॥ श्रीः ॥

शब्दकल्पद्रुमः

चतुर्थो भागः

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३

शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः।

चतुर्थो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००

LIBRARY
UNIVERSITY OF TORONTO

PK
925
D47
1967
V. 4

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४५

THE

CHOWKHAMBA SANSKRIT SERIES

WORK NO. 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPÆDIC DICTIONARY OF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI, THEIR GENDER, VARIOUS MEANINGS AND SYNONYMS, AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS, VEDANTA, NYAYA, OTHER DARSHANAS, PURANETIHAS, MUSIC, ART, ASTRONOMY, TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY

RAJA RADHA KANTA DEVA

PART FOUR

THE

CHOWKHAMBA SANSKRIT SERIES OFFICE

POST BOX 8, VARANASI-1

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi.
Printer : Vidya Vilas Press, Varanasi.
Edition : Third, 1967
Price : 1–5 Vols. Complete Rs. 150–00

© The Chowkhamba Sanskrit Series Office
Oriental and Foreign Book-Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone : 3145

शब्दकल्पद्रुमः

चतुर्थकाण्डम् ।

य, अन्तःस्थयकारः । स च षड्विंशव्यञ्जनवर्णः । अस्योच्चारणस्थानं तालु । (यदुक्तं सिद्धान्तकौमुद्याम् । "इचुयशानां तालु ।" तथा च शिक्षायाम् । १७ ।

"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।")

तस्य स्वरूपं यथा,—

"यकारं शृणु चार्व्वङ्गि ! चतुष्कोणमयं सदा ।
पलालधूमसङ्काशं स्वयं परमकुण्डली ॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं तथा ।
प्रणमामि सदा वर्णं मूर्त्तिमन्मोक्षमव्ययम् ॥"

इति कामधेनुतन्त्रे ५ पटलः ॥

वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,—

"ऊर्द्ध्वाधःक्रमतो रेखा चतुष्कोणमयी शुभा ।
नारायणेशविधयस्तासु तिष्ठन्ति नित्यशः ॥
मात्रा कुण्डलिनी ज्ञेया ध्यानमस्य प्रचक्ष्यते ॥"

तस्य ध्यानं यथा,—

"धूम्रवर्णां महारौद्रीं षड्भुजां रक्तलोचनाम् ।
रक्ताम्बरपरीधानां नानालङ्कारभूषिताम् ॥
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिनीम् ।
एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत् ॥"*॥

तत्प्रणाममन्त्रो यथा,—

"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ।
प्रणमामि सदा वर्णं शक्तिमामोक्षमव्ययम् ॥"

इति वर्णोद्धारतन्त्रम् ॥

अस्य नामानि यथा,—

"यो वायुर्वसुधा वायुर्व्विलतिः पुरुषोत्तमः ।
युगान्तः श्वसनः शीघ्रो धूमार्च्चिः प्राणिसेवकः ॥
शङ्खाभ्रमो जटी लोला वायुवेगी यशस्करी ।
सङ्कर्षणः चपा वालो हृदयं कपिलाप्रभा ॥
आग्नेयो व्यापकस्त्यागी होमो यानं प्रभा सुखम् ।
चण्डः सर्व्वेश्वरी धूमश्वासुण्डा सुसुखेश्वरी ॥
त्वगात्मा मलयो माता हंसिनी भृङ्गिनायकः ।
तेनमः शोषको मीनो घनिष्ठानङ्गवेदिनी ।
मेष्टः सोमः पक्षिनामा पापहा प्राणसंज्ञकः ॥"

इति नानातन्त्रशास्त्रम् ।

(धात्वनुबन्धविशेषः । स तु दिवादिगणद्योतकः । तथा च कविकल्पद्रुमे । "दिवादौ यादादिकः ॥" छन्दःशास्त्रान्तर्गतगणविशेषः । तथा च छन्दोमञ्जर्य्याम् ।

"भादिगुरुः पुनरादिलघुर्यः ॥"

अस्य साङ्केतिकचिह्नं यथा, ।ऽऽ ;

काव्यादौ अस्य प्रथमप्रयोगे लक्ष्मीलाभः फलम् । यथा, वृत्तरत्नाकरटीकायाम् ।

"यो लक्ष्मीं रस्तु दाहं यवनमथ लघौ शः सुखं
मस्तु खेदम् ॥")

यः, पुं, (याति वातीति । या गतौ + डः ।) वायुः । यशः । योगः । यानम् । याता । इति शब्दरत्नावली ॥ सर्व्वनाम । यच्छब्दार्थे इति यावत् । इति विश्वः ॥

यकः, त्रि, यः । ये इति भाषा । यच्छब्दस्य टेरत्वे टेः पूर्व्वं अकागमेन निष्पन्नः ॥ ("अव्ययसर्व्वनाम्नामकच् प्राक् टेः ।" ५ । ३ । ७१ । इति पाणिनिसूत्रम् । यथा, ऋग्वेदे । ८।२१।१८ ।

"चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु ॥")

यकृत्, क्ली, (यण् + "शकेर्ऋतिन् ।" उणा० ४ । ५८ । इत्यत्र "बाहुलकात् यजेः कश्च ।" इत्युज्ज्वलदत्तोक्त्या ऋतिन् जस्य च कः ।) कुक्षेर्द्दक्षिणभागस्थमांसखण्डम् । तत्पर्य्यायः । कालखण्डम् २ । इत्यमरः । २ । ६ । ६६ ॥ कालखञ्जम् ३ कालेयम् ४ कालकम् ५ । इति हेमचन्द्रः ॥ करण्डा ६ महास्नायुः ७ । इति रभसः ॥*॥ (यथा, ऋग्वेदे । १० । १६३ । ३ ।

"यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामि ते ।"

"यक्नः हृदयसमीपे वर्त्तमानः कालमांसविशेषो यकृत् तस्मात् ।" इति तद्भाष्ये सायणः ॥)

अथ शरीरावयवविशेषस्य यकृतः स्वरूपमाह ।

"अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः ।
तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम् ॥"

अथ यकृद्रोगमाह ॥

"प्लीहामयस्य हेत्वादि समस्तं यकृदामये ।
किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः ॥"

अथ यकृद्रोगचिकित्सा ।

"प्लीहोद्दिष्टाः क्रियाः सर्व्वा यकृत्यपि समाचरेत् ।
कार्य्यञ्च दक्षिणे बाहौ तत्र शोणितमोक्षणम् ॥
क्षारञ्च विड्लवणाभ्यां पूतिकस्याम्बु निसृतम् ।
पिबेत् प्रातर्य्यथावह्नि यकृत्शीघ्रप्रशान्तये ॥"

इति भावप्रकाशः ॥

(तथा च ।

"वातेनोदीरितं रक्तं कफेन च घनीकृतम् ।
पित्तेन पाकतां प्राप्तं त्रिदोषसंश्रितं यकृत् ॥
लक्षणं तस्य वक्ष्यामि तेन तत्रापि कथयेत् ।
क्षीयते तेन मनुजो ज्वरश्चास्य प्रवर्त्तते ॥
वमिर्क्लमस्तथोद्गारो ह्युल्लासः श्वसनं श्रमः ।
दाहोऽरुचिस्तृषामूर्च्छा कण्ठे दाहः शिरोव्यथा ॥
हृच्छूलञ्च प्रतिश्यायः ष्ठीवनं कटुकास्यता ।
वमत्यं हृदि शूलञ्च निद्रानाशः प्रलापतः ॥
हृदये मथ्यते नाभ्यं उदरं गच्छते भ्रमम् ।
एतैर्लिङ्गैर्विजानीयात् यकृत् कोष्ठे च वक्षसि ॥"

अथास्य चिकित्सा ।

"निम्बनीपधवचितसं निशा
काश्मरी च तुलसी च किंशुका ।
क्वाथ एव हृदयामयापह
आशु शूलयकृतश्च नाशकृत् ॥
सौराष्ट्रीकासीसमतौषधानि
दुरालभाजातिप्रवालकञ्च ।
दार्व्वी यमानी ककुभः समङ्गा
क्वाथः सपिप्पल्यकृदाशु हन्ति ॥"

इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये ।

"शोणितवद्दक्षिणात् पार्श्वात् कुर्य्याद्यकृदपि च्युतम् ॥"

इति वाभटे निदानस्थाने द्वादशेऽध्याये ॥)

यकृदात्मिका, स्त्री, (यकृत इवात्मा स्वरूपं यस्याः । बहुव्रीहौ कः । टापि अत इत्वम् ।) तैलपायिका । इति शब्दचन्द्रिका ॥

यक्षद्वेरी, [न्] पुं, (यक्षतो वैरी नाशकः ।) रोहितकवृक्षः । यथा,—
"प्लीहघ्नो मांसदलनो यक्षद्वेरी चलच्छदः ॥"
इति शब्दचन्द्रिका ॥

यक्ष, क ङ महि । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, यक्षयते । महि पूजायाम् । इति दुर्गादासः ॥

यक्षः, पुं, (यक्ष्यते पूज्यत इति । यक्ष+घञ् । यद्वा, ईं लक्ष्मीमक्ष्णोतीति । अक्ष+अण् ।) गुह्यकमात्रम् । गुह्यकेश्वरः । इति मेदिनी । षे, २२ ॥ इन्द्रगृहम् । धनरक्षकः । इति सारस्वतः ॥ यक्षस्वरूपं यथा,—
"आजग्मुर्यक्षनिकराः कुबेरवरकिङ्कराः ।
शैलप्रस्तरकरा अञ्जनाकारमूर्त्तयः ॥
विकृताकारवदनाः पिङ्गलाक्षा महोदराः ।
स्फाटिका रक्तकेशाश्च दीर्घस्कन्धाश्च केचन ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥
यक्षगणो यथा,—
"प्रचेतसः सुता यक्षास्तेषां नामानि मे शृणु ।
केवलो हरिकेशश्च कपिलः काञ्चनस्तथा ।
मेघमाली च यक्षाणां गण एष उदाहृतः ॥"
तस्य व्युत्पत्तिर्यथा,—
"धातुर्यक्षत्यथोक्तस्त्वदने चपये च सः ।
यद्‌यक्षत्युक्तवानेष तस्माद्‌यक्षो भवत्ययम् ॥"
इति वह्निपुराणे काश्यपीयवंशः ॥
(अपरा निरुक्तिर्यथा, विष्णुपुराणे ।१।५।४१।
"मैवं भो रक्ष्यतामेष यैरुक्तं राक्षसास्तु ते ।
ऊचुः खादाम इत्यन्ये ये ते यक्षास्तु जक्षणात् ॥"
पुं, क्ली, पूजा । यथा, ऋग्वेदे । ७ । ६१ । ५ ।
"अमूरा विश्वा वृषणा विमा वां
न यासु चित्रं ददृशे न यक्षम् ॥"
"न यक्षं न पूजा दृश्यते ।" इति तद्भाष्ये सायणः । तथाच अथर्ववेदे । ११ । २ । २४ ।
"तव यक्षं पशुपते अप्स्वन्तः ॥")

यक्षकर्द्दमः, पुं, (यक्षप्रियः कर्द्दमः ।) कर्पूरागुरुकस्तूरीकक्कोलानां मिश्रितसमभागः । इत्यमरः । २ । ६ । १३३ ॥ "कर्पूरादिभिर्गन्धद्रव्यैः समभागैः साधितोऽनुलेपनभेदो यक्षकर्द्दम उच्यते । यक्षप्रियः कर्द्दमो यक्षकर्द्दमः ।
'कुङ्कुमागुरुकस्तूरीकर्पूरं चन्दनन्तथा ।
महासुगन्धमित्युक्तं नामतो यक्षकर्द्दमः ॥'
इति धन्वन्तरिः ॥
अन्यत्रापि ।
कर्पूरागुरुकस्तूरीकक्कोलघर्षणादि च ।
एकीकृतमिदं सर्व्वं यक्षकर्द्दम इष्यते ॥"
इति तट्टीकायां भरतः ॥

यक्षतरुः, पुं, (यक्षप्रियो यक्षाश्रितो वा तरुः । शाकपार्थिवादिवत् समासः ।) वटवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य वटशब्दे ज्ञातव्यम् ॥)

यक्षधूपः, पुं, (यक्षप्रियो धूपः ।) धूपसामान्यम् । धूनकधूपः । इति केचित् । धुना इति ख्यात इति केचित् । इति भरतः ॥ तत्पर्य्यायः । सर्ज्जरसः २ अरालः ३ सर्व्वरसः ४ बहुरूपः ५ । इत्यमरः । २ । ६ । १२७ ॥ रालः ६ धूनकः ७ वह्निवल्लभः ८ । इति रभसः ॥ सालसारः ९ सालजः १० सालनिर्यासः ११ सर्ज्जः १२ । इति रत्नमाला ॥ (अस्य पर्य्यायान्तरं यथा,—
"रालस्तु शालनिर्यासस्तथा सर्ज्जरसः स्मृतः ।
देवधूपो यक्षधूपस्तथा सर्व्वरसश्च सः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
एतेन माधवपूजननिषेधो देवीपूजा चोक्ता यथा कालिकापुराणे ६८ अध्याये ।
"न यक्षधूपं वितरेत् माधवाय कदाचन ।"
"यक्षधूपेन वा देवीं महामायां प्रपूजयेत् ॥")
सरलद्रवरसः । टारपिन तैल इति भाषा । तत्पर्य्यायः । पायसः २ श्रीवासः ३ सरलद्रवः ४ । इति हेमचन्द्रः । ३ । ३११ ॥

यक्षरसः, पुं, (यक्षप्रियो रसः । शाकपार्थिववत् समासः ।) पुष्पमद्यम् । तत्पर्य्यायः । मध्वासवः २ । इति त्रिकाण्डशेषः ॥

यक्षराजः, पुं, (यक्षाणां राजा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति समासान्तष्टच् ।) कुबेरः । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । १९४ । ४९ ।
"इत्युक्त्वा भगवान्देवो यक्षराजः सुपूजितः ।
प्रययौ सहितैः सर्व्वैर्निमेषान्तरचारिभिः ॥")

यक्षराट्, [ज्] पुं, (यक्षेषु राजते इति । राज्+"सत्सूद्विषद्रुहेति ।" ३।२।६१ । इति क्विप् ।) कुबेरः । (यथा, भागवते । ८ । १८ । १७ ।
"तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात् ॥"
यक्षराजमात्रम् । मणिभद्रः । यथा, महाभारते । ३ । ६४ । १२७ ।
"तथा नो यक्षराडद्य मणिभद्रः प्रसीदतु ॥")
यक्षा इव मल्ला राजन्तेऽत्र । राज्+क्विप् ।) रङ्गमण्डपः । इति मेदिनी । जे, २५ ॥

यक्षराट्पुरी, स्त्री, (यक्षराजः पुरी ।) अलका । सा च कैलासपर्व्वतस्थितकुबेरपुरी । इति जटाधरः ॥

यक्षरात्रिः, स्त्री, (यक्षप्रिया यक्षाणां वा रात्रिः ।) कार्त्तिकी पूर्णिमा । तत्पर्य्यायः । दीपाली २ । इति त्रिकाण्डशेषः ॥

यक्षसाधनं, क्ली, (यक्षाणां साधनम् ।) यक्षोपासना । यथा, वाराहीतन्त्रे ।
"यक्षाणां यक्षिणीनाञ्च पैशाचीनाञ्च साधनम् ।
भूतवेतालगान्धर्व्वं मारणोच्चाटनानि च ।
अधोगमनमेतेषां साधने ऐहिकं हितम् ॥"

यक्षामलकं, क्ली, (यक्षाणामामलकम् ।) पिण्डखर्ज्जूरफलम् । इति शब्दमाला ॥

यक्षावासः, पुं, (यक्षाणामावासो वासस्थानम् ।) वटवृक्षः । इति राजनिर्घण्टः ॥

यक्षिणी, स्त्री, (यक्षः पूजा अस्त्यस्याः । यक्ष+इनिः । ङीप् ।) कुबेरपत्नी । इति शब्दरत्नावली ॥ यक्षभार्य्या च ॥ (यथा, कथासरित्सागरे । १० । १७८ ।
"सोऽपि शुक्लाशु विजने भ्रातुः पुत्त्रं तमभ्यधात् ।
अधृतिं मा कृथाः पुत्त्र ! मम सिद्धा हि यक्षिणी ॥")

यक्षी, स्त्री, (यक्षस्य भार्य्या । यक्ष+पुंयोगादिति ङीष् ।) कुबेरपत्नी । इति शब्दरत्नावली ॥ (यक्षभार्य्या । यथा, महाभारते ।३। ६४ । ११७ ।
"यक्षी वा राक्षसी वापि उताहोस्वित् सुराङ्गना ।
सर्व्वथा कुरु नः स्वस्ति रक्षस्वास्माननिन्दिते ! ॥")

यक्षोडुम्बरकं, क्ली, (यक्षप्रियमुडुम्बरम् । ततः स्वार्थे कन् ।) अश्वत्थफलम् । इति त्रिकाण्डशेषः ॥

यक्ष्मघ्नी, स्त्री, (यक्ष्माणं हन्ति । हन्+"अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् । ततो ङीप् ।) द्राक्षा । इति शब्दमाला ॥

यक्ष्मा, [न्] पुं, (यक्ष+"बाहुलकात् यक्षयतेरपि ।" उणा० ४।१५० । इत्यत्र उज्ज्वलदत्तोक्त्या मनिन्प्रत्ययेन साधुः ।) रोगविशेषः । तत्पर्य्यायः । क्षयः २ शोषः ३ । इत्यमरः । २ । ६ । ५१ ॥ राजयक्ष्मा ४ रोगराट् ५ ॥ अथ राजयक्ष्माधिकारः । "तत्र राजयक्ष्मणो विप्रकृष्टं सन्निकृष्टञ्च निदानमाह ।
'वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात् ।
त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥'
वेगोऽत्र वातमूत्रपुरीषाणाम् ।
'वातमूत्रपुरीषाणि निगृह्णाति यदा नरः ॥'
इति चरकवचनात् ॥
क्षयात् क्षीयतेऽनेनेति क्षयः तेनातिव्यवायानशनेर्ष्यादयो धातुक्षयहेतवः क्षयशब्देनोच्यन्ते । साहसात् बलवता समं मल्लयुद्धादितः । विषमाशनात् बहु स्तोकमकाले वा भुक्तं तत् विषमाशनम् । तस्मात् । त्रिदोषः सान्निपातिकः । हेतुचतुष्टयात् अन्येऽपि हेतवः हेतुचतुष्टय एवान्तर्भवन्ति । यक्ष्मणः पर्य्यायाः राजयक्ष्मक्षयशोषाः ॥*॥ यक्ष्मादीनां शब्दानां निरुक्तिमाह ।
'वैद्यो व्याधिमतां यस्मात् व्याधिर्यत्नेन यक्ष्यते ।
स यक्ष्मा प्रोच्यते लोके शब्दशास्त्रविशारदैः ॥'
यक्ष्यते पूज्यते ।
'राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः ।
तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः ॥
क्रियाक्षयकरत्वात्तु क्षय इत्युच्यते बुधैः ।
संशोषणाद्रसादीनां शोष इत्यभिधीयते ॥'*॥
संप्राप्तिमाह ।
'कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु ।
अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तरा ।
क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानवः ॥'
कफप्रधानैर्दोषैः रसवर्त्मसु रुद्धेषु अनन्तरा सर्व्वे धातवः क्षीयन्ते ततो मानवः शुष्यति ।

कारणभूतस्य रसस्य क्षये कार्य्याणां रक्तादीनामनुक्रमेण क्षीयमाणत्वात् ॥ * ॥ मार्गावरोधे रसक्षयहेतुमाह चरकः ।

'रसस्रोतःसु रुद्धेषु स्वस्थानस्थो विदह्यते ।
स ऊर्द्धं कासवेगेन बहुरूपः प्रवर्त्तते ॥'

स्वस्थानस्थः हृदयस्थः । कासं विनापि रसक्षयो भवति मार्गावरोधकुपितवातेन रसस्य शोषणात् । उक्तञ्च ।

'वायोर्द्धातुक्षयात् कोपो मार्गस्यावरणेन च ।
अनुलोमक्षयं दृष्ट्वा प्रतिलोमक्षयावहः ॥'

अनुलोमक्षयं दर्शयित्वा प्रतिलोमक्षयमप्याह । अतिव्यवायिनो वा रेतसि क्षीणे प्रतिलोमक्रमेणानन्तरा सर्व्वे धातवो रसपर्य्यन्ताः क्षीयन्ते । तद्यथा । शुक्रे क्षीणे मज्जा क्षीयते मज्जनि क्षीणेऽस्थि क्षीयते । एवं पूर्व्वं पूर्व्वं क्षीयते । ननु कार्य्यस्य शुक्रस्य क्षये कथं कारणभूतानां मज्जादीनां क्षयः । उच्यते । शुक्रक्षयाद्वायुः कुप्यति । यदुक्तम् ।

'वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति ।'

स वायुः सान्निध्यक्रमेण मज्जादीन् सर्व्वान् धातून् संशोषयति । ततस्तदनन्तरं मानवः शुष्यति ॥ * ॥ पूर्व्वरूपमाह ।

'श्वासाङ्गसादकफसंस्रवतालुशोष-
वम्यग्निसादमदपीनसकासनिद्राः ।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥
स्वप्नेषु काकशुकशल्लकिनीलकण्ठ-
गृध्रास्तथैव कपयः कृकलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्येत्
शुष्कांस्तरून् पवनधूमदवार्द्दितांश्च ॥'*॥

यक्ष्मणो लक्षणमाह ।

'अंसपार्श्वाभितापश्च सन्तापः करपादयोः ।
ज्वरः सर्व्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ॥'

अंसयोः पार्श्वयोः अभितापः पीड़ा अत्र सकलधातुक्षयपूर्व्वकः सकलशरीरशोषोऽपि बोद्धव्यः । क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानव इति संप्राप्तेः । एवं षड्रूपे एकादशरूपे च बोद्धव्यम् । एतानि त्रीणि लक्षणानि प्रायोभावित्वेन चरकेणोक्तानि । सुश्रुतेन यक्ष्मणि षट्लक्षणान्युक्तानि ।

'भक्तद्वेषो ज्वरः कासः श्वासः शोणितदर्शनम् ।
स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि ॥'*॥

उल्वणतया दोषाणां भेदादेकादश लक्षणान्याह ।

'स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः ।
ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ।
कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः ॥'

अनिलादुल्वणात् एवं पित्तात् कफाच्च । यत आह सुश्रुतः ।

'एक एवमतः शोषः सन्निपातात्मको गदः ।
उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति च ॥'

असाध्ययक्ष्मिणमाह ।

'एकादशभिरेभिर्व्वा षड्भिर्वापि समन्वितम् ।
त्रिभिर्व्वा पीड़ितं लिङ्गैर्ज्वरकासासृगामयैः ।
जह्याच्छोषार्द्दितं जन्तुमिच्छन् सुविपुलं यशः ॥'

तत्र विशेषमाह ।

'सर्व्वैरर्द्धैस्त्रिभिर्व्वापि लिङ्गैर्मांसबलक्षये ।
युक्तो वर्ज्यश्चिकित्स्यस्तु सर्व्वरूपोऽप्यतोऽन्यथा ॥'

सर्व्वैर्लिङ्गैरेकादशभिः । अर्द्धैः षड्भिः त्रिभिर्ज्वरकासरुधिरवमनैः । अतोऽन्यथा मांसे बले सति सर्व्वरूपोऽपि प्रत्याख्याय चिकित्स्यः ।

'महाशनं क्षीयमाणमतीसारनिपीड़ितम् ।
शूनमुष्कोदरञ्चैव यक्ष्मिणं परिवर्जयेत् ॥'

महाशनं क्षीयमाणमित्येकमसाध्यलक्षणम् । अतीसारनिपीड़ितमिति द्वितीयम् । यत उक्तम् ।

'मलायत्तं बलं पुंसां शुक्रायत्तन्तु जीवनम् ।
तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी ॥'

शूनमुष्कोदरमिति तृतीयम् ॥ * ॥ अरिष्टमाह ।

'शुक्लाक्षमन्नद्वेष्टारमूर्द्ध्वश्वासनिपीड़ितम् ।
कृच्छ्रेण बहु मेहन्तं यक्ष्मा हन्तीह मानवम् ॥'

मेहन्तं मुञ्चन्तं शुक्रं क्षरन्तम् । शुक्लाक्षत्वादीनि एकैकशोऽरिष्टलक्षणानि ॥ * ॥ अवधिमाह ।

'परं दिनसहस्रन्तु यदि जीवति मानवः ।
सुभिषग्भिरुपक्रान्तस्तरुणः शोषपीड़ितः ॥'

शोषपीड़ितो मानवश्चेत्तरुणो भवति । सुभिषग्भिरुपक्रान्तो भवति । तदा परं दिनसहस्रम् । द्वितीयदिनसहस्रं यदि जीवति तत्र जीवनविकल्प इत्यर्थः । एतेन शोषपीड़ितो मानवश्चेत्तरुणो भवति । सद्वैद्यचिकित्स्यो भवति । तदा प्रथमदिनसहस्रं जीवेदेव इत्युक्ता चिकित्स्यामाह ।

'ज्वरानुबन्धरहितं बलवन्तं क्रियासहम् ।
उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरम् ॥'

आत्मवन्तं यत्नवन्तं धृतिमन्तं वा ॥ * ॥ अथ निदानविशेषैः शोषविशेषानाह ।

'व्यवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान् ।
व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु ॥'

व्रणोरःक्षतसंज्ञौ शोषिणौ । व्रणशोषी उरःक्षतशोषी च ॥ * ॥ तत्र व्यवायशोषिणो लक्षणमाह ।

'व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः ।
पाण्डुदेहो यथापूर्व्वं क्षीयन्ते चास्य धातवः ॥'

शुक्रस्य क्षयलिङ्गैः सुश्रुतोक्तैः । तानि यथा, शुक्रक्षये मेढ्रवृषणयोर्वेदना अशक्तिर्मैथुने चिराद्वा प्रसेकः प्रसेके चाल्पशुक्रदर्शनमिति । यथापूर्व्वं क्षीयन्ते चास्य धातवः प्रथमं शुक्रं क्षीयते पश्चात् शुक्रक्षयजनितवायुना मज्जादयोऽपि धातवो यथापूर्व्वं क्षीयन्ते ॥ * ॥ शोकशोषिणो लक्षणमाह ।

'प्रध्यानशील: स्रस्ताङ्गः शोकशोष्यपि तादृशः ।
विना शुक्रक्षयकृतैर्विकारैरुपलक्षितः ॥'

प्रध्यानशीलः यस्याभावेन शोको जनितस्तद्ध्यानपरः । स्रस्ताङ्गः शिथिलाङ्गः । तादृशः व्यवायशोषिसदृशः । तेन शुक्रादिसर्व्वधातुक्षययुक्तो भवति । परं शुक्रक्षयकृतैर्विकारैर्मेढ्रवृषणवेदनादिभिर्वर्जितो भवति । व्याधिस्वभावात् ॥ * ॥ जराशोषिणो लक्षणमाह ।

'जराशोषी कृशो मन्दवीर्य्यबुद्धिबलेन्द्रियः ।
कम्पनोऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः ॥
ष्ठीवति श्लेष्मणा हीनं गौरवारुचिपीड़ितः ।
संप्रस्रुतास्यनासाक्षः शुष्करूक्षमलच्छविः ॥'

मन्दशब्दः स्वल्पार्थः । शुष्करूक्षमलच्छविः शुष्करूक्षे मलच्छवी यस्य सः ॥ * ॥ अध्वशोषिणो लक्षणमाह ।

'अध्वप्रशोषी स्रस्ताङ्गः संभृष्टपरुषच्छविः ।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥'

संभृष्टस्येव परुषा छविर्यस्य सः । प्रसुप्तगात्रावयवः प्रसुप्तः स्पर्शाज्ञः । क्लोमं तिलकं पिपासास्थानम् ॥ * ॥ व्यायामशोषिणो लक्षणमाह ।

'व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः ।
लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना ॥'

एभिरेव स्रस्ताङ्गत्वादिभिरध्वशोषिणो लक्षणैरेव । भूयिष्ठं अत्यर्थम् ॥*॥ सनिदानं व्रणशोषमाह ।

'रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।
व्रणितस्य भवेच्छोषो याप्योऽसाध्यश्च स स्मृतः ॥'

उरःक्षतस्य निदानमाह .

'धनुषायस्यतोऽत्यर्थं भारमुद्वहतो गुरुम् ।
युध्यमानस्य बलिभिः पततो विषमोच्चतः ॥
वृषं हयं वा धावन्तं दम्यं चान्यं निगृह्णतः ।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः

परान् ॥

अधीयानस्य चात्युच्चैर्दूरं वा व्रजतो द्रुतम् ।
महानदीं वा तरतो हयैर्व्वा सह धावतः ॥
सहसोत्पततो दूरं तूर्णञ्चातिप्रनृत्यतः ।
तथान्यैः कर्म्मभिः क्रूरैर्भृशमभ्याहतस्य वा ॥
स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः ।
विक्षते वक्षसि व्याधिर्ब्बलवान् समुदीर्य्यते ॥'

आयास्यतः आयासं कुर्व्वतः । दम्यं वृषादिकम् । अन्यञ्च गजोष्ट्रादिकम् । शिला दीर्घपाषाणः । अश्म प्रस्तरखण्डः । निर्घातोऽस्त्रविशेषः । व्याधिः उरःक्षताख्यः ॥*॥ उरःक्षतस्य लक्षणमाह ।

'उरो विरुज्यतेऽत्यर्थं भिद्यते च विभज्यते ।
शूलं भवति तत्पार्श्वं शुष्यत्यङ्गं प्रवेपते ॥
प्रपीड्यते ततः पार्श्वं शुष्यत्यङ्गं प्रकम्पते ।
क्रमाद्वीर्य्यं बलं वर्णो रुचिरग्निश्च हीयते ॥
ज्वरो व्यथा मनोदैन्यं विड्भेदोऽग्निवधस्तथा ॥
दुष्टः श्यावः सुदुर्गन्धः पीतो विग्रथितो बहु ।
कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्त्तते ॥
स क्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात् ।
अव्यक्तं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम् ॥'

विरुज्यते पीड्यते । भिद्यते विदार्य्यत इव ।

विभज्यते द्विधा क्रियत इव। स पुरुषः। क्षतः उरःक्षतवान्। अत्यर्थं क्षीयते क्षीणो भवति। न केवलं मांसकफक्षयादेव क्षीणो भवति। तथा शुक्रौजसोः क्षयात्। स्त्रीप्रतिसेवनादिना शुक्रौजसोः क्षयादपि क्षीणो भवति ॥*॥ उरःक्षतस्य विशिष्टं लक्षणमाह।

'उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः क्षते।
क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहः॥'

क्षते उरःक्षतवति। उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः विशेषतो भवत्येव। तस्मिन्नेवोरःक्षतवति मांसकफशुक्रौजसां क्षयात् क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहश्च भवति ॥*॥ निदानविशेषेणोरःक्षतस्य लक्षणविशेषमाह।

'व्यवायशोषात् क्षयाच्चैव कोष्ठात् प्रतिमलात्तथा।
क्षतोरस्कस्यान्नपाके निःश्वासो वाति पूतिकः॥'

क्षयात् धातुक्षयहेतोरतिव्यवायादितः कोष्ठात् प्रतिमलात् कोष्ठात् प्रतिमलवातेन प्रतिलोममलात् पूतिकः पूतिगन्धः॥ * ॥ उरःक्षतस्य साध्ययाप्यासाध्यलक्षणमाह।

'अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः।
परिसंवत्सरो याप्यः सर्व्वलिङ्गन्तु वर्जयेत्॥'*॥

अथ राजयक्ष्मचिकित्सा।

'बलिनो बहुदोषस्य पञ्च कर्म्माणि कारयेत्।
यक्ष्मिणः क्षीणदेहस्य तत्क्षतं स्याद्विषोपमम्॥
मलायत्तं बलं पुंसां शुक्रायत्तन्तु जीवनम्।
तस्माद्यत्नेन संरक्षेत् यक्ष्मिणो मलरेतसी॥
शालिषष्टिकगोधूमयवमुद्गादयो हिताः।
मद्यानि जाङ्गलाः पक्षिमृगाः शस्ता विशोषिणः॥
सपिप्पलीकं सयवं सकुलत्थं सनागरम्।
दाडिमामलकोपेतं स्निग्धमाजं रसं पिबेत्॥
तेन षड्विनिवर्त्तन्ते विकाराः पीनसादयः॥
द्रव्यतो द्विगुणं मांसं सर्व्वतोऽष्टगुणं जलम्।
पादस्थं संस्कृतञ्चाज्ये षडङ्गो यूष उच्यते॥'

तद्यथा। यवपल १ कुलत्थपल १ छागमांसपल ४ जलपल ४८ शेषपल १२ ततः पलमिते घृते संस्करणीयम्। तत्र कर्षमितं सैन्धवं देयं सौरभार्थं हिङ्गु च देयम्। पिप्पली नागरञ्च पृथक् माषमितं कल्कीकृत्य देयम्। दाडिमामलकाभ्यामम्लत्वं साध्यम्। षडङ्गयूषः॥*॥

'ककुभत्वक् नागबला वानरीबीजं विचूर्णितं पयसा।
पक्वं मधुघृतयुक्तं ससितं यक्ष्मादिकासहरम्॥
छागमांसं पयश्छागं छागं सर्पिश्च नागरम्।
छागोपसेवा शयनं छागमध्ये तु यक्ष्मनुत्॥
मधुताप्यविडङ्गाश्मजतुलोहघृताभयाः।
घ्नन्ति यक्ष्माणमत्युग्रं सेव्यमाना हिताशिनः॥'

ताप्यं सुवर्णमाक्षीकम्।

'शर्करामधुसंयुक्तं नवनीतं लिहन् क्षयी।
क्षीराशी लभते पुष्टिमतुल्ये चाज्यमाक्षिके॥
सितोपलातुगाक्षीरीपिप्पलीबहुलात्वचः।
अन्त्यादूर्द्ध्वं द्विगुणिताश्चूर्णिता मधुसर्पिषा॥
लेहयेद्राजरोगार्त्तं कासश्वासक्षयातुरम्।
पार्श्वशूलिनमल्पाग्निं सुप्तजिह्वं रुचिच्युतम्।
हस्तपादाङ्गदाहे च ज्वरे रक्ते तथोर्द्धगे॥'

सितोपला मिश्री। बहुला सूक्ष्मैला। इति सितोपलादिरवलेहः॥*॥

'जातीफलं विडङ्गानि चित्रकं तगरं तिला।
तालीशं चन्दनं शुण्ठी लवङ्गमुपकुञ्चिका॥
कर्पूरञ्चाभया धात्री मरीचं पिप्पली तुगा।
एषामक्षसमा भागाश्चातुर्जातकसंयुताः।
पलानि सप्त भङ्गायाः सिता सर्व्वसमा मता॥
चूर्णमेतत् क्षयं कासं श्वासञ्च ग्रहणीगदम्।
अरोचकं प्रतिश्यायं तथा चानलमन्दताम्।
एतान् रोगान् निहन्त्येव वृक्षमिन्द्राशनिर्यथा॥
बालरोगाधिकारोक्तं तैलं लाक्षादि योजयेत्।
अभ्यङ्गे यक्ष्मिणो नित्यं वृद्धवैद्योपदेशतः॥'

इति जातीफलाद्यचूर्णम्॥ * ॥

'वासकस्य रसप्रस्थं माणिकासितशर्करा।
पिप्पली द्विपलं तावत् सर्पिषश्च शनैः पचेत्॥
तस्मिन् लेहत्वमायाते शीते क्षौद्रपलाष्टकम्।
दत्त्वावतारयेद्वैद्यो लीढ़ो लेहोऽयमुत्तमः॥
निहन्ति राजयक्ष्माणं कासं श्वासञ्च दारुणम्।
पार्श्वशूलञ्च हृच्छूलं रक्तपित्तं ज्वरन्तथा॥'

इति वासावलेहः॥ * ॥

अथ व्यवायादिहेतुकशोषचिकित्सा। तत्र व्यवायशोषचिकित्सा।

'व्यवायशोषिणं क्षीररसमांसाज्यभोजनैः।
सुकूलैर्मधुरैर्हृद्यैर्जीवनीयैरुपाचरेत्॥'

रसो मांसरसः सुकूलैर्हितैः॥ * ॥ शोकशोषचिकित्सा।

'हर्षैराश्वासनैः क्षीरैः स्निग्धैर्मधुरशीतलैः।
दीपनैर्लघुभिश्चान्नैः शोकशोषमुपाचरेत्॥'*॥

व्यायामशोषचिकित्सा।

'व्यायामशोषिणं स्निग्धैः क्षतक्षयहितैर्हिमैः।
उपाचरेज्जीवनीयैर्विधिना श्लैष्मिकेण तु॥'*॥

अध्वशोषचिकित्सा।

'आस्यासुखैर्दिवास्वप्नैः शीतैर्मधुरबृंहणैः।
अन्नमांसरसाहारैरध्वशोषमुपाचरेत्॥'*॥

व्रणशोषचिकित्सा।

'व्रणशोषं जयेत् स्निग्धैर्दीपनैः स्वादुशीतलैः।
ईषदम्लैरनम्लैर्वा यूषमांसरसादिभिः॥'*॥

अथोरःक्षतचिकित्सा।

'बलाश्वगन्धा श्रीपर्णी बहुपुत्री पुनर्नवा।
पयसा नित्यमभ्यस्ताः शमयन्ति क्षतक्षयम्॥'

श्रीपर्णी गम्भारी। बहुपुत्री शतावरी। इति बलादिचूर्णम्॥*॥

'एला पत्रत्वचो द्राक्षा पिप्पल्यर्द्धपलं पृथक्।
सितामधुकखर्ज्जूरमृद्वीकाश्च पलोन्मिताः॥
संचूर्ण्य मधुना युक्ता वटिका संप्रकल्पयेत्।
अक्षमात्रा ततश्चैव भक्षयेच्च दिने दिने॥
क्षतक्षयं ज्वरं कासं श्वासं हिक्कां वमिं भ्रमम्।
मूर्च्छां मदं तृषां शोषं पार्श्वशूलमरोचकम्॥
प्लीहानमामवातञ्च रक्तपित्तं स्वरक्षयम्।
एलादिगुटिका हन्ति वृष्या सन्तर्पणी परा॥
द्राक्षायाः प्रस्थमेकन्तु मधूकस्य पलाष्टकम्।
पचेत्तोयाढके शुद्धे पादशेषेण तेन तु॥
पलिके मधुकद्राक्षे पिष्टे कृष्णापलद्वयम्।
प्रदाय सर्पिषः प्रस्थं पचेत् क्षीरे चतुर्गुणे॥
सिद्धे शीते पलान्यष्टौ शर्करायाः प्रदापयेत्।
एतद्द्राक्षाघृतं सिद्धं क्षतक्षीणे सुखावहम्॥
वातपित्तज्वरश्वासविस्फोटकहलीमकान्।
प्रदरं रक्तपित्तञ्च हन्यान्मांसबलप्रदम्॥'

इति द्राक्षादिघृतम्॥*॥

'क्षीरे धात्रीविदारीक्षुवरीणाञ्च तथा रसे।
पचेत् समे घृतप्रस्थं मधुरैः कर्षसम्मितैः॥
द्राक्षाद्विचन्दनोशीरशर्करोत्पलपद्मकैः।
मधूककुसुमानन्ताकाश्मरीवृषसंज्ञकैः॥
प्रस्थार्द्धं मधुनः शीते शर्करार्द्धतुलान्तथा।
पलार्द्धकांश्च संचूर्ण्य त्वगेलापत्रकेशरान्॥
विनीय तत्र संलिह्यान्मात्रां नित्यं सुयन्त्रितः।
अमृतप्राशमित्येतदश्विभ्यां परिकीर्त्तितम्॥
क्षीरमांसाशिनां हन्ति रक्तपित्तक्षतक्षयम्।
तृष्णारुचिश्वासकासच्छर्द्दिमूर्च्छाप्रमर्दनम्।
मूत्रकृच्छ्रज्वरघ्नञ्च बल्यं स्त्रीरतिवर्द्धनम्॥'

इति अमृतप्राशावलेहः॥*॥

'यद्यच्च तर्पणं शीतमविदाहि हितं लघु।
अन्नपानं निषेव्यन्तत् क्षतक्षीणैः सुखार्थिभिः॥
शोकं स्त्रियः क्रोधमसूयताञ्च
त्यजेदुदारान् विषयान् भजेच्च।
तथा द्विजातींस्त्रिदशान् गुरूंश्च
वाचश्च पुण्याः शृणुयाद्द्विजेभ्यः॥'*॥

अथ राजयक्ष्मणि रसाः। अमृतेश्वरो रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ।

'रसभस्मामृतासत्त्वं लौहं मधुघृतान्वितम्।
अमृतेश्वरनामायं षड्भुजो राजयक्ष्मजित्॥'

इति अमृतेश्वरो रसः॥

रसभस्म मारितो रसः। अमृतासत्त्वं गुडूचीसत्त्वम्। लौहं मारितम्॥ * ॥

'त्रयोंऽशा मारितात् सूतादेकोंऽशो हेमभस्मतः।
एकोंऽशो मृततास्रस्य शिला गन्धश्च तालकम्।
प्रत्येकं भागयुग्मं स्यादेतत् सर्व्वं विचूर्णयेत्॥
वराटीः पूरयेत्तेन छागीक्षीरेण टङ्कणम्।
पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तांश्च पूरयेत्॥
ततो गजपुटे पक्त्वा चूर्णयेत् स्वाङ्गशीतलम्।
रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः॥
मरिचैरूनविंशत्या कणाभिर्दशभिस्तथा।
मधुना सर्पिषा चापि दद्यादेतं रसं भिषक्॥
अनेन नश्यति क्षिप्रं वातश्लेष्मभवक्षयः॥'

इति राजमृगाङ्को रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ॥*॥

'शुद्धसूतं द्विधा गन्धं कुर्य्यात् खल्वेन कज्जलीम्।
तयोः समं तीक्ष्णचूर्णं मर्द्दयेत् कन्यकाद्रवैः॥
त्रियाममातपे गोलं ताम्रपात्रे विधारयेत्।

आच्छाद्यैरण्डपत्रेण स्यादुष्णं यामयुग्मतः ।
धान्यराशौ न्यसेत् पश्चादहोरात्रात्तदुद्धरेत् ।
संचूर्ण्य गालयेद्वस्त्रे सत्यं वारितरं भवेत् ॥
त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः ।
नवभागोन्मितैरेतैः सम एष रसो भवेत् ॥
निष्कद्वयमितं नित्यं मधुना सह लेहयेत् ।
अयमग्निरसो नाम्ना कासक्षयहरः परः ॥'
इति अग्निरसः शार्ङ्गधरे ॥"
इति भावप्रकाशस्य मध्यखण्डे द्वितीयभागे राजयक्ष्माधिकारः ॥ * ॥ (अथास्य पौराणिकं विवरणं यथा,—
"दिवौकसां कथयतामृषिभिर्वै श्रुता कथा ।
कामव्यसनसंयुक्ता पौराणी शशिनं प्रति ॥
रोहिण्यामतिसक्तस्य शरीरं नानुरक्षतः ।
आजगामाल्पतामिन्दोर्देहः स्नेहपरिक्षयात् ॥
दुहितॄणामसम्भोगाच्छेषाणाञ्च प्रजापतेः ।
क्रोधो निश्वासरूपेण मूर्त्तिमान्निःसृतो मुखात् ॥
प्रजापतेर्हि दुहितॄरष्टाविंशतिमंशुमान् ।
भार्य्यार्थं प्रतिजग्राह न च सर्व्वास्ववर्त्तत ॥
गुरुणा तमवध्यातं भार्य्यास्वसमवर्त्तिनम् ।
रजोऽन्धमबलं दीनं यक्ष्मा शशिनमाविशत् ॥
सोऽभिभूतोऽतिगुरुणा गुरुक्रोधेन निष्प्रभः ।
देवदेवर्षिसहितो जगाम शरणं गुरुम् ॥
अथ चन्द्रमसः शुद्धां मतिं बुद्ध्वा प्रजापतिः ।
प्रसादं कृतवान् सोमस्ततोऽश्विभ्यां चिकित्सितः ॥
स विमुक्तग्रहश्चन्द्रो विरराज विशेषतः ।
तेजसा वर्द्धितोऽश्विभ्यां शुद्धं सत्त्वमवाप च ॥
क्रोधो यक्ष्मा ज्वरो रोग एकोऽर्थो दुःखसंज्ञितः ।
यस्मात् स राज्ञः प्रागासीद्राजयक्ष्मा ततो मतः ॥
स यक्ष्मा हुङ्कृतोऽश्विभ्यां मानुषं लोकमागतः ।
लब्ध्वा चतुर्व्विधं हेतुं समाविशति मानवान् ॥
अयथावलमारम्भं वेगसन्धारणं क्षयम् ।
यक्ष्मणः कारणं विद्यात् चतुर्थं विषमाशनम् ॥"
अस्य विशेषहेतुर्यथा,—
"शुक्राध्ययनभाराध्वलङ्घनप्लवनादिभिः ।
पतनैरभिघातैर्वा साहसैर्वा तथापरैः ॥
अयथाबलमारम्भैर्जन्तोरुरसि विक्षते ।
वायुः प्रकुपितो दोषावुदीर्य्योभौ विधावति ॥"
तथास्य लक्षणादिकं यथा,—
"स शिरःस्थः शिरःशूलं करोति गलमाश्रितः ।
कण्ठोद्धंसञ्च कासञ्च स्वरभेदमरोचकम् ।
पार्श्वशूलञ्च पार्श्वस्थो वर्चोभेदं गुदे स्थितः ।
जृम्भां ज्वरञ्च सन्धिस्थ उरःस्थश्चोरसो रुजम् ॥
क्षणनाच्चोरसो रक्तं कासमानः कफानुगम् ।
जर्ज्जरेणोरसा कृच्छ्रमुरःशूली निरस्यति ॥
इति साहसिकं यक्ष्मा रूपैरेतैः प्रपद्यते ।
एकादशभिरात्मज्ञो भजेत्तस्मान्न साहसम् ॥
ह्रीमत्वाद्वा घृणित्वाद्वा भयाद्वा वेगमागतम् ।
वातमूत्रपुरीषाणां निगृह्णाति यदा नरः ॥
तदा वेगप्रतीघातात् कफपित्ते समीरयन् ।
ऊर्द्ध्वं तिर्य्यगधः कुर्य्याद्विकारान् कुपितोऽनिलः ॥
प्रतिश्यायञ्च कासञ्च स्वरभेदमरोचकम् ।
पार्श्वशूलं शिरःशूलं ज्वरमंसावमर्द्दनम् ॥
अङ्गमर्द्दं मुहुश्छर्द्दिर्व्वर्चोभेदं त्रिलक्षणम् ।
रूपाण्येकादशैतानि यक्ष्मा येरुच्यते महान् ॥"
इति चरके चिकित्सास्थाने अष्टमेऽध्याये ॥
अस्य चिकित्सा यथा,—
"काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम् ।
विद्रुमं व्रतवैक्रान्तं तारं ताम्रञ्च वङ्गकम् ॥
कस्तूरिका लवङ्गञ्च जातिकोषैलवालुका ।
प्रत्येकं बिन्दुमात्रञ्च सर्व्वं मर्द्द्यं प्रयत्नतः ।
कन्यानीरेण संमर्द्द्य केशराजरसेन च ।
अजाक्षीरेण संभाव्य प्रत्येकं दिवसत्रयम् ॥
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
अनुपानं प्रदातव्यं यथादोषानुसारतः ॥
नानारोगप्रशमनं सर्व्वोपद्रवसंयुतम् ।
क्षयं हन्ति तथा कासं यक्ष्माणं श्वासमेव च ॥
प्रमेहान् विंशतिञ्चैव दोषत्रयसमुत्थितान् ।
सर्व्वान् रोगान् निहन्त्याशु भास्करस्तिमिरं यथा ॥"
इति हेमकाञ्चनाभ्रवटी ।
"शिलाजतुमधुव्योषताप्यलौहरजांसि च ।
क्षीरेणालोड्य तस्याशु यक्ष्मा क्षयमवाप्नुयात् ॥"
इति शिलाजत्वादिलौहम् ॥*॥
इति वैद्यकरसेन्द्रसारसंग्रहे राजयक्ष्माधिकारे ॥ * ॥)

यच्छन्, [त्] त्रि, दानकर्त्ता । उपरमकर्त्ता । दानधातोर्यमधातोश्च शतृप्रत्ययेन निष्पन्नः ।

यज, ऐ ञ औ देवार्च्चादानसङ्गतौ । इति कविकल्पद्रुमः ॥ · (भ्वा०-उभ०-सक०-अनिट् ।) सङ्गस्य कृतिः सङ्गकृतिः । ऐ, इष्यात् । ञ, यजति यजते विष्णुं सुधीः पूजयतीत्यर्थः । पशुना रुद्रं यजते पशुं रुद्राय ददातीत्यर्थः । यजति सक्तं सन् सता सह सङ्गं करोतीत्यर्थः । औ, यष्टा । इति दुर्गादासः ॥

यजतः, पुं, (यजतीति । यज्+"भृमृदृशियजिपर्व्विपच्यमितमिनमिहर्य्यिभ्योऽतच् ।" उणा० ३।११०।इति अतच् ।) ऋत्विक् । इति सिद्धान्तकौमुदी । (ऋषिविशेषः । स तु ऋग्वेदस्य ५ म० ६७।६८ । सूक्तयोः ऋषिः । त्रि, यष्टव्यः । यथा, ऋग्वेदे । १ । १८१ । ३ ।
"अहंपूर्व्वौ यजतो धिष्ण्या यः ।"
"यजतो यष्टव्यः ।" इति तद्भाष्ये सायणः ॥
तथा च तत्रैव । २ । ५ । ८ ।
"यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः ।"
"यजतेभ्यः सर्व्वेभ्यो यजनीयेभ्यो देवेभ्यः ।"
इति तद्भाष्ये सायणः ।)

यजतिः, पुं, (यज्+बाहुलकात् अतिः ।) यागः । यथा,—
"यजतिषु येयजामहं कुर्य्यान्नानुयाजेषु ।"
इति मलमासतत्त्वधृता श्रुतिः ॥

यजत्रः, पुं, (यजतीति । यज्+"अमिनक्षियजिवधिपतिभ्योऽत्रन् ।" उणा० ३ । १०५ । इति अत्रन् ।) अग्निहोत्री । इत्युणादिकोषः ॥ (यजनशीले, त्रि । यथा, ऋग्वेदे ।७।५२।१६।
"पिता च तन्नो महान् यजत्रो
विश्वेदेवाः समनसो जुषन्त ॥"
"यजत्रः यजनशीलः ।" इति तद्भाष्ये सायणः ॥)

यजन्, [त्] पुं, यागकर्त्ता । यजधातोः शतृप्रत्ययेन निष्पन्नः ॥

यजनं, क्ली, (इज्यते इति । यज्+ल्युट् ।) यागः ; (यथा, महाभारते । ७ । ५३ । ३७ ।
"यस्य सेन्द्रामरगणा बृहस्पतिपुरोगमाः ।
देवा विश्वसृजः सर्व्वे यजनान्ते समासते ॥")
तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः । यथा, मानवे १ अध्याये ।
"अध्यापनं अध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहञ्चैव ब्राह्मणानामकल्पयत् ॥"
अस्य लक्षणं यथा । पशुक्षीराज्यपुरोडाशसोमौषधिचरुप्रभृतिभिर्हविर्भिः खदिरपलाशाश्वत्थन्यग्रोधोडुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखलमुषलकुठारखनित्रयूपदारुदर्भचर्म्मग्रावपवित्रभाजनादिभिर्यज्ञोपकरणैरुद्गातृहोत्रध्वर्य्युब्रह्मादिभिरृत्विग्भिः काम्यनैमित्तिकानां यज्ञादिपूर्व्वकाणां यथोक्तदक्षिणानां समापनं यजनम् । इति श्राद्धविवेकधृतदेवलवचनम् ॥ (इज्यतेऽत्रेति । यज्+अधिकरणे ल्युट् । यज्ञस्थानम् । यथा, श्रीमद्भागवते । ४ । ४ । ६ ।
"न्ब्रह्मर्षिःकाञ्चनदर्भचर्म्मभि-
र्निसृष्टभाण्डं यजनं समाविशत् ॥"
"यजनं यज्ञस्थानम् ।" इति तट्टीकायां श्रीधरस्वामी ॥)

यजन्तः, पुं, यागकर्त्ता । यजधातोर्झच्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

यजमानः, पुं,(यजतीति । यज्+शानच् ।) अध्वरे आदेष्टा । तत्पर्य्यायः । व्रती २ यष्टा ३ । इत्यमरः ।२।७।८। (यथा, श्रीमद्भागवते । ३।१६।८ ।
"नाहं तथाद्मि यजमानहविर्वितानै
श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेन ॥")
„ब्रह्मादित्रयं यजमाने । अध्वरे यागविषये मम इष्टसम्पादनाय यथार्थं कर्म्म कुरु इति ऋत्विजामादेशको यागस्वामी ब्रह्मादिशब्दत्रयवाच्य इत्यर्थः । व्रतमेवाजिनादिधारणं विद्यतेऽस्य व्रती इन् । यजते इति तृनि यष्टा । शाने यजमानः । स व्रती सोमपानवति अध्वरे यजमानः सन् दीक्षित उच्यते अन्यत्राप्युपचारात् । दीक्ष मौण्ड्येज्योपनयनव्रतादेशेषु क्तः दीक्षाशब्दादितो वा ।" इति भरतः ॥

यजाकः, त्रि, (यजतीति । यज् दाने+आकन् ।) दानकर्त्ता । इत्युणादिकोषः ॥

यजिः, पुं, (यजतीति । यज्+"सर्व्वधातुभ्य इन् ।" उणा० ४।११७। इति इन् ।) यष्टा । इत्युणादिकोषः ॥

यजुः, [स्] क्ली, (इज्यतेऽनेनेति । यज् + "अर्त्ति-पृवपियजीति ।" उणा० २ । ११८ । इति उसिः ।) वेदविशेषः । इत्यमरः । १ । ६ । ३ ॥ "इज्यतेऽनेनेति यजुः । यजे ज्ञौ देवार्च्चादानसङ्गतौ । चासुसिस् इति उस् ।" इति भरतः ॥ * ॥ अपि च । यजुराह जैमिनिः । शेषे वा यजुःशब्दः । शेषे ऋक्सामभिन्ने मन्त्रजाते ततश्च यन्मन्त्रजातं प्रश्लिष्य पठितं गानादिविच्छेदरहितं तत् यजुरिति । इति तिथ्यादितत्त्वम् ॥ यजुर्व्वेदस्य षडशीतिर्भेदा भवन्ति । तत्र चरका नाम द्वादश भेदा भवन्ति । चरकाः १ आह्वरकाः २ कठाः ३ प्राच्यकठाः ४ कपिष्ठलकठाः ५ औपमन्याः ६ आष्टालकठाः ७ चारायणीयाः ८ वारायणीयाः ९ वार्त्तान्तवेयाः १० श्वेताश्वतराः ११ मैत्रायणीयाश्चेति १२ । तत्र मैत्रायणीया नाम सप्त भेदा भवन्ति । मानवाः १ दुन्दुभाः २ चैकेयाः ३ वाराहाः ४ हारिद्रवेयाः ५ श्यामाः ६ श्यामायनीयाश्चेति ७ । तेषामध्ययनमष्टौ शतम् । यजुःसहस्राण्यधीत्य शाखापारो भवति । तान्येव द्विगुणान्यधीत्य पदपारो भवति । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति । षडङ्गान्यधीत्य षडङ्गविद्भवति । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यङ्गानि । तत्र प्राच्योदीच्या नैरृत्या निरृत्यः । तत्र वाजसनेया नाम सप्तदश भेदा भवन्ति । जाबालाः १ औधेयाः २ काण्वाः ३ माध्यन्दिनाः ४ शापीयाः ५ तापायनीयाः ६ कापालाः ७ पौण्ड्रवत्साः ८ आवटिकाः ९ परमावटिकाः १० पाराशर्य्याः ११ वैधेयाः १२ वैनेयाः १३ औधेयाः १४ गालवाः १५ वैजवाः १६ कात्यायनीयाश्चेति १७ । प्रतिपदमनुपदं छन्दो भाषा धर्म्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि भवन्ति । उपज्योतिषम् १ साङ्गलक्षणम् २ प्रतिज्ञा ३ अनुवाक्यम् ४ परिसंख्या ५ चरणव्यूहम् ६ श्राद्धकल्पः ७ प्रवराध्यायश्च ८ शाल्वम् ९ क्रतुः १० संख्या ११ अनुगमः १२ यज्ञम् १३ पाश्वानः १४ होत्रकम् १५ पशवः १५ उक्थानि १७ कूर्म्मलक्षणम् १८ । इत्यष्टादशपरिशिष्टानि ।

"द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
इत्युक्तं परिसंख्यातमेतत् सकलं सशुक्रियम् ॥
ग्रन्थांश्च परिसंख्यातं ब्राह्मणञ्च चतुर्गुणम् ।
आदावारभ्य वेदान्तं व्याहृतिपूर्व्वकम् ।
येदमध्याय एतेषां होमान्ते तु समारभेत् ॥"

तत्र तैत्तिरीयका नाम द्विभेदा भवन्ति । औख्याः खाण्डिकेयाश्चेति । तत्र खाण्डिकेया नाम पञ्च भेदा भवन्ति । आपस्तम्बी १ बौधायनी २ सत्याषाढ़ी ३ हिरण्यकेशी ४ औधेयाश्चेति ५ । तत्र कठानामुपगानविशेषः । चतुश्चत्वारिंशदुपग्रन्थान् ।

"मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते ।
यजुर्व्वेदः स विज्ञेयोऽन्ये शाखान्तराः स्मृताः ॥"

यजुर्व्वेदस्य धनुर्व्वेद उपवेदः । यजुर्व्वेदस्य भारद्वाजगोत्रम् । रुद्रदैवत्यम् । त्रैष्टुभं छन्दः । यजुर्व्वेदः कृशः । दीर्घः । कपाली । ताम्रवर्णः । काञ्चननयनः । आदित्यवर्णः वर्णेन । पञ्चारत्निमात्रः । अस्य ध्यानम् ।

"वन्दे रौद्रं त्रैष्टुभं ताम्रवर्णं
भारद्वाजं रुक्मनेत्रं कृशाङ्गम् ।
यजुर्व्वेदं दीर्घमादित्यवर्णं
कापालीनं पञ्च चारत्निमात्रम् ॥"

य इदं दैवतं रूपं गोत्रं प्रमाणं छन्दो वर्णं वर्णयति स विद्यां लभते स विद्यां लभते । जन्मजन्मनि वेदपारो भवति । जन्मजन्मनि वेदधारी भवति । अव्रतो व्रती भवति । अप्रयतः प्रयतो भवति । अब्रह्मचारी ब्रह्मचारी भवति । जातिस्मरो जायते । इति चरणव्यूहम् ॥ (ऋक्सामभिन्नो मन्त्रविशेषः । इति केचित् ॥)

यजुर्व्वेदः, पुं, (यजुरेव वेदः । यजुषां वेद इति वा ।) वेदविशेषः । तस्याधिपतिर्यथा,—

"ऋग्वेदाधिपतिर्जीवः सामवेदाधिपः कुजः ।
यजुर्व्वेदाधिपः शुक्रः शशिजोऽथर्व्ववेदराट् ॥"
इति ज्योतिषम् ॥

अस्य वक्ता वैशम्पायनः । स तु आदावेक एवासीत् । यथा,—

"ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ।
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च ॥
जैमिनं सामवेदस्य श्रावकं सोऽन्वपद्यत ।
तथैवाथर्व्ववेदस्य सुमन्तुमृषिसत्तमम् ॥
एक आसीद्‌यजुर्व्वेदस्तञ्चतुर्धा व्यकल्पयत् ।
चातुर्होत्रमभूद्‌यस्मिंस्तेन यज्ञमथाकरोत् ॥
आध्वर्य्यवं यजुर्भिः स्यादृग्भिर्होत्रं द्विजोत्तमाः ।
उद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्व्वभिः ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि च यजुर्व्वेदं सामवेदञ्च सामभिः ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानान्तु शतेनाथ यजुर्व्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानाञ्च विभेदतः ।
अथर्व्वाणमथो वेदं बिभेद नवकेन तु ॥"
इति कौर्म्मे ४९ अध्यायः ॥

यज्ञः, पुं, इज्यते हविर्दीयतेऽत्र । (इज्यन्ते देवता अत्र इति वा । यज् + "यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३।३।९० । इति नङ् ।) यागः । तत्पर्य्यायः । सवः २ अध्वरः ३ यागः ४ सप्ततन्तुः ५ मखः ६ क्रतुः ७ । इत्यमरः ।२।७।१३॥ इष्टिः ८ इष्टम् ९ वितानम् १० मन्युः ११ आहवः १२ सवनम् १३ हवः १४ अभिषवः १५ होमः १६ हवनम् १७ महः १८ । इति शब्दरत्नावली ॥ स त्रिविधः । सात्त्विको राजसिकस्तामसिकश्च । सात्त्विकयज्ञो यथा,—

"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥"

राजसिकयज्ञो यथा,—

"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् ॥"

तामसिकयज्ञो यथा,—

"विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥"
इति श्रीभगवद्गीतायाम् १७ अध्यायः ॥ * ॥

स च नानाविधः । यथा,—

"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥"
इति श्रीभगवद्गीतायाम् ४ अध्यायः ॥ * ॥

पञ्च यज्ञा यथा,—

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
इति गारुड़े ११५ अध्यायः ॥ * ॥

(तथाच मनुः । ४ । २१—२२ ।

"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ॥
एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः ।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥"

अपरपञ्चयज्ञा उक्ता यथा, शिवपुराणे वायुसंहितायामुत्तरभागे । १८ । ८९—१०६ ।

"कर्म्मयज्ञस्तपोयज्ञो जपयज्ञस्तदुत्तरः ।
ध्यानयज्ञो ज्ञानयज्ञः पञ्च यज्ञाः प्रकीर्त्तिताः ॥
कर्म्मयज्ञरताः केचित्तपोयज्ञरताः परे ।
जपयज्ञरताश्चान्ये ध्यानयज्ञरतास्तथा ॥
ज्ञानयज्ञरताश्चान्ये विशिष्टाश्चोत्तरोत्तरम् ।
कर्म्मयज्ञो द्विधा प्रोक्तः कामाकामविभेदतः ॥
कामात् कामी ततो भुक्त्वा कामासक्तः पुनर्भवेत् ।
अकामो रुद्रभवने भोगान् भुक्त्वा ततश्च्युतः ॥
तपोयज्ञरतो भूत्वा जायते नात्र संशयः ।
तपस्वी च पुनस्तस्मिन् भोगान् भुक्त्वा ततश्च्युतः ॥
जपध्यानरतो भूत्वा जायते भुवि मानवः ।
जपध्यानरतो मर्त्त्यस्तद्वैशिष्ट्यवशादिह ॥
ज्ञानं लब्ध्वा चिरादेव शिवसायुज्यमाप्नुयात् ।
तस्मान्मुक्तौ शिवाज्ञप्तः कर्म्मयज्ञोऽपि देहिनाम् ॥
अकामः कामसंयुक्तो बन्धायैव भविष्यति ।
तस्मात् पञ्चसु यज्ञेषु ध्यानज्ञानपरो भवेत् ॥
ध्यानं ज्ञानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः ।
हिंसादिदोषनिर्म्मुक्तो विशुद्धश्चित्तसाधनः ॥
ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः ।
बहिः कर्म्मकरा यद्वन्नातीवफलभागिनः ॥
दृष्ट्वा नरेन्द्रभवने तद्वदत्रापि कर्म्मिणः ।
ध्यानिनां हि वपुः सूक्ष्मं भवेत् प्रत्यक्षमैश्वरम् ॥
तथेह कर्म्मिणां स्थूलं मृत्काष्ठाद्यैः प्रकल्पितम् ।
ध्यानयज्ञरतास्तस्माद्देवान् पाषाणमृन्मयान् ॥
नात्यन्तं प्रतिपद्यन्ते शिवयाथात्म्यवेदनात् ।
आत्मस्थं यः शिवन्त्यक्त्वा बहिरभ्यर्च्चयेन्नरः ॥
हस्तस्थं फलमुत्सृज्य लिहेत् कूर्परमात्मनः ।
ज्ञानात् ध्यानं भवेत् ध्यानाज्ज्ञानं भूयः प्रवर्त्तते ॥
तदुभाभ्यां भवेन्मुक्तिस्तस्मात् ध्यानरतो भवेत् ।
द्वादशान्ते तथा मूर्द्ध्नि ललाटे भ्रूयुगान्तरे ॥

नासाग्रे वा तथास्ये वा कन्धरे हृदये तथा ।
नाभौ वा शाश्वतस्थाने श्रद्धाविद्धेन चेतसा ॥
बहिर्य्यागोपचारेण देवं देवीञ्च पूजयेत् ।
अथवा पूजयेन्नित्यं लिङ्गे वा कृतकेऽपि वा ॥
वह्नौ वा स्थण्डिले वाथ भक्त्या वित्तानुसारतः ॥
अथवान्तर्बहिश्चैव पूजयेत् परमेश्वरम् ।
अन्तर्य्यागरतः पूजां बहिः कुर्व्वीत वा न वा ॥")
अस्योत्पत्तिर्यथा,—

ऋषय ऊचुः ।

"कथं यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
त्रेतात्वमगमन् पुत्त्रा वराहस्य कथं त्रयः ।
तन्नोऽद्य श्रोष्यमाणानां कथयस्व महामते ! ॥

श्रीमार्कण्डेय उवाच ।

शृणुध्वं द्विजशार्दूला यत् पृष्टोऽहं महाद्भुतम् ।
यज्ञेषु देवास्तिष्ठन्ति यज्ञे सर्व्वं प्रतिष्ठितम् ॥
यज्ञेन ध्रियते पृथ्वी यज्ञस्तारयति प्रजाः ।
अन्नेन भूता जीवन्ति पर्जन्यादन्नसम्भवः ॥
पर्जन्यो जायते यज्ञात् सर्व्वं यज्ञमयं ततः ।
स यज्ञोऽभूद्वराहस्य कायात् शम्भुविदारितात् ॥
यथाहं कथये तद्वः शृणुध्वमवहिता द्विजाः ।
विदारिते वराहस्य काये भर्गेण तत्क्षणात् ॥
ब्रह्मविष्णुशिवा देवाः सर्व्वैश्च प्रमथैः सह ।
निन्युर्जलात् समुद्धृत्य तच्छरीरं नभः प्रति ॥
तद्विभेजुः शरीरन्ते विष्णोश्चक्रेण खण्डशः ।
तस्याङ्गसन्धयो यज्ञा जातास्ते वै पृथक् पृथक् ॥
यस्माद्यस्माच्च ये यज्ञास्तत् शृणुन्तु महर्षयः ।
भ्रूनासासन्धिना जातो ज्योतिष्टोमो महाध्वरः ॥
हनुश्रवणसन्ध्योस्तु वह्निष्टोमो व्यजायत ।
चक्षुर्भ्रुवोः सन्धिना तु व्रात्यष्टोमो व्यजायत ॥
राजः पौनर्भवष्टोमस्तस्य पोत्रोष्ठसन्धिना ।
वृद्धष्टोमबृहष्टोमौ जिह्वामूलादजायत ॥
अतिरात्रं सवैराजमधोजिह्वान्तरादभूत् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥
स्नानं तर्पणपर्य्यन्तं नित्ययज्ञाश्च सर्व्वशः ।
कण्ठसन्धेः समुत्पन्ना जिह्वातो विषयस्तथा ॥ ॥
वाजिमेधो महामेधो नरमेधस्तथैव च ।
प्राणिहिंसाकरा येऽन्ये ते जाताः पादसन्धितः ॥
राजसूयोऽथ कारीषो वाजपेयस्तथैव च ॥
पृष्ठसन्धौ समुत्पन्ना ग्रहयज्ञास्तथैव च ॥
प्रतिष्ठोत्सर्गयज्ञाश्च दानश्राद्धादयस्तथा ।
हृत्सन्धितः समुत्पन्नाः सावित्रीयज्ञ एव च ॥
सर्व्वेषां साधका यज्ञाः प्रायश्चित्तकराश्च ये ।
ते मेढ्रसन्धितो जाता यज्ञास्तस्य महात्मनः ॥
रक्षःसत्रं सर्पसत्रं सर्व्वश्चैवाभिचारिकम् ।
गोमेधो वृक्षयागश्च खुरेभ्यो ह्यभवन्निमे ॥
मायेष्टिः परमेष्टिश्च गोष्पतिर्भोगसम्भवः ।
लाङ्गूलसन्धौ संजाता अग्निष्टोमस्तथैव च ॥
नैमित्तिकाश्च ये यज्ञाः संक्रान्त्यादौ प्रकी-
र्त्तिताः ।
लाङ्गूलसन्धौ ते जातास्तथा द्वादशवार्षिकम् ॥
तीर्थप्रयोगसामौजयजुःसङ्घर्षणस्तथा ।
आर्कमाथर्व्वणश्चैव नाभिसन्धेः समुद्गताः ॥
ऋचोत्कर्षः क्षेत्रयज्ञः पञ्चमार्गोऽतियोजनः ।
लिङ्गसंस्थानहेरम्बयज्ञा जाताश्च जानुनि ॥
एवमष्टाधिकं जातं सहस्रं द्विजसत्तमाः ॥
यज्ञानां सततं लोका यैर्भाव्यन्तेऽधुनापि च ।
शृङ्गस्य पोत्रात् संजाता नासिकायाः स्रुवोऽभवत् ॥
अन्ये स्रुक्स्रुवभेदा ये ते जाताः पोत्रनासयोः ।
ग्रीवाभागेन तस्याभूत् प्राग्वंशो मुनिसत्तमाः ॥
इष्टापूर्त्तं यजुर्धर्म्मो जाताः श्रवणरन्ध्रतः ।
दंष्ट्राभ्यो ह्यभवन् यूपाः कुशा रोमाणि चाभवन् ॥
उद्गाता च तथाध्वर्युर्होता समिध एव च ।
अग्रदक्षिणवामाङ्गपश्चात्पादेषु सङ्गताः ॥
पुरोडाशाः सचरवो जाता मस्तिष्कसञ्चयात् ।
कर्णनेत्रयुगाज्जाता यज्ञकेतुस्तथा खुरात् ॥
मध्यभागोऽभवद्वेदी मेढ्रात् कुण्डमजायत ।
रेतोधारास्तथैवाज्यं स्वराम्नाः समुद्गताः ॥
यज्ञालयः पृष्ठभागात् हृत्पद्मात् यज्ञ एव च ।
तदात्मा यज्ञपुरुषो मुञ्जाः कक्षात् समुद्गताः ॥
एवं यावन्ति यज्ञानां भाण्डानि च हवींषि च ।
तानि यज्ञवराहस्य शरीरादेव चाभवन् ॥
एवं यज्ञवराहस्य शरीरं यज्ञतामगात् ।
यद्रूपेण सकलमाप्यायितुमिदं जगत् ॥
एवं विधाय यज्ञन्तु ब्रह्मविष्णुमहेश्वराः ।
सुवृत्तं कनकं घोरमासेदुर्यत्नतत्पराः ॥
ततस्तेषां शरीराणि पिण्डीकृत्य पृथक् पृथक् ।
त्रिदेवाश्चिशरीराणि व्यधमन्मुखवायुभिः ॥
सुवृत्तस्य शरीरन्तु व्यधमन्मुखवायुना ।
स्वयमेव जगत्स्रष्टा दक्षिणाग्निस्ततोऽभवत् ॥
कनकस्य शरीरन्तु ध्मापयामास केशवः ।
ततोऽभूद्गार्हपत्याग्निः पञ्चवैतानभोजनः ॥
घोरस्य तु वपुः शम्भुर्ध्मापयामास वै स्वयम् ।
तत आहवनीयोऽग्निस्तत्क्षणात् समजायत ॥
एतैस्त्रिभिर्जगत् व्याप्तं त्रिमूलं सकलं जगत् ।
एतत् यत्र त्रयं नित्यं तिष्ठति द्विजसत्तमाः ।
समस्ता देवतास्तत्र वसन्तेऽनुचरैः सह ॥
एतद्ब्रह्मपदं नित्यमेतदेव त्रयात्मकम् ।
एतत् त्रयीविधिस्थानमेतत् पुण्यकरं परम् ॥
यस्मिन् जनपदे चैते हूयन्ते अग्नयस्त्रयः ।
तस्मिन् जनपदे नित्यं चतुर्व्वर्गो विवर्द्धते ॥
एतद्वः कथितं सर्व्वं यत् पृष्टं द्विजसत्तमैः ।
यथा यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
तथा च तस्य पुत्त्राणां देहास्त्रेतात्वमागमन् ॥"

इति कालिकापुराणे ३० अध्यायः ॥*॥

ब्रह्मण आदियज्ञो यथा,—

पुलस्त्य उवाच ।

"पूर्व्वमेव मया ख्यातं यदा स्वायम्भुवो मनुः ।
जातः परमधर्म्मात्मा शतरूपापतिः स्वयम् ॥
स्रष्टा प्रजापतिः पूर्व्वं सृष्टिकर्म्मण्ययोजयत् ।
वत्स ! त्वमेव संकल्प्य स्वल्पां सृष्टिं कुरु ह्यथ ॥
स्वयं तु पुष्करं गत्वा कृत्वा यज्ञन्तु विस्तरम् ।
ब्रह्मोद्गाता होताध्वर्युश्चत्वारो यज्ञवाहकाः ।
एकैकस्य त्रयश्चान्ये परिवाराः स्वयं कृताः ॥
एते वै षोड़श प्रोक्ता ऋत्विजो वेदचिन्तकाः ।
शतानि त्रीणि षड्भिश्च यज्ञाः सृष्टाः स्वय-
म्भुवा ॥

भीष्म उवाच ।

यज्ञस्य ब्रह्मणो विप्र ! समाप्तिं वद साम्प्रतम् ॥

पुलस्त्य उवाच ।

मन्वन्तरे व्यतीते तु यज्ञस्यावभृथोऽभवत् ।
दक्षिणा ब्रह्मणा दत्ता प्राची होतुस्तु दक्षिणा ॥
अध्वर्य्यवे प्रतीची तु उद्गातुश्चोत्तरा तथा ।
त्रैलोक्यं सकलं ब्रह्मा ददौ तेषान्तु दक्षि-
णाम् ॥
धेनूनाञ्च शतं सार्द्धं दातव्यं यज्ञसिद्धये ।
अध्वर्य्यूणां सहस्राणि स्वेच्छया दानमिष्यते ॥"

इति पाद्मे सृष्टिखण्डे ३१ अध्यायः ॥*॥

ब्राह्मणादीनां स्वधर्म्मयज्ञा यथा,—
"आरम्भयज्ञाः क्षत्त्राः स्युर्हविर्यज्ञा विशः
स्मृताः ।
परिचारयज्ञाः शूद्रास्तु जपयज्ञास्तु ब्राह्मणाः ॥"

इति मात्स्ये ११८ अध्यायः ॥*॥

हिंसायज्ञस्य अधर्म्मजनकत्वं यथा,—
"तथा विश्वभुगिन्द्रस्तु यज्ञं प्रावर्त्तयत् प्रभुः ।
दैवतैः सह संहृत्य सर्व्वसाधनसंभृतम् ॥
तस्याश्वमेधे वितते समाजग्मुर्महर्षयः ।
महर्षयश्च तान् दृष्ट्वा दीनान् पशुगणांस्तदा ॥
विश्वं भुजन्तं त्वपृच्छन् कोऽयं यज्ञविधिस्तव ।
अधर्म्मो बलवानेष हिंसाधर्म्मेप्सया तव ॥
न नः पशुवधस्त्विष्टस्तव यज्ञेश्वरोत्तम ! ।
अधर्म्मो धर्म्मघाताय प्रारब्धः पशुभिस्त्वया ॥
नायं धर्म्मो ह्यधर्म्मोऽयं न हिंसा धर्म्म उच्यते ।
आगमेन भवान् धर्म्मं प्रकरोतु यदीच्छति ॥
विधिदृष्टेन यज्ञेन धर्म्मेणाव्ययसेतुना ॥
एवं विश्वभुगिन्द्रस्तु ऋषिभिस्तत्त्वदर्शिभिः ।
उक्तो न प्रतिजग्राह मानमोहसमन्वितः ॥
तेषां विवादः सुमहान् जज्ञे इन्द्रमहर्षि-
णाम् ।
जङ्गमैः स्थावरैः केन यष्टव्यमिति चोच्यते ॥
ते तु खिन्ना विवादेन तथ्यमुक्ता महर्षयः ।
सन्धाय वाक्यमिन्द्रेण पप्रच्छुः खचरं वसुम् ॥

ऋषय ऊचुः ।

महाप्राज्ञ कथं दृष्टस्तव यज्ञविधिर्नृप ! ।
उत्तानपादे ! प्रब्रूहि संशयं नो नुद प्रभो ! ॥

सूत उवाच ।

श्रुत्वा वाक्यं वसुस्तेषामविचार्य्य बलाबलम् ।
वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह ॥
यष्टव्यं पशुभिर्मेध्यैरथ मूलफलैरपि ।
हिंसा स्वभावो यज्ञस्य इति मे दर्शनागमः ॥
एवं कृतोत्तरास्ते तु युक्तात्मानं ततो धिया ।
अवश्यं भाविनं दृष्ट्वा तमधो ह्यशपंस्तदा ॥
इत्युक्तमात्रो नृपतिः प्रविवेश रसातलम् ।
धर्म्माणां संशयच्छेत्ता राजा वसुरधो गतः ॥

तस्मान्न वाच्यो ह्येकेन बहुज्ञेनापि संशयः ।
तस्मान्न हिंसा यज्ञस्य यदुक्तमृषिभिः पुरा ॥”
इति मात्स्ये ११६ अध्यायः ॥

तद्वैदिकपर्य्यायः । वेनः २ अध्वरः ३ मेधः ४ विदथः ५ नार्य्यः ६ सवनम् ७ होत्रा ८ इष्टिः ९ देवताता १० मखः ११ विष्णुः १२ इन्दुः १३ प्रजापतिः १४ धर्म्मः १५ । इति पञ्चदश यज्ञनामानि । इति वेदनिघण्टौ । ३ । १७ ॥ (विष्णुः । यथा, महाभारते ।१३।१४६।११७।
“यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥”)

यज्ञकृत्, त्रि, (यज्ञं करोतीति । कृ+क्विप् । यागकर्त्ता । (यथा, श्रीमद्भागवते ।४।४।७ ।
“तामागतां तत्र न कश्चनाद्रियद्-
विमानितां यज्ञकृतो भयाज्जनः ।
ऋते स्वसॄर्वै जननीञ्च सादराः
प्रेमाश्रुकण्ठ्यः परिषस्वजुर्मुदा ॥”
पुं, विष्णुः । यथा, महाभारते । १३ । १४६ । ११८ ।
“यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग् यज्ञसाधनः ॥”)

यज्ञपशुः, पुं, (यज्ञार्थः पशुः ।) घोटकः । इति शब्दमाला ॥ (यथा, श्रीमद्भागवते । ४ । १९ । ११ ।
“चरमेणाश्वमेधेन यजमाने यजुष्पतिम् ।
वैण्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः ॥”)
छागश्च ॥

यज्ञपुरुषः, पुं, (यज्ञरूपी पुरुषः ।) विष्णुः । इति हेमचन्द्रः । २ । २३ ॥ (यथा, श्रीमद्भागवते । २ । ७ । ११ ।
“सत्रे ममास भगवान् हयशीरषाथो
साक्षात् स यज्ञपुरुषस्तपनीयवर्णः ।
छन्दोमयो मखमयोऽखिलदेवतात्मा
वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥”)

यज्ञभाजनं, क्ली, (यज्ञस्य भाजनम् ।) यज्ञपात्रम् । इति जटाधरः ॥

यज्ञभूषणः, पुं, (यज्ञं भूषयतीति । भूष+णिच्+ल्युः ।) श्वेतदर्भः । इति राजनिर्घण्टः ॥ (कुशमात्रम् । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
“कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च ॥”)

यज्ञयोग्यः, पुं, (यज्ञे योग्यः उचितः ।) उडुम्बरवृक्षः । इति राजनिर्घण्टः ॥ यागार्हे, त्रि ॥

यज्ञवल्ली, स्त्री, (यज्ञस्य वल्ली ।) सोमवल्ली । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः सोमलताशब्दे ज्ञातव्याः ॥)

यज्ञवाटः, पुं, (यज्ञस्य वाटो गृहम् ।) यज्ञस्थानम् । इति हेमचन्द्रः ॥ (यथा, श्रीमद्भागवते । १० । २३ । ३३ ।
“इत्युक्ता मुनिपत्न्यस्ता यज्ञवाटं पुनर्गताः ।
ते चानसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥”)

यज्ञवृक्षः, पुं, (यज्ञस्य वृक्षः ।) वटीवृक्षः । इति राजनिर्घण्टः ॥ (विकङ्कतः । तत्पर्य्यायो यथा,
“विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यज्ञश्रेष्ठा, स्त्री, (यज्ञे श्रेष्ठा ।) सोमवल्ली । इति राजनिर्घण्टः ॥

यज्ञसाधनः, पुं, (यज्ञं साधयतीति । सिध+णिच्+ल्युः ।) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १४९ । ११८ ॥ (यज्ञसाधके, त्रि । यथा, ऋग्वेदे । १।१४५।३।
“पुरुप्रैषस्ततुरिर्यज्ञसाधनः ।”
“यज्ञसाधनः यज्ञसाधकः अस्मदधीनत्वात् यज्ञस्य ।”
इति तद्भाष्ये सायणः ॥)

यज्ञसारः, पुं, (यज्ञे सारः उत्कृष्टः ।) यज्ञोडुम्बरवृक्षः । इति राजनिर्घण्टः ॥

यज्ञसूत्रं, क्ली, (यज्ञे धृतं सूत्रम् ।) यज्ञोपवीतम् । यथा,—
“पवित्रं यज्ञसूत्रञ्च यज्ञोपवीतमित्यपि ।
यज्ञसूत्रं तदेवोपवीतं स्याद्दक्षिणे भुजे ॥
उद्धृते वामबाहौ तु प्राचीनावीतमन्यदः ।
निवीतन्तु तदेव स्यादूर्द्धवक्षसि लम्बितम् ॥”
इति जटाधरः ॥

तस्य प्रमाणं यथा,—
“ऊर्द्धन्तु त्रिवृतं सूत्रं सधवानिर्म्मितं शनैः ।
तन्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्ब्बुधाः ॥
त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम् ।
शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम् ॥
यजुर्व्विदां नाभिमितं सामगानामयं विधिः ।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥”
इति कालिकापुराणे ४ अध्यायः ॥

अस्य धारणे मन्त्रो यथा,—
“यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि ।”
इति संस्कारतत्त्वधृतभट्टभाष्यम् ॥

यजुषान्तु,—
“यज्ञोपवीतं परमं पवित्रं
बृहस्पतेर्यत् सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेजः ॥”
इति पशुपतिः ॥

युगभेदे तत्सूत्रनियमो यथा,—
“सत्ये स्वर्णमयं सूत्रं त्रेतायां राजतं तथा ।
द्वापरे ताम्रजं प्रोक्तं कलौ कार्पाससम्भवम् ॥”
इति कृत्यद्वाजमार्त्तण्डः ॥

अन्यच्च ।
“यज्ञार्थं धार्य्यते सूत्रं यज्ञं ब्रह्मण्यमिष्यते ।
स्वर्णं रौप्यं ताम्रमूर्णं पट्टं कार्पासवार्हिषम् ॥
मृगाजिनं गुटं शक्ती यथालब्धं निधाय च ।
यज्ञसूत्रं परिचरेद्ब्रह्मलिङ्गक्रियात्मकम् ॥
न तत्र नियमो ग्राह्यः सूत्रब्राह्मण्यशङ्कया ॥”
इति वृद्धादित्यसंहिता ॥

यज्ञस्थानं, क्ली, (यज्ञस्य स्थानम् ।) यज्ञवाटः । इति जटाधरः ॥

यज्ञाङ्गः, पुं, (यज्ञं अङ्गति प्राप्नोतीति । अङ्ग+अच् ।) उडुम्बरः । इत्यमरः । २ । ४ । २२ ॥ (अस्य पर्य्यायो यथा,—
“यज्ञाङ्गो ब्रह्मवृक्षश्च हेमदुग्धोऽप्युडुम्बरः ॥”
इति वैद्यकरत्नमालायाम् ॥
“उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
खदिरवृक्षः । इति राजनिर्घण्टः ॥ कृष्णयष्टिका । इति शब्दचन्द्रिका ॥ (यज्ञ एव अङ्गं यस्य । विष्णुः । यथा, महाभारते ।१३।१४६।११७ ।
“भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥”*॥
यज्ञस्याङ्गमिति ।) यागावयवे यज्ञसाधने च क्ली ॥ (यथा, कुमारसम्भवे । १ । १७ ।
“यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमञ्च ॥”)

यज्ञाङ्गा, स्त्री, (यज्ञमङ्गति प्राप्नोति या । अङ्ग+अण् । टाप् ।) सोमवल्ली । इति राजनिर्घण्टः ॥ (विवरणोऽस्याः सोमवल्लीशब्दे ज्ञातव्यः ॥)

यज्ञान्तः, पुं, (यज्ञस्य अन्तोऽवसानं यस्मिन् ।) अवभृथः । इति हेमचन्द्रः । ३ । ३९८ ॥ यागशेषश्च ॥ (यथा, महाभारते । १३ । १४९ । ११८ ।
“यज्ञान्तकृत् यज्ञगुह्यमन्नमन्नाद एव च ॥”)

यज्ञारिः, पुं, (यज्ञस्य दक्षयज्ञस्य अरिर्नाशकः ।) शिवः । इति धनञ्जयः ॥ राक्षसश्च ॥

यज्ञिकः, पुं, पलाशवृक्षः । इति जटाधरः ॥ (अनुकम्पितो यज्ञदत्तः । “बह्वचो मनुष्यनाम्नष्ठज् वा ।” ५ । ३ । ७८ । इति ठच् । “ठाजादावूर्द्ध्वं द्वितीयादचः ।” ५।३।८३। इति प्रकृतेर्द्वितीयादच ऊर्द्ध्वस्य लोपः । यज्ञदत्तकः । इति काशिका ॥)

यज्ञियं, त्रि, (यज्ञमर्हतीति । यज्ञ+“यज्ञर्त्विग्भ्यां घखञौ ।” ५।१।७१। इति घः ।) यज्ञकर्म्मार्हम् । इत्यमरः । २।७।२७ ॥ (यथा, हरिवंशे । २९ । १६ ।
“कृतो यज्ञविभागो हि यज्ञियैर्हि सुरैः पुरा ॥”)
यज्ञाय हितम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । २ । २३ ।
“कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥”)

यज्ञियः, पुं, (यज्ञाय हितः । यज्ञ+घः ।) द्वापरयुगम् । इति त्रिकाण्डशेषः ॥ (खदिरवृक्षः । तत्पर्य्यायो यथा,—
“खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥”
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥
पलाशः । तत्पर्य्यायो यथा,—
“पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यज्ञियदेशः, पुं, (यज्ञियश्चासौ देशश्चेति ।) यागकरणोपयुक्तदेशः । यथा, मनुः ।२।२३ ।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥"

यज्ञियशाला, स्त्री, (यज्ञिया शाला ।) यागमण्डपम् । इति जटाधरः ॥

यज्ञीयः, पुं, (यज्ञे भवः इति । यज्ञ + "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः ।) उडुम्बरवृक्षः । इति राजनिर्घण्टः ॥ यागसम्बन्धिनि, त्रि ॥ (यथा, महाभारते । ३ । १२४ । ६ ।
"प्रशस्तेऽहनि यज्ञीये सर्व्वकामसमृद्धिमत् ।
कारयामास शर्य्यातिर्यज्ञायतनमुत्तमम् ॥")

यज्ञीयब्रह्मपादपः, पुं, (यज्ञीयश्चासौ ब्रह्मपादपश्चेति ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

यज्ञेश्वरः, पुं, (यज्ञानामीश्वरः ।) विष्णुः । यथा,
"यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र ।
तत्सन्निधानादपयान्तु सद्यो
रक्षांस्यशेषाण्यसुराश्च सर्व्वे ॥"
इति श्राद्धतत्त्वम् ॥

यज्ञेष्टं, क्ली, (यज्ञे इष्टम् ।) दीर्घरोहिषकतृणम् । इति राजनिर्घण्टः ॥

यज्ञोडुम्बरः, पुं, (यज्ञोचितः उडुम्बरः ।) उडुम्बरवृक्षः । यज्ञडुमुर इति भाषा ॥ तत्पर्य्यायः । हेमदुग्धी २ यज्ञफलः ३ यज्ञाङ्गः ४ हेमदुग्धकः ५ उडुम्बरः ६ जन्तुफलः ७ । इति शब्दरत्नावली ॥ अस्य गुणाः यथा, भावप्रकाशे ।
"उडुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् ।
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥"

यज्ञोपवीतं, क्ली, (यज्ञार्थं उपवीतम् ।) यज्ञसूत्रम् । पैता इति भाषा । तत्पर्य्यायः । पवित्रम् २ ब्रह्मसूत्रम् ३ द्विजायनी ४ । इति त्रिकाण्डशेषः ॥ तस्य निरूपणं यथा । उपवीतमाह गोभिलः । यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि वा कुशरज्जुमेव । यज्ञोपवीतं विशिष्टविन्यासधारणकर्म्मतया कुरुते । किं तत् सूत्रम् । सूत्रं विशेषयति छन्दोगपरिशिष्टम् ।
"ऊर्द्ध्वन्तु त्रिवृतं कार्य्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥"
वामावर्त्तवलितं तन्तुत्रयं त्रिगुणं कृत्वा दक्षिणावर्त्तवलितं कार्य्यं एवं त्रिवृतं त्रिसवं उपवीतं स्यात् । एको ग्रन्थिरिति नानात्वनिषेधार्थम् । तथा बौधायनः ।
"क्षौमं सौत्रं त्रिस्त्रिवृतं यज्ञोपवीतमानाभेः ॥"
क्षौमं कृमिकोषोद्भवं पट्टसूत्रादिमयमित्यर्थः । सौत्रं कार्पासोद्भवम् । तथा मनुः ।
"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥"
त्रिस्त्रिवृतमित्युक्तत्वात् मनुवचनेऽपि त्रिवृत्त्वञ्च त्रिसवत्वेन विशेष्यम् । यत्तु पैठीनसिवचनम् । कार्पासमुपवीतं षट्तन्तु त्रिवृतं ब्राह्मणस्य । क्षौमं राजन्यस्य । आविकं वैश्यस्य । तदवतन्त्वसम्भवे षट्तन्तुविधायकम् । नवतन्तुत्वं यत्तमाह देवलः ।
"यज्ञोपवीतं कुर्व्वीत सूत्राणि नव तन्तवः ।
एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा ॥"
एकेन ग्रन्थिना युक्त इति शेषः । द्विगुणस्त्रिगुणोऽथवेति । तन्तुबलेन द्विसवस्त्रिसवो वा कर्त्तव्यः । द्विसवत्वं त्रिसवत्वासम्भवे । गोभिले वाशब्दो विकल्पार्थः । अपिशब्दो वस्त्रकुशरज्वोः सूत्रानुकल्पत्वप्रदर्शनार्थः । एवकारस्त्रिसवत्वव्यवच्छेदार्थः । द्वितीयो वाशब्दः अनुक्तमौञ्जबालादिसमुच्चयार्थः । तथा निगमपरिशिष्टम् । वाससा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण । कुशमुञ्जबालप्रतिसररज्जुभिर्व्वा । बालोऽत्र गोबालः । यथा देवलः ।
"कार्पासक्षौमगोबालशणरज्जुतृणोद्भवम् ।
सदा सम्भवतो धार्य्यमुपवीतं द्विजातिभिः ॥"
तदभाव इति करणादस्याभावे कुशरज्जुभिरिति बोद्धव्यम् । इति श्राद्धविवेकः ॥ * ॥ अथोपनयनदिनम् । तत्र गर्भाष्टमेऽब्दे ब्राह्मणस्योपनयनं शस्तम् । क्षत्रियस्य गर्भैकादशे । गर्भद्वादशे वैश्यस्य शस्तम् । अत्रासामर्थ्ये ब्राह्मणस्य षोड़शवर्षपर्य्यन्तमेव । क्षत्रियस्य द्वाविंशतिवर्षपर्य्यन्तम् । वैश्यस्य चतुर्व्विंशतिवर्षपर्य्यन्तं तदनुष्ठानकालः । तत्र मासाः माघफाल्गुनचैत्रवैशाखज्यैष्ठाषाढ़ा विहिताः । तत्र तिथयः द्वितीयैकादशीद्वादशीपञ्चमीदशमीतृतीया विहिताः । तत्र वाराः वृहस्पतिशुक्ररवीणां प्रशस्ताः । सामगानां मङ्गलवारोऽपि । तत्र नक्षत्राणि । स्वाती ज्येष्ठा धनिष्ठा अश्विनी अनुराधा हस्ता रेवती पुष्या चित्रा श्रवणा मृगशिरः शतभिषा पूर्व्वफल्गुनी उत्तरफल्गुनी पूर्व्वभाद्रपदा उत्तरभाद्रपदा रोहिणी पूर्व्वाषाढ़ा । तत्र लग्नानि वृषसिंहतुलाधनुर्मीनसंज्ञकानि । तत्र पक्षः शुक्लः । तच्चन्द्रादिशोभने अनध्यायादीन् परित्यज्य कर्त्तव्यम् । इति ज्योतिषतत्त्वमतम् ॥ * ॥ अथोपनयनम् । तत्र गोभिलः । गर्भाष्टमेषु ब्राह्मणमुपनयेत् गर्भैकादशेषु क्षत्रियं गर्भद्वादशेषु वैश्यम् । आषोड़शात् ब्राह्मणस्यानतीतः कालो भवति आद्वाविंशात् क्षत्रियस्य आचतुर्व्विंशात् वैश्यस्य । अत ऊर्द्ध्वं पतितसावित्रीका भवन्ति । नैतानुपनयेयुर्नाध्यापयेयुर्न एभिर्व्विवाहयेयुः ॥ आषोड़शादित्यभिविधावाङ् । तथा च विष्णुधर्म्मोत्तरम् ।
"षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः ।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता ॥
सावित्री नातिवर्त्तेत अत ऊर्द्ध्वं निवर्त्तते ॥"
अत्र षोड़शवर्षाणामुपनयनाङ्गता प्रतीयते ।
"पतिता यस्य सावित्री दश वर्षाणि पञ्च च ।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः ॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः ॥"
इति यमवचनेन तदनङ्गता प्रतीयते अनयोर्गर्भजन्मगणनाभ्यामविरुद्धता । तथा च माण्डव्यः ।
"व्रतबन्धविवाहे च वत्सरपरिगणनमाहुराचार्य्याः ।
आधानपूर्व्वकमेके प्रसूतिपूर्व्वं सदान्ये तु ॥"
यत्तु द्विजानामित्युपक्रम्य पैठीनसिवचनम् । द्वादशषोड़शविंशतिश्चेदतीता अवरुद्धकाला भवन्ति । तद्द्वादशवर्षादुपरि ब्राह्मणादीनां महाव्याहृतिहोमप्रायश्चित्तार्थं षोड़शवर्षोपरि गुरुप्रायश्चित्तमिति । तथा च शङ्खलिखितौ । व्रात्यश्चान्द्रायणं चरेत् गोप्रदानञ्च कुर्य्यात् । चान्द्रायणाशक्तौ धेन्वष्टकं तन्मूल्यं वा सार्द्धद्वाविंशतिकार्षापणाः गोमूल्यं कार्षापण एकः मिलित्वा सार्द्धत्रयोविंशतिकार्षापणाः ज्ञेयाः । पितृमातृरहितस्य निःस्वस्य देशोपप्लवादिना पतितसावित्रीकस्य वा विषये तु मनुविष्णू ।
"येषां द्विजानां सावित्री नानुतिष्ठेद् यथाविधि ।
तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत् ॥"
कृच्छ्रं प्राजापत्यम् । तदशक्तौ धेनुत्रयं तन्मूल्यं वा नव कार्षापणाः । अकृतप्रायश्चित्तं प्रत्याह नैतानित्यादि । तत्र बहुवचनं तत्कर्तृसंसर्गिणां प्रायश्चित्तप्रदर्शनार्थम् । तथा च स्मृत्यन्तरम् ।
"व्रात्याचार्य्यस्य भुक्तान्नं कृच्छ्रपादेन शुध्यति ।
यश्चोपनयते व्रात्यान् त्रिभिः कृच्छ्रैः स शुध्यति ॥"
भुजबलभीमकृत्यचिन्तामण्योः ।
"स्वातीशक्रधनाश्विमित्रकरभे पौष्णेन्द्रचित्राहरि-
ब्रध्नौ तोयपतौ भगेऽदितिसुते भाद्रद्वये सागरे ।
केन्द्रस्थे भृगुजेऽङ्गिरःशशिसुते चन्द्रे च तारे शुभे
कर्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वाराः सितार्केज्यकाः ॥"
अदितिसुत उत्तरफल्गुनी । सागरः पूर्व्वाषाढ़ा । दीपिकायाम् ।
"जीवार्केन्दुविशुद्धौ हरिशयनबहिर्भास्करे चोत्तरस्थे
स्वाध्याये वेदवर्णाधिप इह शुभदे चौरिभे नादितौ च ।
शुक्रार्केज्यर्क्षजन्मे रविमदनतिथिं प्रोज्झ्य षष्ठाष्टमेन्दुं
नो जीवास्तातिचारेऽर्कसितगुरुदिने कालशुद्धौ व्रतं स्यात् ॥"
रविमदनतिथिं सप्तमीं त्रयोदशीम् । षष्ठाष्टमेन्दुं लग्नापेक्षया । कृत्यचिन्तामणौ ।
"माघे द्रविणशीलाढ्यः फाल्गुने च दृढव्रतः ।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत् ॥
ज्यैष्ठे गहननीतिज्ञ आषाढ़े क्रतुभाजनः ।
शेषेष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम् ॥"
राजमार्त्तण्डः ।
"पुनर्व्वसौ कृतो विप्रः पुनःसंस्कारमर्हति ॥"
आश्वलायनः । उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चूड़ोपनयनगोदानविवाहाः । विवाहः सार्व्वकालिक इत्येके । आपूर्य्यमाणे पक्षे शुक्ले पक्षे । वृद्धगर्गः ।

"स्मृतिपूक्तानध्यायान् सप्तमीञ्च त्रयोदशीम् ।
पक्षयोर्माघमासस्य द्वितीयां परिवर्ज्जयेत् ॥"
श्रीपतिव्यवहारसमुच्चये ।
"कार्त्तिकस्याश्विनस्यापि फाल्गुनाषाढ़योरपि ।
कृष्णपक्षे द्वितीयायामनध्यायं विदुर्बुधाः ॥"
मुहूर्त्तबलः ।
"चैत्रकृष्णद्वितीयायां तिसृष्वष्टकासु च ।
मार्गे च फाल्गुने चैव आषाढ़े कार्त्तिके तथा ॥
पक्षयोर्माघमासस्य द्वितीयां परिवर्ज्जयेत् ।
नाकालदृष्टौ कुर्व्वीत व्रतबन्धशुभक्रियाम् ॥"
उपनयने उत्तरायणशुक्लपक्षयोर्विधानात् कार्त्तिकादौ कृष्णपक्षे च द्वितीयानिषेधः पुनःसंस्कारमर्हति इत्युक्तप्रायश्चित्तरूपोपनयनपरः। वैश्योपनयनपरश्च । तथा च गर्गः ।
"विप्रस्य क्षत्त्रियस्यापि मौञ्जी स्यादुत्तरायणे ।
दक्षिणे च विशां कार्य्यं नानध्याये न संक्रमे ।
अनध्यायेऽपि कुर्व्वीत यस्य नैमित्तिकं भवेत् ॥"
अपिना दक्षिणायनकृष्णपक्षयोः समुच्चयः। नैमित्तिकं प्रायश्चित्तरूपम्। चैत्रशुक्लतृतीया आषाढ़शुक्लदशमी मन्वन्तरादित्वेन निषिद्धा। वैशाखशुक्लतृतीया युगादित्वेन निषिद्धा। षष्ठ्यामशुचिरगभार्य्यो रिक्तासु बहुदोषभाक् । सामगानां कुजवारेऽप्युपनयनम् । शाखाधिपत्वात् । यथा च ।
"शाखाधिपे बलिनि केन्द्रगतेऽथवास्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम् ।
नीचस्थितेऽरिगृहगेऽथ पराजिते वा
जीवे भृगावुपनयः स्मृतिकर्म्महीनः ॥"
अस्य शाखाधिपस्य । कृत्यचिन्तामणौ ।
"जन्मोदये जन्मसु तारकासु
मासेऽथवा जन्मनि जन्मभे वा ।
व्रतेन विप्रो न बहुश्रुतोऽपि
विद्याविशेषैः प्रथितः पृथिव्याम् ॥
अस्तं गते दैत्यगुरौ गुरौ वा
क्षयेऽपि वा पापयुतेऽप्युडुक्षे ।
व्रतोपनीतो दिवसैः प्रणाशं
प्रयाति दैवैरपि रक्षितो यः ॥"
उदये लग्ने । व्रतेन उपनयनेन । इति संस्कारतत्त्वम् ॥

यज्युः, त्रि, (यजतीति । यज् + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणा० ३ । २० । इति युच् ।) यजुर्व्वेदवेत्ता ब्राह्मणः । इत्युणादिकोषः ॥ यजमानः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, ऋग्वेदे । १ । ३१ । १३ ।
"त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय ।"
"हे अग्ने त्वं यज्यवे यज्योर्यजमानस्य पायुः पालकः ।" इति तद्भाष्ये सायणः ॥)

यज्वा, [न्] पुं, (यज् + "सुयजोर्ङ्वनिप् ।" ३ । २ । १०३ । इति ङ्वनिप् ।) विधिना इष्टवान् । वेदविधानेन कृतयागः । इत्यमरः । २ । ७ । ८ ॥ (यथा, नैषधचरिते । ३ । २४ ।
"राजा स यज्वा विबुधव्रजत्रा
कृत्वाध्वराज्योपमयैव राज्यम् ।
भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः
पूर्व्वं त्वहो शेषमशेषमन्त्यम् ॥")

यज्वनांपतिः, पुं, चन्द्रः । इति त्रिकाण्डशेषः ॥

यत, ई ङ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । अनिड्निष्ठः ।) ई, यत्तः । ङ, यतते पठितुं शिष्यः । इति दुर्गादासः ॥

यत, क खेदोपस्करयोः । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) खेद इह ताड़नम् । क, यातयति पुत्त्रं पिता ताड़यति इत्यर्थः । यातयति गृहं गृहिणी उपस्करोति इत्यर्थः । निरः प्रत्यर्पणे । प्रत्यर्पणं परीवर्त्तः । निर्यातयति धान्येन माषान् लोकः धान्यं दत्त्वा माषान् गृह्णाति इत्यर्थः । इति दुर्गादासः ॥

यत्, व्य, हेतुः । यस्मात् । इत्यमरः । ३ । ४ । ३ ॥ (यथा, उत्तररामचरिते ।
"अत्र स्थिता तृणमदात् बहुशो यदेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म ॥")

यत्, [द्] त्रि, (यजति सर्व्वैः पदार्थैः सह सङ्गतो भवतीति । यज् + "त्यजितनियजिभ्यो डित् ।" उणा० १ । १३१ । इति अदिः डित् ।) बुद्धिस्थत्वोपलक्षितधर्म्मावच्छिन्नम् । इति न्यायमतं सिद्धान्तकौमुद्युणादिवृत्तिश्च ॥ ये इति भाषा ॥ (एकविंशतिविभक्तिषु पुंलिङ्गे तस्य रूपाणि यथा, यः १ यौ २ ये ३ । प्रथमा । यम् ४ यौ ५ यान् ६ । द्वितीया । येन ७ याभ्याम् ८ यैः ९ । तृतीया । यस्मै १० याभ्याम् ११ येभ्यः १२ । चतुर्थी । यस्मात् १३ याभ्याम् १४ येभ्यः १५ । पञ्चमी । यस्य १६ ययोः १७ येषाम् १८ । षष्ठी । यस्मिन् १९ ययोः २० येषु २१ । सप्तमी ॥ * ॥ स्त्रीलिङ्गे तस्य रूपाणि यथा, या १ ये २ याः ३ । प्रथमा । याम् ४ ये ५ याः ६ । द्वितीया । यया ७ याभ्याम् ८ याभिः ९ । तृतीया । यस्यै १० याभ्याम् ११ याभ्यः १२ । चतुर्थी । यस्याः १३ याभ्याम् १४ याभ्यः १५ । पञ्चमी । यस्याः १६ ययोः १७ यासाम् १८ । षष्ठी । यस्याम् १९ ययोः २० यासु २१ । सप्तमी ॥ * ॥ क्लीवलिङ्गे तस्य रूपाणि । यत् १ ये २ यानि ३ । प्रथमा । यत् ४ ये ५ यानि ६ । द्वितीया । शेषः पुंवत् ॥)

यतः, व्य, (यद् + "पञ्चम्यास्तसिल् ।" ५ । ३ । ७ । इति तसिल् । "तद्धितश्चासर्व्वविभक्तिः ।" १ । १ । ३८ । इति तसिल्प्रत्ययान्तस्याव्ययत्वम् ।) हेतुः । यस्मात् । इत्यमरः । ३ । ४ । ३ ॥ (यथा, मनुः । २ । ११७ ।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥"
यद् + "इतराभ्योऽपि दृश्यन्ते ।" ५ । ३ । १४ । इति तसिल्प्रत्ययेन । येन । यथा, भागवते । २ । ५ । २ ।
"यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ! ॥"
येभ्यः । यथा, भागवते । १ । १५ । २१ ।
"तद्वै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आनमन्ति ॥"
यत्र । यथा, अभिज्ञानशकुन्तले ।
"यतो यतः षट्चरणोऽभिवर्त्तते
ततस्ततः प्रेरितवामलोचना ॥")

यतमः, त्रि, (यत् + "वा बहूनां जातिपरिप्रश्ने डतमच् ।" ५ । ३ । ९३ । इति डतमच् ।) बहूनां मध्ये निर्द्धारित एकः । एषां मध्ये यः । यच्छब्दात् डतमप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥ ("यतमो भवतां कठः ।" इति काशिका ॥)

यतरः, त्रि, (यत् + "किं यत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ।" ५ । ३ । ९२ । इति डतरच् ।) द्वयोर्मध्ये निर्द्धारित एकः । अनयोर्मध्ये यः । यच्छब्दात् डतरप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥ (यथा, ऋग्वेदे ।७।१०४।१२।
"तयोर्यत् सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत् ॥")

यति, त्रि, बहुवचनान्तयावच्छब्दार्थकः । यतगुलि इति भाषा । यच्छब्दात् निपातनात् डतिप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, ऋग्वेदे । १० । २५ । १३ ।
"त्वं वेत्थ यति ते जातवेदः ।"
"यति ते यावन्तस्ते भवन्ति ।" इति तद्भाष्ये सायणः ॥)

यतिः, पुं, (यतते चेष्टते मोक्षार्थमिति । यत् + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) निर्ज्जितेन्द्रियग्रामः । तत्पर्य्यायः । यती २ । इत्यमरः । २ । ७ । ४४ ॥ भिक्षुः ३ संन्यासिकः ४ कर्म्मन्दी ५ रक्तवसनः ६ परिव्राजकः ७ तापसः ८ पाराशरी ९ परिकाङ्क्षी १० मस्करी ११ पारिरक्षकः १२ । इति हेमचन्द्रः ॥ निकारः । विरतिः । इति तत्रैव नानार्थे ॥ * ॥ तस्य वाराणस्यां वासो यथा,—
"अष्टौ मासान् विहारस्स्यात् यतीनां संयतात्मनाम् ।
एकत्र चतुरो मासानब्दं वा निवसेत् पुनः ॥
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते ।
यतिभिर्मोक्षकामैश्च अविमुक्तं निषेव्यते ॥"
इति मात्स्ये अविमुक्तमाहात्म्ये १५९ अध्यायः ॥
यतिधर्म्मो यथा,—
"अलाबुं दारुपात्रञ्च मृन्मयं वैदलं तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥
एककालं चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे ।
भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥

अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्त्तयेत् ॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥
अवेक्षेत गतीर्नृणां कर्म्मदोषसमुद्भवाः ।
निरये चैव पतनं यातनाश्च यमक्षये ॥
विप्रयोगं प्रियैश्चैव संयोगञ्च तथाप्रियैः ।
जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥
देहादुत्क्रमणञ्चास्मात् पुनर्गर्भे च सम्भवम् ।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥
अधर्म्मप्रभवञ्चैव दुःखयोगं शरीरिणाम् ।
धर्म्मार्थप्रभवञ्चैव सुखसंयोगमक्षयम् ॥
सूक्ष्मताञ्चान्ववेक्षेत योगेन परमात्मनः ।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥
दूषितोऽपि चरेद्धर्म्मं यत्र तत्राश्रमे रतः ।
समः सर्व्वेषु भूतेषु न लिङ्गं धर्म्मकारणम् ॥
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ।
न नामग्रहणादेव तस्य वारि प्रसीदति ॥
संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ।
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥
अह्ना रात्र्या च यान् जन्तून् हिनस्त्यज्ञानतो यतिः ।
तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् समाचरेत् ॥
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥
दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ।
उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ।
ध्यानयोगेन सम्पश्येत् गतिमस्यान्तरात्मनः ॥
सम्यग्दर्शनसम्पन्नः कर्म्मभिर्न निवध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्म्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत् पदम् ॥
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्म्मावनद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥
नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम् ॥
यदा भावेन भवति सर्व्वभावेषु निस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥
अनेन विधिना सर्व्वांस्त्यक्ता सङ्गान् शनैः शनैः ।
सर्व्वद्वन्द्वविनिर्म्मुक्तो ब्रह्मण्येवावतिष्ठते ॥
ध्यानिकं सर्व्वमेवैतत् यदेतदभिशब्दितम् ।
न ह्यनध्यात्मवित् कश्चित् क्रियाफलमुपाश्नुते ॥
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकञ्च सततं वेदान्ताभिहितञ्च यत् ॥
इदं शरणमज्ञानामिदमेव विजानताम् ।
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ॥
अनेन क्रमयोगेन परिव्रजति यो द्विजः ।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥”

इति मानवे ६ अध्यायः ॥

(ब्रह्मणः पुत्त्रविशेषः । यथा, श्रीमद्भागवते ।४।८।१ ।
“सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ।
नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्द्ध्वरेतसः ॥”
नहुषपुत्त्रः । यथा, महाभारते ।१।७५।३०।
“यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ।
नहुषो जनयामास षट्सुतान् प्रियवाससि ॥”
विश्वामित्रपुत्त्रः । यथा, महाभारते ।१३।४।५७।
“आराणिर्नाचिकश्चैव चाम्पेयोज्जयनौ तथा ।
नवतन्तुर्वकनखः सयनो यतिरेव च ॥”
त्रि । कर्म्मस्वपरतोऽयष्टा । यथा, ऋग्वेदे । ८।३।९ ।
“येनायतिभ्यो भृगवे धने हिते
येन प्रस्कण्वमाविथ ॥”
“येन सुवीर्य्येण यतिभ्यः कर्म्मस्वपरतेभ्योऽयष्टृभ्यो जनेभ्यः सकाशात् धनमाहृत्य भृगवे महर्षये प्रयच्छसि ।” इति तद्भाष्ये सायणः ॥)

यतिः, स्त्री, (यम्यते रसनानेति । यम् + “स्त्रियां क्तिन् ।” ३ । ३ । ९४ । इति क्तिन् । “अनुदात्तोपदेशवनतितनोत्यादीनामिति ।” ६ । ४ । ३७ । इति मकारलोपः ।) पाठविच्छेदः । इति मेदिनी । ते, ४६ ॥ जिह्वेष्टविश्रामस्थानम् । यथा,—
“यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्व्वाच्या निजेच्छया ॥
क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्व्वकृतिभिः
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ।
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्णः पुष्णात्वतुलमहिमा मां करुणया ॥
श्वेतमाण्डव्यमुख्यास्तु नेच्छन्ति मुनयो यतिम् ।
इत्याह भट्टः स्वग्रन्थे गुरुर्मे पुरुषोत्तमः ॥”

इति छन्दोमञ्जरी । १ । १६—१८ ॥

(नियम्यते इति । यम् + क्तिन् । यतते चेष्टते व्रतादिरक्षार्थं इति वा । यत + “सर्व्वधातुभ्य इन् ।” उणा० ४।११७। इति इन् ।) विधवा । रागः । सन्धिः । इति शब्दरत्नावली ॥ वाद्याङ्गप्रबन्धविशेषः । यथा,—
“यतिरोढ़ाप्यवच्छेदो गजरो रूपकं ध्रुवम् ।
गनपः सारिगोणी च नादश्च कथितं तथा ।
प्रहरणं वृन्दनञ्च प्रबन्धा द्वादश स्मृताः ॥”
यथा दं धातः । इत्येकतालयां यतिः । इति सङ्गीतदामोदरः ॥ (सा त्रिविधा । यथा, मार्कण्डेयपुराणे । २३ । ५३ ।
“चतुर्विधं पदं तालं त्रिःप्रकारं लयत्रयम् ।
यतित्रयं तथा तोद्यं मया दत्तं चतुर्विधम् ॥”)

यतिचान्द्रायणं, क्ली (यतिभिरनुष्ठेयं चान्द्रायणम् ।) व्रतविशेषः । यथा,—
“अष्टावष्टौ समश्नीयात् पिण्डान् मध्यदिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥”

इति मानवे ११ अध्यायः ॥

यतिचान्द्रायणे पादोनधेनुचतुष्टयं तदशक्तौ सपादैकादशकार्षापणाः । इति प्रायश्चित्तविवेकः ॥

यतिनी, स्त्री, (यतं संयमोऽस्या अस्तीति । यत + इनिः । स्त्रियां ङीप् ।) विधवा । यथा,—
“विधवा जालिका रण्डा विश्वस्ता यतिनी यतिः ॥”

इति शब्दरत्नावली ॥

यतिमैथुनं, क्ली, (यतीनां दुष्टयतीनामिव गोपनीयं मैथुनम् ।) यतिगोप्यरतिः । तत्पर्य्यायः । खञ्जनरतम् २ । इति त्रिकाण्डशेषः ॥

यती, स्त्री, (यतिः । कृदिकारादिति स्त्रियां ङीष् ।) विधवा । इति शब्दरत्नावली ॥

यती, [न्] पुं, (यतं संयमोऽस्यास्तीति । यत् + इनिः ।) यतिः । जितेन्द्रियः । इत्यमरः । २ । ७ । ४४ ॥ (यथा, मुग्धबोधे कारकप्रकरणे ।
“दृष्ट्वा दधिं शारुकमेतदर्च्चका-
मुन्नीतवन्तं यतिभिः सुदर्शनम् ॥”)

यतुका, } स्त्री, (यत् + बाहुलकात् उकन् पक्षे
यतूका, } ऊक । स्त्रियां टाप् ।) वृक्षविशेषः । यथा,—
“रजनी स्यात्तु यतुका यतूका जननीति च ॥”

इति शब्दरत्नावली ॥

यत्नः, पुं, (यत + “यजयाचयतविच्छप्रच्छरक्षो नङ् ।” ३ । ३ । ९० । इति नङ् ।) रूपादिचतुर्व्विंशतिगुणान्तर्गतगुणविशेषः । स च त्रिविधः । प्रवृत्तिः १ निवृत्तिः २ जीवनयोनिः ३ । यथा,—
“प्रवृत्तिश्च निवृत्तिश्च तथा जीवनयोनयः ।
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्त्तितम् ॥”
तेषां कारणं यथा,—
“चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥
निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः ।
यत्नो जीवनयोनिस्तु सर्व्वदातीन्द्रियो भवेत् ।
शरीरे प्राणसञ्चारे कारणं तत् प्रकीर्त्तितम् ॥”

इति भाषापरिच्छेदः ॥

उद्योगः । यथा,—
“उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥”

इति हितोपदेशः ॥

यत्नवान्, [त्] त्रि, यत्नविशिष्टः । यत्नशब्दात् वतुप्रत्ययेन निष्पन्नः ॥ (यथा, हरिवंशे ।८६।६।
“कंसेनापि समाज्ञप्तश्चाणूरः पूर्व्वमेव तु ।
योद्धव्यं सह कृष्णेन त्वया यत्नवतेति वै ॥”)

यन्त्र, इ क संकोचने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) दन्त्यवर्गाद्योपधः । इ क, यन्त्रयति मन्त्रेण सर्पं जाङ्गलिकः । यन्त्र

इत्यनेनैवेष्टसिद्धे इदगुवन्धो वेदेपूजाराणभेदार्थः। इति दुर्गादासः॥

यत्र, व, यस्मिन्। येखाने इति भाषा। यच्छब्दात् सप्तम्यास्त्रल्प्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुदी॥ (यथा, श्रीमद्भगवद्गीतायाम्।
"यत्र यत्र मनो देही धारयेत् सकलं धिया।
स्नेहाद्वा यदि वा लोभाद् याति तत्तत् सरूपताम्॥")

यथा, व, सादृश्यम्। साम्यम्। तत्पर्य्यायः। वत् २ वा ३ तथा ४ एव ५ एवम् ६। इत्यमरः। ३। ४। ६॥ (यथा, उत्तररामचरिते। २। ४।
"वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति च।
भवति च तयोर्भूयान् भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः॥")

यथाकामी, [न्] त्रि, (यथा कामयते इति। कामि+णिनिः। यद्वा, काममनतिक्रम्य प्रवृत्तिरस्यास्तीति। यथाकाम+अत इनिठनाविति इनिः।) स्वेच्छाचारी। तत्पर्य्यायः। स्वरुचिः २ स्वच्छन्दः ३ स्वैरी ४ अपावृतः ५ स्वतन्त्रः ६ निरवग्रहः ७। इति हेमचन्द्रः। ३। १९॥ निर्यन्त्रणः ८। इति जटाधरः॥ (यथा, याज्ञवल्क्यसंहितायाम्। १। ८१।
"यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः॥")

यथाक्रमं, व, क्ली, क्रमानुरूपम्। क्रममनतिक्रम्येति व्याकरणम्॥ (यथा, रघुवंशे। ३। १०।
"यथाक्रमं पुंसवनादिकाः क्रियाः
धृतेश्च धीरः सदृशीर्व्यधत्त सः॥")
अपि च।
"यथाक्रमेण पुत्त्रेण कार्य्या प्रेतक्रिया सदा।
पतितापतिता वापि एकोद्दिष्टविधानतः॥"
इति श्राद्धतत्त्वम्॥

यथाजातः, त्रि, (यथा न जातः इति यथाजातः। जातोऽपि पुत्त्रादिरजात इव प्रतीयते विद्यया शौर्य्येण वा न केरपि विदितत्वात्।) मूर्खः। इत्यमरः। ३। १। ४८॥ नीचः। इति जटाधरः॥

यथातथं, व, क्ली, (यथा वर्त्तते तथानतिक्रम्य इति अनतिवृत्तौ अव्ययीभावः। अव्ययीभावश्च। २। ४। १८। इति नपुंसकत्वम्। "ह्रस्वो नपुंसके प्रातिपदिकस्य।" १। २। ४७। इति ह्रस्वः। "नाव्ययीभावादतोऽम्त्वपञ्चम्याः।" २। ४। ८३। इति प्रथमाविभक्तेरमादेशः।) यथार्थम्। इति हारावली॥ (यथा, श्रीमद्भागवते। ६। १। ४१।
"येन स्वधाम्न्यमी भावा रजःसत्त्वतमोमयाः।
गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम्॥")

यथापूर्व्वं, व, क्ली, (पूर्व्वमनतिक्रम्य इत्यव्ययीभावः।) पूर्व्वदिग्देशकालानुरूपम्। यथा,—
"अक्षतायां प्रतिष्ठायां प्राणानां प्रतिमासु च।
यथापूर्व्वं यथा भावः स्वर्गादीनां न विच्युता॥"
इति तिथ्यादितत्त्वधृतकालिकापुराणवचनम्॥

यथासुखीनः, त्रि, (यथासुख+"यथासुखसंमुखस्य दर्शनः खः।" ५। २। ६। इति खः।) सुखप्रतिबिम्बाश्रयः। सुखस्य सदृशं यथासुखं प्रतिबिम्बं निपातनात् सादृश्येऽव्ययीभावः। यथासुखं दर्शनः यथासुखीनः। इति सिद्धान्तकौमुदी॥ अपि च।
"ततश्चिन्त्रीयमाणोऽसौ हेमरत्नमयो मृगः।
यथासुखीनः सीतायाः पुप्लुवे बहु लोभयन्॥"
इति भट्टिः॥
सुखस्य सदृशं यथासुखं दर्पणादिस्थप्रतिबिम्बमुच्यते। सादृश्यार्थेऽव्ययीभावः। इति भरतः॥ निर्म्मलत्वात् सीताया अयतो यथासुखीनः प्रतिबिम्बाश्रय इव भूत्वा पुप्लुवे भ्रमति स्म इवशब्दलोपो द्रष्टव्यः। इति जयमङ्गलः॥

यथायथं, व, क्ली, ("यथास्वे यथायथम्।" ८। १। १४। योऽयमात्मा यच्चात्मीयं तद्यथास्वम्। तस्मिन् यथाशब्दस्य द्वित्वं क्लीवत्वञ्च निपात्यते। यथायथं ज्ञाता यथास्वभावमित्यर्थः यथात्मीयमितिवेति। इति सिद्धान्तकौमुदी।) यथास्वम्। इत्यमरः। ३। ४। १५॥ (अनुरूपम्। यथा, श्रीमद्भागवते। १०। १८। १६।
"तत्रोपाहूय गोपालान् कृष्णः प्राह विहारवित्।
हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम्॥"
"यथायथं वयोवर्णाद्यनुरूपम्।" इति तट्टीकायां श्रीधरस्वामी॥ यथा च,—
"लिङ्गमव्यक्तमल्पत्वात् व्याधीनां तद्यथायथम्॥"
इति वाग्भटे निदानस्थाने प्रथमेऽध्याये॥
"यथायथं यस्य व्याधेर्यद्रूपं तदेवाव्यक्तम्।"
इति तद्व्याख्याने विजयरक्षितः॥)

यथार्थं, व, क्ली, यथातथम्। इत्यमरः। ३।४।१५॥
"द्वे अव्यभिचारिणि। अर्थमनतिक्रान्तं यथार्थं यथास्वरूपं यथातथं उभयत्र अव्ययीभावः। यथार्थमेवेदम्। यथातथं वक्ति सभासु विद्वान्।"
इति भरतः॥ तत्पर्य्यायः।
"सत्यं सम्यक् समीचीनमृतं तथ्यं यथातथम्।
यथास्थितञ्च सद्भूतेऽलीके तु वितथानृते॥"
इति हेमचन्द्रः॥
(यथा, महाभारते। १३। ६। १८।
"कृतश्चापकृतं किञ्चित् कृते कर्म्मणि सिध्यति।
सुकृतं दुष्कृतं कर्म्म न यथार्थं प्रपद्यते॥")

यथार्हं, व, क्ली, (अर्हं योग्यमनतिक्रम्य इत्यव्ययीभावः।) यथायोग्यम्। यथा,—
"कृत्वा तु तौ यथान्यायं यथार्हन्तेन संविदम्।
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ॥"
इति देवीमाहात्म्यम्॥

यथार्हवर्णः, पुं, (यथार्हं यथायोग्यं वर्णयतीति। वर्ण+अण्।) चरः। इत्यमरः। २। ८। १३॥ यथायोग्यमपरं रूपं जानातीत्यस्य॥

यथाशक्ति, व, क्ली, शक्त्यनुसारेण। शक्तिमनतिक्रम्य। इति मुग्धबोधव्याकरणम्॥ (यथा, श्रीमद्भागवते। ६। १२। १६।
"पश्य मां निर्जितं शक्र! वृक्णायुधभुजं मृधे।
घटमानं यथाशक्ति तव प्राणजिहीर्षया॥")

यथाशास्त्रं, व, क्ली, शास्त्रानुसारेण। शास्त्रमनतिक्रम्य। यथा, मलमासतत्त्वे।
"यथाशास्त्रञ्च निर्णीतो यथाव्याधि चिकित्सितः।
न शमं याति यो व्याधिः स ज्ञेयः कर्म्मजो बुधैः॥"

यथास्थितं, त्रि, सत्यम्। इति हेमचन्द्रः। २।१७६॥

यथास्वं, व, क्ली, (स्वमनतिक्रम्येत्यव्ययीभावः।) यथावाञ्छितम्। इत्यमरः॥ (यथा, सुश्रुते चिकित्सास्थाने ८ अध्याये।
"बन्धं ततोऽनुकुर्व्वीत परिषेकन्तु सर्पिषा।
तृतीये दिवसे मुक्त्वा यथास्वं शोधयेद्भिषक्॥")

यथेप्सितं, व, क्ली, (ईप्सितमनतिक्रम्येति।) यथावाञ्छितम्। (यथा, भट्टिकाव्ये। २। २८।
"तान् प्रत्यवादीदथ राघवोऽपि
यथेप्सितं प्रस्तुतकर्म्म धर्म्म्यम्।
तपो मरुद्भिर्भवतां शराग्निः
सन्धुक्ष्यतां नोऽरिसमिन्धनेषु॥")
तत्पर्य्यायः। कामम् २ प्रकामम् ३ पर्य्याप्तम् ४ निकामम् ५ इष्टम् ६। इत्यमरः। २। ९।५७॥ षट् इष्टानतिक्रमे स्वच्छन्दप्रवृत्तौ कामादीनि प्रायः क्रियाविशेषणानि क्रियाविशेषणत्वात् क्लीवत्वमेषाम्। ईप्सितस्यानतिक्रमो यथेप्सितमित्यव्ययीभावः। इति भरतः॥

यथेष्टं, व, क्ली, इष्टमनतिक्रम्य। यथेप्सितम्। यथा,—
"कुर्य्युर्यथेष्टं तत् सर्व्वमीशास्ते स्वधनस्य वै॥"
इति दायभागः॥

यथेष्टचारी, [न्] पुं, (यथेष्टं चरतीति। चर+णिनिः।) पक्षी। इति शब्दचन्द्रिका॥

यथेष्टाचरणः, त्रि, (यथेष्टं आचरणं यस्य।) यथेष्टाचारी। यथा,—
"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम्॥"
यथेष्टाचरणस्य द्यूतवेश्याद्यासक्तस्य। इति शुद्धितत्त्वम्॥

यथेष्टाचारी, [न्] पुं, स्वेच्छाचारी। यथेष्टमाचरितुं शीलमस्य इत्यर्थे इन्प्रत्ययेन निष्पन्नः॥

यथोचितं, व, क्ली, (उचितमनतिक्रम्येति।) यथायोग्यम्। यथाप्राप्तम्। यथा। "भ्रेषो भ्रंशो यथोचितात्।" इत्यमरः। २।८।२३॥ (यथा च श्रीमद्भागवते। ४। २२ ५०।
"कर्म्माणि च यथाकालं यथादेशं यथाबलम्।
यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतम्॥"
त्रि, यथोचितमस्यास्तीति। अर्श आद्यच्। यथार्हः। यथा, मार्कण्डेये। १६। ३८।
"वयमाप्यायिता मर्त्यैर्यज्ञभागैर्यथोचितैः।
तृष्णा तानप्युत्क्षीमो मर्त्यान् शस्त्रादिसिद्धये॥")

यथोदितं, व्य, क्लो, (उदितं कथितमनतिक्रम्य इत्यव्ययीभावः ।) यथोक्तम् । यथा,—
"यथोदितन्ते पितृभिः कुरु दारपरिग्रहम् ॥"
इति मार्कण्डेयपुराणे रुचिस्तोत्रम् ॥

यदा, व्य, (यस्मिन् काले इति । यद् + "सर्व्वैकान्यकिंयत्तदः काले दा ।"५।३।१५। इति दा ।) यस्मिन् काले । यथा,—
"यदा यदा सतां हानिर्व्वेदमार्गानुसारिणाम् ।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥"
इति तिथ्यादितत्त्वधृतवचनम् ॥

यदि, व्य, पक्षान्तरम् । सम्भावना । तत्पर्य्यायः । चेत् २ यद्युवा ३ । यथा,—
"यदीच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ ॥"
इति मलमासतत्त्वम् ॥
"अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥"
इति श्रीभगवद्गीता ॥
"यद्युवाल्पतरसम्भारः स्यादपि पशुनैव कुर्य्यात् इति । यद्युवेति निपातसमुदायो यद्यर्थे ।" इति तिथ्यादितत्त्वम् ॥

यदीयं, त्रि, (यस्येदमिति । यद् + "वृद्धाच्छः ।" ४ । २ । ११४ । इति छः ।) यत्सम्बन्धि । यथा,
"यदीयहलतो विलोक्य विपदं
कलिन्दतनया जलोद्धतगतिः ।
विलासविपिनं विवेश सहसा
करोतु कुशलं हली स जगताम् ॥"
इति छन्दोमञ्जर्य्यां द्वितीयस्तवकः ॥

यदुः, पुं, (यजते इति । यज् + उः । पृषोदरादित्वात् जस्थाने दकारः ।) देवयान्यां जातो ययातेर्ज्येष्ठपुत्त्रः । तस्य वंशे पितृशापात् राजा-चक्रवर्त्ती नासीत् । तद्वंशे द्वापरयुगस्यान्ते श्रीकृष्णोऽवतीर्णः । इति श्रीभागवतमतम् ॥ तस्य मातुलकन्याविवाहकारणं यथा,—
"जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव ह ।
पुत्त्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः ॥
त्वं यदो ! प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा संप्रतिपत्स्यामि पाप्मानं जरया सह ॥
यदुरुवाच ।
सितश्मश्रुधरो दीनो जरया शिथिलीकृतः ।
वलीसन्ततगात्रश्च दुर्द्दर्शो दुर्ब्बलः कृशः ॥
अशक्तः कार्य्यकरणे पापभूतश्च यौवने ।
सहोपजीविभिश्चैव तां जरां नैव कामये ॥
सन्ति ते बहवः पुत्त्रा मत्तः प्रियतरा नृप ! ।
जरां ग्रहीतुं धर्म्मज्ञ ! पुत्त्रमन्यं वृणीष्व वै ॥
ययातिरुवाच ।
यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
पापान्मातुलसम्बन्धात् प्रजा वै ते भविष्यति ॥"
इति मात्स्ये ३१ अध्यायः ॥ * ॥
(हर्य्यश्वराजपुत्त्रः । यथा, हरिवंशे । ९३।४४ ।
"तस्यैवं सुप्रवृत्तस्य पुत्त्रकामस्य धीमतः ।
मधुमत्यां सुतो जज्ञे यदुर्नाम महायशाः ॥")

यदुनाथः, पुं, (यदूनां नाथः ।) श्रीकृष्णः । इति हेमचन्द्रः । २ । १३३ ॥

यदुपतिः, पुं, (यदूनां पतिः ।) श्रीकृष्णः । यथा—
"यदुपतेः क्व गता मथुरापुरी
रघुपतेः क्व गतोत्तरकोशला ।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय ॥"
इति रूपसनातनगोस्वामिनौ ॥

यदृच्छा, स्त्री, स्वातन्त्र्यम् । तत्पर्य्यायः । स्वैरिता २ । इत्यमरः ।३।२।२॥ स्वरिता ३ । इति तट्टीका ॥ (यथा, गीतायाम् । २ । ३२ ।
"यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्त्रियाः पार्थ ! लभन्ते युद्धमीदृशम् ॥")

यद्युवा, व्य, यदि । यथा । "यद्युवाल्पतरसम्भारः स्यादपि पशुनैव कुर्य्यात् । यद्युवेति निपातसमुदायो यद्यर्थे । अपि च । यद्युवा उभयं चिकीर्षेद्धौत्रं ब्रह्मत्वञ्च इति तेनैव कल्पेन छत्रमुत्तरासङ्गं सोदकं कमण्डलुं दर्भवटुं वा ब्रह्मासने निधाय तेनैव प्रत्यावृत्यान्यच्चरेत् ।" इति तिथ्यादितत्त्वम् ॥

यद्वा, स्त्री, बुद्धिः । इति संक्षिप्तसारोणादिवृत्तिः ॥ पक्षान्तरञ्च ॥

यन्ता, [ऋ] पुं, (यम् + तृच् ।) सारथिः । (यथा, रघौ । ७ । ४४ ।
"प्रहारमूर्च्छापगमे रथस्था
यन्तॄनुपालभ्य निवर्त्तिताश्वान् ।
यैः सादिता लक्षितपूर्व्वकेतून्
तानेव सामर्षतया निजघ्नुः ॥)
हस्तिपकः । इत्यमरः । २ । ८ । ५९ ॥ (यथा, माघे । ५ । ४२ ।
"सेव्योऽपि सानुनयमाकलनाय यन्त्रा
नीतेन वन्यकरिदानकृताधिवासः ।
नाभाजि केवलमभाजि गजेन शाखी
नान्यस्य गन्धमपि मानभृतः सहन्ते ॥")
विरतिकारके, त्रि ॥

यन्त्रं, क्ली, (यच्छत्यनेनेति । यम + "गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः ।" उणा० ४ । १६६ । इति त्रः ।) देवाद्यधिष्ठानम् ॥ (यथा, देवीभागवते । ३ । २६ । २१ ।
"अर्च्चाभावे तथा यन्त्रं नवार्णमन्त्रसंयुतम् ।
स्थापयेत् पीठपूजार्थं कलसं तत्र पार्श्वतः ॥")
पात्रभेदः । नियन्त्रणम् । इति हेमचन्द्रः ॥ अग्नियन्त्रम् । इति महाभारतटीकायां नीलकण्ठः ॥ कामान् वन्दूक इत्यादि भाषा ॥ * ॥ वाद्यम् । यथा,—
"यन्त्रस्य गुणदोषौ न विचार्य्यौ मधुसूदन ! ।
अहं यन्त्रं भवान् यन्त्री न मे दोषा न मे गुणाः ॥"
इति महाभारतम् ॥
दारुयन्त्रादि । कल इति भाषा । यथा,—
"ईश्वरः सर्व्वभूतानां हृद्देशेऽर्ज्जुन ! तिष्ठति ।
भ्रामयन् सर्व्वभूतानि यन्त्रारूढानि मायया ॥"
इति श्रीभगवद्गीतायाम् । १८ । ६१ ॥
अस्यार्थः ।"सर्व्वभूतानां हृन्मध्ये ईश्वरोऽन्तर्यामी तिष्ठति । किं कुर्व्वन् सर्व्वाणि भूतानि मायया निजशक्त्या भ्रामयंस्तत्तत्कर्म्मसु प्रवर्त्तयन् यथा दारुयन्त्रमारूढानि कृत्रिमाणि भूतानि सूत्रधारो लोके भ्रामयति तद्वदिति । यद्वा यन्त्राणि शरीराणि आरूढानि भूतानि देहाभिमानिनो जीवान् भ्रामयन्नित्यर्थः ।" इति श्रीधरस्वामी ॥
अथ पूजाधारयन्त्रम् । तत्र नारदीये ।
"आपोऽग्निर्हृदयं चक्रं विष्णोः क्षेत्रसमुद्भवम् ।
यन्त्रञ्च प्रतिमास्थानमर्च्चने सर्व्वदा हरेः ॥"
गौतमीये ।
"शालग्रामे मणौ यन्त्रे प्रतिमामण्डलेषु च ।
नित्यं पूजा हरेः कार्य्या न तु केवलभूतले ॥"
योगिनीतन्त्रे ।
"लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च ।
मण्डलस्थां महामायां यन्त्रस्थां प्रतिमासु च ।
जलस्थां वा शिलास्थां वा पूजयेत् परमेश्वरीम् ॥"
एतत् सर्व्वं यन्त्राभावे । कौलावलीये ।
"यत्रापराजितापुष्पं जवापुष्पञ्च विद्यते ।
करवीरे शुक्लरक्ते द्रोणं वा यत्र तिष्ठति ।
तत्र देवी वसेन्नित्यं तद्यन्त्रे चण्डिकार्च्चनम् ॥"
एतत् सर्व्वयन्त्राभावे । तथा च ।
"यन्त्रं मन्त्रमयं प्रोक्तं मन्त्रात्मा देवतैव हि ।
देहात्मनोर्यथा भेदो यन्त्रदेवतयोस्तथा ॥"
तथा ।
"आदौ लिखेद्यन्त्रराजं देवतायाश्च विग्रहम् ।
कामक्रोधादिदोषोत्थसर्व्वदुःखनियन्त्रणात् ॥
यन्त्रमित्याहुरेतस्मिन् देवः प्रीणाति पूजितः ।
विना यन्त्रेण पूजायां देवता न प्रसीदति ॥
दुःखनिर्यन्त्रणाद्यन्त्रमित्याहुस्तत्त्ववेदिनः ॥"
इति यन्त्रपूजाप्राधान्यम् ॥ * ॥
अथ धारणयन्त्राणि । तत्रादौ भुवनेश्वरीयन्त्रम् । शारदायाम् ।
"आलिख्याष्टदिगर्गलान्युदरगं पाशादिकं चाचरं
कोष्ठेष्वङ्गमनून् परेषु विलिखेद्दशार्णमन्त्रद्वयम् ।
अथ पूर्व्वापरषट्कयुग् लयवरान् व्योमासनानर्गले-
ष्वालिख्येन्द्रजलाधिपादिगुणशः पंक्तिद्वयात्तत्परम् ॥
कोष्ठेष्वष्टयुगार्णमात्मसहितां युग्मस्वरान्तर्गतां
मायां केशरगां दलेषु विलिखेन्मन्त्रं त्रिपंक्तिक्रमात् ।
त्रिः पाशाङ्कुशवेष्टितञ्च लिपिभिर्व्वीतं क्रमाद्व्युत्क्रमात्
पद्मस्थेन घटेन पङ्कजमुखेनावेष्टितं तद्वहिः ॥"
घटार्गलमिदं यन्त्रं मन्त्रिणां श्रीप्रदं महत् ।
पाशश्रीशक्तिकन्दर्पकामशक्तीन्दिराङ्कुशाः ॥
प्रथमोऽष्टाक्षरो मन्त्रस्ततः कामिनि रञ्जिनि ।
स्वाहान्तोऽष्टाक्षरः सद्भिरपरः परिकीर्त्तितः ॥

ह्रीं गौरि रुद्रदयिते योगेश्वरि सवर्म्मफट्।
द्विठान्तः षोड़शार्णोऽयं मन्त्रः सद्भिरुदीरितः ॥"
इति घटार्गलयन्त्रम् ॥*॥
"तारे हुं विलिखेत् वरोनकुहरे साध्याभिधानान्वितं
मन्त्रार्णान् वसुसंख्यकान् वसुदलेष्वालिख्य तद्बाह्यतः।
शक्त्या त्रिः परिवेष्टितं घटगतं पद्मस्थमन्त्रान्वितं
यन्त्रं वश्यकरं ग्रहादिभयहृल्लक्ष्मीप्रदं कीर्त्तिदम् ॥"
इति त्वरितायन्त्रम् ॥ * ॥
"पद्मं भानुदलान्वितं प्रविलिखेत् तत्कर्णिकायां पुनस्तारं शक्तिगबीजसाध्यसहितं तत्केशरेषु क्रमात्।
मर्द्दिन्यामनुसम्भवान् युगलशो वर्णान् पुनः पत्रगान्
मन्त्रार्णान् गुणशो विधाय विलिखेदन्त्यं तदन्त्ये दले ॥"
मन्त्रस्तु। [स्थितम्।
"उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपयदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥
मातृकार्णेन संवीतं भूपुरद्वयमध्यगम्।
यन्त्रञ्च विन्ध्यवासिन्याः प्रोक्तं सर्व्वसमृद्धिदम् ॥
रक्षाकरं विशेषेण क्षुद्रभूतादिनाशनम्।
राज्यदं भ्रष्टराज्यानां वश्यदं वश्यमिच्छताम् ॥
सुतार्थिनीनां सुतदं रोगिणां रोगशान्तिदम्।
बहुना किमिहोक्तेन यन्त्रं यत् कामदो मणिः ॥"
इति वनदुर्गायन्त्रम् ॥*॥
अथ लक्ष्मीयन्त्रम्।
"वेदादिस्थितसाध्यनामयुगशः श्रीशक्तिमारान्वितं
किञ्जल्केषु दिनेशपत्रविलसन्मन्त्राक्षरं तद्बहिः।
पद्मं व्यञ्जनकेशरं स्वरलसत्पत्राष्टयुग्मं धराविम्बाभ्यां वषडन्तया त्वरितया यन्त्रं लिखेद्वेष्टितम्।
भूपुरद्वयकोणेषु हसौ लेख्यौ पुनः पुनः।
महालक्ष्मीयन्त्रमिदं सर्व्वैश्वर्य्यफलप्रदम् ॥
सर्व्वदुःखप्रशमनं सर्व्वापद्विनिवारकम्।
बहुना किमिहोक्तेन परमस्मान्न विद्यते ॥"*॥
अथ त्रिपुरभैरवीयन्त्रम्। [त्रिशो
"मध्याद्यं नवयोनिषु प्रविलिखेद्बीजानि वर्णात्रिशो
गायत्र्याः पुनरष्टपत्रविवरेष्वालिख्य लिप्यावृतम्।
भूविम्बद्वितयेन मन्मथयुजा कोणेषु संवेष्टितं
यन्त्रं त्रैपुरमीरितं त्रिभुवनप्रक्षोभणं श्रीप्रदम् ॥"
गायत्री तु।
"मन्मथं त्रिपुरादेवि विद्महे पदमुद्धरेत्।
उक्त्वा कामेश्वरिपदं प्रवदेदथ धीमहि ॥
अन्ते च प्रवदेद्भूयस्तन्नः क्लिन्ने प्रचोदयात्।
गायत्र्येषा समाख्याता त्रैपुरी सर्व्वसिद्धिदा ॥"
यन्त्रान्तरम्।
"वह्नेर्गेहयुगान्तरस्थमदने मायां लिखेद्वाग्भवं
षट्कोणेष्वथ सन्धिषु प्रविलिखेत् हुंकारमावेष्टितम्।
स्त्रींबीजेन समीरितं त्रिभुवनप्रक्षोभणं त्रैपुरं
यन्त्रं पञ्चमनोभवात्मकमिदं सौन्दर्य्यसम्पत्करम् ॥"
इति त्रिपुरायन्त्रम् ॥*॥
अथ श्रीविद्यायन्त्रम्।
"विशेषं धारणं यन्त्रं प्रसङ्गात् कथयामि ते ॥
रेफहकारयोर्मध्ये देवीनामभिसंख्यकम्।
साध्यनाम द्वितीयान्तं तस्योर्द्ध्वे विलिखेन्मनुम् ॥
तत्रैव मातृकां सर्व्वां विलिखेच्चक्रबाह्यतः।
पञ्चगव्यान्वितेनैव सूत्रेण परिवेष्टयेत् ॥
तत्र प्राणं प्रतिष्ठाप्य विद्यामष्टोत्तरं शतम्।
तत् स्पृष्ट्वा प्रजपेन्मन्त्रं देवीध्यानपरायणः ॥
हेम्नो मध्यगतं कृत्वा रजतस्याथवा पुनः।
करे धृत्वा जगद्वश्यं हृदये स्त्रीषु वल्लभम् ॥
कण्ठे धनं लभेद्बाहौ स्तम्भनं जम्भनं भवेत्।
शिखायां मोक्षमाप्नोति तस्माद्यत्नेन धारयेत् ॥"*॥
अथ गणेशयन्त्रम्।
"बीजं षट्कोणमध्ये स्फुरदनलपुरे तारगं दिक्षु लक्ष्मीमायाकन्दर्पभूमीस्तदनुरसपुटेष्वालिखेद्बीजषट्कम्।
तत्सन्धिष्वङ्गमन्त्रान् वसुदलकमले मूलमन्त्रस्य वर्णान्
शिष्टान् पत्रेषु विद्वान् विलिखतु गुणशश्चान्त्यमन्त्ये पलाशे ॥
आवीतं लिपिभिः क्रमोत्क्रमवशात् पाशाङ्कुशाभ्यामपि
भूविम्बद्वितयेन वेष्टितमिदं यन्त्रं गणाधीशितुः।
लाक्षाकुङ्कुमरोचनामृगमदैर्भूर्जोदरे हेम्नि वा
संलिख्याभिवहन् लभेत सकलैः संप्रार्थनीयां श्रियम् ॥
उक्तं महागणपतेर्व्विधानं सुरपूजितम्।
सर्व्वसिद्धिकरं पुंसां समस्तपुरुषार्थदम् ॥"*॥
अथ श्रीरामयन्त्रम्।
"तारं मध्ये विलिखतु मनुं षट्सु कोणेषु सन्धिष्वङ्गं मायां स्मरमपि लिखेत् कोणगण्डेषु पश्चात्।
किञ्जल्केषु स्वरगणमतो पत्रमध्येषु मालामन्त्रस्यार्णान् गुहसुखमितानष्टमे पञ्चवर्णान् ॥
दशाक्षरेण संवेष्ट्य कादिवर्णैश्च भूपुरे।
दिग्विदिक्षु लिखेद्बीजे नरसिंहवराहयोः ॥
नमो भगवते ब्रूयाच्चतुर्थ्या रघुनन्दनम्।
रक्षोघ्नविषदायान्ते मधुरादि समीरयेत् ॥
प्रसन्नवदनायेति पश्चादमिततेजसे।
बलाय पश्चाद्रामाय विष्णवे तदनन्तरम्।
प्रणवादिनमोऽन्तोऽयं मालामन्त्रः प्रकीर्त्तितः ॥"
अथ नृसिंहयन्त्रम्।
"बीजं साध्यसमन्वितं प्रविलिखेन्मध्येऽष्टपत्रेष्वथो
मन्त्रार्णान् श्रुतिशो विभज्य विलिखेल्लिप्या बहिर्व्वेष्टयेत्।
बाह्ये कोणगबीजवह्निवसुधागेहद्वयेनावृतं
यन्त्रं क्षुद्रविषग्रहामयरिपुप्रध्वंसनं श्रीप्रदम् ॥"*॥
अथ गोपालयन्त्रम्। [षड़र्णं
"पिण्डं मूलेन वीतं दहनपुरयुगे कोणराजत्षड़र्णं
कुर्य्यात् पद्मं दशार्णस्फुरितदशदलं कामबीजेन वीतम्।
पद्मं किञ्जल्कसंस्थस्वरविलसितदलप्रोल्लसत्षोड़शार्णं
किञ्जल्कयक्षनाट्यं विलसितयुगदलेष्वर्पितानष्टवर्णान् ॥
पाशाङ्कुशाभ्यामावीतं क्षौणीपुरयुगाश्रिषु।
अष्टाक्षरेण लक्षितं यन्त्रं गोपालदैवतम् ॥
धर्म्मार्थकामफलदं सर्व्वरक्षाकरं स्मृतम्।
पश्चान्तको धरासंस्थो मनुर्बिन्दुविभूषितः ॥
पिण्डबीजमिदं प्रोक्तं सर्व्वसिद्धिकरं परम्।
स्मरः कृष्णाय ठद्वन्द्वं षड़र्णो मनुरीरितः ॥
गोपीजनान्ते प्रवदेद्वल्लभायाग्निवल्लभा।
अयं दशाक्षरो मन्त्रो दृष्टादृष्टफलप्रदः ॥
प्रणवं हृदयं कृष्णं ङेऽन्तमुक्त्वा ततः परम्।
तादृशं देवकीपुत्त्रं हुंफट्स्वाहासमन्वितम्।
षोड़शाक्षरमन्त्रोऽयं गोविन्दस्य जगत्पतेः ॥
पिण्डं रतिपतेर्ब्बीजं नमो भगवते ततः।
नन्दपुत्त्राय बालादिवपुषे श्यामलाय च ॥
गोपीजनपदस्यान्ते वल्लभाय द्विठावधि।
अनुष्टुप् मन्त्र आख्यातो गोपालस्य जगत्पतेः ॥
अनङ्गः कृष्णगोविन्दौ ङेऽन्तावष्टाक्षरो मनुः ॥"
इति गोपालयन्त्रम् ॥ * ॥
अथ गोपालस्य यन्त्रान्तरम्।
"प्राक् प्रत्यक् दक्षिणोदक् विधिवदभिलिखेत् स्पष्टरेखाचतुष्कं
कोणोद्यच्छूलयुक्तं वलययुगयुतं मध्यपूर्व्वं तदन्तम्।
श्लोकस्यार्णान् पुरस्ताद्वसुपदविवरेष्वष्टवर्णं लिखित्वा
तद्बाह्ये द्वादशार्णैस्तदनुपरिवृतं देवकीपुत्त्रयन्त्रम् ॥
तं सुकी देव देवेतं तं वेदे वरतो वनम्।
तं वर्ता रूढ़तो ख्यातं तं ख्यातो देवकीसुतम् ॥
लिखितं भूर्ज्जपत्रादौ यन्त्रमेतद्यथाविधि।
विधृतं बाहुना नित्यं सर्व्वकामफलप्रदम् ॥
पलाशवृक्षफलके लिखितं साधु साधितम्।
गोस्थाने निखनेदेतत् गवां वृद्धिर्भवेत्तदा ॥"*॥
अथ शिवयन्त्रम्। तत्रादौ षट्कोणमण्डलं कृत्वा तदन्तः साध्यनामयुक्तं प्रासादबीजं विलिख्य षट्कोणेषु प्रणवसहितपञ्चाक्षरवर्णान् विलिख्य विवरेषु षड़ङ्गमन्त्रान् तद्बहिः पञ्चदलानि विरचय्य तद्दलेषु ॐ ईशानाय नमः ॐ तत्पुरुषाय नमः ॐ अघोराय नमः

ॐ सद्योजाताय नमः ॐ वामदेवाय नमः । इति पञ्चमन्त्रान् प्रागादिक्रमेण लिखेत् । तद्बहिरष्टदलानि रचयित्वा तद्दलेषु मातृकावर्णान् लिखेत् । तद्बहिर्वृत्तं त्र्यम्बकेन वेष्टयेत् । एतद्यन्त्रं जपहोमादिना सम्पूज्य धारयेत् । आयुरारोग्यैश्वर्य्यादिसिद्धिर्भवति ॥ * ॥ अथ मृत्युञ्जयस्य यन्त्रम् ।

"मध्ये साध्याक्षराढ्यं भुवमभिविलिखेन्मध्यमं दिग्दलेषु
कोणेष्वन्त्यं मनोस्तत् क्षितिभुवनमथो दिक्षु चन्द्रं विदिक्षु ।
टान्तं यन्त्रं तदुक्तं सकलभयहरं क्ष्वेड़भूतापमृत्युव्याधिव्यामोहदुःखप्रशमनमुदितं श्रीप्रदं कीर्त्तिदायि ॥" * ॥

अथकाणीयन्त्रम् । यामले ।

"आद्यं बीजंससाध्यं प्रथमवसुगृहे तद्बहिश्चाष्टकोणे
पूर्व्वाद्यं चाष्टबीजं तदनु वसुदलद्वन्द्वके बीजषट्कम् ।
किञ्जल्कं तत् स्वराढ्यं वसुदलविवरे स्वाहया बीजषट्कं
कूर्चाभ्यामेव वीतं क्षितिगृहयुगयोरन्तरे यन्त्रराजम् ॥
देवीबीजत्रयं तत् प्रतिदिशमपरं शक्तिबीजद्वयं तत्
कोणे कोणे लिखेद्यस्त्रिजगति स गुरुः शङ्करस्यापि विष्णोः ॥"

अथ शान्तिकादौ ताराधारणयन्त्रम् । तदुक्तं फेत्कारीये ।

"योनियुग्मे लिखेन्मन्त्रं मन्त्री हेमशलाकया ।
जीवहीनान् दीर्घवर्णान् षट्कोणे विलिखेत्ततः ॥
अष्टपत्रेष्वष्टवर्णान् तद्बहिर्भूपुरद्वयम् ।
अष्टवज्रं भूपुरे च विलिख्य साधकोत्तमः ॥
सुवर्णपट्टे भूर्ज्जे वा रूप्ये वाप्यथ सुव्रते ।
विलिखेद्धेमलेखन्या गन्धाष्टकसमन्वितम् ॥
दूर्व्वाकाण्डेन वालिख्य कुशमूलेन वा पुनः ॥"

एकवीराकल्पे ।

"वेष्टितं पीतवस्त्रेण जतुना परिवेष्टयेत् ॥
बध्नीयात् पट्टसूत्रेण शिशूनां कण्ठभूषणम् ।
स्त्रीणां वामभुजे चैवमन्येषां दक्षिणे भुजे ।
बन्ध्यापि लभते पुत्त्रं निर्धनो धनवान् भवेत् ॥
इमां रक्षां पुरा बध्वा त्राणार्थं गौतमादिभिः ।
प्रीत्यर्थं पार्थिवेश्चान्यैः संग्रामे जयकाङ्क्षिभिः ॥"

अस्यार्थः । योनियुग्मे षट्कोणे । तस्य मध्ये हेमशलाकादिना भूर्ज्जपत्रादौ कुङ्कुमरोचनारक्तचन्दनजटामांसीनां समांशं विधाय पङ्क्तिक्रमेण मूलमन्त्रं लिखित्वा तस्य हृल्लेखारेफमध्ये अमुकस्य रक्षां कुरु कुरु अमुकीनां शुभं पुत्त्रमुत्पादयेति वा अस्य त्राणं कुरु कुरु इत्यादि वा साध्यसहितं विलिख्य षट्कोणे जीवभिन्नान् दीर्घवर्णान् आ ई ऊ ऐ औ अः इत्येकैकं लिखेत् । तदुक्तम् ।

"स्वराणां मध्यमं यच्च तच्चतुष्कं नपुंसकमिति ।"

अष्टपत्रेष्वष्टवर्णान् । ऐं ह्रीं ॐ ऐं ह्रीं फट् स्वाहेति लिखेत् । तदुक्तम् ।

"वाग्भवं कुलदेवीञ्च तारकं वाग्भवं तथा ।
हृल्लेखा चास्त्रमन्त्रान्ते वह्निजायावधिर्मनुः ॥
अष्टाक्षरो मनुः प्रोक्तो मन्त्राणां सार ईरितः ॥"

अथ यन्त्रलिखनद्रव्यम् ।

"काश्मीररोचनालाक्षाम्ब्गेभमदचन्दनैः ।
विलिखेद्धेमलेखन्या यन्त्राण्येतानि देशिकः ॥
भूमिस्पृष्टं शवस्पृष्टं यन्त्रं निर्म्माल्यसङ्गतम् ।
विदीर्णं लङ्घितं मन्त्री यन्त्रं नैव च धारयेत् ॥
सौवर्णे राजते पात्रे भूर्जे वा सम्यगालिखेत् ।
अथवा ताम्रपट्टे वा गुटिकां कृत्य धारयेत् ॥
यावज्जीवं सुवर्णे स्यात् रौप्ये विंशतिवार्षिकम् ।
भूर्ज्जे द्वादश वर्षाणि तदर्द्धं ताम्रपट्टके ॥"

इति तन्त्रसारः ॥ * ॥

अन्यत् कालिकापुराणे ७७।७८।७९ अध्यायेषु द्रष्टव्यम् ॥ * ॥ अथ यन्त्रसंस्कारः । वामकेश्वरतन्त्रे ।

"स्नात्वा संकल्पयेन्मन्त्री गुरोरर्चनमाचरेत् ।
पञ्चगव्यं ततः कृत्वा शिवमन्त्रेण मन्त्रितम् ॥
तत्र चक्रं क्षिपेन्मन्त्री प्रणवेन समाकुलम् ।
तदुद्धृत्य ततश्चक्रं स्थापयेत् स्वर्णपात्रके ॥
पञ्चामृतेन दुग्धेन शीतलेन जलेन च ।
चन्दनेन सुगन्धेन कस्तूरीकुङ्कुमेन च ॥
पयोदधिघृतक्षौद्रशर्करादैरनुक्रमात् ।
तोयधूपान्तरैः कुर्य्यात् पञ्चामृतविधिं बुधः ॥
हाटकैः कलसैर्द्देवीमष्टभिर्व्वारिपूरितैः ।
कषायजलसम्पन्नैः कारयेत् स्नानमुत्तमम् ॥
स्नानं समाप्य तां देवीं स्थापयेत् स्वर्णपाठके ।
यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात् ॥
स्पृष्ट्वा यन्त्रं कुशाग्रेण गायत्र्या चाभिमन्त्रयेत् ।
अष्टोत्तरशतं देवि ! देवताभावसिद्धये ॥
आत्मशुद्धिं ततः कृत्वा षड़ङ्गैर्द्देवतां यजेत् ।
तत्रावाह्य महादेवीं जीवन्यासञ्च कारयेत् ॥
उपचारैः षोड़शभिर्म्महामुद्रादिभिः सदा ।
फलताम्बूलनैवेद्यैर्द्देवीं तत्र समर्च्चयेत् ॥
पट्टसूत्रादिकं दद्यात् वस्त्रालङ्कारमेव च ।
अगुरुं चामरं घण्टां यथायोग्यं महेश्वरि ! ।
सर्व्वमेतत् प्रयत्नेन दद्यादात्महिते रतः ॥
ततो जपेत् सहस्रञ्च सकलेप्सितसिद्धये ।
बलिदानं ततः कृत्वा प्रणमेच्चक्रराजकम् ॥
अष्टोत्तरशतं हुत्वा सम्पाताज्यं विनिःक्षिपेत् ।
होमकर्म्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत् ॥
धेनुमेकां समानीय स्वर्णशृङ्गाद्यलङ्कृताम् ।
गुरवे दक्षिणां दद्यात् ततो देव्या विसर्ज्जनम् ॥"

अस्य प्रयोगः । कृतनित्यक्रियः स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकदेवतायाः पूजार्थं अमुकयन्त्रसंस्कारमहं करिष्ये । इति संकल्प्य पञ्चगव्यमानीय हौमितिमन्त्रेणाष्टोत्तरशतं अभिमन्त्र्य प्रणवेन यन्त्रं तत्र क्षिपेत् । तत उत्तोल्य स्थापयेत् । ततः शीतलजलचन्दनगन्धकस्तूरीकुङ्कुमैः स्नापयित्वा पञ्चगव्यमानीय हौमिति मन्त्रेणाष्टोत्तरशतमभिमन्त्र्य प्रणवेन पूर्व्ववत् शोधयित्वा स्नापयेत् । तत्र क्रमः । प्रथमं क्षीरेण स्नापयित्वा धूपं दद्यात् । एवं दध्ना घृतेन मधुना शर्करया च । ततोऽष्टभिः कलसैः कुङ्कुमगोरोचनाचन्दनमिश्रितैस्तोयैः स्नापयेत् । सर्व्वत्र स्नानं मूलमन्त्रेण ततो यन्त्रमुत्तोल्य कुशाग्रेण तत् स्पृष्ट्वा यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात् । इत्यष्टोत्तरशतमभिमन्त्र्य प्राणप्रतिष्ठां कुर्य्यात् । अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषय ऋग्यजुःसामानि छन्दांसि चैतन्यं देवता प्राणप्रतिष्ठायां विनियोगः । तद्यथा । आं ह्रीं क्रों यं रं लं वं शं षं सं हौं हं सः अमुकदेवतायाः प्राणा इह प्राणाः । एवं आमित्यादि अमुकदेवतायाः जीव इह स्थितः । एवं आमित्यादि अमुकदेवतायाः सर्व्वेन्द्रियाणि । एवं आमित्यादि अमुकदेवताया वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । इति प्राणान् प्रतिष्ठाप्य तत्र प्रकृतदेवतामावाह्य षोड़शोपचारैः पञ्चोपचारैर्व्वा पूजयेत् । ततः पट्टसूत्रादिकं दत्त्वा अष्टोत्तरशतं जप्त्वा शक्तश्चेत् बलिं दद्यात् । ततोऽष्टोत्तरशतहोमं कृत्वा प्रत्याहुतिसम्पातं दद्यात् । होमाभावे द्विगुणजपः कार्य्यः । ततो दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात् । इति तन्त्रसारः ॥ * ॥ औषधपाकार्थयन्त्राणि यथा,—

"भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके ।
कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते ॥
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम् ॥"

इति वालुकायन्त्रम् ॥

"निबद्धमौषधं सूतं भूर्ज्जे तत्त्रिगुणाम्बरे ।
रसपोटलिकां काष्ठे दृढं बद्धा गुणेन हि ॥
सन्धानपूर्णे कुम्भान्तः स्वावलम्बनसंस्थितम् ।
अधस्ताज्ज्वालयेदग्निं तत्तदुक्तक्रमेण हि ।
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि ॥"

सन्धानं काञ्जिकादि । इति दोलायन्त्रम् ॥ * ॥

"साम्बुस्थालीमुखे बद्धे वस्त्रे स्वेद्यं निधाय च ।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ॥"

इति स्वेदनयन्त्रम् ॥

"अधःस्थाल्यां रसं क्षिप्त्वा निदध्यात्तन्मुखोपरि ।
स्थालीमूर्द्ध्वमुखीं सम्यक् निरुध्य मृदुमृत्स्नया ॥
ऊर्द्ध्वस्थाल्यां जलं क्षिप्त्वा चुल्ल्यामारोप्य यत्नतः ॥
अधस्ताज्ज्वालयेदग्निं यावत् प्रहरपञ्चकम् ।
स्वाङ्गशीतं ततो यन्त्रादुद्गृह्णीयाद्रसमुत्तमम् ।
विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम् ॥"

इति विद्याधरयन्त्रम् ॥

"वालुकासु समस्ताङ्गं गर्त्ते मूषारसान्विता ।

दीप्तोपलैः संरुन्धयाद्यन्त्रं भूधरनामकम् ।”
इति भूधरयन्त्रम् ।
“यन्त्रं डमरुसंज्ञं स्यात्तत् स्थाल्योर्मुद्रिते मुखे ।”
इति डमरुयन्त्रम् । इति भावप्रकाशः ॥ (तथाच ।
“अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा ।
सैव छिद्रान्विता मध्ये गम्भीरामारणोचिता ॥”
इति अन्धमूषायन्त्रम् ।
“द्वौ भागौ तु सदुग्धस्य एकावल्मीकमृत्तिका ।
लोहकिट्टस्य भागैकं श्वेतपाषाणभागिकम् ॥
नरकेशसमं किञ्चित् छागीदुग्धेन पेषयेत् ।
मासद्वयं दृढं मर्द्द्य तेन मूषां सुसम्पुटाम् ॥
शोषयित्वा रसं क्षिप्त्वा तत्कल्कैः सन्धि लेपयेत् ।
रौद्रमूषा समाख्याता सम्यक्पारदसाधिका ॥”
इति मूषायन्त्रम् । * ।
“वालुकापूरितं भाण्डं तन्मध्ये सूतकं क्षिपेत् ।
रसं मूषागतञ्चैव भाण्डं स्रावेण रोधयेत् ॥
क्षिप्त्वा मृल्लवणैः सन्धिं पाचयेच्चुल्लिकाग्निना ।
वालुकायन्त्रमेतद्धि योजयेद्रसकर्म्मणि ॥”
इति वालुकायन्त्रम् ।
“तिर्य्यक्कण्ठं काचकुप्यां गिलयेत् स्वल्पभाण्डके ।
तिर्य्यक्कृत्वा पचेत् भाण्डं वकयन्त्रमिति स्मृतम् ॥”
इति वकयन्त्रम् ।
“ऊर्द्धाधः संपुटाकारं तन्मध्ये रससंस्थितम् ।
कवचीयन्त्रमेतद्धि रसादिद्रव्यसाधनम् ॥”
इति कवचीयन्त्रम् ॥*॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणाद्यधिकारे ॥
चिकित्सोपयव्यपरयन्त्रविवृतिर्यथा,—
“यन्त्रशतमेकोत्तरमत्र हस्तमेव प्रधानतमं यन्त्राणामवगच्छ । किं कारणम् । यस्माद्धस्तादृते यन्त्राणामप्रवृत्तिरेव तदधीनत्वाद्यन्त्रकर्म्मणाम् । तत्र मनःशरीराबाधकराणि शल्यानि तेषामाहरणोपायो यन्त्राणि । तानि षट्प्रकाराणि । तद्यथा । स्वस्तिकयन्त्राणि । सन्दंशयन्त्राणि । तालयन्त्राणि । नाड़ीयन्त्राणि । शलाकायन्त्राणि । उपयन्त्राणि चेति ॥

तत्र चतुर्व्विंशतिः स्वस्तिकयन्त्राणि । द्वे सन्दंशयन्त्रे । द्वे एव तालयन्त्रे । विंशतिर्नाड्यः । अष्टाविंशतिः शलाकाः । पञ्चविंशतिरुपयन्त्राणि ॥ तानि प्रायशो लौहानि भवन्ति तत्प्रतिरूपकाणि वा तदलाभे । तत्र नानाप्रकाराणां व्यालानां मृगपक्षिणां मुखैर्मुखानि यन्त्राणां प्रायशः सदृशानि तस्मात् तत्सारूप्यादागमादुपदेशादन्ययन्त्रदर्शनाद्युक्तितश्च कारयेत् ।
समाहितानि यन्त्राणि खरश्लक्ष्णमुखानि च ।
सुदृढानि सुरूपाणि सुग्रहाणि च कारयेत् ।

तत्र स्वस्तिकयन्त्राण्यष्टादशाङ्गुलप्रमाणानि सिंहव्याघ्रवृकतरक्ष्वृक्षद्वीपिमार्ज्जारशृगालमृगैर्व्वारुककाककङ्ककुररचासभासशशघात्युलूकचिल्लिश्येनगृध्रक्रौञ्चभृङ्गराजाञ्जलिकर्णावभञ्जननन्दिमुखमुखानि मसूराकृतिभिः कीलैरवबद्धानि मूलेऽङ्कुशवदावृत्तवारङ्गाण्यस्थिविनष्टशल्योद्धरणार्थमुपदिश्यन्ते ॥*॥ सनिग्रहोऽनिग्रहश्च सन्दंशौ षोड़शाङ्गुलौ भवतस्त्वङ्मांससिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते ।

तालयन्त्रे द्वादशाङ्गुले मत्स्यतालुवदेकतालद्वितालके कर्णनासानाड़ीशल्यानामाहरणार्थम् ।

नाड़ीयन्त्राण्यनेकप्रकाराण्यनेकप्रयोजनान्येकतोमुखान्युभयतोमुखानि च तानि स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थमाचूषणार्थं क्रियासौकर्य्यार्थञ्चेति तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च ।

भगन्दरार्शोऽर्ब्बुदव्रणवस्त्युत्तरवस्तिमूत्रवृद्धिदकोदरधूमनिरुद्धप्रकशसन्निरुद्धगुदयन्त्राण्यलावुशृङ्गयन्त्राणि चोपरिष्टाद्वक्ष्यामः ।

शलाकायन्त्राण्यपि नानाप्रकाराणि नानाप्रयोजनानि यथायोगपरिणाहदीर्घाणि च तेषां गण्डूपदशरपुङ्खसर्पफणवड़िशमुखे द्वे द्वे एषणव्यूहनचालनाहरणार्थमुपदिश्येते । मसूरदलमात्रमुखे द्वे किञ्चिदानताग्रे स्रोतोगतशल्योद्धरणार्थम् । षट्कार्पासकृतोष्णीषाणि प्रमार्ज्जनक्रियासु । त्रीणि दर्व्वाकृतीनि खल्लमुखानि क्षारौषधप्रणिधानार्थम् । त्रीण्यन्यानि जाम्बववदनानि त्रीण्यङ्कुशवदनानि षड़ग्निकर्म्मस्वभिप्रेतानि । नासार्व्वुदहरणार्थमेकं कोलास्थिदलमात्रमुखं खल्लतीक्ष्णौष्ठम् । अञ्जनार्थमेकं कलायपरिमण्डलमुभयतो मुकुलाग्रम् । मूत्रमार्गविशोधनार्थमेकं मालतीपुष्पवृन्ताग्रप्रमाणपरिमण्डलमिति ।

उपयन्त्राण्यपि रज्जुवेणिकापट्टचर्म्मान्तवल्कललतावस्त्राष्ठीलाश्म-मुद्गर-पाणिपाद-तलाङ्गुलि-जिह्वा-दन्तनखमुख-वालाश्वकटकशाखाष्ठीवन-प्रवाहणहर्षायस्कान्तमयानि क्षाराग्निभेषजानि चेति ।
एतानि देहे सर्व्वस्मिन् देहस्यावयवे तथा ।
सन्धौ कोष्ठे धमन्याञ्च यथायोगं प्रयोजयेत् ॥
यन्त्रकर्म्माणि तु निर्घातनपूरणबन्धनव्यूहनवर्त्तनचालनविवर्त्तनविवरणपीड़नमार्गविशोधनविकर्षणाहरणाञ्चनोन्नमनविनमनभञ्जनोन्मथनाचूषणैषणदारणर्ज्जुकरणप्रक्षालनप्रधमनप्रमार्ज्जनानि चतुर्व्विंशतिः ॥
स्वबुद्ध्या चापि विभजेद्यन्त्रकर्म्माणि बुद्धिमान् ।
असंख्येयविकल्पत्वाच्छल्यानामिति निश्चयः ॥

तत्रातिस्थूलमसारमतिदीर्घमतिह्रस्वमग्राहि विषमग्राहि वक्रं शिथिलमत्युन्नतं मृदुकीलं मृदुमुखं मृदुपाशमिति द्वादश यन्त्रदोषाः ।
एतैर्दोषैर्व्विनिर्म्मुक्तं यन्त्रमष्टादशाङ्गुलम् ।
प्रशस्तं भिषजा ज्ञेयं तद्धि कर्म्मसु योजयेत् ॥
दृश्यं सिंहमुखाद्यैस्तु गूढं कङ्कमुखादिभिः ।
निर्हरेत्तु शनैः शल्यं शास्त्रयुक्तिव्यपेक्षया ॥
विवर्त्तते साध्ववगाहते च
शल्यं निगृह्योद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्व्वेष्वविकारि चैव ॥”
इति सुश्रुते सूत्रस्थाने सप्तमेऽध्याये ॥*॥

गोलाध्यायोक्तयन्त्राणि यथा,—
“अथ यन्त्राध्यायो व्याख्यायते । तत्रादौ तदारम्भप्रयोजनमाह ।
दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः ।
वक्ष्ये यन्त्राणि ततः स्फुटानि संक्षेपतः कतिचित् ॥
गोलो नाड़ीवलयं यष्टिः शङ्कुर्घटी चक्रम् ।
चापं तुर्यं फलकं धीरेकं पारमार्थिकं यन्त्रम् ॥”
“अथ प्रथमं गोलयन्त्रमाह ।
अपवृत्तनरविचिह्नं क्षितिजे धृत्वा कुजेन संसक्ते ।
नाड़ीवृत्ते विन्दुं कृत्वा धृत्वाथ जलसमं क्षितिजम् ॥
रविचिह्नस्य च्छाया पतति कुमध्ये यथा तथा विधृते ।
उडुगोले कुजविन्द्वोर्मध्ये नाड्यो द्युयाताः स्युः ॥”
“अथ नाड़ीवलयमाह ।
अपवृत्ते कुजलग्ने लग्नं चाथो खगोलनलिकान्तः ।
भूस्थं ध्रुवयष्टिस्थं चक्रं वद्ध्वा निजोदयैश्चाङ्कम् ॥
यष्टेर्यष्टीभायास्तुदयेऽर्कं न्यस्य नाड़िका ज्ञेयाः ।
दृक्छायासूर्य्यान्तरेऽथ लग्नं प्रभायाश्च ॥
केनचिदाधारेण ध्रुवाभिमुखकीलकेऽत्र धृते ।
अथवा कीलच्छायातलमध्ये स्युर्नता नाड्यः ॥”
घटिकायन्त्रलक्षणादिकं घटीयन्त्रशब्दे द्रष्टव्यम् ॥
“अथ शङ्कुमाह । [शङ्कुः ।
समतलमस्तकपरिधिर्भ्रमसिद्धो दन्तिदन्तजः
तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम् ॥
इति शङ्कुयन्त्रम् ।
अथ चक्रमाह ।
चक्रं चक्रांशाङ्कं परिधौ सूत्रस्थलादिकाधारम् ।
धात्री त्रिभ आधारात् कल्प्या भार्द्धेऽत्र खार्द्धञ्च ॥
तन्मध्ये सूक्ष्माक्षं क्षिप्त्वार्काभिमुखनेमिकं धार्य्यम् ।
भूमेरुन्नतभागास्तत्राक्षच्छायया भुक्ताः ॥
तत्खार्द्धान्तश्च नता उन्नतलवसंगुणीकृतं द्युदलम् ।
द्युदलोन्नतांशभक्तं नाड्यः स्थूलाः परैः प्रोक्ताः ॥”
“अथ वेधेन ग्रहज्ञानमाह ।
“पैत्रर्क्षपुष्यान्तिमवारुणाना-
मृक्षद्वयं नेमिगतं यथा स्यात् ।
दूरेऽन्तरेऽप्येषुभखेचरौ वा
तथात्र यन्त्रं सुधिया प्रधार्य्यम् ॥
नेमिस्थदृग्व्यासगतं प्रपश्येत्
खेटञ्च धिष्ण्यस्य च योगताराम् ।
नेम्यङ्कयोरक्षयुजोस्तु मध्ये
येंऽशाः स्थिता भध्रुवको ग्रहस्ते ॥
प्रत्यक् स्थिते भेऽथ पुरःस्थिते ते-
र्हीनो ध्रुवः स्यात् खचरस्य भुक्तम् ॥”
“अथ चापं तुर्य्यगोलं चाह ।
दलीकृतं चक्रमुशन्ति चापं
कोदण्डखण्डं खलु तुर्य्यगोलम् ॥”

"अथ फलकयन्त्रार्थमाह ।
दृग्ज्ञत्वेऽत्र स्फुटकाल उक्तः
सुखेन नान्यैर्यतितं मयातः ।
यन्त्रोलघुक्तैर्गणितस्य सारं
स्पष्टं प्रवक्ष्ये फलकाख्ययन्त्रम् ।"
"इदानीं यन्त्रलक्षणमाह ।
कार्य्यं चतुरस्रकं सुफलकं खाङ्गा-९० ङ्गुलै-
विस्तृतं
विस्ताराद्द्विगुणा-१८० यतं सुगणकेनायाममध्ये
तथा ।
आधारः श्लथशृङ्खलादिघटितः कार्य्या च
रेखा तत-
स्त्वाधारादवलम्बसूत्रसदृशी सा लम्बरेखोच्यते ।
लम्बं नवत्य-९० ङ्गुलकैर्विभज्य
प्रत्यङ्गुलं तिर्य्यगतः प्रसार्य्य ।
सूत्राणि तत्रायतसूत्ररेखा
जीवाभिधानाः सुधिया विधेयाः ।
आधारतोऽधः खगुणा-३० ङ्गुलेषु
च्यालम्बयोगे सुषिरञ्च सूक्ष्मम् ।
इष्टप्रमाणा सुषिरे शलाका
क्षेप्याक्षसंज्ञा खलु सा प्रकल्प्या ।
षष्ट्यङ्गुलव्यासमतश्च रन्ध्रात्
कृत्वा सुवृत्तं परिधौ तदङ्कम् ।
षष्ट्या घटीनां भगणांश-३६० कैश्च
प्रत्यंशकं चाप्युपलैश्च दिग्भिः ।
अग्रे सरन्ध्रा तनुपट्टिकैका
षष्ट्यङ्गुला दीर्घतया तथाङ्क्या ।"
"इदानीं यन्त्रोपकरणमाह ।
यत् खण्डकैः स्थूलचरं पलाद्यं
तन्नोङ्क-१९ हृत् स्याच्चरशिञ्जिनीह ।"
"इदानीं यष्टिसाधनमाह ।
वेदाः ४ भवाः ११ शैलभुवो १७ धृतिश्च १८
विश्वे १३ च बाणाः ५ पलकर्णनिघ्नाः ।
अर्कोद्धृताः स्युः क्रमशः स्वदेशे
राश्यर्द्धलम्बानि हि खण्डकानि ।
तैः क्रान्तिपाताद्यरवैर्भुजज्या
षड्भाहृताद्यश्रवणेन युक्ता ।
दिग्भ्नी कृताप्ता भवतीह यष्टिः
सा पट्टिकायां सुषिरात् प्रदेया ।"
"इदानीं यष्टिप्रयोजनमाह ।
धार्य्यं तथा फलकयन्त्रमिदं यथैव
तत्पार्श्वयोर्लगति तुल्यमिनस्य तेजः ।
छायाच्चणा स्पृशति तत्परिधौ यमंशं
तत्रांशके मतिमता तरणिः प्रकल्प्यः ।
अथ प्रोतां रविलवगतां पट्टिकां न्यस्य तस्माद्-
यष्टेरग्रादुपरि फलकेऽधश्च गोलक्रमेण ।
स्वाहोरात्रदलगुणस्तत्र या ज्या तयात्र
छिन्ने वृत्ते नतगतघटिकाः स्युर्नता लम्बकान्ताः ।"
"अथ यष्टियन्त्रमाह ।
त्रिज्याविष्कम्भार्द्धं वृत्तं कृत्वा दिगङ्कितं तत्र ।
दत्वाग्रां प्राक् पश्चाद्युज्यावृत्तञ्च तन्मध्ये ।
तत्परिधौ षष्ट्यङ्कं यष्टिर्मध्ये द्युतिस्ततः केन्द्रे ।
त्रिज्याङ्गुला निधेया यष्ट्यग्राग्रान्तरं यावत् ।
तावत्या मौर्व्या यद्द्वितीयवृत्ते धनुर्भवेत् तत्र ।
दिनगतशेषा नाड्यः प्राक् पश्चात् स्युः क्रमेणै-
वम् ।"
"इदानीं धीयन्त्रं विवक्षुरादौ तत्प्रशंसामाह ।
अथ किमु पृथुतन्त्रैर्धीमतो भूरियन्त्रैः
स्वकरकलितयष्टेर्दत्तमूलाग्रदृष्टेः ।
न तदविदितमानं वस्तु यद्दृश्यमानं
दिवि भुवि च जलस्थं प्रोच्यतेऽथ स्थलस्थम् ।
अत्र प्रश्नः ।
वंशस्य मूलं प्रविलोक्य चाग्रं
तत्स्वान्तरं तस्य समुच्छ्रयञ्च ।
यो वेत्ति यष्ट्यैव करस्थयासौ
धीयन्त्रवेदी वद किं न वेत्ति ।"
"अथ यष्ट्या ध्रुववेधेन पलभामाह ।
यष्ट्यग्रमूलसंस्थं विदृश्वा ध्रुवमग्रमूलयोर्लम्बौ ।
बाहुर्लम्बान्तरभूर्लम्बोच्छ्रायान्तरं कोटिः ।
कोटिर्द्वादशगुणिता बाहुविभक्ता पलप्रभा
ज्ञेया ।"
"इदानीं वंशादिवेधमाह ।
विद्ध्वैवं वंशतलं दृगुच्छ्रायाहताद्बाहोः ।
कोट्या लब्धं ज्ञेयं स्ववंशमध्ये महीमानम् ।
विद्धाग्रो वंशाग्रं भूमानं कोटिसंगुणं भक्तम् ।
दोष्णा वंशोच्छ्रायो दृगुच्छ्रायेण संयुतो ज्ञेयः ।
उदाहरणम् ।
पञ्चशक्राङ्गुला १४५ यष्टिरष्टयष्टिर्दृगुच्छ्रयः ।
षट्करास्तलवेधे दोः कोटिः सप्तदशाङ्गुला ।
अग्रवेधे रसेशा ११६ दोः कोटिस्तुरगकुञ्जराः ।
वंशस्य यस्य तन्मानं चात्मवंशान्तरं वद ।"
"अथ केवलाग्रवेधेनाह ।
अग्रं विध्वोर्ध्वस्थः पुनरुपविश्य तद्विध्येत् ।
निजभुजभक्ते कोटी तदन्तरहृतो दृगौच्च्यविश्लेषः
भूमिर्वंशौच्च्यमतः पृथक् पृथक् पूर्ववज्ज्ञेयम् ।
अत्र प्रश्नः ।
ऊर्ध्वस्थस्य यदादिभिर्यदि हि तस्याप्यग्रमात्रं सखे !
वंशस्य प्रगुणस्य यस्य सुसमे देशे समालोक्यते ।
अत्रैव त्वमवस्थितो यदि वदस्यस्यान्तरं चोच्छ्रयं
मन्ये यन्त्रविदां वरिष्ठपदवीं यातोऽसि धीयन्त्र-
वित् ।
उदाहरणम् ।
दृष्टयष्टोर्ध्वसंस्थेन वंशाग्रं विध्यता भुजः ।
दृष्टचतुष्करोऽप्यन्ययष्ट्या खाङ्गाङ्गुलः सखे ।
निविष्टेन तथा कोटिरङ्गुलं वेधयोरपि ।
आत्मवंशान्तरं ब्रूहि वंशोच्छ्रायञ्च वेधवित् ।"
"अथ जलान्तर्वेधमाह ।
एवं तोयेऽप्यौच्च्यं तत्र दृगौच्च्योनितं भवति ।
किंवा यष्ट्या कोटी दृगुच्छ्रायौ जलान्तरे
बाहू ।
अत्र प्रश्नः ।
दूरस्थस्य न दूरगस्य यदि वा दृश्यस्य दृश्यस्य वा
वंशस्य प्रतिबिम्बितस्य सलिले दृष्टाग्रमात्रं सखे ।
अत्रैव त्वमवस्थितो यदि वदस्यस्यान्तरं चोच्छ्रयं
त्वां सर्वज्ञमतीन्द्रियज्ञमनुजव्याजेन मन्ये भुवि ।
उदाहरणम् ।
दृष्टा चेत् षडङ्गुला कोटिर्बाहुश्च चतुरङ्गुलः ।
ऊर्ध्वस्थेनोपविष्टेन बाहुरेकादशाङ्गुलः ।
कोटिरष्टाङ्गुला तोये वंशाग्रं विध्यता सखे ! ।
चाक्षहस्तौ दृगुच्छ्रायौ वंशौच्च्यं चान्तरं वद ।"
"किंवा यष्ट्यायस्योदाहरणम् ।
षड्‌ङ्गैरमरैस्तुल्यान्यङ्गुलान्यथवा क्रमात् ।
आत्मतोयान्तरं दृष्ट्वा वंशौच्च्यं चान्तरं वद ।"
"अथ स्वयंवहमाह ।
लघुदारुजसमचक्रे समसुषिराराः समान्तरा
नेम्याम् ।
किञ्चिद्वक्रातोन्याः सुषिरस्यार्द्धे पृथक् तासाम् ।
रसपूर्णे तच्चक्रं द्व्याधाराक्षस्थितं स्वयं भ्रमति ।"
"अथान्यदाह ।
उत्कीर्य्य नेमिमथवा परितो मदनेन संलग्नम् ।
तदुपरि तालदलाद्यं कृत्वा सुषिरे रसं क्षिपेत्
तावत् ।
यावद्रसैकपार्श्वे छिद्रजलं नान्यतो याति ।
पिहितच्छिद्रं तदतश्चक्रं भ्रमति स्वयं जला-
कृष्टम् ।"
"अथान्यदाह ।
ताम्रादिमयस्याङ्कुशरूपनलस्याम्बुपूर्णस्य ।
एकं कुण्डजलान्तर्द्वितीयमग्रं त्वधोमुखञ्च
बहिः ।
युगपन्मुक्तं चेत् कं नलेन कुण्डाद्बहिः पतति ।
नेम्यां बद्ध्वा घटिकाचक्रं जलयन्त्रवत् तथा
धार्य्यम् ।
नलकप्रच्युतसलिलं पतति यथा तद्घटीमध्ये ।
भ्रमति ततस्तत् सततं पूर्णघटीभिः समाकृष्टम् ।
चक्रच्युतं तदुदकं कुण्डे याति प्रणालिकया ।"
"इदानीमन्येषां स्वयंवहमुपहसन्नाह ।
यदधोरन्ध्रनलं तत् चापेक्षत्वात् स्वयंवहं ग्राम्यम् ।
चतुरचमत्कारकरी युक्तिर्यन्त्रं नहि ग्राम्या ।
एवं बहुधा यन्त्रं स्वयंवहं कुहकविद्यया भवति ।
नेदं गोलाश्रितया पूर्वोक्तत्वाच्चयाप्युक्तम् ।"
इति सिद्धान्तशिरोमणौ गोले यन्त्राध्यायः ।)

यन्त्रकं, क्ली, यन्त्रकाष्ठम् । (कुन्दम् । इति हेमचन्द्रः । ३।५७२ ।) कुँद इति भाषा । यम्यते काष्ठमनेनेति यमधातोस्त्रप्रत्ययेन यन्त्रं ततः स्वार्थे कप्रत्ययेन निष्पन्नम् । (यथा, सुश्रुते । ४ । २ ।
"कार्य्यो गोफणिकाबन्धः कण्ठामावेश्य यन्त्रकम् ।
न कुर्य्यात् स्वप्नसेकञ्च तेन क्लिद्यति हि व्रणः ।"
यन्त्रयति बध्नाति सेतुप्रभृतीनीति । यन्त्रि + ण्वुल् । सेतुप्रभृतिनिर्म्मातरि, त्रि । यथा, रामायणे । २ । ८० । १ ।
"स्वकर्म्माभिरताः शूराः खनका यन्त्रकास्तथा ।"
"यन्त्रका जलप्रवाहादियन्त्रणसमर्थाः ।" इति तट्टीका ।)

यन्त्रगृहं, क्ली, (यन्त्रस्य गृहम् ।) तैलशाला । इति हेमचन्द्रः । ४ । ६२ । घानिघर इति भाषा ।

यन्त्रगोलः, पुं, कलायविशेषः। इति शब्दचन्द्रिका ॥ मटर इति भाषा ॥

यन्त्रणं, क्ली, (यन्त्र+ल्युट्।) रक्षणम्। बन्धनम्। (यथा, सुश्रुते सूत्रस्थाने अष्टादशाध्याये। "यन्त्रणमत ऊर्द्ध्वमधस्तिर्य्यक्॥") नियमनम्। इति मेदिनी। णे, ७१ ॥ (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये।
"रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात्।
शोषितस्य भवेच्छोषः स चासाध्यतमस्ततः॥")

यन्त्रणा, स्त्री, (यन्त्रि+"ण्यासश्रन्थो युच्।" ३। ३। १०७। इति युच्। टाप्।) पीडा। यथा, नैषधे। ४। १०।
"मदनतापभरेण विदीर्य्य नो
यदुदपाति हृदा दमनस्वसुः।
निविडपीनकुचद्वययन्त्रणा
तमपराधमधात् प्रतिबध्नती॥"
(पीडाशब्देऽस्या विशेषो विज्ञेयः॥)

यन्त्रपेषणी, स्त्री, (पिष्यतेऽनयेति। पिष्। करणे ल्युट्। ङीप्। यन्त्रमेव पेषणी।) पेषणार्थयन्त्रम्। इति जटाधरः॥ याँता इति भाषा॥

यन्त्रिका, स्त्री, (यन्त्रयति ज्ञातकौतुका पीडयतीति। यन्त्रि+ण्वुल्। टापि अत इत्वम्।) पत्न्याः कनिष्ठा भगिनी। यथा, हेमचन्द्रे।
"कनिष्ठा श्यालिका हाली यन्त्रिका केलिकुञ्चिका॥"

यन्त्रितः, त्रि, (यन्त्रि+क्त।) बद्धः। इति धरणिः॥ (यथा, देवीभागवते। ३। १७। १७।
"ते भृत्या जगृहुर्धेनुं हठादाक्रम्य यन्त्रिताम्।
वेपमाना मुनिं प्राह सुरभिः साश्रुलोचना॥")

यन्त्री, [न्] त्रि, यन्त्रविशिष्टः। यन्त्रशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नः॥ (यन्त्रयति बध्नातीति। यन्त्रि बन्धने+णिनिः। बन्धनकारकः। यथा, रामायणे। १। १। ७६।
"अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात्।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया॥")

यभ, ऌ मैथुने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) ऌ, अयाप्सीत्। यभति युवा। इति दुर्गादासः॥

यम, ऌ उ विरतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्। क्रावेट्।) ऌ, यन्ता। उ, यमित्वा यन्त्वा। विरतिर्निवृत्तिः। यच्छति पापात् साधुः। इति दुर्गादासः॥

यम, क मि परिवेषणे। तदभावे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क मि, यमयति यामयति। परिवेषणं अन्नादेरर्पणम्। वेष्टनमित्येके। विषमयाप्राविश्यस्य रूपमिति रमानाथः। केचित्तु परिवेषण एवायं मानुबन्धः। यमयत्यन्नं द्विजाय गृही। अन्यत्र नियामयति संयामयति इत्याहुः। अन्ये तु अपरिवेषण एवायं मानुबन्धः। 'नियमयति विमार्गप्रस्थितानात्तदण्डम्।' इति शाकुन्तले। परिवेषणे तु यामयत्यन्नं द्विजाय गृही इत्याहुः। तेन उभयस्य प्रामाणिकत्वादुभयत्र विकल्पज्ञापनार्थश्चानुबन्धः कृतः। इति दुर्गादासः॥

यमः, पुं, (यमयति नियमयति जीवानां फलाफलमिति। यम्+अच्।) दक्षिणदिक्पालः। तत्पर्य्यायः। धर्म्मराजः २ पितृपतिः ३ समवर्त्ती ४ परेतराट् ५ कृतान्तः ६ यमुनाभ्राता ७ शमनः ८ यमराट् ९ कालः १० दण्डधरः ११ श्राद्धदेवः १२ वैवस्वतः १३ अन्तकः १४। इत्यमरः। १।१।६१ ॥ धर्म्मः धर्म्मराट् १६ जीवितेशः १७ महिषध्वजः १८ औडुम्बरः १९ दण्डधारः २० कीनाशः २१ दध्नः २२ महिषवाहनः २३ शीर्णपादः २४ भीमशासनः २५ कङ्कः २६ हरिः २७। इति शब्दरत्नावली॥ कर्म्मकरः २८। इति जटाधरः॥ * ॥ चतुर्दशयमतर्पणं यथा,—
"यां काञ्चित् सरितं प्राप्य कृष्णपक्षे चतुर्द्दशीम्।
यमुनायां विशेषेण नियतस्तर्पयेद्यमान्॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च॥
औडुम्बराय दध्नाय नीलाय परमेष्ठिने।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥
एकैकस्य तिलैर्मिश्रांस्त्रीस्त्रीन् दद्यात् जलाञ्जलीन्।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥"
इति तिथ्यादितत्त्वधृतभविष्यपुराणवचनम्॥
तस्योत्पत्तिर्यथा,—
"संज्ञा च रविणा दृष्टा निमीलयति लोचने।
यतस्ततः सरोषोऽर्कः संज्ञां निष्ठुरमब्रवीत्॥
मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमम्।
तस्माज्जनिष्यसे मूढे! प्रजासंयमनं यमम्॥"
मार्कण्डेय उवाच।
"ततस्तस्यास्तु संजज्ञे भर्तृशापेन तेन वै।
यमश्च यमुना चेयं प्रख्याता सुमहानदी॥'
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे ७७ अः॥
पुण्यात्मनां सम्बन्धे तस्य रूपं यथा,—
"तानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान्।
भास्करिः प्रीतिमासाद्य स्वयं नारायणो भवेत्॥
चतुर्ब्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः।
शङ्खचक्रगदापद्मधारी गरुडवाहनः॥
स्वर्णयज्ञोपवीती च स्मेरचारुतराननः।
किरीटी कुण्डली चैव वनमालाविभूषितः॥"
पापिनां सम्बन्धे तस्य रूपं यथा,—
"त्रिंशद्योजनदीर्घाङ्गो वापीसदृशलोचनः।
धूम्रवर्णो महातेजाः प्रलयाम्भोधरध्वनिः॥
तृणाधिराजरोमा च ज्वलदग्निशिखाग्रवत्।
नासारन्ध्रस्फुरच्छ्वासस्वनैर्न्निर्जितमहानिलः॥
सुदीर्घदशनश्रेणिः शूर्पोपमनखावलिः।
प्रचण्डमहिषारूढः संदष्टदशनच्छदः॥
दण्डहस्तश्चर्म्मवासा भ्रूकुटीकुटिलाननः॥'
इति पाद्मे क्रियायोगसारे २२ अध्यायः॥
अस्यानधिकारो यथा,—
"प्रोवाच धर्म्मं यदहं ब्रवीमि
कार्य्यं त्वया तत् खलु धर्म्मराज!॥
ब्रह्मोवाच।
ये भक्ताः पुण्डरीकाक्षे कर्म्मणा मनसा गिरा।
स्वकर्म्मनिरता दान्ता न नियम्या हि ते त्वया॥
कृष्णः संपूजितो यैस्तु यैः कृष्णः समुपासितः।
यैश्च नित्यं स्मृतः कृष्णो न ते त्वद्विषयोपगाः॥
नमः कृष्णाच्युतानन्त वासुदेवेत्युदीरितम्।
यैर्भावभावितो धर्म्म! न ते त्वद्विषयोपगाः॥
दानं ददद्भिर्यैरुक्तमच्युतः प्रीयतामिति।
श्रद्धापुरःसरैर्धर्म्म! न ते त्वद्विषयोपगाः॥
उत्तिष्ठद्भिः स्वपद्भिश्च व्रजद्भिश्च जनार्द्दनः।
यैः स्तुतस्तु सदा धर्म्म! न ते त्वद्विषयोपगाः॥
सर्व्वबाधासु ये कृष्णं संस्मरन्त्युच्चरन्ति च।
तद्भावभाविनो ये च न ते त्वद्विषयोपगाः॥
स एव धाता सर्व्वस्य तन्नियोगकरा वयम्।
यमसंयमने व्यक्तः सोऽस्मत्संयमको हरिः॥"
इति वह्निपुराणे नरसिंहप्रादुर्भावाध्यायः॥
अपि च।
ब्राह्मण उवाच।
"यत् कृत्वा सुमहत् पुण्यं धर्म्माधर्म्मविनिर्णये।
प्रमाणं त्वं हि लोकानां फलं मे ब्रूहि तद्यम!॥"
यम उवाच।
यमो यम इति श्रुत्वा वृथा ह्युद्विजते जनः।
आत्मा च यमितो येन न तस्यैव यमः स्मृतः॥
आनृशंस्यं क्षमा सत्यमहिंसा दम आर्ज्जवम्।
ध्यानं प्रसादो माधुर्य्यं सन्तोषश्च यमा दश॥
यमैश्च नियमैश्चैव यः करोत्यात्मसंयमम्।
स चाहत्वा तु मां याति परं ब्रह्म सनातनम्॥"
इति तत्रैव यमधर्म्मिलोपाख्यानम्॥ * ॥
सावित्रीकृतं यमाष्टकं स्तोत्रं यथा,—
सावित्र्युवाच।
"तपसा धर्म्ममाराध्य पुष्करे भास्करः पुरा।
धर्म्मांशं यं सुतं प्राप धर्म्मराजं नमाम्यहम्॥१॥
समता सर्व्वभूतेषु यस्य सर्व्वस्य साक्षिणः।
अतो यन्नाम शमनमिति तं प्रणमाम्यहम्॥२॥
येनान्तश्च कृतो विश्वे सर्व्वेषां जीविनां परम्।
कर्म्मानुरूपकाले च तं कृतान्तं नमाम्यहम्॥३॥
बिभर्त्ति दण्डं दण्डाय पापिनां शुद्धिहेतवे।
नमामि तं दण्डधरं यः शास्ता सर्व्वदेहिनाम्॥४॥
विश्वं च कलयत्येव यः सर्व्वायुश्च सन्ततम्।
अतीव दुर्न्निवार्य्यश्च तं कालं प्रणमाम्यहम्॥५॥
तपस्वी वैष्णवो धर्म्मी संयमी विजितेन्द्रियः।
जीविनां कर्म्मफलदस्तं यमं प्रणमाम्यहम्॥६॥
स्वात्मारामश्च सर्व्वज्ञो मित्रः पुण्यकृतां भवे।
पापिनां क्लेशदो यस्तं पुण्यमित्रं नमाम्यहम्॥७॥
यज्जन्म ब्रह्मणो वंशे ज्वलन्तं ब्रह्मतेजसा।
यो ध्यायति परं ब्रह्म ब्रह्मवंशं नमाम्यहम्॥८॥
इत्युक्त्वा सा च सावित्री प्रणनाम यमं मुने।
यमस्तां विष्णुभजनं कर्म्मपाकमुवाच ह॥

इदं यमाष्टकं नित्यं प्रातरुत्थाय यः पठेत् ।
यमात्तस्य भयं नास्ति सर्व्वपापात् प्रमुच्यते ॥
महापापी यदि पठेत् नित्यं भक्त्या च नारद ! ।
यमः करोति तं शुद्धं कायव्यूहेन निश्चितम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्यायः ॥*॥
पारिभाषिकयमदन्ता यथा,—
“कार्त्तिकस्य दिनान्यष्टावष्टाग्रहायणस्य च ।
यमस्य दंष्ट्रा एते लघ्वाहारी स जीवति ॥”
इति वैद्यकम् ॥ * ॥
(“पङ्कमत्स्यवसातैलघृतगन्धाश्च ये नराः ।
घृतगन्धाश्च ये वान्ति गन्तारस्ते यमालयम् ॥
यूका ललाटमायान्ति वलिं नाश्नन्ति वायसाः ।
येषां वापि रतिर्नास्ति यातारस्ते यमालयम् ॥”
इति सुश्रुते सूत्रस्थाने ३१ अध्यायः ॥
अस्य शापवृत्तान्तं शापान्तवृत्तान्तञ्च यमराजशब्दे द्रष्टव्यम् ॥ * ॥) शरीरसाधनापेक्षनित्यकर्म्म । इत्यमरः । २ । ७ । ४६ ॥
“उपायान्तरनिरपेक्षं शरीरमात्रसाध्यं नित्यं यावज्जीवमवश्यकार्य्यं यत्कर्म्म सत्यास्तेयादि तद्यमः । यमेरल् ।
‘अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्कता ।
अस्तेयमिति पञ्चैते यमाश्चैव व्रतानि च ॥’
इति मनुः ।” इति तट्टीकायां भरतः ॥
स च अष्टाङ्गयोगान्तर्गताङ्गविशेषः । स तु दशविधो यथा,—
“ब्रह्मचर्य्यं दया क्षान्तिर्ध्यानं सत्यमकल्कता ।
अहिंसास्तेयमाधुर्य्ये दमश्चेति यमाः स्मृताः ॥”
इति गारुडे १०८ अध्यायः ॥ * ॥
स च पञ्चविधो यथा,—
“अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ।
यमाः पञ्चाथ नियमाः शौचं द्विविधमीरितम् ॥”
इति तत्रैव २३० अध्यायः ॥
“अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः ।”
इति पातञ्जले साधनपादे ।३०॥ यच्छति नियच्छति इन्द्रियग्राममनेनेति । यम+घञ् ।) संयमः ॥ यथा, अमरः । ३ । २ । १८ ।
“वियामो वियमो यामो यमः संयामसंयमौ ॥”
काकः । शनिः । इति मेदिनी । मे, २३ ॥
(विष्णुः । यथा, महाभारते ।१३।१४६।३० ।
“अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥”
“अन्तर्यच्छतीति यमः ।”इति तद्भाष्ये शङ्कराचार्य्यः ॥)

यमः, त्रि, (यच्छति एकत्र गर्भाशये निरतो भवतीति । यम्+अच् ।) यमजः । इति मेदिनी । मे, २३ ॥ तयोर्ज्येष्ठत्वनिरूपणं यथा,
“बहिर्वर्षेषु चारित्राद्यमयोः पूर्व्वजन्मतः ।
यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम् ।
सन्तानः पितरश्चैव तस्मिन् ज्येष्ठं प्रतिष्ठितम् ॥
जन्मप्राधान्यात् ज्येष्ठं यमयोः न तु निषेकप्राधान्यात् जन्मप्राधान्यसन्देहे मुखदर्शनप्राधान्यात् ।” इति उद्वाहतत्त्वम् ॥ (यथा,—
“बीजेऽन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ ।
यमावित्यभिधीयेते धर्म्मेतरपुरःसरौ ॥”
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥
अनयोरेकस्य वृद्धिरपरस्य क्षीणताकथमित्यत आह ।
“कर्म्मात्मकत्वाद्विषमांशभेदात्
शुक्रासृजं वृद्धिमुपैति कुक्षौ ।
एकोऽधिको न्यूनतरो द्वितीय
एवं यमेऽप्यभ्यधिको विशेषः ॥”
इति चरके शारीरस्थाने द्वितीयेऽध्याये ॥)

यमकं, क्ली, (यमं युग्मभावं कायति प्राप्नोतीति । कै+कः ।) शब्दालङ्कारः । तस्य लक्षणादि यथा,—
“सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥
अत्र द्वयोरपि पदयोः क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्वं क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वमत उक्तं सत्यर्थे इति । तेनैव क्रमेणेति दमो मोद इत्यादेर्विभक्तविषयत्वं सूचितम् । एतच्च पदपादार्द्धश्लोकावृत्तित्वेन पादाद्यावृत्तिस्थानेकविषयतया प्रभूततममिदं दिङ्मात्रमुदाह्रियते ।
‘नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्
ससुरभिं सुरभिं सुमनोभरैः ॥’
इति माघे । ६ । २ ॥
अत्र पदावृत्तिः पलाशपलाशेति सुरभिं सुरभिमित्यत्र च द्वयोः सार्थकत्वम् । लतान्तलतान्तेत्यत्र प्रथमस्य निरर्थकत्वं परागपरागेत्यत्र द्वितीयस्य एवमन्यत्राप्युदाहार्य्यम् । यमकादौ भवेदैक्यं डलोर्ब्बवोर्लरोस्तथा । इत्युक्तनयात् । भुजलतां जडतामबलाजन इत्यत्र न यमकत्वहानिः ।” इति साहित्यदर्पणे दशमः परिच्छेदः । १० ॥ (यमकालङ्कारस्तु युग्मपादयमकायुग्मपादयमकाद्यन्तयमक-पादमध्ययमक-पादान्तयमक-पादादियमक-पादादिमध्ययमक-पादाद्यन्तयमक-मध्यान्तयमक-काञ्चीयमकगर्भयमकचक्रवालयमकपुष्पयमकमहायमकमिथुनयमकवृन्तयमकविपथयमकसमुद्गयमकसर्व्वयमक यमकावलीभेदात् बहुविधः । तत्तल्लक्षणोदाहरणादिकं भट्टिकाव्ये दशमसर्गे यमकचक्रे काव्यादर्शे दशमपरिच्छेदे च द्रष्टव्यम् ॥ व्यूहविशेषः । यथा, महाभारते । ४ । ५५ । ४२ ।
“ततो विराटस्य सुतः सव्यमावृत्य वाजिनः ।
यमकं मण्डलं कृत्वा तान् योधान् प्रत्यवारयत् ॥”
“यमकं शत्रूणां निरोधकं मण्डलं कृत्वा ।” इति तट्टीकायां नीलकण्ठः ॥ सहशम् । यथा, महाभारते । ३ । १६ । ८ ।
“मण्डलानि विचित्राणि यमकानीतराणि च ।
सव्यानि च विचित्राणि दक्षिणानि च सर्व्वशः ॥”
“यमकानि सदृशानि ।” इति तट्टीकायां नीलकण्ठः ॥) त्रि, यमजः । इति मेदिनी । के, १४२॥

यमकः, पुं, (यम्+भावे घञ् । स्वार्थे कन् ।) संयमः । इति मेदिनी । के, १४६ ॥

यमकालिन्दी, स्त्री, (यमः कालिन्दी च सुतः सुता च यस्याः ।) संज्ञा । सा च सूर्य्यपत्नी । इति शब्दरत्नावली ॥

यमकीटः, पुं, (यमसूचकः कीटः ।) कुर्कुरनामा कीटः । इति त्रिकाण्डशेषः ॥

यमकोटिः, स्त्री, लङ्कायाः पूर्व्वं पृथिव्याश्चतुर्थभागे देशविशेषः । यथा,—
“लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वड़वानलश्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ॥”
इति सिद्धान्तशिरोमणिः ॥

यमघण्टः, पुं, (यमं घण्टयतीति । घण्ट+अण् ।) योगविशेषः । यथा,—
“द्वे मघापूर्व्वफल्गुन्यौ पुष्याश्लेषा च चन्द्रयोः ।
ज्येष्ठानुराधा भरणी चाश्विनी कुजवासरे ॥
हस्तार्द्रा चन्द्रभे मूला पूर्व्वाषाढ़ा च रेवती ।
जीवे तूत्तरभाद्रश्च शुक्राहे स्वातिरोहिणी ।
शनिवारे शतभिषा श्रवणा यमघण्टकः ॥”
इति सारसंग्रहः ॥
अपि च ।
“घण्टोऽर्कखण्डर्क्षयुक्ते स्वगृहपतिदिने सौम्यवारेऽर्य्यमापि ।”
अस्य वर्ज्ज्यकालनिर्णयो यथा,—
“यमघण्टे त्यजेदष्टौ मृत्यौ द्वादश नाड़िकाः ।
अन्येषां पापयोगानां मध्याह्नात् परतः शुभम् ॥”
अस्य दोषा यथा,—
“एभिर्जातो न जीवेत यदि शक्रसमो भवेत् ।
विवाहे विधवा नारी यात्रायां मरणं भवेत् ॥
निष्फलं कृषिवाणिज्यं विद्यारम्भे च मूर्खता ।
गृहप्रवेशे भङ्गः स्याच्चूड़ायां मरणं ध्रुवम् ॥
ऋणदाने फलं नास्ति व्रतदाने च निष्फलं ।
शुभकर्म्माणि सर्व्वाणि नैव कुर्य्याद्विचक्षणः ॥”
इति ज्योतिस्तत्त्वम् ॥
रविवारे १० । ११ । सोमवारे ८ । ६ । मङ्गलवारे १७ । १८ । १ । २ । बुधवारे १३ । ६ । वृहस्पतिवारे १६ । २० । २६ । २७ । शुक्रवारे १५ । ४ । शनिवारे २४ । २२ । इति यमघण्टयोगः ॥

यमजः, त्रि, (यमौ यमकः सन् जायते इति । जन्+डः ।) एककालीनैकगर्भजातसन्तानद्वयम् । यथा, मेदिनी । मे, २३ ।
“यमोऽन्यलिङ्गो यमजे ना काके शमने शनौ ॥”
(यथा च कथासरित्सागरे । २३ । ६१ ।
“शान्तिकरोऽपि पुरोधा भ्रातृसुतं शान्तिसोममपरञ्च ।
वैश्वानरमर्पितवान् पिङ्गलिकापुत्रकौ यमजौ ॥”)

अस्य व्युत्पत्तिं यमशब्दे द्रष्टव्यम् ॥ (अश्वविशेषे, पुं। यथा, अश्ववैद्यके । ३ । १५२ ।
"एकेनाङ्गेन हीनेन भिन्नेन च विशेषतः ।
यमजं वाजिनं विन्द्यात् वामनं वामना-
कृतिम् ॥")

यमदग्निः, पुं, (जमन् हुतभक्षणशीलः प्रज्वलितोऽग्निरिव । पृषोदरादित्वात् जस्य यः ।) जमदग्निमुनिः । स तु परशुरामपिता । इति भरतद्विरूपकोषः ॥ (विवृतिस्तु जमदग्निशब्दे द्रष्टव्या ॥)

यमदूतः, पुं, (यमस्य दूतः ।) यमस्य चरः । यथा,—
"यमदूतपिशाचाद्यैर्यत् परासुरुपास्यते ।
सद्भिरौषधवीर्य्याणि तस्मात्तं परिवर्ज्जयेत् ॥"
इति वाग्भटे शरीरस्थाने पञ्चमेऽध्याये ॥)
धर्म्मस्य उवाच ।
"के यूयं विकृताकाराः पाशमुद्गरपाणयः ।
दंष्ट्राकरालवदना अङ्गारसदृशप्रभाः ॥
यूयं सर्व्वे महावीराः ज्वलत्पावकलोचनाः ।
कृता तथापि युष्माकमियं केन सुदुर्गतिः ॥"
यमदूता ऊचुः ।
"यमदूता वयं सर्व्वे यमाज्ञाकारिणः सदा ।
त्वद्दत्तोऽयं दिनास्माकं सुमहान् कष्टलो-
दयः ॥"
इति पद्मपुराणे क्रियायोगसारे ६ अध्यायः ॥

यमदूतकः, पुं, (यमस्य दूत इवेति कन् ।) काकः । इति शब्दरत्नावली ॥ (यमदूत+स्वार्थे कन् ।) यमदूतश्च ॥

यमदूतिका, स्त्री, (यमस्य दूतिकेव ।) तिन्तिडीवृक्षः । (यथा,—
"जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः ।
किमाश्चर्य्यं चारभूमौ प्रावृदा यमदूतिका ॥"
इत्युद्भटः ।)

यमदेवता, स्त्री, (यमो देवता अधिष्ठात्री यस्याः ।) भरणीनक्षत्रम् । इति हेमचन्द्रः । २ । २९ ॥

यमद्रुमः, पुं. (यम इव भयावहो द्रुमः ।) शाल्मलिवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य शाल्मलिशब्दे ज्ञातव्यम् ॥)

यमद्वितीया, स्त्री, (यमप्रिया द्वितीया इति मध्यपदलोपिकर्म्मधारयः ।) कार्त्तिकशुक्लद्वितीया । भ्रातृद्वितीया इति ख्याता । तत्कृत्यं यथा । लिङ्गपुराणे ।
"कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम् ।
या न कुर्य्याद्विनश्यन्ति भ्रातरः सप्तजन्मनि ॥"
तस्या इति शेषः । महाभारते ।
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर ! ।
यमो यमुनया पूर्ब्बं भोजितः स्वगृहे स्वयम् ।
तस्मान्निजगृहे पार्थ ! न भोक्तव्यमतो बुधैः ॥
यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ।
दानानि च प्रदेयानि भगिनीभ्यो विशेषतः ॥"
तथा ।
"यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत् ।
अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः ॥"
सहजद्वयैर्भगिनीभ्रातृभिः । अर्घ्यमन्त्रः ।
"एह्येहि मार्त्तण्डज पाशहस्त
यमान्तकालोकधरामरेश ।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते ॥
धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज ।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्त्र नमोऽस्तु ते ॥"
यमुनाञ्च संपूज्य नमस्कुर्य्यात् ।
"यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते ।
वरदा भव मे नित्यं सूर्य्यपुत्त्रि नमोऽस्तु ते ॥"
अन्नं दत्त्वा पठेत् ।
"भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः ॥"
ज्येष्ठा चेत् तदाग्रजाताहमिति वदेत् ॥ अत्र भोक्तव्यं पुष्टिवर्द्धनं इति विधिसमभिव्याहृतफलश्रुत्या भोजननियमस्य प्राधान्यात्तस्य मुख्यकालोऽष्टधाविभक्तदिनपञ्चमांशो ग्राह्यः । यथा दक्षः ।
"पञ्चमे च तथा भागे संविभागो यथार्हतः ।
पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते ॥
संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् ।
इतिहासपुराणाद्यैः षष्ठञ्च सप्तमं नयेत् ॥"
संविभागो विभज्यान्नस्य प्रतिपादनम् । देवोऽत्र वैश्वदेवसम्बन्धी । पञ्चमांशालाभे तु ।
"न भुञ्जीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् ।
नातिप्रगे नातिसायं नातिसन्ध्यासमीपतः ॥"
इति मनूक्तपर्य्युदस्तसूर्य्योदयेतरकालोऽपि ग्राह्यः । सौहित्यं तृप्तिः । अत्र भोजनस्य रागप्राप्तत्वेऽपि तत्कालस्य ।
"मुनिभिर्द्दिरशनं प्रोक्तं विप्राणां मर्त्त्यवासिनां
नित्यम् ।
अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः ॥"
इति कात्यायनीयेन नियमितत्वाद्भोजनकालस्य वैधत्वेन शास्त्रीयत्वात् न सामान्यशास्त्रप्राप्तमुपजीविपर्य्युदासासङ्गतिः । अत्रानध्ययनं भ्रात्तानाम् । प्रेतपक्षोत्तरद्वितीयायां तन्निषेधात् । यथा च राजमार्त्तण्डे ।
"प्रेकोचे या द्वितीयास्ताः प्रेतपक्षे गते तु या ।
या तु कोजागरे याते चैत्रावल्याः परेऽपि च ॥
चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः ।
पराश्रिताश्चानध्यायः पुराणैः परिकीर्त्तितः ॥"
ज्यातिषे । तथा यमद्वितीयायां यात्रायां मरणं भवेत् । इति तिथ्यादितत्त्वम् ॥ * ॥ अस्या व्रतविधानं यथा,—
नारद उवाच ।
"भगवन् ! प्रष्टुमिच्छामि त्वामहं विनया-
न्वितः ।
तद्व्रतं ब्रूहि मे स्वामिन् ! मृत्युं येन न पश्यति ॥
अल्पदोषं महत्पुण्यं शोभनं व्रतमुत्तमम् ।
प्रसादं कुरु मे स्वामिन् ! यथाहं तत् करोमि
भोः ॥
ब्रह्मोवाच ।
यदि चेच्छसि विप्रेन्द्र व्रतानां व्रतमुत्तमम् ।
व्रतं यमद्वितीयाख्यं शृणु त्वं मृत्युवारणम् ॥
कार्त्तिके मासि शुक्लायां द्वितीयायां मुनीश्वर ! ।
कर्त्तव्यं तद्विधानेन ह्यपमृत्युनिवारणम् ॥
ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेदात्मनो हितम् ।
प्रातः कृत्वा द्विजः स्नानं दन्तधावनपूर्ब्बकम् ॥
ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ।
कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः ॥
विधिं विष्णुञ्च रुद्रञ्च संस्थाप्यौडुम्बरे शुभे ।
पद्मं सप्तदलं कृत्वा पूजयेत् सुस्थमानसः ॥
चन्दनागुरुकर्पूरकुङ्कुमैर्द्विजसत्तम ! ।
पुष्पैर्धूपैश्च नैवेद्यैर्नारिकेलादिभिः फलैः ॥
सरस्वतीञ्च वरदां वीणापुस्तकधारिणीम् ।
ध्यायेत् शुक्लाम्बरधरां हंसवाहनसंस्थिताम् ॥
ततो मृत्युविनाशार्थं सालङ्कारां पयस्विनीम् ।
विप्राय वेदविदुषे गाञ्च दद्यात् सवत्सकाम् ॥
अपमृत्युविनाशाय संसारार्णवतारिकाम् ।
विप्र तुभ्यमिमां रौद्रीं धेनुं सम्प्रददे ह्यहम् ॥
इति वाक्यविचारेण धेनुं दद्याद्द्विजातये ।
कुलीनाय सुशान्ताय रोगहीनद्विजाय वै ॥
तदभावे चोदकुम्भं सवस्त्रं सहिरण्यकम् ।
औडुम्बरविधानेन सम्प्रदद्याद्द्विजातये ॥
तस्याप्यलाभे विप्रेन्द्र ! विप्राय सदुपानहौ ।
दद्यात् कार्त्तिकशुक्लायां द्वितीयायां विशेषतः ॥
ज्ञातिश्रेष्ठान् तथा वृद्धान् संपूज्य चाभिवादयेत् ।
नारिकेलादिदानेन तोषयेत् स्वजनानपि ॥
ततः सोदरसम्पन्ना भगिनी याभवन्मुने ! ।
तस्या गृहं समागत्य श्रद्धानोऽभिराजयेत् ॥
भद्रे भगिनि ! शुभगे त्वदङ्घ्रिसरसीरुहे ।
श्रेयसेऽद्य नमस्कर्त्तुमागतोऽहं तवालयम् ॥
इति श्रुत्वा भगिन्यादिः सोदरं विनयान्वितम् ।
मृदुवाक्यैस्ततस्तस्य पूजनं क्रियते महत् ॥
अद्य भ्रातृमती भ्रातस्त्वं मो वयसि बान्धवः ।
भोक्तव्यं भोऽद्य मद्गेहे त्वायुषे कुलदीपक ! ॥
कार्त्तिके शुक्लपक्षस्य द्वितीयायां सहोदरः ।
यमो यमुनया पूर्ब्बं भोजितः स्वगृहेऽर्च्चितः ।
अस्मिन् दिने यमेनापि पूजिता भगिनी शुभा ॥
स्वसुर्नरो वेश्मनि यो न भुङ्क्ते
यमद्वितीयादिनमेव लब्धा ।
तं पापिनं सर्व्वसुराः प्रबुध्य
संसारमार्गे रटयन्ति विप्र ! ॥
तस्माद्भ्रात्रा स्वसृगृहे भोक्तव्यं मासि कार्त्तिके ।
शुक्लायाञ्च द्वितीयायां सर्व्वैश्वर्य्याय भो द्विज ! ॥
वर्षे वर्षे च कर्त्तव्यं यशसे आयुषे श्रिये ।
ततः सम्प्राप्य सुमते भगिन्यै सुविधानतः ॥
स्वर्णालङ्कारवस्त्रादिदानसत्कारमादरात् ।
प्रदद्यान्मुनिशार्द्दूल प्रश्रयावनतः सुधीः ॥
स आशीषं प्रगृह्यास्या नमस्कृत्य क्षमापयेत् ।
सर्व्वा भगिन्यः सन्तोष्या ज्येष्ठानुक्रमशस्तदा ॥
वस्त्रान्नपानसत्कारैर्भोजनैः पुष्टिवर्द्धनैः ।
करोत्येवं नरो विद्वान्न याति यमयातनाम् ।

अपमृत्युं न चाप्नोति सत्यं सत्यं हि नान्यथा ॥
यैर्भगिन्य: सुवासिन्यो वस्त्रालङ्कारतोषिता: ।
न तेषां वत्सरं यावत् कलहो न रिपोर्भयम् ॥
व्रतस्यास्य प्रसादेन भूता: प्रेताश्च राक्षसा: ।
दूरादेव पलायन्ते धर्म्मराजेन ताड़िता: ॥
यो देवो महिषारूढ़ो दण्डमुद्गरधारक: ।
वेष्टित: किङ्करैर्दुष्टैस्तस्मै कालात्मने नम: ॥
इत्थं त्वं द्विजशार्द्दूल ! कुरुष्व तद्व्रतं शुभम् ।
रम्यं यमद्वितीयाख्यमपमृत्युनिवारणम् ॥
व्रतस्यास्य प्रभावेन पुत्त्रपौत्त्रसमन्वित: ।
सत्यं वदामि ते विप्र ! गृहस्थ: स्यात् सदैव हि ॥
गार्हस्थ्येन समो धर्म्मो न भूतो न भविष्यति ।
सन्देहोऽत्र न कर्त्तव्य इह लोके परत्र च ॥
ये वै यमद्वितीयाख्यं व्रतं कुर्व्वन्ति मानवा: ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥
अपुत्त्रो लभते पुत्त्रं धनहीनो लभेद्धनम् ।
भार्य्याहीनो लभेद्भार्य्यां सुरूपां कुलसम्भवाम् ॥
यस्यां तिथौ यमुनया यमराजदेव:
संभोजित: सकललोकनिपातदक्ष: ।
तस्यां भुनक्ति सुतिथौ च गृहे भगिन्या:
प्राप्नोति वित्तमतुलं स चिरायुरेव ॥”
इति पाद्मे उत्तरखण्डे १२५ अध्याय: ॥

यमधार:, पुं, (यमा युग्मीभूता धारास्य । यद्वा, यमवत् विनाशिका धारा यत्र ।) पार्श्वद्वय-धारायुक्तास्त्रविशेष: । किरीच काटार इत्यादि भाषा ॥

यमनं, क्ली, (यम्+भावे ल्युट् ।) बन्धनम् । उपरति: । इति मेदिनी । ने, ११९ ॥ (संयम: । यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ४८ ।
“अणुर्वामननामासि यतस्त्वं वामनाख्यया ।
मननान्मुनिरेवासि यमनाद्द यतिरुच्यसे ॥”)

यमन:, पुं, (यमयति नियमयतीति । यम्+ल्यु: ।) यम: । इति मेदिनी । ने, १११ ॥ (यमयति वशमानयतीन्द्रियग्राममिति । संयमकर्त्तरि, त्रि । यथा, वाजसनेयसंहितायाम् । ८ । २२ ।
“यन्तासि यमनो ध्रुवोऽसि धरुण: ।”
“यमन: स्वयं संयमनकर्त्ता भवसि ।” इति तद्द्भाष्ये महीधर: ॥ नियमकारिणि च त्रि । यथा, तत्रैव । १४ । २२ ।
“यन्त्री राड़्यन्त्र्यसि यमनी ध्रुवासि धरित्री ।”
“यमनी सर्व्वेषां नियमकारिण्यसि ।” इति तद्भाष्ये महीधर: ॥)

यमनिका, स्त्री, (यच्छति आवृणोतीति । यम्+ल्युः । कन् । टाप् ।) यवनिका । इत्यमरटीकायां रामाश्रम: ॥ कानात् इति भाषा ॥

यमपत्नी, स्त्री, (यमस्य पत्नी ।) यमस्य भार्य्या । यमस्य द्वे भार्य्ये । धूमोर्णा १ विजया २ । इति जटाधर: ॥

यमप्रिय:, पुं, (प्रीणातीति । प्री+क: । यमस्य प्रिय: ।) वटवृक्ष: । इति शब्दरत्नावली ॥

यमभगिनी, स्त्री, (यमस्य भगिनी स्वसा ।) यमुना । इति हेमचन्द्र: । ४ । १६८ ॥

यमराज:, पुं, (यमश्चासौ राजा चेति । “राजाह: सखिभ्यष्टच् ।” ५।४।९१ । इति टच् ।) यम: । इति हेमचन्द्र: । २।९८ ॥ अस्य पुर्य्यादि यथा,
“पुरी संयमनी तस्य चित्रगुप्तस्तु लेखक: ।
भृत्यौ चण्डमहाचण्डौ धूमोर्णाविजये प्रिये ।
विचारभूमिका नीचि: सहाया: कालपुरुषा: ॥”
इति जटाधर: ॥ * ॥
स च विमात्रा छायया शप्त: । (यथा, मार्कण्डेये । ७७ । २५—२९ ।
“छायासंज्ञा त्वपत्येषु यथा स्वेष्वतिवत्सला ।
तथा न संज्ञाकन्यायां पुत्त्रयोश्चान्ववर्त्तत ॥
लालनाद्युपभोगेषु विशेषमनुवासरम् ।
मनुस्तत्क्षान्तवानस्या यमस्तस्या न चक्षमे ॥
ताड़नाय च वै कोपात् पादस्तेन समुद्यत: ।
तस्या: पुन: क्षान्तिमता न तु देहे निपातित: ॥
तत: शशाप तं कोपात् छायासंज्ञा यमं द्विज ।
किञ्चित् प्रस्फुरमाणोष्ठी विचलत्पाणिपल्लवा ॥
पितु: पत्नीममर्य्यादं यन्मां तर्ज्जयसे पदा ।
भुवि तस्मादयं पादस्तवाद्यैव पतिष्यति ॥”)
तच्छापान्तं यथा,—
“स्वरूपधारिणीं चैमामानिनाय निजाश्रमम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्कर: ॥
तत: पूर्व्वसुतो योऽस्या: सोऽभूद्वैवस्वतो मनु: ।
द्वितीयस्तु यम: शापाद्धर्म्मदृष्टिरभूत् सुत: ॥
क्रिमयो मांसमादाय पादतस्ते महीतलम् ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम् ॥
धर्म्मदृष्टिर्यतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगं तं याम्ये चकार तिमिरापह: ॥
यमुना च नदी जज्ञे कलिन्दान्तरवाहिनी ॥”
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे । ७८ । २५—२९ ॥

यमराट्, [ज्] पुं, (प्राणिसंयमनात् यमप्रभृतय: किङ्करास्तेषु राजते यमेन संयमेन राजते इति वा । राज्+क्विप् । इत्यमरटीकायां रघुनाथ: ।) यम: । इत्यमर: । १ । १ । ६१ ॥

यमलं, क्ली, (यमं लातीति । ला+क: ।) युग्मम् । इति हेमचन्द्र: । ६ । ६० ॥ (त्रि, यमज: । यथा, देवीभागवते । ३ । २८ । ५ ।
“सुमित्रातनयौ जातौ यमलौ द्वौ मनोहरौ ।
ते जाता वै किशोराश्च धनुर्व्वाणधरा: किल ॥”)

यमलच्छद:, पुं, (यमलं यमजं छदमस्य । बहुव्रीहौ क: ।) अश्मन्तकवृक्ष: । कोविदारवृक्ष: । इति राजनिघण्ट: ॥

यमलार्ज्जुनहा, [न्] पुं, (यमलार्ज्जुनौ हतवान् इति । हन्+क्विप् ।) श्रीकृष्ण: । इति हेमचन्द्र: ॥

यमलार्ज्जुनौ, पुं, (यमलौ च तावर्ज्जुनौ चेति कर्म्मधारय: ।) गोकुलस्यार्ज्जुनवृक्षद्वयम् । तौ कुवेरपुत्त्रौ नलकूवरमणिग्रीवौ । नारदशापात् वृक्षतां गतौ श्रीकृष्णेन उद्धारितौ । यथा,—
“यदिमौ लोकपालस्य पुत्त्रौ भूत्वा तम:प्लुतौ ।
न विवाससमात्मानं विजानीत: सुदुर्म्मदौ ॥
अतोऽर्हत: स्थावरतां स्यातां नैवं यथा पुन: ।
स्मृति: स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥
वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ।
वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यत: ॥
श्रीशुक उवाच ।
स एवमुक्त्वा देवर्षिर्गतो नारायणाश्रमम् ।
नलकूवरमणिग्रीवावासतुर्यमलार्ज्जुनौ ॥
ऋषेर्भागवतमुख्यस्य सत्यं कर्त्तुं वचो हरि: ।
जगाम शनकैस्तत्र यत्र स्तो यमलार्ज्जुनौ ॥
देवर्षिर्मे प्रियतमौ यदिमौ धनदात्मजौ ।
तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना ॥
इत्यन्तरेणार्ज्जुनयो: कृष्णस्तु यमयोर्ययौ ।
आत्मनिर्व्वेशमात्रेण तीर्य्यग्गतमुदूखलम् ॥
बालेन निष्कर्षतान्वगुदूखलं तत्
दामोदरेण तरसोत्कलिताङ्घ्रिबन्धौ ।
निष्पेततु: परमविक्रमितातिवेप-
स्कन्धप्रवालविटपौ कृतचण्डशब्दौ ॥
तत्र श्रिया परमया ककुभ: स्फुरन्तौ
सिद्धावुपेत्य कुजयोरिव जातवेदा: ।
कृष्णं प्रणम्य शिरसाखिललोकनाथं
बद्धाञ्जली विरजसाविदमूचतु: स्म ॥
वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्म्मसु मनस्तव पादयोर्न: ।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टि: सतां दर्शनेऽस्तु भवत्तनूनाम् ॥
श्रीभगवानुवाच ।
तद्गच्छतं मत्परमौ नलकूवरसादनम् ।
संजातो मयि भावो वामीप्सित: परमोऽभव: ॥
श्रीशुक उवाच ।
इत्युक्तौ तं परिक्रम्य प्रणम्य च पुन: पुन: ।
बद्धोलूखलमामन्त्र्य जग्मतुर्दिशमुत्तराम् ॥”
इति श्रीभागवते १० स्कन्धे १० अध्याय: ॥

यमली, स्त्री, (यमल+स्त्रियां ङीष् ।) चोटिकाद्वयम् । इति मेदिनी । ने, १२६ ॥ चोटी शाटीपर्य्याये हेमचन्द्रेण गणिता सैव चोटिका ॥

यमवाहन:, पुं, (यमस्य वाहन: ।) महिष: । इति हेमचन्द्र: । ४ । ३२७ ॥ (तथास्य पर्य्याय: ।
“महिषो घोटकारि: स्यात् कासरश्च रजस्वल: ।
पीनस्कन्ध: कृष्णकायो लुलापो यमवाहन: ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

यमव्रतं, क्ली, (यमस्य धर्म्मराजस्येव व्रतम् ।) राजधर्म्मविशेष: । स तु पक्षपातं विना पापिनां शासनरूप: । इति पुराणम् ॥

यमस्वसा, [ऋ] स्त्री, (यमस्य स्वसा भगिनी ।) यमुना । दुर्गा । इति मेदिनी । से, ६० ॥ (यदुक्तं हरिवंशे आर्य्यास्तवप्रकरणे । ५८ । ृ ।
“जया च विजया च त्वं तुष्टि: पुष्टि: क्षमा दया ।
ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥”)

यमानिका, स्त्री, (यमानी+स्वार्थे कन् ।) यमानी । तत्पर्य्याय: । अजमोदा २ उग्रगन्धा ३ ब्रह्मदर्भा ४ । इत्यमर: । २ । ४ । १३५ ॥
“चत्वारि यमान्याम् । यमानी द्विविधा एका

चैत्रयमानी सा अजमोदा इत्येव ख्याता। अपरा यमानी इत्येव ख्याता अविशेषात् इदोरपीति सुभूतिः। केचित्तु अजमोदादिदं वनयमान्या ब्रह्मदर्भादिदयं यमान्यामित्याहुः। उग्रगन्धाजमोदाख्या स्मृता चैत्रयमानिका इति। 'यमानी दीपको दीप्यो भूतिकश्च यमानिका।' इति च रत्नः। यच्छति विरमति निवर्त्तते अग्निमान्द्यमनया यमानी। यमौ उ विरतौ वाम्नोति अनट् ङीप् यमानी स्वार्थे के यमानिका यमानी पञ्चमवर्गपञ्चममध्या। यवानीति अन्तःस्थचतुर्थमध्या इति केचित्।" इति भरतः॥ * ॥ अस्या गुणाः। कुष्ठशूलनाशित्वम्। हृद्यत्वम्। पित्ताग्निकारित्वम्। वायुकफक्रिमिनाशित्वञ्च। इति राजवल्लभः॥

यमानी, स्त्री, (यच्छति विरमति निवर्त्तते अग्निमान्द्यमनयेति। यम + करणे ल्युट्। ङीष्। पृषोदरादित्वात् साधुः।) यमानिका। इति शब्दरत्नावली॥ (यथास्याः पर्य्यायः।
"यमानी दीपको दीप्यो भूतिकश्च यमानिका॥"
इति वैद्यकरत्नमालायाम्॥)

यमान्तकः, पुं, (यमस्यान्तकः। मृत्युञ्जयत्वादेवास्य तथात्वम्।) शिवः। इति शब्दरत्नावली॥ (यमश्च अन्तकश्च तौ इति विग्रहे। वैवस्वतकालौ। यथा, महाभारते। २। १७। १५।
"तेजसा सूर्य्यसङ्काशः क्षमया पृथिवीसमः।
यमान्तकसमः क्रोधे श्रिया वैश्रवणोपमः॥"
"यमो वैवस्वतः अन्तकः कालः।" इति तट्टीकायां नीलकण्ठः॥)

यमी, स्त्री, यमुनानदी। इति त्रिकाण्डशेषः॥ (यथा, श्रीमद्भागवते। ८। १३। ९।
"तृतीयां वड़वामेके तासां संज्ञासुतास्त्रयः।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु॥")

यमुना, स्त्री, (यमयतीति। यमि + "अजियमिशीङ्भ्यश्च।" उणा० ३। ६१। इति उनन्। टाप्।) दुर्गा। यथा,—
"सर्व्वाणि हृदयस्थानि मङ्गलानि शुभानि च।
ददाति चेप्सितान् लोके तेन सा सर्व्वमङ्गला॥
सङ्गमात् गमनाद्गङ्गा लोके देवी विभाव्यते।
यमस्य भगिनी जाता यमुना तेन सा मता॥"
इति देवीपुराणे ४५ अध्यायः॥ * ॥
यच्छति विरमति गङ्गायामिति। नदीविशेषः। सा तु हिमालयदक्षिणदेशान्निर्गत्य प्रयागे गङ्गायां मिश्रिता। तत्पर्य्यायः। कालिन्दी २ सूर्य्यतनया ३ शमनस्वसा ४। इत्यमरः। २। १०। ३२॥ तपनतनूजा ५ कलिन्दकन्या ६ यमस्वसा ७ श्यामा ८ तापी ९ कलिन्दनन्दिनी १० यमनी ११ यमी १२। इति शब्दरत्नावली। कलिन्दशैलजा १३ सूर्य्यसुता १४। इति जटाधरः॥ (यथा,—
"गङ्गा सरस्वती शोणयमुना सरयूः शची।
वेणा इरावती नीला उत्तरात् पूर्व्ववाहिनी॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये॥)
अस्या जलगुणाः। पित्तदाहवमनश्रमापहत्वम्। स्वादुत्वम्। वातजननत्वम्। पावनत्वम्। वह्निदीपनकरत्वम्। रोचनत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ * ॥ सा यमस्य भगिनी। यथा,—
"सावर्णिर्मेरुपृष्ठे तु तपो घोरं चकार ह।
अद्यापि भविता लोके मनुः सावर्णिकेऽन्तरे॥
भ्राता शनैश्चरश्चास्य ग्रहत्वं स तु लब्धवान्।
तयोर्यवीयसी या तु यमस्वसा यशस्विनी।
अभवत् सा सरिच्छ्रेष्ठा यमुना लोकपावनी॥"
इति वह्निपुराणे सागरोपाख्यानम्॥ * ॥
सा च वृन्दावने सुषुम्नाख्या परा शक्तिः। यथा,
श्रीभगवानुवाच।
"इदं वृन्दावनं रम्यं मम धामैव केवलम्।
अत्र ये पशवः साक्षाद्वृक्षाः कीटा नराधमाः।
ये वसन्ति ममाधिष्ठं मृता यान्ति ममान्तिकम्॥
अत्र या गोपपत्न्यश्च निवसन्ति ममालये।
योगिन्यस्तात! एवं हि मम देवाः परायणाः॥
पञ्चयोजनमेवं हि वनं मे देहरूपकम्।
कालिन्दीयं सुषुम्नाख्या परमामृतवाहिनी॥"
इति पाद्मे पातालखण्डे ७ अध्यायः॥ * ॥
अस्या जलस्य कृष्णवर्णत्वकारणं यथा,—
पुलस्त्य उवाच।
"यदा दक्षसुता ब्रह्मन्! सती याता यमक्षयम्।
विनाश्य दक्षयज्ञं तं विचचार त्रिलोचनः॥
ततो वृषध्वजं दृष्ट्वा कन्दर्पः कुसुमायुधः।
अपत्नीकं तदास्त्रेण उन्मादेनाभ्यताड़यत्॥
ततो हरः शरेणाथ उन्मादेनाभिताड़ितः।
विचचार तदोन्मत्तः काननानि सरांसि च॥
स्मरन् सतीं महादेवस्तथोन्मादेन ताड़ितः।
न शर्म्म लेभे देवर्षे बाणविद्ध इव द्विपः॥
ततः पपात देवेशः कालिन्दीसरिते मुने।
निमग्ने शङ्करे चापो दग्धा कृष्णत्वमागता॥
तदाप्रभृति कालिन्द्या भृङ्गाञ्जननिभं जलम्॥"
इति वामने ६ अध्यायः॥ * ॥
ज्यैष्ठशुक्लद्वादश्यादिष्वस्यां स्नानपिण्डदानफलं यथा,—
"ज्यैष्ठशुक्लद्वादश्यां स्नात्वा वै यमुनाजले।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम्॥
यमुनासलिले स्नातः पुरुषो मुनिसत्तम!।
ज्यैष्ठामूलामले पक्षे द्वादश्यामुपवासकृत्॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम्॥
ज्यैष्ठे तु [illegible] सिते पक्षे समभ्यर्च्य जनार्द्दनम्।
धन्यो नः पिण्डनिर्व्वापं यमुनायां प्रदास्यति॥"
इति विष्णुपुराणे ६ अंशे ८ अध्यायः॥

यमुनाजनकः, पुं, (यमुनाया जनकः।) सूर्य्यः। इति हेमचन्द्रः। २। ९॥

यमुनाभित्, [द्] पुं, (यमुनां भिनत्तीति। भिद् + क्विप्।) बलदेवः। इति हेमचन्द्रः। २। १३८॥ (एतद्वृत्तान्तमुक्तं यथा, हरिवंशे। १०२। ३३—३६।
"स हलेनानताग्रेण कूले गृह्य महानदीम्।
चकर्ष यमुनां रामो व्युत्थितां वनितामिव॥
सा विह्वलजलस्रोता ह्रदप्रस्थितसञ्चया।
व्यावर्त्तत नदी भीता हलमार्गानुसारिणी॥
लाङ्गलादिष्टमार्गा सा वेगगा वक्रगामिनी।
सङ्कर्षणभयत्रस्ता योषेवाकुलतां गता॥")

यमुनाभ्राता, [ऋ] पुं, (यमुनाया भ्राता।) यमः। इत्यमरः। १। १। ६१॥

यमेरुका, स्त्री, (यमं ईरयति प्रेरयतीति। ईर + बाहुलकात् उकः। टाप्।) ढक्का। इति त्रिकाण्डशेषः॥

ययातिः, पुं, नहुषराजपुत्त्रः। तत्पर्य्यायः। नाहुषिः २। इति त्रिकाण्डशेषः॥ नाहुषः ३। इति जटाधरः॥ तस्योपाख्यानं यथा,—
"नहुषस्य प्रवक्ष्यामि पुत्त्रान् सप्तैव धार्म्मिकान्।
यतिर्ययातिः संयातिरुद्भवः पञ्चमस्तथा॥
शर्यातिर्मेघयातिश्च सप्तैते वंशवर्द्धनाः।
ययातिरकरोद्राज्यं धर्म्मैकशरणस्तदा॥
शर्म्मिष्ठा तस्य भार्य्याभूत् दुहिता वृषपर्व्वणः।
भार्गवस्याङ्गजा तद्वद्देवयानी च सुव्रता॥
ययातिर्देवयान्यान्तु पुत्त्रावजनयन्नृपः।
यदुञ्च तुर्व्वसुञ्चैव शक्रविष्णू इवापरौ॥
तस्मादेव तु राजर्षेः शर्म्मिष्ठा वार्षपर्व्वणी।
द्रुह्युञ्चानुञ्च पूरुञ्च त्रीन् कुमारानजीजनत्॥
ततः काले च कस्मिंश्चिद्देवयानी शुचिस्मिता।
ययातिसहिता राजन् जगाम हरितं वनम्॥
ददर्श च तदा तत्र कुमारान् देवरूपिणः।
क्रीड़मानान् सुविश्रब्धान् विस्मिता चेदमब्रवीत्॥
किन्नामधेयं गोत्रं वः पुत्त्रकाः! ब्राह्मणः पिता।
विब्रूत मे यथातथ्यं श्रोतुमिच्छामि तं ह्यहम्॥
तेऽदर्शयन् प्रदेशिन्या तमेव नृपसत्तमम्॥
बुद्ध्वा च तत्त्वतो देवी शर्म्मिष्ठामिदमब्रवीत्॥
ममाधीना सती कस्मादकार्षीर्विप्रियं मम॥
शर्म्मिष्ठोवाच।
यदा तया वृतो राजा वृत एव तदा मया।
त्वत्तो हि मे पूज्यतमो राजर्षिः किं न वेत्सि तत्॥
शौनक उवाच।
श्रुत्वा तस्यास्ततो वाक्यं देवयान्यब्रवीदिदम्।
राजन्नाद्येह वत्स्यामि विप्रियं मे त्वया कृतम्॥
अविब्रुवन्ती किञ्चिच्च राजानं साश्रुलोचना।
अचिरादेव संप्राप्ता काव्यस्योशनसोऽन्तिके॥
देवयान्युवाच।
शर्म्मिष्ठयातिवृत्तास्मि दुहित्रा वृषपर्व्वणः।
त्रयोऽस्यां जनिताः पुत्त्रा राज्ञानेन ययातिना।
दुर्भगाया मम द्वौ तु पुत्त्रौ तात! ब्रवीमि वः॥
शुक्र उवाच।
धर्म्मज्ञः सन् महाराज! योऽधर्म्ममकृथाः प्रियम्।
तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्ज्जया॥
ययातिरुवाच।
ऋतुकामां स्त्रियं यस्तु गम्यां रहसि याचितः।
नोपैति स च धर्म्मेषु भ्रूणहेत्युच्यते बुधैः॥

अधर्म्मभयसंविग्नः शर्म्मिष्ठामुपजग्मिवान् ॥
अलग्नो यौवनस्याहं देवयान्या भृगूद्वह ! ।
प्रसादं कुरु मे ब्रह्मन् जरेयं मा विशेत माम् ॥
शुक्र उवाच ।
नाहं मृषा ब्रवीम्येतत् जरां प्राप्तोऽसि भूमिप ! ।
जरां त्वेतां त्वमन्यस्मै संक्रामय यदीच्छसि ॥
वयो दास्यति पुत्त्रो यः स ते राजा भविष्यति ॥”
इति मात्स्ये ३२ अध्यायः ॥ * ॥
शौनक उवाच ।
“जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ।
पुत्त्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः ॥
त्वं यदो ! प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा सम्प्रतिपत्स्यामि पाप्मानं जरया सह ॥
यदुरुवाच ।
सन्ति ते बहवः पुत्त्रा मत्तः प्रियतरा नृप ! ।
जरां ग्रहीतुं धर्म्मज्ञ ! पुत्त्रमन्यं वृणीष्व वै ॥
ययातिरुवाच ।
यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
मातामातुलसम्बन्धात् दुष्प्रजा ते भविष्यति ॥
तुर्व्वसो प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन चरेयं वै विषयांस्तव पुत्त्रक ! ॥
तुर्व्वसुरुवाच ।
न कामये जरां तात ! कामभोगप्रणाशिनीम् ।
बलरूपान्तकरणीं बुद्धिमानविनाशिनीम् ॥
ययातिरुवाच ।
यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् प्रजा समुच्छेदं तुर्व्वसो ! तव यास्यति ॥
द्रुह्यो ! त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीम् ।
जरां वर्षसहस्राणि यौवनं स्वं प्रयच्छ च ॥
द्रुह्युरुवाच ।
न गजं न रथं चाश्वं जीर्णो भुङ्क्ते वरस्त्रियम् ।
नारोगश्चास्य भवति तां जरां ते न कामये ॥
ययातिरुवाच ।
यत्त्व मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् द्रुह्यो ! प्रियः कामो न ते सम्पत्स्यते
क्वचित् ॥
अनो ! त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
एकं वर्षसहस्रन्तु चरेयं यौवनेन ते ॥
अनुरुवाच ।
जीर्णः शिशुरिवादत्ते कालेऽन्नमशुचिर्यथा ।
न जुहोति च कालेऽग्निं तां जरां नैव कामये ॥
ययातिरुवाच ।
यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
जरादोषस्त्वयोक्तो यस्तस्मात्त्वं प्रतिपत्स्यसे ॥
पूरो ! मे त्वं प्रियः पुत्त्र ! त्वं वरीयान् भविष्यसि ।
कायस्त्वौशनसः शापान्न च तृप्तोऽस्मि यौवने ॥
पूरो ! त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
किञ्चित्कालं चरेयं वै विषयान् वयसा तव ॥
पूर्णे वर्षसहस्रे तु प्रतिदास्यामि यौवनम् ।
स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥

शौनक उवाच ।
एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा ।
यथात्थ त्वं महाराज ! तत् करिष्यामि ते वचः ॥
ययातिरुवाच ।
पूरो ! प्रीतोऽस्मि ते वत्स प्रीतश्चेदं ददामि ते ।
सर्व्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥”
इति मात्स्ये ३३ अध्यायः ॥ * ॥
शौनक उवाच ।
“पौरवेणाथ वयसा ययातिर्नहुषात्मजः ।
प्रीतियुक्तो नरश्रेष्ठश्चचार विषयान् सुखी ॥
पूर्णं मत्वा ततः कालं पूरुं पुत्त्रमुवाच ह ।
पूरो ! प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौ-
वनम् ॥
राज्यञ्चापि गृहाणेदं यत् त्वयोपहृतं पुरा ॥
शौनक उवाच ।
एवं स नाहुषो राजा ययातिः पुत्त्रमीप्सितम् ।
राज्येऽभिषिच्य मुदितो वानप्रस्थोऽभवन्मुनिः ॥
उषित्वा वनवासं स ब्राह्मणैः सह संश्रितः ।
फलमूलाशनो दान्तो यथा स्वर्गमितो गतः ॥”
इति मात्स्ये ३५ अध्यायः ॥ * ॥

ययीः, पुं (यायते प्राप्यते भक्तैरिति । या + “यापोः किद्द्वे च” । उणा० ४ । १५६ । इति ईः द्वित्वञ्च ।) महादेवः । इत्युणादिकोषः ।४।१५७॥ (याति द्रुतं गच्छतीति । अश्वः । इत्युज्ज्वलदत्तः ॥)

ययुः, पुं, (यातीति । या + “यो द्वे च ।” उणा० १ । २२ । इति उः द्वित्वञ्च । यजत्यनेनेति । यज + उः । पृषोदरादित्वात् जस्य यत्वमित्यमर-टीकायां रघुनाथः ।) अश्वमेधीयाश्वः । सामान्यघोटकः । इति मेदिनी । ये, ४७ ॥

यवः, पुं, (यूयते अम्भसा इति । यु मिश्रणे + अप् ।) स्वनामख्यातशूकधान्यम् । तत्पर्य्यायः । सित-शूकः २ । इत्यमरः । २।९।१५ ॥ शितशूकः ३ । इति शब्दरत्नावली ॥ मेध्यः ४ दिव्यः ५ अक्षतः ६ कञ्चुकी ७ धान्यराजः ८ तीक्ष्णशूकः ९ तुरग-प्रियः १० शक्तुः ११ महेष्टः १२ पवित्रधान्यम् १३ । तस्य गुणाः । कषायत्वम् । मधुरत्वम् । सुशीतलत्वम् । प्रमेहपित्तकफापहारकत्वञ्च । अशूकसुकयवगुणाः । बलप्रदत्वम् । वृष्यत्वम् । नृणां बहुवीर्य्यपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
“यवः कषायमधुरो बहुवातशकृद्गुरुः ।
रूक्षः स्थैर्य्यकरः शीतो मूत्रमेदकफापहः ॥”
इति राजवल्लभः ॥ * ॥
(अपि च ।
“यवः कषायो मधुरो हिमश्च
कटुर्विपाके कफपित्तहारी ।
व्रणेषु पथ्यस्तिलवच्च नित्यं
प्रबद्धमूत्रो बहुवातवर्च्चाः ॥
स्थैर्य्याग्निमेधा स्वरवर्णकृच्च
स पिच्छिलः स्थूलविलेखनश्च ।
मेदो मरुत्तृड्हरणोऽतिरूक्षः
प्रसादनः शोणितपित्तयोश्च ॥
एभिर्गुणैर्हीनतरास्तु किञ्चिद्-
विद्यादृ यवेभ्योऽतियवान् विशेषैः ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥
“रूक्षः शीतो गुरुः स्वादुर्बहुवातशकृद्यवः ।
स्थैर्य्यकृत् सकषायस्तु बल्यः श्लेष्मविकारनुत् ॥
रूक्षः कषायानुरसो मधुरः कफपित्तहा ।
मेदःक्रिमिविषघ्नश्च बल्यो वेणुयवः स्मृतः ॥”
इति चरके सूत्रस्थाने २७ अध्याये ।
“क्वचिद्वाक्यशेषादपि शक्तिग्रहः यथा यवपदस्य कङ्गुप्रभृतौ म्लेच्छानां दीर्घशूके च शिष्टानां व्यवहारादेकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीति श्रुतौ यवपदस्यार्थे सन्देहे ।
‘वसन्ते सर्व्वशस्यानां जायते पत्रशातनम् ।
मोदमानास्तु तिष्ठन्ति यवाः कणिशशालिनः ॥’
इति विध्यर्थाकाङ्क्षया प्रवर्त्तमानाद्वाक्यशेषाद्दीर्घ-शूक एव यवपदस्य शक्तिग्रहः ।” इति शब्दशक्ति-प्रकाशिकायां नैमित्तिकसंज्ञायाम् ॥ * ॥ हविष्ये यवानामेव मुख्यत्वम् । यथा, —
“हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादिसर्व्वालाभेऽपि वर्ज्जयेत् ॥”
इति कात्यायनसंहिता । ९ । १० ॥
नवयवागमे तैरवश्यं श्राद्धं कार्य्यं अकरणे प्रत्यवायश्रवणात् । यथा, —
“नक्षत्रग्रहपीड़ासु दुष्टस्वप्नावलोकने ।
इच्छाश्राद्धानि कुर्व्वीत नवशस्यागमे तथा ॥
इति विष्णुपुराणात् वक्ष्यमाणबहुतरवचनेषु नवान्नश्रुतेः नवान्नागमत्वेनैव निमित्तं लाघवात् ।
अमावस्यास्तिस्रोऽष्टका माघी प्रौष्ठपद्यूर्द्ध कृष्ण-त्रयोदशी व्रीहियवपाकौ च ।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥”
इति श्राद्धतत्त्वे नवान्नश्राद्धे ॥)
परिमाणविशेषः । स तु चतुर्धान्यमानरूपः । इति शुभङ्करः ॥ षट्सर्षपपरिमाणात्मकञ्च । यथा, —
“जालान्तरगते भानौ यच्चाणु दृश्यते रजः ।
तैश्चतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिश्च सर्षपः ।
षट्सर्षपैर्यवस्त्वेको गुञ्जैका तु यवैस्त्रिभिः ॥”
इति शब्दचन्द्रिका ॥ * ॥
अङ्गुलिस्थयवाकाररेखाविशेषः । यथा, —
“तर्ज्जनीमूलसंप्राप्तौ यवौ पुत्त्रार्थदौ क्रमात् ।
मध्यमायां यवश्चैवाङ्गुष्ठेऽपूर्व्वधनप्रदः ॥”
अपि च सामुद्रके ।
“मध्यमायां यदि यवो दृश्यते च सुशोभनः ।
तदान्यसञ्चितं द्रव्यं प्राप्नोत्यङ्गुष्ठके यवे ॥
यस्यापि चक्रमङ्गुष्ठे यवपूर्णञ्च दृश्यते ।
तदा पितामहादीनामर्ज्जितं लभते धनम् ॥”
(पूर्व्वपक्षः । यथा, वाजसनेयसंहितायाम् ।१४। ३१। “एकत्रिंशता स्तुवत प्रजा अस्रज्यन्त यवा-श्चायवाश्चाधिपतय आसन् ।” “यवाः पूर्व्व-पक्षाः अयवाः अपरपक्षाः ।” इति तट्टी-कायां महीधरः ॥)

यवकः, पुं (यवप्रकारः । यव+"स्थूलादिभ्यः प्रकारवचने कन् ।"५।४।३। इति कन् ।) यवः । इत्यमरटीकायां रामाश्रमः ॥ (यथा,—
"यवका हायनाः पांशुवाप्यनैषधकादयः ।
शालीनं शालयः कुर्व्वन्त्यनुकारं गुणा गुणैः ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

यवक्यं, त्रि, (यवकानां भवनं क्षेत्रमिति । यवक+"यवयवकषष्टिकाद् यत् ।" ५ । २ । ३ । इति यत् ।) यवभवनोचितक्षेत्रम् । इत्यमरः । २ । ९ । ७ ॥

यवक्षारः, पुं, (यवजातः क्षारः । शाकपार्थिववत् समासः ।) क्षारविशेषः । यथा,—
"नरसारयवक्षारस्फटिकारित एव काचवकयन्त्रैः ।
बहुशः पाच्यं सत्त्वं तद्धि महाद्रावकन्नाम ॥"
इति रत्नावली ॥
तत्पर्य्यायः । यवाग्रजः २ पाक्यम् ३ । इत्यमरः । २।९।१०८॥ यवलासः ४ यवशूकः ५ सारकः ६ रेचकः ७ यवनालकः ८ । इति शब्दरत्नावली ॥ यावशूकः ९ क्षारः १० तर्षः ११ तीक्ष्णरसः १२ यवनालजः १३ इति रत्नमाला ॥ यवजः १४ यवशूकजः १५ यवाह्वः १६ यवापत्यम् १७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातोदरार्त्तिनाशित्वम् । आमशूलाश्मरुक्कृत्रविषदोषहरत्वम् । सरत्वञ्च । इति राजनिर्घण्टः ॥ अर्शःश्वासगुल्मग्रहणीपाण्डुप्लीहानाहगलामयनाशित्वञ्च । इति राजवल्लभः ॥ (तथा च ।
"पाक्यः क्षारो यवक्षारो यवशूको यवाग्रजः ।
यवक्षारो लघुः स्निग्धः सुसूक्ष्मो वह्निदीपनः ॥
निहन्ति शूलवातामश्लेष्मश्वासगलामयान् ।
पाण्ड्वर्शोग्रहणीगुल्मानाहप्लीहहृदामयान् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

यवक्षोदः, पुं, (यवानां क्षोदः ।) यवचूर्णम् । तत्पर्य्यायः । चिक्कसः २ । इति हेमचन्द्रः ॥

यवगण्डः, पुं, (यूनो गण्डः स्फोटकः । पृषोदरादित्वात् यवादेशः ।) युवगण्डः । इति शब्दरत्नावली ॥ वयस्फोड़ा इति भाषा ॥

यवजः, पुं, (यवाज्जायते इति । जन्+डः ।) यवक्षारः । इति रत्नमाला ॥ (यथास्य पर्य्यायः ।
"यावशूको यवक्षारो यवशूको यवाग्रजः ।
क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः ॥"
इति वैद्यकरत्नमालायाम् ॥)
यवानी । इति राजनिर्घण्टः ॥

यवजोद्भवं, क्ली, (यवजादुद्भवोऽस्य ।) तवक्षीरम् । इति राजनिर्घण्टः ॥

यवतिक्ता, स्त्री, लताप्रभेदः । शङ्खिनीति यवेची इति च ख्याता । (यथा, सुश्रुते सूत्रस्थाने ४५ अः ।
"यवतिक्तातैलं सर्व्वदोषप्रशमनमीषत्तिक्तम् ।
अग्निदीपनं लेखनं मेध्यं पथ्यं रसायनञ्च ॥")
तत्पर्य्यायः । महातिक्ता २ दृढ़पादविसर्पिणी ३ नाकुली ४ नेत्रमीना ५ शङ्खिनी ६ पत्रतण्डुली ७ तण्डुली ८ अक्षपीड़ा ९ सूक्ष्मपुष्पी १० यशस्विनी ११ माहेश्वरी १२ तिक्तफला १३ यावी १४ तिक्ता १५ । अस्या गुणाः । सतिक्ताम्लत्वम् । दीपनत्वम् । रुचिकारित्वम् । कृमिकुष्ठविवर्णास्रदोषनाशित्वम् । रेचनत्वञ्च । इति राजनिर्घण्टः ॥

यवतैलं, क्ली, (यवनिर्म्मितं तैलम् ।) यवचूर्णादियुक्तपक्वतैलविशेषः । तत्प्रकारं गुणञ्चाह ।
"यवचूर्णार्द्धकुड़वं मञ्जिष्ठार्द्धपलेन तु ।
तैलप्रस्थः शतगुणे काञ्जिके साधितो जयेत् ।
ज्वरं दाहं महावेगमङ्गानाञ्च प्रहर्षणम् ॥"
इति सुखबोधः ॥

यवद्वीपः, पुं, (यवनामा द्वीपः इति मध्यपदलोपिकर्म्मधारयः ।) उपद्वीपविशेषः । यावा इति भाषा । यथा,—
"यत्नवन्तो यवद्वीपं सप्तराज्योपशोभितम् ।
सुवर्णरूप्यकं द्वीपं सुवर्णकरमण्डितम् ॥"
इति वाल्मीकीये रामायणे किष्किन्ध्याकाण्डे ४० सर्गः ॥*॥ "अतः परं यत्नवन्तो भूत्वा सप्तराज्योपशोभितं यवद्वीपं तथा सुवर्णद्वीपं विचेतव्यमिति शेषः । सुवर्णकरमण्डितमिति सुवर्णं कुर्व्वन्ति ये तैः शोभितम् ।" इति रामायणतिलकनामतट्टीका ॥

यवनः, पुं, देशविशेषः । (यथा, मात्स्ये ।१२०।४३।
"तान् देशान् प्लावयन्ति स्म म्लेच्छप्रायांश्च सर्व्वशः ।
सशैलान् कुकुरान् रौधान् वर्व्वरान् यवनान् खसान् ॥")
वेगः । वेगाधिकाश्वः । इति मेदिनी ॥ गोधूमः । गर्जरत्नम् । तुरुष्कः । इति राजनिर्घण्टः ॥ (यौति मिश्रीभवतीति । यु+"सुयुरुवृञो युच् ।" उणा० २ । ७४ । इति युच् ।) जातिविशेषः । इति शब्दरत्नावली ॥ स तु यवनदेशोद्भवययातिराजपुत्रतुर्व्वसुवंशः । यथा,—
"यदोस्तु जाता यदवस्तुर्व्वसोर्यवनाः सुताः ।
द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छजातयः ।
पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव ! ॥"
इति मात्स्ये ३४ अध्यायः ॥*॥
सगरराजेनैषां सर्व्वशिरोमुण्डनं सर्व्वधर्म्मराहित्यञ्च कृतं ते चात्मधर्म्मपरित्यागात् म्लेच्छत्वं ययुरिति विष्णुपुराणोक्तत्वात् यवनः मोसलमानेङ्गरेजोभयजातिवाचकः । यवनशब्दश्चवर्गतृतीयादिरिति रघुनन्दनभट्टाचार्य्येण लिखितम् ॥ जवनादीनान्तु सर्व्वधर्म्मराहित्यमुक्तं हरिवंशे । यथा,—
"सगरस्तां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च ।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह ॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत् ।
जवनानां शिरः सर्व्वं काम्बोजानान्तथैव च ॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः ।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना ॥
शका जवनकाम्बोजाः पारदाः पह्लवास्तथा ।
कोलिसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः ॥
वशिष्ठवचनाद्राजन् ! सगरेण महात्मना ।
शकानां शकदेशोद्भवानां क्षत्त्रियाणां एवं जवनादीनामिति । अत्र जवनशब्दस्तद्देशोद्भववाची चवर्गतृतीयादिः । जवनो देशवेगिनोरिति त्रिकाण्डशेषाभिधानदर्शनात् । तेषां म्लेच्छत्वमप्युक्तं विष्णुपुराणे । तथा हतान् जवनादीनुपक्रम्य । ते चात्मधर्म्मपरित्यागात् म्लेच्छत्वं ययुरिति । वौधायनः ।
"गोमांसखादको यश्च विरुद्धं बहु भाषते ।
धर्म्माचारविहीनश्च म्लेच्छ इत्यभिधीयते ॥"
इति प्रायश्चित्ततत्त्वम् ॥*॥
यवनादीनां राज्यकालो यथा,—
"सप्त गर्द्दभिनश्चापि शकाश्चाष्टादश स्मृताः ।
यवनाष्टौ भविष्यन्ति तुखारञ्च भविष्यति ॥
अष्टौ ते यवना राज्यं वर्षाणां परिसङ्ख्यया ।
भोक्ष्यन्त्यशीतिं तद्वच्च येऽपि गर्द्दभिनः स्मृताः ॥
शतानि त्रीणि वर्षाणां दशशीतीनि शतानि वै ।
शकानां राज्यकालः स्याद्भविष्यो निश्चयो गतः ॥
शतस्यार्द्धं चतुर्थानि वर्षाणां राज्यभागिनः ।
मरुत्तानां सुताः काला यस्मिन् भोक्ष्यन्ति ते महीम् ॥
मरुत्ता वृषलैः सार्द्धं तथान्ये म्लेच्छसम्भवाः ।
भोक्ष्यन्ति राज्यं प्राच्येषु भविष्ये तद्विधारितम् ॥
शतानि त्रीणि वर्षाणां पौण्ड्रा राज्यभुजः स्मृताः ।
अत्रन्ति यार्व्वतेयास्तु द्वे शते परिसङ्ख्यया ॥
शतार्द्धमन्यच्च तथा राज्यं भोक्ष्यन्ति ते नृपाः ।
सप्तषष्टिस्तु वर्षाणि दशातीवाह्नतः स्मृताः ॥
तेषु च्छन्नेषु कालेषु ततः किलकिला नराः ।
भविष्यन्तीह यवना धर्म्मतः कामतोऽर्थतः ॥
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः ।
विपर्य्ययेण वर्त्तन्ते जनयिष्यन्ति वै प्रजाः ॥
लुब्धानिष्टवरश्चैव भवितारस्तदा नृपाः ।
तेषां व्यतीते पर्य्याये बहुवर्षयुगास्तदा ॥
राजानः संप्रणश्यन्ति कालेन महता ततः ।
कल्किना ताड़िताः सर्व्वे आर्य्या म्लेच्छाश्च सर्व्वशः ॥
अधार्म्मिकाश्च ये सर्व्वे पाषण्डाश्चैव सर्व्वशः ।
युष्टे नृपतिशब्दे वै सन्ध्यांशिष्टे च वै कलौ ॥"
इति ब्रह्माण्डपुराणे ३९ अध्यायः ॥
मुनिविशेषः । यथा,—
"जातं दिनं दूषयते वशिष्ठश्चाष्टौ च गर्गो यवनो दशाहम् ।
जन्माख्यमासं किल भागुरिश्च शते विवाहे क्षुरकर्णवेधे ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
कालयवनोत्पत्तिर्यथा,—
श्रीपराशर उवाच ।
"गार्ग्यं गोष्ठे द्विजं श्यालः षण्ढ इत्युक्तवान् द्विज ।
यदूनां सन्निधौ सर्व्वे जहसुर्यादवास्ततः ॥
ततः कोपसमाविष्टो दक्षिणापथमेत्य सः ।
सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम् ॥

आराधयन्महादेवं सोऽयश्चूर्णमभक्षयत् ।
ददौ वरञ्च तुष्टोऽस्मै वर्षे द्वादशमे हरः ॥
सभाजयामास च तं यवनेशो ह्यनात्मजः ।
तद्योषित्सङ्गमाच्चास्य पुत्त्रोऽभूदलिसन्निभः ॥
तं कालयवनं नाम राज्ये स्वे यवनेश्वरः ।
अभिषिच्य वनं यातो वज्राग्रकठिनोरसम् ॥
स च वीर्य्यमदोन्मत्तः पृथिव्यां बलिनो नृपान् ।
पप्रच्छ नारदश्चास्मै कथयामास यादवान् ॥
म्लेच्छकोटिसहस्राणां सहस्रैः सोऽभिसंवृतः ।
गजाश्वरथसम्पन्नैश्चकार परमोद्यमम् ॥
प्रययौ चाव्यवच्छिन्नं छिन्नयानो दिने दिने ।
यादवान् प्रति सामर्षो मैत्रेय मथुरां पुरीम् ॥
कृष्णोऽपि चिन्तयामास क्षयितं यादवं कुलम् ।
यवनेन रणे गम्यं मागधस्य भविष्यति ॥
मागधस्य बलं क्षीणं स कालयवनो बली ।
हन्ता तदिदमायातं यदूनां व्यसनं द्विधा ॥
तस्माद्दुर्गं करिष्यामि यदूनामतिदुर्जयम् ।
स्त्रियोऽपि यत्र युध्येयुः किं पुनर्वृष्णिपुङ्गवाः ॥”
“इति सञ्चिन्त्य गोविन्दो योजनानि महोदधिम् ।
ययाचे द्वादशपुरीं द्वारकां तत्र निर्म्ममे ॥
मथुरावासिनो लोकांस्तत्रानीय जनार्द्दनः ।
आसन्ने कालयवने मथुराञ्च स्वयं ययौ ॥
बहिरावासिते सैन्ये मथुराया निरायुधः ।
निर्जगाम स गोविन्दो ददृशे यवनश्च तम् ॥
स ज्ञात्वा वासुदेवं तं बाहुप्रहरणो नृपः ।
अनुयातो महायोगिचेतोभिः प्राप्यते न यः ॥
तेनानुयातः कृष्णोऽपि प्रविवेश महागुहाम् ।
तत्र शेते महावीर्य्यो मुचुकुन्दो नरेश्वरः ॥
सोऽपि प्रविष्टो यवनो दृष्ट्वा शय्यागतं नरम् ।
पादेन ताड़यामास कृष्णं मत्वा सुदुर्म्मतिः ॥
दृष्टमात्रश्च तेनासौ जज्वाल यवनोऽग्निना ।
तत्क्रोधजेन मैत्रेय ! भस्मीभूतश्च तत्क्षणात् ॥”
इति विष्णुपुराणे ५ अंशे २३ अध्यायः ॥

यवनः, त्रि, (यौतीति । यु + “नन्दिग्रहीति ।” ३ । १ । १३४ । इति ल्युः ।) वेगी । इति मेदिनी । ने, १११ ॥ (यथा, नैषधचरिते । १ । ६५ ।
“तमश्ववारा यवनाश्वयायिनं
प्रकाशरूपा मनुजेशमन्वयुः ॥”)

यवनद्विष्टः, पुं, (यवनैर्द्विष्टः । हिन्दुप्रियत्वात् तथात्वम् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

यवनप्रियं, क्ली, (यवनानां प्रियम् ।) मरिचम् । इति हेमचन्द्रः । ३ । ४८ ॥ (विवरणमस्य मरिचशब्दे ज्ञातव्यम् ॥)

यवनाचार्य्यः, पुं, (यवनो नामाचार्य्यः ।) ज्योतिः-शास्त्रकर्त्तृमुनिविशेषः । इति वराहमिहिरः ॥

यवनानी, स्त्री, (यवनानां लिपिः । “यवनाल्लिप्याम् ।” ४ । १ । ४९ । इति वार्त्तिकोक्त्या ङीष् आनुगागमश्च ।) यवनस्य लिपिः । इति मुग्धबोधटीकायां दुर्गादासः ॥

यवनारिः, पुं, (यवनानामरिः । यवनः कालयवनोऽरिर्यस्येति वा ।) श्रीकृष्णः । इति त्रिकाण्ड-शेषः ॥

यवनालः, पुं, (यवानां नाला इव नाला यस्य ।) धान्यविशेषः । देधान् इति भाषा । तत्पर्य्यायः । योनालः २ जूर्णाह्वयः ३ देवधान्यम् ४ जोन्नाला ५ बीजपुष्पिका ६ । इति हेमचन्द्रः । ४ । २४४ ॥ (यथा, सुश्रुते उत्तरतन्त्रे १५ अध्याये ।
“यवनालस्य चूर्णेन त्रिकटोर्लवणस्य च ।
स्वेदयित्वा ततः पश्चाद्दृशीयात् कुशलो भिषक् ॥”)

यवनालजः, पुं, (यवानां नालेभ्यो जायते इति । जन् + डः ।) यवक्षारः । इति हेमचन्द्रः । ४ । १० ॥ (यथा, वैद्यकरत्नमालायाम् ।
“क्षारस्त्रीद्रुणस्तीक्ष्णरसो यवजो यवनालजः ॥”)

यवनिका, स्त्री, (युनात्याच्छादयत्यनया । यु + ल्युट् । ङीष् । स्वार्थे कन् । टाप् ।) जवनिका । इत्य-मरटीका ॥ कानात् इति भाषा । (यथा, भागवते । १ । ८ । १९ ।
“मायायवनिकाच्छन्नमज्ञाधोक्षजमव्ययम् ।
न लक्ष्यसे मूढ़दृशा नटो नाट्यधरो यथा ॥”)

यवनी, स्त्री, (यूयते पच्यते भुक्तमनया । यु + ल्युट् । ङीप् ।) यवानीनामकौषधिभेदः । इति मेदिनी । ने, ११२ ॥ (यवनस्य स्त्रीति । यवन + ङीष् ।) यवनभार्य्या ॥ (यथा, रघुः । ४ । ६१ ।
“यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥”)

यवनेष्टं, क्ली, (यवनानां इष्टम् ।) सीसकम् । इति हेमचन्द्रः । ४ । १०७ ॥ मरीचम् । शलजनम् । इति राजनिर्घण्टः ॥

यवनेष्टः, पुं, (यवनानामिष्टः ।) लशुनः । राज-पलाण्डुः । निम्बः । पलाण्डुः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
“पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यवप्रख्या, स्त्री, (यव इति प्रख्या यस्याः ।) क्षुद्ररोगविशेषः । तल्लक्षणं यथा, भावप्रकाशे ।
“यवाकारा सुकठिना ग्रथिता मांसमिश्रिता ।
पीड़का श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥”
यवाकारा मध्ये स्थूला प्रान्ते कृशा ॥ तच्चि-कित्सा यथा,—
“अन्नालजीं यवप्रख्यां पूर्व्वं स्वेदैरुपाचरेत् ।
मनःशिलादेवदारुकुष्ठकल्कैः प्रलेपयेत् ।
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत् ॥”

यवफलः, पुं, (यववत् फलमस्य ।) वंशः । इत्य-मरः । २ । ४ । १६१ ॥ जटामांसी । कुटजः । इति मेदिनी । ले, १६२ ॥ (अस्य पर्य्यायो यथा,
“कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
शलवृक्षः । इति शब्दरत्नावली ॥

यवमध्यं, क्ली, (यववत् मध्यं यस्य ।) चान्द्रायण-प्रभेदः । यथा,—
“शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणन्तथा ।
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति ॥”
इति प्रायश्चित्ततत्त्वम् ॥
(पुं, यज्ञभेदः । यथा, शतपथब्राह्मणे । १३ । ६ । १ । ६ ।
“यवमध्यः पञ्चरात्रो भवति ॥”
यवाकारमध्ये, त्रि । यथा, सुश्रुते चिकित्सा-स्थाने १ अध्याये ।
“शरावनिम्नमध्याश्च यवमध्यास्तथापरे ।
एवंप्रकाराकृतयो भवन्त्यागन्तवो व्रणाः ॥”)

यवमयः, त्रि, (यवस्य विकारोऽवयवो वा । यव + “असंज्ञायां तिलयवाभ्याम् ।” ४ । ३ । १४९ । इति मयट् ।) यवनिर्म्मितः । यवशब्दात् मयट्-प्रत्ययेन निष्पन्नः ॥ (यथा, शतपथब्राह्मणे । २ । २ । ३ । १३ ।
“अर्कपलाशाभ्यां यवमयमपूपं कृत्वा यचा-हवनीयमाधास्य न भवति तन्निदधाति ॥”)

यवलासः, पुं, (यवात् लासो यस्य ।) यवक्षारः । इति शब्दरत्नावली ॥ (विशेषोऽस्य यवक्षार-शब्दे ज्ञातव्यः ॥)

यवशूकः, पुं, (यवानां शूकः कारणत्वेनास्त्यस्य । अर्शआद्यच् ।) यवक्षारः । इति त्रिकाण्ड-शेषः ॥ (यथास्य पर्य्यायः ।
“यावशूको यवक्षारो यवशूको यवाग्रजः ।
क्षारस्त्रीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः ॥”
इति वैद्यकरत्नमालायाम् ॥)

यवशूकजः, पुं, (यवशूकात् जायते इति । जन् + डः ।) यवक्षारः । इति राजनिर्घण्टः ॥ (विवरणमस्य यवक्षारशब्दे ज्ञातव्यम् ॥)

यवसं, क्ली, (यौतीति । यु + “वहियुभ्यां णित् ।” उणा० ३ । ११९ । इत्यसच् । संज्ञापूर्व्वकत्वान्न वृद्धिः ।) तृणम् । घासः । इत्यमरः । २ । ४ । १६७ ॥ (यथा, मनौ । ७ । ७५ ।
“तत्स्यादायुधसम्पन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥”)

यवसुरं, क्ली, (यवनिर्म्मिता सुरा । “सुरासेना-च्छायाशालानिशा स्त्रियाञ्च ।” लिङ्गानुशासने नपुंसकाधिकारे १२ । इति क्लीवत्वम् ।) यव-जातसुरा । इति सिद्धान्तकौमुदी ॥

यवागूः, स्त्री, (यूयते मिश्र्यते इति । यु + “स्रु-वचिभ्योऽन्युजागूजक्नुचः ।” उणा० ३ । ८१ । इति आगूच् ।) षड्गुणजलपक्वघनद्रवद्रव्यविशेषः । याउ इति भाषा ॥ तत्पर्य्यायः । उष्णिका २ श्राणा ३ विलेपी ४ तरला ५ । इत्यमरः । २ । ९ । ५० ॥ “यूयते मिश्र्यते यावागूः यु ल मिश्रणे नाम्नीति आगूः गुणः । ओषति हिनस्ति ज्वरादिरोगं उष्णिका उषू ष वाधे दहि पूर्व्वश्च निक् । श्रायते पच्यते स्म श्राणा श्रा ल पाके क्तः मुस्त्वादोदिति नः । विलिम्पति विलेपी लि लिपौ शप च लेपे पचादित्वादन् । नदादित्वा-न्ङीप् । तरति प्लवति तरला त तरेऽभिभवे मुत्यां नाम्नीति अलः ।

'अन्नं पञ्चगुणे साध्यं विलेपी च चतुर्गुणे।
मण्डश्चतुर्द्दशगुणे यवागूः षड्गुणेऽम्भसि।'
इति वैद्यकोक्तो भेद इह नादृतः।" इति तट्टीकायां भरतः॥ अस्या गुणाः।
"यवागूर्व्वंरतृष्णाघ्नी लघ्वी वस्तिविशोधनी।
अतीसारे ज्वरे दाहे हिता वह्निप्रदीपनी॥"
इति राजवल्लभः॥
(अथास्या गुणा लक्षणञ्च।
"सन्दीपनी स्वेदकरी यवागूः
सम्पाचनी दोषमलामयानाम्।
सन्तर्पणी धातु बलेन्द्रियाणां
शस्ता भवेत् सा ज्वररोगिणाञ्च॥
भागैकञ्च भवेत्तत्र द्विभागेन जलं क्षिपेत्।
चित्रकं पिप्पलीमूलं पिप्पलीचव्यनागरम्॥
धान्यकस्य समांशानि पिष्ट्वा श्वेतांश्च तण्डुलान्।
संशुद्धा शिथिला किञ्चित् सा यवागूर्निगद्यते॥
यवागूसुपभुञ्जानो जनो नाद्यविमाचरेत्।
शाकमाषफलैर्युक्ता यवागूः स्याच्च दुर्ज्जरा॥"
इति हारीते प्रथमस्थाने १२ अध्याये॥
"यवागूः षड्गुणजले सिद्धा स्यात् कृशरा घना।
यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी॥"
इति मध्यखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम्॥)
यवाग्रजः, पुं, (यवाग्रात् जायते इति। जन्+डः।) यवक्षारः। इत्यमरः। २। ९। १०८॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"पाक्यः क्षारो यवक्षारो यावशूको यवाग्रजः॥")
यवानी। इति राजनिर्घण्टः॥
यवानः, त्रि, (यवेन वेगेन अनिति जीवतीति। अन्+अच्।) वेगी। इति मेदिनी। ने, १११॥
यवानिका, } स्त्री, (दुष्टो यवः। "यवाद्दोषे।"
यावानी, } ४। १। ४९। इत्यस्य वार्त्तिकोक्त्या ङीष् आनुगागमश्च। पक्षे स्वार्थे कन्।) ओषधिभेदः। योयानि इति भाषा। तत्पर्य्यायः। दीप्यकः २ दीप्यः ३ यवसाह्वः ४ यवाग्रजः ५ दीपनी ६ उग्रगन्धा ७ वातारिः ८ भूकदम्बकः ९ यवजः १० दीपनीयः ११ शूलहन्त्री १२ यवानिका १३ उग्रा १४ तीव्रगन्धा १५। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातार्शःश्लेष्मशूलाध्मानकृमिच्छर्द्दिनाशित्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ अपि च। अथ यवान्या नामगुणाः।
"यवानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका।
सवोक्ता दीप्यका दीप्या तथा स्याद्यवसाह्वया॥
यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः।
दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत्।
वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत्॥
अथ अजमोदाया नामानि गुणाश्च।
अजमोदा खराश्वा च मायूरो दीप्यकस्तथा।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत्।
उष्णा विदाहिनी हृद्या वृष्या बलकरी लघुः॥
नेत्रामयकृमिच्छर्द्दिहिक्कावस्तिरुजो हरेत्।
अथ खुरासानीयवानीनामगुणाः।
पारसीकयवानी तु यवानीसदृशी गुणैः।
विशेषात् पाचनी रुच्या ग्राहिणी मादिनी गुरुः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
यवापत्यं, स्त्री, (यवस्यापत्यम्। तज्जातत्वात्तथात्वम्।) यवक्षारः। इति राजनिर्घण्टः॥
यवाम्लजं, स्त्री, (यवाम्लाभ्यां जायते इति। जन्+डः।) सौवीरम्। इति राजनिर्घण्टः॥
यवासः, पुं, (यौतीति। यु+"ऋतन्यञ्जीति।" उणा० ४।२। इत्यादिना आसः।) दुरालभा। यथा,—
"यासो यवासो दुःस्पर्शो धनुर्यासो दुरालभा॥"
इति रत्नमाला॥
खदिरभेदः। यथा,—
"कण्टकी वासपत्रश्च यवासः खदिरस्तथा॥"
इति शब्दमाला॥
यवासा इति ख्याता कण्टकीक्षुपविशेषः। तत्पर्य्यायः। यासः २ बहुकण्टकः ३ अल्पकः ४ क्षुद्रेक्षुरी ५ रोदनिका ६ कच्छुरा ७ बालपत्रः ८ विषघ्नः ९ कण्टकालुकः १० त्रिकर्णिका ११ गान्धारी १२ अनन्ता १३। अस्य गुणाः। मधुरतिक्तत्वम्। शीतत्वम्। पित्तार्त्तिदाहनाशित्वम्। बलदीपनकारित्वम्। तृष्णाकफच्छर्द्दिविसर्पजित्त्वञ्च। इति राजनिर्घण्टः॥
यवासकः, पुं, (यवास+स्वार्थे कन्।) दुरालभा। इति शब्दरत्नावली॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये।
"क्षयकासं ससन्तापं पार्श्वशूलानपास्यति।
गुडूचीत्रिफलावासात्रायमाणायवासकैः॥")
यवासशर्करा, स्त्री, (यवासेन तद्रसेन कृता शर्करा। शाकपार्थिववत् समासः।) यवासरसघटितशर्करा। तत्पर्य्यायः। सुधामोदकः२ मोदकः३ तवराजः ४ खण्डसरः ५ खण्डजः ६ खण्डमोदकः ७। अस्या गुणाः। अतिमधुरत्वम्। पित्तश्रमतृषापहत्वम्। वृष्यत्वम्। विदाहमूर्च्छार्त्तिभ्रान्तिशान्तिकरत्वम्। सरत्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति॥")
यवासा, स्त्री, (यवास+टाप्।) गुच्छासिनीतृणम्। इति राजनिर्घण्टः॥
यवाह्वः, पुं, (यवमाह्वयति स्वकारणत्वादिति। आ+ह्वे+कः।) यवक्षारः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये।
"यवाह्वगौरिकोन्मिश्रैः पादक्षेपः प्रशस्यते॥"
गुणादिविशेषोऽस्य यवक्षारशब्दे विज्ञेयः॥)
यविष्ठः, त्रि, (अयमेषामतिशयेन युवा इति। युवन्+इष्ठन्।"स्थूलदूरेति।"यणादिलोपगुणौ:) अतिशययुवा। (यथा, ऋग्वेदे। १।१४७।२।
"बोधा मे अस्य वचसो यविष्ठ।")
कनिष्ठभ्रातरि, पुं। इति हेमचन्द्रः। ३।११६॥ (त्रिष्वपि। यथा, भागवते। ३।२।५।
"भ्रातुर्य्यविष्ठस्य सुतान् विबन्धून्
प्रवेश्य लाक्षाभवने ददाह॥")
यवीयान्, [स्] त्रि, (अयमनयोरतिशयेन युवा। युवन्+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्।) कनिष्ठः। (यथा, मनौ। २।१२८।
"अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत्॥"
अतिशय युवा। इति मेदिनी। से, ६१॥
यवोत्थं, स्त्री, (यवेभ्य उत्तिष्ठतीति। उद्+स्था+कः।) सौवीरकम्। इति राजनिर्घण्टः॥
यव्यं, त्रि, (यवानां भवनं क्षेत्रम्। यव+"यवयवकषष्टिकाद् यत्।" ५।२।३। इति यत्।) यवादिभवनोचितक्षेत्रम्। तत्पर्य्यायः। यवक्यम् २ षष्टिक्यम् ३। इत्यमरः। २। ९। ७॥ यवोचितम् ४ यवकोचितम् ५। इति शब्दरत्नावली॥ (यवेभ्यो हितम्। यव+"खलयवमाषतिलवृषब्रह्मणश्च।" ५। १। ७। इति यत्। यवहितः। इति व्याकरणम्॥)
यव्यः, पुं, (यवेभ्यो हितः। यव+यत्।) मासः। यथा,—
"यव्यद्वयं श्रावणादि सर्व्वा नद्यो रजस्वलाः।
तासु स्नानं न कुर्व्वीत वर्ज्जयित्वा समुद्रगाः॥"
इति प्रायश्चित्ततत्त्वे गङ्गामाहात्म्यम्॥
(स्त्री, नदीभेदः। यथा, ऋग्वेदे। ८।९८।८।
"वार्णत्वा यव्याभिर्व्वर्द्धन्ति शूरब्रह्माणि।"
"यव्याभिः नदीभिः। अवनयः यव्याः इति नदीनामसु पाठात्।" इति तद्भाष्ये सायणः॥)
यशः, [स्] क्ली, (अश्नुते व्याप्नोतीति। अश+"अशेर्देवने युट् च।" उणा० ४। १९०। इत्यसुन् युट् च।) सुख्यातिः। तत्पर्य्यायः। कीर्त्तिः २ समज्ञा ३। इत्यमरः।१।६।११॥ समाख्या ४ कीर्त्तना ५ अभिख्यानम् ६ आज्ञा ७ समज्या ८। इति शब्दरत्नावली॥
"दानादिप्रभवा कीर्त्तिः शौर्य्यादिप्रभवं यशः।"
इति माधवी॥
अतएव यशःकीर्त्त्योर्भिदस्यापि दर्शनात् यशःकीर्त्तिपरिभ्रष्टो जीवन्नपि न जीवति। इति कस्यचित् प्रयोगः। जीवतः ख्यातिर्यशो मृतस्य ख्यातिः कीर्त्तिरिति केचित्। तन्न साधु कीर्त्तिस्ते नृप दूतिकेति प्रयोगदर्शनात्।"इत्यमरटीकायां भरतः॥ कीर्त्तिनाशे दोषो यथा,—
"हन्ति यः परकीर्त्तिञ्च स्वकीर्त्तिं मानवाधमः।
स कृतघ्न इति ख्यातस्तत्फलञ्च निशामय॥
अन्धकूपे वसेत् सोऽपि यावदिन्द्राश्चतुर्द्दश।
कीटैर्नकुलमानैश्च भक्षितः सततं नृप!॥
तप्तक्षारोदकं पापी नित्यं पिबति खादति।
ततः सर्पो जन्म सप्त काकः पञ्च ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४९ अध्यायः॥

(अन्नम्। यथा, ऋग्वेदे। ४। ५२। ११।
"वयं स्याम यशसो जनेषु।"
"यशसः कीर्त्तेरन्नस्य वा।" इति तद्भाष्ये सायणः। त्रि, यशस्वी। यथा, ऋग्वेदे। ८। ७६। ५।
"त्वमिन्द्र यशा अस्यृजीषी शवसस्पते।"
"त्वं यशाः यशस्व्यसि भवसि।" इति तद्भाष्ये सायणः।)

यशःपटहः, पुं, (यशःख्यापकः पटहः। शाकपार्थिववत् समासः।) ढक्का। इत्यमरः। १। ७। ६॥

यशःशेषः, त्रि, (यश एव शेषोऽस्य।) मृतः। इति हेमचन्द्रः। ३। ३८। (यथा, कथासरित्सागरे। ६१। ४४।
"ततः क्रमेण तेनैव सरज्वरभरोष्मणा।
प्रच्यावदेहः प्रययौ स यशःशेषतां नृपः॥")
मरणे, पुं॥

यशदं, क्ली, धातुविशेषः। दस्ता इति भाषा। यथा,
"यशदं रङ्गसदृशं रीतिहेतुश्च तन्मतम्।
यशदं तुवरं तिक्तं शीतलं कफपित्तहृत्।
चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत्॥"
इति भावप्रकाशः॥

यशस्करः, त्रि, कीर्त्तिकारकः। सुख्यातिजनकः। यशस्करोति य इत्यर्थे ("कृञो हेतुताच्छील्यानुलोम्येषु।"३।२।२०।) इति टप्रत्ययेन निष्पन्नः। यशस्करी विद्या इति व्याकरणम्। (यथा, मनौ। ८। ३८३।
"एतेषां निग्रहो राज्ञः पञ्चानां विषये स्वके।
साम्राज्यकृत् सजात्येषु लोके चैव यशस्करः॥")
विष्णुक्षेत्रविशेषे, क्ली। यथा, नारसिंहे ६२ अः।
"विरजं पुष्पभद्रायां वालखामीकरे विदुः।
यशस्करं विपाशायां माहिष्मत्यां हुताशनम्॥"
शोभावतीपुर्य्यां जाते ब्राह्मणविशेषे, पुं। यथा, कथासरित्सागरे। १०४। १६।
"तस्यां यशस्करो नाम विद्याताढ्यो बहुक्रतुः।
ब्राह्मणोऽभूदभूत्तस्य सपत्नी मेखलेति च॥")

यशस्या, स्त्री, (यशसे हिता। यशस्+यत्।) जीवन्ती। ऋद्धिनामौषधिः। इति राजनिर्घण्टः॥

यशस्वान्, [त्] त्रि, (यशोऽस्त्यस्य। यशस्+मतुप्। मस्य वः।) कीर्त्तिविशिष्टः। इति व्याकरणम्। (यथा, अथर्व्ववेदे। ६। ५८। २।
"यथेन्द्रो द्यावापृथिव्योर्यशस्वान्
यथाप ओषधीषु यशस्वतीः॥")

यशस्विनी, स्त्री, (यशस्विन्+ङीप्।) वनकार्पासी। इति शब्दरत्नावली॥ यवतिक्ता। महाज्योतिष्मती। इति राजनिर्घण्टः॥ (सत्यव्रतस्य पत्नी। यथा, कथासरित्सागरे। ७३।२५७।
"अहं यशस्वती नाम राजसेवानुजीविनः।
भार्य्या सत्यव्रताख्यस्य विप्रस्येहामलान्वया॥"
गङ्गा। यथा, काशीखण्डे तत्सहस्रनामकथने। २६। १४१।
"यशस्विनी यशोदा च योग्या युक्तात्मसेविता॥")

यशस्वी, [न्] त्रि, (यशोऽस्त्यस्येति। यशस्+"अस्मायेति।"५। २। १२१। इति विनिः।) यशोविशिष्टः। कीर्त्तिमान्। इति व्याकरणम्। (यथा, मनौ। ६। ३३४।
"विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम्।
शुश्रूषैव तु शूद्रस्य धर्म्मो नैःश्रेयसः परः॥")

यशोदः, पुं, (यशो ददातीति। दा+कः।) पारदः। इति राजनिर्घण्टः॥ (क्लीवेऽपि दृश्यते। यथा, वाराहे।
"सुवर्णं रजतं ताम्रं रङ्गं यशोदमेव च।
सीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः॥")
यशोदातरि, त्रि॥

यशोदा, स्त्री,(यशो ददातीति। दा+कः। टाप्।) नन्दपत्नी। यथा, श्रीभागवते १० स्कन्धे।
"नन्दः किमकरोद्ब्रह्मन् श्रेय एवं महोदयम्।
यशोदा वा महाभागा पपौ यस्याः स्तनं हरिः॥"
(दिलीपमाता। यथा, हरिवंशे। १८। ६०।
"तेषान्तु मानसी कन्या यशोदा नाम विश्रुता।
पत्नी सा विश्वमहतः स्नुषा वै हव्यपस्य च।
राजर्षेर्जननी चापि दिलीपस्य महात्मनः॥"
यशोदातरि, त्रि। यथा, तैत्तिरीयसंहितायाम्। ४। ४। ६। २।
"यशोदां त्वा यशसि तेजोदां त्वा तेजसीति॥")

यष्टा, [ऋ] पुं, (यजते इति। यज्+तृच्।) यागकर्त्ता। तत्पर्य्यायः। यजमानः२। इत्यमरः।२। ७। ८॥ (यथा, मार्कण्डेये। १२०। २।
"स दानशीलो यष्टा च यज्वानामवनीपतिः॥")

यष्टिः, पुं, (इज्यते इति। यज्+बाहुलकात् तिः। इति उणादिवृत्तौ उज्ज्वलदत्तः।४।१७६।) ध्वजदण्डः। इति विश्वशब्दरत्नावल्यौ॥ भुजदण्डः। इति मेदिनी। टे, २६॥

यष्टिः, पुं, स्त्री, (यजति सङ्गच्छते। यज्+तिः।) तन्तुः। इति शब्दमाला॥ हारलता। (हारावलिः। यथा, रघौ। १३। ५४।
"क्वचित्प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा।
अन्यत्र माला सितपङ्कजानां
इन्दीवरैरुत्खचितान्तरेव॥"
"यष्टिः हारावलिः।" इति मल्लिनाथः॥ *॥)
भार्गी। मधुका। शस्त्रभेदः। इति मेदिनी। टे,२६॥ शेषस्य पर्य्यायः। दण्डः २। लगुडः ३ इति हेमचन्द्रः। ३। ४४६॥ तद्दानफलं यथा, वह्निपुराणे।
"यष्टिं ये तु प्रयच्छन्ति नेत्रहीने सुदुर्ब्बले।
तेषान्तु विपुलः पुंसां सन्तानो मोक्षवर्ज्जितः॥"
(स्त्री, शाखा। यथा, कुमारे। ६। २।
"चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी॥"
"चूतयष्टिः चूतशाखा इव।" इति तत्र मल्लिनाथः॥ यष्टिमधु। तत्पर्य्यायः। यथा,
"यष्ट्याह्वं मधुकं यष्टिः क्लीतकं मधुयष्टिका।
यष्टिमधु स्वलेजाता जलजातिरसा पुरा॥"
इति वैद्यकरत्नमालायाम्॥)

यष्टिकः, पुं, (यष्टिरिव। कन्।) जलकुक्कुटः। इति शब्दरत्नावली॥ (यष्टि+स्वार्थे कन्।) दण्डश्च॥

यष्टिका, स्त्री, (यष्टि+स्वार्थे कन्। टाप्।) हारभेदः। यथा,—
"यष्टिका इष्टिका चैव तिलका सारिकेत्यपि॥"
इति जटाधरः॥
वापी। यथा,—
"पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका॥"
इति त्रिकाण्डशेषः॥
यष्टिमधुका। यथा,—
"अथ यष्टीमधुकं स्यान्मधुयष्टी तु यष्टिका॥"
इति शब्दरत्नावली॥
लगुडः। यथा,—
"अथ शक्तिश्च शक्ती च यष्टिर्यष्टी च यष्टिका।
दण्डः काष्ठोऽपि लगुडः पशुघ्नो दण्डकोऽपि च॥"
इति शब्दरत्नावली॥

यष्टिग्रहः, पुं, (यष्टिं गृह्णातीति। यष्टि+ग्रह+"शक्तिलाङ्गलाङ्कुशयष्टितोमरेति।"३।२।६। इत्यस्य वार्त्ति॰ अच्।) यष्टिधारकः। लगुडग्राही। इति मुग्धबोधटीकायां दुर्गादासः॥

यष्टिमधु, क्ली, (यष्ट्यां मधु माधुर्य्यमस्य।) यष्टिमधुका। इति हलायुधः॥ (यथास्य पर्य्यायः।
"यष्ट्याह्वं मधुकं यष्टिः क्लीतकं मधुयष्टिका।
यष्टिमधु स्वलेजाता जलजातिरसा पुरा॥"
इति वैद्यकरत्नमालायाम्॥)

यष्टिमधुका, स्त्री, (यष्टिमधुवत् कायतीति। कै+कः।) यष्टिमधु। तत्पर्य्यायः। क्लीतकम् २ मधुकम् ३ मधुयष्टिका ४। इत्यमरः। २।४।१०६॥ यष्ट्याह्वम् ५ यष्टिः ६ स्वलेजातं चेत् यष्टिमधु ७ जलजा चेत् अतिरसा ८। इति रत्नमाला॥ अपि च।
"ज्येष्ठीमधु तथा यष्टीमधुकं क्लीतकं तथा।
अन्यत्क्लीतनकं तत्तु भवेत्तोये मधूलिका॥"
अस्या गुणाः।
"यष्टी हिमा गुरुः स्वाद्वी चक्षुष्या बलवर्णकृत्।
सुस्निग्धा शुक्रला केश्या स्वर्य्या पित्तानिलास्रजित्।
व्रणशोथविषच्छर्दितृष्णाग्लानिक्षयापहा॥"
इति भावप्रकाशः॥

यष्टी, स्त्री, (यष्टि+"कृदिकारादक्तिनः।" इति ङीष्।) यष्टिमधु। इति भावप्रकाशः॥ (यथास्याः पर्य्यायः।
"यष्टी यष्ट्याह्वयं प्रोक्तं मधुकं मधुयष्टिका।"
इति गारुडे २०८ अध्यायः॥
तथास्या गुणाः। भावप्रकाशस्य पूर्व्वखण्डे १।
"यष्टी हिमा गुरुः स्वाद्वी चक्षुष्या बलवर्णकृत्।

सुस्निग्धा शुक्रला केश्या स्वर्य्या पित्तानिलासृजित् ।
ब्रणशोथविषच्छर्द्दितृष्णाग्लानिक्षयापहा ॥”
(हारभेदः । तल्लक्षणं यथा, वृहत्संहितायाम् । ८१ । ३६ ।
“संयोजिता या मणिना तु मध्ये
यष्टीति सा भूषणविद्भिरुक्ता ॥”)

यष्टीकं, क्ली, (यष्टी+कन् ।) यष्टिमधु । इति राजनिर्घण्टः ॥

यष्टीपुष्पः, पुं, (यष्टीपुष्पमिव पुष्पं यस्य ।) पुत्त्रजीववृक्षः । इति भावप्रकाशः ॥

यष्टीमधु, क्ली, (यष्ट्यां मधु माधुर्य्यमस्य ।) मिष्टमूलविशेषः । जेठीमधु इति मूलहटी इति च हिन्दी भाषा । तत्पर्य्यायः । मधुयष्टी २ मधुवल्ली ३ मधुस्रवा ४ मधूकम् ५ मधु ६ यष्टीकम् ७ यष्ट्याह्वम् ८ ॥ (तथा च ।
“यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा ।
अन्यत् क्लीतनकन्तत्तु भवेत्तोये मधूलिका ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अस्य गुणाः । मधुरत्वम् । किञ्चित्तिक्तत्वम् । शीतलत्वम् । चक्षुष्यत्वम् । पित्तहरत्वम् । रुच्यत्वम् । शोषतृष्णाव्रणापहत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सास्थाने २७ अध्याये । “तत्र विड़ङ्गतण्डुलचूर्णमाहृत्य यष्टीमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत ॥”)

यष्ट्याह्वं, क्ली, (यष्ट्याख्याह्वा यस्य ।) यष्टिमधु । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये ।
“यवाश्वगन्धा यष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितम् ॥”)

यस, इर् य उ यतने । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् । क्त्वावेट् ।) इर्, अयसत् अयासीत् अयसीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । य, प्रयस्यति । क्रम क्लम इत्यादिना केवलात् संपूर्व्वाच्च अस्मात् श्यन् विकल्पात् यसति यस्यति संयस्यति संयसति । उ, यसित्वा यस्त्वा । यतनं यत्नः । इति दुर्गादासः ॥

यस्कः, पुं, (यसति मोचयतीति । यस्+क्विप् । संज्ञायां कन् ।) मुनिविशेषः । इति मुग्धबोधव्याकरणम् ॥ (यथा, आश्वलायनश्रौतसूत्रे उत्तरार्द्धे । ६।१०।१०। “यस्कवाधौलमौनमौकशार्कराक्षिसार्ष्टिसावर्णिशालङ्कायनजैमिनिदैवन्त्यायनानां भार्गववैतहव्यसावेतसेति ॥”)

यह्वः, पुं, (यजतीति । यज+“शेवायह्वजिह्वाग्रीवाप्वामीवाः ।” उणा० १ । १५४ । इति वन्प्रत्ययेन निपातितः ।) यजमानः । इत्युणादिकोषः ॥ (त्रि, महान् । यथा, ऋग्वेदे । ३ । १ । १२ ।
“उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः ।”
“यह्वो महान् ।” इति तद्भाष्ये सायणः ॥)

या, ल गतौ । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ल, याति । इति दुर्गादासः ॥

यागः, पुं, (इज्यते इति । यज्+घञ् ।) यज्ञः । इत्यमरः । २ । ७ । १३ ॥ तत्र श्रौताग्निहत्यहविर्यज्ञाः सप्त । यथा । आग्न्याधानं तद्दैवाग्निहोत्रम् १ दर्शपौर्णमासौ २ पिण्डपितृयज्ञः ३ आग्रयणम् ४ चातुर्म्मास्यः ५ निरूढ़पशुबन्धः ६ सौत्रामणिः ७ । स्मार्त्ताग्निकृत्यपाकयज्ञाः सप्त । यथा । औपासनम् १ वैश्वदेवः २ स्थालीपाकः ३ आग्रयणम् ४ सर्पबलिः ५ ईशानबलिः ६ अष्टकान्वष्टका ७ । श्रौताग्निसप्तसंस्थाः । यथा । सोमयागः स एवाग्निष्टोमः १ अत्यग्निष्टोमः २ उक्थ्यः ३ षोड़शी ४ वाजपेयः ५ स द्विविधः संस्था क्रतुश्च । अतिरात्रः ६ अप्तूर्य्यामः ७ । उत्तरक्रतवो बहवः । यथा । महाव्रतम् १ सर्व्वतोमुखम् २ राजसूयः ३ पौण्डरीकम् ४ अभिजित् ५ विश्वजित् ६ अश्वमेधः ७ बृहस्पतिसवः ८ आङ्गिरसः ९ चयनान्यष्टादश २७ । इत्यादि श्रौतसूत्रम् ॥*॥ सर्व्वदेवानां यागकालो यथा,
शुक्र उवाच ।
“स्वल्पेनैव तु द्रव्येण महापुण्यं यथा भवेत् ।
तदहं श्रोतुमिच्छामि ग्रहयागं सुरेश्वर ! ॥
ब्रह्मोवाच ।
शृणु वत्स प्रवक्ष्यामि यथा त्वं परिपृच्छसि ।
अल्पकेन महापुण्यं ग्रहसंतिथियौगिकम् ॥
भृगुपूर्णाष्टमीयोगं शिवयागेषु चोत्तमम् ।
रुद्रवर्गेषु भाग्यश्च उमाया भृगुवासरे ॥
दैवयोगात् यदा षष्ठी पुष्यर्क्षं रविवासरम् ।
स्कन्दयागस्तदा कार्य्यः सर्व्वकामप्रसाधकः ॥
वारेण वा यदा सूर्य्यः सप्तमी विजया मता ।
तदा तु भवति भानोर्यागः सर्व्वगुणावहः ॥
शशिरिक्तानुसंयोगे अर्कर्क्षे सोत्तरासु च ।
नवम्यां मङ्गलायोगो भानुमूलदिनं यदा ॥
अष्टम्यां वाथ चन्द्राहे श्रवणेन शुभावहम् ।
अहिर्बुध्न्ये कुजाहे तु गणेशे तस्य वाहनि ॥
पुनर्व्वसौ गुरोर्व्वारे द्वादश्यां श्रवणेन वा ।
सोमग्रस्तं यदा योगं विष्णोः सर्व्वार्थसाधकम् ॥
द्वितीयायां यदा सौम्ये कृत्तिकर्क्षं भवेत् क्वचित् ।
ग्रहयागस्तदा कार्य्यः सर्व्वशान्तिप्रदायकः ॥
स्वातीसौमी चतुर्थी च उमायागे वरा स्मृता ॥
उत्तरासु च सर्व्वासु भानुपौर्णाष्टमीषु च ।
शान्त्यभिषेकयागेषु सर्व्वकामार्थदाष्टमी ॥
गुरावेकादशी पुष्ये रोहिण्या वा यदा शनिः ।
सुतसौभाग्यकामाय यागो रुद्रविनायके ॥
पूर्णिमासु च सर्व्वासु अष्टमीद्वादशीषु च ।
चतुर्द्दश्यां तृतीयासु ग्रह ऋक्षे शुभेषु च ।
सर्व्वेषां भवति यागो भक्तिपूर्व्वो महामुने ! ॥
मन्त्रसाधनद्रव्यायो रुद्रयागादवाप्यते ।
श्रीमेधाज्ञानवात्सल्यसुमायागान्महामुने ॥
योगज्ञानयशःसिद्धिं महादेवादवाप्नुयात् ।
आरोग्यं सप्रतापत्वं भास्करात् प्राप्यते ध्रुवम् ॥
गतिमिष्टां यथाकामं प्रयच्छति त्रिविक्रमः ।
विघ्नो न भवति तस्य यस्तु पश्येद्विनायकम् ॥
विगतारिर्भवेत् षष्ठ्यां दृष्ट्वा स्कन्दं मखे यथात् ।
मातृयागान्महासिद्धिः सर्व्वेषामपि जायते ॥
भवते धनवान् पुंसः प्रथमाह्वे हुताशनात् ।
स्वर्गापवर्गसंसिद्धिर्दुर्गायागात् प्रजायते ॥
माघादौ मङ्गलाशोत्या ज्यैष्ठाद्यैर्ब्रह्म जायते ।
ईशाद्यैः कालिकाद्यास्तु यष्टव्या विधिना मुने ॥”
इत्याद्ये देव्यवतारे उदयतिथ्यादियोगमाहात्म्यकीर्त्तनम् ॥ * ॥

अथ ग्रहयागविधिः ।
“प्रणम्य नव रव्यादीन् शुभाशुभफलप्रदान् ।
ग्रहयागविधिं सम्यक् वक्ति श्रीरघुनन्दनः ॥

अथ ग्रहयागप्रयोगः ।
तत्र रविसोमबुधगुरुशुक्रवारेषु चित्रानुराधामृगशिरोरेवतीपुष्याश्विनीहस्तारोहिण्युत्तरात्रयेषु चन्द्रताराऽनुकूले शुभलग्ने यागः कार्य्यः । अत्र बालग्रहभूतग्रहप्रबलतरनराधिपशत्रुदुःसहरोगाभिभवाद्भूतदुःस्वप्नावलोकनग्रहदौस्थ्यादिनिमित्तकं शान्तिकं मलमासादावपि कर्त्तव्यम् । अवग्रहं विना केवलदृष्टायुःपुष्टिपुत्त्रश्रीकामादिपौष्टिकन्तु मलमासादीतरकाल एव कार्य्यम् ॥ * ॥ तत्र यजमानः कृतस्नानादिः गोमयोपलिप्ते देशे सदर्भासनोपविष्ट उदङ्मुखः स्वस्तिवाच्यः सूर्य्यः सोम इति पठित्वा फलपुष्पतिलदर्भत्रयसहितजलपूर्णताम्रपात्रं गृहीत्वा, ॐ तद्विष्णोरिति विष्णुं संस्मृत्य ॐ तत् सदित्युच्चार्य्य ॐ अद्येतादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुककामो ग्रहयज्ञमहं करिष्ये इति सङ्कल्प्य तज्जलमैशान्यां निःक्षिपेत् । अन्यार्थत्वे गोत्रनाम्नोः षष्ठ्यन्तता । करिष्ये इत्यत्र करिष्यामीति विशेषः । ततः श्वेतसर्षपानादाय ।
ॐ वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः ।
अपसर्पन्तु ते सर्व्वे ये चान्ये विघ्नकारकाः ॥
ॐ विनायका विघ्नकरा महोग्रा
यज्ञद्विषो ये पिशिताशनाश्च ।
सिद्धार्थकैर्वज्रसमानकल्पै-
र्मया निरस्ता विदिशः प्रयान्तु ॥
इत्येताभ्यां मन्त्राभ्यां श्वेतसर्षपप्रक्षेपैर्विघ्नकारकानपसारयेत् । ततः गणाधिपषोड़शमातृकापूजा वसोर्धारा आयुष्यजपं तदशक्तौ गायत्रीजपं वृद्धिश्राद्धञ्च कृत्वा तदशक्तौ भोज्यमुत्सृज्य ब्राह्मणान् परितोष्य ततः स्वयमशक्तौ कर्त्ता प्राङ्मुखं गुरुम् ॐ साधु भवानास्तामिति वदेत् ॐ साध्वहमासे इति प्रतिवचनम् । ततो गन्धपुष्पवस्त्राङ्गुरीयकादिना गुरुमलङ्कृत्य दक्षिणं जानु स्पृष्ट्वा ॐ अद्येत्यादि मत्सङ्कल्पितग्रहयागकर्म्मणि ग्रहपूजाहोमकर्म्मकरणाय अमुकगोत्रं अमुकदेव-

ब्रह्माणं गन्धादिभिरभ्यर्च्य भवन्तमहं वृणे । ॐ वृतोऽस्मीति प्रतिवचनम् । ॐ यथाविहितं पूजादिकर्म्म कुरु । ॐ यथाज्ञानं करवाणीति प्रतिवचनम् । * । ततो मण्डपोत्तरपूर्व्वभागे वितस्तिद्वयविस्तृतायां वितस्त्युच्छ्रितायां उदक्प्रवायां वेद्यां गोमयेनोपलिप्तायां रक्तचन्दनादिना मध्ये वर्त्तुलं सूर्य्यम् । आग्नेय्यां श्वेतमर्द्धचन्द्राकारं सोमम् । दक्षिणस्यां त्रिकोणं रक्तं मङ्गलम् । ऐशान्यां पीतं धनुराकारं बुधम् । उत्तरस्यां पीतं पद्माकारं बृहस्पतिम् । प्राच्यां श्वेतं चतुष्कोणं शुक्रम् । प्रतीच्यां श्यामं सर्पाकारं शनिम् । नैरृत्यां श्यामं मकराकारं राहुम् । वायव्यां धूम्रवर्णान् खड्गाकारान् केतून् विलिख्य स्वगृह्योक्तविधिना अग्निस्थापनादिब्रह्मस्थापनपर्य्यन्तं कर्म्म कृत्वा मण्डले ग्रहानावाहयेत् । * । तत्र क्रमः । मध्ये ।

ॐ क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम् ।
पद्महस्तद्वयं पूर्व्वाननं सप्ताश्ववाहनम् ।
शिवाधिदैवतं ध्यायेद्वह्निप्रत्यधिदैवतम् ॥

सप्तम्यां जायमानं विशाखानक्षत्रं रक्तमाल्याम्बरधरम् । इति ध्यात्वा ॐ भूर्भुवः स्वः सूर्य्यग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत् । १ । आग्नेये ।

ॐ सामुद्रं वैश्यमात्रेयं हस्तमात्रं सिताम्बरम् ।
श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम् ॥
दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदैवतम् ।
जलप्रत्यधिदेवञ्च सूर्य्यास्यमाह्वयेत्तथा ॥

चतुर्द्दश्यां जातं कृत्तिकानक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः सोमग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत् । २ । दक्षिणस्याम् ।

ॐ आवन्त्यं क्षत्रियं रक्तं मेषस्थं चतुरङ्गुलम् ।
आरक्तमाल्यवसनं भारद्वाजं चतुर्भुजम् ॥
दक्षिणोर्द्ध्वक्रमात् शक्तिवराभयगदाकरम् ।
आदित्याभिमुखं देवं तद्वदेव समाह्वयेत् ।
स्कन्दाधिदैवतं भौमं क्षितिप्रत्यधिदैवतम् ॥

दशम्यां जातं पूर्व्वाषाढ़ानक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः मङ्गलग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत् । ३ । ऐशान्याम् ।

ॐ मागधं द्व्यङ्गुलात्रेयं वैश्यं पीतं चतुर्भुजम् ।
वामोर्द्ध्वक्रमतश्चर्म्मगदावरदखड्गिनम् ॥
सूर्य्यास्यं सिंहगं सौम्यं पीतवस्त्रं तथाह्वयेत् ।
नारायणाधिदेवञ्च विष्णुप्रत्यधिदैवतम् ॥

द्वादश्यां जातं धनिष्ठानक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः बुधग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत् । ४ । उत्तरस्याम् ।

द्विजमाङ्गिरसं पीतं सैन्धवञ्च षडङ्गुलम् ।
ध्यात्वा पीताम्बरं जीवं सरोजस्थं चतुर्भुजम् ॥
दण्डाक्षवरदकरकाढ्यमाह्वयेत् ।
ब्रह्माधिदेवं सूर्य्यास्यमिन्द्रप्रत्यधिदैवतम् ॥

एकादश्यां जातं उत्तरफल्गुनीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः बृहस्पते इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत् । ५ । ततः प्राच्याम् ।

ॐ शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम् ।
पद्मस्थमाह्वयेत् सूर्य्यमुखं श्वेतं चतुर्भुजम् ॥
सदाक्षवरकरकादण्डहस्तं सिताम्बरम् ।
शक्राधिदैवतं ध्यायेत् शचीप्रत्यधिदैवतम् ॥

नवम्यां जातं पुष्यनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः शुक्र इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत् । ६ । पश्चिमायाम् ।

सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं चतुरङ्गुलम् ।
कृष्णं कृष्णाम्बरं गृध्रगतं सौरिं चतुर्भुजम् ॥
तद्बाणवरशूलधनुर्हस्तं समाह्वयेत् ।
यमाधिदैवतं प्रजापतिप्रत्यधिदैवतम् ॥

कृष्णचतुर्द्दश्यां जातं रोहिणीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः शनैश्चर इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत् । ७ । नैरृत्याम् ।

राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम् ।
कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथाह्वयेत् ॥
चतुर्ब्बाहुं खड्गवरशूलचर्म्मकरं तथा ।
कालाधिदेवं सूर्य्यास्यं सर्पप्रत्यधिदैवतम् ॥

पौर्णमास्यां जातं भरणीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः भगवन् राहो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत् । ८ । वायव्याम् ।

कौशद्वीपं केतुगणं जैमिनीयं षडङ्गुलम् ।
धूम्रं गृध्रगतं शूद्रमाह्वयेत् विकृताननम् ॥
सूर्य्यास्यं धूम्रवसनं वरदं गदिनं तथा ।
चित्रगुप्ताधिदेवञ्च ब्रह्मप्रत्यधिदैवतम् ॥

अमावास्यायां जातं अश्लेषानक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः भगवन्तः केतव इहागच्छत इहागच्छत इह तिष्ठत इह तिष्ठत इति शुक्लतण्डुलैरावाह्य स्थापयेत् । ९ । अधिदेवतप्रत्यधिदेवतपूजनञ्च अयुतहोमादौ । ततस्तत्तद्वर्णवस्त्रतत्तद्वर्णगन्धतत्तद्वर्णपुष्पं दद्यात् । धूपे विशेषः । रवये गुग्गुलुधूपम् । सोमाय सरलम् । मङ्गलाय देवदारुम् । बुधाय घृतमिश्रितदेवदारुम् । बृहस्पतये दशाङ्गम् । शुक्राय अगुरु । शनैश्चराय कालागुरु । राहवे गुड़त्वचम् । केतुभ्यो मधुमिश्रितगुड़त्वचम् । अभावे षोड़शाङ्गं वा । * । गन्धे विशेषः । सूर्य्याय रक्तचन्दनम् । सोमाय श्वेतचन्दनम् । मङ्गलाय कुङ्कुमम् । बुधाय सरलम् । गुरवे रक्तचन्दनश्वेतचन्दनकुङ्कुमसरलं मिश्रितसमभागत्वेन दद्यात् । शनैश्चराय कस्तूरीम् । राहवे पद्मकाष्ठम् । केतुभ्यश्च पद्मकाष्ठम् । अधिदेवताप्रत्यधिदेवताः पूजयेत् । * । अधिदेवता प्रत्यधिदेवता यथा । सूर्य्यस्य शिववह्नी । सोमस्य उमा जलम् । मङ्गलस्य स्कन्दः क्षितिः । बुधस्य नारायणविष्णू । बृहस्पतेः ब्रह्मा इन्द्रश्च । शुक्रस्य शक्रः शची । शनैश्चरस्य यमः प्रजापतिश्च । राहोः कालः सर्पश्च । केतूनां चित्रगुप्तः ब्रह्मा च । एतत्तु अयुतादिहोमे ज्ञेयम् । * । सूर्य्याय गुड़ौदनबलिः । एवं सोमादीनामपि । सति सामर्थ्ये षोड़शोपचारादिना । बलौ तु । सूर्य्याय गुड़ौदनम् । सोमाय घृतपायसम् । मङ्गलाय पक्वयवचूर्णात्मकयावकम् । बुधाय क्षीरान्नम् । गुरवे दध्योदनम् । शुक्राय घृतौदनम् । शनैश्चराय कृशरम् । राहवे छागमांसम् । केतुभ्यः अजाक्षीरसाधितालक्तकरक्तमिश्रित-यव-तिल-तण्डुलरूपं चित्रौदनम् तत्तद्द्रव्यालाभे भक्ष्यान्तरं दद्यात् । * । ततश्चरुं श्रपयेत् । तत्र सामगानां क्रमः । अग्नेः पश्चिमायां दिशि प्रागग्रान् कुशानास्तीर्य्य तदुपरि प्रक्षालितवारणसदूखलं वैणवञ्च शूर्पं वारणचमसस्थजलप्रोक्षितं संस्थाप्य व्रीहीन् यवान् वा अप्रक्षालिततण्डुलान् शूर्पे निधाय ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामि इति गृहीत्वा उदूखले स्थापयेत् । एवं सोमाय । एवं मङ्गलादीनामपि निर्व्वपणं कृत्वा उदूखले स्थापयेत् । त्रिस्तूष्णीम् । ततो दक्षिणहस्तमुपरि कृत्वा मुषलेनावहत्य शूर्पेण प्रस्फोटयेत् । इत्थमेव वारत्रयम् । ततश्चरुस्थाल्याममृत्तकं कृतोत्तराग्रं पवित्रं निःक्षिप्य तत्र प्रक्षालिततण्डुलान् निधाय तदुपरि दुग्धं दत्त्वा यथा पायसचरुर्भवति तथा स्तोकं स्तोकमुदकं दत्त्वा तन्मध्ये खदिरपलाशोडुम्बराणामन्यतमस्य प्रादेशप्रमाणं उभयथा साङ्गुष्ठप्रमाणं चतुष्कोणपुष्करं मेक्षणं दक्षिणावर्त्तेन भ्रामयित्वा तथा पचेत् यथा अन्तरोष्मणा सम्यक् पाको भवति मण्डगालनं दाहश्च न भवति । सम्यक्पाके भूते चरुमध्ये घृतस्रुवं दत्त्वा प्रागादिदिक्चिह्नितं कृत्वा चरुमवतार्य्य अग्नेरुत्तरतः कुशोपरि स्थापयित्वा पुनर्मध्ये घृतस्रुवं दद्यात् । ततो भूमिजपादिस्रुवसंस्कारपर्य्यन्तं कर्म्म कृत्वा अग्नेः पश्चिमतः स्तरणकुशोपरि पूर्व्वमाज्यं पश्चाच्चरुं निधाय उदकाञ्जलिसेकं कृत्वा विरूपाक्षजपान्तां कुशण्डिकां समापयेत् । * । यजुर्व्वेदिनान्तु आज्यस्थाल्यामाज्यनिर्व्वपणानन्तरं शूर्पं पुरतो दक्षिणभागे संस्थाप्य तत्रोदूखलं विन्यस्य व्रीह्याद्यन्यतमं तत्र निधाय ॐ सूर्य्याय त्वा जुष्टं गृह्णामि इत्येकां मुष्टिं गृहीत्वा ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामीति उदूखले स्थापयित्वा ॐ सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रोक्षणीजलेन प्रोक्षयेत् । एवं सोमाय त्वा इत्यादि । तत ॐ अग्नये स्विष्टिकृते त्वा इत्यादिना ग्रहणनिर्व्वपणप्रोक्षणानि कृत्वा त्रिस्तूष्णीं कुर्य्यात् । ततः पूर्व्ववत् श्रपणम् । पक्वं ज्ञात्वा स्थालदर्व्विं गृहीत्वा

चरुमध्ये दक्षिणावर्त्तेन भ्रामयित्वा तमग्निं तत्रैवाग्नौ क्षिपेत्। तत आघाराज्यभागान्तं कर्म्म कुर्य्यात्॥ * ॥ ऋग्वेदिनान्तु प्रोक्षणी-पात्रस्थापनानन्तरं पवित्रान्तर्हिते ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामीति व्रीह्याद्यन्यतममुष्टिं प्रक्षिप्य ॐ सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रणीताजलेन प्रोक्षयेत्। एवं सोमाय त्वा इत्यादि। ततः स्विष्टकृदर्थं किञ्चिदधिकं तूष्णीं तथा कृत्वा पवित्रान्तर्हितं कृत्वा पूर्व्वग्रीवोर्द्ध-लोमकृष्णाजिने उदूखलं निधाय तत्र सूर्पस्थ-व्रीह्याद्यन्यतमं प्रक्षिप्य मुषलेनावहत्य सूर्पेण वितुषीकृत्य प्रक्षाल्य त्रिः प्रक्षाल्य पवित्रं चरुस्थाल्यां प्रक्षिप्य तथैव श्रापयित्वा उदीच्यां दक्षिणभागे ॐ सोमाय स्वाहेति होमपर्य्यन्तं कुर्य्यात्। ततः शान्तिकर्म्मणि अग्ने त्वं वरद-नामासीति नाम कृत्वा।

ॐ पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽरुणः।
छागस्थः साक्षसूत्रोऽग्निः सप्तार्च्चिः शक्तिधा-
रकः॥

इत्यादिपुराणीयं ध्यात्वा ॐ वरदनामन्नग्ने इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इत्यावाह्य पाद्यादिना पूजयेत्॥ * ॥ पौष्टिक-कर्म्मणि तु बलदनामाग्निः। ग्रहहोमे अग्नी-नाह गोभिलः।

आदित्ये कपिलो नाम पिङ्गलः सोम उच्यते।
धूमकेतुस्तथा भौमे जठरोऽग्निर्बुधे स्मृतः॥
बृहस्पतौ शिखी नाम शुक्रे भवति हाटकः।
शनैश्चरे महातेजा राहौ चैव हुताशनः।
केतुषु रोहितोऽग्निः स्यादिति वह्निविनिर्णयः॥

ततः स्वगृह्योक्तविधानेन चरुणा सूर्य्यादि-ग्रहेभ्यः प्रत्येकाहुतिं दद्यात्॥ * ॥ अत्र मन्त्राः। सूर्य्यस्य आकृष्णेनेतिमन्त्रस्य हिरण्यस्तूपाङ्गिरा ऋषिस्त्रिष्टुप् छन्दः सविता देवता आदित्यस्य पूजाहोमकर्म्मणि विनियोगः। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्त्यञ्च हिर-ण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। इदं सूर्य्याय इति देवतोद्देशः सामगेतरैः कार्य्यः॥ १॥ सोमस्य इमन्देवेति-मन्त्रस्य वरुण ऋषिरग्निर्देवता सोमस्य पूजा-होमकर्म्मणि विनियोगः। ॐ इमन्देवा असप-त्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठाय। इममसुष्य पुत्रममुष्यै पुत्रमस्यै विशे स्वाहा। इदं सोमाय॥ २॥ मङ्गलस्य अग्निर्मूर्द्धेति-मन्त्रस्य अपाङ्गिरा ऋषिर्गायत्री छन्दोऽग्नि-र्देवता मङ्गलस्य पूजाहोमकर्म्मणि विनि-योगः। ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयमपां रेतांसि जिन्वति स्वाहा। इदं मङ्गलाय॥ ३॥ बुधस्य उद्बुध्यस्वेतिमन्त्रस्य पर-मेष्ठिर्ऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवता बुधस्य पूजा-होमकर्म्मणि विनियोगः। ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते संसृजेथामयञ्चास्मिन् सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं बुधाय॥ ४॥ बृहस्पतेः बृह-स्पते अतीतिमन्त्रस्य गृत्समद ऋषिस्त्रिष्टुप् छन्दो ब्रह्मा देवता जीवस्य पूजाहोमकर्म्मणि विनि-योगः। ॐ बृहस्पते अतियदर्य्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतु प्रजात तद-स्मासु द्रविणं धेहि चित्रं स्वाहा। इदं बृह-स्पतये॥ ५॥ शुक्रस्य अन्नात् परिस्रुत इति मन्त्रस्य प्रजापतिर्ऋषिरतिजगतीच्छन्दोऽश्विसरस्वतीन्द्रा देवताः शुक्रस्य पूजाहोमकर्म्मणि विनियोगः। ॐ अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा। इदं शुक्राय॥ ६॥ शनैश्चरस्य शन्नो देवीतिमन्त्रस्य दध्यङ्ङाथर्व्वण ऋषिर्गायत्री छन्द आपो देवता शनैश्चरस्य पूजाहोम-कर्म्मणि विनियोगः। ॐ शन्नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। इदं शनैश्चराय॥ ७॥ राहोः काण्डात् काण्डा-दिति मन्त्रस्य अग्निर्ऋषिर्गायत्री छन्दो दूर्व्वे-ष्टका देवता राहोः पूजाहोमकर्म्मणि विनि-योगः। ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि एवानो दूर्व्वे प्रतनु सहस्रेण शतेन च स्वाहा। इदं राहवे॥ ८॥ केतूनां केतुं कृण्वन्नितिमन्त्रस्य मधुच्छन्द ऋषिरनिरुक्तागायत्री-छन्दोऽग्निर्देवता केतूनां पूजाहोमकर्म्मणि विनियोगः। ॐ केतुं कृण्वन्न केतवे पेशो मर्य्या अपेशसे। समुषद्भिरजायथा स्वाहा। इदं केतुभ्यः॥ ९॥ ततो मधुघृताक्तां घृताक्तां क्षीराक्तां वा प्रादेशप्रमाणां साग्रामर्कसमिध-मादाय ॐ आकृष्णेन इत्यादिमन्त्रेण सूर्य्याया-ष्टोत्तरशतं अष्टाविंशतिमष्टौ वा अशक्त्या। शक्त्या ग्रहस्यातिपीडाकरत्वाद्वा अष्टोत्तर-सहस्रं जुहुयात्॥ * ॥ समिधमाह याज्ञ-वल्क्यः।

अर्कः पलाशः खदिरश्चापामार्गोऽथ पिप्पलः।
उडुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात्॥
होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत्।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते।
अतिपीडाकरो यस्तु तन्तु यत्नेन पूजयेत्॥

ततो होमानन्तरं उदीच्यं कर्म्म कुर्य्यात्। ततो गुडौदनादीन् ऋत्विजे भोजयेत्। तत्तद्द्रव्या-लाभे भोज्यान्तराणि वा दद्यात्। भोजना-सामर्थ्ये तत्तद्द्रव्याणि पाणिना प्रतिग्राहयेत्। ततो मत्स्यपुराणोक्तैर्मन्त्रैर्दक्षिणां दद्यात्।

धेनुः शङ्खस्तथानड्वान् हेम वासो हयस्तथा।
कृष्णा गौरायसं छाग एता वै दक्षिणाः
क्रमात्॥

तत्र।

कपिले सर्व्वदेवानां पूजनीयासि रोहिणी।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे॥

इति पठित्वा ॐ अद्येत्यादि कृतैतत्सूर्य्यग्रह-यज्ञकर्म्मणः प्रतिष्ठार्थं दक्षिणां कपिलां धेनुं रुद्रदेवताकां अमुकगोत्राय अमुकदेवशर्म्मणे ब्राह्मणाय ऋत्विजे तुभ्यमहं संप्रददे। अन्यार्थ-श्चेत् ददानीति ब्रूयात्। कपिलाभावे गोमात्रं वा। तदभावे काञ्चनम्। तदभावे रजतादिकं वा दद्यात्। काञ्चनादिकन्तु शङ्खादि दक्षिणा-भावेऽपि दद्यात्॥ १॥ एवम्।

पुण्यस्त्वं शङ्खपुण्यानां मङ्गलानाञ्च मङ्गलम्।
विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य पूर्व्वोक्तक्रमेण सोमयज्ञे शङ्खं दद्यात्॥ २॥
ॐ धर्म्मस्त्वं वृषरूपेण जगदानन्दकारकः।
अष्टमूर्त्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य मङ्गलयज्ञे वृषं दद्यात्॥ ३॥
ॐ हिरण्यगर्भगर्भस्त्वं हेमरूपं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य बुधयज्ञे काञ्चनं दद्यात्॥ ४॥
ॐ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम्।
वरप्रदानाद्धरेस्तरतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य गुरुयज्ञे पीतवस्त्रयुगं दद्यात् तद-भावेऽन्यवर्णवासोयुगमपि दद्यात्॥ ५॥
ॐ विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवः।
चन्द्रार्कवाहनस्त्वं वै अतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य शुक्रयज्ञे अश्वं दद्यात्॥ ६॥
ॐ यस्मात्त्वं पृथिवी सर्व्वा धेनुः केशवसम्भवा।
सर्व्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य शनैश्चरयज्ञे कृष्णां धेनुं अन्यवर्णां वा दद्यात्॥ ७॥
ॐ यस्मादायुधकर्म्माणि त्वदधीनानि सर्व्वदा।
लाङ्गलाद्यायुधादीनि ततः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य राहुयज्ञे लौहं दद्यात्॥ ८॥
ॐ यस्मात्त्वं सर्व्वभूतानां मङ्गलाय अव-
स्थितः।
याग विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे॥
इत्युच्चार्य्य केतुयज्ञे छागं दद्यात्॥ ९॥ दक्षिणान्तं शान्तिकुम्भजलेन संसिच्य शान्तिं कुर्य्यात्। ततः कृताञ्जलिः।
ॐ गच्छध्वममराः सर्व्वे गृहीत्वार्घ्यं स्वमा-
लयम्।
सन्तुष्टा वरमस्माकं दत्त्वेदानीं सुपूजिताः॥
इति विष्णुधर्म्मोत्तरीयं पठित्वा यथावत् विस-र्ज्जयेत्। दक्षिणा च प्रदातव्या ग्रहाणाञ्च विस-र्ज्जनमिति वशिष्ठवचनात्।” इति रघुनन्दन-भट्टाचार्य्यविरचितग्रहयागप्रयोगः समाप्तः॥

याच, टु ड ऋ ञ याचने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-द्विक०-सेट्।) याचनमात्मने दानार्थं प्रेरणम्। टु, याचथुः। ड, याचि-त्रिमम्। ऋ, अययाचत्। ञ, याचति याचते नृपं विप्रः। ग्रहणार्थं प्रेरणेऽपि याचति वित्तं गुरवे शिष्यः। इति दुर्गादासः॥

याचकः, त्रि, (याचत इति। याच्+ण्वुल्।) याच्ञाकर्त्ता। तत्पर्य्यायः। वनीयकः २ याचनकः ३ मार्गणः ४ अर्थी ५। इत्यमरः।

३। १। १६। वनीपकः ६ भिक्षुकः ७ भिक्षाकरः ८। इति शब्दरत्नावली॥ तस्य लघुत्वं यथा,—
"तृणादपि लघुस्तूलस्तूलादपि च याचकः।
वायुना किं न नीतोऽसौ किञ्चित्प्रार्थनशङ्कया॥"
इति प्राचीनाः॥
अपि च।
"कुलस्य कीटघातस्य वाताग्निप्रकाशितस्य च।
शिखरे वसतस्तस्य वरं जन्म न याचितम्॥
जगत्पतिर्हि याचित्वा विष्णुर्वामनतां गतः।
कोऽन्योऽधिकतरस्तस्य योऽर्थी याति न लाघवम्॥"
इति गारुडे नीतिसारे ११५ अध्यायः॥

याचत्, [त्] त्रि, (याचतीति। याच्+शतृ।) याचकः। यथा,—
"मुखभङ्गः स्वरो दीनो गात्रस्वेदो महद्भयम्।
मरणे यानि चिह्नानि तानि चिह्नानि याचतः॥"
इति गारुडे नीतिसारे ११५ अध्यायः॥

याचनं, क्ली, (याच्+भावे ल्युट्।) याच्ञा। (यथा, नैषधे। ५। ११२।
"भीमजार्थयाचनवाचे
यूयमेव गुरवः करणीयाः॥")

याचनकः, त्रि, (याचन+स्वार्थे कन्।) याचकः। इत्यमरः। ३।१।४६॥ (यथा, मनौ। ३।१६५।
"आचारहीनः क्लीबश्च नित्यं याचनकस्तथा॥")

याचना, स्त्री, (याच्+स्वार्थे णिच्+युच्। टाप्।) याच्ञा। इत्यमरः। २। ७। ३२॥ (यथा, रामायणे। २। २७। २३।
"नयस्व मां साधु कुरुष्व याचनाम्॥")

याचमानः, त्रि, (याचते इति। याच्+शानच्।) याचकः। यथा,—
"नवीनदीनभावस्य याचमानस्य मानिनः।
वचोजीवितयोरासीत् पुरोनिःसरणे रणः॥"
इति वररुचिः॥
अपि च।
"द्विजेभ्यो याचमानेभ्यो यजमानः प्रयच्छति।
स याति याचयान् लोकान् येभ्यो नावर्त्तते पुनः॥
षष्टिवर्षसहस्राणां सहस्राणि वसेद्दिवि।
योऽनुमन्तापि भवति निरये प्रतिषेधकः॥"
इति वह्निपुराणे वामनप्रादुर्भावो नामाध्यायः॥

याचितं, क्ली, (याच्+क्तः।) याचनवृत्तिः। तत्पर्य्यायः। मृतम् २। यथा,—
"द्वे याचितायाचितयोर्यथासंख्यं मृतामृते॥"
इत्यमरः। २। ९। ३२॥
"द्वे। याचनवृत्तिर्मरणमिव दुःखजनकत्वात् मृतम्। अयाचितं अमृतमिव अमृतम्। याचितायाचितयोर्भावे कर्म्मणि वा क्तः।" इति भरतः॥ प्रार्थितवस्तुनि, त्रि॥ (यथा, देवीभागवते। ३। २८। ६७।
"पिता ते याचितः पूर्व्वं मया वै त्वत्कृतेऽनघे!॥")

याचितकं, क्ली, (याचितेन निर्वृत्तम्। याचित+"अपमित्ययाचिताभ्यां कक्कनौ।" ४। ४। २१। इति कन्।) याच्ञाप्राप्तम्। इत्यमरः। २।६।४॥
"याच्ञया। प्रत्यर्पणीयत्वेन याच्ञया यत् प्राप्तमलङ्कारादिवस्तु तत् याचितकम्। कार्य्यानन्तरं वस्तुस्वामी यत् पुनर्गृह्णाति तदित्यर्थः। याचितेन प्राप्तमिति ठघे कादिति कः।" इति भरतः॥

याच्ञा, स्त्री, (याचनमिति। याच्+"यजयाचयतविच्छप्रच्छरक्षो नङ्।" ३। ३। ९०। इति नङ्।) याचनम्। तत्पर्य्यायः। अभिशस्तिः २ याचना ३ अर्थना ४ भिक्षा ५ अर्द्दना ६। इत्यमरः। २। ७। ३२॥ लालसा ७। इति जटाधरः॥ (यथा, भागवते। २। ७। १७।
"ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां
लोकान् विचक्रम इमान् यदथाधियज्ञः।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन
याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः॥")
तद्वैदिकपर्य्यायः। ईमहे १ यामि २ मन्महे ३ दद्धि ४ शग्धि ५ पूर्द्धि ६ मिमिड्ढि ७ मिमीहि ८ रिरिड्ढि ९ रिरीहि १० पीपरत् ११ यन्तारः १२ यन्धि १३ इषुध्यति १४ मदेमहि १५ मनामहे १६ मायते १७। इति सप्तदश याच्ञाकर्म्माणः। इति वेदनिघण्टौ ३ अः॥

याजः, पुं, अन्नम्। इति हेमचन्द्रः। ३। ५९॥ (ऋषिभेदः। यथा, महाभारते।१।१६८।७।
"याजोपयाजौ ब्रह्मर्षी शाम्यन्तौ परमेष्ठिनौ।
संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ॥")

याजकः, पुं, (यजतीति। यज्+ण्वुल्।) याज्ञिकः। राज्ञो गजः। इति मेदिनी। के, १४२॥ मत्तहस्ती। इति जटाधरः॥ ऋत्विक्। यथा,
"अग्नीध्राद्या धनैर्व्वार्य्या ऋत्विजो याजकाश्च ते॥"
इत्यमरः। २। ७। १७॥
"यजमानेन धनैर्व्वार्य्याः धनानि दत्त्वा इष्टसम्पादनाय व्रियन्ते प्रार्थ्यन्ते ये अग्नीध्रप्रभृतयस्ते ऋत्विजो याचकाश्च कथ्यन्ते। अग्निं इन्धयन्ति दीपयन्ति अग्नीधाः इन्धी ञि ध ङ द्युतौ ञिः नाम्नीति रः मनीषादित्वान्नलोपः। आदिना ब्रह्मोद्गातृहोत्रध्वर्य्युब्राह्मणाच्छंसिप्रभृतयः षोडश गृह्यन्ते। वार्य्या इति ऋहलोर्ण्यदिति घ्यण् इष्टजुषेत्यादौ इ च इति चानुबन्धनिर्द्देशात् अन्यत्रधातोर्न क्यप् ऋतौ यजन्ति ऋत्विजः क्विप्। यजन्ति याचकाः ण्वकः।" इति भरतः॥ * ॥ बहुयाजकग्रामयाजकयोर्निन्दा यथा,—
"ब्रह्मणास्तु षट् प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादित्याञ्च यः पूर्व्वां सादित्याश्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥"
इत्याह्निकतत्त्वे सन्ध्योपासनम्॥
अपि च।
"शूद्रसप्तोद्दिष्टयाजी ग्रामयाजीति कीर्त्तितः।
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः॥
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः।
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

याजनं, क्ली, (याज्यते इति। यज्+णिच्+ल्युट्।) यागक्रियाकारणा। याग कराण इति भाषा। तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः। यथा,—
"अध्यापनमध्ययनं यजनं याजनन्तथा।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥"
इति मानवे १ अध्यायः॥

याजिः, पुं, (यज्+"वसिवपियजिराजीति।" उणा० ४। १२४। इति इञ्।) यज्ञः। इति संक्षिप्तसारोणादिवृत्तिः॥ यागकर्त्ता। इत्युणादिकोषः॥

याजुषं, त्रि, (यजुष इदमिति। यजुष्+अण्।) यजुर्व्वेदसम्बन्धि। इति सिद्धान्तकौमुदी॥

याज्ञवल्क्यः, पुं, (वल्कयतीति। वल्क+अच्। यज्ञस्य वल्को वक्ता। तस्य गोत्रापत्यम्। यज्ञवल्क+"गर्गादिभ्यो यञ्।" ४। २। १०५। इति यञ्।) धर्म्मशास्त्रप्रयोजकमुनिविशेषः। तत्पर्य्यायः। ब्रह्मरात्रिः २ योगेशः ३। इति हेमचन्द्रः॥ योगीश्वरः ४। इति मिताक्षरा॥ (महर्षिरयं याज्ञवल्क्यः सूर्य्यात् शुक्लयजुर्व्वेदं प्राप्तवान्। तथाहि ब्रह्मपरम्परया प्राप्तं वेदं वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तेषु कृपापरः चतुर्धा व्यस्य ऋग्यजुःसामाथर्व्वाख्यांश्चतुरो वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमादुपदिदेश ते च स्वशिष्येभ्यः। तत्र व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्व्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो गुरुः शिष्यं याज्ञवल्क्यं स्वधीतवेदपरित्यागार्थमादिष्टवान्। याज्ञवल्क्योऽपि योगबलेन अधीतयजुर्व्विद्यां मूर्त्तिमतीं विधायोद्वाम। वान्तानि यजूंषि गृह्णीतेति गुरूक्त्या अन्ये शिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षयन्। तान्येव यजूंषि बुद्धिमालिन्यात् कृष्णानि जातानि। ततो वेदहीनोऽतिदुःखितो याज्ञवल्क्यः सूर्य्यमाराध्य शुक्लानि यजूंषि प्राप्तवान् तानि च जाबालगौधेयकाण्वमाध्यन्दिनादीन् पञ्चदशशिष्यानध्यापयामास। तथाहि भागवते द्वादशस्कन्धे ६ अध्याये।
"तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः।
सव्याहृतिकान् सोङ्कारांश्चातुर्होत्रविवक्षया॥
पुत्त्रानध्यापयत् तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान्।
ते तु धर्म्मोपदेष्टारः स्वपुत्त्रेभ्यः समादिशन्॥
ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः।

चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ।
क्षीणायुषः क्षीणसत्त्वान् दुर्मेधान् वीक्ष्य कालतः ।
वेदान् ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतचोदिताः ।
अस्मिन्नप्यन्तरे ब्रह्मन् भगवान् लोकभावनः ।
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्म्मगुप्तये ।
पराशरात् सत्यवत्यामंशांशकलया विभुः ।
अवतीर्णो महाभाग वेदं चक्रे चतुर्व्विधम् ।
ऋगथर्व्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ।
तासां स चतुरः शिष्यानुपाहूय महामतिः ।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ।
पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ।
वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गणम् ।
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्व्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ।"
"वैशम्पायनशिष्या वै चरकाध्वर्य्यवोऽभवन् ।
यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् ।
याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन्
कियत् ।
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ।
इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ।
विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ।
देवरातसुतः सोऽपि छर्द्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान् ।
यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः ।
तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ।
याज्ञवल्क्यस्ततो ब्रह्मंश्छन्दांस्यधि गवेषयन् ।
गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ।"
"एवं स्तुतः स भगवान् वाजिरूपधरो रविः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ।
यजुर्भिरकरोच्छाखा दश पञ्च शतैर्विभुः ।
जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः ।"
अयमेव महर्षिर्मिथिलास्थ एव सामश्रवःप्रभृतिभिः ऋषिभिर्वर्णाश्रमेतरधर्म्मज्ञानार्थमादिष्ट आचारव्यवहारप्रायश्चित्ताख्यकाण्डत्रयात्मकं धर्म्मशास्त्रं प्रणीय तेभ्यः श्रावितवान् । यदुक्तं याज्ञवल्क्यसंहितायां ग्रन्थारम्भे ।
"योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः ।
मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाब्रवीन्
मुनीन् ।")
क्ली. उपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि ।
"गोपालतापनं कृष्णं याज्ञवल्क्यं वराहकम् ।")

याज्ञसेनी, स्त्री, यज्ञसेनस्य अपत्यम् । (यज्ञसेन + अण् । ङीप् ।) सा च द्रौपदी । इति हेमचन्द्रः । ३ । ३७५ । (यथा, महाभारते । ४ । ४ । ५६ ।
"याज्ञसेनीं पुरस्कृत्य षड्वाथ प्रवव्रजुः ।"
अस्या विवरणं द्रौपदीशब्दे द्रष्टव्यम् ।)

याज्ञिकः, पुं, (यज्ञमर्हतीति यज्ञाय हितो वा । यज्ञ + ठक् ।) दर्भभेदः । (यज्ञं यज्ञविद्यामधीते वेद वा । यज्ञ + ठक् ।) याजकः । यज्ञकर्त्ता । इति शब्दरत्नावली । (यथा, भागवते । ११ । १० । २३ ।
"इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ।")
रक्तखदिरः । पलाशः । अश्वत्थः । इति राजनिर्घण्टः ।

याज्ञिक्यं, क्ली, (याज्ञिकानां धर्म्म आम्नायो वा । याज्ञिक + "छन्दोगौक्थिकयाज्ञिकबह्वृच नटाञ्ञ्यः ।" ४ । ३ । १२९ । इति ञ्यः ।) यज्ञः । इति सिद्धान्तकौमुदी ।

याज्यं, क्ली, (इज्यत इति । यज् + ण्यत् । "यजयाचरुचप्रवचर्चश्च ।" ७ । ३ । ६६ । इति कुत्वनिषेधः ।) यागलब्धधनादि । इति सिद्धान्तकौमुदी । यजनीये, त्रि । (यथा, मनौ । ८ । ३१७ ।
"भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी ।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ।"
शिष्यः । शासनार्हः । यथा, देवीभागवते । १ । १८ । ९ ।
"याज्योऽस्ति जनकस्तत्र जीवन्मुक्तो नराधिपः ।
विदेहो लोकविदितः पाति राज्यमकण्टकम् ।")

याज्या, स्त्री, (यजन्त्यनया । यज् + ण्यत् + टाप् ।) ऋक् । इति मुग्धबोधव्याकरणम् । (गङ्गा । यथा, काशीखण्डे सहस्रनामकीर्त्तने । २९ । १४२ ।
"योगसिद्धिप्रदा याज्या यज्ञेशपरिपूजिता ।")

यात्, अ, आख्यातप्रत्ययविशेषः । स च विधिलिङाशीर्लिङोः परस्मैपदप्रथमपुरुषैकवचनम् । स तु विध्याद्यर्थक आशीर्व्वादार्थकश्च । इति व्याकरणम् । मुग्धबोधमते विध्याद्यर्थे अस्य स्नीसंज्ञा । आशीरर्थे टीसंज्ञा ।

यातं, क्ली, (या + क्तः ।) निषादिनां पादकर्म्म । इति हेमचन्द्रः । ४ । १९७ । पुस्तकान्तरे यतमिति पाठः । यथा,—
"अपरस्त्वङ्कुशस्याग्रं वातमङ्कुशवारणम् ।
निषादिनां पादकर्म्म या(य)तं वीतन्तु तद्द्वयम् ।"

यातः, त्रि, गतः । याधातोः क्तप्रत्ययेन निष्पन्नः । (यथा, मनुः । ४ । १७८ ।
"येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न
रिष्यते ।")

यातना, स्त्री, (यत् + णिच् + "ण्यासश्रन्थो युच् ।" ३।३।१०७ । इति युच् । टाप् ।) गाढवेदना । तत्पर्य्यायः । कारणा २ तीव्रवेदना ३ । इत्यमरः । २ । ८ । ३ । अतिव्यथा ४ । इति शब्दरत्नावली । (यथा, भागवते । ७ । १ । ४१ ।
"हिरण्यकशिपुः पुत्त्रं प्रह्लादं केशवप्रियम् ।
जिघांसुरकरोन्नानायातना मृत्युहेतवे ।")
नरकयन्त्रणा । इति केचिदिति भरतः ।

यातयामं, त्रि, (यातो गतो याम उपभोगकालो वीर्य्यं वा यस्य ।) जीर्णम् । (यथा, भट्टिकाव्ये । ५ । ३९ ।
"तं भीतद्वारमाक्रुश्य रावणः प्रत्यभाषत ।
यातयामं विजितवान् स रामं यदि किन्ततः ।")
परिभुक्तम् । इत्यमरः । ३।३।१४५ । उज्झितम् । इति मेदिनी । मे, ६२ । (प्राप्तशैत्यावस्थम् । यथा, गीतायाम् । १७ । १० ।
"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ।"
गतरसः । यथा, ताण्ड्यमहाब्राह्मणे । ४।३।१३।
"ब्रह्मवादिनो वदन्ति यातयामाः संवत्सरा अयातयामा इति ते नायातयामेति वक्तव्यम् ।"
"यातयामः गतरसः ।" इति सायणः ।)

याता, [ऋ] स्त्री, (यतते अन्योन्यभेदायेति । यत् + "तृन् ।" उणा० २ । ९८ । इति तृन् ।) पतिभ्रातृपत्नी । इत्यमरः । २ । ६ । ३० । जा इति भाषा । (यथा, साहित्यदर्पणे । ३ । ७८ ।
"स्वामी निश्वसितेऽप्यसूयति मनो जिघ्रः सपत्नीजनः
श्वश्रूरिङ्गितदैवतं नयनयोरीहालिहो यातरः ।"
या + तृच् । गमनकर्त्तरि, त्रि । (यथा, वृहत्संहितायाम् । ३३ । १२ । [यातुः ।"
"उल्का शुभदा पुरतो दिवाकरविनिःसृता
सारथ्यादिः । यथा, मनौ । ८ । २९० ।
"यानस्य चैव यातुश्च यानस्वामिन एव च ।
दशातिवर्त्तनान्याहुः शेषे दण्डो विधीयते ।"
"यातुः सारथ्यादेः ।" इति कुल्लूकः । हन्ता । यथा, ऋग्वेदे । १।३२।१४ ।
"अहेर्यातारं कमपश्य इन्द्र ।"
"यातारं हन्तारम् ।" इति तद्भाष्ये सायणः ।)

यातायातं, क्ली, गमनागमनम् । यथा,—
"पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनान्
निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः
पान्तु वः ।
यत्संस्कारकलानुवर्त्तनवशाद्वेलानिभेनाम्भसां
यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ।"
इति श्रीभागवते १२ स्कन्धे १३ अध्यायः ।

यातिकः, पुं, (यातं गमनं प्राशस्त्येनास्त्यस्येति । यात + ठन् ।) पान्थः । इति शब्दरत्नावली ।

यातु, क्ली, (सर्व्वेषामन्तं यातीति । या + "कमिमनिजनीति ।" उणा० १ । ७३ । इति तुः ।) राक्षसः । इत्यमरः । १ । १ । ६३ । (यथा,—
"यातु यातुप्रवीराणां प्रणम्य चरणावसौ ।"
इत्यमरटीकायां रघुनाथचक्रवर्त्ती ।
(पुंलिङ्गेऽपि दृश्यते । यथा, ऋग्वेदे । ७।२१।५ ।
"न यातव इन्द्र जूजुवुर्नो न ।"
"यातवो राक्षसाः ।" इति तद्भाष्ये सायणः ।)

यातुः, पुं, (सर्वान्तं याति गच्छतीति । या + "कमिमनिजनिगाभायाहिभ्यश्च ।" उणा० १ । ७३ । इति तुः ।) कालः । अध्वगः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । वायुः । इति संक्षिप्तसारोणादिवृत्तिः । (स्त्री, यातना । यथा, ऋग्वेदे । ८ । ४९ । २० ।
"मा नो रक्ष आवेशीदाघृणीवसो मा यातुर्यातुमावताम् ।"

"यातुर्यातना पीडा ।" इति सायणः ॥ कर्म्मनाशकरी हिंसा । यथा, तत्रैव । ५ । १२ । २ ।

"नाहं यातुं सहसा न द्वयेन ऋतं सपाम्य-
रुषस्य वृष्णः ।"

"यातुं कर्म्मणां नाशकरीं हिंसाम् ।" इति तद्भाष्ये सायणः ॥)

यातु, त्रि, यातीति । या + "कमिमनीति ।" उणा० १ । ७३ । इति तुः ।) गन्ता । इत्युणादिकोषः ॥ क्रियापदं चेत् गच्छतु ॥

यातुघ्नः, पुं, (यातु हन्तीति । हन् + "अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

यातुधानः, पुं, (यातूनि रक्षांसि दधाति पुष्णातीति । धा + बहुलमन्यत्रापीति युच् । स्वजातिपोषकत्वात्तथात्वम् ।) राक्षसः । इत्यमरः । १ । १ । ६३ ॥ (यथा, भट्टिकाव्ये । २ । २९ ।

"दक्षिण्यदिष्टां क्षतमार्त्त्विजीने-
स्तद्यातुधानैश्चिचिते प्रवर्पन् ॥")

यातृकः, पुं, (यातेवेति । यातृ + स्वार्थे कन् ।) पान्थः । इति शब्दरत्नावली ॥

यात्यं, त्रि, यतितव्यम् । यतनीयम् । यतधातोः कर्म्मणि ण्यत्प्रत्ययेन निष्पन्नम् ॥

यात्रा, स्त्री, (या + "हुयामाश्रुभसिभ्यस्त्रन् ।" उणा० ४ । १६७ । इति त्रन् । टाप् ।) विजिगीषोः प्रयाणम् । तत्पर्य्यायः । व्रज्या २ अभिनिर्य्याणम् ३ प्रस्थानम् ४ गमनम् ५ गमः ६ । इत्यमरः । २ । ८ । ९५ ॥ प्रस्थितिः ७ यानम् ८ प्राणनम् ९ । इति शब्दरत्नावली ॥ यापनम् ॥ (यथा, भागवते । १० । ८६ । १५ ।

"यात्रामात्रं त्वहरहर्द्दैवादुपनमत्युत ॥")

उत्सवः । इति मेदिनी । रे, ७८ ॥ (यथा, कथासरित्सागरे । १० । ८७ ।

"यात्रासुपवने द्रष्टुं जगाम सखिभिः सह ॥"

व्यवहारः । यथा, गीतायाम् । ३ । ८ ।

"शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः ॥"

"शरीरयात्रा देहव्यवहारः ।" इति तत्र नीलकण्ठः ॥) उपायः । इति विश्वः ॥ * ॥ अथ यात्रादिनम् । भाद्रपौषचैत्रेतरमासेषु दूरयात्रा कर्त्तव्या । पूर्व्वस्यां दिशि रविशुक्रवारस्य प्राशस्त्यम् । दक्षिणस्यां मङ्गलवारस्य प्राशस्त्यम् । पश्चिमायां सोमशनिवारस्य प्राशस्त्यम् । उत्तरस्यां बृहस्पतिवारस्य प्राशस्त्यम् । पूर्व्वस्यां दिशि सोमशनिवारे न गन्तव्यम् । दक्षिणस्यां बृहस्पतिवारे केषाञ्चिन्मते बुधवारे च न गन्तव्यम् । पश्चिमायां रविशुक्रवारे । एवं उत्तरस्यां बुधमङ्गलवारे न गन्तव्यम् । द्वितीया तृतीया सप्तमी पञ्चमी दशमी एकादशी त्रयोदशी च एता यात्रायां प्रशस्ताः । अथोत्तमनक्षत्राणि । अश्विनी अनुराधा रेवती मृगशिरा मूला पुनर्व्वसु पुष्या हस्ता ज्येष्ठा । मध्यमनक्षत्राणि । रोहिणी पूर्व्वात्रयं चित्रा स्वाती शतभिषा श्रवणा धनिष्ठा । अधमनक्षत्राणि । उत्तरात्रयं विशाखा मघा आर्द्रा भरणी कृत्तिका अश्लेषा । तत्र नक्षत्रमूलकथनम् । स्वात्यां ज्येष्ठायाञ्च पूर्व्वदिग्गमनं निषिद्धम् । एवं पूर्व्वभाद्रपदे अश्विन्याञ्च दक्षिणदिग्गमनं पुष्ये रोहिण्याञ्च पश्चिमदिग्गमनं उत्तरफल्गुन्यां हस्तायाञ्च उत्तरदिग्गमनं निषिद्धम् । तत्रानुक्तकरणानि । नरं वणिजं विष्टिः । नरमपि केचिच्छुभं मन्यते । अथ उत्तमलग्नानि । सिंहवृषकुम्भकन्यामिथुनानि । तत्र योगिनीनिर्णयः । प्रतिपदि नवम्याञ्च प्राच्यां योगिनी । तृतीयायां एकादश्याञ्चाग्निकोणे । पञ्चम्यां त्रयोदश्याञ्च दक्षिणे । द्वादश्यां चतुर्थ्याञ्च नैरृतकोणे । षष्ठ्यां चतुर्द्दश्याञ्च पश्चिमे । सप्तम्यां पूर्णिमायाञ्च वायुकोणे । द्वितीयायां दशम्याञ्च उत्तरदिशि । अष्टम्याममावास्यायाञ्च ईशानकोणे । तां दक्षिणे सम्मुखे च कृत्वा न गन्तव्यम् । पापयोगग्रहस्पर्शमासदग्धादिषु यात्रा न कर्त्तव्या । वारवेलाकालवेलाकुलिकवेलाविष्टिभद्रादिषु च यात्रा न कर्त्तव्या । द्विरागमनदिनं नववधूशब्दे द्रष्टव्यम् ॥ * ॥ अथ नौयात्राप्रवेशविक्रयाः । तत्र तिथयः । अमावस्याष्टमीचतुर्द्दशीविष्टिभिन्नाः । तत्र नक्षत्राणि । रोहिणी पूर्व्वफल्गुनी पूर्व्वाषाढा पूर्व्वभाद्रपत् उत्तरफल्गुनी उत्तराषाढा उत्तरभाद्रपत् श्रवणा भरणी चित्रा एतद्व्यतिरिक्तानि । योगाः । व्यतीपातभिन्नाः । वाराः । क्रूरभिन्नाः ॥ * ॥ अथ नौकायात्रा । तत्र विहितनक्षत्राणि । अश्विनीहस्तापुष्यमृगशिरःपूर्व्वफल्गुनी-पूर्व्वाषाढा-पूर्व्वभाद्रपदनुराधाधनिष्ठाश्रवणाः । वाराः शुभग्रहाणाम् । तत्र लग्नं शोभनम् । तत्र शोभनचन्द्रः । तारा च शोभना विहिता । इति ज्योतिस्तत्त्वम् ॥ * ॥

अथ यात्रायां शुभजनकद्रव्यदर्शनादि यथा,—

"धेनुर्व्वत्सप्रयुक्ता वृषगजतुरगा दक्षिणावर्त्तवह्नि-
र्दिव्यस्त्रीपूर्णकुम्भा द्विजनृपगणिकाः पुष्पमाला
पताका ।
सद्योमांसं घृतं वा दधि मधु रजतं काञ्चनं
शुक्लधान्यं
दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवो
गन्तुकामः ॥"

इति समयप्रदीपः ॥

तत्राशुभजनकदर्शनं यथा,—

"सम्मुखे रजकं पश्चात् क्षुरिकं यदि पश्यति ।
न गन्तव्यं तदा तस्मात् तैलवाय्यगोऽशुभः ॥
अग्रो क्षुभ्यति गौः कासी क्षुतं वा कुरुते नरः ।
पश्यन् यात्रा न कर्त्तव्या क्लीवं पश्यति वाग्यतः ॥"

इति ज्योतिराकरः ॥

यात्राकाले विशेषदर्शनफलं यथा,—

"मृगाहिकपिमार्ज्जारश्वानः शूकरपक्षिणः ।
नकुलो मूषिकश्चैव यात्रायां दक्षिणे शुभाः ॥
विप्रकन्या शवो वत्सशङ्खभेरीवसुन्धराः ।
जम्बुकोष्ट्रखराद्याश्च यात्रायां वामके शुभाः ॥
वेश्यास्त्रीपूर्णकुम्भानां यात्रायां दर्शनं शुभम् ॥"

यात्राकाले अशुभलक्षणं यथा,—

"कार्पासौषधतैलञ्च पङ्काङ्गारभुजङ्गमाः ।
मुक्तकेशो रक्तमाल्यं नग्नाद्यशुभलक्षणम् ॥" * ॥

यात्राकाले छिक्कायाः फलं यथा,—

"छिक्काया जन्म वक्ष्ये लभेत् पूर्व्वे महाफलम् ।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात् ॥
नैरृते शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे ।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत् ।
ईशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम् ॥"

अथ यात्रायां दिग्विशेषे विशेषनक्षत्राणि ।

"कृत्तिकादौ तु पूर्व्वेण सप्त ऋक्षाणि वै व्रजेत् ।
मघादौ दक्षिणे गच्छेदनुराधादि पश्चिमे ॥
प्रशस्ता चोत्तरे यात्रा धनिष्ठादिषु सप्तसु ।
अश्विनीरेवतीचित्राधनिष्ठाः सदलङ्कृताः ।
मृगाश्विचित्रापुष्याश्च मूलहस्तौ शुभौ सदा ॥"

यात्रादौ लग्नादिषु ग्रहस्थितिफलं यथा,—

"कन्याप्रदाने यात्रायां प्रतिष्ठादिषु कर्म्मसु ।
शुक्रचन्द्रौ च लग्नस्थौ शुभदौ च द्वितीयगौ ॥
शशिज्ञशुक्रजीवाश्च राशौ चाथ तृतीयके ।
भौममन्दशशाङ्काङ्कं बुधः श्रेष्ठश्चतुर्थके ॥
शुक्रजीवौ पञ्चमे च श्रेष्ठौ सङ्गिवराहुतौ ।
मन्दार्केन्दुकुजाः षष्ठे गुरुचन्द्रौ च सप्तमे ।
शुक्रज्ञावष्टमे श्रेष्ठौ नवमस्थो गुरुः शुभः ।
अर्कार्किचन्द्रा दशमे एकादशेऽखिला ग्रहाः ॥
बुधोऽथ द्वादशे चैव भार्गवः सुखदो भवेत् ॥"

इति गारुडे ६० । ६१ अध्यायौ ॥ * ॥

अथ राजयात्रा ।

"इदानीं सर्व्वधर्म्मज्ञ धर्म्मशास्त्रविशारद ! ।
यात्राकालविधानं मे कथयस्व महीक्षिताम् ॥
यदा मन्येत नृपतिराक्रन्देन बलीयसा ।
पार्ष्णिग्राहाभिभूतोऽरिस्तदा यात्रां प्रयोजयेत् ॥
योधाश्चला प्रभूताश्च प्रभूतञ्च बलं मम ।
मूलरक्षासमर्थोऽस्मि तदा यात्रां प्रयोजयेत् ॥
अशुद्धपार्ष्णिर्नृपतिर्न तु यात्रां प्रयोजयेत् ।
पार्ष्णिग्राहाधिकं सैन्यं मूले निःक्षिप्य वा व्रजेत् ॥
चैत्रे वा मार्गशीर्षे वा यात्रां यायान्नराधिपः ।
चैत्री पश्यति नैदाघं हन्ति पुष्टिञ्च शारदीं ॥
एतदेव विपर्य्यस्तं मार्गशीर्षे नराधिपः ।
शत्रोर्व्वा व्यसने यायात् कालः स तु सुदुर्लभः ॥
दिव्यान्तरीक्षक्षितिजैरुत्पातैः पीडितं परम् ।
षड्‌क्षपीडाभितप्तं पीडितञ्च तथा ग्रहैः ॥
ज्वलन्तीव तथैवोल्का दिशं यस्य प्रपद्यते ।
भूकम्पोल्का दिशं यान्ति याञ्च केतुः प्रधूयते ॥
निर्घातश्च पतेद्यत्र तं यायाद्वसुधाधिपः ।
बलव्यसनोपेतं तथा दुर्भिक्षपीडितम् ॥
सम्भूतान्तरकोपश्च क्षिप्रं यायादरिं नृपः ।
यूकामाक्षीकबहुलं बहुपङ्कं तथाविलम् ॥
नास्तिकं भिन्नमर्य्यादं तथामङ्गलवादिनम् ।
अपेतप्रकृतिञ्चैव निरायञ्च तथा जयेत् ॥
विविक्तनायकां सेनां तथा भिन्नां परस्परम् ।
व्यसनासक्तनृपतिं बलं राजाभियोजयेत् ॥

सैनिकानामशस्त्राणि स्फुरन्त्यङ्गानि यत्र च ।
दुःस्वप्नान्यपि पश्यन्ति बलन्तदभियोजयेत् ॥
उत्साहबलसम्पन्नश्चानुरक्तबलस्तथा ।
तुष्टपुष्टबलो राजा परानभिमुखो व्रजेत् ॥
शरीरस्फुरणे धन्ये तथा दुःस्वप्ननाशने ।
निमित्ते शकुने धन्ये जाते शत्रुपुरं व्रजेत् ॥
ऋक्षेषु षट्सु शुद्धेषु ग्रहेष्वनुगुणेषु च ।
प्रश्नकाले शुभे जाते परान् यायान्नराधिपः ॥
एवन्तु दैवसम्पन्नस्तथा पौरुषसंयुतः ।
देशकालोपपन्नान्तु यात्रां यायान्नराधिपः ॥
उलूकस्य निशि ध्वाङ्क्षः स च तस्य दिवा बली ।
एवं देशञ्च कालञ्च ज्ञात्वा यात्रां प्रयोजयेत् ॥
पदातिनागबहुलां सेनां प्रावृषि योजयेत् ।
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम् ॥
खरोष्ट्रबहुलां सेनां तथा ग्रीष्मे नराधिपः ।
चतुरङ्गबलोपेतां वसन्ते वा शरद्यथ ॥
सेना पदातिबहुला यस्य स्यात् पृथिवीपतेः ।
अभियोज्यो भवेत्तेन शत्रुर्विषममाश्रितः ॥
गम्ये वृक्षावृते देशे स्थितं शत्रुं तथैव च ।
किञ्चित्पङ्के तथा यायाद्बहुनागो नराधिपः ॥
रथाश्वबहुलो यायात् शत्रुं समपथाश्रितम् ।
तदाश्रयन्तो बहुलांस्तथा राजाभिपूजयेत् ॥
खरोष्ट्रबहुलो राजा शत्रुं बन्धनसंश्रितम् ।
बन्धनस्थोऽपि योज्योऽरिस्तदा प्रावृषि भूभुजा ॥
हिमपातयुते देशे स्थितं ग्रीष्मेऽभियोजयेत् ।
शरद्वसन्तौ धर्म्मज्ञ कालौ साधारणौ स्मृतौ ॥

विज्ञाय राजा द्विजदेशकालौ
दैवं त्रिकालञ्च तथैव बुद्ध्वा ।
प्रायात् परं कालविदां मतेन
सञ्चिन्त्य सार्द्धं द्विजमन्त्रविद्भिः ॥”

इति मात्स्ये २१४ अध्यायः ॥ * ॥

यात्राकाले माङ्गल्यद्रव्याणि यथा,—
“पौर्णापर्य्यं स्ववृत्तान्तं तानुक्त्वा च शुभक्षणे ।
तैरेव सार्द्धं बलवान् बभूव गमनोन्मुखः ॥
ददर्श मङ्गलं रामः शुश्राव जयसूचकम् ।
बुबुधे मनसा सर्व्वं विजयं वैरिसंक्षयम् ॥
यात्राकाले च पुरतः शुश्राव सहसा मुनिः ।
हरिशब्दं शङ्खरवं घण्टादुन्दुभिवादनम् ॥
आकाशवाणीं सङ्गीतां जयस्ते भवितेति च ।
नरोक्तं तच्च कल्याणं मेघशब्दं जयावहम् ॥
चकार यात्रां भगवान् श्रुत्वैवंविधं शुभम् ।
ददर्श पुरतो विप्रवन्दिदैवज्ञभिक्षुकान् ॥
ज्वलत्प्रदीपं बिभ्रन्तीं पतिपुत्रवतीं सतीम् ।
पुरो ददर्श स्मेरास्यां नानाभूषणभूषिताम् ॥
शिवं शिवां पूर्णकुम्भं चाषञ्च नकुलन्तथा ।
गच्छन् ददर्श रामेशो यात्रामङ्गलसूचकम् ॥
कृष्णसारं गजं सिंहं तुरगं गण्डकं द्विपम् ।
चमरीं राजहंसञ्च चक्रवाकं शुकं पिकम् ॥
मयूरं खञ्जनञ्चैव शङ्खचिल्लचकोरकम् ।
पारावतं बलाकाञ्च कारण्डं चातकं चटम् ॥
सौदामिनीं शक्रचापं सूर्य्यं सूर्य्यप्रभां शुभाम् ।
सद्योमांसं सजीवञ्च मत्स्यं शङ्खं सुवर्णकम् ॥
माणिक्यं रजतं मुक्तां मणीन्द्रञ्च प्रवालकम् ।
दधि लाजं शुक्लधान्यं शुक्लपुष्पञ्च कुङ्कुमम् ॥
शुक्लच्छत्रं पताकाञ्च दर्पणं श्वेतचामरम् ।
धेनुं वत्सप्रयुक्ताञ्च रथस्थं भूमिपं तथा ॥
दुग्धञ्च रोचनामाज्यमन्नं पायसं तथा ।
शालग्रामं पक्वफलं स्वस्तिकं शर्करां मधु ॥
मार्ज्जारञ्च वृषेन्द्रञ्च मेघपर्व्वतमूषिकम् ।
मेघाच्छन्नस्य च रवेरुदयं चन्द्रमण्डलम् ॥
कस्तूरीं कज्जलं तोयं हरिद्रां तीर्थमृत्तिकाम् ।
सिद्धार्थं सर्षपं दूर्व्वां विप्रबालञ्च बालिकाम् ॥
स्वर्णं वेश्याञ्च भ्रमरं कर्पूरं पीतवाससम् ।
गोमूत्रं गोपुरीषञ्च गोधूलिं गोपदाङ्कितम् ॥
गोष्ठं गवां वर्त्म रम्यं गोशालं गोरतिं शुभाम् ।
भूषणं देवप्रतिमां ज्वलदग्निं महोत्सवम् ॥
ताम्रं स्फटिकं रैत्यञ्च सिन्दूरं माल्यचन्दनम् ।
गन्धञ्च हीरकं रत्नं ददर्श दक्षिणे शुभम् ॥
सुगन्धि वायोराघ्राणं प्राप विप्राशिषं शुभम् ।
इत्येवं मङ्गलं ज्ञात्वा प्रययौ स मुदान्वितः ॥”

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३३ अध्यायः ॥ * ॥

यात्राकाले अमङ्गलसूचकानि यथा,—
“राजा जगाम समरं हृदयेन विदूयता ।
सार्द्धं सैन्यसमूहैश्च वाद्यभाण्डैरसंख्यकैः ॥
ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ।
ययौ तथापि समरं न जगाम गृहं पुनः ॥
मुक्तकेशीं छिन्ननासां रुदन्तीञ्च दिगम्बरीम् ।
कृष्णवस्त्रपरीधानामपरां विधवामपि ॥
कुलदुष्टां योनिदुष्टां व्याधियुक्ताञ्च कुट्टनीम् ।
पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमहो ॥
कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् ।
कुचेलमपि रूक्षाङ्गं नग्नं काषायवासिनम् ॥
वस्त्रविक्रयिणञ्चैव कन्याविक्रयिणं तथा ।
चितां दग्धशवं भस्म निर्व्वाणाङ्गारमेव च ॥
सर्पंसतवरं सर्पं गोधाञ्च शशकं विषम् ।
श्राद्धपाकञ्च पिण्डञ्च मोदकञ्च तिलांस्तथा ॥
देवलं वृषवाहञ्च शूद्रश्राद्धान्नभोजिनम् ।
शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकम् ॥
कुशपुत्तलिकाञ्चैव शवदाहनकारिणम् ।
शून्यकुम्भं चूर्णकुम्भं तैलं लवणमस्थि च ॥
कार्पासं कच्छपं चूर्णं कुक्कुरं शब्दकारिणम् ।
दक्षिणे च शृगालाञ्च कुर्व्वन्तं भैरवं रवम् ॥
कपर्द्दकञ्च चौरञ्च छिन्नकेशं नखं मलम् ।
कलहञ्च विलापञ्च विलापकारिणं जनम् ॥
अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणम् ।
मिथ्यासाक्षिप्रदातारं चौरञ्च नरघातिनम् ॥
पुंश्चलीपतिपुत्रौ च पुंश्चल्योदनभोजिनम् ।
देवतागुरुविप्राणां वस्तुवित्तापहारिणम् ॥
दत्तापहारिणं दस्युं हिंसकं सूचकं खलम् ।
पितृमातृविरक्तञ्च द्विजाश्वत्थविघातिनम् ॥
सत्यघ्नञ्च कृतघ्नञ्च स्थाप्यापहारिणं जनम् ।
मित्रद्रुहं मित्रघ्नञ्च धूर्त्तं विश्वासघातिनम् ॥
गुरुदेवद्विजानाञ्च निन्दकं स्वाङ्गघातकम् ।
जीवानां घातकञ्चैव स्वाङ्गहीनञ्च निर्दयम् ॥
व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकम् ।
गलितव्याधिगात्रञ्च गुरुलङ्घनमेव च ॥
पुक्कसं छिन्नलिङ्गञ्च सुरामत्तं सुरां तथा ।
क्षिप्तं वमन्तं रुधिरं महिषं गर्द्दभं तथा ॥
मूत्रं पुरीषं श्लेष्माणं कम्पिनं नृकपालिनम् ।
झञ्झावातं रक्तवृष्टिं वाद्यञ्च गृहघातकम् ॥
शृङ्गञ्च शूकरं शशं श्येनं कङ्कञ्च भल्लुकम् ।
पाशञ्च शुष्ककाष्ठञ्च वायसं गन्धकं तथा ॥
अग्रदानिब्राह्मणञ्च तन्त्रमन्त्रोपजीविनम् ।
वैद्यञ्च रक्तपुष्पञ्चैवौषधन्तुषमेव च ॥
कुवार्त्तां मृतवार्त्ताञ्च विप्रशापञ्च दारुणम् ।
दुर्गन्धवातं दुःशब्दं राजा संप्राप वर्त्मनि ॥
मनश्च कुत्सितं प्राणाः क्षुभिताश्च निरन्तरम् ।
वामाङ्गस्पन्दनं देहजाड्यं राज्ञो बभूव ह ॥”

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥

श्रीकृष्णस्य मथुरायात्रा यथा,—
“राधिकायाश्च सभायां सभासु गोपिकासु च ।
पुष्पचन्दनतल्पे च वायुना सुरभीकृते ॥
तृतीयप्रहरेऽतीते निशायाश्च शुभक्षणे ।
शुभचन्द्रर्क्षयोगे चामृतयोगसमन्विते ॥
सौम्यस्वामियुते लग्ने सौम्यग्रहविलोकने ।
पापग्रहसमासक्तदृष्टिदोषादिवर्ज्जिते ॥
यशोदां बोधयामास कारयामास मङ्गलम् ।
बन्धूनाश्वासयामास समुत्थाय हरिः स्वयम् ॥
वाद्यं निषेधयामास राधिकाभयभीतवत् ।
स्वतन्त्रो विश्वकर्त्ता च पाता भर्त्ता स्वतन्त्रवत् ॥
प्रक्षाल्य पादयुगलं धृत्वा धौते च वाससी ।
उवास संस्कृते स्थाने विलिप्ते चन्दनादिना ॥
फलपल्लवसंयुक्तं संस्कृतं चन्दनादिभिः ।
वामे कृत्वा पूर्णकुम्भं वह्निं विप्रं सुदक्षिणे ।
पतिपुत्रवतीं दीपं दर्पणं पुरतस्तथा ॥
दूर्व्वाकाण्डञ्च सुस्निग्धं पुष्पं धान्यं सितं शुभम् ।
गुरुदत्तं गृहीत्वा च प्रददौ मस्तकोपरि ॥
घृतं ददर्श माध्वीकं रजतं काञ्चनं दधि ।
चन्दनं लेपनं कृत्वा पुष्पमालां गले ददौ ॥
गुरुवर्गं ब्राह्मणञ्च वन्दयामास भक्तितः ।
शङ्खध्वनिं वेदपाठं सङ्गीतं मङ्गलाष्टकम् ॥
विप्राशीर्व्वचनं रम्यं शुश्राव परमादरम् ।
ध्यात्वा मङ्गलरूपञ्च सर्व्वत्र मङ्गलप्रदम् ॥
चिक्षेप दक्षिणं पादं सुन्दरं स्वात्मविग्रहम् ।
विधृत्य नासिकावामभागं मध्यमया विभुः ॥
विहृष्य वायुमिष्टञ्च नासादक्षिणरन्ध्रतः ।
ततो ययौ नन्दनन्दो नन्दस्य प्राङ्गणं वरम् ॥”

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७१ अध्यायः ॥

अथ यात्रायुक्तिः । तत्र समयः ।
“यात्रायां द्विविधः कालो वैकारः सहजस्तथा ।
प्रोक्त आत्ययिके कार्य्ये विकारो नात्र निर्णयः ।
सहजः स्वेच्छया राज्ञां तस्य निर्णय उच्यते ॥
यात्राजसिंहमध्या शनैश्चरबुधोशनसां गृहेषु ।

भानौ कुलीरमृगवृश्चिकगोभिर्दीर्घा
शस्तस्तु देवलमतेऽध्वनि एततोऽर्कः ॥

अश्विनी रेवती ज्येष्ठा तथा पुष्यपुनर्व्वसू ।

मैत्रं मृगशिरो मूला यात्रायामुत्तमाः स्मृताः ॥
भरणी कृत्तिकाश्लेषा विशाखा चोत्तरात्रयम् ।
मघा पशुपतिश्चैव यात्रायां मरणप्रदाः ॥

पूर्व्वे कुवेरे दहने निशाटे
यमे जलेशे पवने महेशे ।
त्याज्यं नरस्य प्रतिपत्क्रमेण
युग्मं तिथीनां प्रवदन्ति तज्ज्ञाः ।
स्यात् संमुखे यानमसुक्षयाय
पश्चाद्भवेत् सर्व्वशुभाय पुंसाम् ॥

सूर्य्यः शुक्रः कुजो राहुर्मन्दश्चन्द्रो गुरुर्बुधः ।
अग्रतः शोभना यात्रा पृष्ठतो मरणं ध्रुवम् ॥

पूर्व्वेण्द्रं दक्षिणे यानपादं
रोहिण्ये तत्राय्यमाख्याश्च मूलम् ।
कामं यायात् साम्परायेषु कार्य्ये-
ष्वन्यदापि प्रेक्ष्य मूलानि भानि ॥"

तत्र दिक्शूलम् ।
"षष्ठाष्टमी चतुर्थी च नवमी द्वादशी तथा ।
चतुर्द्दशी कुहूस्त्याज्या यात्रायामशुभप्रदाः ॥

प्रायो जगुः सहजषष्ठचतुर्दशाय संस्थाः
पापाः शुभाः सविलग्नं परिसृज्य खस्थम् ।
सर्व्वगाः शुभफलं जनयन्ति सौम्या-
स्यक्तारिसंस्थममरारिगुरुं जिगीषोः ॥

नाकालवर्षविद्युत्स्तनितेष्विष्टं कथञ्चिदपि यानम् ।
आसप्ताहात् दिव्यान्तरीक्षभौमैस्तथोत्पातैः ॥"

तत्र क्रमः ।
"राज्ञां यात्राविधिं वक्ष्ये जिगीषूणां परावनीम् ।
नीराजनाविधिं कृत्वा सैनिकांश्चानयेत्ततः ।
गजानश्वान् मृगानन्यानिति यात्राक्रमो मतः ॥"

तत्र नीराजनाविधिः ।
"वर्षान्तेऽभ्युदिते शुक्रे चन्द्रे पूर्व्वे शुभक्षये ।
अश्वनीराजनं कुर्य्यात् यथोक्तैर्दिवसत्तमैः ॥
उदीच्यां प्रस्थिते भानौ संक्रान्त्यां वा शुभे दिने ।
गजनीराजनं कुर्य्यात् महीपालो जिगीषिवान् ॥
वृश्चिकस्थे रवौ कुर्य्यात् पत्तिनीराजनाविधिम् ।
नौकानीराजनं कुर्य्यात् दक्षिणाशां प्रतिष्ठति ॥
अन्येषाञ्चैव यानानां विजयादशमीतिथिम् ।
ध्वजादीनाञ्च सर्व्वेषां शक्रोत्थाने नीराजनम् ॥
छत्रस्य नवदण्डस्य तथा सिंहासनस्य च ।
गृहस्य नगरस्यापि महाविषुवसंक्रमे ॥
आत्मनो युवराजस्य महिष्या मन्त्रिणां तथा ।
स्वजन्मदिवसे राजा कुर्य्यान्नीराजनाविधिम् ॥
अभिषेकदिनं प्रोक्तमेषां जन्मदिनं मया ॥"

तद्यथा,—
"अश्वानां भास्करो देवो रेवन्तमिति संज्ञया ।
गजानां देवता शक्रः पत्तीनां कालिका मता ॥
नौकानां वरुणो देवो यानानान्तु जयन्तकः ।
अस्त्राणां देवता रामो यमः खड्गस्य पूज्यते ॥
ध्वजानां हनुमान् पूज्यो वृहस्पतिरिति क्रमात् ।
तान् पूजयित्वा विधिवदेतान्नीराजयेन्नृपः ॥
द्वादशमहिषैः पुष्टैश्चामरघण्टास्वनादिभूषाढ्यैः ।
छागलैर्मेहिषद्विगुणैः पुरुषैस्तद्विगुणैश्चारुदीपि-
काभिः ॥

अथ वा सहस्रांशुदिने नीराजयेद्राजा ।
द्वादशवाहै रुचिरैः साङ्गोपाङ्गैरतोऽर्हतश्चोर्य्यैः ॥
तस्मादर्हतो यात्रेर्गजशतनीराजनं सम्भवति ।
छागलशतं वृषभशतं शतञ्च मेषाणाम् ॥
तुरगा दश हृष्टाङ्गा याम्याः पञ्च द्विपश्चैकः ।
भल्लुका हि कुक्कुराश्चैकैकाः पत्तिलक्षणस्य ॥
नौकाशतकं साङ्गं नवदशकं काष्ठभादिभि-
र्घटितम् ।
वेत्रशतमपि जन्मना नौकानीराजने राज्ञाम् ॥
यद्वा द्विपदं यानं सर्व्वेषामिष्यते तुरगैः ।
सुदशावत्सरवयितैर्योग्याङ्गैर्योग्यवर्णैश्च ॥
अष्टाभिर्धातुभिः कुर्य्याद्दण्डनीराजनाविधिम् ।
गजाश्वनरनौकाभिर्द्विगुणाभिर्यथोत्तरम् ।
रत्नैर्नानाविधैरस्त्रैर्धातुभिर्वसनैस्तथा ॥
सिंहासनैश्च योग्यैश्च कुर्य्यान्नीराजनाविधिम् ।
गृहनीराजनाप्येवं नरस्याथ निगद्यते ॥
षभिः खरैः शृगालैश्च याम्यैरुष्ट्रैस्तथोन्नतैः ।
पुरं नीराजयेद्राजा चिरसम्पत्तिहेतवे ॥
वा दशाश्वस्तदर्द्धेन नरश्चैव तदर्द्धतः ।
याम्यादीनां मध्येकं रत्नं नानाविधन्तथा ॥
अस्त्राणि धातवश्चैव वस्त्राणि च फलानि च ।
वनजाः स्थलजाश्चैव जलजाश्चैव जन्तवः ॥
नवग्रहाश्च सूर्य्याद्याः प्रोक्ताः सप्त घटास्तथा ।
योग्यधातुसमुद्भूता नौकाखड्गद्वयन्तथा ॥
निजदेहमितं स्वर्णं रजतं ताम्रमेव वा ।
आत्मनीराजने दद्यादृयदिच्छेच्चिरसंस्थितिम् ॥
अस्त्रैर्नानाविधैः कुर्य्याद्युवराजनीराजनम् ।
अलङ्कारैश्च विविधैर्द्देवीनीराजनं मतम् ॥
मन्त्रिनीराजनं राजा हयेनैव समाचरेत् ॥
अमात्यानां सैनिकानां विप्राणां धनिनान्तथा ।
वस्त्रैर्नीराजनं कुर्य्यादिति भोजस्य सम्मतम् ॥
नीराजनाया वस्तूनि न पश्येन्न पुनः स्पृशेत् ।
सप्तकृत्वः परिभ्राम्य कुर्य्यान्नीराजनाविधिम् ॥
न्यसेद्वा परराष्ट्रेषु गहने वा जलेऽपि वा ।
देवब्राह्मणदीनेभ्यः प्रयच्छेद्वा यथायथम् ॥
इति संक्षेपतः प्रोक्तो मया नीराजनाविधिः ।
अनेन विधिना राजा सुचिरं सुखमश्नुते ॥"

तथा हि गर्गः ।
"नीराजना महीन्द्राणां निहन्ति विपदोऽखिलाः ।
सैव सन्नहनं राज्ञां कञ्चुकेनेव संयतः ॥
नीराजनावन्दितानां न भयं विद्यते क्वचित् ।
नीराजनाविहीनानां नश्येयुः सर्व्वसम्पदः ॥"

तथा च वात्स्यः ।

"ये भूमिपालाः प्रतिवत्सरान्तं
कुर्व्वन्ति नीराजनकर्म्म सम्यक् ।
तेषां न लक्ष्मीः क्षयतामुपैति
साम्राज्यलक्ष्मीः करगैव तेषाम् ॥

एवं नीराजनं कृत्वा राजा प्रस्थानमाचरेत् ॥"

इति नीराजनाविधिः ॥ * ॥

अथ यात्रा ।
"गुणातिशयसम्पन्नः शत्रुं यायाज्जिगीषया ।
यदि पश्चात् प्रकोपो न यदि राष्ट्रे न कण्टकाः ॥
संश्रायान्यत्र यायाद्वा पार्ष्णिग्राहेण शत्रुणा ॥

राज्ञायुलूको विनिहन्ति काकान्
काकोऽप्युलूकान् रजनीव्यपाये ।
इति स्वकालं समुदीक्ष्य यायात
काले फलन्तीह समीहितानि ॥

प्रबलव्यसनोपेतं दुर्भिक्षादिप्रपीड़ितम् ।
सम्भूतान्तरकोपेतं न यायात पृथिवीपतिः ॥
निजदैवानुकूल्ये हि प्रातिकूल्ये परस्य च ।
यायान्नृपो यतो दैवं बलमेतत् परं मतम् ॥"

अन्यच्च तु ।
"निरातङ्के निरुत्पाते निरुद्विग्ने निरामये ।
विपक्षे जयमिच्छन्ति राजानो विजिगीषवः ॥"

इति युक्तिकल्पतरुः ॥

युद्धयात्रायाममङ्गलदर्शनं यथा,—
"तस्य निर्गच्छतो गेहात् श्वानोऽस्य सुखतो-
ऽभवत् ।
ध्वजे ररोह कापोतः शिवा श्यामा च
दक्षिणा ॥
पिङ्गला चञ्चुगोधा च शूकरी केवली तथा ।
गजवाजरसेनाजशिखिच्छिक्काश्च वामतः ॥
पथं विभिन्दते सर्पः कुम्भोदकं यशीर्य्यत ।
रराव वानरो जम्बो मार्ज्जारो ह्यतिभैरवम् ॥
तैलतक्रछगकेशयुक्ताभ्यक्तादिदर्शनम् ।
वान्तोन्मत्तजड़मूकक्षुत्क्षामनक्रणं रवम् ॥
तुषकार्पासलवणानां निन्दितानाञ्च दर्शनम् ।
रक्ताम्बरधरो मुण्डः पक्वामिषं तथा वसा ॥
ललाटं शक्रजश्चाप उल्कापातध्वजारुणाः ।
दिशां दाहमहीकम्पाः सरजः कलुषं नभः ॥
निस्तेजस्तपते भानुर्नद्यः प्रतिमुखावहाः ।
उष्णोदकं महाकूपं दरणं दीर्घिकासु च ॥
अकालविकृतिः पुष्पफलानामन्वभूत्तदा ।
शीत उष्णविपर्य्यासा मेघनादाश्च दारुणाः ॥
आरण्यसत्त्वा ग्रामेषु ग्रामजारण्यवासिनः ।
क्रोष्टृसर्पसमूहाश्च शशश्वानः पिपीलिकाः ॥
काकानां महती सेना मृगाणाञ्च तथैव च ।
एते च पुरप्राकारे निपतन्त्युत्पतन्ति च ॥
दुर्गन्धः शार्करो वायुर्दीना योधा हतप्रभाः ।
शकृन्मूत्राश्रुपातानि गजा अश्वाः प्रचक्रिरे ।
ध्वजच्छत्रपताकानां स्फुटनं दण्डभिन्दनम् ।
कलङ्कमासे चक्रे च हता दुन्दुभिरेव च ॥
व्यातलाकूटनञ्चापि नाराचानाञ्च कुञ्चता ।
गदानां मुद्गराणाञ्च शीर्णता ह्यनुभिन्दता ॥
शुष्कप्ररोहणञ्चार्कसार्द्रपातस्तथैव च ।
प्रतिमारुदितं स्वेदो मृतकानाञ्च जल्पनम् ॥
गवां रासभमारोहः स्त्रीणाञ्च वक्रपतता ।
स्त्रीरुते अविच्छागादि द्वाणावि शिशुशोभनम् ।
बालानां घातनं युद्धे निस्त्रिंशाः सकलाः प्रजाः ।
मक्षिकादंशमण्डूकबहुगोनासदर्शनम् ॥
निस्तेजा न वहेद्वह्निः सधूमः स्फुटते मुहुः ॥
एवंविधान् तथोत्पातान् दृष्टान् घोरेण वासव ।
पप्रच्छ नारदं सोऽथ किमेतद्विकृतं द्विज ! ॥"

इत्यादौ देव्यवतारे घोरवधाध्यायः ॥

अथ द्वादश यात्रा ।
"प्रणम्य जगतां नाथं कलिकल्मषनाशनम् ।
द्वादशयात्रातत्त्वानि वक्ति श्रीरघुनन्दनः ॥"
तत्रादौ द्वादशयात्राकालस्य सुखोपादेयत्वात् आदौ स एव निरूप्यते । तद्यथा स्कन्दपुराणे ।
इन्द्रद्युम्न उवाच ।
"वैशाखादिषु मासेषु यात्रापूजाविधिं मुने ! ।
श्रोतुमिच्छामि देवेशे यथावद्वक्तुमर्हसि ॥
जैमिनिरुवाच ।
वैशाखादिषु मासेषु देवदेवस्य शार्ङ्गिणः ।
या या द्वादश यात्राः स्युस्ता हि वक्ष्यामि ते शृणु ।
वैशाखे चान्दनी यात्रा ज्यैष्ठे स्नापन्युदीरिता ।
आषाढ़े रथयात्रा स्यात् श्रावणे शयनी तथा ।
भाद्रे दक्षिणपार्श्वीया आश्विने वामपार्श्विका ।
उत्थानी कार्त्तिके मासि छादनी मार्गशीर्षके ॥
पौषे पुष्याभिषेकः स्यान्माघे शाल्योदनी तथा ।
फाल्गुने दोलयात्रा स्याच्चैत्रे मदनभञ्जिका ।
एकैका मुक्तिदा सर्व्वा धर्म्मकामार्थसाधनाः ॥"
अथ यात्राविधिः । स्कान्दे ।
"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता ।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभनैः ॥
वैशाखस्यामले पक्षे तृतीया पापनाशिनी ।
स्वयमाविष्कृता चैषा प्राजापत्यर्क्षसंयुता ॥
यः पश्यति तृतीयायां कृष्णं चन्दनभूषितम् ।
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥
वैष्णवा जयशब्देन पूजयित्वा तदा हरिम् ।
नानास्तोत्रोपनिषदैर्विविधैः संस्तुवन्ति च ।
वेणुवीणादिवाद्यैश्च तथा नानोपहारकैः ।
सन्तोषयन् जगन्नाथं तृतीयादौ विलेपयेत् ॥
वैशाखस्य तृतीयायां जलमध्ये विधिवतः ।
लेपनं मण्डपे कुर्य्यान्मञ्चके वा हृदवने ॥
चन्दनागुरुहीवेरं कुङ्कुमरोचनाः ।
जटामांसी मुरा चैव विष्णोर्गन्धाष्टकं विदुः ॥
एतैर्गन्धैस्तथान्यैश्च विष्णोर्गात्राणि लेपयेत् ।
इतश्च तुलसीकाष्ठं कुर्य्याल्लेपनकर्म्मणि ॥"१।
अथ स्नानयात्रा । स्कन्दपुराणे ।
"ज्यैष्ठामवचावतीर्णत्वात् पूर्व्वं जन्मवासरम् ।
तस्माच्च स्नापनं कार्य्यं महास्नानविधानतः ।
तस्यां प्रातःस्नानकाले ब्रह्मणा सहितश्च माम् ।
रामं सुभद्रां संस्नाप्य मम लोकमवाप्नुयात् ॥"
तथा ।
"मासि ज्यैष्ठे तु संप्राप्ते नक्षत्रे शक्रदैवते ।
पौर्णमास्यां हरेः स्नानं सर्व्वकामफलप्रदम् ॥
सर्व्वतीर्थसमः कूपस्तदा स्ते निर्म्मलः शुचिः ।
तदा भोगवती तत्र प्रत्यक्षं भवति द्विजाः ॥
तस्मात् ज्यैष्ठ्यां समुद्धृत्य होमाद्यैः कलसैर्व्वृतैः ।
स्नापयन्ति तदा कृष्णं सततं तं हलायुधम् ।
जन्माहनि हरेः स्नानमुत्सवं परमाद्भुतम् ।
उत्सवो वै न हीयेत तस्मात्तद्यत्नतश्चरेत् ॥
जन्मनो चयकारित्वाज्जन्मयात्रा प्रतिष्ठिता ।
ज्यैष्ठस्नानं भगवतो ये पश्यन्ति मुदान्विताः ॥
न ते भवाब्धौ मज्जन्ति यात्रायां यतमानसाः ।
ज्यैष्ठे च स्नपनं कुर्य्यात् श्रीविष्णोर्जन्मवासरे ॥
दैनन्दिनन्तु दुरितं पक्षमासर्त्तुवर्षजम् ।
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ।
स्वर्णस्तेयसुरापानगुरुतल्पयुतानि च ।
कोटिकोटिसहस्राणि क्षुद्रपापानि यानि च ॥
सर्व्वाण्येव प्रणश्यन्ति पौर्णमास्यान्तु वासरे ।
पुष्पवस्त्रमन्त्रैश्च पावमान्या तथैव च ॥
नारिकेलोदकेनाथ तथा तालफलाम्बुना ।
पञ्चामृतैः शीततोयैर्दूर्व्वाकर्पूरवासितैः ॥
यवोदकेन शुद्धेन तथा पुष्पोदकेन च ।
स्नापयित्वा जगन्नाथं पूजयेत् परमेश्वरम् ॥
ॐ घं घण्टायै नमः इति घण्टावाद्यं निवेदयेत् ।
य एवं कुरुते विद्वान् ब्राह्मणः क्षत्रियः शुचिः ।
सर्व्वपापैः प्रमुच्येत विष्णुलोकं स गच्छति ।
चतुर्द्दश्यां दृढ़ं मञ्चं कारयित्वा सुशोभनम् ॥
सुगन्धिधूपसुरभिं चन्दनाम्भःसमुक्षितम् ।
एवं मञ्चं प्रतिष्ठाप्य कलसानधिवासयेत् ॥
सुवासितं जलपूर्णं पावकं कलसं न्यसेत् ।
जयशब्देश्च स्तुतिभिर्नीयते जगदीश्वरः ॥
जयस्व राम कृष्णेति जयभद्रेति चोदिते ।
नीयते मञ्चदेशन्तु निशीथे ब्राह्मणादिभिः ॥"
अथ रथयात्रा । स्कन्दपुराणे ।
"गुण्डिकाख्यां महायात्रां प्रकुर्व्वीथाः क्षितीश्वर ! ।
आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता ॥
तस्यां रथे समारोप्य रामं मां भद्रया सह ।
यात्रोत्सवं प्रवर्त्त्याथ प्रीणयेच्च द्विजान् बहून् ॥
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम ।
सप्ताहं सरितस्तीरे मम यात्रा भविष्यति ॥
अष्टमे दिवसे सर्व्वान् रथान् माल्यैर्व्विभूषयेत् ।
नवम्यामानयेद्देवांस्तेषु प्रीतः सन्दहिदान् ॥
दक्षिणाभिमुखी यात्रा विष्णोरेषा सुदुर्लभा ।
यथा पूर्व्वा तथा चेयं ते द्वे मुक्तिप्रदायिके ॥
अष्टाहे विरचेच्छक्रं तदर्द्धेन तु पार्व्वतीम् ॥"
इतिवत् तिथिना एकाहो बोद्धव्यः ।
"तिथिनैकेन दिवसश्चान्द्रमानेन कीर्त्तितः ॥"
इति विष्णुधर्म्मोत्तरात् ।
यत्तु ।
"आषाढ़स्य सिते पक्षे भद्रा या पुष्यसंयुता ।
यात्रोत्सवं प्रकुर्व्वीयात्तदभावे पुष्य एव हि ॥"
इति ईश्वरसंहितायां वचनान्तरम् ।
तद्वैकल्पिकप्रयोगान्तरविधायकम् । पाद्मे ।
"आषाढ़स्य द्वितीयायां रथं कुर्य्याद्विशेषतः ।
आषाढ़शुक्लैकादश्यां जपहोममहोत्सवम् ॥
नातः परं हि कृत्यस्य यात्रान्तरमपेक्षते ।
अत्र स्वयं त्रिलोकेशः स्पन्दनेन कुतूहलात् ।
नाशयन् सर्व्वपापानि वर्षे वर्षे व्रजेदसौ ।
रथस्थितं व्रजन्तं तं महावेदीमहोत्सवे ।
ये पश्यन्ति मुदा भक्त्या वासस्तेषां हरेः पदे ।
सत्यं सत्यं पुनः सत्यं प्रतिज्ञातं द्विजोत्तमाः ॥
नातः श्रेयःपदो विष्णोरुत्सवः शास्त्रसम्मतः ।
रथयात्रैव यात्राणां मुख्येत्याह प्रजापतिः ॥
महावेदीं व्रजन्तं तं रथस्थं पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च दृष्ट्वा मुक्तिर्न चान्यथा ॥
आषाढ़स्य सिते पक्षे दिने विष्णोः शुभप्रदे ।
प्रतिष्ठाप्य सन्दृष्टेन विधिना पूर्व्ववद्द्विजाः ॥
रथं नरो हरेः कुर्य्यात् स्वासनं सुपरिष्कृतम् ।
भूषयेद्विविधैर्भक्त्या वस्त्रालङ्कारमाल्यकैः ॥
मृदङ्गपणवाद्यैश्च भेरीढक्कादयस्तथा ।
नटनर्त्तकमुख्याश्च गायना बहवस्तथा ॥
वेश्या यौवनदर्पाढ्या रूपालङ्कारभूषिताः ।
ध्वजाश्च बहवस्तत्र पताकाधिष्ठिताम्बराः ॥
गरुडञ्च ध्वजं कुर्य्यात् रक्तचन्दनमिश्रितम् ।
दीर्घनासं पीतदेहं कुण्डलाभ्यां विभूषितम् ॥
चञ्चुदष्टभुजगं सर्व्वालङ्कारभूषितम् ।
देव्याः पद्मध्वजं कुर्य्यात् पद्मकाष्ठविनिर्म्मितम् ।
सप्तच्छदमयं कुर्य्याच्छीरिणो लाङ्गलध्वजम् ।
सारथिं वाजिनश्चैव बलं बलसुदान्वितम् ॥
हीरकैर्म्मङ्गलैर्दामैर्व्विविधैः सुशोभनम् ।
इत्थं सुघटितं तत्तु रथं देवत्रयस्य च ॥
अरुणोदयवेलायां देवं तस्मात् प्रपूजयेत् ।
ब्राह्मणैर्व्वैष्णवैः सार्द्धं यतिभिश्च तपस्विभिः ॥
विज्ञापयेद्देवदेवं यात्रायै स कृताञ्जलिः ।
ततः कर्पूरपर्णैश्च सुमनोभिरवाकिरत् ॥
पथि शोभनसूक्तानि प्रपठन्ति द्विजातयः ।
केचिन्मङ्गलगाथाश्च केचिज्जय जयेति च ॥
जितन्त इति मन्त्रं वै केचित् पुण्यं जपन्ति च ।
सूतमागधमुख्याश्च कीर्त्तिं कार्ष्णीं मुदा जगुः ॥
चर्च्चरीझर्झरीवेणुवीणामाधुरिकादयः ।
शब्दायन्ते सुमधुरं गोविन्दविजयान्तरे ॥
एवं प्रवृत्ते समये कृष्णं रामपुरःसरम् ।
नयन्ति विप्रा भद्राश्च क्षत्रियाश्च विशस्तथा ॥
करे धृत्वा जगन्नाथं भ्रामयित्वा रथत्रयम् ।
रामं भद्राञ्च कृष्णञ्च रथमध्ये निवेशयेत् ॥
पूजयेदुपचारैस्तैः श्रद्धाभक्तिसुसंयतः ।
रथच्छायां समाक्रम्य ब्रह्महत्यां व्यपोहति ॥
तद्देशसंसक्ततनुस्त्यजेद्वै पापसंहतिम् ।
चक्रानुद्विसिक्तेन स्वर्गङ्गास्नानजं फलम् ॥
ये प्रणामं प्रकुर्व्वन्ति तेऽपि मोक्षमवाप्नुयुः ।
अनुगच्छन्ति ये कृष्णं ते देवतुल्यविग्रहाः ॥
वेदैः स्तुवन्ति वेदानां वक्तारो मोक्षभागिनः ।
इतिहासपुराणाद्यैः स्तोत्रैश्चापि सुसंस्कृतैः ॥
स्तुवन्ति पुण्डरीकाक्षं ये वै विगतकल्मषाः ।
ते वै जयन्ति पापानि जयशब्दैः स्तुवन्ति ये ॥
नर्त्तनं कुरुते वापि गायन्त्यथ नरोत्तमाः ।
वैष्णवोत्तमसंसर्गान्मुक्तिं प्राप्नोत्यसंशयम् ॥
नामानि कीर्त्तयिष्यन्ति न ते यान्ति यमालयम् ।
जयस्व रामकृष्णेति जयभद्रेति यो वदेत् ।
न मातृगर्भे वासोऽस्य स च देवत्वमाप्नुयात् ॥
चामरैर्व्यजनैः पुष्पैः स्तवकैश्चीनचेलकैः ।
रथस्याग्रे स्थितो यो वै वीजयेत् पुरुषोत्तमम् ॥
संवीज्यमानोऽप्सरोभिर्देवगन्धर्व्वयोजितान् ।
भुङ्क्ते तु भोगानखिलान् यावदाभूतसंप्लवम् ॥

नातः परतरो लोके महावेदीमहोत्सवात् ।
सर्व्वपापहरो योगः सर्व्वतीर्थफलप्रदः ॥
कृष्णमुद्दिश्य ये तत्र दानं ददति वै नराः ।
यत्किञ्चिदक्षयफलं मेरुदानेन संमितम् ॥
गुण्डिकामण्डपे यान्तं भद्राकृष्णं सहाग्रजम् ।
तत्रातपश्रान्तगात्रं दर्पणेष्वभिषेचयेत् ॥
पश्चात्तैः शीततोयैः पुष्पकर्पूरवासितैः ।
नारिकेलजलेनाथ तथा तालफलाम्बुना ॥
रसोदकेन शुद्धेन तथा पुष्पोदकेन च ।
सर्व्वाङ्गमनुलिप्यैव चन्दनेन्दुमदद्रवैः ॥
सुगन्धिमाल्याभरणैश्चीनचेलैः सुशोभनैः ।
चामरैश्च जलाभैश्च शीतलैर्व्यजनैस्तथा ॥
वीजयेत् पुण्डरीकाक्षं सुभद्रां बलमेव च ।
सिताभिः पानकैर्दुग्धैस्तथा खण्डविकारकैः ।
खर्ज्जुरैर्नारिकेलैश्च नागरम्भाफलादिभिः ।
तथा क्षीरविकारैश्च पनसैरिक्षुभिस्तथा ॥
वासितैः शीततोयैश्च गन्धताम्बूलपत्रकैः ।
सकर्पूरलवङ्गाद्यैः पूजयेत् परमेश्वरम् ॥
रथत्रयस्थितं देवत्रयं ये पुरुषर्षभाः ।
प्रदक्षिणं प्रकुर्व्वन्ति त्रिचतुःसप्त एव च ॥
ततोऽपराह्णे देवेशं दक्षिणानिलवीजितम् ।
शनैः शनैर्नयेद्विष्णुं मण्डपस्य च मध्यमे ॥
एवं व्रजति देवेशे सर्व्वपापं गतोऽभवत् ।
दीपकानां सहस्राणि ज्वालितानि नरैस्ततः ॥
मण्डपे वासयेद्देवान् गुण्डिकाख्ये मनोहरे ।
चारुचन्द्रातपे चारुमाल्यचामरभूषिते ॥
पूजयित्वा जगन्नाथं तोषयेत् गीतनृत्यकैः ।
उपहारादिभिस्तत्र सप्ताहानि जनार्द्दनम् ॥
सप्ताहं ये प्रपश्यन्ति गुण्डिकामण्डपे स्थितम् ।
मां च रामं सुभद्रां च विष्णुसायुज्यमाप्नुयात् ॥
दिवा तद्दर्शनं पुण्यं रात्रौ दशगुणं भवेत् ।
यत्किञ्चित् कुरुते कर्म्म कोटिकोटिगुणं भवेत् ॥
सर्व्वं मेरुसमं दानं सर्व्वे व्याससमा द्विजाः ।
महावेद्यां गते कृष्णे योगोऽयं खलु दुर्लभः ॥
अर्द्धोदयादयो योगाः स्कन्देन परिभाषिताः ।
महावेद्याख्ययोगस्य कलां नार्हन्ति षोड़शीम् ॥
अष्टाहे च पुनः कृत्वा दक्षिणाभिमुखान् रथान् ।
दक्षिणाभिमुखी यात्रा विष्णोरेषा प्रकीर्त्तिता ॥
कार्य्या प्रयत्नतः सा हि भुक्तिमुक्तिप्रदा भवेत् ।
दक्षिणाभिमुखं यान्तं कृष्णं पश्यन्ति ये नराः ॥
न तेषां पुनरावृत्तिः सत्यमेतन्न संशयः ।
पुराविदो वदन्त्येतां यात्रां नवदिनात्मिकाम् ॥
तस्याः संकीर्त्तनादेव निर्म्मलो जायते नरः ।
तावतीयं महायात्रा यो यथा कर्त्तुमिच्छति ॥
सोऽपि विष्णुप्रभावेन वैकुण्ठभवनं व्रजेत् ।
उद्धृत्य सप्तपुरुषान् पापावलिसमन्वितान् ॥"४॥
अथ शयनयात्रा । स्कान्दे ।
"आषाढ़े शुक्लद्वादश्यां कुर्य्यात् स्नापमहोत्सवम् ।
मण्डपे रचयेत्तत्र शयनागारमुत्तमम् ॥
देवस्य पुरतः शय्यां रत्नादिनिर्म्मितोपरि ।
आस्तीर्य्य मृदुचेलादि मृदुचीनोत्तरच्छदाम् ॥
कर्पूरधूलिविक्षिप्तां साधुचन्द्रातपां शुभाम् ।
पुष्पगन्धयुतां मुक्तारञ्जितां चन्दनाङ्किताम् ॥
साधुहारां शुभां स्निग्धां नानाचित्रोपशोभिताम् ।
एवं स्नापगृहं कृत्वा निशीथे स्नापयेद्विभुम् ॥
संपूज्य भावयेदैक्यं तेषां कृष्णादिभिः सह ।
एह्येहीति च संप्रार्थ्य स्नापार्थं परमेश्वरम् ॥
नयेच्छय्यागृहद्वारं वासयेत् घटिकात्रयम् ।
पश्चात्तैः स्नापयेत्तान् पृथक्पलशताधिकैः ॥
सुगन्धिचन्दनैर्लिप्तान् वस्त्रालङ्करणादिभिः ।
पूजयित्वा यथान्यायं प्राञ्जलिर्मन्त्रमुच्चरेत् ॥"
जगद्वन्द्य इत्यादि ।
"सुदृढ़ं कारयेद्द्वारं विष्णोः शयनवेश्मनः ।
स्नापयित्वा जगन्नाथं लभते सुखमुत्तमम् ॥"५॥
अथ पार्श्वपरिवर्त्तनयात्रा ।
"अथ ते संप्रवक्ष्यामि पार्श्वस्य परिवर्त्तनम् ।
नभस्यविमले पक्षे संप्राप्ते हरिवासरे ॥
विष्णोः स्नापगृहद्वारं शनैर्गत्वा प्रविश्य च ।
नमस्कृत्य जगन्नाथं पर्य्यङ्कशयितं मुदा ॥
अवधाय शनैर्द्वारं पूजयेदुपचारकैः ।
प्रणम्य भक्त्या तत्पादौ स्नापयेदुत्तरामुखम् ॥"
मन्त्रश्चेमं पठेत् ।
"ॐ देवदेव ! जगन्नाथ ! कल्याणं परिकल्पय ।
परिवृत्तमिदं सर्व्वं यथा स्थावरजङ्गमम् ॥
यत् दृष्ट्वा चेष्टितैरेव जाग्रत्स्वप्नसुषुप्तिभिः ।
जगद्धिताय सुप्तोऽसि पार्श्वेन परिवर्त्तय ॥
परिवर्त्तनकालोऽयं जगतः पालनाय वै ।
त्वद्ध्वजोऽयं शक्रोऽपि ध्वजे तिष्ठतु ससुतः ।
इदं त्वत्पादकमलं विमुञ्च मूर्द्ध्नि तज्जलम् ।
महीं जलं श्रावयति प्रजापालनहेतुकम् ॥
इति संप्रार्थ्य देवेशं विनयात्तोषयेत्ततः ।
व्यजनैश्चामरैश्चैव वीजयेत् परमेश्वरम् ॥
सुगन्धिचन्दनैरस्य सर्व्वाङ्गं परिलेपयेत् ।
स्वादूनि भक्ष्यद्रव्याणि पायसादीनि दापयेत् ॥
शय्यागृहद्वारि विभोः शनैर्भक्त्या निवेदयेत् ।
देवमुद्दिश्य यत् कुर्य्यात् सर्व्वमक्षयतां व्रजेत् ॥
पार्श्वे च जन्मदिवसे उपवासपरो भवेत् ॥"
एवं आश्विनशुक्लैकादश्यां पूर्व्वोक्तविधानेन श्रीकृष्णस्य वामपार्श्वपरिवर्त्तनं कार्य्यम् ।
मतान्तरे ।
"शुभे चैवाश्विने मासि महामायां प्रपूजयेत् ।
सौवर्णीं राजतीं मार्त्तीं विष्णुमायां महेश्वरीम् ।
हिंसा चैव न कर्त्तव्या कदाचिद्विष्णुपूजकैः ॥"६॥
अथोत्थानयात्रा ।
"एकादश्यान्तु कार्त्तिक्यां शुक्लायां पृथिवीपते ।
कृष्णमुत्थापयेद्भक्त्या पूजयित्वा जगद्गुरुम् ।
पूर्व्ववत् पूजयित्वा तु प्रातर्मन्त्रं समुच्चरेत् ॥"
मन्त्रस्तु ।
"ॐ उत्तिष्ठ देवदेवेश ! तेजोराशे जगत्पते ! ।
वीक्ष्यैतत् सकलं देव ! प्रसुप्तं तव मायया ॥
प्रफुल्लपुण्डरीकाक्ष ! श्रीहरे ! शयनेन वै ।
त्वया दृष्टं जगदिदं परमं सुखमेष्यति ॥
ये ते स्मार्त्ताः क्रियाः सर्व्वाः प्रवर्त्तन्ते ततो ध्रुवम् ।
इत्युत्थाप्य जगन्नाथं वेणुवीणादिनिःस्वनैः ॥
जयशब्दैस्तथा देवं नयेयुर्नृत्यमण्डपम् ।
तैलेनाभ्यज्य तोयेन स्नापयेत पुरुषोत्तमम् ।
पश्चात्तैर्नारिकेलरसैः फलरसैस्तथा ॥
सुगन्धामलकेनाथ यवकल्केन लेपयेत् ।
घर्षयेत्तुलसीचूर्णैर्लेपयेद्गन्धचन्दनैः ॥
पुष्पवासिततोयैश्च कुशरसोदकैस्तथा ।
स्नापयित्वा क्षयेत् पापं बहुजन्मोपपादितम् ॥
महोपचारैः संपूज्य विष्णुं नीराजयेत्ततः ।
कृताञ्जलिपुटो भूत्वा प्रार्थयेत् परया मुदा ॥"७॥
अथ प्रावरणयात्रा ।
"मार्गशीर्षे सिते पक्षे कुर्य्यात् प्रावरणोत्सवम् ।
कृत्वा दृष्ट्वा नरो भक्त्या वैष्णवं लोकमाप्नुयात् ॥
वासोऽधिवासं कुर्व्वीत पञ्चम्यां निशि कर्म्मवित् ।
प्रभाते मण्डलं कुर्य्यात् पद्ममष्टदलान्वितम् ॥
दिक्पालान् पूजयेद्दिक्षु क्षेत्रपालं गणाधिपम् ।
चण्डप्रचण्डौ च बहिश्चतुर्द्दिक्षु प्रपूजयेत् ॥
तन्मध्ये स्थापयेद्युग्मं क्षालयेदुष्णवारिणा ।
पूजयित्वा जगन्नाथं गन्धतैलेन दीपकम् ॥
दत्त्वा कृष्णाय भक्त्या तु गीतवाद्यैर्नयेन्निशाम् ।
प्रातः प्रपूजयेद्देवं नानाद्रव्यैः सुशोभनैः ॥
सप्तभिः सप्तभिर्द्देवान् वासोभिः परिवेष्टयेत् ।
सुवर्णैश्च सर्व्वाङ्गे शीतप्रावरणैर्द्विजाः ॥
दूर्व्वाक्षतैः प्रपूज्याथ कुर्य्यान्नीराजनां विभोः ।
भगवन्तं समुद्दिश्य ब्राह्मणेभ्यः प्रदापयेत् ॥
गुरुभ्यश्चान्यदेवेभ्यो दीनानाथेभ्य एव च ।
शीतप्रावरणं दद्यात् सत्वत् परमया मुदा ॥
ददाति भगवान् प्रीतस्तस्मै वरमनुत्तमम् ॥"८॥
अथ पुष्यस्नानयात्रा ।
"पुष्यस्नानोत्सवं वक्ष्ये यथोक्तं ब्रह्मणा पुरा ।
पुष्यर्क्षेण च संयुक्ता पौर्णमासी यदा भवेत् ।
पौषे मासि तु तत् कुर्य्यात् पुष्यस्नानोत्सवं हरेः ॥
चतुर्द्दशीनिशायान्तु कुम्भानामधिवासनम् ।
रात्रौ जागरणं कृत्वा प्रातर्वह्निं प्रकीरयेत् ॥
ब्रह्मविष्णुशिवेभ्यश्च प्रत्येकं समिधं क्रमात् ।
जुहुयात् पूजयित्वा तु तदन्ते पुरुषोत्तमम् ।
पूजयेदुपचारैस्तु आदर्शे प्रतिबिम्बितम् ।
ततः पुरुषसूक्तेन कुम्भांस्तानभिमन्त्रयेत् ।
क्रमात् देवस्य शिरसि स्नापयेद्विधिवत्ततः ॥"
उक्तमुत्तरम् ।
"ततः पञ्चामृतेनैव वासुदेवञ्च क्षालयेत् ।
तन्मन्त्रयुक्तं पुनर्विप्र उपचारैः प्रपूजयेत् ।
दूर्व्वाङ्कुराद्यैः स्तुतिभिर्वाद्यैः संपूज्य केशवम् ।
समन्ताद्विकिरेदेवं कर्पूराद्यैः सुतण्डुलान् ॥
नीराजयेज्जगन्नाथं कर्पूरयुतवर्त्तिभिः ।
ततः प्रदक्षिणं कृत्वा दण्डवत् प्रणमेत् क्षितौ ॥
पुष्यस्नानोत्सवं पुण्यं ये पश्यन्ति मुदान्विताः ।
सर्व्वसम्पन्नकामास्ते व्रजेयुर्व्वैष्णवं पदम् ॥"९॥
अथ नवान्नयात्रा ।
"कुर्य्यादयनसंक्रान्त्यां नवान्नमहोत्सवम् ।
संक्रान्तेः पूर्व्वदिवसे नवं शालिं सुकुट्टिमम् ।
प्रासादपूर्व्वदेशे तु स्थापयित्वाधिवासयेत् ॥"

तथा च पाद्मे।
“संक्रान्त्यां माघमासस्य साधिवासिततण्डुलान्।
निवेद्य विष्णवे भक्त्या इमं मन्त्रमुदीरयेत्॥
त्वयि तुष्टे जगत् सर्व्वमन्नेन प्रभविष्यति।
इच्छ सर्व्वं जगन्नाथ! गृह्यतां पिष्टकं शुभम्॥
ब्राह्मणान् भोजयेत् भक्त्या देवदेवपुरःस्थितान्॥”
अभ्यर्च्य भगवद्भक्तानित्यादि॥
“नवेन वाससावेष्ट्य दूर्व्वासर्षपगुच्छकैः।
पूजयित्वाभिमन्त्र्येण ततस्तामभिरक्षतु॥
पुनः प्रभाते देवेशं प्रलिपेद्गन्धचन्दनैः।
वस्त्रालङ्कारमाल्यैश्च पूजयित्वा यथाविधि॥
नीराजयित्वा देवेशं तण्डुलानधिवासितान्।
स्थालीषु पाकपात्रेषु मधुखण्डाज्यमिश्रितान्॥
पङ्क्तिशः स्थापयेदग्रे गन्धपुष्पाक्षतान्वितान्।
सपूपं पायसं कृत्वा दद्यादै चक्रपाणये।
दशवर्णकपिष्टञ्च विष्णोः प्रियतरं परम्॥
ॐ जीवनं सर्व्वभूतानां जनकस्त्वं जगद्गुरो!।
तन्मयाः शालिनो ह्येते त्वयैव जनिताः प्रभो!॥
लोकानुग्रहणार्थाय गृहीत्वा चित्रविग्रहम्।
तव प्रीत्यै कृतानेतान् गृहाण परमेश्वर!॥
त्वयि तुष्टे जगत् सर्व्वमनेन प्रभविष्यति।
स्वाहाकारस्वधाकारवषट्कारा दिवौकसाम्॥
आप्यायना भविष्यन्ति तेनैवाप्यायितं जगत्।
इच्छ सर्व्वं जगन्नाथ! तन्मयं सचराचरम्॥
इति संप्रार्थ्य देवेशं शालींस्तान् विनिवेदयेत्॥”१०॥
अथ दोलयात्रा।
“फाल्गुने मासि कुर्व्वीत दोलारोहणमुत्तमम्।
यत्र क्रीड़ति गोविन्दो लोकानुग्रहणाय वै॥
प्रथमां देवदेवस्य गोविन्दाख्याणु कारयेत्।
मल्गूत्सवं प्रकुर्व्वीत पञ्चाहानि त्र्यहाणि वा॥
फाल्गुन्याः पूर्व्वतो विप्राश्चतुर्द्दश्यां निशामुखे।
वह्न्युत्सवं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः॥”
पाद्मे।
“पौर्णमास्यां समारभ्य पञ्चम्याञ्च समापयेत्॥”११॥
अथ मदनभञ्जिका यात्रा।
“वासन्तिकां समाख्यास्ये यात्रां मदनभञ्जिकाम्।
यस्यां कृतायां हृष्टायां प्रीणाति पुरुषोत्तमः॥
चैत्रशुक्लत्रयोदश्यामाहरेत्तु सन्दलकम्।
देवस्याग्रे विरचिते मण्डपे साधिवासिते॥”१२॥
इति यात्रातत्त्वम्॥
देव्याः षोड़शप्रकारोत्सवः। यथा,—
“वैशाखे मधयात्रा च चन्दनागुरुकल्पना।
ज्यैष्ठे महास्नानयात्रा अम्बुवाचीदिनत्रयम्॥
आषाढ़े रथयात्रा च दिग्दिनव्यापिनी परा।
श्रावणे जलयात्रा च वस्त्रभूषणचामरैः॥
भाद्रे यात्रा धूननाख्या चण्डिकाया दिनत्रयम्।
आश्विने च महापूजा यात्रा पशुबलिप्रिया॥
कार्त्तिके दीपयात्रा च नवान्नमग्रहायणे।
पौषे चाङ्गरागयात्रा वस्त्रालङ्कारभूषणैः॥
माघे मासि महादेवी रटन्ती च चतुर्द्दशी।
दोलाकेलिः फाल्गुने च चैत्रे यात्रा चतुष्टयी।
दूतीयात्रा रासयात्रा वासन्ती शीलयात्रिका।
एवं यात्रा मया प्रोक्ता षोड़शी भवमोचनी॥”
इति वामकेश्वरतन्त्रे ५४ पटलः॥
(रोगिदर्शनार्थं भिषजां यात्राविवरणम्। यथा,
“इदानीं निर्गमे पुत्त्र! प्रवेशे वा गृहस्य च।
शुभाशुभानि सर्व्वाणि वक्ष्यामि शकुनानि च॥
राजा गजो द्विजमयूरकखञ्जरीटा-
श्चाषः शकुन्तरजकः सितवस्त्रयुक्तः।
पुत्त्रान्विता च युवती गणिका च कन्या
श्रेयः सुखाय यशसां प्रतिदर्शयन्ति॥
नटाश्चाषो भासहारीतचक्री
भारद्वाजोच्छिक्करश्छागसंज्ञः।
एते श्रेष्ठा दक्षिणे वाथ सव्ये
वैद्यावेशो निर्गमे श्रेयसे च॥
सर्पोलूकौ वानरः शूकरश्च
गोधा ऋक्षः कृकलासः शशश्च।
एते दिष्टानिर्गमे वा प्रवेशे
कार्य्याघातो नोपकारेषु शस्ताः॥
मृगो वा पिङ्गलो वापि प्रशस्ता दक्षिणे सदा।
निर्गमे वा प्रवेशे च दक्षिणाः शुभदायकाः॥
एको वा त्रीणि वा पञ्च सप्त वा नवसंख्यया।
भाग्यकाले नराणान्तु मृगा यान्ति प्रदक्षिणाः॥
शिखिहयगजगोधाराशभो भृङ्गराजो
सुखरपिककपोतो पोतकी शूकरी वा।
तदनुविहगराजो मङ्गलाशंसिनः स्यु-
र्वदति शकुनवेत्ता वामतो निर्गमे वः॥
तित्तिरिः कुररः क्रौञ्चः सारसाभासशूकरः।
वामे तु शुभशंसी च निर्गमे कार्य्यसिद्धये॥
काको दक्षिणतः श्रेष्ठो निर्गमे शुभदायकः।
प्रवेशे गदितः श्रेष्ठो वामतः कृष्णवायसः॥
जालको हि शशकोऽपि कर्कटो-
कीर्त्तनञ्च गदितं न सुखाय।
न शुभदर्शना अमी भवेयुः
सर्पगोधाकृकलासविड़ालाः॥
दर्शनं हितकरं प्रवदन्ति
खञ्जरीटमरालच्छिक्कराणाम्।
वामतः शुभकराः प्रवदन्ति
दार्व्वाघाटवराटकशुकश्च॥
इति शुभाशुभशकुनानि॥”
इति हारीते द्वितीयस्थाने सप्तमेऽध्याये॥ *॥
तथा च।
“शवकाष्ठपलाशानां शुष्कानां पथि सङ्गमाः।
नेष्यन्ते पतितान्तस्थदीनान्धरिपवस्तथा॥
मृदुशीतोऽनुकूलश्च सुगन्धिश्चानिलः शुभः।
खरोष्णोऽनिष्टगन्धश्च प्रतिलोमश्च गर्हितः।
ग्रन्थ्यर्व्वुदादिषु सदा छेदशब्दश्च पूजितः।
विद्रध्युदरगुल्मेषु भेदशब्दस्तथैव च॥
रक्तपित्तातिसारेषु रुद्धशब्दः प्रशस्यते।
एवं व्याधिविशेषेण निमित्तमुपधारयेत्॥
तथैवाक्रुष्टहाकष्टमाक्रन्दरुदितस्वनाः।
छर्द्दीं वातपुरीषाणां शब्दो वै गर्द्दभोष्ट्रयोः॥
प्रतिषिद्धं तथा भग्नं क्षुतं स्खलितमाहतम्।
दौर्म्मनस्यञ्च वैद्यस्य यात्रायां न प्रशस्यते॥”
इति सुश्रुते सूत्रस्थाने २९ अध्यायः॥)

यादईशः, पुं, (यादसां जलानां जलजन्तूनां वा ईशः।) समुद्रः। इति हेमचन्द्रः। ४। १३९॥

यादः, [स्] क्ली, (यान्ति वेगेनेति। या + असुन्। बाहुलकात् दागमश्च।) जलजन्तुः। इत्यमरः। १।१०।२०॥ (यथा, भगवद्गीतायाम्।१०।२९।
“अनन्तश्चास्मि नागानां वरुणो यादसामहम्॥”
जलम्। इति निघण्टुः। १। १२॥)

यादःपतिः, पुं, (यादसां पतिः।) समुद्रः। इत्यमरः।१।१०।२०॥ वरुणः। इत्यजयपालः॥

यादवः, पुं, (यदोरपत्यम्। यदु + अण्।) श्रीकृष्णः। इति शब्दरत्नावली॥ (यथा, भगवद्गीतायाम्। ११। ४१।
“सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण! हे यादव! हे सखेति।
अजानता महिमानं तवेदं
मया प्रमादात् प्रणयेन वापि॥”)
ययातेर्ज्येष्ठपुत्त्रो यदुस्तस्य वंशः। यथा,—
“ययातेर्ज्येष्ठपुत्त्रस्य यदोर्वंशं नरर्षभ!।”
इत्युपक्रम्य।
“माधवा वृष्णयो राजन् यादवाश्चेतिसंज्ञितम्॥”
इति श्रीभागवते ९ स्कन्धे २३ अध्यायः॥
(यदुसम्बन्धिनि, त्रि। यथा, भागवते। ११।१।३।
“मन्येऽवनेर्नंनु गतोऽप्यगतं हि भारं
यद्यादवं कुलमहो अविसह्यमास्ते॥”)

यादवी, स्त्री, (यदोरियमिति। यदु + अण्। ङीप्।) दुर्गा। इति त्रिकाण्डशेषः॥ (यदुवंशीयस्त्रीसामान्ये। यथा, महाभारते। १। ९५। १३।
“प्राचीन्वान् खल्वश्मकीमुपयेमे यादवीं तस्यामस्य जज्ञे संयातिः॥”)

यादसांनाथः, पुं, (यादसां जलजन्तूनां नाथः। षष्ठ्या अलुक्।) वरुणः। इति हलायुधः॥

यादसांपतिः, पुं, (यादसां जलजन्तूनां पतिः। षष्ठ्या अलुक्।) समुद्रः। इत्यमरः। १।१।६४॥ वरुणः। इति मेदिनी। ते, २४२॥ (यथा, देवीभागवते। ३। ९। ३५।
“अश्विनौ वसवस्त्वष्टा कुवेरो यादसांपतिः।”
क्वचित् विशेषणमपि। यथा, मार्कण्डेये।२२।११।
“यावदन्तर्जले देवं वरुणं यादसांपतिम्॥”)

यादृक्, [श्] त्रि, (य इव दृश्यते। दृश् + “त्यदादिषु दृशोऽनालोचने कञ्च।” ३।२।६०। इति चकारात् क्विन्। “आ सर्व्वनाम्नः।” ६।३।९१। इत्याकारादेशः।) य इव दृश्यते सः। इति मुग्धबोधव्याकरणम्॥ येमन इति भाषा। (यथा, भागवते। ४। २९। ६४।
“नानुभूतं क्वचानेन देहेनादृष्टमश्रुतम्।
कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि॥”)

यादृक्षः, त्रि, (य इव दृश्यते यमिव पश्यति वा। दृश् + “दृशेः क्सश्च वक्तव्यः।” ३।२।६०। इति

वार्त्तिकोक्तेः क्सः। "आसर्व्वनाम्नः।"६।३।९१। इत्यत्र "दृक्षे चेति वक्तव्यम्।" इत्यात्वम्।) य इव दृश्यते सः। इति मुग्धबोधव्याकरणम्॥ येमन इति भाषा॥

याहृशः, त्रि, (य इव दृश्यते। दृश्+"त्यदादिषु दृशः इति।"३।२।६०। इति कञ्। "आसर्व्वनाम्नः।" ६।३।९१। इत्याकारादेशः।) य इव दृश्यते सः। इति मुग्धबोधव्याकरणम्॥ येमन इति भाषा। (यथा, मनुः। ४। २५४।

"याहृशोऽस्य भवेदात्मा याहृशश्च चिकीर्षितम्।
यथा चोपचरेदेनं तथात्मानं निवेदयेत्॥"

स्त्रियां याहृशी॥)

यादोनाथः, पुं, (यादसां नाथः।) समुद्रः। इति राजनिर्घण्टः॥ (वरुणः। इति यादसांनाथशब्ददर्शनात्॥)

यादोनिवासः, पुं, (यादसां निवासः।) जलम्। इति हेमचन्द्रः। ४। १३५॥

यानं, क्ली, (या+ल्युट्। अर्द्धर्चादित्वात् पुंलिङ्गमपि।) राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषः। तत्तु उपचितशक्तेः कृतमूलराष्ट्ररक्षस्य शत्रोराक्रन्दनाय यात्रा। इति भरतः॥ (यथा, देवीभागवते। ५। ४। ११।

"यानमप्यधुना नैव कर्त्तव्यं सहसा पुनः॥"

यात्यनेनेति। या+ल्युट्।) हस्त्यश्वरथदोलादि। तत्पर्य्यायः। वाहनम् २ युग्यम् ३ पत्रम् ४ धोरणम् ५। इत्यमरः।२।८।५८॥ विमानम् ६ चक्रम् ७ यापनम् ८ गतिमित्रकम् ९। इति शब्दरत्नावली॥*॥ (यथा, मनुः। ३। ६४ ६५।

"शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः।
गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया॥
अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम्।
कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः॥")

अथ चतुष्पदयानोद्देशः।

"ये मत्तजात्यादिविभेदतोऽमी
मया निरुक्ता इह वाजिमुख्याः।
दिशानया सर्व्वचतुष्पदानां
भेदो विधेयो विदुषादरेण॥
तथा यथाश्वादिकपोषणेन
यानेन वा दोषगुणौ भवेताम्।
तथा तथैवान्यचतुष्पदानां
प्रकीर्त्तितौ दोषगुणौ बुधेन॥
वरमयानमपोषणमेव वा
वरमिवान्यशरीरमपोषणम्।
न खलु दोषयुतं च चतुष्पदं
स्पृशति पश्यति शोभनचेतनः॥
सुराविन्दुर्दूषयति पयोघटशतं यथा।
तथा सर्व्वं दूषयति दोषदुष्टश्चतुष्पदः॥"

इति चतुष्पदयानोद्देशः॥*॥

अथ द्विपदयानोद्देशः।

"मानुषैः पक्षिभिर्व्वापि तथान्यैर्द्विपदैरपि।
यानं स्याद्विपदं नाम तस्य भेदो ह्यनेकधा॥
सामान्यञ्च विशेषञ्च तस्य भेदो द्विधा भवेत्॥"

तत्र सामान्यं यथा,—

"यानं यद्विपदाभ्यां सत् तद्दोलादिकमुच्यते।
चतुर्भिर्युक्तिसंयुक्तैर्दण्डधातुगुणाम्बरैः।
दोलेति कथ्यते तेषां नियमोऽयं प्रदर्श्यते॥"

तत्र चक्रयः।

"उपेन्द्रमूलाद्विशिवाभिवर्ज्जं
शस्तेन्दुताराततिथियोगलग्ने।
हृद्दिष्टमायुष्ययमाहवर्ज्जं
दोलादिकारोहणमाद्यमिष्टम्॥
दण्डकाष्ठस्य नियमे नियमश्छत्रदण्डवत्।
कनकं रजतं ताम्रं लौहं धातुचतुष्टयम्॥
चतुर्विधानामुद्दिष्टं ब्रह्मादीनां यथाक्रमम्।
सुराणामसुराणाञ्च चातुर्व्वर्ण्यमुदाहृतम्॥
त्रिहस्तसम्मितो मध्ये तदर्द्धं पार्श्वयोर्द्वयोः।
विजया नाम दोलेयं विजयाय महीक्षिताम्॥
विजया मङ्गला क्रूरा शिवा क्षेमा शुभा क्रमात्।
वितस्त्यैकैकसंवृद्ध्या दोलाः षट् स्युः सुखप्रदाः॥
कुम्भश्च पद्मकोषश्च शङ्खः पर्व्वत एव च।
चतुर्विधानां दोलासु कल्याणाय चतुष्टयम्॥
हंसः केकी शुको भृङ्गश्चतुष्टयमिदं क्रमात्।
कुम्भाद्यग्रे निधातव्यं चतुर्विधमहीक्षिताम्॥
अत्रापि वर्णविन्यासो विज्ञेयो नवदण्डवत्॥"

भोजस्तु।

"गजः प्रस्थानदोलायां रणदोलासु केशरी।
मृगो भ्रमणदोलायां क्रीड़ादोलासु षट्पदः॥
भुजङ्गमः शत्रुराज्ये वृषभो दानकर्म्मणि।
दोलोपर्य्युपरि न्यस्तो बहुभिर्मुनिशासनम्॥
यदक्रदण्डं यानं स्यात् तत् पर्य्यङ्कमिति स्मृतम्।
त्रिहस्तसम्मितो यानस्तदर्द्धपरिणाहवान्।
पर्य्यङ्कः क्षेमनामायं भर्त्तुः सर्व्वार्थसाधकः॥
क्षेमो मृत्युर्जयो दुःखश्चत्वारस्ते यथाक्रमम्।
वितस्त्यैकैकसंवृद्ध्या यथा चाशुभं सङ्गिनः॥
मणिधातुगुणादीनां नियमः पूर्व्ववन्मतः।
विशेषमथ वक्ष्यामि पर्य्यङ्कस्य यथाक्रमम्॥
शुक्तिश्च गजदन्तश्च मृगाश्वङ्गस्तथैव च।
अनूपादिकजातानां पर्य्यङ्केषु न्यसेत् क्रमात्॥
पद्मशङ्खगजाश्वाजिहंसकोकशुकान् क्रमात्।
आदित्यादिदशाजानां मणिरूपेण विन्यसेत्॥
महीन्द्राणां विशेषेण सिंहमानेव शस्यते।
निर्म्माणे शुक्तिदण्डाश्च राज्यभोगसुखप्रदाः॥
तदेवावक्रदण्डन्तु खट्टायानमिति स्मृतम्।
अस्यापि पूर्व्ववन्मानमणिधात्वादिनिर्णयः॥
विशेषश्चरणोच्छ्रायः परिणाहार्द्धसम्मितः।
तदेव चेन्निश्चरणं पीठयानमिति स्मृतम्॥
तस्य भेदो द्विधा दण्डवक्रावक्रप्रभेदतः।
मानादिकं पूर्व्वतुल्यं विशेषाच्चतुरस्रता॥
एवमन्यानि मिश्राणि यानानि विविधानि च।
सामान्याख्यानि जानीयात् शिल्पिभिर्निर्म्मितानि वै॥
मनोहरत्वं लघुता दृढ़तेति गुणत्रयम्।
प्रोक्तं द्विपदयानानां सहजं भोजभूभुजा॥
इति सामान्यद्विपदयानकथनम्॥"

इति युक्तिकल्पतरुः॥*॥ विशेषद्विपदयानन्तु चतुर्दोलशब्दे निष्पदयानोद्देशस्तु नौकाशब्दे द्रष्टव्यम्॥ (फलप्राप्तिहेतौ, त्रि। यथा, ऋग्वेदे। १०। ११०। २।

"तनूनपात् पथ ऋतस्य यानान्
मध्वा समञ्जन् स्वदयासुजिह्व॥"

"यानान् फलप्राप्तिहेतून् पथो मार्गान्।" इति तद्भाष्ये सायणः॥ या+भावे ल्युट्। गतिः। यथा, वाभटे शारीरस्थाने षष्ठेऽध्याये।

"यानं खरोष्ट्रमार्ज्जारकपिशार्द्दूलशूकरैः।
यस्य प्रेतैः शृगालैर्वा स मृत्योर्वर्त्तते मुखे॥")

यानपात्रं, क्ली, (यानसाधनं पात्रम्। शाकपार्थिववत् समासः।) निष्पदयानविशेषः। जाहाज इति भाषा॥ तत्पर्य्यायः। वहित्रकम् २ बोहित्थम् ३ वहनम् ४ पोतः ५। इति हेमचन्द्रः। ३। ५३९॥ समुद्रयानम् ६। इति वराहपुराणम्॥ (यथा, हरिवंशे।१४५।६३।

"समुच्छ्रितैः सितैः पोतैः यानपात्रैस्तथैव च।
नौभिश्च भिल्लिकाभिश्च शुशुभे वरुणालयः॥")

यानमुखं, क्ली, (यानस्य मुखम् पुरोभागः।) रथादेः पुरोभागः। तत्पर्य्यायः। धूः २। इत्यमरः। २। ८। ५५॥

यापनं, क्ली, (या+णिच्+ल्युट्।) वर्त्तनम्। कालक्षेपणम्॥ (यथा, कामन्दकीये।१७।३१।

"पूर्व्वसेनापतिर्नीचः कालयापनमाश्रितः॥")

निरसनम्। इति मेदिनी। ने, ११२॥ (यापयतीति। या+णिच्+ल्युः। प्रापके, त्रि। यथा, भागवते। ३। २२। ३३।

"अयातयामास्तस्यासन् यामाः स्वान्तरयापनाः॥")

याप्ता, स्त्री, जटा। इति भूरिप्रयोगः॥

याप्यः, त्रि, (यापि+यत्।) अधमः। निन्दितः। इत्यमरः।३।१।५४॥ (यथा, बृहत्संहितायाम्। १९। २२।

"यदशुभमशुभेऽब्दे मासजं तस्य वृद्धिः
शुभफलमपि चैवं याप्यमन्योऽन्यतायाम्॥")

यापनीयः। (यथा, सुश्रुते निदानस्थाने प्रथमे अध्याये।

"शोणितं तदसाध्यं स्यात् याप्यं संवत्सरोत्थितम्॥")

क्षेपणीयकालादिः। इति मेदिनी। ये, ४८॥ व्याधिविशेषः। यथा,—

"साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः।
सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते॥
याप्यलक्षणमाह।
यापनीयन्तु तं विद्यात् क्रिया धारयते हिताम्।
क्रियायान्तु निवृत्तायां सद्यो यश्च विनश्यति॥
प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम्।
प्रपतिष्यदिवागारं स्तम्भो यत्नेन योजितः॥
साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम्॥

अक्रियावतां चिकित्सारहितानाम् ।” इति भावप्रकाशः ॥

याप्ययानं, क्ली, (याप्यं अधमं यानम् ।) शिविका । इत्यमरः । २ । ८ । ५३ ॥

याभः, पुं, (यभ्यते इति । यभ + घञ् ।) मैथुनम् । यथा । इयाभयोर्याभेऽर्थे घञ् । इति त्रिधुपादे वोपदेवः । ८४६ ॥ (यथा, भागवते । ६ । १६ । ६ ।
“पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् ।
स एकोऽजद्धस्तासां वह्नीनां रतिवर्द्धकः ।
रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥”)

यामः, पुं, (याति यायते वा । या + “अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् ।” उणा० १।१४० । इति मन् । यम् + घञ् वा ।) दिवारात्र्योश्चतुर्थभागैकभागः । तत्पर्य्यायः । प्रहरः २ । इत्यमरः । १।४।६ ॥ (यथा, मनौ । ७ । १४५ ।
“उत्थाय पश्चिमे यामे कृतशौचः समाहितः ।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां
सभाम् ॥”)
संयमः । इति मेदिनी । मे, २४ ॥ (गमनम् । यथा, ऋग्वेदे । १ । ४८ । ४ ।
“उषो ये ते प्र यामेषु युञ्जते ।”
“यामेषु गमनेषु ।”इति तद्भाष्ये सायणः ॥ गमनसाधनः । यथा, ऋग्वेदे । ४ । ५१ । ४ ।
“कुवित्स देवीः सनयो नवो वा
यामो बभूयादुषसो वो अद्य ॥”
“यामो गमनसाधनः स रथः ।”इति सायणः ॥ देवगणभेदः । यथा, मार्कण्डेयपुराणे ।१५।१८।
“यज्ञस्य दक्षिणायान्तु पुत्त्रा द्वादश जज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे ॥”)

यामघोषः, पुं, (यामे प्रतियामे घोषः रवोऽस्य । प्रतिप्रहरं रवकरणादेवास्य तथात्वम् ।) कुक्कुटः । इति शब्दमाला ॥

यामघोषा, स्त्री, (यामे यामे घोषोऽस्याः । यामान् प्रहरान् घोषति शब्दायते इति वा । घुष + अच् । टाप् ।) यन्त्रविशेषः । घड़ी इति भाषा । तत्पर्य्यायः । नाडी २ घटी ३ यामनाली ४ घनेरुका ५ इकटका ६ । इति त्रिकाण्डशेषः ॥

यामनाली,, स्त्री, (यामस्य नालीव ।) यामघोषा । इति त्रिकाण्डशेषः ॥

यामनेमिः, पुं, इन्द्रः । इति त्रिकाण्डशेषः ॥

यामलं, क्ली, युगलम् । इति हेमचन्द्रः । ६ । ६० ॥ तन्त्रशास्त्रविशेषः । तस्य लक्षणं यथा,—
“सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम् ।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च ।
युगधर्म्मश्च संख्यातो यामलस्याष्टलक्षणम् ॥”
तत्तु षड्विधम् । आदियामलम् १ ब्रह्मयामलम् २ विष्णुयामलम् ३ रुद्रयामलम् ४ गणेशयामलम् ५ आदित्ययामलम् ६ । इति वाराहीतन्त्रम् ॥ एषां श्लोकसंख्या तन्त्रशब्दे द्रष्टव्या ॥

यामवती, स्त्री (यामः प्रहरः अस्त्यस्यामिति । याम + मतुप् । मस्य व ङीप् ।) रात्रिः । इति राजनिर्घण्टः ॥

यामाता, [ऋ] पुं, (जामाता पृषोदरादित्वात् । जस्य यः ।) जामाता । दुहितुः पतिः । इत्यमरटीका शब्दरत्नावली च ॥ यामातुर्विष्णुतुल्यत्वं तस्य गृहे कन्यादातुर्दौहित्रजननात् प्राक् भोजननिषेधश्च यथा, कामधेनावादित्यपुराणम् ।
“विष्णुं यामातरं मन्ये तस्य मन्युं न कारयेत् ।
अप्रजायान्तु कन्यायां नाश्नीयात्तस्य वै गृहे ॥”
इत्युद्वाहतत्त्वम् ॥

यामार्द्धं, क्ली, (यामस्यार्द्धम् ।) प्रहरस्यार्द्धम् । तस्याधिपा यथा,—
“वारेशाद्दर्द्धयामेषु रात्रावह्नः पञ्च षट्क्रमात् ।
अधिपाः सुग्रहास्तत्र यथार्काद्दे भवन्ति हि ॥
रवौ श्येन्दुभृगुश्चाजशनिशरवयो निशि ।
रविशुक्रशराज्जीवशनीज्यकुजभास्कराः ॥
दिने तुल्याः परेष्वेवं तत्राध्यायश्चतुर्ग्रहाः ।
पापदण्डे भवेद्विघ्नः शुभदण्डे शुभं भवेत् ॥
शुभग्रहस्य दण्डे तु कर्म्मारम्भाच्छुभं भवेत् ।
आरम्भात् पापदण्डे तु कर्म्म निष्फलतां व्रजेत् ॥
यस्यार्द्धयामस्तस्यैव प्राग्दण्डः समुदाहृतः ।
षट् षट् परीक्ष्य दण्डाश्च त्रयो रात्रौ मतास्तथा ॥
यामार्द्धाधिपसंख्यातो द्वितीयस्तु तदर्द्धतः ।
तदर्द्धात्तु तृतीयः स्यात्तदर्द्धात्तु तुरीयकः ॥
अह्नाभावे तु राहुः स्यात्तदङ्को वसुसंज्ञकः ।
भयाहस्य परित्यागाद्दिवादण्डाधिपा यथा ॥”
इति ज्योतिषतत्त्वम् ॥

यामिः, स्त्री, (याति कुलात् कुलान्तरमिति । या + बाहुलकात् मिः ।) स्वसा । कुलस्त्री । इत्यमरः । २ । ६ । १४२ ॥ “स्वसा भगिनी । कुलस्त्री कुलवधूः । प्रहरे संयमे यामो यामिः स्वसृकुलस्त्रियोरित्यन्तःस्थादौ रभसः ॥ जिह्मस्तु कुटिले निन्द्ये जामिः स्वसृकुलस्त्रियोरिति चवर्गतृतीयादावजयः इति भरतसुकुटौ ॥ यथा, जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः ॥ इति स्वामी । जै क्षये बाहुलकान्मिः । यद्वा जसु अदने बाहुलकादिञ् जामिरिति । अन्तःस्थादौ या प्रापणे धातुर्बोध्यः ।” इति रामाश्रमः ॥ (यथा, मनौ । ४ । १८३ ।
“यामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः ॥”)
यामिनी । इति शब्दरत्नावली ॥ धर्म्मस्य पत्नी । तस्याः कन्या नागवीथी । यथा,—
“अरुन्धती वसुर्यामिर्लम्बा भानुर्मरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः ।
धर्म्मपत्न्यो दश त्वेतास्तास्वपत्यानि मे शृणु ।
यामायाश्चैव घोषोऽसौ नागवीथी तु यामिजा ॥”
इति वह्निपुराणे कश्यपीयप्रजासर्गः ॥

यामिकभटः, पुं, (यामे यामे नियुक्तः । याम + ठक् । स चासौ भटश्चेति ।) प्राहरिकः । चौकीदार इति भाषा । यथा,—
“उन्मादाम्बुदवर्द्धितान्धतमसः प्रभ्रष्टदिङ्मण्डले
काले जाग्रदुदग्रयामिकभटप्रारब्धकोलाहले ।
कर्णस्यासुहृदर्णवाम्बुवड़वावह्नेर्यदन्तःपुराद्यातासि यदम्बुजाक्षि ! सतकं मन्ये भयं
योषिताम् ॥”
इति कर्णाटः ॥

यामित्रं, क्ली, लग्नात् सप्तमराशिः । यथा,—
“धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम् ।
द्यूनं द्यूनं तथास्ताख्यं षट्कोणं रिपुमन्दिरम् ॥”
यामित्रवेधो यथा,—
“पापात् सप्तमगः शशी यदि भवेत् पापेन
युक्तोऽथवा
यत्नेनाशु विवर्ज्जयेन्मुनिमतो दोषोऽप्ययं कथ्यते ।
यात्रायां विपदो गृहे सुतवधः चौरेषु रोगोद्भवो-
ऽप्युद्वाहे विधवा व्रते तु मरणं मूलञ्च पुंस्कर्म्मणि ॥
रविमन्दकुजाक्रान्तं लग्नाद्भात् सप्तमं त्यजेत् ।
विवाहयात्राचूड़ासु गृहकर्म्मप्रवेशने ॥”
इति यामित्रवेधः । ● ।
अस्य प्रतिप्रसवो यथा ।
“मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो
मित्रर्क्षसौम्यग्रहगोऽथ तदीक्षितो वा ।
यामित्रवेधविहितानपहृत्य दोषान्
दोषाकरः सुखमनेकविधं विधत्ते ॥”
इति ज्योतिस्तत्त्वम् ॥

यामिनी, स्त्री, (यामाः सन्त्यस्याम् । याम + इनिः । ङीप् ।) रात्रिः ॥ (यथा, महाभारते ।१२।५३।१।
“ततः शयनमाविश्य प्रसुप्तो मधुसूदनः ।
याममात्रार्द्धशेषायां यामिन्यां प्रत्यबुध्यत ॥”)
हरिद्रा । इत्यमरः । १ । ४ । ४ ॥ (कश्यपपत्नी । यथा, भागवते । ६ । ६ । २१ ।
“तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनीति च ।
पतङ्ग्यसूत पतगान् यामिनी शलभानथ ॥”
प्रह्लादस्य द्वितीया तनया । यथा, कथासरित्सागरे । ४६ । २२ ।
“प्रह्लादो यामिनीं नाम द्वितीयां तनयां ददौ ॥”)

यामिनीपतिः, पुं, (यामिन्याः पतिः ।) चन्द्रः । इति शब्दरत्नावली ॥ (यथा, भागवते । १० । ३५ । २५ ।
“यदुपतिर्द्विरदराजविहारो
यामिनीपतिरिवैष दिनान्ते ।
मुदितवक्त्र उपयाति दुरन्तं
मोचयन् व्रजगवां दिनतापम् ॥”)
कर्पूरम् । इत्यमरः ॥

यामी, स्त्री, (यमस्येयम् । यमो देवतास्याः इति वा । यम + अण् । ङीप् ।) दक्षिणदिक् । इति राजनिर्घण्टः ॥ (यथा, ज्योतिषे ।
“———यामीं गुरौ न व्रजेत् ।”
यामि + ङीष् ।) कुलस्त्री । इति शब्दरत्नावली ॥ (यथा, मनौ । ४।१८० ।
“मातापितृभ्यां यामीभिर्भ्रात्रा पुत्त्रेण भार्य्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥”

धर्म्मपत्नी । यथा, विष्णुपुराणे ।१।१५।१०५।
"अरुन्धती वसुर्यामी लम्बा भानुर्मरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च
ता दश ॥")

यामुनं, क्ली, (यमुनायां भवम् । यमुना + अण् । यमुनाया इदमित्यण् वा ।) स्रोतोऽञ्जनम् । इत्यमरः । २।६।१०० ॥ (अस्य पर्य्यायो यथा,—
"अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि ।
तत्तु स्रोतोऽञ्जनं कृष्णं सौवीरं श्वेतमीरितम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पुं, जनपदभेदः । यथा, भागवते । १।१०।३४ ।
"कुरुजाङ्गलपाञ्चालान् शूरसेनान् स यामुनान् ।
ब्रह्मावर्त्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ॥"
पर्व्वतविशेषः । यथा, रामायणे । ४।४०।२१ ।
"कालिन्दीं यमुनां रम्यां यामुनञ्च महा-
गिरिम् ।"
तीर्थभेदः । यथा, महाभारते । ३ । ८४ । ४९ ।
"यमुनाप्रभवं गत्वा समुपस्पृश्य यामुनम् ।
अश्वमेधफलं लब्ध्वा स्वर्गलोके महीयते ॥")
यमुनासम्बन्धिनि, त्रि । (यथा, प्रायश्चित्ततत्त्वे ।
"त्रिभिः सारस्वतं तोयं सप्तभिश्चाथ यामुनम् ।
गाङ्गेयं दशभिर्मासैर्गाङ्गं वर्षेण जीर्य्यति ॥")

यामुनेष्टकं, क्ली, (यामुनमिष्टकम् ।) सीसकम् । इति जटाधरः ॥ (विवृतिरस्य सीसकशब्दे विज्ञेया ॥)

यामेयः, पुं, भागिनेयः । यामिः स्वसृकुलस्त्रियोरित्यनुशासनात् यामेरपत्यमित्यर्थे ढक्-(ढक्) प्रत्ययनिष्पन्नः ॥ (याम्या धर्म्मपत्न्या अपत्यमिति । यामिपुत्त्रः । यथा, भागवते । ६।६।६ ।
"ककुदः सङ्कटस्तस्य कीकटस्तनयो यतः ।
सुवो दुर्गाणि यामेयः स्वर्गो नन्दिस्ततोऽभवत् ॥")

याम्यः, पुं, (यामो निवासोऽस्य । यामी + यत् ।) अगस्त्यमुनिः । चन्दनद्रुमः । इति मेदिनी । ये, ४८ । (यमस्यायमिति । यम + यत् । यमदूतः । यथा, मार्कण्डेये । ११ । ३० ।
"तप्यमानस्य याम्यैश्च नरकेषु च पात्यतः ।
पुनश्च गर्भो जन्माथ मरणं नरकस्तथा ॥")

याम्या, स्त्री, (यमस्येयं यमो देवतास्या इति वा । यम + "यमाच्चेति वक्तव्यम् ।" ४।२।८५ । इति वार्त्तिकोक्त्या ण्यः । टाप् ।) दक्षिणदिक् । (यथा, रामायणे । २ । १०३ । २६ ।
"प्रगृह्य तु महीपालो जलपूरितमञ्जलिम् ।
दिशं याम्यामभिमुखो रुदन् वचनमब्रवीत् ॥")
भरणीनक्षत्रम् । इति मेदिनी । ये, ४८ ।
(यमसम्बन्धिनि, त्रि । यथा, महाभारते ।२।८।१।
"कथयिष्ये सभां याम्यां युधिष्ठिर ! निबोध ताम् ।
वैवस्वतस्य यां पार्थ ! विश्वकर्म्मा चकार ह ॥")

याम्यायनं, क्ली, (याम्यायामयनं याम्यं अयनमिति वा ।) दक्षिणायनम् । यथा, मलमासतत्त्वे ।
"याम्यायने हरौ सुप्ते सर्व्वकर्म्माणि वर्ज्जयेत् ॥"

याम्योद्भूतः, पुं, (याम्यायामुद्भूतः ।) श्रीतालद्रुमः । इति राजनिर्घण्टः ॥

यायजूकः, पुं, (पुनः पुनर्यजति । यज् + यङ् । "यजजपदशां यङः ।" ३ । २ । १६६ । इति ऊकः ।) पुनःपुनर्यागकर्त्ता । तत्पर्य्यायः । इज्याशीलः । इत्यमरः । २ । ७ । ८ । (यथा, रामायणे । २ । ७२ । १५ ।
"या गतिः सर्व्वभूतानां तां गतिं ते पिता गतः ।
राजा महात्मा तेजस्वी यायजूकः सतां गतिः ॥")

यायावरः, पुं, (पुनःपुनरतिशयेन वा याति देशाद्देशान्तरं गच्छतीति । या + यङ् । "यश्च यङः ।" ३।२।१७६ । इति वरच् ।) अश्वमेधीयाश्वः । इति जटाधरः ॥ जरत्कारुमुनिः । इति त्रिकाण्डशेषः ॥ (ऋषीणां गणविशेषः । यथा, महाभारते । १२ । २४३ । १७ ।
"तात प्रब्रूहि धर्म्मात्मा यायावरा गताः ॥"
जरत्कारुमुनिरेवैतद्वंशीयः । यथा, महाभारते । १ । १३ । ११ ।
"जरत्कारुरिति ख्यात ऊर्द्धरेता महातपाः ।
यायावराणां प्रवरो धर्म्मज्ञः संशितव्रतः ॥")
त्रि, पुनःपुनर्गमनशीलः । यथा,—
"यायावराः पुष्पफलेन चान्ये
प्रानर्चुरर्च्यां जगदर्च्चनीयम् ।"
इति भट्टिः । २ । २० ॥
(स्त्री, यावृत्ता । यथा, भागवते ।७।११।१६ ।
"वार्त्ता विचित्रा शालीनयायावरशिलोञ्छनम् ।
विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा ॥"
"यायावरं प्रत्यहं धान्ययाच्ञा ।" इति तत्र श्रीधरस्वामी ॥)

यावः, पुं, (यौति यूयते वा । यु + अण् अप् वा । ततः प्रज्ञाद्यण् ।) अलक्तः । इत्यमरः । २ । ६ । १२५ ॥ (तथास्य पर्य्यायः ।
"लाक्षा पलङ्कषालक्तो यावो द्रुमामयो जतु ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
यथा, नैषधे । २२ । ४६ ।
"तस्तस्तदीयाधरयावयोगा-
दुदेति विम्बारुणबिम्ब एषः ॥"
यव एव । स्वार्थेऽण् । यावः । यथा, तैत्तिरीयसंहितायाम् । ४ । ३ । ९ । २ ।
"यावानां भागोऽस्य यावानामाधिपत्यमिति ॥")

यावकः, पुं, (यव एव यावः स इवेति इवार्थे कन् । यद्वा, याव एव । याव + "यावादिभ्यः कन् ।" ५ । ४ । २९ । इति स्वार्थे कन् ।) कुल्माषः । इत्यमरः । २ । ९ । १६ ॥ "द्वे घोरोधान्ये । कुलत्थ इत्यन्ये माषाकृतिपत्रे काश्मीरेषु कुलथीति ख्याते । इति सुभूतिः ॥ यव इव गुणेन इति यवकः विकारसंघेति कः । यवक एव यावकः स्वार्थे ष्णः । कुत्सेन मस्यति परिणमति कुल्माषः मसीयं ई परिमाणे परीणामे घञ् मनीषादित्वाद्दुक् । कुल्माषो दन्त्यसकारवान् मूर्द्धन्यषकारवांश्च । कुल्मासो रभसश्चेति दन्त्यान्तं रचित इति मधुः ॥ कुल्माषो यावके पुंसि काञ्जिके तु नपुंसकमिति मूर्द्धन्यान्ते रभसः ।" इति भरतः ॥

"यवकः स्यात्तु कुल्माषः कुल्मासो यावकोऽपि च ।
घोरवाख्ये षष्टिके वा कुल्मे काश्मीरदेशजे ।
शालिधान्येषु चत्वार इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥ * ॥
यावान्नम् । इति हेमचन्द्रः ॥ (यथा, मनौ ।११। १२६ ।
"शूद्रापात्नहत्यासु मासं शोधनमैन्दवम् ।
मलिनी करणीयेषु तप्तः स्याद्यावकैस्त्र्यहम् ॥")
अलक्तकः । इति शब्दरत्नावली ॥ (यथा, किराते । ५ । ३९ ।
"इह सनियमयोः सुरापगायाः
मुषसि सयावकसव्यपादलेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥")

यावज्जीवं, अ, क्ली, (यावत् जीवतीति । जीव + "यावति विन्दजीवोः ।" ३ । ४ । ३० । इति णमुल् ।) यावदायुः । जीवनपर्य्यन्तम् । यथा,
"यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता ।
माता च मम वन्ध्यासीदपुत्त्रश्च पिता मम ॥"
इति आह्वतशब्दटीकायां भरतः ॥

यावत्, अ, (यद् + डावतुः ।) साकल्यम् । अवधिः । मानम् । अवधारणम् । इत्यमरः । ३ । ३ । २४५ ॥ "साकल्ये निरवशेषे । यथा । यावद्दत्तं तावद्भुक्तं । अवधौ मर्य्यादायाम् । मूलात् शाखां यावत् प्रकाण्डः । मानं प्रमाणम् । यावद्गृह्णाणि तावन्निमन्त्रण: ॥ अवधारणमियत्तापरिच्छेदः । इयतो भाव इयत्ता परिमाणं तस्य परिच्छेदो निश्चयः । यथा यावत् पात्रं तावद्ब्राह्मणानामन्त्रयस्व । यावत् कात्स्न्येऽवधारणे प्रशंसायां परिच्छेदे मानाधिकारसम्भ्रमे पक्षान्तरे चेति मेदिनी ।" इति भरतः ॥ (यत्परिमाणमस्य इत्यर्थे । यत् + "यत्तदेतेभ्यः परिमाणे वतुप् ।" ५ । २ । ३९ । इति वतुप् । "आसर्व्वनाम्नः ।" ६ । ३ । ९१ । इत्यात्वम् ।) यत्परिमिते, त्रि । तत्र यावान् यावती यावत् इति रूपत्रयं भवति । यच्छब्दात् निपातनाद्वतुप्रत्ययनिष्पन्नः । इति तद्धितपादे वोपदेवः ॥ (यथा, भागवते । २ । ९ । ३१ ।
"यावानहं यथा भावो यद्रूपगुणकर्म्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥"
यथाच मनुः । ८ । १५५ ।
"यावती सम्भवेद्वृद्धिस्तावतीं दातुमर्हसि ॥"
तथाच याज्ञवल्क्यः । २ । २६४ ।
"यावत् शस्यं विनश्येत्तु तावत् स्यात् क्षेत्रिणः
फलम् ॥")

यावतिथः, त्रि, (यावतां पूरणः । यावत् + "तस्य पूरणे डट् ।" ५।२।४८ । इति डट् । "वतोरिथुक् ।" ५।२।५३ । इति इथुगागमश्च ।) यावत्परिमाणम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । १ । २० ।
"आद्याद्यस्य गुणन्त्वेषामवाप्नोति परः परः ।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥")

यावनः, पुं, (यवने यवनदेशे भवः। यवन+ अण्।) शिह्लाख्यगन्धद्रव्यम्। इत्यमरः।२।६। १२८॥ (विवृतिरस्य शिह्लकशब्दे ज्ञातव्या॥)

यावनालः, पुं, (यवनाल एवेति। यवनाल+स्वार्थे अण्।) धान्यविशेषः। जोयार इति भाषा। तत्पर्य्यायः। यवनालः २ शिखरी ३ वृत्ततण्डुलः ४ दीर्घनालः ५ दीर्घशरः ६ क्षेत्रेक्षुः ७ इक्षुपत्रकः ८। तस्य गुणाः। मधुरत्वम्। शीतलत्वम्। बल्यत्वम्। त्रिदोषजित्त्वम्। वृष्यत्वम्। रुच्यत्वम्। अर्शोयक्ष्मगुल्मशमनाशित्वञ्च। इति राजनिर्घण्टः॥

यावनालशरः, पुं, (यावनाल इव शरः।) शरभेदः। जोङ्गरली इति हिन्दी भाषा। तत्पर्य्यायः। नदीजः २ दृढत्वक् ३ वारिसम्भवः ४ यावनालनिभः ५ खरपत्रः ६। अस्य मूलगुणाः। ईषन्मधुरत्वम्। रुच्यत्वम्। शीतत्वम्। पित्तदाहनाशित्वम्। पशूनामबलप्रदत्वञ्च। इति राजनिर्घण्टः॥

यावनाली, स्त्री, (यवनालस्य विकारः। यवनाल+अण्। ततो ङीप्।) यावनालशर्करा। तत्पर्य्यायः। हिमोत्पन्ना २ हिमानी ३ हिमशर्करा ४ क्षुद्रशर्करिका ५ क्षुद्रा ६ गड्भा ७ जलविन्दुजा ८। अस्या गुणाः। शैत्यत्वम्। उष्णत्वम्। तिक्तत्वम्। अतिपिच्छिलत्वम्। वातघ्नत्वम्। सारकत्वम्। रुच्यत्वम्। दाहपित्तास्रदायित्वञ्च। इति राजनिर्घण्टः॥

यावशूकः, पुं, (यवशूक एव। यवशूक+स्वार्थेऽण्। यद्वा, यावस्य यवस्य शूकः कारणत्वेनास्त्यस्येति। अर्श‍आद्यच्।) यवक्षारः। इति रत्नमाला॥ (यथा, सुश्रुते चिकित्सास्थाने १ अध्याये।
"क्षौमं प्लोतं पिचुं फेनं यावशूकं ससन्धवम्।
कर्कशानि च पत्राणि लेखनार्थे प्रदापयेत्॥")

यावसः, पुं, (यूयते इति। यु+"वहियुभ्यां णित्।") उणा० ३।११६। इति असच्। तस्य णित्त्वञ्च। यद्वा, यवसानां समूहः। यवस+"तस्य समूहः।" ४।२।३७। इत्यण्।) यवससमूहः। इति सिद्धान्तकौमुदी।

याव्यं, त्रि, (यूयते इति। यु+"आसुयुवपिरपिलपित्रपिचमश्च।" ३।१।१२६। इति ण्यत्।) मिश्रणीयम्। यूयते यत्। इति मुग्धबोधव्याकरणम्।

याशोधरेयः, पुं, (यशोधरस्यापत्यं पुमान्। यशोधर+ढ।) शाक्यमुनिपुत्रः। इति हेमचन्द्रः॥

याष्टीकः, पुं, (यष्टिः प्रहरणमस्य। यष्टि+"शक्तियष्ट्योरीकक्।" ४।४।५९। इति ईकक्।) यष्टिधारियोद्धा। लेठेरा इति भाषा। तत्पर्य्यायः। याष्टिहेतिकः २। इत्यमरः।२।८।७०॥ (यथा, राजतरङ्गिण्याम्। ६। २०३।
"आकलय्य द्रुतं दिक्षु सन्धाय प्रार्थनादिकम्।
एष्टे प्रयुत याष्टीकांस्तस्य हन्तुं यथर्णयत्॥")

यासः, पुं, (यस+घञ्।) दुरालभा। इत्यमरः। २। ४। ९९। (यथा,—
"यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी।
गान्धारी कच्छुरानन्ता कषाया दुरभिग्रहा।
यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः।
कफमेदोमदभ्रान्तिपित्तासृक्कुष्ठकासजित्।
तृष्णाविसर्पवातास्रवमिज्वरहरः परः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

यासा, स्त्री, (यासः प्रयत्नोऽस्त्यस्या इति अर्श‍आद्यच्। टाप्।) मदनशलाकापक्षी। इति शब्दमाला॥

यु, ङ क निन्दने। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) ङ क, यावयते। इति दुर्गादासः॥ ("यावयते बाला हृद्यम्।" इति मनोरमा॥)

यु, ञ श बन्धे। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-सक०-सेट्।) ञ श, युनाति यो वयस्योऽपि न वेश्यावन्धकीजनैरिति हलायुधः। इति दुर्गादासः॥

यु, ल मिश्रणे। अमिश्रणे। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-सेट्।) ल, यौति। मिश्रणे यथा,—
"यौति काले कुशस्त्रीभिः सन्तसन्तानहृद्वये॥"
इति हलायुधः॥
अमिश्रणे समवायलक्षणे। अयुतसिद्धानामिति मिलितसिद्धानामित्यर्थः। इति दुर्गादासः॥

युक्, [ज्] त्रि, (युज्यते समाधत्ते इति। युज्ौ ङ समाधौ+क्विप्।) समाधिमान्। इति मुग्धबोधव्याकरणम्॥ (युज्यते परस्परमिति।) युग्मम्। इति शब्दरत्नावली॥ (यथा, मनुः। ३। २७७।
"युक्षु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते।
अयुक्षु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम्॥")

युक्, च, निन्दा। युज क ङ, निन्दे इत्यस्माद्भावे क्विप्प्रत्ययेन निष्पन्नम्॥ (एतच्चिन्त्यम्॥)

युक्तं, त्रि, (युज्यते स्म इति। युज्+क्तः।) न्याय्यम्। तत्तु न्यायागतद्रव्यादिकम्। इत्यमरः। २। ८। २४॥ (यथा, शाकुन्तले। १ अङ्के।
"जन्म यस्य पुरोर्व्वंशे युक्तरूपमिदं तव।
पुत्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि॥")
अपृथग्भूतम्। मिलितमित्यर्थः। इति मेदिनी। ते, ४७॥ (यथा, आनन्दलहर्य्याम्। १।
"शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥")

युक्तं, क्ली, (युज्+क्तः।) हस्तचतुष्टयम्। इति मेदिनी। ते, ४७॥

युक्तः, पुं, (युज्यते स्म योगेनेति। युज्+क्तः।) अभ्यस्तयोगः। यथा,—
"योगज्ञो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः॥"
इति भाषापरिच्छेदे। ६६॥
तस्य लक्षणं यथा, गीतायाम्। ६। ८।
"ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥"
"योगारूढस्य लक्षणं श्रेष्ठं चोक्तमुपसंहरति ज्ञानेति। ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवः ताभ्यां तृप्तो निराकाङ्क्ष आत्मा चित्तं यस्य। अतः कूटस्थो निर्व्विकारः। अतएव विजितानि इन्द्रियाणि येन। अतएव समानि लोष्टादीनि यस्य। मृत्खण्डपाषाणसुवर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते॥" इति तट्टीकायां श्रीधरस्वामी॥
(रैवतमनोः पुत्रः। यथा, हरिवंशे। ७। २८।
"अथ पुत्रान्निमांस्तस्य निबोध गदतो मम।
धृतिमानव्ययो युक्तस्तत्त्वदर्शी निरुत्सुकः॥")

युक्तरसा, स्त्री, (युक्तः रसोऽस्याः।) रास्ना। इत्यमरभरतौ। २।४।१४०॥ काँटा आमरुली इति भाषा। (तथास्याः पर्य्यायः।
"रास्ना युक्तरसा रस्या सुवहा रसना रसा।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

युक्ता, स्त्री, (युक्त+टाप्।) वृत्तविशेषः। इति रत्नमाला॥ एलानी इति भाषा॥

युक्तिः, स्त्री, (युज्यते इति। युज्+क्तिन्।) न्यायः। इति मेदिनी। ते, ४७॥ (यथा, पञ्चतन्त्रे। ३। १६३।
"तस्य तद्वचनं श्रुत्वा धर्म्मयुक्तिसमन्वितम्।
उपगम्य ततोऽधस्तात् कपोतः प्राह लुब्धकम्॥")
लोकव्यवहारः। इति व्यवहारमातृका॥
"धर्म्मशास्त्रविरोधे तु युक्तियुक्तो विधिः स्मृतः॥"
इति स्मृतिश्च॥
अनुमानम्। यथा,—
"युक्तिष्वप्यवसन्नासु शपथेनैवमर्द्दयेत्॥
युक्तिरनुमानम्।
अनुमानेन निर्णयं न स्यातां पत्रसाक्षिणौ।
इत्येकवाक्यत्वादिति विवरणम्॥ अथ युक्तिः।
नारदः।
उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः।
केशाकेशिगृहीतश्च युगपत् पारदारिकः॥
कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः।
तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्त्तितः॥
प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकृन्नरः।
असाक्षिप्रत्यता ह्येते पारुष्ये तु परीक्षणम्॥
प्रत्यक्षचिह्नैः रुधिराक्तखड्गादिभिः। पारुष्ये वाक्पारुष्ये। शठः। लोप्त्रहस्तश्च चौर इति।
नारदः।
अभीक्ष्णं दिश्यमानोऽपि प्रतिहन्यान्न तद्वचः।
त्रिचतुःपञ्चकृत्वो वा परतोऽर्थं समाचरेत्॥
यदा धनिकेनाधमर्णिकस्त्रिचतुःपञ्चकृत्वो वा त्वं मे ऋणं धारयसीति पुनःपुनर्दिश्यमानोऽपि

न तद्वाक्यं प्रतिहन्ति तदोत्तरकालमनेनाभ्युपगतोऽयमर्थ इत्यवधार्य्य तमर्थमुत्तमर्णिकाय दापयेदित्यर्थः ।” इति व्यवहारतत्त्वम् ॥ * ॥ नाट्यालङ्कारविशेषः । तस्य लक्षणम् । यथा ।“युक्तिरर्थावधारणम् । उदाहरणं यथा,—

‘यदिसमरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वम् ॥’

इति वेणीसंहारः ।” इति साहित्यदर्पणम् ॥ (उपायः । यथा, कथासरित्सागरे । ३६ । ५६ ।
“तस्य खड्गभुजो देशान्निर्व्वास्येताचिरात् यथा ।
तां पुत्र ! चिन्तयेर्युक्तिं त्वमन्यैर्भ्रातृभिः सह ॥”
भोगः । यथा, सूर्य्यसिद्धान्ते । ७ । २४ ।
“त्रिचतुःकर्णयुक्त्याप्तास्ते द्विघ्नास्त्रिज्यया हृताः ।
स्फुटाः स्वकर्णस्त्रिज्याप्ता भवेयुर्मानलिप्तिकाः ॥”
प्रमाणविशेषः । तद्यथा,—
“अत्रासां तन्त्रयुक्तीनां किं प्रयोजनमित्युच्यते वाक्ययोजनमर्थयोजनञ्च ।”
“असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनम् ।
स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः ॥
व्यक्ता नोक्ताश्च ये ह्यर्था लीना ये चाप्य-
निर्म्मलाः ।
लेशोक्ता ये क्वचित्तन्त्रे तेषाञ्चापि प्रसाधनम् ॥
यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा ।
प्रबोधस्य प्रकाशार्थास्तथा तन्त्रस्य युक्तयः ॥”
इति सुश्रुते उत्तरतन्त्रे ६५ अध्यायः ॥)

युग, इ वर्ज्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) अन्तःस्थादिः । इ, युङ्गयते । इति दुर्गादासः ॥

युगं, क्ली, (युज्यत इति । युज् + घञ् । कुत्वम् । न गुणः । “युजेर्घञन्तस्य निपातनादगुणत्वं विशिष्टविषये च निपातनमिदमिष्यते । कालविशेषे रथाद्युपकरणे च युगशब्दस्य प्रयोगोऽन्यत्र योग एव भवति ।” इति काशिका । ६ । १ । १६० ।) युग्मम् । (यथा, शिशुपालवधे । ६ । ७२ ।

“उपनेतुमुन्नतिमतेव दिवं
कुचयोर्युगेन तरसा कलिताम् ।
रभसोत्थितामुपगतः सहसा
परिरभ्य कश्चन वधूमरुधत् ॥”)

कृतादिकालचतुष्टयम् । (यथा, गीतायाम् ।४।८।
“परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥”)
वृद्धिनामौषधम् । हस्तचतुष्कम् । इति मेदिनी । गे, १६ ॥ (यथा, मार्कण्डेये । ४६ । ३६ ।
“द्वे वितस्ती तथा हस्तो ब्राह्मतीर्थादिवेष्टयन् ।
चतुर्हस्तं धनुर्दण्डो नाड़िका युगमेव च ॥”)
देवानां द्वादशसहस्रवत्सरेण चतुर्युगं भवति । मनुष्यमानेन चतुर्युगपरिमाणं विंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षम् । तत्र सत्ययुगस्य मानम् १७२८००० वर्षाः । त्रेतायुगस्य १२९६००० वर्षाः । द्वापरयुगस्य ८६४००० वर्षाः । कलियुगस्य ४३२००० वर्षाः । इति श्रीभागवतमतम् ॥ तेषां भारतवर्षवर्त्तित्वं विवरणञ्च यथा,—

“चत्वारि भारते वर्षे युगानि ऋषयोऽब्रुवन् ।
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ॥
पूर्व्वं कृतयुगं नाम ततस्त्रेता विधीयते ।
द्वापरञ्च कलिश्चैव युगानि परिकल्पयन् ॥
चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावत् शती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥
त्रेतां त्रीणि सहस्राणि युगसंख्याविदो विदुः ।
तस्यापि त्रिशती सन्ध्या सन्ध्यांशः सन्ध्यया समः ॥
द्वे सहस्रे द्वापरे तु सन्ध्यांशौ तु चतुःशते ।
सहस्रमेकं वर्षाणां दिव्यं कलौ प्रकीर्त्तितम् ॥
द्वे शते च तथान्ये वै संख्यातश्च मनीषिभिः ।
एषा द्वादशसाहस्री युगसंख्या तु संज्ञिता ॥
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
तत्र संवत्सराः सृष्टा मानुषास्तान्निबोधत ॥
चत्वारिंशत्तथा त्रीणि कृतं युगमथोच्यते ।
विंशतिश्च सहस्राणि कालो ह्येष चतुर्युगः ॥
पृथक्त्वेनेह वक्ष्यामि युगानि तु निबोधत ।
नियुतानि दश द्वे च पञ्च चैवात्र संख्यया ॥
अष्टाविंशसहस्राणि कृतं युगमथोच्यते ।
अयुतन्तु तथा पूर्णं द्वे चान्ये नियुते पुनः ॥
षट्त्रिंशच्च सहस्राणि संख्यातानि तु संख्यया ।
त्रेतायुगस्य संख्यैषा मानुषेण तु कीर्त्तिता ॥
अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥
चत्वारि नियुतानि स्युर्वर्षाणान्तु चतुर्युगम् ।
द्वात्रिंशच्च तथान्यानि सहस्राणि तु संख्यया ॥
एतत् कलियुगं प्रोक्तं मानुषेण प्रमाणतः ।
एषा चतुर्युगावस्था मानुषेण प्रकीर्त्तिता ॥
चतुर्युगस्य संख्याता सन्ध्या सन्ध्यांशकेन च । ।
एषा चतुर्युगाख्या तु साधिका त्वेकसप्ततिः ।
कृतत्रेतादियुक्ता सा मनोरन्तरमुच्यते ॥”
इति मात्स्ये ११८ अध्यायः ॥ * ॥

युगधर्म्मो यथा,—
“ध्यानं परं कृतयुगे त्रेतायां ज्ञानमध्वरः ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥
ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ।
द्वापरे दैवतं विष्णुः कलौ रुद्रो महेश्वरः ॥
ब्रह्मा विष्णुस्तथा सूर्य्यः सर्व्व एव कलिष्वपि ।
पूज्यते भगवान् रुद्रश्चतुर्ष्वपि पिनाकधृक् ॥
आद्ये कृतयुगे धर्म्मश्चतुष्पादः सनातनः ।
त्रेतायुगे त्रिपादः स्याद्द्विपादो द्वापरे स्थितः ।
त्रिपादहीनस्तिष्ये तु सत्तामात्रेण तिष्ठति ॥”
इति कूर्म्मपुराणे युगधर्म्मकीर्त्तनं नाम २८ अध्यायः ॥ * ॥ युगावतारा यथा,—
“कृते युगे परं ज्ञानं कपिलादिस्वरूपभृत् ।
ददाति सर्व्वभूतात्मा सर्व्वभूतहिते रतः ॥
चक्रवर्त्तिस्वरूपेण त्रेतायामपि स प्रभुः ।
दुष्टानां निग्रहं कुर्व्वन् परिपाति जगत्त्रयम् ॥
वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ॥
वेदांस्तु द्वापरे व्यस्य कलेरन्ते पुनर्हरिः ।
कल्किस्वरूपी दुर्वृत्तान् मार्गे स्थापयति प्रभुः ॥
एवमेष जगत् सर्व्वं परिपाति करोति च ।
हन्ति चान्येष्वनन्तात्मा नास्त्यस्माद्व्यतिरेकि
यत् ॥”
इति विष्णुपुराणे ३ अंशे २ अध्यायः ॥ * ॥

युगधर्म्मान्तरं यथा,—
जैमिनिरुवाच ।
“कलौ युगे महाभाग ! समायाते सुदारुणे ।
भविष्यन्ति जनाः सर्व्वे कीदृशास्तद्वदस्व मे ॥
व्यास उवाच ।
आद्यं सत्ययुगं प्राहुस्ततस्त्रेताह्वयं युगम् ।
ततश्च द्वापरं विप्र ! कलिमन्त्यं विदुर्बुधाः ॥
कृते धर्म्मश्चतुष्पादः सर्व्वधर्म्मरता जनाः ।
वर्णाश्रमाचाररतास्तपोव्रतपरायणाः ॥
नारायणार्च्चनपराः शोकव्याधिविवर्जिताः ।
सत्योक्तिभाषिणः सर्व्वे सदया दीर्घजीविनः ॥
धनधान्यादिसम्पन्ना हिंसादम्भविवर्ज्जिताः ।
परोपकारिणश्चैव सर्व्वशास्त्रविदस्तथा ॥
एवंविधाः सत्ययुगे सर्व्वे लोका द्विजोत्तम ! ।
राजधर्म्मग्राहिणश्च भूपाला जनपालिनः ॥
अहो सत्ययुगस्यास्ति कः संख्यातुं गुणान् क्षमः ॥
अधर्म्माचरणं तत्र जनाः केचिन्न कुर्व्वते ॥ * ॥
त्रेतायुगे समायाते धर्म्मः पादोनतां गतः ।
अल्पक्लेशान्विता लोकाः केचित् केचिद्दयाश्रयाः ।
विष्णुध्यानरता लोका यज्ञदानपरायणाः ।
वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः ॥
चत्वा भूमिस्पृशः शूद्राः सर्व्वे ब्राह्मणसेविनः ।
ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः ॥
प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः ।
तपोव्रतरता नित्यं दातारो विष्णुसेविनः ॥
कालवर्षी तड़िद्वांश्च स्त्रियः सर्व्वाः पतिव्रताः ।
वसुन्धरा च शस्याढ्या पुत्राश्च पितृसेविनः ॥*॥
त्रेतायुगस्यावसाने द्वापरे युग आगते ।
द्विपादो भूतवान् धर्म्मः सुखदुःखान्विता नराः ॥
केचित् केचित् पापरताः केचिद्धर्म्मरतास्तथा ।
केचित् केचित् गुणैर्हीनाः केचित् केचिन्महा-
गुणाः ॥
अत्यन्तदुःखिनः केचित् केचित् चातिधनास्तथा ।
प्रतिग्रहे ब्राह्मणाश्च कदाचित् कुर्व्वते स्पृहाम् ।
भूभुजा धनलोभेन कदाचिद्दण्ड्यते प्रजाः ।
विष्णुपूजापरा विप्राः शूद्राश्च द्विजसेविनः ॥
तदा विष्णुर्व्यासरूपी वेदभागं चकार ह ॥*॥
कलौ युगे च विप्रेन्द्र ! सर्व्वपापैकमन्दिरे ।
एकपादोऽभवद्धर्म्मः सर्व्वे पापरता जनाः ॥
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राः पापपरायणाः ।
निजाचारविहीनाश्च भविष्यन्ति कलौ युगे ॥
विप्रा वेदविहीनाश्च प्रतिग्रहपरायणाः ।
अत्यन्तकामिनः क्रूरा भविष्यन्ति कलौ युगे ॥

परान्नलोलुपा नित्यं तपोव्रतपराङ्मुखाः ।
पाषण्डसङ्गलुब्धाश्च भविष्यन्ति कलौ युगे ॥
वित्तार्थं ब्राह्मणाः केचिन्महाकपटधर्म्मिणः ।
वल्काधरा भविष्यन्ति जटिलाः श्मश्रुधारिणः ।
कलौ युगे भविष्यन्ति ब्राह्मणाः शूद्रधर्म्मिणः ॥
शूद्राश्च दीक्षागुरवो नित्यं ब्राह्मणधर्म्मिणः ।
कलौ यास्यन्ति निर्वृत्ता उत्तमा अपि नीचताम् ॥
नीचाश्च धनसम्पन्ना यास्यन्त्युच्चपदं प्रति ।
प्रदास्यन्त्युपकारिभ्यो दानानि सकला जनाः ॥
यत्नादपि च नेष्यन्ति वृषला विप्रवर्त्तनम् ।
मित्रस्नेहाद्दरिष्यन्ति कुसाख्यश्च कलौ जनाः ॥
अधर्म्मबुद्धिदातारो धर्म्मबुद्धिविलोपिनः ।
परोक्षनिन्दकाः क्रूराः सम्मुखप्रियवादिनः ॥
परस्त्रीहिंसकाश्चैव मिथ्यावचनभाषिणः ।
भविष्यन्ति कलौ विप्राः परवित्ताभिलाषिणः ॥
गृहमायान्तमतिथिं समाराध्य विधानतः ।
धनलोभाद्धनिष्यन्ति नरा नरकभागिनः ।
ऋणोपजीविनश्चैव भविष्यन्ति कलौ युगे ।
स्त्रीजिताः पुरुषाः सर्व्वे स्त्रियोऽप्यत्यन्तचञ्चलाः ।
दुर्नीतिर्व्वाधते तासां स्वामिनश्च न संशयः ॥
जैमिनिरुवाच ।
मनःशुद्धिविहीनत्वात् सर्व्वेषां प्राणिनां मुने ! ।
अतः सर्व्वं त्वया प्रोक्तं मनो विस्मयदं मम ॥
कलौ सर्व्वे भविष्यन्ति मनःशुद्धिविवर्जिताः ।
तेषां यथा भवेत् कर्म्म सफलं ब्रूहि तद्गुरो ! ॥
व्यास उवाच ।
अनर्पितन्तु यत् कर्म्म तद्भवेन्निष्फलं खलु ।
एकेन मनसा विप्र ! सुदृढं कथ्यते मया ॥
विष्णुभक्तिमतां पुंसां न किञ्चिद्विफलं भवेत् ।
इति ते कथितं सर्व्वं वत्स ब्राह्मणसत्तम ! ।
यत् श्रुत्वा भक्तिभावेन नरो मोक्षमवाप्नुयात् ॥”
इति पाद्मे क्रियायोगसारे २५ अध्यायः ॥*॥
अपि च ।
“कृते धर्म्मश्चतुष्पाच्च सत्यं दानं तपो दया ।
धर्म्मपाता हरिः श्वेतः सन्तुष्टा ज्ञानिनो नराः ।
चतुर्व्वर्षसहस्राणि नरा जीवन्ति वै तदा ।
कृतान्ते क्षत्त्रियैर्व्विप्रा विट्शूद्राश्च जिता द्विजैः ।
सूरस्य प्रवर्तिः पुत्रो विष्णुः शङ्खं जघान ह ॥*॥
त्रेतायुगे त्रिपाद्धर्म्मः सत्यदानदयात्मकः ।
नरा यज्ञपरास्तस्मिंस्तथा यज्ञोद्भवं जगत् ।
रक्तो हरिर्न्नरैः पूज्यो नरा दशशतायुषः ।
तत्र विष्णुर्भौमरथः क्षत्त्रियो रावणान्तकृत् ॥*॥
द्विपाच्च द्वापरे धर्म्मः पीततांचाच्युते गते ।
चतुःशतायुषो लोका द्विजक्षत्त्रोत्तराः प्रजाः ॥
तदा दृष्ट्वाल्पबुद्धींश्च विष्णुर्व्यासस्वरूपधृक् ।
तदेकन्तु यजुर्व्वेदं चतुर्धा विभजत् पुनः ।
शिष्यानध्यापयामास नामतस्तान्निबोध मे ।
ऋग्वेदमथ पैलञ्च सामवेदञ्च जैमिनिम् ।
अथर्व्वाणं सुमन्तुन्तु यजुर्व्वेदं महामुनिम् ।
वैशम्पायनसंज्ञन्तु पुराणं सूतमेव च ।
अष्टादश पुराणानि अत्र वै हरिरेव हि ।
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतन्तथा ।
भविष्यं नारदीयञ्च पुराणञ्चेति विस्तरम् ॥
मार्कण्डेयं तथाग्नेयं ब्रह्मवैवर्त्तमेव च ।
कौर्म्मं मात्स्यं गारुडञ्च वायवीयमनन्तरम् ।
अष्टादशं समुद्दिष्टं ब्रह्माण्डमिति संज्ञितम् ।
अन्यान्युपपुराणानि मुनिभिः कथितानि तु ।
आद्यं सनत्कुमारोक्तं नारसिंहमथापरम् ।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ।
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम् ॥
कापिलं वामनञ्चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणञ्चाथ कालिकाह्वयमेव च ॥
माहेश्वरं तथा शाम्बं सौरं सर्व्वार्थसञ्चयम् ।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ॥
पुराणं धर्म्मशास्त्रञ्च वेदा अङ्गानि यन्मुने ! ।
न्यायः शौनक ! मीमांसा आयुर्व्वेदार्थशास्त्रकम् ।
गान्धर्व्वञ्च धनुर्व्वेदो विद्या ह्यष्टादश स्मृताः ।
द्वापरान्ते स च हरिर्भुवो भारमपाहरत् ॥*॥
एकपादस्थिते धर्म्मे कृष्णताञ्चाच्युते गते ।
जनास्तदा दुराचारा भविष्यन्ति च निर्द्दयाः ॥
सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥
प्रभूतञ्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रतिः ॥
यदा कर्म्मसु काम्येषु शक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक ! ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्म्मणाञ्चापि काम्यानां द्वापरन्तद्रजस्तमः ॥
यदा सदानृतं तन्द्रीर्निद्राहिंसादिसाधनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥
यस्मिन् जनाः कामिनोऽपि शश्वत्कटुकभाषिणः ।
दस्युकृष्टा जनपदा वेदाः पाषण्डदूषिताः ॥
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ।
अव्रता बटवोऽशौचा भिक्षवश्च कुटुम्बिनः ॥
तपस्विनो ग्रामवासा न्यासिनो नित्यलोलुपाः ।
ह्रस्वकाया महाहाराश्चौर्य्यमायोरुसाहसाः ॥
त्यक्ष्यन्ति भृत्याश्च पतिं भृत्यं भर्त्तार एव च ।
शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः ॥
उद्विग्नाश्चानलङ्काराः पिशाचसदृशाः प्रजाः ।
अस्नातभोजनेनाग्निदेवतातिथिपूजनम् ।
करिष्यन्ति कलौ प्राप्ते न च पित्रोदकक्रियाम् ॥
स्त्रीपराश्च जनाः सर्व्वे शूद्रप्रायाश्च शौनक ! ।
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः ॥
शिरःकण्डूयनपरा आज्ञां नेष्यन्ति सत्पतेः ।
विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः ॥
कलेर्द्दोषनिधेर्व्विप्र अस्ति ह्येको महान् गुणः ।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः फलम् ।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात् ॥
तस्माद्ध्येयो हरिर्नित्यं ध्येयः पूज्यश्च शौनक ।”
इति गारुडे युगधर्म्माः । २२७ अध्यायः ।

युगः, पुं, (युज्येते बलीवर्द्दौ अस्मिन्निति । युज् + घञ् । युजेर्घञन्तस्य निपातनादगुणत्वम् । इति काशिका । ६ । १ । १६० ।) रथहलाद्यङ्गम् । इति मेदिनी । गे, १६ ॥ जोयालि इति भाषा । (यथा,—
“नावेव नः पारयतं युगेव
नभ्येव न उपधीव प्रधीव ।”
इति ऋग्वेदे । २ । ३९ । ४ ।
“युगा इव यथा रथस्य युगे बध्वा इव ।” इति तद्भाष्ये सायणः । तथा च कथासरित्सागरे । ६० । १२ ।
“तस्यैकदा वणिज्यार्थं गच्छतो मथुरां पुरीम् ।
भारवोढ़ा युगं कर्षन् भारेण युगभग्नतः ।”)
युगकीलकः, पुं, (युगस्य कीलकः ।) युगकाष्ठस्य कीलकः । जोयालेर खिल इति भाषा । तत्पर्य्यायः । शम्या २ । इत्यमरः । २ । ८ । १४ ॥
युगन्धरः, पुं, (युगं धारयतीति । धारि + “संज्ञायां भृतृवृजिधारिसहितपिदमः ।” ३।२।४६ । इति खच् । “अरुर्द्विषदजन्तस्य मुम् ।” ६।३।६७ । इति मुम् ।) यत्र रथस्य युगकाष्ठमासज्यते तत्र । रथस्यान्ते यत्र बध्नन्ति तद्युगकाष्ठं तद्युगं धरति युगन्धरः । इति भरतः ॥ तत्पर्य्यायः । कूवरः २ । इत्यमरः । २ । ८ । ५७ ॥ पर्व्वतविशेषः । यथा,—
“निषधो माल्यवान् विन्ध्यो हेमकूटो युगन्धरः ॥”
इति शब्दरत्नावली ।
(तूणिपुत्त्रः । स च सात्यकेः पौत्त्रः । यथा, हरिवंशे । १६० । ३१ ।
“तूणेर्युगन्धरः पुत्त्र इति वंशः समाप्यते ।”)
युगपत्, व्य, एकदा । एककालीनम् । इत्यमरः ।३। ४ । २२ ॥ (यथा, भागवते । ३ । ६ । २ ।
“कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ।
त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥”)
युगपत्त्रः, पुं, (युग्मं पत्त्रमस्य ।) कोविदारवृक्षः । इति हेमचन्द्रः ।४।११८॥ युग्मपर्णश्चाप्यत्र ॥
युगपत्त्रकः, पुं, (युगपत्त्र + स्वार्थे कन् ।) कोविदारवृक्षः । इत्यमरः ।२।४।२२॥ (यथास्य पर्य्यायः ।
“कोविदारश्चमरिकः कुद्दालो युगपत्त्रकः ।
कुण्डली ताम्रपुष्पश्च अश्मन्तकः स्वल्पकेशरी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
युगपत्त्रिका, स्त्री, (युगं पत्त्रमस्याः । कप् । टाप् । अकारस्येत्वञ्च ।) शिंशपावृक्षः । इति त्रिकाण्डशेषः ॥ (विवरणमस्याः शिंशपाशब्दे ज्ञातव्यम् ।)
युगपार्श्वगः, पुं, (युगस्य पार्श्वे गच्छतीति । गम् + डः ।) अभ्यासार्थं लाङ्गलपार्श्वबद्धो गौः । पाँटि बाँधा गरु इति भाषा । तत्पर्य्यायः । प्रष्ठवाट् २ । इत्यमरः । २ । ९ । ६३ ॥
युगलं, क्ली, (युज्यते परस्परं संगच्छत इति । युज् + वृषादिभ्यः कलच् । न्यङ्क्वादित्वात् कुत्वम् ।) युग्मम् । इत्यमरः ।२।५।३८ ॥ (यथा, भागवते । ४ । २६ । २० ।
“पस्पर्श पादयुगलमाह चोत्सङ्गलालिताम् ।”)

युगलमन्त्रः, पुं, (युगलाख्यो मन्त्रः। शाकपार्थिववत् समासः।) लक्ष्मीनारायणमन्त्रः। यथा,—
"इदं रहस्यं परमं लक्ष्मीनारायणाह्वयम्।
राजंस्तवापि वक्ष्यामि प्रपत्तिं शरणागतिम्॥
द्वयात् परतरो मन्त्रो नास्ति सत्यं ब्रवीमि ते।
द्वयात् परतरो धर्म्मो नास्ति लोकेषु कश्चन॥
सर्व्वेषां कृष्णमन्त्राणां मध्ये युगलसंज्ञकम्।
मन्त्रं हि सर्व्वतः श्रेष्ठं कृष्णाख्यमनुत्तमम्॥
सर्व्वतो युगलं मन्त्रं कार्य्यं परतरं नृप!।
गुह्याद्गुह्यतमं जातु चैयं तत्तदुपासकैः॥"
इति पाद्मोत्तरखण्डे २५ अध्यायः॥

युगलाख्यः, पुं, (युगलमित्याख्या यस्य।) बब्बूर-वृक्षः। इति राजनिर्घण्टः॥ त्रि, युग्मनामकः॥

युगांशकः, पुं, (युगस्य अंशकः चतुर्थांशः इति।) वत्सरः। इति हारावली।२८। युगविभाजकश्च॥

युगाद्या, स्त्री, (युगस्याद्यादिभूता।) युगारम्भ-तिथिः। यथा। "अथ युगाद्याः। तासु च।
'युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता॥'
इत्यनेन व्यवस्था॥
ब्रह्मपुराणे।
'वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम्।
कार्त्तिके शुक्लपक्षे तु त्रेताच नवमेऽहनि॥
अथ भाद्रपदे कृष्णत्रयोदश्यान्तु द्वापरम्।
माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम्॥
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः॥'
अत्र वैशाखादयः पौर्णमास्यन्ता एव। ब्रह्म-पुराणे तथैव तिथिकृत्याभिधानात्। मुख्य-चान्द्रत्वे कार्त्तिके नवमेऽहनीत्यनेनेष्टसिद्धौ शुक्ल-पक्ष इति व्यर्थं स्यात्। तेन भाद्रकृष्णत्रयोदशी अश्वयुक्कृष्णपक्षीयेति मैथिलोक्तं निरस्तम्॥*॥
आसां प्रशंसामाह विष्णुपुराणम्।
'वैशाखमासस्य सिता तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी पञ्चदशी च माघे॥
एता युगाद्याः कथिताः पुराणै-
रनन्तपुण्यास्तिथयश्चतस्रः।
उपप्लवे चन्द्रमसो रवेश्च
त्रिष्वष्टकास्वप्ययनद्वये च॥'
उपप्लवे ग्रहणे।
'पानीयमप्यत्र तिलैर्व्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः।
श्राद्धं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति॥'
स्नानमधिकृत्य भविष्ये।
संवत्सरफलं तत्र नवम्यां कार्त्तिके तथा।
मन्वादौ च युगादौ च मासत्रयफलं लभेत्॥"
इति तिथ्यादितत्त्वम्॥

युगान्तः, पुं, (युगानामन्तो यत्र। युगानामन्तो वा।) प्रलयः। इति हलायुधः॥ (यथा, महा-भारते। ५। ४८। ६५।
"उद्वर्त्तयन् दस्युसंघान् समेतान्
प्रवर्त्तयन् युगमन्यद्युगान्ते।
यदा धक्ष्यात्यग्निवत् कौरवेयां-
स्तदा तप्ता धार्त्तराष्ट्रः सपुत्त्रः॥)
युगशेषश्च॥

युग्मं, क्ली, (युज्यते इति। युज्+"युजिरुचि-तिजां कुश्च।" उणा० १।१४५। इति मक्।) द्वयम्। योड़ा इति भाषा। तत्पर्य्यायः। द्वन्द्वम् २ युगलम् ३ युगम् ४। इत्यमरः। २। ५। ३८। (यथा, रामायणे। २। ६१। ७६।
"पादुकोपानहाश्चैव युगान्यत्र सहस्रशः॥")
द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशराशयः। यथा
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"
इति ज्योतिस्तत्त्वम्॥
(द्वितीया।) मेलनम्। यथा,—
"युग्माग्निकृतभूतानि षण्मुन्योर्व्वसुरन्ध्रयोः।
रुद्रेण द्वादशी युक्ता चतुर्द्दश्याथ पूर्णिमा॥
प्रतिपदाप्यमावास्या तिथ्योर्युग्मं महाफलम्।
एतद्व्यस्तं महाघोरं हन्ति पुण्यं पुराकृतम्॥
द्वितीयातृतीययोश्चतुर्थीपञ्चम्योः षष्ठीसप्तम्यो-रष्टमीनवम्योरेकादशीद्वादश्योः चतुर्द्दशीपौर्ण-मास्योः प्रतिपदमावास्ययोर्युग्मं मेलनम्। तत्त-त्तिथिमात्रनिमित्तके कर्म्मणि महाफलम्। एतत् प्रयोजनन्तु तिथिविशेषविहिते कर्म्मणि तिथिखण्डविशेषनियमनम्। स्वतिथ्या कर्म्मानि-र्व्वाहे सहायभावेनान्यतिथ्यनुप्रवेशादुपवासा-द्याचरणञ्च।" इति तिथ्यादितत्त्वम्॥ (द्वय-विशिष्टे, त्रि। यथा, मनुः। ३। ४८।
"युग्मासु पुत्त्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।
तस्मात् युग्मासु पुत्त्रार्थी संविशेदार्त्तवे स्त्रियम्॥")

युग्मपत्त्रः, पुं, (युग्मं पत्त्रमस्य।) रक्तकाञ्चनवृक्षः। इति रत्नमाला॥ (युग्मं पत्त्रम्।) युगलपर्णे, क्ली॥

युग्मपत्त्रिका, स्त्री, (युग्मं पत्त्रमस्याः। "शेषाद्वि-भाषा।" ५। ४। १५४। इति कप्। टापि अत इत्वम्।) शिंशपावृक्षः। इति शब्दरत्नावली। (विवरणमस्याः शिंशपाशब्दे ज्ञातव्यः॥)

युग्मपर्णः पुं, (युग्मं पर्णमस्य।) कोविदारवृक्षः सप्तपर्णवृक्षः। इति राजनिर्घण्टः॥

युग्मफला, स्त्री, (युग्मं फलमस्याः।) इन्द्रचिर्भिटी। वृश्चिकाली। इति राजनिर्घण्टः॥ गन्धिका। इति रत्नमाला॥

युग्मादरः, पुं, (युग्मस्यादरः।) तिथिविशेषयोगेन तिथिखण्डविशेषस्यादरणम्। यथा। "पञ्चमी सप्तमी चैवेत्यादिना विशेषतः सायाह्नव्यापि-तिथेर्ग्रहणादुपवासेऽपि न रात्रियुग्मादरः।" इति तिथ्यादितत्त्वम्॥ अस्य विवरणं युग्मशब्दे द्रष्टव्यम्॥

युग्मादरणं, क्ली, (युग्मस्यादरणम्।) युग्मतिथि-पूज्यता। यथा,—
"त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात्॥"
इति तिथ्यादितत्त्वम्॥

युग्यं, क्ली, (युगाय हितम्। युग+"उगवादिभ्यो यत्।" ५। १। २। इति यत्। युगमर्हतीति वा। दण्डादित्वात् यत्। यद्वा, युज्यत इति। युज्+"युग्यं च पत्त्रे।" ३। १। १२१। इति क्यबन्तो निपातितः।) वाहनम्। यानम्। इत्यमरः। २।८। ५८॥ (यथा, महाभारते। ३। ५६। ६।
"हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम्।
आविष्टः कलिना द्यूते जीयते स्म नलस्तदा॥"
यथा च मनौ। ८। २९३।
"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्॥"
वाच्यलिङ्गेऽपि दृश्यते। यथा, "युग्यो गौः। युग्योऽश्वः। युग्यो हस्ती।" इति काशिका। ३। १। १२१॥)

युग्यः, पुं, (युगं वहतीति। युग+"तद्वहति रथ-युगप्रासङ्गम्।" ४। ४। ७६। इति यत्प्रत्ययः।) युगवोढा। इत्यमरः।२।८।६४॥ ("रथं वहतीति रथ्यः युग्यः प्रासङ्ग्यः।" इति काशिका॥)

युङ् [ज्] त्रि, (युजिर् योगे+क्विन्। "युजेर-समासे।" ७। १। ७१। इति नुमागमः।) योगकर्त्ता। मेलनकर्त्ता। इति मुग्धबोध-व्याकरणम्॥ (यथा, भट्टिकाव्ये। ६। ११८।
"गुहाया निरगाद्वाली सिंहो मृगमिव द्रावन्।
भ्रातरं युङ्भियः संख्ये घोषेणापूरयन्दिशः॥"
युग्मम्। यथा, मनौ। ३। २७७।
"युक्षु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते।
अयुक्षु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्क-लाम्॥"
समः। स च छन्दसि द्वितीयचतुर्थपादरूपः। यथा, छन्दोमञ्जर्य्याम्। २। १।
"विषमे यदि सौ सलगा दले
भौ युजि भाद्गुरुकाण्यपचित्रम्॥")

युञ्जी, [न्] पुं, वर्णसङ्करजातिविशेषः। स तु गङ्गापुत्त्रकन्यायां वेशधारिणो जातः। यथा,—
"गङ्गापुत्त्रस्य कन्यायां वीर्य्येण वेशधारिणः।
बभूव वेशधारी च पुत्त्रो युञ्जी प्रकीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥

युच्छ, प्रमादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) अन्तःस्थाद्यादिः पञ्चम-स्वरी। प्रमादोऽनवधानता। युच्छति पापे साधुः। ओष्ठ्यवर्गाद्यादिरिति रमानाथः। पचादित्वादनि युच्छो जाल्मकम्। ओष्ठ्यवर्ग-शेषादिरिति त्रिलोचनः। वुच्छति। इति दुर्गादासः॥

युज, इर् ध ञ औ युतौ। इति कविकल्पद्रुमः॥ (रुधा०-उभ०-सक०-अनिट्।) इर्, अयुजत् अयौक्षीत्। ध, युनक्ति युङ्क्ते इत्येतावान् भेदः। औ, योक्ता। इति दुर्गादासः॥

युज, कि संयमे। युतौ। इति कविकल्पद्रुमः॥ (चुरा॰-पक्षे भ्वा॰-पर॰-सक॰-सेट्।) अन्तः-स्थाद्यादिः। कि, योजयति योजति। संयमो बन्धनम्। इति दुर्गादासः॥

युज, इ क निन्दे। इति कविकल्पद्रुमः॥ (चुरा॰-आत्म॰-सक॰-सेट्।) इ क, योजयते। इति दुर्गादासः॥

युज, य औ इ समाधौ। इति कविकल्पद्रुमः॥ (दिवा॰-आत्म॰-अक॰-अनिट्।) समाधि-र्योग्यभावः। य इ, स्वयमर्थे नियुज्यते। इति हलायुधः। औ, योक्ता। इति दुर्गादासः॥

युजानः, पुं, सारथिः। इति संक्षिप्तसारोणादि-वृत्तिः॥

युजौ, [ज्] पुं, (युज्+क्विप्।) अश्विनीकुमारौ। इति त्रिकाण्डशेषः॥ नित्यद्विवचनान्तोऽयम्॥

युञ्जानः, पुं, (युज्+शानच्।) सारथिः। विप्रः। इति मेदिनी। ने, ११३॥ भावनासहकारेण सर्व्वज्ञः। यथा,—

"योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः॥"

इति भाषापरिच्छेदे। ६५॥

"युक्तस्येति। योगाभ्यासावगत्या वशीकृतसमाधि-समासादितो विविधसिद्धयुक्त इत्युच्यते अयमेव विप्रियोगवत्त्वात् युक्त इत्युच्यते। सर्व्वदेति चिन्तासहकारं विनेत्यर्थः। भानं सर्व्वविषयाणां प्रत्यक्षम्। अपरो युञ्जानः। विषयव्यावृत्ता मानससमाधिस्थः। अयञ्च युञ्जान उच्यते। चिन्ता ध्यानं तदेव कारणं तत्सहकारात् स्थूलसूक्ष्मव्यवहितविप्रकृष्टान् अर्थान् मनः प्रत्यक्षीकरोतीत्यर्थः।" इति सिद्धान्तमुक्तावली॥

युत्, स्त्री, निन्दा। यु इ क निन्दे इत्यस्माद्भावे क्विप्प्रत्ययेन निष्पन्नम्॥

युत्, [ध्] स्त्री, (योधनमिति। युध्+क्विप्।) युद्धम्। इत्यमरः।३।८।१०६॥ (त्रि, युद्धकर्त्ता। यथा, भागवते। ६।१२।२३।

"इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप!।
युयुधाते महावीर्य्याविन्द्रवृत्रौ युधां पती॥")

युत, ऋ इ दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-अक॰-सेट्।) ऋ, अयुयोतत्। इ, योतते। इति दुर्गादासः॥

युतं, क्ली, (यु+क्तः।) हस्तचतुष्टयम्। इति मेदिनी। ते, ४७॥

युतः, त्रि, (यु+क्तः।) युक्तः। अपृथग्-भूतः। इति मेदिनी। ते, ४७॥ (यथा, भट्टिकाव्ये। १।७।

"स्त्रीभिर्युतान्यप्सरसामिवौघै-
र्मेरोः शिरांसीव गृहाणि यस्याम्॥")

युतकं, क्ली, संशयः। युगम्। नारीवस्त्राञ्चलम्। युक्तम्। चलनाग्रम्। यौतुकम्। इति विश्व-मेदिन्यौ। के, १४३॥ मैत्रीकरणम्। इति शब्दरत्नावली॥ स्त्रीवस्त्रभेदः। इति हेमचन्द्रः॥ संश्रयः। शूर्पाग्रम्। इति नानार्थरत्नमाला॥

युद्, [ध्] स्त्री, (योधनमिति। युध्+क्विप्।) युद्धम्। इत्यमरः। २। ८। १०६॥ (यथा, रामायणे। २।५१।१०।

"यो न देवासुरैः सर्व्वैः शक्यः प्रसहितुं युधि।
तं पश्य सुखसंसुप्तं तृणेषु सह सीतया॥")

युद्धं, क्ली, (युध्यते इति। युध्+भावे क्तः।) योध-नम्। लड़ाइ इति भाषा। तत्पर्य्यायः। आयो-धनम् २ जन्यम् ३ प्रधनम् ४ प्रविदारणम् ५ मृधम् ६ आस्कन्दनम् ७ संख्यम् ८ समीकम् ९ साम्प-रायिकम् १० समरम् ११ अनीकम् १२ रणः १३ कलहः १४ विग्रहः १५ संप्रहारः १६ अभिसम्पातः १७ कलिः १८ संस्फोटः १९ संयुगः २० अभ्यामर्दः २१ समाघातः २२ संग्रामः २३ अभ्यागमः २४ आहवः २५ समु-दायः २६ संयत् २७ समितिः २८ आजिः २९ समित् ३० युत् ३१। इत्यमरः।२।८।१०३-१०६॥ संरावः ३२ आनाहः ३३ सम्परायकः ३४ विदारः ३५ दारणम् ३६ संवित् ३७ सम्परायः ३८। इति शब्दरत्नावली॥ तीव्रम् ३९ अम्बरीषम् ४० तलजम् ४१ आनर्त्तः ४२ अभि-मरः ४३ समुदयः ४४। इति जटाधरः॥ *॥ युद्धे वर्णनीयानि यथा। चर्म्म १ वर्म्म २ बलम् ३ चरः ४ धूलिः ५ तूर्य्यस्वनः ६ सिंहनादः ७ शवमण्डलम् ८ रक्तनदी ९ छिन्नच्छत्रम् १० रथः ११ चामरः १२ हस्ती १३ अश्वः १४ केतुः १५ विदीर्णकुम्भकहस्तिकुम्भमुक्ता १६ व्यूहरचनावस्थितसेना १७ सुरपुष्पवृष्टिः १८। इति कविकल्पलता॥ *॥ अथ युद्धफलम्।

"अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः।
न तत् फलमवाप्नोति संग्रामे यदवाप्नुयात्॥
इति यज्ञविदः प्राहुर्यज्ञकर्म्मविशारदाः।
तस्मात्ते प्रवक्ष्यामि यत् फलं शस्त्रजीविनाम्॥"

युद्धे मरणफलं यथा,—

"धर्म्मलाभोऽर्थलाभश्च यशोलाभस्तथैव च।
यः शूरो वध्यते युद्धे विमर्दन् परवाहिनीम्॥
यस्य धर्म्मार्थकामौ च यज्ञश्चैव सदक्षिणः।
परं ह्यभिमुखे हत्वा तयोः पन्थाधिरोहति॥
विष्णोः स्थानमवाप्नोति एवं युध्यन् रणाजिरे।
अश्वमेधानवाप्नोति चतुरस्तेन कर्म्मणा॥
यस्तु शस्त्रं समुत्सृज्य वीर्य्यवान् वाहिनीमुखे।
सम्मुखो वर्त्तते शूरः स स्वर्गान्न निवर्त्तते॥
राजा वा राजपुत्त्रो वा सेनापतिरथापि वा।
हतः क्षत्त्रेण यः शूरस्तस्य लोकोऽक्षयो ध्रुवः॥
यावन्ति तस्य गात्राणि भिन्दन्ति शस्त्रमाहवे।
तावतो लभते लोकान् सर्व्वकामदुहोऽक्षयान्॥
वीरासनं वीरशय्या वीरस्थानस्थितिः स्थिरा।
गवार्थे ब्राह्मणस्यार्थे गोस्वाम्यर्थे च ये हताः।
ते गच्छन्त्यमरस्थानं ये स्युः सुकृतिनस्तथा॥
अभग्नो यः परं सैन्यं भग्नञ्च परिरक्षति।
पृष्ठस्थितः पालयति सोऽपि गच्छति तद्गतिम्॥
अनुत्तीर्णस्तथा सद्यः प्राणान् यस्त्यजते युधि।
हतश्च स्वपते युद्धे स स्वर्गान्न निवर्त्तते॥
दंष्ट्रिभिः शृङ्गिभिर्व्वापि तथा म्लेच्छैश्च तस्करैः।
स्वाम्यर्थे ये हता राजंस्तेषां स्वर्गो न संशयः॥
शस्त्राग्निना सुनिर्द्दग्धः स्वगृहे च च्युतो यदि।
संग्रामान्म्रियते राजंस्तस्य स्वर्गो न संशयः॥
भयेन लज्जया वापि स्नेहेन च रणाजिरे।
सम्मुखो म्रियते राजंस्तदा स्वर्गो न संशयः॥
यत्तु भिन्नीकृतं गात्रं शरशक्त्यृष्टितोमरैः।
देवकन्यास्तु तं वीरं रामयन्ति रमन्ति च॥
वराप्सरःसहस्राणि शूरमायोधने हतम्।
त्वरितान्यभिधावन्ति मम भर्त्ता भवेति च॥
यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः।
अक्षयान् लभते लोकान् यदि क्लीवं न भाषते॥
जितेन लभ्यते लक्ष्मीर्मृतेनापि सुराङ्गनाः।
क्षणविध्वंसिनि काये का चिन्ता मरणे रणे॥
हतस्याभिमुखस्यस्य ये लोका न निवर्त्तिनः।
हते गोस्वामिविप्रार्थे नरमेधफलं हि तत्॥

स्थानाभिघाते शरणागते च
राज्ञो विपत्तौ द्विजसार्थघाते।
स्त्रीबालवृद्धाजनगोग्रहे च
शस्त्रं मुनीनामपि धारणीयम्॥
यां यज्ञसंघैस्तपसा च विप्राः
स्वर्गैषिणो यत्र न वै प्रयान्ति।
क्षणेन तामेव गतिं प्रयान्ति
महाहवे स्वां तनुं संत्यजन्तः॥
सर्व्वांश्च वेदान् सुमहद्भिरङ्गैः
सांख्यञ्च योगञ्च वने विवासम्।
एते गुणा एकपदे प्रविष्टा
महाहवे स्वां तनुं संत्यजेद्यः॥
इमां गिरं वेदविदः शुभाचरां
सुभाषितां वृत्रभिदा दिवौकसाम्।
चमूमुखे यः स्मरते दृढ़स्थिति-
र्न हन्यते हन्ति च सोऽपि वैरिणः॥

सदा पुण्यतमः स्वर्ग्यः सुयज्ञः सर्व्वतो सुखः।
सर्व्वेषामेव वर्णानां क्षत्त्रियस्य विशेषतः॥
भूयश्चैव तु वक्ष्यामि रणधर्म्मं सनातनम्।
यादृशाय प्रवर्त्तेत यादृशं परिवर्जयेत्॥
आततायिनमायान्तमपि वेदान्तगं द्विजम्।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्॥
कोदण्डशस्त्रपाणिन्तु प्रहरन्तं द्विजं यदि।
हन्यात्तमासुरं भावं हत्वा न ब्रह्महा भवेत्॥
ब्रह्महा जायते येस्तु हतैस्तांस्त्वं शृणुष्व मे॥
वचःसंखेन्न नृपश्रेष्ठ! काययज्ञे सनातने।
विरथं विगतं शस्त्रं विवर्णं विमुखस्थितम्।
युद्धोत्साहहतं हत्वा ब्रह्महा जायते नरः॥
विशस्त्रं विधनुष्कञ्च तं भीतोऽस्मीतिवादिनम्।
वर्णशाखायुतांस्तांस्तु हत्वा स ब्रह्महा भवेत्॥
अन्याहतो न हन्तव्यो बालो वृद्धो नपुंसकः।
तवाहं प्रवदन्मूत्रशकृत्कृतोऽथ भीरवः॥
तस्मादेतान् परिहरेत्क्रूरो धर्म्मभृतां वरः।
सम्यग्यज्ञफलस्त्वीहन् हत्वासौ ब्रह्महा भवेत्॥
शक्यन्त्विह सन्देहस्तु यज्ञैः क्रतुशतैर्नृपाः।
आत्मदेहपरित्यागः कर्त्तुं युद्धे सुदुष्करः॥

अशक्तः युध्यतेऽशुद्धो देहं त्यक्ता रणाजिरे ।
न शुद्धी रणभग्नानां ऋते कश्चिन्महापथात् ॥
संग्रामे युध्यतो लक्ष्मीः कीर्त्तिः स्यात् स्वर्गति-
स्तथा ।
भग्नस्य तेऽपि नश्यन्ति महासत्यान्महारणात् ॥
तस्मात् सत्वेन यत्किञ्चित् क्रियते तच्छुभप्रदम् ।
यज्ञं दानं व्रतं चापि संग्रामे नृपसत्तम ! ॥"
इत्यादौ वह्निपुराणे संग्रामप्रशंसा ॥ * ॥
अथ युद्धनिर्णयः ।
"यत्रायुद्धे ध्रुवं नाशो युद्धे जीवितसंशयः ।
तं कालमेकं युद्धस्य प्रवदन्ति मनीषिणः ॥
आत्मोदये विरक्तीयात् चोभौ नात्मबले यदि ।
व्यसने च प्रहर्त्तव्यं शत्रौ न तु विपर्य्यये ॥
स्वयं राज्ञा न योद्धव्यं येऽपि शस्त्रास्त्रकोविदाः ।
ज्ञता युद्धेषु दृश्यन्ते शक्तेभ्यः शक्तिमत्तराः ॥
रथयुद्धं समे देशे विषमे हस्तिसङ्गरः ।
अश्वयुद्धं मरौ देशे पत्तियुद्धञ्च दुर्गमे ॥
व्यलये सर्व्वयुद्धं स्यान्नौकायुद्धं जलप्लुते ।
संहत्य योधयेदल्पान् कामं विस्तारयेद्बहून् ॥
सूचीमुखमनीकं स्यादल्पं हि बहुभिः सह ।
अपि पश्चाग्रतः शूरान् निघ्नन्ति परवाहिनीम् ।
येऽपि वा पञ्चषट्सप्तसहिताः कृतनिश्चयाः ॥"
अथ युद्धासननिर्णयः ।
"अन्यद्वारा विपक्षन्तु विगृह्यासनमुच्यते ।
अरिं विगृह्य वा स्थानं विग्रहासनमुच्यते ॥
अरेश्च विजिगीषोश्च विग्रहे हीयमानयोः ।
सन्धाय यदवस्थानं सन्धायासनमुच्यते ॥
उदासीने मध्यमे वा समाने प्रतिशङ्कया ।
एकीभूय यवस्थानं सम्भूयासनमुच्यते ॥
सर्व्वेषां प्रीतिजननं निजराष्ट्रस्य लक्षणम् ।
एतत् प्रीत्यासनं नाम सर्व्वासनमहत्तरम् ॥"
अथ दुर्गयुक्तिः ।
"राज्ञो बलं नहि बलं दुर्गमेव बलं बलम् ।
अप्यल्पबलवान् राजा स्थिरो दुर्गबलाद्भवेत् ॥"
तथा च ।
"एकः शतं योधयति प्राकारस्थो धनुर्धरः ।
शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते ॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत् ॥
यद्दैवसुचितं दुर्गं गिरिनद्यादिसंश्रयम् ।
अकृत्रिममिदं ज्ञेयं दुर्लङ्घमरिभूभुजाम् ॥
प्राकारपरिखारण्यसंश्रयं यद्भवेदिह ।
कृत्रिमं नाम विज्ञेयं लङ्घ्यालङ्घ्यन्तु वैरिणाम् ॥"
अथाकृत्रिमदुर्गयुक्तिः ।
"अत्युच्चविस्तीर्णशिरा दुरारोहः सकाननः ।
सजलाशयसम्भारभोज्यद्रव्यसमाश्रयः ॥
सुखनिःसरणो दुर्गः पर्व्वताख्यो महीभुजाम् ।
नद्यो गभीरविस्तीर्णाश्चतुर्दिक्षु व्यवस्थिताः ॥
तन्मध्ये भूप्रदेशो यो नदीदुर्गः स उच्यते ।
यदत्यचिरकालीनं दुर्लङ्घ्यविपिनादिकम् ।
तन्मध्यरचिता भूमिर्दुर्गत्वेनोपतिष्ठते ।
वनदुर्गमिति ख्यातं यथापूर्व्वं महत्तरम् ॥"
कृत्रिमदुर्गयुक्तिर्यथा,—
"यस्मिन्नाख्ये गिरिर्नास्ति नद्यो वा गहनोदकाः ।
तस्य मध्ये महीपालः कृत्रिमं दुर्गमारभेत् ॥
गजैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः ।
दुर्गत्वेन समादिष्टाः परिखा बहुयादसः ॥
विशालशालं सुधनं बहुकण्टकि सङ्कटम् ।
दुर्गत्वेन समादिष्टं विस्तीर्णं विषमं वनम् ॥
अधोऽधो वध्यमानोऽपि कन्दरोऽल्पजलं स्रवन् ।
दुर्गत्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम् ॥
सर्व्वतः परिखां कृत्वा निबन्धोपरि कन्दरम् ।
तज्जलप्लुतदेशत्वाज्जलदुर्गं तदुच्यते ॥
एषामभावे निम्नस्य भूप्रदेशस्य बन्धना ।
वर्षास्वपगते वारि जलदुर्गं ततो भवेत् ॥
एतयोरपि संमिश्रात् संमिश्रं दुर्गमाचरेत् ।
आश्रित्य कृत्रिमं दुर्गं बलवद्वैरिणो दिशि ॥
अन्यत्र कृत्रिमं दुर्गं कृत्वा नरपतिर्विशेत् ।
रथपतिर्यदा वैरी स्थलदुर्गं तदाचरेत् ॥
गजाश्वनाथश्चेद्वैरी जलदुर्गं तदाचरेत् ।
गिरिदुर्गं नृपः सेवेत् यस्य स्याद्द्विविधो रिपुः ॥
सर्व्वं हि त्रिविधं युद्धं समासादुपादिश्यते ।
प्रतिराजस्य राज्यान्ते प्रकटे गुप्त एव च ॥
राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम् ।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः ॥"
अथ सामान्यतो गुणाः । तथा हि नीति-
शास्त्रम् ।
"सप्रवेशापसरणं दुर्गमुत्तममुच्यते ।
अन्यच्च वन्दिशालेव न तादृगबहुमाश्रयेत् ॥
धनुर्द्दुर्गं महीदुर्गं गिरिदुर्गं तथैव च ।
मनुष्यदुर्गसंसर्गं वनदुर्गञ्च तानि षट् ॥"
अन्ये तु ।
"न दुर्गं दुर्गमित्याहुर्योद्धृदुर्गं प्रकीर्त्तितम् ।
योद्धृशून्यं हि यद्दुर्गं मृतकायसमं हि तत् ॥"
अथान्यच्चापि ।
"यावत्प्रमाणं नगरं हि राज्ञो
ततो भवेदुत्तममध्यमान्त्यम् ।
त्रिंशच्चलच्चाष्टगुणोत्तरेण
त्रिदेशजानां धरणीपतीनाम् ॥"
गर्गस्तु ।
"यदन्यद्द्विविधं दुर्गं प्रोच्यते धरणीभुजाम् ।
तेभ्य एवातिरिच्येत मल्लदुर्गं विशेषतः ॥
अन्येषु दैवाङ्गिनेषु मल्लदुर्गाज्जयेन्नृपः ।
मल्लदुर्गे हि भिन्ने हि न चान्यत् कार्य्यकारकम् ॥
यदेव वैरिदुर्लङ्घ्यं विस्तीर्णं विषमञ्च तत् ।
सप्रवेशापसरणं तद्दुर्गमुत्तमं विदुः ॥"
इति युक्तिकल्पतरुः ॥
तद्वैदिकपर्य्यायः । रणः १ विवाक् २ विखादः ३ नदनुः ४ भरे ५ आक्रन्दे ६ आहवे ७ आजौ ८ पृतनाज्यम् ९ अभीके १० समीके ११ ममसत्यम् १२ नेमधिता १३ सङ्काः १४ समितिः १५ समनम् १६ मीळ्हे १७ पृतनाः १८ स्पृधः १९ मृधः २० पृत्सु २१ समत्सु २२ समर्य्ये २३ समरणे २४ समोहे २५ समिथे २६ सङ्खे २७ सङ्गे २८ संयुगे २९ सङ्गथे ३० सङ्गमे ३१ वृत्रतूर्य्ये ३२ पृक्षे ३३ आणौ ३४ शूरसातौ ३५ वाजसातौ ३६ समनीके ३७ खले ३८ खजे ३९ पौंस्ये ४० महाधने ४१ वाजे ४२ अज्म ४३ सद्म ४४ संयत् ४५ संवतः ४६ । इति षट्चत्वारिंशत् संग्रामनामानि । इति वेदनिघण्टौ २ । १७ ॥

युद्धरङ्गः, पुं, (युद्धे रङ्गो रागोऽस्य ।) कार्त्तिकेयः । इति शब्दचन्द्रिका ॥ (युद्धस्य रङ्गः । युद्धस्थलम् । यथा, महाभारते । ७ । ९५ । १८ ।
"अन्योऽन्यं जघ्निरे क्रुद्धाः युद्धरङ्गगता नराः ॥")

युद्धसारः, पुं, (युद्धस्य सारः ।) घोटकः । इति शब्दचन्द्रिका ॥

युध, य औ ङ युद्धे । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-हनने सक०-अनिट् ।) य ङ, युध्यते । औ, योद्धा । संमुखस्थितयोर्द्वयोः सांग्रामिकरीत्या परस्पराभिभवेच्छा युद्धम् । युध्यते योधः कदाचिदेकस्य सह भावविवक्षायां युध्यते योधः परेण । कदाचिद्धननेऽपि युध्यते चौरं राजा हन्तीत्यर्थः । यो भक्तपिण्डस्य कृते न युध्येदिति अस्माद्भावे क्विपि तमिच्छतीति क्ये तं करोतीति कण्ड्वादित्वात् क्ये वा साध्यम् । इति दुर्गादासः ॥

युधानः, पुं, (युध्यतेऽसौ । युध् + "युधिबुधिदृशः किच्च ।" उणा० २ । ९० । इति आनच् । स च कित् ।) क्षत्त्रियः । इत्युणादिकोषः ॥ (रिपुः । इत्युज्ज्वलदत्तः ॥)

युधिकः, त्रि, योद्धा । युधशब्दात् ष्णिकप्रत्ययेन निष्पन्नः ॥

युधिष्ठिरः, पुं, (युधि संग्रामे स्थिरः । "गवियुधिभ्यां स्थिरः ।" ८ । ३ । ९५ । इति षत्वम् । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इति सप्तम्या अलुक् ।) पाण्डवराजः । स कुन्तीगर्भे धर्म्माज्जातः । तत्पर्य्यायः । अजातशत्रुः २ शल्यारिः ३ धर्म्मपुत्त्रः ४ अजमीढः ५ । इति हेमचन्द्रः । ३ । ३७१ ॥ (मृगशापाभितप्तः पाण्डुर्निरपत्यतया खिन्नचित्तः पुत्त्रार्थमेकदा धर्म्मपत्नीं कुन्तीमुवाच । शुचिस्मिते ! अनपत्यो हि न शुभलोकार्ह इति विचिन्त्य त्वं मदुपकारार्थं केनापि पुत्त्रमुत्पादयेति । एवमुक्ता कुन्ती दृष्ट्वा च पत्युरात्यन्तिकाग्रहं धार्म्मिकपुत्त्रलाभाय दुर्व्वासः प्रदत्तमन्त्रबलेन धर्म्ममाहूय तेन सङ्गता युधिष्ठिरं पुत्त्रमलभत । यदुक्तं महाभारते । १ । १२३ । ५—८ ।
'संयुक्ता सा हि धर्म्मेण योगमूर्त्तिधरेण ह ।
लेभे पुत्त्रं वरारोहा सर्व्वप्राणभृतां हितम् ॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे ।
दिवा मध्यगते सूर्य्ये तिथौ पूर्णेऽतिपूजिते ॥
समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम् ।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी ॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः ॥
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति ।

युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः ॥” अथ गच्छति काले धृतराष्ट्रेण यौवराज्ये स्थापितोऽयं दयादाक्षिण्यादिगुणपरम्परया प्रजासु लब्धकीर्त्तिरनुजैः सह सुखमुवास । अथ जतुगृहदाहानन्तरं ब्रह्मराज्यो द्रुपदराज्यमभिगम्य द्रौपदीं सानुजः परिणीय पुनः स्वराज्यमागतवान् । ततः कृष्णसहायो राजसूययज्ञकरणाय दुर्जयान् जरासन्धप्रभृतिनृपतीन् हत्वा राजसूयेष्टिं समापयामास । ततोऽक्षक्रीडापरवशदुर्य्योधनमतानुसारिणा कैतवपटुना शकुनिना सह द्यूतं कृत्वा पराजितोऽनुजैर्भीमादिभिः पत्न्या द्रौपद्या च सहितो द्वादशवर्षं वनवासाय एकवर्षमज्ञातवासाय च प्रस्थितो द्वैतवनमध्युवास । ततो द्वादशवर्षैर्वनवासजातं महत् कष्टमनुभूय अज्ञातवासार्थं त्रयोदशवर्षं विराटनगरमधिवसन् पुनः कृष्णसहायः स्वराज्यप्राप्त्यर्थं महतीं चेष्टां कृतवान् । कृतेऽपि यत्ने यदा विगुणग्रही दुर्य्योधनो राज्यादिकं न दत्तवान् तदा लब्धसैन्यबलोऽसौ कुरुक्षेत्रे महत् युद्धं कृत्वा विनाश्य च दुर्य्योधनादीन् हस्तिनाधिपतिः सम्राट् बभूव । अथाश्वमेधादिना सुरगणान् परितोष्य षट्त्रिंशद्वर्षं राज्यसुखमनुभूतवान् । ततः प्रभासे विप्रशापात् यदुवंशक्षयमाकर्ण्यातिनिर्व्विण्णः षट्त्रिंशद्वर्षवयस्कं अर्जुनपौत्रं परीक्षितं स्वराज्येऽभिषिच्य उत्तरामार्गेण स्वर्गारोहणं कृतवानिति । तथाच देवीभागवते । २ । ८ । १५-१७ ।

“देहत्यागं हरेः श्रुत्वा यादवानां क्षयं तथा ।
गमनाय मतिं चक्रे राजा हैमाचलं प्रति ॥
षट्त्रिंशद्वार्षिकं राज्ये स्थापयित्वोत्तरासुतम् ।
निर्जगाम वनं राजा द्रौपद्या भ्रातृभिः सह ॥
षट्त्रिंशच्चैव वर्षाणि कृत्वा राज्यं गजाह्वये ।
गत्वा हिमाचले षट् ते जहुः प्राणान्
पृथासुताः ॥”

अस्याख्यानशेषविवरणन्तु महाभारतादौ विस्तरशो द्रष्टव्यम् ॥)

युधीयः, त्रि, योद्धा । युधधातोरीयप्रत्ययेन निष्पन्नः ॥

युध्मः, पुं, (युध्यते इति युध्यते येनेति वा । युध् + “इषियुधीन्धिदसिश्याधूसूभ्यो मक् ।” उणा० १।१४४। इति मक् ।) संग्रामः । धनुः । इति मेदिनी ॥ बाणः । इत्युणादिकोषः ॥ योद्धा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे । १ । ५५ । ५ ।

“स इन्महानि समिथानि मज्मना
कृणोति युध्म ओजसा जनेभ्यः ।”

“युध्मः योद्धा ।” इति तद्भाष्ये सायणः ॥) शेषसंग्रामः । शरभः । इति संक्षिप्तसारोणादिवृत्तिः ॥

युप, य इर् विमोहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) विमोह व्याकुलीकरणम् । य, युप्यति । इर्, अयुपत् अयोपीत् । पुष्पादित्वात् ङ इत्यन्ये । इति दुर्गादासः ॥

युयुक्खुरः, पुं, (युर्निन्दितः युक् योजनमस्य । तादृशः खुरो यस्य ।) क्षुद्रव्याघ्रः । इति शब्दचन्द्रिका ॥

युयुधानः, पुं, (युध्यतेऽसौ । युध + “सुषियुधिभ्यां सन्वच ।” उणा० २ । ९१ । इत्यानच् किल्कार्य्यं सन्वत्कार्य्यञ्च ।) सात्यकिः । यथा,—

“शैनेयस्तु शिनेर्नप्ता युयुधानश्च सात्यकिः ॥”
इति त्रिकाण्डशेषः ॥

इन्द्रः । क्षत्रियः । इति संक्षिप्तसारोणादिवृत्तिः ॥ त्रि, योद्धा च ॥

युवकः, पुं, युवा । युवन्शब्दात् कन्प्रत्ययेन निष्पन्नः ॥

युवगण्डः, पुं, (यूनां गण्ड आश्रयत्वेनास्त्यस्य । युवगण्ड + अर्शआद्यच् ।) यूनो गण्डस्थव्रणविशेषः । मयस्फोड़ा इति भाषा । यथा,—

“युवगण्डो यवगण्डः स्यात् मयस्फोटाह्वये द्वयम् ।”
इति शब्दरत्नावली ॥

युवजानिः, पुं, (युवतिर्जाया यस्येति । “जायाया निङ् ।” ५।४।१३४। इति निङ् ।) युवतीपतिः । यथा,

“युवजानिर्धनुष्पाणिर्भूमिष्ठः खविचारिणः ।
रामो यज्वद्विषो हन्ति कालकल्पशिलीमुखः ॥”
इति भट्टिः । ५ । १२ ॥

युवतिः, स्त्री, (युवन् + “यूनस्तिः ।” ४ । १ । ७७। इति तिः ।) प्राप्तयौवना ॥ (यथा, अभिज्ञानशाकुन्तले ४ अङ्के ।

“ शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥”)

युवती, स्त्री, (यु + शतृ + ङीप् । इति सिद्धान्तकौमुदी । ४ । १ । ७७ । कृदिति ङीष् । इत्युज्ज्वलदत्तः । १ । १५६ ।) प्राप्तयौवना । यथा, बृहत्संहितायाम् । ७५ । ४ ।

“यो यं विचिन्तयति याति स तन्मयत्वं
यस्मादतः सुभगयेव गता युवत्यः ॥”)

तत्पर्य्यायः । युवतिः २ यूनी ३ तरुणी ४ तलुनी ५ दिक्करी ६ धनिका ७ धनीका ८ मध्यमा ९ दृष्टरजाः १० मध्यमिका ११ । इति शब्दरत्नावली ॥ ईश्वरी १२ वर्ण्या १३ । इति हेमचन्द्रः । ३ । ५११ ॥ वयस्था १४ । इति राजनिर्घण्टः ॥ तस्या लक्षणादि यथा,—

“आषोड़शाद्भवेद्बाला तरुणी त्रिंशता मता ।
पञ्चपञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम् ॥”
इति कालिदासः ॥

“बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥”

योग्या युवती । इति राजवल्लभः ॥ स्त्रीसामान्यम् । यथा । प्रमदा चेति विज्ञेया युवतिश्च तथा स्मृतेति भागुरिः । प्राप्तयौवना युवतिरिति वात्स्यायनः । इत्यमरटीकायां भरतः । २ । ६ । ८ ॥ * ॥ हरिद्रा । इति शब्दचन्द्रिका ॥

युवतीष्टा, स्त्री, (युवतीनामिष्टा ।) स्वर्णयूथिका । इति राजनिर्घण्टः ॥

युवनाश्वः, पुं, सूर्य्यवंशीयराजविशेषः । स च गौरीगर्भे प्रसेनजितो जातः मान्धातृपिता च । यथा,—

“तस्याः प्रसेनजिच्चक्रे लेभे भार्य्या पतिव्रता ।
गौरी नामाभिशप्ता सा नदीभूता तरङ्गिणी ।
तस्यां प्रसेनजिच्चक्रे युवनाश्वं महीपतिम् ॥
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥”
इति वह्निपुराणे सगरोपाख्याननामाध्यायः ॥

युवनाश्वजः, पुं, (युवनाश्वात् जातः । जन् + डः ।) मान्धातृराजः । इति हेमचन्द्रः । ३ । ३६४ ।

युवराजः, पुं, भाविबुद्धविशेषः । तत्पर्य्यायः । मैत्रेयः २ अजितः ३ । इति त्रिकाण्डशेषः ॥ राजपुत्त्रः । तत्पर्य्यायः । कुमारः २ भर्त्तृदारकः ३ । इत्यमरः । १ । ७ । १२ ॥ युवा बालो राजा यूनां वा राजा युवराजः । सख्यहोराश्च इति षः । कुमारयति कुमारः । स्यात् कुमारः कुमाल तु क केलौ अन् । भर्त्तृदारकः पुत्त्रः भर्त्ता चासौ दारकश्चेति वा भर्त्तृदारकः । दारको भेदके शिशाविति निगमः । इति भरतः ॥ (यथा, महाभारते । १ । ७३ । १६ ।

“मयि जायेत यः पुत्त्रः स भवेत्त्वदनन्तरम् ।
युवराजो महाराज ! सत्यमेतद्ब्रवीमि ते ॥”)

युवा, [न्] त्रि, (यौतीति । यु + “कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः ।” उणा० १ । १५६ । इति कनिन् ।) तरुणः । (यथा, मनौ । २ । १२० ।

“ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर
आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥”)

श्रेष्ठः । निसर्गबलशाली । इति मेदिनी । ने,११३ ॥

युवा, [न्] पुं, (यौतीति । यु + कनिन् ।) यौवनावस्थाविशिष्टः । षोड़शवर्षात् त्रिंशद्वर्षपर्य्यन्तवयस्कः । इति केचित् ॥ षोड़शवर्षात् सप्ततिवर्षपर्य्यन्तवयस्कः । यथा,—

“आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम् ॥”
इति भरतधृतस्मृतिः ॥

(“आषोड़शाद्भवेद्बालः पञ्चत्रिंशत् युवा नरः ।”
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥)

तत्पर्य्यायः । वयस्थः २ तरुणः ३ । इत्यमरः । २।६।४२ ॥ वयःस्थः ४ तलुनः ५ । इति शब्दरत्नावली ॥ गर्भरूपः ६ पेटकः ७ । इति जटाधरः ॥

युष, भजने । इति कविकल्पद्रुमः ॥ सौत्रधातुरयम् । (पर०-सक०-सेट् ।) योषित् युष्मद् । इति दुर्गादासः ॥

युष्मद्, (योषति भजतीति । युष् + “युष्यसिभ्यां मदिक् ।” उणा० १ । १३८ । इति मदिक् ।)

सर्व्वनामयुष्मच्छब्दः । तस्य त्रिषु लिङ्गेषु समानि रूपाणि । (एकविंशतिविभक्तिषु तस्य रूपाणि ।) यथा । त्वम् १ युवाम् २ यूयम् ३ । त्वाम् ४ युवाम् ५ युष्मान् ६ । त्वया ७ युवाभ्याम् ८ युष्माभिः ९ । तुभ्यम् १० युवाभ्याम् ११ युष्मभ्यम् १२ । त्वत् १३ युवाभ्याम् १४ युष्मत् १५ । तव १६ युवयोः १७ युष्माकम् १८ । त्वयि १९ युवयोः २० युष्मासु २१ । (द्वितीयाचतुर्थीषष्ठीनामेकवचनद्विवचनबहुवचनविभक्तिषु तस्य रूपान्तराणि यथा । द्वितीयैकवचने त्वा । चतुर्थीषष्ठ्योरेकवचने ते । आसां द्विवचने वाम् । आसां बहुवचने वः । श्लोकपादे वाक्यादौ च-वा-हा-ह-एव-शब्दयोगे अदर्शनार्थकदृशधातुयोगे च न स्युः ।) इति व्याकरणम् ॥ यथा,—

"युष्मत्तत्ते खञ्जनगञ्जनाक्षि !
शिरो मदीयं यदि याति यातु ।
नीतानि नाशं जनकात्मजार्थं
दशाननेनापि दशाननानि ॥"
इति सुक्तिवादे गदाधरः ॥)

यूः, स्त्री, यूषः । इति हेमचन्द्रः । ३ । ६८ ॥

यूकः, पुं, (यौतीति । यु + "अजियुधूनीभ्यो दीर्घश्च ।" उणा० ३ । ४७ । इति कन् दीर्घश्च ।) मत्कुणः । इति जटाधरः ॥ (यथा, सुश्रुते सूत्रस्थाने ३१ अध्याये ।
"यूका ललाटमायान्ति बलिं नाश्नन्ति वायसाः ।
येषां वापि रतिर्नास्ति यातारस्ते यमालयम् ॥")

यूका, स्त्री, (यूक + स्त्रियां टाप् ।) मत्कुणः । यूषी इति उकुण इति च भाषा । तत्पर्य्यायः । केशकीटः २ स्वेदजः ३ षट्पदः ४ । इति राजनिर्घण्टः ॥ पालौ ५ बालकृमिः ६ । इति जटाधरः ॥ (यथा, मनौ । १ । ४५ ।
"स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम् ।
ऊष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम् ॥"
क्रिमिविशेषः । तद्यथा,—
"नामतो विंशतिविधा वाह्यास्तत्र मलोद्भवाः ।
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ॥
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः ।
द्विधा ते कोठपिडकाः कण्डूगण्डान् प्रकुर्व्वते ॥"
इति माधवकरसंगृहीतरुग्विनिश्चये क्रिम्यधिकारे ॥
"क्रिमयो द्विविधाः प्रोक्ता वाह्याभ्यन्तरसम्भवाः ।
वाह्या यूकाः प्रविहाः स्युः किचुलूकास्तथापराः ॥
सप्तधा हि भवेद्वाह्याः षड्धा चान्तःसमुद्भवाः ।
तेषां वक्ष्यामि संभूतिं वाह्यानामाभ्यन्तरे शृणु ॥
रूक्षादति मलात् स्वेदाच्चिन्तया शोषणादपि ।
कफधातुसमुद्भूतास्तीक्ष्णा यूका भवन्ति हि ॥
यूकाः कृष्णाः पराः श्वेतास्तृतीयाश्चर्म्मसंस्थिताः ।
सूक्ष्मातिविकटा रूक्षाश्चर्म्माभाश्चर्म्मयूकिकाः ॥
चतुर्थी विन्दुकी नाम वर्त्तुला मूत्रसम्भवा ।
मत्कुणाद्याश्च पञ्चम्यो वाह्योपद्रवकारिणः ॥
यूका मस्तकसंस्थाने श्वेता वस्त्रनिवासिनी ।
चर्म्मयूका नेत्रचर्म्मे सूक्ष्मा रोमणि यष्टिका ॥"
इति हारीते चिकित्सितस्थाने पञ्चमेऽध्याये ॥
यूकानाशकौषधं यथा, कामरत्ने ।
"विडङ्गगन्धोत्पलकल्कयोगात्
गोमूत्रसिद्धं कटुतैलमेतत् ।
अभ्यङ्गयोगेन शिरोरुहाणां
यूकादिलीक्षाप्रचयं निहन्ति ॥
गोमूत्रेण बलामूललेपो यूकानिवारणः ।
पारदं मर्द्दयेन्निष्कद्वयं धुस्तूरजद्रवैः ॥
नागवल्लीद्रवैश्चाथ वस्त्रखण्डं प्रलेपयेत् ।
तद्वस्त्रं वेष्टयेन्मौलौ धार्य्यं यामत्रयं तथा ॥
यूका पतन्ति निःशेषान्मस्तकान्नात्र संशयः ।
द्विनिशानवनीतेन लेपान्मौलौ प्रकण्डुनुत् ॥
नीलोत्पलं तिलं यष्टि सर्षपं नागकेशरम् ।
धात्रीफलं समं पिष्ट्वा लेपो यूकाविनाशनः ॥
निशागन्धकगोमूत्रं विडङ्गकटुतैलकम् ।
पारदेन समं मर्द्द्य लेपो यूकानिवारणः ॥"
इति केशस्य यूकादिनिवारणम् ॥
परिमाणभेदः । यथा, मार्कण्डेये । ४९ । ३७ ।
"परमाणुः परं सूक्ष्मं त्रसरेणुर्म्महीरजः ।
वालाग्रञ्चैव लिक्षा च यूका चाथ यवोदरम् ॥")

यूतिः, स्त्री, (यु + "ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च ।" ३।३।९७ । इति क्तिन् निपातनाद्दीर्घत्वञ्च ।) मिश्रणम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टिकाव्ये । ७ । ६९ ।
"करोमि वो वह्नियूतीन् पिबध्वं पाणिभिर्द्दंशः ॥")

यूथं, क्ली, (यु मिश्रणे + "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक्प्रत्ययेन निपातितम् ।) सजातीयसमूहः । इत्यमरः ।२।५।४१॥ (यथा, रामायणे । २ । ५४ । ४१ ।
"तत्र कुञ्जरयूथानि मृगयूथानि चैव हि ।
विचरन्ति वनान्तेषु तानि द्रक्ष्यसि राघव ! ॥")

यूथनाथः, पुं, (यूथस्य नाथः ।) वन्यकरिणां समूहस्य ईश्वरः । तत्पर्य्यायः । यूथपः २ । इत्यमरः । २ । ८ । ३५ ॥

यूथपः, पुं, (यूथं पातीति । पा + कः ।) अरण्यहस्तिनां प्रधानम् । इति शब्दरत्नावली ॥ (यथा, श्रीमद्भागवते । ९ । १५ । २८ ।
"घोरमादाय परशुं सतूणं चर्म्मकार्म्मुकम् ।
अन्वधावत दुर्म्मर्षो मृगेन्द्र इव यूथपम् ॥"
प्रधानमात्रे च । यथा, महाभारते । १।११८।५ ।
"राजा पाण्डुर्म्महारण्ये मृगव्यालनिषेविते ।
चरन् मैथुनधर्म्मस्थं ददर्श मृगयूथपम् ॥")

यूथभ्रष्टः, पुं, (यूथाद्भ्रष्टश्चलितः ।) यूथात् पलायितहस्ती । इति शब्दमाला ॥ (यूथभ्रष्टमात्रे, त्रि । यथा, श्रीमद्भागवते । ४ । २८ । ४६ ।
"यदा नोपलभेताङ्घ्रावूष्माणं पत्युरर्च्चती ।
आसीत् संविग्नहृदया यूथभ्रष्टा मृगी यथा ॥")

यूथिका, स्त्री, (यूथं पुष्पवृन्दमस्या अस्तीति । यूथ + ठन् । टाप् ।) पाठा । इति राजनिर्घण्टः ॥ अम्बानकः । इति मेदिनी । के, १४४ ॥ पुष्पविशेषः । युँइ फुल इति भाषा ॥ (यथा, मेघदूते । १ । २८ ।
"विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्चन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि ॥")
तत्पर्य्यायः । गणिका २ अम्बष्ठा ३ मागधी ४ । सा पीता चेत् हेमपुष्पिका । इत्यमरः । २ । ४ । ७१ ॥ यूथी ५ प्रहसन्ती ६ । इति त्रिकाण्डशेषः ॥ शिखण्डिनी ७ वासन्ती ८ । इति रत्नमाला ॥ बालपुष्पिका ९ बहुगन्धा १० भृङ्गानन्दा ११ । अस्या गुणाः । स्वादुत्वम् । शिशिरत्वम् । शर्करार्त्तिपित्तदाहतृष्णानानात्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"यूथीयुगं हिमं तिक्तं कटुपाकं सरं लघु ।
मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम् ।
व्रणास्रमुखदन्ताक्षिशिरोरोगविषापहम् ॥"
इति भावप्रकाशः ॥
(तथा च सुश्रुते उत्तरतन्त्रे ४५ अध्यायः ।
"पटोलशेलूसुनिषण्णयूथिका
वटातिमुक्ताङ्कुरनिष्कुचारणम् ॥")

यूथी, स्त्री, (यूथ + अर्श आद्यच् । ततो ङीष् ।) यूथिका । इति शब्दरत्नावली ॥

यूथीनः, पुं, (यूथं पातीति । यूथ + खः ।) यूथपः । इति शब्दचन्द्रिका ॥

यूनिः, स्त्री, योगम् । मिश्रणम् । इति सिद्धान्तकौमुदी ॥

यूनी, स्त्री, (युवन् + ङीष् । "श्वयुवमघोनामतद्धिते ।" ६ । ४ । १३३ । इति वस्य उत्वम् ।) युवती । इति शब्दरत्नावली ॥ (यथा,—
"यूनी काममयी दुनोति हृदयं वैधव्यभावाद्वधूः ॥"
इति कलापे श्वयुवमघोनामित्यत्र कुलचन्द्रः ॥)

यूपः, पुं क्ली, (यौति मिश्रयतीति । यूयते युज्यतेऽस्मिन्निति ऋग्भाष्ये सायणः । १ । ५१ । १४ । यद्वा, यु + "कुयुभ्यां च ।" उणा० ३ । २७ । इति पः दीर्घत्वञ्च ।) यज्ञे पशुबन्धनकाष्ठम् । इत्यमरः । २ । ४ । ४१ ॥ तस्य परिमाणादिर्यथा । स्मृतौ ।
"चतुर्हस्तो भवेद्यूपो यज्ञदण्डसमुद्भवः ।
वर्त्तुलः शोभनः स्थूलः कर्त्तव्यो दृढमौलिकः ॥"
भविष्ये ।
"विल्वस्य वकुलस्येव कलौ यूपः प्रशस्यते ।"
इति सामवेदिवृषोत्सर्गतत्त्वम् ॥

यूपः, पुं, (यु + पः । दीर्घश्च ।) जयस्तम्भः । यागस्तम्भः । इत्युणादिकोषः ॥ (यथा, रघुवंशे । ६ । ३८ ।
"संग्रामनिर्व्विष्टसहस्रबाहु-
रष्टादशद्वीपनिखातयूपः ।
अनन्यसाधारणराजशब्दो
बभूव योगी किल कार्त्तवीर्य्यः ॥")

यूपकटकः, पुं, (यूपस्य कटक इव ।) यज्ञसमाप्ति-सूचकं पशुबन्धार्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः तस्य शिरसि वलयाकृतिर्हैमकाष्ठादिर्वा यः काष्ठविकारः सः । यूपमूले निहितलौहवलय इति केचित् । इति भरतः ॥ तत्पर्य्यायः । चषालः २ । इत्यमरः ।२।७।१८॥

यूपकर्णः, पुं, (यूपस्य कर्ण इव ।) यूपैकदेशः । तत्पर्य्यायः । घृतावनिः २ । इति हेमचन्द्रः । ३ । ४९८ ॥

यूपद्रुः, पुं, (यूपाय द्रुः ।) खदिरवृक्षः । इति त्रिकाण्डशेषः ॥

यूपद्रुमः, पुं, (यूपाय द्रुमः ।) खदिरवृक्षः । इति शब्दरत्नावली ॥ रक्तखदिरः । इति राजनिर्घण्टः ॥

यूपलक्षः पुं, (यूपो लक्ष्य उपवेशनार्थमस्य ।) पक्षी । इति शब्दमाला ॥

यूपाग्रं, क्ली, (यूपस्याग्रम् ।) यूपस्याग्रभागः । तत्पर्य्यायः । तर्म्म २ । इत्यमरः । २ । ७ । १९ ॥

यूष, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) षकस्वरी । यूषति । इति दुर्गादासः ॥

यूषं, पुं, क्ली, (यूष् + कः ।) मुद्गादिक्वाथरसः । इत्यमरः । ३ । ५ । ३५ ॥ यूषोऽन्तःस्थादिः । चवर्गादिश्चेति मुकुटः । इति भरतः ॥ * ॥

अथ मुद्गयूषगुणाः ।
"मुद्गयूषोऽमिदो हृद्यः शुद्धानां व्रणिनामपि ।
पथ्यो बलाशपित्तघ्नो ज्वरहा च कृताकृतः ॥
अस्नेहलवणं सर्व्वमकृतं कटुकैर्विना ।
विज्ञेयं लवणस्नेहकटुकैः संस्कृतं कृतम् ॥
स तु दाड़िममृद्वीकायुक्तः स्याद्रागषाड़वः ।
रुचिकृल्लघुपाकश्च दोषाणामविरोधकृत् ॥"*॥

मकुष्ठयूषगुणाः ।
"मकुष्ठयूषः संग्राही हृद्यो स्वादुः प्रमेहजित् ।
पित्तश्लेष्मज्वरहरस्तथातीसारनाशनः ॥"*॥

कुलत्थयूषगुणाः ।
"कुलत्थयूषोऽनिलहा शर्कराश्मरिनाशनः ।
तूणीप्रतूणीकासार्शोगुल्ममेदःकफापहः ॥"*॥

अनेन सह माषयूषगुणाः ।
"अथ माषो गुरुर्भेदी वातघ्नो दीपनो मतः ॥"

अथ खड़यूषः ।
"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः ।
सुपक्वं खड़यूषोऽयमयं काम्बलिकोऽपरः ॥"*॥

खड़काम्बलिकयूषगुणाः ।
"दध्यम्लो लवणस्नेहतिलमाषविपाचितः ।
खड़काम्बलिकौ यूषौ ग्राहिवातकफापहौ ॥"
इति राजवल्लभः ॥ * ॥

अपि च । अथ यूषस्य विधिर्गुणाश्च ।
"अष्टादशगुणे नीरे शमीधान्यकृतो रसः ।
विरलाग्ने घनः किञ्चित् पेयातो यूष उच्यते ।
उक्तः स एव निर्यूहो रुचिकृच्च विशेषतः ॥"

यूषस्य प्रकारान्तरमाह ।
"कल्कद्वयपलं शुण्ठीं पिप्पलीचार्द्धकार्षिकीम् ।
वारिप्रस्थेन विपचेत्तद्रवो यूष उच्यते ॥"

अयमर्थः । यूषान्नं पलमितं तत् कल्कीकृतं शुण्ठी पिप्पली च समुदिताऽर्द्धकर्षमिता कल्कीकृता उभयमपि प्रस्थमितेन वारिणा पचेत् । तद्रवो यूषः ।
"यूषो बल्यो लघुः पाके रुच्यः कण्ठ्यः कफापहः ॥"

अथ मुद्गयूषविधिः । वृन्दटीकायां तन्त्रान्तरे ।
"मुद्गानां द्विपलं तोये प्रतमर्द्धाढ़कोन्मिते ।
पादस्थं मर्द्दितं पूतं दाड़िमस्य पलेन तत् ॥
युक्तं सैन्धवविश्वाह्वधान्यकैः पादकार्षिकैः ।
कणाजीरकयोश्चूर्णाच्छाणेकेनावचूर्णितम् ।
संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्महरो मतः ॥"*॥

अथ मुद्गयूषगुणाः ।
"मुद्गानामुत्तमो यूषो दीपनः शीतलो लघुः ।
शोथोर्द्ध्वगुरुग्दाहकफपित्तज्वरास्रहृत् ॥"*॥

अथ मुद्गामलकयूषगुणाः ।
"मुद्गामलकयूषस्तु भेदी पित्तानिलापहः ।
तृड्दाहशमनः शीतो मूर्च्छाश्रममदापहः ॥"

मकुष्ठयूषगुणाः पूर्व्ववत् । इति भावप्रकाशः ॥

(तथा च ।
"कुलत्थयूषो मधुरः कषायः
कफं सपित्तं विनिहन्ति शीघ्रम् ।
मेहाश्मरी पाण्डुमेदहन्ता
सन्दीपनो मूत्रविशोधनश्च ॥
आढकयूषं मधुरञ्च शीतं
विशेषतो वातनिवारणञ्च ।
श्लेष्मापहं पित्तहरं नराणां
कृमिं निहन्यादपि दारुणञ्च ॥
शीतलं मधुरं मौद्गं यूषं पित्तविकारजित् ।
वातदोषहरं प्रोक्तं ज्वराणां शमनं परम् ॥
माकुष्ठो ग्राहको यूषो रूक्षो स्वादुः प्रमेहजित् ।
पित्तश्लेष्मज्वरघ्नः स्यात्तथातीसारनाशनः ॥
कषायं कटुकञ्चोष्णं वातघ्नं पुंस्त्वदोषकृत् ।
रक्तपित्तं निहन्त्याशु चणानां यूषमुच्यते ॥
घनं सवातं कफकृन्माषयूषं स पित्तकृत् ।
अन्नं पर्य्युषितं तच्च शस्यते तैलपाचने ॥
अन्यानि चैव शस्तानि कौलत्थान्युषितानि च ।
मकुष्ठास्थिपुठा वल्याः कलायाद्याश्च वर्ज्जिताः ॥"
इति यूषविधिः ॥ * ॥
इति हारिते प्रथमस्थाने नवमेऽध्याये ।
"ज्ञेयः पथ्यतमश्चापि मुद्गयूषः कृताकृतः ।
स तु दाड़िममृद्वीकायुक्तः स्याद्रागषाड़वः ॥"
"पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ ।
पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ ॥
श्वासकासप्रतिश्याय प्रसेकारोचकज्वरान् ।
हन्ति मूलकयूषस्तु कफमेदोगलामयान् ॥
कुलत्थयूषोऽनिलहा श्वासपीनसनाशनः ।
तूणी प्रतूणी कासार्शोगुल्मोदावर्त्तनाशनः ॥
दाड़िमामलकैर्यूषो हृद्यः संशमनो लघुः ।
प्राणाग्निजननो मूर्च्छामेदोघ्नः पित्तवातजित् ॥
मुद्गामलकयूषस्तु ग्राही पित्तकफे हितः ।
यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥)

यूषः, पुं. (यूषतीति । यूष् + कः ।) ब्रह्मदारुवृक्षः । इति शब्दरत्नावली ॥

येष, ऋ ङ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) अन्तःस्थादिः । ऋ, अयियेषत् । ङ, येषते यियेषे । इति दुर्गादासः ॥

योक्ता, [ऋ] त्रि, योगकर्त्ता । इति युजधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नम् ॥ (यथा, वाजसनेयसंहितायाम् । ३० । १४ ।
"मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारं शोकायाभिसर्त्तारम् ॥"
"योक्तारं योगकर्त्तारम् ।" इति तद्भाष्ये ॥)

योक्त्रं, क्ली, (युज्यतेऽनेनेति । युज् + "दाम्नीशसयुयुजस्तुतुदेति ।" ३ । २ । १८२ । इति ष्ट्रन् ।) युगेन सह ईशादण्ड आवध्यते अनेन तत् । योत् दड़ि इति भाषा । तत्पर्य्यायः । आबन्धः २ योत्रम् ३ । इत्यमरः । २ । ९ । १३ ॥ (यथा, ऋग्वेदे । ५ । ३३ । २ ।
"स त्वं न इन्द्र धियमानो अर्कैर्हरीणां वृषन् योक्त्रमश्रेः ॥"
"योक्त्रं नियोजनरज्जुं अश्रः आश्रयसि ।" इति तद्भाष्ये सायणः ॥ मन्थनरज्जुः । यथा, रामायणे । १ । ४५ । १८ ।
"ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिम् ।
मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः ॥")

योगः, पुं, (युज समाधौ + भावादौ यथायथं घञ् ।) सन्नहनः । उपायः । ध्यानम् । सङ्गतिः । युक्तिः । इत्यमरः । ३ । ३ । २२ ॥ (प्रेम । यथा, देवीभागवते । ३ । १५ । १३ ।
"स्वीयान् गुणान् प्रविततान् प्रवदंस्तदासौ तां प्रेमदामनुचकार च योगयुक्तः ॥"
"योगयुक्तः प्रेमयुक्तः ।" इति तट्टीकायां नीलकण्ठः ॥ छलम् । इति मनुः । ८ । १६५ ॥ अस्य प्रमाणं योगदानशब्दे द्रष्टव्यम् ॥) अपूर्व्वार्थसम्प्राप्तिः । वपुःस्थैर्य्यम् । प्रयोगः । विष्कम्भादिः । भेषजम् । विश्रब्धघातकः । द्रव्यम् । कार्म्मणम् । इति मेदिनी ॥ नैयायिकः । धनम् । इति हेमचन्द्रः ॥ चारः । सूत्रम् । इति त्रिकाण्डशेषः ॥ * ॥ (येन वाक्यं युज्यते स योगः । यथा,—
"तैलं पिबेच्चामृतवल्लिनिम्ब-
हिंस्राभयावृक्षकपिप्पलीभिः ।
सिद्धं बलाभ्याञ्च सदेवदारु
हिताय नित्यं गलगण्डरोगी ॥
सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तमेवं दूरस्थानामपि पदानामेकीकरणं योगः ।" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥) अथ सप्तविंशतियोगानां नामानि । यथा,—

"विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभन-
स्तथा।
अतिगण्डः सुकर्म्मा च धृतिः शूलस्तथैव च ॥
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ।
वज्रश्चासृक् व्यतीपातो वरीयान् परिघः शिवः।
सिद्धः साध्यः शुभः शुक्लो ब्रह्मैन्द्रो वैधृतिस्तथा॥"
तेषां वर्ज्जनीयभागा यथा,—
"परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ।
त्यजादौ पञ्च विष्कम्भे सप्त शूले च नाड़िकाः ॥
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः ।
वैधृतिव्यतिपातौ च समस्तौ परिवर्ज्जयेत् ॥
शेषा यथार्थनामानो योगाः कार्य्येषु शोभनाः ॥"
अथ विष्कम्भादियोगानयनक्रमः ।
"रवीन्दुयोगलिप्ताभ्यो योगा भभोगभाजिताः ।
गतगम्याश्च षष्टिघ्ना नाड्यो भुक्त्यन्तरोद्धृताः ॥"
इति सूर्य्यसिद्धान्तः ॥
विष्कम्भादिसप्तविंशतिसङ्ख्यककालविशेषः । तत्-
साधनमाह ।
"ग्रहकलाः सरवीन्दुकलाहृताः
खखगजैश्च भयोगमितौ क्रमात् ।
अथ हृता खगतैष्यविलिप्तिका
निजजवेन गतागत नाड़िकाः ॥"
इति भास्करीयसिद्धान्तशिरोमणौगणिता-
ध्यायः ॥ * ॥ यस्य ग्रहस्य नक्षत्रं ज्ञातु-
मिष्यते तस्य कलाः कार्य्याः । तथा चन्द्रार्कयो-
र्योगस्य कलाः कार्य्याः । उभयत्र शताष्टकेन
हृते प्रथमस्थाने गतभानि । द्वितीयस्थाने गत-
योगाः । अथ यान्यवशिष्टानि गतानि खख-
हारच्युतानि गम्यानि स्युः तेषां गतानां सम्ब-
न्धिन्यो विकलाः खखगतिभिर्भाज्याः । यल्लभ्यते
ता गतनाड़िका भवन्ति । यद्गम्यानां विकला
भक्तास्तदेष्या घटिका भवन्ति । इति मिता-
क्षरानाम्नी तत्कृतटीका ॥ आनन्दयोगो
यथा । भीमपराक्रमे ।
"अश्विनी सह सूर्य्येण सोमे मृगशिरस्तथा ।
अश्लेषा भौमवारेण बुधे हस्तः प्रकीर्त्तितः ॥
अनुराधा गुरोर्वारे विश्वदेवस्तु भार्गवे ।
वारुणं शनिसंयुक्तमानन्दोऽयं प्रकीर्त्तितः ॥"
योगवरा यथा । दीपिकायाम् ।
"भूमिपुत्त्रार्कयोरह्नि नन्दा मरु-
द्वारुणार्द्रान्त्यचित्राहिमूलाश्विभिः ।
भार्गवेन्द्वाङ्कयोरह्नि भद्रा
भवेत् फल्गुयुग्मोडुसंयुता ॥
सोमपुत्त्रस्य वारे जया स्यान्मृगो-
पेन्द्रगुर्व्विन्द्रयाम्याभिजिद्वाजिभिः ।
गोष्पतेरह्नि रिक्ता च युक्ता यदा
विश्वशक्राग्निशुक्पित्रादित्यम्बुभिः ॥
सूर्य्यसुतस्य दिने यदि पूर्णा
ब्रह्मदिनाधिपतिद्रविणैः स्यात् ।
योगवरास्त्रिभिरेव समेताः
सर्व्वसमीहितसिद्धिनियुक्ताः ॥"
अयमेव चान्तयोगः ॥*॥ अथामृतयोगः ।

"ध्रुवगुरुकरमूलापौष्णभान्यर्कवारे
हरियुगविधियुग्मे फल्गुनी भाद्रयुग्मे ।
दिवसकरतुरङ्गौ शर्व्वरीनाथवारे
गुरुयुगनलवातोपान्त्यपौष्णानि कौजे
दहनविधिशताख्यामैत्रभं सौम्यवारे
मरुददितिभपुष्यामैत्रभं जीववारे ।
भगयुगजयुगाश्वो विष्णुमैत्रे सिताहे
श्वसनकमलयोनी सौरिवारेऽमृतानि ॥
यदि विष्टिव्यतीपातौ दिनं चाप्यशुभं भवेत् ।
हन्यतेऽमृतयोगेन भास्करेण तमो यथा॥
सर्व्वदेशाविशेषेण फलं स्याच्छुभयोगजम् ॥
अमृतं सिद्धियोगश्च यद्येकस्मिन् दिने भवेत् ।
तद्दिनन्तु भवेद्दुष्टं मधुसर्पिर्यथा विषम् ॥"*॥
अथ सिद्धिदग्धपापयमघण्टयोगाः । यथा,—
"नन्दाद्याः सिद्धियोगा भृगुजबुधकुजार्कौष्ण्य-
वारैः प्रशस्ताः ।
सूर्य्यशाशाग्निषड्द्वरसुनिमितितिथयोऽर्कादि-
वारैः प्रदग्धाः ॥"
राजमार्त्तण्डे ।
"मासा वह्न्यादिशो रामा षट्पञ्चसुनयस्तथा ।
दहन्ति तिथयः सप्त रव्यादिसप्तभिर्ग्रहैः ॥".
अपि च ।
"द्वादश्यर्कयुता भवेदशुभदा सोमेन चैकादशी
भौमे चापि युता तथैव दशमी नेष्टा तृतीया
बुधे ।
षष्ठी नेष्टफलप्रदा सुरगुरौ शुक्रे द्वितीया तथा ।
सर्व्वारम्भविनाशविघ्नजननी सूर्य्यात्मजे सप्तमी ॥
पापोऽर्काहे विशाखात्रययमसदुपस्याह्नि
चित्राचतुष्कं
तोयं विश्वाभिजिद्गं त्वथ कुजदिवसे स्वत्रयं
विश्वरुद्रौ ।
शाहे मूला विशाखा यमधनतुरगान्त्यानि जैवे-
ऽह्नि पित्र्यं
रोहिण्यार्द्रा यमेन्दूशतभमथ भृगोरह्नि पुष्या-
ग्नयेन्द्रौ ॥
सौराहे हस्तयुग्मार्य्यमयमजयुक्पौष्णपुष्या-
धनानि
यत्नोऽखण्डसंयुक्ते स्वगृहपतिदिने सौम्यवारे
ऽर्य्यमापि ॥"*॥
अथोत्पाटादियोगाः ।
"रव्यादिदिवसैर्युक्ता विशाखादिचतुश्चतुः ।
उत्पाटा मृत्यवः काणा अमृतानि यथा-
क्रमम् ॥"
अथ करकचायोगः ।
"वाजिचित्रोत्तराषाढ़ा मूलपाशीष्ण्यभान्तकाः ।
सूर्य्यादिवारसंयुक्ता योगाः करकचाः स्मृताः॥"
अथ मृत्युयोगः ।
"आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः ।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा ॥"
अथ यमघण्टादीनां वर्ज्यकालनिर्णयः ।
"यमघण्टे त्यजेदष्टौ मृत्यौ द्वादश नाड़िकाः ।
अन्येषां पापयोगानां मध्याह्नात् परतः शुभम् ॥"

अथ शुभचन्द्रेण करकचादिशान्तिः ।
"अयोगेषु च सर्व्वेषु पूर्व्वयामं परित्यजेत् ।
अयोगाश्च विनश्यन्ति चन्द्रशुद्धिहता इमे ॥
करकचा मृत्युयोगाश्च दिनं दग्धं तथा परे ।
शुभे चन्द्रे प्रणश्यन्ति तृषा वज्रहता इव ॥"*॥
विरुद्धयोगानां देशविशेषे प्रतिप्रसवो यथा ।
श्रीपतिः ।
"विरुद्धसंज्ञास्तिथिवारयोगा
नक्षत्रवारप्रभवाश्च ये वै ।
हूणाङ्गवङ्गेषु खशेषु वर्ज्याः
शेषेषु देशेषु न ते विरुद्धाः ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अथ क्रियायोगः । सुनय ऊचुः ।
"दुःखाम्बुमग्नाः पुरुषाः प्राप्य ब्रह्म महालयम् ।
उत्तरेयुर्भवाम्भोधिं तथा त्वमनुचिन्तय ॥
इत्युक्तः स तदा प्राह क्रियायोगं महात्मनाम् ।
नराणामुपकाराय दुःखविच्छित्तिकारकम् ॥
वह्निरुवाच ।
आराधयध्वं विश्वेशं जगतां कारणं परम् ।
केशवन्तमिरापेक्षा एवमुक्तं प्रवास्यथ ॥
इष्ट्या पूजानमस्कारैः शुश्रूषाभिरहर्निशम् ।
व्रतोपवासैर्विविधैर्ब्राह्मणानाञ्च तर्पणैः ॥
तैस्तैश्चात्महितैः कामैर्यैः स्वचेतसि सुस्थिराः ।
भवेयुरपरिच्छेदादाराधयत केशवम् ॥
तन्निष्ठास्तद्गतधियस्तत्कर्म्माणस्तदाश्रयाः ।
तद्दृष्टयस्तन्मनसः सर्व्वस्मिन् स इति स्थिताः ॥
समस्तान्यथ कर्म्माणि तत्र सर्व्वात्मनात्मनि ।
संन्यस्यध्वं स यः कर्त्ता समस्तावरणक्षयः ॥
परः पराणां परमः स एको
नरोत्तमो यस्य परन्न भिन्नम् ।
चराचरं विश्वमिदं समस्ता-
दचिन्त्यरूपन्त्वपरिग्रहं यत् ॥
समाराध्य जगन्नाथं क्रियायोगेन पाड़वाः ।
ययौ मोक्षं परं जग्मुस्तस्मात्तन्मोक्षकारणम् ॥
संसारार्णवमग्नानां विषयाक्रान्तचेतसाम् ।
विष्णुपोतं विना नान्यत् किञ्चिदस्ति परायणम् ॥
उत्तिष्ठंश्चिन्तय हरिं व्रजंश्चिन्तय केशवम् ।
भुञ्जंश्चिन्तय गोविन्दं स्वपंश्चिन्तय माधवम् ॥
यूयमेकाग्रचित्ता हि संश्रिता मधुसूदनम् ।
जन्ममृत्युजराग्राहं संसारं सन्तरिष्यथ ॥
क्रियायोगपराश्चेह मुक्तिकार्य्याण्यनेकशः ।
समाराध्य जगन्नाथं राजानो मोक्षमाप्नुयुः ॥"
इति वह्निपुराणम् ॥ * ॥
अथ योगसाधनम् । केशिध्वज उवाच ।
"योगस्वरूपं खाण्डिक्य ! श्रूयतां गदतो मम ।
यत्र स्थितो न च्यवते प्राप्य ब्रह्मलयं मुनिः ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धस्य विषयासङ्गि मुक्तेर्निर्व्विषयं तथा ॥
विषयेभ्यः समाहृत्य विज्ञानात्मा मनो मुने ।
चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम् ॥
आत्मभावं नयत्येवं तद्ब्रह्मध्यायिनं मुने ।
विकार्य्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥
एवमत्यन्तवैशिष्ट्ययुक्तधर्म्मोपलक्षणः ।
यस्य योगः स वै योगी मुमुक्षुरभिधीयते ॥
योगयुक् प्रथमं योगी युञ्जानः सोऽभिधीयते ।
विनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धिमान् ॥
यद्यन्तरायदोषेण दुष्यते चास्य मानसम् ।
जन्मान्तरैरभ्यसतो मुक्तिः पूर्व्वस्य जायते ॥
विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मा च यो-
ऽचिरात् ॥
ब्रह्मचर्य्यमहिंसाञ्च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन् ॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्व्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः ॥
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः ।
विशिष्टफलदाः काम्या निष्कामानां विमु-
क्तिदाः ॥
एकं भद्रासनादीनां समास्थाय गुणैर्युतः ।
यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः ॥
प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत् ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सद्विधानेन तृतीयः संयमात्तयोः ॥
तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥
शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥
वश्यता परमा तेन जायतेऽतिचलात्मनाम् ।
इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधकः ॥
प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ।
वशीकृतैस्ततः कुर्य्यात् स्थितं चेतः शुभाश्रये ॥

श्रीखाण्डिक्य उवाच ।

कथ्यतां मे महाभाग ! चेतसो यः शुभाश्रयः ।
यदाधारमशेषं तद्धन्ति दोषमलोद्भवम् ॥

श्रीकेशिध्वज उवाच ।

आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वभावतः ।
भूप ! मूर्त्तममूर्त्तञ्च परञ्चापरमेव च ॥
त्रिविधा भावना विप्र विश्वमेतन्निबोध मे ।
ब्रह्माख्या कर्म्मसंज्ञा च तथा चैवोभयात्मिका ॥
ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिका परा ।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥
सनन्दनादयो ब्रह्मभावभावनया युताः ।
कर्म्मभावनया चान्ये देवाद्याः स्थावराचराः ॥
हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा ।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥
अक्षीणेषु समस्तेषु विशेषज्ञानकर्म्मसु ।
विश्वमेतत् परं चान्यद्भेदभिन्नदृशां नृप ! ॥
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥
तच्च विष्णोः परं रूपमरूपस्याजमक्षरम् ।
विश्वस्वरूपवैरूप्यलक्षणं परमात्मनः ॥
न तद्योगयुजा शक्यं नृप ! चिन्तयितुं यतः ।
ततः स्थूलं हरे रूपं चिन्त्यं यद्विश्वगोचरम् ॥
हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः ।
मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः ॥
गन्धर्व्वयक्षदैत्याद्याः सकला देवयोनयः ।
मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः ॥
भूप भूतान्यशेषाणि भूतानां ये च हेतवः ।
प्रधानादि विशेषान्तं चेतनाचेतनात्मकम् ॥
एकपादं द्विपादञ्च बहुपादमपादकम् ।
मूर्त्तमेतद्धरे रूपं भावनात्रितयात्मकम् ॥
एतत् सर्व्वमिदं विश्वं जगदेतच्चराचरम् ।
परं ब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्या कर्म्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्व्वगा ।
संसारतापानखिलानवाप्नोत्यनुसन्ततान् ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्व्वभूतेषु भूपाल ! तारतम्येन लक्ष्यते ॥
अप्राणवत्सु स्वल्पाल्पा स्थावरेषु ततोऽधिका ।
सरीसृपेऽपि तेभ्योऽपि अतिशक्त्या पतत्रिषु ॥
पतत्रिभ्यो मृगास्तेभ्यः स्वशक्त्या पशवोऽधिकाः ।
पशुभ्यो मनुजाश्चातिशक्त्या पुंसः प्रभाविताः ॥
एभ्योऽपि नागगन्धर्व्वा यक्षाद्या देवता नृप ! ।
शक्रः समस्तदेवेभ्यस्ततश्चापि प्रजापतिः ॥
हिरण्यगर्भोऽपि ततः पुंसः शक्त्युपलक्षितः ।
एतान्यशेषरूपस्य तस्य रूपाणि पार्थिव ! ॥
यतस्तच्छक्तियोगेन युक्तानि नभसा यथा ।
द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते ॥
अमूर्त्तं ब्रह्मणो रूपं यत् सदित्युच्यते बुधैः ।
समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ॥
तद्विश्वरूपरूपं वै रूपमन्यद्धरेर्महत् ।
समस्तशक्तिरूपाणि तत् करोति जनेश्वर ! ॥
देवतिर्य्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया ।
जगतामुपकाराय न सा कर्म्म निमित्तजा ।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥
तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप ! ।
चिन्त्यमात्मविशुद्ध्यर्थं सर्व्वकिल्विषनाशनम् ॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्ते स्थितो विष्णुर्योगिनां सर्व्वकिल्विषम् ।
तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥
शुभाश्रयः सचित्तस्य सर्व्वगस्य तथात्मनः ।
त्रिभावभावनातीतो मुक्तये योगिनां नृप ॥
अन्ये च पुरुषव्याघ्र ! चेतसो ये व्यपाश्रयाः ।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्म्मयोनयः ॥
मूर्त्तं भगवतो रूपं सर्व्वापाश्रयनिःस्पृहम् ।
एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्य्यते ॥
तच्च मूर्त्तं हरे रूपं यादृक्चिन्त्यं नराधिप ! ।
तच्छ्रूयतामनाधारा धारणा नोपपद्यते ॥
प्रसन्नचारुवदनं पद्मपत्रायतेक्षणम् ।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् ॥
समकर्णान्तविन्यस्तचारुकर्णविभूषणम् ।
कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम् ॥
वलीत्रिभङ्गिना मग्ननाभिना चोदरेण वै ।
प्रलम्बाष्टभुजं विष्णुमथवापि चतुर्भुजम् ॥
समस्थितोरुजङ्घञ्च सुस्थिराङ्घ्रिकराम्बुजम् ।
चिन्तयेद्ब्रह्मभूतं तं पीतनिर्म्मलवाससम् ॥
किरीटचारुकेयूरकटकादिविभूषितम् ।
शार्ङ्गशङ्खगदाखड्गचक्राक्षवलयान्वितम् ॥
चिन्तयेत्तन्मयो योगी समाधायात्ममानसम् ।
तावद्यावद्दृढीभूता तत्रैव नृप धारणा ॥
व्रजतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म्म कुर्व्वतः ।
नापयाति तदा चित्तात् सिद्धां मन्येत तां तदा ॥
ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुधः ।
चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसूत्रकम् ॥
सा यदा धारणा तद्वदवस्थानवती ततः ।
किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत् ॥
तदेकावयवं देवं चेतसापि पुनर्बुधः ।
कुर्य्यात्ततोऽवयविनि प्रणिधानपरो भवेत् ॥
तद्रूपप्रत्यये चैकसन्ततिश्चान्यनिःस्पृहा ।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ॥
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥
विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव ! ।
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ॥
क्षेत्रज्ञः करणी ज्ञानं करणं तेन तस्य तत् ।
निष्पाद्य मुक्तिकार्य्यं वै कृतकृत्यं निवर्त्तते ॥
तद्भावभावमापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥
विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥
इत्युक्तस्ते मया योगः खाण्डिक्य ! परिपृच्छते ॥”
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥

ब्रह्मकृतयोगो यथा ।

“सुखं योगासनं कृत्वा बभूव संपुटाञ्जलिः ।
पुलकाङ्कितसर्व्वाङ्गः सास्रुनेत्रोऽतिदीनवत् ॥
इडां सुषुम्नां मेधाञ्च पिङ्गलां नलिनीं धुराम् ।
नाडीषट्कञ्च योगेन निरुध्य च प्रयत्नतः ॥
मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम् ।
विशुद्धं परमाज्ञाख्यं षट्चक्रञ्च निरुध्य च ॥
लङ्घनं कारयित्वा च तं षट्चक्रं क्रमाद्विधिः ।
ब्रह्मरन्ध्रं समानीय वायुवद्धं चकार ह ॥
निरुध्य वायुं मेधान्तामानीय हृदयाम्बुजम् ।
तं वायुं भ्रामयित्वा च योजयामास मेधया ॥
एवं कृत्वा तु निष्पन्दो यो दत्तो हरिणा पुरा)
जजाप परमं मन्त्रं तं तस्यैकादशाक्षरम् ॥
मुहूर्त्तञ्च जपं कृत्वा ध्यायं ध्यायं पदाम्बुजम् ।
ददर्श हृदयाम्भोजे सर्व्वं तेजोमयं मुने ॥
तत्तेजसोऽन्तरे रूपमतीवसुमनोहरम् ।
द्विभुजं मुरलीहस्तं भूषितं पीतवाससा ॥
श्रुतिमूलन्यस्तज्वलन्मकरकुण्डलम् ।
ईषद्धास्यं प्रसन्नास्यं भक्तानुग्रहकातरम् ॥
नवीनजलदाकारश्यामसुन्दरविग्रहम् ।
स्थितं जन्तुषु सर्व्वेषु निर्लिप्तं साक्षिरूपिणम् ॥

स्वात्मारामं पूर्णकामं जगद्व्यापि जगत्परम् ।
सर्व्वस्वरूपं सर्व्वेषां बीजरूपं सनातनम् ॥
सर्व्वाधारं सर्व्ववरं सर्व्वशक्तिसमन्वितम् ।
सर्व्वाराध्यं सर्व्वगुरुं सर्व्वमङ्गलकारणम् ॥
सर्व्वमन्त्रस्वरूपञ्च सर्व्वसम्पत्प्रदं वरम् ।
यद्दृष्टं ब्रह्मरन्ध्रे च हृदि तद्बहिरेव च ।
दृष्ट्वा च परमाश्चर्य्यं तुष्टाव परमेश्वरम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २० अध्यायः ॥ * ॥
अथ ध्यानयोगः । हरिरुवाच ।
“अथ योगं प्रवक्ष्यामि भुक्तिमुक्तिकरं परम् ।
ध्यायिभिः प्रोच्यते ध्येयो ध्यानेन हरिरीश्वरः ॥
तत् शृणुष्व महेशान ! सर्व्वपापविनाशनम् ।
विष्णुः सर्व्वेश्वरोऽनन्तो षड्भूमिपरिवर्ज्जितः ॥
वासुदेवो जगन्नाथो ब्रह्मात्मा अहमेव तु ।
देहिदेहस्थितो नित्यः सर्व्वदेहविवर्ज्जितः ॥
देहधर्म्मविहीनश्च क्षराक्षरविवर्ज्जितः ।
षड्विधेषु स्थितो द्रष्टा श्रोता घ्राता ह्यतीन्द्रियः ॥
तद्धर्म्मरहितः स्रष्टा नामगोत्रविवर्ज्जितः ।
मन्ता मनःस्थितो देवो मनसा परिवर्ज्जितः ॥
मनोधर्म्मविहीनश्च विज्ञानात्मय एव च ।
बोद्धा बुद्धिस्थितः साक्षी सर्व्वबोधविवर्ज्जितः ॥
बुद्धिधर्म्मविहीनश्च सर्व्वः सर्व्वगतोऽमलः ।
सर्व्वप्राणविनिर्मुक्तः प्राणधर्म्मविवर्ज्जितः ॥
प्राणिप्राणो महाशान्तो भयेन परिवर्ज्जितः ।
अहङ्कारादिहीनश्च तद्धर्म्मपरिवर्ज्जितः ॥
तत्साक्षी तन्नियन्ता च परमानन्दरूपकः ।
जाग्रत्स्वप्नसुषुप्तिस्थस्तत्साक्षी तद्विवर्ज्जितः ॥
तुरीयः परमो धाता दृग्रूपो गुणवर्ज्जितः ।
मुक्तो बुद्धो जगद्व्यापी सत्य आत्मास्म्यहं शिवः ॥
एवं ये मानवा विप्रा ध्यायन्तीशपरं परम् ।
प्राप्नुयुस्ते च तद्रूपं नात्र कार्य्या विचारणा ॥
इति ध्यानं मया ख्यातं तव शङ्कर ! सुव्रत ! ।
पठेद्य एतत् सततं विष्णुलोकं स गच्छति ॥”
इति गारुडे १४ अध्यायः ॥
अथाष्टाङ्गयोगः ।
“मुक्तिरष्टाङ्गविज्ञानात् संक्षेपात्तद्वदे शृणु ।
यमाः पञ्च त्वहिंसाद्या अहिंसा प्राण्यहिंसनम् ॥
सत्यं भूतहितं वाक्यमस्तेयं स्वाग्रहं परम् ।
अमैथुनं ब्रह्मचर्य्यं सर्व्वत्यागोऽपरिग्रहः ॥
नियमाः पञ्च सत्याद्या बाह्यमाभ्यन्तरं द्विधा ।
शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः ॥
स्वाध्यायः स्यान्मन्त्रजापः प्रणिधानं हरेर्यजिः ।
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः ॥
मन्त्रध्यानयुतो गर्भो विपरीतो ह्यगर्भकः ।
अगर्भात् सगर्भश्च प्राणायामस्ततोऽधिकः ॥
एवं द्विधा त्रिधाप्युक्तः पूरणात् पूरकः स च ।
कुम्भको निश्चलत्वात् स रेचकाद्रेचकस्त्रिधा ॥
लघुर्द्वादशमात्रः स्याच्चतुर्विंशतिकः परः ।
षट्त्रिंशन्मात्रिकः श्रेष्ठः प्रत्याहारश्च रोधनम् ।
ब्रह्मात्मचिन्ता ध्यानं स्याद्धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥
अहमात्मा परं ब्रह्म सत्यं ज्ञानमनन्तकम् ।
विज्ञानमानन्दो ब्रह्म सत्तत्त्वमसि केवलम् ॥
अहं ब्रह्मास्म्यहं ब्रह्म अशरीरमनिन्द्रियम् ।
अहं मनो बुद्धिमहदहङ्कारादिवर्ज्जितम् ॥
जाग्रत्स्वप्नसुषुप्त्यादिमुक्तं ज्योतिस्तुरीयकम् ।
नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् ॥
योऽसावादित्यपुरुषः सोऽसावहमखण्ड ॐ ।
इति ध्यायन् विमुच्येत ब्राह्मणो भवबन्धनात् ॥”
इति गारुडे ४९ अध्यायः ॥ * ॥
अपि च ।
“एतत्ते कथितं ज्ञानं योगक्षेमं निबोध मे ।
यं प्राप्य ब्राह्मणो योगी शाश्वतानन्यतां व्रजेत् ॥
प्राणात्मेवात्मना जेयो योगिनां स हि दुर्ज्जयः ।
कुर्व्वीत तज्जये यत्नं तस्योपायं शृणुष्व मे ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्विषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान्
गुणान् ॥
यथा पर्व्वतधातूनां ध्मातानां दह्यते मलम् ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥
प्रथमं साधनं कुर्य्यात् प्राणायामस्य योगवित् ।
प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥
लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क ! शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः ॥
निमेषोन्मेषणे मात्रा तालो लघ्वक्षरो मतः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः ॥
प्रथमेन जयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥
मृदुत्वं सेव्यमानास्तु सिंहशार्दूलकुञ्जराः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥
वश्यं मत्तं यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी च्छन्देन प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो मृगान् हन्ति न
मानुषान् ।
तद्वन्निषिद्धः पवनः किल्विषं न नृणां तनुम् ॥
तस्माद्युक्तः सदा योगी प्राणायामपरो भवेत् ।
श्रूयतां मुक्तिफलदं तस्यावस्थाचतुष्टयम् ॥
ध्वस्तिः प्राप्तिस्तथा संवित् प्रसादश्च महीपते ।
स्वरूपं शृणु वै तेषां कथ्यमानमनुक्रमात् ॥
कर्म्मणामिष्टदुष्टानां जायते फलसंक्षयः ।
चेतसो विकषायत्वं यत्र सा ध्वस्तिरुच्यते ॥
ऐहिकामुष्मिकान् कामान् लोभमोहात्मकांश्च
यान् ।
निरुध्यास्ते सदा योगी प्राप्तिः सा सार्व्व-
कालिकी ॥
अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।
विजानातीन्दुसूर्य्यर्क्षग्रहाणां ज्ञानसम्पदा ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति संविदम् ।
तदा संविदिति ख्याता प्राणायामस्य सा
स्थितिः ॥
यान्ति प्रसादं येनास्य मनः पञ्च च वायवः ।
इन्द्रियाणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ।
शृणुष्व च महीपाल ! प्राणायामस्य लक्षणम्
युञ्जतश्च यथायोगं यादृग्विहितमासनम् ॥
पद्ममर्द्धासनं वापि तथा स्वस्तिकमासनम् ।
आस्थाय योगी युञ्जीत कृत्वा च प्रणवं हृदि ॥
समः समासनो भूत्वा संहृत्य चरणावुभौ ।
संवृतास्यस्तथा चोरू सम्यग्विष्टभ्य वाग्यतः ॥
पार्ष्णिभ्यां लिङ्गवृषणावस्पृशन् प्रयतः स्थितः ।
किञ्चिदुन्नामितशिरा दन्तैर्दन्तान्न संस्पृशेत् ।
संपश्यन्नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥
रजसा तमसो वृत्तिं सत्त्वेन रजसस्तथा ।
संस्थाप्य निर्म्मले सत्त्वे स्थितो युञ्जीत योगवित् ॥
इन्द्रियाणीन्द्रियार्थेभ्यः प्राणादीन् मन एव च ।
निगृह्य समवायेन प्रत्याहारमुपक्रमेत् ॥
यस्तु प्रत्याहरेत् कामान् कूर्म्मोऽङ्गानीव सर्व्वशः ।
स त्वात्मरतिरेकस्थः पश्यन्नात्मानमात्मनि ॥
सबाह्याभ्यन्तरं शौचं निष्पाद्याकण्ठनाभितः ।
पूरयित्वा बुधो देहं प्रत्याहारमुपक्रमेत् ॥
प्राणायामा दश द्वौ च धारणा साभिधीयते ।
द्विधारणा स्मृतो योगो योगिभिस्तत्त्वदर्शिभिः ॥
तथा वै योगयुक्तस्य योगिनो नियतात्मनः ।
सर्व्वे दोषाः प्रणश्यन्ति स्वस्थश्चैवोपजायते ॥
वीक्षते च परं ब्रह्म प्राकृतांश्च गुणान् पृथक् ।
व्योमादिपरमाणूंश्च तथात्मानमकल्मषम् ॥
इत्थं योगी जिताहारः प्राणायामपरायणः ।
जितां जितां शनैर्भूमिमारोहेत यथा गृहम् ॥
दोषान् व्याधिं तथा मोहमाक्रान्ता भूरनि-
र्जिता ।
विवर्द्धयति नारोहेत्तस्माद्भूमिमनिर्ज्जिताम् ॥
प्राणानामुपसंरोधात् प्राणायाम इति स्मृतः ।
धारणेत्युच्यते चेयं धार्य्यते यन्मनोऽनया ॥
शब्दादिभ्यः प्रवृत्तानि यदक्षाणि जितात्मभिः ।
प्रत्याह्रियन्ते योगेन प्रत्याहारस्ततः स्मृतः ॥
उपायश्चात्र कथितो योगिभिः परमर्षिभिः ।
येन व्याध्यादयो दोषा न जायन्ते हि योगिनः ॥
यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः ।
आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः ॥
प्राणाभ्यां हृदये वाथ तृतीये च तथोरसि ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ॥
किञ्चित्तस्मात् परस्मिंश्च धारणा परमा स्मृता ।
दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यताम् ॥
नाध्मातः क्षुधितः श्रान्तो न च व्याकुलचेतनः ।
युञ्जीत योगं राजेन्द्र ! योगी सिद्ध्यर्थमात्मनः ॥
नातिशीते न चैवोष्णे द्वन्द्वे नाम्बुनिलात्मके ।
कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः ॥
सशब्देऽग्निजलाभ्यासे जीर्णे गोष्ठे चतुष्पथे ।
शुष्कपर्णचये नद्यां श्मशाने ससरीसृपे ॥
सभये कूपतीरे वा चैत्यवल्मीकसञ्चये ।
देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्ज्जयेत् ॥
सत्त्वस्यानुपपत्तौ च देशकालविवर्ज्जिते ।
नासतो दर्शनं योगे तस्मात्तं परिवर्ज्जयेत् ॥
देशानेतानगाहत्य मूढत्वाद्यो युनक्ति वै ।

विघ्नाय तस्य ये दोषा जायन्ते तान्निबोध मे ।
बाधिर्य्यं जड़तालोपः स्मृतेर्मूकत्वमन्धता ॥
ज्वरश्च जायते सद्यस्तद्वदज्ञानयोगिनः ॥
प्रमादाद्योगिनो दोषा यद्येते स्युश्चिकित्सितम् ।
तेषां नाशाय कर्त्तव्यं योगिनां तं निबोध मे ॥
स्निग्धां यवागूमत्युष्णां भुक्त्वा तत्रैव धारयेत् ।
वातगुल्मप्रशान्त्यर्थं गुदावर्त्ते ततो दधि ॥
यवागूर्व्वापि पवने वायुग्रन्थौ प्रतिक्षिपेत् ।
तद्वत् कम्पे महाशैलं स्थिरं मनसि धारयेत् ॥
विघाते वचसो वापि बाधिर्य्ये श्रवणेन्द्रिये ।
तथैवाम्रफलं ध्यायेत्तृष्णार्त्तो रसनेन्द्रिये ॥
यस्मिन् यस्मिन् रुजा देहे तस्मिंस्तदुपकारिणीम् ।
धारयेद्धारणामुष्णे शीतां शीते विदाहिनीम् ॥
कीलं शिरसि संस्थाप्य काष्ठं काष्ठेन ताड़येत् ।
लुप्तस्मृतेः स्मृतिः सद्यो योगिनस्तेन जायते ॥
द्यावापृथिव्यौ वाय्वग्नी व्यापिनावपि धारयेत् ।
अमानुषात् सत्त्वजाताद्वाधास्वितिचिकित्सितम् ॥
अमानुषं सत्त्वमन्तर्योगिनं प्रविशेत् यदि ।
वाय्वग्निधारणा चैनं देहसंस्थं विनिर्दहेत् ॥
एवं सर्व्वात्मना कार्य्या रक्षा योगविदा नृप ! ।
धर्म्मार्थकाममोक्षाणां शरीरं साधनं यतः ॥
प्रवृत्तिलक्षणा ख्याता योगिनो विस्मयात्तथा ।
विज्ञानं विलयं याति तस्माद्गोप्याः प्रवृत्तयः ॥
अलौल्यमारोग्यमनिष्ठुरत्वं
गन्धः शुभो मूत्रपुरीषमल्पम् ।
कान्तिः प्रसादः स्वरसौम्यता च
योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥
अनुरागं जनो याति परोक्षे गुणकीर्त्तनम् ।
न बिभ्यति च सत्त्वानि सिद्धेर्लक्षणमुत्तमम् ॥
शीतोष्णादिभिरत्युग्रैर्यस्य बाधा न जायते ।
न भीतिमेति चान्येभ्यस्तस्य सिद्धिरुपस्थिता ॥”
इति मार्कण्डेयपुराणे योगिचिकित्सानाम ३८ अध्यायः ॥ (तथा च ।
ईश्वर उवाच ।
“मय्येकचित्तता योग इति पूर्व्वं निरूपितम् ।
साधनान्यष्टधा तस्य प्रवक्ष्याम्यधुना शृणु ॥
यमाश्च नियमास्तावदासनान्यपि षण्मुख ! ।
प्राणायामस्ततः प्रोक्तः प्रत्याहारश्च धारणा ॥
ध्यानं तथा समाधिश्च योगाङ्गानि प्रचक्षते ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ॥
यमाः संक्षेपतः प्रोक्ता नियमाः शृणु पुत्त्रक ! ।
तपः स्वाध्यायसन्तोषः शौचमीश्वरपूजनम् ॥
नियमाः कथिता वत्स ! योगसिद्धिप्रदायिनः ।
सर्व्वेषामेव भूतानामक्लेशजननं हि यत् ॥
अहिंसा कथिता सद्भिर्योगसिद्धिप्रदायिनी ।
यथार्थकथनं सत्यमस्तेयमधुना शृणु ॥
चौर्य्येण वा बलेनापि परस्वहरणञ्च यत् ।
स्तेयमित्युच्यते सद्भिरस्तेयं तस्य वर्ज्जनम् ॥
सर्व्वत्र मैथुनत्यागो ब्रह्मचर्य्यमिहोच्यते ।
द्रव्याणामप्यनादानमापद्यपि यथेच्छया ॥
अपरिग्रह इत्युक्तो योगसिद्धेस्तु साधनम् ।
चान्द्रायणादिना यत्तु शरीरस्य च शोषणम् ॥
तत्तपः कथितं पुत्त्र ! स्वाध्यायमधुना शृणु ।
प्रणवः शतरुद्रीयं तथाथर्व्वशिरःशिखा ॥
एतेषां यो जपः पुत्त्र ! स्वाध्याय इति कीर्त्तितः ।
यदृच्छालाभसन्तुष्टः सन्तोष इति पठ्यते ॥
बाह्ये चाभ्यन्तरे चापि शुद्धिः शौचं विधीयते ।
स्तुतिस्मरणपूजाभिर्वाङ्मनःकायकर्म्मभिः ॥
मयि भक्तिर्दृढ़ा पुत्त्र एतदीश्वरपूजनम् ।
यमाश्च नियमाः प्रोक्ताः संक्षेपान्न तु विस्तरात् ॥
यमैश्च नियमैर्युक्तो योगी मोक्षाय संस्तुतः ।
स्थिरबुद्धिरसंमूढ़ः पूर्व्वमासनमभ्यसेत् ॥
पद्मकं स्वस्तिकं पीठं सैंहं कौक्कुटकौञ्जरम् ।
कौर्म्मं वज्रासनं चैव वैयाघ्रं चार्द्धचन्द्रकम् ॥
दण्डं तार्क्ष्यासनं शूलं खड्गं मुद्गरमेव च ।
मकरं त्रिपथं काष्ठं स्थाणुर्वा हस्तिकर्णिकम् ।
भौमं वीरासनं चापि वाराहं मृगचैलिकम् ॥
क्रौञ्चं नालालिकं चापि सर्व्वतोभद्रमेव च ।
इत्येतान्यासनान्यत्र सप्तविंशतिसंख्यया ॥
योगसंसिद्धिहेतोस्तु कथितानि तवानघ ! ॥
एषामेकतरं बद्ध्वा गुरुभक्तिपरायणः ।
द्वन्द्वातीतो जयेत्प्राणानभ्यासक्रमयोगतः ॥
अन्तश्चराणां वायूनां बाह्याभ्यन्तररोधनम् ।
प्राणायाम इति प्रोक्तो द्विविधः स च कथ्यते ॥
अगर्भश्च सगर्भश्च तयोराद्योऽजपः स्मृतः ।
द्वितीयः सजपः प्रोक्तो भूयः स्यात्तु तिमात्रभिः ॥
रेचकः शून्यकश्चैव पूरकः कुम्भकस्तथा ।
एवं चतुर्व्विधो भेदः प्राणायामेऽत्र सूरिभिः ॥
चतस्रो नाड्यः प्रोक्ता गमागमजयाश्रयाः ।
रेचनाद्रेचकः प्रोक्तः शून्यकस्तु यथास्थितः ॥
पूरकः पूरणाद्वायोस्तन्निरोधाच्च कुम्भकः ।
देहिनो दक्षिणे भागे पिङ्गला नाड़िका स्मृता ॥
पितृयोनिरिति ख्याता भानुस्तत्राधिदैवतम् ।
दक्षिणेतरगा या च इड़ा सा नाड़िका स्मृता ।
देवयोनिरिति ख्याता चन्द्रस्तत्राधिदैवतम् ॥
एतयोरुभयोर्म्मध्ये सुषुम्ना नाम विश्रुता ॥
पद्मसूत्रनिभा नाड़ी कार्य्याख्या ब्रह्मदैवतम् ।
ततः शून्यं निरालम्बं मध्ये स्वात्मनि योजयेत् ॥
बाह्यस्याशोधनाद्वायोः शून्यकत्वं विनिर्द्दिशेत् ।
चन्द्रदेवतया भूयः पिबेदमृतमुत्तमम् ॥
आप्यायनं भवेत्तेन प्लावनं कल्मषस्य तु ।
आपूर्य्योदरसंस्थं तु उच्चैर्वायुं निरोधयेत् ॥
कुम्भकः कुम्भवत् स्याद्रेचको वर्णितस्य च ।
उत्क्षिप्य प्रयतो वायुमजदेवत्वमानयेत् ॥
अङ्गुष्ठाद्यान्तमारभ्य ब्रह्मरन्ध्रेण मोचयेत् ।
सङ्कोच्य कुञ्चिकाचक्रमूर्द्धं नीत्वा रसाश्रयम् ॥
संक्षोभ्य शङ्खिनीं सम्यक्ततो ब्रह्मगुहां नयेत् ।
अनेन शोधयेन्मार्गमैश्वरं विमलं मुनिः ॥
क्रमेणाभ्यासयोगेन योगसंसिद्धिभाग्भवेत् ।
सुसम्पूर्णां सदा वत्स ! योगाङ्गं योगसिद्धये ॥
विहाय वह्निमार्गं तु अङ्गुल्यास्तु शनैः शनैः ।
सौम्ये नाकर्षयेद्वायुं नाभावाहृत्य धारयेत् ॥
धारयन्नियतप्राणो योगैश्वर्य्यसमन्वितः ।
जायते वत्सराद्योगी जरामरणवर्ज्जितः ॥
वायुमाकर्षयेद्वाह्यं वामया चोदरं भवेत् ।
नाभिनासान्तराध्यायं क्षितिः प्राणांश्च जयेद्ध्रुवम् ॥
मनःस्थैर्य्यं भवेद्वत्स ! त्रिषु स्थानेषु धारणात् ।
अङ्गुष्ठनाभिनासाग्रे वायुं योगी जितासनः ॥
अपानं कटिदेशे तु पृष्ठतो वै विनिर्द्दिशेत् ।
सदा तत्रैव सन्धेय एष वायुजयक्रमः ॥
रेचकः पूरकश्चैव कुम्भकश्च न विद्यते ।
निरालम्बे मनः कृत्वा चक्षात्प्राणजितो भवेत् ॥
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
निग्रहः प्रोच्यते यस्तु प्रत्याहारः स उच्यते ॥
यद्यत् पश्यति तत्सर्व्वं पश्येदात्मवदात्मनि ।
प्रत्याहारः स वै प्रोक्तो योगसाधनमुत्तमम् ॥
कर्म्मेन्द्रियाणां पञ्चानां पञ्चमाद्येतरे जने ।
यदि तत्र स्थिरो लोको मनो याति तदात्मयम् ॥
उद्घातान् दश पञ्चैव कारयेद्धारणां बुधः ।
प्राणवायुं निरोध्यैव मनः सर्व्वेऽन्तरे क्षिपेत् ॥
देवांश्च सिद्धान् गन्धर्व्वांश्चारणान् खेचरान् गणान् ।
षण्मासाभ्यासयोगेन सूक्ष्मज्योतिः प्रपश्यति ॥
दूरे न स्यान्नरा न्त्युः सर्व्वज्ञश्च प्रजायते ।
स्फोटाख्या नाड़िका प्रोक्ता कूर्म्मलोकस्तदान्तरे ॥
उच्चार्य्य बिन्दुतत्त्वं तु तस्यान्ते गुणवत् स्मरेत् ।
भूतं भव्यं भविष्यच्च वर्त्तमानञ्च दूरतः ॥
ध्यानं यत्तद्भवेन्नूनं स्फोटाख्ये ध्यानमभ्यसेत् ।
ललाटे मूर्द्ध्नि हृदये सदाशिवमनुस्मरेत् ॥
शुद्धस्फटिकसङ्काशं जटाजूटेन्दुशेखरम् ।
पञ्चवक्त्रं दशभुजं सर्पयज्ञोपवीतिनम् ॥
ध्यात्वैवमात्मनि विभुं ध्यानं तत् सूरयो विदुः ।
ततोऽमनस्कं भवति न शृणोति न पश्यति ॥
न जिघ्रति न स्पृशति न किञ्चिद्वा समीक्षते ।
गुह्योदरादिस्थानेषु वायुं नासां विचिन्तयेत् ॥
ईशोऽहमिति योगीन्द्रः परानन्दैकविग्रहः ।
जरामरणनिर्म्मुक्तः शिव एव भवेन्मुनिः ॥
गमनागमनाभ्यां यो हीनो वै विषयोज्झितः ।
एकान्तरोऽमनीभावः समाधिरभिधीयते ॥
न दृष्टवस्तुनश्चिन्ता न सूक्ष्मस्यापि चिन्तनम् ।
न बहिर्नान्तरं पुत्त्र ! ब्रह्मग्रन्थिविभेदनम् ॥
न स्थूलं न कृशं वापि न ह्रस्वं नापि लोपितम् ।
न शुक्लं नापि वा पीतं न कृष्णं नापि कर्व्वुरम् ॥
कृत्वा हृत्पद्मनिलये विश्वाख्यं विश्वसम्भवम् ।
आत्मानं सर्व्वभूतानां परस्तात्तमसः स्थितम् ॥
सर्व्वस्याधारमव्यक्तमानन्दं ज्योतिरव्ययम् ।
प्रधानपुरुषातीतमाकाशं दहरं शिवम् ॥
तदन्तः सर्व्वभूतानामीश्वरं ब्रह्मरूपिणम् ।
ध्यायेदनादिमध्यान्तमानन्दादिगुणालयम् ॥
महान्तं पुरुषं ब्रह्म ब्रह्माणं ब्रह्म चाव्ययम् ।

ओङ्कारान्ते तथात्मानं संस्थाप्य परमात्मनि ।
आकाशे देवमीशानं ध्यायीताकाशमध्यगम् ।
कारणं सर्व्वभावानामानन्दैकरसाश्रयम् ॥
पुराणं पुरुषं शम्भुं ध्यायेन्मुच्येत बन्धनात् ।
शिवभक्तिं विना यस्तु संसारं तर्त्तुमिच्छति ॥
मूढ़ो यथा चलाङ्गूलैः समुद्रं तर्त्तुमिच्छति ।
तथा विना शम्भुसेवां संसारतरणं न हि ॥
सर्व्वसौख्यप्रदः शम्भुर्नान्या काचन देवता ।
तस्मात् सर्व्वप्रयत्नेन महादेवं प्रपूजयेत् ॥
यदा गुहायां प्रकृतं जगत्संमोहनालये ।
विचिन्त्य परमं व्योम सर्व्वभूतैककारणम् ॥
जीवनं सर्व्वभूतानां यत्र लोकः प्रलीयते ।
आनन्दं ब्रह्मणः सूक्ष्मं यत्पश्यन्ति मुमुक्षवः ॥
तन्मध्ये निहितं ब्रह्म केवलं ज्ञानलक्षणम् ।
पातुं तिष्ठेन्महेशेन सोऽश्नुते योगमैश्वरम् ॥
नैकलक्ष्यं द्विलक्ष्यं वा त्रिलक्ष्यं न नवात्मकम् ।
सर्व्वोपाधिविनिर्म्मुक्तं समाधिरभिधीयते ॥
बाह्ये चाभ्यन्तरे पुत्र ! यत्र यत्र मनः क्षिपेत् ।
तत्र तत्रात्मनो रूपमानन्दमनुभूयते ॥
संस्थाप्य मयि चात्मानं परं ज्योतिषि निर्गुणे ।
मुहूर्त्तं तिष्ठतः साक्षात्तस्य चानुभवो भवेत् ॥
सर्व्वज्ञः परिपूर्णश्च जरामरणवर्ज्जितः ।
मत्प्रसादाद्भवेद्योगी नान्यथा क्रौञ्चसूदन ! ॥
तस्मात् सर्व्वं परित्यज्य कर्म्मजातं सुदुष्करम् ।
मामेकं शरणं गच्छेदज्ञानं नाशयाम्यहम् ॥
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चान्ये च सङ्कराः ।
मद्भक्तिभावना पूता यान्ति मत्परमं पदम् ॥
जगतः प्रलये प्राप्ते नष्टे च कमलोद्भवे ।
मद्भक्ता नैव नश्यन्ति स्वेच्छाविग्रहधारिणः ॥
योगिनां कर्म्मिणां चैव तापसानां यतात्मनाम् ।
अहमेव गतिस्तेषां नान्यदस्तीति निश्चयः ॥”
इति ब्रह्मपुराणोपपुराणे श्रीसौरे शिवस्कन्द-संवादे यमनियमप्राणायामादिकथनं १२ अः ॥
अथ योगान्तराया यथा,—
“योगान्तरायास्तस्याथ जायन्ते युञ्जतः पुनः ।
नश्यन्त्यभ्यासतस्तेऽपि प्रणिधानेन वै गुरोः ॥”
सूत उवाच ।
“आलस्यं प्रथमं पश्चाद्व्याधिपीड़ा प्रजायते ।
प्रमादः संशयस्थाने चित्तस्येहानवस्थितिः ॥
अश्रद्धादर्शनं भ्रान्तिदुःखञ्च त्रिविधं ततः ।
दौर्म्मनस्यमयोग्येषु विषयेषु च योग्यता ॥
दशधाभिप्रजायन्ते मुनेर्योगान्तरायकाः ।
आलस्यञ्च प्रवृत्तिश्च गुरुत्वात् कायचित्तयोः ॥
व्याधयो धातुवैषम्यात् कर्म्मजा दोषजास्तथा ।
प्रमादस्तु समाधेस्तु साधनानामभावनम् ॥
इदं वेत्युभयस्पृक्तं विज्ञानं स्थानसंशयः ।
अनवस्थितचित्तत्वमप्रतिष्ठा हि योगिनः ॥
लब्धायामपि भूमौ च चित्तस्य भवबन्धनात् ।
अश्रद्धाभावरहिता वृत्तिर्वै साधनेषु च ॥
साध्ये चित्तस्य हि गुरौ ज्ञानाचारशिवादिषु ।
विपर्य्ययज्ञानमिति भ्रान्तिदर्शनमुच्यते ॥
अनात्मन्यात्मविज्ञानमज्ञानात् तस्य सन्निधौ ।
दुःखमाध्यात्मिकं प्रोक्तं तथा चैवाधिभौतिकम् ॥
आधिदैविकमित्युक्तं त्रिविधं सहजं पुनः ।
इच्छाविघातात् सङ्क्षोभश्चेतसस्तदुदाहृतम् ॥
दौर्म्मनस्यं निरोद्धव्यं वैराग्येण परेण तु ।
तमसा रजसा चैव संस्पृष्टं दुर्म्मनः स्मृतम् ॥
तदा मनसि सञ्जातं दौर्म्मनस्यमिति स्मृतम् ।
हठात् स्वीकरणं कृत्वा योग्यायोग्यविवेकतः ॥
विषयेषु विचित्रेषु जन्तोर्व्विषयलोलता ।
अन्तराया इति ख्याता योगस्यैते हि योगिनाम् ॥
अत्यन्तोत्साहयुक्तस्य नश्यन्ति न च संशयः ।
प्रनष्टेष्वन्तरायेषु द्विजा पश्चाद्धि योगिनः ॥
उपसर्गाः प्रवर्त्तन्ते सर्व्वे ते सिद्धिसूचकाः ।
प्रतिभा प्रथमा सिद्धिर्द्वितीया श्रवणा स्मृता ॥
वार्त्ता तृतीया विप्रेन्द्रास्तुरीया चेह दर्शना ।
आस्वादा पञ्चमी प्रोक्ता वेदना षष्ठिका स्मृता ।
स्वल्पषट्सिद्धिसन्त्यागात् सिद्धिदाः सिद्धयो मुनेः ।
प्रतिभा प्रतिभावृत्तिः प्रतिभाव इति स्थितिः ॥
बुद्धिर्व्विवेचना वेद्यं बुध्यते बुद्धिरुच्यते ।
सूक्ष्मे व्यवहितेऽतीते विप्रकृष्टे त्वनागते ॥
सर्व्वत्र सर्व्वदा ज्ञानं प्रतिभानुक्रमेण तु ।
श्रवणात् सर्व्वशब्दानामप्रयत्नेन योगिनः ॥
ह्रस्वदीर्घप्लुतादीनां गुह्यानां श्रवणादपि ।
स्पर्शस्याधिगमो यस्तु वेदना तूपपादिता ॥
दर्शना दिव्यरूपाणां दर्शनञ्चाप्रयत्नतः ।
संविद्दिव्यरसे तस्मिन्नास्वादो ह्यप्रयत्नतः ॥
वार्त्ता च दिव्यगन्धानां तन्मात्रा बुद्धिसंविदा ।
विन्दन्ते योगिनस्तस्मादाब्रह्मभुवनं द्विजाः ॥
जगत्यस्मिन् हि देहस्थं चतुःषष्टिगुणं समम् ।
औपसर्गिकमेतेषु गुणेषु गुणितं द्विजाः ॥
सन्त्याज्यं सर्व्वथा सर्व्वमौपसर्गिकमात्मनः ।
पैशाचे पार्थिवञ्चाप्यं राक्षसानां पुरे द्विजाः ॥
याक्षे तु तैजसं प्रोक्तं गान्धर्व्वे श्वसनात्मकम् ।
ऐन्द्रे व्योमात्मकं सर्व्वं सौम्ये चैव तु मानसम् ॥
प्राजापत्ये त्वहङ्कारं ब्राह्मे बोधमनुत्तमम् ।
आद्ये चाष्टौ द्वितीये च तथा षोड़शरूपकम् ॥
चतुर्व्विंशत् तृतीये तु द्वात्रिंशच्च चतुर्थके ।
चत्वारिंशत् पञ्चमे तु भूतमात्रात्मकं स्मृतम् ॥
गन्धो रसस्तथा रूपं शब्दः स्पर्शस्तथैव च ।
प्रत्येकमष्टधा सिद्धं पञ्चमे तच्छतक्रतोः ॥
तथाष्टचत्वारिंशच्च षट्पञ्चाशत् तथैव च ।
चतुःषष्टिगुणं ब्राह्मं लभते द्विजसत्तमाः ॥
औपसर्गिकमाब्रह्म भुवनेषु परित्यजेत् ।
लोकेष्वालोक्ययोगेन योगवित् परमं सुखम् ॥
स्थूलता ह्रस्वता बाल्यं वार्द्धक्यं यौवनं तथा ।
नानाजातिस्वरूपञ्च चतुर्भिर्द्देहधारणम् ॥
पार्थिवांशं विना नित्यं सुरभिर्गन्धसंयुतः ।
एतदष्टगुणं प्रोक्तमैश्वर्य्यं पार्थिवं महत् ॥
जले निवसनं यद्वद्भूम्यामिव विनिर्गमः ।
इच्छेच्छक्तः स्वयं पातुं समुद्रमपि नातुरः ॥
यत्रेच्छति जगत्यस्मिन् तत्रास्य जलदर्शनम् ।
यद्यद्वस्तु समादाय भोक्तुमिच्छति कामतः ॥
तत्तद्रसान्वितं तस्य त्रयाणां देहधारणम् ।
भाण्डं विनाथ हस्तेन जलपिण्डस्य धारणम् ॥
अव्रणत्वं शरीरस्य पार्थिवेन समन्वितम् ।
एतत् षोड़शकं प्रोक्तमाप्यमैश्वर्य्यमुत्तमम् ॥
देहादग्निविनिर्म्माणं तत्तापभयवर्ज्जितम् ।
लोकं दग्धमपीहाप्यदग्धं स्वविधानतः ॥
जलमध्ये हुतवहस्याधाय परिरक्षणम् ।
अग्निनिग्रहणं हस्ते स्मृतिमात्रेण चागमः ॥
भस्मीभूतविनिर्म्माणं यथापूर्व्वं स्वकामतः ।
द्वाभ्यां रूपविनिष्पत्तिर्विना तैस्त्रिभिरात्मनः ॥
चतुर्व्विंशात्मकं ह्येतत् तैजसं मुनिपुङ्गवाः ।
मनोगतित्वं भूतानामन्तर्निवसनं तथा ॥
पर्व्वतादिमहाभारस्कन्धेनोद्वहनं पुनः ।
लघुत्वञ्च गुरुत्वञ्च पाणिभ्यां वायुधारणम् ॥
अङ्गुल्यग्रनिपातेन भूमेः सर्व्वत्र कम्पनम् ।
एकेन देहनिष्पत्तिर्वातैश्वर्य्यं स्मृतं बुधैः ॥
छायाविहीननिष्पत्तिरिन्द्रियाणाञ्च दर्शनम् ।
आकाशगमनं नित्यमिन्द्रियार्थैः समन्वितम् ॥
दूरे च शब्दग्रहणं सर्व्वशब्दावगाहनम् ।
तन्मात्रलिङ्गग्रहणं सर्व्वप्राणिनिदर्शनम् ॥
ऐन्द्रमैश्वर्य्यमित्युक्तमेतैरुक्तः पुरातनः ।
यथाकामोपलब्धिश्च यथाकामविनिर्गमः ॥
सर्व्वत्राभिभवश्चैव सर्व्वगुह्यनिदर्शनम् ।
कामानुरूपनिर्म्माणं वशित्वं प्रियदर्शनम् ॥
संसारदर्शनञ्चैव मानसं गुणलक्षणम् ।
छेदनं ताड़नं बन्धं संसारपरिवर्त्तनम् ॥
सर्व्वभूतप्रसादश्च मृत्युकालजयस्तथा ।
प्राजापत्यमिदं प्रोक्तमाहङ्कारिकमुत्तमम् ॥
अकारणजगत्सृष्टिस्तथानुग्रह एव च ।
प्रलयश्चाधिकारश्च लोकवृत्तप्रवर्त्तनम् ॥
असादृश्यमिदं व्यक्तं निर्म्माणञ्च पृथक् पृथक् ।
संसारस्य च कर्तृत्वं ब्राह्ममेतदनुत्तमम् ॥
एतावत् तत्त्वमित्युक्तं प्राधान्यं वैष्णवं पदम् ।
ब्रह्मणा तद्गुणं शक्यं वेत्तुमन्यैर्न शक्यते ॥
विद्यते तत् परं शैवं विष्णुना नावगम्यते ।
असंख्येयगुणं शुद्धं को जानीयाच्छिवात्मकम् ॥
व्युत्थाने सिद्धयश्चैता ह्युपसर्गाश्च कीर्त्तिताः ।
निरोद्धव्याः प्रयत्नेन वैराग्येण परेण तु ॥
नाशातिशयतां ज्ञात्वा विषयेषु भयेषु च ।
अश्रद्धया त्यजेत् सर्व्वं विरक्त इति कीर्त्तितः ॥
वैतृष्ण्यं पुरुषे ख्यातं गुणवैतृष्ण्यमुच्यते ।
वैराग्येणैव सन्त्याज्याः सिद्धयश्चौपसर्गिकाः ॥
औपसर्गिकमाब्रह्म भुवनेषु परित्यजेत् ।
निरुध्यैव त्यजेत् सर्व्वं प्रसीदति महेश्वरः ॥
प्रसन्ने विमला मुक्तिर्वैराग्येण परेण वै ।
अथवानुग्रहार्थञ्च लीलार्थं वा तदा मुनिः ॥
अनिरुध्य विचेरेद्यः सोऽप्येवं हि सुखी भवेत् ।
क्वचिद्भूमिं परित्यज्य आकाशे क्रीड़ते श्रिया ॥
उद्गिरेच्च क्वचिद्वेदान् सूक्ष्मानर्थान् समासतः ।
क्वचिच्छ्रुते तदर्थेन श्लोकबन्धं करोति सः ॥

कश्चिद्दण्डकवन्मन्तु कुर्य्याद्रूपं सहस्रशः ।
स्थापत्तिसमूहस्य स्वज्ञानञ्च विन्दति ॥
ब्रह्माद्यं स्थावरान्तञ्च हस्तामलकवद्भवेत् ।
बहुनात्र किमुक्तेन विज्ञानानि सहस्रशः ॥
उत्पद्यन्ते मुनिश्रेष्ठा मुनेस्तस्य महात्मनः ।
अभ्यासेनैव विज्ञानं विशुद्धञ्च स्थिरं भवेत् ॥
तेजोरूपाणि सर्व्वाणि सर्व्वं पश्यति योगवित् ।
देवबिम्बान्यनेकानि विमानानि सहस्रशः ॥
पश्यति ब्रह्मविष्ण्विन्द्रयमाग्निवरुणादिकान् ।
ग्रहनक्षत्रताराश्च भुवनानि सहस्रशः ॥
पातालतलसंस्थाश्च समाधिस्थः स पश्यति ।
आत्मविद्याप्रदीपेन स्वस्थेनाचलनेन तु ॥
प्रसादामृतपूर्णेन सत्त्वपात्रस्थितेन तु ।
तमो निहत्य पुरुषः पश्यति ह्यात्मनीश्वरम् ॥
तस्य प्रसादाद्धर्म्मश्च ऐश्वर्य्यं ज्ञानमेव च ।
वैराग्यमपवर्गश्च नात्र कार्य्या विचारणा ॥
न शक्यो विस्तराद्वक्तुं वर्षाणामयुतैरपि ।
योगे पाशुपते निष्ठा स्थातव्यञ्च मुनीश्वराः ! ॥”
इति लिङ्गपुराणे ६ अध्यायः ॥)

अथ त्रिविधयोगः ।

श्रीभगवानुवाच ।

“योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।
ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्र-
चित् ॥
निर्व्विण्णानां ज्ञानयोगो न्यासिनामिह कर्म्मसु ।
तेष्वनिर्व्विण्णचित्तानां कर्म्मयोगश्च कामिनाम् ॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥
तावत् कर्म्माणि कुर्व्वीत न निर्व्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥
स्वधर्म्मस्थो यजन् यज्ञैरनाशीः काम उद्धव ! ।
न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥
अस्मिँल्लोके वर्त्तमानः स्वधर्म्मस्थोऽनघः शुचिः ।
ज्ञानं विशुद्धमाप्नोति मद्भक्तिञ्च यदृच्छया ॥”
इति श्रीभागवते । ११ । २० । ६—११ ॥ * ॥

१ सांख्ययोगः २ कर्म्मयोगः ३ ज्ञानकर्म्मन्यास-योगः ४ सन्न्यासयोगः ५ ज्ञानयोगः ६ विज्ञान-योगः ७ ब्रह्मयोगः ८ राजगुह्ययोगः ९ विभूति-योगः १० भक्तियोगः ११ प्रकृतिपुरुषविवेक योगः १२ गुणत्रययोगः १३ पुरुषोत्तमयोगः १४ आचारविवेकयोगः १५ मोक्षयोगः १६ एते योगा एतेष्वध्यायेषु भगवद्गीतायां द्रष्टव्याः ॥ * ॥

(कलौ योगसिद्धिर्नास्ति । यदुक्तं काशीखण्डे । ४२ अध्याये ।

“न सिध्यति कलौ योगो न सिध्यति कलौ
तपः ॥

तथा च तत्रैव ४२ अध्याये ।

“चञ्चलेन्द्रियवृत्तिः स्यात् कलिकल्मषजृम्भणात् ।
अल्पायुः स्यात्तथा नॄणां क्व योगमहोदयः ॥”)

योगक्षेमं, क्ली, (योगश्च क्षेमश्च तयोः समाहारः ।) अनागतानयनागतरक्षणे । यथा मनुः ।

“दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे ।
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात् ॥”
बृहस्पतिः ।
“अनागतस्य चानेता आगतस्य च रक्षकः ।
रात्रावपि यदान्योऽस्ति तदा स्वामी न दोष-
भाक् ॥”
इति प्रायश्चित्ततत्त्वम् ॥

(तथा च गीतायाम् । ९ । २२ ।
“अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥”
“योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि ।” इति शङ्कराचार्य्यः ॥ “योगं धनादि-लाभं क्षेमञ्च तत्पालनं मोक्षं वा तैरप्रार्थित-मपि अहमेव वहामि प्रापयामि ।” इति श्रीधरस्वामी ॥ योगश्च क्षेमश्च इतीतरेतरद्वन्द्वे पुंलिङ्गद्विवचनप्रयोगो भवति ।) यथा,—
“योगक्षेमकरं कृत्वा सीताया लक्ष्मणं ततः ।
मृगस्यानुपदी रामो जगाम गजविक्रमः ॥”
इति भट्टिकाव्ये । ५ । ५० ॥
“फलपुष्पादेरलब्धस्य साधनं योगः शरीरादे-र्लब्धस्य पालनं क्षेमः ।” इति तट्टीकायां भरतः ॥ “योगक्षेमौ शरीरस्थितिपालने ।” इति तत्रैव जयमङ्गलः ॥

योगचरः, पुं, (योगेषु चरतीति । चर + “चरेष्टः ।” ३ । २ । १६ । इति टः ।) हनूमान् । इति शब्दरत्नावली ॥

योगजं, क्ली, (योगात् जायते इति । जन् + डः ।) अगुरु । इति भावप्रकाशः ॥ योगजाते, त्रि ॥

योगजः, पुं, (योगेभ्यो जायते इति । जन् + डः ।) अलौकिकसन्निकर्षविशेषः । स च युक्तयुञ्जान-भेदतो द्विविधः । यथा,—
“अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्ष्यते ॥
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः ॥”
इति भाषापरिच्छेदे । ६३—६६ ॥ * ॥
“योगज इति । योगाभ्यासजनितधर्म्मविशेषः । श्रुतिपुराणादिप्रमाणक इत्यर्थः । युक्तेति । युक्तयुञ्जानरूपयोगिद्वैविध्यात् धर्म्मस्य द्वैविध्य-मिति भावः । युक्तस्येति । योगाभ्यासावगता वशीकृत-समाधि-समासादित-विविधसिद्धियुक्त इत्युच्यते । अयमेव विशिष्टयोगवत्त्वात् युक्त इत्यु-च्यते । सर्व्वदेति । चिन्तासहकारं विनेत्यर्थः । भानं सर्व्वविषयाणां प्रत्यक्षम् । अपरो युञ्जानः । विषयव्यावृत्तया मानससमाधिस्थः अयञ्च युञ्जान उच्यते । चिन्ता ध्यानं तदेव कारणं तत्सहकारात् सूक्ष्मव्यवहितविप्रकृष्टा-र्थान् मनः प्रत्यक्षीकरोतीत्यर्थः ।” इति सिद्धान्तमुक्तावली ॥

योगदानं, क्ली, (योगेन दानम् ।) छलेन दानम् । यथा,—
“योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत्तत् सर्व्वं विनिवर्त्तयेत् ॥”
इति मानवे ८ अध्यायः ॥
“योगाधमनेति । योगशब्दश्छलवाची छलेन ये बन्धकविक्रयदानप्रतिग्रहाः क्रियन्ते न तत्त्वतो-ऽन्यत्रापि निःक्षेपादौ यत्र छद्म जानीयात् वस्तुतो निक्षेपादि न कृतं तत् सर्व्वं निवर्त्त-येत् ।” इति तट्टीकायां कुल्लूकभट्टः ॥

योगनाविकः, पुं, मत्स्यविशेषः । तत्पर्य्यायः ! गर्गाटः २ । इति हारावली ॥

योगनिद्रा, स्त्री, (योगश्चित्तवृत्तिनिरोधलक्षणः समाधिस्तद्रूपा निद्रा ।) दुर्गा । यथा,—
“या निम्नान्तःस्थलाधस्था जगद्दण्डकपालतः ।
विभज्य पुरुषं याति योगनिद्रेति सोच्यते ॥”
इति कालिकापुराणे ६ अध्यायः ॥
(अपि च मार्कण्डेये देवीमाहात्म्ये । ८१ ।४९।
“योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ॥”
योगेन सन्नहनोपायादिना साध्या निद्रा । वीराणां निद्रा । यथा, कामन्दकीयनीति-सारे । १५ । ४४ ।
“मार्गे च दुर्गे विनिविष्टसैन्यो
विधाय रक्षां विधिवद्विधिज्ञः ।
सन्नद्धपार्श्वस्थितवीरयोधः
सेवेत साध्वीं सुखयोगनिद्राम् ॥”)

योगपट्टं, क्ली, (योगस्य पट्टं वसनविशेषः । योगार्थं पट्टमिति वा ।) यद्द्वारा पृष्ठजानुबन्धनं भवति तत् । यथा,—
“पादुके योगपट्टञ्च तर्ज्जन्यां रौप्यधारणम् ।
न जीवत्पितृकः कुर्य्यात् ज्येष्ठे भ्रातरि
जीवति ॥”
तल्लक्षणं यथा,—
“पृष्ठजान्वोः समायोगे वस्त्रं वलयवद्दृढम् ।
परिवेष्ट्य यदूर्द्धमुष्टिष्ठेत्तद्योगपट्टकम् ॥”
इति पाद्मे कार्त्तिकमाहात्म्ये २ अध्यायः ॥
(योगपदकम् । उत्तरीयविशेषः । यथा, याज्ञ-वल्क्यः ।
“अभावे धौतवस्त्राणां शाणक्षौमाविकानि च ।
कुतपो योगपट्टं वा द्विर्व्वासा येन वा भवेत् ॥”)
इत्याह्निकतत्त्वम् ॥)

योगपदकं, क्ली, (योगस्य पदकम् ।) पूजादौ धार्य्योत्तरीयविशेषः । योगपाटा इति भाषा ॥ यथा,—
“त्रिविधं योगपदकमाद्यं व्याघ्राजिनोद्भवम् ।
द्वितीयं मृगचर्म्मोत्थं तृतीयं तन्तुनिर्म्मितम् ।
चतुर्म्मासप्रविस्तारं दैर्घ्येण यज्ञसूत्रवत् ॥
चतुर्म्मासं चतुरङ्गुलमात्रम् ॥” इति वीर-मित्रोदयधृतसिद्धान्तशेखरः ॥

योगपीठं, क्ली, (योगस्य योगार्थं वा पीठमास-नम् ।) देवानां योगासनम् । यथा,—

"मण्डलं योगपीठन्तु पद्मं पद्मे विचिन्तयेत् ।
प्रावादीन्यासनानीह चत्वार्य्यपि विचिन्तयेत् ॥
योगपीठं पृथग्ध्यात्वा मण्डलेन सहैकताम् ।
पुनर्ध्यात्वा ततः पश्चात् पूजयेदासनं ततः ॥
ध्यानेन योगपीठस्य ध्यात्वा यद्दीयते जलम् ।
नैवेद्यपुष्पधूपादि तत् स्वयञ्चोपतिष्ठते ॥
सर्व्वे देवाः सगन्धर्व्वाः सचराचरगुह्यकाः ।
चिन्तिताः पूजिताश्च स्युर्योगपीठस्य पूजने ॥"
इति कालिकापुराणे ५६ अध्यायः ॥

योगमाया, स्त्री, (योग एव माया ।) भगवती । सा च विष्णुमाया । यथा, —
"ततश्च शौरिर्भगवत्प्रचोदितः
सुतं समादाय स सूतिकागृहात् ।
यदा बहिर्गन्तुमियेष तर्ह्यजा
या योगमायाजनि नन्दजायया ॥"
इति श्रीभागवते १० स्कन्धे ३ अध्यायः ॥

योगरङ्गः, पुं, (योगेन रङ्गो रागो यस्य ।) नारङ्गः । इति राजनिर्घण्टः ॥ (नारङ्गशब्देऽस्य विशेषो ज्ञेयः ॥)

योगराजगुग्गुलुः, पुं, (योगराजाख्यो गुग्गुलुः ।) वातरोगादीनामौषधविशेषः । यथा,—
"नागरं पिप्पलीमूलं चव्यमूषणचित्रकम् ।
भृष्टं हिङ्ग्वजमोदा च सर्षपौ जीरकद्वयम् ॥
रेणुकेन्द्रयवौ पाठा विडङ्गं गजपिप्पली ।
कटुकातिविषा भार्गी वचा मूर्व्वा च पत्रकम् ।
देवदारु कणा कुष्ठं रास्ना मुस्ता च सैन्धवम् ।
एला त्रिकण्टकः पथ्या धान्यकञ्च विभीतकम् ॥
धात्री च त्वगुशीरञ्च यवक्षारोऽखिलान्यपि ।
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥
यावन्त्येतानि चूर्णानि तावदेवात्र गुग्गुलुः ।
संमर्द्य सर्पिषा पश्चात् सर्व्वं संमिश्रयेच्च तत् ॥
एकपिण्डं ततः कुर्य्यात् धारयेत् घृतभाजने ।
गुटिकाष्टकमात्रास्तु खादेत्ताश्च यथोचितम् ॥
यथोचितमिति दोषकालानलाद्यपेक्षया ॥
परिभाषा च ।
आदौ शाणोन्मितं खादेत् ततः कर्षार्द्धमात्रकम् ।
ततः कर्षमितं खादेत् गुग्गुलुं क्रमतो नरः ॥
दिनानां सप्तके पूर्व्वे गुग्गुलोः शाणमाहरेत् ।
द्वितीये कर्षमर्द्धन्तु पूर्णं कर्षं ततः परम् ॥
गुग्गुलुर्योगराजोऽयं महान्मुख्यो रसायनः ।
मैथुनाहारपानानां नियमो नात्र विद्यते ॥
सर्व्वान् वातामयान् हन्यात् आमवातमपस्मृतिम् ।
वातरक्तं तथा कुष्ठं तथा दुष्टव्रणानपि ॥
अर्शांसि ग्रहणीरोगं प्लीहगुल्मोदराण्यपि ।
आनाहं मन्दमग्निञ्च श्वासं कासमरोचकम् ॥
प्रमेहं नाभिमूलञ्च क्रिमिं चयमुरोग्रहम् ।
शुक्रदोषं रजोदोषमुदावर्त्तं भगन्दरम् ॥ * ॥
रास्नादिक्वाथसंयुक्तः सर्व्ववातामयान् हरेत् ।
काकोल्यादिशृतात् पित्तं कफमारग्वधादिना ॥
दार्व्वीशृतेन मेहांश्च गोमूत्रेण च पाण्डुताम् ।
मधुना मेदसो वृद्धिं कुष्ठं निम्बशृतेन च ॥
छिन्नाक्वाथेन वातास्रं शोफं मूलकजात् शृतात् ।
पाटलाक्वाथसहितो विषं मूषकसम्भवम् ॥
त्रिफलाक्वाथसंयुक्तो दारुणां नेत्रवेदनाम् ।
पुनर्नवादेः क्वाथेन हन्ति सर्व्वोदराणपि ॥ * ॥
अत्र रास्नादिक्वाथो यथा,—
रास्ना पुनर्नवा शुण्ठी गुडूच्येरण्डजं शृतम् ।
सप्तधातुगते वाते सामे सर्व्वाङ्गगे पिबेत् ॥
इति योगराजो गुग्गुलुः ॥" इति भावप्रकाशः ॥

योगरूढः, पुं, (योगार्थप्रतिपादको रूढः ।) योगार्थसहभावेन रूढ्यर्थबोधकशब्दः । यथा,
"योगरूढाश्च रूढाश्च यौगिकाश्चेति ते त्रिधा ॥"
"ते शब्दाः पुनस्त्रिधा भवन्ति । योगरूढाः पङ्कजादयः । पङ्कजनिप्रत्ययैः पङ्कजनिकर्त्तृमभिधाय केन योगेनापि पद्मार्थ एव प्रतिपाद्यते न कुमुदाद्यर्थ इति । योगार्थपुरस्कारेणापि रूढ्यर्थ एवेति योगरूढः । एवं ईश्वरसङ्केतमहिम्ना झटिति पद्मस्यैव स्मृतेः ।" इत्यलङ्कारकौस्तुभे २ किरणः ॥ ("योगरूढं नाम लक्षयति ।
'स्वान्तर्निविष्टशब्दार्थस्वार्थयोर्बोधकृज्जियः ।
योगरूढं न यत्रैकं विनान्यस्यास्ति शाब्दधीः ॥'
यन्नाम स्वावयववृत्तिलभ्यार्थेन समं स्वार्थस्यान्वयबोधकृत् तन्नाम योगरूढं यथा पङ्कजक्षत्रसर्पाधर्म्मादि तद्धि शान्तर्निविष्टानां पङ्कादिशब्दानां वृत्तिलभ्येन पङ्कजनिकर्त्रादिना समं स्वशक्यस्य पद्मादेरन्वयानुभावकं पङ्कजमित्यादितः पङ्कजनिकर्त्तृ पद्ममित्यनुभवस्य सर्व्वसिद्धत्वात् । इयांस्तु विशेषो यद्रूढमपि मण्डपरथकारादिपदं योगार्थविनाकृतस्य रूढ्यर्थस्यैव रूढ्यर्थविनाकृतस्यापि योगार्थस्य बोधकं मण्डपे प्रेते इत्यादौ योगार्थस्य मण्डपानकर्त्रादेरिव मण्डपं भोजयेदित्यादौ समुदितार्थस्य गृहादेरयोग्यत्वेनान्वयबोधात् । योगरूढन्तु पङ्कजादिपदमवयववृत्त्या रूढ्यर्थमेव समुदायशक्त्या चावयवलभ्यार्थमेवानुभावयति नत्वन्यं व्युत्पत्तिवैचित्र्यात्तथैव साकाङ्क्षत्वात् । अतएव पङ्कजं कुमुदमित्यत्र पङ्कजनिकर्त्तृत्वेन भूमौ पङ्कजमुत्पन्नमित्यादौ च पद्मत्वेन पङ्कजपदस्य लक्षणयैव कुमुदस्थलपद्मयोर्बोध इति वार्त्तिकम् । ननु पुष्पं पङ्कजेत्यादौ पङ्कजादेरन्वयस्याबोधात् बोधाच्च पङ्कजपुष्पमित्यादौ निर्विभक्तिकेन पङ्कजादिपदेनोपस्थाप्यार्थस्यान्वयधीसामान्यं प्रत्येव तादृशपङ्कजादिपदोत्तरशब्दोपस्थाप्यत्वं तन्त्रम् एवं पुष्पं पङ्कजमित्यादौ अन्वयबोधदर्शनात्तदनुरोधेन सविभक्तिकपङ्कजादिपदोपस्थाप्यार्थान्वयबोधं प्रति स्वसमानविभक्तिकपदोपस्थाप्यत्वञ्च अतस्तदनुपस्थापितस्य पङ्कजातादेः कथं पदान्तरानुपस्थापितं 'पद्माद्यावन्वय इति चेदपङ्कजवृत्तिः सत्त्यादौ च व्यभिचाराद्व्युत्पत्तेः 'स्वच्छन्दचरवंशाभि तडागास्थपङ्कजम् ।' इत्यादौ सङ्कोचेनेति गृहाण । नच धेनुपदस्य धानकर्म्मत्वविशिष्टायां गवीव पङ्कजादिपदस्यापि पङ्कजातत्वादिविशिष्टपद्मादौ रूढिरेवास्तु नतु योगरूढिरिति साम्प्रतं अन्यत्र क्लृप्तशक्तिभ्यः पङ्कजन्यादिपदेभ्य एवाकाङ्क्षादिसाचिव्येन पङ्कजनिकर्त्तृत्वादेर्लाभसम्भवे तद्विशिष्टस्य पद्मस्य गुरोः समुदायशक्यत्वादनन्यलभ्यस्यैव शब्दार्थत्वात् । यद्यपि कर्त्तृवाचकडप्रत्यये एव पद्मत्वविशिष्टस्य लक्षणया लाभसम्भवान्न पङ्कजभागस्य तत्र शक्तिरुचिता प्रकारान्तरालभ्यस्यैव शब्दशक्यत्वमित्युक्तत्वात् स्तनिवर्त्तमानत्वयोरिवैकपदार्थयोरपि कर्त्तृपद्मयोर्मिथोऽन्वयस्य सम्भवित्वात् तथाप्यवयवानां शक्तेरग्रहे ग्रहेऽपि वा पद्मादौ तदर्थस्यान्वयधीविरोधिधीदशायां पङ्कजमस्तीत्यादितः पद्ममस्तीत्याद्यनुभवार्थमवश्यं पद्मत्वादिविशिष्टे पङ्कजादिभागस्य रूढिरपेया इतरथा प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य पदार्थान्तरेणान्वयस्य व्युत्पन्नतया डप्रत्ययोपस्थापितस्यापि पद्मस्यास्तित्वादिना सहान्वयानुपपत्तेः । अतएव पङ्कजादिपदागृहीतशक्तिकस्य पुंसः पङ्कजमस्तीत्यादितो ज्ञात्वपि कर्त्रास्तीत्याकारको नान्वयबोधः प्रत्ययमात्रोपस्थाप्यस्य कर्त्तुरन्यत्रान्वये निराकाङ्क्षत्वादिति वक्ष्यते । किञ्चैवमेकाक्षरकोषावधृतशक्तिकानां कखादिप्रत्येकवर्णानामेव निरूढलक्षणया तत्तदर्थानुभावकत्वसम्भवाद्दकनखादिसमुदायस्यापि तत्तदर्थे शक्तिर्व्विलीयेत कादिप्रत्येकवर्णस्य शक्तिग्रहं विनापि वकादिशब्दाद्दकादेरनुभवार्थं तत्र समुदाये शक्तिरिति तु प्रकृतेऽपि समानं खादिप्रत्ययमात्रस्य पद्मादौ वृत्तिमत्त्वाग्रहेऽपि पङ्कजादिसमुदायात् पद्मादेरनुभवस्य सर्व्वसिद्धत्वात् । नचैवं चित्रगुरित्यादावपि चित्रगोस्वाम्यादौ समुदायस्य शक्तिप्रसङ्गः समासत्वस्याविशिष्टत्वादिति वाच्यम् अगृहीतावयववृत्तिकस्य पुंसस्ततोऽर्थानधिगमेनावयवानां वृत्तेरवश्यापेक्षायां तेषामेव तथाविधार्थबोधकत्वौचित्यस्य वक्ष्यमाणत्वादिति ।

पङ्कजादिपदेभ्यः केवलस्यैव योगार्थस्य रूढ्यर्थस्य वा बोधव्युदासार्थन्तादृशार्थयोर्मिथः साकाङ्क्षत्वनियमो न कल्प्यते परन्तु रूढ्यर्थभिन्ने योगार्थस्य बोधं प्रति रूढिधियः प्रतिबन्धकत्वं तेन रूढेरप्रतिसन्धानदशायामवयवशक्त्यैव पङ्कजं कुमुदमित्यादौ पङ्कजनिकर्त्तृत्वादिना कैरवादेरवगमस्तथावयवशक्तेरनुपस्थितौ समुदायशक्त्यैव भूमौ पङ्कजमुत्पन्नमित्यादौ पद्मत्वप्रकारेण स्थलपद्मादेरतएव च तैलपदं योगेन तिलप्रभवं रूढ्या विलक्षणद्रवपर्य्यवसितं स्नेहं बोधयेद्योगरूढमपि तैलं पचमित्यादौ सर्षपस्य तैलमित्यादौ च शक्त्यैव प्रत्येकस्य बोधकमिति मीमांसकानां मतमुपन्यस्यति ।
'रूढ्यर्थभिन्ने योगार्थबुद्धौ रूढिर्विरोधिताम् ।
वदन्ति केचिदेकैकबुद्धिस्तैः क्वचिदिष्यते ॥'
क्वचित्समुदायावयवयोरेकमात्रस्य शक्तिप्रति-

सम्बन्धस्थले यद्यपि पद्मान्यधर्म्मिकपङ्कजातत्वान्वयधीसामान्यं प्रति पङ्कजपदं पद्मशक्तमित्येवं रूढिज्ञानत्वेन न विरोधित्वं तादृशधीसत्त्वेऽपि कर्दमजातादिशब्देभ्यस्तादृप्येण कैरवादेरवगमात् नापि पङ्कजपदजन्यतादृशबोधं प्रत्येव तथा विरोधित्वं रूढिज्ञानदशायामपि समुदायस्य लक्षणया शक्तिभ्रमेण वा पङ्कजपदात् पङ्कजातत्वेन कुमुदबोधस्य सर्व्वैरुपगमात् तथाप्यवयवशक्त्या पङ्कजपदजन्यपद्मान्यधर्म्मिकपङ्कजातत्वान्वयबोधं प्रत्येव रूढिज्ञानत्वेन प्रतिबन्धकत्वम्। नच कुमुद एव पद्मत्वेन रूढिभ्रमदशायां तादृप्येण कुमुदस्य बोधो न स्याद्विरोधिन्या रूढिधियः सत्त्वादिति वाच्यं पद्मान्यधर्म्मिकत्वेन पद्मत्वानवच्छिन्नविशेष्यताकत्वस्योक्तत्वात्। पद्मस्येव कुमुदस्यापि समुदायशक्यत्वधीदशायामवयवशक्त्या पङ्कजातं कुमुदमित्याकारकधीस्वीकारे तु कुमुदादिशक्तत्वज्ञानानामन्यत्वे नापि प्रतिबध्यं विशेषणीयम्। नच यत्र तात्पर्य्यादिधीविलम्बादयोग्यताभ्रमादिना-प्रतिबन्धाद्वा रूढ्योपस्थिते पद्मे योगार्थस्य पङ्कजनिकर्त्तुरनन्वयस्तत्रावयवशक्त्या पङ्कजातत्वेन कुमुदादिबोधो न स्यात् विरोधिनो रूढिज्ञानस्य सत्त्वादिति वाच्यं मीमांसकानामिष्टत्वात् ते हि मण्डपं भोजयेत्यादावपि यत्रादौ रूढिधीसत्त्वे मण्डपादिपदानामवयवशक्त्या मण्डपानकर्त्रादेर्न सम्यग् बोधं भ्रमत्वाग्रहणाक्रान्तस्यैव रूढार्थगोचरतदयोग्यताज्ञानाद्यभावविशिष्टस्यैव रूढिज्ञानस्य विरोधितायाः सुवचत्वाच्च। यदि च समुदाय एव पद्मत्वेन पङ्कजनिकर्त्तृत्वेन च शक्तिः प्रमाभ्रमाभ्यां पङ्कजातं पद्ममित्याकारको बोधः प्रामाणिकस्तदानीं च पङ्कजनिकर्त्तृत्वेन कुमुदस्य नान्वयधीः तदावयवशक्त्यैवोपपाद्य पङ्कजपदघटकशब्दशक्तीति प्रतिबध्यकुक्षौ निवेशनीयं तद्घटकत्वेन तद्विषयितापादकविषयिताकत्वमात्रं तदवधेय एव तथाप्यविशिष्टम्। यत्तु स्वावयवशक्त्या पङ्कजपदजन्यं पङ्कजकर्त्तृत्वेनान्वयबोधं प्रति पद्मत्वं हेतुत्वञ्च कार्य्यस्य विशेष्यत्वं तदवच्छेदकत्वं वा कारणस्य तु समवायस्तादात्म्यं वा प्रत्यासत्तिरित्यतश्चैव योगार्थमर्य्यादया कुमुदादेर्बोधस्योपपत्तिसम्भवात् उक्तक्रमेण प्रतिबन्धकतायां मानाभावः पद्मत्वं पङ्कजप्रयोगोपाधिरिति प्राचीनप्रवादस्याप्युक्तार्थ एव पर्य्यवसानादिति तत्तुच्छं पद्माप्रतीतप्रवृत्तिकस्यापि पुंसः पङ्कजनिकर्त्तृत्वेनावयवशक्त्या कुमुदस्य बोधानुदयप्रसङ्गात् नचेष्टापत्तिरनुभवविरोधात् नच रूढिज्ञानकालीनमेव योगार्थस्य बोधं प्रत्युक्तरीत्या पद्मत्वस्य हेतुत्वं तथा सति रूढिधीदशायामपि तदसमानकालीनस्य पङ्कजातत्वेन कुमुदबोधस्य सामान्यसामग्रीमहिम्ना दुर्व्वारतापत्तेः रूढिज्ञानासमानकालीनतादृशबोधं प्रति विशेषतो हेत्वन्तरस्याकृप्तत्वात् तत्कल्पने चातिगौरवात्। यद्यपि पङ्कजननकर्त्तृषु पङ्कजादिपदानां शक्तिसत्त्वेऽपि पङ्कजपदान्न तादृप्येण बोधः परन्तु पद्मत्वमात्रेण योगार्थमर्य्यादया पङ्कजातत्वप्रकारकबोधसामान्यं प्रत्येव पद्मत्वविशिष्टे रूढिज्ञानस्य लाघवेन विरोधित्वात् पद्मान्यधर्म्मिकत्वादेर्गौरवेण प्रतिबध्यकोटावप्रवेशादतो योगरूढं नामैव नास्ति युधिष्ठिरादिशब्दादपि रणस्थिरत्वादिकं योगार्थं परित्यज्यैव चैत्रत्वादिप्रकारेण कुन्तीपुत्राद्यवगमात्। यदुक्तमभियुक्तैः।

या वृत्तिरजहत्स्वार्था सेयमत्रोपपादिता।
जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी।
पङ्कजं मनसा देवी पद्मनाभो युधिष्ठिरः॥

इति। तदेतद्वैयाकरणमतं पङ्कजमस्तीत्यादितः पङ्कजातं पद्ममस्तीत्याद्यनुभवस्य न्यायमीमांसादिसकलतन्त्रसिद्धत्वेन गौरवस्य प्रामाणिकत्वादनादेयमन्यथा अवयवशक्तेरपि प्रतिबध्यतायामप्रवेशापत्तेर्लाघवे पङ्कजातत्वप्रकारकशाब्दसामान्यं प्रत्येव रूढिधियः प्रतिबन्धकत्वस्य सुवचत्वात्। नन्वेवं दध्नि सरसिजमस्तीत्यादितो दध्यनिष्ठं सरोजमिव दध्यभिन्ने सरसि जातं पद्ममपि प्रतीयेत नामार्थयोरभेदान्वये तन्त्रस्य नाम्नोः समानविभक्तिकत्वस्याभावादिति चेत् सत्यं सविभक्तिकनामार्थस्य नामान्तरार्थान्वये वृत्तिशब्दैकदेशार्थेनैव समानविभक्तिकनामान्तरेण स्मारितत्वस्य तन्त्रतायाः स्वीकार्य्यत्वादिति।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैः समधिगम्यते॥

इति रूढार्थयोगार्थयोर्युगपदुपस्थितौ तयोराकाङ्क्षादिसाचिव्यादाहत्यान्वयबुद्धिस्थल एव योगार्थस्य रूढार्थस्य वा नान्यत्रान्वयो नतु तयोरेव मिथः साकाङ्क्षत्वं अन्यत्र योगार्थस्य बोधने रूढिधियः प्रतिबन्धकत्वं वा प्रमाणाभावात् एवञ्च यत्र योगरूढिलभ्यार्थयोस्तात्पर्य्याद्यग्रहाद्विरोधिसमवधानाद्वा न प्रथममन्वयधीस्तत्र योगार्थमर्य्यादया पङ्कजातत्वेन कुमुदादेः समुदायशक्त्या च पद्मत्वेन स्थलकमलस्य बोधो भवत्येवेति मणिकृन्मतं दर्शयति।

'रूढार्थेऽन्यत्र या यत्र यदाकाङ्क्षादिनिश्चयः।
तदैव तत्र योगार्थस्यान्वयो मणिकृन्मतः॥'

समुदायशक्त्युपस्थापिते पदान्तरवृत्त्युपस्थापिते वा यत्र धर्म्मिण्यवान्तरवृत्तिलभ्यार्थस्य यदाकाङ्क्षानिश्चयादिस्तदैव तत्र तथान्वयबोध उत्पद्यते सम्भूतसामग्रीकत्वात् रूढार्थभिन्ने योगार्थस्यान्वयबोधमुदासाय तु रूढेर्योगापहारिताप्रवादो रूढार्थमात्रे योगार्थस्यान्वयबोधसामग्रीस्थलाभिप्रायक इति चिन्तामणिकृताम्मतम्।
योगरूढं विभजते।

'सामासिकं तद्धितान्तमिति तद् द्विविधं भवेत्।
योगरूढं कृदन्तस्य समासत्वव्यवस्थितेः॥'

तत् योगरूढं सामासिकं समासात्मकं यथा-सपादि तद्धितान्तं वासुदेवादि। कृदन्तस्य पङ्कजादियोगरूढस्य सामासिक एवान्तर्भाव इति नाधिक्यम्॥ * ॥)

योगवाहः, पुं, (योगस्य वाहः। योगं वाहयतीति। वह + णिच् + अण् वा।) अनुस्वारः। विसर्गः। जिह्वामूलीयः। उपध्मानीयः। इति व्याकरणम्॥

योगवाही, स्त्री, (योगं वाहयतीति। वह + णिच् + अण्। ततो ङीष्।) क्षारविशेषः। यथा,—
"स्वर्जिस्तु स्वर्जिकासुघ्नी योगवाही सुवर्चिका।"
इति हेमचन्द्रः॥
पारदश्च। (पुं, रोगविशेषे मिलितानामौषधानां प्रयोगः। यथा,—
"योगवाहिरसाः सर्व्वे सर्व्वरोगगलग्रहे॥"
इति वैद्यकरसेन्द्रसारसंग्रहे रक्तपित्ताधिकारे॥)

योगसारः, पुं, (योगस्यौषधप्रयोगस्य सारः।) सर्व्वरोगहरणोपायः। यथा,—
धन्वन्तरिरुवाच।
"सर्व्वरोगहरं सिद्धं योगसारं वदाम्यहम्।
शृणु सुश्रुत! संक्षेपात् प्राणिनां जीवहेतवे॥
निमेषादिर्हविःकालश्चिन्ताभिः षड्विधो भवेत्॥
कषायकटुतिक्ताम्लरूक्षाहारादभोजनात्।
चिन्ताव्यवायव्यायामभयशोकप्रजागरात्॥
उच्चैर्भाष्यतिभावाच्च कर्म्मयोगातिकर्षणात्।
वायुः कुप्यति पर्य्यन्ते जीर्णान्ने दिनसंक्षये॥
उष्णाम्ललवणक्षारकटुकाजीर्णभोजनात्।
तीक्ष्णातपाग्निसन्तापमद्यक्रोधनिषेवणात्॥
विदाहकाले भुक्तस्य मध्याह्ने जलदागमे।
ग्रीष्मकालेऽर्द्धरात्रेऽपि पित्तं कुप्यति देहिनः॥
स्वाद्वम्ललवणस्निग्धगुरुशीतातिभोजनात्।
नवान्नपिच्छलानूपमांसाभिष्यन्दिसेवनात्॥
अव्यवायो दिवास्वप्नशय्यासनसुखादिभिः।
कफः प्रदोषे भुक्ते च वसन्ते च प्रकुप्यति॥
पारुष्यमूलसङ्कोचतोदविष्टम्भभोजनात्।
खरता सुप्तता हर्षरौक्ष्यस्तम्भनशोषणम्॥
श्यावत्वमङ्गविश्लेषवलनाशामवर्त्तनम्।
वायोर्लिङ्गानि तैर्युक्तं रोगं वातात्मकं वदेत्॥
दाहोष्मपादसंक्लेदकोपरागपरिस्रवाः।
कट्वम्लशवगन्धस्वेदमूर्च्छातितृट्श्रमाः॥
हारिद्रं हरितत्वञ्च पित्तलिङ्गानि तैर्लयः।
स्नेहोपदेहमाधुर्य्यचिरकारित्वबन्धनम्॥
स्तैमित्यहृदिसंघातशोथशीतत्वगौरवम्।
कण्डुनिद्राभियोगश्च लक्षणं कफसम्भवम्॥
हेतुलक्षणसंसर्गाद्विद्याद्व्याधिं द्विदोषजम्।
सर्व्वहेतुसमुत्पन्नं त्रिलिङ्गं सान्निपातिकम्॥
दोषधातुमलाधारो देहिनां देह उच्यते।
तेषां समत्वमारोग्यं क्षयवृद्धौ विपर्य्ययः॥
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः।
वातपित्तकफा दोषा विण्मूत्राद्या मलाः स्मृताः।
वायुः शीतो लघुः सूक्ष्मः खरो रूक्षोऽस्थिरो बली।
पित्तमम्लकटूष्णञ्च पक्वोजोरोगकारणम्।
मधुरो लवणः स्निग्धो गुरुः श्लेष्मातिपिच्छिलः।

गुह्यश्रोण्याश्रयो वायुः पित्तं पक्वाशयस्थितम् ॥
कफस्यामाशयं स्थानं कण्ठोरन्ध्रसन्धयः ।
कटुतिक्तकषायाश्च कफपित्तादिसंश्रयः ।
कट्वम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफम् ॥
एत एव विपर्य्यस्ताः समायैर्वा प्रयोजिताः ।
भवन्ति रोगिणां शान्त्यै सुस्थानां सुखहेतवः ॥"
इत्यादि गारुडे १७२ अध्यायः ॥
(योगस्य सारः । शिववल्लभात्मको ग्रन्थविशेषः ॥)

योगाधमनं, क्ली, (योगेनाधमनम् ।) छलेन बन्धकम् । यथा,—
"योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत् तत् सर्व्वं विनिवर्त्तयेत् ॥"
इति मनुः ॥
अस्य विवरणं योगदानशब्दे द्रष्टव्यम् ॥

योगारङ्गः, पुं, (योगेन ऋतुयोगेन आरङ्गः ।) नारङ्गः । इति राजनिर्घण्टः ॥

योगारूढः, त्रि, (योगं विषयनिवृत्तिं यमादिकं वा आरूढः ।) इन्द्रियभोग्येषु शब्दादिषु तत्साधनकर्म्मसु चानासक्तः । तस्य लक्षणं यथा,—
"यदा हि नेन्द्रियार्थेषु न कर्म्मस्वनुषज्जते ।
सर्व्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ॥"
इति श्रीभगवद्गीतायाम् । ६ । ४ ॥ * ॥
"कीदृशोऽयं योगारूढो यस्य शमः कारणमुच्यते इत्यत्राह यदेति । इन्द्रियार्थेषु इन्द्रियभोग्येषु शब्दादिषु तत्साधनेषु च कर्म्मसु यदा नानुषज्जते आसक्तिं न करोति । तत्र हेतुः आसक्तिमूलभूतान् सर्व्वान् भोगविषयान् कर्म्मविषयांश्च सङ्कल्पान् संन्यसितुं त्यक्तुं शीलं यस्य सः । तदा योगारूढ उच्यते ।" इति तट्टीकायां श्रीधरस्वामी ॥

योगासनं, क्ली, (योगस्यासनं योगसाधनमासनमिति वा ।) ब्रह्मासनम् । ध्यानासनम् । इति हेमचन्द्रः । ३ । ५०३ ॥ (तत्तु पद्मासनादि । यथा, भट्टिकाव्ये । ७ । ७७ ।
"इत्युक्ता सर्व्व एवास्युर्बद्धा योगासनानि ते ॥"
"योगासनानि पद्मासनानि ।" इति तट्टीकायां जयमङ्गलभरतमल्लिकौ ॥)

योगिदण्डः, पुं, (योगिनां दण्डोऽवलम्बनयष्टिः ।) वेत्रः । इति राजनिर्घण्टः ॥

योगिनी, स्त्री, (योगोऽस्त्यस्या इति । योग + इनिः । ङीप् ।) योगयुक्ता नारी । (यथा, मार्कण्डेये । ५२ । ३१ ।
"ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज ॥")
भगवत्याः सखीरूपा आवरणदेवता । सा कोटिविधा । तासां मध्ये चतुःषष्टिः प्रधानाः । यथा । नारायणी १ गौरी २ शाकम्भरी ३ भीमा ४ रक्तदन्तिका ५ भ्रामरी ६ पार्व्वती ७ दुर्गा ८ कात्यायनी ९ महादेवी १० चण्डघण्टा ११ महाविद्या १२ महातपा १३ सावित्री १४ ब्रह्मवादिनी १५ भद्रकाली १६ विशालाक्षी १७ रुद्राणी १८ कृष्णपिङ्गला १९ अग्निज्वाला २० रौद्रमुखी २१ कालरात्रिः २२ तपस्विनी २३ मेघस्वना २४ सहस्राक्षी २५ विष्णुमाया २६ जलोदरी २७ महोदरी २८ मुक्तकेशी २९ घोररूपा ३० महाबला ३१ श्रुतिः ३२ स्मृतिः ३३ धृतिः ३४ तुष्टिः ३५ पुष्टिः ३६ मेधा ३७ विद्या ३८ लक्ष्मीः ३९ सरस्वती ४० अपर्णा ४१ अम्बिका ४२ योगिनी ४३ डाकिनी ४४ शाकिनी ४५ हारिणी ४६ हाकिनी ४७ लाकिनी ४८ त्रिदशेश्वरी ४९ महाषष्ठी ५० सर्व्वमङ्गला ५१ लज्जा ५२ कौशिकी ५३ ब्रह्माणी ५४ माहेश्वरी ५५ कौमारी ५६ वैष्णवी ५७ ऐन्द्री ५८ नारसिंही ५९ वाराही ६० चामुण्डा ६१ शिवदूती ६२ विष्णुमाया ६३ मातृका ६४ । इति दृहन्नन्दिकेश्वरपुराणोक्तदुर्गापूजापद्धतिः ॥ अपि च ।
"ब्रह्माणी चण्डिका रौद्री गौरीन्द्राणी तथैव च ।
कौमारी वैष्णवी दुर्गा नारसिंही च कालिका ॥
चामुण्डा शिवदूती च वाराही कौशिकी तथा ।
माहेश्वरी शाङ्करी च जयन्ती सर्व्वमङ्गला ॥
काली कपालिनी मेधा शिवा शाकम्भरी तथा ।
भीमा शान्ता भ्रामरी च रुद्राणी चाम्बिका तथा ॥
क्षमा धात्री तथा स्वाहा स्वधापर्णा महोदरी ।
घोररूपा महाकाली भद्रकाली भयङ्करी ॥
क्षेमङ्करी चोग्रचण्डा चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चण्डी महामोहा प्रियङ्करी ॥
बलविकरिणी देवी बलप्रमथिनी तथा ।
मनोन्मथिनी देवी च सर्व्वभूतस्य दामिनी ॥
उमा तारा महानिद्रा विजया च जया तथा ।
पूर्व्वोक्ताः शैलपुत्त्राद्या योगिन्यष्टौ च याः क्रमात् ॥
ताभिराभिश्च सहिताश्चतुःषष्टीश्च योगिनीः ।
पूजयेन्मण्डलस्थान्तः सर्व्वकामार्थसिद्धये ॥"
इति कालिकापुराणे ६२ अध्यायः ॥ * ॥
अष्टयोगिन्यो यथा,—
"ततोऽष्टपत्रेष्वब्जस्य पूजयेदष्टयोगिनीः ॥
शैलपुत्त्रीं चण्डघण्टां स्कन्दमातरमेव च ।
कालरात्रिञ्च पूर्व्वादिचतुर्दिक्षु प्रपूजयेत् ॥
चण्डिकामथ कुष्माण्डीं तथा कात्यायनीं शुभाम् ।
महागौरीं चाग्निकोणे नैरृत्यादिषु पूजयेत् ॥"
इति तत्रैव ५३ अध्यायः ॥ * ॥
तिथिविशेषे दिग्विशेषावस्थितयोगिन्यो यथा,—
"ब्रह्माणी संस्थिता पूर्व्वे प्रतिपन्नवमीतिथौ ।
माहेश्वरी चोत्तरे च द्वितीयादशमीतिथौ ॥
स्थिताग्नेये च कौमारी तृतीयैकादशीतिथौ ।
नारायणी च नैरृत्ये चतुर्थीद्वादशीतिथौ ॥
पञ्चम्याञ्च त्रयोदश्यां वाराही दक्षिणे तथा ।
षष्ठ्याञ्चैव चतुर्द्दश्यामिन्द्राणी पश्चिमे स्थिता ॥
सप्तम्यां पौर्णमास्याञ्च चामुण्डा वायुगोचरे ।
अष्टम्यमावास्ययोश्च महालक्ष्मीशगोचरे ॥
योगिनीसंमुखे नैव गमनादि प्रकारयेत् ॥"
इति गारुडे ५९ अध्यायः ॥ * ॥
अपि च ।
"प्रतिपन्नवमी पूर्व्वे रामा रुद्राश्च पावके ।
शरत्त्रयोदशी याम्ये वेदा मासाश्च नैरृते ॥
षष्ठी चतुर्द्दशी पश्चात् वायव्यां मुनिपूर्णिमा ।
द्वितीया दशमी यक्षे ऐशान्यां चाष्टमी कुहूः ॥
वामे शुभकरी देवी म्लदुदा दक्षिणे स्थिता ।
वधबन्धकरी चाग्रे पृष्ठे सर्व्वार्थसाधनी ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
तत्कालयोगिनी यथा,—
"यस्यां दिश्युदयं याति ततो यामार्द्धभुक्तिका ।
भ्रमन्ती तेन मार्गेण भवेत्तत्कालयोगिनी ॥
प्राची धनेश्वरहुताशनकौणपेय-
वायव्यवारुणयमाधिपशङ्करेषु ।
एषु क्रमान्निवसति प्रतिपन्नवम्योः
पृष्ठे स्थिता शुभकरी गिरिराजपुत्त्री ॥"
इति समयामृतम् ॥ * ॥
अथ योगिनीसाधनम् । भूतडामरे ।
"अथातः संप्रवक्ष्यामि योगिनीसाधनोत्तमम् ।
सर्व्वार्थसाधनं नाम देहिनां सर्व्वसिद्धिदम् ॥
अतिगुह्या महाविद्या देवानामपि दुर्लभा ।
यासामभ्यर्च्चनं कृत्वा यक्षेशोऽभूद्धनाधिपः ॥
तासामाद्यां प्रवक्ष्यामि सुराणां सुन्दरीं प्रिये ।
अस्या अभ्यर्च्चनेनैव राजत्वं लभते नरः ॥
अथ प्रातः समुत्थाय कृत्वा स्नानादिकं शुभम् ।
प्रासादस्य समासाद्य कुर्य्यादाचमनं ततः ॥
प्रणवान्ते सहस्रारे हूँ फट् दिग्बन्धनं चरेत् ॥
प्राणायामं ततः कुर्य्यात् मूलमन्त्रेण मन्त्रवित् ।
षडङ्गं मायया कुर्य्यात् पद्ममष्टदलं लिखेत् ॥
तस्मिन् पद्मे महामन्त्रं जीवन्यासं समाचरेत् ।
पीठे देवीं समावाह्य ध्यायेद्देवीं जगत्प्रियाम् ॥
पूर्णचन्द्रनिभां गौरीं विचित्राम्बरधारिणीम् ।
पीनोत्तुङ्गकुचां रामां सर्व्वेषामभयप्रदाम् ॥
इति ध्यात्वा च मूलेन दद्यात् पाद्यादिकं शुभम् ।
पुनर्धूपं निवेद्यैव नैवेद्यं मूलमन्त्रतः ।
गन्धचन्दनताम्बूलं सकर्पूरं सुशोभनम् ॥
प्रणवान्ते भुवनेशी आगच्छ सुरसुन्दरि ! ।
वह्निभार्य्यां जपेन्मन्त्रं त्रिसन्ध्यञ्च दिने दिने ॥
सहस्रैकप्रमाणेन ध्यात्वा देवीं सदा बुधः ।
मासान्ते प्राप्य दिवसं बलिपूजां सुशोभनाम् ॥
कृत्वा च प्रजपेन्मन्त्रं निशीथे याति सुन्दरी ।
सुदृढं साधकं मत्वा याति सा साधकालये ॥
सुप्रसन्ना साधकाग्रे सदा स्मेरमुखी ततः ।
दृष्ट्वा देवीं साधकेन्द्रो दद्यात् पाद्यादिकं शुभम् ॥
सुचन्दनं सुमनसो ज्ञात्वाभिलषितं वदेत् ।
मातरं भगिनीं वापि भार्य्यां वा भक्तिभावतः ॥
यदि माता तदा वित्तं द्रव्यञ्च सुमनोहरम् ।
भूपतित्वं प्रार्थितं यत्तद्ददाति दिने दिने ।
पुत्त्रवत् पाति तं लोके सत्यं सत्यं सुनिश्चितम् ॥
स्वसा ददाति द्रव्यञ्च दिव्यवस्त्रं तथैव च ।
दिव्यां कन्यां समानीय नागकन्यां दिने दिने ॥
यद्यद्भवति भूतञ्च भविष्यतीति यत् पुनः ।
तत् सर्व्वं साधकेन्द्राय निवेदयति निश्चितम् ॥

यत् यत् प्रार्थयते सर्व्वं ददाति सा दिने दिने ।
भ्रातृवत् पाति तं लोके कामनाभिर्मनोगतैः ॥
भार्य्या स्याद्यदि सा देवी साधकस्य मनोहरा ।
राजेन्द्रः सर्व्वराजानां संसारे साधकोत्तमः ॥
स्वर्गे मर्त्ये च पाताले गतिः सर्व्वत्र निश्चितम् ।
यद्यद्ददाति सा देवी कथितुं नैव शक्यते ॥
तया सार्द्धञ्च संभोगं करोति साधकोत्तमः ।
अन्यस्त्रीगमनं त्यक्त्वा अन्यथा नश्यति ध्रुवम् ॥१॥
ततोऽन्यत् साधनं वक्ष्ये निर्म्मितं ब्रह्मणा पुरा ।
नदीतीरं समासाद्य कुर्य्यात् स्नानादिकं ततः ॥
पूर्व्ववत् सकलं कार्य्यं चन्दनेनैककं लिखेत् ।
समस्तं तत्र संलिख्यावाह्य ध्यायेन्मनोहराम् ॥

कुरङ्गनेत्रां शरदिन्दुवक्त्रां
बिम्बाधरां चन्दनगन्धलिप्ताम् ।
चीनांशुकां पीनकुचां मनोज्ञां
श्यामां सदा कामदुघां विचित्राम् ॥

एवं ध्यात्वा जपेद्देवीमगुरुधूपदीपकैः ।
गन्धं पुष्पञ्चैव ताम्बूलादींश्च मूलतः ॥
तारं माया गच्छ मनोहरे पावकवल्लभा ।
जप्त्वायुतं प्रतिदिनं जपेन्मन्त्रं प्रसन्नधीः ॥
मासान्ते चाप्य दिवसं कुर्य्याच्च जपमुत्तमम् ।
आनिशीथं जपेन्मन्त्रं ज्ञात्वा च साधकं दृढम् ॥
गत्वा च साधकाभ्यासे सुप्रसन्ना मनोहरा ।
ततोऽर्च्चिता प्रसन्ना सा पृच्छति प्रार्थितञ्च यत् ॥
स्वर्णशतं साधकाय ददाति सा दिने दिने ।
सावशेषं व्ययं कुर्य्यात् स्थिते तत्तु न दास्यति ॥
अन्यस्त्रीगमनं तस्य न भवेत् सत्यमीरितम् ।
अप्याहतगतिस्तस्य भवतीति न संशयः ॥
इयं ते कथिता विद्या सुगोप्या या सुरासुरैः ।
तव स्नेहेन भक्त्या च वक्ष्येऽहं परमेश्वरि ! ॥२॥
ततोऽन्यत् साधनं वक्ष्ये शृणुष्वैकमनाः प्रिये ।
गत्वा वटतलं देवीं पूजयेत् साधकोत्तमः ॥
प्राणायामं षडङ्गञ्च माययाच समाचरेत् ।
सद्योमांसं बलिं दत्त्वा पूजयेत्तां समाहितः ॥
अर्घ्यमुच्छिष्टरक्तेन दद्यात्तस्यै दिने दिने ।
प्रचन्द्रवदनां गौरीं पक्वबिम्बाधरां प्रिये ॥
रक्ताम्बरधरां बालां सर्व्वकामप्रदां शुभाम् ।
एवं ध्यात्वा जपेन्मन्त्रमयुतं साधकोत्तमः ॥
सप्तदिनं समभ्यर्च्च्य चाष्टमे विधिवच्चरेत् ।
कायेन मनसा वाचा पूजयेच्च दिने दिने ॥
तारं माया तथा कूर्च्चं रञ्च कर्म्मणि तद्वहिः ।
आगच्छ कनकान्ते तु वतिः स्वाहा महामनुः ।
आनिशीथं जपेन्मन्त्रं बलिं दत्त्वा मनोहरम् ॥
साधकेन्द्रं दृढं मत्वा आयाति साधकालये ।
साधकेन्द्रोऽपि तां दृष्ट्वा दद्यादर्घ्यादिकं ततः ॥
ततः सपरिवारेण भार्य्या स्यात् कामभोजनैः ।
वस्त्रभूषादिकं त्यक्त्वा याति सा निजमन्दिरम् ।
एवंभार्य्या भवेन्नित्यं साधकाज्ञानुरूपतः ।
आत्मभार्य्यां परित्यज्य भजेत्ताञ्च विचक्षणः ॥३॥
ततः कामेश्वरीं वक्ष्ये सर्व्वकामफलप्रदाम् ।
प्रणवं भुवनेशानी चागच्छ कामेश्वरि ततः ॥
वह्निभार्य्या महामन्त्रं साधकानां सुखावहम् ।
पूर्व्ववत् सकलं कृत्वा भूर्ज्जपत्रे सुशोभने ।
गोरोचनाभिः प्रतिमां विनिर्म्माय स्वलङ्कृताम् ।
शय्यामारुह्य प्रजपेन्मन्त्रमेकमनास्ततः ॥
सहस्रैकप्रमाणेन मासमेकं जपेद्बुधः ।
घृतेन मधुना दीपं दद्याच्च सुसमाहितः ॥
कामेश्वरीं शशाङ्कास्यां चलत्खञ्जनलोचनाम् ।
सदा लोलगतिं कान्तां कुसुमास्त्रशिलीमुखीम् ॥
एवं ध्यात्वा जपेन्मन्त्रं निशीथे याति सा तदा ।
दृष्ट्वा तु साधकः श्रेष्ठामाद्यां देहीति तां वदेत् ॥
स्त्रीभावेन मुदा तस्यै दद्यात् पाद्यादिकं ततः ।
सुप्रसन्ना तदा देवी साधकं तोषयेत् सदा ॥
अन्नाद्यैरतिभोगेन पतिवत् पालयेत् सदा ।
नीत्वा रात्रौ सुखैश्वर्य्यैर्दत्त्वा च विपुलं धनम् ॥
वस्त्रालङ्कारद्रव्यादीन् प्रभाते याति निश्चितम् ।
एवं प्रतिदिनं तस्य सिद्धिः स्यात् कामरूपतः ॥४॥
ततः पटे विनिर्म्माय पुत्तलिं ध्यानरूपतः ।
सुवर्णवर्णां गौराङ्गीं सर्व्वालङ्कारभूषिताम् ॥
नूपुराङ्गदहाराढ्यां रम्याञ्च पुष्करेक्षणाम् ।
एवं ध्यात्वा जपेन्मन्त्रं दत्त्वा च पाद्यमुत्तमम् ॥
सचन्दनेन पुष्पेण जातीपुष्पेण यत्नतः ।
गुग्गुलुं धूपदीपौ च दद्यान्मूलेन साधकः ॥
मन्त्रस्तु ।
तारं मायां तथागच्छ रतिसुन्दरिपदं ततः ।
वह्निजाया चाष्टसहस्रं जपेन्मन्त्रं दिने दिने ॥
मासान्ते दिवसं प्राप्य कुर्य्यात् पूजादिकं शुभम् ।
घृतदीपं तथा गन्धं पुष्पं ताम्बूलमेव च ॥
तावन्मन्त्रं जपेद्विद्वान् यावदायाति सुन्दरी ।
ज्ञात्वा दृढं साधकेन्द्रं निशीथे याति निश्चितम् ॥
ततस्तामर्च्चयेद्भक्त्या जातीकुसुममालया ।
सुसन्तुष्टा साधकेन्द्रं तोषयेद्रतिभोजनैः ॥
भूत्वा भार्य्या च सा तस्मै ददाति वाञ्छितं वरम् ।
भूषादिकं परित्यज्य प्रभाते याति सा ध्रुवम् ॥
साधकाज्ञानुरूपेण प्रयाति सा दिने दिने ।
विर्ज्जने प्रान्तरे देवि ! सिद्धिः स्यान्नात्र संशयः ॥
त्यक्त्वा भार्य्यां भजेत्ताञ्च अन्यथा नश्यति ध्रुवम् ॥५॥
ततोऽन्यत् साधनं वक्ष्ये स्वगृहे शिवसन्निधौ ।
वेदाद्यं भुवनेशीं चागच्छ पद्मिनि वल्लभा ।
पावकस्य महामन्त्रं पूर्व्ववत् सकलं ततः ।
मण्डलं चन्दनैः कृत्वा मूलमन्त्रं लिखेत्ततः ॥
पद्माननां श्यामवर्णां पीनोत्तुङ्गपयोधराम् ।
कोमलाङ्गीं स्मेरमुखीं रक्तोत्पलदलेक्षणाम् ॥
एवं ध्यात्वा जपेन्मन्त्रं सहस्रञ्च दिने दिने ।
मासान्ते पूर्णिमां प्राप्य विधिवत् पूजयेत् सदा ॥
आनिशीथं जपेन्मन्त्रं दृढाभ्यासेन साधकः ।
सर्व्वञ्च कुशलं ज्ञात्वा सा याति साधकालयम् ॥
भूत्वा भार्य्या साधकं हि साधयेद्विविधैरपि ।
भोगैर्द्दिव्यैर्भूषणाद्यैः पद्मिनी सा दिने दिने ॥
पतिवत् पाति तं लोके नित्यं स्वर्गं च सर्व्वदा ।
त्यक्त्वा भार्य्यां भजेत् ताञ्च साधकेन्द्रः सदा प्रिये ॥६॥
ततो वक्ष्ये महाविद्यां विश्वामित्रेण धीमता ।
ज्ञात्वा यां साधिता विद्या बला चातिबला प्रिये ॥
मन्त्रस्तु ।
प्रणवान्ते महामाया नटिनि पावकप्रिया ।
महाविद्येह कथिता गोपनीया प्रयत्नतः ॥
अशोकस्य तलं गत्वा स्नानं पूर्व्ववदाचरेत् ।
मूलमन्त्रेण सकलं कुर्य्याच्च सुसमाहितः ॥
त्रैलोक्यमोहिनीं गौरीं विचित्राम्बरधारिणीम् ।
विचित्रालङ्कृतां रम्यां नर्त्तकीवेशधारिणीम् ॥
एवं ध्यात्वा जपेन्मन्त्रं सहस्रञ्च दिने दिने ।
मांसोपहारैः संपूज्य धूपं दीपं निवेदयेत् ॥
गन्धचन्दनताम्बूलं दद्यात्तस्यै मुदा बुधः ।
मासमेकञ्च तां भक्त्या पूजयेत् साधकोत्तमः ॥
मासान्ते दिवसं प्राप्य कुर्य्याच्च पूजनं महत् ।
अर्द्धरात्रौ भयं दत्त्वा किञ्चित् साधकसत्तमे ।
सुदृढं साधकं मत्वा याति सा साधकालयम् ॥
विद्याभिः सकलाभिश्च किञ्चित्स्मेरमुखी ततः ।
वरं वरय शीघ्रं त्वं यत्ते मनसि वर्त्तते ॥
तत् श्रुत्वा साधकश्रेष्ठो भावयेन्मनसा धिया ।
मातरं भगिनीं वापि भार्य्यां वा प्रीतिभावतः ।
कृत्वा सन्तोषयेद्भक्त्या नटिनी तत् करोत्यलम् ॥
माता स्याद्यदि सा देवी पुत्रवत् पाति तं सदा ।
स्वर्णशतं सिद्धिद्रव्यं ददाति सा दिने दिने ॥
भगिनी यदि सा कन्यां देवस्य नागकन्यकाम् ।
राजकन्यां समानीय ददाति सा दिने दिने ।
अतीतानागतां वार्त्तां सर्व्वां जानाति साधकः ॥
भार्य्या स्यात् यदि सा देवी ददाति विपुलं धनम् ।
अन्नाद्यैरुपचारैश्च ददाति कामभोजनम् ॥
स्वर्णशतं सदा तस्मै ददाति सा ध्रुवं प्रिये ।
यत् यत् वाञ्छति तत् सर्व्वं ददाति नात्र संशयः ॥७॥
महाविद्यां प्रवक्ष्यामि सावधानावधारय ।
कुङ्कुमेन समालिख्य भूर्ज्जपत्रे स्त्रियं सदा ।
ततोऽष्टदलमालिख्य कुर्य्यान्न्यासादिकं प्रिये ।
जीवन्यासादिकं कृत्वा ध्यायेत् तत्र प्रसन्नधीः ॥
शुद्धस्फटिकसङ्काशां नानारत्नविभूषिताम् ।
मञ्जीरहारकेयूररत्नकुण्डलमण्डिताम् ।
एवं ध्यात्वा जपेन्मन्त्रं सहस्रन्तु दिने दिने ॥
प्रतिपद्दिनमारभ्य पूजयेत् कुसुमादिभिः ।
धूपदीपविधानेन त्रिसन्ध्यं पूजयेन्मुदा ॥
पूर्णिमां प्राप्य गन्धाद्यैः पूजयेत् साधकोत्तमः ।
घृतदीपं तथा धूपं नैवेद्यञ्च मनोरमम् ॥
रात्रौ च दिवसे जप्यं कुर्य्याच्च सुसमाहितः ।
प्रभातसमये याति साधकस्यान्तिकं ध्रुवम् ॥
प्रसन्नवदना भूत्वा तोषयेद्रतिभोजनैः ।
देवदानवगन्धर्व्वविद्याधरयक्षरक्षसाम् ॥
कन्याभी रत्नभूषाभिः साधकेन्द्रं मुहुर्मुहुः ।
चर्व्व्यं चोष्यादिकं द्रव्यं दिव्यं ददाति सा ध्रुवम् ॥
स्वर्गे मर्त्ये च पाताले यद्वस्तु विद्यते प्रिये ।
आनीय दीयते सर्व्वं साधकाज्ञानुरूपतः ॥
स्वर्णशतं सदा तस्मै ददाति सा दिने दिने ।
साधकाय वरं दत्त्वा याति सा निजमन्दिरम् ॥
तस्या वरप्रसादेन चिरजीवी निरामयः ।
सर्व्वज्ञः सुन्दरः श्रीमान् सर्व्वगो भवति ध्रुवम् ।
रमे सार्द्धं तया देवि साधकेन्द्रो दिने दिने ॥
मन्त्रस्तु ।

तारं मायां तथागच्छानुरागिणि मैथुनप्रिये ।
यद्विभार्य्या मनुः प्रोक्तः सर्व्वसिद्धिप्रदायकः ॥
एषा मधुमती तु स्यात् सर्व्वसिद्धिप्रदा प्रिये ।
गुह्यात् गुह्यतरा विद्या तव स्नेहात् प्रकी-
र्त्तिता ॥ ८ ॥

देव्युवाच ।

श्रुतञ्च साधनं पुण्यं यक्षिणीनां सुखप्रदम् ।
यस्मिन् काले प्रकर्त्तव्यं विधिना केन वा प्रभो ।
अत्राधिकारिणः के वा समासेन वदस्व मे ॥

ईश्वर उवाच ।

वसन्ते साधयेद्धीमान् हविष्याशी जितेन्द्रियः ।
सदा ध्यानपरो भूत्वा तद्दर्शनमहोत्सुकः ॥
उत्कटे प्रान्तरे वापि कामरूपे विशेषतः ।
स्थानेष्वेकतमं प्राप्य साधयेत् सुसमाहितः ।
अनेन विधिना साक्षात् भविष्यति न संशयः ॥
देव्याश्च सेवकाः सर्व्वे परं चात्राधिकारिणः ।
तारकब्रह्मणो भक्तं विनाप्यत्राधिकारिणः ॥”
इति तन्त्रसारे योगिनीसाधनप्रकरणं समाप्तम् ॥
दशविधदशान्तर्गतदशाविशेषः । यथा,—
“स्वनक्षत्रं ध्रुवं कृत्वा पञ्च तत्र विमिश्रयेत् ।
मङ्गलेन हृतः शेषो मङ्गलादिविनिश्चयः ॥
मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा ।
उल्का सिद्धा सङ्कटा च योगिन्यष्टौ प्रकीर्त्तिताः ॥
अब्देकं मङ्गला धत्ते शेषास्त्वेकैकवर्द्धिकाः ।
पुनस्ताभ्यां निवर्त्तन्ते चक्रवत् परिवर्त्तनात् ॥”
अपि च ।
“रोहिण्यादौ त्रिरावृत्त्या मङ्गलादौ यथाक्रमम् ।
उल्का सिद्धा सङ्कटा च अश्विन्यादित्रये पुनः ॥”
एतासामन्तर्दशा ।
“दशावर्षन्तु षट्त्रिंशद्भागं कृत्वा विनिर्द्दिशेत् ।
यत्तु यस्या हि यद्वर्षं तत्तद्भागं प्रकीर्त्तितम् ॥”
फलं यथा,—
“मङ्गला मङ्गलं धत्तेऽतुलभोगं सुखं तथा ।
गोगजाश्वसहस्राणि गृहे तस्य दिने दिने ॥
पिङ्गला विविधं दुःखमन्नचिन्तादिसम्भवम् ।
ददाति नाशं शत्रुभ्यो धनधान्यगजादिकम् ॥
धन्या च सततं दत्ते सर्व्वत्र विजयादिकम् ।
शत्रुभ्यो रक्षते नित्यं मातृवत् परिपालयेत् ॥
भ्रामरी विविधं दुःखमन्तःसम्भ्रमसम्भवम् ।
अकस्मात्तस्य दुर्द्दैवं विधिना प्रेरितं भवेत् ॥
भद्रिका विविधान् धत्ते सम्मानादिमनोरथान् ।
तुष्टा चेद्भद्रिका नित्यं दुर्ग्रहः सुग्रहायते ॥
उल्का चाधिकरी प्रोक्ता नित्यं नानाभयप्रदा ।
उल्का यदि समायाति सुग्रहो दुर्ग्रहायते ॥
सिद्धा च साधयेत् सर्व्वं मन्त्रारम्भधनादिकम् ।
यस्य तुष्टा भवेत् सिद्धा लक्ष्मीस्तस्य करे स्थिता ॥
सङ्कटा सङ्कटं दत्ते भुङ्क्ते धान्यधनादिकम् ।
सैव भार्य्या सदा नित्यं गृही क्षणाः फणी यथा ॥”
इत्युद्बोधचन्द्रिका ॥
योगी, [न्] पुं, (योगः अस्त्यस्येति । योग + इनिः । यद्वा, युज समाधौ । युजिर् योगे वा + “संपृचानुरुधेति ।” ३। २।१४२। इति घिनुण् ।) योगयुक्तः । तस्य लक्षणादि यथा,—
“स्वर्णे लोष्टे गृहेऽरण्ये सुखिगधे चन्दने तथा ।
समता भावना यस्य स योगी परिकीर्त्तितः ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥
अपि च ।
“आत्मौपम्येन सर्व्वत्र समं पश्यति योऽर्ज्जुन ! ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥”
इति श्रीभगवद्गीतायाम् ७ अध्यायः ॥
अन्यच्च ।

ऋषय ऊचुः ।

“भगवन् ! देवतारिघ्न ! हिरण्यादिनिसूदन ! ।
चत्वारो ह्याश्रमाः प्रोक्ता योगी नाम क उच्यते ॥
सर्व्वकर्म्माणि संन्यस्य समाधिमचलं श्रितः ।
य आस्ते निश्चलो योगी स सन्यासी न पञ्चमः ॥
सर्व्वेषामाश्रमाणान्तु द्वैविध्यं श्रुतिदर्शितम् ।
ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
उदासीनसाधकश्च गृहस्थो द्विविधो भवेत् ।
ऋणानि त्रीण्युपाहृत्य त्यक्त्वा भार्य्याधनादिकम् ॥
एकाकी यस्तु विचरेदुदासीनः स मौक्षिकः ।
कुटुम्बभरणायत्तः साधकोऽसौ गृही भवेत् ॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासिकः स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥
योगाभ्यासरतो नित्यमारुरुक्षुर्ज्जितेन्द्रियः ।
ज्ञानाय वर्त्तते भिक्षुः प्रोच्यते पारमेष्ठिकः ॥
यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यग्दर्शनसम्पन्नः स योगी भिक्षुरुच्यते ॥
ज्ञानसन्न्यासिनः केचिद्वेदसन्न्यासिनः परे ।
कर्म्मसन्न्यासिनः केचित्त्रिविधाः पारमेष्ठिकाः ॥
योगी च त्रिविधो ज्ञेयो भौतिकः सांख्य एव च ।
तृतीयोऽत्याश्रमी प्रोक्तो योगमुत्तममास्थितः ॥”
इति कौर्म्मे २ अध्यायः ॥
(तेषां स्त्रीसङ्गनिषेधो यथा,—
“यदि सङ्गं करोत्येव बिन्दुस्तस्य विनश्यति ।
आयुःक्षयो बिन्दुहीनादसामर्थ्यञ्च जायते ॥
तस्मात् स्त्रीणां सङ्गवर्ज्जं कुर्य्यादभ्यासमादरात् ।
योगिनोऽङ्गस्य सिद्धिः स्यात् सततं बिन्दुधारणात् ॥”
इति दत्तात्रेयसंहिता ॥
तेषां पथ्यं यथा, हठयोगप्रदीपिकायाम् ।
“गोधूमशालियवषष्टिकशोभनान्नं
क्षीराज्यखण्डनवनीतसितामधूनि ।
शुण्ठीकपोलकफलादिकपञ्चशाकं
मुद्गादिदिव्यमुदकञ्च यमीन्द्रपथ्यम् ॥”
तेषामपथ्यं यथा, तत्रैव ।
“कट्वम्लतिक्तलवणोष्णहरीतशाक-
सौवीरतैलतिलसर्षपमत्स्यमद्यम् ।
अजादिमांसदधितक्रकुलत्थकोल-
पिन्याकहिङ्गुलशुनाद्यमपथ्यमाहुः ॥”)
योगीश्वरः, पुं, (योगिनामीश्वरः ।) याज्ञवल्क्य-मुनिः । (इति हेमचन्द्रे योगेशशब्ददर्शनात् ॥ ३ । ८५१ ॥) यथा,—
“योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः ॥”
“योगिनां सनकादीनां ईश्वरः श्रेष्ठस्तं याज्ञ-वल्क्यं संपूज्य ।” इति मिताक्षरा ॥ त्रि, यमिनां श्रेष्ठः । (यथा, मार्कण्डेये । ८६ । २८ ।
“यजन्ति यानस्तमलैर्मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून् ॥”)
योगीश्वरी, स्त्री, (योगिनामीश्वरी ।) दुर्गा । यथा,—
“योगिशक्रादयो देवाः सनकान्तास्तपोधनाः ।
तेषां स्वामी तथा योगी ईश्वरी प्रभुपालना ॥
आत्मेन्द्रियमनादीनां संयोगो योग उच्यते ।
तेषां वा योजनाद्योगी योगैश्वर्य्यविबोधना ॥”
इति देवीपुराणे ४५ अध्यायः ॥
योगेशः, पुं, (योगस्य ईशः ईश्वरः ।) याज्ञ-वल्क्यः । इति हेमचन्द्रः । ३ । ८५१ ॥ (योगे-श्वरे, त्रि । यथा, भागवते । ४ । १८ । ६ ।
“कपिलो नारदो दत्तो योगेशाः सनकादयः ।
समन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ॥”)
योगेश्वरः, पुं, (योगानां ईश्वरः ।) श्रीकृष्णः । यथा,—
“ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्म्मवर्म्मणि ।
स्वां काष्ठामधुनोपेते धर्म्मः कं शरणं गतः ॥”
इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥
(शिवः । यथा, महाभारते । १३ ।१४।३२३ ।
“नमस्ते भगवन् देव ! नमस्ते भक्तवत्सल ! ।
योगेश्वर ! नमस्तेऽस्तु नमस्ते विश्वसम्भव ! ॥”
देवहोत्रतनयः । यथा, भागवते । ८ । १३।३२।
“देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः ।
योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति ॥”
योगेश्वरी, स्त्री, वन्ध्याकर्कोटकी । इति भाव-प्रकाशः ॥ (योगानामीश्वरी । दुर्गा । यथा,—
“त्वञ्च योगेश्वरी तथा— ।” इति चण्डीकव-चम् ॥ योगयुक्ते, त्रि । यथा, मार्कण्डेये।८७।८।
“प्रजापतेः कश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यश्च सदा नमस्यामि कृताञ्जलिः ॥”)
योगेष्टं, क्ली, (योगे सन्धिच्छिद्रादिपूरणे इष्टम् ।) सीसकम् । इत्यमरः । २ । ९ । १०५ ॥ (तथास्य पर्य्यायः ।
“नागं महाबलं चीनं पिष्टं योगेष्टसीसकम् ॥”
इति वैद्यकरत्नमालायाम् ॥)
योग्यं, क्ली, (योज्यत इति । युज् + णिच् + ण्यत् ।) ऋद्धिनामौषधम् । वृद्धिनामौषधम् । इत्यमरः । २ । ४ । ११९ ॥
योग्यः, त्रि, (योगाय प्रभवति । योग + “योगाद्-यच्च ।” ५ । १ । १०२ । इति यत् ।) प्रवीणः । योगार्हः । (यथा, रघुः । ६ । २९ ।

"कान्त्या गिरा सूनृतया च योग्या
त्वमेव कल्याणि ! तयोस्तृतीया ॥")
उपायी । शक्तः । इति मेदिनी हेमचन्द्रश्च ॥ (यथा, मार्कण्डेये । ७१ । १० ।
"अपत्नीको नरो भूप न योग्यो निजकर्म्मणाम् ॥"
योजनसाधनभूतः । यथा, ऋग्वेदे । ३ । ६ । ६ ।
"ऋतस्य वा केशिना योग्याभिः ।"
"योग्याभिर्योजनसाधनभूताभी रश्मिभिः ।" इति सायणः ॥ शकटादियोजनीयः । यथा, शतपथब्राह्मणे । १।३।१ । १२ ।
"योक्त्रं हि योग्यं युञ्जन्त्यस्ति वै पत्न्या
अमेध्यं यदवाचीनम् ।"
"योग्यं योजनीयमनडुदश्वादिकम् ।" इति तद्भाष्यम् ॥) पुष्यनक्षत्रे, पुं । इति मेदिनी । ये, ४६ ॥

योग्यता, स्त्री, (योग्यस्य भावः । योग्य + तल् । टाप् ।) क्षमता । इति लोकप्रसिद्धिः ॥ (यथा, मार्कण्डेये । ११३ । ८ ।
"तथान्यानप्ययोग्यान योग्यतां यान्ति कालतः ।
योग्याश्चायोग्यतां यान्ति कालवशा हि योग्यता ॥")
शाब्दबोधकारणविशेषः । स तु पदार्थानां परस्परसम्बन्धे बाधाभावः । इति साहित्यदर्पणम् ॥ न्यायमते तत्पदार्थे तत्पदार्थवत्ता । यथा,—
"पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता ।"
इति भाषापरिच्छेदः ॥
"योग्यतां निरूपयति पदार्थे इत्यादिना । एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता इत्यर्थः । तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः । नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात् प्राक् सर्व्वत्र न सम्भवति वाक्यार्थस्यापूर्व्वत्वादिति चेन्न तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताया ज्ञानस्य सम्भवात् । नवास्तु योग्यताज्ञानं न शब्दज्ञाने कारणं वह्निना सिञ्चति इत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यताया निश्चयेन प्रतिबन्धान्न शाब्दबोधः । तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दे प्रतिबन्धकत्वं सिद्धं योग्यताज्ञानविलम्बाच्च शाब्दविलम्बोऽसिद्ध इति वदन्ति ।" इति सिद्धान्तमुक्तावली ॥

योग्या, स्त्री, (योग्य + टाप् ।) अभ्यासः । (यथा, रघुः । ८ । १६ ।
"अपरः प्रणिधानयोग्यया
मरुतः पञ्च शरीरगोचरान् ॥"
"अपरो रघुः प्रणिधानयोग्यया समाध्यभ्यासेन ।" इति मल्लिनाथः ॥) अर्कयोषित् । इति मेदिनी । ये, ४६ ॥ शस्त्राभ्यासः । तत्पर्य्यायः । खुरली २ श्रमः ३ अभ्यासः ४ । तक्रूः खलूरिका । इति हेमचन्द्रः । ३ । ४५२ ॥ (यथा, सुश्रुते सूत्रस्थाने ९ अध्याये ।
"अथातो योग्यासूत्रीयमध्यायं व्याख्यास्यामः । अधिगतसर्व्वशास्त्रार्थमपि शिष्यं योग्यां कारयेत् । छेद्यादिषु स्नेहादिषु च कर्म्मपथमुपदिशेत् । सुबहुश्रुतोऽप्यकृतयोग्यः कर्म्मस्वयोग्यो भवति । तत्र पुष्पफलालाबूकालिन्दकत्रपुषैर्व्वारुककर्कारुकप्रभृतिषु छेद्यविशेषान् दर्शयेदुत्कर्त्तनपरिकर्त्तनानि चोपदिशेत् । दृतिवस्तिप्रसेवकप्रभृतिषूदकपङ्कपूर्णेषु भेद्ययोग्याम् । सरोम्णि चर्म्मण्याततै लेख्यस्य । मृतपशुशिरासूत्पलनालेषु च वेध्यस्य । घुणोपहतकाष्ठवेणुनलनालीशुष्कालाबुमुखेष्वेष्यस्य । पनसबिम्बीबिल्वफलमज्जमृतपशुदन्तेष्वाहार्य्यस्य । मधूच्छिष्टोपलिप्ते शाल्मलीफलके विस्राव्यस्य । सूक्ष्मघनवस्त्रान्तयोर्मृदुचर्म्मान्तयोश्च सीव्यस्य । पुस्तमयपुरुषाङ्गप्रत्यङ्गविशेषेषु बन्धयोग्याम् । मृदुमांसपेशीषूत्पलनालेषु च कर्णसन्धिबन्धयोग्याम् । मृदुषु मांसखण्डेष्वग्निक्षारयोग्याम् । उदकपूर्णघटपार्श्वस्रोतस्यलाबूमुखादिषु च नेत्रप्रणिधानवस्तिव्रणवस्तिपीडनयोग्यामिति । भवति चात्र ।
एवमादिषु मेधावी योग्यार्हेषु यथाविधि ।
द्रव्येषु योग्यां कुर्व्वाणो न प्रमुह्यति कर्म्मसु ॥
तस्मात् कौशलमन्विच्छन् शस्त्रक्षाराग्निकर्म्मसु ।
यस्य यत्रेह साधर्म्म्यं तत्र योग्यां समाचरेत् ॥"
(युवती । यथा,—
"निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥"
योग्या युवती । इति राजवल्लभः ॥)

योजनं, क्ली, (युज्यते मनो यस्मिन्निति । युज् + ल्युट् ।) परमात्मा । चतुःक्रोशी । योगः । इति मेदिनी । ने, ११३ ॥ * ॥ (यथा, हरिवंशे । १४६ । १३ ।
"गान्धारकन्या वहने नृपाणां
रथे तथा योजनमर्ञ्चितानाम् ॥")
चतुःक्रोशार्थे यथा,—
"द्वादशाङ्गुलिकः शङ्कुस्तद्द्वयञ्च शयः स्मृतः ।
तच्चतुष्कं धनुः प्रोक्तं क्रोशो धनुःसहस्रकः ॥
तच्चतुष्कं योजनं स्यादित्यादि मानशास्त्रकम् ॥
एतच्छते षोड़शसहस्रहस्तैर्योजनं भवति । द्वात्रिंशत्सहस्रहस्तैरपि योजनम् । यथा,—
यवोदरैरङ्गुलमष्टसंख्यै-
र्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः
क्रोशः सहस्रद्वितयेन तेषाम् ।
स्याद्योजनं क्रोशचतुष्टयेन
तथा कराणां दशकेन वंशः ॥"
इति लीलावती ॥

योजनगन्धा, स्त्री, (योजनं गन्धोऽस्याः । योजनात् गन्धोऽस्या इति वा ।) कस्तूरी । सीता । सत्यवती । इति मेदिनी । धे, ४८ ॥ (यथा, देवीभागवते । २ । २ । १८ ।
"इत्युक्तेन तु सा कन्या चक्रमाचेव भाविनी ।
कृता योजनगन्धा तु सुरूपा च वरानना ॥")

योजनगन्धिका, स्त्री, सत्यवती । इति जटाधरः ॥ कस्तूरी । इत्यजयपालः ॥ सीता । योजनगन्धाशब्दात् स्वार्थे कप्रत्ययेन जातत्वात् ॥

योजनपर्णी, स्त्री, (योजनाय सन्धिस्थानादेर्म्मिलनार्थं पर्णं यस्याः ।) मञ्जिष्ठा । इति रत्नमाला ॥

योजनवल्लिका, स्त्री (योजनवल्ली + स्वार्थे कन् । टाप् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

योजना, स्त्री, योगकारणा । इति ण्यन्तयुजधातोरनप्रत्ययेन सिद्धम् ॥

योजनवल्ली, स्त्री, (योजनगामिनी अतिदीर्घा वल्ली यस्याः सा ।) मञ्जिष्ठा । इत्यमरः । २ । ४ । ६१ ॥ (तथास्याः पर्य्यायः ।
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

योजित, त्रि, कारितयोजनम् । ण्यन्तयुजधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥ (यथा, भागवते । ४ । २१ । २२ ।
"अहं दण्डधरो राजा प्रजानामिह
योजितः ।")

योटकः, पुं, योटनम् । मेलनमिति यावत् । विवाहे राशियोटक-ग्रहयोटक-नक्षत्रयोटक-गणयोटक-वर्णयोटक-योनियोटक-वर्गयोटकभेदेन सप्तविधो योटकः । तत्र राशियोटके षड़ष्टकनवपञ्चमद्विद्वादशविषमसप्तकयोगा निषिद्धाः । तदाह श्रीपतिसंहितायाम् ।
"षड़ष्टकं त्रिकोणञ्च द्विद्वादशकमेव च ।
परस्परं जन्मराशिस्थ्यता कन्याकुमारयोः ॥
षड़ष्टके भवेद्दोषो वैधव्यं मृत्युरेव वा ।
त्रिकोणे पुत्त्रहानिः स्यात् धनहानिर्धनव्यये ॥
पुरुषस्याष्टमे कन्या कन्यायाः षष्ठके पुमान् ।
शुभं षड़ष्टकं ज्ञेयं नोद्वाहे दूषणं भवेत् ॥
नवपञ्चमे ।
पुंसो गृहात् सुतगृहे सुतहा च कन्या
धर्म्मे स्थिता सुतवती पतिवल्लभा च ।
द्विद्वादशे धनगृहे धनहा च कन्या
रिष्फे स्थिता धनवती पतिवल्लभा च ॥
योटके सप्तके मेषतुलौ युग्महयौ तथा ।
सिंहघटौ सदा वर्ज्यौ मृतिस्तत्राब्रवीच्छिवः ॥
राजयोटकमाह दीपिकायाम् ।
एकराशौ च दम्पत्योः शुभं स्यात् समसप्तके ।
चतुर्दशके चैव तृतीयैकादशे तथा ॥"
इति राशियोटकविचारः ॥ * ॥
ग्रहयोटके ग्रहशत्रुयोगो निषिद्धः । कन्यावरराश्यधिपग्रहयोः शत्रुत्वे ग्रहशत्रुयोगः । तत्र विवाहे रोगादिः फलम् । तदाह गर्गः । मरणं

भावविरोधे ग्रहरिपुभावे चारिरेव रोगादिः । इति ग्रहयोटकविचारः ॥ * ॥ अन्ये योटकाः प्रपञ्चभयान्न लिखिताः । इति ज्योतिषम् ॥ ग्रन्थान्तरे जोटकशब्दस्ववर्गतृतीयादिश्च ॥

योतुः, पुं, (यूयते ज्ञायते अनेनेति । यु + बाहुलकात् तुः ।) परिमाणम् । इत्युणादिकोषः ॥

योत्रं, क्ली, (यूयते अनेनेति । यु + "दाम्नीशस यु युजस्तु तुद सि सिच मिह-पतदंश-नहः करणे ।" ३ । २ । १८२ । इति ष्ट्रन् ।) योक्त्रम् । इत्यमरः । २ । ९ । १३ ॥ (यथा, गो० रामायणे । २ । ४५ । २९ ।
"भरतायाभिसृष्टाः स्म योत्राय पशवो यथा ॥")

योद्धा, [ऋ] पुं, (युध्यतीति । युध् + तृच् ।) युद्धकर्त्ता । तत्पर्य्यायः । भटः २ योधः ३ । इत्यमरः । २ । ८ । ६१ ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । २ । १८ ।
"बाधिष्यते पुरीं योद्धा छिद्रं यदि लभेत सः ॥")

योधः, पुं, (युध्यतीति । युध् + अच् ।) योद्धा । इत्यमरः । २ । ८ । ६१ ॥ (यथा, कथासरित्सागरे । १२ । २२ ।
"सङ्केतमिलितैश्चान्यैर्योधास्तैः सैनिकैः सह ।
निन्युर्वत्सेश्वरं चण्डमहासेनान्तिकञ्च तत् ॥")

योधनं, क्ली, युद्धम् । (यथा, मार्कण्डेये ।१३५।१७।
"योधनेषु स्वरूपेण दमो यस्य दुरात्मनः ।
स दमो वारयत्येव हन्ति तस्य रिपोर्गुरुम् ॥")
अस्त्रम् ॥ युधधातोर्भावे करणे चानट् (ल्युट्) प्रत्ययेन निष्पन्नम् ।

योधसंरावः, पुं, (योधानां संरावः ।) अन्योन्यं योधानां युद्धायाह्वानम् । तत्पर्य्यायः । क्रन्दनम् २ । इत्यमरभरतौ ॥

योधेयः, पुं, (युध् + भावे घञ् । योधं युद्धं करोतीति । योध + खः ।) योद्धा । योधशब्दात् खेयप्रत्ययेन निष्पन्नः ॥

योनलः, पुं, (यवस्य नल इव नलः काण्डोऽस्य । पृषोदरादिः ।) शस्यविशेषः । ततृपर्य्यायः । यवनालः २ जूर्णाह्वयः ३ देवधान्यम् ४ जोन्नाला ५ बीजपुष्पिका ६ । इति हेमचन्द्रः । ४ । २४४ ॥

योनिः, पुं, स्त्री, (यौति संयोजयतीति । यु + "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ।" उणा० ४ । ५१ । इति निः ।) आकरः । इति मेदिनी । ने, १६ ॥ कारणम् । (यथा, उत्तररामचरिते । ६ ।
"ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः ।
सा योनिः सर्व्ववैराणां सा हि लोकस्य
निर्ऋतिः ॥")
जलम् । इति हेमचन्द्रः । ३ । २४९ ॥ (कुशद्वीपस्थनदीविशेषः । यथा, मार्कण्डेये ।१२१।७१।
"धूतपापा नदी नाम योनिश्चैव पुनः स्मृता ।
सीता द्वितीया विज्ञेया सा चैव हि निशा-
स्मृता ॥"
तन्त्रशास्त्रविशेषः । यथा, महासिद्धिसारस्वते ।
"सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम् ।
तन्त्रान्तरञ्च देवेशि ! नवरत्नेश्वरं तथा ॥")
प्राणिनामुत्पत्तिस्थानम् । इति त्रिकाण्डशेषः ॥ तत्तु चतुरशीतिलक्षप्रकारम् । यथा,—
"चतुरशीतिलक्षाणि चतुर्भेदाश्च जन्तवः ।
अण्डजाः स्वेदजाश्चैव उद्भिज्जाश्च जरायुजाः ॥
एकविंशतिलक्षाणि ह्यण्डजाः परिकीर्त्तिताः ।
स्वेदजाश्च तथैवोक्ता उद्भिज्जास्तत्प्रमाणतः ॥
जरायुजाश्च तावन्तो मनुष्याद्याश्च जन्तवः ।
सर्व्वेषामेव जन्तूनां मानुषत्वं सुदुर्लभम् ॥"
इति श्रीगरुडपुराणे प्रेतकल्पे धर्म्मप्रकटनो नाम २ अध्यायः ॥ * ॥ अन्यच्च ।
"जलजा नव लक्षाणि स्थावरा लक्षविंशतिः ।
कृमयो रुद्रसङ्ख्याकाः पक्षिणां दशलक्षकम् ॥
त्रिंशल्लक्षाणि पशवश्चतुर्लक्षाणि मानुषाः ।
सर्व्वयोनिं परित्यज्य ब्रह्मयोनिं ततोऽभ्यगात् ॥"
इति वृहद्विष्णुपुराणम् ॥ * ॥
अपि च ।
"स्थावरास्त्रिंशल्लक्षञ्च जलजो नवलक्षकः ।
कृमिजा दशलक्षञ्च रुद्रलक्षञ्च पक्षिणः ॥
पशवो विंशलक्षञ्च चतुर्लक्षञ्च मानवाः ।
एतेषु भ्रमणं कृत्वा द्विजत्वमुपजायते ॥"
इति कर्म्मविपाकः ॥
("भूतानाञ्चतुर्व्विधा योनिर्भवति जरायुण्ड-स्वेदोद्भिदः । तासां खलु चतसृणामपि योनीनामेकैका योनिरपरिसङ्ख्येयभेदा भवति भूतानामाकृतिविशेषापरिसङ्ख्येयत्वात् । तत्र जरायुजानामण्डजानां प्राणिनामेते गर्भकरा भावा यां यां योनिमापद्यन्ते तस्यां तस्यां योनौ तथा तथा रूपा भवन्ति । तद्यथा कनकरजतताम्रत्रपुसीसा आसिच्यमानास्तेषु तेषु मधूच्छिष्टविम्बेषु । ते यदा मनुष्यविम्बमापद्यन्ते तदा मनुष्यविग्रहेण जायन्ते । तस्मात् समुदायात्मकः सन् गर्भो मनुष्यविग्रहेण जायते मनुष्यो मनुष्यप्रभव इत्युच्यते तद्योनित्वात् ।" इति चरके शारीरस्थाने तृतीयेऽध्याये ॥ * ॥)
भगम् । इत्यमरः ।२।६।७६ ॥ तत्पर्य्यायः । वराङ्गम् २ उपस्थः ३ स्मरमन्दिरम् ४ । इति राजनिर्घण्टः ॥ रतिगृहम् ५ जन्मवर्त्म ६ अधरम् ७ अवाच्यदेशः ८ प्रकृतिः ९ अपथम् १० स्मरकूपकः ११ अप्रदेशः १२ प्रकृतिः १३ पुष्पी १४ संसारमार्गकः १५ संसारमार्गः १६ गुह्यम् १७ स्मरागारम् १८ स्मरध्वजम् १९ रत्यङ्गम् २० रतिकुहरम् २१ कलत्रम् २२ अधः २३ । इति शब्दरत्नावली ॥ रतिमन्दिरम् २४ स्मरगृहम् २५ कन्दर्पकूपः २६ कन्दर्पसम्बाधः २७ कन्दर्पसन्धिः २८ स्त्रीचिह्नम् २९ । इति जटाधरः ॥ स तु गर्भस्थायाः सप्तभिर्मासैर्भवति । इति सुखबोधः ॥ * ॥ तस्य लक्षणं यथा,—
"शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः ।
वामोन्नतश्चेत् कन्याजः पुत्त्रजो दक्षिणोन्नतः ॥
आखुरोमा गूढमणिः सुश्लिष्टः संहतः पृथुः ।
तुङ्गः कमलवर्णाभः शुभोऽश्वत्थदलाकृतिः ॥
कुरङ्गखुररूपो यश्चुल्लिकोदरसन्निभः ।
रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः ॥
शङ्खावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति ।
चिपिटः कर्परांकारः किङ्करीपददो भगः ॥
वंशवेतसपत्राभो गजरोमोच्चनासिकः ।
विकटः कुटिलाकारो लम्बगल्लस्तथाशुभः ॥"
इति काशीखण्डे ३७ अध्यायः ॥ * ॥
अपि च ।
"शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च
कीर्त्तिता ।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता ॥" * ॥
अथ योनिरोगाधिकारः ।
"तत्र योनिरोगाणां निदानमाह ।
'मिथ्याहारविहाराभ्यां दुष्टैर्दोषैः प्रदूषितात् ।
आर्त्तवाद्बीजतश्चापि दैवाद्वा स्युर्भगे गदाः ॥'
रोगिणीनां योनीनां नामान्याह ।
'उदावर्त्ता तथा बन्ध्या विप्लुता च परिप्लुता ।
वातला योनयो ह्येता वातदोषेण पञ्चधा ॥
पञ्चधा पित्तदोषेण तत्रादौ लोहितक्षरा ।
प्रस्रंसिनी वामिनी च पुत्त्रघ्नी पित्तला तथा ॥
अत्यानन्दा कर्णिनी च चरणानन्दपूर्व्विका ।
अतिपूर्व्वापि सा ज्ञेया श्लेष्मला च कफादिमाः ॥
षण्डाख्यिनी च महती सूचीवक्त्रा त्रिदोषिणी ।
पञ्चैता योनयः प्रोक्ताः सर्व्वदोषप्रकोपतः ॥'
अथ तासां लक्षणान्याह ।
'सा फेनिलमुदावर्त्ता रजःकृच्छ्रेण मुञ्चति ।
बन्ध्या नष्टार्त्तवा ज्ञेया विप्लुता नित्यवेदना ॥
परिप्लुता या भवति ग्राम्यधर्म्मे रुजा भृशम् ।
वातला कर्कशा स्तब्धा शूलनिस्तोदपीड़िता ॥
चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः ॥'
अनिलवेदनास्तोदादयः ॥ वातलायां त्वतिशयिता वातवेदना बोद्धव्या । वातला इत्यन्वयात् ॥ * ॥
'सदाहं क्षरते रक्तं यस्याः साः लोहितक्षरा ।
प्रस्रंसिनी स्रंसते च क्षोभिता दुःप्रजायिनी ॥'
क्षोभिता विमर्द्दिता स्रंसते स्वस्थानात् च्यवते दुःप्रजायिनी दुःप्रजननशीला ।
'सवातमुद्गिरेद्बीज्यं वामिनी रजसा युतम् ।
स्थितं स्थितं हन्ति गर्भं पुत्त्रघ्नी रक्तसंस्रवात् ॥'
पुत्त्रशब्दोऽत्रापत्योपलक्षकः ।
'अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता ।
चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत् ॥'
अत्यानन्दा न सन्तोषं ग्राम्यधर्म्मेण विन्दति ।
कर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते ॥'
कर्णिका मांसस्य कर्णिकाकारो ग्रन्थिः ॥
'मैथुने चरणापूर्व्वं पुरुषादतिरिच्यते ।'
अतिरिच्यते रजो मुञ्चति इत्यर्थः ।
'बहुशश्चातिचरणा तयोर्व्वीजं न तिष्ठति ॥'
बहुशः वारं वारं अतिरिच्यते तयोः चरणातिचरणयोः ।
'श्लेष्मला पिच्छिला योनिः कण्डयुक्तातिशीतला ।

चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रयो भवेत् ॥
अनार्त्तवास्तनी षण्डी खरस्पर्शा च मैथुने ॥'
अस्तनी ईषत् स्तनौ यस्याः सा अत्र लघ्वी खण्डी । अण्डिनीमाह ।
'महामेढ्रगृहीताया बालाया अण्डिनी भवेत् ॥'
महामेढ्रः पुरुषः तेन गृहीताया बालायाः स्वल्पयोनिच्छिद्राया अण्डिनी अण्डवल्लम्बमाना योनिर्भवति ।
'विवृतातिमहायोनिः सूचीवक्त्रातिसंवृता ।
सर्व्वलिङ्गसमुत्थानात् सर्व्वदोषप्रकोपजा ।
चतसृष्वपि चाद्यासु सर्व्वलिङ्गनिदर्शनम् ॥'
असाध्या योनीराह ।
'पञ्चासाध्या भवन्तीह योनयः सर्व्वदोषजाः ॥'
पञ्च षण्डीप्रभृतयः ॥ * ॥
अथ योनिकन्दस्य निदानमाह ।
'दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्व्वाताद्याः कुपिता यथा ॥'
वाताद्याः कुपिता यथा यथा निदानकुपिता वाताद्याः ॥ * ॥ रूपमाह ।
"पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् ।
जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः ॥"
लकुचाकृतिसन्निभं लकुचाकाराकारम् । गुड़कमत्र विशेष्यं बोद्धव्यम् ॥ * ॥ वातजादिभेदेन रूपभेदमाह ।
"रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्द्दिशेत् ।
दाहरागज्वरयुतं विद्यात् पित्तात्मकं तु तम् ॥
तिलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम् ।
सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं भवेत् ॥" * ॥
अथ योनिरोगाणां चिकित्सा । तत्र बन्ध्याचिकित्सा । तस्या लक्षणमाह । बन्ध्या नष्टार्त्तवा ज्ञेयेति । ततः प्रथमतो नष्टार्त्तवाचिकित्सा ।
'आर्त्तवादर्शने नारी मत्स्यान् सेवेत नित्यशः ।
काञ्जिकञ्च तिलान् माषानुदश्विच्च तथा दधि ॥
इक्ष्वाकुवीजदन्तीचपलागुड़दमनकिण्वयवशूकैः ।
सस्नुक्क्षीरैर्व्वर्त्तिर्योनिगता कुसुमसञ्जननी ॥'
इक्ष्वाकुः कटुतुम्बी । चपला पिप्पली । दमनो मदनफलम् । किण्वं सुरावीजम् ।
'पीतं ज्योतिष्मतीपत्रं राजिकोग्रासनं त्र्यहम् ।
शीतेन पयसा पिष्टं कुसुमं जनयेद्ध्रुवम् ॥'
ज्योतिष्मती कटभीवृक्षविशेषः करही इति लोके । पयसा दुग्धेन ॥ * ॥ अथ बन्ध्याचिकित्सा ।

'बला सिता सातिबला मधूकं
वटस्य शुङ्गं गजकेशरञ्च ।
एतन्मधुक्षीरघृतैर्निपीय
बन्ध्या सुपुत्रं नियतं प्रसूते ॥
अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम् ।
ऋतुस्नानाङ्गना प्रातः पीत्वा गर्भं दधाति हि ॥
पुष्योद्धृतं लक्ष्मणाया मूलं दुग्धेन कन्यया ।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः ॥
कुरण्टमूलं धातक्या कुसुमानि वटाङ्कुराः ।
नालोत्पलं पयोयुक्तमेतद्गर्भप्रदं ध्रुवम् ॥

यावला पिबति पाश्वपिप्पलं
जीरकेण सहितं हिताशना ।
श्वेतया विशिखपुङ्खया युतं
सा सुतं जनयतीह नान्यथा ॥"
श्वेतकुसुमया शरपुंखया सह ।
"पत्रमेकं पलाशस्य पिष्ट्वा दुग्धेन गर्भिणी ।
पीत्वा पुत्त्रमवाप्नोति वीर्य्यवन्तं न संशयः ॥
शूकरशिम्बीमूलं मध्यं वा दधि फलस्य सपयस्कम् ।
पीत्वाथोभयलिङ्गीवीजं कन्यां न सूते स्त्री ॥
पुत्त्रमजारीमूलं विष्णुक्रान्तेशालिङ्गिनीसहिता ।
एतत् गर्भेऽहदिनं पीत्वा कन्यां न सर्व्वथा सूते ॥
पुत्त्रमजारी पत्रजिया तस्या मूलम् । इशालिङ्गिनी पचगुरिया ॥ * ॥ गर्भप्रदरभेषजकथनावसरे गर्भाजनकमपि भेषजमाह ।
'पिप्पलीविड़ङ्गटङ्कणसमचूर्णं या पिबेत् पयसा ।
ऋतुसमये नहि तस्या गर्भः संजायते क्वापि ॥
आरनालपरिपेषितं त्र्यहं
या जयाकुसुममत्ति पुष्पिणी ।
सत्पुराणगुड़मुष्टिसेविनी
सा दधाति नहि गर्भमङ्गना ॥ * ॥
तासु योनिषु चाद्यासु स्नेहादिक्रम इष्यते ।
वस्त्यभ्यङ्गपरीषेकप्रलेपपिचुधारणम् ॥'
वस्तिरत्रोत्तरवस्तिः । क्रमश्चिकित्सा ।
'नतवार्त्ताकिनीकुष्ठसैन्धवामरदारुभिः ।
तिलतैलं पचेन्नारी पिचुं तस्य विधारयेत् ॥
विप्लुतायां सदा योनौ व्यथा तेन प्रशाम्यति ॥'
नतं तगरम् ।
'वातलां कर्कशां स्तब्धामल्पस्पर्शां तथैव च ।
कुम्भीस्वेदैरुपचरेदन्तर्व्वेश्मनि संवृते ॥
धारयेद्वा पिचुं योनौ तिलतैलस्य सा सदा ।
पित्तलानाञ्च योनीनां सेकाभ्यङ्गपिचुक्रियाः ॥
शीताः पित्तहराः कार्य्याः स्नेहनार्थं घृतानि च ।
प्रस्रंसिनीं घृताभ्यक्तां क्षीरस्विन्नां प्रवेशयेत् ॥
पिधाय वेशवारेण ततो बन्धं समाचरेत् ।
शुण्ठीमरिचकृष्णाभिर्धान्यकाजाजिदाड़िमैः ॥
पिप्पलीमूलसंयुक्तैर्व्वेशवारः स्मृतो बुधैः ॥
धात्रीरसं सितायुक्तं योनिदाहे पिबेत् सदा ।
सूर्य्यकान्ताभवं मूलं पिबेद्वा तण्डुलाम्बुना ॥
योन्यान्तु पूयस्राविण्यां शोधनद्रव्यनिर्म्मितैः ।
सगोमूत्रैः सलवणैः पिण्डैः संपूरणं हितम् ॥'
शोधनद्रव्याणि निम्बपत्रादीनि ।
'दुर्गन्धां पिच्छिलां वापि चूर्णैः पञ्चकषायजैः ।
पूरयेद्धारयेद्राजवृक्षादिक्वथिताम्बुना ॥"
पञ्च कषायाः । वचावासापटोलप्रियङ्गुनिम्बाः । राजवृक्षादि धनवहेरा ।
"पिप्पल्यामरिचैर्माषैः शताह्वाकुष्ठसैन्धवैः ।
वर्त्तिस्तुल्या प्रदेशिन्या योनौ श्लेष्मविशोधिनी ॥
तुल्या प्रदेशिन्या दैर्घ्येण परिणाहेन च ।
कर्णिन्यां वर्त्तयो देयाः शोधनद्रव्यनिर्म्मिताः ॥
गुड़ूचीत्रिफलादन्तीक्वथितोदकधारया ।
योनिं प्रक्षालयेत्तेन तत्र कण्डूः प्रशाम्यति ॥
सुमनपुष्पं सखदिरं पथ्यां जातीफलं तथा ।
बिम्बीं पूगञ्च संचूर्ण्य वस्त्रपूतं क्षिपेद्भगे ।
योनिर्भवति संकीर्णा न स्रवेच्च जलं ततः ॥
कपिकच्छूभवं मूलं क्वाथयेद्विधिना भिषक् ।
योनिः सङ्कीर्णतां याति क्वाथेनानेन धावनात् ॥
जीरकद्वितयं कृष्णा सुयुवी सुरभिर्व्वचा ।
वासकः सैन्धवञ्चापि यवक्षारो यवानिका ॥
एषां चूर्णं घृते किञ्चित् भृष्ट्वा खण्डेन मोदकम् ।
कृत्वा खादेद्यथावह्नि योनिरोगाद्विमुच्यते ॥
मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला ।
मेदे पयस्या काकोली मूलञ्चैवाश्वगन्धजम् ॥
अजमोदा हरिद्रे द्वे प्रियङ्गुकटुरोहिणी ।
उत्पलं कुमुदं द्राक्षा काकोल्यौ चन्दनद्वयम्
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
शतावरीरसं क्षीरं घृताच्चेयं चतुर्गुणम् ।
सर्पिरेतन्नरः पीत्वा स्त्रीषु नित्यं वृषायते ।
पुत्त्रान् जनयते वीरान् मेधाढ्यान् प्रियदर्शनान् ॥
या चैवास्थिरगर्भा स्यात् पुत्त्रं वा जनयेन्मृतम् ।
अल्पायुषं वा जनयेत् या च कन्यां प्रसूयते ॥
योनिरोगे रजोदोषे परिस्रावे च शस्यते ।
प्रजावर्द्धनमायुष्यं सर्व्वग्रहनिवारणम् ।
नाम्ना फलघृतं ह्येतदश्विभ्यां परिवर्त्तितम् ॥
अनुक्तं लक्ष्मणामूलं क्षिपन्त्यत्र चिकित्सकाः ।
जीवद्वत्सैकवर्णाया घृतञ्चात्र प्रयुज्यते ।
अरण्यगोमयेनेह वह्निज्वाला च दीयते ॥'
मेदे मेदा महामेदा तयोरभावे शतावरी द्विगुणा देया । पयस्यात्र क्षीरकाकोली काकोलीयुगलाभावे अश्वगन्धा द्विगुणा देया । प्रियङ्गुस्थाने केचिद्धिङ्गु पठन्ति । पयस्या काकोलीत्युक्ता पुनः काकोल्याविति काकोलीक्षीरकाकोल्यौ द्वैगुण्यार्थं एतस्य फलघृतस्य पाठो नानातन्त्रेषु नानाविधः । तत्र हिङ्गुवचातगरजीवकर्षभका एवाधिकाः । तत्र जीवकर्षभयोरभावे विदारीकन्दो द्विगुणो देयः । फलघृतं सकलयोनिरोगेषु ॥ * ॥

अथ योनिकन्दस्य चिकित्सा ।
'गैरिकाम्रास्थिजन्तुघ्नरजन्यञ्जनकट्फलम् ।
पूरयेद्योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः ॥
त्रिफलायाः कषायेण सक्षौद्रेण च सेचयेत ।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते ॥'
अथ प्रसङ्गात् गुर्व्विण्या रोगाणां चिकित्सा ।
'ह्रीवेरातिविषामुस्तमोचशक्रैः शृतं जलम् ।
दद्याद्गर्भे प्रचलिते प्रदरे कुक्षिरुज्यपि ॥'
कुक्षिरुक् उदरव्यथा । चलितगर्भस्थापने ह्रीवेरादिक्वाथः ॥ * ॥

अथ गर्भस्रावपातयोर्निदानम् ।
'ग्राम्यधर्म्माध्वगमनयानासनप्रपीड़नैः ।
ज्वरोपवासोत्पतनप्रहाराजीर्णधावनैः ॥
वमनाच्च विरेकाच्च क्रुन्थनाद्गर्भपातनात् ।
तीक्ष्णक्षारोष्णकटुकतिक्तरूक्षनिषेवणात् ॥
वेगाभिघाताद्विषमादासनाच्छयनाद्भयात् ।
गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत् ॥'

गर्भपातनात् नियमे गर्भे पातनशीलं द्रव्यं तस्मात्। गर्भस्य स्रावपातयोः पूर्व्वरूपमाह। गर्भे पततीत्यादि। पतति स्रावेण पातेन वा पतिष्यति स्रावपातयोरवधिमाह।

‘आचतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥’

आचतुर्थात् मासात् चतुर्थमासपर्य्यन्तम्। गर्भस्य विद्रवः। शोणितरूपगर्भः। स्रवति शोणितमिति भोजवचनात्। स्थिरशरीरस्य कठिनशरीरस्य गर्भस्य। गर्भपातस्य दृष्टान्तं दर्शयति।

‘गर्भोऽभिघातविषमासनपीडनाद्यैः
पक्वं द्रुमादिव फलं पतति क्षणेन॥’

यथा वृन्तलग्नं पक्वं फलमभिघातेनाकाल एव पतति तथा गर्भोऽप्यभिघातादिना अकालेऽपि पतति॥ *॥ अथ गर्भस्रावस्य चिकित्सा।

‘गुर्व्विण्या गर्भतो रक्तं स्रवेद्यदि मुहुर्मुहुः।
तन्निरोधाय सुस्निग्धमुत्पलादिशृतं पिबेत्॥’

उत्पलादिगणमाह।

‘उत्पलं नीलमारक्तं कह्लारं कुमुदं तथा।
श्वेताम्भोजञ्च मधुकमुत्पलादिरयं गणः॥
संशीलितो हरत्येव दाहं तृष्णां हृदामयम्।
रक्तपित्तञ्च मूर्च्छाञ्च तथा छर्द्दिमरोचकम्॥’

अथ गर्भपातस्य उपद्रवानाह।

‘प्रस्रंश्यमाने गर्भे स्याद्दाहः शूलञ्च पार्श्वयोः।
पृष्ठरुक् प्रदरानाहौ मूत्रसङ्गश्च जायते॥’

प्रस्रंश्यमाने पतति॥ *॥ अथ गर्भस्य स्थानान्तरगमने चोपद्रवानाह।

‘स्थानात् स्थानान्तरं तस्मिन् प्रयात्यपि च जायते।
आमपक्वाशयादौ तु क्षोभः पूर्व्वेऽप्युपद्रवाः॥’

पूर्व्वेऽप्युपद्रवाः पार्श्वशूलादयः॥ *॥ तच्चिकित्सामाह।

‘स्निग्धशीताः क्रियास्तेषु दाहादिषु समाचरेत्।
कुशकाशोरुबूकाणां मूलैर्गोक्षुरकस्य च॥
शृतं दुग्धं सितायुक्तं गर्भिण्याः शूलहृत् परम्।
शदंष्ट्रामधुकच्छुद्राम्लानैः सिद्धं पयः पिबेत्।
शर्करामधुसंयुक्तं गुर्व्विणीवेदनापहम्॥’

अम्लानः पुष्पजातिः। अयं वाणपुष्प इति गौड़ादौ प्रसिद्धः।

‘मृत्कोष्ठागारिका गेहसम्भवात्र च मृत्तिका।
समङ्गा धातकीपुष्पं गैरिकञ्च रसाञ्जनम्॥
तथा सर्ज्जरसश्चैतान् यथालाभं विचूर्णयेत्।
तच्चूर्णं मधुना लिह्यान्नारी प्रदरशान्तये॥’

मृत्कोष्ठागारिकासम्भवा मृत्कोष्ठागारिका वरटी तन्निर्म्मितगृहभवा मृत्तिका। समङ्गा लज्जालुः।

‘कसेरूत्पलशृङ्गाटकल्कं वा पयसा पिबेत्।
पक्वं वचारसोनाभ्यां हिङ्गुसौवर्च्चलान्वितम्।
आनाहे तु पिबेत् दुग्धं गुर्व्विणी सुखिनी भवेत्॥’

सौवर्च्चलं चौहार इति लोके।

‘तृणपञ्चकमूलानां कल्केन विपचेत् पयः।
तत् पयो गुर्व्विणी पीत्वा मूत्रसङ्गाद्विमुच्यते॥
शालीक्षुकुशकाशैः स्यात् शरेण तृणपञ्चकम्।
एषां मूलं तृषादाहपित्तास्रङ्मूत्रसङ्गहृत्॥’*॥

अथ प्रसूताया योनेः क्षतादेश्चिकित्सा।

‘तुम्बीपत्रं तथा लोध्रं समभागं सुपेषयेत्।
तेन लेपो भगे कार्य्यः शीघ्रं स्याद्योनिरक्षता॥
पलाशोडुम्बरफलं तिलतैलसमन्वितम्।
योनौ विलिप्तं विधिना गाढ़ीकरणमुत्तमम्॥”

इति भावप्रकाशः॥ *॥

अथ कुयोनिप्राप्तिकारणानि।

“हविर्लुङ्कति नाश्नौ ये गोविन्दं नार्च्चयन्ति ये।
लभन्ते नात्मविद्याश्च सुतीर्थविमुखाश्च ये॥
सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम्।
आर्त्तेभ्यो न प्रयच्छन्ति सर्व्वे सुहृतदारकाः॥
ब्रह्मस्वञ्च स्त्रीधनानि लोभादेव हरन्ति ये।
बलेन छद्मना वापि धूर्त्ताश्च परवञ्चकाः॥
नास्तिकाः कुहकाश्चौरा ये चान्ये वकवृत्तयः।
बालवृद्धातुरस्त्रीषु निर्द्दयाः सत्यवर्ज्जिताः॥
अग्निदा गरदा ये च ये चान्ये कूटसाक्षिणः।
अगम्यागामिनः सर्व्वे ये चान्ये ग्रामयाजिनः॥
व्याधाचरणसम्पन्ना वर्णादिधर्म्मवर्जिताः।
देवोपदेवद्रव्यचौर्य्यचाद्विसेविनः॥
सर्व्वदा मादकद्रव्यपानमत्ता हरिद्विषः।
देवतोच्छिष्टपतितशूद्रश्राद्धान्नभोजिनः॥
असत्कर्म्मरता नित्यं सर्व्वपातकपापिनः।
पाषण्डधर्म्माचरणाः पुरोधोवृत्तिजीविनः॥
पितृमातृस्वसापत्यस्वदारत्यागिनश्च ये।
ये कदर्य्याश्च लुब्धाश्च नास्तिका धर्म्मदूषकाः॥
त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम्।
गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः॥
महापर्व्वसु सर्व्वेषु प्रतिग्रहरताश्च ये।
परद्रोहरता ये च तथा ये प्राणिहिंसकाः॥
परापवादिनः पापा देवतागुरुनिन्दकाः॥
कुप्रतिग्राहिणः सर्व्वे सम्भवन्ति पुनः पुनः॥
प्रेतराक्षसपैशाच्यतिर्य्यगादिकुयोनिषु।
न तेषां सुखलेशोऽस्ति इह लोके परत्र च॥
तस्मात् त्यक्त्वा निषिद्धार्थं विहितं कर्म्म कारयेत्।
यज्ञं दानं तपस्तीर्थं मन्त्रं देवं गुरुं भरेत्॥
नाचरेत् कुत्सितं कर्म्म मनसा च कदाचन।
विपाकं कर्म्मणां दृष्ट्वा योनिकोटिषु दुःसहम्॥
चतुर्भिरपि वर्णैस्तु सेव्यो धर्म्मो निरन्तरम्॥”

इति पाद्मोत्तरखण्डे १८ अध्यायः॥ *॥

योनिदुष्टाया असाध्वीत्वं यथा,—

“साध्वी स्त्री मातृतुल्या च सर्व्वथा हितकारिणी।
असाध्वी वैरतुल्या च शश्वत्सन्तापदायिका।
सुखदुष्टा योनिदुष्टा चैवासाध्वीति विश्रुता॥”

इति ब्रह्मवैवर्त्ते गणपतिखण्डे २ अध्यायः॥*॥

पापपुण्यफलं अधमोत्तमयोनिप्राप्तिर्यथा,—

“पापपुण्यफलं लोके प्रत्यक्षं खलु दृश्यते।
देवदानवमानुष्यतिर्य्यक्त्वं कृमियोनिता॥
नानायोनिषु जन्मानि नानाव्याधिप्रपीड़िताः।
मरणं बालवृद्धानामन्धत्वं कुब्जता तथा॥
ऐश्वर्य्यं सुदरिद्रत्वं पाण्डित्यं मूर्खता तथा।
एताश्चराचरे लोके भवन्ति कथमन्यथा॥”

इति पाद्मोत्तरखण्डे २१ अध्यायः॥ *॥

पक्षियोनिप्राप्तिकारणं यथा,—

“इति श्रुतकथो विप्र! सारसं प्राह वानरः।
सम्यग्वेत्ति भवान् नूनं त्वं कथं पक्षितां गतः॥
वृत्तान्तमेतं कथय श्रोतुमिच्छामि सारस!॥

सारस उवाच।

कथयिष्यामि तत् कर्म्म येनाहं दुर्गतिं गतः।
पक्षियोनिं गतो येन तत् सर्व्वं श्रोतुमर्हसि॥
धान्यखारीशतं साग्रमुत्सृष्टं हि त्वया पुरा।
बहुभ्यो ब्राह्मणेभ्यश्च नर्म्मदायाः परिग्रहे॥
पौरोहित्यमदाल्लोभाद्वञ्चयित्वा द्विजांस्तथा।
किञ्चिद्दत्त्वा तु तेभ्यश्च गृहीतमखिलं मया॥
विप्रसाधारणद्रव्यग्रहणोत्पन्नपातकात्।
पतितः कालसूत्रेऽहं नरके रक्तकर्द्दमे॥
वक्तुमत्र न शक्नोमि दुःखं वानर! नारकम्।
दैवात् कथमपि प्राप्त उत्तारो नरकाम्बुधेः॥
मया यदि तथापीह शकुनत्वमुपस्थितम्।
अपहृत्य पुरा कांस्यभाजनं भगिनीगृहात्॥
द्यूतकर्त्त्रे मया दत्तं तेन मे सारसी गतिः॥
इयञ्च ब्राह्मणी पूर्व्वं कांस्यचौरी सदाभवत्।
तेनेह सारसी जाता मद्भार्य्या सहधर्म्मिणी॥”

इति तत्रैव १६। २० अध्यायौ॥ *॥

पापिनां नरकभोगानन्तरं स्थावरादियोनिप्राप्तिर्यथा,—

“स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः।
धार्म्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम्॥
सहस्रभागप्रथमा द्वितीयानुक्रमास्तथा।
सर्व्वे ह्येते महाभाग यावन्मुक्तिसमाश्रयाः॥”

इति विष्णुपुराणे २ अंशे ५ अध्यायः॥

“पापिनां नरकभोगानन्तरं स्थावराद्यास्तत्तरोत्तरमुत्कृष्टास्तु नवधा भिन्नासु योनिषु जन्मक्रममाह। स्थावरा इति। अब्जा मत्स्यादयः। धार्म्मिका नरेष्वेव पुण्यविशेषेण केचिन्मोक्षिणश्च मुमुक्षवश्च यथाक्रमं भवन्तीति शेषः। तेषाञ्च पूर्व्वबाहुल्यमुत्तरोत्तराल्पत्वञ्चाह सहस्रेति। द्वितीयानुक्रमाः द्वितीयोऽनुक्रम उद्देशो येषां द्वितीयस्थानेऽनुक्रान्ता ये कृमयस्ते सहस्रभागप्रथमाः सहस्रभागाः सहस्रगुणाः प्रथमाः प्रथमनिर्द्दिष्टाः स्थावरा येषां ते। कृमिभ्यः सहस्रगुणमधिकाः स्थावराः। तत्सहस्रतमभागाः कृमय इत्यर्थः। पञ्चम्यन्तपाठेऽपि द्वितीयस्थानेऽनुक्रान्तात् कृमिवर्गात् सहस्रगुणाः स्थावरा इत्येवार्थः। तथा सर्व्वे ह्येत इति। यथा स्थावराः स्थानान्तरनिर्द्दिष्टेभ्यः कृमिभ्यः सहस्रगुणमधिकाः। तथा कृमयः स्थानान्तरनिर्द्दिष्टेभ्योऽब्जेभ्यः सहस्रगुणमधिकाः। एवं पक्ष्यादिष्वपि द्रष्टव्यम्। मोक्षं सम्यगाश्रयन्ति इति मोक्षसमाश्रया मुमुक्षवो ज्ञाननिष्ठास्तत्पर्य्यन्तमेवं पूर्व्वपूर्व्वादुत्तरोत्तरन्यूनत्वेन जन्म-

क्रमः । ततः परं मुक्तिः । एतच्च संसारिजीव-बाहुल्यकथनं मोक्षस्य दुर्लभताख्यापनार्थम् । अथच नवधा निर्द्दिष्टो जन्मक्रमः प्रायिक एव । तदुक्तमादित्यपुराणे ।
व्युत्क्रमेणापि मानुष्यं प्राप्यन्ते पुण्यगौरवात् ।
विचित्रा गतयः पुंसां कर्म्मणां गुरुलाघवैः ॥”
इति तट्टीका ॥

कुयोनिमोक्षणं यथा,—
वाराह उवाच ।
“येन गर्भं न गच्छेत तन्मे शृणु हि माधवि ! ।
कथयिष्यामि ते ह्येतं सर्व्वधर्म्मविनिश्चयम् ॥
कृत्वापि विपुलं कर्म्म आत्मानं न प्रशंसति ।
कुर्व्वते बहुकर्म्माणि शुद्धेनैवान्तरात्मना ॥
कृत्वापि मम कर्म्माणि मत्प्रियाणि वसुन्धरे ! ।
नैव कुर्व्वन्त्यहङ्कारं क्रोधञ्चैव न गच्छति ॥
समं पश्यति चित्तेन लाभालाभविवर्जितः ।
पञ्चानामिन्द्रियाणाञ्च समर्थो निग्रहे रतः ॥
कार्य्याकार्य्ये विजानाति सर्व्वधर्म्मेषु निष्ठितः ।
शीतोष्णवातवर्षादिक्षुत्पिपासासहश्च यः ॥
यो दरिद्रो निरालस्यः सत्यवागनसूयकः ।
स्वदारनिरतो नित्यं परदारविवर्जितः ॥
सत्यवादी विशुद्धात्मा नित्यं भागवतप्रियः ।
संविभागी विशेषज्ञो नित्यं ब्राह्मणवत्सलः ॥
प्रियवादी द्विजानाञ्च मम कर्म्मपरायणः ।
कुयोनिन्तु न गच्छेत मम लोकाय गच्छति ॥”

वियोनिमोक्षणं यथा,—
“अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ! ।
यो वियोनिं न गच्छेत मम कर्म्मपरायणः ॥
जीवहिंसानिवृत्तस्तु सर्व्वभूतहितः शुचिः ।
सर्व्वत्र समतायुक्तः समलोष्टाश्मकाञ्चनः ॥
बाल्ये स्थितोऽपि वयसि क्षान्तो दान्तः शुभे रतः ।
स्वल्पं नैव विजानाति परेणापहृतं क्वचित् ॥
स्वल्पञ्च संस्मरेत् हितदत्तञ्च न जल्पति ।
अलीकेषु निवृत्तो यः पर्य्येति कृतनिश्चयः ॥
नित्यञ्च धृतिमान् किञ्चित् परोक्षेऽपि न च
चिपेत् ।
ऋतुकालेऽभिगच्छेत अपत्यार्थं स्वकां स्त्रियम् ॥
ईदृशास्तु नरा भद्रे ! मम कर्म्मपरायणाः ।
ते वियोनिं न गच्छन्ति मम गच्छन्ति सुन्दरि ॥”

तिर्य्यग्योनिमोक्षणं यथा,—
वाराह उवाच ।
“गुह्यानां परमं गुह्यं तच्छृणुष्व वसुन्धरे ! ।
तिर्य्यग्योनिगताश्चापि यो न गच्छन्ति किल्बि-
षम् ॥
अष्टम्याञ्च चतुर्द्दश्यां मैथुनं यो न गच्छति ।
भुङ्क्ते परस्य चान्नानि यश्चैव न विकुत्सति ॥
बाल्ये वयस्यपि च यो मम नित्यमनुव्रतः ।
येन केनापि सन्तुष्टः पितृमातृप्रपूजकः ॥
प्राणेन जीवति च यः प्रविभागी गुणान्वितः ।
अलुब्धः सर्व्वकार्य्येषु स्वतन्त्रो नित्यसंयतः ॥
विकर्म्म नाभिकुर्व्वीत कौमारव्रतसंस्थितः ।
सर्व्वभूतदयायुक्तः सत्त्वेन च समन्वितः ॥
मतिमान्नैव तप्येत परार्थेषु कदाचन ।
ईदृशीं बुद्धिमास्थाय मम कर्म्माणि कुर्व्वते ।
तिर्य्यग्योनिं न गच्छेत मम लोकाय गच्छति ॥”
इति वराहपुराणे योनिगर्भमोक्षणनामाध्यायः ॥

योनिकन्दः, पुं, (योनौ कन्द इव ।) योनिरोग-विशेषः । तस्य निदानं यथा,—
“दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्व्वाताद्याः कुपिता यथा ॥
वाताद्याः कुपिता यथा । यथा निदानकुपिता वाताद्याः । रूपमाह ।
‘पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् ।
जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः ॥’
लकुचाकृतिसन्निभं लकुचाकाराकारम् । गुडकमत्र विशेष्यं बोद्धव्यम् ॥ * ॥ वातजादि-भेदेन रूपमिदमाह ।
‘रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्द्दिशेत् ।
दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तत् ॥
तिलपुष्पप्रतीकाशं कण्डूमत् कफात्मकम् ।
सर्व्वलिङ्गसमायुक्तं सान्निपातात्मकं भवेत् ॥’
अस्य चिकित्सा । योनिशब्दे द्रष्टव्या ।” इति भावप्रकाशः ॥

योनिजं, त्रि, (योनेर्ज्जायते इति । जन्+डः ।) योनिनिःसृतशरीरादिकम् । यथा,—
“सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा ।
योनिजादिर्भवेद्देह इन्द्रियं घ्राणलक्षणम् ॥”
इति भाषापरिच्छेदः ॥
“योनिजादीति । योनिजमयोनिजञ्चेत्यर्थः । योनिजमपि जरायुजमण्डजञ्च । जरायुजं मानुषादीनां अण्डजं सर्पादीनाम् । अयोनिजं स्वेदजोद्भिदादिकम् । स्वेदजाः कृमिदंशाद्याः । उद्भिदस्तरुगुल्माद्याः । नारकिणां शरीरमप्ययोनिजम् ।” इति सिद्धान्तमुक्तावली ॥

योनिदेवता, स्त्री, (योनेर्द्देवता ।) पूर्व्वफल्गुनीनक्षत्रम् । इति हेमचन्द्रः ॥

योनिमुद्रा, स्त्री, (योन्याकृतिर्मुद्रा हस्तभङ्गी ।) भगवत्याः पूजायां प्रदर्शनीयाङ्गुलीरचितयोन्याकारमुद्राविशेषः । यथा,—
“पञ्च प्रणामान् कृत्वाथ ॐ ह्रीँ श्रीमितिमन्त्रकैः ।
अन्येषां पुरतश्चैव अधिकाख्या यथेच्छया ।
योनिमुद्रां ततः पश्चात् दर्शयित्वा विसर्ज्जयेत् ॥
द्वौ पाणी प्रसृतीकृत्य कृत्वा तूत्तानमञ्जलिम् ।
अङ्गुष्ठाग्रद्वयं न्यस्य कनिष्ठाग्रद्वयोस्ततः ॥
अनामिकायां वामस्य तत्कनिष्ठां पुरो न्यसेत् ।
दक्षिणस्यानामिकायां कनिष्ठां दक्षिणस्य च ॥
अनामिकायाः पृष्ठे तु मध्यमे विनियोजयेत् ।
द्वे तर्ज्जन्यौ कनिष्ठाग्रे तदग्रेणैव योजयेत् ॥
योनिमुद्रा समाख्याता देव्याः प्रीतिकरी मता ॥
त्रिवारं दर्शयेदग्रे मूलमन्त्रेण साधकः ।
तां मुद्रां शिरसि न्यस्य मण्डलं विन्यसेत्ततः ॥”
इति कालिकापुराणे ५६ अध्यायः ॥ * ॥
पारिभाषिकयोनिमुद्रा यथा । मन्त्रमुक्तावल्याम् ।
“उपविश्यासने मन्त्री प्राङ्मुखो वाप्युदङ्मुखः
षट्चक्रं चिन्तयेद्देवि ! प्राणायामपुरःसरम् ॥
चतुर्द्दलं स्यादाधारं स्वाधिष्ठानन्तु षड्दलम् ।
नाभौ दशदलं पद्मं सूर्य्यसंख्यदलं हृदि ॥
कण्ठे स्यात् षोडशदलं भ्रूमध्ये द्विदलन्तथा ।
सहस्रदलमाख्यातं ब्रह्मरन्ध्रे महापथे ॥
आधारे कन्दमध्यस्थं त्रिकोणमतिसुन्दरम् ।
त्रिकोणमध्ये देवेशि ! कामबीजं सुलक्षणम् ॥
कामबीजोद्भवं तत्र स्वयम्भुलिङ्गमुत्तमम् ।
तस्योपरि पुनर्ध्यायेत् चित्कलां हंसमाश्रिताम् ॥
ध्यायेत् कुण्डलिनीं देवीं स्वयम्भुलिङ्गवेष्टिताम् ।
चित्कलया कुण्डलिनीं तेजोरूपां जगन्मयीम् ॥
आधारादीनि पद्मानि भित्त्वा तेजःस्वरू-
पिणीम् ।
हंसेन मनुना देवीं ब्रह्मरन्ध्रं नयेत् सुधीः ॥
सदाशिवेन देवेशि ! क्षणमात्रं रमेत् प्रिये ! ।
अमृतं जायते देवि ! तत्क्षणात् परमेश्वरि ! ॥
तदुद्भवामृतं देवि ! लाक्षारससमोपमम् ।
तेनामृतेन देवेशि ! तर्पयेत् परदेवताम् ॥
षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया ।
आनयेत्तेन मार्गेण मूलाधारं पुनः सुधीः ॥
ततस्तु परमेशानि ! अक्षमालां विचिन्तयेत् ।
चित्रिणी विशतन्त्वाभा ब्रह्मनाडीगतान्तरा ॥
तया संग्रथिता ध्येया साक्षाज्जाग्रत्स्वरूपिणी ।
अनुलोमविलोमेन मन्त्रवर्णविभेदतः ॥
मन्त्रेणान्तरितान् वर्णान् वर्णेनान्तरितं मनुम् ।
कुर्य्याद्वर्णमयीं मालां सर्व्वमन्त्रप्रकाशिनीम् ॥
चरमार्णं मेरुरूपं लङ्घनं नैव कारयेत् ।
सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेत् सुधीः ॥
अष्टोत्तरशतं मूलमन्त्रं ध्यानेन संजपेत् ।
वर्गाणामष्टवर्गेण अष्टवारं जपेत् सुधीः ॥
अ क च ट त प य श इत्येवञ्चाष्टवर्गकाः ।
योनिमुद्रा महेशानि ! तव स्नेहात् प्रकाशिता ॥
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥”
इति शाक्तानन्दतरङ्गिणी ॥

योनिरोगः, पुं, (योनेः रोगः ।) भगन्दरः ॥ (यथा, सुश्रुते । १ । ४५ ।
“शूलोदावर्त्तातिसारप्रवाहिकायोनिरोगगर्भस्रावरक्तपित्तश्रमक्लमहरम् ।” * ॥) अस्य निदानादिर्योनिशब्दे द्रष्टव्यः ॥

योन्यर्शः, [स्] क्ली, (योनिजातमर्शः ।) योनिजातरोगविशेषः । तत्पर्य्यायः । कन्दसंज्ञम् २ । इति त्रिकाण्डशेषः ॥ (यथा,—
“केचित्तु भूयांसमेव देशमुपदिशन्त्यर्शसां शिश्नमपत्यपथं गलमुखनासिकाकर्णाक्षिवर्त्मानि त्वक् च ।” इति चरके चिकित्सास्थाने अष्टमे अध्याये ॥)

योषा, स्त्री, (यौति मिश्रीभवतीति । यु मिश्रणे + बाहुलकात् सः । इत्युज्ज्वलदत्तः । ३ । ६२ । स्त्रियां टाप् ।) नारी । इत्यमरः । २ । ६ । २ ॥ (यथा, देवीभागवते । ३ । २५ । ८ ।

"यथा दारुमयी योषा नटादीनां प्रचेष्टते ।
तथा स्वकर्म्मवशगो देही सर्व्वत्र वर्त्तते ॥")

योषित्, स्त्री, (योषति पुमांसं युष्यते पुंभिरिति वा । युष् + "हृसृरुहियुषिभ्य इतिः ।" उणा० १ । ९९ । इति इतिः ।) नारी । इत्यमरः । २ । ६ । २ ॥ (यथा, मेघदूते । १ । ३९ ।
"गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ॥")
तस्या अवध्यत्वं यथा, वह्निपुराणे ।
"तं प्रेक्ष्य भरतं श्रेष्ठं प्रभुर्नो वाक्यमब्रवीत् ।
अवध्याः सर्व्वभूतानां योषितः क्षम्यतामिति ॥"

योषित्प्रिया, स्त्री, (योषितां प्रिया ।) हरिद्रा । इति भावप्रकाशः ॥

योषिता, स्त्री, (योषित् + टाप् ।) नारी । यथा,
"स्त्री वधूरबला नारी प्रिया रामा नितम्बिनी ।
योषा योषिद्योषिता च जोषिज्जोषा च
जोषिता ॥"
इति शब्दरत्नावली ।
(यथा, मुण्डकोपनिषदि । २ । १ । ५ ।
"तस्मादग्निः समिधो यस्य सूर्य्यः
सोमात् पर्जन्य ओषधयः पृथिव्याम् ।
पुमान् रेतः सिञ्चति योषितायां
बह्वीः प्रजाः पुरुषात् सम्प्रसूताः ॥")

यौक्तिकः, पुं, (युक्तिं करोतीति । युक्ति + ठण् ।) नर्म्मसचिवः । इति शब्दरत्नावली ॥ युक्तियोग्ये, त्रि ॥

यौगकः, त्रि, (योगस्यायमिति । योग + अण् + स्वार्थे कन् ।) योगसम्बन्धी । इति सिद्धान्तकौमुदी ॥

यौगिकः, त्रि, (योगाय प्रभवतीति । योग + "योगाद्यच्च ।" ५ । १ । १२९ । इति ठञ् ।) प्रकृतिप्रत्यययोगलभ्यार्थवाचकः । यथा । योगाय प्रभवति । इति योग्यः यौगिकः । इति सिद्धान्तकौमुदी ॥ "योगरूढाश्च रूढाश्च यौगिकाश्चेति ते त्रिधा । आदितेयादिशब्दा यौगिकाः अदितेरपत्यानीति ढक्प्रत्ययेन केवलं योगार्थ एव ।" इत्यलङ्कारकौस्तुभे २ किरणः ॥ * ॥
("यौगिकं नाम लक्षयति विभजते च ।
'योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम् ।
समासस्तद्धितान्तश्च कृदन्तश्चेति तत्त्रिधा ॥'
यन्नाम स्वान्तर्निविष्टशब्दानां योगलभ्यस्यैव यादृशार्थस्यान्वयबोधं प्रतिहेतुस्तन्नाम तादृशार्थे यौगिकम् । योगरूढन्तु कृष्णसर्पादिपदं योगेनावच्छिन्नस्य रूढार्थस्य बोधकं न तु तन्मात्रस्य । तच्च यौगिकं त्रिविधं समासस्तद्धितान्तं कृदन्तञ्चेति । द्वन्द्वोऽपि समासः स्वघटकशब्दानामाकाङ्क्षया लभ्यस्य धवखदिराद्यर्थस्यान्वयबोधकतया यौगिक एव । सर्व्वञ्चेदं रूढान्यत्वेन विशेषणीयं नातः कृष्णसर्पादौ वासुदेवादौ पङ्कजादौ च योगरूढेऽतिप्रसङ्गः । ब्राह्मणी श्वश्रूः शूद्रेत्यादौ ङीबादेः स्त्रीत्ववाचित्वे तादृशं नाम यौगिकमेव अन्यथा तु स्त्रीत्वादिमति तत्तदर्थे रूढमेव नातो विभागस्य व्याघातः ॥ यौगिकेषु समासं लक्षयति ।
'यादृशस्य महावाक्यस्यान्तस्थादिर्भिन्नार्थके ।
यादृशार्थस्य धीहेतुः स समासस्तदर्थकः ॥'
यादृशमहावाक्योत्तरस्थतलादिः स्वार्थस्य यादृशार्थावच्छिन्नविषयताशालिबोधे हेतुस्तादृशं तद्वाक्यं तथाविधार्थे समासः । पाचकादिकन्तु पाककर्त्राद्यर्थकं वाक्यमपि स्वघटकानेकनामलभ्यतादृशार्थकत्वविरहान्न महावाक्यम् । प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थस्यान्वयबोधं प्रत्ययोग्यत्वं वा प्रकृते वाक्यस्य महत्त्वं वाच्यम् । तेन उपकुम्भादौ नाव्याप्तिर्न्नवा नीलघटत्वमित्यादौ नीलघटत्वादिभागेऽतिप्रसङ्गः । चौरपायीत्यादिकन्तु प्रकृत्यर्थावच्छिन्नतदर्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पानशीलसामान्यस्याप्रत्ययात् । राज्ञः पुरुषत्वमित्यादितो राजन्येव पुरुषभावः प्रतीयते न तु राजपुरुषस्य भावः तद्धितानां प्रकृत्यर्थमात्रान्वितस्वार्थबोधकत्वादतो राज्ञः पुरुषेत्यादिभागे न प्रसङ्गः । पायंपायमित्यादिणमन्तभागस्तु स्वार्थावच्छिन्नस्य धात्वन्तरार्थस्यैवान्वयबोधको न तु त्वादिप्रत्ययार्थस्य प्रश्नायेत्यादौ समासव्यपदेशोऽव्ययादिशब्दसंस्कारप्रयोजनको गौणः ॥"
* * * * * *
"यौगिकेषु क्रमप्राप्तं तद्धितान्तं नाम लक्षयति ।
'यन्नाम तद्धितं यच्च यत्क्रमं यद्यदर्थकम् ।
यद्द्वयं यत्क्रमं तत्र तद्धितान्तं निगद्यते ॥'
यद्यपि नामोत्तरतद्धितत्वं तद्धितोत्तरनामत्वं वा प्रत्येकं बहुगुडो द्राक्षेत्यादौ दाक्षिरित्यादौ चाव्यापकमेव तद्धितान्ते नास्ति तथापि यादृशं नाम यच्च तद्धितं यादृशानुपूर्व्व्यवच्छिन्नं यद्यादृशार्थस्यान्वयबोधे समर्थं तादृशानुपूर्व्व्यवच्छिन्नं तद्द्वयमपि तादृशार्थे तद्धितान्तं नामैकार्थः पचतितरामित्यादिकन्तु नामैव न प्रागेव तु तद्धितान्तं तस्यापि लक्ष्यत्वे यः शब्दस्तद्धितं यश्चेति पठनीयं टाबादेरपि तद्धितत्वोपगमाद्दजाब्राह्मणीत्यादेर्नासंग्रह इति वदन्ति ।
कृदन्तं नाम लक्षयति ।
'यद्धात्वर्थान्वितस्वार्थधीकृत् कृद्यादृशं भवेत् ।
तद्धातूत्तरगं तत् कृत् कृदन्तं नाम तादृशम् ॥'
यद्धात्वर्थान्वितस्वार्थान्वयबोधं प्रति यादृशानुपूर्व्व्यवच्छिन्नस्य यत्कृतो निश्चयः कारणं तद्धातूत्तरगं तत् कृदेव तादृशानुपूर्व्व्यवच्छिन्नं सत् कृदन्तं नाम । यथा पाठकपाठ्यमानादि तद्धि धात्वर्थेनान्वितस्य स्वार्थकर्त्रादेः कर्म्मत्वाद्यन्वयबोधं प्रति द्वितीयाद्यंशे तादृशानुपूर्व्विकत्वेन निश्चीयमानं हेतुः चैत्रेण ग्रामस्य गन्तव्यमित्यादौ धात्वर्थे स्वार्थमिष्टसाधनत्वादिकं बोधयदपि तव्यादिकं धात्वर्थनिष्ठविषयतानिरूपितस्वार्थविषयताकबोधजनकत्वेन धात्वर्थान्वितस्वार्थकमेव भावकृतामपि स्वरूपार्थकत्वं व्युत्पादितमेव ॥" इति शब्दशक्तिप्रकाशिका ॥ अगुरुः । तत्पर्य्यायो यथा,—
"अयोगुरुः समुद्दिष्टो यौगिको लोहनामभिः ॥"
इति गारुडे २०५ अध्यायः ॥)

यौजनशतिकः, त्रि, (योजनशतं गच्छतीति । योजनशत + "क्रोशशतयोजनशतयोरुपसंख्यानम् ।" ५।१।७४। इत्यस्य वार्त्ति० इति । ठञ् ।) योजनशतगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥ (योजनशतादभिगमनमर्हतीति वाक्ये योजनशताभिगमनकर्त्ता । इति काशिका ॥)

यौजनिकः, त्रि, (योजनं गच्छतीति । योजन + "योजनं गच्छति ।" ५ । १ । ७४ । इति ठञ् ।) एकयोजनगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥

यौट, ऋ सम्बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अयुयौटत् । यौटति काष्ठं तथा । इति दुर्गादासः ॥

यौड, ऋ सम्बन्धे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अयुयौडत् । यौडति काष्ठं तथा । इति दुर्गादासः ॥

यौतकं, क्ली, (युतकयोर्वधूवरयोरिदम् । युतक + अण् । युतकमेवेति । स्वार्थे अण् वा ।) यौतुकम् । इति हलायुधरायमुकुटौ । २ । ८ । २८ ॥ (यथा, मनुः । ९ । १३१ ।
"मातुस्तु यौतकं यत् स्यात् कुमारीभाग एव
सः ॥"
अस्य विशेषविवरणन्तु यौतुकशब्दे द्रष्टव्यम् ॥)

यौतवं, क्ली, परिमाणम् । इत्यमरः । २ । ९ । ८५ ॥

यौतुकं, क्ली, यौतकम् । विवाहकाले दम्पत्योर्लब्धं धनम् । उपचारात् अन्नप्राशनादिसंस्कारकाललब्धमपि । युतकं योनिसम्बन्धः तत्र भवमिति अणि यौतकम् । युतयोर्वधूवरयोरिदमिति वा कणि यौतकम् ॥ यौतकमुकारमध्यमपि । यौतकं यौतुकञ्च तत् । इति वाचस्पतिः ॥ यौतकादि तु यद्देयं स दायो हरणञ्च तदित्यमरटीकायां भरतः ॥ * ॥ स्त्रिया यौतकधनस्याधिकारक्रमो यथा,—
"यत्तु दुहितृमात्राधिकारार्थं गौतमवचनम् ।
'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्च ।'
यच्च नारदस्य ।
'मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः ॥'
यच्च कात्यायनस्यापि ।
'दुहितॄणामभावे तु रिक्थं पुत्त्रेषु तद्भवेत् ॥'
यच्च याज्ञवल्क्यस्य ।
'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ॥'
तानि पूर्व्वोक्तदेवलवचनविरोधेन यौतकधनमात्रविषयाणि । अतएव मनुः । ९ । १३१ ॥
'मातुश्च यौतकं यत् स्यात् कुमारीभाग एव सः ॥'
यौतकं परिणयनलब्धम् । यु मिश्रणे इति धातोर्युत इति पदम् । मिश्रता च स्त्रीपुंसयोरेकशरीरता तच्च विवाहाद्भवति । अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचमिति श्रुतेः । अतो विवाहकाललब्धं यौतकम् । ततश्च परिणयनलब्धं स्त्रीधनं दुहितुरेव न पुत्त्रायाम् । तत्रैव

क्रमार्थं गौतमवचनम्। स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्च। प्रथममप्रत्तानां तदभावे प्रत्तानां तदभावे सम्मूढ़ानाम्। स्त्रीधनं दुहितॄणामितिसामान्यत: प्राप्तत्वात्। अप्रत्तानामित्यादिस्तु क्रमार्थत्वात्। तथा, याज्ञवल्क्य:।

'अप्रज:स्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि।
दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्॥'

तत्र ब्राह्मादिषु विवाहेषु यल्लब्धमध्यग्निधनं स्त्रिया तत् तस्यां म्टतायां प्रथमं दुहितॄणामेव तत्रापि प्रथमं कन्यायास्तदभावे प्रत्तायास्तदभावे परिणीतायाः सर्व्वदुहित्रभावे च पुत्रस्याधिकार: अप्रज:स्त्रीधने भर्त्तुरधिकारात्। वृहस्पतिना अप्रत्तापदेन अप्रत्ताद्यभावे सम्मूढ़ाया अप्यधिकार: सूचित:।

'ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम्।
अप्रजायामतीतायां भर्त्तुरेव तदिष्यते॥
यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते॥'

अस्याः स्याद्दत्तमिति पराचीनं पूर्व्वत्रानुषज्यते। तेन विवाहेषु यद्धनं दत्तमिति सम्बन्धात् वैवाहिकधनमात्रप्रतीतेर्न यावद्धनविषयत्वम्, तथा यम:।

'आसुरादिषु यद्द्रव्यं विवाहेषु प्रदीयते॥'

विवाहक्रियायां पूर्व्वापरीभूतायां यद्द्रव्यं प्रदीयते इति यौतकधनमात्रगोचरत्वमेव प्रतीयते।" इति दायभाग:॥*॥ "ऊढ़ाया यौतकधने प्रथमं कुमारी तदभावे वाग्दत्ता अधिकारिणी। एतयोरभावे ऊढ़यो: पुत्रवतीसम्भावितपुत्रयोर्युगपदधिकार:। एकाभावे चापरायाः। एतयोरभावे बन्ध्याविधवयोस्तुल्याधिकार:। एकाभावे चापरायाः। तत: पुत्रदौहित्रपौत्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राणां क्रमेणाधिकार:। ग्रन्थान्तरमते सपत्नीपुत्रानन्तरं दौहित्रस्याधिकार इति विशेष:। ततो ब्राह्मादिविवाहपञ्चकसमयलब्धयौतकधने भर्त्ता भ्राता माता पिता चेति क्रम:। आसुरादिविवाहत्रयसमयलब्धयौतकधने माता पिता भ्राता भर्त्ता चेति क्रम:। ततो देवर: ततो देवरपुत्रभर्त्तृश्वशुरपुत्रौ भगिनीपुत्र: ततो भर्त्तृभागिनेय: ततो भ्रातृपुत्र: ततो जामाता तत: श्वशुर: ततो भ्रातृश्वशुर: तत आनन्तर्य्यक्रमेण सपिण्डा: तत: सकुल्या: तत: समानोदका:।" इति तट्टीकायां श्रीकृष्णतर्कालङ्कार:॥

यौधिष्ठिरं, त्रि, (युधिष्ठिरस्य इदमिति। युधिष्ठिर + अण्।) युधिष्ठिरसम्बन्धि। यथा,—

"सा च यौधिष्ठिरी सेना गाङ्गेयशरताड़िता।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता॥"
इति महाभारतम्॥

(युधिष्ठिरस्यापत्ये, पुं। यथा, महाभारते। ६। ५०। ५६।

"यौधिष्ठिर: सुसंक्रुद्ध: सौवलं निशितै: शरै:।
अदारयत संग्रामे मघवा इव दानवम्॥"

वासुदेवस्य पत्नीविशेषे, स्त्री। यथा, हरिवंशे। १६०। २०—२१।

"कौशिक्यां सुतसोमायां यौधिष्ठिर्य्यां युधिष्ठिर:।
कापाली गरुड़श्चैव जज्ञाते चित्रयोधिनौ॥
एवमादीनि पुत्राणां सहस्राणि निबोध मे।
दशायुतं समाख्याता वासुदेवस्य ते सुता:॥")

यौधेय:, पुं, (योधमर्हतीति। योध + ढञ्। यद्वा, "पार्श्वादियौधेयादिभ्यामणञौ।" ५। ३। ११७। इति स्वार्थे अञ्।) योद्धा। इति सिद्धान्तकौमुदी॥ (युधिष्ठिरपुत्र:। स च शैव्यराजदौहित्र:। यथा, महाभारते। १। ६५। ७६।

"युधिष्ठिरस्तु गोवासनस्य शैव्यस्य देविकां नाम कन्यां स्वयम्बरां लेभे। तस्यां पुत्त्रं जनयामास यौधेयं नाम॥" नृगराजपुत्त्रा: यौधेया इति ख्याता:। यथा, हरिवंशे। ३१। २५।

"दृषद्वत्यास्तु संजज्ञे शिविरौशीनरो नृप:।
शिवेस्तु शिवयस्तात! यौधेयास्तु नृगस्य ह॥")

यौनं, क्ली, (योनेरिदमिति। योनि + अण्।) योनिसम्बन्धाधीनपापम्। यथा। बौधायन:।

"संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनात् सद्यो हि शयनाशनात्॥"

सुमन्तु:। यश्चैतैर्यौनमौखश्रौवादीनां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यादिति। इयात् कुर्य्यात्। एतदेवेति द्वादशवार्षिकमित्यर्थ:। अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते। इति प्रायश्चित्तविवेक:॥ (उत्पत्तिकारणम्। यथा, महाभारते। १३। १०२। २५।

"यत्राग्नियौनाश्च वसन्ति लोका
अप्योनय: पर्व्वतयोनयश्च॥"

उत्तरापथजातजातिविशेषे, पुं। यथा, महाभारते। १२। २०७। ४३।

"उत्तरापथजन्मान: कीर्त्तयिष्यामि तानपि।
यौनकाम्भोजगान्धरा: किराता वर्व्वरै: सह॥")

यौवतं, क्ली, (युवतीनां समूह:। युवति + "भिक्षादिभ्योऽण्।" ४। २। ३८। इति अण्। पुंवद्भावाभावश्च।) युवतिसमूह:। इत्यमर:। २। ६। २२॥ (यथा, गीतगोविन्दे। १०। १५।

"रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवावहो विबुधयौवतं वहसि तन्वि ! पृथ्वीगता॥"

युवतिभि: कृतमिति। नृत्यविशेष:। यथा, सङ्गीतदामोदरे।

"मधुरं बहुलीलाभिर्नटीभिर्यत्र नृत्यते।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम्॥")

परिमाणम्। इति अमरटीकायां भरत:॥

यौवनं, क्ली, (युवन् + "हायनान्तयुवादिभ्योऽण्।" ५। १। १३०। इति अण्।) यूनो भाव:। तत्पर्य्याय:। तारुण्यम् २। इत्यमर:॥ वय: ३ इति जटाधर:॥ तत्तु षोड़शवर्षमारभ्य सप्ततिवर्षपर्य्यन्तम्। यथा,—

"आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते।
वृद्ध: स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवते: परम्॥"
इति स्मृति:॥

नवयौवनलक्षणं यथा,—

"दरोद्भिन्नस्तनं किञ्चित् चलाक्षं मेदुरस्मितम्।
मनागभिस्फुरद्भावं नव्यं यौवनमुच्यते॥"
इत्युज्ज्वलनीलमणि:॥

("गर्भेश्वरत्वम् अभिनवयौवनत्वमप्रतिरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्व्वाविनयानामेकैकमप्येषामायतनम्। किमुत समवाय:। यौवनारम्भे च प्राय: शास्त्रजलप्रक्षालननिर्म्मलापि कालुष्यमुपयाति बुद्धि:। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टि:। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृति:। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनस:। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्त्तक: पुरुषमत्यासङ्गो विषयेषु।" इति कादम्बर्य्यां चन्द्रापीड़ं प्रति शुकनासोपदेश:॥)

नवयौवनकारकमौषधं यथा,—

"अश्वगन्धानागबलागुड़मांसनिषेविणाम्।
रूपं भवेद्यथा तद्वत् नवयौवनचारिणाम्॥"
इति गारुड़े १८६ अध्याय:॥

यौवनकण्टकं, पुं, क्ली, (यौवने कण्टकमिव दुःखदत्वात्।) युवगण्ड:। इति शब्दमाला॥ वयस्फोड़ा इति भाषा॥

यौवनपिड़का, स्त्री, (यौवने पिड़का।) युवकाले मुखे जात: क्षुद्रस्फोटक:। वयस्फोड़ा इति भाषा॥ (यथा, सुश्रुते निदानस्थाने। १३।

"यौवनपिड़का पद्मिनी कण्टका जतुमणिरित्यादि॥") तल्लक्षणं यथा,—

"शाल्मलीकण्टकप्रख्या: कफमारुतशोणितै:।
जायन्ते पिड़का यूनां वक्त्रे या मुखदूषिका:॥"
इति सुश्रुते। १। १४ अध्याय:॥

अस्याश्चिकित्सा मुखदूषिकाशब्दे द्रष्टव्या॥

यौवनलक्षणं, क्ली (यौवनस्य लक्षणं चिह्नम्।) लावण्यम्। स्तन:। इति मेदिनी। ने, ११७॥ तारुण्यचिह्नम्॥

यौवनाश्व:, पुं. (युवनाश्वस्यापत्यमिति। युवनाश्व + अण्।) मान्धातृराज:। इति त्रिकाण्डशेष:॥ अपि च।

"यौवनाश्वोऽथ मान्धाता चक्रवर्त्त्यवनीप्रभु:।
सप्तद्वीपवतीमेक: शशासाच्युततेजसा॥
ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणै:॥
सर्व्वदेवमयं देवं सर्व्वात्मकमतीन्द्रियम्॥
द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विज:।
धर्म्मो देशश्च कालश्च सर्व्वमेतद्यदात्मकम्॥
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
तत् सर्व्वं यौवनाश्वस्य मान्धातु: क्षेत्रमुच्यते॥

शशबिन्दोर्दुहितरि बिन्दुमत्यामधान्नृपः ।
पुरुकुत्समम्बरीषं मुचुकुन्दञ्च योगिनम् ॥
तेषां स्वसारः पञ्चाशत् सौभरिं वव्रिरे पतिम् ॥"
इति श्रीभागवते ९ स्कन्धे ६ अध्यायः ॥

यौवनाश्वकः, पुं, (यौवनाश्व+स्वार्थे कन् ।) मान्धातृराजः । इति जटाधरः ॥

यौष्माकं, त्रि, (युष्मद्+अण् । "तस्मिन्नणि च युष्माकास्माकौ ।" ४ । ३ । २ । इति प्रकृतेर्युष्माकादेशः ।) युष्मत्सम्बन्धि । युष्माकमिदं इत्यर्थे ष्णप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । ११२ । २०५ ।
"इत्याद्यस्मासु जल्पत्सु मिलितेष्वत्र तत्क्षणम् ।
विद्याधरो धूमशिखो यौष्माकोऽवातरद्दिवः ॥")

यौष्माकीनं, त्रि, (युष्मद्+"युष्मदस्मदोरन्यतरस्यां खञ्च ।"४।३।१। इति खञ् । "तस्मिन्नणि चेति ।" ४ । ३ । २ । इति युष्माकादेशः ।) युष्मत्सम्बन्धि, युष्माकमिदं इत्यर्थे ष्णीन् प्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ युष्मच्छब्दे अलिखितत्वादवसरसङ्गत्या गौणयुष्मदस्मच्छब्दप्रयोगोऽत्र लिख्यते । युष्मदस्मदोर्मुख्यत्वे गौणत्वे च सिजस्ङेङसां स्वरूपग्रहणात् तेषु परेषु त्वाहयूयवयतुभ्यमह्यतवममाः स्युरेव । सिजसादेरन्यत्र युष्मदस्मदोर्मुख्यत्वे एकवचने परे त्वमदौ द्विवचने परे युवावौ बहुवचने परे स्वरूपेणावस्थानम्, गौणत्वे तु परविभक्तिमनादृत्य युष्मदस्मदोरेकत्वे त्वमदौ द्वित्वे युवावौ बहुत्वे स्वरूपेणावस्थानमिति ॥*॥ यथा त्वामतिक्रान्तः अतित्वं अतित्वां अतियूयम् । अतित्वां अतित्वां अतित्वान् । अतित्वया अतित्वाभ्यां अतित्वाभिः । अतितुभ्यं अतित्वाभ्यां अतित्वभ्यम् । अतित्वत् अतित्वाभ्यां अतित्वत् । अतितव अतित्वयोः अतित्वयाम् । अतित्वयि अतित्वयोः अतित्वासु ॥ * ॥ युवामतिक्रान्तः अतित्वं अतियुवां अतियूयम् । अतियुवां अतियुवां अतियुवान् । अतियुवया अतियुवाभ्यां अतियुवाभिः । अतितुभ्यं अतियुवाभ्यां अतियुवभ्यम् । अतियुवत् अतियुवाभ्यां अतियुवत् । अतितव अतियुवयोः अतियुवयाम् । अतियुवयि अतियुवयोः अतियुवासु ॥ * ॥ युष्मानतिक्रान्तः अतित्वं अतियुष्मां अतियूयम् । अतियुष्मां अतियुष्मां अतियुष्मान् । अतियुष्मया अतियुष्माभ्यां अतियुष्माभिः । अतितुभ्यं अतियुष्माभ्यां अतियुष्मभ्यम् । अतियुष्मत् अतियुष्माभ्यां अतियुष्मत् । अतितव अतियुष्मयोः अतियुष्मयाम् । अतियुष्मयि अतियुष्मयोः अतियुष्मासु ॥ * ॥ मामतिक्रान्तः अत्यहं अतिमां अतिवयम् । अतिमां अतिमां अतिमान् । अतिमया अतिमाभ्यां अतिमाभिः । अतिमह्यं अतिमाभ्यां अतिमभ्यम् । अतिमत् अतिमाभ्यां अतिमत् । अतिमम अतिमयोः अतिमयाम् । अतिमयि अतिमयोः अतिमासु ॥ * ॥ आवामतिक्रान्तः अत्यहं अत्यावां अतिवयम् । अत्यावां अत्यावां अत्यावान् । अत्यावया अत्यावाभ्यां अत्यावाभिः । अतिमह्यं अत्यावाभ्यां अत्यावभ्यम् । अत्यावत् अत्यावाभ्यां अत्यावत् । अतिमम अत्यावयोः अत्यावयाम् । अत्यावयि अत्यावयोः अत्यावासु ॥ * ॥ अस्मानतिक्रान्तः अत्यहं अत्यस्मां अतिवयम् । अत्यस्मां अत्यस्मां अत्यस्मान् । अत्यस्मया अत्यस्माभ्यां अत्यस्माभिः । अतिमह्यं अत्यस्माभ्यां अत्यस्मत् । अत्यस्मत् अत्यस्माभ्यां अत्यस्मत् । अतिमम अत्यस्मयोः अत्यस्मयाम् । अत्यस्मयि अत्यस्मयोः अत्यस्मासु । इति दुर्गादासः ॥

र

र, रेफः । यथा । वर्णात् कारतकारौ राद्देफः । इति कलापसंक्षिप्तसारव्याकरणे । रेफात् कारश्च । रकारः । इति प्रक्रियाकौमुदी ॥ स तु सप्तविंशहलवर्णः । तस्योच्चारणस्थानं मूर्द्धा । इति मुग्धबोधव्याकरणम् ॥ * ॥ (तथा च शिक्षायाम् । १७ ।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः
स्मृताः ॥")

तस्य स्वरूपं यथा,—
"रेफञ्च चञ्चलापाङ्गि ! कुण्डलीद्वयसंयुतम् ।
रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा ।
पञ्चप्राणमयं वर्णं त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रे ६ पटलः ॥ * ॥

तस्य लेखनप्रकारो यथा,—
"दक्षतः कुण्डली रेखा वामाद्दक्षगताप्यधः ।
पुनर्दक्षगता द्वेधा ततोऽधोगत्य चोर्द्धतः ॥
भवानी शङ्करो वह्निस्तासु तिष्ठन्ति नित्यशः ।
अर्द्धमात्रा ब्रह्मरूपा महाशक्तिः प्रकीर्त्तिता ॥"
अपि च ।
"ऊर्द्धाधःक्रमतो रेखा त्रिकोणाधोगता हि सा ।
विधिरीशः केशवश्च तासु तिष्ठन्ति नित्यशः ॥
ऊर्द्धस्थिता तु या मात्रा सा शक्तिः परि-
कीर्त्तिता ।
तस्य मध्यगता रेखा वह्निरूपा हि सा स्मृता ।
निर्गुणोऽसौ सदा वर्णो न कदाचित् गुणीभवेत् ॥"

अस्य ध्यानं यथा,—
"ललज्जिह्वां महारौद्रीं रक्तास्यां रक्तलोच-
नाम् ।
रक्तवर्णामष्टभुजां रक्तपुष्पोपशोभिताम् ॥
रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम् ।
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिकाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"

तन्त्रणाममन्त्रो यथा,—
"त्रिशक्तिसहितं देवि ! आत्मादितत्त्वसंयुतम् ।
सर्व्वतेजोमयं वर्णं सततं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

तस्य नामानि यथा,—
"रो रक्तः क्रोधिनी रेफः पावकस्तैजसो मतः ।
प्रकाशादर्शनो दीप्तो रतक्षणापरं बली ॥
भुजङ्गेशो मतिः सूर्य्यो धातुरक्तः प्रकाशकः ।
व्यापको रेवतीदासं कुक्ष्यंशो वह्निमण्डलम् ॥
उग्ररेखा स्थूलदण्डो वेदकण्ठपला पुरा ।
प्रकृतिः सुगलो ब्रह्मशब्दश्च गायको धनम् ॥
श्रीकण्ठ उष्मा हृदयं सुखी त्रिपुरसुन्दरी ।
सबिन्दुर्योनिजो ज्वाला श्रीशैलो विश्वतो-
मुखी ॥"
इति नानातन्त्रशास्त्राणि ॥

(छन्दःशास्त्रोक्तगणविशेषः । यथा, छन्दोमञ्जर्य्याम् । १ । ८ । "र-लमध्यः ।" लघुवर्णमध्यो रः भवति । तस्येदं साङ्केतिकं चिह्नम् ऽ।ऽ मद्यादौ अस्याक्षरस्य प्रयोगे दाहो भवति । यदुक्तं वृत्तरत्नाकरटीकायाम् ।
"यो लक्ष्मीं रस्तु दाहं वसनमथ लवौ शः सुखं
यस्तु खेदम् ॥"

धात्वनुबन्धविशेषः । यथा, कविकल्पद्रुमे ।
"————चो जघादि र वैदिकः ।"
"वैदिको वेदेष्वेव प्रयुक्तो न तु भाषायामित्यर्थः । यथा, गार्त्ति स्तुतौ जगाति ।")

रः, पुं, (राति ऊर्द्धं गतत्वमिति । रा+डः ।) पावकः । तीक्ष्णः । इति मेदिनी । रे, १ ॥ कामवह्निः । इति शब्दरत्नावली ॥

रंहः, [स्] क्ली, (रमते येन इति । रम्+"रमेश्च ।" उणा॰ ४ । २१३ । इति असुन् । हुगागमश्च धातोः । "रहिरंहिभ्यामसुन् इति वंहो रंहः । इति धातुप्रदीपः ।" इत्युज्ज्वलदत्तः ।) वेगः । इत्यमरः । १ । १ । ६० ॥ (यथा, रघुवंशे । २ । ३४ ।
"अलं महीपाल ! तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥"
महादेवः । यथा, महाभारते । १३ । ८ । १५ ।
"हरिनेत्राय मुण्डाय कृशायोत्तरणाय च ।
भास्कराय सुतीर्थाय देवदेवाय रंहसे ॥"
विष्णुः । यथा, महाभारते हरिवंशपर्व्वणि २५२ । १८ ।
"नमस्कृत्य सुरेशाय तस्मै देवाय रंहसे ।
प्रयाताः प्राग्दिशं पुण्यां विपुलं काश्यपाश्र-
मम् ॥")

रक, क स्वादे । आपने । इति कविकल्पद्रुमः ॥ स्वादो रसोपादनम् । क, राकयति मोदकं बालकः । इति दुर्गादासः ॥

रक्तं, क्ली, (रज्यते अङ्गमनेनेति । रञ्ज्+क्तः ।) कुङ्कुमम् । ताम्रम् । (अस्य पर्य्यायो यथा,—
"रक्तं वरिष्ठं म्लेच्छास्यं ताम्रं शुल्बमुडुम्बरम् ॥"
इति वैद्यकरत्नमालायाम् ।)
प्राचीनामलकम् । इति मेदिनी । ते, ४८ ॥ पद्मकम् । (अस्य पर्य्यायो यथा,—

"रक्तं कोकनदं पद्ममल्पमन्यदलोहितम् ॥"

इति रत्नमाला ॥)

सिन्दूरम्। हिङ्गुलम्। इति राजनिर्घण्टः ॥

(अस्य पर्य्यायो यथा,—

"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥"

इति रत्नमाला ॥)

(रक्तचन्दनभेदः। तत्पर्य्यायो यथा,—

"पतङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम् ॥"

इति रत्नमाला ॥)

शरीरस्थसप्तधात्वन्तर्गतधातुविशेषः। तत् पर्य्यायः। रुधिरम् २ असृक् ३ लोहितम् ४ अस्रम् ५ क्षतजम् ६ शोणितम् ७। इत्यमरः। २। ६। ६४॥ पलङ्कारम् ८ रोहितम् ९ रञ्जकम् १०। इति शब्दरत्नावली ॥ कीलालम् ११ अङ्गजम् १२ रौधिरम् १३ स्वजम् १४। इति जटाधरः ॥ त्वग्जम् १५ शोणम् १६ लोहम् १७ चर्म्मजम् १८। इति राजनिर्घण्टः ॥ * ॥ अथ रक्तस्य स्वरूपमाह।

"यदा रसो यकृद्याति तत्र रञ्जकपित्ततः।
रागं पाकञ्च संप्राप्य स भवेद्रक्तसंज्ञकः ॥
रक्तं सर्व्वशरीरस्थं जीवस्याधार उत्तमः।
स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् ॥
जीवस्याधार उत्तम इति। यत आह।
जीवो वसति सर्व्वस्मिन् देहे तत्र विशेषतः।
वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणा-
दिति ॥

वीर्य्ये रक्ते मले च शरीरारम्भके। वाग्भटोक्तपरिमाणमिते शुद्धे जीवो वसति न तु दुष्टे प्रवृद्धे. रक्तस्रावणोपदेशस्य वैयर्थ्यप्रसङ्गात्। पित्तवद्भवेत्। अम्लं भवेदित्यर्थः ॥ ० ॥ अथ रक्तस्य स्थानमाह।

यकृत् प्लीहा च रक्तस्य मुख्यं स्थानं तयोः
स्थितम्।
अन्यत्रापि स्थितवतां रक्तानां पोषकं भवेत् ॥"

इति भावप्रकाशः ॥

रक्तदोषनाशकौषधं यथा,—

"ब्रह्मयष्टिफलं पिष्टं वारिणा तनु लेपतः।
तेन दृष्टं रक्तदोषः प्रणश्यति न संशयः ॥"

इति गारुडे १६२ अध्यायः ॥

("स स्वस्थाप्यो रसो यकृत्प्लीहानौ प्राप्य राग मुपैति ॥ भवतश्चात्र।
रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम्।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥
रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते।
तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम्।"
"रसाद्रक्तं ततो मांसम् ॥"

"तत्र फेनिलमरुणं कृष्णं परुषं तनु शीघ्रगमस्कन्दि च वातेन दुष्टम्। नीलं पीतं हरितं श्यावं विस्रमनिष्टं पिपीलिकामक्षिकाणामस्कन्दि च पित्तदुष्टम्। गैरिकोदकप्रतीकाशं स्निग्धं शीतलं बहलं पिच्छिलं चिरस्रावि मांसपेशीप्रभं श्लेष्मदुष्टञ्च। सर्व्वलक्षणसंयुक्तं काञ्जिकाभं विशेषतो दुर्गन्धि च सन्निपातदुष्टम्। पित्तवद्रक्तेनातिकृष्णञ्च। द्विदोषलिङ्गं संसृष्टम् ॥"

"इन्द्रगोपप्रतीकाशमसंहतमविवर्णञ्च प्रकृतिस्थं जानीयात् ॥"

"त्वग्दोषा ग्रन्थयः शोफाः रोगाः शोणितजाश्च ये।
रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥"
"देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते।
तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥

इति सुश्रुते सूत्रस्थाने चतुर्द्दशेऽध्याये ॥ * ॥

"शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः।
सम्यक्साध्या न सिद्ध्यन्ति रक्तजांस्तान् विभा-
वयेत् ॥"
अरुणाभं भवेद्वातात् फेनिलं विशदं तनु।
पित्तात्पीतासितं रक्तं स्त्यायत्यौष्ण्याच्चिरेण च।
चिरात् ॥
ईषत् पाण्डुकफाद्दुष्टं पिच्छिलं तन्तुमद्घनम्।
द्विदोषलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम्।"

"नात्युष्णशीतं लघुदीपनीयं
रक्तेऽपनीते हितमन्नपानम्।
तदा शरीरं ह्यनवस्थितासृ-
गग्निर्विशेषेण च रक्षितव्यः ॥
प्रसन्नवर्णेन्द्रियमिन्द्रियार्था
निच्छन्तमव्याहतपक्तिवेगम्।
सुखान्वितं पुष्टिबलोपपन्नं
विशुद्धरक्तं पुरुषं वदन्ति ॥"

इति चरके सूत्रस्थाने २४ अध्यायः ॥)

रक्तः, पुं, लोहितवर्णः। इत्यमरः। १। ५। १५ ॥ कुसुम्भः। हिज्जलः। इति राजनिर्घण्टः ॥ (बन्धूकः ॥ तत्पर्य्यायो यथा,—

"बन्धूको बन्धुजीवश्च रक्तो माध्याह्निकोऽपि
च ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तः, त्रि, अनुरक्तः। नील्यादिरञ्जितः। लोहितः। इति मेदिनी। ते, ४८ ॥ क्रीडारतः। इति धरणिः ॥ * ॥ रक्तवर्णवस्तुनि यथा,—

"शोणानि भौमतीक्ष्णांशुताम्रकुङ्कुमतक्षकाः।
गुञ्जेन्द्रगोपखद्योतविद्युत्कुञ्जरबिन्दवः ॥
दृगन्ताधरजिह्वाहृन्मांससिन्दूरधातवः।
हिङ्गुलं कुक्कुटशिखा तेजः सारसमस्तकम् ॥
माणिक्यं हंसचञ्चुश्च शुकमर्कटयोर्मुखम्।
चकोरकोकिलपारावतनेत्रनखाश्रयः ॥
कुसुम्भकिंशुकाशोकजवाबन्धूकपाटलाः।
कमलं दाड़िमीपुष्पं बिम्बकिम्पाकपल्लवौ ॥
ताम्बूलरागो मञ्जिष्ठालक्तकं रक्तचन्दनम्।
त्रेता नखक्षतक्रोधधर्म्मरौद्ररसादयः ॥" * ॥

रक्तनीलवाचकानि यथा,—

"लोहितनीलौ पुष्करहरिविद्रुमकमलकृष्ण-
रत्नानि।
सिन्दूरभूषणोत्पलधनञ्जयाम्भोजिनीदलानि ॥"

यथा। पुष्करं पद्माकाशयोः। हरिः सूर्य्यकृष्णयोः। विद्रुमः प्रवालविशिष्टवृक्षयोः। कमलं पद्मपाणीयामलयोः। कृष्णरत्नं कौस्तुभेन्द्रनीलयोः। सिन्दूरभूषणं सिन्दूरालङ्कारगजयोः। उत्पलमुत्कृष्टमांसेन्दीवरयोः। धनञ्जयोऽग्निपार्थयोः। अम्भोजिनीदलं पद्मपत्रपुटकिन्योः।

"कमलाधिपपद्मीशौ नागजित्कान्तस्वयम्भूः।
रत्नाकरवरश्रीकः सदाधिकमलद्युतिः ॥"

कमलाधिपपद्मीशौ सूर्य्यकृष्णौ। नागजित् गरुड़ो नागसङ्घौ च। कान्तः कमनीयः कं जलं तस्यान्तश्च। स्वयम्भूः सूर्य्योद्भवो यमश्च।

"सदा सिन्दूरमुन्मीता कलयन् कमलश्रियम्।
स्फुटशोभनताम्रश्रीर्व्वराहस्वामिदीधितिः ॥
एवं सुसम्पन्नखप्रभः विदूरमणिदीधितिः।
प्रवालप्रबलच्छायः कलभानुमितच्छविः ॥" *॥

रक्तश्वेतवाचकानि यथा,—

"रक्तश्वेतौ हरिशुचिपुष्करशतपत्रसूर्य्यकान्ताजाः।
नवहंसमहापद्मार्कसोदराः कमलकीलाले ॥"

हरिचन्द्रसूर्य्ययोः। शुचिः श्वेतवैश्वानरयोः। पुष्करं जलपद्मयोः। शतपत्रं हंसपद्मयोः। सूर्य्यकान्तः स्फटिके सूर्य्यवत्कान्ते च। अजः शशाम्बुजयोः। नवहंसः नवहंसे प्रत्यग्रसूर्य्ये च। महापद्मः श्वेतनागे पद्मे च। अर्कः स्फटिकसूर्य्ययोः। कमलं जलाम्बुजयोः। कीलालं जलरक्तयोः।

"सुहृद्रत्नादिभिर्भानो रत्ननाम्नि रदांशुकैः।
जलेभ्यो जन्मशोभाभिः सरोजकुमुदारिभिः ॥"
भानोः परस्मात् सुहृद्रत्नादिभिः ॥ * ॥

सितरक्तौ यथा। रविमित्रं चन्द्रः रवितुल्यश्च। भानुरत्नं सूर्य्यकान्तः रविपद्मरागौ च। अग्निरत्नं सूर्य्यकान्तोऽग्निपद्मरागौ च। रदांशुकं दन्तवस्त्रे अधरश्च। जलजशोभा जलजा चासौ शोभा चेति पक्षे पद्मकान्तिः। एवं सरोजारिशोभा सरोजसुहृच्छोभा पक्षे सरोजारिश्चन्द्रः। कुमुदारिशोभा कुमुदसुहृच्छोभा पक्षे कुमुदारिरादित्यः। इति कविकल्पलतायाम् २ शेषस्तवके उद्दिष्टवर्णनं नाम १ कुसुमम् ॥

रक्तकः, पुं, (रक्तं रक्तवर्णं कायति प्राप्नोतीति। कै + कः।) अम्लानवृक्षः। बन्धूकवृक्षः। रक्तवस्त्रम्। अनुरागी। इति मेदिनी। के, १४५॥ विनोदी। इति शब्दरत्नावली ॥ रक्तशिग्रुः। रक्तैरण्डः। इति राजनिर्घण्टः ॥ (अश्वविशेषः। यथा, अश्ववैद्यके। ३। १००।

"पीतको हरितः प्रोक्तः कषायो रक्तकः स्मृतः।
पक्वतालनिभो वाजी कयाहः परिकीर्त्तितः ॥"

रक्त एव स्वार्थे कन्। लोहितवर्णे, त्रि। यथा, बृहत्संहितायाम्। ८। ४६।

"अलसस्तु जनः प्रमादिसंज्ञे
डमरं रक्तकपुष्पबीजनाशः ॥")

रक्तकन्दः, पुं, (रक्तः रक्तवर्णः कन्दोऽस्य।) विद्रुमः। इति हेमचन्द्रः। ४। १३२ ॥ राजपलाण्डुः। रक्तालुः। इति राजनिर्घण्टः ॥

रक्तकन्दलः, पुं, (रक्तं रक्तवर्णं कन्दलं नवाङ्कुरो यस्य।) प्रवालम्। इति त्रिकाण्डशेषः॥ (गुणादयोऽस्य प्रवालशब्दे विज्ञेयाः॥)

रक्तकमलं, क्ली, (रक्तं रक्तवर्णं कमलम्।) रक्तवर्णोत्पलम्। तत्पर्य्यायः। कोकनदम् २ रक्ताम्भोजम् ३ अरुणकमलम् ४ शोणपद्मम् ५ रक्तोत्पलम् ६ अरविन्दम् ७ रविप्रियम् ८ रक्तवारिजम् ९। (रक्तकम्बलम् १०। इति पाद्मोत्तरखण्डे १३ अध्यायः॥) अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। मधुरत्वम्। शिशिरत्वम्। रक्तदोषहरत्वम्। पित्तकफवातशमनत्वम्। सन्तर्पणकारणत्वम्। वृष्यत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम्॥
धवलं कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम्॥"
इति भावप्रकाशः॥

रक्तकम्बलं, क्ली, (कम्बलं जलमाश्रयत्वेनास्त्यस्येति। अर्श आद्यच्। रक्तं रक्तवर्णं कम्बलमुत्पलमिति।) रक्तोत्पलम्। यथा,—

"चन्दनागुरुकर्पूरकुङ्कुमैश्च सुगन्धिभिः।
कमलैः कुमुदैः पुष्पैः कह्लारै रक्तकम्बलैः॥
फलैर्धूपैरपूपैश्च शोभनैर्गुडमिश्रितैः।
अर्च्चयेद्बलिराजानं मन्त्रेण द्विजसत्तमः॥"
इति पाद्मोत्तरखण्डे १३ अध्यायः॥

रक्तकरवीरकः, पुं, (करवीर+स्वार्थे कन्। ततो रक्तः रक्तवर्णः करवीरकः।) लोहितवर्णकरवीरपुष्पवृक्षः। लाल् कनेल् इति हिन्दी भाषा। तत्पर्य्यायः। रक्तप्रसवः २ गणेशकुसुमः ३ चण्डीकुसुमः ४ क्रूरः ५ भूतद्रावी ६ रविप्रियः ७। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। विशोधनत्वम्। त्वग्दोषव्रणकण्डूतिकुष्ठविषहरत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत्।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम्।
वीर्य्योष्णं क्रिमिकण्डूघ्नं भक्षितं विषवन्मतम्॥"
इति भावप्रकाशः॥

रक्तकाञ्चनः, पुं, (रक्तः रक्तवर्णः काञ्चनः।) स्वनामख्यातपुष्पवृक्षविशेषः। तत्पर्य्यायः। विदलः २ चमरिकः ३। इति शब्दरत्नावली॥ काञ्चनालः ४ ताम्रपुष्पः ५ कुद्दारः ६। इति जटाधरः॥

रक्तकाण्डा, स्त्री, (रक्तः रक्तवर्णः काण्डः दण्डोऽस्याः।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (विवरणमस्या रक्तपुनर्नवाशब्दे विज्ञेयम्॥)

रक्तकाष्ठं, क्ली, (रक्तं काष्ठं यस्य।) पत्तङ्गम्। इति राजनिर्घण्टः॥ लोहितवर्णदारु च॥

रक्तकुमुदं क्ली, (रक्तं रक्तवर्णं कुमुदम्।) रक्तकैरवम्। इति जटाधरः॥

रक्तकुसुमः, पुं, (रक्तानि रक्तवर्णानि कुसुमान्यस्य।) पारिभद्रः। धन्वनवृक्षः। इति राजनिर्घण्टः॥

रक्तकेशरः, पुं, (रक्ताः केशराः किञ्जल्काः अस्य।) पारिभद्रः। इति रत्नमाला॥

रक्तकैरवं, क्ली, (रक्तं रक्तवर्णं कैरवम्।) रक्तकुमुदम्। इति जटाधरः॥ (यथास्य पर्य्यायः।
"तदल्पगन्धं सोमाख्यं हल्लकं रक्तकैरवम्॥"
इति वैद्यकरत्नमाला॥)

रक्तकोकनदं, क्ली, (रक्तं रक्तवर्णं कोकनदम्।) रक्तोत्पलम्। इति जटाधरः॥ (विशेषोऽस्य रक्तोत्पलशब्दे ज्ञातव्यः॥)

रक्तखदिरः, पुं, (रक्तः रक्तवर्णः खदिरः।) रक्तवर्णखदिरवृक्षः। तत्पर्य्यायः। रक्तसारः २ सुसारः ३ ताम्रसारकः ४ बहुशल्यः ५ याज्ञिकः ६ कुष्ठनोदनः ७ यूपद्रुमः ८ अम्लखदिरः ९ अरुः १०। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कषायत्वम्। गुरुत्वम्। तिक्तत्वम्। आमवातास्रवातव्रणभूतज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाश्च।

"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत्।
तिक्तः कषायो मेदोघ्नः क्रिमिमेहज्वरव्रणान्।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत्॥"
इति भावप्रकाशः॥

रक्तगन्धकं, क्ली, (रक्तं रक्तवर्णं गन्धकम्।) बोलम्। इति राजनिर्घण्टः॥

रक्तगुल्मः, पुं, (रक्तजो गुल्मः इति मध्यपदलोपी कर्म्मधारयः।) स्त्रीणां रक्तजगुल्मरोगः। तस्यौषधं यथा,—

"द्विजयष्टीत्रिकटुकं चूर्णं पीतं हरेच्छिव!।
तिलक्वाथेन संयुक्तं रक्तगुल्मं स्त्रिया हर!॥"
इति गारुडे १९६ अध्यायः॥

(तथास्य निदानादिकं यथा,—
"शोणितगुल्मस्तु खलु स्त्रिया एव भवति न पुरुषस्य गर्भकोष्ठार्त्तवागमनवैशेष्यात्। पारतन्त्र्यादवैशारद्यात् सततमुपचारानुरोधाद्वेगानुदीर्णानुपरुन्धन्त्या आमगर्भे वाप्यचिरात् पतिते तथाप्यचिरप्रजाताया ऋतौ वा वातप्रकोपनान्यासेवमानाया वातः प्रकोपमापद्यते। स प्रकुपितो योन्या मुखमनुप्रविश्यार्त्तवमुपरुणद्धि मासि मासि तदार्त्तवमुपरुध्यमानं कुक्षिं वर्द्धयति। तस्याः शूलकासातीसारच्छर्द्यरोचकाविपाकाङ्गमर्द्दनिद्रालस्यकफप्रसेकाः समुपजायन्ते स्तनयोश्च स्तन्यमोष्ठयोः स्तनमण्डलयोश्च कार्ष्ण्यं ग्लानिः चक्षुषोर्मूर्च्छा हृल्लासो दोहदः श्वयथुः पादयोरीषच्चोद्गमो रोमराज्या योन्याश्चाजालत्वमपि च योन्या दौर्गन्ध्यमास्रावश्चोपजायते। केवलश्चास्या गुल्मः स्पन्दते तामगर्भां गर्भिणीमित्याहुर्मूढाः।" इति चरके निदानस्थाने तृतीयेऽध्याये॥ यथा च।

"न स्पन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम्।
तं गर्भकालातिगमे चिकित्स्य-
मसृग्भवं गुल्ममुशन्ति तज्ज्ञाः॥"
इति सुश्रुते उत्तरतन्त्रे ४२ अध्यायः॥

तथा च। रक्तगुल्मस्तु स्त्रिया एव प्रजायते। यथा,—

"ऋतौ वा नवसूता वा यदि वा योनिरोगिणी।
सेवते वातलानि स्त्री क्रुद्धस्तस्याः समीरणः॥
निरुणद्ध्यार्त्तवं योन्यां प्रतिमासमवस्थितम्।
कुक्षिं करोति तद्गर्भलिङ्गमाविष्करोति च॥
हृल्लासदौर्हृदस्तन्यदर्शनं क्षामतादिकम्।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत्॥
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान्।
रुक्स्तम्भदाहातीसारतृड्ज्वरादीनुपद्रवान्॥
गर्भाशये च सुतरां शूलं दुष्टासृगाश्रये।
योन्याश्च स्रावदौर्गन्ध्यतोदस्पन्दनवेदनाः॥
न चाङ्गैर्गर्भवद्गुल्मः स्फुरत्यपि तु शूलवान्।
पिण्डीभूतः स एवास्याः कदाचित् स्पन्दते
चिरात्॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते।
स्वदोषसंश्रयो गुल्मः सर्व्वो भवति तेन सः॥'
पाकं चिरेण भजते नैव वा———॥"
इति वाभटे निदानस्थाने एकादशेऽध्याये॥*॥

तथास्य चिकित्सा।

"सरक्तगुल्मे न च पाचनन्तु
न हिङ्गुपानं कटिचालनञ्च।
न चैव संस्वेदनमर्द्दनञ्च
न वा क्रमेणोत्प्लवनं हितञ्च॥
रोध्राञ्जनं खदिरमागधिका समङ्गा
क्वाथोऽम्लवेतससमं घृतसंप्रयुक्तम्।
गुल्मं सरक्तमपि चाथ निहन्ति शीघ्रं
हृत्क्लेदनञ्च विनिहन्ति च कुष्ठरक्तम्॥
क्षीरपानं प्रदातव्यं घृतसौवर्च्चलान्वितम्।
रक्तगुल्मविनाशाय यत्नाद्विचतजेऽपि वा॥
न हिङ्गुसंयुतं पथ्यं न चोष्णं न विदाहि च।
रक्तजे चतजे गुल्मे मांसानि जाङ्गलानि च॥"
इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये॥)

अन्यत् गुल्मशब्दे द्रष्टव्यम्॥*॥

रक्तघ्नः, पुं, (रक्तं हन्तीति। हन्+"अमनुष्यकर्तृके च।" ३।२।५३। इति टक्।) रोहितकवृक्षः। इति जटाधरः॥ (रहितकशब्देऽस्य विशेषो ज्ञेयः॥)

रक्तघ्नी, स्त्री, (रक्तं हन्तीति। हन्+टक्। ङीष्।) दूर्व्वाविशेषः। गाँठिया दूर्वा इति भाषा॥ यथा,
"महौषधिश्च गोलोम्यां रक्तघ्नी रक्तपित्तहा॥"
इति शब्दचन्द्रिका॥

रक्तचन्दनं, क्ली, (रक्तं रक्तवर्णं चन्दनम्।) रक्तवर्णचन्दनकाष्ठम्। (यथा, रामायणे। २।३४।६।
"पद्मरागोचितां सीतां रक्तचन्दनसेविनीम्।
वर्षमुष्णञ्च शीतञ्च नेष्यत्याशु विवर्णताम्॥")
तत्पर्य्यायः। तिलपर्णी २ पत्राङ्गम् ३ रञ्ज-

नम् ४ कुचन्दनम् ५ । इत्यमरः । १ । ६ । १३२ ॥ ताम्रसारम् ६ ताम्रवृक्षः ७ चन्दनम् ८ । इति रत्नमाला ॥ लोहितम् ९ शोणितचन्दनम् १० रक्तसारम् ११ ताम्रसारकम् १२ क्षुद्रचन्दनम् १३ अर्कचन्दनम् १४ । इति राजनिर्घण्टः ॥ रक्ताङ्गम् १५ प्रवालफलम् १६ । इति भावप्रकाशः ॥ पत्तङ्गम् १७ पत्तगम् १८ रक्तबीजम् १९ । इति शब्दरत्नावली ॥ अस्य गुणाः । अतिशीतलत्वम् । तिक्तत्वम् । ईषन्नयनामयदोषभूतपित्तकफकासज्वरभ्रान्तिजन्तुवमथुतृषानाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"रक्तं शीतं गुरु स्वादु च्छर्द्दितृष्णास्रपित्तहृत् ।
तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम् ॥"
इति भावप्रकाशः ॥

अन्यच्च ।
"रक्तपित्तहरं बल्यं चक्षुष्यं रक्तचन्दनम् ॥"
इति राजवल्लभः ॥

रक्तचित्रकः, पुं, (रक्तो रक्तवर्णश्चित्रकः ।) क्षुपविशेषः । राङ्चिता इति भाषा ॥ तत्पर्य्यायः । कालः २ व्यालः ३ कालमूलः ४ अतिदीप्यः ५ मार्ज्जारः ६ अग्निः ७ दाहकः ८ पावकः ९ चित्राङ्गः १० महाङ्गः ११ । अस्य गुणाः । प्रसवकारकत्वम् । रुच्यत्वम् । कुष्ठघ्नत्वम् । लोहवेधकत्वम् । रसनियामकत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

रक्तचूर्णं, क्ली, (रक्तं रक्तवर्णं चूर्णम् ।) सिन्दूरम् । इति हारावली । ४४ ॥ रक्तवर्णचूर्णमात्रञ्च ॥

रक्तजन्तुकः, पुं, (रक्तः रक्तवर्णो जन्तुः । ततः स्वार्थे कन् । अथवा रक्ता आसक्ता जन्तवोऽस्मिन् ।) भूनागः । इति राजनिर्घण्टः ॥ रक्तवर्णजन्तुमात्रञ्च ॥

रक्तजिह्वः, पुं, (रक्ता रक्तवर्णा शोणितपानादौ आसक्ता वा जिह्वा यस्य ।) सिंहः । इति शब्दमाला ॥ रक्तवर्णजिह्वायुक्ते, त्रि ॥

रक्तझिण्टी, स्त्री, (रक्ता रक्तवर्णा झिण्टी ।) रक्तवर्णझिण्टीपुष्पवृक्षः । तत्पर्य्यायः । कुरवकः २ । इत्यमरः ॥ (विशेषोऽस्याः कुरवकशब्दे ज्ञातव्यः ॥)

रक्ततुण्डः, पुं, (रक्तौ तुण्डौ यस्य ।) शुकपक्षी । इति राजनिर्घण्टः ॥ लोहितमुखयुक्ते, त्रि ॥

रक्ततुण्डकः, पुं, (रक्ततुण्डो यस्य । कन् । भूनागः ।) इति राजनिर्घण्टः ॥

रक्ततृणा, स्त्री, (रक्तानि तृणान्यस्याम् ।) गोमूत्रिका । इति राजनिर्घण्टः ॥

रक्तत्रिवृत्, स्त्री, (रक्ता त्रिवृत् ।) रक्तवर्णत्रिवृता । लाल तेउड़ी । इति भाषा ॥ तत्पर्य्यायः । कालिन्दी २ त्रिपुटा ३ ताम्रपुष्पिका ४ कुलवर्णा ५ मसूरी ६ अरुणा ७ काकनासिका ८ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रेचनत्वम् । वह्निशीमलविष्टम्भहारित्वम् । हितकारित्वञ्च । इति राजनिर्घण्टः ॥ (अस्या विशेषो यथा,—

"तयोर्म्मुख्यतरं विद्धि मूलं यदरुणप्रभम् ।
सुकुमारे शिशौ वृद्धे मृदुकोष्ठे च तत् शुभम् ॥"
इति चरके कल्पस्थाने सप्तमेऽध्याये ॥
"अरुणाभं त्रिवृन्मूलं श्रेष्ठं मूलविरेचने ॥"
इति सुश्रुते सूत्रस्थाने ४४ अध्यायः ॥)

रक्तदन्तिका, स्त्री, (रक्ता दन्ताः अस्याः ।) रक्तदन्ता + स्वार्थे कन् । टापि अत इत्वम् ।) चण्डिका । यथा,—

"भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ।
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्ये । ९१ । ४० ॥

रक्तदला, स्त्री, (रक्तानि दलान्यस्याः ।) नलिका । चिविल्लिका । इति राजनिर्घण्टः ॥

रक्तदृक्, [श्] पुं स्त्री, (रक्ता दृक् दृष्टिर्यस्य ।) कपोतः । इति केचित् ॥ रक्तवर्णचक्षुर्विशिष्टे, त्रि ॥

रक्तधातुः, पुं, (रक्तो रक्तवर्णो धातुः ।) गैरिकम् । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा,—

"गैरिकं रक्तधातुश्च गैरेयं गिरिजन्तथा ।
सुवर्णगैरिकन्त्वन्यत्ततो रक्ततरं हि तत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

ताम्रम् । इति राजनिर्घण्टः ॥ रक्तवर्णधातुमात्रञ्च ॥

रक्तनालः, पुं, (रक्तो नालोऽस्य ।) जीवशाकः इति राजनिर्घण्टः ॥ (विवरणमस्य जीवशाकशब्दे विज्ञेयम् ॥)

रक्तनासिकः, पुं, (रक्ता नासिकास्य ।) पेचकः । इति शब्दरत्नावली ॥ लोहितनासायुक्ते, त्रि ॥

रक्तपः, पुं, (रक्तं पिबतीति । पा + कः ।) राक्षसः । इति मेदिनी । पे, २१ ॥ रक्तपानकर्त्तरि, त्रि ॥

रक्तपक्षः, पुं, (रक्तौ पक्षौ अस्य ।) गरुडः । इति केचित् ॥

रक्तपत्रिका, स्त्री, (रक्तानि पत्राण्यस्याः । स्वार्थे कन् । टापि अत इत्वञ्च ।) नाकुली । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ लोहितपत्रञ्च ॥

रक्तपदी, स्त्री, क्षुद्रवृक्षविशेषः । यथा,—
"शमीपत्रा रक्तपदी समङ्गाञ्जलिकारिका ॥"
इति जटाधरः ॥

रक्तपद्मः, पुं क्ली, (रक्तो रक्तवर्णो पद्मः ।) रक्तवर्णकमलम् । तत्पर्य्यायः । रक्तसरोरुहम् २ रक्तोत्पलम् ३ कोकनदम् ४ । इत्यमरः । १ । १० । ४२ ॥ अस्य प्रमाणं यथा,—

"येषा ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥
रक्तपद्मासनस्था च जटामुकुटमण्डिता ॥
रक्तकौषेयवस्त्रा च स्मितवक्त्रा शुभानना ।
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा ॥"
इति तिथ्यादितत्त्वम् ॥

रक्तपल्लवः, पुं, (रक्ताः पल्लवा अस्य ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ लोहितपत्रञ्च ॥

रक्तपा, स्त्री, (रक्तं पिबतीति । पा + कः + स्त्रियां टाप् ।) जलौका । डाकिनी । इति मेदिनी । पे, २१ ॥ शोणितपानकर्त्तरि, त्रि ॥

रक्तपाकी, स्त्री, (पच्यते इति । पच् + घञ् । रक्तः रक्तवर्णः पाको यस्याः ।) बृहती । इति राजनिर्घण्टः ॥

रक्तपाता, स्त्री, (रक्तं पातयतीति । पत + णिच् + अच् । स्त्रियां टाप् ।) जलौका । इति शब्दरत्नावली ॥

रक्तपादः, पुं, (रक्तौ पादावस्य ।) शुकपक्षी । इति हेमचन्द्रः ॥ (यथा, रामायणे । ७।६।५७ ।

"रथोत्तमस्योपरिष्टात् परिभ्रमति कालवत् ।
कपोता रक्तपादाश्च सारिका विद्रुता ययुः ॥"
तथा च याज्ञवल्क्यः । १ । १७५ ।
"चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च ।
मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं चरेत् ॥")

लोहितचरणयुक्ते, त्रि ॥

रक्तपादी, स्त्री, (रक्ताः पादा अस्याः ।) लज्जालुः । (अस्याः पर्य्यायो यथा,—

"लज्जालुः स्यात् शमीपत्रा समङ्गा जलकारिका ।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हंसपदी । इति राजनिर्घण्टः ॥

रक्तपायिनी, स्त्री, (रक्तं पातुं शीलमस्याः । पा + णिनि । स्त्रियां ङीप् ।) जलौका । इति राजनिर्घण्टः ॥

रक्तपायी, [न्] त्रि, (रक्तं पातुं शीलमस्य । पा + णिनिः ।) रक्तपानशीलः । इति व्याकरणम् ॥

रक्तपारदं, क्ली, (रक्तं रक्तवर्णं पारदम् ।) हिङ्गुलम् । इति हारावली । १५५ ॥ जटाधरे, पुं ॥

रक्तपिण्डं, क्ली, (रक्तं रक्तवर्णं पिण्डमिव ।) जवापुष्पम् । इति शब्दरत्नावली ॥

रक्तपिण्डकः, पुं, (रक्तपिण्डमिवेति । रक्तपिण्ड + इवार्थे कन् ।) रक्तालुः । इति राजनिर्घण्टः ॥

रक्तपित्तं, क्ली, (रक्तदूषकं पित्तमिति । मध्यपदलोपी कर्म्मधारयः । "रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः । रक्तञ्च तत् पित्तञ्चेति रक्तपित्तं रागप्राप्तं पित्तमिति कर्म्मधारय इति चरकः ।") रोगविशेषः । तस्य निदानं यथा, धन्वन्तरिरुवाच ।

"अथातो रक्तपित्तस्य निदानं प्रवदाम्यहम् ।
भृशोष्णतिक्तकट्वम्ललवणादिविदाहिभिः ॥
कोद्रवोद्दालकैश्चान्यैस्तद्युक्तैरतिसेवितैः ।
कुपितं पित्तलैः पित्तं द्रवं रक्तञ्च मूर्च्छयेत् ॥

ते मिथस्तुल्यरूपत्वमागम्य व्याप्नुवंस्तनुम् ।
पित्तरक्तस्य विकृतेः संसर्गाद्दूषणादपि ॥
गन्धवर्णानुवृत्तेषु रक्ते न व्यपदिश्यते ।
प्रभवत्यसृजस्तस्मात् प्लीहतो यकृतश्च तत् ॥
शिरोगुरुत्वमरुचिः शीतेच्छा मधुकोत्कफः ।
छर्द्दिच्छर्द्दिवैभत्स्यं कासः श्वासो भ्रमः क्लमः ॥
लोहितोऽलोहितो मत्स्यामगन्ध्यास्यश्च विज्वरः ।
रक्तहारिद्रहरितवर्णता नयनादिषु ॥
नीललोहितपीतानां वर्णानामविवेचनम् ।
स्वप्ने तद्वर्णधर्म्मित्वं भवत्यस्मिन् भविष्यति ॥
ऊर्द्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः ।
कुपितं रोमकूपैश्च समस्तैस्तत् प्रवर्त्तते ॥
ऊर्द्ध्वं साध्यं कफाद्यस्मात् तद्विरेचनसाधितम् ।
बह्वौषधञ्च पित्तस्य विरेको हि वरौषधम् ॥
अनुबन्धी कफो यश्च तत्र तस्यापि शुद्धिकृत् ।
कषायाः स्वादवो यस्य निशुद्धे श्लेष्मलोहिताः ॥
कटुतिक्तकषाया वा ये निसर्गात् कफावहाः ।
अधो याप्यञ्च नासुश्यात् तत् प्रवर्द्धनसाधनम् ॥
अल्पौषधञ्च पित्तस्य वमनं ननु चौषधम् ।
अनुबन्धि च लोपस्य शान्तपित्तनरस्य तत् ॥
कषायाश्च हितास्तस्य मधुरा एव केवलम् ।
कफमारुतसंसृष्टमसाध्यमुपनायनम् ॥
असह्यप्रतिलोमत्वादसाध्यादौषधस्य च ।
नहि संशोधनं किञ्चिदस्य च प्रतिलोमनम् ॥
शोधनं प्रतिलोमञ्च रक्तपित्ते विनिर्म्मितम् ।
एवमेवोपशमनं सर्व्वशोधनमिष्यते ॥
संसृष्टेष्वाह दोषेषु सर्व्वथा छर्द्दनं हितम् ।
तत्र दोषोऽत्र गमनं शिवास्त्र इव लक्ष्यते ।
उपद्रवास्त्र विकृतं फलतस्तेषु चाधिकम् ॥”
इति गारुडे १५३ अध्यायः ॥ * ॥
तस्यौषधं यथा,—
“त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु ।
मोदकः सन्निपातान्तो रक्तपित्तज्वरापहः ॥
वाशायां विद्यमानायामाशायां जीवितस्य च ।
रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥
अटरूषकम्दहीकापथ्याक्वाथः सशर्करः ।
क्षौद्राढ्यः कासनश्वासरक्तपित्तनिवर्हणः ॥”
इति गारुडे १७४ अध्यायः ॥*॥
अपि च । “तत्र रक्तपित्तस्य निदानपूर्व्विकां संप्राप्तिमाह ।
‘घर्म्मव्यायामशोकाध्वव्यवायैरतिसेवितैः ।
तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च ।
पित्तं विदग्धं स्वगुणैर्व्विदहत्याशु शोणितम् ॥’
तीक्ष्णं मरिचादि । उष्णोऽग्नितापादिः । क्षारो यवक्षारादिः । विदग्धं दूषितम् । स्वगुणैः स्वकारणैर्गुणैस्तीक्ष्णादिभिः । गुणैरिति बहुत्वेन तीक्ष्णाम्ललवणकटूष्णघर्म्मादयो गृह्यन्ते । विदहति दूषयति ॥ * ॥ रक्तपित्तस्य सामान्यलक्षणमाह ।
‘ततः प्रवर्त्तते रक्तमूर्द्ध्वं वाधो द्विधापि वा ।’
रक्तमित्युपलक्षणम् । तत्संसर्गि पित्तञ्च । अत एव रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः ॥ रक्तञ्च तत् पित्तञ्चेति रक्तपित्तं रागप्राप्तं पित्तमिति कर्म्मधारय इति चरकः ॥ मार्गानाह ।
‘ऊर्द्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः ।
कुपितं रोमकूपैश्च समस्तैस्तत् प्रवर्त्तते ॥’
कुपितमतिकुपितम् ॥*॥ पूर्व्वरूपमाह ।
‘सदनं शीतकामित्वं कण्ठधूमायनं वमिः ।
लोहगन्धिश्च निश्वासो भवत्यस्मिन् भविष्यति ॥’
विशिष्टं रूपमाह ।
‘सान्द्रं सपाण्डु सस्नेहं पिच्छिलञ्च कफान्वितम् ।
श्यावारुणं सफेनञ्च तनुरूक्षञ्च वातिकम् ॥
रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम् ।
मेचकागारधूमाभमञ्जनाभञ्च पैत्तिकम् ।
संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥’
सपाण्डु ईषत्पाण्डु । पिच्छिलं मयूरपिच्छच्छविवत् । कृष्णं कज्जलाभम् । मेचकं स्निग्धकृष्णवर्णम् । अञ्जनं स्रोतोऽञ्जनं तदाभम् ॥*॥ संसर्गविशेषेण मार्गभेदमाह ।
‘ऊर्द्ध्वगं कफसंसृष्टमधोगं मारुतानुगम् ।
द्विमार्गं कफवाताभ्यां उभाभ्यां तत्प्रवर्त्तते ॥’*॥
उपद्रवानाह ।
‘दौर्ब्बल्यश्वासकासज्वरवमथुमदाः पाण्डुता दाहमूर्च्छा
भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीड़ा ।
तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनञ्च
द्वेषो भुक्तेऽविपाको विकृतिरपि भवेद्रक्तपित्तोपसर्गाः ॥’
उपसर्गा उपद्रवाः । विकृतिर्मांसप्रक्षालनाभत्वादिः ॥ * ॥ साध्यत्वादिकमाह ।
‘एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ।
यत्त्रिदोषमसाध्यं स्यान्मन्दाग्नेरतिवेगवत् ॥
ऊर्द्ध्वं साध्यमधो याप्यमसाध्यं युगपद्गतम् ।
व्याधिभिः क्षीणदेहस्य वृद्धस्यानश्नतश्च यत् ॥’
साध्यमाह ।
‘एकमार्गं बलवतो नातिवेगं न चोत्थितम् ।
रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम् ॥’
सुखे काले हिमशिशिरयोः ॥*॥ असाध्यमाह ।
‘मांसप्रक्षालनाभं क्वथितमिव च यत् कर्द्दमाम्भोनिभं वा
मेदः पूयास्रकल्पं यकृदिव यदि वा पक्वजं वा कफाभम् ।
यत् कृष्णं यच्च नीलं भृशमपि कुणपं यत्र चोक्ता विकारास्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥’
उक्ता विकारा दौर्ब्बल्यादयः । सुरपतिधनुषा तुल्यं नानावर्णम् ।
‘येन चोपहतो रक्तं रक्तपित्तेन मानवः ।
पश्येद्दृश्यं वियच्चापि तच्चासाध्यमसंशयम् ॥’
येन रक्तपित्तेन उपहतो मनुष्यः दृश्यं घटपटादिकं वियच्च रक्तं पश्यति स नश्यति वियच्चापि अदृश्यमपीत्यर्थः ॥ * ॥ अरिष्टमाह ।
‘लोहितं छर्द्दयेद्यस्तु बहुशो लोहितेक्षणः ।
लोहितोद्गारदर्शी च म्रियते रक्तपित्तकः ॥’
लोहितोद्गारदर्शी व्याधिमहिम्नोद्गारमपि लोहितं पश्यति इत्यर्थः ॥*॥ अथ रक्तपित्तस्य चिकित्सा ।
‘पित्तास्रं स्तम्भयेन्नादौ प्रवृत्तं बलिनोऽश्नतः ।
हृत्पाण्डुग्रहणीरोगप्लीहगुल्मज्वरादिकृत् ॥
शालिषष्टिकनीवारकोरदूषप्रसाधिकाः ।
श्यामाकाश्च प्रियङ्गुश्च भोजनं रक्तपित्तिनाम् ॥’
प्रियङ्गुः कङ्गुः ।
‘मसूरमुद्गचणकाः समकुष्ठाढ़कीफलाः ।
प्रशस्ताः सूपयूषार्थे कल्पिता रक्तपित्तिनाम् ।
दाड़िमामलकं विद्वानम्लार्थे चापि दापयेत् ।
पटोलनिम्बवेत्राग्रप्लक्षवेतसपल्लवाः ॥
शाकार्थे शाकसात्म्यानां तण्डुलीयादयो हिताः ।
पारावतान् कपोतांश्च लावान् रक्ताक्षवर्त्तकान् ॥
शशान् कपिञ्जलानेणान् हरिणान् कालपुच्छकान् ।
रक्तपित्तहरान् विद्याद्रसांस्तेषां प्रयोजयेत् ॥
ईषदम्लाननम्लांश्च घृतभृष्टान् ससैन्धवान् ।
कफानुगे यूषशाके दद्याद्वातानुगे रसम् ॥
पथ्यं सतिलयूषेण ससितालाजशक्तुभिः ।
धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः ।
रक्तपित्तं ज्वरं दाहं तृष्णां शोषञ्च नाशयेत् ॥
धान्याकादेर्हिमः ॥ * ॥
‘ह्रीवेरमुत्पलं धान्यं चन्दनं यष्टिकामृता ।
उशीरञ्च वृषश्चैषां क्वाथं समधुशर्करम् ॥
पाययेत्तेन सद्यो हि रक्तपित्तं प्रशाम्यति ।
रक्तपित्तं जयत्युग्रं तृष्णां दाहं ज्वरं तथा ॥*॥
पुराणं पीनमानीय कुष्माण्डस्य फलं दृढ़म् ।
तद्वीजाधारबीजत्वक्शिराशून्यं समाचरेत् ॥
ततस्तस्य तुलां नीत्वा पचेज्जलतुलाद्वये ।
तस्मिन्नीरेऽर्द्धशिष्टे तु यत्नतः शीतलीकृते ॥
तानि कुष्माण्डखण्डानि पीड़येद्दृढ़वाससा ।
यत्नतस्तज्जलं नीत्वा पुनःपाकाय धारयेत् ॥
कुष्माण्डं शोषयेद्घर्म्मे ताम्रपात्रे ततः क्षिपेत् ।
क्षिप्त्वा तत्र घृतप्रस्थं कुष्माण्डं तेन भर्ज्जयेत् ॥
मधुवर्णं सदालोक्य तज्जलं तत्र निःक्षिपेत् ।
सितायाश्च तुलां तत्र क्षिप्त्वा तल्लेहवत् पचेत् ॥
सुपक्वे पिप्पलीशुण्ठीजीरकाणां द्वे पले पृथक् ।
पृथक् पलार्द्धं धन्याकपत्रैलामरिचं त्वचम् ॥
चूर्णमेषां क्षिपेत्तत्र घृतार्द्धं क्षौद्रमावपेत् ।
एतत् पलमितं खादेदथवाग्निबलं यथा ॥
खण्डकुष्माण्डलेहोऽयं रक्तपित्तं विनाशयेत् ।
पित्तज्वरं तृषां दाहं प्रदरं कृशतां वमिम् ॥
स्वरभेदं सहृद्रोगं कासं श्वासं क्षतं क्षयम् ।
नाशयत्येव वृष्योऽयं बृंहणो बलवर्द्धनः ॥’
इति खण्डकुष्माण्डावलेहः ॥ * ॥
‘शतावरीमूलकल्कं कल्कात् क्षीरं चतुर्गुणम् ।
क्षीरतुल्यं घृतं गव्यं सितया कल्कतुल्यया ॥

घृतशेषं पचेत्तत्तु पलार्द्धं लेहयेत् सदा ।
रक्तपित्तं चाम्लपित्तं क्षयं श्वासञ्च नाशयेत् ॥'
शतावरीपाकः । इति रक्तपित्ताधिकारः ॥"
इति भावप्रकाशः ॥

(तथास्य सनिदानपूर्ब्बरूपलक्षणं सम्प्राप्तिश्च । "पित्तं यथा भूतं लोहितपित्तसंज्ञां लभते तत्तथानुव्याख्यास्यामः । यदा जन्तुर्य्यवकोद्दालककोरदूषकप्रायाण्यन्नानि नित्यं भुङ्क्ते भृशोष्णतीक्ष्णमपि चान्यदन्नजातं निष्पावमाषकुलत्थक्षारसूपोपहितं दधिमण्डोदश्वित् कट्वम्लकाञ्जिकोपहितं वाराहमाहिषाविकमात्स्यगव्यपिशितं पिण्याकं पिण्डालकशाकोपहितं मूलक-सर्षपलशुनकरञ्जशिग्रुकखरदूषभूस्तृणक-सुमुखसुरसकुठेरकगण्डीरकालक-पर्णासक्षवक-फणिज्झकोपदंशं सुरासौवीरतुषोदकमैरेय-मेदकमधूलकशुक्तबदराम्लप्रायानुपानं पिष्टान्नोत्तरभूयिष्ठमुष्णाभितप्तो वातिमात्रमतिवेलं वा पयसा समश्नाति रौहिणीकलकपोतं वा सर्षपतैलक्षारसिद्धं कुलत्थमाषपिण्याकजाम्बवलकुचपक्वैः शौक्तिकैर्वा सह क्षीरमाममतिमात्रमथवा पिबत्युष्णाभितप्तस्तस्यैवमाचरतः पित्तं प्रकोपमापद्यते । लोहितञ्च स्वप्रमाणमतिवर्त्तते । तस्मिन् प्रमाणातिप्रवृत्ते पित्तं प्रकुपितं शरीरमनुसर्पद्यदेव यकृत्प्लीहप्रभवाणां लोहितवहानां स्रोतसां लोहिताभिष्यन्दगुरूणि मुखान्यासाद्य प्रतिपद्यते तदेव लोहितं दूषयति । संसर्गाल्लोहितप्रदूषणाल्लोहितगन्धवर्णानुविधानाच्च पित्तं लोहितमित्याचक्षते । तस्येमानि पूर्ब्बरूपाणि । तद्यथा । अनन्नाभिलाषो भुक्तस्य विदाहः शुक्ताम्लरसगन्ध उद्गारश्छर्द्देरभीक्ष्णागमनं छर्द्दितस्य बीभत्सता स्वरभेदो गात्राणां सदनं परिदाहश्च मुखाद्धूमागम इव लोहलोहितमत्स्यामगन्धित्वमपि चास्यस्य रक्तहरितहारिद्रत्वमङ्गावयवशकृन्मूत्र-स्वेदलालाशिङ्घाणकास्यकर्णमलपिड़कोलिकापिड़कानामङ्गवेदनालोहितनीलपीतश्यावानामर्च्चिष्मताञ्च रूपाणां स्वप्नदर्शनमभीक्ष्णमिति लोहितपित्तपूर्ब्बरूपाणि । उपद्रवास्तु खलु दौर्ब्बल्यारोचकाविपाकश्वासकासज्वरातीसारशोफशोषपाण्डुरोगस्वरभेदाः । मार्गौ पुनरस्य द्वौ ऊर्द्ध्वञ्चाधश्च तद्बहुश्लेष्मणि शरीरे श्लेष्मसंसर्गादूर्द्ध्वं प्रपद्यमानं कर्णनासिकानेत्रास्येभ्यः प्रच्यवते । बहुवाते तु शरीरे वातसंसर्गादधः प्रपद्यमानं मूत्रपुरीषमार्गाभ्यां प्रच्यवते । बहुवातश्लेष्मणि तु शरीरे श्लेष्मवातसंसर्गाद्द्वावपि मार्गौ प्रपद्यते । तौ मार्गौ प्रपद्यमानं सर्व्वेभ्य एव यथोक्तेभ्यः खेभ्यः प्रच्यवते शरीरस्य । तत्र यदूर्द्ध्वभागं तत्साध्यं विरेचनोपक्रमणीयत्वात् बह्वौषधत्वाच्च । यदधोभागं तद्याप्यं वमनोपक्रमणीयत्वात् अल्पौषधत्वाच्च । यदुभयभागं तदसाध्यं वमनविरेचनायोगित्वादनौषधत्वाच्च । रक्तपित्तप्रकोपस्तु खलु पुरा दक्षयज्ञोद्ध्वंसे रुद्रकोपामर्षाग्निना प्राणिनां परिगतशरीरप्राणानामनुज्वरमभवत् । तस्याशुकारिणो दावाग्नेरिवापतितस्यात्ययिकस्याशु प्रशान्तौ यतितव्यं मात्रां देशं कालञ्चाभिसमीक्ष्य सन्तर्पणेनापतर्पणेन वा मृदुमधुरशिशिरतिक्तकषायैरभ्यवहार्य्यैः प्रदेहपरिषेकावगाहसंस्पर्शनैर्वमनाद्यैर्वा तत्रावहितेनेति ।"

संक्षेपतोऽस्योपशमनोपायो यथा,--

"साध्यं लोहितपित्तं तद्यदूर्द्ध्वं प्रतिपद्यते ।
विरेचनस्य योगित्वाद्बहुत्वाद्भेषजस्य च ॥
वमनं नहि पित्तस्य हरणे श्रेष्ठमुच्यते ।
यश्च तत्रानुगो वायुस्तच्छान्त्यै चावरं मतम् ॥
स्याच्च योगावहन्तत्र कषायं तिक्तकानि च ।
तस्माद्याप्यं समाख्यातं यद्रक्तमनुलोमगम् ॥
रक्तपित्तन्तु यन्मार्गौ द्वावपि प्रतिपद्यते ।
असाध्यमपि तज्ज्ञेयं पूर्ब्बोक्तादपि कारणात् ॥
नहि संशोधनं किञ्चिदस्त्यस्य प्रतिमार्गगम् ।
प्रतिमार्गञ्च हरणं रक्तपित्ते विधीयते ॥
एवमेवोपशमनं सर्व्वशो नास्य विद्यते ।
संसृष्टेषु च दोषेषु सर्व्वजिच्छमनं मतम् ॥
इत्युक्तं त्रिविधोदर्कं रक्तं मार्गविशेषतः ॥
एभ्यस्तु खलु हेतुभ्यः किञ्चित् साध्यं न सिध्यति ।
प्रेष्योपकरणाभावात् दौरात्म्याद्वैद्यदोषतः ॥
अकर्म्मतश्च साध्यत्वं कश्चिद्रोगोऽतिवर्त्तते ।
तत्र साध्यत्वमेकं स्यात् साध्ययाप्यपरि-
क्रमात् ॥
रक्तपित्तस्य विज्ञानमिदं तस्योपदेक्ष्यते ।
यत् कृष्णमथवा नीलं यद्वा शक्रधनुष्प्रभम् ॥
रक्तपित्तमसाध्यन्तद्वाससो रञ्जनञ्च यत् ।
भृशं पूत्यतिमात्रञ्च सर्व्वोपद्रववच्च यत् ॥
बलमांसक्षये यच्च तच्च रक्तमसिद्धिमत् ॥
येन चोपहतो रक्तं रक्तपित्तेन मानवः ।
पश्येद्दृश्यं वियच्चैव तच्चासाध्यमसंशयम् ॥
तत्रासाध्यं परित्यज्यं याप्यं यत्नेन यापयेत् ।
साध्यञ्चावहितः सिद्धैर्भेषजैः साधयेद्भिषक् ॥
कारणं नाम निर्वृत्तिं पूर्ब्बरूपाण्युपद्रवान् ।
मार्गौ दोषानुबन्धञ्च साध्यत्वं न च हेतुमत् ॥
निदाने रक्तपित्तस्य व्याजहार पुनर्व्वसुः ।
शीतमोहरजोदोषलोभमानमदस्पृहः ॥"

इति चरके निदानस्थाने द्वितीयेऽध्याये ॥ * ॥

अथास्य चिकित्सायां रसाः ।

"सूतं गन्धं माक्षिकञ्चैव लौहं
सर्व्वं घृष्टं त्रैफलेनोदकेन ।
लौहे पात्रे गोमयैः पाचयित्वा
रात्रौ दद्यात् रक्तपित्तप्रशान्त्यै ॥
इति सुधानिधीरसः ॥

मृताभ्रसूततीक्ष्णञ्च माक्षिकं रसतालकम् ।
गन्धकञ्च भवेत्तुल्यं यष्टिद्राक्षामृताद्रवैः ॥
दिनैकं मर्द्दयेत् खल्ले सिताक्षौद्रयुतावटी ।
माषमात्रा निहन्त्याशु रक्तपित्तं सुदारुणम् ।
ज्वरं दाहं तृषां वान्तिं शोषं पित्तान्तको रसः ॥
इति रक्तपित्तान्तको रसः ॥

शर्करातिलसंयुक्तं त्रिकत्रययुतन्त्वयः ।
रक्तपित्तं निहन्त्याशु अम्लपित्तहरं परम् ॥
इति शर्करादं लौहम् ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे रक्तपित्ताधिकारे ॥

अथास्य पथ्यापथ्यविधिः ।

"अधोगते छर्द्दनमूर्द्ध्वनिर्गमे
विरेचनं स्यादुभयत्र लङ्घनम् ।
पुरातनाः षष्टिकशालिकोद्रव-
प्रियङ्गुनीवारयवप्रसातिकाः ॥
मुद्गा मसूराश्चणकास्तु वर्व्वो-
मुकुष्टकाश्चिङ्गटवर्म्मिमत्स्याः ।
शशः कपोतो हरिणैणलाव-
शरालिपारावतवर्त्तकाश्च ॥
वक्रा उरभ्राश्च सकालपुच्छाः
कपिञ्जलाश्चापि कषायवर्गः ।
गवामजायाश्च पयो घृतञ्च
घृतं महिष्याः पनसं पियालम् ॥
रम्भाफलं कर्कटतण्डुलीय-
पटोलवेत्राग्रमहार्द्रकाणि ।
पुराणकुष्माण्डफलञ्च पक्व-
फलानि तद्बीजजलानि वासा ॥
स्वादूनि बिम्बानि च दाड़िमानि
खर्ज्जूरधात्रीमिषिनारिकेलम् ।
कशेरुशृङ्गाटमरुष्कराणि
कपित्थशालूकपरूषकाणि ॥
भूनिम्बशाकं पिचुमर्द्दपत्रं
तुम्बीकलिङ्गानि च लाजसक्तुः ।
द्राक्षा सिता माक्षिकमैक्षवञ्च
शीतोदकञ्चौद्भिदवारि चापि ॥
सेकोऽवगाहः शतधौतसर्पि-
रभ्यङ्गयोगः शिशिरप्रदेहः ।
हिमानिलश्चन्दनमिन्दुपादाः
कथा विचित्राश्च मनोऽनुकूलाः ॥
धारागृहं भूमिगृहं सुशीतं
वैदूर्य्यमुक्तामणिधारणञ्च ।
रम्भोत्पलाम्भोरुहपत्रशय्या
क्षौमाम्बरञ्चोपवनं सुशीतम् ॥
प्रियङ्गुकाचन्दनरूषितानां
मालिङ्गनञ्चापि वराङ्गनानाम् ।
पद्माकराणां सरितां ह्रदानां
चन्द्रोदयानां हिमवद्दरीणाम् ॥
सुशीतलानां गिरिनिर्झराणां
स्तुतिः प्रशस्तानि च कीर्त्तितानि ।
प्रवीरनीरं हिमवालुका च
मित्रं नृणां शोणितपित्तरोगे ॥"

अथापथ्यानि ।

"व्यायामाध्वनिषेवणं रविकरस्तीक्ष्णानि
कर्म्माणि च ।
क्षोभो वेगविधारणञ्चपलता हस्त्यश्वयानानि च ॥
स्वेदासृक्स्रुतिधूमपानसुरतक्रोधाः कुलत्थो गुड़ो
वार्त्ताकं तिलमाषसर्षपदधिक्षाराणि कौपं पयः ॥"
इति वैद्यकपथ्यापथ्यविधौ रक्तपित्ताधिकारः ।)

रक्तपित्तहा, स्त्री, (रक्तपित्तं हन्तीति । हन्+ डः । स्त्रियां टाप् ।) रक्तघ्नी । इति शब्दचन्द्रिका ॥ गाँठिया दूर्व्वा इति भाषा ॥ (विवृतिरस्याः रक्तघ्नीशब्दे ज्ञातव्या ॥)

रक्तपुनर्नवा, स्त्री, (रक्ता रक्तवर्णा पुनर्नवा ।) रक्तवर्णपुनर्नवाशाकः । तत्पर्य्यायः । क्रूरा २ मण्डलपत्रिका ३ रक्तकाण्डा ४ वर्षकेतुः ५ लोहिता ६ रक्तपत्रिका ७ वैशाखी ८ रक्तवर्षाभूः ९ शोफघ्नी १० पुष्पिका ११ विकस्वरा १२ विषघ्नी १३ प्रावृषेण्या १४ सारिणी १५ वर्षाभवः १६ शोणपत्रः १७ भौमः १८ पुनर्भवः १९ नवः २० नव्यः २१ । अस्य गुणाः । तिक्तत्वम् । सारकत्वम् । शोफरक्तप्रदरदोषपाण्डुपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

रक्तपुष्पः, पुं, (रक्तं पुष्पमस्य ।) करवीरः । इति जटाधरः ॥ (अस्य पर्य्यायो यथा,—

“करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः ।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) रोहितवृक्षः । इति शब्दमाला ॥ रक्तकाञ्चनवृक्षः । दाड़िमवृक्षः । वकवृक्षः । इति रत्नमाला ॥ बन्धूकवृक्षः । पुन्नागवृक्षः । इति राजनिर्घण्टः ॥ (रक्तवर्णपुष्पविशिष्टे, त्रि ।) यथा, वृहत्संहितायाम् । १५ । १४ ।

“इन्द्राग्निदैवते रक्तपुष्पफलशाखिनः सतिलमुद्गाः ।
कार्पासमाषचणकाः पुरन्दरहुताशभक्ताश्च ॥”)

रक्तपुष्पकः, पुं, (रक्तं पुष्पमस्य । कन् ।) पलाशवृक्षः । (अस्य पर्य्यायो यथा,—

“पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) रोहितकवृक्षः । इति जटाधरः ॥ पर्प्पटः । शाल्मलिवृक्षः । इति राजनिर्घण्टः ॥

रक्तपुष्पा, स्त्री, (रक्तं पुष्पं यस्याः ।) शाल्मलिवृक्षः । इति जटाधरः ॥ (अस्याः पर्य्यायो यथा,—

“शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पुनर्नवा । तत्पर्य्यायो यथा,—

“पुनर्नवा पराऽरक्ता रक्तपुष्पा शिवाटिका ॥”

सिन्दूरी । तत्पर्य्यायो यथा,—

“सिन्दूरी रक्तबीजा च रक्तपुष्पा सुकोमला ॥”

इति भावप्रकाशः ॥)

रक्तपुष्पिका, स्त्री, (रक्तपुष्पा+कन् । टापि अत इत्वम् ।) लज्जालुः । इति शब्दचन्द्रिका ॥ रक्तपुनर्नवा । भूपाटलिः । इति राजनिर्घण्टः ॥

रक्तपुष्पी, स्त्री, (रक्तं पुष्पं यस्याः । ङीष् ।) पाटलीवृक्षः । इति जटाधरः ॥ जवा । आवर्त्तकीलता । नागदमनी । करुणीवृक्षः । उद्रकाञ्ची । इति राजनिर्घण्टः ॥ (धातकी । तत्पर्य्यायो यथा,—

“धातकी रक्तपुष्पी स्यात् कुञ्जरा मद्यवासिनी ॥”

इति वैद्यकरत्नमालायाम् ॥)

रक्तपूरकं, क्ली, (रक्तं पूरयतीति । पूर्+ण्वुल् ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥ (विवरणमस्य वृक्षाम्लशब्दे ज्ञातव्यम् ॥)

रक्तप्रसवः, पुं, (रक्तः रक्तवर्णः प्रसवः पुष्पमस्य ।) रक्तकरवीरः । रक्ताम्लानः । इति राजनिर्घण्टः ॥

रक्तफलः, पुं, (रक्तं लोहितवर्णं फलमस्य ।) वटवृक्षः । इति जटाधरः ॥ (अस्य पर्य्यायो यथा,—

“वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तफला, स्त्री, (रक्तं पक्वदशायां लोहितवर्णं फलमस्याः ।) विम्बिका । इत्यमरः । २ । ४ । १३९ ॥ (अस्याः पर्य्यायो यथा,—

“तुण्डी रक्तफला विम्बी तुण्डिकेरी च विम्बिका ॥”

इति वैद्यकरत्नमालायाम् ॥) स्वर्णवल्ली । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—

“स्वर्णवल्ली रक्तफला काकायुः काकवल्लरी ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तफेनजः, पुं, (रक्तफेनात् जायते इति । जन्+ डः ।) वामपार्श्वस्थक्लोम । तत्पर्य्यायः । पुस्फुसः २ । इति हेमचन्द्रः । ३ । २९९ ॥

रक्तबिन्दुः, पुं, (रक्तानां बिन्दुः ।) रक्तकणा । यथा,—

“रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः ॥”

इति मार्कण्डेये देवीमाहात्म्यम् ॥)

रक्तबीजः, पुं, (रक्तवर्णं बीजमस्य ।) दाड़िमः । इति राजनिर्घण्टः ॥ (अरिष्टकफलः । रीठा इति ख्यातः । तत्पर्य्यायो यथा,—

“अरिष्टकस्तु माङ्गल्यः कृष्णवर्णोऽर्थसाधनः ।
रक्तबीजः पीतफेनः फेनिलो गर्भपातनः ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ रक्तं शोणितं बीजं कारणमस्य ।) असुरविशेषः । स च शुम्भनिशुम्भसेनापतिः देव्या हतश्च । यथा,—

“पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्द्दितान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥
रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः ॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताड़यत् ॥
कुलिशेनाहतस्याशु तस्य सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्य्यबलविक्रमाः ॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राहसत्वरा ।
उवाच कालीं चामुण्डे ! विस्तरं वदनं कुरु ॥
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महासुरान् ।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिता ॥
भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान् ।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥
मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।
ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥
यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति ।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ।
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥
देवी शूलेन वज्रेण वाणैरसिभिरृष्टिभिः ।
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ॥
स पपात महीपृष्ठे शस्त्रसंघसमाहतः ।
नीरक्तश्च महीपाल ! रक्तबीजो महासुरः ॥
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ! ।
तेषां मातृगणो जातो ननर्त्तासृङ्मदोद्धतः ॥”

इति मार्कण्डेये देवीमाहात्म्यम् ॥ (महिषासुरपिता दानवो रम्भ एव जन्मान्तरे रक्तबीजो जातः । यथा, देवीभागवते । ५ । २ । ४४—४९ ।

“मृतं रम्भं समानीय यक्षास्ते परमं प्रियम् ।
चितायां रोपयामासुस्तस्य देहस्य शुद्धये ॥
महिषी सा पतिं दृष्ट्वा चितायां रोपितं तदा ।
प्रवेष्टुं सा मतिं चक्रे पतिना सह पावकम् ॥
वार्य्यमाणापि यक्षैः सा प्रविवेश हुताशनम् ।
ज्वालामालाकुलं साध्वी पतिमादाय वल्लभम् ॥
महिषस्तु चितामध्यात् समुत्तस्थौ महाबलः ।
रम्भोऽप्यन्यद्वपुः कृत्वा निःसृतः पुत्त्रवत्सलः ॥
रक्तबीजोऽप्यसौ जातो महिषोऽपि महाबलः ।
अभिषिक्तस्तु राज्येऽसौ हयारिरसुरोत्तमैः ॥
एवं स महिषो जातो रक्तबीजश्च वीर्य्यवान् ।
अवध्यस्तु सुरैर्द्दैत्यैर्मानवैश्च नृपोत्तम ! ॥”)

रक्तबीजका, स्त्री, (रक्तो रक्तवर्णो बीजोऽस्याः । कन् +टाप् ।) तरटीवृक्षः । इति राजनिर्घण्टः ॥

रक्तमञ्जरः, पुं, (रक्ता रक्तवर्णा मञ्जरी । सा विद्यतेऽस्येति । “अर्शआदिभ्यः अच् ।” ५।२।१२७। इत्यच् ।) निचुलवृक्षः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य निचुलशब्दे ज्ञातव्याः ॥)

रक्तमत्स्यः, पुं, (रक्तो रक्तवर्णो मत्स्यः ।) रक्तवर्णो मत्स्यविशेषः । यथा,—

“यो रक्ताङ्गो नातिदीर्घो न चाल्पो
नातिस्थूलो रक्तमत्स्यः स उक्तः ।
शीतो बल्यः पुष्टिकृद्दीपनोऽसौ
नाशं धत्ते किञ्च दोषत्रयस्य ॥”

इति राजनिर्घण्टः ॥

रक्तमूलकः, पुं, (रक्तं रक्तवर्णं मूलमस्य । कन् ।) देवसर्षपवृक्षः । इति राजनिर्घण्टः ॥

रक्तमूला, स्त्री, (रक्तं मूलं अस्याः । टाप् ।) लज्जालुवृक्षः । इति राजनिर्घण्टः ॥

रक्तमेहः, पुं, (मेहनं मेहः रक्तस्य मेहः ।) प्रमेहरोगविशेषः । तस्य लक्षणं यथा,—
"विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ॥"
मूत्रं मूत्रयेदिति योजनीयम् । अस्यौषधम् । यथा,—
"चन्द्रप्रभावचामुस्ताभूनिम्बसुरदारवः ।
हरिद्रातिविषादार्व्वीपिप्पलीमूलचित्रकम् ॥
धान्यकं त्रिफला चव्यं विड़ङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संग्राह्याणि पृथक् पृथक् ।
द्विकर्षं हलोहं स्याच्चतुष्कर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभेति विख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥
चतस्रश्चाश्मरीस्तद्वत् मूत्राघातांस्त्रयोदश ।
अण्डवृद्धिं पाण्डुरोगं कामलाञ्च हलीमकम् ॥
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ।
वातपित्तकफव्याधीन् बल्या वृष्या रसायनी ॥
समाराध्य शिवं तस्मात् प्रयत्नात् गुटिकामिमाम् ।
प्राप्तवांश्चन्द्रमा यस्मात्तस्माच्चन्द्रप्रभा स्मृता ॥"
इति भावप्रकाशः ॥
(तथास्य लक्षणम् । यथा,—
"विस्रं लवणमुष्णञ्च रक्तं मेहति यो नरः ।
पित्तस्य परिकोपेन तं विद्याद्रक्तमेहिनम् ॥"
इति चरके निदानस्थाने चतुर्थेऽध्याये ॥)

रक्तमोक्षणं, क्ली, (रक्तस्य मोक्षणम् ।) शोणितस्रावः । यथा,—
"वेदनोपशमार्थाय तथा पाकशमाय च ।
अचिरोत्पतिते शोथे शोणितस्रावणञ्चरेत् ॥
चरेत् कुर्य्यात् ।
एकतस्तु क्रियाः सर्व्वा रक्तमोक्षणमेकतः ।
रक्तं हि वेदनामूलं तच्चेन्नास्ति न चापि रुक् ॥
विवर्णे कठिने श्यावे व्रणे चात्यन्तवेदने ।
सविशेषे विशेषेण जलौकोभिः पदैरपि ॥
शोणितस्रावणञ्चरेदित्यनेनान्वयः ।" इति भावप्रकाशः ॥ (तथा च ।
"रक्तावसेचनं चतुर्भिः प्रकारैर्भवति ।
शिराविरेचनेनापि अलाबूभिश्चैव च ॥
अश्वत्थं शृङ्गैर्जलौकाभी रक्तञ्च स्रावयेद्बुधः ।
पूर्व्वाह्णे चापराह्णे च नात्युष्णे नातिशीतले ॥
यवागूपरिपीतस्य शोणितं मोक्षयेद्भिषक् ।
शिरोरोगेषु सर्व्वेषु नासामध्यपुटे तथा ।
अह्नं रेचयेद्यत्नात् सर्व्वदा भिषगुत्तमः ॥"
इति हारीते शारीरस्थाने पञ्चमेऽध्याये ॥)

रक्तयष्टिः, स्त्री, (रक्ता यष्टिरिव । यद्वा रक्ता रक्तवर्णा यष्टिः शाखास्याः ।) मञ्जिष्ठा । इति जटाधरः ॥

रक्तयष्टिका, स्त्री, (रक्तयष्टि+कन् । टाप् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्ण्यपि ।
ताम्रवल्ली चित्रपर्णी काण्डीरी रक्तयष्टिका ॥"
इति वैद्यकरत्नमालायाम् ॥
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तयावनालः, पुं, (रक्तवर्णः यावनालः ।) तुवरयावनालः । इति राजनिर्घण्टः ॥

रक्तरेणुः, पुं, (रक्ताः रेणवोऽस्मिन्निति ।) सिन्दूरम् । (अस्य पर्य्यायो यथा,—
"सिन्दूरं रक्तरेणुश्च नागगर्भञ्च सीसजम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पलाशकलिका । इति मेदिनी । ने, १०५ ॥ पुन्नागः । इति राजनिर्घण्टः ॥

रक्तरेणुका, स्त्री, (रक्ताः रेणवः परागा अस्याम्, कन् । टाप् च ।) पलाशकलिका । तत्पर्य्यायः । अङ्गारिका २ । इति शब्दमाला ॥

रक्तरैवतकं, क्ली, (रक्तवर्णं रैवतकम् ।) महापारेवतम् । इति राजनिर्घण्टः ॥

रक्तलशुनः, पुं, (रक्तवर्णो लशुनः ।) रक्तवर्णमूलविशेषः । तत्पर्य्यायः । महाकन्दः २ गृञ्जनः ३ दीर्घपत्रकः ४ पृथुपत्रः ५ स्थूलकन्दः ६ यवनेष्टः ७ । अस्य गुणाः ।
"गृञ्जनस्य मधुरं कटु कन्दं
नालमप्युपदिशन्ति कषायम् ।
पत्रमप्ययमुशन्ति सतिक्तं
सूरयो लवणमस्थि वदन्ति ॥"
इति राजनिर्घण्टः ॥

रक्तला, स्त्री, (रक्तं लाति गृह्णातीति । ला+कः । टाप् ।) काकतुण्डी । इति राजनिर्घण्टः ॥ (विशेषोऽस्याः काकतुण्डीशब्दे ज्ञातव्यः ॥)

रक्तलोचनः, पुं, (रक्ते लोहिते लोचने अस्य ।) कपोतः । इति हेमचन्द्रः । ४ । ४०५ ॥ लोहितलोचनयुक्ते, त्रि ॥

रक्तवटी, स्त्री, (रक्ता वटी वटिकेव ।) मसूरिका । इति त्रिकाण्डशेषः ॥

रक्तवरटी, स्त्री (रक्ता वरटीव ।) मसूरिका । इति जटाधरः ॥ (मसूरिकाशब्देऽस्या गुणादयो ज्ञेयाः ॥)

रक्तवर्गः पुं, (रक्तानां लोहितवर्णानां वर्गः समूहोऽत्र ।) दाड़िमः । किंशुकम् । लाक्षा । बन्धूकम् । निशाद्वयम् । कुसुम्भपुष्पम् । मञ्जिष्ठा, इति राजनिर्घण्टः ॥

रक्तवर्णः, पुं, (रक्तः लोहितः वर्णोऽस्य ।) इन्द्रगोपः । इति राजनिर्घण्टः ॥ (रक्तवर्णविशिष्टे, त्रि । यथा, सुश्रुते सूत्रस्थाने । ४६ अध्याये ।
"सितासिताः पीतकरक्तवर्णा
भवन्ति येऽनेकविधास्तु शिम्बाः ॥")

रक्तवर्द्धनः, पुं, (रक्तं शोणितं वर्द्धयतीति । वृध्+णिच्+ल्युः ।) वार्त्ताकुः । इति शब्दचन्द्रिका ॥ (पारावतः । तत्पर्य्यायो यथा,—
"पारावतः कलरवः कपोतो रक्तवर्द्धनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तवर्षाभूः, स्त्री, (रक्तवर्णा वर्षाभूः ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

रक्तवसनः, पु, (रक्तं वसनमस्य ।) सन्न्यासी । इति हेमचन्द्रः । ३ । ४७२ ॥

रक्तवातः, पु, (रक्तप्रधानो वातः ।) रोगविशेषः । अस्यौषधम् । यथा, गारुड़े १९३ अध्याये ।
"नारिकेलस्य वै मूलं छागक्षीरेण संयुतम् ।
पिबेच्च त्रिविधस्तस्य रक्तवातो विनश्यति ॥"

रक्तवालुकं, क्ली, (रक्ता वालुका चूर्णमत्र ।) सिन्दूरम् । इति हारावली ॥

रक्तवालुका, स्त्री, (रक्ता वालुकेव ।) सिन्दूरम् । इति शब्दरत्नावली ॥

रक्तवृन्ता, स्त्री, (रक्तवर्णं वृन्तं प्रसवबन्धनमस्याः ।) शेफालिका । इति शब्दचन्द्रिका ॥ (शेफालिकाशब्देऽस्या गुणादयो विज्ञेयाः ॥)

रक्तवृष्टिः, स्त्री, (रक्तानां वृष्टिः ।) रुधिरवर्षणम् । तत्तु उत्पातविशेषः । तत्फलं शस्त्रोद्योगः । यथा । ज्योतिषचिन्तामणौ ।
"रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्म्मरकः ।
धान्यहिरण्यत्वक्फलकुसुमाद्यं वर्षिते भयं
विद्यात् ॥"
इति ज्योतिस्तत्त्वम् ॥

रक्तशालिः, पुं, (रक्तवर्णः शालिः ।) रक्तवर्णधान्यविशेषः । (यथा, सुश्रुते सूत्रस्थाने । २० अध्याये । "रक्तशालिषष्टिकगङ्गकमुकुन्दकपाण्डुकपीतकप्रमोदककालकेत्यादि ॥") तत्पर्य्यायः । ताम्रशालिः २ शोणशालिः ३ लोहितः ४ । अस्य गुणाः । मधुरत्वम् । लघुत्वम् । स्निग्धत्वम् । बलावहत्वम् । रुचिकारित्वम् । दीपनत्वम् । पथ्यत्वम् । पित्तदाहानिलासनाशित्वञ्च । इति राजनिर्घण्टः ॥ (तथा च ।
"रक्तशालिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रलस्तृट् ज्वरापहः ।
विषव्रणश्वासकासदाहनुद्वह्निपुष्टिदः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तशासनं, क्ली, (रक्तं रक्तवर्णं शास्ति वशीकरोतीति । शास्+ल्युः ।) सिन्दूरम् । इति हारावली ॥

रक्तशिग्रुः, पुं, (रक्तवर्णः शिग्रुः ।) रक्तशोभाञ्जनवृक्षः । तत्पर्य्यायः । रक्तकः २ मधुरः ३ बहुलच्छदः ४ सुगन्धः ५ केशरी ६ सिंहः ७ मृगारिः ८ । अस्य गुणाः । महावीर्य्यत्वम् । मधुरत्वम् । रसायनत्वम् । शोफाध्मानसमीरणपित्तश्लेष्मनाशित्वम् । सारकत्वञ्च । इति राजनिर्घण्टः ॥

रक्तशीर्षकः, पुं, (रक्तं रक्तवर्णं शीर्षं अग्रमस्य । कन् ।) सरलद्रवः । इति रत्नमाला ॥

रक्तशृङ्गिकं, क्ली, विषम् । इति राजनिर्घण्टः ॥

रक्तसंज्ञं, क्ली, (रक्तमिति संज्ञास्य ।) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य कुङ्कुमशब्दे विज्ञेयाः ॥)

रक्तसन्दंशिका, स्त्री, (रक्ताय रक्तपानाय सम्यक् दशतीति । दन्श + ण्वुल् । टापि अत इत्वञ्च ।) जलौका । इति राजनिर्घण्टः ॥

रक्तसन्ध्यकं, क्ली, ("रक्तं सन्ध्येवेति रघुनाथः । रक्तान् सन्धीन् अकति गच्छति व्याप्नोतीति । कः । इति रायमुकुटभरतमल्लिकौ ।") रक्तकह्लारम् । तत्पर्य्यायः । हल्लकम् २ । इत्यमरः । १ । १० । ३६ ॥

रक्तसरोरुहं, क्ली, (रक्तं सरोरुहम् ।) रक्तपद्मम् । इत्यमरः । १ । १० । ४१ ॥

रक्तसर्षपः, पुं, (रक्तवर्णः सर्षपः ।) राजिका । इति राजनिर्घण्टः ॥

रक्तसहा, स्त्री, (रक्तं सहते इति । सह + अच् + टाप् ।) रक्ताम्लानः । इति राजनिर्घण्टः ॥

रक्तसारं, क्ली, (रक्तवर्णः सारोऽस्य ।) रक्तचन्दनम् । (यथास्य पर्य्यायः ।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पत्तङ्गम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"पत्तङ्गं रक्तसारञ्च सुरङ्गं रञ्जनन्तथा ।
पट्टरञ्जकमाख्यातं पत्तूरञ्च कुचन्दनम् ॥")
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तसारः, पुं, (रक्तः सारो यस्य ।) अम्लवेतसः । रक्तखदिरः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
रक्तं सारो यस्येति । शोणितसारयुक्ते, त्रि । यथा, बृहत्संहितायाम् । ६८ । ६७ ।
"ताल्वोष्ठदन्तपालीजिह्वानेत्रान्तपायुकर-चरणैः ।
रक्तैस्तु रक्तसारा बहुसुखवनितार्थपुत्त्रयुताः ॥")

रक्तसौगन्धिकं, क्ली, (रक्तवर्णं सौगन्धिकम् ।) रक्तकह्लारम् । इति जटाधरः ॥

रक्तस्रावः, पुं, (रक्तं स्रावयतीति । स्रु + णिच् + अच् ।) वेतसाम्लः । इति जटाधरः ॥ (रक्तस्य स्रावः ।) रक्तपतनम् । (यथा, बृहत्संहितायाम् । ८९ । ३५ ।
"कलहो नैरृतभागे रक्तस्रावोऽथ शस्त्रकोपश्च ।
अपराह्णे चर्म्मकृतं विनश्यते चर्म्मकारभयम् ॥")

रक्तहंसा, स्त्री, (रक्ताः वशीभूताः हंसा अत्र ।) रागिणीविशेषः । इति हलायुधः ॥

रक्ता, स्त्री, (रक्त + टाप् ।) गुञ्जा । (अस्याः पर्य्यायो यथा,—
"रक्ता सा काकचिञ्ची स्यात् काकानन्ती च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लाक्षा । मञ्जिष्ठा । उष्ट्रकाण्डी । इति राजनिर्घण्टः ॥

रक्ताकारः, पुं, (रक्तवर्णं आकारः अवयवोऽस्य ।) प्रवालः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य प्रवालशब्दे विज्ञेयः ॥)

रक्ताक्तं क्ली, (रक्तेन रक्तवर्णेन अक्तं म्रक्षितम् ।) रक्तचन्दनम् । इति जटाधरः ॥ शोणितमिश्रिते, त्रि ॥

रक्ताक्षः, पुं, (रक्ते लोहिते अक्षिणी अस्य । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।) महिषः । पारावतः । चकोरः । क्रूरः । इति मेदिनी । षे, ४४ ॥ सारसः । इति राजनिर्घण्टः ॥ (अब्दविशेषः । यथा, बृहत्संहितायाम् । ८ । ५१ ।
"रक्ताक्षमब्दं कथितं तृतीयं
यस्मिन् भयं दंष्ट्रिकृतं गदाश्च ॥")
रक्तवर्णचक्षुर्युक्ते, त्रि । (यथा, रामायणे । २ । ८८ । १६ ।
"कथमिन्दीवरश्यामो रक्ताक्षः प्रियदर्शनः ।
सुखभागी न दुःखार्हः शयितो भुवि राघवः ॥"
अयन्तु सदा लक्ष्मीयुक्तो भवेत् । यथा, ज्योतिःसागरे ।
"न श्रीस्त्यजति रक्ताक्षं नार्थः कनकपिङ्गलम् ।
न दीर्घबाहुमैश्वर्य्यं न सौख्यं प्रहसन्मुखम् ॥")

रक्ताङ्गं, क्ली, (रक्तवर्णमङ्गमस्य ।) विद्रुमः । कुङ्कुमम् । इति मेदिनी । गे, ४८ ॥ (रक्तचन्दनम् । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥")

रक्ताङ्गः, पुं, (रक्तमङ्गं यस्य ।) मङ्गलग्रहः । कम्पिल्लः । इति मेदिनी । गे, ४७ ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"कम्पिल्लकस्तु रक्ताङ्गो गुण्डारोचनिकेति सा ॥"
"कम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
प्रवालः । मत्कुणः । इति राजनिर्घण्टः ॥ मण्डलम् । इति शब्दरत्नावली ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । १७ ।
"ऋषभो वेगवान्नागः पिण्डारकमहाहनू ।
रक्ताङ्गः सर्व्वसारङ्गः समृद्धः पटवासकौ ॥")

रक्ताङ्गी, स्त्री, (रक्ताङ्ग + ङीष् ।) जीवन्ती । इति मेदिनी । गे, ४६ ॥ मञ्जिष्ठा । इति भावप्रकाशः ॥

रक्तातिसारः, पुं, (रक्तं अत्यन्तं सरत्यस्मात् । सृ + घञ् ।) रोगविशेषः । "तस्य संप्राप्तिमाह ।
'पित्तकृत्तु यदात्यर्थं द्रव्यमश्नाति पैत्तिके ।
तदोपजायते शीघ्रं रक्तातीसार उल्बणः ॥'
तस्य चिकित्सा ।
'वत्सकतरुत्वगार्द्रा दाडिमफलसम्भवा त्वक् ।
त्वग्युगलं पलमानं विपचेदष्टाङ्गसम्मिते तोये ॥
अष्टमभागं शेषं क्वाथं मधुना पिबेत् पुरुषः ।
रक्तातिसारमुल्बणमतिशयितं नाशयेन्नियतम् ॥
इति कुटजदाडिमक्वाथः ॥ * ॥
'गोदुग्धनवनीतन्तु मधुना सितया सह ।
लीढं रक्तातिसारे तु ग्राहकं परमं महत् ॥'
इति नवनीतावलेहः ॥ * ॥
'पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना ।
रक्तातिसारजिद्रक्तपित्ततृड्दाहमेहनुत् ॥'
चन्दनमत्र श्वेतम् । इति चन्दनकल्कः ॥" इति भावप्रकाशः ॥ (तथा च ।
"यस्तु रक्तशुद्धविरेचने शोषदाहमतिरिष्यते ।
रक्तातिसार इति विज्ञेयो वैद्यैर्महामतिभिः ॥
धन्वनागरमुस्ता च बालकं बालबिल्वकम् ।
बलानागबला चेति क्वाथो रक्तातिसारिणाम् ॥
दाडिमश्च कपित्थश्च पथ्याजम्ब्वाम्रपल्लवान् ।
पिष्ट्वा देया मस्तुयुक्ता रक्तातिसारवारणाः ॥
गुडेन पक्वं दातव्यं बिल्वं रक्तातिसारिणे ।
मनुजे मधुयुक्ता वा दध्ना रक्तातिसारहाः ॥
वत्सकातिविषनागराभया
पेषितश्च मधुमस्तुसंयुतम् ।
लेह एव मधुना च मानुषे
रक्तवाहमति वारयत्यपि ॥
कुटजत्वक् च पाठा च बिम्बं बिल्वञ्च धातकी ।
मधुना सहितं चूर्णं देयं रक्तातिसारहम् ॥
इति रक्तातिसारः ।" इति हारीते चिकित्सितस्थाने तृतीयेऽध्याये ॥)

रक्ताधारः, पुं, (रक्तस्याधारः ।) चर्म्म । इति राजनिर्घण्टः ॥

रक्तापहं, क्ली, (रक्तमपहन्तीति । हन् + डः ।) बोलम् । इति राजनिर्घण्टः ॥

रक्तापामार्गः, पुं, (रक्तवर्णः अपामार्गः ।) रक्तवर्णापामार्गक्षुपः । राङ्गा आपाङ् इति वङ्गभाषा । लाल चिरचिरी इति हिन्दी भाषा । तत्पर्य्यायः । क्षुद्रापामार्गः २ आघट्टकः ३ दुग्धिनिका ४ रक्तविट् ५ कल्यपत्रिका ६ । अस्य गुणाः । शीतत्वम् । कटुत्वम् । कफवातव्रणकण्डूविषनाशित्वम् । संग्राहित्वम् । वान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः । अथ आरक्तचिरचिरा ।
"रक्तोऽन्यो वशिरो वृत्तफलो धामार्गवोऽपि च ।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ॥
अपामार्गोऽरुणो वातविष्टम्भी कफहद्धिमः ।
रूक्षः पूर्व्वगुणैर्न्यूनः कथितो गुणवेदिभिः ॥
अपामार्गफलं स्वादु रसे पाके च दुर्ज्जरम् ।
विष्टम्भि वातलं रूक्षं वातपित्तप्रसादनम् ॥"
इति भावप्रकाशः ॥

रक्ताम्बरं, क्ली, (रक्तं रञ्जितमम्बरम् ।) काषायवस्त्रम् । यथा,—

"शवोपरिसमासीनां रक्ताम्बरपरिच्छदाम् ।
रक्तालङ्कारसंयुक्तां गुञ्जाहारविभूषिताम् ॥"
इति तन्त्रसारधृतमुच्छिष्टचाण्डालिनीध्यानम् ॥ तद्युक्ते, त्रि ॥

रक्ताम्रः, पुं, (रक्तवर्णः आम्रः ।) कोषाम्रः । इति राजनिर्घण्टः ॥ (विवरणमस्य कोषाम्रशब्दे ज्ञातव्यम् ॥)

रक्ताम्लानः, पुं, (रक्तेन रक्तवर्णेन आ सम्यक् म्लायते इति । म्लै + क्तः । समधिकरक्तवर्णत्वात्तथात्वम् ।) रक्तवर्णपुष्पविशेषः । तत्पर्य्यायः । रक्तसहा २ अपरिम्लानः ३ रक्ताम्लानकः ४ रागप्रसवः ५ रक्तप्रसवः ६ कुरवकः ७ रामालिङ्गनकामः ८ मधूत्सवप्रसवः ९ सुभगः १० भ्रमरानन्दः ११ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । वातामयशोफज्वराध्मानशूलकासश्वासार्त्तिप्रशमनत्वम् । वर्ण्यत्वञ्च । इति राजनिर्घण्टः ॥

रक्तार्म्म, [न्] क्ली, (रक्तं ऋच्छतीति । ऋ + मन् ।) नेत्ररोगभेदः । तस्य लक्षणं यथा,—
"पद्माभं मृदु रक्तार्म्म यन्मांसं चीयते सिते ॥"
इति माधवकरः ॥

रक्तार्ब्बुदः, पुं, क्ली, (रक्तानामर्ब्बुदमत्र ।) रोगविशेषः । यथा, शातातपीयकर्म्मविपाके ।
"जलोदरयकृत्प्लीहशूलरोगव्रणानि च ।
श्वासाजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः ।
रक्तार्ब्बुदविसर्पाद्या उपपापोद्भवा गदाः ॥"
इति मलमासतत्त्वम् ॥ * ॥
"रक्तार्ब्बुदमाह ।
'दोषप्रदुष्टा रुधिरं शिराश्च
सङ्कोच्य संपीड्य ततस्त्वपाकम् ।
सस्रावमुन्नह्यति मांसपिण्डं
मांसाङ्कुरैराचितमाशु वृद्धिम् ॥
स्रवत्यजस्रं रुधिरं प्रदुष्ट-
मसाध्यमेतद्रुधिरात्मकन्तु ।
रक्तक्षयोपद्रवपीड़ितत्वात्
पाण्डुर्भवेदर्ब्बुदपीड़ितश्च ॥'
दोषोऽत्र पित्तं रुधिरं शिराश्च सङ्कोच्य संपीड्य संहतीकृत्य मांसाख्यो: सर्व्वेष्वर्ब्बुदेषु दूष्यत्वं रक्तार्ब्बुदे तु विशेषतो रक्तदुष्टिः एवं मांसार्ब्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या । ततो मांसपिण्डमुन्नह्यति उन्नतं करोति । अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणम् । ईषत्पाकश्चैकदेशपाकेन । रक्तक्षयोपद्रवपीड़ितत्वात् रक्तक्षयोपद्रवाः सुश्रुतेनोक्ताः । तैः पीड़ितत्वात् अर्ब्बुदपीड़ितः ॥ * ॥ अथार्ब्बुदस्य चिकित्सा ।
'ग्रन्थ्यर्ब्बुदानां न यतो विशेषः
प्रदेशहेत्वाकृतिदोषदूष्यैः ।
अतश्चिकित्सेद्भिषगर्ब्बुदानि
विधानविद्ग्रन्थिचिकित्सितेन ॥
हरिद्रालोध्रपत्तङ्गगृहधूममनःशिलाः ।
मधुप्रगाढ़ो लेपोऽयं मेदोऽर्ब्बुदहरः परः ॥
मल्लकस्य कृतः क्षारो हरिद्रायास्तथैव च ।
शङ्खचूर्णेन संयुक्तो लेपः सिद्धोऽर्ब्बुदापहः ॥
वटदुग्धकुष्ठरोमकलिप्तं बद्धं वटस्य पत्रेण ।
अथास्थि सप्तरात्रान्महदप्युपशान्तिमर्ब्बुदं गच्छेत् ॥
शिग्रुमूलकयोर्ब्बीजं रक्षोघ्नं सुरसा यवम् ।
तक्रेणाश्वरिपुं पिष्ट्वा लिम्पेदर्ब्बुदशान्तये ॥'
रक्षोघ्नं सर्षपम् । सुरसा तुलसी । यवं इन्द्रयवम् । अश्वरिपुं करवीरम् ।" इति भावप्रकाशः ॥

रक्तार्शः, [स्] क्ली, (रक्तजनितमर्शः ।) अर्शोरोगविशेषः । तस्य लक्षणमाह ।
"रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः ।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ॥
तेऽत्यर्थं दुष्टमुष्णञ्च गाढ़विड्भिः प्रपीड़िताः ।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः ।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ॥
विट्श्यावं कठिनं रूक्षमधो वायुर्न वर्त्तते ।
तनु चारुणवर्णञ्च फेनिलञ्चासृगर्शसाम् ॥
कट्यूरुगुदशूलञ्च दौर्ब्बल्यं यदि वाधिकम् ।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम् ॥
शिथिलं श्वेतपीतञ्च विट्स्निग्धं गुरु शीतलम् ।
यद्यर्शसां घनञ्चासृक् तन्तुमत्पाण्डु पिच्छिलम् ॥
गुदं सपिच्छं स्तिमितं गुरु स्निग्धञ्च कारणम् ।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः ॥
गुदे कीला अर्शांसि । पित्ताकृतिसमन्विताः पित्तार्शोलक्षणयुक्ताः । आकारेण च वटप्ररोहादिसदृशाः । दुःखैः रोगैः । त्वक्पारुष्यासुशीतप्रार्थनादिभिः कलुषेन्द्रियः आकुलसर्व्वेन्द्रियः । रक्तजस्यापि वातोल्वणस्य लक्षणमाह । तत्र रक्तार्शसि अनुबन्धः उल्वणत्वम् । रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यम् । पित्तोल्वणस्य लक्षणं रक्तोल्वणा गुदे कीला पित्ताकृतिसमन्विता इत्यादिनैवोक्तम् । रक्तपित्तयोः समानलिङ्गत्वात् ॥ * ॥ कफोल्वणस्य लक्षणमाह । सपिच्छं पिच्छिलार्द्रस्तिमितमार्द्रचर्म्मावगुण्ठितमिव । तस्य चिकित्सा ।
रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्भिषक् ।
दुष्टास्रे निगृहीते स्युः शूलानाहासृगामयाः ॥
चन्दनकिराततिक्तकधन्वयवासाः सनागराः कथिताः ।
रक्तार्शसां प्रशमना दार्व्वीत्वगुशीरनिम्बा वा ॥
चन्दनमत्र रक्तचन्दनम् । इति चन्दनादिक्वाथः ॥
नवनीततिलाभ्यासात्
केशरनवनीतशर्कराभ्यासात् ।
दधिसरमथिताभ्यासात्
गुदजाः शाम्यन्ति रक्तवहाः ॥
दध्नस्तूपरि यो भागो घनः स्नेहयुतः सरः ।
मथितं सररहितम् । निर्ज्जलं वस्त्रपूतं दधि ।
सपद्मकेशरं क्षौद्रं नवनीतं नवं लिहन् ।
सिताकेशरसंयुक्तं रक्तार्शाःस सुखी भवेत् ॥
पयसा शृतेन यूषैः शतीनमुद्गाढ़कीमसूराणाम् ।
ओदनमद्यादश्नैर्मधुरैरीषत्ससुगन्धैश्च ।
समङ्गोत्पलमोचाह्वतिरीटतिलचन्दनैः ।
सिद्धं छागीपयो दद्यात्गुदजे शोणितात्मके ॥
समङ्गा लज्जालुः । मोचाह्वो मोचरसः । तिरीटो लोध्रः । चन्दनमत्र रक्तचन्दनम् । समङ्गादिदुग्धम् ।
भावितं रजनीचूर्णं स्नुहीक्षीरैः पुनः पुनः ।
बन्धनात् सुदृढ़ं सूत्रं छिनत्त्यर्शो भगन्दरम् ॥
क्षारसूत्रम् ॥
नासानाभिषु सूत्रेषु तथा मेढ्रादिकेष्वपि ।
क्रियामर्शःसु कुर्व्वीत तत्र तत्र यथोदिताम् ॥
चर्म्मकीलन्तु संछिद्य दहेत् क्षारेण चाग्निना ।
वेगावरोधस्त्रीपृष्ठयानमुत्कटकासनम् ।
यथास्वं दोषलञ्चान्नमर्शसः परिवर्ज्जयेत् ॥"
इति भावप्रकाशः ॥
(यथा चास्य लक्षणानि ।
"रक्तजानि न्यग्रोधप्ररोहविद्रुमकाकणन्तिकाफलसदृशानि पित्तलक्षणानि च यदावगाढ़पुरीषप्रपीड़ितानि भवन्ति तदात्यर्थं दुष्टमनल्पमसृक् सहसा विसृजन्ति तस्यैवातिप्रवृत्तौ शोणितातियोगोपद्रवा भवन्ति ।" इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये ॥ अथास्य चिकित्सा ।
"रक्तार्शसामुपचारं वक्ष्यामि शृणु पुत्त्रक ! ।
प्रातस्तिलान् भक्षयेच्च नवनीतविमिश्रितान् ॥
सितानागरसंयुक्तं नवनीतं सशर्करम् ।
केशरं मातुलुङ्गस्य विड़ङ्गशर्करायुतम् ॥
भक्षेत् कुष्माण्डावलेहं नवनीतेन शर्कराम् ।
एतेन रक्तगुदजान् शमयन्ति विचक्षणाः ॥
समङ्गा शाल्मलीपुष्पं चन्दनं ककुभत्वचम् ।
नीलोत्पलमजाक्षीरं पिष्ट्वा पानमसृग्मदान् ॥
कुटजमूलककेशरमुत्पलं
खदिरधातकिमूलशृतं पयः ।
पिबति मन्थकयोगमसृग्भवं
गुदजवेदनसङ्घविनाशनम् ॥"
इति रक्तार्शश्चिकित्सा ॥
इति हारीते चिकित्सितस्थाने १२ अध्यायः ॥)

रक्तालुः, पुं, (रक्तः रक्तवर्णः आलुः ।) रक्तवर्णालुविशेषः । शकरकन्द आलु इति भाषा ॥ तत्पर्य्यायः । रक्तपिण्डालुः २ रक्तपिण्डकः ३ लोहितः ४ रक्तकन्दः ५ लोहितालुः ६ । अस्य गुणाः । शीतत्वम् । मधुरत्वम् । श्रमपित्तदाहापहत्वम् । वृष्यत्वम् । बलपुष्टिकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

रक्तिका, स्त्री, (रक्तो रक्तवर्णोऽस्त्यस्याः । रक्त + "अत इनिठनौ ।" ५।२।११५ । इति ठन् ।) गुञ्जा । (अस्याः पर्य्यायो यथा,—
"साङ्कुष्ठा कृष्णला गुञ्जा रक्तिका काकणन्तिका ।
काकादनी काकतिक्ता काकजङ्घा शिखण्डिनी ।"
इति वैद्यकरत्नमालायाम् ॥
"रक्ता सा काकचिञ्ची स्यात् काकणन्ती च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

राजिका । इति राजनिर्घण्टः ॥ रक्तिका-परिमाणञ्च ॥

रक्तेक्षुः, पुं, (रक्तो रक्तवर्ण इक्षुः ।) रक्त-वर्णेक्षुः । लाल आक् इति भाषा ॥ तत्पर्य्यायः । सूक्ष्मपत्रः २ शोणः ३ लोहितः ४ उत्कटः ५ मधुरः ६ दृढमूलः ७ लोहितेक्षुः ८ । अस्य गुणाः । मधुरत्वम् । पाके शीतलत्वम् । मृदु-त्वम् । पित्तदाहहरत्वम् । वृष्यत्वम् । तेजो-बलविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

रक्तैरण्डः, पुं, (रक्तवर्णः एरण्डः ।) वृक्षविशेषः । लाल भेरण्डा इति भाषा ॥ तत्पर्य्यायः । व्याघ्रः २ हस्तिकर्णः ३ रुवुः ४ उरुवूकः ५ नाग-कर्णः ६ चञ्चुः ७ उत्तानपत्रकः ८ करपर्णः ९ पाचनः १० स्निग्धः ११ व्याघ्रतलः १२ रक्तकः १३ चित्रवीर्य्यः १४ हस्तैरण्डः १५ । अस्य गुणाः श्वयथुपवनश्रान्तिरक्तार्त्तिपाण्डुभ्रान्ति-श्वासज्वरारोचकनाशित्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
“शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डो व्यडम्बकः ॥
रक्तोऽपरोरुवूकः स्यादुरुवूको रुवुस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ॥
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत् ।
शूलशोथकटीवस्तिशिरःपीडोदरज्वरान् ॥
ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान् ॥
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम् ।
मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपणम् ॥
वाताग्र्यग्रदलं गुल्मवस्तिशूलहरं परम् ।
कफवातक्रमीन् हन्ति वृद्धिं सप्तविधामपि ॥
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम् ।
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम् ।
तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः ॥”
इति भावप्रकाशः ॥

रक्तैर्व्वारुः, पुं, (रक्तः रक्तवर्णः एर्व्वारुः ।) इन्द्र-वारुणी । इति राजनिर्घण्टः ॥ (विशेषो-ऽस्येन्द्रवारुणीशब्दे विज्ञेयः ॥)

रक्तोत्पलं, क्ली, (रक्तं रक्तवर्णमुत्पलम् ।) रक्त-पद्मम् । तत्पर्य्यायः । रक्तसरोरुहम् २ कोक-नदम् ३ । इत्यमरः । १ । १० । ४२ ॥ (यथा, वृहत्संहितायाम् । २६ । ९ ।
“विन्द्याच्च सिन्दूरकेण मौक्तिकं कुङ्कुमं कुसुम्भेन ।
रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः ॥”
तथास्य गुणाः ।
“धवलं कमलं शीतं मधुरं कफपित्तजित् ।
तस्मादल्पगुणं किञ्चिदन्यत् रक्तोत्पलादिकम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तोत्पलः, पुं, (रक्तोत्पलमिव पुष्पमस्यास्य । अर्शआद्यच् ।) शाल्मलिवृक्षः । इति राज-निर्घण्टः ॥

रक्तोत्पलाभः, पुं, (रक्तोत्पलस्य आभेव आभास्य ।) शोणवर्णः । इति जटाधरः । तद्-युक्ते, त्रि ॥

रक्तोपलं, क्ली, (रक्तमुपलम् ।) गैरिकम् । इति हारावली । ११५ ॥ (गुणादयोऽस्य गैरिक-शब्दे ज्ञेयाः ॥)

रक्ष, ञि पालने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० सक०-सेट् ।) ञि, रक्षितोऽस्ति । इति दुर्गादासः ॥

रक्षः, [स्] क्ली, (रक्षत्यस्मादिति । रक्ष+ “सर्व्वधातुभ्योऽसुन् ।” उणा० ४ । १८८ । इति असुन् ।) राक्षसः । इत्यमरः । १ । १ । ६२ ॥ तद्विशेषो यथा,—
“दृष्ट्वा तु विकलान् व्यङ्गाननाथान् रोगिणस्तथा
दया न जायते यस्य स रक्ष इति मे मतिः ॥”
इत्याग्नेये यमशर्म्मिलोपाख्याननामाध्यायः ॥
रक्षोघ्नौषधं यथा,—
मनुरुवाच ।
“रक्षोघ्नानि विषघ्नानि यानि धार्य्याणि भूभुजा ।
अगदानि समाचक्ष्व तानि धर्म्मभृतांवर ॥
मत्स्य उवाच ।
पञ्चिका रोहिणी चैव रक्तमाला महौषधी ।
तथामलकवन्दारं या च चित्रपटोलिका ॥
काकोली क्षीरकाकोली पीलुपर्णी तथैव च ।
केशिनी वृश्चिकाली च महानागा शतावरी ॥
तथा गरुडवेगा च स्थवे कुमुदिनी तथा ।
स्थवे चोत्पलिनी या च महाभूमिलता च या ।
उन्मादिनी सोमराजी सर्व्वरत्नानि पार्थिव ।
विशेषान्मरकताद्यत्र कीटपक्षविशेषतः ॥
जीवजाताश्च मणयः सर्व्वे धार्य्या विशेषतः ।
रक्षोघ्नाश्च यशस्याश्च तथा वैतालनाशनाः ॥”
इति मात्स्ये १९२ अध्यायः ॥

रक्षःसभं, क्ली, (रक्षसां राक्षसानां सभा । क्लीव-त्वमभिधानात् ।) रक्षःसमूहः । इत्यमरः । ३ । ५ । २३ ॥

रक्षकः, त्रि, (रक्षतीति । रक्ष+ण्वुल् ।) रक्षा-कर्त्ता । यथा,—
“गोरक्षः सहदेवश्च नकुलो हयरक्षकः ।
वैराटे कुरुदायादो नराणां मातुलक्रमः ॥”
इति पुराणम् ॥

रक्षणं, क्ली, (रक्ष+भावे ल्युट् ।) रक्षा । यथा,
“इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम् ।
पाययित्वा स्तनं माता संन्यवेशयदात्मजम् ॥”
इति श्रीभागवते १० स्कन्धे ६ अध्यायः ॥

रक्षणारकः, पुं, मूत्रकृच्छ्ररोगः । इति शब्द-रत्नावली । क्वचित् पुस्तके रक्षणीरकोऽपि पाठः ॥

रक्षणिः, स्त्री, त्रायमाणा लता । इति राज-निर्घण्टः ॥

रक्षा, स्त्री, (रक्षणमिति । रक्ष+“गुरोश्च हलः ।” ३ । ३ । १०३ । इति अः । स्त्रियां टाप् ।) रक्षणम् । (यथा, कुमारे । २ । २८ ।
“मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥”) जतु । इति मेदिनी । षे, २३ ॥ भस्म । इति शब्दरत्नावली ॥ यशोदाकृता रक्षा यथा,—
“रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः ।
गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकम् ॥
रक्षां च चक्रुः शकृता द्वादशाङ्गेषु नामभिः ।
गोप्यः संस्पृष्टसलिला अङ्गेषु करयोः पृथक् ॥
न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्व्वत ॥
अव्यादजोऽङ्घ्रिमणिमांस्तव जान्वथोरू
यज्ञोऽच्युतः कटितटं जठरं हयास्यः ।
हृत् केशवस्त्वदुर ईश इनस्तु कण्ठं
विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम् ॥
चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्
त्वत्पार्श्वयोर्धनुरसी मधुहा जनश्च ।
कोणेषु शङ्ख उरुगाय उपर्य्युपेन्द्र-
स्तार्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात् ॥
इन्द्रियाणि हृषीकेशः प्राणान् नारायणोऽवतु ।
श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु ॥
पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः ।
क्रीडन्तं पातु गोविन्दः शयानं पातु माधवः ॥
व्रजन्तमव्याद्वैकुण्ठ आसीनं त्वां श्रियः पतिः ।
भुञ्जानं यज्ञभुक् पातु सर्व्वग्रहभयङ्करः ॥
डाकिन्यो यातुधान्यश्च कुष्माण्डा येऽर्भकग्रहाः ।
भूतमातृपिशाचाश्च यक्षरक्षोविनायकाः ॥
कोटरा रेवती ज्येष्ठा पूतना मातृकादयः ।
उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः ॥
स्वप्नदृष्टमहोत्पाता वृद्धबालग्रहाश्च ये ।
सर्व्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः ॥”
इति श्रीभागवते १० स्कन्धे ६ अध्यायः ॥ * ॥
अथ पौर्णमास्यां रक्षाबन्धनम् । राखीबाँधा इति भाषा । यथा,—
“पौर्णमास्यां हरे रक्षाबन्धनं विधिपूर्व्वकम् ।
व्रजराजकुमारत्वात् केचिदिच्छन्ति साधवः ॥”
तत्र भद्रादिसद्भावे तामतिक्रम्यैव कुर्य्यात् ।
तथा च स्मृत्यन्तरे ।
“भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति ग्रामान् दहति फाल्-
गुनीति ॥”
विधिश्च भविष्योत्तरे ।
“उपाकर्म्मदिने प्रोक्तम्टषीणाञ्चैव तर्पणम् ।
ततोऽपराह्णसमये रक्षापोटलिकां शुभाम् ॥
कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषिताम् ।
वस्त्रैर्व्विचित्रैः कार्पासैः क्षौमैर्व्वा मलवर्ज्जितैः ।
विचित्रं ग्रथितं सूत्रं स्थापयेद्भाजनोपरि ॥
उपलिप्तगृहमध्ये दत्तचतुष्के न्यसेच्छुभं पीठम् ।
तत्रोपविष्टो राजा सामात्यः सपुरोहितः ससुहृत् ॥
ततस्तु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण ।
येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥”
वैदिकश्च । यदा वध्न दाक्षायणा हिरण्यः शतानीकाय मनस्य माना तन्मया बध्नामि शतं शारदाया युष्मान् जरदष्टिर्यथा सम् ।
“ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः ।
कर्त्तव्यो रक्षणाचारो विप्रान् संपूज्य शक्तितः ॥
अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत् ।

स सर्व्वदोषरहितः सुखं संवत्सरं वसेदिति ॥”
अथ तद्दिननिर्णयार्थं उपाकर्म्मदिननिर्णयः क्रियते । यदाह स्मृत्यन्तरे ।
“उपाकर्म्म तु कुर्व्वन्ति ते सामऋग्यजुर्व्विदः ।
ग्रहसंक्रान्तिमुक्तेषु हस्तश्रवणपर्व्वसु ॥”
तथा च । सामवेदिनां भाद्रस्य हस्तानक्षत्रं ऋग्वेदिनां श्रावणस्य श्रवणनक्षत्रं यजुर्व्वेदिनां श्रावणी पूर्णिमोपाकर्म्मकालः । उपक्रमकण्डिका-कीर्त्तनरूपं कर्म्म उपाकर्म्म । अत्र करणाभावे भाद्रे श्रावणेऽपि विधेयम् ।
“अस्फुटौषधयस्तस्मिन् मासे न हि भवन्ति चेत् ।
तदा भाद्रपदे मासि श्रावणेऽपि तदिष्यते ॥”
इति बह्वृचपरिशिष्टवचनात् ॥
श्रावणपञ्चम्यनुकल्पः । तदाह गर्गः ।
“यदि स्यात् श्रावणं पर्व्व ग्रहसंक्रान्तिदूषितम् ।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य च ॥”इति ॥
अत्र भूतविद्धा पूर्णिमा च निषिद्धा । तथा च कालिकापुराणे ।
“चतुर्द्दश्यां समुत्पन्नावसुरौ मधुकैटभौ ।
वेदान् स्वीकुर्व्वतः पद्मयोनेस्तौ जघ्नतुः श्रुतीः ॥
हत्वा तावसुरौ देवः पातालतलवासिनौ ।
आहृता ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयम् ॥
संप्राप्तवान् श्रुतीर्ब्रह्मा पर्व्वण्यौदयिके पुनः ।
अतो भूतयुते तस्मिन्नोपाकरणमिष्यते ।
आसुरं वर्ज्जयेत् कालं वेदाहरणशङ्कयेति ॥”
व्यासोऽपि ।
“श्रवणेन तु यत् कर्म्म उत्तराषाढ़संयुतम् ।
संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥
धनिष्ठासंयतं कुर्य्याच्छ्रावणं कर्म्म यद्भवेत् ।
तत् कर्म्म सफलं विद्यादुपाकरणसंज्ञकमिति ॥”
इति श्रीहरिभक्तिविलासे ५१ विलासः ॥
(रक्षाकर्म्म यथा । उदकुम्भाद्यापो गृहीत्वा प्रोक्षयन् रक्षाकर्म्म कुर्य्यात् तद्यथा ।
“कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च ।
रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम् ॥
नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः ।
अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा ॥
पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः ।
दिक्षु वास्तुनिवासाश्च पान्तु त्वान्ते नमस्कृताः ॥
पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा ।
पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः ॥
अग्नी रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च ।
सोमो व्यानमपानन्ते पर्जन्यः परिरक्षतु ॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः ।
बलमिन्द्रो बलपतिर्मनुर्मन्ये मतिस्तथा ॥
कामांस्ते पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्षतु ।
प्रज्ञान्ते वरुणो राजा समुद्रो नाभिमण्डलम् ॥
चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः ।
नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव ॥
रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा ।
आकाशं खानि ते पातु देहन्तव वसुन्धरा ॥
वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमम् ।
पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं ध्रुवो भ्रुवौ ॥
एता देहे विशेषेण तव नित्या हि देवताः ।
एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि ॥
स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्व्वताम् ।
स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ ॥
स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः ।
पितामहकृता रक्षा स्वस्त्यायुर्व्वर्द्धतां तव ॥
ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः ॥”
इति स्वाहा ॥
एतैर्व्वेदात्मकैर्मन्त्रैः कृत्या व्याधिविनाशनैः ।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि ॥”
इति सुश्रुते सूत्रस्थाने पञ्चमेऽध्याये ॥)

रक्षापत्रः, पुं, (रक्षार्थं पत्रमस्य ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः ॥ भूर्ज्जत्वचि, स्त्री ॥

रक्षिका, स्त्री, (रक्षैव । रक्षा + स्वार्थे कन् । टापि अत इत्वम् ।) रक्षा । यथा,—
“अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत् ।
स सर्व्वदोषरहितः सुखं संवत्सरं वसेत् ॥”
इति हरिभक्तिविलासे ५१ विलासः ॥

रक्षितं, त्रि, (रक्ष + क्तः ।) कृतरक्षम् । तत्-पर्य्यायः । त्रातम् २ त्राणम् ३ अवितम् ४ गोपायितम् ५ गुप्तम् ६ । इत्यमरः ।३।१।१०६॥ (यथा, मनुः । ११ । २३ ।
“कल्पयित्वास्य वृत्तिञ्च रक्षेदेनं समन्ततः ।
राजा हि धर्म्मषड्भागं तस्मात् प्राप्नोति रक्षितात् ॥”
स्त्री, भावे क्तः । रक्षा ॥ * ॥ स्त्रियां टाप् । अप्सरोविशेषः । यथा, महाभारते ।१।६५।५०।
“अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा ।
अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा ॥”)

रक्षिता, [ऋ] पुं, (रक्षतीति । रक्ष + तृच् ।) रक्षाकर्त्ता । यथा,—
“आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः ।
कृताकृतज्ञो भृत्यानां ज्ञेयः स्यादेष रक्षिता ॥”
इति मात्स्ये १८६ अध्यायः ॥

रक्षिवर्गः, पुं, (रक्षिणां वर्गः समूहः ।) राजाङ्ग-रक्षकगणः । तत्पर्य्यायः । अनीकस्थः २ । इत्य-मरः । २ । ८ । ६ ॥

रक्षोघ्नं, क्ली, (रक्षो राक्षसं हन्तीति । हन् + टक् ।) काञ्जिकम् । इति हेमचन्द्रः ॥ हिङ्गु । इति राजनिर्घण्टः ॥

रक्षोघ्नः, पुं, (रक्षो हन्तीति । हन् + टक् ।) भल्लातकवृक्षः । इति त्रिकाण्डशेषः ॥ श्वेत-सर्षपः । इति रत्नमाला ॥ रक्षोघ्नमन्त्रो यथा,—
“स्थाने हृषीकेश तव प्रकीर्त्त्या
जगत् प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्व्वे नमस्यन्ति च सिद्धसंघाः ॥”
इति भगवद्गीतायाम् । ११ । ३६ ॥
“स्थाने इत्ययं युक्तमित्यर्थे । हे हृषीकेश सर्व्वेन्द्रियप्रवर्त्तक यतस्त्वमेवात्यन्ताद्भुतप्रभावो भक्तवत्सलश्च ततस्तव प्रकीर्त्त्या प्रकृष्टया कीर्त्त्या निरतिशयप्राशस्त्यस्य कीर्त्तनेन श्रव-णेन च न केवलमहमेव प्रहृष्यामि किन्तु सर्व्व-मेव जगच्चेतनमात्रं रक्षोविरोधि प्रहृष्यति प्रकर्षं हर्षमाप्नोति इति यत् तत् स्थाने युक्त-मित्यर्थः । तथा सर्व्वं जगत् अनुरज्यते च तद्वि-षयमनुरागमुपैति इति च यत्तदपि युक्तमेव । यथा रक्षांसि भीतानि सन्ति दिशो द्रवन्ति सर्व्वासु दिक्षु पलायन्ते इति यत्तदपि युक्तमेव । यथा सर्व्वेषां सिद्धानां कपिलादीनां संघा नमस्यन्ति चेति यत्तदपि युक्तमेव । सर्व्वत्र तव प्रकीर्त्त्या इत्यस्यान्वयः स्थाने इत्यस्य च । अयं श्लोको रक्षोघ्नमन्त्रः प्राशस्त्यप्रसिद्धः ।” इति तट्टीकायां मधुसूदनसरस्वती ॥ (रक्षोविनाशके, त्रि । यथा, सुश्रुते । १ । ५ । “वेदनारक्षोघ्नैर्धूपै-र्धूपयेद्रक्षोघ्नैश्च मन्त्रै रक्षां कुर्व्वीत ॥”)

रक्षोघ्नी, स्त्री, (रक्षो हन्तीति । हन + टक् । ङीप् ।) वचा । इति रत्नमाला ॥

रक्षोजननी, स्त्री, (रक्षसां जननीव ।) रात्रिः । इति त्रिकाण्डशेषः ॥ राक्षसमाता च ॥

रक्षोहा, [न्] पुं, (रक्षो हन्तीति । हन् + क्विप् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ (ऋषिविशेषः । स तु ऋग्वेदस्य १० मण्डलस्य १६२ सूक्तस्य ऋषिः ॥ राक्षसहन्तरि, त्रि । यथा, ऋग्वेदे । १० । ८७ । ६ ।
“विप्रः स उच्यते भिषग्रक्षोहा मीवचातनः ॥”
“रक्षोहा रक्षोहन्ता ।” तद्भाष्ये सायणः ॥)

रक्ष्णः, पुं, (रक्ष + “यजयाचयतविच्छप्रच्छरक्षो नङ् ।” ३ । ३ । ९० । इति नङ् ।) त्राणम् । इत्यमरः । ३ । २ । ८ ॥

रख, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रखति । इति दुर्गादासः ॥

रखि, इ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, रङ्खति । इति दुर्गादासः ॥

रगि, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, रङ्गति । इति दुर्गादासः ॥

रग, क स्वाद आपने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-अक०च-सेट् ।) क, रागयति । इति दुर्गादासः ॥

रग, म ए शङ्के । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) म, रगयति । ए, अरगीत् । शङ्कः शङ्का । रगति रोगी कुपथ्येभ्यः । इति दुर्गादासः ॥

रघि, इ क भासि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इ क, रङ्घयति । भासि दीप्तौ । इति दुर्गादासः ॥

रघि, इ ङ गमने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक० सेट् ।) इ, रङ्घते । ङ, रङ्घते । इति दुर्गादासः ॥

रघुः, पुं, (लङ्घति ज्ञानसीमां प्राप्नोतीति । लघि + “लङ्घिबंह्योर्नलोपश्च ।” उणा० १ । ३० । इति कुः नलोपश्च । “वालमूललघ्वसुराल-मङ्गुलीनां वा लो रत्वमापद्यते इति वक्तव्यम् ।”

८ । २ । १८ । इति काशिकोक्त्या तस्य रत्वम् । इत्युज्ज्वलदत्तः ।) सूर्य्यवंशीयदिलीपराजपुत्त्रः । स तु अयोध्याधिपतिः । श्रीरामचन्द्रस्य प्रपितामहः । यथा, रघुः । ३ । १८ ।

"स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते ।
दिलीपसूनुर्म्मणिराकरोद्भवः
प्रयुक्तसंस्कार इवाधिकं बभौ ॥"

तन्नामव्युत्पत्तिर्यथा,—

"श्रुतस्य यायादयमन्तमर्भक-
स्तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थ-वि-
च्चकार नाम्ना रघुमात्मसम्भवम् ॥"

इति रघुवंशे महाकाव्ये । ३ । २१ ॥

(अस्य पिता दिलीपः माता सुदक्षिणा । अयं हि अश्वमेधयज्ञदीक्षितस्य पितुर्यज्ञीयाश्वरक्षणे नियुक्तस्तदश्वहारिणं देवराजं जितवान् । अथ बहुकालं राज्यसुखमनुभूय विश्वजिन्नामाध्वरे सर्व्वं वित्तं ब्राह्मणसात् कृतवानपि गुरुदक्षिणार्थिना वरतन्तुशिष्येण कौत्सेनाभ्यर्थितः कुवेरं विजित्य धनान्याहाय तस्मै प्रदत्तवान् । अथ स्वपुत्त्रमजं यौवराज्येऽभिषिच्य विगतविषयाभिलाषो योगसमाधिना भगवत्-सायुज्यमाप्तवान् । तथा च रघुवंशे । ८ सर्गे ।

"अथ वीक्ष्य रघुः प्रतिष्ठितं
प्रकृतिष्वात्मजमात्मवत्तया ।
विषयेषु विनाशधर्म्मसु
त्रिदिवस्थेष्वपि निःस्पृहोऽभवत् ॥"

"अथ काश्चिदजव्यपेक्षया
गमयित्वा समदर्शनः समाः ।
तमसः परमापदव्ययं
पुरुषं योगसमाधिना रघुः ॥" * ॥

भीमादिवदेकदेशग्रहणे रघुवंशकाव्यम् । यथा,

"रघुरपि काव्यं तदपि च पाठ्यम्
तस्य च टीका सापि च पाठ्या ॥"

एवं "रघोः काव्यं पदे पदे ।" एतावुद्भटौ ॥ अपि च ।

"रञ्जयतीति । राजा प्रभुः । तेन 'राजा प्रकृतिरञ्जनात् ।' इति रघुः ।" इति उणादिवृत्तौ उज्ज्वलदत्तः । १ । १५६ ॥ * ॥ रघुवंशीयमात्रम् । तत्र बहुवचनान्तः । यथा, रघुवंशे । १ । ९ ।

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ॥"

लङ्घति द्रुतं गच्छतीति । शीघ्रगामिनि, त्रि । यथा, ऋग्वेदे । ५ । ३० । १४ ।

"अत्यो न वाजी रघुरज्यमानः ।"

"रघुः शीघ्रगामी ।" इति तद्भाष्ये सायणः ॥")

रघुकारः, पुं. (रघुं तदाख्यं काव्यं करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) कालिदासः । इति त्रिकाण्डशेषः ॥ (यथा, आर्य्यासप्तशत्याम् । ६९७ ।

"पूर्व्वैर्विभिन्नवृत्तां गुणाढ्यभवभूतिवाणरघुकारैः ।
वाग्देवीं भजतो मम सन्तः पश्यन्तु को दोषः ॥"

यथा च ।

"सीमन्तिनी च नलिनी च कुमुद्वती च
चन्द्रप्रभा च रघुकारसरस्वती च ।
कान्तोज्झिता हिमहता रविरश्मितप्ता
मेघावृता जडधियाभिहता न भाति ॥"

इत्युद्भटः ॥)

रघुनन्दनः, पुं, (रघून् रघुवंशसम्भूतान् नन्दयतीति । नन्दि + ल्युः ।) श्रीरामः । इति शब्दरत्नावली ॥ (यथा, रामायणे । १ । ५२ । ९२ ।

"ततो वशिष्ठो भगवान् कथान्ते रघुनन्दन ! ।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥"

वङ्गदेशीयनवद्वीपनिवासी स्मार्त्तः पण्डितविशेषः । स च प्राचीनस्मृतिसंग्रहकर्त्ता । मलमासतत्त्वाद्यष्टाविंशतितत्त्वप्रणेता वन्द्यघटीयश्रीहरिहरभट्टाचार्य्यात्मजः । यथा,—

"प्रणम्य सच्चिदानन्दं परमात्मानमीश्वरम् ।
मुनीन्द्राणां स्मृतेस्तत्त्वं वक्ति श्रीरघुनन्दनः ।
मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये ।
प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते ॥
दुर्गोत्सवे व्यवहृतावेकादश्यादिनिर्णये ।
तडागभवनोत्सर्गे वृषोत्सर्गव्रये व्रते ॥
प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुयज्ञके ।
दीक्षायामाह्निके कृत्ये क्षेत्रे श्रीपुरुषोत्तमे ॥
सामश्राद्धे यजुःश्राद्धे शूद्रकृत्यविचारणे ।
इत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः ॥"

इति मलमासतत्त्वम् ॥

अपरः पण्डितविशेषः । स च वर्द्धमानप्रदेशान्तर्गतमाड़ग्रामनिवासिच्चरः । राढ़ीयश्रेणीभुक्तः किशोरीमोहनगोस्वामिसूनुः श्रीमन्नित्यानन्दवंशीयगोस्वामी । भागवतसिद्धान्तव्रजरमापरिणयच्छन्दोमञ्जरीटीकाव्याख्यानकौमुदीरामरसायनप्रभृतयो बहवो ग्रन्थास्तत्प्रणीताः सन्ति ॥)

रघुनाथः, पुं, (रघूणां नाथः । सुप्सुपादित्वात् णत्वाभावः ।) श्रीरामः । इति शब्दरत्नावली ॥ (यथा, रघुः । १५ । ५४ ।

"रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना ।
महौजसा संयुयुजे शरत्काल इवेन्दुना ॥")

रघुपतिः, पुं, (रघूणां पतिः ।) श्रीरामः । यथा,

"यदुपतेः क्व गता मथुरा पुरी
रघुपतेः क्व गतोत्तरकोशला ।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय ॥"

इति रूपगोस्वामी ॥

(केषाञ्चित् पण्डितानां नाम । यथा, रघुनाथशिरोमणिः अयन्तु नैयायिकः गाङ्गेशोपाध्यायकृततत्त्वचिन्तामण्यादेष्टीकाकारः । रघुनाथ चक्रवर्त्ती अयममरकोषस्य टीकाकारः । रघुनाथ तर्कवागीशः । रघुनाथ सरस्वती । रघुनाथ दासगोस्वामी । अयं हि श्रीचैतन्यदेवस्य प्रियभक्तः आसीत् । स्तवावल्यादिभक्तिग्रन्थप्रणेता । अयं खलु अशेषवैराग्यसम्पन्नः यशोहरनिवासिच्चरः कायस्थकुलभूषणं मथुरान्तर्व्वर्त्तिगोवर्द्धनगिरितटे राधाकुण्डे मनोऽहेच्छं विहाय स्वधामागमत् । तत्समाधिरधुनापि तत्रैवास्ते सेव्यतेऽद्यापि बहुभिर्वैष्णवैः ॥)

रघुवंशः, पुं, स्त्री, (रघोर्वंशः सन्ततिर्वर्ण्णनीयो यस्मिन् । यद्वा रघूणां वंशमधिकृत्य कृतमिति अण् लुक् च ।) कालिदासकृतरघुराजान्वयवर्णनमहाकाव्यग्रन्थविशेषः । यथा,—

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥"

इति रघुवंशे महाकाव्ये । १ । ९ ॥

(अयं हि ऊनविंशसर्गात्मको ग्रन्थः । अत्र दिलीपादारभ्य अग्निवर्णपर्य्यन्तं वस्तु वर्णितम् । पुं, रघोर्वंशः । यथा,—

"जयति रघुवंशतिलकः कौशल्यानन्दिवर्द्धनो
रामः ॥"

इति रामायणम् ।)

रघुवंशतिलकः, पुं, (रघुवंशे तिलक इव शोभाजनकत्वात् ।) श्रीरामः । यथा,—

"जयति रघुवंशतिलकः कौशल्यानन्दिवर्द्धनो
रामः ।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः ॥"

इति रामायणम् ॥

रघुवरः, त्रि, (रघुषु वरः श्रेष्ठः ।) रघुवंशीयश्रेष्ठः । यथा, रामायणे ।

"रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं
धार्म्मिकम् ॥"

रघूद्वहः, पुं. (उद्वहतीति । उत् + वह् + अच् । रघूणां उद्वहः रक्षाभारधारकः ।) श्रीरामः । इति शब्दरत्नावली ॥

रङ्कः, पुं, (रमते तुष्यतीति । रम् + "बाहुलकात् रमेरपि कः ।" इति कः । इत्युज्ज्वलदत्तः । ३ । ४० ।) कृपणः । मन्दः । इति मेदिनी । के, २१ ॥

रङ्कुः, पुं, (रमते इति । रम् + बाहुलकात् कुः ।) मृगविशेषः । इत्यमरः । २ । ५ । १० ॥ स तु शबलपृष्ठहरिणः । इति राजनिर्घण्टः ॥

रङ्गं, क्ली पुं, (रज्यतीति । रञ्ज + अच् । रज्यते अस्मिन् । रञ्ज् + अधिकरणे घञ् वा ।) धातुविशेषः । राङ्ग इति भाषा । तत्पर्य्यायः । त्रपुः २ त्रपुषम् ३ आपूषम् ४ वङ्गम् ५ मधुरम् ६ हिमम् ७ कुरूप्यम् ८ पिच्चटम् ९ पूतिगन्धम् १० । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । हिमत्वम् । कषायत्वम् । लवणरसत्वम् । मेहघ्नत्वम् । कृमिपाण्डुदाहशमनत्वम् । कान्तिकरत्वम् । रसायनत्वञ्च । तद्विशेषो यथा,—

"श्वेतं मृदु लघु स्वच्छं स्निग्धमुष्णसहं हिमम् ।
सूत्रपत्रकरं कान्तं त्रपुश्रेष्ठमुदाहृतम् ॥
खुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते ।
उत्तमं खुरकं तत्र मिश्रकं त्वहितं मतम् ॥"

इति राजनिर्घण्टः ॥

तस्यानुद्धस्य दोषमाह ।

"वङ्गो विधत्ते खलु शुद्धिहीन-
स्तथा ह्यपक्वश्च किलासगुल्मौ ।
कुष्ठानि शूलं किल वातशोथं
पाण्डुं प्रमेहञ्च भगन्दरञ्च ॥
विषोपमं रक्तविकारवृन्दं
क्षयञ्च कृच्छ्राणि कफज्वरञ्च ।
मेहाश्मरीविद्रधिमुख्यरोगान्
नागोऽपि कुर्य्यात् कथितान् विकारान् ॥"

तस्य शोधनमभिधीयते ।

"वङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत् ।
त्रिधा त्रिधा विशुद्धिः स्यात्रविदुग्धेऽपि च
त्रिधा ॥

तैलतक्रकाञ्जिकगोमूत्रकुलत्थक्वाथेषु प्रत्येकं त्रिधा त्रिधा । ततोऽर्कदुग्धे त्रिधा ॥ * ॥

अथ वङ्गस्य मारणविधिः ।

"मृत्पात्रे द्राविते वङ्गे चिञ्चाश्वत्थत्वचो रजः ।
क्षिप्त्वा वङ्गचतुर्थांशमयोदर्व्या प्रचालयेत् ॥"

चिञ्चा अम्लिली । रजश्चूर्णम् । अयोदर्व्वी करछुली ।

"ततो द्वियाममात्रेण वङ्गं भस्म प्रजायते ।
अथ भस्मसमं तालं क्षिप्त्वाम्लेन विमर्द्दयेत् ॥
ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत् ।
तालेन दशमांशेन याममेकं ततः पुटेत् ।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम् ॥"

एवं मारितस्य वङ्गस्य गुणाः ।

"वङ्गं लघु सरं रूक्षं कुष्ठमेहकफक्रमीन् ।
निहन्ति पाण्डुं सश्वासं नेत्र्यमीषत्तु पित्तलम् ॥
सिंहो गजौघन्तु यथा निहन्ति
तथैव रङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥'
इति भावप्रकाशः ॥

(यथाच ।

"वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपणम् ।
मेदः श्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे
जारणमारणाधिकारे ॥)

रङ्गः, पुं, (रन्ज् + घञ् ।) रागः । (यथा, महाभारते । ५ । ३६ । १० ।

"वासो यथा रङ्गवशं प्रयाति
तथा स तेषां वशमभ्युपैति ॥")

नृत्यम् । (यथा विष्णुपुराणे । २ । ६ । २० ।

"रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा ।
रूपीमाहिषिकश्चैव पर्व्वकारी च यो द्विजः ॥"

रजति आसज्यति मनोऽत्र । रन्ज् + अधिकरणे घञ् ।) रणभूमिः । इति मेदिनी । गे, २९ ॥ (यथा, श्रीमद्भागवते । १० । ४३ । १७ ।

"वृष्णीनां परदेवतेति विदितो रङ्गं गतः
साग्रजः ॥")

नाट्यस्थानम् । इति हेमचन्द्रः ॥ (यथा, मृच्छकटिकप्रकरणे । १ ।

"इयं रङ्गप्रवेशेन कलानाञ्चोपशिक्षया ।
वञ्चनापण्डितत्वेन स्वरनैपुण्यमाश्रिता ॥"

लक्षणया नाट्यस्थानस्थितो जनः । यथा, अभिज्ञानशकुन्तले १ प्रस्तावनायाम् ।

"सूत्रधारः । आर्य्ये ! साधु गीतम् । अहो रागापहृतचित्तवृत्तिरालिखित इव विभाति सर्व्वतो रङ्गः । तदिदानीं कतमं प्रयोगमाश्रित्यैनमाराधयामः ॥" राजमार्गः । यथा, देवीभागवते । ७ । २२ । ३ ।

"अवतार्य्य तदा रङ्गे तां भार्य्यां नृपसत्तमः ॥")

टङ्कणः । खादिरसारः । इति राजनिर्घण्टः ॥

रङ्गकाष्ठं, क्ली, (रङ्गं रञ्जितं काष्ठमस्य ।) पत्तङ्गम् । इति राजनिर्घण्टः ॥

रङ्गजं, क्ली, (रङ्गात् जायते इति । जन् + डः ।) सिन्दूरम् । इति रत्नमाला ॥

रङ्गजीवकः, पुं, (रङ्गेण रञ्जनकार्य्येण जीवतीति । जीव् + ण्वुल् ।) चित्रकारः । इति शब्दरत्नावली ॥ नाट्यकारश्च ॥

रङ्गदः, पुं, (रङ्गं द्यति छिनत्तीति । दो + कः ।) टङ्कणः । खादिरसारः । इति राजनिर्घण्टः ॥

रङ्गदा, स्त्री, (रङ्गद + टाप् ।) स्फटी । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः ।

"स्फटी च स्फटिका प्रोक्ता श्वेता शुभ्रा च रङ्गदा ।
रङ्गदृढ़ा रङ्गदा च दृढ़ा रङ्गापि कथ्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रङ्गदायकं, क्ली, (रङ्गस्य दायकम् ।) कङ्कुष्ठम् । इति राजनिर्घण्टः ॥

रङ्गदृढ़ा, स्त्री, (रङ्गवत् दृढ़ा ।) स्फटी । इति राजनिर्घण्टः ॥

रङ्गपत्री, स्त्री, (रङ्गं रङ्गार्थं पत्रमस्याः । ङीष् ।) नीलीवृक्षः । इति राजनिर्घण्टः ॥

रङ्गपुष्पी, स्त्री, (रङ्गं रञ्जितं पुष्पमस्याः ।) नीलीवृक्षः । इति राजनिर्घण्टः ॥

रङ्गबीजं, क्ली, (रङ्गं बीजं उत्पत्तिकारणमस्य ।) रूप्यम् । इति शब्दरत्नावली ॥

रङ्गभूतिः, स्त्री, (रङ्गस्य रागस्य गौरिम्नः भूतिः शोभात्र ।') कोजागरपूर्णिमा । इति शब्दरत्नावली ॥

रङ्गभूमिः, स्त्री, (रङ्गस्य भूमिः ।) मल्लभूमिः । इति शब्दरत्नावली ॥ (यथा, महाभारते ।१।१३५।६।

"अवघुष्टे समाजे च तदर्थं वदतां वरः ।
रङ्गभूमौ सुविपुलं शास्त्रदृष्टं यथाविधि ॥"

रङ्गभूमिविवरणं यथा, अश्ववैद्यके ।७।११-१२।

"सान्द्रां सुकठिनाञ्चैव पाषाणोदकसंयुताम् ।
तृणकाष्ठसमायुक्तां रङ्गभूमिन्तु वर्ज्जयेत् ॥
समाञ्च विपुलाञ्चैव किञ्चित् पांशुसमन्विताम् ।
एकान्ते विजने रम्ये रङ्गभूमिन्तु कारयेत् ॥")

नाट्यभूमिश्च ॥

रङ्गमल्ली, स्त्री, (रङ्गाय रागाय मल्ली ।) वीणा । इति शब्दरत्नावली ॥

रङ्गमाणिक्यं, क्ली, (रङ्गं रञ्जितं माणिक्यम् ।) माणिक्यरत्नम् । इति राजनिर्घण्टः ॥

रङ्गमाता, [ऋ] स्त्री, (रङ्गस्य माता जनिका ।) कुट्टनी । लाक्षा । इति मेदिनी । ते, २१५ ॥

रङ्गमातृका, स्त्री, (रङ्गमातृ + स्वार्थे कन् । टाप् ।) लाक्षा । इति त्रिकाण्डशेषः ॥

रङ्गलासिनी, स्त्री, (रङ्गेण रागेण लसितुं शीलमस्याः इति । लस + णिनिः ।) शेफालिका । इति शब्दचन्द्रिका ॥

रङ्गशाला, स्त्री, (रङ्गस्य शाला ।) नाट्यगृहम् । इति शब्दरत्नावली ॥ नाचघर इति भाषा ॥

रङ्गाङ्गा, स्त्री, (रङ्गं रङ्गार्हमङ्गमस्याः ।) स्फटी । इति राजनिर्घण्टः ॥

रङ्गाजीवः, पुं, (रङ्गो हरितालादिस्तेनाजीवतीति । जीव् + अण् । यद्वा, रङ्ग आजीवोऽस्य ।) चित्रकरः । इत्यमरः । २ । १० । ७ ॥ नटः । इति हेमचन्द्रः । ३ । ५८५ ॥

रङ्गावतारकः, पुं, (रङ्गे सङ्गीतभवने अवतरतीति । तॄ + ण्वुल् । यद्वा रङ्गं नृत्यादिकमवतारयतीति । तॄ + णिच् + ण्वुल् ।) रङ्गावतारी । तत्पर्य्यायः । शैलूषः २ भरतः ३ सर्व्ववेशी ४ भरतपुत्रकः ५ धात्रीपुत्त्रः ६ रङ्गजीवः ७ जायाजीवः ८ नटः ९ कृशाश्वी १० शैलाली ११ । इति हेमचन्द्रः ॥ नृत्यगीतस्थाने गीतवाद्यादिना तदनुगुणतया प्रसक्तः । इति प्रायश्चित्तविवेकः ॥ नटगायनव्यतिरिक्तरङ्गावतरणजीवी । इति कुल्लूकभट्टः ॥ तस्यान्नभक्षणप्रायश्चित्तं यथा,—

"मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन ।
केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः ॥"

इत्युपक्रम्य,—

"कर्म्मारस्य निषादस्य रङ्गावतारकस्य च ।
सुवर्णकर्त्तुर्व्वेणस्य शस्त्रविक्रयिणस्तथा ॥"

इत्याद्युक्त्वा,—

"य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः ॥
तेषान्त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः ॥
भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम् ।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च ॥"
इति मानवे ४ अध्यायः ॥

रङ्गावतारी, [न्] पुं, (रङ्गमवतरतीति । तॄ + णिनिः ।) नटः । इति जटाधरः ॥ (यथा, याज्ञवल्क्यसंहितायाम् । २ । ७२ ।

"स्त्रीवृद्धबालकितवमत्तोन्मत्ताभिशस्तकाः ।
रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियाः ॥")

रङ्गारिः, पुं, (रङ्गस्य तदाख्यधातोररिरिव ।) करवीरः । इति रत्नमाला ॥

रङ्गिणी, स्त्री, (रङ्गोऽस्त्यस्या इति । रङ्ग + इनिः । स्त्रियां ङीप् ।) शतमूली । इति जटाधरः ॥ कैवर्त्तिका । इति राजनिर्घण्टः ॥ रङ्गविशिष्टे, त्रि ॥

रंहः, [स्] क्ली, (रंह्यते प्राप्यते इति । रघि + "अघिरघिभ्यामसुन् ।" इति असुन् । इत्युज्ज्वलदत्तः । ४ । २१३ ।) रंहः । वेगः । इति भरतद्विरूपकोषः ॥ (यथा, सूर्य्यशतके । ७९ ।

"रंघः संघो सुराणां जगदुपकृतये नित्यमुक्तस्य यस्य ॥")

रच, तु क कृत्याम् । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) रचयति । इति दुर्गादासः ॥

रचनं, क्ली, (रचि+भावे ल्युट् ।) निर्म्माणम् । ग्रन्थनम् । यथा, जयदेवः । १ । ४ ।
"वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः ।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्य्यगोवर्द्धनः
स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविः क्ष्मापतिः ॥"

रचना, स्त्री, (रच्यते इति । रच+णिच्+"ण्यास-श्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् ।) कुसुमप्रकारादेः पत्रावल्यादेश्च रचनम् । तत्पर्य्यायः । परिस्पन्दः २ । इत्यमरः । २ । ६ । १३७ ॥ परिस्यन्दः ३ । इति भरतः ॥ (यथा, साहित्यदर्पणे । ३ । १४६ ।
"भूषाणामर्द्धरचना वृथा विश्वगवेषणम् ।
रहस्याख्यानमौषच्च विच्छेदो दयितान्तिके ॥")
यथाक्रमेण स्थापनम् । तत्पर्य्यायः । निवेशः २ स्थितिः ३ । इति हेमचन्द्रः । ३ । ४११ ॥ (यथा, महाभारते । ८ । ४६ । १० ।
"शृणु व्यूहस्य रचनामर्ज्जुनस्य यथागतः ॥")
निर्म्मितिः । कृतिः । यथा,—
"असाधारणचमत्कारकारिणी रचना हि निर्म्मितिः ॥" इत्यलङ्कारकौस्तुभे १ किरणः ॥ तत्पर्य्यायः । सन्दर्भः २ गुम्फः ३ स्रन्थनम् ४ । ग्रन्थनम् ५ । इति हेमचन्द्रः । ३ । ३१७ ॥ (उद्यमः । यथा, श्रीमद्भागवते । ३ । ६ । १० ।
"दैवाहतार्थरचना ऋषयोऽपि देव
युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥"
"दैवेनाहताः सर्व्वतः प्रतिहताः अर्थानां रचनाः अर्थोद्यमाः येषाम् ।" इति तट्टीकायां श्रीधरस्वामी ॥ रचयतीति । रचि+ल्युः । टाप् । विश्वकर्म्मणो भार्य्या । यथा, श्रीमद्भागवते । ६ । ६ । ४४ ।
"त्वष्टुर्दैत्यात्मजा भार्य्या रचना नाम कन्यका ।
सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्य्यवान् ॥")

रचितः, त्रि, कृतः । रचधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः । यथा,—
"शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्ज्जितमिदम् ॥"
इति पुष्पदन्तकृतस्तुतिः ॥

रजं, क्ली, (रञ्जयतीति । रञ्ज+अच् । निपातनात् सिद्धम् ।) स्त्रीकुसुमम् । इति शब्दरत्नावली ॥

रजः, पुं, (रञ्जयतीति । रन्ज्+अच् । निपातनान्नलोपः ।) परागः । (यथा, गौ० रामायणे । ३ । ७६ । २६ ।
"पद्मपुष्परजोमिश्रो वृक्षान्तरविनिःसृतः ।
निश्वास इव सीताया वायुर्वाति मनोरमः ॥")
रेणुः । ("अर्थाः पादरजोपमाः ॥" इति उज्ज्वलदत्तः । ४ । २१६ ॥) गुणभेदः । आर्त्तवम् । इति जान्तवर्गे शब्दरत्नावली ॥ (स्कन्दस्य सेनाविशेषः । यथा, महाभारते । ६ । ४५ । ७१ ।
"दण्डबाहुः सुबाहुश्च रजः कोकिलकस्तथा ॥"
विरजपुत्त्रः । यथा, विष्णुपुराणे । २ । १ । ४० ।
"त्वष्टा त्वष्टुश्च विरजो रजस्तस्याप्यभूत्सुतः ॥"
वशिष्ठपुत्त्रः ऋषिभेदः । यथा, विष्णुपुराणे । १ । १० । १३ ।
"ऊर्ज्जायान्तु वशिष्ठस्य सप्ताजायन्त वै सुताः ।
रजो गात्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा ॥")

रजः [स्] क्ली, (रज्यते रजतीति । रन्ज्+"भू-रञ्जिभ्यां कित् ।" उणा०४ । २१६ । इत्यसुन् ।) स्त्रीणां मासि मासि योनिनिःसृतरक्तम् । तत्पर्य्यायः । पुष्पम् २ आर्त्तवम् ३ । इत्यमरः । २ । ६ । २१ ॥ ऋतुः ४ कुसुमम् ५ रजम् ६ । इति शब्दरत्नावली ॥ (यथा, मनौ । ५ । १०८ ।
"रजसा स्त्री मनोदुष्टा सन्न्यासेन द्विजोत्तमः ॥"
अस्य लक्षणं यथा,—
"रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम् ।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥
रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते ।
तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥"
"नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोन्यभिवृद्धिर्भवति ।" इति सुश्रुते सूत्रस्थाने १४ अध्यायः ॥
"मासि मासि रजःस्त्रीणां रसजं स्रवति त्र्यहम् ।
वत्सराद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥"
इति वाभटे शारीरस्थाने प्रथमेऽध्याये ॥)
प्रकृतेर्गुणविशेषः । तत्तु रागद्वेषात्मकं दुःखहेतुः । रजोऽदन्तः पुंलिङ्गोऽपि । यथा,—
"रजोऽयं रजसा सार्द्धं स्त्रीपुष्पगुणधूलिषु ।"
इत्यमरदत्तः ' इति भरतः ॥
महाभारतमते दुःखजनकगुणः । तस्य धर्म्मः कामः क्रोधः लोभः मानः दर्पश्च । इति मोक्षधर्म्मः ॥
"तृष्णा क्रोधोऽभिसंरम्भो राजसास्ते गुणाः स्मृताः ॥"
अभिसंरम्भो द्वेषाभिनिवेशः । इत्याश्वमेधिकपर्व्व ॥ अपि च ।
"काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥"
इति श्रीभगवद्गीतायाम् । २ अध्यायः ॥
अपि च ।
"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥"
"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय ! कर्म्मसङ्गेन देहिनम् ॥"
"सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ।"
"लोभः प्रवृत्तिरारम्भः कर्म्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ! ॥"
"कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥"
इति श्रीभगवद्गीतायाम् । १४ अध्यायः ॥
"सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥
प्रभूतञ्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याद्दाने तपसि यद्रतिः ॥
यदा कर्म्मसु काम्येषु शक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृद्धिरिति जानीहि शौनक ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्म्मणाञ्चापि काम्यानां द्वापरं तद्रजस्तमः ॥
यदा सदानृतं तन्द्री निद्रा हिंसादिसाधनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥"
इति गारुडे २२७ अध्यायः ॥
परागः । इति मेदिनी । से, ३२ ॥ (यथा, भागवते । ४ । २४ । २२ ।
"पद्मकोशरजो दिक्षु विधिपत्यवनोत्सवम् ॥")
रेणुः । अस्य पर्य्यायः धूलिशब्दे द्रष्टव्यः ॥ (यथा, माघे । २ । ४६ ।
"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥")
निषिद्धानिषिद्धरजो यथा,—
"आयुष्कामो न सेवेत तथा सम्मार्ज्जनीरजः ।
तथाश्वरथधान्यानां गवाञ्चैव रजः शुभम् ॥
अशुभञ्च विजानीयात् खरोष्ट्राजाविकेषु च ।
गवां रजो धान्यरजः पुत्त्रस्याङ्गभवं रजः ॥
एतद्रजो महाशस्तं महापातकनाशनम् ।
अजारजः खररजो यत्तु सम्मार्ज्जनीरजः ॥
एतद्रजो महापापं महाकिल्विषकारणम् ॥"
इति गारुडे ११४ अध्यायः ॥
(रात्रिः । इति निघण्टुः । १ । ७ ॥ उदकम् । यथा, ऋग्वेदे । १ । ५६ । ५ ।
"वियत्तिरोधरुणमच्युतं रजोतिष्ठिपो दिव आतासु बर्हणा ।"
'रज उदकम् ।' इति तद्भाष्ये सायणः ॥
भुवनम् । यथा, तत्रैव । १० । ८२ । ४ ।
"असूर्त्ते सूर्त्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ।"
"रजसि लोके ।" इति तद्भाष्ये सायणः ॥
ज्योतिः । यथा, तत्रैव । १० । ३२ । २ ।
"वीन्द्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुष्टुत ।"
"रजसा आत्मीयेन ज्योतिषा । विद्युल्लक्षणेन यदा रजःशब्दाच्छस आकारः पार्थिवान् लोकान् ।" इति तद्भाष्ये सायणः ॥)

रजःशयः, पुं, (रजसि शेते । शी+"अधिकरणे शेतेः ।" ३ । २ । १५ । इति अच् ।) कुक्कुरः । इति शब्दमाला ॥ (धूलिशायिनि, त्रि । रजतमयी । यथा, वाजसनेयसंहितायाम् । ५ । ८ ।
"या तेऽग्ने रजःशया तनूर्वर्षिष्ठा ।"
"रजःशया रजतमयीति ।" तद्भाष्ये महीधरः ॥)
रजःसारथिः, पुं (रजसां सारथिरिव ।) वायुः । इति शब्दरत्नावली ॥
रजकः, पुं, (रजति निर्णेजनेन श्वेतिमानमापादयति वस्त्रादीनामिति । रन्ज+"शिल्पिनि ष्वुन्" इति प्रतिषेधे सति "कृञादिभ्यः प्रतिप्रसवं वक्तव्यम् ।" ३ । १ । १४५ । इति ष्वुन् ।) वर्णसङ्करजातिविशेषः । धोवा इति भाषा ॥ (यथा, भागवते । १० । ४१ । ३२ ।
"रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रजः ।
दृष्ट्वायाचत वासांसि धौतान्युत्तमानि च ॥")
स च तीवरपत्न्यां धीवराज्जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । निर्णेजकः २ । इत्यमरः । २ । १० । १० ॥ शौचेयः ३ कर्म्मकीलकः ४ । इति शब्दरत्नावली ॥ धावकः ५ । इति हेमचन्द्रः । ३ । ५ । ७८ ॥ रजकस्य वस्त्रनिर्णेजनप्रकारो यथा,—
"वासांसि फलके श्लक्ष्णे निर्णिज्याद्रजकः शनैः ।
अतोऽन्यथा हि कुर्व्वीत दण्ड्यः स्यादष्टकमाषकम् ॥"
इति मात्स्ये २०१ अध्यायः ॥
(रजकान्नभक्षणप्रायश्चित्तं यथाह आपस्तम्बः ।
"रजके चैव शैलूषे वेणुचर्म्मोपजीविनि ।
एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणञ्चरेत् ॥"
इति प्रायश्चित्तविवेकः ॥ शिल्पिष्वेव प्रत्ययः ॥)
अंशुकः । इति विश्वः ॥
रजकी, स्त्री, रजकपत्नी । रञ्जधातोः ष्वुन्प्रत्ययान्तादीपि स्त्री सिद्धा । इति मुग्धबोधव्याकरणम् ॥ (यथा, आर्य्यासप्तशत्याम् । ४०२ ।
"पटपट इव रजकीभिर्म्मलिनो भूत्वापि निर्द्दयं ताभिः ।
अयमाहत्यैव विना जघन्य ! मुक्तोऽपि कुलटाभिः ॥)
रजतं, क्ली, (रजति प्रियं भवति रज्यते इति वा । रन्ज+"पृषिरञ्जिभ्यां कित् ।" उणा० । ३ । ११९ । इति अतच् कित्कार्य्यञ्च ।) रूप्यम् । इत्यमरः । २ । ९ । ९६ ॥ हस्तिदन्तः । धवलः शोणितम् । हारः । ह्रदः । शैलः । (स तु शाकद्वीपस्थ एव । यथा, मात्स्ये १२१ । १४ ।
"रम्यमालान्तरमयः शाल्मलश्चान्तराजकृत् ।
तस्यापरेण रजतो महानस्तो गिरिः स्मृतः ॥")
स्वर्णम् । इति हेमचन्द्रः । ३ । १०९ ॥ शुक्लवर्णविशिष्टे, त्रि । इत्यमरटीकायां भरतः ॥ पितृकार्य्ये रजतपात्रादीनां प्राशस्त्यादि यथा,
"सौवर्णं राजतं ताम्रं पितृणां पात्रमुच्यते ।
रजतस्य कथा वापि दर्शनं दानमेव वा ॥
राजतैर्भाजनैरेषामथवा रजतान्वितैः ।
वार्य्यपि श्रद्धया दत्तमक्षयायोपकल्प्यते ॥
यथार्घ्यपिण्डभोज्यादौ पितॄणां राजतं मतम् ।
शिवनेत्रोद्भवं तस्मादत्तं तत् पितृवल्लभम् ।
अमङ्गलं तद्यत्नेन देवकार्य्येषु वर्ज्जितम् ॥"
इति मात्स्ये १७ अध्यायः ॥
रजतद्युतिः, पुं, (रजतस्येव द्युतिरस्य ।) हनूमान् । इति शब्दरत्नावली ॥
रजतप्रस्थः, पुं, (रजतस्येवाच्छः तद्वत् शुभ्रो वा प्रस्थः सानुरस्य ।) कैलासपर्व्वतः । इति त्रिकाण्डशेषः ॥
रजताचलः, पुं, (रजतप्रधानोऽचल इव । शाकपार्थिवादित्वत्समासः ।) रौप्यपर्व्वतः । तस्य परिमाणं दानविधिश्च यथा,—
"राजतो नवमस्तद्वद्दशमः शर्क्कराचलः ।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः ॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम् ।
यत्प्रसादान्नरो याति सोमलोकं द्विजोत्तम ॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः ।
पञ्चभिर्म्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः ॥
अशक्तो विंशतेरूर्द्ध्वं कारयेत् शक्तितः सदा ।
विष्कम्भपर्व्वतांस्तद्वत् तुरीयांशेन कल्पयेत् ॥
पूर्व्ववद्राजतान् कुर्य्यान्मन्दरादीन् विधानतः ॥"
पूर्व्ववत् रत्नाचलवत् ।
"कलधौतमयांस्तत्र लोकेशान् रचयेद्बुधः ॥
ब्रह्मविष्ण्वर्कवत् कार्य्यो नितम्बोऽत्र हिरण्मयः ।
राजतं स्याद्यदन्येषां समस्तादिह काञ्चनम् ॥
शेषञ्च पूर्व्ववत् कुर्य्यात् होमजागरणादिकम् ।
प्रदद्यात् प्रभाते तु गुरवे रौप्यपर्व्वतम् ॥
विष्कम्भशैलान् ऋत्विग्भ्यः पूज्य वस्त्रविभूषणैः ।
इमं मन्त्रं पठन् दद्याद्दर्भपाणिर्व्विमत्सरः ॥
पितॄणां वल्लभं यस्मात् विष्णोर्व्वा शङ्करस्य च ।
रजतं पाहि तस्मान्नः शोकसंसारसागरात् ॥
इत्थं निवेद्य यो दद्यात् रजताचलमुत्तमम् ।
गवामयुतदानस्य फलं प्राप्नोति मानवः ॥
सोमलोके सगन्धर्व्वैः किन्नराप्सरसाङ्गणैः ।
पूज्यमानो वसेद्विद्वान् यावदाभूतसंप्लवम् ॥"
इति मात्स्ये ७ अध्यायः ॥
(कैलासपर्व्वतः । यथा, महालिङ्गार्च्चनतन्त्रे ।
"रजताचलमध्ये तु कुवेरेश्वर ईरितः ॥")
रजताद्रिः, पुं, (रजतमयस्तद्वत् शुभ्रो वा अद्रिः । शाकपार्थिववत् समासः ।) कैलासपर्व्वतः । इति हेमचन्द्रः । ४ । ९४ ॥
रजनं, क्ली, (रज्यते इति । रन्ज+"रञ्जेः क्युन् ।" उणा० २ । ७९ । इति क्युन् । "रजकरजनरजःसूपसंख्यानम् ।" ६ । ४ । २४ । इति वार्त्तिकोक्तेर्नलोपश्च ।) रागः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, महाभारते । ८ । ५२ । ६ ।
" यथा वा वाससी शुक्ले महारजनरञ्जिते ।
बिभृयाद् युवती श्यामा तद्वदासीद्वसुन्धरा ॥")
ऋषिविशेषे, पुं । यथा, तैत्तिरीयसंहितायाम् । २ । ३ । ८ । १ ।
"रजनो वै कौणेयः क्रतुजितं जानकिं चक्षुर्व्वन्यमयात् ॥")
रजनिः, स्त्री, (रजन्ति लोका यत्र । रन्ज+बाहुलकादनिः । इत्युज्ज्वलदत्तः । २ । १०३ ।) रात्रिः । इत्यमरटीका ॥ (यथा, कथासरित्सागरे । १८ । १४५ ।
"इत्येवं स्थाप्य समयं प्राप्तायां रजनौ च तान् ।
आमन्त्र्य विप्रान् प्रययौ श्मशानं स विदूषकः ॥")
रजनी, स्त्री, (रजनि+कृदिकारादिति ङीष् ।) रात्रिः । (यथा, महाभारते । ३ । ६९ । २८ ।
"सा युक्ता रजनीं तत्र पितुर्वेश्मनि भाविनी ।
विश्रान्ता मातरं राजन् ! इदं वचनमब्रवीत् ॥")
हरिद्रा ॥ (अस्याः पर्य्यायो यथा,—
"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिनामिका ॥"
इति वैद्यकरत्नमालायाम् ॥
यथा, नषधे । २२ । ४९ ।
"अस्याः सुराधीशदिशः पुरासीत्
यदम्बरं पीतमिदं रजन्या ।
चन्द्रांशुचूर्णव्यतिचुम्बितेन
तेनाधुना नूनमलोहितायि ॥")
जतुका । इत्यमरः । २ । ४ । १५३ ॥ (यथा, बृहत्संहितायाम् । ४४ । ६ ।
"इन्द्रधन्वतास्रजनीसुवर्णपुष्पाभिमन्त्राश्व ॥")
नीलिनी । इति मेदिनी । ने, ११६ ॥ (शाल्मलीद्वीपस्थनदीभेदः । यथा, भागवते । ५।२०।१० ।
"अनुमती सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ॥")
रजनीकरः, पुं, (रजनीं करोतीति । कृ+टः ।) चन्द्रः । इति शब्दरत्नावली ॥ (यथा, भागवते । ४ । २८ । ३४ ।
"हित्वा गृहान् सुतान् भोगान् वैदर्भी मदिरेक्षणा ।
अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनीकरम् ॥")
रजनीगन्धा, स्त्री, (रजन्यां गन्धोऽस्याः । रात्रौ विकाशात् तथात्वम् ।) स्वनामख्यातश्वेतवर्णपुष्पविशेषः । इति लोकप्रसिद्धिः ॥
रजनीचरः, पुं, (रजन्यां चरतीति । चर+"चरेष्टः ।" ३ । २ । १६ । इति टः ।) राक्षसः । इति शब्दरत्नावली ॥ (यथा, रामायणे । ७।५।४ ।
"स तया सह संयुक्तो रराज रजनीचरः ॥"
तथा च ।
"ओजोऽशनानां रजनीचराणा-
माहारहेतोर्न शरीरमिष्टम् ।
गर्भं हरेयुर्यदि ते न मातु-
र्लब्धावकाशां न हरेयुरोजः ॥"
इति चरके शारीरस्थाने द्वितीयेऽध्याये ॥)
चौरः ॥ यामिकभटः ॥ (रात्रिविहारके, त्रि । यथा, हरिवंशे । २०२ । १८ ।
"श्राद्धयानाच राजानं शाश्वतं रजनीचरम् ॥")
रजनीजलं, क्ली, (रजन्या जलम् ।) नीहारः । इति हारावली । ६७ ॥

रजनीपुष्पः, पुं, (रजन्या हरिद्रायाः पुष्पमिव पुष्पमस्य ।) पूतिकरञ्जः । इति राजनिर्घण्टः ॥ (पूतिकरञ्जशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

रजनीमुखं, क्ली, (रजन्या मुखम् ।) प्रदोषः । इत्यमरः । १ । ४ । ६ ॥ (यथा, राजतरङ्गिण्याम् । ४ । ४३३ ।
"ततः शशाङ्कधवले सञ्जाते रजनीमुखे ।
पाणिनालम्ब्य भूपालं शय्यावेश्म विवेश सा ॥")

रजनीहासा, स्त्री, (रजन्यां हासो विकाशो यस्याः ।) शेफालिकापुष्पम् । इति शब्दरत्नावली ॥

रजसानुः, पुं, (रज्यतेऽस्मिन्निति । रन्ज + "असानुः सहिमन्दिभ्यां रुधिरञ्जिभ्यां तु किदर्त्तिरशेच ।" इत्युणादिकोषटीकाकृदुक्तेः असानुप्रत्ययः ।) मेघः । चित्तम् । इत्युणादिकोषः । १ । १७४ ॥

रजस्वलः, पुं, (रजोऽस्त्यस्येति । रजस् + "रजःकृष्यासुतिपरिषदो वलच् ।" ५ । २ । ११२ । इति वलच् ।) महिषः । इति मेदिनी । ले, १६३ ॥ (अस्य पर्य्यायो यथा,—
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः ।
पीनस्कः कृष्णकायोऽथ लुलापो यमवाहनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
त्रि, रजोयुक्तः । यथा, भागवते । ७ । १३ । १२ ।
"तं शयानं धरोपस्थे कावेर्य्यां सह्यसानुनि ।
रजस्वलैस्तनूदेशैर्निगूढ़ामलतेजसम् ॥"
रजोगुणयुक्तः । स्पृहयालुः । यथा, मनुः । ६ । ७७ ।
"जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥")

रजस्वला, स्त्री, (रजोऽस्त्यस्याः । "रजःकृष्यासुतीति ।" ५ । २ । ११२ । इति वलच् । टाप् ।) रजोयुक्ता । तत्पर्य्यायः । स्त्रीधर्म्मिणी २ अवी ३ आत्रेयी ४ मलिनी ५ पुष्पवती ६ ऋतुमती ७ उदक्या ८ । इत्यमरः । २ । ६ । २० ॥ दुरिः ९ पुष्पहासा १० । इति शब्दरत्नावली ॥ पुष्पिता ११ अवीरा १२ विफली १३ निष्फली १४ । इति जटाधरः ॥ स्नाता १५ पांशुला १६ । इति राजनिर्घण्टः ॥ * ॥ अथ रजस्वलास्पर्शप्रायश्चित्तम् । "काश्यपः ।
'रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि ।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति ॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या ।
त्रिरात्रेण विशुद्धिः स्यात् व्यासस्य वचनं यथा ॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणा च या ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति ॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि ।
षड्रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः ॥
अकामतश्चरेदर्द्धं ब्राह्मणी सर्व्वजातिषु ॥'
एतेन रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानं कामतः । अकामतस्तदर्द्धम् । नक्तव्रतम् । असवर्णरजस्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः । अकामतस्तदर्द्धम् । एतत् चतुर्थाहानन्तरं कर्त्तव्यम् ।
'चाण्डालेन श्वपाकेन संस्पृष्टा चेद्रजस्वला ।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत् ॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति ।
तां निशान्तु अतिक्रम्य स्नानात्कृत्न्तु कारयेत् ॥'
इति वचनान्तरदर्शनात् एतत् कामतः ॥
अत्र दिनभेदोऽपि नास्ति । अज्ञाने बृहस्पतिः ।
'पतितान्त्यश्वपाकैश्च संस्पृष्टा स्त्री रजस्वला ।
तान्यहानि अतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
प्रथमेऽह्नि त्रिरात्रं तु द्वितीये द्व्यहमाचरेत् ।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत् ॥'
चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्व्वम् । व्यासः ।
'रजस्वला यदा स्पृष्टा श्वजम्बूकखरैः क्वचित् ।
निराहारा भवेत्तावत् यावत् स्नानेन शुध्यति ॥'
अत्रापि बृहस्पत्युक्तदिनभेदव्यवस्था । वृद्धशातातपः ।
'रजस्वले तु ये नार्य्यावन्योन्यं स्पृशतो यदि ।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतः परम् ॥'
पञ्चगव्यपानं व्रतरूपम् । तेनोपवासः । ब्रह्मकूर्च्चमाह जावालः ।
'अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः ।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः ॥'
तदशक्तौ पुराणैकं दातव्यम् ।" इति प्रायश्चित्ततत्त्वम् ॥ * ॥ अन्यच्च ।
'शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा दैवपैत्रयोः ।
दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति ॥'
इति शुद्धितत्त्वम् ॥
तस्यां गमने पापं यथा,—
"प्रथमे दिवसे कान्तां यो हि गच्छेद्रजस्वलाम् ।
ब्रह्महत्याचतुर्थांशं लभते नात्र संशयः ।
स पुमान्न हि कर्म्मार्हो दैवे पैत्रे च कर्म्मणि ।
अधमः स च सर्व्वेषां निन्दितश्चायशस्करः ॥
द्वितीयदिवसे नारीं यो व्रजेच्च रजस्वलाम् ।
कामतः परिपूर्णाञ्च ब्रह्महत्यां लभेद्ध्रुवम् ॥
आजीवनं नाधिकारी पितृविप्रसुरार्च्चने ॥
अमनुष्योऽयशस्यः स्यादित्याङ्गिरसभाषितम् ॥
तृतीयदिवसे जायां यो हि गच्छेद्रजस्वलाम् ।
स मूढ़ो ब्रह्महत्याञ्च लभते नात्र संशयः ॥
पूर्व्ववत् पतितः सोऽपि न चार्हः सर्व्वकर्म्मसु ।
असत्पुत्त्रा चतुर्थेऽह्नि न गच्छेत्तां विचक्षणः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५९ अध्यायः ॥
अपि च ।
"अपूर्ब्बे ऋतुकाले तु योऽभिगच्छेद्रजस्वलाम् ।
रेतपाः पितरस्तस्य एवमेतन्न संशयः ॥
एकस्तु पुरुषो याति द्वितीयां काममोहितः ।
तृतीयां वा चतुर्थीञ्च तदा स पुरुषाधमः ॥
ऋतुकाले तु सर्व्वासां पित्रर्थं भोग इष्यते ।
ऋतुकालाभिगामी यो ब्रह्मचार्य्येव सम्मतः ॥
न गच्छति च यः क्रोधात् मोहाद्वा पुरुषाधमः ।
ऋतौ ऋतौ भ्रूणहत्यां प्राप्नोति पुरुषर्षभ ॥"
इति वाराहे गुह्यकर्म्मवर्णनं नामाध्यायः ॥
(अपि च ।
"रजस्वलास्त्रीगमनमेतन्नरककारणम् ।
रजस्वलावीरान्नञ्च पुंश्चल्यन्नञ्च भक्षणम् ।
अभक्ष्यान्नञ्च विप्राणां यदन्नं वृषलीपतेः ॥"
तथा च ।
"रजस्वलामकामाञ्च मलिनामप्रियान्तथा ।
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम् ॥
हीनाङ्गीं गर्भिणीं द्वेष्यां योनिदोषसमन्विताम् ।
सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि ॥
सन्ध्यापर्व्वस्वगम्याश्च नोपेयात् प्रमदां नरः ।
रजस्वलां प्राप्नुवतो नरस्यानियतात्मनः ।
दृष्ट्यायुस्तेजसां हानि-रधर्म्मश्च ततो भवेत् ॥"
इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः ॥)

रजिः, पुं, चन्द्रवंशीयराजविशेषः । यथा । "पुरूरवसो ज्येष्ठपुत्त्रश्चायुर्नामा । स राहोर्दुहितरमुपयेमे । तस्यां पञ्च पुत्त्रानुत्पादयामास । नहुषक्षत्त्रवृद्धरम्भरजिसंज्ञाः । रजेः पञ्च पुत्त्रशतान्यतुलवीर्य्यसाराण्यासन् ।" इति विष्णुपुराणे ४ अंशे । ८ । ९ । अध्यायौ ॥ (राज्यम् । कन्याविशेषे, स्त्री । यथा, ऋग्वेदे । ६ । २६ । ६ ।
"त्वं रजिं पिठीनसे दशस्यन् षष्टिं सहस्रा
शच्या सचाहन् ।"
"रजिं एतदाख्यां कन्यां वा राज्यं वा ।" इति तद्भाष्ये सायणः ॥ रज्जुः । यथा, ऋग्वेदे । १० । १०० । १२ । "रजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्य्यग्रं दुवस्युः ॥"
"रजिष्ठया ऋजुतमया रज्या रज्ज्वा ।" इति तद्भाष्ये सायणः ॥)

रजोबलं, क्ली, (रज इव बलति संवृणोतीति । बल् + अच् ।) अन्धकारः । इति त्रिकाण्डशेषः ॥

रजोरसं, क्ली, अन्धकारः । इति शब्दरत्नावली ॥

रजोहरः, पुं, (रजो हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ९ । इति अच् ।) रजकः । इति शब्दमाला ॥

रज्जुः, स्त्री, (सृज्यते रच्यते इति । सृज् + "सृजेरसुम् च ।" उणा० १ । १६ । इति उः । असुगागमश्च । धातुसकारलोपश्च । आगमसकारस्य जश्त्वम् । दकारः । तस्यापि चुत्वम् । जकारः । इत्युज्ज्वलः । अप्राणिजातेश्चारज्ज्वादीनामिति कथनात् न ऊङ् ।) बन्धनसाधनवस्तु । दड़ी इति भाषा ॥ तत्पर्य्यायः । शुल्वम् २ वराटकः ३ वटी ४ गुणः ५ इत्यमरः । २ । १० । २७ ॥ शुल्वा ६ । इति भरतधृतरत्नकोषः ॥ शुल्बम् ७ शुल्वः ८ शुल्बा ९ शुल्वी १० सुल्वम् ११ वराटः १२ वटाकरः १३ वटीगुणः १४ । इति टीकान्तरम् ॥ (तस्या अपहरणे दोषो यथा, मनौ । ११ । १६८ ।
"कार्पासकीटजीर्णानां द्विशफैकशफस्य च ।
पक्षिगन्धौषधीनाञ्च रज्ज्वाश्चैव त्र्यहं पयः ॥")
वेणी । इति मेदिनी । जे, १४ ॥ (प्रत्यङ्गविशेषः । यथा, सुश्रुते शारीरस्थाने ५ अध्याये ।
"रज्जवः सेवन्यः सङ्घाताः ॥")

रञ्जकं, क्ली, (रञ्जयतीति। रन्ज्+णिच्+ण्वुल्।) हिङ्गुलम्। इति राजनिर्घण्टः॥ (गुणादयोऽस्य हिङ्गुलशब्दे विज्ञेयाः॥)

रञ्जकः, पुं, (रञ्जयतीति। रन्ज्+णिच्+ण्वुल्।) कम्पिल्लकः। इति राजनिर्घण्टः॥ प्रीतिजनकः। वस्त्रादिरागकर्त्ता च। (अस्य गृहे भोजनं निषिद्धं यथा, मनौ। ४। २१६।

"चक्रती मौष्टिकानाञ्च चैलनिर्णेजकस्य च। रञ्जकस्य नृशंसस्य यस्य चोपपतिर्गृहे॥"

नाद्यादिति शेषः॥ पित्तान्तर्गतोऽग्निविशेषः। यथा,—

"यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति संज्ञा स रसस्य रागकृदुक्तः।" इति सुश्रुते सूत्रस्थाने २१ अध्यायः॥)

रञ्जनं, क्ली, (रज्यतेऽनेनेति। रन्ज्+करणे ल्युट्।) रक्तचन्दनम्। इति मेदिनी। ने, ११५॥ (अस्य पर्य्यायो यथा,—

"पत्तङ्गं रक्तसारञ्च सुरङ्गं रञ्जनन्तथा। पट्टरञ्जनमाख्यातं पत्तूरञ्च कुचन्दनम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) हिङ्गुलम्। इति राजनिर्घण्टः॥ (रन्ज्+णिच्। भावे ल्युट्। प्रीतिजननम्। यथा, रघौ। ४। १२।

"तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्॥")

रञ्जनः, पुं, (रञ्जयतीति। रन्ज्+णिच्+ल्युः।) रागजनकः। इति मेदिनी। ने, ११५॥ मुञ्जतृणम्। इति राजनिर्घण्टः॥

रञ्जनकः, पुं, (रञ्जन+कन्।) कट्फलः। इति राजनिर्घण्टः॥ (गुणादिविशेषोऽस्य कट्फलशब्दे विज्ञेयः॥)

रञ्जनद्रुः, पुं, (रञ्जयतीति। रन्ज्+णिच्+ल्युः। रञ्जनश्चासौ द्रुश्चेति।) चञ्चुकटचः। आच्-गाछ इति भाषा॥

रञ्जनी, स्त्री, (रञ्जन+ङीष्।) शुक्लारोचनिका। नीली। (अस्याः पर्य्यायो यथा,—

"नीली तु नीलिनी तूली कालदोला च नीलिका। रञ्जनी श्रीफली तुच्छा ग्रामीणा मधुपर्णिका। क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) मञ्जिष्ठा। इति मेदिनी। ने, ११५॥ शेफालिका। इति शब्दचन्द्रिका॥ हरिद्रा। (अस्याः पर्य्यायो यथा,—

"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा। मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिनामिका॥"

इति वैद्यकरत्नमालायाम्॥)

पर्प्पटी। इति राजनिर्घण्टः॥

रट, वाचि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रटति। इति दुर्गादासः॥

रटन्ती, स्त्री, (रट्यते पुण्यजनकत्वेन कथ्यते इति। रट्+बहुलकात् झच्। ङीप्।) गौणचान्द्रमाघीयकृष्णचतुर्द्दशी। तत्र अरुणोदयकाले स्नानं कर्त्तव्यम्। यथा। यमः।

"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्द्दशी। तस्यामुदयवेलायां स्नाता नावेक्षते यमम्॥"

उदयवेलायामरुणोदयवेलायाम्।

"अनर्काभ्युदिते काले माघे कृष्णचतुर्द्दशी। सतारयोमकाले तु तत्र स्नानं महाफलम्। स्नात्वा सन्तर्प्य तु यमान् सर्व्वपापैः प्रमुच्यते॥"

अत्र तिथितत्त्वात् गौणचान्द्रादरः। अत्रारुणोदयकाल एव स्नानं पूर्ब्बोक्तचतुर्द्दशयमतर्पणञ्च। यत्तु उदयवेलायां सूर्य्योदयवेलायां अनर्काभ्युदित इति दैवदर्शे लिखित व्याख्यानं तत् समुद्रकरभाष्यधृतसतारयोम इति इत्युत्तराद्धानवलोकनेनेति। इति तिथ्यादितत्त्वम्॥ किञ्च।

"अनर्काभ्युदिते काले स्नानं कुर्य्यात् सरिज्जले। शतजन्मकृतं पापं तत्क्षणादेव नश्यति। रटन्ती नाम विख्याता सर्व्वपापहरा शिवा॥"

इति मत्स्यसूक्ते ५५ पटलः॥

क्वचित् पुस्तके सरिज्जले इत्यत्र वह्निज्वले इति पाठः॥ * ॥ तत्र श्यामापूजाविधिर्यथा,—

"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्द्दशी। तस्यां संपूजयेत्तारां महाविभवविस्तरैः। चक्रवर्त्ती महाराजो भवत्येव न संशयः॥"

इति इन्द्रनीलतन्त्रे ७ पटलः॥

अपि च।

"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्द्दशी। तद्रात्रौ कालिकापूजा सर्व्वविघ्नोपशान्तये॥"

इति कालिकापुराणम्॥ * ॥

अपरञ्च।

"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्द्दशी। तस्यां प्रदोषसमये पूजयेन्मुण्डमालिनीम्॥"

इत्याचार्य्यचूडामणिकृततन्त्रतत्त्वार्णवधृतवचनम्॥ अन्यत् श्यामाशब्दे द्रष्टव्यम्॥

रटितं, त्रि, कथितम्। रटधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्। (भावे क्तः।) कथनमात्रे, क्ली॥ (यथा, राजतरङ्गिण्याम्। २। १७४।

"वनहरिरचितैः पदे पदे
स प्रतिभटतां पटहध्वनेर्द्दधानैः।
अमनुत रटितैश्च कर्करेटोः
परिगलितां गमनोन्मुखश्रियामाम्॥")

रठ, भाषणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) भाषणं कथनम्। रठति। इति दुर्गादासः॥

रण, रुति। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) रणति। रुति शब्दे। इति दुर्गादासः॥

रण, म गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, रणयति। इति दुर्गादासः॥

रणं, क्ली पुं, (रणन्ति शब्दायन्तेऽत्रेति। रण्+"ग्रहेति।"३।३।५८। इत्यप्। "क्वणिरणयोरुपसंख्यानम्।" इति काशिकोक्त्या अप्।) युद्धम्। इत्यमरः। २। ८। १०४॥ (यथा, मनौ। ७। ९०।

"न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून्। न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः॥"

रमणम्। यथा, ऋग्वेदे। ८। १७। १२।

"शाचिगो शाचिपूजनायं रणाय ते सुतः॥"

"रणाय रमणाय।" इति तद्भाष्ये सायणः॥ रमणीये, त्रि। यथा, तत्रैव। १। ११६। २१।

"एकस्यावस्तो रावतं रणाय वशमश्विना सनये सहस्रा।"

"रणाय रमणीयाय।" इति तद्भाष्ये सायणः॥)

रणः, पुं, (रण्+अप्।) शब्दः। क्वणः। इति मेदिनी॥ गतिः। इति शब्दरत्नावली॥

रणतूर्य्यं, क्ली, (रणस्य तूर्य्यम्।) युद्धवाद्यम्। तत्पर्य्यायः। संग्रामपटहः २ अभयडिण्डिमः ३। इति त्रिकाण्डशेषः॥

रणप्रियं, क्ली, (रणे प्रियम्।) उशीरम्। इति राजनिर्घण्टः॥

रणप्रियः, पुं, (रणः प्रियोऽस्य। तत्र मांसभक्षणासक्तत्वात्।) श्येनपक्षी। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते। १३। १४९। ८६।

"स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः॥"

युद्धप्रियमात्रे, त्रि। यथा, कामन्दकीये। १७।३३।

"रणप्रियः साहसिक आत्मसम्भावितस्तथा। विच्छिन्नधर्म्मकामार्थः क्रुद्धो मानी विमानितः॥")

रणमत्तः, पुं, (रणे रणं प्राप्य वा मत्तः।) हस्ती। इति शब्दमाला॥

रणमुष्टिः, पुं, विषमुष्टिक्षुपः। इति राजनिर्घण्टः॥

रणरङ्कः, पुं, (रणेषु रङ्को मन्दः।) गजकातरहस्ती। तत्पर्य्यायः। प्रतिमः २। इति हारावली। २०४॥

रणरणं, क्ली, उदाहनम्। इति त्रिकाण्डशेषः॥

रणरणः, पुं, (रणरण इति शब्दोऽस्त्यस्येति। अर्श आदित्वादच्।) मशकः। इति त्रिकाण्डशेषः॥ (रणे रणः शब्दो यस्य। रणगर्ज्जनशीले, त्रि। यथा,—

"अक्षादः करणो रणो रणरणो रागो रणो . रावणो
भूत्वा येन रमा रमा रमरमा रामा रमा सा रमा।
सश्रीमानदयो दयो दयदयो दायो दयो वेदयो
विष्णुर्ज्जिष्णुरभीरभीरभरभीराभीरभीसौरभिः॥"

इत्युद्भटः॥)

रणरणकः, पुं, उत्कण्ठा। इति हेमचन्द्रः। २। २२९॥ (यथा, उत्तररामचरिते प्रथमाङ्के।

"अये सेयं रणरणकदायिनी चित्रदर्शनादिरहभावना देव्याः स्वप्नोद्वेगं करोति॥")

रणसङ्कुलं, क्ली, (रणस्य सङ्कुलम्।) तुमुलम्। इत्यमरः। २। ८। १०६॥

रणालङ्करणः, पुं, (रणस्य अलङ्करणः।) कङ्कपक्षी। इति राजनिर्घण्टः॥

रण्डः, त्रि, (रम्+"अमन्तात् डः।" उणा० १। ११३। इति डः।) अर्द्धचर्म्मावच्छिन्नावयवः। धूर्त्तः। इति संक्षिप्तसारोणादिवृत्तिः॥

रण्डकः, पुं, (रण्ड इवेति। रण्ड+कन्।) अफलवृक्षः। इति शब्दचन्द्रिका॥

रण्डा, स्त्री, (रमन्तेऽत्रेति। रम्+"अमन्तात् डः।" उणा० १। ११३। इति डः। टाप्।) मूषिकपर्णी। इत्यमरः। २। ४। ८८॥ (यथा,
"हिङ्गुलात् सम्भवं सूतं पालिधारसमर्द्दितम्।
रण्डाशोधितगन्धश्च तेनैव कज्जलीकृतम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे हृद्रसोमनाथरसे॥) विधवा। राँड् इति भाषा॥ यथा। तिष्ठते रण्डा विकर्म्मिभ्यः स्वहृदयं यनक्तीत्यर्थः। इति संक्षिप्तसारे तिङन्तपादः॥

रण्डाश्रमी [न्] पुं, (रण्डो विफल आश्रमः सोऽस्यास्य। रण्डाश्रम+इनिः।) अष्टचत्वारिंशद्वत्सरोपरिभार्य्याविहीनः। यथा, भविष्यपुराणम्।
"चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि।
स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः॥"
इत्युद्वाहतत्त्वम्॥

रतं, क्ली, (रमणमिति। रम्+भावे क्तः।) मैथुनम्। इत्यमरः। २। ७। ५७॥ (यथा, आर्य्यासप्तशत्याम्। ५४६।
"विपरीतमपि रतं ते स्रोतो नद्या इवानुकूलमिदम्।
तटतरुमिव मम हृदयं समूलमपि वेगतो हरति॥"
तत्तु द्विविधम्। यथा, कामशास्त्रम्।
"बाह्यमाभ्यन्तरञ्चेति द्विविधं रतमुच्यते।
तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम्॥
द्वितीयं सुरतं साक्षान्नानाकारेण कल्पितम्॥")
गुह्यम्। इति मेदिनी। ते, ४६॥ अनुरक्ते, त्रि॥ (यथा, राजतरङ्गिण्याम्। ३। ५०५।
"तत्तुल्यगुणनिर्व्विण्णा तद्विपक्षस्तुतौ रता॥"
नियुक्तः। यथा, मनुः। २। २३५।
"यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत्।
तेष्वेव नित्यं शुश्रूषां कुर्य्यात् प्रियहिते रतः॥")

रतकीलः, पुं, (रते मैथुने कीलति परस्परं संबध्नातीति। कील्+कः।) कुक्कुरः। इति हेमचन्द्रः। ४। ३४६॥ (रतस्य कीलः।) सुरतकण्टकञ्च॥

रतकूजितं, क्ली, (रतस्य कूजितम्।) मैथुनकालीनवाक्। तत्पर्य्यायः। मणितम् २। इति हेमचन्द्रः॥

रतगुरुः, पुं, (रतस्य रते वा गुरुः।) पतिः। इति त्रिकाण्डशेषः। ६। ४४॥

रतज्वरः, पुं, (रतेन ज्वरोऽस्य।) काकः। इति त्रिकाण्डशेषः॥

रततालो, [न्] पुं, (रते तलति प्रतिष्ठां लभते इति। तल+णिनिः।) विड्गः। इति शब्दमाला॥

रतताली, स्त्री, (रते तालः प्रतिष्ठास्याः। ङीष्।) कुट्टनी। इति त्रिकाण्डशेषः॥

रतनारीचः, पुं, (रते नार्य्यां चिनोतीति। चि+डः।) नारीणां शीत्कारः। कुक्कुरः। स्मरः। इति मेदिनी। चे, २९॥ विड्गः। इति शब्दमाला॥

रतनिधिः पुं, (रतमेव निधिवत् गोप्यं यस्य।) खञ्जनः। इति शब्दरत्नावली॥

रतहिंकं, क्ली, (रतस्य अहिरत्र। शेषादिभाषेति कप्।) दिवसः। सुखस्नानम्। अष्टमङ्गलम्। इति मेदिनी। के, २१०॥

रतव्रणः, पुं, (रतेन व्रणोऽस्य। रतं व्रण इव कष्टदायकं यस्येति वा।) कुक्कुरः। इति हेमचन्द्रः। ४। ३४६॥

रतशायी, [न्] पुं (रतेन श्यति तनूकरोत्यात्मानमिति। शो+णिनिः।) कुक्कुरः। इति हेमचन्द्रः। ४। ३५६॥

रतहिण्डकः, पुं, (रते रतार्थं वा हिण्डते इति। हिण्ड्+ण्वुल्।) स्त्रीचौरः। इति त्रिकाण्डशेषः॥ लम्पटः। लोचा इति भाषा। तत्पर्य्यायः। विड्गः २ अलीकः ३ पल्लवः ४ द्रावकः ५ सुजङ्गः ६ चुम्बकः ७ षङ्गः ८ भृङ्गः ९ नारीतरङ्गकः १० खल्लिकः ११ रतनारीचः १२ बन्धकः १३ रतताली १४ कटारः १५ कामी १६ खेटी १७ नागरः १८ दासीप्रियः १९ कुण्डकीटः २०। इति शब्दमाला॥

रतान्दुकः, पुं, (रतार्थमन्दुक इव।) कुक्कुरः। इति हेमचन्द्रः। ४। ३४६॥

रतान्धी, स्त्री, (रते अन्धीव।) कुणभाटिः। इति त्रिकाण्डशेषः॥

रतामर्दः, पुं, (रते रतकाले आमर्द्दोऽस्य।) कुक्कुरः। इति शब्दमाला॥

रतायनी, स्त्री, (रतमेवायनं जीवनगतिर्यस्याः।) वेश्या। इति शब्दमाला॥

रतार्थिनी, स्त्री, (रतमर्थयत इति। अर्थ+णिनिः। ङीप्।) मैथुनाभिलाषिणी। इति हलायुधः॥

रतिः, स्त्री, (रम्यतेऽनया इति। रम्+क्तिन्।) कामदेवपत्नी॥ (अस्याः नामनिरुक्तिर्यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ४। ६।
"मनो मथ्नाति सर्व्वेषां पञ्चबाणेन कामिनीम्।
तन्नाम मन्मथस्तेन प्रवदन्ति मनीषिणः॥
तस्य पुंसो वामपार्श्वात् कामस्य कामिनी वरा।
बभूवातीव ललिता सर्व्वेषां मोहकारिणी॥
रतिर्बभूव सर्व्वेषां तां दृष्ट्वा सस्मितां सतीम्।
रतीति तेन तन्नाम प्रवदन्ति मनीषिणः॥")
तस्य उत्पत्तिः नामकारणं कामपत्नीत्वञ्च यथा,
दक्ष उवाच।
"मद्देहजेयं कन्दर्प मद्रूपगुणशालिनी।
एनां गृहीष्व भार्य्यार्थे भवतः सदृशी गुणैः॥
एषा तव महातेजाः सर्व्वदा सहचारिणी।
भविष्यति यथाकामं धर्म्मतो वशवर्त्तिनी॥
मार्कण्डेय उवाच।
इत्युक्त्वा प्रददौ दक्षो देहस्वेदजलोद्भवाम्।
कन्दर्पायाग्रतः कृत्वा नाम कृत्वा रतीति
ताम्॥
तां वीक्ष्य मदनो रामां रत्याख्यां सुमनोहराम्।
आत्मायुगेन विद्धोऽसौ मुमोह रतिरञ्जितः॥"
इति कालिकापुराणे ३ अध्यायः॥
अनुरागः। (यथा, भागवते। १। २। ८।
"नोत्पादयेद्‌ यदि रतिं श्रम एव हि केवलम्॥")
रतम्। (यथा, बृहत्संहितायाम्। ७४। १८।
"कामिनीं प्रथमयौवनान्वितां
मन्दवल्गुमृदुपीड़ितस्तनाम्।
उत्स्तनीं समवलम्ब्य या रतिः
सा न धात्रभवनेऽस्ति मे मतिः॥")
गुह्यम्। इति मेदिनी। ते। ४६॥ (अप्सरोविशेषः। यथा, महाभारते। १३। १९। ४५।
"विद्युता प्रशमी दान्ता विद्योता रतिरेव च।
एताश्चान्याश्च वै बह्व्यः प्रनृत्ताप्सरसः शुभाः॥"
प्रीतिः। यथा, रामायणे। १। १८। २४।
"तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः॥"
'रतिः प्रीतिः।' इति तट्टीकायां रामानुजः॥)
रतिबन्धा यथा,—
"न भवन्ति यदा नार्य्यस्तुष्टा बाह्यरते मताः।
नानाविधैस्तथा बन्धै रन्तव्याः कामिभिः स्त्रियः॥
पद्मासनो नागपाशो लतावेष्टोऽर्द्धसंपुटम्।
कुलिशं सुन्दरश्चैव तथा केशर एव च॥
हिल्लोलो नरसिंहोऽपि विपरीतस्तथापरः।
क्षुब्धो वै धेनुकश्चैवसुत्कण्ठस्तु ततः परम्।
सिंहासनो रतिनागो विद्याधरस्तु षोड़शः॥"
इति रतिमञ्जरी॥
एतेषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि॥

रतिकुहरं, क्ली, (रत्याः कुहरम्।) योनिः। इति त्रिकाण्डशेषः॥

रतिक्रिया, स्त्री, (रत्याः क्रिया।) मैथुनम्। तत्पर्य्यायः। संवेशनम् २। इति त्रिकाण्डशेषः॥ (यथा, कामन्दकीये नीतिसारे। २। २५।
"अग्निहोत्रोपचरणं जीवनञ्च स्वकर्म्मभिः।
धर्म्मोऽयं गृहिणां काले पर्व्ववर्ज्जं रतिक्रिया॥")

रतिगृहं, क्ली, (रत्याः गृहम्।) योनिः। इति त्रिकाण्डशेषः॥ रमणमन्दिरञ्च॥ (यथा, बृहत्संहितायाम्। ५३। १६।
"पञ्चाश्रमिणामभितं धान्यायुधवह्निरतिगृहाणाञ्च।
नेच्छन्ति शास्त्रकारा हस्तशताद्रुच्छ्रितं परतः॥")

रतिनागः, पुं, षोड़शरतिबन्धान्तर्गतपञ्चदशबन्धः। तस्य लक्षणं यथा,—
"पीड़येदूरुयुग्मेन कामुकं कामिनी यदि।
रतिनागः समाख्यातः कामिनीनां मनोरमः॥"
इति रतिमञ्जरी॥

रतिपतिः, पुं, (रत्याः पतिः।) कामदेवः। इत्यमरः॥ (यथा, महागणपतिस्तोत्रे। १०।

"पश्चात्पिप्यजमाश्रितो रतिपतिर्दवस्य रत्योत्-
पले ।
विभ्रत्या समसैव्यवं धनुरिषून् पौष्यान् वहन्
पञ्च च ॥")

देशविशेषस्य स्त्रीणां स्थानविशेषे तस्याविर्भावो यथा,—
"वाचि श्रीमाथुरीणां जनकजनपदस्थायिनीनां
कटाक्षे
दन्ते गौड़ाङ्गनानां सुललितजघने चोत्कल-
प्रेयसीनाम् ।
तैलङ्गीनां नितम्बे सजलघनरुचौ केरलीकेश-
पाशे
कार्णाटीनां कटौ च स्फुरति रतिपतिर्गुर्जरीणां
स्तनेषु ॥"
इति साहित्यदर्पणम् ॥

रतिपाशकः, पुं, (रतेः पाश इव । ततः स्वार्थे कन् ।) रतिबन्धविशेषः । यथा,—
"पीड़येदूरुयुग्मेन कामुको यदि सुन्दरीम् ।
रतिपाशस्तथाख्यातः कामिनीनां सुखावहः ॥"
इति स्मरदीपिका ॥

रतिप्रियः, पुं, (रतेः प्रियः ।) कामदेवः । इति शब्दरत्नावली ॥ सुरतप्रियश्च ॥ (स्त्री, शक्तिविशेषः । यथा, देवीभागवते । ७ । ३० । ६८ ।
"गोदावर्य्यां त्रिसन्ध्या तु गङ्गाद्वारे रति-
प्रिया ॥")

रतिमदा, स्त्री, (रतेर्मदोऽस्याः ।) अप्सराः । यथा,—
"स्वर्णानन्दा रतिमदाप्सरसः सुमदात्मजा ॥"
इति त्रिकाण्डशेषः ॥

रतिमन्दिरं, क्ली, (रतेर्मन्दिरमिव ।) योनिः । इति जटाधरः ॥ मैथुनगृहम् । यथा,—
"सञ्चारो रतिमन्दिरावधि सखीकर्णावधि
व्याहृतं
चेतः कान्तसमीहितावधि पदन्यासावधि
प्रेक्षितम् ।
हास्यं चाधरपल्लवावधि महामानोऽपि
मौनावधिः
सर्व्वं सावधि नावधिः कुलभुवां प्रेम्णः परं
केवलम् ॥"
इति रसमञ्जरी ॥

रतिमित्रः, पुं, (रतौ मित्रः सूर्य्य इव ।) रतिबन्धविशेषः । तस्य लक्षणं यथा,—
"पातयेदूरुयुग्मे च कामुकं यदि कामुकी ।
रतिमित्रस्तदाख्यातः कामिनीनां सुखावहः ॥"
इति रतिमञ्जरी ॥

रतिरमणः, पुं, (रत्या रमणः ।) कामदेवः । इति त्रिकाण्डशेषः ॥

रतिलक्षं, क्ली, (रतिं लक्षयतीति । लक्षि + अच् ।) निधुवनम् । इति हारावली । ५० ॥

रतिसत्वरा, स्त्री, (रतौ सत्वरा ।) चिरञ्जीवा । इति शब्दचन्द्रिका ॥ पिड़िङ्ग शाक इति भाषा ॥

रतिसुन्दरः, पुं, (रतौ सुन्दरः सुखावहः ।) रतिबन्धविशेषः । तस्य लक्षणं यथा,—
"नारीपदद्वयं कामी धारयेद्धृदये यदि ।
धृतकण्ठो रमेत् कामी बन्धः स्याद्रतिसुन्दरः ॥"
इति रतिमञ्जरी स्मरदीपिका च ॥

रतूः, स्त्री, (ऋतीयते इति । स्पर्द्धाद्यर्थक ऋत्-सौत्रधातुः + "ऋतेरम् च ।" उणा० १ । ६४ । इति कूः । अम् च ।) देवनदी । सत्यवाक् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रत्नोद्वहः, पुं, (रत्नं उद्वहति प्रापयतीति । उत् + वह् + अच् ।) कोकिलः । इति शब्दमाला ॥

रत्नं, क्ली, (रमयति हर्षयतीति । रम् + णिच् + "रमेस्त च ।" उणा० ३ । १४ । इति नः तकारश्चान्तादेशः ।) अश्मजातिः । मुक्तादि । तत्पर्य्यायः । मणिः २ । इत्यमरः ॥ (यथा, कुमारे । ५ । ४५ ।
"न रत्नमन्विष्यति मृग्यते हि तत् ॥")
स्वजातिश्रेष्ठः । इति मेदिनी ॥ (यथा, मार्कण्डेये । ८५ । ४५ ।
"स्त्रीरत्नमतिचार्व्वङ्गी द्योतयन्ती दिशस्त्विषा ।")
माणिक्यम् । वज्रम् । इति राजनिर्घण्टः ॥*॥

अथ रत्नोत्पत्तिकारणम् । यथा,—
सूत उवाच ।
"वक्ष्मि परीक्षां रत्नानां वलो नामासुरोऽभवत् ।
इन्द्राद्या निर्ज्जितास्तेन निर्जेतुं तैर्न शक्यते ॥
वरव्याजेन पशुतां याचितः स सुरैर्मखे ।
वलो ददौ स्वपशुतामतिसत्त्वो मखे हतः ॥
पशुवन्न विशेत् स्तम्भे स्ववाक्यपाशनियन्त्रितः ।
वलो लोकोपकाराय देवानां हितकाम्यया ॥
तस्य सत्त्वविशुद्धस्य सुविशुद्धेन कर्म्मणा ।
कायस्यावयवाः सर्व्वे रत्नबीजत्वमाययुः ॥
देवानामथ यक्षाणां सिद्धानां पवनाशिनाम् ।
रत्नबीजमयं ग्राहः सुमहानभवत्तदा ॥"*॥

अथ तस्याकरस्थानानि यथा,—
"तेषान्तु पततां वेगाद्विमानेन विहायसा ।
यद्यत् पपात रत्नानां बीजं क्वचन किञ्चन ॥
महोदधौ सरिति वा पर्व्वते कानने़ऽपि वा ।
तत्तदाकरतां यातं स्थानमाधेयगौरवात् ॥
तेषु रक्षोविषव्यालव्याधिघ्नान्यघहानि च ।
प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च ॥
वज्रमुक्तामणयः सपद्मरागाः समरकताः
प्रोक्ताः ।
अपि चेन्द्रनीलमणिवरवैदूर्य्याश्च पुष्परागाश्च ।
कर्केतनं सपुलकं रुधिराख्यसमन्वितं तथा
स्फटिकम् ।
विद्रुममणिश्च यत्नादुद्दिष्टं संग्रहे तज्ज्ञैः ॥*॥
आकारवर्णौ प्रथमं गुणदोषौ तत्फलं परीक्षा
च ।
मूल्यञ्च रत्नकुशलैर्व्विज्ञेयं सर्व्वशास्त्राणाम् ॥
कुलग्नेषूपनायन्ते यानि चोपहतेऽहनि ।
दोषैस्तान्युपयुज्यन्ते हीयन्ते गुणसम्पदा ॥
परीक्षापरिशुद्धानां रत्नानां पृथिवीभुजा ।
धारणं संग्रहो वापि कार्य्यः श्रियमभीप्सता ॥
शास्त्रज्ञाः कुशलाश्चापि रत्नभाजः परीक्षकाः ।
त एव मूल्यमात्राया वेत्तारः परिकीर्त्तिताः ॥"
इति गारुड़े ६८ अध्यायः ॥

विशेषरत्नपरीक्षा तत्तच्छब्दे द्रष्टव्या ॥*॥ चतुर्द्दश महारत्नानि यथा । शशकोश्चिन्नरथः तत्तनयः शशबिन्दुश्चतुर्द्दशमहारत्नश्चक्रवर्त्त्यभवत् । चतुर्द्दश महान्ति रत्नानि यस्य सः । रत्नानि तु स्वजातिश्रेष्ठानि धर्म्मसंहितोक्तानि ।
"चक्रं रथो मणिः खड़्गश्चर्म्म रत्नञ्च पञ्चमम् ।
केतुर्निधिश्च सप्तैवमप्राणानि प्रचक्षते ॥
भार्य्या पुरोहितश्चैव सेनानी रथकृच्च यः ।
पत्त्यश्वौ कलभश्चेति प्राणिनः सप्त कीर्त्तिताः ॥
चतुर्द्दशैतानि रत्नानि सर्व्वेषां चक्रवर्त्तिनामिति । इति विष्णुपुराणे ४ अंशे १२ अध्यायः तट्टीका च ॥ (अथ रत्नस्य निरुक्तिः ।
"धनार्थिनो जनाः सर्व्वे रमन्तेऽस्मिन्नतीव यत् ।
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ॥"
अथ रत्नस्य नामानि स्वरूपनिरूपणञ्च । यथा,—
"रत्नं क्लीवे मणिः पुंसि स्त्रियामपि निगद्यते ।
तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते ॥"
अथ रत्नानां निरूपणम् ।
"रत्नं गारुत्मतं पुष्परागो माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्य्यमित्यपि ॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ।
रत्नं हीरा । गारुत्मतं पान्ना । माणिक्यं पद्मरागः । इन्द्रनीलः लीला ।
विष्णुधर्म्मोत्तरेऽपि नवरत्ननिरूपणम् ।
मुक्ताफलं हीरकञ्च वैदूर्य्यं पद्मरागकम् ।
पुष्परागञ्च गोमेदं नीलं गारुत्मतन्तथा ।
प्रवालयुक्तान्येतानि महारत्नानि वै नव ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रत्नकन्दलः, पुं, (रत्नानां कन्दलो नवाङ्कुर इव ।) प्रवालम् । इति शब्दरत्नावली ॥

रत्नकूटः, पुं, (रत्नमयः कूटो शृङ्गमस्य ।) पर्व्वतविशेषः । इति शब्दरत्नावली ॥ (क्ली, द्वीपविशेषः । यथा, कथासरित्सागरे । २६ । ३ ।
"अस्ति द्वीपवरं मध्ये रत्नकूटाख्यमम्बुधेः ।
कृतप्रतिष्ठस्तत्रास्ते भगवान् हरिरब्धिना ॥")

रत्नगर्भः, पुं, (रत्नानि गर्भे लक्षणया अधिकारेऽस्य ।) कुवेरः । इति त्रिकाण्डशेषः ॥ (रत्नानि गर्भेऽस्य ।) समुद्रः । इति राजनिर्घण्टः ॥

रत्नगर्भा, स्त्री, (रत्नानि गर्भे मध्येऽस्याः ।) पृथिवी । इति हेमचन्द्रः । ४ । ३ ॥ उपचारात् गुणवत्पुत्रवती च ॥

रत्नद्वीपं, क्ली, (रत्ननिर्म्मितं द्वीपम् । शाकपार्थिववत् समासः ।) रत्ननिर्म्मितस्थानम् । यथा,—
"सिंहस्कन्धाधिसंरूढ़ां नानालङ्कारभूषिताम् ।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ॥
शङ्खचक्रधनुर्व्वाणलोचनत्रितयान्विताम् ।
रक्तवस्त्रपरीधानां बालार्कसदृशीतनूम् ।

नारदाद्यैर्म्मुनिगणैः सेवितां भवसुन्दरीम् ।
त्रिवलीवलयोपेतनाभिनालम्बणालिनीम् ॥
रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते ।
प्रफुल्लकमलारूढ़ां ध्यायेत्तां भवगेहिनीत् ॥"
इति तन्त्रसारे जगद्धात्रीध्यानम् ॥

रत्नधेनुः, स्त्री, (रत्ननिर्म्मिता धेनुः ।) महादानविशेषः । यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
रत्नधेनुरिति ख्यातं गोलोकफलदं नृणाम् ॥
पुण्यन्दिनमथासाद्य तुलापुरुषदानवत् ।
लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्पयेत् ॥
भूमौ कृष्णाजिनं कृत्वा लवणद्रोणसंयुतम् ।
धेनुं रत्नमयीं कुर्य्यात् सङ्कल्प्य विधिपूर्व्वकम् ॥
स्थापयेत् पद्मरागाणामेकाशीतिं मुखे बुधः ।
पुष्परागशतं तद्वद्घोणायां परिकल्पयेत् ॥
ललाटे हैमतिलकं मुक्ताफलशतं दृशोः ।
भ्रूयुगे विद्रुमशतं शुक्ती कर्णद्वये स्मृते ॥
काञ्चनानि तु शृङ्गाणि शिरो वज्रशतात्मकम् ।
ग्रीवायां नेत्रपटलं गोमेदकसमन्वितम् ॥
इन्द्रनीलशतं पृष्ठे वैदूर्य्यशतपार्श्वकौ ।
स्फाटिकैरुदरं कार्य्यं सौगन्धिकशतान् हृदि ॥
खुरा हेममयाः कार्य्याः पुच्छं मुक्तावलीमयम् ।
सूर्य्यकान्तेन्दुकान्तौ च घ्राणं कर्पूरचन्दनैः ॥
कुङ्कुमानि च रोमाणि रौप्यं नाभिञ्च कारयेत् ।
गारुत्मतशतं तद्वदस्थीनि परिकल्पयेत् ॥
तथान्यानि च रत्नानि स्थापयेत् सर्व्वसन्धिषु ।
कुर्य्याच्छर्करया जिह्वां गोमयञ्च गुड़ात्मकम् ॥
गोमूत्रमाज्यञ्च तथा दधि दुग्धं स्वरूपतः ।
पुच्छाग्रे चामरं दद्यात् समीपे ताम्रदोहनम् ॥
कुण्डलानि च हैमानि भूषणानि च शक्तितः ।
कारयेदेवमेवन्तु चतुर्थांशेन वत्सकम् ॥
तथान्यानि च सर्व्वाणि पादोक्षुमयांस्तथा ।
नानाफलानि सर्व्वाणि पञ्चवर्णवितानकम् ॥
एवं विरचनं कृत्वा तद्वद्धोमाधिवासनम् ।
ऋत्विग्भ्यो दक्षिणां दत्त्वा धेनुमामन्त्रयेत्ततः ।
गुड़धेनुवदावाह्य इदञ्चोदाहरेत्ततः ॥
त्वं सर्व्वदेवगणधाम यतः पठन्ति
रुद्रेन्द्रविष्णुकमलासनवामदेवाः ।
तस्मात् समस्तभुवनत्रयदेहयुक्ता
मां पाहि देवि भवसागरपीड्यमानम् ॥
आमन्त्र्य धेनुमभितः परिवर्त्त्य भक्त्या
दद्याद्द्विजाय गुरवे जलपूर्व्वकं ताम् ।
यः पुण्यमाप्य दिनमत्र कृतोपवासः
पापैर्विमुक्ततनुरेति पदं मुरारेः ॥
इति सकलविधिज्ञो रत्नधेनुप्रदानं
वितरति च विमानं प्राप्य देदीप्यमानम् ।
कलिकलुषविमुक्तो बन्धुभिः पुत्रपौत्रैः
स हि मदनस्वरूपः स्थानमभ्येति शम्भोः ॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने रत्नधेनुप्रदानिको नाम २९२ अध्यायः ॥

रत्ननिधिः, पुं, खञ्जनपक्षी । इति त्रिकाण्डशेषः ॥

रत्नपारायणं, क्ली, (परायणमेव । अण् । रत्नस्य पारायणम् ।) सर्व्वरत्नस्थानम् । यथा,—
"समुद्रोपत्यका हैमी पर्व्वताधित्यका पुरी ।
रत्नपारायणं नाम्ना लङ्केति मम मैथिलि ! ॥"
इति भट्टिः ॥

रत्नप्रभा, स्त्री, (रत्नानां प्रभात्र ।) जिनानां नरकविशेषः । यथा,—
"रत्नशर्करावालुकापङ्कधूमतमप्रभाः ।
महातमप्रभा चेत्यधोऽधो नरकभूमयः ॥"
इति हेमचन्द्रः ॥

रत्नमुख्यं, क्ली, (रत्नेषु मुख्यम् ।) हीरकम् । इति हेमचन्द्रः ॥

रत्नराट्, [ज्] क्ली, (रत्नेषु राजते इति । राज + क्विप् ।) माणिक्यम् । इति राजनिर्घण्टः । रत्नश्रेष्ठञ्च ॥

रत्नवती, स्त्री, (रत्नानि सन्त्यस्यामिति । रत्न + मतुप् । मस्य वः । उगित्वात् ङीप् ।) पृथिवी । इति शब्दमाला । (राज्ञो वीरकेतोः कन्या । यथा, कथासरित्सागरे । ८८ । ६ ।
"नन्दयन्त्यभिधानायां पत्न्यां तस्योदपद्यत ।
सुता रत्नवती नाम देवताराधनार्ज्जिता ॥")

रत्नवत्, त्रि ॥ (यथा, रघुः । ६ । ४ ।
"परार्द्ध्यवर्णास्तरणोपपन्न-
मासेदिवान् रत्नवदासनं सः ॥"
फलप्रदे च त्रि । यथा, ऋग्वेदे । ३ । २८ । ५ ।
"धारत्नवन्तममृतेषु जागृविम् ॥"
"रत्नवन्तं रत्नशब्देन स्वर्गादिलक्षणमुत्तमं फलमभिधीयते तद्वन्तं फलप्रदम् ।" इति तद्भाष्ये सायणः ॥)

रत्नवर्षुकं, क्ली, (रत्नानि वर्षितुं शीलमस्य । वृष् + "लषपतपदस्थेति ।" ३ । २ । १५४ । इति उकञ् ।) पुष्पकरथः । इति शब्दरत्नावली ॥ रत्नवर्षणशीले, त्रि ॥

रत्नसानुः, पुं, (रत्नानि सानौ प्रस्थे यस्य ।) सुमेरुपर्व्वतः । इत्यमरः । १ । १ । ५२ ॥

रत्नसूः, स्त्री, (रत्नानि सूते इति । सू प्रसवे + क्विप् ।) पृथिवी । इति हेमचन्द्रः । ४ । ३ ॥ (यथा, राजतरङ्गिण्याम् । १ । ४२ ।
"त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित् ।
तत्र गौरीगुरुः शैलो यत्तस्मिन्नपि मण्डलम् ॥"
रत्नप्रसवकारिणि, त्रि । यथा, रघुः । १ । ६५ ।
"न मामवति सद्वीपा रत्नसूरपि मेदिनी ॥")

रत्नाकरः, पुं, (रत्नानामाकरः उत्पत्तिस्थानम् ।) समुद्रः । इत्यमरः । १ । १० । २ ॥ (यथा, महाभारते । ३ । १०१ । २३ ।
"दुर्गं समाश्रित्य महोर्म्मिमन्तं
रत्नाकरं वरुणस्यालयं स्म ॥")
रत्नोत्पत्तिस्थानञ्च ॥ (स्वनामख्यातकविविशेषः । यथा, राजशेखरकृतश्लोकः ।
"मा स्म सन्तु हि चत्वारः प्रायो रत्नाकरा इमे ।
इतीव स कृतो धात्रा कविरत्नाकरोऽपरः ॥"
स तु ध्वनिगाथापञ्जिका-वक्रोक्तिपञ्चाशिका-हरविजयादिग्रन्थप्रणेता । अमृतभानुसुनुर्विद्याधिपत्यपरनामायं कविः काश्मीरदेशेऽवन्तिवर्म्मणो राज्यकाले समुत्पन्नः । तथा च राजतरङ्गिण्याम् । ५ । ३६ ।
"मुक्ताकणः शिवस्वामी कविरानन्दवर्द्धनः ।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्म्मणः ॥"
अवन्तिवर्म्मराज्यकालस्तु ७७७ शकाब्दादारभ्य ८०६ शकाब्दपर्य्यन्तमासीदतस्तत्कालीन एवायं कविरिति ज्ञायते । रत्नाकरप्रणीतं हरविजयाभिधं पञ्चाशत्सर्गात्मकं महाकाव्यं काश्मीरेषु प्रसिद्धमस्ति ।)

रत्नाङ्कः, पुं, (रत्नानामङ्कश्चिह्नं यस्मिन् ।) विष्णुरथः । इति शब्दरत्नावली ॥ (रत्नानामङ्कः ।) रत्नचिह्नञ्च ॥

रत्नाचलः, पुं, (रत्ननिर्म्मितः अचलः । शाकपार्थिववत् समासः ।) दानार्थमणिमयपर्व्वतः । यथा,—
"अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
मुक्ताफलसहस्रेण पर्व्वतः स्यादनुत्तमः ॥
मध्यमः पञ्चशतिकस्त्रिशतेनाधमः स्मृतः ।
चतुर्थांशेन विष्कम्भाः पर्व्वताः स्युः समन्ततः ॥
पूर्व्वेण वज्रगोमेदैर्द्दक्षिणेनेन्द्रनीलकैः ।
पुष्परागयुतैः कार्य्यो विद्वद्भिर्गन्धमादनः ॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विमलाचलः ।
पद्मरागसमो वर्णैरुत्तरेण तु विन्यसेत् ॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत् ।
तद्वदावाहनं कृत्वा वृक्षान् देवांश्च काञ्चनान् ॥
पूजयेत् पुष्पपानीयैः प्रभाते चाथ पूर्व्ववत् ।
पूर्व्ववद्गुरुऋत्विग्भ्यः फलमन्त्रानुदीरयेत् ॥
यथा देवगणाः सर्व्वे सर्व्वरत्नेष्ववस्थिताः ।
त्वञ्च रत्नमयो नित्यमतः पाहि महाचल ! ॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरिः ।
सदा रत्नप्रदानेन तस्मान्नः पाहि पर्व्वत ॥
अनेन विधिना यस्तु दद्याद्रत्नं महागिरिम् ।
स याति वैष्णवं लोकममरेश्वरपूजितः ॥
यावत् कल्पशतं साग्रं वसेच्चेह नराधिप ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥
ब्रह्महत्यादिकं किञ्चिद्यदत्रामुत्र वा कृतम् ।
तत् सर्व्वं नाशमायाति गिरिर्वज्रहतो यथा ॥"
इति मात्स्ये ९० अध्यायः ॥

रत्नाभरणं, क्ली, (रत्नविशिष्टमाभरणम् ।) मणिमयालङ्करणम् । जड़ाओ गहना इति भाषा ॥ तस्य धारणगुणाः ।
"धन्यं यशस्यमायुष्यं श्रीमद्व्यसनसूदनम् ।
हर्षणं काम्यमौजस्यं रत्नाभरणधारणम् ॥"
इति राजवल्लभः ॥

रत्निः, पुं, (ऋच्छति प्राप्नोत्यनेनेति । ऋ + "ऋतन्यञ्जीति ।" उणा० ४ । २ । इति कत्निच् ।) बद्धमुष्टिहस्तः । इत्यमरः । २ । ६ । ८६ ॥ मुटुम् हात इति भाषा ॥ स्त्रीपुंसयो

रत्नारत्नी इत्यन्ये। इति भरतः ॥ (यथा, महाभारते । ८ । ७२ । २७ ।
"अष्टरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्ज्जयः ।")
रत्यङ्गं, क्ली, (रतेरङ्गम् ।) योनिः । इति शब्दरत्नावली ॥
रथः, पुं. (रम्यतेऽनेनात्र वा । रम्+"हनिकुषिनीरमिकाशिभ्यः क्थन् ।" उणा० २ ।२ । इति क्थन् । अनुनासिकलोपश्च ।) कायः । (यथा, गीतायाम् ।
"आत्मानं रथिनं विद्धि शरीरं रथमेव च ।")
चरणः । वेतसवृक्षः । इति विश्वः ॥ (अस्य पर्य्यायो यथा,—
"वेतसो नम्रकः प्रोक्तो वाणीरो वञ्जुलस्तथा ।
अभ्रपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तिनिशवृक्षः । इति राजनिर्घण्टः ॥ चक्रविशिष्टयुद्धार्थयानम् । तत्पर्य्यायः । शताङ्गः २ स्यन्दनः ३ । इत्यमरः । २ । ८ । ५१ ॥ स्यन्दनमात्रम् । इत्यजयः ॥ (यथा, मनुः । ८ ।२९५ ।
"स चेत् तु पथि संरुद्धः पशुभिर्वा रथेन वा ।
प्रमापयेत् प्राणभृतस्तत्र दण्डोऽविचारितः ॥")
तद्द्वारा भ्रमणगुणाः ।
"हस्त्यश्वरथदोलाद्यैर्भ्रमणं वातकोपनम् ।
स्थिरीकरणमङ्गानां बल्यं वह्निविवर्द्धनम् ॥"
इति राजवल्लभः ॥ * ॥
रथविशेषाणां नामानि यथा,—
"युद्धार्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः ।
स क्रीडार्थः पुष्परथो देवार्थस्तु मरुद्रथः ॥
योग्यो रथो वैनायिकोऽध्वरथः परियानिकः ।
कर्णीरथः प्रवहणं डयनं रथगर्भकः ॥
अनस्तु शकटोऽथ स्यात् गन्त्री कम्बलिवाह्यकम् ।
अथ काम्बलवस्त्राद्यास्तैस्तैः परिवृते रथे ॥
नपाण्डुकम्बली यः स्यात् संवीतः पाण्डुकम्बलैः ।
स तु द्वैपो वैयाघ्रश्च यो वृतो द्वीपिचर्म्मणा ॥"
इति हेमचन्द्रः ।
गोलोकस्य रथो यथा,—
"प्रदत्तं विप्रपत्नीभिर्म्मिष्टमन्नं सुधोपमम् ।
बालकान् भोजयित्वा तु स्वयञ्च बुभुजे विभुः ॥
एतस्मिन्नन्तरे तत्र शातकुम्भरथं वरम् ।
ददृशुर्विप्रपत्न्यश्च पतन्तं गगनाद्धरौ ॥
रत्नदर्पणसंयुक्तं रत्नसारपरिच्छदम् ।
रत्नस्तम्भैर्न्निबद्धञ्च सद्रत्नकलसोज्ज्वलम् ॥
श्वेतचामरसंयुक्तं वह्निशुद्धांशुकान्वितम् ।
पारिजातप्रसूनानां मालाजालविराजितम् ॥
शतचक्रसमायुक्तं मनोयायि मनोहरम् ।
वेष्टितं पार्षदैर्द्दिव्यैर्व्वनमालाविभूषितैः ॥
पीतवस्त्रपरीधानै रत्नालङ्कारभूषितैः ।
नवयौवनसम्पन्नैः श्यामलैः सुमनोहरैः ॥
द्विभुजैर्म्मुरलीहस्तैर्गोपवेशधरैर्व्वरैः ।
शिखिपुच्छगुञ्जमालाबद्धवङ्किमचूडकैः ॥
अवरुह्य रथात्तूर्णं ते प्रणम्य हरेः पदम् ।
रथमारोहयां कर्त्तुमूचुस्तां सकामिनीः ॥
विप्रभार्य्या हरिं नत्वा जग्मुर्गोलोकमीप्सितम् ।
बभूवुर्गोपिकाः सद्यस्त्यक्त्वा मानुषविग्रहान् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १८ अध्यायः ॥
देव्या रथयात्रा यथा,—
ब्रह्मोवाच ।
"भूयस्त्वं संप्रवक्ष्यामि देव्याराधनमुत्तमम् ।
यत् कृत्वा सर्व्वकामानां व्याप्तिस्तुष्टिर्भविष्यति ॥
दन्तिदन्तमयैर्द्दण्डैर्हेमबद्धैः सुशोभनैः ।
विचित्रपद्मरागाद्यैर्म्मणिभिरुपशोभितैः ॥
रथस्तैः कारयेद्देव्या सप्तभौमं मनोरमम् ।
दुकूलवस्त्रसंछन्नमर्द्धचन्द्रोपशोभितम् ॥
घण्टाकिङ्किणिशब्दाढ्यं चामरैः कटकान्वितम् ।
पताकाध्वजशोभाढ्यं दर्पणैरुपशोभितम् ॥
तं रथं पूजयेच्छक्र जातीकुसुममल्लिकैः ।
पारिजातकपुष्पैश्च यक्षकर्द्दमचन्दनैः ॥
सुगन्धधूपितैः कृत्वा देवीं तत्र निवेशयेत् ।
प्रतिमां शोभनां वत्स ! महासुरभयङ्करीम् ॥
पूजयेद्रथविन्यस्तां सर्व्वमङ्गलमङ्गलाम् ।
दुर्गां कात्यायनी देवी वरदा विन्ध्यवासिनी ॥
निशुम्भशुम्भमथनी महिषासुरघातिनी ।
प्रसीदतु सदा मेऽस्तु यच्च मे वाञ्छितं हृदि ॥
अनेन बलिपूर्व्वेण नमस्कारयुतेन च ।
पूजयित्वा ततो नेया समस्ताचरगीतकैः ॥
पञ्चमी सप्तमी पूर्णा नवम्येकादशीषु च ।
तृतीयाशिववर्त्तिशदिवसेषूत्सवेषु च ॥
महानदीनदसंप्रपर्व्वतस्रवणेषु च ।
तत्र मण्डपविन्यासं महद्दारुविनिर्म्मितम् ॥
शैलं वा ऽऽप्सयं वापि कृत्वा वास्तुविचारितम् ।
सर्व्वलक्षणसंपूर्णं सर्व्वशोभासमन्वितम् ॥
पूर्व्वं च कारयेच्छक्र पश्चाद्यात्रां प्रचक्रिरे ।
महाजनपदोपेतां महास्त्रीभिः ससङ्कुलाम् ॥
सर्व्वान्नपाननैवेद्यैः समस्तैरपि पूजयेत् ।
दद्याद्बलिं शक्र सर्व्वं सर्व्वदिक्षु समन्ततः ॥
भूयो वेतालसंघस्य मन्त्रेणानेन सुव्रत ! ।
रक्ष मां निजभूतेभ्यो बलिं गृह्ण सदा प्रियम् ॥
मातर्मातर्वरे देवि ! सर्व्वकामार्थसाधिनि ।
अनेन बलिदानेन सर्व्वकामान् प्रयच्छ मे ॥
एवं दत्त्वा बलिं शक्र तथा देव्यावतारयेत् ।
विन्यसेद्भद्रपीठे तु मण्डलैरुपशोभिताम् ॥
तत्रस्थां पूजयेद्देवीं हेमरूप्यैश्च ताम्रजैः ।
कलसैस्तु सहस्रेण गन्धोदकसुपूरितैः ॥
समस्तफलसम्पूर्णैर्यज्ञियैरथ पल्लवैः ।
स्नापयेदेकमेकेन रत्नगर्भैर्न्नवैर्दृढैः ॥
वेदमङ्गलशब्देन शङ्खवादित्रनिस्वनैः ।
वेणुवीणामृदङ्गैश्च घण्टाकिङ्किणिरावणैः ॥
स्नापयित्वा ततो देवीं निर्म्मञ्छनकैः शुभैः ।
गोमयादिकृतैः पश्चैर्दीपवर्त्त्या विशोधितैः ॥
स्वस्तिकैर्नन्दिकावर्त्तैः शङ्खैर्नीलोत्पलोत्पलैः ।
यवशाल्यङ्कुरोद्भिन्नैर्यवाचारैर्निमज्जयेत् ॥
प्रत्येकञ्च दहेद्रूपं प्रत्येकं कलसैः स्नपेत् ।
तथा कर्पूरचोदेन चन्दनैः कुङ्कुमेन च ॥
गोरोचनासमेतेन देवीमालिप्य पूजयेत् ॥
हेमजैर्नातिजैर्माल्यै रत्नमाल्यैरनेकधा ।
वासोभिः सुमनैश्चित्रैः पुनर्धूपं समुत्क्षिपेत् ॥
भक्षयेत तथा कन्या द्विजातीनथ दुःखितान् ।
भक्ष्यभोज्यान्नपानेन तत्र सर्व्वांश्च प्रीणयेत् ॥
भोजयित्वा क्षमायेत देवि मे प्रीयतामिति ।
रथे कृत्वा तथा देवीं पुनरेव गृहं नयेत् ॥
महता जनसंघेन समस्तविभवान्वितैः ।
शान्तरेणुपथं सर्व्वं पुष्पदूर्व्वाक्षतैर्ज्जलैः ॥
प्रक्षिप्यमाणैः कन्याभिः स्त्रीभिर्मङ्गलवादिभिः ।
सलिलेन यथा पांशुं कृत्वा पङ्कं प्रचक्रिरे ॥
पुरशोभां पथे शोभां द्वारशोभां गृहे गृहे ।
कारयीत तथा शक्र सर्व्वबाधां निवारयेत् ॥
अच्छेद्यास्तरवस्तस्मिन् प्राणिहिंसां विवर्ज्जयेत् ।
बन्धनस्था विमोक्तव्या बध्याः क्रोधादिशत्रवः ॥
अकालकौमुदीं शक्र रथयात्रान्तु कारयेत् ।
सर्व्वदा सर्व्वदेवैस्तु शङ्कराद्यैः प्रतिष्ठिता ॥
रथयात्रा तदा शक्र सुरैः स्वर्गे सदा कृता ।
तथा किन्नरगन्धर्व्वैर्भूर्पातालनिवासिभिः ॥
रथयात्राप्रभावेण मोदन्ते दिवि देवताः ।
आदित्यो रथयात्राकृद्रथेन नभसः क्रमेत् ॥
देव्यो दिव्यविमानस्था रथयात्राप्रभावतः ।
क्रीडन्ते विविधैर्भोगैः सर्व्वातङ्कविवर्जिताः ॥
तथा त्वमपि देवेन्द्र ! रथयात्राकरो भव ।
शिवायाः शिवदायास्तु परमेण समाधिना ॥
अगस्त्य उवाच ।
रथयात्राकृतं पुण्यं ब्रह्मणो वासवस्य तु ।
पूर्व्वं यत् कथितं तात तत्ते सर्व्वं मयाखिलम् ॥
श्रावितं नात्र सन्देहो देवीमाहात्म्यमुत्तमम् ।
यः पठेत् शृणुयाद्वापि भक्तिमान् नृपसत्तम ॥
स सुखं यशः सौभाग्यं पुत्त्रप्राप्तिमथेप्सिताम् ।
लभते नात्र सन्देह इत्येवं ब्रह्मणोऽब्रवीत् ॥
स्वबलेन कृते राज्ये पुरा शक्रस्य कीर्त्तिता ।
धनदस्य पुरीप्राप्तिर्व्वरुणस्य च वायुना ॥
हृते स्थाने कृता तेन तथा श्रुत्वा च निर्ऋतेः ।
भुञ्जते परया हृष्ट्या पुरीर्भोगवतीः शुभाः ॥"
इति देवीपुराणे रथयात्राविधिमाहात्म्यम् ३९ अध्यायः ॥ * ॥ नवग्रहाणां रथा यथा,—
"योजनानां सहस्राणि भास्करस्य रथो नव ।
ईशादण्डस्तथैवास्माद्द्विगुणो द्विजसत्तमाः ॥
सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि तु ।
योजनानान्तु तस्याक्षं तत्र चक्रं प्रतिष्ठितम् ॥
त्रिनाभिमतिपञ्चारे षण्णेमिन्यक्षयात्मके ।
संवत्सरस्तु यत् कृत्स्नं कालचक्रं प्रतिष्ठितम् ॥
चत्वारिंसत्सहस्राणि द्वितीयोऽक्षो विवस्वतः ।
पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य द्विजोत्तमाः ॥
अक्षप्रमाणमुभयोः प्रमाणं तत्पराह्वयोः ।
भूयोऽक्षस्तद्युगार्द्धं च ध्रुवाधारं रथस्य वै ॥
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले ।
हयाश्च सप्त च्छन्दांसि तन्नामानि निबोधत ॥
गायत्त्री च बृहत्युष्णिक् जगती पंक्तिरेव च ।
अनुष्टुप् त्रिष्टुबित्युक्ताश्छन्दांसि हरयो रवेः ॥"१॥
इति कौर्म्मे ३८ अध्यायः ॥

“रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः।
वामदक्षिणतो युक्ता दश तेन निशाकरः।
वीथ्याश्रयाणि चरति नक्षत्राणि रविर्यथा ॥२॥
सोमपुत्त्रस्य चाष्टाभिर्वाजिभिर्वायुवेगिभिः।
वारिजैः स्यन्दनो युक्तस्तेनासौ याति सर्व्वतः ॥३॥
शुक्रस्य भूमिजैरश्वैः स्यन्दनो दशभिर्वृतः ॥ ४ ॥
अष्टाभिश्चाथ भौमस्य रथो हैमः सुशोभनः ।५।
बृहस्पतेरथाष्टाश्वः स्यन्दनो हेमनिर्म्मितः ॥६॥
रथस्तमोमयो ह्यश्वो मन्दस्यायसनिर्म्मितः । ७।
स्वर्भानोर्भास्करारेश्च तथा षड्भिर्हयैर्वृतः॥८॥९॥
एते महाग्रहाणां वै समाख्याता रथा नव।
सर्व्वे ध्रुवे महाभागा निबद्धा वातरश्मिभिः ॥
ग्रहर्क्षताराधिष्ण्यानि ध्रुवे बद्धान्यशेषतः।
भ्रमन्ति भ्रामयन्त्येनं सर्व्वाण्यनिलरश्मिभिः ॥”

इति कौर्म्मे ४० अध्यायः ॥ * ॥

श्रीजगन्नाथदेवस्य रथः यात्राशब्दे द्रष्टव्यः ॥*॥
(त्रिपुरदहनार्थं महेश्वरादिष्टा देवा येन प्रकारेण तद्रथं निर्म्मितवन्तस्तदाह। मात्स्ये। १३३। १३—७१।
“त्रिनेत्र एवमुक्तस्तु देवैः शक्रपुरोगमैः।
उवाच देवान् देवेशो वरदो वृषवाहनः ॥
अपगच्छतु वो देवा महद्दानवजं भयम्।
तदहं त्रिपुरं धक्ष्ये क्रियतां यद्ब्रवीमि तत् ॥
यदीच्छथ मया दग्धुं तत् पुरं सहदानवम्।
रथमौपयिकं मह्यं सज्जयध्वं किलास्य ते ॥
दिग्वाससा तथोक्तास्ते सपितामहकाः सुराः।
तथेत्युक्त्वा महादेवं चक्रुस्ते रथमुत्तमम् ॥
धरां कूवरकौ द्वौ तु रुद्रपार्श्वचरावुभौ।
अधिष्ठानं शिरो मेरोरक्षो मन्दर एव च ॥
चक्रुश्चन्द्रञ्च सूर्य्यञ्च चक्रे काञ्चन-राजते।
कृष्णपक्षं शुक्लपक्षं पक्षद्वयमपीश्वराः ॥
रथनेमिद्वयं चक्रुर्देवा ब्रह्मपुरःसराः।
आदिद्वयं पक्षयन्त्रं यन्त्रमेताश्च देवताः ॥
कम्बलाश्वतराभ्याञ्च नागाभ्यां समवेष्टितम्।
भार्गवश्चाङ्गिराश्चैव बुधोऽङ्गारक एव च ॥
शनैश्चरस्तथा चात्र सर्व्वे ते देवसत्तमाः।
वरूथं गगनं चक्रुश्चारुरूपं रथस्य ते ॥
कृतं द्विजिह्वनयनं त्रिवेणु शातकौम्भिकम्।
मणिमुक्तेन्द्रनीलैश्च वृतं ह्यष्टमुखैः सुरैः ॥
गङ्गा सिन्धुः शतद्रुश्च चन्द्रभागा इरावती।
वितस्ता च विपाशा च यमुना गण्डकी तथा ॥
सरस्वती देविका च तथा च शरयूरपि।
एताः सरिद्वराः सर्व्वा वेणुसंज्ञाः कृता रथे ॥
धृतराष्ट्राश्च ये नागास्ते च वेश्यात्मकाः कृताः।
वासुकेः कुलजा ये च ये च रैवतवंशजाः ॥
ते सर्पा दर्पसम्पूर्णाश्चापतूणेष्वनूनगाः।
अवतस्थुः शरा भूत्वा नानाजातिशुभाननाः ॥
सुरसा सरमा कद्रूर्विनता शुचिरेव च।
तृषा बुभुक्षा सर्व्वोग्रा मृत्युः सर्व्वशमस्तथा ॥
ब्रह्मवध्या च गोवध्या बालवध्या प्रजाभयाः।
गदा भूत्वा शक्तयश्च तदा देवरथेऽभ्ययुः ॥
युगं कृतयुगञ्चात्र चातुर्होत्रप्रयोजकाः।
चतुर्व्वर्णाः सलीलाश्च बभूवुः स्वर्णकुण्डलाः ॥
तद्युगं युगसङ्काशं रथशीर्षे प्रतिष्ठितम्।
धृतराष्ट्रेण नागेन बद्धं बलवता महत् ॥
ऋग्वेदः सामवेदश्च यजुर्व्वेदस्तथापरः।
वेदाश्चत्वार एवैते चत्वारस्तुरगा भवन् ॥
अन्नदानपुरोगाणि यानि दानानि कानिचित्।
तान्यासन् वाजिनां तेषां भूषणानि सहस्रशः ॥
पद्मद्वयं तक्षकश्च कर्कोटक-धनञ्जयौ।
नागा बभूवुरेवैते हयानां बालबन्धनाः ॥
ओङ्कारप्रभवास्ता वा मन्त्रयज्ञक्रतुक्रियाः।
उपद्रवाः प्रतीकाराः पशुबन्धेष्टयस्तथा ॥
यज्ञोपवाह्यान्येतानि तस्मिन् लोकरथे शुभे।
मणि-मुक्ता-प्रवालैस्तु भूषितानि सहस्रशः ॥
प्रतोदोङ्कार एवासीत् तदग्रञ्च वषट्कृतम्।
सिनीवाली कुहू राका तथा चानुमती शुभा ॥
योक्त्राण्यासंस्तुरङ्गाणामपसर्पणविग्रहाः ॥
कृष्णान्यथ च पीतानि श्वेतमाञ्जिष्ठकानि च।
अवदाताः पताकास्तु बभूवुः पवनेरिताः ॥
ऋतुभिश्च कृतः षड्भिर्धनुः संवत्सरोऽभवत्।
अजरा ज्याभवच्चापि साम्बिका धनुषो दृढा ॥
कालो हि भगवान् रुद्रस्तञ्च संवत्सरं विदुः।
तस्मादुमा कालरात्रिर्धनुषो ज्याऽजराभवत् ॥
सगर्भं त्रिपुरं येन दग्धवान् स त्रिलोचनः।
स इषुर्विष्णुसोमाग्नि-त्रिदैवतमयोऽभवत् ॥
आननं ह्यग्निरभवच्छल्यं सोमस्तमोनुदः।
तेजसः समवायोऽथ चेषोस्तेजो रथाङ्गधृक् ॥
तस्मिंश्च वीर्य्यवृद्ध्यर्थं वासुकिर्नागपार्थिवः।
तेजः संवसनार्थं वै मुमोचातिविषो विषम् ॥
कृत्वा देवा रथञ्चापि दिव्यं दिव्यप्रभावतः।
लोकाधिपतिमभ्येत्य इदं वचनमब्रुवन् ॥
संस्कृतोऽयं रथोऽस्माभिस्तव दानवशत्रुजित्।
इदमापत्परित्राणं देवान् सेन्द्रपुरोगमान् ॥
तं मेरुशिखराकारं त्रैलोक्यरथमुत्तमम्।
प्रशस्य देवान् साध्विति रथं पश्यति शङ्करः ॥
मुहुर्दृष्ट्वा रथं साधु साध्वित्युक्त्वा मुहुर्म्मुहुः।
उवाच सेन्द्रानमरानमराधिपतिः स्वयम् ॥
यादृशोऽयं रथः कॢप्तो युष्माभिर्मम सत्तमाः।
ईदृशो रथसम्पत्त्या यन्ता शीघ्रं विधीयताम् ॥
इत्युक्ता देवदेवेन देवा विद्धा इवेषुभिः।
अवापुर्महतीं चिन्तां कथं कार्य्यमिति ब्रुवन् ॥
महादेवस्य देवोऽन्यः को नाम सदृशो भवेत्।
मुक्त्वा चक्रायुधं देवं सोऽपास्य इषुमाश्रितः ॥
धुरि युक्ता इवोक्षाणो घटन्त इव पर्व्वतैः।
निश्वसन्तः सुराः सर्व्वे कथमेतदिति ब्रुवन् ॥
अहं सारथिरित्युक्त्वा जग्राहाश्वांस्ततोऽग्रजः ॥
ततो देवैः सगन्धर्व्वैः सिंहनादो महान् कृतः।
प्रतोदहस्तं सम्प्रेक्ष्य ब्रह्माणं सूततां गतम् ॥
भगवानपि विश्वेशो रथस्थे वै पितामहे।
सदृशः सूत इत्युक्त्वा चारुरोह रथं हरः ॥
आरोहति रथं देवे ह्यश्वा हरभरातुराः।
जानुभिः पतिता भूमौ रजोग्रासञ्च ग्रासिताः ॥
देवो दृष्ट्वाथ वेदांस्तानभीरुग्रहयान् भयात्।
उज्जहार पितृनार्त्तान् सुपुत्त्र इव दुःखितान् ॥
ततः सिंहरवो भूयो बभूव रथभैरवः।
जयशब्दश्च देवानां सम्बभूवार्णवोपमः ॥
तदोङ्कारमयं गृह्य प्रतोदं वरदः प्रभुः।
स्वयम्भुः प्रययौ वाहाननुमन्त्र्य यथाजवम् ॥
ग्रसमाना इवाकाशं मुष्णन्त इव मेदिनीम्।
मुखेभ्यः ससृजुः श्वासानुच्छ्वसन्त इवोरगाः ॥
स्वयम्भुवा चोद्यमानाश्चोदितेन कपर्द्दिना।
व्रजन्ति तेऽश्वा जवनाः क्षयकाल इवानिलाः ॥
ध्वजोच्छ्रयविनिर्म्माणे ध्वजयष्टिमनुत्तमाम्।
आक्रम्य नन्दी वृषभं तस्थौ तस्मिञ्छिवेच्छया ॥
भार्गवाङ्गिरसौ देवौ दण्डहस्तौ रविप्रभौ।
रथचक्रे तु रक्षेते रुद्रस्य प्रियकाङ्क्षिणौ ॥
शेषश्च भगवान् नागः अनन्तोऽन्तकरोऽरिणाम्।
शरहस्तो रथं पाति शयनं ब्रह्मणस्तदा ॥
यमस्तूर्णं समास्थाय महिषञ्चातिदारुणम्।
द्रविणाधिपतिर्व्यालं सुराणामधिपो द्विपम् ॥
मयूरं शतचन्द्रञ्च कूजन्तं किन्नरं यथा।
गुह आस्थाय वरदो जुगोप मरथं पितुः ॥
नन्दीश्वरश्च भगवान् शूलमादाय दीप्तिमत्।
पृष्ठतश्चापि पार्श्वाभ्यां लोकस्य क्षयकृद्यथा ॥
प्रमथाश्चाग्निवर्णाभाः साग्निज्वाला इवाचलाः।
अनुजग्मू रथं शार्व्वं नक्रा इव महार्णवम् ॥
भृगुर्भरद्वाज-वसिष्ठ-गौतमाः
क्रतुः पुलस्त्यः पुलहस्तपोधनाः।
मरीचिरत्रिर्भगवानथाङ्गिराः
पराशरागस्त्यमुखा महर्षयः ॥
हरमजितमजं प्रतुष्टुवु-
र्वचनविशेषैर्विचित्रभूषणैः।
रथस्त्रिपुरे सकाञ्चनाचलो
व्रजति सपक्ष इवाद्रिरम्बरे ॥
करिगिरिरविमेघसन्निभाः
सजलपयोदनिनादनादिनः।
प्रमथगणाः परिवार्य्य देवगुप्तं
रथमभितः प्रययुः सदर्पयुक्ताः ॥
मकर-तिमि-तिमिङ्गिलावृतः
प्रलय इवातिसमुद्धतोऽर्णवः।
व्रजति रथवरोऽति भास्वरो
ह्यशनिनिपातपयोदनिस्वनः ॥”*।)
अथ ज्योतिर्व्विदाभरणे रथकर्म्माह।
“लोलमैत्रजधुनिष्णुकभेषु
स्यन्दनाखिलविधानमथाहुः।
सौनसद्ध्रुवशान्तुतपस्ये
साधुराश्विवति साधुभिरङ्ग ॥”
अथ रथचक्रमाह।
“उष्णवृष्णिकरकीर्णपुरश्री-
द्दियम्बकवलयं वलयस्य।
सप्तभागनिचितभ्रममग्रा-
दाविमध्यमगसो नवभागम् ॥
अग्रभे भवति संकलिरन्तः-
कूवरोडुनि जयोऽथ रथाङ्गे।

सन्धिभेऽर्थक्षतिरन्तरसन्धौ
भीतिरिष्टमनसो ननु गर्भे ।"

अथ मुहूर्त्तगणपतौ रथकृत्यम् ।

"पुष्ये पुनर्व्वसुज्येष्ठानुराधा रेवती द्वयोः ।
श्रवणादित्रिभे हस्तत्रितये रोहिणीमृगे ।
सार्के सौम्यदिने सौम्यविलग्ने रथकर्म्म सत् ॥"

अथ ज्योतिःसागरे रथचक्रम् ।

"रथाकारं लिखेच्चक्रं भानुभादौ विलोकयेत् ।
रथाग्रे त्रीणि रत्नानि दृष्टिमार्गे प्रदापयेत् ॥
षडङ्गे मृत्युर्ज्जयं चक्रे सन्धिदण्डे महद्भयम् ।
रथाग्रे च महोत्पातं मध्ये चैव सुखप्रदम् ॥"

इत्यार्य्येषु ज्योतिर्व्विदाभरणेषु कृताः शुभा दिशः ॥ * ॥ अस्यार्थः । अथानन्तरं धीराः स्यन्दनानां रथानां अखिलं सम्पूर्णं विधानं कार्य्यमाहुः कथयन्ति । केषु लोलसंज्ञानि स्वाति पुनर्व्वसुः श्रवणा धनिष्ठा शतभिषा एतानि । मैत्रसंज्ञानि मृगशिरा रेवती चित्रा अनुराधा एतानि । लघुसंज्ञानि हस्ता अश्विनी पुष्या अभिजित् एतानि । निष्णुरिन्द्रस्तद्भं ज्येष्ठा को ब्रह्मा तद्भं रोहिणी एतेषु नक्षत्रेषु । पुनः केषु येनसद्दृग्गषु इनः सूर्य्यः तेन सह वर्त्तमानेषु । सतां शुभग्रहाणां दृग्षु वारेषु । पुनः कस्मिन् साधुराशिवति शुभग्रहराशियुक्ते अङ्गे लग्ने सति । पुनः कैः बधा स्वौ सप्तमं स्थानं अम्बु चतुर्थं तपः नवमं एतद्भवनस्थैः साधुभिः शुभग्रहैरिति । अथ रथचक्रे नक्षत्रस्थापनम् । उष्णेति । उष्णदृष्टिः सूर्य्यस्तस्य करैः किरणैः कीर्णं व्याप्तं पुरं कम्रामकलीयस्वभागप्रदेशं यस्य तच्च तदृक्षचेति तस्मात् अर्थात् सूर्य्या क्रान्तनक्षत्रात् अनसः शकटस्य वलयचक्रं तस्याग्रात् अग्रभागमारभ्य आविमध्यं मध्यभागपर्य्यन्तं सुधिया ऋक्षवलयं भचक्रं देयं न्यासीकर्त्तव्यं किम्भूतं ऋक्षवलयं नवभागं नवभिर्भागैः स्थितमिति यावत् । पुनः किंभूतं सव्यभागनिचितभ्रमं वामभागेन व्याप्तभ्रमणमिति । अथास्य फलम् । अनसः शकटस्य अग्रभे अग्रगतवर्त्तमाने चन्द्रनक्षत्रे सङ्कुलिः युद्धं भवति । कूवरोडुनि युगन्धरगते वर्त्तमाननक्षत्रे अन्तो क्षतिः मरणं भवति । रथाङ्गे चक्रयुग्मे जयो भवति । सन्धिभे सन्धिगतनक्षत्रे अर्थक्षतिः द्रव्यहरणं भवति । अन्तरसन्धौ मध्यसन्धानगतनक्षत्रे भीतिर्भयो भवति । गर्भे मध्यभागगतनक्षत्रे इष्टं शुभं भवति । ननु निश्चितमिति । अन्यत् सुगमम् ।

रथकः, पुं, (रथ इव प्रतिकृतिः । कन् ।) मन्दिरावयवविशेषः । यथा,—

"अष्टांशेन गर्भस्य रथकानान्तु निर्गमः ।
परिधेर्गुणभागेन रथकांस्तत्र कल्पयेत् ॥
तत्तृतीयेन वा कुर्य्यात् रथकानान्तु निर्गमम् ।
रामत्रयं स्थापनीयं रथकत्रितये सदा ॥"

इति श्रीहरिभक्तिविलासे २० विलासः ।

रथकट्या, स्त्री, (रथानां समूह इति । "जनखलादिर्णारथेति ।" इति मुग्धबोधसूत्रेण कट्यः । टाप् ।) रथसमूहः । तत्पर्य्यायः । रथव्रजः २ । इत्यमरः । २ । ८ । ५५ ॥ (रथकड्या । इति पाणिनिः । ४ । २ । ५१ ॥)

रथकरः, पुं, (करोतीति । कृ + अच् । रथानां करः ।) रथकारः । इति शब्दरत्नावली ॥

रथकारः, पुं, (रथं करोतीति । कृ + अण् ।) रथनिर्म्माणकर्त्ता । छुतार इति भाषा । स तु करणीगर्भे माहिष्याज्जातः । (यथा, वाजसनेयसंहितायाम् । ३० । ६ ।

"स्तोकवर्णं प्रमदे कुमारीपुत्रं
मेधायै रथकारं धैर्य्याय तक्षाणम् ।"

"रथकारं माहिष्येण करिण्यां जातम् ।" इति तद्भाष्ये महीधरः ॥) तत्पर्य्यायः । तक्षा २ वर्द्धकिः ३ त्वष्टा ४ काष्ठतट् ५ । इत्यमरः ॥ सूत्रधारः ६ वड्ढका ७ रथकरः ८ काष्ठतक्षकः ९ । इति शब्दरत्नावली ॥

रथकुटुम्बी, [न्] पुं, (रथं कुटुम्बयितुं धारयितुं शीलमस्य । णिनिः । यद्वा, रथ एव कुटुम्बम् । तदस्यास्तीति । इनिः ।) सारथिः । इत्यमरः । २ । ८ । ६० ॥

रथक्रान्तः, पुं, (रथवत् क्रान्तं क्रमणमस्य ।) तालविशेषः । यथा,—

"अश्वक्रान्तो रथक्रान्तो विष्णुक्रान्तस्ततः परः ।
सूर्य्यक्रान्तो विधुक्रान्तो वलभिन्नागपञ्चकः ॥
इति पञ्चमहीनानां संज्ञाः सप्त क्रमान्मताः ॥"

इति सङ्गीतरत्नाकरः ॥

रथगर्भकः, पुं, (रथो गर्भोऽस्य ।) स्कन्धवाह्ययानम् । नररथः । तत्पर्य्यायः । कर्णीरथः २ प्रवहणम् ३ डयनम् ४ । इति हेमचन्द्रः ॥

रथगुप्तिः, स्त्री, परप्रहरणाभिघातरक्षार्थं रथस्य सन्नाहवदावरणकाष्ठादिद्रव्यम् । रथस्य गुप्तिः काष्ठादिभ्यो रक्षार्थमावरणम् । तत्पर्य्यायः । वरूथः २ । इत्यमरः भरतश्च ॥

रथगोपनं, क्ली, (रथस्य गोपनं शस्त्रादिभ्यो रक्षार्थमावरणम् ।) रथगुप्तिः । इति हलायुधः ॥

रथचरणः, पुं, (रथचरणं चक्रं तदेव नामास्य ।) चक्रवाकपक्षी । इति शब्दरत्नावली ॥ (पुं, क्ली, रथस्य चरणः ।) रथचक्रम् । यथा,—

"रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।"

इति महिम्नः स्तोत्रम् ॥

रथद्रुः, पुं, (रथनामा द्रुः । यद्वा, रथस्य द्रुर्द्रुमः । तत्रोपयोगित्वात् ।) तिनिशवृक्षः । इत्यमरः । २ । ४ । २६ ॥ (तथास्य पर्य्यायः ।

"तिनिशः स्यन्दनो नेमी रथद्रुर्व्वञ्जुलस्तथा ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रथन्तरः, त्रि, रथेन तरति यः । इति मुग्धबोधव्याकरणम् ॥ (कल्पविशेषे, पुं । यथा, मत्स्यपुराणे । ५३ । ३३—३४ ।

"रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य यत् ।
सावर्णिना नारदाय कृष्णमाहात्म्यसंयुतम् ॥
यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः ।
तदष्टादशसाहस्रं ब्रह्मवैवर्त्तमुच्यते ॥"

रथेन तरतीति । तॄ + "संज्ञायां भृतॄवृजिधारिसहितपिदमः ।" ३ । २ । ४६ । इति खच् । मुमश्च । अत्र व्युत्पत्तिमात्रम् । नत्ववयवार्थानुगमः । सामभेदे, क्ली । यथा, ऋग्वेदे । १ । १६४ । २५ ।

"जगता सिन्धुं दिव्यस्तभायद्रथन्तरे सूर्य्यं पर्य्यपश्यत् ॥"

"रथन्तरे एतन्नामके साम्नि ।" इति तद्भाष्ये सायणः । स्त्रियां ङीप् । रथन्तरी । पौरवस्य ईलिनस्य भार्य्या । यथा, महाभारते । १ । ९४ । १७ ।

"रथन्तर्य्यां सुतान् पञ्च पञ्चभूतोपमांस्ततः ।
ईलिनो जनयामास दुष्मन्तप्रभृतीन् नृपान् ॥")

रथपर्य्यायः, पुं, (रथः पर्य्यायो यस्य ।) वेतसवृक्षः । इति शब्दचन्द्रिका ॥ (विवरणमस्य वेतसशब्दे विज्ञेयम् ॥)

रथपादः, पुं, (रथस्य पादः ।) चक्रम् । इति हेमचन्द्रः ॥

रथस्था, स्त्री, नदीविशेषः । इति शब्दरत्नावली ॥

रथयात्रा, स्त्री, (रथेन भगवतो यात्रा ।) आषाढ़शुक्लद्वितीयायां श्रीजगन्नाथस्य रथारोपणरूपोत्सवः । यथा, स्कन्दपुराणे ।

"आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥
यात्रोत्सवं प्रवर्त्याथ प्रीणयेच्च द्विजान् बहून् ॥
तथा ।
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम ॥
मां जगन्नाथम् । सा यात्रा ।" इति तिथ्यादितत्त्वम् ॥ * ॥
"नातः श्रेयःप्रदो विष्णोरुत्सवः शास्त्रसम्मतः ।
रथयात्रेव यात्राणां मुख्येत्याह प्रजापतिः ॥"

इति यात्रातत्त्वम् ॥ * ॥

अन्यत् यात्राशब्दे द्रष्टव्यम् ॥

रथाङ्गं, क्ली, (रथस्याङ्गम् ।) चक्रम् । इत्यमरः ॥ (यथा, रघुः । ७ । ४१ ।

"रथो रथाङ्गध्वनिना विजज्ञे
विलोलघण्टाक्वणितेन नागः ॥"

रथावयवमात्रम् । यथा, महाभारते । १४ । ८२ । १३ ।

"ध्वजे पताकादण्डेषु रथयन्त्रहयेषु च ।
अन्येषु च रथाङ्गेषु न शरीरे न सारथौ ॥"

सुदर्शनचक्रम् । यथा, माघे । १ । २१ ।

"रथाङ्गपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजिरे ॥")

रथाङ्गः, पुं, चक्रवाकपक्षी । इत्यमरः ॥ (यथा, नैषधे । १९ । ३५ ।

"विरहतरलजिह्वा बह्वाढ्यन्त्यतिविह्वलामिह सहचरीं नामयाहं रथाङ्गविहङ्गमाः ॥")

रथाङ्गपाणिः, पुं, (रथाङ्गं सुदर्शनचक्रं पाणौ यस्य ।) विष्णुः । इति हलायुधः ॥ (यथा, भागवते । १ । ३ । ३८ ।
"सवेद धातुः पदवीं परस्य
दुरन्तवीर्य्यस्य रथाङ्गपाणेः ॥")

रथाङ्गी, स्त्री, (रथस्याङ्गमिवाकृतिर्यस्याः । रथाङ्ग + ङीष् ।) ऋद्धिः । इति राजनिर्घण्टः ॥

रथान्तरः, पुं, कल्पभेदः । इत्यग्निपुराणम् । (रथन्तर इत्यपि पाठः ॥)

रथाभ्रः, पुं, वेतसवृक्षः । इति शब्दरत्नावली ॥

रथाभ्रपुष्पः, पुं, (रथाभ्रस्य पुष्पमिव पुष्पमस्य ।) वेतसः । इत्यमरटीकायां भरतः ॥

रथारोही, [न्] पुं, (रथे अवरोहतीति । अव + रुह + णिनिः ।) रथस्थयुद्धकर्त्ता । इति हेमचन्द्रः ॥

रथिकः, पुं, (रथोऽस्त्यस्येति । रथ + ठन् ।) रथी । इत्यमरः । २ । ८ । ७६ ॥ (यथा, बृहत्संहितायाम् । १५ । ११ ।
"हस्ते तस्करकुञ्जर-
रथिकमहामात्रशिल्पिपण्यानि ॥")
तिनिशवृक्षः । इति राजनिर्घण्टः ॥ (रथेन चरतीति । रथ + "पर्पादिभ्यः ष्ठन् ।" ४ । ४ । १० । इति ष्ठन् । रथचारिणि, त्रि । इति सिद्धान्तकौमुदी ॥)

रथिनः, पुं, (रथस्य इनः प्रभुः । शकन्ध्वादित्वादकारलोपः ।) रथी । इत्यमरः ।२।८।७६ ॥

रथिरः, पुं, (रथोऽस्त्यस्येति । रथ + "मेधारथाभ्यामिरन्निरचौ वक्तव्यौ ।" ५ । २ । १०९। इत्यस्य वार्त्तिकोक्त्या इरच् ।) रथी । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । ३ । १ । १७ ।
"अनुदेवान् रथिरो यासि साधन् ॥"
"रथिरः रथी ।" इति तद्भाष्ये सायणः ॥)

रथी, [न्] पुं, (रथोऽस्यास्तीति । रथ + इनिः ।) रथस्वामी राजादिः । तत्पर्य्यायः । रथिकः २ रथिनः ३ । इत्यमरः । २।८ । ७६ । रथारोही ४ रथी ५ रथिरः ६ । इति हेमचन्द्रः । रथस्वामी ७ सारथः ८ । इति शब्दरत्नावली । स्यन्दनारोहः ९ । इति जटाधरः । (यथा, रघुः । ७ । ३७ ।
"पत्तिः पदातिं रथिनं रथेश-
स्तुरङ्गसादी तुरगाधिरूढ़म् ॥")

रथ्यः, पुं, (रथं वहतीति । रथ + "तद्वहतिरथयुगप्रासङ्गम् ।" ४ । ४ । ७६ । इति यत् ।) रथस्य वोढ़ा घोटकः। इत्यमरः। २ । ८ । ४६ ॥ रथांशः । इति हेमचन्द्रः ॥ (रथस्य नेता । यथा, ऋग्वेदे । ९ । २१ । ६ ।
"ऋभुर्न रथ्यं नवं दधाता केतमादिशे ।"
"रथ्यं रथस्य नेतारम् ।" इति तद्भाष्ये सायणः ॥ रथसम्बन्धिनि, त्रि । यथा, ऋग्वेदे । २ । ३१ । ७ ।
"मघिनं रथ्यो अहधीतिमश्याः ।"
"रथ्यो रथसम्बन्धी मघिनं सर्पेणशीलोऽन्न इव ।" इति तद्भाष्ये सायणः ॥ रथस्येदमिति । "रथात् यत् ।" ४ । ३ । १२१ । इति यत् ।) स्त्री चक्रम् ॥ (युगम् । इति काशिका ॥

रथ्या, स्त्री, (रथानां समूहः । रथ + "खलगोरथात् ।" ४ । २ । ५० । इति यत् ।) रथसमूहः । तत्पर्य्यायः । रथकट्या (ड्या) २ रथव्रजः ३ । अभ्यन्तरमार्गः । गाछ इति भाषा ॥ तत्पर्य्यायः । प्रतोली २ विशिखा ३ । इत्यमरः ॥ आवर्त्तनी । इति मेदिनी ॥ (रथाय हिता । रथ + "रथाद्यत् ।" ४ । ३ ।१२१ । इति यत् । यद्वा, रथं वहतीति । "तद्वहतीति ।" ४ । ४ । ७६ । इति यत् ।) पन्थाः । (यथा, महाभारते । १ । १४१ । ६० ।
"पानागारेषु रथ्यासु सर्व्वतीर्थेषु चाप्यथ ।
चत्वरेषु च कूपेषु पर्व्वतेषु वनेषु च ॥")
चत्वरम् । इति हेमचन्द्रः ॥

रद, उत्खाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रेफादिः । उत्खातमुत्खननमिति गोविन्दभट्टः । रदति भूमिं शूकरः । इति दुर्गादासः ॥

रदः, पुं, (रदतीति । रद विलेखने + पचादित्वात् अच् ।) दन्तः । (यथा, आर्य्यासप्तशत्याम् । ४०९ ।
"भ्रमसि प्रकटयसि रदं
करं प्रसारयसि हृणमपि श्रयसि ।
धिङ्मानं तव कुञ्जर
जीवं न जुहोषि जठराग्नौ ॥")
विलेखनम् । इति मेदिनी । दे, १४ ॥ पुरुषदन्तलक्षणं यथा,—
"विवर्णोर्धनहीनाश्च दन्ताः स्निग्धा घनाः
शुभाः ।
तीक्ष्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा
शुभा ॥"
स्त्रीदन्तलक्षणं यथा,—
"कुन्दपुष्पसमा दन्ता भाषितं कोकिलासमम् ।
दाक्षिण्ययुक्तमशठं हंसशब्दसुखावहम् ॥
नासा समा समपुटा स्त्रीणान्तु रुचिरा शुभा ।
करालविषमा दन्ताः क्लेशाय च भयाय च ।
चौर्य्याय श्यामांसाश्च दीर्घा भर्त्तुश्च मृत्यवे ॥"
इति गारुड़े ६६ अध्यायः ॥*॥
दन्तलग्नस्य शुचित्वं यथा,—
"दन्तवद्दन्तलग्नेषु जिह्वास्पर्शेऽशुचिर्भवेत् ॥"
इति कौर्म्मे उपविभागे १२ अध्यायः ॥*॥
"दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत् ।
न तत्र बहुशः कुर्य्याद्यत्नमुद्धरणे पुनः ।
भवेदशौचमत्यर्थं तृणवेधाद्व्रणे कृते ॥"
इति प्रायश्चित्ततत्त्वधृतवचनम् ॥

रदच्छदः, पुं, (रदानां छद आच्छादकः ।) ओष्ठः । इति हेमचन्द्रः ॥

रदनः, पुं, (रद्यतेऽनेनेति । रद + करणे ल्युट् । रदतीति । रद् + ल्युर्वा ।) दन्तः । इत्यमरः । २ । ६ । ९१ ॥ (यथा, हरिवंशे । ११० । ८७ ।
"रदनैः पन्नगरिपुं करेण शिरसा तदा ।
ऐरावतो गजपतिराजघान मदंस्तथा ॥"
रद् + भावे ल्युट् ।) उत्खनने, क्ली ॥

रदनच्छदः, पुं, (रदनानां छद आच्छादकः ।) ओष्ठः । अधरः । इत्यमरः । २।६।९० ॥ तस्य शुभाशुभलक्षणं यथा,—
"मांसलैश्च धनोपेता अवक्रैरधरैर्नृपाः ।
बिम्बोपमैश्च स्फुटितैरोष्ठै रूक्षैश्च खण्डितैः ।
विवर्णैर्धनहीनाश्च दन्ता स्निग्धा घनाः शुभाः ॥"
इति गारुड़े ६६ अध्यायः ॥

रदनी, [न्] पुं, (रदनौ प्रशस्तदन्तावस्य स्त इति । रदन + इनिः ।) हस्ती । इति राजनिर्घण्टः ॥

रदी, [न्] पुं, (रदौ प्रशस्तदन्तावस्य स्त इति । रद + इनिः ।) हस्ती । इति हलायुधः ॥

रध, य ऌ ह हिंसने । पाके । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-वेट् ।) य, रध्यति । ह, रधिष्यति रत्स्यति । ऌ, अरधत् । इति दुर्गादासः ॥

रञ्ज, म औ ञ } रागे । इति कविकल्पद्रुमः ॥
रञ्ज, य म औ ञ } (भ्वा०-दिवा० च-उभ०-वर्णान्तरोत्पादने सक०-आसक्तौ अक०-अनिट् ।) य ञ, रज्यति रज्यते । म, रजयति मृगान् मृगरमणादन्यत्र रञ्जयति पुत्रं पिता । औ, रङ्क्ता । ञ, रजति रजते । रागो वर्णान्तरोत्पादनमासक्तिश्च । इति दुर्गादासः ॥

रन्तिदेवः, पुं, (रमते इति । रम + संज्ञायां तिक् । रन्तिश्चासौ देवश्चेति ।) विष्णुः । चन्द्रवंशीयनृपतिभेदः । स तु साङ्कृतिपुत्रः । इति मेदिनी । वे, ६२ ॥ (यथा, भागवते ।९।२१।२।
"गुरुश्च रन्तिदेवश्च संकृतेः पाण्डुनन्दन ! ।
रन्तिदेवस्य महिमा इहामुत्र च गीयते ॥"
अयं हि याज्ञिको दाताग्रगण्य इति पुराणेषु श्रूयते । एतद्यज्ञहतगोचर्म्मरसेनैव चर्म्मण्वती नदी जाता । यथा, महाभारते । ३ । २०७ । ८—९ ।
"राज्ञो महानसे पूर्व्वं रन्तिदेवस्य वै द्विज ।
द्वे सहस्रे तु वध्येते पशूनामन्वहं तदा ॥
अहन्यहनि वध्येते द्वे सहस्रे गवां तथा ।
समांसं ददतो ह्यन्नं रन्तिदेवस्य नित्यशः ॥
अतुला कीर्त्तिरभवत् नृपस्य द्विजसत्तम ! ॥"
तथाच तत्रैव । १२ । २९ । १२२—१२८ ।
"उपातिष्ठंश्च पशवः स्वयं तं संशितव्रतम् ।
ग्राम्यारण्या महात्मानं रन्तिदेवं यशस्विनम् ॥
महानदी चर्म्मराशेरुत्क्लेदात् सुस्रुवे यतः ।
ततश्चर्म्मण्वतीत्येवं विख्याता सा महानदी ॥
ब्राह्मणेभ्यो ददौ निष्कान् सदसि प्रतते नृपः ।
तुभ्यं निष्कं तुभ्यं निष्कमिति क्रोशन्ति वै द्विजाः
सहस्रं तुभ्यमित्युक्त्वा ब्राह्मणान् संप्रपद्यते ।
अन्वाहार्य्योपकरणं द्रव्योपकरणञ्च यत् ॥
घटाः पात्र्यः कटाहानि स्थाल्यश्च पिठराणि च ।
नासीत् किञ्चिदसौवर्णं रन्तिदेवस्य धीमतः ॥

सांकृते रन्तिदेवस्य यां रात्रिमवसन् गृहे ।
आलभ्यन्त शतं गावः सहस्राणि च विंशतिः ॥
तत्र स्म सूदाः क्रोशन्ति सुमृष्टमणिकुण्डलाः ।
सूपभूयिष्ठमश्नीध्वं नाद्यमांसं यथा पुरा ॥")
कुक्कुरः । इति शब्दरत्नावली ॥

रन्तुः, स्त्री, (रमते अत्रेति । रम् + तुन् ।) वर्त्म । नदी । इति मेदिनी । ते, ४६ ॥

रन्धनं, क्ली, पाकः । रधधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् । यथा रन्धनाय स्थाली । इति संक्षिप्तसारव्याकरणम् ॥ (रध् + ल्युः । नाशके, त्रि । यथा, भागवते । ४ । ३० । २८ ।
"यदयुक्षर्थते काले स्वबुद्ध्याभद्ररन्धन ! ॥"
"हे अभद्ररन्धन ! अमङ्गलनाशन !" इति तट्टीकायां श्रीधरः ॥)

रन्धितं, क्ली, (रध् + क्त ।) सुतरन्धनद्रव्यम् । तस्य पात्रान्तरे स्थापनविधिर्यथा,—
"सद्योऽन्नं पात्रसम्भारे मार्गे वा ग्रामवर्ज्जिते ।
स्थापयेद्गुणवान् सूदः सिद्धान्नं पात्रकान्तरे ॥
भक्तं स्वपाके स्थाप्यं न स्थाप्यं पात्रकान्तरे ॥
घृतं कांस्यायसे स्थाप्यं मांसं मांसभवं रसम् ।
स्थापयेद्राजते हैमे पात्रे लौहेऽथ कांस्यके ।
यथादिवद्द्विधं शाकं स्थाप्यं कांस्यात्मलौहके ।
पक्वान्नं पिष्टकं भक्ष्यं स्थाप्यं कांस्येऽथ दारुणे ॥
धारयेत् सुशृतं चौरं पार्थिवे वाथ कांस्यके ।
पानीयं पायसं तक्रं ऋग्मयेष्वेव धारयेत् ॥
काचजे स्फाटिके वाथ वैदूर्यादिविचित्रिते ।
धारयेत् सर्व्वदा पात्रे रागषाड़वशष्कुकान् ॥
उक्तपात्रान्तरे स्थाप्यं तद्द्रव्यं तद्गुणापहम् ।
सर्व्वदा सुखदं हृद्यमन्यथा दोषकारकम् ॥"
इति सूपकारशास्त्रे पाकराजेश्वरः ॥

रन्ध्रं, क्ली, (रन्धयति छिनत्त्यनेनेति । रध् + बाहुलकात् रक् ।) दूषणम् । (यथा, रघुः । १२ । ११ ।
"रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥")
छिद्रम् । इति मेदिनी ॥ (यथा, रघौ ।१५।८२।
"एवमुक्ते तया साध्व्या रन्ध्रात् सद्योभवाद्भुवः ।
शातह्रदमिव ज्योतिः प्रभामण्डलमुद्ययौ ॥"
मनुष्यशरीरस्थरन्ध्राणि यथा,—
"नासानयनकर्णानां द्वे द्वे रन्ध्रे प्रकीर्त्तिते ।
मेहनापानवक्त्राणामेकैकं रन्ध्रमुच्यते ।
दशमं मस्तके प्रोक्तं रन्ध्राणीति नृणां विदुः ॥
स्त्रीणामन्यधिकानि स्युः स्तनयोर्गर्भवर्त्मनः ।
सूक्ष्मच्छिद्राणि चान्यानि मतानि त्वचि जन्मिनाम् ॥"
इति शार्ङ्गधरे पूर्व्वखण्डे पञ्चमेऽध्याये ॥
योनिः । यथा, महाभारते ।१२।२८२।५३।
"रन्ध्रागतमथान्यासां शिखोद्भेदश्च बर्हिणाम् ।
मेत्ररोगः कोकिलस्य स्वरः प्रोक्तो महात्मना ॥")

रन्ध्रकण्टः, पुं, (रन्ध्रे कण्टः कण्टको यस्य ।) आलवर्व्वूरकः । इति राजनिर्घण्टः ॥

रन्ध्रबभ्रुः, पुं, (रन्ध्रे गर्त्ते बभ्रुर्नकुल इव ।) उन्दुरः । इति त्रिकाण्डशेषः ।

रन्ध्रवंशः, पुं, (रन्ध्रविशिष्टो वंशः ।) छिद्रयुक्तवंशः । फाँपावाँश इति भाषा । तत्पर्य्यायः । त्वक्सारः २ कीचकाख्यः ३ मस्करः ४ वादनीयः ५ शुषिराख्यः ६ । अस्य गुणाः ।
"वंशौ लघ्वौ कषायौ च किञ्चित्तिक्तौ च शीतलौ ।
मूत्रकृच्छ्रप्रमेहार्शःपित्तदाहास्रनाशनौ ॥
विशेषो रन्ध्रवंशस्तु दीपनोऽजीर्णनाशकः ।
रुचिकृत् पाचनो हृद्यः शूलघ्नो गुल्मनाशनः ॥"
इति राजनिर्घण्टः ॥

रप, वदे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रपति । वदः कथनम् । इति दुर्गादासः ॥

रफ, गत्याम् । वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रफति । इति दुर्गादासः ॥

रफि, इ गत्याम् । वधे । इति कविकल्पद्रुमः ॥ आत्म०-पर०-सक०-सेट् ।) इ, रम्फति । इति दुर्गादासः ।

रबि, इ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) इ, रम्बति । इति दुर्गादासः ॥

रव, इ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ॥)

रवः, पुं, शब्दः । रवधातोर्भावेऽल्प्रत्ययेन निष्पन्नः ॥ (यथा, राजतरङ्गिण्याम् । ५ । ४०८ ।
"सुप्रस्फटाद्गृहे भट इव निद्रालसेक्षणः ।
प्रबुद्धः शस्त्रपातैः स श्रुतवद्भैरवान् रवान् ॥")

रभि, इ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) इ, रम्भते । ङ, रम्भते । इति दुर्गादासः ॥

रभ, औ ङ राभस्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट् । राभस्यमुत्सुकीभावः । निर्व्विचारा प्रवृत्तिरिति गोविन्दभट्टः । औ, रब्धा । ङ, रभते साधुः पुण्ये । आङ्पूर्व्वोऽयमारम्भे । शास्त्रं पठितुमारभते शिष्यः । इति दुर्गादासः ॥

रभसः, पुं, (रभणमिति । रभ + "अत्यविचमितमिनमिरभिलभीति ।" उणा० ३ । ११७ । इति असच् ।) वेगः । (यथा, माघे । ६ । ७२ ।
"रभसोत्थितामुपगतः सहसा
परिरभ्यकश्चन वधूमरुधत् ॥")
हर्षः । इति मेदिनी । से, ३१ ॥ (प्रेमोत्साहः । यथा, गीतगोविन्दे । ५ । ६ ।
"मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥"
"रभसस्य प्रेमोत्साहस्य ।" इति तट्टीकाबालबोधिनी ॥) संरम्भः । यथा, माघे । ११ । १६ ।
"प्रमदमदनमाद्यद्यौवनोद्दामरामा
रमणरभसखेदच्छेदविच्छेदक्षः ॥"
संभ्रमः । यथा, भागवते । ११ । १६ ।
"वज्रदंष्ट्राः श्वानः सप्तशतानि
विंशतिश्च सरभसं खादन्ति ॥")
पौर्व्वापर्य्यविचारः । इत्यरुणः । औत्सुक्यमिति कलिङ्गः । स्त्रियामा रभसा च दृश्यते । इति दुर्गः । (यथा, किरातार्ज्जुनीये । ५ । १ ।
"अथ जयाय नु मेरुमहीभृतो
रभसया नु दिगन्तदिदृक्षया ।
अभिययौ स हिमालयमुच्छ्रितं
समुदितं नु विलङ्घयितुं नभः ॥")
(यथा, महाभारते । ५ । ५१ । १० ।
"सर्व्वेषां मम पुत्राणां स एकः क्रूरविक्रमः ।
वज्राशी विप्रतीपश्च बाल्येऽपि रभसः सदा ॥"
महान् । इति निघण्टुः । ३ । ३ ॥)
यदा तु रभसगुणयोगात्तत्र आदित्वात् अच्प्रत्यये तद्वति वर्त्तते तदा वाच्यलिङ्गता स्यात् । इति लिङ्गादिसंग्रहे भरतः ॥ स्वनामख्यातः अभिधानविशेषश्च ॥

रम, उ ङ ञ औ क्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-अक०-अनिट् । क्वावेट् ।) रेफादिः । उ, रमित्वा । रन्त्वा । ङ, रमते । ञ, रामः रमः । औ, रन्ता । इति दुर्गादासः ॥

रमः, पुं, (रमते इति । रम् + पचाद्यच् ।) कान्तः । (यथा, किरातार्ज्जुनीये । ५ । २० ।
"निधिगुह्यकाधिपरमैः परमैः ॥")
रक्ताशोकवृक्षः । कामदेवः । इति मेदिनी । मे, २५ ॥ रमणञ्च । रमधातोर्भावेऽल्प्रत्ययनिष्पन्नम् ॥

रमकः, पुं, (रमते इति । रम् + "रमेरश्च लो वा ।" उणा० ३ । ३३ । इति वुन् ।) कान्तः । इत्युणादिकोषः ॥

रमठं, क्ली, (रम + अठन् ।) हिङ्गु । इत्युणादिकोषः ॥ (जनपदविशेषे, पुं । तद्देशवासिनि, त्रि । यथा, महाभारते । ३ । ५१ । २४ ।
"नागुडान् रमठान् सूक्ष्मान् कौराव्यानथ तङ्गणान् ॥")

रमठध्वनिः, पुं, (रमठ इति शब्देन ध्वन्यते कथ्यते इति । ध्वन् + इन् ।) हिङ्गु । इति शब्दचन्द्रिका ॥

रमणं, क्ली, (रमयतीति । रम् + णिच् + ल्युः ।) पटोलमूलम् । इति मेदिनी ॥ जघनम् । इति हेमचन्द्रः ॥ (रम् + भावे ल्युट् ।) जम्भनम् । तत्पर्य्यायः । अब्रह्मचर्य्यकम् २ ग्राम्यधर्म्मः ३ सुरतम् ४ रतम् ५ संप्रयोगः ६ निधुवनम् ७ मैथुनम् ८ रतिः ९ उपस्थम् १० धर्षितम् ११ क्रीड़ारत्नम् १२ महासुखम् १३ त्रिभद्रम् १४ योगमिथुनम् १५ अभिमानितम् १६ । इति शब्दरत्नावली ॥ (यथा, माघे । ११ । १९ ।
विकचकमलगन्धैरन्धयन् भृङ्गमालाः
सुरभितमकरन्दं मन्दमावाति वातः ।
प्रमदमदनमाद्यद्यौवनोद्दामरामा-
रमणरभसखेदस्वेदविच्छेददक्षः ॥")
क्रीड़नम् । इति रमधात्वर्थदर्शनात् ॥ (रत्युत्पादनम् । यथा, भागवते । १० । २ । १३ ।
"रामेति लोकरमणाद्बलं बलवदुच्छ्रयात् ।"
"लोकस्य रमणात् रत्युत्पादनात् ।" इति तत्र

स्वामी। वनविशेषः। यथा, हरिवंशे।१५५।२१।
"भाति चैत्ररथस्येव नन्दनस्य वनं महत्।
रमणं भावनं चैव वेणुमद्भिः समन्ततः॥")

रमणः, पुं, (रमते रमयतीति वा। रम्+णिच् वा+ल्युः।) पतिः। (यथा, कुमारे। ४। २१।
"वचनीयमिदं व्यवस्थितं
रमण! त्वामनुयामि यद्यपि॥"
रमयति स्त्रीपुरुषयोरन्तःकरणमिति। रम्+णिच्+ल्युः।) कामदेवः। इति मेदिनी। णे, ७२॥ गर्द्दभः। इति हेमचन्द्रः।३।१८१॥ वृषणः। इति शब्दचन्द्रिका॥ महारिष्टः। इति राजनिर्घण्टः॥ (धरवसुपुत्त्राणामन्यतमः। यथा, मात्स्ये। ५। २४।
"कल्याणिन्यां ततः प्राणो रमणः शिशिरोऽपि च
मनोहरा धरात् पुत्त्रानवापाथ हरेः सुता॥"
रमणीये त्रि। यथा, भागवते। ४। ६। १०।
"रमणं विहरन्तीनां रमणैः सिद्धयोषिताम्॥")

रमणकं, क्ली, (रमन्ते लोका अत्र। रम्+ल्युट्। संज्ञायां कन्।) जम्बुद्वीपान्तर्गतवर्षविशेषः। स तु रम्यकवर्षः। यथा,—
"एवमेवोत्तरे त्रीणि वर्षाणि च तपोधन।
कुरुवर्षं सिन्धुकूलात् शृङ्गवानवधिः स्मृतः॥
हिरण्मयं ततो वर्षं श्वेतावधि निगद्यते।
रम्यकञ्च ततो वर्षं नीलकस्यावधिः स्मृतः॥"
अपि च।
शिव उवाच।
"दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु।
वर्षं रमणकं नाम जायन्ते तत्र मानवाः॥
शुक्लाभिजनसम्पन्नाः सर्व्वे सुप्रियदर्शनाः।
दशवर्षसहस्राणि शतानि दश पञ्च च।
जीवन्ति ते महाभाग नित्यं मुदितमानसाः॥"
इति पाद्मे भूखण्डे १२८। १२९ अध्यायौ॥
(अन्यत् रम्यकशब्दे द्रष्टव्यम्॥ वीतिहोत्रस्य पुत्त्रभेदः। यथा, भागवते। ५। २०। ३१।
"तद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणकधातकनामानौ वर्षपती नियुज्य स्वयं पूर्व्वजवद्भगवत्कर्म्मशील एवास्ते।")

रमणा, स्त्री, रमणी। इत्यमरटीका॥ (पीठस्य शक्तिविशेषः। यथा, देवीभागवते। ७।३०।६७।
"रमणा रामतीर्थे तु यमुनायां मृगावती॥")

रमणी, स्त्री, (रमतेऽस्यामिति। रम+ल्युट्। ङीप्।) नारी। इति मेदिनी। णे, ७२॥ उत्तमस्त्रीविशेषः। या वपुर्गुणोपचारेण सौभाग्येन कान्तं रमयति सा। इत्यमरभरतौ॥ (यथा, कथासरित्सागरे। ५२। २१४॥
"रथेन रमणीयुक्तः प्रजानां दत्तकौतुकः॥")
बालाख्यद्रव्यः। यथा,—
"बाला च रमणी रामा बन्ध्या कामकलापि
च॥"
इति शब्दचन्द्रिका॥

रमणीयं त्रि, (रम्+अनीयर्।) सुन्दरम्। इत्यमरटीका। (यथा, गीतगोविन्दे। १। ११।
"विलससि दिक्षु रणे दिक्पतिकमनीयम्
दशमुखमौलिबलिं रमणीयम्॥")

रमण्यं, त्रि, (रम्+"क्षरम्यो च।" उणा० ३। १०१। इति अन्यप्रत्ययः। रमणीयम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥)

रमतिः, पुं, (रमतेऽस्मिन् इति। रम्+"रमेर्नित्।" उणा० ४। ६३। इति अतिप्रत्ययः। नित्।) नायकः। स्वर्गः। इति मेदिनी। ते, १४३॥ काकः। इति शब्दरत्नावली॥ कालः। कामदेवः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

रमा, स्त्री, (रमयतीति। रम्+णिच्+अच्। टाप् च।) लक्ष्मीः। इति मेदिनी। मे, २५॥ (यथा, भागवते। ३। ९। २३।
"एष प्रसन्नवरदो रमयात्मशक्त्या
यद्यत् करिष्यति गृहीतगुणावतारः॥"
यथा च।
"रमा यत्र नवाक् तत्र यत्र वाक् तत्र नो रमा।
ते यत्र विनयो नास्ति सा च सा च स च
त्वयि॥"
रत्युद्भटः॥)
शशिध्वजराजकन्या। सा कल्किदेवेन विवाहिता। यथा,—
"ततः शशिध्वजो राजा युद्धादागृह्य पुत्त्रकान्।
सुशान्ताया मतिं बुद्ध्वा रमां प्रादात् स
कल्कये॥"
इति कल्किपुराणे २५ अध्यायः॥
शोभा। इति राजनिर्घण्टः॥ (गङ्गा। यथा, काशीखण्डे। २९। १४५।
"रेवती रतिसम्पन्ना रत्नगर्भा रमा रतिः॥"

रमाधवः, पुं, (रमाया लक्ष्म्या धवः पतिरिति।) श्रीकृष्णः। यथा। रमाधवः पूज्यो माधवत्वात्। इत्यवयवग्रन्थे जगदीशः॥

रमानाथः, पुं, श्रीकृष्णः। रमा लक्ष्मीस्तस्या नाथः स्वामी। इति षष्ठीतत्पुरुषसमासनिष्पन्नः॥

रमापतिः, पुं, (रमायाः पतिः।) श्रीकृष्णः। यथा, मुग्धबोधव्याकरणे।
"मुकुन्दस्यार्चितमिदमिदं यातं रमापतेः।
शुक्लमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः॥"
(यथा च देवीभागवते। १। ५। ८।
"दृष्ट्वा भारं धनुष्कोट्यां निद्रामाप रमापतिः॥")

रमाप्रियं, क्ली, (रमायाः प्रियम्।) पद्मम्। इति शब्दचन्द्रिका॥

रमावेष्टः, पुं, (रमया वेष्ट्यतेऽसौ। वेष्ट+घञ्।) श्रीवासः। इति राजनिर्घण्टः॥

रमिता, त्रि, (रम्+णिच्+क्त। टाप्।) रतिप्रापिता। यथा,—
"त्वरितगतिर्व्रजयुवतिस्तरणिसुताविपिनगता।
सुररिपुणा रतिगुरुणा परिरमिता प्रमद
मिता॥"
इति छन्दोमञ्जरी।
"व्रजयुवतिर्गोपवधूः सुररिपुणा श्रीकृष्णेन परिरमिता सती प्रमदं हर्षं इता गता। किम्भूता। त्वरितगतिः त्वरिता शीघ्रा गतिर्यस्याः सा तथा। पुनः किम्भूता तरणिसुताविपिनगता यमुनासम्बन्धिवनमुपागता। किम्भूतेन रतिगुरुणा रतौ शृङ्गारे गुरुणा उपाध्यायेन। अयमभिप्रायः। स्वयं रतिकुशलो नायिकाश्च रतिमध्यापयति।" इति तट्टीका॥

रमेश्वरः, पुं, (रमाया लक्ष्म्या ईश्वरः पतिर्नियन्ता वा।) विष्णुः। यथा,—
"श्रीराम राघव रमेश्वर रावणारे
भूतेश मन्मथरिपो प्रमथाधिनाथ।
चाणूरमर्द्दन हृषीकपतेऽसुरारे
त्वाम्भा भटा य इति सन्ततमामनन्ति॥"
इति काशीखण्डे हरिहरस्तोत्रम्॥

रम्भः, पुं, (रम्भते रागमन्वेषणादिकमनेनेति। रभि+कर्म्मणि घञ्।) वेणुः। (रम्भते उद्यमशीलो भवति निरन्तरमुदरभरणायेति भावः। रभि+अच्।) वानरविशेषः। इति मेदिनी। भे, ७॥ महिषासुरपिता। यथा,—
श्रीऔर्व्व उवाच।
"आराधितो महादेवो रम्भेण सुरवैरिणा।
चिरेण स च सुप्रीतस्तपसा तस्य शङ्करः॥
अथ तुष्टो महादेवः प्रत्यक्षं रम्भमुक्तवान्।
प्रीतोऽस्मि ते वरं रम्भ वरयस्व यथेप्सितम्॥
एवमुक्तः प्रत्युवाच रम्भस्तं चन्द्रशेखरम्।
अपुत्त्रोऽहं महादेव यदि ते मय्यनुग्रहः॥
मम जन्मत्रये पुत्त्रो भवान् भवतु शङ्कर।
एवमुक्तस्तु देवेन प्रत्युवाच वृषध्वजः॥
भवत्वेतदभिप्रेतं ते भविष्यामि सुतस्तव।
इत्युक्त्वा स महादेवस्तत्रैवान्तरधीयत॥
रम्भोऽपि यातः स्वस्थानं हर्षोत्फुल्लविलोचनः।
पथि गच्छन् स रम्भोऽथ ददर्श महिषीं
शुभाम्॥
त्रिहायणीं चित्रवर्णां सुन्दरीं ऋतुशालिनीम्।
स तां दृष्ट्वाथ महिषीं रम्भः कामेन मोहितः॥
शीघ्रं गृहीत्वा च तदा चकार सुरतोत्सवम्।
तयोः प्रवृत्ते सुरते वा तदा तस्य तेजसा॥
दधार महिषी गर्भं तदाभून्महिषासुरः॥"
इति कालिकापुराणे ५९ अध्यायः॥
(असौ एव जन्मान्तरे रक्तबीजो जातः। एतद्विवरणं यथा, देवीभागवते। ५।२।१७-४६।
व्यास उवाच।
"दनोः पुत्त्रौ महाराज! विख्यातौ क्षिति-
मण्डले।
रम्भश्चैव करम्भश्च द्वावास्तां दानवोत्तमौ॥
तावपुत्त्रौ महाराज! पुत्त्रार्थं तेपतुस्तपः।
बहून् वर्षगणान् कामं पुण्ये पञ्चनदे जले॥
करम्भस्तु जले मग्नश्चकार परमं तपः।
वृक्षं रसालवटं प्राप्य स रम्भोऽग्निमसेवत।
पञ्चाग्निसाधनासक्तः स रम्भस्तु यदाभवत्।
ज्ञात्वा शचीपतिर्दुःखहृदयौ दानवौ प्रति॥

गत्वा पञ्चनदे तत्र ग्राहरूपं चकार ह ।
वासवस्तु करम्भन्तं तदा जग्राह पादयोः ॥
निजघान च तं दुष्टं करम्भं वृत्रसूदनः ।
भ्रातरं निहतं श्रुत्वा रम्भः कोपं परन्तपः ॥
स्वशीर्षं पावके होतुमैच्छच्छित्वा करेण ह ।
केशपाशे गृहीत्वाशु वामेन क्रोधसंयुतः ॥
दक्षिणेन करेणोग्रं गृहीत्वा खड्गमुत्तमम् ।
छिनत्ति शीर्षं तत्तावद्वह्निना प्रतिबोधितः ॥
उक्तश्च दैत्य मूर्खोऽसि स्वशीर्षं छेत्तुमिच्छसि ।
आत्महत्यातिदुःसाध्या कथं त्वं कर्त्तुमुद्यतः ॥
वरं वरय भद्रं ते यत्ते मनसि वर्त्तते ।
मा म्रियस्व मृतेनाद्य किन्ते कार्य्यं भविष्यति ॥
व्यास उवाच ।
तच्छ्रुत्वा वचनं रम्भः पावकस्य सुभाषितम् ।
ततोऽब्रवीद्वचो रम्भस्त्यक्त्वा केशकलापकम् ॥
यदि तुष्टोऽसि देवेश ! देहि मे वाञ्छितं वरम् ।
त्रैलोक्यविजयी पुत्त्रः स्यान्मे परबलार्द्दनः ॥
अजेयः सर्व्वथा स स्याद्देवदानवमानवैः ।
कामरूपी महावीर्य्यः सर्व्वलोकाभिवन्दितः ॥
पावकस्तं तथेत्याह भविष्यति तवेप्सितम् ।
पुत्त्रस्तव महाभाग ! मरणाद्विरमाधुना ॥
यस्यां चित्तं तु रम्भ ! त्वं प्रमदायां करिष्यसि ।
व्यास उवाच ।
तस्यां पुत्त्रो महाभाग ! भविष्यति बलाधिकः ॥
इत्युक्तो वह्निना रम्भो वचनं चित्तरञ्जनम् ।
श्रुत्वा प्रणम्य प्रययौ वह्निं तं दानवोत्तमः ॥
यक्षैः परिवृतं स्थानं रमणीयं श्रियान्वितम् ।
दृष्ट्वा चक्रे तदा भावं महिष्यां दानवोत्तमः ॥
मत्तायां रूपयुक्तायां विहायान्याश्च योषितम् ।
सा समागाच्च तरसा कामयन्ती मुदान्विता ॥
रम्भोऽपि गमनं चक्रे भवितव्यप्रणोदितः ।
सा तु गर्भवती जाता महिषी तस्य वीर्य्यतः ॥
तां गृहीत्वाथ पातालं प्रविवेश मनोहरम् ।
महिषेभ्यश्च तां रक्षन् प्रियामनुमतां किल ॥
कदाचित् महिषश्चान्यः कामार्त्तस्तामुपाद्रवत् ।
स्वयमागत्य तं हन्तुं दानवः समुपाद्रवत् ॥
त्वरयार्थं समागम्य महिषं समताड़यत् ।
सोऽपि तं निजघानाशु शृङ्गाभ्यां काममोहितः ॥
ताड़ितस्तेन तीक्ष्णाभ्यां शृङ्गाभ्यां हृदये भृशम् ।
भूमौ पपात तरसा ममार च विमूर्च्छितः ॥
मृते भर्त्तरि सा दीना भयार्त्ता विद्रुता भृशम् ।
सा वेगात्तं वटं प्राप्य यक्षाणां शरणं गता ॥
पृष्ठतस्तु गतस्तत्र महिषः कामपीड़ितः ।
कामयानस्तु तां कामी बलवीर्य्यमदोद्धतः ॥
वदती सा भृशं दीना दृष्टा यक्षैर्भयातुरा ।
धावमानश्च तं वीक्ष्य यक्षास्त्रातुं समाययुः ॥
युद्धं समभवद्घोरं यक्षाणां च हयारिणा ।
शरेण ताड़ितस्तूर्णं पपात धरणीतले ॥
मृतं रम्भं समानीय यक्षास्ते परमं प्रियम् ।
चितायां रोपयामासुस्तस्य देहस्य शुद्धये ॥
महिषी सा पतिं दृष्ट्वा चितायां रोपितं तदा ।
प्रवेष्टुं सा मतिं चक्रे पतिना सह पावकम् ॥
वार्य्यमाणापि यक्षैः सा प्रविवेश हुताशनम् ।
ज्वालामालाकुलं साध्वी पतिमादाय वल्लभम् ॥
महिषस्तु चितामध्यात् समुत्तस्थौ महाबलः ।
रम्भोऽप्यन्यद्वपुः कृत्वा निःसृतः पुत्त्रवत्सलः ॥
रक्तबीजोऽप्यसौ जातो महिषोऽपि महाबलः ।
अभिषिक्तस्तु राज्येऽसौ हयारिरसुरोत्तमैः ॥
एवं स महिषो जातो रक्तबीजश्च वीर्य्यवान् ।
अवध्यस्तु सुरैर्दैत्यैर्मानवैश्च नृपोत्तम ! ॥”)

रम्भा, स्त्री, (रभि+अच् । टाप् ।) कदली । (यथा, नैषधे । २ । ३७ ।
“तरुमूरुयुगेन सुन्दरी
किमु रम्भां परिणाहिना परम् ।”)
अप्सरोविशेषः । इति मेदिनी । भे, ७ ॥ (यथा, महाभारते । १ । ६५ । ५० ।
“अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा ।”)
गौरी । इति शब्दरत्नावली ॥ (सा तु पीठस्थशक्तीनामन्यतमा । यथा, देवीभागवते । ७ । ३० । ५८ ।
“गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले ।”)
गोध्वनिः । इति हेमचन्द्रः । ६ । ४२ ॥ वेश्या । इति धरणिः ॥

रम्भातृतीया, स्त्री, (रम्भाख्या तृतीया ।) व्रतविशेषकालः । यथा,—
ब्रह्मोवाच ।
“रम्भातृतीयां वक्ष्ये च सौभाग्यश्रीसुतादिदाम् ।
मार्गशीर्षे सिते पक्षे तृतीयायामुपोषितः ॥
गौरीं यजेद्बिल्वपत्रैः कुशोदादः करम्भदः ।
कदम्बादो गिरिसुतां पौषे मरुवकैर्यजेत् ॥
कर्पूरादः कृशरदो मल्लिकादन्तकाष्ठकृत् ।
माघे सुभद्रां कल्हारैर्घृताशो मण्डकप्रदः ॥
गौतीमयं दन्तकाष्ठं फाल्गुने गोमतीं यजेत् ।
कुन्दैः कृत्वा दन्तकाष्ठं जीवाशः शष्कुलीप्रदः ॥
विशालाक्षीं दमनकैश्चैत्रे काशारचंप्रदः ।
दधिप्राशी दन्तकाष्ठं तगरं श्रीमुखीं यजेत् ॥
वैशाखे कर्णिकारैश्च अशोकाशो वटप्रदः ।
ज्येष्ठे नारायणीमर्च्चेच्छतपत्रैश्च खण्डदः ॥
नवशाखाश्च तन्नाद आषाढ़े माधवीं यजेत् ।
तिलाशो बिल्वपत्रैश्च क्षीरान्नवटकप्रदः ॥
औदुम्बरं दन्तकाष्ठं तगर्य्याः श्रावणे श्रियम् ।
दन्तकाष्ठं स्वर्णकाशः क्षीरदो ह्युत्तमां यजेत् ॥
पद्मैर्यजेत् भाद्रपदे शृङ्गोदाशो गुड़ादिदः ।
राजपुत्त्रीञ्चाश्वयुजे जवापुष्पैश्च जीवकम् ॥
प्राशयेन्निशि नैवेद्यैः कृशरैः कार्त्तिके यजेत् ।
जातिपुष्पैः पद्मजाञ्च पञ्चगव्याशनो यजेत् ॥
वृतोदनश्च वर्षान्ते सपत्नीकान् द्विजान् यजेत् ।
उमामहेश्वरं स्वर्णं लवणे तु गुड़े स्थितम् ॥
वस्त्रच्छत्रसुवर्णाद्यै रात्रौ च कृतजागरः ।
गीतवाद्यैर्द्ददेत् प्रातर्गवाद्यं सर्व्वमाप्नुयात् ॥”
इति गारुड़े १२० अध्यायः ॥ * ॥
अपि च । “अथ तृतीया । सा चतुर्थीयुता रम्भाव्रतेतरदैवकर्म्मसु ग्राह्या ।
‘रम्भाख्यां वर्ज्जयित्वा तु तृतीयां मुनिसत्तम ।
अन्येषु सर्व्वकार्य्येषु गणयुक्ता प्रशस्यते ।’
इति ब्रह्मवैवर्त्तात् ॥
ततश्च युग्मवाक्यं रम्भाव्रतपरम् । भविष्योत्तरे ।
‘शृणुष्व भद्रे यत्नेन रम्भाख्यं व्रतमुत्तमम् ।
ज्यैष्ठे शुक्लतृतीयायां स्नातनियमतत्परा ।’
रम्भाख्यमिति रम्भया कृतमिति रम्भाव्रतम् ।”
इति तिथ्यादितत्त्वम् ॥

रम्भोरुः, स्त्री, रम्भे इव ऊरू यस्याः सा । इति व्याकरणम् ॥ (यथा, रघौ । ६ । ३५ ।
“अनेन यूना सह पार्थिवेन
रम्भोरु ! कच्चिन्मनसो रुचिस्ते ।”)

रम्यं, क्ली, (रम+“पोरदुपधात् यत् ।” ३ । १ । ९८ । इति यत् ।) पटोलमूलम् । इति मेदिनी ॥ प्रधानधातु । इति जटाधरः ॥

रम्यः, पुं, (रम्यते अनेनेति । रम+यत् ।) चम्पकवृक्षः । इति मेदिनी ॥ बकवृक्षः । इति शब्दचन्द्रिका ॥

रम्यः, त्रि, (रम+यत् ।) मनोज्ञः । इति मेदिनी ॥ (यथा, मनौ । ७ । ६९ ।
“रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ।”)
बलकरः । इति जटाधरः ॥

रम्यकं, क्ली, (रम्यते जनोऽत्रेति । रम्+यत् । ततः कप् संज्ञायां कन् वा ।) वर्षविशेषः । इति जटाधरः ॥ एतस्य विवरणं यथा,—
“दक्षिणेन तु मेरोस्तु श्वेतस्य चोत्तरेण च ।
वायथं रम्यकं नाम जायन्ते तत्र मानवाः ॥
रतिप्रधाना विमला जरादुर्गन्धवर्जिताः ।
तत्रापि सुमहान् वृक्षो न्यग्रोधो रोहितः
स्मृतः ।
तत्फलप्राशनादेव जीवन्ति बहुवासरम् ।”
इति वराहपुराणे रुद्रगीतानामाध्यायः ॥
(तथाच देवीभागवते । ८ । ९ । १८—२३ ।
“रम्यके नाम वर्षे च मूर्त्तिं भगवतः पराम् ।
मात्स्यां देवासुरैर्व्वन्द्यां मनुः स्तौति निरन्तरम् ॥
मनुरुवाच ।
ॐ नमो मुख्यतमाय नमः सत्त्वाय
प्राणायौजसे बलाय महामत्स्याय नमः ।
अन्तर्बहिश्चाखिललोकपालकै-
रदृष्टरूपो विचरस्युरुस्वनः ।
स ईश्वरस्त्वं स इदं वशे नय-
न्नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥
यं लोकपालाः किल मत्सरज्वरा
हित्वा यतन्तोऽपि पृथक् समेत्य च ।
पातुं न शेकुर्द्विपदश्चतुष्पदः
सरीसृपं स्थाणु यदत्र दृश्यते ॥
भवान् युगान्तार्णव ऊर्म्मिमालिनि
क्षौणीमिमामोषधिवीरुधां निधिम् ।
मया सहोरुक्रमतेऽज ओजसा
तस्मै जगत्प्राणगणात्मने नमः ॥
एवं स्तौति च देवेशं मनुः पार्थिवसत्तमः ।
मत्स्यावतारं देवेशं संशयच्छेदकारणम् ॥

ध्यानयोगेन देवस्य निर्धूताशेषकल्मषः ।
आस्ते परिचरन् भक्त्या महाभागवतोत्तमः ॥"
तथाच माघे । ११२ । ३० ॥ वैद्यके । ३।२।१३॥
ब्रह्माण्डे च । ६ । १ । ७ ॥ द्रष्टव्यम् ॥) पटोल-
मूलम् । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते ।
१ । ३६ अध्याये ।
"कम्पिल्लकरम्यकपाटलापूगहरीतकीत्यादयः ॥"
पुं, आग्नीध्रपुत्त्रभेदः । एतन्नामानुसारेणैव रम्यक-
वर्षोऽभवत् । यथा, भागवते । ५ । २ । १६ ।
"तस्यामुह वा आत्मजान् स राजवर्य्य आग्नीध्रो
नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मय-
कुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्त्रानजनयत् ॥")
रम्यपुष्पः, पुं, (रम्यं दर्शनीयं पुष्पमस्य ।)
शाल्मलिवृक्षः । इति राजनिर्घण्टः ॥ (शाल्मलि-
शब्देऽस्य गुणादयो ज्ञेयाः ॥)
रम्यफलः, पुं, (रम्यं फलमस्य ।) कारस्करवृक्षः ।
इति राजनिर्घण्टः ॥
रम्या, स्त्री, (रमतेऽस्यामिति । रम+"पोर-
दुपधात् यत् ।" ३ । १ । ९८ । इति यत् ।
टाप् च ।) रात्रिः । इति मेदिनी ॥ स्थल-
पद्मिनी । इति राजनिर्घण्टः ॥ (गङ्गा ।
यथा, काशीखण्डे तत्सहस्रनामकीर्त्तने । २९ ।
१४५ ।
"रेवती रतिकृद्रम्या रत्नगर्भा रमा रतिः ॥")
रम्रः, पुं, (रम्+स्फायादित्वात् रः ।) मदनवर्णः ।
शोभा । इत्युणादिकोषः । २ । २३८ ॥
रय, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-
सक०-सेट् ।) ङ, रयते । इति दुर्गादासः ॥
रयः, पुं, (रयते अनेनेति । रय+"पुंसि संज्ञायां
घः प्रायेण ।"३ । ३ । ११८ । इति घः । रीङा-
त्यनेनेति वा । री गतौ+अप्रत्ययेन साधुरिति ।)
वेगः । इत्यमरः ।१।१।६७ ॥ प्रवाहः । यथा,—
"प्रवाहः पुनरोघः स्याद्वेगो धारा रयश्च सः ॥"
इति हेमचन्द्रः ॥
(यथा, महाभारते । २ ।१७ । ६ ।
"कथमन्तं न गच्छेम वृक्षस्येव नदीरयाः ॥"
पुरूरवसः पुत्त्रभेदः । यथा, भागवते ।९।१५।१।
"ऐलस्य चोर्व्वशीगर्भात् षडासन्नात्मजा नृप ।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥")
रराटी, स्त्री, (ललाट+रलयोरैक्यात् लस्य रत्वम् ।
ततो ङीप् ।) ललाटः । इति पुराणम् ॥ (यथा,
भागवते । २ । १ । २८ ।
"तपो रराटीं विदुरादिपुंसः
सत्यन्तु शीर्षाणि सहस्रशीर्ष्णः ॥")
रलकः, पुं, ("रमणं रत् क्विप्तुनासिकलोपे
रत् इच्छा तां लाति कः रलस्ततः स्वार्थे
कन् ।" इत्यमरटीकायां रघुनाथचक्रवर्त्ती ।)
कम्बलः । इत्यमरः ॥ पक्ष्म । इति सुभूतिः ॥
म्गविशेषः । इति सुकुटः ॥
रव, ऋ व्रजे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
सक०-सेट् ।) ऋ, रवति । इति दुर्गा-
दासः ॥

रवः, पुं, (रूयते इति । रु ध्वनौ+भावे अप् ।)
शब्दः । इत्यमरः ॥ (यथा, रघुः । ९ । ५४ ।
"धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोषितकेसरी ॥")
रवणं, क्ली, (रौतीति । रु+युच् ।) कांस्यम् ।
इति हेमचन्द्रः ॥ (रु+भावे ल्युट् ।) रवश्च ॥
रवणः, पुं, (रौतीति । रु+"सुयुरुवृञो युच् ।"
उणा० २ । ७४ । इति युच् ।) उष्ट्रः । इति
हेमचन्द्रः ॥ (यथा, माघे । १२ । ९ ।
"उत्थातुमिच्छन् विधृतः पुरोबला-
न्निधीयमाने भरभाजि यन्त्रके ।
अर्द्धोज्झितोद्गारविभक्तरखरः
स्वनाम निन्ये रवणः स्फुटार्थताम् ॥")
कोकिलः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
रवणः, त्रि, (रु+युच् ।) शब्दनः । तीक्ष्णः ।
भण्डः । चञ्चलः । इति शब्दरत्नावली ॥
रवथः, पुं, (रु+"शीङ्शपिरुगमिवञ्चिजीवि-
प्राणिभ्योऽथः ।" उणा० ३ । ११३ । इति
अथप्रत्ययः ।) कोकिलः । इत्युणादिकोषः ॥
रविः, पुं, (रूयते स्तूयते इति । रु+"अच इः ।"
उणा० ४ । १३८ । इति इः ।) सूर्य्यः । अर्क-
वृक्षः । इत्यमरः ॥ सूर्य्यस्य भोग्यं दिनं वार-
रूपम् । यथा,—
"रवौ वर्ज्ज्यं चतुः पञ्च सोमे सप्त द्वयं तथा ॥"
इत्यादिवारवेलाकथने समयप्रदीपः ॥
तत्र निषिद्धानि यथा,—
"माषमामिषमांसञ्च मसूरं निम्बपत्रकम् ।
भक्षयेद्यो रवेर्व्वारे सप्तजन्मन्यपुत्त्रकः ॥
आर्द्रकं मधु मत्स्यञ्च भक्षयेद्यो रवेर्दिने ।
सप्तजन्म भवेद्रोगी जन्म जन्म दरिद्रता ॥
निम्बं मांसं मसूरञ्च बिल्वकाञ्जिकमार्द्रकम् ।
भक्षयेद्यो रवेर्व्वारे सप्तजन्मन्यपुत्त्रकः ॥"
इति कर्म्मलोचनम् ॥ * ॥
रविग्रहस्य रक्तश्यामामिश्रितवर्णः । अयं
पूर्व्वदिक्पुरुषक्षत्रियजातिसत्त्वगुणकटुरससिंह-
राशिष्वहस्तानचलप्रमोतिषिचिताम्रकलिङ्गदेशा-
नामधिपतिः । काश्यपगोत्रः । ह्रस्वाकृत-
शरीरः । पद्महस्तद्वयः । पूर्व्वाननः । सप्ताश्व-
वाहनः । शिवाधिदैवतः । वह्निप्रत्यधिदैवतश्च ।
इति ग्रहयज्ञतत्त्वादयः ॥*॥ अस्य व्युत्पत्तिर्यथा,
"अवतीर्णोऽखिलो लोकांस्त्रस्मात् सूर्य्यः परि-
भ्रमात् ।
अचिरात्तु प्रकाशेन अवनात् स रविः स्मृतः ॥"
इति मात्स्ये १०१ अध्यायः ॥ * ॥
अस्य भार्य्यापत्यानि यथा,—
"मरीचेः काश्यपो जज्ञे तस्मान्जज्ञे विभावसुः ।
तस्य भार्य्याभवत् संज्ञा पुत्त्री त्वष्टुः प्रजापतेः ॥
त्रीण्यपत्यानि राजेन्द्र ! संज्ञायां महसां
निधिः
आदित्यो जनयामास कन्यामेकां सुलोचनाम् ।
वैवस्वतं मनुश्रेष्ठं यमञ्च यमुनां ततः ॥
नातितेजोमयं रूपं सोढुं सा तं विवस्वतः ।

मायामयीं ततश्छायां सवर्णां निर्म्ममे स्वतः ॥
संयोगात् ततश्छायां सवर्णे शृणु मे वचः ।
अहं यास्यामि सदनं पितुस्त्वं पुनरत्र मे ।
भवने वस कल्याणि ! निर्व्विशङ्कं ममाज्ञया ॥
मनुरेष यमावेतौ यमुनायमसंज्ञकौ ।
स्वापत्यदृश्या द्रष्टव्यमेतद्वालत्रयं त्वया ॥
न वक्तव्यमिदं वृत्तं त्वया पत्यौ कदाचन ।
इत्याकर्ण्याथ सा त्वाष्ट्रीं देवी छाया जगाद
ताम् ॥
आकचग्रहणामाशापान्नापाचे कदाचन ।
आख्यास्यामि चरित्रं ते याहि देवि ! यथासुखम् ॥
इति छायां गृहे स्थाप्य संज्ञागात् पितुरालयम् ।
उवाच पितरं देवी आमातुस्तव न क्षमा ॥
तेजः सोढुमहं तात ! कामप्रश्च महात्मनः ।
तन्निशम्य शुकोपाशौ भर्त्सयामास कन्यकाम् ॥
भर्त्तुः श्रेयः कथं वा स्यादिति सा परिचिन्त्य च ।
आगच्छद्वडवा भूत्वा चरन्ती चोत्तरान् कुरून् ॥
तपस्तेपे च सा तीव्रं पतिमाधाय चेतसि ।
मन्यमानोऽथ तां संज्ञां सवर्णायां तथा रविः ॥
सावर्णिं जनयामास मनुश्रेष्ठं महीपते ।
शनैश्चरं द्वितीयञ्च सुतां भद्रां तृतीयिकाम् ॥
सवर्णा स्वेष्वपत्येषु स्नापल्न्यात् स्नेहभावतः ।
चकाराभ्यधिकं स्नेहं न तथा पूर्व्वजेष्वहो ॥
चिरमालोक्य तां भार्य्यां उवाच सविता वचः ।
अयि भाविनि बालेषु समेष्वपि कुतस्त्वया ॥
विशेषितोऽधिकः स्नेहः सावर्ण्यादिसुतान् प्रति ।
नाचचक्षे तदा सा च भास्करे परिपृच्छति ॥
ततः समुद्यतं शप्तुं छाया सर्व्वं शशंस ह ।
यथा वृत्तं तथा तथ्यं तुतोष भगवान् रविः ॥
निरागसं न शशाप जगाम त्वष्टुरन्तिकम् ।
त्वष्टापि च यथान्यायं सान्त्वयित्वाथ काश्यपम् ।
निर्देग्धुकामं कोपेन प्रार्थयन्च मुदा तदा ।
त्वष्टोवाच ।
तवातितेजसो भीता प्राप्योत्तरकुरून् वने ।
वडवारूपमास्थाय संज्ञा चरति शाद्वले ।
द्रष्टा हि तां भवानद्य स्वभार्य्यां तात मा वद ॥
तथ्यातुरोऽथ सविता गत्वोत्तरकुरूनथ ।
स हरिर्हरिरूपेण सुखेन समताडयत् ॥
त्वरमाणा च सवितुः परपूरुषशङ्कया ।
सा तन्निरवमत् शुक्रं नासिकाभ्यां विवस्वतः ।
देवौ तस्मादजायेतामश्विनौ भिषजां वरौ ॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः ॥
(अन्यत् सूर्य्यशब्दे द्रष्टव्यम् ॥)
रविकान्तः, पुं, (रविणा रविकरसंयोगेन कान्तः
कमनीयः ।) सूर्य्यकान्तमणिः । इति राज-
निर्घण्टः ॥
रविचक्रं, क्ली, (रवेश्चक्रम् ।) नराकारसूर्य्यचक्र-
विशेषः । यथा,—
"लिखेत रविचक्रन्तु भास्करो नरसन्निभः ॥
यस्मिन्नृक्षे भवेत् सूर्य्यस्तदादौ त्रीणि मस्तके ।
अथ षट् प्रदातव्यमेकैकं स्कन्धयोर्न्यसेत् ॥
एकैकं बाहुयुग्मे तु एकैकं हस्तयोर्द्वयोः ।

हृदये पञ्च नक्षत्राणि एकं नाभौ प्रदापयेत् ।
नक्षत्रमेकं दद्याद्गुह्ये एकैकं जानुके न्यसेत् ।
नक्षत्राणि च शेषाणि रविपादे नियोजयेत् ।
चरणस्थेन ऋक्षेण अल्पायुर्जायते नरः ।
विदेशगमनं जानौ गुह्यस्थे परदारवान् ।
नाभिस्थेनाल्पसन्तुष्टो हृत्स्थेन स्यान्महेश्वरः ।
पाणिस्थेन भवेच्चौरः स्थानभ्रष्टो भवेद्भुजे ।
स्कन्धस्थिते धनपतिर्मुखे मिष्टान्नमाप्नुयात् ।
मस्तके पट्टबन्धस्तु नक्षत्रं स्याद्यदि स्थितम् ।”
इति गारुडे ६० अध्यायः ।

रविजः, पुं, (रवेर्जात इति । जन्+डः ।) शनैश्चरः । यथा, ज्योतिषतत्त्वे ।
“उरगशतभिषार्द्रास्वातिमूलाभिपूर्व्वा
रविरविजकुजार्के भूतषष्ठीनवम्याम् ।”
(बहुवचने तु केतवः । यथा, बृहत्संहितायाम् । ११ । १० ।
“प्रागपरदिशोर्द्दृश्या
नृपतिविरोधावहा रविजाः ।”)

रवितनयः, पुं, (रवेः तनयः पुत्रः ।) सावर्णिकमनुः । यथा,—
“स बभूव महाभागः सावर्णिस्तनयो रवेः ।”
इति देवीमाहात्म्यम् ।
वैवस्वतमनुः । शनिः । (यथा, बृहत्संहितायाम् । १४ । ३२ ।
“परिवेशमण्डलगतो
रवितनयो क्षुद्रधान्यनाशकरः ।”)
यमः । (सुग्रीवः । कर्णः । द्विवचने अश्विनीकुमारौ ।)

रविनन्दनः, पुं, (रवेर्नन्दनः । यद्वा, रविं नन्दयतीति । नन्दि+ल्युः ।) सुग्रीवः । इति त्रिकाण्डशेषः । सावर्णिमनुः । वैवस्वतमनुः । (यथा, भागवते । ८ । १ । १९ ।
“होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनन्दनम् ।”)
शनिः । यमश्च । (द्विवचने अश्विनीकुमारौ ।)

रविनाथं, क्ली, (रविरेव नाथोऽस्य ।) पद्मम् । बन्धूके, पुं । इति शब्दचन्द्रिका ।

रविपत्रः, पुं, (रविवत् दीप्तिमत् पत्रं यस्य ।) आदित्यपत्रक्षुपः । इति राजनिर्घण्टः ।

रविप्रियं, क्ली, (रविरेव प्रियमस्य ।) रक्तकमलम् । ताम्रम् । इति राजनिर्घण्टः । (अस्य पर्य्याये यथा,—
“ताम्रमौदुम्बरं शुल्वमुदुम्बरमपि स्मृतम् ।
रविप्रियं म्लेच्छमुखं सूर्य्यपर्य्यायनामकम् ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

रविप्रियः, पुं, (रवेः प्रियः ।) आदित्यपत्रः । रक्तकरवीरः । इति राजनिर्घण्टः । लकुचः । इति शब्दमाला ।

रविरत्नकं, क्ली, (रवे रत्नम् । ततः कन् ।) माणिक्यम् । इति राजनिर्घण्टः ।

रविलोहं, क्ली, (रविप्रियं लोहम् ।) ताम्रम् । इति राजनिर्घण्टः । (शुल्वादयोऽस्य ताम्रशब्दे विज्ञेयाः ।)

रविलोचनः, पुं, (रविर्लोचनमस्य ।) विष्णुः । यथा,—
“रविर्व्विरोचनः सूर्य्यः सविता रविलोचनः ।”
इति तस्य सहस्रनामस्तोत्रम् ।

रविसंज्ञकं, क्ली, (रविः संज्ञा यस्य इति । कप् ।) ताम्रम् । इति शब्दचन्द्रिका ।

रविसुतः, पुं, (रवेः सुतः ।) सूर्य्यपुत्रः । स च शनैश्चरादिः । यथा,—
“नीलाञ्जनचयप्रख्यं रविसुतं महाग्रहम् ।
छायाया गर्भसंभूतं वन्दे भक्त्या शनैश्चरम् ।”
इति नवग्रहस्तोत्रम् ।

रवीन्दं, क्ली, (रविणा सूर्य्यकरस्पर्शेन इन्दति प्रकाशते इति । इन्द+अच् ।) पद्मम् । इति धरणिः ।

रश, स्वने । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) रेफादिस्तालव्यान्तः । रशना । इति दुर्गादासः । सौत्रधातुरयम् ।

रशना, स्त्री, (अश्नुते व्याप्नोतीति । अशू व्याप्तौ + “अशे रश च ।” उणा० २ । ७५ । इति युच् धातो रशादेशश्च ।) काञ्ची । इत्युणादिकोषः । (यथा, रघौ । ८ । ५८ ।
“इयमप्रतिबोधशायिनी
रशना त्वां प्रथमा रहःसखी ।”)
जिह्वा । इति शब्दरत्नावली । (“जिह्वावाची तु रसनाशब्दो दन्त्यसकारवानेव । रसयति स्वादयतीति । नन्द्यादित्वात् ल्युः । इति कलिङ्गः । रशना काञ्चिजिह्वयोरिति तु धरणिः ।” इत्युज्ज्वलः । २ । ७५ । रज्जुः । यथा, वाजसनेयसंहितायाम् । २१ । ४६ ।
“होता यक्षदनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित ।” “रशनया रज्ज्वा बद्ध्वा अधित धृतवान् पशून् इति शेषः ।” इति तद्भाष्ये महीधरः । अङ्गुलयः । इति निघण्टुः । २ । ५ । अत्र सदा बहुवचनप्रयोगो भवति । इति देवराजयज्वा ।)

रश्मिः, पुं, (अश्नुते व्याप्नोतीति । अशू व्याप्तौ + “अश्नोते रश्च ।” उणा० ४ । ४६ । इति मिः धातो रशादेशश्च ।) किरणः । (यथा, मनौ । ५ । १३३ ।
“मक्षिका विप्रुषश्छाया गौरश्वः सूर्य्यरश्मयः ।
रजो भूर्व्वायुरग्निश्च स्पर्शे मेध्यानि निर्द्दिशेत् ।”)
पक्ष्म । अश्वरज्जुः । इति मेदिनी । * । (यथा, ऋग्वेदे । १ । २८ । ४ ।
“यत्र मन्थां विबध्नते रश्मीन् यामत वा इव ।”
“रश्मीन् अश्वबन्धनार्थान् प्रग्रहान् ।” इति तद्भाष्ये सायणः ।) सूर्य्यस्य रश्मिना जलादानदाने यथा,—
“तेजोभिः सर्व्वलोकेभ्य आदत्ते रश्मिभिर्ज्जलम् ।
समुद्राद्वायुसंयोगाद्वहन्त्यापो गभस्तयः ।
ततस्तु पयसां काले परिवर्त्तन्दिवाकरः ।
नियच्छत्यपो मेघेभ्यः शुक्लाशुक्लैस्तु रश्मिभिः ।”
इति मात्स्ये १०२ अध्यायः । * ।
अपि च ।
“एवमेव महादेवो देवदेवः पितामहः ।
करोति नियतं कालं कालात्मा ह्यैश्वरी तनुः ।
तस्य ये रश्मयो विप्राः सर्व्वलोकप्रदीपकाः ।
तेषां श्रेष्ठाः पुनः सप्त रश्मयो ग्रहयोनयः ।
सुषुम्नो हरिकेशश्च विश्वकर्म्मा तथैव च ।
विश्वव्यचाः पुनश्चान्यः सम्पद्वसुरतः परः ।
अर्व्वाग्वसुरिति ख्यातः स्वराडन्यः प्रकीर्त्तितः ।
सुषुम्नः सूर्य्यरश्मिस्तु पुष्णाति शिशिरद्युतिम् ।
तिर्य्यगूर्द्ध्वप्रचारोऽसौ सुषुम्नः परिगीयते ।
हरिकेशस्तु यः प्रोक्तो रश्मिर्नक्षत्रपोषकः ।
विश्वकर्म्मा तथा रश्मिर्बुधं पुष्णाति सर्व्वदा ।
विश्वव्यचास्तु यो रश्मिः शुक्रं पुष्णाति नित्यदा ।
सम्पद्वसुरिति ख्यातः स पुष्णाति च लोहितम् ।
वृहस्पतिं प्रपुष्णाति रश्मिरर्व्वाग्वसुः प्रभोः ।
शनैश्चरं प्रपुष्णाति सप्तमश्च स्वराट् तथा ।
एवं सूर्य्यप्रभावेन सर्व्वा नक्षत्रतारकाः ।
वर्द्धन्ते वर्द्धिता नित्यं नित्यमाप्याययन्ति च ।
दिव्यानां पार्थिवानाञ्च नैशानाञ्चैव सर्व्वशः ।
आदानान्नित्यमादित्यस्तेजसा तमसां प्रभुः ।
आदत्ते स तु नाड़ीनां सहस्रेण समन्ततः ।
नादेयांश्चैव सामुद्रान् कूपांश्चैव सहस्रकम् ।
स्थावरान् जङ्गमांश्चैव यच्च कुल्यादिकं पयः ।
तस्य रश्मिसहस्रन्तु शीतवर्षोष्णनिस्रवम् ।
तासां चतुःशतं नाड्यो वर्षन्ते चित्रमूर्त्तयः ।
छन्दनाश्चैव याह्याश्च कोतना भूतनास्तथा ।
अमृता नामतः सर्व्वा रश्मयो वृष्टिसर्ज्जनाः ।
हिमोद्वहाश्च तामस्यो रश्मयस्त्रिशतं पुनः ।
चश्यो मेध्यश्च पेध्यश्च ह्लादिन्यो हिमसर्ज्जनाः ।
चन्द्राख्या नामतः सर्व्वाः पीताभाः स्युर्गभस्तयः ।
शुक्लाश्च ककुभश्चैव गावो विश्वभृतस्तथा ।
शुक्लाख्या नामतः सर्व्वास्त्रिविधा घर्म्मसर्ज्जनाः ।
समं बिभर्त्ति ताभिः स मनुष्यपितृदेवताः ।
मनुष्यानौषधेनेह स्वधया च पितॄनपि ।
अमृतेन सुरान् सर्व्वांस्त्रिभिस्त्रींस्तर्पयत्यसौ ।
वसन्ते ग्रीष्मके चैव शतैः सन्तपति त्रिभिः ।
शरद्यपि च वर्षासु चतुर्भिः संप्रवर्षति ।
हेमन्ते शिशिरे चैव हिममुत्सृजति त्रिभिः ।
वरुणो माघमासे तु सूर्य्यः पूषा तु फाल्गुने ।
चैत्रे मासि भवेदंशो धाता वैशाखतापनः ।
ज्यैष्ठमूले भवेदिन्द्र आषाढ़े सविता रविः ।
विवस्वान् श्रावणे मासि प्रौष्ठपद्यां भगः स्मृतः ।
पर्ज्जन्योऽश्वयुजि त्वष्टा कार्त्तिके मासि भास्करः ।
मार्गशीर्षे भवेन्मित्रः पौषे विष्णुः सनातनः ।
पञ्च रश्मिसहस्राणि वरुणस्यार्ककर्म्मणि ।
षड्भिः सहस्रैः पूषा तु देवेशः सप्तभिस्तथा ।
धाताष्टभिः सहस्रैस्तु नवभिस्तु शतक्रतुः ।
विवस्वान् दशभिः पाति पात्येकादशभिर्भगः ।
सप्तभिस्तपते मित्रस्त्वष्टा चैवाष्टभिस्तपेत् ।
अर्य्यमा दशभिः पाति पर्ज्जन्यो नवभिस्तपेत् ।
षड्भी रश्मिसहस्रैस्तु विष्णुस्तपति विश्वसृक् ।
वसन्ते कपिलः सूर्य्यो ग्रीष्मे काञ्चनसप्रभः ।

स्वतो वर्षासु वर्णेन पाण्डुरः शरदि प्रभुः ।
हेमन्ते ताम्रवर्णः स्यात् शिशिरे लोहितो रविः ॥
औषधीषु बलं धत्ते स्वधामपि पितृष्वथ ।
सूर्य्योऽमरत्वममृतत्रयं त्रिषु नियच्छति ॥
अन्ये चाष्टौ ग्रहा ज्ञेयाः सूर्य्येणाधिष्ठिता द्विजाः ।
चन्द्रमाः सोमपुत्त्रश्च शुक्रश्चैव बृहस्पतिः ॥
भौमो मन्दस्तथा राहुः केतुमानपि चाष्टमः ।
सर्व्वे ध्रुवे निबद्धा ये ग्रहास्ते वातरश्मिभिः ।
भ्राम्यमाणा यथायोगं भ्रमन्त्यनुदिवाकरम् ॥”
इति कौर्म्मे ४० अध्यायः ॥

तद्वैदिकपर्य्यायः । खेदयाः १ किरणाः २ गावः ३ रश्मयः ४ अभीशवः ५ दीधितयः ६ गभस्तयः ७ वनम् ८ उस्राः ९ वसवः १० मरीचिपाः ११ मयूखाः १२ सप्तऋषयः १३ साध्याः १४ सुपर्णाः १५ । इति पञ्चदश रश्मिनामानि । इति वेदनिघण्टौ । १५ ॥

रश्मिपतिः, पुं, (रश्मिः पतिः पोषको यस्य ।) आदित्यपत्रक्षुपः । इति राजनिर्घण्टः ॥

रस, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) रसति । इति दुर्गादासः ॥

रस, त् क आस्वादे । स्नेहे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) दन्त्योपधः । रसयति मधु द्विरेफः । इति दुर्गादासः ॥

रसं, क्ली, बोलम् । इति राजनिर्घण्टः ॥

रसः, पुं, (रसतीति । रस् + पचाद्यच् । यद्वा, रस्यते इति । रस आस्वादने + “पुंसि संज्ञायां घः प्रायेण ।” ३ । ३ । ११८ । इति घः ।) रसनेन्द्रियग्राह्यवस्तु । स च कालस्वभावभूमिवियदनिलानलसंसर्गेण परिणामान्तरं गतः षट्प्रकारो भवति । तत्र पृथिव्यम्बुगुणबाहुल्यान्मधुरः १ तोयाग्निगुणबाहुल्यादम्लः २ पृथिव्यग्निगुणबाहुल्याल्लवणः ३ वाय्वग्निगुणबाहुल्यात् कटुकः ४ वाय्वाकाशगुणबाहुल्यात् तिक्तः ५ पृथिव्यनिलगुणबाहुल्यात् कषायः ६ । आपो रसानामाधारकारणं अत आप्यो नाम । अपां पृथिव्यामनुप्रवेशात् पृथिव्याप्याधारकारणमेव । तेन जलक्षिती अपि तदाधारतया रसानामभिव्यक्तौ कारणे । अभिव्यक्तेश्च मधुरादिरूपमन्तरेणासम्भवान्मधुरादिविशेषेऽपि जलक्षिती कारणे । अग्न्यादयस्तु त्रयः नीरसतया मधुरादिविशेषे प्राधान्येन निमित्तकारणम् । तद्व्यतिरेकेणाम्लादिरसाभावात् । रसाभिव्यक्तेश्च अग्न्यादिभूतत्रयसन्निधानं विनानुपलब्धेरभिव्यक्तावपि अग्न्यादीनां कारणत्वम् । तदुक्तं चरके ।

“रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा ।
निर्व्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः ॥”

एते च रसाः परस्परसंयोगात् सप्तपञ्चाशद्भवन्ति । इति चक्रपाणिदत्तकृतद्रव्यगुणोपरि शिवदासीयटीका ॥ * ॥ (तथाच ।

“भेदश्चैषां त्रिषष्टिविधविकल्पो द्रव्यदेशकालप्रभावात्तदुपदेक्ष्यामः ।
स्वादुरम्लादिभिर्योगं शेषैरम्लादयः पृथक् ।
यान्ति पञ्चदशैतानि द्रव्याणि द्विरसानि तु ॥
पृथगम्लादियुक्तस्य योगः शेषैः पृथग्भवेत् ।
मधुरस्य तथाम्लस्य लवणस्य कटोस्तथा ॥
त्रिरसानि यथासङ्ख्यं द्रव्याण्युक्तानि विंशतिः ।
वक्ष्यन्ते तु चतुष्केण द्रव्याणि दश पञ्च च ॥
स्वाद्वम्लौ सहितौ योगं लवणाद्यैः पृथग्गतौ ।
योगैः शेषं पृथग्यातश्चतुष्कं रससङ्ख्यया ॥
सहितौ स्वादुलवणौ तद्वत् कट्वादिभिः पृथक् ।
युक्तौ शेषैः पृथग् योगं यातः स्वादूषणौ तथा ॥
कट्वाद्यैरम्ललवणौ संयुक्तौ सहितौ पृथक् ।
यातः शेषैः पृथग्योगं शेषैरम्लकटू तथा ॥
युज्येते तु कषायेण सतिक्तौ लवणोषणौ ।
षट् तु पञ्च रसान्याहुरेकैकस्यापवर्ज्जनात् ॥
षट् चैवैकरसानि स्युरेकं षड्रसमेव तु ।
इति त्रिषष्टिर्द्रव्याणां निर्द्दिष्टा रससङ्ख्यया ॥
त्रिषष्टिः स्यात्त्वसङ्ख्येया रसानुरसकल्पनात् ।
रसास्तरतमाभ्यस्ताः सङ्ख्यामतिपतन्ति हि ॥
संयोगाः सप्तपञ्चाशत् कल्पना तु त्रिषष्टिधा ।
रसानां तत्र योग्यत्वात् कल्पिता रसचिन्तकैः ॥
क्वचिदेको रसः कल्प्यः संयुक्ताश्च रसाः क्वचित् ।
दोषौषधादीन् सञ्चिन्त्य भिषजा सिद्धिमिच्छता ॥”
परस्तात् प्रवक्ष्यन्ते रसानां षड्विभक्तयः ।
षट्पञ्चभूतप्रभवाः सङ्ख्याताश्च यथा रसाः ॥”
“सौम्याः खल्वापोऽन्तरिक्षप्रभवाः प्रकृति शीता लघ्व्यश्च अव्यक्तरसाश्च तास्त्वन्तरिक्षाद्भ्रश्यमानाभ्रष्टाश्च पञ्च महाभूतगुणसमन्विता जङ्गमस्थावराणां भूतानां मूर्त्तीरभिप्रीणयन्ति यासु मूर्त्तिषु षड्भिर्मूर्च्छन्ति रसाः ।
तेषां षण्णां रसानां सोमगुणातिरेकान्मधुरो रसः पृथिव्यग्निभूयिष्ठत्वादम्लः सलिलाग्निभूयिष्ठत्वाल्लवणो वाय्वग्निभूयिष्ठत्वात् कटुको वाय्वाकाशातिरेकात्तिक्तः पवनपृथिव्यतिरेकात् कषायः । एवमेषां रसानां षट्त्वमुपपन्नम् ॥” इति च चरके सूत्रस्थाने २६ अध्यायः ॥ तथाच ।

“दोषाणां पञ्चदशधा प्रसरोऽभिहितस्तु यः ।
त्रिषष्ट्या रसभेदानां तत्प्रयोजनमुच्यते ॥
अविदग्धा विदग्धाश्च भिद्यन्ते ते त्रिषष्टिधा ।
रसभेदत्रिषष्टिस्तु वीक्ष्य वीक्ष्यावचारयेत् ॥
एकैकेनानुगमनं भागशो यदुदीरितम् ।
दोषाणां तत्र मतिमान् त्रिषष्टिन्तु प्रयोजयेत् ॥
यथाक्रमं प्रवृत्तानां द्विकेषु मधुरो रसः ।
पञ्चानुक्रमते योगानम्लश्चतुर एव च ॥
त्रींश्चानुगच्छति रसो लवणः कटुको द्वयम् ।
तिक्तः कषायमन्वेति ते द्विका दश पञ्च च ॥
तद्यथा । मधुराम्लः । मधुरलवणः । मधुरतिक्तः । मधुरकटुकः । मधुरकषायः । एते पञ्चानुक्रान्ता मधुरेण ॥ अम्ललवणः । अम्लकटुकः । अम्लतिक्तः । अम्लकषायः । एते चत्वारोऽनुक्रान्ता अम्लेन ॥ लवणकटुकः । लवणतिक्तः । लवणकषायः । एते त्रयोऽनुक्रान्ता लवणेन ॥ कटुतिक्तः । कटुकषायः । द्वावेतावनुक्रान्तौ कटुकेन ॥ तिक्तकषाय एक एवानुक्रान्तस्तिक्तेन । एते पञ्चदश द्विकसंयोगा व्याख्यातास्त्रिकं वक्ष्यामः ॥

आदौ प्रयुज्यमानस्तु मधुरो दश गच्छति ।
षडम्लो लवणस्तस्माद्द्वयमेकं रसः कटुः ॥

मधुराम्ललवणः । मधुराम्लकटुकः । मधुराम्लतिक्तः । मधुराम्लकषायः । मधुरलवणकटुकः । मधुरलवणतिक्तः । मधुरलवणकषायः । मधुरकटुकतिक्तः । मधुरकटुकषायः । मधुरतिक्तकषायः । एवमेषां त्रिकसंयोगानां दशानामादौ मधुरः प्रयुज्यते । अम्ललवणकटुकः । अम्ललवणतिक्तः । अम्ललवणकषायः । अम्लकटुकषायः । अम्लकटुकतिक्तः । अम्लतिक्तकषायः । एवमेषां षण्णामादावम्लः प्रयुज्यते । लवणकटुतिक्तः । लवणकटुकषायः । लवणतिक्तकषायः । एवमेषां त्रयाणामादौ लवणः प्रयुज्यते । कटुतिक्तकषायः । एवमेकस्यादौ कटुकः प्रयुज्यते । एवमेते त्रिकसंयोगविंशतिर्व्याख्याताः । चतुष्कान् वक्ष्यामः ।

चतुष्करससंयोगान्मधुरो दश गच्छति ।
चतुरोऽम्लस्तु गच्छेच्च लवणस्त्वेकमेव तु ॥

मधुराम्ललवणकटुकः । मधुराम्ललवणतिक्तः । मधुराम्ललवणकषायः । मधुराम्लकटुकतिक्तः । मधुराम्लकटुककषायः । मधुरलवणतिक्तकटुकः । मधुराम्लतिक्तकषायः । मधुरलवणकटुतिक्तः । मधुरलवणकटुकषायः । मधुरलवणतिक्तकषायः । एवमेषां दशानामादौ मधुरः प्रयुज्यते । अम्ललवणकटुकतिक्तः । अम्ललवणकटुकषायः । अम्ललवणतिक्तकषायः । अम्लकटुतिक्तकषायः । एवमेषां चतुर्णामम्लः । लवणकटुतिक्तकषायः । एवमेकस्यादौ लवणः । एवमेते चतुष्करससंयोगाः पञ्चदशकीर्त्तिताः । पञ्चकान् वक्ष्यामः ।

पञ्चकान् पञ्चमधुर एकमम्लस्तु गच्छति ।

मधुराम्ललवणकटुतिक्तः । मधुराम्ललवणकटुकषायः । मधुराम्ललवणतिक्तकषायः । मधुराम्लकटुतिक्तकषायः । मधुरलवणकटुतिक्तकषायः । एवमेषां पञ्चानां पञ्चकरससंयोगानामादौ मधुरः प्रयुज्यते । अम्ललवणकटुतिक्तकषायः । एवमेकस्यादावम्लः प्रयुज्यते । एवमेते षट्पञ्चकसंयोगा व्याख्याताः ॥ षट्कमेकं वक्ष्यामः । एकस्तु षट्कसंयोगः मधुराम्ललवणकटुकतिक्तकषायः । एवमयमेकषट्संयोगः ॥ एकैकश्च षड्रसा भवन्ति । मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति । भवति चात्र ।

एषा त्रिषष्टिर्व्याख्याता रसानां रसचिन्तकैः ।
दोषभेदे त्रिषष्टिस्तु प्रयोक्तव्या विपश्चिता ॥”

इत्युत्तरतन्त्रे सुश्रुतेन त्रिषष्टितमेऽध्याय उक्तः ॥

“रसास्तु प्रधानं कस्मादागमादागमो हि शास्त्र-

सुच्यते शास्त्रे हि रसा अधिकृता यथा रसायत्त आहार इति तस्मिंश्च शास्त्राः। उपदेशाच्चोपदिश्यन्ते हि रसाः। यथा मधुराम्ललवणा वातं शमयन्ति। अनुमानाच्च रसेन अनुमीयते द्रव्यं यथा मधुरमिति। ऋषिवचनाच्च ऋषिवचनं वेदो यथा किञ्चिदिज्यार्थं मधुरमाहरेदिति। तस्माद्रसाः प्रधानं रसेषु गुणसंज्ञा।" इति च सुश्रुते सूत्रस्थाने ४० अध्याये। यथा च, वाग्भटे १० अध्याये।

"क्ष्माम्भोऽग्नि: क्ष्माम्बुतेजः खवाय्वग्न्यनिलगोऽनिलैः।
द्वयोल्बणैः क्रमाद्भूतैर्म्मधुरादिरसोद्भवः॥
तेषां विद्याद्रसं स्वादुं यो वक्त्रमनुलिम्पति।
आस्वाद्यमानो देहस्य ह्लादनोऽक्षप्रसादनः॥
प्रियः पिपीलिकादीनां अम्लः क्षालयते मुखम्।
हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचनः॥
लवणः स्यन्दयत्यास्यं कपोलगलदाहकृत्।
तिक्तो विशदयत्यास्यं रसनं प्रतिहन्ति च।
उद्वेजयति जिह्वाग्रं कुर्व्वंश्चिमिचिमां कटुः॥
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च।
कषायो जडयेज्जिह्वां कण्ठस्रोतो विबन्धकृत्॥
रसानामिति रूपाणि कर्म्माणि मधुरो रसः।
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम्॥
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम्।
प्रशस्तो बृंहणः कण्ठ्यः स्तन्यसन्धानकृद्गुरुः॥
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः।
कुरुतेऽत्युपयोगेन स मेदः कफजान् गदान्॥
स्थौल्याग्निसादसंन्यासमेहगण्डार्ब्बुदादिकान्।
अम्लोऽग्निदीप्तिकृत्स्निग्धो हृद्यः पाचनरोचनः।
उष्णवीर्य्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः॥
करोति कफपित्तास्रं मूढवातानुलोमनम्।
सोऽत्यभ्यस्तस्तनोः कुर्य्याच्छैथिल्यं तिमिरं भ्रमम्॥
कण्डूपाण्डुत्ववीसर्पशोफविस्फोटतृड्ज्वरान्।
लवणः स्तम्भसंघातबन्धविध्मापनोऽग्निकृत्।
स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत्॥
सोऽतियुक्तोऽस्रपवनं खलतिं पलितं वलिम्।
तृट्कुष्ठविषवीसर्पान् जनयेत् क्षपयेद्बलम्॥
तिक्तः स्वयमरोचिष्णुररुचिं हन्ति कृमितृड्विषम्।
कुष्ठमूर्च्छाज्वरोत्क्लेशदाहपित्तकफान् जयेत्॥
क्लेदमेदोवसामज्जशकृन्मूत्रोपशोषणः।
लघुर्मेध्यो हिमो रूक्षः स्तन्यकण्ठविशोधनः॥
धातुक्षयानिलव्याधीनतियोगात् करोति सः।
कटुर्गलामयोदर्दकुष्ठालसकशोफजित्॥
व्रणावसादनः स्नेहमेदःक्लेदोपशोषणः।
छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः।
कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम्।
मूर्च्छामाकुञ्चनं कम्पं कटिपृष्ठादिषु व्यथाम्।
कषायः पित्तकफहा गुरुरस्रविशोधनः।
पीडनो रोपणः शीतः क्लेदमेदोविशोषणः॥
आमसंस्तम्भनो ग्राही रूक्षोऽतित्वक्प्रसादनः।
करोति शीलितः सोऽतिविष्टम्भाध्मानहृद्रुजः॥
तृट्कार्श्यपौरुषभ्रंशस्रोतोरोधमलग्रहान्॥
घृतहेमगुडाक्षोडमोचचोचपरूषकम्।
अभीरुवीरापनसराजादनबलात्रयम्॥
मेदे चतस्रः पर्ण्यो जीवन्ती जीवकर्षभौ।
मधूकं मधुकं बिम्बी विदारी श्रावणीयुगम्॥
क्षीरशुक्ला तुगाक्षीरी क्षीरिण्यौ काश्मरी सहे।
क्षीरेक्षुगोक्षुरक्षौद्रद्राक्षादिर्म्मधुरो गणः॥
अम्लो धात्रीफलाम्लीकामातुलुङ्गाम्लवेतसम्।
दाडिमं रजतं तक्रं चुक्रं पालेवतं दधि।
आम्रमाम्रातकं भव्यं कपित्थं करमर्द्दकम्॥
वरं सौवर्चलं कृष्णं विड़ं सामुद्रमौद्भिदम्॥
रोमकं पांसुजं शीसं क्षारश्च लवणो गणः।
तिक्तः पटोली त्रायन्ती वालकोशीरचन्दनम्।
भूनिम्बनिम्बकटुकातगरागुरुवत्सकम्॥
नक्तमालद्विरजनीमुस्तमूर्वाटरूषकम्।
पाठापामार्गकांस्यायोगुडूचीधन्वयासकम्।
पञ्चमूलं महद्व्याघ्र्यौ विशालातिविषा वचा॥
कटुको हिङ्गुमरिचकृमिजित्पञ्चकोलकम्।
कुठेराद्या हरितकाः पित्तं मूत्रमरुष्करम्॥
वर्गः कषायः पथ्याक्षं शिरीषः खदिरो मधु।
कदम्बोडुम्बरं मुक्ताप्रवालाञ्जनगैरिकम्।
बालं कपित्थं खर्ज्जूरं बिसपद्मोत्पलादि च॥
मधुरं श्लेष्मलं प्रायो जीर्णाच्छालियवादृते।
मुद्गाद्गोधूमतः क्षौद्रात्सिताया जाङ्गलामिषात्॥
प्रायोऽम्लं पित्तजननं दाडिमामलकादृते।
अपथ्यं लवणं प्रायश्चक्षुषोऽन्यत्र सैन्धवात्॥
तिक्तं कटु च भूयिष्ठमवृष्यं वातकोपनम्।
ऋतेऽमृतापटोलीभ्यां शुण्ठीकृष्णारसोनतः॥
कषायं प्रायशः शीतं स्तम्भनं चाभयामृते।
रसाः कट्वम्ललवणा वीर्य्येणोष्णा यथोत्तरम्।
तिक्तः कषायो मधुरस्तद्वदेव च शीतलः॥
तिक्तः कटुः कषायश्च रूक्षा बद्धमलास्तथा।
पट्वम्लमधुराः स्निग्धाः सृष्टविण्मूत्रमारुताः॥
पटोः कषायस्तस्माच्च मधुरः परमं गुरुः।
लघुरम्लः कटुस्तस्मात्तस्मादपि च तिक्तकः।
संयोगाः सप्तपञ्चाशत्कल्पना तु त्रिषष्टिधा।
रसानां यौगिकत्वेन यथास्थूलं विभज्यते॥
एकैकहीनास्तान् पञ्च पञ्च यान्ति रसा द्विके।
त्रिके स्वादुर्दशाम्लः षट् त्रीन् पटुस्तिक्त एककम्॥
चतुष्केषु दश स्वादुश्चतुरोऽम्लः पटुः सकृत्।
पञ्चकेष्वेकमेवाम्लो मधुरः पञ्च सेवते।
द्रव्यमेकं षडास्वादमसंयुक्ताश्च षड्रसाः॥
षट्पञ्चकाः षट् च पृथग्रसाः स्यु-
श्चतुर्द्विकौ पञ्चदशप्रकारौ।
भेदास्त्रिकाविंशतिरेकमेकं
द्रव्यं षडास्वादमिति त्रिषष्टिः॥
ते रसानुरसतो रसभेदा-
स्तारतम्यपरिकल्पनया च।
सम्भवन्ति गणनां समतीता
दोषभेषजवशादुपयोज्याः॥"

अथ षड्रसगुणाः।
"मधुरः शीतलो बल्यो बृंहणोऽनिलपित्तहा।
रसायनो गुरुः स्निग्धश्चक्षुष्यः शीतलश्च सः॥
आयुःकृद्व्रणहा रुच्यः कण्ठोदावर्त्तनाशकः।
अम्लो रुचिकरो हृद्यः शीतलो वह्निवर्द्धनः॥
वातहा रसनोद्वेगी स्निग्धोष्णो रक्तमांसदः।
क्लेदनस्तर्पणः पक्ता लघुश्चापी कटुश्च यः॥
लवणः क्लेदनस्तीक्ष्णः पाचनो दीपनो रसः।
स्निग्धो रुचिकरः स्यन्दी हृद्विशुक्लकरोऽगुरुः॥
कटुर्ज्जिह्वास्यनासाक्षिरोचनो रुचिराङ्गकृत्।
उष्णस्तीक्ष्णो लघुः कण्डूकृमिशुक्रकफापहः॥
लघुः शोषी पक्तिकरः श्लेष्माकर्षणकः पटुः।
तिक्तः पित्तकफच्छेदी विषकुष्ठज्वरापहः॥
दीपनः पाचनो रूक्षः कण्डूकृमिहरो लघुः।
कषायः शोषकः स्तम्भी व्रणग्लानार्त्तिनाशनः॥
कफशोणितपित्तघ्नो रूक्षः शीतो लघुस्तथा।
शीतलः पित्तहा बल्यः कफवातहरो गुरुः॥
उष्णं पित्तकरो वीर्य्यो वातश्लेष्महरो लघुः।
शीतं वीर्य्यञ्च यद्द्रव्यं मधुरं रसपाकयोः॥
तयोरम्लं कटुञ्चैव यच्चोष्णं कटुकं तयोः।
कटुतिक्तकषायाणां विपाकः प्रायशः कटुः॥
अम्लोष्णं पच्यते स्वादु मधुरं लवणं तथा।
कटुर्व्विपाके शुक्रघ्नो बद्धविड्वातलो लघुः॥
स्वादुर्गुरुः सृष्टमलो विपाके कफशुक्रलः।
पाकेऽम्लः सृष्टविण्मूत्रपित्तकृच्छुक्रहा लघुः॥"
गारुड़े॥
"कटुतिक्तकषायाश्च कोपयन्ति समीरणम्।
कट्वम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफम्॥
अतएव विपर्य्यस्ताः समायैषां प्रयोजिताः।
चक्षुष्यो मधुरो ज्ञेयो रसो धातुविवर्द्धनः॥
स्थौल्यालस्यविषघ्नश्च कटूद्दीपन पाचनः॥"
इत्याह्निकतत्त्वम्॥)
न्यायमते तु।
"रसस्तु रसनाग्राह्यो मधुरादिरनेकधा।
सहकारी रसज्ञाया नित्यत्वादि च पूर्व्ववत्॥"
इति भाषापरिच्छेदः॥
"रसस्त्विति। सहकारीति रासनज्ञाने रसकारणमित्यर्थः। पूर्व्ववदिति जलपरमाणौ रसो नित्यः अन्यः सर्व्वोऽपि रसोऽनित्य इत्यर्थः।" इति सिद्धान्तमुक्तावली॥ *॥ शरीरस्थधातुविशेषः। तत्पर्य्यायः। रसिका २ स्वेदमाता ३ वपुःस्रवः ४ चर्म्माम्भः ५ चर्म्मसारः ६ रक्तसारः ७ अस्रमातृका ८। इति राजनिर्घण्टः॥ आहारसम्भवः ९ तेजःसम्भवः १० अग्निसम्भवः ११ षड्रसासवः १२ आग्नेयः १३ असृक्करः १४ धातुपः १५ मलमहापरः १६। इति हेमचन्द्रः॥ तस्य निरुक्तिर्यथा,—
"अत् धातौ रसधातुर्यस्ततोऽभवदयं रसः।
सदैव सकलं देहं रसतीति रसः स्मृतः॥"
तस्य स्वरूपमाह।
"सम्यक्पक्वस्य भुक्तस्य सारो निगदितो रसः।
स तु द्रवः सितः शीतः स्वादुः स्निग्धश्चलो भवेत्॥"

सारः। यथा, गुड़मधूकपुष्पवकुलत्वग्खर्ज्जूरीमूलादिभवः सारो मदिरा। तस्य स्थानमाह।
"सर्व्वदेहचरस्यापि रसस्य हृदयं स्थलम्।
समानमरुता पूर्व्वं यदयं हृदये धृतः॥"
तस्य कर्म्माण्याह।
"आरुह्य धमनीर्गत्वा धातून् सर्व्वानयं रसः।
पुष्णाति तदनु स्वीयैर्व्याप्नोति च तनुं गुणैः॥"
गुणैः शीतस्निग्धपोषकत्वैः।
"मन्दवह्निविदग्धस्तु कट्वम्लो भवेद्रसः।
स कुर्य्याद्बहुलान् रोगान् विषत्वं करोत्यपि॥"
इति भावप्रकाशः॥
(तथा च। "तत्र पाञ्चभौतिकस्य चतुर्व्विधस्य षड्रसस्य द्विविधवीर्य्यस्याष्टविधवीर्य्यस्य वानेकगुणस्योपयुक्तस्याहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रस इत्युच्यते। तस्य च हृदयं स्थानं स हृदयाच्चतुर्व्विंशतिं धमनीरनुप्रविश्योर्द्ध्वगा दश दश चाधोगामिनीश्चतस्रस्तिर्य्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चादृष्टहेतुकेन कर्म्मणा। तस्य शरीरमनुधावतोऽनुमानाद् गतिरुपलक्षयितव्या क्षयवृद्धिवैकृतैः। तस्मिन् सर्व्वशरीरावयवदोषधातुमलाशयानुसारिणि रसे जिज्ञासा किमयं सौम्यस्तैजस इति। अत्रोच्यते स खलु द्रवानुसारी स्नेहनजीवनतर्पणधारणादिभिर्विशेषैः सौम्य इत्यवगम्यते।" इति च सुश्रुते सूत्रस्थाने चतुर्द्दशेऽध्याये॥ * ॥)

शृङ्गारादिदशविधस्थायी भावः। शृङ्गारादयोऽष्टौ रसशब्दवाच्याः। रस्यन्ते आस्वाद्यन्ते रसाः रसत् क आस्वादे घञ्। तथा हि।
विभावैरनुभावैश्च व्यक्तो वा व्यभिचारिभिः।
आस्वाद्यत्वात् प्रधानत्वात् स्थायी भावो रसो भवेदिति॥
रत्युत्साहशोक-विस्मयहासभयजुगुप्साक्रोधाः क्रमादेते स्युः स्थायिनः। यदुक्तम्।
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः क्रमादमी॥
समये यः समुद्भूतः स्वान्ते यश्चावतिष्ठते।
भावः स्थायी स विज्ञेयो व्यभिचारी ततोऽन्यथा।
निर्व्वेदग्लानिशङ्काद्या व्यभिचारिण ईरिताः॥"
स्थायिनः कारणं विभावः स चावलम्बनोद्दीपनत्वेन द्विविधः। यथा रतेरवलम्बनकारणं पुंसो युवती युवत्याश्च पुमान्। उद्दीपनकारणं स्रक्चन्दनादि। एवं सर्व्वत्रोन्नेयम्। रतिप्रमोदात्मको भावः स च युवभिरुत्पादितः शृङ्गारः। यदाह।
"पुंसः स्त्रियां स्त्रियाः पुंसि संयोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातो रतिक्रीड़ादिकारणम्॥
दानधर्म्मयुद्धेषु जीवानपेक्षोत्साहकारी रसो वीरः। शोकस्थायिभावः करुणः। असम्भावितमर्त्त्यान्तरीक्षगमनादिजोऽद्भुतः। कौतुकोद्भवो हासः। क्रुध्यद्राक्षसादिभयजन्यो भयानकः। घृणाकरपूयरक्तादिजो वीभत्सः। सर्व्वाभिभाविता रौद्रः। यथा, रावणचरितादि। शान्तोऽपि रसोऽस्ति।
"शृङ्गारवीरवीभत्सरौद्रहास्यभयानकाः।
करुणाद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः॥"
इति रत्नकोषः॥
एवं वत्सलोऽपि रसोऽस्ति।
"शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः।
वीभत्सरौद्रौ वात्सल्यं शान्तश्चेति रसा दश॥"
इति नामनिधानम्॥
वत्सलः पुत्त्रादिस्नेहात् स्वारतिभेद एव। शान्तस्त्वलौकिकत्वान्नोक्तः। इति मुकुटः॥ चशब्दात् शान्तवत्सलावपि संगृहीताविति केचित्। इत्यमरटीकायां भरतः॥ * ॥ अपि च। तत्र शृङ्गारादिसर्व्वरसकदम्बमूर्त्तिर्भगवान् तत्तदभिप्रायानुसारेण बभौ न साकल्येन सर्व्वेषामित्याह। मल्लानामिति। मल्लादीनां दशानां दृष्टां अशन्यादिरूपेण दशधा विदितः सन् साग्रजो रङ्गं गतः इत्यन्वयः। मल्लादिषु अभिव्यक्ता रसाः क्रमेण श्लोकेन निबध्यन्ते।
"रौद्रोऽद्भुतश्च शृङ्गारो हास्यवीरौ दया
तथा।
भयानकश्च वीभत्सः शान्तः सप्रेमभक्तिकः॥"
अविदुषां विराट् विकलः अपर्य्याप्तो जड़ इति यावत्। अनेन वीभत्स उक्तः। विकलत्वञ्च वज्रसारसर्व्वाङ्गावित्यादिना वक्ष्यति। इति श्रीमद्भागवते १० स्कन्धे ४३ अध्याये १५ श्लोकटीकायां श्रीधरस्वामी॥ * ॥ (तथा च।
"रसे सारश्चमत्कारः सर्व्वत्राप्यनुभूयते॥
तच्चमत्कारसारत्वे सर्व्वत्राप्यद्भुतो रसः।
तस्मादद्भुतमेवाह कृती नारायणो रसम्॥"
इति साहित्यदर्पणे धर्म्मदत्तः॥
रसः कथ्यते।
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्॥"
अस्य स्वरूपकथनगर्भं आस्वादप्रकारः कथ्यते।
"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।
स्वाकारवदभिन्नत्वे नायमास्वाद्यते रसः।
रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते॥"
इति साहित्यदर्पणे विश्वनाथः॥ ३॥
"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥"
शृङ्गारस्य यथा,—
"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते॥
परोढ़ां वर्ज्जयित्वा तु वेश्याञ्चाननुरागिणीम्।
आलम्बनं नायिकाः स्युर्द्दक्षिणाद्याश्च नायकाः॥
चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः॥
त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः।
स्थायी भावो रतिः श्यामवर्णोऽयं विष्णुदैवतः॥"
यथा,—
"शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः
निद्राव्याजमुपागतस्य सुचिरं निर्व्वर्ण्य पत्युर्म्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥"
हास्यस्य।
"विकृताकारवाग्वेशचेष्टादेः कुहकाद्भवेत्।
हासो हास्यस्थायिभावः श्वेतः प्रमथदैवतः॥
विकृताकारवाक्चेष्टं यदालोक्य हसेन्नरः।
तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्॥
अनुभावोऽक्षिसङ्कोचवदनस्मेरतादयः।
निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः॥
ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च।
नीचानामपहसितं तथातिहसितञ्च षड्भेदाः॥
ईषद्विकासिनयनं स्मितं स्यात् स्पन्दिताधरम्।
किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः॥
मधुरस्वरं विहसितं सांसशिरःकम्पनमवहसितम्।
अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम्॥"
यथा,—
"आकुञ्च्य पाणिमशुचिं मम मूर्द्ध्नि वेश्या
मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे।
तारस्वरं प्रथितथूत्कमदात् प्रहारं
हाहा हतोऽहमिति रोदिति विष्णुशर्म्मा॥"
करुणस्य।
"इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं
मतम्।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः।
अनुभावा दैवनिन्दा भूपातक्रन्दनादयः॥
वैवर्ण्योच्छ्वासनिश्वासस्तम्भप्रलपनानि च।
निर्व्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः॥
विषादजड़तोन्मादचिन्ताद्या व्यभिचारिणः॥"
यथा,—
"विपिने क्व जटानिबन्धनं
तव चेदं क्व मनोहरं वपुः।
अनयोर्घटनाविधेः स्फुटं
ननु खड्गेन शिरीषकर्त्तनम्॥"
रौद्रस्य।
"रौद्रः क्रोधः स्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्॥
मुष्टिप्रहारपतनविकृतच्छेदावदारणैश्चैव।
संग्रामसम्भ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढ़ा॥

भ्रूविभङ्गोष्ठनिर्द्दंशबाहुस्फोटनतर्ज्जनम् ।
आत्मावदानकथनमायुधोत्क्षेपणानि च ।
अनुभावास्तथाक्षेपक्रूरसन्दर्शनादयः ।
उग्रतावेगरोमाञ्च स्वेदवेपथवो मदः ॥
मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः ॥”
यथा,—
“कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्म्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥”
वीरस्य ।
“उत्तमप्रकृतिर्व्वीर उत्साहस्थायिभावकः
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ॥
आलम्बनविभावास्तु विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ॥
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ।
सञ्चारिणस्तु धृतिमतिगर्व्वस्मृतितर्करोमाञ्चाः ॥
स च दानधर्म्मयुद्धैर्दयया च समन्वितश्चतुर्द्धा स्यात् ॥”
यथा,—
“क्षुद्राः सन्त्रासमेते विजहित हरयः ! क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे ! तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥”
भयानकस्य ।
“भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरा तस्य तदत्रोद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।
पुलकस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥
जुगुप्सावेगसम्मोहसन्त्राससम्भ्रान्तिदीनताः ।
शङ्कापस्मारसम्भ्रान्तिमृत्याद्या व्यभिचारिणः ॥”
यथा,—
“ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्वकायम् ।
शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्व्यां प्रयाति ॥”
वीभत्सस्य ।
“जुगुप्सा स्थायिभावस्तु वीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥
दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम् ।
तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम् ॥
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मतास्तत्र स्युर्व्यभिचारिणः ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ॥”
यथा,—
“उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्त्तःपर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥”
अद्भुतस्य ।
“अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः ।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ॥
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ।
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः ॥
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः ।
वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः ॥”
यथा,
“चित्रं महानेष बतावतारः
क्व कान्तिरेषाभिनवैव भङ्गिः ।
लोकोत्तरं धैर्य्यमहो प्रभावः
काप्याकृतिर्नूतन एष सर्गः ॥”
शान्तस्य ।
“निर्व्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ॥”
तथा च ।
“शान्तः शमस्थायिभाव उत्तमप्रकृतिर्म्मतः ।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ॥
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या ।
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ॥
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ॥
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः ।
निर्व्वेदहर्षस्मरणमतिभूतदयादयः ॥”
यथा,—
“अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित् पुण्येऽरण्ये शिवशिवशिवेति प्रलपतः ॥”
इति काव्यप्रकाशसाहित्यदर्पणे ॥ विशेषविस्तृतिस्तु साहित्यदर्पणे तृतीयपरिच्छेदे द्रष्टव्या ॥ तन्त्रशास्त्रेऽपि साधकानामुपासनासौकर्य्यार्थं रसास्वादः रसप्रकारश्च कथ्यते । यथा,—

भैरव उवाच ।

“क्रियाकाण्डप्रकथने तन्त्रं बहुतरं भवेत् ।
किञ्चिल्लक्षणमेतेषां संक्षेपात् कथयामि ते ॥
काव्यशास्त्रे नव रसा योगे चाष्टौ रसाः स्मृताः ॥
अष्टादशप्रकारा हि विद्यायाः परिकीर्त्तिताः ।
भक्तियोगे नव रसा ऋतवो विषये स्मृताः ॥
रसमाद्या रसा देवि ! पञ्चपञ्चाशतः स्मृताः ।
भेदं रसानां वक्ष्यामि शृणुष्वावहिता प्रिये ॥
शृङ्गारवीरकरुणहास्योद्भुतभयानकाः ।
वीभत्सः शान्तको रौद्रो नवधा काव्यशास्त्रके ॥
यमश्च नियमश्चैव आसनं प्राणसंयमः ।
प्रत्याहारो धारणा च ध्यानं समाधिरष्टधा ॥
योगशास्त्रे महादेवि कथिता विस्तरात् प्रिये ॥
छन्दः पादौ च वेदस्य मुखं व्याकरणं स्मृतम् ।
शिक्षा घ्राणं महेशानि ! हस्तौ कल्पोऽथ कथ्यते ॥
ज्योतिषं देवि तन्नेत्रं निरुक्तं श्रोत्रमुच्यते ।
अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरैः ॥
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्द्दश ।
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वाश्चेति ते त्रयः ॥
अर्थशास्त्रसमायुक्ता विद्याष्टादशधा रसाः ।
मननं कीर्त्तनं ध्यानं स्मरणं पादसेवनम् ॥
अर्च्चनं वन्दनं दास्यं सख्यमात्मसमर्पणम् ।
इत्थं देवि नव रसा भक्तियोगे प्रकीर्त्तिताः ॥
स्रग्गन्धवनिताशय्यावस्त्रालङ्करणानि च ।
कथिताः परमेशानि विषये ऋतवो रसाः ॥
खाद्याः पञ्चरसा गौड़ी माध्वी चुपलशस्यकाः ।
एतेषु रसभावज्ञा ये ते वै रसिकाः स्मृताः ॥
कृत्यविधिर्ज्जपविधिर्द्ध्यानशोधनिको विधिः ।
बाह्यमानसिकी पूजा विधिश्च परमेश्वरि ! ॥
पुरश्चर्य्याविधिर्द्देवि ! कर्म्मकाण्डानि पञ्चधा ।
त्रिधा कृत्य विधिर्द्देवि ! प्रातः सायं दिनान्ततः ॥
अनुभूय रसान् सर्व्वान् क्रियाकाण्डं विधाय च ।
साधकः स्थिरचित्तेन कुर्य्यात् पूर्णाभिषेचनम् ॥”
इति वामकेश्वरतन्त्रे त्रयःपञ्चाशत् पटलः ॥

देव्युवाच ।

“मन्त्रप्रकथनं नाथ ! देव प्रकथनं कथम् ।
तत्तद्रसानां वचनैश्चित्तं मोहयसीव मे ॥
साम्प्रतं संशयच्छेदकारणं ब्रूहि मे प्रभो ! ॥
आश्चर्य्याख्यानमेवं हि श्रवणात् कौतुकं महत् ॥

भैरव उवाच ।

तन्त्रोक्तं वेदवाक्यञ्च सर्व्वशास्त्रस्य कारणम् ।
भेदं रसानां वक्ष्यामि शृणुष्वावहिता सती ॥
शृङ्गारो वीरतो श्रेयस्तस्मिंस्ते करुणादयः ।
शृङ्गारादिष्टयादिश्च अपि शृङ्गारतो भवेत् ॥
शृङ्गारस्तु यदा देवी परमार्थकसूचकः ।
तदैव परमा शान्ती रुद्रत्वं संप्रपद्यते ॥
तेषां प्रकरणार्थेषु शृणु प्राणाधिके ! मयि ।
पादं विना शरीरस्य न गतिर्व्विद्यते प्रिये ! ॥
छन्दसा वेदमार्गे तु प्रविशेन्न कदाचन ॥
अलङ्कारं विनाच्छन्दो न शोभेत प्रियंवदे ॥
चक्षुः परोक्षभेदः स्यात् ज्योतिःशास्त्रं तथैव च ।
चन्द्रसूर्य्यस्य ग्रहणात् ज्योतिः प्रत्यक्षतामियात् ॥
वेदशाखा निरुक्तं स्यात् शाखाभिर्व्रक्ष जायते ।
गानकार्य्ये श्रूयमाणे भक्तिर्भवति अञ्जसा ॥
तदैव गानकृत्यञ्च सुखनासिकयोर्भवेत् ।
गानं विना न नृत्यं स्यात् नृत्यं गानेन जायते ॥
शिक्षाशास्त्रं नाटकादि शब्दव्याकरणं स्मृतम् ।
अविनाभावसम्बन्धात्द्वयोरेव सुनिश्चिते ॥

वेदाः षड़ङ्गसहिताः ब्रह्मव्याख्यानतत्पराः ।
न्यायेन सार्द्धं मीमांसा ब्रह्म निर्णीयते ध्रुवम् ॥
ब्रह्मज्ञाने तु जीवस्य परमात्मविचारणम् ।
धर्म्मशास्त्रानुसारेण व्यवस्थादिर्निरूपितः ॥
पुराणाख्यानि तेनैव जायते सततं प्रिये ! ।
ब्रह्मानन्दपरो जीव आत्मसंरक्षणोत्सुकः ॥
आयुर्व्वेदं धनुर्व्वेदं गान्धर्व्वञ्च समभ्यसेत् ।
अनुसन्धानतो देवि पूर्णज्ञानी च साधकः ॥
मधुनेक्षुरसेनैव दुग्धादिफलशस्यकैः ।
गन्धमाल्यादिना देवि ! वस्त्रालङ्करणादिना ॥
शय्यायां वनितारूपं पूजयेज्जगदम्बिकाम् ।
वनितापूजने देवि ! शृङ्गारो रससाधनम् ॥
पूजनं कर्म्मकाण्डञ्च पञ्चधा तत्प्रकीर्त्तितम् ।
तत्सर्व्वं साधयेद्वीरो देवी सम्प्राप्तिहेतवे ॥
पूजने नवधा भक्ती रसोल्लासश्च जायते ।
तदा योगं समभ्यस्य समाधिस्थो भवेद्यतिः ॥
अतएव महेशानि ! पुरैव कथितं मया ।
अनुभूय रसान् सर्व्वान् पञ्चपञ्चाशतः प्रिये ! ॥
विषये कर्म्मकाण्डेषु निष्कामी भवति प्रिये ! ।
निष्कामे फलमाश्चर्य्यं तेन तुष्यति देवता ॥
देही देहं समाश्रित्य न च कर्म्म परित्यजेत् ।
दिव्यां क्रियां समाप्यैवं देवीयात्रादिकर्म्मणा ॥
पूर्णज्ञानरसानन्दात् जीवन्मुक्तो भवेद्ध्रुवम् ॥"
इति वामकेश्वरतन्त्रे चतुःपञ्चाशत् पटलः ॥
रसस्य परब्रह्मस्वरूपत्वमप्युक्तम् । यथा,—
"रसो वै सः ।" इति श्रुतिः ॥ सन्ध्यामन्त्रेऽपि ।
"आपो ज्योती रसोऽमृतं ब्रह्म ।" अत्र ब्राह्मणसर्व्वस्वे हलायुधः ॥ "स एव ब्रह्मरूपो भर्गो रसः वृक्षवृक्षौषध्यादिषु स्थावरेषु च स एव रसरूपेण वसतीत्यर्थः । तथा च योगियाज्ञवल्क्यः ।
"वृक्षौषधिलतानाञ्च रसरूपेण तिष्ठति ॥"
श्रीमद्भगवद्गीतायामपि ।
"रसोऽहमप्सु कौन्तेय इति ॥")
विषम् । (यथा, मुद्राराक्षसे २ अङ्के ।
"ये मन्त्रेषु रसेषु च प्रणिहितास्तैरेव ते घातिताः ॥")
वीर्य्यम् । गुणः । रागः । (यथा,—
"कविता कोमलवनिता
रसयति रसिकं रसेन मिलिता ।
सा यदि दुर्ज्जनहस्ते
पतिता प्रतिपदभग्ना संशयमग्ना ॥"
इत्युद्भटः ॥)
द्रवः । इत्यमरः । ३ । ३ । २२६ ॥ गन्धरसः ।
(तत्पर्य्यायो यथा,—
"विद्वान् गोलः पिण्डकश्च पिण्डो वोलो रसो रसः ॥")
जलम् । (यथा, रघौ । १ । १८ ।
"प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥")
पारदः । इति मेदिनी ॥ ("तत्र रसप्राधान्यमाह ।
अल्पमात्रोपयोगित्वादरुचेरप्रसङ्गतः ।
क्षिप्रमारोग्यदायित्वादौषधेभ्योऽधिको रसः ॥
साध्येषु भेषजं सर्व्वमीरितं तत्त्ववेदिना ।
असाध्येष्वपि दातव्यो रसोऽतः श्रेष्ठ उच्यते ॥
हतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः ।
बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः ॥"
अथ रसपर्य्यायमाह ।
"रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः ।
शिवतेजो रसः सप्त नामान्येवं रसस्य तु ॥"
मतान्तरम् ।
"शिववीजं रसः सूतः पारदश्च रसेन्द्रकः ।
एतानि रसनामानि तथान्यानि यथा शिवे ॥"
यथा शिवे इत्यनेन शिवपर्य्यायाणामपि रसवाचकत्वम् ॥ * ॥ अथ रसलक्षणम् ।
"अन्तः सुनीलो बहिरुज्ज्वलो यो
मध्याह्नसूर्य्यप्रतिमप्रकाशः ।
शस्तोऽथ धूम्रः परिपाण्डुरश्च
चित्रो न योज्यो रसकर्म्मसिद्धौ ॥
नागो वङ्गो मलो वह्निश्चाञ्चल्यञ्च विषं गिरिः ।
असह्याग्निर्महादोषा निसर्गाः पारदे स्थिताः ॥
व्रणं कुष्ठं तथा जाड्यं दाहं वीर्य्यस्य नाशनम् ।
मरणं जड़तां स्फोटं कुर्व्वन्त्येते क्रमान्नृणाम् ॥
तस्माद्रसस्य संशुद्धिं विदध्याद्भिषजां वरः ।
शुद्धोऽयममृतं साक्षाद्दोषयुक्तो रसो विषम् ॥"
"शतं पञ्चाशतं वापि पञ्चविंशद्दशैव च ।
पञ्चैकं वा पलञ्चैव पलार्द्धं कर्षमेव च ॥
कर्षान्न्यूनो न कर्त्तव्यो रससंस्कार उत्तमः ।
प्रयोगेषु च सर्व्वेषु यथालाभं प्रकल्पयेत् ॥
शुभेऽह्नि विष्णुं परिचिन्त्य कुर्य्यात्
सम्यक्कुमारीवटुकार्च्चनञ्च ।
सुलोहपाषाणसमुद्भवेऽस्मिन्
दृढ़े च वेदाङ्गुलिगर्भमात्रे ॥
सुतप्तखल्वे निजमन्त्रयुक्तां
विधाय रक्षां स्थिरधारबुद्धिः ।
अनन्यचित्तः शिवभक्तियुक्तः
समाचरेत् कर्म्मरसस्य तज्ज्ञः ॥"
"अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च ।
सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्ते रुद्ररूपिभ्यः ॥"
इति रक्षामन्त्रः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे। विस्तृतविवृतिरस्य पारदशब्देऽभिहिता ।
शिलारसः । तत्पर्य्यायो यथा,—
"कपिनामा कपितैलं कृत्रिमं कपिलश्चलः ।
तुरुष्को मुक्तिसुक्तश्च पिण्डातः सिल्हको रसः ॥"
हिङ्गुलम् ॥ तत्पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥"
इति वैद्यकरत्नमालायाम् ॥)

रसकः, पुं, (रस+संज्ञायां कन् ।) निष्क्वाथमांसः । इति हेमचन्द्रः । ३ । ७७ ॥

रसकर्पूरं, क्ली, कर्पूररसः । रसकापूर इति भाषा । यथा, "तत्र पारदस्य संक्षिप्तं शोधनं कर्त्तव्यम् ।
शुद्धसूतसमं कुर्य्यात् प्रत्येकं गैरिकं सुधीः ।
इष्टिकां खटिकां तद्वत् स्फुटिकां सिन्धुजन्म च ॥
वल्मीकक्षारलवणं भाण्डरञ्जकमृत्तिकाम् ।
सर्व्वाण्येतानि संचूर्ण्य वाससा चापि शोधयेत् ॥
खटिका खड़ी । स्फुटिका फिट्करी । सिन्धुजन्म सैन्धवम् । वल्मीकं तच्छा मृत् । वल्मीक वरउर । क्षारलवणं खारीलवण। भाण्डरञ्जकमृत्तिका काविसमाटी ।
एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्द्दितम् ।
तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत् ॥
तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत् समाम् ।
सवस्त्रकुट्टितमृदा मुद्रयेदुभयोर्म्मुखम् ॥
संशोष्य मुद्रयेद्भूयो भूयः संशोष्य मुद्रयेत् ।
सम्यग्विशोष्य मुद्रां तां स्थालीं चुल्ल्यां विधारयेत् ॥
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
अङ्गारोपरि तद्यन्त्रं रक्षेद्यत्नादहर्निशम् ॥
शनैरुद्घाटयेद्यन्त्रमूर्द्धस्थालीगतं रसम् ।
कर्पूरवत् सुविमलं गृह्णीयाद्गुणवत्तरम् ॥
तं देवकुसुमचन्दनकस्तूरीकुङ्कुमैर्युक्तम् ।
खादन् हरति फिरङ्गं व्याधिं सोपद्रवं सपदि ॥
विन्दति वह्नेर्दीप्तिं पुष्टिं वीर्य्यं बलं विपुलम् ।
रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम् ॥"
इति भावप्रकाशः ॥ * ॥
अपि च ।
"गैरिकतुवरीखटिकासैन्धवगरुणं रजं कुड़वम् ।
प्रत्येकं दृढ़हण्डामाधायास्योपरि शतं स्थाप्यः ॥
कुड़वमितोऽथ तदूर्द्ध देया हण्डीतदास्य पालमुखी ।
अथ तत्सन्धिर्म्मुद्रा कृता तदधो हुताशनो ज्वाल्यः ॥
अर्म्मणषट्कप्रमितैर्द्दारुभिरनुनातिदुर्ब्बलस्थूलैः ।
अग्निं क्रमेण दद्याद्गुरुदर्शितवर्त्मना त्रिनिशम् ॥
तदनु ततो यन्त्रवराद्युक्त्या कर्पूरसन्निभं सूतम् ।
आदाय काचकुम्भे निधाय नवसादरं दद्यात् ॥
संमर्द्द्य चाथ काष्ठैरर्द्धर्म्मणसंमितैः पचेत् घस्रम् ।
चुल्लीजमरुकमध्यं वितस्तिचतुराङ्गुलावकाशन्तु ॥
कर्त्तव्यं क्रमदहन तदधः प्रज्वालयेन्मध्यम् ।
शशिधवलसुपरिलग्नं युक्त्या संगृह्य रक्षयेद्यत्नात् ॥
वल्लं वल्लार्द्धं वा गुड़ेन जीर्णेन रोगिणे दद्यात् ।
दुग्धोदनन्तु पथ्यं देयं तस्मै च ताम्बूलम् ॥
हरति समस्तं रोगं कर्पूराख्यो रसो नृणाम् ॥
फिरङ्गकरिकेशरी सकलकुष्ठदावानलोऽखिलव्रनविनाशकृत् व्रणजगर्त्तपूर्त्तिप्रदः ।
सुवर्णसमवर्णकृत् बलहुताशतेजस्करः
समस्तगदतस्करो रसपतिः स कर्पूरकः ॥"
ग्रन्थान्तरम् ।
"टङ्कणं मधु लाक्षाच ऊर्णा गुञ्जायुतो रसः ।
मर्द्दयेत् भृङ्गजद्रावैर्द्दिनैकं भावयेत् पुनः ।
भातो भस्मत्वमाप्नोति शुद्धकर्पूरसन्निभः ॥

नवसादरं पारदाच्चतुर्थांशमिति सङ्केतः । गड़णं साम्भरिलोण इति भाषा । शेषं स्पष्टम् । इत्यायुर्व्वेदप्रकाशः ॥ (तथा च ।
"पिष्टं पांशुपटु प्रगाढममलं वज्राम्बुना नैकशः
सूतं धातुगतं खटीकवलितं तत्सम्पुटे रोधयेत् ।
अन्तःस्वल्पवयस्य तस्य च तले प्रज्वाल्य वह्निं हठात्
घस्रं ग्राह्य मथेन्दुकुन्दधवलं भस्मोपरिस्थं शनैः ॥
तद्वल्लद्वितयं लवङ्गसहितं प्रातः प्रयुक्तं भजेत् ।
ऊर्द्धं रेचयति द्वियाममसकृत् पेयं जलं शीतलम् ॥
एतद्धन्ति च वत्सरावधि विषं षाण्मासिकं मासिकम् ।
शैलोत्थं गरलं न्यगेन्द्रकुटिलोऽद्भुतश्च तात्कालिकम् ॥"
इति सुधानिधिरसः ॥ * ॥ रसकर्पूरमिति रसमञ्जरीकारः । श्वेतभस्म इति चन्द्रिका ॥ इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रसकेशरं, क्ली, कर्पूरम् । इति हारावली ॥ (कर्पूरशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

रसगन्धं, क्ली, बोलम् । इति राजनिर्घण्टः ॥

रसगन्धः, पुं, गन्धरसः । यथा,—
"रसगन्धो गन्धरसो गान्धारं मसिवर्द्धनम् ॥"
इति त्रिकाण्डशेषः ॥

रसगन्धकः, पुं, (रसगन्ध + स्वार्थे कन् ।) गन्धरसः । इति शब्दचन्द्रिका ॥ गन्धकः । इति राजनिर्घण्टः ॥

रसगर्भं, क्ली, रसाञ्जनम् । इत्यमरः ॥ (तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"रसाञ्जनन्तार्क्ष्यशैलं रसगर्भञ्च तार्क्ष्यजम् ॥")
हिङ्गुलम् । इति राजनिर्घण्टः ॥

रसघ्नः, पुं, (रसं रसस्य दोषावहशक्तिं हन्तीति । हन + टक् ।) टङ्कणः । इति राजनिर्घण्टः ॥

रसजं, क्ली, (रसाज्जायते इति । जन् + डः ।) रक्तम् । इति शब्दचन्द्रिका ॥

रसजः, पुं, (रसाज्जातः । जन् + डः ।) गुड़ः । इति राजनिर्घण्टः ॥ (यथा, मनुः ।११।१४४।
"अन्नाद्यजानां सत्त्वानां रसजानाञ्च सर्व्वशः ॥")
मद्यकीटः । इति हेमचन्द्रः ॥ (रसजाते, त्रि । यथा,—
"रसजं पुरुषं विद्याद्रसं रक्षेत् प्रयत्नतः ।
अन्नात् पानाच्च मतिमानाचाराच्चाप्यतन्द्रितः ॥"
इति सुश्रुते सूत्रस्थाने चतुर्द्दशेऽध्याये ॥)

रसज्ञा, स्त्री, (रसं जानातीति । ज्ञा + कः । टाप् ।) जिह्वा । इत्यमरः ॥ (गङ्गा । इति काशीखण्डे । २९ । १४६ ॥) रसवेत्तरि, त्रि ॥ (यथा, रघौ । २ । ३६ ।
"यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः ॥")

रसज्येष्ठः, पुं, (रसेषु ज्येष्ठः ।) मधुररसः । इति हेमचन्द्रः ॥ शृङ्गाररसश्च ॥

रसतेजः, [स्] क्ली, (रसात् रसजन्यं वा तेजो यस्य ।) रक्तम् । इति हेमचन्द्रः ॥

रसदालिका, स्त्री, (रसं दालयति इति । दल + णिच् + ण्वुल् । टापि अत इत्वम् ।) पुण्ड्रेक्षुः । इति राजनिर्घण्टः ॥

रसद्रावी, [न्] पुं, (रसं द्रावयतीति । द्रु + णिच् + णिनि ।) मधुरजम्बीरः । इति राजनिर्घण्टः ॥

रसधातुः, पुं, (रसात्मको धातुः ।) पारदः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायादिर्यथा,—
"रसायनार्थिभिर्लोकैः पारदो रस्यते यतः ।
ततो रस इति प्रोक्तः स च धातुरपि स्मृतः ॥
पारदो रसधातुश्च रसेन्द्रश्च महारसः ।
चपलः शिववीर्य्यश्च रसः सूतः शिवाह्वयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रसधेनुः, स्त्री, (रसकल्पिता धेनुः ।) दानार्थेक्षुरसनिर्म्मितधेनुः । यथा,—
होतोवाच ।
"रसधेनुं महाराज कथयामि समासतः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तरे ॥
रसस्य तु घटं राजन् संपूर्णमेक्षवस्य च ।
तद्वत् संकल्पयेत् प्राज्ञश्चतुर्थांशेन वत्सकम् ॥
इक्षुदण्डमयाः पादा रजतक्षुरसंयुताः ।
सुवर्णशृङ्गाभरणां वस्त्रपुच्छां घृतस्तनीम् ॥
पुष्पकम्बलसंयुक्तां शर्करासुखजिह्विकाम् ।
दन्ताः फलमयास्तस्याः पृष्ठताम्रमयीं शुभाम् ॥
पुष्परोमाश्च राजेन्द्र मुक्ताफलकृतेक्षणाम् ।
सप्तव्रीहिसमायुक्तां चतुर्द्दिक्षु च दीपिकाम् ॥
सर्व्वोपस्करसंयुक्तां सर्व्वगन्धादिवासिताम् ।
चत्वारि तिलपात्राणि चतुर्द्दिक्षु निवेशयेत् ॥
ब्राह्मणे वेदविदुषे श्रोत्रियायाहिताग्नये ।
पुराणज्ञे विशेषेण साधुवृत्ताय धीमते ॥
तादृशाय प्रदातव्या रसधेनुः कटम्बिने ।
सर्व्वलक्षणयुक्ताय श्रोत्रियाय कुटुम्बिने ॥
रसधेनुः प्रदातव्या सर्व्वकामेण नित्यदा ।
दाता स्वर्गमवाप्नोति सर्व्वपातकवर्ज्जितः ॥
दाता च ग्राहको वाथ एककालमभोजनः ।
सोमपानफलं तस्य सर्व्वक्रतुफलं लभेत् ॥
दीयमानान्तु पश्यन्ति ते यान्ति परमां गतिम् ।
धेनुञ्च पूजयित्वाग्रे गन्धधूपस्रगादिभिः ॥
पूर्व्वोक्तैरेव मन्त्रैस्तु ततस्तां प्रार्थयेत् सुधीः ।
प्रार्थनापूर्व्वकं भक्त्या द्विजाग्र्याय निवेदयेत् ॥
दश पूर्व्वान् परांश्चैव आत्मानञ्चैकविंशकम् ।
प्रापयेत् परमं स्थानं स्वर्गान्नावर्त्तते पुनः ॥
एषा ते कथिता राजन् रसधेनुरनुत्तमा ।
ददस्व च महाराज परं स्थानमवाप्नुहि ॥
य इदं पठते नित्यं शृणुयादथ भक्तितः ।
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥"
इत्यादि वाराहपुराणे श्वेतोपाख्याने रसधेनुमाहात्म्यं समाप्तम् ॥

रसनं, क्ली, (रस् + भावे ल्युट् ।) स्वादनम् । ध्वनिः । इति मेदिनी ॥ (यथा, बृहत्संहितायाम् । ४६ । ८८ ।
"कम्पोद्वर्त्तनवैकृत्यं रसनं दरणं क्षितेः ॥")

रसनं, क्ली स्त्री, (रस्यते रसयत्यनेन वा । रस + करणे ल्युट् ।) जिह्वा । इति मेदिनी ॥ सा च जलेन्द्रियम् । यथा,—
"नित्यतादि प्रथमवत् किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुर्हिमादिर्व्विषयो मतः ॥"
इति भाषापरिच्छेदः ॥
"प्रथमवदिति पृथिव्या इवेत्यर्थः । तथा हि जलं द्विविधं नित्यमनित्यञ्च । परमाणुरूपं नित्यं द्व्यणुकादिकं सर्व्वमनित्यम् । अवयवसमवेतञ्चानित्यजलमपि त्रिविधम् । शरीरेन्द्रियविषयभेदात् । किन्तु पृथिवीतोययोर्यो विशेषस्तमाह किन्त्विति । अयोनिजमेवेत्यर्थः । जलीयं शरीरं अयोनिजं वरुणलोके प्रसिद्धमिति । इन्द्रियं रसनं जलीयम् । तथा हि रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् । शक्तुरसाभिव्यञ्जकोदकवत् । रसनासन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं हेतौ देयम् । विषयं दर्शयति सिन्धुर्हिमादिरिति । सिन्धुः समुद्रः हिमं तुषारः । आदिना सरित्कासारकरकादिः सर्व्वो ग्राह्यः ।" इति सिद्धान्तमुक्तावली ॥

रसना, स्त्री, (रस + युच् । टाप् च ।) जिह्वा । इत्यमरः ॥ (यथा, भागवते । ८ । ४ । १८ ।
"घ्राणञ्च तत्पादसरोजसौरभे
श्रीमत्तुलस्या रसनां तदर्पिते ॥")
तस्याः शुभलक्षणं यथा,—
"तीक्ष्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा शुभा ।
श्लक्ष्णा दीर्घा च विज्ञेया तालुः श्वेतो धनक्षये ॥"
इति गारुड़े ६६ अध्यायः ॥
न्यायमते रसनेन्द्रियग्राह्यो रसो रसत्वादिसहितः । यथा,—
"रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ।
सहकारी रसज्ञाया नित्यतादि च पूर्व्ववत् ॥
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः ॥"
इति भाषापरिच्छेदः ॥
"तथारस इति रसत्वादिसहित इत्यर्थः ।" इति सिद्धान्तमुक्तावली ॥ * ॥ रास्ना । इति मेदिनी ॥ (अस्याः पर्य्यायो यथा,—
"रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गन्धभद्रा । इति शब्दचन्द्रिका ॥ काञ्ची । इति हेमचन्द्रः ॥ (यथा, रघौ । ७ । १० ।
"कस्याश्चिदासीद्रसना तदानीं
अङ्गुष्ठमूलार्पितसूत्रशेषा ॥")
रज्जुः । इति संक्षिप्तसारोणादिवृत्तिः ॥

रसनाथः, पुं, (रसानां नाथः श्रेष्ठ इत्यर्थः ।) पारदः । इति राजनिर्घण्टः ॥

रसनायकः, पुं, (रसानां नायकः नेता रसायनविद्याविष्कारकत्वादस्य तथात्वम् ।) शिवः । इति शब्दरत्नावली ॥

रसनालिट्, [ह्] पुं, (रसनया लेढ़ीति । लिह+क्विप् ।) कुक्कुरः । इति हेमचन्द्रः ॥ रसनया लेहनकर्त्तरि, त्रि ॥

रसनेत्रिका, स्त्री, (रसो नेत्रमिव तदस्यस्या इति । रसनेत्र+ठन् ।) मनःशिला । इति हेमचन्द्रः ॥ (मनःशिलाशब्देऽस्या गुणादयो ज्ञेयाः ॥)

रसपाकजः, पुं, (रसपाकात् जायते इति । जन्+डः ।) गुड़ः । इति राजनिर्घण्टः ॥

रसफलः, पुं, (रसो जलं फले यस्य रसयुक्तं फलमस्येति वा । शाकपार्थिववत् मध्यपदलोपी समासः ।) नारिकेलवृक्षः । इति शब्दरत्नावली ॥ (नारिकेलशब्देऽस्य विशेषो विज्ञेयः ॥)

रसभवं, क्ली, (रसात् रसे वा भवतीति ।) भू+अच् ।) रक्तम् । इति राजनिर्घण्टः ॥

रसमञ्जरी, स्त्री, (रसानां मञ्जरीव ।) नायकनायिकाभेदकग्रन्थविशेषः । यथा,—
"विद्वज्जनमनोभृङ्गरसयासङ्गहेतवे ।
एषा प्रकाश्यते श्रीमद्भानुना रसमञ्जरी ॥"
इति तस्य द्वितीयः श्लोकः ॥

रसमयः, त्रि, रसस्वरूपः । रसात्मकः रसशब्दात् मयट्प्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । ३ । ५ । ३४ ।
"आधत्तात्मो रसमयं कालमायांशयोगतः ॥")

रसमर्द्दनं, क्ली, (रसस्य पारदधातोर्मर्द्दनम् ।) पारदपेषणम् । यथा,—
"इष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्दो रसस्ततः ।
दध्ना गुड़ेन विल्पत्यराजिकागृहधूमकैः ॥"
अन्यच्च ।
"कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥"
इति भावप्रकाशः ॥

रसमारणं, क्ली, (रसस्य पारदस्य मारणम् ।) पारदस्य मारणम् । यथा,—
"धूमसारं रसं तोरिं गन्धकं नवसादरम् ।
यामैकं मर्द्दयेदम्लैर्भागं कृत्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य ताञ्च मृद्वस्त्रमुद्रया ।
विलिप्य परितो वक्त्रे मुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीवालुकापूरैर्भृत्वा वा कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्य्याच्छनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् स्वाङ्गशीतं तमूर्द्धगं गन्धकं त्यजेत् ॥
अधःस्थञ्च मृतं सूतं गृह्णीयात् तन्तु मात्रया ।
यथोचितानुपानेन सर्व्वकर्म्मसु योजयेत् ॥"
इति भावप्रकाशः ॥

रसमूर्च्छनं, क्ली, (रसस्य पारदस्य मूर्च्छनम् ।) पारदस्य मूर्च्छाकरणम् । यथा,—
"त्र्यूषणं त्रिफलावन्ध्याकन्दैः क्षुद्रद्वयान्वितैः ।
चित्रकोरुणिशाक्षारकन्याकनकद्रवैः ॥
सूतं कृतेन यूषेण वारान् सप्ताभिमर्द्दयेत् ।
इत्थं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कञ्चुकान् ॥"
इति भावप्रकाशः ॥
(तथास्य विवृतिः ।
"गन्धकेन रसं प्राज्ञः सुदृढ़ं मर्द्दयेद्भिषक् ।
कज्जलाभो यदा सूतो विहाय घनचापलम् ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः ।
असौ रोगत्रयं हन्यादनुपानस्य योगतः ॥"
इति मूर्च्छनम् ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रसराजः, पुं, (रसानां धातूनां राजा इति । "राजाहःसखिभ्यष्टच् ।" ५।४।९१। इति टच् ।) पारदः । रसाञ्जनम् । इति राजनिर्घण्टः ॥

रसलेहः, पुं, (रसान् अपरान् धातून् लेढ़ीति । लिह+पचाद्यच् ।) पारदः । इति राजनिर्घण्टः ॥

रसवती, स्त्री, (रसो विविधस्वादरसो विद्यतेऽस्यामिति । रस+"रसादिभ्यश्च ।" ५ । २ । ९५ । इति मतुप् । मस्य वत्वम् ।) महानसम् । इत्यमरः ॥ (यथा, सांख्यतत्त्वकौमुद्याम् । ५ । "यथा धूमाद्वह्नित्वसामान्यविशेषः पर्व्वते अनुमीयते तस्य च वह्नित्वसामान्यविशेषस्य स्वलक्षणो वह्निविशेषो दृष्टो रसवत्याम् ॥*॥") रसविशिष्टे, त्रि ॥ (यथा, आर्य्यासप्तशत्याम् ।४९८।
"रोषोऽपि रसवतीनां न कर्कशो वा चिरानुबन्धी वा ॥")

रसशोधनं, क्ली, (रसः शोध्यतेऽनेनेति । शुध्+णिच्+ल्युट् । रसं पारदं शोधयत्यनेनेति वा ।) टङ्कणः । इति हेमचन्द्रः ॥ (रसस्य शोधनम् ।) पारदशुद्धिः । यथा,—
"कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥
एवं कदर्थितः सूतः षण्ढो भवति निश्चितम् ।
वह्न्यौषधीकषायेण स्वेदितः स बली भवेत् ॥
सर्पाक्षीचित्रिकावन्ध्याभृङ्गारैः स्वेदितो बली ।
ततः सपावकद्रावैः स्विन्नः स्यादतिदीप्तिमान् ॥"
इति भावप्रकाशः ॥
(मतान्तरम् ।
"जयन्त्या वर्द्धमानस्य चार्द्रकस्य रसेन च ।
वायस्याश्चानुपूर्व्व्येण मर्द्दनं रसशोधनम् ॥
एषां प्रत्येकशस्त्वावन्मर्द्दयेत् खरसेन च ।
यावच्च शुष्कतां याति सप्तवारं विचक्षणः ॥
उद्धृत्योष्णारनालेन मृद्भाण्डे चालयेत् सुधीः ।
सर्व्वदोषविनिर्म्मुक्तः सप्तकञ्चुकवर्ज्जितः ॥
जायते शुद्धसूतोऽयं युज्यते सर्व्वकर्म्मसु ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रससिन्दूरं, क्ली, (रसजातं सिन्दूरमिति ।) औषधविशेषः । तस्य नामान्तरं सिन्दूररसः । यथा,—
"शुद्धसूतस्य गृह्णीयाद्विषग्भागचतुष्टयम् ।
शुद्धगन्धस्य भागैकं तावत् कृत्रिमगन्धकम् ॥
अथवा पारदस्यार्द्धं शुद्धगन्धकमेव हि ।
तयोः कज्जलिकां कुर्य्याद्दिनमेकं विवर्ज्जयेत् ।
मृत्तिकां वाससा सार्द्धं कुट्टयेदतियत्नतः ।
तया वारत्रयं सम्यक् काचकूपीं प्रलेपयेत् ॥
मृत्तिकां शोषयित्वा तु कूप्यां कज्जलिकां क्षिपेत् ।
तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत् ॥
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
गृह्णीयादूर्द्धसंलग्नं सिन्दूरसदृसं रसम् ॥"
इति भावप्रकाशः ॥
(मतान्तरम् ।
"पृथक् समं समं कृत्वा पारदं गन्धकन्तथा ।
नवसारं धूमसारं स्फटिकं याममात्रकम् ॥
निम्बूरसेन संमर्द्य काचकूप्यां निवेशयेत् ।
मुखे पाषाणखटिकां दत्त्वा मुद्रां प्रलेपयेत् ॥
सप्तभिर्मृत्तिकावस्त्रैः पृथक्संशोष्य वेष्टयेत् ।
सच्छिद्रायां मृदस्थाल्यां कूपिकां तां निवेशयेत् ।
पूरयेत् सिकतापूरैरागलं मतिमान् भिषक् ।
निवेश्य चुल्ल्यां दहनं मन्दं मध्यं खरं क्रमात् ॥
प्रज्वाल्य द्वादशं यामं स्वाङ्गशीतं समुद्धरेत् ।
स्फोटयित्वा तु मुक्ताभमूर्द्धलग्नं वलिं त्यजेत् ।
अधःस्थं रससिन्दूरं सर्व्वरोगेषु योजयेत् ॥"
इति रससिन्दूरम् ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रसस्थानं, क्ली, (रसः स्थानमाधार उत्पत्तिस्थानं यस्य । रसस्य पारदस्य स्थानमित्येके ।) हिङ्गुलम् । इति शब्दचन्द्रिका ॥ शरीरस्य रसस्थलञ्च । तस्य प्रमाणं रसशब्दे द्रष्टव्यम् ॥

रसा, स्त्री, (माधुर्य्यादिरूपो विविधो रसोऽस्त्यस्यामिति । "अर्श आदिभ्योऽच् ।"५ । २ । १२७ । इति अच् । रसति शब्दायते इति वा । रस+अच् । टाप् च ।) पृथिवी । इत्यमरः ॥ रसना । (तत्पर्य्यायो यथा, भावप्रकाशे ।१।१।
"रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥")
पाठा । (अस्याः पर्य्यायो यथा, भावप्रकाशे ।१।१।
"पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥"
शल्लकी । (अस्याः पर्य्यायो यथा,—
"शल्लकी गजभक्ष्या च सुवहा सुरभी रसा ।
महेरणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कङ्गुः । इति मेदिनी ॥ द्राक्षा । काकोली । इति शब्दरत्नावली ॥ (रसातलम् । यथा, भागवते । १० । ६ । १२ ।
"रसा दिशश्च प्रतिनेदिरे जनाः
पेतुः क्षितौ वज्रनिपातशङ्कया ॥"
यथा च तत्रैव । ३ । १३ । १६ ।

"हन्तो मे चितिर्वाभिः प्लाव्यमाना रसां गता ॥"

"रसां रसातलं गता।" इति तट्टीकायां स्वामिपादाः ॥ नदी। यथा, ऋग्वेदे।१।११२।१२।

"याभी रसां चोदसोद्नः पिपिन्वथुः ॥"

"रसां नदीम्।" इति तद्भाष्ये सायणः ॥)

रसाखनः, पुं, (खनतीति। खन् विदारे+अच्। रसाया भूमेः खनः।) कुक्कुटः। इति शब्दचन्द्रिका ॥

रसाग्रजं, क्ली, (रसानां अग्रजं रसस्य अग्रे जायते इति वा। जन्+डः।) रसाञ्जनम्। इति राजनिर्घण्टः ॥

रसाञ्जनं, क्ली, (रसजातमञ्जनं इति मध्यपदलोपी कर्म्मधारयः।) रसजाताञ्जनविशेषः। रसवत् इति भाषा ॥ तत्पर्य्यायः। रसगर्भम् २ तार्क्ष्यशैलम् ३। इत्यमरः ॥ रसोद्भूतम् ४ रसाग्रजम् ५ कृतकम् ६ बालभैषज्यम् ७ दार्व्वीक्वाथोद्भवम् ८ रसराजः ९ वर्य्याञ्जनम् १० रसनाभिम् ११ अग्निसारम् १२। अस्य गुणाः। हिमत्वम्। तिक्तत्वम्। चक्षुष्यत्वम्। मधुरत्वम्। कटुत्वम्। रक्तपित्तविषच्छर्द्दिहिक्कापस्मारनाशित्वञ्च।

"रीत्यान्तु ध्मायमानायां ततुकिट्टन्तु रसाञ्जनम्।
तदभावे तु कर्त्तव्यं दार्व्वीक्वाथसमुद्भवम् ॥"

इति राजनिर्घण्टः ॥

अपि च।

"दार्व्वीक्वाथसमं क्षीरं पादं पक्त्वा यथाघनम्।
तदा रसाञ्जनाख्यं तन्नेत्रयोः परमं हितम् ॥
रसाञ्जनं तार्क्ष्यशैलं रसगर्भञ्च तार्क्ष्यजम्।
रसाञ्जनं कटु श्लेष्मविषनेत्रविकारनुत्।
उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत् ॥"

इति भावप्रकाशः ॥

रसाढ्यः, पुं, (रसेनाढ्यः युक्तः।) आम्रातकः। इति राजनिर्घण्टः ॥ (आम्रातकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

रसातलं, क्ली, (रसायाः तलं निम्नभागस्थलोकविशेषः।) पातालम्। इत्यमरः ॥ (यथा, महाभारते। १२। ३४७। ५६।

"जग्राह वेदानखिलान् रसातलगतो हरिः ॥")

पातालभेदः। यथा,—

"अतलं वितलञ्चैव नितलञ्च तलातलम् ॥
महातलञ्च सुतलं सप्तमञ्च रसातलम् ॥
पातालभेदाः सप्तैव नामतः कीर्त्तिता अमी।
तत्र पातालमेकैकं दशसाहस्रयोजनम् ॥"

इति शब्दमाला ॥

(इदमेव निवातकवचानां निवासस्थानम्। तथा च देवीभागवते। ८। २०। ८—१२।

"ततोऽधस्ताच्च विवरे रसातलसमाह्वये।
दैतेया निवसन्त्येव पणयो दानवाश्च वै ॥
निवातकवचा नाम हिरण्यपुरवासिनः।
कालेया इति च प्रोक्ताः प्रत्यनीका हविर्भुजाम् ॥

महौजसश्चोत्पत्त्यैव महासाहसिनस्तथा।
सकलेशस्य च हरेस्तेजसा हतविक्रमाः ॥
बिलेशया इव सदा विवरे निवसन्ति हि।
ये वै वाग्भिः सरमया शक्रदूत्या निरन्तरम् ॥
मन्त्रवर्णाभिरसुरास्ताड़िता बिभ्यति स्म ह ॥")

रसादानं, क्ली, (रसानां आदानं ग्रहणम्।) शोषणम्। इति हेमचन्द्रः ॥ (रसाया दानम्।) भूमिदानञ्च ॥

रसाधारः, पुं, (रसानां जलानां आधारः। रसां पृथिवीं धरति स्वाकर्षणेनेति वा। धृ+णिच्।) सूर्य्यः। इति शब्दरत्नावली ॥ रसस्याधारश्च ॥

रसाधिकः, पुं, (रसाय स्वर्णादीनां द्रवीकरणाय अधिकः प्रबलः।) टङ्कणः। इति राजनिर्घण्टः ॥ अधिकरसश्च ॥

रसाधिका, स्त्री, (रसेन अधिका।) काकोलीद्राक्षा। इति राजनिर्घण्टः ॥

रसाभासः, पुं, (रस इव आभासते इति। आ+भास्+अच्।) अनौचित्यविशिष्टरसः। तस्य लक्षणं यथा,—

"अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः।"

अनौचित्यञ्चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे सत्येकदेशयोगित्वोपलक्षणपरं बोध्यम्। तच्च बालव्युत्पत्तये एकदेशतो दर्शते; उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च। बहुनायकविषयायां रतौ तथानुभयनिष्ठायां प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्य्यगादिगते शृङ्गारे अनौचित्यम्। रौद्रे गुर्व्वादिगतकोपे। शान्ते च हीननिष्ठे। गुर्व्वाद्यालम्बने हास्ये। ब्रह्मवधाद्युत्साहे। अधमपात्रगते तथा वीरे। उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र। तत्र रतेरुपनायकनिष्ठत्वे यथा मम।

"स्वामी मुग्धतरो वनं घनमिदं बालाहमेकाकिनी
क्षोणीमावृणुते तमालमलिनच्छायातमःसन्ततिः।
तन्मे सुन्दर! मुञ्च कृष्ण! सहसा वर्त्मेति गोप्या गिरः
श्रुत्वा तां परिरभ्य मन्मथकलासक्तो हरिः पातु वः ॥"

बहुनायकनिष्ठत्वे यथा,—

"कान्तास्त एव भुवनत्रितयेऽपि मन्ये
येषां कृते सुतनु! पाण्डुरयं कपोलः।"

अनुभयनिष्ठत्वे यथा,—

मालतीमाधवे नन्दनस्य मालत्याम्। पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वमिति श्रीमल्लोचनकाराः। तत्रोदाहरणं यथा रत्नावल्याम्। सागरिकाया अन्योऽन्यदर्शनात् प्राक् वत्सराजे रतिः। प्रतिनायकनिष्ठत्वे यथा हयग्रीववधे। हयग्रीवस्य जलक्रीड़ावर्णने। अधमपात्रगतत्वे यथा,—

"जघनस्थलनद्धपत्रवल्ली-
गिरिमल्लीकुसुमानि कापि भिल्ली।
अवचित्य गिरौ पुरो निषण्णा
स्वकचानुत्कचयाञ्चकार भर्त्रा ॥"

तिर्य्यग्गतत्वे यथा,—

"मल्लीमतल्लीषु वनान्तरेषु
वल्ल्यन्तरे वल्लभमाह्वयन्ती।
चञ्चद्विपञ्ची कलनादभङ्गी
सङ्गीतमङ्गीकुरुते स्म भृङ्गी ॥"

आदिशब्दात्तापसादयः। रौद्राभासो यथा —

"रक्तोत्फुल्लविशाललोलनयनः कम्पोत्तराङ्गो मुहु-
र्मुक्ताकर्णमपेतभीर्धृतधनुर्व्वाणो हरेः पश्यतः।
आध्मातः कटुकोक्तिभिः स्वमसकृद्दोर्व्विक्रमं कीर्त्तयन्
अंसास्फोटपटुर्युधिष्ठिरमसौ हन्तु प्रविष्टोऽर्ज्जुनः ॥"

भयानकाभासो यथा —

"अशक्नुवन् सोढुमधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम्।
प्रविश्य हेमाद्रिगुहागृहान्तरं
निनाय बिभ्यद्दिवसानि कौशिकः ॥"

अत्रोत्तमविषयमेव हि भयं रसप्रकृतिः। एवमन्यत्र। इति साहित्यदर्पणे ३ परिच्छेदः ॥

रसाम्लं, क्ली, (रसात्मकोऽम्लो यत्र।) वृक्षाम्लम्। इति राजनिर्घण्टः ॥ चुक्रम्। इति भावप्रकाशः ॥

रसाम्लः, पुं, (रसेन सह अम्लो यत्र।) अम्लवेतसः। इति राजनिर्घण्टः ॥

रसायकः, पुं, (रसं रसत्वमयति प्राप्नोति इति। अय+ण्वुल्।) तृणविशेषः। इति शब्दचन्द्रिका ॥

रसायनं, क्ली, कटिः। इति राजनिर्घण्टः ॥ (रसो दुग्धं अयनं मूलं यस्येति।) तक्रम्। इति हेमचन्द्रः ॥ विषम्। (रसा रसरक्तादय ईयन्ते प्राप्यन्ते अनेनेति। इ+ल्युट्।) ज्वराव्याधिनाशकौषधम्। इति मेदिनी ॥ (यथा, माघे। २। ९३।

"षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षं रसायनम्।
भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च ॥")

"न सूतेन विना कान्तं न कान्तेन विना रसः।
सूतकान्तसमायोगात् रसायनमुदीरितम् ॥"

इति राजनिर्घण्टः ॥ * ॥

अथ रसायनाधिकारः। तत्र रसायनस्य लक्षणमाह।

"यज्जराव्याधिविध्वंसि वयस्तम्भकरन्तथा।
चक्षुष्यं वृंहणं वृष्यं भेषजं तद्रसायनम् ॥"

रसायनस्य फलमाह।

"दीर्घमायुः स्मृतिर्मेधामारोग्यं तरुणं वयः।
देहेन्द्रियबलं कान्तिं नरो विन्देद्रसायनात् ॥"

तद्विधिमाह।

"पूर्व्वे वयसि मध्ये वा मनुष्यस्य रसायनम्।
प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा ॥
नाविशुद्धशरीरस्य युक्तो रासायनो विधिः।
न भाति वाससि श्लिष्टे रङ्गयोग इवाहितः ॥"

अथ तदुदाहरणानि ।
"पीतोदकं पय: क्षौद्रं घृतमेकैकशो हिम: ।
त्रिश: समस्तमथवा प्राक् पीतं स्थापयेद्वय: ॥
मण्डूकपर्ण्या: स्वरस: प्रभाते
प्रयोज्य यष्टीमधुकस्य चूर्णम् ।
रसो गुडूच्यास्तु समूलपुष्प्या:
कल्क: प्रयोज्य: खलु शङ्खपुष्प्या: ॥
आयु:प्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्द्धनानि ।
मेध्यानि चैतानि रसायनानि
मेध्या विशेषेण च शङ्खपुष्पी ॥"
मण्डूकपर्णी ब्राह्मी । थरभी इति लोके । तदलाभे मञ्जिष्ठापि ग्राह्या । तस्या अपि रसायनत्वात् ।
"माक्षिकेण तुगाक्षीर्य्या पिप्पल्या लवणेन च ।
त्रिफला सितया वापि युक्ता सिद्धं रसायनम् ॥
सिन्धूत्थशर्कराशुण्ठीकणामधुगुडै: क्रमात् ।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥
पुनर्नवस्यार्द्धपलं नवस्य
पिष्टं पिबेद्य: पयसार्द्धमासम् ।
मासत्रयं तत्त्रिगुणं समां वा
जीर्णोऽपि भूय: स पुनर्नव: स्यात् ॥
ये मासमेकं स्वरसं पिबन्ति
दिने दिने भृङ्गरज:समुत्थम् ।
क्षीराशिनस्ते बलवीर्य्ययुक्ता:
समाशतं जीवनमाप्नुवन्ति ॥
शतावरी मुण्डितिका गुडूची
सहस्तिकर्णा सहतालमूली ।
एतानि कृत्वा समभागयुक्ता-
न्याज्येन किंवा मधुनावलिह्यात् ॥
जरारुजामृत्युवियुक्तदेहो
भवेन्नरो वीर्य्यबलादियुक्त: ।
विभाति देवप्रतिम: स नित्यं
प्रभामयो भूरिविशुद्धबुद्धि: ॥
पीताश्वगन्धा पयसार्द्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
वीर्य्यस्य पुष्टिं वपुषो विधत्ते
बालस्य शस्यस्य यथाम्बुवृष्टि: ॥
अय:पलं गुग्गुलुरत्र योज्य:
पलत्रयं चौषपलानि पञ्च ।
पलानि चाष्टौ त्रिफलारजश्च
कर्षं लिहन् यात्यमरत्वमेव ॥"
लोहगुग्गुलु: ।
"न केवलं दीर्घमिहायुरश्नुते
रसायनं यो विविधं निषेवते ।
गतिं स देवर्षिनिषेवितां शुभां
प्रपद्यते ब्रह्म तथैव चाक्षयम् ॥"
इति रसायनाधिकारे भावप्रकाश: ॥
(तथा च ।
"लाभोपायोहि प्रशस्तानां रसादीनां रसायनम् ।
पूर्व्वे वयसि मध्ये वा तत् प्रयोज्यं जितात्मन: ।
स्निग्धस्य स्नुतरक्तस्य विशुद्धस्य च सर्व्वथा ॥
नाविशुद्धे शरीरे हि युक्तो रासायनो विधि: ।
वाजीकरो वा मलिने वस्त्रे रङ्ग इवाफल: ॥'
"रसायनानां द्विविधं प्रयोगमृषयो विदु: ।
कुटीप्रावेशिकं मुख्यं वातातपिकमन्यथा ॥
निर्व्वाते निर्भये हर्म्ये प्राप्योपकरणे पुरे ।
दिश्युदीच्यां शुभे देशे त्रिगर्भां सूक्ष्मलोचनाम् ॥
धूमातपरजोव्यालस्त्रीमूर्खाद्यविलङ्घिताम् ।
सज्जवैद्योपकरणां सुमृष्टां कारयेत् कुटीम् ॥
अथ पुण्येऽह्नि संपूज्य पूज्यांस्तां प्रविशेच्छुचि: ।
तत्र संशोधनै: शुद्ध: सुखी जातबल: पुन: ॥
ब्रह्मचारी धृतियुत: श्रद्दधानो जितेन्द्रिय: ।
दानशीलदयासत्यव्रतधर्म्मपरायण: ॥
देवतानुस्मृतौ युक्तो युक्तस्वप्नप्रजागर: ।
प्रियौषध: पेशलवाक् प्रारभेत रसायनम् ॥
हरीतकीमामलकं सैन्धवं नागरं वचाम् ।
हरिद्रां पिप्पलीं वेल्लं गुडेनोष्णाम्बुना पिबेत् ॥
स्निग्ध: स्विन्नो नर: पूर्व्वं तेन साधु विरिच्यते ।
तत: शुद्धशरीराय कृतसंसर्ज्जनाय च ॥
त्रिरात्रं पञ्चरात्रं वा सप्ताहं वा घृतान्वितम् ।
दद्याद्यावकमाशुद्धे: पुराणशकृतोऽथ वा ॥
इत्थं संस्कृतकोष्ठस्य रसायनमुपाहरेत् ।
यस्य यद्यौगिकं पश्येत् सर्व्वमालोच्य सात्म्यवित् ॥"
"कुटीप्रवेश: क्षमिणां परिच्छदवतां हित: ।
अतोऽन्यथा तु ये तेषां सूर्य्यमारुतिकोविधि: ॥
वातातपसहायोगा वक्ष्यन्तेऽतो विशेषत: ।
सुखोपचारा भ्रंशेऽपि ये न देहस्य बाधका: ॥"
इत्युत्तरस्थानीयवाग्भटे ३९ अध्याये ॥
विशेषस्तु तस्मिन्नध्याये ज्ञातव्य: ॥ * ॥ रस: पारद: तत्सहायया तज्जातीय-हरितालादिकञ्च अयनं आश्रय उपायो वा यस्य तत् । स्वर्णादि-करणम् ।
अथरसायने ईश्वर उवाच ।
"गोमूत्रं हरितालञ्च गन्धकञ्च मन:शिलाम् ।
समं समं गृहीत्वा तु यावत् शुष्यति पेषयेत् ॥
एकादशदिनं यावत् यत्नेन रक्षयेत् शुचि: ।
मन्त्रेण धूपदीपादिनैवेद्यैर्गन्धमिश्रितै: ॥
मन्त्रस्तु ॐ हरिहराय रसायनं सिद्धिं कुरुकुरु स्वाहा । अयुतजपेन सिद्धि: ।
तद्वटीं गोलकं कृत्वा वस्त्रेणावेष्टयेत् पुन: ।
मृत्तिका लेपयेत्तस्य छायाशुष्कञ्च कारयेत् ॥
गर्त्ते कुण्डे विनिक्षिप्य पलाशकाष्ठवह्निना ।
ज्वालयेद्दशयामन्तु नान्यथा शङ्करोदितम् ॥
तद्रसं जायते सिद्धिर्व्विद्धि सिद्धिसमाकुलम् ।
ताम्रपात्रे अग्निमध्ये बिन्दुमात्रं नियच्छति ॥
ततश्चयाज्जायते स्वर्णं नान्यथा शङ्करोदितम् ।
दातव्यं गुरुभक्ताय न दद्याद्दुष्टमानसे ।
सिद्धपीठे भवेत्सिद्धिर्गोपनीयञ्च जापनै: ॥
यस्मै कस्मै न दातव्यं दातव्यं शिवभक्तके ।
अग्निमुखं द्विजातीनां पावकानां विशेषत: ।
गोप्यं गोप्यं महागोप्यं देवानामपि दुर्लभम् ॥"
प्रकारान्तरम् ।
"आनीय वहयत्नेन समलं तोलकद्वयम् ।
वसुरात्रं शिवचार्य्यं मायाबिन्दुसमन्वितम् ॥
बीजत्रयस्याष्टशतं प्रजपेत् समलोपरि ।
अष्टौतितोलकमानं कृष्णधेनुसमुद्भवम् ॥
दुग्धमानीय यत्नेन चाष्टोत्तरशतं जपेत् ।
वस्त्रयुक्तेन सूत्रेण दुग्धमध्ये विनिक्षिपेत् ॥
उत्तापं ज्वालयेद्धीमान् मन्दमन्देन वह्निना ।
रिपुर्व्वदाहपर्य्यन्तमर्द्धशेषं भवेद्यदि ॥
तद्देवोत्तोल्य तद्द्रव्यं दुग्धं तोये विनिक्षिपेत् ॥"
तत: परीक्षा कर्त्तव्या ।
"निर्धूमे पावके द्रव्यं दत्त्वा उत्थाप्य यत्नत: ।
तत्रैव प्रजपेन्मन्त्रं सर्व्वबन्धनमात्मकम् ॥
साद्धेन तोलकं ताम्रं दत्त्वा उत्थाप्य यत्नत: ।
गुञ्जाप्रमाणं तद्द्रव्यं सत्यं सत्यं हि शङ्करि ! ।
रौप्यं भवति तद्द्रव्यं नान्यथा शङ्करोदितम् ॥"
प्रकारान्तरम् ।
"कृष्णसर्पमेकं गृहीत्वा तस्य मुखे शिववीर्य्यं पूरयित्वा सर्पस्य मुखं गुदञ्च बद्धा नूतनमृन्मयस्थालीमध्ये संस्थाप्य स्थालीमुखं मृदादिना संलिप्य निर्ज्जनस्थाने प्रातरारभ्य पुन:प्रातर्यावत् वह्निना ज्वालं दद्यात् । तत: शुभक्षणे स्थालीमुखमुद्घाट्य सर्पभस्म विहाय शिववीर्य्यं गृह्णीयात् । ततस्तोलकमितं ताम्रं गालयित्वा तस्मिन् गालितताम्रे रक्तिकमात्रं तत् शिववीर्य्यं दद्यात् तेन तत्क्षणादेव तत्ताम्रं सुवर्णीभूतम् । आदौ शिवार्च्चनं कृत्वा पश्चात् प्रयोग एव कर्त्तव्य: ।" इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे रसायनं नाम त्रयोदश: पटल: ॥)

रसायन:, पुं, गरुड: । विडङ्ग: । इति मेदिनी ॥

रसायनफला, स्त्री, (रसायनेन फलति या । फल् + अच् । टाप् ।) हरीतकी । इति त्रिकाण्डशेष: ॥

रसायनश्रेष्ठ:, पुं, (रसायनेषु श्रेष्ठ: ।) पारद: । इति राजनिर्घण्ट: ॥

रसायनी, स्त्री, (रसान् तैलादीन् अयतं प्राप्नोतीति । अय् + ल्यु: । ङीष् ।) गुडूची । काकमाची । महाकरञ्ज: । गोरक्षदुग्धा । मांसच्छदा । इति राजनिर्घण्ट: ॥ (मञ्जिष्ठा । अस्या: पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रसालं, क्ली, (रसं आलातीति । आ + ला + क: ।) सिह्लकम् । बोलम् । इति मेदिनी ॥

रसाल:, पुं, (रसं आलाति गृह्णाति । आ + ला + क: ।) इक्षु: । आम्र: । इत्यमर: ॥ (यथा, साहित्यदर्पणे १०परिच्छेदे अतिशयोक्त्यलङ्कारे ।
"प्रागेव हरिणाक्षीणां चित्तमुत्कलिकाकुलम् ।
पश्चादुद्भिन्नबकुलरसालमुकुलश्रिय: ॥")
पनस: । इति शब्दरत्नावली । कुन्दरुकम् ॥ गोधूम: । पुष्पकनामेक्षु: । इति राजनिर्घण्ट: ।

रसालसा, स्त्री, (रसेन अलसा ।) नाडी । इति शब्दचन्द्रिका ॥

रसाला, स्त्री, (रसान् आलातीति । आ+ला+कः । टाप् ।) रसना । दूर्व्वा । विदारी । इति मेदिनी ॥ द्राक्षा । इति शब्दरत्नावली ॥ शिखरिणी । तत्पर्य्यायः । मार्ज्जिता २ । इत्यमरः ॥ तस्याः करणप्रकारो यथा,—

"आदौ माहिषमम्लमम्बुरहितं दध्याढकं शर्करां शुभ्रां प्रस्थयुगोन्मितां शुचिपटे किञ्चिच्च कश्चित् क्षिपेत् ।
दुग्धेनार्द्धघनेन मल्लयुगलस्थाल्यां दृढं स्रावयेदेलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च तद्योजयेत् ॥
भीमेन प्रियभोजनेन रचिता नाम्ना रसाला स्वयं
श्रीकृष्णेन पुरा पुनःपुनरियं प्रीत्या समास्वादिता ।
एषा येन वसन्तवर्ज्जितदिने सेव्या परं नित्यशस्तस्य स्यादतिवीर्य्यवृद्धिरनिशं सर्व्वेन्द्रियाणां बलम् ॥
ग्रीष्मे तथा शरदि ये रविशोषिताङ्गा
ये च प्रमत्तवनितासुरतातिखिन्नाः ।
ये चापि मार्गपरिसर्पणशीर्णगात्रा-
स्तेषामियं वपुषि पोषणमाशु कुर्य्यात् ॥
रसाला शुक्रला बल्या रोचनी वातपित्तजित् ।
दीपनी वृंहणी स्निग्धा मधुरा शिशिरा सरा ।
रक्तपित्तं तृषां दाहं प्रतिश्यायं विनाशयेत् ॥"
इति राजनिर्घण्टः ॥

अपि च ।
"दध्नोऽर्द्धाढकमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः प्रस्थं चौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्म्माषकान् ।
एलामाषचतुष्टयं मरिचतः कर्षं लवङ्गं तथा कृत्वा शुक्लपटे शनैः करतलेनोन्मथ्य विस्रावयेत् ॥
मृद्भाण्डे मृगनाभिचन्दनरसस्पृष्टेऽगुरुद्धूपिते कर्पूरेण सुगन्धितं तदखिलं संलोड्य संस्थापयेत् ।
स्वस्वार्थे मधुरेश्वरेण रचिता ह्येषा रसाला स्वयं
भोक्तुर्म्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥"
इति भावप्रकाशः ॥

रसालिहा, स्त्री, शीर्णनाला । इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥

रसाली, स्त्री, (रसान् आलाति या । आ+ला+कः । ङीप् ।) पुण्ड्रकेक्षुः । इति राजनिर्घण्टः ॥

रसाश्वासा, स्त्री, पलाशीलता । इति राजनिर्घण्टः ॥

रसास्वादः, पुं, (रसस्य आस्वादः ।) अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनम् । समाध्यारम्भसमये सविकल्पानन्दास्वादनं वा । इति वेदान्तसारः ॥*॥ "चतुर्थं विघ्नमाह अखण्डेति । उक्तसविकल्पकसमाध्योर्म्मध्ये द्वितीयः शब्दानुविद्धत्रिपुटीविशिष्टस्तस्मिन् य आनन्दो बाह्यशब्दादिविषयप्रपञ्चभारत्यागप्रयुक्तो न तु चैतन्यप्रयुक्तः । यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालकभूतप्रेताद्याहतस्य निधिप्राप्तेः अभावेऽपि भूताद्यनिष्टनिवृत्तिमात्रेण कोऽपि महानानन्दो भवति तथा सविकल्पकसमाधावखण्डवस्त्वनवलम्बनेन नित्यानन्दरसास्वादनाभावेऽपि अनिष्टबाह्यप्रपञ्चनिवृत्तिजन्यानन्दं सविकल्पकरूपं ब्रह्मानन्दभ्रमेण स्वादयति तद्रसास्वादनमित्यर्थः । लक्षणान्तरमाह समाधीत्यादि । निर्व्विकल्पकसमाध्यारम्भकाले अनुभूय मानसविकल्पकानन्दत्यागासहिष्णुतया पुनस्तस्यैवास्वादनं रसास्वाद इत्यर्थः ।" इति सुबोधन्याख्या तट्टीका ॥

रसास्वादी, [न्] पुं, (रसं मधु आस्वादयितुं शीलमस्य । आ+स्वद्+णिनिः ।) भ्रमरः । इति शब्दमाला ॥ रसास्वादविशिष्टे, त्रि ॥

रसाढ्यः, पुं, (रसः आढ्या आख्या यस्य ।) सरलद्रवः । इति रत्नमाला ॥

रसिकः, पुं, (रसोऽस्त्यस्येति वा । रस्+ठन् ।) सारसपक्षी । इति राजनिर्घण्टः ॥ तुरङ्गः । हस्ती । इति सारस्वतः ॥ सरसे, त्रि । इति मेदिनी ॥ (यथा, भागवते । १ । १ । ३ ।
"पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥")

रसिका, स्त्री, (रसिक+टाप् ।) रसाला । इक्षुरसः । इति मेदिनी ॥ काञ्ची । रसना । इति विश्वः ॥

रसिकेश्वरः, पुं, (रसिकानां रसज्ञानामीश्वरः ।) श्रीकृष्णः । यथा,—
"वृन्दावनान्तरे रम्ये रासोत्सवसमुत्सुकम् ।
रासमण्डलमध्यस्थं नमामि रसिकेश्वरम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३२ अध्यायः ॥ (रसिकश्रेष्ठश्च ॥)

रसितं, क्ली, (रस शब्दे+भावे क्तः ।) मेघनिर्घोषः । इत्यमरः ॥ रुतम् । स्वर्णादिखचिते, त्रि । इति मेदिनी ॥

रसुनः, पुं, (रस+उनन् ।) लशुनः । इति शब्दचन्द्रिका ॥ (विवरणमस्य रसोनशब्दे ज्ञातव्यम् ॥)

रसेन्द्रः, पुं, (रसानां धातुरसानामिन्द्रः श्रेष्ठः ।) पारदः । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशे । १ । १ ।
"असाध्यो यो भवेद्रोगो यस्य नास्ति चिकित्सितम् ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"
अस्य पर्य्यायादिकं रसशब्दे द्रष्टव्यम् ॥)

रसोत्तमः, पुं, (रसेषु उत्तमः । यद्वा, रसः उत्तमोऽस्य ।) मुद्गः । इति राजनिर्घण्टः ॥ श्रेष्ठरसश्च ॥

रसोद्भवं, क्ली, (रसात् पारदधातोरुद्भवतीति । उत्+भू+अच् ।) हिङ्गुलम् । इति राजनिर्घण्टः ॥ रसजाते, त्रि ॥

रसोनः, पुं, (रसेनैकेनोनः ।) रसुनः । इति राजनिर्घण्टः ॥ (तस्योत्पत्तिर्यथा,—
"राहोरमृतचौर्य्येण लूनात् ये पतिता गलात् ।
अमृतस्य कणा भूमौ ते रसोनत्वमागताः ॥
द्विजा नाश्नन्ति तमतो दैत्यदेहसमुद्भवम् ।
साक्षादमृतसम्भूतेर्ग्रामणीः स रसायनम् ॥"
इति वाभटे उत्तरस्थाने ३९ अध्यायः ॥
"अथ वीर्य्यञ्च वक्ष्यामि रसोनस्य महामते ।
रसैश्च पञ्चभिर्युक्तो रसोनस्तेन वर्जितः ॥"
"दध्ना वातादिशमनो रसोनो विहितो बुधैः ।
जाङ्गलानि रसान्येव भोजनार्थे प्रदापयेत् ॥"
इति हारीते कल्पस्थाने तृतीयेऽध्याये ॥
अथास्य गुणाः ।
"रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तास्रवृद्धिदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अन्यद्विवरणमस्य रसोनकशब्दे लशुनशब्दे च द्रष्टव्यम् ॥)

रसोनकः, पुं, (रसोन+स्वार्थे कन् ।) रसुनः । तत्पर्य्यायः ।
"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥"
तस्योत्पत्तिर्यथा,—
"यदामृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद्बिन्दुः स रसोनोऽभवद्भुवि ॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्ज्जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥"
अस्यावयवगुणाः ।
"कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ।
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः ॥"
अस्य भक्षणगुणाः ।
"रसोनो बृंहणो वृष्यो स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तास्रवृद्धिदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥
हृद्रोगजीर्णज्वरकुक्षिशूल-
विबन्धगुल्मारुचिकासशोफान् ।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति ॥
मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम् ॥
व्यायाममातपं रोषमतिनीरपयो गुडम् ।
रसोनमश्नन् पुरुषस्त्यजेदेतन्निरन्तरम् ॥"
इति भावप्रकाशः ॥
(तथास्यान्या विवृतिर्यथा,—
"अमृतमथने जातः सुरासुरमहो महान् ।

जहार वैनतेयश्च चञ्चुना त्रिदिवं गतः ॥
संग्रामश्रमसम्प्राप्ते श्रमवेगप्रधाविते ।
आरूढ़े वैकृतं प्राप्ते च्युता ह्यमृतबिन्दवः ॥
सकृत् सन्दूषिते देहे पतितास्तत्र संस्थिताः ।
तस्मात् कालवशाज्जातं दुर्भिक्षं द्वादशाब्दि-
कम् ॥
विशुष्काः कानने सर्व्वा वृक्षकाण्डप्रतानिकाः ।
तस्माच्च कानने सर्व्वे प्रकृष्टं गहनं गताः ॥
तेषां मध्ये जराग्रस्तो गतिहीनोऽतिजर्ज्जरः ।
सयष्टिः सरणिस्तुत्यः शीर्णदन्तावलीमुखः ॥
सवक्तस्थैः क्षुधापन्नैः ऋषिभिस्तत्र विस्मृतः ।
सोऽपि क्षुधातुरः सर्व्वां पर्य्यटत्तुर्व्वरां महीम् ॥
कुत्रचित् पुण्ययोगेन दृष्टवान् विटपान् शुभान् ।
नीलशैवालसङ्काशान् शाड्वलान् बहुलान्
भुवि ।
क्षुधासंपीड़नेनापि भुक्तवान् शाड्वलानपि ॥
मध्यमानान्तरे शुष्कान् विटपान् तदनन्तरम् ।
भुक्तवान् कन्दकान् सोऽपि मासमेकं तथा
ऋषिः ॥
पश्चात् सुभिक्षे सञ्जाते सर्व्वे चैकत्र संस्थिताः ।
सोऽपि वृद्धो युवा भूत्वा गतस्तत्र च यत्र ते ॥
तं दृष्ट्वा विस्मयापन्नाः पप्रच्छुः किं कृतं त्वया ।
प्रोक्तवान् सोऽपि किञ्चिच्च यथा तैः प्रापित-
स्ततः ॥
यत्त्वया खादितं द्रव्यं तदभक्ष्यं द्विजातिभिः ।
दुर्गन्धमपि विप्रस्य तस्माज्जातं रसोनकम् ॥”
“तेन रसोनकं नाम विख्यातं भुवनत्रये ।
कुक्कुटाण्डनिभं ग्रीष्मे शीर्णपर्णं समुद्धरेत् ॥
भद्रा पुटे सुनिर्गन्धं धारयेत्तन्महामते ।
दीप्ताग्निदर्शनात्तेन म्रियते दीर्य्यते भुवि ॥
वर्षासु शिशिरे चैव कारयेन्मात्रया शुभम् ।
रामठं जीरके द्वे च अजमोदाकटुत्रयम् ॥
कृतसौवर्च्चलोपेतं वातरोगे विशेषतः ।
मातुलुङ्गरसेनापि शूलनाशे प्रकीर्त्तितः ॥”
इति हारीते कल्पस्थाने तृतीयेऽध्याये ।
अस्यान्यत् द्विजाभक्ष्यत्वकारणादिकं रसोनशब्दे
द्रष्टव्यम् ।)
रसोपलं, क्ली, (रसवत् पारद इव उपलम् ।)
मौक्तिकम् । इति त्रिकाण्डशेषः ॥
रस्नं, क्ली, (रस+“ऋषियुविरसिभ्यः कित् ।”
उणा० ३ । १२ । इति नप्रत्ययः ।) द्रव्यम् ।
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
रस्यं, क्ली, (रसात् भुक्तान्नादिपरिपाकात् आगत-
मिति । रस+ यत् ।) रक्तम् । इति शब्द-
चन्द्रिका ॥ (यथा, महाभारते ।१३।५०।३२।
“यन्नैव गन्धिनो रस्यं नरूपं स्पर्शशब्दवत् ॥”
रसयुक्ते, त्रि : यथा, भगवद्गीतायाम् । १७ ।८।
“रस्याः स्निग्धाः स्थिरा हृद्या आहाराः
सात्त्विकप्रियाः ॥”)
रस्या, स्त्री, (रसाय हिता । रस् + यत् । टाप् ।)
रास्ना । (अस्याः पर्य्यायो यथा,—
“रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पाठा । इति राजनिर्घण्टः ॥
रंह, तृ क गतौ । इति कविकल्पद्रुमः ॥ (अदन्त
चुरा०-पर०-सक०-सेट् ।) रंहयति रंहा-
पयति । इति दुर्गादासः ॥
रंहः, [स्] क्ली, (रम+“रमेश्च ।” उणा०
४ । २१३ । इति असुन् हुगागमश्च । “अहि
रहिभ्यामसुन् इत्यन्ये रंह इति धातुप्रदीपः ।”
इत्युज्ज्वलः ।) वेगः । तत्पर्य्यायः । तरः २
रयः ३ स्यदः ४ जवः ५ । इत्यमरः ॥ रंघः ६
जवनः ७ । इति तट्टीका ॥ (यथा, रघुः ।
२ । ३४ ।
“न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥”)
रह, त्यजि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
सक०-सेट् ।) रहति सुखं दीनः । इति दुर्गा-
दासः ॥
रह, इ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-सक०-सेट् ।) इ, रंह्यते । इति दुर्गा-
दासः ॥
रह, तृ क त्यागे । इति कविकल्पद्रुमः । (अदन्त
चुरा०-पर०-सक०-सेट् ।) रहयति शोकं
धीरः । इति दुर्गादासः ॥
रहः, [स्] क्ली, (रमन्तेऽस्मिन् । रंह+“हेशे ह्र
च ।” उणा० ४ । २१४ । इति असुन्प्रत्ययः ।
हकारस्यान्तादेशः । “रह त्यागे अस्मादसुनि
रह इति धातुप्रदीपः ।” इत्युज्ज्वलः ।)
निर्ज्जनम् । तत्पर्य्यायः । विविक्तः २ विजनः ३
छन्नः ४ निःशलाकः ५ रहः ६ उपांशु ७
इत्यमरः ॥ (यथा, रघौ । ३ । ३ ।
“तदाननं मृत्सुरभि क्षितीश्वरः
रहस्युपाघ्राय न तृप्तिमाययौ ॥”)
तत्त्वम् । रतिः । गुह्यम् । इति मेदिनी ॥
रहः, [स्] व्य, विजनम् । इत्यमरः ॥
“रहो निधुवनेऽपि स्याद्रहो गुह्ये नपुंसकम् ॥”
इति रभसश्च ॥
“देशादन्यत्र रहोऽव्ययं शब्दान्तरं वाक्ति सुरत-
वाचकम् ।” इत्युज्ज्वलः । ४ । २१४ ॥)
रहस्यं, त्रि, (रहसि भवम् । रहस्+दिगादि-
त्वात् यत् । इत्युज्ज्वलः । ४ । २१४ ।) गोप-
नीयम् । रहसि भवम् । इति मेदिनी अमरश्च ।
रहस्यरोमस्पर्शनिषेधो यथा,—
“न सर्पशस्त्रैः क्रीड़ेत स्वानि खानि न संस्पृशेत् ।
रोमाणि च रहस्यानि नाशिष्टेन सहा व्रजेत् ॥”
इति कौर्म्मे १५ अध्यायः ॥
रहस्या, स्त्री, (रहस्य+टाप् ।) नदीभेदः ।
इति मेदिनी ॥ (यथा, महाभारते ।६।९।१९।
“रहस्यां शतकुम्भां च सरयूं च नरेश्वर ! ॥”)
रास्ना । पाठा । इति राजनिर्घण्टः ॥
रहितं, त्रि, (रह+क्तः ।) वर्ज्जितम् । यथा,—
“जातसूतकमादौ च अन्ते च मृतसूतकम् ।
गुरोस्तद्रहितं ज्ञात्वा जपकर्म्म समाचरेत् ॥”
इति तन्त्रसारः ॥
अपि च ।
“दिग्भोऽब्दवाग्भिरहितो जन्मर्क्षाद्यो भमि-
तिः ।
भं भवेदब्दवेशेऽत्र योगेऽप्येवं विचिन्तयेत् ॥”
इति जातकपद्धतिः ॥
रा, ल दाने । ग्रहणे । इति कविकल्पद्रुमः ॥
(अदा०-पर०-सक०-अनिट् ।) ल, राति ।
इति दुर्गादासः ॥
राः, स्त्री, (रा+सम्पदादित्वात् क्विप् ।) विभ्रमः ।
दानम् । इत्येकाक्षरकोषः ॥ काञ्चनम् । इति
शब्दरत्नावली ॥
राः, [रै] पुं, (रा दाने+“रातेर्डैः ।” उणा
२ । ६६ । इति डैः ।) धनम् । (यथा, भाग-
वते । ३ । २५ । ३८ ।
“आत्मानमनु ये चेह ये रायः पशवो
गृहाः ॥”)
स्वर्णम् । इत्यमरः ॥ शब्दः । इति शब्दरत्ना-
वली ॥ (स्त्री, श्रीः । यथा, ऋग्वेदे । १० ।
१११ । ७ ।
“स चक्षायदुषसः सूर्य्येण चित्रामस्य केतवो
रामविन्दन् ॥”
“चित्रां नानावर्णां रां रायं श्रियमविन्दन् अल-
भन्त ।” इति तद्भाष्ये सायणः ॥)
राका, स्त्री, (रा दाने+“सृदाधाराचिकलिभ्यः
कः ।” उणा० ३ । ४० । इति कः । बहुल-
वचनादेव न ह्रस्वः ।) नदीविशेषः । (सा च
शाल्मलीद्वीपस्यान्यतमा नदीनामन्यतमा । यथा,
भागवते । ५ । २० । १० ।
“तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः । सुरसः
शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्प-
वर्षः सहस्रश्रुतिरिति । अनुमती सिनीवाली
सरस्वती कुहू रजनी नन्दा राकेति ॥”)
कच्छूरोगः । नवजातरजःस्त्री । (रायते दीयते
देवेभ्य हविर्यस्याम् । इति निघण्टुटीकायां देव-
राजयज्वा । ५ । ५ । २१ ।) सम्पूर्णेन्दुतिथिः ।
इति मेदिनी ॥ (यथा, ऋग्वेदे । २ । ३२ । ४ ।
“राकामहं सुहवां सुष्टुतीहुवे
शृणोतु नः सुभगा बोधतुत्मना ॥”
“संपूर्णचन्द्रा पौर्णमासी राका ।” इति सायणः ॥
राक्षसीविशेषः । सा च खरस्य शूर्पणखायाश्च
जननी । यथा, महाभारते । ३ । २७४ । १-८ ।
मार्कण्डेय उवाच ।
“पुलस्त्यस्य तु यः क्रोधादर्द्धदेहोऽभवन्मुनिः ।
विश्रवा नाम सक्रोधः स वैश्रवणमैक्षत ॥
बुबुधे तन्तु सक्रोधं पितरं राक्षसेश्वरः ।
कुबेरस्तत्प्रसादार्थं यतते स्म सदा नृप ! ॥
स राजराजो लङ्कायां निवसन्नरवाहनः ।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः ॥
ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः ।
ऋषिं भरतशार्दूल ! नृत्तगीतविशारदाः ॥

पुष्पोत्कटा च राका च मालिनी च विशाम्पते।
अन्योऽन्यस्पर्द्धया राजन्! श्रेयस्कामाः सुमध्यमाः॥
स तासां भगवांस्तुष्टो महात्मा प्रददौ वरान्।
लोकपालोपमान् पुत्रानेकैकस्या यथेप्सितान्॥
पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ।
कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि॥
मालिनी जनयामास पुत्रमेकं विभीषणम्।
राकायां मिथुनं जज्ञे खरः शूर्पणखा तथा॥")

राक्षसः, पुं, रक्षन्त्यस्मात् रक्षः रक्ष एव राक्षसः। तत्पर्य्यायः। कौणपः २ क्रव्यात् ३ क्रव्यादः ४ अस्रपः ५ आशरः ६ रात्रिञ्चरः ७ रात्रिचरः ८ कर्व्वूरः ९ निकषात्मजः १० यातुधानः ११ पुण्यजनः १२ नैरृतः १३ यातु १४ रक्षः १५। इत्यमरः॥ सन्ध्याबलः १६ चपाटः १७ रजनीचरः १८ कीलापाः १९ नृचक्षाः २० नक्तञ्चरः २१ पलाशी २२ पलाशः २३ भूतः २४। इति शब्दरत्नावली॥ नीलाम्बरः २५ कव्याषः २६ कटप्रूः २७ असिरः २८ कीलालपाः २९ नरधिष्णवः ३०। इति जटाधरः॥ तस्योत्पत्तिर्यथा,—

"रजोमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम्।
ततः क्षुद्ब्रह्मणो जाता जज्ञे कोपात्तयास्ततः॥
क्षुत्क्षामानन्धकारांश्च सोऽसृजद्भगवांस्ततः।
विरूपाः श्मश्रुला जातास्तेऽभ्यधावन्त तं प्रभुम्॥
मैवं भो रक्ष्यतामेष तैरुक्तं राक्षसास्तु ते॥"
इति वह्निपुराणम्॥ * ॥

अपि च।
"रक्षोगणं क्रोधवशात् स्वनामानमजीजनत्।
दंष्ट्रिणां नियुतं तेषां भीमसेनाहृतं क्षयम्॥"
इति मात्स्ये आदिसर्गे कश्यपान्वयनाम ६ अध्यायः॥ * ॥ राक्षसभोज्यान्नानि यथा,—
"शुक्कीटाद्युपपन्नञ्च यच्चोच्छिष्टेऽन्वितं भवेत्।
केशावपन्नमाधूतं मारुतश्वासदूषितम्॥
एभिः संसृष्टमन्नञ्च भागो वै रक्षसो भवेत्।
तस्माज्ज्ञात्वा सदा विद्वानन्नान्येतानि वर्ज्जयेत्॥
राक्षसा नाम ये प्रोक्तास्ते भुञ्जन्त्यन्नमीदृशम्॥"
इति वामनपुराणे ६९ अध्यायः॥ * ॥
तेषां विहारः स्वर्य्यलोकादधः। यथा,—
"यक्षाश्चरा ये च भूतप्रेतपिशाचकाः।
वर्ज्जयित्वा रुद्रगणांस्ते तत्रैव चरन्ति हि॥
नोर्द्ध्वं विक्रमणे शक्तिस्तेषां सम्भूतपाप्मनाम्।
अत ऊर्द्ध्वं हि विप्रेन्द्र राक्षसा ये हतैनसः।
ते तु स्वर्ग्यादधः सर्व्वे विहरन्त्यूर्द्ध्ववर्ज्जिताः॥"
इति पाद्मे स्वर्गखण्डे १५ अध्यायः॥ * ॥
(अनेनाधिष्ठितस्य रोगिणो लक्षणं यथा,—
"सक्रोधदृष्टिं भ्रुकुटीमुद्वहन्तं ससंभ्रमम्।
प्रहरन्तं प्रधावन्तं शब्दन्तं भैरवाननम्॥
अन्नादिनापि रहितं नष्टनिद्रं निशाचरम्।
निर्लज्जमशुचिं शूरं क्रूरं परुषभाषिणम्॥
रोषणं रक्तमाल्यस्त्रीरक्तमद्यामिषप्रियम्।
दृष्ट्वा च रक्तं मांसं वा लिहानं दशनच्छदौ।
हसन्तमन्नकाले च राक्षसाधिष्ठितं वदेत्॥"
इति वाग्भटे उत्तरस्थाने चतुर्थेऽध्याये॥)
अष्टप्रकारविवाहान्तर्गतविवाहविशेषः। यथा,
"आसुरो द्रविणादानाद्गान्धर्व्वः समयान्मिथः।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात्॥"
इत्युद्वाहतत्त्वम्॥
(एतल्लक्षणान्तरञ्च यथा, मनुः। ३। ३३।
"हत्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं गृहात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते॥"
राक्षसविवाहस्तु क्षत्त्रियस्यैव प्रशस्तः। यथा, तत्रैव। ३। २४।
"चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः।
राक्षसं क्षत्त्रियस्यैकं आसुरं वैश्यशूद्रयोः॥"
निन्द्यप्रजोत्पत्तिजनकतया तु ब्राह्माद्यपेक्षया राक्षसादिविवाहस्य गर्हितत्वमाह तत्रैव। ३। ४१—४२।
"इतरेषु च शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्व्विवाहेषु ब्रह्मधर्म्मद्विषः सुताः॥
अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्ज्जयेत्॥" * ॥
अब्दविशेषे, पुं, क्ली। यथा, वृहत्संहितायाम्। ८। ३५।
"इन्द्राग्निदैवं दशमं युगं यत्
तत्राद्यमब्दं परिधाविसंज्ञम्।
प्रमादियानन्दमतःपरं यत्
स्याद्राक्षसं चानलसंज्ञितञ्च॥")
रक्षःसम्बन्धिनि, त्रि॥

राक्षसी, स्त्री, (राक्षस+ङीप्।) कौणपी। राक्षसपत्नी। यथा, रघुः। १२। ६१।
"दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता।
जानकी विषवल्लीभिः परीतेव महौषधिः॥")
दंष्ट्रा। वृहद्दन्तीति यावत्। इति हेमचन्द्रः॥ चण्डा घोरनामगन्धद्रव्यमिति यावत्। इति मेदिनी॥ सायाह्नवेला। यथा,—
"प्रातःकाले मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥"
इति तिथ्यादितत्त्वम्॥

राक्षसेन्द्रः, पुं, (राक्षसानामिन्द्रः।) रावणः। इति त्रिकाण्डशेषः॥ (राक्षसपतिमात्रे च। यथा, महाभारते। १। १५४। १८।
"धिक्! त्वामसति पुंस्कामे मम विप्रियकारिणि।
पूर्व्वेषां राक्षसेन्द्राणां सर्व्वेषामयशस्करि॥")

राक्षा, स्त्री, (लाक्षा। रलयोरैक्यात् लस्य रत्वम्।) लाक्षा। इत्यमरः॥

राख, ऋ शोषालमर्थयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च-सेट्।) शोषः स्नेहरहितीभावः। अलमर्थो भूषणं सामर्थ्यं निवारणञ्च। ऋ, अरराखत्। इति दुर्गादासः॥

रागः, पुं, (रञ्जनमिति रज्यतेऽनेनेति वा। रञ्ज+भावे करणे वा घञ्। "घञि च भावकरणयोः।" ६। ४। २७। इति नलोपः।) मात्सर्य्यम्। लोहितादिः। (यथा, कुमारे। ३। ३०।
"रागेण बालारुणकोमलेन
चूतप्रवालोष्ठमलञ्चकार॥")
क्लेशादिः। अनुरागः। (यथा, आर्य्यासप्तशत्याम्। २७०।
"तानवमेत्य छिन्नः परोपहितरागमदनसङ्घटितः।
कर्ण इव कामिनीनां न शोभते निर्भरः प्रेमा॥")
गान्धारादिः। नृपः। इति मेदिनी॥ चन्द्रः॥ सूर्य्यः। इति शब्दरत्नावली॥ लाक्षादिः। (यथा, कुमारे। ४। १९।
"तमिमं कुरु दक्षिणेतरं
चरणं निर्म्मितरागमेहि मे॥")
रक्तिमलिट्। रञ्जनम्। इति नानार्थरत्नमाला॥ प्रीतिः। यथा,—
"वीतरागभयक्रोधस्थितधीर्म्मुनिरुच्यते॥"
इति भगवद्गीताश्लोकटीकायां श्रीधरस्वामी॥
तस्य लक्षणं यथा,—
"सुखमप्यधिकं चित्ते सुखत्वेनैव रज्यते।
यतस्तु प्रणयोत्कर्षात् स राग इति कीर्त्त्यते॥"
इत्युज्ज्वलनीलमणिः॥ * ॥
(अभिमतविषयाभिलाषः। स तु पञ्चक्लेशान्तर्गतः। यथा,—
"अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः। रागोऽभिमतविषयाभिलाषः।" इति शिशुपालवधटीकायां मल्लिनाथः। ४। ५६॥
"सुखानुशयी रागः।" इति पतञ्जलिः। गानशास्त्रीयरागा यथा। भरतमते हनूमन्मते च रागः षड्विधः। तेषां नामानि यथा। भैरवः १ कौशिकः २ हिन्दोलः ३ दीपकः ४ श्रीरागः ५ मेघः ६। हनूमद्भरतयोर्म्मते प्रत्येकमेषां पञ्च रागिण्यः। सोमेश्वरकल्लिनाथयोर्म्मते प्रत्येकमेतेषां षट् रागिण्यः। एतेषां प्रत्येकमष्टौ पुत्राः एकैकपुत्रभार्य्या च। कल्लिनाथसोमेश्वरमते षड्रागा यथा। श्रीरागः १ वसन्तः २ पञ्चमः ३ भैरवः ४ मेघः ५ नटनारायणः ६। इति नानासंगीतशास्त्रम्॥*॥
अथ रागस्य व्युत्पत्तिसंख्याख्यानानि।
"येस्तु चेतांसि रज्यन्ते जगत्त्रितयवर्त्तिनाम्।
ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभिः॥
गोपीभिर्गीतमारब्धमेकैकं कृष्णसन्निधौ।
तेन जातानि रागाणां सहस्राणि तु षोडश॥
रागेषु तेषु षट्त्रिंशद्रागा जगति विश्रुताः।

कालक्रमेण तथापि ह्रास एव तु दृश्यते ।
केचिद्वदन्ति ते रागाः सर्व्वे सन्तीति निश्चितम् ॥
मेरोरुत्तरतः पूर्व्वे पश्चिमे दक्षिणे तथा ।
समुद्रकच्छे ये देशास्तत्रामीषां प्रचारणा ॥"
तथा च । "अङ्गवङ्गकलिङ्गतैलङ्गभूलिङ्गद्राविड़-
सुराष्ट्रयूपलङ्कखेलाड़सौवीरकीरकाश्मीरनाभी-
रकाभीरसिन्धुजालन्धरमगमगधनिषधमलयश्री-
हयगजाड्यमालवजालवमत्स्यपाञ्चालोत्कलकु-
न्तलसिंहलहरिकेलकेरल-कोशलमलिवालमल्ल-
भल्लसौविदल्लवातकिष्ठातगुर्जरातगुल्लरकालञ्जर-
गौड़दपिड़ौड़ान्तर्व्वेदिकाशीपाञ्चालसौराष्ट्र-
वरलौहावरखशकीकशवत्सकामरूपहरिगर्भ-
विदर्भदुर्मंटवाटकीकटदेवेङ्गनटङ्कनाटभोटक-
वाटकरहाटकर्णाटकुन्तिकावन्तिककनकाल-
कान्यकुब्जभोजकाम्बोजतोजतुखारविहारवली-
हारवाजगेहविदेहवाल्मीकचर्च्चरीकाञ्चिगर्त्तान-
र्त्तादिदेशेषु रागाः प्रचरन्तीति ।
"यस्य श्रवणमात्रेण रज्यन्ते सकलाः प्रजाः ।
सर्व्वानुरञ्जनाद्धेतोस्तेन राग इति स्मृतः ॥"*॥
अथ रागाः ।
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागश्च ततः पश्चाद्वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः षडेव तु ॥६।
षट्त्रिंशद्रागिणी तत्र क्रमशः कथिता मया ।
धानसी मालसी चैव रामकिरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ॥६
वेलावली च पुरवी कानड़ा माधवी तथा ।
कोड़ा केदारिका चापि मल्लारदयिता इमाः॥६
गान्धारी शुभगा चैव गौरी कौमारिका तथा ।
वेलोयारी च वैरागी श्रीरागस्य प्रिया इमाः॥६
तुड़ी च पञ्चमी चैव ललिता पठमञ्जरी ।
गुर्ज्जरी च विभाषा च वसन्तस्य प्रिया इमाः॥६
मायूरी दीपिका चैव देशकारी च पाहिड़ा ।
वराड़ी मोरहाटी च हिन्दोलस्य प्रिया
इमाः ॥६॥
नाटिका चाथ भूपाली रामकेली गड़ा तथा ।
कामोदा चापि कल्याणी कर्णाटस्य प्रिया
इमाः ॥६।३६॥*॥
अथ कालनियमः ।
"विभाषा ललिता चैव कामोदा पठमञ्जरी ।
रामकीरी रामकेली वेलोयारी च गुर्ज्जरी ॥
देशकारी च शुभगा पञ्चमी च गड़ा तुड़ी ।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च ।
एताः पूर्व्वाह्णकाले तु गीयन्ते गायनोत्तमैः ॥
वराड़ी मायूरी कोड़ा वैरागी चाथ धानसी ।
वेलावली मोरहाटी सम्मता रागयोषितः ।
गेया मध्याह्नकाले तु यथा भारतभाषितम् ॥
गान्धारी दीपिका चैव कल्याणी पुरवी तथा ।
कानड़ा शारवी चैव गौरी केदारपाहिड़ा ॥
मायूरी मालसी नाटी भूपाली सिन्धुड़ा तथा ।
सायाह्ने ताश्च रागिण्यः प्रगायन्ति चतुर्द्दश ॥
पुरुषा वस्तुभूषाढ्या रागास्ते मालवादयः ।
प्रदोषे चापराह्णे च रजन्यां गानगोचराः ॥
दशदण्डात् परं रात्रौ सर्व्वेषां गानमीरितम् ।
मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥
श्रीपञ्चम्यां समारभ्य यावत् जन्मोत्सवं हरेः ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः ॥
शक्रोत्थानं समारभ्य यावद्दुर्गामहोत्सवम् ।
गीयते तद्दिनैर्नित्यं मालसी सा मनोहरा ॥
सर्व्वेषामिह रागाणां रागिणीनाञ्च सर्व्वशः ।
रङ्गभूमौ नृपाज्ञायां कालदोषो न विद्यते ॥
रागश्चालापयेदादौ तत्पश्चात्तदनन्तरम् ।
नाश्यपत्नी प्रगातव्या नृपाज्ञायां न दूषणम् ॥
रागाः षडेव रागिण्यः षट्त्रिंशच्चाव-
विग्रहाः ।
आगता ब्रह्मसदनात् ब्रह्माणं समुपासते ॥"*॥
अथ ध्यानम् ।
"नितम्बिनीचुम्बितवक्त्रपद्मः
शुकद्युतिः कुण्डलवान् प्रमत्तः ।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मालवरागराजः ॥ १ ॥
नीलोत्पलं कर्णयुगे वहन्ती
श्यामा सुकेशी च सुमध्यभागा ।
ईषत्सहासाम्बुजरम्यवक्त्रा
सा धानसी पद्मसुचारुनेत्रा ॥ १ ॥
करे धृता चाम्बुजयुग्मरम्या
इतस्ततश्चाव विलोकयन्ती ।
कण्ठस्फुरन्मौक्तिकरत्नहारा
सा मालसी संकथिता विचित्रा ॥ २ ॥
प्रतप्तचामीकरचारुवक्त्रा
कर्णावतंसं कमलं वहन्ती ।
पुष्पं धनुः पुष्पशरैर्दधाना
चन्द्रानना रामकिरी प्रदिष्टा ॥३॥
महेन्द्रनीलद्युतिरम्बुजाक्षी
प्रवादयन्ती कपिलाश्रयन्त्रम् ।
विचित्ररत्नाभरणा सुकेशी
सा सिन्धुड़ा कान्तसमीपसंस्था ॥४॥
जवाप्रसूनद्युतिविम्बवक्त्रा
सकञ्चुपद्मं करयोर्दधाना ।
चौर्मांशुकाच्छादितगात्रयष्टि-
राशावरी रङ्गकिला विदग्धा ॥५॥
सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहैः शङ्करमर्च्चयन्ती ।
तालप्रयोगप्रतिरङ्गगीतै
र्गौरीतनुर्भैरविका सतीयम् ॥"६॥*॥
अथ मल्लारः ।
"विहारशीलोऽतिसुकान्तदेहः
कान्ताप्रियो धार्म्मिकशीलयुक्तः ।
कामातुरः पिङ्गलनेत्रयुग्मो
मल्लाररागः प्रियसत् सुवेशः ॥१॥
सङ्केतितोत्फुल्ललतानिकुञ्जे
कृतस्थितिः कान्तसमागमाय ।
वेलावली चम्पकमौलिनी सा
बाला विचित्राभरणा निरक्ता ॥१॥
रहःसु कान्तप्रियमाणपत्रं
रम्यं वहन्ती कुचकुम्भयुग्मे ।
दूर्व्वादलश्यामतनुः सकामा
पुरातनैः सा पुरवी निरुक्ता ॥२॥
अशोकवृक्षस्य तले निषण्णा
वियोगिनी वासकशायिताङ्गी ।
विभूषिताङ्गी जटिलेव बाला
सा कानड़ा हेमलतेव तन्वी ॥३॥
संगृह्य संग्रथ्य गले दधाना
प्रसूनमाला दयितेन बाला ।
गौरी स्वकान्ताननचुम्बितास्या
सा सुन्दरी माधविका निकुञ्जे ॥४॥
शुकच्छवी वादयति स्वभर्त्तु-
र्गानार्थमभ्यस्यति सम्मुखेन ।
सदैव ताला विहिता च माला
कोड़ा कला तानवती मता सा ॥५॥
श्यामा सत्तारवती सुदेहा
केशप्रलिप्यच्छितवारिविन्दुः ।
निष्पीड़यन्ती तिमिरांशुकान्तं
केदारिका रक्तपयोधरश्रीः ॥"६॥*॥
अथ श्रीरागः ।
"लीलावतारेण वनान्तराणि
चिन्वन् प्रसूनानि वधूसहायः ।
विलासवेशो धृतिदिव्यमूर्त्तिः
श्रीराग एष प्रथितः पृथिव्याम् ॥१॥
सन्ध्यासुकाले गृहमध्यदेशे
प्रवादयन्ती च पिनाकयन्त्रम् ।
धाराधराधातुविचित्रिताङ्गी
गान्धारिका गन्धसणं निषण्णे ॥ १ ॥
रसनया सुविचारकौतुकं
विदधती कविकोविदकौतुकम् ।
सुकवितान्तभावकलम्परा
भगवती शुभगा वसुदात्रृवा ॥२॥
पुष्पोद्याने वार्द्दमालीकलापैः
क्रीड़न्त्येवं कोकिलाकाकलीषु ।
रामा श्यामा सद्गुणागाश्च गौरा
गौरी गौरी गौरवालोकदिष्टा ॥३॥
अट्टालिकायां स्फुटकौमुदीभिः
प्रकाशितायां रजनीविहारम् ।
आहाय कान्तेन समं वसन्ती
कौमारिका कामकला वहन्ती ॥४॥
गौरीपादाम्भोजमभ्यर्चयन्ती
गन्धोद्भूतं गन्धमाल्यं दधाना ।
नानारत्नोपायनैर्भक्तिभावै-
र्वेलोयारी कथ्यते बालिकेयम् ॥५॥
उल्लासयन्ती धम्मिल्लं रहःस्थान् प्राणवल्लभा ।
मालतीकुसुमस्रग्भिर्व्वैरागी रागिणी स्मृता ॥"६
अथ वसन्तः ।
"चूताङ्कुरैर्णैव कृतावतंसो
विघूर्णमानारुणनेत्रपद्मः ।
पीताम्बरः काञ्चनचारुदेहो
वसन्तरागो युवतिप्रियश्च ॥१॥

सुनृत्यमानातिसुशीलयुक्ता
मुक्तालताकल्पितहारयष्टिः ।
चूताङ्कुरं पाणियुगे वहन्ती
नवारुणाङ्गी तुड़िकेरितीयम् ॥१॥
संगीतगोष्ठीषु गरिष्ठभावं
समाश्रिता गायनसम्प्रदायैः ।
सर्व्वाङ्गिनी नूपुरपादपद्मा
सा पञ्चमी पञ्चमवेदवेत्री ॥२॥
उरसि केशचयस्य सुभारं
विदधती शयनोत्थितचारुवेशम् ।
विलुलितालकवल्लिलसाङ्गी
भासुरा ललिता कथिता बुधैः ॥३॥
सखीकलापैः परिहास्यमाना
वियोगिनी कान्तवियोगदेहा ।
पीनस्तनी चैव धराप्रसुप्ता
श्यामा सुकेशी पठमञ्जरीयम् ॥४॥
कर्णोत्पलालम्बिमधुव्रताली
शृणोति सा मञ्जुलकूजितानि ।
कान्तान्तिकं गन्तुमनाः प्रदोषे
सा गुर्ज्जरी वेशकलोचिताङ्गी ॥५॥
अध्यापयन्ती निजशिष्यवृन्दं
सङ्गीतशास्त्राणि विवेचनाभिः ।
मनोहरा हारलताभिरामा
समस्तभाषाकुशला विशेषा ।"६॥*॥

अथ हिन्दोलः ।

"हासाभिलासेन पतन् पृथिव्यां
उत्थापितस्तत्पृथुमालिवृन्दैः ।
उल्लोलसङ्गीतरसैर्विदग्धो
हिन्दोलरागः कथितो रसज्ञैः ॥१॥
मयूरकेकाश्रवणोल्लसन्ती
मयूरिकानृत्यततं किरन्ती ।
मयूरकान्तीव स्थितिं दधाना
मायूरिका संकथिता गुणज्ञैः ॥१॥
प्रदोषकाले गृहसंप्रविष्टा
प्रदीपहस्तारुणगात्रयष्टिः ।
सीमन्तसिन्दूरविराजमाना
सुरक्तमाल्या किल दीपिकेयम् ॥२॥
सार्द्धं सखीभिर्विजने वसन्ती
विचित्रवर्णोज्ज्वलितप्रसङ्गा ।
निरीक्ष्यमाणाननदर्पणा या
सा देशकारी कथिता गुणज्ञैः ॥३॥
भर्त्तुर्दधाना चरणारविन्दं
निषेधयन्ती परदेशयानम् ।
प्रकामदाम्पत्यसुखे निमग्ना
सा पाहिड़ा संकथिता कवीन्द्रैः ॥४॥
कर्णे दधाना सुरपुष्पयुग्मं
स्फुरत्सुवर्णोज्ज्वलमनोहराङ्गी ।
स्मेरानना चारुविलोलनेत्रा
वराङ्गनेयं कथिता वड़ारी ॥५॥
उत्पन्नमात्रे प्रथमापराधे
मानं पुनः कर्त्तुमनाश्चोरेव ।
भक्तुस्वभावान्नियतं वदन्ती
सा मोरहाटी हठकेलिदक्षा ।"६॥*॥

अथ कर्णाटः ।

"कृपाणपाणिस्तुरगाधिरूढो
मयूरकण्ठातिसुकण्ठकान्तिः ।
स्फुरत्सितस्निग्धरसः प्रशान्तः
कर्णाटरागो हरितालवर्णः ॥१॥
चिरं नटन्ती शुभरङ्गमध्ये
संप्रार्थयन्ती नटिनं वसन्तम् ।
सुगीततालेषु कृतावधाना
नटी सुशाटीपरिधानदेहा ॥१॥
स्वनायकं पुष्पलताधिरूढ़ा
हसन्मुखी सर्व्वसुदं वहन्ती ।
स्थानानि शश्वद्विसनोति मुग्धा
भूपालिका सा स्खलदुत्तरीया ॥२॥
अध्यापयन्ती शुकसारसारीः
श्रीराम रामेति सुवेशजल्पीः ।
वामस्तनार्द्धस्खलितांशुकश्रीः
श्रीरामकेली कथिता कवीन्द्रैः ॥३॥
विशेषवैदग्ध्यवती समस्तान्
कलाविलासेन विमोहयन्ती ।
दृढस्तिनिम्बा परिपुष्टदेहा
वड़ा प्रलम्बस्तनभारभग्ना ॥४॥
भर्त्तुः समं पाथसि सन्तरन्ती
पयोविहारेण सरोरुहाणि ।
विचिन्वती सौरभमोदमाना
कामोदरागिण्युदिता गुणज्ञैः ॥५॥
व्याधूता नटनृत्यपरिश्रमेण
बाला लीलाभिः सुदती कृतादरा ।
नटीनां कल्याणी कथयति मत्तहस्ती
एवप्रस्थानं सुखरिता किङ्किणीकलापम् ।"६॥

अथ रागरागिणीनां भावनिरूपणम् ।

"मालवः श्रीश्च हिन्दोलो मल्लारस्तदनन्तरम् ।
गायन्ति गायका धीर सानन्देन चतुष्टयम् ॥
वसन्तो रागः कर्णाटो द्वौ वीरौ भवतः क्रमात् ॥
मानसी मालसी चैव भैरवी माधवी तथा ।
सुभगा पञ्चमी नाटी वेलोयारी च गुर्ज्जरी ।
कामोदा चापि कल्याणी कोड़ा केदारिका
तुड़ी ।
कौमारी मायूरी चैव देशकारी च सिन्धुड़ा ।
रामकेली च भूपाली रागिण्यश्चेति विंशतिः ।
शान्त्यांशा इति प्रोक्ता गीयन्ते गानकोविदैः ।
पुरवी कानड़ा गौरी रामकिरी च दीपिका ।
आशावरी विभासा च वड़ारी च गड़ा तथा ।
एताश्च नव रागिण्यो वीरांशे गानसुत्तमम् ।
वेलावली च गान्धारी ललिता पठमञ्जरी ।
वैरागी रागिणी चापि मोरहाटी च पाहिड़ा ।
करुणांशा विनागीयात् सप्रेता रागयोषितः ।
रागेण रसभागेन षट्त्रिंशद्रागिणीषु च ।
करुणानन्दवीरेषु शापनार्थं मतत्रयम् ।"
इति संगीतदामोदरे शिवनारदसंवादे १ । २
अध्यायौ । (तथा च संगीतदर्पणे ।
अथ रागाणामुत्पत्तिं दर्शयति ।
"शिवशक्तिसमायोगाद्रागाणां सम्भवो भवेत् ।
पञ्चास्यात् पञ्च रागाः स्युः षष्ठस्तु गिरिजा-
मुखात् ॥
सद्योवक्त्रात्तु श्रीरागो वामदेवाद् वसन्तकः ।
अघोराद् भैरवोऽभूत् तत्पुरुषात् पञ्चमो-
ऽभवत् ॥
ईशानाख्यान्मेघरागो नाट्यारम्भे शिवादभूत् ।
गिरिजाया मुखाल्लास्ये नट्टनारायणोऽभवत् ।"
अथ रागवेला ।
"मधुमाधवी च देशाख्या भूपाली भैरवी
तथा ।
वेलावली च मल्लारी वल्लारी सोमगुर्ज्जरी ।
धनाश्रीर्मालवश्रीश्च मेघरागश्च पञ्चमः ।
देशकारी भैरवश्च ललिता च वसन्तकः ।
एते रागाः प्रगीयन्ते प्रातरारभ्य नित्यशः ।
गुर्ज्जरी कौशिकश्चैव सावेरी पठमञ्जरी ।
रेवा गुणकिरी चैव भैरवी रामकिर्य्यपि ।
सौराटी च तथा गेया प्रथमप्रहरोत्तरम् ।
वैराटी तोड़िका चैव कामोदी च कुड़ायिका ।
गान्धारी नागशब्दी च तथा देशी विशेषतः ।
शङ्कराभरणो गेयो द्वितीयप्रहरात् परम् ।
श्रीरागो मालवाख्यश्च गौरी त्रिवणसंज्ञिका ।
नट्टकल्याणसंज्ञश्च सारङ्गनट्टकौ तथा ।
सर्व्वे नाटाश्च केदारी कर्णाट्याभीरिका तथा ।
वड़हंसी पहाड़ी च तृतीयप्रहरात् परम् ।
अर्द्धरात्रावधि गेया एते रागाः सुखप्रदाः ।
यथोक्तकाल एवैते गेयाः पूर्व्वविधानतः ।
राजाज्ञया सदा गेया न तु कालं विचारयेत् ।"
इति रागवेला ।
अथ ऋतवः ।
"श्रीरागो रागिणीयुक्तः शिशिरे गीयते
बुधैः ।
वसन्तः ससहायस्तु वसन्तर्त्तौ प्रगीयते ।
भैरवः ससहायस्तु ऋतौ ग्रीष्मे प्रगीयते ।
पञ्चमस्तु तथा गेयो रागिण्या सह शारदे ।
मेघरागो रागिणीभिर्युक्तो वर्षासु गीयते ।
नट्टनारायणो रागो रागिण्या सह हैमके ।
यथेच्छया वा गातव्याः सर्व्वर्त्तुषु सुखप्रदाः ।"
इति रागाणां ऋतुनिर्णयः । इति सोमेश्वर-
मतम् । * ।)

रागचूर्णः, पुं, कामदेवः । खदिरवृक्षः । इति मेदिनी । ने, १०६ । फलगुपूर्णम् । इति शब्द-रत्नावली । लाक्षारसः । इति राजनिर्घण्टः ॥

रागच्छन्नः, पुं, (रागेण छन्नः ।) कामदेवः । इति शब्दरत्नावली । रागेणाच्छन्ने, त्रि ॥

रागदः, पुं, (रागं ददातीति । दा+कः ।) तैरणीक्षुपः । इति राजनिर्घण्टः । रागदातरि, त्रि ॥

रागदालिः, पुं, (रागदा रागप्रदा आलिः पङ्क्ति-र्यस्य ।) मसूरः । इति राजनिर्घण्टः ॥ (विवरण-मस्य मसूरशब्दे विज्ञेयम् ॥)

रागपुष्पः, पुं, (रागविशिष्टं रक्तवर्णं पुष्पं यस्य ।) बन्धूकः । रक्ताम्लानः । इति राजनिर्घण्टः ॥

रागपुष्पी, स्त्री, (रागयुक्तं पुष्पं यस्याः । ङीप् ।) जवा । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य जवाशब्दे ज्ञातव्याः ॥)

रागप्रसवः, पुं, (रागयुक्तो रक्तवर्णः प्रसवः पुष्पं यस्य ।) बन्धूकः । रक्ताम्लानः । इति राजनिर्घण्टः ॥

रागभुक्, [ज्] पुं, (रागेण भुज्यते इति । भुज्+क्विप् ।) माणिक्यम् । इति राजनिर्घण्टः । कस्मिंश्चित् पुस्तके रागदृक् इति पाठोऽपि विद्यते ॥

रागरज्जुः, पुं, (रागो रज्जुरिव यस्य । नायकयोः परस्परानुरागबहुलत्वात्तथात्वम् ।) कामदेवः । इति शब्दरत्नावली ॥

रागलता, स्त्री, (रागस्य जनिका लतेव ।) कामदेवपत्नी । इति जटाधरः ॥

रागवृन्तः, पुं, (रागस्य वृन्त इव ।) कामदेवः । इति शब्दमाला ॥

रागषाड़वः, पुं, दाड़िमद्राक्षायुक्तमुद्गयूषः । अस्य गुणाः । रुचिकारित्वम् । लघुपाकित्वम् । वातपित्तकफाविरोधित्वञ्च । इति राजवल्लभः ॥ (यथा, सुश्रुते । १ । ४६ अध्याये कृतान्नवर्गे ।
"ज्ञेयः पथ्यतमश्चापि मुद्गयूषः कृताकृतः ।
स तु दाड़िममृद्वीकायुक्तः स्याद्रागषाड़वः ।
रुच्यो लघुपाकश्च दोषाणामविरोधकृत् ॥"
तथास्य गुणाः ।
"लघवो बृंहणा वृष्याः हृद्या रोचनदीपनाः ।
तृष्णामूर्च्छाभ्रमच्छर्द्दिश्रमघ्ना रागषाड़वाः ॥"
इति च सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

रागसूत्रं, क्ली, (रागयुक्तं रक्तवर्णं सूत्रम् ।) तुलासूत्रम् । पट्टसूत्रम् । इति मेदिनी । रे, २६३ ॥

रागाङ्गी, स्त्री, (रागविशिष्टमङ्गं यस्याः । ङीप् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

रागाढ्या, स्त्री, (रागेण आढ्या ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

रागारुः, त्रि, आर्य्यां दृष्ट्वा रागविमुखः । यथा,
"आर्य्यां वशवर्त्तीं दृष्ट्वा यो हन्ति पिशुनो जनः ।
स जीवन्नपि रागारुर्ज्ञेयो दासस्तु दासरि ॥"
इति शब्दमाला ॥

रागाशनिः, पुं, (रागेषु विषयवासनासु अशनिरिव ।) बुद्धः । इति त्रिकाण्डशेषः ॥

रागिणी, स्त्री, (रागोऽस्त्यस्या इति । राग+इनिः । ङीप् ।) विदग्धा नारी । इति जटाधरः ॥ मेनकाया ज्येष्ठकन्या । यथा,—
"रागिणी नाम संजाता ज्येष्ठा मेनासुता मुने ।
सुभाङ्गी पद्मपत्राक्षी नीलकुञ्चितमूर्द्धजा ॥"
इति वामनपुराणे ४८ अध्यायः ॥
जयश्रीनाम्नी लक्ष्मीः । इति पुराणम् ॥ षड्रागाणां पत्नी । इति हलायुधः ॥ सा तु हनूमन्मते भरतमते च त्रिंशत्प्रकारा । सोमेश्वरमते कल्लिनाथमते च षट्त्रिंशत्प्रकारा ॥ आसां विवरणं रागशब्दे द्रष्टव्यम् ॥

रागी, [न्] त्रि, (रञ्ज+"संपृचानुरुधेति ।" ३ । २ । १४२ । इति तच्छीलादिषु घिनुण् । यद्वा, रागोऽस्यास्तीति । राग+इनिः ।) अनुरक्तः । (यथा, मार्कण्डेये । २१ । ४१ ।
"त्वय्यस्या हृदयं रागि भर्त्ता चान्यो भविष्यति ।
यावज्जीवमतो दुःखं सुरभ्या नान्यथा वचः ॥")
कामुकः । इति विश्वः ॥ रङ्क्ता । इति मेदिनी ॥ (विषयानुरागयुक्तः । स च द्विविधः । यथा, देवीभागवते । १ । १७ । ३७—३८ । ४१ ।
"द्वैविध्यं सर्व्वलोकेषु सर्व्वत्र द्विविधो जनः ।
रागी चैव विरागी च तयोश्चित्तं द्विधा पुनः ॥
विरागी त्रिविधः कामं ज्ञातोऽज्ञातश्च मध्यमः ।
रागी च द्विविधः प्रोक्तो मूर्खश्च चतुरस्तथा ॥"
"रागो यस्यास्ति संसारे स रागीत्युच्यते ध्रुवम् ।
दुःखं बहुविधं तस्य सुखञ्च विविधं पुनः ॥"
रक्तवर्णविशिष्टः । यथा, कथासरित्सागरे । २१ । ६ ।
"ईर्ष्यारुषामभावेऽपि भङ्गुरभ्रुणि रागिणि ।
न सुखे तत्तयो राज्ञ्योस्तद्दृष्टिस्त्रिमाययौ ॥")
पुं, तृणधान्यविशेषः । तत्पर्य्यायः । लाञ्छनः २ बहुतरकणिशः ३ गुच्छकणिशः ४ । अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । कषायत्वम् । शीतत्वम् । पित्तास्रनाशित्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥

राघ, ऋ ङ शक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अरराघत् । ङ, राघते । शक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

राघवः, पुं, (रघोरपत्यमिति । रघु+अण् ।) रामचन्द्रः । (यथा, रघुः । १२ । ३२ ।
"रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमम् ॥"
अजः । यथा, रघुः । ८ । १६ ।
"यतिपार्थिवलिङ्गधारिणौ
ददृशाते रघुराघवौ जनैः ॥"
दशरथः । यथा, रामायणे । २ । ६४ । १ ।
"वधमप्रतिरूपं तु महर्षेस्तस्य राघवः ।
विलपन्नेव धर्म्मात्मा कौशल्यामिदमब्रवीत् ॥"
रघुवंशीयमात्रम् । यथा, तत्रैव । २।६४।२५ ।
"अपि स्वस्य कुशं न स्याद्राघवाणां कुतो
भवान् ॥")
समुद्र-महामत्स्यविशेषः । इति मेदिनी ॥ वे, ४८ ॥ (यथा, लङ्कायां प्रथमपादे दुर्गसिंहः ।
"अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति
राघवः ॥")

राघवायनं, क्ली, (राघवस्य रामस्य चरितान्वितं अयनं शास्त्रम् ।) रामायणम् । यथा,—
"सेतिहासपुराणानि राघवायनभारतम् ।
समाप्तिरहितान्येव सन्ति तानि श्रुतानि ते ॥"
इत्यग्निपुराणे वामनप्रादुर्भावनामाध्यायः ॥

राङ्कलः, पुं, इषुकण्टकः । इति हारावली । ६१ ॥

राङ्कवं, क्ली, (रङ्कौ भवम् । रङ्कु+"रङ्कोरमनुष्येऽण् च ।" ४ । २ । १०० । इति अण् ।) मृगलोमजातवस्त्रादि । तत्पर्य्यायः । मृगरोमजम् २ । इत्यमरः । २ । ६ । १११ ॥ रङ्कुर्मृगभेदः ततो जातार्थे अण् पशवोऽपि मृगा इति रूढ्या मेषादिलोमजमपि कम्बलादि राङ्कवम् । इति तट्टीकायां भरतः ॥ (यथा, महाभारते । २ । ५० । २३ ।
"और्णञ्च राङ्कवञ्चैव पट्टजं कीटजन्तथा ॥"
पुं, गौः । इति काशिका ॥ राङ्कवाकृतौ, त्रि । यथा, महाभारते । ६ । ४४ । २६ ।
"क्रौञ्चपारावतनिभैर्व्वदनै राङ्कवैरपि ॥")

राङ्गणं, क्ली, पुष्पविशेषः । रङ्गन् इति भाषा । अस्य गुणः । रक्तपित्तनाशित्वम् । इति द्रव्यगुणः ॥

राज, ऋ ञ ष दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-अक० सेट् ।) ऋ, अरराजत् । ञ, राजति राजते । ष, रेजतुः । इति दुर्गादासः ॥

राजकं, क्ली, (राज्ञां समूहः । राजन्+"गोत्रोक्षोष्ट्रोरभ्रराजेति ।" ४।२।३९ । इति वुञ् ।) नृपसमूहः । इत्यमरः । २ । ८ । ३ ॥ यथा, मार्कण्डेये । १०९ । ६ ।
"हृष्टपुष्टमतीवासीत् तस्मिन् राजन्यशेषतः ।
राजकं सकलं चोर्व्व्यां पौरजानपदो जनः ॥"
राजन्+स्वार्थे कन् ।) राजनि, पुं । (यथा, हरिवंशे भविष्यपर्व्वणि । २४ । ६ ।
"तवाङ्गं तिलशः कृत्वा श्वभ्यो दास्यामि राजक ॥"
राज्+ण्वुल् ।) दीप्तिकारके, त्रि ॥

राजकदम्बः, पुं, (कदम्बानां राजा । राजदन्तादित्वात् परनिपातः ।) कदम्बविशेषः । यथा,—
"कादम्बर्य्यः प्रावृषेण्यो नीपो धूलीकदम्बकः ।
कदम्बप्रियको राजकदम्बोऽध्वरोऽयिकः ॥"
इति जटाधरः ॥

राजकन्या, स्त्री, (राज्ञः कन्येव ।) केविकापुष्पम् । इति राजनिर्घण्टः ॥ नृपसुता च ॥ (यथा, भागवते । ९ । ६ । ४३ ।
"वृतः स राजकन्याभिरेकः पञ्चाशता वरः ॥")

राजकर्कटी, स्त्री, चीनाकर्कटी । इति राजनिर्घण्टः ॥

राजकशेरुः, पुं, (कशेरूणां राजा । राजदन्तादित्वात् परनिपातः ।) भद्रमुस्ता । इति राजनिर्घण्टः ॥

राजकीयः, त्रि, (राज्ञ इदम् । राजन्+"राज्ञः क च ।" ४ । २ । १४० । इति छः ककारश्चान्तादेशः ।) राजसम्बन्धी । राजकस्यायं इत्यर्थे ईयप्रत्ययेन सिद्धः ॥ (यथा, कथासरित्सागरे । ६२ । २२८ ।
"ततस्तदर्थं रात्रौ स राजकीयं सरो ययौ ॥")

राजकुमारः, पुं, (राज्ञः कुमारः ।) राजपुत्रः । तत्र वर्णनीयानि यथा,—
"कुमारे शस्त्रशास्त्रश्रीकलाविनयगुणोत्करा: ।

बाह्वाली खुरली राजभक्तिः शुभगतादयः ॥”
इति कविकल्पलतायाम् १ स्तवकः ॥

राजकुष्माण्डः, पुं, वार्त्ताकी । इति जटाधरः ॥

राजकोषातकी, स्त्री, (राजप्रिया कोषातकी ।) झिङ्गाकविशेषः । घिया तोरइ इति हिन्दीभाषा ॥ तत्पर्य्यायः । हस्तिपर्णिका २ पीतपुष्पिका ३ धामार्गवः ४ केशफला ५ महाजाली ६ सपीतकः ७ । अस्या गुणाः । शीतत्वम् । ज्वरघ्नत्वम् । कफवातलत्वञ्च । इति मदनविनोदः ॥

राजखर्ज्जूरी, स्त्री, (राजप्रिया खर्ज्जूरी ।) श्रेष्ठखर्ज्जूरी । पिण्डखर्ज्जूरिका । तत्पर्य्यायः । राजपिण्डा २ नृपपिण्डा ३ । अस्या गुणाः । शैत्यत्वम् । स्वादे हिमत्वम् । गुरुत्वम् । पित्तदाहार्त्तिश्वासश्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥

राजगामि, [न्] त्रि, (राजानं गच्छतीति । गम् + णिनिः ।) राजसम्बन्धि । यथा,—
“अनृतञ्च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्ब्बन्धः समानि ब्रह्महत्यया ॥”
इति मानवे ११ अध्यायः ॥

“राजनि वा स्तेनादीनां परेषां मरणफलदोषाभिधानम् ।” इति कुल्लूकभट्टः ॥ अपि च ।
“अपुत्त्रस्य धनं पत्न्यभिगामि तदभावे मातृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्त्रगामि तदभावे सकुल्यगामि तदभावे बन्धुगामि तदभावे शिष्यगामि तदभावे सहाध्यायिगामि तदभावे ब्राह्मणधनवर्ज्जं राजगामि ।” इति दायभागग्रन्थधृतविष्णुवचनम् ॥

राजगिरिः, पुं, शाकभेदः । तत्पर्य्यायः । राजाद्रिः २ राजशाकिनी ३ राजशाकनिका ४ । अस्य गुणाः । रुच्यत्वम् । पित्तनाशित्वम् । शीतलत्वम् । स्थूलस्य तु अतिशीतलत्वम् । अतिरुच्यत्वञ्च । इति राजनिर्घण्टः ॥ (मगधदेशस्थः पर्व्वतविशेषश्च ॥)

राजग्रीवः, पुं, (राजते इति । राज् + अच् । राजा दीप्तिशालिनी ग्रीवा यस्य ।) मत्स्यविशेषः । फलुइ इति भाषा । यथा,—
“फलकी स्याच्चित्रफली राजग्रीवो मदामदः ॥”
इति त्रिकाण्डशेषः ॥

राजघः, त्रि, तीक्ष्णः । इति त्रिकाण्डशेषः ॥ (राजानं हन्तीति । हन् + “राजघ उपसंख्यानम् ।” ३ । २ । ५५ । इत्यस्य वार्त्तिकोक्त्या कप्रत्ययेन साधु ।) राजहन्ता । यथा,—
“अनल्पदग्धारिपुरानलोज्ज्वलै-
र्निजप्रतापैर्व्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया
रराज नीराजनया स राजघः ॥”
इति नैषधे । १ । १० ॥

राजचिह्नकं, क्ली, उपस्थः । इति शब्दचन्द्रिका । चिह्नानां स्त्रीपुंविभाजकानां राजा इति व्युत्पत्त्या सिद्धम् ॥

राजजम्बूः, स्त्री, (जम्बूनां राजा । राजदन्तादित्वात् परनिपातः ।) पिण्डखर्ज्जूरम् । इति मेदिनी ॥ महाजम्बूः । इति राजनिर्घण्टः ॥

राजयक्ष्मा [न्] पुं, क्षयरोगः । “यक्ष्यते पूज्यते रोगराजत्वात् यक्ष्मा यक्ष क ङ महि अन्तःस्थादिः श्वासुसिसिति मन् चवर्गतृतीयादिरित्येके तदा जक्ष भक्षहसनयोरित्यस्य रूपं राजयक्ष्मशब्दोऽप्यत्र ।” इत्यमरटीकायां भरतः ॥ (अस्य विवरणन्तु राजयक्ष्मशब्दे द्रष्टव्यम् ॥)

राजतं, त्रि, (रजतस्य विकारः । रजत + “प्राणिरजतादिभ्योऽञ् ।” ४ । ३ । १५४ । इति अञ् ।) रजतनिर्म्मितम् । यथा,—
“सौवर्णं राजतं ताम्रं पितॄणां पात्रमुच्यते ।
रजतस्य कथा वापि दर्शनं दानमेव वा ॥”
इति मात्स्ये १७ अध्यायः ॥

रजते, क्ली ॥ (यथा, गो० रामायणे । ३ । ४८ । २ ।
“तं तु सीता मृगं दृष्ट्वा वने काञ्चनसुप्रभम् ।
हेमराजतचित्राभ्यां पार्श्वाभ्यां समलङ्कृतम् ॥”)

राजतरुः, पुं, (तरूणां राजा । राजदन्तादित्वात् परनिपातः ।) कर्णिकारवृक्षः । आरग्वधः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । ६ । ५७ ।
“मुस्तादिराजतरुवर्गदशाङ्गसिद्धैः
क्वाथैर्नयेन्मधुयुतैर्व्विविधैश्च लेहैः ॥”)

राजतरुणी, स्त्री, (राज्ञस्तरुणीव । सौन्दर्य्यातिशय्यवत्त्वात् ।) पुष्पविशेषः । तत्पर्य्यायः । महासहा २ वर्णपुष्पः ३ अम्लानः ४ अम्लातकः ५ सुपुष्पः ६ सुवर्णपुष्पः ७ । अस्या गुणाः । कषायत्वम् । कफकारित्वम् । चक्षुष्यत्वम् । हर्षदत्वम् । हृद्यत्वम् । सुरभित्वम् । सुखवल्लभत्वञ्च । इति राजनिर्घण्टः ॥

राजता, स्त्री, राजत्वम् । राज्ञो भाव इत्यर्थे राजन्शब्दात् तल्प्रत्ययेन सिद्धा ॥ (यथा, कथासरित्सागरे । ३६ । ६८ ।
“तेन मत्तामसुप्तन्तीमपि मुक्त्वा स तां ययौ ।
रत्नकूटं स्वकार्य्यार्थं नित्यस्निग्धा हि राजता ॥”)

राजतालः, पुं, (राज्ञस्ताल इव ।) गुवाकवृक्षः । इति शब्दरत्नावली ॥

राजतिमिशः, पुं, सुखाशः । इति हारावली । १८१ ॥

राजत्वं, क्ली, राजता । राज्ञो भाव इत्यर्थे राजन्शब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे । २० । १६१ ।
“कष राजत्वमित्युक्त्वा स राजा निषिषेध तत् ॥”)

राजदण्डः, पुं, (राज्ञो दण्डः ।) राजशासनम् । यथा,—
“ऊनैकादशवर्षस्य पञ्चवर्षाधिकस्य च ।
चरेद्गुरुः सुहृद्वापि प्रायश्चित्तं विशुद्धये ।
ततो न्यूनतरस्यास्य नापराधो न पातकम् ।
न चास्य राजदण्डोऽपि प्रायश्चित्तं न विद्यते ॥”
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम् ॥

राजदन्तः, पुं, दन्तानां राजा । (“राजदन्तादिषु परम् ।” २ । २ । ३१ । इति परनिपातः ।) उपरिश्रेणीस्थमध्यवर्त्तिदन्तद्वयम् । यथा,—
“राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचित् ॥”
इति हेमचन्द्रः ॥

राजदेशीयः, पुं, (ईषदूनो राजा । राजन् + “ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ।” ५ । ३ । ६७ । इति देशीयर् ।) राजदेश्यः । राजकल्पः । इति व्याकरणम् ॥

राजधत्तूरकः, पुं, (धत्तूरकाणां राजा । राजदन्तादित्वात् परनिपातः ।) दण्डधुस्तूरः । इति कश्चित् राजनिर्घण्टः ॥ तस्य पर्य्यायः राजधुस्तूरशब्दे द्रष्टव्यः ॥

राजधर्म्मः, पुं, (राज्ञो धर्म्मः ।) राज्ञः कर्त्तव्यं कर्म्म । यथा,—
“राजधर्म्मान् प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
सम्भवश्च यथा तस्य सिद्धिश्च परमा यथा ॥
ब्राह्मं प्राप्तेन संस्कारं क्षत्त्रियेण यथाविधि ।
सर्व्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणम् ॥
अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः ॥
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्म्मितो नृपः ।
तस्मादभिभवत्येष सर्व्वभूतानि तेजसा ॥
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्म्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥
कार्य्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः ।
कुरुते धर्म्मसिद्ध्यर्थं विश्वरूपं पुनःपुनः ॥
यस्य प्रसादे पद्मा श्रीर्व्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्व्वतेजोमयो हि सः ॥
तं यस्तु द्वेष्टि संमोहात् स विनश्यत्यसंशयम् ।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥
तस्माद्धर्म्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टञ्चाप्यनिष्टेषु तं धर्म्मं न विचालयेत् ॥
तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत् पूर्व्वमीश्वरः ॥
तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्म्मान्न चलन्ति च ॥
तं देशकालौ शक्तिञ्च विद्याञ्चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्त्तिषु ॥
स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणाञ्च धर्म्मस्य प्रतिभूः स्मृतः ॥
दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्ब्बुधाः ॥
समीक्ष्य स धृतः सम्यक् सर्व्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्व्वतः ॥
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन् दुर्ब्बलान् बलवत्तराः ॥

अद्यात् काकः पुरोडाशं श्वावलिह्याद्धविस्तथा ।
स्वाम्यञ्च न स्यात् कस्मिंश्चित् प्रवर्त्तेताधरोत्तरम् ॥
सर्व्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः ।
दण्डस्य हि भयात् सर्व्वं जगद्भोगाय कल्पते ॥
देवदानवगन्धर्व्वा रक्षांसि पतगोरगाः ।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीड़िताः ॥
दुष्येयुः सर्व्ववर्णाश्च भिद्येरन् सर्व्वसेतवः ।
सर्व्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ॥
यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा ।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति ॥
तस्याहुः संप्रणेतारं राजानं सत्यवादिनम् ।
समीक्ष्य कारिणं प्राज्ञं धर्म्मकामार्थकोविदम् ॥
तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्द्धते ।
कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते ॥
दण्डो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः ।
धर्म्माद्विचलितं हन्ति नृपमेव सबान्धवम् ॥
ततो दुर्गञ्च राष्ट्रञ्च लोकञ्च सचराचरम् ।
अन्तरीक्षगतांश्चैव मुनीन् देवांश्च पीड़येत् ॥
सोऽसहायेन मूढ़ेन लुब्धेनाकृतबुद्धिना ।
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ॥
शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा ।
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ॥
स्वराष्ट्रे न्यायवृत्तः स्याद्भृशदण्डश्च शत्रुषु ।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥
एवंवृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः ।
विस्तीर्य्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥
अतस्तु विपरीतस्य नृपतेरजितात्मनः ।
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ॥
स्वे स्वे धर्म्मे निविष्टानां सर्व्वेषामनुपूर्व्वशः ।
वर्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता ॥
तेन यद्यत् सभृत्येन कर्त्तव्यं रक्षता प्रजाः ।
तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
ब्राह्मणान् पर्य्युपासीत प्रातरुत्थाय पार्थिवः ।
त्रैविद्यवृद्धान् विदुषस्तिष्ठेत्तेषाञ्च शासने ॥
वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन् ।
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ॥
तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः ।
विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित् ॥
बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे ॥
वेणो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः ।
सुदासो यवनश्चैव सुमुखो निमिरेव च ॥
पृथुस्तु विनयाद्राज्यं प्राप्तवान् मनुरेव च ।
कुवेरश्च धनैश्वर्य्यं ब्राह्मण्यञ्चैव गाधिजः ॥
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः ॥
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥
दश कामसमुत्थानि तथाष्टौ क्रोधजानि च ।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्ज्जयेत् ॥
कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः ।
वियुज्यतेऽर्थधर्म्माभ्यां क्रोधजेष्वात्मनैव तु ॥
मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः ।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥
पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम् ।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥
द्वयोरप्येतयोर्म्मूलं यं सर्व्वे कवयो विदुः ।
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥
दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा ॥
सप्तकस्यास्य वर्गस्य सर्व्वत्रैवानुषङ्गिणः ।
पूर्व्वं पूर्व्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥
व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते ।
व्यसन्यधोऽधो व्रजति स्वर्य्यात्यव्यसनी मृतः ॥
मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्गतान् ।
सचिवान् सप्त चाष्टौ वा प्रकुर्व्वीत परीक्षितान् ॥
अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम् ।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम् ॥
तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम् ।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥
तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक् ।
समस्तानाञ्च कार्य्येषु विदध्याद्धितमात्मनः ॥
सर्व्वेषान्तु विशिष्टेन ब्राह्मणेन विपश्चिता ।
मन्त्रयेत् परमं मन्त्रं राजा षाड़्गुण्यसंयुतम् ॥
नित्यं तस्मिन् समाश्वस्तः सर्व्वकार्य्याणि निःक्षिपेत् ।
तेन सार्द्धं विनिश्चित्य ततः कर्म्म समारभेत् ॥
अन्यानपि प्रकुर्व्वीत शुचीन् प्राज्ञानवस्थितान् ।
सम्यगर्थसमाहर्तॄनमात्यान् सुपरीक्षितान् ॥
निर्व्वर्त्तेतास्य यावद्भिरिति कर्त्तव्यता नृभिः ।
तावतोऽतन्द्रितान् दक्षान् प्रकुर्व्वीत विचक्षणान् ॥
तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान् ।
शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने ॥
दूतञ्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम् ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित् ।
वपुष्मान् वीतभीर्व्वाग्मी दूतो राज्ञः प्रशस्यते ॥
अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया ।
नृपतौ कोषराष्ट्रे च दूते सन्धिविपर्य्ययौ ॥
दूत एव हि सन्धत्ते भिनत्त्येव च संहतान् ।
दूतस्तत् कुरुते कर्म्म भिद्यन्ते येन वा न वा ॥
स विद्यादस्य कृत्येषु निगूढ़ेङ्गितचेष्टितैः ।
आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम् ॥
बुद्ध्वा च सर्व्वं तत्त्वेन परराजचिकीर्षितम् ।
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीड़येत् ॥
जाङ्गलं शस्यसम्पन्नमार्य्यप्रायमनाविलम् ।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ॥
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम् ॥
सर्व्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् ।
एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ॥
त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्त्ताश्रयाप्चराः ।
त्रीण्युत्तराणि क्रमशः प्लवङ्गमनरामराः ॥
यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः ।
तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितम् ॥
एकः शतं योधयति प्राकारस्थो धनुर्द्धरः ।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते ॥
तत् स्यादायुधसम्पन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥
तस्य मध्ये सुपर्य्याप्तं कारयेद्गृहमात्मनः ।
गुप्तं सर्व्वर्त्तुकं शुभ्रं जलवृक्षसमन्वितम् ॥ * ॥
तदध्यास्योद्वहेद्भार्य्यां सवर्णां लक्षणान्विताम् ।
कुले महति सम्भूतां हृद्यां रूपगुणान्विताम् ॥
पुरोहितञ्च कुर्व्वीत वृणुयादेव चर्त्विजम् ।
तेऽस्य गृह्याणि कर्म्माणि कुर्य्युर्वैतानिकानि च ॥
यजेत राजा क्रतुभिर्व्विविधैराप्तदक्षिणैः ।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च ॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् ।
स्याच्चाम्नायपरो लोके वर्त्तेत पितृवन्नृषु ॥
अध्यक्षान् विविधान् कुर्य्यात् तत्र तत्र विपश्चितः ।
तेऽस्य सर्व्वाण्यवेक्षेरन् नृणां कार्य्याणि कुर्व्वताम् ॥
आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत् ।
नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते ॥
न तं स्तेना न चामित्रा हरन्ति न च नश्यति ।
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥
न स्कन्दते न व्यथते न विनश्यति कर्हिचित् ।
वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम् ॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
प्राधीते शतसाहस्रमनन्तं वेदपारगे ॥
पात्रस्य हि विशेषेण श्रद्दधानतयैव च ।
अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलम् ॥
समोत्तमाधमै राजा त्वाहूतः पालयन् प्रजाः ।
न निवर्त्तेत संग्रामात् क्षात्रं धर्म्ममनुस्मरन् ॥
संग्रामेष्वनिवर्त्तित्वं प्रजानाञ्चैव पालनम् ।
शुश्रूषा ब्राह्मणानाञ्च राज्ञां श्रेयस्करं परम् ॥
आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः ।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥
न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून् ।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥
न च हन्यात् स्थलारूढ़ं न क्लीवं न कृताञ्जलिम् ।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम् ॥
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम् ।
नायुध्यमानं पश्यन्तं न परेण समागतम् ॥
नायुधव्यसनप्राप्तं नार्त्तं नातिपरीक्षतम् ।
न भीतं न परावृत्तं सतां धर्म्ममनुस्मरन् ॥
यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः ।
भर्त्तुर्यद्दुष्कृतं किञ्चित्तत् सर्व्वं प्रतिपद्यते ॥
यच्चास्य सुकृतं किञ्चिदमुत्रार्थमुपार्ज्जितम् ।
भर्त्ता तत् सर्व्वमादत्ते परावृत्तहतस्य तु ॥ * ॥

रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः ।
सर्व्वद्रव्याणि कुप्यञ्च यो यज्जयति तस्य तत् ॥
राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः ।
राज्ञा च सर्व्वयोधेभ्यो दातव्यमपृथग्जितम् ॥
एषोऽनुपस्कृतः प्रोक्तो योधधर्म्मः सनातनः ।
अस्माद्धर्म्मान्न च्यवेत क्षत्त्रियो घ्नन् रणे रिपून् ॥
अलब्धञ्चैव लिप्सेत लब्धं रक्षेत् प्रयत्नतः ।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निःक्षिपेत् ॥
एतच्चतुर्व्विधं विद्यात् पुरुषार्थप्रयोजनम् ।
अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रितः ॥
अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया ।
रक्षितं वर्द्धयेद्वृद्ध्या वृद्धं दानेन निःक्षिपेत् ॥*
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः ।
नित्यं संवृतसंवार्य्यो नित्यं छिद्रानुसार्य्यरेः ॥
नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत् ।
तस्मात् सर्व्वाणि भूतानि दण्डेनैव प्रसाधयेत् ॥
अमाययैव वर्त्तेत न कथञ्चन मायया ।
बुद्ध्येतारिप्रयुक्ताञ्च मायां नित्यं स्वसंवृतः ॥
नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु ।
गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥
वकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ॥
एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः ।
तानानयेद्वशं सर्व्वान् सामादिभिरुपक्रमैः ॥
यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः ।
दण्डेनैव प्रसह्यैतान् शनकैर्व्वशमानयेत् ॥
सामादीनामुपायानां चतुर्णामपि पण्डिताः ।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये ॥
यथोद्धरति निर्द्दाता कक्षं धान्यञ्च रक्षति ।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः ॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया ।
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ॥
शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा ।
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात् ॥
राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत् ।
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते ॥
द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम् ।
तथा ग्रामशतानाञ्च कुर्य्याद्राष्ट्रस्य संग्रहम् ॥
ग्रामस्याधिपतिं कुर्य्याद्दशग्रामपतिं तथा ।
विंशतीशं शतेशञ्च सहस्रपतिमेव च ॥
ग्रामे दोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयम् ।
शंसेद्ग्रामदशेशाय दशेशो विंशतीशिनम् ॥
विंशतीशस्तु तत्सर्व्वं शतेशाय निवेदयेत् ।
शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम् ॥
यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः ।
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात् ॥
दशी कुलन्तु भुञ्जीत विंशी पञ्च कुलानि च ।
ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम् ॥
तेषां ग्राम्याणि कार्य्याणि पृथक् कार्य्याणि चैव हि ।
राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः ॥
नगरे नगरे चैकं कुर्य्यात् सर्व्वार्थचिन्तकम् ।
उच्चैः स्थानं घोररूपं नक्षत्राणामिव ग्रहम् ॥
स ताननुपरिक्रामेत् सर्व्वानेव सदा स्वयम् ।
तेषां वृत्तं परिणयेत् सम्यग्राष्ट्रेषु तच्चरैः ॥
राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः ।
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः ॥
ये कार्य्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः ।
तेषां सर्व्वस्वमादाय राजा कुर्य्यात् प्रवासनम् ॥
राजकर्म्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च ।
प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्म्मानुरूपतः ॥
पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम् ।
षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः ॥ * ॥
क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम् ।
योगक्षेमञ्च संप्रेक्ष्य वणिजो दापयेत् करान् ॥
यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणाम् ।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान् ॥
यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्सषट्पदाः ।
तथाल्पाल्पो गृहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः ॥
पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ॥
आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ।
गन्धौषधिरसानाञ्च मूलपुष्पफलस्य च ॥
पत्रशाकतृणानाञ्च वैदलस्य च चर्म्मणाम् ।
मृण्मयानाञ्च भाण्डानां सर्व्वस्याश्ममयस्य च ॥
म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करम् ।
न च क्षुधास्य संसीदेत् श्रोत्रियो विषये वसन् ॥
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ।
तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति ॥
श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्म्यां प्रकल्पयेत् ।
संरक्षेत् सर्व्वतश्चैनं पिता पुत्त्रमिवौरसम् ॥
संरक्ष्यमाणो राज्ञा यं कुरुते धर्म्ममन्वहम् ।
तेनायुर्व्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव च ॥
यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम् ।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् ॥
कारुकान् शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः ।
एकैकं कारयेत् कर्म्म मासि मासि महीपतिः ॥
नोच्छिन्द्यादात्मनो मूलं परेषाञ्चातितृष्णया ।
उच्छिन्दन् ह्यात्मनो मूलमात्मानं तांश्च पीड़येत् ॥
तीक्ष्णश्चैव मृदुश्च स्यात् कार्य्यं वीक्ष्य महीपतिः ।
तीक्ष्णश्चैव मृदुश्चैव राजा भवति सम्मतः ॥
अमात्यमुख्यं धर्म्मज्ञं प्राज्ञं दान्तं कुलोद्गतम् ।
स्थापयेदासने तस्मिन् खिन्नः कार्य्येक्षणे नृणाम् ॥
एवं सर्व्वं विधायेदमिति कर्त्तव्यमात्मनः ।
युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः ॥
विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः ।
संपश्यतः सभृत्यस्य मृतः स न तु जीवति ॥
क्षत्त्रियस्य परो धर्म्मः प्रजानामेव पालनम् ।
निर्द्दिष्टफलभोक्ता हि राजा धर्म्मेण युज्यते ॥
उत्थाय पश्चिमे यामे कृतशौचः समाहितः ।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां सभाम् ॥
तत्र स्थितः प्रजाः सर्व्वाः प्रतिनन्द्य विसर्ज्जयेत् ।
विसृज्य च प्रजाः सर्व्वा मन्त्रयेत् सह मन्त्रिभिः ॥
गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः ।
अरण्ये निःशलाके वा मन्त्रयेदविभावितः ॥
यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः ।
स कृत्स्नां पृथिवीं भुङ्क्ते कोषहीनोऽपि पार्थिवः ॥
जड़मूकान्धवधिरांस्तिर्य्यग्योनान् वयोगतान् ।
स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकालेऽपसारयेत् ॥
भिन्दन्त्यवमता मन्त्रं तैर्य्यग्योनास्तथैव च ।
स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो भवेत् ॥
मध्यन्दिनेऽर्द्धरात्रे वा विश्रान्तो विगतक्लमः ।
चिन्तयेद्धर्म्मकामार्थान् सार्द्धं तैरेक एव वा ॥
परस्परविरुद्धानां तेषाञ्च समुपार्ज्जनम् ।
कन्यानां सम्प्रदानञ्च कुमाराणाञ्च रक्षणम् ॥
दूतसंप्रेषणञ्चैव कार्य्यशेषं तथैव च ।
अन्तःपुरप्रचारञ्च प्रणिधीनाञ्च चेष्टितम् ॥
कृत्स्नं चाष्टविधं कर्म्म पञ्चवर्गञ्च तत्त्वतः ।
अनुरागापरागौ च प्रचारं मण्डलस्य च ॥
मध्यमस्य प्रचारञ्च विजिगीषोश्च चेष्टितम् ।
उदासीनप्रचारञ्च शत्रोश्चैव प्रयत्नतः ॥ * ॥
एताः प्रकृतयो मूलं मण्डलस्य समासतः ।
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः ॥
अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः ।
प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥
अनन्तरमरिं विद्यादरिसेविनमेव च ।
अरेरनन्तरं मित्त्रमुदासीनं तयोः परम् ॥
तान् सर्व्वानभिसन्दध्यात् सामादिभिरुपक्रमैः ।
व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च ॥
सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥
आसनञ्चैव यानञ्च सन्धिं विग्रहमेव च ।
कार्य्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च ॥
सन्धिन्तु द्विविधं विद्याद्राजा विग्रहमेव च ।
उभे यानासने चैव द्विविधः संश्रयः स्मृतः ॥
समानयानकर्म्मा च विपरीतस्तथैव च ।
तदात्वायतिसंयुक्तः सन्धिर्ज्ञेयो द्विलक्षणः ॥
स्वयंकृतश्च कार्य्यार्थमकाले काल एव वा ।
मित्त्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः ॥
एकाकिनश्चात्ययिके कार्य्ये प्राप्ते यदृच्छया ।
संहतस्य च मित्त्रेण द्विविधं यानमुच्यते ॥
क्षीणस्य चैव क्रमशो दैवात् पूर्व्वकृतेन वा ।
मित्त्रस्य चानुरोधेन द्विविधं स्मृतमासनम् ॥
बलस्य स्वामिनश्चैव स्थितिः कार्य्यार्थसिद्धये ।
द्विविधं कीर्त्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः ॥
अर्थसम्पादनार्थञ्च पीड्यमानस्य शत्रुभिः ।
साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः ॥*॥
यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः ।
तदात्वे चाल्पिकां पीड़ां तदा सन्धिं समाश्रयेत् ॥"

तदात्वे तत्काले ।
"यदा प्रहृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम् ।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम् ॥
यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम् ।
परस्य विपरीतञ्च तदा यायाद्रिपुं प्रति ॥
यदा तु स्यात् परिक्षीणो वाहनेन बलेन च ।
तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन् ॥
मन्येतारिं यदा राजा सर्व्वथा बलवत्तरम् ।
तदा द्विधा बलं कृत्वा साधयेत् कार्य्यमात्मनः ॥
यदा परबलानान्तु गमनीयतमो भवेत् ।
तदा तु संश्रयेत् क्षिप्रं धार्म्मिकं बलिनं नृपम् ॥
निग्रहं प्रकृतीनाञ्च कुर्य्याद्योऽरिबलस्य च ।
उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा ॥
यदि तत्रापि संपश्येत् दोषं संश्रयकारितम् ।
सुयुद्धमेवं तत्रापि निर्विशङ्कः समाचरेत् ॥
सर्व्वोपायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥
आयतिं सर्व्वकार्य्याणां तदात्वञ्च विचारयेत् ।
अतीतानाञ्च सर्व्वेषां गुणदोषौ च तत्त्वतः ॥
आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः ।
अतीते कार्य्यशेषज्ञः शत्रुभिर्नाभिभूयते ॥
यथैनं नाभिसन्दध्युर्म्मित्रोदासीनशत्रवः ।
तथा सर्व्वं संविदध्यादेष सामासिको नयः ॥
यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः ।
तदानेन विधानेन यायादरिपुरं शनैः ॥
मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः ।
फाल्गुनं वाथ चैत्रं वा मासौ प्रति यथाबलम् ॥
अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम् ।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः ॥
कृत्वा विधानं मूले तु यात्रिकञ्च यथाविधि ।
उपगृह्यास्पदञ्चैव चारान् सम्यग्विधाय च ॥
संशोध्य त्रिविधं मार्गं षड्विधञ्च बलं स्वकम् ।
साम्परायिककल्पेन यायादरिपुरं शनैः ।
शत्रुसेविनि मित्रे च गूढ़े युक्ततरो भवेत् ।
गतप्रत्यागते चैव स हि कष्टतरो रिपुः ॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गरुड़ेन वा ॥
यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम् ।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् ॥
सेनापतिबलाध्यक्षौ सर्व्वदिक्षु निवेशयेत् ।
यतश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम् ॥
गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः ।
स्थाने युद्धे च कुशलानभीरूनविकारिणः ॥*॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून् ।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत् ॥
स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले ॥
कुरुक्षेत्रांश्च मत्स्यांश्च पञ्चालान् शूरसेनजान् ।
दीर्घान् लघूंश्चैव नरानग्रानीकेषु योधयेत् ॥
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत् ।
चेष्टाश्चैव विजानीयादरीन् योधयतामपि ॥
उपरुध्यारिमासीत राष्ट्रं चास्योपपीड़येत् ।
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् ॥
भिन्द्याच्चैव तड़ागानि प्राकारपरिखास्तथा ।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा ॥
उपजप्यानुपजपेद्बुध्येतैव च तत्कृतम् ।
युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः ॥
साम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥
अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः ।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्ज्जयेत् ॥
त्रयाणामप्युपायानां पूर्व्वोक्तानामसम्भवे ।
तथा युध्येत संयत्तो विजयेत रिपून् यथा ॥*॥
जित्वा सम्पूजयेद्देवान् ब्राह्मणांश्चैव धार्म्मिकान् ।
प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च ॥
सर्व्वेषान्तु विदित्वैषां समासेन चिकीर्षितम् ।
स्थापयेत्तत्र तद्वंश्यं कुर्य्याच्च समयक्रियाम् ॥
प्रमाणानि च कुर्व्वीत तेषां धर्म्म्यान् यथोदितान् ।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥
आदानमप्रियकरं दानञ्च प्रियकारकम् ।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते ॥
सर्व्वं कर्म्मेदमायत्तं विधाने दैवमानुषे ।
तयोर्द्दैवमचिन्त्यन्तु मानुषे विद्यते क्रिया ॥
सह वापि व्रजेद्युक्तः सन्धिं कृत्वा प्रयत्नतः ।
मित्रं हिरण्यं भूमिं वा सम्पश्यंस्त्रिविधं फलम् ॥
पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले ।
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात् ॥"
आक्रन्दः पार्ष्णिग्राहस्य नियामको राजा ।
"हिरण्यभूमिसम्प्राप्त्या पार्थिवो न तथैधते ।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् ॥*॥
धर्म्मज्ञञ्च कृतज्ञञ्च तुष्टप्रकृतिमेव च ।
अनुरक्तं स्थिरारम्भं लघु मित्रं प्रशस्यते ॥
प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च ।
कृतज्ञं धृतिमन्तञ्च कष्टमाहुररिं बुधाः ॥
आर्य्यता पुरुषज्ञानं शौर्य्यं करुणवेदिता ।
स्थौललक्ष्यञ्च सततमुदासीनगुणोदयः ॥"
स्थौललक्ष्यं बहुप्रदत्वम् ।
"क्षेम्यां शस्यप्रदां नित्यं पशुवृद्धिकरीमपि ।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् ॥
आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥
सह सर्व्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम् ।
संयुक्तांश्च वियुक्तांश्च सर्व्वोपायान् सृजेद्बुधः ॥
उपेतारमुपेयञ्च सर्व्वोपायांश्च कृत्स्नशः ।
एतत् त्रयं समाश्रित्य प्रयतेतार्थसिद्धये ॥"
उपेतारं आत्मानम् । उपेयं प्राप्यम् ॥*॥
"एवं सर्व्वमिदं राजा सह सम्मन्त्र्य मन्त्रिभिः ।
व्यायाम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् ॥
तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्व्विषापहैः ॥
विषघ्नैरगदैश्चास्य सर्व्वद्रव्याणि योजयेत् ।
विषघ्नानि च रत्नानि नियतो धारयेत् सदा ॥
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ।
वेशाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः ॥
एवं प्रयत्नं कुर्व्वीत यानशय्यासनाशने ।
स्नाने प्रसाधने चैव सर्व्वालङ्कारकेषु च ॥
भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विहृत्य तु यथाकालं पुनः कार्य्याणि चिन्तयेत् ॥
अलङ्कृतश्च संपश्येदायुधीयं पुनर्ज्जनम् ।
वाहनानि च सर्व्वाणि शस्त्राण्याभरणानि च ॥
सन्ध्याञ्चोपास्य शृणुयादन्तर्व्वेश्मनि शस्त्रभृत् ।
रहस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितम् ॥
गत्वा कक्षान्तरं त्वन्यत् समनुज्ञाप्य तं जनम् ।
प्रविशेद्भोजनार्थञ्च स्त्रीवृतोऽन्तःपुरं पुनः ॥
तत्र भुक्त्वा पुनः किञ्चित्तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः ।
अस्वस्थः सर्व्वमेतत्तु भृत्येषु विनियोजयेत् ॥"
इति मानवे ७ अध्यायः ॥*॥
कालीकापुराणोक्तराजधर्म्मः ८५ । ८६ अध्याययोः द्रष्टव्यः । महाभारतोक्तराजधर्म्मः शान्तिपर्व्वणि द्रष्टव्यः । पद्मपुराणोक्तराजधर्म्मः स्वर्गखण्डे १३८ अध्याये द्रष्टव्यः ॥

राजधानकं, क्ली, (धीयतेऽस्मिन्निति । धा + ल्युट् । ततः कन् । राज्ञां धानकं नगरम् ।) राजपुरम् । इति शब्दरत्नावली ॥

राजधानी, स्त्री, (धीयतेऽस्यामिति । धा + अधिकरणे ल्युट् । ङीप् । राज्ञां धानी नगरी ।) राजधानिका । तत्पर्य्यायः । कोट्टः २ राजधानकम् ३ । इति शब्दरत्नावली ॥ स्कन्धावारः ४ । इति हेमचन्द्रः ॥ (यथा, रघुः ।२।७० ।
"तौ दम्पती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वशिष्ठः ॥")

राजधान्यं, क्ली, (राजप्रियं धान्यम् ।) श्यामाकः । इति राजनिर्घण्टः ॥ (यथा, वृहत्संहितायाम् । १५ । १२ ।
"त्वक्सारभूषणमणिरागलेख्यगान्धर्व्वगन्धयुक्तिज्ञाः ।
गणितपटुतन्तुवायाः शालाक्या राजधान्यानि ॥")

राजधुस्तूरकः, पुं, (धुस्तूरकाणां राजा । राजदन्तादित्वात् परनिपातः ।) वृहद्धुस्तूरः । तत्पर्य्यायः । राजधूर्त्तः २ महाशठः ३ निस्नेहफलकः ४ भ्रान्तः ५ राजस्वर्णः ६ । इति राजनिर्घण्टः ॥ अस्य गुणाः धुस्तूरशब्दे द्रष्टव्याः ॥

राजनामा, [न्] पुं, (राज्ञो नाम नाम यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

राजनीतिः, स्त्री, (राज्ञां नीतिः ।) राज्ञां नयः । यथा, चाणक्यपण्डितकृतप्रथमः श्लोकः ।
"नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ।
सर्व्वबीजमिदं शास्त्रं चाणक्यं सारसंग्रहम् ॥"
सा यथा,—
"गदितं वलिशुक्राभ्यां श्रुत्वा भागवतोऽसुरः ।
प्राह धर्म्मार्थसंयुक्तं प्रह्लादो वाक्यमुत्तमम् ॥
यदायत्तो धर्म्मं राजन् ! यद्धितं भुवनस्य ह ।
अविरोधेन धर्म्मस्य अर्थस्योपार्ज्जनञ्च यत् ॥
सर्व्वसत्त्वानुगमनं कामवर्गफलञ्च यत् ।

परत्रेह च यच्छ्रेय: पुत्र तत् कर्म्म आचर ॥
यथा श्लाघां प्रयास्यद्य यथा कीर्त्तिर्भवेत्तव ।
यथा नापयशोयोगस्तथा कुरु महामते ॥
एतदर्थं श्रियं दीप्तां काङ्क्षन्ते पुरुषोत्तमा: ।
येनेति हि गृहेऽस्माकं निवसन्ति सुनिर्वृता: ।
वृद्धो ज्ञातिर्गुणी विप्र: कीर्त्तिश्च यशसा सह ॥
तस्माद्यथा ते निवसन्ति पुत्र-
राज्यस्थितस्येह कुलोत्तमाद्या: ।
तथा यतस्वामलसत्त्वचेष्टया
यथा यशस्वी भवितासि लोके ॥
भूम्यां सदा ब्राह्मणभूषितायां
क्षेत्रान्वितायां दृढ़वापितायाम् ।
शुश्रूषणासक्तससुद्भवायां
ऋद्धिं प्रयान्तीह नराधिपेन्द्रा: ॥
तस्माद्द्विजाग्र्या: श्रुतिशास्त्रयुक्ता
नराधिपांस्ते प्रतियाजयन्ते ।
दिव्यैर्यजन्तु क्रतुभिर्दिवेन्द्रा
यज्ञाग्निधूमो न नृपस्य शान्ति: ॥
तपोऽध्ययनसम्पन्ना याजनाध्यापने रता: ।
सन्तु विप्रा बले पूज्यास्त्वत्तोऽनुज्ञामवाप्य हि ॥
स्वाध्याययज्ञनिरता दातार: शस्त्रजीविन: ।
क्षत्त्रिया: सन्तु दैत्येन्द्र प्रजापालनधर्म्मिण: ॥
यज्ञाध्ययनसम्पन्ना दातार: कृषिकारिण: ।
पाशुपाल्यं प्रकुर्व्वन्तु वैश्या विपिनजीविन: ॥
ब्राह्मणक्षत्त्रियविशां सदा शुश्रूषणे रता: ।
शूद्रा: सन्त्वसुरश्रेष्ठ तवाज्ञाकारिण: सदा ॥
यदा वर्णा: स्वधर्म्मस्था भवन्ति दितिजेश्वर ! ।
धर्म्मवृद्धिस्तदा स्याद्वै धर्म्मवृद्धौ नृपोदय: ॥
तस्माद्वर्णा सधर्म्मस्थास्त्वया कार्य्या: सदा बले ! ।
तद्वृद्धौ भवतो वृद्धिस्तद्धानौ हानिरुच्यते ॥
इत्थं वच: श्राव्य महासुरेन्द्रो
बलिं महात्मा स बभूव तूष्णीम् ।
ततो यदाज्ञापयसे करिष्ये
इत्थ बलि: प्राह वचो महर्षे ॥”
इति वामने ७१ अध्याय: ॥ * ॥
अपि च ।
“एवं दत्त्वा ततो राज्यं मूर्द्ध्नि चाघ्राय धर्म्मवित् ।
उवाच मधुरं वाक्यं पुत्रं पुत्रवतां वर: ॥
राज्यस्थेनापि ते पुत्र कर्त्तव्यं शृणु तन्मम ।
यदीच्छेत् परमं धर्म्मं पितॄणां तारणं तथा ॥
दातव्योऽग्निर्न कर्त्तव्या हन्तव्या परदारिका: ।
बालघाताश्च हन्तव्या हन्तव्या स्त्रीविघातका: ॥
मा लोभं परद्रव्येषु अन्यायोपार्ज्जितेषु च ।
न चिरं तिष्ठते क्वापि सर्व्वे मान्या: कदाचन ॥
रक्षणीयश्च ते देश: कुलन्यायवशार्ज्जित: ।
नित्योद्युक्तेन स्थातव्यममात्यवचनं कुरु ॥
अमात्यो यद्वचो ब्रूयात् पुत्र कार्य्यविमर्शनम् ।
अवश्यमेव कर्त्तव्यं शरीरपरिरक्षणम् ॥
प्रजा येन प्रमोदन्ति येन तुष्यन्ति ब्राह्मणा: ।
एवं ते पुत्र कर्त्तव्यं मम प्रियहितैषिणा ॥
सप्त व्यसनं वर्ज्जीत दोषो राज्ञस्तु तन्महत् ।
येषु राजा विनश्येत सम्पन्नोऽपि महाद्युति: ॥
वर्ज्जयेत सुरापानं मृगयां वर्ज्जयेत् सदा ।
वाक्यं रूक्षं न वक्तव्यं वृथा यावत् कदाचन ॥
राजगुह्यं न वक्तव्यं दूतभेदं विवर्ज्जयेत् ।
वर्ज्जयेदतिपारुष्यं असद्भिश्च समागमम् ॥
अर्थदूषणकश्चैव न कर्त्तव्यं कदाचन ।
अमात्यं नाप्रियं ब्रूयाद्यदीच्छेद्राजकर्म्मणि ॥
नाहं निवारणीयस्ते गमनाय पथे स्थित: ।
एतन्मे क्रियतां शीघ्रं यदीच्छसि मम प्रियम् ॥
तत: पितुर्व्वच: श्रुत्वा राजपुत्रो यशस्विन: ।
उभौ तु पादौ संगृह्य कारुण्यं प्रत्युवाच तम् ॥”
इत्यादि श्रीवराहपुराणे भगवच्छास्त्रे शौकरवे तीर्थमाहात्म्ये आदित्यवरप्रदानव्यजम्बुकोपाख्यानं नामाध्याय: ॥ * ॥
अन्यच्च ।
मनुरुवाच ।
“राज्ञोऽभिषिक्तमात्रस्य किंनु कृत्यतमं भवेत् ।
एतत् सर्व्वं समाचक्ष्व सम्यग्वेत्ति यतो भवान् ॥
मत्स्य उवाच ।
अभिषेकार्द्रशिरसा राज्ञा राजीवलोचन ।
सहायावरणं कार्य्यं तत्र राज्यं प्रतिष्ठितम् ॥
यदप्यल्पतरं कर्म्म तदप्येकेन दुष्करम् ।
पुरुषेणासहायेन किमु राज्यं महत् पदम् ॥
तस्मात् सहायान् वरयेत् कुलीनान् नृपति: स्वयम् ।
शूरान् कुलीनान् जातीयान् बलयुक्तान् श्रियान्वितान् ॥
रूपसत्त्वगुणोपेतान् सज्जनान् क्षमया युतान् ।
क्लेशक्षमान् महोत्साहान् धर्म्मज्ञांश्च प्रियंवदान् ॥
हितोपदेशकालज्ञान् स्वामिभक्तान् यशोऽर्थिन: ।
एवंविधान् सहायांश्च शुभकर्म्मसु योजयेत् ॥
गुणहीनानपि सदा विज्ञाय नृपति: स्वयम् ॥
कर्म्मस्वेव नियुञ्जीत यथायोग्येषु भारत ! ।
कुलीन: शीलसम्पन्नो धनुर्व्वेदविशारद: ।
हस्तिशिक्षाश्वशिक्षासु कुशल: श्लक्ष्णभाषण: ॥
निमित्ते शकुनज्ञाने वेत्ता चैव चिकित्सिते ।
कृतज्ञ: कर्म्मणां शूरस्तथा क्लेशसहो ऋजु: ॥
व्यूहतत्त्वविधानज्ञ: फल्गुसारविशेषवित् ।
राज्ञा सेनापति: कार्य्यो ब्राह्मण: क्षत्त्रियो यथा ॥
प्रांशु: सुरूपो दक्षश्च प्रियवादी न चोद्धत: ।
चित्तग्राहश्च सर्व्वेषां प्रतीहारो विधीयते ॥
यथोक्तवादी दूत: स्याद्देशभाषाविशारद: ।
शक्त: क्लेशसहो वाग्मी देशकालविभावित: ॥
विज्ञातदेशकालश्च दूत: स्यात् स महीक्षित: ।
वक्ता नयस्य य: काले स दूतो भूपतेर्भवेत् ॥
प्रांशवो व्यायता: शूरा: दृढ़भक्ता निराकुला: ।
राज्ञा तु रक्षिण: कार्य्या: सदा क्लेशसहा हिता: ॥
अनाहार्य्योऽनृशंसश्च दृढ़भक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाप्यथ तद्गुणा ॥
षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारद: ।
सन्धिविग्रहिक: कार्य्यो राज्ञा नयविशारद: ॥
आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारद: ।
कृताकृतज्ञो भृत्यानां ज्ञेय: स्यादेष रक्षिता ॥
सुरूपस्तरुण: प्रांशुर्दृढ़भक्ति: कुलोचित: ।
शूर: क्लेशसहश्चैव खड्गधारी प्रकीर्त्तित: ॥
शूरश्च बलयुक्तश्च गजाश्वरथकोविद: ।
धनुर्धारी भवेद्राज्ञ: सर्व्वक्लेशसह: शुचि: ॥
निमित्तशकुनज्ञानहयशिक्षाविशारद: ।
हयायुर्व्वेदतत्त्वज्ञो भूविभागविशेषवित् ॥
स्वामिभक्तो महोत्साह: सर्व्वशश्च प्रियंवद: ।
बलाबलज्ञो रथिक: स्थिरदृष्टि: प्रियंवद: ॥
शूरश्च कृतविद्यश्च सारथि: परिकीर्त्तित: ।
अनाहार्य्य: शुचिर्दक्षश्चिकित्सितविदांवर: ॥
सूदशास्त्रविशेषज्ञ: सूदाध्यक्ष: प्रशस्यते ।
सूदशास्त्रविधानज्ञा: पराभेद्या: कुलोद्गता: ।
सर्व्वे महानसे धार्य्या लुप्तकेशनखा जना: ॥
सम: शत्रौ च मित्रे च धर्म्मशास्त्रविशारद: ।
विप्रमुख्य: कुलीनश्च धर्म्माधिकरणो भवेत् ॥
कार्य्यास्तथाविधास्तत्र द्विजमुख्या: सभासद: ।
सर्व्वदेशाक्षराभिज्ञ: सर्व्वशास्त्रविशारद: ॥
लेखक: कथितो राज्ञ: सर्व्वाधिकरणेषु वै ।
शीर्षोपेतान् सुसम्पूर्णान् समश्रेणिगतान् समान् ।
अक्षरान् वै लिखेत् यस्तु लेखक: स वर: स्मृत: ॥
उपायवाक्यकुशल: सर्व्वशास्त्रविशारद: ।
बह्वर्थवक्ता चाल्पेन लेखक: स्याद्भृगूत्तम ॥
वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् ।
अनाहार्य्यो नृपे भक्तो लेखक: स्याद्भृगूत्तम ॥
पुरुषान्तरतत्त्वज्ञा: प्रांशवश्चाप्यलोलुपा: ।
धर्म्माधिकरणे कार्य्या जनाह्वानकरा नरा: ।
एवंविधास्तथा कार्य्या राज्ञा दौवारिका जना: ।
लोहवस्त्राजिनादीनां रत्नानाञ्च विधानवित् ॥
विज्ञाता फल्गुसाराणामनाहार्य्य: शुचि: सदा ।
निपुणश्चाप्रमत्तश्च धनाध्यक्ष: प्रकीर्त्तित: ॥
आयद्वारेषु सर्व्वेषु धनाध्यक्षसमा नरा: ।
व्ययद्वारेषु च तथा कर्त्तव्या पृथिवीक्षिता ॥
परम्परागतो य: स्यादष्टाङ्गे तु चिकित्सिते ।
अनाहार्य्य: स वैद्य: स्याद्धर्म्मात्मा च कुलोद्गत: ॥
प्राणाचार्य्य: स विज्ञेयो वचनं तस्य भूभुजा ।
राजन् राज्ञा सदा कार्य्यं यथाकार्य्यं पृथग्जनै: ॥
हस्तिशिक्षाविधानज्ञो वनजातिविशारद: ।
क्लेशक्षमस्तथा राज्ञो गजाध्यक्ष: प्रशस्यते ॥
एतैरेव गुणैर्युक्त: स्थासनश्च विशेषत: ।
गजारोहो नरेन्द्रस्य सर्व्वकर्म्मणि शस्यते ॥
हयशिक्षाविधानज्ञस्तच्चिकित्सितपारग: ।
अश्वाध्यक्षो महीभर्त्तु: स्वासनश्च प्रशस्यते ॥
अनाहार्य्यश्च शूरश्च तथा प्राज्ञ: कुलोद्गत: ।
दुर्गाध्यक्ष: स्मृतो राज्ञ उद्युक्त: सर्व्वकर्म्मसु ॥
वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रम: ।
दीर्घदर्शी च शूरश्च स्थपति: परिकीर्त्तित: ॥

यन्त्रमुक्ते पाणिमुक्ते अमुक्ते मुक्तधारिते ।
अस्त्राचार्य्यो निरुद्वेगः कुलपश्च विशिष्यते ॥
वृद्धः कुलोद्गतः स्वक्तः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥
एवं सप्ताधिकारेषु पुरुषाः सप्त तेऽपरे ।
पञ्च शब्दाधिकरणाः पुरुषाः सप्त तेऽपरम् ॥
अन्तःपुरचराः कार्य्या राज्ञा सर्व्वेषु कर्म्मसु ।
स्थापनाजाततत्त्वज्ञः सततं प्रतिजाग्रता ॥
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः ।
कर्म्माण्यपरिमेयाणि राज्ञां भृगुकुलोद्भव ॥
उत्तमाधममध्यानि बुद्धा कर्म्माणि पार्थिवः ।
उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥
नरकर्म्मविपर्य्यासाद्राजा नाशमवाप्नुयात् ।
नियोगं पौरुषं भक्तिं श्रुतं शौर्य्यं कुलं नयम् ॥
ज्ञात्वा वृत्तिर्व्विधातव्या पुरुषाणां महीक्षिता ।
पुरुषान्तरविज्ञाने तत्त्वसारनिबन्धनात् ॥
बहुभिर्म्मन्त्रयेत् कामं राजा मन्त्रं पृथक् पृथक् ।
मन्त्रिणामपि नो कुर्य्यान्मन्त्रिमन्त्रप्रकाशनम् ॥
क्वचित् कस्यचिद्विश्वासो भवतीह सदा नृणाम् ।
निश्चयश्च सदा मन्त्रे कार्य्य एकेन सूरिणा ॥
भवेद्वा निश्चयावाप्तिः परबुद्ध्यनुजीवनात् ।
एकस्यैव महीभर्त्तुर्भूयः कार्य्यो विनिश्चयः ॥
ब्राह्मणान् पर्य्युपासीत त्रयीं नाम सुनिश्चिताम् ।
नासच्छास्त्रवतो मूढ़ांस्ते हि लोकस्य कण्टकाः ॥
वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन् ।
तेभ्यो हि शिक्षेद्विनयं विनीतात्मा हि नित्यशः ।
समग्रां वशगां कुर्य्यात् पृथिवीं नात्र संशयः ॥
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः ।
वनस्थाश्चैव राज्यानि विनयात् प्रतिपेदिरे ॥
त्रैविद्येभ्यस्त्रयीविद्यां दण्डनीतिञ्च शाश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः ॥
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ।
यजेत राजा क्रतुभिर्व्वहुभिश्चाप्तदक्षिणैः ।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च ॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् ।
स्यात् स्वाध्यायपरो लोके वर्त्तेत पितृवन्नृषु ॥
आवृत्तानां गुरुकुलात् द्विजानां पूजको भवेत् ।
नृपाणामक्षयो ह्येष विधिर्ब्राह्मो विधीयते ॥
ततः स्तेनानवामित्रा हरन्ति न च नश्यति ।
तस्माद्राज्ञा विधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥
समोत्तमाधमै राजा त्वाहूय पालयेत् प्रजाः ।
न निवर्त्तेत संग्रामात् क्षात्त्रव्रतमनुस्मरन् ॥
संग्रामेष्वनिवर्त्तित्वं प्रजानां परिपालनम् ।
शुश्रूषा ब्राह्मणानाञ्च राज्ञां निःश्रेयसं परम् ॥
कृपणानाथवृद्धानामातुराणाञ्च रोगिणाम् ।
योगक्षेमञ्च वृत्तिञ्च तथैव परिकल्पयेत् ॥
वर्णाश्रमव्यवस्थानं तथा कार्य्यं विशेषतः ।
स्वधर्म्मप्रच्युतान् राजा स्वधर्म्मे स्थापयेत्तथा ॥
आश्रमे च यथाकार्य्यं तैलभाजनभोजनम् ।
स्वयमेवानयेद्राजा सत्कृतान्नावमानयेत् ॥
तापसे सर्व्वकार्य्याणि राज्यमात्मानमेव च ।
निवेदयेत् प्रयत्नेन देववच्चिरमर्च्चयेत् ॥
द्वे प्रज्ञे वेदितव्ये च ऋज्वी वक्रा च मानवैः ।
वक्रां ज्ञात्वा न सेवेत प्रतिबाधेत चागताम् ॥
नास्य च्छिद्रं परो विद्यात् विद्याच्छिद्रं परस्य तु ।
गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥
विश्वासयेच्चाप्यपरं तत्त्वभूतेन हेतुना ।
वकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ॥
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ।
दृढ़प्रहारी च भवेत् तथा शूकरवन्नृपः ॥
चित्राकारश्च शिखिवद्दृढ़भक्तस्तथाश्ववत् ।
भवेच्च मधुराभाषी तथा कोकिलवन्नृपः ॥
काकशङ्की भवेन्नित्यं नाज्ञातवसतिं वसेत् ।
नापरीक्षितपूर्व्वञ्च भोजनं शयनं व्रजेत् ॥
वस्त्रं पुष्पमलङ्कारं यच्चान्यन्मनुजोत्तम ! ।
न गाहेज्जनसम्बाधं न चाज्ञातजलाशयम् ॥
अपरीक्षितपूर्व्वन्तु पुरुषैराप्तकारिभिः ।
नारोहेत् कुञ्जरं व्यालं न जातु तुरगं तथा ॥
नाविज्ञातस्त्रियं गच्छेत् नैव देवोत्सवे वसेत् ।
नरेन्द्रलक्ष्म्या धर्म्मस्य त्राता यत्तो भवेन्नृपः ।
सद्वृत्ताश्च तथा पुष्टा सततं प्रतिमानिताः ।
राज्ञा सहायाः कर्त्तव्याः पृथिवीं जेतुमिच्छता ।
यथार्हञ्चाप्य सुभृतान् राजा कर्म्मसु योजयेत् ।
धर्म्मिष्ठान् धर्म्मकार्य्येषु शूरान् संग्रामकर्म्मसु ॥
निपुणानर्थकृत्येषु सर्व्वत्र च तथा शुचीन् ।
स्त्रीषु षण्डान् नियुञ्जीत तीक्ष्णान् दारुणकर्म्मसु ।
धर्म्मे चार्थे च कामे च भये च रविनन्दन ।
राजा यथार्हञ्च कुर्य्यादुपधाभिः परीक्षणम् ॥
समतीतोपधान् भृत्यान् कुर्य्याद्धस्तिवनेचरान् ।
तत्पादान्वेषणे यत्नांस्तदध्यक्षांश्च कारयेत् ॥
एवमादीनि कर्म्माणि नृपैः कर्य्याणि भार्गव ।
सर्व्वथा नेष्यते राज्ञस्तीक्ष्णोपकरणक्रिया ॥
पापसाध्यानि कर्म्माणि यानि राज्ञां नृपोत्तम ।
सन्तस्तानि न कुर्व्वन्ति तस्मात्तान् विसृजन्नृपः ।
नेष्यते पृथिवीशानां तीक्ष्णोपकरणक्रिया ।
यस्मिन् कर्म्मणि यस्य स्यात् विशेषेण च कौश-
लम् ।
तस्मिन् कर्म्मणि तं राजा परीक्ष्य विनियोजयेत् ।
पितृपैतामहान् भृत्यान् सर्व्वकर्म्मसु योजयेत् ।
विना दायादकृत्येषु परीक्ष्य स्वकृतानरान् ।
नियुञ्जीत महाभाग तस्य ते हितकारिणः ॥
परराजगृहात् प्राप्त जनसंग्रहकाम्यया ।
दुष्टान् वाप्यथवादुष्टानाश्रयीत प्रयत्नतः ॥
दुष्टं विज्ञाय विश्वासं न कुर्य्यात्तत्र भूमिपः ।
वृत्तिं तस्यापि वर्त्तेत जनसंग्रहकाम्यया ॥
राजा देशान्तरं प्राप्तं पुरुषं पूजयेद्भृशम् ।
ममायं देशसंप्राप्तो बहुमानेन चिन्तितः ॥
तेषाञ्चारेण चारित्रं राजा विज्ञाय नित्यशः ।
गुणिनां पूजनं कुर्य्यात् निर्गुणानाञ्च शासनम् ॥
कथिताः सततं राजन् राजानश्चारचक्षुषः ।
स्वके देशे परे देशे ज्ञातशीलान् विचक्षणान् ॥
अनाहार्य्यान् क्लेशसहान् नियुञ्जीत सदा चरान् ।
जनस्याविदितान् सौम्यांस्तथाज्ञातान् परस्परम् ॥
वणिजो मन्त्रकुशलान् सांवत्सरचिकित्सकान् ।
तथा प्रव्रजिताकारान् चारान् राजा नियो-
जयेत् ॥
नैकस्य राजा श्रद्दध्यात् चारस्यापि च भाषिते ।
द्वयोः सम्बन्धमाज्ञाय श्रद्दध्यान्नृपतिस्ततः ॥
परस्परस्याविदितौ यदि स्यातां चरावुभौ ।
तस्माद्राजा प्रयत्नेन गूढ़ांश्चारान्नियोजयेत् ॥
राज्यस्य मूलमेतावत् या राज्ञश्चारदृष्टिता ।
चाराणामपि यत्नेन राज्ञा कार्य्यं परीक्षणम् ॥
विरज्यते तथा केन विज्ञेयं तन्महीक्षिता ।
अनुरागात् कथं लोके कर्म्म कार्य्यं महीक्षिता ॥
लोकरागापरागौ च भृत्यानाञ्च गुणागुणान् ।
सर्व्वं राज्ञां चरायत्तं तेषु यत्नपरो भवेत् ॥
कर्म्मणा केन मे लोके जनः सर्व्वोऽनुरज्यते ।
विरज्यते केन तथा विज्ञेयं तन्महीक्षिता ।
विरोधजनकं लोके वर्ज्जनीयं विशेषतः ॥

जनानुरागप्रभवा हि लक्ष्मी
राज्ञां मता भार्गववंशचन्द्र ।
तस्मात् प्रयत्नेन नरेन्द्रमुख्यैः
कार्य्योऽनुरागो भुवि मानवेषु ॥”

इति मात्स्ये २१५ अध्यायः ॥ * ॥

अपरञ्च ।

रामोवाच ।

“बहवो भूपतेर्धर्म्मास्तान् वक्तुं नहि शक्यते ।
तस्मात् समासतो वच्मि महाभाग निशामय ॥
पृथिवी वैष्णवी पुण्या सदा प्रियतमा हरेः ।
नारायणादृते नान्यो वसुमत्याः पतिर्भवेत् ॥
नारायणांशजो राजा मनुष्यो न कदाचन ।
अतस्तु दुर्नयं त्यक्त्वा सर्व्वां नीतिं समाचरेत् ॥
नीतिग्राही नृपो यस्तु विपत्तिर्नास्ति तस्य वै ।
चिरं भुनक्ति पृथिवीं कण्टकैः परिवर्ज्जितः ॥
यस्मै न रोचते नीतिर्भूपालाय दुरात्मने ।
भ्रष्टश्रीरचिरेणैव स भवेन्नात्र संशयः ॥
आयुर्व्वलं यशो वित्तं विजयं सुखमिच्छता ।
मन्त्रित्वे पण्डितो राज्ञा नियोज्यः सर्व्वदैव हि ॥
अवज्ञया महीभर्त्तुस्त्यजन्ति सदसीं बुधाः ।
सभायां बुधहीनायां नीतिर्व्वलवती न हि ॥
ततो नीतौ विपन्नायां सहसा धरणीपतेः ।
राजश्रियो विनश्यन्ति सकोषबलवाहनाः ॥
ब्राह्मणान् गणकांश्चैव वैद्यांश्च बान्धवांस्तथा ।
नृपाः कल्याणमिच्छन्तो न द्विषन्ति कदाचन ॥
गतश्रीर्गणकद्वेष्टा वैद्यद्वेष्टायुर्व्वर्ज्जितः ।
ज्ञातिद्वेष्टा निष्कुलः स्यात् द्विजद्वेष्टाखिलार्त्ति-
भाक् ॥
राजानः पितरः प्रोक्ताः पुत्रा जनपदास्तथा ।
अतो भूपाः पालयन्ति प्रजाः पुत्रानिवौरसान् ॥
पौरलोकवधूं राजा पश्येत् पुत्त्रवधूमिव ।
पौरलोके तथा कुर्य्यात् यथा स्नेहो निजात्मजे ॥
प्रजापीड़ाकरा ये च भूपाला अतिपापिनः ।
शिरस्था विपदस्तेषां विज्ञेया दीर्घदर्शिभिः ॥

विवेकिनो महीपालाः पालयन्ति यथा प्रजाः ।
तथा तानपि देवेशः पालयत्यनिशं हरिः ॥
प्रजानां पालनं दानं द्वेऽपि राज्ञो शुभावहे ।
द्वाभ्यां ये वर्ज्जिता भूपास्ते विज्ञेया नृपाधमाः ॥
दुष्टानां शासनञ्चैव शिष्टानां प्रतिपालनम् ।
प्रकुर्व्वन्तो महीपालाश्चिरं नन्दन्ति भूतले ॥
न्यायेनोपार्ज्जितं वित्तं यत्नाद्रक्षेन्महीपतिः ।
निर्व्वित्तो हि महीपालो विपत्त्यां न हि निस्त-
रेत् ॥
नृपाः कल्याणमिच्छन्तो निजराज्यशुभाशुभम् ।
पश्यन्ति नित्यं विप्रेन्द्र ! सत्वराश्चारचक्षुषः ॥
परचक्रभयं यावत् नायाति चिन्तयेद्भयम् ।
आगते तु भये भूप आचरेन्निर्भयो यथा ॥
ज्ञातौ वापि च मित्रे वा पुत्त्रे वापि च मन्त्रिणि ।
कुर्य्यान्मुखेन गाम्भीर्य्यं मनसा प्रेम केवलम् ॥
मन्त्रिणो ज्ञातयः पुत्त्राः प्रजाश्च भ्रातरस्तथा ।
गाम्भीर्य्यहीनं भूपालं मन्यन्ते न हि भूपवत् ॥
तिष्ठन्ति प्रथमं दूरे वसन्ति पुरतस्तदा ।
लोकाः श्रियं यदिच्छन्ति त्यक्तगाम्भीर्य्यभूपतेः ।
एकस्य मन्त्रिणो राज्ञा चिरं राजत्वमिच्छता ।
कर्त्तव्याः सकले राज्ये ह्रद्वयो नैव भूसुर ॥
अत्यन्तलब्धवृद्धीनां भृत्यानां सम्पदं हरेत् ।
तस्यां सम्पदि भूपालो भृत्यमन्यं नियोजयेत् ॥
मूर्खः स्त्रीविजितो राजा गीतवाद्यरतः सदा ।
चतुरङ्गबलैर्हीनः सहसा विपदं व्रजेत् ॥
आचारग्रहणं सत्त्वं स्ववाक्यप्रतिपालनम् ।
गाम्भीर्य्यञ्चेति भूपानां लक्षणानि द्विजोत्तम ! ॥
स कथं नृपतिर्यस्तु प्रतापेन विवर्ज्जितः ।
स कथं नृपतिर्येन न जिता परमेदिनी ॥
जितायां परमेदिन्यां यावत् पादं व्रजेन्नृपः ।
प्रतिपादेऽश्वमेधस्य फलं प्राप्नोति चाक्षयम् ॥
परभूमिजयाकाङ्क्षी हतो वा नृपतिर्युधि ।
तदा गच्छेत् परं धाम विमुक्तः सर्व्वपातकैः ॥
युधि प्राप्तजयो राजा प्राप्नोति परमं पदम् ।
स साहसप्राप्तवृद्धिर्वीन्द्रसम्पदं लभेत् ॥
व्यक्तसत्त्वं त्यक्तशस्त्रं पलायनपरायणम् ।
योद्धारं युधि यो हन्यात् स भूपो यात्यधो-
गतिम् ॥
पलायनपरो युद्धे तद्धन्ता च द्विजोत्तम ! ।
तावुभावपि तिष्ठेतां नरकेऽत्यन्तदुःसहे ॥
युधि साहसवान् योद्धा तद्धन्ता च महीसुर ।
तिष्ठेतां द्वावपि स्वर्गे यावच्चन्द्रदिवाकरौ ॥
बहुनात्र किमुक्तेन संक्षेपादुच्यते मया ।
प्रजापालनकृद्राजा कदाचिन्नावसीदति ॥"

इति पाद्मे क्रियायोगसारे २० अध्यायः ॥

राजनीलं, क्ली, मरकतमणिः । इति शब्दरत्ना-
वली ॥

राजन्यः, पुं, (राज्ञोऽपत्यमिति । राजन्+
"राजश्वशुराद् यत् ।" ४ । १ । १३७ । इति
यत् ।) क्षत्त्रियः । इत्यमरः ॥ (यथा, ऋग्वेदे ।
१० । ९० । १२ ।
"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥")
राजपुत्त्रः । (राजति दीप्यते इति । राज्+
"राजेरन्यः ।" उणा० ३।१०० । इति अन्यः ।)
अग्निः । इत्युणादिकोषः ॥ क्षीरिकावृक्षः ।
इति जटाधरः ॥

राजन्यकं, क्ली, (राजन्यानां क्षत्त्रियाणां समूहः ।
राजन्य + "गोत्रोक्षोष्ट्रोरभ्रराजराजन्येति ।"
४।२।३९। इति वुञ् ।) क्षत्त्रियसमूहः । इत्य-
मरः ॥ (यथा, रघुः । ७ । ५९ ।
"रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ।
निवारयामास महावराहः
कल्पक्षयोद्वृत्तमिवार्णवाम्भः ॥"* ॥
राजन्यानां विषये देशे च पुं । इति काशिका ॥
अत्र "राजन्यादिभ्यो वुञ् ।" ४ । २ । ५३ ।
इति वुञ्प्रत्ययः ॥)

राजन्वान्, त्रि, (राजास्त्यस्यास्मिन्निति वा । राजन्
+प्रशंसायां मतुप् । "राजन्वान् सौराज्ये ।"
८ । २ । १४ । इति निपातनात् नलोपाभावः ।)
सुराजयुक्तदेशः । इत्यमरः ॥ "प्रजापालनादि-
स्वधर्म्मपरायणराजयुक्ते देशे राजन्वात् राजा
विद्यतेऽस्येति मोक्षभूपादिति प्रशंसायां वतुः ।
यदुक्तं तन्त्रान्तरे ।
'भूम्नि निन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥' इति
स्वमते अस्त्यर्थे भमाद्यर्थौऽमी अर्था अर्थात्तु
लभ्यन्त एव । निपातनान्नलोपाभावः । न
सौराज्ये राज्ञो नस्य लुप्तनाविति परे । सुराज्ञि
स्वधर्म्मपरत्वात् शोभना राजानोऽत्रेति
नार्थायां स्वतेरिति अनिषेधः । देशो लोकोप-
लक्षणं सुराज्ञि लोके इत्यर्थः ।" इति तट्टीकायां
भरतः ॥ (यथा, रघुः । ६ । २२ ।
"कामं नृपाः सन्तु सहस्रशोऽन्ये
राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥")

राजपटोलः, पुं, (पटोलानां राजा । पर-
निपातः ।) मधुरपटोलः । इति रत्नमाला ॥

राजपटोली, स्त्री, (राजप्रिया पटोली ।) मधुर-
पटोली । इति राजनिर्घण्टः ॥

राजपट्टः, पुं, (राजप्रियः पट्ट इव ।) मणि-
विशेषः । तत्पर्य्यायः । विराटजः २ । इति
त्रिकाण्डशेषः ॥

राजपट्टिका, स्त्री, चातकपक्षी । इति हारा-
वली ॥

राजपथः, पुं, (राज्ञां पन्थाः । "ऋक्पूरब्धूःपथा-
मानक्षे ।" ५ । ४ । ७४ । इत्यः ।) राजमार्गः ।
तस्य लक्षणं यथा,—
"धनूंषि दश विस्तीर्णः श्रीमान् राजपथः स्मृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥"
इति देवीपुराणम् ॥
(यथा, कुमारसम्भवे । ७ । ६३ ।
"तावत्पताकाकुलमिन्दुमौलि-
रुत्तोरणं राजपथं प्रपेदे ॥")

राजपर्णी, स्त्री, प्रसारिणी लता । इति राज-
निर्घण्टः ॥

राजपलाण्डुः, पुं, (पलाण्डूनां राजा । राज-
दन्तादित्वात् परनिपातः ।) रक्तवर्णपलाण्डुः ।
लाल प्याँज इति भाषा ॥ तत्पर्य्यायः । जव-
नेष्टः २ नृपाह्वयः ३ राजप्रियः ४ महामूलः ५
दीर्घपत्रः ६ रोकः ७ नृपेष्टः ८ नृपकन्दः ९
महाकन्दः १० नृपप्रियः ११ रक्तकन्दः १२
राजेष्टः १३ । अस्य गुणाः । शिशिरत्वम् ।
पित्तकफनाशित्वम् । दीपनत्वम् । बहुनिद्राकर-
त्वञ्च । इति राजनिर्घण्टः ॥

राजपीलुः, पुं, (राजप्रियः पीलुः ।) महापीलु-
वृक्षः । इति राजनिर्घण्टः ॥

राजपुत्त्रः, पुं, (राज्ञश्चन्द्रस्य पुत्त्रः ।) बुधग्रहः ।
इति शब्दरत्नावली ॥ महाराजचूतः । इति
राजनिर्घण्टः ॥ वर्णसङ्करजातिविशेषः । रज-
पुत इति भाषा ॥ यथा,—
"वैश्यादम्बष्ठकन्यायां राजपुत्त्रस्य सम्भवः ॥"
इति पराशरपद्धतिः ॥
करणकन्यायां क्षत्त्रियाज्जातश्च । इति पुरा-
णम् ॥ राजनन्दनः । तत्पर्य्यायः । युवराजः २
कुमारः ३ भर्त्तृदारकः ४ । इत्यमरः ॥ (यथा,—
"राजपुत्त्र ! चिरं जीव माजीव मुनिपुत्त्रक ! ।
जीव वा मर वा साधो व्याध माजीव मा मर ॥"
इत्युद्भटः ॥)
तस्य रक्षणं यथा,—
"राजपुत्त्रस्य रक्षा च कर्त्तव्या पृथिवीक्षिता ।
आचार्य्यश्चास्य कर्त्तव्यं नित्ययुक्तैश्च रक्षकम् ॥
धर्म्मकामार्थशास्त्राणि धनुर्व्वेदञ्च शिक्षयेत् ।
रथे च कुञ्जरे चैनं व्यायामं कारयेत् सदा ॥
शिल्पानि शिक्षयेच्चैव नाप्तैर्मिथ्याप्रियं वदेत् ॥
गुणाधानमशक्यन्तु यस्य कर्त्तुं स्वभावतः ।
बन्धनं तस्य कर्त्तव्यं गुप्ते देशे सुखान्वितम् ॥
अविनीतकुमारं हि कुलमाशु विशीर्य्यते ।
अधिकारेषु सर्व्वेषु विनीतं हि नियोजयेत् ।
आदौ स्वल्पेषु ततपश्चात् क्रमेणाथ महत्स्वपि ॥
मृगयापानमक्षांश्च वर्ज्जयेत् पृथिवीपतिः ।
एतान्यासेवमानास्तु विनष्टाः पृथिवीक्षितः ॥
बहवो नृपशार्दूला येषां संख्या न विद्यते ॥
वृथाटनदिवास्वप्नं विशेषेण विवर्ज्जयेत् ।
वाक्पारुष्यं न कर्त्तव्यं दण्डपारुष्यमेव च ॥
परोक्षनिन्दा च तथा वर्ज्जनीया महीक्षिता ।
अर्थस्य दूषणं राजा द्विःप्रकारं विवर्ज्जयेत् ॥
अर्थानां दूषणञ्चैव तथा चार्थेषु दूषणम् ।
अकारणात् समुच्छेदं दुर्गादीनामसत्क्रिया ।
अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ।
अदेशकाले यद्दानमपात्रे दानमेव च ॥
अर्थस्य दूषणं प्रोक्तमसत्कर्म्मप्रवर्त्तनम् ।
कामं क्रोधं मदं मानं लोभं दर्पन्तथैव च ।
जेतव्यमरिषड्वर्गं सादरं पृथिवीक्षिता ॥

एतेषां विजयं कृत्वा कार्य्यं भृत्यजयं ततः ।
कृत्वा भृत्यजयं सर्व्वं राजा जनपदं जयेत् ॥
कृत्वा तु विजयं तेषां शत्रून् बाह्यांस्ततो जयेत् ।
बाह्याश्च त्रिविधा ज्ञेयास्तुल्याभ्यन्तरकृत्रिमाः ॥
गुरवस्ते यथापूर्व्वं तेषु यत्नपरो भवेत् ।
पितृपैतामहं मित्रममित्रञ्च तथा रिपोः ॥
कृत्रिमञ्च महाभाग मित्रं त्रिविधमुच्यते ।
तथापि च गुरुः पूर्व्वं भवेत्तत्रापि चाहतः ॥
स्वाम्यमात्यो जनपदो दुर्गं सैन्यन्तथैव च ।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्गं राज्यमुच्यते ॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः ।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः ।
षड़ङ्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः ॥
अङ्गेभ्यो यस्तथैकस्य द्रोहमाचरतेऽल्पधीः ।
वधस्तस्य तु कर्त्तव्यः शीघ्रमेव महीक्षिता ॥
न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते ।
न भाव्यं दारुणेनापि तीक्ष्णादुद्विजते जनः ॥
काले मृदुर्यो भवति काले भवति दारुणः ।
राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत् ॥
भृत्यैः सह महीपालः परिहासं विवर्ज्जयेत् ।
भृत्याः परिभवन्तीह नृपं हर्षवशं गतम् ॥
व्यसनानि च सर्व्वाणि भूपतिः परिवर्ज्जयेत् ।
लोकसंग्रहणार्थाय कृतकव्यसनो भवेत् ॥
शौटीरस्य नरेन्द्रस्य नित्यमुद्रिक्तचेतसः ।
जना विरागमायान्ति सदा दुःसेव्यभावतः ॥
स्मितपूर्व्वाभिभाषी स्यात् सर्व्वस्यैव महीपतिः ।
वध्येष्वपि महाभाग भ्रुकुटीं न समाचरेत् ॥
भाव्यं धर्म्मभृतां श्रेष्ठ स्थूललक्ष्येण भूभुजा ।
स्थूललक्ष्यस्य वशगा सर्व्वा भवति मेदिनी ॥
अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिवः ।
दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत् ॥
रागे दर्पे च माने च द्रोहे पापे च कर्म्मणि ।
अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते ॥
राज्ञा संवृतमन्त्रेण सदा भाव्यं द्विजोत्तम ।
तस्यासंवृतमन्त्रस्य ज्ञेयाः सर्व्वापदो ध्रुवाः ॥
कृतान्येव तु कर्म्माणि ज्ञायन्ते यस्य भूपतेः ।
नारब्धानि महाभाग तस्य स्यात् वसुधा वशे ॥
मन्त्रमूलं सदा राज्यं तस्मान्मन्त्रं सुरक्षितम् ।
कर्त्तव्यं पृथिवीपालैर्मन्त्रभेदभयात् सदा ॥
मन्त्रवित् साधितो मन्त्रः संयतानां सुखावहः ।
मन्त्रच्छलेन बहवो विनष्टाः पृथिवीक्षितः ॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥
नयस्य कुशलस्तस्य वशे सर्व्वा वसुन्धरा ।
भवतीह महीभर्त्तुः सदा पार्थिवनन्दन ॥
नैकस्तु मन्त्रयेन्मन्त्रं न राजा बहुभिः सह ।
नारोहेद्विषमां नावं नापरीक्षितनाविकाम् ॥
ये चास्य भूमिं जयतो भवेयुः परिपन्थिनः ।
तानानयेद्वशे सर्व्वान् सामादिभिरुपक्रमैः ॥
यथा न स्यात् कृशीभावः प्रजानामनपेक्षया ।
तथा राज्ञा प्रकर्त्तव्यं स्वराष्ट्रपरिरक्षता ॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनपेक्षया ।
सोऽचिराद्भ्रश्यते राज्यात् जीविताच्च सबान्धवः ॥
भृतो वत्सो जातबलः कर्म्मयोग्यो यथा भवेत् ।
तथा राष्ट्रं महाभाग भृतं कर्म्मसहं भवेत् ॥
यो राष्ट्रमनुगृह्णाति राज्यं स्वं परिरक्षति ।
संघातमुपयादेत्तु विन्दते स महत् फलम् ॥
राष्ट्राद्धिरण्यं धान्यञ्च महीं राजा सुरक्षिताम् ।
महता तु प्रयत्नेन स्वराष्ट्रस्य च रक्षिता ॥
नित्यं स्वेभ्यः परेभ्यश्च यथा माता यथा पिता ।
गोपितानि सदा कुर्य्यात् स विभागी प्रियाणि च ॥
अजस्रमुपयोक्तव्यं फलं तेभ्यस्तथैव च ।
धर्म्मकर्म्मेदमायत्तं विधाने दैवमानुषे ।
तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया ॥
एवं महीं पालयतोऽस्य भर्त्तु-
र्लोकानुरागः परमो भवेच्च ।
लोकानुरागप्रभवा च लक्ष्मी-
र्लक्ष्मीवतश्चैव परा च कीर्त्तिः ॥"
इति मात्स्ये २०० अध्यायः ॥

राजपुत्त्रिका, स्त्री, (राजपुत्त्री + संज्ञायां कन् ।) शरारिपक्षी । शराली इति भाषा ॥ यथा,—
"शरारिराटिराड़िश्च हापुत्त्री राजपुत्त्रिका ॥"
इति जटाधरः ॥
राजकन्या च ॥ (यथा, हरिवंशे । २५ । ४६ ।
"उत्पादयामास ततः पुत्त्रं वै राजपुत्त्रिका ॥")

राजपुत्त्री, स्त्री, (राज्ञः पुत्त्रीव ।) कटुतुम्बी । रेणुका । जाती । राजरीतिः । छुछुन्दरी । इति राजनिर्घण्टः ॥ मालती । यथा,—
"अतिमुक्तश्चाथ जातिर्मालती सुमना अपि ॥"
राजपुत्त्री मनोज्ञा——॥" इति जटाधरः ॥
राजकन्या च ॥ (यथा, महाभारते ।१।७३।१।
"सुव्यक्तं राजपुत्त्री त्वं यथा कल्याणि ! भाषसे ।
भार्य्या मे भव सुश्रोणि ! ब्रूहि किं करवाणि ते ॥")

राजपुष्पः, पुं, (पुष्पाणां राजा । राजदन्तादित्वात् परनिपातः ।) नागकेशरपुष्पवृक्षः । यथा,—
"चाम्पेयः केशरो नागकेशरः कनकाह्वयः ।
महौषधं राजपुष्पः फलकः स्वरघातनः ॥"
इति शब्दचन्द्रिका ॥

राजपुष्पी, स्त्री, (राजप्रियं पुष्पमस्याः । ङीप् ।) करुणीवृक्षः । इति राजनिर्घण्टः ॥

राजप्रिया, स्त्री, (राज्ञः प्रिया ।) करुणीवृक्षः । इति राजनिर्घण्टः ॥

राजफणिज्झकः, पुं, (राजते इति । राज् + अच् । राजो दीप्तिशाली फणिज्झकः ।) नागरङ्गवृक्षः । इति शब्दमाला ॥

राजफलं, क्ली, (राजाभिधेयं फलम् ।) पटोलम् । इति त्रिकाण्डशेषः ॥

राजफला, स्त्री, (राजप्रियं फलमस्याः ।) जम्बूः । इति राजनिर्घण्टः ॥

राजबदरं, क्ली, (राज्ञो बदरमिव प्रियत्वात् ।) रक्तामलकम् । लवणम् । इति मेदिनी ॥

राजबदरः, पुं, (बदराणां राजा । राजदन्तादित्वात् परनिपातः ।) उत्तमकोलिः । तत्पर्य्यायः । नृपश्रेष्ठः २ नृपबदरः ३ राजवल्लभः ४ पृथुकोलः ५ तनुबीजः ६ मधुरफलः ७ राजकोलः ८ । अस्य गुणाः । सुमधुरत्वम् । शिशिरत्वम् । दाहार्त्तिपित्तवातहरत्वम् । वृष्यत्वम् । वीर्य्यवृद्धिकरत्वत् । शोषश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

राजबीजी, [न्] त्रि, (राजा बीजी कारणं यस्य ।) राजवंश्यः । इत्यमरः । २ । ७ । २ ॥

राजभट्टिका, स्त्री, हापुत्त्रीपक्षी । यथा,—
"गोभक्षीरः पङ्ककीरो हापुत्त्री राजभट्टिका ॥"
इति जटाधरः ॥

राजभद्रकः, पुं, कुष्ठम् । निम्बः । इति राजनिर्घण्टः ॥ पारिभद्रकः । इति साधुपाठः ॥

राजभूयं, क्ली, (राज्ञो भावः । राजन् + भू + क्यप् ।) राजत्वम् । यथा,—
"स्यादृतत्त्वभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत् ।" इत्यमरकोषदर्शनात् ॥

राजभोग्यं, क्ली, (राज्ञा भोक्तुं योग्यम् । भुज् + ण्यत् । कुत्वञ्च ।) जातीकोषम् । प्रियालवृक्षे, पुं । इति शब्दचन्द्रिका ॥

राजमण्डूकः, पुं, (मण्डूकानां राजा । राजदन्तादित्वात् परनिपातः ।) हृहङ्कः । बड़ बेङ् इति भाषा । तत्पर्य्यायः । महामण्डूकः २ पीताङ्गः ३ पीतमण्डूकः ४ वर्षाघोषः ५ महारवः ६ । इति राजनिर्घण्टः ॥

राजमल्लः, पुं, राज्ञां मल्लः । राजार माल् इति भाषा । तत्पर्य्यायः । उत्क्षिप्तः २ उद्धतः ३ । इति त्रिकाण्डशेषः ॥

राजमार्गः, पुं, (राज्ञो मार्गः ।) राजपथः । तद्विवरणं यथा,—
"राजमार्गं सौधयुक्तं यः करोति पतिव्रते ।
वर्षाणामयुतं सोऽपि शक्रलोके महीयते ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ॥
अपि च ।
"त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः ।
विंशं धनुर्ग्राममार्गः सीमामार्गो दशैव तु ॥
धनूंषि दश विस्तीर्णः श्रीमान् राजपथः कृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ।
त्रिकरास्चोपरथ्यास्तु द्विकराप्युपरथ्यका ॥
जङ्घापथश्चतुष्पादस्त्रिपादश्च गृहान्तरम् ।
वृतीपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः ।
अवकरः परिवारः पादमात्रः समन्ततः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणं नामाध्यायः ॥
(अत्रामेध्योत्सर्गे दण्डविधानं कर्त्तव्यम् । यथा, मनुः । ९ । २८२ ।
"समुत्सृजेत् राजमार्गे यस्त्वमेध्यमनापदि ।
स द्वौ कार्षापणौ दद्यादमेध्याञ्चाशु शोधयेत् ॥"
नीतिः । यथा, हरिवंशे भविष्यपर्व्वणि । ५४ । २ ।

"ज्ञानविज्ञानसम्पन्नौ राजमार्गविशारदौ ।
शुशुभाते महारङ्गे राक्षसेन दुरात्मना ॥")

राजमाषः, पुं, (माषाणां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) वर्व्वटः । वरवटी कड़ाइ इति भाषा । तत्पर्य्यायः । नीलमाषः २ नृपमाषः ३ नृपोचितः ४ । अस्य गुणाः । कफपित्तहरत्वम् । रुच्यत्वम् । वातकारित्वम् । बलदायकत्वञ्च । इति राजनिर्घण्टः ॥ सारकत्वम् । शुक्राम्लपित्तहरत्वम् । सुस्वादुत्वम् । रूक्षत्वम् । कषायत्वम् । विषदत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ अन्यच्च ।

"राजमाषो महामाषश्चपलश्च बलः स्मृतः ।
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणो रसः ।
रूक्षो वातकरो रुच्यः स्तन्यो भूरिमलप्रदः ॥"
इति भावप्रकाशः ॥ * ॥

कालविशेषे अस्याभक्ष्यत्वं यथा । नारदीये ।
"निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने ।
यो भक्षयति राजेन्द्र चाण्डालादधिको हि सः ॥
कार्त्तिके तु विशेषेण राजमाषांश्च वर्ज्जयेत् ।
निष्पावान् मुनिशार्द्दूल यावदाभूतनारकी ॥"
इति तिथ्यादितत्त्वम् ॥

राजमुद्गः, पुं, (मुद्गानां राजा । राजदन्तादित्वात् परनिपातः ।) मकुष्टकः । इति हेमचन्द्रः । ४ । २४० ॥

राजयक्ष्मा, [न्] पुं, (राज्ञश्चन्द्रस्य क्षयकारको यक्ष्मा । राजा चासौ यक्ष्मा चेति वा ।) क्षयरोगः । इति हेमचन्द्रः ॥ अस्य पर्य्यायनिदानौषधादयो यक्ष्मशब्दे द्रष्टव्याः ॥ * ॥ (असौ हि सर्व्वरोगाणामाकरः । यथा, माघे । २ । ९६ ।
"मावेदि यदसावेको जेतव्यश्चेदिराडिति ।
राजयक्ष्मेव रोगाणां समूहः स महीभृताम् ॥"
"तथाह वाग्भटः ।
अनेकरोगानुगतो बहुरोगपुरःसरः ।
राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः ॥
नक्षत्राणां द्विजानाञ्च राज्ञोऽभूत् यदयं पुरा ।
यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः ॥"
इति तट्टीकायां मल्लिनाथः ।)
महापातकजचिह्नमध्यवम् । यथा, विष्णुः । अथ नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्ये लक्षणानि भवन्ति । कुष्ठातिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः सुवर्णहारी कुनखी गुरुतल्पगो दुश्चर्म्मा । इत्यादि कूर्म्मपुराणम् ॥
"क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥"
महारोगिणः पापरोगाष्टकान्यतमरोगवतः । ते च उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः । इति शुद्धितत्त्वम् ॥ * ॥ तस्योत्पत्तिरूपस्थानानि यथा,—
"अथ कोपवतस्तस्य दक्षस्य सुमहात्मनः ।
निश्चक्राम तदा यक्ष्मा नासिकाग्रादतिभीषणः ॥
दंष्ट्राकरालवदनः कृष्णाङ्गारसमप्रभः ।
अतिदीर्घः स्वल्पकेशः कृशो धमनिसन्ततः ॥
अधोमुखो दण्डहस्तः कासं विश्रम्य सन्ततम् ।
कुर्व्वाणो निम्ननेत्रश्च योषासम्भोगलोलुपः ॥
स चोवाच तदा दक्षं कुत्र स्थास्याम्यहं मुने ।
किंवा चाहं करिष्यामि तन्मे वद महामते ॥
ततो दक्षस्तु तं प्राह सोमं यातु द्रुतं भवान् ।
सोममत्तु भवान्नित्यं सोमे त्वं तिष्ठ स्वेच्छया ॥
मार्कण्डेय उवाच ।
इति तस्य वचः श्रुत्वा दक्षस्याथ महात्मनः ।
शनैः शनैस्ततः सोममाससाद स च द्रुतम् ॥
आसाद्य स तदा सोमं वल्मीकं पन्नगो यथा ।
प्रविवेशेन्दुहृदये छिद्रं प्राप्य महागदः ॥
तस्मिन् प्रविष्टे हृदये दारुणे राजयक्ष्मणि ।
शुशोच चन्द्रस्तन्द्रीञ्च विषमां प्राप्तवांस्ततः ॥
उत्पत्य प्रथमं यस्माल्लीनो राजन्यसौ गदः ।
राजयक्ष्मेति लोकेऽस्मिंस्तस्य ख्यातिरभूत्
द्विजाः ॥
ततस्तेनाभिभूतश्च यक्ष्मणा रोहिणीपतिः ।
क्षयं जगामानुदिनं ग्रीष्मे शुष्का नदी यथा ॥
तथा चन्द्रे क्षीयमाणे सर्व्वौषध्यः क्षयं गताः ।
क्षयं जातास्त्वोषधीषु न यज्ञः संप्रवर्त्तते ॥
यज्ञाभावात्तु देवानामन्नं सर्व्वं क्षयं गतम् ।
पर्य्यण्याश्च ततो नष्टास्तनो वृष्टिर्न चाभवत् ।
वृष्ट्यभावे तु लोकानामाहारो क्षीणताङ्गतः ॥
दुर्भिक्षव्यसनोपेते सर्व्वलोके द्विजोत्तमाः ।
दानधर्म्मादिकं किञ्चिन्न लोकेषु प्रवर्त्तते ॥
सत्त्वहीनाः प्रजाः सर्व्वा लोभेनोपहतेन्द्रियाः ।
पापमेव तदा चक्रुर्न धर्म्मञ्चयस्तथा ॥
एतद्दृष्ट्वा तदा भावं दिक्पालाः सपुरन्दराः ।
जग्मुः क्षोभं परं देवाः सागराश्च ग्रहास्तथा ॥
ततो दृष्ट्वा जगत् सर्व्वं व्याकुलं दस्युपीड़ितम् ।
ब्रह्माणमगमन्देवाः सर्व्वे शक्रपुरोगमाः ॥
उपसङ्गम्य लोकेशं स्रष्टारं जगतां पतिम् ।
प्रणम्याथ यथायोग्यमुपविष्टास्ततः सुराः ॥
तान् म्लानवदनान् वीक्ष्य ब्रह्मा लोकपितामहः ।
अभिभूतान् परेणेव हृतस्वविषयानिव ।
पप्रच्छ सुसुखीकृत्य गुरुमिन्द्रं हुताशनम् ॥
ब्रह्मोवाच ।
स्वागतं भोः सुरगणाः किमर्थं यूयमागताः ।
दुःखोपहतदेहांश्च युष्मान् म्लानांश्च लक्षये
निराधारान् निरातङ्कान् सुरान् सर्व्वांस्तु
कामगान् ।
कृत्वा स्वविषये न्यस्तान् कथं पश्यामि दुःखितान् ॥
यद्भूयं दुःखबीजं युष्मान् वा यस्तु बाधते ।
तत् कथ्यतामशेषेण सिद्धिं चाप्यवधार्य्यताम् ॥
मार्कण्डेय उवाच ।
ततो वृहस्पतिदा जीवः कृष्णवर्त्मा च लोककृत् ।
उवाचात्मभुवे तस्मै सुराणां दुःखकारणम् ॥
शृणु सर्व्वं जगत्कर्त्तस्त्वं येन वयमागताः ।
यदस्माकं दुःखबीजं यतो म्लानश्रियो वयम् ।
न कश्चित् संप्रवर्त्तन्ते यज्ञा लोकपितामह ॥
देवा ऊचुः ।
निराधारा निरातङ्काः प्रजाः सर्व्वाः क्षयं
गताः ।
न च दानादिधर्म्माश्च न तपांसि क्षितौ क्वचित् ॥
नैव वर्षति पर्ज्जन्यः क्षीणतोयाभवन् क्षितिः ।
क्षीणाः सर्व्वास्तथौषध्यः शस्या लोकाः समा-
कुलाः ॥
दस्युभिः पीड़िता विप्रा वेदवादान्न कुर्व्वते ।
अन्नवैकल्यमासाद्य म्रियन्ते बहवः प्रजाः ॥
क्षीणेषु यज्ञभागेषु भोगहीनास्तथा वयम् ।
दुर्व्वलाश्च श्रिया हीना नैव शान्तिं लभामहे ॥
रोहिण्या मन्दिरे चन्द्रो वक्रगत्या चिरं स्थितः ।
वृषराशौ स च क्षीणो ज्योत्स्नाहीनश्च वर्त्तते ॥
यद्देवान्विष्यते देवैश्चन्द्रो नैषां पुरःसरः ।
कदाचिदपि देवानां समाजे वा भवद्विधे ॥
कदाचिद्रोहिणीं त्यक्ता नैव क्व च न गच्छति ।
यद्यन्यः कोऽपि न भवेत्तदा चन्द्रो बहिर्भवेत् ।
दृश्यते स कलाहीनः कलामात्रावशेषितः ॥
इति सर्व्वत्र लोकेश दृष्टः कर्म्मविपर्य्ययः ।
तं दृष्ट्वा कान्दिशीकास्तु वयं त्वां शरणं गताः ॥
पातालादुत्थायोत्थाय कालकञ्जादयोऽसुराः ।
नाशान् लोकेषु बाधन्ते तावन्नः पाहि साध्व-
सात् ॥
स्वयं प्रवर्त्तते कस्माज्जगतां वा व्यतिक्रमः ।
न जानीमस्तु तत् सर्व्वं विप्लवे चापि कारणम् ॥
मार्कण्डेय उवाच ।
एतत् सुराणां वचनं दिव्यदर्शी पितामहः ।
श्रुत्वा क्षणमभिध्याय निजगाद सुरोत्तमान् ॥
ब्रह्मोवाच ।
शृण्वन्तु देवताः सर्व्वा यदर्थं लोकविप्लवः ।
प्रवर्त्ततेऽधुना येन शान्तिस्तस्य भविष्यति ॥
सोमो दाक्षायणीः कन्याः सप्तविंशतिसंख्यया ।
अश्विन्याद्या वरवधूर्भार्य्यार्थे परिणीतवान् ॥
परिणीय स ताः सर्व्वा रोहिण्यां सततं विधुः ।
प्रवर्त्ततानुरागेण न सर्व्वासु प्रवर्त्तते ॥
अश्विन्याद्यास्ततः सर्व्वा दौर्भाग्यज्वरपीड़िताः ।
षड्विंशतिर्वरारोहाः पितरं प्रस्थिताः स्वकम् ॥
प्रवर्त्तते निशानाथो रोहिण्यां रागतो यथा ।
तथा न तासु भजते तद्दक्षाय न्यवेदयन् ॥
अतो दक्षो महाबुद्धिः साम्ना संस्तूय विट्-
पतिम् ।
बहुसूनृतमाभाष्य पुत्र्यर्थेऽनुरुरोध तम् ॥
अनुरुद्धो यथाकामं दक्षेण सुमहात्मना ।
समं प्रवर्त्तितं तासु समयं कृतवान् विधुः ॥
सममङ्गीकृते भावं तासु कर्त्तुं हिमांशुना ।
स्वं जगाम ततः स्थानं दक्षोऽपि मुनिसत्तमः ॥
गते दक्षे मुनिश्रेष्ठे वैषम्यं तासु चन्द्रमाः ।
जहौ न भावं ताः शश्वत् कुपिताः पितरं
गताः ॥
ततो दक्षः पुनश्चन्द्रमनुरुध्य सुतान्तरे ।

समवृत्तिं प्रतिश्राव्य वचनञ्चेदमब्रवीत् ॥
न समं वर्त्तते चन्द्र सर्व्वास्वासु भवान् यदि ।
तदा शप्स्ये त्वहं तुभ्यं तस्मात् कुरु समत्व-
सम् ॥
ततो गते पुनर्द्दक्षे न समं वर्त्तते यदा ।
तासु चन्द्रस्तदा दक्षं पुनर्गत्वाब्रुवन् रुषा ॥
न ते वचः स कुरुते नैवास्मासु प्रवर्त्तते ।
वयं तपः करिष्यामः स्थास्यामश्च त्वदन्तिके ॥
तासामिति वचः श्रुत्वा कुपितस्य तदा मुनेः ।
क्षयाय चन्द्रस्य मनः शापायोत्सुकतां गतम् ॥
शापायोद्युक्तमनसः कुपितस्य महात्मनः ।
क्षयो नाम महारोगो नासिकाग्रादिनिर्गतः ॥
प्रेषितः स च चन्द्राय दक्षेण मुनिना ततः ।
प्रविष्टवांस्तस्य देहे क्षयितस्तेन चन्द्रमाः ॥
क्षीणे चन्द्रे क्षयं याता ज्योत्स्ना तस्य महा-
त्मनः ।
क्षीणासु सर्व्वज्योत्स्नासु सर्व्वौषध्यः क्षयं गताः ॥
ओषध्यभावाल्लोकेऽस्मिन् यज्ञः संप्रवर्त्तते ।
यज्ञाभावादनावृष्टिस्ततः सर्व्वप्रजाक्षयः ॥
यज्ञभागोपभोगेन हीनानां भवतां तथा ।
दुर्व्वलत्वं समुत्पन्नं विकारश्च खगोचरे ॥
इति वः कथितं सर्व्वं यथाभूल्लोकविप्लवः ।
येनोपायेन तच्छान्तिस्तत्कृणुध्वं सुरोत्तमाः ॥”
इति कालिकापुराणे २० अध्यायः ॥ * ॥
ब्रह्मोवाच ।
“गच्छन्तु भोः सुरगणा दक्षस्य सदनं प्रति ।
तं प्रसाद्य चन्द्रार्थे स च पूर्णो भवेद्यथा ॥
पूर्णे चन्द्रे जगत् सर्व्वं प्रकृतिस्थं भविष्यति ।
युष्माकञ्च भवेत् शान्तिरोषधीनाञ्च सम्भवः ॥
मार्कण्डेय उवाच ।
इति ब्रह्मवचः श्रुत्वा देवाः शक्रपुरोगमाः ।
प्रययुर्हृष्टमनसस्तदा दक्षनिवेशनम् ॥
यथान्यायमुपस्थाय सर्व्वे मुनिवरं सुराः ।
प्रोचुः प्रजापतिं दक्षं प्रणम्य श्लक्ष्णया गिरा ॥
देवा ऊचुः ।
प्रसीद सीदतां ब्रह्मन्नस्माकं बहुदुःखिनाम् ।
उद्धरस्व महाबुद्धे त्राहि नः शोकसागरात् ॥
यद्रूपं ब्रह्मसंज्ञन्तु स्थितिहृत्परमात्मनः ।
तदंशस्त्वं परं ज्योतिर्विश्वरूपं गतोऽसि ते ॥
दक्षत्वात् सर्व्वजगतां प्रजापालनकारणात् ।
दक्षप्रजापतिश्चेति योगेशस्त्वन्नुमो वयम् ॥
दक्षाय सर्व्वजगतां दक्षाय कुशलात्मनाम् ।
दक्षायात्महितायाशु नमस्तुभ्यं महात्मने ॥
सततं चिन्त्यमानस्य योगिभिर्नियतात्मभिः ।
सारस्य सारभूतस्त्वं दक्षाय परमात्मने ॥
योगविद्भिरनाद्यन्तः पारगाणां परायणः ।
आद्यन्तमुक्तः सहसा तस्मै नित्यं नमो नमः ॥
इति तेषां वचः श्रुत्वा दक्षो यज्ञभुजां तदा ।
प्राह प्रसन्नवदनः शक्रमाभाष्य सुस्वतः ॥
दक्ष उवाच ।
कुतः शक्र महाभाग भवतां दुःखमागतम् ।
दुःखहेतुं वद विभो श्रोतुमिच्छाम्यहन्तु तम् ॥
ममास्ति यदि कर्त्तव्यं भवतां दुःखहानये ।
तदहं यदि शक्नोमि करिष्यामि हितं समम् ॥
मार्कण्डेय उवाच ।
तत् श्रुत्वा वचनं तस्य ब्रह्मसूनोर्महर्षिणः ।
जगाद शौच्यपतिः शक्रो वीतिहोत्रोऽथ तं
मुनिम् ॥
क्षयं यातो निशानाथस्तस्मिन् क्षीणे क्षयं गताः ।
सर्व्वौषध्यो द्विजश्रेष्ठ तद्धानिर्यज्ञहानिकृत् ॥
यज्ञे विनष्टे सकलाः प्रजाः क्षुद्भयकातराः ।
हव्याभावान्महद्दुःखं प्राप्य नष्टाश्च काश्चन ॥
क्षयोऽयं रात्रिनाथस्य यस्ते कोपात् प्रवर्त्तते ।
स सर्व्वजगतो ब्रह्मन्नभवायैमुपस्थितः ॥
नाधुना तत्त्रिभुवने यज्ञ सुष्यन्तु किञ्चन ।
विप्लवं यान्ति विप्रेन्द्र सागराः स्थावराश्चराः ॥
न यज्ञाः संप्रवर्त्तन्ते न तपस्यन्ति तापसाः ।
आहारदुःखान्निःश्रीकाः प्रजाः क्षीणा भया-
तुराः ॥
एवं प्रवृत्ते विप्रेन्द्र विप्लवेऽस्मान् रसातलात् ।
दैत्या न यावदुत्थाय बाधन्ते तावदुद्धर ॥
प्रसीद दक्ष सततं तं पूरय तपोबलात् ।
पूर्णे चन्द्रे जगत् सर्व्वं प्रकृतिस्थं भविष्यति ॥
मार्कण्डेय उवाच ।
इति तेषां वचः श्रुत्वा प्रजापतिसुतस्तदा ।
उवाच तान् सुरगणान् हृदयाच्छल्यमुद्धरन् ॥
दक्ष उवाच ।
यन्मे वचो निशानाथे प्रवृत्तं शापकारणम् ।
न केनापि निदानेन मिथ्या कर्त्तुं तदुत्सहे ॥
किन्तु मद्वचनं यस्मान्नैकान्तेन मृषा भवेत् ।
चन्द्रोऽपि वर्द्धते यस्मात् तमुपायमपेक्षते ॥
तत्राप्ययमुपायोऽस्ति मासार्द्धं यातु चन्द्रमाः ।
क्षयं हर्हिश्च मासार्द्धं स्वयं भार्य्यासु वर्द्धताम् ॥
तस्य तद्वचनं श्रुत्वा तं प्रसाद्य प्रजापतिम् ।
सर्व्वे सुरगणास्तत्र गता यत्रास्ति चन्द्रमाः ॥
एवमुक्ते तु वचने दक्षेण मुनिना द्विजाः ।
अथ चन्द्रं समादाय भार्य्याभिः सहितं तदा ।
अगमन् ब्रह्मसदनं मुदिताः सुरसत्तमाः ॥
तत्र गत्वा महाभागा यथा दक्षेण भाषितम् ।
तत्सर्व्वं कथयामासुर्ब्रह्मणे परमात्मने ॥
ब्रह्मा दक्षवचः श्रुत्वा देवानां सदनं तदा ।
चन्द्रभागं महाशैलं जगाम सहितः सुरैः ॥
तत्र गत्वा सुरश्रेष्ठः प्रजानां हितकाम्यया ।
स्नापयामास शुभ्रांशुं वृहल्लोहितपुष्करे ॥
भूतभव्यभवज्ज्ञानः पूर्व्वमेव पितामहः ।
एतदर्थं चकारात्र सरः पूर्णं जगत्प्रभुः ॥
तत्र स्नातस्य लोकस्य नीरोगत्वं प्रजायते ।
चिरायुस्त्वञ्च सततं वृहल्लोहितसंज्ञके ॥
तत्र स्नातस्य चन्द्रस्य शरीरात् तत्क्षणं गदः ।
राजयक्ष्मा निःससार पूर्व्वरूपो यथोदितः ॥
निःसृत्य राजयक्ष्मा तु ब्रह्माणञ्च जगत्पतिम् ।
प्रणम्याहं किं करिष्ये क्व गच्छामीत्युवाच ह ॥
स्थानं पश्चोत्र लोकेश ! कृत्यं मम सदातनम् ।
निर्देशयानुरूपं मे स्रष्टा त्वं जगतां यतः ॥
मार्कण्डेय उवाच ।
ततो ब्रह्मापि तं दृष्ट्वं निरीक्ष्येन्दुशरीरगैः ।
अमृतैस्तेनातिभुक्तैः क्षीणञ्चापि निशापतिम् ॥
दोर्भिः स्वयं तं गृहीत्वा गिरौ निष्पिष्य वै
मुहुः ।
अमृतं गालयामास शरीराद्राजयक्ष्मणः ॥
अमृतानि च गाल्याशु तदपूतं तदा जले ।
क्षीरोदस्य च चिक्षेप मध्ये रहसि लोकभृत् ॥
तस्मादप्यमृतादिन्दोः कलाः क्षीणाः पुराश्च
याः ।
तासां जग्राह लवशश्चूर्णान् क्षीरोदसागरात् ॥
कलामात्रावशेषस्य संसर्गाद्राजयक्ष्मणः ।
क्षीणाः कलाः पञ्चदश याः पूर्व्वममृतात्मिकाः ।
ता राजयक्ष्मगर्भस्थाश्चूर्णीभूतास्तु पीड़या ॥
तेजोज्योत्स्नाकलाभिस्तु निबद्धं यत् कला-
पतेः ।
शरीरं तत्त्रिधाभूतं गर्भस्थं राजयक्ष्मणः ॥
ज्योतिश्चूर्णमभूत् ज्योत्स्ना लीना राजादि-
यक्ष्मणि ।
द्रवीभूताः सुधाः सर्व्वा गर्भे रोगस्य च स्थिताः ॥
यदा निर्गालयामास सुधां ब्रह्मा गदान्तरात् ।
तदा ज्योत्स्ना सुधा ज्योतिः सर्व्वं तस्माद्-
बहिर्गतम् ॥
क्षीरोदसागरे क्षिप्तं तत्सर्व्वं विधिना तदा ।
देवान् गिरौ परित्यज्य स्वयं गत्वा द्रुतं ततः ॥
ततोऽमृतानि प्रक्षाल्य कलाचूर्णानि वारिधेः ।
ज्योत्स्नाञ्चाप्याजगामाशु गृहीत्वा तत्त्रयं
गिरिम् ॥
क्षीरोदाद्गिरिमागम्य चन्द्रभागं तदा विधिः ।
देवमध्ये कलाचूर्णं सुधां ज्योत्स्नां न्यवीविशत् ॥
संस्थाप्य तत्त्रयं ब्रह्मा देवानां मध्यतस्ततः ।
जगाद राजयक्ष्माणं तत्स्थानादि निर्देशयन् ॥
ब्रह्मोवाच ।
सर्व्वदा यो दिवा रात्रौ सन्ध्यायां वनितारतः ।
सेवते सुरतं तस्मिन् राजयक्ष्मन् वसिष्यसि ॥
प्रतिश्यायश्वासकासयुक्तो यो मैथुनं चरेत् ।
स ते प्रवेश्यः सततं श्लेष्मणश्च तथाविधः ॥
कृष्णाख्या मृत्युपुत्री या भवतः सदृशी गुणैः ।
सा तेऽस्तु भार्य्या सततं भवन्तमनुयास्यति ॥
क्षीणत्वं भवतः कृत्यं तत्त्वं विषये कुरु ।
द्रुतं गच्छ यथाकामं चन्द्रे त्वं विमुखो भव ॥
मार्कण्डेय उवाच ।
एवं विसृष्टो विधिना राजयक्ष्मा महागदः ।
पश्यतां सर्व्वदेवानामन्तर्द्धानं जगाम ह ॥
अन्तर्हिते महारोगे ब्रह्मा लोकपितामहः ।
चन्द्रं समग्रयामास कलापञ्चदशोधितम् ॥
तेन क्षीरोदधौतेन सुधापूगेन चात्मभूः ।
सज्योत्स्नैस्तु कलाचूर्णैः पूर्व्ववच्चाकरोद्विधुम् ॥
स षोड़शकलापूर्णः पूर्व्ववद्विबभौ यदा ।
चन्द्रस्तदा सर्व्वदेवा मुमुदुस्तस्य दर्शनात् ॥
अथ चन्द्रस्तदा पूर्णः प्रणिपत्य पितामहम् ।
उवाचेदं सुरसदो मध्यगो नातिहर्षितः ॥

सोम उवाच ।
न स्थानं पूर्ववद्ब्रह्मन् शरीरे मम वर्त्तते ।
न वीर्य्यं वा तथोत्साहो विसीदन्त्यङ्गसन्धय: ॥
नोत्सहे पूर्ववच्चेष्टां विधातुं सुतरामहम् ।
चेष्टाहीनस्त्वनुदिनं वर्त्तयं केन लोकभृत् ॥
ब्रह्मोवाच ।
यस्तस्य यक्ष्मणा सोम यदभूदङ्गसन्धय: ।
पूर्व्वं विशीर्णा भवतस्तत्पूर्णमभवन्न हि ॥
अधुना भवतो देहपूर्णं नि:सारितं मया ।
शरीरात् चान्दनज्योत्स्ना अञ्जसा राजयक्ष्मण: ॥
तेषां प्रक्षालनविधौ लवणो यत् स्थितं जले ।
ज्योत्स्नायाश्च सुधायाश्च तेन हीनो भवान् यत: ।
ततोऽङ्गसन्धयो राजंस्तव सीदन्ति साम्प्रतम् ॥
अत्रोपायं विधास्यामि यथा शान्तिं लभेद्भवान् ।
प्राजापत्य: पुरोडाशो हवनीय: पुरोऽध्वरे ॥
ऐन्द्रस्ततोऽनु चाग्नेय: प्रदेय: सर्व्वत: क्रतौ ।
ततोऽनु भवतो भाग: पुरोडाशो मया कृत: ॥
तेन भागेन भुक्तेन नित्यं यज्ञहुतेन हि ।
पूर्व्ववत्ते समुत्साह: स्थानं वीर्य्यं भविष्यति ॥
यच्चाम्तनकणास्तोये क्षीरोदस्य स्थितास्तव ।
शरीरचूर्णं यावत्ते ज्योत्स्नायाश्चापि ये कणा: ।
वृद्धिं यास्यन्ति सततं क्षीरसागरमध्यगा: ॥
स्वारोचिषेऽन्तरे प्राप्ते द्वितीये शङ्करांशज: ।
दुर्व्वासा भविता विप्र: प्रचण्डश्चण्डभास्कर: ॥
स महेन्द्रस्याविनयात् शापं दत्त्वा सुदारुणम् ।
करिष्यति त्रिभुवनं नि:श्रीकं ससुरासुरम् ॥
श्रिया हीने ततो लोके भविता लोकविप्लव: ।
यथा तव क्षयात् सोम प्रवृत्तो लोकविप्लव: ॥
तस्मात्तुषप्रमाणेन तृतीये तु कृते युगे ।
भविष्यति स्थास्यति च यावद्युगचतुष्टयम् ॥
ततश्चतुर्थे सम्प्राप्ते सह देवै: कृते युगे ।
क्षीरोदं निर्म्मथिष्याम: शम्भुर्विष्णुरहं तथा ॥
मन्थानं मन्दरं कृत्वा सर्पराजं तथांशुकम् ॥
यज्ञभागेषु हीनेषु देवानार्थे वयं तत: ।
मथिष्याम: समं देवै: क्षीरोदं सह दानवै: ।
त्वच्छरीरामृतमिदं यत् स्थितं क्षीरसागरे ॥
तत्प्रमथ्य ग्रहीष्यामो राशीभूतं तथाक्षयम् ।
सर्व्वौषध्यन्तरे कृत्वा त्वच्छरीरं तदा वयम् ।
क्षेप्स्याम: सागरजले शरीरार्थं विधो तव ॥
निर्म्मथ्य सागरं पश्चात् समुद्धार्य्य यदामृतम् ।
तदा तव वपुस्तस्मिन्नपूर्व्वं सम्भविष्यति ॥
ओजो वीर्य्यांशुकं कान्तमक्षयञ्च सुधात्मकम् ।
दृढाङ्गसन्धिकं चारु भविष्यति वपुस्तव ॥
मार्कण्डेय उवाच ।
सुधांशुमेवमाभाष्य ब्रह्मा लोकपितामह: ।
विधो: क्षयाय मासार्द्धं वृद्धये यत्नवानभूत् ॥
यथा दक्षेण गदितं मासार्द्धं यातु चन्द्रमा: ।
क्षयं वृद्धिञ्च मासार्द्धं यत्नं तत्राकरोद्विधि: ॥
यत: षोड़शधा चन्द्रं सुरज्येष्ठो विभक्तवान् ।
विभज्य च सुरान् सर्व्वान् समुवाचेदमद्भुतम् ॥
कला: षोड़श चन्द्रस्य तत्रैका शम्भुमूर्द्धनि ।
तिष्ठत्वद्यावधि परा: क्षयं यान्तु क्षयं विना ॥
क्षयेण यदि रोगेण मासार्द्धं दक्षवाक्यत: ।
क्षयाय पीड्यते चन्द्रो नोपशान्ति: सदा भवेत् ॥
किन्त्वस्य या कला शम्भौ ज्योत्स्ना गच्छन्तु तां प्रति ।
चतुर्द्दशकलासंस्था: प्रतिमासं सुरोत्तमा: ॥
चतुर्द्दशकलासंस्थान्यमृतानि पिबन्तु वै ।
प्रतिपत्तिथिमारभ्य भवन्तस्त्वाचतुर्द्दशीम् ॥
तेजोभागा: सूर्य्यबिम्बं चतुर्द्दशतिथौ क्रमात् ।
प्रविशन्तु क्षयं त्वेवं कृष्णपक्षे विधोर्भवेत् ॥
यातु शेषा कलादर्शे हरित्पक्षे पलायिता ।
तिष्ठतु प्रथमे भागे तिथौ तस्यां निशापते: ॥
द्वितीये दर्शभागे तु रोहिण्या यातु मन्दिरम् ।
तृतीये तु सरस्वत्यां स्नात्वा सन्धुक्षितो विधु: ॥
चतुर्थे वत्सपूर्णस्तिथिभागे विभावसो: ।
मण्डलं यातु चन्द्रोऽयं सविम्बरथघोटक: ॥
यावत्कालेन हि कला प्रथमा क्षयमाप्नुयात् ।
एवमेवं कृष्णपक्षे तावत्स्या प्रतिपत् भवेत् ॥
द्वितीयादौ कृष्णपक्षे वृद्धिर्ह्रासस्तथाविध: ।
तिथीनां वृद्धिहेतुश्च शुक्ले कृष्णे तथा भवेत् ॥
तत: पुन: शुक्लपक्षे यावत् पूर्व्वा कलोदिता ।
वृद्धिमेति भवेत्तावत् प्रतिपत्तिथिरादित: ॥
ततो द्वितीयभागस्य या ज्योत्स्ना हरमूर्द्धनि ।
स्थितायां वै कलायान्तु गता सा पुनरेष्यति ॥
युष्माभिस्तु भवेत् पेयममृतं यद्दिने दिने ।
तद्द्वितीयादितिथिभि: पूर्णान्ताभि: सदैव हि ॥
स्वयमुत्पत्स्यते चन्द्रो ज्योत्स्नायोगात् सुरोत्तमा: ।
यथा दिने दिने भागा: क्षयं यान्ति तथा विधो: ॥
वृद्धिं गच्छन्त्वनुदिनं शुक्लपक्षेऽन्वहं सुरा: ।
तेजोभाग: सूर्य्यबिम्बात् पुनरेव समेष्यति ॥
प्रयास्यति कृष्णपक्षे यथाभागक्रमन्तथा ।
ज्योत्स्नाहरशिरश्चन्द्रात् प्रत्यहं पुनरेष्यति ॥
तेजोभाग: सूर्य्यबिम्बादमृतं वत्स्यते स्वयम् ।
एवं वृद्धि: शुक्लपक्षे सुधांशो: संभविष्यति ॥
पक्षयो: शुक्लकृष्णत्वं चन्द्रवृद्धिक्षयाद्भवेत् ।
यावत्कालेन यो भागं क्षयं वृद्धिञ्च यास्यति ॥
तावत्कालमभिव्याप्य तिथि: स्थास्यति सा पुन: ॥
चिरेण वृद्धिर्यदि वा क्षयो वा
द्रुतेन वृद्धिर्यदि वा क्षयो वा ।
द्रुतास्तिथीनां तु सदा क्षय: स्या-
च्चिरात्तु वृद्धिस्थितिषु प्रवेशे ॥
क्षयं कथञ्च चन्द्रेण विना न संभविष्यति ।
तस्मात् तयो: प्रवृद्ध्यर्थं चन्द्रं रक्षन्तु देवता: ॥
आस्वादनीय: शुभ्रांशु: कलाशेषोऽनुमासत: ।
अमावास्यापराह्णे तु पितृभी रोहिणीगृहे ॥
तस्यैवास्वादनात् कथं वृद्धिं यास्यति चान्वहम् ।
तेन कव्येन पितरस्तृप्तिं यास्यन्ति वै पराम् ॥
श्रीमार्कण्डेय उवाच ।
तत: सुरगणा: सर्व्वे यथोक्तं विधिना तथा ।
चक्रुर्लोकहितार्थाय चन्द्रस्य क्षयवृद्धये ॥
महादेवोऽपि चन्द्रार्द्धं स्वरूपं परमात्मन: ।
जग्राह देवैर्विधिना शिरसाभ्युदितो भृशम् ॥
यत्तेज: परमं नित्यमजमव्ययमक्षयम् ।
तत्स्वरूपाश्चन्द्रकला: शापतस्तु क्षयं गता: ॥
प्रविशन्ति यदा ज्योतिरानन्दमजरं परम् ।
योगिनान्तु तदा तेषां चित्तं तल्लीनमेष्यति ॥
महादेवशिर:संस्थे लीने चित्ते सुधानिधौ ।
चन्द्रद्वारा भवेन्मुक्तिरित्येवं वैदिकी श्रुति: ॥
एतज्ज्ञात्वा महादेव: क्षयवृद्ध्या विना कृतम् ।
हिताय सर्व्वलोकानां जग्राह शिरसा विधुम् ॥
चन्द्रज्योत्स्नासमायोगादोषध्यो यान्ति वृद्धये ।
सर्व्वौषधीषु वृद्धासु प्रवर्त्तन्ते ततोऽध्वरा: ॥
अध्वरेषु प्रवृत्तेषु स्वान् स्वान् भागांस्तु देवता: ।
परिगृह्णन्ति पितरस्तथा कव्यानि भूरि च ॥
अमृतं ब्रह्मणा सृष्टं यद्देवेभ्य: पुरातनम् ।
तेन तृप्यन्ति हीना ये हव्यभागेन देवता: ॥
यज्ञेनाप्यायिते तच्च ज्योत्स्नाभिर्वृद्धिमेति वै ।
यज्ञज्योत्स्ना विना भूतं तच्च स्यात् क्षीणमन्यथा ॥
अतोऽमृतस्य यज्ञस्य चन्द्रमा: कारणं स्वयम् ।
अतोऽस्य दक्षशापात्तु रक्षायै तच्चिकीर्षितम् ॥
अद्यापि कृष्णपक्षेऽपि सुधा संपीयते सुरै: ।
तेज: सूर्य्यं याति शम्भोश्चन्द्रार्द्धं ज्योत्स्निका तथा ।
पुनश्च शुक्लपक्षे तु शेषोदेति कला तत: ।
ज्योत्स्नाद्वितीयो भागस्तु तेजोभागो द्वितीयक: ॥
अन्वेत्युपशिरश्चन्द्रात् सूर्य्यबिम्बाद्यथाक्रमम् ।
कला: षोड़श चन्द्रस्य तत्रैका शम्भुशेखरे ॥
सितासितावुभौ पक्षौ शेषाणामुदयक्षयौ ।
इति व: सर्व्वमाख्यातं विभक्तश्चन्द्रमा यथा ॥
ब्रह्मणा पर्व्वतश्रेष्ठे तथा तच्चन्द्रभागत: ।
यज्ञभागे स्थिते यस्माद्देवार्थमकरोद्विधुम् ।
कव्ये स्थितेऽपि पित्रर्थं तिथिवृद्धिक्षयौ यथा ॥
इदं पुण्यतमाख्यानं य: शृणोति सन्नर: ।
राजयक्ष्मा तस्य कुले न कदाचिद्भविष्यति ॥
यक्ष्मणा परिभूतो य: शृणोति वचनं विधे: ।
अचिरात् यक्ष्मणा मुक्त: स भवेन्नरसत्तम: ॥
इदं स्वस्त्ययनं पुण्यं गुह्यात् गुह्यतरं परम् ।
य: शृणोत्येकचित्त: सन् स महापुण्यभाग्भवेत् ॥"
इति कालिकापुराणे २१ अध्याय: ॥

राजयोग्य:, त्रि, (राज्ञो योग्य: ।) राजार्ह: । नृपोचित: । यथा,—
"त्रिकोणकण्टके सौम्ये पापे चोपचयस्थिते ।
राजयोग्या भवेन्नारी सुन्दरी कुलवर्द्धिनी ॥"
इति जातकामृतम् ॥

राजरङ्गं, क्ली, (राजयोग्यं रङ्गम् ।) रजतम् । इति शब्दरत्नावली ॥

राजराज:, पुं, (राज्ञामपि राजा धनाधिपत्वात् । "राजाह:सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) कुवेर: । इत्यमर: । १ । १ । ६३ ॥ (यथा, किरातार्ज्जुनीये । ५ । ५१ ।

"इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे
धाम स्वं गतवति राजराजभृत्ये ।
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ
सन्धत्ते भृशमरतिं हि सद्वियोगः ॥")
सार्व्वभौमः । (यथा, रामायणे ।२।६२।१४।
"प्रयाणमिति च श्रुत्वा राजराजस्य योषितः ।
हित्वा यानानि यानार्हा ब्राह्मणं पर्य्यवारयन् ॥")
सुधाकरः । इति मेदिनी । जे, ३६ ॥

राजरीतिः, स्त्री, पित्तलविशेषः । तत्पर्य्यायः । पाकतुण्डी २ राजपुत्त्री ३ महेश्वरी ४ ब्रह्माणी ५ ब्रह्मरीतिः ६ कपिला ७ पिङ्गला ८ । अस्या गुणाः । तिक्तत्वम् । शीतलत्वम् । लवणत्वम् । शोधनत्वम् । पाण्डुवातक्रिमिप्लीहपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

राजर्षिः, पुं, (राजा ऋषिरिव श्रेष्ठत्वात् ।) ऋतुपर्णादिराजः । इति त्रिकाण्डशेषः ॥ तस्य स्मरणं कलिनाशनम् । यथा,—
"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम् ॥"
इति महाभारतम् ॥

राजलक्ष्मा, [न्] पुं, (राज्ञो लक्ष्म चिह्नं यत्र ।) युधिष्ठिरः । इति धनञ्जयकोषः ॥ (राजचिह्नयुक्ते, त्रि ॥)

राजलक्ष्मीः, स्त्री, (राज्ञो लक्ष्मीः ।) राजश्रीः । यथा, ज्योतिषतत्त्वे ।
"मन्त्रप्रभावनिपुणः प्रमदाविलासः
श्वेतातपत्रनृपपूजितदेशलाभः ।
हस्त्यश्वलाभधनपूर्णमनोरथः स्यात्
शौक्री दशा भवति निश्चलराजलक्ष्मीः ॥"

राजवंश्यः, त्रि, (राजवंशे भवः । राजवंश + यत् ।) राजवंशोद्भवः । तत्पर्य्यायः । राजबीजी २ । इत्यमरः । २ । ७ । २ ॥

राजवर्त्म, [न्] क्ली, (राज्ञो वर्त्म पन्थाः ।) राजपथः । तत्पर्य्यायः । घण्टापथः २ संसरणम् ३ श्रीपथः ४ उपनिष्क्रमणम् ५ उपनिष्करम् ६ महापथः ७ । इति हेमचन्द्रः । ४ । ५३ ॥

राजवला, स्त्री, (राजते शोभते इति । राज् + अच् । राजा वला इति कर्म्मधारयः ।) भद्रवला । इत्यमरः । २ । ४ । १५३ ॥ गन्धभादालिया इति भाषा ॥

राजवल्लभः, पुं, (राज्ञां वल्लभः ।) राजादनी । राजाम्रः । राजबदरः । इति राजनिर्घण्टः ॥ नारायणदासकविराजकृतद्रव्यगुणग्रन्थविशेषः । यथा —
"श्रीनारायणदासेन कविराजेन धीमता ।
प्रतिसंस्क्रियते द्रव्यगुणोऽयं राजवल्लभः ॥"
इति तस्य द्वितीयश्लोकः ॥
नृपप्रिये, त्रि ॥ (यथा, मार्कण्डेये । ४६ । ४६ ।
"दुष्टप्रायो विना चेचैः परभूमिचरो बली ।
ग्राम एवाक्रिमीसंज्ञो राजवल्लभसंश्रयः ॥")

राजवल्ली, स्त्री, (राजप्रिया वल्ली ।) तोयवल्ली । इति रत्नमाला । उच्छा इति भाषा ॥

राजवान्, [त्] त्रि, (राजास्यास्तीति । राजन् + मतुप् । मस्य वः ।) राजमात्रयुक्तदेशः । यथा,—
"सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् ॥"
इत्यमरः । २ । १ । १३ ॥
(नृपविशिष्टः । यथा, महाभारते ।५।१.७।
"रराज सा राजवती सभोद्वा
ग्रहैरिव द्यौर्व्विमलैरुपेता ॥")

राजवाहः, पुं, (राजानं वहतीति । वह् + अण् ।) घोटकः । इति शब्दचन्द्रिका ॥

राजवाह्यः, पुं, (राज्ञां वाह्यः ।) राजवाहकहस्ती । तत्पर्य्यायः । उपवाह्यः २ । इति हेमचन्द्रः ॥ विजयकुञ्जरः ३ । इति त्रिकाण्डशेषः ॥ राजवाहनीये, त्रि ॥

राजवृक्षः, पुं, (वृक्षाणां राजा । राजदन्तादित्वात् परनिपातः ।) आरग्वधवृक्षः । इत्यमरः ॥ पियालवृक्षः । इति मेदिनी ॥ लङ्कास्थायी वृक्षः । इति शब्दचन्द्रिका ॥ लङ्कासिज् इति भाषा ॥

राजशणः, पुं, (राजः शोभमानः शणः ।) पट्टः । इति शब्दमाला ॥ पाट् इति भाषा ॥

राजशफरः, पुं, इल्लिशमत्स्यः । इति हारावली ॥

राजशय्या, स्त्री, (राज्ञः शय्या ।) राज्ञः शयनीयम् । तत्पर्य्यायः : महाशय्या २ । इति हेमचन्द्रः ॥

राजशाकः, पुं, (राजप्रियः शाकः । शाकानां राजा इति वा ।) वास्तूकम् । इति राजनिर्घण्टः ॥

राजशुकः, पुं, (शुकानां राजा । राजदन्तादित्वात् परनिपातः ।) पक्षिविशेषः । राजा सुगा इति हिन्दी भाषा । तत्पर्य्यायः । प्राज्ञः २ शतपत्रः ३ नृपप्रियः ४ । इति राजनिर्घण्टः ॥

राजशृङ्गं, क्ली, राजच्छत्रम् । तत्पर्य्यायः । कनकदण्डकम् २ । इति त्रिकाण्डशेषः ॥

राजशृङ्गः, पुं, मद्गुरमत्स्यः । इति हेमचन्द्रः ॥

राजसः, त्रि, (रजसो भवः । रजस् + अण् ।) रजोगुणोद्भवः । तल्लक्षणं यथा,—
"आरम्भरुचिताधैर्य्यमसत्कार्य्यपरिग्रहः ।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥"
आरम्भरुचिता फलार्थं कर्म्मानुष्ठानशीलता ॥*॥
संक्षेपतस्तल्लक्षणं यथा,—
"येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति पुष्कलाम् ।
न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम् ॥"
तस्मात्गतिर्यथा,—
"देवत्वं सात्त्विका यान्ति मनुष्यत्वञ्च राजसाः ।
तिर्य्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥"
तद्गतिप्रकारा यथा,—
"झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः ।
द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ॥
राजानः क्षत्त्रियाश्चैव राज्ञाश्चैव पुरोहिताः ।
वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥
गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये ।
तथैवाप्सरसः सर्व्वा राजसीषूत्तमा गतिः ॥"
इति वामने १२ अध्यायः ॥
राजसाहारा यथा,—
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥"
राजसयज्ञो यथा,—
"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥"
राजसतपो यथा,—
"सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥"*॥
राजसदानं यथा,—
"यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥"
इति श्रीभगवद्गीतायाम् १७ अध्यायः ॥
राजसत्यागो यथा,—
"दुःखमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजसत्यागं नैव त्यागफलं लभेत् ॥"
राजसज्ञानं यथा,—
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥"
राजसकर्म्म यथा,—
"यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥"*॥
राजसकर्त्ता यथा,—
"रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥"
राजसी बुद्धिर्यथा,—
"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥"
राजसी धृतिर्यथा,—
"यया तु धर्म्मकामार्थान् धृत्या धारयतेऽर्ज्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥"
राजससुखं यथा,—
"विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत् सुखं राजसं स्मृतम् ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥ * ॥
राजसपुराणानि यथा,—
"ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत ॥"
राजसस्मृतयो यथा,—
"च्यावनं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च ।
कात्यायनं वैष्णवञ्च राजसाः स्वर्गदा मताः ॥"
इति पाद्मोत्तरखण्डे ४१ अध्यायः ॥

राजसदनं, क्ली, (राज्ञः सदनम् ।) राजगृहम् । तत्पर्य्यायः । सौधः २ । इत्यमरः । २ । २ ।१० ॥ भूपालभवनम् ३ सुधामयम् ४ । इति शब्दरत्नावली ॥ तद्भेदा यथा,—
"सौधोऽस्त्री राजसदनमुपकार्य्योपकारिका ।

स्वस्तिकः सर्व्वतोभद्रो नन्द्यावर्त्तादयोऽपि च ।
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ॥”
इत्यमरः । २ । २ । १० ॥

राजसभा, स्त्री, राज्ञः सभा । (“सभा राजा-मनुष्यपूर्व्वा ।” २ । ४ । २३ । इत्यत्र राज-पर्य्यायस्यैव ग्रहणात् न क्लीवत्वम् ।) नृपति-समाजः । इत्यमरः । ३ । ५ । ६ ॥ (वाचस्पते नपुंसकलिङ्गतोक्तिस्तु प्रामादिकी ॥)

राजसर्पः, पुं, (सर्पाणां राजा । राजदन्तादि-त्वात् परनिपातः ।) सर्पविशेषः । तत्पर्य्यायः । भुजङ्गभोजी २ । इति हेमचन्द्रः । ४ । ३७० ॥

राजसर्षपः, पुं, (सर्षपाणां राजा श्रेष्ठत्वात् । पर-निपातः ।) सर्षपविशेषः । राजसर्षा इति भाषा ॥ राइ इति केचित् ॥ तत्पर्य्यायः । क्षविका २ राजिका ३ क्षुरी ४ सुष्ठकः ५ । सुष्ठक इत्यत्र थष्टक इति वा पाठः । इति रत्नमाला ॥ क्षवः ६ क्षुताभिजननः ७ । क्षुताभिजनन इत्यत्र क्षुधाभिजनन इति वा पाठः । इति हेमचन्द्रः ॥ कृष्णा ८ तीक्ष्ण-फला ९ राजी १० कृष्णसर्षपाख्या ११ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । वात-शूलगुल्मकण्डुकुष्ठव्रणनाशित्वम् । पित्तदाह-प्रदत्वञ्च । इति राजनिर्घण्टः ॥ (चतुर्व्विंशति-त्रसरेणुपरिमित-परिमाणविशेषः । यथा, मनुः । ८ । १३३ ।
“त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ॥”
“त्रसेत्यादि । अष्टौ त्रसरेणवो लिक्षैका परि-माणेन ज्ञेया तास्तिस्रो लिक्षा राजसर्षपो ज्ञेयः । ते राजसर्षपास्त्रयो गौरसर्षपो ज्ञेयः ।” इति तट्टीकायां कुल्लूकः ॥)

राजसायुज्यं, क्ली, (राज्ञः सायुज्यम् ।) राजत्वम् ।
“स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत्——————— ॥”
इत्यमरदर्शनात् ॥

राजसारसः, पुं, (राज्ञः सारस इव । राजः शोभाशाली सारस इव इति वा ।) मयूरः । इति शब्दमाला ॥

राजसी, स्त्री, (रजस इयमिति । रजस्+अण् । ङीप् ।) दुर्गा । इति शब्दरत्नावली ॥ रजो-गुणसम्बन्धिनी च ॥ (यथा, गीतायाम् ।
“यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥”)

राजसूयः, पुं, (“राजा लतात्मकः सोमः सूयते ऽत्र ।” इत्यमरटीका । सु+अधिकरणे क्यप् । “राज्ञा सोतव्यः राजा वा इह सूयते ।” इति काशिका । “राजसूयसूर्य्येति ।” ३ । १ । ११४ । इति निपातनात् दीर्घः ।) राजकर्त्तव्य-यज्ञविशेषः । तत्पर्य्यायः । नृपाध्वरः २ क्रतु-राजः ३ क्रतूत्तमः ४ । इति शब्दरत्नावली ॥ (अमरमते क्लीवलिङ्गोऽयम् । २ । ५ । २९ ॥ यथा, महाभारते । ९ । १५७ । १६ ।
“यक्ष्यन्ति च नरव्याघ्रा निर्जित्य पृथिवीमिमाम् ।
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः ॥”
राजसूयमन्त्रादिकं वाजसनेयसंहितायाम् ९ अध्यायस्य ३५ कण्डिकामारभ्य १० अध्या-यस्य ३० कण्डिकापर्य्यन्तं द्रष्टव्यम् ॥ युधिष्ठिरस्य राजसूययज्ञविवरणन्तु महाभारते सभापर्व्वणि विशेषतो द्रष्टव्यम् ॥)

राजस्कन्धः, पुं, (राजः शोभाशाली स्कन्धो यस्य ।) घोटकः । इति त्रिकाण्डशेषः ॥

राजस्वं, पुं क्ली, (राज्ञे देयं स्वं धनम् ।) राज-धनम् । राजकरः । इति लोकप्रसिद्धम् ॥

राजस्वर्णः, पुं, (स्वर्णानां धुस्तूराणां राजा । राजदन्तादित्वात् परनिपातः ।) राजधुस्तू-रकः । इति राजनिर्घण्टः ॥

राजहंसः, पुं, (हंसानां राजा श्रेष्ठत्वात् । राज-दन्तादित्वात् परनिपातः ।) चञ्चुचरण-लोहितश्वेतवर्णहंसः । इत्यमरः । २ । ५ । २४ ॥ (यथा, कुमारे । १ । ३४ ।
“सा राजहंसैरिव सन्नताङ्गी
गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धै-
रादित्सुभिर्नूपुरशिञ्जितानि ॥”)
कदम्बः । कलहंसः । नृपोत्तमः । इति मेदिनी ॥

राजहर्षणं, क्ली, (राजानमपि हर्षयतीति । हृष्+णिच्+ल्युः ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

राजहस्ती, [न्] पुं, (राज्ञो हस्ती ।) राज-गजः । तत्पर्य्यायः । मारीचः २ याजकगजः ३ मदोत्कटः ४ । इति हारावली । ४६ ॥

राजहासकः, पुं, (राजानमपि हासयतीति । हस्+णिच्+ण्वुल् ।) मत्स्यविशेषः । तत्-पर्य्यायः । कातरः २ कातलः ३ राजीवः ४ । इति शब्दरत्नावली ॥

राजक्षवकः, पुं, सर्षपः । इति राजनिर्घण्टः ॥ (अस्य शाकगुणाः ।
“संग्राहि शीतलञ्चापि लघुदोषाविरोधि च ।
राजक्षवकशाकन्तु सटीशाकन्तु तद्विधम् ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

राजा, [न्] पुं, (राजते शोभते इति । राज्+ “कनिन् युवृषितक्षिराजीति ।” उणा० १ । १५६ । इति कनिन् ।) प्रभुः । नृपतिः । (यथा-रघुः । ४ । १२ ।
“यथा प्रह्लादनात् चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥”)
क्षत्रियः । (यथा, मनुः । २ । ३२ ।
“शर्म्मवद्ब्राह्मणस्य स्यात् राज्ञो रक्षासम-न्वितम् ।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रैष्यसंयुतम् ॥”)
चन्द्रः । यक्षः । इन्द्रः । इति मेदिनी ॥ उत्तर-पदे चेत् श्रेष्ठार्थवाचकः ॥ अथ नृपतेः पर्य्यायः । राट् २ पार्थिवः ३ क्ष्माभृत् ४ नृपः ५ भूपः ६ महीक्षित् ७ । इत्यमरः ॥ नरपतिः ८ पार्थः ९ नृपतिः १० भूपालः ११ भूभृत् १२ महीपतिः १३ नाभिः १४ नाराट् १५ भूमीन्द्रः १६ नरेन्द्रः १७ नायकाधिपः १८ । इति शब्दरत्नावली ॥ प्रजेश्वरः १९ भूमिपः २० इनः २१ दण्डधरः २२ अवनीपतिः २३ स्कन्दः २४ स्कन्धः २५ भूभुक् २६ अर्थपतिः २७ । इति जटाधरः ॥ * ॥ अस्य व्युत्पत्तिर्यथा,—
“महता राजराज्येन पृथुर्वैण्यः प्रतापवान् ।
सोऽभिषिक्तो महातेजा विधिवद्धर्म्मकोविदैः ॥
पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः ।
अनुरागात्ततस्तस्य नाम राजेत्यभाषत ॥”
इति विष्णुपुराणे १ अंशे १३ अध्यायः ॥
अपि च ।
“रागी राजसिकं स्वर्ग्यं कुरुते कर्म्म रागतः ।
रागान्धाच्च राजसिकास्तेन राजा प्रकीर्त्तितः ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥ * ॥
तस्य सर्व्वपितृत्वं यथा,—
शच्युवाच ।
“शृणु वत्स ! महाराज हे तात ! भयभञ्जन ।
भयत्राता च राजा च सर्व्वेषां पालकः पिता ॥
भ्रष्टश्रीश्च महेन्द्रोऽद्य त्वञ्च स्वर्गे नृपोऽधुना ।
यो राजा स पिता माता प्रजानामेव निश्चयः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५९ अध्यायः ॥
पृथोरेवादौ राजा इति संज्ञा आसीत् । यथा,
“देवैर्विप्रैस्तथा सर्व्वैरभिषिक्तो महामनाः ।
राज्ञाश्चैवाधिकारे वै पृथुर्वैण्यः प्रतापवान् ॥
तदा पित्रा प्रजाः सर्व्वाः कदा नैवानुरञ्जिताः ।
तेनानुरञ्जिताः सर्व्वाः सुखैर्म्मुमुदिरे सदा ।
अनुरागात्तस्य वीरस्य नाम राजेत्यभाषत ॥”
इति पाद्मे भूखण्डे २९ अध्यायः ॥ * ॥
अथ राजलक्षणम् ।
“सोऽपि कृष्णपटे बालं दृष्ट्वाशीविषपीडितम् ।
नरेन्द्रलक्षणोपेतं चिन्तामाप नरेश्वरः ॥
तस्यास्यं चन्द्रबिम्बाभं सुभ्रु रम्यं समुन्नसम् ।
नीलाः केशाः कुञ्चिताश्च समा दीर्घाग्रर-ञ्जिताः ॥
राजीवनेत्रयुगलो बिम्बोष्ठपुटसद्दृतः ।
चतुर्दंष्ट्रश्चतुष्किष्कुर्दीर्घांसो दीर्घबाहुकः ॥
चतुर्लेखाकरो मात्स्ययवच्छत्रैकपर्व्वकः ।
शिरालपादो गम्भीरः स्वल्पत्वक् त्रिवलीधरः ॥”
इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्याना-ध्यायः ॥ * ॥ अन्यच्च ।
“अस्वेदिनौ मृदुतरौ कमलोदरसन्निभौ ।
श्लिष्टाङ्गुली ताम्रनखौ पादावुष्णौ शिरोन्-नतौ ।
कूर्म्मोन्नतौ गूढगुल्फौ सपार्ष्णी नृपतेः स्मृतौ ॥
मृदुलोमा समा जङ्घा तथा करिकरप्रभा ।
ऊरवो नागवस्तुल्या नृपस्योपचिताः स्मृताः ॥
कोषगूढ़ नृपो दीर्घैर्भर्गैश्च धनवर्ज्जितः ।
समाभ्यां क्षितिपः प्रोक्तः प्रबन्धेव सुतान्वतान् ।
सशब्दनिःशब्दमूत्राः स्युर्द्दरिद्राश्च मानवाः ।

एकद्वित्रिचतुःपञ्चषड्धारादिभिरेव च ।
दक्षिणावर्त्तवलितशुभाभिश्च नृपाः स्मृताः ।
नृपाः पुष्पगन्धिशुक्रा मधुगन्धे धनं बहु ॥
मांसलस्फिक् सुखी स्याच्च सिंहस्फिक् भूपतिः
स्मृतः ।
भवेत् सिंहकटी राजा निःस्वः कपिकटिर्नरः ॥
नृपाश्चोन्नतकक्षाः स्युर्न्निम्ना विषमकक्षकाः ।
वलिमध्यगता नाभिः शूलधारां करोति हि ॥
अधो नवाढ्यं कुर्य्याच्च नृपत्वं पद्मकर्णिका ।
ऋजुवृत्तैश्चचुकैश्च भवन्ति सुभगा नराः ।
निर्द्धना विषमैर्दीर्घैः पीनोपचितकैर्नृपाः ॥
समोन्नतञ्च हृदयमकम्प्यं मांसलं पृथु ।
नृपाणामधमानाञ्च खरलोम शिरालकम् ॥
कम्बुग्रीवश्च नृपतिर्लम्बकर्णोऽतिभक्षकः ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ॥
मणिबन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः ।
नृपा हीनैः करच्छेदमश्लिष्टैर्धनवर्ज्जिताः ॥
निम्नाश्चक्रनखैस्तद्वदर्थैश्च परतर्ककाः ।
ताम्रैर्भूपा धनाढ्याश्च अङ्गुष्ठैः सयवैस्तथा ॥
घनाङ्गुलिश्च सधनस्तिस्रो रेखाश्च यस्य वै ।
नृपतेः करतलगा मणिबन्धे समुत्थिताः ॥
शकातपत्रशिविका गजपद्मोपमा नृपे ।
कुम्भाङ्कुशपताकाभा न्मृणालाभा निरीश्वरे ।
दामाभाश्च नवाढ्यानां स्वस्तिकाभा नृपेश्वरे ।
चक्रासितोमरधनुःकुन्ताभा नृपतेः करे ॥
मांसलैश्च घनोपेता अवक्रैरधरैर्नृपाः ।
बिम्बोपमैश्च स्फुटितैरोष्ठै रूक्षैश्च खण्डितैः ॥
विवर्णैर्धनहीनाश्च दन्ताः स्निग्धा घनाः शुभाः ।
तीक्ष्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा
शुभा ॥
शक्ता दीर्घा च विज्ञेया तालु श्वेतं धनेश्वरे ।
श्लक्ष्णा च परषा वक्त्रं समं सौम्यञ्च संवृतम् ॥
भूपानाममलं शस्तं विपरीतञ्च दुःखिनाम् ।
शङ्कुकर्णाश्च राजानो रोमकर्णाः शतायुषः ॥
कराः स्निग्धावनद्धैश्च आलम्बैर्मांसलैर्नृपाः ।
श्रोत्रस्तुच्चिपिटनासः स्रग्वी भाग्यवतां भवेत् ॥
अल्पच्छिद्रा सपुटा च अवक्रा च नृपेश्वरे ।
संवृतैश्च ललाटैश्च सुपद्मा उन्नतैर्नृपाः ॥
ललाटोपसृतास्तिस्रो रेखाः स्युः शतवर्षिणाम् ।
नृपत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ ॥
छत्राकारैः शिरोभिस्तु नृपा निम्नशिरा धनी ।
षडुन्नतश्चतुर्ह्रस्वो रक्तः सप्तसु सौ नृपः ॥”
इति गारुडे नरस्त्रीलक्षणं नाम ६६ अध्यायः ॥
अपि च ।
“पार्थिवस्य तु वक्ष्यामि भृत्यानाञ्चैव लक्षणम् ।
सर्व्वाणि यो महीपालः सम्यङ्नित्यं परीक्षयेत् ॥
राज्यं पालयते नित्यं सत्यधर्म्मपरायणः ।
निर्ज्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ।
पुष्पं पुष्पं विचिन्वीयान्मूलच्छेदं न कारयेत् ।
मालाकार इवारण्ये न यथाङ्गारकारकः ॥
दुग्धी चौरस्तु भुञ्जीत विक्रेतारो न भुञ्जते ।
परराष्ट्रं महीपालो कालयानैश्च दूषयेत् ॥
नोधश्छिन्द्यात्तु यो धेन्वाः क्षीरार्थी लभते पयः ।
एवं राष्ट्रमयोगेन पीड्यमानं न वर्द्धते ॥
तस्मात् सर्व्वप्रयत्नेन पृथिवीमनुपालयेत् ।
पालकस्य भवेद्भूमिः कीर्त्तिरायुर्यशो बलम् ॥
अभ्यर्च्य विष्णुं धर्म्मात्मा गोब्राह्मणहिते रतः ।
प्रजाः प्रालयितुं शक्तः पार्थिवो यो जितेन्द्रियः ॥
ऐश्वर्य्यमध्रुवं प्राप्य राजा धर्म्मे मतिश्चरेत् ॥”
इति गारुडे १११ अध्यायः ॥ * ॥
ब्रह्माभिषिक्तराजानो यथा,—
श्रीपराशर उवाच ।
“यदाभिषिक्तः स पृथुः पूर्व्वं राज्ये महर्षिभिः ।
ततः क्रमेण राज्यानि ददौ लोकपितामहः ॥
नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः ।
सोमं राज्ये दधाद्ब्रह्मा यज्ञानां तपसामपि ॥
राज्ञां वैश्रवणं राज्ये जलानां वरुणं तथा ।
आदित्यानां पतिं विष्णुं वसूनामथ पावकम् ॥
प्रजापतीनां दक्षन्तु वासवं मरुतामपि ।
दैत्यानां दानवानाञ्च प्रह्लादमधिपं ददौ ॥
पितॄणां धर्म्मराजानं यमं राज्येऽभ्यषेचयत् ।
ऐरावतं गजेन्द्राणामशेषाणां पतिं ददौ ॥
पतत्रीणाञ्च गरुडं देवानामपि वासवम् ।
उच्चैःश्रवसमश्वानां वृषभन्तु गवामपि ॥
शेषन्तु नागराजानं न्मृगाणां सिंहमीश्वरम् ।
वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् ॥
एवं विभज्य राज्यानि दिशां पालाननन्तरम् ।
प्रजापतिपतिर्ब्रह्मा स्थापयामास सर्व्वतः ॥
पूर्व्वस्यां दिशि राजानं वैराजस्य प्रजापतेः ।
दिशःपालं सुधन्वानं पुत्त्रं वै सोऽभ्यषेचयत् ॥
दक्षिणस्यां दिशि तथा कर्द्दमस्य प्रजापतेः ।
पुत्त्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयत् ॥
पश्चिमायां दिशि तथा रजसः पुत्त्रमच्युतम् ।
केतुमन्तं महात्मानं राजानमभिषिक्तवान् ॥
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
उदीच्यां दिशि दुर्द्धर्षं राजानमभिषिक्तवान् ॥
तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मतः प्रतिपाल्यते ॥
एते सर्व्वे प्रवृत्तस्य स्थितौ विष्णोर्म्महात्मनः ।
विभूतिभूता राजानो ये चान्ये मुनिसत्तम ॥
ये भविष्यन्ति येऽतीताः सर्व्वभूतेश्वरा द्विज ।
ते सर्व्वे सर्व्वभूतस्य विष्णोरंशा द्विजोत्तम ॥”
इति श्रीविष्णुपुराणे प्रथमेंऽशे २२ अध्यायः ॥ *
सूत उवाच ।
“एवं सृष्टासु सर्व्वासु स्थावरासु चरासु च ।
ब्रह्मा क्रमेण राज्यानि चादेष्टुमुपचक्रमे ॥
द्विजानां वीरुधाञ्चैव नक्षत्राणां ग्रहैः सह ।
यज्ञानां तपसाञ्चैव सोमं राज्येऽभ्यषेचयत् ॥
बृहस्पतिञ्च सर्व्वेषां ददावङ्गिरसामपि ।
भृगूणामाधिपत्ये च काव्यं राज्येऽभ्यषेचयत् ॥
आदित्यानां पुनर्व्विष्णुं वसूनामथ पावकम् ।
प्रजापतीनां दक्षञ्च मरुतामथ वासवम् ॥
दैत्यानामथ राजानं प्रह्लादं दितिनन्दनम् ।
नारायणन्तु साध्यानां रुद्राणां वृषभध्वजम् ॥
न्मृगाणामथ शार्दूलं गरुडं पततां वरम् ।
गन्धर्व्वाणां चित्ररथं नागानामथ वासुकिम् ॥
गन्धानां मरुतञ्चैव भूतानाञ्च शरीरिणाम् ।
सर्व्वेषां दंष्ट्रिणां शेषं सर्पाणाञ्चैव तक्षकम् ॥
सागराणां नदीनाञ्च मेघानां वर्षितस्य च ।
आदित्यानामन्यतमं पर्ज्जन्यमभिषिक्तवान् ।
सर्व्वाप्सरोगणानाञ्च कामदेवं तथा प्रभुम् ॥
ऋतूनामधिमासानां दिवसानां तथैव च ।
पक्षाणाञ्च क्षपाणाञ्च मुहूर्त्ततिथिपर्व्वणाम् ॥
कलाकाष्ठाप्रमाणानां गतेरयनयोस्तथा ।
गणितस्याथ योगस्य चक्रे संवत्सरं प्रभुम् ॥
प्रजापतेर्व्विरजसः पूर्व्वस्यामभिषेचयन् ।
पुत्त्रं नाम्ना सुधामानं राजानञ्चाभ्यषेचयत् ॥
यथाप्रदेशं राजानं दक्षिणस्यां प्रजापतेः ।
कर्द्दमस्य शङ्खपदं पुत्त्रं राज्येऽभिषिक्तवान् ॥
पश्चिमस्यां दिशि तथा रजसः पुत्त्रमुत्तमम् ।
केतुमन्तं महात्मानं राजानं ह्यभ्यषेचयत् ॥
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
दिशुत्तरायां पुत्त्रन्तु राजानमभ्यषेचयत् ॥
मानुषाणामधिपतिं चक्रे वैवस्वतं मनुम् ।
तैरेव पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मेण परिरक्ष्यते ॥
स्वायम्भुवेऽन्तरे पूर्व्वं ब्रह्मणा तेऽभिषेचिताः ।
इन्द्रादिलोकपालास्तु पुनर्व्वैवस्वतेऽन्तरे ॥
राजसूयेऽभिषिक्तस्तु पृथुः पूर्व्वं महर्षिभिः ।
मनुभिर्व्विधिना तद्वत् सोऽधिराजः प्रताप-
वान् ॥”
इत्याद्ये वह्निपुराणे वराहप्रादुर्भावनामाध्यायः ॥
राजकर्त्तव्यकर्म्माणि यथा,—
मदालसोवाच ।
“वत्स ! राज्याभिषिक्तेन प्रजारञ्जनमादितः ।
कर्त्तव्यमविरोधेन स्वधर्म्मस्य महीभृता ॥”
अविरोधेन धर्म्मशास्त्राविरोधेन ।
“व्यसनानि परित्यज्य सप्तमूलहराणि वै ।
आत्मा रिपुभ्यः संरक्ष्यो बहिर्मन्त्रविनिर्गमात् ॥
अष्टधा नाशमाप्नोति स्वचक्रस्यन्दनाद्यथा ।
तथा राजाप्यसन्दिग्धं बहिर्मन्त्रं विनिगमात् ॥
दुष्टादुष्टांश्च जानीयादमात्यानरिदोषतः ।
चरैश्चरास्तथा शत्रोरन्वेष्टव्याः प्रयत्नतः ॥
विश्वासो न तु कर्त्तव्यो राज्ञा मित्राप्तबन्धुषु ।
कार्य्ययोगादमित्रेषु विश्वसीत नराधिपः ॥
स्थानवृद्धिक्षयज्ञेन षाड्गुण्यविदितात्मना ।
भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना ।
प्रागात्मा मन्त्रिणश्चैव ततो भृत्या महीभृता ।
जेयाश्चानन्तरं पौरा विरुध्येत ततोऽरिभिः ॥
यस्त्वेताननिर्जित्यैव वैरिणो विजिगीषते ।
सोऽजितात्मा जितामात्यः शत्रुवर्गेण बाध्यते ॥
तस्मात् कामादयः पूर्व्वं जेयाः पुत्त्र महीभृता ।
तज्जये हि जयो राज्ञो राजा नश्यति तैर्जितः ॥
कामः क्रोधश्च लोभश्च मदो मानस्तथैव च ।
हर्षश्च शत्रवो ह्येते नाशाय कुमहीभृताम् ॥
कामप्रसक्तमात्मानं स्मृत्वा दण्डं निपातितम् ।

निवर्त्तयेत्तथा क्रोधादनुह्रादं हतात्मजम् ।
हतमैलं तथा लोभान्मदाद्वेणं द्विजैर्हतम् ।
मानादनायुषः पुत्त्रं हतं हर्षात् पुरञ्जयम् ।
एभिर्जितैर्जितं सर्व्वं मरुत्तेन महात्मना ।
स्मृत्वा विवर्ज्जयेदेतान् षड्दोषांश्च महीपतिः ॥
काककोकिलभृङ्गाणां वकव्यालशिखण्डिनाम् ।
हंसानां लोहकुट्टानां शिक्षेत चरितं नृपः ॥”
काकात् सर्व्वशङ्किता । कोकिलात् माधुर्य्यम् । भृङ्गात् प्रपीड़या अर्थादानम् । वकात् शत्रुग्रहणे एकाग्रताम् । व्यालात् दुरुपसर्पित्वम् । शिखण्डिनश्चित्रतां सर्पग्रहणाय मूकतां राज्ञात्मगोपनञ्च । हंसस्य सारग्राहित्वम् । लोहकुट्टात् सन्धानम् ॥
“कौशिकस्य क्रियां कुर्य्याद्विपक्षे मनुजेश्वरः ।
चेष्टां पिपीलिकानाञ्च काले भूपः प्रदर्शयेत् ॥”
कौशिकस्य उलूकस्य रात्रौ काकावस्कन्दनम् । पिपीलिकानां सैन्यबहुत्वं सर्पभक्षणञ्च ।
“ज्ञेयाग्निविस्फुलिङ्गानां वीजचेष्टा च शाल्मलेः ।
चन्द्रसूर्य्यस्वरूपञ्च नीत्यर्थं पृथिवीक्षिता ॥”
अग्निविस्फुलिङ्गात् दूरात् दाहः । वीजात् महदर्थनिष्पादनम् । उष्णकाले चन्द्रः सुखदायी शीतकाले न । एवं सूर्य्यः शीते सुखदायी उष्णकाले न । एवं कालानुसारेण सुखदुःखदातृत्वम् ॥
“बन्धकात् पद्मशरभशूलिन्या गुर्व्विणीस्तनात् ।
प्रज्ञा नृपेण चादेया तथा चण्डालयोषितः ॥”
बन्धकात् निष्ठुरत्वम् । पद्मात् कण्टकगोपनं स्मितमुखता च । शरभात् हत्वापि शत्रून् मोदकः । यथा शरभोऽष्टापदः पयोन्नतिं न सहते । शूलिन्या आर्त्तिज्ञापनम् । गुर्व्विण्याः स्तनात् कालेऽर्थादानम् । चण्डालयोषित् शौनकी छागशिरो दर्शयित्वा अन्यद्विक्रीणाति ।
“शक्रार्कयमसोमानां तद्वद्वायोर्महीपतिः ।
रूपाणि पञ्च कुर्व्वीत महीपालनकर्म्मणि ॥
यथेन्द्रश्चतुरो मासान् वार्य्यौघेणैव भूतलम् ।
आप्याययेत्तथा लोकान् परिचारैर्महीपतिः ॥”
परिचारैर्धनदानादिभिः ।
“मासानष्टौ यथा सूर्य्यस्तोयं हरति रश्मिभिः ।
सूक्ष्मेणैवाभ्युपायेन तथा शुल्कादिना नृपः ॥
यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा प्रियाप्रियौ राजा दुष्टादुष्टे समो भवेत् ॥
पूर्णेन्दुमालोक्य यथा प्रीतिमान् जायते नरः ।
एवं यत्र प्रजाः सर्व्वा निर्वृतास्तच्छशिव्रतम् ॥
मारुतः सर्व्वभूतेषु निगूढ़श्चरते यथा ।
एवं चरेन्नृपश्चारैः पौरामात्यारिबन्धुषु ॥
न लोभार्थैर्न कामार्थैर्नार्थार्थैर्यस्य मानसम् ।
यदार्थैः कृष्यते धर्म्मान् स राजा स्वर्गमृच्छति ॥”
लोभादिपयोधर्मैः ।
“उत्पथग्राहिणो मूढ़ान् स्वधर्म्माच्चलितान्नरान् ।
यः करोति निजे धर्म्मे स राजा स्वर्गमृच्छति ॥”
उत्पथग्राहिणः पापिनः ।
“वर्णधर्म्मा न सीदन्ति यस्य राष्ट्रे तथाश्रमाः ।
राजंस्तस्य सुखं तात परत्रेह च शाश्वतम् ।
एतद्राज्ञः परं कृत्यं तथैतद्वृद्धिकारणम् ।
स्वधर्म्मे स्थापनं नृणां चाल्यते न कुबुद्धिभिः ॥
पालनेनैव भूतानां कृतकृत्यो महीपतिः ।
सम्यक् पालयिता भागं धर्म्मस्याप्नोति वै यतः ॥
एवमाचरते राजा चातुर्व्वर्ण्यस्य रक्षणे ।
स सुखी विहरत्येष शक्रस्यैति सलोकताम् ॥”
इति मार्कण्डेयपुराणे मदालसोपाख्यानाध्यायः सट्टीका च ॥ * ॥ राजाभिषेकस्य विहितनक्षत्राणि यथा,—
“पुष्यानुराधा ज्येष्ठा च रोहिणी चोत्तरात्रयम् ।
हस्ताश्विनी रेवती च नृपाभिषेचनोत्तमाः ॥”
इति ज्योतिःसारसंग्रहः ॥
अस्य विवरणं अभिषेकशब्दे द्रष्टव्यम् ॥ * ॥
राज्ञि वर्णनीयानि यथा,—
“नृपे कीर्त्तिप्रतापाज्ञादुष्टशास्तिविवेकिताः ।
धर्म्मप्रयाणसंग्रामशस्त्राद्याः सनयक्षमाः ॥
प्रजारागोऽरिशैलादिवासोऽरिपुरशून्यता ।
औदार्य्यधैर्य्यगाम्भीर्य्यशौर्य्यैश्वर्य्योद्यमादयः ॥”
इति कविकल्पलतायाम् १स्तवके ३कुसुमम् ॥ * ॥
राजान्नभक्षणे दोषो यथा,—
वाराह उवाच ।
“शुद्धा भागवता भूत्वा मम कर्म्मपरायणाः ।
ये तु भुञ्जन्ति राजान्नं लोभेन च भयेन च ॥
आपद्गता हि भुञ्जीत राजान्नन्तु वसुन्धरे ।
दशवर्षसहस्राणि पच्यन्ते नरके नराः ॥
भगवद्वचनं श्रुत्वा सा मही शंसितव्रता ।
उवाच मधुरं वाक्यं सर्व्वलोकसुखावहम् ॥
धरण्युवाच ।
शृणु तत्त्वेन मे देव हृदये हि व्यवस्थितम् ।
को नु दोषो हि राजान्ने तन्मे त्वं वक्तुमर्हसि ॥
ततो भूम्या वचः श्रुत्वा सर्व्वधर्म्मविदां वरः ।
प्राह नारायणो वाक्यं धर्म्मकामां वसुन्धराम् ॥
वाराह उवाच ।
शृणु सुन्दरि ! तत्त्वेन गुह्यमेतदनिन्दिते ।
राजान्नन्तु न भोक्तव्यं शुभैर्भागवतैः सदा ॥
यद्यप्येष समत्वेन राजा लोके प्रवर्त्तते ।
राजसस्तामसो वापि कुर्व्वन् कर्म्म सुदारुणम् ॥
अपि वा गर्हितं तेन राजान्नन्तु वसुन्धरे ।
धर्म्मसन्धारणार्थाय न तु मे रोचते भुवि ॥
ततोऽन्यं संप्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा राजान्नु भोज्यं वै शुद्धैर्भागवतैः शुभैः ॥
स्थापयित्वा तु मां देवि विधिदृष्टेन कर्म्मणा ।
धनधान्यप्रदानानि दत्त्वा भागवतैरपि ॥
सिद्धं भागवतैस्त्वान्नं मम प्रापणशोधकम् ।
भुञ्जानस्तु वरारोहे न स पापेन लिप्यते ॥
एवं विष्णुवचः श्रुत्वा धरणी शंसितव्रता ।
वाराहरूपिणं देवं प्रत्युवाच वरानना ॥” * ॥
तदन्नभोजनप्रायश्चित्तानि यथा,—
धरण्युवाच ।
“राजान्नन्तु ततो भुक्त्वा शुद्धो भागवतः शुचिः ।
कर्म्मणा केन शुद्धेत तन्मे ब्रूहि जनार्द्दन ॥
वाराह उवाच ।
शृणु तत्त्वेन मे देवि यन्मां त्वं भीरु भाषसे ।
तरन्ति मनुजा येन राजान्नस्योपभुञ्जकाः ॥
एवं चान्द्रायणं कृत्वा तप्तकृच्छ्रञ्च पुष्कलम् ।
कुर्य्यात् सान्तपनञ्चैकं शीघ्रं मुच्यति किल्बिषात् ॥
भुक्त्वा वै राजोऽन्नानि इदं कर्म्म समारभेत् ।
न तस्यैवापराधोऽस्ति वसुधे वै वचो मम ॥
एवमेव न भोक्तव्यं राजान्नन्तु कदाचन ।
ममात्र प्रियकामाय यदीच्छेत् परमां गतिम् ॥”
इत्यादि वाराहे राजान्नभक्षणप्रायश्चित्तं नामाध्यायः ॥ * ॥ अपि च ।
“राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
इत्याद्यभिधाय,—
भुक्त्वा चान्यतमस्यान्नममत्या क्षपयेत्त्र्यहम् ।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतो विण्मूत्रमेव च ॥”
इति प्रायश्चित्ततत्त्वम् ॥
(राजनम् । यथा, ऋग्वेदे । १० । ४९ । ४ ।
“अहं भुवं यजमानस्य राजनि ।”
“अहं यजमानस्य राजनि राजनार्थं भुवं अभवं समर्थ इति शेषः ।” इति तद्भाष्ये सायणः ॥)

राजातनः, पुं, (राजानं अनतीति । अत सातत्यगमने + “बहुलमन्यत्रापि ।” उणा० २ । ७८ । इति युच् ।) पियालद्रुमः । इति शब्दमाला ॥

राजादनं, क्ली, (राजभिरद्यते इति । अद भक्षणे + कर्म्मणि ल्युट् ।) क्षीरिका । पियालः । किंशुकः । इति मेदिनी । ने, २०५ ॥ (यथा, सुश्रुते । १ । ४६ । लवणवर्गे ।
“दाड़िमामलकं द्राक्षा खर्ज्जूरं सपरूषकम् ।
राजादनं मातुलुङ्गं फलवर्गे प्रशस्यते ॥”
पुंलिङ्गान्तोऽपि दृश्यते । इत्यमरः । २ । ४ । ४५ ॥
हेमचन्द्रश्च । ४ । २०८ ॥ क्षीरिकार्थे पर्य्यायो यथा,—
“राजादनः क्षीरद्रुमः फलाध्यो वानरप्रियः ॥”
इति वैद्यकरत्नमालायाम् ॥
किंशुकार्थे पर्य्यायो यथा,—
“वातपोथः पलाशः स्याद्राजादनश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोऽपरः ॥”)

राजानुजीवी, [न्] त्रि, (राज्ञः अनुजीवी ।) राजोपजीवी । तस्य कर्म्माणि यथा,—
मत्स्य उवाच ।
“यथानुवर्त्तितव्यं स्यात्मनो राजोपजीविना ।
तथा ते कथयिष्यामि निबोध गदतो मम ॥
आज्ञा सर्व्वात्मना कार्य्या स्वशक्त्या रविनन्दन ।
आक्षिप्य वचनन्तस्य न वक्तव्यं तथा वचः ॥
अनुकूलं प्रियन्तस्य वक्तव्यं जनसंसदि ।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ॥
परार्थमस्य वक्तव्यं स्वस्थे चेतसि भार्गव ।
स्वार्थः सुहृद्भिर्वक्तव्यो न स्वयन्तु कदाचन ॥
कार्य्याभिघातः सर्व्वेषु रक्षितव्यः प्रयत्नतः ।
न च हिंस्यं धनं किञ्चिन्नियुक्तेन च कर्म्मणि ॥
नोपेक्ष्यं भाष्यमाणञ्च तथा राज्ञः प्रियो भवेत् ।

राज्ञश्च न तथा कार्य्यं वेशभाषितचेष्टितम् ।
राजलीला न कर्त्तव्या तद्विद्विष्टं विवर्ज्जयेत् ।
राज्ञः समोऽधिको वा न कार्य्यो वेशो विजानता ॥
द्यूतादिषु तथैवास्य कौशलञ्च प्रदर्शयेत् ।
प्रदर्श्य कौशलञ्चास्य राजानञ्च विशेषयेत् ॥
अन्तःपुरधनाध्यक्षैर्वैरदूतैः समागतैः ।
संसर्गं न व्रजेद्राजन् ! विना पार्थिवशासनम् ॥
निःस्नेहताञ्चावमानं प्रयत्नेन च गोपयेत् ।
यच्च गुह्यं भवेद्राज्ञो न तल्लोके प्रकाशयेत् ॥
नृपेण श्रावितं यत् स्याद्वाच्यावाच्यं नृपोत्तम ! ।
न तत् संश्रावयेल्लोके तदा राज्ञः प्रियो भवेत् ॥
आज्ञाप्यमाने चान्यस्मिन् समुत्थाय त्वरान्वितः ।
अहं किं करवाणीति वाच्यो राजा विजानता ॥
कार्य्यावस्थाञ्च विज्ञाय कार्य्यमेव तथा भवेत् ।
सततं क्रियमाणेऽस्मिन् लाघवन्तु व्रजेत् ध्रुवम् ॥
राज्ञः प्रियाणि वाक्यानि न चात्यर्थं पुनःपुनः ।
न हास्यशीलश्च भवेन्न चापि भ्रुकुटीमुखः ॥
नातिवक्ता न निर्व्वक्ता न च मत्सरिकस्तथा ।
आत्मसम्भावितश्चैव न भवेत् कथञ्चन ॥
दुष्कृतानि नरेन्द्रस्य न तु संकीर्त्तयेत् क्वचित् ।
वस्त्रं शस्त्रमलङ्कारं राज्ञा दत्तञ्च धारयेत् ॥
औदार्य्येण न तद्देयमन्यस्मै भूतिमिच्छता ।
तथैवोपासनं कार्य्यं दिवास्वप्नं न कारयेत् ॥
नानिर्द्दिष्टे तथा द्वारे प्रविशेत कदाचन ।
न च पश्येत्तु राजानमयोग्यासु च भूमिषु ।
राज्ञस्तु दक्षिणे पार्श्वे वामे चोपविशेत्तथा ।
पुरस्तात्तु तथा पश्चादासनन्तु विगर्हितम् ॥
जृम्भा निष्ठीवनं कासं कोपं पर्य्यस्तिकाश्रयम् ।
भ्रुकुटीं वान्तमुद्गारं तत्समीपे विवर्जयेत् ॥
स्वयं तत्र न कुर्व्वीत स्वगुणाख्यापनन्तथा ।
स्वगुणाख्यापने चैव परमेव प्रयोजयेत् ॥
हृदयं निर्म्मलं कृत्वा परां भक्तिमुपाश्रितैः ।
अनुजीविगणैर्भाव्यं नित्यं राज्ञामतन्द्रितैः ॥
शाठ्यं लौल्यञ्च पैशुन्यं नास्तिक्यं क्षुद्रतान्तथा ।
चापल्यञ्च परित्याज्यं नित्यं राजानुजीविना ॥
श्रुतेन विद्याशिल्पैश्च संयोज्यात्मानमात्मना ।
राजसेवां ततः कुर्य्याद्भूतये भूतिवर्द्धिनीम् ॥
नमस्कार्य्याः सदा चास्य पुत्त्रवल्लभमन्त्रिणः ।
सचिवैश्चास्य विश्वासो न तु कार्य्यः कथञ्चन ॥
अपृष्टश्चास्य न ब्रूयात् कामं ब्रूयात्तथापदि ।
हितं पथ्यञ्च वचनं हितैः सह सुनिश्चितम् ॥
चित्तञ्चैवास्य विज्ञेयं नित्यमेवोपजीविना ।
भर्त्तुराराधनं कुर्य्यात् चित्तज्ञो मानवः सुखम् ॥
रागापरागौ चैवास्य विज्ञेयौ भूतिमिच्छता ।
त्यजेद्वृत्तिं विरक्तस्तु रक्तो वृत्तिन्तु कारयेत् ॥
विरक्तः कारयेन्नाशं विपक्षाभ्युदयन्तथा ।
आशावर्द्धनकं कृत्वा फलनाशं करोति च ॥
अकोपोऽपि सकोपान्तः प्रसन्नोऽपि च निष्फलः ।
वाक्यं स मन्दं वदति वृत्तिच्छेदं करोति च ॥
प्रदेशवाक्यमुदितो न सम्भावयतेऽन्यथा ।
आराधनासु सर्व्वासु सुप्तवच्च विचेष्टते ॥
कथासु दोषं क्षिपति वाक्यभङ्गं करोति च ।
लक्ष्यते विमुखश्चैव गुणसंकीर्त्तने कृते ॥
दृष्टिं क्षिपत्यथान्यत्र क्रियमाणे च कर्म्मणि ।
विरक्तलक्षणं ह्येतत् शृणु रक्तस्य लक्षणम् ॥
दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् ।
कुशलादिपरिप्रश्नी संप्रयच्छति चासनम् ॥
विरक्तदर्शने चास्य रहस्ये च न शङ्कते ।
जायते हृष्टवदनः श्रुत्वा तस्य तु तत्कथाम् ॥
अप्रियाण्यपि वाक्यानि तदुक्तान्यभिनन्दति ।
उपायनञ्च गृह्णाति स्तोकमप्यादरात्तथा ॥
कथान्तरेषु स्मरति प्रहृष्टवदनस्तथा ।
इति रक्तस्य कर्त्तव्या सेवा रविकुलोद्वह ॥
आपत्सु न त्यजेत् पूर्व्वं विरक्तमपि सेवितम् ।

मित्रं न चापत्सु तथा च भृत्यं
त्यजन्ति ये निर्गुणमप्रमेयम् ।
प्रभुं विशेषेण च ते व्रजन्ति
सुरेन्द्रधामामरवृन्दजुष्टम् ॥"

इति मत्स्यपुराणे राजधर्म्मे अनुजीविवृत्तिर्नाम २१६ अध्यायः ॥

राजादनी, स्त्री, (राजभिरद्यते या । अद् + कर्म्मणि ल्युट् । ङीप् ।) वृक्षविशेषः । क्षीरिणी इति भाषा । तत्पर्य्यायः । राजफलः २ क्षीरवृक्षः ३ नृपद्रुमः ४ निम्वबीजः ५ मधुफलः ६ कपीष्टः ७ माधवोद्भवः ८ क्षीरी ९ गुच्छफलः १० भूपेष्टः ११ राजवल्लभः १२ श्रीफलः १३ दृढ़स्कन्धः १४ क्षीरशुक्लः १५ । अस्या गुणाः । मधुरत्वम् । पित्तनाशित्वम् । गुरुत्वम् । तर्पणत्वम् । वृष्यत्वम् । स्थौल्यकरत्वम् । हृद्यत्वम् । सुस्निग्धत्वम् । मेहनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु ।
तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयास्रजित् ॥"
इति भावप्रकाशः ॥

राजान्नं, क्ली, (राजयोग्यमन्नम् । अन्नानां राजा इति वा ।) अन्ध्रदेशोद्भवशालिविशेषः । तत्पर्य्यायः । नृपान्नम् २ राजार्हम् ३ दीर्घशूककम् ४ धान्यश्रेष्ठम् ५ राजधान्यम् ६ राजेष्टम् ७ दीर्घकूरकम् ८ । अस्य गुणाः । त्रिदोषघ्नत्वम् । सुस्निग्धत्वम् । मधुरत्वम् । लघुत्वम् । दीपनत्वम् । बलकारित्वम् । पथ्यत्वम् । कान्तिवीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ (राज्ञः अन्नम् ।) राजस्वामिकभक्तम् । तद्भोजननिषेधप्रायश्चित्ते राजशब्दे द्रष्टव्ये ॥ (राजान्नभक्षणेन हि तेजोहानिर्भवति । यथा, मनुः । ४ । २१८ ।
"राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्च्चसम् ।
आयुः सुवर्णकारान्नं यशश्चर्म्मावकर्त्तिनः ॥")

राजाम्रः, पुं, (आम्राणां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) आम्रविशेषः । तत्पर्य्यायः । राजफलः २ स्मराम्रः ३ कोकिलोत्सवः ४ मधुरः ५ कोकिलानन्दः ६ कामेष्टः ७ नृपवल्लभः ८ । अस्य फलगुणाः । कोमलत्वम् । कट्वम्लत्वम् । पित्तदाहदत्वञ्च ॥ सुपक्वस्य तस्य गुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"राजाम्रस्तु आम्रातः कामाङ्गो राजपुत्रकः ।
राजाम्रं तुवरं स्वादु विषदं शीतलं गुरु ।
ग्राहि रूक्षं विबन्धाध्मानवातकृत् कफपित्तनुत् ॥"
इति भावप्रकाशः ॥

राजाम्लः, पुं, (अम्लानां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) अम्लवेतसः । इति राजनिर्घण्टः ॥

राजार्कः, पुं, (अर्काणां राजा श्रेष्ठत्वात् ।) श्वेतार्कवृक्षः । सादा आकन्द इति भाषा । तत्पर्य्यायः । वसुकः २ अर्कः ३ मन्दारः ४ गणरूपकः ५ काष्ठीलः ६ सदापुष्पः ७ । इति राजनिर्घण्टः ॥ अलर्कः ८ प्रतापसः ९ । इति शब्दरत्नावली ॥

राजार्हं, क्ली, (राजानमर्हतीति । अर्ह + अण् ।) अगुरु । (अस्य पर्य्यायो यथा,—
"अगुरु प्रवरं लोहं राजार्हं योगजन्तथा ।
वंशिकं क्रमिजं वापि क्रमिजग्धमनार्य्यकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
राजयोग्ये, त्रि । इति मेदिनी । हे, २३ ॥ (यथा, गो० रामायणे । ३ । ४९ । ४२ ।
"तथेदमुपपन्नं मे म्टगरूपस्य धर्षणम् ।
राजार्हाणि च रत्नानि रत्नभाजो वयं ध्रुवम् ॥")

राजार्हा, स्त्री, (राज्ञोऽर्हा ।) जम्बूः । इति राजनिर्घण्टः ॥

राजालाबूः, स्त्री, (अलाबूनां राजा । राजदन्तादित्वात् परनिपातः ।) स्वादुतुम्बी । मिठा लाउ इति भाषा । तत्पर्य्यायः । महातुम्बी २ मधुरालाबुनी ३ शाकालाबूः ४ तुम्बकः ५ भक्ष्यालाबूः ६ अलाबुनी ७ मिष्टतुम्बी ८ । अस्याः फलगुणाः । वृष्यत्वम् । कफपित्तहरत्वम् । गुरुत्वञ्च । इति मदनविनोदः ॥

राजालुकः, पुं, (आलूनां राजा । ततः स्वार्थे कन् ।) महाकन्दः । इति हारावली । १०१ ॥

राजावर्त्तः, पुं, (राजानं आवर्त्तयति आनन्दयतीति । आ + वृत् + णिच् + अण् । यद्वा, राजः शोभमान आवर्त्तो यत्र ।) उपरत्नभेदः । रेउटी इति हिन्दी भाषा । तत्पर्य्यायः । नृपावर्त्तः २ राजाव्यावर्त्तकः ३ आवर्त्तमणिः ४ आवर्त्तः ५ । अस्य गुणाः । मृदुत्वम् । स्निग्धत्वम् । शिशिरत्वम् । पित्तनाशनत्वम् । भूषणे प्रयोजितश्चेत् नृणां बहुभाग्यकरत्वञ्च । इति राजनिर्घण्टः ॥ विराटदेशजहीरकः । तत्पर्य्यायः । विराटजः २ राजपट्टः ३ । इति हेमचन्द्रः । ४ । १३२ ॥ (यथा, कथासरित्सागरे । ७३ । ३३९ ।
"राजावर्त्तोपलश्यामतले सद्मसवेश्मनि ॥"
तथास्य गुणाः ।
"राजावर्त्तः कटुस्तिक्तः शिशिरः पित्तनाशनः ।

राजापत्तः प्रमेहघ्नः हृद्दिक्काश्वासनिवारकः ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

राजाहिः, पुं, (अहीनां राजा । राजदन्तादित्वात् परनिपातः ।) द्विमुखसर्पः । तत्पर्य्यायः । द्विमुखाहिः २ विलावासी ३ द्विजाधुमः ४ । इति शब्दरत्नावली । अहीरविः ५ । इति त्रिकाण्डशेषः ।

राजिः, स्त्री, (राजते इति । राज + “वसिवपियजिराजीति ।” उणा० ४ । १२४ । इति इन् ।) श्रेणी । (यथा, आर्य्यासप्तशत्याम् । ६८३ ।
“उल्लसति रोमराजिः स्तनशम्भोर्गरललेखेव ।”)
रेखा । इति मेदिनी । जे, १४ । (यथा, महाभारते । ७ । २२ । ६२ ।
“कलायपुष्पवर्णास्तु श्वेतलोहितराजयः ।
रथसेनं हयश्रेष्ठाः समूहुर्युद्धदुर्म्मदम् ॥”
पुं, आयुपुत्रविशेषः । स तु ऐलपौत्रः । यथा, महाभारते । १ । ७५ । २५ ।
“नहुषं वृद्धशर्म्माणं राजिं गयमनेनसम् ।
स्वर्भानवी सुतानेतानायोः पुत्रान् प्रचक्षते ॥”)

राजिका, स्त्री, (राजते या । राज + ण्वुल् । टापि अत इत्वम् ।) केदारः । राजसर्षपः । रेखा । इति मेदिनी । के, १४५ । पङ्क्तिः । इति हेमचन्द्रः । कृष्णसर्षपः । तत्पर्य्यायः । क्षवः २ क्षुधाभिजननः ३ क्षविका ४ आसुरी ५ । इत्यमरः ।२।९।१९। क्षुताभिजननः ६ असुरी ७ । इति तट्टीका । रक्तवर्णसर्षपः । राइ इति भाषा । तत्पर्य्यायः । राजी २ आसुरी ३ रक्तिका ४ रक्तसर्षपः ५ तीक्ष्णगन्धा ६ मधूलिका ७ क्षवकः ८ क्षुतकः ९ क्षवः १० । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातश्लेष्मशूलकफगुल्मकृमिव्रणनाशित्वम् । दाहपित्तप्रदत्वञ्च । तत्तैलगुणाः । तीक्ष्णत्वम् । वातादिदोषनाशित्वम् । स्थिरत्वम् । यूककण्डूघ्नत्वम् । केशघ्नत्वम् । त्वग्दोषनाशित्वञ्च । तत्पत्रगुणाः । कटुत्वम् । उष्णत्वम् । कृमिवातकफकण्ठामयहरत्वम् । स्वादुत्वम् । वह्निदीपनकारित्वञ्च । इति राजनिर्घण्टः । अपि च ।
राजी तु राजिका तीक्ष्णगन्धा क्षुज्जनिकासुरी ।
क्षवः क्षुताभिजनकः कृमिकः कृष्णसर्षपः ॥
राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत् ।
किञ्चिद्रूक्षाग्निदा कण्डूकुष्ठकोठकृमीन् हरेत् ।
अतितीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका ॥”
इति भावप्रकाशः ।

राजिकाफलः, पुं, (राजिकायाः फलमिव फलमस्य ।) गौरसर्षपः । इति राजनिर्घण्टः ।

राजिफला, स्त्री, (राजीभूतानि श्रेणिबद्धानि फलानि यस्याः ।) चीनाकर्कटी । इति राजनिर्घण्टः ।

राजिलः, पुं, (राजी रेखास्त्यस्येति । राजि + सिध्मादित्वात् लच् । यद्वा, राजिं लातीति । ला + कः ।) डुण्डुभसर्पः । इत्यमरः । १।८।५ । (यथा, रघुः । १२ । २७ ।
“किं महोरगविसर्पिविक्रमो
राजिलेषु गरुडः प्रवर्त्तते ।”)

राजी, स्त्री, (राजि + कृदिकारादिति ङीष् ।) निच्छिद्रपङ्क्तिः । इति शब्दरत्नावली । (श्रेणिः । यथा, माघे । ४ । ९ ।
“राजीवराजीवशलोलभृङ्ग-
मुष्णन्तमुष्णन्ततिभिस्तरूणाम् ।”)
राजिका । (अस्या गुणा यथा,—
“राजी तु राजिका तीक्ष्णगन्धा क्षुज्जनिकासुरी ।
क्षवः क्षुताभिजनकः कृमिकः कृष्णसर्षपः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
रक्तवर्णसर्षपः । इति राजनिर्घण्टः ॥

राजीफलः, पुं, (राजीभूतानि श्रेणिबद्धानि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
“पटोलः कुलकस्तिक्तः पाण्डुकः कर्कशच्छदः ।
राजीफलः पाण्डुफलो राजेयश्चामृताफलः ।
बीजगर्भः प्रतीकश्च कुष्ठहा कासमर्द्दनः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

राजीवं, क्ली, (राजी दलश्रेणिरस्यास्तीति । राजी + “अन्येभ्योऽपि दृश्यते ।”५ । २ । १०९ । इत्यस्य वार्त्तिकोक्त्या वः ।) पद्मम् । इत्यमरः । १ । १० । ४१ । (यथा, कुमारे । ३ । ४५ ।
“उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये ॥”)

राजीवः पुं, (राजी अस्त्यस्येति । राजी + वः ।) हरिणभेदः । (अस्य लक्षणं यथा,—
“राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
हस्तिमीनभेदः । इति मेदिनी । वे, ४८ ॥ (यथा, मनुः । ५ । १६ ।
“पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः ॥”)
हस्ती । इति । त्रिकाण्डशेषः ॥ सारसपक्षी । इत्यमरः ॥ राजोपजीविनि, त्रि । इति जयः ॥

राजेन्द्रः, पुं, (राजसु इन्द्र इव श्रेष्ठत्वात् ।) मण्डलेश्वरात् दशगुणो राजा । यथा,—
“चतुर्योजनपर्य्यन्तमधिकारं नृपस्य च ।
यो राजा तच्छतगुणः स एव मण्डलेश्वरः ।
तस्माद्दशगुणो राजा राजेन्द्रः परिकीर्त्तितः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः ॥ (राजश्रेष्ठः । यथा, महाभारते ।२।४५।४१।
“कर्म्मणैतेन राजेन्द्र ! धर्म्मश्च सुमहान् कृतः ॥”)

राजोदेजनसंज्ञकः, पुं, (राजोद्वेजन इति संज्ञा यस्य । ततः कन् ।) भूताङ्कुशवृक्षः । इति राजनिर्घण्टः ॥

राज्ञी, स्त्री, (राज्ञः पत्नी । राजन् + ङीप् । यद्वा, राजते इति । राज + कनिन् । ततः स्त्रियां ङीप् ।) राजपत्नी । राणी इति भाषा ॥ (यथा, रघुः । १ । ५७ ।
“तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥”)
सूर्य्यपत्नी । इति मेदिनी । ञे, २ ॥ राजपत्न्याः पर्य्यायोच्चारणानि यथा,—
“देव्याः सौभाग्यलावण्यशीलश्रृङ्गारसम्पदः ।
कृपाचातुर्य्यदाक्षिण्यप्रेममानव्रतादयः ॥
वेणीधम्मिल्लसीमन्तभालभ्रूश्रवणालिकम् ।
कपोलाधरनेत्रभ्रूकटाक्षरदकन्धराः ॥
गण्डबाहुकरोरोजनाभीमध्यवलित्रयम् ।
लोमालिश्रोणिजङ्घोरुपादयुग्मनखं क्रमात् ॥”
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥
सूर्य्यपत्न्याः प्रमाणान्तरं यथा,—
सूत उवाच ।
“विवस्वान् कश्यपात् पूर्व्वमदित्यामभवत् पुरा ।
तस्य पत्नीत्रयं तद्वत् संज्ञा राज्ञी प्रभा तथा ॥
रैवतस्य सुता राज्ञी रैवन्तं सुषुवे सुतम् ।
प्रभा प्रभातं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम् ॥
यमश्च यमुना चैव यमलौ तु बभूवतुः ॥”
इति मात्स्ये ११ अध्यायः ।
कांस्यः । इति । हेमचन्द्रः ॥ नीली इति राजनिर्घण्टः ॥ * ॥ (प्रतीची दिक् । यथा, छान्दोग्योपनिषदि । ३।१५।२ । “तस्य प्राची दिक् जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीचीति ।” ‘तथा राज्ञी नाम प्रतीची पश्चिमा दिक् राज्ञी राज्ञा वरुणेनाधिष्ठिता सन्ध्यारागयोगाद्वा ।’ इति शाङ्करभाष्यम् ॥)

राज्यं, क्ली, (राज्ञो भावः कर्म्म वा । राजन् + “पत्यन्तपुरोहितादिभ्यो यक् ।”५ । १ । १२८ ॥ इति यक् ।) राज्ञ इदम् । तत्पर्य्यायः । नीवृत् २ मण्डलम् ३ जनपदः ४ देशः ५ प्रदेशः ६ विषयः ७ राष्ट्रम् ८ उपवर्त्तनम् ९ । इति शब्दरत्नावली ॥ अमरमते नीवृज्जनपदौ अङ्गवङ्गकलिङ्गपञ्चालमगधकोशलादौ मण्डलेन ख्याते ग्रामसमूहे । देशविषयोपवर्त्तनानि च जनपदे जनपदसमुदाये । जनपदैकदेशे सजलनिर्जलस्थानमात्रे च । उपाधिभेदेन देशादित्रिकं भिन्नार्थम् । सामान्येन प्रयोगदर्शनात् । नीवृदादयः पञ्चैकार्थाः । इत्यपरे । एतच्चायुक्तम् । इति भरतः ॥ * ॥ तस्य लक्षणं अङ्गानि च यथा,—
“परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते ॥
अमात्यराष्ट्रदुर्गाणि कोषो दण्डश्च पञ्चमः ।
एताः प्रकृतयस्तद्वद्विजिगीषोरुदाहृताः ॥
एताः पञ्च तथा मित्रं सप्तमं पृथिवीपतिः ।
सप्तप्रकृतिकं राज्यमित्युवाच बृहस्पतिः ॥
पौरश्रेणी तदङ्गञ्च ब्रुवते शब्दवेदिनः ।
स्वाम्यमात्यः सुहृत् कोषो राष्ट्रं दुर्गं बलं तथा ।
पौरश्रेणी च राज्याङ्गं प्रकृतिश्च भवेत् द्वयम् ॥”
इति शब्दरत्नावली ॥
अपि च ।
“लक्षाधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके ।
एतलक्षे महेशानि महासाम्राज्यमुच्यते ॥”
इति वरदातन्त्रम् ॥

राज्यक्ता, स्त्री, (राज्या सर्षपेण अक्ता म्रक्षिता।) पिष्टराजिकादधिसवणमिश्रितखण्डालावूखण्डादि। रायता इति भाषा॥ यथा,—
"संचूर्ण्य निक्षिपेत्तत्र भृष्टं जीरकहिङ्गु च।
लवणान्तत्र वटकान् सकलानपि मज्जयेत्॥
शुक्रलस्तत्र वटको वलहृद्रोचनो गुरुः।
विबन्धशूलहृदाह्री च श्लेष्मलः पवनापहः।
राज्यक्तयातिरोचिष्णा पाचन्या तांस्तु भक्षयेत्॥"
इति भावप्रकाशे कृतान्नवर्गः॥

राज्याङ्गं, क्ली, (राज्यस्य अङ्गम्।) राज्यस्योपायः। तत्पर्य्यायः। प्रकृतिः २। तत्तु अष्टविधं यथा। स्वामी १ अमात्यः २ सुहृत् ३ कोषः ४ राष्ट्रम् ५ दुर्गम् ६ बलम् ७ पौराणां श्रेणयश्च ८। इत्यमरः। २। ८। १८॥ "स्वाम्यादयः सप्त पुरस्थलोकश्रेणयश्च राज्याङ्गपदप्रकृतिपदवाच्याः। राज्यं सप्ताङ्गम्। कस्यचिन्मते अष्टाङ्गत्वेऽप्युभयमेव दर्शितम्। यदुक्तं कामन्दकीये।
'स्वाम्यमात्यश्च राष्ट्रञ्च दुर्गं कोषो बलं सुहृत्।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते॥'
पौरश्रेण्या सहाष्टाङ्गमपि राज्यं प्रकीर्त्तितमिति। स्वाम्यादयः सप्त परस्परोपकारित्वात् राज्यस्य अङ्गानि उपायाः साधनानि राज्याङ्गानि प्रकृष्टं कुर्व्वन्ति राज्यम्। प्रकृतयः स्त्रीः कभाव इत्युक्तेः क्तिः प्रकृतिः स्त्रियाम्। स्वामी राजा। अमात्यो मन्त्री। सुहृन्मित्रम्। स्वर्णादिभाण्डागारं कोषः। राष्ट्रं जनपदवर्त्तिभूमिः। पर्व्वतादिदुर्गमं पुरं दुर्गम्। बलं सैन्यम्। पौरश्रेणीग्रहणे सिद्धे पुनर्व्वचनं प्राधान्यख्यापनार्थम्।" इति भरतः॥ * ॥ अपि च।
"स्वाम्यमात्यौ जनपदो दुर्गं दण्डस्तथैव च।
कोषो मित्रञ्च धर्म्मश्च सप्ताङ्गं राज्यमुच्यते॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः॥
षड़ङ्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः।
अङ्गेभ्यो यस्त्वेकस्य द्रोहमाचरतेऽल्पधीः।
वधस्तस्य तु कर्त्तव्यः शीघ्रमेव महीक्षिता।"
इति मात्स्ये १९४ अध्यायः॥

राटिः, स्त्री, (राटयति परस्परमाह्वानयत्यत्रेति। रट+णिच्+इन्।) युद्धम्। इति हेमचन्द्रः। ३।४६२॥ (राटयतीति। रट भाषणे+स्वार्थे णिच्+इन्।) शरारिपक्षी। इत्यमरः। २। ५। २५॥

राडिः, स्त्री, शरारिपक्षी। इत्यमरः। २।५।२५॥

राढ़कः, पुं, स्वनामख्यातदेशः। यथा,—
"प्राच्या मागधशोणौ च वारेन्द्रीगौड़राढ़काः॥"
इति ज्योतिषतत्त्वम्॥

राढ़ा, स्त्री, कान्तिः। शोभा। इति मेदिनी। ढे, २॥ पुरीविशेषः। यथा।
"गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी
भूरिश्रेष्ठिकनामधाम परमं तत्रोत्तमो नः पिता॥"
इत्यादि प्रबोधचन्द्रोदये दम्भवाक्यम्॥

राढ़ीयः, त्रि, (राढ़ो निवासोऽस्य। राढ़+"वृद्धाच्छः।" ४।२।११४। इति छः।) राढ़देशोद्भवः। यथा,—
"अयनांशाजयमानं दुष्टमिति नोच्यते।
राढ़ीयश्रीनिवासोक्तं तन्मानं स्थूलतोऽत्र तु॥"
इति मलमासतत्त्वम्॥

रात्रं, क्ली ज्ञानम्। यथा,—
"रात्रञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।
तेनेदं पञ्चरात्रञ्च प्रवदन्ति मनीषिणः॥"
इति नारदपञ्चरात्रे प्रथमरात्रे १ अध्यायः॥
(रात्रिः। यथा, महाभारते। १३।१३६।११।
"क्षेत्रप्रतिग्रहे चैव शवहस्तकयोस्तथा।
त्रीणि रात्राण्युपोषित्वा तेन पापाद्विमुच्यते॥")

रात्रकं, क्ली, (रात्रं ज्ञानं तेन कायतीति। कै+कः।) पञ्चरात्रम्। इति मेदिनी। के, १४६॥

रात्रकः, पुं, एकवर्षं वेश्यागृहवासी। इति मेदिनी। के, १४६॥

रात्रिः, स्त्री, राति ददाति कर्म्मभ्योऽवसरं निद्रादिसुखं वा। रादाने+"राशदिभ्यां त्रिप्।" उणा० ४।६७। इति त्रिप्।) हरिद्रा। (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये।
"लाक्षा कुष्ठं सर्षपाः श्रीनिकेतं
रात्रिर्व्योषं चक्रमर्द्दस्य बीजम्।
तक्रेकस्थं तत्र पिष्टः प्रलेपो
दद्रूघ्नो मूलकाद्वीजयुक्तः॥")
एतद्दीपावच्छिन्न-सूर्य्यकिरणानवच्छिन्नकालः। राति इति भाषा। तत्पर्य्यायः। शर्व्वरी २ निशा ३ निशीथिनी ४ त्रियामा ५ क्षणदा ६ क्षपा ७ विभावरी ८ तमस्विनी ९ रजनी १० यामिनी ११ तमी १२। इत्यमरः।१।४।४॥ श्यामा १३ घोरा १४ याम्या १५ तुङ्गी १६ नक्तम् १७ दोषा १८ वासतेयी १९ तमा २० क्षमा २१ शताक्षी २२ चक्रिणी २३ निशिथ्या २४ चक्रभेदिनी २५ शार्व्वरी २६ शय्या २७ वासुरा २८ निषद्वरी २९। इति शब्दरत्नावली॥ वसतिः ३० उपरोधा ३१ निशीथः ३२ निट् ३३। इति जटाधरः॥ यामवती ३४ तारा ३५ भूषा ३६ ज्योतिष्मती ३७ तारकिणी ३८ काली ३९ कलापिनी ४०। इति राजनिर्घण्टः॥ * ॥ तस्याः कारणं यथा,—
"यदा दिक्षु च सर्व्वासु मेरोर्भूगोलकोद्भवा।
छाया भवेत्तदा रात्रिः स्याच्च तद्विरहाद्दिनम्॥"
इति वह्निपुराणे गणभेदो नामाध्यायः॥ * ॥
पितृदेवानां रात्रिर्यथा,—
"मासेन च नराणाञ्च पितॄणां तदहर्निशम्।
कृष्णपक्षे दिनं प्रोक्तं शुक्ले रात्रिः प्रकीर्त्तिता॥
वत्सरेण नराणाञ्च देवानाञ्च दिवानिशम्।
उत्तरायणे दिनं प्रोक्तं रात्रिश्च दक्षिणायने॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५९ अध्यायः॥

अथ रात्रिकृत्यम्। स्मृतिः।
"पूर्व्वाह्णविहितं कर्म्म न कृतं तत् प्रमादतः।
रात्रेस्तु प्रहरं यावत् तत् कर्त्तव्यं यथोक्तवत्॥
दिवोदितानि कर्म्माणि प्रमादात् पतितानि च।
शर्व्वर्याः प्रथमे यामे तानि कुर्य्यादतन्द्रितः॥"
इति रत्नाकरः॥
याज्ञवल्क्याङ्गिरसौ।
"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च।
भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत्॥
अग्निहोमोपासने साग्निपरे। उपास्य चेति चकारो वैश्वदेवादिकं समुच्चिनोति। संविशेत् स्वपेत्। तथा च विष्णुपुराणम्।
"पुनः पाकमुपादाय सायमप्यवनीपते।
वैश्वदेवनिमित्तं वै पत्न्या सार्द्धं बलिं हरेत्॥
अतिथिश्चागतं तत्र स्वशक्त्या पूजयेद्बुधः।
दिवातिथौ तु विमुखे गते यत् पातकं भवेत्।
तदेवाष्टगुणं पुंसां सूर्य्योढ़े विमुखे गते॥"
सूर्य्योढ़े अस्तं गते सूर्य्ये। तथा,—
"कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही।
गच्छेदस्फुटितां शय्यामपि दारुमयीं नृप॥"
भोजने सायमिति साहचर्य्यपरं प्रागुक्तात्॥ अथ रात्रौ शयनविधिः। तत्र सूर्य्ये शय्या च न पातनीया सा च सूर्य्योदयात् पूर्व्वमुत्तोलनीया। तथा च स्मृतिः।
"भास्कराद्दृष्टशय्यानि नित्याच्चिवसितानि च।
सूर्य्यावलोकितदीपानि लक्ष्मीं घ्नन्ति भाजनम्॥"
व्यासः।
"शुचौ देशे विविक्ते च गोमयेनोपलेपिते।
प्रागुदक्प्लवने चैव संविशेत्तु सदा बुधः॥
माङ्गल्यं पूर्णकुम्भञ्च शिरःस्थाने निधाय च।
वैदिकैर्गारुड़ैर्मन्त्रै रक्षां कृत्वा स्वपेत्ततः॥"
गर्गः।
"स्वगृहे प्राक्शिराः शेते श्वाशुरे दक्षिणाशिराः।
प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः॥"
मार्कण्डेयपुराणे।
"प्राक्शिरः शयने विद्यात् धनमायुश्च दक्षिणे।
पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे॥"
तथा।
"नमस्कृत्याव्ययं विष्णुं समाधिस्थं स्वपेन्निशि॥"
मार्कण्डेयः।
"शून्यालये श्मशाने च एकवृक्षे चतुष्पथे।
महादेवगृहे चापि शर्क्कराणोष्ट्रपांशुषु॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि।
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा॥"
स्वपेदिति शेषः॥ * ॥ अथ रात्रौ दारोपगमनविधिः। याज्ञवल्क्यः।
"षोड़शर्त्तुर्निशाः स्त्रीणां तासु युग्मासु संविशेत्।
ब्रह्मचार्य्येव पर्व्वण्याद्याश्चतस्रस्तु वर्जयेत्॥"
स्त्रीणां षोड़शनिशा ऋतुर्गर्भाधानयोग्यकालः।

तत्रोक्तविधिना गच्छेत्। तत्र युग्मासु रात्रिष्वपि पर्व्ववर्ज्जं ब्रह्मचार्य्येव भवति। तत्र व्रतादौ गच्छतो ब्रह्मचर्य्यस्खलनदोषो नास्ति इति मिताक्षरा। विष्णुपुराणम्।
"अष्टम्येकादशीममावास्यामुभे पक्षे चतुर्द्दशीम्।
मैथुनं नोपसेवेत ब्राह्मणीव मम प्रियाम्॥"
हारीतः। "चतुर्थेऽहनि स्नातायां युग्मासु च गर्भाधानवदुपेत ब्रह्मगर्भं सन्दधातीति।" अत्र चतुर्थ्यां रात्रौ यद्गर्भाधानमुक्तं तद्रजोनिवृत्तौ बोध्यम्। रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला। इति मनुवचनैकवाक्यत्वात्। साध्वी गर्भाधानादिविहितकर्म्मयोग्येत्यर्थः। आद्याश्चतस्रस्तु वर्ज्जयेत्। इति तु रजोनिवृत्तीतरपरम्। अनृतावपि कामुकीगमनमाह। विष्णुपुराणम्।
"स्वतो नरकमभ्येति क्षीयेच्चापि चायुषः।
परदाररतिः पुंसामुभयत्रापि भीतिदा॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत्।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि॥"
पैठीनसिः। "त्वाष्ट्रं विश्वरूपं जघान वज्रेणेन्द्रस्तं प्रति देवा ब्रह्महन्निति अवदन् स स्त्रिय उपागच्छत् वरं दास्यामि ततोऽस्यास्तृतीयं ब्रह्महत्यायाः प्रपद्यन्त स्त्रियः एकं भूमिर्व्वनस्पतयश्चैकम्। तासां मघवा तुष्टो वरं प्रायच्छत भूमेः स्थिरत्वं वृक्षाणां छिन्नप्ररोहणं स्त्रीणां सर्व्वकालेषु सम्भवः।" सम्भवो मेलनं सम्भोग इति यावत्। सर्व्वकाले ऋतावनृतौ च। न तु प्रतिषिद्धपर्व्वादौ। तथाच गोतमः। ऋतावुपेयात् सर्व्वत्र वा प्रतिषिद्धवर्ज्जमिति। दुष्टकालमाह ज्योतिषे।
"ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिकाश्विनी।
उत्तरात्रितयं त्यक्त्वा पर्व्ववर्ज्जं व्रजेदृतौ॥"
एवञ्च।
"ऋतौ नोपैति यो भार्य्यामनृतौ यश्च गच्छति।
तुल्यमाहुस्तयोर्द्दोषमयोनौ यश्च सिञ्चति॥"
बौधायनीयमनृतौ गमनदोषाभिधानमकामाविषयम्। विष्णुः। पर्व्वानारोग्यवर्ज्जमृतावगच्छन् पत्नीं त्रिरात्रमुपवसेदिति। वृद्धशातातपः।
"स्त्रीणां संप्रेक्षणात् स्पर्शात् ताभिः संकथनादपि।
ब्रह्मचर्य्यं विपद्येत न दारेष्वृतुसङ्गमात्॥"
संप्रेक्षणात् संकथनादित्यत्र सरागत्वं संग्रन्थार्थः। श्राद्धानन्तरन्तु निषेधमाहतुः शङ्खलिखितौ। ऋतुस्नातां तदहोरात्रं परिहरेत् नार्त्तवे दिवामैथुनं व्रजेत् क्षीणाल्पवीर्य्याश्च दिवा प्रसूयन्तेऽल्पायुषश्च तस्मादेतद्विवर्ज्जयेत्। प्रजाकामश्च पितॄणां नोपहरेत तन्तुं विच्छिन्द्यात् प्रयतेताच्छेदाय तेनाप्रतिष्ठो भवति तस्मात् प्रतिष्ठाकामः प्रजया प्रतिष्ठतेति। नोपहरेदिति निषेधे। तन्तुं सन्तानं अच्छेदाय अविच्छेदाय सन्तानस्य। येन यस्मात् अप्रतिष्ठः प्रजानुत्पत्त्या अप्राप्तप्रतिष्ठः सन् पतति तस्मात् तदुत्पत्त्यर्थं यतितव्यमिति कल्पतरुः॥ एवञ्च श्राद्धदिने यदभिगमनं प्रागुक्तयाज्ञवल्क्यवचनात् उक्तं मिताक्षरायां तद्वेयम्। वशिष्ठः।
"शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति।
यस्यान्नं तस्य ते पुत्रा अस्वर्ग्याः शूद्रवत् द्विजाः॥"
पराशरः।
"ऋतुस्नातान्तु यो भार्य्यां सन्निधौ नोपगच्छति।
स गच्छेन्नरकं घोरं ब्रह्महेति तथोच्यते॥"
सन्निधावित्यभिधानात् असन्निहितस्य गमनाभावे न दोषः। पुत्त्रोत्पत्तिं यावदृत्वभिगमननियममाह। कूर्म्मपुराणम्।
"ऋतुकालाभिगामी स्यात् यावत् पुत्त्रो न जायते।
ऋणापकर्षणार्थं हि पुत्त्रस्योत्पादनं प्रति॥"
यतितव्यमिति शेषः। आपस्तम्बः।
"ऋतौ तु गर्भशङ्कित्वात् स्नानं मैथुनिनः स्मृतम्।
अनृतौ तु सदा कार्य्यं शौचं मूत्रपुरीषवदिति॥
द्वावेतावशुची स्यातां दम्पती शयनं गतौ।
शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान्॥
मैथुनस्नुतः प्राक् मलमूत्रोत्सर्गं न कुर्य्यात्।
तैलाभ्यक्ते तथा वान्ते श्मश्रुकर्म्मणि मैथुने।
मूत्रोच्चारं यदा कुर्य्यादहोरात्रेण शुद्ध्यति॥"
इति वचनात्।
पुत्त्रानुत्पत्तौ पारस्करः। सा यदि गर्भं नादधीत निर्दिग्धिकायाः श्वेतपुष्पाया उपोष्य पुष्यनक्षत्रे मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदकेन पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चतीति। इयमोषधीत्रायमाणा सहमाना सरस्वती। अस्या अहं वृहत्याः पुत्त्रः पितुरिव नाम जग्रभमित इति। सा परिणीता ऋतुकालेऽपि कृताभिगमना यदि गर्भं न दधाति तदा उपोष्य पुष्ये नक्षत्रे श्वेतकण्टकारिकामूलमुत्थाप्य चतुर्थेऽहनि ऋतुस्नातायां सत्यां रात्रावुदकेन पिष्ट्वा दक्षिणनासापुटे पतिः इयमोषधीरिति मन्त्रेण नस्यं ददाति दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा प्राक्शिरः संविष्टाया इति गोभिलस्मरणात्। आयुर्व्वेदीये।
"पिप्पलीं शृङ्गवेरञ्च मरीचं नागकेशरम्।
आज्येन सह भुञ्जीत अपि वन्ध्या प्रसूयते॥"
याज्ञवल्क्यः।
"एवं गच्छन् स्त्रियं क्षामां मघां मूलाञ्च वर्ज्जयेत्।
सुस्थ इन्दौ सकृत् पुत्त्रं लक्षण्यं जनयेत् पुमान्॥"
क्षामामाहारलाघवादिना। सकृदेकवारम्। अत्र सम्यगाधानहेतुतया उत्तानकरचरणामेव कुर्व्वीत न तिर्य्यगाश्रितकरचरणां स्त्रियञ्च ऋत्वभिगमनानन्तरं दक्षिणपार्श्वे न स्वापयेत्। पुरुषायिते तु गर्भानुत्पत्तिरिति विशेषः। दक्षः।
"प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते॥"
इत्याह्निकतत्त्वम्॥ *॥
अथ रात्रिजागरणदोषगुणौ।
"रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा।
अरूक्षमनभिष्यन्दि त्वासीनप्रचलायितम्॥
कफमेदोविषार्त्तानां रात्रौ जागरणं हितम्॥
दिवा वा यदि वा रात्रौ निद्रा सात्मीकृता तु यैः।
न तेषां स्वपतां दोषो जाग्रतां वा विधीयते॥"
इति राजवल्लभः॥ *॥
रात्रौ कुलपूजा यथा। "यत्तु।
रात्रावेव महापूजा कर्त्तव्या वीरवन्दिते।
न दिने सर्व्वथा कार्य्या शासनान्मम सुव्रते॥
तत् पुनः कुलपूजाविषयम्।
अर्द्धरात्रात् परं यच्च मुहूर्त्तद्वयमेव च।
सा महारात्रिरुद्दिष्टा तद्दत्तमक्षयन्तु वै॥"
इति तन्त्रसारः॥ *॥
अथ रात्रौ विहितनिषिद्धे। छन्दोगपरिशिष्टम्।
"मुनिभिर्द्दिरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्।
अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः॥"
जाबालः।
"अहःसु तिथयः पुण्याः कर्म्मानुष्ठानतो दिवा।
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते॥"
देवलः।
"राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु।
स्नानदानादिकं कुर्य्युर्निशि काम्यव्रतेषु च॥"
ब्रह्माण्डपुराणम्।
"न रात्रौ पारणं कुर्य्यात् ऋते वै रोहिणीव्रतात्।
तत्र निश्यपि वै कुर्य्याद्वर्जयित्वा महानिशाम्॥"
इति तिथ्यादितत्त्वम्॥ *॥
"एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन दानेन नैवाद्वादशिको भवेत्॥"
स्कन्दपुराणम्।
"प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा।"
देवीपुराणम्।
"हविष्यभोजनं सत्यं स्नानमाहारलाघवम्।
अग्निकार्य्यमधःशय्यां नक्तभोजी षडाचरेत्॥"
इत्येकादशीतत्त्वम्॥ *॥
देवलः।
"रात्रौ श्राद्धं न कुर्व्वीत राक्षसी कीर्त्तिता हि सा।
सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरोदिते॥"
इति श्राद्धतत्त्वम्॥ *॥
विष्णुपुराणम्।
"प्रातर्निशि तथा सन्ध्यामध्याह्नादिषु संस्मरन्।
नारायणमवाप्नोति सद्यः पापक्षयं नरः॥"
रात्रावपि गङ्गायां स्नानादौ प्रतिप्रसवमाह।

ब्रह्मपुराणम् ।
"दिवारात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः ।
स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृतसज्जलैः ॥"
रात्रिचराधिकारमुपक्रम्य आदिपर्व्वणि ।
"अतो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः ।
गर्हयन्ति जनान् सर्व्वान् वनस्थान् नृपतीनपि ॥"
तत्रार्ज्जुनस्य प्रतिवचनम् ।
"समुद्रे हिमवत्पार्श्वे गङ्गायामस्याञ्च दुर्म्मते ।
रात्रावहनि सन्ध्यायां कस्य गुप्तः परिग्रहः ॥"
देवलः ।
"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।
तस्यां स्नानं न कुर्व्वीत काम्यनैमित्तिकादृते ॥"
अतएव कल्पतरुः । न नक्तं स्नायादिति बौधायनवचनं रागप्राप्तस्नानविषयम् । एवञ्च गङ्गास्नानस्य दिवारात्रिकर्त्तव्यत्वाविशेषात् तत्तन्निमित्ततिथिविशेषस्यापि दिवारात्रिसम्बन्धित्वाविशेषः । इति प्रायश्चित्ततत्त्वम् ॥
(रात्र्युक्तनियमाः यथा,—
"रात्रौ च भोजनं कुर्य्यात् प्रथमप्रहरागमे ।
किञ्चिदूनं समश्नीयात् दुर्ज्जरन्तत्र वर्ज्जयेत् ॥
शरीरे जायते नित्यं देहिनः सुरतस्पृहा ।
अव्यवायान्मेहमेदोवृद्धिः शिथिलता तनोः ॥
बालेति गीयते नारी यावद्वर्षाणि षोड़श ।
ततस्तु तरुणी ज्ञेया द्वात्रिंशत् वत्सरावधि ॥
तदूर्द्धमधिरूढ़ा स्यात् पञ्चाशद्वत्सरावधि ।
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्ज्जिता ॥"
अधिरूढ़ा प्रौढ़ा ।
"निदाघशरदोर्बाला हिता विषयिणो मता ।
तरुणी शीतसमये प्रौढ़ा वर्षावसन्तयोः ॥
नित्यं बाला सेव्यमाना नित्यं वर्द्धयते बलम् ।
तरुणी ह्रासयेच्छक्तिं प्रौढ़ोत्पादयते जराम् ॥
सद्यो मांसं नवान्नं बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकं स्नानं सद्यः प्राणकराणि षट् ॥
पूतिमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥"
प्राणशब्दोऽत्र बलवाचकः । बालार्कः कन्यार्कः ।
"वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात् ।
वयोऽधिकां स्त्रियं गत्वा तरुणः स्थविरायते ॥
आयुष्मन्तो मन्दजरा वपुर्व्वर्णबलान्विताः ।
स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः ॥
सेवेत कामतः कामं बलाद्वाजीकृतो हि ने ।
प्रकामन्तु निषेवेत मैथुनं शिशिरागमे ॥
त्र्यहाद्वसन्तशरदोः पक्षाद्वृष्टिनिदाघयोः ॥"
सुश्रुतस्तु ।
"त्रिभिस्त्रिभिरहोभिर्हि समेयात् प्रमदान्नरः ।
सर्व्वेष्वृतुषु घर्म्मेषु पक्षात् पक्षाद्व्रजेद्बुधः ॥"
समेयात् सङ्गच्छेत् घर्म्मे ग्रीष्मे ।
"शीते रात्रौ दिवा ग्रीष्मे वसन्ते तु दिवानिशि ।
वर्षासु वारिदध्वाने शरत्सु सरसः स्मरः ॥
वर्जयेत् पुरुषो नारीं सन्ध्ययोर्न च पर्व्वसु ।
गोसर्गे चार्द्धरात्रे च तथा मध्यदिनेऽपि च ॥
विहारं भार्य्यया कुर्य्याद्देशेऽतिशयसंवृते ।
रम्ये अथाङ्गनागारे सुगन्धे सुखमारुते ॥
द्वेषी गुरुजनासन्ने विस्तृतेऽतिचपाकरे ।
श्रूयमाणे यथाहेतुवचने न रमेत ना ॥
स्नातश्चन्दनलिप्ताङ्गः सुगन्धः सुमनोऽन्वितः ॥
भुक्तवृष्यः सुवसनः सुवेशः समलङ्कृतः ।
ताम्बूलवदनः पत्न्यामनुरक्तोऽधिकः स्मरः ॥
पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे ।
अत्याशितोऽधृतिः क्षुद्वान् सव्यथाङ्गः पिपासितः ॥
बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् ॥"
रोगी मैथुनसंवर्द्धनीयरोगयुक्तः ।
"भार्य्यां रूपगुणोपेतां तुल्यशीलां कुलोद्भवाम् ।
अतिकामोऽभिकामान्तु हृष्टो हृष्टामलङ्कृताम् ॥
सेवेत प्रमदां युक्त्या वाजीकरणबृंहितः ।
रजस्वलामकामाञ्च मलिनामप्रियान्तथा ॥
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम् ।
हीनाङ्गीं गर्भिणीं द्वेष्यां योनिरोगसमन्विताम् ॥
सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि ॥
नाभिगच्छेत् पुमान्नारीं भूरिवैगुण्यशङ्कया ॥"
"स्नानं सशर्करं क्षीरं भक्ष्यमैक्षवसंस्कृतम् ।
वातो मांसरसः स्वप्नः सुरतान्ते हिता अमी ॥
शूलकासज्वरश्वासकार्श्यपाण्ड्वामयक्षयः ।
अतिव्यवायाज्जायन्ते रोगाश्चाक्षेपकादयः ॥
रात्रौ जागरणं रूक्षं कफदोषविषार्त्तिजित् ।
निद्रा तु सेविता काले धातुसाम्यमतन्द्रिताम् ॥
पुष्टिवर्णबलोत्साहं वह्निदीप्तिं करोति च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तद्वैदिकपर्य्यायः । श्यावी १ क्षपा २ शर्व्वरी ३ अक्तुः ४ ऊर्म्या ५ राम्या ६ यम्या ७ नम्या ८ दोषा ९ नक्ता १० तमः ११ रजः १२ असिक्नी १३ पयस्वती १४ तमस्वती १५ घृताची १६ शिरिणा १७ मोकी १८ शोकी १९ ऊधः २० पयः २१ हिमा २२ वस्वी २३ । इति त्रयोविंशती रात्रिनामानि । इति वैदनिघण्टौ । १ । ७ ॥ (क्रौञ्चद्वीपस्थनदीविशेषः । यथा, मात्स्ये । १२२ । ८७ ।
"शृतास्त्वेव नद्यस्तु प्रतिवर्षं गताः शुभाः ।
गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ॥")
रात्रिकरः, पुं, (रात्रिं करोतीति । कृ+टः ।) चन्द्रः । इति हेमचन्द्रे निशाकरशब्ददर्शनात् ॥ (कर्पूरः । इत्यमरः । २ । ६ । १३० ॥)
रात्रिचरः, पुं, (रात्रौ चरतीति । "चरेष्टः ।" ३।२।१६। इति टः । "रात्रेः कृति विभाषा ।" ६ । ३ । ७२ । इति पक्षे मुमभावः ।) राक्षसः । इत्यमरः । १।१।६३ ॥ रात्रौ गमनकर्त्तरि, त्रि ॥
रात्रिचरी, स्त्री, (रात्रिचर+टित्वात् ङीप् ।) राक्षसी । यथा, भट्टिः । २ । २३ ।
"तं विप्रदर्शं कृतघातयत्नां
यान्तं वने रात्रिचरी डुढौके ।
जिघांसुवेदं धृतभासुरास्त्रं
स्तां ताड़काख्यां निजघान रामः ॥"
रात्रिजलं, क्ली, (रात्रेर्जलम् ।) कुज्झटिका । इति शब्दमाला ॥
रात्रिजागरः, पुं, (रात्रौ जागर्त्तीति । जागृ+अच् ।) कुक्कुरः । इति हेमचन्द्रः ॥ रात्रौ जागरणकर्त्तरि, त्रि ॥
रात्रिजागरदः, पुं, (रात्रौ जागरं जागरणं ददातीति । दा+कः ।) मशकः । इति राजनिर्घण्टः ॥
रात्रिञ्चरः, पुं, (रात्रौ चरतीति । चर्+टः । "रात्रेः कृति विभाषा ।"६।३।७२। इति मुम् ।) राक्षसः । इत्यमरः । १।१।६३ ॥ (स्त्रियां ङीप् । रात्रिञ्चरी ॥) रात्रौ गमनकर्त्तरि, त्रि ॥
रात्रिपुष्पं, क्ली, (रात्रौ पुष्प्यति विकाशते इति । पुष्प्+अच् ।) उत्पलम् । इति राजनिर्घण्टः ॥
रात्रिमटः, पुं, (रात्रौ अटतीति । अट्+अच् ॥ "रात्रेः कृति विभाषा ।" ६ । ३ । ७२ । इति मुम् ।) राक्षसः । इति त्रिकाण्डशेषः ॥ रात्रौ गमनकर्त्तरि, त्रि ॥
रात्रिमणिः, पुं, (रात्रेर्मणिरिव ।) चन्द्रः । इति हारावली । १३ ॥
रात्रिवासः, [स्] क्ली, (रात्रेर्वासो वस्त्रमिव ।) अन्धकारः । इति शब्दमाला ॥ रात्रौ शयनकालीनपरिधेयवस्त्रम् । यथा । ब्राह्मे मुहूर्त्ते उत्थाय मुक्तस्वापः रात्रिवासस्त्यक्त्वा शिरसि सहस्रदलकमलावस्थितं श्वेतवर्णं द्विभुजं वराभयकरं श्वेतमाल्यानुलेपनं स्वप्रकाशरूपं स्ववामस्थितरक्तशक्त्या सुप्रकाशरूपया सहितं गुरुं विभाव्य मानसोपचारैराराध्य नमस्कुर्य्यात् । इति तन्त्रसारः ॥ अपि च ।
"शयनस्यान्धकारे च रात्रिवासो दिने तथा ।
स्नानाम्बरं कुवेशञ्च वर्ज्जयेत् शुष्कभोजनम् ॥"
इति कर्म्मलोचनम् ॥
रात्रिविगमः, पुं, (रात्रेर्विगमो यत्र ।) प्रभातम् । इति शब्दमाला ॥
रात्रिविश्लेषगामी, [न्] पुं, (रात्रौ विश्लेषं विच्छेदं गच्छतीति । गम्+णिनिः ।) चक्रवाकः । इति राजनिर्घण्टः ॥
रात्रिवेदः, पुं, (रात्रिं रात्रिशेषं वेदयति ज्ञापयतीति । विद्+णिच्+अच् ।) कुक्कुटः । इति शब्दरत्नावली ॥
रात्रिवेदी, [न्] पुं, (रात्रिं रात्रिशेषं वेदयति स्मारयतीति । रात्रि+विद्+णिच्+णिनिः ।) कुक्कुटः । इति त्रिकाण्डशेषः ॥
रात्रिहासः, पुं, (रात्रेर्हास इव शुभ्रत्वात् । रात्रौ हासो विकाशो यस्य इति वा ।) श्वेतोत्पलम् । इति शब्दरत्नावली ॥
रात्रिहिण्डकः, पुं, (रात्रौ हिण्डति अन्तःपुरमध्ये भ्रमतीति । हिण्ड गतौ+ण्वुल् ।) अन्तःपुररक्षकः । इति शब्दरत्नावली ॥
रात्री, स्त्री, (रात्रि+कृदिकारादिति ङीष् ।) निशा । इत्यमरटीकायां भरतः ॥ (यथा, ऋग्वेदे । १० । १२७ । १ ।

"रात्री सख्यत् आयती पुरुत्रा देवचभिः ।" हरिद्रा । निशापर्य्यायत्वात् ।)

राव्राटः, पुं, (रात्रौ अटतीति । अट्+अच् ।) राक्षसः । इति केचित् । रात्रौ गमनकर्त्तरि, त्रि ।

रात्र्यन्धः, त्रि, (रात्रौ अन्धः ।) रात्रौ दृष्टिहीनो नरः । रातिकाणा इति भाषा । रात्रौ स्वाभाविकदृष्टिहीनपक्षी । स तु काकादिः । यथा, मार्कण्डेयपुराणे देवीमाहात्म्यम् ।

"दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥"

तन्नाशकौषधं यथा,—

"देवदारोश्च वै चूर्णं अजामूत्रेण भावयेत् ।
एकविंशति वै वारमक्षिणी तेन चाञ्जयेत् ।
रात्र्यन्धता पटलता नश्येदिति विनिश्चयः ॥"

इति गारुडे १८६ अध्यायः ॥

राद्धं, त्रि, (राध सिद्धौ+क्तः ।) पक्वम् । सिद्धम् । इति हेमचन्द्रः । ३ । ७६ ॥ त्रिकाण्डशेषश्च ॥ (यथा, भागवते । ३ । ६ । ४० ।

"पूर्त्तेन तपसा यज्ञैर्दानैर्योगैः समाधिना ।
राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम् ॥")

राद्धान्तः, पुं, (राद्धः सिद्धः अन्तो निर्णयो यस्मात् ।) सिद्धान्तः । इत्यमरः । १ । ५ । ४ ॥ (यथा, भागवते । १२ । ११ । १ ।

"अथेममर्थं पृच्छामो भवन्तं बहुवित्तमम् ।
समस्ततन्त्रराद्धान्ते भवान् भागवततत्त्ववित् ॥")

राध, न औ य सिद्धौ । इति कविकल्पद्रुमः ॥ (स्वा०-दिवा०-च-पर०-स्वादिपक्षे सक०-दिवादिपक्षे अक०-अनिट् ।) रेफादिः । न, राध्नोति । य, राध्यति । औ, अरात्सीत् । सिद्धिरिह स्वादिपक्षे निष्पादना । दिवादिपक्षे निष्पत्तिः । अन्नं राध्नोति विप्राणां य इति हलायुधः । निष्पादयतीत्यर्थः । सततं राध्यति श्रिये इति हलायुधः । निष्पन्नो स्यादित्यर्थः । सिद्धिरन्तर्भूतण्यर्थत्वादुभयत्रैव निष्पादनेति गोविन्दभट्टः । इति दुर्गादासः ॥ (शुभाशुभपर्य्यालोचने च । यथा, मुग्धबोधे । "गर्गो राध्यति रामाय ।" रामस्य शुभाशुभं पर्य्यालोचयतीत्यर्थः ॥)

राधः, पुं, (राधा विशाखा तद्युता पौर्णमासी राधी । सास्मिन्नस्तीति । राधी+"सास्मिन् पौर्णमासीति ।" ४ । २ । २१ । इति अण् ।) वैशाखमासः । इत्यमरः । १ । ४ । १६ ॥ (यथा, राजतरङ्गिण्याम् । ८ । २४८२ ।

"राधमासावधि दधुस्ततः प्रभृति वारिदाः ॥"

धनम् । यथा, ऋग्वेदे । १ । ३० । ५ ।

"स्तोत्रं राधानां पते गीर्वाहो वीर यस्य ते ।"
"हे इन्द्र राधानां पते धनानां पालक ।" इति तद्भाष्ये सायणः ॥)

राधनं, क्ली, (राध्+ल्युट् ।) साधनम् । प्राप्तिः । इति मेदिनी । ने, ११४ ॥ तोषः । इति हेमचन्द्रः ॥

राधना, स्त्री, (राध्+णिच्+युच् । टाप् ।) भाषणम् । इति मेदिनी । ने, ११४ ॥

राधा, स्त्री, (राध्नोति साधयति कार्य्याणीति । राध+अच् । टाप् ।) धन्विनां चित्रभेदः । (यथा, बालभारते १ अङ्के । "इह हि महाराजसमाजे न जाने कमवलम्बिष्यते राधावेधकीर्त्तिर्निर्व्वर्णयन्ती ।") गोपीविशेषः । विशाखानक्षत्रम् । आमलकी । विष्णुक्रान्ता । विद्युत् । इति मेदिनी । धे, १३ ॥ (सूतस्याधिरथस्य पत्नी । असौ एव कुन्तीगर्भजस्य शिशोः कर्णस्य पालयित्री अतएव कर्णो राधासुत इति ख्यात आसीत् । यथा, महाभारते । १ । ६७ । १३८—१३६ ।

"निगूहमाना जातं वै बन्धुपक्षभयात्तदा ।
उत्ससर्ज्ज जले कुन्ती तं कुमारं यशस्विनम् ॥
तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः ।
राधायाः कल्पयामास पुत्त्रं सोऽधिरथस्तदा ॥"

तथा च देवीभागवते । २ । ६ । ३८ ।

"राधा सूतस्य भार्य्या वै तयासौ प्रार्थितः सुतः ।
कर्णोऽभूद्बलवान् वीरः पालितः सूतसद्मनि ॥")

श्रीराधिका । सा च श्रीकृष्णवामभागांशा शक्तिः । यथा,—

"स कृष्णः सर्व्वसृष्ट्यादौ सिसृक्षुरेक एव च ।
सृष्ट्युन्मुखस्तदंशेन कालेन प्रेरितः प्रभुः ॥
स्वेच्छामयः स्वेच्छया च द्विधारूपो बभूव ह ।
स्त्रीरूपा वामभागांशा दक्षिणांशः पुमान् स्मृतः ॥
तां ददर्श महाकामी कामाधारः सनातनः ।
अतीवकमनीयाञ्च चारुचम्पकसन्निभाम् ॥"

इत्यादि ॥*॥

तस्या अनपत्यताकारणादिर्यथा,—

"हरिमाद्यं तया सार्द्धं रासेशो रासमण्डले ।
रासोल्लासे सुरहसि रासक्रीडाञ्चकार ह ॥
नानाप्रकारशृङ्गारं शृङ्गारो मूर्त्तिमानिव ।
चकार सुखसम्भोगं यावद्वै ब्रह्मणो दिनम् ॥
ततः स चापरिश्रान्तस्तस्या योनौ जगत्पिता ।
चकार वीर्य्याधानञ्च नित्यानन्दः शुभे क्षणे ॥
गात्रतो योषितस्तस्याः सुरतान्ते च सुव्रत ।
निःससार श्रमजलं श्रान्तायास्तेजसा हरेः ॥
महाक्रमणक्लिष्टाया निःश्वासश्च बभूव ह ।
तदा वव्रे श्रमजलं तत्सर्व्वं विश्वगोलकम् ॥
स तु निश्वासवायुश्च सर्व्वाधारो बभूव ह ।
निःश्वासवायुः सर्व्वेषां जीविनाञ्च भवेषु च ॥
बभूव मूर्त्तिमद्वायोर्वामाङ्गात्प्राणवल्लभा ।
तत्पत्नी सा च तत्पुत्त्राः प्राणाश्च पञ्च जीविनाम् ॥
प्राणोऽपानः समानश्चैवोदानो व्यान एव च ।
बभूवुरेव तत्पुत्त्रा अधःप्राणाश्च पञ्च च ॥
घर्म्मतोयाधिदेवश्च बभूव वरुणो महान् ।
तद्वामाङ्गात्तु तत्पत्नी वरुणानी बभूव ह ॥
अथ सा कृष्णशक्तिश्च कृष्णगर्भं दधार च ।
शतमन्वन्तरं यावत् ज्वलन्ती ब्रह्मतेजसा ॥
कृष्णप्राणाधिदेवी सा कृष्णप्राणाधिकप्रिया ।
कृष्णस्य सङ्गिनी शश्वत् कृष्णवक्षःस्थलस्थिता ॥
शतमन्वन्तरातीतकालेऽतीतेऽपि सुन्दरी ।
सुषाव डिम्बं स्वर्णाभं विश्वाधारालयं परम् ॥
दृष्ट्वा डिम्बञ्च सा देवी हृदयेन विदूयता ।
उत्ससर्ज्ज च कोपेन ब्रह्माण्डं गोलके जले ॥
दृष्ट्वा कृष्णश्च तत्त्यागं हाहाकारं चकार ह ।
शशाप देवीं देवेशस्तत्क्षणञ्च यथोचितम् ॥
यतोऽपत्यं त्वया त्यक्तं कोपशीले सुनिष्ठुरे ।
भव त्वमनपत्यापि चाद्यप्रभृति निश्चितम् ॥
या यास्त्वदंशरूपाश्च भविष्यन्ति सुरस्त्रियः ।
अनपत्याश्च ताः सर्व्वास्त्वत्समा नित्ययौवनाः ॥
एतस्मिन्नन्तरे देवीजिह्वाग्रात् सहसा ततः ।
आविर्ब्बभूव कन्यैका शुक्लवर्णा मनोहरा ॥
पीतवस्त्रपरीधाना वीणापुस्तकधारिणी
रत्नभूषणभूषाढ्या सर्व्वशास्त्राधिदेवता ॥
अथ कालान्तरे सा च द्विधारूपा बभूव ह ।
वामार्द्धाङ्गा च कमला दक्षिणार्द्धा सरस्वती ॥
एतस्मिन्नन्तरे कृष्णो द्विधारूपो बभूव सः ।
दक्षिणार्द्धश्च द्विभुजो वामार्द्धश्च चतुर्भुजः ॥
उवाच वाणीं श्रीकृष्णस्त्वमस्य कामिनी भव ।
अत्रैव मानिनी राधा नैव भद्रं भविष्यति ॥
एवं लक्ष्मीञ्च प्रददौ तुष्टो नारायणाय च ।
स जगाम च वैकुण्ठं ताभ्यां सार्द्धं जगत्पतिः ॥
अनपत्ये च ते द्वे च यतो राधाङ्गसम्भवा ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २ अध्यायः ॥

राधाया उत्पत्तिर्यथा,—

"पुरा वृन्दावने रम्ये गोलोके रासमण्डले ।
शतशृङ्गैकदेशे च मल्लिकामाधवीवने ॥
रत्नसिंहासने रम्ये तस्थौ तत्र जगत्पतिः ।
स्वेच्छामयश्च भगवान् बभूव रमणोत्सुकः ॥
रिरंसां कर्त्तुमिच्छुश्च तद्बभूव सुरेश्वरी ।
इच्छया च भवेत् सर्व्वं तस्य स्वेच्छामयस्य च ।
एतस्मिन्नन्तरे दुर्गे द्विधारूपो बभूव सः ।
दक्षिणाङ्गश्च श्रीकृष्णो वामार्द्धाङ्गा च राधिका ॥
बभूव रमणी रम्या रासेशी रमणोत्सुका ।
अमूल्यरत्नाभरणा रत्नसिंहासनस्थिता ॥
वह्निशुद्धांशुकाधाना कोटिपूर्णशशिप्रभा ।
तप्तकाञ्चनवर्णाभा राजिता च स्वतेजसा ॥
सस्मिता सुदती शुद्धा शरत्पद्मनिभानना ।
बिभ्रती कवरीं रम्यां मालतीमाल्यमण्डिताम् ॥
रत्नमालाञ्च दधती ग्रीष्मसूर्य्यसमप्रभाम् ।
मुक्ताहारञ्च शुभ्रञ्च गङ्गाधारानिभेन च ॥
संयुक्तं वर्त्तुलोत्तुङ्गं सुमेरुगिरिसन्निभम् ।
कठिनं सुन्दरं दृश्यं कस्तूरीपत्त्रचित्रितम् ॥
माङ्गल्यं मङ्गलार्हञ्च स्तनयुग्मञ्च बिभ्रतीम् ।
नितम्बश्रोणिभारार्त्तां नवयौवनसंयुताम् ॥
कामातुरां सस्मिताञ्च ददर्श रसिकेश्वरः ।
दृष्ट्वा कान्तां जगत्कान्तो बभूव रमणोत्सुकः ॥
दृष्ट्वा रिरंसुं कान्तञ्च सा दधार हरेः पुरः ।
रासेशं भूय गोलोके सा दधार हरेः पुरः ।
तेन राधा समाख्याता पुराविद्भिर्महेश्वरि ।

राधा भजति श्रीकृष्णं स च ताञ्च परस्परम् ।
उभयोः सर्व्वसाम्यञ्च सदा सन्तो वदन्ति च ।
भवनं धावनं रासे स्मरत्यालिङ्गनं जपेत् ॥
तेन जल्पति सङ्केतादस्या राधां यदीश्वरः ।
राशब्दोच्चारणाद्भक्तो राति मुक्तिं सुदुर्लभाम् ॥
धाशब्दोच्चारणाद्दुर्गे धावत्येव हरेः पदम् ।
कृष्णवामांशसम्भूता राधा रासेश्वरी पुरा ॥
तस्याश्चांशांशकलया बभूवुर्देवयोषितः ।
रा इत्यादानवचनो धा च निर्व्वाणवाचकः ॥
ततोऽवाप्नोति मुक्तिञ्च सा च राधा प्रकीर्त्तिता ।
बभूव गोपीसंघश्च राधाया लोमकूपतः ॥
श्रीकृष्णलोमकूपेभ्यो बभूवुः सर्व्वबल्लवाः ।
राधा वामांशभागेन महालक्ष्मीर्बभूव सा ॥
चतुर्भुजस्य सा पत्नी देवी वैकुण्ठवासिनी ।
तदंशा राजलक्ष्मीश्च राजसम्पत्प्रदायिनी ॥
तदंशा मर्त्यलक्ष्मीश्च गृहिणाञ्च गृहे गृहे ।
शस्याधिष्ठातृदेवी च सा एव गृहदेवता ॥
स्वयं राधा कृष्णपत्नी कृष्णवक्षःस्थलस्थिता ।
प्राणाधिष्ठातृदेवी च तस्यैव परमात्मनः ॥
ब्रह्मादिस्तम्बपर्य्यन्तं सर्व्वं मिथ्यैव पार्व्वति ।
भज सत्यं परं ब्रह्म राधेशं त्रिगुणात् परम् ॥
परं प्रधानं परमं परमात्मानमीश्वरम् ।
सर्व्वाद्यं सर्व्वपूज्यञ्च निरीहं प्रकृतेः परम् ॥
स्वेच्छामयं नित्यरूपं भक्तानुग्रहविग्रहम् ।
तद्भिन्नानाञ्च देवानां प्राकृतं रूपमेव च ॥
तस्य प्राणाधिका राधा बहुसौभाग्यसंयुता ।
महद्विष्णोः प्रसूः सा च मूलप्रकृतिरीश्वरी ॥
मानिनीं राधिकां सन्तः सदा सेवन्ति नित्यशः ।
सुलभं यत्पदाम्भोजं ब्रह्मादीनां सुदुर्लभम् ॥
स्वप्ने राधापदाम्भोजं न हि पश्यन्ति बल्लवाः ।
स्वयं देवी हरेः क्रोडे छाया रायाणकामिनी ॥
स च द्वादशगोपानां रायाणः परमः प्रिये ।
श्रीकृष्णांशश्च भगवान् विष्णुतुल्यपराक्रमः ॥
श्रीदामशापात् सा देवी गोलोकादागता

महीम् ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे राधोपाख्यानं ४५ अध्यायः ॥ * ॥ अपि च ।

गर्ग उवाच ।

“शृणु नन्द प्रवक्ष्येऽहमितिहासं पुरातनम् ।
पुरा गोलोकवृत्तान्तं श्रुतं शङ्करवक्त्रतः ॥
श्रीदाम्नो राधया सार्द्धं बभूव कलहो महान् ।
श्रीदामा शापाद्दैत्यश्च गोपी राधा च गोकुले ॥
वृषभानुसुता सा च माता यस्याः कलावती ।
कृष्णस्यार्द्धाङ्गसम्भूता नाथस्य सदृशी सती ॥
गोलोकवासिनी सेयमत्र कृष्णाज्ञयाधुना ।
अयोनिसम्भवा देवी मूलप्रकृतिरीश्वरी ॥
मातुर्गर्भे वायुपूर्णं कृत्वा च मायया सती ।
वायुनिःसारणे काले धृत्वा च शिशुविग्रहम् ॥
आविर्बभूव सा सद्यः पृथ्व्यां कृष्णोपदेशतः ।
वर्द्धते सा व्रजे राधा शुक्ले चन्द्रकला यथा ॥
श्रीकृष्णतेजसोऽर्द्धेन सा च मूर्त्तिमती सती ।
एका मूर्त्तिर्द्विधा भूता भेदो वेदे निरूपितः ॥
इयं स्त्री न पुमान् किंवा सा वा कान्ता

पुमानयम् ।
द्वे रूपे तेजसा तुल्ये रूपेण च गुणेन च ॥
पराक्रमेण बुद्ध्या वा ज्ञानेन सम्पदेन च ।
पुरतो गमनेनैव किन्तु सा वयसाधिका ॥
ध्यायते तामयं शश्वदिमं सा स्मरति प्रियम् ।
रचिता चास्य प्राणैश्च तत्प्राणैर्मूर्त्तिमानयम् ॥
अस्य राधानुसारेण गोकुलागमनं परम् ।
स्वीकारं सार्थकं कर्त्तुं गोलोके यत् कृतं पुरा ॥
कंसभीतिच्छलेनैव गोकुलागमनं हरेः ।
प्रतिज्ञापालनार्थञ्च भयेशस्य भयं कुतः ॥” * ॥
राधाशब्दस्य व्युत्पत्तिर्यथा—
“राधाशब्दस्य व्युत्पत्तिः सामवेदे निरूपिता ।
नारायणस्तामुवाच ब्रह्माणं नाभिपङ्कजे ॥
ब्रह्मा तां कथयामास ब्रह्मलोके च शङ्करम् ।
पुरा कैलासशिखरे मामुवाच महेश्वरः ॥
देवानां दुर्लभं नन्द निशामय वदामि ते ।
सुरासुरमुनीन्द्राणां वाञ्छितां मुक्तिदां पराम् ॥
रेफो हि कोटिजन्माघं कर्म्मभोगं शुभाशुभम् ।
आकारो गर्भवासञ्च मृत्युञ्च रोगमुत्सृजेत् ॥
धकारमायुषो हानिमाकारो भवबन्धनम् ।
श्रवणस्मरणोक्तिभ्यः प्रणश्यति न संशयः ॥
रेफो हि निश्चलां भक्तिं दास्यं कृष्णपदाम्बुजे ।
सर्व्वेप्सितं सदानन्दं सर्व्वसिद्धौघमीश्वरम् ॥
धकारः सहवासञ्च तत्तुल्यकालमेव च ।
ददाति सार्ष्टिं सारूप्यं तत्त्वज्ञानं हरेः स्वयम् ॥
आकारस्तेजसो राशिं दानशक्तिं हरौ यथा ।
योगशक्तिं योगमतिं सर्व्वकालहरिस्मृतिम् ॥
श्रुत्युक्तिस्मरणाद्योगान्मोहजालञ्च किल्बिषम् ।
रोगशोकमृत्युमया वेपन्ते नात्र संशयः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३ अध्यायः ॥
तस्याः षोड़शनामानि तेषां व्युत्पत्तिश्च यथा,

नारद उवाच ।

“कानि षोड़श नामानि राधिकाया जगद्-

गुरोः ।
तानि मे वद शिष्याय श्रोतुं कौतूहलं मम ॥
श्रुतं नाम्नां सहस्रञ्च सामवेदनिरूपितम् ।
तथापि श्रोतुमिच्छामि त्वत्तो नामानि षोड़श ॥
अभ्यन्तराणि तेषां वा तदन्यान्येव वा विभो ।
अहो पुण्यस्वरूपाणि भक्तानां वाञ्छितानि च ॥
नामानि तेषां व्युत्पत्तिं सर्व्वेषां दुर्लभानि च ।
पावनानि जगन्मातुर्जगतां गूढ़रूपिणी ॥

नारायण उवाच ।

राधा रासेश्वरी रासवासिनी रसिकेश्वरी ।
कृष्णप्राणाधिका कृष्णप्रिया कृष्णस्वरूपिणी ॥
कृष्णवामांशसम्भूता परमानन्दरूपिणी ।
कृष्णा वृन्दावनी वृन्दा वृन्दावनविनोदिनी ॥
चन्द्रावती चन्द्रकान्ता शतचन्द्रनिभानना ।
नामान्येतानि साराणि तेषामभ्यन्तराणि च ॥
राधेत्येवञ्च संसिद्धा राकारो दानवाचकः ।
स्वयं निर्व्वाणदात्री या सा राधा परिकीर्त्तिता ॥
रा च रासे च भवनाद्धा एव धारणादहो ।
हरेरालिङ्गनाधारात्तेन राधा प्रकीर्त्तिता ॥
रासेश्वरस्य पत्नीयं तेन रासेश्वरी स्मृता ।
रासे च वासो यस्याश्च तेन रासनिवासिनी ॥
सर्व्वासां रसिकानाञ्च देवीनामीश्वरी परा ।
प्रवदन्ति पुरा सन्तस्तेन तां रसिकेश्वरीम् ॥
प्राणाधिका प्रेयसी सा कृष्णस्य परमात्मनः ।
कृष्णप्राणाधिका सा च कृष्णेन परिकीर्त्तिता ॥
कृष्णस्यापि प्रिया शान्ता कृष्णो वास्याः प्रियः

सदा ।
सर्व्व देवगणैरुक्ता तेन कृष्णप्रिया स्मृता ॥
कृष्णरूपं संविधातुं या शक्ता चावलीलया ।
सर्व्वांशैः कृष्णसदृशी तेन कृष्णस्वरूपिणी ॥
वामाङ्गार्द्धेन कृष्णस्य या सम्भूता परा सती ।
कृष्णवामांशसम्भूता तेन कृष्णेति कीर्त्तिता ॥
परमानन्दराशिश्च स्वयं मूर्त्तिमती सती ।
श्रुतिभिः कीर्त्तिता तेन परमानन्दरूपिणी ॥
कृषिर्मोक्षार्थवचनो ण एवोत्कृष्टवाचकः ।
आकारो दातृवचनस्तेन कृष्णा प्रकीर्त्तिता ॥
अस्ति वृन्दावनं यस्यास्तेन वृन्दावनी स्मृता ।
वृन्दावनस्याधिदेवी तेन राधा प्रकीर्त्तिता ॥
वृन्दः संघवचः सख्यराकारोऽप्यस्तिवाचकः ।
सखिवृन्दास्ति यस्याश्च सा वृन्दा परिकीर्त्तिता ॥
वृन्दावने विनोदश्च सा यस्या अस्ति तत्र च ।
वेदा वदन्ति तां तेन वृन्दावनविनोदिनीम् ॥
नखचन्द्रावलीवक्त्रचन्द्रोऽस्ति यत्र सन्ततम् ।
तेन चन्द्रावली सा च कृष्णेन कीर्त्तिता पुरा ॥
कान्तिरस्ति चन्द्रतुल्या सदा यस्या दिवा-

निशम् ।
सा चन्द्रकान्ता हर्षेण हरिणा परिकीर्त्तिता ॥
शरच्चन्द्रप्रभा यस्याश्चाननेऽस्ति दिवानिशम् ।
मुनिना कीर्त्तिता तेन शरच्चन्द्रप्रभानना ॥
इदं षोड़शनामोक्तमर्थव्याख्यानसंयुतम् ।
नारायणेन यद्दत्तं ब्रह्मणे नाभिपङ्कजे ॥
ब्रह्मणा च पुरा दत्तं धर्म्माय जनकाय मे ।
धर्म्मेण कृपया दत्तं मह्यमादित्यपर्व्वणि ॥
पुष्करे च महातीर्थे पुण्याहे देवसंसदि ।
राधाप्रभावप्रस्तावे सुप्रसन्नेन चेतसा ॥
इदं स्तोत्रं महापुण्यं तुभ्यं दत्तं महामुने ।
निन्दकायावैष्णवाय न दातव्यं महामुने ॥
यावज्जीवमिदं स्तोत्रं त्रिसन्ध्यं यः पठेन्नरः ।
राधामाधवयोः पादपद्मे भक्तिर्भवेदिह ॥
अन्ते लभेत्तयोर्दास्यं शश्वत् सहचरो भवेत् ।
अणिमादिकसिद्धिञ्च संप्राप्य नित्यविग्रहम् ॥
व्रतदानोपवासैश्च सर्व्वैर्नियमपूर्व्वकम् ।
चतुर्णाञ्चैव वेदानां पाठैः सर्व्वार्थसंयुतैः ॥
सर्व्वेषां यज्ञतीर्थानां करणैर्विधिबोधितैः ।
प्रादक्षिण्येन भूमेश्च कृत्स्नाया एव सप्तधा ॥
शरणागतरक्षायामज्ञानज्ञानदानतः ।
देवानां वैष्णवानाञ्च दर्शनेनापि यत् फलम् ॥
तदेव स्तोत्रपाठस्य कलां नार्हन्ति षोड़शीम् ।
स्तोत्रस्यास्य प्रभावेन जीवन्मुक्तो भवेन्नरः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥

राधानामोच्चारणानन्तरं कृष्णनामोच्चारणविधिर्यथा,—

नारद उवाच।

"आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्बुधाः।
निमित्तमस्य मां भक्त्या वद भक्तजनप्रिय॥

श्रीनारायण उवाच।

निमित्तमस्य त्रिविधं कथयामि निशामय।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता॥
गरीयसीति जगतां माता शतगुणैः पितुः।
राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः॥
कृष्णराधेशगौरीति लोके न च कदा श्रुतः।
प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम॥
गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर।
प्रसीद कमलाकान्त गृहाण मम पूजनम्॥
इति दृष्टं सामवेदे कौथुमे मुनिसत्तम॥
राशब्दोच्चारणादेव स्फीतो भवति माधवः।
धाशब्दोच्चारतः पश्चाद्धावत्येव ससम्भ्रमः॥
आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत्।
स भवेन्मातृगामी च वेदातिक्रमणे मुने॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५२ अध्यायः॥

तस्या निन्दायां दोषो यथा,—

"ये वा द्विषन्ति निन्दन्ति पापिनश्च हसन्ति च।
कृष्णप्राणाधिकां देव देवीञ्च राधिकां पराम्॥
ब्रह्महत्याशतं ते च लभन्ते नात्र संशयः।
तत्पापेन च पच्यन्ते कुम्भीपाके च रौरवे॥
तप्ततैले महाघोरे ध्वान्ते कीटे च यन्त्रके।
चतुर्द्दशेन्द्रावच्छिन्नं पितृभिः सप्तभिः सह॥
ततः परमजायन्त जन्मैकं कोलयोनितः।
दिव्यं वर्षसहस्रञ्च विष्ठाकीटाश्च पापतः॥
पुंश्चलीनां योनिकीटास्तद्रक्तमलभक्षकाः।
मलकीटाश्च तन्मानवर्षञ्च पूयभक्षकाः।
वेदे च काण्वशाखायामित्याह कमलोद्भवः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६७ अध्यायः॥

राधास्वरूपं यथा,—

यशोदोवाच।

"हरौ च निश्चला भक्तिस्तद्दास्यं वाञ्छितं मम।
तव नाम्नश्च व्युत्पत्तिं का वा त्वं वक्तुमर्हसि॥

राधिकोवाच।

भवेद्भक्तिर्निश्चला ते हरेर्दास्यञ्च दुर्लभम्।
लभस्व मद्वरेणापि कथयामि स्वनिर्णयम्॥
पुरा नन्देन दृष्टाहं भाण्डीर वटमूलके।
मया च कथितो नन्दो निषिद्धस्य ब्रजेश्वरः॥
अहमेव स्वयं राधा छाया रायाणकामिनी।
रायाणः श्रीहरेरंशः पार्श्वदप्रवरो महान्॥
राशब्दश्च महद्विष्णोर्विश्वानि यस्य लोमसु।
विश्वप्राणिषु विश्वेषु धा धात्रीमातृवाचकः॥
धात्री माताहमेतेषां मूलप्रकृतिरीश्वरी।
तेन राधा समाख्याता हरिणा च पुरा बुधैः॥
अहं श्रीदामशापेन वृषभानुसुताधुना।
शतवर्षञ्च विच्छेदो हरिणा सह साम्प्रतम्॥
वृषभानुश्च कृष्णस्य पार्श्वदप्रवरो महान्।
पितृणां मानसी कन्या मम माता कलावती॥
अयोनिसम्भवाहञ्च मम माता च भारते।
पुनः सार्द्धञ्च युष्माभिर्यास्यामि श्रीहरेः पदम्॥
इति ते कथितं सर्व्वं ब्रजं ब्रज ब्रजेश्वरि।
ब्रजेश्वरेण सहिता स्वामिना ज्ञानिना सति!॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥

राधापार्व्वत्योरभेदो यथा,—

पार्व्वत्युवाच।

"किं वा प्रश्नं करिष्यामि त्वां राधां मङ्गलालयाम्।
गता ते विरहज्वाला श्रीदाम्नः शापमोचने॥
सततं तन्मनःप्राणा त्वय्येव मयि ते तथा।
न ह्येवमावयोर्भेदः शक्तिपूरुषयोर्यथा॥
ये त्वां निन्दन्ति मद्भक्तास्त्वद्भक्ताश्चापि मामपि।
कुम्भीपाके च पच्यन्ते यावच्चन्द्रदिवाकरौ॥
राधामाधवयोर्भेदं ये कुर्व्वन्ति नराधमाः।
वंशहानिर्भवेत्तस्य पच्यन्ते नरकं चिरम्॥
यान्ति शूकरयोनिञ्च पितृभिः शतकैः सह।
षष्टिं वर्षसहस्राणि विष्ठायां कृमयस्तथा॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२३ अध्यायः॥

गोलोके तस्या आश्रमो यथा,—

"एतान् मनोरमान् दृष्ट्वा ते देवा गमनोन्मुखाः।
जग्मुः शीघ्रं कियद्दूरं ददृशुः सुन्दरं ततः॥
आश्रमं राधिकायाश्च रासेश्वर्य्याश्च नारद।
देवाधिदेव्या गोपीनां वरायाश्चारु निर्म्मितम्॥
प्राणाधिकायाः कृष्णस्य रम्याद्रम्यं मनोहरम्।
सर्व्वानिर्व्वचनीयञ्च पण्डितैर्न निरूपितम्॥
सुचारु वर्त्तुलाकारं षड्गव्यूतिप्रमाणकम्।
शतमन्दिरसंयुक्तं ज्वलितं रत्नतेजसा॥
अमूल्यरत्नसाराणां वरैर्विरचितं वरम्।
दुर्लङ्घ्याभिर्गभीराभिः परिखाभिः सुशोभितम्॥
कल्पवृक्षैः परिवृतं पुष्पोद्यानशतान्तरम्।
सुमूल्यरत्नरचितं प्राकारैः परिवेष्टितम्॥
सद्रत्नवेदिकायुक्तं युक्तैर्द्वारैश्च सप्तभिः।
संयुक्तरत्नचित्रैश्च विचित्रैर्व्वर्त्तुलैर्मुने॥
प्रधानद्वारसप्तभ्यः क्रमशः क्रमशो मुने।
सर्व्वतोऽपि ततस्तत्र षोड़शद्वारसंयुतम्॥
देवा दृष्ट्वा च प्राकारं सहस्रधनुरुच्छ्रितम्।
सद्रत्नरत्नकलससमूहैः सुमनोहरम्॥
सुदीप्तं तेजसा रम्यं परमं विस्मयं ययुः।
ततः प्रदक्षिणीकृत्य कियद्दूरं ययुर्मुदा॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः॥

तस्या जन्मतिथिर्यथा,—

"भाद्रस्य कृष्णपक्षे तु हरिजन्माष्टमी यदा।
तस्याः परे तु या शुक्ला तस्यां जाता हरिप्रिया॥
वृषभानुपुरी नाम्ना सर्व्वरत्नमयी शुभा।
सुवर्णमणिमाणिक्यविचित्रभवनाङ्गना॥
अणिमादिसुखैश्वर्य्यपरिपूर्णमनोहरा।
चित्रध्वजपताकादिविचित्रा चित्रनिर्म्मिता॥
चिदानन्दस्वरूपा सा चिदानन्दप्रदायिनी।
आनन्दकलिला नार्य्यो यत्र तिष्ठन्ति सर्व्वदा॥
विचित्रवेशालङ्कारा विचित्रवसनाम्बरा।
नानावेशविचित्राङ्गा प्रमदामोददायिनी॥
सर्व्वलक्षणसम्पन्ना राधा नाम्ना विनोदिनी।
जगतां मोहिनी देवी गुह्यगुह्यातिसुन्दरी।
मूढ़ानामसताञ्चैव न कथ्यं मुनिसत्तम॥

नारद उवाच।

प्रणिपत्य महाभाग पृच्छामि तव किङ्करः।
सा लक्ष्मीः किं सुरवधूर्म्महालक्ष्मीः सरस्वती॥
विद्या किमन्तरङ्गाथ वैष्णवी प्रकृतिः किमु।
वेदकन्या देवकन्या मुनिकन्याथवा वद॥

सदाशिव उवाच।

कोटिकोटिमहालक्ष्मीर्लक्ष्मीः का वा परा वरा।
निन्दिता यत्पदाम्भोजे कथिता मुनिसत्तम॥
अपरं किं निगदेऽहमेकवक्त्रेण नारद।
श्रीराधारूपलावण्यगुणादीन् वक्तुमक्षमः॥
तत्तद्रूपादिमाहात्म्यं लज्जेऽहमपि नारद।
त्रैलोक्ये तु समर्थो हि न मातुं वक्तुमर्हति॥
तद्देहरूपमाधुर्य्यं जगन्मोहनमोहनम्।
यद्यनन्तमुखोऽपि स्यां तद्वक्तुं नास्ति मे गतिः॥
लक्षशः कमला दास्यो यस्याः सा लाक्षकी मता।
एवं शतसहस्राणामीश्वरी राधिका परा॥

नारद उवाच।

प्रभो श्रीराधिकाजन्ममाहात्म्यं सर्व्वतः परम्।
तदहं श्रोतुमिच्छामि समस्तं भक्तवत्सल॥
कथ्यतां मे महाभाग व्रतानाञ्च व्रतोत्तमम्।
ध्यानं वा कीदृशी पूजा स्तुतिर्व्वापि वदस्व मे॥
तत्सर्व्वं श्रोतुमिच्छामि कथ्यतां मे सदाशिव।
चर्य्यां पूजाविधानञ्च विशेषमर्च्चनं भव॥
यन्त्रं मन्त्रं स्तुतिर्ध्यानं पूजनं यत्र निर्म्मितम्।
पूजने किं विधानञ्च तत्तत्सेवार्च्चने विधौ॥

शिव उवाच।

वृषभानुपुरीराजा वृषभानुर्महाशयः।
महाकुलप्रसूतोऽसौ सर्व्वशास्त्रविशारदः॥
महाशयो धनी श्रीमानणिमाद्यष्टवैभवः।
वैश्यः सदन्तःकरणः कुलीनः कृष्णदैवतः॥
तस्य भार्य्या महाभागा श्रीमत्श्रीकीर्त्तिदाह्वया।
रूपयौवनसम्पन्ना महाराजकुलोद्भवा॥
महालक्ष्मीस्वरूपा सा भव्या परमसुन्दरी।
महापतिव्रता काष्ठां सर्व्वविद्यागुणान्विता॥
तस्यां श्रीराधिका जाता श्रीमद्वृन्दावनेश्वरी।
भाद्रे मासि सिताष्टम्यां मध्याह्ने शुभदायिनी॥
वेदागमपुराणादिगीता या कृष्णवल्लभा।
सदा कृष्णप्रिया साध्वी श्रीकृष्णानन्ददायिनी॥
शृणु मत्तो महाभाग पूजनं भजनं तथा।
कर्त्तव्यं यदनुष्ठानं राधाजन्मंमहोत्सवः।
समर्च्चेय सदा राधां जन्मव्रतपरायणैः।
तत् समग्रं प्रवक्ष्यामि ध्यानादिकमनुक्रमात्॥
सर्व्वदा पश्चिमद्वारे श्रीराधाकृष्णमन्दिरे।
ध्वजस्रग्वस्त्रकलसपताकातोरणादिभिः॥
नानासुमङ्गलद्रव्यैर्यथाविधि प्रवर्त्तते।
सुवासितगन्धपुष्पैर्धूपैश्च धूपितैर्गृणन्॥
मध्ये पञ्चवर्णचूर्णैर्मण्डपं ससरोरुहम्।
सुषोड़शदलाकारं तत्र निर्म्माय यत्नतः॥
दिव्यासने पद्ममध्ये पश्चिमाभिमुखीं स्थिताम्।

श्रीयुग्ममूर्त्तिं सुपाद्य ध्यानपाद्यादिभिः क्रमात् ॥
भक्तैः सह सजातीयैः शक्त्यानुसारवस्तुभिः ।
सद्भक्तः पूजयेद्भक्त्या तां सदा संयतेन्द्रियः ॥”

अथ ध्यानम् ।

“हेमेन्दीवरकान्तिमञ्जुलतरं श्रीमज्जगन्मोहनं नित्याभिर्ललितादिभिः परिवृतं सन्नीलपीताम्बरम् ।
नानाभूषणभूषणाङ्गमधुरं कैशोररूपं युगं गान्धर्व्वाजनमव्ययं सुललितं नित्यं शरण्यं भजे ॥
युग्ममूर्त्तिमिति ध्यात्वा शालग्रामेऽथवा पुनः ।
साक्षात् शैलादिमूर्त्तौ वा मनोमय्यां समर्च्चयेत् ॥
ततो मण्डलपूजाञ्च तयोः सम्मुखतः क्रमात् ।
कुर्य्याद्भक्तः प्रयत्नेन ध्यानपाद्यादिभिः सदा ॥
ललिता पश्चिमे पूज्या पीतवर्णदलेऽपरा ।
चन्द्रावती शुक्लदले तद्वामे पूजयेत् सुधीः ॥
वायव्ये श्यामलां देवीं कृष्णवर्णदलेऽर्च्चयेत् ।
तद्वामे चित्ररेखाख्यां शुक्लवर्णदले ततः ॥
उत्तरे श्रीमती लक्ष्मीं रक्तवर्णदले तथा ।
तद्वामपार्श्वे चन्द्राख्यां नीलवर्णदलेऽर्च्चयेत् ॥
रक्तवर्णदलेऽभ्यर्च्या ईशाने श्रीहरिप्रिया ।
तस्या वामे शुक्लदले पूज्या मदनसुन्दरी ॥
पीतवर्णदले पूर्व्वे विशाखामर्च्चयेत्ततः ।
प्रियां तस्या वामपार्श्वे शुक्लवर्णदलेऽर्च्चयेत् ॥
अग्निकोणे श्यामवर्णां दले सव्यां समर्च्चयेत् ।
तद्वामे श्रीमधुमतीं शुक्लवर्णदलेऽर्च्चयेत् ॥
पूजयेद्दक्षिणे पद्मां रक्तवर्णदले तथा ।
शशिरेखाञ्च तद्वामे नीलवर्णदलेऽर्च्चयेत् ॥
पूजयेन्नैरृते भद्रां रक्तवर्णदले ततः ।
रसप्रियाञ्च तद्वामे शुक्लवर्णदलेऽर्च्चयेत् ॥ * ॥
श्रीराधाप्रियसङ्गिनीं विधुमुखीं कृष्णप्रियां प्रेयसीं हेमाभां परिवादिनीं सुमधुरध्वानां सुवेशाम्बराम् ।
सद्रत्नाभरणैर्मनोज्ञसुतनुं नित्यां जगन्मोहिनीं वन्दे श्रीललितां कुरङ्गनयनीं पीताम्बरेणावृताम् ॥ १ ॥
श्यामां श्यामपरायणां वरतनुं चामीकराङ्गच्छटां मञ्जीरैर्मधुरध्वनिं परिलसच्चन्द्राननां सुस्वराम् ।
सद्रत्नाभरणां सरोजनयनीं शुक्लांशुकेनावृतां ध्यायेत् श्रीललितासखीं सुचिबुकां चन्द्रावतीसत्तमाम् ॥ २ ॥
कान्त्या काञ्चनसन्निभां सुललितां कृष्णाम्बरं बिभ्रतीं नानाभूषणमञ्जुलाञ्च सुदतीं मार्द्दङ्गिकीं सुन्दरीम् ।
श्रीवृन्दाविपिनेश्वरीं प्रियसखीं भव्यां शशाङ्काननां वेणीचारुसुमल्लिकास्रजमलं नित्यं भजे श्यामलाम् ॥ ३ ॥
श्रीकृष्णप्रियवल्लभां शशिमुखीं सच्छन्दसम्पान्वितां शुद्धस्वर्णशरीरकान्तिमतुलां शुक्लाम्बरेणावृताम् ।
स्वर्णाद्याभरणां सदा पुलकिनीं श्रीकृष्णभावेन वै गायन्तीं मधुरस्वरैरविरतं श्रीचित्ररेखां भजे ॥४॥
कनकनिभशरीरां बिभ्रतीं रक्तवस्त्रं ललितनलिननेत्रां चारुभूषाङ्गशोभाम् ।
सुमधुरपिकवाक्यां चन्द्रवक्त्रां सुवेशां मधुरिपुनिजदासीं श्रीमतीं तां हि वन्दे ॥५॥
वृन्दावनेशनिजसेवनसौख्यदासीं रम्यां सुनीलवसनां सुरवाद्ययन्त्राम् ।
नानाविभूषिततनुं स्फुरदम्बुजाक्षीं चन्द्रां भजे सकलरागमनोज्ञगानाम् ॥६॥
सुवर्णवर्णां शुकधारिणीं तांसुपाङ्गयन्त्रां मणिभूषणाङ्गीम् ।
हरिप्रियां मञ्जुलपद्मनेत्रां भजेऽहमीशां कनकाङ्गशोभाम् ॥ ७ ॥
रवावकलवादिनीं सकलरागसंगायिनीं सुचारुमणिकुण्डलां शरदपूर्णचन्द्राननाम् ।
सुरत्नवरभूषणां रुचिरशुभ्रपट्टाम्बरां भजे मदनसुन्दरीं कनकवर्णदेहां शुभाम् ॥८॥
सुतानचतुरां गीते भ्रमरकलकण्ठीं सुचतुरां जगद्वन्द्यां वेशन्नलिननयनामिन्दुवदनाम् ।
विशाखां गौराङ्गीं कलितमुरलीं पीतवसनां भजे श्यामां सेव्यां सकलगुणपूर्णां सुखमयीम् ॥९॥
सुचामीकराभूषणाढ्यां सुवेशां सुसङ्गीतविद्यासुधीरां वरेण्याम् ।
सुवंशीसुगानां सुहेमाङ्गशोभां भजे श्रीप्रियां शुक्लवस्त्रां मनोज्ञाम् ॥१०॥
गान्धर्व्वानिजदासिकां सुगदवामयन्त्रं सदा बिभ्रतीं मञ्जुस्वर्णविभूषितां वरतनुं पाथोजनेत्रां वराम् ।
ध्यायेत् कृष्णपदारविन्दमधुपीं कृष्णाम्बरेणावृतां संगीते मधुरवरामविरतं सेव्यां मनोहारिणीम् ॥११॥
रुचिरमधुमतीं तां तप्तचामीकराभां पिककलरवकण्ठीं शुक्लवस्त्रं दधानाम् ।
तिलकुसुमसुनासां चारुहेमाङ्गभूषां युगलचरणसेवातत्पराभामभजेऽहम् ॥१२॥
रत्नालङ्कारदेहां तिलकुसुमरुचीमङ्गलावण्यरूपैर्भव्यां सङ्गीतविद्यासुनिपुणरसिकां तानमानातिविज्ञाम् ।
शारङ्गीयन्त्रगानां कनकनिभतनुं सर्व्वदा कृष्णसेवीं वन्दे पद्मां सुवेशां शशधरवदनां बिभ्रतीं रङ्गवस्त्रम् ॥ १३ ॥
शशिरेखां मृदङ्गञ्च वादयन्तीं मुहुर्मुहुः ।
रसालापस्वरूपाञ्च रसप्रेमैकसंयुताम् ॥१४॥
भव्यां श्रीशशिरेखिकां सुखमकां यन्त्रादिगानांवरीं वन्देऽहं मधुरस्वरां परमिकां लावण्यसारान्विताम् ।
नानायन्त्रविशारदां वरतनुं पट्टाम्बरेणावृतां फुल्लेन्दीवरलोचनामविरतं ध्याये जगन्मोहिनीम् ॥१५॥
श्रीयन्त्रं स्वरमण्डलं कलरवं गाने सदा बिभ्रतीं श्रीभद्रां मधुरस्वरां सुललितां सद्रक्तवस्त्रावृताम् ।
राजत्स्वर्णरुचिं विभूषणवरैरङ्गैः सदा शोभितां ध्याये श्रीयुगसेविकां परमिकां ज्ञानैकमग्नां सदा ॥१६॥
राधाकृष्णपदारविन्दमधुपीं सद्भृङ्गतुष्ट्यार्थिनीं नानाभूषणभूषिताङ्गरुचिरां सद्रक्तवस्त्राभाम् ।
ध्याये सन्ततकृष्णभावललितां केयूरहेमाङ्गदां स्वर्णाङ्गीञ्च रसप्रियां सुखमयीं सर्व्वाङ्गशोभान्विताम् ॥१७॥
मधुस्वरां कोकिलभृङ्गगानां सतुम्बरीयन्त्रविधारिणीञ्च ।
वनप्रियां शुक्लसुचीनवस्त्रां भजे हरिदाङ्गसमङ्गशोभाम् ॥१८॥
एवं ध्यात्वा पूजयित्वा ललिताद्या यथाक्रमात् ।
पाद्यादिभिः सोपचारैर्विधिवद्भक्तितत्परः ॥
सङ्गिन्यो ललितादीनां दलात्पश्चिमतो मुने ! ।
प्रणवादिनमोऽन्तेन सम्प्रदानपदेन वै ।
तत्तन्नाम्ना तु मनुना पुष्पगन्धादिभिर्मुने ! ॥”
इति पाद्मे उत्तरखण्डे श्रीराधाजन्माष्टमीव्रतकथनमाहात्म्यं नाम १६२ अध्यायः ॥

श्रीसदाशिव उवाच ।

“प्रत्येकेऽष्टौ पूजयेद्वै क्रमतस्तु दले दले ।
तत्र नाम्ना कथ्यते ताश्चाष्टाविंशाधिकं शतम् ।
इन्दुमुखी रसज्ञा च शुभदा सुमुखी तथा ।
वल्लवी चन्द्रिका चारुचतुरा च सुचञ्चला ॥
मधुरा हस्तकमला तथा मधुरभाषिणी ।
विलासिनी रसवती तथा खञ्जनलोचना ॥
सुखदा चम्पकलिका रसदा रसमञ्जरी ।
सदा सुमञ्जरी शीला चन्द्रा चन्द्रप्रभावती ॥
वंशश्री मालती जाती चन्द्रकान्ती सुकुन्तला ।
रम्भा भ्रमरगम्भीरा सुशीला च सुवेशिनी ॥
आमलकी सुधाकण्ठी श्रिता च श्रीरतिप्रिया ।
शुकप्रिया मधुकरी सुवेशा चान्द्रतोद्भवा ॥
मुरलीवल्लभा वृन्दा पारिजातप्रिया शुभा ।
पञ्चस्वरा रत्नमाला मदिरा रासवल्लवी ॥
मातङ्गगमनी तारावती कुण्डलधारिणी ।
केशरी मित्रवृन्दा च तथा चाच्युतमालिका ॥
मायावती कौशिकी च कोमलाङ्गी सुचन्दनी ।
पीयूषभाषिणी सत्यवती च कुञ्जवासिनी ॥
कपोतमालिका लोपामुद्रा च किंशुकप्रिया ।
इलावती कुङ्कुमा च कमला च मदालसा ॥
तिलोत्तमा च सावित्री बकुला प्रियवादिनी ।
मुक्तावली चित्ररेखा सुमित्रा लीलकुन्तला ॥
अरुन्धती चित्रवती श्रीरक्ता पद्मगन्धिनी ।
मेनका कलिका रङ्गकेतकी कामवर्द्धिनी ॥

कुमुदप्रिया च तानज्ञा तथा नृत्यविलासिनी ।
हिरावती हारकण्ठी सिंहमध्या सुलोचना ॥
नन्दया नन्दकलिका सुनन्दा नन्ददायिनी ।
कुरङ्गाक्षी च सुश्रोणी केलिलोला प्रियंवदा ॥
श्यामाराध्या श्यामसेव्या कस्तूरी मानभञ्जिनी ।
विचित्रवसना रत्नमञ्जीरा मञ्जुकिङ्किणी ॥
पिकस्वरा भृङ्गगाना तथा रासविहारिणी ।
श्रीकृष्णदयिते पूज्या यत्नात् चन्द्रावली ततः ।
ध्यानपाद्यादिभिः सम्यक्प्रकारेण च पूजकैः ॥
हेमाभां मधुरस्वरां विधुमुखीं गान्धर्व्वविद्यारतां
नानाभूषणभूषिताङ्गमधुरां जातीसुमल्लीस्रजम् ।
वीणायन्त्रसुवादिनीं वरतनुं चित्राम्बरं बिभ्रतीं
ध्याये कृष्णपरायणां सुचिबुकां चन्द्रावलीं मञ्जुलाम् ॥
एवं राधाजन्मतिथौ कुर्य्यान्मङ्गलपूजनम् ।
कार्ष्णादीन् वैष्णवान् सर्व्वान् यत्नतः परिपूजयेत् ॥
एवं राधाकृष्णपूजां तयोर्मङ्गलपूजनम् ।
प्रत्यब्दे यत्नतः कुर्य्यात् कार्ष्णो रासमहोत्सवे ।
न्यूनातिरिक्तं देवर्षे ! न कर्त्तव्यं कदाचन ।
श्रीमत्कृष्णैकतानेनावश्यं तेनैव सर्व्वदा ॥
नाहूयेत् शैवशाक्तादीन् राधाजन्ममहोत्सवे ।
पाषण्डान् पतितान् कौलानन्त्यजान्न निमन्त्रयेत् ॥
विना भागवतांल्लोकान्न च तत्र प्रवेशयेत् ।
गन्धपुष्पादिभिर्माल्यैश्चन्दनैस्तन्निवेदितैः ।
नानापराधभीतस्तु भक्तांस्तांस्तत्र चार्च्चयेत् ।
ततस्तत्प्रसादैश्च भक्ष्यपेयादिभिस्तथा ॥
ततो मङ्गलपूजायाः कार्ष्णो नार्य्यश्च भोजयेत् ।
बहिर्मुखान् श्रीकृष्णस्य गान्धर्व्वाभक्तितत्परः ।
कार्ष्णादीन् वैष्णवान् भक्त्या भोजयेत् पूजयेत्तथा ।
तन्नैवेद्यैर्गन्धपुष्पैर्माल्यैर्मलयजादिभिः ॥
सजातीयैर्भक्तवृन्दैः समं तत्र महोत्सवम् ।
दिवा कुर्य्यात् प्रयत्नेन राधाभक्तिपरायणः ॥
महाप्रसादं भुञ्जीत दिनान्ते चरणोदकम् ।
पूजां कृत्वा पिबेत् कार्ष्णः सार्द्धमानन्दितैस्ततः ॥
रात्रौ जागरणं कुर्य्याद्राधाकृष्णेति वा स्मरन् ।
पूजयेन्मूर्त्तिमारोप्य रूप्यस्वर्णादिसंस्कृताम् ॥
[illegible]कथालापं पुराणाद्युक्तकीर्त्तनम् ।
श्रवणीयं प्रयत्नेन नारीभिर्ब्बान्धवैः सह ॥
यः करोति नरो भक्त्या राधाजन्माष्टमीं शुभाम् ।
वदन्ति विबुधाः सर्व्वे राधाभक्तोऽस्ति भूतले ॥
प्रहरे प्रहरे राधां गोष्ठाष्टम्यां दिवानिशि ।
पूजयित्वा विधानेन श्रीकृष्णसहितां तथा ॥
तद्रसिकैः सहालापे राधाकृष्णस्तुतिं मुहुः ।
तत्तन्महोत्सवं कृत्वा परमानन्दितो भवन् ॥
एकवत् प्रणतिं कुर्य्यादष्टाङ्गविधिबोधिताम् ।
प्रत्यब्दमेव कुरुते राधाजन्ममहोत्सवम् ॥
यः पुमानथवा नारी राधाभक्तिपरायणा ।
भूत्वा वृन्दावने वासः श्रीराधाकृष्णसङ्गिनी ॥
व्रजदासी भवेत् सोऽपि राधाभक्तिपरायणः ।
तस्यालापप्रयोगाच्च सत्सम्बन्धो नरो भवेत् ॥
राधाराधेति यो ब्रूयात् स्मरणं कुरुते नरः ।
सर्व्वतीर्थेषु संस्कारात् सर्व्वविद्याप्रयत्नवान् ॥
राधाराधेति कुर्य्यात्तु राधाराधेति पूजयेत् ।
राधाराधेति यन्निष्ठा राधाराधेति जल्पति ॥
वृन्दारण्ये महाभागा राधासहचरी भवेत् ।
जगतां पृथिवी धन्या तत्र वृन्दावनं पुरी ।
तत्र धन्या सती राधा ध्येया या मुनिसत्तमैः ॥
ब्रह्मादीनां महाराध्यां दूरतः सेवते सुरः ।
तां राधिकां यो भजते देवर्षे तं भजेमहि ॥
तदालापं कुरुष्वेव जपस्व मन्त्रमुत्तमम् ।
अहर्निशं महाभाग कुरु राधेति कीर्त्तनम् ॥
राधेति कीर्त्तनं कुर्य्यात् कृष्णेन सह यो जनः ।
तन्माहात्म्यं न शक्योऽहं वक्तुं शेषोऽपि नैव च ॥
न गङ्गा न गया नित्यं न हिता च सरस्वती ।
कदाचिन्नैव विमुखा सर्व्वतीर्थफलप्रदा ॥
सर्व्वतीर्थमयी राधा सर्व्वैश्वर्य्यमयी पुनः ।
कदाचिद्विमुखा लक्ष्मीर्न भवेत्तु तदालये ॥
तस्यालये वसेत् कृष्णो राधया सह नारद ।
राधाकृष्णेति यस्येष्टं तदेतद्व्रतमुत्तमम् ।
तद्गेहे देहमनसोः कदाचिन्न चलेद्धरिः ॥
एतदेव वचः श्रुत्वा नारदो मुनिसत्तमः ।
प्रयतः पूजयामास गोष्ठाष्टम्यां यथोदितम् ॥
जन्माष्टमीव्रतकथां यः शृणोतीह मानवः ।
श्रीराधायाः सुखी मानी धनी सर्व्वगुणान्वितः ॥
जपेद्वै भक्तिसंयुक्तः पठेन्नाम्ना स्मरेन्नरः ।
धर्म्मार्थी लभते धर्म्ममर्थार्थी लभते धनम् ॥
कामार्थी लभते कामं मोक्षार्थी मोक्षमाप्नुयात् ॥
सर्व्वदानन्यशरणः कार्ष्णादिर्व्वैष्णवः सुखी ।
विवेकी च तथा निष्कामी यदा भक्तिमाप्नुयात् ॥”
इति पाद्मे उत्तरखण्डे श्रीसदाशिवनारदसंवादे श्रीराधाजन्माष्टमीकथनमाहात्म्यं १६ अध्यायः ॥
(तन्त्रमतेऽस्या उत्पत्त्यादिविवरणानि यथा,—

कात्यायन्युवाच ।

“वासुदेव महाबाहो मा भयं कुरु पुत्रक ।
मथुरां गच्छ तातेति तव सिद्धिर्भविष्यति ॥
गच्छ गच्छ महाबाहो पद्मिनीसङ्गमाचर ।
पद्मिनी मम देवेश व्रजे राधा भविष्यति ।
अन्याश्च मातृकादेव्यः सदा तस्यानुचारिकाः ॥

वासुदेव उवाच ।

शृणु मातर्म्महामाये चतुर्वर्गप्रदायिनि ।
त्वां विना परमेशानि ! विद्यासिद्धिर्न जायते ॥
पद्मिनीं परमेशानि ! शीघ्रं दर्शय सुन्दरि ! ।
प्रत्ययं मम देवेशि ! तदा भवति मानसम् ॥
इति श्रुत्वा वचस्तस्य वासुदेवस्य तत्क्षणात् ।
आविरासीत्तदा देवी पद्मिनी परसंस्थिता ॥
रक्तविद्युल्लताकारा पद्मगन्धसमन्विता ।
रूपेण मोहयन्ती सा सखीगणसमन्विता ॥
सहस्रदलपद्मान्तर्म्मध्यस्थानस्थिता सदा ।
सखीगणयुता देवी जपन्ती परमाक्षरम् ॥
एकाक्षरी महेशानि ! सा एव परमाक्षरा ।
कालिका या महाविद्या पद्मिन्या इष्टदेवता ।
वासुदेवो महाबाहुर्दृष्ट्वा विस्मयमागतः ॥

पद्मिन्युवाच ।

व्रजं गच्छ महाबाहो शीघ्रं हि भगवन् ! प्रभो ! ।
त्वया सह महाबाहो कुलाचारं करोम्यहम् ॥

वासुदेव उवाच ।

शृणु पद्मिनि मे वाक्यं कदा ते दर्शनं भवेत् ।
कृपया वद देवेशि ! जपं किंवा करोम्यहम् ॥

पद्मिन्युवाच ।

तवाग्रे देवदेवेश मम जन्म भविष्यति ।
गोकुले माथुरे पीठे वृकभानुगृहे ध्रुवम् ॥
दुःखं नास्ति महाबाहो मम संसर्गहेतुना ।
कुलाचारोपयुक्ता या सामग्री पञ्चलक्षणा ॥
मालायां तव देवेश सदा स्थास्यति नान्यथा ।
इत्युक्ता पद्मिनी सा तु सुन्दर्य्या दूतिका तदा ॥
अन्तर्द्धानं ततो गत्वा मालायां सहसा व्ययात् ।
वासुदेवोऽपि तां दृष्ट्वा क्षीराब्धिं प्रययौ ध्रुवम् ॥
त्यक्त्वा काशीपुरं रम्यं महापीठं दुरासदम् ।
प्रययौ माथुरं पीठं पद्मिनी परमेश्वरी ॥
यत्र कात्यायनी दुर्गा महामायास्वरूपिणी ।
नारदाद्यैर्म्मुनिश्रेष्ठैः पूजिता संस्तुता सदा ॥
कात्यायनी महामाया यमुनाजलसंस्थिता ।
यमुनाया जलं तत्र साक्षात् कालीस्वरूपिणी ॥
बहुपत्रयुतं रम्यं शुक्लपीतं महाप्रभम् ।
रक्तं कृष्णं तथा चित्रं हरितं सर्व्वमोहनम् ।
कालिन्द्याख्या महेशानि यत्र कात्यायनी परा ॥
कालिन्दी कालिका माता जगतां हितकाम्यया ।
साराध्यास्ते महेशानि ! देवर्षिसंस्तुता परा ।
सहस्रदलपत्रान्तर्म्मध्ये माथुरमण्डलम् ॥
केशबन्धे महेशानि ! यत् पद्मं सततं स्थितम् ।
पद्ममध्ये महेशानि ! केशपीठं मनोहरम् ॥
केशबन्धं महेशानि ! व्रजं माथुरमण्डलम् ।
यत्र कात्यायनी माया महामाया जगन्मयी ॥
व्रजं वृन्दावनं देवि ! नानाशक्तिसमन्वितम् ।
शक्तिस्तु परमेशानि ! कलारूपेण साक्षिणी ।
शक्तिं विना परं ब्रह्म न भाति शवरूपवत् ॥”
इति वासुदेवरहस्ये राधातन्त्रे षष्ठः पटलः ॥

देव्युवाच ।

“व्रजं गत्वा महादेवाकरोत् किं पद्मिनी तदा ।
कस्य वा भवने सा तु जाता सा पद्मिनी परा ॥
तत् सर्व्वं परमेशान विस्ताराद्वद शङ्कर ।
यदि नो कथ्यते देव विमुञ्चामि तदा तनुम् ॥

ईश्वर उवाच ।

पद्मिनी पद्मगन्धा सा वृकभानुगृहे प्रिये ! ।
आविरासीत्तदा देवी कृष्णस्य प्रथमं प्रिया ।
चैत्रे मासि सिते पक्षे नवम्यां पुष्यसंयुते ॥
कालिन्दीजलकल्लोले नानापद्मगणावृते ।
आविरासीत्तदा पद्मा मायाडिम्बसमाश्रिता ॥
डिम्बीभूता तदा पद्मा स्थिता कनकमध्यतः ।
कोटिचन्द्रप्रतीकाशं डिम्बं मायासमन्वितम् ॥
पुष्ययुक्तनवम्यां वै निशार्द्धे पद्ममध्यतः ।

राधा
राधा

आविरासीत्तदा पद्मा रङ्गिणी कुसुमप्रभा ॥
तरुणादित्यसङ्काशे पद्मे परमकामिनी ।
वृकभानुपुरं देवि ! कालिन्दीपारमेव च ।
नाम्ना पद्मपुरं रम्यं चतुर्व्वर्गसमन्वितम् ॥
डिम्बज्योतिर्म्महेशानि ! सहस्रादित्यसन्निभम् ।
तत्क्षणात् परमेशानि गाढ़ध्वान्तविनाशनत् ॥
वृकभानुर्म्महात्मा स कालिन्दीतटमास्थितः ।
महाविद्यां महाकालीं सततं प्रजपेत्सुधीः ॥
आविरासीन्महामाया तदा कात्यायनी परा ।
शृणु पुत्र महाबाहो वृकभानो महीधर ।
सिद्धोऽसि पुरुषश्रेष्ठ वरं वरय साम्प्रतम् ॥
वृकभानुरुवाच ।
सिद्धोऽहं सततं देवि ! त्वत्प्रसादात् सुरेश्वरि ! ।
त्वत्प्रसादान्महामाये यथा मुक्तो भवाम्यहम् ॥
त्वत्प्रसादान्महामाये असाध्यं नास्ति भूतले ।
आत्मनः सदृशाकारां कन्यामेकां प्रयच्छ मे ॥
तच्छ्रुत्वा परमेशानि ! तदा कात्यायनी परा ।
मेघगम्भीरया वाचा यदाह वृकभानवे ॥
तच्छृणुष्व महेशानि ! पीयूषसदृशं वचः ।
भक्त्या त्वदीयपत्न्यास्तु तुष्टाहं त्वयि सुन्दरि ! ॥
एतद्धि वचनं वत्स ! तव पत्न्या सुयुज्यते ।
इत्युक्त्वा सहसा तत्र महामाया जगन्मयी ॥
प्रददौ परमेशानि ! तस्मै डिम्बं मनोहरम् ।
वृकभानुर्म्महात्मा स तत्क्षणाद्गृहमाययौ ॥
भार्य्या तस्य विशालाक्षी विशालकटिमोहिनी ।
रत्नप्रदीपमाभाष्य रत्नपर्य्यङ्कमाश्रिता ॥
तस्या हस्ते तदा भानुः प्रददौ डिम्बमोहनम् ।
तं दृष्ट्वा परमेशानि ! विस्मयं परमं गता ॥
हस्ते कृत्वा तु डिम्बं वै निरीक्ष्य च पुनः पुनः ।
नानागन्धयुतं डिम्बं सर्व्वशक्तिसमन्वितम् ॥
नानाज्योतिर्म्मयं डिम्बं तत्क्षणाच्च द्विधाभवत् ।
तत्रापश्यन्महाकन्यां पद्मिनीं कृष्णमोहिनीम् ॥
रक्तविद्युल्लताकारां सर्व्वसौभाग्यवर्द्धिनीम् ।
तां दृष्ट्वा परमेशानि सहसा विस्मयं गता ॥
कीर्त्तिदोवाच ।
हे मातः पद्मिनीरूपे रूपं संहर संहर ।
ततस्तु परमेशानि ! तद्रूपं तत्क्षणात् प्रिये ! ॥
संहृत्य सहसा देवी सामान्यं रूपमास्थिता ।
ततस्तु कीर्त्तिदा देवी रूपन्तस्या अलोकयत् ॥
रङ्गिणी कुसुमाकारा रक्तविद्युत्समप्रभा ॥
कन्योवाच ।
हे मातः कीर्त्तिदे भद्रे क्षीरं पायय सुन्दरि ! ।
स्तनं देहि स्तनं देहि तव कन्या भवाम्यहम् ॥
तच्छ्रुत्वा वचनं तस्याः पद्मिन्याः कमलेक्षणे ।
अपाययत् स्तनं तस्यै पद्मिन्यै नगनन्दिनि ॥
चकार नाम तस्यास्तु भानुः कीर्त्तिदयान्वितः ।
रक्तविद्युत्प्रभां देवी धत्ते यस्मात् शुचिस्मिते ।
तस्मात्तु राधिका नाम सर्व्वलोकेषु गीयते ॥
ईश्वर उवाच ।
दिने दिने वर्द्धमाना वृकभानुगृहे प्रिये ! ।
एवं माथुरपीठे च चकार व्रजवासिनी ॥
तस्माद्द्वादशे मासि कृष्णोऽभूत् कमलेक्षणः ॥

महादेव उवाच ।
श्रूयतां पद्मपत्राक्षि रहस्यं पद्मिनीमतम् ।
सम्प्राप्ते परमेशानि ! द्वितीये वत्सरे तदा ॥
कुर्य्याद्यत्नेन देवेशि ! शिवलिङ्गप्रपूजनम् ।
प्रजपेत् परमां विद्यां कालीं ब्रह्माण्डरूपिणीम् ॥
पूजयेद्विविधैः पुष्पैर्गन्धैश्च सुमनोहरैः ।
फलैर्ब्बहुविधैर्भद्रे पूजयेत् परमेश्वरीम् ॥
पद्मिन्युवाच ।
कात्यायनि महामाये महायोगिन्यधीश्वरि ! ।
देहि देहि महामाये विद्यासिद्धिमनुत्तमाम् ॥
सिद्धिञ्च वासुदेवस्य देहि मातर्नमोऽस्तु ते ।
त्वां विना ब्रह्म निःशब्दं निश्चलं सततं सदा ॥
शरीरस्थं हि कृष्णस्य कृष्णो ज्योतिर्म्मयं सदा ।
विना देहं परं ब्रह्म शवरूपवदीरितम् ॥
अतएव महामाये ब्रह्मणः कारणं परा ।
एवं प्रार्थ्य महेशानि ! सततं परमेश्वरीम् ॥
संपूज्य परया भक्त्या लक्षं जप्त्वा तु मानसम् ।
वरं प्राप्ता महेशानि कात्यायन्याः समीपतः ॥
कात्यायन्युवाच ।
पद्मिनि शृणु मद्वाक्यं शीघ्रं प्राप्स्यसि केशवम् ।
इत्युक्त्वा परमेशानि ! तत्रैवान्तरधीयत ॥
कात्यायनी महामाया सदा वृन्दावनेश्वरी ।
वृकभानुसुता राधा सखीगणवृता सदा ॥
वर्द्धमाना सदा राधा यथा चन्द्रकला प्रिये ! ।
सर्व्वशृङ्गारवेशाढ्या स्फुरच्चकितलोचना ॥
सर्व्वालङ्कारसंयुक्ता साक्षात् श्रीरिव पार्व्वति ।
चचार गहने घोरे पद्मिनी परसुन्दरी ॥
या राधा परमेशानि ! पद्मिनी परमेश्वरी ।
पद्मस्य वनमाश्रित्य सदा तिष्ठति कामिनी ॥
अन्यमूर्त्तिं महेशानि ! दृष्ट्वा चैवात्मसन्निभाम् ।
आत्मनः सदृशाकारां राधामन्यां ससर्ज्ज सा ॥
या सा तु कृत्रिमा राधा वृकभानुगृहे सदा ।
अयोनिसम्भवा यातु पद्मिनी सा परात्परा ॥
कृत्रिमा या महेशानि ! तस्यास्तु चरितं
शृणु ।
वृकभानुर्म्महात्मा स तस्या वैवाहिकीं क्रियाम् ॥
कारयामास यत्नेन पञ्चवर्षे तु सुन्दरि ! ।
तस्यास्तु चोभयं वंशं सावधानावधारय ॥
श्वशुरस्य वृकस्यापि वंशं परमसुन्दरम् ।
श्वश्रूस्तु जटिला ख्याता पतिर्म्माम्योऽतिमन्युकः ॥
ननान्दा कुटिलानाम्नी देवरो दुर्म्मदाभिधः ।
तिलकं स्मरमादाख्यं हरोहरिमनोहरः ॥
रोचनो रत्नताड़ङ्को घृणियुक्तप्रभाकरी ।
छत्रं दृष्ट्वा प्रतिच्छायं पद्मञ्च मदनाभिधम् ॥
स्यमन्तकाख्यपर्य्यायः शङ्खचूड़शिरोमणिः ।
पुष्पवन्तोऽचपलकः सौभाग्यमणिरुच्यते ॥
काञ्ची काञ्चनचित्राङ्गि नूपुरे चित्रगोपुरे ।
मधुसूदनमाबद्धा ययोः शिञ्जितमाधुरी ॥
वासो मेघाम्बरं नाम कुरुविन्दनिभं सदा ।
आद्यं सुप्रियमभ्राभं रक्तमन्यं हरेः प्रियम् ॥
सुधांशो दर्पहरणो दर्पणो मणिबान्धवः ।
शलाका नर्म्मदा हैमी स्वस्तिका नाम कङ्कतिः ॥

कन्दर्पकुहरी नाम कटिका पुष्पभूषिता ।
स्वर्णसुखीतड़िद्वली कृष्णा ख्याता स्वनामतः ॥
नीपा नदीतटे यस्य रहस्यकथनस्थली ।
मन्दारश्च धनुः स्त्रीश्च रागोद्दृदयमन्दगौ
छानिक्यं दयिता नित्यं वल्लभा रुद्रधन्वकौ ।
सख्यः ख्याताः सदा भद्राचारुचन्द्रावलीमुखाः ॥
गान्धर्व्वास्तु कलाकण्ठी सुकण्ठी पिककण्ठिका ।
कलावती रसोल्लासा गुणवत्यादयः स्मृताः ॥
या विशाखाललतामीतिर्गायन्त्यः सुखदा हरेः ।
वादयन्त्यद्य शुषिरं ताललब्धघनन्त्वपि ॥
माणिक्या नर्म्मदा प्रेमवती कुसुमपेशलाः ।
दिवाकीर्त्तिस्तनूजे तु सुगन्धानलिनीत्युभे ॥
मञ्जिष्ठा रङ्गवत्याख्ये रजकस्य किशोरिके ।
पालिन्धिसमसैरिन्ध्री वृन्दाकन्दलतादयः ॥
धनिष्ठा गुणवत्याद्या धन्यवेश्मरगेहगाः ।
कामधा नामधा प्रेयी सखीभावविशेषभाक् ॥
लवङ्गमञ्जरी रागमञ्जरी गुणमञ्जरी ।
सुभानुसत्यनुपमा सुप्रिया रतिमञ्जरी ॥
रागलेखा कलाकेली भूरिदाद्याश्च नायिकाः ।
नान्दीमुखी बिन्दुमुखी आद्याः सन्धिविधा-
यिकाः ॥
सुहृत्पक्षतया ख्याताः श्यामला मङ्गलादयः ।
प्रतिपक्षतया श्रेष्ठा राधाचन्द्रावलीत्युभे ॥
सम्रहास्तु ययोः सन्ति कोटिसंख्याम्मृगीदृशाम् ।
तयोरप्युभयोर्म्मध्ये सर्व्वमाधुर्य्यतोऽधिका ॥
श्रीराधा त्रिपुरादूती पुराणपुरुषप्रिया ।
असमीनगुणोदर्य्या धूर्य्यो गोपेन्द्रनन्दनः ॥
यस्याः प्राणपरार्द्धानां परार्द्धादतिवल्लभः ।
श्रेष्ठा सा मातृकादिभ्यस्तत्र गोपेन्द्रगेहिनी ।
वृषभानुः पिता यस्या वृषभानुरिवो महान् ।
रत्नगर्भा क्षितौ ख्याता जननी कीर्त्तिदा च या ॥
उपास्यो जगतां चक्षुर्भगवान् पद्मबान्धवः ।
जप्यः स्वाभीष्टसंसर्गी कात्यायन्या महामनुः ॥
पौर्णमासी भगवती सर्व्वसौभाग्यवर्द्धिनी ।
पितामहो महीभानुर्ब्बिन्दुर्म्मातामहो मतः ॥
मातामहीपितामह्यौ सुखदामोक्षदाभिधे ।
रत्नभानुः स्वभानुश्च भानुश्च भ्रातरः पितुः ॥
भद्रकीर्त्तिर्म्महाकीर्त्तिः कीर्त्तिचन्द्रश्च मातुलः ।
स्वसा कीर्त्तिमती मातुर्भानुमुद्रा पितृष्वसा ॥
पितृष्वसृपतिः काश्यो मातृष्वसृपतिः कृशः ।
मातुली मेनकामेना षष्ठी धात्री तु धातकी ॥
श्रीदामा पूर्व्वजो भ्राता कनिष्ठानङ्गमञ्जरी ।
परमप्रेष्ठसख्यस्तु ललिता च विशाखिका ॥
विचित्रा चम्पकलता रङ्गदेवी सुदेविका ।
तुङ्गवेद्यङ्गलेखा च इत्यष्टौ च गणा मताः ॥
प्रियसख्यः कुरङ्गाक्षी मण्डली मानकुण्डला ।
मालती चन्द्रलतिका माधवामदनालसा ॥
मञ्जुमेधा शशिकला सुमध्या मधुमेक्षणा ।
कमला कामलतिका कान्तचूड़ा वराङ्गना ॥
मधूरी चन्द्रिका प्रेममञ्जरी तनुमध्यमा ।
कन्दर्पसुन्दरी मञ्जुकेशी चाद्यास्तु कोटिशः ॥
रक्तानीवितयाख्याता कलिका केलिसुन्दरी ।

कादम्बरी शशिमुखी चन्द्ररेखा प्रियंवदा ।
मदोन्मादा मधुमती वासन्ती कलभाषिणी ।
रत्नवेणी मालवती कर्पूरतिलकादयः ॥
एता वृन्दावनेश्वर्य्याः प्रायः सारूप्यमागताः ।
नित्यसख्यस्तु कस्तूरी मनोज्ञा मणिमञ्जरी ॥
सिन्दूरा चन्दनवती कौमुदी मुदितादयः ।
काननादिगतास्तस्या विहारार्थं कला इव ॥
अथ तस्याः प्रकीर्त्तन्ते प्रेयस्यः परमाद्भुताः ।
वनादिव्योप्युरुप्रेमसौन्दर्य्यभरभूषिताः ॥
चन्द्रावली च पद्मा च श्यामा सैका च भद्रिका ।
तारा चित्रा च गन्धर्व्वी पालिका चन्द्रमालिका ॥
मङ्गला विमला नीला भवनाक्षी मनोरमा ।
कल्पलता तथा मञ्जुभाषिणी मञ्जुमेखला ॥
कुमुदा कैरवी पारी शारदाक्षी विशारदा ।
शङ्करी कुसुमा कृष्णा सारङ्गी प्रविलासिनी ॥
तारावली गुणवती सुमुखी केलिमञ्जरी ।
हारावली चकोराक्षी भारती कामिनीति च ॥
आसां यूथानि शतशः ख्यातान्यानि सुभ्रुवाम् ।
लक्षसंख्यास्तु कथिता यूथे यूथे वराङ्गनाः ॥
मुख्यास्तु तेषु यूथेषु कान्ताः सर्व्वगुणोत्तमाः ।
राधा चन्द्रावली भद्रा श्यामला पालिकादयः ॥
जन्मनाम्नाथ सा ख्याता मधुमासे विशेषतः ।
पुष्यर्क्षे च नवम्यां वै शुक्लपक्षे शुचिस्मिते ॥
जाता राधा महेशानी स्वयं प्रकृतिपद्मिनी ।
तासु रेमे महेशानि स्वयं कृष्णः शुचिस्मिते ।
रमणं वासुदेवस्य मन्त्रसिद्धेस्तु कारणम् ॥

देव्युवाच ।

भो देव तापसां श्रेष्ठ विस्तारात् वद ईश्वर ।
कथं सा पद्मिनी राधा सदा पद्मवने स्थिता ॥
पितरं मातरं त्यक्त्वा आत्मतुल्यां सवर्ण्णं सा ।
पद्ममाश्रित्य देवेश वृन्दावनविलासिनी ।
सदाध्यास्ते महेशानि एतद्गुह्यं वद प्रभो ! ॥”
इति वासुदेवरहस्ये राधातन्त्रे सप्तमः पटलः ॥

ईश्वर उवाच ।

“सा राधा नगशावाक्षि ! पद्मिनी विष्णुवल्लभा ।
महामाया जगद्धात्री त्रिपुरा परमेश्वरी ॥
तस्या दूती महेशानि पद्मिनी पद्मगन्धिनी ।
कृष्णस्य दृढ़भक्ता तु पद्मिनी तस्य वल्लभा ॥
वृकभानोर्म्महेशानि दृढ़भक्तिः शुचिस्मिते ।
दुहितृत्वं गता देवी पद्मिनी गन्धमालिनी ॥
कृत्वा तु स्तनपानं हि राधामन्यां सवर्ण्णं सा ।
पद्मषण्डं समाश्रित्य यमुनाजलमध्यतः ॥
महाकाल्या महामन्त्रं प्रजपेन्निर्ज्जने वने ।
अन्या चन्द्रावली राधा वृकभानुगृहे स्थिता ॥
पूर्व्वोक्तं यद्गुणं देवि पद्मिनी कमलेक्षणे ।
तत् सर्व्वं पद्मिनीस्थं नान्यथा परमेश्वरि ॥
राधिका त्रिविधा प्रोक्ता चन्द्रा तु पद्मिनी तथा ।
न पश्येत् परमेशानि चन्द्रसूर्य्यौ शुचिस्मिते ॥
मानवानां महेशानि वराकाणां हि का कथा ।
आत्मनोऽपह्नवं कृत्वा पद्मिनी पद्ममाश्रिता ।
त्रिपुराया महेशानि पद्मिनी अनुचारिणी ॥”
इति वासुदेवरहस्ये राधातन्त्रे अष्टमः पटलः ॥)

अस्याः सहस्रनामानि यथा,—

पार्व्वत्युवाच ।

“देवदेव जगन्नाथ भक्तानुग्रहकारक ।
यद्यस्ति मयि कारुण्यं यद्यस्ति मयि ते दया ॥
यद्यत् त्वया प्रगदितं तत् सर्व्वं मे श्रुतं प्रभो ।
गुह्यात् गुह्यतरं यत्तु यत्ते मनसि काङ्क्षति ॥
त्वया न गदितं यत्तु यस्मै कस्मै कदाचन ।
तन्मां कथय देवेश सहस्रं नाम चोत्तमम् ॥
श्रीराधाया महादेव्या गोप्या भक्तिप्रसाधनम् ।
ब्रह्माण्डकर्त्री हर्त्री सा कथं गोपीत्वमागता ॥

महादेव उवाच ।

शृणु देवि ! विचित्रार्थां कथां पापहरां शुभाम् ।
सन्ति जन्मानि कर्म्माणि तस्या नूनं महेश्वरि ! ॥
यदा हरिश्चरित्राणि कुरुते कार्य्यगौरवात् ।
तदा विधत्ते रूपाणि हरिसान्निध्यसाधिनी ॥
तस्या गोपीत्वभावस्य कारणं गदितं पुरा ।
इदानीं शृणु देवेशि ! नाम्नां चैव सहस्रकम् ॥
यन्मया कथितं नैव तन्त्रेष्वपि कदाचन ।
तव स्नेहात् प्रवक्ष्यामि भक्त्या धार्य्यं मुमुक्षुभिः ॥
मम प्राणसमा विद्या भाव्यते मे त्वहर्निशम् ।
शृणुष्व गिरिजे नित्यं पठस्व च यथामति ॥
यस्याः प्रसादात् कृष्णस्तु गोलोकेशः परः प्रभुः । * ।
अस्या नामसहस्रस्य ऋषिर्नारद एव च ॥
देवी राधा परा प्रोक्ता चतुर्व्वर्गप्रसाधिनी ।
श्रीराधा राधिका कृष्णवल्लभा कृष्णसंयुता ॥
वृन्दावनेश्वरी कृष्णप्रिया मदनमोहिनी ।
श्रीमती कृष्णकान्ता च कृष्णानन्दप्रदायिनी ॥
यशस्विनी यशोगम्या यशोदानन्दवल्लभा ।
दामोदरप्रिया गोपी गोपानन्दकरी तथा ॥
कृष्णाङ्गवासिनी हृद्या हरिकान्ता हरिप्रिया ।
प्रधाना गोपिका गोपकन्या त्रैलोक्यसुन्दरी ॥
वृन्दावनविहारी च विस्फूर्ज्जितमुखाम्बुजा ।
गोपकुलानन्दकर्त्री गोकुलानन्ददायिनी ॥
गतिप्रदा गीतगम्या आगमागमनप्रिया ।
विष्णुप्रिया विष्णुकान्ता विष्णोरङ्गनिवासिनी ॥
यशोदानन्दपत्नी च यशोदानन्दगेहिनी ।
कामारिकान्ता कामेशी कामलालसविग्रहा ॥
जयप्रदा जया जीवा जीवानन्दप्रदायिनी ।
यशोदानन्दपत्नी च वृषभानुसुता शिवा ॥
गणाध्यक्षा गवाध्यक्षा गवां गतिरनुत्तमा ।
काञ्चनाभा हेममात्री काञ्चनाङ्गदधारिणी ॥
अशोका शोकरहिता विशोका शोकनाशिनी ।
गायत्त्री वेदमाता च वेदातीता विदुत्तमा ॥
नीतिशास्त्रप्रिया नीतिर्गतिर्म्मतिरभीष्टदा ।
वेदप्रिया वेदगर्भा वेदमार्गप्रवर्द्धिनी ॥
वेदगम्या वेदपरा विचित्रकनकोज्ज्वला ।
तथोज्ज्वलप्रदा नित्या तथैवोज्ज्वलगात्रिका ।
नन्दप्रिया नन्दसुता राधानन्दप्रदा शुभा ।
शुभाङ्गी विमलाङ्गी च विलासिन्यपराजिता ॥
जननी जन्मशून्या च जन्ममृत्युजरापहा ।

गतिर्गतिमतां धात्री धात्रानन्दप्रदायिनी ॥
जगन्नाथप्रिया शैलवासिनी हेमसुन्दरी ।
विचित्रवासिनी चित्रवासिनी चित्ररूपिणी ॥
निर्गुणा सुकुलीना च निष्कुलीना निराकुला ।
गोकुलान्तरगेहा च योगानन्दकरी तथा ॥
वेणुवाद्या वेणुरतिर्वेणुवाद्यपरायणा ।
गोपालस्य प्रिया सौम्या रम्या सौम्यकुलोद्भवा ॥
अतिसौम्यातिमोहा च गतिरिष्टा गतिप्रदा ।
गीर्व्वाणवन्द्या गीर्व्वाणा गीर्व्वाणगणसेविता ॥
ललिता च विशोका च विशाखा चित्रमालिनी ।
जितेन्द्रिया शुद्धसत्त्वा कुलीना कुलदीपिका ॥
दीपप्रिया दीपदात्री विमला विमलोदका ।
कान्तारवासिनी कृष्णा कृष्णचन्द्रप्रिया मतिः ॥
अनुत्तरा दुःखहन्त्री दुःखकर्त्री कुलोद्भवा ।
मतिर्लक्ष्मीर्धृतिर्लज्जा कान्तिः पुष्टिः स्मृतिः क्षमा ॥
क्षीरोदशायिनी देवी देवारिकुलमर्द्दिनी ।
वैष्णवी च महालक्ष्मीः कुलपूज्या कुलप्रिया ॥
संहर्त्री सर्व्वदैत्यानां सावित्री वेदगामिनी ।
वेदातीता निरालम्बा निरालम्बगणप्रिया ॥
निरालम्बजनैः पूज्या निरालोका निराश्रया ।
एकाङ्गी सर्व्वगा सेव्या विष्णोः पत्नी सरस्वती ॥
रासप्रिया रासगम्या रासाधिष्ठातृदेवता ।
रसिका रसिकानन्दा स्वयं रासेश्वरी परा ॥
रासमण्डलमध्यस्था रासमण्डलशोभिता ।
रासमण्डलसेव्या च रासक्रीड़ामनोहरा ॥
पुण्डरीकाक्षनिलया पुण्डरीकाक्षगेहिनी ।
पुण्डरीकाक्षसेव्या च पुण्डरीकाक्षवल्लभा ॥
सर्व्वजीवेश्वरी सर्व्वजीववन्द्या परात्परा ।
प्रकृतिः शम्भुकान्ता च सदाशिवमनोहरा ॥
क्षुत् पिपासा दया निद्रा भ्रान्तिः श्रान्तिः क्षमाकुला ।
विधुरूपा गोपपत्नी भारती सिद्धयोगिनी ॥
सत्यरूपा नित्यरूपा नित्याङ्गी नित्यगेहिनी ।
स्थानदात्री तथा धात्री महालक्ष्मीः स्वयंप्रभा ॥
सिन्धुकन्या स्थानदात्री द्वारकावासिनी तथा ।
बुद्धिः स्थितिः स्थानरूपा सर्व्वकारणकारणम् ॥
भक्तप्रिया भक्तगम्या भक्तानन्दप्रदायिनी ।
भक्तकल्पद्रुमातीता तथातीतगुणा तथा ॥
मनोऽधिष्ठातृदेवी च कृष्णप्रेमपरायणा ।
निरामया सौम्यदात्री तथा मदनमोहिनी ॥
एकानंशा शिवा क्षेमा दुर्गा दुर्गतिनाशिनी ।
ईश्वरी सर्व्ववन्द्या च गोपनीया शुभङ्करी ॥
पालिनी सर्व्वभूतानां तथा कामाङ्गहारिणी ।
सद्योमुक्तिप्रदा देवी वेदसारा परात्परा ॥
हिमालयसुता सर्व्वा पार्व्वती गिरिजा सती ।
दक्षकन्या देवमाता मन्दलज्जा हरेस्तनुः ॥
वृन्दारण्यप्रिया वृन्दा वृन्दावनविलासिनी ।
विलासिनी वैष्णवी च ब्रह्मलोकप्रतिष्ठिता ॥
रुक्मिणी रेवती सत्यभामा जाम्बवती तथा ।
सुलक्षणा मित्रविन्दा कालिन्दी जह्नुकन्यका ॥

परिपूर्णा पूर्णतरा तथा हैमवती गतिः।
अपूर्वा ब्रह्मरूपा च ब्रह्माण्डपरिपालिनी ॥
ब्रह्माण्डभाण्डमध्यस्था ब्रह्माण्डभाण्डरूपिणी।
अण्डरूपाण्डमध्यस्था तथाण्डपरिपालिनी ॥
अण्डबाह्याण्डसंहर्त्री शिवब्रह्महरिप्रिया।
महाविष्णुप्रिया कल्पवृक्षरूपा निरन्तरा ॥
सारभूता स्थिरा गौरी गौराङ्गी शशिशेखरा।
श्वेतचम्पकवर्णाभा शशिकोटिसमप्रभा ॥
मालतीमाल्यभूषाढ्या मालतीमाल्यधारिणी।
कृष्णस्तुता कृष्णकान्ता वृन्दावनविलासिनी ॥
तुलस्यधिष्ठातृदेवी संसारार्णवपारदा।
सारदा हारदा गोपनन्दिनी सर्व्वसिद्धिदा ॥
अतीतगमना गौरी परानुग्रहकारिणी।
करुणार्णवसंपूर्णा करुणार्णवधारिणी ॥
माधवी माधवमनोहारिणी श्यामवल्लभा।
अन्धकारभयध्वस्ता मङ्गल्या मङ्गलप्रदा ॥
श्रीप्रभा श्रीप्रदा श्रीशा श्रीनिवासाच्युतप्रिया।
श्रीरूपा श्रीहरा श्रीदा श्रीकामा श्रीस्वरूपिणी ॥
श्रीदामानन्ददात्री च श्रीदामेश्वरवल्लभा।
श्रीनितम्बा श्रीगणेशा श्रीस्वरूपाश्रिता श्रुतिः ॥
श्रीक्रियारूपिणी श्रीला श्रीकृष्णभजनाश्रिता।
श्रीराधा श्रीमतिः श्रेष्ठा श्रेष्ठरूपा श्रुतिप्रिया ॥
योगेशा योगमाता च योगातीता युगप्रिया।
योगप्रिया योगगम्या योगिनीगणवन्दिता ॥
जवाकुसुमसङ्काशा दाड़िमीकुसुमोपमा।
नीलाम्बरधरा धारी धैर्य्यरूपा धरा धृतिः ॥
रत्नसिंहासनस्था च रत्नकुण्डलभूषिता।
रत्नालङ्कारसंयुक्ता रत्नमाल्यधरा परा ॥
रत्नेन्द्रसारहाराढ्या रत्नमालाविभूषिता।
इन्द्रनीलमणिन्यस्तपादपद्मा शुभा शुचिः ॥
कार्त्तिकी पौर्णमासी च अमावस्या भयापहा।
गोविन्दराजगृहिणी गोविन्दराजपूजिता ॥
गोविन्दार्पितचित्ता च गोपीजनगणान्विता।
वैकुण्ठनाथगृहिणी गोविन्दपरमानसा ॥
गोविन्ददेवदेवाढ्या तथा वैकुण्ठसुन्दरी।
मानदा सा वेदवती सीता साध्वी पतिव्रता ॥
अन्नपूर्णा सदानन्दरूपा कैवल्यसुन्दरी।
कैवल्यदायिनी श्रेष्ठा गोपीनाथमनोहरा ॥
गोपीनाथेश्वरी चण्डी नायिका नयनान्विता।
नायका नायकप्रीता नायकानन्दरूपिणी ॥
शेषा शेषवती शेषरूपा चैव जगन्मयी।
गोपालपालिका माया नन्दजाया तथा परा ॥
कुमारी यौवनानन्दी युवती गोपसुन्दरी।
गोपमाता जानकी च जनकानन्दकारिणी ॥
कैलासवासिनी रम्भा हरतोषणतत्परा।
हरेश्वरी रामरता रामरासेश्वरी रमा ॥
श्यामला चित्रलेखा च तथा भुवनमोहिनी।
सुगोप्या गोपवनिता गोपराज्यप्रदा शुभा ॥
आनन्दपूर्णा माहेशी मत्स्यराजसुता सती।
कौमारी नारसिंही च वाराही नवदुर्गिका ॥
चञ्चलाचञ्चला मोदा नारी भुवनसुन्दरी।
दक्षयज्ञहरा दाक्षी दक्षकन्या सुलोचना ॥

रतिरूपा रतिप्रीता रतिश्रेष्ठा रतिप्रदा।
रतिलक्षणगेहस्था विरजा भुवनेश्वरी ॥
शङ्कास्पदा हरेर्जाया जामातृकुलवन्दिता।
बकुला बकुलामोदधारिणी यमुना जया ॥
विजया जयपत्नी च यमलार्ज्जुनभञ्जिनी।
वक्रेश्वरी वक्ररूपा वक्रवीक्षणवीक्षिता ॥
अपराजिता जगन्नाथा जगन्नाथेश्वरी मतिः।
खेचरी खेचरसुता खेचरत्वप्रदायिनी ॥
विष्णुवक्षःस्थलस्था च विष्णुभावनतत्परा।
चन्द्रकोटिसुगात्रा च चन्द्राननमनोहरा ॥
सर्व्वसेव्या शिवा क्षेमा तथा क्षेमङ्करी वधूः।
यादवेन्द्रवधूः शैव्या शिवभक्ता शिवान्विता ॥
केवला निष्कला सूक्ष्मा महाभीमा भयप्रदा।
जीमूतरूपा जैमूती जिता मित्रप्रमोदिनी ॥
गोपालवनितानन्दा कुलजेन्द्रनिवासिनी।
जयन्ती यमुनाङ्गी च यमुनातोषकारिणी ॥
कलिकल्मषभङ्गा च कलिकल्मषनाशिनी।
कलिकल्मषरूपा च नित्यानन्दकरी कृपा ॥
कृपावती कुलवती कैलासाचलवासिनी।
वामदेवी वामभागा गोविन्दप्रियकारिणी ॥
नगेन्द्रकन्या योगेशी योगिनी योगरूपिणी।
योगसिद्धा सिद्धरूपा सिद्धक्षेत्रनिवासिनी ॥
क्षेत्राधिष्ठातृरूपा च क्षेत्रातीता कुलप्रदा।
केशवानन्ददात्री च केशवानन्ददायिनी ॥
केशवा केशवप्रीता केशोरी केशवप्रिया।
रासक्रीड़ाकरी रासवासिनी राससुन्दरी ॥
गोकुलान्वितदेहा च गोकुलत्वप्रदायिनी।
लवङ्गनाम्नी नारङ्गी नारङ्गकुलमण्डला ॥
एलालवङ्गकर्पूरसुखवाससुखान्विता।
मुख्या मुख्यप्रदा मुख्यरूपा मुख्यप्रदायिनी ॥
नारायणी कृपा राधा करुणा करुणामयी।
कारुण्या करुणाकर्णी गोकर्णा नागकर्णिका ॥
सर्पिणी कौलिनी क्षेत्रवासिनी च जगन्मयी।
जटिला कुटिला नीला नीलाम्बरधरा शुभा ॥
नितम्बिनी रूपवती युवती कृष्णपीवरी।
विभावरी वेत्रवती संकटा कुटिलालका ॥
नारायणप्रिया शैला सृक्कणीपरिमोहिता।
दृक्पातमोहिता प्रातराशितनवनीतिका ॥
नवीना नवनारी च नारङ्गफलशोभिता।
हैमी हेमसुखी चन्द्रसुखी शशिसुशोभना ॥
अर्द्धचन्द्रधरा चन्द्रवल्लभा रोहिणी तिमिः।
तिमिङ्गिलकुलामोदमत्स्यरूपाङ्गहारिणी ॥
कारणी सर्व्वभूतानां कार्य्यातीता किशोरिणी।
किशोरवल्लभा केशकारिका कामकारिका ॥
कामेश्वरी कामकला कालिन्दीकुलदीपिका।
कलिन्दतनयातीरवासिनी तीरगेहिनी ॥
कादम्बरीपानपरा कुसुमामोदधारिणी।
कुमुदा कुमुदानन्दा कृष्णेशी कामवल्लभा ॥
तर्क्कारी वैजयन्ती च निम्बदाड़िमरूपिणी।
विल्ववृक्षप्रिया कृष्णाम्बरा विल्वोपमस्तनी ॥
विल्वात्मिका विल्ववपुर्विल्ववृक्षनिवासिनी।
तुलसी तोषिका चैव तैतिलानन्दकारिणी ॥

गजेन्द्रगामिनी श्यामलतानङ्गलता तथा।
योषिच्छक्तिस्वरूपा च योषिदानन्दकारिणी ॥
प्रेमप्रिया प्रेमरूपा प्रेमानन्दतरङ्गिणी।
प्रेमहरा प्रेमदात्री प्रेमशक्तिमयी तथा ॥
कृष्णप्रेमवती धन्या कृष्णप्रेमतरङ्गिणी।
प्रेमार्थदायिनी सर्व्वश्वेता नित्यतरङ्गिणी ॥
हावभावान्विता रौद्रा रुद्रानन्दप्रकाशिनी।
कपिला शृङ्खला केशपाशसम्बर्द्धिनी घटी ॥
कुटीरवासिनी धूम्रा धूम्रकेशा जलोदरी।
ब्रह्माण्डगोचरा ब्रह्मरूपिणी भवभाविनी ॥
संसारनाशिनी शैवा शैवानन्दप्रदायिनी।
शिशिरा हैमरागाढ्या मेघरूपातिसुन्दरी ॥
मनोरमा वेगवती वेगाढ्या वेदवादिनी।
दयान्विता दयाधारा दयारूपा सुसेविनी ॥
किशोरसङ्गसंसर्गा गौरचन्द्रानना कला।
कलाधिनाथवदना कलानाथाधिरोहिणी ॥
विरागकुशला हेमपिङ्गला हेममण्डला।
भाण्डीरतालवनगा कैवर्त्ती पीवरी शुकी ॥
शुकदेवगुणातीता शुकदेवप्रियासखी।
विकलोत्कर्षिणी कोषा कौषेयाम्बरधारिणी ॥
कोषावरी कोषरूपा जगदुत्पत्तिकारिका।
सृष्टिस्थितिकरी संहारिणी संहारकारिणी ॥
केशशैवालधात्री च चन्द्रगात्रा सुकोमला।
पद्माङ्गरागसंरागा विन्ध्याद्रिपरिवासिनी ॥
विन्ध्यालया श्यामसखी सखी संसाररागिणी।
भूता भविष्या भव्या च भव्यगात्रा भवातिगा ॥
भवनाशान्तकारिण्याकाशरूपा सुवेशिनी।
रतिरङ्गपरित्यागा रतिवेशा रतिप्रिया ॥
तेजस्विनी तेजरूपा कैवल्यपथदा शुभा।
मुक्तिहेतुर्मुक्तिहेतुलङ्घिनी लङ्घना क्षमा ॥
विशालनेत्रा वैशाली विशालकुलसम्भवा।
विशालगृहवासा च विशालवदरीरतिः ॥
भक्त्यतीता भक्तिगतिर्भक्तिवाध्या भवाकृतिः।
वामाङ्गहारिणी विष्णोः शिवभक्तिसुखा-
न्विता ॥
विचित्राविचित्रा मोदमग्ना च गणतोषिता।
हयास्या हेरम्बसुता गणमाता सुरेश्वरी ॥
दुःखघ्नी दुःखहरा सेवितेप्सितसर्व्वदा।
सर्व्वाङ्गसुविधात्री च कुलक्षेत्रविनाशिनी ॥
लवङ्गा पाण्डवसखी सखीमध्यविलासिनी।
धान्यगीता गया गम्या गमनातीतनिर्भरा ॥
सर्व्वाङ्गसुन्दरी गङ्गा गङ्गाजलमयी तथा।
गङ्गेरिता पूतमाता पवित्रकुलदीपिका ॥
पवित्रगुणशीलाढ्या पवित्रानन्ददायिनी।
पवित्रगुणसीमाढ्या पवित्रकुलपावका ॥
गतिज्ञा गीतकुशला दनुजेन्द्रनिवारिणी।
निर्व्वाणदात्री नैर्वाणी हेतुयुक्तागमोत्तरा ॥
पर्व्वताधिनिवासा च निवासकुशला तथा।
सन्न्यासधर्म्मकुशला सन्न्यासे फलदा शुभा ॥
शरच्चन्द्रसुखी श्यामहारा क्षेत्रनिवासिनी।
वसन्तरागा सुश्रोणी वसन्तवसनाकृतिः ॥
चतुर्भुजा षड्भुजा च द्विभुजा गौरविग्रहा।

सहस्रास्या विहास्या च मुद्रास्या मुद्रदायिनी ॥
प्राणप्रिया प्राणरूपा प्राणरूपिण्यपावृता ।
कृष्णप्रीता कृष्णरता कृष्णतोषणतत्परा ॥
कृष्णप्रेमवती कृष्णभक्ता भक्तफलप्रदा ।
कृष्णप्रेमप्रेमभक्ता हरिभक्तिप्रदायिनी ॥
चैतन्यरूपा चैतन्यप्रिया चैतन्यरूपिणी ।
उग्ररूपा शिवक्रोडा कृष्णक्रोडा जलोदरी ॥
महोदरी महादुर्गकान्तारस्थलवासिनी ।
चन्द्रावली चन्द्रकेशी चन्द्रप्रेमतरङ्गिणी ॥
समुद्रामृतरूपा च समुद्रजलवासिका ।
केशपाशरता निद्रा क्षुधा प्रेमरतात्मिका ॥
दूर्व्वादलश्यामतनुर्दूर्व्वादलतनुच्छविः ।
नागरा नागरीवासा नगरानन्दकारिणी ॥
नागरालिङ्गनपरा नगराङ्गनमङ्गला ।
उच्चनीचा हैमवती प्रियाकृष्णतरङ्गिणी ॥
प्रेमालिङ्गनसिद्धाङ्गी सिद्धसाध्यविलासिका ।
मङ्गला मोदजननी मेखला मोदधारिणी ॥
रत्नमञ्जीरभूषाङ्गी रत्नभूषणभूषणा ।
जम्बालमालिका कृष्णप्राणा प्राणविमोचना ॥
सत्यप्रदा सत्यवती सेवकानन्ददायिका ।
जगद्योनिर्ज्जगद्दीप्ता विचित्रमणिभूषणा ॥
राधारमणकान्ता च राध्याराधनरूपिणी ।
कैलासवासिनी कृष्णप्राणसर्व्वस्वदायिनी ॥
कृष्णावतारनिरता कृष्णभक्तफलार्थिनी ।
याचका याचकानन्दकारिणी याचकोज्ज्वला ॥
हरिभूषणभूषाढ्या नन्दयुक्ता कृपापगा ।
हैहैतालधरा थैथैशब्दशक्तिप्रकाशिनी ॥
हेहेशब्दस्वरूपा च हीहीवाक्यविशारदा ॥
जगदानन्दकर्त्री च शास्त्रानन्दविशारदा ॥
पण्डिता पण्डितगुणा पण्डितानन्दकारिणी ।
परिपालनकर्त्री च तथा स्थितिविनोदिनी ॥
तथा संहारशब्दाढ्या विद्वज्जनमनोहरा ।
विदुषां प्रीतिजननी विद्वत्प्रेमविवर्द्धिनी ॥
नादेयी नादरूपा च नादबिन्दुविधारिणी ।
शून्यस्थानस्थिता शून्यरूपा पादपवासिनी ॥
कार्त्तिकव्रतकर्त्री च रसनाहारिणी खरा ।
ज्वलना चातलतली शिलातलनिवासिनी ॥
क्षुद्रकीटाङ्गसंसर्गसङ्गदोषविनाशिनी ।
कोटिकन्दर्पलावण्या कन्दर्पकोटिसुन्दरी ॥
कन्दर्पकोटिजननी कामबीजप्रदायिनी ।
कामशास्त्रविनोदा च कामशास्त्रप्रकाशिनी ॥
कामप्रकाशिका कामिन्यणिमाद्यष्टसिद्धिदा ।
यामिनी यामिनीनाथवदना यामिनीश्वरी ॥
योगेश्वरी हरयोगमुक्तिदात्री हिरण्यदा ।
कपालमालिनी देवी लीलाधामस्वरूपदा ॥
कृपान्वितगुणा गौणा गुणातीता फलप्रदा ।
कुष्माण्डभूतवेतालनाशिनी शारदान्विता ॥
सितासिता च सरला लीलालावण्यमङ्गला ।
विद्यार्थिविद्या माया च विद्याविद्यास्वरूपिणी ॥
आन्वीक्षिकीशास्त्ररूपा शास्त्रसिद्धान्त-
कारिणी ।
नागेन्द्राणी नागमाता क्रीडाकौतुकरूपिणी ॥

हरिभावनशीला च हरिसेवनतत्परा ।
हरिप्राणा हरप्राणा शिवप्राणा शिवान्विता ॥
नरकार्णवसंहन्त्री नरकार्णवनाशिनी ।
नरेश्वरी नरातीता नरसेव्या वराङ्गना ॥
यशोदानन्दिनीक्रीडा यशोदाक्रोडवासिनी ।
यशोदानन्दनप्राणा यशोदानन्दनार्थदा ॥
वत्सला कोशला काला करुणार्णवरूपिणी ।
स्वर्गलक्ष्मीर्भूमिलक्ष्मीर्द्रौपदी पाण्डवप्रिया ॥
तथार्ज्जुनसखी भौमी भीमा भैमी भयानका ।
त्रिजगन्मोहिनी क्षीणा प्राणासक्ततरा तथा ॥
पानार्थिनी पानपात्रा पानपानन्ददायिनी ।
दुग्धमन्थनकर्म्माढ्या दधिमन्थनतत्परा ॥
दधिभाण्डार्थिनी कृष्णक्रोधिनी नन्दनाङ्गना ।
घृतलिप्ता तक्रयुक्ता यमुनापारकौतुका ॥
विचित्रकर्म्मिका कृष्णहास्यभाषणतत्परा ।
गोपाङ्गनावेष्टिता च कृष्णसङ्गार्थिनी तथा ॥
रासयुक्ता रासरतिरासवासक्तवासना ।
हरिद्रा हरिताम्ररूपा हरावर्पितचेतसा ॥
निश्चैतन्या च निश्चेता तथा दारुहरिद्रिका ।
सुबलस्य स्वसा चैव कृष्णभाषातिवेगिनी ॥
श्रीदामस्य सखी दामदामिनी दामधारिणी ।
मल्लिकोल्लासिनी केशी हरिदम्बरधारिणी ॥
हरिसान्निध्यदात्री च हरिकौतुकमङ्गला ।
हरिप्रदा हरिप्राणा यमुनाजलवासिनी ॥
तपःप्रदा जितार्था च चतुरा चातुरीतमी ।
तमिस्रा तपरूपा च रौद्ररूपा यशोऽर्थिनी ॥
कृष्णकामा कृष्णभक्ता कृष्णानन्दप्रदायिनी ।
कृष्णार्थवासना कृष्णरागिणी भाविनी तथा ॥
कृष्णार्थरहिता भक्ता भक्ताभक्तसुभक्तिदा ।
श्रीकृष्णरहिता दीना विरहिणी हरेः प्रिया ॥
मथुरा मधुराराजगेहभावनभाजना ।
श्रीकृष्णभावनामोदा तस्योन्मादविधायिनी ॥
कृष्णार्थकुशला कृष्णसारचर्म्मधरा शुभा ।
अलकेश्वरपूज्या च कुबेरेश्वरवल्लभा ॥
धनधान्यविधात्री च जया काया हया हयी ।
प्रणवा प्रणवेशी च प्रणवार्थस्वरूपिणी ॥
ब्रह्मविष्णुशिवार्द्धाङ्गहारिणी शैवशिंशपा ।
राक्षसीनाशिनी भूतप्रेतप्राणविनाशिनी ॥
सकलेप्सितदात्री च सती साध्वी अरुन्धती ।
पतिव्रता पतिप्राणा पतिवाक्यविनोदिनी ॥
अशेषसाधिनी कल्पवासिनी कल्परूपिणी ॥
इत्येतत् कथितं देवि! राधानामसहस्रकम् ।
यः पठेत् पाठयेद्वापि तस्य तुष्यति माधवः ॥
किं तस्य यमुनाभिर्व्वा नदीभिः सर्व्वतः प्रिये ।
कुरुक्षेत्रादितीर्थेन यस्य तुष्टो जनार्दनः ॥
स्तोत्रस्यास्य प्रसादेन किं न सिध्यति भूतले ॥
ब्राह्मणो ब्रह्मवर्च्चस्वी क्षत्त्रियो जगतीपतिः ।
वैश्यो निधिपतिर्भूयात् शूद्रो मुच्येत जन्मतः ॥
ब्रह्महत्या सुरापानमित्यादीन्यतिपापतः ।
सद्यो मुच्येत देवेशि! सत्यं सत्यं न संशयः ॥
राधानामसहस्रस्य समानं नास्ति भूतले ।
स्वर्गे वाप्यथ पाताले गिरौ वा जलतोऽपि वा ॥

नातः परं शुभं स्तोत्रं तीर्थं नातः परं परम् ।
एकादश्यां शुचिर्भूत्वा यः पठेत् सुसमाहितः ॥
तस्य सर्व्वार्थसिद्धिः स्यात् शृणुयाद्वा सुशोभने ।
द्वादश्यां पौर्णमास्यां वा तुलसीसन्निधौ शिवे! ॥
यः पठेत् शृणुयाद्वापि तस्य तत्तत् फलं शृणु ।
अश्वमेधं राजसूयं बार्हस्पत्यं तथाविधम् ॥
अतिरात्रं वाजपेयं अग्निष्टोमं तथा शुभम् ।
कृत्वा यत्फलमाप्नोति श्रुत्वा तत्फलमाप्नुयात् ॥
कार्त्तिके चाष्टमीं प्राप्य पठेद्वा शृणुयादपि ।
सहस्रयुगकल्पान्तं वैकुण्ठवसतिं लभेत् ॥
ततश्च ब्रह्मभवने शिवस्य भवने पुनः ।
सुराधिनाथभवने पुनर्याति सलोकताम् ॥
गङ्गातीरं समासाद्य यः पठेत् शृणुयादपि ।
विष्णोः स्वरूपतां याति सत्यं सत्यं सुरेश्वरि! ॥
मम वक्त्रगिरेर्ज्जाता पार्व्वतीसागराश्रिता ।
राधानामसहस्राख्या नदी त्रैलोक्यपावनी ॥
पठ्यते हि मया नित्यं भक्त्या शक्त्या यथोचितम् ।
मम प्राणसमं ह्येतत् तव भक्त्या प्रकाशितम् ॥
नाभक्ताय प्रदातव्यं पाषण्डाय कदाचन ।
नास्तिकाय विरागाय रागयुक्ताय सुन्दरि! ॥
तथा देयं महास्तोत्रं हरिभक्ताय शङ्करि! ।
वैष्णवेषु यथाशक्तिदात्रे पुण्यार्थशीलिने ॥
राधानामसुधावारि मम वक्त्रं महाखनिः ।
उद्धृतं हि त्वया यत्नात् पाता सद्वैष्णवा-
ग्रणीः ॥

विशुद्धसत्त्वाय यथार्थवादिने
द्विजस्य सेवानिरताय मन्त्रिणे ।
दात्रे यथाशक्ति सुभक्तिमानसे
राधापदध्यानपराय शोभने ॥

हरिपादाब्जमधुपमनोभूताय मानसे ।
राधापादसुधास्वादशालिने वैष्णवाय च ॥
दद्यात् स्तोत्रं महापुण्यं हरिभक्तिप्रसाधनम् ।
जन्मान्तरं न तस्यास्ति राधाकृष्णपदार्थिनः ॥
मम प्राणा वैष्णवा हि तेषां रक्षार्थमेव हि ।
शूलं मया धार्य्यते हि नान्यथा मेत्रकारणम् ॥
हरिभक्तिद्विषामर्थे शूलं संधार्य्यते मया ।
शृणु देवि यथार्थं मे गदितं त्वयि सुव्रते! ॥
भक्तासि मे प्रियासि त्वमतः स्नेहात् प्रका-
शितम् ।
कदापि नोच्यते देवि मया नामसहस्रकम् ॥
किं परं त्वां प्रवक्ष्यामि प्राणतुल्यं मम प्रिये ।
स्तोत्रं मन्त्रं राधिकाया यन्त्रं कवचमेव हि ॥”
इति नारदपञ्चरात्रे राधिकासहस्रनामसमाप्तोऽध्यायः ॥*॥ (राधातन्त्रोक्तसहस्रनामस्तोत्रं यथा,—

ईश्वर उवाच ।

“इति ते कथितं देवि किमन्यत् कथयामि ते ।
श्रोत्री त्वं परमेशानि अहं वक्ता च शाश्वतः ॥

देव्युवाच ।

कियदन्यन्महादेव पृच्छामि यदि रोचते ।
हृदये तव देवेश नानातन्त्राणि सन्ति वै ॥
नानातन्त्राणि मन्त्राणि रहस्यानि पृथक् पृथक् ।

बहूनि तव देवेश हृदये देव सुव्रत ।
कृपया परमेशान कथयस्व दयानिधे ॥
ईश्वर उवाच ।
पद्मिन्याः परमेशानि रहस्यं नास्ति सुन्दरी ।
त्वयि सर्व्वं महेशानि कथितं परमेश्वरि ॥
किञ्चिदन्यन्महेशानि नास्ति मे गोचरे प्रिये ।
यद्यदस्ति महेशानि रहस्यं कथितं मया ॥
देव्युवाच ।
पद्मिन्याः परमेशान रहस्यं कथय प्रभो ।
यदि नो कथ्यते देव त्यजामि विग्रहं तदा ॥
ईश्वर उवाच ।
शृणु प्रिये कुरङ्गाक्षि एतत् प्रौढ़ं कथं तव ।
प्रौढ़त्वं यदि चार्व्वङ्गि रहस्यं कथयामि ते ॥
रहस्यं शृणु चार्व्वङ्गि स्तोत्रं परमदुर्लभम् ।
स्तोत्रं सहस्रनामाख्यं उपविद्यासु सम्मतम् ॥
उपविद्यासु देवेशि अतिगुप्तं मनोहरम् ।
एतत् स्तोत्रं महेशानि पद्मिनीसम्मतं सदा ॥
एतत्तु पद्मिनीस्तोत्रमाश्चर्य्यं परमाद्भुतम् ।
यन्नोक्तं सर्व्वतन्त्रेषु तव भक्त्या प्रकाशितम् ॥
अस्य श्रीपद्मिनीसहस्रनामस्तोत्रस्य श्रीकृष्ण-ऋषिर्म्महिषमर्द्दिन्यधिष्ठात्री देवता गायत्री-च्छन्दो महाविद्यासिद्ध्यर्थे विनियोगः । ॐ ह्रीँ ऐँ पद्मिन्यै राधिकायै । राधा रमणीरूपा निरुपमरूपवती रूपधन्या वश्या वामा रजोगुणा ।
रक्ताङ्गी रक्तपुष्पाभा राधा रासपरायणा ।
रम्भावती रूपशीला रदनी रङ्गिणी रतिः ॥
रतिप्रिया रमणीया रसपुञ्जा रसायना ।
रासमध्ये रासरूपा रसवेशा रसोत्सुका ॥
रसवती रसोल्लासा रसिका रसभूषणा ।
रसमालाधरी रङ्गी रसपट्टपरिच्छदा ॥
कमला कल्पलतिका कुलव्रतपरायणा ।
कामिनी कमला कुन्ती कलिकल्मषनाशिनी ।
कुलिना कुलवती कामी कामसन्दीपनी तथा ॥
कौमारी कृष्णवनिता कामार्त्ता कामरूपिणी ।
कामुकी कलुषघ्नी च कुलज्ञा कुलपण्डिता ॥
कृष्णवर्णा कृशाङ्गी च कृष्णवस्त्रपरिच्छदा ।
कान्ता कामस्वरूपा च कामरूपा कृपावती ॥
क्षेमा क्षमावती चैव खेलत्खञ्जनगामिनी ।
खस्था खगा खगस्थात्री खगवास्य विहारिणी ॥
गरिष्ठा गरिमा गङ्गा गया गोदावरी गतिः ।
गान्धारी गुणिनी गौरी गङ्गा गोकुलवासिनी ॥
गान्धर्व्वी गानकुशला गुणा गुप्तविलासिनी ।
घर्घरा घर्म्मदा घर्म्मा घनस्था घनवासिनी ॥
घृणा घृणावती घोरा घोरकर्म्मविवर्ज्जिता ।
चन्द्रा चन्द्रप्रभा चैव चन्द्रमूर्त्तिपरिच्छदा ॥
चन्द्ररूपा च चन्द्राख्या चपला चारुभूषणा ।
चतुरा चारुशीला च चम्पा चम्पावती तथा ॥
चन्द्ररेखा चन्द्रकला चारुवेशा विनोदिनी ।
चन्द्रचन्दनभूषाङ्गी चार्व्वङ्गी चन्द्रभूषणा ॥
चित्रिणी चित्ररूपा च चित्रमूर्त्तिधरा सदा ।
छद्मरूपा छद्मवेशी श्वेतच्छत्रनिधारिणी ॥

छत्रातपा च छत्राङ्गी छत्रघ्नी छत्रपालिनी ।
छुरितान्तधारौघा छद्मवेशनिवासिनी ॥
छटीलतमरालौघा छटीलतनिजान्तरा ।
जयन्ती च जगन्माता जननी जन्मदायिनी ॥
जया जैत्री च जरती जीवनी जगदम्बिका ।
जीवा जीवस्वरूपा च जाड्यविध्वंसकारिणी ॥
जगज्जनिर्ज्जनश्रेष्ठा जगद्धेतुर्ज्जगन्मयी ।
जगदानन्दजननी जगयित्री जगाश्रदा ॥
झङ्कारवाहिनी झञ्झा झञ्झारनिर्भरावती ।
टङ्कारटङ्किनी टङ्का टङ्किता टङ्करूपिणी ॥
डम्बरा डम्भरा डम्भा डमडम्भा च डम्बुरा ।
ढौकिताशेषनिर्घोषा ढलढलितलोचना ॥
तापिनी त्रिपथा तीर्थवासिनी त्रिदशेश्वरी ।
त्रिलोकजयी त्रैलोक्यतरणी तरणे तरुः ॥
तापहन्त्री तपा तापा तपनीया तपावती ।
तापिनी त्रिपुरादेवी त्रिपुराशाकरी सदा ॥
त्रिलक्षा तारिणी तारा तारामायकमोहिनी ।
त्रैलोक्यगमना तीर्णा तुष्टिता त्वरिता त्वरा ॥
तृष्णा तरङ्गिणी तीर्था त्रिविक्रमविधारिणी ।
तमोमयी तामसी च तपस्या तपसः फला ॥
त्रैलोक्यव्यापिनी तुष्टा तृप्तिस्तुष्टा तुला तथा ।
त्रैलोक्यमोहिनी तूर्णा त्रैलोक्यविभवप्रदा ॥
त्रिपदी च तथा तथ्या तिमिरध्वंसचन्द्रिका ।
तेजोरूपा तपःपारा त्रिपुरा त्रिपदस्थिता ॥
त्रयी तन्वी तापहरा तपनाङ्गजवाहिनी ।
तरित्तरङ्गितारण्या तपिता तरणीप्रिया ॥
तीव्रपापहरातुल्यातुलपापतनूनपात् ।
दारिद्र्यनाशिनी दात्री दया देया दयावती ॥
दिव्या दिव्यस्वरूपा च दीप्तादया दया द्रवा ।
दिव्यरूपा दिव्यमूर्त्तिर्दैत्येन्द्रप्राणनाशिनी ॥
द्रुता च द्रुतरूपा च दन्दशूकविनाशिनी ।
दुर्व्वारादमनीया च देवकार्य्यकरी सदा ॥
देवप्रिया देवधात्री देवा देवधिया सदा ।
दिक्पालपददात्री च दीर्घाद्या दीर्घलोचना ॥
दुष्टदैत्यकामदुघा दोग्ध्री दूषणवर्ज्जिता ।
दुग्धा दुग्धशशाभासा दिव्या दिव्यगतिप्रिया ॥
द्युनदी दीनशरणा दिव्या देहविदारिणी ।
दुर्गमा दरिमा दामा दूरघ्नी दूरवासिनी ॥
दुर्व्विगाह्या दयाधारा दूरसन्तापनाशिनी ।
दुराश्रया दुराधारा द्राविणी द्रुहिमस्तुता ॥
दैत्यशुद्धिकरी देवी सदादानवसिद्धिदा ।
दुर्बुद्धिनाशिनी देवी सततं दानदायिनी ॥
दानदात्री च देवेशी द्यावाभूमिविगाहिनी ।
दृष्टिदा दृष्टिफलदा देवताप्रसंस्थिता ॥
दीर्घव्रतकरी दीर्घा दीर्घधर्म्मा दयावती ।
दक्षिणी दक्षनीतिश्च दीप्तदक्षधरार्च्चिता ॥
दानार्च्चिता द्रवद्रथा द्रव्यैकनियमा परा ।
दुःसन्तापशाम्या च दात्री दवथुरोधिनी ॥
देवी दिव्या बलवती दान्ता दान्तजनप्रिया ।
दारिद्र्यादितटा दुर्गा दुर्गादिव्यप्रचारिणी ॥
धर्म्मरूपा धर्म्मधुरा धेनुरूपा धृतिध्रुवा ।
धेनुदाना ध्रुवसर्ग्गा धर्म्मकामार्थमोक्षदा ॥

धर्म्मिणी धर्म्ममाता च धर्म्मदात्री धनुर्द्धरा ।
धात्री ध्येया धरा धर्म्मधारिणी धृतकल्मषी ॥
धनदा धर्म्मदा धन्या धन्यदा धान्यदा धना ।
धन्या धनाधिरूपा च धरित्री धनपूरिता ॥
धारणा धनरूपा च धर्म्मा धर्म्मप्रचारिणी ।
धर्म्मिणी धर्म्मतत्त्वाख्या धम्मिल्लामलकेशिनी ॥
धर्म्मप्रचारनिरता धर्म्मरूपा धुरन्धरी ।
धनुर्व्विद्याधरी धात्री धनुर्व्विद्याविशारदा ॥
निरानन्दा निरीहा च निर्व्वाणद्वारसंस्थिता ।
निर्व्वाणपदवी दात्री नन्दिनी नाकनायिका ॥
नारायणी निषिद्धघ्नी निजरूपप्रकाशिनी ।
नमस्या निर्दया नन्दनता नूतनरूपिणी ॥
निर्म्मला निर्म्मलाभासा निरक्षा निरपत्रपा ।
नित्यानन्दमयी नित्यानित्या नूतनविग्रहा ॥
निषिद्धा नीतिधैर्य्या च निर्व्वाणपददीपिका ।
निःशङ्का च निरातङ्का निर्नाशितमहामनाः ॥
निर्म्मला नन्दजननी निर्म्मलश्यामवेशिनी ।
निरवद्यकुलस्रष्ट्री नित्यानन्दस्वरूपिणी ॥
निर्णया निर्णयज्ञाता निषिद्धकर्म्मवर्ज्जिता ।
नित्योत्सवा नित्यतप्ता नमस्कार्य्या निरञ्जना ॥
निष्ठावती निरातङ्का निर्लेपा निश्चलात्मिका ।
निरवद्या निरीशा च निरञ्जनपुरस्थिता ॥
पुण्यप्रदा पुण्यकरी पुण्यगर्भा पुरातनी ।
पुण्यरूपा पुण्यदेहा पुण्यगीता च पावनी ॥
पूजा पवित्रा परमा परा पुण्यविभूषणा ।
पुण्यदात्री पुण्यधरा पुण्या पुण्यप्रवाहिनी ॥
पुण्यदेहा पुण्यवती पूर्णिमा पूर्णचन्द्रमा ।
पौर्णमासी परा पद्मा पयस्या पद्मगन्धिनी ॥
पद्मिनी पद्मवक्त्रा च पद्ममालाधरा सदा ।
पद्मोद्भवा परख्या च परमानन्दरूपिणी ॥
प्रकाशा परमाश्चर्य्या पद्मगर्भनिवासिनी ।
पावनी च तथा पूता पवित्रा परमाकला ॥
पद्मार्च्चिता पद्मसंस्था पद्ममाता पुरातनी ।
पद्मासनगता नित्या पद्मासनपरिच्छदा ॥
शुक्लपद्मासनगता रक्तपद्मासना तथा ।
पीतपद्मासनगता कृष्णपद्मस्थिता तथा ॥
पदार्थदायिनी पद्मवनवासपरायणा ।
प्रकाशिनी प्रगम्या च पुण्यश्लोका च पावनी ॥
फलहन्त्री फलहरा फलिनी फलरूपिणी ।
फुल्लेन्दीवरलोचना फुल्ला फुल्लकोरकगन्धिनी ॥
फलिनी फालिनी फेना फुल्लच्छादितपातका ।
विश्वमाता च विश्वेशी विश्वा विश्वेश्वरप्रिया ॥
ब्रह्मण्या ब्राह्मणी ब्राह्मी ब्रह्मज्ञा द्विजकामदा ।
बहुला बाहुला वल्ली वल्लरी वरदायिनी ॥
विक्रान्ता विक्रमामाला बहुभाग्यविलोचना ।
विश्वामित्रा विष्णुसखी वैष्णवी विष्णुवल्लभा ॥
विष्णुप्राणप्रिया देवी विभूतिर्विश्वतोमुखी ।
वेदवेदरता वाणी वेदाक्षरसमन्विता ॥
विद्या विद्यावती वन्द्या बृहती ब्रह्मवादिनी ।
वरदा विप्रकृष्टा च वरिष्ठा च विशोधिनी ॥
विद्याधरी वसुमती विप्रकृष्टा विशोधिता ।
व्योमस्थानावली वामा विधात्री विबुधप्रिया ॥

बुद्धिर्ब्बिनाशिनी वित्ता ब्रह्मरूपा वराङ्गना ।
वासिनी ब्रह्मजननी ब्रह्महत्याप्रहारिणी ॥
ब्रह्मविष्णुस्वरूपा च सदा विभववर्द्धिनी ।
विभाषिणी व्यापिनी च व्यापिका परिचारिका ॥
विपन्नार्त्तिहरा देवी विनयव्रतचारिणी ।
विपन्नशोकसंहर्त्री विपञ्चीवाद्यतत्परा ॥
वेणुवाद्यपरा देवी वेणुश्रुतिपरायणा ।
वर्द्धिनी बलकरी बलमूला विवस्वती ॥
विपाशा विशिखा चैव विकल्पपरिवर्ज्जिता ।
बुद्धिदा बृहती देवी विधिविच्छिन्नसंशया ।
विचित्राङ्गी विचित्राभा विरूपा विभववर्द्धिनी ।
विजया विनया वन्द्या वामदेवी वरप्रदा ॥
विघ्नघ्नी च विशालाक्षी विज्ञानवित्तमानिनी ।
भद्रा भोगवती भव्या भवानी भयवासिनी ॥
भूतधात्री भयहरी भक्तवश्या भयापहा ।
भक्तिदा भयदा भेरीभक्तदुर्गप्रदायिनी ।
भागीरथी भानुमती भाग्यदा भगनिष्ठिता ।
भवप्रिया भूतवृद्धिर्भूतिदा भूतभूषणा ।
भोगवती भूतिमती भयरूपा भ्रमिर्भ्रमा ।
भूरिदा भक्तिसुलभा भाग्यवृद्धिकरी सदा ॥
भिक्षुमाता भिक्षुनिभा भया भवस्वरूपिणी ।
महामाया मातृप्रिया महानन्दा महोदरी ॥
मतिर्म्मुक्तिर्म्मनोज्ञा च महामङ्गलदायिनी ।
महापुण्या महादात्री मैथुनप्रियलालसा ॥
मनोज्ञा मालिनी मान्या मणिमाणिक्यधारिणी ।
मुनिस्तुता मोहकरी मोहहन्त्री मदोत्कटा ॥
मधुपानरता मद्या मदाघूर्णितलोचना ।
मधुपानप्रमत्ता च मधुलुब्धा मधुव्रता ॥
माधवी मालिनी मान्या मनोरथपथातिगा ।
मोक्षैश्वर्य्यप्रदामर्त्या महापुण्यवनाश्रिता ॥
महाप्रभावा महती मृगाक्षी मीनलोचना ।
महाकाठिन्यसम्पूर्णा महाक्षी महती कला ।
मुक्तिरूपा महामुक्ता मणिमाणिक्यभूषणा ।
मुक्ताफलविचित्राङ्गी मुक्ताराञ्जितनासिका ॥
महापातकराशिघ्नी मनोनयननन्दिनी ।
महामाणिक्यरचिता महाभूषणभूषिता ॥
मायावती मोहहन्त्री महाविद्याविधारिणी ।
महामेधा महाभूतिर्म्महामाया प्रिया सखी ॥
मनोधरी महोपाया महामणिविभूषिता ।
महामोहप्रशमिनी महामङ्गलदायिनी ॥
यशस्विनी यशोदा च यमुनावारिहारिणी ।
योगसिद्धिकरी यज्ञा यज्ञेशवन्दितप्रिया ॥
यज्ञेशी यज्ञफलदा यजनीया यशस्करी ।
योगयोनिर्योगसिद्धा योगिनी योगबुद्धिदा ।
योगयुक्ता यमाद्यष्टसिद्धियुक्तैकधारिणी ।
यमुनाजलसेव्या च यमुनाजलहारिणी ॥
यामिनी यमुना याम्या यमलोकनिवासिनी ।
लोकालोकविलासा च लोलत्कल्लोलमालिका ।
लोलाक्षी लोकमाता च लोकानन्दप्रदायिनी ।
लोकबन्धुर्लोकधात्री लोकालोकनिवासिनी ॥
लोकत्रयनिवासा च लपललपललिता ।
लीलालोका च लावण्या लघिमा लसदीक्षणा ॥

वासुदेवप्रिया वामा वसन्तसमयप्रिया ।
वासन्ती वसुदा वन्द्या वेणुवादपरायणा ॥
वीणावाद्यप्रमत्ता च वीणानादविभूषणा ।
वेणुवाद्यरता चैव वंशीनादविभूषणा ॥
शुभा शुभरतिः शान्तिः शैशवा शान्तिविग्रहा ।
शीतला शोभिता शोभा सुभद्रा शुभदायिनी ॥
शिवप्रिया शिवानन्दा शिवपूजासु तत्परा ।
शिवस्तुत्या शिवसखा शिवनित्यपरायणा ॥
श्रीमती श्रीनिवासा च श्रुतिरूपा शुभव्रता ।
शुद्धविद्याजपकरी शुभकर्त्री शुभाश्रया ।
श्रुतानन्दा श्रुतिः श्रोत्री शिवप्रेमपरायणा ।
शोषणी शुभवार्त्ता च शालिनी शिवनर्त्तकी ॥
षड्गुणायुधदाक्रान्ता षडङ्गश्रुतिरूपिणी ।
सरसा सुप्रभा सिद्धा सिद्धसिद्धिप्रदायिनी ॥
सेव्यासङ्गा सती सत्ता सक्तिरूपा सदाप्रिया ।
सम्पत्प्रदा स्तुतिः स्तुत्या स्तवनीया स्तवप्रिया ॥
स्थैर्य्यदा स्थैर्य्यगा सौख्या स्वैरसौभाग्यदायिनी ।
स्वल्पस्वल्पा स्वधा स्वाहा स्वधाक्षेपप्रमोदिनी ॥
स्वर्गप्रिया समुद्भाभा सर्व्वपातकनाशिनी ।
संसारवारिणी राधा सौभाग्यवर्द्धिनी सदा ॥
हरप्रिया हिरण्याभा हरिणाक्षी हिरण्मयी ।
हंसरूपा हरिद्राभा हरिद्वर्णा सुचिस्मिते ॥
क्षेमदा चालिता क्षेमा क्षुद्रघण्टाविधारिणी ।
अपरेकं प्रवक्ष्यामि प्रौढ़े स्वराक्षरसमन्वितम् ॥
स्तोत्रं सहस्रनामाख्यं स्वरव्यञ्जनसंयुतम् ।
अजपा अतुलानन्दा अनन्तानन्ददायिनी ॥
अन्नदाना अशोका च अलका अमृतश्रवा ।
अनाथवल्लभानन्ता अयोनिसम्भवा प्रिये ॥
अयत्नलब्धागाम्भीर्या विच्छिन्नाचापराजिता ।
अनाथानामभीष्टार्थसिद्धिदानन्दवर्द्धिनी ॥
अणिमादिगुणाधारा अगण्यालिकहारिणी ।
अचिन्त्यशक्तिवलयाद्भुतरूपा च हारिणी ॥
अद्रिराजसुता दूती अष्टयोगसमन्विता ।
अच्युता अनवच्छिन्ना अक्षुण्णशक्तिधारिणी ॥
अनन्ततीर्थरूपा च अनन्तानन्तरूपिणी ।
अनन्तमहिमा पारा अनन्तसुखदायिनी ॥
अर्थदा अन्नदा अर्था सदा अमृतवर्षिणी ।
अविद्याजालशमनी अप्रतर्क्यगतिप्रदा ॥
अशेषविघ्नसंहन्त्री अशेषगुणगुम्फिता ।
अज्ञाननाशिनी देवी अनन्तसिद्धिदायिनी ॥
अशेषपापसंहन्त्री अशेषदेवतामयी ।
अघोरा अमृता देवी अज्ञानतिमिरप्रदा ॥
अनुग्रहपरा देवी अभिरामविनोदिनी ।
अनवद्यपरिच्छिन्ना अत्यनन्तकलङ्किणी ॥
आरोग्यदात्री आनन्दा आपन्नार्त्तिविनाशिनी ।
आश्चर्य्यरूपा आद्यस्था आप्तविद्या सदा प्रिया ॥
आप्यायिनी च आलस्या आपदाहामृतप्रदा ।
इरावतिरिरादात्री इष्टपूर्त्तफलप्रदा ।
इतिहासस्मृतिः श्वेता इष्टामृतफलप्रदा ।
इरा च इष्टरूपा च इन्द्रादिपरिवन्दिता ॥
इन्दिरा इतराक्षी च इलङ्कार इधारिणी ।
इन्द्राणीसेवितपदा इन्द्रियप्रीतिदायिनी ॥

ईश्वरी ईशजननी ईशस्त्रैश्वर्य्यदायिनी ।
उत्तमश्रक्तिसंयुक्ता उपमानविवर्ज्जिता ।
उत्तमश्लोकसंसेव्या उत्तमोत्तमरूपिणी ॥
उषा उषा उषाराधा उर्म्मिला च सुचिस्मिते ।
ऊहा ऊहवितर्का च ऊर्द्धधारा च ऊर्द्धगा ॥
ऊर्द्धधारा ऊर्द्धयोनी उपपापविनाशिनी ।
ऋषिवृन्दस्तुता ऋद्धिकरणत्रयनाशिनी ॥
ऋतम्भरा ऋद्धिदात्री ऋक्‌रूपा ऋक्षस्वरूपिणी
ऋतुप्रिया ऋतमाता ऋक्षार्चितर्क्षमार्गगा ॥
ऋतुलक्षणरूपा च ऋतुमार्गप्रदर्शिनी ।
एधिताखिलसर्व्वस्वा एकैकायुतदायिनी ॥
ऐश्वर्य्यतर्थ्यरूपा च ऐतिरेन्द्रशिरोमणिः ।
ओजस्विनी ओषधी च ओजोनादौजदायिनी ॥
ओङ्कारजननी देवि ओङ्कारप्रतिपादिता ।
औदार्य्यप्रकरा भद्रे औपेन्द्रौषधिविग्रहा ॥
अम्बष्ठा च अमृता अम्बा अम्बालिका तथा ।
अम्बुजाक्षी च अम्बाना अम्बुस्निग्धाम्बुजानना ॥
अंशुमाली अंशुमती अंशीशांशांशसम्भवा ।
अन्धतामिस्रहा भद्रे अन्धलत्शोभनस्वरा ॥
अर्थेशा अर्थदात्री च अर्थरूपा अनाहता ।
शृणु नामान्तरं भद्रे ककारादि वरानने ! ॥
अत्यन्तसुन्दरं शुद्धं निर्म्मोलोत्पलगन्धिनी ।
कुटम्ना करुणा कान्ता कर्म्मजालविनाशिनी ॥
कमला कल्पलतिका कलिकल्मषनाशिनी ।
कमनीयकला कर्णा कपर्द्दिपूजनप्रिया ॥
कदम्बकुसुमाभावा सदा कोकनदेक्षणा ।
कालिन्दीकेलिकलिता कला कादम्बमालिका ॥
कान्तालोकनया कम्रा कम्बुरूपा मनोहरा ।
खड्गिनी खड्गधाराभा खगा खगेन्द्रधारिणी ॥
खेखेलगामिनी खड्गा खड्गेन्द्रुतलकाङ्क्षिता ।
खेचरी खेचरी विद्या खगतिः ख्यातिदायिनी ॥
खण्डिपाशेषपापौघा खलबुद्धिविनाशिनी ।
खातैन कन्दसन्दोहा खड्गखट्वाङ्गधारिणी ॥
खरसन्तापशमनी खरदुःखनिहन्तनी ।
गुहायत्नगतिर्गौरी गन्धर्व्वनगरप्रिया ॥
गूढ़रूपा गुणवती गुर्व्वी गौरवरङ्गिणी ।
ग्रहपीड़ाहरा गुप्ता गदस्निग्धमना प्रिया ॥
चाम्पेयलोचना चारु चार्व्वङ्गी चारुरूपिणी ।
चन्द्रचन्दनसिक्ताङ्गी चर्व्वणीया चिरस्थिता ॥
चारुचम्पकमालाढ्या चलिताशेषदुष्कृता ।
चारिताशेषवृजिना चारुताशेषसंस्तुता ।
रक्तचन्दनसिक्ताङ्गी रक्ताङ्गी रक्तमालिका ।
शुक्लचन्दनसिक्ताङ्गी शुक्लाङ्गी शुक्लमालिका ।
पीतचन्दनसिक्ताङ्गी पीताङ्गी पीतमालिका ।
कृष्णचन्दनसिक्ताङ्गी कृष्णाङ्गी कृष्णमालिका ॥
शुक्लवस्त्रपरीधाना शुक्लवस्त्रोत्तरीयिका ।
रक्तवस्त्रपरीधाना रक्तवस्त्रोत्तरीयिका ।
पीतवस्त्रपरीधाना पीतवस्त्रोत्तरीयिका ।
कृष्णपट्टपरीधाना कृष्णपट्टोत्तरीयिका ॥
वृन्दावनेश्वरी राधा कृष्णकार्य्यप्रकाशिनी ।
पद्मिनी नागिनी गोपी कालिन्दी अवगाहिनी ॥
गोपीश्वरप्रिया भव्या सदा नगरमोहिनी ।

त्रिपुरा त्रिपुरादेवी त्रिपुराज्ञाकरी सदा ॥
त्रिपुरासन्निकर्षस्था त्रिपुरापरिचारिका ।
त्रिपुरापुरसंस्था तु या राधा पद्मिनी परा ॥
नानासौभाग्यसम्पन्ना नानाभरणभूषिता ।
स्तोत्रं सहस्रनामाख्यं कथितं तव भक्तितः ॥
एतत् स्तोत्रस्य मन्त्रस्य कवचस्य वरानने ।
कल्पे कल्पे च देवेशि प्रपठेद्यदि मानवः ॥
उपास्य राधिकां विद्यां केवलं कमलेक्षणे ।
बहुकालेन देवेशि उपविद्यापि सिध्यति ॥
पद्मिनी राधिका विद्या उपविद्यासु निश्चिता ।
महाविद्यां महेशानि उपास्य यत्नतः स्वयम् ॥
प्रकटं परमेशानि राधामन्त्रेण सुन्दरि ! ।
सहस्र नाम सहस्राणि प्रकटे यत्तु शस्यते ॥
कृष्णस्तु कालिका साक्षात् राधाप्रकृतिपद्मिनी ।
हे कृष्ण राधे गोविन्द इदमुच्चार्य्य यत्नतः ॥
सदासौ वैष्णवो देवि सर्व्वत्रैव प्रकाशते ।
गोविन्दो यस्तु देवेशि स्वयं त्रिपुरसुन्दरी ॥
विना मन्त्रं विना होमं विना पूजां विना बलिम् ।
विना गन्धं विना पुष्पं विना नित्योदितां क्रियाम् ॥
प्राणायामं विना ध्यानं विना भूतविशोधनम् ।
विना जपं विना दानं येन राधा प्रसीदति ॥
राधासहस्रनामाख्यस्तोत्रमार्गेण पार्व्वति ।
यो जपेद्वैष्णवं मन्त्रं राधिकामन्त्रमेव च ॥
स पतेन्नरके घोरे यावदिन्द्राश्चतुर्द्दश ।
श्रुत्वा गुरुमुखान्मन्त्रं वैष्णवो भक्तितत्परः ॥
ततः पुरश्चरीं कुर्य्यादेकविंशतिसंख्यकम् ।
पूर्णाभिषेकसिक्तस्य ततो गुरुपदार्च्चनम् ॥
विना पूर्णाभिषेकञ्च भवाब्धौ पारमिच्छति ।
अशस्य तस्य दुर्ब्बुद्धेर्निरये पतनं भवेत् ॥
सत्यं सत्यं महेशानि सत्यं सत्यं वदाम्यहम् ।
भवाब्धितरणं नास्ति विना पूर्णाभिषेचनम् ॥
नानागमपुराणानि वेदवेदाङ्गशास्त्रतः ।
मयोद्धृतं महेशानि सारं पूर्णाभिषेचनम् ॥
तस्मात् सर्व्वप्रयत्नेन कुर्य्यात् पूर्णाभिषेचनम् ।
कृत्वा पूर्णाभिषेकञ्च पठेत् राधास्तवं प्रिये ॥
स्तवपाठान्महेशानि स भवेद्भवनन्दनः ।
स्तोत्रं सहस्रनामाख्यं न यस्य जपतो मशुम् ॥
राधाकृष्णस्य देवेशि तस्य पापफलं शृणु ।
कुम्भीपाके स पच्येत यावद्वै ब्रह्मणः शतम् ॥
निम्नगानां यथा श्रेष्ठा भवेद्भागीरथी प्रिये ।
वैष्णवानां यथा शम्भुः प्रकृतीनां यथा सती ॥
पुरुषाणां यथा विष्णुर्नक्षत्राणां यथा शशी ।
स्तवानाञ्च तथा श्रेष्ठं राधास्तोत्रमिदं प्रिये ॥
जपपूजादिकं यद्यद्बलिहोमादिकन्तथा ।
श्रीराधास्तोत्रपाठस्य कलां नार्हति षोड़शीम् ॥”
इति वासुदेवरहस्ये राधातन्त्रे द्वात्रिंशत् पटले सहस्रनामस्तोत्रम् ॥ * ॥) अथ राधाकवचम् ।

श्रीपार्व्वत्युवाच ।

“कैलासवासिन् भगवन् भक्तानुग्रहकारक ।
राधिकाकवचं पुण्यं कथयस्व मम प्रभो ॥
यद्यस्ति करुणा नाथ त्राहि मां दुःखतो भयात् ।
त्वमेव शरणं नाथ शूलपाणे पिनाकधृक् ॥

श्रीमहादेव उवाच ।

शृणुष्व गिरिजे तुभ्यं कवचं पूर्व्वसूचितम् ।
सर्व्वरक्षाकरं पुण्यं सर्व्वहत्याहरं परम् ॥
हरिभक्तिप्रदं साक्षात् भुक्तिमुक्तिप्रसाधनम् ।
त्रैलोक्याकर्षणं देवि हरिसान्निध्यकारणम् ॥
सर्व्वत्र जयदं देवि सर्व्वशत्रुभयापहम् ।
सर्व्वेषाञ्चैव भूतानां मनोवृत्तिकरं परम् ॥
चतुर्द्धामुक्तिजनकं सदानन्दकरं परम् ।
राजसूयाश्वमेधानां यज्ञानां फलदायकम् ॥
इदं कवचमज्ञात्वा राधामन्त्रञ्च यो जपेत् ।
स नाप्नोति फलं तस्य विघ्नास्तस्य पदे पदे ॥
ऋषिरस्य महादेवोऽनुष्टुप्छन्दः प्रकीर्त्तितम् ।
राधास्य देवता प्रोक्ता रां बीजं परिकीर्त्तितम् ॥
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ।
श्रीराधा मे शिरः पातु ललाटं राधिका तथा ॥
वृषभानुसुता दन्तान् चिबुकं गोपनन्दिनी ।
चन्द्रावली पातु गण्डं जिह्वां कृष्णप्रिया तथा ॥
कण्ठं पातु हरिप्राणा हृदयं विजया तथा ।
बाहू द्वौ चन्द्रवदना उदरं सुबलस्वसा ॥
कटिं योगान्विता पातु पादौ सौभद्रिका तथा ।
नखान् चन्द्रमुखी पातु गुल्फौ गोपालवल्लभा ॥
सुखं विधुमुखी पातु गोपी पदतलं तथा ॥
शुभप्रदा पातु पृष्ठं कुक्षौ श्रीकान्तवल्लभा ।
गुह्यदेशं जरा पातु हरिणी पातु सर्व्वतः ॥
वाक्यं वाणी सदा पातु धनागारं धनेश्वरी ।
पूर्व्वां दिशं कृष्णरता कृष्णप्राणा च पश्चिमाम् ॥
उत्तरां हरिता पातु दक्षिणां वृषभानुजा ।
चन्द्रावली नैशमेव दिवा क्ष्वेड़ितमेखला ॥
सौभाग्यदा मध्यदिने सायाह्ने कामरूपिणी ।
रौद्री प्रातः पातु मां हि गोपिनी रजनीक्षये ॥
हेतुदा सङ्गवे पातु कोमला च दिवार्द्धके ।
शेषापराह्णसमये शमिता सर्व्वसन्धिषु ॥
योगिनी भोगसमये रतौ रतिप्रदा सदा ।
कामेशी कौतुके नित्यं योगे रत्नावली मम ॥
सर्व्वदा सर्व्वकार्य्येषु राधिका कृष्णमानसा ।
इत्येतत् कथितं देवि कवचं परमाद्भुतम् ॥
सर्व्वरक्षाकरं नाम महारक्षाकरं परम् ।
सर्व्वार्थसिद्धिस्तस्य स्यात् यद्यन्मनसि वर्त्तते ॥
राजद्वारे सभायाञ्च संग्रामे शत्रुसङ्कटे ।
प्राणार्थनाशसमये यः पठेत् प्रयतो नरः ।
तस्य सिद्धिर्भवेद्देवि न भयं विद्यते क्वचित् ॥
आराधिता राधिका च तेन सत्यं न संशयः ।
गङ्गास्नानात् हरेर्नामग्रहणात् यत् फलं लभेत् ॥
तत् फलं तस्य भवति यः पठेत् प्रयतः शुचिः ।
हरिद्रारोचना चन्द्रमण्डितं हरिचन्दनम् ॥
कृत्वा लिखित्वा भूर्ज्जे च धारयेत् मस्तके भुजे ।
कण्ठे वा देवदेवेशि स हरिर्नात्र संशयः ॥
कवचस्य प्रसादेन ब्रह्मा सृष्टिं स्थितिं हरिः ।
संहारञ्चाहं नियतं करोमि कुरुते तथा ॥
वैष्णवाय च शुद्धाय विरागगुणशालिने ।
दद्यात् कवचमव्यग्रमन्यथा नाशमाप्नुयात् ॥”
इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे पञ्चरात्रे सर्व्वरक्षाकवचं समाप्तम् ॥ * ॥ (राधातन्त्रोक्त-राधिकाकवचं यथा,—

देव्युवाच ।

“देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
राधिकाकवचं देव कथयस्व दयानिधे ॥

ईश्वर उवाच ।

शृणु देवि वरारोहे कवचं जनमोहनम् ।
गोपितं सर्व्वतन्त्रेषु इदानीं प्रकटीकृतम् ॥
या राधा त्रिपुरा दूती उपविद्या सदा तु सा ।
उपविद्याक्रमाद्देवि कवचं शृणु पार्व्वति ॥
जपपूजाविधानस्य फलं सर्व्वस्वसिद्धिदम् ।
यत्र तत्र न वक्तव्यं कवचं गोपितं महत् ।
भक्तिहीनाय देवेशि द्विजनिन्दापराय च ।
न शूद्रयाजिविप्राय वक्तव्यं परमेश्वरि ॥
शिष्याय भक्तियुक्ताय शक्तिदीक्षारताय च ।
वैष्णवाय विशेषेण गुरुभक्तिपराय च ॥
वक्तव्यं परमेशानि मम वाक्यं न चान्यथा ॥
अस्य श्रीराधात्रैलोक्यमङ्गलकवचस्य गोपिका ऋषिरनुष्टुप्छन्दः श्रीराधिका देवता महाविद्यासाधनगोप्यर्थे विनियोगः ॥
ॐ पूर्व्वे च पातु सा देवी रुक्मिणी शुभदायिनी ।
ह्रीं पश्चिमे पातु सत्या सर्व्वकामप्रपूरणी ।
याम्यां ह्रीं जाम्बवती पातु सर्व्वकामफलप्रदा ।
उत्तरे पातु भद्रा ह्रीं भद्रशक्तिसमन्विता ॥
ऊर्द्ध्वे पातु महादेवी क्लीं कृष्णप्रिया यशस्विनी ।
अधश्च पातु मां देवी ऐँ पातालतलवासिनी ॥
अधरे राधिका पातु ऐँ पातु हृदयं मम ।
नमः पातु च सर्व्वाङ्गं ङेयुता च पुनः पुनः ।
सर्व्वत्र पातु मे देवी ईश्वरी भुवनेश्वरी ॥
ऐँ ह्रीं राधिकायै ह्रीं ऐँ शिरः पातु मां क्लीं क्लीं राधिकायै क्लीं क्लीं दक्षबाहुं रक्षतु मम । ह्रीं ह्रीं राधिकायै ह्रीं ह्रीं वामाङ्गं रक्षतु पद्मिनी पद्मगन्धिनी । ऐं ह्रीं राधिकायै ऐं ऐं दक्षपादं रक्षतु मम । क्लीं क्लीं ऐं ऐं राधिकायै ह्रीं ह्रीं ऐं ऐं क्लीं क्लीं ॐ सर्व्वाङ्गं मम रक्षतु । क्लीं राधिकायै क्लीं वामपादं रक्षतु सदा पद्मिनी । ह्रीं राधिकायै ह्रीं अक्षियुग्मं रक्षतु मम । ऐ राधिकायै ऐं कर्णयुग्मं सदा रक्षतु मम । ह्रीं राधिकायै ह्रीं नासायुग्मं सदा रक्षतु मम । ॐ ह्रीं राधिकायै ॐ ह्रीं दन्तपंक्तिं सदा पातु सरस्वती । ह्रीं भुवनेश्वरी ललाटं पातु ह्रीं काली मे मुखमण्डलं सदा पातु । ह्रीं ह्रीं ह्रीं महिषमर्द्दिन्यै ह्रीं ह्रीं महिषमर्द्दिनी द्वारकावासिनी सहस्रारं रक्षतु सदा मम । ऐं ह्रीं ऐं मातङ्गी हृदयं सदा मम रक्षतु । ह्रीं ऐं ह्रीं उग्रतारा नाभिपद्मं सदा रक्षतु मम । क्लीं ऐं क्लीं सुन्दरी क्लीं ऐं क्लीं स्वाधिष्ठानं लिङ्गमूलं रक्षतु मम । लं ऐं लं पृथिवी गुदमण्डलं रक्षतु मम । ऐं ऐं ऐं बलमा ऐं ऐं ऐं स्तनद्वयं रक्षतु मम । ह्सौं भैरवी ह्सौः स्कन्धद्वयं रक्षतु मम । ह्रीं

अन्नपूर्णा ह्रीं घाटी रक्षतु मम । ऐं ह्रीं ऐं बीजचयं सदा पातु पृष्ठदेशं मम । ॐ महादेवः पातु सर्व्वाङ्गं मे ॐ नारायणः पातु सर्व्वाङ्गं सदा मम ।
ॐ ॐ कृष्णः पातु सदा गोत्रं रुक्मिणीनाथः ।
रुक्मिणी सत्यभामा च सेव्या जाम्बवती तथा ॥
लक्ष्मणा मित्रवृन्दा च भद्रा नग्नजिता तथा ।
एताः सर्व्वा युवतयः शोभनाख्याः सुलोचनाः ॥
रक्षेयुर्मां सन्तु दिक्षु सततं शुभदर्शनाः ।
ॐ नारायणश्च गोविन्दः शिरः पद्मदलेक्षणः ॥
सर्व्वाङ्गं मे सदा रक्षेत् केशवः केशिहा हरिः ।
इतीदं कवचं भद्रे त्रैलोक्यमङ्गलं शुभम् ॥
पद्मिन्याः परमेशानि उपविद्यासु सत्तमम् ।
यः पठेत् पाठयेद्वापि सततं भक्तितत्परः ॥
निराहारी जलत्यागी अयुतं वत्सरे सदा ।
तदैव परमेशानि पद्मिनी वश्यतामियात् ॥
एतत्ते कथितं देवि कवचं भुवि दुर्लभम् ।
फलमूलजलं त्यक्त्वा पठेत् संवत्सरं यदि ॥
पद्मिनी वश्यमायाति तदैव नगनन्दिनि ।
अनेनैव विधानेन यः पठेत् कवचं परम् ॥
विष्णुलोकमवाप्नोति नान्यथा वचनं मम ।
संगोप्य पूजयेद्विद्यां महाविद्यां वरानने ॥
प्रकटार्थमिदं देवि कवचं प्रपठेत् सदा ।
महाविद्यां विना भद्रे यः पठेत् कवचं प्रिये ।
तदैव सहसा भद्रे कुम्भीपाकं व्रजेत् प्रिये ॥”
इति वासुदेवरहस्ये राधातन्त्रे एकत्रिंशत् प्रटलः ॥) अथ राधास्तोत्रम् ।
“स्तोत्रञ्च सामवेदोक्तं प्रपठेत् भक्तिपूर्व्वकम् ।
राधा रासेश्वरी रम्या परमा च परात्मनः ॥
रासोद्भवा कृष्णकान्ता कृष्णवक्षःस्थलस्थिता ।
कृष्णप्राणाधिदेवी च महाविष्णुप्रसूरपि ॥
सर्व्वाद्या विष्णुमाया च सत्यासत्या सनातनी ।
ब्रह्मस्वरूपा परमा निर्लिप्ता निर्गुणा परा ॥
वृन्दावनेशा विजया यमुनातटवासिनी ।
गोलोकवासिनी गोपी गोपीशा गोपमातृका ।
सानन्दा परमानन्दा नन्दनन्दनकामिनी ।
वृषभानुसुता शान्ता कान्ता पूर्णतमस्य च ॥
काम्या कलावतीकन्या तीर्थपूता सतीनिभा ।
सप्तविंशच्च नामानि वेदोक्तानि शुभानि च ॥
सारभूतानि पुण्यानि सर्व्वनामसु नारद ।
यः पठेत् संयतः शुद्धो विष्णुभक्तो जितेन्द्रियः ॥
इह वै निश्चलां लक्ष्मीं लब्ध्वा याति हरेः पदम् ॥
हरिभक्तिं हरेर्दास्यं लभते नात्र संशयः ।
भक्त्या लक्षजपेनैव स्तोत्रसिद्धिर्भवेत् ध्रुवम् ।
स्तोत्रस्मरणमात्रेण जीवन्मुक्तो भवेन्नरः ॥
पदे पदेऽश्वमेधस्य लभते निश्चितं फलम् ।
कोटिजन्मार्ज्जितात् पापात् ब्रह्महत्याशतादपि ।
स्तोत्रस्मरणमात्रेण मुच्यते नात्र संशयः ॥
मृतवत्सा काकवन्ध्या महावन्ध्या प्रसूयते ।
शृणोति वर्षमेकं या शुद्धा स्निग्धान्नभोजनी ॥
शृणोति मासमेकं यः सर्व्वाभीष्टं लभेन्नरः ।
सामवेदे कुमारं तमित्याह कमलोद्भवः ॥”

इति नारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रौ शिवनारदसंवादे भक्तिज्ञानकथने श्रीराधिकास्तोत्रं समाप्तम् ॥

राधाकान्तः, पुं, (राधायाः कान्तः ।) श्रीकृष्णः । यथा,—
“गोलोके द्विभुजः कृष्णो राधाकान्तः सनातनः ।
गोपाङ्गनादिभिर्युक्तो द्विभुजैर्गोपपार्षदैः ॥”
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १७ अध्यायः ॥

राधातनयः, पुं, (राधायाः सूतपत्न्यास्तनयः । तया पालितत्वात् तथात्वम् ।) कर्णः । इति हेमचन्द्रे कर्णपर्य्याये राधासुतशब्ददर्शनात् ॥

राधाभेदी, [न्] पुं, (राधां धन्विविच्चभेदं भिनत्तीति । भिद् + णिनिः ।) अर्ज्जुनः । इति भूरिप्रयोगः ॥

राधावेधी, [न्] पुं, (राधां धन्विचित्रविशेषं विध्यतीति । विध् + णिनिः ।) अर्ज्जुनः । यथा,
“राधावेधी किरीटीन्द्रिर्जिष्णुः श्वेतहयो नरः ।
बृहन्नली गुडाकेशः सुभद्रेशः कपिध्वजः ।
वीभत्सुः कर्णजित्तस्य गाण्डीवं गाण्डिवं धनुः ॥”
इति हेमचन्द्रः । ३ । ३७३ ॥

राधासुतः, पुं, (राधायाः सूतपत्न्याः सुतः ।) कर्णः । यथा,—
“वेदिजा याज्ञसेनी च कर्णश्चम्पाधिपोऽङ्गराट् ।
राधासुतोऽर्कतनयः कालपृष्ठन्तु तद्धनुः ॥”
इति हेमचन्द्रः । ३ । ३७५ ॥
(यथा, महाभारते । ८ । ८६ । ३ ।
“पश्य चैनं समायुक्तं रथं कर्णस्य पाण्डव ।
श्वेतवाजिसमायुक्तं युक्तं राधासुतेन च ॥”)

राधेयः, पुं, (राधाया अपत्यमिति । राधा + “स्त्रीभ्यो ढक् ।” ४ । १ । १२० । इति ढक् ।) कर्णः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १३४ । ११ ।
“सूतपुत्त्रस्तु राधेयो गुरुं द्रोणमियात्तदा ॥”)

राप्यः, त्रि, (रप्यते इति । रप् + “आसुयुवपिरपीति ।” ३ । १ । १२६ । इति ण्यत् ।) कथनीयः । रपधातोः कर्म्मणि ण्यप्रत्ययेन निष्पन्नः ॥

रामं, क्ली, (रम्यतेऽनेनेति । रम् + घञ् ।) वास्तुकम् । कुष्ठम् । इति मेदिनी । मे, २६ ॥ तमालपत्रम् । इति राजनिर्घण्टः ॥ (नैशं तमः । यथा, ऋग्वेदे । १० । ३ । ३ ।
“सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्
रुशद्भिर्वर्णैरभिराममस्थात् ॥”
“रामं कृष्णवर्णं शार्व्वरं तमः अभ्यस्थात्स्वायं होमकाले अभिभूय तिष्ठति ।” इति तद्भाष्ये सायणः ॥)

रामः, त्रि, (रमते इति । रम् + णः । रम्यतेऽनेनेति । रम् + घञ् वा ।) मनोज्ञः । (यथा, बृहत्संहितायाम् । १६ । ५ ।
“गावः प्रभूतपयसो नयनाभिरामा
रामा रतेरविरतं रमयन्ति रामान् ॥”)
सितः । असितः । इति मेदिनी । मे, २७ ॥

रामः, पुं, (रमते इति । रम क्रीडायाम् + “ज्वलितिकसन्तेभ्यो णः ।” ३ । १ । १४० । इति णः ।) परशुरामः । स तु विष्णोरंशः जमदग्निसुतः पुत्त्रत्वेन त्रेतायुगादाववतीर्णः एकविंशतिवारान् पृथिवीं निःक्षत्त्रियामकरोत् । (असौ एव समन्तपञ्चके पञ्च क्षत्त्रियशोणितह्रदान् विधाय पितॄन् सन्तर्पयामास । यदुक्तं महाभारते । १ । २ । २—११ ।
सौतिरुवाच ।
“इच्छामि मम भो विप्राः ब्रुवतश्च कथाः शुभाः ।
समन्तपञ्चकाख्यञ्च श्रोतुमर्हथ सत्तमाः ॥
त्रेताद्वापरयोः सन्धौ रामः शस्त्रभृतांवरः ।
असकृत् पार्थिवं क्षत्त्रं जघानामर्षचोदितः ॥
स सर्व्वं क्षत्त्रमुत्साद्य स्ववीर्य्येणानलद्युतिः ।
समन्तपञ्चके पञ्च चकार रौधिरान् ह्रदान् ॥
स तेषु रुधिराम्भःसु ह्रदेषु क्रोधमूर्च्छितः ।
पितॄन् सन्तर्पयामास रुधिरेणेति नः श्रुतम् ॥
अथर्चीकादयोऽभ्येत्य पितरो राममब्रुवन् ।
राम राम महाभाग प्रीताः स्मस्तव भार्गव ॥
अनया पितृभक्त्या च विक्रमेण तव प्रभो ।
वरं वृणीष्व भद्रन्ते यमिच्छसि महाद्युते ॥
राम उवाच ।
यदि मे पितरः प्रीता यद्यनुग्राह्यता मयि ।
यच्च रोषाभिभूतेन क्षत्त्रमुत्सादितं मया ॥
अतश्च पापान्मुच्येऽहमेष मे प्रार्थितो वरः ।
ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुताः ॥
एवं भविष्यतीत्येवं पितरस्तमथाब्रुवन् ।
तं क्षमस्वेति निषिषिधुस्ततः स विरराम ह ॥
तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम् ।
समन्तपञ्चकमिति पुण्यं तत् परिकीर्त्तितम् ॥”
अस्यान्यद्विवरणं परशुरामशब्दे द्रष्टव्यम् ॥ *) राघवः । श्रीरामचन्द्रः स च पूर्णब्रह्मस्वरूपः अयोध्याधिपतिदशरथराजतनयत्वेन त्रेतायुगशेषे रावणादिवधार्थमवतीर्णः । बलदेवः । स तु अनन्तदेवो विष्णोरंशः यदुवंशीयवसुदेवपुत्त्रत्वेन द्वापरयुगान्ते कंसादिवधार्थमवतीर्णः । (यथा, भागवते । १ । ११ । १७ ।
“निशम्य प्रेष्ठमायान्तं वासुदेवो महामनाः ।
अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥”)
त्रयो रामा यथा,—
“अघोरश्चाथ वामश्च महाकालौ प्रकीर्त्तितौ ।
भार्गवो राघवो गोपस्त्रयो रामाः प्रकीर्त्तिताः ॥”
इति वह्निपुराणम् ॥ * ॥
वरुणः । घोटकः । पशुभेदः । इति मेदिनी । मे, २६ ॥ (रम् + भावे घञ् । रतिः । यथा, भागवते । ७ । ६ । १४ ।
“सर्व्वत्र तापत्रयदुःखितात्मा
निर्व्विद्यते न स्वकुटुम्बरामः ॥”
“स्वकुटुम्बे रामो रतिर्यस्य ।” इति तत्र श्रीधरस्वामी ॥) रामशब्दस्य व्युत्पत्तिर्यथा,—
“राशब्दो विश्ववचनो मश्चापीश्वरवाचकः ।
विश्वानामीश्वरो यो हि तेन रामः प्रकीर्त्तितः ॥

रमते रमया सार्द्धं तेन रामं विदुर्बुधाः ।
रमाणां रमणस्थानं रामं रामविदो विदुः ॥
रा चेति लक्ष्मीवचनो मश्चापीश्वरवाचकः ।
लक्ष्मीपतिं गतिं रामं प्रवदन्ति मनीषिणः ॥
नाम्नां सहस्रं दिव्यानां स्मरणे यत् फलं लभेत् ।
तत् फलं लभते नूनं रामोच्चारणमात्रतः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
(तथा च अध्यात्मरामायणे । १ । ३ । ४४ ।
“यस्मिन् रमन्ते मुनयो विद्यया ज्ञानविप्लवे ।
तं गुरुः प्राह रामेति रमणाद्राम इत्यपि ॥”
एतत्कृतराक्षसवधवृत्तान्तं विचार्य्य यदुक्तं रामानुजेन तदाह । “अत्र युद्धदिवसगणनायां कतकतीर्थौ । पूर्व्वं सुवेलारोहणदिने ।
‘ततोऽस्तमगमत् सूर्य्यः सन्ध्यया प्रतिरञ्जितः ।
पूर्णचन्द्रप्रदीप्ता च क्षपा समतिवर्त्तते ॥’
इत्युक्तेस्तद्दिनं चतुर्द्दशीपूर्णिमान्यतरदिति स्पष्टम् । ततः कृष्णप्रतिपदि युद्धारम्भस्तस्यामेव रात्रौ नागपाशबन्धतद्विमोचौ । द्वितीयायां धूम्राक्षवधः । तृतीयायां वज्रदंष्ट्रस्य । चतुर्थ्यामकम्पनस्य । पञ्चम्यां प्रहस्तस्य । षष्ठ्यां रावणभङ्गः । सप्तम्यां कुम्भकर्णवधः । अष्टम्यामतिकायादेः । नवम्यामिन्द्रजितो ब्रह्मास्त्रप्रयोगः । दशम्यां दिवा निकुम्भवधः । तद्रात्रौ मकराक्षवधः । एकादश्यादित्रयोदश्यन्तदिनत्रयेण इन्द्रजिद्वधः । चतुर्द्दश्यां मूलबलवधः । अमायां रावणयुद्धारम्भतद्वधाविति पञ्चदशदिनानि सर्व्वं युद्धमिति । अत्रेदं वक्तव्यम् । केयं कृष्णप्रतिपत् माघकृष्णस्य वा चैत्रकृष्णस्य वा । नाद्यः चैत्रे पुष्यानक्षत्रेऽयोध्यातो वनं प्रति रामस्य प्रस्थानमिति स्पष्टमयोध्याकाण्डे । चैत्रे पुष्यश्च शुक्लपक्ष एव तत्रापि नवम्यादिदिनत्रये एवेति स्पष्टमेव ज्योतिषादौ । तत्र नवमीरिक्तात्वादभिषेकायोग्या दशम्येव तु पूर्णत्वाद्योग्या । एवञ्च चैत्रशुक्लदशम्यां प्रस्थानम् । तत्र माघकृष्णामायां युद्धसमाप्तौ तदुत्तरपञ्चम्यां भरद्वाजाश्रमगमनम् ।
‘पूर्णे चतुर्द्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः ।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥’
इति वक्ष्यमाणत्वात् । तत्र न च चतुर्द्दशवर्षसमाप्तिरिति भगवतः प्रतिज्ञाहानिः । पूर्णे चतुर्द्दशे वर्षे इत्युक्तेरसङ्गतिश्च । युद्धोत्तरं तावत्कालं लङ्कायामवस्थानस्यालाभाच्च । चैत्रशुक्लपञ्चम्यां तत्रागमनेऽपि पञ्चदिनन्यूनतैवेति तद्धानिस्तदवस्थैव । तदुत्तरद्वितीयदिने एवायोध्याप्रवेशस्य लाभात् । अमान्तमानेन चैत्रकृष्णोत्तरपञ्चम्यां तदाश्रमगतावपि चतुर्द्दशवर्षतो बहुदिनाधिक्येन चतुर्द्दशवर्षसमाप्तिदिनेऽयोध्यागमने “मया प्राप्या देया” इति भरतप्रतिज्ञाहानिः । सा च प्रतिज्ञा चित्रकूटे रामसन्निधावयोध्याकाण्डान्ते स्पष्टम् । एतेन चैत्रकृष्णप्रतिपदि युद्धारम्भस्तच्छुक्लप्रतिपदि रावणसंहार इति तीर्थोक्तश्चैत्रकृष्णस्येत्यन्त्योऽपि परास्तः । पूर्णिमान्तमानेन तिथिबद्धद्वादशमासैर्व्वर्षगणने पञ्चदिनानां न्यूनत्वात् । अमान्तमानेन चैत्रकृष्णग्रहणे बहुदिनाधिक्यम् । सावनमानेन षष्ट्युत्तरत्रिशता दिनैर्व्वर्षगणने तु तिथिबद्धवर्षात् तत्र षड्दिनाधिक्येन चतुर्द्दशवर्षाणाञ्चतुरशीत्यहोरात्रवृद्ध्या बहुदिनन्यूनतैव । किञ्च महाभारते युधिष्ठिरवनवासे त्रयोदशवर्षमिते किञ्चित्कालादर्व्वागेव तेषां प्राकट्ये दुर्य्योधनेन तदसमाप्तौ एषां प्राकट्येन पुनस्तावत्पर्य्यन्तं पुनरेतैर्वनवासः कर्त्तव्यो भविष्यतीति भीष्मं प्रत्युक्ते भीष्मवाक्यं विराटपर्व्वणि ।
‘पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।
एषामभ्यधिका मासाः पञ्च च द्वादशक्षपाः ॥
त्रयोदशानां वर्षाणामिति मे धीयते मतिः ।
सर्व्वं यथावच्चरितं यद्यदेभिः प्रतिश्रुतम् ॥
एवमेतद्ध्रुवं ज्ञात्वा ततो बीभत्सुरागतः ।
सर्व्वे चैव महात्मानः सर्व्वे धर्म्मार्थकोविदाः ॥
येषां युधिष्ठिरो राजा कस्माद्धर्म्मेपराध्नुयुः ॥’
इति । एवञ्चैदृशव्यवहारनिबद्धद्वादशमासैरेव वर्षगणना । अधिकमासगणना चोचितैव । एवञ्चाधिकमासगणनायां धर्म्माहानौ न्याय्यत्वे च स्थिते कस्माद्रामस्तामुपेक्षेत । भरतो वा तान्न गणयेत् । एवञ्चामान्तमानेन चतुर्द्दशीयाश्विनकृष्णे । पूर्णिमान्तमानेन कार्त्तिककृष्णे षष्ठ्यां तत्समाप्तिरित्यायाति । अन्यथा चैत्रशुक्लदशम्यामारब्धस्य वनवासस्य षष्ठ्यां चतुर्द्दशवर्षसमाप्तिर्न कथमप्युपपद्यते । तद्गणने तु एकादशदिनन्यूनषष्ठ्यां मासानां चतुर्द्दशवर्षेषु वृद्धावुपपद्यत एव सा । तस्मात् द्वादशसमाप्त्युत्तरं त्रयोदशे किञ्चिद्गतीते अरण्यकाण्डोक्ताखदीत्या फाल्गुनाष्टम्यां रावणकृतसीतापहारः । ततश्चतुर्द्दशे किञ्चिद्गतीते रामस्य लङ्कासमीपगमनम् । वर्त्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गमेति सीतोक्तिः सावनमानेन स्वहरणदिनतः कालगणनया । तत्र पूर्णचन्द्रप्रदीप्ता चेति रामोक्त्या पौषशुक्लचतुर्द्दश्यां पूर्णिमायां वा त्रिकूटशिखरप्राप्तौ रामस्य । किञ्च हनूमतो लङ्काप्रवेशोत्तरं सीतादर्शनकाले हिमव्यपायेन च शीतरश्मिरभ्युत्थितो नैकसहस्ररश्मिरिति वाक्येन द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृत इति रावणवाक्येन मार्गशुक्लदशम्युत्तरं हनूमतो लङ्काप्रवेशो दिनद्वयान्तरे लभ्यते इति निरूपितं सुन्दरकाण्डे । ततो मार्गकृष्णाष्टम्यां राघवप्रस्थानस्याभ्योक्तत्वेन पौषपूर्णिमात्वमेवोचितं तत्प्राप्तिदिनस्य । ततो दशपञ्चदिनानि सेनानिवेशदूतप्रेषणादिना गतानि । ततो युद्धारम्भस्तत्र तदारभ्य भाद्रश्रावणोभयामान्तं लङ्कापुराद् बहिः सेनयोः सङ्कुलं युद्धम् । ततो बहुराक्षसक्षयेण भीता राक्षसा लङ्कां प्रविष्टा इति तद्दिनेऽवहारः । तदुत्तरप्रतिपदि रात्राविन्द्रजित्कृतशरबन्ध इत्यादि । अतएव शरबन्धबद्धराघवदर्शनकाले सीतावाक्यम् । तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोष्पदे हताविति । अनेन बहुदिनयुद्धे बहुषु राक्षसेषु क्षयितेषु यूथपकतिपयरूपेऽल्पावशिष्टे सैन्ये तयोः शरबन्ध इति लभ्यते । तथा अयं ते सुमहान् कालः शयानस्य महाबल इति कुम्भकर्णम्प्रति रावणोक्त्या नास्यनतिनिद्रायाः षण्मासाधिकत्वप्रतीतेरप्येवमेवोचितम् । निरूपितञ्चैतत् प्राक् । सेतुबन्धादिवृत्तान्तं त्वं न जानीषे इति कुम्भकर्णम्प्रति रावणोक्त्या पूर्व्वमन्त्रकरणोत्तरं मध्ये जागरणाभावस्य प्रतीतेः । किञ्च । शरबन्धनदिनं न कृष्णप्रतिपत् । तस्याः पूर्णिमोत्तरत्वेन सम्पूर्णरात्रौ चन्द्रसत्तया तस्मिंस्तमसि दारुणे इत्याद्युक्तेरसङ्गत्यापत्तेरतः सा शुक्लप्रतिपदाद्या । एवञ्चामान्तपञ्चमासं युद्धमित्यस्यात्यन्तमसङ्गत्यापत्तिः । यत्तु अमायामेव रावणवध इति तत्तु न युक्तम् । इन्द्रजिद्वधोत्तरम् ।
‘अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्द्दशीम् ।
कृत्वा निर्य्याह्यमावास्यां विजयाय बलैर्वृतः ॥’
इति रावणम्प्रति सुपार्श्वस्योक्त्या । चतुर्द्दश्यां रावणप्रेषितबलवधोत्तरममायां निर्गतरावणेन रामलक्ष्मणयोर्युद्धे रात्रौ लक्ष्मणस्य शक्तिघातोत्तरं रावणलङ्काप्रवेशस्योक्ततया ततो लक्ष्मणचिकित्सोत्तरं पुना रामरावणयुद्धस्य वाल्मीकिनैव स्पष्टमुक्ततया तदसम्भवात् । किञ्च । आदित्यहृदयस्यादित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवानित्यनेन सूर्य्यदर्शनोत्तरं जपस्योक्ततया रावणमरणोत्तरं स्थिरप्रभश्चाप्यभवद्दिवाकर इत्युक्त्या दिवा तद्वधप्रतीत्या च चिरकालयुद्धोत्तरं लक्ष्मणे शक्तिघातस्य तदर्थमोषधीपर्व्वतानयनस्य चोक्तत्वेनामारात्रौ शक्तिघातप्रतीत्या रणाद्रावणापगमस्य प्रतीत्या च तद्विरोधात् । तथा पाद्मे ।
‘ततो जज्ञे महायुद्धं सङ्कुलं कपिरक्षसाम् ।
मध्याह्ने प्रथमं युद्धं प्रारब्धं प्रतिपद्यभूत् ॥’
प्रतिपदि शुक्लप्रतिपदीत्यर्थः । उक्तयुक्तेः ।
‘ततो निशि समागम्य मायावी शक्रजिद् बली ।
बबन्ध नागपाशैस्तौ राघवौ च हरिव्रजान् ॥’
ततः चिरकालसङ्कुलयुद्धोत्तरम् । अन्यथा तस्यां निशीत्येव वदेत् । अग्रे द्वितीयेऽह्नि षष्ठ्यामिति चोक्त्या दारुणे तमसीति रामायणोक्त्या च भाद्रश्रावणोभयमासोत्तरप्रतिपद्येतदिति बोध्यम् ।
‘वैनतेयस्तदाभ्येत्य तानि पाशान्यमोचयत् ।
द्वितीयेऽहनि धूम्राक्षं हनूमान्निजघान वै ॥
तृतीयेऽह्नि वज्रदंष्ट्रं खड्गाच्चिच्छेद चाङ्गदः ।
जघान हनूमान् भूयश्चतुर्थेऽह्न्यकम्पनम् ॥
प्रहस्तं पञ्चमीतिथ्यां नीलश्चिच्छेदमर्द्दनि ।
रावणः परिभूतोऽभूत् षष्ठ्यां रामेण धन्विना ॥
अथ लङ्केश्वरः क्षिप्रः कुम्भकर्णं महोदरम् ।
शैलशृङ्गरवाताम्बधावनाद्यैरबोधयत् ।
जघान तं कुम्भकर्णं रामः सप्तमवासरे ॥’

इह बोधनं दिनद्वयेन। तं बोधितं कुम्भकर्णम्। सप्तमवासरे बोधनोत्तरं सप्तमवासरे इत्यर्थः। यत्तु बोधनं षष्ठ्यां रात्रौ सप्तम्याञ्चैतद्वध इति तन्न। तदुत्थापने उक्तस्यातिप्रयासस्य रात्रिमात्रेणासम्भवात्। रावणमन्दिरगमनकाले सूर्य्यप्रभया रावणमन्दिरस्यातिभास्वरत्ववर्णनेन मल्लादिना सप्तम्यां युद्धासम्भवात्। इन्द्रजितो दिनत्रयेण वधोऽस्य यामषट्केनेत्यस्यासङ्गतत्वाच्च। एवञ्च भाद्रपूर्णिमायामेतद्वधः।
'जघान लक्ष्मणोऽन्येद्युरतिकायं दशास्यजम्।
ववन्धान्येद्युरिन्द्रारिर्ब्रह्मास्त्रेण नृपौ कपीन्॥
हनूमता समानीतो महौषधमहीधरः।
तस्यानिलस्पर्शवशात् सर्व्व एते समुत्थिताः॥
अन्येद्युः कपिराट् कुम्भं निकुम्भं वायुजोऽवधीत्।
तस्यां निशि रघुश्रेष्ठो जघान मकरेक्षणम्॥
मायासीतावधञ्चक्रे शक्रजिद्रणमूर्द्धनि।
तेन खिन्नोऽभवद्रामं आश्वस्तो लक्ष्मणेन सः।
त्रयोदशाहे सौमित्रिस्त्रिदिनं योधयन् बली॥
जघान शक्रजेतारं रामध्यानेन हेतुना॥'
अन्येद्युः अन्येषु दिवसेषु। अत्रातिकायग्रहणं त्रिशिरोदेवान्तकनरान्तकमहोदरमहापार्श्वोपलक्षणम्। लक्ष्मणग्रहणमङ्गदहनूमतोरप्युपलक्षणम्। एवं षड्भिर्द्दिनैः षस्णां वधः। पूर्व्वं क्रमेणैव तद्वधोक्तिः। अन्येद्युः सप्तम्याम्। पर्व्वतानयनमष्टम्याम्। अन्येद्युर्नवम्याम्। तस्यां निशि नवमीरात्रौ तदन्ते मायासीतावधः। ततो दशमीचतुर्थयाममारभ्य त्रयोदशीचतुर्थयामपर्य्यन्तमिन्द्रजिद्वधः।
'ततोऽवधीन्मूलबलञ्चतुर्द्दश्यां रघूद्वहः।
दर्शेऽथ निर्य्ययौ राजा योद्धुं रामेण संयुगे॥
चतुरङ्गबलैः सार्द्धं मन्त्रिभिर्द्दशकन्धरः।
छत्रचामरसंयुक्तः सर्व्वाभरणभूषितः॥
महारथगतो द्वाराद्दुत्तरान्निर्य्ययौ बहिः।
आगतो रक्षसां राजा त्र्यक्षघ्नो देवकण्टकः॥
योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः।
तत्र युद्धं समभवद्वानराणाञ्च रक्षसाम्॥
रामरावणयोश्चैव तथा सौमित्रिणा सह॥
शक्तिञ्चिक्षेप संक्रुद्धः सोऽनुजं प्रति रावणः।
वक्षसा धारयामास सौमित्रिस्तां वियद्गताम्।
तया स बाध्यमानः सन् पपात धरणीतले॥
हनूमता जीवितोऽभूदौषध्यानयनात् पुनः।
ततः क्रुद्धो महातेजा राघवो राक्षसान्तकः॥
जघान राक्षसान् सर्व्वान् शरैः कालान्तकोपमैः।
भयात् प्रदुद्राव रणे लङ्कां प्रति निशाचरः॥
जगद्राममयं पश्यन्निर्व्वेदात् स्वगृहं विशत्।
निकुम्भिलां ततः प्राप्य होमञ्चक्रे जिगीषया॥
ध्वंसितं वानरैस्तैस्तदभिचारात्मकं रिपोः।
पुनरुत्थाय पौलस्त्यो रामेण सह योधितुम्॥
दिव्यं स्यन्दनमारुह्य राक्षसैर्निर्य्ययौ बहिः॥
इदं निर्गमनमाश्विनशुक्लप्रतिपदि।
'ततः शतमखो दिव्यं रथं हर्य्यश्वसंयुतम्।
राघवाय स्वसूतेन प्रेषयामास भक्तिमान्॥
तन्तु मातलिनानीतमारुह्य रथसत्तमम्।
स्तूयमानः सुरगणैर्युयुधे तेन रक्षसा॥
ततो युद्धमभूद्घोरं रामरावणयोर्म्महत्।
सप्ताह्निकमहोरात्रं शस्त्रास्त्रैरतिभीषणैरिति॥'
ततो मातलिरथागमनदिनोत्तरम्। एवञ्च नवम्यां तद्वधः। तदुक्तं कालिकापुराणे।
'रामस्यानुग्रहार्थं वै रावणस्य वधाय च।
रात्रावेव महादेवी ब्रह्मणा बोधिता पुरा॥
ततस्तु त्यक्तनिद्रा सा नन्दायामाश्विनेऽसिते।
जगाम नगरीं लङ्कां यत्रासीद्राघवः पुरा॥'
आगत इति शेषः। इदञ्चागमनं रात्रान्ते तदैव मातलिरथागमनम्।
'तत्र गत्वा महादेवी तदा तौ रामरावणौ।
युद्धे नियोजयामास स्वयमन्तर्हिताम्बिका॥
राक्षसानां वानराणां अगृध्वा सा मांसशोणितम्।
रामरावणयोर्युद्धं सप्ताहं सा न्ययोजयत्॥
व्यतीते सप्तमे रात्रे नवम्यां रावणं ततः।
रामेण घातयामास महामाया जगन्मयी॥
यावत्तयोः स्वयं देवी युद्धकेलिमुपैक्षत।
तावत्तु अहोरात्राणि सर्व्वैर्द्देवैः सुपूजिता॥
निहते रावणे वीरे नवम्यां सकलैः सुरैः।
विशेषपूजां दुर्गायाश्चक्रे लोकपितामहः॥'
सकलैः सुरैरित्यस्य सहेति शेषः।
'रामरावणबाणैस्तु युद्धञ्चादेश्य भीतिदम्।
तृतीयायान्तु लङ्कायाः पूर्व्वोत्तरदिशि स्थितम्॥
स्वातिनक्षत्रयुक्तायां भीतं सुरबलं महत्।
शान्त्यथ वारयामास देवेन्द्रो वचनाद्धरेः॥
शान्त्यर्थं भयशान्त्यर्थम्।
'ततस्तु श्रवणे नाथ दशम्यां चण्डिका शुभाम्।
विसृज्य चक्रे शान्त्यर्थं बलनीराजनं हरिः॥'
रिपुजनितभयशान्त्यर्थमित्यर्थः।
'नीराजितबलः शक्रस्तत्र रामं सलक्ष्मणम्।
सम्भाष्य प्रययौ स्वर्गं सह देवैः शचीपतिः॥
इति वृत्तं पुरा कल्पे मनोः स्वायम्भुवेऽन्तरे।
पुरा कल्पे यथा वृत्तं प्रतिकल्पं तथैव तु॥
प्रवर्त्तते स्वयं देवी दैत्यानां नाशनाय वै।'
स्वायम्भुवमन्वन्तररूपे पुरा कल्पे इत्यर्थः। प्रतिकल्पं प्रतिमन्वन्तरमित्यर्थः। अवयवसामान्येन तत्रापि कल्पव्यवहारात्।
'प्रतिकल्पं भवेद्रामो रावणश्चापि राक्षसः।
तथैव जायते युद्धं तथैव त्रिदशागमः॥
एवं रामसहस्राणि रावणानां तथैव च।
भवितव्यानि भूतानि तेषु देवी प्रवर्त्तते॥
तां पूजन्ति सुराः सर्व्वे बलं नीराजयन्ति च।
तथैव च नराः सर्व्वे कुर्य्युः पूजां यथाविधि॥
बलनीराजनं राजा कुर्य्याद् बलविवृद्धये॥' इति।
इयञ्च ब्रह्मबोधिता महादेवी अस्मौ प्रविष्टा सीतैव भगवच्छक्तिरूपेति प्रतिभाति। अतएव ब्रह्मवैवर्त्ते प्रथमेऽ'शविभागे। प्रतिकल्पं विष्णोश्चरितं कीदृशमिति नारदप्रश्ने ब्रह्मवाक्यम्।
'स एव भगवान्नूनं प्रतिमन्वन्तरं मुने!।
वधाय दुष्टदैत्यानां भूमिभारहृतां भुवि॥
कलिद्वापरयोः सन्धौ भविष्यति न संशयः।
प्रतिकल्पं त्वेवमेव भविष्यति न संशयः॥" इति।
सहस्रकृत्वो रामोऽपि भविता ब्रह्मणो दिने इति ब्रह्मवैवर्त्ते प्रथमविभागस्थे राधां प्रति कृष्णवाक्ये। दिने इति जातावेकवचनम्। दिनेष्वित्यर्थः। पूर्व्वं प्रतिमन्वन्तरमित्युक्तेः। प्रतिचतुर्युगं रामाद्यवतार इति तु न युक्तम्। चतुर्व्विंशतितमचतुर्युगे रामावतारस्याष्टाविंशतितमचतुर्युगे कृष्णावतारस्य हरिवंशे पुराणान्तरे च प्रसिद्धत्वादिति दिक्। अग्निवेशरामायणमिति प्रसिद्धग्रन्थेषु।
'रामः पञ्चदशे वर्षे षड्वर्षामपि मैथिलीम्।
उपयेमे त्वयोध्यायां द्वादशाब्दानुवास सः॥
सप्तविंशतिमे वर्षे वनवासमकल्पयत्।
अष्टादश तु वर्षाणि सीतायास्तु तदाभवन्॥
त्रिरात्रमुदकाहारश्चतुर्थेऽह्नि फलाशनः।
पञ्चमे चित्रकूटे तु रामो वासमकारयत्॥
अथ त्रयोदशे वर्षे पञ्चवट्यां महामनाः।
रामो विरूपयामास घोरां शूर्पणखां वने॥
ततो माघे सिताष्टम्यां मुहूर्त्ते वृन्दसंज्ञके।
राघवाभ्यां विना सीतां जहार दशकन्धरः॥'
माघे शुक्लचतुर्द्दश्यामिति पाठान्तरम्।
'मार्गशुक्लदशम्यान्तु वसन्तीं रावणालये।
सम्पातिर्द्दशमे मासे आचख्यौ वानरेषु ताम्॥
एकादश्यां महेन्द्राग्रात् पुप्लुवे शतयोजनम्।
तद्रात्रिशेषे सीताया दर्शनं हि हनूमतः॥
द्वादश्यां शिंशपावृक्षे हनूमान् पर्य्यवस्थितः।
तस्यां निशायां सीतायां विश्वासालापसत्कथाः॥
अक्षादिभिस्त्रयोदश्यां ततो युद्धमवर्त्तत।
वधो ह्यक्षकुमारस्य वनविध्वंसनं तथा॥
ब्रह्मास्त्रेण चतुर्द्दश्यां बद्धः शक्रजिता कपिः।
वह्निना पुच्छयुक्तेन लङ्काया दहनं तथा॥
पौर्णमासीं महेन्द्राद्रौ पुनरागमनं कपेः।
मार्गासितप्रतिपदः पञ्चभिः पथि वासरैः॥
पुनरागम्य षष्ठेऽह्नि ध्वस्तं मधुवनञ्च तैः।
सप्तम्यां प्रत्यभिज्ञानदानं शुद्धिनिवेदनम्॥
अष्टम्युत्तरफल्गुन्यां मुहूर्त्ते विजयाभिधे।
मध्यं प्राप्ते सहस्रांशौ प्रस्थानं राघवस्य तु॥
वासरे सप्तमेऽम्भोधौ स्कन्धावारनिवेशनम्॥
पौषशुक्लप्रतिपदस्तृतीया यावदम्बुधिः।
उपस्थानं ससैन्यस्य राघवस्य बभूव ह॥
विभीषणश्चतुर्थ्यां वै रामेण सह सङ्गतः।
समुद्रतरणार्थाय पञ्चम्यां मन्त्र उद्गमः॥
प्रायोपवेशनञ्चक्रे रामो दिनचतुष्टयम्।
समुद्रवरलाभश्च सेतूपायप्रकीर्त्तनम्॥
सेतोर्द्दशम्यामारम्भस्त्रयोदश्यां समापनम्।
चतुर्द्दश्यां सुवेलाग्रे रामः सैन्यं न्यवेशयत्॥
पौर्णमास्यां द्वितीयान्तं त्रिदिनैः सैन्यतारणम्।
तृतीयाया दशम्यन्तं मन्त्रो गुल्मनिवेशने।

शुक्लादशम्यो: सैन्यप्राप्तिरेकादश्यां दिने।
माघे सितायां द्वादश्यां सैन्यसंख्या कृता तु वै ॥
सारणेन कपीनान्तु सारासारोपवर्णनम्।
त्रयोदश्याद्यमां यावच्चतुर्थ्यां दिवसैस्त्रिभि: ॥
रावण: सैन्यसंख्यानं रणायोत्साहनं तथा।
प्रयागाङ्गदो दौत्यं माघशुक्लादिवासरे ॥
माघशुक्लद्वितीयादिदिनै: सप्तभिरेव तु।
रक्षसां वानराणाञ्च युद्धमासीत् सुदारुणम् ॥
माघशुक्लनवम्यान्तु रात्राविन्द्रजिता रणे।
रामलक्ष्मणयोर्नागपाशैर्बन्धो बभूव ह ॥
नागपाशविमोक्षार्थं दशम्यां गरुडोऽभ्यगात्।
अवहार: कथितो दशम्यादिदिनद्वयम् ॥
द्वादश्यामाञ्जनेयेन धूम्राक्षस्य वध: कृत:।
त्रयोदश्यान्तु तेनैव निहतोऽकम्पनो रणे ॥
माघशुक्लचतुर्दश्यां यावत् कृष्णादिवासरम्।
त्रिदिनेन प्रहस्तस्य नीलेन विहितोऽवध: ॥
माघासितद्वितीयायाश्चतुर्थ्यन्तस्त्रिभिर्दिनै:।
रामेण तुमुले युद्धे रावणो द्राविती रणात् ॥
पञ्चम्याश्चाष्टमी यावद्रावणेन प्रबोधित:।
कुम्भकर्ण: ससुप्तस्तौ तावद्युद्धश्चतुर्दिनम् ॥
कुम्भकर्णो दिनै: षड्भिर्न्नवम्यास्तु चतुर्दशीम्।
रामेण निहतो युद्धे बहुवानरभक्षक: ॥
अमावास्यादिने शोकादवहारो बभूव ह।
फाल्गुनादिप्रतिपदश्चतुर्थ्यन्तदिनैस्तत: ॥
नरान्तकप्रभृतयो निहता: पञ्च राक्षसा:।
पञ्चम्या: सप्तमी यावदतिकायवधस्त्र्यहात् ॥
अष्टम्या द्वादशी यावन्निहतौ दिनपञ्चकात्।
निकुम्भकुम्भावुद्धृन्तु मकराक्षश्चतुर्दिनै: ॥
फाल्गुनस्य द्वितीयायां कृष्णे शक्रजिता
जितम्।
तृतीयायास्तु सप्तम्यां हरय: पञ्चवासरात् ॥
औषध्यानयने व्यग्रास्तदासीदवहारक:।
तत्र त्रयोदशीं यावद्दिनै: षड्भिस्तु शक्रजित् ॥
लक्ष्मणेन हतो युद्धे विख्यातोऽभिचरन् क्रमात्।
चतुर्दश्यां दशग्रीवश्चदीक्षाविधि: क्रमात् ॥
अमावास्यां ययौ वीरो युद्धाय दशकन्धर:।
चैत्रशुक्लप्रतिपद: पञ्चमी दिनपञ्चकै: ॥
रावणस्य प्रधानानां युध्यतामभवत् क्षय:।
चैत्रषष्ठ्यष्टमी यावन्महापार्श्वादिमारणम् ॥
चैत्रशुक्लनवम्यान्तु सौमित्रे: शक्तिभेदनम्।
द्रोणादिराञ्जनेयेन लक्ष्मणार्थं समाहृत: ॥
दशम्यामवहारोऽभूद्रात्रौ युद्धं तु रक्षसो:।
एकादश्यान्तु रामाय रथो मातलिसारथि: ॥
अष्टादशदिने रामो द्वैरथे रावणं वधीत्।
द्वादश्या: शुक्लपक्षस्य यावत् कृष्णचतुर्दशीम् ॥
माघशुक्लद्वितीयायाश्चैत्रकृष्णचतुर्दशीम्।
अष्टाशीतिदिनं युद्धं मध्ये पञ्चदशाहकम् ॥
युद्धावहार: संग्रामस्त्रिसप्ततिदिनान्यभूत्।
संस्कारो रावणादीनाममावास्यादिनेऽभवत् ॥
वैशाखादितिथौ राम: सुवेलं पुनरागत:।
अभिषिक्तो द्वितीयायां लङ्काराज्ये विभीषण: ॥
सीताशुद्धिस्तृतीयायां देवेभ्यो वरलम्भनम्।
वैशाखस्य चतुर्थ्यान्तु राम: पुष्पकमाश्रित: ॥
पूर्णे चतुर्दशे वर्षे पञ्चम्यां माधवस्य तु।
भरद्वाजाश्रमं राम: ससैन्य: पुनरागमत् ॥
नन्दिग्रामे तु षष्ठ्यां वै भरतेन समागम:।
सप्तम्यामभिषिक्तोऽसावयोध्यायां रघूत्तम: ॥
जानकी रामसहिता रावणस्य निवेशने।
मनुमासान् स्थिता पञ्चदशवासरसंयुतेति ॥'
यत्तु सर्व्वांशे अनिश्चितप्रामाण्यम्। कालिका-पुराणादिविरोधात्। इदं कल्पान्तरविषयमिति न युक्तम्। तद्विरोधादेव। तस्मात् क्रियाविरोधे पुराणेषु उपसंहार एव न्याय्य:। शाखान्तरोक्ताङ्गोपसंहारवत्। यथा कुम्भकर्णवधोऽत्र रामेणोक्तो भारते लक्ष्मणेन तादृशे विषये न तु कल्पभेदेन व्यवस्था। अन्यविषये एव तु हरिवंशोक्ता सेति बोध्यम्।" इति श्रीरामायण-तीलके लङ्काकाण्डे ११० सर्ग:।) तस्य परि-पूर्णतमत्वं यथा,—
"सर्व्वे चांशकला: पुंस: कृष्णस्तु भगवान्
स्वयम्।
परिपूर्णतमो रामो ब्रह्मशापात् स्वविस्मृत: ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११६ अध्याय: ॥
अथ श्रीराममन्त्रा:।
"अनन्तोऽग्न्यासन: सेन्दुर्व्वीजं रामाय हृन्मनु:।
षड्वर्णोऽयमादिष्टो भजतां कामदो मनु: ॥"*
तस्य तारकब्रह्ममन्त्रो यथा,—
"सर्व्वेषां राममन्त्राणां मन्त्रराज: षडक्षर:।
तारकब्रह्म चेत्युक्तं तेन पूजा प्रशस्यते ॥"
तन्मन्त्रश्च रां रामाय स्वाहा। इति रामा-र्च्चनचन्द्रिकायाम् ४ पटल: ॥ अस्य पूजा-प्रयोग:। प्रात:कृत्यादि वैष्णवोक्तपीठन्यासान्तं कर्म्म विधाय ऋष्यादिन्यासं कुर्य्यात्। शिरसि ॐ ब्रह्मणे ऋषये नम:। मुखे गायत्रीच्छन्दसे नम:। हृदि श्रीरामाय देवतायै नम:। तत: कराङ्गन्यासौ। रां अङ्गुष्ठाभ्यां नम:। रीं तर्ज्जनीभ्यां स्वाहा। रूं मध्यमाभ्यां वषट्। रैं अनामिकाभ्यां हुम्। रौं कनिष्ठाभ्यां वौषट्। र: करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। ततो मन्त्रन्यास:। ब्रह्मरन्ध्रे रां नम:। भ्रूमध्ये रा नम:। हृदि मा नम: ॥ नाभौ य नम:। लिङ्गे न नम: ॥ पादयोर्मं नम:। ततो मूर्त्ति-पञ्जरादिविधिं विधाय देवं ध्यायेत्।
"कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्या-
सिनं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं
भजे ॥"
एवं ध्यात्वा मानसै: संपूज्य शङ्खस्थापनं कुर्य्यात्। तत: पीठपूजां विधाय वैष्ण-वोक्तपीठशक्ती: पीठमनुञ्च संपूज्य पुनर्ध्यात्वा वाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाया-वरणपूजामारभेत्। यथा देववामपार्श्वे श्रीं सीतायै नम:। अग्रे ॐ शार्ङ्गाय नम:। दक्षिणवामपार्श्वयो: ॐ शरेभ्यो नम:। ॐ चापाय नम: तद्बहि: केशरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च रां हृदयाय नम:। इत्यादिना षडङ्गानि पूजयेत्। ततो दलेषु पूर्व्वादिदिक्षु ॐ हनुमते नम:। ॐ सुग्रीवाय नम:। ॐ भरताय नम:। ॐ विभीषणाय नम:। ॐ लक्ष्मणाय नम:। ॐ अङ्गदाय नम:। ॐ शत्रु-घ्नाय नम:। ॐ जाम्बवते नम:। दलाग्रेषु ॐ दृष्टाय नम:। ॐ जयन्ताय नम:। ॐ विजयाय नम:। ॐ सुराष्ट्राय नम:। ॐ राष्ट्र-वर्द्धनाय नम:। ॐ अकोपाय नम:। ॐ धर्म्म-पालाय नम:। ॐ सुमन्त्राय नम:। तद्बहि-रिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादि-विसर्ज्जनान्तं कर्म्म समापयेत् ॥ * ॥ अस्य पुरश्चरणं षड्लक्षजप:। तथा च।
"षट्लक्षं जपेन्मन्त्रं दशांशं कमलै: शुभै:।
जुहुयादर्च्चिते वह्नौ ब्राह्मणान् भोजयेत्तत: ॥"
अयं मन्त्र: षड्विध:। तथा च।
"स्वकामशक्तिवाक्लक्ष्मीताराद्य: पञ्चवर्णक:।
षडक्षर: षड्विध: स्यात् चतुर्व्वर्गफलप्रद: ॥
ब्रह्मा सम्मोहन: शक्तिर्दक्षिणामूर्त्तिरुच्यते।
अगस्त्य: श्रीशिव: प्रोक्तो मुनयोऽत्र क्रमादिमे ॥
अथवा कामबीजादेर्विश्वामित्रो मुनिर्मनो:।
छन्दो गायत्रीसंज्ञञ्च श्रीरामश्चैव देवता ॥
ध्यानपूजादिकं सर्व्वं पूर्व्ववच्च समाचरेत् ॥"
तथा।
"जानकीवल्लभं ङेऽन्तं वह्निजाया हुमादिकम्।
दशाक्षरोऽयं मन्त्र: स्याद्वशिष्ठस्तु ऋषिर्विराट् ॥
छन्दस्तु देवता राम: सीतापाणिपरिग्रह:।
आद्यं बीजं द्विठ: शक्ति: कामेनाङ्गक्रिया मता ॥
शिरोललाटभ्रूमध्यतालुकण्ठेषु हृद्यपि।
नाभ्यूरुजानुपादेषु दशवर्णान् न्यसेन्मनो: ॥"* ॥
ततो ध्यानम्।
"अयोध्यानगरे चित्रे रत्नसौवर्णमण्डपे।
मन्दारपुष्पैराबद्धविताने तोरणाञ्चिते ॥
सिंहासनसमारूढं पुष्पकोपरि राघवम्।
रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतै: शुभै: ॥
संस्तूयमानं मुनिभिर्गन्धर्व्वै: परिशोभितम्।
सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपशोभितम् ॥
श्यामं प्रसन्नवदनं सर्व्वाभरणभूषितम्।
ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षमनन्यधी: ॥"
अन्यत् सर्व्वं पूर्व्ववत् ॥ * ॥
"वह्निर्नारायणो नाद्यो जठर: केवल एव च।
द्व्यक्षरो मन्त्रराजोऽयं सर्व्वाभीष्टफलप्रद: ॥
श्रीमाया मन्मथैकैकबीजाद्यन्तगतो मनु:।
चतुर्व्वर्ण: स एव स्यात् षड्वर्णो वाञ्छितप्रद: ॥
स्वाहान्तो हुं फडन्तो वा नमोऽन्तो वा
भवेन्मनु: ॥"
तथा।
"तारमायारमानङ्गवाक्स्वबीजैस्तु षड्विध:।
त्र्यक्षरो मन्त्रराज: स्यात् सर्व्वाभीष्टफलप्रद: ॥

रावरचन्द्रभद्रान्तो चन्द्रोऽयं चतुरक्षरः ।
रामाय हृन्मनुः प्रोक्तो मन्त्रः पञ्चाक्षरः परः ॥
पञ्चाशन्मातृकावर्णैः प्रत्येकपूर्व्वको मनुः ।
लक्ष्मीवाक्मन्मथादिश्च ताराद्यः स्यादनेकधा ॥
तेन अं राम । आं राम । इत्यादि च्यक्षरः ।
तथा लक्ष्मीवाक्मन्मथादीनामन्यतमदानेऽपि च्यक्षरः । तेन श्रीं राम । ऐं राम । क्लीं राम इति ।
"वह्निस्थं शयनं विष्णोरर्द्धचन्द्रविभूषितम् ।
एकाक्षरो मनुः प्रोक्तो मन्त्रराजः सुरद्रुमः ॥
ब्रह्मा मुनिः स्याद्गायत्री छन्दो रामस्तु
देवता ।"* ।
एकाक्षरे तु द्वादशलक्षजपः पुरश्चरणम् ।
तथा च । भानुलक्षं जपेन्मन्त्रं इति वचनात् अन्येषां षड्लक्षजप इति विशेषः । ध्यानपूजादिकं षडक्षरवत् । * । अथ श्रीरामचन्द्रप्रयोगः ।
"जातीप्रसूनैर्जुहुयादिन्दिरावाप्तये नरः ।
जातीप्रसूनैर्जुहुयाच्चन्दनाम्भःसमुक्षितैः ॥
राजवश्याय कमलैर्धनधान्यादिसम्पदः ।
नीलोत्पलानां होमेन वशयेदखिलं जगत् ॥
बिल्वप्रसूनैर्जुहुयादिन्दिरावाप्तये नरः ।
दूर्व्वाहोमेन दीर्घायुर्भवेन्मन्त्री निरामयः ॥
रक्तोत्पलहुतान्मन्त्री धनमाप्नोति वाञ्छितम् ।
मेधाकामेन होतव्यं पलाशकुसुमैर्नरैः ॥
तज्जप्तमम्भः प्रपिबेत् कविर्भवति वत्सरात् ।
तन्मिश्रितान्नं भुञ्जीत महदारोग्यवर्द्धनम् ॥"* ।
अथ श्रीरामचन्द्रस्तोत्रम् ।

श्रीहनूमानुवाच ।

"तिरश्चामपि राजेति समवायं समीयुषाम् ।
यथा सुग्रीवमुख्यानां यस्तमुग्रं नमाम्यहम् ॥
सकृदेव प्रपन्नाय विशिष्टायैव यत् प्रियम् ।
विभीषणायाब्धितटे यस्तं वीरं नमाम्यहम् ॥
यो महान् पूजितो व्यापी महाब्धेः करुणा-
मृतम् ।
स्तुतं जटायुना येन महाविष्णुं नमाम्यहम् ॥
तेजसाप्यायिता यस्य ज्वलन्ति ज्वलनादयः ।
प्रकाशते स्वतन्त्रो यस्तं ज्वलन्तं नमाम्यहम् ॥
सर्व्वतोमुखता येन लीलया दर्शिता रणे ।
राक्षसेश्वरयोधानां तं वन्दे सर्व्वतोमुखम् ॥
नृभावन्तु प्रपन्नानां हिनस्ति च यथा नृषु ।
सिंहः सत्त्वेष्विवोत्कृष्टस्तं नृसिंहं नमाम्यहम् ॥
यस्माद्बिभ्यति वातार्कज्वलनेन्द्राः समृत्यवः ।
भियं धिनोति पापानां भीषणं तं नमाम्यहम् ॥
परस्य योग्यतापेक्षारहितो नित्यमङ्गलम् ।
ददात्येव निजौदार्य्याद्यस्तं भद्रं नमाम्यहम् ॥
यो मृत्युं निजदासानां मारयत्यखिलेष्टदः ।
तत्रोदाहृतयो व्यक्तो मृत्युमृत्युं नमाम्यहम् ॥
यत्पादपद्मप्रणतो भवेदुत्तमपूरुषः ।
तमीशं सर्व्वदेवानां नमनीयं नमाम्यहम् ॥
आत्मभावं समुत्क्षिप्य दास्येनैव रघूत्तमम् ।
भजेऽहं प्रत्यहं रामं ससीतं सहलक्ष्मणम् ॥
नित्यं श्रीरामभक्तस्य किङ्करा यमकिङ्कराः ।
शिवमय्यो दिशस्तस्य सिद्धयस्तस्य दासिकाः ॥
इदं हनूमता प्रोक्तं मन्त्रराजात्मकं स्तवम् ।
पठेदनुदिनं यस्तु स रामे भक्तिमान् भवेत् ॥"
इति हनूमत्कल्पे मन्त्रराजात्मकं श्रीरामचन्द्रस्तोत्रं समाप्तम् ॥ * ॥ अथ श्रीरामचन्द्रस्याष्टोत्तरशतकं नाम ।

वेदव्यास उवाच ।

"शृणु गाङ्गेय वक्ष्यामि रामस्याद्भुतकर्म्मणः ।
नामाष्टशतकं पुण्यं त्रिषु लोकेषु विश्रुतम् ॥
नातः परतरं गुह्यं त्रिषु लोकेषु विद्यते ॥
कैलासशिखरे रम्ये नानारत्नविचित्रिते ।
एकाग्रप्रयतो भूत्वा विष्णुमाराध्य भक्तितः ॥
उपविष्टस्ततो भोक्तुं पार्व्वतीं शङ्करोऽब्रवीत् ।
पार्व्वत्येहि मया सार्द्धं भोक्तुं भुवनवन्दिते ॥
तमाह पार्व्वती देवी जप्त्वा नाम सहस्रकम् ।
ततो भोक्ष्याम्यहं देव भुज्यतां भवता प्रभो ॥
ततस्तां पार्व्वतीं प्राह प्रहसन् परमेश्वरः ॥
धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्व्वति ।
दुर्लभा वैष्णवी भक्तिर्भागधेयं त्रिनेत्रि ॥
रकारादीनि नामानि शृण्वतो मम पार्व्वति ।
मनः प्रसन्नतामेति रामनामाभिशङ्कया ॥
रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥
राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनामभिस्तुल्यं रामनाम वरानने ॥
रामेत्युक्ता महादेवि भुङ्क्ष्व सार्द्धं मयाधुना ।
ततो रामेति नामोक्ता सह भुक्ता च पार्व्वती ॥
ततो भुक्ता महादेवी पतिना सह संस्थिता ।
पप्रच्छ श्रीमहादेवं प्रीतिप्रसन्नमानसा ॥
सहस्रनामभिस्तुल्यं रामनाम त्वयोदितम् ।
तस्यान्यान्यपि नामानि सन्ति चेन्नाथ शङ्कर ।
कथ्यतां मम देवेश तत्र मे प्रीतिरुत्तमा ॥

श्रीशङ्कर उवाच ।

शृणु नामानि वक्ष्यामि रामचन्द्रस्य पार्व्वती ।
लौकिका वैदिकाः शब्दा ये केचित् सन्ति
पार्व्वति ॥
नामानि रामचन्द्रस्य सहस्रं तेषु चाधिकम् ।
तेषु चात्यन्तमुख्यं हि नाम्नामष्टोत्तरं शतम् ॥
विष्णोरेकैकनामानि सर्व्ववेदाधिकं फलम् ।
तादृङ्नामसहस्रेषु रामनाम परं मतम् ॥
जपतः सर्व्ववेदाश्च सर्व्वमन्त्राश्च पार्व्वति ।
तस्मात् कोटिगुणं पुण्यं रामनाम्नैव लभ्यते ॥
अस्य श्रीरामनामाष्टोत्तरशतनामस्तोत्रस्य ईश्वर ऋषिरनुष्टुप् छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थं जपे विनियोगः ।
श्रीरामो रामचन्द्रश्च रामभद्रश्च शाश्वतः ।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥
जानकीवल्लभो जैत्रो जितामित्रो जनार्द्दनः ।
विश्वामित्रप्रियो दान्तः शरण्यत्राणतत्परः ॥
वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ।
सत्यव्रतो व्रतधरः सदा हनुमदाश्रयः ॥
कौशलेयः खरध्वंसी विराधवधपण्डितः ।
विभीषणपरित्राता दशग्रीवशिरोहरः ॥
सप्ततालप्रभेत्ता च हरकोदण्डखण्डनः ।
जामदग्न्यमहादर्पदमनस्ताड़कान्तकः ॥
वेदान्तपारोऽमेयात्मा भवरोगस्य भेषजः ।
दूषणत्रिशिरोहन्ता-त्रिमूर्त्तिस्त्रिगुणत्रयी ॥
त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्त्तनः ।
त्रिलोकीरक्षको धन्वी दण्डकारण्यपुण्यकृत् ॥
अहल्यापावनश्चैव पितृभक्तो वरप्रदः ।
जितेन्द्रियो जितक्रोधो जितलोभो जगद्गुरुः ॥
ऋक्षवानरसंघाती चित्रकूटसमाश्रयः ।
जयन्तत्राणवरदः सुमित्रापुत्त्रसेवितः ॥
सर्व्वदेवाधिदेवश्च मृतवानरजीवनः ।
मायामारीचहन्ता च महाभागो महाभुजः ॥
सर्व्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः ।
महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥
सर्व्वपुण्याधिकफलस्तीर्थः सर्व्वाघनाशनः ।
आदिपुरुषो महापुरुषः परमः पुरुषस्तथा ॥
पुण्योदयो दयासारः पुराणः पुरुषोत्तमः ।
स्मितवक्त्रो मितभाषी पूर्व्वभाषी च राघवः ॥
अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तरः ।
मायामानुषचारित्रो महादेवाभिपूजितः ॥
सेतुकृत् जितवारीशः सर्व्वतीर्थमयो हरिः ।
श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्द्धरः ॥
सर्व्वयज्ञाधिपो यज्ञो जरामरणवर्ज्जितः ।
शिवलिङ्गप्रतिष्ठाता सर्व्वाघगणवर्ज्जितः ॥
परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः ।
परं ज्योतिः परं धाम पराकाशः परात्परः ।
परेशः पारगः पारः सर्व्ववेदात्मकः शिवः ॥
इत्येतद्रामभद्रस्य नाम्नामष्टोत्तरं शतम् ।
गुह्याद्गुह्यतरं देवि तव प्रीत्या प्रकीर्त्तितम् ॥
यः पठेत् शृणुयाद्वापि भक्तियुक्तेन चेतसा ।
स सर्व्वैर्मुच्यते पापैः कल्पकोटिसमुद्भवैः ।
जलानि स्थलतां यान्ति शत्रवो यान्ति मित्र-
ताम् ।
राजानो दासतां यान्ति वह्नयो यान्ति सौम्य-
ताम् ॥
आनुकूल्यञ्च भूतानि स्थैर्य्यं यान्ति चलाः श्रियः ।
अनुग्रहं ग्रहा यान्ति शान्तिमायान्त्युपद्रवाः ॥
पठतो भक्तिभावेन जनस्य गिरिसम्भवे ।
यः पठेत् परया भक्त्या तस्य वश्यं जगत्त्रयम् ॥
यद्यत् कामयते चित्ते तत्तदाप्नोति कीर्त्तनात् ।
यः पठेद्रामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ॥
अज्ञानेनापि कुर्व्वाणो न स पापैर्विलिप्यते ।
पुण्यकालेषु सर्व्वेषु पठनानन्त्यमाप्नुयात् ॥
सर्व्ववेदेषु तीर्थेषु दानेषु च तपःसु च ।
तत्फलं कोटिगुणितं स्तवेनानेन लभ्यते ॥
पुण्यकालेषु सर्व्वेषु पठन्नामशताष्टकम् ।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥
वैकुण्ठे वासमाप्नोति दशपूर्व्वैर्दशापरैः ।
रामं दूर्व्वादलश्यामं पद्माक्षं पीतवाससम् ॥
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः ।

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥
इमं मन्त्रं महेशानि ! जपन्नेव दिवानिशम् ।
सर्व्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥
इत्येतद्रामभद्रस्य माहात्म्यं वेदसम्मतम् ।
कथितं तव गाङ्गेय यतस्त्वं वैष्णवोत्तमः ॥
वन्दामहे महेशानं हरकोदण्डखण्डनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥”
इति पद्मपुराणे उमामहेश्वरसंवादे श्रीराम-चन्द्राष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ * ॥
(अस्य विराड्मूर्त्तिकथनं यथा, अध्यात्मरामायणे । ३ । ६ । ३०—५४ ।

गन्धर्व्व उवाच ।

“स्तोतुमुत्सहते मेऽद्य मनो रामातिसम्भ्रमात् ।
त्वामनन्तमनाद्यन्तं मनोवाचामगोचरम् ॥
सूक्ष्मं ते रूपमव्यक्तं देहद्वयविलक्षणम् ।
दृग्रूपमितरं सर्व्वं दृश्यं जड़मनात्मकम् ॥
तत्कथं त्वां विजानीयाद्व्यतिरिक्तं मनः प्रभो ।
बुद्ध्यात्माभासयोरैक्यं जीव इत्यभिधीयते ॥
बुद्ध्यादिसाक्षी ब्रह्मैव तस्मिन् निर्व्विषयेऽखिलम् ।
आरोप्यतेऽज्ञानवशान्निर्व्विकारेऽखिलात्मनि ॥
हिरण्यगर्भस्ते सूक्ष्मं देहं स्थूलं विराट् स्मृतम् ।
भावनाविषयो राम सूक्ष्मं ते ध्यातृमङ्गलम् ॥
भूतं भव्यं भविष्यच्च यत्रेदं दृश्यते जगत् ।
स्थूलेऽण्डकोशे देहे ते महदादिभिरावृते ॥
सप्तभिरुत्तरगुणैर्व्वैराजो धारणाश्रयः ।
त्वमेव सर्व्वकैवल्यं लोकास्तेऽवयवाः स्मृताः ॥
पातालं ते पादमूलं पार्ष्णिस्तव महातलम् ।
रसातलं ते गुल्फौ तु तलातलमितीर्य्यते ॥
जानुनी सुतलं राम ! ऊरू ते वितलं तथा ।
अतलञ्च मही राम ! जघनं नाभिगं नभः ॥
उरःस्थलं ते ज्योतींषि ग्रीवा ते मह उच्यते ।
वदनं जनलोकस्ते तपस्ते शङ्खदेशगम् ।
सत्यलोको रघुश्रेष्ठ ! शीर्षण्यास्ते सदा प्रभो ।
इन्द्रादयो लोकपाला बाहवस्ते दिशः श्रुती ।
अश्विनौ नासिके राम वक्त्रं तेऽग्निरुदाहृतः ॥
चक्षुस्ते सविता राम मनश्चन्द्र उदाहृतः ।
भ्रूभङ्ग एव कालस्ते बुद्धिस्ते वाक्पतिर्भवेत् ॥
रुद्रोऽहङ्काररूपस्ते वाचश्छन्दांसि तेऽव्यय ।
यमस्ते दंष्ट्रदेशस्थो नक्षत्राणि द्विजालयः ॥
हासो मोहकरी माया सृष्टिस्तेऽपाङ्गमोक्षणम् ।
धर्म्मः पुरस्तेऽधर्म्मश्च पृष्ठभाग उदीरितः ॥
निमिषोन्मेषणे रात्रिर्दिवा चैव रघूत्तम ! ।
समुद्राः सप्त ते कुक्षिर्नाड्यो नद्यस्तव प्रभो ॥
रोमाणि वृक्षौषधयो रेतो वृष्टिस्तव प्रभो ।
महिमा ज्ञानशक्तिस्ते एवं स्थूलं वपुस्तव ।
यदस्मिन् स्थूलरूपे ते मनः सन्धार्य्यते नरैः ।
अनायासेन मुक्तिः स्यादतोऽन्यन्नहि किञ्चन ॥
अतोऽहं रामरूपं ते स्थूलमेवानुभावये ।
यस्मिन् ध्याते प्रेमरसः सरोमपुलको भवेत् ॥
तदैव मुक्तिः स्याद्राम यदा ते स्थूलभावकः ।
तदप्यास्तां तवैवाहमेतद्रूपं विचिन्तये ॥
धनुर्व्वाणधरं श्यामं जटावल्कलभूषितम् ।
अपीच्यवयसं सीतां विचिन्वन्तं सलक्ष्मणम् ॥
इदमेव सदा मे स्यान्मानसे रघुनन्दन ।
सर्व्वज्ञः शङ्करः साक्षात् पार्व्वत्या सहितः सदा ।
तद्रूपमेवं सततं ध्यायन्नास्ते रघूत्तम ।
मुमूर्षूणां सदा काश्यां तारकं ब्रह्मवाचकम् ॥
राम रामेत्युपदिशन् सदा सन्तुष्टमानसः ।
अतस्त्वं जानकीनाथ परमात्मा सुनिश्चितः ॥
सर्व्वे ते मायया मूढ़ास्त्वां न जानन्ति तत्त्वतः ।
नमस्ते रामभद्राय वेधसे परमात्मने ॥
अयोध्याधिपते तुभ्यं नमः सौमित्रिसेवित ।
त्राहि त्राहि जगन्नाथ मां माया नावृणोतु ते ॥”* ॥)

अथ श्रीरामकवचम् ।
“ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥
सासितूणधनुर्व्वाणपाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥
रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्व्वकामदाम् ॥”
अस्य श्रीरामचन्द्रकवचस्य बुधकौशिकऋषिर्गायत्री छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थं जपे विनियोगः ।
ॐ शिरो मे राघवः पातु भालं दशरथात्मजः ।
कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ॥
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ।
जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः ॥
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्म्मुकः ।
करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ॥
वक्षः पातु कबन्धारिः स्तनौ शाखामृगवन्दितः ।
पार्श्वौ कुलपतिः पातु कुक्षिमिक्ष्वाकुनन्दनः ॥
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ।
गुह्यं जितेन्द्रियः पातु पृष्ठं पातु रघूद्वहः ॥
सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥
जानुनी सेतुकृत् पातु जङ्घे दशमुखान्तकः ।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥
एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्त्री विजयी विनयी भवेत् ।
पातालभूतलव्योमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिञ्च विन्दति ॥
जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम् ।
यः कण्ठे धारयेत्तस्य करस्थाः सर्व्वसिद्धयः ॥
भूर्ज्जपत्रे लिखित्वा विद्यां गन्धचन्दनचर्च्चिताम् ।
कृत्वा वै धारयेद्यस्तु सोऽभीष्टं फलमाप्नुयात् ॥
रणे राजकुले द्यूते नित्यं तस्य जयो भवेत् ।
काकवन्ध्या च या नारी मृतापत्या च या भवेत् ।
बहुपत्या जीववत्सा सा भवेन्नात्र संशयः ॥
वज्रपञ्जरनामेदं यो रामकवचं पठेत् ।
अव्याहताज्ञः सर्व्वत्र लभते जयमङ्गलम् ॥
आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हरिः ।
तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः ॥
धन्विनौ बद्धनिस्त्रिंशौ काकपक्षधरौ शुभौ ।
वीरौ मां पथि रक्षेतां ताबुभौ रामलक्ष्मणौ ॥
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्त्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥
शरण्यौ सर्व्वसत्त्वानां श्रेष्ठौ सर्व्वधनुष्मताम् ।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥

आत्तसज्यधनुषाविषुस्पृशा-
वक्षयाशुगनिषङ्गसङ्गिनौ ।
रक्षणाय मम रामलक्ष्मणा-
वग्रतः पथि सदैव गच्छताम् ॥

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्मनोरथान्नाशं रामः पातु सलक्ष्मणः ॥
अग्रतस्तु नृसिंहो मे पृष्ठतो गरुड़ध्वजः ।
पार्श्वयोस्तु धनुष्मन्तौ सशरौ रामलक्ष्मणौ ॥
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौशल्येयो रघूत्तमः ॥
वेदान्तवेद्यो यज्ञेशः पुराणः पुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥
आपदामपहर्त्तारं दातारं सर्व्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥
दक्षिणे लक्ष्मणो धन्वी वामतो जानकी शुभा ।
पुरतो मारुतिर्यस्य तं नमामि रघूत्तमम् ॥
एतानि मम नामानि मद्भक्तो यः सदा स्मरेत् ।
अश्वमेधायुतं पुण्यं स प्राप्नोति न संशयः ॥”
इति पद्मपुराणे वज्रपञ्जरनामाख्यं श्रीरामकवचम् । इति तन्त्रसारः ॥

रामकरी, स्त्री, रामकली रागिणी । इति हलायुधः ॥ (क्वचित् रामकिरीत्यपि पाठः । यथा, सङ्गीतदर्पणे रागाध्याये ।

अथ रामकिरी ।

“षड्जग्रहांशकन्यासा पूर्णा रामकिरी मता ।
मूर्च्छना प्रथमा ज्ञेया कलये सा प्रयुज्यते ।
रिधत्यक्ताथवा प्रोक्ता कैश्चित् पञ्चमवर्जिता ।
त्रिविधा सा समुद्दिष्टा सम्पूर्णा षाड़वौड़वा ॥”
अस्या ध्यानम् ।

“हेमप्रभा भासुरभूषणा च
नीलं निचोलं वपुषा वहन्ती ।
कान्ते समीपे कमनीयकण्ठा
मानोन्नता रामकिरी मतेयम् ॥”

उदाहरणम् ।

स रि ग म प ध नि स । सम्पूर्णा ।

अथवा

स ग म प नि स । औड़वा ।

अथवा
स रि ग म ध नि स। षाड़वा।
इति रामकिरी।)

अस्य अन्यत् विवरणं रागशब्दे द्रष्टव्यम्।

रामकर्पूरकः, पुं, (रामो रमणीयः कर्पूरः। ततः स्वार्थे संज्ञायां वा कन्।) स्वामख्यातद्रव्यम्। यथा,—
"सौगन्धिकञ्च सौगन्धं रामकर्पूरके स्मृते।"
इति शब्दरत्नावली।

रामगिरिः, पुं, (रामाश्रितो गिरिः। रामो रमणीयो गिरिर्वा।) पर्व्वतविशेषः। चित्रकूटपर्व्वतः। इति कश्चित्। यथा,—
"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तं गमितमहिमा वर्षभोग्येन भर्त्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु॥"
इति मेघदूतः॥१॥

रामचन्द्रः, पुं, (रामश्चन्द्र इवाह्लादकत्वात्।) श्रीरामः। इति शब्दरत्नावली। (लक्ष्मणभट्टसुतः स्वनामख्यातः कविविशेषः। स तु अयोध्यानगरे वैराग्यशृङ्गारार्थद्वयोपेतं सटीकं रसिकरञ्जनं नाम काव्यं प्रणीतवान्। तस्यादिमश्लोको यथा,—
"शुभारम्भेऽदम्भे महितमतिजृम्भे ज्वितशतं
मचिस्तम्भे रम्भे चषकुचकुम्भे परिणतम्।
अनालम्बे लम्बे पथि पदविलम्बेऽमितसुखं
समालम्बे स्वम्बेरमवदनमम्बेचितसुखम्॥"
एतट्टीकान्तिमश्लोकौ यथा,—
"शृङ्गारवैराग्यशतं सपञ्च-
विंशत्ययोध्यानगरे व्यधत्त।
अब्दे वियद्वारणबाणचन्द्रे
श्रीरामचन्द्रोऽथ च तस्य टीकाम्॥
श्रीरामचन्द्रकविना काव्यमिदं यदपि विरतिबीजतया।
रसिकानामपि रतये शृङ्गारार्थोऽपि संगृहीतोऽत्र॥"
एतत्कविप्रणीतानि रोमावलीशतकप्रभृतीन्यन्यान्यपि काव्यानि दृश्यन्ते॥)

रामच्छर्द्दनकः, पुं, (रामं मनोज्ञत्वं छर्द्दयति। छर्द्दि+ल्युः। स्वार्थे कन्।) मदनवृक्षः। इति भावप्रकाशः॥ क्वचित् पुस्तके रामाच्छर्द्दनकः इति च पाठः॥ (गुणादयोऽस्य मदनशब्दे विज्ञेयाः॥)

रामजननी, स्त्री, (रामस्य जननी।) बलदेवमाता। यथा,—
"रोहिणी रामजननी रोहिणिश्च बलप्रसूः॥"
इति शब्दरत्नावली॥
कौशल्या। रेणुका च॥

रामठं, क्ली, (रम्यतेऽनेनेति। रम+"रमेर्वृद्धिश्च।" उणा० १। १०१। इति अठः वृद्धिश्च धातोः।) हिङ्गु। इत्यमरः। १। १०२॥ (यथा, सुश्रुते। ५। १।
"तत्र नस्याञ्जने कुष्ठं रामठं मधुरं मधु।
कुर्य्यात् शिरीषरजनीचन्दनैश्च प्रलेपनम्॥")

रामठः, पुं, (रम्+अठः। वृद्धिश्च।) अङ्कोठवृक्षः। इति रत्नमाला॥ (जनपदविशेषः। यथा, वृहत्संहितायाम्। १०। ५।
"सौराष्ट्रे पारतरामठतैलिकरणकचौराश्च॥"
तद्देशवासिनश्च। यथा, महाभारते। २। ३२। १२।
"रामठान् हारहूणांश्च प्रतीच्याश्चैव ये नृपाः।
तान् सर्व्वान् स वशे चक्रे शासनादेव पाण्डवः॥")

रामठी, स्त्री, (रामठ+स्त्रियां ङीष्।) नाड़ीहिङ्गु। इति राजनिर्घण्टः॥

रामणः, पुं, गिरिनिम्बः। तिन्दुकः। इति राजनिर्घण्टः॥

रामणीयकं, त्रि, रमणीयम्। इत्यमरटीका॥ (यथा, महाभारते। १। २६। ८।
"रामणीयकमागच्छन्मात्रा सह भुजङ्गमाः॥"
रामणीयकं रमणीयं द्वीपमिति शेषः॥
क्ली, रमणीयस्य भावः कर्म्म वा। रमणीय+"योपधाद्गुरूपोत्तमाद्वुञ्।" ५। १। १३२। इति वुञ्। रमणीयत्वम्॥ यथा, किराते। १। ३९।
"पुरोपनीतं नृप! रामणीयकं
द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः॥")

रामतरुणी, स्त्री, (रामा मनोहरा तरुणीव।) तरुणीपुष्पम्। इति राजनिर्घण्टः॥ सेउती इति भाषा॥

रामदूतः, पुं, (रामस्य दूतः।) हनूमान्। इति शब्दरत्नावली॥

रामदूती, स्त्री, (रामस्य दूतीव। विष्णुप्रियत्वात्।) तुलसीविशेषः। तत्पर्य्यायः। पर्व्वपुष्पी २ विशल्या ३ नागदन्तिका ४ काण्डली ५ स्वल्पपर्णी ६ भरण्याह्वा ७ पक्षिजम्भका ८। इति शब्दचन्द्रिका॥

रामनवमी, स्त्री, (रामस्य जन्मतिथिरूपा नवमी। मध्यपदलोपिकर्म्मधारयः।) चैत्रशुक्लनवमी। सा च श्रीरामचन्द्रस्य जन्मतिथिः। यथा,—
"अगस्त्यसंहितायाम्।
'चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः।
पुनर्व्वसुऋक्षसंयुक्ता सा तिथिः सर्व्वकामदा॥
पुनर्व्वसुऋक्षसंयोगः स्वल्पोऽपि यदि लभ्यते।
चैत्रशुक्लनवम्यान्तु सा तिथिः सर्व्वकामदा॥
श्रीरामनवमी प्रोक्ता कोटिसूर्य्यग्रहाधिका।
तस्मिन् दिने महापुण्ये रामसुद्दिश्य भक्तितः।
यत्किञ्चित् क्रियते कर्म्म तद्भवक्षयकारकम्॥
उपोषणं जागरणं पितृनुद्दिश्य तर्पणम्।
तस्मिन् दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः॥'
चैत्रपदं चान्द्रपरम्।
'मेषं पूषणि संप्राप्ते लग्ने च कर्कटाह्वये।
आविरासीत् सकलया कौशल्यायां परःपुमान्॥'
अत्र मेषस्थसूर्य्ये चान्द्रचैत्रस्यैव सम्भवात् तिथितत्त्वाच्च। तथा।
'तस्मिन् दिने महापुण्ये रामसुद्दिश्य भक्तितः।
जपेदेकान्त आसीनो यावत् स्याद्दशमीदिनम्॥
तेनैव स्यात् पुरश्चर्य्या दशम्यां भोजयेद्द्विजान्।
भक्ष्यभोज्यैर्बहुविधैर्भक्त्या दद्याच्च दक्षिणाम्।
सततक्रत्यो भवेत्तेन सद्यो रामः प्रसीदति॥'
तथा।
'चैत्रशुक्ला तु नवमी पुनर्व्वसुयुता यदि।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत्॥
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः।
उपोषणं नवम्यान्तु दशम्यामेव पारणम्॥'
एतद्वचनद्वयं कालमाधवीयेऽपि। किन्तु महापुण्या इत्यत्र महापवेति पाठः। शुद्धेतिश्रवणात् सर्व्वत्र शुद्धायामेवादरो न विद्धायामिति। अतएवाष्टमीविद्धा नवमी सनक्षत्रापि नोपोष्या। इति माधवाचार्य्यः॥ सैव तादृश्येव नतु विद्धा। यदा तु परदिने एकादश्यां दशमी पारणयोग्या तदा दशमीयुक्ता नवम्युपोष्या। वैष्णवैर्विष्णुपरायणैरितिश्रवणात्। अवैष्णवैस्तु अष्टमीविद्धैव ग्राह्या। यदा तु पूर्व्वदिने अष्टमीविद्धा नवमी परत्र दशमीयुता नवमी एकादशीदिने च न पारणयोग्या दशमी तदा नक्षत्रयोगायोगेऽप्यष्टमीविद्धैव ग्राह्या। परदिने दशम्यामेव पारणमिति नियमात्। तथा च रामार्च्चनचन्द्रिकायाम्।
'दशम्यादिषु हृद्धिश्चेत् त्याज्या विद्धैव वैष्णवैः।
तदन्यथान्तु सर्व्वेषां व्रतं तत्रैव निश्चितम्॥
दशम्यामेवशब्देन दशमीं नैव लङ्घयेत्।
निश्चित्यैवं विचार्य्येव नवमीव्रतमाचरेत्॥'
इति कारिकाभ्यामगस्त्यसंहिताव्याख्यानम्॥ वस्तुतस्तु दशमीपारणपक्षे सर्व्वैरेवाष्टमीविद्धा नोपोष्या। विष्णुपरायणैरिति तु विष्णुपरायणत्वेन भवितव्यमित्युपदेशपरं न तु कर्त्तृविशेषणम्। अगस्त्येनावैष्णवस्य विद्धोपवासानुपदेशात्। कर्त्तृभेदे विधिद्वयकल्पनापत्तेश्च। अतएव माधवाचार्य्येण सामान्यत एव विद्धा निषिद्धा। अगस्त्यसंहितायामस्य नित्यत्वमाह।
'प्राप्ते श्रीरामनवमीदिने मर्त्त्यो विमूढधीः।
उपोषणं न कुरुते कुम्भीपाकेषु पच्यते॥
यस्तु रामनवम्यान्तु भुङ्क्ते मोहाद्विमूढधीः।
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः॥'
अत्र मर्त्त्य इत्युपादानात् नरमात्रस्याधिकारः। एवञ्च।
'कुर्य्याद्रामनवम्यां य उपोषणमतन्द्रितः।
मातुर्गर्भमवाप्नोति नैव रामो भवेत् स्वयम्॥
तस्मात् सर्व्वात्मना सर्व्वे कृत्वैवं नवमीव्रतम्।
मुच्यन्ते पातकैः सर्व्वैर्यान्ति ब्रह्म सनातनम्॥'
इति फलकीर्त्तनं प्रागुक्तसंयोगपृथक्त्वन्यायात् सिद्धम्। अगस्त्यसंहितायाम्।
'शालग्रामशिलायाञ्च तुलसीदलकल्पिता।
पूजा श्रीरामचन्द्रस्य कोटिकोटिगुणाधिका॥'

तत्रानुष्ठानं अगस्त्यसंहितातः संक्षिप्य लिख्यते।
कृतप्रातःस्नानादिः।
'उपोष्य नवमीन्त्वद्य यामेष्वष्टसु राघव।
तेन प्रीतो भव त्वंभो संसाराद्याहि मां हरे॥'
इति निवेद्य॥
'कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम्।
दक्षिणांशे दशरथं पुत्त्रावेक्षणतत्परम्॥
पृष्ठतो लक्ष्मणं देवं सच्छत्त्रं कनकप्रभम्।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ।
अग्रे व्यग्रं हनूमन्तं रामानुग्रहकाङ्क्षिणम्॥'
एवं ध्यात्वा श्रीरामं पूजयेत्। स्नानमन्त्रस्तु।
'इन्द्रोऽग्निश्च यमश्चैव नैरृतो वरुणोऽनिलः।
कुवेर ईशो ब्रह्माहिर्दिक्पालाः स्नापयन्तु ते॥'
अहिरनन्तः। कौशल्यां पूजयेत्। मन्त्रस्तु।
'रामस्य जननी चासि राममयमिदं जगत्।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते॥'
तथा।
'नमो दशरथायेति पूजयेत् पितरं ततः।
ततोऽनुज्ञाप्य देवेशं परिवारान् समर्चयेत्।
पूर्व्वषट्कोणकोणेषु हृदयादीनि च क्रमात्॥'
हृदयादीनि यथा। रां हृदयाय नमः। रीं शिरसे स्वाहा। रूं शिखायै वषट्। रैं कवचाय हुम्। रौं नेत्राभ्यां वौषट्। रः अस्त्राय फट्। तथा,—
'हनूमन्तं ससुग्रीवं भरतं सविभीषणम्।
लक्ष्मणाङ्गदशत्रुघ्नं जाम्बवन्तं दलादिषु॥
धृष्टं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम्।
अकोपं धर्म्मपालाख्यं सुमन्त्रं दलमध्यतः।
दलाग्रे लोकपालांश्च तदस्त्राणि तदग्रतः॥'
लोकपाला इन्द्रादयो दश। तदस्त्राणि वज्रशक्तिदण्डखड्गपाशाङ्कुशगदाशूलपद्मचक्राणि।
मध्याह्ने जन्म भावयेत्।
'उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्व्वसुदिने मेषं गते पूषणि।
निर्द्दग्धुं निखिलाः पलाशसमिधो मध्यादयोध्यारणे-
राविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः॥'
पलाशा राक्षसाः।
'मत्वैवं वादयेद्वाद्यानर्घ्यं दद्याज्जगत्पतेः।
फलपुष्पाम्बुसंपूर्णं गृहीत्वा शङ्खमुत्तमम्।
अशोकरक्तकुसुमैर्युक्तञ्च तुलसीदलैः॥'
मन्त्रस्तु।
'दशाननवधार्थाय धर्म्मसंस्थापनाय च।
दानवानां विनाशाय दैत्यानां निधनाय च॥
परित्राणाय साधूनां रामो जातः स्वयं हरिः।
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितो मम॥
पुष्पाञ्जलिं पुनर्दत्त्वा यामे यामेष्वतन्द्रितः।
पूजयेद्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः॥'
तदयं संक्षेपः। शुद्धायां नवम्युक्तायां विवादाभावः। विद्धायान्तु एकादशीदिने दशमी पारणयोग्या न चेत् तदा नवमयोगायोगेऽपि अष्टमीविद्धायाम्। पारणयोग्या चेत् तदा अष्टमीविद्धां त्यक्त्वा परेऽहनि उपवासः।"
इति तिथ्यादितत्त्वम्॥

रामपूगः, पुं, (रामो रमणीयः पूगः।) गुवाकविशेषः। तत्पर्य्यायः। कामीनः २ सुनिपूगः ३ सुरेवटः ४। इति त्रिकाण्डशेषः॥

रामवाणः, पुं, (रामस्य वाण इव सफलत्वात्।) औषधविशेषः। यथा। रसेन्द्रचिन्तामणौ।
"पारदामृतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम्।
तत्र जातिफलमर्द्धभागिकं
तिन्तिडीफलरसेन मर्द्दितम्॥
वह्निमान्द्यदशवक्त्रनाशनो
रामवाण इति विश्रुतो रसः।
संग्रहग्रहणीकुम्भकर्णक-
मामवातखरदूषणं जयेत्॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः॥"
पाराभागः १ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागः २ जायफलभागः २। रामवाणो रसोऽजीर्णे। इति भावप्रकाशः॥ (शरदृणभेदः। इति राजनिर्घण्टः॥ रामशरश्च॥)

रामभद्रः, पुं, (राम एव भद्रो मङ्गलजनकत्वात्।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ३४। २३६।
"लोकश्च सर्व्वदा रक्ष्यस्तत्प्रवादेन किं पुरा।
रामभद्रेण शुद्धापि त्यक्ता देवी न जानकी॥")

रामलवणं, क्ली, (रामं रमणीयं लवणम्।) शाम्भरिलवणम्। तत्पर्य्यायः। रोमकम् २ पाञ्चाल्याकरसम्भवम् ३। इति रत्नमाला॥

रामवल्लभं, क्ली, (रामं रमणीयं वल्लभञ्च।) त्वचम्। इति राजनिर्घण्टः॥ (रामस्य वल्लभम्।) रामप्रिये, त्रि॥

रामवीणा, स्त्री, (रामा रमणीया वीणा।) वीणाविशेषः। यथा, शब्दरत्नावली॥
"कूर्म्मी च कच्छपीवीणा वीणा तुम्बुरुनारदी।
सारस्वती कैलिकला रामवीणा बलान्विता॥"

रामशरः, पुं, (रामस्य शर इव।) शरतृणभेदः। तत्पर्य्यायः। रामकाण्डः २ रामवाणः ३ रामेषुः ४ अपर्व्वदण्डः ५ दीर्घः ६ नृपप्रियः ७। तस्य मूलगुणाः। ईषदुष्णत्वम्। रुचिप्रदत्वम्। रसे अम्लत्वम्। कषायत्वम्। पित्तकारित्वम्। कफवातनाशित्वञ्च। इति राजनिर्घण्टः॥ (रामचन्द्रस्य वाणोऽपि॥)

रामशीतला, स्त्री, आरामशीतला। इति राजनिर्घण्टः॥

रामसखः, पुं, (रामस्य सखा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) सुग्रीवः। इति शब्दरत्नावली॥

रामसेनकः, पुं, भूनिम्बः। (अस्य पर्य्यायो यथा,—
"किराततिक्तः कैरातः कटुतिक्तः किराතकः।
काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
कटफलः। इति राजनिर्घण्टः॥

रामा, स्त्री, (रमते रमयतीति वा। रम + ज्वलादित्वात् णः। टाप्। रमतेऽनयेति। करणे घञ् वा।) उत्तमस्त्रीविशेषः। इत्यमरः। २। ६। ४॥ गीतकलाभी रमते रामा। इति भरतः॥ (यथा, भागवते। ३। २३। ४३।
"विभज्य नवधात्मानं मानवीं सुरतोत्सुकाम्।
रामां निरमयन् रेमे वर्षपूगान् मुहूर्त्तवत्॥")
योषा। (यथा, रघुः। ५। ४९।
"स च्छिन्नबन्धद्रुतयुग्यशून्यं
भग्नाक्षपर्य्यस्तरथं क्षणेन।
रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार॥")
हिङ्गु। नदी। इति मेदिनी॥ हिङ्गुलम्। इति शब्दरत्नावली॥ श्वेतकण्टकारी। गृहकन्या। आरामशीतला। अशोकः। गोरोचना। इति राजनिर्घण्टः॥ वाला। गैरिकम्। इति शब्दचन्द्रिका॥

रामायणं, क्ली, (रामस्य चरितान्वितं अयनं शास्त्रम्।) रामेण रावणवधकाव्यम्। इति त्रिकाण्डशेषः॥ तच्च शतकोटिसंख्यकम्। यथा। स्कान्दे पातालखण्डे अयोध्यामाहात्म्ये तत्रत्यतीर्थाश्रमवर्णनप्रस्तावे।
"शापोक्त्या हृदि सन्तप्तं प्राचेतसमकल्मषम्।
प्रोवाच वचनं ब्रह्मा तत्रागत्य सुसत्कृतः॥
न निषादः स वै रामो मृगयाचर्त्तुमागतः।
तस्य संवर्णनेनैव सुश्लोक्यस्त्वं भविष्यसि॥
इत्युक्त्वा तं जगामाशु ब्रह्मलोकं सनातनः।
ततः संवर्णयामास राघवं ग्रन्थकोटिभिः॥"
कोटिभिः शतकोटिभिः। चरितं रघुनाथस्य शतकोटिप्रविस्तरमित्यन्यत्रोक्तेः। तच्च संपूर्णं ब्रह्मलोके इत्येतिह्यम्। इह तु कुशलवोपदिष्टा चतुर्विंशतिसाहस्रीत्यलम्। इति रामायणटीकायां नागोजीभट्टः॥ * ॥ तथा हि।
"प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवान् ऋषिः।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत्॥
चतुर्विंशत्सहस्राणि श्लोकानामुक्तवान् ऋषिः।
तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरम्॥
इति रामायणे वाल्मीकीये बालकाण्डे ३ सर्गः॥
संक्षिप्तरामचरित्रं यथा,—
"रामायणमयो वक्ष्ये श्रुतं पापविनाशनम्।
विष्णुनाभ्यब्जजो ब्रह्मा मरीचिस्तत्सुतः स्मृतः॥
मरीचेः कश्यपस्तस्मात् परस्तस्मात् मनुः सुतः।
मनोरिक्ष्वाकुवंशोऽभूद्वंशे राजा रघुः स्मृतः॥
रघोरजस्ततो जातो राजा दशरथो बली।
तस्य पुत्त्रास्तु चत्वारो महाबलपराक्रमाः॥
कौशल्यायामभूद्रामो भरतः कैकयीसुतः।
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः॥

रामो भक्त: पितुर्मातुर्विश्वामित्रादवाप्तवान् ।
अस्त्रग्रामं यतो यत्नीं ताड़कां प्रजघान ह ॥
विश्वामित्रस्य यज्ञे तु सुबाहुं न्यवधीद्बली ।
जनकस्य क्रतुं गत्वा उपयेमेऽथ जानकीम् ॥
उर्म्मिलां लक्ष्मणो वीरो भरतो माण्डवीं सुताम् ।
शत्रुघ्नो वै कीर्त्तिमतीं कुशध्वजसुते च वै ॥
पित्रादिभिरयोध्यायां गत्वा रामादय: स्थिता: ।
युधाजितं मातुलञ्च शत्रुघ्नभरतौ गतौ ॥
गतयोर्नृपवर्य्येण राज्यं दातुं समुद्यतम् ।
रामाय ज्येष्ठपुत्राय कैकेय्या प्रार्थितं तदा ।
चतुर्द्दशसमा वासो वने रामस्य वाञ्छित: ॥
राम: पितृहितार्थन्तु लक्ष्मणेन च सीतया ।
राज्यञ्च तृणवत्त्यक्त्वा शृङ्गवेरपुरं गत: ।
रथं त्यक्त्वा प्रयागञ्च चित्रकूटं गिरिं गत: ॥
रामस्य तु वियोगेन राजा स्वर्गं समाश्रित: ।
संस्कृत्य भरतश्चागात् रामं मातृबलान्वित: ॥
अयोध्यान्तु समागत्य राज्यं कुरु महामते ।
स नैच्छत् पादुके दत्त्वा राज्याय भरताय तु ॥
विसर्ज्जितोऽथ भरतो रामराज्यमपालयत् ।
नन्दिग्रामे स्थितो भक्तो ह्ययोध्यां नाविशद्व्रती ॥
रामोऽपि चित्रकूटाच्च अत्रेराश्रममाययौ ।
नत्वा ह्यभीक्ष्णं चागस्त्यं दण्डकारण्यमागत: ॥
तत्र शूर्पणखा नाम राक्षसीभाक्षमागता ।
निकृत्य कर्णौ नासे च रामेणाथ पराहिता ॥
तत्प्रेरित: खरश्चागाद्दूषणस्त्रिशिरास्तथा ।
चतुर्द्दशसहस्रेण रक्षसान्तु बलेन च ॥
रामोऽपि प्रेषयामास वाणैर्यमपुरञ्च तान् ।
राक्षस्या प्रेरितोऽभ्यागात् रावणो हरणाय हि ॥
मृगरूपं स मारीचं कृत्वाग्रेऽथ त्रिदण्डधृक् ।
सीतया प्रेरितो रामो मारीचं प्रजघान ह ॥
म्रियमाण: स च प्राह हा सीते लक्ष्मणेति च ।
सीतोक्तो लक्ष्मणोऽप्यागाद्रामश्चाशु ददर्श तम् ॥
उवाच राक्षसी माया नूनं सीता हृतेति सा ।
रावणोऽन्तरमासाद्य अङ्केनादाय जानकीम् ॥
जटायुषं विनिर्भिद्य ययौ लङ्कां ततो बली ।
अशोकवृक्षच्छायायां रक्षितां तामधारयत् ॥
आगत्य राम: शून्यञ्च पर्णशालां ददर्श ह ।
शोकं कृत्वाथ जानक्या मार्गणं कृतवान् प्रभु: ॥
जटायुषञ्च संस्कृत्य तदुक्तो दक्षिणां दिशम् ।
गत्वा सख्यं ततश्चक्रे सुग्रीवेण च राघव: ॥
सप्ततालान् विनिर्भिद्य शरेणानतपर्व्वणा ।
वालिनञ्च विनिर्भिद्य किष्किन्धायां हरीश्वरम् ॥
सुग्रीवं कृतवान् रामो ऋष्यमूके स्वयं स्थित: ।
सुग्रीव: प्रेषयामास वानरान् पर्व्वतोपमान् ॥
सीताया मार्गणं कर्त्तुं पूर्व्वादौ सुमहाबलान् ।
प्रतीचीमुत्तरां प्राचीं दिशं गत्वा समागता: ॥
दक्षिणान्तु दिशं ये च मार्गयन्तोऽथ जानकीम् ।
वनानि पर्व्वतान् द्वीपान् नदीनां पुलिनानि च ॥
जानकीं ते त्वपश्यन्तो मरणे कृतनिश्चया: ।
सम्पातिवचनात् ज्ञात्वा हनूमान् कपिकुञ्जर: ॥
शतयोजनविस्तीर्णं पुप्लुवे मकरालयम् ।
अपश्यज्जानकीं तत्र अशोकवनिकास्थिताम् ॥
भर्त्सितां राक्षसीभिश्च रावणेन च रक्षसा ।
भव भार्य्येति वदता चिन्तयन्तीञ्च राघवम् ॥
अङ्गुलीयं कपिर्दत्त्वा सीतां कौशल्यमब्रवीत् ।
रामस्य तस्य दूतोऽहं शोकं मा कुरु मैथिलि ॥
अभिज्ञानञ्च मे देहि येन राम: स्मरिष्यति ।
तत् श्रुत्वा प्रददौ सीता वेणी रत्नं हनूमते ॥
यथा रामो नयेत् शीघ्रं तथा वाच्यं त्वया गते ।
तथेत्युक्त्वा तु हनुमान् वनं दिव्यं बभञ्ज तत् ॥
हत्वाक्षं राक्षसांश्चान्यान् बन्धनं स्वयमागत: ।
सर्व्वैरिन्द्रजितो वाणैर्दृष्ट्वा रावणमब्रवीत् ॥
रामदूतोऽस्मि हनुमान् देहि रामाय मैथि-
लीम् ।
एतत् श्रुत्वा प्रकुपितो दीपयामास पुच्छकम् ॥
कपिर्ज्ज्वलितलाङ्गूलो लङ्कागेहे महाबल: ।
दग्ध्वा लङ्कां समायातो रामपार्श्वं स वानर: ॥
जग्ध्वा फलं मधुवने दृष्टा सीतेत्यवेदयत् ।
मणिरत्नञ्च रामाय रामो लङ्कां ययौ पुरीम् ॥
ससुग्रीव: सहनुमानङ्गदाद्य: सलक्ष्मण: ।
विभीषणोऽपि संप्राप्त: शरणं राघवं प्रति ॥
लङ्कैश्वर्य्येऽभ्यषिञ्चद्रामस्तं रावणानुजम् ।
रामो नलेन सेतुञ्च कृत्वाब्धौ चोच्छ्रितायतम् ॥
सुवेलावस्थितश्चैव पुरीं लङ्कां ददर्श ह ।
अथ ते वानरा वीरा नीलाङ्गदनलादय: ॥
धूम्रधूम्राक्षधूम्रेन्द्रा जाम्बवत्प्रमुखास्तदा ।
मैन्दद्विविदमुख्यास्ते पुरीं लङ्कां बभञ्जिरे ॥
राक्षसांश्च महाकायान् कालाञ्जनचयोपमान् ।
राम: सलक्ष्मणो हत्वा सकपि: सर्व्वराक्षसान् ॥
विद्युज्जिह्वञ्च धूम्राक्षं देवान्तकनरान्तकौ ।
महोदरमहापार्श्वावतिकायं महाबलम् ॥
कुम्भं निकुम्भं मत्तञ्च मकराक्षं ह्यकम्पनम् ।
प्रहस्तं वीरमुन्मत्तं कुम्भकर्णं महाबलम् ॥
रावणिं लक्ष्मणश्छित्त्वा ह्यस्त्राद्यै राघवो बली ।
निकृत्य बाहू वक्त्राणि रावणन्तु न्यपातयत् ॥
सीतां शुद्धां गृहीत्वाथ विमाने पुष्पके स्थित: ।
सवानर: समायातो ह्ययोध्याप्रवरं पुरम् ॥
तत्र राज्यं चकाराथ पुत्त्रवत् पालयन् प्रजा: ।
दशाश्वमेधानाहृत्य गयाशिरसि पातनम् ॥
पिण्डानां विधिवत् कृत्वा दत्त्वा दानानि राघव: ।
पुत्त्रौ कुशलवौ दृष्ट्वा तौ च राज्येऽभ्यषेचयत् ॥
एकादशसहस्राणि रामो राज्यमकारयत् ।
शत्रुघ्नो लवणं हत्वा शैलूषं भरत: स्थित: ॥
अगस्त्याद्यान् मुनीन् नत्वा श्रुत्वोत्पत्तिञ्च रक्ष-
साम् ।
स्वर्गं गतो जनै: सार्द्धमयोध्यां वैष्णवात्मक: ॥”

इति गारुड़े १४८ अध्याय: ॥ * ॥

एतदतिरिक्तं वाल्मीकिप्रणीतं सप्तविंशतिसर्ग-युक्तं सहस्रश्लोकात्मकं सीताकर्त्तृकसहस्रकन्धरावणवधकाण्डरूपादभुतोत्तरकाण्डमस्ति । तस्य प्रथमसर्गीयश्लोका यथा,—

“तमसातीरनिलयं सर्व्वेषां तपसां गुरुम् ।
वचसां प्रथमं स्थानं वाल्मीकं मुनिपुङ्गवम् ॥
विनयावनतो भूत्वा भारद्वाजो महामुनि: ।
पप्रच्छ सम्मत: शिष्य: कृताञ्जलिपुटो वशी ॥
रामायणमितिख्यातं शतकोटि प्रविस्तरम् ।
प्रणीतं भवता यच्च ब्रह्मलोके प्रतिष्ठितम् ॥
श्रूयते ब्रह्मणा नित्यमृषिभि: पितृभि: सुरै: ।
पञ्चविंशतिसाहस्रं रामायणमिदं भुवि ।
तदाकर्णितमस्माभि: सावशेषं महामुने ॥
शतकोटिप्रविस्तारे रामायणमहार्णवे ।
किं गीतमिह यन्नास्ति तन्मे कथय सुव्रत ॥
आकर्ण्यादरिण: एवं भरद्वाजस्य वै मुनि: ।
हस्तामलकवत् सर्व्वं सस्मार शतकोटिकम् ॥
ओमित्युक्त्वा मुनि: शिष्यं प्रोवाच वदतां वर: ।
भारद्वाज चिरं जीव साधु स्मारितमद्य न: ॥
शतकोटिप्रविस्तारे रामायणमहार्णवे ।
रामस्य चरितं सर्व्वमाश्चर्य्यं सम्यगीरितम् ॥
पञ्चविंशतिसाहस्रं नृलोके यत् प्रतिष्ठितम् ।
नृणां हि सदृशं रामचरितं वर्णितं मया ।
सीतामाहात्म्यसारं यत् विशेषादत्र नोक्त-
वान् ।
प्रवक्ष्यावहितो ब्रह्मन् काकुत्स्थचरितं महत् ।
सीताया मूलभूताया: प्रकृतेश्चरितञ्च यत् ॥”

इत्याद्यार्षे रामायणे वाल्मीकीये अदभुतोत्तरकाण्डे आदिकाव्ये प्रथम: सर्ग: ॥ * ॥ अन्यत् ब्रह्माण्डपुराणीयोत्तरखण्डान्तर्गतैकषष्टितमाध्यायादिकहरपार्व्वती-संवादरूपाध्यात्म-रामायणमस्ति । तत्र अध्यात्मबालकाण्डे सर्गा: सप्तैव शम्भुनोदिता: षष्ट्युत्तरत्रिशतश्लोका: मोक्षप्रदा नृणाम् १ । अध्यात्मरामचरिते अयोध्याकाण्डे नवानां सर्गाणां सप्तशतानि श्लोका: पुण्यमोक्षप्रदा: २ । काण्डेऽरण्येऽध्यात्माख्ये सर्गा दिपञ्च परिक्षिप्ता: पञ्चशतानि श्लोका: पापहरा: पार्व्वतीशोक्ता: ३ । श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्धाकाण्डे नवम: सर्ग: पञ्चशतानि श्लोका: दुरितहरा पञ्चपञ्चाशत् ४ । सुन्दरकाण्डे सर्गा: पञ्चैवाध्यात्मिकमन्विते शोक्ताश्चोभि शतानि श्लोकास्त्रिभुवनपापहरा: ५ । काण्डे युद्धात्मके सर्गा नवसप्त शौनकश्चोक्ता: सार्द्धैकादशशतश्लोका मनुसंख्यायुता-पुण्या: ६ । अध्यात्मोत्तरकाण्डे सर्गा: षड्-संख्यया प्रक्षिप्ता चतुःशतसंख्यश्लोका: ७ । पुराणसंख्या च पुरा हरेणोक्ता: ।

“पार्व्वत्यै परमेश्वरेण गदिते ह्यध्यात्मरामायणे
काण्डै: सप्तभिरन्वितेऽतिशुभदे सर्गाश्चतु:-
षष्टिका: ।
श्लोकानान्तु शतद्वयेन सहिता युक्तानि चत्वारि सा-
हस्राण्येव समासत: श्रुतिशते व्यक्तानि तत्त्वा-
र्थत: ॥”

इत्यध्यात्मरामायणम् ॥ * ॥

अपरं रामवशिष्ठसंवादरूपमोक्षोपायकदेवदूतोक्तवाशिष्ठनामकमहारामायणमस्ति । तत्र प्रथमार्द्धे षट्त्रिंशदुत्तरशतसर्गा: । तस्य आद्यन्तश्लोकौ यथा,—

श्रीवाल्मीकिरुवाच ।
"उपशमप्रकरणादनन्तरमिदं शृणु ।
तन्निर्वाणप्रकरणं ज्ञातं निर्व्वाणदायि यत् ॥ १ ॥
य इमं शृणुयान्नित्यं विधिं रामवशिष्ठयोः ।
सर्व्वावस्थोऽपि श्रवणान्मुच्यते ब्रह्म गच्छति ॥ २ ॥"
उत्तरार्द्धे षोड़शोत्तरद्विशततसर्गाः । तस्याद्यन्तश्लोकौ यथा,—
श्रीराम उवाच ।
"नैष्कर्म्म्यात् कृष्णगन्धागात् तनुः पतति रोहितः ।
कथमेतदतो ब्रह्मन् सम्भवत्याशु जीवतः ॥ १ ॥
यत् सर्व्वं खल्विदं ब्रह्म तज्जलानिति च स्फुटम् ।
श्रुत्वा सुदीर्घते शान्ति तस्मै ब्रह्मात्मने नमः ॥" २ ॥
अत्रादौ वैराग्यप्रकरणग्रन्थः । द्वितीयो मुमुक्षुग्रन्थः । तृतीय उत्पत्तिग्रन्थः । चतुर्थः स्थितिग्रन्थः । पञ्चमः सकलोपशमग्रन्थः । षष्ठप्रकरणे निर्व्वाणग्रन्थः । पूर्व्वार्द्धे सटीकग्रन्थसंख्या १३६०० । उत्तरार्द्धे सटीकग्रन्थसंख्या २३६०० । इति श्रीमहारामायणे निर्व्वाणप्रकरणे बालकाण्डे मोक्षोपाये देवदूतोक्ते द्वात्रिंशत्साहस्र्यां संहितायां वाशिष्ठे ब्रह्मदर्शने उत्तरार्द्धे षोड़शोत्तरद्विशततमः सर्गः ॥

रामालिङ्गनकामः, पुं, (रामाणामालिङ्गनस्य कामोऽभिलाषो यस्मात् ।) रक्ताम्लानः । इति राजनिर्घण्टः ॥

रामावक्षोजोपमः, पुं, (रामावक्षोजयोः स्त्रीस्तनयोरुपमा यत्र ।) चक्रवाकः । इति राजनिर्घण्टः ।

रामिलः, पुं, रमणम् । कामः । इति मेदिनी ॥ ले, १२७ ॥

राम्भः, पुं, (रम्भस्य विकारः । रम्भ+"पलाशादिभ्यो वा ।" ४ । ३ । १४१ । इत्यण् ।) व्रते वैणवदण्डः । रम्भो वेणुः तस्य विकारः । इत्यमरभरतौ । २ । ७ । ४५ ॥

रायणं, क्ली, पीड़ा । इति काचित् शब्दरत्नावली ॥

रायभाटी, स्त्री, नदीस्रोतोविशेषः । याओड़् इति भाषा । यथा,—
"पूरोढ़ि पाशसञ्चारो रायभाटी समाकरे ।"
इति शब्दरत्नावली ॥

रालः, पुं, शालवृक्षनिर्यासः । धुना इति भाषा । तत्पर्य्यायः । सर्ज्जरसः २ शालः ३ कलकलोद्भवः ४ ललनः ५ शालनिर्यासः ६ देवेष्टः ७ शीतलः ८ बहुरूपः ९ शालरसः १० सर्ज्जनिर्यासकः ११ सुरभिः १२ सुरधूपः १३ यक्षधूपः १४ अग्निवल्लभः १५ कलः १६ कललजः १७ । अस्य गुणाः । शिशिरत्वम् । स्निग्धत्वम् । कषायत्वम् । तिक्तत्वम् । संग्राहित्वम् । वातपित्तस्फोटकण्डूव्रणनाशित्वञ्च । अस्य पानलेपगुणौ । शिशिरत्वम् । प्रदरामयशान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"रालस्तु शालनिर्यासस्तथा सर्ज्जरसः स्मृतः ।
देवधूपो यक्षधूपस्तथा सर्ज्जरसश्च सः ।
रालो हिमो गुरुस्तिक्तः कषायो ग्राहको हरेत् ।
दोषास्रस्वेदवीसर्पज्वरव्रणविपादिकाः ।
ग्रहभग्नाग्निदग्धाशूलातीसारनाशनः ॥"
इति भावप्रकाशः ॥

रालकार्य्यः, पुं, (रालस्य शालरसस्य कार्य्यं यत्र ।) शालवृक्षः । इति राजनिर्घण्टः ॥

रावः, पुं, (रवणमिति । रु ल ध्वनौ+भावे घञ् ।) शब्दः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । २१ । १८ ।
"गम्भीरं तिमिमकरोग्रसंकुलं तं
गर्ज्जन्तं जलचररावरौद्रनादैः ।
विस्तीर्णं ददृशतुरम्बरप्रकाशं
तेऽगाधं निधिमुरुमम्भसामनन्तम् ॥")

रावणः, पुं, (रवणस्यापत्यमिति । रवण+"शिवादिभ्योऽण् ।" ४ । १ । ११२ । इति अण् । यद्वा, रावयति भीषयति सर्व्वानिति । रु+णिच्+ल्युः ।) लङ्काधिपतिः । तत्पर्य्यायः । पौलस्त्यः २ रक्षः ३ लङ्केशः ४ दशकन्धरः ५ । इति हेमचन्द्रः ॥ दशकण्ठः ६ निकषात्मजः ७ राक्षसेन्द्रः ८ लङ्केशः ९ पङ्क्तिग्रीवः १० दशाननः ११ । इति शब्दरत्नावली ॥ लङ्कापतिः १२ दशास्यः १३ । इति जटाधरः ॥ (अस्य निरुक्तिर्यथा, रामायणे ।
"यस्माल्लोकत्रयं चैतद्रावितं भयमागतम् ।
तस्मात्त्वं रावणो नाम नाम्ना वीरो भविष्यसि ॥")
तस्योत्पत्तिनाशौ यथा,—
सूत उवाच ।
"मानवस्य नरिष्यन्त आसीत् पुत्त्रो दमः किल ।
नवमस्तस्य दायादस्तृणविन्दुरिति स्मृतः ॥
तस्य कन्या इड़विड़ा रूपेणाप्रतिमा भुवि ।
पुलस्त्याय स राजर्षिस्तां कन्यां प्रत्यपादयत् ॥
ऋषिरैड़विड़ो यस्यां विश्रवाः समपद्यत ।
तस्य पत्न्यश्चतस्रश्च पूर्व्वा वै देववर्णिनी ॥
ज्येष्ठं वैश्रवणं यज्ञे सुरूपं देववर्णिनी ।
त्रिपादं सुमहाकायं स्थूलशीर्षं महाहनुम् ।
अष्टदंष्ट्रं हरिश्मश्रुं शङ्कुकर्णं विलोहितम् ।
पिङ्गलं नाम संदृश्य पिता तस्याब्रवीत्ततः ॥
कुत्सायान्तु कुशब्दोऽयं शरीरञ्चेरमुच्यते ।
कुशरीरत्वाच्च नाम्ना तेन वै स कुवेरकः ॥
ऋध्यां कुवेरो जनयद्विश्रुतं नलकूवरम् ॥
रावणं कुम्भकर्णञ्च कन्यां शूर्पणखां तथा ।
विभीषणं चतुर्थन्तु नैकष्यजनयत् सुतम् ॥
शङ्कुकर्णो दशग्रीवः पिङ्गलो रक्तमूर्द्धजः ।
चतुष्पाद्विंशतिभुजो महाकायो महाबलः ॥
जात्यञ्जननिभो महंलोहितग्रीव एव च ।
निसर्गाद्दारुणः क्रूरः स रावण इति स्मृतः ॥
हिरण्यकशिपुश्चासीत् स राजा पूर्व्वजन्मनि ॥
चतुर्युगानि राजा तु त्रयोदश स राक्षसः ॥
ताः पञ्चकोट्यो वर्षाणां संख्याताः संख्यया द्विजैः ।
नियुतान्येकषष्टिः संख्याविद्भिरुदाहृताः ॥
षष्टिश्चैव सहस्राणि वर्षाणां हि स रावणः ।
देवतानां पितृणाञ्च घोरं कृत्वा प्रजागरम्
त्रेतायुगे चतुर्थांशे रावणस्तपसः क्षयात् ।
रामं दाशरथिं प्राप्य सगणः क्षयमीयिवान् ॥"
इति वह्निपुराणे वाराहप्रादुर्भावनामाध्यायः ॥

रावणगङ्गा, स्त्री, (रावणेन कृता गङ्गा ।) सिंहलदेशस्थनदीविशेषः । यथा,—
सूत उवाच ।
"दिवाकरस्तस्य महामहिम्नो
महासुरस्योत्तमरत्नबीजम् ।
असृग्गृहीत्वा चरितं प्रतस्थे
निस्त्रिंशनीलेन नभस्तलेन ॥
जेता सुराणां समरेष्वजस्रं
वीर्य्यावलेपोद्धतमानसेन ।
लङ्काधिपेनार्द्धपथं समेत्य
स्वर्भानुनेव प्रसभं निरुद्धम् ॥
तत् सिंहलीचारुनितम्बबिम्ब-
विक्षोभितागाधमहाह्रदायाम् ।
पूगद्रुमाबद्धतटद्वयायां
मुमोच सूर्य्यः सरिदुत्तमायाम् ॥
ततः प्रभृति सा गङ्गा तुल्यपुण्यफलोदया ।
नाम्ना रावणगङ्गेति प्रथिमानमुपागता ॥
ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः ।
पद्मरागा घनं रागं बिभ्राणाः स्फटिकार्च्चिषः ॥"
इति गारुड़े ७० अध्यायः ॥

रावणारिः, पुं, (रावणस्य अरिः शत्रुः ।) श्रीरामः । इति जटाधरः ॥ (यथा,—
"वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥"
इति महानाटकम् ॥)

रावणिः, पुं, (रावणस्यापत्यमिति । रावण+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) रावणज्येष्ठपुत्त्रः । स च इन्द्रजित् । यथा,—
"रावणिः शक्रजिन्मेघनादो मन्दोदरीसुतः ॥"
इति हेमचन्द्रः । ३ । ३७० ॥
(यथा, महाभारते । ३ । २८७ । १२ ।
"रावणिस्तु यदा नैनं विशेषयति सायकैः ।
ततो गुरुतरं यत्नमातिष्ठद्बलिनां वरः ॥"
रावणपुत्त्रमात्रे । यथा, भट्टिः । १४ । ७९ ।
"तस्याहारिषत प्राणान् मुष्टिना वालिसूनुना ।
प्रादुद्रुवंस्ततः क्रुद्धाः सर्व्वे रावणयोऽङ्गदम् ॥")

राश, ऋ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) दन्त्यान्तोऽयमिति गदसिंहः । रासभः खरः । दुर्गसिंहस्तु इमं तालव्यान्तं मत्वा उणादौ ह्रस्वं कृत्वा रश्मिशब्दं व्युत्पादितवान् । ऋ, अरराशत् । ङ, राशते । इति दुर्गादासः ॥

राशिः, पुं, (राशते इति । राश शब्दे+इञ् । यद्वा, अश्नुते व्याप्नोतीति । अशू व्याप्तौ+"अशिपण्योर्रुड़ायलुकौ च ।" उणा० ४ । १३२ । इति इञ् रुड़ागमश्च ।) धान्यादिसमूहः । तत्पर्य्यायः । पुञ्जः २ उत्करः ३ कूटम् ४ ।

इत्यमरः । २ । ५ । ४२ ॥ समुच्चयः ५ समाहारः ६ । इति जटाधरः ॥ अश्नुते व्याप्नोति इति राशिः। अशू च व्याप्तिसंहत्योरित्यस्मात् व्याप्नोति इञ् निपातनाद्रेफागमः। इति भरतः ॥ * ॥ (यथा, शकुन्तलायाम् १ अङ्के।
"न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ॥")
ज्योतिश्चक्रस्य द्वादशांशः। तस्योत्पत्तिर्यथा,—
अथ सृष्टौ मनश्चक्रे ब्रह्माहङ्कारमूर्त्तिभृत्।
मनसश्चन्द्रमा जज्ञे सूर्य्योऽक्ष्णोस्तेजसां निधिः ॥
मनसः खं ततो वायुरग्निरापो धरा क्रमात्।
गुणैकवृद्ध्या पञ्चैव महाभूतानि जज्ञिरे ॥
अग्नीषोमौ भास्करेन्दू ततस्त्वङ्गारकादयः।
तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च जज्ञिरे।
पुनर्द्वादशधात्मानं विभजेद्राशिसंज्ञकम्।
नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी ॥"
इति सूर्य्यसिद्धान्ते गोलाध्यायः ॥ * ॥
तस्य संस्थानं यथा,—
"विषुवत्क्रान्तिवृत्तैक्यात् पूर्व्वभागस्थिताः स्थिराः।
मेषाद्या राशयः क्रान्तिवृत्तयः पूर्व्वदिक्क्रमात् ॥"
इति मुनीश्वरकृतसार्व्वभौमसिद्धान्तः ॥ * ॥
अथ राश्यादिनिर्णयः।
"मेषवृषमिथुनकर्कटसिंहाः कन्या तुला च वृश्चिकभम्।
धनुरथ मकरः कुम्भो मीन इति च राशयः कथिताः ॥"
इति राशिकथनम् ॥ * ॥
"अश्विन्या सह भरणी कृत्तिकापादश्च कीर्त्तितो मेषः। १।
वृषभः कृत्तिकाशेषं रोहिण्यर्द्धञ्च मृगशिरसः ॥ २ ॥
मृगशिरसोऽर्द्धं चार्द्रा पुनर्व्वसोस्त्रिपादो मिथुनम्। ३।
पादः पुनर्व्वसोरन्त्यः पुष्योऽश्लेषा च कर्कटः ॥४॥
सिंहोऽथ मघा पूर्व्वफल्गुणी पाद उत्तरायाः।५।
तच्छेषं हस्ता चित्रार्द्धञ्च कन्यकाख्यः ॥ ६ ॥
तौलिनि चित्रार्द्धं स्वाती विशाखायाः पादत्रयम्। ७।
अलिनि विशाखा पादस्तथानुराधान्विता ज्येष्ठा ॥ ८ ॥
मूलं पूर्व्वाषाढ़ा प्रथमश्चाप्युत्तरांशको धन्वी।९।
मकरस्तत्परिशेषं श्रवणा चार्द्धं धनिष्ठायाः ॥१०॥
धनिष्ठार्द्धं शतभिषा पूर्व्वभाद्रपदपादत्रयं कुम्भः। ११।
पूर्व्वभाद्रपदाशेषस्तथोत्तरा रेवती मीनः ॥"१२॥
इति राशिनक्षत्रभेदकथनम् ॥ * ॥
"राशिनामानि च चैत्रं भन्दच्चं ग्रहनाम च।
मेषादीनाञ्च पर्य्यायं लोकादेव विचिन्तयेत् ॥"
इति राशिपर्य्यायकथनम् ॥ * ॥
"क्रियताबुरिजितुमकुलीरलेयपाथेययूककौर्पाख्याः।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम् ॥"
इति मेषादीनां विशेषनामकथनम् ॥ * ॥
"अरुणसितहरितपाटलपाण्डुविचित्राः सितेतरपिशङ्गौ।
पिङ्गलकर्व्वुरबभ्रुमलिना रुचयो यथासंख्यम् ॥"
इति मेषादीनां वर्णभेदकथनम् ॥ * ॥
"मत्स्यौ घटी नृमिथुनं सगदं सवीणं
चापी नरोऽश्वजघनो मकरो मृगास्यः।
तौली सशस्यदहना प्लवगा च कन्या
शेषाः स्वनामसदृशाः स्वचराश्च सर्व्वे ॥"
अश्वजघनोऽश्वाकारजघनो नतु अश्वारूढ़ इति जघनः। उत्तरत्र चतुश्चरणत्वकथनात्।
राश्यधिष्ठातृदेवताकथनम् ॥ * ॥
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
इति राशीनां क्रूरसौम्यादिविवेकः ॥ * ॥
दैवज्ञमनोहरे।
"पुंराशिः पुष्करश्चैव आग्नेयाख्यस्तथैव च।
स्त्रियाः वृत्ता भवन्त्येते नित्यं द्वादश राशयः ॥"
इति पुरुषादिविवेकः ॥ * ॥
"मिथुनतुलाघटकन्या द्विपादाश्चापपूर्व्वभागश्च।
मृगधनुरादाम्त्यार्द्धं वृषाजसिंहाश्चरणाः ॥"
इति द्विपदचतुष्पदराशिकथनम् ॥ * ॥
"कर्कटवृश्चिकमीना मकरान्त्यार्द्धञ्च कीटसंज्ञाः स्युः।
वृश्चिकराशिर्मुनिभिः सरीसृपत्वेन निर्द्दिष्टः ॥"
इति कीटसरीसृपराशिकथनम् ॥ * ॥
"द्विपदवशगाः सर्व्वे सिंहं विहाय चतुष्पदाः।
सलिलनिलया भक्ष्या वश्याः सरीसृपजातयः ॥
मृगपतिवशे तिष्ठन्त्येते विहाय सरीसृपान्।
अकथितगृहेषूह्यं वश्यं जनव्यवहारतः ॥"
सरीसृपजातय इति बहुवचनात् कीटस्यापि परिग्रहः। राशीनां वश्यावश्यकथनम् ॥ * ॥
"ग्राम्या मिथुनतुलाङ्गीचापाद्यघटाः निशाश्च वृषमेषौ।
मकरादिमार्द्धसिंहौ वन्यौ दिवसेऽजवृषभौ च ॥
जलजौ कर्कटमीनौ मकरान्त्यार्द्धञ्च शिवमते कुम्भः ॥
इति ग्राम्यारण्यजलजराशिकथनम् ॥ * ॥
"ह्रस्वास्तिमिगोऽविघटा मिथुनधनुःकर्किमृगसुखाश्च समाः।
वृश्चिककन्यामृगपतिवणिजो दीर्घाः समाख्याताः ॥"
इति राशीनां ह्रस्वदीर्घकथनम् ॥ * ॥
"प्रागादिककुभां नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयास्त्रिरावृत्तिपरिभ्रमात् ॥"
इति दिगधिपत्यकथनम् ॥ * ॥
"कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीसुताम्।
जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः ॥"
इति ग्रहाणां क्षेत्रकथनम् ॥ * ॥
"अजो गोपतियुग्मश्च कर्किधन्विमृगास्तथा।
निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः ॥
निशासंज्ञा विमिथुनाः स्मृताः पृष्ठोदयास्तथा।
शेषाः शीर्षोदया ह्येते मीनश्चोभयसंज्ञकः ॥"
इति निशादिसंज्ञाकथनम् ॥ * ॥
"रविर्मासं निशानाथः सपाददिवसद्वयम्।
पक्षत्रयं भूमिपुत्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशद्दिनं भृगुः।
शनिः सार्द्धद्वयं वर्षं स्वर्भानुः सार्द्धवत्सरम् ॥
एवं प्रमाणात् सकलाः स्वराशिं भुञ्जते ग्रहाः ॥"
इति राशिभोगकथनम् ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥ द्वादशराश्यात्मकशिवरूपं यथा,—
पुलस्त्य उवाच।
'स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिणः।
अश्विनी भरणी चैव कृत्तिकाप्रथमांशकम् ॥
मेषकं हि विजानीयात् कुलचेत्रसुदाहृतम्।
आग्नेयांशास्त्रयो ब्रह्मन् प्राजापत्यं कवेर्गृहम् ॥
सौम्यार्द्धं वृषनामेदं वदनं परिकीर्त्तितम्।
मृगार्द्धमार्द्रादित्यांशास्त्रयः सौम्यगृहं त्विदम् ॥
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः।
आदित्यांशश्च पुष्यश्च अश्लेषा शशिनो गृहम् ॥
राशिः कर्कटको नाम पार्श्वे मखविनाशिनः।
पित्र्यर्क्षं भगदैवत्यं उत्तरांशश्च केशरी ॥
सूर्य्यक्षेत्रं विभोर्ब्रह्मन् हृदयं परिकीर्त्तितम्।
उत्तरांशास्त्रयः पाणिश्चित्रार्द्धं कन्यका त्वियम् ॥
सोमपुत्रस्य सद्मैतद्द्वितीयं जठरं विभोः ॥
चित्रांशद्वितयं स्वाती विशाखायांशकत्रयम्।
द्वितीयं शुक्रसदनं तुला नाभिरुदाहृता ॥
विशाखांशमनुराधा ज्येष्ठा भौमगृहं त्विदम्।
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः ॥
मूलं पूर्व्वोत्तरांशश्च देवाचार्य्यगृहं धनुः।
ऊरुयुगलमीशस्य अमरर्षे प्रगीयते ॥
उत्तरांशास्त्रयो ऋक्षं श्रवणं मकरो मुने।
धनिष्ठार्द्धं शनिक्षेत्रं जानुनी परिकीर्त्तिते ॥
धनिष्ठार्द्धं शतभिषा प्रोष्ठपदांशकत्रयम्।
सौरं पद्मापरमिदं कुम्भो जङ्घे च विश्रुते ॥
प्रोष्ठपदांशमेकन्तु उत्तरा रेवती तथा।
द्वितीयं जीवसदनं मीनस्तु चरणावुभौ ॥" * ॥
राशीनां लक्षणस्वरूपादि यथा,—
नारद उवाच।
"राशयः कथिता ब्रह्मन्! त्वया द्वादश वै मम।
तेषां विशेषतो ब्रूहि लक्षणानि स्वरूपतः ॥
पुलस्त्य उवाच।
स्वरूपं तव वक्ष्यामि राशीनां शृणु नारद।
यादृशा यत्र सञ्चारा यस्मिन् स्थाने वसन्ति हि ॥
सञ्चारस्थानमेकस्य धान्यरत्नाकरादिषु।
नवशाद्वलसंच्छन्ने वसुधायाञ्च सर्व्वशः ॥
नित्यं चरति फुल्लेषु सरसां पुलिनेषु च।
मेषः समानमूर्त्तिश्च अजाविकधनादिषु ॥

वृषः सदृशरूपेषु चरति गोकुलादिषु ।
तस्याधिवासभूमिस्तु कृषीवलधराश्रया ॥
स्त्रीपुंसयोः समं भद्रशय्यासनपरिग्रहैः ।
वीणावाद्यधृङ्मिथुनं गीतनर्त्तकशिल्पिषु ॥
स्थितं क्रीडा रतिर्नित्यं विहारोऽवनिरस्य तु ।
मिथुनं नाम विख्यातं राशिर्द्वैधात्मकः स्मृतः ॥
कर्किः कुलीरेण समः सलिलस्थः प्रकीर्त्तितः ।
केदारवापीपुलिनविविक्तावनिरेव च ॥
सिंहस्तु पर्व्वतारण्यदुर्गकन्दरभूमिषु ।
वसते व्याधपल्लीषु गह्वरेषु गुहासु च ॥
या हि प्रदीपककरा नावारूढ़ा च कन्यका ।
चरते स्त्रीरतिस्थाने वसते तद्वनेषु च ॥
तुलापाणिश्च पुरुषो वीथ्यापणविचारकः ।
नगराध्वनि शालासु वसते तत्र नारद ॥
स्वभ्रवल्मीकसञ्चारी वृश्चिको वृश्चिकाकृतिः ।
वृषगोमयकीटोऽहिपाषाणादिषु संस्थितः ॥
धनुस्तुरङ्गजघनो दीप्यमानो धनुर्द्धरः ।
वाजिशूरोऽस्त्रविद्वीरः स्थायी गुह्यवलादिषु ॥
मृगास्यो मकरो ब्रह्मन् ! वृषस्कन्धः फणाङ्गदः ।
मकरोऽसौ नदीचारी वसते च महोदधौ ॥
रिक्तकुम्भश्च पुरुषः स्कन्धधारी जलाप्लुतः ।
द्यूतशालाचरः कुम्भस्थायी शौण्डिकसद्मसु ॥
मीनद्वयमिवासक्तो मीनस्तीर्थाम्बुसञ्चरः ।
वसते पुण्यदेशेषु देवब्राह्मणपूजकः ॥
लक्षणं गदितं तुभ्यं मेषादीनां महामुने ।
न कस्यचित्त्वयाख्येयं गुह्यमेतत् पुरातनम् ॥
एतन्मया ते कथितं सुरर्षे
यथा त्रिनेत्रः प्रममाथ यज्ञे ।
पुण्यं पुराणं परमं पवित्रं
संङ्कीर्त्तितं पापहरं शिवञ्च ॥"
इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे हरजनितः पञ्चमोऽध्यायः ॥

राशिचक्रं, क्ली, (राशीनां चक्रम् ।) मेषादिद्वादशराश्यादियुक्तवृत्तम् । तस्य नामान्तरं भचक्रं ज्योतिषचक्रञ्च । यथा,—
"सप्तविंशतिभैर्ज्योतिश्चक्रं स्तिमितवायुगम् ।
तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः ॥"
इति दीपिका ॥ * ॥

तद्विवरणं यथा,—
"भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः ।
पर्य्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम् ॥
उपरिस्थस्य महतीकक्षाल्पाधःस्थितस्य च ।
महत्या कक्षया भागा महान्तोऽल्पास्तथाल्पया ॥
कालेनाल्पेन भगणं भुङ्क्तेऽल्पभ्रमणाश्रितः ।
ग्रहः कालेन महता मण्डले महति भ्रमन् ॥
स्वल्पया तु बहून् भुङ्क्ते भगणान् शीतदीधितिः ।
महत्या कक्षयागच्छन् ततः स्वल्पः शनैश्चरः ॥
मन्दादधःक्रमेण स्युश्चतुर्था दिवसाधिपाः ।
वर्षाधिपतयस्तद्वत् तृतीयाः परिकीर्त्तिताः ॥
ऊर्द्ध्वक्रमेण शशिनो मासानामधिपाः स्मृताः ।
होरेशाः सूर्य्यतनयादधोधः क्रमशस्तथा ।
भवेद्भकक्षा तीग्मांशोर्भ्रमणं षष्टिताड़ितम् ।
सर्व्वोपरिष्टात् भ्रमति योजनैस्तैर्भमण्डलम् ॥"
तत्र कक्षाक्रममाह ।
"ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाभिधीयते ।
तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा ॥
मन्दामरेज्यभूपुत्त्रसूर्य्यशुक्रेन्दुजेन्दवः ।
परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधरा घनाः ॥"
इति सूर्य्यसिद्धान्तः ॥ * ॥

ग्रहत्रयचन्द्रसंयोगे फलविशेषजनकं राशिचक्रं यथा,—
"राशिचक्रं प्रवक्ष्यामि नृपाणां हितकाम्यया ।
रविर्जीवस्तथा सौम्यस्तेषु चन्द्रे समागते ।
जलपातो भवेत् सत्यमित्युक्तं विष्णुयामले ॥
रविर्जीवस्तथा शुक्रस्तेषु चन्द्रे समागते ।
वायुपातो भवेत् सत्यमित्युक्तं विष्णुयामले ॥
रविर्ज्जीवस्तथा भौमस्तेषु चन्द्रे समागते ।
अग्निपातो भवेत् सत्यमित्युक्तं ब्रह्मयामले ॥
रविर्भौमस्तथा राहुस्तेषु चन्द्रे समागते ।
लोहपातो भवेत् सत्यमित्युक्तं रुद्रयामले ॥
रवौ राहुस्तथा केतुस्तेषु चन्द्रे समागते ।
पाषाणपातोऽपि भवेदित्युक्तं भानुयामले ॥"
इति नरपतिजयचर्य्यायां तुम्बुरुचक्रे राशिचक्रम् ॥ * ॥ जातकराशिचक्रम् । यथा,—
"तन्वादिव्ययपर्य्यन्तं राशिचक्रे व्यवस्थितम् ।
तत्र मुग्धाल्पमतयो जल्पयन्ति वृथा वृथा ॥"
इति पञ्चस्वरा ॥ * ॥

मन्त्रग्रहणोक्तराशिचक्रम् यथा । आगमकल्पद्रुमे ।
"रेखाद्वयं पूर्ब्बपरागतं स्यात्
तन्मध्यतो याम्यकुबेरभेदात् ।
एकैकमीशाननिशाचरे तु
हुताशवाय्वोर्विलिखेत्ततोऽर्णान् ॥
वेदाग्निवह्नियुगलश्रवणाब्धिसंख्यान्
पञ्चेषुवाणशरपञ्चचतुष्टयार्णान् ।
मेषादितः प्रविलिखेत् सकलांस्तु वर्णान्
कन्यागतान् प्रविलिखेदथ शादिवर्णान् ॥"
तथा,—
"वाणं गौरं खुरं शोणं शमी शोभेति राशिषु ।
क्रमेण भेदिता वर्णाः कन्यायां शादयः स्मृताः ॥"
तेन अ आ इ ई मेषः । उ ऊ ऋ वृषः ।
ॠ ऌ ॡ मिथुनम् । ए ऐ कर्कटः । ओ औ सिंहः । अं अः श ष स ह क्षाः कन्याः । कवर्गस्तुला । चवर्गो वृश्चिकः । टवर्गो धनुः । तवर्गो मकरः । पवर्गः कुम्भः । यवर्गो मीनः । स्वराशीनामनुकूलं मन्त्रं भजेत् । तथा च ।
"स्वताररराशिकोष्ठानामनुकूलान् भजेन्मनून् ॥"
इति वचनात् ॥
"राशीनां शुद्धता ज्ञेया त्यजेच्छत्रुं स्मृतं यथा ।
स्वराशेर्मन्त्रराश्यन्तं गणनीयं विपश्चितः ॥"
यदा तु स्वराशेरज्ञानं तदा साधकनामाद्यक्षरसम्बन्धिनं राशिं गृहीत्वा गणयेत् ।
"साध्याद्यक्षरराश्यन्तं गणयेत् साधकाक्षरम् ।"
इति रामार्च्चनचन्द्रिकाधृतवचनात् । तथा,
"अज्ञाते राशिनक्षत्रे नामाद्यक्षरराशितः ॥"
इति तन्त्रराजे ॥
"तेन मन्त्राद्यवर्णेन नाम्नश्चाद्यक्षरेण च ।
गणयेद्यदि षष्ठं वाप्यष्टमं द्वादशन्तु वा ।
रिपुर्मन्त्राद्यवर्णः स्यात् तेन तस्याहितं भवेत् ॥
एक पञ्च नव बान्धवाः स्मृताः
द्वौ च षट् च दशमाश्च सेवकाः ।
वह्निरुद्रसुनयस्तु पोषकाः
द्वादशाष्टचतुरस्तु घातकाः ॥"
इति विष्णुविषयम् ।
रामार्च्चनचन्द्रिकाधृतत्वात् । शक्त्यादौ तु षष्ठं वर्ज्जनीयम् । तथा च ।
"षष्ठाष्टमद्वादशानि वर्ज्जनीयानि यत्नतः ॥"
इति वचनात् ॥
तन्त्रान्तरे ।
"लग्नं धनं भ्रातृबन्धुपुत्त्रशत्रुकलत्रकाः ।
मरणं धर्म्मकर्म्मायव्यया द्वादश राशयः ॥
नामानुरूपमेतेषां शुभाशुभफलं लभेत् ॥
लग्ने सिद्धिस्तथा नित्यं धने धनसमृद्धिदः ।
भ्रातरि भ्रातृवृद्धिश्च शत्रौ शत्रुविवर्द्धनः ॥
पुत्त्रे पुत्त्रविवृद्धिः स्यात् बन्धौ बान्धववत् प्रियः ।
कलत्रे मध्यमा प्रोक्ता मरणे मरणं भवेत् ॥
धर्म्मे धर्म्मविवृद्धिः स्यात् सिद्धिदः कर्म्मसंस्थितः ।
आये च धनसम्पत्तिर्व्यये च सञ्चितक्षयः ॥"
वैष्णवतन्त्रे तु शत्रुस्थाने बन्धुरिति पाठः । इति तन्त्रसारः ॥

राशिव्यवहारः, पुं, (राशेर्व्यवहारः ।) धान्यराशिपरिमाणज्ञापकाङ्कः । तद्विवरणं यथा,—
अथ राशिव्यवहारे करणसूत्रं वृत्तम् ।
"अनणुषु दशमांशोऽणुष्वथैकादशांशः
परिधिनवमभागः शूकधान्येषु वेधः ।
भवति परिधिषष्ठे वर्गिते वेधनिघ्ने
घनगणितकराः स्युर्म्मागधास्ताश्च खार्य्यः ॥"
उदाहरणम् ।
"समभुवि किल राशिर्यः स्थितः स्थूलधान्यः
परिधिपरिमितिः स्याद्धस्तषष्टिर्यदीया ।
प्रवद गणक खार्य्यः किंमिताः सन्ति तस्मिन्
अथ पृथगणुधान्यैः शूकधान्यैश्च शीघ्रम् ॥"

अथ स्थूलधान्यराशिमानावबोधनाय



परिधिः ६० । वेधः ६ । परिधेः षष्ठांशः १० । वर्गितः १०० । वेध ६ निघ्नः । जाताः खार्य्यः ६०० ।

अथाणुधान्यराशिमानानयनाय

न्यासः



परिधिः ६० । वेधः ६०/११ । जातं फलम् ५४५ ५/११ ।

अथ मूकधान्यराशिमानानयनाय

न्यासः



परिधिः ६० । वेधः २०/३ । खार्यः ६६६ २/३ ।

अथ भित्त्यन्तर्बाह्यकोणसंलग्नराशिप्रमाणानयने करणसूत्रं वृत्तम् ।

"द्विवेदसत्रिभागैकनिघ्नात्तु परिधेः फलम् ।
भित्त्यन्तर्बाह्यकोणस्थराशेः स्वगुणभाजितम् ॥"

उदाहरणम् ।

"परिधिर्भित्तिलग्नस्य राशेस्त्रिंशन्मितः करः किल ।
अन्तःकोणस्थितस्यापि तिथितुल्यः करः सखे ॥
बहिः कोणस्थितस्यापि पञ्चघ्ननवसम्मितः ।
तेषामाचक्ष्व मे क्षिप्रं घनहस्तान् पृथक् पृथक् ॥"

अत्रापि स्थूलादिधान्यानां राशिमानाव-बोधनाय पूर्ववदेवावयवम् ।

तत्रादावणुधान्यराशिमानबोधकं क्षेत्रम् ।

न्यासः



अत्राद्यस्य परिधिः ३० । द्विनिघ्नः ६० । अन्त्यः १५ । चतुर्घ्नः ६० । अपरः ४५ । सत्रि-भागेन ४/३ निघ्नः ६० । एषां वेधः ६ । एभ्यः फलं तुल्यमेतावन्त्य एव खार्यः ६०० । एतत्-स्वस्वगुणेन भक्तं जातं पृथक् पृथक् फलम् ३०० । १५० । ४५० ॥

अथाणुधान्यराशिमानानयनाय

न्यासः



पूर्ववत् क्षेत्रत्रयाणां स्वगुणगुणितपरिधिः ६० । वेधः ६०/११ । फलानि २७२ ८/११ । १३६ ४/११ । ४०९ १/११ ।

अथ मूकधान्यराशिमानानयनाय

न्यासः



अत्रापि पूर्ववत् क्षेत्रत्रयाणां स्वगुणगुणितः परिधिः ६० । वेधः २०/३ । फलानि ३३३ १/३ । १६६ २/३ । ५०० ।

इति लीलावत्यां राशिव्यवहारः समाप्तः ॥

राष्ट्रं, पुं, क्ली, (राजते इति । राज् + "सर्वधातुभ्यः ष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् । व्रश्चेति षः ।) विषयः । (यथा, मनुः । ९ । २५४ ।
"अशासंस्तस्करान् यस्तु बलिं गृह्णाति पार्थिवः । तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते ॥") उपद्रवः । इत्यमरः । ३ । ३ । १८३ ॥ विषयो जनपदः । उपद्रवो मरकादिः । इति भरतः ॥ (राष्ट्रपालननियमादिकं महाभारते १२ । ८७ अध्याये द्रष्टव्यम् ॥ * ॥ पुं, पुरूरवोवंशजातस्य काशेः पुत्रः । यथा, भागवते । ९ । १७ । ४ ।
"काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमः पिता ।")

राष्ट्रनिवासी, [न्] पुं, (राष्ट्रे निवसतीति । नि + वस् + णिनिः ।) जानपदः । देशवासी । इति त्रिकाण्डशेषः ॥

राष्ट्रिका, स्त्री, (राष्ट्रं उत्पत्तिस्थानत्वेनास्त्यस्या इति । राष्ट्र + ठन् । टाप् ।) कण्टकारिका । इत्यमरः । २ । ४ । ९३ ॥ (पुं, राष्ट्रवासी । जानपदः । यथा, मनुः । १० । ६१ ।
"यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः । राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥" राष्ट्रपतिः । यथा, हरिवंशे । १८३ । २७—२८ ।
"कुम्भाण्ड ! मन्त्रिणां श्रेष्ठ ! प्रीतोऽस्मि तव सुव्रत ।
सुकृतस्ते विजानामि राष्ट्रिकोऽस्तु भवानिह ॥
सम्मानितश्च सुसुखी निर्वृतोऽस्तु भवानिह ।
राज्यञ्च ते मया दत्तं चिरं जीव ममाश्रयात् ॥")

राष्ट्रियः, पुं, (राष्ट्रेऽधिकृतः । राष्ट्र + "राष्ट्रावारपाराद् घखौ ।" ४ । २ । ९३ । इति घः । यद्वा, राष्ट्रे जातः । "तत्र जातः ।" ४ । ३ । २५ । इति घः ।) नाट्योक्तौ राजश्यालः । इत्यमरः । १ । ७ । १४ ॥ (राष्ट्राध्यक्षः । यथा, महाभारते । १२ । ८५ । १२ ।
"ततः संप्रेषयेद्राष्ट्रे राष्ट्रियाय च दर्शयेत् ॥")

राष्ट्रीयः, पुं, (राष्ट्रे भव इति । राष्ट्र + छः ।) नाट्योक्तौ राजश्यालः । इति हेमचन्द्रः । २ । २४ ॥ राष्ट्रसम्बन्धिनि, त्रि ॥ (यथा, महाभारते । १२ । ८७ । ६ ।
"धान्यं हिरण्यं भोगेन भोक्तुं राष्ट्रीयसत्तमः ॥")

रास, ङ ऋ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) दन्त्यान्तोऽयमिति गदसिंहः । रासभः खरः । दुर्गसिंहस्त्विमं तालव्यान्तं मत्वा उणादौ ह्रस्वं कृत्वा रश्मिशब्दं व्युत्पादितवान् । ऋ, अररासत् । ङ, रासते । इति दुर्गादासः ॥

रासः, पुं, (रासनमिति रासतेऽनेनेति वा । रास शब्दे + भावे अधिकरणे वा घञ् ।) कोलाहलः । ध्वनिः । भाषाशृङ्खलकः । गोपानां क्रीडाभेदः । इति मेदिनी । से, ११ ॥ तस्य विधिर्यथा,—
"कार्त्तिकीपूर्णिमायाञ्च कृत्वा तु रासमण्डलम् ।
गोपानां शतकं कृत्वा गोपीनां शतकन्तथा ॥
शिलायां प्रतिमायां वा श्रीकृष्णं राधया सह ।
भारते पूजयेत् कृत्वा चोपहाराणि षोडश ॥
गोलोके च वसेत् सोऽपि यावद्वै ब्रह्मणो वयः ।
भारतं पुनरागत्य हरिभक्तिं लभेद्दृढम् ॥
क्रमेण सुदृढां भक्तिं लब्ध्वा मन्त्रं हरेरपि ।
देहं त्यक्त्वा च गोलोकं पुनरेव प्रयाति च ॥
तत्र कृष्णस्य सारूप्यं संप्राप्य पार्षदो भवेत् ।
पुनस्तत्पतनं नास्ति जरामृत्युहरो महान् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २५ अध्यायः ॥ विस्तारस्तु श्रीकृष्णजन्मखण्डे २८ अध्याये श्रीमद्भागवतीयरासपञ्चाध्यायेषु च द्रष्टव्यः ॥ * ॥ कस्यचिन्मते कल्पतरुयात्रेयम् । अस्य विधिर्यथा,—
"कार्त्तिके पौर्णमास्यान्तु रासयात्रा महानिशि ।
नन्दसूनोः प्रकर्त्तव्या महाविभवविस्तरैः ॥
इह लोके सुखं प्राप्य अन्ते विष्णुपुरं व्रजेत् ।
पूजा कार्य्याहोरात्रे तु नयेत् शेषं महोत्सवैः ।
गीतैर्नानाविधैर्वाद्यैर्वेणुवीणामृदङ्गकैः ॥
दृश्यैर्वराङ्गनागीतैरङ्गनानाञ्च कीर्त्तनैः ।

चन्दनागुरुकस्तूरीपङ्कलेपैर्व्विराजितैः ॥
त्रिहरद्भिर्विष्णुभक्तैः कार्य्य एव महोत्सवः ।
ध्यायेद्वृन्दावने रम्ये यमुनापुलिने वने ॥
निकुञ्जसदने कृष्णं गोपीमण्डलमण्डितम् ।
रासमण्डलयन्त्रस्य गोविन्दं कर्णिकागतम् ॥
द्वयोर्द्वयोर्गोपिकयोर्म्मध्ये सान्तमनेकधा ।
अपरं नटवेशेन मध्ये तं मुरलीधरम् ॥
गोपीगणमुखाम्भोजमधुपानमधुव्रतम् ।
कुलालचक्रप्रतिमं मण्डलं पङ्कजाङ्कितम् ॥
दलाष्टशोभितं कार्य्यं महिष्योऽष्टौ च सन्निधौ ।
मध्ये मध्ये च गोविन्दं पार्श्वयोरष्टरूपकम् ॥
मुकुन्दं माधवं कृष्णं नटनागरमेव च ।
हरिं दामोदरं विष्णुं पूजयेत् कामरूपिणम् ॥
तदाद्ये भूपुरे गोप्यः शतशोऽथ सहस्रशः ।
पूजनीयाः प्रयत्नेन नृत्यगीतपरायणाः ॥
असंख्या गोपिकास्तत्र मण्डलेऽष्टौ वराङ्गनाः ।
महिष्यस्ताः समाख्याताः सदासङ्गसुनिव्रताः ॥
भक्तोत्सवाभिलाषेन कमला बहुरूपिणी ।
राधा विशाखा विमला सुमित्रा ललिता तथा ।
सुन्दरी कमला रम्भा महिष्योऽष्टौ प्रकीर्त्तिताः ॥
तारा राधा निराबाधा कृष्णा भेदमुपागताः ।
तासां ध्यानैर्व्वक्ष्यमाणैः पूजा कार्य्या विशेषतः ॥
उत्तीर्णे सायं समये गोप्यो वृन्दावनं ययुः ।
रासक्रीडां ततश्चाभिचक्रे च जगदीश्वरः ॥
गोप्यो रासक्रीडां चक्रुः पौर्णमास्यां महा-
निशि ।
न तत्र पथिनिनदो न भिल्लीनिनदस्तथा ॥
महानिशा द्वे घटिके रात्रेर्म्मध्यमयामयोः ।
तदप्राप्तौ च कर्त्तव्यं पौर्णमास्यां निशामुखे ॥
एवं रासक्रीडां यस्तु कारयेद्भुवि मानवः ।
स सर्व्वदुष्कृतं त्यक्त्वा निर्व्वाणमुक्तिमाप्नुयात् ॥"
इत्युत्कलखण्डिका ॥
(विलासः । यथा, भागवते । ५ । २ । १२ ।
"अस्मद्विधस्य मन उन्नयनौ बिभर्त्ति
बह्वद्भुतं सरसरासमुधादिवक्त्रे ॥"
"वक्त्रे च बह्वद्भुतं बिभर्त्ति किं तदाह । रसो
मधुरालापः रासो विलासस्ताभ्यां सहिता सुधा
अधरामृतम् । आदिशब्दात् स्मितनर्म्मादि ।"
इति तत्र श्रीधरस्वामी ॥ क्रिया । यथा, भाग-
वते । ५ । १३ । १७ ।
"तैर्वञ्चितो हंसकुलं समाविशन्
नरोचयन् शीलमुपैति वानरान् ।
तज्जातिरासेन सुनिर्वृतेन्द्रियः
परस्परोद्वीक्षणविस्मृतावधिः ॥"
"तैर्वञ्चितस्तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्म-
णानां कुलं पुनः प्रविशन् तेषां शीलं प्राय-
श्चित्तपूर्व्वकं पुनरुपनयनाद्याचारमरोचयन्
अप्रियं पश्यन् वानरतुल्यान् भ्रष्टाचारान्
शूद्रप्रायानुपैति । तज्जातिरासेन वानरजाति-
क्रियया स्त्रिया मिथुनीभूय परस्परमुखोद्वीक्ष-
णेन विस्मृतो जीवितावधिर्मरणकालो येन ।"
इति तट्टीकायां श्रीधरस्वामी । * ।)

रासभः, पुं, (रासते शब्दायते इति । रास+
"रासिवल्लिभ्याञ्च ।" उणा० ३ । १२५ । इति
अभच् ।) गर्द्दभः । इत्यमरः । २ । ९ । ७८ ॥
(अयं हि ब्रह्मणः पद्भ्यां जातः । यथा, मार्क-
ण्डेये । ४८ । २९ ।-
"पद्भ्यामश्वान् समातङ्गान् रासभान् शशकान्
मृगान् ।
उष्ट्रानश्वतरांश्चैव नानारूपाश्च जातयः ॥"
अश्वतरः । खच्चर इति भाषा । यथा, महा-
भारते । १ । १४५ । ७ ।
"स त्वं रासभयुक्तेन स्यन्दनेनाशुगामिना ।
वारणावतमद्यैव यथा यासि तथा कुरु ॥")
रासभवन्दिनी, स्त्री, मल्लिका । इति शब्द-
चन्द्रिका ॥
रासभी, स्त्री, (रासभ+ङीष् ।) गर्द्दभी । इति
शब्दरत्नावली ॥ (यथा, महाभारते । १३ ।
२७ । १४ ।
"एतत् श्रुत्वा मतङ्गस्तु दारुणं रासभीवचः ।
अवतीर्य्य रथात्तूर्णं रासभीं प्रत्यभाषत ॥")
रासमण्डलं, क्ली, (रासस्य मण्डलम् ।) श्रीकृष्णस्य
रासक्रीडास्थलम् । तद्विवरणम् । यथा,—
"तस्मादुपरि गोलोकः पञ्चाशत्कोटियोजने ।
वायुना धार्य्यमाणश्च विचित्रपरमाश्रयः ॥
अतीवरम्यनिर्म्माणो नित्यरूपो मदीच्छया ।
शतशृङ्गेण शैलेन पुण्यवृन्दावनेन च ॥
सुरासमण्डलेनापि नद्या विरजयावृतः ।
कोटियोजनविस्तीर्णा प्रस्थेन विरजा व्रज ॥
दैर्घ्ये तस्य शतगुणा परितः परमा शुभा ।
अमूल्यरत्ननिकरा हीरामाणिक्ययोस्तथा ॥
मणीनां कौस्तुभादीनामसंख्यानां मनोहरा ।
अमूल्यरत्ननिर्म्माणं तत्रापि प्रतिमन्दिरम् ॥
मनोहरञ्च प्राकारमहर्द्दं विश्वकर्म्मणा ।
गोपीभिर्गोपनिकरैर्वेष्टितं कामधेनुभिः ॥
कल्पवृक्षैः पारिजातैरसंख्यैश्च सरोवरैः ।
पुष्पोद्यानैः सुकोटिभिः संवृतं रासमण्डलम् ॥
वेष्टितं वेष्टितैर्गोपीमन्दिरैः शतकोटिभिः ।
रत्नप्रदीपयुक्तैश्च पुष्पतल्पसमन्वितैः ॥
सुगन्धिचन्दनामोदैः कस्तूरीकुङ्कुमान्वितैः ।
क्रीडोपयुक्तैर्भोगैश्च ताम्बूलैर्वासितैर्जलैः ॥
धूपैः सुरभिरम्यैश्च माल्यैश्च रत्नदर्पणैः ।
द्वारके रक्षितैः शश्वद्दासदासीभिकोटिभिः ॥
अमूल्यरत्नाभरणैर्वह्निशुद्धांशुकैरपि ।
अष्टमत्तगजेन्द्राणां वेष्टितैश्च बलैः क्रमात् ॥
नवयौवनसम्पन्नै रूपैर्निरुपमैरपि ।
रम्यञ्च वर्त्तुलाकारं चन्द्रबिम्बं यथा व्रज ।
अमूल्यरत्नरचितं दशयोजनविस्तृतम् ।
कस्तूरीकुङ्कुमे रम्यैः सुगन्धिचन्दनार्च्चितैः ॥
आवृतं मङ्गलघटैः फलपल्लवसंयुतैः ।
दधिलाजैश्च पर्णैश्च स्निग्धदूर्व्वाङ्कुरैः फलैः ॥
शीरामकदलीस्तम्भैरसंख्यैश्च मनोहरैः ।
पट्टसूत्रनिबद्धैश्च स्निग्धैश्चन्दनपल्लवैः ॥
चन्दनावृतमाल्यैश्च भूषणैश्च विभूषितम् ।
अमूल्यरत्नरचितं शतशृङ्गं मनोहरम् ॥
कोटियोजनमूर्द्धञ्च दैर्घ्यं दशगुणोत्तरम् ।
शैलप्रस्थं परिमितं पञ्चाशत्कोटियोजनम् ॥
अतीवकमनीयञ्च वेदेऽनिर्व्वचनीयकम् ।
प्राकारमिव तस्यापि गोलोकस्य मनोहरम् ॥
परितो वेष्टितं रम्यं हीराहारसमन्वितम् ।
तत्र वृन्दावनं रम्यं युक्तं चन्दनपादपैः ॥
कल्पवृक्षैश्च रम्यैश्च मन्दारैः कामधेनुभिः ।
शोभितं शोभनाढ्यञ्च पुष्पोद्यानैर्मनोहरैः ॥
क्रीडासरोवरै रम्यैः सुरम्यै रतिमन्दिरैः ।
अतीवरम्यं रहसि रासयोग्यस्थलान्वितम् ॥
रक्षितं रक्षकै रम्यैरसंख्यैर्गोपिकागणैः ।
परितो वर्त्तुलाकारं त्रिलक्षयोजनं वनम् ॥
षट्पदध्वनिसंयुक्तं पुंस्कोकिलरुतान्वितम् ।
तत्राक्षयवटो रम्यो रहस्येव हि विस्तृतः ॥
सहस्रयोजनोर्द्धश्च परितश्च चतुर्गुणः ।
गोपीनां कल्पवृक्षश्च सर्व्ववाञ्छाफलप्रदः ॥
क्रीडान्वितैरावृतश्च राधादासीचित्तचकैः ।
विरजातीरनारीणां समुनाशीतलेन च ॥
पुष्पान्वितेन मान्द्येन पवित्रञ्च सुगन्धिना ।
दासीगणैरसंख्यैश्च वृन्दावनविनोदिनी ॥
तत्र क्रीडति सा राधा मम प्राणाधिदेवता ।
सेयं श्रीदामशापेन वृषभानुसुताधुना ।
ब्रह्मादिदेवैः सिद्धैश्च मुनीन्द्रैः पूजिता व्रज ॥"
इति ब्रह्मवैवर्त्ते भगवन्नन्दसंवादे श्रीकृष्णजन्म-
खण्डे ८४ अध्यायः ॥
रासयात्रा, स्त्री, (रासस्य यात्रा उत्सवः ।)
कार्त्तिकीपौर्णमासीकर्त्तव्यश्रीकृष्णस्योत्सवविशेषः ।
तद्विवरणं यात्राशब्दे द्रष्टव्यम् ॥ * ॥ शक्ति-
विषयकरासयात्रा यथा,—
"पौर्णमास्यां रासयात्रां देव्याः कुर्य्यान्नि-
शार्द्धके ।
पूर्व्ववत्सम्यगास्थाप्य देवीं देवासनं यजेत् ॥"
पौर्णमास्यां चैत्रपौर्णमास्याम् ।
"संमुखे रासस्थानं भैरवीभैरवान्वितम् ।
कृत्वा तान् पूजयित्वा च भ्रामयेत् कुम्भचक्रवत् ॥
कोलाहलं म्दङ्गादिवाद्यैर्नृत्यैः सुगीतकैः ।
कुर्य्यादानन्दहृदयः साधकः स्थिरमानसः ॥
वित्तशाठ्यं न कुर्व्वीत देवीयात्रा सुखप्रदा ॥"
इति वामकेश्वरतन्त्रे ५४ पटलः ॥
रासेरसः, पुं, (रासे क्रीडाविशेषे यो रसः ।
अलुक्समासः ।) गोष्ठी । रासः । शृङ्गारः ।
रसविहिः । रसावासः । मल्लीनागरकः । इति
मेदिनी । से, ६० ॥ उत्सवः । इति शब्दरत्ना-
वली ॥ परिहासः । इति जटाधरः ॥
रासेश्वरी, स्त्री, (रासस्य ईश्वरी ।) राधा ।
यथा,—
"राधा रासेश्वरी रासवासिनी रसिकेश्वरी ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥
रास्ना, स्त्री, (रस्यते इति । रस आस्वादने+
"रास्नासास्नास्थूणावीणाः ।" उणा० ३ । १५ ।
इति नप्रत्ययेन साधुः ।) सुनामस्थातलता ।

विशेषः। रायन इति हिन्दी भाषा। तत्पर्य्यायः। नाकुली २ सुरसा ३ सुगन्धा ४ गन्धनाकुली ५ नकुलेष्टा ६ भुजङ्गाक्षी ७ छत्राकी ८ सुवहा ९। इत्यमरः॥ नाकुल्यादिपञ्चकं रास्नायाम्। नकुलेष्टादिचतुष्कं सर्पाक्ष्यामित्याहुः। इति तट्टीकायां भरतः॥ रस्या १० श्रेयसी ११ रसना १२ रसा १३ सुगन्धिमूला १४ रसाढ्या १५ अतिरसा १६ द्रोणगन्धिका १७ सर्पगन्धा १८ पलङ्कषा १९। इति जटाधरः॥ अस्या गुणाः। गुरुत्वम्। तिक्तत्वम्। उष्णत्वम्। विषवातास्रकासशोफकम्पोदरश्लेष्मनाशित्वम्। पाचनत्वञ्च।

"रास्ना तु त्रिविधा प्रोक्ता मूलं पत्रं तृणं तथा।
श्रेष्ठौ मूलदलौ शिष्टौ तृणा रास्ना तु मध्यमा॥"
इति राजनिर्घण्टः॥

अपि च।

"नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत्।
भोगिलूतावृश्चिकाखुविषज्वरकृमिव्रणान्॥"
इति भावप्रकाशः॥

रास्ना शोषामवातघ्नी। इति राजवल्लभः॥ औषधिविशेषः। काँटा आमरुली इति भाषा। तत्पर्य्यायः। एलापर्णी २ सुवहा ३ युक्तरसा ४। इत्यमरः॥ अपि च।

"रास्ना युक्तरसा रस्या सुवहा रसना रसा।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा॥
रास्नामपाचनी तिक्ता गुरूष्णा कफवातजित्।
शोथश्वाससमीरास्रवातशूलोदरापहा।
कासज्वरविषाशीतिवातिकामयहिध्महृत्॥"
इति भावप्रकाशः॥

(रशना। यथा, वाजसनेयसंहितायाम्।१।३०।
"आदित्यै रास्नासि।"
"हे योक्त्र आदित्यै अदित्या भूम्यास्त्वं रास्नासि रशना असि।" इति तद्भाष्ये महीधरः॥ रुद्रपत्नीनामन्यतमा। यथा, ब्रह्मवैवर्त्ते। १। ९। १३—१४।

"नामानि रुद्रपत्नीनां सावधानं निबोध मे।
कला कलावती काष्ठा कालिका कलहप्रिया॥
कन्दली भीषणा रास्ना प्रम्लोचा भूषणा शुकी।
एतासां बहवः पुत्रा बभूवुः शिवपार्षदाः॥")

राहुः, पुं, (रह त्यागे + बहुलवचनात् उण्।) त्यागः। इति संक्षिप्तसारोणादिवृत्तिः॥ (रहति गृहीत्वा त्यजति चन्द्रमिति। रह त्यागे + बहुलवचनात् उण्। इत्युज्ज्वलः।१।१।) ग्रहविशेषः। तत्पर्य्यायः। तमः २ स्वर्भानुः ३ सैंहिकेयः ४ विधुन्तुदः ५। इत्यमरः॥ अस्रपिशाचः ६ ग्रहकल्लोलः ७ सैंहिकः ८ उपप्लवः ९ शीर्षकः १० उपरागः ११ सिंहिकासुतः १२। इति शब्दरत्नावली॥ कृष्णवर्णः १३ कबन्धः १४। इति जटाधरः॥ अगुः १५ असुरः १६। इति ज्योतिस्तत्त्वम्॥ तस्योत्पत्त्यादिर्यथा,—

"सिंहिकायामथोत्पन्ना विप्रचित्तिसुतांश्च।
शम्बः शम्बलगात्रश्च यज्ञः शाल्वस्तथैव च॥
इल्वलो नमुचिश्चैव वातापी हृष्टपो जिकः।
हरकल्पकलिनाभौ भौमश्च नरकस्तथा॥
राहुर्ज्येष्ठश्च तेषां वै चन्द्रसूर्य्यप्रमर्द्दनः।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदाः॥
दारुणाभिजनाः क्रूराः सर्व्वे ब्रह्मद्विषस्तु ते।
दशान्यानि सहस्राणि सैंहिकेयो गणः स्मृतः॥
निहतो जामदग्न्येन भार्गवेण बलीयसा।
स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु शची सुता॥"
इति वह्निपुराणे प्रजापतिसर्गनामाध्यायः॥*॥

तस्य शिरश्छेदकारणं यथा,—

"देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि।
प्रविष्टः सोममपिबत् चन्द्रार्काभ्याञ्च सूचितः॥
चक्रेण क्षुरधारेण जहार पिबतः शिरः।
हरिस्तस्य कबन्धस्तु सुधयाप्लावितोऽपतत्॥
शिरस्त्वमरतां नीतमजो ग्रहमचीकॢपत्।
यस्तु पर्व्वणि चन्द्रार्कावभिधावति वैरधीः॥"
इति श्रीभागवते ८ स्कन्धे ९ अध्यायः॥

स च मलयपर्व्वतजातः। शूद्रवर्णः। द्वादशाङ्गुलपरिमाणः। कृष्णवर्णः। कृष्णवस्त्रः। सिंहवाहनः। चतुर्भुजः। खड्गवरशूलचर्म्मधारी। सूर्य्यास्यः। अस्य अधिदेवता कालः। प्रत्यधिदेवता सर्पः। इति ग्रहयज्ञतत्त्वम्॥ अस्य स्वरूपं शनिवत्। स च चण्डालजातिः। सर्पाकृतिः। अस्थिस्वामी नैरृतदिक्स्वामी च। इति बृहज्जातकादयः॥ (राहुचारस्य फलाफलं बृहत्संहितायाः ५ अध्यायतो द्रष्टव्यम्॥)

राहुग्राहः, पुं, (राहोर्ग्राहो ग्रहणं यत्र।) चन्द्रसूर्य्ययोर्ग्रहणम्। यथा,—
"राहुग्राहोऽर्केन्द्वोर्ग्रह उपराग उपप्लवः॥"
इति हेमचन्द्रः। २। ३९॥
(अत्र राहुग्रास इत्यपि पाठो दृश्यते॥)

राहुचक्रं, क्ली, (राहोश्चक्रम्।) रव्यादिसप्तवारेषु अष्टगत्या वामावर्त्तेन यामार्द्धं प्राप्य अष्टदिक्षु राहोर्गमनम्। यथा,—

"पश्चादर्के विधौ वह्नौ सौम्यां भे वायवे ज्ञे।
रक्षोदिशि भृगौ याम्यां गुरावीशे शनौ दिने।
राहुर्भ्रमति यामार्द्धादष्टगत्या च वामतः॥
द्यूते युद्धे विवादे च यात्रायां सम्मुखं स्थितम्।
राहुं विवर्ज्जयेद्यत्नाद्यदीच्छेत् कर्म्मणः फलम्॥"
इति सत्कृत्यमुक्तावली॥*॥

राहुकालानलचक्रं यथा,—

"तस्य चक्रं प्रवक्ष्यामि राहुकालानलात्मकम्।
शलाकासप्तकं चक्रं ईशादौ कृत्तिकादिकाः॥
यत्र ऋक्षे स्थितो राहुर्वदनं तद्विनिर्द्दिशेत्॥
मुखात् पञ्चदशे ऋक्षे तस्य पुच्छं व्यवस्थितम्।
अष्टोत्तरशतं ख्याता आयभ्ने यत्र केतवः॥
प्राप्य तच्चुम्बनात् सर्व्वे सहस्रार्कसमत्विषः।
राहुभुक्तानि ऋक्षाणि जीवपक्षे जयोदय॥
जयोदयेन भोग्यानि मृतपक्षे प्रकीर्त्तयेत्।
मृतपक्षे मुखं तस्य गुदं जीवाङ्गमध्यगम्॥
एवमङ्गद्वयो राहुर्ज्ञातव्यः स्वरपारगैः।
जीवपक्षे चपानाथे मृतपक्षे रवौ स्थिते।
तस्मिन् काले शुभा यात्रा विपरीते तु हानिदा॥"
इति स्वरोदयः॥

राहुच्छत्रं, क्ली, आर्द्रकम्। इति राजनिर्घण्टः॥

राहुदर्शनं, क्ली, (राहोर्दर्शनं यत्र।) राहोश्चाक्षुषज्ञानम्। ग्रहणमिति यावत्। यथा,—

"चक्षुषा दर्शनं राहोर्यत्तद्ग्रहणमुच्यते।
तत्र कर्म्माणि कुर्व्वीत गणनामात्रतो न तु॥
राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु।
स्नानमात्रन्तु कर्त्तव्यं दानश्राद्धविवर्ज्जितम्॥"
इति तिथ्यादितत्त्वम्॥

राहुभेदी, [न्] पुं, (राहुं भिनत्तीति। भिद् + णिनिः।) विष्णुः। इति जटाधरः॥

राहुमूर्द्धभित्, पुं, (राहोर्मूर्द्धानं भिनत्ति छिनत्तीति। भिद् + क्विप्।) विष्णुः। इति त्रिकाण्डशेषः॥

राहुरत्नं, क्ली, (राहुप्रियं रत्नम्। राहो रत्नमिति वा।) गोमेदकः। इति राजनिर्घण्टः॥

राहुलसूः, पुं, बुद्धः। इति हेमचन्द्रः। २। १५१॥

राहुवृहस्पतियोगः, पुं, (राहुणा वृहस्पतेर्योगो मेलनम्।) एकराशिस्थितगुरुराहुः। गुरुचाण्डालियोग इति ख्यातः। तस्य कालाशुद्धिजनकत्वं यथा, भोजदेवव्यवहारसमुच्चये।

"सर्व्वं कार्य्यं न कर्त्तव्यं गुरौ सिंहेऽस्तगेऽपि च।
प्रतदोषे न कुर्व्वीत तमोयुक्ते बृहस्पतौ॥"

तमोयुक्ते राहुयुक्ते। प्रतदोषे इति नित्येतरवैदिककर्म्मोपलक्षणम्। तथा च स्मृतिसारे ज्योतिषम्।

"एकराशौ स्थितौ स्यातां यदि राहुबृहस्पती।
विवाहव्रतयज्ञादि सर्व्वं तत्र परित्यजेत्॥"

मलमासादुपक्रम्य भविष्ये।

"ऋक्षभेदेऽप्येकराशौ सम्पर्को यदि चानयोः।
गुरो राहोरपि तथा त्यजेदित्यत्र संशयः॥"

अत्र गुरोर्लङ्घितत्वं हेतुः।

"यत्र यत्र स्थितो जीवस्तमोयोगेन लङ्घ्यते।
उपहासाय किं न स्यादस्तत्वज्ञो मनीषिणाम्॥"
इति मलमासतत्त्वम्॥*॥

अस्य प्रतिप्रसवो यथा,—

"कर्णाटलाटाङ्गकलिङ्गदेशे
बृहस्पतौ राहुयुते विवाहः।
शेषेषु देशेषु न चास्ति दोषः
सर्व्वत्र कार्य्यं मुनयो वदन्ति॥"

इति बृहद्राजमार्त्तण्डधृतवचनमिति केचिद्वदन्ति॥

राहुस्पर्शः, पुं, (राहोः स्पर्शो यत्र।) उपरागः। इति हलायुधः॥

राहुहा, [न्] पुं, (राहुं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

राहूच्छिष्टः, पुं, (राहोरुच्छिष्टः ।) लशुनः । इति त्रिकाण्डशेषः ॥ (अस्य विवरणन्तु रसोनशब्दे द्रष्टव्यम् ॥)

राहूत्सृष्टः, पुं, (राहुणा उत्सृष्टः परित्यक्तः ।) लशुनः । इति हारावली । २२३ ॥ (अस्य विवरणं रसोनशब्दे द्रष्टव्यम् ॥)

रि, श गतौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) रेफादिः । श, रियति । इति दुर्गादासः ॥

रिक्तं, क्ली, (रिच् + क्तः ।) शून्यम् । वनम् । इति मेदिनी । ते, ५० ॥

रिक्तं, त्रि, (रिच् + क्तः ।) निर्धनम् । इति शब्दरत्नावली ॥ (शून्यम् । यथा, मनुः । ८ । ४०५ ।
"भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि मारतः ।
रिक्तभाण्डानि यत्किञ्चित् पुमांसश्चापरिच्छदाः ॥")

रिक्तकं, त्रि, (रिक्त + कन् ।) शून्यम् । इत्यमरः । ३ । १ । ५६ ॥ (यथा, मनुः । ८ । ४०४ ।
"पणं यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे ।
पादं पशुश्च योषिच्च पादार्द्धं रिक्तकः पुमान् ॥")

रिक्ता, स्त्री, (रिच् + क्तः । टाप् ।) तिथिभेदः । सा तु चतुर्थी नवमी चतुर्द्दशी च । यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात् ॥"
इति तिथ्यादितत्त्वम् ॥
कर्म्मसु तस्या निषेधविधी यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा नामसदृक्फलाः ।"
न रिक्ता सर्व्वकर्म्मसु । इति ज्योतिःसारः ॥
"चन्द्रे चार्ककुजार्किशुक्रवियुते मध्येऽथवा पापयोः
त्यक्ता च व्यतिपातवैधृतिदिनं विष्टिञ्च रिक्तां तिथिम् ।
क्रूराहायनचैत्रपौषरहिते लग्नांशके मानुषे ॥
रिक्तासु विधवा कन्या दर्शेऽपि स्याद्विवाहिता ।
शनैश्चरदिने चैव यदि रिक्ता तिथिर्भवेत् ।
तस्मिन् विवाहिता कन्या पतिसन्तानवर्द्धिनी ॥"
इति दीपिका ॥
"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ
सौम्यादित्यसितेन्दुजीवदिवसे पथ्ये च लग्नेतरे ।"
इति भुजबलभीमः ॥
"द्वादशी सप्तमी नन्दा रिक्तासु पञ्चपर्व्वसु ।
बलमायुर्यशो हन्यात् शिशूनामन्नभक्षणम् ॥"
इति कृत्यचिन्तामणिः ॥
"पूर्व्वशान्तकसर्पमूलरहितेष्वेष्वरिक्ते तिथौ
षष्ठे मासि सितेन्दुजीवदिवसे गोमर्त्यमीनोदये ।
संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्द्दने ।
षष्ठीं प्रतिपदञ्चैव वर्जयित्वा तथाष्टमीम् ।
रिक्तां पञ्चदशीञ्चैव सौरिभौमदिने तथा ।
एवं सुनिश्चिते काले विद्यारम्भन्तु कारयेत् ॥"
इति विष्णुधर्म्मोत्तरः ॥

"पूर्व्वाग्नियाम्यफणिचित्रशिवान्यभेषु
रिक्ताष्टमीं विगतचन्द्रतिथिं विहाय ।
द्व्यङ्गालिगोसमुदये विकुजार्किवारे
शस्तेन्दुयोगकरणेषु हलप्रवाहः ॥"
इति दीपिका ॥
"चन्द्रार्कयोर्भवेत् पूर्णा कुजे भद्रा जया गुरौ ।
बुधमन्दौ च नन्दायां शुक्रे रिक्तामृता तिथिः ॥"
इति भीमपराक्रमः ॥
"सर्व्वत्र कार्य्ये बुधजीवशुक्राः
केन्द्रत्रिकोणोपगताः प्रशस्ताः ।
तृतीयलाभारिगताश्च पापा-
स्तिथिर्विरिक्ता शुभदश्च चाहः ॥"
इति दीपिका ॥
"चतुर्थी नवमी चैव रिक्ता चैव चतुर्द्दशी ।
शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया ।
गुरौ पूर्णा च संयुक्ता सिद्धियोगाः प्रकीर्त्तिताः ॥
बुधमन्दगता नन्दा कुजे भद्रा जया गुरौ ।
भृगुरिक्तामृतं प्रोक्तं पूर्णा च रविचन्द्रयोः ॥"
इति ज्योतिःसागरसारः ॥
"षष्ठाष्टमीद्वादशीषु न गच्छेत्त्रिदिनस्पृशि ।
पूर्णिमाप्रतिपद्दर्शरिक्तावमदिनेषु च ।
तथा यमद्वितीयायां यात्रायां मरणं भवेत् ॥"
इति सत्कृत्यमुक्तावली ॥

रिक्थं, क्ली, (रिङ्क्ते वहिर्गच्छति गच्छतीति । रिच् + "पातृतुदिवचिरिचिसिचिभ्यस्थक् ।" उणा० २ । ७ । इति थक् ।) धनम् । इत्यमरः । २ । ९ । ९० ॥ (यथा, मनुः । ८ । २७ ।
"बालदायादिकं रिक्थं तावद्राजानुपालयेत् ।
यावत् स स्यात् समावृत्तो यावच्चातीतशैशवः ॥")

रिक्थहारी, [न्] त्रि, (रिक्थं हरतीति । हृ + णिनिः ।) दायादः । धनहारी । यथा । "यदासौ नियुक्तो देवरादिः स्वयमप्यपुत्त्रोऽपुत्त्रस्य क्षेत्रे स्वपरपुत्त्रार्थं प्रवृत्तोऽयं जनयति स द्विपितृको द्व्यामुष्यायणो द्वयोरपि रिक्थहारी पिण्डदाता च ।" इति मिताक्षरायां दायभागः ॥

रिक्थी, [न्] त्रि, (रिक्थमस्यास्तीति । रिक्थ + इनिः ।) धनहारी । धनी । (यथा, याज्ञवल्क्यः । २ । २९ ।
"योऽभियुक्तः परेतः स्यात् तस्य रिक्थी तमुद्धरेत् ॥")

रिक्षा, स्त्री, लिक्षा । यूका । इति हेमचन्द्रः । ४ । २७४ ॥

रिख, इ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, रिङ्खति । इति दुर्गादासः ॥

रिग, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, रिङ्गति । इति दुर्गादासः ॥

रिङ्खणं, क्ली, (रिखि + ल्युट् ।) स्खलनम् । इति हेमचन्द्रः । ६ । १५९ ॥ (यथा,—
"सुताय रिङ्खणविधिं पादसंक्रमलक्षणः ।
कुमारः पञ्चवर्षीयः कलाभ्यासं विधास्यति ॥")

रिङ्गणं, क्ली, (रिगि + ल्युट् ।) स्खलनम् । इत्यमरः ॥ "द्वे धर्म्मादनपेतादप्रतिष्ठायां स्वकीयविधानादन्यथाभावे इत्यर्थः । औचित्यात् पिच्छिलादेश्च स्खलने । इति रमानाथः ॥ धर्म्मविलङ्घनं रिङ्गणमिति स्वामी ॥ बालानां हस्तपादाभ्यां चलनं रिङ्गणम् । पिच्छिलादौ पतनं स्खलनमित्यन्ये । एतन्मते भेदेऽप्यभेदोपचारेण समे इत्युक्तम् । रग रिग लिगि गतौ अनट् । रिङ्खणमिति पाठे रखि रख रिखि सर्पणे इत्यस्य रूपम् ।" इति भरतः ॥

रिच, कि सम्पर्कवियोगयोः । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-अक०-सेट् ।) कि, रेचयति रेचति । रिङ्क्ते रिपुर्यदाक्रान्तो धनैर्म्मलैश्च रेचति । रेचयन्ति च तन्नार्य्यं इति हलायुधः । इति दुर्गादासः ॥

रिच, इर् ध न औ विरेके । इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-अक०-अनिट् ।) विरेकः पौनःपुन्येन पुरीषोत्सर्गः । इति चतुर्भुजः । इर्, अरिचत् अरैक्षीत् । ध न, रिणक्ति रिङ्क्ते अतिसारकी । औ, रेक्ता । इति दुर्गादासः ॥

रिज, ङ भर्ज्यर्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) भर्ज्यर्थे भर्ज्जने । ङ, रेजते । इति दुर्गादासः ॥

रिधमः, पुं, कामः । वसन्तः । इति विश्वः ॥

रिपुः, पुं, (अनिष्टं रपतीति । रप वाचि + "रपेरिच्चोपधायाः ।" उणा० १ । २७ । इति कुः इकारश्चोपधायाः । "रिप कत्थनयुद्धनिन्दाहिंसादानेषु । 'ईषिः किच्च ।' उणा० १ । १४ । इति बाहुलकादुप्रत्ययः । रिपति केचित् पठन्ति । तत्र बाहुलकादेव ककारस्य पकारः । रिपति मोषणार्थं युध्यते हिनस्ति वा निन्दति च सत्पुरुषैः ।" इति निघण्टुटीकायां देवराजयज्वा । ३ । २४ । ४ ।) शत्रुः । इत्यमरः । २ । ८ । १० ॥ (यथा, हितोपदेशे ।
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥")
शरीरस्थषड्रिपवो यथा । कामः क्रोधः लोभः मोहः मदः मात्सर्य्यञ्च । तथा हि ।
"आस्थाय योगमवजित्य च वैरिषट्क-
माबध्य चेन्द्रियगणं मनसि प्रसन्ने ।"
इत्यादि तन्त्रसारे भुवनेश्वरीस्तोत्रम् ॥ ● ॥ चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ लग्नापेक्षया षष्ठलग्नम् । तत्पर्य्यायः । षट्कोणम् २ रिपुमन्दिरम् ३ । यथा,—
"धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम् ।
द्युनं द्यूनं तथाख्यातं षट्कोणं रिपुमन्दिरम् ॥"
अपि च ।
"सुनीचगेऽस्तगेऽपि वा रिपोर्व्यये स्थिता ग्रहाः ।
तथा फलं प्रकीर्त्तितं समस्तमेव सूरिभिः ॥"
अन्यच्च ।
"अरातिमृत्युयोः षष्ठे चाष्टमे मृत्युरन्ध्रयोः ।
व्ययस्य द्वादशस्थाने वैपरीत्येन चिन्तनम् ॥"
इति ज्योतिस्तत्त्वम् ।

(ध्रुवपुत्त्रस्य श्लिष्टेः पुत्त्रः। यथा, हरिवंशे। २। १४-१५।
"तस्मात्‌ श्लिष्टिञ्च भव्यञ्च ध्रुवात्‌ शम्भुर्व्यजायत।
श्लिष्टेराधत्त सुच्छाया पञ्चपुत्त्रानकल्मषान्‌॥
रिपुं रिपुञ्जयं पुष्यं वृकलं वृकतेजसम्‌॥"
यदोः पुत्त्रः। यथा, भागवते। ९। २३। २०।
"यदोः सहस्रजित्‌ क्रोष्टानलोरिपुरितिश्रुताः॥")

रिपुघातिनी, स्त्री, (रिपुं हन्तीति। हन+णिनिः।) लताविशेषः। कुचुद इति भाषा। यथा,
"कुचिका बहुविस्तीर्णा कुचिका रिपुघातिनी॥"
इति शब्दचन्द्रिका॥

रिन्फ, प श वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) नोपधः। प श, रिम्फति रिरिम्फ। सप्तमस्वरादिरयमित्यन्ये। इति दुर्गादासः॥

रिपर्ं, क्ली, लग्नापेक्षया द्वादशराशिः। यथा,—
"कर्म्मस्थानञ्च दशमं खं मेषूरणमास्पदम्‌।
छिद्राख्यमष्टमं स्थानं रिप्फाख्यं द्वादशं स्मृतम्‌॥"
तत्र चिन्तनीयं यथा,—
"प्राग्व्ययावथ चिन्तयेद्‌भवगृहे रिप्फेऽथ मन्त्रिव्ययौ
सौम्यस्वामियुतौ चितेरुपचितिस्तेषां च तिस्त्रयथा॥"
इति ज्योतिस्तत्त्वम्‌॥

रिप्रः, त्रि, (रीङ् स्रवणे+"लीरीङो ह्रस्वश्च पुट् च तरौ श्लेषणकुत्सितयोः।" उणा० ५। ५५। इति रप्रत्ययः। धातोर्ह्रस्वः। प्रत्ययस्य पुट् च।) अधमः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। ६। ७८। १।
"गृभ्णाति रिप्रमविरस्य तान्वा।'
"रिप्रं अनुपादेयत्वेन पापरूपम्‌॥" इति तद्भाष्ये सायणः॥ क्ली, पापम्‌। यथा, ऋग्वेदे। १०। १७। १०।
"विश्वं हि रिप्रं प्रवहन्ति देवीः॥"
"देवीर्देव्यः देवनशीला आपः विश्वं सर्व्वं विप्रं पापं प्रवहन्ति पुरुषसकाशात्‌ प्रगमयन्ति अपनयन्तीति यावत्‌।" इति तद्भाष्ये सायणः॥)

रिप्रवाहः, त्रि, पापवाहकः। यथा,—
"क्रव्यादमग्निं प्रहिणोमि दूरम्‌।
यमराज्यं गच्छतु रिप्रवाहः॥"
इति भवदेवभट्टोक्तकुशण्डिकापद्धतिः॥
"रिप्रं पापं वहतीति रिप्रवाहः।" इति तट्टीकायां गुणविष्णुः॥ "स प्रहितः क्रव्यादग्निः यमराज्यं गच्छतु यमस्य राज्यं प्रति व्रजतु। किम्भूतः रिप्रवाहः रिप्रमिति पापनाम। रिप्रं पापं वहति नाशयति रिप्रवाहः।" इति वाजसनेयसंहिताभाष्ये महीधरः। ३५। १९॥
"रिप्रवाहः रिप्रं पापं तस्य वोढ़ा सोऽग्निः यमराज्ञः यमो राजा येषां तान्‌ यमराजकान्‌ अन्यप्रदेशान्‌ गच्छतु प्राप्नोतु।" इति ऋक्‌भाष्ये सायणः। १०। १६। ९।)

रिफ, कुत्सने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सौत्रधातुरयम्‌। रिप्फः रेफः। इति दुर्गादासः॥

रिफ, श अर्पे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) श, रिफति। अर्पो दानश्लाघाहिंसानिन्दायुद्धानि। इति दुर्गादासः॥

रिव, इ गत्याम्‌। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, रिण्वति। इति दुर्गादासः॥

रिभ, रवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) विरिब्धः। इति दुर्गादासः॥

रिमेदः, पुं, अरिमेदः। इति राजनिर्घण्टः॥

रिरी, स्त्री, पित्तलः। इति हेमचन्द्रः। ४। ११४॥

रिव, इ व्रजे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, रिण्वति। व्रजो गतिः। इति दुर्गादासः॥

रिश, औ श हिंसे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-अनिट्।) औ, अरिक्षत्‌। श, रिशति। रेक्ष्यति। इति दुर्गादासः॥

रिश्यः, पुं, (रिश्यते हिंस्यते इति। रिश्+क्यप्‌।) मृगः। इति त्रिकाण्डशेषः॥

रिष, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेषति। इति दुर्गादासः॥

रिषिः, पुं, ऋषिः। ऋषन्ति ज्ञानसंसारयोः पारं गच्छन्ति ऋषयः। ऋषी श गतौ नाम्नीति किः। रिषिर्हंसादिश्च। विद्याविदग्धमतयो रिषयः प्रसिद्धाः। इति प्रयोगात्‌। स्त्रियां ऋषी च। इत्यमरटीकायां भरतः॥

रिष्टं, क्ली, (रिष्+क्तः।) क्षेमम्‌। कल्याणम्‌। अशुभम्‌। अमङ्गलम्‌। (यथा, मार्कण्डेये। ५०। ८९।
"स्थालीपिधाने यत्राग्निर्दत्तो दर्व्वीमुखेन वा।
गृहे तत्र हि रिष्टानामशेषाणां समाश्रयः॥")
अभावः। नाशः। इत्यमरभरतौ॥ अशुभस्याभावः। इति केचित्‌। इति भरतः॥ पापम्‌। इत्यजयः॥ तद्वति, त्रि॥

रिष्टः, पुं, (रिष्+क्तः।) खड्गः। फेनिलः। स तु रक्तशिग्रुः। इति मेदिनी। टे, २७॥

रिष्टकः, पुं, (रिष्ट एव। स्वार्थे कन्‌।) रक्तशिग्रुः। इति शब्दरत्नावली॥

रिष्टिः, पुं, (रेषति हिनस्तीति। रिष्+क्तिच्‌।) खड्गः। इति मेदिनी। टे, २७॥

रिष्टिः, स्त्री, (रिष्+क्तिन्‌।) अशुभम्‌। इति मेदिनी। टे, २७॥ शस्त्रभेदः। इति शब्दरत्नावली॥

रिष्यः, पुं, (रिष्यते इति। रिष्+क्यप्‌।) मृगविशेषः। यथा,—
"ऋष्य ऋश्यो रिश्यो रिष्य एणः स्यादेणकोऽपि च।"
इति शब्दरत्नावली॥

रिस्वः, त्रि, (रिष वधे+"सर्व्वनिघृष्वरिष्वेति।" उणा० १। १५३। इति वन्‌प्रत्ययेन साधुः।) वधकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

रिह, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेहति। इति दुर्गादासः॥

री, ओ ङ य चरणे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) ओ, रीणः। ङ य, रीयते पयः। इति दुर्गादासः॥

री, गि रवे। वधे। गतौ। इति कविकल्पद्रुमः॥ (क्र्या०-प्वा०-पर०-अक०-सक० च-अनिट्।) गि, रिणाति रीणः रिणिः। रवः शब्दः। तथा च कातन्त्रादौ री गतिरेषणयोः। रेषणं वृकध्वनिरिति रमानाथः। रिणाति रेषते वृकः। इति शब्दार्थे भट्टमल्लः। इति दुर्गादासः॥

री, स्त्री, (री+क्विप्‌।) गतिः। इति शब्दरत्नावली॥ रवः। वधः। इति रीधातुदर्शनात्‌॥

रीण्या, स्त्री, घृणा। यथा। मोहो रीण्या जुगुप्सा च हृणीया हृणिया घृणेति वाचस्पतिः। अयन्तु लज्जायां प्रसिद्धेः प्रमादात्‌ घृणायां प्रयुक्त इति कश्चित्‌। इत्यमरटीकायां भरतः॥

रीठा, स्त्री, रीठाकरञ्जः। इति राजनिर्घण्टः॥

रीठाकरञ्जः, पुं, स्वनामख्यातवृक्षः। तत्पर्य्यायः। गुच्छकः २ गुच्छपुष्पकः ३ रीठा ४ गुच्छफलः ५ अरिष्टः ६ मङ्गल्यः ७ कुम्भबीजकः ८ प्रकीर्य्यः ९ सोमवल्कः १० फेनिलः ११। अस्य फलगुणाः। तिक्तत्वम्‌। उष्णत्वम्‌। कटुत्वम्‌। स्निग्धत्वम्‌। वातकफकुष्ठकण्डूतिविषविस्फोटनाशित्वञ्च। इति राजनिर्घण्टः॥

रीढ़कः, पुं, पृष्ठवंशः। इति हेमचन्द्रः। ३। २९५॥

रीढ़ा, स्त्री, (रिह बन्धे+औणादिकः क्तः।) अवज्ञा। इत्यमरः। १। ७। २३॥

रीणं, त्रि, (री+क्तः। ओदितश्चेति नः।) स्रुतजलादि। क्षरितम्‌। इत्यमरः। ३। १। ९२॥

रीतिः, स्त्री, (री+क्तिच्‌ क्तिन्‌ वा।) आरकूटः। (तत्पर्य्यायगुणा यथा,—
"पित्तलन्त्वारकूटं स्यादरो रीतिश्च कथ्यते।
राजरीतिर्ब्रह्मरीतिः कपिला पिङ्गलापि च॥
रीतिरप्युपधातुः स्यात्ताम्रस्य यशदस्य च।
पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा जनैः॥
संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
प्रचारः। स्यन्दः। इत्यमरः। २। ८। ९७॥ ३। ३। ६८॥ लोहकिट्टम्‌। इति मेदिनी। ते, ५०॥ दग्धस्वर्णादिमलम्‌। इति धरणिः॥ सीमा। स्रवणम्‌। गतिः। स्वभावः। शेषस्य पर्य्यायः। रूपम्‌ २ लक्षणम्‌ ३ भावः ४ आत्मा ५ प्रकृतिः ६ सहजः ७ रूपतत्त्वम्‌ ८ धर्म्मः ९ सर्गः १० निसर्गः ११ शीलम्‌ १२ सतत्त्वम्‌ १३ संसिद्धिः १४। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। १४। ६२।
"निशान्तखिन्नचक्राङ्करीतिहृद्यो रसक्रमः॥"

स्तुतिः । यथा, ऋग्वेदे । २ । २४ । १४ ।
"महीव रीतिः शवसासरत् पृथक् ॥"
"महीव रीतिः महती स्तुतिरिव ।" इति तद्भाष्ये सायणः ॥) काव्यस्यात्मा । इति वामनसूत्रम् ॥ गुणभेदेन तद्विभागमाह ।
"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः ।
गौड़वैदर्भ्यपाञ्चालरीतयः परिकीर्त्तिताः ॥"
प्रत्येकेनैषां लक्षणानि यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ।
व्यक्तार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः ॥
शब्दार्थयोस्तु रसवन्मधुरं परिकीर्त्तितम् ।
सर्व्वलोकावगम्यं यद्ग्राम्यं तदभिधीयते ।
सुश्राव्यमपि गम्भीरं प्रसन्नमुपनागरम् ॥"
ग्राम्यं यथा,—
"कन्ये मन्येऽद्यसौ धन्यो यस्त्वामद्य विवाहयेत् ।
नाल्पेन तपसा लभ्यः सुन्दरस्त्रीसमागमः ॥"
उपनागरं यथा—
"तन्वि त्वदधरं स्वादु नाविदन्नविदो जनाः ।
वसुधायां सुधाभावान्मृषा स्वर्गे पियासवः ॥
शब्दालङ्करणं तत् स्याद्यदनुप्रासभास्वरम् ।
वर्णावृत्तिरनुप्रासः पदे पादे विधीयते ।
पदावृत्तिस्तु यमकमादिमध्यान्तसर्व्वगम् ॥" * ॥
क्रमेण रीतित्रयाणामुदाहरणानि ।
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणिस्फूर्ज्जत्फुत्कृतिभीतिसम्भृतिचमत्कारस्फुरत्-
सम्भ्रमा ।
आमन्द्रान्तवापिकां विदधती चित्ते गिरीश-
प्रभो-
स्त्वां पायान्नवसङ्गमे भगवती लज्जावती
पार्व्वती ॥
भवतो विरहव्याधिमधिगम्य ससम्भ्रमा ।
कामिनी यामिनीकान्तं कृतान्तमिव पश्यति ॥
हन्तालि सन्तापनिवृत्तयेऽस्याः
किं तालवृन्तं तरलीकरोषि ।
उत्ताप एषोऽन्तरतापहेतु-
र्नतभ्रुवो नयनापनेयः ॥"
इति काव्यचन्द्रिका ॥
(अस्या अन्यद्विवरणं साहित्यदर्पणे ६ परिच्छेदे द्रष्टव्यम् ॥)

रीतिकं, क्ली, पुष्पाञ्जनम् । इति राजनिर्घण्टः ॥

रीतिका, स्त्री, कुसुमाञ्जनम् । इति शब्दचन्द्रिका पित्तलञ्च ॥ (यथा, बृहत्संहितायाम् । ५७।८।
"अष्टौ सीसकभागाः कांसस्य द्वौ तु रीतिका-
भागः ।
मयकथितो योगोऽयं विज्ञेयो वज्रसंघातः ॥")

रीतिपुष्पं, क्ली, (रीतेः पित्तलस्य पुष्पमिव । तदाकृतित्वात् ।) कुसुमाञ्जनम् । इत्यमरः । २ । ६ । १०३ ॥

रीव, ऋ ञ चीवे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अरिरीवत् । ञ, रीवति रीवते । चीवो ग्रहणसंवरणयोः । इति दुर्गादासः ॥

रु, ङ वधे । गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, रवते । इति दुर्गादासः ॥

रु, ल ध्वनौ । इति कविकल्पद्रुमः ॥ (अदा०-पर०-अक०-सेट् ।) ल, रौति रवीति पक्षी । इति दुर्गादासः ॥

रुः, पुं, शब्दः । इत्येकाक्षरकोषः ॥

रुकः, त्रि, बहुप्रदः । इति शब्दमाला ॥

रुक्, [च्] स्त्री, (रुच्+भावे क्विप् ।) शोभा । (यथा, माघे । ४ । ६६ ।
"दधद्भिरभितस्तटौ विकचवारिजाम्बूनदै-
र्व्विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः ॥")
द्युतिः । (यथा, किराते । ५ । ४५ ।
"क्षिपति योऽनुवनं विततां बृहद्-
बृहतिकामिव रौचनिकीं रुचम् ॥")
इच्छा । इति मेदिनी ॥ (यथा, महाभारते । १३ । १२४ । २८ ।
"नानाबुद्धिरुचो लोके मनुष्यान्नूनमिच्छसि ।
ग्रहीतुं स्वगुणैः सर्व्वांस्तेनासि हरिणः कृशः ॥"
तेजः । यथा, रघुः । ६ । ६ ।
"अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥")
शारिकाशुकवाक् । इति शब्दरत्नावली ॥

रुक्, [ज्] स्त्री, (रुज्+क्विप् ।) रोगः । इत्यमरः ।२।६।५१ ॥ (यथा, भागवते । ६ ।१। ८ ।
"दोषस्य दृष्ट्वा गुरुलाघवं यथा
भिषक् चिकित्सेत रुजां निदानवित् ॥"
रुजति पीड़यतीति । पीड़ादायके, त्रि । यथा, महाभारते । ५ । ८४ । १ ।
"प्रयान्तं देवकीपुत्त्रं परवीररुजो दश ।
महारथा महाबाहुमन्वयुः शस्त्रपाणयः ॥"
अथवा परस्य वीराणां रुक् येरिति ॥)

रुक्प्रतिक्रिया, स्त्री, (रुजः प्रतिक्रिया निरसनम् ।) चिकित्सा । इत्यमरः । २ । ३ । ५० ॥

रुक्मं, क्ली, (रोचते शोभते इति । रुच्+"युजिरुचितिजां कुश्च । उणा० १ । १४५ । इति मक् कवर्गश्चान्तादेशः ।) काञ्चनम् । (यथा, रामायणे । २ । ७० । २१ ।
"रुक्मनिष्कसहस्रे द्वे षोड़शाश्वशतानि च ।
सत्कृत्य कैकयीपुत्त्रं केकेयो धनमादिशत् ॥")
धुस्तूरम् । इत्यमरः ॥ लोहम् । इति मेदिनी । मे, २८ ॥ (अस्य पर्य्यायो यथा,—
"कृष्णायसं काललोहं रुक्मं तत्तीक्ष्णमप्यथ ॥"
इति वैद्यकरत्नमालायाम् ॥)
नागकेशरम् । इति राजनिर्घण्टः ॥ (वर्णे, पुं । इति उज्ज्वलदत्तः । १ । १४५ ॥ दीप्तिशीले, त्रि । यथा, ऋग्वेदे । ५ । ६१ । १२ ।
"दिवि रुक्म इवोपरि ॥"
"दिवि द्युलोके रुक्मो रोचमान आदित्य इव ।" इति तद्भाष्ये सायणः ॥)

रुक्मकारकः, पुं, (रुक्मं स्वर्णालङ्कारं करोतीति । कृ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ततः स्वार्थे कन् ।) स्वर्णकारः । इत्यमरः । २ । १० । ८ ॥

रुक्माङ्गदः, पुं, राजविशेषः । यथा । अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नरपतिर्दिग्विजयव्यापारक्रमेणागत्य चन्द्रभागानदीतीरे समावेशितकटको वर्त्तते । इत्यादि हितोपदेशे १ परिच्छेदः ॥

रुक्मिणी, स्त्री, (रुक्मो वर्णोऽस्त्यस्या इति । रुक्म+इनिः । ङीप् ।) कृष्णमहिषीविशेषः । तत्पर्य्यायः । ईः २ रमा ३ सिन्धुजा ४ मामा ५ चला ६ हीरा ७ चपला ८ वृषाकपायी ९ चपला १० इन्दिरा ११ लक्ष्मीः १२ पद्मालया १३ पद्मा १४ कमला १५ श्रीः १६ हरिप्रिया १७ । इति जटाधरः ॥ अस्या विवरणं यथा,
"विदर्भराजो धर्म्मात्मा भीष्मको नाम धार्म्मिकः ।
बभूवुस्तस्य पुत्त्रास्तु नाम्ना रुक्माादयः शुभाः ॥
तेषामवरजा कन्या रुक्मिणी रुक्मवर्णिनी ।
कमलांशेन सम्भूता सर्व्वलक्षणशोभिता ॥
राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
साक्षाल्लक्ष्मीस्तु विज्ञेया प्राकट्येनैव पार्व्वति ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥ * ॥
(रुक्मिण्या सह शिशुपालस्य विवाहघोषणा श्रीकृष्णस्य रुक्मिणीहरणं कृतायाश्च तस्या यादवैः सह राज्ञां तुमुलयुद्धादिकं हरिवंशे । ११६ अध्याये द्रष्टव्यम् ॥ * ॥ नारदस्य रुक्मिण्यै पारिजातपुष्पप्रदानवृत्तान्तं तत्रैव च १२२ अध्याये द्रष्टव्यम् ॥ * ॥ अस्याः सन्ततिनामानि यथा तत्रैव । १६० । ४—६ ।
"—————रुक्मिणीतनयान् शृणु ।
प्रद्युम्नः प्रथमं यज्ञे शम्बरान्तकरः सुतः ॥
द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथः ।
चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च ॥
सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ।
चारुबाहुः कनीयांश्च कन्या चारुमती तथा ॥")
स्वर्णक्षीरी । इति राजनिर्घण्टः ॥

रुक्मिणीव्रतं, क्ली, (रुक्मिण्या व्रतम् ।) व्रतविशेषः । यथा,—
सूत उवाच ।
"जामदग्न्यः समाकर्ण्य रमां तां पुत्त्रगर्हिणीम् ।
कल्केरभिमतं बुद्ध्वा कारयद्रुक्मिणीव्रतम् ॥
व्रतेन तेन च रमा पुत्राढ्या सुभगा सती ।
सर्व्वभोगेन संयुक्ता बभूव स्थिरयौवना ॥
शौनक उवाच ।
विधानं ब्रूहि मे सूत व्रतस्यास्य च यत् फलम् ।
पुरा केन कृतं धर्म्मं रुक्मिणीव्रतमुत्तमम् ॥
सूत उवाच ।
वृषपर्व्वसुता ब्रह्मन् ! राजपुत्त्री शर्म्मिष्ठा वार्षपर्व्वणी ।
अवगाह्य सरोनीरं सोमं हरमपश्यत ।
सा सखीभिः परिवृता देवयान्या च संगता ।
शम्भुभीत्या समुत्थाय पर्य्यधुर्व्वसनं द्रुतम् ॥
तत्र शुक्रस्य कन्या या वसनव्यत्ययमात्मनः ।
संलक्ष्य कुपिता प्राह वसनं त्यज भिक्षुकि ! ॥

इति दानवकन्या सा दासीभिः परिवारिता ।
तां तस्या वाससा बद्धा कूपे क्षिप्त्वा गता गृहम् ॥
तां कूपमध्यां रुदतीं जलार्थी नहुषात्मजः ।
करे स्पृश्य समुद्धृत्य प्राह का त्वं वरानने ॥
सा शुक्रपुत्त्री वसनं परिधाय ह्रिया भिया ।
शर्म्मिष्ठया कृतं सर्व्वं प्राह राजानमीक्षती ॥
ययातिस्तदभिप्रायं ज्ञात्वानुज्ञाप्य शोभनाम् ।
आश्वास्य तां ययौ गेहं तस्याः परिणयादृतः ॥
सा गत्वा भवनं शुक्रं प्राह शर्म्मिष्ठया कृतम् ।
तच्छ्रुत्वा कुपितं विप्रं वृषपर्व्वाह सान्त्वयन् ॥
दण्डं मां दण्डय विभो रोषो यद्यस्ति ते मयि ।
शर्म्मिष्ठां वाप्यपत्यां कुरु यन्मनसेप्सितम् ॥
राजानं प्रणतं पादे पितुर्दृष्ट्वा रुषाब्रवीत् ।
देवयानी त्वियं कन्या मम दासी भवत्विति ॥
समानीय तदा राजा दास्ये तां विनियुज्य सः ।
ययौ निजगृहं ज्ञानी देवं परमकं स्मरन् ॥
ततः शुक्रस्समानीय ययातिं प्रतिलोमकम् ।
तस्मै ददौ तां विधिवत् देवयानीं तया सह ॥
दत्त्वा प्राह नृपं विप्रोऽप्येनां राजसुतां यदि ।
शयने नयसे सद्यो जरा त्वामुपभोक्ष्यति ॥
शुक्रस्यैतद्वचः श्रुत्वा राजा तां वरवर्णिनीम् ।
अदृश्यां स्थापयामास देवयान्यनुगां भिया ॥
सा शर्म्मिष्ठा राजपुत्त्री दुःखशोकभयाकुला ।
नित्यं दासीशताकीर्णा देवयानीन्तु सेवते ॥
एकदा सा वनगता रुदती जाह्नवीतटे ।
विश्वामित्रं मुनिं सा तं ददर्श स्त्रीभिरावृतम् ॥
व्रजिनं पुण्यगन्धाभिः सुरूपाभिः सुवासितम् ।
कारयन्तं व्रतं माल्यधूपदीपोपहारकैः ॥
निर्म्मायाष्टदलं पद्मं वेदिकायां सुचिह्नितम् ।
रम्भापोतैश्चतुर्भिस्तु चतुष्कोणं विराजितम् ॥
वाससा निर्म्मितगृहे स्वर्णपट्टैर्विचित्रिते ।
निर्म्मितश्रीवासुदेवं नानारत्नविघट्टितम् ॥
पौरुषेण च सूक्तेन नानागन्धोदकैः शुभैः ।
पञ्चामृतैः पञ्चगव्यैर्यामन्त्रैर्हिजेरितैः ॥
स्नापयित्वा भद्रपीठे कर्णिकायां प्रपूजयन् ।
पञ्चभिर्दशभिर्व्वापि षोड़शैरुपचारकैः ॥
पाद्यमध्र्यमनघं शीतलं सुमनोहरम् ।
परमानन्दजनकं गृहाण परमेश्वर ॥
दूर्व्वाचन्दनगन्धाढ्यमर्घ्ययुक्तं प्रयत्नतः ।
गृहाण रुक्मिणीकान्त प्रपन्नस्य मम प्रभो ॥
नानातीर्थोद्भवं वारि सुगन्धि सुमनोहरम् ।
गृहाणाचमनीयं त्वं श्रीनिवास श्रिया सह ॥
नानाकुसुमगन्धाढ्यं सूत्रग्रथितसुत्तमम् ।
वक्षःशोभाकरं चारु माल्यं नय सुरेश्वर ॥
तन्तुसन्तानसन्धानरचितं वस्त्र हरे ।
गृहाणावरणं शुद्धं निरावरण सप्रिय ॥
यज्ञसूत्रमिदं देव प्रजापतिविनिर्म्मितम् ।
गृहाण वासुदेव त्वं रुक्मिण्या रमया सह ॥
नानारत्नसमायुक्तं स्वर्णसुक्तादिघट्टितम् ।
प्रियया सह देवेश गृहाणाभरणं मम ॥
दधिक्षीरगुड़ान्नादिपूपलड्डुकखण्डकान् ।
गृहाण रुक्मिणीनाथ सनाथं कुरु मां प्रभो ॥
कर्पूरागुरुगन्धाढ्यं परमानन्ददायकम् ।
धूपं गृहाण वरद वैदर्भ्या प्रियया सह ॥
भक्तानां गेहसक्तानां संसारध्वान्तनाशनम् ।
दीपमालोकय विभो जगदालोकनादर ॥
श्यामसुन्दर पद्माक्ष पीताम्बर चतुर्भुज ।
प्रपन्नं पाहि देवेश रुक्मिण्या सहिताच्युत ॥
इति तासां व्रतं दृष्ट्वा मुनिं नत्वा सुदुःखिता ।
शर्म्मिष्ठा मिष्टवचना कृताञ्जलिरुवाच ताः ॥

शर्म्मिष्ठोवाच ।

राजपुत्त्रीं दुर्भगां मां स्वामिना परिवर्ज्जिताम् ।
त्रातुमर्हथ हे देव्यो व्रतेनानेन कर्म्मणा ॥
श्रुत्वा तु ता वचस्तस्याः कारुण्याच्च कियत् कियत् ।
पूजोपकरणं दत्त्वा कारयामासुरादरात् ॥
व्रतं कृत्वा तु शर्म्मिष्ठा लब्ध्वा स्वामिनमीश्वरम् ।
कृत्वा पुत्त्रान् सुसम्पुष्टा समभूत् स्थिरयौवना ॥
सीता चाशोकवनिकामध्ये सरमया सह ।
व्रतं कृत्वा पतिं लेभे रामं राक्षसनाशनम् ॥
हृदम्बप्रसादेन कृत्वेदं द्रौपदी व्रतम् ।
पतियुक्ता दुःखमुक्ता बभूव स्थिरयौवना ॥
तथा रमा सिते पक्षे वैशाखे द्वादशीदिने ।
जामदग्न्याद्व्रतं चक्रे पूर्णं वर्षचतुष्टयम् ॥
पट्टसूत्रं करे बद्धा भोजयित्वा द्विजान् बहून् ।
भुक्त्वा हविष्यं क्षीराक्तं सुमिष्टं स्वामिना सह ॥
बुभुजे पृथिवीं सर्व्वामपूर्व्वां स्वजनैर्वृता ।
सा पुत्त्रौ सुषुवे साध्वी मेघमालबलाहकौ ॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतौ ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ ॥

व्रतवरमिति कृत्वा सर्व्वसम्पत्समृद्धा
भवति विदिततत्त्वा पूजिता पूर्णकामा ।
हरिचरणसरोजद्वन्द्वभक्त्यैकताना
व्रजति गतिमपूर्व्वां ब्रह्मविद्भिरगम्याम् ॥”

इति कल्किपुराणे रुक्मिणीव्रतम् ३१ अध्यायः ॥

रुक्मिदर्पः, पुं, (रुक्मिणि भीष्मकपुत्त्रे दर्पो यस्य सः । तस्य रुक्मिनाशकत्वात् ।) बलदेवः । इति हलायुधः ॥

रुक्मिदारी, [न्] पुं, (रुक्मिणं दारयतीति । दृ + णिच् + णिनिः ।) बलदेवः । इति त्रिकाण्डशेषः ॥

रुक्मिभित्, [द्] पुं, (रुक्मिणं भिनत्तीति । भिद् + क्विप् ।) बलदेवः । इति हेमचन्द्रः । २ । १३८ ॥

रुक्मी, [न्] पुं, (रुक्मो वर्णविशेषोऽस्यास्तीति । रुक्म + इनिः ।) भीष्मकराजज्येष्ठपुत्त्रः । यथा,
“राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान् ।
तस्य पञ्चाभवन् पुत्त्राः कन्यैका रुचिरानना ॥
रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनन्तरः ।
रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥”

इति श्रीभागवते १० स्कन्धे ५२ अध्यायः ॥

(रुक्मिणीहरणानन्तरं कृष्णेन सहास्य युद्धादिविवरणं हरिवंशे ११७ अध्याये तथा प्रद्युम्नेन सहास्य कन्यापरिणयवृत्तान्तः अनिरुद्धेन सहास्य पौत्र्याः परिणयस्तदा बलदेवादस्य मृत्युविवरणञ्च ११८ अध्याये विस्तरशो द्रष्टव्यम् ॥)

रुक्मिष्ठ, [न्] क्ली, मलम् । इति केचित् ॥

रुचः, त्रि, अप्रेम । अचिक्कणः । रुहधातोरौणादिकसप्रत्ययेन निष्पन्नः । इत्युणादिकोषः ॥ (नीरसः । तद्यथा, वायुस्वरूपवर्णने ।
“दोषधातुमलादीनां नेता शीघ्रः समीरणः ।
रजोगुणमयः सूक्ष्मो रुक्षः शीतो लघुश्चलः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रुग्नः, त्रि, (रुज् + क्तः । ओदितश्चेति नः ।) रोगादिना कुटिलीकृतः । तत्पर्य्यायः । भुग्नः २ । इत्यमरः ॥ (यथा, रामायणे । २ । १०२ । ६ ।
“त्वया विहीनस्तव शोकरुग्न-
स्त्वां संस्मरन्नेव गतः पिता ते ॥”)
रोगी । इति राजनिर्घण्टः ॥

रुच, ङ रु दीप्तिप्रकाशयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) प्रीतिरिह अनुरागविशेषः । तत्र यस्यानुरागस्तस्य सम्प्रदानत्वम् । ङ, रोचते अन्नं बुभुक्षवे । रु, अरुचत् । इति दुर्गादासः ॥

रुचकं, क्ली, (रोचतेऽनेनेति । रुच् + “बहुलमन्यत्रापि ।” उणा० २ । ३७ । इति क्वुन् ।) सर्जिकाक्षारम् । अश्वाभरणम् । माल्यम् । सौवर्च्चलम् । (यथा,—
“सौवर्च्चलं स्याद्रुचकमन्यपाकञ्च तन्मतम् ॥”
तथास्य गुणाः ।
“रुचकं रोचनम्भेदि दीपनम्पाचनम्परम् ।
सुस्नेहं वातनुन्नातिपित्तलं विशदं लघु ।
उद्गारशुद्धिदं सूक्ष्मं विबन्धानाहशूलजित् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
माङ्गल्यद्रव्यम् । (यथा, भागवते । ३ ।२३।३१ ।
“हारेण च महार्हेण रुचकेन च भूषितम् ॥”
“रुचकेन मङ्गलद्रव्येण ।” इति श्रीधरः ।) उत्कटः । इति मेदिनी । के, १४६ ॥ स्वादुरसः । इति शब्दरत्नावली ॥ रोचना । विड़ङ्गम् । इति हेमचन्द्रः ॥ लवणम् । इति हारावली ॥ (दक्षिणदिक् । यथा, बृहत्संहितायाम् । ५३ । ३५ ।
“प्राक्पश्चिमावलिन्दावन्तगतौ तदवधिस्थितौ शेषौ ।
रुचके द्वारं न शुभदमुत्तरतोऽन्यानि शस्तानि ॥”
“रुचकं मातुलुङ्गकम् ।” इत्युज्ज्वलदत्तः । २ । ३७ ॥)

रुचकः, पुं, (रोचते इति । रुच् + क्वुन् ।) बीजपूरः । निष्कः । दन्तः । कपोतः । इति मेदिनी ॥ (यथा, बृहत्संहितायाम् । ६९ । २ ।
“जीवेन भवति हंसः
सौरेण शशः कुजेन रुचकश्च ॥”
पर्व्वतविशेषः । यथा, विष्णुपुराणे ।२।२।२६।
“त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा ॥”
स्तम्भः । यथा, बृहत्संहितायाम् । ५३ । २८ ।

"समचतुरस्रो रुचको
वज्रोऽष्टाश्रिर्द्विवज्रको द्विगुणः ॥")

रुच्, स्त्री, (रुच्+क्विप् । पक्षे टाप् ।) दीप्तिः । शोभा । इच्छा । (यथा, महाभारते ।३।५।१३।

"तद्वै तस्मै न रुचामभ्युपैति
ततश्चाहं समसन्यन्न मन्ये ॥")

शारिकाशुकवाक् । इति शब्दरत्नावली ॥

रुचिः, स्त्री, (रुच्यते इति । रुच्+"इगुपधात् कित् ।" उणा० ४ । ११९ । इति इन् । सच कित् ।) अभिष्वङ्गः । अनुरागः । आसक्तिर्वा । स्पृहा । (यथा, किराते । १० । ६२ ।

"रुचिकरमपि नार्थवद्बभूव
स्तिमितसमाधिशुचौ पृथात्मजे ॥"

"अम्लो रुचिकरो हृद्यः प्रीणनो वह्निदीपनः ॥"
इति वैद्यकराजवल्लभे द्रव्यगुणव्याख्यायाम् ॥) अभिलाषः । गभस्तिः । किरणः । इत्यमरभरतौ ॥ शोभा । इति मेदिनी ॥ (यथा, रघुः । ५ । ६७ ।

"लक्ष्मीर्विनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥")

बुभुक्षा । इति हेमचन्द्रः ॥ गोरोचना । इति राजनिर्घण्टः ॥ आलिङ्गनविशेषः । तल्लक्षणं यथा । नायिकाया नायकस्य संमुखे जान्वोरुपर्य्युपविश्य वक्षसि वक्षो दत्त्वा यदवस्थानम् । इति कामशास्त्रम् ॥

रुचिः, पुं, (रोचते शोभते इति । रुच्+इन् । सच कित् ।) प्रजापतिविशेषः । स च रौच्यमनुपिता । यथा,—

मार्कण्डेय उवाच ।

"रुचिः प्रजापतिः पूर्व्वं निर्म्ममो निरहङ्कृतिः ।
अत्रास्तमितशायी च चचार पृथिवीमिमाम् ॥
अनग्निमनिकेतन्तमेकाहारमसथाश्रयम् ।
विमुक्तसङ्गं वं दृष्ट्वा प्रोचुः स्वपितरो मुनिम् ॥

पितर ऊचुः ।

वत्स कस्मात् त्वया पुण्यो न कृतो दारसंग्रहः ।
स्वर्गापवर्गहेतुत्वाद्बन्धस्तेनानिशं विना ॥
गृही समस्तदेवानां पितॄणाञ्च तथार्हणाम् ।
ऋषीणामतिथीनाञ्च कुर्व्वन् लोकानुपाश्नुते ॥
स्वाहोच्चारणतो देवान् स्वधोच्चारणतः पितॄन् ।
विभजन्नन्नदानेन भूताद्यानतिथीनपि ॥
स त्वं दैवादृणाद्बन्धं बन्धमस्मदृणादपि ।
आवाप्नोषि मनुष्यर्षिभूतेभ्यश्च दिने दिने ॥
अनुत्पाद्य सुतान् देवानसन्तर्प्य पितॄंस्तथा ।
भूतादींश्च कथं मौढ्यात् सुगतिं गन्तुमिच्छसि ॥

रुचिरुवाच ।

परिग्रहोऽतिदुःखाय पापायाधोगतेस्तथा ।
भवत्यतो मया पूर्व्वं न कृतो दारसंग्रहः ॥
प्रक्षाल्यतेऽनुदिवसं यदात्मा निष्परिग्रहैः ।
ममत्वपङ्कदिग्धोऽपि चिन्ताम्भोभिर्व्वरं हि तत् ॥"
इत्यादि ॥

पितर ऊचुः ।

"युक्तं प्रक्षालनं कर्त्तुमात्मनो नियतेन्द्रियैः ।
किन्तु सैपाय मार्गोऽयं यत्र त्वं पुत्त्र वर्त्तसे ॥"
इत्यादि ॥ * ॥

मार्कण्डेय उवाच ।

"स तेन पितृवाक्येन भृशमुद्विग्नमानसः ।
कन्याभिलाषी विप्रर्षिः परिबभ्राम मेदिनीम् ॥
कन्यामलभमानोऽसौ पितृवाक्याग्निदीपितः ।
चिन्तामवाप महतीमतीवोद्विग्नमानसः ॥
किं करोमि क्व गच्छामि कथं मे दारसंग्रहः ।
क्षिप्रं भवेत् पितॄणां यो ममाभ्युदयकारकः ॥
इति चिन्तयतस्तस्य मतिर्जाता महात्मनः ।
तपसाराधयाम्येनं ब्रह्माणं कमलोद्भवम् ॥
ततो वर्षशतं दिव्यं तपस्तेपे स वैधसम् ।
दिदृक्षुः सुचिरं कालं रुचिर्नियममास्थितः ॥
ततः स्वन्दर्शयामास ब्रह्मा लोकपितामहः ।
उवाच च प्रसन्नोऽस्मीत्युच्यतामभिवाञ्छितम् ॥
ततोऽसौ प्रणिपत्याह ब्रह्माणं जगतः पतिम् ।
पितॄणां वचनात्तेन यत् कर्त्तुमभिवाञ्छितम् ॥
ब्रह्मा चाह रुचिं विप्रं श्रुत्वा तस्याभिवाञ्छितम् ।
प्रजापतिस्त्वं भविता स्रष्टव्या भवता प्रजाः ॥
सृष्ट्वा प्रजाः सुतान् विप्र समुत्पाद्य क्रियास्तथा ।
कृत्वा कृताधिकारस्त्वं ततः सिद्धिमवाप्स्यसि ॥
स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहम् ।
कामञ्चेममभिध्याय क्रियतां पितृपूजनम् ॥
त एव तुष्टाः पितरः प्रदास्यन्ति तवेप्सितम् ।
पत्नीं सुतांश्च सन्तुष्टाः किं न दद्युः पितामहाः ॥

मार्कण्डेय उवाच ।

इत्यृषिर्व्वचनं श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः ।
नद्या विविक्ते पुलिने चकार पितृतर्पणम् ॥
तुष्टाव च पितॄन् विप्रः स्तवैरेभिरथादृतः ।
एकाग्रः प्रयतो भूत्वा भक्तिनम्रात्मको रुचिः ॥"

रुचिकृतपितृस्तोत्रं यथा,—

रुचिरुवाच ।

"नमस्येऽहं पितॄन् भक्त्या ये वसन्त्यधिदैवतम् ।
देवैरपि हि तर्प्यन्ते ये श्राद्धेषु स्वधोत्तरैः ॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः ।
श्राद्धैर्म्मनोमयैर्भक्त्या भुक्तिमुक्तिमभीप्सुभिः ॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान् ।
श्राद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः ॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैर्दिवि ।
तन्मयत्वेन वाञ्छद्भिर्ऋद्धिमात्यन्तिकीं पराम् ॥
नमस्येऽहं पितॄन् मर्त्त्यैरर्च्यन्ते भुवि ये सदा ।
श्राद्धेषु श्रद्धयाभीष्टलोकपुष्टिप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा ।
वाञ्छिताभीष्टलाभाय प्राजापत्यप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्तेऽरण्यवासिभिः ।
वन्यैः श्राद्धैर्यताहारैस्तपोनिर्द्धूतकल्मषैः ॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतधारिभिः ।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः ॥
नमस्येऽहं पितॄन् श्राद्धे राजन्यास्तर्पयन्ति यान् ।
कव्यैरशेषैर्विधिवल्लोकद्वयफलप्रदान् ॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा ।
स्वकर्म्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः ॥
नमस्येऽहं पितॄन् श्राद्धे ये शूद्रैरपि भक्तितः ।
सन्तर्प्यन्ते जगत्यस्मिन् नाम्ना ख्याताः सुकालिनः ॥
नमस्येऽहं पितॄन् श्राद्धे पाताले ये महासुरैः ।
सन्तर्प्यन्ते स्वधाहारास्त्यक्तदम्भमदैः सदा ॥
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले ।
भोगैरशेषैर्विविधैर्नागैः कामानभीप्सुभिः ॥
नमस्येऽहं पितॄन् श्राद्धे सर्पैः सन्तर्पितान् सदा ।
तत्रैव विविधैर्म्मन्त्रैर्भोगसम्पत्समन्वितैः ॥

पितॄन्नमस्ये निवसन्ति साक्षाद्
ये देवलोकेऽथ महीतले वा ।
तथान्तरीक्षे च सुरादिपूज्या-
स्ते संप्रतीच्छन्तु मयोपनीतम् ॥
पितॄन्नमस्ये परमात्मभूता
ये वै विमाने निवसन्त्यमूर्त्ताः ।
यजन्ति यानस्तमला मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून् ॥
पितॄन्नमस्ये दिवि ये च मूर्त्ताः
स्वधाभुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु ॥
तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान् ।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
गजाश्वरत्नानि महागृहाणि ॥
सूर्य्यस्य ये रश्मिषु चन्द्रबिम्बे
शुक्ले विमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयै-
र्गन्धादिना पुष्टिमतो व्रजन्तु ॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः ।
ये पिण्डदानेन मुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयैः ॥
ये खड्गमांसेन सुरैरभीष्टैः
कृष्णैस्तिलैर्दिव्यमहोरगैश्च ।
कालेन शाकेन महर्षिवर्य्यैः
संप्रीणितास्ते मुदमत्र यान्तु ॥
कव्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव येषाममरार्च्चितानाम् ।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धादिभोज्येषु मयाहृतेषु ॥
दिने दिने ये प्रतिगृह्णतेऽर्च्चां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तुष्टिम् ॥
पूज्या द्विजानां कुमुदेन्दुभासो
ये क्षत्त्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
नीलीनिभाः शूद्रजनस्य ये च ॥
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादिनिवेदनेन ।

तथाग्निहोमेन च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्व्वाण्यतितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहृतानि ।
तृप्ताश्च ये भूतिसृजो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
निर्णाशयन्तस्त्वशिवं प्रजानाम् ।
आद्याः सुराणाममरेशपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे
दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरःस्थिताः ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
ऊर्द्धंतस्त्वर्य्यमा रक्षेत् कव्यवालोऽनलोऽप्यधः ॥
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्व्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥
विश्वो विश्वभुगाराध्यो धन्यो धर्म्मः सनातनः ।
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ॥
कल्याणः कल्यदः कर्त्ता कल्यः कल्यतराश्रयः ।
कल्यताहेतुरनघः षडित्येते गणाः स्मृताः ॥
वरो वरेण्यो वरदस्तुष्टिदः पुष्टिदस्तथा ।
विश्वपाता तथा धाता सप्त चैते गणाः स्मृताः ॥
महान्महात्मा महितो महिमावान्महाबलः ।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यो विभूतिदः ।
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ॥
एकत्रिंशत् पितृगणा येर्व्याप्तमखिलं जगत् ।
ते मेऽत्र तृप्तास्तुष्यन्तु यच्छन्तु च समीहितम् ॥”
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृस्तवः ॥
मार्कण्डेय उवाच ।
“एवन्तु स्तुवतस्तस्य तेजसो राशिरुच्छ्रितः ।
प्रादुर्ब्बभूव सहसा गगनव्याप्तिकारकः ॥
तद्दृष्ट्वा सुमहत्तेजः समाच्छाद्य स्थितं जगत् ।
जानुभ्यामवनिं गत्वा रुचिः स्तोत्रमिदं जगौ ॥
अमूर्त्तानाञ्च मूर्त्तानां पितॄणां दीप्ततेजसाम् ।
नमस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषाम् ॥
इन्द्रादीनाञ्च नेतारो दक्षमारीचयोस्तथा ।
सप्तर्षीणान्तथान्येषां तान् नमस्यामि काम-
दान् ॥
मन्वादीनाञ्च नेतारः सूर्य्याचन्द्रमसोस्तथा ।
तान्नमस्याम्यहं सर्व्वान् पितॄनप्सर्णवेषु च ॥
नक्षत्राणां ग्रहाणाञ्च वाय्वग्निनभसां तथा ।
द्यावापृथिव्योश्च तथा नमस्यामि कृताञ्जलिः ॥
प्रजापतेः कश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यश्च तथा नमस्यामि कृताञ्जलिः ॥
नमो गणेभ्यः सप्तभ्यस्तथा लोकेषु सप्तसु ।
स्वयम्भुवे नमस्यामि ब्रह्मणे योगचक्षुषे ॥
सोमाधाराः पितृगणा योगमूर्त्तिधरा हि ते ।
नमस्यामि ततः सोमं पितरं जगतामहम् ॥
अग्निरूपांस्तथैवान्यान्नमस्यामि पितॄनहम् ।
अग्नीषोममयं विश्वं यत एतदशेषतः ॥
ये तु तेजसि ये चैते सोमसूर्य्याग्निमूर्त्तयः ।
जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ॥
तेभ्योऽखिलेभ्यो योगिभ्यः पितृभ्यो यतमानसः ।
नमो नमो नमस्ते मे प्रसीदन्तु स्वधाभुजः ॥
श्रीमार्कण्डेय उवाच ।
एवं स्तुतास्ततस्तेन तेजसो मुनिसत्तमाः ।
निश्चक्रमुस्ते पितरो भासयन्तो दिशो दश ॥
निवेदितन्तु यत्तेन पुष्पगन्धानुलेपनम् ।
तद्भूषितानथ स तान् ददृशे पुरतः स्थितान् ॥
प्रणिपत्य रुचिर्भक्त्या पुनरेव कृताञ्जलिः ।
नमस्तुभ्यं नमस्तुभ्यमित्याह पृथगादृतः ॥
ततः प्रसन्नाः पितरस्तमूचुर्म्मुनिसत्तमम् ।
वरं वृणीष्वेति स तानुवाचानतकन्धरः ॥
साम्प्रतं सर्गकर्तृत्वमादिष्टं ब्रह्मणा मम ।
सोऽहं पत्नीमभीप्सामि धन्यां दिव्यां प्रजाव-
तीम् ॥
पितर ऊचुः ।
अत्रैव सद्यः पत्नी ते भवित्री मनोरमा ।
तस्याञ्च पुत्त्रो भविता भवतो मुनिसत्तम ! ॥
मन्वन्तराधिपो धीमान् त्वन्नाम्नैवोपलक्षितः ।
रुचे रौच्य इति ख्यातिं प्रयास्यति जगत्त्रये ॥
तस्यापि बहवः पुत्त्रा महाबलपराक्रमाः ।
भविष्यन्ति महात्मानः पृथिवीपरिपालकाः ॥
त्वञ्च प्रजापतिर्भूत्वा प्रजाः सृष्ट्वा चतुर्व्विधाः ।
क्षीणाधिकारो धर्म्मज्ञस्ततः सिद्धिमवाप्स्यसि ॥
स्तोत्रेणानेन च नरो योऽस्मांस्तोष्यति भक्तितः ।
तस्य तुष्टा वयं भोगान् दास्यामो ज्ञानमुत्तमम् ॥
शरीरारोग्यमैश्वर्य्यं पुत्त्रपौत्त्रादिसन्ततिम् ।
प्रदास्यामो न सन्देहो यच्चान्यदभिवाञ्छितम् ॥
तस्मात् पुण्यफलं लोके वाञ्छद्भिः सततं नरैः ।
पितॄणाञ्चाक्षयां तृप्तिं स्तुयाः स्तोत्रेण मानवैः ॥
श्राद्धे च य इमं भक्त्या अस्मत्प्रीतिकरं स्तवम् ।
पठिष्यन्ति द्विजाग्र्याणां भुञ्जतां पुरतः स्थिताः ॥
स्तोत्रश्रवणसंप्रीत्या सन्निधाने परे कृते ।
अस्माभिरक्षयं श्राद्धं तद्भविष्यत्यसंशयम् ॥
यद्यप्यश्रोत्रियं श्राद्धं यद्यप्युपहतं भवेत् ।
अन्यायोपात्तवित्तेन यदि वा कृतमन्यथा ॥
अश्राद्धार्हैरुपहृतैरुपहारैस्तथा कृतम् ।
अकालेऽप्यथवा देशे विधिहीनमथापि वा ॥
अश्रद्धया वा पुरुषैर्द्दम्भमाश्रित्य वा कृतम् ।
अस्माकं प्रीतये श्राद्धं तथाप्येतदुदीरणात् ॥
यत्रैतत् पठ्यते श्राद्धे स्तोत्रमस्मत्सुखावहम् ।
अस्माकं जायते तृप्तिस्तत्र द्वादशवार्षिकी ॥
हेमन्ते द्वादशाब्दानि तृप्तिमेतत् प्रयच्छति ।
शिशिरे द्विगुणाब्दानि तृप्तिं स्तोत्रमिदं श्रुतम् ॥
वसन्ते षोड़शसमास्तृप्तये श्राद्धकर्म्मणि ।
ग्रीष्मे च षोड़शैवैतत् पठितं तृप्तिकारकम् ॥
विकलेऽपि कृते श्राद्धे स्तोत्रेणानेन साधिते ।
वर्षासु तृप्तिरस्माकमक्षया जायते रुचे ॥
शरत्कालेऽपि पठितं श्राद्धकाले प्रयच्छति ।
अस्माकमेतत् पुरुषैस्तृप्तिं पञ्चदशाब्दिकीम् ॥
यस्मिन् गृहेऽपि लिखितमेतत्तिष्ठति नित्यदा ।
सन्निधानं कृते श्राद्धे तत्रास्माकं भविष्यति ॥
तस्मादेतत्त्वया श्राद्धे विप्राणां भुञ्जतां पुरः ।
श्रावणीयं महाभाग अस्माकं तुष्टिकारकम् ॥”
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृस्तवे ॥
मार्कण्डेय उवाच ।
“ततस्तस्मान्नदीमध्यात् समुत्तस्थौ मनोरमा ।
प्रम्लोचा नाम तन्वङ्गी तत्समीपे वराप्सराः ॥
सा चोवाच महात्मानं रुचिं सुमधुराक्षरम् ।
प्रश्रयावनता सुभ्रूः प्रम्लोचा वै वराप्सराः ॥
अतीवरूपिणी कन्या मत्सुता तपतांवर ।
जाता वरुणपुत्त्रेण पुष्करेण महात्मना ॥
तां गृहाण मया दत्तां भार्य्यार्थे वरवर्णिनीम् ।
मनुर्म्महामतिस्तस्यां समुत्पत्स्यति ते सुतः ॥
मार्कण्डेय उवाच ।
तथेति तेन साप्युक्ता तस्मात्तोयात्वपुष्मतीम् ।
उज्जहार ततः कन्यां मालिनीं नाम नामतः ॥
नद्याश्च पुलिने तस्मिन् स मुनिर्म्मुनिसत्तम ! ।
जग्राह पाणिं विधिवत् समानाय्य महामुनीन् ॥
तस्यां तस्य सुतो जज्ञे महावीर्य्यो महामतिः ।
रौच्योऽभवत् पितुर्नाम्ना ख्यातोऽत्र वसुधातले ॥
तस्य मन्वन्तरे देवास्तथा सप्तर्षयश्च ये ।
तनयाश्च नृपाश्चैव ते सम्यक् कथितास्तव ॥
धर्म्मवृद्धिस्तथारोग्यं धनधान्यसुतोद्भवः ।
नृणां भवत्यसन्दिग्धमस्मिन् मन्वन्तरे श्रुते ॥
पितृस्तवं तथा श्रुत्वा पितॄणाञ्च तथा गणान् ।
सर्व्वान् कामानवाप्नोति तत्प्रसादान्नरो मुने ! ॥”
इति मार्कण्डेयपुराणे रौच्यमन्वन्तरं समाप्तम् ॥
गारुड़े ८८ । ९० अध्यायेऽप्येवमस्ति ॥

रुचितं, त्रि, (रोचते इति । रुच्+“रुचिवचि-
कुचिकुटिभ्यः कितच् ।” उणा० ४ । २८५ ।
इति कितच् ।) मिष्टवस्तु । इत्युणादिकोषः ॥
(रुच्+क्तः । अभिलषितः । यथा, महा-
भारते । ५ । १०० । १६ ।
“मातले कच्चिदत्रापि रुचितस्ते वरो भवेत् ॥”)
क्ली, रुच्+भावे क्तः । इच्छा । अभिलाषः ।
यथा, महाभारते । १ । १८६ । ७८ ।
“वसावेह यथाप्रेक्ष्य रुचितं यदि तेऽनघ ॥”)

रुचिफलं, क्ली, (रुचिजनकं फलम् ।) अमृता-
ह्वम् । इति राजनिर्घण्टः ॥

रुचिरं, क्ली, (रोचते इति । रुच्+“इषिमदि-
मुदीति ।” उणा० १ । ५२ । इति किरच् ।)
मूलकम् । कुङ्कुमम् । लवङ्गम् । इति राज-
निर्घण्टः ॥ (पुं, सेनजित्पुत्त्रः । यथा, हरि-
वंशे । २० । २१ ।
“पुत्त्राः सेनजितश्चासंश्चत्वारो लोकसत्तमाः ।
रुचिरः श्वेतकेतुश्च महिम्नारस्तथैव च ॥”)

रुचिरं, त्रि, (रुच्+किरच् ।) सुन्दरम् । इत्य-
मरः ॥ (यथा, आर्य्यासप्तशत्याम् । ११७ ।
“उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचि-
राङ्गि ।

अचला अपि न महान्तः के चञ्चलभाव-
मानीताः ॥")

मिष्टम् । इत्युणादिकोषः ॥

रुचिरा, स्त्री, (रोचते इति । रुच्+किरच् । ततष्टाप् ।) गोरोचना । इति राजनिर्घण्टः ॥ (त्रयोदशाक्षरवृत्तिविशेषः । अस्य लक्षणोदाहरणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

रुचिराञ्जनः, पुं, (रुचिरः सुन्दरोऽञ्जनः ।) शोभाञ्जनः । इति राजनिर्घण्टः ॥

रुचिराश्वः, पुं, (रुचिरः सुन्दरोऽश्वो यस्य ।) राजविशेषः । स तु देवापेः श्वशुरः । यथा,—
"मरो भूपाललोकानां स्वस्तये कुरु मे वचः ।
रुचिराश्वसुतां शान्तां देवापे त्वं दशाहह ॥"
इति कल्किपुराणे १८ अध्यायः ॥

सुन्दरघोटकश्च ॥

रुचिष्यं, त्रि, (रुच्यते इति । रुच्+"रुचिभुजिभ्यां किष्यन् ।" उणा० ४ । १७८ । इति किष्यन् ।) मिष्टवस्तु । इत्युणादिकोषः ॥ (यथा, सुश्रुते । १ । ४६ । पुष्पवर्गे ।
"शिक्षाकी वातला सान्द्रा रुचिष्यानल-
दीपनी ॥")

अभिप्रेतम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, हरिवंशे । २५४ । ६० ।
"न पृथ्वीं कामये क्षत्तुर्नां सन्तुष्टोऽस्मि पदे-
स्त्रिभिः ॥
एष एव रुचिष्यो मे वरो दानवसत्तम ! ॥")

रुची, स्त्री, (रुचि+कृदिकारादिति ङीष् ।) रुचिः । यथा । रुक् रुची रुचयः समाः । इत्येकार्थसंग्रहः ॥

रुच्यं, क्ली, (रोचते इति । रुच्+"राजसूयसूर्य-म्टषोद्येति ।" ३ । १ । ११४ । इति क्यप्प्रत्ययेन निपातितम् ।) सौवर्चलम् । इति राजनिर्घण्टः ॥

रुच्यः, पुं, (रुच्+क्यप् ।) कतकवृक्षः । शालिधान्यम् । इति राजनिघण्टः ॥ पतिः । इति हेमचन्द्रः । ३।९६१ ॥ सुन्दरे, त्रि । इत्यमरः ॥ (रुचिकरः । यथा,—
"पक्वं वर्णकरं रुच्यं मांसशुक्रबलप्रदम् ।
पित्ताविरोधि वातघ्नं हृद्यं गुर्व्वनुलोमनम् ॥"
इति वैद्यकराजवल्लभे द्रव्यगुणाख्यायाम् ॥)

रुच्यकन्दः, पुं, (रुच्यः कन्दो यस्य ।) सूरणः । इति राजनिर्घण्टः ॥

रुज, ओ श औ भङ्गे । इति कविकल्पद्रुमः ॥ (तुदा०-पर० सक०-अनिट् ।) ओ, रुग्नः । श, रुजति रोगो हस्तम् । औ, रोक्ता । इति दुर्गादासः ॥

रुज, क हिंसे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक० सेट् ।) क, रोजयति । इति दुर्गादासः ॥

रुजा, स्त्री, (रुज्+क्विप् । पक्षे टाप् ।) रोगः । भङ्गः । इति मेदिनी । जे, १४ ॥ (पीड़ा । यथा, महाभारते । ८ । ३४ । १४६ ।
"निपातात् तव शस्त्राणां शरीरे याभवद्रुजा ।
तया ते मानुषं कर्म्म व्यपोढ़ं भृगुनन्दन ! ॥")

मेषी । इति हेमचन्द्रः । ४ । ३४३ ॥ कुष्ठम् । इति राजनिर्घण्टः ॥

रुजाकरं, क्ली, (रुजां रोगं करोतीति । कृ+टः ।) कर्म्मरङ्गफलम् । इति शब्दचन्द्रिका ॥

रुजाकरः, पुं, (रुजां करोतीति । कृ+टः ।) व्याधिः । यथा । व्याधिस्त्वाधी रुजाकरः । इति हेमचन्द्रः । २ । २२६ ॥ (व्याधिकारके, त्रि ॥)

रुजासहः, पुं, (रुजां सहते इति । सह+अच् ।) धन्वनवृक्षः । इति राजनिर्घण्टः ॥

रुट, इ स्तेये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । इ, रुण्टति धनं चौरेण । इति दुर्गादासः ॥

रुट, ऌ ङ दीप्तिप्रतिहत्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अक० च-सेट् ।) ऌ, अरुटत् । ङ, रोटते । प्रतिहतिः शोकादिना पातनं पुनर्हननं वा । इति दुर्गादासः ॥

रुट, क रुषि । द्युतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, रोटयति ॥ इति दुर्गादासः ॥

रुट् [ष्] स्त्री, (रुष्+क्विप् ।) क्रोधः । इत्यमरः ।१।७।२६ ॥ (यथा, भागवते । १।१८।३० ।
"स तु ब्रह्म ऋषेरंसे गतासुमुरगं रुषा ।
विनिर्गच्छन् धनुष्कोट्या निधाय पुरमागतः ॥")

रुठ, उपघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रोठति लोकं शोकः । इति दुर्गादासः ॥

रुठ, इ गत्यालस्यस्तेयखोटे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक०च-सेट् ।) पञ्चमस्वरी । इ, रुण्ठति । आलस्यं मन्दीभावः । स्तेयं चौर्य्यम् । खोटः खोड़नम् । इति दुर्गादासः ॥

रुठ, ऌ ङ प्रतीघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऌ, अरुठत् । ङ, रोठते । प्रतीघातः शोकादिना पतनं पुनर्हननं वा । इति दुर्गादासः ॥

रुड्, [ष्] स्त्री, (रुष क्रुधि+क्विप् ।) रुट् । इति व्याकरणम् ॥

रुणस्करा, स्त्री, सुखसन्दोह्या गौः । इति शब्दचन्द्रिका ॥

रुण्डः, पुं, कबन्धः । इति जटाधरः ॥ (छिन्नपादहस्तः । यथा, कथासरित्सागरे । ६५ । ११ ।
"तेनारोप्य स्थलं पृष्ठः स रुण्डः पुरुषोऽभ्यधात् ।
निकृत्तहस्तचरणो नटां छिन्नोऽस्मि शत्रुभिः ॥")

रुण्डिका, स्त्री, (रुण्डः कबन्धोऽस्त्यत्रेति । रुण्ड+ठन् ।) युद्धभूमिः । दारपिण्डिका । विभूतिः । इति शब्दरत्नावली ॥

रुतं, क्ली, (रु+क्तः ।) पशुपक्ष्यादीनां शब्दः । तत्पर्य्यायः । वाशितम् २ । इत्यमरः ॥ वासितम् ३ । इति शब्दरत्नावली ॥ (यथा, शिशुपालवधे । १६ । २५ ।
"अनुहुङ्कुरुते घनध्वनिं
न तु गोमायुरुतानि केशरी ॥")

रुद, ल घ इर् रोदे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-अक०-सेट् ।) रोदोऽश्रुविमोचनम् । ल घ, रोदिति लोकः शोकात् । इर्, अरुदत् अरोदीत् । रोदिष्यमाणमात्मानमिति भट्टौ । आत्मानविशिष्टरोदनक्रियाव्याप्यत्वात् सकर्म्मकत्वमिति जयमङ्गला । इति दुर्गादासः ॥

रुदथः, पुं, (रोदितीति । रुद् रोदने+"रुदिविदिभ्यां ङित् ।" उणा० ३ । ११६ । इति अथः । सच ङित् ।) कुक्कुरः । इत्युणादिकोषः ॥ शिशुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रुदन्तिका, } स्त्री, (रोदनं रुत् । अति अदि
रुदन्ती } बन्धने+अच्+ङीप् । स्वार्थे कन् च ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । स्रवत्तोया २ सञ्जीवनी ३ अमृतस्रवा ४ रोमाञ्चिका ५ महामांसी ६ चणगन्धी ७ सुधास्रवी ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । श्वासरक्तपित्तकफश्वासमेहनाशित्वम् । रसायनत्वञ्च । अस्य स्वरूपं यथा,—
"चणपत्रसमं पत्रं क्षुपश्चैव तथाकृतिः ।
शिशिरे जलबिन्दूनां स्रवन्तीति रुदन्तिका ॥"
इति राजनिर्घण्टः ॥

अस्य गुणाः ।
"रुदन्ती वह्निकृद्दृष्या पित्तघ्नी च रसायनी ।"
इति राजवल्लभः ॥

(रोदनशीले, त्रि । यथा,—
"धरित्रि पुष्पाञ्जलिरेष तुभ्यं
सुता मदीयास्तव पालनीयाः ।
इतीव रम्भा नमिताग्रमौलिना
भृशं रुदन्ती मकरन्दबिन्दुना ॥"
इति प्रसिद्धम् ॥)

रुदितं, क्ली, (रुद्+क्तः ।) क्रन्दनम् । इत्यमरः ॥ तद्वति, त्रि ॥ (यथा, महाभारते । १३।२३।६ ।
"केशकीटावपतितं क्षुतं श्वभिरवेक्षितम् ।
रुदितञ्चावधूतञ्च तं भागं रक्षसां विदुः ॥")

रुद्धं, त्रि, (रुध्+क्तः ।) नदीप्राकारादिना कृतवेष्टनम् । तत्पर्य्यायः । वेष्टितम् २ वलयितम् ३ संवीतम् ४ आवृतम् ५ । इत्यमरः ॥ (यथा, मेघदूते । ३६ ।
"रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ॥")

रुद्रः, पुं, (रोदयतीति । रुद्+णिच्+"रोदेर्णिलुक् च ।" उणा० २ । २२ । इति रक् । णेश्च लुक् ।) आदित्यपत्रवृक्षः । इति राजनिर्घण्टः ॥ शिवः । (यथा, महाभारते । १३ । १७ । ४६ ।
"त्रिजटश्चीरवासाश्च रुद्रः सेनापतिर्व्विभुः ॥")
गणदेवताविशेषः । इत्यमरः ॥ अयं अग्निमूर्त्तिः । यथा रुद्राय अग्निमूर्त्तये नमः । इति तिथ्यादितत्त्वे शिवपूजापद्धतिः ॥ स च ब्रह्मणः क्रोधरूपः सृष्टिकाले भ्रूमध्याज्जातः । तत्स्थः भूतप्रेतपिशाचादिः । अयमेवान्ते संहारकर्त्ता । इति भागवतम् ॥ * ॥ अथैकादशरुद्रनामानि यथा । अजः १ एकपात् २ अहिब्रध्नः ३ पिनाकी ४ अपराजितः ५ त्र्यम्बकः ६

महेश्वरः ७ वृषाकपिः ८ शम्भुः ९ हरणः १० ईश्वरः ११ । इति महाभारते दानधर्म्मः ॥ * ॥ अपि च ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षः सुरेश्वरः ।
जयन्तो बहुरूपश्च त्र्यम्बकोऽप्यपराजितः ।
वैवस्वतश्च सावित्रो हरो रुद्रा इमे स्मृताः ॥"
इति जटाधरः ॥ * ॥

अन्यच्च ।

"अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च वीर्य्यवान् ।
त्वष्टुश्चाप्यात्मजः पुत्त्रो विश्वरूपो महातपाः ॥
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ॥"
इति गारुड़े ६ अध्यायः ॥

अग्निपुराणे त्वष्टृस्थाने कृत्तिवासाः ॥ * ॥ अपरञ्च ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
एते रुद्राः समाख्याता एकादश गणेश्वराः ॥
एतेषां मानसानान्तु त्रिशूलवरधारिणाम् ।
कोटयश्चतुरशीतिस्तत् पुत्त्राश्चाक्षमा मताः ॥
दिक्षु सर्व्वासु ये रक्षां प्रकुर्व्वन्ति गणेश्वराः ।
पुत्त्रपौत्त्रसुतास्त्वेते सुरभीगर्भसम्भवाः ॥"
इति मात्स्ये ५ अध्यायः ॥ * ॥

तस्य उत्पत्तिर्यथा,—

"प्रजाः सृष्टुमनास्तेपे तपः परमदुश्चरम् ।
तस्यैवं तप्यमानस्य न किञ्चित् समवर्त्तत ॥
ततो दीर्घेण कालेन दुःखात् क्रोधो व्यजायत ।
क्रोधाविष्टस्य नेत्राभ्यां प्रापतन्नश्रुविन्दवः ॥
ततस्तेभ्योऽश्रुविन्दुभ्यो भूताः प्रेतास्तदाभवन् ।
सर्व्वांस्तानग्रजान् दृष्ट्वा ब्रह्मात्मानमविन्दत ॥
तदा प्राणमयो रुद्रः प्रादुरासीत् प्रभोर्मुखात् ।
सहस्रादित्यसङ्काशो युगान्तदहनोपमः ॥
रुरोद सस्वरं घोरं देवदेवः स्वयं शिवः ।
रोदमानं तदा ब्रह्मा मारोदीरित्यभाषत ।
रोदनाद्रुद्र इत्येवं लोके ख्यातिं गमिष्यसि ॥
अन्यानि सप्तनामानि पत्नीः पुत्त्रांश्च शाश्वतान् ।
स्थानानि चैषामष्टानां ददौ लोकपितामहः ॥
भवः शर्व्वस्तथेशानः पशूनाम्पतिरेव च ।
भीमश्चोग्रो महादेवस्तानि नामानि सप्त वै ॥
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणश्चन्द्र इत्येता अष्टमूर्त्तयः ॥
स्थानेषु तेषु ये रुद्रं ध्यायन्ति मनुजाधिप ।
तेषामष्टतनुर्द्देवो ददाति परमं पदम् ॥
सुवर्च्चला तथैवोमा विकेशा च शिवा तथा ।
स्वाहा दिशा च दीक्षा च रोहिणीति च पत्नयः ॥
शनैश्चरस्तथा शुक्रो लोहिताक्षो मनोजवः ।
स्कन्दः सर्गोऽथ सन्तानो बुधश्चैषां सुताः स्मृताः ॥"
इति कौर्म्मे १० अध्यायः ॥ * ॥

विष्णुरुद्रयोरभेदो यथा,—

"सदैव देवो भगवान् महादेवो न संशयः ।
मन्यन्ते ये जगद्योनिं विभिन्नं विष्णुमीश्वरात् ।
मोहादवेदनिष्ठाद्वा ते यान्ति नरकं नराः ॥
वेदानुवर्त्तिनं रुद्रं देवं नारायणन्तथा ।
एकीभावेन पश्यन्ति मुक्तिभाजो भवन्ति ते ॥"
इति च तत्रैव १२ अध्यायः ॥ * ॥

कल्पभेदे तस्योत्पत्तिनामस्थानभार्य्यादीनि यथा,

"चुकोप च ततो ब्रह्मा ज्वलन्निव हुताशनः ।
ततः कोपं स्वपुत्त्रेभ्यः क्षतमन्याय्यमित्यपि ॥
विचार्य्य परिवर्द्धन्तं नियन्तुमुपचक्रमे ।
यत्नान्नियम्यमानोऽपि स कोपः परमेष्ठिनः ॥
भ्रुवोर्म्मध्यादथोद्भूतः कुमारो नीललोहितः ।
जातमात्रः कुमारोऽसौ रुरोद भगवान् भवः ॥
ब्रह्मोवाच कथं पुत्त्ररोदिषि त्वं महाबल ।
तन्मे कथत कामन्ते सद्यः सम्पादयाम्यहम् ॥
रुद्र उवाच ।
नामानि कुरु मे ब्रह्मन् ! स्थानानि च जगद्गुरो ।
पत्नीश्च देहि भगवन् ततः शान्तिर्भविष्यति ॥
ब्रह्मोवाच ।
जानामि त्वां देवदेवं पूर्व्वं दत्तं वरं मम ।
सत्यं कर्त्तुं भवान् जातस्त्वं हि सर्व्वेश्वरेश्वरः ॥
जातमात्रो रोदिषि त्वं ततो रुद्र इति स्मृतः ।
नामान्यन्यानि ते देव विधास्ये शृणु पुत्त्रक ॥
ऋतध्वजो मनुर्मन्युरुग्ररेता महान् शिवः ।
भवः कालो महिनसो वामदेवो धृतव्रतः ॥
एतानि तव नामानि ये स्मरन्ति नरा भुवि ।
तेषां सदैव कल्याणं करिष्यसि महामते ॥
स्थानानि च प्रवक्ष्यामि तेषु वासो विधीयताम् ॥
इन्द्रियाण्यसुहृद्व्योम वायुरग्निर्जलं मही ।
तपश्चन्द्रश्च सूर्य्यश्च स्थानान्येतानि ते भव ॥
धृतिर्धीरसिलोमा च नियुत् सर्पिर्व्विलम्बिका ।
इरावती स्वधा दीक्षा योषितस्तव सुन्दरी ॥
प्रजाः सृज महाभाग जगदेतत् प्रपूरय ॥
इत्यादिष्टः स भगवान् ब्रह्मणा नीललोहितः ।
सृष्टवान् स प्रजा बह्वीर्भूतप्रेतपिशाचकान् ।
कुष्माण्डान् विकृताकारान् भैरवान् भीमनादिनः ॥
तान् दृष्ट्वा तु तदा ब्रह्मा जगद्विद्रावकान् बहून् ।
वारयामास पुत्त्र त्वं मा स्राक्षीरीदृशीः प्रजाः ॥
तपसा विष्णुमाराध्य विहरस्व यथासुखम् ।
इति ते कथितो राजन् ! रुद्रसर्गः प्रजापतेः ॥
यं श्रुत्वापि नरः सद्यो जह्याद्भूतकृतं भयम् ॥"
इति पाद्मे स्वर्गखण्डे रुद्रसर्गः ८ अध्यायः ॥ * ॥

प्रकारान्तरं यथा,—

"कथितस्तामसः सर्गो ब्रह्मंस्तेऽयं महामुने ।
रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥
कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः ।
प्रादुरासीत् प्रभोरङ्के कुमारो नीललोहितः ॥
रुदन् वै सस्वरं सोऽथ द्रवंश्च द्विजसत्तम ! ।
किं रोदिषीति तं ब्रह्मा रुदन्तं प्रत्युवाच वै ॥
नाम धेहीति तं सोऽथ प्रत्युवाच प्रजापतिम् ।
रुद्रस्त्वं देव नामासि मारोदीर्धैर्य्यमावह ॥
एवमुक्तः पुनः सोऽथ सप्तकृत्वो रुरोद वै ।
ततोऽन्यानि ददौ तस्मै सप्त नामानि स प्रभुः ॥
स्थानानि चैषामष्टानां पत्नीः पुत्त्रांश्च वै प्रभुः ॥
भवं शर्व्वमथेशानं तथा पशुपतिं द्विज ।
भीममुग्रं महादेवमुवाच स पितामहः ॥
चक्रे नामान्यथैतानि स्थानान्येषां चकार सः ॥
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ॥
सुवर्च्चला तथैवोमा सुकेशी चापरा शिवा ।
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम् ॥
सूर्य्यादीनां नरश्रेष्ठ रुद्राद्यैर्नामभिः सह ।
पत्न्यः स्मृता महाभाग तदपत्यानि मे शृणु ॥
येषां सूतिप्रसूतैश्च इदमापूरितं जगत् ।
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ॥
स्कन्दः सर्गोऽथ सन्तानो बुधश्चानुक्रमात् सुताः ।
एवंप्रकाररुद्रोऽसौ सतीं भार्य्यामविन्दत ॥
दक्षकोपाच्च तत्याज सा सती स्वं कलेवरम् ।
हिमवद्दुहिता साभून्मेनायां द्विजसत्तम ! ॥
उपयेमे पुनश्चोमामनन्यां भगवान् भवः ॥
देवौ धाता विधातारौ भृगोः ख्यातिरसूयत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ॥"
इति विष्णुपुराणे १ अंशे ८ अध्यायः ॥ * ॥

("द्वितीये हि युगे सर्व्वमक्रोधव्रतमास्थितम् ।
दिव्यं सहस्रवर्षाणामसुरा अभिदुद्रुवुः ॥
तपोविघ्नं शमीकर्त्तुंन्तपोविघ्नं महात्मनाम् ।
पश्यन् समर्थश्चोपेक्षाञ्चक्रे दक्षः प्रजापतिः ॥
पुनर्माहेश्वरं भागं ध्रुवं दक्षः प्रजापतिः ।
प्रायो न कल्पयामास प्रोच्यमानः सुरैरपि ॥
पाशुपत्य ऋचो याश्च शैवश्चाहुतयश्च याः ।
यज्ञसिद्धिकृतस्ताभिर्हीनश्चैव स दृष्टवान् ॥
अथोत्तीर्णव्रतो देवो बुद्धा दक्षव्यतिक्रमम् ।
रुद्रो रौद्रं पुरस्कृत्य भावमात्मविदात्मनः ॥
सृष्ट्वा ललाटे चक्षुर्वै दग्ध्वा तानसुरान् प्रभुः ।
बालं क्रोधाग्निसन्तप्तमसृजत् क्रतुनाशनम् ॥
ततो यज्ञः स विध्वस्तो व्यथिताश्च दिवौकसः ।
दाहव्यथा परीताश्च भ्रान्ता भूतगणा दिशः ॥"
इति चरके चिकित्सास्थाने तृतीयेऽध्याये ॥)

रुद्रगीता वराहपुराणे द्रष्टव्या ॥ * ॥ (विश्वकर्म्मपुत्त्रविशेषः । यथा, विष्णुपुराणे । १ । १५ । १२२ ।

"तस्य पुत्त्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च बुद्धिमान् ॥")

स्वनामख्यातः कविविशेषः । स च विद्याविलासपुत्त्रः भावविलासप्रणेता । कविरयं मानसिंहपुत्त्रस्य भावसिंहमहीपतेः समये बभूव । स च भावसिंहमहीपतिर्व्वर्त्तमानजयपुरमहाराजस्य षोड़शः पूर्व्वपुरुषः । तथा च भावविलासे । १३४—१३६ ।

"अन्यापदेशविनिवेशविदग्धबुद्धि-
श्रीभावसिंहनरसिंहनियोगयोगात्।
सम्पादितो विविधभावविकासभाजां
प्रीत्यै भृशं भवतु भावविलास एषः॥
सद्गुणानां समुद्रेण रुद्रेण ग्रथिता गुणैः।
कण्ठस्था श्लोकमालेयं केषां न कुरुते श्रियम्॥
विद्याविलासपुत्रस्य न्यायवाचस्पतेरियम्।
काव्यालापविदग्धानां मुदं निर्म्मातु निर्म्मितिः॥")

रुद्रकवचं, क्ली, (रुद्रस्य कवचम्।) शिवनामसमूहेन सर्व्वाङ्गरक्षकम्। यथा,—
"वक्ष्यामि रुद्रकवचमाद्यं प्राणस्य रक्षणम्।
अहोरात्रं महादेव रक्षार्थं देवनिर्म्मितम्॥
ॐ रुद्रो मामग्रतः पातु पृष्ठतः पातु शङ्करः।
कपर्द्दी दक्षिणे पातु वामपार्श्वे तथा हरः॥
शिवः शिरो मे च पातु ललाटे नीललोहितः।
नेत्रयोस्त्र्यम्बकः पातु मुखे पातु महेश्वरः॥
कर्णयोर्नासिकायाञ्च जिह्वायां शम्भुरव्ययः।
श्रीकण्ठस्तु गले पातु बाह्वोः पातु पिनाकधृक्॥
हृदयं मे महादेव ईश्वरस्तु तथोदरम्।
नाभौ कुक्षौ कटिस्थाने पातु सर्व्वं प्रजापतिः॥
ऊरू जानू महादेवः पादौ पातु महेश्वरः।
सर्व्वं रक्षतु भूतेशः सर्व्वगात्राणि यत्नतः॥
परशुं शूलखट्वाङ्गं दिव्यास्त्रं रौद्रमेव च।
नमस्काराय देवेशं रक्ष मां जगदीश्वरः॥
रक्षोभ्यो ग्रहपीड़ाभ्यो रोगशोकार्णवेषु च।
पापेभ्यो नरकेभ्यश्च त्राहि मां भक्तवत्सल॥
जन्म मृत्युर्ज्जरा व्याधिः कामः क्रोधः शमो दमः।
लोभमोहमदाश्चापि व्यजन्तु भुवनेश्वर॥
त्वं गतिस्त्वं मतिश्चैव त्वं बुद्धिस्त्वं परायणः।
कायेन मनसा वाचा त्वयि भक्तिर्दृढ़ास्तु मे॥
इत्येतद्रुद्रकवचं पठतः पापनाशनम्।
महादेवप्रसादेन दुर्व्वासःपरिकीर्त्तितम्॥
न तस्य पापलेशोऽस्ति भयं तस्य न विद्यते।
प्राप्नोति सुखमारोग्यं पुण्यमात्मप्रबन्धनम्॥
पुत्त्रार्थी लभते पुत्त्रं धनार्थी लभते धनम्।
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात्॥
देहे चेदं हृदि न्यस्य शिवकल्पो भवेन्नरः।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकं स गच्छति॥"
इति स्कन्दपुराणे रुद्रकवचं समाप्तम्। इति तन्त्रसारः॥

रुद्रगणः, पुं, (रुद्रस्य गणः।) शिवपार्षदसमूहः। यथा,—
"अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः।
देवेन्द्रस्य नियोगेन वर्त्तन्ते त्रिदिवे सदा॥
तेषां संख्या चैककोटिस्ते सर्व्वे बलवत्तराः।
कुर्व्वन्ति हि सदा सेवां हरस्य सततं गणाः॥
विस्मयन्ति च पापिष्ठान् धर्म्मिष्ठान् पालयन्ति च।
अनुगृह्णन्ति सततं धृतपाशुपतव्रतान्॥
विघ्नांश्च सततं घ्नन्ति योगिनां प्रयतात्मनाम्।
षट्त्रिंशत्कोटयश्चैव हरस्य सकला गणाः॥
वराहगणनाशार्थं हिताय जगतां तथा।
शङ्करस्याथ सेवायै समुत्पन्ना इमे गणाः॥"
इति कालिकापुराणे २६ अध्यायः॥

रुद्रचण्डी, स्त्री, (रुद्रा चण्डी।) रुद्रयामलोक्तदेवीमाहात्म्यम्। यथा। "अस्य चण्डिकामहामन्त्रस्य महारुद्र ऋषिरनुष्टुप् छन्दश्चण्डिका देवता रुद्रचण्डीजपे विनियोगः। ॐ नमश्चण्डिकायै।
श्रीशङ्कर उवाच।
चण्डिकां हृदये न्यस्य स्मरणं यः करोत्यपि।
अनन्तफलमाप्नोति देवि चण्डीप्रसादतः॥
रविवारे यदा चण्डीं पठेदागमसम्मताम्।
नवावृत्तिफलं तस्य जायते नात्र संशयः॥
सोमवारे यदा चण्डीं पठेद्यस्तु समाहितः।
सहस्रावृत्तिपाठस्य फलं जानीहि सुव्रते॥
कुजवारे जगद्धात्रि पठेद्यामलसम्मताम्।
शतावृत्तिफलं तस्य बुधे लक्षफलं भवेत्॥
गुरौ यदि महामाये लक्षयुग्मफलं ध्रुवम्।
शुक्रे देवि जगद्धात्रि चण्डीपाठेन शङ्करि॥
श्रेयं तुल्यफलं दुर्गे यदि चण्डीं समाहितः।
शनिवारे जगद्धात्रि कोट्यावृत्तिफलं ध्रुवम्॥
अतएव जगद्धात्रीं यश्च चण्डीं समभ्यसेत्।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत्॥
आरोग्यं विजयं सौख्यं वस्त्ररत्नप्रवालकम्।
पठनाच्छ्रवणाच्चैव जायते नात्र संशयः॥
धनं धान्यं प्रवालञ्च वस्त्ररत्नविभूषितम्।
चण्डीस्मरणमात्रेण कुर्य्यात् सर्व्वं महेश्वरि॥
ॐ घोरचण्डी महाचण्डी चण्डमुण्डविखण्डिनी।
चण्डवक्त्रा महामाया महादेवविभूषिता॥
चतुर्वक्त्रा इत्यपि पाठः।
रक्तदन्ता वरारोहा महासुरविमर्द्दिनी।
तारिणी जननी दुर्गा चण्डिका चण्डविक्रमा॥
गुह्यकाली जगद्धात्री चण्डी च यामलोद्भवा।
श्मशानवासिनी देवी घोरचण्डी भयानका॥
शिवा घोरा रुद्रचण्डी महेशगणभूषिता।
जाह्नवी परमा कृष्णा महात्रिपुरसुन्दरी॥
विद्या श्रीपरमा विद्या चण्डी च वैरमर्द्दिनी।
दुर्गे दुर्गा शिवा घोरा चण्डहन्त्री प्रचण्डिका॥
महेशी वगला देवी भैरवी चण्डविक्रमा।
प्रमथैर्भूषिता कृष्णा चामुण्डा मुण्डमर्द्दिनी॥
रणघण्टा चण्डघण्टा रणरामवरप्रदा।
तारिणी भद्रकाली च शिवा घोरा भयानका॥
विष्णुप्रिया महामाया नन्दगोपगृहोद्भवा।
मङ्गला जननी चण्डी महाक्रुद्धा भयङ्करी॥
विमला भैरवी निद्रा जातिरूपा मनोहरा।
तृष्णा निद्रा क्षुधा माया शक्तिरूपा मनोहरा॥
तस्यै देव्यै नमस्तस्यै सर्व्वरूपेण संस्थिता।
प्राणप्रिया जातिमाया निद्रारूपा महेश्वरी॥
या देवी सर्व्वभूतेषु सर्व्वरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥
एतां चण्डीं जगद्धात्रीं ब्राह्मणस्तु सदा पठेत्।
नान्यस्तु पाठको देवी पठने ब्रह्महा भवेत्॥
नारदः पाठकश्चैव कैलासे रत्नभूषिते।
वैकुण्ठे ब्रह्मलोके च देवराजपुरे शिवे॥
यः शृणोति धरायाञ्च मुच्यते सर्व्वपातकैः।
ब्रह्महत्या च गोहत्या स्त्रीवधोद्भवपातकम्॥
तत् सर्व्वं पातकं दुर्गे मातृगमनपातकम्।
श्वश्रूगमनपापञ्च यत् कन्यागमपातकम्॥
सुतस्त्रीगमनञ्चैव यत् यत् पापं प्रजायते।
परदारकृतं पापं तत्क्षणादेव नश्यति॥
जन्मजन्मान्तरात् पापात् गुरुहत्यादिपातकात्।
मुच्यते मुच्यते देवि गुरुपत्नीषु सङ्गमात्॥
मनसा वचसा पापं यत् पापं ब्रह्महिंसने।
मिथ्यायाश्चैव यत् पापं तत् पापं नश्यति क्षणात्॥
श्रवणं पठनञ्चैव यः करोति धरातले।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत्॥
यः करिष्यत्यवज्ञां वै रुद्रयामलचण्डिकाम्।
पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत्॥
अश्रद्धां ये प्रकुर्व्वन्ति ते च पातकिनो नराः।
रौरवं रक्तकुण्डञ्च कृमिकुण्डं मलस्य वै॥
शुक्रस्य कुण्डं स्त्रीरक्तं यान्ति तेऽप्यचिरेण वै।
ततः पितृगणैः सार्द्धं विष्ठायां जायते कृमिः॥
शृणु देवि महामाये पठेत् चण्डीं शृणोत्यपि।
गयायाश्चैव यत् पुण्यं काश्यां विश्वेश्वराग्रतः॥
प्रयागे मुण्डनञ्चैव हरिद्वारे हरेर्गृहे।
तुल्यं पुण्यं भवेद्देवि सत्यं दुर्गे शिवे रमे॥
त्रिगयायां त्रिकाश्यां वै यच्च पुण्यं शृणु प्रिये।
तच्च पुण्यं तच्च पुण्यं तच्च पुण्यं न संशयः॥
भवानी च भवानी च भवानीत्युच्यते बुधैः।
भकारस्तु भकारस्तु भकारः केवलः शिवः॥
वाणी चैव जगद्धात्री वरारोहे भकारकः।
प्रेतवद्देवि विश्वेशि भकारः प्रेतवत् सदा॥
आरोग्यञ्च जयं दुःखनाशनं सुखवर्द्धनम्।
धनं पुत्त्रं जयारोग्यं कुष्ठं गलितनाशकम्॥
अर्द्धाङ्गरोगान्मुच्येत दद्रुरोगाद्धि पार्व्वति।
सत्यं सत्यं जगद्धात्रि महामाये शिवे रमे॥
चण्डे चण्डे महाघोरे चण्डिके व्याधिनाशिनि।
मन्दे दिने महेशानि विशेषफलदायिनी॥
सर्व्वदुःखात् प्रमुच्येत भक्त्या चण्डीं शृणोति यः।
ब्राह्मणो हितकारी च पठेन्नियतमानसः॥
मङ्गलं मङ्गलं श्रेयं मङ्गलं जयमङ्गलम्।
भवेद्धि पुत्त्रपौत्त्रादिकन्यादासादिभिर्युतः॥
तत्त्वज्ञानञ्च निधने काले निर्व्वाणमाप्नुयात्।
महादानोद्भवं पुण्यं तुलाहिरण्यके यथा॥
चण्डीश्रवणमात्रेण पठनाद्ब्राह्मणोऽपि सः।
निर्व्वाणमेति देवेशि महास्वस्त्ययनं हि तत्॥
सर्व्वत्र विजयं याति श्रवणाद्ग्रहदोषतः।
मुच्यते सर्व्वपापेभ्यो राजराजाधिपो भवेत्॥
महाचण्डी शिवा घोरा भयानकवरप्रदा।
काली च कमला विद्या महोरगविमर्द्दिनी॥
गुह्यचण्डी घोरचण्डी चण्डी त्रैलोक्यदुर्लभा।
देवानां दुर्लभा चण्डी रुद्रयामलसम्भवा॥
अप्रकाश्या महादेवप्रिया रावणमर्द्दिनी।

मनुष्यप्रिया मांसरता मनुष्यमांसबलिप्रिया ॥
मदमत्ता सदा नित्या भूतप्रमथसङ्गता ।
मध्यभागा महाराज्ञा धान्यदा धनरत्नदा ॥
वस्त्रदा मणिदा राज्यप्रदा विषयवर्द्धिका ।
मुक्तिदा सर्व्वदा चण्डी महाविपदनाशिनी ॥
इमाञ्च चर्च्चीं पठते मनुष्यः
शृणोति भक्त्या परमां शिवस्य ।
चर्च्चीं धरण्यामतिपुण्ययुक्तः
पठेच्च गच्छेद्धरमन्दिरं शुभम् ॥
यद्यन्मनोरथात् दुर्गे करोति धरणीतले ।
रुद्रचण्डीप्रसादेन किं न सिध्यति भूतले ॥
रुद्रध्येया रुद्ररूपा रुद्राणी रुद्रवल्लभा ।
रुद्रभक्ता रुद्ररूपा रुद्रभूषासमन्विता ॥
शिवचण्डी महारक्ता शिवप्रीतिगणान्विता ।
भैरवी परमा विद्या महाविद्या च षोड़शी ॥
सुन्दरी परमा विद्या महात्रिपुरसुन्दरी ।
गुह्यकाली भद्रकाली महाकालविमर्द्दिनी ॥
कृष्णा कृष्णस्वरूपा सा जननी मोहकारिणी ।
अतितन्द्रा महालज्जा सर्व्वमङ्गलदायिनी ॥
घोरचण्डी भीमरूपा भीमा देवी मनोहरा ।
बगला बगला सिद्धिदायिका सर्व्वदा शिवा ॥
स्मृतिरूपा कीर्त्तिरूपा बुद्धिरूपा मनोहरा ।
विष्णुप्रिया शक्रपूज्या योगेन्द्रैरपि सेविता ॥
भयानका महालक्ष्मा देवी भयविनाशिनी ।
चण्डिका शक्तिहस्ता च कौमारी सर्व्वकामदा ॥
वाराही च वराहस्य इन्द्राणी शक्रपूजिता ।
माहेश्वरी महेशस्य महेशगणभूषिता ॥
चामुण्डा नारसिंही च नृसिंहशत्रुनाशिनी ।
सर्व्वशत्रुप्रशमनी सर्व्वारोग्यप्रदायिनी ॥
नैव दुःखं भयं किञ्चित् पठनात् श्रवणाज्जनः ।
इति सत्यं महेशानि सत्यं सत्यं वदाम्यहम् ॥
नैव शोकं नैव रोगं नैव दुःखं भयन्तथा ।
आरोग्यं मङ्गलं नित्यं करोति शुभमङ्गलम् ॥
महेशानि वरारोहे ब्रवीमि सत्यमुत्तमम् ।
अभक्ताय न दातव्यं मम प्राणाधिकं शुभम् ॥
मम भक्ताय शान्ताय शिवविष्णुप्रियाय च ।
दद्यात् कदाचिद्देवेशि सत्यं सत्यं न संशयः ॥
अनन्तफलमाप्नोति शिवचण्डीप्रसादतः ।
अश्वमेधवाजपेयराजसूयशतैन वै ।
तृप्ताः स्युः पितरो देवास्तथा च सर्व्वदेवताः ॥
दुर्गे त्वां न्यस्यथीशानं रुद्रयामलपुस्तकम् ।
मन्त्रमचरसंज्ञानं यः करोति नराधमः ॥
अतएव महेशानि किं वक्ष्ये तव सन्निधौ ॥
लम्बोदराधिकचण्डीपठनाच्छ्रवणात् जनः ।
तत्त्वमसीति वाक्येन मुक्तिमाप्नोति दुर्लभाम् ॥"
इति श्रीरुद्रयामले हरगौरीसंवादे रुद्रयामल-
चण्डी समाप्ता ॥

रुद्रजः, पुं, (रुद्रात् जात इति । जन्+डः ।) पारदः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य पारदशब्दे विज्ञेयाः ॥)

रुद्रजटा, स्त्री, (रुद्रस्य जटेव ।) लताविशेषः ॥ तत्पर्य्यायः । रौद्री २ जटा ३ रुद्रा ४ सौम्या ५ सुगन्धा ६ सुवहा ७ घना ८ ईश्वरी ९ रुद्रलता १० सुपत्रा ११ सुगन्धपत्रा १२ सुरभिः १३ शिवाह्वा १४ पत्रवल्ली १५ जटावल्ली १६ रुद्राणी १७ नेत्रपुष्करा १८ महाजटा १९ जटारुद्रा २० । अस्या गुणाः । कटुरसत्वम् । श्वासकासहृद्रोगभूतरक्षोनाशित्वञ्च । इति राजनिर्घण्टः ॥

रुद्रपत्नी, स्त्री, (रुद्रस्य पत्नी ।) दुर्गा । इत्युणादिकोषः ॥ (यथा, महाभारते । ३ । ८३ । १५८ ।
"सान्निध्यं तत्र राजेन्द्र रुद्रपत्न्या कुरूद्वह ।
अभिगम्य च तां देवीं न दुर्गतिमवाप्नुयात् ॥").
अतसी । इति रत्नमाला ॥

रुद्रप्रिया, स्त्री, (रुद्रस्य प्रिया ।) हरीतकी । इति शब्दरत्नावली ॥ पार्व्वती च ॥

रुद्रभूः, स्त्री, (रुद्रस्य भूः स्थानम् ।) श्मशानम् । इति केचित् ॥

रुद्रविंशतिः, स्त्री, (रुद्रदेवताका विंशतिः ।) प्रभवादिषष्टिवर्षान्तर्गतशेषविंशतिवर्षाणि । तेषां नामानि फलानि च यथा,—
"आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता ।
तृतीया रुद्रदेवत्या श्रेष्ठा मध्याधमा भवेत् ॥
तृणधान्यानि पीड्यन्ते ग्रीष्मे वर्षति वासवः ।
प्लवङ्गे पीडिताः सर्व्वाः प्रजाश्च सुरवन्दिते ॥१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यवृष्टिर्भवेद्राजा कालिके च शुभं वदेत् ॥२॥
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम् ।
सौम्यवृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकीर्त्तितम् ॥३॥
तोयपूर्णो भवेन्मेघो वर्षते च दिने दिने ।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये ॥४॥
वासवो वर्षते देवि देशे चाखण्डमण्डले ।
अहिच्छत्रे कान्यकुब्जे विरोधी कृषिनाशकृत् ॥५॥
अभिभूतं जगत् सर्व्वं क्लेशैर्बहुविधैः प्रिये ।
मारुतैः फलदाहैश्च परिवारिणि शोभने ॥६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये ।
प्रमाथिनि जलोद्गारी जलदो मोदते प्रजा ॥७॥
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता ।
घृतं तैलसमं याति आनन्दे नन्दिनी प्रजा ॥८॥
कोद्रवाः शालिमुद्गाश्च पीड्यन्ते वरवर्णिनि ।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुरा प्रजा ॥९॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम् ।
अनले च समाख्यातं नात्र कार्य्या विचारणा ॥१०॥
देशभङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्म्मदातटे ॥११॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः ।
वासवो वर्षते देवि शस्यञ्च नहि जायते ॥
तिलसर्षपमाषादिकार्पासानां महार्घता ।
गोमहिष्यः सुवर्णानि कांस्यताम्रादिशेषतः ॥
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्द्दिनम् ।
पार्थिवा मोचका दीनाः कालयुक्ते प्रपीड़िताः ॥ १२ ॥
तोयपूर्णाः स्मृता मेघा बहुशस्या च मेदिनी ।
निष्ठुराः पार्थिवा देवि सिद्धार्थे च वरानने ॥१३॥
अल्पतोया घनाश्चैव कीटकाः प्रबलाः स्मृताः ।
विरुद्धाः पार्थिवा देवि रौद्रे वर्षे वरानने ॥१४॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेद्दे मध्यमा वृष्टिर्दुर्म्मतौ समुपस्थिते ॥१५॥
सुभिक्षं जायते लोकः सर्व्वोपद्रववर्जितः ।
प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि ॥१६॥
महिषीगोहिरण्यादिताम्रकांस्यादिशेषतः ।
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ॥
रक्ते संवत्सरे देवि क्रूरबुद्धिर्नराधिपः ।
मानवाः क्रूरचेष्टाश्च संग्रामे न जयो भवेत् ॥१७॥
दुर्भिक्षं मरणं रोगो धान्यौषधिनिपीड़नम् ।
पापरोगो भवेद्देवि रक्ताक्षेऽसुरवन्दिते ॥ १८ ॥
रोगो मरणदुर्भिक्षं विविधोपद्रवाकुलम् ।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये ॥१९॥
मेदिनी चलते देवि सर्व्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा ॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा ।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ॥
कौसुदीचर्म्मनदीश्च यमुनानर्म्मदातटे ।
विन्ध्यार्थां सैन्धवे चैव विनश्यति न संशयः ॥
सिंहले मरुदेशञ्च कालञ्जरं तथैव च ।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि ॥"२०
इति ज्योतिस्तत्त्वम् ॥

रुद्रवीणा, स्त्री, (रुद्रस्य वीणा ।) वीणाभेदः ।
यथा,—
"दण्डः स्याद्रुद्रवीणाया सुष्ठोकादशसम्मितः ।
अमदङ्गुष्ठाप्यमितं शुषिरं तस्य कीर्त्तितम् ॥
दण्डस्योभयतो ज्ञेयं कांस्यसंवरकद्वयम् ।
पश्चात् संवरकस्याच हुर्व्वीकृतशिरो भवेत् ॥
दण्डस्य वेष्टनं सार्द्धं पञ्चाङ्गुलमिवोदितम् ।
तन्मिता लसरी तस्याः कर्त्तव्या सुन्दराकृतिः ॥
ककुभो रुद्रवीणायास्त्रिशिराः परिकीर्त्तितः ।
ऊर्द्धे शिरसि दातव्या लोहपत्री समन्विता ॥
मूलतन्त्री तदुपरि तस्या लौही ततः परम् ।
दक्षिणे शिरसि न्यस्येत् श्रुतितन्त्रीद्वयं क्रमात् ॥
एवन्तु ककुभं तत्र वीणादण्डे निवेशयेत् ।
द्व्यङ्गुलीवन्मद्दण्डशिरोऽङ्गुष्ठमात्रन्तु पार्श्वकम् ॥
सप्ताङ्गुलान्तरं तस्मात्तन्मूलञ्च निवेशयेत् ।
अन्यं ततश्चतुस्त्रिंशदङ्गुलान्तरमाक्षिपेत् ॥
अष्टादशाङ्गुलमुखं चक्रं वै चारुगर्भकम् ।
दण्डं समुन्नतं कान्तं वर्त्तुलं तुम्बयुग्मकम् ॥
अधोन्नतौ किञ्चिदाधिक्यमलयञ्च प्रशस्यते ।
अष्टाङ्गुलान्तरं पश्चात्तुम्बरं स्थापयेद्बुधः ॥
दण्डपृष्ठे रन्ध्रमेकं स्थापयेच्च समन्ततः ।
लोहाङ्कुशन्तु कर्त्तव्यं वर्त्तुलं पङ्कजाकृति ॥
तद्दन्तनं गुणं तस्मिन् वेष्टयन्ते निवेशयेत् ।
एतत्परायां मोटिण्यां वेदरन्ध्राङ्कुशं क्षिपेत् ॥
तन्मोटनीष्टतरन्ध्रसदृशं दण्डरन्ध्रकम् ।
सुयन्त्रिते तु तत्रैव बध्नीयात्सुखतन्त्रिकाम् ॥
तावच्च भ्रामयेत् पूर्व्वां मोटनीञ्च शनैः शनैः ।

न यावदेति स्वस्थानं तन्त्री यन्त्रविशारदः ॥
अस्यास्त्वष्टादश प्रोक्ताः शारिकाः पूर्ब्बसूरिभिः ।
तासां दृढतरा अष्टौ दश क्षुद्राः प्रकीर्त्तिताः ॥
एतास्तु तारवादिन्यस्तिष्ठन्ति पट्टिकोपरि ।
वितस्तिमात्रपट्टिकाङ्गुष्ठोच्चाप्यस्य गर्भकः ॥
तावत् शून्यस्तु कर्त्तव्यो यथा दण्डे स्थिरो भवेत् ।
मदनस्य च सिक्थस्य योगेन सुदृढीकृता ॥
दृढतीनाञ्च शारीणां स्तननोऽयं तत्क्रमात् ।
एतास्तु सर्व्वावयवैः कथितास्त्र्यङ्गुला बुधैः ॥
स्थाप्य दण्डस्य ताः पृष्ठे यथारागस्वरं पुनः ।
मदनस्य च सिक्थस्य योगेन सुदृढीकृताः ॥
सर्व्वासां लोहकलिका मस्तके स्युः सुयन्त्रिताः ।
एकाङ्गुलोच्चाः क्षुद्राः स्युरिति शारीविनिर्णयः ॥
एवं विनिर्म्मिता रुद्रवीणा जनमनोहरा ।
अस्यां शिक्षा तु कर्त्तव्या दाक्षिणात्योपदेशतः ॥”
इति सङ्गीतनारायणः ॥

रुद्रसर्गः, पुं, (रुद्रकृतः सर्गः ।) रुद्रकर्त्तृकसृष्टिः । यथा,—
“इदानीं रुद्रसर्गं त्वं शृणु पार्थिवसत्तम ! ।
दशवर्षसहस्राणि तपश्चीर्त्वा महाजले ॥
प्रतिबुद्धो यदा रुद्रस्तदा चोर्व्वीं सकाननाम् ।
दृष्ट्वा शस्यवतीं रम्यां मनुष्यपशुसंकुलाम् ॥
शुश्राव च तदा शब्दाकृतिर्वा दक्षसद्मनि ।
आश्रमे यज्वनाञ्चोच्चैर्योगस्थैरिति कीर्त्तितान् ॥
ततः श्रुत्वा महातेजाः सर्व्वज्ञः परमेश्वरः ।
चुकोप सुभृशं देवो वाक्यञ्चेदमुवाच ह ॥
अहं पूर्व्वन्तु कविना सृष्टः सर्व्वात्मना विभुः ।
प्रजाः सृजस्वेति तदा वाक्यमेतत्तथोक्तवान् ॥
इदानीं केन तत् कर्म्म कृतं सृष्ट्यादिवर्णनम् ।
एवमुक्त्वा भृशं कोपात्मनाद परमेश्वरः ॥
तस्य ता नदतो ज्वालाः श्रोत्रेभ्यो निर्ययुस्तदा ।
तत्र भूतानि वेताला उल्कुशाः प्रेतपूतनाः ॥
कुष्माण्डा यातुधानाश्च सर्व्वे प्रज्वलिताननाः ।
उत्तस्थुः कोटिशस्तत्र नानाप्रहरणावृताः ॥”
इति वराहपुराणम् ॥

रुद्रसावर्णिः, पुं, द्वादशो मनुः । अस्मिन् मन्वन्तरे सुधामाख्योऽवतारः । ऋतधामा इन्द्रः । हरितादयो देवाः । तपोमूर्त्त्यादयः सप्तर्षयः । देववदुपदेवादयो मनुपुत्त्रा भविष्यन्ति । इति श्रीभागवतमतम् ॥ अपि च ।
“द्वादशे रुद्रपुत्त्रस्य प्राप्ते मन्वन्तरे मनोः ।
सावर्ण्याख्यस्य ये देवा मुनयश्च शृणुष्व तान् ॥
सुकर्म्माणः सुमनसो हरितो रोहितस्तथा ।
सुरापाश्च सुरास्तत्र पञ्चैते दशका गणाः ॥
त्रिःप्रकारा भविष्यन्ति एकैकस्त्रिंशको गणः ।
तेषामिन्द्रो हि विज्ञेयो ऋतधामा महाबलः ॥
सर्व्वैरिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु ।
द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः ॥
तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः ।
देववान् वामदेवश्च देवश्रेष्ठो विदूरथः ।
मित्रवान्मित्रदूतश्च भाविनस्तत्सुता मनोः ॥”
इति मार्कण्डेयपुराणम् ॥

रुद्रसूः, स्त्री, (रुद्रं तत्परिमितपुत्त्रं सूते इति । सू + क्विप् ।) एकादशपुत्त्रजननी । यथा,—
“विशद्दशपुत्त्रा स्यादेकाधिका तु रुद्रसूः ॥”
इति शब्दरत्नावली ॥

रुद्राक्रीडः, पुं, (रुद्रस्य आक्रीडा देवनं यत्र ।) श्मशानम् । इति त्रिकाण्डशेषः ॥

रुद्राक्षं, क्ली, (रुद्रस्य अक्षि कारणत्वेनास्त्यस्येति । अर्श आदित्वादच् ।) स्वनामख्यातवृक्षवीजम् । तस्य स्थूलत्वं प्रशस्तत्वञ्च यथा,—
“रुद्राक्षं शिवलिङ्गञ्च स्थूलं स्थूलं विशिष्यते ।
शालग्रामो नार्म्मदश्च सूक्ष्मः सूक्ष्मो विशिष्यते ॥”
इति मेरुतन्त्रे ९ प्रकाशः ॥

रुद्राक्षः, पुं, स्वनामख्यातवृक्षः । तत्पर्य्यायः । तृणमेरुः २ अमरः ३ पुष्पचामरः ४ । इति शब्दरत्नावली ॥ तस्य फलपर्य्यायः । शिवाक्षम् १ सर्पाक्षम् २ भूतनाशनम् ३ पावनम् ४ नीलकण्ठाक्षम् ५ हराक्षम् ६ शिवप्रियम् ७ । अस्य गुणाः । अम्लत्वम् । उष्णत्वम् । वातकफशिरोऽर्त्तिभूतग्रहविषनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥ शिवपूजायां अस्य मालाधारणमावश्यकम् । यथा, लिङ्गपुराणे ।
“विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥”
तस्योत्पत्तिर्यथा । संवत्सरप्रदीपे ।
“त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये ।
अश्रुणो विन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥”
यद्यप्येकादिचतुर्द्दशमुखरुद्राक्षेषु मन्त्रफलविशेषाः सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य फलमन्त्रावभिधीयेते । यथा, स्कान्दे ।
“पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥
ह्रूं नमः इति प्रत्येकमष्टोत्तरशतं जप्त्वा शिवाम्भसा प्रक्षाल्य धारणीयम् ।
“विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवाः ।
स याति नरकं घोरं यावदिन्द्राश्चतुर्द्दश ॥”
इति तिथ्यादितत्त्वम् ॥ * ॥
तस्य धारणे आवश्यकत्वं यथा, संवत्सरप्रदीपे ।
“अरुद्राक्षधरो भूत्वा यद्यत् कर्म्म च वैदिकम् ।
करोति जपहोमादि तत् सर्व्वं निष्फलं भवेत् ॥”
स्कान्दे ।
“ध्यानधारणहीनोऽपि रुद्राक्षं धारयद्बुधः ।
सर्व्वपापविनिर्म्मुक्तः स याति परमां गतिम् ॥”
इत्येकादशीतत्त्वम् ॥
अथ रुद्राक्षमाहात्म्यम् ।
श्रीमहादेव उवाच ।
“इदानीं देवदेवेशि ! मालानां धारणं शुभम् ।
रुद्राक्षस्य च माहात्म्यं वद मे परमेश्वरि ! ॥
श्रीदेव्युवाच ।
“शिखायां हस्तयोः कण्ठे कर्णयोश्चापि यो नरः ।
रुद्राक्षं धारयेद्भक्त्या शिवलोकमवाप्नुयात् ॥
नववक्त्रन्तु रुद्राक्षं धारयेद्वामबाहुना ।
दशबाहौ तथा वत्स ! धारयेद्यतमानसः ॥
शिखायां दशनं धार्य्यं कण्ठे च पञ्चविंशतिम् ।
कर्णयोः पञ्च संख्या हृदि चाष्टोत्तरं शतम् ॥
नाभौ सप्त च रुद्राक्षं धारणान्मोक्षभाग्भवेत् ।
रुद्राक्षधारणादेव नरो देवत्वमाप्नुयात् ॥”
शिखायां दशनं द्वात्रिंशत्परिमितम् ॥ तथा ।
“रुद्राक्षं धारयेन्नित्यं भद्राक्षञ्च सुरेश्वर ! ।
रुद्राक्षस्य महाबाहो माहात्म्यं शृणु यत्नतः ॥
एकवक्त्रः शिवः साक्षात् ब्रह्महत्यां व्यपोहति ।
अवध्यत्वं प्रतिस्रोतो वह्निस्तम्भं करोति च ॥
द्विवक्त्रो हरगौरी स्यात् गोवधाद्यघनाशकृत् ।
त्रिवक्त्रोऽग्निस्त्रिजन्मोत्थपापराशिं प्रणाशयेत् ॥
तुलाराशिं यथा वह्निर्भस्मसात् कुरुते हर ! ।
त्रिवक्त्रोऽपि च रुद्राक्षस्तथा दहति किल्बिषम् ॥
चतुर्व्वक्त्रस्तु धाता स्यात् नरहत्यां व्यपोहति ।
पञ्चवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत् ॥
षड्वक्त्रो यो गुहः साक्षात् गर्भहत्यां शमेदयम् ।
सप्तवक्त्रो ह्यनन्तश्च स्वर्णस्तेयाघनुत् सदा ॥
विनायकोऽष्टवक्त्रः स्यात् सर्व्वानृतविनाशकृत् ।
भैरवो नववक्त्रः स्यात् शिवसायुज्यदायकः ॥
दशवक्त्रः स्वयं विष्णुर्भूतप्रेतपिशाचहा ।
एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥
द्वादशास्यो भवेदर्कः सर्व्वतीर्थफलप्रदः ।
त्रयोदशमुखः कामः सर्व्वकामफलप्रदः ॥
चतुर्द्दशास्यः श्रीकण्ठो वंशोद्धारकरः स्मृतः ।
यथोक्तन्तेऽपि रुद्राक्षे तथेन्द्राक्षे प्रकीर्त्तितम् ॥
भद्राक्षेऽपि सुरश्रेष्ठ तद्गुणं परिकीर्त्तितम् ॥”
इति योगसारे २ परिच्छेदः ॥
अपि च ।
“निश्छिद्राश्च सुपक्काश्च रुद्राक्षा धारणे स्मृताः ।
पञ्चामृतं पञ्चगव्यं स्नानकाले प्रयोजयेत् ॥
रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा ।
त्र्यम्बकादिकमन्त्रञ्च तथा तत्र प्रयोजयेत् ॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॥
तथा ॐ ह्रीं अघोरे ह्रैं घोरे ह्रूं घोरघोरतरे ॐ ह्रैं ह्रीं श्रीं ऐं सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्तेऽस्तु रुद्ररूपिणे ह्रूं ह्रूं ।
अनेनापि च मन्त्रेण रुद्राक्षस्य द्विजोत्तमः ।
प्रतिष्ठां विधिवत् कुर्य्यात् ततोऽधिकफलं लभेत् ॥
ततो यथा स्वमन्त्रेण धारयेद्भक्तिसंयुतः ॥
एकादिचतुर्द्दशवक्त्राणां संस्कारे प्रत्येकं क्रमेण मन्त्रा यथा । ॐ ॐ भृशं नमः । १ । ॐ ॐ नमः । २ । ॐ ॐ नमः ।३। ॐ ॐ ह्रीं नमः । ४ । ॐ ह्रूं नमः । ५ । ॐ ह्रूं नमः । ६ । ॐ ॐ ह्रूं ह्रूं नमः । ७ । ॐ नमः ।८। ह्रूं नमः । ९ । ॐ ह्रं नमः । १० । ॐ ह्रीं नमः ।११। ॐ ह्रीं नमः । १२ । ॐ क्षां क्षौं नमः । १३ । ॐ नमो नमः । १४ ।
“रुद्राक्षे देहसंस्थे तु कुक्कुरो म्रियते यदि ।

सोऽपि रुद्रपदं याति किं पुनर्मानवा गुह ॥
सप्तविंशतिरुद्राक्षमालया देहसंस्थया ।
यः करोति नरः पुण्यं सर्व्वं कोटिगुणं भवेत् ॥
यो ददाति द्विजातिभ्यो रुद्राक्षं भुवि षण्मुख ।
तस्य प्रीतो भवेद्रुद्रः स्वपदञ्च प्रयच्छति ॥
विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति नरकान् घोरान् यावदिन्द्राश्चतुर्द्दश ॥"

इति पद्मपुराणे रुद्राक्षमाहात्म्यम् । इति तन्त्रसारः ॥

रुद्राणी, स्त्री, (रुद्रस्य पत्नी । "इन्द्रवरुणभवशर्व्वरुद्रेति ।" ४ । १ । ४९ । इति ङीष् ।) दुर्गा । इत्यमरः ॥ तस्या व्युत्पत्तिर्यथा,—
"रुद्रस्येयन्तु रुद्राणी रौद्रं हन्ति करोति या ॥"
इति देवीपुराणे ४५ अध्यायः ॥
रुद्रजटा । इति राजनिर्घण्टः ॥

रुद्रावासः, पुं, (रुद्रस्य आवासः ।) काशी । इति केचित् ॥

रुद्रारिः, पुं, (रुद्रः अरिर्यस्य ।) कामदेवः । इति केचित् ॥

रुद्री, स्त्री, वीणाभेदः । इति शब्दरत्नावली ॥ अस्या विवरणं रुद्रवीणाशब्दे द्रष्टव्यम् ॥

रुध, इर् ध ञ औ ञि आवृतौ । इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-सक०-अनिट् ।) इर्, अरुधत् अरौत्सीत् । ध ञ, रुणद्धि रुन्धे । औ, रोद्धा । ञि, रुद्धोऽस्ति । इति दुर्गादासः ॥

रुध, य ङ औ कामे । अनुपूर्व्वोऽयम् । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) य ङ, अनुरुध्यते धनं लोकः । औ, अनुरोद्धा । इति दुर्गादासः ॥

रुधिरं, क्ली, (रुणद्धि रुध्यते इति वा । रुध + "इषिमदिमुदीति ।" उणा० १ । ५२ । इति किरच् ।) शरीरस्थरसभवधातुः । तत्पर्य्यायः । रक्तम् २ असृम् ३ त्वग्जम् ४ कीलालम् ५ क्षतजम् ६ शोणितम् ७ लोहितम् ८ असृक् ९ शोणम् १० लोहम् ११ चर्म्मजम् १२ । इति राजनिर्घण्टः ॥ (यथा,—
"तद्विशुद्धं हि रुधिरं बलवर्णसुखायुषा ।
युनक्ति प्राणिनं प्राणः शोणितं ह्यनुवर्त्तते ॥"
"बलदोषप्रमाणाद्वा विशुद्ध्या रुधिरस्य वा ।
रुधिरं स्रावयेज्जन्तोराशयं प्रसमीक्ष्य वा ॥"
इति चरके सूत्रस्थाने चतुर्व्विंशेऽध्याये ॥
"चतुर्व्विधं यदेतद्धि रुधिरस्य निवारणम् ।
सन्धानं स्कन्दनञ्चैव पाचनं दहनन्तथा ॥
व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम् ।
तथा सम्पाचयेद्भस्म दाहः सङ्कोचयेत् शिराः ॥
अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत् ।
सन्धाने भ्रस्यमाने तु पाचनैः समुपाचरेत् ॥
कल्पैरेतैस्त्रिभिर्व्वैद्यः प्रयतेत यथाविधि ।
असिद्धिमत्सु चैतेषु दाहः परम इष्यते ॥
सशेषदोषे रुधिरे न व्याधिरतिवर्त्तते ।
सावशेषे ततः स्थेयं न तु कुर्य्यादतिक्रमम् ॥
देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते ।
तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥"
इति सुश्रुते सूत्रस्थाने चतुर्द्दशेऽध्याये ॥
रुधिरस्रावेऽनध्ययनमुक्तं यथा, मनौ । ४।१२२ ।
"रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ।
सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥")
कुङ्कुमम् । इत्यमरः ॥ (यथा, रघुः । ११।२० ।
"राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा ॥")

रुधिरः, पुं, (रुध + किरच् ।) मङ्गलग्रहः । इति मेदिनी ॥

रुधिराख्यं, क्ली, (रुधिरमिति आख्या यस्य ।) मणिभेदः । यथा,—
"हुतभुग्रूपमादाय दानवस्य यथेप्सितम् ।
नर्म्मदायां निचिक्षेप किञ्चिद्दीनादि भूतले ॥
तत्रेन्द्रगोपकलितं शुकवक्त्रवर्णं
संस्थानतः प्रकटपीलुसमानमात्रम् ।
नानाप्रकारविहितं रुधिराख्यरत्न-
मुद्भूत तस्य खलु सर्व्वसमानमेव ॥
मध्येन्दुपाण्डरमतीवविशुद्धवर्णं
तच्चेन्द्रनीलसदृशं पटलं तुले स्यात् ।
सैश्वर्य्यभृत्यजननं कथितं तदेव
पक्वञ्च तत् किल भवेत् सुरवज्रवर्णम् ॥"
इति गारुडे ७८ अध्यायः ॥

रुप, य इर् विमोहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) विमोह आकुलीकरणम् । य, रुप्यति लोकं लोकः । इर्, अरुपत् अरोपीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

रुमा, स्त्री, सुग्रीवभार्य्या । विशिष्टलवणाकरः । इति मेदिनी । मे, २७ ॥

रुम्रः, पुं, (रम् + "चकिरम्योरुच्चोपधायाः ।" उणा० २।१४ । इति रक् उपधायाश्च उत्वम् ।) अरुणः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रुरुः, पुं, (रौतीति । रु + "रुशातिभ्यां क्रुन् ।" उणा० ४ । १०३ । इति क्रुन् ।) मृगविशेषः । इत्यमरः ॥ (यथा, महाभारते । ३ । ५० । ७ ।
"रुरून् कृष्णमृगांश्चैव मेध्यांश्चान्यान् वनेचरान् ।
बाणैरुन्मथ्य विविधैर्ब्राह्मणेभ्यो न्यवेदयत् ॥")
अस्य मांसगुणाः । स्निग्धत्वम् । गुरुत्वम् । मन्दाग्निबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ दैत्यभेदः । इति मेदिनी । रे, ७९ ॥ (यथा, कथासरित्सागरे । ५३ । १७१ ।
"एकानंशे शिवे दुर्गे नारायणि सरस्वति ।
भद्रकालि महालक्ष्मि सिद्धिरुरुविदारिणि ॥")
क्रूरसत्त्वविशेषः । तस्य भारुण्ड इति नाम । इति भागवतटीकायां श्रीधरः । ५ । २६ । ११ ॥ यथा च देवीभागवते । ८ । २२ । १०—११ ।
"इह लोकेऽमुना ये तु हिंसिता जन्तवः पुरा ।
त एव रुरवो भूत्वा परत्र पीडयन्ति तम् ॥
तस्माद्रौरवमित्याहुः पुराणज्ञा मनीषिणः ।
रुरुः सर्पादतिक्रूरो जन्तुरुक्तः पुरातनैः ॥"
स्वनामख्यातमुनिविशेषः । स तु च्यवनस्य पौत्रः । अयमेव निजायुषोऽर्द्धं दत्त्वा प्रियां जीवयामास । अस्य विवरणं देवीभागवते २ स्कन्धे ८ अध्यायमारभ्य तथा महाभारते १ पर्व्वणि ५ अध्यायमारभ्य द्रष्टव्यम् ॥)

रुवुः, पुं, (रु + कुः ।) एरण्डवृक्षः । इति रत्नमाला ॥ रक्तैरण्डः । इति राजनिर्घण्टः ॥ (एरण्डशब्देऽस्य विषयो ज्ञातव्यः ॥)

रुवुकः, पुं, (रुवुरेव । रुवु + स्वार्थे कन् ।) एरण्डवृक्षः । इति रत्नमाला ॥ रक्तैरण्डः । इति राजनिर्घण्टः ॥

रुवुक्, पुं, एरण्डवृक्षः । इति रत्नमाला ॥

रुवूकः, पुं, एरण्डवृक्षः । इत्यमरः ॥ (तथास्य पर्य्यायः ।
"शुक्लएरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः ॥
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते ।
रक्तोऽपरो रुवूकः स्याद्रुवूको रुवूस्तथा ॥
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रुश, औ श हिंसे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) औ, अरुक्षत् । श, रुशति रोक्ष्यति । इति दुर्गादासः ॥

रुष, क क्रुधि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, रोषयति । इति दुर्गादासः ॥

रुष, ञि वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ञि, रुष्टः रुषितोऽस्ति । रुरोष । इति दुर्गादासः ॥

रुष, य इर् ञि क्रुधि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) य, रुष्यति भृत्याय भूपालः । इर्, अरुषत् अरोषीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । ञि, रुष्टः रुषितोऽस्ति । इति दुर्गादासः ॥

रुषा, स्त्री, (रुष् + क्विप् । भागुरिमते टाप् ।) अमर्षः । तत्पर्य्यायः । क्रोधः २ मन्युः ३ क्रुधा ४ क्रुत् ५ कोपः ६ प्रतिघः ७ रोषः ८ रुट् ९ । इति हेमचन्द्रः । २ । २१२ ॥

रुषितः, त्रि, (रुष्यति स्मेति । रुष + क्तः । "रुष्यमत्वरसंघुषास्वनाम् ।" ७ । २ । २८ । इति पक्षे इट् ।) क्रोधयुक्तः । यथा,—
"तं नागपाशैर्बलिनन्दनो बली
घ्नन्तं स्वसैन्यं रुषितो बबन्ध ह ॥"
इति श्रीभागवते बाणयुद्धे ६२ अध्यायः ॥

रुष्टः, त्रि, (रुष्यते स्मेति । रुष + क्तः । "रुष्यमत्वरसंघुषास्वनाम् ।" ७।२।२८ । इति इड्भावः ।) क्रोधयुक्तः । यथा,—
"शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥"
इति तन्त्रसारः ॥

रुह, ञि ज औ जन्मनि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) ञि, रूढोऽस्ति ।

ज. रोह: रुह:। ञौ, अरुरुहत्। जनिर्जन्म। रोहति जन्तुर्जायते इत्यर्थ:। रुह जन्मनि प्रादुर्भावे इति प्राञ्च:। जन्मप्रादुर्भावयोरेकोऽर्थ:। इति गोविन्दभट्टचतुर्भुजमिश्रौ। रमानाथस्तु प्रादुर्भाव: स्फूर्त्तिरिति भेदमाह। इति दुर्गादास:॥

रुह:, त्रि, (रोहतीति। रुह+"इगुपधज्ञेति। ३।१।१३५। इति क:।) जात:। आरूढ़:। (यथा, मनु:। १। ४८।
"बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च॥")

रुहकं, क्ली, छिद्रम्। इति शब्दचन्द्रिका॥

रुहा, स्त्री, (रोहति छिन्नापि पुनरुत्पद्यते इति। रुह+क:। टाप्।) दूर्व्वा। इत्यमर:॥ (अस्या: पर्य्यायो यथा,—
"सहस्रवीर्य्या दूर्व्वा तु मङ्गल्या भार्गवी
रुहा॥"
इति वैद्यकरत्नमालायाम्॥
"नीलदूर्व्वा रुहानन्ता भार्गवी शतपर्व्विका।
शष्पं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
महासमङ्गा। इति राजनिर्घण्ट:॥

रुहिरुहिका, स्त्री, (रुह+इन्। रुहिरुत्पत्ति:। रुहिरुहिर्या पुन: पुनरुद्भवेन कायतीति। कै+क:। टाप्।) उत्कण्ठा। इति पुराणम्॥

रुक्मा, [न्] पुं, (रोहतीति। रुह+"श्वीङ्क्रुशिरुहीति।" उणा० ४। ११३। इति कनिप्।) वृक्ष:। इति सिद्धान्तकौमुद्यामुणादिवृत्ति:॥

रूक्ष, त् क पारुष्ये। इति कविकल्पद्रुम:॥ (अदन्त चुरा०-पर०-अक०-सेट्।) "दीर्घौ। तथा च।
'स पुनातु व्रजे यस्य गोरज:पातरूक्षितौ।
शिशुरुच्छिद्य यमलौ निष्पिपेष तरू चितौ॥'
इति कीचकयमकम्॥
पारुष्यमस्निग्धीभाव:। रूक्षयति रूक्षापयति केश: तैलाभावादिति शेष:।"इति दुर्गादास:॥

रूक्षं, त्रि, (रूक्षयतीति। रूक्ष पारुष्ये+पचाद्यच्।) अप्रेम। अचिक्कणम्। इत्यमर:। ३। ३। २२४॥ (यथा, महाभारते। १।१५३।६।
"ऊर्द्ध्वाङ्गुलि: स कण्डूयन् धुन्वन् रूक्षान् शिरोरुहान्॥")

रूक्ष:, पुं, वृक्ष:। इति हेमचन्द्र:॥ वरकवृक्षम्। इति राजनिर्घण्ट:॥

रूक्षगन्धक:, पुं, (रूक्षो गन्धो यस्य। कप्।) गुग्गुलु:। इति राजनिर्घण्ट:॥

रूक्षात्मिका, स्त्री, (रूक्ष आत्मा यस्या:। कप्। टापि अत इत्वम्।) लङ्काधान्यम्। इति राजनिर्घण्ट:॥

रूक्षदर्भ:, पुं, (रूक्ष: कर्कशो दर्भ:।) हरिदर्भ:। इति राजनिर्घण्ट:॥

रूक्षपत्र:, पुं, (रूक्षाणि पत्राणि यस्य।) शाखोटवृक्ष:। इति राजनिर्घण्ट:॥

रूक्षप्रिय:, पुं, (रूक्षस्य प्रिय:।) ऋषभौषधम्। इति राजनिर्घण्ट:॥

रूक्षस्वादुफल:, पुं, (रूक्षं स्वादु च फलं यस्य।) धन्वनवृक्ष:। इति राजनिर्घण्ट:॥

रूक्षा, स्त्री, (रूक्षयतीति। रूक्ष+अच्+टाप्।) दन्तीवृक्ष:। इति राजनिर्घण्ट:॥

रूढ़ं, त्रि, (रुह+क्त:।) जातम्। (यथा, रघु:। ६। ४१।
"येन श्रिय: संश्रयदोषरूढ़ं
स्वभावलोलेत्ययश: प्रमृष्टम्॥")
प्रसिद्धम्। इति मेदिनी। ढ़े, १॥ (यथा, रघु:। २। ५३।
"क्षतात् किल त्रायत इत्युदग्र:
क्षत्रस्य शब्दो भुवनेषु रूढ़:॥")

रूढ़:, पुं, (रुह+क्त:।) प्रकृतिप्रत्ययार्थमनपेक्ष्य शाब्दबोधजनक: शब्द:। यथा,—
"मुख्यो लाक्षणिको गौण: शब्द: स्यादौपचारिक:।
यौगिको योगरूढ़ो वा रूढ़ो वा मुख्य एव स:॥"
इति शाब्दिका:॥ * ॥
अपि च। रूढ़ं नाम लक्षयति विभजते च।
"रूढ़ं सङ्केतवन्नाम सैव संज्ञेति कीर्त्त्यते।
नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्भिदा॥"
यन्नाम याहशार्थे सङ्केतितमेव न तु यौगिकमपि तद्रूढ़म्। योगरूढ़न्तु पङ्कजादिकं न तथा रूढ़ानामेव च संज्ञापदेनाभिलप्यते। न तु रूढ़ादिवत् संज्ञापि नाम्नोऽवान्तरभेद:। येन विभागव्याघात: स्यात्। संज्ञायाश्च त्रयो भेदा: नैमित्तिकी पारिभाषिकी औपाधिकी चेति। पाचकपाठकादयस्तु न संज्ञा: सङ्केतशून्यत्वादिति वक्ष्यते॥ ये तु रूढ़स्य नाम्नश्चतुर्व्विधत्वमाहुस्तन्मतमुपन्यस्यति।
"जातिद्रव्यगुणस्पन्दैर्धर्म्मै: सङ्केतवत्तया।
जातिशब्दादिभेदेन चातुर्व्विध्यं परे जगु:॥"
गोगवयादीनां गोत्वादिजात्या। पश्वाढ्यादीनां लाङ्गूलधनादिद्रव्येण। धन्यपिशुनादीनां पुण्यद्वेषादिगुणेन। चलचपलादीनाञ्च शब्दानां कर्म्मणावच्छिन्नशक्तिमत्त्वाच्चातुर्व्विध्यमेव रूढ़ानामिति। यदुक्तं दण्ड्याचार्य्यै:।
"शब्दैरेभि: प्रतीयन्ते जातिद्रव्यगुणक्रिया:।
चातुर्व्विध्यादमीषान्तु शब्द उक्तश्चतुर्व्विध:॥"इति
तदेतड्डत्थ-म्लक-म्लखादीनामव्यभूम्यादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्यक्तमस्माभि:॥ * ॥
नैमित्तिकसंज्ञां लक्षयति।
"जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता।
जातिमात्रे हि सङ्केतादाक्षेपोऽर्थस्य दुष्करम्॥"
यन्नामजात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गोचैत्रादि:। सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रम्। गोपदं गोत्वे सङ्केतितमित्याकारकग्रहाद्गामानयेत्यादौ गोत्वादिना गवादेरन्वयानुपपत्तेश्च एकशक्तत्वग्रहस्यान्यानुभावकत्वेऽतिप्रसङ्गात्॥ * ॥ पारिभाषिकीमौपाधिकीञ्च संज्ञां क्रमेण लक्षयति।
"उभयावृत्तिधर्म्मेण संज्ञा स्यात् पारिभाषिकी।
औपाधिकी त्वनुगतोपाधिना या प्रवर्त्तते॥"
उभयावृत्तिधर्म्मावच्छिन्नसङ्केतवती संज्ञा पारिभाषिकी। यथाकाशडित्यादि:। या चानुगतोपाध्यवच्छिन्नसङ्केतवती संज्ञा सा त्वौपाधिकी। यथा भूतदूतादि:। सा हि सचेतनवृत्तिविशेषगुणवत्त्ववार्त्ताहारकत्वाद्यनुगतोपाधिपुरस्कारेणैव प्रवर्त्तते। इति शब्दशक्तिप्रकाशिका॥

रूढ़ि:, स्त्री, (रुह+क्तिन्।) जन्म। प्रादुर्भाव:। (प्रसिद्धि:। यथा, राजतरङ्गिण्याम्।४।२७१।
"रूढ़ि: परम्परायाता सेयमस्मद्गृहे स्थिता॥"
आरोहणम्। यथा, तत्रैव। १। २८५।
"यात्याश्रित: किल समाश्रयणीयलभ्यां
निम्नां गतिं जगति सर्व्वजनार्च्चितां वा।
गच्छत्यधस्तृणगुण: श्रितकूपयन्त्र:
पुष्पाश्रया सुरशिरोभुवि रूढ़िमेति॥")
रूढ़शब्दनिष्ठशक्ति:। यथा,—
"लब्धात्मिका सती रूढ़िर्भवेद्योगापहारिणी।
कल्पनीया तु लभते नात्मानं योगबाधत:॥"
इति कुमारभट्टकारिका॥

रूप, त् क तत्कृतौ। इति कविकल्पद्रुम:॥ (अदन्त चुरा०-पर०-सक०-सेट्।) तत्कृतौ रूपकरणम्। अरूरूपत् प्रतिमां शिल्पी। प्रतिमाया रूपं करोतीत्यर्थ:। निपूर्व्व: स्वरूपकथने। अनुमानं निरूप्यत इत्यनुमानखण्डम्। इति दुर्गादास:॥

रूपं, क्ली, (रूप्यते कीर्त्त्यते रौतीति वा। रु+"खष्पशिल्पशष्पेति।" उणा० ३। २८। इति प: दीर्घश्च। रूपयतीति। रूप्+अच् वा।) स्वभाव:। सौन्दर्य्यम्। नाणकम्। पशु:। शब्द:। ग्रन्थावृत्ति:। नाटकादि:। आकार:। (यथा, मनु:। ७। ७७।
"तदध्यास्योद्वहेद्भार्य्यां सवर्णां लक्षणान्विताम्।
कुले महति सम्भूतां हृद्यां रूपगुणान्विताम्॥")
श्लोक:। इति मेदिनीशब्दरत्नावलीभूरिप्रयोगा:॥ (स्वरूपम्। यथा, मनु:। ८। ४५।
"देशं रूपञ्च कालञ्च व्यवहारविधौ स्थित:॥")
शुक्लादि:। नाणकस्थाने नाणकम्। इति नानार्थरत्नमालाविश्वहेमचन्द्रा:॥ * ॥ रूपन्तु षोड़शविधम्। यथा। ह्रस्वम् १ दीर्घम् २ स्थूलम् ३ चतुरस्रम् ४ वृत्तम् ५ शुक्लम् ६ कृष्णम् ७ नीलारुणम् ८ रक्तम् ९ पीतम् १० कठिनम् ११ चिक्कणम् १२ श्लक्ष्णम् १३ पिच्छिलम् १४ मृदु १५ दारुणम् १६। इति महाभारते मोक्षधर्म्म:॥ * ॥ तस्य लक्षणं यथा,—
"अङ्गान्यभूषितान्येव केनचिद्भूषणादिना।
येन भूषितवद्भान्ति तद्रूपमिति कथ्यते॥"
इत्युज्ज्वलनीलमणि:॥
न्यायमते तत् चक्षुरिन्द्रियग्राह्यम्। द्रव्यादिप्रत्यक्षकारणम्। चक्षु: सहकारि। शुक्लाद्यनेकप्रकारम्। जलादिपरमाणुरूपं नित्यम्। अन्यत्र अनित्यम्। यथा,—

"चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् ।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ।
जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम् ॥"
इति भाषापरिच्छेदः ॥
उत्तरपदस्थरूपादिशब्दस्य उपमानवाचकत्वम् । यथा,—
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः ।
भूतरूपोपमाः काशः सन्निभः प्रथितः परः ॥"
इति हेमचन्द्रः ॥
अतिशयरूपस्य दोषो यथा,—
उमोवाच ।
"रूपातिशयसम्पन्ना नानागुणसमन्विताः ।
किमर्थं दुःखिता जाताः कान्तसौख्यविवर्ज्जिताः॥
ईश्वर उवाच ।
दमयन्ती तथा सीता रूपातिशयपारगा ।
दुःखिता तेन संजाता कान्तसौख्यविवर्ज्जिता ॥
अहल्या बन्धकी जाता कपिलस्य तु योषिता ।
रूपस्य तु प्रभावेण दासी जाता तिलोत्तमा ॥
तस्माद्रूपञ्च नेच्छन्ति लक्षणज्ञास्तपोधनाः ।
अतिरूपेण स्वल्पायुः पुरुषो योषितोऽपि वा ।
अथवा सौख्यहीनस्तु जायते तु महातपे ॥"
इति देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः ॥
तद्वैदिकपर्य्यायः । निर्णिक् १ वव्रिः २ वर्पः ३ वपुः ४ अमतिः ५ अप्सः ६ प्सुः ७ अप्नः ८ पिष्टम् ९ पेशः १० कृशनम् ११ स्परः १२ अर्ज्जुनम् १३ ताम्रम् १४ अरुषम् १५ शिल्पम् १६ । इति षोड़शरूपनामानि । इति वेदनिघण्टौ ३ अध्यायः ॥
रूपकं, क्ली, (रूपयतीति । रूपि+ण्वुल् ।) नाटकम् । ("तस्य रूपकसंज्ञाहेतुमाह । रूपारोपात्तु रूपकम् । रूपकस्य भेदानाह ।
नाटकमथ प्रकरणं
भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः
प्रहसनमिति रूपकाणि दश ॥
किञ्च ।
नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥
संलापकं श्रीगदितं शिल्पकञ्च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥
अष्टादश प्राहुरुपरूपकाणि मनीषिणः ।
विना विशेषं सर्व्वेषां लक्ष्म नाटकवन्मतम् ॥"
इति साहित्यदर्पणे ६ परिच्छेदः ॥)
मूर्त्तम् । (यथा, कथासरित्सागरे । ५५ । ४३ ।
"आदिशताश्च चित्रे किमालिखामीह रूपकम् ॥")
काव्यालङ्करणम् । इति मेदिनी । के, १४८ ॥
शेषस्य लक्षणं यथा,—
"रूपकं रूपितारोपात् विषये निरपह्नवे ।
तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा ॥
यत्र कस्यचिदारोपः परारोपणकारणम् ।
तत् परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनम् ॥
प्रत्येकं केवलं मालारूपञ्चेति चतुर्व्विधम् ।
अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् ॥
समस्तवस्तुविषयमेकदेशविवर्त्ति च ।
आरोप्याणामशेषाणां शाब्दत्वे प्रथमं मतम् ॥
यत्र कस्यचिदार्थत्वमेकदेशविवर्त्ति तत् ।
निरङ्गं केवलस्यैव रूपणं तदपि द्विधा ॥
माला केवलरूपत्वात् तेनाष्टौ रूपके भिदाः ॥"
इति साहित्यदर्पणे १० परिच्छेदः ॥
अपि च ।
"अभेदो भासते यस्मिन्नुपमानोपमेययोः ।
रूपकं कथ्यते सद्भिरलङ्कारोत्तमं यथा ॥
तन्वि शुभ्रमुखाम्भोजं लीलालकमधुव्रतम् ।
न कस्य हरते चेतो लसद्दशनकेशरम् ॥
अस्त्यनेकप्रकारत्वं रूपकोपमयोरपि ।
संक्षेपेणोक्तमन्यत्तु सुधीभिरवधीयताम् ॥"
इति काव्यचन्द्रिका ॥
संख्याविशेषः । यथा,—
"सपादौ प्रोच्यते गुञ्जा सा तिस्रो रूपकं भवेत् ।
रूपकैर्द्दशभिः प्रोक्तः कलञ्जो नाम नामतः ॥"
इति शुक्तिकल्पतरुः ॥
(उपमानम् । यथा, साहित्यदर्पणे १० परिच्छेदे समासोक्त्यलङ्कारे ।
"यत्र तु रूप्यरूपकयोः साहश्यमस्फुटमिति ॥"
पुं, मुद्रा । यथा, कथासरित्सागरे । ७८।१३ ।
"अल्पे परिकरेऽप्येभिरियद्भिः स्वर्णरूपकैः ।
किमेष व्यसनं पुण्यात्यथ कश्चन सहायम् ॥"
तथाच वृहत्संहितायाम् । ८१ । १२ ।
"गुञ्जात्रयस्य मूल्यं पञ्चाशद्रूपका गुणयुतस्य ॥")
रूपतत्त्वं, क्ली, (रूपस्य तत्त्वम् ।) शीलम् । यथा,—
"स्याद्रूपं लक्षणं भावश्चात्मप्रकृतिरीतयः ।
सहजो रूपतत्त्वञ्च धर्म्मसर्गौ निसर्गवत् ॥"
इति हेमचन्द्रः । ६ । १२ ॥
रूपधारी, [न्] (रूपं धरतीति । धृ+णिनिः ।) सौन्दर्य्यविशिष्टः । यथा,—
"ततो विकटरूपोऽसौ सर्व्वशास्त्रार्थपारगः ।
विवाहयद्द्विजसुतां रूपेणानुपमां द्विजः ॥
सावमेने च भर्त्तारं सुशीलमपि भाविनी ।
विरूपमिति मन्वाना ततः सोऽभूत् सुदुःखितः ॥
ततो निर्व्वेदसंयुक्तो गत्वाश्रमपदं महत् ।
इरावत्यास्तटे श्रीमान् रूपधारिणमासदत् ॥
तमाराध्य जगन्नाथं नक्षत्रपुरुषेण हि ।
सुरूपतामवाप्याग्र्यां तस्मिन्नेव च जन्मनि ॥"
इति वामनपुराणे ७६ अध्यायः ॥
रूपनाशनः, पुं, (रूपस्य नाशनं अदर्शनं यत्र ।) पेचकः । इति शब्दरत्नावली ॥
रूपवान्, [त्] त्रि, (रूपमस्यास्तीति । रूप+"रसादिभ्यश्च ।" ५ । २ । ९५ । इति मतुप् । मस्य वः ।) आकारविशिष्टः । (यथा, भागवते । २ । ५ । २७ ।
"वायोरपि विकुर्व्वाणात् कालकर्म्मस्वभावतः ।
उदपद्यत वै तेजो रूपवत् स्पर्शशब्दवत् ॥")
सौन्दर्य्ययुक्तः । (यथा, महाभारते । ३ । ४५ । १२ ।
"सत्यवाक् पूजितो वक्ता रूपवाननहङ्कृतः ॥")
रूपाजीवा, स्त्री, (रूपेण सौन्दर्य्येण आजीवतीति । आ+जीव्+अच् । टाप् ।) वेश्या । इत्यमरः । २ । ६ । १९ ॥ (यथा, रामायणे । २ । ३६ । ३ ।
"रूपाजीवाश्च वादिन्यो वणिजश्च महाधनाः ।
शोभयन्तु कुमारस्य वाहिनीः सुप्रसारिताः ॥")
रूपास्त्रः, पुं, (रूपमेव अस्त्रं यस्य ।) कामदेवः । इति त्रिकाण्डशेषः ॥
रूपिका, स्त्री, (रूपमस्या अस्तीति । रूप+ठन् ।) श्वेतार्कवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते । ५ । ६ ।
"पललं तिलतैलञ्च रूपिकायाः पयो गुड़ः ॥")
रूपेश्वरी, स्त्री, (रूपाणामीश्वरी ।) देवीविशेषः । सा तु प्रभवादिषष्टिवर्षान्तर्गतैकविंशवर्षे पूज्या । यथा,—
"रूपेश्वरी प्रकर्त्तव्या वृषयुग्मव्यवस्थिता ।
जटामुकुटभारेन्दुत्रिशूलोरगभूषणा ॥
मणिमौक्तिकशोभाढ्या सितचन्दनचर्च्चिता ।
पूजिता कुसुमैर्द्दिव्यैः सर्व्वकामफलप्रदा ॥"
इति देवीपुराणे संवत्सरदेवताविंशतिविधिः प्रथमः ॥
रूप्यं, क्ली, (आहतं रूपं अस्यास्तीति । रूप्+"रूपादाहतप्रशंसयोर्यप् ।" ५।२।१२० । इति यप् ।) आहतस्वर्णरजतम् । इत्यमरः ।२।९। ९१ ॥ हेम रूप्यञ्च आहतं अश्ववराहपुरुषादिरूपमुत्थापयितुं निर्घातिकया ताड़ितं रूप्यमुच्यते रूपाय आहतं रूप्यं टङ्के कादिति ख्यातः । इति भरतः ॥ * ॥ धातुविशेषः । रूपा इति भाषा ॥ (यथा, महाभारते । ५ । ३९ । ७९ ।
"सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु ।
ज्ञेयं त्रपु मलं सीसं सीसस्यापि मलं मलम् ॥")
तत्पर्य्यायः । शुभ्रम् २ वसुश्रेष्ठम् ३ रुधिरम् ४ चन्द्रलोहकम् ५ श्वेतकम् ६ महाशुभ्रम् ७ रजतम् ८ तप्तरूपकम् ९ चन्द्रभूति १० सितम् ११ तारम् १२ कलधूतम् १३ इन्द्रलोहकम् १४ रौप्यम् १५ धौतम् १६ सौधम् १७ चन्द्रहासम् १८ । इति राजनिर्घण्टः ॥ खर्ज्जूरम् १९ दुर्व्वर्णम् २० श्वेतम् २१ रङ्गबीजम् २२ राजरङ्गम् २३ लोहराजकम् २४ । इति शब्दरत्नावली ॥ कलधौतम् २५ । इति जटाधरः ॥ अस्य गुणाः । स्निग्धत्वम् । कषायत्वम् । अम्लत्वम् । विपाके मधुरत्वम् । सरत्वम् । वातपित्तहरत्वम् । रुच्यत्वम् । वलीपलितनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अथ रूप्यस्योत्पत्तिनामलक्षणगुणाः ।
"त्रिपुरस्य वधार्थाय निर्निमेषैर्व्विलोकनैः ।
निरीक्षयामास शिवः क्रोधेन परिपूरितः ॥
ततस्तूल्का समपतत्तस्यैकस्मादिलोचनात् ।

अतो रुद्र: समभवद्वैश्वानर इव ज्वलन् ॥
द्वितीयादपतन्नेत्रादश्रुबिन्दुस्तु वामकात् ।
तस्मादयतमुत्पन्नमुक्तकर्म्मसु योजयेत् ॥
कृत्रिमञ्च भवेत्तद्धि रङ्गादिरसयोगत: ।
रूप्यन्तु रजतं तारं चन्द्रकान्ति सितं शुभम् ॥
गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षमम् ।
वर्णाढ्यं चन्द्रवत् स्वच्छं रूप्यं नवगुणं शुभम् ॥
कठिनं कृत्रिमं रूक्षं रक्तं पीतं दलं लघु ।
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥
रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ।
वयस: स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥
प्रमेहादिकरोगांश्च नाशयत्यचिरात् ध्रुवम् ।
तारं शरीरस्य करोति तापं
विध्वंसनं यच्छति शुक्रनाशम् ।
वीर्य्यं बलं हन्ति तनोश्च पुष्टिं
महागदान् पोषयति ह्यशुद्धम् ॥"
अथ मारणाय योग्यं रूप्यमाह ।
"गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षमम् ।
वर्णाढ्यं चन्द्रवत् स्वच्छं तारं नवगुणं स्मृतम् ॥"
अयोग्यम् ।
"कठिनं कृत्रिमं रूक्षं रक्तं पीतं दलं लघु ।
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥"
अथ शोधनविधि: ।
"पत्तलीकृतपत्राणि तारस्याग्नौ प्रतापयेत् ।
निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं रजतपत्राणां विशुद्धि: संप्रजायते ॥"
अथाशुद्धस्य रूप्यस्य दोषमाह ।
"रूप्यं ह्यशुद्धन्तु करोति तापं
विध्वंसनं वीर्य्यबलक्षयञ्च ।
देहस्य पुष्टिं हरते तनोति
रोगांस्तत: शोधनमस्य कुर्य्यात् ॥"
अथ रूप्यस्य मारणविधि: ।
"भागैकं तालकं मर्द्यं याममम्लेन केनचित् ।
तेन भागत्रयं तारपत्राणि परिलेपयेत् ॥
धृत्वा मूषापुटे रुद्ध्वा पुटेत् त्रिंशद्वनोपलै: ।
समुद्धृत्य पुनस्तालं दत्त्वा रुद्ध्वा पुन: पचेत् ।
एवं चतुर्द्दशपुटैस्तारं भस्म प्रजायते ॥"
अन्यप्रकार: ।
"स्नुहीक्षीरेण संपिष्टं माक्षिकं तेन लेप-
येत् ।
तालकस्य प्रकारेण तारपत्राणि बुद्धिमान् ।
पुटे चतुर्द्दशपुटैस्तारं भस्म प्रजायते ॥"
एवं मारितस्य रूप्यस्य गुणा: ।
"रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ।
वयस: स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥
प्रमेहादिकरोगांश्च नाशयत्यचिरात् ध्रुवम् ॥"
इति भावप्रकाश: ॥
अथ रूप्यकरणम् ।
"मध्वाज्यं गुडताम्रञ्च करेणा माक्षिकं रसम् ।
धमनाच्च भवेद्रौप्यं सुवर्णकरणं शृणु ॥"
इति गारुडे १९८ अध्याय: ॥

रूप्यं, त्रि, (प्रशस्तं रूपं अस्यास्तीति । रूप+"रूपादाहतप्रशंसयोर्यप् ।" ५ । २ । १२० । इति यप् ।) सुन्दरम् । इति मेदिनी । ये, ५० ॥ (क्ली, उपमेयम् । यथा, साहित्यदर्पणे १० परिच्छेदे समासोक्त्यलङ्कारे ।
"तत्र हि तिमिरांशुकयोरूप्यरूपकभावो द्वयोरावरकत्वेन स्फुटमिति ॥"* ॥ पुं, प्रत्ययविशेष: । स च तत आगत इत्येतस्मिन्विषये "हेतुमनुष्येभ्योऽन्यतरस्यां रूप्य: ।" ४ । ३ । ८१ । इति सूत्रेण हेतुभ्यो मनुष्येभ्यश्चान्यतरस्यां भवति । यथा समादागतं समरूप्यम् । देवदत्तरूप्यम् ।)

रूप्याध्यक्ष:, पुं, (रूप्यस्य रूप्ये वा अध्यक्ष: ।) नैष्किक: । इत्यमर: ॥ रूप्यं रजतं तदेव निष्कं पूर्व्ववत् ष्णिक: रजताध्यक्षो नैष्किक: । टङ्कपतिर्नैष्किक इत्यन्ये । पुरुषाश्वादिरूपं गठितं रजतं रूप्यं तस्याध्यक्षो नैष्किक इति केचित् । इति भरत: ॥

रूबुक:, पुं, एरण्ड: । इति शब्दमाला ॥ (यथास्य पर्य्याय: ।
"शुक्लएरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तक: ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डक: ॥
वातारिस्तरुणश्चापि रुबुकश्च निगद्यते ।
रक्तोऽपरो रुबुक: स्यादुरुबुको रुबुस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चुञ्चुरुत्तानपत्रक: ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रूष, त् क विस्फुरणे । इति कविकल्पद्रुम: ॥ (अदन्तचुरा०-पर०-अक०-सेट् ।) दीर्घी । मूर्द्धन्योपध: । अरुरूषत् । इति दुर्गादास: ॥

रूषक:, पुं, (रूषयतीति । रूष+ण्वुल् ।) वासक: । इति जटाधर: ॥

रूषितं, त्रि, (रूष+क्त: ।) गुण्ठितम् । इत्यमर: ॥ हे धूलिगुण्ठकेनैव न्यासिते । गुड़ि क वेढ़े रूष त् क स्याद्विस्फुरणे क्त: । इति भरत: ॥ (यथा, रामायणे । २ । ४२ । १५ ।
"य: सुखेनोपधानेषु शेते चन्दनरूषित: ।
वीज्यमानो महार्हाभि: स्त्रीभिर्मम सुतोत्तम: ॥")

रे, व्य, सम्बोधनविशेष: । यथा,—
"सम्बोधनेऽङ्ग भो: पाट् प्याट् हे है हं होऽरे
रेऽपि च ।"
इति हेमचन्द्र: । ६ । १७१ ॥
(यथा, कथासरित्सागरे । ३२ । १५५ ।
"तत्र मन्दमिवालोक्य साभिप्राय: समां नृप: ।
पप्रच्छ रे किमीढक् त्वं सञ्जात: कथ्यता-
मिति ॥")

रेक, ऋ ङ शङ्कायाम् । इति कविकल्पद्रुम: । (भ्वा०-आत्म०-सक०-सेट् ।) शङ्का संशयारोप: । ऋ, अरिरेकत् । ङ, रेकते पुरुषत्वं स्थाणौ । स्थाणुर्व्वा पुरुषो वेति संशयमारोपयतीत्यर्थ: । रिरेके । इति दुर्गादास: ॥

रेक:, पुं, (रेक शङ्कायाम् अथवा रिच्+घञ् ।) शङ्का । नीच: । विरेचनम् । इति मेदिनी । के, ३१ ॥ (यथा,—
"वस्तिर्वातविकारान् पैत्तान् रेक: कफोद्भवान्
वमनम् ।
क्षौद्रं जयति बलासं सर्पि: पित्तं समीरणं
तैलम् ॥"
इति वाभटे उत्तरस्थाने ४० अध्याये ॥) भेक: । इति त्रिकाण्डशेष: ॥

रेक्ण:, [स्] क्ली, (रिणक्तीति । रिच्+"रिचेर्धने घित् किच्च ।" उणा० ४ । १९८ । इति असुन् । घात् प्रत्ययस्य नुट् । घित्वात् कुत्वम् ।) स्वर्णम् । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

रेका, स्त्री, (रेक शङ्कायाम्+अच् । स्त्रियां टाप् ।) सन्देह: । इति हेमचन्द्र: ॥

रेखा, स्त्री, (लिख्यते इति । लिख विलेखने+"षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इति भिदादित्वात् अङ् । टाप् । रलयोरैक्यात् लस्य रत्वम् ।) अल्पकम् । छद्म । आभोग: । उल्लेख: । इति विश्व: ॥ उल्लेखस्तत्र दण्डाकारलिपिविशेष: । दाँड़ी इति कसी इति च भाषा । यथा,—
"यावती यावती रेखा यद्ग्रहाणामष्टवर्गके ।
तावतीं द्विगुणीकृत्य अष्टाभि: परिशोधयेत् ॥
अष्टोपरि भवेद्रेखा अष्टाभ्यन्तरबिन्दव: ।
यत्र रेखा न बिन्दुश्च तत् समं परिकीर्त्तितम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
शरीरस्थरेखया शुभाशुभलक्षणं यथा,—
"ललाटे यस्य दृश्यन्ते तिस्रो रेखा: समा,स्थिता: ।
सुखी पुत्त्रसमायुक्त: स षष्टिं जीवते नर: ॥
चत्वारिंशच्च वर्षाणि द्विरेखादर्शनान्नर: ।
विंशत्यब्दमेकरेख आकर्णान्ता: शतायुष: ॥
आकर्णान्तरिता रेखास्तिस्रश्च स्यु: शतायुष: ।
सप्तत्या स्फुट्रे रेखा तु षष्ट्यायुस्तिसृभिर्भवेत् ॥
व्यक्ताव्यक्ताभी रेखाभिर्विंशत्यब्दायुरेव हि ।
चत्वारिंशच्च वर्षाणि हीनरेखस्तु जीवति ॥
भिन्नाभिश्चैव रेखाभिरपमृत्युर्नरस्य हि ।
त्रिशूलं पट्टिशं चापि ललाटे यस्य दृश्यते ।
धनपुत्त्रसमायुक्त: स जीवेत् शरद: शतम् ॥
तर्ज्जन्या मध्यमाङ्गुल्या आयूरेखा तु मध्यत: ।
सम्प्राप्ता या भवेद्दुग्ध स जीवेत् शरद: शतम् ॥
कुलरेखा तु प्रथमा अङ्गुष्ठादनुवर्त्तते ।
मध्यमाया: करे रेखा आयूरेखा अत: परम् ॥
कनिष्ठिकां समाश्रित्य आयूरेखां समादिशेत् ।
अच्छिन्ना वाविभक्ता वा स जीवेच्छरद: शतम् ॥
यस्य पाणितले रेखा आयुस्तस्य प्रकाशयेत् ।
शतं वर्षाणि जीवेच्च भोगी दक्ष ! न संशय: ॥
कनिष्ठिकां समाश्रित्य मध्यमायामुपागता ।
षष्टिं वर्षायुषं कुर्य्यात् आयूरेखा तु मानवम् ॥"
इति गारुडे ६३ अध्याय: ॥ * ॥
अपिच ।
"घनाङ्गुलिश्च सघनस्तिस्रो रेखाश्च यस्य वै ।
नृपते: करतलगा मणिबन्धे समुत्थिता ॥
युग्ममीनाङ्कितकरो भवेत् सत्रप्रदो नर: ।
वज्राकारश्च धनिनां मत्स्यपुच्छनिभो बुधे ॥

शङ्खातपत्रशिबिकागजपद्मोपमा नृपे ।
कुम्भाङ्कुशपताकाभा मृणालाभा निरीश्वरे ।
दामाभाश्च गवाढ्यानां स्वस्तिकाभा नृपेश्वरे ।
चक्रासितोमरधनुःकुन्ताभा नृपतेः करे ।
उदूखलाभा यज्वाढ्ये वेदीभाश्चाग्निहोत्रिणि ।
वापीदेवकुलाभाश्च त्रिकोणाभाश्च धार्म्मिके ।
अङ्गुष्ठमूलगा रेखाः पुत्त्राः स्युश्चाव कारिकाः ।
प्रदेशिनीगता रेखा कनिष्ठामूलगामिनी ।
शतायुषश्च कुरुते छिन्नया तरुतो भयम् ।
निःस्वाश्च बहुरेखाः स्युर्निर्द्धनाश्चिबुके कृशैः ॥"
इति गारुडे ६६ अध्यायः ॥

रेखागणितः, पुं, (रेखाया गणितं प्रमाणस्वरू-पादि यत्र ।) श्रीजयसिंहमहाराजपण्डितद्विज-सम्राड्जगन्नाथकृतगणितग्रन्थविशेषः । तस्य संक्षिप्तविवरणम् । यथा,—
"येनेष्टं वाजपेयाद्यैर्म्महादानानि षोड़श ।
दत्तानि द्विजवर्य्येभ्यो गोग्रामगजवाजिनः ॥
तस्य श्रीजयसिंहस्य तुष्ट्यै रचयति स्फुटम् ।
द्विजः सम्राड् जगन्नाथो रेखागणितसुत्त-
मम् ॥
अपूर्व्वं विहितं शास्त्रं यत्र कोणाववोधनात् ।
क्षेत्रेषु जायते सम्यक् व्युत्पत्तिर्गणिते तथा ॥
शिल्पशास्त्रमिदं प्रोक्तं ब्रह्मणा विश्वकर्म्मणे ।
पारम्पर्य्यवशादेतदागतं धरणीतले ॥
तदुच्छिन्नं महाराजजयसिंहाज्ञया पुनः ।
प्रकाशितं मया सम्यक् गणकानन्दहेतवे ॥"*॥
अथ रेखागणिता । अत्र ग्रन्थे पञ्चदशा-ध्यायाः सन्ति । अष्टसप्तोत्तरचतुःशतम् शक-लानि सन्ति । तत्र प्रथमाध्याये अष्टचत्वारिंश-च्छकलानि । तत्रादौ परिभाषा । यः पदार्थः दर्शनयोग्यः विभागानर्हः स बिन्दुर्वाच्यः । यः पदार्थः दीर्घः विस्ताररहितः विभागार्हः स रेखाशब्दवाच्यः । विस्तारदैर्घ्ययोर्यद्गृह्यते तद्ध-रातलं तदेव क्षेत्रम् । तद्द्विविधं एकं जलवत् समं द्वितीयं विषमम् । अथ रेखापि द्विविधा । एका वक्रा अन्या सरला । अथ सरलरेखालक्षणम् । यस्यां न्यस्ता बिन्दवः अवलोकिताः सन्त एक-बिन्दुनाच्छाद्यन्ते सा सरला अन्यथा कुटिला । धरातलमपि समं विषमञ्च ज्ञेयम् । समं य आहणोति । यत् रेखाद्वयं समं समानान्तरं न भवति तस्य यस्मिन् प्रदेशे बह्वन्तरं भवति तद्दिशि वर्द्धितयो रेखयोरन्तरमुत्तरोत्तरं अधिक-मेव भवति यत्राल्पमन्तरं भवति तद्दिशि वर्द्धितयो रेखयोरन्तरमुत्तरोत्तरमल्पमेव भवति यावद्रेखासंयोगं तदनन्तरमन्तरं वर्द्धिष्णु भवति । यत्र कोणशब्दः तत्र सरलरेखाकृत एव कोणो ज्ञेयः । यत्र रेखाशब्दः तत्र सरलैव रेखा ज्ञेया । यत्र भूमितलशब्दः तत्र जलसमीकृत-मेव भूतलं ज्ञेयम् । इति रेखागणितस्य परि-भाषा ॥

रेखाभूमिः, स्त्री, (रेखास्थिता भूमिः ।) लङ्का-सुमेरुपर्व्वतयोर्म्मध्यसूत्रगतदेशः । यथा,—
"यल्लङ्कोज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान्
स्पृशन्
सूत्रं मेरुगतं बुधैर्न्निगदिता सा मध्यरेखा
भुवः ।
आदौ प्रागुदयोऽपरत्र विषये पश्चाद्धि रेखो-
दयात्
स्यात्तस्मात् क्रियते तदन्तरभवं खेटेष्वृणं स्वं
फलम् ॥"
इति सिद्धान्तशिरोमणिः ॥ * ॥
अन्यच्च । रेखोक्ता सूर्य्यसिद्धान्ते । यथा रेखा-मधिकृत्य ।
"राक्षसालयदेवौकः शैलयोर्म्मध्यसूत्रगाः ।
रोहितकमवन्ती च तथा सन्निहितं सरः ॥"
अस्यार्थः । लङ्कासुमेरुपर्व्वतयोर्म्मध्यसूत्रगा देशा रेखासंज्ञिताः । तान् देशानाह । रोहि-तकदेशोऽवन्तीदेशः सन्निहितं सरः कुरुक्षेत्र-क्षेत्रञ्च । रेखायाः पूर्व्वदेशे परदेशे च यथा-संख्यं सूर्य्योदयकालात् परकालं पूर्व्वकालञ्च वारप्रवृत्तिः स्यादित्यर्थः । एतेनैतदुक्तं भवति रेखासंज्ञकदेशस्थलोका यदा सूर्य्यं पश्यन्ति तदैव सर्व्वदेशे वारप्रवृत्तिरित्यर्थः । तत्र रेखा पूर्व्वस्थाः सन्निहितत्वादादौ सूर्य्यं पश्यन्ति तद-नन्तरञ्च रेखास्थाः । अतो रेखापूर्व्वे सूर्य्यो-दयात् परं वारः । तथा रेखास्थैः सूर्य्ये दृष्टे सति पश्चात् रेखापरस्थाः पश्यन्ति अतो रेखा-परदेशे सूर्य्योदयात् पूर्व्वं वार इत्यर्थः । तत्र कालपरिमाणमाह । रेखातो यावन्ति देशा-न्तरयोजनानि तत्सम्मिताभिर्व्विघटीभिः पलैः पादहीनाभिः चतुर्थभागहीनाभिर्व्वारप्रवृत्तिः स्यादित्यर्थः । देशान्तरसाधनप्रकारस्तु सूर्य्य-सिद्धान्ते उक्तः । अत्र तु संक्षेपेण किञ्चित् कथ्यते । गौड़े पञ्चदशाधिकशतयोजनानि ११५ । दक्षिणराढ़े गङ्गातीरे दशाधिकशतम् ११० । भैरवीतीरे विंशत्यधिकशतम् १२० । वङ्गे सुवर्ण-ग्रामादौ चत्वारिंशदधिकशतम् १४० । वारा-णस्यामष्टोत्तरशतम् १०८ देशान्तरम् । एव-मन्यत्राप्यूह्यम् । तन्मतन्तु लोकसंगृहीतमिति किन्तु सूर्य्यसिद्धान्ते अर्द्धरात्रावेव वारप्रवृत्ति-रुक्ता । यथा,—
"वारप्रवृत्तिः प्राग्देशे क्षपार्द्धेऽभ्यधिके भवेत् ।
तद्देशान्तरनाड़ीभिः पश्चादूने विनिर्द्दिशेत् ॥"
इति दीपिकाटीकायामर्थकौमुद्यां गोविन्दा-नन्दः ॥

रेचकं, क्ली, (रेचयतीति । रिच् + णिच् + ण्वुल् ।) कङ्कुष्ठमृत्तिका । इति राजनिर्घण्टः ॥ (भेदके, त्रि ।)

रेचकः, पुं, (रेचयतीति । रिच् + णिच् + ण्वुल् ।) यवक्षारः । इति त्रिकाण्डशेषः ॥ जयपाल-वृक्षः । इति राजनिर्घण्टः ॥ क्रीड़ार्थजल-निःक्षेपयन्त्रम् । पिच्कारी इति भाषा । यथा,
"सिच्यमानोऽच्युतस्ताभिर्म्महिषीभिः स
रेचकैः ।
प्रतिषिञ्चन् विचिक्रीड़े यक्षीभिर्यक्षराड़िव ॥"
इति श्रीभागवते । १० । ९० । ९ ॥
(ध्याननासिकया प्राणायामाङ्गमुच्यमानवायुः । यथा, भागवते । ३ । २८ । ९ ।
"प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ॥"
अस्याश्चिवरणं प्राणायामशब्दे द्रष्टव्यम् ।)
रेच्यः, पुं, ध्याननासिकया प्राणायामाङ्गमुच्यमान-वायुः । यथा,—
"पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः ।
नासिकाकृष्ट उच्छ्वासो ध्मातुः पूरक उच्यते ।
कुम्भको निश्चलश्वासो मुच्यमानस्तु रेचकः ॥"
इत्याह्निकाचारतत्त्वम् ॥
भेदके, त्रि ॥

रेचनं, (रिच् + ल्युट् ।) मलभेदनम् । तत्प-र्य्यायः । प्रस्कन्दनम् २ विरेकः ३ विरेचनम् ४ । इति रत्नमाला ॥ रेकः ५ रेचना ६ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । ३ ।
"रसस्थानं वमनार्थमध्यायो रेचनाय च ॥"
रेचनद्रव्याणि तु सुश्रुते । १ । ४४ । अध्यायतो ज्ञेयानि ॥)

रेचनकः, पुं, (रेचयतीति । रिच् + णिच् + ल्युः । ततः स्वार्थे कन् ।) कम्पिल्लकः । इति राज-निर्घण्टः ॥

रेचना, स्त्री, (रिच् + णिच् + युच् । टाप् ।) काम्पिल्लः । इति शब्दरत्नावली ॥

रेचनी, स्त्री, (रिच्यतेऽनयेति । रिच् + ल्युट् + ङीप्) काम्पिल्लः । इति शब्दरत्नावली ॥ कालाञ्जनी । दन्तीवृक्षः । इति राजनिर्घण्टः ॥ श्वेतत्रिवृता । इति मेदिनी ॥ (अस्याः पर्य्यायो यथा,—
"श्वेता त्रिवृत्ता भण्डी स्यात् त्रिवृता त्रिपुटापि च ।
सर्व्वानुभूतिः सरला निशोत्रा रेचनीति च ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥
वटपत्री । तत्पर्य्यायो यथा,—
"वटपत्री तु कथिता मोहिनी रेचनी बुधैः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रेची, स्त्री, (रेचयतीति । रिच् + णिच् + अच् । गौरादित्वात् ङीष् ।) कम्पिल्लकः । अङ्कोठः । इति राजनिर्घण्टः ॥

रेज, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अरिरेजत् । ङ, रेजते रिरेजे । इति दुर्गादासः ॥

रेट, ऋ ञ याचे । वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-द्विक०-सेट् ।) ऋ, अरिरेटत् । ञ, रेटति रेटते । याचो याचनम् । इति दुर्गा-दासः ॥

रेणुः, पुं स्त्री, (रिणातीति । री गतिरेषणयोः + "अजिवृरीभ्यो निच ।" उणा० ३ । ३८ । इति णुः ।) धूलिः । इत्यमरः ॥ (यथाह कश्चित् ।
"मामुखीकरणरेणुरस्ति ते
पादयोरिति कथा प्रथीयसी ।

चालयामि तव पादपङ्कजं
नाथ ! दारुदृषदोस्तु का भिदा ॥”)

रेणुः, पुं, (री + णुः ।) पर्पटः । रेणुका । पांशुः । इति राजनिर्घण्टः ॥ (यथा, रघुः । ६।२३ ।
“दिनकराभिमुखा रणरेणवो
रुरुधिरे रुधिरेण सुरद्विषाम् ॥”
विड़ङ्गः । तत्पर्य्यायो यथा,—
“जन्तुघ्नं भस्मकं रेणुः क्रिमिघ्नं चित्रतण्डुलम् ।
क्रिमिशत्रुः विड़ङ्गञ्च गर्द्दभं तच्च केवलम् ॥”
इति वैद्यकरत्नमालायाम् ॥)

रेणुका, स्त्री, (रेणुना कायतीति । कै + कः । टाप् ।) मरिचाकृतिसुगन्धिद्रव्यविशेषः । तत्पर्य्यायः । द्विजा २ हरेणुः ३ कौन्ती ४ कपिला ५ भस्मगन्धिनी ६ । इत्यमरः ॥ कान्ता ७ नन्दिनी ८ महिला ९ राजपुत्त्री १० हिमा ११ रेणुः १२ पाण्डुपुत्त्री १३ हरेणुका १४ सुपर्णी १५ शिशिरा १६ शान्ता १७ हन्ता १८ क्वचित् पुस्तके हृता इति च पाठः । धर्म्मिणी १९ कपिलोमा २० हैमवती २१ पाण्डुपत्नी २२ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । खर्ज्जू-कण्डूति-तृष्णा-दाह-विषनाशित्वम् । सुखवैमल्यकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
अथ रेणुका मरीचसदृशी ।
“रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपुत्त्री स्मृता कौन्ती हरेणुका ॥
रेणुका कटुका पाके तिक्तानुष्णा कटुर्लघुः ।
पित्तला दीपनी मेध्या पाचनी गर्भपातिनी ।
बलास-वात-वैक्लव्य-तृट्-कण्डू-विष-दाह-नुत् ॥”
इति भावप्रकाशः ॥
अन्यच्च ।
“रेणुका कफवातघ्नी दीपनी पित्तला लघुः ।”
इति राजवल्लभः ॥ * ॥
(“हरेणू रेणुका कौन्ती ब्राह्मणी हैमगन्धिनी ॥”
इति वैद्यकरत्नमालाम् ॥)
परशुराममाता । तद्विवरणं यथा,—
मार्कण्डेय उवाच ।
“अथ काले व्यतीते तु जमदग्निर्म्महातपाः ।
विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम् ॥
भार्य्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम् ।
सा तस्मात् सुषुवे पुत्त्रान् चतुरो वेदसम्मतान् ॥
रुमण्वन्तं सुषेणञ्च विश्वं विश्वावसुं तथा ।
पश्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः ॥
कार्त्तवीर्य्यवधार्थाय शक्राद्यैः सकलैः सुरैः ।
याचितः पञ्चमः सोऽभूत्तेषां रामाह्वयस्तु यः ॥
भारावतारणार्थाय जातः परशुना सह ।
सहजः परशुस्तस्य तं जहाति कदापि न ॥
अयं निजपितामह्याश्चरुभुक्तिविपर्य्ययात् ।
ब्राह्मणः क्षत्त्रियाचारो रामोऽभूत् क्रूरकर्म्मकृत् ॥
स वेदानखिलान् ज्ञात्वा धनुर्व्वेदांश्च सर्व्वतः ।
स्वतातात् कृतकृत्योऽभूद्वेदविद्याविशारदः ॥
एकदा तस्य जननी स्नानार्थं रेणुका गता ।
गङ्गातोये तथापश्यन्नाम्ना चित्ररथं नृपम् ॥
भार्य्याभिः सदृशीभिश्च जलक्रीड़ारतं शुभम् ।
सुमालिनं सुकान्तञ्च तरुणं चन्द्रसन्निभम् ॥
तथाविधं नृपं दृष्ट्वा संजातमदना भृशम् ।
रेणुका स्पृहयामास तस्मै राज्ञे च मैथुनम् ॥
स्पृहायुतायास्तस्यास्तु संक्लेदः समजायत ।
विचेतना तथा क्लिन्ना त्रस्ता सा स्वाश्रमं ययौ ॥
अबोधि जमदग्निस्तां रेणुकां विकृतां तथा ।
धिक् धिक् पापरतेत्येवं निनिन्द च समन्ततः ॥
ततः स्वतनयान् प्राह चतुरः प्रथमं मुनिः ।
रुमण्वत्प्रमुखान् सर्व्वान् एकैकं क्रमतो रुतम् ॥
छिन्ध्येनां पापनिरतां रेणुकां व्यभिचारिणीम् ।
ते तद्वचो नैव चक्रुर्मूढ़ाश्चासन् जड़ा इव ॥
कुपितो जमदग्निस्तान् शशापेति विचेतनान् ।
भवध्वं यूयं नचिरात् जड़ा गोवह्निगर्हिताः ॥
अथाजगाम चरमो जामदग्न्योऽतिवीर्य्यवान् ।
तञ्च रामं पिता प्राह पापिष्ठां छिन्धि मातरम् ॥
स भ्रातॄंश्च तथाभूतान् दृष्ट्वा ज्ञानविवर्ज्जितान् ।
पित्रा शप्तान् महातेजाः प्रसूं परशुनाच्छिनत् ॥
रामेण रेणुकां छिन्नां दृष्ट्वा चाक्रोधनोऽभवत् ।
जमदग्निः प्रसन्नः सन्निति राममुवाच ह ॥
प्रीतोऽस्मि पुत्त्र भद्रं ते यत्त्वया मद्वचः कृतम् ।
तस्मादिष्टवरान् कामान् त्वं वै वरय साम्प्रतम् ॥
स तु रामो वरान् वव्रे मातुरुत्थानमादितः ।
वधस्यास्मरणं तस्या भ्रातॄणां शापमोचनम् ॥
मातृहत्यापनयं युद्धे सर्व्वत्र वै जयम् ।
आयुः कल्पान्तपर्य्यन्तं क्रमाद्धि नृपसत्तम ! ॥
सर्व्वान् वरान् स प्रददौ जमदग्निर्म्महातपाः ।
सुप्तोत्थितेव जननी रेणुकाप्यभवत्तदा ॥
वधं न चापि सस्मार सहजप्रकृतिं तथा ।
युद्धे जयं चिरायुष्ट्वं लेभे रामस्तदैव हि ॥
मातृहत्यापनोदाय पिता तं वाक्यमब्रवीत् ।
न पुत्त्र वरदानेन मातृहत्यापगच्छति ॥
तस्मात्त्वं ब्रह्मकुण्डाय गच्छ स्नातुञ्च तज्जले ।
तत्र स्नात्वा मुक्तपापो नचिरात् पुनरेष्यसि ।
जगद्धिताय पुत्त्र त्वं ब्रह्मकुण्डं व्रज द्रुतम् ॥
स तस्य वचनं श्रुत्वा रामः परशुधृक् तदा ।
उपदेशात् पितुर्यातो ब्रह्मकुण्डं पयोदकम् ॥
तत्र स्नानं स विधिवत्कृत्वा धौतपरश्वधः ।
शरीरान्निःसृतां सम्यक् मातृहत्यां व्यलोकयत् ॥
जातसंप्रत्ययः सोऽथ तीर्थमासाद्य तं वरम् ।
वीथिं परशुना कृत्वा ब्रह्मपुत्त्रमवाहयत् ॥
ब्रह्मकुण्डात् सुतः सोऽथ कासारे लोहिताह्वये ।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः ॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाहयदसुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम् ।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्ययमुनां संत्यक्त्वा ब्रह्मणः सुतः ।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् ॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥
इति ते कथितं राजन् यदर्थं मातरं पुरा ।
हन्ति धीरो जामदग्न्यो यस्माद्वा क्रूरकर्म्मकृत् ॥
इदन्तु महदाख्यानं यः शृणोति दिने दिने ।
स दीर्घायुः प्रमुदितो धनवानभिजायते ॥”
इति कालिकापुराणे ८५ अध्यायः ॥

रेणुकासुतः, पुं, (रेणुकायाः सुतः ।) परशुरामः । इति हेमचन्द्रः । ३ । ५१२ ॥ (यथा, महाभारते । ३ । ९९ । ४३ ।
“आर्चीकनन्दनो रामो भार्गवो रेणुकासुतः ॥”)

रेणुरुषितः, पुं, (रेणुना रुषितः ।) गर्द्दभः । इति त्रिकाण्डशेषः ॥ धूलिलिप्ते, त्रि ॥

रेणुवासः, पुं, (रेणौ परागे वासो यस्य ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

रेणुसारः, पुं, (रेणुरेव सारो यस्य ।) कर्पूरः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य कर्पूरशब्दे विज्ञेयाः ॥)

रेणुसारकः, पुं, (रेणुसार एव । स्वार्थे कन् ।) कर्पूरः । इति शब्दरत्नावली ॥

रेतः, [स्] क्ली, (रीयते क्षरतीति । री य इ क्षरणे + “सुरीभ्यां तुट् च ।” उणा० ४।२०१। इति असुन् तस्य तुट् च ।) शुक्रम् । (यथा,—
“क्षीणं रजोमयं रेतो बीजाद्यामिन्द्रियं नरे ।
तस्मात् संयोगतः पुंसो जायते गर्भसम्भवः ।
प्रथमेऽहनि रेतश्च संयोगात् कललञ्च यत् ॥”
इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥
“मातापित्रोर्बीजदोषादशुभैश्चात्मनः ।
गर्भस्थस्य यदा दोषाः प्राप्य रेतोवहाः शिराः ॥
शोषयन्त्याशु तन्नाशाद्रेतश्चाप्युपहन्यते ।
तत्र सम्पूर्णसर्व्वाङ्गः स भवत्यपुमान् पुमान् ।
इत्यसाध्या व्याख्याताः सन्निपातसमुच्छ्रयात् ॥”
इति चरके चिकित्सास्थाने त्रिंशेऽध्याये ॥)
अप्सु रेतःपातनिषेधो यथा,—
“न वामहस्तेनोद्धृत्य पिबेद्वक्त्रेण वा जलम् ।
नोत्तरेदनुपस्पृश्य नाप्सु रेतः समुत्सृजेत् ॥”
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
पारदम् । इति मेदिनी । सै, ३३ ॥
(जलम् । इति निघण्टुः । १ । १२ ॥ “इन्द्रियलक्षणानां अपां देवानां रेतस्त्वादेत उच्यते । तथाचोपनिषत् । देवानां रेतो वर्षमिति ।” इति तट्टीकायां देवराजयज्वा ॥ यथा, ऋग्वेदे । ६ । ७० । २ ।
‘अस्मे रेतः सिञ्चतं यन्मनुर्हितम् ॥”)

रेतजा, स्त्री, (रेत इव जायते इति । जन् + ड: । टाप् । सर्व्वे सान्ता अदन्ताश्च इति न्यायात् अत्राकारान्तरेतशब्द: ।) वालुका । इति भावप्रकाश: ॥

रेतनं, क्ली, शुक्रम् । इति शब्दचन्द्रिका ॥

रेत्यं, क्ली, पित्तलम् । इत्यमरटिकायां नीलकण्ठ: ॥

रेत्रं, क्ली, (रीयते चरतीति । री + बाहुलकात् त्र: ।) रेत: । पीयूषम् । पटवास: । सूतकम् । इति मेदिनी ॥

रेप:, ङ ऋ शब्दे । गमने । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-शब्दे अक०-गमने सक०-सेट् ।) ङ, रेपते रिरेपे । ऋ, अरिरेपत् । इति दुर्गादास: ॥

रेप:, त्रि, (रेप्यते निन्द्यते इति । रेप + घञ् ।) निन्दित: । क्रूर: । कृपण: । इति मेदिनी । पे, १० ॥

रेफ:, पुं, (रिफ्यते इति । रिफ + घञ् । यद्वा, "रादिफन् ।" इत्यनेन वर्णस्वरूपार्थे रशब्दादिफन्प्रत्यय: । तथाच "रेफ इत्यौणादिक: ।" इति कातन्त्र ५ पादे दुर्ग: ।) रवर्ण: । (यथा,—

"परैर्गतो य: शिरसापि धार्य्यते
समागते सत्त्वपि याति नम्रताम् ।
गुणै: परेषां हि गुरुत्वमीहते ।
रेफेण तुल्या प्रकृतिर्म्महात्मनाम् ॥"
इत्युद्भट: ॥)

राग: । इति शब्दरत्नावली ॥ (शब्द: । यथा, भागवते । ८ । २० । २५ ।

"श्रियञ्च वक्षस्यरविन्दहस्तां
कण्ठे च सामानि समस्तरेफान् ॥")

रेफ:, त्रि, (रिफ + "अवद्यावमाधमार्व्वरेफा: कुत्सिते ।" उणा० ५ । ५४ । इति अप्रत्ययेन निपातित: ।) कुत्सित: । इत्यमर: ॥

रेफा:, [स्] त्रि, (रिफतीति । रिफ + असुन् ।) क्रूर: । अधम: । दुष्ट: । कृपण: । इति शब्दरत्नावली ॥

रेभ, ङ ऋ शब्दे । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-अक० सेट् ।) ङ, रेभते रिरेभे । ऋ, अरिरेभत् । इति दुर्गादास: ॥

रेभणं, क्ली, (रेभ शब्दे + भावे ल्युट् ।) गवां ध्वनि: । इति त्रिकाण्डशेष: ॥

रेरिहाण:, पुं, शिव: । असुर: । इति मेदिनी । णे, १०६ ॥ चौर: । इति शब्दरत्नावली ॥

रेव, ऋ ङ प्लुतौ गतौ । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-अक०-सेट् ।) प्लुति: ' प्लवेन गमनम् । ऋ, अरिरेवत् । ङ, रेवते कपि: उत्प्लुत्य गच्छतीत्यर्थ: । इति दुर्गादास: ॥

रेवटं, क्ली, दक्षिणावर्त्तशङ्खम् । इति जयपाल: ॥

रेवट:, पुं, (रेवते इति । रेव + बाहुलकात् अटन् ।) शूकर: । वेणु: । वातुल: । विषवैद्य: । इति जयपाल: ॥

रेवत:, पुं, जम्बीर: । इति जटाधर: ॥ (यथा, सुश्रुते । ४ । ५ । "पित्तप्रवृत्ते द्राक्षारेवतकट्फलपयस्यामधुकचन्दनकाश्मर्य्यकषायं शर्करामधुमधुरं पाययेत् ॥") आरग्वधवृक्ष: । इति शब्दरत्नावली ॥ राजविशेष: । स तु रेवतीपिता । बलरामश्वशुरश्च । इति महाभारतम् ॥ (अयं हि आनर्त्तपुत्त्र: शर्य्यातिपौत्त्र: । स खलु स्वपुत्त्र्या रेवत्या वरं प्रष्टुकामस्तया सह ब्रह्मलोकं गतवान् आज्ञप्तश्च ब्रह्मणा बलदेवाय कन्यां दत्तवान् । एतद्विवरणं देवीभागवते ७ स्कन्धे ७ । ८ अध्यायतो द्रष्टव्यम् ॥)

रेवतकं, क्ली, (रेवत इव कायतीति । कै + क: ।) पारेवतम् । इति राजनिर्घण्ट: ॥

रेवति:, स्त्री, कामदेवपत्नी । इति त्रिकाण्डशेष: ॥

रेवती, स्त्री, (रेवतस्यापत्यं स्त्री । रेवत + अण् । न वृद्धि: । ङीप् ।) बलदेवपत्नी । नक्षत्रभेद: । मातृकाभेद: । इति मेदिनी ॥ स्त्रीगवी । इति जयपाल: ॥ दुर्गा । यथा,—

"रेवा तु नर्म्मदा देवी नदी वा रेवती मता ।
अतिखण्डनवत्त्वा वा लोके देवी प्रकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्याय: ॥ * ॥

रेवतीनक्षत्रन्तु अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतशेषनक्षत्रम् । तस्य रूपं मत्स्याकृति द्वात्रिंशत्तारात्मकम् । तस्याधिष्ठातृदेवता पूषाख्य: सूर्य्य: । यथा,—

"अन्त्यसंस्थभवने भषात्मता-
वल्लभे लसदनन्तमध्यगे ।
कोमलाङ्गि मिथुनोदयात् प्रिये
कालखानलकला: प्रियेऽचलन् ॥"
इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥*॥

तत्र जातफलं यथा,—

"चारुशीलविभवो जितेन्द्रिय:
सत्कुल: स्वभवनैकमानस: ।
मानवो ननु भवेन्महीपती
रेवती भवति यस्य जन्मभम् ॥"
इति कोष्ठीप्रदीप: ॥ * ॥

बालग्रहविशेष: । तज्जुष्टस्य चिकित्सा यथा,—
"अश्वगन्धाजशृङ्गी च शारिवाथ पुनर्नवा ।
सहा विदारी चैतासां क्वाथेन परिषेचनम् ॥"
अजशृङ्गी मेढ़ाशृङ्गी । सहा सेवतीपुष्पजाति: ।
"तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसे तथा ।
पलङ्कषायां नलदे तथा गौरकदम्बके ॥"
सर्ज्जरस: राल: । पलङ्कषा गुग्गुलु: । नलदं लामज्जकसुगन्धिरवत् पीतच्छवि । गौरकदम्बको हारिद्रक: । हरदुया कदम्ब इति लोके ।
"धवाश्वकर्णककुभशालकीतिन्दुकेषु च ।
काकोल्यादौ गणे चापि सिद्धं सर्पि: पिबेच्छिशु: ॥"
अश्वकर्ण: सांखु इति लोके ।
"कुलत्था: शङ्खचूर्णञ्च प्रदेह: सार्व्वगन्धिक: ।
गृध्रोलूकपुरीषाणि यवान् यवफलो घृतम् ।
सन्ध्ययोरुभयो: कार्य्यमेतदुद्धूपनं शिशो: ॥"
यवफलो वंशाङ्कुर: ।
"शुक्ला: सुमनसो लाजा: पय: शाल्योदनं दधि ।
बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना ॥"
गोतीर्थे गोष्ठे ।
"स्नानं धात्रीकुमाराभ्यां सङ्गमे कारयेद्भिषक् ॥
नानाशस्त्रधरा देवी चित्रमाल्यानुलेपना ।
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु ॥
उपासते यां सततं देव्यो विविधभूषणा: ।
लम्बा कराला विनता तथैव बहुपुत्त्रिका ।
रेवती शुष्कनासा च तुभ्यं देवी प्रसीदतु ॥"
इति भावप्रकाश: ॥ * ॥

बलदेवपत्न्या विवरणं यथा,—
"रेवस्य रेवत: पुत्त्र: ककुद्मीनाम धार्म्मिक: ।
ज्येष्ठ: पुत्त्रशतस्यासीत्तस्यां पुर्य्यां नृपोऽभवत् ॥
स कन्यासहित: प्रायाद्रैवतो ब्रह्मणोऽन्तिकम् ॥
न जरा क्षुत् पिपासा वा न मृत्युस्तत्र कर्हिचित् ।
ऋतुचक्रञ्च भवति ब्रह्मलोके द्विजोत्तमा: ॥
रैवतस्य गतस्याथ सा पुरी राक्षसैर्हृता ।
तस्य पुत्त्रशतं यच्च त्यक्त्वा तामगमद्दिश: ॥
तस्य वंशे तु ये तत्र शर्य्याता इति विश्रुता: ।
क्षत्त्रिया ह्यभवन् विप्रा दिक्षु सर्व्वासु धार्म्मिका: ॥
गते बहुयुगे काले आजगामाथ रैवत: ।
मुहूर्त्तमेकं मत्वासौ ददर्श यादवैर्वृताम् ॥
कृतां द्वारवतीं नाम बहुद्वारां मनोरमाम् ।
भोजवृष्ण्यन्धकैर्गुप्तां वासुदेवपुरोगमै: ॥
गत्वा तु रैवत: सम्यग्बलभद्राय रेवतीम् ।
प्रादाद्गुरुतरां तान्तु बलदेवो हलेन वै ।
समानां लघुतां नीत्वा उवाह स प्रहर्षित: ॥
दत्त्वा जगाम शिखरं मेरोस्तपसि रैवत: ।
रेमे रामोऽपि धर्म्मात्मा रेवत्या सहित: सुखी ॥"
इति वह्निपुराणम् ॥*॥

(ब्रह्मणो वाक्येनैव इयं रेवतेन बलदेवाय प्रदत्ता । एतद्विवरणन्तु देवीभागवते ७ स्कन्धे ८ अध्याये द्रष्टव्यम् ।) रेवतमनुमाता । तद्विवरणं यथा,—

मार्कण्डेय उवाच ।
"पञ्चमोऽपि मनुर्ब्रह्मन् रैवतो नाम विश्रुत: ।
तस्योत्पत्तिं विस्तरश्च शृणुष्व कथयामि ते ॥
ऋषिरासीन्महाभाग ऋतवागिति विश्रुत: ।
तस्यापुत्त्रस्य पुत्त्रोऽभूत् रेवत्यन्ते महात्मन: ॥
स तस्य विधिवच्चक्रे जातकर्म्मादिका: क्रिया: ।
तथोपनयनादींश्च स चाशीलोऽभवन्मुने ॥
यत: प्रभृति जातोऽसौ तत: प्रभृति सोऽप्यृषि: ।
दीर्घरोगपरामर्शमवाप मुनिपुङ्गव: ॥
माता चास्य परामार्त्तिं कुष्ठरोगादिपीड़िता ।
जगाम स पिता चास्य चिन्तयामास दु:खित: ॥
किमेतदिति सोऽप्यस्य पुत्त्रोऽत्यन्तसुदुर्म्मति: ।
जग्राह भार्य्यामन्यस्य मुनिपुत्त्रस्य मन्दधी: ॥
ततो विषण्णो मनसा ऋतवागिदमुक्तवान् ।
अपुत्त्रता मनुष्याणां श्रेयसे न कुपुत्त्रता ॥

कुपुत्रो हृदयायासं सर्व्वदा कुरुते पितुः ।
मातुश्च स्वर्गसंस्थांश्च स्वपितॄन् पातयत्यधः ॥
सुहृदां नोपकाराय पितॄणां नापि तृप्तये ।
पित्रोर्दुःखाय धिक् जन्म तस्य दुष्कृतकर्म्मणः ॥
धन्यास्ते तनया येषां सर्व्वलोकाभिसम्मताः ।
परोपकारिणः शान्ताः साधुकर्म्मण्यनुव्रताः ॥
अनिर्वृतं तथा मूर्खं परलोकपराङ्मुखम् ।
नरकाय न सद्गत्यै कुपुत्रालम्बि यज्जनः ॥
करोति सुहृदां दैन्यमहितानां तथा मुदम् ।
अकाले च जरां पित्रोः कुपुत्रः कुरुते हि वै ॥
मार्कण्डेय उवाच ।
एवं सोऽत्यन्तदुष्टस्य पुत्रस्य चरितैर्मुनिः ।
दह्यमानमनोवृत्तिर्वृद्धं गर्गमपृच्छत ॥
ऋषिरुवाच ।
सुव्रतेन पुरा वेदा गृहीता विधिवन्मया ।
समाप्य वेदान् विधिवत् कृतो दारपरिग्रहः ॥
सदारेण यथा कार्य्याः श्रौताः स्मार्त्तास्तथा क्रियाः ।
नानुन्यूनाः कृताः काश्चिद्यावदद्य महामुने ॥
गर्भाधानविधानेन न काममनुरुध्यता ।
पुत्रार्थं जनितश्चायं पुन्नाम्नो बिभ्यता मुने ॥
सोऽयं किमात्मदोषेण मम दोषेण वा मुने ।
अस्मद्दुःखवहो जातो दौःशील्याद्बन्धुशोकदः ॥
गर्ग उवाच ।
रेवत्यन्ते मुनिश्रेष्ठ जातोऽयं तनयस्तव ।
तेन दुःखाय ते काले दुष्टे यस्मादजायत ॥
न तेऽपचारो नैवास्य मातुर्नापि कुलस्य ते ।
तस्य दौःशील्यहेतुत्वं रेवत्यन्तमुपागतम् ॥
ऋतवागुवाच ।
यस्मान्ममैकपुत्रस्य रेवत्यन्तसमुद्भवम् ।
दौःशील्यमेतत् सा तस्मात् पततामाशु रेवती ॥
मार्कण्डेय उवाच ।
तेनैव व्याहृते शापे रेवत्यृक्षं पपात ह ।
पश्यतः सर्व्वलोकस्य विस्मयाविष्टचेतसः ॥
रेवत्यृक्षञ्च पतितं कुमुदाद्रौ समन्ततः ।
भासयामास सहसा वनकन्दरनिर्झरान् ॥
कुमुदाद्रिश्च तत्पातात् ख्यातो रैवतकोऽभवत् ।
अतीवरम्यः सर्व्वस्यां पृथिव्यां पृथिवीधरः ॥
तस्यर्क्षस्य तु या कान्तिर्जाता पङ्कजिनीसरः ।
ततो जज्ञे तदा कन्या रूपेणातीव शोभना ॥
रेवतीकान्तिसंभूतां तां दृष्ट्वा प्रमुचो मुनिः ।
तस्या नाम चकारेत्थं रेवतीति हि भागुरे ॥
पोषयामास चैवैनां स्वाश्रमाभ्याससम्भवाम् ।
प्रमुचः स महाभागस्तस्मिन्नेव महाचले ॥
तान्तु यौवनिनीं दृष्ट्वा कन्यकां रूपशालिनीम् ।
स मुनिश्चिन्तयामास कोऽस्या भर्त्ता भवेदिति ॥
एवं चिन्तयतः कालो जगाम सुमहात्मनः ।
न चाससाद सदृशं वरं तस्या महामुनिः ॥
ततस्तस्या वरं प्रष्टुमग्निं स प्रमुचो मुनिः ।
विवेश वह्निशालां वै पृष्टस्तं प्राह हव्यभुक् ॥
महाबलो महावीर्य्यः प्रियवाक् धर्म्मवत्सलः ।
दुर्द्दमो नाम भविता भर्त्ता ह्यस्या महीपतिः ॥

मार्कण्डेय उवाच ।
अनन्तरञ्च मृगयाप्रसङ्गेनागतो मुने ।
तस्याश्रमपदं धीमान् दुर्द्दमः स नराधिपः ॥
प्रियव्रतान्वयभवो महाबलपराक्रमः ।
पुत्रो विक्रमशीलस्य कालिन्दीजठरोद्भवः ॥
स प्रविश्याश्रमपदं तां तन्वीं जगतीपतिः ।
अपश्यमानस्तमृषिं प्रियेत्यामन्त्र्य पृष्टवान् ॥
राजोवाच ।
क्व गतो भगवानस्मादाश्रमान्मुनिपुङ्गवः ।
तं प्रणन्तुमिहेच्छामि तत्त्वं प्रब्रूहि शोभने ॥
मार्कण्डेय उवाच ।
अग्निशालां गतो विप्रस्तच्छ्रुत्वा तस्य भाषितम् ।
प्रियेत्यामन्त्रणञ्चैव निश्चक्राम त्वरान्वितः ॥
स ददर्श महात्मानं राजानं दुर्द्दमं मुनिः ।
नरेन्द्रचिह्नसहितं प्रश्रयावनतं पुरः ॥
तस्मिन् दृष्टे ततः शिष्यमुवाच स तु गौतमम् ।
गौतमानीयतां शीघ्रमर्घोऽस्य जगतां पतेः ॥
एष तावदयं भूपश्चिरकालादुपागतः ।
जामाता च विशेषेण योग्योऽर्घोऽस्य मतं मम ॥
मार्कण्डेय उवाच ।
ततः स चिन्तयामास राजा जामातृकारणम् ।
विवेद न च तन्मौनी जगृहेऽर्घञ्च तं नृपः ॥
तमासनगतं विप्र गृहीतार्घं महामुनिः ।
प्रहृतं प्राह राजेन्द्रमपि ते कुशलं पुरे ॥
कोषे बलेऽथ मित्रेषु भृत्यामात्येषु चेश्वर ।
तथात्मनि महाबाहो यत्र सर्व्वं प्रतिष्ठितम् ॥
पत्नी च ते कुशलिनी यत एवात्र तिष्ठति ।
पृच्छाम्यस्यास्ततो नाहं कुशलिन्योऽपरास्तव ॥
राजोवाच ।
त्वत्प्रसादादकुशलं न क्वचिन्मुनिसत्तम ।
जातकौतूहलश्चास्मि मम भार्य्यात्र का मुने ॥
ऋषिरुवाच ।
रेवती तु महाभागा त्रैलोक्ये चापि सुन्दरी ।
तव भार्य्या वरारोहा मानवेन्द्र न वेत्सि किम् ॥
राजोवाच ।
सुभद्रां शान्ततनयां कावेरीतनयां विभो ।
सुराष्ट्रजां सुजाताञ्च कदम्बाञ्च वरूथजाम् ॥
विपाठां नन्दिनीञ्चैव वेद्मि भार्य्या गृहे हि याः ।
तिष्ठन्ति मे न भगवन् रेवतीं वेद्मि का त्वियम् ॥
ऋषिरुवाच ।
प्रियेति साम्प्रतं येयं त्वयोक्ता वरवर्णिनी ।
किं विस्मृतं ते भूपाल श्लाघ्येयं गृहिणी तव ॥
राजोवाच ।
सत्यमुक्तं मया किन्तु भावो दुष्टो न मे मुने ।
नात्र कोपं भवान् कर्त्तुमर्हत्यस्मास्तु याचितः ॥
ऋषिरुवाच ।
सत्यं ब्रवीषि भूपाल न भावस्तव दूषितः ।
व्याजहार भवानेवं वह्निना नृप नोदितः ॥
मया पृष्टो हुतवहः कोऽस्या भर्त्तेति पार्थिव ।
भविता तेन चाप्युक्तो भवानेवाद्य चागतः ।
तद्गृह्यतां मया दत्ता कन्या तुभ्यं नराधिप ।
प्रियेत्यामन्त्रिता चेयं विचारं कुरुषे कथम् ॥
श्रीमार्कण्डेय उवाच ।
ततश्च सोऽभवन्मौनी तेनोक्तः पृथिवीपतिः ।
ऋषिस्तथोद्यतः कर्त्तुं तस्या वैवाहिकं विधिम् ॥
समुद्यतञ्च पितरं विवाहाय महामुने ।
उवाच कन्या सा किञ्चित् प्रश्रयावनतानना ॥
यदि मे प्रीतिमांस्तात प्रसादं कर्त्तुमिच्छसि ।
रेवत्यृक्षे विवाहं मे तत् करोतु प्रसादितः ॥
ऋषिरुवाच ।
रेवत्यृक्षं न वै भद्रे चन्द्रयोगि दिवि स्थितम् ।
अन्यानि सन्ति ऋक्षाणि सुभ्रु वैवाहिकानि ते ॥
कन्योवाच ।
तात तेन विना कालो विकलः प्रतिभाति मे ।
विवाहो विकले काले मद्विधायाः कथं भवेत् ॥
ऋषिरुवाच ।
ऋतवागिति विख्यातस्तपस्वी रेवतीं प्रति ।
चकार कोपं क्रोधेन तेनर्क्षं तन्निपातितम् ॥
मया चास्मै प्रतिज्ञाता भार्य्येति मदिरेक्षणे ।
न चेच्छसि विवाहं त्वं संकटं नः समागतम् ॥
कन्योवाच ।
ऋतवाक् स मुनिस्तात किं मे कस्तप्तवांस्तपः ।
न त्वया समता तेन ब्रह्मबन्धोः सुतास्मि किम् ॥
ऋषिरुवाच ।
ब्रह्मबन्धोः सुता न त्वं बाले नैवातपस्विनः ।
सुता त्वं मम यो देवान् कर्त्तुमन्यान् समुत्सहे ॥
कन्योवाच ।
तपस्वी यदि मे तातस्तत् किमृक्षमिदं दिवि ।
समारोप्य विवाहो मे नात्रर्क्षे क्रियते पितः ॥
ऋषिरुवाच ।
एवं भवतु भद्रं ते भद्रे प्रीतिमती भव ।
आरोपयामीन्दुमार्गे रेवत्यृक्षं कृते तव ॥
श्रीमार्कण्डेय उवाच ।
ततस्तपःप्रभावेन रेवत्यृक्षं महामुनिः ।
यथापूर्व्वं तथा चक्रे सोमयोगि द्विजोत्तमः ॥
विवाहञ्चैव दुहितुर्विधिवन्मन्त्रयोगजम् ।
निष्पाद्य प्रीतिमान् भूयो जामातरमथाब्रवीत् ॥
ऋषिरुवाच ।
औद्वाहिकं ते भूपाल कथ्यतां किं ददाम्यहम् ।
दुर्लभ्यमपि दास्यामि ममाप्रतिहतं तपः ॥
राजोवाच ।
मनोः स्वायम्भुवस्याहमुत्पन्नः सन्ततौ मुने ।
मन्वन्तराधिपं पुत्रं त्वत्प्रसादाद्वृणोम्यहम् ॥
मुनिरुवाच ।
भविष्यत्येष ते कामो मनुस्त्वत्तनयो महान् ।
सकलां भोक्ष्यते भूमिं धर्म्मविच्च भविष्यति ॥
श्रीमार्कण्डेय उवाच ।
तामादाय ततो भूपस्तदैव नगरं ययौ ।
तस्याश्चाजायत सुतो रेवत्यां रैवतो मनुः ॥
समेतः सकलैर्धर्म्मैर्मानवैरपराजितः ।
विज्ञाताखिलशास्त्रार्थो वेदविद्यार्थशास्त्रवित् ॥
इति मार्कण्डेयपुराणे रैवतमन्वन्तरं समाप्तम् ॥

(गौः । इति निघण्टुटीकायां देवराजयज्वा । १ । १० । १६ ॥)

रेवतीभवः, पुं, (रेवत्यां भव उत्पत्तिर्यस्य ।) शनैश्चरः । इति हेमचन्द्रः । २ । ३४ ॥ (रैवतमनुः । इति मार्कण्डेयपुराणम् ॥)

रेवतीरमणः, पुं, (रेवत्या रमणः पतिः ।) बलदेवः । इत्यमरः । १ । १ । २४ ॥

रेवतीशः, पुं, (रेवत्या ईशः ।) बलरामः । इति हेमचन्द्रः । २ । १३८ ॥

रेवन्तः, पुं, सूर्य्यपुत्त्रविशेषः । स च गुह्यकाधिपतिः । तस्योत्पत्तिर्यथा,—

"ततोऽसौ योगमास्थाय स्वां भार्य्यां वड़वां रविः ।
ददर्श नियमस्थान्तामश्वरूपमथाकरोत् ॥
मैथुनायोपचक्राम सूर्य्योऽसौ च त्वरान्वितः ।
नेच्छन्ती तेन संयोगं परपुंसोऽभिशङ्कया ॥
संग्रहात् संमुखी तेजो मुखनासिकया रवेः ।
देवी यतः प्रजायेतामश्विनौ भिषजां वरौ ।
नासत्यौ द्वौ तृतीयश्च रेवन्तोऽश्वप्रवाहकः ॥"
इति वह्निपुराणम् ॥

अपि च ।

"ततोऽश्वरूपधृक् भानुरुत्तरानगमत् कुरून् ।
ददर्श तत्र संज्ञान्तु वड़वारूपधारिणीम् ॥
सा च दृष्ट्वा तमायान्तं परपुंसोऽभिशङ्कया ।
जगाम संमुखं तस्य पृष्ठरक्षणतत्परा ॥
ततश्च नासिकायोगे तयोस्तत्र समेतयोः ।
नासत्यदस्रौ तनयावश्ववक्त्राद्विनिर्गतौ ॥
रेतसोऽन्ते च रेवन्तः खड्गी धन्वी तनुत्रधृक् ।
अश्वारूढ़ः समुत्पन्नो वाणतूणसमन्वितः ॥
ततः स्वं रूपममलं दर्शयामास भानुमान् ।
तस्मै सा च समालोक्य स्वरूपं मुदमाददे ॥
स्वरूपधारिणीञ्चेमामानिनाय निजाश्रमम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयश्च यमः शापाद्धर्म्मदृष्टिरभूत् सुतः ॥
क्रमयो मांसमादाय पादतस्ते महीतलम् ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम् ॥
धर्म्मदृष्टिर्यतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगं तं याम्ये चकार तिमिरापहः ॥
यमुना च नदी जज्ञे कलिन्दान्तरवाहिनी ।
अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना ।
गुह्यकाधिपतित्वे च रेवन्तो विनियोजितः ॥"
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे ॥ * ॥

सप्तदिनकर्त्तव्यनीराजनविधौ रेवन्तस्य राजकर्त्तृकपूजाविधिर्यथा,—

"सप्तमे हि तु रेवन्तं पूजयेत्तोरणान्तरे ।
सूर्य्यपुत्त्रं महाबाहुं द्विभुजं कवचोज्ज्वलम् ॥
ज्वलन्तं शुक्लवस्त्रेण केशान् वितत्य वाससा ।
कशां वामकरे बिभ्रद्दक्षिणे तु करे पुनः ।
खड्गं न्यस्य महातीव्रं सितसैन्धवसंस्थितम् ॥
एवंविधन्तु रेवन्तं प्रतिमायां घटेऽपि वा ।
सूर्य्यपूजाविधानेन पूजयेत्तोरणान्तरे ॥"
इति कालिकापुराणे नीराजनविधिः ८६ अध्यायः ॥ * ॥ कोजागरपूर्णिमारात्रौ द्वारोपान्ते तस्य पूजाविधिर्यथा,—

"द्वारोपान्ते सुदीप्तस्तु संपूज्यो हयवाहनः ।
यवाचतद्धृतोपेतैस्तण्डुलैश्च सुतर्पितः ॥
संपूजितश्च पूर्णेन्दुः पयसा पायसेन च ।
स्कन्दः सभार्य्यो रुद्रश्च तथा नन्दीश्वरो मुनिः ॥
गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः ।
उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः ।
पूज्यः साश्वैश्च रेवन्तो यथाविभवविस्तरैः ॥"
इति तिथ्यादितत्त्वम् ॥

(रेवन्तदर्शनेन लक्ष्मीं प्रति नारायणस्य शापवृत्तान्तं देवीभागवते ६ स्कन्धे १७ अध्याये द्रष्टव्यम् ॥)

रेवन्तमनुसूः, स्त्री, (रेवन्तं मनुञ्च सूते इति । सू + क्विप् ।) संज्ञा । इति त्रिकाण्डशेषः ॥

रेवा, स्त्री, (रेवते उत्प्लुत्य गच्छतीति । रेव + अच् । टाप् ।) नर्म्मदा नदी । इत्यमरः । १ । १० । ३२ ॥ (यथा, मेघदूते । २० ।

"रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णाम् ॥")

अस्यां शिवलिङ्गोत्पत्तिर्यथा,—

"रेवया च कृतं पूर्व्वं तपः शिवसुतुष्टिदम् ।
मम त्वत्सदृशः पुत्त्रो भूयादिति विधो तथा ॥
अहं कस्यापि न सुतः किं करिष्यामि चिन्तयन् ।
रेवायास्तु वरो देयस्त्ववश्यं मृगलाञ्छन ॥
निश्चित्यैवं तदा प्रोक्तं प्रसन्नेनान्तरात्मना ।
लिङ्गरूपेण ते देवि ! गजाननपुरस्कृतः ।
गर्भे तव वसिष्यामि पुत्त्रो भूत्वा शिवप्रिये ! ॥
मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा ।
शिवशक्तिविभेदेन चावामेकत्र संस्थितौ ॥
एवं दत्तवरा रेवा मत्सान्निध्यमिहागता ।
रेवाखण्डमिति ख्यातं ततः प्रभृति गोपते ॥"
इति वाराहे सोमेश्वरादिलिङ्गमहिमाध्यायः ॥

रतिः । सा च कामपत्नी । नीलीवृक्षः । इति मेदिनी । वे, २१ ॥ दुर्गा । यथा,—

"रेवा तु नर्म्मदा देवी नदी वा रेवती मता ।
अतिखण्डनबन्धा वा लोके देवी प्रकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥

रेष, ऋ ङ हेषायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) हेषा घोटककर्त्तृकशब्दः । ऋ, अरिरेषत् । ङ, रेषते रिरेषेऽश्वः । इति दुर्गादासः ॥

रै, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) रेफादिः । रायति । इति दुर्गादासः ॥

रैवतः, पुं, स्वर्णालुवृक्षः । (यथा, गारुड़े २०८ अः ।

"चतुरङ्गुलसम्पाको व्याधिघाताभिसंज्ञकः ।
विद्यादारग्वधं राजवृक्षं रैवतसंज्ञकम् ॥")

शैलभेदः । (अत्रैवार्ज्जुनः सुभद्रां हृतवान् । यथा, महाभारते । २२१ । ६—८ ।

"सुभद्रा त्वथ शैलेन्द्रमभ्यर्च्यैव हि रैवतम् ।
देवतानि च सर्व्वाणि ब्राह्मणान् स्वस्ति वाच्य च ॥
प्रदक्षिणं गिरेः कृत्वा प्रययौ द्वारकां प्रति ॥
तामभिद्रुत्य कौन्तेयः प्रसह्यारोपयद्रथम् ।
सुभद्रां चारुसर्व्वाङ्गीं कामबाणप्रपीड़ितः ॥
ततः स पुरुषव्याघ्रस्तामादाय शुचिस्मिताम् ।
रथेन काञ्चनाङ्गेन प्रययौ स्वपुरं प्रति ॥")

शङ्करः । इति मेदिनी । ते, ४५ ॥ दैत्यविशेषः । इति धरणिः ॥ (स तु बालग्रहाणामन्यतमः । यथा, महाभारते । ३ । २२६ । २६ ।

"अदितिं रेवतीं प्राहुर्ग्रहस्तस्यास्तु रैवतः ।
सोऽपि बालान् महाघोरो बाधते वै महाग्रहः ॥"

रेवत्यां भवः । रेवती + अण् ।) वर्त्तमानकल्पीयः पञ्चमो मनुः । स तु रेवतीगर्भे दुर्दमराजपुत्त्रः । अस्मिन् मन्वन्तरे विकुण्ठोऽवतारः । विभुरिन्द्रः । भूतरयादयो देवाः । हिरण्यरोमादयः सप्तर्षयः । बलिविन्ध्यादयस्तन्मनुसुताः । इति श्रीभागवतम् ॥ तद्विवरणं यथा,—

"पञ्चमस्य मनोस्तद्वत् रैवतस्यान्तरं शृणु ।
देवबाहुः सुबाहुश्च पर्ज्जन्यः सोमपो मुनिः ॥
हिरण्यरोमा सप्ताश्वः सप्तैते ऋषयः स्मृताः ।
देवाश्चाभूतरजसस्तथा प्रकृतयः स्मृताः ॥
अरुणस्तत्त्वदर्शी च वित्तवान् हव्यपः कपिः ।
युक्तो निरुत्सुकः सत्वो निर्म्मोहोऽथ प्रकाशकः ।
धर्म्मवीर्य्यबलोपेता दशैते रैवतात्मजाः ॥
भृगुः सुधामा विरजः सहिष्णुर्नाद एव च ।
विवस्वानतिनामा च षष्ठसप्तर्षयोऽपरे ॥"
इति मात्स्ये ९ अध्यायः ॥ * ॥

मार्कण्डेयपुराणोक्तरैवतमनुविवरणन्तु रेवतीशब्दे द्रष्टव्यम् ॥ (रुद्राणामन्यतमः । यथा, मात्स्ये । ५ । २९ ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ॥"

मेघः । इति निघण्टुः । १ । १० ॥

"रेवत्यो गावः 'पशवो वै रेवतीः ।' इति श्रुतेः 'तस्येदम् ।' ४ । ३ । १२० । इत्यण् । मेघो हि सर्व्वत्र वर्षति यवसं पानीयं च जनयित्वा तदीयो भवति पर्व्वतस्तद्वत्तया । यद्वा, रयिरस्यास्तीति मतुपि 'रयेर्म्मतौ बहुलम् ।' ६ । १ । ३४ । इति सम्प्रसारणम् । 'संज्ञायाम् ।' ८ । २ । ११ । इति वत्वम् । सर्व्वस्य धनस्येशितृत्वात् रेवान् इन्द्रः मघवेति हि तस्य नाम तदीयो रैवतः पूर्व्ववत् तदीयत्वं द्रष्टव्यम् ॥"

इति तत्र देवराजयज्वा ॥ * ॥ सोमलताविशेषः । यथा, सुश्रुते । ४ । २९ ।

"अग्निष्टोमो रैवतश्च यथोक्त इति संज्ञितः ॥"

ऋषिविशेषः । यथा, महाभारते । २ । ५ । ११ ।

"नारदः सुमहातेजा ऋषिभिः सहितस्तदा ।
पारिजातेन राजेन्द्र रैवतेन च धीमता ॥"

धनवति, त्रि । यथा, ऋग्वेदे । ५ । ६० । ४ ।

"वरा इवेद्रैवतासो हिरण्यैरभिस्वधाभिस्तन्वः पिपिश्रे ।"

"रैवतासो धनवन्तः ।" इति तद्भाष्ये सायणः ॥)

रैवतकं, क्ली, (रैवतकमेव । स्वार्थे अण् ।) पारेवतवृक्षः । इति राजनिर्घण्टः ॥ (पारेवतशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

रैवतकः, पुं, (रैवत एव । स्वार्थे कन् ।) रैवतपर्व्वतः । तत्पर्य्यायः । उज्जयन्तः २ । इति हेमचन्द्रः ॥ (यथा, महाभारते ।१।२२०।१।
"ततः कतिपयाहस्य तस्मिन् रैवतके गिरौ ।
वृष्ण्यन्धकानामभवदुत्सवो नृपसत्तम ! ॥")
तस्य नामकारणं रैवतीशब्दे द्रष्टव्यम् ॥

रैवतिकः, त्रि, (रेवती+"रेवत्यादिभ्यष्ठक् ।" ४ । १ । १४६ । इति ठक् ।) रेवत्या अपत्यम् । इति मुग्धबोधव्याकरणम् ॥

रोकं, क्ली, (रोचतेऽनेनेति । रुच्+घञ् । न्यङ्क्वादित्वात् कुत्वम् ।) छिद्रम् । इत्यमरः ।१।८।२॥ नौका । चलम् । इति मेदिनी ॥ के, ३२ ॥

रोकः, पुं, (रुच्+घञ् ।) क्रयभेदः । दीप्तिः । इति मेदिनी । के, ३१ ॥ (यथा, ऋग्वेदे । ३ । ६ । ७ ।
"दिवश्चिदाते रुचयन्त रोकाः ।"
"ते रोकास्त्वदीया दीप्तयः ।" इति तद्भाष्ये सायणः ॥")

रोगः, पुं, (रुज्यतेऽनेनेति । रोजनमिति वा । रुज+घञ् । यद्वा, रुजतीति । रुज्+"पदरुजविशस्पृशो घञ् ।" ३।३।१६ । इति कर्त्तरि घञ् ।) कुष्ठौषधम् । इति मेदिनी । गे, २३ ॥ देहभङ्गकारकः । तत्पर्य्यायः । रुक् २ रुजा ३ उपतापः ४ व्याधिः ५ गदः ६ आमयः ७ । इत्यमरः । २ । ६ । ५१ ॥ अपाटवः ८ आमः ९ आतङ्कः १० भयः ११ उपघातः १२ भङ्गः १३ अर्त्तिः १४ तमोविकारः १५ ग्लानिः १६ पयः १७ अनार्ज्जवः १८ मृत्युभृत्यः १९ । इति राजनिर्घण्टः ॥ क्षमः २० । इति जटाधरः ॥ मान्द्यम् २१ आकल्यम् २२ । इति हेमचन्द्रः ॥ * ॥ अस्य निदानादिर्यथा,—

धन्वन्तरिरुवाच ।

"सर्व्वरोगनिदानञ्च वक्ष्ये सुश्रुत तत्त्वतः ।
आत्रेयाद्यैर्मुनिवरैर्यथापूर्व्वमुदीरितम् ॥
रोगः पाप्मा ज्वरो व्याधिर्विकारो दुष्टमामयः ।
यक्ष्मातङ्कगदाबाधाः शब्दाः पर्य्यायवाचिनः ॥
निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा ।
संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ।
निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते ।
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः ॥
लिङ्गमव्यक्तमल्पत्वात् व्याधीनां तद्यथातथम् ।
तदेव व्यक्ततां यातं रूपमित्यभिधीयते ॥
संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः ।
हेतुव्याधिविपर्य्यस्तं विपर्य्यस्तार्थकारिणाम् ॥
औषधान्नविहाराणां उपयोगं सुखावहम् ।
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः ॥
विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः ।
यथा दुष्टेन दोषेण तथा चानुविसर्पता ॥
निर्वृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः ।
संख्याविकल्पप्राधान्यबलकालविशेषतः ॥
स भिद्यते यथात्रैव संख्यन्तेऽष्टौ ज्वरा इति ।
दोषाणां समवेतानां विकल्पोंऽशांशकल्पना ॥
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् ।
हेत्वादिकार्त्स्न्यावयवैर्बलाबलविशेषणम् ॥
नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथा मलम् ।
इति प्रोक्तो निदानार्थः स व्यासेनोपदेक्ष्यते ।
सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः ॥
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ।
अहितस्त्रिविधो योगस्त्रयाणां प्रागुदाहृतः ॥
तिक्तोषणकषायाल्परूक्षाप्रमितभोजनैः ।
धावनोदीरणनिशाजागरात्युच्चभाषणैः ॥
क्रियाभियोगभीशोकचिन्ताव्यायाममैथुनैः ।
ग्रीष्माहोरात्रभुक्तान्ते प्रकुप्यति समीरणः ॥
पित्तं कट्वम्लतीक्ष्णोष्णकटुक्रोधविदाहिभिः ।
शरन्मध्याह्नरात्र्यर्द्धविदाहसमयेषु च ॥
स्वाद्वम्ललवणस्निग्धगुर्व्वभिष्यन्दिशीतलैः ।
आस्यास्वप्नसुखाजीवदिवास्वप्नादिहर्षणैः ॥
प्रच्छर्दनाद्ययोगेन भुक्तमात्रवसन्तयोः ।
पूर्व्वाह्णे पूर्व्वरात्रे च श्लेष्मा वक्ष्यामि शङ्करान् ॥
मिश्रीभावात् समस्तानां सन्निपातस्तथा पुनः ।
सङ्कीर्णाजीर्णविषमविरुद्धाध्यशनादिभिः ॥
व्यापन्नमद्यपानीयशुष्कशाकाममूलकैः ।
पिण्याकमृद्यवसुरापूतिशुष्ककृशामिषैः ॥
दोषत्रयकरैस्तैस्तैस्तथान्नपरिवर्त्ततः ।
ऋतोर्दुष्टात् पुरोवातात् विग्रहावेशविभ्रवात् ॥
दुष्टामान्नैरतिश्लिष्टग्रहैर्जन्मर्क्षपीडनात् ।
मिथ्यायोगाच्च विविधात् पापानाच्च निषेवणात् ॥
स्त्रीणां प्रसववैषम्यात्तथा मिथ्योपचारतः ।
प्रतिरोगमिति क्रुद्धा रोगविध्यनुगामिनः ।
रसायनीं प्रपद्याशु दोषा देहे विकुर्व्वते ॥"
इति गारुड़े सर्व्वरोगनिदानं १५९ अध्यायः ॥
रोगविशेषाणां औषधानि गारुड़े १८९।१९०। १९१ । १९२ । १९३ । १९४ । १९५ । १९६ । १९७ । १९८ । १९९ अध्यायेषु द्रष्टव्यानि ॥ सर्व्वरोगहरवैष्णवकवचञ्च तत्रैव २०० अध्याये द्रष्टव्यम् ॥ * ॥ अपि च ।
"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः ।
शिवभक्तश्च योगी च स एव विकृताकृतिः ॥
भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः ।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥
मन्दाग्निस्तस्य जनको मन्दाग्नेर्जनकास्त्रयः ।
पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः ॥
वायुजः पित्तजश्चैव श्लेष्मजश्च तथैव च ।
ज्वरभेदाश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः ॥
पाण्डुकः कामलः कुष्ठः शोथः प्लीहा च शूलकः ।
ज्वरातिसारग्रहणीकाशव्रणहलीमकाः ॥
मूत्रकृच्छ्रश्च गुल्मश्च रक्तदोषविकारकः ।
व्यारिशो मेहनः कुब्जो गोदश्च गलगण्डकः ॥
भ्रमरी सन्निपातश्च विसूची दारुणी सति ।
एषां भेदप्रभेदेन चतुःषष्टिरुजः स्मृताः ॥
मृत्युकन्यासुताश्चैते जरा तस्याश्च कन्यका ।
जरा च भ्रातृभिः सार्द्धं शश्वद्भ्रमति भूतलम् ॥
एते चोपायवेत्तारं न गच्छन्ति च संयुतम् ।
पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः ॥ * ॥
चक्षुर्जलञ्च व्यायामः पादाधस्तैलसेवनम् ।
कर्णतैलं मूर्द्ध्नि तैलं जराव्याधिविनाशकम् ॥
वसन्ते भ्रमणं वह्निसेवास्वप्नं करोति यः ।
बालाञ्च सेवते काले जरा तं नोपगच्छति ॥
खातशीतोदकस्नायी सेवते चन्दनद्रवम् ।
नोपयाति जरा तञ्च निदाघेऽनिलसेविनम् ॥
प्रावृडुष्णोदकस्नायी घनतोयं न सेवते ।
समये च यमाहारी जरा तं नोपगच्छति ॥
शरद्रौद्रं न गृह्णाति भ्रमणं तत्र वर्जयेत् ।
खातस्नायी समाहारी जरा तं नोपतिष्ठति ॥
खातस्नायी च हेमन्ते काले वह्निं निषेवते ।
भुङ्क्ते नवान्नमुष्णञ्च जरा तं नोपगच्छति ॥
शिशिरेऽंशुकवह्निञ्च नवोष्णान्नञ्च सेवते ।
य एवोष्णोदकस्नायी जरा तं नोपगच्छति ॥
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतञ्च सेवते यो हि जरा तं नोपगच्छति ॥
भुङ्क्ते सदन्नं क्षुत्काले तृष्णायां पीयते जलम् ।
नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति ॥
दधि हैयङ्गवीनञ्च नवनीतं तथा शुभम् ।
नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति ॥
शुष्कमांसं स्त्रियो वृद्धा बालार्कं तरुणं दधि ।
संसेवन्तं जरा याति प्रहृष्टा भ्रातृभिः सह ॥
रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम् ।
तमुपैति जरा हृष्टा भ्रातृभिः सह सुन्दरि ! ॥
रजस्वला च कुलटा चावीरा जारदूतिका ।
शूद्रयाजकपत्नी या ऋतुहीना च या सति ! ॥
यो हि तासामन्नभोजी ब्रह्महत्यां लभेत्तु सः ।
तेन पापेन सार्द्धं सा जरा तमुपगच्छति ॥
पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम् ।
पापं व्याधिजराबीजं विघ्नबीजञ्च निश्चितम् ॥
पापेन जायते व्याधिः पापेन जायते जरा ।
पापेन जायते दैन्यं दुःखं शोकं भयं कलिः ॥
तस्मात् पापं महावैरं दोषबीजममङ्गलम् ।
भारते सन्ततं सन्तो नाचरन्ति भयातुराः ॥
स्वधर्म्माचारयुक्तञ्च दीक्षितं हरिसेवकम् ।
गुरुदेवातिथीनाञ्च भक्तं सक्तं तपःसु च ॥
व्रतोपवासयुक्तञ्च सदा तीर्थनिषेविणम् ।
पापा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः ॥
एतान् जरा न सेवेत व्याधिसङ्घश्च दुर्ज्जयः ।
सर्व्वं वोध्यमसमये काले सर्व्वं ग्रहीष्यति ॥ * ॥
ज्वरश्च सर्व्वरोगाणां जनकः कथितः सति ।
पित्तश्लेष्मसमीराश्च ज्वरस्य जनकास्त्रयः ॥
एते यथा सञ्चरन्ति क्षयं यान्ति च देहिषु ।
तमेव विविधोपायं साध्वि मत्तो निशामय ॥
क्षुधि जाज्वल्यमानायामाहाराभाव एव च ।
प्राणिनां जायते पित्तं चक्रे च मणिपूरके ॥
तालं बिल्वफलं भुक्त्वा जलपानञ्च तत्क्षणम् ।

नदेव तु भवेत् पित्तं सद्यःप्राणहरं परम् ॥
तप्तोदकञ्च शरदि भाद्रे तिक्तं विशेषतः ।
दैवगतञ्च यो भुङ्क्ते पित्तं तस्य प्रजायते ॥
सशर्करञ्च धन्याकं पिष्टं शीतोदकान्वितम् ।
चणकं सर्व्वगव्यञ्च दधितक्रविवर्ज्जितम् ॥
बिल्वतालफलं पक्वं सर्व्वमक्षारमेव च ॥
आर्द्रकं मुद्गयूषञ्च तिलपिष्टं सशर्करम् ॥”
अक्षारस्थाने ऐक्षवमिति च पाठः ।
“पित्तक्षयकरं सद्यो बलपुष्टिप्रदं परम् ।
पित्तनाशञ्च तद्वीजमुक्तमन्यं निबोध मे ॥
भोजनानन्तरं स्नानं जलपानं विना तृषा ।
तिलतैलं स्निग्धतैलं स्निग्धमामजकोद्रवम् ॥
पर्य्युषितान्नं तक्रञ्च पक्वरम्भाफलं दधि ।
छायाम्बुशर्करातोयं सुस्निग्धस्थलसेवनम् ॥
नारिकेलोदकं रूक्षस्नानं पर्य्युषितं जलम् ।
नरसुञ्जपक्वफलं सुपक्वकर्कटीफलम् ॥
स्नातस्नानञ्च वर्षासु मूलकं श्लेष्मकारणम् ।
ब्रह्मरन्ध्रं च तच्चाम्म मद्वीर्य्यविनाशनम् ॥
वह्निस्वेदं भ्रष्टिभङ्गं पक्वतैलं विशोषकम् ।
भ्रमणं शुष्कभक्ष्यञ्च शुष्कपक्वहरीतकी ॥
पिण्डारकमपक्वञ्च रम्भाफलमपक्वकम् ।
वेशवारसिन्धुवारमनाहारमपानकम् ॥
सघृतं रोचनाचूर्णं सघृतं शुष्कशर्करम् ।
मरीचं पिप्पलीशुष्कमार्द्रकं जीरकं मधु ॥
द्रव्याण्येतानि गन्धर्व्वि सद्यः श्लेष्महराणि च ।
बलपुष्टिकराण्येव वायुवीजं निशामय ॥
भोजनानन्तरं सद्यो गमनं धावनं तथा ।
छेदनं वह्नितापञ्च शश्वद्भ्रमणमैथुनम् ॥
वृद्धस्त्रीगमनञ्चैव मनःसन्ताप एव च ।
अतिरूक्षमनाहारं युद्धं कलहमेव च ॥
कटुवाक्यं भयं शोकः केवलं वायुकारणम् ।
आख्याख्यचक्रे तच्चान्न निशामय तदौषधम् ॥
पक्वरम्भाफलञ्चैव सवीजं सर्करोदकम् ।
नारिकेलोदकञ्चैव सद्यस्तक्रं सुमिष्टकम् ॥
माहिषं दधि मिष्टञ्च केवलं वा सशर्करम् ।
सद्यःपर्य्युषितान्नञ्च सौवीरं शीतलोदकम् ॥
पक्वतैलविशेषञ्च तिलतैलञ्च केवलम् ।
लाङ्गलीतालखर्ज्जूररससुस्तमामलकोद्रवम् ॥
शीतलोष्णोदकस्नानं सुस्निग्धचन्दनद्रवम् ।
स्निग्धपद्मपत्रतल्पं सुस्निग्धव्यजनानिलः ॥
एतत्ते कथितं वत्से ! सद्यो वातप्रणाशनम् ॥ * ॥
वायवस्त्रिविधाः पुंसां क्लेशसन्तापकामजाः ॥
व्याधिसंघश्च कथितस्तन्त्राणि विविधानि च ।
तानि व्याधिप्रणाशाय कृतानि सद्भिरेव च ॥
तन्त्राण्येतानि सर्व्वाणि व्याधिक्षयकराणि च ।
रसायनादयो येषु चोपायश्च सुदुर्लभः ॥
न शक्तः कथितुं साध्वि याथार्थ्यं वत्सरेण च ।
तेषाञ्च सर्व्वतन्त्राणां कृतार्थानां विचक्षणे ! ॥”

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥

अथ व्याधिलक्षणम् । तत्र वाग्भटः ।
“रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ।
रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते ॥
ते च स्वाभाविकाः केचित् केचिदागन्तवः स्मृताः ।
मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः ॥”

तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः । क्षुत्पिपासासुषुप्ताजागराम्लप्रभृतयः ॥ अथवा स्वस्य भावादुत्पत्तेर्जाताः स्वाभाविकाः सहजा इति यावत् । ते च जन्मान्धादयः । आगन्तवोऽभिघातादिजनिताः । अथवा जन्मोत्तरभाविनः । मानसाः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यविषादेर्षासूयामात्सर्य्यप्रभृतयः । अथवा उन्मादापस्मारमूर्च्छाभ्रमतमःसन्न्यासप्रभृतयः । कायिकाः पाण्डुरोगप्रभृतयः ॥

“कर्म्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे ।
कर्म्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः ॥”

तत्र कर्म्मजा व्याधयः । यत् प्राक्तनं दुष्कर्म्मप्रबलं व्याधिरूपं केवलं भोगनाश्यं प्रायश्चित्तनाश्यं वा ततो जाताः न तु दुष्टवातादिदोषैर्जनिताः । तथा ।

“यथाशास्त्रन्तु निर्णीता यथाव्याधि चिकित्सिताः ।
न शमं यान्ति ये रोगास्ते ज्ञेयाः कर्म्मजा बुधैः ॥”

दोषजाः मिथ्याहारविहारप्रकुपितवातपित्तकफजाः ॥ * ॥ ननु मिथ्याहारविहारिणामपि प्राक्तनसुकृतेन नैरुज्यं दृश्यत एव ततो दोषजेष्वपि प्राक्तनकर्म्मैव कारणं तत् कथं दोषजा इति । उच्यते । दोषजेष्वपि वस्तुत आदिकारणं दुष्कर्म्म वर्त्तत एव किन्तु तत्र मिथ्याहारविहारभूषिता दोषा हेतवो दृश्यत इति दोषजा इत्युच्यत इति समाधिः ॥ * ॥ कर्म्मदोषोद्भवाः ।

“स्वल्पदोषो गरीयांसस्ते ज्ञेयाः कर्म्मदोषजाः ।”

अत्र कारणं दुष्कर्म्मप्रबलं यतो दोषाल्पत्वेऽपि व्याधेर्गरीयस्त्वं तत्कर्म्मक्षयादेव क्षीणं भवति । दोषास्तु स्वल्पा अपि निदानत्वेनोक्ता दृश्यन्त एवेति । दोषाणां कारणन्तु मन्यत इति कर्म्मदोषोद्भवाः ।

“कर्म्मक्षयात् कर्म्मकृता दोषजाः स्वस्वभेषजैः ।
कर्म्मदोषोद्भवा यान्ति कर्म्मदोषक्षयात् क्षयम् ॥”

दोषजाः स्वस्वभेषजैरिति दोषजेष्वादिकारणं दुष्कर्म्म तद्भेषजार्थद्रव्यक्षयादिजनितदुःखभोगेन कटुतिक्तकषायाद्युद्भवभक्षणादिजनितदुःखभोगेन च क्षयं याति । शेषाद्दृष्टहेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः ।

“साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः ।
सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते ॥”

याप्यलक्षणमाह ।

“यापनीयन्तु तं विद्यात् क्रियां धारयते हि तम् ।
क्रियायान्तु निवृत्तायां सद्यो यश्च विनश्यति ॥
प्राप्ता क्रिया धारयति सुखिनं शाप्यमातुरम् ।
प्रपतिष्यदिवागारं स्तम्भो यत्नेन योजितः ॥
साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ॥”

अक्रियावतां चिकित्सारहितानाम् ॥ * ॥

अथोपद्रवलक्षणम् ।

“रोगारम्भकदोषस्य प्रकोपादुपजायते ।
योऽन्यो विकारः स बुधैरुपद्रव इहोदितः ॥”

अथारिष्टस्य लक्षणमाह ।

“रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्यादिष्टञ्चापि तदुच्यते ॥”

अथ रोगस्य चिकित्सालक्षणमाह ।

“या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते ।
दोषधातुमलानां या साम्यकृत् सैव रोगहृत् ॥”

क्रियात्र कर्म्म । व्याधिर्ह्रियतेऽनयेति व्याधिहरणी । करणाधिकरणयोश्चेति सूत्रेण करणार्थे ल्युट् । तथा च ।

“याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम् ॥
या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥”

क्रियाच चिकित्सा । तथा चामरसिंहः ।

“आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम् ।
उपायः कर्म्म चेष्टा च चिकित्सा च नव क्रियाः ॥”
इति ॥ * ॥

अथ चिकित्साविध्युपदेशः ।

“जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया गदः ।
वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म्म भिषक् पश्चात् ज्ञानपूर्व्वं समाचरेत् ॥”

अयमर्थः । भिषक् आदौ रोगं परीक्षेत विचारयेत् । ततोऽनन्तरं औषधं विचारयेत् । ततः पश्चात् रोगौषधविचारानन्तरं ज्ञानपूर्व्वं सावधानो न तु अवज्ञया कर्म्म चिकित्सामौषधदानादिरूपं समाचरेदित्यर्थः ॥ * ॥ रोगाज्ञानं चिकित्साकरणे दोषमाह ।

“यस्तु रोगमविज्ञाय कर्म्माण्यारभते भिषक् ।
अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया ॥”

यदृच्छया स्वैरितया सिद्धिर्भवति नापि भवतीत्यर्थः । अन्यच्च ।

“औषधं केवलं कर्त्तुं यो जानाति न चामयम् ।
वैद्यकर्म्म स चेत् कुर्य्याद्वधमर्हति राजतः ॥” * ॥

रोगज्ञाने भेषजाज्ञाने दोषमाह ।

“यस्तु केवलरोगज्ञो भेषजेष्वविचक्षणः ।
तं वैद्यं प्राप्य रोगी स्याद्यथा नौर्नाविकं विना ॥”

नाविकं कर्णधारं विना यथा नौः सङ्कटे पतति तथा रोगीत्यर्थः । अन्यच्च ।

“यस्तु केवलशास्त्रज्ञः क्रियास्वकुशलो भिषक् ।
स मुह्यत्यातुरं प्राप्य भीरुः शस्त्रीव चाहवम् ॥”

रोगौषधयोर्ज्ञाने गुणमाह ।

“यस्तु रोगविशेषज्ञः सर्व्वभैषज्यकोविदः ।
देशकालविभागज्ञस्तस्य सिद्धिर्न संशयः ॥

व्याधावस्थां ज्ञाने प्रयतेत चिकित्सकः ।
भेषजानां विधानेऽथ ततः कुर्य्याच्चिकित्सितम् ॥”
चिकित्सितमित्यत्र भावे क्तः । इति भावप्रकाशे पूर्व्वखण्डः ॥ * ॥ अथ येन रोगाणां ज्ञानं स्यात्तदाह ।
“हेतुस्तदनु संप्राप्तिः पूर्व्वरूपञ्च लक्षणम् ।
तथैवोपशयः पञ्च रोगविज्ञानहेतवः ॥”
तत्र हेतोर्लक्षणमाह ।
“यत्तु न स्याद्विना येन तस्य तद्धेतुरुच्यते ।
शास्त्रे संव्यवहाराय तत्पर्य्यायान् प्रवक्ष्महे ॥
निदानं कारणं हेतुर्निमित्तञ्च निबन्धनम् ।
मूलमायतनं तत्तु प्रत्ययोऽपि निगद्यते ॥”
तत्र हेतुर्व्याधीनां ज्ञानाय हेतुर्यथा । वर्षारूक्षश्रमहिमानशनातिमैथुनशोकचिन्ताभयादयो वातप्रकोपहेतवो वातजान् व्याधीन् बोधयन्ति । शरत्कट्वम्लोष्णतीक्ष्णक्रोधलङ्घनातपाभिघातादयः पित्तप्रकोपहेतवः पित्तजान् व्याधीन् बोधयन्ति । वसन्तमधुरस्निग्धशीतादयः कफप्रकोपहेतवः कफजान् व्याधीन् बोधयन्ति ॥ * ॥ अथ संप्राप्तेर्लक्षणमाह ।
“यथा दुष्टेन दोषेण यथा चानुविसर्पता ।
उत्पत्तिर्व्यामयस्यासौ संप्राप्तिर्ज्जातिरागतिः ॥”
यथा दुष्टेन दोषेण यथा कारणभेदेन दुष्टेन दोषेण । यथा चानुविसर्पता अनेकधा दोषाणां विसर्पणमूर्द्धाधस्तिर्य्यगादिगतिभेदेन । तथा च विसर्पता आमयस्य या उत्पत्तिः असौ संप्राप्तिः । शास्त्रे व्यवहाराय संप्राप्तेः पर्य्यायावाह जातिरागतिरिति । संप्राप्तेरौपाधिकभेदानाह ।
“संख्याविकल्पप्राधान्यबलकालविशेषतः ।
सा भिद्यते यथात्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ॥”
संख्यादिरूपा ये विशेषास्तेभ्यः सा संप्राप्तिर्भिद्यते भेदवती क्रियते इत्यर्थः । तत्र संख्यां विवृणोति । यथा ज्वरोऽष्टधा अतीसारः षड्विध इत्यादि । विकल्पं विवृणोति । दोषाणां समवेतानां विकल्पोऽंशांशकल्पना । समवेतानां समुदितानां दोषाणां अंशांशकल्पना हीनमध्याधिकभेदैर्भागकल्पना विकल्पः ॥ * ॥ प्राधान्यं विवृणोति ।
“स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् ।
व्याधेः स्वातन्त्र्येण प्राधान्यं पारतन्त्र्येणाप्राधान्यञ्च वदेदित्यर्थः । यथा स्वतन्त्रस्य ज्वरस्य प्राधान्यं ज्वराधीनानां श्वासादीनामप्राधान्यम् ॥ * ॥ बलं विवृणोति ।
“हेत्वादिकार्त्स्न्यावयवैर्ब्बलाबलविशेषणम् ।”
अत्रापि व्याधेरित्यनुवर्त्तते । हेत्वादेः हेतुपूर्व्वरूपाणां कार्त्स्न्येन साकल्येन । अवयवैः एकदेशेन । व्याधेर्ब्बलाबलयोर्व्विशेषणं विशेषबोधः ॥ * ॥ कालं विवृणोति ।
“नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथाबलम् ।”
नक्तमत्राव्ययं रात्रिवाचकम् । एतेनैतदुक्तं यस्मिन्नक्तादेरंशे यस्य दोषस्य प्रकोप उक्तोऽस्ति सोऽंशस्तद्दोषजस्य व्याधेः काल इत्यर्थः । नक्तादेरंशेषु वातादिप्रकोप उक्तो वाग्भटेन ।
“ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्द्ध्वसंश्रयाः ।
वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमात् ॥”
इति ॥

ते वातपित्तकफाः । ऋतुषु वातादिकोपो यथा,
“वर्षासु शिशिरे वायुः पित्तं शरदि उष्णके ।
वसन्ते तु कफः कुप्येदेषा प्रकृतिरार्त्तवी ॥” * ॥
संप्राप्तिर्व्याधीनां ज्ञानाय हेतुर्यथा । मिथ्याहारविहारकुपितवाताद्यामाशयगमनरसदूषणकोष्ठाग्निर्ब्बहिर्निरसनरूपं ज्वरोत्पत्तिप्रकारं बोधयति तथा व्याधीनां संख्यादोषांशांशकल्पनाप्राधान्यबलकालांश्च बोधयति । तेषु ज्ञानेषु चिकित्साविशेषः स्यात् ॥ * ॥ अथ पूर्व्वरूपस्य लक्षणमाह ।
“पूर्व्वरूपन्तु तद्येन विद्याद्भाविनमामयम् ।
सामान्यञ्च विशिष्टञ्च द्विविधं तदुदाहृतम् ॥
सामान्यं तत्र दोषाणां विशेषैरनधिष्ठितम् ।
विशिष्टमीषद्व्यक्तं स्यात् विशेषैश्च समन्वितम् ॥”
दोषाणां विशेषाः जृम्भातिशयनेत्रदाहाग्निमान्द्यादयः । तत्र पूर्व्वरूपं व्याधीनां ज्ञानाय हेतुर्यथा । श्रमादयो भाविनं ज्वरं बोधयन्ति । अथ च त एव श्रमादयोऽतिशयितजृम्भायुक्ता भाविनं वातज्वरं नेत्रदाहयुक्ता भाविनं पित्तज्वरं वह्निमान्द्ययुक्ता भाविनं श्लेष्मज्वरं बोधयन्ति ॥ * ॥ अथ लक्षणस्य लक्षणमाह ।
“पूर्व्वरूपं विशिष्टं यद्व्यक्तं तल्लक्षणं स्मृतम् ।
संस्थानं लिङ्गचिह्ने च व्यञ्जनं रूपमाकृतिः ॥”
विशिष्टं पूर्व्वरूपं ईषद्व्यक्तं रूपं तदेव सम्यग्व्यक्तं लक्षणं स्मृतम् । तत्र शास्त्रे व्यवहाराय पर्य्यायानाह संस्थानमित्यादि । लक्षणं व्याधेर्ज्ञानाय हेतुर्यथा । स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणञ्च युगपदेतल्लक्षणं ज्वरं बोधयति ॥ * ॥ अथोपशयस्य लक्षणमाह ।
“औषधान्नविहाराणामुपयोगं सुखावहम् ।
रुणामुपशयं विद्यात् स हि सात्म्यमिति स्मृतः ॥”
तत्र वातस्योपशयमाह ।

“मधुरलवणसाम्लस्निग्धनस्योष्णनिद्रा-
गुरुरुचिकरवस्तिस्वेदसंमर्द्दनानि ।
दहनजलदशोषाभ्यङ्गसन्तर्पणानि
प्रकुपितपवमानं शान्तमेतानि कुर्य्युः ॥”

अथ पित्तस्योपशयमाह ।
“तिक्तस्वादुकषायशीतपवनच्छायानिशावीजनज्योत्स्नाभूगृहयन्त्रवारिजलदस्त्रीगात्रसंस्पर्शनम् ।
सर्पिः क्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत् ॥”
अथ कफस्योपशयमाह ।
“रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनं धूमात्युष्णशिरोविरेकवमनं स्वेदोपवासादिकम् । युद्धवाताध्वनियुद्धजागरजलक्रीडाङ्गनासेवनं पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं हरेत् ॥”
जलक्रीडा कथं कफं हरति तदाह । जलक्रीडाजनितशैत्येनावरुद्धदेहोष्मा पक्तुलिप्तपाकाग्निरिवोग्रो भूत्वा कफं शोषयति इति समाधिः ॥ * ॥ उपशयो व्याधेर्ज्ञानाय हेतुर्यदुक्तं चरकेण । गूढलिङ्गं सङ्कीर्णलक्षणञ्च व्याधिमुपशयानुपशयाभ्यां परीक्षेतेति । तथा च सुश्रुते ।
“अभ्यङ्गस्वेदनस्नेहैर्विकारो वातिको न यः ।
शाम्येत्तत्र तु विज्ञेयं रक्तमात्राक्ति दूषितम् ॥
सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः ।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥”
सर्व्वेषां रोगाणां निदानं सन्निकृष्टं कारणम् । कुपिताः स्वहेतुदुष्टाः । मला वातपित्तकफा एवेत्यन्वयः । तथा च वाग्भटः । दोषा एव हि सर्व्वेषां रोगाणामेककारणमिति । नत्वागन्तुजव्याधिषु व्यभिचारः स्यात् । तत्र तत्राप्युत्पत्त्यनन्तरं दोषप्रकोपस्यावश्यं भावित्वात् । उत्पन्नद्रव्येषु गुणयोगस्येव । इति भावप्रकाशः ॥ * ॥
पापजरोगा यथा । शातातपीयकर्म्मविपाके ।
“कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीकाशा अतिसारभगन्दरौ ॥
दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् ।
इत्येवमादयो रोगा महापापोद्भवाः स्मृताः ।
जलोदरयकृत्प्लीहशूलरोगव्रणानि च ।
श्वासाजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः ।
रक्तार्ब्बुदविसर्पाद्या उपपापोद्भवा गदाः ॥
दण्डापतानकश्चित्रवपुःकम्पविचर्च्चिकाः ।
वल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः ॥”
तथा ।
“अर्शआद्या नृणां रोगा अतिपापाद्भवन्ति हि ।
अन्ये च बहुधा रोगा जायन्ते रोगसङ्कराः ।
उच्यन्ते हि निदानानि प्रायश्चित्तानि च
क्रमात् ॥”
सर्व्वरोगनाशकदानं यथा । हेमाद्रिधृतदानखण्डे भगवद्वाक्यम् ।
“सुवर्णदानं सर्व्वेषां रोगाणां नाशकारणम् ।
तस्मात् सर्व्वप्रयत्नेन कर्त्तव्यं कमलोद्भव ॥”
इति मलमासतत्त्वम् ॥ * ॥
अथारोग्यस्नानदिनम् । तत्र तिथयो रिक्ताः प्रशस्ताः । दशमीप्रतिपद्द्वितीयात्रयोदशीपञ्चमीभिन्ना मध्यमाः । तत्र नक्षत्राणि । स्वातीश्रवणाधनिष्ठाशतभिषाज्येष्ठाहस्तापुष्यपूर्व्वाषाढापूर्व्वफल्गुनीपूर्व्वभाद्रपन्मघाभरणीमृगशिरांसि । तत्र वाराः क्रूराः । तत्र योगो व्यतीपातः । अशोभनश्चन्द्रः । लग्नापेक्षया केन्द्रेषु पापग्रहः । इति ज्योतिस्तत्त्वम् ॥ अपि च ।
“चन्द्रासुद्धौ व्यतीपाते भौमार्कशनिवासरे ।
व्रणमुक्तो व्याधिमुक्तः क्रमशः स्नानं समाचरेत् ॥
पूर्व्वात्रयमघाश्लेषा भरणी कृत्तिका तथा ।
आर्द्रायाञ्च तिथौ रिक्ते चारोग्यस्नानमाचरेत् ॥”
इति ज्योतिःसारसंग्रहः ॥

रोगघ्नं, क्ली, (रोगं हन्तीति। हन+टक्।) औषधम्। इति वैद्यकम् ॥ रोगनाशके, त्रि ॥ (स्त्रियां ङीप्। यथा, सुश्रुते। १। ४४।
"त्रिफला सर्व्वरोगघ्नी त्रिभागघृतमूर्च्छिता ॥")

रोगभूः स्त्री, (रोगाणां भूः स्थानं व्याधिमन्दिरत्वात्।) शरीरम्। इति शब्दचन्द्रिका ॥

रोगराजः, पुं, (रोगाणां राजा। टच्।) राजयक्ष्मा। इति राजनिर्घण्टः ॥ (यथा,—
"इति व्याधिसमूहस्य रोगराजस्य हेतुजम्।
रूपमेकादशविधं हेतुश्चोक्तश्चतुर्विधः ॥"
इति चरके चिकित्सास्थाने ८ अध्यायः ॥)

रोगलक्षणं, क्ली, (रोगाणां लक्षणम्।) निदानम्। इति राजनिर्घण्टः ॥

रोगशान्तकः, पुं, (रोगान् शान्तयतीति। शान्ति+ण्वुल्।) वैद्यः। इति शब्दचन्द्रिका ॥

रोगशिला, स्त्री, (रोगाय रोगनिवृत्तये शिला।) मनःशिला। इति राजनिर्घण्टः। (विवरणमस्या मनःशिलाशब्दे विज्ञेयम्।)

रोगशिल्पी, [न्] पुं, (रोगे शिल्पीव।) वृक्षविशेषः। इति जटाधरः। शराल इति भाषा ॥

रोगश्रेष्ठः, पुं, (रोगेषु श्रेष्ठः।) ज्वरः। इति राजनिर्घण्टः ॥

रोगहं, क्ली, (रोगान् हन्तीति। हन्+डः।) औषधम्। इति शब्दचन्द्रिका ॥

रोगहरद्रव्यं, क्ली, (रोगहरं रोगनाशकं द्रव्यम्।) रोगनाशकवस्तु। यथा,—

धन्वन्तरिरुवाच।

"द्रव्याणि मधुरादीनि वक्ष्ये रोगहराण्यहम्।
शालिषष्टिकगोधूमक्षीरश्चैव तथा मधु ॥
मज्जाशृङ्गाटकयवकशेरुकगोक्षुरम्।
गम्भारी पौष्करं बीजं द्राक्षा खर्ज्जूरकं बला ॥
नारिकेलेक्षुत्मगुप्ता विदारी च पियालकम्।
मधुकं तालकुष्माण्डं सुख्योऽयं मधुरो गणः ॥
मूर्च्छादाहप्रशमनः षड़िन्द्रियप्रसादनः।
कृमिकृत् कफकृत् वृष्य एकोऽत्यर्थं निषेवितः ॥
श्वासकासास्यमाधुर्य्यस्वरघातार्ब्बुदानि च।
गलगण्डश्लीपदानि गुड़लेपादि कारयेत् ॥ * ॥
दाड़िमामलकाम्रञ्च कपित्थकरमर्द्दकौ।
मातुलुङ्गाम्रातकञ्च वदरं तिन्तिरीफलम् ॥
दधितक्रं काञ्जिकञ्च लकुचं चाम्लवेतसम्।
अम्ला दन्तशठायुक्तो जारणः पाचनो रसः ॥
क्लेदनो वातकृत् दृष्यो विदाही चानुलोमनः।
अम्लोऽत्यर्थं सेव्यमानः कुर्य्याद्दै दन्तहर्षकम् ॥
शरीरस्य च शैथिल्यस्वरकुष्ठनलङ्घवेत्।
छिन्नभिन्नव्रणादीनि पाचयत्यग्निभावतः ॥ * ॥
लवणादियवक्षारः सर्ज्जकादिश्च लावणः।
शोधनः पाचनः क्लेदी विश्लेषसर्पणादिकृत् ॥
मार्गरोधी मार्दवकृत् स एकः परिषेवितः।
गात्रकण्डूकोटशोफवैवर्ण्यं जनयेद्रसः।
रक्तवातं रक्तपित्तं पुंस्त्वेन्द्रियरुजादिकम् ॥ * ॥
चोषशिग्रुं मूलकञ्च देवदारु च कुष्ठकम् ॥
लवणं जम्बुजफलं मुस्ता गुग्गुलुलाङ्गली।
कटुको दीपनः शोधी कुष्ठकण्डूकफान्तकृत् ॥
स्थौल्यालस्यकृमिहरः शुक्रमेदोविरोधनः।
एकोऽत्यर्थं सेव्यमानो भ्रमदाहादिकृद्भवेत् ॥ * ॥
कृतमालः करीराणि हरिद्रेन्द्रयवास्तथा।
स्वादुकण्टकवेत्राणि वृहतीद्वयशङ्खिनी ॥
गुड़ूची च द्रवन्ती च त्रिवृन्मण्डूकपर्ण्यपि।
कारवेल्लकवार्त्ताकुकरवीरकवासकाः ॥
रोहिणी शङ्खपुष्पी च कर्कोटो वैजयन्तिका।
जाती वरुणकं निम्बो ज्योतिष्मती पुनर्नवा ॥
तिक्तो रसश्छेदनः स्याद्रोचनो दीपनस्तथा।
शोधनो ज्वरतृष्णाघ्नो मूर्च्छाकण्डूतिकादिजित् ॥
विण्मूत्रक्लेदसंशोषि अत्यर्थं स च सेवितः।
मन्यास्तम्भाक्षेपकार्दितशिरःशूलव्रणादिकृत् ॥ * ॥
त्रिफलाशल्लकीजम्बु आम्राम्रातवटादिकम्।
तिन्दुकं वकुलं शाकं निष्पावं सुरचिल्लिका ॥"
निष्पावस्थाने पालङ्का इति क्वचित् पाठः।
"कषायो ग्राहको रोपी स्तम्भनः क्लेदशोषणः।
एकोऽत्यर्थं सेव्यमानो हृदयादच पीड़कृत् ॥
मुखशोषज्वराध्मानमन्यास्तम्भादिकारकः। * ।
हरिद्रा कुष्ठलवणमेषशृङ्गीवलाद्वयम् ॥
कच्छपी शल्लकी पत्नी पुनर्नवा शतावरी।
अग्निमन्थो ब्रह्मदण्डी श्वदंष्ट्रैरण्डके तथा ॥
यवकोलकुलत्थादि कर्पासीदसमूलकम्।
पृथक् समस्तो वातान्तो वहुपित्तहरस्तथा ॥
शतावरी विदारी च वालकोशीरचन्दनम्।
दूर्व्वा वटः पिप्पली च वदरी शल्लकी तथा ॥
कदली चोत्पलं पद्ममुडुम्बरपटोलकम्। * ।
अथ श्लेष्महरो वर्गो हरिद्रा गुड़कुष्ठकम् ॥
शतपुष्पी च जाती च व्योषारग्वधनाकुली। * ।
सर्पिस्तैलवसामज्जा स्नेहेषु प्रवरं घृतम् ॥
तथाधीस्मृतिमेधाग्निकाङ्क्षिणां शस्यते घृतम्।
केवलं पैत्तिके सर्पिर्व्वातिके लवणान्वितम् ॥
देयं वहुकफे वापि व्योषक्षारसमन्वितम्।
ग्रन्थीनाड़ीकृमिश्लेष्ममेदोमारुतरोगिषु ॥ * ॥
तैलं लाघवदार्ढ्याय क्रूरकोष्ठेषु देहिषु।
वातातपाध्वभारातिव्यायामक्षीणधातुषु ॥
रूक्षे क्लेशक्षयात्यग्निवातावृतपथेषु च।
तथा दग्धा हतभ्रष्टा योनिकर्म्मा शिरोरुजि ॥
उत्तमस्य पलं मात्रा त्रिभिश्चार्द्धैश्च मध्यमे।
अधमस्य पलार्द्धेन स्नेहकार्य्योषधेषु च ॥ * ॥
जलमुष्णं घृते देयं पृथक् तैले न शस्यते।
स्नेहे पीते तु तृष्णायां पिवेदुष्णोदकं नरः।
वातानुलोमदीप्ताग्निवर्च्चास्निग्धसमं मतम्।
रूक्षस्य स्नेहनं कार्य्यमतिस्निग्धस्य रूक्षणम् ॥
श्यामाककोरदूषाम्लतक्रपिण्याकयष्टिभिः।
वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते ॥
न स्वेदयेदतिस्थूलरूक्षदुर्ब्बलमूर्च्छितान् ॥"
इति गारुड़े योगसारे १७७ अध्यायः ॥ * ॥

धन्वन्तरिरुवाच।

"घृततैलादि वक्ष्यामि शृणु सुश्रुत रोगनुत्।
शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्च्चला ॥
अभया गुड़ूची चैव अट्टरूषकवाकुची।
एतैरक्षसमैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
कण्टकार्य्या रसप्रस्थः क्षीरप्रस्थसमन्वितः।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम् ॥ * ॥
त्रिफलाचित्रकवलानिर्गुण्डीनिम्बवासकाः।
पुनर्नवा गुड़ूची च वृहती च शतावरी ॥
एतैर्घृतं यथालाभं सर्व्वरोगविमर्द्दनम्। * ।
वलाशतकषाये तु तैलस्याढ़कं पचेत् ॥
कल्कैर्म्मधुकमञ्जिष्ठाचन्दनोत्पलपद्मकैः।
सूक्ष्मैलापिप्पलीकुष्ठत्वगेलागुरुकेशरैः ॥
गन्धाश्वजीवनीयैश्च जीराढ़कसमाश्रितम्।
एतन्मृद्वग्निना पक्वं स्थापयेद्राजते शुभे ॥
सर्व्ववातविकारांस्तु सर्व्वधात्वन्तराश्रयान्।
तैलमेतत् प्रशमयेद्बलाख्यं राजवल्लभम् ॥ * ॥
शतावरीरसप्रस्थं क्षीरप्रस्थं तथैव च।
शतपुष्पा देवदारु मांसी शैलेयकं वला ॥
चन्दनं तगरं कुष्ठं माला चांशुमती तथा।
एतैः कर्षसमैः कल्कैस्तैलप्रस्थं विपाचयेत् ॥
कुब्जवामनपङ्गूनां वधिरव्यङ्गकुब्जिनाम्।
वायुना भग्नगात्राणां ये च सीदन्ति मैथुने ॥
जराजर्ज्जरगात्राणां चाध्मानमुखशोषिणाम्।
त्वग्गताश्चापि ये वाताः शिरास्नायुगताश्च ये ॥
स वस्तिर्नाशयत्याशु तैश्चैव स्याद्दशाङ्गकः।
नारायणमिदं तैलं विष्णुनोक्तं रुगर्द्दनम् ॥ * ॥
पृथक् तैलं घृतं कुर्य्यात् समस्तैरौषधैः पृथक्।
शतावर्य्या गुड़ूच्या वा चित्रके रोचनायुतः ॥
निर्गुण्ड्या वा प्रसारण्या कण्टकार्य्या रसादिभिः।
वर्षाभानलया वापि वासकेन फलत्रिकैः ॥
ब्राह्म्या चैरण्डकेनापि भृङ्गराजेन मुण्डिना।
मूषल्या दशमूलेन खदिरेण वटादिभिः ॥
वटिका मोदको वापि चूर्णं स्यात् सर्व्वरोगनुत्।
घृतेन मधुना वापि युक्तं खण्डगुड़ादिभिः।
लवणैः कटुकैर्युक्तं यथाभागञ्च रोगनुत् ॥
चित्रकार्कत्रिवृतामलशह्यमारकम्।
स्नुधा च वाला गणिका सप्तपर्णसुवर्च्चिकाम् ॥
ज्योतिष्मतीञ्च संभृत्य तैलं धीरो विपाचयेत्।
एतच्छिष्यन्दनं तैलं भृशं दद्यात् भगन्दरे ॥
शोधनं रोचनञ्चैव सुवर्णकरं परम्।
चित्रकाद्यं महातैलं सर्व्वरोगप्रभञ्जनम् ॥
अजमोदः ससिन्दूरो हरितालनिशाद्वयम्।
क्षारद्वयं फेनयुतमार्द्रकं सरलोद्भवम् ॥
इन्द्रवारुण्यपामार्गकदलैः कन्दलैः समैः।"
कन्दलैः स्थाने स्यन्दनैः इति च पाठः।
"एभिः सर्षपजं तैलमजामूत्रैश्च योजितम्।
मृद्वग्निना पचेदेतत् अर्कक्षीरेण संयुतम् ॥
अजमोदादिकं तैलं गण्डमालां व्यपोहति।
विदग्धस्तु पचेत् पक्वं पक्वञ्चैव विशोधयेत् ॥
रोपणं मृदुभावञ्च तैलेनानेन कारयेत्।
अजमोदादिकं तैलं महावीर्य्यञ्च रोगहृत् ॥"
इति गारुड़े १७८ अध्यायः ॥

रोगहारी, [न्] पुं, (रोगं हरति तच्छीलः । हृ + णिनिः ।) वैद्यः । इत्यमरः । २ । ६ । ५७॥ रोगनाशके, त्रि ॥

रोगितरुः, पुं, (रोगिणां शोकनाशकस्तरुः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

रोगिवल्लभं, क्ली, (रोगिणां वल्लभं प्रियम् ।) औषधम् । इति शब्दचन्द्रिका ॥ रोगिप्रिये, त्रि ॥

रोगी, [न्] त्रि, (रोगोऽस्यास्तीति । रोग + इनिः ।) रोगयुक्तः । तत्पर्य्यायः । व्याधितः २ विकृतः ३ ग्लानः ४ म्लानः ५ मन्दः ६ आतुरः ७ अभ्यान्तः ८ अभ्यमितः ९ रुग्णः १० सामयः ११ अपटुः १२ । इति राजनिर्घण्टः ॥ आमयावी १३ ग्लास्नुः १४ । इत्यमरः ॥ * ॥ अथ चिकित्सार्थं रोगिणः परीक्षा । तत्र वाग्भटः ।

"दर्शनस्पर्शनप्रश्नैः परीक्षेत च रोगिणम् ।
आयुरादि दृशा स्पर्शाच्छीतादेः प्रश्नतोऽपरम् ॥"

आयुरादि । आदिशब्दात् साध्यत्वासाध्यत्वादि । दृशा दर्शनेन । अत्र सम्पदादिभ्यश्चेति भावे क्विप् । स्पर्शात् शीतादेः । शीतोष्णमृदुकठिनत्वादिना परीक्षणञ्च । प्रश्नतः । उदरलाघवगौरवक्षुधातृष्णाबलाबलादिना ॥

"मिथ्या दृष्टा विकारा हि दुराख्यातास्तथैव च ।
तथा दुष्परिदृष्टाश्च मोहयेयुश्चिकित्सकान् ॥"

तत्र दर्शनं नेत्रजिह्वामूत्रादेः कर्त्तव्यम् ॥ * ॥ तत्र नेत्रपरीक्षा यथा,—

"नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथारुणम् ।
कोटरान्तःप्रविष्टञ्च तथास्तञ्च विलोकनम् ॥
हरिद्राखण्डवर्णञ्च रक्तं वा हरितं तथा ।
दीपद्वेषि सदाहञ्च नेत्रं स्यात् पित्तकोपतः ॥
चक्षुःश्लेष्मबाहुल्यात् स्निग्धं स्यात् सलिलप्लुतम् ।
तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥
नेत्रं द्विदोषबाहुल्यात् स्याद्दोषद्वयलक्षणम् ।
त्रिदोषलिङ्गं सैवेत तन्मारयति रोगिणम् ॥
त्रिदोषदूषितं नेत्रमन्तर्म्मग्नं भृशं भवेत् ।
त्रिलिङ्गं सलिलस्रावि प्रान्तेनोन्मीलयत्यपि ॥"*

अथ जिह्वापरीक्षा ।

"शाकपत्रप्रभा रूक्षा स्फुटिता रसनानिलात् ।
रक्ता श्यामा भवेत् पित्ताल्लिप्ताऽर्द्रा धवला कफात् ।
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके ।
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा ॥"

अथ मूत्रपरीक्षा ।

"वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः ।
रक्तमेव भवेद्रक्ताद्धवलं फेनिलं कफात् ॥"

अथ शरीरस्य उष्णत्वादिज्ञानार्थं स्पर्शनं कार्य्यम् । तत्र नाड़ीपरीक्षामाह ।

"पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु ।
अङ्गुष्ठमूलगा नाड़ी परीक्ष्येत भिषग्वरैः ॥
अङ्गुलीभिस्तु तिसृभिर्नाड़ीमवहितः स्पृशेत् ।
तच्चेष्टया सुखं दुःखं जानीयात् कुशलोऽखिलम् ॥
सद्यःस्नातस्य सुप्तस्य क्षुत्तृष्णातपशीलिनः ।
व्यायामश्रान्तदेहस्य सम्यक् नाड़ी न बुध्यते ॥
वातेऽधिके भवेन्नाड़ी प्रव्यक्ता तर्ज्जनीतले ।
पित्ते व्यक्ता मध्यमायां तृतीयाङ्गुलिगा कफे ॥
तर्ज्जनीमध्यमामध्ये वातपित्तेऽधिके स्फुटा ।
अनामिकायां तर्ज्जन्यां व्यक्ता वातकफे भवेत् ॥
मध्यमानामिकामध्ये स्फुटा पित्तकफेऽधिके ।
अङ्गुलित्रितयेऽपि स्यात् प्रव्यक्ता सन्निपातिनः ॥
वाताद्वक्रगतिर्नाड़ी पित्तादुत्प्लुत्य गामिनी ।
कफान्मन्दगतिर्ज्ञेया सन्निपातादतिद्रुता ॥
वक्रमुत्प्लुत्य चलति धमनी वातपित्ततः ।
वहेद्वक्रञ्च मन्दञ्च वातश्लेष्माधिके तत ॥
उत्प्लुत्य मन्दं चलति नाड़ी पित्तकफेऽधिके ।
कामात् क्रोधात् वेगवहा क्षीणा चिन्ताभयाप्लुता ॥
स्थित्वा स्थित्वा चलेद्या सा हन्ति स्यानच्युता तथा ।
अतिक्षीणा च शीता च प्राणान् हन्ति न संशयः ॥
ज्वरकोपेन धमनी सोष्णा वेगवती भवेत् ।
मन्दाग्नेः क्षीणधातोश्च सैव मन्दतरा मता ॥
चपला क्षुधितस्य स्यात् तृप्तस्य भवति स्थिरा ।
सुखिनोऽपि स्थिरा ज्ञेया तथा बलवती मता ॥"

इति भावप्रकाशः ॥ (लक्षणान्तरादिकमाह ।

"रोगो यस्यास्ति रोगी स स चिकित्स्यस्तु यादृशः ।
यादृशश्चाचिकित्स्योऽपि वक्ष्यमाणो निशम्यताम् ॥"

तत्र चिकित्स्यः ।

"निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन चक्षुषा ।
चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः ॥"

सत्त्वं व्यसनाभ्युदयक्रियादिष्वविक्लवताकरं तेन युक्तः । चक्षुषा चक्षुरुपलक्षितेन । ततोऽन्येनापीन्द्रियेण चिकित्स्यः रोगान् मोचयितव्यः । अन्यच्च ।

"आयुष्मान् सत्त्ववान् साध्यो द्रव्यवान् मित्रवानपि ।
चिकित्स्यो भिषजा रोगी वैद्यवाक्यकृदास्तिकः ॥"

आयुर्व्वेदोऽस्तीति मतिर्यस्य स आस्तिकः ॥ अथाचिकित्स्यः ।

"चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च ।
शोकाकुलो मुमूर्षुश्च विहीनः करणैश्च यः ॥
वैरी वैद्यविदग्धश्च श्रद्धाहीनश्च शङ्कितः ।
भिषजामविधेयाः स्युर्नोपक्रम्या भिषग्विधाः ॥
एतानुपाचरन् वैद्यो बहून् दोषानवाप्नुयात् ॥"

चण्डोऽत्यन्तक्रोधशीलः । साहसिकः अविचार्य्यकारी । भीरुर्भयशीलः । कृतघ्नो वैद्यकृतोपकारलोपकः । व्यग्रो व्याकुलः । विहीनः करणैश्च यः निजेन्द्रियशक्तिरहितः । वैरी न चिकित्स्यः कदाचिद्रोगोद्रेके अपवादभयात् । वैद्यविदग्धो वैद्यधूर्त्तः । तथा च सुश्रुतः ।

"स न सिद्ध्यति वैद्यस्तु गृहे यस्य न पूज्यते ।"

शङ्कितो वैद्यविश्वासरहितः । भिषजामविधेयाः ॥ वैद्यवचनाविधायिनः । भिषग्विधा वैद्यतुल्याः । एते नोपक्रम्याः न चिकित्स्याः । अथ दूतस्य लक्षणम् ।

"यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च यादृक् समुचितस्तादृगत्र निगद्यते ॥
दूताः सुजातयोऽव्यङ्गाः पटवो निर्म्मलाम्बराः ।
सुखिनोऽश्ववृषारूढ़ाः शुभ्रपुष्पफलैर्युताः ॥
सजातयः सुचेष्टाश्च सजीवदिग्विसङ्गताः ।
भिषजं समये प्राप्ता रोगिणः सुखहेतवे ॥"

सजातयः रोगिसमानजातयः ।

"यस्यां प्राणमरुद्वाति सा नाड़ी जीवसंज्ञिता ॥"

अथ दूतस्य यात्रायां शकुनविचारः ।

"वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते ।
न शुभं सौम्य शकुनं प्रदीप्तन्तु सुखावहम् ॥"

प्रदीप्तमग्निं दूतो रोगी रिक्तहस्तो वैद्यं न पश्येत् । तथा च ।

"रिक्तहस्तो न पश्येत् राजानं भिषजं गुरुम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रोग्यं, त्रि, (रोगाय हितमिति । रोग + यत् ।) अपथ्यम् । अहितम् । इति शब्दचन्द्रिका ॥ रोगसम्बन्धिनि च ॥

रोचकः, पुं, (रोचयतीति । रुच् + णिच् + ण्वुल् ।) क्षुधा । तत्पर्य्यायः । बुभुक्षा २ अशना ३ जिघत्सा ४ रुचिः ५ । इति हेमचन्द्रः । ३ । ५७ ॥ कदली । इति शब्दरत्नावली ॥ राजपलाण्डुः । अवदंशः । इति राजनिर्घण्टः ॥ ग्रन्थिपर्णभेदः । भण्डिउर इति नेपालदेशे ख्यातः । तत्पर्य्यायः । निशाचरः २ धनहरः ३ कितवः ४ गणहासकः ५ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कटुत्वम् । पाके कटुत्वम् । लघुत्वम् । तीक्ष्णत्वम् । हृद्यत्वम् । हिमत्वम् । कुष्ठकण्डूकफानिलरक्षोऽश्रीस्वेदमेदोऽस्रज्वरगन्धविषव्रणनाशित्वञ्च । इति भावप्रकाशः ॥ (काचकूप्यादिकारकः । यथा, रामायणे । २ । ८३ । १३ ।

"मायूरकाः क्राकचिका वेधका रोचकास्तथा ॥"

"रोचकाः काचकुप्यादिकर्त्तारः इति कतकः ।" इति तट्टीका ॥) रुचिकारके, त्रि ॥ (यथा, सुश्रुते । १ । ४६ । मांसवर्गे ।

"संग्राही रोचको बल्यस्तेषामेणो ज्वरापहः ॥")

रोचनः, पुं, (रोचयतीति । रोचि + नन्द्यादित्वात् ल्युः ।) कूटशाल्मलिः । इत्यमरः ॥ (तस्य पर्य्यायो यथा,—

"कुत्सित: शाल्मलि: प्रोक्तो रोचन: कूट-
शाल्मलि: ॥"
इति भावप्रकाशे । १ । १ ॥
काम्पिल्ल: । तत्पर्य्यायो यथा,—
"काम्पिल्ल: कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि
च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
श्वेतशिग्रु: । पलाण्डु: । आरग्वध: । करञ्ज: ।
अङ्कोठ: । दाडिम: । इति राजनिर्घण्ट: ॥
(देवयोनिविशेष: । यथा, हरिवंशे ।१६६।७५।
"कुम्भाण्ड: कुम्भमूर्द्धा च रोचनो वैकृतोग्रह: ॥"
दक्षिणापुत्त्राणामन्यतम: । स च स्वायम्भुवमन्व-
न्तरे देवविशेष: । इति भागवतम् । ४ । १ । ७ ॥
स्वारोचिषमन्वन्तरे इन्द्र: । इति च तत्रैव ।८।१।
२० ॥ भारतवर्षान्तर्गतपर्व्वतविशेष: । यथा,
मार्कण्डेये । ५७ । १३ ।
"तुङ्गप्रस्थो नागगिरी रोचन: पाण्डराचल: ॥")
त्रि, रोचक: । इति मेदिनी । ने, ११६ ॥ (यथा,
सुश्रुते । १ । ४६ । शाकवर्गे ।
"शृष्योणं रोचनं हृद्यं सस्नेहं लघु दीपनम् ॥"
दीप्तिशाली । यथा, हरिवंशे । १२८ । ३५ ।
"अन्तचरं रोचनं चारुशाखं
महाबलं धर्म्मनेतारमीशम् ।
सहस्रनेत्रं शतवर्म्माणमुग्रं
महादेवं विश्वसृजं नमस्ये ॥"
शोभमान: । यथा, भट्टि: । ६ । ७३ ।
"भृङ्गालिकोकिलकुड्भिर्वाशनै: पश्य लक्ष्मण ।
रोचनैर्भूषिता पम्पाभस्माकं हृदयाविधम् ॥"
अनुरागकर: । यथा, भागवते । १ । १० ।११ ।
"मत्तज्ञानमुक्तदु:सङ्गो हातुं नोत्सहते बुध: ।
कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥");
रोचनक:, पुं, (रोचयतीति । रोचि + ल्यु: । तत:
कन्) जम्बीर: । इति राजनिर्घण्ट: ॥ (गुणा-
दयोऽस्य जम्बीरशब्दे ज्ञातव्या: ॥)
रोचनफल:, पुं, (रोचनं रुचिकरं फलमस्य ।)
बीजपूरक: । । इति राजनिर्घण्ट: ॥
रोचनफला, स्त्री, (रोचनं रोचकं फलमस्या: ।)
चिर्भिटा । इति राजनिर्घण्ट: ॥
रोचना, स्त्री, (रोचते या । रुच् + "बहुलमन्य-
त्रापि ।" उणा० २ । ७८ । इति युच् । टाप् ।)
रक्तकह्लारम् । गोपित्तम् । गोरोचना इति
ख्यातम् । (यथा, मनु: । ८ । २३४ ।
"कर्णौ चर्म्म च वालांश्च वस्तिं स्नायुञ्च रोच-
नाम् ।
पशुषु स्वामिनां दद्यात् मृतेष्वङ्गानि दर्शयेत् ॥")
वरयोषित् । इति मेदिनी । ने, ११८ ॥ (वसु-
देवपत्नी । यथा, भागवते । ६ । २४ । ४५ ।
"पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकी प्रमुखाश्चासन् पत्न्य आनकदुन्दुभे: ॥")
रोचनिका, स्त्री, (रोचनैव । स्वार्थे कन् ।
टापि अत इत्वम् ।) वंशरोचना । इति राज-
निर्घण्ट: ॥ शुक्लारोचनी । इति रत्नमाला ॥

रोचनी, स्त्री, (रोचते इति । रुच् + कृत्यल्युटो
बहुलमिति ल्युट् । ततो ङीष् ।) आमलकी ।
गोरोचना । इति राजनिर्घण्ट: ॥ मन:शिला ।
इति हेमचन्द्र: ॥ श्वेतत्रिवृता । गुँड़ारोच-
नीतिख्यातवणिग्द्रव्यम् । तत्पर्य्याय: । काम्पिल्ल:२
कर्कश: ३ चन्द्र: ४ रक्ताङ्ग: ५ । इत्यमर: ॥
कम्पिल्ल: ६ कम्पील: ७ कम्पिल: ८ काम्पिल्य:९
रेचनी १० । इति भरत: ॥ पर्य्यायान्तरं गुणाश्च
कम्पिल्लकशब्दे द्रष्टव्या: ॥
रोचमान:, पुं, (रोचते इति । रुच् + शानच् ।)
अश्वग्रीवास्थरोमावर्त्त: । यथा,—
"श्रीवृक्षो हृदयावर्त्तो रोचमानो गलोद्भव: ॥"
इति त्रिकाण्डशेष: ॥
(यथा, माघे । ५ । ४ ।
"अश्वा: प्रधुर्व्वसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्म्मिभिरापतन्त: ॥"
नृपविशेष: । यथा, महाभारते । १ । ६७।१८ ।
"अश्वग्रीव इति ख्यात: सत्त्ववान् यो महा-
सुर: ।
रोचमान इति ख्यात: पृथिव्यां सोऽभवन्नृप: ॥"
दीप्यमाने, त्रि । यथा, कथासरित्सागरे ।
७४ । ७८ ।
"रोचमानै: समायुक्तचूड़ामण्यङ्गदादिभि: ।
गन्धर्व्वकुलसम्भूतिसंसिद्धैरिव भूषितम् ॥")
रोचि:, [स्] स्त्री, (रोचतेऽनेनेति । रुच् +
बाहुलकात् इसिन् । इत्युज्ज्वल: । २ ।।१२ ।)
प्रभा । इत्यमर: ॥ (यथा, माघे । १ । २१ ।
"रथाङ्गपाणे: पटलेन रोचिषा-
मृषित्विष: संवलिता विरेजिरे ॥")
रोचिष्णु:, त्रि, (रोचते तच्छील: । रुच् + "अलं
कृञ् निराकृञिति ।" ३ । २ । १३६ । इति
इष्णुच् ।) अलङ्कारादिना दीप्तिशील: । तत्-
पर्य्याय: । विभ्राट् २ भ्राजिष्णु: ३ । इत्यमर: ॥
(यथा, कथासरित्सागरे । ६४ । ६ ।
"तत्र शूकरवृन्दानि भिन्दन् बाणैर्निरन्तरम् ।
श्यामलाम्बररोचिष्णुस्तमांसीव रवि: करै: ॥"
रोचक: । यथा, सुश्रुते । १ । ४५ । मद्यवर्गे ।
"सुगन्धि दीपनं हृद्यं रोचिष्णु कृमिनाशनम् ॥")
रोची, स्त्री, (रोचते इति । रुच् + इन् । वा
ङीष् ।) हिलमोचिका । इति शब्दरत्नावली ॥
रोची, [न्] त्रि, (रोचते इति । रुच् + णिनि: ।)
रोचिष्णु: । इति हेमचन्द्र: ॥
रोच्यं, त्रि, (रुच् + ण्य: । "यजयाचरुचप्रवच-
र्चश्च ।" ७ । ३ । ६६ । इति कवर्गादेशो न ।)
प्रकाश्यम् । प्रीतिविषय: । रुचधातो: कर्म्मणि
यप्रत्ययेन निष्पन्नोऽयम् ॥
रोट्, [ष्] त्रि, (रुष् + "अन्येभ्योऽपि दृश्यन्ते ।"
३ । २ । ७५ । इति क्विप् ।) हिंस्र: । वधक: ।
रोषतीति विचि गुण: । इति मुग्धबोधटीकायां
दुर्गादास: ॥
रोटिका, स्त्री, पिष्टकविशेष: । रोटी इति रुटी
इति च भाषा । तत्करणप्रकारमाह ।

"शुष्कगोधूमचूर्णेन किञ्चित् पुष्टाञ्च पोलिकाम् ।
तप्तके स्वेदयेत् कृत्वा भूयोऽङ्गारेऽपि तां पचेत् ॥
सिद्धैषा रोटिका प्रोक्ता गुणानस्या: प्रचक्ष्महे ।
रोटिका बलकृद्रुच्या बृंहणी धातुवर्द्धिनी ।
वातघ्नी कफकृद्गुर्व्वी दीप्ताग्नीनां प्रपूजिता ॥"
अथ लेटी ।
"सुशुगोधूमचूर्णन्तु साम्बुगाढ़ं विमर्द्दयेत् ।
विधाय वटकाकारं निर्धूमेऽग्नौ शनै: पचेत् ॥
अङ्गारकर्कटी ह्येषा बृंहणी शुक्रला लघु: ।
दीपनी कफकृद्बल्या पीनसश्वासकासजित् ॥"
अथ यवरोटिका ।
"यवजा रोटिका रुच्या मधुरा विशदा लघु: ।
मलशुक्रानिलकरी बल्या हन्ति कफामयान् ।
पीनसश्वासकासांश्च मेदोमेहगलामयान् ॥"
अथ माषरोटिका ।
"चूर्णं यच्छुष्कमाषाणां धमसी साभिधीयते ।
धमसीरचिता रोटी कथ्यते वलभद्रिका ॥
रूक्षोष्णा वातला बल्या दीप्ताग्नीनां प्रपूजिता ।
माषाणां दालयस्तोये स्थापितास्त्यक्तकञ्चुका: ॥
आतपे शोषिता यन्त्रे पिष्टास्ता धूमसी स्मृता ।
धूमसीरचिता सैव प्रोक्ता झर्झरिका बुधै: ॥"
झर्झरिकास्थाने झुर्झुरिका इति गुर्गुरिका
इति वा पाठ: ।
"झर्झरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥"
अथ चणकरोटिका ।
"चाणक्या रोटिका रूक्षा श्लेष्मपित्तास्रनुद्गुरु: ।
विष्टम्भिनी न चक्षुष्या तद्गुणा तिलशष्कुली ॥"
इति भावप्रकाश: ॥
रोड, ऋ अनादरे । इति कविकल्पद्रुम: ॥ (भ्वा०-
पर०-सक०-सेट् ।) ऋ, अरुरोड़त् । इति
दुर्गादास: ॥
रोद:, [स्] स्त्री (रुद् + असुन् ।) स्वर्ग: । भूमि: ।
इति मेदिनी । से, ३३ ॥ (यथा, ऋग्वेदे । ६ ।
२२ । ५ ।
"एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशु: ॥")
रोदनं, स्त्री, (रुद् + ल्युट् ।) क्रन्दनम् । (यथा,
चाणक्यशतके । ६२ ।
"दुर्ब्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम् ॥")
अस्रु । इति मेदिनी । ने, ११६ ॥ तस्य शुभाशुभं
यथा,—
"अनश्रु स्निग्धरुदितमदीनं शुभदं नृणाम् ।
प्रचुराश्रु दीनं रूक्षञ्च रुदितं न सुखावहम् ॥"
इति गारुड़े ६६ अध्याय: ॥
कपिलाधेनूनां नेत्राम्बुना रत्नसमूहो जात: ।
यथा,—
"शुष्के मुनिं मृतं दृष्ट्वा रुरोद कपिला मुहु: ॥"
इत्युपक्रम्य ।
"तदश्रुबिन्दुना मर्त्त्ये रत्नसंघो बभूव ह ॥"
रोदनाश्रुपतनेन मृतानां नरकं स्यात् । यथा,—
"ज्ञानिनो मा वदन्त्येव मा रोदी: पुत्त्र साम्प्र-
तम् ।

रोदनाश्रुप्रपतनान्मृतानां नरकं ध्रुवम् ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २७ अध्याय: ॥
मृतमुद्दिश्य रोदननिषेधो यथा,—
“श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः।
अतो न रोदितव्यं हि क्रियाः कार्य्या विधानतः॥”
इति शुद्धितत्त्वम् ॥

रोदनिका, स्त्री, (रोदनं अश्रु पात्यत्वेनास्त्यस्येति। रोदन+ठन्।) यवासः। इति राजनिर्घण्टः॥ (विषयोऽस्य यवासशब्दे ज्ञातव्यः॥)

रोदनी, स्त्री, (रुद्यतेऽनयेति। रुद्+करणे ल्युट्। ङीप्।) दुरालभा। इत्यमरः। २। ४। ९२॥

रोदसी, स्त्री, (रोदस्+गौरादित्वात् ङीष्।) स्वर्गः। भूमिः। इत्यमरः। ३। ३। २२८॥

रोदसी, च, स्वर्गः। भूमिः। यथा,—
“द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च।”
इति भरतधृतकोषः॥

रोदस्यौ, स्त्री, भूमिस्वर्गौ। यथा,—
“प्रकरन्धापि भूद्यावौ रोदस्यौ रोदसी च ते॥”
इत्यमरः। ३। ३। २२८॥
“भूर्भूमिः द्यौराकाशं एते सहिते विगृहीते च रोदसीरोदःशब्दयोर्वाच्येते इति भूद्यावौ परान्वय्येते एतेन ईकारान्तसान्तशब्दद्वयेन एकवचनान्तेनापि भूद्यावौ समुदिते उच्येते।
‘रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक्।
सह प्रयोगेऽप्यनयो रोदः स्यादपि रोदसी॥’
इति विश्वः॥
‘रोदसी रोदसा सार्द्धं पृथ्वीस्वर्गे दिवि स्थितौ॥’
इत्यजयः॥
रोदसीत्यव्ययमप्यस्ति। यथा। द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति चेति।” इति तट्टीकायां भरतः॥

रोधः, पुं, (रुणद्धि जलमिति। रुध्+पचाद्यच्।) नदीतीरम्। इत्यमरटीकायां भरतः॥१।१०।७॥ (रुध्+घञ्। रोधनम्। यथा, मार्कण्डेये। १३। १।
“अहं वैश्यकुले जातो जन्मन्यस्मात्तु सप्तमे।
समतीते गवां रोधं निपाने कृतवान् पुरा॥”)

रोधः, [स्] क्ली, (रुणद्धि वार्य्यादिकमिति। रुध+“सर्व्वधातुभ्योऽसुन्।” उणा० ४। १८८। इति असुन्।) नदीतीरम्। इत्यमरः। १। १०। ७॥ (यथा, रघुः। ५। ४२।
“स नर्म्मदारोधसि सीकरार्द्रै-
र्मरुद्भिरानर्त्तितनक्तमाले।
निवेशयामास विलङ्घिताध्वा
क्लान्तं रजोधूसरकेतु सैन्यम्॥”)

रोधनः, त्रि, (रुणद्धीति। रुध+ल्युः।) रोधकर्त्ता। (रुध्+भावे ल्युट्।) रोधे, क्ली। इति व्याकरणम्॥ (यथा, भागवते। ३। ३०। २७।
“पातनं गिरिशृङ्गेभ्यो रोधनं चाम्बुगर्त्तयोः॥”)

रोधवक्रा, स्त्री, (रोधेन वक्रा।) नदी। यथा। निम्नगा रोधवक्रा च स्रवन्ती सिन्धुरापगेति नदीपर्य्याये भागुरिः। इति भरतः॥

रोधोवक्रा, स्त्री, (रोधसा वक्रा।) नदी। इति त्रिकाण्डशेषः॥

रोधोवती, स्त्री, (रोधोऽस्त्यस्या इति। रोधस्+मतुप्। ङीप्।) नदी। इति राजनिर्घण्टः॥

रोध्रं, क्ली, (रुध्यतेऽनेन। रुध+बाहुलकात् रन्।) अपराधः। पापम्। इति मेदिनी। रे, ८१॥

रोध्रः, पुं, लोध्रः। इति मेदिनी राजनिर्घण्टश्च॥ (यथा, सुश्रुते। १। १२।
“मधूच्छिष्टं समधुकं रोध्रं सर्ज्जरसं तथा।
मञ्जिष्ठां चन्दनं मूर्व्वां पिष्ट्वा सर्पिर्व्विपाचयेत्॥”)

रोध्रपुष्पः, पुं, (रोध्रस्येव पुष्पमस्य।) मधूकवृक्षः। इति राजनिर्घण्टः॥ (मण्डलिसर्पजातिविशेषः। तद्यथा।“आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्पो मिलिन्दको गोनसः इत्यादिषु।” इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये॥)

रोध्रपुष्पिणी, स्त्री, (रोध्र इव पुष्प्यतीति। पुष्प+णिनि। ङीप्।) धातकीवृक्षः। इति राजनिर्घण्टः॥

रोपः, पुं, (रुप्यतेऽनेनेति। रुप विमोहे+घञ्।) बाणः। इत्यमरः॥ (रुह+णिच्+घञ्।) रोपणम्। इति मेदिनी। पे, २॥ (यथा, महाभारते। १३। ५८। २४।
“एता जात्यस्तु वृक्षाणां तेषां रोपे गुणास्त्विमे॥”)
छिद्रे, क्ली। इति हेमचन्द्रः॥

रोपणं, क्ली, विमोहनम्। रुपधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥ जननम्। प्रादुर्भावः। ण्यन्तरुहधातोः पडादेशे अनट्प्रत्ययेन निष्पन्नम्। इति व्याकरणम्॥ (यथा, सुश्रुते। १। १५।
“सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्य्यकृच्छ्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मानुग्रहं करोति॥”)
अञ्जनविशेषः। यथा,—
“रोपणं रसकं पिष्ट्वा सम्यक् संप्लाव्य वारिणा।
गृह्णीयात्तज्जलं सर्व्वं त्यजेच्चूर्णमधोगतम्॥
शुष्कञ्च तज्जलं सर्व्वं पर्पटीसन्निभं भवेत्।
विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारसैः॥
कर्पूरस्य रसन्तत्र दशमांशेन निक्षिपेत्।
अञ्जयेन्नयने तेन नेत्राखिलगदच्छिदः॥”
इति भावप्रकाशः॥
(त्रि, रोपकः। यथा, सुश्रुते। ६। १८।
“लेखनात्त्रिगुणो धार्य्यः पुटपाकस्तु रोपणः॥”
व्रणरोगे मांसाङ्कुरजननार्थप्रक्रियादिकम्। तद्यथा,—
“आदौ विम्लापनं कुर्य्याद्द्वितीयमवसेचनम्।
तृतीयमुपनाहञ्च चतुर्थीं पटलक्रियाम्॥
पञ्चमं शोधनञ्चैव षष्ठं रोपणमिष्यते।
एते क्रमा व्रणस्योक्ताः सप्तमो वै कृतापहः॥
निम्बपत्रतिलैः कल्को मधुना व्रणशोधनः।
रोपणः सर्पिषा युक्तो यवकल्केऽप्ययं विधिः॥”
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे॥)

रोपणचूर्णं, क्ली, (रोपणस्य चूर्णम्।) नयनाञ्जनविशेषः। यथा, भावप्रकाशे।
अथ रोपणचूर्णम्।
“शिलायां रसकं पिष्ट्वा सम्यगाप्लाव्य वारिणा।
गृह्णीयात् तज्जलं सर्व्वं त्यजेच्चूर्णमधोगतम्॥
शुष्कं तच्च जलं सर्व्वं पर्पटीसन्निभं भवेत्।
विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारसैः॥
कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत्।
अञ्जयेन्नयनं तेन सर्व्वदोषोपशान्तये॥
समस्तनेत्ररोगघ्नं चूर्णमेतन्न संशयः॥”

रोपणीवर्त्तिः, स्त्री, नेत्राञ्जनभेदः। यथा। अथ रोपणीवर्त्तिः।
“अशीतिस्तिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः।
जातीपुष्पाणि पञ्चाशन्मरिचानि च षोड़श॥
सूक्ष्मं पिष्ट्वाम्बुना वर्त्तिः कृता कुसुमिकाभिधा।
तिमिरार्ज्जुनशुक्राणां नाशिनी मांसवृद्धिनुत्।
एतस्या अञ्जने प्रोक्ता मात्रा साईहरेणुका॥”
कुसुमिकावटी रोपणी। इति भावप्रकाशः॥

रोप्यातिरोप्यः, पुं, धान्यविशेषः। अस्य गुणाः।
“रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः।
अदाहिनो दोषहरा बल्या मूत्रविवर्द्धनाः॥”
इति राजवल्लभः॥

रोमं, क्ली, जलम्। इति शब्दचन्द्रिका॥ (लोम। यथा, महाभारते। ३। ११२। ३।
“द्वौ चास्य पिण्डावधरेण कण्ठा-
दजातरोमौ सुमनोहरौ च॥”
जनपदविशेषः। इति केचित्॥)

रोम, [न्] क्ली, (रौतीति। रु+“नामन्सीमन्व्योमन्रोमन्निति।” उणा० ४। १५०। इति मनिन्प्रत्ययेन साधुः।) शरीरजाताङ्कुरः। रोँया इति भाषा। तत्पर्य्यायः। लोम २ अङ्गजम् ३ त्वग्जम् ४ चर्म्मजम् ५ तनूरुहम् ६। इति राजनिर्घण्टः॥ स्थानविशेषे तस्य शुभाशुभसूचकत्वं यथा,—
“अल्परोमयुता श्रेष्ठा जङ्घा हस्तिकरोपमा।
रोमैकैकं कूपके स्यान्नृपाणान्तु महात्मनाम्॥
द्वे द्वे रोमे पण्डितानां श्रोत्रियाणान्तथैव च।
रोमत्रयं दरिद्राणां रोगी निर्म्मांसजानुकः॥”
इति गारुड़े ६३ अध्यायः॥
रहस्यरोम्णोऽस्पृश्यत्वं यथा,—
“न सर्पशस्त्रैः क्रीड़ेत स्वानि खानि न संस्पृशेत्।
रोमाणि च रहस्यानि नाशिष्टेन सदा व्रजेत्॥”
इति कौर्म्मे उपविभागे १५ अध्यायः॥
(जनपदविशेषः। तद्देशवासिनि। पुं भूम्नि। यथा, महाभारते। ६। ९। ५५।
“वानायवो दशाःपार्श्वा रोमाणः कुशविन्दवः॥”)

रोमकं, क्ली, (रोमे कायतीति। कै+कः।) पांशुलवणम्। (यथा, सुश्रुते। १। ४२।
“सैन्धवसौवर्च्चलविड़पाक्यरोमकसामुद्रकपक्रिमयवक्षारोषप्रसूतसुवर्च्चिकाप्रभृतीनि समासेन लवणो वर्गः॥”) अयस्कान्तभेदः। इति राजनिर्घण्टः॥ (रोमैव। जनपदविशेषः। तद्देशवासिनि, पुं भूम्नि। यथा, महाभारते।२।५०।१५।
“औष्णीकानन्तवासांश्च रोमकान् पुरुषादकान्॥”)

रोमकन्दः, पुं, (रोमयुक्तः कन्दो मूलमस्य ।) पिण्डालुः । इति राजनिर्घण्टः ॥

रोमकपत्तनं, क्ली, (रोमकं पत्तनमिति कर्म्मधारयः ।) देशविशेषः । रुम् इति पारस्यभाषा । यथा,—

"लङ्काकुमध्ये यमकोटिरस्याः
प्राक् पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वड़वानलञ्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड़्गोलविदो वदन्ति ॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

रोमकूपः, पुं, (रोम्णां कूपः ।) लोमविवरम् । यथा,—
"प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ।
समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥
(तथा च ।
"ऊर्द्धं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः ।
कुपितं रोमकूपैश्च समस्तैस्तत्प्रवर्त्तते ॥"
इति वाभटे निदानस्थाने तृतीयेऽध्याये ॥)

रोमकेशरं, क्ली, (रोम्णां केशरमिव ।) चामरम् । इति त्रिकाण्डशेषः ॥

रोमगुच्छः, पुं, (रोम्णां गुच्छस्तवकः ।) चामरम् । इति हेमचन्द्रः ।२।३८१। हारावली च ।१७३।

रोमगुच्छकः, पुं, (रोमगुच्छ एव । स्वार्थे कन् ।) चामरम् । इति जटाधरः ॥

रोमन्थः, पुं, उद्गीर्य्य चर्व्वणम् । इत्यमरः ॥ जाओरकाटा इति भाषा ॥ (यथा, रघुः । १ । ५२ ।
"मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु ॥")

रोमभूमिः, स्त्री, (रोम्णां भूमिरिव ।) चर्म्म । इति राजनिर्घण्टः ॥

रोमलता, स्त्री, (रोम्णां लतेव ।) लोमावलिः । इति हेमचन्द्रः । ३ । २७० ॥

रोमवान्, [त्] त्रि, लोमविशिष्टः । रोमशब्दादस्त्यर्थे मतुप्प्रत्ययेन निष्पन्नः ॥

रोमविकारः, पुं, (रोम्णां विकारः ।) रोमाञ्चः । इति हलायुधः ॥

रोमशः, पुं, (रोमाणि सन्त्यस्येति । रोमन्+ "लोमादिपामादिपिच्छादिभ्यः शनेलचः ।" ५ । २ । १०० । इति शः ।) मेषः । इति हेमचन्द्रः ॥ पिण्डालुः । कुम्भी । शूकरः । इति राजनिर्घण्टः ॥ (ऋषिविशेषः । यथा, भागवते । ६ । १५ । १४ ।
"रोमशश्च्यवनो दत्त आसुरिः सपतञ्जलिः ।"
अस्य शरीरैकलोमपतने एकेन्द्रपातो भवेत् एवं सर्व्वलोमपतनकालस्तस्य परमायुः । एतादृशोऽप्यसौ जीवामि वा कियन्ति दिनानीति चिन्तयन् निवस्तुं गृहं न निर्म्ममे केवलं वर्षासु धारापातनिवृत्तये मस्तकविन्यस्तकटस्तपश्चरति । विशेषविवरणमस्य ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे द्रष्टव्यम् ॥ क्ली, उपस्थम् । यथा, ऋग्वेदे । १० । ८६ । १६ ।
"सेदीशे यस्य रोमशं निषेदुषो
विजृम्भते विश्वस्मादिन्द्र उत्तरः ॥"
"निषेदुषः शयानस्य रोमशमुपस्थं विजृम्भते विवृतं भवति ।" इति तद्भाष्ये सायणः ॥)
अतिशयलोमविशिष्टे, त्रि ॥ (यथा, मनुः ।३।७।
"हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ॥")

रोमशफलः, पुं, (रोमशं फलमस्य । टिण्डिशवृक्षः । इति राजनिर्घण्टः ॥

रोमशा, स्त्री, (रोमाणि सन्त्यस्या इति । रोमन्+शः । टाप् ।) दग्धावृक्षः । इति राजनिर्घण्टः ॥ लोमशा च ॥ (बृहस्पतिकन्या । यथा, ऋग्वेदे । १ । १२७ । ७ ।
"सर्व्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥")

रोमसूकं, क्ली, (रोमयुक्तं सूकं यस्य ।) स्थौणेयकम् । इति भावप्रकाशः ॥

रोमहर्षः, पुं, (रोम्णां हर्षः ।) रोमाञ्चः । इति हलायुधः ॥ (यथा, गीतायाम् । १ । २९ ।
"वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥")

रोमहर्षणं, क्ली, (रोम्णां हर्षणम् ।) रोमाञ्चः । इत्यमरः ॥ (रोम्णां हर्षणं यस्मात् । रोमाञ्चकरे, त्रि । यथा, गीतायाम् । १८ । ७४ ।
"संवादमिदमश्रौषमद्भुतं लोमहर्षणम् ॥")

रोमहर्षणः, पुं, सूतः । अस्य व्युत्पत्तिर्यथा,—
"यस्य ते सर्व्वरोमाणि वचसा हृषितानि यत् ।
द्वैपायनस्य भगवंस्ततो वै रोमहर्षणः ।
भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः ॥"
इति कौर्म्मे १ अध्यायः ॥
(स तु व्यासशिष्यः । यथा, भागवते । १० । ७८ । २२ ।
"सोऽर्च्चितः सपरीवारः कृतासनपरिग्रहः ।
रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥"
अस्यान्यद्विवरणं लोमहर्षणशब्दे द्रष्टव्यम् ॥)
विभीतकवृक्षः ॥ इति मेदिनी । णे, ११६ ॥

रोमाञ्चः, पुं, (रोम्णां अञ्चः उद्गमः ।) रोमहर्षणम् । इत्यमरः ॥ पुलककण्टकरोमविक्रिया रोमोद्गमरोमहर्षणाश्च । इति भरतः ॥ (स तु सात्त्विकभावानामन्यतमः । यथा, साहित्यदर्पणे । ३ । १६६ ।
"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥"
"हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ॥")

रोमाञ्चिका, स्त्री, (रोमाञ्च उत्पाद्यत्वेनास्त्यस्या इति । रोमाञ्च+ठन् ।) रुदन्तीवृक्षः । इति राजनिर्घण्टः ॥

रोमाञ्चितः, त्रि, (रोमाञ्चः सञ्जातोऽस्येति । रोमाञ्च+"तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) जातपुलकः । रोमाञ्चविशिष्टः । तत्पर्य्यायः । हृष्टरोमा २ । इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । १०० । २० ।
"स च शान्तिर्गते वह्नौ परितुष्टेन चेतसा ।
हर्षरोमाञ्चिततनुः प्रविवेशाश्रमं गुरोः ॥")

रोमाली, स्त्री, (रोम्णां आली श्रेणिर्यत्र ।) वयःसन्धिः । इति शब्दमाला ॥ (रोम्णां आली ।) रोमावली । (यथा, आर्य्यासप्तशत्याम् । ३६८ ।
"निधिनिःक्षेपस्थानस्योपरि चिह्नार्थमिव लता निहिता ।
लोभयति तव तनूदरि जघनतटादुपरि रोमाली ॥")

रोमालुः, पुं, (रोमविशिष्ट आलुः ।) पिण्डालुः । इति राजनिर्घण्टः ॥

रोमालुविटपी, [न्] पुं, (रोमालुरिव विटपी वृक्षः ।) कुम्भीवृक्षः । इति राजनिर्घण्टः ॥

रोमावली, स्त्री, (रोम्णामावली ।) नाभिरूर्द्धलोमश्रेणी । तत्पर्य्यायः । रोमलता २ । इति हेमचन्द्रः । ३ । २७० ॥ रोमाली ३ । इति शब्दमाला ॥ लोमराजी ४ । यथा,—
"तस्याः प्रविष्टा नतनाभिरन्ध्रं
रराज तन्वी नवलोमराजी ।
नीवीमतिक्रम्य सितेतरस्य
तन्मेखलामध्यमणेरिवार्च्चिः ॥"
इति कुमारसम्भवम् ॥
सा च यौवनारम्भे भवति । अज्ञातयौवना यथा,—
"गौराङ्गीरमुपागता श्रवणयोः सीम्नि स्फुरन्नेत्रयोः
श्रोणी लम्बमिदं किमुत्पलमिति घ्रातुं करं न्यस्यति ।
सैवालाङ्कुरशङ्कया शशिमुखी रोमावलीं प्रोञ्छति
आन्ताक्षीति मुहुः सखीमविदितश्रोणीभरा पृच्छति ॥"
इति रसमञ्जरी ॥

रोमाश्रयफला, स्त्री, (रोमाश्रयं फलमस्याः ।) झिञ्झिरिष्टाक्षुपः । इति राजनिर्घण्टः ॥

रोमोद्गमः, पुं, (रोम्णामुद्गमः ।) रोमाञ्चः । इति हलायुधः ॥ (यथा, कुमारे । ७ । ७७ ।
"रोमोद्गमः प्रादुरभूदुमायाः
स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत् ।
वृत्तिस्तयोः पाणिसमागमेन
समं विभक्तेव मनोभवस्य ॥")

रोमोद्भेदः, पुं, (रोम्णामुद्भेदः ।) रोमाञ्चः । इति त्रिकाण्डशेषः ॥ (यथा, प्रबोधचन्द्रोदये । १ अङ्के ।
"स्फुरद्रोमोद्भेदस्तरलतरताराकुलदृशो
भयोत्कम्पोत्तुङ्गस्तनयुगभरासङ्गसुभगः ॥")

रोलः, पुं, पानीयामलकम् । इति शब्दचन्द्रिका ॥ (पानीयामलकशब्देऽस्य गुणादयोऽभिहिताः ॥)

रोलम्बः, पुं, (रौतीति । रु+विच् । रौः कूजन् सन् लम्बति स्थानात् स्थानान्तरं गच्छतीति । लम्ब+अच् ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

(यथा, वक्रोक्तिपञ्चाशिकायाम् । ४० ।
"गण्डे दानवनाशिनो गणपतेः कुर्व्वन्ति कोलाहलं
रोलम्बा इनुहन्तुनाशनविधौ सक्ताः स्फुरेते कथम् ॥")

रोषः, पुं, (रुष्+घञ् ।) क्रोधः । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ४४८ ।
"मुञ्चसि किं मानवतीं व्यवसायाद्द्विगुणमन्युवेगेति ।
स्नेहभवः पयसाग्निः सान्त्वेन च रोष उत्क्षिपति ॥")

रोषणः, पुं, (रोषति तच्छीलः । रुष्+"क्रुधमण्डार्थेभ्यश्च ।" ३ । २ । १५१ । इति युच् ।) पारदः । हेमघर्षणोपलः । इति मेदिनी । ने, ७३ ॥ ऊषरभूमिः । क्रोधने, त्रि । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ११२ । १५ ।
"न धर्म्मः क्रोधशीलस्य नार्थञ्चाप्नोति रोषणः ।
नालं सुखाय कामाप्तिः कोपेनाविष्टचेतसाम् ॥")

रोहः, पुं, (रोहतीति । रुह्+अच् ।) अङ्कुरः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १२ । १२० । ३८ ।
"अग्निः स्तोको वर्द्धतेऽप्याज्यसिक्तो
बीजञ्चैकं रोहसाहस्रमेति ।
आयव्ययौ विपुलौ सन्निशाम्य
तस्मादल्पं नावमन्येत वित्तम् ॥"
रोहणीये, त्रि । यथा, वाजसनेयसंहितायाम् । १३ । ५१ ।
"तेन रोहमायन्नुप मेध्यासः ।"
"रोहं रोहणीय स्वर्गम् ।" इति तद्भाष्ये महीधरः ॥)

रोहकः, पुं, (रुह्+ण्वुल् ।) प्रेतभेदः । वोढ़रि, त्रि । इति मेदिनी । के, १४८ ॥ (यथा, महाभारते । ८ । ३४ । ३२ ।
"सिनीवालीमनुमतिं कुहूं राकाञ्च सुव्रताम् ।
योक्त्राणि चक्रुर्व्वाहानां रोहकांस्तत्र कण्टकान् ॥")

रोहणं, क्ली, (रोहत्यनेनेति । रुह्+करणे ल्युट् ।) शुक्रम् । इति राजनिर्घण्टः ॥ जन्म । प्रादुर्भावः । इति रुहधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥

रोहणः, पुं, (रोहत्यस्मिन्निति । रुह्+अधिकरणे ल्युट् ।) पर्व्वतविशेषः । तत्पर्य्यायः । विदूराद्रिः २ । इति जटाधरः ॥ (यथा, राजेन्द्रकर्णपूरे । ५२ ।
"अपारपुलिनस्थलीभुवि हिमालये मालये
निकामविकटोन्नते दुरधिरोहणे रोहणे ।
महत्यमरभूधरे गहनकन्दरे मन्दरे
भ्रमन्ति न पतन्त्यहो परिणता भवत्कीर्त्तयः ॥")

रोहन्तः, पुं, (रुह्यादिति । रुह्+"रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ।" उणा० ३ । १२७ । इति झच् ।) वृक्षभेदः । इत्युणादिकोषः ॥ वृक्षमात्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

रोहन्ती, पुं, (रुह्+झच् । षित्वात् ङीष् ।) लताभेदः । इत्युणादिकोषः ॥ लतामात्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

रोहिः, पुं, (रोहतीति । रुह्+"वृपिषिरुहीति ।" उणा० ४ । ११८ । इति इन् ।) बीजम् । वृक्षः । इत्युणादिकोषः ॥ धार्म्मिकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रोहिणं, क्ली, (रुह्+"रुहेश्च ।" उणा० २ । ५५ । इति इनन् ।) कालभेदः । इत्युणादिकोषः ॥ स तु दिवसीयनवममुहूर्त्तः । पूर्व्वाह्णश्राद्धस्य गौणकालत्वेनोत्तरावधिः । अपराह्णश्राद्धस्य पूर्व्वावधिः । एकोद्दिष्टश्राद्धस्य समापनकालः । रौहिणञ्चास्य नामान्तरम् । यथा । अत्र पूर्व्वाह्णे श्राद्धमभिधाय रौहिणन्तु न लङ्घयेदित्यभिधानेन पूर्व्वाह्णश्राद्धस्य सङ्गवात् परो रौहिणपर्य्यन्तगौणपूर्व्वाह्णकालः प्रतीयते तेन रौहिणं पूर्व्वाह्णश्राद्धस्य गौणकालत्वेनोत्तरावधिः अपराह्णश्राद्धस्य पूर्व्वावधिरित्यवगम्यते । रौहिणन्तु दिवसस्य नवममुहूर्त्तः । तस्य ज्योतिषोक्तरोहिणीदैवतत्वात् रौहिणत्वमिति । व्यासः ।
"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत् ॥"
इति श्राद्धतत्त्वम् ॥

रोहिणः, पुं, (रोहतीति । रुह्+"रुहेश्च ।"उणा० २ । ५५ । इति इनन् ।) भूतृणः । वटवृक्षः । रोहितकवृक्षः । इति राजनिर्घण्टः ॥ (शाल्मलद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१।६६।
"रोहितो यस्तृतीयस्तु रोहिणो नाम विश्रुतः ॥")

रोहिणिः, स्त्री, रोहिणीनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, वृहत्संहितायाम् ।१०७।४।
"धारणवर्षणरोहिणि-
वायव्याषाढ़भाद्रपदयोगाः ।
घनवृष्टिः कुसुमलता
सन्ध्याचिह्नं दिशां दाहः ॥")

रोहिणिका, स्त्री, (रोहिण्येव स्वार्थे कन् । टाप् ह्रस्वश्च ।) कोपादिना रक्तवर्णा स्त्री । इति जटाधरः ॥

रोहिणी, स्त्री, (रुह्+इनन् । गौरादित्वात् ङीष् ।) स्त्रीगवी । इत्यमरः ॥ (यथा, माघे । १२ । ४० ।
"प्रीत्या नियुक्ताल्लिहतीः स्तनन्धया-
न्निगृह्य पारीमुभयेन जानुनोः ।
वर्द्धिष्णुधाराध्वनि रोहिणीः पयश्चिरं निदध्यौ दुहतः स गोदुहः ॥")
तड़ित् । कटुम्भरा । (यथास्याः पर्य्यायः ।
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सोमवल्कः । (यथास्याः पर्य्यायो रत्नमालायाम् ।
"कट्फलः सोमवल्काख्यः सोमवृक्षश्च रोहिणी ॥"
महाश्वेता । तत्पर्य्यायो यथा,—
"कटभी किणिही श्वेता महाश्वेता च रोहिणी ॥"
इति वैद्यकरत्नमालायाम् ॥)
लोहिता । इति मेदिनी । णे, ३७ ॥ जिनानां विद्यादेवीविशेषः । इति हेमचन्द्रः ॥ काश्मरी । हरीतकी । मञ्जिष्ठा । इति राजनिर्घण्टः ॥ कपिलवर्णा वर्त्तुलाकारा विरेचने प्रशस्ता हरीतकी । इति राजवल्लभः ॥ * ॥ बलदेवमाता । सा वसुदेवभार्य्या कश्यपपत्नीसुरभ्यंशजाता । यथा,—
"देवकी रोहिणी चेमे वसुदेवस्य धीमतः ।
रोहिणी सुरभिर्देवी अदितिर्देवकी ह्यभूत् ॥"
इति महाभारते हरिवंशः ॥ * ॥
सुरभिकन्या । यथा,—
श्रीमार्कण्डेय उवाच ।
"दक्षस्य तनया याभूत् सुरभिर्नाम नामतः ।
गवां माता महाभागागा सर्व्वलोकोपकारिणी ॥
तस्यास्तु तनया जज्ञे कश्यपात्तु प्रजापतेः ।
नाम्ना सा रोहिणी शुभ्रा सर्व्वकामदुघा नृणाम् ॥
तस्यां यज्ञे शूरसेनाद्वसोरिति तपोज्ज्वलात् ।
कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता ॥"
इति कालिकापुराणे शेषाध्यायः ॥ * ॥
नववर्षीया कन्या । यथा,—
"अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशमे कन्यका प्रोक्ता अत ऊर्द्ध्वं रजस्वला ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
(पञ्चवर्षा कुमारी । यथा, देवीभागवते । ३ । २६ । ४२ ।
"रोहिणी पञ्चवर्षा च षड्वर्षा कालिका स्मृता ॥"
रोगनाशायैवास्याः पूजा कर्त्तव्या । यथा, तत्रैव । ३ । २६ । ४८ ।
"रोहिणीं रोगनाशाय पूजयेद्विधिवन्नरः ॥"
अस्याः पूजामन्त्रो यथा, तत्रैव । ३ । २६।५६ ।
"रोहयन्ती च बीजानि प्राग्जन्मसञ्चितानि वै ।
या देवी सर्व्वभूतानां रोहिणीं पूजयाम्यहम् ॥"
हिरण्यकशिपुकन्या । यथा, महाभारते । ३ । २२० । १८ ।
"कन्या सा रोहिणी नाम हिरण्यकशिपोः सुता ॥" * ॥
रोहिणि+पक्षे ङीष् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतचतुर्थनक्षत्रम् । तत्पर्य्यायः । रोहिणिः २ । इति शब्दरत्नावली ॥ ब्राह्मी ३ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १४६ । ३३ ।
"अष्टमेऽहनि रोहिण्यां प्रयाताः फाल्गुनस्य ते ।
वारणावतमासाद्य ददृशुर्नागरं जनम् ॥")
तत्त शकटाकृति पञ्चतारात्मकम् । तस्याधि-

स्वामी देवता ब्रह्मा । गगनमध्ये उदिते सति सिंहलग्नस्य अष्टत्रिंशत्पलाधिकदण्डत्रितयं गतं भवति । यथा,—

"कम्बुकण्ठि ! प्रकृताहतौ नभो-
मध्यमागतवति प्रजापतौ ।
पञ्चभेगजकुपञ्चलिप्तिका
निःसृताः सुमुखि ! सिंहलग्नतः ॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥ * ॥ तत्र जातफलं यथा,—

"स्वाहर्म्मकार्य्ये कुशलः कुलीनः
सुचारुदेहो विलसत्कलेवरः ।
तारान्विताकुलिताखिलाशयो
यो रोहिणीजः स धनी स मानी ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

गलरोगविशेषः । यथा । रोहिणीनामकगल-रोगाणां नामानि संख्या चाह ।

"रोहिणी पञ्चधा प्रोक्ता कण्ठशालूक एव च ।
अधिजिह्वश्च वलयोऽलासनामैकवृन्दकः ॥
ततो वृन्दः शतघ्नी च गिलायुः कण्ठविद्रधिः ।
गलौघः स्वरघ्नश्च मांसतानस्तथैव च ।
विदारी कण्ठदेशे तु रोगा अष्टादश स्मृताः ॥"

तत्र पञ्चानामपि रोहिणीनां सामान्यसंप्राप्ति-माह ।

"गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम् ।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् व्याधिरियं हि रोहिणी ॥"

अनिलः मूर्च्छितः प्रवृद्धः कफपित्तौ च मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः । ननु त्रयोऽपि मूर्च्छिताः पृथग्दोषजाया अविवक्षितत्वात् ॥ तस्या वातजाया लक्षणमाह ।

"जिह्वासमन्तादृभृशवेदनास्तु
मांसाङ्कुराः कण्ठविरोधनाः स्युः ।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढयुक्ता ॥"

जिह्वासमन्तात् जिह्वायाः सर्व्वतः । वातात्मकोपद्रवगाढयुक्ता स्तम्भादिभिरतिशयेन युक्ता ॥" पित्तजामाह ।

"क्षिप्रोद्गमा क्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता ॥"

श्लेष्मजामाह ।

"स्रोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा तु ॥"

स्रोतोऽत्र कण्ठस्रोतः ॥ * ॥ सन्निपातजामाह ।

"गम्भीरपाकिन्यनिवार्य्यवीर्य्या
त्रिदोषलिङ्गा त्रिभवा भवेत् सा ॥"

रक्तजामाह ।

"स्फोटैश्चिता पित्तसमानलिङ्गा
साध्या प्रदिष्टा रुधिरात्मिका तु ॥"

रक्तजेतरासंहारकत्वावधिमाह ।

"सद्यस्त्रिदोषजा हन्ति त्र्यहात् कफसमुद्भवा ।
पञ्चाहात् पित्तसम्भूता सप्ताहात् पवनोत्थिता ॥"

कण्ठशालूकमाह ।

"कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शस्त्रनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति ॥"

कण्टकशूकभूतः कण्टकवच्छूकवद्वेदनाजनकः ॥ अधिजिह्वामाह ।

"जिह्वाग्ररूपः श्वयथुः कफात्तु
जिह्वोपरिष्टादपि रक्तमिश्रात् ।
ज्ञेयोऽधिजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम् ॥"

रक्तजा मिश्रादेवेत्यन्वयः ॥ * ॥ वलयमाह ।

"बलास एवायतमुन्नतञ्च
शोथं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति ॥"

अलासमाह ।

"गले तु शोथं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम् ।
मर्म्मच्छिदं दुस्तरमेनमाहु-
रलाससंज्ञं भिषजो विकारम् ॥"

मर्म्मच्छिदं हृदयमर्म्मणि छेदेनेव वेदनाजनकम् ॥ एकवृन्दमाह ।

"वृत्तोन्नतोऽन्तः श्वयथुः सदाहः
सकण्डुरोऽपाक्यमृदुर्गुरुश्च ।
नाम्नैकवृन्दः परिकीर्त्तितोऽसौ
व्याधिर्बलाशः क्षतजप्रसूतः ॥"

अन्तः गलमध्ये । अपाकी ईषत् पाकी । अमृदुः ईषन्मृदुः ॥ * ॥ वृन्दमाह ।

"समुन्नतं वृत्तममन्ददाहं
तीव्रज्वरं वृन्दमुदाहरन्ति ।
तच्चापि पित्तक्षतजप्रकोपा-
द्विद्यात् सतोदं पवनात्मकन्तु ॥" * ॥

शतघ्नीमाह ।

"वर्त्तिर्घना कण्ठनिरोधिनी तु
चितातिमात्रं पिशितप्ररोहैः ।
अनेकरुक् प्राणहरी त्रिदोषा
ज्ञेया शतघ्नीसदृशी शतघ्नी ॥"

घना कठिना । अनेकरुक् वातपित्तकफज-तोददाहकण्ड्वादियुक्ता । शतघ्नीसदृशी लोह-कण्टकसंछन्ना शतघ्नी महती शिला । तत्तुल्या यतः प्राणहरी ॥ * ॥ गिलायुमाह ।

"ग्रन्थिर्गले त्वामलकास्थिमात्रः
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः ।
संलक्ष्यते शक्तमिवाशितञ्च
स शस्त्रसाध्यस्तु गिलायुसंज्ञः ॥"

गलविद्रधिमाह ।

"सर्व्वं गलं व्याप्य समुत्थितो यः
शोफो रुजः सन्ति च यत्र सर्व्वाः ।
स सर्व्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्व्वजस्य ॥" * ॥

गलौघमाह ।

"शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतेर्निहन्ता ।
कफेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्तितोऽसौ ॥"

वायुगतेर्निहन्ता उदानवायुगतिरोधकः ॥ * ॥ स्वरघ्नमाह ।

"यस्ताम्यमानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविमुक्तकण्ठः ।
कफोपदिग्धेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥"

ताम्यमानः तमः पश्यन् । शुष्कविमुक्तकण्ठः शुष्को विमुक्तोऽस्वाधीनः कण्ठो यस्य सः । अस्वाधीनता भुक्तं गिलितुं अशक्यत्वात् । अनिलायनेषु वायुवर्त्मसु । श्वसनाद्वातात् ॥ * ॥ मांसतानमाह ।

"प्रतानवान् यः श्वयथुः सुकष्टो
गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितोऽवलम्बी
प्राणप्रणुत् सर्व्वकृतो विकारः ॥"

प्रतानवान् विस्तारवान् । सुकष्टः अतिशयितं कष्टं यत्र सः ॥ * ॥ विदारीमाह ।

"सदाहतोदं श्वयथुं सताम्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्यादवदने विदारीं
पार्श्वे विशेषात् स तु येन शेते ॥"

पार्श्वे विशेषात् स तु येन शेते स पुरुषो येन पार्श्वेन विशेषाद्बाहुल्येन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थः ॥ * ॥ अथ गलरोगाणां चिकित्सा ।

"रोहिणीनान्तु साध्यानां हितं शोणितमोक्ष-णम् ।
वमनं धूमपानञ्च गण्डूषो नस्यकर्म्म च ॥
वातजान्तु हृते रक्ते लवणैः प्रतिसारयेत् ।
सुखोष्णान् स्नेहगण्डूषान् धारयेच्चाप्यभीक्ष्णशः ॥
विस्राव्य पित्तसंभूतां सिताक्षौद्रप्रियङ्गुभिः ।
घर्षयेत् कवलो द्राक्षापरूषैः कथितो हितः ॥
आगारधूमकटुकैः कफजां प्रतिसारयेत् ।"

आगारधूमः झूल इति लोके । कटुकानि शुण्ठीपिप्पलीमरिचानि ।

"श्वेताविडङ्गदन्तीषु तैलं सिद्धं ससैन्धवम् ।
नस्यकर्म्मणि दातव्यं कवलश्च कफोच्छ्रये ॥"

श्वेता अपराजिता ।

"पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम् ।
विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत् ॥
एककालं यवान्नञ्च भुञ्जीत स्निग्धमल्पशः ।
उपजिह्वकवच्चापि साधयेदधिजिह्वकम् ॥
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् ।
एकवृन्दमिव प्रायो वृन्दञ्च समुपाचरेत् ॥
गिलायुश्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत् ।
अमर्म्मस्थं सुसंपक्वं छेदयेद्गलविद्रधिम् ॥"

इति भावप्रकाशः ॥

(स्थूले, त्रि । यथा, महाभारते ।२।६१।३३।

"नैव ह्रस्वा न महती न कृशा नापि रोहिणी ।
नीलकुक्षिसितकेशी च तथा दीर्घान्यहं त्वया ॥")

रोहिणीपतिः, पुं, (रोहिण्याः पतिः ।) चन्द्रः । इति हेमचन्द्रः । २ । १८ ॥ (यथा, देवीभागवते । १ । ११ । १८ ।
"इत्येवं भाषमाणं तमुवाच रोहिणीपतिः ।
गुरुं क्रोधसमायुक्तं कान्ताविरहदुःखितम् ॥"
वसुदेवः । वृषभश्च ॥)

रोहिणीरमणः, पुं, (रोहिण्या रमणः ।) वृषभः । इति राजनिर्घण्टः ॥ वसुदेवश्च ॥ (चन्द्रः । यथा, गीतगोविन्दे । ३ । १० ।
"वर्णितं जयदेवकेन हरेरिदं प्रवणेन ।
केन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन ॥")

रोहिणीवल्लभः, पुं, (रोहिण्या वल्लभः ।) चन्द्रः । इति हलायुधः ॥ वसुदेवश्च ॥

रोहिणीशः, पुं, (रोहिण्या ईशः ।) चन्द्रः । इति हेमचन्द्रः ॥ (यथा, माघे । ३ । ६० ।
"यां रेवतीजानिरियेष हातुं
न रौहिणेयो न च रोहिणीशः ॥")
वसुदेवश्च ॥

रोहिण्यष्टमी, स्त्री, (रोहिणीयुक्ता अष्टमी ।) रोहिणीनक्षत्रयुक्तभाद्रकृष्णाष्टमी । यथा,—
"कृष्णाष्टम्यां च रोहिण्यामर्द्धरात्रेऽर्च्चनं हरेः ।
कार्य्या विद्धापि सप्तम्या हन्ति पापं त्रिजन्म-
जम् ॥
उपोषितोऽर्च्चयेन्मन्त्रैस्तिथिभान्ते च पारणम् ॥
योगाय योगपतये योगेश्वराय योगसम्भवाय गोविन्दाय नमो नमः ॥ स्नानमन्त्रः । यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः ॥ अर्च्चनस्य । विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः ॥ शयनस्य । सर्व्वाय सर्व्वेश्वराय सर्व्वपतये सर्व्वसम्भवाय गोविन्दाय नमो नमः ॥ पारणस्य ।
स्थण्डिले पूजयेद्देवं सचन्द्रां रोहिणीन्तथा ।
शङ्खे तोयं समादाय सपुष्पफलचन्दनम् ।
जानुभ्यामवनीं गत्वा चन्द्रायार्घ्यं निवेदयेत् ॥
क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ॥
श्रियै वसुदेवाय बलदेवाय नन्दाय यशोदायै ।
अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं नृसिंहं दैत्यसूदनम् ॥
वाराहं पुण्डरीकाक्षं श्रीकान्तमजमव्ययम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥
गोविन्दमच्युतं देवमनन्तमपराजितम् ।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारकम् ॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
नारायणञ्चतुर्बाहुं शङ्खचक्रगदाधरम् ॥
पीताम्बरधरं दिव्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगद्धाम श्रीपतिं श्रीधरं हरिम् ॥
यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ।
नामान्येतानि संकीर्त्य नत्वर्थं प्रार्थयेत् पुनः ॥
त्राहि मां सर्व्वपापघ्न दुःखशोकार्णवात् प्रभो ।
देवकीनन्दन श्रीश हरे संसारसागरात् ॥
दुर्वृत्तांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत् ।
सोऽहं देवातिदुर्वृत्तस्त्राहि मां शोकसाग-
रात् ॥
पुष्कराक्ष निमग्नोऽहं महत्यज्ञानसागरे ।
त्राहि मां देवदेवेश त्वामृतेऽन्यो न रक्षिता ॥
स्वजन्म वासुदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
शान्तिरस्तु शिवञ्चास्तु धनर्द्धिख्यातिराज्य-
भाक् ॥"
इति गारुडे १३२ अध्यायः ॥

रोहित्, पुं, (रोहतीति । रुह + "हृसृरुहियुषिभ्य इतिः ।" उणा० १ । ९९ । इति इतिः ।) सूर्य्यः । इति मेदिनी । टे, १४७ ॥ वर्णभेदः । मत्स्यभेदः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (ऋष्यमृगः । यथा, वाजसनेयसंहितायाम् । "२४ । ३० ॥ "मनुष्यराजाय मर्कटः शार्द्दू-लाय रोहित् ।" "एको रोहित् ऋष्यः शार्द्दू-लाय ।" इति तद्भाष्ये महीधरः ॥ रोहितवर्णविशिष्टे, त्रि । (यथा, ऋग्वेदे । १ । १०० । १६ ।
"रोहित् श्यावा सुमदंशुर्ललामीः ।"
"रोहित् रोहितवर्णा श्यावा श्यामवर्णा ।"
इति तद्भाष्ये सायणः ॥)

रोहित्, स्त्री, (रुह + "हृसृरुहियुषिभ्य इतिः ।" उणा० १ । ९९ । इति इतिः ।) मृगी । ("ऋष्यस्य मृगस्य मृगी रोहिदुच्यते । तथा च महिम्नः स्तवे । गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।" इत्युज्ज्वलः । १ । ९९ ॥) लताभेदः । इति मेदिनी । टे, १४७ ॥ (वडवा । यथा, ऋग्वेदे । १ । १४ । १२ ।
"युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः ॥"
"हे देवाग्ने रोहितः रोहिच्छब्दाभिधेयास्त्वदीया वडवाः रथे युक्ष्व युङ्क्ष्व योजय ।" इति तद्भाष्ये सायणः ॥*॥ रोहन्त्याभिर्बीजानि तज्जलेन हि बीजानि प्ररोहन्तीति तथात्वम् । नदी । इति निघण्टुः । १ । १३ । १८ ॥ निगमेषु बहुवचनान्तत्वेन प्रायशः श्रवणात् बहुवचनान्तत्वम् ॥)

रोहितं, क्ली, (रुह + "रुहे रश्च लो वा ।" उणा० ३ । ९४ । इति इतन् ।) कुङ्कुमम् । रक्तम् । ऋजुशक्रशरासनम् । इति मेदिनी । ते, १४५ ॥ (यथा, मनुः । १ । ३८ ।
"विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च ।
उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च ॥")

रोहितः, पुं, (रोहतीति । रुह + "रुहे रश्च लो वा ।" उणा० ३ । ९४ । इति इतन् ।) मीनविशेषः । (यथाह कश्चित् ।
"इंलीशो जितपीयूषो वाचा वाचामगोचरः ।
रोहितो नो हितः प्रोक्तो मद्गुरो मद्गुरोः
प्रियः ॥")
रोहितमत्स्यस्य लक्षणं गुणाश्च यथा,—
"कृष्णः शल्की श्वेतकुक्षिस्तु मत्स्यो
यः श्रेष्ठोऽसौ लोहितो हस्तवक्त्रः ।
कोष्णं बल्यं रोहितस्यापि मांसं
वातं हन्ति स्निग्धमभ्याति वीर्य्यम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः ।
शष्पभक्षो मत्स्यश्रेष्ठो रोहितः कथितो बुधैः ॥
रोहितः सर्व्वमत्स्यानां वरो वृष्योऽर्द्दितार्त्तिजित् ।
कषायानुरसः स्वादुर्व्वातघ्नो नातिपित्तकृत् ॥
ऊर्द्ध्वजत्रुगतान् रोगान् हन्याद्रोहितमुण्डकम् ॥"
इति भावप्रकाशः ॥
(तथा च ।
"वातघ्नो नहि पित्तकृद्बलकरः स्याद्रोहितः
सर्व्वदा ॥"
इति हारीते प्रथमस्थाने एकादशेऽध्याये ॥
"शैवलाहारभोजित्वात् स्वप्नस्य च विवर्ज्जनात् ।
रोहितो दीपनीयश्च लघुपाको महाबलः ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥
"कषायानुरसस्तेषां शष्पशैवालभोजनः ।
रोहितो मारुतहरो नात्यर्थं पित्तकोपनः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥
स्वनामख्यातो हरिश्चन्द्रस्य नृपतेः पुत्रः । यथा देवीभागवते । ७ । १५ । १५ ॥
"राजा पुत्रमुखं दृष्ट्वा सुखमाप महत्तरम् ।
नामास्य रोहितश्चेति चकार विधिपूर्व्वकम् ॥"
अस्य विवरणन्तु तत्रैव द्रष्टव्यम् ॥) मृगभेदः । रोहितकवृक्षः । इति मेदिनी । ते, १४६ ॥ (रोहीतोऽपि पाठः । रोहीतकशब्ददर्शनात् ॥ यथा, सुश्रुते । ६ । १७ ।
"एणाशरोहीतमधूकजा रसाः
सौद्रेण युक्ता मदिराशमिश्रिताः ॥"
असितपोटकः । इति निघण्टुः । १ । १५ ॥
"रोहन्ति आरोहन्ति रथं वहन्त्यादित्यमिति रोहितः ।" इति तत्र देवराजयज्वा ॥ यथा, ऋग्वेदे । १ । ९४ । १० ।
"यदयुक्था अरुषा रोहिता रथे ॥"
"रोहिता लोहितवर्णौ रोहित इत्यग्नेरश्वस्याख्या रोहितोऽग्नेरितिदर्शनात् रोहितौ त्वामिहैवतौ गमयत्विति मन्त्रवर्णाच्च ।" इति तद्भाष्ये सायणः ॥) रक्तवर्णः । रक्तवर्णविशिष्टे, त्रि । इत्यमरः ॥ (यथा, वाजसनेयसंहितायाम् । १६ । १९ ।
"नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमः ॥")

रोहितकः, पुं, (रोहित एव । स्वार्थे कन् ।) वृक्षविशेषः । रोहड़ा इति भाषा । तत्पर्य्यायः । रोही २ शोहशत्रुः ३ दाडिमपुष्पकः ४ । इत्यमरः ॥ रोहीतकः ५ रोहितः ६ रोहिणः ७ कुशाल्मलिः ८ दाडिमपुष्पः ९ सदाप्रसूनः १० कूटशाल्मलिः ११ विरोचनः १२ शाल्मलिकः १३ । अस्य गुणाः । कटुत्वम् । स्निग्धत्वम् । कषायत्वम् । सुशीतलत्वम् । कृमिदोष-

कृमिश्लेष्मरक्तनेत्रामयापहत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"रोहितो लोहितो रोही लोही दाड़िमपुष्पकः।
रोहीतकः प्लीहघाती रुच्यो रक्तप्रसादनः॥"
इति भावप्रकाशः॥
अन्यच्च।
"रोहीतको यकृत्प्लीहगुल्मोदरहरः स्मृतः॥"
इति राजवल्लभः॥
(गणविशेषः। यथा, महाभारते।३।२५३।१६।
"भद्रान् रोहितकांश्चैव आग्नेयान्मालवानपि।
गणान् सर्व्वान् विनिर्जित्य नीतिकृत् प्रहसन्निव।
शशकान् यवनांश्चैव विजिग्ये सूतनन्दनः॥")

रोहिता, स्त्री, (रोहित+टाप्। "वर्णादनुदात्तात्तोपधात्तो नः।" ४।१।३९। इति पाणिनिको ङीप् नकारस्य नकारादेशश्च न।) रागादिना रक्तवर्णा। यथा,—
"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा।"
इति जटाधरः॥

रोहिताश्वः, पुं, (रोहितः अश्वो यस्य।) अग्निः। इत्यमरः॥ हरिश्चन्द्रराजपुत्त्रः। इति मेदिनी। वे, ६३॥

रोहितिका, स्त्री, (रोहितो वर्णोऽस्त्यस्या इति। रोहित+ठन्।) रागादिना रक्तवर्णा। इति जटाधरः॥

रोहितेयः, पुं, (रोहित एव। स्वार्थे ढः।) रोहितवृक्षः। यथा,—
"प्लीहारी रोहितेयः स्यात् रक्तपुष्पश्च रोहितः॥"
इति भरतधृतरत्नकोषः॥
(विवरणमस्य रोहितकशब्दे ज्ञातव्यम्॥)

रोही, [न्] पुं, (अवश्यं रोहतीति। रुह्+आवश्यके णिनिः।) रोहितकवृक्षः। (अस्य पर्य्यायो यथा,—
"रोही रोहितकः प्लीहशत्रुर्दाड़िमपुष्पकः॥"
इति वैद्यकरत्नमालायाम्॥
"रोहीतको रोहितको रोही दाड़िमपुष्पकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अश्वत्थवृक्षः। वटवृक्षः। इति मेदिनी। ने, १२०॥

रोहीतकः, पुं, (रोहीत एव। स्वार्थे कन्।) रोहितकवृक्षः। इति राजनिर्घण्टः॥ (यथा, बृहत्संहितायाम्।५४।९८।
"रोहितकस्य पश्चादहिवासस्त्रिभिः करैर्याम्ये॥"
तथास्य पर्य्यायः।
"रोहीतको रोहितको रोही दाड़िमपुष्पकः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रौक्ष्यं, क्ली, (रूक्षस्य भावः। रूक्ष+ष्यञ्।) रूक्षता। रूक्षस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्। तथा हि।
"तैलं यद्रौक्ष्यदोषघ्नं तैलं यच्चार्द्दकं स्मृतम्।
तेन त्वां स्नापयाम्यद्य जगन्मातरमम्बिकाम्॥"
इति दुर्गापूजायां महाष्टमीमहानवम्योर्महास्नानप्रकरणे देवीपुराणम्॥ (तथा च।
"ये रसा वातशमना भवन्ति यदि तेषु वै।
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणम्॥"
इति सुश्रुते सूत्रस्थाने ४० अध्यायः॥)

रौच्यः, पुं, (रुचेरपत्यमिति। रुचि+ष्यञ्।) मनुविशेषः। यथा,—
"रौच्यादयस्तथान्येऽपि मनवः संप्रकीर्त्तिताः।
रुचेः प्रजापतेः पुत्त्रो रौच्यो नाम भविष्यति॥"
इति मात्स्ये ९ अध्यायः॥
तन्मन्वन्तरे देवादयो यथा,—
"त्रयोदशस्य पर्य्याये ये रौच्यस्य मनोः सुराः।
सप्तर्षींश्च नृपांश्चैव वदतो मे निशामय॥
सुधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरे।
सुशर्म्माणस्तथा ह्येते समस्ता मुनिसत्तम॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः।
भविष्यत्यथ सप्तर्षीन् गदतो मे निशामय॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः॥
चित्रसेनो विचित्रश्च नयकृन्निर्भयो दृढः।
सुनेत्रः क्षत्त्रबुद्धिश्च सुव्रतश्चैव तत्सुताः॥"
इति मार्कण्डेयपुराणम्॥
अन्यद्विवरणं रुचिशब्दे द्रष्टव्यम्॥ * ॥ विल्वकाष्ठदण्डः। तत्पर्य्यायः। वैल्वः २। इति हेमचन्द्रः॥ (क्ली, रौच्यस्येदमिति। अण्। मन्वन्तरविशेषः। यथा, मार्कण्डेये।१००।३९।
"ख्यातिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते।
निशातयत्यखिलं रौच्यं श्रुत्वा नरोत्तमः॥")

रौट, ऋ नादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) चतुर्दशस्वरी। ऋ, अरुरौटत्। नादरोऽनादरः। रौटति खलं लोकः। इति दुर्गादासः॥

रौड, ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अरुरौड़त्। इति दुर्गादासः॥

रौद्रं, क्ली, (रुद्रस्येदम्। रुद्र+अण्।) शृङ्गाराद्यष्टरसान्तर्गतरसविशेषः। तत्पर्य्यायः। उग्रम् २। इत्यमरः॥ रे क्रोधस्याश्रये। रुद्रो देवता यस्य रौद्रम्। यदाह भरतः।
"शृङ्गारो विष्णुदेवः स्याद्धासः प्रमथदैवतः।
करुणो यमदेवः स्याद्रौद्रो रुद्राधिदैवतः॥" इति
रे क्रोधस्याश्रये। उच्यति क्रुधा समवैति उग्रः। उचिर् समवायने नाम्नीति रक् निपातनाच्चस्य गः। सर्व्वाभिभाविता रौद्रः। यथा, रावणचरितादि। एषु वीभत्सरौद्रे क्लीवे रूपभेदात् अन्ये पुंसि वीभत्सरौद्रौ चेति पुंलिङ्गपाठ इह युक्तः। इति भरतः॥ * ॥ अपि च।
अथ रौद्रः।
"रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनं रिपुस्तत्र तच्चेष्टोद्दीपनं मतम्॥
मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव।
संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढ़ा॥
भ्रूविभङ्गौष्ठनिर्द्दंशबाहुस्फोटनतर्ज्जनाः।
आत्मावदानकथनमायुधोत्क्षेपणानि च।
अनुभावास्तथाक्षेपक्रूरसन्दर्शनादयः॥
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः।
मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः॥"
यथा,—
"कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्म्मर्य्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां वलिम्॥"
अस्य युद्धवीराद्भेदमाह।
"रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः॥"
इति साहित्यदर्पणे ३ परिच्छेदः॥

रौद्रः, पुं, (रुद्रस्यायमिति। रुद्र+अण्।) सूर्य्यतेजः। तत्पर्य्यायः। घर्म्मः २। इति मेदिनी। रे, ८०॥ प्रकाशः ३ द्योतः ४ आतपः ५। इत्यमरः॥ तस्य गुणाः।
"आतपः कटुको रूक्षः स्वेदमूर्च्छातृषावहः।
दाहवैवर्ण्यजननो नेत्ररोगप्रकोपणः॥"
इति राजवल्लभः॥ * ॥
सप्तरौद्रा यथा,—
"जठरः पिङ्गलो रौद्रो घोराख्यः कालसंज्ञितः।
अग्निनामा हतो रौद्रः सप्त रौद्राः प्रकीर्त्तिताः॥"
ग्रन्थान्तरे सप्तमो रौद्रः प्राणदाहः॥ तेषां फलानि यथा,—
"पिङ्गलो रौद्रनामा च कालरूपः प्रजाक्षयम्।
स्पर्शने बहुरोगः स्यात् सर्व्वजीवसमुद्भवः॥
जठरो रौद्रनामा च घोरधूम्रञ्च कारयेत्।
व्रणादिपित्तरोगञ्च नानाक्लेशकरो नृणाम्॥
अग्निर्नाम्ना यदा वर्षे रौद्रो भवति नान्यथा।
उत्तापेन क्षितिं शुष्येत् नराणां रोगदो भवेत्।
रौद्रनामा महारौद्रो यत्राब्दे च भवेद्ध्रुवम्।
चित्तोद्वेगं व्रणं कुर्य्यान्नानारोगसमन्वितम्॥
घोरनामा महारौद्रो घोरधम्रञ्च कारयेत्।
उत्तापेन सदा दग्धं नानारोगसमन्वितम्॥
कालनामा महारौद्र उत्तापं पीड़नं सदा।
नानारोगसमायुक्तं व्रणादिकण्डुकं भवेत्॥"
इति ज्योतिषम्॥
रसविशेषः। इति मेदिनी। रे, ८०॥ तद्विवरणं क्लीवलिङ्गरौद्रशब्दे द्रष्टव्यम्। हेमन्त ऋतुः। इति हेमचन्द्रः॥ यमः। इति धरणिः॥ (कार्त्तिकेयः। यथा, महाभारते।१।१३८।१३।
"आग्नेयः कृत्तिकापुत्त्रो रौद्रो गाङ्गेय इत्यपि।
श्रूयते भगवान् देवः सर्व्वदेवमयो गुहः॥")

रौद्रः, त्रि, (रुद्र+अण्।) तीव्रः। (यथा, रुक्मिनिश्चयव्याख्याने विजयरक्षितेन हरिवंशोक्तज्वरवर्णनवचनमुक्तम्।
"ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः॥")

भीषणः। इति मेदिनी। रे, ८०॥ (यथा, महाभारते। २।६४।५०।
"तस्य ते तद्वचः श्रुत्वा रौद्रं लोमप्रहर्षणम्।
प्रचक्रुर्व्बहुलां पूजां कुरुसन्तो धृतराष्ट्रजम्॥")
रुद्रसम्बन्धिनि च॥

रौद्री, स्त्री, (रौद्र+ङीप्।) चण्डी। इति मेदिनी। रे, ८०॥ रुद्रजटा। इति राजनिर्घण्टः॥ रुरुदैत्यहतमहारौद्री माया महारौद्रीनाम्नी चामुण्डा च। यथा,—
"एक एव महादैत्यो रुरुस्तस्थौ महाम्बुधे।
स च मायां महारौद्रीं रौरवीं विससर्ज्ज ह॥
सा माया वह्निधे भीमा सर्व्वदेवप्रमोहिनी।
तया तु मोहिता देवाः सद्यो निद्रां तु भेजिरे॥
देवी च त्रिशूलेनाजौ तं दैत्यं समताड़यत्।
तया तु ताड़ितं तस्य दैत्यस्य शुभलोचने।
चर्म्ममुण्डे उभे सम्यक् पृथग्भूते बभूवतुः॥
रुरोस्तु दानवेन्द्रस्य चर्म्ममुण्डे क्षणाद्यतः।
अपहृत्य हरेद्देवी चामुण्डा तेन साभवत्॥
सर्व्वभूतमहारौद्री या देवी परमेश्वरी।
संहारिणी तु या चैव कालरात्रिः प्रकीर्त्तिता॥"
इति वाराहे त्रिशक्तिमाहात्म्यम्॥

रौप्यं, क्ली, (रूप्यमेव। अण्।) रूप्यम्। इति राजनिर्घण्टः॥ (यथा, माघे। ४।६७।
"दर्पणनिर्म्मलासु पतिते घनतिमिरमुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति
मुहुः॥")
तत्करणं यथा,—
"मध्वाज्यं गुड़ताम्रञ्च करेणा माक्षिकं रसम्।
धमनाच्च भवेद्रौप्यं सुवर्णकरणं स्मृतम्॥"
इति गारुड़े १८८ अध्यायः॥
(औषधादिषु अस्यालाभे यद्यातव्यं तद्यथा,—
"सुवर्णमथ। (रौप्यं स्मृतं यत्र न लभ्यते।
तत्र कान्तिन कर्म्माणि भिषक् कुर्य्याद्विचक्षणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
तन्निर्म्मिते, त्रि। यथा, भागवते। ४।२५।१४।
"स्वर्णरौप्यायसैः शृङ्गैः सङ्कुलां सर्व्वतो गृहैः॥")

रौमं, क्ली, (रुमायां लवणाकरे भवम्। रुमा+अण्।) शाम्भरिलवणम्। इत्यमरटीकायां रामाश्रमः॥

रौमकं, क्ली, शाम्भरिलवणम्। तत्पर्य्यायः। वसुकम् २। इत्यमरः॥ "रुमा नाम नदी लवणाकरः तत्र भवं रौमकम्। ठघे कादिति ण्यः रौमं ततः स्वार्थे कः रौमकम्।" इति तट्टीकायां भरतः॥ (पर्य्यायोऽस्य यथा,—
"शाकम्भरीयं कथितं गुड़ाख्यं रौमकन्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रौमलवणं, क्ली, (रौमं लवणमिति।) शाम्भरिलवणम्। इति रत्नमाला॥

रौरवः, पुं, (रुरवः जन्तुविशेषास्तस्यायमिति। रुरु+अण्।) नरकविशेषः। घोरः। इति मेदिनी। वे, ४६॥ आद्यस्य विवरणं यथा,—
"रौरवे कूटसाक्षी तु याति यश्चानृती नरः।
तस्य स्वरूपं वदतो रौरवस्य निशामय॥
योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः।
जानुमात्रप्रमाणन्तु तत्र श्वभ्रं सुदुस्तरम्॥
तत्राङ्गारचयो येन कृतं तद्धरणीसमम्।
जाज्वल्यतातितीव्रेण तापिताङ्गारभूमिना॥
तन्मध्ये पापकर्म्माणं विमुञ्चन्ति यमानुगाः।
स दह्यमानस्तीव्रेण वह्निना तेन धावति॥
पदे पदे च पादोऽस्य शीर्य्यते जायते पुनः।
अहोरात्रेणोद्धरणं पादन्यासं स गच्छति।
एवं सहस्रं विस्तीर्णं योजनानां विमुच्यते॥"
इति मार्कण्डेयपुराणे पितापुत्त्रसंवादनामाध्यायः॥ (तथाच देवीभागवते। ८।२२।८-११।
"एतन्ममाहमिति यो भूतद्रोहेण केवलम्।
पुष्णाति प्रत्यहं स्वीयकुटुम्बं कार्य्यलम्पटः॥
एतद्विहाय चान्तेन स्वाशुभेन पतेदिह।
रौरवे नाम नरके सर्व्वसत्त्वभयावहे॥
इह लोकेऽमुना ये तु हिंसिता जन्तवः पुरा।
त एव रुरवो भूत्वा परत्र पीड़यन्ति तम्॥
तस्माद्रौरवमित्याहुः पुराणज्ञा मनीषिणः।
रुरुः सर्पादपि क्रूरो जन्तुरुक्तः पुरातनैः॥")

रौरवः, त्रि, चञ्चलः। धूर्त्तः। घोरः। इति शब्दरत्नावली॥ (रुरोर्मृगस्येदमिति। अण्। मृगसम्बन्धिनि च। यथा, मनुः। २।४१।
"कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः।
वसीरन्नानुपूर्व्व्येण शाणक्षौमाविकानि च॥")

रौहिट्, [ष्] पुं, रौहिषमृगः। यथा। "स एष रौहिषां मध्ये चरतीति भवभूतिः।" इत्यमरटीकायां भरतः॥

रौहिणं, क्ली, (रौहिणमेव। स्वार्थे अण्।) दिवसस्य नवममुहूर्त्तः। यथा। अत्र पूर्व्वाह्णे श्राद्धमभिधाय रौहिणन्तु न लङ्घयेदित्यभिधानेन पूर्व्वाह्णश्राद्धस्य सङ्गवात् परो रौहिणपर्य्यन्तगौणपूर्व्वाह्णकालः प्रतीयते। तेन रौहिणं पूर्व्वाह्णश्राद्धस्य गौणकालत्वेनोत्तरावधिः अपराह्णश्राद्धस्य पूर्व्वावधिरित्यवगम्यते अतश्च पूर्व्वदिने सङ्गवात् परं रौहिणपर्य्यन्तं तिथिलाभे परदिने मुहूर्त्तत्रयमात्रे तत्तिथिलाभे पूर्व्वदिने श्राद्धम्। रौहिणान्तस्यपरगौणपूर्व्वाह्णलाभात् न परदिने तथात्वाभावात्। उभयदिने सङ्गवलाभे परदिने शुक्लपक्षे तिथिर्ग्राह्या इति वचनात्। रौहिणन्तु दिवसस्य नवम मुहूर्त्तस्तस्य ज्योतिषोक्तरौहिणीदैवतत्वात् रौहिणत्वमिति। इति श्राद्धतत्त्वम्॥

रौहिणः, पुं, (रुह्+इनन्। स्वार्थे अण्।) चन्दनद्रुमः। इति त्रिकाण्डशेषः॥

रौहिणेयं, क्ली, मरकतमणिः। इति राजनिर्घण्टः॥

रौहिणेयः, पुं, (रोहिण्या अपत्यमिति। रोहिणी+"शुभ्रादिभ्यश्च।" ४।१।१२३। इति ढक्।) बलदेवः। (यथा, महाभारते। १।१६२।१६।
"तत्रोपविष्टं पृथुदीर्घबाहुं
ददर्श कृष्णः सहरौहिणेयः॥")
बुधग्रहः। इत्यमरः॥ (पुरुषोत्तमस्थतीर्थपञ्चकान्यतमः। यथा, तीर्थतत्त्वे।
"मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते॥")

रौहिणेयः, त्रि, (रोहिण्या अपत्यमिति। रोहिणी+ढक्।) गोवत्सः। इति मेदिनी। ये, १२७॥

रौहिषं, क्ली, (रोहतीति। रुह्+"रुहेर्वृद्धिश्च।" उणा० १।४८। इति टिषच्। वृद्धिश्च धातोः।) कत्तृणम्। इत्यमरः॥ रोहिषतृणम्। इति राजनिर्घण्टः॥ तन्नामगुणाः।
"कत्तृणं रौहिषं देवजग्धं सौगन्धिकं तथा।
भूतीकं ध्याम पौरञ्च श्यामकं धूपगन्धिकम्॥
रौहिष तुवरं तिक्तं कटुपाकं व्यपोहति।
हृत्कण्ठव्याधिपित्तास्रशूलकासकफज्वरान्॥"
इति भावप्रकाशः॥ * ॥
अन्यत् कत्तृणशब्दे द्रष्टव्यम्॥

रौहिषः, पुं, (रुह्+टिषच्। वृद्धिश्च धातोः।) मृगविशेषः। इत्यमरः॥ रोहितमत्स्यः। इति जयपालः॥

रौहिषी, स्त्री, (रौहिष+ङीप्।) मृगी। दूर्व्वा। इति संक्षिप्तसारोणादिवृत्तिः॥

ल

ल, लकारः। स तु यवर्गस्य तृतीयो वर्णो व्यञ्जनस्याष्टाविंशवर्णश्च। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम्॥ (तथाच सिद्धान्तकौमुद्याम्। "लृतुलसानां दन्ताः॥") तस्य स्वरूपं यथा,—
"लकारं चञ्चलापाङ्गि! कुण्डलीत्रयसंयुतम्।
पीतविद्युल्लताकारं सर्व्वरत्नप्रदायकम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
आत्मादितत्त्वसंहितं हृदि भावय पार्व्वति!॥"
इति कामधेनुतन्त्रम्॥ * ॥
(वङ्गीयवर्णमालायाम्।) अस्य लेखनप्रकारो यथा,—
"कुण्डलीत्रयसंयुक्ता वामाद्दक्षगता त्वधः।
पुनरूर्द्ध्वगता रेखा तासु नारायणः शिवः।
ब्रह्मशक्तिश्च सन्तिष्ठेद्ध्यानमस्य प्रचक्ष्यते॥"
ध्यानं यथा,—
"चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम्।
सर्व्वदा वरदां भीमां सर्व्वालङ्कारभूषिताम्॥
योगीन्द्रसेवितां नित्यां योगिनीं योगरूपिणीम्।
चतुर्वर्गप्रदां देवीं नागहारोपशोभिताम्॥
एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥
तस्य नामानि यथा,—
"लश्चन्द्रः पूतना पृथ्वी माधवः शक्रवाचकः।
बलानुजः पिनाकीशो व्यापको मांससंज्ञकः॥

"लक्ष्मी नादोऽस्तं देवी लवणं वाक्यौपतिः।
शिखा याज्ञी क्रिया माता भामिनी कामिनी प्रिया॥
ज्वालिनी वेगिनी नादः प्रद्युम्नः प्रीषणो हरिः।
विन्यासमन्त्री नली चेतो मेरुगिरिः कला रथः॥"

इति नानातन्त्रशास्त्रम्॥

(अनुबन्धविशेषः। यथा, कविकल्पद्रुमे। "दिवादौ शादादिकः।" एतेन अद् लौ अचलौ लुगद्भ्योऽपः। अस्ति इति। छन्दःशास्त्रोक्तौ लघुसंज्ञकौ गणविशेषः। इति छन्दोमञ्जरी।)

लं, क्ली, (लीयतेऽत्रेति। ली + अभिधानात् निरुपपदेऽपि डः।) पृथ्वीबीजम्। इति तन्त्रम्॥

लः, पुं, (लातीति। ला + अच्।) इन्द्रः। इति मेदिनी। ले, १॥

लक, क स्वादे आपने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) स्वादो रसोपादानम्। क, लाकयति मोदकं बालकः। इति दुर्गादासः॥

लकचः, पुं, लकुचवृक्षः। इति शब्दरत्नावली॥

लकुचः, पुं, (लकते इति। लक स्वादे + बाहुलकादुचः।) वृक्षविशेषः। डेहुया इति मादार इति च भाषा। तत्पर्य्यायः। लिकुचः २ शालः ३ कषायी ४ दृढवल्कलः ५ डहुः ६ कार्श्यः ७ शूरः ८ स्थूलस्कन्धः ९। अस्य गुणाः। तिक्तरसत्वम्। कषायत्वम्। उष्णत्वम्। लघुत्वम्। कफदोषहरत्वम्। दाहित्वम्। मलसंग्रहदायकत्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च।

"लकुचः क्षुद्रपनसो लिकुचो डहुरित्यपि।
आमं लकुचमुष्णञ्च गुरु विष्टम्भकृत्तथा॥
मधुरञ्च तथाम्लञ्च दोषत्रितयरक्तकृत्।
शुक्राग्निनाशनञ्चापि नेत्रयोरहितं स्मृतम्॥
सुपक्वं तत्तु मधुरमम्लं चानिलपित्तकृत्।
कफवह्निकरं रुच्यं वृष्यं विष्टम्भकञ्च तत्॥"

इति भावप्रकाशः॥ * ॥

अन्यच्च।

"लकुचं गुरु विष्टम्भि स्वादम्लं रक्तपित्तकम्।
श्लेष्मकारि समीरघ्नमुष्णं शुक्राग्निनाशनम्॥"

इति वैद्यकम्॥

लक्तकः, पुं, (रक्तेन रक्तवर्णेन कायतीति। कै + कः। रस्य लत्वम्।) अलक्तकः। इति शब्दरत्नावली॥ (यथा, गो० रामायणे।२।६०।२६।

"प्रसक्ता लक्तकरसप्रख्यौ तदलवर्ज्जितौ।
तथैव रेजतुस्तस्याश्चरणौ पद्मवर्च्चसौ॥")

जीर्णवस्त्रखण्डम्। नेकड़ा इति भाषा। तत्पर्य्यायः। कर्पटः २ इत्यमरः॥ नक्तकः ३। इति भरतः॥ हे मलिनत्वादिदुष्टजीर्णवस्त्रखण्डे नेकड़ा इति ख्याते। लक्तकादयस्त्रयं वस्त्रमात्रे इति केचित्॥ पटोऽस्त्री कर्पटः शाटः चिपयप्रोतलक्तकाः। इति रभसः॥ लज्यते ह्रीनेराशाद्यते अनुभूयते जलः रक लक क स्वाद आपने चुर्ण्यो णिर्व्वेति विभाषितत्वात् न णिः कर्म्मणि क्तः ततः स्वार्थे कः। लक्तकोऽन्नःस्यादिः। अज्यते स अक्तं अक्तं अनूनोः क्तः न अक्तं कं सुखं यस्मादिति विपदवहुव्रीहौ मनोषादित्वात् अक्तस्य पूर्व्वलोपे नक्तकस्त्वर्गपञ्चमादिरपि। इति तट्टीकायां भरतः॥

लक्तकर्म्मा, [न्] पुं, (लक्तं रक्तवर्णं करोतीति। कृ + मनिन्।) रक्तवर्णलोध्रः। इति शब्दचन्द्रिका॥

लक्ष, क ञ दर्शने। अङ्के। इति कविकल्पद्रुमः॥ (चुरा०-उभ०-सक०-सेट्।) क ञ, लक्षयति लक्षयते घटं लोकः। पश्यति चिह्नयुक्तं करोतीत्यर्थो वा। इति दुर्गादासः॥

लक्षं, क्ली, (लक्षयतीति। लक्ष + अच्।) व्याजः। शरव्यम्। इति मेदिनी। षे, २१॥ (यथा, मनुः। ७। ५४।

"मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्गतान्।
सचिवान् सप्त चाष्टौ वा प्रकुर्व्वीत परीक्षितान्॥")

लक्षं, क्ली, स्त्री, (लक्षयतीति। लक्ष + अच्।) दशायुतसंख्या। इति मेदिनी। षे, २१॥ लाक इति भाषा। (यथा, कथासरित्सागरे।४३।९०४।

"तल्लोकादशभिर्मित्रैः सङ्घातैर्युतस्य हि।
लक्षमभ्यधिकं देव वर्त्तते वरवाजिनाम्॥")

लक्षकं, क्ली, (लक्षयतीति। लक्ष + ण्वुल्।) लक्षयति यत्। यथा। लक्षकं नाम लक्षयति।

"याद्दशार्थस्य सम्बन्धवति शक्तन्तु यन्नवेत्।
तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि॥"

याद्दशार्थसम्बन्धवति यन्नाम सङ्केतितं सदेव ताद्दशार्थे लक्षकं यदि ताद्दशार्थे शक्तिशून्यं भवेत्। सैन्धवादयस्तु शब्दाः तुरगादिसम्बन्धिनि लवणादाविव तुरगादावपि शक्ता एव। गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धिनीरादिशक्तत्वेन गृहीता एव तीरादन्वयं बोधयन्ति तत्र लक्षका एव। अपि च। तदेवं विधलक्षणावत्त्वात् लक्षकं नामापि जहत्स्वार्थादिभेदादनेकविधमित्यर्थः। स्यादेतद्यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्यनुभवे भवेत्तेतुस्तदोक्तक्रमेण लक्षकाणां विभागो न सिद्ध्यति। तीरादान्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरुणामपि शैवं शयेदित्यादौ शक्येन इत्यादिनेव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना साकं गृहीतावसंसर्गकस्यैव सप्रन्यर्याधियत्वान्वयबोधप्रविष्टत्वादिति चेत्। शक्ततयार्थावच्छिन्नस्यैव शब्दार्थस्य धर्म्मान्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीराद्यविशेषितस्य सुवर्थाधियत्वादेर्घोषादावन्वयबोधायोगात्। न च शक्तस्यैव पदस्य स्वसाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्म्मिकान्वयबोधं प्रति हेतुत्वादन्वयबुद्धौ लक्षार्थस्य प्रवेशः। कुन्ताः प्रविशन्तीत्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविशेष्यत्वानुपपत्तेः। कुमतिः पशुरित्यादौ लक्ष्यार्थयोर्मिथोऽन्वयबोधस्याप्यनुभाविकत्वाच्च। तस्मात् शक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव कार्य्यतावच्छेदकस्य सङ्कोचाच्च न व्यभिचारः। इति शब्दशक्तिप्रकाशिका॥

लक्षणं, क्ली, (लक्ष्यतेऽनेनेति। लक्ष + ल्युट्। यद्वा, "लक्षेरट् च।" उणा० ३।७। इति नप्रत्ययस्तस्याडागमश्च।) चिह्नम्। (यथा, रघुः।१०।६।

"अथाग्रेपी भविष्यन्त्याः कार्य्यसिद्धेर्हि लक्षणम्॥")

नाम। इति मेदिनी। णे, ७५॥ लक्ष्यते ज्ञायतेऽनेनेति लक्षणम्। तद्द्विविधम्। इतरभेदानुमापकम्। व्यवहारप्रयोजकञ्च। इति न्यायमतम्॥ व्याकरणमते तु।

"तत्तद्धितसमासानामभिधानं नियामकम्।
लक्षणस्यनभिज्ञानी तदभिज्ञानसूचकम्॥"

इति वोपदेवः॥

(लक्षणलक्षणन्तु। "समासासमासयणातोयो व्यवच्छेदो लक्षणार्थः।" इति सांख्यतत्त्वकौमुद्याम्।५। सुखदुःखलक्षणं यथा, मनौ।४।१६०।

"सर्व्वं परवशं दुःखं सर्व्वमात्मवशं सुखम्।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः॥")

दर्शनम्। इति लक्षधात्वर्थदर्शनात्॥

लक्षणः, पुं, (लक्ष + "लक्षेरट् च।" उणा० ३।७। इति नस्तस्याडागमश्च। लक्षणमस्त्यस्येति अच् वा।) सौमित्रिः। यथा, हरिवंशे।४१।१२६।

"लक्षणानुगतो यत्र सर्व्वभूतहिते रतः।
चतुर्द्दश वने तप्त्वा तपो वर्षाणि राघवः॥")

सारसपक्षी। इति शब्दरत्नावली॥

लक्षणा, स्त्री, (लक्षण + टाप्।) सारसी। इति मेदिनी। णे, ७५॥ हंसी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (अप्सरोविशेषः। यथा, महाभारते।१।१२३।५६।

"अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा॥")

शब्दसम्बन्धः। यथा,—

"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः॥"

इति भाषापरिच्छेदः॥

गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्य्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोधः। सा च शक्यसम्बन्धरूपा। तथा हि प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात्तीरस्य स्मरणं ततः शाब्दबोधः। इति सिद्धान्तमुक्तावली॥ * ॥ अपि च।

"जहत्स्वार्थाजहत्स्वार्थानिरूढ़ाधुनिकादिकाः।
लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा॥"

काचिल्लक्षणा शक्यावृत्तिरूपेण बोधकतया जहत्स्वार्थेत्युच्यते। यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्षोभयवृत्तिना शक्य-

हतिनैव वा रूपेणानुभावकत्वादजहत्स्वार्थां। यथा द्रव्यत्वादिना नीलघटत्वादिना च घटादिपदस्य। काचिल्लक्षणतावच्छेदकीभूततद्रूपेण पूर्व्वपूर्व्वं प्रत्यायकत्वान्निरूढ़ा। यथा, आरण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरण्यादिपदस्य। काचिच्च पूर्व्वपूर्व्वं तादृप्येणाप्रत्यायकत्वादाधुनिकी। यथा घटत्वादिना पटादिपदस्य। आदिना शक्यसदृशत्वप्रकारेण बोधकतया गौणीत्युपगम्यते। यथा अग्निर्माणवक इत्यादावग्निसदृशत्वादिना अग्न्यादिपदस्य। इति शब्दशक्तिप्रकाशिका ॥ * ॥ अन्यच्च।

"मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढ़ेः प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिता॥"१॥

कलिङ्गः साहसिक इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थे असम्भवन् यया शब्दस्य शक्त्या स्वसंयुक्तान् पुरुषादीन् प्रत्याययति। यथा च गङ्गायां घोष इत्यादौ गङ्गादिशब्दो जलमयाद्यर्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धसम्बन्धिनं तटादिं बोधयति। सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम। पूर्व्वत्र हेतू रूढ़िः प्रसिद्धिरेव। उत्तरत्र गङ्गातटे घोष इति प्रतिपादनादलभ्यस्य शीतत्वपावनत्वातिशयस्य बोधनरूपं प्रयोजनम्। हेतुं विनापि यस्य कस्यचित् सम्बन्धिनो लक्षणेऽतिप्रसङ्गः स्यादत उक्तं रूढ़ेः प्रयोजनाद्वेति ॥ * ॥ तद्भेदानाह।

"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा॥"२॥

रूढ़ावुपादानलक्षणा यथा। श्वेतो धावति। प्रयोजने यथा। कुन्ताः प्रविशन्ति। अनयोर्हि श्वेतादिभिः कुन्तादिभिश्च अचेतनतया केवलैर्धावनप्रवेशनक्रिययोः कर्त्तृतयान्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनोऽश्वादयः पुरुषादयश्च आक्षिप्यन्ते। पूर्व्वत्र प्रयोजनाभावाद्रूढ़िः। उत्तरत्र कुन्तादीनामतिगहनत्वं प्रयोजनम्। अत्र च मुख्यार्थस्यात्मनोऽप्युपादानम्। लक्षणलक्षणायान्तु परस्यैवोपलक्षणमित्यनयोर्भेदः। इयमेवाजहत्स्वार्थेत्युच्यते ॥ * ॥

"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥" ३॥

रूढ़िप्रयोजनयोर्लक्षणलक्षणा यथा। कलिङ्गः साहसिकः गङ्गायां घोष इति च। अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाशब्दावात्मानमर्पयतः। यथा वा।

"उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे
सुखितमास्स्व ततः शरदां शतम्॥"

अत्रानुपकारादीनां वाक्यार्थेऽन्वयसिद्धये उपकृतादयः शब्दाः आत्मानमर्पयन्ति। अत्रापकारिणं प्रति उपकारादिप्रतिपादनान्मुख्यार्थबाधः वैपरीत्यलक्षणः सम्बन्धः फलमपकारातिशयः। इयमेव जहत्स्वार्थेत्युच्यते ॥ * ॥

"आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा।"

ताः पूर्व्वोक्ताश्चतुर्भेदा लक्षणाः।

"विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्।
सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका ॥ ४ ॥

रूढ़ावुपादानलक्षणा सारोपा यथा। अश्वः श्वेतो धावति अत्र हि श्वेतगुणवान् अश्वोऽनिगीर्णस्वरूपः स्वसमवेतश्वेतगुणतादात्म्येन प्रतीयते। प्रयोजने यथा एते कुन्ताः प्रविशन्ति अत्र सर्व्वनाम्ना कुन्तधारिपुरुषनिर्द्देशात् सारोपात्वम्। रूढ़ौ लक्षणलक्षणा यथा। कलिङ्गः पुरुषो युध्यति। अत्र पुरुषकलिङ्गयोराधाराधारतासम्बन्धः। प्रयोजने यथा आयुर्घृतम्। अत्रायुष्कारणमपि घृतं कार्य्यकारणभावसम्बन्धसम्बन्ध्यायुस्तादात्म्येन प्रतीयते अन्यवैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम्। यथा च राजकीये पुरुषे गच्छति राजासौ गच्छति इत्यत्र स्वस्वामिभावलक्षणः सम्बन्धः। यथा वा अग्रमात्रेऽवयवे हस्तोऽयम्। अत्रावयवावयविभावलक्षणः सम्बन्धः। ब्राह्मणेऽपि तक्षासौ अत्र तात्कर्म्यलक्षणः सम्बन्धः। इन्द्रार्थासु स्थूणासु अमी इन्द्राः अत्र तादर्थ्यरूपः। एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिकृत् साध्यवसाना। अस्याश्चतुर्षु भेदेषु पूर्व्वोदाहरणान्येव ॥ * ॥

"सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।
सादृश्यात्तु मता गौण्यस्तेन षोड़श भेदिताः॥"५॥

ताः पूर्व्वोक्ता अष्टभेदा लक्षणाः सादृश्येतरसम्बन्धाः कार्य्यकारणभावादयः। अत्र शुद्धानां पूर्व्वोदाहरणान्येव। रूढ़ावुपादानलक्षणा सारोपा गौणी यथा। एतानि तैलानि हेमन्ते सुखानि अत्र तैलशब्दस्तिलभवस्नेहरूपं मुख्यार्थमुपादायैव सार्षपादिस्नेहेषु वर्त्तते। प्रयोजने यथा राजकुमारेषु तत्सदृशेषु च गच्छत्सु एते राजकुमारा गच्छन्ति। रूढ़ावुपादानलक्षणा साध्यवसाना गौणी यथा तैलानि हेमन्ते सुखानि। प्रयोजने यथा राजकुमारा गच्छन्ति। रूढ़ौ लक्षणलक्षणा सारोपा गौणी यथा राजा गौड़ेन्द्रः कण्टकं शोधयति। प्रयोजने गौर्व्वाहिकः। रूढ़ौ लक्षणलक्षणा साध्यवसाना गौणी यथा कण्टकं शोधयति। प्रयोजने यथा गौर्ज्जल्पति ॥ * ॥

"व्यङ्ग्यस्य गूढ़ागूढ़त्वाद्द्विधा स्युः फललक्षणाः॥" ६॥

प्रयोजने या अष्टभेदा लक्षणा दर्शितास्ताः प्रयोजनरूपव्यङ्ग्यस्य गूढ़ागूढ़तया प्रत्येकं द्विधा भूत्वा षोड़शभेदाः। तत्र गूढ़ः काव्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यः। यथा उपकृतं बहु तत्रेत्यादि। अगूढ़ोऽतिस्फुटतया सर्व्वजनवेद्यः। यथा उपदिशति कामिनीनां यौवनमद एव ललितानि। अत्रोपदिशतीत्यनेन आविष्करोतीति लक्ष्यते आविष्कारातिशयश्चाभिधेयवत् स्फुटं प्रतीयते ॥ * ॥

"धर्म्मिधर्म्मगतत्वेन फलस्यैता अपि द्विधा॥"७॥

एता अनन्तरोक्ताः षोड़शभेदा लक्षणाः फलस्य धर्म्मगतत्वेन धर्म्मिगतत्वेन च प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदाः। क्रमेणोदाहरति।

"स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढ़ं कठोरहृदयो रामोऽस्मि सर्व्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि! धीरा भव॥"

अत्रात्यन्तदुःखसहिष्णुरूपे रामे धर्म्मिणि लक्ष्ये तस्यैवातिशयः फलम्। गङ्गायां घोष इत्यत्र तटादिषु लक्ष्येषु शीतत्वपावनत्वादिरूपधर्म्मस्यातिशयः फलम् ॥ * ॥

"तदेवं लक्षणाभेदाश्चत्वारिंशन्मता बुधैः॥"

रूढ़ावष्टौ फले द्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदाः ॥ * ॥ किञ्च।

"पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा।"८।

ता अनन्तरोक्ताः। अत्र पदगतत्वेन यथा गङ्गायां घोषः। वाक्यगतत्वेन यथा उपकृतं बहु तत्रेति। एवमशीतिप्रकारा लक्षणा। इति साहित्यदर्पणम्॥

लक्षा, स्त्री, (लक्षयतीति। लक्ष + अच्। टाप्।) लक्षम्। दशायुतसंख्या। इति मेदिनी। षे, २३॥

लक्षितः, त्रि, (लक्ष + क्तः।) आलोचितः। दृष्टः। (यथा, रघुः। ७। ४४।

"यैः सादिता लक्षितपूर्व्वकेतून्
तानेव सामर्षतया निजघ्नुः॥")

अङ्कितः। इति लक्षधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्॥ लक्षणाश्रयश्च॥

लक्षितलक्षणा, स्त्री, लक्षिते लक्षणा। यथा द्विरेफपदेन बहुव्रीहिलक्षणयोपस्थापिताद्रेफद्वययुक्तभ्रमरपदादभिधयैव भृङ्गोपस्थितिः। अत्र रूढ़िरस्ति। प्रकृते तु रूढ़िप्रयोजनाभावान्नेयार्थत्वं इयमेव लक्षितलक्षणेत्युच्यते। न च लक्षणाद्वयाभावात् कथमियं लक्षितलक्षणेति वाच्यम्। यत्र लक्षिताच्छब्दादर्थाभिधानं तत्रैव लक्षितलक्षणायाः परिभाषितत्वात्। इति साहित्यदर्पणटीकाकृत् श्रीरामचरणतर्कवागीशः॥

लक्षिता, स्त्री, (लक्ष + क्तः। स्त्रियां टाप्।) परकीयान्तर्गतनायिकाभेदः। अस्या लक्षणम्।

पुंश्चलीभावनिपुणा। उदाहरणं यथा,—
"यद्भूतं तद्भूतं यद्भूयात्तदपि वा भूयात्।
यद्भवतु तद्भवतु वा विफलस्तव गोपनोपायः॥"
इति रसमञ्जरी॥

लक्ष्म, [न्] क्ली, (लक्षयत्यनेन लक्ष्यते इति वा। लक्ष+मनिन्।) चिह्नम्। (यथा, शाकुन्तले १ अङ्के।
"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥")
प्रधानम्। इत्यमरः। ३। ३। १२४॥

लक्ष्मणं, क्ली, चिह्नम्। इति शब्दरत्नावली॥ (यथा, माघे। ९। ३१।
"अथ लक्ष्मणानुगतकान्तवपु-
र्जलधिं विलङ्घ्य शिशिरद्युतिरथिः।
परिवारितः परित ऋक्षगणै-
स्तिमिरौघराक्षसकुलं बिभिदे॥")
नाम। इत्यमरटीकायां भरतः॥ (लक्ष्मीरस्त्यस्येति। लक्ष्मी+पामादित्वान्नः। लक्ष्म्या अस्येति गणसूत्रेणात्वं बोध्यम्।) श्रीविशिष्टे, त्रि। इति मेदिनी। णे, ७५॥

लक्ष्मणः, पुं, (लक्ष्मणमस्त्यस्येति। अर्श आदित्वादच्।) सारसः। इति हेमचन्द्रः॥ श्रीरामभ्राता। इति मेदिनी। णे, ७६॥ (यथा, अध्यात्मरामायणे। १। ३। ४५।
"भरणाद्भरतो नाम लक्ष्मणं लक्षणान्वितम्।
शत्रुघ्नं शत्रुहन्तारमेवं गुरुरभाषत॥")
स च त्रेतायुगे अयोध्यायां सुमित्रागर्भे दशरथाज्जातः। इन्द्रजिद्वधार्थं तस्य चतुर्द्दशवर्षपर्य्यन्तं आहारनिद्रादिरहितत्वं यथा,—
"एकदा रघुनाथश्च सीतया लक्ष्मणेन च।
स्नातः सरसि तत्रस्थो रम्ये पञ्चवटीतटे॥
उवाच सीता हेमन्ते जलं सुस्वादु निर्म्मलम्।
तथाश्रयस्थानं रम्यं सर्व्वं वस्तु सुशीतलम्॥
फलञ्च चयनं चक्रे सीतायै प्रददौ पुरः।
ततो ददौ लक्ष्मणाय पश्चाद्भुङ्क्ते स्वयं प्रभुः॥
लक्ष्मणस्तु गृहीत्वा च नैव भुङ्क्ते फलं जलम्।
मेघनादवधार्थञ्च सीतोद्धारणकारणात्॥
निद्रां न याति नो भुङ्क्ते वर्षाणाञ्च चतुर्द्दश।
य एव पुरुषो योगी तद्वध्यो रावणात्मजः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः॥

लक्ष्मणप्रसूः, स्त्री, (लक्ष्मणस्य प्रसूर्जननी।) सुमित्रा। इति शब्दरत्नावली॥

लक्ष्मणा, स्त्री, (लक्ष्मणमस्त्यस्या इति। अर्श आदित्वात् अच्। टाप्।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥ सारसी। ओषधिभेदः। इति मेदिनी। ७६॥ सैषस्तु लक्ष्मणाकन्द इति नाम्ना ख्यातः। तस्याः पर्य्यायः। पुत्रकन्दा २ पुत्रदा ३ नागिनी ४ नागाह्वा ५ नागपत्री ६ तुलिनी ७ मञ्जिका ८ रक्तबिन्दुच्छदा ९ पुच्छदा १०। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। स्त्रीवन्ध्यत्वनाशित्वम्। रसायनकरत्वम्। बल्यत्वम्। त्रिदोषशमनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"पुत्रकाकाररक्ताल्पबिन्दुभिर्लाञ्छिता सदा।
लक्ष्मणा पुत्रजननी वस्तगन्धाकृतिर्भवेत्॥"
इति भावप्रकाशः॥ * ॥
(मद्राधिपतिकन्या। यथा, भागवते। १०। ५८। ५७।
"सुताञ्च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युताम्।
स्वयंवरे जहारैकः स सुपर्णः सुधामिव॥")
दुर्य्योधनकन्या। सा तु श्रीकृष्णपुत्रेण साम्बेन विवाहिता। इति महाभारतम्॥ (यथा, भागवते। १०। ६८। १।
"दुर्य्योधनसुतां राजन् लक्ष्मणां समितिञ्जयः।
स्वयंवरस्थामहरत् साम्बो जाम्बवतीसुतः॥")

लक्ष्मीः, स्त्री, (लक्षयति पश्यति उद्योगिनमिति। लक्षि+"लक्षेर्मुट् च।" उणा० ३।१६०। इति ईप्रत्ययो मुडागमश्च।) विष्णुपत्नी। तत्पर्य्यायः। पद्मालया २ पद्मा ३ कमला ४ श्रीः ५ हरिप्रिया ६ इन्दिरा ७ लोकमाता ८ मा ९ क्षीराब्धितनया १० रमा ११। इत्यमरः॥ जलधिजा १२ भार्गवी १३। इति शब्दरत्नावली॥ हरिवल्लभा १४ दुग्धाब्धितनया १५ क्षीरसागरसुता १६। इति कविकल्पलता॥ * ॥

अथ लक्ष्मीमन्त्राः।
"वान्तं वह्निसमारूढं वामनेत्रेन्दुसंयुतम्।
बीजमेतत् श्रियः प्रोक्तं सर्व्वकामफलप्रदम्॥" * ॥
अस्य पूजाप्रयोगः। प्रातःकृत्यादिपीठन्यासान्तं कर्म्म विधाय हृत्पद्मस्य पूर्व्वादिकेशरेषु मध्ये च पीठशक्तीः पीठमनुञ्च न्यसेत्। ॐ विभूत्यै नमः। एवं उन्नत्यै कान्त्यै सृष्ट्यै कीर्त्त्यै सन्नत्यै व्युष्ट्यै उत्कृष्ट्यै ऋद्ध्यै। ततः श्रीकमलासनाय नमः। इत्यासनं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। शिरसि भृगुऋषये नमः मुखे निवृच्छन्दसे नमः। हृदि श्रियै देवतायै नमः। ततः कराङ्गन्यासौ कुर्य्यात्। श्रां अङ्गुष्ठाभ्यां नमः। श्रीं तर्ज्जनीभ्यां स्वाहा। श्रूं मध्यमाभ्यां वषट्। इत्यादि। एवं श्रां हृदयाय नमः इत्यादिना च न्यसेत्। तथा च निबन्धे।
"अङ्गानि दीर्घयुक्तेन रमाबीजेन कल्पयेत्।"
ततो ध्यानम्।
"कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यै-
श्चतुर्भिर्गजै-
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां
श्रियम्।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटो-
ज्ज्वलां
क्षौमाबद्धनितम्बबिम्बललितां वन्देऽरविन्द-
स्थिताम्॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततः पीठपूजां विधाय केशरेषु मध्ये च विभूत्यादिपीठमन्त्रान्तपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत्। अग्न्यादिकेशरेषु मध्ये दिक्षु च श्रां हृदयाय नमः। इत्यादिना संपूज्य दिग्दलेषु पूर्व्वादितः ॐ वासुदेवाय नमः। एवं सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय। विदिग्दलेषु ॐ दमकाय ॐ सलिलाय ॐ गुग्गुलवे ॐ कुरुण्टकाय। ततो देव्या दक्षिणे ॐ शङ्खनिधये नमः। एवं वसुधारायै। वामे ॐ पद्मनिधये वसुमत्यै। पत्राग्रेषु पूर्व्वादिषु ॐ बलाक्यै नमः। एवं विमलायै कमलायै वनमालिकायै विभीषिकायै शाङ्कर्य्यै वसुमालिकायै। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च।
"भानुलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः।
तत्सहस्रञ्च जुहुयात् कमलैर्मधुराप्लुतैः।
जयान्ते जुहुयान्मन्त्री तिलैर्वा मधुराप्लुतैः।
बिल्वैः फलैर्व्वा जुहुयात्त्रिभिर्व्वा साधकोत्तमः॥
वाग्भवं वनिता विष्णोर्माया मकरकेतनः।
चतुर्व्वीजात्मको मन्त्रश्चतुर्व्वर्गफलप्रदः॥"
वाग्भवं ऐं। विष्णुवनिता श्रीं। माया ह्रीं। मकरकेतनः क्लीं। अस्य पूजादिकं पूर्व्ववद्बोध्यम्। तथा च।
"रमायाः कल्पिते पीठे तद्विधानेन पूजयेत्।
कुर्य्यात् प्रयोगान् तत्रस्थाननेन साधकोत्तमः॥
निधिभिः सेव्यते नित्यं मूर्त्तिमद्भिरुपस्थितैः॥"
ध्याने तु विशेषः।
"माणिक्यप्रतिमप्रभां हिमनिभैस्तुङ्गैश्चतुर्भिर्गजै-
र्हस्तग्राहितरत्नकुम्भसलिलैरासिच्यमानां सदा।
हस्ताब्जैर्वरदानमम्बुजयुगाभीतीर्दधानां हरेः
कान्तां काङ्क्षितपारिजातलतिकां वन्दे सरोजासनाम्॥"
अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च।
"भानुलक्षं हविष्याशी जपेदन्ते सरोरुहैः।
जुहुयादरुणैः पुष्पैस्तत्सहस्रं जितेन्द्रियः॥"
मन्त्रान्तरम्। नमः कमलान्ते वासिन्यै टद्वयमिति प्रोक्तो दशाक्षरः। तथा च निबन्धे।
"दीर्घा यादिर्विसर्गान्तो ब्रह्मा भानुर्वसुन्धरा।
वान्तेसिन्यै प्रिया वह्नेर्मनुः प्रोक्तो दशाक्षरः॥"
"दीर्घा नकारः। यादिर्मः। ब्रह्मा कः। भानुर्मः। वसुन्धरा लः।" वान्तेसिन्यै वासिन्यै। वह्निप्रिया स्वाहा। अस्य पूजाप्रयोगः। पूर्व्ववत् पीठमन्त्रान्तं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। शिरसि दक्षऋषये नमः। मुखे विराट्छन्दसे नमः। हृदि श्रियै देवतायै नमः। तथा च शारदायाम्।
"ऋषिर्दक्षो विराट्छन्दो देवता श्रीः प्रकीर्त्तिता॥"
ततः कराङ्गन्यासौ। ॐ देव्यै नमोऽङ्गुष्ठाभ्यां नमः। ॐ पद्मिन्यै नमस्तर्ज्जनीभ्यां स्वाहा। ॐ विष्णुपत्न्यै नमो मध्यमाभ्यां वषट्। ॐ वरदायै नमोऽनामिकाभ्यां हुं।

ॐ कमलरूपायै नमः कनिष्ठाभ्यां फट्। एवं हृदयादिषु। ॐ देव्यै नमो हृदयाय नम इत्यादि। तथा च निबन्धे।
"देव्यै हृदयमाख्यातं पद्मिन्यै शिर ईरितम्।
विष्णुपत्न्यै शिखा प्रोक्ता वरदायै तनुच्छदम्।
अस्त्रं कमलरूपायै नमोऽन्ताः प्रणवादिकाः॥"
ततो ध्यानम्।
"आसीना सरसीरुहे स्मितमुखी हस्ताम्बुजै-
र्बिभ्रती
दानं पद्मयुगाभये च वपुषा सौदामिनी-
सन्निभा।
मुक्ताहारविराजमानपृथुलोत्तुङ्गस्तनोद्भासिनी
पायाद्वः कमला कटाक्षविभवैरानन्दयन्ती
हरिम्॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा पूर्व्वोक्तपीठशक्तिसहितपीठमन्वन्तां पूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। अग्न्यादिचतुष्क दिक्षु च ॐ देव्यै नमो हृदयाय नमः। ॐ पद्मिन्यै नमः शिरसे स्वाहा। ॐ विष्णुपत्न्यै नमः शिखायै वषट्। ॐ वरदायै नमः कवचाय हुम्। ॐ कमलरूपायै नमोऽस्त्राय फट्। ततः पूर्व्वादिदलेषु पूर्व्ववत् बलाक्यादि पूजयेत्। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं दशलक्षजपः। तथा च।
"दशलक्षं जपेन्मन्त्रं मन्त्रविद्विजितेन्द्रियः।
दशांशं जुहुयान्मन्त्री मधुराक्तैः सरोरुहैः॥"*॥
अथ लक्ष्मीस्तोत्रम्।

ईश्वर उवाच।

"त्रैलोक्यपूजिते देवि! कमले विष्णुवल्लभे।
यथा त्वं सुस्थिरा कृष्णे तथा भव मयि स्थिरा॥
ईश्वरी कमला लक्ष्मीश्चला भूतिर्हरिप्रिया।
पद्मा पद्मालया सम्पदुच्चैः श्रीः पद्मधारिणी॥
द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत्।
स्थिरा लक्ष्मीर्भवेत् तस्य पुत्त्रदारादिभिः सह॥"
इति तन्त्रसारः॥
विष्णुपुराणोक्तलक्ष्मीस्तोत्रं तत्रैव १ अंशे ६ अध्याये द्रष्टव्यम्॥ *॥ अथ लक्ष्मीपूजानिरूपणम्। यथा, स्कन्दपुराणे।
"पौषे चैत्रे तथा भाद्रे पूजयेयुः स्त्रियः श्रियम्।
सिंहे धनुषि मीने च स्थिते सप्ततुरङ्गमे॥
प्रत्यब्दं पूजयेल्लक्ष्मीं शुक्लपक्षे गुरोर्दिने।
नापराह्णे न रात्रौ च नाशिते न चाहस्पृशि॥
द्वादश्याञ्चैव नन्दायां रिक्तायाञ्च निरंशके।
त्रयोदश्यां तथाष्टम्यां कमलां नैव पूजयेत्॥
न पूजयेत् शनौ भौमे न बुधे नैव भार्गवे।
पूजयेत्तु गुरोर्वारे चाप्राप्ते रविसोमयोः॥
गुरुवारे हि पूर्णा च यत्नेन यदि लभ्यते।
तत्र पूज्या तु कमला धनपुत्त्रविवर्द्धिनी॥
न कुर्य्यात् प्रथमे मासि नैव कुर्य्याद्विसर्जनम्।
न घण्टां वादयेत्तत्र नैव झिण्टीं प्रदापयेत्॥
पौषे च दशमी शस्ता चैत्रके पञ्चमी तथा।
नभस्ये पूर्णिमा ज्ञेया गुरुवारे विशेषतः॥
आढ़कं धान्यसम्पूर्णं नानाभरणभूषितम्।
सुगन्धिशुक्लपुष्पेण शुक्लपक्षे प्रपूजयेत्॥
पौषे तु पिष्टकं दद्यात् परमान्नञ्च चैत्रके।
पिष्टकं परमान्नञ्च नभस्ये तु विशेषतः॥
गुरुवारसमायुक्ता नभस्ये पूर्णिमा शुभा।
कमलां पूजयेत्तत्र पुनर्जन्म न विद्यते॥
एकेन कमलेनैव कमलां पूजयेद् यदि।
इह लोके सुखं प्राप्य परत्र केशवं व्रजेत्॥
प्राङ्मुखो पूजयेल्लक्ष्मीं पश्चिमाननसंस्थिताम्।
गन्धपुष्पधूपदीपनैवेद्याद्युपचारकैः॥
गन्धद्वारेतिमन्त्रेण गन्धेनावाहयेदसौ।
श्रिये जात इति द्वाभ्यां पुष्पैरावाहयेत्ततः॥"
ततो ध्यानम्।
"हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदसमावहाम्॥
गौरवर्णान्तु द्विभुजां सितपद्मोपरिस्थिताम्।
विष्णोर्व्वक्षःस्थलस्थाञ्च जगच्छोभाप्रकाशिनीम्॥
ध्यायेदाद्यां सदा देवीं पूजाकाले विशेषतः।
ततः पूजादिकं कुर्य्यात् श्रीं लक्ष्म्यै नम इत्यृचा॥
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्धृतिः क्षमा।
तुष्टिः पुष्टिस्तथा कान्तिर्मेधा विद्या रमा स्मृतिः॥
हरिप्रिया तथा विष्णोः प्रिया नारायणस्य च।
एताभिः सप्तदशभिर्लक्ष्मीबीजादिनार्च्चयेत्॥
लक्ष्मीनारायणाभ्याञ्च नमोऽन्तेन प्रपूजयेत्।
धिषणञ्च कुबेरञ्च पूजयेत्तदनन्तरम्॥"
लघीचरित्रे।
"न कृष्णपक्षे रिक्तायां दशमीद्वादशीषु च।
श्रवणादिचतुर्ऋक्षे लक्ष्मीपूजां न कारयेत्॥"
इति कालचन्द्रिका॥
दीपान्वितामावस्यायां लक्ष्मीपूजाविधिर्यथा,—
"तुलाराशिगते भानौ अमावास्यां नराधिपः।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च॥
कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुड़ादिभिः।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः।
लक्ष्मीः संपूज्यतां लोका उल्काभिश्चाभिवेष्ट्य-
ताम्॥
अमावास्या यदा रात्रौ दिवाभागे चतुर्द्दशी।
पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका॥
अमावास्यां यदा देवाः कार्त्तिके मासि केश-
वात्।
अभयं प्राप्य सुप्ताश्च क्षीरोदार्णवसानुषु॥
लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ताम्बुजोदरे।
चतुर्युगसहस्रान्ते ब्रह्मा स्वपिति पङ्कजे॥
अतोऽत्र विधिवत् कार्य्या मनुष्यैः सुखसुप्तिका।
दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्॥
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्।
दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि॥
चतुष्पथश्मशानेषु नदीपर्व्वतसानुषु।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम्॥
ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षि-
तान्।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना।
स्निग्धैर्मुग्धैर्व्विदग्धैश्च बान्धवैर्भृत्यकैः सह॥"
अत्र लक्ष्मीपूजायां पुष्पदानकाले।
"नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये!।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्॥"
लक्ष्म्यै नम इत्यनेन वारत्रयं पूजयेत्।
"सुखरात्र्यां प्रदोषे तु कुबेरं पूजयन्ति ये॥"
इति रुद्रधरधृतात् कुबेरमपि पूजयन्ति।
"धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः॥"
इति पठित्वा कुबेराय नम इति त्रिः पूजयेत्। ततो देवगृहादिषु दीपान् दद्यात्। तत्र मन्त्रः।
"अग्निर्ज्योती रविर्ज्योतिश्चन्द्रज्योतिस्तथैव च।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम्॥"
ततो ब्राह्मणान् बन्धूंश्च भोजयित्वा स्वयं भुक्त्वा सुखं सुप्त्वा प्रत्यूषे भविष्योक्तं कर्म्म कुर्य्यात्। तथा,—
"सुखरात्रेरुषःकाले प्रदीपोज्ज्वलितालये।
बन्धून् बन्धूनबन्धूंश्च वाचा कुशलयार्च्चयेत्॥
प्रदीपवन्दनं कार्य्यं लक्ष्मीमङ्गलहेतवे।
गोरोचनाक्षतञ्चैव दद्यादङ्गेषु सर्व्वतः॥"
लक्ष्मीपूजामन्त्रः।
"विश्वरूपस्य भार्य्यासि पद्मे पद्मालये शुभे।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रिप्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला॥
माता त्वं सर्व्वभूतानां देवानां सृष्टिसम्भवा।
आख्याता भूतले देवि! सुखरात्रि नमोऽस्तु
ते॥"
लक्ष्म्यै नम इति त्रिः पूजयेत्। इति तिथ्यादितत्त्वम्॥ *॥ तस्या उपाख्यानं यथा,—

नारद उवाच।

"श्रीकृष्णस्यात्मनश्चैव निर्गुणस्य निराकृतेः।
सावित्रीयमसंवादे श्रुतं सुनिर्म्मलं यशः॥
तद्गुणोत्कीर्त्तनं सत्यं मङ्गलानाञ्च मङ्गलम्।
अधुना श्रोतुमिच्छामि लक्ष्म्युपाख्यानमेव च॥
केनादौ पूजिता सापि किम्भूता केन वा पुरा।
तद्गुणोत्कीर्त्तनं सत्यं वद वेदविदांवर॥

श्रीनारायण उवाच।

सृष्टेरादौ पुरा ब्रह्मन् कृष्णस्य परमात्मनः।
देवी वामांशसम्भूता बभूव रासमण्डले॥
अतीवसुन्दरी रामा न्यग्रोधपरिमण्डला।
यथा द्वादशवर्षीया शश्वत् सुस्थिरयौवना॥
श्वेतचम्पकवर्णाभा सुखदृश्या मनोहरा।
शरत्पार्व्वणकोटीन्दुप्रभाप्रच्छादितानना॥
शरन्मध्याह्नपद्मानां शोभामोचनलोचना।

सा च देवी द्विधा भूता सहसैवेश्वरेच्छया ।
समा रूपेण वर्णेन तेजसा वयसा त्विषा ।
यशसा वाससा सृष्ट्या भूषणेन गुणेन च ।
स्मितेन वीक्षितेनैव वचसा गमनेन च ।
मधुरेण स्वरेणैव नयेनानुनयेन च ॥
तद्वामांशो महालक्ष्मीर्दक्षिणांशश्च राधिका ।
राधादौ वरयामास द्विभुजञ्च परात्परम् ॥
महालक्ष्मीश्च तत्पश्चात्तकमे कमनीयकम् ।
कृष्णस्तयोरवेक्षेव द्विधारूपो बभूव ह ।
दक्षिणांशश्च द्विभुजो वामांशश्च चतुर्भुजः ।
चतुर्भुजाय द्विभुजो महालक्ष्मीं ददौ पुरा ॥
लक्ष्यते दृश्यते विश्वं स्निग्धदृष्ट्या ययानिशम् ।
देवीषु या च महती महालक्ष्मीश्च सा
स्मृता ॥
द्विभुजो राधिकाकान्तो लक्ष्मीकान्तश्चतुर्भुजः ।
शुद्धसत्त्वस्वरूपैश्च गोपैर्गोपीभिरावृतः ॥
चतुर्भुजश्च वैकुण्ठं प्रययौ पद्मया सह ।
सर्व्वांशेन समौ द्वौ तौ कृष्णनारायणौ परौ ॥
महालक्ष्मीश्च योगेन नानारूपा बभूव सा ।
वैकुण्ठे च महालक्ष्मीः परिपूर्णतमा रमा ॥
शुद्धसत्त्वस्वरूपा च सर्व्वसौभाग्यसंयुता ।
प्रेम्णा सा च प्रधाना च सर्व्वासु रमणीषु च ॥
स्वर्गे च स्वर्गलक्ष्मीश्च शक्रसम्पत्स्वरूपिणी ।
पातालेषु च मर्त्येषु राजलक्ष्मीश्च राजसु ॥
गृहलक्ष्मीर्गृहेष्वेव गृहिणी च कलांशया ।
सम्पत्स्वरूपा गृहिणां सर्व्वमङ्गलमङ्गला ॥
गवां प्रसूः सा सुरभी दक्षिणा यज्ञकामिनी ।
क्षीरोदसिन्धुकन्या सा श्रीरूपा पद्मिनीषु च ॥
शोभास्वरूपा चन्द्रे च सूर्य्यमण्डलमण्डिता ।
विभूषणेषु रत्नेषु फलेषु च जलेषु च ॥
नृपेषु नृपपत्नीषु दिव्यस्त्रीषु गृहेषु च ।
सर्व्वशस्येषु वस्त्रेषु स्थानेषु संस्कृतेषु च ॥
प्रतिमासु च देवानां मङ्गलेषु घटेषु च ।
माणिक्येषु च मुक्तासु माल्येषु च मनोहरा ॥
मणीन्द्रेषु च हीरेषु क्षीरेषु चन्दनेषु च ।
वृक्षशाखासु रम्यासु नवमेघेषु वस्तुषु ॥
वैकुण्ठे पूजिता सादौ देवी नारायणेन च ।
द्वितीये ब्रह्मणा भक्त्या तृतीये शङ्करेण च ॥
विष्णुना पूजिता सा च क्षीरोदे भारते मुने ! ।
स्वायम्भुवेन मनुना मानवेन्द्रैश्च सर्व्वतः ॥
ऋषीन्द्रैश्च मुनीन्द्रैश्च सद्भिश्च गृहिभिर्भवे ।
गन्धर्व्वाद्यैश्च नागाद्यैः पातालेषु च पूजिता ॥
शुक्लाष्टम्यां भाद्रपदे कृता पूजा च ब्रह्मणा ।
भक्त्या च पक्षपर्य्यन्तं त्रिषु लोकेषु नारद ! ॥
चैत्रे पौषे च भाद्रे च पुण्ये मङ्गलवासरे ।
विष्णुना निर्म्मिता पूजा त्रिषु लोकेषु भक्तितः ॥
वर्षान्ते पौषसंक्रान्त्यां मेध्यामावाह्य प्राङ्गणे ।
मनुस्तां पूजयामास सा भूता भुवनत्रये ॥
राजेन्द्रेण पूजिता सा मङ्गलेनैव मङ्गला ।
केदारेणैव नीलेन नलेन सुबलेन च ॥
ध्रुवेणोत्तानपादेन शक्रेण बलिना तथा ।
कश्यपेन च दक्षेण कर्द्दमेन विवस्वता ।
प्रियव्रतेन चन्द्रेण कुबेरेणैव वायुना ।
यमेन वह्निना चैव वरुणेनैव पूजिता ॥
एवं सर्व्वत्र सर्व्वैश्च वन्दिता पूजिता सदा ।
सर्व्वैश्वर्य्याधिदेवी सा सर्व्वसम्पत्स्वरूपिणी ॥”
अपि च ।

नारद उवाच ।

“नारायणप्रिया सा च वरा वैकुण्ठवासिनी ।
वैकुण्ठाधिष्ठातृदेवी महालक्ष्मीः सनातनी ॥
कथं बभूव सा देवी पृथिव्यां सिन्धुकन्यका ।
किं तद्ध्यानञ्च स्तवनं सर्व्वः पूजाविधिक्रमः ।
पुरा केन स्तुतादौ सा तन्मां व्याख्यातुमर्हसि ॥

श्रीनारायण उवाच ।

पुरा दुर्व्वाससः शापात् भ्रष्टश्रीश्च पुरन्दरः ।
बभूव देवसंघश्च मर्त्त्यलोकश्च नारद ! ॥
लक्ष्मीः स्वर्गादिकं त्यक्त्वा रुष्टा परमदुःखिता ।
गत्वा लीना च वैकुण्ठे महालक्ष्म्याञ्च नारद ॥
तदा शोकाद्ययुर्देवा दुःखिता ब्रह्मणः सभाम् ।
ब्रह्माणञ्च पुरस्कृत्य ययुर्वैकुण्ठमेव च ॥
वैकुण्ठे शरणापन्ना देवा नारायणे परे ।
अतीवदैन्ययुक्ताश्च शुष्ककण्ठौष्ठतालुकाः ॥
तदा लक्ष्मीश्च कलया पुरा नारायणाज्ञया ।
बभूव सिन्धुकन्या सा शक्रसम्पत्स्वरूपिणी ॥
तदा मथित्वा क्षीरोदं देवा दैत्यगणैः सह ।
संप्रापुश्च वरं लक्ष्म्या ददृशुस्ताञ्च तत्र हि ॥
सुरादिभ्यो वरं दत्त्वा वरमालाञ्च विष्णवे ।
ददौ प्रसन्नवदना तुष्टा क्षीरोदशायिने ॥
देवाश्चाप्यसुरग्रस्तं राज्यं प्रापुश्च तद्वरात् ।
तां सम्पूज्य च सम्भूय सर्व्वत्र च निरापदः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३५ ।३६ अध्यायौ ।
लक्ष्म्या अगम्यगृहाणि यथा,—
“यं यं रुष्टो गुरुर्द्देवो माता तातश्च बान्धवः ।
अतिथिः पितृलोकाश्च न यामि तस्य मन्दि-
रम् ॥
मिथ्यावादी च यः शश्वन्नास्तीति वाचकः
सदा ।
सत्त्वहीनश्च दुःशीलो न गेहं तस्य याम्यहम् ॥
सत्यहीनः स्थाप्यहारी मिथ्यासाक्ष्यप्रदायकः ।
विश्वासघ्नः कृतघ्नो यो न यामि तस्य मन्दिरम् ॥
चिन्ताग्रस्तो भयग्रस्तः शत्रुग्रस्तोऽतिपातकी ।
ऋणग्रस्तोऽतिकृपणो न गेहं यामि पापिनाम् ॥
दीक्षाहीनश्च शोकार्त्तो मन्दधीः स्त्रीजितः
सदा ।
पुंश्चलीपतिपुत्रौ यौ तद्गेहं नैव याम्यहम् ॥
पुंश्चल्यन्नचाण्डालान्नं यो भुङ्क्ते कामतः सदा ।
शूद्रान्नभोजी तद्याजी तद्गेहं नैव याम्यहम् ॥
यो दुर्व्वाक् कलहाविष्टः कलिः शश्वदथालये ।
स्त्री प्रधाना गृहे यस्य न यामि तस्य मन्दि-
रम् ॥
यत्र नास्ति हरेः पूजा तदीयगुणकीर्त्तनम् ।
नोत्सुकश्च प्रशंसायां न यामि तस्य मन्दिरम् ॥
कन्यान्नवेदविक्रेता नरघाती च हिंसकः ।
नरकागारसदृशं न यामि तस्य मन्दिरम् ।
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं सुरस्य च ।
यो हरेद्दानहीनस्तु न यामि तस्य मन्दिरम् ॥
यत् कर्म्म दक्षिणाहीनं मूढधीः कुरुते शठः ।
स पापी पुण्यहीनश्च न यामि तस्य मन्दिरम् ॥
मातरं पितरं भार्य्यां गुरुपत्नीं गुरुञ्च तम् ।
अनाथां भगिनीं कन्यामनन्याश्रयबान्धवान् ॥
कार्पण्याद्यो न पुष्णाति सञ्चयं कुरुते सदा ।
तद्गृहान्नरकाकारान्न यामि ताननीश्वराः ॥
मूत्रं पुरीषमुत्सृज्य यस्तत् पश्यति मन्दधीः ।
यः शेते क्लिन्नपादेन न यामि तस्य मन्दिरम् ॥
अधौतपादशायी यो नग्नः शेतेऽतिनिद्रितः ।
सन्ध्याशायी दिवाशायी न यामि तस्य मन्दि-
रम् ॥
मूर्ध्नि तैलं पुरो दत्त्वा योऽन्यदङ्गमुपस्पृशेत् ।
ददाति पश्चाद्गात्रे वा न यामि तस्य मन्दिरम् ॥
दत्त्वा तैलं मूर्ध्नि गात्रे विण्मूत्रं यः समुत्सृजेत् ।
प्रणमेद्वाहरेत् पुष्पं न यामि तस्य मन्दिरम् ॥
तृणं छिनत्ति नखरैर्नखरैर्व्विलिखेन्महीम् ।
गात्रे पादे मलं यस्य न यामि तस्य मन्दिरम् ॥
दशनं वसनं यस्य समलं रूक्षमस्तकम् ।
विकृतौ ग्रासहासौ च न यामि तस्य मन्दिरम् ॥
मन्त्रविद्योपजीवी च ग्रामयाजी चिकित्सकः ।
सूपकृद्देवलश्चैव न यामि तस्य मन्दिरम् ॥
विवाहं धर्म्मकार्य्यं वा यो निहन्ति च कोपतः ।
दिवामैथुनकारी यो न यामि तस्य मन्दिरम् ॥”
इत्यादि ब्रह्मवैवर्त्ते गणेशखण्डे लक्ष्मीचरित-
नाम २३ अध्यायः ॥ * ॥ अपि च ।

“कुचैलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम् ।
सूर्य्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥

नित्यं छेदस्तृणानां धरणिविलिखनं पादयो-
रल्पमार्ष्टि-
र्दन्तानामल्पशौचं वसनमलिनता रूक्षता
मूर्द्धजानाम् ।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं ग्रासहाति-
रेकः
स्वाङ्गे पीठे च वाद्यं निधनमुपनयेत् केशव-
स्यापि लक्ष्मीम् ॥

शिरः सुधौतं चरणौ सुमार्ज्जितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥

यस्य कस्य तु पुष्पस्य पाण्डरस्य विशेषतः ।
शिरसा धार्य्यमाणस्य अलक्ष्मीः प्रतिहन्यते ॥
दीपस्य पश्चिमा च्छाया छाया शय्यासनस्य च ।
रजकस्य तु यत्तीर्थमलक्ष्मीस्तत्र तिष्ठति ॥”
इत्यादि गारुड़े ११४ अध्यायः ॥ * ॥
अङ्गविशेषे तस्याः स्थितिफलं यथा,—

देवा ऊचुः ।

“कथयस्व जगन्नाथ ! केषु स्थानेष्ववस्थिता ।
पुरुषाणां फलं किं वा प्रयच्छत्यथ नश्यति ॥

दत्तात्रेय उवाच ।

जृम्भा पादस्थिता लक्ष्मीर्निलयं संप्रयच्छति ।
सक्थ्निनि संस्थिता वस्त्रं रत्नं नानाविधं वसु ॥
कलत्रदा गुह्यसंस्था क्रोड़स्थापत्यदायिनी ।
मनोरथान् पूरयति पुरुषाणां हृदि स्थिता ॥
लक्ष्मीर्लक्ष्मीवतां श्रेष्ठं कण्ठस्था कण्ठभूषणम् ।
अभीष्टबन्धुदारैश्च तथाश्लेषं प्रवासिभिः ॥
मिष्टान्नं वाक्यलावण्यमाज्ञाममवितथान्तथा ।
मुखसंस्था कवित्वञ्च यच्छत्युदधिसम्भवा ॥
शिरोगता संत्यजति ततोऽन्यं याति संश्रयम् ।
सेयं शिरोगता दैत्यान् परित्यजति साम्प्रतम् ॥”
इति मार्कण्डेयपुराणे दत्तात्रेयचरिताध्यायः ॥ * ॥
अथ लक्ष्मीचरित्रम् ।

श्रीसूत उवाच ।

“मेरुपृष्ठे सुखासीनां लक्ष्मीं पृच्छति केशवः ।
केनोपायेन देवि त्वं कृष्णा भवसि निश्चला ॥

श्रीरुवाच ।

शुक्लाः पारावता यत्र गृहिणी यत्र चोज्ज्वला ।
अकलहा वसतिर्यत्र तत्र कृष्ण वसाम्यहम् ॥
धान्यं सुवर्णसदृशं तण्डुला रजतोपमाः ।
अन्नञ्चैवातुषं यत्र तत्र कृष्ण वसाम्यहम् ॥

यः संविभागी प्रियवाक्यभाषी
वृद्धोपसेवी प्रियदर्शनश्च ।
अल्पप्रलापी न च दीर्घसूत्री
तस्मिन् सदाहं पुरुषे वसामि ॥
यो धर्म्मशीलो विजितेन्द्रियश्च
विद्याविनीतो न परोपतापी ।
अगर्व्वितो यश्च जनानुरागी
तस्मिन् सदाहं पुरुषे वसामि ॥

चिरं स्नाति द्रुतं भुङ्क्ते पुष्पं प्राप्य न जिघ्रति ।
यो न पश्येत् स्त्रियं नग्नां नियतं स च मे प्रियः ॥
त्यागः सत्यञ्च शौचञ्च यत्र एते महागुणाः ।
यः प्राप्नोति गुणानेतान् श्रद्धावान् स च मे प्रियः ॥
सर्व्वलक्षणमध्ये तु त्याग एव विशिष्यते ।
काले देशे च पात्रे च स च त्यागः प्रशस्यते ॥
नित्यमामलके लक्ष्मीर्नित्यं वसति गोमये ।
नित्यं शङ्खे च पद्मे च नित्यं श्रीः शुक्लवाससि ॥

वसामि पद्मोत्पलशङ्खमध्ये
वसामि चन्द्रे च महेश्वरे च ।
नारायणे चैव वसुन्धरायां
वसामि नित्योत्सवमन्दिरेषु ॥”

वसुन्धरायामित्यत्र वसौ धरायामिति वा पाठः ॥

“यथोपदिष्टा गुरुभक्तियुक्ता
पत्युर्व्वचो नाक्रमते च नित्यम् ।
नित्यञ्च भुङ्क्ते पतिभुक्तशेषं
तस्याः शरीरे नियतं वसामि ॥
तुष्टा च धीरा प्रियवादिनी च
सौभाग्ययुक्ता च सुशोभना च ।
लावण्ययुक्ता प्रियदर्शना या
पतिव्रता या च वसामि तासु ॥
श्यामा मृगाक्षी कृशमध्यभागा
सुभ्रूः सुकेशी सुगतिः सुशीला ।
गभीरनाभिः समदन्तपङ्क्ति-
स्तस्याः शरीरे नियतं वसामि ॥
या पापरक्ता पिशुनस्वभावा
स्वाधीनकान्तः परिभूयते च ।
अमर्षकामा कुचरित्रशीला
तामङ्गनां प्रेतमुखीं त्यजामि ॥

पुष्पं पर्य्युषितं पूतिं शयनं बहुभिः सह ।
भस्मासनं कुमारीञ्च दूरतः परिवर्जयेत् ॥
चिताङ्गारकमस्थीनि वह्निं भस्म द्विजञ्च गाम् ।
न पादेन स्पृशेत् पादं कार्पासास्थि तुषं गुरुम् ॥
नखकेशोदकञ्चैव मैथुनं पर्व्वसन्ध्ययोः ।
वर्जयेन्नग्नशायित्वमेकाकी मिष्टभोजनम् ॥

शिरः सपुष्पं चरणौ सुपूजितौ
निशाङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥

सम्मार्जनीरजोवात निर्गुण्डी लशुनन्तथा ।
रात्रौ विल्वपलाशञ्च कपित्थं वर्जयेद्दधि ॥
खगात्रासनयोर्वाद्यं अपूजा मुण्डपादयोः ।
उच्छिष्टस्पर्शनं मूर्द्ध्नि स्नानाभ्यङ्गञ्च वर्जयेत् ॥
शयनञ्चान्धकारे च रात्रिवासो दिने तथा ।
स्नानान्तरं कुवेशञ्च वर्जयेत् शुष्कभोजनम् ॥
परेणोद्वर्त्तितं वस्त्रं स्वयं माल्यापकर्षणम् ।
आलस्यमवशादेव न कुर्य्यात्लोष्टमर्द्दनम् ॥
शुक्रवारे च यत्तैलं शिलापिष्टञ्च दर्शके ।
स्वयं वामेन मूर्द्धानं पाणिना नैव संस्पृशेत् ॥
तारकाः पुच्छवन्तो च न पश्येदशुचिः पुमान् ।
नैवेद्दृशुद्धं परस्त्रीणां नास्तं यान्तं दिवाकरम् ॥
कुर्य्यान्नान्यधनाकाङ्क्षां परस्त्रीणां तथैव च ।
परेषां प्रतिकूलञ्च उदितार्के प्रबोधनम् ॥
नखकाष्ठकरक्षेश्च मृत्तिकाङ्गारधारिभिः ।
वृथा विलेखनं भूमौ न कुर्य्यात्मम काङ्क्षया ॥
स्वयं दीपं स्वयं माल्यं स्वयं पृष्ठञ्च चन्दनम् ।
नापितस्य गृहे क्षौरं शक्रादपि हरेत् श्रियम् ॥”
स्वयं दीपमित्यत्र यचितञ्चेति वा पाठः ।
“न निन्दां गणके विप्रे पादयोर्न्नैवन्तथा ।
प्रतिकूलञ्चरेत् स्त्रीणां भुक्ता च दन्तधावनम् ॥
अहतं मांसरूपञ्च नग्नाञ्चैव स्त्रियन्तथा ।
भक्षणाद्दृशनाच्चैव शक्रादपि हरेत् श्रियम् ॥

मत्सरयुक्तः परदारसेवी
आचारहीनः परसेवकश्च ।
बह्वीर्षचारी परिवादशील-
स्तं निष्ठुरं दम्भमयं त्यजामि ॥

शयनञ्चार्द्रपादेन रात्रिवासो दिने तथा ।
नोत्तरीयमधः कुर्य्यात् शुष्कपादेन भोजनम् ॥
अशुचिं स्नानवस्त्रञ्च दुर्गन्धामसुखावहाम् ।
अभूषणामपुष्पाञ्च न कुर्य्यादात्मनस्तनुम् ॥
कर्णे च वदने प्राणे तथा करतलेऽपि च ।
पादे पृष्ठे तथा नेत्रे न कुर्य्यादनुलेपनम् ॥
चक्षुर्लग्ने हतं श्रेयो मुखलग्ने धनक्षयः ।
दरिद्रः कर्णलग्ने च पादपृष्ठे तथायुषः ॥
गन्धं पुष्पं यथा तोयं रत्नञ्चैव महोदधिम् ।
गृहीतं प्रथमं वस्त्रं वर्जयेन्न कदाचन ॥
अजरजः खररजस्तथा सम्मार्जनीरजः ।
स्त्रीणां पादरजो राजन् शक्रादपि हरेत्
श्रियम् ॥

कुचेलिनं दन्तमलप्रधारिणं
महाशठं निष्ठुरवाक्यभाषिणम् ।
सूर्य्योदये चास्तमिते तु शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥”

महाशठमित्यत्र बह्वाशिनमिति वा पाठः ।
“नित्यं छेदस्तृणानां क्षितिनखलिखनं पादयो-
रल्पशौचं
एकाङ्गे तैलहीनं वसनमलिनतावन्धनं मूर्द्ध-
जानाम् ।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं ग्रासहासा-
तिरेकः
स्वाङ्गे पीठे च वाद्यं हरति धनपतेः केशव-
स्यापि लक्ष्मीम् ॥”
अवन्धनमित्यत्र रूक्षता इति वा पाठः ।
“एवं यः कुरुते नित्यं मयोक्तानि च केशव ! ।
तुष्टा भवामि तस्याहं त्वय्येवा निश्चला यथा ॥
श्रीभाषितमिदं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
तद्गृहं विपुलं रम्यं नित्यं भवति नान्यथा ॥
व्याधितो मुच्यते रोगी बद्धो मुच्येत बन्धनात् ।
आपदस्तस्य नश्यन्ति तमः सूर्य्योदये यथा ॥”
इति स्कन्दपुराणे लक्ष्मीकेशवसंवादे लक्ष्मी-
चरित्रं समाप्तम् ॥ * ॥ दुर्गा । यथा,—
“स्तुतिः सिद्धिरिति ख्याता श्रिया संश्रयणाच्च वा ।
लक्ष्मीर्वा ललना वापि क्रमात् सा कान्ति-
रुच्यते ॥

इति देवीपुराणे ५५ अध्यायः ॥

सम्पत्तिः । शोभा । ऋद्ध्यौषधम् । वृद्धिनामौ-
षधम् । फलिनीवृक्षः । इति मेदिनी । मे, २८ ॥
सीता । वीरयोषित् । इति शब्दरत्नावली ॥
स्थलपद्मिनी । हरिद्रा । शमी । द्रव्यम् । मुक्ता ।
इति राजनिर्घण्टः ॥ मोक्षप्राप्तिः । इति
चक्रटीकायां वाग्भट्टः ॥ (शोभा । यथा,
कुमारे । ३ । ४९ ।

“कपालनेत्रान्तरलब्धमार्गै-
र्ज्योतिःप्ररोहैरुदितैः शिरस्तः ।
मृणालसूत्राधिकसौकुमार्य्यां
बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः ॥”)

लक्ष्मीकान्तः, पुं, (लक्ष्म्याः कान्तः ।) नारायणः ।
यथा,—
“नमः कमलनेत्राय हरये परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त नमोऽस्तु ते ॥”

इति जन्माष्टमीव्रतकथा ॥

लक्ष्मीगृहं, क्ली, (लक्ष्म्याः गृहमावासस्थानम् ।)
रक्तोत्पलम् । इति त्रिकाण्डशेषः ॥ लक्ष्मी-
वेश्म च ॥
लक्ष्मीजनार्द्दनः, पुं, (लक्ष्म्याः सहितो जनार्द्दनः ।)
शालग्रामविशेषः । तस्य लक्षणं यथा,—
“एकद्वारे चतुश्चक्रं नवीननीरदोपमम् ।

लक्ष्मीजनार्द्दनो ज्ञेयो रहितो वनमालया ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
(तथा, देवीभागवते । ९ । २४ । ५९ ॥)

लक्ष्मीतालः, पुं, (लक्ष्मीयुक्तस्तालः ।) श्रीतालवृक्षः । इति राजनिर्घण्टः ॥ तौर्य्यत्रिकस्य परिच्छेदविशेषः । तस्य द्रुतलघ्वणुविरामक्रमो यथा,—

"द्रौ लो म् द्रौ विरामान्तौ द्रुतौ ल् द्रविरामकः ।
विरामान्तौ द्रुतौ लश्च द्रुतौ लघुविरामकः ॥"
इति सङ्गीतरत्नाकरे लक्ष्मीतालः ॥

लक्ष्मीनारायणः, पुं, (लक्ष्म्यान्वितो नारायणः ।) शालग्रामविशेषः । तस्य लक्षणं यथा,—

"एकद्वारे चतुश्चक्रं वनमालाविभूषितम् ।
नवीननीरदाकारं लक्ष्मीनारायणाभिधम् ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥

लक्ष्मीनृसिंहः, पुं, (लक्ष्मीयुतो नृसिंहः ।) शालग्रामविशेषः । तस्य लक्षणं यथा,—

"द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम् ।
लक्ष्मीनृसिंहं विज्ञेयं गृहिणाञ्च सुखप्रदम् ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥

लक्ष्मीपतिः, पुं, (लक्ष्म्याः पतिः ।) वासुदेवः । नरपतिः । इति मेदिनी । ते, २१५ ॥ (यथा, किराते । ६ । ४४ ।

"अथ क्षमामेव निरस्तविक्रम-
श्चिराय पर्य्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्म्मुकं
जटाधरः सन् जुहुधीह पावकम् ॥")

लवङ्गवृक्षः । पूगः । इति विश्वः ॥

लक्ष्मीपुत्त्रः, पुं, (लक्ष्म्याः पुत्त्रः ।) कामदेवः । घोटकः । इति मेदिनी । रे, २९३ ॥ कुशः । लवः । इति शब्दरत्नावली ॥

लक्ष्मीपुष्पः, पुं, (लक्ष्मीयुक्तं सौन्दर्य्यविशिष्टं पुष्पमिवास्य ।) पद्मरागमणिः । इति हेमचन्द्रः ॥

लक्ष्मीफलः, पुं, (लक्ष्म्यास्तन्नत्वं फलं यत्र ।) बिल्ववृक्षः । इति राजनिर्घण्टः ॥

लक्ष्मीवान्, [त्] पुं, (लक्ष्मीः शोभास्त्यस्येति । मतुप् । मस्य वः ।) पनसवृक्षः । इति शब्दमाला ॥ श्वेतरोहितवृक्षः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३।१४९।५२ ।

"सर्व्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥")

लक्ष्मीवान्, [त्] त्रि, (लक्ष्मीरस्त्यस्येति ।) श्रीयुक्तः । धनवान् । तत्पर्य्यायः । लक्ष्मणः २ श्रीलः ३ श्रीमान् ४ । इत्यमरः ॥ (यथाह कश्चित् ।

"शेषे धराभराक्रान्ते शेते विश्वम्भरः श्रिया ।
लक्ष्मीवन्तो न पश्यन्ति दुःसहां परवेदनाम् ॥")

लक्ष्मीवेष्टः, पुं, (लक्ष्मीयुक्तो वेष्टः ।) श्रीवेष्टः । इति राजनिर्घण्टः ॥

लक्ष्मीशः, पुं, (लक्ष्म्या ईशः ।) विष्णुः । इति मुग्धबोधव्याकरणम् ॥

लक्ष्मीसमाह्वया, स्त्री, (लक्ष्म्याः सम आह्वयो यस्याः ।) सीता । इति शब्दरत्नावली ॥

लक्ष्मीसहजः, पुं, (लक्ष्म्या सह जातः इति । जन् + डः । क्षीराब्धिजातत्वादस्य तथात्वम् ।) चन्द्रः । इति शब्दरत्नावली ॥

लक्ष्म्यारामः, पुं, (लक्ष्म्या आरामः ।) वनभेदः । इति शब्दमाला ॥

लक्ष्यं, क्ली, (लक्ष्यते यदिति । लक्ष् + ण्यत् ।) शरवेधस्थानम् । तत्पर्य्यायः । लक्षम् २ शरव्यम् ३ । इत्यमरः । २ । ८ । ८६ ॥ प्रतिकायः ४ वेध्यम् ५ । इति जटाधरः ॥ वेधम् ६ । इति शब्दरत्नावली ॥ (यथा, कुमारे । ३ । ६४ ।

"कामस्तु बाणावसरं प्रतीक्ष्य
पतङ्गवद्वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः
शरासनज्यां मुहुराममर्श ॥")

लक्ष्यः, त्रि, लक्षणया बोध्यः । इति साहित्यदर्पणम् ॥ (लक्ष्यते इति । लक्ष + ण्यत् ।) दर्शनीयः । इति लक्षधात्वर्थदर्शनात् ॥ (व्याजः । इत्यमरः ॥ यथा, रघुः । ६ । ८१ ।

"रोमाञ्चलक्ष्येण स गात्रयष्टिं
भित्त्वा निराक्रामदरालकेश्याः ॥"

अनुमेयः । इति मल्लिनाथः ॥ यथा, कुमारे । ५ । ७४ ।

"इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ॥"

तथा च रघुः । ४ । ५ ।

"छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्त्रेण भेजे साम्राज्यदीक्षितम् ॥")

लख, इ गि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लखति । इ गि गतौ । इति दुर्गादासः ॥

लख, इ इ गि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लङ्ख्यते । इ गि गतौ । इति दुर्गादासः ॥

लग, इ खञ्जे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-खञ्जे अक०-गतौ सक०-सेट् ।) इ, लङ्ग्यते । खञ्जो गतिवैकल्यम् । इति दुर्गादासः ॥

लग, क रक्के । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लागयति । रक्के स्वादाप्त्योः । रक्के इति रक क स्वाद आपने । इत्यस्य ञेरनित्यत्वे भावे अलि रूपम् । इति दुर्गादासः ॥

लग, म ए सङ्गे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) म, लगयति । ए, अलगीत् । लगति अधर ओष्ठे । इति दुर्गादासः ॥

लगड़ं, त्रि, चारु । इति त्रिकाण्डशेषः ॥

लगितं, त्रि, सङ्गयुक्तम् । लागा इति भाषा । इति लगधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥

लगुड़ः, पुं, दण्डः । लाठी इति भाषा । इत्यमरः ॥ लगुड़ो वंशादिमयो दण्डः । लौहमयोऽस्त्रभेदः । इति सुभूतिः । लगुड़ो लौहमयी यष्टिरस्त्रचोपचारादित्यन्ये । इति तट्टीकायां भरतः ॥ (अस्याकृतिपरिमाणादि यथा, शुक्रनीतौ ।

"लगुड़ः खड्गपादः स्यात् पृथ्वंशः स्थूलशीर्षकः ।
लौहबद्धाग्रभागश्च हृस्वदेहः सुपीवरः ।
एकाकारो दृढ़ाङ्गश्च तथा हस्तद्वयोन्नतः ।
उत्थानं पातनञ्चैव पेषणं पोथनं तथा ।
चतस्रो गतयस्तस्य पञ्चमी नेह विद्यते ।
दृढ़कायः पत्तिवर्गो तेन युध्येत शत्रुभिः ॥")

लग्नं, क्ली, (लगति फले इति । लग सङ्गे + "क्षुब्धस्वान्तध्वान्तलग्नेति ।" ७ । २ । १८ । इति निपातनात् साधु ।) राशीनामुदयः । इत्यमरः ॥ राति फलं राशिस्तालव्यशकारः । अहोरात्रमध्ये द्वादशराशय उदयन्ति । उदयः पूर्व्वाचलसंयोगः । तेषां क्रमेण उदयाचलसंयोगो लग्नं ओ लसृजी व्रीडे ओदित्वान्नः निपातनादस्य गः । इति तट्टीकायां भरतः ॥ तेषां शून्यायनांशपरिमाणं यथा,—

"रामोऽगवेदे-३ । ४७ र्जलधिस्तु मैत्रे-४ ।१७
र्व्वाणो रसैः ५ । ६ पञ्च खसागरैश्च ५ । ४० ।
बाणः कुवेदे-५।४१ र्विषयोऽङ्कयुग्मैः ५। २९
क्रमोत्क्रमान्मेषतुलादिमानम् ॥"

तथा हि ।

मेषस्य	३ । ४७ ॥	तुलायाः	५ । २९ ॥		
वृषस्य	४ । १७ ॥	वृश्चिकस्य	५ । ४१ ॥		
मिथुनस्य	५ । ६ ॥	धनुषः	५ । ४० ॥		
कर्कटस्य	५ । ४० ॥	मकरस्य	५ । ६ ॥		
सिंहस्य	५ । ४१ ॥	कुम्भस्य	४ । १७ ॥		
कन्यायाः	५ । २९ ॥	मीनस्य	३ । ४७ ॥		

इति दीपिका ॥ * ॥ दशयवकुलाधिकपञ्चाकुलप्रमे कलिकाताख्यदेशे वर्त्तमानोनविंशायनांशे प्रामाणिककारिका यथा,—

"वेदोऽङ्गैः ४ । ६ सोऽन्धवेदै-४ । ४८ रिपुरगनयनैः ५।२७ सोऽन्तरीक्षाम्बुनाथैः ५ । ४० ।
पारावाराश्वयासै-५।३४ र्गगनगनयनैः ५ । २९
षट्त्रिभि-५।३६ श्चन्द्रवेदैः ५ । ४१ ।
अङ्कप्राभिः ५ । १९ समुद्रोऽसुमुनिभि-४ ।३५
र्दनजोऽष्टेन्दुभिः ३।५८ सोऽगवेदै-३ । ४७ ।
र्मेषादेकोनविंशे गणितपरिमितं मानमत्रायनांशे ॥" * ॥

उदयलग्नास्तलग्नयोर्दिनं प्रति रविभोग्यं यथा,

"लग्नदण्डपलं द्विघ्नं तत्संख्यं क्रमतः पलम् ।
विपलञ्च रवेर्भोग्यमेवं कल्पनमन्तमे ॥"
इति ज्योतिषम् ॥

एतयोर्विवरणं यथा,—

तत्र प्राचीनलग्नमानम् ।

लग्नाः	दिनभुक्तम् ।		मासभुक्तम् ।	
यथा	पलम् ।	विपलम् ।	दण्डः ।	पलम् ।
१ मेषः ।	७ ।	३४ ॥	३ ।	४७ ॥
२ वृषः ।	८ ।	३४ ॥	४ ।	१७ ॥
३ मिथुनम् ।	१० ।	१२ ॥	५ ।	६ ॥
४ कर्कटः ।	११ ।	२० ॥	५ ।	४० ॥
५ सिंहः ।	११ ।	२२ ॥	५ ।	४१ ॥
६ कन्या ।	१० ।	५८ ॥	५ ।	२९ ॥

लग्ना:	दिनभुक्तम् ।		मासभुक्तम् ।	
यथा	पलम् ।	विपलम् ।	दण्ड: ।	पलम् ।
७ तुला ।	१० ।	५८ ॥	५ ।	२६ ॥
८ वृश्चिक: ।	११ ।	२२ ॥	५ ।	४१ ॥
९ धनु: ।	११ ।	२० ॥	५ ।	४० ॥
१० मकर: ।	१० ।	१२ ॥	५ ।	६ ॥
११ कुम्भ: ।	८ ।	३४ ॥	४ ।	१७ ॥
१२ मीन: ।	७ ।	३४ ॥	३ ।	४७ ॥

तत्र स्वदेशाधुनिकलग्नमानम् ।

लग्ना:	दिनभुक्तम् ।		मासभुक्तम् ।	
यथा	पलम् ।	विपलम् ।	दण्ड: ।	पलम् ।
१ मेष: ।	८ ।	१२ ॥	४ ।	६ ।
२ वृष: ।	९ ।	३६ ॥	४ ।	४८ ॥
३ मिथुनम् ।	१० ।	५४ ॥	५ ।	२७ ॥
४ कर्कट: ।	११ ।	२० ॥	५ ।	४० ॥
५ सिंह: ।	११ ।	८ ॥	५ ।	३४ ॥
६ कन्या ।	१० ।	५८ ॥	५ ।	२९ ॥
७ तुला ।	११ ।	१२ ॥	५ ।	३६ ॥
८ वृश्चिक: ।	११ ।	२२ ॥	५ ।	४१ ॥
९ धनु: ।	१० ।	३८ ॥	५ ।	१९ ॥
१० मकर: ।	९ ।	१० ॥	४ ।	३५ ॥
११ कुम्भ: ।	७ ।	५६ ॥	३ ।	५८ ॥
१२ मीन: ।	७ ।	३४ ॥	३ ।	४७ ॥

अथ जन्मकालीनलग्नस्थग्रहसूचितफलम् ।
"लग्ने सूर्य्येऽचिरोगी शशिनि बलयुतो
रूपवान् वित्तयुक्तो
भौमे चण्ड: सुवाग्मी शशधरतनये सर्व्व-
शास्त्रार्थवेत्ता ।
जीवे दाता पवित्र: सुकविरथ गते भार्गवे
मण्डलेश:
सौरौ कण्डूतिगात्रस्तमसि च नियतं वञ्चितो
धर्म्महीन: ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च ।
हरिरुवाच ।
"उदयन्तु समारभ्य राशौ भानु: स्थितो हर ।
स्वराश्यादौ व्रजेदह्नि षड्भि: षड्भिस्तथा
निशाम् ॥
मीने मेषे च पञ्च स्युश्चतस्रो वृषकुम्भयो: ।
मकरे मिथुने तिस्र: पञ्च चापे च कर्कटे ॥
सिंहे च वृश्चिके षट् च सप्त कन्या तुले तथा ।
एता लग्नप्रमाणेन घटिका: परिकीर्त्तिता: ॥
शरपूर्व्वावशानेषुरसाब्धीब्धिसागरा: ।
लङ्कोदया हि हे वस्तु लग्ना मेषादयोऽथवा ॥
मेषलग्ने भवेद्वन्ध्या वृषे भवति कामिनी ।
मिथुने सुभगा कन्या वेश्या भवति कर्कटे ॥
सिंहे चैवाल्पपुत्त्रा च कन्यायां रूपसंयुता ।
तुलायां रूपमैश्वर्य्यं वृश्चिके कर्कशा भवेत् ॥
सौभाग्यं धनुषि स्याच्च मकरे नीचगामिनी ।
कुम्भे चैवाल्पपुत्त्रा स्यान्मीने वैराग्यसंयुता ॥
तुला कर्कटको मेषो मकरश्चैव राशय: ।
चरकार्य्याणि कुर्य्याच्च स्थिरकार्य्याणि चैव हि ॥
पञ्चाननो वृष: कुम्भो वृश्चिक: स्यु: स्थिराणि हि ।
कन्या धनुश्च मीनश्च मिथुनं द्विस्वभावत: ॥
द्विस्वभावानि कर्म्माणि कुर्य्यादेषु विचक्षण: ।
यात्रा चरेण कर्त्तव्या प्रवेशश्च स्थिरेण तु ।
देवस्थापनवैवाह्यं द्विस्वभावेन कारयेत् ॥"
इति गारुडे ६२ अध्याय: ॥

लग्न:, पुं, (लग् + क्त: । निपातनात् साधु: । यद्वा, लस्ज + क्त: । "ओ लस्जी । लग्न: लग्नवान् । लस्जेरोदनुबन्धबलादिड्भावे नत्वं स्यात् ।" इति लतुषष्ठे दुर्गसिंह: ।) स्तुतिपाठक: ॥ तत्पर्य्याय: । प्रातर्गेय: २ स्तुतिव्रत: ३ । इति त्रिकाण्डशेष: ॥ सूत: ४ । इति जटाधर: ॥

लग्न:, त्रि, (लस्ज + क्तप्रत्ययेन साधु: ।) सक्त: । लज्जित: । इति मेदिनी ॥

लग्नक:, पुं, (लग्न एव । स्वार्थे कन् ।) प्रतिभू: । इत्यमर: ॥ द्वे लागा इति जामिन इति च ख्याते । तत्कार्य्ये लग्नक: । ओ लस्जी व्रीडे क्त: । स्वार्थे कन् । प्रतिनिधिर्भवति प्रतिभू: क्विप् । इति तट्टीकायां भरत: ॥

लग्निका, स्त्री, नग्निका । इत्यमरटीका ॥

लघ, इ शोषे । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लङ्घते । शोष इह अल्पीकरणम् ।
'यं व्याधिरतिदीप्ताङ्गं कदाचित्तु न लङ्घति ।'
इति हलायुध: ॥
गतावप्यन्ये । अन्ये चालङ्घिषु: शैलान् । इति दुर्गादास: ॥

लघ, इ क त्विषि । इति कविकल्पद्रुम: ॥ (चुरा०-पर०-अक०-सेट् ।) इ क, लङ्घयति । त्विषि दीप्तौ । इति दुर्गादास: ॥

लघ, इ ङ अशुग्गत्यो: । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-अक०-सक०च-सेट् ।) इ, लङ्घ्यते । ङ, लङ्घते । अशुक् भोजनाभाव: । तथा च ।
'ये गुणा लङ्घने प्रोक्तास्ते गुणा लघुभोजने ॥'
इति वैद्यकम् ॥
लङ्घने उपवासे इत्यर्थ: । इति दुर्गादास: ॥

लघट्, पुं, (लङ्घते मध्यस्थानमस्पृष्ट्वोत्तरस्थाने पतति प्लुतं इतस्ततो गच्छतीति वा । लङ्घ + "लङ्घेर्नलोपश्च ।" उणा०१।१३४। इति अटि: । नलोपश्च धातो: ।) वायु: । इत्युणादिकोष: ॥

लघटि:, पुं, (लघ गतौ + अटि: । इदभाव: ।) वायु: । इत्युणादिकोष: ॥

लघिमा, [न्] पुं, (लघोर्भाव: । लघु + "पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् ।) लघुत्वम् । (यथा, रघु: । १३ । ३७ ।
"घ्रात्वा हविर्गन्धि रजोविमुक्त:
समश्नुते मे लघिमानमात्मा ॥")
तत्तु शिवस्याष्टैश्वर्य्यान्तर्गत ऐश्वर्य्यविशेष: । यथा,
"लघिमा वशितेशित्वं प्राकाम्यं महिमाणिमा ।
यत्र कामावसायित्वं प्राप्तिरैश्वर्य्यमष्टधा ॥"
इति हेमचन्द्र: ॥
(अबहुमतत्वम् । ह्रस्वत्वम् । यथा, आर्य्यासप्तशत्याम् । ६० ।
"अग्रे लघिमा पश्चात् महतापि विधीयते नहि
महिम्ना ।
वामन इति त्रिविक्रममभिदधति दशावतार-
विद: ॥")

लघिष्ठ:, त्रि, अयमनयोरेषां वा अतिशयेन लघु: इत्यर्थे इष्ठप्रत्ययेन निष्पन्न: । अतिशयलघुत्वयुक्त: । इति व्याकरणम् ॥ (यथा, विदग्धमुखमण्डने ।
"भविन्नी रम्भोरु त्रिदशवदनग्लानिरधुना
स रामोऽपि स्थाता न युधि पुरतो लक्ष्मणयुत: ।
गमिष्यत्येवोच्चैर्व्विपदमधुना वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुन: ॥"
सीतारावणयोरुक्तिप्रत्युक्तिरियम् । सप्तमाक्षर-लोपे त्विदं वाक्यम् । यथा । "दशवदनग्लानि: ।" "स्थाता युधि ।" "उच्चै: पदम् ॥")

लघीयान् [स्] त्रि, अयमनयोरेषां वा अतिशयेन लघु: इत्यर्थे ईयसुप्रत्ययेन निष्पन्न: । अतिशयलघुत्वयुक्त: । इति व्याकरणम् ॥ (यथा, महाभारते । २ । ६२ । १४ ।
"न वै समृद्धिं पालयते लघीयान्
यत्त्वां समानेष्यति राजपुत्त्रि ! ॥")

लघु, क्ली, (लङ्घते अनेनेति । लङ्घ + "लङ्घिवंह्योर्नलोपश्च ।" उणा० १ । ३० । इति कु: । धातोर्नलोपश्च ।) शीघ्रम् । इत्यमर: ॥ (यथा, रामायणे । २ । ४६ । २१ ।
"यावदेव तु संसुप्तास्तावदेव वयं लघु ।
रथमारुह्य गच्छाम: पन्थानमकुतोभयम् ॥")
कृष्णागुरु । इति मेदिनी । घे, ५ ॥ लामज्जकम् । इति राजनिर्घण्ट: ॥ (अस्य पर्य्यायो यथा,—
"लामज्जकं सुनालं स्यादमृणालं लयं लघु: ।
इष्टकापथकं सेव्यं नलदश्चावदातकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
हस्ताश्विनीपुष्यनक्षत्राणि । यथा, वृहत्संहितायाम् । ९८ । ६ ।
"लघु हस्ताश्विनपुष्या:
पण्यरतिज्ञानभूषणकलासु ।
शिल्पौषधयानादिषु
सिद्धिकराणि प्रदिष्टानि ॥"
कालपरिमाणविशेष: । यथा, भागवते । ३ । ११ । ७ ।
"चषान् पञ्च विदु: काष्ठां लघुता दश पञ्च च ।
लघूनि वै समाम्नाता दश पञ्च च नाड़िका: ॥"
पुं, प्राणायामविशेष: । यथा, मार्कण्डेये । ३९ । १३—१४ ।
"लघुमध्योत्तरीयाख्य: प्राणायामस्त्रिधोदित: ।
तस्य प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुण: स तु मध्यम: ।
त्रिगुणाभिस्तु मात्राभिरुत्तम: परिकीर्त्तित: ॥")

लघु:, स्त्री, पृक्का नाम औषधि: । इति मेदिनी । घे, ५ ॥ (तथास्या: पर्य्याय: ।

"शृङ्गाटङ्ग्राह्मणी देवी मरुन्माला लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लघुः, त्रि, (लङ्घ + कुः । नलोपश्च ।) अगुरुः । (यथा,—
"तृणादपि लघुस्तूलस्तूलादपि च भिक्षुकः ।
न नीतो वायुना कस्मादयं प्रार्थनशङ्कया ॥"
इत्युद्भटः ॥)
मनोज्ञः । (इष्टः । इत्यमरः ॥ यथा, रघुः । ११ । १२ ।
"नाम्भसां कमलशोभिनां तथा
शाखिनाञ्च न परिश्रमच्छिदाम् ।
दर्शनेन लघुना यथा तयोः
प्रीतिमापुरुभयोस्तपस्विनः ॥")
निःसारः । इति मेदिनी । घे, ५ ॥ (यथा, रघुः । १२ । ६६ ।
"श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम् ॥")
ह्रस्वः । इति हेमचन्द्रः ॥ * ॥ व्याकरणोक्तलघुसंज्ञा यथा । ह्रस्वो लघुः दीर्घो गुरुरित्युच्चारणवशाज्ज्ञायते । तथा संयोगे सति ह्रस्वोऽपि गुरुर्गुरुमतोऽनृच्छ इति वर्ज्जनाच्च । इति दुर्गसिंहकृतकलापवृत्तिः ॥ * ॥ छन्दःशास्त्रोक्तं लघुलक्षणं यथा,—
"मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥
गुरुरेको गकारस्तु लकारो लघुरेककः ॥"
इति छन्दोमञ्जरी ॥

लघुकायः, पुं, (लघुः कायो यस्य ।) छागः । इति त्रिकाण्डशेषः ॥ क्षुद्रशरीरश्च ॥

लघुकाश्मर्य्यः, पुं, (लघुः काश्मर्य्यः ।) कट्फलवृक्षः । इति राजनिर्घण्टः ॥

लघुखट्टिका, स्त्री, (लघुः खट्टिका ।) क्षुद्रखट्टा । तत्पर्य्यायः । आसन्दी २ । इति हारावली । २०६ ॥

लघुगणः, पुं, (लघुर्गणः ।) अश्विनीपुष्यहस्तनक्षत्राणि । यथा,—
"उग्रः पूर्व्वमघान्तका ध्रुवगणश्चोग्युत्तराणि स्वभू-
र्व्वातादित्यहरित्रयं चरगणः पुष्याश्विहस्ता लघुः ॥"
इति दीपिका ॥

लघुगर्गः, पुं, (लघुर्गर्ग इव ।) त्रिकण्टकमत्स्यः । इति हारावली । १६० ॥

लघुचिर्भिटा, स्त्री, (लघुश्चिर्भिटा ।) मृगेर्व्वारु । इति राजनिर्घण्टः ॥

लघुजङ्गलः, पुं, लावकपक्षी । इति त्रिकाण्डशेषः ॥

लघुदन्ती, स्त्री, (लघुः क्षुद्रा दन्ती ।) क्षुद्रदन्तीवृक्षः । यथा,—
"लघ्वी दन्ती विशल्या च स्यादुडुम्बरपर्ण्यपि ।
तथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया ।
वराहाङ्गी च कथिता निकुम्भश्च मकूलकः ॥"
अस्या गुणाः ।
"दन्तीद्वयं सरं पाके रसे च कटु दीपनम् ।
गुदाङ्कुराश्ममूलासकण्डूकुष्ठविदाहनुत् ॥
तीक्ष्णोष्णं हन्ति पित्तासकफशोथोदरक्रिमीन् ॥"
इति भावप्रकाशः ॥
तत्फलगुणाः ।
"क्षुद्रदन्तीफलन्तु स्यान्मधुरं रसपाकयोः ।
शीतलं हृष्टविण्मूत्रं गलशोथकफापहम् ॥"
इति भावप्रकाशः ॥

लघुदुन्दुभिः, पुं, (लघुर्दुन्दुभिः ।) डगड्वाद्यम् । इति शब्दरत्नावली ॥

लघुद्राक्षा, स्त्री, (लघुः क्षुद्रा द्राक्षा ।) काकलीद्राक्षा । इति राजनिर्घण्टः ॥

लघुनाम, [न्] क्ली, (लघु लघुवर्णयुक्तं नाम यस्य ।) अगुरु । इति शब्दचन्द्रिका ॥

लघुपञ्चमूलं, क्ली, (लघु क्षुद्रं पञ्चमूलम् ।) क्षुद्रपञ्चमूलपाचनम् । तत्तु शालपर्णीपृश्निपर्णीवृहतीकण्टकारीगोक्षुरसंयुक्तम् । यथा,—
"शालपर्णी पृश्निपर्णी वार्त्ताकी कण्टकारिका ।
गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥"
अस्य गुणाः ।
"पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम् ।
नात्युष्णं वृंहणं ग्राहि ज्वरश्वासाश्मरीप्रणुत् ॥"
इति भावप्रकाशः ॥

लघुपत्रकः, पुं, (लघूनि पत्राणि यस्य । कप् ।) रोचनी । शुक्लारोचनी इति ख्यातः । इति शब्दचन्द्रिका ॥

लघुपत्री, स्त्री, (लघूनि पत्राणि यस्याः । ङीष् ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥

लघुपिच्छिलः, पुं, (लघुः पिच्छिलः ।) भूकर्व्वुदारकः । इति राजनिर्घण्टः ॥

लघुपुष्पः, पुं, (लघूनि क्षुद्राणि पुष्पाणि यस्य ।) भूमिकदम्बः । इति राजनिर्घण्टः ॥ (भूमिकदम्बशब्देऽस्य विशेषो ज्ञेयः ॥)

लघुबदरः, पुं, (लघुः क्षुद्रो बदरः ।) क्षुद्रकोलिः । तत्पर्य्यायः । सूक्ष्मफलः २ बहुकरः ३ सूक्ष्मपत्रः ४ दुस्पर्शः ५ मधुरः ६ हरहारः ७ शिशुप्रियः ८ । इति राजनिर्घण्टः ॥ अस्य फलगुणाः ।
"कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रबदरं कषायं कथितं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भेद्यग्निकृत् सर्व्वं लघु तृष्णाक्लमास्रजित् ॥"
इति भावप्रकाशः ॥
अस्य पक्वफलगुणाः । मधुराम्लत्वम् । कफवातनाशित्वम् । रुच्यत्वम् । स्निग्धत्वम् । जन्तुकारकत्वम् । ईषत्पित्तार्त्तिदाहशोषशमत्वञ्च । इति राजनिर्घण्टः ॥

लघुबदरी, स्त्री, (लघुः क्षुद्रा बदरी ।) भूबदरी । इति राजनिर्घण्टः ॥

लघुब्राह्मी, स्त्री, (लघुः क्षुद्रा ब्राह्मी ।) क्षुद्रब्राह्मी । तत्पर्य्यायः । जलोद्भवा २ सूक्ष्मपत्रा ३ । इति राजनिर्घण्टः ॥

लघुमन्थः, पुं, (लघुः क्षुद्रो मन्थः) क्षुद्राग्निमन्थः । इति राजनिर्घण्टः ॥

लघुमांसः, पुं, (लघु स्वल्पं मांसं यस्य ।) तित्तिरिपक्षी । इति त्रिकाण्डशेषः ॥

लघुमांसी, स्त्री, गन्धमांसी । इति राजनिर्घण्टः ॥

लघुलयं, क्ली, (लघु शीघ्रं लीयते इति । ली + अच् ।) वीरणमूलम् । इत्यमरः ॥

लघुसदाफला, स्त्री, (सदा फलं यस्याः सा । लघुः सदाफला ।) लघूदुम्बरिका । इति राजनिर्घण्टः ॥

लघुहस्तः, पुं, (लघुः क्षिप्रकारी हस्तो यस्य ।) शीघ्रवेधी । इति हेमचन्द्रः । ३ । ४३१ ॥ (वाच्यलिङ्गोऽपि । यथा, कथासरित्सागरे । ४२ । १३३ ।
"स राजपुत्रश्छित्त्वैव रक्षसस्तस्य तच्छिरः ।
भूयः खड्गप्रहारेण लघुहस्तो द्विधाकरोत् ॥"
यथा च ।
"तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥)

लघुहेमदुग्धा, स्त्री, (लघुर्हेमदुग्धा ।) लघूदुम्बरिका । इति राजनिर्घण्टः ॥

लघूदुम्बरिका, स्त्री, (लघुः क्षुद्रा उदुम्बरिका ।) क्षुद्रोडुम्बरिका । छोट डुमुर इति भाषा । तत्पर्य्यायः । लघुपत्रफला २ लघुहेमदुग्धा ३ लघुसदाफला ४ लघ्वादुडुम्बराङ्का ५ । रसवीर्य्यविपाकेषु उडुम्बरात् किञ्चिन्न्यूनगुणेयम् । इति राजनिर्घण्टः ॥

लघ्वी, स्त्री, (लघु + ङीष् ।) लाघवयुक्ता । (यथा,—
"गुर्व्वी पिष्टी खरात्यर्थं लघ्वी सैव विपर्य्ययात् ।
शक्तूनामाशु जीर्य्येत मृदुत्वादवलेहिका ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे ॥)
स्पन्दनप्रभेदः । इति मेदिनी । घे, ५ ॥ पृक्का । इति राजनिर्घण्टः ॥

लङ्का, स्त्री, (रमन्तेऽस्यामिति । रम + बाहुलकात् कः । रस्य लत्वम् । इत्युज्ज्वलः । ३ । ४० ।) रक्षःपुरी । (यथा, नैषधे । ३ । ६७ ।
"चेतो न लङ्कामयते मदीयं
नान्यत्र कुत्रापि च साभिलाषम् ॥")
ज्योतिःशास्त्रमते सा च पृथिव्या मध्यभागे तिष्ठति । लङ्कोदयात् चरखण्डेभ्यः स्वदेशे लग्नप्रमाणं भवति । यथा,—
"लङ्का कुमध्ये यमकोटिरस्याः
प्राक् पश्चिमे रोमकपत्तनञ्च ।

अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वड़वानलश्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड़्गोलविदो वदन्ति ॥"

अपि च ।

"यल्लङ्कोज्जयनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशन्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः ।
आदौ प्रागुदयोऽपरत्र विषये पश्चाद्धि रेखोदयात्
स्यात्तस्मात् क्रियते तदन्तरभुवं खेटेष्वृणं स्वं फलम् ॥"

इति सिद्धान्तशिरोमणिः ॥ * ॥

अथ लङ्कापुरीवर्णनम् ।

ब्रह्मोवाच ।

"त्रिंशद्योजनविस्तीर्णां स्वर्णप्राकारतोरणाम् ।
दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्व्वतः ।
शिखरे तस्य शैलस्य मध्यमम्बुधिसन्निधौ ॥
पतत्रिभिश्च दुष्प्रापां टङ्कच्छिन्नां चतुर्द्दिशम् ।
शक्रार्थं मत्कृता पूर्व्वं प्रयत्नात् बहुवत्सरैः ॥
वसन्तु तत्र दुर्द्धर्षाः सुखं राक्षसपुङ्गवाः ।
अमरावतीं समासाद्य सेन्द्रा इव दिवौकसः ॥
लङ्कादुर्गं समासाद्य शत्रूणां शक्रसूदनाः ।
दुराधर्षा भविष्यन्ति राक्षसैर्ब्बहुभिर्वृताः ॥"

इति वह्निपुराणे कपिलदर्शननामाध्यायः ॥ * ॥ शाखा । शाकिनी । कुलटा । इति मेदिनी । के, ३३ ॥ धान्यविशेषः । तत्पर्य्यायः । करालत्रिपुटा २ काण्डिका ३ रूक्षणात्मिका ४ । अस्या गुणाः । रुच्यत्वम् । हिमत्वम् । गौल्यत्वम् । पित्तनाशित्वम् । वातकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

लङ्कादाही, [न्] पुं, (लङ्कां दहति तच्छीलः । दह् + णिनिः ।) हनूमान् । इति शब्दरत्नावली ॥

लङ्काधिपतिः, पुं, (लङ्काया अधिपतिः ।) रावणः । इति जटाधरभूरिप्रयोगौ ॥ (यथा, रघुः । ६ । ६२ ।

"पुरा जनस्थानविमर्द्दशङ्की
सन्धाय लङ्काधिपतिः प्रतस्थे ॥")

लङ्कापतिः, पुं, (लङ्कायाः पतिः ।) रावणः । इति भूरिप्रयोगः ॥

लङ्कापिका, लङ्कायिका, लङ्कारिका } स्त्री, पृक्का । इति शब्दरत्नावली ॥ पिड़िंशाक इति भाषा ॥

लङ्कास्थायी, [न्] पुं, (लङ्कावत् तिष्ठतीति । स्था + णिनिः ।) वृक्षविशेषः । लङ्कासिज इति भाषा । यथा,—

"लङ्कास्थायी राजवृक्षो भद्रचूड़ो विशायकः ।"

इति शब्दचन्द्रिका ॥

(लङ्कायां तिष्ठतीति ।) लङ्कावासिनि, त्रि ॥

लङ्केशः, पुं, (लङ्काया ईशः पतिः ।) रावणः । इति त्रिकाण्डशेषः ॥

लङ्कोपिका, स्त्री, पृक्का । इति शब्दरत्नावली ॥

लङ्कोयिका, स्त्री, पृक्का । इति शब्दरत्नावली ॥

लङ्गः, पुं, (लङ्गतीति । लङ्ग गतौ + अच् ।) सङ्गः । षिड़्गः । इति मेदिनी । गे, २३ ॥ नां इति भाषा ॥

लङ्गूलं, क्ली, लाङ्गूलम् । इत्युणादिकोषः ॥

लङ्घनं, क्ली, (लङ्घ + ल्युट् ।) उपवासः । (यथा, सुश्रुते । १ । ४६ ।

"तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितम् ।
विष्टब्धे स्वेदनं पथ्यं रसशेषे शयीत च ॥"

यथा च ।

"लङ्घनं बृंहणं काले रूक्षणं स्नेहनन्तथा ।
स्वेदनं स्तम्भनञ्चैव जानीते यः स वै भिषक् ॥"
"तदग्निवेशस्य वचो निशम्य गुरुरब्रवीत् ।
यत्किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम् ॥"
"लघूष्णतीक्ष्णविषदं रूक्षं सूक्ष्मं खरं सरम् ।
कठिनञ्चैव यद्द्रव्यं प्रायस्तल्लङ्घनं स्मृतम् ॥"
"—————पिपासा मारुतातपौ ।
पाचनान्युपवासाश्च व्यायामश्चेति लङ्घनम् ॥"
"प्रभूतश्लेष्मपित्तास्रमलाः संसृष्टमारुताः ।
बृहच्छरीरा बलिनो लङ्घनीया विशुद्धिभिः ॥"
"त्वग्दोषिणां प्रमीढ़ानां स्निग्धाभिष्यन्दिबृंहिणाम् ।
शिशिरे लङ्घनं शस्तमपि वातविकारिणाम् ॥"

इति चरके सूत्रस्थाने द्वाविंशेऽध्याये ॥

"ज्वरे लङ्घनमेवादावुपदिश्यते ज्वरात् ।
क्षयानिलभयक्रोधकामशोकश्रमोद्भवात् ॥
आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तदा लङ्घनमाचरेत् ॥
अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥
प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ॥
तत्तु मारुतक्षुत्तृष्णामुखशोषभ्रमान्विते ।
कार्य्यं न बाले वृद्धे वा न गर्भिण्यां न दुर्ब्बले ॥
वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्रा क्लमे गते ॥
स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये ॥
कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि ॥
पर्व्वभेदोऽङ्गमर्द्दश्च कासः शोषो मुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः ॥
मनसः सम्भ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि ।
देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत् ॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

क्रमणम् । (यथा, कुमारे । ५ । ६४ ।

"यथा श्रुतं वेदविदांवर त्वया
जनोऽयमुच्चैः पदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥")

प्लवनम् । इति मेदिनी । ने, १२० ॥ अग्निलङ्घननिषेधो यथा,—

"न चाग्निं लङ्घयेद्धीमान्नोपदध्यादधः क्वचित् ।
न चैनं पादतः कुर्य्यात् मुखेन न धमेद्बुधः ॥"

इति कौर्म्मे उपविभागे १५ अध्यायः ॥

(अतिक्रमः । यथा, महाभारते । १ । १५८ । ३६ ।

"न चाप्यधर्म्मः कल्याण बहुपत्नीकृता नृणाम् ।
स्त्रीणामधर्म्मः सुमहान् भर्त्तुः पूर्व्वस्य लङ्घने ॥")

अश्वप्लुतीयगतिः । यथा,—

"प्लुतन्तु लङ्घनं पक्षिमृगगत्यनुहारकम् ।"

इति हेमचन्द्रः ॥ * ॥

(स्त्री, अवमानना । यथा, मार्कण्डेये । १३५ । ३३ ।

"अन्यस्यापि स्वयंशस्य लङ्घना क्रियते स्त्रिया ।
तां गालं क्षत्रियः सोढुं किं पुनः पितृमारणम् ॥")

लछ, लक्ष्मणि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लछति वृषं चक्रेण गोपः । इति दुर्गादासः ॥

लज, भर्त्सने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लजति । इति दुर्गादासः ॥

लज, इ भर्त्सने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लञ्जति । इति दुर्गादासः ॥

लज, इ क भाषार्थे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सक०च-सेट् ।) इ क, लञ्जयति । भा दीप्तिः षड्डार्थो निकेतनहिंसाबलदानानि । इति दुर्गादासः ॥

लज, क अन्तर्द्धौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) अन्तर्द्धिराच्छादनम् । क, लाजयति चन्द्रं मेघः । इति दुर्गादासः ॥

लज, ङ व्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ङ, लजते । निष्ठायां लग्न इत्यन्ये । इति दुर्गादासः ॥

लज, त् क भासने । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-अक०-सेट् ।) क, लजयति । भासनं दीप्तिः । इति दुर्गादासः ॥

लजकारिका, स्त्री, (लजं लज्जां करोतीव । कृ + ण्वुल् । टापि अत इत्वम् ।) लज्जालुलता । इति शब्दमाला ॥

लज्जा, स्त्री, (लज्जनमिति । लस्ज व्रीड़ने + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् ।) अन्तःकरणवृत्तिविशेषः । इति नागोजीभट्टः ॥ अकर्त्तव्ये कर्म्मणि परज्ञानभयम् । लाज् इति भाषा । तत्पर्य्यायः । मन्दाक्षम् २ ह्रीः ३ त्रपा ४ व्रीड़ा ५ । सा अन्यतश्चेत् अपत्रपा ६ । इत्यमरः ॥ मन्दास्यम् ७ लज्या ८ व्रीड़ः ९ व्रीड़नम् १० । इति शब्दरत्नावली ॥ (यथा, कुमारे । १ । ४८ ।

"लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्वालप्रियत्वं शिथिलं चमर्य्यः ॥")

लज्जालुः । इति राजनिर्घण्टः ॥

लज्जालुः, पुं, स्त्री, (लज्जेवास्या अस्तीत्यर्थे आलुः।) क्षुपविशेषः। तत्पर्य्यायः। रक्तपादी २ शमीपत्रा ३ स्पृक्का ४ खदिरपत्रिका ५ सङ्कोचिनी ६ समङ्गा ७ नमस्कारी ८ प्रसारिणी ९ सप्तपर्णी १० खदिरी ११ गण्डमालिका १२ लज्जा १३ लज्जिरी १४ स्पर्शलज्जा १५ असरोधिनी १६ रक्तमूला १७ ताम्रमूला १८ स्वगुप्ता १९ अञ्जलिकारिका २०। इति राजनिर्घण्टः॥ महाभीता २१ वशिनी २२ महौषधिः २३। इति शब्दचन्द्रिका॥ अस्या गुणाः। कटुत्वम्। शीतत्वम्। पित्तातिसारशोफदाहश्रमश्वासव्रणकुष्ठ-कफास्रनाशित्वञ्च॥ तद्भेदो यथा,—

"लज्जालुर्विपरीतान्या अल्पक्षुपबहुदला।
वैपरीत्या च लज्जालुर्ह्याभिधाने प्रयोजयेत्॥
लज्जालुर्वैपरीत्याहुः कटुरुष्णः कफापहृत्।
रसे नियामकश्चैव नानाविज्ञानकारकः॥"
इति राजनिर्घण्टः॥

अन्या हंसपादीशब्दे द्रष्टव्या॥ *॥ अपि च।

"लज्जालुः स्यात् शमीपत्रा समङ्गाञ्जलिकारिका।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि॥
लज्जालुः शीतला तिक्ता कषाया कफपित्तजित्।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत्॥"

अत लज्जालुभेदः।

"अलम्बुषा खरत्वक् च तथा मेदोगला स्मृता।
अलम्बुषा लघुः स्वादुः कृमिपित्तकफापहा॥"
इति भावप्रकाशः॥

अन्या दुग्धिकाशब्दे द्रष्टव्या॥

लज्जाशीलः, त्रि, (लज्जा शीलं स्वभावो यस्य।) लज्जाविशिष्टः। तत्पर्य्यायः। अपत्रपिष्णुः २। इत्यमरः॥ लज्जितः ३। इति शब्दरत्नावली॥

लज्जितः, त्रि, (लज्जा सञ्जातास्य। लज्जा+तारकादित्वात् इतच्।) लज्जायुक्तः। तत्पर्य्यायः। ह्रीणः २ ह्रीतः ३। इत्यमरः॥ (यथा, रघुः। १२। ७५।

"कामं जीवति मे नाथः इति सा विजहौ शुचम्।
प्राक् मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता॥")

लज्जिरी, स्त्री, लज्जालुः। इति राजनिर्घण्टः॥

लज्या, स्त्री, लज्जा। इति शब्दरत्नावली॥

लञ्ज, त् क भासने। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-अक०-सेट्।) क, लञ्जयति। भासनं दीप्तिः। इति दुर्गादासः॥

लञ्जः, पुं, (लञ्जयति शोभते इति। लञ्ज+अच्।) पदः। कच्छः। इति हेमचन्द्रः॥ पुच्छः। इति जटाधरः॥

लञ्जिका, स्त्री, (लञ्जयति शोभते इति। लञ्ज+ण्वुल्। टापि अत इत्वम्।) वेश्या। इति हेमचन्द्रः॥

लट, बाल्योक्त्योः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च-सेट्।) बालोऽज्ञः तस्य भावो बाल्यं व्यामोह इति यावत्। लटति लोकः शिशुः स्यात्। किञ्चिद्वदति वेत्यर्थः। इति दुर्गादासः॥

लटः, पुं, (लटति यथेच्छया वदतीति। लट+अच्।) प्रमादवचनम्। दोषः। इति विश्वः॥

लटकः, पुं, (लटतीति। लट्+"क्वुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति क्वुन्।) दुर्जनः। इत्युणादिकोषः॥

लटपर्णं, क्ली, (लटसुग्रं पर्णमस्य।) त्वचम्। इति राजनिर्घण्टः॥

लट्टः, पुं, दुर्जनः। इति शब्दरत्नावली॥

लट्वः, पुं, (लटतीति। लट+"अशूप्रुषिलटीति।" उणा० १। १५१। इति क्वन्।) जातिविशेषः। नेटुया इति भाषा॥ रागभेदः। तुरङ्गमः। इत्युणादिकोषः॥

लट्वा, स्त्री, (लट्+क्वन्। टाप्।) करञ्जभेदः। नाटाकरञ्जा इति भाषा। वाद्यभेदः। पक्षिविशेषः। ग्रामचटक इति ख्यातः। इति मेदिनी। वे, २२॥ कुसुम्भम्। इति हेमचन्द्रः॥ भ्रमरकः। भोडरी इति ख्यातः। इत्यमरभरतौ॥ (शिखी। इति हारावली। २५६॥ तूलिका। द्यूतम्। यथा,—

"लट्वा तु तूलिका ख्याता लट्वा द्यूतेऽपि दृश्यते॥"

इति व्याडिरभसौ।" इति उणादिवृत्तौ उज्ज्वलः। १। १५१॥)

लड, विलासे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) लडति बाला। इति दुर्गादासः॥

लड, इ कि भाषणे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) इ, लण्ड्यते। कि, लण्डयति लण्डति। भाषणं कथनम्। अयं केश्चिन्न मन्यते। इति दुर्गादासः॥

लड, ओ इ कि उत्क्षेपणे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) ओ, लण्डिनः। अनुबन्धबलादिमुत्यवधानेऽपि निष्ठातस्य नत्वम्। अस्मात् निष्ठायामिम् न स्यादित्येके। लड् इति। इ, लण्ड्यते। कि, लण्डयति लण्डति तण्डुलं लोकः। इति दुर्गादासः॥

लड, क उपसेवे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) उपसेव इह अत्यन्तपालनम्। क, लालयेत् पञ्चवर्षाणि पुत्त्रमिति अत्र डलयोरेकत्वाल्लत्वम्। कल्पनायामस्य प्रयोगः। इति रमानाथः। लाडयति लतां वायुः। इति दुर्गादासः॥

लड, क ङ वीप्से। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्। क ङ, लाडयते। लाभ एव इत्यन्य। विशेषेण आप्तुमिच्छा वीप्सा। इति दुर्गादासः॥

लड, त् क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-सक०-सेट्।) लडयति। अललाडत्। इति दुर्गादासः॥

लड, म उन्मन्थनजिह्वयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-क्वचित् पीडनादौ सक०-सेट्।) उन्मन्थनं पीडितीभावः उत्क्षिप्तीभावश्च। लडति लता वायुना पीडिता उत्क्षिप्ता वा स्यादित्यर्थः। जिह्वा तद्विषयक्रिया। लडति जिह्वा स्पन्दनवती स्यादित्यर्थः। म, लडयति। लडयति त्वचमुल्ललयत्यम्ननिति श्रीहर्षः। पीडयतीत्यर्थः। कवाटशौमिन्द्रः किरणलहरीमुल्ललयतीति मुरारिः। उत्क्षिपतीत्यर्थः। उभयत्र डलयोरेकत्वाल्लत्वम्। केचित्तु जिह्वोन्मन्थने इति पठित्वा जिह्वाया उन्मन्थनं उत्क्षेपणमिति व्याख्याय लडति जिह्वां सर्पं इत्येवोदाहरन्ति। इति दुर्गादासः॥

लड्हः, त्रि, मनोज्ञः। इति त्रिकाण्डशेषः॥

लड्डुः, त्रि, दुर्ज्जनः। इति शब्दरत्नावली॥

लड्डुकः, पुं, पिष्टकविशेषः। लाड़ु इति भाषा॥ यथा। लड्डुको दुर्ज्जरो गुरुः। इति राजवल्लभः॥ अपि च।

"तैलेन हविषा पक्वं भवेत् चूर्णञ्च लड्डुकः॥"
इति शब्दचन्द्रिका॥

लण्डं, क्ली, (लण्ड्यते उत्क्षिप्यते इति। लण्ड+घञ्।) पुरीषम्। ल्याड़ इति भाषा। यथा,—

"समेधमानेन स कृष्णबाहुना
निरुद्धवायुश्चरणांश्च निक्षिपन्।
प्रस्विन्नगात्रः परिवृत्तलोचनः
पपात लण्डं विसृजन् क्षितौ व्यसुः॥"

इति श्रीभागवते १० स्कन्धे ३७ अध्याये ८ श्लोकः॥ लण्डं पुरीषमुत्सृजन्। इति तट्टीकायां श्रीधरस्वामी॥

लण्डजः, त्रि, (लण्डे तदाख्यदेशे जायते इति। जन्+डः।) लण्डदेशजातः। यथा,—

"पूर्व्वाम्नाये नवशतं षड़शीतिः प्रकीर्त्तिताः।
फिरङ्गभाषया मन्त्रास्तेषां संसाधनात् भुवि॥
अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च लण्डजाश्चापि भाविनः॥"
इति मेरुतन्त्रे २३ प्रकाशः॥ *॥

लण्डस्तु अधुना लण्डन् इति ख्यातः। इंरेजानां राजधानी च॥

लत, घाते। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लता। इति दुर्गादासः॥

लता, स्त्री, (लतति वेष्टयते यान्यमिति। लत+पचाद्यच्। टाप्।) शाखादिरहिता गुडूच्यादिः। तत्पर्य्यायः। वल्ली २ व्रततिः ३। इत्यमरः॥ वल्लिः ४ वेल्लिः ५ प्रततिः ६। सा शाखापत्रसमायुक्ता चेत्प्रतानिनी। इति शब्दरत्नावली॥ तत्पर्य्यायः। वीरुत् २ गुल्मिनी ३ उलपः ४। इत्यमरः॥ *॥ अभायां वीरुधां छेदकर्त्तुर्निन्दी

यथा,—
"अप्सु तस्मिन्नहोरात्रे पूर्व्वं विशति चन्द्रमाः
ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात् ॥
छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे।
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ॥"
इति श्रीविष्णुपुराणे २ अंशे १२ अध्यायः ॥*॥
आश्रमे रोपणीया शुभदा लतादिर्यथा,—
"अलावुश्चापि कुष्माण्डं मायाम्बुश्च सुकासुकः।
खर्ज्जुरी कर्कटी चापि शिविरे मङ्गलप्रदा ॥
वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥
शाखा। प्रियङ्गुः। (अस्याः पर्य्यायो यथा,—
"प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया।
गुन्द्रा गुन्द्रफला श्यामा विष्वक् सेनाङ्गना-
प्रिया ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
स्पृक्का। (यथास्याः पर्य्यायः।
"तस्करोचारकश्चण्डो देवी स्पृक्का लता लघुः ॥"
इति वैद्यकरत्नमालायाम् ॥)
अशनपर्णी। इत्यमरः ॥ ज्योतिष्मती। (अस्याः पर्य्यायो यथा,—
"ज्योतिष्मती स्यात् कटभी ज्योतिष्का कङ्गनी-
नि च।
पारावतपदी पण्या लता प्रोक्ता ककुन्दनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लताकस्तूरिका। माधवी। दूर्व्वा। इति मेदिनी। ते, ५१-५२ ॥ कैवर्त्तिका। सारिवा। इति राजनिर्घण्टः ॥ (वृहती। तत्पर्य्यायो यथा,—
"भण्टाकी वृहती सिंही वार्त्ताकी राष्ट्रिका-
कुली।
प्रसहा रक्तपाका च लता वृहतिका परा ॥")
नारी। यथा,—
"नग्नां परलतां पश्यन् अयुतं यस्तु साधकः।
प्रजपेत् स भवेत् शीघ्रं विद्याया वल्लभः स्वयम् ॥"
इति तन्त्रसारे श्यामासाधनम् ॥
(तथा च नैषधे। १। ८५।
"नवा लता गन्धवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः।
दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यां दरकम्पिनी पपे ॥"
"नवा नवीना लता माधवीलता पक्षे नवा रम्या लता स्त्री।" इति तट्टीका ॥*॥ अप्सरोविशेषः। यथा, महाभारते। १। २१७। २०।
"अद्यञ्च सौरभेयी च समीची वुद्वुदा लता।
यौगपद्येन तं विप्रमभ्यगच्छाम भारत ! ॥")
लताकरञ्जः, पुं, (लतारूपः करञ्जः।) करञ्जविशेषः। काण्टकरेञ्ज इति हिन्दी भाषा। तत्पर्य्यायः। दुःस्पर्शः २ वीराख्यः ३ वज्रवीजकः ४ धनदाक्षी ५ कण्टफलः ६ कुवेराक्षी ७। अस्य पत्रगुणाः। कटुत्वम्। उष्णत्वम्। कफवातनाशित्वञ्च। तद्वीजगुणाः। दीपनत्वम्। पथ्यत्वम्। शूलगुल्मविषापहत्वञ्च। इति राजनिर्घण्टः ॥
लताकस्तूरिका, स्त्री, (लतारूपा कस्तूरी तद्वद्गन्धत्वात्। ततः स्वार्थे कन्।) लताकस्तूरी। तत्पर्य्यायः। कटुः २ दक्षिणदेशजा ३। अस्या गुणाः। तिक्तत्वम्। स्वादुत्वम्। वृष्यत्वम्। हिमत्वम्। लघुत्वम्। चक्षुष्यत्वम्। छेदनीत्वम्। श्लेष्मतृष्णावस्त्यास्यरोगनाशित्वञ्च। इति पथ्यापथ्यविवेकः ॥ अपि च।
"लताकस्तूरिका तिक्ता स्वाद्वी शीतास्य-
रोगनुत् ॥"
इति राजवल्लभः ॥
लताजिह्वः, पुं, (लतेव जिह्वा यस्य।) सर्पः। इति शब्दमाला ॥
लतातरुः, पुं, (लतेव दीर्घस्तरुः।) नारङ्गवृक्षः। तालवृक्षः। इति शब्दमाला ॥ शालवृक्षः। इति त्रिकाण्डशेषः ॥
लताद्रुमः, (लतेव द्रुमः दीर्घत्वात्।) लताशालः। तत्पर्य्यायः। तार्क्षः २ अश्वकर्णः ३ कुशिकः ४ वन्यः ५ दीर्घः ६। इति रत्नमाला ॥
लतापनसः, पुं, (लतायां पनसमिव फलमस्य।) फललताविशेषः। तरमुज् इति ख्यातः। तत्पर्य्यायः। चेलालः २ चित्रफलः ३ सुखाशः ४ राजतेमिसः ५ नाटाम्रः ६ सेतुः ७। इति त्रिकाण्डशेषः ॥
लतार्क्का, स्त्री, (लताप्रधाना स्पृक्का।) समुद्रान्ता। इति शब्दरत्नावली ॥ पिड़िंशाक इति भाषा ॥
लताप्रतानिनी, स्त्री, (लताप्रतानोऽस्त्यस्येति। इनिः।) शाखाप्रचयवती लता। तत्पर्य्यायः। वीरुत् २ गुल्मिनी ३ उलपः ४। इत्यमरभरतौ ॥ वीरुधा ५ वरुत् ६। इति शब्दरत्नावली ॥ प्रतानी ७ कक्षः ८। इति जटाधरः ॥
लताफलं, स्त्री, (लतायां फलमस्य।) पटोलः। यथा,—
"वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥
लताभद्रा, स्त्री, (लतया भद्रा यस्याः।) भद्रालीवृक्षः। इति शब्दमाला ॥
लतामणिः, पुं, (लतासदृशो मणिः।) प्रवालः। इति त्रिकाण्डशेषः राजनिर्घण्टश्च ॥ (प्रवालशब्देऽस्य विवरणं ज्ञातव्यम् ॥)
लतामरुत्, स्त्री, (लतायां मरुत् यस्याः।) स्पृक्का। इति शब्दरत्नावली ॥
लतामाधवी, स्त्री, (लताप्रधाना माधवी।) माधवीलता। इति शब्दरत्नावली ॥
लतायष्टिः, स्त्री, (लता यष्टिरिव।) मञ्जिष्ठा। इति शब्दमाला ॥
लतायावकं, स्त्री, (लतायां याव इव यस्य। कन्।) प्रवालम्। इति हारावली। ६१ ॥ (गुणादयोऽस्य प्रवालशब्दे ज्ञेयाः ॥)
लतारसनः, पुं, (लतेव रसना यस्य।) सर्पः। इति हारावली। १५ ॥
लतार्कः, पुं, (लता अर्क इव तीव्रा यस्य।) हरित्पलाण्डुः। तत्पर्य्यायः। द्रुद्रुमः २। इत्यमरः ॥
लतालकः, पुं, हस्ती। इति त्रिकाण्डशेषः ॥
लतावेष्टः, पुं, (लतयेव आवेष्टो वेष्टनं यत्र।) षोड़शरतिबन्धान्तर्गततृतीयबन्धः। यथा,—
"बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत्।
लघुलिङ्गताड़नं योनौ लतावेष्टोऽयमुच्यते ॥"
इति रतिमञ्जरी ॥*॥
पर्व्वतविशेषः। यथा,—
"अन्वेषयन् निरुद्धस्य चरान् व्यादिष्टवान् तदा।
अभ्यन्तरञ्च मार्गध्वं वाह्यतश्च समन्ततः ॥
वेणुमन्तं लतावेष्टं तथा रैवतकं गिरिम्।
ऋक्षवन्तं गिरिञ्चैव मार्गध्वं त्वरिता हयैः ॥"
इति हरिवंशे वाणयुद्धम् ॥
(पर्व्वतोऽयं द्वारकाया दक्षिणस्यां दिशि स्थितः। यथा, तत्रैव। १५५। १६।
"दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः ॥")
लतावेष्टितकं, स्त्री, (लतयेव वेष्टितं वेष्टनं यत्र। कन्।) आलिङ्गनभेदः। यथा, शब्दमालायाम्।
"उद्दृष्टकं पीड़ितकं लतावेष्टितकं तथा ॥"
लताशङ्खः, पुं, शालवृक्षः। इति शब्दरत्नावली ॥
लतासाधनं, स्त्री, (लतया स्त्रिया साधनम्।) योषिदधिकरणकेष्टदेवताराधनम्। तद्यथा,—
"लतायाः साधनं वक्ष्ये शृणुष्व हरवल्लभे।
शतं केशे शतं भाले शतं सिन्दूरमण्डले ॥
स्तनद्वन्द्वे शतद्वन्द्वं शतं नाभौ महेश्वरि।
शतं योनौ महेशानि उत्थाय च शतत्रयम् ॥
एवं दशशतं जप्त्वा सर्व्वसिद्धीश्वरो भवेत्।
अथान्यत् संप्रवक्ष्यामि साधनं भुवि दुर्लभम् ॥
रजोऽवस्थां समानीय तद्योनौ स्वेष्टदेवताम्।
पूजयित्वा महारात्रौ त्रिदिनं पूजयेत्ततुम् ॥
शतत्रयञ्च षट्त्रिंशदधिकं प्रत्यहं जपन्।
अष्टोत्तरंशतं पूर्व्वं चक्रवक्त्रे जपेद्बुधः ॥
ततस्तां नवभिः पुष्पैर्यजेदष्टोत्तरं शतम्।
ततः पूर्णाहुतिं दत्त्वा जपेदष्टोत्तरं शतम् ॥
धनवान् बलवान् वाग्मी सर्व्वयोषित्प्रियङ्करः।
षोड़शाहेन च भवेत् सत्यं सत्यं न संशयः ॥"
इति मायातन्त्रे १२ पटलः ॥
अन्यत् अन्नदाकल्पे १६ पटले गुप्तसाधनतन्त्रे ४ पटले च द्रष्टव्यम् ॥
लतिका, स्त्री, लता। इति लताशब्दात् स्वार्थे कन्प्रत्ययेन ष्णिकप्रत्ययेन वा निष्पन्नम् ॥
(यथा,—
"इयं सन्ध्या दूरादहमुपगतो हन्त मलयात्
तदेकां त्वद्गेहे विनयवति। नेष्यामि रजनीम्।
समीरेणोक्त्वैवं नवकुसुमिता चूतलतिका
धुनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥"
इत्युद्भटः ॥)

लत्तिका, स्त्री, (लत घाते + "क्षतिभिदिलतिभ्यः कित् ।" उणा० ३ । १४७ । इति तिकन् ।) गोधा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लप, ऋ भाषे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अलीलपत् अललापत् । भाषः कथनम् । इति दुर्गादासः ॥

लपनं, क्ली, (लप्यतेऽनेनेति । लप् + करणे ल्युट् ।) मुखम् । इत्यमरः ॥ (भावे ल्युट् ।) भाषणम् । इति लपधात्वर्थदर्शनात् ॥ (यथा, आर्य्यासप्तशत्याम् । ३८१ ।

"प्रकटयति रागमधिकं लपनमिदं वक्त्रिमाणमावहति ।
प्रीणयति च प्रतिपदं दूति शुकस्येव दयितस्य ॥"

"शुकस्येव दयितस्य लपनं सम्भाषणम् । पक्षे वदनम् ।" इति तट्टीका ॥)

लपितं, क्ली, (लप् + क्तः भावे ।) वचनम् । कथिते, त्रि । इत्यमरः ॥ (लपितमस्यास्तीति । अच् । वचनयुक्ते च त्रि । यथा, अथर्व्ववेदे । ४।३६।६।

"ये मा क्रोधयन्ति लपिता हस्तिनं मशका इव ।
तानहं मन्ये दुर्हितां जने अल्पशयूनिव ॥")

लप्सिका, स्त्री, खाद्यविशेषः । लप्सी । इति ख्याता । यथा,—

"समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत् ।
तस्मिन् घनीकृते न्यस्येत् लवङ्गमरिचादिकम् ।
सिद्धैषा लप्सिका ख्याता गुणानस्या वदाम्यहम् ॥
लप्सिका बृंहणी वृष्या बल्या पित्तानिलापहा ।
स्निग्धा श्लेष्मकरी गुर्व्वी रोचनी तर्पणी परम् ॥"

इति भावप्रकाशः ॥

लब, इ ङ संसने । शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अवलम्बने सक०-शब्दे अक०-सेट् ।) इ, लम्ब्यते । ङ, लम्बते । संसनमिहावलम्बनमिति गोविन्दभट्टः । ननाद चरणायुधस्तदपि मौनमालम्बसे । इति दुर्गादासः ॥

लब्धः, त्रि, (लभ् + क्तः ।) प्राप्तः । इत्यमरः ॥ (यथा, हितोपदेशे ।

"अलब्धञ्चैव लिप्सेत लब्धं रक्षेदपक्षयात् ।
रक्षितं वर्द्धयेत् सम्यक् वृद्धं तीर्थेषु निक्षिपेत् ॥")

लब्धवर्णः, पुं, (लब्धा वर्णा यशांसि येन ।) पण्डितः । इत्यमरः ॥ (यथा, रघुः । ११ । २ ।

"तत्कुललब्धमपि लब्धवर्णभाक्
तं दिदेश मुनये सलक्ष्मणम् ॥")

लब्धा, स्त्री, (लभ् + क्तः । टाप् ।) नायिकाभेदः । यथा,—

"खण्डितोत्कण्ठिता लब्धा तथा प्रोषितभर्तृका ।
कलहान्तरिता वाससज्जा स्वाधीनभर्तृका ॥"

इति जटाधरः ॥

लभ, इ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) इ, लम्भ्यते । ङ, लभते । इति दुर्गादासः ॥

लभ, ड औ ङ ष प्राप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अनिट् ।) डु, लब्धिमम् । औ, लब्धा । ङ, लभते । ष, लभा । लभन्ति पुनरुत्थानमिति गणकृतानित्यत्वादिति रमानाथः । वस्तुतस्तु लभते लभः पचादित्वादन् ततो लभ इवाचरतीति क्वौ साध्यम् । इति दुर्गादासः ॥

लभसः, पुं, (लभ् + "अत्यविचमीति ।" उणा० ३ । ११७ । इति असच् ।) वाजिबन्धनरज्जुः । इत्युणादिकोषः ॥ धनम् । याचकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लभ्यं, त्रि, (लभ्यते इति । लभ् + "पोरदुपधात् ।" ३ । १ । ९८ । इति यत् ।) न्याय्यम् । इत्यमरः ॥ लब्धव्यम् । इति मेदिनी । ये, ४३ ॥ (यथा, मुण्डकोपनिषदि । ३ । २ । ३ ।

"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")

लमकः, पुं, (रमते इति । रम् + "रमेरश्च लो वा ।" उणा० २ । ३३ । इति क्वुन् रस्य लत्वञ्च ।) षिड्गः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (तीर्थशोधकः । इत्युज्ज्वलः ॥ विलासिनि, त्रि । इति केचित् ॥)

लम्पटः, पुं, षिड्गः । इति लम्पाकशब्दार्थे मेदिनी । के, १४६ ॥ (यथा, कथासरित्सागरे । ४७ । १०९ ।

"अथेतराब्रवीन्नैवं यद्यपि स्त्रीषु लम्पटः ।
तथापि न स दुःखेऽस्मिन्नीदृशः स्यात्तथाविधः ॥")

आसक्तः । यथा,—

"यथेहिकामुष्मिककामलम्पटः
सुतेषु दारेषु धनेषु चिन्तयन् ।
शङ्केत विद्वान् कुकलेवरात्ययाद्-
यस्तस्य यत्नः श्रम एव केवलम् ॥"

इति श्रीभागवते ५ स्कन्धे १९ अध्यायः ॥

लम्पाकः, पुं, लम्पटः । देशभेदः । इति मेदिनी । के, १४६ ॥ (यथा, मार्कण्डेये । ५७ । ४० ।

"लम्पाकाः शूलकाराश्च चुलिका जागुडैः सह ।
औपधाश्चानिभद्राश्च किरातानाञ्च जातयः ॥")

लम्पाटहः, पुं, पटहवाद्यम् । इति हारावली ॥

लम्फः, पुं, प्लुतगतिः । लाफ इति भाषा । इति प्रसिद्धः ॥ उल्लस्फनं प्रलम्फनञ्चात्र ॥

लम्बः, पुं, (लम्बते इति । लबि अवसंसने + अच् ।) नर्त्तकः । अङ्गम् । कान्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥ उत्कोचः । यथा,

"प्राभृतं ढौकनं लम्बोत्कोचः कौशलिकामिषे ।
उपाचारः प्रदानन्दा हारो ग्राह्यायने अपि ॥"

इति हेमचन्द्रः ॥

अचभेदः । यथा,—

"चरलम्बगमा भेदाः पाटकोऽचादिपातने ॥"

इति शब्दमाला ॥

क्षेत्रादौ लम्बमानरेखा सूत्रं वा । यथा,—

"त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवाहृतो लब्धा ।
द्विस्था भूरूनयुता दलिताबाधे तयोः स्याताम् ॥
स्वाबाधाभुजकृत्योरन्तरमूलं प्रजायते लम्बः ।
लम्बगुणं भूम्यर्द्धं स्पष्टं त्रिभुजे फलं भवति ॥"

उदाहरणम् ।

"क्षेत्रे मही मनुमिता त्रिभुजे भुजौ तु
यत्र त्रयोदशतिथिप्रमितौ हि यस्य ।
तत्रावलम्बकमथो कथयाऽवबाधे
क्षिप्रं तथा च समकोष्ठमितिं फलाख्याम् ॥"

न्यासः । भूः १४ भुजौ १३ । १५ लब्धे आबाधे ५ । ९ । लब्धो लम्बश्च १२ क्षेत्रफलञ्च ८४ । इति लीलावती ॥ (दैत्यविशेषः । यथा, हरिवंशे । ४३ । २२ ।

"लम्बस्तु लम्बमेघाभः प्रलम्बाम्बरभूषणः ।
दैत्यव्यूहगतो भाति सनीहार इवांशुमान् ॥")

त्रि, दीर्घः । लम्बा इति भाषा । यथा,—

"दूरतः शोभते मूर्खो लम्बशाटपटावृतः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥"

इति चाणक्यशतकम् ॥

(लम्बमानः । यथा, रघुः । ६ । ६० ।

"पाण्ड्योऽयमंसार्पितलम्बहारः
कॢप्ताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः ॥")

लम्बकर्णः, पुं, (लम्बौ कर्णौ यस्य ।) छागः । अङ्कोटवृक्षः । इति मेदिनी । णे, १०७ ॥ राक्षसः । हस्ती । इति शब्दरत्नावली ॥ श्येनपक्षी । इति राजनिर्घण्टः ॥ (शशः । तद्यथा, अथ विलेशयेषु तत्र शशः स्यात् ।

"लम्बकर्णः शशः शूली लोमकर्णो विलेशयः ॥"

इति वैद्यकम् ॥

लम्बःकर्णः इति कर्म्मधारये ।) दीर्घश्रोत्रम् ॥ तद्युक्ते, त्रि । (यथा, महाभारते । ९ । ४६ । ३४ ।

"लम्बोदर्य्यो लम्बकर्णास्तथा लम्बपयोधराः ॥")

लम्बकेशः, पुं, (लम्बः केश इवाग्रभागो यस्य ।) विष्टरः । स तु विवाहकाले वरोपवेशनार्थं सार्द्धहितयवामावर्त्तवलिताधोमुखा असंख्यातदर्भाः । यथा,—

"ऊर्द्धकेशो भवेत् ब्रह्मा लम्बकेशस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥"

इति संस्कारतत्त्वम् ॥

केशोऽत्राग्रम् । इति प्रायश्चित्ततत्त्वे गङ्गामाहात्म्ये प्रतिनिहितदर्भवटुस्नानप्रकरणे लिखितम् ॥ * ॥ दीर्घकेशयुक्ते, त्रि ॥

लम्बदन्ता, स्त्री, (लम्बा दन्ता इव फलानि यस्याः ।) सैंहलीपिप्पली । इति राजनिर्घण्टः ॥ दृढदशनविशिष्टे, त्रि ॥

लम्बनं, क्ली, (लम्बते इति । लम्ब + ल्युः ।) नाभिलम्बितकण्ठिकादिः । तत्पर्य्यायः । ललन्तिका २ । इत्यमरः ॥ लम्बते लम्बनं नन्द्यादित्वादनः । इति तट्टीकायां भरतः ॥ (लम्ब + भावे ल्युट् ।) लम्बशब्दार्थश्च ॥

लम्बनः, पुं, (लम्बते इति । लम्ब + ल्युः ।) कफः । इति शब्दचन्द्रिका ॥

लम्बबीजा, स्त्री, (लम्बानि बीजानि यस्याः ।) सैंहलीपिप्पली । इति राजनिर्घण्टः ॥

लम्बमानं, त्रि, लम्बायमानवस्तु । लम्बधातोः कर्त्तरि शानच्प्रत्ययेन निष्पन्नम् ॥

लम्बा, स्त्री, लक्ष्मीः । गौरी । तिक्ततुम्बी । इति मेदिनी । वे, ६ ॥ दक्षकन्याविशेषः । यथा,—

"अरुन्धतीं वसुं यामीं लम्बां भानुं मरुत्वतीम् ।
सङ्कल्पाञ्च मुहूर्त्ताञ्च साध्यां विश्वाञ्च भारत ।
मनवे दक्षपुत्राय दश एता ददौ प्रभुः ॥"

इति हरिवंशे अधिपतिस्थापनम् ॥

हिमालयकन्याविशेषः । यथा,—

"ततस्तस्य वचः श्रुत्वा देवीलम्बामथाब्रवीत् ।
गच्छस्व लम्बे शीघ्रं त्वं वायसंरक्षणं कुरु ॥
ततो योगं समाधाय बहुशा हिमवत्सुता ।
छायस्यैकस्य तद्रूपं दर्शयत् पार्श्वमागता ॥
सान्तर्द्धानमुपागम्य त्यक्ता सा वासवी पुनः ।
परित्राणाय बाणस्य विजयाधिष्ठिता ततः ॥
प्रमुखे वासुदेवस्य दिग्वासाः कोट्टवी स्थिता ।"

इति महाभारते हरिवंशे बाणयुद्धम् ॥

लम्बिका, स्त्री, (लम्बते या । लम्ब + ण्वुल् । टापि अत इत्वम् ।) तालूर्द्ध्वस्थजिह्वा । तत्पर्य्यायः । घण्टिका २ । इति राजनिर्घण्टः ॥ सुधास्रवा ३ गलशुण्डिका ४ । इति हेमचन्द्रः ॥ अलिजिह्वा ५ अलिजिह्विका ६ । इति शब्दरत्नावली ॥

लम्बितः, त्रि, (लम्ब + क्तः ।) स्रंसितः । (यथा, गीतगोविन्दे । १२ । १८ ।

"त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय लोचने ॥")

शब्दितः । इति लवधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् । लम्बमानमाल्यादिश्च ॥ (यथा, महाभारते । ३ । १५७ । ४२ ।

"वद्धशोऽयं त्वया ग्रस्तः कालसूत्रेण लम्बितः ॥")

लम्बोदरः, पुं, (लम्बमुदरं यस्य ।) गणेशः । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । १६८ ।

"गतिगञ्जितवरयुवतिः करी कपोलौ करोतु मदमलिनौ ।
सुखबन्धमात्रसिन्धुर लम्बोदर किं मदं वहसि ॥"

नृपविशेषः । इति भागवतम् । १२ । १ । २२ ॥) औदरिके, त्रि । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । ७० । १०२ ।

"ततो लम्बोदरेणेत्थ पुंसारोपितबाहुकः ।
सम्पादितः स यतस्तदनं केशरिणीकृते ॥")

लम्बोष्ठः पुं, (लम्ब ओष्ठो यस्य । ओत्वोष्ठयोः समासे वा । इति साधुः ।) उष्ट्रः । इति राजनिर्घण्टः ॥ लम्बमानौष्ठयुक्ते, त्रि । (क्षेत्रपालदेवताविशेषः । यथा, प्रयोगसारे क्षेत्रपालप्रकरणे ।

"शुगान्तो बाह्यकश्चाथ लम्बोष्ठो वसवस्तथा ॥")

लम्बौष्ठः, पुं, (लम्ब ओष्ठो यस्य ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥ दीर्घोष्ठविशिष्टे, त्रि ॥

लम्भनं, क्ली, प्रतिलम्भः । इति हेमचन्द्रः ॥ ध्वनिः । लभि ङ शब्दे इत्यस्मात् भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नमिति ॥

लम्भा, स्त्री, (लभते इति । लभ इ ङ शब्दे + अच् । टाप् ।) वाटश्रृङ्खला । इति हारावली ॥

लय, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, लयते । इति दुर्गादासः ॥

लयः, पुं, (ली + अच् ।) विनाशः । संश्लेषः । तौर्य्यत्रिकस्य साम्यम् । इति मेदिनी । ये, ५२ ॥ प्रलयः । इति शब्दरत्नावली ॥ * ॥ अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा । इति श्रीपरमहंससदानन्दयोगीन्द्रकृतवेदान्तसारः ॥ तत्राद्यं विघ्नं लक्षयति लयस्तावदिति । लयो द्विविधः । चिरकालमुक्ताष्टाङ्गसहितनिर्विकल्पकसमाध्यभ्यासपाटवेनातितप्तलोहतलक्षिप्तजलबिन्दुवत् तैलरहितदीपकलिकावच्च प्रत्यगभिन्ने परमानन्दे चित्तवृत्तेर्लयः प्रथमः । द्वितीयस्तु मूर्च्छावस्थावत् आलस्येन चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहणाभावे सतिप्रत्यगात्मस्वरूपानवभासनात् वृत्तेस्तब्धीभावलक्षणनिद्रारूपः । इति श्रीनृसिंहसरस्वतीकृतसुबोधिन्याख्या तट्टीका ॥ गीतवाद्यपादन्यासानां क्रियाकालयोः परस्परं समता लयः । लीयन्ते श्लिष्यन्तेऽनेनेति लयन्ति मजन्ति साम्यं गीतादयोऽनेनेति वा लयः । ली ङ य ओ श्लिषि लय गत्यां वा अल् । इत्यमरटीकायां भरतः ॥ * ॥ लयस्थानविवर्ज्जनं गायकस्य चतुर्द्दशदोषान्तर्गतदोषविशेषो यथा,—

"लज्जितं भीतमुत्क्षिप्तं अव्यक्तमनुनासिकम् ।
काकस्वरः शिरःकम्पो लयस्थानविवर्ज्जितम् ॥
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् ।
आकुलं तालहीनञ्च गातुर्दोषाश्चतुर्दश ॥" * ॥

अथ लयाः । हृदि स्थितिः कण्ठस्थितिः कपालस्थितिरिति लयत्रयम् । अपरे तु ।

"द्विपदी स्यादनतिका भञ्जिका छिन्नखण्डिका ।
वामध्रुवस्ततश्छिन्ना खण्डधावा फड़ङ्कः ॥
जम्भटिका कलतिकः खण्डकः खुरिकस्तथा ।
कथितश्चतुरस्रोऽर्द्धचतुरस्रोऽथ नर्त्तकः ॥
भ्रमः षड्गन्दोलनावकुष्टा नन्दघटीत्यपि ।
कादम्बचर्व्वरी चट्टा मिश्रोऽर्द्धवनिता ततः ॥
अतिचित्रः समयश्च वलितोऽर्द्धदक्षस्तथा ।
आविद्धस्तु टक्कवकस्ततश्चित्रविचित्रकौ ॥
आम्नौ विकृतधावा च मुकुलोऽथ विलोलकः ।
रमणीयस्ततश्चैव करकण्टकसंज्ञकः ॥
चत्वारिंशदिमे प्रोक्ता लया लयविशारदैः ।
लयेन वश्यो भगवान् लये लीनो जनार्द्दनः ॥"

इति संगीतदामोदरः ॥

(त्रि, आवरणात्मकम् । इति श्रीधरस्वामी ॥ यथा, भागवते । ११ । २५ । १५ ।

"यदा जयेद्रजः सत्त्वं तमो मूढं लयं जड़म् ।
युज्येत शोकमोहाभ्यां निद्रया हिंसया शया ॥"

क्ली, लामज्जकम् । यथा,—

"लामज्जकं सुनालं स्याद्दमृणालं लयं लघुः ।
इष्टकापथकं सेव्यं नलदञ्चावदातकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लयपुत्री, स्त्री, (लयस्य पुत्रीव ।) नर्त्तकी । इति शब्दरत्नावली ॥

लयारम्भः, पुं, (लयस्यारम्भो यस्मात् ।) नटः । इति त्रिकाण्डशेषः ॥

लयालम्बः, पुं, (लयमालम्बते इति । लम्ब + अण् ।) नटः । इति शब्दरत्नावली ॥

लर्ब्ब, गतौ । (भ्वा०-पर०-सक०-सेट् ।) लर्ब्बति : इति सिद्धान्तकौमुदी ॥

लल, ङ क ईप्सायाम् । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, लालयते । ईप्सा आप्तुमिच्छा । इति दुर्गादासः ॥

लल, त् क ईप्से । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) ईप्सा इति आपधातोः सनन्तस्य रूपम् । शंस्याद इत्यकारेण सरूपोऽपि अल् कथं न बाध्यते इति चेन्न स्त्रीविहितप्रत्ययैः क्वचित् सरूपोऽपि न बाध्यते इत्यस्य बाध्यत्वात् अन्यथा कारणाकारणमित्यादयोऽपि न स्युः । एवं वक्ष्यमाणेषु व्रीड़ लज्जे इत्यादिष्वपि बोध्यम् । ललयति धनं लोकः । इति दुर्गादासः ॥

ललज्जिह्वः, पुं, (ललन्ती जिह्वा यस्य ।) उष्ट्रः । कुक्कुरः । हिंस्रे, त्रि । इति मेदिनी । वे, १६ ॥ (चलद्रसनायुक्ते च त्रि । यथा, कथासरित्सागरे । १०६ । १२७ ।

"तावच्च प्रकटीभूय भगवान् भैरवाकृतिः ।
उद्धृतासिर्ललज्जिह्वः कृत्वा हुंकारमभ्यधात् ॥")

ललत्, त्रि, विलासयुक्तः । उन्मन्थनविशिष्टः । जिह्वाक्रियाविशिष्टः । क्षेपविशिष्टः । वीप्साविशिष्टः । उपसेवाविशिष्टः । भाषणविशिष्टः । कृतक्षेपविशिष्टः । इति लडधातोः कर्त्तरि शतृप्रत्ययेन डस्य लकारादेशेन च निष्पन्नम् ॥

ललदम्बुः, पुं, (ललत् चलदम्बु यत्र ।) लिम्पाकः । इति जटाधरः ॥ (विषयोऽस्य लिम्पाकशब्दे ज्ञेयः ॥)

ललनं, क्ली, (लल + ल्युट् ।) केलिः । इति हेमचन्द्रः ॥ चालनम् । इति नागोजीभट्टः ॥ यथा,—

"काली करालवदना विनिष्क्रान्तासिपाशिनी ।
विचित्रखट्टाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा ।
अतिविस्तारवदना जिह्वाललनभीषणा ॥"

इति देवीमाहात्म्यम् ॥

ललनः, पुं, (लल्यते ईप्स्यते इति । लल + कर्म्मणि ल्युट् ।) सालः । सालः । प्रियालः । इति राजनिर्घण्टः ॥

ललना, स्त्री, (ललयति ईप्सति कामानिति। लल+ल्युः। टाप्।) कामिनी। (यथा कला-विलासे। १। ५।

"रतिलुलित ललित ललनाक्षमजल लवबाहिन सुहृयँश्च।
अथ केशकुसुम परिमल वासितदेहा यहत्य-निलाः॥")

नारीभेदः। जिह्वा। इति मेदिनी। ने, १२९॥

ललनाप्रियं, क्ली, (ललनानां प्रियम्।) ह्रीवेरम्। इति राजनिर्घण्टः॥

ललनाप्रियः, पुं, (ललनानां प्रियः।) कदम्बः। इति राजनिर्घण्टः॥ कामिनीवल्लभश्च॥

ललन्तिका, स्त्री, (ललन्त्येव। स्वार्थे कन्।) नाभिलम्बकण्ठिकादिः। तत्पर्य्यायः। लम्बनम् २। इत्यमरः॥ गोधा। इति शब्दमाला॥

ललाकः, पुं, मेढ्रनम्। इति शब्दचन्द्रिका।

ललाटं, क्ली, (ललं ईप्सामटति व्याप्नोतीति। अट्+अण्।) अवयवविशेषः। कपाल इति ख्यातम्। तत्पर्य्यायः। अलिकम् २ गोधिः ३। इत्यमरः॥ महाशङ्खः ४ शङ्खः ५ भालः ६ कपालकः ७ अलीकम् ८। इति शब्दरत्नावली॥ ललाटकम् ९। इति धनञ्जयः॥ तस्य शुभाशुभ-लक्षणम्। यथा,—

"उन्नतैर्विपुलैः शङ्खैर्ललाटैर्विषमैस्तथा।
निर्द्धना धनवन्तश्च अर्द्धेन्दुसदृशैर्नराः॥
आचार्य्याः शुक्तिविशालैः शिरालैः पापकारिणः।
उन्नताभिः शिराभिस्तु स्वस्तिकाभिर्धनेश्वराः॥
निम्नैर्ललाटैर्वधार्हाः क्रूरकर्मरतास्तथा।
संवृतैश्च ललाटैश्च कृपणा उन्नतैर्नृपाः॥
ललाटोपस्थितास्तिस्रो रेखाः स्युः शतवर्षिणाम्।
नृपत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ॥
अरेखेणायुर्नवतिर्विच्छिन्नाभिश्च पुंश्चलाः।
केशान्तोपगताभिश्च अशीत्यायुर्नरो भवेत्॥
पञ्चभिः सप्तभिः षड्भिः पञ्चाशद्वृत्तभिस्तथा।
चत्वारिंशच्च वक्राभिस्त्रिंशद्भूलग्नगामिभिः॥
विंशतिर्वामवक्राभिरायुः क्षुद्राभिरल्पकम्।
न पृथु बालेन्दुनिभे भ्रुवौ चाय ललाटकम्॥
शुभमर्द्धेन्दुसंस्थानमतुङ्गं स्यादलोमशम्॥"

इति गारुडे ६५ अध्यायः॥

("अतःपरं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरपृष्ठ-नाभिललाटनासाचिबुकबस्तिग्रीवा इत्येता एकै-काः।" इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)

ललाटकं, क्ली, (ललाटमेव। कन्।) प्रशस्त-ललाटम्। इति शब्दरत्नावली॥ ललाट-मात्रम्। इति धनञ्जयः॥

ललाटन्तपः, त्रि, (ललाटं तपतीति। ललाट+तप+"असूर्य्यललाटयोर्दृशितपोः।" ३। २। ३६। इति खश्। मुम्।) ललाटतापकः। "ललाटन्तपः सूर्य्यः।" इति सिद्धान्तकौमुदी॥ (यथा, रघुः। १३। ४१।

"हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसप्तसप्तिः।
असौ तपस्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः॥"

यथा च, नैषधे। १। १३८।

"कथं विधातर्मयि पाणिपङ्कजात्
तव प्रिया शैत्यमृदुत्वशिल्पिनः।
वियोक्ष्यसे वल्लभयेति निर्गता
लिपिर्ललाटन्तपनिष्ठुराक्षरा॥")

ललाटिका, स्त्री, (ललाटे भवोऽलङ्कारः। "कर्ण-ललाटात् कनलङ्कारे।" ४। ३। ६५। इति कन्।) स्वर्णादिरचितललाटाभरणम्। टिका इति ख्याता। तत्पर्य्यायः। पत्त्रपाश्या २। इत्यमरः॥ लालाटस्थचन्दनम्। तत्पर्य्यायः। शुक्लवर्ती २। इति शब्दरत्नावली॥ (तिलकः। इति मल्लिनाथः॥ यथा, कुमारे। ५। ५५।

"तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका।
न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि॥")

ललाम, [न्] क्ली, ललामम्। यथाह रुद्रः।

"प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु।
भूषावाजिप्रभावेषु ललामं स्यात् ललाम च॥"

(प्रधाने। यथा, रघुः। ५। ६४।

"तत्र स्वयंवरसमाहृतराजलोकं
कन्याललाम कमनीयमजस्य लिप्सोः॥"

पुरुषः। इति रघुटीकायां मल्लिनाथधृत-यादवः। ५। ६४॥)

ललामं, क्ली, (लड विलासे+क्विप्। तं अमति प्राप्नोतीति। अम गतौ+घञ्। डस्य लत्वम्।) चिह्नम्। ध्वजः। शृङ्गम्। प्रधानम्। भूषा। (यथा, भागवते। ३। १४। ४८।

"पौत्रस्तव श्रीललनाललामं
द्रष्टा स्फुरत् कुण्डलमण्डिताननम्॥")

वालधिः। पुण्ड्रम्। तुरङ्गः। प्रभावः। इति मेदिनी। मे, ५१। अश्वललाटे अश्ववर्णचिह्नम्। गवादीनां ललाटचित्रम्। अश्वस्य भूषा। इत्यमरटीकायां भरतः॥ (पुंनपुंसकलिङ्गमपि। यथा,—

"ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे।
श्रेष्ठभूषापुण्ड्रशृङ्गपुच्छचिह्नाश्वलिङ्गिषु॥"

इति रघुटीकायां मल्लिनाथधृतयादवः॥ रम्ये श्रेष्ठे च त्रि। यथा, महाभारते। ७। २२। १९।

"ललामैर्हरिभिर्युक्ताः सर्वशब्दसहैर्युधि।
राज्ञां मध्ये महेष्वासः शान्तभीरभ्यवर्त्तत॥")

ललामकं, क्ली, पुरोन्यस्तमाल्यम्। इत्यमरः॥ तदेव माल्यं पुरः संमुखभागे न्यस्तं ललाटपर्य्यन्त-मागतं ललामकं ललामं तिलकमिव इति इवार्थे कः। इति भरतः॥

ललामी, स्त्री कर्णभूषणविशेषः। तत्पर्य्यायः। उत्क्षिप्तिका २। इति शब्दमाला॥

ललितं, क्ली, (लल+क्तः।) शृङ्गारभावजक्रिया-विशेषः। इत्यमरः॥ सुकुमारविधानेन भू-नेत्रादिक्रियासञ्चिवकरचरणाङ्गविन्यासो ललि-तम्। तथा च।

"सुकुमाराङ्गविन्यासो मसृणो ललितं भवेत्॥"

तथा,—

"सभ्रूभङ्गं करकिसलयावर्त्तनैरालपन्ती
सा पश्यन्ती ललितललितं लोचनस्याञ्चलेन।
विन्यस्यन्ती चरणकमले लीलया स्वैरयाते
निःसङ्गीतं प्रथमवयसा नर्त्तिता पङ्कजाक्षी॥
भ्रूनेत्रादिक्रियाशालिसुकुमारविधानतः।
हस्तपादाङ्गविन्यासस्तरुण्या ललितं विदुः॥"

इत्यन्येऽपि॥

"अनाचार्य्योपदिष्टं स्याल्ललितं रतिचेष्टितम्।"

इत्यन्ये।

ललत् केन्चि भावे क्तः। लड विलासे इत्यस्य मनीषादित्वात् डस्य लत्वं वा। इति भरतः॥ अपि च।

"विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा।
सुकुमारा भवेद्यत्र ललितं तदुदीरितम्॥"

इत्युज्ज्वलनीलमणिः॥

ललितः, पुं, (लल्यते ईप्स्यते इति। लल+कर्म्मणि क्तः।) रागविशेषः। तस्य स्वरूपं यथा,—

"प्रफुल्लसप्तच्छदमाल्यधारी
युवातिगौरोऽलसलोचनश्रीः।
विनिःसरन् वासगृहात् प्रभाते
विलासिवेशो ललितः प्रदिष्टः॥"

तस्य गानसमयो यथा,—

"प्रातर्गेयास्तु देशाखी ललितः पटमञ्जरी।
विभासा भैरवी चैव कामोदो गोण्डकीत्यपि॥"

इति सङ्गीतदामोदरः॥

ललितः, त्रि, (लल+क्तः।) सुन्दरः। (यथा, रघुः। ८। १।

"अथ तस्य विवाहकौतुकं
ललितं बिभ्रत एव पार्थिवः॥")

ईप्सितः। इति मेदिनी। ते, १४७॥ चलितः। इति विश्वशब्दरत्नावल्यौ॥

ललितकान्ता, स्त्री, (ललिता कान्ता च।) मङ्गल-चण्डिका। तस्या ध्यानं यथा,—

"एषा ललितकान्ताख्या देवी मङ्गलचण्डिका।
वरदाभयहस्ता च द्विभुजा गौरदेहिका॥
रक्तकौशेयवस्त्रा च स्मितवक्त्रा शुभानना।
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा॥"

इति तिथ्यादितत्त्वम्॥

ललिता, स्त्री, (ललित+टाप्।) कस्तूरी। दारी। इति राजनिर्घण्टः॥ नदीविशेषः। यथा,—

"निमिनामस्तु राजर्षिः शापाद्ब्रह्मसुतः पुरा।
वशिष्ठो ह्यशरीरोऽभूत् शापाच्च निमिनस्तथा॥
ततो ब्रह्मोपदेशेन निर्जने कामरूपके।
सन्ध्याचले तपस्तेपे तस्य विष्णुरभूत्तदा॥
प्रत्यक्षस्तस्य देवस्य वरदानमहाद्युतिः।
अमृतान्यवतार्य्याशु कुण्डं कृत्वा गिरेस्तटे।
तत्र स्नात्वा च पीत्वा च शरीरं प्राप पूरितम्॥
तस्मादमृतकुण्डात्तु सम्भवा नाम नदी वरा।

निःसृता तत्र चाप्लुत्य चिरायुरगदो भवेत् ॥
तस्मात् पूर्व्वन्तु कुण्डात्तु ललिताख्या सरिद्वरा ।
सागरादृच्चिणात् पूर्व्वं महादेवावतारिता ॥
वैशाखशुक्लपक्षस्य तृतीयायां नरस्तु यः ।
कुर्य्याद्वै ललितास्नानं स शम्भुसदनं व्रजेत् ॥
ललितायाः पूर्व्वतीरे भगवान्नाम पर्व्वतः ।
स्वयं विष्णुर्लिङ्गरूपी तत्रास्ते भगवान् हरिः ॥
ललितायां नरः स्नात्वा द्वादश्यां शुक्लपक्षके ।
भगवन्तं समारुह्य यो यजेत् परमेश्वरम् ।
स याति विष्णुभवनं शरीरेण विराजता ॥”
इति कालिकापुराणे ८१ अध्यायः ॥ * ॥

गोपीविशेषः । यथा,—
“अखिलरसामृतमूर्त्तिः
प्रसृमररुचिरुद्धतारका पालिः ।
कलितश्यामा ललितो
राधाप्रेयान् विधुर्जयति ॥
इति भक्तिरसामृतसिन्धुः ॥

ललिता श्यामला शैव्या पद्मा भद्रा च श्रूयन्ते ॥ इति तट्टीकायां जीवगोस्वामी ॥ तस्याः स्वरूपं यथा,—
“या दुर्गा सैव ललिता ललिता सैव राधिका ।
एतासामन्तरं नास्ति सत्यं सत्यं हि नारद ! ॥”
इति पाद्मे पातालखण्डे रासलीलायां नारदं प्रति श्रीकृष्णवाक्यम् ॥ रागिणीविशेषः । सा च मेघरागस्य पत्नी । यथा, सङ्गीतदामोदरे ।
“ललिता मालसी गौड़ी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥”
(सा तु हनूमन्मते हिन्दोलरागस्य पत्नी । सोमेश्वरमते वसन्तस्य पत्नी । यथा, संगीतदर्पणे ।
“वेलावली रामकिरी देशाख्या पटमञ्जरी ।
ललिता सहिता एता हिन्दोलस्य वराङ्गनाः ॥”
“देशी देवकिरी चैव वराटी तोड़िका तथा ।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गनाः ॥”
अस्या ध्यानादिकमाह तत्रैव । अथ ललिता ।
“रि-प-वर्ज्या च ललिता औड़वा सत्रया मता ।
मूर्च्छना शुद्धमध्या स्यात् सम्पूर्णा केचिदूचिरे ।
धैवतत्रयसंयुक्ता द्वितीया ललिता मता ॥”
ध्यानम् । यथा,—
“प्रफुल्लसप्तच्छदमाल्यकण्ठा
सुगौरकान्तिर्युवती सुदृष्टिः ।
विनिश्वसन्ती सहसा प्रभाते
विलासवेशा ललिता प्रदिष्टा ॥”
उदाहरणम् । स ग म ध नि स ।
अथवा,—
स रि ग म प ध नि स । इति प्रथमा ॥
ध नि स ग म ध । इति द्वितीया ॥
इति ललिता ॥)

ललितासप्तमी, स्त्री, (ललिताख्या सप्तमी ।) भाद्रशुक्लसप्तमी । तत्र कुक्कुटीव्रतं कार्य्यम् । यथा भविष्ये ।
“भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या ।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम् ।
पूजयेच्च तदा तस्यां दुष्प्रापं नैव विद्यते ॥”
इति कुक्कुटीव्रतत्वेन ख्यातम् । इति तिथ्यादितत्त्वम् ॥ * ॥

तद्विधिर्यथा । तत्रादौ स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । ॐ अद्येत्यादि भाद्रे मासि शुक्ले पक्षे सप्तम्यान्तिथौ यावज्जीवनपर्य्यन्तं अमुकगोत्रा श्रीमदमुकी शिवदुर्गाप्रीतिकामा प्रतिवर्षीयभाद्रशुक्लसप्तम्यां गणेशादिदेवतापूजापूर्व्वकशिवपार्व्वतीपूजायावज्जीवनडोरकधारणभविष्यपुराणोक्तव्रतकथाश्रवणरूपललितासप्तमीव्रतमहं करिष्ये । ततः सङ्कल्पसूक्तं पठित्वा सामान्यार्घ्यं विधाय गणेशादीन् संपूज्य भूतशुद्ध्यादिकं विधाय मण्डलादिषु पूजामारभेत । ततो ध्यात्वा स्वशिरसि पुष्पं दत्त्वा मानसोपचारैः संपूज्य अर्घ्यं संस्थाप्य पुनर्ध्यात्वा आवाहयेत् । शिवपूजाविधिना शिवं दुर्गापूजाविधिना दुर्गाञ्च यथाशक्त्युपचारैः संपूज्य आवरणदेवान् पूजयेत् । ततोऽष्टग्रन्थियुक्तडोरकं दुग्धेन सिक्तं शिवदुर्गाभ्यां अर्पयित्वा तत् डोरकं वामकरे बद्ध्वा भोज्यसुतहृष्य कथां शृणुयात् । अष्टफलानि दद्यात् । ततो दक्षिणां दद्यात् ॥ * ॥ अथ कथा ।

श्रीकृष्ण उवाच ।
“लोमशो नाम देवर्षिर्मथुरामागतः पुरा ।
सोऽर्च्चितो वसुदेवेन देवक्या च युधिष्ठिर ! ॥
उपविष्टः कथाः पुण्याः कथयामास वै तदा ।
ततः कथयितुं भूयः कथामेतां प्रचक्रमे ॥
कंसेन निहताः पुत्त्रा जाता जाताः पुनः पुनः ।
मृतवत्सा देवकि ! त्वं पुत्त्रदुःखेन दुःखिता ॥
यथा चन्द्रमुखी दीना बभूव नहुषप्रिया ।
तथा त्वं देवकी भद्रे पुत्त्रदुःखेन दुःखिता ॥
पश्चाच्चीर्णव्रता सा तु बभूवाक्षयपुत्त्रिका ।
त्वमेव देवकी देवि ! भविष्यसि न संशयः ॥
देवक्युवाच ।
का सा चन्द्रमुखी दीना बभूव नहुषप्रिया ।
कथं चीर्णव्रतं सम्यक् तस्याः सन्ततिकारणम् ॥
लोमश उवाच ।
अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः ।
तस्य राज्ञो महादेवी नाम्ना चन्द्रमुखी प्रिया ॥
पुरोहितस्य तस्यैव पत्नी माला च नामिका ।
तयोरासीद्दृढप्रीतिः स्पृहणीया परस्परम् ॥
अथ तेऽपि च मित्रिण्यौ स्नानार्थं सरयूजले ।
प्राप्ते प्राप्तास्तु तत्रैव बहुशो नगराङ्गनाः ॥
स्नातास्ता मण्डलं चक्रुस्तन्मध्ये व्यक्तरूपिणम् ।
लेखयित्वा शिवं शान्तमुमया सह शङ्करम् ॥
गन्धपुष्पाक्षतैर्भक्त्या पूजयित्वा यथाविधि ।
प्रणम्य शिरसा भक्त्या दृष्टास्ताभ्यां वरस्त्रियः ॥
किमिदं क्रियते साध्व्यः कथ्यतां यदि रोचते ।
कदा वा क्रियते किं वा फलं सम्यक् तदुच्यताम् ॥
स्त्रिय ऊचुः ।
पूजितोऽस्माभिरेतस्मिन् पार्व्वत्या सह शङ्करः ।
बद्धा सूत्रमिदं शुभ्रं शिवस्यात्मा निवेदितः ॥
धारणीयमिदं तावद्यावत् प्राणस्य धारणम् ।
तासान्तु तद्वचः श्रुत्वा ते कृत्वा मानसं तथा ॥
कृत्वा च सम्मतिं तत्र बद्धा दोर्भ्यां सुडोरकम् ।
ततस्ताः स्वगृहं जग्मुः सखीभिः परिवारिताः ॥
कालेन महता तत्र विस्मृतं तद्व्रतं नृप ! ।
प्रमत्तया चन्द्रमुख्या विस्मृतश्च सुडोरकम् ॥
मृता केषुचिदहोरात्रैः सा बभूव प्लवङ्गमी ।
माला च कुक्कुटी जाता त्वसम्यग्व्रतपालनात् ॥
तथैव ते च मित्रिण्यौ जाते जातिस्मरे कुले ।
सम्भूय भूयस्तत्रैव प्राप्तश्च समयः पुनः ॥
तद्दिने तद्दिने प्राप्ते पुनः काले च ते मृते ।
अद्वैधमातृके देशे जाते गोकुलसङ्कुले ॥
राज्ञो जाया बभूवाथ पृथ्वीनाथस्य सा पुनः ।
ईश्वरी नाम विख्याता सा तु राज्ञोऽतिवल्लभा ॥
अग्निमीलद्विजस्यासीद्भार्य्या भूषणनामिका ।
पुरोहितस्य कालेन कुक्कुटी बहुपुत्त्रिणी ॥
जातिस्मरा चाष्टपुत्त्रा तथैव चामृतप्रजा ।
पुनर्निरन्तरा प्रीतिर्बभूवाथ तयोर्द्विज ॥
तत्रेश्वरी पुत्त्रमेकं प्रसूता तच्च रोगिणम् ।
नववर्षे तु पञ्चत्वमगात्तत्र युधिष्ठिर ! ॥
तत्र तां भूषणा द्रष्टुमाजगामातिदुःखिता ।
सखीभावादतिस्नेहादष्टपुत्त्रसमन्विता ॥
अयुक्ताभरणा नित्यं स्वभावेनैव भूषिता ।
तां दृष्ट्वा पुत्त्रिणीं भर्य्यां प्रजज्वालेश्वरी रुषा ॥
ततो गृहं प्रेषयित्वा तां सखीं तीव्रमत्सरा ।
चिन्तयामास सा राज्ञी तस्याः पुत्त्रवधं प्रति ॥
हता हताश्च ये पुत्त्राः पुनर्जीवन्त्यनामयाः ।
बहुपुत्त्रा जीववत्सा प्रयुक्ताभरणा कथम् ।
शोभसे ह्यधिकं भद्रे तड़ित् सौदामिनी यथा ॥
भूषणोवाच ।
भाद्रे मासि सिते पक्षे सप्तम्यां ललितालये ।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम् ॥
संपूज्य विधिवत् प्राप्तं त्रैलोक्ये यच्च विद्यते ।
तदेव हि व्रतं पूर्व्वं त्वया सह मया कृतम् ॥
तन्मयाचरितं भक्त्या तेनाहं सुस्थिरा सखि ।
त्वया नाचरितं सम्यक् दर्पभ्रान्तशरीरया ॥
तेन ते सन्ततिच्छिन्ना राज्येऽपि सति दुःखिता ।
प्रभाव एष कथितो व्रतस्यास्य मया सखि ! ॥
अहं तुभ्यं प्रदास्यामि तस्य धर्म्मस्य सुव्रते ।
सखीभावात् प्रतीच्छ त्वं नात्र कार्य्या विचारणा ॥
संपूज्य शङ्करं भक्त्या करे बद्धा सुडोरकम् ।
यावज्जीवं मया तावत् शिवस्यात्मा निवेदितः ॥
इत्येवं समयं कृत्वा ततः प्रभृति डोरकम् ।
स्वर्णरूप्यमयं वापि करशाखासु धारणम् ॥
शङ्करस्योमया सार्द्धं सौवर्णं राजतन्तथा ।
ताम्रपात्रे प्रतिष्ठाप्य ब्राह्मणायोपपादयेत् ॥
पायसं पिष्टकञ्चैव भक्ष्यं भोज्यं प्रयत्नतः ।
सगोत्रान् भोजयित्वा तु स्वयं भुञ्जीत तत्परम् ॥
मण्डलं सोमसदृशं शिवस्यात्मनिवेदितम् ।
इत्येवं प्रतिजग्राह व्रतदानफलं ततः ॥

बभूव सुप्रजा साध्वी ईश्वरी भुवनेश्वरी।
व्रतस्यास्य प्रभावेन सुपुत्त्रा त्वञ्च देवकि ! ॥
भविष्यसि त्रिलोकेशं पुत्त्रञ्च जनयिष्यसि।
इत्येवं श्रावयित्वा च विरराम मुनिस्तदा ॥
जगाम स्वपुरं पार्थ मयाप्येवं तवोदितम्।
या: स्त्रिय: स्वाचरिष्यन्ति व्रतमेतद्युधिष्ठिर ॥
कुक्कुटाख्यं प्लवङ्गाख्यं देवश्याचरितं शुभम्।
तासां सन्ततिविच्छेदो न कदाचिद्भविष्यति ॥
स्त्रियश्चैवाचरिष्यन्ति व्रतमेतत् सुखप्रदम्।
अस्मिन् लोके सुखं भुक्त्वा यास्यन्ति शिवमन्दि-
रम् ॥

या कुक्कुटीव्रतमिदं प्लवगीसमेतं
देवं विभाव्य हृदये च गुरुं निधाय।
भक्त्या करोति कलुषौघविवासदक्षं
साध्वी सदा भवति शोभनजीववत्सा ॥"

इति भविष्यपुराणे कुक्कुटीव्रतकथा समाप्ता ॥

लवं, क्ली, (लू + अप्।) जातीफलम्। इति शब्दचन्द्रिका ॥ लवङ्गम्। लामज्जकम्। ईषत्। इति राजनिर्घण्ट: ॥

लव:, पुं, (लवनमिति। लू + अप्।) लेश:। (यथा, रघु: । १६ । ६६ ।
"वक्रेतराग्रैरलकैस्तरुण्य-
श्चूर्णारुणान् वारिलवान् वमन्ति ॥")
विनाश:। छेदनम्। रामपुत्त्र:। इति मेदिनी। वे, २९ ॥ अत्र विनाशस्थाने विलास:। इति विश्व: हेमचन्द्रश्च ॥ (रामपुत्त्रस्य जन्मविवरणादिकं रामायणे उत्तरकाण्डतो द्रष्टव्यम् ॥) कालभेद:। यथा,—
"अष्टादशनिमेषास्तु काष्ठा काष्ठाद्वयं लव: ॥"
इति हेमचन्द्र: ॥
(यथा, भागवते । १ । १८ । १३ ।
"तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्।
भगवत्सङ्गिसङ्गस्य मर्त्त्यानां किमुताशिष: ॥")
लावानामा पक्षी। इति राजनिर्घण्ट: ॥ (किञ्जल्क:। पक्ष:। गोपुच्छलोम। इति रघुटीकायां मल्लिनाथधृतवैजयन्ती ॥ यथा, रघु:। १५ । ३२ ।
"स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया।
कवि: कुशलवावेव चकार किल नामत: ॥")

लवङ्गं, क्ली, (लुनाति श्लेष्मादिकमिति। लू + "तरत्यादिभ्यश्च।" उणा० १ । ११६। इति अङ्गच्।) स्वनामख्यातवणिग्द्रव्यभेद:। तत्पर्य्याय:। देवकुसुमम् २ श्रीसंज्ञम् ३। इत्यमर: ॥ श्रीप्रसूनम् ४। इति भावप्रकाश: ॥ लवङ्गकम् ५। इति शब्दरत्नावली ॥ लवङ्गकलिका ६ दिव्यम् ७ शेखरम् ८ लवम् ९ श्रीपुष्पम् १० रुचिरम् ११ वारिसम्भवम् १२ भृङ्गारम् १४ गीर्व्वाणकुसुमम् १५ चन्दनपुष्पम् १६। अस्य गुणा:। शीतलत्वम्। तिक्तत्वम्। चक्षुष्यत्वम्। भुक्तरोचनत्वम्। वातपित्तकफनाशित्वम्। तीक्ष्णत्वम्। मूर्च्छारुजापहत्वञ्च। इति राजनिर्घण्ट: ॥ आध्मानानाहशूलघ्नत्वम्। दीपनत्वम्। लघुत्वञ्च। इति राजवल्लभ: ॥ अपि च।
"लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम्।
दीपनं पाचनं रुच्यं कफपित्तास्रनाशकृत् ॥
तृष्णां छर्द्दिं तथाध्मानं शूलमाशु विनाशयेत्।
कासं श्वासञ्च हिक्काञ्च क्षयं क्षपयति ध्रुवम् ॥"
इति भावप्रकाश: ॥
(यथा,—
"विरहानलसन्तप्ता तापिनी कापि कामिनी।
लवङ्गानि समुत्सृज्य गृहणे राहवे ददौ ॥"
इत्युद्भट: ॥)

लवङ्गकं, क्ली, (लवङ्ग + स्वार्थे कन्।) लवङ्गम्। इति शब्दरत्नावली ॥ (लवङ्गशब्देऽस्य विवरणं विज्ञेयम् ॥)

लवङ्गकलिका, स्त्री, लवङ्गम्। इति राजनिर्घण्ट: ॥

लवङ्गलता, स्त्री, (लवङ्गस्य लता।) पुष्पलताविशेष:। यथा, जयदेव:।
"ललितलवङ्गलतापरिशीलनकोमलमलय-
समीरे।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्ज-
कुटीरे।
विहरति हरिरिह सरसवसन्ते।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य
दुरन्ते ॥"
(यथा च।
"अयि ! प्लवङ्ग ! लवङ्गलतालये
पिब मधूनि विधूय मधुव्रतान्।
इह वने हि वनेचरसङ्कुले
नहि सतामसताञ्च विवेचना ॥")
राधाया: सखीविशेषश्च ॥

लवणं, क्ली, (लुनाति जाड्यमिति। लू + नन्द्यादित्वात् ल्यु:। पृषोदरादित्वात् णत्वम्।) क्षाररसयुक्तद्रव्यम्। तत्तु पञ्चविधं यथा। सौवर्च्चलम् १ सैन्धवम् २ विटम् ३ औद्भिदम् ४ सामुद्रम् ५। तथा हि।
"सामुद्रं यत्तु लवणमक्षीवं वसिरञ्च तत्।
सैन्धवोऽस्त्री शीतशिवं माणिमन्थञ्च सिन्धुजे ॥
रौमकं वसुकं पाक्यं विड़ञ्च कृतके द्वयम् ॥"
सौवर्च्चलेऽक्षरुचके। इत्यमर: ॥ (अस्य विवरणं यथा। "सैन्धवसामुद्रविड़सौवर्च्चलरौमकौद्भिदप्रभृतीनि लवणानि यथोत्तरमुष्णानि वातहराणि कफपित्तकराणि यथापूर्व्वं स्निग्धानि स्वादूनि सृष्टमूत्रपुरीषाणि चेति ॥
"चक्षुष्यं सैन्धवं हृद्यं रुच्यं लघ्वग्निदीपनम्।
स्निग्धं समधुरं वृष्यं शीतं दोषघ्नमुत्तमम् ॥
सामुद्रं मधुरं पाके नात्युष्णमविदाहि च।
भेदनं स्निग्धमीषच्च शूलघ्नं नातिपित्तलम् ॥
सक्षारं दीपनं रूक्षं शूलहृद्रोगनाशनम्।
रोचनं तीक्ष्णमुष्णञ्च विड़ं वातानुलोमनम् ॥
लघुसौवर्च्चलं पाके वीर्य्योष्णं विशदं कटु।
गुल्मशूलविबन्धघ्नं हृद्यं सुरभि रोचनम् ॥
रौमकं तीक्ष्णमत्युष्णं व्यवायि कटुपाकि च।
वातघ्नं लघु विस्यन्दि सूक्ष्मं विड्भेदि मूत्रलम् ॥
लघु तीक्ष्णोष्णमुत्क्लेदि सूक्ष्मं वातानुलोमनम्।
सतिक्तं कटु सक्षारं विद्याल्लवणमौद्भिदम् ॥
कफवातक्रिमिहरं लेखनं पित्तकोपनम्।
दीपनं पाचनं भेदि लवणं गुटिकाह्वयम् ॥
ऊषसूतं वालुकैलं शैलमूलाकरोद्भवम्।
लवणं कटुकं छेदि विहितं कटु चोच्यते ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याय: ॥ * ॥
लू + भावे ल्युट्।) छेदनम्। यथा। लवोऽभिलावो लवनं। इति चामर: (खड्गयुद्धप्रकारविशेष:। यथा, हरिवंशे भविष्यपर्व्वणि। ५३ । १७ ।
"आहितं चित्रकं चित्रं कुन्तवं लवणं धृतम् ॥"))

लवण:, पुं. (लुनातीति। लू + ल्यु:।) सिन्धुभेद:। (यथा, महाभारते। ६ । ५ । १५ ।
"लवणेन समुद्रेण समन्तात् परिवारित: ॥")
राक्षसविशेष:। रसविशेष:। इति मेदिनी। णे, ७४ ॥ (यथा, भागवते। ३ । ३१ । ७।
"कट्वीक्ष्णोष्णलवणक्षाराम्लादिभिरुल्बणै:।
मातृभुक्तैरुपस्पृष्ट: सर्व्वाङ्गोत्थितवेदन: ॥")
पृथिव्यग्निगुणबाहुल्याल्लवण:। इति चक्रपाणिदत्तकृतद्रव्यगुणोपरि शिवदासीयटीका ॥ तत्पर्य्याय:। पटु: २। तस्य गुणा:।
"लवणो रुचिकृद्रसोऽभिदायी
पचन: स्वादुकरश्च सारकश्च।
रचितो नितरां जराञ्च पित्तं
शिथिमानञ्च ददाति कुष्ठकारी ॥"
इति राजनिर्घण्ट: ॥
अपि च।
"लवण: क्लेदनस्तीक्ष्ण: पाचनो दीपन: सर:।
स्निग्धो रुचिकर: स्यन्दी हरिशुक्रहरो लघु: ॥"
अन्यच्च।
"लवण: शोधनो रुच्य: पाचन: कफपित्तद:।
पुंस्त्ववातहर: कायशैथिल्यमृदुताकर:।
सोऽतियुक्तोऽक्षिपाकास्रपित्तकुष्ठक्षयापहृत् ॥"
इति राजवल्लभ: ॥ * ॥
("लवण: स्यन्दयत्यास्यं कपोलगलदाहकृत्।"
"लवण: स्तम्भसङ्घातबन्धविध्मापनोऽग्निकृत् ॥
स्नेहन: स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत्।
सोऽतियुक्तोऽस्रपवनं खलतिं पलितं वलिम् ॥
तृट्कुष्ठविषवीसर्पान् जनयेत् क्षपयेद्बलम् ॥"
इति वाग्भटे सूत्रस्थाने दशमेऽध्याये ॥
"लवणो रस: पाचन: क्लेदन: दीपन: च्यावन: छेदन: भेदनस्तीक्ष्ण: सरो विकास्यध:स्रंसवकाशकरो वातहर: स्तम्भबन्धसङ्घातविधमन: सर्व्वरसप्रत्यनीकभूत आस्यं विस्रावयति कफं विष्यन्दयति मार्गान् शोधयति सर्व्वशरीरावयवान् मृदूकरोति रोचयत्याहारमाहारयोगी नात्यर्थंगुरु: स्निग्ध उष्णश्च।
स एवं गुणोऽप्येक एवात्यर्थमुपयुज्यमान: पित्तं कोपयति रक्तं वर्द्धयति तर्पयति मूर्च्छ-

यति तापयति दाहयति कुथ्नाति मांसानि प्रगालयति कुष्ठानि विषं वर्द्धयति शोफान् स्फोटयति दन्तान् च्यावयति पुंस्त्वमुपहन्ति इन्द्रियाण्युपरुणद्धि वलीपलितखालित्यमापादयति च लोहितपित्ताम्लपित्तवीसर्पवातरक्तविचर्च्चिकेन्द्रलुप्तप्रभृतीन् विकारानुपजनयति ।”

“प्रलीयन् क्लेदविष्यन्दलाघवं कुरुते मुखे ।
यः शीघ्रं लवणो ज्ञेयः सविदाहान्मुखस्य च ॥”

इति चरके सूत्रस्थाने २६ अध्यायः ॥

“लवणः संशोधनः पाचनो विश्लेषणः क्लेदनः शैथिल्यकृदुष्णः सर्व्वरसप्रत्यनीको मार्गविशोधनः सर्व्वशरीरावयवमार्द्दवकरश्चेति स एवंगुणोऽप्येक एवात्यर्थमासेव्यमानो गात्रकण्डूकोठशोफवैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापान् तथा मुखाक्षिपाकं रक्तपित्तवातशोणिताम्लीकाप्रभृतीनापादयति ॥”

“यो भक्तरुचिमुत्पादयति कफप्रसेकं जनयति मार्द्दवञ्चापादयति स लवणः ।” इति सुश्रुते सूत्रस्थाने ४२ अध्यायः ॥ * ॥)

लवणासुरस्य विवरणं यथा,—

“पूर्व्वं कृतयुगे राजन् ! दैतेयः सुमहामतिः ।
लोलापुत्त्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः ॥
स मधुर्व्वीर्य्यसम्पन्नो धर्म्मे च सुसमाहितः ।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः ॥
शूलं शूलाद्विनिष्कृष्य महावीर्य्यं महाप्रभम् ।
ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह ॥
यावत् सुरैश्च विप्रैश्च न विरुध्येर्म्महासुर ! ।
तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति ॥
यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः ।
तं शूलो भस्मसात् कृत्वा पुनरेष्यति ते करम् ॥
एवं रुद्राद्वरं लब्ध्वा भूय एव महासुरः ।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह ॥
भगवन्मम वंशस्य शूलमेतदनुत्तमम् ।
भवेत्तु सततं देव सुराणामीश्वरो ह्यसि ॥
तं ब्रुवाणं मधुं देवः सर्व्वभूतपतिः शिवः ।
प्रत्युवाच महादेवो नैतदेवं भविष्यसि ॥
माभूत्ते विफला वाणी मत्प्रसादकृता शुभा ।
भवतः पुत्त्रमेकन्तु शूलमेतद्भविष्यति ॥
यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते ।
अवध्यः सर्व्वभूतानां शूलहस्तो भविष्यति ॥
एवं मधुर्व्वरं लब्ध्वा देवात् सुमहदद्भुतम् ।
भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम् ॥
तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या ।
विश्वावसोरपत्यं साप्यनलायां महाप्रभा ॥
तस्याः पुत्त्रो महावीर्य्यो लवणो नाम दारुणः ।
बाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत् ॥
तं पुत्त्रं दुर्व्विनीतन्तु दृष्ट्वा क्रोधसमन्वितः ।
मधुः स शोकमापेदे न चैनं किञ्चिदब्रवीत् ॥
स विहाय इमं लोकं प्रविष्टो वरुणालयम् ।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत् ॥
स प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा ।
सन्तापयति लोकांस्त्रीन् विशेषेण च तापसान् ॥
आहारः सर्व्वसत्त्वानि विशेषेण च तापसाः ।
आचारो रौद्रता नित्यं वासो मधुवने तथा ॥
हत्वा बहुसहस्राणि सिंहव्याघ्रमृगाण्डजान् ।
मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम् ॥
तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन् ।
घातयिष्यामि तद्रक्षो व्यपगच्छतु वो भयम् ॥
प्रतिज्ञाय तदा तेषां मुनीनामुग्रतेजसाम् ।
स भ्रातॄन् सहितान् सर्व्वानुवाच रघुनन्दनः ॥
को हन्ता लवणं वीरः कस्यांशः स विधीयताम् ।
भरतस्य महाबाहो शत्रुघ्नस्य च धीमतः ॥
राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत् ।
अहमेनं वधिष्यामि ममांशः स विधीयताम् ॥
भरतस्य वचः श्रुत्वा धैर्य्यशौर्य्यसमन्वितम् ।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम् ॥
शत्रुघ्नस्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिपम् ।
कृतकर्म्मा महाबाहुर्मध्यमो रघुनन्दन ! ॥
आर्य्येण हि पुरा शून्या त्वयोध्या परिपालिता ।
सन्तापं हृदये कृत्वा आर्य्यस्यागमनं प्रति ।
प्रेष्ये मयि स्थिते राजन्न भूयः क्लेशमाप्नुयात् ॥
तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत् ।
एवं भवतु काकुत्स्थ क्रियतां मम शासनम् ॥
स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम् ।
राज्यं प्रशाधि धर्म्मेण वाक्यं मे यद्यवेक्षसे ॥
यदा तु युद्धमाकाङ्क्षन् यदि कश्चित् समाह्वयेत् ।
तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि ॥
स त्वं पुरुषशार्द्दूल ! तमायुधविनाकृतम् ।
अप्रविष्टं पुरं पूर्व्वं द्वारि तिष्ठ धृतायुधः ।
अन्यथा क्रियमाणे तु अवध्यः स भविष्यति ॥
ततः प्रभाते विमले तस्मिन् काले स राक्षसः ।
निर्गतस्तु पुराद्वीरो भक्ष्याहारप्रचोदितः ॥
एतस्मिन्नन्तरे वीर उत्तीर्य्य यमुनां नदीम् ।
तीर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत ॥
ततोऽर्द्धदिवसे प्राप्ते क्रूरधर्म्मा स राक्षसः ।
आगच्छद्बहुसाहस्रं प्राणिनां भारमुद्वहन् ॥
ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम् ।
तमुवाच ततो रक्षः किमनेन करिष्यसि ॥
तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः ।
शत्रुघ्नो वीर्य्यसम्पन्नो रोषादश्रूण्यवासृजत् ॥
उवाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरम् ।
योद्धुमिच्छामि दुर्ब्बुद्धे द्वन्द्वयुद्धं त्वया सह ॥
तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः ।
क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥
आहूतस्तु पुनस्तेन शत्रुघ्नेन महात्मना ।
लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः ॥
आकर्णात् स विकृष्याथ तद्धनुर्धन्विनां वरः ।
स मुमोच महावाणं लवणस्य महोरसि ॥
उरस्तस्य विदार्य्याशु प्रविवेश रसातलम् ।
पुनरेवागमत्तूर्णमिक्ष्वाकुकुलनन्दनम् ॥
शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः ।
पपात सहसा भूमौ वज्राहत इवाचलः ॥
तच्च शूलं महद्दिव्यं हते लवणराक्षसे ।
पश्यतां सर्व्वदेवानां रुद्रस्य वशमन्वगात् ॥
हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः ।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम् ॥
वरदास्तु महाबाहो सर्व्व एव समागताः ।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः ॥
देवानां भाषितं श्रुत्वा शूरो मूर्द्ध्नि कृताञ्जलिः ।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् ॥
इयं मधुपुरी रम्या मधुरा देवनिर्म्मिता ।
निवेशं प्राप्नुयाच्छीघ्रमेव मेऽस्तु वरः परः ॥
तं देवाः प्रीतमनसो वाढ़मित्येव राघवम् ।
भविष्यति पुरी रम्या शूरसेना न संशयः ॥
ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा ।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयेत् ॥
सा सेना शीघ्रमागच्छत् श्रुत्वा शत्रुघ्नशासनम् ।
निवेशनञ्च शत्रुघ्नः श्रावणेन समारभत् ॥
तां पुरीं दिव्यसङ्काशां नानापण्योपशोभिताम् ।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत् ॥
तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम् ।
रामपादौ निरीक्ष्येऽहं वर्षे द्वादश आगते ॥”

इति श्रीरामायणे उत्तरकाण्डे एकषष्ट्यादिसप्तत्यन्ताध्यायेभ्यः सङ्कलितम् ॥ * ॥ लवणसमुद्रस्योत्पत्तिर्यथा,—

“विरजा सा रजोयुक्ता धृत्वा वीर्य्यममोघकम् ।
सद्यो बभूव तत्रैव धन्या गर्भवती सती ।
तस्थौ तत्र सुखासीना सार्द्धं पुत्त्रैश्च सप्तभिः ॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्ज्जने ।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा ॥
एतस्मिन्नन्तरे तत्र मातुः क्रोड़ं जगाम ह ।
कनिष्ठपुत्त्रस्तस्याश्च भ्रातृभिः पीड़ितो भिया ॥
भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः ।
क्रोड़े चकार बालं सा कृष्णो राधागृहं ययौ ॥
प्रबोध्य बालं सा साध्वी न ददर्शान्तिके प्रियम् ।
विललाप भृशं तत्र शृङ्गाराकृष्टमानसा ॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यति ।
कदापि ते जलं केचित् न खादिष्यन्ति जीविनः ॥
शशाप सर्व्वान् बालांश्च यात मूढ़ा महीतलम् ।
गच्छध्वं च महीं मूढ़ा जम्बुद्वीपं मनोहरम् ॥
स्थितिर्नैकत्र युष्माकं भविष्यति पृथक् पृथक् ।
द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठन्तु सुखिनः सुताः ॥
द्वीपस्थाभिर्नदीभिश्च सह क्रीड़न्तु निर्ज्जने ।
कनिष्ठो मातृशापाच्च लवणोदो बभूव ह ॥
कनिष्ठः कथयामास मातृशापञ्च बालकान् ।
आजग्मुर्दुःखिताः सर्व्वे मातृस्थानञ्च बालकाः ॥
श्रुत्वा विवरणं सर्व्वं प्रजग्मुर्धरणीतलम् ।
प्रणम्य मातुश्चरणं भक्तिनम्रात्मकन्धराः ॥
सप्तद्वीपे समुद्राश्च सप्त तस्थुर्विभागशः ।
कनिष्ठादूर्द्ध्वपर्य्यन्तं द्विगुणं द्विगुणं मुने ॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः ।
एतेषाञ्च जलं पृथ्व्यां प्रस्थार्थञ्च भविष्यति ।
याभ्यः समुद्राः सप्तैव सप्तद्वीपां वसुन्धराम् ॥”

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३ अध्यायः ॥

लवणः, त्रि, (लवणेन संसृष्टः । लवण + ठक् । "लवणात् लुक् ।" ४ । ४ । २४ । इति ठको लुक् । यद्वा, लवणो रसोऽस्यास्मिन्निति । अर्श आद्यच् ।) लवणरसयुक्तः । इति मेदिनी । णे, ७५ ॥ (यथा, सुश्रुते । १ । २१ ।
"मधुरस्त्विदग्धः स्यादिदग्धो लवणः स्मृतः ॥")
लावण्ययुक्तश्च ॥

लवणकिंशुका, स्त्री, महाज्योतिष्मती । इति राजनिर्घण्टः ॥

लवणक्षारः पुं, (लवणस्य क्षारः ।) लोणारक्षारः । इति राजनिर्घण्टः ॥

लवणखानिः, स्त्री, (लवणस्य खानिः खनिः ।) शाम्भरिलवणोत्पत्तिस्थानम् । तत्पर्य्यायः । रुमा २ । इति हेमचन्द्रः । ४ । ७ ॥ लवणाकरमात्रञ्च ॥

लवणतृणं, क्ली, (लवणरसविशिष्टं तृणम् ।) तृणविशेषः । तत्पर्य्यायः । लोमतृणम् २ तृणाम्लम् ३ पटुतृणकम् ४ अम्लकाण्डम् ५ । अस्य गुणाः । सक्षारत्वम् । अम्लत्वम् । कषायत्वम् । अस्तन्यत्वम् । अश्मवृद्धिकरत्वञ्च । इति राजनिर्घण्टः ॥

लवणत्रयं, क्ली, (लवणानां त्रयम् ।) सैन्धवं विड् रुचकञ्च । इति राजनिर्घण्टः ॥

लवणधेनुः, स्त्री, (लवणनिर्म्मिता धेनुः ।) दानार्थलवणादिनिर्म्मितधेनुः । तद्विवरणं यथा,—

होतोवाच ।

"लवणधेनुं वक्ष्यामि तां निबोध महीपते ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं लवणमयीं कृत्वा षोड़शप्रस्थसंयुताम् ।
वत्सं चतुर्भिः राजेन्द्र इक्षुपादांश्च कारयेत् ॥
सौवर्णसुखशृङ्गाणि खुरा रौप्यमयास्तथा ।
पुच्छं गुड़मयं तस्या दन्ताः फलमया नृप ! ॥
जिह्वां शर्करया राजन् घ्राणं गन्धमयन्तथा ।
नेत्रे रत्नमये कुर्य्यात् कर्णौ पत्रमयौ तथा ॥
श्रीखण्डं शृङ्गकोटौ च नवनीतमयाः स्तनाः ।
सूत्रपुच्छां ताम्रपृष्ठां दर्भरोमयुतां पयस्विनीम् ॥
कांस्योपदोहां राजेन्द्र घण्टाभरणभूषिताम् ।
सुगन्धपुष्पधूपैश्च पूजयित्वा विधानतः ।
आच्छाद्य वस्त्रयुग्मेन ब्राह्मणाय निवेदयेत् ॥
ग्रहणे वाथ संक्रान्तौ व्यतीपाते तथायने ।
नक्षत्रग्रहपीड़ासु सर्व्वकालं प्रदापयेत् ॥
द्विजाय साधुवृत्ताय कुलीनाय च धीमते ।
वेदवेदाङ्गविदुषे श्रोत्रियायाहिताग्नये ॥
दद्भाय प्रदातव्या तथामत्सरिणे नृप ! ।
अन्नयमेव मन्त्रन्तु पुच्छदेशोपरिस्थितः ॥
छत्रकोपानहौ देयौ मुद्रिकापर्णपञ्चके ।
आच्छाद्य वस्त्रयुग्मेन दक्षिणां कनकं ददेत् ॥
पूर्व्वोक्तेन विधानेन स्वशक्त्या कनकेन तु ।
इमां गृहाण भो विप्र रुद्ररूपे नमोऽस्तु ते ॥
रसज्ञा सर्व्वभूतानां सर्व्वदेवनमस्कृता ।
कामं कामदुघे कामा धारधेनो नमोऽस्तु ते ॥
दत्त्वा धेनुं लवणेन एकाहश्चैव तिष्ठति ।
स्वयं त्रिरात्रं विप्रेश तथैव लवणाशिना ।
सहस्रेण शतेनाथ स्वशक्त्या कनकेन तु ।
दत्त्वेमां स्वर्गमाप्नोति यत्र देवो वृषध्वजः ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकञ्च गच्छति ॥"
इत्यादि वाराहपुराणे श्वेतोपाख्याने लवणधेनुमाहात्म्यम् ॥

लवणमदः, पुं, (लवणस्य मदः ।) लोणारक्षारः । इति राजनिर्घण्टः ॥

लवणा, स्त्री, (लुनाति या । लू + ल्युः । टाप् ।) नदीभेदः । दीप्तिः । इति मेदिनीशब्दरत्नावल्यौ ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥

लवणाचलः, पुं, (लवणनिर्म्मितः अचलः ।) दानार्थलवणादिनिर्म्मितपर्व्वतः । यथा,—
"अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम् ।
यत्प्रदाता नरो लोकं प्राप्नोति शिवसंयुतम् ॥
उत्तमः षोड़शद्रोणः कर्त्तव्यो लवणाचलः ।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः ॥
वित्तहीनो यथाशक्त्या द्रोणादूर्द्धन्तु कारयेत् ।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक् ॥
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा ।
तद्वद्धेमतरून् सर्व्वान् लोकपालान्निवेशयेत् ॥
सरांसि कामदेवादींस्तद्वच्चात्र निवेशयेत् ।
कुर्य्याज्जागरमत्रापि दानमत्र निबोधत ॥
सौभाग्यरससम्भूतो यतोऽयं लवणो रसः ।
तदात्मकत्वेन च मां पाहि पापान्नगोत्तम ॥
यस्मादन्नरसाः सर्व्वे नोत्कटा लवणं विना ।
प्रियश्च शिवयोर्नित्यं तस्मात् शान्तिप्रदो भव ॥
विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनम् ।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात् ॥
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम् ।
उमालोके वसेत् कल्पं ततो याति परां गतिम् ॥"
इति मात्स्ये ७७ अध्यायः ॥

लवणाब्धिजं, क्ली, (लवणाब्धौ लवणसमुद्रे जायते इति । जन् + डः ।) सामुद्रलवणम् । इति राजनिर्घण्टः ॥

लवणारजं, क्ली, लोणारक्षारः । इति राजनिर्घण्टः ॥

लवणोत्तमं, क्ली, (लवणेषु उत्तमम् ।) सैन्धवम् । इति रत्नमाला ॥

लवणोत्थं, क्ली, (लवणादुत्तिष्ठतीति । उत् + स्था + कः ।) लोणारक्षारः । इति राजनिर्घण्टः ॥

लवणोदः, पुं, (लवणं उदकं यस्य । उत्तरपदस्य चेत्युदकस्योदादेशः ।) लवणसमुद्रः । इत्यमरः ॥

लवनं, क्ली, (लू + भावे ल्युट् ।) छेदनम् । इत्यमरः ॥

लवनी, स्त्री, फलवृक्षविशेषः । लोना इति भाषा ॥ तत्पर्य्यायः । पीवणा २ अग्निमा ३ । इति शब्दचन्द्रिका ॥

लवली, स्त्री, (लवं लेशं लातीति । ला + कः । गौरादित्वात् ङीष् ।) फलवृक्षविशेषः । नोयाड़ि इति भाषा । तत्पर्य्यायः । सुगन्धमूला २ शन्दुः ३ कोमलवल्कला ४ । इति राजनिर्घण्टः ॥ तस्य फलगुणाः । हृद्यत्वम् । सुगन्धित्वम् । कफवातनाशित्वञ्च । इति राजवल्लभः ॥
"लवलीफलमर्शोघ्नं वातपित्तहरं लघु ॥"
इति केचित् ॥
(यथा, राजेन्द्रकर्णपूरे । ४७ ।
"कृत्वा वेलापुलिनलवलीपल्लवग्रासगोष्ठीं
दिङ्मातङ्गाः सममथ सरिन्नाथपाथः
पिबन्ति ॥")

लवाकः, पुं, (लवार्थं छेदनार्थं अकतीति । अक + अच् ।) छेदनद्रव्यम् । इत्युणादिकोषः ॥

लवाणकः, पुं, (लूयतेऽनेनेति । लू + "आणको लूधूशिङ्घिधाञ्भ्यः ।" उणा० ३ । ८३ । इति आणकः ।) दात्रादिः । इत्युणादिकोषः ॥

लविः, त्रि, (लूयतेऽनेनेति । लू + "अच इः ।" उणा० ४ । १३८ । इति इः ।) छिद्वरः । इत्युणादिकोषः ॥

लवित्रं, क्ली, (लूयतेऽनेनेति । लू + "अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः ।) दात्रम् । इत्यमरः ॥

लश, क शिल्पयोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, लाशयति कुशलो वृत्ये शिल्पं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लशुनं, क्ली, (अश्यते भुज्यते इति । अश् + "अशेर्लश च ।" उणा० ३ । ५७ इति उनन् । लशादेशश्च धातोः ।) रसुनः । तत्पर्य्यायः । महौषधम् २ गृञ्जनः ३ अरिष्टः ४ महाकन्दः ५ रसोनकः ६ । इत्यमरः ॥ रसोनः ७ म्लेच्छकन्दः ८ भूतघ्नः ९ उग्रगन्धः १० । अस्य गुणाः । अम्लरसेन ऊनत्वम् । गुरुत्वम् । उष्णत्वम् । कफवातनाशित्वम् । अशुचित्वम् । क्रिमिहृद्रोगशोफघ्नत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥
यदामृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद्बिन्दुः स रसोनोऽभवद्भुवि ॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्ज्जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥
कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ॥
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः ।
रसोनो बृंहणो वृष्यो स्निग्धोष्णः पाचनः
सरः ॥
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ।
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तास्रवृद्धिदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥
हृद्रोगजीर्णज्वरकुक्षिशूल
विबन्धगुल्मारुचिकासशोफान् ।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति ॥

मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम् ।
व्यायाममातपं रोषमतिनीरं पयो गुडम् ।
रसोनमश्नन् पुरुषस्त्यजेदेतन्निरन्तरम् ॥"

इति भावप्रकाशः ॥ * ॥

अन्यच्च ।

"लशुनः क्षारमधुरः कण्ठ्यो वृष्यो गुरुः सरः ।
भग्नसन्धानकृद्बल्यो रक्तपित्तप्रदूषणः ॥"

इति राजवल्लभः ।

(तथाचास्य गुणादिविषयो यथा,—

"कट्वम्लवीर्य्यो लशुनो हितश्च
स्निग्धो गुरुः स्वादुरसोऽथ वृष्यः ।
हृद्यस्य मेधास्वरवर्णचक्षु-
र्भग्नास्थिसन्धानकरः सुतीक्ष्णः ॥
हृद्रोगजीर्णज्वरकुक्षिशूल-
प्रमेहहिक्कारुचिगुल्मशोफान् ।
दुर्नामकुष्ठानलमान्द्यजन्तु-
समीरणं श्वासकफांश्च हन्ति ॥"

इति हारीते कल्पस्थाने तृतीयाध्याये ।

"शीतवातहिमदग्धतनूनां
स्तब्धभुग्नकुटिलव्यथितानाम् ।
भेषजस्य पवनोपहतानां
वक्ष्यते विधिरतो लशुनस्य ॥"

"शीलयेल्लशुनं शीते वसन्तेऽपि कफोल्बणः ।
घनोदयेऽपि वातार्त्तः सदा वा ग्रीष्मलीलया ॥"

इति वागभटे उत्तरस्थाने ३९ अध्यायः ।

"क्रिमिकुष्ठकिलासघ्नो वातघ्नो गुल्मनाशनः ।
स्निग्धश्चोष्णश्च वृष्यश्च लशुनः कटुको गुरुः ॥"

इति चरके सूत्रस्थाने २७ अध्यायः ॥)

लशूनः, पुं. (रसेन ऊनः रस्य लत्वम् । पृषो-दरादित्वात् सस्य शः अकारलोपश्च ।) लशुनः । इति शब्दरत्नावली ॥

लष, क शिल्पयोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, लाषयति कुशलो वृत्त्यै शिल्पं युनक्तीत्यर्थः । इति दुर्गा-दासः ॥

लष, ञ स्पृहि । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ञ, लषति लषते । इति दुर्गादासः ॥

लष, य ञ स्पृहि । इति कविकल्पद्रुमः ॥ (दिवा०-उभ०-सक०-सेट् ।) य ञ, लष्यति लष्यते । इति दुर्गादासः ॥

लष्वः, पुं, (लाषयति वृत्त्यै शिल्पं युनक्तीति । लष्+"सर्व्वनिघृष्वरिष्वेति ।" उणा० १।१५३। इति वन्प्रत्ययेन साधुः ।) नर्त्तकः । इत्यु-णादिकोषः ॥

लस, श्लिषि । क्रीडे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) लसति । इति दुर्गादासः ॥

लस, क शिल्पयोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक० सेट् ।) क, लासयति कुशलो वृत्त्यै शिल्पं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लसा, स्त्री, (लसतीति । लस्+अच् ।) हरिद्रा । इति हारावली । ९३ ॥

लसिका, स्त्री, (लसतीति । लस्+अच् । ततः कन् ततष्टापि अत इत्वम् ।) लाला । यथा,—
"लालायां पिच्छिला ख्याता लसिका लासिका तथा ॥"

इति शब्दचन्द्रिका ॥

लसीका, स्त्री, इक्षुरसः । त्वङ्मांसमध्यगरसः । इति केचित् ॥ (यथा । "लसीका उदक-विशेषः । यथाह चरकः । यत्तु मांसत्वगन्तरे उदकं तल्लसीकाशब्दं लभते ।" इति विजय-रक्षितकृतप्रमेहरोगव्याख्याने ॥
"यत्तु त्वगन्तरे श्लथगतं लसीकाशब्दं लभते ।"
इति चरके शारीरस्थाने सप्तमेऽध्याये ॥)

लसूज, ई ओ ड व्रीडे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) क्विपि संयोगादिलोपे लक् । ई ओ, लग्नः । ड, लज्जते । इति दुर्गादासः ॥

लस्तः, त्रि, श्लिष्टः । क्रीडितः । शिल्पयुक्तः । लस-धातोः क्तप्रत्ययेन निष्पन्नः । इति लस्तकशब्द-व्युत्पत्तौ भरतश्च ॥

लस्तकः, पुं, धनुषो मध्यभागः । इत्यमरः ॥

लस्तकी, [न्] पुं, (लस्तकोऽस्त्यस्येति । लस्तक+ इनिः ।) धनुः । इति शब्दमाला ॥

लहरिः, } स्त्री, महातरङ्गः । तत्पर्य्यायः ।
लहरी, } उल्लोलः २ कल्लोलः ३ । इति हेम-चन्द्रः शब्दरत्नावली च ॥ (यथा, आर्य्या-सप्तशत्याम् । ६१४ ।
"सरित इव यस्य गेहे शुष्यन्ति विशाल-गोत्रजा नार्य्यः ।
धाराखेव स लुप्यति जलनिधिलहरिषु जलद इव ॥")

ला, क ग्रहे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) क, लाति । ग्रहो ग्रह-णम् । इति दुर्गादासः ॥

ला, स्त्री, ग्रहणम् । दानम् । इति मेदिनी । ले, १ ॥

लाक्षकी, स्त्री, सीता । यथा,—
"राघव ते इयं सीता द्वारकेशस्य रुक्मिणी ।
विष्णोऽवतारमात्रस्य लक्ष्मीर्य्या कमलालया ॥
वाराणस्यां विशालाक्षी विमला पुरुषोत्तमे ।
वैकुण्ठे तु महालक्ष्मी राधा वृन्दावने वने ॥
लक्षशः कमला दास्यो यस्याः सा लाक्षकी मता ।
एवं शतसहस्राणामीश्वरी राधिकाधिका ॥"

इति पाद्मोत्तरखण्डे ५५ अध्यायः ॥

लाक्षणिकः, पुं, लक्षणया प्रतिपादकः । इति साहित्यदर्पणम् ॥ लक्षणात्मकशक्तिमत्पदत्वं लाक्षणिकत्वम् । इति सारमञ्जरी ॥ (यथा, विभक्तितत्त्वार्थवादे ।
"शक्तो लाक्षणिको रूढो योगरूढश्च यौगिकः ।
क्वचित् यौगिकरूढश्च शब्दः षोढा निगद्यते ॥"
(लक्षणमधीते वेद वा । लक्षण+"क्रतूक्थादि-सूत्रान्तात् ठक् ।" ४ । २ । ६० । इति ठक् । लक्षणाभिज्ञे, त्रि ।)

लाक्षा, स्त्री, (लक्ष्यतेऽनयेति । लक्ष्+"गुरोश्च हलः ।" ३।३।१०३ । इति अः । टाप् । यद्वा, "बाहुलकात् राजतेरपि सः । कापिलिकादित्वात् वा लत्वम् ।" इत्युज्ज्वलः । ३ । ६२ ।) रक्त-वर्णवृक्षनिर्य्यासविशेषः । लाहा इति भाषा ॥ तत्पर्य्यायः । राक्षा २ जतु ३ यावः ४ अलक्तः ५ द्रुमामयः ६ । इत्यमरः ॥ खदिरिका ७ रक्ता ८ रङ्गमाता ९ पलङ्कषा १० क्रिमिहा ११ द्रुम-व्याधिः १२ अलक्तकः १३ पलाशी १४ सुद्रिणी १५ दीप्तिः १६ जतुका १७ गन्धमादिनी १८ नीला १९ द्रवरसा २० पित्तारिः २१ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । श्लेष्मपित्तार्त्तिशोफविषरक्तविषमज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ भग्नविसर्पत्वग्दोषनाशि-त्वम् । बल्यत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः ।
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत् ॥
व्रणोरःक्षतवीसर्पक्रिमिकुष्ठगदापहा ।
अलक्तको गुणैस्तद्वद्विशेषाद्व्यङ्गनाशनः ॥"

इति भावप्रकाशः ॥

(शतपत्री । सेवती । गुलाव इति च । तत्-पर्य्यायो यथा,—
"शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा ।
महाकुमारी गन्धाढ्या लाक्षा लक्ष्यानि-मञ्जुला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लाक्षातरुः, पुं, (लाक्षोत्पादकस्तरुः ।) पलाश-वृक्षः । इति शब्दमाला ॥ (पलाशशब्देऽस्य विशेष ज्ञेयः ॥)

लाक्षातैलं क्ली, (लाक्षादिभिः पक्वं तैलम् ।) पक्वतैलविशेषः । लाक्षादितैलमिति ख्यातम् । तद्द्विविधं स्वल्पं बृहच्च । यथाक्रमं तत्प्रकारं तद्गुणञ्चाह ।
"लाक्षाहरिद्रामञ्जिष्ठाकल्कैस्तैलं विपाचितम्
षड्गुणेनारनालेन दाहशीतज्वरापहम् ॥"

इति स्वल्पलाक्षातैलम् ॥

बृहद्यथा,—
"लाक्षारसाढके प्रस्थं तैलस्य विपचेद्भिषक् ।
मस्त्वाढकसमायुक्तं पिष्ट्वा चात्र समावपेत् ॥
शतपुष्पां हरिद्राञ्च मूर्व्वां कुष्ठं हरेणुकाम् ।
कटुकां मधुकां रास्नामश्वगन्धाञ्च दारु च ॥
मुस्तकं चन्दनञ्चैव पृथगक्षसमांशकैः ।
द्रव्यैरेतैश्च तत् सिद्धं अभ्यङ्गान्मारुतापहम् ॥
विषमाख्यान् ज्वरान् सर्व्वानाश्वेव प्रशमं नयेत् ।
कासं श्वासं प्रतिश्यायं कण्डूं दौर्गन्ध्यगौरवम् ॥
त्रिकपृष्ठग्रहं शूलं गात्राणां स्फुटनन्तथा ।
पापालक्ष्मीप्रशमनं सर्व्वग्रहनिवारणम् ।
अश्विभ्यां निर्म्मितं सम्यक् तैलं लाक्षादिकं महत् ॥"
इति बृहल्लाक्षातैलम् । इति सुखबोधः ॥

लाक्षाप्रसादः, पुं, (लाक्षायाः प्रसादो यस्मात् ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥

लाक्षाप्रसादनः, पुं, (लाक्षां प्रसादयतीति । प्र+सद्+णिच्+ल्युः ।) रक्तलोध्रः । तत्पर्य्यायः । क्रमुकः २ पट्टिका ३ पट्टी ४ । इत्यमरः ॥ (तथास्य पर्य्यायः ।
"द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः ।
जीर्णपत्रो बृहत्पत्रः पट्टी लाक्षाप्रसादनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लाक्षावृक्षः, पुं, (लाक्षोत्पादको वृक्षः ।) कोशाम्रः । इति राजनिर्घण्टः ॥ पलाशवृक्षः । इति हारावली ॥

लाख, ऋ शोषालमर्थयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ऋ, अललाखत् । इति दुर्गादासः ॥

लाघ, ऋ ङ शक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अललाघत् । ङ, लाघते । शक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

लाघवं, क्ली, (लघोर्भावः कर्म्म वा । लघु+"इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इति अण् ।) आरोग्यम् । इति राजनिर्घण्टः ॥ लघुत्वम् । लघोर्भाव इत्यर्थे ष्णप्रत्ययेन निष्पन्नम् ॥ (शीघ्रत्वम् । यथा, महाभारते ।५।१८३।७।
"तासां रूपं भारत नोत शक्यं
तेजस्वित्वात् लाघवाच्चैव वक्तुम् ॥"
अल्पत्वम् । यथा, मार्कण्डेये । ४१ । १७ ।
"अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् ।
नित्यस्वाध्याय इत्येते नियमाः पञ्च कीर्त्तिताः ॥"
क्षैप्यम् । यथा, कुमारे । २ । २३ ।
"यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा ।
कुरुतेऽस्मिन्नमोघेऽपि निर्व्वाणालातलाघवम् ॥")

लाङ्गलं, क्ली, (लङ्गतीति । लगि गतौ+बाहुलकात् कलच् । वृद्धिश्च धातोः । इति उणादिवृत्तौ उज्ज्वलदत्तः । १ । १०८ ।) स्वनामख्यातभूमिकर्षणयन्त्रम् । तत्पर्य्यायः । हलम् २ गोदारणम् ३ सीरः ४ । इत्यमरः ॥ हलः ५ हालम् ६ हालः ७ शीरः ८ । इति भरतः ॥ (यथा, वाजसनेयसंहितायाम् । १२ । ७१ ।
"लाङ्गलं पवीरवत्सुशेवꣳसोमपित्सरु ॥")
लिङ्गः । इति त्रिकाण्डशेषः ॥ पुष्पविशेषः । तालवृक्षः । गृहदारु । इति मेदिनी । ले,१२८॥

लाङ्गलग्रहः, पुं, कृषकः । लाङ्गलं गृह्णाति य इत्यर्थे अन्प्रत्ययेन निष्पन्नः ॥ ("शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुःषु ग्रहेरुपसंख्यानम्।"३ । २ । ९ । इत्यस्य वार्त्तिकोक्त्या अच् ॥)

लाङ्गलचक्रं, क्ली, (लाङ्गलाकारं चक्रम् ।) कृषिकर्म्मणि शुभाशुभज्ञापक हलाकारचक्रविशेषः । यथा । अथ लाङ्गलचक्रं स्वरोदये ।
"लाङ्गलं दण्डकायुग्मयोक्त्रद्वयसमन्वितम् ।
दण्डकादि लिखेत् भानि दिनेशाक्रान्तभादितः ॥
दण्डिकाहलयूपानां द्विद्विस्थाने त्रिकं त्रिकम् ।
योक्त्रयोश्च त्रिकञ्चैव मध्ये पञ्चायके द्विकम् ॥
दण्डस्थे च गवां हानिर्यूपस्थे स्वामिनो भयम् ।
लक्ष्मीर्लाङ्गलयोक्त्रे स्यात् चैवारम्भदिनर्क्षके ॥"
इति ज्योतिस्तत्त्वम् ॥



लाङ्गलदण्डः, पुं, (लाङ्गलस्य दण्डः ।) लाङ्गलमध्यस्थकाष्ठम् । लाङ्गलेर ईश इति भाषा । तत्पर्य्यायः । ईषा २ । इत्यमरः ॥ ईशा ३ । इति शब्दरत्नावली ॥

लाङ्गलपद्धतिः, स्त्री, (लाङ्गलस्य पद्धतिः ।) लाङ्गलरेखा । सिराल इति भाषा । तत्पर्य्यायः । शीता २ । इत्यमरः ॥ सीता ३ । इति शब्दरत्नावली ॥

लाङ्गलिकः, पुं, (लाङ्गलवत् आकृतिरस्त्यस्येति । लाङ्गल+ठन् ।) स्थावरविषभेदः । इति हेमचन्द्रः ॥

लाङ्गलिका, स्त्री,(लाङ्गलमिवाकारोऽस्त्यस्या इति । लाङ्गल+ठन् । टाप् ।) लाङ्गलीवृक्षः । इति शब्दरत्नावली ॥ (यथा, गारुडे १९२ अध्याये ।
"इन्द्रलाङ्गलिकामूलं हिङ्गुलस्य तथैव च ।
तेन ब्रणमुखं लिप्तं शल्यो निःसरति क्षणात् ॥")

लाङ्गलिकी, स्त्री, (लाङ्गल+ठन् । ङीष् ।) वृक्षविशेषः । लाङ्गलिया इति विषलाङ्गलिया इति च भाषा । तत्पर्य्यायः । अग्निशिखा २ । इत्यमरः ॥ अग्निज्वाला ३ लाङ्गलिका ४ लाङ्गली ५ । इति शब्दरत्नावली ॥ गैरी ६ दीप्ता ७ हलिनी ८ गर्भघातिनी ९ अग्निजिह्वा १० इन्द्रपुष्पा ११ अग्निमुखी १२ वह्निशिखा १३ । इति रत्नमाला ॥ अस्या गुणः । कुष्ठदुष्टव्रणनाशित्वम् । इति राजवल्लभः ॥ राजनिर्घण्टोक्तगुणपर्य्यायाः कलिकारीशब्दे द्रष्टव्याः ॥

लाङ्गली, [न्] पुं, (लाङ्गलमस्त्यस्येति । लाङ्गल+इनिः ।) बलरामः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ३८ । ३८ ।
"स्थापयित्वा विलद्वारि यदून् लाङ्गलिना सह ।
शार्ङ्गधन्वा विलस्थस्तु जाम्बवन्तं ददर्श ह ॥")
नारिकेलः । इत्यमरः ॥ (यथा,—
"नारिकेलो दृढफलो लाङ्गली कूर्च्चशीर्षकः ।
तुङ्गस्कन्धफलश्चैव तृणराजः सदाफलः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) सर्पः । इति शब्दचन्द्रिका ॥ (लाङ्गलविशिष्टे, त्रि । यथा, रामायणे । २ । ३२ । ३० ।
"तत्रासीत् पिङ्गलो गार्ग्यस्त्रिजटो नाम वै द्विजः ।
क्षतवृत्तिर्वने नित्यं फालकुद्दाललाङ्गली ॥"
तथा, महाभारते । १ । २२२ । ५३ ।
"रामः पाणिग्रहणिकं ददौ पार्थाय लाङ्गली ॥"
स्त्रियां ङीष् । नदीविशेषः । यथा, मार्कण्डेये । ५७ । २९ ।
"लाङ्गलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ॥")

लाङ्गली, स्त्री, (लाङ्गलाकारोऽस्त्यस्या इति । लाङ्गल+अच् । ङीष् ।) लाङ्गलाकारपुष्पजलजशाकविशेषः । काँचड़ा इति भाषा । तत्पर्य्यायः । शारदी २ तोयपिप्पली ३ शकुलादनी ४ । इत्यमरः ॥ जलाची ५ जलपिप्पलिः ६ । इति शब्दरत्नावली ॥ पित्तला ७ श्यामादिनी ८ मत्स्यगन्धा ९ । इति जटाधरः ॥ कलिकारी १० । इति राजनिर्घण्टः ॥ (शालपर्णी । तत्पर्य्यायो यथा,—
"स्थिरा विदारिगन्धा च शालपर्ण्यंशुमत्यपि ।
लाङ्गली कलसी चैव क्रोष्टुपुच्छा गुहा मता ॥"
इति गारुडे २०८ अध्यायः ॥)

लाङ्गुलं, क्ली, पुच्छम् । इत्यमरटीकासारसुन्दरी ॥

लाङ्गूलं, क्ली, (लङ्ग+"खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा० ४ । ९० । इति ऊलच् । बाहुलकात् वृद्धिश्च ।) पशुपश्चाद्भागस्थलम्बमानलोमाद्यवयवविशेषः । ल्याज इति भाषा । तत्पर्य्यायः । पुच्छम् २ लूम ३ बालहस्तः ४ बालधिः ५ । इत्यमरः ॥ लङ्गूलम् ६ लाङ्गुलम् ७ लुलामः ८ अपालः ९ । इति शब्दरत्नावली ॥ लङ्गः १० पिच्छः ११ बालः १२ । इति जटाधरः ॥ (यथा, कुमारे । १ । १३ ।
"लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति बालव्यजनैश्चमर्यः ॥")
गोलाङ्गूलजलमाहात्म्यं यथा,—
"लाङ्गूलेनोद्धृतं तोयं मूर्द्ध्नि गृह्णाति यो नरः ।
सर्व्वतीर्थफलं प्राप्य सर्व्वपापैः प्रमुच्यते ॥"
इति वाराहपुराणम् ॥
शेफः । इति मेदिनी । ले,१२७॥ कुसुमः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लाङ्गूलिका, स्त्री, (लाङ्गूलाकृतिरस्त्यस्या इति । लाङ्गूल+ठन् ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥

लाङ्गूली, [न्] पुं, (प्रशस्तं लाङ्गूलमस्त्यस्येति । लाङ्गूल+इनिः ।) वानरः । इति शब्दचन्द्रिका ॥ ऋषभनामौषधम् । इति राजनिर्घण्टः ॥

लाछ, इ लक्ष्मणि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लाञ्छ्यते । लाञ्छति । इति दुर्गादासः ॥

लाज, भर्त्सने । भर्ज्जे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लाजति ॥

लाज, इ भर्त्सने । भर्ज्जे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) द्वौ द्वितीय-

क्षरिणौ । लाजति । ६, लाज्जते । भर्त्सन एव केचित् पठन्ति । भर्गो भर्त्सनम् । इति दुर्गादासः ॥

लाजं, क्ली, (लाज्+अच् ।) उशीरम् । इति मेदिनी । जे, १५ ॥ (भ्रष्टधान्यम् । खइ इति भाषा ॥
"येषां स्युस्तण्डुलास्तानि धान्यानि सतु-
षाणि च ।
भ्रष्टानि स्फुटितान्याहुर्लाजानीति मनीषिणः ॥
लाजाः स्युर्मधुराः शीता लघवो दीपनाश्च ते ॥
स्वल्पमूत्रमला रूक्षा बल्याः पित्तकफच्छिदः ।
छर्द्द्यतीसारदाहास्रमेहमेदस्तृषापहाः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लाजः, पुं, (लाज्+अच् ।) आर्द्रतण्डुलः । इति मेदिनी । जे, १५ ॥

लाजा, स्त्री, अक्षतम् । इति मेदिनी । जे, १५ ॥ (यथा, सुश्रुते । ४ । १६ ।
"पैत्तिकं शर्करालाजामधुकैः सारिवा-
युतैः ॥")

लाजाः, पुं भूम्नि, (लाज्यन्ते ये ते । लाज्+घञ् ।) भ्रष्टधान्यम् । लाज्योया इति खइ इति च भाषा । (यथा, रामायणे । २ । ४३ । १३ ।
"कदा प्राणिसहस्राणि राजमार्गे ममात्मजौ ।
लाजैरवकरिष्यन्ति प्रविशन्तावरिन्दमौ ॥")
तत्पर्य्यायः । अक्षतम् २ । इत्यमरः । २।६।४७ ॥ लाजा ३ अक्षताः ४ । इति भरतः ॥ अस्य गुणाः । तृष्णाच्छर्द्द्यतीसारप्रमेहमेदःकफनाशित्वम् । कासपित्तोपशमनत्वम् । अग्निकारित्वम् । लघुत्वम् । शीतलत्वञ्च । अस्य मण्डगुणाः । अग्निकारित्वम् । दाहतृष्णाज्वरातीसारनाशित्वम् । अशेषदोषामपाचनत्वञ्च ॥ तस्य पेयागुणाः । श्रामकण्ठस्य श्रमघ्नत्वम् । क्षुधातृष्णाग्लानिदौर्ब्बल्यकुक्षिरोगनाशित्वञ्च । इति राजवल्लभः ॥ * ॥ अपि च ।
"एते च व्रीहयो भ्रष्टास्ते लाजा इति
संज्ञिताः ।
यवादयश्च ये भ्रष्टास्ते धानाः परिकीर्त्तिताः ॥
लाजाश्च यवधानाश्च तर्पणाः पित्तनाशनाः ।
गोधूमयावनालोत्थाः किञ्चिदुष्णाश्च दीपनाः ॥
तृष्णातीसारशमनो धातुसाम्यकरः परः ।
मन्दाग्निविषमाग्नीनां बालस्थविरयोषिताम् ।
देयश्च सुकुमाराणां लाजमण्डः सुसंस्कृतः ॥"
इति राजनिर्घण्टः ॥ * ॥
तस्य चूर्णगुणाः ।
"द्राक्षादाड़िमखर्ज्जूरम्रदिताम्बुघशर्करम् ।
लाजचूर्णं समध्वाज्यं सक्तर्पणमुदाहृतम् ॥"
लाजचूर्णं द्राक्षादिजलशर्करामध्वाज्यसहितं तर्पणसक्तमित्यर्थः । लाजशक्तुगुणाश्च गुणग्रन्थे ।
"लाजानां शक्तवः क्षौद्रसितायुक्ता विशेषतः ।
छर्द्द्यतीसारतृड्दाहविषमूर्च्छाज्वरापहाः ॥"
चरकश्च ।
"यत्र तर्पणमेवादौ प्रदेयं लाजशक्तुभिः ।
ज्वरापहैः फलरसैर्युक्तं समधुशर्करम् ॥"
इति भावप्रकाशः ॥

लाञ्छनं क्ली, (लाञ्छ+ल्युट् ।) नाम । चिह्नम् । इति मेदिनी । ने, १२१ ॥ (यथा, कुमारे । ७ । ३५ ।
"दिवापि निष्ठ्यूतमरीचिभासा
बाल्यादनाविष्कृतलाञ्छनेन ।
चन्द्रेण नित्यं प्रतिभिन्नमौले-
श्चूड़ामणेः किं ग्रहणं हरस्य ॥")

लाञ्छनः, पुं, (लाञ्छतीति । लाञ्छ+ल्युः ।) रागीधान्यम् । इति राजनिर्घण्टः ॥ क्वचित् पुस्तके लाञ्छनीति च पाठः ॥

लाटः, पुं, देशान्तरम् । (यथा, कथासरित्सागरे । ७८ । ११६ ।
"ददौ तस्मै सपुत्राय प्रीत्या वीरवराय च ।
लाटदेशे ततो राज्यं स कर्णाटपुरे नृपः ॥")
वस्त्रम् । इति मेदिनी । टे, २७ ॥ जीर्णभूषणादि । इति शब्दरत्नावली ॥

लाड, ऋ क क्षेपे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा० पर०-सक०-सेट् ।) लाड़यति अललाड़त् । इति दुर्गादासः ॥

लापः, पुं, कथनम् । लपधातोर्भावे घञ्प्रत्ययेन निष्पन्नम् ॥

लाप्यं, त्रि, (लप्यते इति । लप्+ण्यत् ।) कथनीयम् । लपधातोः कर्म्मणि घ्यण्प्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥

लाभः, पुं, (लभ+घञ् करणे ।) मूलधनादधिकं वाणिज्योपार्ज्जितं धनम् । तत्पर्य्यायः । फलम् २ । इत्यमरभरतौ ॥ लभ्यम् ३ वृद्धिः ४ । इति शब्दरत्नावली ॥ (यथा, रामायणे : २ । २२ । २२ ।
"सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ ।
यच्च किञ्चित्तथाभूतं ननु दैवस्य कर्म्म तत् ॥")
प्राप्तिः । इति लभधात्वर्थदर्शनात् ॥ (सप्तधर्म्म्यवित्तागमेषु अन्यतमः । यथा, मनुः । १० । ११५ ।
"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥")

लाभ्यं, क्ली, (लभ्+ण्यत् ।) लाभः । इति शब्दरत्नावली ॥

लामज्जकं, क्ली, वीरणमूलम् । इत्यमरः ॥ अस्य पर्य्यायगुणाउशीरशब्दे द्रष्टव्यौ । उशीरवत् पीतवर्णविरलतृणविशेषः । तत्पर्य्यायः । सुनालम् २ अमृणालम् ३ लवम् ४ लघु ५ इष्टकापथिकम् ६ शीघ्रम् ७ दीर्घमूलम् ८ जलाशयम् ९ । अस्य गुणाः । हिमत्वम् । तिक्तत्वम् । वातपित्ततृड्दाहश्रममूर्च्छातिरक्तज्वरापहत्वञ्च । इति राजनिर्घण्टः ॥

लालनं, क्ली, (लल्+णिच्+ल्युट् ।) अत्यन्तस्नेहकरणम् । प्रेमपूर्व्वकबालकादरणम् । सोहाग इति भाषा । लड कोपसेवे उपसेव इह अत्यन्तपालनम् । क, लालयेत् पञ्च वर्षाणि पुत्रमिति अत्र डलयोरेकत्वाल्लत्वम् । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥ तथा हि ।
"लालने बहवो दोषास्ताड़ने बहवो गुणाः ।
तस्मात् पुत्त्रञ्च शिष्यञ्च ताड़येन्न तु लालयेत् ॥"
अपि च ।
"लालयेत् पञ्च वर्षाणि दशवर्षाणि ताड़येत् ।
प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत् ॥"
इति चाणक्यशतकम् ॥

लालसा, पुं स्त्री, (लस्+यङ् । ततः "अ प्रत्ययात् ।" ३।३।१०२। इति अः । टाप् ।) महाभिलाषः । इत्यमरः ॥ औत्सुक्यम् । याच्ञा इति मेदिनी । से, ६४ ॥ दोहदम् । यथा,—
"दोहदं दौर्हृदं श्रद्धा लालसा क्षतिमाणि तु ।"
इति हेमचन्द्रः ॥
लोलः । इति नानार्थे स एव ॥ (लोलुपे, त्रि । इति यादवः ॥ यथा, माघे । ४ । ६ ।
"छायां निजस्त्रीचटुलालसानां
मदेन किञ्चित् चटुलालसानाम् ।
कुर्व्वाणमुत्पिञ्जरजातपत्रै-
र्विहङ्गमानां जलजातपत्रैः ॥"
तथा च कुमारे । ७ । ५६ ।
"तस्मिन् मुहूर्त्ते पुरसुन्दरीणा-
मीशानसन्दर्शनलालसानाम् ॥")

लालसीकं, क्ली, पिच्छलम् । इति शब्दरत्नावली ॥

लाला, स्त्री, (लल्+णिच्+अच् । टाप् ।) मुखभवजलम् । लाल इति भाषा । तत्पर्य्यायः । सृणिका २ स्यन्दिनी ३ । इत्यमरः ॥ दाविका ४ सृणीका ५ । इति शब्दरत्नावली ॥ मुखस्रावः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । ४ । २२ ।
"छीनच्छेदात् भवेच्छोफो लालानिद्राश्रम-
क्लमः ॥")

लालाटिकः, त्रि, (ललाटं पश्यतीति । ललाट+"संज्ञायां ललाटकुक्कुट्यौ पश्यति ।" ४।४।४६ । इति ठक् । दूरेस्थित्वा प्रभोर्ल्ललाटं पश्यति न तु कार्य्येषूपतिष्ठते इत्यर्थः ।) प्रभोर्भावदर्शी । कार्य्याक्षमः । इत्यमरः ॥ यः सेवकः क्रोधप्रसादचिह्नज्ञानाय प्रभोर्ल्ललाटमेव पश्यति । यश्च प्रभोः कार्य्येऽक्षमोऽशक्तस्तौ लालाटिकौ पूर्व्ववत् ष्णिकः । केचित्तु कार्य्याक्षम इति भावदर्शिन एव विशेषणमुक्त्वा एकमेव लालाटिकमाहुर्न तु द्वाविति । भावदर्शीति च पाठः लालाटिकः सदालस्ये प्रभुभावनिदर्शिनि । इत्यजयः ॥ इति तट्टीकायां भरतः ॥ आभरणविशेषे, पुं । इति मेदिनी । के, २२१ ॥ ललाटसम्बन्धिनि, त्रि । यथा । प्राप्तिस्तु लालाटिकीत्यादि ॥

लालामेहः, पुं, (लालावत् मेहतीति । मिह+अच् ।) प्रमेहविशेषः । यथा,—
"लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ।"
प्रमेहतीति शेषः । अस्यौषधम् ।
"गुडूच्याः स्वरसः पेयो मधुना सर्व्वमेहजित् ।

हरिद्राचूर्णसंयुक्तो वा रसो धात्र्याः समाक्षिकः ॥"

अपि च ।

"चन्द्रप्रभा वचा मुस्ता भूनिम्बं सुरदारु च ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
धन्याकं त्रिफला चव्यं विडङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान् ॥
धान्यकं त्रिफला चव्यं विडङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षहतलौहं स्याच्चतुःकर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभेति विख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥"

इत्यादि भावप्रकाशः ॥

(तथास्य लक्षणान्तरम् ।

"तन्तुबद्धमिवालालं पिच्छिलं यः प्रमेहति ।
लालामेहिनं विद्यात्तं नरं श्लेष्मकोपतः ॥"

इति चरके निदानस्थाने चतुर्थेऽध्याये ॥)

लालायितः, त्रि, लालाविशिष्टः । कातर इति यावत् । लालाशब्दात् नमस्तपोवरिवः कण्ड्वादिभ्यः क्यः कृतौ इति मुग्धबोधव्याकरणसूत्रेण क्यप्रत्यये कृते क्तप्रत्ययान्निष्पन्नः । यथा । अत्र लालायितः फणी । इति अनन्तदेवोक्तगणेशलिखितपाणिनिव्याकरणीयमहाभाष्यम् ॥

अपि च ।

"परिखावलयच्छलेन या
न परेषां ग्रहणस्य गोचरः ।
फणिभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥"

इति पूर्व्वनैषधे २ सर्गः ॥

परिखेति । शत्रूणां ग्रहणगोचरो नेयमिति कृत्वा परिखावलयव्याजेन या पुरी कुण्डलनां प्रापिता विधात्रेति शेषः । फणिना भाषिता या महाभाष्यफक्किका तद्वद्विषमा सापि परेषां ज्ञानगोचरो नेयमिति कृत्वा अत्र लालायितः फणीत्येवं कुण्डलनां प्रापिता पण्डितैरिति शेषः । इति भवदत्तकृततट्टीका ॥

लालाविषः, पुं, (लालायां विषं यस्य ।) लूतादिः । इति हेमचन्द्रः । ४ । ३७६ ॥

लालास्रावः, पुं, (लालां स्रावयतीति । स्रु + णिच् + अण् ।) ऊर्णनाभः । इति हेमचन्द्रः ॥

(लालास्रावके, त्रि । यथा, सुश्रुते । २ । १६ ।

"लालास्रावी स विज्ञेयः कण्डूमान् शौषिरो गदः ॥")

लालिकः, पुं, महिषः । इति हेमचन्द्रः ।४।३४६॥

लालित्यं, क्ली, (ललित + ष्यञ् ।) ललितस्य भावः । यथा,—

"प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् स्मृत-
स्तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुट-
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥"

इति लीलावती ॥

ला(व)वः, पुं स्त्री, पक्षिविशेषः । लाओया इति भाषा । इत्यमरभरतौ ॥ (यथा, सुश्रुते ।४।८।

"शाल्यान्नमोदकैर्मांसैर्लावाद्यैर्वापि विष्किरैः ॥")

अस्य मांसगुणाः । लघुत्वम् । कटुत्वम् । मलबद्धकारित्वम् । स्वादुत्वम् । शीतलत्वम् । त्रिदोषनाशित्वञ्च । इति राजवल्लभः ॥ (तथा च ।

"संग्राही दीपनश्चैव कषायो मधुरो लघुः ।
लावः कटुविपाकश्च सन्निपाते च पूजितः ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

(यथास्य गुणपर्य्यायौ ।

"लावा विष्किरवर्गेषु ते चतुर्द्धा मता बुधैः ।
पांशुलो गौरकोऽन्यस्तु पौण्ड्रकोदर्भरस्तथा ॥
लावा वह्निकराः स्निग्धा गरघ्ना ग्राहिका हिताः ॥
पांशुलः श्लेष्मलस्तेषु वीर्य्योष्णोऽनिलनाशनः ।
गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ॥
पौण्ड्रकः पित्तकृत् किञ्चिल्लघुवातकफापहः ।
दर्भरो रक्तपित्तघ्नो हृद्रोगामयहरो हिमः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

ला(व)वकः, पुं, (लाव एव । स्वार्थे कन् ।) लावपक्षी । तत्पर्य्यायः । लघुजङ्गलः २ । इति त्रिकाण्डशेषः ॥ (तथास्य मांसगुणाः ।

"पवित्रश्च महाश्रेष्ठो लावको जाङ्गलात्मकः ।
संग्राही दीपनः प्रोक्तः कषायो मधुरो लघुः ।
तथा विपाके मधुरः सन्निपातेऽतिपूजितः ॥"

इति हारीते प्रथमे स्थाने एकादशेऽध्याये ॥

यथा, सुश्रुते । ४ । ३६ ।

"विरिक्तवान्तैर्हरिणैणलावकाः
शशाश्च सेव्याः समयूरतित्तिरिः ॥"

लुनातीति । लू + ण्वुल् । छेदकः । यथा, मार्कण्डेये । ४६ । १६ ।

"यथा प्राणापकः क्षेत्री पालको लावकस्तथा ॥")

लावणं, त्रि, (लवण + अण् ।) लवणेन संस्कृतम् । यथा,—

"सार्पिष्कं दाधिकं सर्पिर्दधिभ्यां संस्कृतं क्रमात् ।
लवणोदकाभ्यामुदकं लावणिकमुदश्वितिः ।
औदश्वितमौदश्वित्कं लवणे स्यात्तु लावणम् ॥"

इति हेमचन्द्रः ॥

लवणसम्बन्धि च । (यथा, हरिवंशे ।५३।२० ।

"स मां परिभवन्निव खां वेलां समुपाक्रमत् ।
छेदयामास चपलैर्लावणैरम्बुविप्रुषैः ॥")

नस्ये, क्ली । इति रत्नमाला ॥

लावणिकं, त्रि, (लवण + ठञ् ।) लवणेन संस्कृतम् । इति हेमचन्द्रः ॥ लवणसम्बन्धि च । लवणविक्रेतरि, पुं । (यथा, माघे । १० । ३८ ।

"लीलयैव सुतनोस्तुलयित्वा
गौरवाढ्यमपि लावणिकेन ॥")

लवणपात्रे, क्ली । इति केचित् ॥

लावण्यं, क्ली, (लवण + ष्यञ् ।) लवणत्वम् । लवणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् । (लवणा लिट् विद्यते यस्येति लवणः । अर्श आदिभ्योऽच् । तस्य भावः । दृढादित्वात् ष्यञ् । यद्वा, लवणा लिट् सैव । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ।) सौन्दर्य्यविशेषः । तस्य लक्षणं यथा,—

"मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥"

इत्युज्ज्वलनीलमणिः ॥

तथा हि ।

"नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृतिर्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम् ।
लावण्यं वपुषः स्मृतिस्तु मनसः शान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्डनम् ॥"

इति नवरत्नान्तर्गतामरसिंहः ॥

(शीलनैपुण्यादि । अस्य प्रमाणं लावण्यार्जितशब्दे द्रष्टव्यम् ॥)

लावण्यार्जितं, क्ली, (लावण्येन अर्जितम् ।) विवाहकालीनं श्वशुराभ्यां दत्तं धनम् । यथा,—

"गौत्या दत्तञ्च यत्किञ्चित् श्वश्र्वा वा श्वशुरेण वा ।
पादवन्दनिकं यत्तल्लावण्यार्जितमुच्यते ॥"

इति विवादचिन्तामणिधृतकात्यायनवचनम् ॥

लावण्यं शीलनैपुण्यादि । तथा च पादप्रणतौ शीलादिमत्त्वे वा स्त्रियै श्वशुरादिना दत्तं तृतीयं स्त्रीधनमित्यर्थः । इति तद्व्याख्यानम् ॥

लावा, स्त्री, (लाव + टाप् ।) पक्षिविशेषः । तत्पर्य्यायः । लावकः २ लावः ३ लवः ४ । अस्या मांसगुणाः । पथ्यत्वम् । ग्राहित्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥

लावुः, } **लावूः**, } स्त्री, अलावुः । इति शब्दरत्नावली ॥

लासः, पुं, (लस् + घञ् ।) नृत्यमात्रम् । स्त्रीणां नृत्यम् । इति शब्दरत्नावली ॥ (यथा, ऋतुसंहारे । ६ । ३१ ।

"मदजनितविलासैर्दृष्टिपातैर्मुनीन्द्रान्
स्तनभरनतनार्य्यः कामयन्ति प्रशान्तान् ॥")

यूषः । इति शब्दचन्द्रिका ॥

लासकं, क्ली, (लसतीति । लस + ण्वुल् ।) मट्टकम् । इति हारावली ॥ मट्का इति भाषा ॥

लासकः, पुं, (लसतीति । लस + ण्वुल् ।) लास्यकारी । मयूरः । लसकः । इति मेदिनी । के, ॥ वेरः । इति धरणिः ॥ (दीप्तिकारकः । यथा, ऋतुसंहारे । २ । २६ ।

"नवजलकणसेकाच्छीततामादधानः
कुसुमभरनतानां लासकः पादपानाम् ॥")
लासकी, स्त्री, नर्त्तकी । इत्यमरः ॥
लासिका, स्त्री, (लासोऽस्त्यस्या इति । लास+ठन् ।) नर्त्तकी । इत्यमरः ॥
लास्फोटनी, स्त्री, आस्फोटनी । वेधनिका । इत्यमरटीकायां रायमुकुटः ॥
लास्यं, क्ली, (लस्+"ऋहलोर्ण्यत् ।" ३।१।१२४ । इति ण्यत् ।) नृत्यम् । इत्यमरः ॥ तौर्य्यत्रिकम् । इति मेदिनी ॥ भावाश्रयं नृत्यम् । ताललयाश्रयं नृत्यम् । इति भरतः ॥
"पुंनृत्यं ताण्डवं प्राहुः स्त्रीनृत्यं लास्यमुच्यते ।"
इति सङ्गीतनारायणे नारदसंहिता ॥
(यथा, महाभारते । १ । ६८ । १० ।
"सम्भोगस्नेहचातुर्य्यैर्हावलास्यमनोहरैः ।
राजानं रमयामास तथा रेमे तथैव सः ॥")
लास्यः, पुं, (लास्यमस्त्यस्येति । लास्य+अच् ।) नर्त्तकः । इति शब्दरत्नावली ॥
लास्यकं, क्ली, (लास्यमेव । स्वार्थे कन् ।) नृत्यम् । इति शब्दरत्नावली ॥
लास्या, स्त्री, (लास्यमस्त्यस्या इति । लास्य+अच् । टाप् ।) नर्त्तकी । इति शब्दरत्नावली ॥
लिकुचं, क्ली, (लक्यते आस्वाद्यते इति । लक्+बाहुलकात् उचः । पृषोदरादित्वात् इत्वम् ।) चुक्रम् । इति राजनिर्घण्टः ॥ (डहुः । अस्य गुणा यथा,—
"पित्तश्लेष्मप्रकोपीणि कर्कन्धुलिकुचान्यपि ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)
लिकुचः, पुं, लकुचः । इत्यमरः ॥
लिक्षा, स्त्री, लिक्षा । इति शब्दरत्नावली ॥
लिक्षा, स्त्री, (लिश गतौ+बाहुलकात् सः । स च कित् । इत्युणादिवृत्तौ उज्ज्वलः । ३ । ६६ ।) यूकाण्डम् । इत्यमरः ॥ लिकि इति भाषा । इत्यमरभरतौ ॥ तत्पर्य्यायः । लिक्षा २ लीक्षा ३ लीक्षा ४ लिक्षिका ५ । इति शब्दरत्नावली ॥ (यथा,—
"जङ्घापादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः ॥"
इति वाभटे निदानस्थाने चतुर्द्दशेऽध्याये ॥)
परिमाणविशेषः । यथा,—
"जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः ।
तैश्चतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिश्च सर्षपः ॥"
इति शब्दचन्द्रिका ॥
सयकारकवर्गद्वितीयवतीत्यपि पाठः ॥
लिख, इ खपि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लिङ्खते । खपि गतौ । इति दुर्गादासः ॥
लिख, श लेखने । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) श, लिखति पुस्तकं लेखकः । अयं विभाषया कुटादिरिति केचित् । तेन लिखितं विश्वक्णोऽपि शक्तिहानिरिति । लिखितव्यं लेखितव्यं लिखनं इत्यादि सिद्धम् । इति दुर्गादासः ॥

लिखः, त्रि, (लिखतीति । लेख+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) लेखकः । इति लिखधातोः कप्रत्ययेन निष्पन्नम् ॥
लिखनं, क्ली, लेखनम् । लिपिः । इत्यमरटीकायां सारसुन्दरी ॥ (यथा, मार्कण्डेये । ५१ । २२ ।
"प्रसिद्धमन्त्रलिखनात् शस्तमाल्यादिधारणात् ।
विशुद्धगेहावसथादनायासाच्च वै द्विज ! ॥")
विधिलिपिरखण्डनीया यथा,—
"यस्य यल्लिखनं पूर्व्वं यत्र काले निरूपितम् ।
तदेव खण्डितुं राधे चम्ये नाहञ्च को विधिः ॥
विधातुश्च विधाताहं येषां यल्लिखनं कृतम् ।
ब्रह्मादीनाञ्च क्षुद्राणां न तत् खण्ड्यं कदाचन ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १५ अध्यायः ॥
लिखितं, क्ली, (लिख+भावे क्तः ।) लिपिः । इत्यमरः ॥ लेखनम् । इति भरतः ॥ (लिख+कर्म्मणि क्तः ।) लिखितप्रचारो, त्रि । यथा,—
"प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति
कीर्त्तितम् ॥"
इति मिताक्षरायां याज्ञवल्क्यः ॥
मुनिविशेषे, पुं । यथा, श्राद्धतत्त्वे याज्ञवल्क्यः ॥
"पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥"
लिख्या, स्त्री, परिमाणविशेषः । यथा,—
"जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः ।
तैश्चतुर्भिर्भवेल्लिख्या लिख्याषड्भिश्च सर्षपः ॥"
इति शब्दचन्द्रिका ॥
लिग, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लिङ्गते । इति दुर्गादासः ॥
लिग, इ क चित्रे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) इ क, लिङ्गयति शब्दं स्त्रीनपुंसकैः शाब्दिकः चित्रं करोतीत्यर्थः । इति दुर्गादासः ॥
लिगु, क्ली, (लिङ्गति विषयात् विषयान्तरं गच्छतीति । लिग+"फलिपाटिनमिमनिजनां ... मृगय्वादयश्च" "खरुशंकुपीयुनीलङ्गुलिगु ।" उणा० १ । ३७ । इति कुप्रत्ययेन साधु ।) मनः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
लिगुः, पुं, (लिग+कुः ।) मूर्खः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ भूप्रदेशः । मृगः । इति नानार्थरत्नमाला ॥
लिङ्गं, क्ली, (लिङ्ग्यते अनेन इति । लिङ्ग+घञ् । अभिधानात् क्लीवलिङ्गत्वम् ।) चिह्नम् । (यथा, महाभारते । १ । २ । १२ ।
"येन लिङ्गेन यो देशो युक्तः समुपलक्ष्यते ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः ॥")
शेफः । इत्यमरः ॥ अनुमानम् । साङ्ख्योक्तप्रकृतिः । (यथा, साङ्ख्यकारिकायाम् । ५५ ।
"तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः
पुरुषः ।
लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन ॥"
प्रकृतिकार्य्यं विकृतिश्च । यथा, तत्रैव । १० ।
"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं
लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥"
विशेषस्तु तत्र द्रष्टव्यः ।) शिवमूर्त्तिविशेषः । इति मेदिनी । गे,२३ ॥ व्याप्यम् । व्यक्तम् । पुंस्त्वादिः । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ५ । १३६ ।
"एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता ॥")
सामर्थ्यम् । यथा,—
"यावतामेव धातूनां लिङ्गं रूढिगतं भवेत् ।
अर्थश्चैवाभिधेयस्तु तावद्भिर्गुणविग्रहः ॥"
इति तिथ्यादितत्त्वे एतत्कारिकाव्याख्यायां रघुनन्दनः ॥ * ॥ अथ शेफार्थस्य लिङ्गस्य पर्य्यायः । शिश्नः २ स्मरस्तम्भः ३ उपस्थः ४ मदनाङ्कुशः ५ कन्दर्पमुषलः ६ शेफः ७ मेहनम् ८ शेफः [स]९ मेढ्रः १० लाङ्गुः ११ ध्वजः ११ रागलता १३ यङ्गः १४ । इति शब्दरत्नावली ॥ लाङ्गूलम् १५ साधनम् १६ सेफः १७ कामाङ्कुशः १८ । इति जटाधरः ॥ * ॥ लिङ्गमूले वादिलान्तवर्णयुक्तस्वाधिष्ठाननामकषड्दलपद्ममस्ति । यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे हेमवर्णाभं व स वर्णचतुर्दलम् ।
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ॥
वादिलान्तषड्वर्णेन युक्तस्वाधिष्ठानसंज्ञकम् ।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥"
इति तन्त्रम् ॥ * ॥
अस्याधिष्ठातृदेवतादिर्यथा ।
"प्रजनः सर्व्वभूतानामुपस्थोऽध्यात्ममुच्यते ।
अधिभूतं तथा शुक्रं दैवतञ्च प्रजापतिः ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥ * ॥
अस्य शुभाशुभलक्षणं यथा,—
"स्वल्पे लिङ्गे च धनवान् स्याच्च पुत्त्रादि-
वर्ज्जितः ।
स्थूललिङ्गो दरिद्रः स्याद्दुःखेऽकष्टघणो भवेत् ॥"
इति गारुडे ६३ अध्यायः ॥ * ॥
अपि च ।
"महद्भिरायुराख्यातं स्वल्पलिङ्गो धनी नरः ।
अपत्यरहितश्चैव स्थूललिङ्गो धनोज्झितः ॥"
महद्भिर्जानुभिरिति शेषः ।
"मेढ्रे वामनते चैव सुतार्थरहितो भवेत् ।
वक्रेऽन्यथा पुत्त्रवान् स्यात् दारिद्र्यं विनते
त्वधः ॥
अल्पे तु तनयो लिङ्गे शिरालेऽथ सुखी नरः ।
स्थूलग्रन्थियुते लिङ्गे भवेत् पुत्त्रादिसंयुतः ॥"
इति गारुडे ६६ अध्यायः ॥
अन्यच्च ।
"दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्द्धनः ।
कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥
कर्कशैः कठिनैर्लिङ्गैः परदाररतः सदा ।
रमते च सदा दासीं निर्द्धनो भवति ध्रुवम् ॥
कृशलिङ्गेन लक्ष्मीश रक्तलिङ्गेन भूपतिः ।
परस्त्रीं रमते नित्यं नारीणां वल्लभो भवेत् ॥
कृशलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् ।

राज्यं सुखञ्च दिव्यास्त्राः कन्यकायाः पति-
र्भवेत् ॥’
इति सामुद्रकम् ॥

शिवस्य लिङ्गरूपस्य तन्निर्म्माल्याग्राह्यत्वस्य च कारणं यथा,—

दिलीप उवाच ।

“वेद्मि त्वाहं द्विजश्रेष्ठ ! रुद्रस्त्रिपुरहन्तकः ।
कस्माद्विगर्हितं रूपं प्राप्तवान् सह भार्य्यया ॥
योनिलिङ्गस्वरूपञ्च कथं स्यात् सुमहात्मनः ।
पञ्चवक्त्रश्चतुर्बाहुः शूलपाणिस्त्रिलोचनः ॥
कथं विगर्हितं रूपं प्राप्तवान् द्विजपुङ्गव ! ।
एवं सर्व्वं समाचक्ष्व मित्रावरुणनन्दन ॥

श्रीवशिष्ठ उवाच ।

शृणु राजन् प्रवक्ष्यामि यन्मां पृच्छसि गौरवात् ।
स्वायम्भुवो मनुः पूर्व्वं मन्दरे पर्व्वतोत्तमे ॥
इयाज मुनिभिः सार्द्धं दीर्घसत्रमनुत्तमम् ।
तस्मिन् समागताः सर्व्वे मुनयः शंसितव्रताः ॥
चर्च्चितुं देवतातत्त्वं मिथः प्रोचुस्तपोधनाः ।
विप्राणां वेदविदुषां कः पूज्यो देवतावरः ॥
इति तस्य वचः श्रुत्वा सर्व्व एव महर्षयः ।
भृगुं तपोनिधिं विप्रं प्रोचुः प्राञ्जलयस्तदा ॥

ऋषय ऊचुः ।

अस्माकं संशयं छेत्तुं समर्थोऽसि शुभव्रत ।
ब्रह्मविष्णुमहेशानामन्तिकं व्रज सुव्रत ॥
गत्वा तेषां समीपन्तु तथा दृष्ट्वा च विग्रहान् ।
शुद्धसत्त्वगुणस्तेषां यस्मिन् संविद्यते मुने ! ॥
स एव पूज्यो विप्राणां नेतरस्तु कदाचन ।
तस्मात् त्वं हि मुनिश्रेष्ठ विबुधानां निराशनम् ॥
क्षिप्रं कुरु मुनिश्रेष्ठ सर्व्वलोकहितं प्रभो ॥
एवमुक्तस्ततस्तूर्णं कैलासं मुनिसत्तमः ।
जगाम वामदेवेन यत्रास्ते वृषभध्वजः ॥
गृहद्वारमुपागम्य शङ्करस्य महात्मनः ।
शूलहस्तं महारौद्रं नन्दिं दृष्ट्वाब्रवीद्द्विजः ॥
संप्राप्तो हि भृगुर्विप्रो हरं द्रष्टुं सुरोत्तमम् ।
निवेदयस्व मां शीघ्रं शङ्कराय महात्मने ॥
तस्य तद्वचनं श्रुत्वा नन्दी सर्व्वगणेश्वरः ।
उवाच परुषं वाक्यं महर्षिममितौजसम् ॥
असान्निध्यः प्रभोस्तस्य देव्या क्रीड़ति शङ्करः ।
निवर्त्तस्व निवर्त्तस्व यदि जीवितुमिच्छसि ॥
एवं निराकृतस्तेन तत्रातिष्ठन्महातपाः ।
बहूनि दिवसान्यस्मिन् गृहद्वारे मुनीश्वरः ॥
ततः क्रोधसमाविष्टो भृगुः प्रोवाच शङ्करम् ।
विनष्टस्तमसारूढ़ो मां न जानाति शङ्करः ॥
नारीसङ्गमत्तोऽसौ यस्मान्मामवमन्यते ।
योनिलिङ्गस्वरूपं वै रूपं तस्माद्भविष्यति ॥
ब्राह्मणं मां न जानाति तमसा चाप्युपागतः ।
अब्राह्मण्यत्वमापन्नो न पूज्योऽसौ द्विजन्मनाम् ॥
तस्मान्न जलमन्नन्तु तस्मै दत्तं हविस्तथा ।
शिवस्यान्नं जलञ्चैव पत्रं पुष्पं फलादिकम् ॥
निर्म्माल्यमस्य चाग्राह्यं भविष्यति न संशयः ॥
एवं शप्त्वा महातेजाः शङ्करं लोकपूजितम् ।
उवाच वचनमुग्रं नन्दिं शूलधरं नृप ! ॥
रुद्रभक्ताश्च ये लोके भस्मलिङ्गास्थिधारिणः ।
ते पाषण्डत्वमापन्ना वेदबाह्या भवन्ति वै ॥
एवं शप्त्वा मुनिस्तत्र रुद्रं त्रिपुरहन्तकम् ।
जगाम ब्रह्मलोकं वै सर्व्वलोकनमस्कृतम् ॥”

इति पाद्मोत्तरखण्डीयाष्टसप्ततितमाध्यायात् सङ्कलितम् ॥*॥ शिवलिङ्गस्य पूजाधारत्वं यथा,

“पूजास्थानानि वक्ष्यामि यस्मिन् सान्निध्यतां व्रजेत् ।
लिङ्गस्थां पूजयेद्देवीं स्थण्डिलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पादुके प्रतिमासु च ॥
तल्लिङ्गमाश्रयेन्मन्त्री मुक्ताद्यैर्यत् प्रतिष्ठितम् ।
कषाद्यैर्यत् कृतं लिङ्गं वर्ज्जनीयन्तु साधकैः ॥
अल्पसौख्यप्रदं प्रोक्तं वेदमन्त्रैः प्रतिष्ठितम् ।
साधिकारन्तु यल्लिङ्गं मुक्तभोगं तथैव च ।
ज्ञातव्यं साधकेन्द्रैश्च सिद्धिदञ्चाप्यसिद्धिदम् ॥

देव्युवाच ।

साधिकारन्तु यल्लिङ्गं मन्त्रहीनं प्रतिष्ठितम् ।
निर्व्वर्त्तितविकारञ्च अस्वयम्भु स्वयम्भवम् ॥
कुर्व्वन्ति भक्तिवात्सल्यं लोकानां वासनात्मकम् ।
दुर्व्विज्ञेयमिदं ज्ञानं योगिनामप्यगोचरम् ॥
मर्त्त्यैर्जड़धियैर्नाथ कथं विज्ञायते विभो ॥

ईश्वर उवाच ।

साधु साधु महादेवि ! रहस्यमिदमुत्तमम् ।
यत्त्वया चोदितं भद्रे ! तत्तथैव न चान्यथा ॥
दुर्व्विज्ञेयं सुरैश्चापि किं पुनर्मनुजन्तुभिः ।
चाधिष्ठ्य साधकः चैनं हृदयानन्दकारकम् ॥
इन्द्रियाणाञ्च औत्सुक्यं ददाति लिङ्गदर्शने ।
सेव्यमानं ततो लिङ्गं नित्यमानन्ददायकम् ॥
सुस्वप्नान् पश्यते नित्यं विमानस्थां वराङ्गनाम् ।
भैरवं पश्यति नित्यं क्रीड़न्तं मातृमण्डले ॥
उमामहेश्वरञ्चापि स्वप्ने पश्यति साधकः ।
अनिवर्त्तिताधिकारं लिङ्गं त्रिभुवनेश्वरि ! ।
आक्रमन्ति महाविघ्नाः सदैत्या राक्षसादयः ॥
शून्यागारं यथा देवि ! आक्रमन्ति नराः प्रिये ।
अनर्च्चितन्तु भुञ्जन्ति तथा लिङ्गन्तु कल्पना ॥
प्रेतं यथा सुराध्यक्षे आक्रमन्ति पिशाचकाः ।
शून्यञ्च खड्गलिङ्गन्तु चाश्रयन्ति तथा प्रिये ॥”

इत्यादि देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः ॥*॥

अथ लिङ्गलक्षणम् ।

तत्र बाणलिङ्गस्य लक्षणं यथा,—

“बाणलिङ्गं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शेषतः शृणु ॥
नर्म्मदादेविकायाञ्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि षण्मुखे ।
इन्द्रादिपूजितान्यत्र तच्चिह्नैर्विहितानि च ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ॥
इन्द्रलिङ्गानि तान्याहुः साम्राज्यार्थप्रदानि च ॥”

अथाग्नेयलिङ्गलक्षणम् ।

“आरक्तं हित्वकीलालसुखस्पर्शं करोत्यलम् ।
आग्नेयं तत् शक्तिनिभमथवा शक्तिलाञ्छितम् ।
इदं लिङ्गवरं स्थाप्य तेजसाधिपतिर्भवेत् ॥” * ॥

अथ याम्यलिङ्गलक्षणम् ।

“दण्डाकारं भवेद्याम्यमथवा रसनाकृति ।
यद्यद्युक्तं सह तैर्न निर्निक्तं ज्ञायते सदा ।
निषिक्तं निधनं तेन क्रियते स्थापितेन तु ॥”*॥

अथ नैरृतलिङ्गलक्षणम् ।

“राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम् ।
कर्करादिप्रभिन्नन्तु कृष्णकुञ्चियुतं तथा ।
राक्षसं निष्कृते लिङ्गं गार्हस्थ्ये न सुखप्रदम् ॥”

अथ वारुणलिङ्गलक्षणम् ।

“वारुणं वर्त्तुलाकारं पाशाङ्कं चालिवर्च्चसम् ।
दृढिर्मुखादेः दृश्यत्वं संभोगात्मन्तु मध्यगं ॥”

अथ वायुलिङ्गलक्षणम् ।

“लक्ष्यं धूम्रं न वारुणं ध्वजाभं ध्वजमुद्रजम् ।
मस्तके स्थापितं तस्य न्यूनन्यूनमितस्ततः ॥”*॥

अथ कुबेरलिङ्गलक्षणम् ।

“तूणपाशगदाकारं गुह्यकेशस्य मध्यगम् ॥”

अथ रौद्रलिङ्गलक्षणम् ।

“दिनं वाप्यथवा रात्रिं सशोणं रविवर्च्चसम् ।
अस्थिशूलाङ्कितं रौद्रं हेमकुण्डलवर्च्चसम् ॥”

अथ वैष्णवलिङ्गलक्षणम् ।

“चतुर्व्वर्णमयं वापि वैष्णवं ज्ञायतेऽपरः ।
वैष्णवं शङ्खचक्राङ्कगदाब्जादिविभूषितम् ॥
श्रीवत्सं कौस्तुभाङ्कञ्च सर्व्वसिंहासनाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ॥
वैष्णवं नाम तत् प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ।
शालग्रामादिसंस्थन्तु शशाङ्कं श्रीविवर्द्धनम् ॥
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥”

इति वीरमित्रोदयधृतकालोत्तरः ॥ * ॥

नारद उवाच ।

“अथ वक्ष्यामि ते विप्र चिह्नमेकादशं परम् ।
श्रवणाद्यस्य पापानि नाशमायान्ति तत्
क्षणात् ॥
मधुपिङ्गलवर्णाभं कृष्णकुण्डलिकायुतम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धैर्निषेवितम् ॥
नानावर्णसमाकीर्णं जटाशूलसमन्वितम् ।
मृत्युञ्जयाख्यं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभ्रवर्णं कृष्णबिन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ॥
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रणोदनम् ॥
ज्वललिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम् ।
कालाग्निरुद्रमाख्यातं सर्व्वसत्त्वैर्निषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतिनम् ।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम् ॥
प्रलयास्त्रसमायुक्तं त्रिपुरारिसमाह्वयम् ।
शुभ्राभं पिङ्गलजटं मुण्डमालाधरं परम् ॥
त्रिशूलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ।
त्रिशूलडमरुधरं शुभ्ररक्तार्द्धभागतः ॥
अर्द्धनारीश्वराख्यानं सर्व्वदेवैरभिष्टुतम् ।
ईषद्रक्तमयं कान्तं स्थूलं लिङ्गं समुज्ज्वलम् ॥
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ।
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महेशितुः ।

एकेनैव कृतार्थः स्यात् बहुभिः किमु सुव्रत ॥”
इति हेमाद्रिधृतलक्षणकाण्डम् ॥ * ॥
“उत्ताङ्कं श्रेयसे योग्यं शीर्षमन्तं विवर्ज्जयेत् ।
यमवर्णन्तु यल्लिङ्गं यमाङ्कं वा कमण्डलुम् ॥
दण्डाङ्कं छत्रचिह्नं वा अक्षज्ञानान्वितं मतम् ।
अग्निवर्णं महाकालं नन्दीशं पद्मरागवत् ॥
पद्मरागनिभं सर्व्वं महाभं सिद्धपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्रादित्यैः प्रपूजितम् ॥
वसुदैः सेन्द्रयक्षेशं गुह्यकैर्यातुधानकैः ।
नानावर्णमयं नीलं शशाङ्कमण्डलप्रभम् ॥”
इति वीरमित्रोदयधृतकालोत्तरः ॥
इति बाणलिङ्गलक्षणम् ॥ * ॥
अथ तस्य परीक्षा ।
“इत्येतल्लक्षणं प्रोक्तं परीक्षा तत्त्वकोविदैः ।
त्रिः सप्त पञ्च वारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥”
इति वीरमित्रोदयधृतम् ॥
तुलाकरणन्तु तण्डुलेन । अपरतुलादिषु तण्डुला यद्यधिकाः स्युस्तदा तल्लिङ्गं गृहिणा पूज्यमव-धार्य्यं लिङ्गञ्चेदधिकं तदोदासीनपूज्यन्तदिति किं वदन्तीति हेमाद्रिधृतलक्षणकाण्डम् ॥
“सप्तकृत्वस्तुलारूढ़ं वृद्धिमेति न हीयते ।
बाणलिङ्गमिति ख्यातं शेषं नार्म्मदमुच्यते ॥
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥”
इति सूतसंहिता ॥
“नद्यां वा प्रक्षिपेद्भूयाद्यदा तदुपलभ्यते ।
बाणलिङ्गं तदा विद्धि न्यूनं सुखविवर्द्धनम् ॥”
इति वीरमित्रोदयः ॥ * ॥
बाणशब्दव्युत्पत्तिरपि तत्रैव ।
“अथ बाणं समाख्यातं यथा वत्स तथादितः ।
बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च ॥
तेन यस्मै कृतं तस्मात् बाणलिङ्गसदाकृतम् ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ॥
कृतप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च ।
पङ्कजस्य फलाकारं कुष्माण्डस्य समाकृति ॥
भुक्तिमुक्तिप्रदञ्चैव बाणलिङ्गसदाकृतम् ॥”
पङ्कजफलं पद्मबीजम् ।
“पक्वजम्बुफलाकारं कुक्कुटाण्डसमाकृति ।”
इति हेमाद्रिधृतलक्षणकाण्डे पाठः ॥ * ॥
देवीं प्रति शिववाक्यम् ।
“प्रशस्तं नार्म्मदं लिङ्गं पक्वजम्बुफलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ॥
हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते ।
स्वयं संस्रवते लिङ्गं गिरितो नर्म्मदाजले ॥
पुरा बाणासुरेणाहं प्रार्थितो नर्म्मदातटे ।
आविरासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽर्थाज्जगतीतले ॥
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्यो बाणलिङ्गैकपूजनात् ॥”

तथा,—
“ताम्री वा स्फाटिकी स्वार्णी पाषाणी राजती तथा ।
वेदिका च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत् ॥”* ॥
प्रत्यहं योऽर्च्चयेल्लिङ्गं नार्म्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ॥”
इति प्रत्यहबाणलिङ्गपूजायाः फलम् । इति याज्ञवल्क्यसंहिता ॥ * ॥
“संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रसलिङ्गे ततो बाणात् फलं कोटिगुणं स्मृतम् ॥
गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी ।
सिद्धयो रसलिङ्गे स्युरणिमाद्याः सुसंस्थिताः ॥”
इति सूतसंहिता ॥ * ॥
“रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पूज्यानि सर्व्वकामप्रदानि च ॥
एतेषामपि सर्व्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ॥
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजाकर्त्तुः प्रयच्छति ॥”
इति बाणलिङ्गप्रशंसा । इति केदारखण्डम् ॥*॥
निन्द्यलिङ्गमाह तत्रैव ।
“कर्कशे बाणलिङ्गे तु पुत्त्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ॥
एकपार्श्वस्थिते चैव पुत्त्रदारधनक्षयः ।
शिरसि स्फुटिते बाणे व्याधिर्म्मृत्युमेव च ॥
छिन्नलिङ्गेऽर्च्चिते बाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधिमान् जायते पुमान् ।
अत्युन्नतिं विलाग्रे तु गोधनानां क्षयो भवेत् ॥*
तीक्ष्णाग्रं वक्रशीर्षञ्च बाणलिङ्गं विवर्जयेत् ।
अतिस्थूलञ्चातिकृशं स्वल्पं वा भूषणान्वितम् ।
गृही विवर्ज्जयेत्तादृक् तद्धि मोक्षार्थिनो हितम् ॥”
इति दुष्टबाणलिङ्गलक्षणम् । इति हेमाद्रिः ॥*॥
शुभलिङ्गमाह ।
“अर्थदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणः ।
लघु वा कपिलं स्थूलं गृही नैवार्च्चयेत् क्वचित् ॥
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ।
तत् सपीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रासादपीठगम् ॥”
इति शुभबाणलिङ्गलक्षणम् । इति वीरमित्रो-दयः ॥ * ॥ बाणलिङ्गेष्वावाहनादि न कर्त्तव्यं यथा,—
“बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ॥”
इति भविष्यपुराणम् ॥
“ब्राह्मे मुहूर्त्ते चोत्थाय यः स्मरेद्बाणलिङ्गकम् ।
सर्व्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ॥”
इति योगसारे ५ परिच्छेदः ॥ * ॥
अथ बाणलिङ्गध्यानम् ।
“ॐ प्रमत्तं शक्तिसंयुक्तं बाणाख्यञ्च महा-प्रभम् ।

कामबाणान्वितं देवं संसारदहनक्षमम् ॥
शृङ्गारादिरसोल्लासं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ॥
मनसा गन्धपुष्पाद्यैः संपूज्यास्य मनुं स्मरेत् ।
प्राणायामं ततः कृत्वा बाणलिङ्गन्तु तोषयेत् ॥
तदिष्टदेवयोरैक्यं विभाव्य वाग्भवं जपेत् ।
ततो जपं समाप्याथ स्तवेनानेन तोषयेत् ॥”*॥
अथ स्तवः ।
“बाणलिङ्ग महाभाग संसारात्त्राहि मां प्रभो
नमस्ते चोग्ररूपाय नमस्तेऽव्यक्तयोनये ॥
संसारकारिणे तुभ्यं नमस्ते सूक्ष्मरूपधृक् ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ॥
दहनाय नमस्तुभ्यं नमस्ते योगकारिणे ।
भोगिनां भोगकर्त्रे च मोक्षदात्रे नमो नमः ॥
नमः कामाङ्गनाशाय नमः कल्मषहारिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ॥
बाणस्य वरदात्रे च रावणस्य क्षयाय च ।
रामस्याशुप्रहार्याय राज्याय भरतस्य च ॥
सुनीनां योगदात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥
ऐं डाकिनीशक्तियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सर्व्वाय वैरिणां निग्रहाय च ॥
परित्राणाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ॥
कुलभक्ताय योगाय नमो नारायणाय च ।
मधुपानप्रमत्ताय योगेशाय नमो नमः ॥
कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च ।
कुलयोगाय निष्ठाय शुद्धाय परमात्मने ॥
परमात्मस्वरूपाय लिङ्गमूलात्मकाय च ।
सर्व्वेश्वराय सर्व्वाय शिवाय निर्गुणाय च ॥ * ॥
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शङ्कर ।
यः पठेत् साधकश्रेष्ठो गाणपत्यं लभेत सः ॥
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ॥
साधूनां साधनं देव कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं तमाप्नोति लीलया ॥
बाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमन्यत् कथयामीह सर्व्वं वेत्सि कुलेश्वर ! ॥
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ! ।
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ॥
बाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ॥
बाणलिङ्गं सदाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे पशूनां शत्रुनिग्रहे ॥
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यो यो नाराधयेदेनं सर्व्वं तन्निष्फलं भवेत् ॥”
इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीशिव-संवादे बाणलिङ्गस्तोत्रं समाप्तम् ॥ * ॥
अथ रौद्रलिङ्गलक्षणम् ।
“नदीसमुद्भवं रौद्रमन्योन्यस्य विपर्ययात् ।

नदीवेगात् समं स्निग्धं संजातं रौद्रमुच्यते ॥”
इति वीरमित्रोदयः ॥
“सरित्प्रवाहसंस्थानं वाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुखावहम् ॥
नदीधारनर्म्मदाया वाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भविष्यति ॥
रौद्रलिङ्ग तथाख्यातं वाणलिङ्गसमाकृति ।
श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम् ॥
स्वभावात् कृष्णवर्णं वा सर्व्वजातिषु सिद्धिदम् ।
नर्म्मदासम्भवं रौद्रं वाणलिङ्गवदीरितम् ॥”
इति रौद्रलिङ्गलक्षणम् । इति लक्षणसमुच्चयोऽपि॥
अथ शिवनाभिलिङ्गलक्षणम् ।
“उत्तमं मध्यमधमं त्रिविधं लिङ्गमीरितम् ।
चतुरङ्गुलमुत्सेधे रम्यवेदिकमुत्तमम् ॥
उत्तमं लिङ्गमाख्यातं मुनिभिः शास्त्रकोविदैः ।
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमधमं स्मृतम् ॥”
तस्य महिमा ।
“शिवनाभिमयं लिङ्ग प्रतिपूज्य महर्षिभिः ।
श्रेष्ठञ्च सर्व्वलिङ्गेभ्यस्तस्मात् पूज्यं विशेषतः ॥”
इति शिवनाभिलिङ्गलक्षणम् । इति वीरमित्रो-
दयधृतशिवनारदसंवादः ॥ * ॥
अथ दैवलिङ्गलक्षणम् । सिद्धान्तशेखरे ।
“करसंपुटसंस्पर्शं मूलटङ्केन्दुभूषितम् ।
रेखाकोटरसंयुक्तं निम्नोन्नतसमन्वितम् ॥
दीर्घाकारञ्च यल्लिङ्गं अग्रभागादिवर्जितम् ।
लिङ्गं गोलमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना ॥
कुष्माण्डस्य फलाकारं नागरङ्गफलोपमम् ।
काकडिम्बफलाकारं गोललिङ्गमितीरितम् ॥”
इति गोललिङ्गलक्षणम् ॥
अथार्षलिङ्गलक्षणं तत्रैव ।
“नानाकौलफलाकारं अग्रच्छत्रविवर्जितम् ।
मूले स्थूलञ्च यल्लिङ्गं कपित्थफलसन्निभम् ॥
नालस्य वा फलाकारं मध्ये स्थूलञ्च यद्भवेत् ।
मध्ये स्थूलं वरं लिङ्गमृषिबाणसुदाहृतम् ॥”
इत्यार्षलिङ्गलक्षणम् ॥*॥
अथ लिङ्गलक्षणम् ।
“लिङ्गं हि द्विविधं प्रोक्तं कृत्रिमाकृत्रिमञ्चतत् ।
तल्लिङ्गं द्विविधं ज्ञेयमचलञ्च चलन्तथा ।
प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम् ॥
प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम् ।
स्थापितं सचलं गेहे स्थिरं लिङ्गमयोजिते ॥
पञ्चधा तत् स्थितं लिङ्गं स्वयम्भु दैवपाणकम् ।
आर्षञ्च मानवं लिङ्गं तेषां लक्षणमुच्यते ॥”
इति सिद्धान्तशेखरः ॥
“आचार्य्यसुनये स्वैरं स्वयम्भूतो महेश्वरः ।
यत्र चैव स्वयं व्यक्तं लिङ्गमस्तु स्वयम्भु तत् ॥
धमनी यस्य संस्पर्शात् दहति क्षिप्रमेव तु ॥”
इति षट्कर्म्मदीपिका ॥ * ॥
“नानाच्छिद्रसुसंयुक्तं नानावर्णसमन्वितम् ।
अदृष्टमूलं यल्लिङ्गं कर्कशं भुवि दृश्यते ॥
तल्लिङ्गन्तु स्वयम्भूतमपरं लक्षणच्युतम् ।
स्वयम्भु लिङ्गमित्युक्तं तच्च नानाविधं मतम् ।
शङ्खाभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम् ।
पद्माभमस्तकं ब्राह्मं छत्राभं शाक्रमुच्यते ॥
शिरोयुग्मं तदाग्नेयं त्रिपदं याम्यमीरितम् ।
खड्गाभं नैर्ऋतं लिङ्गं वारुणं कलसाकृति ॥
वायव्यं ध्वजवल्लिङ्गं कौवेरन्तु गदान्वितम् ।
ईशानस्य त्रिशूलाभं लोकपालादिनिःसृतम् ।
स्वयम्भु लिङ्गमाख्यातं सर्व्वशास्त्रविशारदैः ॥”
इति स्वयम्भुलिङ्गलक्षणम् ॥
इति सिद्धान्तशेखरः ॥ * ॥
“दृष्ट्वा लिङ्गं महेशस्य स्वयम्भूतस्य पार्व्वति! ।
सर्व्वपापविनिर्मुक्तः परे ब्रह्मणि लीयते ॥”
एतेषां पूजाफलं तत्रैव ।
“विशेषाच्छैलजं मुक्त्यै भुक्तये चानुषङ्गतः ।
पार्थिवं मुक्तये शस्तं मुक्तये चानुषङ्गतः ॥
एवं वै दारुजं ज्ञेयं चिह्नलिङ्गं तथा पुनः ।
स्थिरलक्ष्मीप्रदं ज्ञेयं हैमं राज्यप्रदञ्च तत् ॥
पुत्त्रवृद्धिकरं राङ्गमायुःप्रवर्द्धनम् ॥”
इति मत्स्यसूक्तमहातन्त्रम् ॥ * ॥
“पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम् ।
चन्द्रकान्तं मृत्युजित् स्याद्वाटकं सर्व्वकामदम् ॥”
इति पद्मपुराणम् ॥ * ॥
“सर्व्वफलप्रदा भूमिर्मणयस्तद्वदेव हि ।
अनन्ताद्याः स्मृता ह्यष्टौ मणयो विद्युदुज्ज्वलाः ॥
रात्रौ प्रकाशकाः सर्व्वविषाद्याघातकारिणः ।
नानावर्णास्तु विज्ञेया रसैर्गन्धैश्च रूपतः ॥
वज्राद्याः स्फाटिकाद्याश्च गुड़ान्नादिविनि-
र्म्मितम् ।
सर्व्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम् ॥”
इति वीरमित्रोदयधृतकालोत्तरः ॥ * ॥
“गान्धं सौभाग्यदं लिङ्गं पौष्पं मुक्तिप्रदायकम् ।
नानाशूनोद्भवं लिङ्गं नानाकामप्रदायकम् ॥
सैकतं गुणदं लिङ्गं सौभाग्याय च लावणम् ।
उच्चाटने तु पाशान्नं मौलं शत्रुक्षयावहम् ।
तात्कालिकं दरिद्रश्च कृत्वा भक्त्या समर्च्चयेत् ॥”
इति लक्षणसमुच्चयः ॥
अथ गन्धलिङ्गम् । गरुड़पुराणे ।
“कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैव शशिना च चतुःसमम् ॥
एतद्वै गन्धलिङ्गन्तु कृत्वा संपूज्य भक्तितः ।
शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः ॥”
पुष्पमयलिङ्गं यथा,—
“कार्य्यं पुष्पमयं लिङ्गं हयगन्धसमन्वितम् ।
नवखर्ज्जां धरां भुङ्क्ते गणेशोऽधिपतिर्भवेत् ॥”
अथ रजोमयलिङ्गम् ।
“रजोभिर्निर्म्मितं लिङ्गं यः पूजयति भक्तितः ।
विद्याधरपदं प्राप्य पश्चाच्छिवसमो भवेत् ॥”
अथ गोशकृल्लिङ्गम् ।
“श्रीकामो गोशकृल्लिङ्गं कृत्वा भक्त्या प्रपू-
जयेत् ।
स्वच्छेन कापिलेनैव गोमयेन प्रकल्पयेत् ॥”
स्वच्छेन भूमिपतनरहितेन । शून्योद्धृतेनेति
यावत् ॥*॥
अथ यवगोधूमशालिजलिङ्गम् ।
“कार्य्यं यष्टिकमं लिङ्गं यवगोधूमशालिजम् ।
श्रीकामः पुष्टिकामश्च पुत्त्रकामस्तदर्च्चयेत् ॥”
अथ सिताखण्डमयलिङ्गम् ।
“सिताखण्डमयं लिङ्गं कार्य्यमारोग्यवर्द्धनम् ।
वश्ये लवणजं लिङ्गं तालत्रिकटुकान्वितम् ॥”
तालं हरितालम् । त्रिकटुकं शुण्ठीपिप्पली-
मरीचं इति प्रसिद्धम् ।
“गव्यघृतमयं लिङ्गं संपूज्य बुद्धिवर्द्धनम् ।”
तथा ।
“लवणेन च सौभाग्यं पार्थिवं सर्व्वकामदम् ।
कामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम् ॥
भस्मोत्थं सर्व्वफलदं गुड़ोत्थं प्रीतिवर्द्धनम् ।
गन्धोत्थं गुणदं भूरि शर्करोत्थं सुखप्रदम् ॥
वंशाङ्कुरोत्थं वंशकरं गोमयं सर्व्वरोगदम् ।
केशास्थिसम्भवं लिङ्गं सर्व्वशत्रुविनाशनम् ॥
क्षोभणे मारणे पिष्टसम्भवं लिङ्गमुत्तमम् ।
दारिद्र्यदं द्रुमोद्भूतं पिष्टं सारस्वतंप्रदम् ॥
दधिदुग्धोद्भवं लिङ्गं कीर्त्तिलक्ष्मीसुखप्रदम् ।
धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत् ॥
पुष्पोत्थं दिव्यभोगायुर्मुक्त्यै धात्रीफलोद्भवम् ।
नवनीतोद्भवं लिङ्गं कीर्त्तिसौभाग्यवर्द्धनम् ॥
दूर्व्वाकाण्डसमुद्भूतमपमृत्युनिवारणम् ।
कर्पूरसम्भवं लिङ्गं चलं वै भुक्तिमुक्तिदम् ॥
अयस्कान्तं चतुर्धा तु ज्ञेयं सामान्यसिद्धिषु ॥
सर्व्वं नवभवं श्रेष्ठं तत्र वज्रमरिच्छिदि ।
यमलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम् ।
पुष्टिमूलं महानीलं ज्योतिश्चीरससुद्भवम् ॥
स्पर्शकं कुलसम्पत्त्यै तैजसं सूर्य्यकान्तजम् ।
चन्द्रापीड़ं मृत्युजितं स्फाटिकं सर्व्वकामदम् ।”
चन्द्रापीड़ं चन्द्रकान्तमित्यर्थः ।
“शूलाख्यमणिजं शत्रुक्षयार्थं मौक्तिकं तथा ।”
यत्सन्निधानात् शूलरोगनाशः स शूलमणिः ॥
“आपुत्त्रं हीरकं ज्ञेयं रोगघ्नम्मौक्तिकोद्भवम् ।
शुभकृत् पुष्कलं तीर्थं वैदूर्य्यं शत्रुदर्पहृत् ।
नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्व्वकामदम् ॥”
इति सारसंग्रहे ॥
“महाभुक्तिप्रदं हैमं राजतं भूतिवर्द्धनम् ।
आरकूटं तथा कांस्यं द्वयं सामान्यमुक्तिदम् ।”
आरकूटं पित्तलम् ।
“त्रपु सीसायसं लिङ्गं शत्रूणां नाशने हितम् ।
कीर्त्तिदं कांस्यजं लिङ्गं राजतं पुष्टिवर्द्धनम् ।
पैत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्व्वसिद्धिदम् ।”
मिश्रजमष्टधातुनिर्म्मितम् ॥ इति कालोत्तरः ॥
“पितॄणां मुक्तये लिङ्गं पूज्यं रजतसम्भवम् ।
हैमजं सत्यलोकस्य प्राप्तये पूजयेत् पुमान् ॥
पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः ॥”
इति शिवनारदसंवादः ॥
ताम्रादिलिङ्गपूजनन्तु कलीतरपरम् ।
“ताम्रलिङ्गं कलौ नार्च्चेत् रैत्यस्य सीसकस्य च ।
रक्तचन्दनलिङ्गञ्च शङ्खकांस्यायसं तथा ॥
तुष्टिकामस्तु सततं लिङ्गं पित्तलसम्भवम् ।

कीर्त्तिकामो यजेन्नित्यं लिङ्गं कांस्यसमुद्भवम् ॥
शत्रुमारणकामस्तु लिङ्गं लौहमयं सदा।
सदा सीसमयं लिङ्गमायुष्कामोऽर्च्चयेत् नरः ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥
"स्थिरलक्ष्मीप्रदं हैमं राजतं चैव राज्यदम्।
प्रचारवृद्धिकरं राज्ञं ताम्रमायुःप्रवर्द्धनम् ॥
विद्वेषकारणं कांस्यं रीतिजं शत्रुनाशनम्।
रोगघ्नं सैसकं लिङ्गमायसं शत्रुनाशनम् ॥
अष्टलौहमयं लिङ्गं कुष्ठरोगक्षयावहम्।
त्रिलौहसम्भवं लिङ्गं विज्ञानं प्रति सिद्धिदम् ॥"
इति लक्षणसमुच्चयः ॥
"श्रीप्रदं वज्रजं लिङ्गं शिलाजं सर्व्वसिद्धिदम्।
धातुजं धनदं साक्षाद्दारुजं भोगसिद्धिदम् ॥"
इति लिङ्गपुराणम् ॥
"गन्धपुष्पमयं लिङ्गं तथान्नादिविनिर्म्मितम्।
कस्तूरीसम्भवं लिङ्गं धनाकाङ्क्षी प्रपूजयेत् ॥
लिङ्गं गोरोचनोत्पन्नं रूपकामस्तु पूजयेत्।
कान्तिकामस्तु सततं लिङ्गं कुङ्कुमसम्भवम् ॥
श्वेतागुरुसमुद्भूतं महाबुद्धिविवर्द्धनम्।
धारणाशक्तिदं लिङ्गं कृष्णागुरुसमुद्भवम् ॥
यक्षकर्द्दमसम्भूतम्।" इति कालोत्तरः।
"पार्थिवे शिवपूजायां सर्व्वसिद्धियुतो भवेत्।
पाषाणे शिवपूजायां द्विगुणं फलमीरितम् ॥
स्वर्णलिङ्गे च पूजायां शत्रूणां नाशनं मतम्।
सर्व्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम् ॥
ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंचयः।
गङ्गायाश्च लक्षगुणं लाक्षायां रोगवान् भवेत् ॥
स्फाटिके सर्व्वसिद्धिः स्यात्तथा मरकते प्रिये।
लौहलिङ्गे रिपोर्नाशः कामदं भस्मलिङ्गकम्।
बालुकायां काम्यसिद्धिर्गोमये रिपुहिंसनम्।
सर्व्वलिङ्गस्य माहात्म्यं धर्म्मकामार्थमोक्षदम् ॥"
इति मातृकाभेदतन्त्रे १२ पटलः ॥
"ब्रह्मा संपूजयेन्नित्यं लिङ्गं शैलमयं शुभम्।
तस्य संपूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम् ॥
इन्द्रनीलमयं लिङ्गं विष्णुः समर्च्चयेत् सदा।
विष्णुत्वं प्राप्तवान् तेन सोऽभूद्भूतकपालकः ॥
स्फाटिकं निर्म्मलं लिङ्गं वरुणोऽभ्यर्च्चयेत् सदा।
तेन तद्वरुणत्वं हि प्राप्तं तेजोबलान्वितम् ॥"
इति षट्कर्म्मदीपिकाधृतशिवधर्म्मः ॥
"पूजयेत् पार्थिवे लिङ्गे पाषाणलिङ्गकेऽथवा।
स्वर्णलिङ्गेऽथवा देवि रौप्ये ताम्रे च कांस्यके ॥
पारदे वाथ गङ्गायां स्फाटिके मरकतेऽपि वा।
कार्य्यभेदे लौहलिङ्गे भस्मनिर्म्मितलिङ्गके ॥
बालुकानिर्म्मिते लिङ्गे गोमये वाथ पूजयेत्।
संस्कारेण विना देवि पाषाणादौ न पूजयेत् ॥"
इति मातृकाभेदतन्त्रे ७ पटलः ॥
इति शिवलिङ्गनिर्म्माणद्रव्याणि ॥ * ॥ अथ शिवलिङ्गसंस्कारः।
"संस्कारञ्च प्रवक्ष्यामि विशेष इह यद्भवेत् ॥
रौप्यञ्च स्वर्णलिङ्गञ्च स्वर्णपात्रे निधाय च।
तस्मादुत्तोल्य तल्लिङ्गं दुग्धमध्ये दिनत्रयम्।
त्र्यम्बकेण स्नापयित्वा कालरुद्रं प्रपूजयेत् ॥
षोडशेनोपचारेण वेद्यान्तु पार्व्वतीं यजेत्।
तस्मादुत्तोल्य तल्लिङ्गं गङ्गातोये दिनत्रयम्।
ततो वेदोक्तविधिना संस्कारमाचरेत् सुधीः ॥"
पूर्व्वोक्तवचनैः फलविशेषकामनया नानाविधलिङ्गपूजोक्ता सा च पूजा।
"लिङ्गं सुलक्षणं कुर्य्यात्त्यजेल्लिङ्गमलक्षणम्।
दैर्घ्यहीने भवेद्व्याधिरधिके शत्रुवर्द्धनम् ॥
मानहीने विनाशः स्यादधिके च शिशुक्षयः।
विस्तारे चाधिके हीने राष्ट्रनाशो भवेद्ध्रुवम् ॥
पीठहीने तु दारिद्र्यं शिरोहीने कुलक्षयः।
ब्रह्मसूत्रविहीने च राज्ञां राष्ट्रञ्च नश्यति।
तस्मात् सर्व्वप्रयत्नेन लिङ्गं कुर्य्यात् सुलक्षणम् ॥"
इत्यादिना सुलक्षणलिङ्गस्यैव फलदातृत्वमुक्तम्।
इति मातृकाभेदतन्त्रे ७ पटलः ॥

देव्युवाच।

"इन्द्रिये रहितो देवः शून्यरूपः सदाशिवः।
आकारो नास्ति देवस्य किं तस्य पूजने फलम् ॥

शिव उवाच।

शिवे पूजा महेशानि कदाचिन्नास्ति पार्व्वती।
रुद्रस्य परमेशानि रौद्री शक्तिरितीरिता ॥
रौद्री तु परमेशानि आद्या कुण्डलिनी भवेत्।
वर्त्तते परमेशानि ब्रह्मविष्णुशिवात्मिका।
सार्द्धत्रिवलयाकारैः शिवं वेष्ट्य सदा स्थिता।
शक्तिं विना महेशानि शवत्वं तस्य निश्चितम् ॥
शक्तिसंयोगमात्रेण कर्म्मकर्त्ता सदाशिवः।
अतएव महेशानि पूजयेच्छिवलिङ्गकम् ॥"
इति सशक्तिकशिवलिङ्गपूजनफलम् ॥
इति लिङ्गार्च्चनतन्त्रे २ पटलः ॥ * ॥

देव्युवाच।

"लिङ्गप्रमाणं देवेश कथयस्व मयि प्रभो।
पार्थिवे च शिलादौ च विशेषो यत्र यो भवेत् ॥

श्रीशिव उवाच।

मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम्।
एतदन्यन्न कुर्व्वीत कदाचिदपि पार्व्वति ॥"
इति मातृकाभेदतन्त्रे ७ पटलः ॥
अपि च।
"मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम्।
त्रिसन्धस्य प्रमाणेन घटनं कारयेद्बुधः ॥
स्वाङ्गुष्ठपर्व्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत्।
मृदादिलिङ्गघटने प्रमाणं परिकीर्त्तितम्।
फलमुक्तमवाप्नोति अन्यथा चेत्तदन्यथा ॥"
इति षट्कर्म्मदीपिकाधृतविश्वसारतन्त्रम् ॥
"लिङ्गे वेद्यां तथा पीठे समस्तानि यातनात्।
समश्चैव विजानीयात्सिद्धीकरणन्त्विदम् ॥"
इति कालोत्तरः ॥
मृत्तिकाभेदेन ब्राह्मणादीनां पूजाफलस्य प्रशस्तत्वं यथा,—
"चतुर्धा पार्थिवं लिङ्गं मृत्स्नाभेदेन पार्व्वति।
शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि ॥
शुक्लन्तु ब्राह्मणे शस्तं क्षत्रिये रक्तमिष्यते।
पीतन्तु वैश्यजातौ स्यात् कृष्णं शूद्रे प्रकीर्त्तितम् ॥"
तथा।
"शुक्लं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्।
स एव परमेशानि त्रिवर्गफलभाग्भवेत् ॥
क्षत्रियस्तु वरारोहे रक्तं निर्म्माय पार्थिवम्।
पूजयेत् सततं यस्तु त्रिवर्गफलमाप्नुयात् ॥
हरितं पार्थिवं देवि! निर्म्माय यस्तु पूजयेत्।
स च वैश्यो महेशानि! त्रिवर्गफलभाग्भवेत् ॥
कृष्णं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्।
स शूद्रः परमेशानि! त्रिवर्गफलभाग्भवेत् ॥"
इति लिङ्गार्च्चनतन्त्रे ३ पटलः ॥ * ॥
"शिलादौ च महेशानि! स्थूलञ्च फलदायकम्।
अङ्गुष्ठमानं देवेशि! यद्वा हेमाद्रिमानकम् ॥
क्रमेण देवदेवेशि! फलं बहुविधं लभेत्।
स्थूलात् स्थूलतरं लिङ्गं रुद्राक्षं परमेश्वरि! ॥
पूजनाद्धारणाद्देवि! फलं बहुविधं स्मृतम् ॥"
स्थूलात् स्थूलमिति पार्थिवलिङ्गेतरपरम्। मृत्तिकातोलकमिति विशेषवचनात्। शिलास्फाटिकमरकतादीनां पञ्चसूत्रीकरणमुक्तं यथा,—
"शिवलिङ्गस्य यन्मानं तन्मानं दक्षसव्ययोः।
योन्यग्रमपि यन्मानं तदधोऽपि तथा भवेत् ॥"
इति लिङ्गपुराणम् ॥
"लिङ्गस्य यादृग्विस्तारः परिणाहोऽपि तादृशः।
लिङ्गस्य द्विगुणा देवी योनिस्तदर्द्धसम्मिता ॥
कुर्व्वीताङ्गुष्ठतो ह्रस्वं न कदाचिदपि क्वचित्।
रत्नादिशिवनिर्म्माणे मानमिच्छावशाद्भवे ॥"
इति तन्त्रान्तरम् ॥
लिङ्गव्युत्पत्तिर्यथा,—
"आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते ॥"
इति स्कन्दपुराणम् ॥
लिङ्गमहिमा यथा,—

शिव उवाच।

"न तुष्याम्यर्च्चितोऽर्च्चायां पुष्पधूपनिवेदनैः।
लिङ्गेऽर्च्चिते तथात्यर्थं परं तुष्यामि पार्व्वति! ॥
एष देवि! पुरा कल्पे जीनोऽहं सर्व्वदैवतैः।
लिङ्गत्वाल्लिङ्गमित्युक्तं सदेवासुरकिन्नरैः ॥
प्रवक्ष्यामि दिवं देवि! यो मल्लिङ्गार्च्चने रतः।
त्यक्त्वा सर्व्वाणि पापानि निर्गतो दग्धकल्मषः ॥
मन्मना मन्नमस्कारी मामेव प्रतिपद्यते ॥"
इति वीरमित्रोदयधृतस्कन्दपुराणम् ॥
द्रव्यविशेषेण पूजादिफलं यथा,—
"वस्त्रपूतजलैर्लिङ्गं स्नापयित्वा मम मानवाः।
लक्षाणामश्वमेधानां फलमाप्नोति सत्तमः ॥
सुगन्धिचन्दनरसैर्लिङ्गमालिप्य भक्तितः।
आलिप्यते सुरस्त्रीभिः सुगन्धैर्यक्षकर्द्दमैः ॥"
इति तत्रैव ॥ * ॥
लिङ्गपूजाया अकरणे दोषः तत्पूजाफलञ्च यथा,
"विना लिङ्गार्च्चनं यस्य कालो गच्छति नित्यशः।
महाहानिर्भवेत्तस्य दुर्गतस्य दुरात्मनः।
एकतः सर्व्वदानानि व्रतानि विविधानि च।
तीर्थानि नियमा यज्ञा लिङ्गाराधनमेकतः ॥

न लिङ्गाराधनादन्यत् पुरा वेदे चतुर्ष्वपि ।
विद्यते सर्व्वशास्त्राणामेष एव सुनिश्चितः ॥
भुक्तिमुक्तिप्रदं लिङ्गं विविधापन्निवारकम् ।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात् ॥
सर्व्वमन्यत् परित्यज्य क्रियाजालमशेषतः ।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत् ॥”
इति स्कन्दपुराणम् ॥*॥
“अश्वमेधसहस्राणि वाजपेयशतानि च ।
महेशार्च्चनपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥”
इति मत्स्यसूक्ते १६ पटलः ॥
“बहुनात्र किमुक्तेन चराचरमिदं जगत् ।
शिवलिङ्गं समभ्यर्च्य स्थितमत्र न संशयः ॥”
इति लिङ्गपुराणम् ॥*॥
“शिवस्य पूजनाद्देवि चतुर्व्वर्गाधिपो भवेत् ।
अष्टैश्वर्य्ययुतो मर्त्त्यः शम्भुनाथस्य पूजनात् ।
स्वयं नारायणेनोक्तं यदि शम्भुं प्रपूजयेत् ॥
स्वर्गे मर्त्त्ये च पाताले ये देवाः संस्थिताः सदा ।
तेषां पूजा भवेद्देवि शम्भुनाथस्य पूजनात् ॥”
इति लिङ्गपुराणम् ॥*॥
“असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भु-
पूजनम् ॥”
इति षट्कर्म्मदीपिकाधृतकालोत्तरे नारद-
वाक्यम् ॥ * ॥
“अग्निहोत्राश्च वेदाश्च यज्ञाश्च बहुदक्षिणाः ।
शिवलिङ्गार्च्चनस्यैते कोट्यंशेनापि न समाः ॥
छित्त्वा भित्त्वा च भूतानि हत्वा सर्व्वमिदं
जगत् ।
यजेद्देवं विरूपाक्षं न स पापेन लिप्यते ॥
अनेकजन्मसाहस्रं भ्राम्यमाणश्च योनिषु ।
कः समाप्नोति वै मुक्तिं विना लिङ्गार्च्चनं नरः ॥”
इति स्कन्दपुराणम् ॥*॥
“ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रो वाप्यनुलोमजः ।
पूजयेत् सततं लिङ्गं तत्तन्मन्त्रेण सादरम् ॥”
तत्तन्मन्त्रेणेति यथायोग्यं वैदिकतान्त्रिकनाम-
मन्त्रेणेत्यर्थः । इति वीरमित्रोदयधृतस्कन्द-
पुराणम् ॥ * ॥
“मूले ब्रह्मा तथा मध्ये विष्णुस्त्रिभुवनेश्वरः ।
रुद्रोपरि महादेवः प्रणवाख्यः सदाशिवः ॥
लिङ्गवेदी महादेवी लिङ्गं साक्षान्महेश्वरः ॥
तयोः प्रपूजनान्नित्यं देवी देवश्च पूजितौ ॥”
इति लिङ्गपुराणम् ॥*॥
अथ पारदशिवलिङ्गमाहात्म्यम् ।
“ज्योतिर्म्मयं महालिङ्गं कैलासनगरे प्रिये ।
तस्यैव षोड़शांशैकः काश्यां विश्वेश्वरः स्थितः ॥
पूर्णलिङ्गं महेशानि शिववीजं न चान्यथा ।
शिलामध्ये यथा चक्रं लक्ष्मीनारायणः परम् ।
पारदस्य शतांशैको लक्ष्मीनारायणो न हि ॥
पकारं विष्णुरूपञ्च आकारं कालिका स्वयम् ।
रेफं शिवं दकारञ्च ब्रह्मरूपं न चान्यथा ॥
पारदं परमेशानि ब्रह्मविष्णुशिवात्मकम् ।
यो यजेत् पारदं लिङ्गं स एव शम्भुरव्ययः ॥
आजन्ममध्ये यो देवि एकदा यदि पूजयेत् ।
स एव धन्यो देवेशि स ज्ञानी स च तत्त्ववित् ॥
स ब्रह्मवेत्ता स धनी स राजा भुवि पूज्यते ।
अणिमादिविभूतीनामीश्वरः साधकोत्तमः ॥”*॥
अथ पारदशिवलिङ्गनिर्म्माणविधिः ।
“पारदे शिवनिर्म्माणे नानाविघ्नं यतः प्रिये ।
अतएव महेशानि शान्तिस्वस्त्ययनं चरेत् ॥
पारदं शिववीजं हि ताड़नं हि न कारयेत् ।
ताड़नाद्धितनाशः स्यात्ताड़नाद्वित्तहीनता ।
ताड़नाद्रोगयुक्तत्वं ताड़नान्मरणं भवेत् ॥”
इति मातृकाभेदतन्त्रे ८ पटलः ॥*॥
अथ शिवलिङ्गोत्पत्तिः ।
ब्रह्मोवाच ।
“पुरा त्वां चपलं ज्ञात्वा त्वदग्रे न प्रकाशितम् ।
इदानीं योगिनं ज्ञात्वा कथयामि न संशयः ॥
अतिगुह्यमतिगुह्यमतिगुह्यं न संशयः ।
गोपितव्यं गोपितव्यं गोपितव्यं त्वयापि च ॥
शम्भुना गोपितं तन्त्रे तन्त्रान्तरे प्रकाशितम् ।
शृणु तत् कथयाम्यद्य सावधानोऽवधारय ॥
सर्गादौ विविधाः सर्गा मया सृष्टा हि नारद ।
देवदानवदैत्याश्च गन्धर्व्वयक्षराक्षसाः ॥
सर्व्वे स्त्रीवशगाः श्रेष्ठा मैथुनाज्जायते प्रजा ।
केवलं हि शिवः शम्भुर्दारग्रहणकर्म्मणि ॥
कदापि न मनश्चक्रे दृष्ट्वा चिन्तापराः सुराः ।
मामेव शरणं जग्मुः सेन्द्रा देवासुरादयः ॥
प्रणिपत्य स्तुतिं कृत्वा उपतस्थुः समाहिताः ।
प्रोचुः प्राञ्जलयः सर्व्वे भयाद्गद्गदमानसाः ॥
देवाद्या ऊचुः ।
उदासिता वयं सर्व्वे भवानपि जनार्द्दनः ।
केवलं हि महादेवो देवदेवो जगत्पतिः ॥
विवाहे न मनश्चक्रे कथं वा मोहते शिवः ।
उपायं चिन्तय विभो सदारः कथमीश्वरः ।
येन स्याज्जगतां नाथस्तत् कुरुष्व दयानिधे ॥
इति श्रुत्वा वचस्तेषां ततो ब्रह्मा प्रजापतिः ।
सह तैर्वैकुण्ठं जगाम कमलासनः ।
उवाच तं जगन्नाथं विष्णुं कमललोचनम् ॥
ब्रह्मोवाच ।
सृष्टा मया सुरश्रेष्ठ मानुषा मैथुनोद्भवाः ।
सर्व्वे स्त्रैणा विना शम्भुं यत् कर्त्तव्यं वदस्व मे ॥
श्रीभगवानुवाच ।
एभिः सह महाबाहो गच्छामस्त्वमहं शिवम् ।
कर्त्तव्यं कथितं तेन अनुज्ञातैर्यथाविधि ।
किन्तु तद्योग्यनारीञ्च विवाहार्थं प्रकल्पय ॥
ब्रह्मोवाच ।
दक्षं गच्छामहे सर्व्वे अनुज्ञापय तं हरे ।
आद्याशक्तिं महामायां प्रसादयतु वै लघु ॥
कन्या भूत्वा महाशम्भुं मोहयिष्यति शङ्करम् ।
एवमुक्ता तु तैः सार्द्धं जग्मतुर्विधिकेशवौ ।
यत्र दक्षो महातेजाः प्रोचतुः कार्य्यमात्मनः ॥
उवाच दक्षं तद्युक्तं तपस्तप्तुं प्रजापतिः ।
ब्रह्मा विष्णुश्च सर्व्वे ते तपसा तोषयेच्छिवाम् ॥
आविर्ब्बभूव सा देवी कालिका जगदीश्वरी ।
प्राह मां वः किमर्थन्तु समुत्कण्ठाः सुरासुराः ॥
देव्युवाच ।
शीघ्रं रूपं यथाकामं भवता प्रार्थने फलम् ।
अचिरात् तत्प्रदास्यामि सत्यं सत्यं न संशयः ॥
देवाद्या ऊचुः ।
भूत्वा तु दक्षकन्या त्वं शङ्करं परिमोहय ।
अस्माकं वाञ्छितञ्चैतत् कुरु सिद्धिं सदा शिवे ॥
एतत् श्रुत्वा वचस्तेषां निरीक्ष्य कमलासनम् ।
उवाच विस्मयाविष्टा कालिका जगदीश्वरी ॥
देव्युवाच ।
शम्भुरद्यतनो बालः किं मां सन्तोषयिष्यति ।
मम योग्यं पुमांसन्तु अन्यं वै परिकल्पय ॥
ब्रह्मोवाच ।
शम्भुः सर्व्वगुरुर्देवो ह्यस्माकं परमेश्वरः ।
महासत्त्वो महातेजाः स ते तोषं करिष्यति ॥
शम्भुतुल्यः पुमान्नास्ति कदाचिदपि कुत्रचित् ।
इत्युक्ता ब्रह्मणा देवी बाढ़मित्याह चेश्वरी ।
दक्षाय दर्शनं दत्त्वा उवाच उच्यतां वरः ॥
दक्षोऽपि दृष्ट्वा तां देवीं खड्गकर्तृधरां पराम् ।
खर्व्वां लम्बोदरीं व्याघ्रचर्म्मावृतकटिस्थलीम् ॥
नीलोत्पलकपालाढ्यकरयुग्मां वरप्रदाम् ।
कृतकृत्यमिवात्मानं मेने दक्षः प्रजापतिः ॥
दक्ष उवाच ।
यदि मे वरदासि त्वं देवानामपि वाञ्छितम् ।
मदीयतनया भूत्वा शङ्करं किल मोहय ॥
तथेत्युक्ता जगद्धात्री अन्तर्द्धानं गता तदा ।
देवताश्च ततो गत्वा यत्र तेपे तपो हरः ॥
सस्त्रीकाः परमात्मानमुपतस्थुर्जगत्पतिम् ।
प्रणेमुस्तुष्टुवुर्भक्त्या प्राहुर्गद्गदभाषिणः ॥
देवाद्या ऊचुः ।
भगवन् देवदेवेश लोकनाथ महाशय ।
वयं सर्व्वे तु सस्त्रीकाः त्वदर्थं परमेश्वर ।
अतस्त्वं कुरु चोद्वाहं सृष्टिरक्षा यथा भवेत् ॥
दक्षगेहे महाकाली मायेति परिकीर्त्तिता ।
जाता ते प्रीतये शम्भो सा ते योग्या न
संशयः ॥
ईश्वर उवाच ।
भवतां प्रीतये सम्यक् करिष्ये नात्र संशयः ।
उद्योगः क्रियतां क्षिप्रं विवाहाय ममैव हि ॥
इत्युक्तास्तु सुराः सर्व्वे ईश्वरेण महात्मना ।
कृतकृत्या गताः सर्व्वे भवनं सर्व्वसुन्दरम् ॥
दक्षाय कथयामासुः शङ्करेणोदितं वचः ।
ततो विवाहं निर्व्वर्त्य कृतकृत्या यथा गताः ॥
गताः सर्व्वे महेशोऽपि सत्या सह तदा गृहम् ।
जगाम रेमे सत्या च चिरं निर्भरमानसः ॥
अथ काले कदाचित्तु सत्या सह महेश्वरः ।
रेमे न शेके तं सोढुं सती श्रान्ताभवत्तदा ॥
उवाच दीनया वाचा देवदेवं जगद्गुरुम् ।
भगवन्नहि शक्नोमि तव भारं सुदुःसहम् ।
क्षमस्व मां महादेव कृपां कुरु जगत्पते ॥
निशम्य वचनं तस्या भगवान् वृषभध्वजः ।
निर्भरं रमणं चक्रे गाढ़ं निर्दयमानसः ॥

हत्वा सम्पूर्णरनवं सती च त्यक्तमैथुना।
उत्थानाय मनश्चक्रे उभयोस्तेज उत्तमम्।
पपात धरणीपृष्ठे तेर्व्याप्तमखिलं जगत्॥
पाताले भूतले स्वर्गे शिवलिङ्गास्तदाभवन्।
तेन भूता भविष्याश्च शिवलिङ्गाः सयोनयः॥
यत्र लिङ्गं तत्र योनिर्यत्र योनिस्ततः शिवः।
उभयोस्तेज तेजोभिः शिवलिङ्गं व्यजायत॥"

इति शिवलिङ्गोत्पत्तिकथनमिति नारदपञ्चरात्रान्तर्गततृतीयरात्रे प्रथमाध्याये नारदब्रह्मसंवादः॥ *॥ शिवलिङ्गपूजायां सर्व्वेषामधिकारो यथा,—

"शाक्तो वा वैष्णवो वापि सौरो वा गाणपोऽथवा।
शिवार्च्चनविहीनस्य कुतः सिद्धिर्भवेत् प्रिये॥
अनाराध्य च मां देवि योऽर्च्चयेद्देवतान्तरम्।
न गृह्णाति महादेवि शापं दत्त्वा व्रजेत् पुरम्॥
पर्व्वताग्रसमं देवि मिष्टान्नादि क्रमेण हि।
फलानि बहुधान्येव पुष्पाण्येव यथाविधि॥
सुमेरुसदृशं चान्नं नानाविधं महेश्वरी।
स्तूपादिकं महेशानि यदि स्यात् सागरोपमम्॥
यद्दत्तं पुष्पनैवेद्यं सर्व्वं विष्ठासमं भवेत्।
शिवार्च्चनविहीनो यः पूजयेद्देवतान्तरम्।
विशेषतः कलियुगे स नरः पापभाग्भवेत्॥"

इति उत्पत्तितन्त्रे ६४ पटलः॥ *॥

"सर्व्वपूजासु देवेशि! लिङ्गपूजापरं पदम्।
लिङ्गपूजां विना देवि अन्यपूजां करोति यः॥
विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात्।
तस्माल्लिङ्गं महेशानि प्रथमं परिपूजयेत्॥
यद्राज्यं लिङ्गपूजायां रहितं सततं प्रिये।
तद्राज्यं पतितं मन्ये विष्ठाभूमिसमं स्मृतम्॥
ब्रह्म विट् क्षत्त्रियो देवि यदि लिङ्गं न पूजयेत्।
तत्क्षणात् परमेशानि त्रयश्चाण्डालतामियुः।
शूद्रश्च परमेशानि सदा शूकरवद्भवेत्॥
शिवार्च्चनन्तु देवेशि यस्मिन् गेहे विवर्ज्जितम्।
विष्ठागर्त्तसमं देवि तद्गृहं विद्धि पार्व्वति।
अन्नं विष्ठा पयो मूत्रं तस्मिन् वेश्मनि पार्व्वति॥
शाक्तो वा वैष्णवो वापि शैवो वा परमेश्वरि!।
आदौ लिङ्गं प्रपूज्याथ विल्वपत्रैर्व्वरानने!॥
पश्चादन्यं महेशानि! लिङ्गं प्रार्थ्य प्रपूजयेत्।
अन्यथा मूत्रवत् सर्व्वं शिवपूजां विना प्रिये!॥"

इति लिङ्गार्च्चनतन्त्रे १ पटलः॥

उपक्रमोपसंहारादि। यथा। लिङ्गानि तु उपक्रमोपसंहारावभ्यासापूर्व्वताफलार्थवादोपपत्त्याख्यानि। तदुक्तम्।

"उपक्रमोपसंहारावभ्यासोऽपूर्व्वताफलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये॥"

तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपादानं उपक्रमोपसंहारौ। यथा छान्दोग्ये षष्ठे प्रपाठके। प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादौ ऐतदात्म्यमिदं सर्व्वमित्यन्ते च प्रतिपादनम्॥ १॥ प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनं अभ्यासः। यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम्॥ २॥ प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तरेणाविषयीकरणं अपूर्व्वत्वम्। यथा। तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम्॥३॥ फलन्तु। प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्। यथा। तत्रैव आचार्य्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिप्रयोजनं श्रूयते॥ ४॥ प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं अर्थवादः। यथा तत्रैव उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनम्॥ ५॥ प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः। यथा तत्र यथा सौम्यैकेन मृत्पिण्डेन सर्व्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते॥६॥ इति श्रीपरमहंससदानन्दयोगीन्द्रविरचितवेदान्तसारः॥ (पुराणविशेषः। यथा, देवीभागवते। १। ३। १०।

"एकादशसहस्राणि लिङ्गाख्यं चातिविस्तृतम्॥"

अस्यान्यद्विवरणं पुराणशब्दे द्रष्टव्यम्॥ हेतुः। यथा, तर्ककौमुद्याम्। "लिङ्गज्ञानजन्यं लिङ्गिज्ञानमनुमितिः॥ "ज्ञायमानं लिङ्गन्तु करणं न हि।" इति भाषापरिच्छेदः॥ सूक्ष्मशरीरम्। यथा, पञ्चदश्याम्। १। २३।

"बुद्धिकर्म्मेन्द्रियप्राणपञ्चकैर्म्मनसा धिया।
शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते॥")

लिङ्गकः, पुं, (लिङ्गेन कायतीति। कै+कः।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य कपित्थशब्दे विज्ञेयाः॥)

लिङ्गवर्द्धः, पुं, (लिङ्गं वर्द्धयतीति। वृध्+णिच्+अच्।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥ शिश्नवृद्धिकरणम्। तस्यौषधं यथा,—

"कटुतैलं भल्लातकं बृहतीफलदाडिमम्।
वल्कलैः साधितं लिप्तं लिङ्गं तेन विवर्द्धते॥"

अपि च।

"कुष्ठमाषमरीचानि तगरं मधुपिप्पली।
अपामार्गाश्वगन्धा च बृहती सितसर्षपाः॥
यवास्तिलं सैन्धवञ्च पाणिकोद्वर्त्तनं शुभम्।
लिङ्गबाहुस्तनानाञ्च कर्णयोश्च विवर्द्धनं भवेत्॥"

इति गारुडे १९० अध्यायः॥

लिङ्गवर्द्धिनी, स्त्री, (लिङ्गं वर्द्धयति या। वृध्+णिच्+इनि। ङीप्।) अपामार्गः। इति शब्दचन्द्रिका॥

लिङ्गवृत्तिः, पुं, (लिङ्गमेव वृत्तिर्जीवनोपायो यस्य।) जीविकार्थजटादिचिह्नधारी। तत्पर्य्यायः। धर्म्मध्वजी २। इत्यमरः। २।७।५४॥

"जीविकादिनिमित्तन्तु यो बिभर्त्ति जटादिकम्।
धर्म्मध्वजी लिङ्गवृत्तिरयं तत्र निगद्यते॥"

इति शब्दरत्नावली॥

लिङ्गालिका, स्त्री, क्षुद्रमूषिकः। तत्पर्य्यायः। दीना २। इति हारावली। २१७॥

लिङ्गिनी, स्त्री, (लिङ्गमस्त्यस्या इति। लिङ्ग+इनिः।) लताविशेषः। पचगुरिया इति हिन्दी भाषा। तत्पर्य्यायः। बहुपत्री २ ईश्वरी ३ शिववल्लिका ४ स्वयम्भूः ५ लिङ्गसम्भूता ६ लैङ्गी ७ चित्रफला ८ चाक्षाली ९ लिङ्गजा १० देवी ११ चण्डा १२ चोपस्तम्भिनी १३ शिवजा १४ शिववल्ली १५। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। दुर्गन्धत्वम्। रसायनत्वम्। सर्व्वसिद्धिकरत्वम्। दिव्यत्वम्। वश्यत्वम्। रसनियामनत्वञ्च। इति राजनिर्घण्टः॥ (सन्न्यासादिलिङ्गधारिणी। यथा, सुश्रुते। ४। २४।

"लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्व्वसु।
वृद्धाञ्च सन्ध्ययोश्चापि गच्छतो जीवितक्षयः॥")

लिङ्गी [न्], पुं, (लिङ्गमस्त्यस्येति। इनिः।) हस्ती। इति जटाधरः॥ त्रि, धर्म्मध्वजी। यथा,—

"अलिङ्गी लिङ्गवेशेन यो लिङ्गमुपजीवति।
स लिङ्गिनां हरेदेनस्तिर्य्यग्योनौ च गच्छति॥"

इति कौर्म्मे उपविभागे १५ अध्यायः॥

(वासनाश्रयः। इति श्रीधरस्वामी॥ यथा, भागवते। ४। २९। ६५।

"तेनास्य तादृशं राजन् लिङ्गिनो देहसम्भवम्।
श्रद्धत्स्वाननुभूतोऽर्थो न मनः स्प्रष्टुमिच्छति॥")

लिप, श ओ श प ञ लेपे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) श, लिम्पोऽस्ति। ओ, लेप्ता। श प ञ, लिम्पति लिम्पते चन्दनेन गात्रं सुखी। इति दुर्गादासः॥

लिपः, पुं, (लिम्पतीति। लिप+कः।) लेपनकर्त्ता। इति लिपधातोः कर्त्तरि कप्रत्ययेन निष्पन्नम्॥

लिपिः, स्त्री, (लिप+"इगुपधात् कित्।" उणा० ४। ११९। इति इन्। स च कित्।) लिखितवर्णम्। तत्पर्य्यायः। लिखितम् २ अक्षरसंस्थानम् ३ लिविः ४। इत्यमरः॥ लिखनम् ५ लेखनम् ६ अक्षरविन्यासः ७ लिपी ८ लिवी ९। इति तट्टीका॥ अक्षररचना १०। इति जटाधरः॥ लिपिका ११। इति शब्दरत्नावली॥ (यथा, नैषधे। १। १५।

"अयं दरिद्रो भवितेति वैधसीं
लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषा न चक्रेऽल्पितकल्पपादपः
प्रणीय दारिद्र्यदरिद्रतां नृपः॥"

अस्याः पञ्चविधत्वं यथा, वाराहीतन्त्रे।

"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा।
गुण्डिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः॥")

लिखितपुस्तकादि। इति केचिदिति भरतः॥

लिपिकरः, पुं, (लिपिं करोतीति। लिपि+कृ+"दिवाविभानिशेति।" ३। २। २१। इति टः।) लेखकः। इत्यमरटीका॥

लिपिका, स्त्री, (लिपिरेव। लिपि+स्वार्थे कन्। टाप्।) लिपिः। इति शब्दरत्नावली॥

लिपिकारः, पुं, (लिपिं करोतीति। कृ+अण्।) लेखकः। इत्यमरः। २। ८। १६॥

लिपी, स्त्री, (लिपिः। कृदिकारादिति ङीष्।) लिपिः। इति शब्दरत्नावली॥

लिप्तं, त्रि, (लिप+क्तः।) भक्षितम्। कृतलेपनम्। तत्पर्य्यायः। दिग्धम् २। इत्यमरः॥ विलिम्पितम् ३। इति शब्दरत्नावली॥ चर्च्चितम् ४। इति जटाधरः॥ (यथा, कथासरित्सागरे। ४। ४८।

"तल्लिप्ताश्चैलखण्डाश्च चत्वारो विहितास्तया॥")

मिलितम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ विषदिग्धम्। इति मेदिनी। ते, ५२॥

लिप्तकः, पुं, (लिप्त एव। स्वार्थे कन्।) विषाक्तबाणः। इत्यमरः। २। ८। ८८॥

लिप्तिका, स्त्री, (लिप्तैव। स्वार्थे कन्।) दक्षः। यथा। वैश्वस्य चतुर्थोऽंशः अवयादौ लिप्तिकाचतुष्कं अभिजित्। इति सतृतत्वमुक्तावली॥

लिप्सा, स्त्री, (लब्धुमिच्छा। लभ+सन्+अः। टाप्।) इच्छा। इत्यमरः॥ (यथा, हरिवंशे। ३८। २६।

"लिप्सां चक्रे प्रसेनात्तु मणिरत्ने स्यमन्तके।

गोविन्दो न च तं लेभे शक्तोऽपि न जहार ह॥")

लिप्सुः, त्रि, (लभ+सन्+उः।) लब्धुमिच्छुः। तत्पर्य्यायः। गृध्नुः २ गर्द्धनः ३ तृष्णक् ४ लुब्धः ५ अभिलाषुकः ६ लोलुपः ७ लोलुभः ८। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। २४। ११८।

"सोऽप्युपायनलोभात्तत् महर्धं कल्पितायतिः।

उपप्रदानं लिप्सूनामेकं ह्याकर्षणौषधम्॥")

लि(वि)बिः, स्त्री, (लिप्+इन्। बाहुलकात् पस्य बत्वम्।) लिपिः। इत्यमरः॥

लिबि(वि)कारः, पुं, (लिबिं करोतीति। कृ+"दिवाविभानिशेति।" ३। २। २१। इति टः।) लिपिकरः। लिपिं करोति इत्यर्थे त्वकुट इत्यनेन कर्त्तरि टप्रत्ययेन निष्पन्नः॥

लिबि(वि)ङ्करः, पुं, (लिपिं करोतीति। कृ+टः। पृषोदरादित्वात् द्वितीयाया अलुक्।) लिपिकारः। इत्यमरटीकायां भानुदीक्षितः॥

लिबी, स्त्री, (लिबि+कृदिकारादिति ङीष्।) लिपिः। इति शब्दरत्नावली॥

लिम्पः, पुं, (लिम्पतीति। लिम्प+"अनुपसर्गात् लिम्पविन्देति।" ३। १। १३८। इति शः।) लेपनकर्त्ता। इति लिम्पधातोः कर्त्तरि शप्रत्ययनिष्पन्नम्। इति मुग्धबोधव्याकरणम्॥

लिम्पटः, पुं, विटगः। इति हारावली। १६२॥

लिम्पार्कं, क्ली, निम्बूकविशेषः। पातिलेबु इति भाषा। तस्य गुणाः। सुरभित्वम्। स्वादुत्वम्। गाम्यत्वम्। भक्तरोचनत्वम्। वातश्लेष्महरत्वम्। मुद्रात्वम्। हृदिष्टत्वम्। नातिपित्तकृत्त्वञ्च। इति राजवल्लभः॥ (तथा च।

"कर्षं शुद्धं न्यस्तं ताम्रं लिम्पार्काद्भूत्वचाप्लम्॥"

इति रसेन्द्रसारसंग्रहे शौद्धि यकृदरिलौहे।)

लिम्पाकः, पुं, जम्बीरः। खरः। इति शब्दरत्नावली॥

लिश, ङ य औ तीक्ष्णे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) तीक्ष्णमल्पीभावः। ङ य, लिश्यते धर्म्मः कलौ। औ, लेष्टा। इति दुर्गादासः॥

लिश, श औ गत्याम्। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-अनिट्।) लिशति। औ, अलिक्षत् लेष्टा। इति दुर्गादासः॥

लिश्वः, पुं, नर्त्तकः। लशधातोः कर्त्तरि वन्प्रत्ययेन निपातनात् सिद्धः। उपधाया इत्वमपि। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। १।१५३॥ (लश्व इति पाठः साधुः॥)

लिह, ल ञ औ स्वादे। इति कविकल्पद्रुमः॥ (अदा०-उभ०-सक०-अनिट्।) ल ञ, लेढि पुष्पाणि षट्पदः। लीढे। औ, अलिक्षत्। इति दुर्गादासः॥

ली, कि द्रावणे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-अनिट्।) द्रावणं द्रवीकरणम्। कि, लाययति लयति। मिथ्योर्येकत्वाविति लापयति लोहमग्नौ कर्म्मकारः। स्नेहद्रवे तु लाल्योर्लन्नगाविति जनो घृतमग्नौ लीनयत्यपि। इति दुर्गादासः॥

ली, गि श्लेषे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-अक०-अनिट्।) गि, लिनाति बाला लावण्यं प्राप्नोतीत्यर्थः। कर्म्माविवक्षायाञ्च लिनाति जलधौ नदी। लीनः लीनिः। अयं अन्तःस्थतृतीयादिः। इति दुर्गादासः॥

ली, ङ य औ श्लेषे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) ङ य, लीयते चन्द्रः सूर्य्ये। औ, लीनः। इति दुर्गादासः॥

लीक्षा, स्त्री, लिक्षा। इति शब्दरत्नावली॥

लीखा, स्त्री, लिक्षा। इति शब्दरत्नावली॥

लीढः, त्रि, आस्वादितः। इति लिहधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः॥ (यथा, श्रीकण्ठचरिते। १। ५३।

"सा शुद्धयेऽस्तु शिवपादनखावनिर्यो

भक्त्या यदीयरचिलीढललाटपट्टाः॥")

लीनः, त्रि, (ली+क्तः। "ओदितश्च।" ८। २। ४५। इति निष्ठातस्य नः।) लयप्राप्तः। श्लिष्टः। इति व्याकरणम्। अपि च।

"दिवाकराद्रक्षति यो गुहासु

लीनं दिवाभीतमिवान्धकारम्।

क्षुद्रेऽपि नूनं शरणं प्रपन्ने

ममत्वमुच्चैःशिरसामतीव॥"

इति कुमारसम्भवे। १।१२॥

लीला, स्त्री, (लयनमिति। ली+सम्पदादित्वात् क्विप्। लियं लातीति। ला+कः।) केलिः। विलासः। शृङ्गारभावचेष्टा। इति मेदिनी। ले, ४७॥ खेला। इति विश्वः॥ (यथा, भागवते। १। १। १८।

"अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः।

लीलाविदधतः स्वैरमीश्वरस्यात्ममायया॥")

अलब्धप्रियसमागमया स्वचित्तविनोदनार्थं प्रियस्य या वेशगतिहसितभणितैरनुकृतिः क्रियते सा लीला। तथा च।

"अप्राप्तवल्लभसमागमनायिकायाः

सख्याः पुरोऽत्र निजचित्तविनोदबुद्ध्या।

आलापवेशगतिहास्यविलोकनाद्यैः

प्राणेश्वरानुकृतिमाकथयन्ति लीलाम्॥" इति।

प्रियानुकरणं लीला। यथा वैनोदितं वदति याति तथा तथासावित्यादीत्यन्योऽपि। ली ङ य औ श्लिषि नाम्नीति लक् लीला। इत्यमरटीकायां भरतः॥ *॥ सा प्रकटाप्रकटभेदेन द्विविधा यथा,—

"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते।"

इति पद्मपुराणम्॥

तथा हि।

"सदानन्दैः प्रकाशैः स्वैर्लीलाभिश्च स दीव्यति।

तत्रैकेन प्रकाशेन कदाचिज्जगदन्तरे॥

सहैव स्वपरीवारैर्जन्मादि कुरुते हरिः।

कृष्णभावानुसारेण लीलाख्या शक्तिरेव सा॥

तेषां परिकराणाञ्च तं तं भावं विभावयेत्।

प्रपञ्चगोचरत्वेन सा लीला प्रकटा स्मृता॥

अन्यास्त्वप्रकटा भान्ति तादृश्यस्तदगोचराः।

तत्र प्रकटलीलायामेव स्यातां गमागमौ॥

गोकुले मथुरायाञ्च द्वारकायाञ्च शार्ङ्गिणः।

यास्तत्र तत्राप्रकटास्तत्र तत्रैव सन्ति ताः॥"

इति श्रीभागवतामृतम्॥

लीलावती, स्त्री, (लीलाऽस्त्यस्या इति। लीला+मतुप्। मस्य वः।) केलियुक्ता। विलासवती। शृङ्गारभावचेष्टान्विता। खेलाविशिष्टा। इति लीलाशब्दार्थदर्शनात्॥ *॥ भास्कराचार्य्यस्य पत्नी। तत्कृताङ्कग्रन्थः। यथा। गोदावरीतीरनिवासिनो महाराष्ट्रदेशोद्भवस्य श्रीभास्कराचार्य्यस्य ग्रन्थकर्त्तुः सुप्रिया लीलावती विरहविच्छिन्नहृदयस्य तां पदैर्लीलावत्या लीलावतीमिव। इति लीलावतीग्रन्थस्य मङ्गलाचरणश्लोकस्य टीकायां भवेशः॥ *॥ (अविक्षितनृपतेः स्त्रीविशेषः। यथा, मार्कण्डेये। १२२। १७।

"लीलावती वीरसुता वीरभद्रसुतानिभा॥")

वेश्याविशेषः॥ यथा,—

"अभिरूपेण सम्पन्नान् घट्टयित्वा विना भृतिम्।

धर्म्मकार्य्यमिति ज्ञात्वा न गृह्णाति कथञ्चन॥

योऽसौ सुवर्णकारश्च दरिद्रोऽप्यथ सत्त्ववान्।

न मूल्यमादादेशात: सभार्य्य ऋद्धिसंयुतः।

धर्म्मद्वीपपतिर्ज्ज्ञातः सूर्य्यायुतसमप्रभः॥"

इति मत्स्यपुराणे लीलावतीवेश्याया लवणाचलदाने धर्म्मतरुघटकस्य तथाविधफलदर्शनात्।

इति तिथ्यादितत्त्वम् ॥ * ॥ न्यायग्रन्थविशेषः । तस्य द्वितीयश्लोको यथा,—

"इयं नाकुलसुजन्मनो गुणगणः कर्म्माधिकं श्लाघ्यते
जातिर्विप्रुतिमागता न च पुनः श्लाघ्या विशेषस्थितिः ।
सम्बन्धः सहजो गुणादिभिरयं यत्रास्तु सत्प्रीतये
साम्नीषा नयवेश्मकर्म्मकुशला श्रीन्यायलीलावती ॥"

इति मक्षनमिश्रः ॥

लीलोद्यानं, क्ली, (लीलार्थमुद्यानम् ।) देववनम् । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । १०६ । ४१ ।
"अथ मानससुक्षुण्ण देवर्षिव्रातसेवितम् ।
अतीत्य गन्धशैलञ्च लीलोद्यानं द्युयोषिताम् ॥")

लुक्, [च्] पुं, लोपः । यथा । स्वमोर्लुक् क्लीवात् परयोः स्वमोर्लुक् स्यात् । इति मुग्धबोधव्याकरणम् ॥

लुक्कायितः, त्रि, (लुक् कायस्य यस्य तादृश इवाचरतीति । लुक्काय + क्विप् । ततः क्तः ।) अन्तर्हितः । यथा । अन्तर्धानं लुक्कायनमिति यावत् । यथा गुरोरन्तर्द्धत्ते शिशुः निलीयते पलायते लुक्कायते लुक्कायतीति लुपापनयनेऽपि लुक् । लुक् कायः शरीरं यस्य स लुक्कायः ततः स इव आचरतीति क्वौ साध्यम् । इति कारकटीकायां दुर्गादासः ॥ कर्म्मणि क्तप्रत्ययेन निष्पन्नोऽयम् ॥

लुङ्गुषः, पुं, छोलङ्गः । इति रत्नमाला ॥

लुच, इ क भासार्थे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सक०-च-सेट् ।) इ क, लुञ्चयति । भा दीप्तिः । भासार्थो निकेतनहिंसाबलदानानि । इति दुर्गादासः ॥

लुच, अपनयने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) सोऽलुचीत् कचं बालिकम् । इति दुर्गादासः ॥

लुट, विलोटविलोडनयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-विलोटे अक०-विलोडने सक०-सेट् ।) लोटति । इति दुर्गादासः ॥

लुट, इ ह्रुतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लुण्टति । ह्रुतिश्चौर्य्यम् । इति दुर्गादासः ॥

लुट, ऌ ऋ य विलोटविलोडनयोः । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-विलोटे अक०-विलोडने सक०-सेट् ।) ऌ, अलुटत् । ऋ, अलुलुटत् अलुलोटत् । य, लुट्यति । विलोटः सम्भ्रमीभावः । तत्र लुट्यन् सशोको भुवि रोदनावान् । इति भट्टिः ॥ विलोडने लुट्यत्प्रहारकान् दुर्गान् कपाटानि च लोटति । इति हलायुधः । इति दुर्गादासः ॥

लुट, ऌ ङ दीप्तिप्रतिहत्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-पुनर्हनने सक०-सेट् ।) ऌ, अलुटत् । ङ, लोटते । प्रतिहतिः शोकादिना पतनं पुनर्हननं वा । इति दुर्गादासः ॥

लुट, क भासे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, लोटयति । भासो दीप्तिः । इति दुर्गादासः ॥

लुठ, उपघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लोठति । इति दुर्गादासः ॥

लुठ, इ गत्यालस्यस्तेयखोटे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक० च-सेट् ।) इ, लुण्ठति । आलस्यं मन्दीभावः । स्तेयं चौर्य्यम् । खोटः खोडनम् । इति दुर्गादासः ॥

लुठ, ऌ ङ प्रतीघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऌ, अलुठत् । ङ, लोठते । इति दुर्गादासः ॥

लुठ, क चौर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लोठयति । इति दुर्गादासः ॥

लुठ, शि लोटे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् ।) शि, लुठति अलुठीत् लुलोठ । लोटः सम्भ्रमीभावः । हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले । इति दुर्गादासः ॥

लुठनं, क्ली, (लुठ लोटे + ल्युट् ।) अश्वस्य भूमौ पुनः पुनः श्रमोपहननम् । लोटा इति गड़ागड़ि इति च भाषा । तत्पर्य्यायः । वेल्लनम् २ । इति त्रिकाण्डशेषः ॥

लुठितः त्रि, (लुठ + क्तः ।) तद्भुवि परावृत्तः । श्रमशान्त्यर्थं पुनःपुनर्भूमौ लुठितोऽश्वः । तत्पर्य्यायः । उपावृत्तः २ । इत्यमरभरतौ ॥ वेल्लितः ३ । इति शब्दरत्नावली ॥ अपावृत्तः ४ परावृत्तः ५ । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । १०२ । ७७ ।
"शिलाकलापो लुठितः किमञ्जनगिरेरयम् ।
किमुताकालकल्पान्तमेघौघः पतितो भुवि ॥")

लुड, मन्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लोडति । मन्थो विलोडनम् । इति दुर्गादासः ॥

लुड, शि संवृतौ । क्षेपे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) शि, लुडति अलुडीत् लुलोड । इति दुर्गादासः ॥

लुण्ट, कि अवज्ञाचौर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) दन्त्यनकारप्रकृतिः टयोगान्मूर्द्धन्यः । तेन भ्वादिपक्षे यङादौ नलोपे लुट्यत इत्यादि । कि, लुण्टयति लुण्टति । इति दुर्गादासः ॥

लुण्टकः पुं, (लुण्टतीति । लुण्ट + ण्वुल् ।) शाकविशेषः । नम्बा इति भाषा । तत्पर्य्यायः । मारिषः २ । इति शब्दचन्द्रिका ॥

लुण्टा, स्त्री, (लुण्ट + अङ् । टाप् ।) लुठनम् । इति काचित् शब्दरत्नावली ॥

लुण्टाकः, पुं, (लुण्टतीति । लुण्ट + "जल्पभिक्षकुट्टलुण्टवृङः षाकन् ।" ३ । २ । १५५ । इति षाकन् ।) चौरः । लुटधातोः षाकप्रत्ययेन निष्पन्नः ॥

लुण्टाकी, स्त्री, (लुण्टाक + षित्वात् ङीप् ।) चौरा स्त्री । इति मुग्धबोधव्याकरणम् ॥

लुण्ठकः, त्रि, (लुण्ठतीति । लुण्ठ + ण्वुल् ।) स्तेयकारकः । लुटेरा इति भाषा । यथा,—
"ये चौरा वह्निना दुष्टा गरदा ग्रामलुण्ठकाः ।
सारमेयादने ते वै पात्यन्ते पातकान्विताः ॥"
इति पाद्मे पातालखण्डम् ॥

लुण्ठनं, क्ली, (लुण्ठ + ल्युट् ।) लुठनम् । इति काचित् शब्दरत्नावली ॥ (यथा, देवीभागवते । ५ । १ । १८ ।
"हरणं लुण्ठनं तद्वत् ततुपत्नीनां नराधिप ! ॥")

लुण्ठा, स्त्री, (लुण्ठ + अङ् । स्त्रियां टाप् ।) लुठनम् । इति काचित् शब्दरत्नावली ॥

लुण्ठाकः, पुं, (लुण्ठ + षाकन् ।) काकः । इति त्रिकाण्डशेषः ॥ (चौरः । यथा, कलाविलासे । १ । २ ।
"विप्रोऽभिसारिकाणां भवनगवाक्षस्फाटिकप्रभानिकरः ।
यत्र विराजति रजनीतिमिरपटप्रकटलुण्ठाकः ॥")

लुण्डी, स्त्री, लुठनम् । इति काचित् शब्दरत्नावली ॥

लुण्ड, क चौर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लुण्डयति । इति दुर्गादासः ॥

लुण्डिका, स्त्री, (लुण्डी । स्वार्थे कन् । ततष्टाप् ।) न्यायसारिणी । इति हारावली ॥ एतच्च वेष्टितमेषलोमादिः । लुड़ि इति लुटि इति च भाषा ॥ यथा,—
"सैन्धवञ्च घृताभ्यक्तं ताम्रभाजनमातपे ।
प्रतप्तमूर्खया घृतं तत्क्षणञ्च समाहरेत् ॥"
ताम्रभाजने घृतं सैन्धवं दत्त्वा रौद्रे तप्तं कृत्वा मेषलोमलुण्डिकया घृतं मकयदं कृत्वा तेन व्यचयेत् । इति भैषज्यरत्नावली ॥

लुण्डी, स्त्री, न्यायसारिणी । इति त्रिकाण्डशेषः ॥

लुथ, इ कुन्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लुन्थति । कुन्थो बधक्लेशौ । इति दुर्गादासः ॥

लुप, ऋ श प ऌ न औ छिदे । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-अनिट् ।) ऋ, अलूलुपत् अलुलोपत् । श प न, लुम्पति लुम्पते । ऌ, अलुपत् । औ, लोप्ता । इति दुर्गादासः ॥

लुप, इर् य शुपि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) इर्, अलुपत् अलोपीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । य, लुप्यति । शुपि आकुलीभावे । पातु लुप्यति यावत्यं नैवाक्षिपुटैर्नरः । इति हलायुधः । इति दुर्गादासः ॥

लुप्, पुं, (लुप छेदे + क्विप् ।) लोपः । यथा । अभोभगोऽघोभ्योऽपि लुप् । इति मुग्धबोधव्याकरणम् ॥

लुप्तं, क्ली, (लुप् + क्तः ।) चौर्य्यधनम् । लोत इति ख्यातम् । इति शब्दरत्नावली ॥ लोपवति, त्रि । यथा,—
"वन्तुमानिति लुप्तार्न्तं चाक्षालं त्राह्मणेति च । प्रशंसा निन्दनं द्वेषात् परत्वाञ्च विशिष्यते ॥"
इति तिथ्यादितत्त्वम् ॥
(यथा च, आर्य्यासप्तशत्याम् । ३६३ ।
"परिहृतनाभि लुप्तत्रिवलि श्यामस्तनाग्रमलसाचि ।
बहुधवलजघनरेखं वपुर्न्न पुरुषायितं सहते ॥")
लुब, कि द अर्द्दने । इति कविकल्पद्रुमः ॥ (चुरा०-पत्ते भ्वा०-पर०-सक०-सेट् ।) कि, लुम्बयति लुम्बति । द, लुम्ब्यते । अर्द्दनं वधः । इति दुर्गादासः ॥
लुब्धः, पुं, (लुभ + गत्यर्थेति क्तः ।) व्याधः । (यथा, महाभारते । १६ । ४ । २१ ।
"स संनिरुद्धेन्द्रियवाड्मनास्तु
शिश्ये महायोगमुपेत्य कृष्णः ।
जराथ तं देशमुपाजगाम
लुब्धस्तदानीं मृगलिप्सुरुग्रः ॥")
लम्पटः । इति शब्दरत्नावली ॥
लुब्धः, त्रि, (लुभ + क्तः ।) आकाङ्क्षी । इति मेदिनी । धे, १४ ॥ तत्पर्य्यायः । गृध्नुः २ । गर्द्धनः ३ अभिलाषुकः ४ तृष्णक् ५ । इत्यमरः ॥ (यथा, कथासरित्सागरे । ५५ । ३० ।
"लुब्धो यशसि नार्थे भीतः पापान्न शत्रुतः । मूर्खः परापवादेषु न च शास्त्रेषु योऽभवत् ॥")
लुब्धकः, पुं, (लुब्ध एव । स्वार्थे कन् ।) व्याधः । इत्यमरः ॥ (यथा, कथासरित्सागरे । ८ । २४ ।
"आस्माकमीदृशं मांसं हरते लुब्धका इति ॥")
लम्पटः । इति लुब्धशब्दार्थदर्शनात् ॥ (यथा, भागवते । ४ । २५ । ५३ ।
"निर्ऋतिर्नाम पश्चाद्द्वास्तया याति पुरञ्जनः । वैशसं नाम विषयं लुब्धकेन समन्वितः ॥")
लुभ, य इर् गार्द्ध्ये । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) गार्द्ध्यमाकाङ्क्षा । य, लुभ्यति धनं लुब्धः । इर्, अलुभत् अलोभीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥
लुभ, श विमोहने । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) श, लुभत्यात्मनि कामे च । इति हलायुधः ॥ लोभिता लोब्धा । इति दुर्गादासः ॥ [क्तप्रत्ययेन निष्पन्नः ॥
लुभितः, त्रि, विमोहितः । विमोहनार्थलुभधातोः
लुल, विमर्द्दने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लौचधातुरयम् । लुलापः । इति दुर्गादासः ॥
लुलापः, पुं, (लुल्यते इति । लुल विमर्द्दने + भिदादित्वात् अङ् । लुलां आप्नोतीति । आप् + अण् ।) महिषः । इत्यमरः ॥ (यथा, दुर्गाभक्तितरङ्गिण्याम् ।
"लुलापं खड्गेन छिन्धि छिन्धि ॥")
(तथास्य पर्य्यायः ।
"महिषो घोटकारिः स्यात्कासरश्च रजस्वलः ।
यौनस्कन्धः लुलायो लुलापो यमवाहनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
लुलापकन्दः, पुं, (लुलापप्रियः कन्दः ।) महिषकन्दः । इति राजनिर्घण्टः ॥
लुलापकान्ता, स्त्री, (लुलापस्य कान्ता ।) महिषी । इति राजनिर्घण्टः ॥
लुलितः, त्रि, (.लुल + क्तः ।) आन्दोलितः । यथा,
"प्रेङ्खोलितस्तरलितो लुलितान्दोलितावपि ।"
इति भूरिप्रयोगः ॥
(यथा, कथासरित्सागरे । ३७ । ७० ।
"हत्वा रथान्यौश्चिच्छेद शिरो लुलितकुण्डलम् ॥"
विकीर्णः । इति श्रीधरः ॥ यथा, भागवते । १ । ६ । ३४ ।
"युधि तुरगरजो विधूम्रविष्वक्
कचलुलितश्रमवार्य्यलङ्कृतास्ये ॥"
व्याप्तः । यथा, रामायणे । २ । ६५ । १६ ।
"न स्म विश्वासते देवी शोकाश्रुलुलितानना ॥"
म्लानः । यथा, आर्य्यासप्तशत्याम् ।
"प्रातर्निद्राति यथा यथाल्पमा लुलितनिःसहैरङ्गैः ।
जामातरि मुदितमनास्तथा तथा सादरा श्वश्रूः ॥"
उन्मूलितः । यथा, भागवते । ३ । १६ । २४ ।
"विशीर्णबाह्वङ्घ्रिशिरोरुहोऽपतत्
यथा नगेन्द्रो लुलितो नभस्वता ॥"
स्खलितः । यथा, तत्रैव । ४ । ६ । १० ।
"किम्वम्बकाशलुलितात् पततां विमानात् ॥"
विध्वस्तः । यथा, तत्रैव । ७ । ८ । २३ ।
"येऽन्नस्तपितुः कुपितहासविजृम्भितभ्रू-
विस्फूर्ज्जितेन लुलिताः स तु ते निरस्तः ॥")
लुष, स्तेये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लोषति । इति दुर्गादासः ॥
लुष, हिंसने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लौचधातुरयम् । लुष्टः । इति दुर्गादासः ॥
लुषभः, पुं, (रोषतीति । रुष हिंसायाम् + "रुषेर्नित् लुष् च ।" उणा० ३ । १२४ । इति अभच् । लुषादेशश्च धातोः ।) मत्तहस्ती । इत्युणादिकोषः ॥
लुह, औ गार्द्ध्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट् ।) औ, अलुहत् । गार्द्ध्यं दाभुमिच्छा । लोहति धनं लोकः । इति दुर्गादासः ॥
लू, ञ गि छिदि । इति कविकल्पद्रुमः ॥ (क्र्या०-उभ०-सक०-अनिट् ।) ञ गि, लूनाति लूनीते । लूनः लूनिः । इति दुर्गादासः ॥
लूता, स्त्री, (लूनातीति । लू + बाहुलकात् तन् । गुणाभावश्च ।) कीटविशेषः । माकड़सा इति भाषा । तत्पर्य्यायः । तन्तुवायः २ ऊर्णनाभः ३ मर्कटकः ४ । इत्यमरः ॥ मर्कटः ५ लूतिका ६ ऊर्णनाभिः ७ प्लवकः ८ तन्तवायः ६ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ५०४ ।
"लूतातन्तुनिरुद्धद्वारः शून्यालयः पतत्पतगः ।
पथिके तस्मिन्नचलमिहितमुखो रोदितीव सखि ! ॥")
पिपीलिका । रोगविशेषः । इति मेदिनी । ते, ५२ ॥ शेषस्य पर्य्यायः । मर्म्मभेदः २ इका ३ । इति राजनिर्घण्टः ॥ तद्रोगस्य निदानादि लूतानां जन्तुविशेषाणामुत्पत्तिं चाह ।
"यस्माल्लूनतृणं प्राप्ता मुनेः प्रस्वेदविन्दवः ।
तेभ्यो जातास्ततो लूता इति ख्यातास्तु षोडश ॥"
अत्र सुश्रुतः ।
"विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम् ।
वशिष्ठं कोपयामास गत्वाश्रमपदं किल ॥
कुपितस्य मुनेस्तस्य ललाटे स्वेदविन्दवः ।
अपतन् दर्शनादेव ह्यधस्तात्तीव्रवर्चसः ॥
लूने तृणे महर्षेस्तु धेन्वर्थे संभृतेऽपि च ।
ततो जातास्त्विमा घोरा नानारूपा महाविषाः ।
तासामष्टौ कष्टसाध्या वर्ज्ज्यास्तावन्त एव हि ॥"
तत्र त्रिमण्डलाप्रभृतयोऽष्ट कष्टसाध्याः । सौवर्णिकाप्रभृतयोऽष्टावसाध्याः । तासां सामान्यतो दंशलक्षणमाह ।
"ताभिर्दष्टे दंशकोथप्रवृत्तिः क्षतजस्य च ।
ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदोषजाः ॥
पिड़का विविधाकारा मण्डलानि महान्ति च ।
शोथा महान्तो मृदवो रक्ताः श्यावाश्चलास्तथा ।
सामान्यं सर्व्वलूतानामेतद्दंशस्य लक्षणम् ॥"
दंशकोथदंशमध्ये पूतिभावः ।
"दंशमध्ये तु यत् कृष्णं श्यावं वा जालकावृतम् ।
दग्धाकृति भृशं पाकं क्लेदशोथज्वरान्वितम् ।
दूषीविषाभिर्लूताभिस्तद्दष्टमिति निर्दिशेत् ॥"
सौवर्णिकादयोऽष्टावसाध्यास्तद्दष्टानां लक्षणमाह ।
"शोथः श्वेतासिता रक्ता पीता च पिड़का ज्वरः ।
प्राणान्तिको भवेद्दाहः श्वासो हिक्का शिरोग्रहः ॥ * ॥
तस्यौषधं यथा,—
"रजनीयुग्मपतङ्गमञ्जिष्ठानागकेशरैः ।
शीताम्बुपिष्टैरालेपः सद्यो लूतां विनाशयेत् ॥"
अपि च ।
"अभयां रोचनां कुष्ठमकेशुरं तथोत्पलम् ।
नलवेतसमूलानि गरलं सुरसां तथा ॥
एकलिङ्गं समञ्जिष्ठामनन्ताञ्च शतावरीम् ।

शृङ्गाटकं समङ्गाञ्च पद्मकेशरमित्यपि ॥
कल्कोकृत्य पचेत् सर्पिः पयो दत्त्वा चतुर्गुणम् ।
सम्यक् पक्वेऽवतीर्णे च शीते तस्मिन् विनिः । क्षिपेत् ॥
सर्पिस्तुल्यं भिषक् क्षौद्रं ततस्तच्च निधापयेत् ।
विषाणि हन्ति दुर्गाणि गरदोषक्षतानि च ॥
स्पर्शाद्धन्ति विषं सर्व्वं गरैरुपहतां त्वचाम् ।
योगश्चन्तमकं कण्डुं मांससादं विसंज्ञताम् ॥
नाशयत्यञ्जनाभ्यङ्गं पानवस्तिषु योजितम् ।
सर्पकीटाखुलूतादिदष्टानां विषहृत् परम् ॥”
मृत्युपाशच्छेदि घृतम् । इति भावप्रकाशः ॥
(तथा च ।
“कोटिभ्यो दारुणतरा लूताः षोडश ता जगुः ।
अष्टाविंशतिरित्येके ततोऽप्यन्ये तु भूयसीः ॥
सहस्ररश्मानुचरा वदन्त्यन्ये सहस्रशः ।
बहुरूपरूपा तु लूतैकेव विषात्मिका ॥
रूपाणि नामतस्तस्या दुर्ज्ञेयान्यतिसङ्करात् ।
नास्ति स्थानव्यवस्था च दोषतोऽतः प्रचक्षते ॥
कृच्छ्रसाध्या पृथग्दोषैरसाध्या निचयेन सा ।
तद्दंशः पैत्तिको दाहतृट्स्फोटज्वरदाहवान् ॥
भृशोष्मा रक्तपीताभः क्लेदी द्राक्षाफलोपमः ।
श्लेष्मिकः कठिनः पाण्डुः परूषकफलाकृतिः ॥
निद्रां शीतज्वरं कासं कण्डूञ्च कुरुते भृशम् ।
वातिकः परुषः श्यावः पर्व्वभेदज्वरप्रदः ॥
तद्विभागं यथास्वञ्च दोषलिङ्गैर्विभावयेत् ।
असाध्यायास्तु हृन्मोहश्वासहिक्काशिरो- रुजाः ॥
श्वेताः पीताः सिता रक्ताः पिटिकाः श्वयथू- द्भवाः ॥
वेपथुर्व्वमथुर्दाहस्तृड़ान्ध्यं वक्रनासता ।
श्यावोऽष्ठवक्त्रदन्तत्वं पृष्ठग्रीवावभञ्जनम् ॥
पक्वजम्बूसवर्णञ्च दंशात् स्रवति शोणितम् ।
सर्व्वापि सर्व्वजा प्रायो व्यपदेशस्तु भूयसा ॥
तीक्ष्णमध्यावरत्वेन सा त्रिधा हन्त्युपेक्षिता ।
सप्ताहेन दशाहेन पक्षेण च परं क्रमात् ॥
लूतादंशश्च सर्व्वोऽपि दद्रुमण्डलसन्निभः ।
सितोऽसितोऽरुणः पीतः श्यावो वा मृदुरु- न्नतः ॥
मध्ये कृष्णोऽथवा श्यावः पर्य्यन्ते जाल- कावृतः ।
विसर्पवान् शोफयुतस्तप्यते बहुवेदनः ॥
ज्वराशुपाकविक्लेदकोदावदरणान्वितः ।
क्लेदेन यत् स्पृशत्यङ्गं तत्रापि कुरुते व्रणम् ॥
श्वासदंष्ट्राशकृन्मूत्रशुक्रलालानखार्त्तवैः ।
अष्टाभिरुद्वमन्त्येता विषं वक्रैर्व्विशेषतः ॥
लूता नाभेर्द्दंशत्यूर्द्ध्वमूर्द्ध्वं वाधश्च कीटकाः ।
तद्दूषितञ्च वस्त्रादिदेहे पृक्तं विकारकृत् ॥
दिनार्द्धं लक्ष्यते नैव दंशो लूताविषोद्भवः ।
सूच्यौषधवदाभाति ततोऽसौ प्रथमेऽहनि ॥
अव्यक्तवर्णः प्रचलः किञ्चित् कण्डूरुजान्वितः ।
द्वितीयेऽभ्युन्नतोऽन्तेषु पिटकैरिव चाचितः ॥
व्यक्तवर्णो नतो मध्ये कण्डूमान् ग्रन्थिसन्निभः ।
तृतीये सज्वरो रोमहर्षकृद्रक्तमण्डलः ॥
शरावरूपस्तोदाढ्यो रोमकूपेषु सस्रवः ।
महांश्चतुर्थे श्वयथुस्तापश्वासभ्रमप्रदः ॥
विकारान् कुरुते तांस्तान् पञ्चमे विषकोपजान् ।
षष्ठे व्याप्नोति मर्म्माणि सप्तमे हन्ति जीवितम् ॥
इति तीक्ष्णं विषं मध्यं हीनञ्च विभजेदतः ।
एकविंशतिरात्रेण विषं शाम्यति सर्व्वथा ॥
अथाशु लूतादष्टस्य शस्त्रेणादंशमुद्धरेत् ।
दहेच्च जाम्बवौष्ठाद्यैर्न तु पित्तोत्तरं दहेत् ॥
कर्कशं भिन्नरोमाग्रं मर्म्मसन्ध्यादिसंश्रितम् ।
प्रसृतं सर्व्वतो दंशं नच्छिन्दीत दहेन्न च ॥
लेपयेद्दग्धमगदैर्मधुसैन्धवसंयुतैः ।
सुशीतैः सेचयेच्चानुकषायैः क्षीरिवृक्षजैः ॥
सर्व्वतोऽपहरेद्रक्तं शृङ्गाद्यैः सिरयापिवा ।
सेका लेपास्ततः शीता बोधिश्लेष्मातकाक्षरैः ॥
फलिनीद्विनिशाक्षौद्रसर्पिर्भिः पद्मकाह्वयः ।
अशेषलूताकीटानामगदः सर्व्वकार्म्मिकः ॥”
“रोध्रं सेव्यं पद्मकं पद्मरेणुः
कालीयाख्यं चन्दनं यच्च रक्तम् ।
कान्ता पुष्पं दुग्धिनीका मृणालं
लूताः सर्व्वा घ्नन्ति सर्व्वक्रियाभिः ॥”
इति वाग्भटे उत्तरस्थाने ३७ अध्यायः ॥)

लूतारिः, पुं, (लूताया अरिः ।) दुग्धफेनीक्षुपः । इति राजनिर्घण्टः ॥

लूतिका, स्त्री, (लूतेव । स्वार्थे कन् । टापि अत इत्वम् ।) मर्कटकः । इति शब्दरत्नावली ॥

लूनः, त्रि, (लूयते स्मेति । लू + क्तः । “ल्वादिभ्यः ।” ८ । २ । ४४ । इति निष्ठातस्य नः ।) छिन्नः । इत्यमरः ॥ (यथा, कथासरित्सागरे ।२७।१४३।
“दैवेन वैरिणा संख्ये लूनबाहुर्वनः क्षतः ॥”
उपचितः । यथा, कुमारे । ३ । ६१ ।
“तस्याः सखीभ्यां प्रणिपातपूर्व्वं
स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्य्यत त्र्यम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥”)

लूनकः, पुं, (लून एव । स्वार्थे कन् ।) भेदितः । पशुः । इति मेदिनी । के, १५६ ॥

लूनिः, स्त्री, (लू + क्तिन् । “ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम् ।” ८ । २ ।४४ । इत्यस्य वार्त्तिकोक्त्या तस्य नः ।) छेदः । इति मुग्धबोधव्याकरणम् ॥ (व्रीहिः । इत्युणादिवृत्तौ उज्ज्वल- दत्तः । ४ । १०५ ॥)

लूमं, क्ली, (लूयते इति । लू + बाहुलकात् मक् ।) लाङ्गूलम् । इत्यमरः ॥

लूमविषः, पुं, (लूमे लाङ्गूले विषमस्य ।) वृश्चि- कादिः । इति हेमचन्द्रः ॥

लूष, क वधे । स्तेये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, लूषयति । इति दुर्गादासः ॥

लेखः, पुं, (लिख्यते इति । लिख् + घञ् ।) देवः । इत्यमरः ॥ लेखाः । इति मेदिनी । खे, ४ ॥ (यथा, कुमारे । १ । ७ ।
“भजन्ति विद्याधरसुन्दरीणा-
मनङ्गलेखक्रिययोपयोगम् ॥”)

लेखकः, पुं, (लिखतीति । लिख् + ण्वुल् ।) लेखनकर्त्ता । तत्पर्य्यायः । लिपिकरः २ अक्षर- चणः ३ अक्षरचुञ्चुः ४ । इत्यमरः । २।८ । १५ ॥ वोलकः ५ करकः ६ मसीपण्यः ७ करप्रणीः ८ । इति शब्दरत्नावली ॥ वर्णी ९ । इति जटा- धरः ॥ * ॥ तस्य लक्षणानि यथा,—
“सर्व्वदेशाक्षराभिज्ञः सर्व्वशास्त्रविशारदः ।
लेखकः कथितो राज्ञः सर्व्वाधिकरणेषु वै ॥
शीर्षोपेतान् सुसंपूर्णान् समश्रेणिगतान् समान् ।
अक्षरान् वै लिखेद्यस्तु लेखकः स वरः स्मृतः ॥
उपायवाक्यकुशलः सर्व्वशास्त्रविशारदः ।
बह्वर्थवक्ता चाल्पेन लेखकः स्याद्भृगूत्तम ॥
वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् ।
अनाहार्य्यो नृपे भक्तो लेखकः स्याद्भृगूत्तम ॥”
इति मात्स्ये १८९ अध्यायः ॥ * ॥
अपि च ।
“सकृदुक्तगृहीतार्थो लघुहस्तो जिताक्षरः ।
सर्व्वशास्त्रसमालोकी प्रकृष्टो नाम लेखकः ॥”
इति चाणक्यसंग्रहः ॥ * ॥
राजलेखकलक्षणं यथा,—
“ब्राह्मणो मन्त्रणाभिज्ञो राजनीतिविशारदः ।
नानालिपिज्ञो मेधावी नानाभाषासमन्वितः ॥
मन्त्रणाचतुरो धीमान् नीतिशास्त्रार्थकोविदः ।
सन्धिविग्रहभेदज्ञो राजकार्य्ये विचक्षणः ॥
सदा राजहितान्वेषी राजसन्निधिसंस्थितः ।
कार्य्याकार्य्यविचारज्ञः सत्यवादी जितेन्द्रियः ॥
स्वरूपवादी शुद्धात्मा धर्म्मज्ञो राजधर्म्मवित् ।
एवमादिगुणैर्युक्तः स एव राजलेखकः ॥
नृपानुवर्त्ती सततं नृपविश्वासरक्षकः ।
नृपतेर्हितकाङ्क्षी स एव राजलेखकः ॥”
इति मन्त्रकौमुदी ॥ * ॥
लेखकर्म्म कायस्थेन कर्त्तव्यम् । यथा,—
“लेखकानपि कायस्थान् लेखकृत्ये विचक्ष- णान् ॥”
कुर्य्यादितिशेषः । इति पराशरसंहितायाम् १० अध्यायः ॥ (गणेशस्तु महाभारतस्य लेखकः । यथा, महाभारते । १ । १ ७८—७९ ।
“श्रुत्वैतत् प्राह विघ्नेशो यदि मे लेखनी क्षणम् ।
लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहम् ॥
व्यासोऽप्युवाच तं देवमबुद्ध्वा मा लिख क्वचित् ।
ओमित्युक्त्वा गणेशोऽपि बभूव किल लेखकः ॥”)

लेखनं, क्ली, (लिख + ल्युट् ।) छर्द्दनम् । भूर्ज्जत्वक् । अक्षरविन्यासः । इति मेदिनी । ने, १२२ ॥*॥
भूमौ लेखननिषेधो यथा,—
“न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत् ॥”
इति योगिनीतन्त्रे तृतीयभागे ७ पटलः ॥
लेखनाञ्जनम् । यथा,—
“दग्धाक्षत्वक्शिलाकाचशङ्खचन्दनसैन्धवैः ।
चूर्णितैरञ्जनं प्रोक्तं पुष्पार्म्मादिनिकृन्तनम् ॥”

दण्ड: कुक्कुट: तस्याण्डस्य त्वक् । शिला मन:-शिला । इति भावप्रकाश: ॥

लेखन:, पुं, (लिख + ल्यु: ।) काश: । इति राज-निर्घण्ट: ॥

लेखनिक: पुं, (लेखनं शिल्पमस्य । लेखन + ठन् ।) लेखहारक: । परहस्तेन लेखक: । स्वहस्तेन लेखक: । इति मेदिनी । के, २११ ॥

लेखनी, स्त्री, लिख्यतेऽनया । (लिख + ल्युट् । ङीप् ।) लेखनसाधनवस्तु । तत्पर्य्याय: । वर्ण-तूलिका २ । इति हारावली ॥ वर्णतूली ३ कलम: ४ अक्षरतूलिका ५ । इति जटाधर: ॥ कराश्रय: ६ चित्रक: ७ । इति शब्दरत्नावली ॥ * ॥ (यथा, महाभारते ।१।१।७८।

"श्रुत्वैतत् प्राह विघ्नेशो यदि मे लेखनी क्षणम् ।
लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहम् ॥")

लेखनीकरणशुभाशुभं यथा,—

"वंशलब्ध्या लिखेद्यस्तु तस्य हानिर्भवेद्ध्रुवम् ।
ताम्रलब्ध्या तु विभवो भवेन्न तत्क्षयो भवेत् ॥
महालक्ष्मीर्भवेन्नित्यं सुवर्णस्य शलाकया ।
इन्द्रनलस्य लब्ध्या वै मतिवृद्धि: प्रजायते ॥
तथा चाग्निमयैर्देवि पुत्रपौत्रधनागम: ।"

अग्निमयैश्चित्रकाष्ठमयै: ।

"दैर्घ्येण विपुला लक्ष्मी: कार्श्येन मरणं भवेत् ।
अष्टाङ्गुलप्रमाणेन दशाङ्गुलेन वाथवा ।
चतुरङ्गुललब्ध्या वा यो लिखेत् पुस्तकं शुभे ।
तत्तदक्षरसंख्यं तु लक्ष्मायुर्याति वै दिने ॥"

यथा दैर्घ्येणेत्यादिवचने एकत्रैव विधिनिषेधौ तथाचाष्टाङ्गुलदशाङ्गुलयोर्विधि: निषेधश्चतु-रङ्गुले । इति योगिनीतन्त्रे तृतीयभागे ७ पटल: । (खटिका । तत्पर्य्यायो यथा,—

"खटिका कठिनी चापि लेखनी च निगद्यते ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

लेखनीय:, त्रि, लेख्यम् । लेखितव्यम् । इति लिख-धातो: कर्म्मण्यनीयप्रत्ययेन निष्पन्नम् । (यथा, सुश्रुते । ६ । १८ ।

"लेखनो लेखनीयश्च रोपणीयश्च स त्रिधा ॥")

लेखर्षभ:, पुं, (लेखेषु देवेषु ऋषभ: श्रेष्ठ: । लेख ऋषभ इवेति वा ।) इन्द्र: । इत्यमर: ॥

लेखहार:, पुं, लेखं हरति इत्यर्थे अण्प्रत्ययेन निष्पन्न: । पत्रवाहक: । इति सिद्धान्तकौमुदी । (यथा, कथासरित्सागरे । ५ । ६५ ।

"निगूढं च नृपस्तत्र लेखहारं व्यसर्जयत् ॥")

लेखहारक:, पुं, (लेखहार एव । स्वार्थे कन् ।) पत्रवाहक: । (यथा, कथासरित्सागरे । १९ । १९० ।

"पाञ्चालाय स्वनगरे स्थितेनोच्छृङ्खलस्थिते: ।
भ्रातुर्मणिबलस्यैष प्रहितो लेखहारक: ॥")

लेखा, स्त्री, (लिख्यते इति । लिख + बाहुलकात् अप् । टाप् ।) लिपि: । पङ्क्ति: । इति मेदिनी । खे, ४ ॥

लेखार्ह:, पुं, (लेखे अर्ह: ।) श्रीतालवृक्ष: । इति राजनिर्घण्ट: । लेखनयोग्ये, त्रि ।

लेखितं, त्रि, लेखते यत् । कारितलिखितम् । इति ण्यन्तलिखधातो: क्तप्रत्ययेन निष्पन्नम् ॥

लेख्यं, त्रि, (लिख + ण्यत् ।) लेखितव्यम् लेखनीयम् । इति लिखधातो: कर्म्मणि यप्रत्य-येन निष्पन्नम् ॥ * ॥ व्यवहाराङ्गकक्रियापादा-ङ्गम् । यथा,—

"षाण्मासिकेऽपि समये भ्रान्ति: संजायते यत: ।
धात्राक्षराणि सृष्टानि पत्रारूढान्यत: पुरा ॥
लेख्यन्तु द्विविधं प्रोक्तं स्वहस्तान्यकृतन्तथा ।
असाक्षिकं साक्षिमच्च सिद्धिर्देशस्थितेस्तयो: ॥
मतास्तु साक्षिणो यत्र धनिकर्णिकलेखका: ।
तदप्यपार्थं करणन्ते त्वाधे: स्थिराश्रयात् ॥
दर्शितं प्रतिकालञ्च पठितं श्रावितञ्च यत् ।
लेख्यं सिध्यति सर्व्वत्र मृतेष्वपि च साक्षिषु ॥"

इति व्यवहारतत्त्वे बृहस्पति: ॥

अपि च । साम्प्रतं लेख्यं निरूप्यते । तत्र लेख्यं द्विविधम् । शासनं जानपदञ्चेति । शासनं निरू-पितम् । जानपदमभिधीयते । तच्च द्विविधम् । स्वहस्तकृतमन्यकृतञ्चेति । तत्र स्वहस्तकृतम-साक्षिकम् । अन्यकृतं ससाक्षिकम् । अनयोश्च देशाचारानुसारेण प्रामाण्यम् । यदाह नारद: ।

"लेख्यन्तु द्विविधं ज्ञेयं स्वहस्तान्यकृतन्तथा ।
असाक्षिमत् साक्षिमच्च सिद्धिर्देशस्थितेस्तयो: ॥"

इति ॥

तत्रान्यकृतमाह ।

"य: कश्चिदर्थो निष्णात: स्वरुच्या तु परस्परम् ।
लेख्यन्तु साक्षिमत् कार्य्यन्तस्मिन् धनिकपूर्व्वकम् ॥"

धनिकाधमर्णयोर्योऽर्थो हिरण्यादि: परस्परं स्वरुच्या इयता कालेनैतावद्देयमितीयती च प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थित-स्तस्मिन्नर्थे कालान्तरे विप्रतिपत्तौ वस्तुतत्त्व-निर्णयार्थं लेख्यम् । साक्षिमदुक्तलक्षणं साक्षि-युक्तम् । धनिक: पूर्व्वो यस्मिन् तद्धनिकपूर्व्वकम् । धनिकनामलेखनपूर्व्वकमिति यावत् कार्य्यं कर्त्तव्यम् । उक्तलक्षणा: साक्षिणो वा कर्त्तव्या: ।

"वर्णा तु यत् कृतं कार्य्यं सिद्धार्थन्तस्य साक्षिण: ।
प्रवर्त्तन्ते विवादेषु स्वकृतं वाप्यलेख्यकम् ॥"

इति स्मरणात् ।

अपि च ।

"समामासतदर्द्धाहर्नामजातिस्वगोत्रकै: ।
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् ॥"

समा संवत्सर: । मासश्चैत्रादिस्तदर्द्ध: पक्ष: शुक्ल: कृष्णो वा । अहस्तिथि: प्रतिपदादि: । नाम धनिकाधमर्णयो: । जातिर्ब्राह्मणादि: । स्वगोत्रं वाशिष्ठादिगोत्रमेतै: समादिभिश्चिह्नि-तम् । तथा सब्रह्मचारिकं बह्वृचादिशाखा-प्रयुक्तं गुणनामबह्वृच: कठ इति । आत्मीय-पितृनाम धनिकर्णिकपितृनाम । आदि ग्रह-णाद्द्रव्यजातिसंख्याचारादेर्ग्रहणम् । एतैश्चि-ह्नितं लेख्यं कार्य्यमिति गतेन सम्बन्ध: । किञ्च ।

"समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् ।
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम् ॥"

धनिकाधमर्णयोर्योऽर्थ: स्वरुच्या व्यवस्थित-स्तस्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णो नामात्मीयं स्वहस्तेनास्मिन् लेख्ये यदुपरि लेखितं तन्ममामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत् पत्रे लिखेत् । तथा;—

"साक्षिणश्च स्वहस्तेन पितृनामकपूर्व्वकम् ।
अत्राहममुक: साक्षी लिखेयुरिति ते समा: ॥"

तस्मिन् लेख्ये ये साक्षिणो लिखितास्तेऽप्यात्मीयपितृनामलेखनपूर्व्वकमस्मिन्नर्थे अहममुको देवदत्त: साक्षीति स्वहस्तेनैकैकशो लिखेयुस्ते च समा: संख्यातो गुणतश्च कर्त्तव्या: । यद्य-धमर्ण: साक्षी वा लिपिज्ञो न भवति तदाध-मर्णोऽन्येन साक्षी च साक्ष्यन्तरेण सर्व्वसाक्षि-सन्निधौ स्वमतं लेखयेत् । यथाह नारद: ।

"अलिपिज्ञ ऋणी य: स्यात् स्वमतन्तु स लेख-येत् ।
साक्षी वा साक्षिणान्येन सर्व्वसाक्षी समीपत: ॥"

इति ।

अपि च ।

"उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना ।
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत् ॥"

ततो लेखको धनिकाधमर्णिकाभ्यां उभाभ्यां प्रार्थितेन मयामुकेन देवदत्तेन विष्णुमित्रसूनुना एतल्लेख्यं लिखितमित्यन्ते लिखेत् ॥ * ॥ साम्प्रतं स्वकृतलेख्यमाह ।

"विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितन्तु यत् ।
तत् प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते ॥"

यल्लेख्यं स्वहस्तेन लिखितं अधमर्णेन तत् साक्षि-भिर्विनापि प्रमाणं स्मृतं मन्वादिभि: । बलोप-धिकृतादृते । बलेन बलात्कारेण । उपधिना छललोभक्रोधभयमदादिलक्षणेन यत् कृतं तस्मा-द्विना । नारदोऽप्याह ।

"मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत् ।
तदप्रमाणं लिखितं भयोपधिकृतन्तथेति ॥"

तच्चैतत् स्वहस्तकृतं परहस्तकृतञ्च यल्लेख्यं देशा-चारानुसारेण सम्बन्धकव्यवहारे बन्धकव्यवहार-युक्तमर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपेन च लेख्यमित्येतावन्न पुन: साधुशब्दैरेव प्रातिस्विक-देशभाषयापि लेखनीयम् । यथाह नारद: ।

"देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणम् ।
तत् प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम् ॥"

इति ॥

विधानं विधिराधेर्विधिराधीकरणन्तस्य लक्ष-णम् । गोप्याधिर्भोग्याधि: कालकृतमित्यादि तद्-व्यक्तं विस्पष्टं यस्मिंस्तद्व्यक्ताधिविधिलक्षणम् । अविलुप्तक्रमाक्षरं पर्य्यायात् क्रम: क्रमश्चाक्षराणि च क्रमाक्षराणि अविलुप्तानि क्रमाक्षराणि यस्मिं-स्तदविलुप्तक्रमाक्षरम् । तदेवं भूतं लिखितं प्रमा-णम् । राजशासनवन्न साधुशब्दनियमोऽत्राभि-प्राय: । लेख्यप्रसङ्गेन लेख्यारूढमपराणं त्रिभिरेव

देयमित्याह । ऋणं लेख्यकृतन्देयं पुरुषैस्त्रिभिरेव तु । यथा साक्ष्यादिकृतमृणन्त्रिभिरेव देयं तथा लेख्यकृतमप्याहर्तृपुत्रतत्पुत्रैस्त्रिभिरेव देयम् । न चतुर्थादिभिरिति नियम्यते । ननु पुत्रपौत्रैर्ऋणन्देयमित्यविशेषेणर्णमात्रन्त्रिभिरेव देयमिति नियतमेव । बाढमस्यैवोत्सर्गस्य पत्रारूढर्णविषये स्मृत्यन्तरप्रभवामपवादशङ्कामपनेतुमिदं वचनमारब्धम् । तथा हि । पत्रलक्षणमभिधाय कात्यायनेनाभिहितम् । एवं कालमतिक्रान्तं पितॄणान्दाप्यते ऋणमिति । इत्थं पत्रारूढमतिक्रान्तकालमपि पितॄणामपि पितॄणां सम्बन्धि दाप्यते । अत्र पितॄणामिति बहुवचननिर्द्देशात् कालमतिक्रान्तमिति वचनाच्चतुर्थादिर्दाप्यत इति प्रतीयते । तथा हारीतेनापि । लेख्यं यस्य भवेद्धस्ते लाभस्तस्य विनिर्द्दिशेदिति । अत्रापि यस्य हस्ते पत्रमस्ति तस्यर्णलाभ इति सामान्येन चतुर्थादिभ्योऽप्यृणलाभोऽस्तीति प्रतीयते । अनश्चैतदाशङ्कानिवृत्त्यर्थं एतद्वचनमिति युक्तम्। वचनद्वयन्तु योगीश्वरवचनानुसारेण योजनीयम् ॥*॥ अस्यापवादमाह । आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते । सबन्धकेऽपि पत्रारूढे ऋणे त्रिभिरेव देयमिति नियमाद्धनापकरणानधिकारेणाध्याहरणेऽप्यनधिकारंप्राप्ताविदमुच्यते । यावच्चतुर्थेन पञ्चमेन वा ऋणं न दीयते तावदेवाधिर्भुज्यत इति वदता सबन्धकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शितः । नन्वेतदप्ययुक्तमेव फलभोग्यो न नश्यतीति सत्यम् । तदप्येतस्मिन्न सत्यपवादवचने पुरुषत्रयविषयमेव स्यादिति सर्व्वमनवद्यम् । * । प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसरति ।

"देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा ।
भिन्ने दग्धेऽथवा च्छिन्ने लेख्यमन्यत्तु कारयेत् ॥"

व्यवहाराक्षमे पत्रे पत्रान्तरं कुर्य्यादिति विधीयते । व्यवहाराक्षमत्वञ्चात्यन्तव्यवहितदेशान्तरस्थे पत्रे दुर्लेख्ये दुष्टानि सन्दिह्यमानानि अवाचकानि वा लेख्यानि लिप्यक्षराणि पदानि वा यस्मिंस्तद्दुर्लेख्यं तस्मिन्दुर्लेख्ये नष्टे कालवशेन उन्मृष्टे मसीदौर्ब्बल्यादिना म्लदिते लिप्यक्षरे हृते तस्करादिभिर्भिन्ने विदलिते दग्धे अग्निना छिन्ने द्विधा भूते सति द्विर्भवति । एतच्चार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्यां विमत्यान्तु व्यवहाराप्राप्तौ देशान्तरस्थपत्रानयनाध्यानापेक्षया कालो दातव्यः दुर्द्देशावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्य्यः । यथाह नारदः ।

"लेखे देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते ।
सतस्तत्कालकरणमसतो द्रष्टृदर्शनम् ॥" इति ।

सतो विद्यमानपत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः । असतः पुनरविद्यमानस्य पत्रस्य पूर्व्वं ये द्रष्टारः साक्षिणस्तैर्द्दर्शनं व्यवहारपरिसमापनं कार्य्यम् । यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्य्यः अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्द्दिशेदिति स्मरणात् । एतच्च जानपदं व्यवस्थापत्रम् । राजकीयमपि व्यवस्थापत्रमीदृशमेव भवति । इयांस्तु विशेषः ।

"राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितन्तथा ।
राजकीयं स्मृतं लेख्यं सर्व्वेष्वर्थेषु साक्षिमत् ॥"
इति ॥ * ॥

तथान्यदपि राजकीयं जयपत्रं वृद्धवशिष्ठेनोक्तम् ।
यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियम् ।
सावधारणकञ्चैव जयपत्रकमिष्यते ॥
प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया ।
सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्रकमिति ॥

तथा । सभासदोऽपि मतं मेऽमुकपुत्रस्येति स्वहस्तं दद्युः ।

"सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः ।
यथा लेख्यविधौ तद्वत् स्वहस्तं दद्युरेव ते ॥"
इति मनुस्मरणात् ॥

सभासदाञ्च परस्परानुमतिव्यतिरेकेण व्यवहारो निःशल्यो भवति । यथाह नारदः ।

"यत्र सभ्यो जनः सर्व्वः साध्वेतदिति मन्यते ।
स निःशल्यो विवादः स्यात् सशल्यस्त्वन्यथा भवेत् ॥" इति ।

एतच्चतुष्पाद्व्यवहार एव ।

"शोधयेत् साध्यमर्थं यच्चतुष्पादान्वितञ्च यत् ।
राजमुद्राङ्कितञ्चैव जयपत्रकमिष्यते ॥"
इति स्मरणात् ॥

यत्र तु हीनता यथा ।

"अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥"
इति ।

तत्र न जयपत्रमस्ति अपि तु हीनपत्रमेव तच्च कालान्तरे दण्डप्राप्त्यर्थं जयपत्रं तु प्राड्न्यायविधिसिद्ध्यर्थमिति विशेषः । लेख्यसन्देहे निर्णयनिमित्तान्याह ।

"सन्दिग्धलेख्यशुद्धिः स्यात् स्वहस्तलिखितादिभिः ।
युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः ॥"

शुद्धमशुद्धञ्चेति सन्दिग्धस्य लेख्यस्य शुद्धिः स्वहस्तलिखितादिभिः स्यात् । स्वहस्तेन लिखितं यल्लेख्यान्तरन्तेन शुद्धिः । यदि सदृशान्यक्षराणि भवन्ति तदा शुद्धिः स्यादित्यर्थः । आदिशब्दात् साक्षिलेखकस्वहस्तलिखिताक्षरसमादाच्छुद्धिरिति । युक्त्या प्राप्तिर्युक्तिप्राप्तिः । देशकालपुरुषाणां द्रव्येण सह सम्बन्धः प्राप्तिः । अस्मिन्देशे अस्मिन् काले अस्य पुरुषस्येदं द्रव्यं घटत इति युक्तिः । प्राप्तिः क्रिया तत्साक्ष्युपन्यासः । चिह्नमसाधारणं श्रीकारादि । सम्बन्धः अर्थिप्रत्यर्थिनोः पूर्व्वमपि परस्परविश्वासेन दानग्रहणादिसम्बन्धः । आगमोऽस्यैतावतोऽर्थस्य सम्भावितः प्राप्त्युपायः । एत एव हेतवः । एभिर्हेतुभिः सन्दिग्धलेख्यशुद्धिः स्यादित्यन्वयः । यदा तु लेख्ये सन्देहानिर्णयो न जायते तदा साक्षिभिर्निर्णयः कार्य्यः । यथाह कात्यायनः ।

"दूषिते पत्रके वादी तदारूढांस्तु निर्द्दिशेत् ॥"
इति ।

साक्षिसम्भवविषयमिदं वचनम् । साक्ष्यसम्भवविषयन्तु हारीतवचनम् ।

"न मयैतत् कृतं पत्रं कूटमेतेन कारितम् ।
अधरीकृत्य तत् पत्रमथ दिव्येन निर्णयः ॥"
इति ॥ * ॥

एवं शोधिते पत्रे ऋणे च दातव्ये प्राप्ते यदा कृत्स्नमेवर्णन्दातुमसमर्थस्तदा किं कर्त्तव्यमित्यत आह ।

"लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वर्णिको धनम् ।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम् ॥"

यदाधमर्णिकः सकलमृणं दातुमसमर्थस्तदा शक्त्यनुसारेण दत्त्वा दत्त्वा पूर्व्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेदेतावन्मया दत्तमिति । उत्तमर्णो वा उपगतं प्राप्तं धनन्तस्यैव लेख्यस्य पृष्ठे दद्यादभिलिखेदेतावन्मया लब्धमिति । कथं स्वहस्तपरिचिह्नितम् । स्वहस्तलिखिताक्षरचिह्नितम् । यद्वोपगतं प्रवेशपत्रं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णो दद्यात् ॥ * ॥ ऋणे तु कृत्स्ने दत्ते लेख्यं किं कर्त्तव्यमित्यत आह ।

"दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यै चान्यत्तु कारयेत् ।"

क्रमेण सकृदेव वा कृत्स्नमृणन्दत्त्वा पूर्व्वकृतं लेख्यम्पाटयेत् । यदा तु दुर्गदेशावस्थितं लेख्यं नष्टं वा तदा शुद्ध्यै अधमर्णत्वनिवृत्त्यर्थमन्यल्लेख्यं कारयेदुत्तमर्णमधमर्णः पूर्व्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रं अधमर्णाय दद्यादित्यर्थः । * । ससाक्षिके ऋणे कृत्स्ने दातव्ये किं कर्त्तव्यमित्यत आह ।

"साक्षिमच्च भवेत् यद्वा तद्दातव्यं ससाक्षिकम् ।"

यत्तु ससाक्षिकमृणन्तत् पूर्व्वसाक्षिसमक्षमेव दद्यात् । इति लेख्यप्रकरणम् । इति मिताक्षरायां व्यवहाराध्यायः ॥

लेख्यचूर्णिका, स्त्री, (लेख्यस्य चूर्णिका ।) तूलिका इति शब्दरत्नावली ॥

लेख्यपत्रः, पुं, (लेख्यं लेखार्हं पत्रं यस्य ।) तालवृक्षः । इति भावप्रकाशः ॥ लेखनीयपत्रे, क्ली ॥

लेख्यस्थानं, क्ली, (लेख्यस्य स्थानम् ।) लिख्यते यत्र । आफिस इति दप्तरखाना इति च म्लेच्छभाषा । तत्पर्य्यायः । ग्रन्थकुटी २ । इति शब्दरत्नावली ॥

लेण्डं, क्ली, गूथम् । न्याड़ इति भाषा । यथा,—
" उत्सृजन्ते हृलेण्डं मूत्रञ्च भयमाप च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे धेनुकासुरवधे २२ अध्यायः ॥

लेप, ऋ ङ गमने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अलिलेपत् । ङ, लेपते लिलेपे । इति दुर्गादासः ॥

लेपः, पुं, (लिप + घञ् ।) लेपनम् । (यथा, मार्कण्डेये । ३५ । १५ ।

"भूमिर्विशुध्यते कालात् दाहमार्ज्जनगोक्रमैः ।
लेपादुल्लेखनात् सेकाद्वेश्मसंमार्ज्जनार्च्चनात् ॥")

भोजनम् । इति मेदिनी । पे, १० ॥ (लिप्यते-ऽनेनेति ।) सुधा । इति विश्वः ॥ चुन इति भाषा ॥

लेपकः, पुं, (लिम्पतीति । लिप् + ण्वुल् ।) जातिविशेषः । राज इति थेकर इति च भाषा । तत्पर्य्यायः । पलगण्डः २ । इत्यमरः ॥ लेपी ३ । इति शब्दरत्नावली ॥ लेप्यकृत् ४ । इति हेमचन्द्रः ॥ (लेपनकर्त्तरि, त्रि ॥)

लेपनं, क्ली, (लिप् + ल्युट् ।) लेपः । लेपा इति भाषा । यथा,—
"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता ।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभितम् ॥"
इति तिथ्यादितत्त्वम् ॥

विष्णुगृहलेपनफलं यथा,—
वराह उवाच ।
"शृणु तत्त्वेन मे देवि ! लिप्यमानस्य यत् फलम् ।
सर्व्वं ते कथयिष्यामि यथा प्राप्नोति मानवः ॥
गोमयं गृह्य वै भूमे मम वेश्मोपलेपयेत् ।
न्यस्तानि तत्र यावन्ति पदानि च विलिम्पतः ॥
तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते ।
यदि द्वादश वर्षाणि लिप्यते मम कर्म्मसु ॥
जायते विपुले शुद्धे धनधान्यसमाकुले ॥
दिव्यैर्नमस्कृतो देवि ! कुशद्वीपाय गच्छति ।
कुशद्वीपमनुप्राप्य सहस्रं जीवते दश ।
मद्भक्तश्चैव जायेत महिमागुणवान् शुचिः ॥
कुशद्वीपात् परिभ्रष्टो मम कर्म्मपरायणः ।
राजा वै जायते सुभ्रु सर्व्वधर्म्मेषु निष्ठितः ॥
लेपनस्य प्रभावेण मम कर्म्मपरायणः ।
भक्त्या यवस्थितश्चापि सर्व्वशास्त्राणि गच्छते ॥
देवि ! कारयते सर्व्वं मम चायतनानि च ॥
कारयित्वा यथान्यायं मम लोकाय गच्छति ॥
गोमयस्य तु वक्ष्यामि तच्छृणुष्व वसुन्धरे ।
गोमयन्तु समासाद्य यावल्लोकोऽनुगच्छति ॥
समीपे यदि वा दूरे गत्वानयति गोमयम् ।
यावन्ति तत्पदान्यस्य तावद्वर्षसहस्रकम् ।
गोमयानयिता चैव स्वर्गलोके महीयते ॥
एकादशसहस्राणि एकादशशतानि च ।
ततः स शाल्मले द्वीपे रमते च सुदा युतः ॥
शाल्मलात्तु परिभ्रष्टो राजा भवति धार्म्मिकः ।
मद्भक्तश्चैव जायेत सर्व्वधर्म्मविदांवरः ॥
अथ द्वादशवर्षाणि मच्चित्तः सुदृढव्रतः ।
वहते गोमयं सुभ्रु मम लोकाय गच्छति ॥"
इति वराहपुराणम् ॥

देवीगृहलेपनफलं यथा,—
"देव्या गृहन्तु यः शुभ्र गोमयेनानुलेपयेत् ।
स्त्रियो वा यदि वा पुंसः षण्मासन्तु निरन्तरम् ।
स लभेदीप्सितान् कामान् देव्या लोकञ्च गच्छति ॥"
इति देवीपुराणे ४२ अध्यायः ॥

(रात्रौ लेपननिषेधो यथा,—
"न रात्रौ लेपनं कुर्य्यात् शुष्कमाणं न धारयेत् ।
शुष्कमाणमुपेक्षेत प्रदेहे पीडनं प्रति ॥"
इति मध्यखण्डे त्रयोविंशेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

लेपनः, पुं, (लिम्पत्यनेनेति । लिप् + करणे ल्युट् ।) तुरुष्कनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

लेपी [न्] पुं, (लिम्पतीति । लिप् + णिनिः ।) लेपकः । थेकर इति भाषा । इति शब्दरत्नावली ॥ लेपकर्त्तरि लेपविशिष्टे च त्रि ॥

लेप्यं, त्रि, (लिप् + ण्यत् ।) लेपनीयम् । लेपनम् । लिपधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥ (यथा, भागवते । ११ । २७ । १२ ।
"शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥")

लेप्यकृत्, पुं, (लेप्यं करोतीति । कृ + क्विप् ।) लेपकः । इति हेमचन्द्रः । ३ । ५८६ ॥

लेप्यमयी, स्त्री, (लेप्य + मयट् । ङीप् ।) काष्ठादिघटितपुत्तलिका । तत्पर्य्यायः । अञ्जलिकारिका २ । इति हेमचन्द्रः ॥

लेप्यस्त्री, स्त्री, (लेप्या स्त्री ।) सुगन्धद्रव्यलिप्ता स्त्री । इति शब्दरत्नावली ॥

लेयः, पुं, सिंहराशिः । इति ज्योतिस्तत्त्वम् ॥

लेलिहानः, पुं, (पुनःपुनरतिशयेन वा लेढीति । लिह् + यङ् + शानच् ।) शिवः । इति शब्दरत्नावली ॥ सर्पः । इति हेमचन्द्रः ॥ पुनःपुनर्लेहनकर्त्तरि, त्रि ॥ (यथा, महाभारते । १ । २३६ । ५ ।
"सप्तजिह्वाननः क्रूरो लेलिहानो विसर्पति ॥")

लेलिहाना, स्त्री, (लेलिहान + स्त्रियां टाप् ।) मुद्राविशेषः । यथा,—
"वक्त्रं विस्फारितं कृत्वाप्यधो जिह्वाञ्च चालयेत् ।
पार्श्वस्थं मुष्टियुगलं लेलिहानेति कीर्त्तिता ॥"
एषा ताराराधने । अन्या लेलिहाना वक्तव्या ।
"योनिर्म्मायाधरः सेन्दुर्वधूः कूर्च्चं क्रमादिदुः ॥
बीजानि चोच्चरन् मन्त्री मुद्राबन्धनमाचरेत् ।
तर्ज्जनीमध्यमानामाः समं कुर्य्यादधोमुखम् ॥
अनामायां क्षिपेद्वृद्धां ऋज्वीं कृत्वा कनिष्ठिकाम् ।
लेलिहानाख्यमुद्रेयं जीवन्यासे प्रकीर्त्तिता ॥"
इति तन्त्रसारः ॥

लेशः, पुं, (लिश् + घञ् ।) कणा । इत्यमरः ॥ (यथा, महाभारते । १२ । ५८ । २४ ।
"एष ते राजधर्म्माणां लेशः समनुवर्णितः ॥")

लेष्टुः, पुं, (लिश्यते इति । लिश् + बाहुलकात् तुन् ।) लोष्टम् । इत्यमरः ॥ (यथा, महाभारते । १३ । ३४ । २६ ।
"अथ यो ब्राह्मणान् क्रुद्धः पराभवति सोऽचिरात् ।
यथा महार्णवे क्षिप्त आमलेष्टुर्व्विनश्यति ॥")

लेष्टुघ्नः, पुं, (लेष्टुं हन्तीति । हन् + टक् ।) लेष्टुभेदनः । इति शब्दरत्नावली ॥

लेष्टुभेदनः, पुं, (लेष्टुं भिनत्तीति । भिद् + ल्युट् ।) लोष्टभङ्गसाधनमुद्गरः । मद इति ख्यातः । इति केचित् । इति भरतः ॥ तत्पर्य्यायः कोटिशः २ । इत्यमरः ॥ कोटीशः ३ । इति रत्नकोषः ॥ लेष्टुघ्नः ४ लेष्टुभेदी ५ चूर्णदण्डः ६ । इति शब्दरत्नावली ॥

लेषिकः, पुं, हस्त्यारोहकः । तत्पर्य्यायः । कटिरोहकः २ । इति शब्दमाला ॥

लेहः, पुं, (लेहनमिति । लिह् + घञ् ।) आहारः । भक्षणम् । इति हेमचन्द्रः ॥ तत्पर्य्यायः । स्वादनम् २ रसनम् ३ स्वदनम् ४ स्वदिः ५ । इति राजनिर्घण्टः ॥ (यथा, बृहत्संहितायाम् । ५ । ४३ ।
"सर्पाशयलेह्यसननिरोधावमर्द्दनारोहाः ।
आघ्रातं मध्यतमस्तमोऽन्त्य इति ते दश ग्रासाः ॥"
कर्म्मणि घञ् । रसः । यथा, सुश्रुते । १ । ४४ ।
"पचेल्लेहं सिता चौद्रं पलार्द्धकुडवान्वितम् ॥"
लेढीति । लिह् + पचाद्यच् । लेहनकर्त्तरि, त्रि । यथा, भट्टिः । ६ । ८२ ।
"दस्योऽहं मधुनो लेहैद्यविरुद्धैर्यथा गिरिः ॥"
अवलेहः । तत्पर्य्यायो यथा,—
"क्वाथस्य स्यात् पुनः पाकात् घनत्वं सा रसक्रिया ।
सोऽवलेहश्च लेहः स्यात्तन्मात्रा स्यात् पलोन्मिता ॥
सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुडः ।
द्रवं चतुर्गुणं दद्यादिति सर्व्वत्र निश्चयः ॥"
इति मध्यखण्डेऽष्टमेऽध्याये शार्ङ्गधरेणोक्तम् ॥")

लेहनं, क्ली (लिह् + ल्युट् ।) जिह्वया रसग्रहणम् । चाटन इति भाषा । तत्पर्य्यायः । जिह्वास्वादः २ । इति हेमचन्द्रः ॥

लेहिनः, पुं, (लिह् + बाहुलकात् इनन् ।) टङ्कणम् । इति हेमचन्द्रः ॥

लेह्यं, क्ली, (लिह् + ण्यत् ।) अमृतम् । इति शब्दमाला ॥ लेहनीये, त्रि ॥ (यथा, कथासरित्सागरे । ४५ । २३० ।
"तत्रनानाविधं भक्ष्यभोज्यलेह्यादि षड्रसम् ।
दिव्यमन्नं बुभुजिरे पपुः पानमथोत्तमम् ॥"
आहारविशेषो यथा,—
"आहारं षड्विधञ्चूष्यं पेयं लेह्यन्तथैव च ।
भोज्यं भक्ष्यन्तथा चर्व्व्यं गुरु विद्याद्यथोत्तरम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लैङ्गं, क्ली, (लिङ्गमधिकृत्य कृतो ग्रन्थ इति । लिङ्गस्येदमिति वा । लिङ्ग + अण् ।) लिङ्गपुराणम् । यथा,—
"मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दन्तथैव च ॥"
इत्यादि पाद्मोत्तरखण्डे ३४ अध्यायः ॥
(अस्य विवरणादिकं पुराणशब्दे द्रष्टव्यम् ॥)

लेङ्गी, स्त्री, लिङ्गिनी । इति राजनिर्घण्टः ॥ लिङ्ग सम्बन्धिनि, त्रि ॥

लोक, ऋ क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) ऋ, अलुलोकत् । क, लोकयति । इति दुर्गादासः ॥

लोक, ऋ ङ दर्शने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अलुलोकत् । ङ, लोकते । विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः । इत्यादौ विलोकनं विलोकः पश्चात् तं करोतीति णौ साध्यम् । इति दुर्गादासः ॥

लोकः, पुं, (लोक्यते इति । लोक्+घञ् ।) भुवनम् । जनः । इत्यमरः ॥ सप्तलोकनामानि यथा —

"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च ।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः ॥"
इत्यग्निपुराणम् ॥

अपि च ।

"भूर्लोको भुवः स्वर्लोकस्त्रैलोक्यमिदमुच्यते ।
महर्ज्जनस्तपः सत्यः सप्त लोकाः प्रकीर्त्तिताः ॥
भूर्लोकः पार्थिवो लोकः अन्तरीक्षं भुवः स्मृतः ।
भाव्यो लोको दिवि ह्येतच्छेषादूर्द्ध्वं यथाक्रमम् ॥
भूतस्याधिपतिर्ह्यग्निस्ततो भूतपतिस्तु सः ।
वायुर्नभसोऽधिपतिस्तेन वायुर्नभस्पतिः ।
भाव्यस्य सूर्य्योऽधिपतिस्तेन सूर्य्यो दिवस्पतिः ॥
गन्धर्व्वाप्सरसश्चैव गुह्यकाः सह राक्षसैः ।
भूर्लोकवासिनः सर्व्वे अन्तरीक्षचरान् शृणु ॥
मरुतः सप्तभिः स्कन्धे रुद्रास्तथैव चाश्विनौ ।
आदित्या वसवः सर्व्वे तथैव च गणाङ्गनाः ॥
चतुर्थे तु महर्लोके तिष्ठन्ते कल्पवासिनः ।
प्रजानां पतिभिः सर्व्वैः सेव्यते पञ्चमो महान् ॥
मनुः सनत्कुमाराद्या वैराजश्च सुतास्त्रयः ।
षष्ठे तु संस्थिता ह्येते देवा देवविरोधकाः ॥
सत्यस्तु सप्तमो लोको ह्यपुनर्भववासिनाम् ।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः ॥
महीतलात् सहस्रांशस्तत ऊर्द्ध्वं दिवाकरः ।
दश तानि ध्रुवे यावद्द्विगुणे द्विगुणान्तरे ॥
दशयोजनकोट्यास्तु मेरुरूर्द्ध्वं ध्रुवः स्मृतः ।
त्रयोविंशतिलक्षाणि त्रैलोक्यमेक उच्यते ॥
द्विगुणेषु सहस्रेषु योजनानां शतेषु च ।
लोकान्तरमथैवैकं ध्रुवादूर्द्ध्वं विधीयते ॥
देवदानवगन्धर्व्वयक्षराक्षसपन्नगाः ।
भूतविद्याधराश्चैव अष्टौ ते देवयोनयः ॥
ते ब्रह्माण्डस्य मध्यस्थाः परतस्तमसावृतम् ।
ततोऽग्निवायुराकाशं ततो भूतादिरुच्यते ॥
ततो महान् प्रधानश्च प्रकृतिः पुरुषस्ततः ।
पुरुषादीश्वरो ज्ञेयो यस्य शक्त्यावृतं जगत् ।
शिवोमाभानुदेवानां परात्परतरा मताः ॥"

इति देवीपुराणे त्रैलोक्याभ्युदये ग्रहगतिर्नामाध्यायः ॥ * ॥ दिक्पालानां लोका यथा,

"प्रजापतिस्तु भगवान् गुणतः प्रेक्ष्य देवताम् ।
आधिपत्येषु शुक्लेषु न्ययोजयत योगवित् ॥
त्रयाणामपि लोकानां देवतानां द्विजोत्तमाः ।
चकार शक्रं राजानं दैत्यानां दितिपूर्व्वजम् ॥
पूर्व्वस्यां कौशिको राजा दक्षिणस्यां यमो दिशि ।
वरुणः पश्चिमायान्तु उत्तरस्यां सदा धनी ॥" * ॥

पुण्यवतां लोका यथा,—

"एवं विभज्य राज्यानि पुरा प्रोक्तानि यानि च ।
लोकांश्च विदधे दिव्यान् ददावथ पृथक् पृथक् ॥
कस्यचित् सूर्य्यसङ्काशान् कस्यचिद्वह्निनिर्म्मलान् ।
कस्यचिद्विद्युद्विद्योतान् कस्यचिच्चन्द्रनिर्म्मलान् ॥
नानावर्णान् काममयाननेकशतयोजनान् ।
स तान् सुकृतिनां लोकान् पावनाय च संस्थितान् ॥
भानूर्द्ध्वं ये तपस्यन्ति सौम्यास्तारागणाः सदा ।
एते सुकृतिनां लोका ये प्राप्ताः पुण्यकर्म्मभिः ।
ये यजन्ति मखैः पुण्यैः समाप्तवरदक्षिणैः ।
स्वदारनिरता दान्ता ऋजवः सत्यवादिनः ॥
दीनानुग्रहकर्त्तारो ब्रह्मण्या लोकपूजिताः ।
योगयुक्ता महात्मानो यान्ति तत्र तपोज्ज्वलाः ॥
सर्व्वं सहाः क्षमायुक्ता कोपिता ये तमोजिताः ।
एवं नियोज्य तनयान् स्वयं लोकपितामहः ।
'पौष्करं ब्रह्मसदनमारुरोह प्रजापतिः ॥
सर्व्वे स्वयम्भुदत्तेषु पावनेषु दिवौकसः ।
रेमिरे स्वेषु लोकेषु महेन्द्रेणाभिपालिताः ॥"

इति वह्निपुराणे वाराहप्रादुर्भावनामाध्यायः ॥

(जनार्थे विषयोऽस्य यथा,—

"यथा लोकस्य सर्गादिस्तथा पुरुषस्य गर्भाधानं यथा कृतयुगमेवं बाल्यम् । यथा त्रेता तथा यौवनं यथा द्वापरस्तथा स्थाविर्य्यं यथा कलिरेवमातुर्य्यं यथा युगान्तस्तथा मरणमित्येवमनुमानेनानुक्तानामपि लोकपुरुषयोरवयवविशेषाणामग्निवेशसामान्यं विद्यात् ।"

"तत्र संयोगापेक्षी लोकशब्दः षड्धातुसमुदायो हि सामान्यतः सर्व्वलोकः । तस्य हेतुरुत्पत्तिर्वृद्धिरुपप्लवो वियोगश्च तत्र हेतुरुत्पत्तिकारणं उत्पत्तिर्जन्म वृद्धिराप्यायनं उपप्लवो दुःखागमः षड्धातु विभागो वियोगः स जीवापगमः स प्राणनिरोधः स भङ्गः स लोकस्वभावः ।" इति चरके शारीरस्थाने पञ्चमेऽध्याये ॥

"तस्मिन् क्रिया सोऽधिष्ठानं कस्मात् लोकस्य द्वैविध्यात् । लोको हि द्विविधः स्थावरो जङ्गमश्च । द्विविधात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात् । पञ्चात्मको वा ।" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥ * ॥)

लोककान्ता, स्त्री, (लोकानां कान्ता प्रिया ।) ऋद्धिनामौषधम् । इति राजनिर्घण्टः ॥ (लोकप्रिये, त्रि । यथा, गो० रामायणे । २ । ३८ । ६ ।

"लोककान्तं प्रियं पुत्रं कुशचीराम्बरं वनम् ।
प्रस्थितं पश्यतो मेऽद्य हृदयं किं न दीर्य्यते ॥")

लोकचक्षुः, [स्] क्ली, (लोकानां चक्षुरिव ।) सूर्य्यः । इति शब्दमाला ॥ जनस्य लोचनञ्च ॥

लोकजित्, पुं, (लोकं जितवानिति । जि+क्विप् ।) बुद्धः । इत्यमरः ॥ (लोकजेतरि, त्रि । यथा, शतपथब्राह्मणे । १४ । ४ । १ । ३३ ।

"यं कामं कामयते तमागायति तद्धैतल्लोकजिदेव ॥")

लोकतुषारः, पुं, (लोके तुषार इव ।) कर्पूरः । इति राजनिर्घण्टः ॥ (कर्पूरशब्देऽस्य गुणादिकं ज्ञातव्यम् ॥)

लोकनाथः, पुं, (लोकानां नाथः ।) बुद्धः । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । १ । १३८ ।

"लोके भगवतो लोकनाथादारभ्य केचन
ये जन्तवो गतक्लेशान् बोधिसत्त्वानवेहि तान् ॥")

ब्रह्मा । इति शब्दरत्नावली ॥ विष्णुः । इति तस्य सहस्रनामस्तोत्रम् ॥ शिवः । यथा,—

"अकिञ्चनः सन् प्रभवः स सम्पदां
स लोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्य्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ॥"
इति कुमारसम्भवम् ॥

(तथा च महालिङ्गार्च्चनतन्त्रे शिवशतनामस्तोत्रे ।

"त्रैलोक्ये लोकनाथश्च रुद्रलोके महेश्वरः ॥")

वटिकौषधविशेषः । तद्यथा,—

"पारदं गन्धकञ्चैव समभागं विचूर्णयेत् ।
मृताभ्रं रसतुल्यञ्च पुनस्तेनैव मर्द्दयेत् ॥
रसाद्द्विगुणलौहञ्च लोहतुल्यञ्च ताम्रकम् ।
भस्मवराटिकायाश्च ताम्रतस्त्रिगुणं क्षिपेत् ॥
नागवल्लीदलेनैव मर्द्दयेद्दृयमतो भिषक् ।
पचेद्गजपुटेनैव स्वाङ्गशीतं समुद्धरेत् ॥
यकृत्प्लीहोदरहरः गुल्मश्वयथुनाशनः ।
पिप्पलीमधुसंयुक्तां सगुडां वा हरीतकीम् ।
गोमूत्रञ्च पिबेच्चानु गुडं वा जीरकान्वितम् ॥"

इति लोकनाथो रसः । इति वैद्यकरसेन्द्रसारसंग्रहे यकृत्प्लीहाधिकारे ॥ * ॥ लोकप्रभौ, त्रि । यथा, गो० रामायणे । २ । ३३ । १६ ।

"लोकनाथस्य रामस्य पीड़या पीड़ितं जगत् ।
अपर्व्वणीव सोमस्य राहुग्रहणपीड़या ॥")

लोकपालः, पुं, (लोकान् पालयतीति । पाल+णिच्+अण् ।) राजा । इति हलायुधः ॥ (यथा, राजतरङ्गिण्याम् । १ । ३४९ ।

"उत्तमो लोकपालोऽयमिति वाच्यः प्रशस्तिषु ।
यः प्राप्तवान् विना यत्नं चपले न मनुष्यताम् ॥")

दिक्पालः । यथा,—

"इन्द्रो वह्निः पितृपतिर्नैरृतिर्वरुणोऽनिलः ।
धनदः शङ्करश्चैव लोकपालाः पुरातनाः ॥"
इति वह्निपुराणम् ॥

(यथा च, मनुः । ५ । ९६ ।
"सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च ।
अष्टानां लोकपालानां वपुर्धारयते नृपः ॥")
लोकबान्धवः, पुं, (लोकानां बान्धवः ।) सूर्य्यः । इति जटाधरः ॥
लोकबाह्यः, पुं, (लोकात् लोकसमाजात् बाह्यः ।) सर्व्वाचारवर्ज्जितः । यथा,—
"लोकबाह्यस्तु यो वाजिगवाद्याचारवर्ज्जितः ॥"
इति जटाधरः ॥
लोकमाता, स्त्री, (लोकानां मातेव ।) लक्ष्मीः । इत्यमरः ॥ (लक्षणया लोकजननीमात्रापि च । यथा, भागवते । २ । ३ । ५ ।
"प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥")
लोकलोचनं, क्ली, (लोकानां लोचनमिव ।) सूर्य्यः । इति शब्दरत्नावली । (जनस्य लोचनञ्च । यथा, कथासरित्सागरे । १८ । ९२ ।
"सोऽथ सत्पाणिघातेन यस्तैर्विदारितः शरः ।
जगाम व्याप्तिजयादलक्ष्यो लोकलोचनैः ॥")
लोकविनायकः, पुं, (लोके विनायक इव ।) ग्रहविशेषः । यथा,—
"स्कन्दग्रहादयो ये च चार्य्यकग्राहकादयः ।
कौमाराख्ये भूवि ज्ञेया ये च लोकविनायकाः ।
बहुशतसंख्याता मर्त्त्यलोकविचारिणः ॥"
इति वह्निपुराणम् ॥
लोकविश्रुतिः, स्त्री, (लोके विश्रुतिः ।) जनश्रुतिः । किंवदन्ती । इति केचित् ॥
लोकायतं, क्ली, (लोकेषु आयतं विस्तीर्णमिव ।) तर्कभेदः । चार्व्वाकशास्त्रम् । इत्यमरभरतौ ॥
लोकायतिकः, पुं, (लोकायतं शास्त्रमस्त्यस्येति । लोकायत+ठन् ।) चार्व्वाकः । इति हेमचन्द्रः ॥ (तार्किकः । यथा, हरिवंशे ।२४६।३०।
"ऐश्वर्य्यमात्मसंयोगसमवायविशारदैः ।
लोकायतिकमुख्यैश्च शुश्रुवुः स्वनमीरितम् ॥")
लोकालोकः, पुं, (लोक्यतेऽसौ इति लोकः । न लोक्यतेऽसौ इति अलोकः । ततः कर्म्मधारयः ।) स्वनामख्यातपर्व्वतः । तत्पर्य्यायः । चक्रवाड़ः २ । इत्यमरः ॥ द्वे सप्तद्वीपां महीमावेष्ट्य प्राकारवत् स्थिते गिरौ लोकालोक इति स्वनामख्याते । अन्तर्लोक्यते सूर्य्यरश्मिभिः प्रकाश्यमानत्वात् इति लोकः । तथा बहिः सूर्य्यकिरणास्पर्शात् न लोक्यते इति अलोकः । लोकृ दर्शने कर्म्मणि घञ् लोकश्चासौ अलोकश्चेति लोकालोकः । चक्रं महीचक्रं वक्रति वेष्टयति चक्रवाड़ः । वकि ड वेष्टे च अच् । आपकसिद्धस्यानित्यत्वात् न नुम् । इति भरतः ॥ (यथा, रघुः । १ । ६८ ।
"लोकालोक इवाचलः ॥" etc.
"सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥"
अस्य विवरणं यथा देवीभागवते ।८।१४।१-१५।
श्रीनारायण उवाच ।
"ततः परस्तादचलो लोकालोकेति नामकः ।
अन्तराले च लोकालोकयोर्यः परिकल्पितः ॥
यावदस्ति च देवर्षे ह्यन्तरं मानसोत्तरात् ।
सुमेरोस्तावती शुद्धा काञ्चनी भूमिरस्ति हि ॥
दर्पणोदरतुल्या सा सर्व्वप्राणिविवर्ज्जिता ।
यस्यां पदार्थः प्रहितो न किञ्चित् प्रत्युदीयते ॥
अतः सर्व्वप्राणिसत्त्वरहिता सा च नारद ! ।
लोकालोक इति ख्याता यदत्र परिकल्पिता ॥
लोकालोकान्तरे चास्य वर्त्तते सर्व्वदा स्थितिः ।
ईश्वरेण सलोकानां नयाणामन्तगः कृतः ॥
सूर्य्यादीनां ध्रुवान्तानां रश्मयो यदशादिह ।
अर्व्वाचीनाश्च यौं लोकानातन्वाना; कदापि हि ॥
पराचीनत्वभाजो हि न भवन्ति च नारद ! ।
तावदुन्नहनायामः पर्व्वतेन्द्रो महोदयः ॥
एतावाँल्लोकविन्यासोऽयं संख्यामानलक्षणैः ।
कविभिः स तु पञ्चाशत्कोटिभिर्गणितस्य च ॥
भूगोलस्य चतुर्थांशो लोकालोकाचलो मुने ! ।
तस्योपरि चतुर्दिक्षु ब्रह्मणा चात्मयोनिना ॥
निवेशिता दिग्गजा ये तन्नामानि निबोधत ।
ऋषभः पुष्पचूड़ोऽथ वामनोऽथापराजितः ॥
एते समस्तलोकस्य स्थितिहेतव ईरिताः ।
तेषाञ्च स्वविभूतीनां बहुवीर्य्योपबृंहणम् ॥
विशुद्धसत्त्वमैश्वर्य्यं वर्द्धयन् भगवान् हरिः ।
आस्ते सिद्धाष्टकोपेतो विष्वक्‌सेनादिसंवृतः ॥
निजायुधैः परिवृतो भुजदण्डैः समं ततः ।
आस्ते सकललोकस्य स्वस्तये परमेश्वरः ॥
आकल्पमेवं वेशं स गतो विष्णुः सनातनः ।
स्वमायारचितस्यास्य गोपीथायात्मसाधनः ॥
योऽन्तर्व्विस्तार एतेन ह्यलोकपरिमाणकम् ।
व्याख्यातं यद्बहिर्लोकालोकाचल इती-
रणात् ॥" * ॥
लोकश्च अलोकश्च तौ । सूर्य्याद्यालोकविशिष्टतद्रहितदेशौ । अत्र द्विवचनप्रयोगः स्यात् । यथा, भागवते । ५ । २० । ३४ ।
"ततः परस्तात् लोकालोकनामाचलो लोकालोकयोरन्तराले परित उपक्षिप्तः ॥")
लोकेशः, पुं, (लोकानामीशः ।) ब्रह्मा । इत्यमरः ॥ बुद्धभेदः । इति त्रिकाण्डशेषः । पारदः । इति राजनिर्घण्टः ॥ (इन्द्रः । यथा, रघुः । ३ । ६६ ।
"यथा च वृत्तान्तमिमं सदोगत-
स्त्रिलोचनैकांशतया दुरासदः ।
तवैव सन्देशहरादिशांपतिः
शृणोति लोकेश ! तथा विधीयताम् ॥"
लोकपालः । यथा, मनुः । ५ । ९७ ।
"लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते ।
शौचाशौचं हि मर्त्त्यानां लोकेशप्रभवाप्ययम् ॥"
लोकाधिपतौ, त्रि । यथा, भागवते । ३ । ६ । १९ ।
"पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् ॥")
लोकेश्वरः, पुं, (लोकानामीश्वरः ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ भुवनानां जनानां प्रभुश्च ॥ (यथा, महाभारते ।३।११४।१९ ।
"अवसीदन्ती कौन्तेय दत्तमात्रा मही तदा ।
उवाच चापि कुपिता लोकेश्वरमिदं प्रभुम् ॥")
लोकपालः । यथा, महाभारते । ८ । ३४।२९ ।
"ग्रहनक्षत्रताराभिश्चर्म्म चित्रं नभस्तलम् ।
सुरासुरप्रेतवित्तानां पतीन् लोकेश्वरान्
ह्यान् ॥")
लोकेश्वरात्मजा, स्त्री, (लोकेश्वरस्य बुद्धस्य आत्मजेव ।) बुद्धशक्तिभेदः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ खदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१ । इति हेमचन्द्रः ॥
लोच, ऋ ङ भाषि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) ऋ, अलुलोचत् । भाषि दीप्तौ । किन्तु पुरुषोत्तमशरणदेवौ भाष इति मूर्द्धन्यषकारं मत्वा वचनार्थमाहतुः । इति दुर्गादासः ॥
लोच, ऋ ङ ईक्षि । इति दुर्गादासः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ईक्षः पर्य्यालोचनं प्रणिधानमिति यावत् । ऋ, अलुलोचत् । ङ, लोचते कार्य्यं सुधीः । इति दुर्गादासः ॥
लोचं, क्ली, (लोचते पर्य्यालोचयति सुखदुःखादिकमिति । लोच+अच् ।) अश्रु । इति जटाधरः ॥
लोचकः, पुं, (लोचते इति । लोच+ण्वुल् ।) मांसपिण्डम् । अक्षितारका । कज्जलम् । स्त्रीणां ललाटाभरणम् । कदली । नीलवस्त्रम् । निर्ब्बुद्धिः । कर्णपूरः । मूर्व्वी । भ्रूस्थचर्म्म । इति मेदिनी । के, ५० ॥ निर्मोकः । इति शब्दरत्नावली ॥
लोचनं, क्ली, (लोचतेऽनेनेति । लोच+ल्युट् ।) चक्षुः । इत्यमरः ॥ तस्य शुभाशुभलक्षणं यथा,—
"वक्रान्तैः पद्मपत्राभैर्लोचनैः सुखभागिनः ।
मार्जारलोचनैः पापो महात्मा मधुपिङ्गलैः ॥
क्रूराः केकरनेत्राश्च हरिणाक्षाः सकल्मषाः ।
जिह्मैश्च लोचनैः क्रूराः सेनान्यो गजलोचनाः ॥
गम्भीराक्षा ईश्वराः स्युर्मन्त्रिणः स्थूलचक्षुषः ।
नीलोत्पलाक्षा विद्वांसः सौभाग्यं श्यावचक्षुषाम् ॥
स्यात् कृष्णतारकाक्षाणामक्ष्णामुत्पाटनं किल ।
मण्डलाक्षाश्च पापाः स्युर्निःस्वाः स्युर्दीर्घलोचनाः ॥
दृक् स्निग्धा विपुला भोगे अल्पायुर्नाभिउन्नता ।
विशालोन्नता सुखिनो दरिद्रा विषमभ्रुवः ॥"
इति गारुड़े ६५ अध्यायः ॥
लोचनहिता, स्त्री, (लोचनाभ्यां हिता ।) तुत्थाञ्जनम् । इति राजनिर्घण्टः ॥

लोचना, स्त्री, (लोचते पर्य्यालोचयतीति । लोच + ल्युः । टाप् ।) बुद्धशक्तिभेदः । अस्याः प्रमाणं पर्य्यायाश्च लोकेश्वरात्मजाशब्दे द्रष्टव्याः ॥

लोचनामयः, पुं, (लोचनयोरामयः ।) चक्षूरोगविशेषः । तत्पर्य्यायः । अभिमन्थः २ । इति त्रिकाण्डशेषः ॥

लोचनी, स्त्री, (लोच्यतेऽनौ । लोच् + ल्युट् । ङीप् ।) महाश्रावणिका । इति राजनिर्घण्टः ॥

लोचमर्कटः, पुं, लोचमस्तकः । इत्यमरटीकायां स्वामी ॥

लोचमस्तकः, पुं, (लोचं दृश्यं मस्तकं मयूरशिखेव यस्य ।) मयूरशिखौषधम् । रुद्रजटा इति ख्यातः । चैत्रयमानिकेति केचित् । तत्पर्य्यायः । खराश्वा २ कारवी ३ दीप्यः ४ मयूरः ५ । इत्यमरः ॥ लोचमर्कटः ६ । इति भरतः ॥

लोचिका, स्त्री, दधिघृतमर्द्दितोष्णोदकसहितदलितमण्डलाकारनिर्म्मितघृतभृष्टसमिता । लुचि इति भाषा । इति पाकराजेश्वरः ॥

लोट, ऋ उन्मादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ऋ, अलुलोटत् । लोटति लोकः उन्माद्यतीत्यर्थः । इति दुर्गादासः ॥

लोटुलः, पुं, (लोटतीति । लोट् + बाहुलकात् उलच् ।) अभिलोटकः । इति संक्षिप्तसारोणादिवृत्तिः ॥

लोड, ऋ उन्मादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ऋ, अलुलोडत् । इति दुर्गादासः ॥

लोणलवणं, क्ली, (लोणं लवणरसयुक्तं लवणम् ।) लवणलवणम् । इति राजनिर्घण्टः ॥

लोणा, स्त्री, (लवणमस्त्यस्या इति । अच् । टाप् । पृषोदरादित्वात् साधुः ।) चुक्राम्लिका । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः ।

"लोणा लोणी च कथिता बृहल्लोणी तु
घोटिका ।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

लोणारं, क्ली, (लवणं ऋच्छतीति । लवण + ऋ + अण् । पृषोदरादित्वात् साधुः ।) क्षारविशेषः । तत्पर्य्यायः । लवणोत्थम् २ लवणाकरजम् ३ लवणमदः ४ जलजम् ५ लवणक्षारः ६ लवणः ७ । अस्य गुणाः । अत्युष्णत्वम् । तीक्ष्णत्वम् । पित्तवृद्धिकारित्वम् । क्षारत्वम् । ईषल्लवणत्वम् । वातगुल्मादिशूलनाशित्वञ्च । इति राजनिर्घण्टः ॥

लोणाम्ला, स्त्री, चुक्राम्लिका । इति राजनिर्घण्टः ॥

लोतं, क्ली, (लुनातीति । लू + "हसिमृग्रिणिति ।" उणा० ३ । ८६ । इति तन् ।) स्तेयधनम् । तत्पर्य्यायः । लोप्त्रम् २ । इति जटाधरः ॥ लोप्त्री ३ लोत्रम् ४ लुम्पम् ५ । इति शब्दरत्नावली ॥

लोतः, पुं, क्ली, (लुनातीति । लू + "हसिमृग्रिणिति ।" उणा० ३ । ८६ । इति तन् ।) नेत्राम्बु । इति त्रिकाण्डशेषः ॥ चिह्नम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ लवणम् । अश्रुपातः । इति संक्षिप्तसारोणादिवृत्तिः ॥

लोत्रं, क्ली, (लूनातीति । लू + "सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् । यद्वा, ला + "अशित्रादिभ्य इत्रोत्रौ ।" उणा० ४ । १७२ । इति उत्रः । इत्युज्ज्वलः ।) लोतम् । इति शब्दरत्नावली ॥ नेत्रजलम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

लोधः, पुं, (रुणद्धीति । रुध + अच् । रस्य लः ।) स्वनामख्यातवृक्षः । रक्तवर्णस्य तस्य पर्य्यायः । तिरीटः २ मार्ज्जनः ३ रक्तः ४ लोध्रः ५ तिल्लकः ६ । श्वेतस्य तस्य पर्य्यायः । शुक्लः २ शबरलोध्रः ३ महालोध्रः ४ शाबरः ५ । इति रत्नमाला ॥ अस्य गुणाः । असृक्कफवातनाशित्वम् । चक्षुष्यत्वम् । शोथजित्त्वम् । सरत्वञ्च । इति राजवल्लभः ॥

लोध्रः, पुं, (रुणद्धीति । रुध + बाहुलकात् रन् । रस्य लः ।) लोधवृक्षः । (यथा, शिशुपालवधे । ९ । ४६ ।

"अधरेष्वलक्तकरसः सुदृशां
विशदं कपोलभुवि लोध्ररजः ।
नवमञ्जनं नयनपङ्कजयो-
र्विभिदे न शक्रनिहितात् पयसः ॥")

तत्पर्य्यायः । गालवः २ शावरः ३ तिरीटः ४ तिल्वः ५ मार्जनः ६ । इत्यमरः ॥ षट् लोध्रमात्रे लोध इति ख्याते । षट् श्वेतलोध्र इति सुभूतिः ॥ आद्यपादः श्वेतलोध्रे शेषो रक्तलोध्र इति स्वामी ॥ तस्य पर्य्यायान्तरं यथा । लोध्रः ७ भिल्लतरुः ८ तिल्वकः ९ काण्डकीलकः १० लोध्रवृक्षः ११ शबरः १२ हस्तिरोध्रकः १३ तिलकः १४ काण्डनीलकः १५ हेमपुष्पकः १६ भिल्ली १७ शावरकः १८ । अस्य गुणाः । कषायत्वम् । शीतत्वम् । वातकफास्रनाशित्वम् । चक्षुष्यत्वम् । विषहृत्त्वम् । तत्र विशिष्टो वल्कलोध्रकः । इति राजनिर्घण्टः ॥ अपि च ।

"लोध्रस्तिल्वस्तिरीटश्च शावरो गालवस्तथा ।
द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः ॥
जीर्णपत्रो बृहत्पत्रः पट्टीलाक्षाप्रसादनः ।
लोध्रो ग्राही लघुः शीतश्चक्षुष्यः कफपित्तनुत् ।
कषायो रक्तपित्तासृग्ज्वरातीसारशोथहृत् ॥"

इति भावप्रकाशः ॥

(तथा च ।

"तिल्वकस्तु मतो लोध्रो बृहत्पत्रस्तिरीटकः ।
तस्य मूलत्वचं शुष्कामन्तर्वल्कलवर्ज्जिताम् ॥
चूर्णयेत्तु त्रिधा कृत्वा द्वौ भागौ चालनेत्ततः ।
लोध्रस्यैव कषायेण तृतीयं तेन भावयेत् ॥
भागं तं दशमूलस्य पुनः क्वाथेन भावयेत् ।
शुष्कं चूर्णं पुनः कृत्वा तत ऊर्द्धं प्रयोजयेत् ॥
दधितक्रसुरामण्डमूत्रैर्वदरशीधुना ।
रसेनामलकानां वा ततः पाणितलं पिबेत् ॥"
"सुरां लोध्रकषायेण जातां पक्षस्थितां पिबेत् ॥"

इति चरके कल्पस्थाने नवमेऽध्याये ॥)

लोध्रकवृक्षः, पुं, (लोध्र एव लोध्रकः । स एव वृक्षः ।) लोधः । इति राजनिर्घण्टः ॥

लोपः, पुं, छेदः । आकुलीभावः । लुपधातोर्भावे घञ्प्रत्ययेन निष्पन्नोऽयम् । (अभावः । यथा, रघुः । १ । ६८ ।

"सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥")

व्याकरणमते वर्णनाशः । यथा हि । नाशविधिर्यथा । लोपोऽस्त्रीमाडोरित्यादि ॥ अपि च ।

"सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्बली ॥"

इति दुर्गादासः ॥

लोपा, स्त्री, अगस्त्यमुनिपत्नी । इति जटाधरः ॥

लोपाकः, पुं, (लोपं शीघ्रमदर्शनं अकति प्राप्नोतीति । अक् + अण् ।) शृगालः । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते । १ । ४६ ।

"श्वाविच्छल्यकगोधाशशवृषदंशलोपाकलोमशकर्णकदलीमृगप्रियकाजगरसर्पमूषिकनकुलमहावभ्रुप्रभृतयो विलेशयाः ॥")

लोपापकः, पुं, (लोपं द्रुतमदर्शनं आप्नोतीति । आप् + ण्वुल् ।) शृगालः । इति शब्दमाला ॥

लोपापिका, स्त्री, (लोपापक + स्त्रियां टाप् । अत इत्वम् ।) शृगाली । इति शब्दमाला ॥

लोपामुद्रा, स्त्री, अगस्त्यमुनिभार्य्या । इत्यमरः ॥ लोपयति योषितां रूपाभिमानमिति लोपा पश्चात् आमुद्रयति मुदः हर्षमिति आमुद्रा अच् ततः कर्म्मधारयः । किंवा न मुदं राति अमुद्रा पतिशुश्रूषाया लोपे अमुद्रा लोपामुद्रा । लोपा च ।

"लोपामुद्रा तु वैदर्भी लोपा स्त्री कुम्भजन्मनः ॥"

इति कण्ठभूषणम् । इति भरतः ॥ * ॥

अस्या अर्घ्यदानप्रसङ्गेन अगस्त्यार्घ्यदानं लिख्यते । अगस्त्यार्घ्यदानन्तु सौरेण सिंहराशौ विधानात् । यथा, ब्रह्मवैवर्त्ते ।

"अप्राप्ते भास्करे कन्यां शेषभूतैस्त्रिभिर्दिनैः ।
अर्घ्यं दद्युरगस्त्याय गौड़देशनिवासिनः ॥"

नारसिंहे ।

"शङ्खे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतम् ।
मन्त्रेणानेन वै दद्याद्दक्षिणाशामुखस्थितः ॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥"

प्रार्थनन्तु ।

"आतापिर्भक्षितो येन वातापिश्च महासुरः ।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥"

गन्धादिकन्तु अगस्त्याय नम इत्यनेन देयं विशेषानुद्देशे सामान्यतः प्राप्तत्वात् ।
दक्षिणाशामुखस्थित इति गन्धादावपि प्रयोगाङ्गकर्तृधर्म्मत्वादिति रत्नाकरः ॥ * ॥

तत्पत्न्यर्घ्यदानमन्त्रस्तु ।

"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते ।
गृहाणार्घ्यं मया दत्तं मैत्रावरुणिवल्लभे ॥"

इति मलमासतत्त्वम् ॥

(अस्या जन्मादिविवरणन्तु महाभारते वन-पर्व्वणि ९६ अध्यायमारभ्य द्रष्टव्यम् ।)

लोपामुद्रापतिः, पुं, (लोपामुद्रायाः पतिः ।) अगस्त्यमुनिः । इति पुराणम् ।

लोपाशकः, पुं, (लोपं व्याकुलीभावं चकितमश्नाति । अश् + ण्वुल् ।) शृगालः । इति हारावली ।

लोपाशिका, स्त्री, (लोपाशक + स्त्रियां टाप् । अत इत्वम् ।) शृगाली । इति हारावली । १७२ ।

लोप्त्रं, क्ली, (लुप् + ष्ट्रन् ।) स्तेयधनम् । लोत्रम् । इत्यमरः । (यथा, महाभारते ।१।१०७।५।
"ते तस्यावसथे लोप्त्रं दस्यवः कुरुसत्तम ! ।
निधाय च भयाल्लीनास्तत्रैवानागते बले ।")

लोप्त्री, स्त्री, (लोप्त्र + षित्वात् ङीष् ।) लोप्त्रम् । इति शब्दरत्नावली ।

लोभः, पुं, (लुभ् + घञ् ।) आकाङ्क्षा । परद्रव्याभिलाषः । तत्पर्य्यायः । तृष्णा २ लिप्सा ३ वशः ४ स्पृहा ५ काङ्क्षा ६ शंसा ७ गर्द्धः ८ वाञ्छा ९ इच्छा १० ईहा ११ मनोरथः १२ कामः १३ अभिलाषः १४ । इति हेमचन्द्रः ॥*॥
तस्य लक्षणं यथा,—
"परवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते ।
अभिलाषो द्विजश्रेष्ठ स लोभः परिकीर्त्तितः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥*॥
स च ब्रह्मणोऽधरात्जातः । यथा,—
"भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः ।"
इति मात्स्ये सृष्ट्युत्पत्तिर्नाम ३ अध्यायः ॥*॥
स तु नाशकारणं यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुडे नीतिसारे ११५ अध्यायः ।
अपि च ।
"त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥"
इति श्रीभगवद्गीतायाम् १६ अध्यायः ।
(लोभनिन्दाविषयकश्लोकानि यथा,—
"लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च ।
द्वेषक्रोधादिजनको लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति लोभात्कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति क्रोधाद्द्रोहः प्रवर्त्तते ।
द्रोहेण नरकं याति शास्त्रज्ञोऽपि विचक्षणः ॥
मातरं पितरं पुत्त्रं भ्रातरं वा सुहृत्तमम् ।
लोभाविष्टो नरो हन्ति स्वामिनं वा सहोदरम् ॥
लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥
लोभाविष्टो नरो वित्तं वीक्षते न स चापदम् ।
दुग्धं पश्यति मार्ज्जारो यथा न लगुडाहतिम् ॥
प्रायेण धनिनामेव धनलोभो निरन्तरम् ।
पश्य कोटिद्वयोपेतं लक्षाय प्रणतं धनुः ॥
नात्यर्थमर्थार्थितया लुब्धस्तद्वर्जयेज्जनम् ।
अब्धिर्देवाचरत्रं चार्थ्यमानोऽत्यजद्विषम् ॥
लोभः सदा विचिन्त्यो लुब्धेभ्यः सर्व्वतो भयं दृष्टम् ।
कार्य्याकार्य्यविचारो लोभविमूढस्य नास्त्येव ॥
सत्यप्रशमतपोभिः शस्त्रधनैः शास्त्रवेदिभिर्विजितः ।
लोभो यत्र प्रविष्टः कुटिलं हृदयं किरातीनाम् ॥
स्नेहोपपन्न इति पूर्णदशाविशेषशाली स्वमात्मनि वसुप्रकरं निधाय ।
लब्धोदये तमथ गृह्णति पद्मबन्धौ
दीपा भवन्ति कलुषा बलवान् हि लोभः ॥
यद्दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं
गाहन्ते गहनं समुद्रमथनक्लेशं कृषिं कुर्व्वते ।
सेवन्ते कृपणं पतिं गजघटासङ्घट्टदुःसञ्चरं
सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्ज्जितम् ॥" * ।)

लोभी, [न्] त्रि, (लोभोऽस्यास्तीति । लोभ + इनिः ।) लोभयुक्तः । तत्पर्य्यायः । गृध्नुः २ गर्द्धनः ३ लुब्धः ४ अभिलाषुकः ५ तृष्णकः ६ लोलुपः ७ लोलुभः ८ । इति जटाधरः । लिप्सुः ९ । इति हेमचन्द्रः ।

लोभ्यः, पुं, (लुभ्यते इति । लुभ + यत् ।) मुद्गः । इति हेमचन्द्रः । लोभनीये, त्रि ।

लोम, [न्] क्ली, (लूयते छिद्यते इति । लू + "नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन् ।" उणा० ४ । १५० । इति मनिन्प्रत्ययेन साधुः ।) शरीरस्थकेशः । तत्पर्य्यायः । तनूरुहम् २ रोम ३ । इत्यमरः । तनुरुहम् ४ तनुरुट् ५ । इति शब्दरत्नावली । (यथा, मुण्डकोपनिषदि । १ । १ । ७ ।
"यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम् ।")
तत्तु गर्भस्थस्य षष्ठे मासि भवति । इति मुग्धबोधः । अपि च ।
"षष्ठे मासि च नारीणां वैदिके नाधिकारिता ।
उदरस्थस्य बालस्य नखलोमप्रवर्त्तनात् ॥"
इति स्मृतिः ।
(तथास्य विवृतिः ।
"अस्थी मलानि लोमानि अचलानि भवन्ति हि ।
सन्ति यावन्ति लोमानि तावन्तो लोमकूपकाः ॥
अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते ।
सन्निवेशश्च मात्राणां नान्यत्कारणान्तरम् ॥"
निर्वृत्तिः सिद्धिः स्वभावात् ईश्वरात् । सन्निवेशो रचनाविशेषः । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

लोमं, क्ली, लाङ्गूलम् । इति जटाधरः । (रोम । यथा, तैत्तिरीयसंहितायाम् । ५ । १ । ६ । २ ।
"अथो शन्त्वायाजलोमैः संसृजत्येषा वा अग्नेः प्रिया तनूर्यद्जेति ।")

लोमकरणी, स्त्री, मांसच्छदा । इति राजनिर्घण्टः ।

लोमकर्णः, पुं, (लोमयुक्तौ कर्णौ यस्य ।) शशकः । इति हेमचन्द्रः । (अस्य पर्य्यायो यथा,—
"लम्बकर्णः शशः शूली लोमकर्णो बिलेशयः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।)
लोमयुक्तकर्णविशिष्टे, त्रि ।

लोमघ्नं, क्ली, (लोमानि हन्तीति । हन + टक् ।) इन्द्रलुप्तकम् । इति भूरिप्रयोगः । टाक इति भाषा । लोमघातके, त्रि ।

लोमपादः, पुं, (लोमानि पादयोर्यस्य ।) अङ्गदेशीयराजविशेषः । स तु ऋष्यशृङ्गमुनिश्वशुरः । इति रामायणम् । (अयं हि सूर्य्यवंशावतंसस्य दशरथस्य सखा । विप्रावमाननात एवास्य राष्ट्रे बहुकालं अवग्रहः सम्भूव तत एवासौ काश्यपं ऋष्यशृङ्गं स्वराष्ट्रे आनीय शान्तां नाम दशरथकन्यामस्मै दत्तवान् । एतद्वृत्तान्तन्तु महाभारते वनपर्व्वणि ११० अध्यायतो विशेषतो द्रष्टव्यम् ।)

लोमपादपूः, स्त्री, (लोमपादस्य पूः ।) पुरीविशेषः । अधुना भागलपुर इति ख्याता । तत्पर्य्यायः । चम्पा २ मालिनी ३ कर्णपूः ४ । इति हेमचन्द्रः ।

लोमफलं, क्ली, (लोमयुक्तं फलम् ।) भव्यम् । इति राजनिर्घण्टः ।

लोमविषः, पुं, (लोम्नि विषं यस्य ।) व्याघ्रादिः । इति हेमचन्द्रः ।

लोमशः, पुं, (लोमानि सन्त्यस्येति । लोमन् + "लोमादिभ्यः शः ।" इति शः ।) मुनिविशेषः । (मुनिवरोऽयं तीर्थगमनाभिलाषिणः सानुजस्य युधिष्ठिरस्यानुगामी सर्व्वतीर्थवृत्तान्तमस्मै विज्ञापयामासेति महाभारते वनपर्व्वणि द्रष्टव्यम् ॥*॥) मेषः । अतिलोमान्विते, त्रि । इति मेदिनी । शे, २७ । यथा,—
"कदाचिद्गुरो मूर्खः कदाचिल्लोमशः सुखी ।"
इति सामुद्रकम् ।
(धान्यापहरणरूपकर्म्मविपाकात् लोमशो भवति । यथा, महाभारते । १३ । १११ ।११९।
"धान्यं हृत्वा तु पुरुषो लोमशः संप्रजायते ।")

लोमशकाण्डा, स्त्री, (लोमशः काण्डो यस्याः ।) कर्कटी । इति राजनिर्घण्टः । (कर्कटीशब्देऽस्या गुणादयो ज्ञातव्याः ।)

लोमशपर्णिनी, स्त्री, (लोमशं पर्णमस्त्यस्या इति । इनि । ङीप् ।) माषपर्णी । इति शब्दचन्द्रिका ।

लोमशपुष्पकः, पुं, (लोमशानि पुष्पाणि यस्य । कप् ।) शिरीषवृक्षः । इति राजनिर्घण्टः ।

लोमशमार्ज्जारः, पुं, (लोमशो लोमबहुलो मार्ज्जारः ।) मार्जारविशेषः । गन्धनकुला

इति भाषा। तत्पर्य्यायः। पूतिकः २ मारजातकः ३ सुगन्धी ४ मूत्रपातनः ५ गन्धमार्ज्जारकः ६। इति राजनिर्घण्टः॥ अस्य शुक्रगुणाः।
"गन्धमार्ज्जारवीर्य्यन्तु वीर्य्यकृत् कफवातहृत्।
कण्डुकोष्ठहरं नेत्र्यं सुगन्धं स्वेदगन्धनुत्॥"
इति भावप्रकाशः॥

लोमशा, स्त्री, (लोमानि सन्त्यस्या इति। लोमन्+श। टाप्।) काकजङ्घा। मांसी। (अस्याः पर्य्यायो यथा,—
"नलदं नन्दिनी पेषी मांसी कृष्णजटा जटी।
किरातिनी च जटिला लोमशा तु तपस्विनी॥"
इति वैद्यकरत्नमालायाम्।)
वचा। (अस्याः पर्य्यायो यथा,—
"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
शूकशिम्बिः। महामेदा। काशीसम्। शाकिनीभेदः। इति मेदिनी। शे, २०॥ अतिबला। इति विश्वः॥ शणपुष्पी। एर्व्वारुः। गन्धमांसी। इति राजनिर्घण्टः॥

लोमशातनं, क्ली, (लोम्नां शातनम्।) लोमपातनम्। तस्यौषधानि यथा,—
"हरितालं शङ्खचूर्णं कदलीदलभस्मना।
एतद्युगेण चोद्वर्त्त्य लोमशातनमुत्तमम्॥
लवणं हरितालञ्च तण्डुलाश्च फलानि च।
लाक्षारससमायुक्तं लोमशातनमुत्तमम्॥
सुधा च हरितालञ्च शङ्खश्चैव मनःशिला।
सैन्धवेन सहैकत्र छागमूत्रेण पेषयेत्।
तत्पश्चोद्वर्त्तनादेव लोमशातनमुत्तमम्॥"
इति गारुडे १८५ अध्यायः॥
(तथाच।
"भल्लातकं विडङ्गञ्च यवक्षारञ्च सैन्धवम्।
मनःशिला शङ्खचूर्णं तैलपक्वं तथैव च।
लोमानि शातयत्येव नात्र कार्य्या विचारणा॥"
इति वैद्यके भैषज्यधन्वन्तरौ वशीकरणाद्यधिकारे॥ * ॥)

लोमहर्षणं, क्ली, (लोम्नां हर्षणमिव।) रोमाञ्चः। इत्यमरः॥ (लोम्नां हर्षणमस्मादिति। रोमाञ्चकारके, त्रि। यथा, महाभारते।६।६७।१३।
"तस्मिन् महाभये घोरे तुमुले लोमहर्षणे।
ववर्षुः शरजालानि क्षत्रिया युद्धदुर्म्मदाः॥")

लोमहर्षणः, पुं, (विचित्रपुराणकथाश्रवणात् लोम्नां हर्षणं उद्गमो यस्मात्।) सूतः। यथा,
"पुराणसंहितां चक्रे पुराणार्थविशारदः।
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः॥
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः॥"
इति विष्णुपुराणे ३ अंशे ७ अध्यायः॥ * ॥
स च बलरामेण हतः। यथा,—
"तथा चैत्रे सूतपुत्त्रो निहतो लोमहर्षणः।
बलरामाक्रयुक्तात्मा नैमिषेऽभूत् स्ववाञ्छया॥"
इति कल्किपुराणे २७ अध्यायः॥

लोमहृत्, पुं, (लोमानि हरति नाशयतीति। हृ+क्विप्।) हरितालम्। इति हेमचन्द्रः॥

लोमालिका, स्त्री, (लोमाल्या लोमश्रेण्या कायतीति। कै+कः। टाप्।) शृगालिका। यथा,—
"लोमालिका दीप्तजिह्वा किखिरुल्कामुखी च सा॥"
इति त्रिकाण्डशेषः॥

लोलः, त्रि, (लोडतीति। लुड विलोडने+अच्।) चञ्चलः। (यथा, साहित्यदर्पणे ३ परिच्छेदे। १४९।
"पल्लवोपमितिसाम्यसपक्षं
दष्टवत्यधरविम्बमभीष्टे।
पर्य्यकूजि सरुजेव तरुण्या-
स्तारलोलवलयेन करेण॥")
साकाङ्क्षः। इत्यमरः॥ (यथा, रघुः।७।२३।
"ह्रीयन्त्रणामानशिरे मनोज्ञा-
मन्योन्यलोलानि विलोचनानि॥"
पुं, तामसमनुः। इति मार्कण्डेयपुराणम्। ७४।४१॥)

लोला, स्त्री, (लोल+टाप्।) जिह्वा। लक्ष्मीः। इति मेदिनी। ले, ४७॥ चञ्चला स्त्री च। (यथा, आर्य्यासप्तशत्याम्। ६०८।
"सर्व्वाङ्गमर्पयन्ती लोला सुप्तं श्रमेण शय्यायाम्।
अलसमपि भाग्यवन्तं भजते पुरुषायितेव श्रीः॥"
चतुर्द्दशाक्षरवृत्तिविशेषः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्।)

लोलार्कः, पुं, (लोलनामा अर्कः।) सूर्य्यः। यथा,
पुलस्त्य उवाच।
"ततः सुकेशिवचनात् सर्व्व एव निशाचराः।
तेनोदितन्तु ते धर्म्मं चक्रुर्मुदितमानसाः॥
ततः प्रवृद्धिं सुतरामगच्छन्त निशाचराः।
पुत्त्रपौत्त्रार्थसंयुक्ताः सदाचारसमन्विताः॥
तज्ज्योतिस्तेजसा तेषां राक्षसानां महात्मनाम्।
गन्तुं नाशक्नुवन् सूर्य्यो नक्षत्राणि च चन्द्रमाः॥
ततस्त्रिभुवनं ब्रह्मन् निशाचरपुरोऽभवत्।
दिवा सूर्य्यस्य सदृशः क्षणदायाञ्च चन्द्रवत्॥
ततः क्रोधाभिभूतेन भानुना विप्रभेदिभिः।
भानुभी राक्षसपुरं तद्दृष्टं यथेच्छया॥
तद्भानुना तदा दृष्टं क्रोधाध्मातेन चक्षुषा।
निपपाताम्बराद्दृष्टः क्षीणपुण्य इव ग्रहः॥
पतमानं समालोक्य पुरं शालङ्कटङ्कटः।
नमो भवाय सर्व्वाय इदमुच्चैरधीयत॥
तेषां क्रन्दितमाकर्ण्य चारणा गगनेचराः।
हाहेतुचुक्रुशुः सर्व्वे हरभक्तः पतत्यसौ॥
तच्चारणवचः शर्व्वः श्रुतवान् सर्व्वतोऽव्ययः।
श्रुत्वा स चिन्तयामास केनासौ पात्यते भुवि॥
ज्ञातवान् देवपतिना सहस्रकिरणेन तत्।
पातितं राक्षसपुरं ततः क्रुद्धस्त्रिलोचनः॥
क्रुद्धस्तु भगवान् दृग्भिर्भानुमन्तमपश्यत।
दृष्टमात्रस्त्रिनेत्रेण निपपात ततोऽम्बरात्॥
ततो ब्रह्मा सुरपतिः सुरैः सार्द्धं समभ्ययात्।
रम्यं महेश्वरावासं मन्दरं रविकारणात्॥
गत्वा दृष्ट्वा च देवेशं शङ्करं शूलपाणिनम्।
प्रसाद्य भास्करार्थाय वाराणस्यामुपानयत्॥
ततो दिवाकरं भूयः पाणिनादाय शङ्करः।
कृत्वा नामास्य लोलेति रथमारोपयत् पुनः॥
आरोपिते दिनकरे ब्रह्माभ्येत्य सुकेशिनम्।
सबान्धवं सनगरं पुनरारोपयद्दिवि॥"
इति श्रीवामनपुराणे सुकेशिचरिते लोलार्कपतनं नाम १५ अध्यायः॥

लोलिका, स्त्री, (लोलतीति। लुल+ण्वुल्। टापि अत इत्वम्।) चाङ्गेरी। यथा,—
"क्षुद्रा दन्तशठाम्लष्ठा चाङ्गेरी लोलिका च सा॥"
इति जटाधरः॥

लोलितः, त्रि, स्रवः। झोला इति भाषा। लुल विमर्द्दे अस्माद्भावे घञि लोलः सोऽस्य जातः इत्यर्थे इतप्रत्ययेन निष्पन्नः॥

लोलुपः, त्रि, (गर्हितं लुम्पतीति। लुप+यङ्+अच्।) अतिलुब्धः। इत्यमरः॥ (यथा, माघे। १। ४०।
"तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः॥")

लोलुभः, त्रि, (भृशं लुभ्यतीति। लुभ+यङ्+अच्।) लोलुपः। इत्यमरः॥ (यथा, कथासरित्सागरे। ११७। ४६।
"स्त्रियोऽपीच्छन्ति पुंभावं यं दृष्ट्वा रूपलोलुभाः।
तस्यास्ति को भवेन्नार्य्यां तुल्यरूपः स किं पुनः॥")

लोष्ट, ङ संहतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, लोष्टते धान्यं लोकः। इति दुर्गादासः॥

लोष्टं, क्ली, (लोष्टते इति। लोष्ट+अच्।) लौहमलम्। इति राजनिर्घण्टः॥ लेष्टुः। इत्यमरः॥

लोष्टः, पुं क्ली, (लोष्ट्यते इति। लोष्ट+घञ्। यद्वा, लूयते इति। लू+"लोष्टपलितौ।" उणा० ३। ६२। इति तप्रत्ययेन निपातितः।) मृत्तिकाखण्डम्। ढेला इति भाषा। तत्पर्य्यायः। लोष्टुः २। इति शब्दरत्नावली अमरश्च॥ लोष्टुः ३ दलिः ४। इति हेमचन्द्रः॥ (यथा, वेतालपञ्चविंशत्याम्। १।
"अहौ वा हारे वा बलवति रिपौ वा
सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित्पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः॥")

लोष्टघ्नः, पुं, (लोष्टं हन्तीति। हन+टक्।) लेष्टुभेदनः। इत्यमरटीकायां भरतः॥

लोष्टभेदनः, पुं, (भिनत्तीति। भिद्+ल्युः। लोष्टस्य भेदनः।) लोष्टभङ्गसाधनमुद्गरः। मर इति ख्याते इति केचित्। तत्पर्य्यायः। लेष्टुभेदनः २ लोष्टघ्नः ३ लेष्टुघ्नः ४ कोटिशः ५ कोटीशः ६। इत्यमरटीका॥

लोष्टुः, पुं, लोष्टः। इति हेमचन्द्रः॥

लोहं, क्ली, अगुरु। इत्यमरः॥ (अथास्य पर्य्यायः।

"अगुरुप्रवरं लोहं राजार्हं योगजन्तथा।
वंशिकं क्रिमिजं वापि क्रिमिजग्धमनार्य्यकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लोहः, पुं क्ली, (लूयतेऽनेनेति। लू+बाहुलकात् हः।) लोहम्। जोङ्गकम्। सर्व्वतैजसम्। इति मेदिनी। हे, ८॥ रुधिरम्। इति राजनिर्घण्टः॥ अथ मुण्डलोहस्य पर्य्यायः। मुण्डम् २ मुण्डायसम् ३ दृषत्सारम् ४ शिलात्मजम् ५ अश्मजम् ६ कृष्णलोहम् ७ आरम् ८ कृष्णायसम् ९॥ अथ तीक्ष्णलोहस्य पर्य्यायः। तीक्ष्णम् २ शस्त्रायसम् ३ शस्त्रम् ४ पिण्डम् ५ पिण्डायसम् ६ शठम् ७ आयसम् ८ निशितम् ९ तीव्रम् १० खड्गम् ११ मुण्डजम् १२ अयः १३ चित्रायसम् १४ चीनजम् १५। अस्य गुणाः। रूक्षत्वम्। उष्णत्वम्। तिक्तत्वम्। वातपित्तकफप्रमेहपाण्डुशूलनाशित्वम्। तीक्ष्णत्वम्। मुण्डाधिकगुणत्वञ्च। इति राजनिर्घण्टः॥ *॥ अथ लोहस्योत्पत्तिनामलक्षणगुणाः।

"पुरा लोमिलदैत्यानां निहतानां सुरैर्युधि।
उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च॥
लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी।
गुरुता दृढतोत्क्लेदकश्मलादाहस्य कारिता।
अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु॥
लोहं तिक्तरसं शीतं मधुरं तुवरं गुरु।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्॥
कफं पित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः।
मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि॥
षण्ढत्वकुष्ठामयमृत्युदं भवेत्
हृद्रोगशूलौ कुरुतेऽश्मरीञ्च।
नानारुजाश्चापि तथा प्रकोपं
करोति हृल्लासमशुद्धलोहम्॥
ओजोहारि मदकारि चायसं
चेदशुद्धिमदसंस्कृतं ध्रुवम्।
पाटवं न तनुते शरीरके
दारुणां हृदि रुजाञ्च यच्छति॥"*॥

तत्र सारलोहस्य लक्षणं गुणाश्च।

"चमाभ्रच्छिखराकाराण्यङ्गान्यङ्गेन वेदिते।
लोहे स्युर्यत्र सूक्ष्माणि तत्सारमभिधीयते॥
लोहं साराह्वयं हन्यादुग्रहणीमतिसारकम्।
अर्द्धसर्व्वाङ्गजं वातं शूलञ्च परिणामजम्।
छर्द्दिञ्च पीनसं पित्तं श्वासमाशु व्यपोहति॥"

अथ कान्तलोहस्य लक्षणं गुणाश्च।

"यत्पात्रे न प्रसरति जले तैलबिन्दुः प्रतप्ते
हिङ्गुर्गन्धं त्यजति च निजं तिक्ततां निम्बकल्कः।
तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं
कृष्णाङ्गः स्यात् सजलचणकः कान्तलोहं तदुक्तम्॥
गुल्मोदरार्शःशूलाममामवातं भगन्दरम्।
कामलाशोथकुष्ठानि क्षयं कान्तमयो जयेत्॥
प्लीहानमम्लपित्तञ्च यकृच्चापि शिरोरुजम्।
सर्व्वान् रोगान् विजयते कान्तलोहं न संशयः।
बलं वीर्य्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्द्धयेत्॥"

अथ किट्टी।

"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते।
लोहसिंहानिका किट्टी सिंहानञ्च निगद्यते॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्॥"

अथ लोहस्याशुद्धस्य दोषमाह।

"षण्ढत्वकुष्ठामयमृत्युकारि
हृद्रोगशूलौ कुरुतेऽश्मरीञ्च।
नानारुजानाञ्च तथा प्रकोपं
कुर्य्याच्च हृल्लासमशुद्धलोहम्॥"

अथ लोहस्य दोषशान्तये शोधनमभिधीयते।

"पत्तलीकृतपत्राणि लोहस्याग्नौ प्रतापयेत्।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा।
एवं लोहस्य पत्राणां विशुद्धिः संप्रजायते॥"

अथ लोहस्य मारणविधिः।

"शुद्धलोहभवं चूर्णं पातालगरुडीरसैः।
मर्द्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटद्वयम्॥
पुटत्रयं कुमार्य्याश्च कुठारच्छिन्निकारसैः।
पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत्॥"

अन्यच्च।

"शिफेहादशमांशेन दरदं तीक्ष्णचूर्णतः।
मर्द्दयेत् कन्यकाद्रावैर्यामयुग्मं ततः पुटेत्।
एवं सप्तपुटैर्मृत्युं लोहचूर्णमवाप्नुयात्॥
सत्योऽनुभूतो योगीन्द्रैः क्रमोऽन्यो लोहमारणे।
कथ्यते रामराजेन कौतूहलधियाधुना॥
सूतकाद्द्विगुणं गन्धं दत्त्वा कुर्य्याच्च कज्जलीम्।
द्वयोः समं लोहचूर्णं मर्द्दयेत् कन्यकाद्रवैः॥
यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके।
घर्म्मे धृत्वा रूबुकस्य पत्रैराच्छादयेद्बुधः॥
यामद्वयाद्भवेदुष्णं धान्यराशौ न्यसेत्ततः।
दत्त्वोपरि शरावञ्च त्रिदिनान्ते समुद्धरेत्॥
पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत्।
दाड़िमस्य दलं पिष्ट्वा तच्चतुर्गुणवारिणा॥
तद्रसेनायसश्चूर्णं सन्नीयात् भावयेदपि।
आतपे शोषयेत्तच्च पुटेदेव पुनः पुनः।
एकविंशतिवारैस्तन्म्रियते नात्र संशयः।
एवं सर्व्वाणि लोहानि स्वर्णादीन्यपि मारयेत्॥"

एवं मारितलोहस्य गुणाः।

"लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्॥
कफं पित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः।
मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि॥
गुञ्जामेकां समारभ्य यावत् स्युर्नवरक्तिकाः।
तावल्लोहं समश्नीयाद्यथादोषानलं नरः॥
कुष्माण्डं तिलतैलञ्च माषान्नं राजिकान्तथा।
मद्यमम्लरसञ्चैव वर्जयेल्लोहसेवकः॥"

इति भावप्रकाशः॥

लोहपात्रे भक्षणनिषेधो यथा,—

"यदा तु आयसे पात्रे पक्वमश्नाति वै द्विजः।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते॥"

इति मत्स्यसूक्ततन्त्रम्॥

अपि च।

"अयःपात्रे पयःपानं गव्यं सिद्धान्नमेव च।
भृष्टादिकं मधु गुड़ं नारिकेलोदकन्तथा॥
फलं मूलञ्च यत्किञ्चिदभक्ष्यं मुनिरब्रवीत्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥

(अश्मन एवास्य उत्पत्तिः श्रूयते। यथा, मनुः।९।३२१।

"अद्भ्योऽग्निर्ब्रह्मतः क्षत्त्रमश्मनो लोहमुत्थितम्।
तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति॥"

पुं, छागः। स तु लक्षणान्वितः कृष्णवर्णो रक्तवर्णो वा। यथा, मनुः।३।२७२।

"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्व्वशः॥"

पार्व्वत्यजातिविशेषः। यथा, महाभारते।२।२७।२५।

"लोहान् परमकाम्बोजानृषिकानुत्तरानपि।
सहितांस्तान् महाराज व्यजयत् पाकशासनिः॥"

रक्तवर्णे, त्रि। यथा, महाभारते।९।१३६।२१।

"भ्रमतश्च वराहस्य लोहस्य प्रमुखे समम्।
पञ्चबाणान् सुसंयुक्तान् स मुमोचैकबाणवत्॥")

लोहकण्टकः, पुं, (लोहवत् कण्टकं यत्र।) मदनवृक्षः। इति शब्दचन्द्रिका॥ लोहमयकण्ठकञ्च॥ (यथा, आर्य्यासप्तशत्याम्।४७९।

"सखि लोहकण्टकनिभस्तथा तथा मदनविशिखोऽपि॥")

लोहकान्तं, क्ली, (लोहः कान्तोऽस्येति।) अयस्कान्तम्। इति राजनिर्घण्टः॥

लोहकारः, पुं, (लोहं लोहमयं शस्त्रादि करोतीति। कृ+अण्।) लौहकारकः। इति हलायुधः॥ (यथा, गो॰ रामायणे।२।९०।२३।

"शङ्खाताश्चर्म्मकाराश्च लोहकारास्तथैव च॥")

लोहकारकः, पुं, (लोहं तन्मयशस्त्रादि करोतीति। कृ+ण्वुल्।) वर्णसङ्करजातिविशेषः। कामार इति भाषा। तत्पर्य्यायः। व्योकारः २ इत्यमरः॥ लौहकारः ३ अयस्कारः ४ कर्म्मकारः ५ कर्म्मारः ६। इति भरतरभसौ॥ तस्योत्पत्तिर्यथा।

"गोपालात्तन्तुवाय्यां वै कर्म्मकारोऽप्यभूत् सुतः॥"

इति पराशरपद्धतिः॥

लोहकिट्टं, क्ली, (लोहस्य किट्टम्।) लोहमलम्। तत्पर्य्यायः। किट्टम् २ लोहचूर्णम् ३ अयोमलम् ४ लोहजम् ५ कृष्णचूर्णम् ६ लोरम् ७ लोहमलम् ८। (यथा, सुश्रुते।६।४४।

"मूत्रस्थितं सैन्धवसंप्रयुक्तं
मांसं पिबेद्वापि हि लोहकिट्टम्॥")

अस्य गुणाः। मधुरत्वम्। कटुत्वम्। उष्णत्वम्। कृमिवातपक्तिशूलमहच्छूलमेहगुल्मशोफनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते ।
लोहसिंहानिका किट्टी सिंहाणञ्च निगद्यते ॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
इति भावप्रकाशः ॥
(तथास्योद्धरणादिविधिः ।
"शतोर्द्धमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम् ।
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाद्यधिकारे ॥
"कुरवं पथ्याचूर्णं द्विपलगन्धाश्मलोहकिट्टञ्च ।
शुद्धरसस्यार्द्धपलं भृङ्गस्य रसं केशराजस्य ॥"
इति वैद्यकचक्रपाणिसंग्रहे परिणामशूलाधिकारे ॥)

लोहचूर्णं, क्ली, (लोहस्य चूर्णम् ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ (यथा, बृहत्संहितायाम् । ७६ । ३ ।
"माक्षीकधातुमधुपारदलोहचूर्ण-
पथ्याशिलाजतुविडङ्गघृतानि योऽद्यात् ।
सैकानि विंशतिरहानि जरान्वितोऽपि
सोऽशीतिकोऽपि रमयत्यबलां युवेव ॥")

लोहजं, क्ली, (लोहात् जायते इति । जन् + डः ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, "मण्डूरं लोहजं किट्टम् ।" इति वैद्यकरत्नमालायाम् ॥) कांस्यम् । इति हेमचन्द्रः ॥

लोहद्रावी [न्] पुं, (लोहानि द्रावयतीति । द्रु + णिच् + णिनिः ।) टङ्गणः । इति राजनिर्घण्टः ॥ (टङ्गणशब्देऽस्य विषयो विज्ञेयः ॥)

लोहनालः, पुं, (लोहस्य नालं दण्डो यस्य ।) नाराचः । इति त्रिकाण्डशेषः ॥

लोहपृष्ठः, पुं, (लोहस्येव कठिनं श्यामलं वा पृष्ठं यस्य ।) कङ्कपक्षी । इत्यमरः ॥ लौहमयपृष्ठयुक्ते, त्रि ॥

लोहप्रतिमा, स्त्री, (लोहस्य प्रतिमा ।) लौहमयी प्रतिमा । तत्पर्य्यायः । सूर्म्मी २ स्थूणा ३ । इत्यमरः ॥ शूर्म्मी ४ शूर्म्मिः ५ शूर्म्मः ६ । इति भरतः । शूर्म्मिका ७ । इति शब्दरत्नावली ॥

लोहमयं, त्रि, लोहात्मकम् । लोहनिर्म्मितम् । लोहशब्दात् तद्रूपार्थे मयट्प्रत्ययेन निष्पन्नम् ॥ (यथा, छान्दोग्योपनिषदि । ६ । १ । ५ ।
"यथा सौम्यैकेन लोहमणिना सर्व्वं लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥")

लोहमारकः, पुं, (लोहं मारयति.जारयतीति । मृ + णिच् + ण्वुल् ।) शालिञ्चशाकः । इति त्रिकाण्डशेषराजनिर्घण्टौ ॥

लोहलः, पुं, (लोहं लातीति । ला + कः ।) शृङ्खलाचार्य्यः । इति मेदिनी । ले, १२६ ॥

लोहलः, त्रि, (लोहमिव लातीति । ला + कः ।) अव्यक्तवाक् । इत्यमरः ॥ लोहग्राहकश्च ॥

लोहवरं, क्ली, (लोहेषु सर्व्वतैजसेषु वरम् ।) स्वर्णम् । इति त्रिकाण्डशेषः ॥

लोहश्लेषणः, पुं, (लोहानि सर्व्वतैजसानि श्लेषयति योजयतीति । श्लिष + ल्युः ।) टङ्गणः । इति हेमचन्द्रः ॥

लोहसङ्करं, क्ली, (लोहानां सङ्करो यत्र ।) वर्त्तलोहम् । इति राजनिर्घण्टः ॥ मिश्रिततैजसञ्च ॥

लोहाख्यं, क्ली, (लोहमेव आख्या यस्य ।) अगुरु । इति रत्नमाला ॥

लोहाभिसारः, पुं, (लोहानां शस्त्रादीनां अभिसारो यत्र ।) लोहाभिहारः । इत्यमरटीकायां भरतः ॥

लोहाभिहारः, पुं, (लोहानामभिहारो यत्र ।) शस्त्रभृतां राज्ञां नीराजनाविधिः । इत्यमरः ॥ महानवमीदीक्षायां अश्वादीनां नीराजने सति पश्चात् शस्त्रधारिणां राज्ञां यः शास्त्रोक्तो निर्म्मञ्छनप्रधानो विधिः प्रस्थानात् प्राक् स लोहाभिहारः । लोहस्य शस्त्रस्य अभिहारः सर्व्वतो हरणमत्रेति बहुव्रीहिः । लोहाभिहार इत्युक्तो विधिर्नीराजनोत्तर इत्यमरमाला ॥ लोहोऽस्त्री शस्त्रके लौहे इति मेदिनी ॥ लोहाभिसार इति पठन्त्यन्ये तत्र लोहं शस्त्रं अभिसार्य्यते प्रस्थाप्यतेऽत्रेति घञ् वाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना नीरस्य शान्त्युदकस्य अजनं क्षेपो यत्र सा नीराजना वा । इति भरतः ॥

लोहार्गलं, क्ली, (लोहस्य अर्गलमिव ।) तीर्थविशेषः । यथा,—
वराह उवाच ।
"शृणु देवि च तत्त्वेन यन्मां त्वं परिपृच्छसि ।
गुह्यमन्यच्च वक्ष्यामि महतः कर्म्मणो गतिः ॥
ततः सिद्धवटे गत्वा त्रिंशद्योजनदूरतः ।
म्लेच्छमध्ये वरारोहे हिमवन्तं समाश्रितम् ॥
तत्र लोहार्गलं नाम निवासो मे विधीयते ।
गुहाः पञ्चदश यत्र समन्तात् पञ्चयोजनम् ॥
सुलभं पुण्ययुक्तानां मम कर्म्मानुचारिणाम् ।
तत्र तिष्ठाम्यहं भद्रे ! उदीचीं दिशमाश्रितः ॥
तत्र ब्रह्मा च रुद्रश्च स्कन्देन्द्रश्च मरुद्गणाः ।
आदित्या वसवो रुद्रा अश्विनौ च महौजसः ॥
सोमो बृहस्पतिश्चैव ये चान्ये च दिवौकसः ।
तैश्चास्मेवार्गलं दत्त्वा चक्रं गृह्य महौजसम् ॥
ततो मे दानवाः सर्व्वे क्रमन्तो लोकमुत्तमम् ।
मया चैवान्तरं ज्ञात्वा कृत्वा मायाञ्च वैष्णवीम् ॥
शतकोटिसहस्राणि शीघ्रमेव निपातितम् ।
एवं लोहार्गलेत्यासीन्नाम मे तत्र कारितम् ॥
एकधारा पतत्यत्र इन्द्रगोपकसन्निभा ।
यस्तत्र कुरुते स्नानं सप्तरात्रोषितो नरः ॥
ब्रह्मलोकं समासाद्य ब्रह्मणा सह मोदते ।
अथात्र मुञ्चते प्राणानहङ्कारविवर्ज्जितः ॥
ब्रह्मलोकं परित्यज्य मम लोकं प्रपद्यते ।
गुह्याख्याने महाभागे क्षेत्रे लोहार्गले मम ॥
सिद्धिकामेन मर्त्त्येन गन्तव्यं नात्र संशयः ॥
एतत्ते कथितं भद्रे लोहार्गलनिवासिनः ।
माहात्म्यं पद्मपत्राक्षि गुह्यं पञ्चमहौजसम् ।
मङ्गल्यञ्च पवित्रञ्च मम भक्तसुखावहम् ॥"
इत्यादि वराहपुराणे लोहार्गलमाहात्म्यवर्णनं नामाध्यायः ॥ * ॥ लौहकीलके क्ली स्त्री च ॥

लोहि, क्ली, श्वेतटङ्कणम् । इति कश्चिद्राजनिर्घण्टः ॥

लोहिका, स्त्री, (लोहमस्त्यत्रेति । लोह + ठन् ।) लौहपात्रम् । तत्पर्य्यायः । खरकोन्दः २ खरपात्रम् ३ । इति त्रिकाण्डशेषः ॥

लोहितं, क्ली, (रुह्यते इति । रुह + "रुहेरश्च लो वा ।" उणा० ३ । ६४ । इति इतन् रस्य लत्वञ्च ।) रक्तगोशीर्षम् । कुङ्कुमम् । रक्तचन्दनम् । इति मेदिनी । ते, १४७ ॥ पत्तङ्गम् । हरिचन्दनम् । हयकुङ्कुमम् । रुधिरम् । इति राजनिर्घण्टः ॥ (यथा, मनुः । ४ । ५६ ।
"नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् ।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ॥")
युद्धम् । इति हेमचन्द्रः ॥ (सरोवरविशेषः । इति मात्स्ये । १२० । १२ ॥ माणिक्यम् । तत्पर्य्यायो यथा,—
"माणिक्यं पद्मरागः स्याच्छोणरत्नञ्च लोहितम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

लोहितः, पुं, (रुह + इतन् । रस्य लः ।) नदविशेषः । (सागरविशेषश्च । यथा, रामायणे । ४ । ४० । ३८ ।
"ततो रक्तजलं भीमं लोहितं नाम सागरम् ।
गत्वा प्रेक्षत तां चैव बृहतीं कूटशाल्मलीम् ॥")
भौमः । (यथा, बृहत्संहितायाम् । ६ । ८ ।
"मध्येन यदि मघानां गतागतं लोहितः करोति ततः ।
पाण्ड्यो नृपो विनश्यति शस्त्रोद्योगाद्भयमवृष्टिः ॥")
रक्तवर्णः । इति मेदिनी । ते, १४८ ॥ रोहितमत्स्यः । मृगविशेषः । इति शब्दरत्नावली ॥ सर्पः । (यथा, महाभारते । २ । ६ । ८ ।
"वासुकिस्तक्षकश्चैव नागश्चैरावतस्तथा ।
कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥")
युद्धान्तरः । इति धरणिः ॥ मङ्गलः । इति शब्दचन्द्रिका ॥ रक्ताशुः । रक्तशालिः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । १ । ४६ ।
"षष्टिका यवगोधूमा लोहिता ये च शालयः ।
मुद्गाढ़की मसूराश्च धान्येषु प्रवराः स्मृताः ॥")
बलभेदः । इति हेमचन्द्रः ॥ (पर्व्वतविशेषः । इति मात्स्ये । १२० । ११ ॥ कुशद्वीपस्थवर्षविशेषः । इति तत्रैव । १२२ । ६५ ॥)

लोहितः, त्रि, रक्तवर्णयुक्तः । इत्यमरः ॥ (यथा, मनुः । ५ । ६ ।
"लोहितान् वृक्षनिर्य्यासान् व्रश्चनप्रभवांस्तथा ।
शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥")

लोहितकं, क्ली, (लोहितमिव । इवार्थे कन् ।) रीतिः । इति राजनिर्घण्टः ॥

लोहितकः, पुं, (लोहित एव । स्वार्थे कन् ।) मङ्गलग्रहः । इति शब्दमाला ॥ पद्मरागमणिः । इति हेमचन्द्रः ॥ (यथा, माघे । १३ । ५२ ।

"लयनेषु लोहितकनिर्म्मिता भुवः
शितिरत्नरश्मिहरितीकृतान्तराः ॥"

रक्तवर्णयुक्ते, त्रि । यथा, महाभारते ।३।६।३।
"नीलपीतासितश्यामैः सितैर्लोहितकैरपि ।
अवतानैस्तथा गुल्मैर्मञ्जरीजालधारिभिः ॥")

लोहितचन्दनं, क्ली, (लोहितं चन्दनमिव ।) कुङ्कुमम् । इत्यमरः ॥ रक्तचन्दनम् ॥ (यथा, किरातार्ज्जुनीये । १ । ३४ ।

"परिभ्रमन् लोहितचन्दनोचितः
पदातिरन्तर्गिरिरेणुरूषितः ॥")

लोहितपुष्पकः, पुं, (लोहितं पुष्पमस्य । कप् ।) दाड़िमवृक्षः । इति भावप्रकाशः ॥

लोहितमृत्तिका, स्त्री, (लोहिता मृत्तिका ।) गैरिकम् । इति रत्नमाला ॥ रक्तवर्णमृत्तिका च ॥

लोहिता, स्त्री, (लोहित+स्त्रियां टाप् ।) रागादिना रक्तवर्णा । इति जटाधरः ॥ वराहक्रान्ता । इति शब्दचन्द्रिका ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

लोहिताक्षः, पुं, (लोहिते अक्षिणी यस्य । सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।) विष्णुः । इति शब्दमाला ॥ कोकिलः । इति शब्दचन्द्रिका ॥ रक्तवर्णचक्षुर्युक्ते, त्रि । (यथा, महाभारते । १ । ५६ । ६ ।

"यथा सूतो लोहिताक्षो महात्मा
पौराणिको वेदितवान् पुरस्तात् ॥")

लोहिताङ्गः, पुं, (लोहितमङ्गं यस्य ।) मङ्गलग्रहः । इत्यमरः ॥ (यथा, हरिवंशे । २२८ । १२ ।
"वामे च दक्षिणे चैव स्थितौ शुक्रबृहस्पती ।
शनैश्चरो लोहिताङ्गो लोहितार्कसमद्युतिः ॥")
कम्पिल्लकः । इति राजनिर्घण्टः ॥

लोहिताननः, पुं, (लोहितमाननं मुखं यस्य ।) नकुलः । इति राजनिर्घण्टः ॥ रक्तवर्णमुखे, त्रि ॥

लोहितायः, [स्] क्ली, (लोहितमयः ।) ताम्रम् । इति त्रिकाण्डशेषः ॥ (विशेषोऽस्य ताम्रशब्दे विज्ञेयः ॥)

लोहितायसं, क्ली, (लोहितमायसम् ।) रक्तवर्णलोहजातिः । इति मुग्धबोधव्याकरणम् ॥

लोहिनी, स्त्री, (लोहिता+"वर्णादनुदात्तादिति ।" ४ । १ । ३९ । इति ङीप् । तकारस्य नकारादेशश्च ।) रक्तवर्णा स्त्री । यथा,—
"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा ॥"
इति जटाधरः ॥

लोहोत्तमं, क्ली, (लोहेषु सर्व्वतैजसेषु उत्तमम् ।) स्वर्णम् । इति हेमचन्द्रः ॥

लौकायतिकः, पुं, (लोकायतमधीते वेद वा । लोकायत+"क्रतूक्थादि सूत्रान्तात् ठक् ।" ४ । २ । ६० । इति ठक् ।) तार्किकभेदः । (यथा, गो० रामायणे । २ । १०९ । २९ ।
"कच्चिन्न लौकायतिकान् ब्राह्मणानुपसेवसे ।
अनर्थकुशला ह्येते मूढ़ाः पण्डितमानिनः ॥")
चार्व्वाकशास्त्रवेत्ता । लोकायतं वेत्ति इत्यर्थे ष्णिकप्रत्ययेन निष्पन्नोऽयम् ॥

लौकिकः, त्रि, (लोके विदितः प्रसिद्धो हितो लोकं वेत्ति वा । लोक+ठञ् ।) लोकव्यवहारसिद्धः । यथा,—
"वैदिका लौकिकाश्चैव ये यथोक्तास्तथैव ते ।
निर्णीतार्थास्तु विज्ञेया लोकात्तेषामसंग्रहः ॥"
इति कलापव्याकरणे सन्धिवृत्तौ प्रथमप्रकरणम् ॥ लोकाय हित इत्यर्थे च ष्णिकप्रत्ययनिष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

लौकिकता, स्त्री, (लौकिकस्य भावः । लौकिक+तल् ।) लोकव्यवहारसिद्धत्वम् । शिष्टाचारेऽस्य भूरिप्रयोगः ॥

लौकिकाग्निः, पुं, (लौकिकोऽग्निः ।) असंस्कृताग्निः । यथा, आह्निकतत्त्वे ।
"न पैतृयज्ञियो होमो लौकिकाग्नौ विधीयते ॥"

लौड, ऋ उन्मादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अलुलौड़त् । इति दुर्गादासः ॥

लौहः, पुं, (लोह एव । प्रज्ञाद्यण् ।) लोहः । इत्यमरटीकायां भरतः ॥ स च पञ्चविधः । यथा । काचिः १ पाण्डिः २ कान्तः ३ कालिङ्गः ४ वज्रकः ५ । अस्य त्रयोदशविधसंस्काराः । यथा । शाणघर्षणम् १ उद्वर्त्तनम् १ अम्लभावनम् ३ आतपशोषः ४ निषेकः ५ मारणम् ६ दलनम् ७ क्षालनम् ८ सूर्य्यपाकः ९ स्थालीपाकः १० चूर्णनम् ११ पुटपाकः १२ पाकनिष्पन्नः १३ । अस्य गुणाः । आयुर्ब्बलवीर्य्यकामदातृत्वम् । रोगनाशित्वम् । श्रेष्ठतमरसायनत्वञ्च । कृष्णवर्णस्य तस्य गुणाः । शोथशूलार्शःकुष्ठपाण्डुप्रमेहमेदवायु-नाशित्वम् । वयःस्थैर्य्यचक्षुस्तेजःकारित्वम् । सारकत्वम् । गुरुत्वञ्च । शोधितस्यास्य गुणौ । सर्व्वरोगनाशित्वम् । मरणनाशित्वञ्च । अशुद्धस्य तस्य गुणाः । जारणायोग्यत्वम् । आयुर्नाशकत्वञ्च । इति रत्नावल्यादयः ॥ * ॥ (अथास्य शोधनादिनियमः ।
"त्रिफलाष्टगुणे तोये त्रिफलाषोड़शं पलम् ।
ततः क्वाथे पादशेषे लौहस्य पलपञ्चकम् ॥
कृत्वा तप्तानि पत्राणि सप्तवारं निषेचयेत् ।
ध्रुवं प्रलीयते दोषो गिरिजो लोहसम्भवः ॥"
इति लोहशोधनम् ॥ * ॥
"भानुपाकात्तथा स्थालीपाकाच्च पुटपाकतः ।
त्रितयो जायते लौही यथोक्तफलदो भवेत् ॥"
इति संक्षिप्तलौहमारणम् ॥ * ॥
"द्वादशांशेन दरदं तीक्ष्णचूर्णस्य मेलयेत् ।
कन्यानीरेण संमर्द्द्य यामयुग्मञ्च संपुटे ।
पुटेदेवं लौहचूर्णं सप्तधा मारणं भवेत् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥") अन्यत् लोहशब्दे द्रष्टव्यम् ॥ (छागविशेषः । यथा, महाभारते । १३ । ८८ । १३ ।
"अजेन वापि लौहेन मघास्वेव यतव्रतः ।
हस्तिच्छायासु विधिवत् कर्म्म व्यजनवीजितम् ॥"
लोहशब्दार्थोऽप्यत्र ॥)

लौहचारकः, पुं, (लौहेन लौहनिगड़ेन चारः प्रचारो यत्र ।) नरकभेदः ॥ यत्र निगड़ैर्बध्यन्ते । इति पुराणम् ॥

लौहजं, क्ली, (लौहात् जायते इति । जन्+डः ।) मण्डूरम् । इति रत्नमाला ॥

लौहभाण्डः, पुं, (लौहस्य भाण्डमिवाकृतिर्यत्र ।) उदूखलम् । इति शब्दचन्द्रिका ॥ हामन्दिस्ता इति भाषा । लौहनिर्म्मितभाण्डे, क्ली ॥

लौहभूः, स्त्री, (लौहस्य भूरिव ।) कटिनी । सा तु लौहपात्रविशेषः । यथा,—
"लौहात्मा चायुगा लौहा लौहभूः कठिन्यपि ॥"
इति शब्दचन्द्रिका ॥

लौहमलं, क्ली, (लौहस्य मलम् ।) लोहमलम् । इति राजनिर्घण्टः ॥ (तथास्य विषयः ।
"सद्यो लौहमलाज्यमाक्षिकसिताभागाः समा मानतः
पात्रे ताम्रमये दिनान्तमथितं संस्थापयेदातपे
पश्चात्तद्घनतां प्रणीय रजनीमेकां बहिः स्थापयेत् ।
पात्रे ताम्रमये विधेयमथवा पात्रे हविर्भाविते ॥
पश्चान्माषचतुष्टयं प्रतिदिनं जग्ध्वा जलं शीतलम् ।
पेयं भोजनपूर्व्वमध्यविरतोऽस्वच्छन्दभोज्यैर्नरैः ॥
चेतुं शूलहुताशमान्द्यकसनश्वासाम्लपित्तज्वरोन्मादापस्मृतिमेहसर्व्वजठराजीर्णादि सर्व्वा रुजः ॥"
इति भैषज्यधन्वन्तरौ शूले चतुःसममण्डूरम् ॥)

लौहशङ्कुः, पुं, (लौहस्य शङ्कुर्यत्र ।) नरकविशेषः । यत्र सूचीभिर्भिद्यते । इति पुराणम् ॥ लौहनिर्म्मितकीलकञ्च ॥

लौहा, स्त्री, लौहभूः । इति शब्दचन्द्रिका ॥

लौहात्मा, स्त्री, (लौह आत्मा यस्याः ।) लौहभूः । इति शब्दचन्द्रिका ॥

लौहितः, पुं, लोहितः । इति लोहितशब्दात् स्वार्थे ष्ण-(अण्) प्रत्ययेन निष्पन्नः ॥ लोहितसम्बन्धिनि, त्रि ॥

लौहितीकः, त्रि, (लोहित इव । लोहित+"कर्कलोहितादीकक् ।" ५ । ३ । ११० । इति ईकक् ।) लोहितवर्णतुल्यः । इति सिद्धान्तकौमुदी ॥

लौहित्यं, क्ली, (लोहितस्य भावः । लोहित+ष्यञ् ।) लोहितत्वम् । इति मेदिनी । ये, १०२ ॥

लौहित्यः पुं, (लोहित एव । स्वार्थे ष्यञ् ।) नदभेदः । स च ब्रह्मपुत्त्रः । इति मेदिनी । ये, १०२ ॥ सागरः । इति शब्दमाला ॥ तस्य नदविशेषस्य उत्पत्तिर्यथा,—

सगर उवाच ।

“अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुतः ।
कथं शान्तनुभार्य्यायां रतः स कमलासनः ॥
पारम्पर्य्येयपुत्त्रो वा कथं जज्ञे पितामहात् ।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम ॥

और्व्व उवाच ।

शृणु त्वं नृपशार्द्दूल कथयामि महत्तरम् ।
आख्यानं ब्रह्मपुत्त्रस्य लौहित्यस्य महात्मनः ॥
हरिवर्षे महावर्षे शान्तनुर्नाम नामतः ।
मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः ॥
तस्य भार्य्या महाभागा अमोघाख्या महासती ।
हिरण्यगर्भस्य मुनेर्मुखचन्द्रास्यमोद्भवा ॥
तया सार्द्धं स कैलासमध्यादापर्व्वतेऽवसत् ।
लोहित्याख्यस्य सरसस्तीरे वै गन्धमादने ॥
एकदा स तपोनिष्ठो निजपुष्पादिगोचरे ।
जगाम वनमध्यन्तु चिन्वन् बहुफलानि च ॥
तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामहः ।
तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया ॥
तां दृष्ट्वा हेमगर्भाभां युवतीमतिसुन्दरीम् ।
मोहितो मदनेनाशु तथाभूद्दूषितेन्द्रियः ॥
उदीरितेन्द्रियो भूत्वा गिरुत्सुकां महासतीम् ।
अथाधावत्तदा ब्रह्मा संमुखो मदनार्द्दितः ॥
धावमानं विधातारं दृष्ट्वामोघा महासती ।
मैवं मैवमिति प्रोक्ता पर्णशालां व्यलीयत ॥
इदञ्चोवाच धातारममोघा कुपिता तदा ।
पर्णशालान्तरगता द्वारमाहृत्य तत्क्षणात् ॥
अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम् ।
बलात् प्रमथ्ये चाहं तत्त्वया त्वाञ्च शपाम्यहम् ॥
अमोघया चैवमुक्ते विधातुश्च तदा नृप ।
रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः ॥
च्युते रेतसि धातापि हंसयानं समास्थितः ।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ ॥
गते वेधसि शान्तनुर्निजमाश्रममागतः ।
आगत्य दृष्ट्वा हंसानां पदक्षोभं तथा भुवि ॥
तेजश्च पतितं भूमौ विधातुर्ज्वलनोपमम् ।
अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम् ॥
किमेतदत्र शुभगे प्रवृत्तं दृश्यते तु यत् ।
पदचिह्नाच पदक्षोभं तेजश्चेदञ्च कीदृशम् ॥
सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम् ।
अमर्षितेव न्यगददाकुला विकलानना ॥
हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः ।
कमण्डलुकरो भीरू रतिं मां समयाचत ॥
ततो मया भर्त्सितश्च उटजान्तरलीनया ।
प्रयातश्च तेजः संयातो मम शापभयार्द्दितः ॥
कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तवो ।
न हि मां धर्षणां सोढुं कश्चित् शक्नोति जीवभृत् ॥
स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः ।
इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत् ॥
दिव्यध्यानेन तज्ज्ञात्वा देवकार्य्यमुपस्थितम् ।
तीर्थावतारणञ्चापि हिताय जगतां मुनिः ॥
ध्यात्वोदर्कं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत् ।
इदं तेजो ब्रह्मणस्त्वं पिबामोघे ममाज्ञया ॥
हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये ।
भवत्या निकटं ब्रह्मा स्वयमेव समागतः ॥
कामप्राप्य महात्मानमावयोः स समर्थ्य च ।
गतो निजालयं तस्मात् कर्त्तुमर्हसि तद्वचः ॥
तत् श्रुत्वा शान्तनोर्व्वाक्यममोघातीव लज्जिता ।
सान्त्वयन्तीव तं प्राह पतिं नत्वा महासती ॥
नान्यस्य तेजो धास्यामि न चेत्ते विमनस्कता ।
अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज ॥
तत्तस्याः वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः ।
स्वयं पीत्वा च तत्तेजस्तस्या गर्भे न्यषिञ्चयत् ॥
संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मणः सती ।
गर्भं दधानामोघाख्या हिताय जगतां ततः ॥
तस्याः काले तु संप्राप्ते संजातो जलसञ्चयः ।
तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक् ॥
रत्नमालासमायुक्तो रक्तगौरश्च ब्रह्मवत् ।
चतुर्भुजः पद्मविद्याधरशक्तिधरस्तथा ॥
शिशुमारशिरःस्थश्च तुल्यकायो जलोत्करैः ।
तं जातञ्च तथा भूतं शान्तनुर्लोकशान्तनुः ।
चतुर्णां पर्व्वतानाञ्च मध्यदेशे न्यवेशयत् ॥
कैलासश्चोत्तरे पार्श्वे दक्षिणे गन्धमादनः ।
जारुधिः पश्चिमे शैलः पूर्व्वे संवर्त्तकाह्वयः ॥
तेषां मध्ये स्वयं कुण्डं पर्व्वतानां विधेः सुतः ।
कृत्वातिववृधे नित्यं शरदीव निशाकरः ॥
तं तोयमध्यगं पुत्त्रमासाद्य द्रुहिणः स्वयम् ।
क्रमतस्तस्य संस्कारानकरोद्देवशुद्धये ॥
अथ काले बहुतिथे व्यतीते ब्रह्मणः सुतः ।
तोयराशिस्वरूपेण ववृधे पञ्चयोजनान् ॥
तस्मिन् देवाः पपुः सस्नुर्हंसीय इव सागरे ।
शीतामलजले ह्रदे देवचाप्सरसां गणैः ॥
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान् ।
चक्रे मातृवधं घोरमत्युग्रं पितुराज्ञया ॥
तस्य पापस्य मोक्षाय स्वपितुश्चोपदेशतः ।
स जगाम महाकुण्डं ब्रह्माख्यं स्नातुमिच्छया ॥
तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् ।
वीर्य्यौ परशुना कृत्वा तत्र च्छामवतारयत् ॥”

इति कालिकापुराणे जामदग्न्योपाख्याने ८४ अध्यायः ॥ * ॥ अपि च ।

“जातसंप्रत्ययः सोऽथ तीर्थमासाद्य तं वरम् ।
वीर्य्यौ परशुना कृत्वा ब्रह्मपुत्त्रमवाहयत् ॥
ब्रह्मकुण्डात् सुतः सोऽथ कासारे लोहिताह्वये ।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः ॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाहयदसुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम् ।
लोहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्यमुनी संत्यक्ता ब्रह्मणः सुतः ।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् ॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥”

इति कालिकापुराणे ८५ अध्यायः ॥

ल्पी, गि श्लिषि । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-अनिट् ।) ओष्ठ्यवर्गाद्योपधः । ल्पिनाति ल्पीनः ल्पीनिः । अन्तःस्थाद्योपध इति रमानाथः । ल्विनाति । इति दुर्गादासः ॥

ल्वी, गि ग गत्याम् । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-अनिट् ।) वकारोपधः । ग, ल्वीनाति ल्वीतः ल्वीतिः । गि, ल्विनाति ल्वीनाति ल्वीनः ल्वीनिः । गिनैव क्र्यादित्वसिद्धौ गकरणं प्वादित्वविकल्पार्थम् । इति दुर्गादासः ॥

व

व, वकारः । स च व्यञ्जनस्य ऊनत्रिंशवर्णः । यवर्गस्य चतुर्थवर्णश्च । अस्योच्चारणस्थानं दन्तः ओष्ठश्च । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । १८ ।
“जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठो वः स्मृतो बुधैः ॥”)

दन्त्यवकारः । स च अन्तःस्थवर्णः । यथा । अन्तःस्था य र ल वाः । इति कलापव्याकरणम् ॥ अपि च ।

“ततोऽक्षरसमाम्नायमसृजद्भगवानजः ।
अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ॥”

इति श्रीभागवते १२ स्कन्धे ६ अध्यायः ॥ “ततस्तेभ्योऽक्षराणां समाम्नायं समाहारं तमेवाह । अन्तःस्था य र ल वाः । ऊष्माणः श ष स हाः । स्वरा अकाराद्याः । स्पर्शाः कादयो मावसानाः । ह्रस्वा दीर्घाश्च । आदिशब्दात् जिह्वामूलीयादयः । त एव लक्षणं स्वरूपं यस्य तम् ।” इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ “यवरलीयवकारस्य प फ ब भ म वा इत्येकपदोक्त्या उत्पत्तिस्थानमोष्ठमुक्त्वा दन्त्यकार्य्यार्थं दन्त्यमध्येऽपि त थ द ध न ल सा व इति भिन्नपदे पठितवान् । यथा संवृणोति इत्यादौ वकारस्य ओष्ठ्यत्वात् जर् दन्त्यत्वात् अनुस्वारस्य मकारो न स्यात् । वैदिकास्तु अस्योत्पत्तिस्थानं दन्त एवेत्याहुः । अतएव तद्विष्णोः परमं पदं इत्यादौ तथैवोच्चारयन्ति ।” इति मुग्धबोधटीकायां दुर्गादासः ॥ * ॥

तस्य पर्य्याय:।
"वो वाणो वारुणी सूक्ष्मा वरुणो देव-
संज्ञक:।
तोयं लान्तश्च वामांश:॥" इति वीजवर्णाभि-
धानम्॥ * ॥ अपि च।
"वकारो वरुणो वाम: स्वेद: खड्गीश्वरो जद:॥"
इति रुद्रयामले मन्त्रकोष:॥ * ॥
अपि च।
"वो वाणो वारुणी सूक्ष्मा वरुणो देवसंज्ञक:।
खड्गीशो ज्वालिनी वस: कलसध्वनिवाचक:॥
उत्कारीशस्तु नावीतो वचा स्फिक् सागर:
शुचि:।
निशातु: शङ्कर: श्रेष्ठो विशेषो यमसादनम्॥"
इति नागानन्दशास्त्रम्॥
अस्य स्वरूपं यथा,—
"वकारं चञ्चलापाङ्गि कुण्डली मोहनत्रयम्।
पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा॥
त्रिविन्दुसहितं वर्णमात्मादितत्त्वसंयुतम्।
पञ्चदेवमयं वर्णं पीतविद्युल्लतामयम्॥
चतुर्व्वर्गप्रदं वर्णं सर्व्वसिद्धिप्रदायकम्।
त्रिशक्तिसहितं देवि! त्रिविन्दुसहितं सदा॥"
इति कामधेनुतन्त्रम्॥ * ॥
बङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,—
"कोणत्रययुता रेखा अधर्व्विन्दुशिवात्मिका।
माया शक्ति: परा नित्या ध्यानमस्य प्रचक्ष्यते॥"
इति वर्णोद्धारतन्त्रम्॥ * ॥
अस्य ध्यानम्।
"कुन्दपुष्पप्रभां देवीं द्विभुजां पङ्कजेक्षणाम्।
शुक्लमाल्याम्बरधरां रत्नहारोज्ज्वलां पराम्॥
साधकाभीष्टदां सिद्धां सिद्धिदां सिद्धसेविताम्।
एवं ध्यात्वा वकारन्तु तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥
व, व, इवार्थ:। इति मेदिनी। वे, १॥ (यथा, रघु:। ४। ४२।
"ताम्बूलीनां दलैस्तत्र रचितापानभूमय:।
नारिकेलासवं योधा: शात्रवं व यश: पपु:॥")
वं, क्ली, (वा ल गमनहिंसयो:+क:।) प्रचेता:। इति मेदिनी। वे, १॥ वरुणवीजम्। इति तन्त्रम्॥
व:, पुं, (वानमिति। वा+भावे घ:) सान्त्वनम्। (वाति गच्छतीति। वाल गमने+क:।) वायु:। वरुण:। इति मेदिनी। वे, १॥ बाहु:। मन्त्रणम्। कल्याणम्। बलवान्। वसति:। वरुणालय:। इति शब्दरत्नावली॥ शार्द्दूल:। वस्त्रम्। शालूक:। वन्दनम्। इति नानार्थरत्नकोष:॥
व:, [स्] त्रि, युष्मान्। युष्मभ्यम्। युष्माकम्। युष्मच्छब्दस्य द्वितीयाचतुर्थीषष्ठीबहुवचनान्तरूपोऽयम्। इति व्याकरणम्॥ (यथा, मुग्धबोधे।
"पुष्णातु वो नोऽपि हरिर्धनं वो
ददातु नो हन्त्वशुभानि वो न:॥"
पादवाक्यादौ तु अस्य प्रयोगो न भवति। इति वैयाकरणिका:॥)
वंश:, पुं, (वमति उद्गिरति पुरुषान् वम्यते इति वा। टु वम उद्गिरणे इति धातोर्यद्वा वन शब्दे इति धातोर्बाहुलकात् श:। यद्वा, वष्टि उश्यते इति वा। वश कान्तौ+अच् घञ् वा। ततो नुम्।) पुत्रपौत्रादि:। तत्पर्य्याय:। सन्तति: २ गोत्रम् ३ जननम् ४ कुलम् ५ अभिजन: ६ अन्वय: ७ अन्ववाय: ८ सन्तान: ९। इत्यमर:। २। ७। १॥ निचनम् १० जाति: ११। इति जटाधर:॥ कुलस्य विद्यया जन्मना वा प्राणिनामेकलक्षण: सन्तानो वंश इति जयादित्य:। धनेन विद्यया वा ख्यातस्यापत्यधारा वंश इति सुभू:। वमति उद्गिरति पूर्व्वपुरुषान् वंश: नाम्नीति श:। इत्यमरटीकायां भरत:॥ * ॥ (यथा, रघु:। १। २।
"क्व सूर्य्यप्रभवो वंश: क्व चाल्पविषया मति:।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥"
पुत्र:। यथा, भागवते। ९। २। १७।
"नृपस्य वंश: सुमतिर्भूतज्योतिस्ततो वसु:॥")
तृणजातिविशेष:। बाँश इति भाषा। तत्पर्य्याय:। त्वक्सार: २ कर्म्मार: ३ त्वचिसार: ४ तृणध्वज: ५ शतपर्व्वा ६ यवफल: ७ वेणु: ८ मस्कर: ९ तेजन: १०। इत्यमर:। २। ४। १६०॥ किष्कुपर्व्वा ११। इति जटाधर:॥ वम्भ: १२। इति शब्दरत्नावली॥ तृणकेतुक: १३ कण्टालु: १४ कण्टकी १५ महाबल: १६ दृढग्रन्थि: १७ दृढपत्र: १८ धनुर्द्रुम: १९ धानुष्य: २० दृढकाण्ड: २१॥ (यथा, ऋतुसंहारे। २। २५।
"ध्वनति पवनविद्ध: पर्व्वतानां दरीषु
स्फुटति पटुनिनाद: शुष्कवंशस्थलीषु।
प्रसरति तृणमध्ये लब्धवृद्धि: क्षणेन
क्षपयति मृगयूथं प्रान्तलग्नो दवाग्नि:॥")
अस्य गुणा:। अम्लत्वम्। कषायत्वम्। किञ्चित्तिक्तत्वम्। शीतलत्वम्। मूत्रकृच्छ्र-प्रमेहार्श:पित्तदाहास्रनाशित्वञ्च। इति राजनिर्घण्ट:॥ * ॥ अपि च।
"वंश: सरो हिम: स्वादु: कषायो वस्तिशोधन:।
छेदन: कफपित्तघ्न: कुष्ठास्रव्रणशोथजित्॥ * ॥
तत्करीर: कटु: पाके रसे रूक्षो गुरु: सर:।
कषाय: कफकृत् स्वादुर्व्विदाही वातपित्तल:॥
तद्यवास्तु सरा रूक्षा: कषाया: कटुपाकिन:।
वातपित्तकरा उष्णा बद्धमूत्रा: कफापहा:॥"
इति भावप्रकाश:॥ * ॥
(गृहोर्द्धकाष्ठम्। यथा,—
"वंश: पृष्ठास्थ्नि गेहोर्द्धकाष्ठे वेणौ गणे कुले॥"
इति रघुटीकायां मल्लिनाथधृतकेशव:। ७। ३९।)
पृष्ठावयव:। पिठेर दाँड़ा इति भाषा॥ (यथा, भागवते। ११। ८। ३३।
"यदस्थिभिर्न्निर्म्मितवंशवंश्य-
स्थूणं त्वचा रोमनखै: पिनद्धम्॥")
वर्ग:। इति मेदिनी। शे, १३॥ (यथा, रघु:। ७। ३९।
"उत्थापित: संयति रेणुरश्वै:
सान्द्रीकृत: स्यन्दनवंशचक्रै:॥")
वाद्यभाण्डविशेष:। इति धरणि:॥ बाँशी इति भाषा॥ (यथा, रघु:। २। १२।
"स कीचकैर्मारुतपूर्णरन्ध्रै:
कूजद्भिरापादितवंशकृत्यम्।
शुश्राव कुञ्जेषु यश: स्वमुच्चै-
रुद्गीयमानं वनदेवताभि:॥"
विवृतिरस्य वंशीशब्दे द्रष्टव्या॥) इक्षु:। सालवृक्ष:। इति राजनिर्घण्ट:॥ (प्राधागर्भसम्भूताप्सरोविशेषे, स्त्री। यथा, महाभारते। १। ६५। ४६।
"अलम्बुषां मिश्रकेशीं विद्युत्पर्णां तिलोत्तमाम्"
"अरुणां रक्षितां चैव रम्भां तद्वन्मनोरमाम्"
—

"अनवद्यां मनुं वंशामसुरां मार्गणप्रियाम्।
अनूपां सुभगां भासीमिति प्राधा व्यजायत॥")
वंशकं, क्ली, (वंश इव कायतीति। कै+क:।) अगुरु। इति हारावली। १०४॥
वंशक:, पुं, (वंश इव प्रतिकृति:। "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) मत्स्यविशेष:। इति शब्दमाला॥ बाँशपातामाछ इतिभाषा॥ इक्षुविशेष:। इति रत्नमाला॥ बाँशाइ इति सामशाड़ा इति च भाषा॥ अस्य गुणा:।
"वंशकस्तनभिष्यन्दी मधुर्द्दोषभयापह:॥"
इति राजवल्लभ:॥
(यथा, सुश्रुते। १। ४५।
"पौण्ड्रको भीरुकश्चैव वंशक: शतपोरक:॥"
"अविदाही गुरुर्वृष्य: पौण्ड्रको भीरुकस्तथा।
आभ्यां तुल्यगुण: किञ्चित् सक्षारो वंशको मत:॥")
(ह्रस्वो वंश:। "संज्ञायां कन्।" ५। ३। ८७। इति कन्। क्षुद्रवंश:। इति सिद्धान्तकौमुदी॥)
वंशकफं, क्ली, आकाशोड्डीयमानतूलम्। यथा,—
"हंसतूलकमित्याहुरिन्द्रतूलं मनीषिण:।
शीर्णहासं वंशकफं वाततूलं मरुद्ध्वजम्॥"
इति हारावली। २३॥
वंशकर्पूररोचना, स्त्री, (कर्पूर इव रोचते शोभते इति। रुच्+ल्यु:। तत: षष्ठीतत्पुरुष:।) वंशरोचना। इति राजनिर्घण्ट:॥
वंशक्षीरी, स्त्री, (वंशस्य क्षीरमिवास्या अस्तीति। अच्। गौरादित्वात् ङीष्।) वंशरोचना। इति राजनिर्घण्ट:॥
वंशज:, पुं, (वंशाज्जायते इति। जन्+ड:।) वेणुयव:। इति राजनिर्घण्ट:॥
वंशज:, त्रि, (वंशात् सद्वंशाज्जायते इति। जन्+ड:।) सद्वंशजात:। तत्पर्य्याय:। बीज्य: २ वंश्य: ३। इति हेमचन्द्र:। ३। १७७॥ (वेणूत्पन्नोऽपि। यथा, आर्य्यासप्तशत्याम्। ४७९।
"यन्नियतनिर्गुणं यन्न वंशजं यच्च नित्यनिर्व्वाणम्।
किं कुम्भसन्निहितं धनु: मदे देवराजेन॥")

वंशजा, स्त्री, (वंशे जायते इति । जन् + डः + टाप् ।) वंशरोचना । इति शब्दरत्नावली ॥ (अस्या गुणाः यथा,—
"वंशजा वृंहणी वृष्या बल्या स्वाद्वी च शीतला ।
तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः ।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातकृच्छ्रजित् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

वंशतण्डुलः, पुं, (वंशजातस्तण्डुलः ।) वेणुयवः । इति राजनिर्घण्टः ॥

वंशधान्यं, क्ली, (वंशस्य धान्यम् ।) वेणुयवः । इति राजनिर्घण्टः ॥

वंशनालिका, स्त्री, (वंशनालोऽस्त्यस्या इति । वंशनाल + ठन् । टाप् ।) वंशी । इति शब्दरत्नावली ॥

वंशनेत्रं, क्ली, (वंशस्येव नेत्रमस्य ।) इक्षुमूलम् । इति राजनिर्घण्टः ॥

वंशपत्रः, पुं, (वंशस्य पत्राणीव पत्राण्यस्य ।) नलः । इति राजनिर्घण्टः ॥ (वंशस्य पत्रम् ।) वंशस्य दले, क्ली ॥ (हरितालम् । यथा,—
"तालकं वंशपत्राख्यं कुष्माण्डसलिले क्षिपेत् ।
सप्तधा वा त्रिधा वापि दध्यम्लेन च वा पुनः ॥
शोषयित्वा पुनः शुष्कं चूर्णयेत्तण्डुलाकृति ।
ततः शरावके पात्रे स्थापयेत् कुशलो भिषक् ॥
बदरीपत्रकल्केन सन्धिलेपञ्च कारयेत् ।
अरण्याभमधःपात्रं तावज्ज्वाला प्रदीयते ॥
स्वाङ्गशीतं समुद्धृत्य माणिक्याभो भवेद्रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे कुष्ठाधिकारे ॥)

वंशपत्रकं, क्ली, (वंशपत्रमेव । स्वार्थे कन् ।) हरितालम् । इति हेमचन्द्रः । ४ । १२४ ॥

वंशपत्रकः, पुं, (वंशस्य पत्रमिवाकृतिरस्यति । इवार्थे कन् ।) क्षुद्रमत्स्यविशेषः । इति शब्दमाला ॥ वाँशपाता माछ इति भाषा ॥ नलः । श्वेतेक्षुः । इति राजनिर्घण्टः ॥

वंशपत्रपतितं, क्ली, सप्तदशाक्षरपादच्छन्दोविशेषः । यथा,—
"दिङ्मुनिवंशपत्रपतितं भ र न भ न ल गैः ॥"
उदाहरणम् ।
"नूतनवंशपत्रपतितं रजनिजलकणं
पश्य मुकुन्द ! मौक्तिकमिवोत्तममरकतगम् ।
एष च तं चकोरनिकरः प्रपिबति मुदितो
वान्तमवेत्य चन्द्रकिरणैरमृतकणमिव ॥"
वंशपत्रचरितेति केचित् । वंशदलमिति शम्भौ । इति छन्दोमञ्जरी ॥

वंशपत्री, स्त्री, (वंशपत्र + गौरादित्वात् ङीष् ।) नाडीहिङ्गुः । तृणविशेषः । तत्पर्य्यायः । वंशदला २ जीरिका ३ जीर्णपत्रिका ४ । अस्या गुणाः । सुमधुरत्वम् । शिशिरत्वम् । पित्तरक्तदोषनाशित्वम् । रुच्यत्वम् । पशूनां दुग्धदायित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"वंशपत्री वेणुपत्री पिण्डा हिङ्गु शिवाटिका ।
हिङ्गुपत्रीगुणा विज्ञैर्वंशपत्री च कीर्त्तिता ॥"
इति भावप्रकाशः ॥

वंशपीतः, पुं, (वंशः वंशपत्त्रमिव पीतः ।) कणगुग्गुलुः । इति राजनिर्घण्टः ॥

वंशपुष्पा, स्त्री, (वंशस्य पुष्पाणीव पुष्पाणि यस्याः ।) सहदेवीलता । इति राजनिर्घण्टः ॥

वंशपूरकं, क्ली, (वंशस्येव पूरकमस्य ।) इक्षुमूलम् । इति राजनिर्घण्टः ॥

वंशरोचना, स्त्री, (रोचते इति । रुच + नन्द्यादित्वात् ल्युः । टाप् । वंशस्य रोचना ।) स्वनामख्यातवंशपर्व्वस्थितश्वेतवर्णौषधविशेषः । वंशलोचन इति भाषा । तत्पर्य्यायः । त्वक्क्षीरा २ । इत्यमरः । २ । ६ । १०६ ॥ वंशलोचना ३ । इति भरतः ॥ तुगाक्षीरी ४ शुभा ५ वांशी ६ वंशजा ७ । इति रत्नमाला ॥ क्षीरिका ८ । इति शब्दरत्नावली ॥ तुगा ९ त्वक्क्षीरी १० शुभ्रा ११ वंशक्षीरी १२ वैणवी १३ त्वक्सारा १४ कर्म्मरी १५ श्वेता १६ वंशकर्पूररोचना १७ तुङ्गा १८ रोचनिका १९ पिङ्गा २० वंशशर्करा २१ । अस्या गुणाः । रूक्षत्वम् । कषायत्वम् । मधुरत्वम् । हिमत्वम् । रक्तशुद्धिकारित्वम् । तापपित्तोद्रेकहरत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वंशजा वृंहणी वृष्या बल्या स्वाद्वी च शीतला ।
तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः ।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातकृच्छ्रजित् ॥"
इति भावप्रकाशः ॥

वंशलोचना, स्त्री, (वंशरोचना । रस्य लः ।) वंशरोचना । इति हेमचन्द्रः ॥ अस्या गुणाः ।
"कषायमधुरा रूक्षा वातघ्नी वंशलोचना ।
तुगाक्षीरी क्षयश्वासकासघ्नी मधुरा हिमा ॥"
इति राजवल्लभः ॥

वंशशर्करा, स्त्री, (वंशस्य शर्करेव ।) वंशलोचना । इति राजनिर्घण्टः ॥

वंशशलाका, स्त्री, (वंशस्य शलाकेव दार्ढ्यात् ।) वीणामूलम् । इति हेमचन्द्रः । २ । २०० ॥ (वंशनिर्म्मिता शलाकेति मध्यलोपी समासः ।) वंशनिर्म्मितशलाका च ॥

वंशस्तनितं, } वंशस्थविलं, } क्ली, द्वादशाक्षरपादच्छन्दोविशेषः । यथा,—
"वदन्ति वंशस्थविलं जतौ जरौ ॥"
उदाहरणम् ।
"विलासवंशस्थविलं मुखानिलैः
प्रपूर्य्य यः पञ्चमरागमुद्गिरन् ।
व्रजाङ्गनानामपि गानशालिनां
जहार मानं स हरिः पुनातु वः ॥"
वंशस्तनितमपि क्वापि । इति छन्दोमञ्जरी ॥

वंशाग्रं, क्ली, (वंशस्य अग्रम् । प्रथमजातत्वात् ।) वंशाङ्कुरः । इति राजनिर्घण्टः ॥

वंशानुचरितं, क्ली, (वंशस्य अनुचरितम् ।) वंशचरित्रवर्णनम् । तत्तु पुराणस्य पञ्चलक्षणान्तर्गतलक्षणविशेषः । यथा, शब्दरत्नावल्याम् ।
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम् ॥"
(यथा, भागवते । ६ । १ । ४ ।
"तेषां वंशं पृथग्ब्रह्मन् ! वंशानुचरितानि च ।
कीर्त्तयस्व महाभाग ! नित्यं शुश्रूषतां हि नः ॥")

वंशाङ्कुरः, पुं, वंशस्याङ्कुरः । वाँशेर कोँड़ा इति भाषा । तत्पर्य्यायः । करीरम् २ वंशाग्रम् ३ यवफलाङ्कुरः । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । अम्लत्वम् । कषायत्वम् । लघुत्वम् । शीतलत्वम् । पित्तास्रदाहकृच्छ्रघ्नत्वम् । रुचिकारित्वम् । तत्पर्व्वणो निर्गुणत्वञ्च । इति राजनिर्घण्टः ॥

वंशिकं, क्ली, (वंशोऽस्त्यस्येति । ठन् ।) अगुरु । इत्यमरः । २ । ६ । १२६ ॥

वंशिका, स्त्री, (वंशिक + टाप् ।) अगुरु । इत्यमरटीकायां भरतः ॥ वंशी । इति शब्दरत्नावली ॥

वंशी, स्त्री, (वंशः कारणत्वेनास्त्यस्याः । अच् । गौरादित्वात् ङीष् ।) मुरली । इति शब्दरत्नावली ॥ वाँशी इति भाषा ॥ (यथा, काव्यचन्द्रिकायाम् ।
"निर्म्मिता कापि गोपीनां कुलशीलविनाशिनी ।
विधिना पामरेणेयं न वंशी मुरवैरिणः ॥")
कर्षचतुष्टयम् । इति राजनिर्घण्टः ॥ वंशीवाद्यस्य विवरणम् । यथा,—
"तालेन राजते गीतं तालो वादित्रसम्भवः ।
गरीयस्तेन वादित्रं तच्चतुर्व्विधमुच्यते ॥
ततं शुषिरमानद्धं घनमित्थं चतुर्व्विधम् ।
ततं तन्त्रीगतं वाद्यं वंशाद्यं शुषिरं तथा ।
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम् ॥"
शुषिरं यथा,—
"वंशोऽथ पारीमधुरीतित्तिरीशङ्खकाहलाः ।
तोड़हीमुरलीबुक्काशृङ्गिकास्वरनाभयः ॥
शृङ्गं कापालिकं वंशश्चर्म्म वंशस्तथा परः ।
एते शुषिरभेदास्तु कथिताः पूर्ब्बसूरिभिः ॥
वर्त्तुलः सरलश्चैव पर्व्वदोषविवर्ज्जितः ।
वैणवः खादिरो वापि रक्तचन्दनजोऽथवा ॥
श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा ।
राजतस्ताम्रजो वापि लौहजः स्फाटिकोऽथवा ॥
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः ।
शिल्पविद्याप्रवीणेन वंशः कार्य्यो मनोहरः ॥
वंशेनैव मतोऽपीति मतङ्गमुनिनोदितम् ।
ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्त्तिताः ॥
तत्र त्यक्त्वा शिरोदेशादधो द्विमितमङ्गुलम् ।
फुत्काररन्ध्रं कुर्व्वीत मितमङ्गुलिपर्व्वणा ॥
पञ्चाङ्गुलानि संत्यज्य ताररन्ध्राणि कारयेत् ।
कुर्य्यात्तथान्यरन्ध्राणि सप्तसंख्यानि कौशलात् ॥
बदरीबीजतुल्यानि संत्यज्यार्द्धार्द्धमङ्गुलम् ।
प्रान्तयोर्म्मन्थनं कार्य्यं स्वराद्यैर्नादहेतवे ॥
सिक्थकेन कला देया तेन सुस्वरता भवेत् ।
पञ्चाङ्गुलोऽयं वंशः स्यादेकैकाङ्गुलिवृद्धितः ॥
षड़ङ्गुलानि नाम्ना स्यात् यावदष्टादशाङ्गुलम् ।
फुत्कारताररन्ध्रस्य यावदङ्गुलिमन्तरम् ।
तदेव नाम वंशस्य वांशिकैः परिकीर्त्त्यते ॥

एकाङ्गुलो हाङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुल:।
अतितारतरत्वेन वांशिके: समुपेक्षित: ॥
त्रयोदशाङ्गुलो वंशोऽपर: पञ्चदशाङ्गुल:।
निन्दितो वंशतत्त्वज्ञैस्तथासप्तदशाङ्गुल: ॥
महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा।
चत्वार उत्तमा वंशा मतङ्गमुनिसम्मता: ॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुल:।
द्वादशाङ्गुलमानस्तु विजय: परिकीर्त्तित: ॥
चतुर्द्दशाङ्गुलमितो जय इत्यभिधीयते।
ब्रह्मा रुद्रो रविर्विष्णु: क्रमादत्र व्यवस्थिता: ॥
नैविड्यं प्रौढ़ता चापि सुस्वरत्वञ्च शीघ्रता।
माधुर्य्यमिति पञ्चामी फुत्कृतेषु गुणा: स्मृता: ॥
शीत्कारबहुल: स्तब्धो विस्वर: स्फुटितो लघु:।
अमधुरश्च विज्ञेया: षड्दोषा: फुत्कृते क्रमात् ॥
वृथाप्रयोगबाहुल्यमल्पता गीतवादने।
एभिर्दोषैर्युतोऽतीव निन्दितो वांशिको मत: ॥
स्थानकादिनयाभिज्ञो गमकाढ्य: स्फुटाक्षर:।
शीघ्रहस्त: कलाभिज्ञो वांशिको रक्त उच्यते ॥
प्रयुक्तिर्म्मिश्रमुक्तिश्च युक्तिश्चाङ्गुलिर्गुणा: ॥
सुस्थानत्वं सुस्वरत्वं अङ्गुलीसारणक्रिया।
समस्तगमकज्ञानं रागरागाङ्गवेदिता ॥
क्रियाभाषाविभाषासु दक्षता गीतवादने।
स्वस्थाने चापि दु:स्थाने नादनिर्म्माणकौशलम् ॥
गातॄणां स्थानदातृत्वं तद्दोषाच्छादनं तथा।
वांशिकस्य गुणा एते मया संक्षिप्य दर्शिता: ॥"

इति संगीतदामोदर: ॥

वंश्य:, त्रि, (वंशे भव:। वंश+"दिगादिभ्यो यत्।" ४।३।५४। इति यत्।) सदंशजात:। तत्पर्य्याय:। कुल्य: २ बीज्य: ३। इति त्रिकाण्डशेष: ॥ (यथा, मनु:। १।६१।
"स्वायम्भुवस्यास्य मनो: षड्वंश्या मनवोऽपरे ॥"
वंशोत्पन्नमात्रे च। यथा, रघु:। १८। ४६।
"वंश्या गुणा: खल्वपि लोककान्ता:
प्रारम्भसूक्ष्मा: प्रथिमानमापु: ॥"
पृष्ठोर्द्धकाष्ठविशेष:। पृष्ठावयवविशेषश्च। इति वंशशब्ददर्शनात्। यथा, भागवते ।११।८।३३।
"यदस्थिभिर्निर्म्मितवंशवंश्य-
स्थूणं त्वचा रोमनखै: पिनद्धम् ॥")

वक्क, ऌ ङ कौटिल्ये। गतौ। इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट्।) कौटिल्यमिह कुटिलीभाव: कुटिलीकरणञ्च। ऌ, वङ्क्यते। ङ, वङ्कते काष्ठं कुटिलं स्यादित्यर्थ:। वङ्कते काष्ठं कुटिलं करोतीत्यर्थ:। इति दुर्गादास: ॥

वक, ङ गतौ। इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, वकते। इति दुर्गादास: ॥

वक्तव्य:, त्रि, (ब्रू वच् वा+तव्य:।) कुत्सित:। हीन:। (यथा, मनु:। ८। ६६।
"नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्म्मकृत् ॥")
वचनार्ह:। इति मेदिनी। ये, १०३ ॥ (यथा, महाभारते। १४। ७६। २३।
"वक्तव्याश्चापि राजान: सर्व्वे सह सुहृज्जनै:।
युधिष्ठिरस्याश्वमेधो भवद्भिरनुभूयताम् ॥"
वच्+भावे तव्य।) वचने, क्ली ॥

वक्ता, [ऋ] त्रि, (वच्+तृच्।) यो वक्तुं जानाति स:। इति भरत: ॥ कौचित्यात् बहु विशिष्टं वदति। इति मुकुट: ॥ (यथा, हितोपदेशे।
"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥")
तत्पर्य्याय:। वद: २ वदावद: ३। इत्यमर:। ३।१।३५॥ वदान्य: ४ वग्मा ५। इति जटाधर: ॥ सुष्ठुवक्ता। इति भरत: ॥ बहुभाषी। इत्येके। तत्पर्य्याय:। वाचोयुक्तिपटु: २ वाग्मी ३ वावदूक: ४। इत्यमर: ॥ यचक: ५ सुवचा: ६ प्रवाक् ७। इति जटाधर: ॥ पण्डित:। इति मेदिनी। ते, ५३ ॥

वक्त्रं, क्ली, (वक्ति अनेनेति। वच्+"गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्र:।" उणा० ४। १६६। इति त्र:।) मुखम्। इत्यमर:। २। ६। ८९ ॥ (यथा, मनौ। ८। २७२।
"धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वत:।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिव: ॥")
तगरमूलम्। इति शब्दमाला। वस्त्रभेद:। इति मेदिनी। रे, ८४ ॥ छन्दोविशेष:। इति हेमचन्द्र: ॥ तस्य लक्षणादि यथा,—
"भवत्यष्टसमं वक्त्रं विषमञ्च कदाचन।
तयोर्द्वयोरुपान्तेऽत्र च्छन्दस्तद्धुनोच्यते ॥
वक्त्रं युग्भ्यां मगौ स्यातामब्धेर्योऽनुष्टुभि:
ख्यातम् ॥"
अत्र द्विरावर्त्त्य श्लोक: पूरयितव्य:।
"वक्त्राम्भोजं सदा स्मेरं चक्षुर्नीलोत्पलं फुल्लम्।
पश्चवीनां सुरारातेर्वृतो भृङ्गं जहारोच्चै: ॥"

इति छन्दोमञ्जरी ॥

वक्त्रखुर:, पुं, (वक्त्रस्य खुर इव पृषोदरादित्वात् ख:।) दन्त:। इति त्रिकाण्डशेष: ॥

वक्त्रज:, पुं, (ब्रह्मणो वक्त्राद् जायते इति। ब्राह्मणोऽस्य मुखमासीत् इति श्रुते:। जन्+ड:।) ब्राह्मण:। इति त्रिकाण्डशेष: ॥ मुखजाते, त्रि ॥

वक्त्रतालं, क्ली, (वक्त्रस्य तालम्।) मुखवाद्यम्। इति केचित्। त्रिकाण्डशेषे मुखवाद्यं वक्त्रनालमिति लिखितम् ॥

वक्त्रपट्ट:, पुं, (वक्त्रस्य पट्ट इव।) अश्वाद्यभोजनपात्रम्। तोवड़ा इति भाषा। तत्पर्य्याय:। तलिका २ तलसारकम् ३। इति हेमचन्द्र:। ४। ३१७ ॥

वक्त्रभेदी, [न्] पुं, (वक्त्रं भिनत्तीति। भिद्+णिनि:।) तिक्तरस:। इति हेमचन्द्र:। ६। २५ ॥ मुखभेदके, त्रि ॥

वक्त्रवास:, पुं, (वक्त्रं वासयति सुरभीकरोतीति। वासि+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) नारङ्ग:। इति राजनिर्घण्ट: ॥ (विवरणमस्य नारङ्गशब्दे ज्ञातव्यम् ॥ वक्त्रस्य वास:।) मुखगन्धश्च ॥

वक्त्रशोधनं, क्ली, (वक्त्रस्य शोधनमिव।) भव्यम्। इति राजनिर्घण्ट: ॥ (वक्त्रस्य शोधनम्।) मुखशुद्धिकरणञ्च ॥

वक्त्रशोधी, [न्] पुं, (वक्त्रं शोधयतीति। शुध्+णिच्+णिनि:।) जम्बीर:। इति जटाधर: ॥ मुखशोधके, त्रि ॥

वक्त्रासव:, पुं, (वक्त्रस्य आसव:।) अधरमधु। इति त्रिकाण्डशेष: ॥

वक्रं, क्ली, (वङ्कते इति। वकि कौटिल्ये+रन्। पृषोदरादित्वात् न लोप:। यद्वा, वञ्चतीति। वञ्चु गतौ+"स्फायितञ्चिवञ्चीति।" उणा० २। १३। इति रक्। न्यङ्क्वादित्वात् कुत्वम्।) नदीवक्र:। तत्पर्य्याय:। पुटभेद: २। इत्यमर: ॥ वङ्क: ३। इति भरत: ॥ (तगरपादिकम्। तत्पर्य्यायो यथा,—
"कालानुसार्य्यवक्रं वक्रं तगरं कुटिलं शठम्।
महोरगं नतं जिह्मं दीनं तगरपादिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥
तथास्य विषय:।
"शताह्वे रक्तमूल्योषा बक्रव्याघ्रीफलै: सृतम्।
तैलं नस्य मरुच्छ्लेष्मतिमिरोर्द्ध्वगदापहम् ॥"
इति शताह्वाद्यं तैलम्।
इति चक्रपाणिसंग्रहे शिरोरोगाधिकारे ॥)

वक्र:, पुं, (वञ्चतीति। वञ्चु गतौ+"स्फायितञ्चिवञ्चीति।" उणा० २। १३। इति रक्। न्यङ्क्वादित्वात् कुत्वम्।) शनैश्चर:। इति मेदिनी। रे, ६५ ॥ मङ्गलग्रह:। इति हेमचन्द्र:। २। ३० ॥ रुद्र:। त्रिपुरासुर:। इति धरणि: ॥ पर्पट:। इति राजनिर्घण्ट: ॥ वक्रगतिविशिष्टग्रह:। स तु यस्य ग्रहस्याश्रितात् रव्यधिष्ठितराशीयचिंशांशाभ्यन्तर्गतादंशात् पञ्चमषष्ठांशे रविस्तिष्ठति। यथा,—
"वक्रा: स्यु: पञ्चषष्ठेऽर्के स्वतिवक्रा नगाष्टगे।
नवमे दशमे भानौ जायते सहजा गति: ॥
द्वादशैकादशे सूर्य्ये लभन्ते शीघ्रतां पुन:।
रविस्थितांशकाच्चिंशावधि: संख्याच कल्प्यते ॥
न तु राशन्तरस्पर्शात् द्वितीयादिनिरूपणम्।
राहुकेतू सदा वक्रौ शीघ्रगौ चन्द्रभास्करौ ॥"
इति ज्योतिस्तत्त्वम् ॥
(कल्पदेशीयनृपतिभेद:। यथा, महाभारते। २। १४। ११।
"तमेव च महाराज! शिष्यवत् समुपस्थित:।
वक्र: करूषाधिपतिर्म्मायायोधी महाबल: ॥")

वक्र:, त्रि, (वङ्कते इति। वकि कौटिल्ये+रन्। पृषोदरादित्वात् न लोप:। यद्वा, वञ्चि+रक्।) अनृजु:। बाँका इति भाषा। तत्पर्य्याय:। अरालम् २ वृजिनम् ३ जिह्मम् ४ ऊर्म्मिमत् ५ कुञ्चितम् ६ नतम् ७ आविद्धम् ८ कुटिलम् ९ भुग्नम् १० वेल्लितम् ११। इत्यमर:। ३।१।७१॥ वङ्कुरम् १२ वेङ्कु १३ विनतम् १४ उन्दुरम् १५। इति शब्दरत्नावली ॥ अवनत: १६ आनत: १७ भङ्गुर: १८। इति जटाधर: ॥*॥

(यथा, महाभारते । ३ । १३२ । १२ ।
"स वै तथा वक्र एवाभ्यजाय-
दष्टावक्रः प्रथितो वै महर्षिः ॥")
वक्राणि यथा । अलकः १ भालः २ भ्रूः ३ नखचिह्नम् ४ अङ्कुशः ५ कुञ्चिका ६ भयकङ्कणम् ७ बालेन्दुः ८ दात्रम् ९ कुद्दालः १० चन्द्रकः ११ शुकास्यम् १२ एलाग्रपुष्पम् १३ विद्युत् १४ कटाक्षः १५ शक्रधनुः १६ फणा १७ प्रबोधः १८ करः १९ हस्तिदन्तः २० शूकरदन्तः २१ सिंहनखादिः २२ । इति कविकल्पलता । क्रूरः । इति मेदिनी । रे, ६५ ॥

वक्रकण्टः, पुं, (वक्राः कण्ठाः कण्टका यस्य ।) बदरवृक्षः । इति राजनिर्घण्टः ॥ (वक्रः कण्टः ।) कुटिलकण्टकश्च ॥

वक्रकण्टकः, पुं, (वक्राः कण्टका अस्य ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥ (विवृतोऽस्य खदिरशब्दे विशेषः ॥)

वक्रखड्गः, पुं, (वक्रः खड्गः ।) करवालः । इति राजनिर्घण्टः ॥

वक्रग्रीवः, पुं, (वक्रा ग्रीवास्य ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥

वक्रचञ्चुः, पुं, (वक्रा चञ्चुर्यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥

वक्रतालं, क्ली, (वक्रं तालं यत्र ।) वाद्यविशेषः । तत्पर्य्यायः । सुखवाद्यम् २ । वक्रनालमिति वा पाठः । इति त्रिकाण्डशेषः ॥

वक्रताली, स्त्री, (वक्रताल + गौरादित्वात् ङीष् ।) सुखवाद्यम् । इति शब्दरत्नावली ॥

वक्रतुण्डः, पुं, (वक्रतुण्डं यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥ (वक्रौष्ठे, त्रि । यथा, भागवते । ६ । १ । २८ ।
"स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषानतिदारुणान् ।
वक्रतुण्डानूर्द्ध्वरोम्ण आत्मानं नेतुमागतान् ॥")

वक्रदंष्ट्रः, पुं, (वक्रा दंष्ट्रा यस्य ।) शूकरः । इति केचित् ॥

वक्रनक्रः, पुं, (वक्रः कुटिलः नक्र इव हिंस्रश्च ।) पिशुनः । शुकपक्षी । इति मेदिनी । रे, २८५ ॥

वक्रनालं, क्ली, सुखवाद्यम् । इति मुद्राङ्कितत्रिकाण्डशेषः ॥

वक्रनासिकः, पुं, (वक्रा नासिका यस्य ।) पेचकः । इति त्रिकाण्डशेषः ॥ कुटिलनासायुक्ते, त्रि ॥

वक्रपुच्छः, पुं, स्त्री, (वक्रं पुच्छं यस्य ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥ सलोमकुटिललाङ्गूलश्च ॥

वक्रपुष्पः, पुं, (वक्राणि पुष्पाण्यस्य ।) वकवृक्षः । इति शब्दरत्नावली ॥ पलाशवृक्षः । इति राजनिर्घण्टः ॥

वक्रवालधिः, पुं, (वक्रो वालधिः केशयुक्तलाङ्गूलं यस्य ।) कुक्कुरः । इति हेमचन्द्रः । ४ । ३४४ ॥ कुटिलपुच्छश्च ॥

वक्रभणितं, क्ली, (वक्रं कुटिलं भणितम् ।) कुटिलवाक्यम् । तत्पर्य्यायः । छेकोक्तिः २ । इति त्रिकाण्डशेषः ॥

वक्रमः, पुं, (अवक्रमणमिति । अव+क्रम+भावे घञ् । अल्लोपः ।) पलायनम् । इति शब्दरत्नावली ॥

वक्रलाङ्गूलः, पुं, (वक्रं लाङ्गूलं यस्य ।) कुक्कुरः । इति राजनिर्घण्टः ॥ कुटिलपुच्छे, क्ली ॥

वक्रवक्त्रः, पुं, (वक्रं वक्त्रं मुखमस्य ।) शूकरः । इति शब्दरत्नावली ॥ कुटिलमुखविशिष्टे, त्रि ॥

वक्रशल्या, स्त्री, (वक्रं शल्यमिव पत्रादिकं यस्याः ।) कुटुम्बिनीक्षुपः । इति राजनिर्घण्टः ॥

वक्राग्रं, क्ली, (वक्रमग्रं यस्य ।) कवाटवक्रदारु । इति रत्नमाला ॥ कुटिलाग्रभागश्च ॥

वक्राङ्गः, पुं, (वक्रमङ्गं यस्य ।) हंसः । इति हेमचन्द्रः ॥ कुटिलावयवे, क्ली ॥ (कुटिलावयवविशिष्टे, त्रि । यथा, हरिवंशे । १०२ । ३८ ।
"तरङ्गविषमापीडा चक्रवाकोन्मुखस्तनी ।
वेगगम्भीरवक्राङ्गी चलमीनविभूषणा ॥")

वक्रिः, त्रि, मिथ्यावादी । वकधातोः क्रिन्प्रत्ययेन निष्पन्नः ॥

वक्री, [न्] पुं, (वक्रो वक्रतास्यास्तीति । इनिः । वैदिकधर्म्मविरुद्धवादित्वादस्य तथात्वम् ।) बुद्धः । इति शब्दरत्नावली । वक्रताविशिष्टे, त्रि । यथा,
"लग्नेशो यदि वक्री स्यात् पुंसः कार्य्येषु
वक्रता ।
लग्नेशेऽस्तं गते मर्त्यो दुःखादिव्याधिसंयुतः ॥"
इति ज्योतिस्तत्त्वम् ॥

वक्रोक्तिः, स्त्री, (वक्रा कुटिला उक्तिः ।) काकूक्तिः । यथा, कामधेनुकल्पतरुधृतब्रह्मपुराणम् ।
"अथ हर्त्ता हयोत्सर्गे दाता वक्रोक्तिभिः पदैः ।
ब्राह्मणानाह यत् किञ्चित् मयोत्सृष्टन्तु
निर्ज्जने ॥
तत् कश्चिदन्यो न नयेत विभाव्यं यथाक्रमम् ।
न वाह्यं न च तत् चौरं पातव्यं केनचित्
क्वचित् ॥"
श्राद्धप्रदीपेऽप्येवम् । वक्रोक्तिभिः काकूक्तिभिः । इति शुद्धितत्त्वम् ॥ * ॥ कुटिलोक्तिः । यथा,
"वादी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः
सभां
जल्पन्नल्पमतिः स्मयात् पटुवटुभ्रूभङ्गवक्रो-
क्तिभिः ।
ह्रीतः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा
ज्योतिर्व्विस्तदपि प्रगल्भगणकः प्रश्नप्रपञ्चो-
क्तिभिः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥
(वक्रा अर्थान्तरग्रहणेन कुटिला उक्तिः । शब्दालङ्कारप्रभेदः । तल्लक्षणादिकं यथा, साहित्यदर्पणे दशमपरिच्छेदे ।
"अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद् यदि ।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा ॥
द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । क्रमेणोदाहरणं यथा,—
"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रयः
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो
हरिः ।
वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो
वर्त्तते
येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्
भ्रमः ॥"
अत्र विशेषपदस्य विः पक्षी शेषो नाग इति अर्थद्वययोगात् सभङ्गः श्लेषः । अन्यत्र तु अभङ्गः ।
"काले कोकिलवाचाले सहकारमनोहरे ।
कृतागसः परित्यागात् तस्याश्चेतो न दूयते ॥"
अत्र कयाचित् सख्या निषेधार्थे नियुक्तो नञ् अन्यया काक्वा दूयत एवेति विध्यर्थे घटितः ॥")

वक्रोष्ठिका, स्त्री, (वक्रोष्ठोऽस्त्यस्या इति । ठन् । ईषद्धसनेन हि ओष्ठस्य वक्रता जायते अतोऽस्यास्तथात्वम् । यद्वा, वक्र ओष्ठो यस्याः । ततः स्वार्थे कन् । टापि अत इत्वम् ।) अदृष्टरदहास्यम् । ईषद्धास्यम् । तत्पर्य्यायः । स्मितम् २ । इति हेमचन्द्रः ॥

वक्ष, रोषसंहत्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-रोषे अक०-संहतौ सक०-सेट् ।) वक्षति । इति दुर्गादासः ॥

वक्षः, [स्] क्ली, (उच्यतेऽनेनेति । वच+"पचिवचिभ्यां सुट् च ।" उणा० ४ । २१९ । इति असुन् सुट् । वक्षतेरसुन् इति रमानाथः । धातुप्रदीपस्य ।) अङ्गविशेषः । स तु हृदयोपरिकण्ठादधोभागः । बुक् इति भाषा । तत्पर्य्यायः । क्रोडम् २ भुजान्तरम् ३ उरः ४ वत्सम् ५ । इत्यमरः ॥ अङ्कः ६ उत्सङ्गः ७ । इति जटाधरः ॥ वक्षणम् ८ गात्रपीठकम् ९ । इति शब्दचन्द्रिका ॥ अपि च ।
"अथ वक्षश्च वत्सं स्यादुरो वक्षस्थले वयम् ।"
इति शब्दरत्नावली ॥
तस्य शुभाशुभलक्षणं यथा,—
"अकम्पवान् समवक्षाः स्यात् पीनैर्व्वक्षोभि-
रूर्ज्जितः ।
वक्षोभिर्व्विषमैर्निःस्वः शस्त्रेण निधनस्तथा ॥"
इति गारुडे ६६ अध्यायः ॥
(पुं, वहतीति । वह+"वहिहाधाञ्भ्यश्छन्दसि ।" उणा० ४ । २२० । इति असुन् । सुट् च । अनड्वान् । इत्युज्ज्वलदत्तः ॥")

वक्षणं, क्ली, (वक्षत्यनेनेति । वक्षरोषसंहत्योः + ल्युट् ।) वक्षः । इति शब्दचन्द्रिका ॥ (वाहके, त्रि । यथा, ऋग्वेदे । ६ । २३ । ६ ।
"क्रियाम वक्षणानि यज्ञैः ।"
"वक्षणानि वाहकानि स्तोत्राणि क्रियाम करवाम ।" इति तद्भाष्ये सायणः ॥)

वक्षोजं, क्ली, (वक्षसि जायते इति । जन्+डः ।) स्तनः । इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दतां
दूरं यात्युदरञ्च लोमलतिका नेत्रार्ज्जवं धावति ।

कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तं क्षणात्
अङ्गानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुव: ॥”)

वक्षोरुह: पुं, (वक्षसि रोहतीति । रुह + क: ।) स्तन: । इति त्रिकाण्डशेष: ॥ (यथा, आर्य्यासप्तशत्याम् । ४४६ ।
“मा शबरतरुणि पीवरवक्षोरुहयोर्भरेण भज गर्व्वम् ।
निर्म्मोकैरपि शोभा ययोर्भुजङ्गीभिरुन्मुक्तै: ॥”)

वक्ष्यमाण:, त्रि, भविष्यत्कथनीयविषय: । वच-धातो: स्यमानप्रत्ययेन निष्पन्न: । यथा । अत्र वक्ष्यमाणवचनात् मध्यरात्रप्राप्तावेव जयन्तीत्वम् । इति तिथ्यादितत्त्वम् ॥ अपि च ।
“तत्रैव द्वादशीमध्ये पारणं श्रवणेऽधिके ।
वक्ष्यमाणञ्च घटतेऽन्यथा प्राग्वद्विधा व्रतम् ॥”
इति श्रीहरिभक्तिविलासे १५ विलास: ॥

वख, सृपि । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् ।) वखति । सृपि गतौ । इति दुर्गादास: ॥

वख, इ सृपि । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् । इदित् ।) इ, वङ्खति । सृपि गतौ । इति दुर्गादास: ॥

वग, इ खञ्जे । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-अक०-सेट् ।) इ, वङ्गति । इति दुर्गादास: ॥

वगला, वगलामुखी, स्त्री, दशमहाविद्यान्तर्गतदेवीविशेष: । तदुक्तं तन्त्रान्तरे ।
“ब्रह्मास्त्रं संप्रवक्ष्यामि सद्य:प्रत्ययकारकम् ।
साधकानां हितार्थाय स्तम्भनाय च वैरिणाम् ॥
यस्या: स्मरणमात्रेण पवनोऽपि स्थिरायते ।
प्रणवं स्थिरमायाञ्च ततश्च वगलामुखि ॥
तदन्ते सर्व्वदुष्टानां ततो वाचं मुखं पदम् ॥
स्तम्भयेति ततो जिह्वां कीलयेति पदद्वयम् ॥
बुद्धिं नाशय पश्चात्तु स्थिरमायां समालिखेत् ।
लिखेच्च पुनरोङ्कारं स्वाहेति पदमन्तत: ॥
षट्त्रिंशदक्षरी विद्या सर्व्वसम्पत्करी मता ॥”
स्थिरमाया ह्लीँ । तथा च ।
“वह्निहीनेन्द्रमायायुक् स्थिरमाया प्रकीर्त्तिता ॥
ॐ ह्लीँ वगलामुखी सर्व्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय कीलय बुद्धिं नाशय ह्लीँ ॐ स्वाहा ॥ * ॥ तन्त्रान्तरे ।
“वह्निहीनेन्द्रमायायुक् वगलामुखि सर्व्वयुक् ।
दुष्टानां वाचमित्युक्त्वा मुखं स्तम्भय कीर्त्तयेत् ॥
जिह्वां कीलय बुद्धिं तत् विनाशय परं वदेत् ।
पुनर्व्वीजं ततस्तारं वह्निजायावधिर्भवेत् ।
ताराद्विका चतुस्त्रिंशदक्षरा वगलामुखी ॥”
ॐ ह्लीँ वगलामुखि सर्व्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीँ ॐ स्वाहा । इत्यपि मन्त्रान्तरम् ॥ * ॥ अनयो: पूजा । प्रात:कृत्यादिप्राणायामान्तं विधाय ऋष्यादिन्यासं कुर्य्यात् । यथा, शिरसि नारदऋषये नम: । मुखे त्रिष्टुप्छन्दसे नम: । हृदि वगलामुख्यै देवतायै नम: । गुह्ये ह्लीँ वीजाय नम: । पादयो: स्वाहाशक्तये नम: ।
“नारदोऽस्य ऋषिं मूर्द्ध्नि त्रिष्टुप् छन्दश्च तन्मुखे ।
श्रीवगलामुखीं देवीं हृदये विन्यसेत्तत: ।
ह्लीँ वीजं गुह्यदेशे तु स्वाहाशक्तिस्तु पादयो: ॥”
तत: कराङ्गन्यासौ । ॐ ह्लीँ अङ्गुष्ठाभ्यां नम: । वगलामुखि तर्ज्जनीभ्यां स्वाहा । सर्व्वदुष्टानां मध्यमाभ्यां वषट् । वाचं मुखं स्तम्भय अनामिकाभ्यां हूँ । जिह्वां कीलय कीलय कनिष्ठाभ्यां वौषट् । बुद्धिं नाशय ह्लीँ ॐ स्वाहा करतलपृष्ठाभ्यां फट् । एवं हृदयादिषु । तथा च दिव्यतन्त्रे ।
“युग्मवाणेषुषष्ठाद्विशेषार्णैश्च मनूद्भवै: ।
करशाखासु तलयो: कराङ्गन्यासमाचरेत् ॥”
ततो मूलान्ते आत्मतत्त्वव्यापिनीवगलामुखीश्रीपादुकां पूजयामि इति मूलाधारे । मूलान्ते विद्यातत्त्वव्यापिनीवगलामुखीश्रीपादुकां पूजयामि शिरसि । मूलान्ते शिवतत्त्वव्यापिनीवगलामुखीश्रीपादुकां पूजयामि सर्व्वाङ्गे । ततश्च ।
“मूर्द्ध्नि भाले दृशो: श्रोत्रे गण्डयोर्नासयो: पुन: ।
ओष्ठयोर्म्मुखवृत्ते च दक्षिणांशे च कूर्परे ॥
मणिबन्धेऽङ्गुलेर्मूले गले च कुचयोर्हृदि ।
नाभौ कट्यां गुह्यदेशे वामांशे कूर्परे तथा ॥
मणिबन्धेऽङ्गुलेर्मूले ततश्च विन्यसेत् पुन: ।
दक्षवामे चोरुजान्वोर्गुल्फयोरङ्गुलिस्थलयो: ।
क्रमेण मन्त्रवर्णांस्तु न्यस्य ध्यायेत् यथाविधि ॥” * ॥
ततो ध्यानम् ।
“मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं स्मरामि धृतमुद्गरवैरिजिह्वाम् ॥
जिह्वाग्रमादाय करेण देवीं
वामेन शत्रुं परिपीडयन्तीम् ।
गदाभिघातेन च दक्षिणेन
पीताम्बराढ्यां द्विभुजां नमामि ॥”
एवं ध्यात्वा मानसै: सम्पूज्य बहि:पूजामारभेत् ॥ * ॥ तत्र प्रथमतोऽर्घ्यस्थापनम् । यथा । अष्टाङ्गुलं चतुरस्रं विधाय ईशानादिकोणेषु पूर्व्वादिदिक्षु च कुङ्कुमागुरुरक्तचन्दनैर्ग्लौँ गणपतये नम: इत्यनेन गणदानेन संपूज्य तेन मधुना वा अर्घ्यपात्रमापूरयेत् । ततो वारत्रयं विद्यया संपूज्य अङ्गानि विन्यसेत् । ततो धेनुयोनिमुद्रे प्रदर्श्य तेनोदकेन आत्मानं पूजोपकरणञ्चाभ्युक्षयेत् ॥ * ॥ अस्या यन्त्रम् । त्र्यस्रं षट्कं दलमष्टदलं भूपुरान्वितम् । ततो मूलमुच्चार्य्य ॐ आधारशक्तिकमलासनाय नम: । एवं शक्तिपद्मासनाय नम: । पूर्व्ववत् ध्यात्वा पीठे आवाह्य षडङ्गानि न्यसेत् । ततो मुद्रां प्रदर्श्य पुरत: षडङ्गेन सकलं यजेत् । ततो मूलेन मन्त्रयित्वा धेनुयोनिमुद्रे प्रदर्श्य आत्मविद्याशिवैस्तत्त्वैर्विन्दुत्रयं मुखे क्षिप्त्वा तर्ज्जन्यङ्गुष्ठयोगेन साङ्गावरणां वगलामुखीं तर्पयेत् । ततो यथासम्भवमुपचारै: संपूज्य आवरणपूजामारभेत् । षट्कोणेषु पूर्व्वे ॐ सुभगायै नम: । एवमग्निकोणे भगसर्पिण्यै । ईशाने भगावहायै । पश्चिमे भगसिद्धायै । नैरृते भगपातिन्यै । वायौ भगमालिन्यै । ततोऽष्टदलपत्रेषु ब्राह्म्याद्या: पूज्या: । पत्राग्रेषु ॐ जयायै नम: । एवं विजयायै । अजितायै । अपराजितायै । स्तम्भिन्यै । जृम्भिन्यै । मोहिन्यै । आकर्षिण्यै । ततो द्वारेषु ॐ भैरवाय नम: । तद्बाह्ये इन्द्रादीन् वज्रादीन् पूजयेत् । ततो मूलेन धूपादिकं दत्त्वा यथाशक्ति जपं विधाय त्रिशूलमुद्रां प्रदर्श्य पुष्पाञ्जलित्रयं दत्त्वा देव्यै योनिमुद्रां प्रदर्शयेत् । ततो भैरवाय वलिं दद्यात् । ततो विसर्ज्जनान्तं कर्म्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजप: । तथा च ।
“पीताम्बरधरो भूत्वा पूर्व्वाशाभिमुखस्थित: ।
लक्षमेकं जपेन्मन्त्रं हरिद्राग्रन्थिमालया ॥
ब्रह्मचर्य्यरतो नित्यं प्रयतो ध्यानतत्पर: ।
प्रियङ्गुकुसुमेनापि पीतपुष्पेण होमयेत् ॥” * ॥
द्वितीयमन्त्रस्य तु न्यासादिकं सर्व्वं पूर्व्ववत् । ध्यानन्तु ।
“गम्भीराञ्च मदोन्मत्तां स्वर्णकान्तिसमप्रभाम् ।
चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम् ॥
मुद्गरं दक्षिणे पाशं वामे जिह्वाञ्च वज्रकम् ।
पीताम्बरधरां देवीं दृढपीनपयोधराम् ।
हेमकुण्डलभूषाञ्च स्वर्णसिंहासनस्थिताम् ॥” * ॥
अथ प्रयोग: ।
“कुरुते वाग्गतिस्तम्भं दुष्टानां बुद्धिनाशनम् ।
जपहोमप्रयोगे च मन्त्रं चाप्ययुतं जपेत् ॥
हरिद्राहरितालाभ्यां लवणं जुहुयान्निशि ।
स्तम्भयेत् परसैन्यानि नात्र कार्य्या विचारणा ॥
अथवा पीतपुष्पेण त्रिमध्वक्तेन होमयेत् ।
स्तम्भनेषु च सर्व्वेषु प्रयोग: प्रत्ययावह: ॥” * ॥
यन्त्रन्तु ।
“ॐकारयो: संमुखयोरूर्द्ध्वाध:शिरसोर्लिखेत् ।
मध्यगं नाम साध्यस्य तद्बाह्ये चाक्षरद्वयम् ॥
वीजं द्वितीयवर्गस्य तृतीयं विन्दुभूषितम् ।
चतुर्द्दशस्वरोपेतं संलिखेत् पृथिवीगतम् ॥
ठकारेण समावेष्ट्य चतुष्कोणपुटं बहि: ।
तत्कोणरेखासंसक्तै: शूलैर्व्वाष्टकं लिखेत् ॥
त्रिशूलमध्यरेखाया: पृष्ठौ वीजानि पार्श्वयो: ।
अष्टस्वपि च कोणेषु तद्बहिर्व्वगलां लिखेत् ॥
पृथिव्यन्तरितं वाह्ये मातृकापरिमण्डलम् ।
आवेष्ट्य चाष्टधा पश्चात्तद्बाह्ये स्थिरमायया ॥
निबध्याङ्कुशवीजेन नादसंमिलिताङ्ग्रिणा ।
लिखेत् पूर्व्ववदावेष्ट्य पश्चाच्च वगलामुखीम् ॥
पट्टे पाषाणपट्टे वा हरिद्रोन्मत्ततालकै: ।
दिवस्तम्भे मुखस्तम्भे लिखित्वा गाढ़माक्रमेत् ॥
विवादे यन्त्रमालिख्य भूर्ज्जे तैरेव वस्तुभि: ।
कुम्भकारस्य चक्रस्य भ्रमतो विपरीतत: ॥

मृत्तिकां समुपादाय वृषभं कारयेत्ततः ।
यन्त्रं तस्योपरि न्यस्य तालकेन विलिप्य च ॥
तन्नासायां विनिःक्षिप्य पीतरज्जुं निजे गृहे ।
अर्च्चयेत्तं चतुष्कालं नित्यं पीतोपचारवः ।
दुष्टस्य स्तम्भयत्येव मुखं वाचस्पतेरपि ॥"
इति वगलापरिच्छेदः ॥ * ॥

विश्वसारे ।
"काली तारा महाविद्या षोड़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥"

अथ वगलामुखीस्तोत्रम् ।
"मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं भजामि धृतमुद्गरवैरिजिह्वाम् ॥
जिह्वाग्रमादाय करेण देवीं
वामेन शत्रुं परिपीड़यन्तीम् ।
गदाभिघातेन च दक्षिणेन
पीताम्बरां तां द्विभुजां भजामि ॥
चलत्कनककुण्डलोल्लसितचारुगण्डस्थलीं
लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम् ।
गदाहतविपक्षकां कलितलोलजिह्वाञ्चलां
स्मरामि वगलामुखीं विमुखवाङ्मनःस्तम्भिनीम् ॥
पीयूषोदधिमध्यचारुविलसद्रक्तोत्पले मण्डपे
यत्सिंहासनमौलिपातितरिपुप्रेतासनाध्यासिनीम् ।
स्वर्णाभां करपीड़ितारिरसनां भ्राम्यद्गदाविभ्रमा-
मित्थं ध्यायति यान्ति तस्य विलयं सद्योऽथ सर्व्वापदः ॥
देवि त्वच्चरणाम्बुजार्च्चनकृते यः पीतपुष्पाञ्जलीन्
भक्त्या वामकरे निधाय च मनुं मन्त्री मनोज्ञाक्षरम् ।
पीठध्यानपरोऽथ कुम्भकवशात् वीजं स्मरेत् पार्थिवं
तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत् तत्क्षणात् ॥
वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति
क्रोधी शाम्यति दुर्ज्जनः सुजनति क्षिप्रानुगः खञ्जति ।
गर्व्वी खर्व्वति सर्व्वविच्च जड़ति त्वन्मन्त्रणायन्त्रितः
श्रीनित्ये वगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ॥
मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रञ्च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रञ्च चित्रं न ते ।
मातः श्रीवगलेति नाम ललितं यस्यास्ति जन्तोर्म्मुखे
त्वन्नामग्रहणेन संसदि मुखस्तम्भो भवेद्वादिनाम् ॥
दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं
भूभृद्भूशमनं चलन्मृगदृशां चेतःसमाकर्षणम् ।
सौभाग्यैकनिकेतनं मम दृशोः कारुण्यपूर्णामृतं
मृत्योर्म्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥
मातर्भञ्जय मे विपक्षवदनं जिह्वाञ्चलां कीलय
ब्राह्मीं मुद्रय नाशयाशु धिषणामुग्रां गतिं स्तम्भय ।
शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौराङ्गि पीताम्बरे
विघ्नौघं वगले हर प्रणमतां कारुण्यपूर्णेक्षणे ॥
मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये
श्रीविद्ये समये महेशि वगले कामेशि रामे रमे ।
मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे
दासोऽहं शरणागतः करुणया विश्वेश्वरि त्राहि माम् ॥
संरम्भे चौरसङ्घे प्रहरणसमये बन्धने व्याधिमध्ये
विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम् ।
वश्ये वा स्तम्भने वा रिपुवधसमये निर्ज्जने वा वने वा
गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः ॥
नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः पठत्यादरा-
द्धृत्वा यन्त्रमिदं तथैव समरे बाहौ करे वा गले ।
राजानो हरयो मदान्धकरिणः सर्पा मृगेन्द्रादिका-
स्ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिराः सिद्धयः ॥
त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछेदिनी
योषाकर्षणकारिणी जनमनःसम्मोहसन्दायिनी ।
स्तम्भोत्सारणकारिणी पशुमनःसम्मोहसंदायिनी
जिह्वाकीलनभैरवी विजयते ब्रह्मादिमन्त्रो यथा ॥
विद्या लक्ष्मीः सर्व्वसौभाग्यमायुः
पुत्त्रैः पौत्त्रैः सर्व्वसाम्राज्यसिद्धिः ।
मानं भोगो वश्यमारोग्यसौख्यं
प्राप्तं तत्तद्भूतलेऽस्मिन् नरेण ॥
यत् कृतं जपसन्नाहं गदितं परमेश्वरि ।
दुष्टानां निग्रहार्थाय तद्गृहाण नमोऽस्तु ते ॥
ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतम् ।
गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥
पीताम्बरां द्विभुजाञ्च त्रिनेत्रां गात्रकोज्ज्वलाम् ।
शिलामुद्गरहस्ताञ्च स्मरेत्तां वगलामुखीम् ॥
प्रातर्म्मध्याह्नकाले स्तवपठनमिदं कार्य्यसिद्धिप्रदं स्यात् ॥"
इति रुद्रयामले वगलामुखीस्तोत्रं समाप्तम् ।
इति कृष्णानन्दकृततन्त्रसारः ॥

वगाहः, पुं, (अव + गाह + भावे घञ् । अलोपः ।) अवगाहः । इति मुग्धबोधव्याकरणं भरतश्च ॥

वग्नुः, पुं, (वक्ति इति । वच् + "वचेर्गश्च ।" उणा० ३ । ३३ । इति नुः गश्चान्तादेशः ।) वक्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ वावदूकः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (शब्दः । यथा, ऋग्वेदे । ७ । १०३ । २ ।
"गवामाह न मायुर्वत्सिनीनां
मण्डूकानां वग्नुरत्रासमेति ॥"
"मण्डूकानां वग्नुः शब्दः समेति सङ्गच्छते ॥" इति तद्भाष्ये सायणः ॥)

वघ, इ ङ गतिनिन्दारम्भजवेषु । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-जवे अक० च-सेट् ।) इ, वंघ्यते । ङ, वंघते । जवे एव केचित् पठन्ति । इति दुर्गादासः ॥

वङ्कः, पुं, (वङ्कतीति । वङ्क + अच् ।) नदीवक्रम् । इत्यमरटीकायां भरतः ॥

वङ्का, स्त्री, (वङ्क + टाप् ।) वल्गाग्रभागः । तत्पर्य्यायः । पल्ययनम् २ । इति त्रिकाण्डशेषः ॥

वङ्किलः, पुं, (वङ्कति इति । वङ्क + इलच् ।) कण्टकः । इति त्रिकाण्डशेषः ॥

वङ्क्यः, त्रि, (वच् + ण्यत् । "वञ्चेर्गतौ ।" ७ । ३ । ६३ । इति अगत्यर्थे कुत्वञ्च ।) वक्रम् । यथा, वङ्क्यं काष्ठम् । इति मुग्धबोधव्याकरणम् ॥

वङ्क्रि, स्त्री, (वङ्कते इति । वकि कौटिल्ये + "वङ्क्र्यादयश्च ।" उणा० ४ । ६६ । इति क्रिन्-प्रत्ययेन निपातितम् ।) पार्श्वास्थि । तत्पर्य्यायः । पर्शुकम् २ । इति हेमचन्द्रः । ३ । २८९ ॥

वङ्क्रिः, पुं, स्त्री, (वङ्कते इति । वकि कौटिल्ये + "वङ्क्र्यादयश्च ।" उणा० ४ । ६६ । इति क्रिन्-प्रत्ययेन निपात्यते ।) वाद्यभेदः । इत्युणादिकोषः । गृहदारु । पार्श्वास्थि । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वङ्क्षणः, पुं, (वक्षति संहतो भवतीति । वक्ष + ल्युः । पृषोदरादित्वात् नुम् ।) ऊरुसन्धिः । इत्यमरः । २ । ६ । ७३ ॥ कुँचकी इति भाषा ॥ (यथा, सुश्रुते शारीरस्थाने ५ अध्याये ।
"चतुर्द्दशास्थ्नां संघाताः । तेषां त्रयो गुल्फजानुवङ्क्षणेषु ॥")

वङ्क्षुः, स्त्री, (वहतीति । वह + बाहुलकात् क्सुन् । नुम् च ।) गङ्गास्रोतोविशेषः । यथा,—
"तस्याः स्रोतसि सीता च वङ्क्षुर्भद्रा च कीर्त्तिता ॥"
सा च केतुमालवर्षस्था गङ्गा । यथा । एवं माल्यवच्छिखरान्निष्पतन्ती ततः उपरतवेगा केतुमालमभिवङ्क्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति । इति श्रीभागवते ५ स्कन्धे १७ अध्यायः ॥ (यथा च महाभारते । १३ । १६५ । २२ ।
"गोदावरी च वेण्णा च कृष्णवेणा तथा द्विजा ।
दृषद्वती च कावेरी वङ्क्षुर्मन्दाकिनी तथा ॥")

वङ्गं, क्ली, (वङ्गतीति । वगि गतौ + अच् ।) धातुविशेषः । रां इति भाषा ॥ तत्पर्य्यायः । त्रपुः २ स्वर्णजम् ३ नागजीवनम् ४ मृदङ्गम् ५ रङ्गम् ६ गुरुपत्रम् ७ पिच्चटम् ८ चक्रसंज्ञम् ९ तमरम् १० नागजम् ११ कस्तीरम् १२ आलीनकम् १३ सिंहलम् १४ । इति हेमचन्द्रः । ४ । १०८ ॥ श्वेतम् १५ नागम् १६ त्रपु १७ । इति शब्दरत्नावली ॥ अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । मेहित्वम् । पाण्डुत्वम् । क्रमिवातनाशित्वम् । लेखनत्वम् । किञ्चित्पित्तकारित्वञ्च । इति राजवल्लभः ॥ (अथ वङ्गस्य नामलक्षणगुणाः ।

"रङ्गवङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि ।
खुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते ॥
उत्तमं खुरकं तत्र मिश्रकन्त्ववरं मतम् ।
रङ्गं लघु सरं रूक्षमुष्णं मेहकफक्रिमीन् ॥
निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक् ।
सिंहो यथा हस्तिगणं निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

अस्य शोधनमारणविधिर्यथा,—

"वङ्गं चूर्णोदके स्विन्नं यामार्द्धेन विशुध्यति ॥"

इति वङ्गशुद्धिः ॥

"वङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन संपुटेत् ।
शुष्काश्वत्थभवैर्व्वल्कैः सप्तधा भस्मतां नयेत् ॥"

मतान्तरम् ।

"वङ्गं खर्परके कृत्वा चुल्लयां संस्थापयेत् सुधीः ।
द्रवीभूते पुनस्तस्मिन् चूर्णान्येतानि दापयेत् ॥
प्रथमं रजनीचूर्णं द्वितीये च यमानिका ।
तृतीये जीरकञ्चैव ततश्चिञ्चात्वगुद्भवम् ॥
अश्वत्थवल्कलोत्थञ्च चूर्णं तत्र विनिःक्षिपेत् ।
एवं विधानतो वङ्गं म्रियते नात्र संशयः ॥
वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपनम् ।
मेदःश्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥"

इति वङ्गमारणम् । इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥) अन्यद्रङ्गशब्दे द्रष्टव्यम् ॥ * ॥ सीसकम् । देशविशेषे पुं भूम्नि । इति मेदिनी । गे, २२ ॥ (एकवचनान्तोऽपि । यथा, महाभारते । १ । १०४ । ५० ।

"अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च स्मृतः ॥")

स तु प्राचीदेशान्तर्गतदेशविशेषः । यथा,—

"अङ्गवङ्गा मद्गुरका अन्तर्गिरिवहिर्गिराः ॥"

इत्युपक्रम्य ।

"शाखा मागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः ॥"

इत्यन्तं मत्स्यपुराणवचनम् ॥

मतान्तरं यथा,—

"आग्नेय्यामङ्गवङ्गोपवङ्गत्रिपुरकोशलाः ।
कलिङ्गौड्रान्ध्रकिष्किन्धाविदर्भशवरादयः ॥"

इति ज्योतिस्तत्त्वधृतकूर्म्मचक्रवचनम् ॥

तस्य सीमा यथा,—

"रत्नाकरं समारभ्य ब्रह्मपुत्त्रान्तगं शिवे ! ।
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः ॥"

इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥

वङ्गः, पुं, चन्द्रवंशीयवलिराजपुत्त्रः । यथा,—

"वलेः सुतपसो जज्ञे अङ्गवङ्गकलिङ्गकाः ।
सुह्मपौण्ड्राश्च वालेया अनपानस्तथाङ्गतः ॥"

इति गारुडे १४४ अध्यायः ॥ * ॥ (स च वङ्गो दीर्घतमस औरसो वलेः क्षेत्रजश्च । यथा, महाभारते । १ । १०४ । ४७-५१ ।

"ततः प्रसादयामास पुनस्तमृषिसत्तमम् ।
वलिं सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत् पुनः ॥
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्च्चसः ॥
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ॥
अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च स्मृतः ।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ॥
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः ।
एवं वलेः पुरा वंशः प्रख्यातो वै महर्षिजः ॥")

वार्त्ताकुः । कार्पासः । इति मेदिनी । गे, २९ ॥

वङ्गजं, क्ली, (वङ्गात् धातुविशेषात् जायते इति । जन् + डः ।) सिन्दूरम् । इति रत्नमाला ॥ वङ्गदेशजाते, त्रि ॥

वङ्गनः, पुं, (वङ्गतीति । वगि + ल्युः ।) वार्त्ताकुः । इति शब्दरत्नावली ॥ वेगुन् इति भाषा ॥ (गुणादयोऽस्य वार्त्ताकुशब्दे ज्ञातव्याः ॥)

वङ्गला, स्त्री, रागिणीविशेषः । इति हलायुधः ॥ वङ्गालीति च नामान्तरम् ॥

वङ्गशुल्वजं, क्ली, (वङ्गशुल्वाभ्यां रङ्गताम्राभ्यां जायते इति । जन + डः ।) कांस्यम् । इति हेमचन्द्रः । ४ । ११५ ॥

वङ्गसेनः, पुं, वकवृक्षः । यथा,—

"वङ्गसेनस्त्वगस्तिद्रुः शुकनाशो मुनिद्रुमः ।
अनलिः कुनली ॥" इति त्रिकाण्डशेषः ॥

वङ्गसेनकः, पुं, (वङ्गसेन + स्वार्थे कन् ।) वकवृक्षः । यथा,—

"रक्तपुष्पो मुनितरुरगस्तिर्व्वङ्गसेनकः ॥"

इति रत्नमाला ॥

अस्य पुष्पगुणाः ।

"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि ।
कटुपाकानि तिक्तानि कासक्षयकराणि च ॥"

इति राजवल्लभः ॥

वङ्गारिः, पुं, (वङ्गस्य रङ्गधातोररिः । अस्य वङ्गधातुजारकत्वात् तथात्वम् ।) हरितालम् । इति हेमचन्द्रः ॥

वङ्गालः, पुं, भैरवरागस्य पुत्त्रः । यथा,—

"वङ्गालः पञ्चमः षष्ठो मधुरो हर्षकस्तथा ।
देशाख्यो माधवः सिन्धुर्भैरवपुत्त्राः प्रकीर्त्तिताः ॥"

अस्य ध्यानम् ।

"कन्थानिवेशितकरस्फुरदक्षपत्री
भास्वत्त्रिशूलपरिमण्डितवामहस्तः ।
भस्मोज्ज्वलो निविडबद्धजटाकलापो
वङ्गाल इत्यभिहितस्तरुणार्कवर्णः ॥
षाड्वो देववङ्गालो ग्रहांशन्यासमध्यमः ।
प्रहर्षे विनियोक्तव्यः प्रोक्तोऽयं मुनिना स्वयम् ॥"

इति सङ्गीतरत्नाकरः ॥

वङ्गाली, स्त्री, भैरवरागस्य रागिणी । यथा,—

"भैरवी कौशिकी चैव भाषा वेलावली तथा ।
वङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः ॥"

इति सङ्गीतदामोदरः ॥

अस्या मूर्त्तिः ।

"मनोज्ञमुक्तागुणभूषिताङ्गी
शुकं दधाना धरणीधरस्था ।
प्रांशुः कुमारी कमनीयमूर्त्ति-
र्व्वङ्गालिकेयं शुचिसाङ्गगीता ॥"

इति सङ्गीतरत्नाकरः ॥

"वङ्गाली औड़वा ज्ञेया ग्रहांशन्यासषड्जभाक् ।
ऋषभहीना च विज्ञेया मूर्च्छना प्रथमा मता ।
पूर्णा वा मध्यमोपेता कल्लिनाथेन भाषिता ॥"

इति सङ्गीतदर्पणम् ॥

वच, औ वाचि । सन्देशे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट् ।) औ, वक्ता । अयं सेट् (सेट्) इत्येके । न वचत्यप्रियं वचः । इति हलायुधः । इति दुर्गादासः ॥

वच, क सन्देशे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) सन्देशो वचनविशेषः । क, वाचयत्यखिलां लिपिमिति हलायुधः । इति दुर्गादासः ॥

वच, ल औ वाचि । इति कविकल्पद्रुमः ॥ (अदा०-पर०-द्विक०-सेट् ।) ल, वक्ति । औ, वक्ता । अस्मादन्तिविभक्तिर्न प्रयोज्या । इत्यालङ्कारिकाः । इति दुर्गादासः ॥ (यथा,—

"वचेरन्त्यन्तुशन्तृङ्भिः प्रयोगो नाभिधीयते ।
अयतेर्नास्ति पञ्चम्या उत्तमः पुरुषः क्वचित् ॥"

इति बहुसम्मतम् ॥)

वचः, पुं, (वक्तीति । वच् + अच् ।) कीरपक्षी । इति मेदिनी । चे, ६ ॥

वचः, [स्] क्ली, (उच्यते इति । वच् + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४।१८९ । इत्यसुन् ।) वाक्यम् । इत्यमरः ।१।६।१॥ (यथा, रघौ ।२।४१।

"इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावा-
दात्मन्यवज्ञां शिथिलीचकार ॥")

वचक्नुः, पुं, (वक्तीति । वच् + "हृयुवचिभ्योऽन्युजागूजक्नुचः ।" उणा० ३ । ८१ । इति क्नुच् ।) ब्राह्मणः । इति मेदिनी । ने, १२७ ॥

वचक्नुः त्रि, (वक्तीति । वच् + "क्नुयुवचिभ्यः इति ।" उणा० ३ । ८१ । इत्यक्नुप् ।) वावदूकः । इति मेदिनी । ने, १२७ ।

वचण्डी, स्त्री, शारिका । पक्षिः । शकुन्तभेदः । इति शब्दरत्नावली ॥ मेदिन्यां वचण्डा इति वरण्डा इति च पाठः ॥

वचनं, क्ली, (उच्यतेऽनेनेति । शब्दनाशकत्वादस्य तथात्वम् । वच् + ल्युट् ।) शुण्ठी । इति शब्दचन्द्रिका ॥ वाक्यम् । तत्पर्य्यायः ।

"इरा सरस्वती ब्राह्मी भाषा वाणी च सारदा ।
गिरा गीश्च गिरां देवी गीर्देवी भारतीश्वरी ॥
वाग्वाचा वचसामीशा वाग्देवी वर्णमातृका ।
वचनं भाषितं चोक्तिर्व्याहारो लपितं वचः ॥
वाग्देवीवचसोरेष पर्य्यायः परिकीर्त्तितः ।
यथास्थानं यथायोग्यं भेद ऊह्यो मनीषिभिः ॥"
इति शब्दरत्नावली ॥ * ॥

(यथा, हितोपदेशे ।
"असेवितेश्वरद्वारमदृष्टविरहव्यथम् ।
अनुक्तक्लीववचनं धन्यं कस्यापि जीवनम् ॥")

तत्तु त्रिविधम् । यथा,—
वशिष्ठ उवाच ।
"वचनं त्रिविधं शैल लौकिके वैदिके तथा ।
सर्व्वं जानाति शास्त्रज्ञो निर्म्मलज्ञानचक्षुषा ॥
असत्यमहितं पश्चात् सांप्रतं श्रुतिसुन्दरम् ।
सुबुद्धिशत्रुर्व्वदति नहि तेषां कदाचन ॥
आपदः प्रीतिजनकं परिणामसुखावहम् ।
दयालुर्धर्म्मशीलश्च बोधयत्येव बान्धवम् ॥
श्रुतिमात्रात् सुधातुल्यं सर्व्वकाले सुखावहम् ।
सत्यं सारं हितकरं वचसां श्रेष्ठमीप्सितम् ॥
एवं स त्रिविधं शैल नीतिसारनिरूपितम् ।
कथ्यतां त्रिषुमध्ये किं वदामि वाक्यमीप्सितम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४१ अध्यायः ॥ विभक्तिः । सा तु स्यादिस्त्यादिश्च । यथा । "एकैकं वचनं क्रमात् कद्वन्द्वसंज्ञं स्यात् ।" इति मुग्धबोधव्याकरणम् ॥ तद्वैदिकपर्य्यायः । श्लोकः १ धारा २ इळा ३ गौः ४ गौरी ५ गान्धर्व्वी ६ गभीरा ७ गम्भीरा ८ मन्द्रा ९ मन्द्राजनी १० वाशी ११ वाणी १२ वाणीची १३ वाणः १४ पविः १५ भारती १६ धमनिः १७ नाळीः १८ मेना १९ मेळिः २० सूर्य्या २१ सरस्वती २२ निवित् २३ स्वाहा २४ वग्नुः २५ उपब्दिः २६ मायुः २७ काकुत् २८ जिह्वा २९ घोषः ३० स्वरः ३१ शब्दः ३२ स्वनः ३३ ऋक् ३४ होत्रा ३५ गीः ३६ गाथा ३७ गणः ३८ धेना ३९ ग्नाः ४० विपा ४१ नना ४२ कशा ४३ धिषणा ४४ नौः ४५ अक्षरम् ४६ मही ४७ अदितिः ४८ शची ४९ वाक् ५० अनुष्टुप् ५१ धेनुः ५२ वल्गुः ५३ गल्दा ५४ सरः ५५ सुपर्णी ५६ वेकुरा ५७ । इति सप्तपञ्चाशत् वाङ्नामानि । इति वेदनिघण्टौ । १ । ११ ॥

वचनग्राही [न्], त्रि, (वचनं गृह्णातीति । ग्रह + णिनिः ।) वचने स्थितः । इत्यमरटीकायां रमानाथः ॥

वचनीयः, त्रि, (वच् + अनीयर् ।) कथनीयः । इति वचधातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः ॥ (निन्दायां, क्ली । यथा, कुमारे । ४ । २१ ।
"मदनेन विना कृता रतिः
क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं
रमण ! त्वामनुयामि यद्यपि ॥"
"इति वचनीयं निन्दा मे मम व्यवस्थितम् ॥" इति तट्टीकायां मल्लिनाथः ॥)

वचनीयता, स्त्री, (वचनीयस्य भावः । वचनीय + तल् ।) लोकापवादः । यथा,—
"जनप्रवादः कौलीनं विगानं वचनीयता ॥"
इति हेमचन्द्रः । २ । १८४ ॥
(तथा, मृच्छकटिकनाटके तृतीयाङ्के ।
"कामं नीचमिदं वदन्ति पुरुषः स्वप्ने च यद्वर्द्धते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्य्यं न शौर्य्यं हि तत् ।
स्वाधीना वचनीयतापि हि वरं बद्धो न सेवाञ्जलि-
र्मार्गो ह्येष नरेन्द्रसौप्तिकवधे पूर्व्वं कृतो द्रौणिना ॥")

वचनेस्थितः, त्रि, (वचने तिष्ठति स्मेति । स्था + "गत्यर्थेति ।" ३।४।७२ । इति क्तः । "तत्पुरुषे कृति बहुलम् ।" ६।३।१४। इति सप्तम्या अलुक् ।) वचने तिष्ठति यः । वचनस्थः । तत्पर्य्यायः । विधेयः २ विनयग्राही ३ आश्रवः । इत्यमरः । ३ । १ । २४ ॥ वश्यः ५ प्रणेयः ६ । इति केचिदिति भरतः ॥

वचनोपक्रमः, पुं, (वचनस्य उपक्रमः ।) वाक्यारम्भः । इति भरतशब्दरत्नावल्यौ ॥ तत्पर्य्यायः । उपन्यासः २ वाङ्मुखम् ३ । इत्यमरः ॥

वचरः, पुं, (अवान्तरे चरतीति । अव + चर + अच् । अल्लोपः ।) कुक्कुटः । शठः । इति मेदिनी ॥

वचलुः, पुं, शत्रुः । यथा,—
"पुंसि मन्तुः क्षुपण्युश्च वचलुर्जंगलुस्तथा ।
भरण्युश्च शरण्युः स्यादमित्रे घृणिरित्यपि ॥"
इति शब्दमाला ॥

वचसांपतिः, पुं, (वचसां वाचां पतिः ।) बृहस्पतिः । यथा,—
"जीवोऽङ्गिराः सुरगुरुर्व्वचसांपतीज्यौ ॥"
इति दीपिका ॥

वचस्करः, त्रि, (करोतीति । कृ + अच् । वचसः करः ।) वचने स्थितः । इति केचित् ॥

वचा, स्त्री, (वाचयतीति । वच् + णिच् + अच् । निपातनात् ह्रस्वः । यद्वा, अन्तर्भावितण्यर्थात् वचः अच् ।) औषधविशेषः । वच् इति भाषा । तत्पर्य्यायः । उग्रगन्धा २ षड्ग्रन्था ३ गोलोमी ४ शतपर्व्विका ५ । इत्यमरः । २ । ४ । १०२ ॥ तीक्ष्णा ६ जटिला ७ मङ्गल्या ८ विजया ९ उग्रा १० रक्षोघ्नी ११ । इति रत्नमाला ॥ वच्या १२ लोमशा १३ । इति जटाधरः ॥ भद्रा १४ । अस्या गुणाः । अतितीक्ष्णत्वम् । कटुत्वम् । उष्णत्वम् । कफामग्रन्थिशोफवातज्वरातिसारसादभूतनाशित्वम् । वान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका ।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा ॥
वचोग्रगन्धा कटुका तिक्तोष्णा वान्तिवह्निकृत् ।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी ॥
अपस्मारकफोन्मादभूतजन्त्वनिलान् हरेत् ॥"
अथ खुरासानी वचा ।
"पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा ।
हैमवत्युदिता तद्वत् शूलं हन्ति विशेषतः ॥"
अथ महाभरी वचा । यस्या लोके कुलीलन इति नामान्तरम् ।
"सुगन्धाप्युग्रगन्धा च विशेषात् कफकासनुत् ।
सुस्वरत्वकरी रुच्या हृत्कण्ठमुखशोधिनी ॥"
अपरा सुगन्धा स्थूलग्रन्थिर्यस्या लोके महाभरा इति नाम ।
"स्थूलग्रन्थिः सुगन्धान्या ततो हीनगुणा स्मृता ॥"
अथ चोपचीनीति लोके प्रसिद्धा । तस्या गुणाः ।
"द्वीपान्तरवचा कट्वी तिक्तोष्णा वह्निदीप्तिकृत् ।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी ॥
वातव्याधीनपस्मारमुन्मादं तनुवेदनाम् ।
व्यपोहति विशेषेण फिरङ्गामयनाशिनी ॥"
इति भावप्रकाशः ॥ * ॥
अपरञ्च ।
"वचायुष्या वातकफतृष्णाघ्नी स्मृतिवर्द्धिनी ॥"
इति राजवल्लभः ॥ * ॥
अन्यच्च ।
"अह्निर्व्वा पयसाज्येन मासमेकन्तु सेविता ।
वचा कुर्य्यान्नरं प्राज्ञं श्रुतिधारणसंयुतम् ॥
चन्द्रसूर्य्यग्रहे पीतं पलमेकं पयोऽन्वितम् ।
वचायास्तत्क्षणं कुर्य्यान्महाप्रज्ञान्वितं नरम् ॥"
इति गारुडे १९८ अध्यायः ॥

वचोग्रहः, पुं, (गृह्णातीति । ग्रह + अच् । वचसां ग्रहः ।) कर्णः । इति राजनिर्घण्टः ॥

वज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) वजति । इति दुर्गादासः ॥

वज, क संस्कृतौ । गतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) अयं मार्गणसंस्कारे इति प्राञ्चः । मार्गणस्य शरस्य पक्षादिना संस्कारो मार्गणसंस्कारः । क, वाजयति पक्षैर्बाणं काण्डकारः । इति रमानाथः ॥ मार्गणसंस्कारयोरिति कश्चित् । इति दुर्गादासः ॥

वज्रं, पुं, क्ली, (वजतीति । वज गतौ + "ऋज्रेन्द्राग्रवज्रविप्रेति ।" उणा० २ । २८ । इति रन्प्रत्ययेन निपातितः ।) इन्द्रस्यास्त्रविशेषः । वाज् इति भाषा । तत्पर्य्यायः । ह्लादिनी २ कुलिशम् ३

भिदुरम् ४ पविः ५ शतकोटिः ६ स्वरुः ७ शम्बः ८ दम्भोलिः ९ अशनिः १० । इत्यमरः । १।१।५० ॥ कुलीशम् ११ भिदिरम् १२ भिदुः १३ स्वरुस् १४ सम्बः १५ संवः १६ अशनी १७ वज्राशनिः १८ । इति तट्टीका ॥ जम्भारिः १९ त्रिदशायुधम् २० शतधारम् २१ शतारम् २२ आपोत्रम् २३ अब्जम् २४ । इति पुरुषोत्तमः ॥ गिरिकण्टकः २५ गौः २६ अभ्रोत्थम् २७ मेघभूतिः २८ गिरिज्वरः २९ । इति शब्दरत्नावली ॥ जाम्बविः ३० दम्भः ३१ । इति जटाधरः ॥ भिद्रः ३२ अम्बुजम् ३३ । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे ।१।३२।२।

"अहन्नहिं पर्व्वते शिश्रियाणं
त्वष्टास्मै वज्रं स्वर्य्यं ततक्ष ॥")

अस्योत्पत्तिर्यथा,—

"तथेत्युक्तः स रविणा भ्रमौ कृत्वा दिवाकरम् ।
पृथक् चकार तत्तेजश्चक्रं विष्णोरकल्पयत् ॥
त्रिशूलञ्चापि रुद्रस्य वज्रमिन्द्रस्य चाधिकम् ।
दैत्यदानवसंहर्त्तुः सहस्रकिरणात्मकम् ॥
रूपञ्च प्रतिमञ्चक्रे त्वष्टा पादाहते महत् ।
न शशाकाथ तद्द्रष्टुं पादरूपं रवेः पुनः ॥
अर्च्चास्वपि ततः पादौ न कश्चित् कारयेत् क्वचित् ।
यः करोति स पापिष्ठां गतिमाप्नोति निन्दिताम् ॥
कुष्ठरोगमवाप्नोति लोकेऽस्मिन् दुःखसंयुतम् ।
तस्मान्न धर्म्मकामार्थी चित्रेष्वायतनेषु च ।
न क्वचित् कारयेत् पादौ देवदेवस्य धीमतः ॥"
इति मात्स्ये ११ अध्यायः ॥ * ॥

अपि च ।

"प्रविश्य जठरं शक्रो दैत्यमातुः पुरन्दरः ।
ददर्शोर्द्ध्वमुखं बालं कटिन्यस्तकरं महत् ॥
तस्यैवान्तेऽथ ददृशे पेशीं मांसस्य वासवः ।
शुद्धस्फटिकसंकाशां कराभ्यां जगृहेऽथ ताम् ॥
ततः कोपसमाध्मातो मांसपेशीं शतक्रतुः ।
कराभ्याममर्द्दयामास ततः सा कठिनाभवत् ॥
ऊर्द्ध्वेनार्द्धञ्च ववृधे त्वधोऽर्द्धं ववृधे तथा ।
शतपर्व्वा च कुलिशः संजातो मांसपेशितः ॥"
इति वामने ६८ अध्यायः ॥ * ॥

वृत्रासुरवधार्थं दधीचिमुनेरस्थ्ना इन्द्राज्ञया विश्वकर्म्मणा निर्म्मितवज्रस्य प्रमाणं यथा,—

"एवं कृतव्यवसितो दध्यङ्ङाथर्व्वणस्तनुम् ।
परे भगवति ब्रह्मण्यात्मानं सन्नयन् जहौ ॥
यताक्षासु मनो बुद्धिस्तत्त्वदृक् ध्वस्तबन्धनः ।
आस्थितः परमं योगं न देहं बुबुधे गतम् ॥
अथेन्द्रो वज्रमुद्यम्य निर्म्मितं विश्वकर्म्मणा ।
मुनेः शक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥
वृतो देवगणैः सर्व्वैर्गजेन्द्रो पर्य्यशोभत ।
स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥"
इति श्रीभागवते ६ स्कन्धे १० अध्यायः ॥ * ॥

गन्धशोथवारकविधिर्यथा,—

"प्रचण्डपवनाघाते मेघेषु स्तनितेषु यः ।
त्रिः पठेज्जैमिनीयोऽस्मि प्राङ्मुखो वाप्युदङ्मुखः ॥
तस्य माभूद्भयं घोरं विद्युतीयोऽवसीदति ॥"
इत्याह्निकतत्त्वधृतब्रह्मपुराणम् ॥

"मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात् ।
विद्युदग्निभयं नास्ति पठिते च गृहोदरे ॥"
लिखिते च गृहोदरे । इति वा पाठः ।

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः ॥"
इति पुराणम् ॥ * ॥ * ॥

रत्नविशेषः । हीरा इति भाषा । तत्पर्य्यायः । इन्द्रायुधम् २ हीरम् ३ भिदुरम् ४ कुलिशम् ५ पविः ६ अभेद्यम् ७ अशिरम् ८ रत्नम् ९ दृढ़म् १० भार्गवकम् ११ षट्कोणम् १२ बहुधारम् १३ शतकोटिः १४ । अस्य गुणाः । षड्रसोपेतत्वम् । सर्व्वरोगापहारकत्वम् । सर्व्वाघशमनत्वम् । सौख्यत्वम् । देहदार्ढ्यकरत्वम् । रसायनत्वञ्च । तद्विशेषो यथा,—

"स्वच्छं विद्युत्प्रभं स्निग्धं सौन्दर्य्यं लघु लेखनम् ।
षड़ारन्तीक्ष्णधारञ्च शुशाम्यारं श्रियं दिशेत् ॥"

तस्य कुलक्षणं यथा,—

"भस्माभं काकपादञ्च रेखाक्रान्तन्तु वर्त्तुलम् ।
व्याधारमलिनं बिन्दुसंत्रासैः स्फुटितन्तथा ।
नीलाभं चिपिटं रूक्षं तद्वज्रं दोषलं त्यजेत् ॥"

वज्रस्य चतुर्व्वर्णलक्षणं यथा,—

"श्वेतालोहितपीतमेचकतया छायाश्चतस्रः क्रमाद्-
विप्रादित्वमिहास्य यत् सुमनसः शंसन्ति सत्यं ततः ।
स्फीतां कीर्त्तिमनुत्तमां श्रियमिदं दत्ते यथा संभृतं
मर्त्यानामयथायथं तु कुलिशं पथ्यं हितं जात्यतः ॥" * ॥

तस्य परीक्षा यथा,—

"यत् पाषाणतले निकाशनिकरे नोद्घृष्यते निष्ठुरे
यच्चान्योपललोहमुद्गरसुखैर्लेखान्न यात्याहननम् ।
यच्चान्यं निजलीलयैव दलयेद्वज्रेण वा भिद्यते
तज्जातं कुलिशं वदन्ति कुशलाः श्लाघ्यं महार्घञ्च तत् ॥" * ॥

तस्य वर्णगुणौ यथा,—

"विप्रः सोऽपि रसायनेषु बलवानष्टाङ्गसिद्धिप्रदो
राजन्यस्तु नृणां वलीपलितजिन्मृत्युं जयेद्रसात् ।
इत्याकर्षणसिद्धिदस्तु सुतरां वैश्योऽथ शूद्रो भवेत्
सर्व्वव्याधिहरस्तदेव कथितो वज्रस्य वर्णो गुणः ॥"
इति राजनिर्घण्टः ॥ * ॥

अपि च ।

अथ वज्रस्य नामलक्षणगुणाः ।

"हीरकः पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च सः ।
स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्त्रियो मतः ।
पीतो वैश्योऽसितः शूद्रश्चतुर्व्वर्णात्मकश्च सः ॥
रसायने मतो विप्रः सर्व्वसिद्धिप्रदायकः ।
क्षत्त्रियो व्याधिविध्वंसी जरामृत्युहरः परः ॥
वैश्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत् ।
शूद्रो नाशयति व्याधीन् वयःस्तम्भं करोति च ।
पुंस्त्रीनपुंसकाश्चैते लक्षणीयानि लक्षणैः ॥
सुवृत्ताः फलसंपूर्णास्तेजोयुक्ता बृहत्तराः ।
पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः ॥
रेखाबिन्दुसमायुक्ताः षड़स्रास्ते स्त्रियः स्मृताः ॥"
षड़स्राः षट्कोणाः ।

"त्रिकोणाश्च सुदीर्घाश्च ते विज्ञेया नपुंसकाः ॥
तेऽपि स्युः पुरुषाः श्रेष्ठा रसबन्धनकारिणः ।
स्त्रियः कुर्व्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः ॥
नपुंसकास्त्ववीर्य्याः स्युरकामाः सत्त्ववर्ज्जिताः ।
स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवं क्लीवे प्रयोजयेत् ।
सर्व्वेभ्यः सर्व्वदा देयाः पुरुषा वीर्य्यवर्द्धनाः ॥
अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ।
पाण्डुतां पङ्गुलत्वञ्च तस्मात् संशोध्य मारयेत् ॥"

मारितस्य वज्रस्य गुणाः ।

"आयुः पुष्टिं बलं वीर्य्यं वर्णं सौख्यं करोति च ।
सेवितं सर्व्वरोगघ्नं मृतं वज्रं न संशयः ॥"
इति भावप्रकाशः ॥

(अथ वज्रमारणम् ।

"त्रिवर्षारूढ़कार्पासमूलमादाय पेषयेत् ।
त्रिवर्षनागवल्लयास्तु निजद्रावैः प्रपेषयेत् ॥
तद्गोलके क्षिपेद्वज्रं बद्धा गजपुटे पचेत् ।
एवं सप्तपुटेनैव म्रियते कुलिशं ध्रुवम् ॥"

मतान्तरम् ।

"कांस्यपात्रे तु भेकस्य मूत्रे वज्रन्तु निःक्षिपेत् ।
त्रिःसप्तकृत्वः सन्तप्तं वज्रमेवं मृतं भवेत् ॥"

अथान्यः ।

"त्रिःसप्तकृत्वः सन्तप्तं खरमूत्रेण सेचयेत् ।
मत्कुणैस्तालकं पिष्ट्वा तद्गोले कुलिशं क्षिपेत् ॥
प्रध्मातं वाजिमूत्रेण सिक्तं पूर्व्वक्रमेण तु ।
भस्मी भवति तद्वज्रं वज्रवत् कुरुते तनुम् ॥
आयुष्यं सौख्यजननं बलरूपप्रदन्तथा ।
रोगघ्नं मृत्युहरणं वज्रभस्म भवत्यलम् ॥"
इति वज्रमारणम् । इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥ * ॥) अन्यच्च । अथ वज्रगणना । विष्णुधर्म्मोत्तरे ।

"वज्रं मरकतञ्चैव पद्मरागञ्च मौक्तिकम् ।
इन्द्रनीलं महानीलं वैदूर्य्यं गन्धसंज्ञकम् ॥
चन्द्रकान्तं सूर्य्यकान्तं स्फाटिकं वलकं तथा ।
कर्क्केतरं पुष्परागं तथा ज्योतीरसं द्विज ॥
स्फाटिकं राजवर्त्तञ्च तथा राजमतं शुभम् ।
सौगन्धिकं तथा गञ्जं शङ्खब्रह्ममयं तथा ॥
गोमेदं रुधिराख्यञ्च तथा भल्लातकं द्विज ।
धूलीमरकतञ्चैव तुत्थकं सीसमेव च ॥

पौलुं प्रवालकञ्चैव गिरिवज्रञ्च भार्गव ।
भुजङ्गमामणिश्चैव तथा वज्रमणिः शुभः ॥
तित्तिरञ्च तथा पीतं भ्रामरञ्च तथोत्पलम् ।
वज्राण्येतानि सर्व्वाणि धार्य्याण्येव महीभृता ॥
सुवर्णप्रतिबद्धानि जयारोग्यसमृद्धये ॥”
इति युक्तिकल्पतरुः ॥
तस्योत्पत्तिपरीक्षामूल्यादि यथा,—
“वक्ष्मि परीक्षां रत्नानां बलो नामासुरोऽभवत् ।
इन्द्राद्या निर्ज्जितास्तेन निर्ज्जेतुं तैर्न शक्यते ॥”
इत्युपक्रम्य ।
“महाप्रभावं विबुधैर्यस्माद्वज्रसुदाहृतम् ।
वज्रपूर्व्वा परीक्षेयं ततोऽस्माभिः प्रकीर्त्त्यते ॥
तस्यास्थिलेशो निपपात येषु
भुवः प्रदेशेषु कथञ्चिदेव ।
वज्राणि वज्रायुधनिर्ज्जिगीषो-
र्भवन्ति नानाकृतिमन्ति तेषु ॥
हैममातङ्गसौराष्ट्राः पौण्ड्रकालिङ्गकोशलाः ।
वेण्वातटाः ससौवीरा वज्रस्याष्टाविहाकराः ॥
आताम्रा हिमशैलजाश्च शशिभा वेण्वातटीयाः स्मृताः
सौवीरे तुषिताब्जमेघसदृशास्ताम्राश्च सौराष्ट्रजाः ।
कालिङ्गाः कनकावदातरुचिराः पीतप्रभाः कोशले
श्यामाः पुण्ड्रभवा मतङ्गविषये नात्यन्तपीतप्रभाः ॥
अत्यर्थं लघु वर्णतश्च गुणवत् पार्श्वेषु सम्यक् समं
रेखाबिन्दुकलङ्ककाकपदकत्रासादिभिर्व्वर्ज्जितम् ।
लोकेऽस्मिन् परमाणुमात्रमपि यत् वज्रं क्वचिद्दृश्यते
तस्मिन् देवसमाश्रयो ह्यवितथस्तीक्ष्णाग्रधारं यदि ॥
वर्णेषु वर्णयुक्त्या देवानामपि परिग्रहः प्रोक्तः ।
वर्णेभ्यश्च विभागः कार्य्यो वर्णाश्रयादेव ॥
हरितसितपीतपिङ्गश्यामाताम्राः स्वभावतो रुचिराः ।
हरिवरुणशक्रहुतवहपितृपतिमरुतां स्वका वर्णाः ॥
विप्रस्य शङ्खकुमुदस्फटिकावदातः
स्यात् क्षत्रियस्य शशबभ्रुविलोचनाभः ।
वैश्यस्य कान्तकदलीदलसन्निकाशः
शूद्रस्य धौतकरवालसमानदीप्तिः ॥
द्वौ वज्रवर्णौ पृथिवीपतीनां
सद्भिः प्रतिष्ठौ न तु सार्व्वजन्यौ ।
यः स्याज्जवाविद्रुमभङ्गशोणो
यो वा हरिद्रारससन्निकाशः ॥
ईशत्वात् सर्व्ववर्णानां गुणवत् सार्व्ववर्णिकम् ।
कामतो धारयेद्राजा न त्वन्योऽन्यत् कथञ्चन ॥
यथरोत्तरवृत्त्या हि यादृक् स्याद्वर्णसङ्करः ।
ततः कष्टतरो वज्रो वर्णानां सङ्करो मतः ॥
न च मार्गविभागमात्रवृत्त्या
विदुषा वज्रपरिग्रहो विधेयः ।
गुणवद्गुणसम्पदां विभूति-
र्विपरीतो व्यसनोदयस्य हेतुः ॥
एकमपि यस्य शृङ्गं
विदलितमवलोक्यते विशीर्णं वा ।
गुणवदपि तन्न धार्य्यं
वज्रं श्रेयोऽर्थिभिर्भवने ॥
स्फुटिताग्निविशीर्णशृङ्गदेशं
मलवर्णैः पृषतैरुपेतमध्यम् ।
नहि वज्रभृतोऽपि वज्रमाशु
श्रियमन्याश्रयलालसां न कुर्य्यात् ॥
यस्यैकदेशः क्षतजावभासो
यद्वा भवेल्लोहितवर्णचित्रम् ।
न तन्न कुर्य्याद्ध्रियमाणमाशु
स्वच्छन्दमृत्योरपि जीवितान्तम् ॥
कोष्ठः पार्श्वानि धाराश्च षड़ष्टौ द्वादशेति च ।
उत्तुङ्गसमतीक्ष्णाग्रा वज्रस्याकरजा गुणाः ॥
षट्कोटिशुद्धममलं स्फुटतीक्ष्णधारं
वर्णान्वितं लघु सुपार्श्वमपेतदोषम् ।
इन्द्रायुधांशुविसृतिस्फुरितान्तरीक्ष-
मेवंविधं भुवि भवेत् सुलभं न वज्रम् ॥
तीक्ष्णाग्रं विमलमपेतसर्व्वदोषं
धत्ते यः प्रयततनुः सदैव वज्रम् ।
वृद्धिस्तं प्रतिदिनमेति यावदायुः
श्रीसम्पत्सुतधनधान्यगोपशूनाम् ॥
व्यालवह्निविषव्याघ्रतस्कराम्बुभयानि च ।
दूरात्तस्य निवर्त्तन्ते कर्म्माण्याथर्व्वणानि च ॥
यदि वज्रमपेतसर्व्वदोषं
बिभृयात्तण्डुलविंशतिं गुरुत्वे ।
मणिशास्त्रविदो वदन्ति तस्य
द्विगुणं रूपकलक्षणमग्र्यं मूल्यम् ॥
त्रिभागहीनार्द्धतदर्द्धशेषं
त्रयोदशं त्रिंशदतोऽर्द्धभागाः ।
अशीतिभागोऽथ शतांशभागः
सहस्रभागोऽल्पसमानयोगः ॥
यत्तण्डुलैर्द्वादशभिः कृतस्य
वज्रस्य मूल्यं प्रथमं प्रदिष्टम् ।
द्वाभ्यां क्रमाद्धानिमुपागतस्य
त्वेकावसानस्य विनिश्चयोऽयम् ॥
न चापि तण्डुलैरेव वज्राणां धारणक्रमः ।
अष्टाभिः सर्षपैर्गौरैस्तण्डुलं परिकल्पयेत् ॥
यत्तु सर्व्वगुणैर्युक्तं वज्रं तरति वारिणि ।
रत्नवर्गे समस्तेऽपि तस्य धारणमिष्यते ॥
अनेनापि हि दोषेण लक्ष्यालक्ष्येण दूषितम् ।
स्वमूल्यात् दशमं भागं वज्रं लभति मानवः ॥
प्रकटानेकदोषस्य स्वल्पस्य महतोऽपि वा ।
स्वमूल्याच्छतशो भागो वज्रस्य न विधीयते ॥
सुदृष्टदोषमलङ्कारे वज्रं यद्यपि दृश्यते ।
रत्नानां परिकर्म्मार्थं मूल्यं तस्य भवेल्लघु ॥
प्रथमं गुणसम्पदाभ्युपेतं
प्रतिबद्धं समुपैति यच्च दोषम् ।
अलमाभरणेन तस्य राज्ञो
गुणहीनोऽपि मणिर्न भूषणाय ॥
नार्य्या वज्रमधार्य्यं गुणवदपि सुतप्रसूतिमिच्छन्त्या ।
अन्यत्र दीर्घचिपिटत्र्यस्राद्गुणैर्वियुक्ताच्च ॥
अयसा पुष्परागेण तथा गोमेदकेन च ।
वैदूर्य्यस्फटिकाभ्याञ्च काचैश्चापि पृथग्विधैः ॥
प्रतिरूपाणि कुर्व्वन्ति वज्रस्य कुशला जनाः ।
परीक्षा तेषु कर्त्तव्या विद्वद्भिः सुपरीक्षकैः ॥
क्षारोल्लिखनशालाभिस्तेषां कार्य्यं परीक्षणम् ।
पृथिव्यां यानि रत्नानि ये चान्ये लोहधातवः ॥
सर्व्वाणि विलिखेद्वज्रं तच्च तैर्न विलिख्यते ॥
गुरुता सर्व्वरत्नानां गौरवाधारकारणम् ।
वज्रे तद्वैपरीत्येन सूरयः परिचक्षते ॥
जातिरजातिं विलिखन्ति वज्रकुरुविन्दाः ।
वज्रैर्वज्रं विलिखति नान्येन लिख्यते वज्रम् ।
वज्राणि मुक्ता मणयो ये च केचन जातयः ।
न तेषां प्रतिबद्धानां भा भवत्यूर्द्ध्वगामिनी ॥
तिर्य्यक्क्षतत्वात् केषाञ्चित् कथञ्चिद्यदि दृश्यते ।
तिर्य्यगालिख्यमानानां सा पार्श्वेष्वपि हन्यते ॥
यद्यपि विशीर्णकोटिः
सबिन्दुरेखान्वितो विवर्णो वा ।
तदपि धनधान्यपुत्रान्
करोति सेन्द्रायुधो वज्रः ।
सौदामिनीविस्फुरिताभिरामं
राजा यथोक्तं कुलिशं दधानः ।
पराक्रमाक्रान्तपरप्रतापः
समस्तसामन्तभुवं भुनक्ति ॥”
इति गारुडे ६८ अध्यायः ॥
वज्रार्थे वैदिकपर्य्यायो यथा । दिद्युत् १ नेमिः २ हेतिः ३ नमः ४ पविः ५ सृकः ६ वृकः ७ वधः ८ वज्रः ९ अर्कः १० कुत्सः ११ कुलिशः १२ तुजः १३ तिग्मम् १४ मेनिः १५ स्वधितिः १६ सायकः १७ परशुः १८ । इत्यष्टादश वज्रनामानि । इति वेदनिघण्टौ । २ । २० ॥

वज्रं, क्ली, (वज गतौ + ऋज्रेन्द्रेति रन् ।) बालकः । धात्री । इति मेदिनी । रे, ६ ॥ काञ्जिकम् । इति धरणिः ॥ वज्रपुष्पम् । इति शब्दरत्नावली ॥ लौहविशेषः । स च बहुविधो यथा । नीलपिण्डम् १ अरुणाभम् २ मोरकम् ३ नागकेशरम् ४ तित्तिराङ्गम् ५ स्वर्णवज्रम् ६ शैवालवज्रम् ७ शोणवज्रम् ८ रोहिणी ९ काङ्कोलम् १० ग्रन्थिवज्रकम् ११ मदनाख्यम् १२ इत्यादि । तेषां नामानुरूपं चिह्नम् । इति पुराणम् ॥ अभ्रविशेषः । तस्योत्पत्त्यादि यथा,—
“पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतम् ।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः ॥
ते निपेतुर्घनध्वानाच्छिखरेषु महीभृताम् ।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम् ॥
तद्वज्रं वज्रजातत्वादभ्रमभ्ररवोद्भवात् ।

गगनात् स्खलितं यस्मात् गगनञ्च ततो मतम् ॥
पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्व्विधम् ।
वज्रन्तु वज्रवत् तिष्ठेत् तन्नाग्नौ विकृतिं व्रजेत् ॥
सर्व्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् ॥"
इति भावप्रकाशः ॥

वज्रः, पुं, (वज् + रन् ।) कोकिलाक्षवृक्षः । श्वेतकुशः । इति राजनिर्घण्टः ॥ सेहुण्ड-वृक्षः । इति भावप्रकाशः ॥ श्रीकृष्णप्रपौत्रः । यथा,—
"अनिरुद्धात् सुभद्रायां वज्रो नाम नृपोऽभवत् ।
प्रतिबाहुर्व्वज्रसुतस्तस्यासीत् सुतोऽभवत् ॥"
इति गारुड़े १४४ अध्यायः ॥
अपि च ।
"प्रद्युम्न आसीत् प्रथमः पितृवद्रुक्मिणीसुतः ।
स रुक्मिणो दुहितरमुपयेमे महारथः ॥
तस्यां ततोऽनिरुद्धोऽभून्नागायुतबलान्वितः ।
स चापि रुक्मिणः पौत्त्रीं दौहित्रो जगृहे ततः ॥
वज्रस्तस्यामभूद्यस्तु मौषलादवशेषितः ।
प्रतिबाहुरभूत्तस्मात् सुबाहुस्तस्य चात्मजः ॥"
इति श्रीभागवते १० स्कन्धे ६० अध्यायः ॥ *॥
(विश्वामित्रपुत्त्रभेदः । यथा, महाभारते ।१३। ४ । ५१ ; ५६ ।
"वल्गुजङ्घश्च भगवान् गालवश्च महानृषिः ।
रुचिरैजस्तथाख्यानः सालङ्कायन एव च ॥"
"विश्वामित्रात्मजाः सर्व्वे मुनयो ब्रह्मवादिनः ॥")
विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चदशयोगः । तस्यायनवदण्डा वर्ज्जनीया यथा,—
"व्यघातौ पञ्च विष्कम्भे सप्त शूले च नाड़िकाः ।
गण्ड व्याघातयोः षट् च नव हर्षणवज्रयोः ॥
वैधृतिव्यतिपातौ च समस्तौ परिवर्ज्जयेत् ।
शेषा यथार्थनामानो योगाः कार्य्येषु शोभनाः ॥"
इति ज्योतिस्तत्त्वम् ॥
अत्र जातफलं यथा,—
"गुणी गुणज्ञो बलवान् महौजाः
सद्रत्नवस्त्रादिपरीक्षकः स्यात् ।
वज्राभिधाने यदि चेत् प्रसूतो
वज्रोपमः स्याद्रिपुकामिनीनाम् ॥"
इति कोष्ठीप्रदीपः ॥

वज्रकं, क्ली, (वज्र + संज्ञायां कन् ।) वज्रक्षारम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये । तैलं वज्रकमभ्यङ्गार्थं ॥) सर्व्वतोभद्रचक्रान्तर्गतसूर्य्यभोग्यनक्षत्रात् त्रयोविंशनक्षत्रात्मक उपग्रहः । यथा,—
"सूर्य्यभात् पञ्चमं धिष्ण्यं ज्ञेयं विद्युन्मुखाभिधम् ।
शून्यञ्चाष्टमगं प्रोक्तं सन्निपातं चतुर्द्दशम् ॥
केतुमष्टादशं प्रोक्तमुल्का स्यादेकविंशतिः ।
द्वाविंशतितमं कम्पं त्रयोविंशश्च वज्रकम् ।
निर्घातश्च चतुर्व्विंशस्तुक्ता अष्टावुपग्रहाः ॥"
इति ज्योतिस्तत्त्वम् ॥

वज्रकङ्कटः, पुं, (वज्रः कङ्कटो देहावरणमस्य ।) हनूमान् । इति हेमचन्द्रः । ३ । ३७० ॥

वज्रकण्टकः, पुं, (वज्रस्य कण्टकमिव तदाकारत्वात् ।) स्नुहीवृक्षः । इति जटाधरः ॥ कोकिलाक्षवृक्षः । इति राजनिर्घण्टः ॥

वज्रकन्दः, पुं, (वज्राकारः कन्दोऽस्य ।) वज्रकर्णः । इति रत्नमाला ॥ सकरकन्द आलु इति भाषा ॥

वज्रकपाली, [न्] पुं, (वज्रकपालोऽस्यास्तीति । इनिः ।) बुद्धविशेषः । तत्पर्य्यायः । हेरम्बः २ हेरुकः ३ चक्रसम्बरः ४ देवः ५ निशुम्भीशः ६ शशिशेखरः ७ वज्रटीकः ८ । इति हेमचन्द्रः ॥

वज्रकालिका, स्त्री, (वज्रोपलक्षिता कालिका ।) मायादेवी । इति हेमचन्द्रः ॥

वज्रकेतुः, पुं, (वज्रं केतुश्चिह्नमस्य ।) नरकराजः । यथा,—
"गते वशिष्ठे नरकः शीघ्रं विस्मयसंयुतः ॥"
इत्युपक्रम्य ॥
"इति याशीष्मतिरस्य वज्रकेतोस्तदा चला ।
दूतञ्च प्राहिणोत् यत्नं बाणस्य नगरं प्रति ॥"
इति कालिकापुराणे ३८ अध्यायः ॥

वज्रक्षारं, क्ली, (वज्रसंज्ञकं क्षारमिति ।) क्षारविशेषः । तत्पर्य्यायः । वज्रकम् २ क्षारश्रेष्ठम् ३ विदारकम् ४ सारः ५ चन्दनारः ६ धूमोत्थम् ७ धूमजाङ्गकम् ८ । अस्य गुणाः । अत्युष्णत्वम् । तीक्ष्णत्वम् । क्षारत्वम् । रेचनत्वम् । गुल्मोदरार्त्तिविष्टम्भश्रमप्रशमनत्वम् । सरत्वञ्च । इति राजनिर्घण्टः ॥ (भस्मौषधविशेषः । तद्यथा,—
"सामुद्रं सैन्धवं काचं यवक्षारं सुवर्च्चलम् ।
टङ्कणं सर्ज्जिका क्षारं तुल्यं सर्व्वं विचूर्णयेत् ॥
अर्कक्षीरैः स्नुहीक्षीरैरातपे भावयेत् त्र्यहम् ।
तेन लिप्तार्कपत्रञ्च रुद्धा चान्तः पुटे पचेत् ॥
तत् क्षारं चूर्णयेत् पश्चात् त्र्यूषणत्रिफलारजः ।
जीरकं रजनी वह्निं नवभागं समं समम् ॥
क्षारार्द्धमेवं सर्व्वञ्च एकीकृत्य प्रयोजयेत् ।
वज्रक्षारमिदं सिद्धं स्वयं प्रोक्तं पिनाकिना ॥
सर्व्वोदरेषु गुल्मेषु शूलदोषेषु योजयेत् ।
अग्निमान्द्येऽप्यजीर्णेऽपि भक्ष्यं निष्कद्वयं दयम् ॥
वाताधिके जलं कोष्णं घृतं वा पैत्तिके हितम् ।
कफे गोमूत्रसंयुक्तमारनालं त्रिदोषजे ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे शोथाधिकारे ॥ *॥)

वज्रचर्म्मा, [न्] पुं, (वज्रवत् दुर्भेद्यं चर्म्म यस्य ।) खड्गी । गण्डकम् । इति राजनिर्घण्टः ॥

वज्रजित्, पुं, (वज्रं जयति तस्याघातसहनेनेति । जि + क्विप् । "ह्रस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) गरुड़ः । इति हेमचन्द्रः । २ । १४५ ॥

वज्रज्वाला, स्त्री (वज्रस्य ज्वाला ।) वज्राग्निः । इति हलायुधः ॥ (यथा, मात्स्ये । १२९ । १४ ।
"वज्रज्वालान्तरमयः शाल्मलश्चान्तरालकृत् ॥")

वज्रटीकः, पुं, (वज्रेण वज्रकपालेन टीकते प्रकाशते इति । टीक + कः ।) वज्रकपाली नामकबुद्धः । इति त्रिकाण्डशेषः ॥

वज्रतुण्डः, पुं, (वज्रं वज्रतुल्यं कठिनन्तुण्डं यस्य ।) गरुड़ः । गणेशः । इति त्रिकाण्डशेषः ॥ गृध्रः । मशकः । इति राजनिर्घण्टः ॥ (वज्रतुण्डधरे, त्रि । यथा, भागवते । ५ । २६ । ३५ ।
"यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्रकङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति ॥")

वज्रदन्तः, पुं, (वज्रमिव कठिना दन्ता यस्य ।) शूकरः । मूषिकः । इति शब्दमाला ॥

वज्रदशनः, पुं, (वज्रमिव कठिनं दशनमस्य ।) मूषिकः । इति हेमचन्द्रः । ४ । ३६६ ॥

वज्रद्रुः, पुं, (वज्रवारको द्रुः ।) स्नुहीवृक्षः । इत्यमरः ॥

वज्रद्रुमः, पुं, (वज्रवारको द्रुमः ।) स्नुहीवृक्षः । इति शब्दरत्नावली ॥ (तथास्य पर्य्यायः ।
"सेहुण्डः सिंहतुण्डः स्याद्वज्री वज्रद्रुमोऽपि च ।
सुधासमन्तदुग्धा च स्नुक्स्त्रियां स्यात् स्नुही गुड़ा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वज्रधरः पुं, (धरतीति । धृ + अच् । वज्रस्य धरः ।) इन्द्रः । इति हलायुधः ॥ (यथा, महाभारते । ३ । ११३ । २३ ।
"अरुन्धती वा सुभगा वशिष्ठं
लोपामुद्रा वापि यथा ह्यगस्त्यम् ।
नलस्य वा दमयन्ती यथाभूद्
यथा शची वज्रधरस्य चैव ॥")
जिनविशेषः । इति त्रिकाण्डशेषः ॥ (वल्लापुराधिपतिराजविशेषः । यथा, राजतरङ्गिण्याम् । ८ । ५४० ।
"उपरागे नवे सर्व्वे पार्व्वतीयास्त्रयो नृपाः ।
चाम्पेयो जासटो वज्रधरो वल्लापुराधिपः ॥")

वज्रनिर्घोषः, पुं, (वज्रस्य निर्घोषः ।) वज्रजनितशब्दः । इति हलायुधः ॥

वज्रनिष्पेषः, पुं, (वज्राणां निष्पेषः संघर्षध्वनिः ।) वज्रनिर्घोषः । तत्पर्य्यायः । स्फूर्जथुः २ । इत्यमरः । १ । ३ । १० ॥ "द्वे वज्रजनितशब्दे । अन्योन्यसंघट्टनात् भग्नं साग्निमेघखण्डं वज्रमिव वज्रं तस्य साटोपध्वनौ द्वयमिति केचित् ॥ द्वे स्फूर्ज्जौ वज्रनिष्पेषे । निष्पेषः संघट्टध्वनिः । अशन्याघात इत्येके । निष्पेषग्रहणेन साटोपध्वनिश्च इह तु ध्वनिरभिप्रेतः । श्रुत्वा विस्फूर्जथुप्रख्यं निनादं परिदेविनीति भट्टिः । ट्वितोऽथुरिति अथुः निपातनात् दीर्घः । स्फूर्जेरथुरिति दीर्घार्थं परसूत्रम् । केचित्तु दीर्घं नेच्छन्ति । केचिद्विभाषया दीर्घमिच्छन्ति । वज्रस्य निष्पेषो वज्रनिष्पेषः धौ पिष ऌ चूर्णने घञ् । निष्पेषो द्विमूर्द्धन्यः ।" इति भरतः ॥

वज्रपाणिः, पुं, (वज्रं पाणौ यस्य ।) इन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ।६।१६।७।
"एष व्यूहामि ते व्यूहं राजसत्तम दुर्ज्जयम् ।

अचलं नाम वज्राख्यं विहितं वज्रपाणिना ॥”
ब्राह्मणः । यथा, महाभारते । १ । १७१ । ५१ ।
“वज्रपाणिर्ब्राह्मणः स्यात् क्षत्रं वज्ररथं स्मृतम् ।
वैश्या वै दानवज्राश्च कर्म्मवज्रा यवीयसः ॥”)

वज्रपुष्पं, क्ली, (वज्रमिव पुष्पम् ।) तिलपुष्पम् । इत्यमरः । २ । ४ । ७६ ॥

वज्रपुष्पा, स्त्री, (वज्रमिव पुष्पं यस्याः ।) शतपुष्पा । इति राजनिर्घण्टः ॥

वज्रबीजकः, पुं, (वज्रमिव कठिनं बीजमस्य । कप् ।) लताकरञ्जः । इति राजनिर्घण्टः ॥

वज्रमूली, स्त्री, (वज्रमिव कठिनं मूलं यस्याः । ङीष् ।) माषपर्णी । इति राजनिर्घण्टः ॥ (विवरणमस्या माषपर्णीशब्दे ज्ञातव्यम् ॥)

वज्ररथः, पुं, (वज्रमिव रथो यस्य ।) क्षत्त्रियः । इति पुराणम् ॥ (यथा, महाभारते ।१।१७१।५१।
“वज्रपाणिर्ब्राह्मणः स्यात् क्षत्त्रं वज्ररथं स्मृतम् ॥”)

वज्ररदः, पुं, (वज्रमिव रदोऽस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥ वज्रतुल्यदन्तस्य ॥

वज्रवल्ली, स्त्री, (वज्रमिव कठिना वल्ली ।) अस्थिसंहारलता । इति हारावली ॥

वज्रवाराही, स्त्री, मायादेवी । तत्पर्य्यायः । मारीची २ त्रिमुखा ३ वज्रकालिका ४ विकटा ५ गौरी ६ पोत्रिरथा ७ । इति त्रिकाण्डशेषः ॥

वज्रवृक्षः, पुं, (वज्रनिवारको वृक्षः ।) सेहुण्डवृक्षः । इति राजनिर्घण्टः ॥ (तथास्यान्यः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
“स्नुही स्नुक् च महावृक्षो वज्रवृक्षः सुधागुडा ॥”)

वज्रशल्यः, पुं, (वज्रमिव कठिनं शल्यं गात्रलोमशलाका यस्य ।) शल्यकनामा जन्तुः । इति राजनिर्घण्टः ॥

वज्रशृङ्खला, स्त्री, (वज्रवत् शृङ्खलं यस्याः ।) विद्यादेवी । इति हेमचन्द्रः । २ । १५३ ॥

वज्रसूर्य्यः, पुं, (अतिसारवत्त्वात् वज्रमिव तेजस्वित्वात् सूर्य्य इव च ।) बुद्धविशेषः : इति त्रिकाण्डशेषः ॥

वज्रा, स्त्री, (वजति गच्छतीति । वज गतौ + “ऋज्रेन्द्रेति ।” उणा० २ । २८ । इति रक् । टाप् ।) स्नुहीवृक्षः । गुडूची । इति मेदिनी । रे, ८१ ॥ दुर्गा । यथा,—
“वज्राङ्कुशकरी देवी वज्रा तेनोपगीयते ॥”
इति देवीपुराणे ४५ अध्यायः ॥

वज्राङ्गः, पुं, (वज्रमिव अङ्गं यस्य ।) सर्पः । इति राजनिर्घण्टः ॥ वक्राङ्ग इति वा पाठः । वज्रतुल्याङ्गयुक्ते, त्रि ॥

वज्राङ्गी, स्त्री, (वज्रमिव अङ्गं यस्याः । ङीष् ।) गवेधुका । इति शब्दचन्द्रिका ॥ अस्थिसंहारी । इति भावप्रकाशः ॥

वज्राभः, पुं, (वज्रस्य हीरकस्य आभा इव आभा यस्य ।) दुग्धपाषाणः । इति राजनिर्घण्टः ॥ हीरकतुल्यदीप्तिमति, त्रि ॥

वज्राशनिः, पुं, वज्रम् । इति त्रिकाण्डशेषः ॥

वज्रास्थिशृङ्खला, स्त्री, कोकिलाक्षवृक्षः । इति राजनिर्घण्टः ॥

वज्री, [न्] पुं, (वज्रोऽस्यास्तीति । वज्र + “अत इनिठनौ ।” ५ । २ । ११५ । इति इनिः ।) इन्द्रः । इत्यमरः । १ । १ । ४५ ॥ (यथा, रघुः । ६ । २४ ।
“यमकुबेरजलेश्वरवज्रिणां
समधुरं मधुरञ्चितविक्रमम् ॥”)
बुद्धः । इति मेदिनी । ने, १२६ ॥ (वज्रविशिष्टे, त्रि । यथा, महाभारते । १३ । १४ । ३८१ ।
“पिनाकिनं वज्रिणं तीक्ष्णदंष्ट्रं
शुभाङ्गदं व्यालयज्ञोपवीतम् ॥)

वज्री, स्त्री, (वज् + रक् । गौरादित्वात् ङीष् ।) स्नुहीभेदः । इति मेदिनी । रे, ८१ ॥ (तथास्याः पर्य्यायः ।
“सेहुण्डः सिंहतुण्डः स्याद्वज्री वज्रद्रुमोऽपि च ।
सुधासमन्तदुग्धा च स्नुक् स्त्रियां स्यात् स्नुहीगुडा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वञ्चकः, पुं, (वञ्चयते प्रतारयतीति । वञ्च + णिच् + ण्वुल् ।) शृगालः । इत्यमरः ॥ गृहबभ्रुः । इति मेदिनी । के, १५४ ॥

वञ्चकः, त्रि, (वञ्चयते इति । वञ्च + णिच् + ण्वुल् ।) खलः । धूर्त्तः । इति मेदिनी । के, १५४ ॥ (यथा, कलाविलासे । १ । ३९ ।
“शृणु पुत्त्र वञ्चकानां सकलकलाहृदयसारमतिकुटिलम् ।
ज्ञाते भवन्ति यस्मिन् चारुचिचपलाः श्रियोऽप्यचलाः ॥”)

वञ्चथः, पुं, (वञ्चति प्रतारयतीति । वञ्च + “शीङ्शपीति ।” उणा० ३ । ११३ । इति अथः ।) धूर्त्तः । इत्युणादिकोषः ॥ वञ्चना । कोकिलः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वञ्चनं क्ली, (वञ्च + भावे ल्युट् ।) प्रतारणम् । इति हेमचन्द्रः । ३ । ४३ ॥ तस्य गोपनीयत्वम् । यथा,—
“वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत् ॥”
इति चाणक्यसंग्रहः ॥

वञ्चना, स्त्री, (वञ्च् + णिच् + युच् + टाप् ।) प्रतारणा । यथा,—
“ते कान्तं मुनयो दिशः प्रेक्ष्य हैमवतं पुरम् ।
स्वर्गाभिसन्धि सुकृतं वञ्चनामिव मेनिरे ॥”
इति कुमारसम्भवे । ६ । ४७ ॥

वञ्चितः, त्रि, (वञ्च्यते स्मेति । वञ्च + णिच् + क्तः ।) वञ्चनाविशिष्टः । प्रतारितः । तत्पर्य्यायः । विप्रलब्धः २ । इति हेमचन्द्रः । ३ । १०६ ॥ (यथा, कुमारे । ४ । १० ।
“विधिना जन एष वञ्चित-
स्त्वदधीनं खलु देहिनां सुखम् ॥”)

वञ्चुकः, त्रि, (वञ्चति प्रतारयतीति । वञ्च + उकञ् ।) प्रतारणशीलः । तत्पर्य्यायः । धूर्त्तः २ वञ्चकः ३ । इति शब्दरत्नावली ॥

वञ्च्यं, त्रि, (वञ्च् + ण्यत् । “वञ्चेर्गतौ ।” ७ । ३ । ६३ । इति कुत्वं न ।) गमनीयम् । इति गत्यर्थवञ्चधातोः कर्म्मणि घ्यण्प्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥

वञ्जुलः, पुं, (वजतीति । वज गतौ + बाहुलकात् । उलच् नुमच ।) तिनिशवृक्षः । (तथास्य पर्य्यायः ।
“तिनिशः स्यन्दनो नेमी रथद्रुर्वञ्जुलस्तथा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अशोकवृक्षः । इत्यमरः । २ । ४ । ७७ ॥ स्थलपद्मवृक्षः । इति शब्दरत्नावली ॥ पक्षिविशेषः । इति हलायुधः ॥ वेतसवृक्षः । इति मेदिनी । ले, १२९ ॥ (अस्य पर्य्यायो यथा,—
“वेतसो नम्रकः प्रोक्तो वानीरो वञ्जुलस्तथा ।
अभ्रपुष्पश्च विदुलो ह्यथ शीतश्च कीर्त्तितः ॥”
इति भावप्रकाशः ॥
यथा च रामायणे । ६ । ४ । ७९ ।
“चिरबिल्वा मधूकाश्च वञ्जुला वकुलास्तथा ॥”)

वञ्जुलद्रुमः, पुं, (वञ्जुलो द्रुमः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (वेतसवृक्षादिरपि तदर्थे वञ्जुलशब्ददर्शनात् ॥)

वञ्जुलप्रियः, पुं, (वञ्जुलस्य प्रियः । वञ्जुलः प्रियश्चेति कर्म्मधारयो वा ।) वेतसवृक्षः । यथा,
“विदुलो वेतसः शीतो वानीरो वञ्जुलप्रियः ॥”
इति रत्नमाला ॥

वञ्जुला, स्त्री, (वञ्जुल + टाप् ।) बहुदुग्धा गौः । इति हेमचन्द्रः । ४ । ३३५ ॥ (नदीविशेषः । यथा, मात्स्ये । ११३ । २९ ।
“गोदावरी भीमरथी कृष्णवेणी च वञ्जुला ।
तुङ्गभद्रा सुप्रयोगा बाह्या कावेरी चैव तु ।
दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृताः ॥”)

वट, वेष्टे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) वटति वृक्षं लता । इति दुर्गादासः ॥

वट, इ स्तेये । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । इदित् ।) इ, वण्टकः । इति दुर्गादासः ॥

वट, इ कि वण्टने । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) वण्टनं विभागः । इ, वण्ट्यते । कि, वण्टयति वण्टति । वण्टन्ति हाटकं यस्मात् प्राप्य विप्राः परस्परम् । इति हलायुधः । अयं चुरादौ केश्चिन्न पठ्यते । इति दुर्गसिंहादयः । इति दुर्गादासः ॥

वट, त् क वेष्टे । भागे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) वटयति । इति दुर्गादासः ॥

वट, म उक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) म, वटयति । इति दुर्गादासः ॥

वटः, पुं, (वटति वेष्टयति मूलेन वृक्षान्तरमिति ।) वट + पचाद्यच् ।) वृक्षविशेषः । वड़गाछ इति भाषा । तत्पर्य्यायः । न्यग्रोधः २ बहुपात् ३ । इत्यमरः । २ । ४ । ३२ ॥ वृक्षनाथः ४ यमप्रियः ५ । इति शब्दरत्नावली ॥ रक्तफलः ६ शृङ्गी ७ कर्म्मजः ८ ध्रुवः ९ क्षीरी १० वैश्रवणावासः ११ भाण्डीरः १२ । इति जटाधरः ॥ जटालः १३ रोहिणः १४ अवरोही १५ विटपी १६ स्कन्धरुहः १७ मण्डली १८ महाच्छायः १९ भृङ्गी २० यक्षावासः २१ यक्षतरुः २२ पादरोहणः २३ नीलः २४ शिफारुहः २५ बहुपादः २६ वनस्पतिः २७ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । शिशिरत्वम् । कफपित्तज्वरदाहतृष्णामोहव्रणशोफनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः । वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत् ॥"

इति भावप्रकाशः ॥ * ॥

स च रुद्रस्वरूपः । यथा,—

ऋषय ऊचुः ।

"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ । सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ ॥

सूत उवाच ।

अश्वत्थरूपी भगवान् विष्णुरेव न संशयः । रुद्ररूपी वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥ दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः । दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम् ॥"

इति पाद्मोत्तरखण्डे १६० अध्यायः ॥

अन्यत् पलाशशब्दे द्रष्टव्यम् ॥*॥ कपर्द्दः । इति मेदिनी । टे, २४ ॥ कड़ि इति भाषा ॥ गोलः । भक्ष्यम् । वड़ा इति भाषा । साम्यम् । इति हेमचन्द्रः ॥ * ॥ क्ली, व्रजमण्डलाभ्यन्तरीणवटसंज्ञकषोड़शवनानि यथा । अथैषां वटसाङ्गवनानामभ्यन्तरे सङ्केतवटाद्या यमुनायाश्चतुरशीतिक्रोशमर्य्यादान्तरे दक्षिणोत्तरतटयोः षोड़शवनानि । पाद्मे ।

"सङ्केतवटमादौ तु भाण्डीराख्यं वटं द्वयम् । यावकाख्यं तृतीयञ्च वटं शृङ्गारसंज्ञकम् ॥ तुर्य्यं वंशिवटं श्रेष्ठं पञ्चमं श्रीवटञ्च षट् । सप्तमञ्च जटाजूटं कामाख्यवटमष्टकम् ॥ मनोऽर्थवटकं नाम नवमं परिकीर्त्तितम् । आशावटं महाश्रेष्ठं दशमं शुभदायकम् ॥ अशोकाख्यं वटं श्रेष्ठमेकादशमुदाहृतम् । नाम केलिवटं श्रेष्ठं द्वादशं परिकीर्त्तितम् ॥ नाम ब्रह्मवटञ्चैव त्रयोदशमसंज्ञकम् । नाम रुद्रवटं श्रेष्ठं चतुर्द्दशमुदाहृतम् ॥ श्रीधराख्यं वटं ख्यातं पञ्चदशसमीरितम् । सावित्राख्यं वटं श्रेष्ठं संख्याषोड़शनिर्म्मितम् ॥"

इति व्रजमण्डलान्तरे षोड़शवटानि । इति नारायणभट्टकृतव्रजभक्तिविलासः ॥ * ॥

वटः, त्रि, (वटतीति । वट् + अच् ।) गुणः । इति मेदिनी । टे, २४ ॥ वेटे इति भाषा ॥

वटकः, पुं, (वट एव । स्वार्थे कन् ।) पिष्टकविशेषः । इत्यमरभरतौ ॥ वड़ा इति भाषा । अस्य गुणाः । विदाहित्वम् । तृष्णाकारित्वञ्च । इति राजवल्लभः ॥ अपि च ।

"माषाणां पिष्टिकां युक्तां लवणार्द्रकहिङ्गुभिः । कृत्वा विदध्याद्वटकांस्तांस्तैलेषु पचेच्छनैः ॥ विशुष्का वटका बल्या वृंहणा वीर्य्यवर्द्धनाः । वातामयहरा रुच्या विशेषाददितापहाः ॥ विबन्धभेदिनः श्लेष्मकारिणोऽत्यग्निपूजिताः । संचूर्ण्य निक्षिपेत्तक्रे भृष्टं जीरकहिङ्गु च ॥ लवणं तत्र वटकान् सकलानपि मज्जयेत् । शुक्लस्तत्र वटको बलकृद्रोचनो गुरुः ॥ विबन्धकृद्विदाही च श्लेष्मलः पवनापहः । राज्यक्तयातिरोचिन्या पाचन्या तांस्तु भक्षयेत् ॥

तत्प्रकारा यथा ।

कदलसुमनमाषक्षोदसन्मोरिशस्ते-र्म्मरिचसुघनदुग्धैः सचतुर्ज्जातचन्द्रैः । कृत इह घृतपक्वो यः पतेत् खण्डपाके वटकमन्दतकेलिं सा यधात्तं प्रियेष्टम् ॥ १ ॥

सामिचैः शालिचूर्णैर्दधिमरिचसितानारिकेलार्द्रशस्तै-र्जातीलासलवङ्गाम्रतकदलफलैः फेणितैः पिष्टसङ्गैः । दृष्टः पक्वो घृते यः प्रपतति समधौ दुग्धपूरे प्रगाढ़े सिन्दौ कर्पूरकेलिं तमिह सुवटकं सा यधात् स्वप्रियेष्टम् ॥ २ ॥

ग्रन्थिवद्वटिकालिस्तैर्द्रव्यैः सृष्टा तु या पतेत् । पचाम्रते यधात्तां सा पीयूषग्रन्थिपालिकाम् ॥३

घनीरसारशशितखण्डलनारिकेल-
जातीलवङ्गमरिचैः ससितैः सुपिष्टैः ।
रम्भेलया च घृतभावनया भवेद्या
सा तामनङ्गगुटिकां विदधे प्रियेष्टाम् ॥४॥
कदलमरिचदुग्धैः खण्डगोधूमपक्व-
प्रकटितवटकोऽयं भूरिजातीफलाढ्यः ।
नवविधुमधुमध्ये यो विलासं विधत्ते
रचित इह तयासौ सीधुपूर्व्वो विलासः ॥५॥

लवङ्गेन्दुमरिचैः संयुतैः शर्कराचयैः । चक्रे गङ्गाजलाख्यानि लड्डुकान्यपराणि च ॥६ तैस्तैर्युतैः क्षीरसारैस्तथा लाङ्गलिशस्यकैः । अन्यान्यप्यान्यसंभृष्टैः सा रसैः सरपूपिका ॥"७

इति रघुनाथभट्टकृते गोविन्दलीलामृते १९ सर्गः ॥ * ॥ अथाम्लिकावटकः ।

"अम्लिकां स्वेदयित्वा तु जलेन सह मर्द्दयेत् । तन्नीरे कृतसंस्कारे वटकान् मज्जयेत्ततः ॥ अम्लिकावटकास्ते तु रुच्या वह्निप्रदीपनाः । वटकस्य गुणैः पूर्व्वैरेतेऽपि च समन्विताः ॥*॥

अथ तक्रवटकः ।

सुद्गानां वटकास्तक्रे मज्जिता लघवो हिमाः । संस्कारजप्रभावेण त्रिदोषशमना हिताः ॥*॥

अथ माषवटकः ।

माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंस्कृता । तया विरचिता वस्त्रे वटिकाः साधु शोषिताः ॥ तालितास्तप्ततैले ता अथवा सुप्रलेहिताः । वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम् ॥*

अथ कुष्माण्डवटिः ।

कुष्माण्डकवटी ज्ञेया पूर्व्वोक्तवटिकागुणा । विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ॥

अथ मुद्गवटिका ।

मुद्गानां वटिका तद्वद्रचिता साधिता तथा । पथ्या रुच्या तथा लघ्वी मुद्गसूपगुणा स्मृता ॥"

इति भावप्रकाशः ॥*॥

(वटी । वड़ि इति भाषा ॥ यथा,—

"वटका अथ कथ्यन्ते तन्नाम गुटिका वटी । मोदको वटिका पिण्डी गुड़ोवर्त्तिस्तथोच्यते ॥ लेहवत् साध्यते वह्नौ गुड़ो वा शर्करायवा । गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्म्मिता वटी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

यथा च ।

"मण्डूरं चूर्णयेत्सूक्ष्मं गोमूत्रेऽष्टगुणे क्षिपेत् । पक्त्वा च वटकं कृत्वा दद्यात्तक्रानुपानतः ॥"

इति शार्ङ्गधरे मध्यखण्डे सप्तमेऽध्याये मण्डूरवटके ॥ * ॥) अष्टमाषकपरिमाणम् । यथा,—

"दशगुञ्जास्तु माषः स्यात् शाणो माषचतुष्टयम् । द्वौ शाणौ वटकः कोलस्तोलको द्रङ्क्षणश्च सः ॥"

इति शब्दमाला ॥

(तथा च ।

"माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते । टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते । क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥"

इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥)

वटपत्रः, पुं, (वटस्येव पत्रं यस्य ।) सितार्जकः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।

"बर्ब्बरी तुवरी तुङ्गी खरपुष्पाजगन्धिका । पर्णासस्तत्र कृष्णे तु कठिञ्जककुठेरकौ ॥ तत्र शुक्लोऽर्ज्जकः प्रोक्तो वटपत्रस्ततोऽपरः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वटपत्रा, स्त्री, (वटस्येव पत्रमस्याः ।) त्रिपुरमालीपुष्पवृक्षः । इति रत्नमाला ॥

वटपत्री, स्त्री, (वटस्येव पत्रं यस्याः । गौरादित्वात् ङीष् ।) पाषाणभेदीविशेषः । तत्पर्य्यायः । इरावती २ ऐरावती ३ गोधावती ४ दरावती ५ श्यामा ६ खड्गाङ्गनामिका ७ । अस्याः गुणाः । हिमत्वम् । शीतत्वम् । मेहकृच्छ्रविनाशित्वम् । बलदातृत्वम् । प्रशस्तत्वम् । किञ्चिद्दीपनकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"वटपत्री तु कथिता मोहिन्यैरावती बुधैः । वटपत्री कषायोष्णा योनिमूत्रगदापहा ॥"

इति भावप्रकाशः ॥

वटरः, पुं, कुक्कुटः । वेष्टः । शठः । चौरः । चपलः । इति शब्दरत्नावली ॥

वटवासी [न्] पुं, स्त्री, (वटे वटवृक्षे वसतीति । वस् + णिनिः ।) यक्षः । इति हेमचन्द्रः । २ १०८ ॥ वटवृक्षवासकर्त्तरि, त्रि ॥

वटाकरः, पुं, रज्जुः। इत्यमरटीकायां रामाश्रमः॥

वटारका, स्त्री, रज्जुः। दड़ि इति वेटे इति च भाषा। इति पुराणम्॥ (यथा, महाभारते। १२। ३२६। ३६।
"चत्वारिंशां सत्यमयीं धर्म्मस्थैर्य्यवटारकाम्॥"
पुंलिङ्गोऽप्ययं शब्दः। यथा, महाभारते। ३। १८७। ४०।
"वटारकमयं पाशमथ मत्स्यस्य शृङ्गिनि।
मनुर्मनुजशार्द्दूल! तस्मिन् शृङ्गे न्यवेशयत्॥")

वटावीकः, पुं, चौरविशेषः। यथा,—
"नामचौरो वटावीकः सन्धिचौरस्तु हारकः॥"
इति शब्दमाला॥

वटिः, स्त्री, (वटतीति। वट + "सर्व्वधातुभ्य इन्।" उणा० ४। ११८। इति इन्।) उपजिह्विका। यथा,—
"उपजिह्विकोत्पादिका च वटिरुद्देहिका देवी॥"
इति हारावली। ११०॥

वटिका, स्त्री, (वटिरेव। स्वार्थे कन्। टाप्।) वटी। वड़ी इति भाषा। तत्पर्य्यायः। निस्तली २। इति शब्दचन्द्रिका॥ अथ वटिकाविधिः।
"वटका अथ कथ्यन्ते तन्नामा वटिका वटी।
मोदको गुटिका पिण्डी गुड़ो वर्त्तिस्तथोच्यते॥
लेहवत् साध्यते वह्नौ गुड़ो वा शर्कराथवा।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्म्मिता वटी॥"
तत्र वह्निसिद्धे गुड़ादौ।
"कुर्य्यादवह्निसिद्धेन क्वचिद्गुग्गुलुना वटीम्।
द्रवेण मधुना वापि गुटिकां कारयेद्बुधः॥
सिता चतुर्गुणा देया वटीषु द्विगुणो गुड़ः।
चूर्णे चूर्णसमः कार्य्यो गुग्गुलुर्म्मधु तत्समम्॥"
तत्समं चूर्णसमम्।
"द्रवन्तु द्विगुणं देयं मोदकेषु भिषग्वरैः॥"
द्रवं चतुर्गुणमिति वा पाठः। द्रवं द्रवरूपं द्रव्यम्।
"कर्षप्रमाणा तन्मात्रा बलं दृष्ट्वा प्रयुज्यते।
बलमिति कालादेरप्युपलक्षणम्। इति भावप्रकाशः॥ *॥ व्यञ्जनोपयोगिद्रव्यम्। अस्यापि वड़ी इति भाषा। यथा,—
"माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंस्कृता।
तया विरचिता वस्त्रे वटिकाः साधु शोषिताः॥
तालितास्तप्ततैले ता अथवा सुप्रवेशिताः।
वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम्॥
कुष्माण्डकवटी ज्ञेया पूर्व्वोक्तवटिकागुणा।
विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः॥
मुद्गानां वटिका तद्वद्रचिता साधिता तथा।
पथ्या रुच्या ततो लघ्वी मुद्गसूपगुणा स्मृता॥"
इति भावप्रकाशः॥

वटी, स्त्री, (वट् + अच्। गौरादित्वात् ङीष्।) वटिका। इति भावप्रकाशः॥ वृक्षविशेषः। तत्पर्य्यायः। नदीवटः २ यक्षवृक्षः ३ सिद्धार्थः ४ वटकः ५ अमरा ६ भङ्गिनी ७ चीरकाष्ठा ८। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। शिशिरत्वम्। पित्तनाशित्वम्। दाहतृष्णाश्रमश्वासविषच्छर्द्दिशमनत्वञ्च। इति राजनिर्घण्टः॥

वटी, त्रि, रज्जुः। इत्यमरः। २। १०। २७॥

व(ब)टुः, पुं, (वटतीति। वट् + "कटिवटिभ्याञ्च।" उणा० १। ६। इति उः।) माणवकः। यथा,—
"वटुः पुनर्म्माणवको भिक्षास्य ग्रासमात्रकम्॥"
इति हेमचन्द्रः॥
ब्रह्मचारी। यथा। वटुर्व्वर्णी ब्रह्मचारी। इति शब्दरत्नावली॥ (यथा, महाभारते। १। १८६। १५।
"तस्माद्भवन्तु सर्व्वेऽत्र वटुरेष धनुर्म्महान्।
आरोपयतु शीघ्रं वै तथेत्यूचुर्द्विजर्षभाः॥")
कुटन्नटवृक्षः। यथा,—
"मण्डूकपर्णः श्योणाकः शुकनासः कुटन्नटः।
ऋक्षो वटुर्दीर्घवृन्तो दीर्घवृन्तक इत्यपि॥"
इति च शब्दरत्नावली॥
बालकः। यथा,—
"बालको माणवो बालः किशोरो वटुरित्यपि॥"
इत्यपि शब्दरत्नावली॥

वटुकः, पुं, (वटु + स्वार्थे संज्ञायां वा कन्।) बालकः। इति शब्दरत्नावली॥ (यथा, पाद्मे सृष्टिखण्डे शीतलषष्ठीव्रतकथायाम्।)
"कुमारीवटुकान् पूज्य तथा शैवतपोधनान्।
राजसूयफलं तेन प्राप्यते नात्र संशयः॥"
ब्रह्मचारी। यथा, भागवते। १०। ८८। २७।
"तं तथा व्यसनं दृष्ट्वा भगवान् वृजिनार्द्दनः।
दूरात् प्रत्युदियाद्भूत्वा वटुको योगमायया॥")
भैरवविशेषः। (यथा, महानिर्व्वाणतन्त्रे। २। २४।
"भैरवाश्चैव वेताला वटुका नायिकागणाः।
शाक्ताः शैवा वैष्णवाश्च सौरा गाणपतादयः॥")
अस्य मन्त्रादिर्यथा,—
"उद्धरेद्वटुकं ङेऽन्तमापदुद्धारणं तथा।
कुरुद्वयं पुनर्ङेऽन्तं वटुकञ्च समुद्धरेत्।
एकविंशत्यक्षरात्मा शक्तिरुद्धो महामनुः॥"
अस्य पूजा। प्रातःकृत्यादिप्राणायामान्तं विधाय पीठन्यासं कुर्य्यात्। यथा। धर्म्मादि-अनैश्वर्य्यान्तं देहे विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। यथा शिरसि ॐ बृहदारण्यकऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि वटुकभैरवाय देवतायै नमः। ततो मूर्त्तिन्यासः। ह्रौं वौं ईशानाय नमोऽङ्गुष्ठयोः। ह्रैं वैं तत्पुरुषाय नमस्तर्ज्जन्योः। ह्रुं वुं अघोराय नमो मध्यमयोः। ह्रिं विं वामदेवाय नमोऽनामिकयोः। ह्रं वं सद्योजाताय नमः कनिष्ठयोः। पुनस्तत्तदङ्गुलीभिः शिरोवदनहृद्गुह्यपादेषु तत्तद्बीजादिकास्तत्तन्मूर्त्तीर्न्यसेत्। तयोर्द्ध्वप्रागदक्षिणोदीच्यपश्चिमेषु मुखेषु च तान् न्यसेत्। तथा च निबन्धे।
"अङ्गुलीदेहवक्त्रेषु मूर्त्तीर्न्यसेद्यथा पुरा।
सद्यादिपञ्चह्रस्वाढ्यशक्तिबीजपुरःसरम्।
वकारं पञ्चह्रस्वाढ्यमीशानादिषु योजयेत्॥"
ततः कराङ्गन्यासौ। तद्यथा ॐ ह्रां वां अङ्गुष्ठाभ्यां नम इत्यादि। ॐ ह्रां वां हृदयाय नम इत्यादि च। षड्दीर्घबीजद्वयेन कुर्य्यात्। तथा च निबन्धे।
"षड्दीर्घयुक्तया शक्त्या वकारेणापि तद्वता।
अङ्गानि जातियुक्तानि प्रणवाद्येन कल्पयेत्॥"
ततो ध्यानम्।
"तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः॥"
सात्त्विकम्। यथा,—
"वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिवक्त्रं
दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानम्॥" १॥
राजसं यथा,—
"उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः।
नीलग्रीवमुदारभूषणशतं शीतांशुचूड़ोज्ज्वलं
बन्धूकारुणवाससं भयहरं देवं सदा भावये॥" २॥
तामसं यथा,—
"ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुण्डमालं महेशं
दिग्वस्त्रं पिङ्गकेशं डमरुमथ सृणिं खड्गशूलाभयानि।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणीनूपुराढ्यम्॥" ३॥
"सात्त्विकं ध्यानमाख्यातमपमृत्युविनाशनम्।
आयुरारोग्यजननमपवर्गफलप्रदम्॥ १॥
राजसं ध्यानमाख्यातं धर्म्मकामार्थसिद्धिदम्। २।
तामसं शत्रुशमनं कृत्याभूतगदापहम्॥" ३॥
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्॥ *॥ अस्य पूजायन्त्रम्।
"धर्म्माधर्म्मादिभिः कॢप्तपीठे पङ्कजशोभिते।
षट्कोणान्तस्त्रिकोणस्थे व्योमपङ्कजसंयुते॥"
ततो मूलेन मूर्त्तिं सङ्कल्प्य पूर्व्ववत् ध्यात्वावाहनादिकं कुर्य्यात्। तत्र क्रमः। मूलेन सद्योजातमन्त्रेणावाहनम्। मूलादिवामदेवेन स्थापनम्। मूलेन सान्निध्यम्। अघोरेण सन्निबोधनम्। तत्पुरुषेण योनिमुद्राप्रदर्शनम्। ईशानेन वन्दनमिति विशेषः। ततः कर्णिकायां दिक्षु कोणेषु ईशानादीन् यजेत्। ततो व्योमपङ्कजदलेषु असिताङ्गादिभैरवान् यजेत्।
"असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तौ च भैरवौ।
कपाली भीषणश्चैव संहारोऽष्टौ च भैरवाः॥"
एतैरष्टभैरवैर्द्वितीयावरणम्। ततः षट्कोणेषु ह्रां वां हृदयाय नम इत्यनेन पूजयेत्।

ततः पूर्व्वादिडाकिनीराकिणीलाकिनीकाकिनी-शाकिनीहाकिनीमालिनीपुत्रान् देवीपुत्रान् उमापुत्रान् रुद्रपुत्रान् मातृकापुत्रान् दशदिक्षु यजेत्। ऊर्द्ध ऊर्द्धमुखीपुत्रान् अधोऽधोमुखी-पुत्रान्। तद्बहिरष्टपत्रेषु लोकेशान् वटुक-रूपान् पूजयेत्। तद्बहिः पूर्व्वे ॐ ब्रह्माणी-पुत्राय नमः। एवमीशाने माहेश्वरीपुत्राय। उत्तरे वैष्णवीपुत्राय। अनिले कौमारीपुत्राय। पश्चिमे इन्द्राणीपुत्राय। नैरृते महालक्ष्मी-पुत्राय। याम्ये वाराहीपुत्राय। अनले चामुण्डापुत्राय। तथा च निबन्धे।

"ब्रह्माणीपुत्रकं पूर्व्वे माहेशीपुत्रमैश्वरे।
वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमानिले॥
इन्द्राणीपुत्रकं भूयः पश्चिमे पूजयेत्ततः।
महालक्ष्मीसुतं पश्चाद्रक्षोदिशि समर्च्चयेत्।
वाराहीपुत्रकं याम्ये चामुण्डापुत्रमानले॥"

तद्बहिर्द्दशदिक्षु च। हेतुकं त्रिपुरान्तकं वेतालं वह्निजिह्वं करालं कालान्तकं एकपादं भीम-रूपं अचलं हाटकेश्वरं पूजयेत्। ततो योगिनीसहितदिव्ययोगीशाय नमः। एवं योगिनीसहितान्तरीक्षयोगीशाय नमः। एवं योगिनीसहितभूमिस्थयोगीशाय नमः। ईशा-नाग्निनिरृतिषु पूजयेत्॥ *॥ अस्य पुर-श्चरणमेकविंशतिलक्षजपः।

"वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः।
तद्दशांशं प्रजुहुयात्तिलैर्मधुरसंयुतैः॥"*॥

अथ बलिदानम्।

"पूर्व्वं विघ्नं दुर्गां समाराध्य बलिं दद्यात्।
शाल्यन्नं पललं सर्पिर्लाजचूर्णानि शर्करा॥
गुड़मिक्षुरसापूपैर्मध्वक्तैः परिमिश्रितैः।
कृत्वा कवलमाराध्य देवं प्रागुक्तवर्त्मना।
रक्तचन्दनपुष्पाद्यैर्निशि तस्मै बलिं हरेत्॥"

यद्वा।

"अन्यूनाङ्गमलं हत्वा राजसं प्रागुदीरितम्।
बलिप्रदानसमये रिपूणां सर्व्वसैन्यकम्।
निवेदयेद्बलित्वेन वटुकाय विशिष्टधीः॥
विदर्भयेच्छत्रुनाम्ना बलिमन्त्रं तथा सुधीः।
शत्रुपक्षस्य रुधिरं पिशितञ्च दिने दिने॥
भक्षयस्व गणैः सार्द्धं सारमेयसमन्वितः।
बलिमन्त्रोऽयमाख्यातः सर्व्वेषां विजयप्रदः॥
अनेन बलिना हृष्टो वटुकः परसैन्यकम्।
सर्व्वं गणेभ्यो विभजेच्चामिष क्रुद्धमानसः॥
एवं कृते परबलं क्षीयते नात्र संशयः॥"

इति तन्त्रसारः॥*॥

अथ वटुकभैरवस्तोत्रम्।

"कैलासशिखरासीनं देवदेवं जगद्गुरुम्।
शङ्करं परिपप्रच्छ पार्व्वती परमेश्वरम्॥

श्रीपार्व्वत्युवाच।

भगवन् सर्व्वधर्म्मज्ञ सर्व्वशास्त्रागमादिषु।
आपदुद्धारणं मन्त्रं सर्व्वसिद्धिप्रदं नृणाम्॥
सर्व्वेषाञ्चैव भूतानां हितार्थं वाञ्छितं मया।
विशेषतस्तु राज्ञां वै शान्तिपुष्टिप्रसाधनम्॥
अङ्गन्यासकरन्यासबीजन्याससमन्वितम्।
वक्तुमर्हसि देवेश मम हर्षविवर्द्धनम्॥

श्रीभगवानुवाच।

शृणु देवि महामन्त्रमापदुद्धारहेतुकम्।
सर्व्वदुःखप्रशमनं सर्व्वशत्रुनिवर्हणम्॥
अपस्मारादिरोगाणां ज्वरादीनां विशेषतः।
नाशनं स्मृतिमात्रेण मन्त्रराजमिमं प्रिये॥
ग्रहराजभयानाञ्च नाशनं सुखवर्द्धनम्।
स्नेहाद्वक्ष्यामि ते मन्त्रं सर्व्वसारमिमं प्रिये॥
सर्व्वकामार्थदं मन्त्रं राज्यभोगप्रदं नृणाम्।
प्रणवं पूर्व्वमुच्चार्य्य देवी प्रणवमुद्धरेत्॥
वटुकायेति वै पश्चादापदुद्धारणाय च।
कुरुद्वयं ततः पश्चाद्वटुकाय पुनः क्षिपेत्॥
देवी प्रणवमुद्धृत्य मन्त्रराजमिमं प्रिये।
मन्त्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभम्।
अप्रकाश्यमिमं मन्त्रं सर्व्वशक्तिसमन्वितम्॥
स्मरणादेव मन्त्रस्य भूतप्रेतपिशाचकाः।
विद्रवन्ति भयार्त्ता वै कालरुद्रादिव प्रजाः॥
पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम्।
नाग्निचौरभयं वापि ग्रहराजभयन्तथा।
न च मारीभयं तस्य सर्व्वत्र सुखवान् भवेत्॥
आयुरारोग्यमैश्वर्य्यं पुत्त्रपौत्रादिसम्पदः।
भवन्ति सततं तस्य पुस्तकस्यापि पूजनात्॥

श्रीपार्व्वत्युवाच।

य एष भैरवो नाम आपदुद्धारको मतः।
त्वया च कथितो देव भैरवः कल्प उत्तमः॥
तस्य नामसहस्राणि अयुतान्यर्व्वुदानि च।
सारमुद्धृत्य तेषां वै नामाष्टशतकं वद॥*॥

श्रीभगवानुवाच।

यस्तु संकीर्त्तयेदेतत् सर्व्वदुष्टनिवर्हणम्।
सर्व्वान् कामानवाप्नोति साधकः सिद्धिमेव च॥
शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः।
आपदुद्धारकस्येह नामाष्टशतमुत्तमम्॥
सर्व्वपापहरं पुण्यं सर्व्वापद्विनिवारकम्।
सर्व्वकामार्थदं देवि साधकानां सुखावहम्॥
देहाङ्गन्यसनञ्चैव पूर्व्वं कुर्य्यात् समाहितः।
भैरवं मूर्द्ध्नि विन्यस्य ललाटे भीमदर्शनम्॥
अक्ष्णोर्भूताश्रयं न्यस्य वदने तीक्ष्णदर्शनम्।
क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत्॥
क्षेत्राख्यं नाभिदेशे च कट्यां सर्व्वाघनाशनम्।
त्रिनेत्रमूर्व्वोर्विन्यस्य जङ्घयो रक्तपाणिकम्॥
पादयोर्द्देवदेवेशं सर्व्वाङ्गे वटुकं न्यसेत्।
एवं न्यासविधिं कृत्वा तदनन्तरमुत्तमम्॥
नामाष्टशतकस्यापि छन्दोऽनुष्टुबुदाहृतम्।
बृहदारण्यको नाम ऋषिश्च परिकीर्त्तितः॥
देवता कथिता चेह सद्भिर्वटुकभैरवः।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः॥*॥
ॐ भैरवो भूतनाथश्च भूतात्मा भूतभावनः।
क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्त्रियो विराट्।
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत्।
रक्तपः प्राणपः सिद्धः सिद्धिदः सिद्धसेवितः॥
करालः कालशमनः कलाकाष्ठातनुः कविः।
त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः॥
शूलपाणिः खड्गपाणिः कङ्काली धूम्रलोचनः।
अभीरुर्भैरवो भीरुर्भूतपो योगिनीपतिः॥
धनदो धनहारी च धनपः प्रतिभाववान्।
नागहारो नागकेशो व्योमकेशः कपालभृत्॥
कालः कपालमाली च कमनीयः कलानिधिः।
त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपात्॥
त्रिवृत्तनयनो डिम्भः शान्तः शान्तजनप्रियः।
वटुको वटुकेशश्च खट्वाङ्गवरधारकः॥
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः।
धूर्त्तो दिगम्बरः सौरिर्हरिणः पाण्डुलोचनः॥
प्रशान्तः शान्तिदः शुद्धः शङ्करप्रियबान्धवः।
अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्तमोमयः॥
अष्टाधारः कलाधारः सर्पयुक्तः शशीशिखः।
भूधरो भूधराधीशो भूपतिर्भूधरात्मकः॥
कङ्कालधारी मुण्डी च व्यालयज्ञोपवीतवान्।
जृम्भणो मोहनः स्तम्भी मारणः क्षोभणस्तथा॥
शुद्धनीलाञ्जनप्रख्यदेहो मुण्डविभूषितः।
बलिभुक् बलिभूतात्मा कामी कामपराक्रमः॥
सर्व्वापत्तारको दुर्गो दुष्टभूतनिषेवितः।
कामी कलानिधिः कान्तः कामिनीवशकृद्वशी।
सर्व्वसिद्धिप्रदो वैद्यः प्रभविष्णुः प्रभाववान्॥
अष्टोत्तरशतं नाम भैरवस्य महात्मनः।
मया ते कथितं देवि रहस्यं सर्व्वकामिकम्॥
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम्।
न तस्य दुरितं किञ्चिन्न रोगेभ्यो भयं तथा।
न शत्रुभ्यो भयं किञ्चित् प्राप्नोति मानवः क्वचित्॥
पातकानां भयं नैव पठेत् स्तोत्रमनन्यधीः।
मारीभये राजभये तथा चौराग्निजे भये॥
औत्पातिके महाघोरे यथा दुःस्वप्नदर्शने।
बन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः॥
सर्व्वे प्रशमनं यान्ति भयाद्भैरवकीर्त्तनात्।
एकादशसहस्रन्तु पुरश्चरणमुच्यते॥
त्रिसन्ध्यं यः पठेद्देवि संवत्सरमतन्द्रितः।
स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानुषः॥
षण्मासान् भूमिकामस्तु स जप्त्वा लभते महीम्।
राजा शत्रुविनाशाय जपेन्मासाष्टकं पुनः॥
रात्रौ वारत्रयञ्चैव नाशयत्येव शात्रवान्।
जपेन्मासत्रयं रात्रौ राजानं वशमानयेत्॥
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः।
पठेद्वारत्रयं यद्वा वारमेकं तथा निशि॥
धनं पुत्त्रांस्तथा दारान् प्राप्नुयान्नात्र संशयः।
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात्॥
भीतो भयात् प्रमुच्येत देवि सत्यं न संशयः।
यान् यान् समीहते कामांस्तांस्तानाप्नोति
निश्चितम्॥
अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित्।
सत्कुलीनाय शान्ताय ऋजवे दम्भवर्ज्जिते।
दद्यात् स्तोत्रमिदं पुण्यं सर्व्वकामफलप्रदम्।
ध्यानं वक्ष्यामि देवस्य यथा ध्यात्वा पठेन्नरः॥*॥
ॐ शुद्धस्फटिकसङ्काशं सहस्रादित्यवर्च्चसम्।
अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम्॥

भुजङ्गमेखलं देवमग्निवर्णंशिरोरुहम् ।
दिगम्बरं कुमारीशं वटुकाख्यं महाबलम् ॥
खट्वाङ्गमसिपाशञ्च शूलञ्चैव तथा पुनः ।
डमरुञ्च कपालञ्च वरदं भुजगन्तथा ॥
नीलजीमूतसङ्काशं नीलाञ्जनचयप्रभम् ।
दंष्ट्राकरालवदनं नूपुराङ्गदभूषितम् ॥
आत्मवर्णसमोपेतसारमेयसमन्वितम् ।
ध्यात्वा जपेत् सुसंहृष्टः सर्व्वान् कामानवाप्नुयात्॥
एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमम् ।
भैरवाय प्रहृष्टाभूत् स्वयञ्चैव महेश्वरी ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे भैरव-स्तवराजः समाप्तः ॥*॥ अथ वटुकभैरवकवचम् ।

श्रीभैरव उवाच ।

"देवेशि देहरक्षार्थं कारणं कथ्यतां ध्रुवम् ।
म्रियन्ते साधका येन विना श्मशानभूमिषु ॥
रणेषु चातिघोरेषु महावायुजलेषु च ।
शृङ्गिमकरवज्रेषु ज्वरादिव्याधिवह्निषु ॥

श्रीदेव्युवाच ।

कथयामि शृणु प्राज्ञ वटोस्तु कवचं शुभम् ।
गोपनीयं प्रयत्नेन मातृजारोपमं यथा ॥
तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः ।
सात्त्विकं राजसञ्चैव तामसं देव तत् शृणु ॥
वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिवक्त्रं
दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः ।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां वटुकमनिशं शूलखड्गौ दधानम् ॥१॥
उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ।
नीलग्रीवमुदारभूषणशतं शीतांशुचूडोज्ज्वलं
बन्धूकारुणवाससं भयहरं देवं सदा भावये ॥२॥
ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुण्डमालं महेशं
दिग्वस्त्रं पिङ्गकेशं डमरुमथ सृणिं खड्ग-शूलाभयानि ।
नागं घण्टां कपालं करसरसिरुहैर्विभ्रतं भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणी नूपुराढ्यम् ॥ ३ ॥*॥
अस्य वटुकभैरवकवचस्य महाकाल ऋषिरनु-ष्टुप्छन्दः श्रीवटुकभैरवो देवता वं बीजं ह्रीं शक्तिरापदुद्धारणायेति कीलकं मम सर्व्वाभीष्ट-सिद्ध्यर्थे विनियोगः ।
"ॐ शिरो मे भैरवः पातु ललाटं भीषणस्तथा ।
नेत्रे च भूतहननः सारमेयानुगो भ्रुवौ ॥
भूतनाथश्च मे कर्णौ कपोलौ प्रेतवाहनः ।
नासापुटौ तथोष्ठौ च भस्माङ्गः सर्व्वभूषणः ॥
भीषणास्यो ममास्यञ्च शक्तिहस्तो गलं मम ।
स्कन्धौ दैत्यरिपुः पातु बाहू अतुलविक्रमः ॥
पाणी कपाली मे पातु मुण्डमालाधरो हृदम् ।
वक्षःस्थलं तथा शान्तः कामचारी स्तनं मम ॥
उदरञ्च स मे तुष्टः क्षेत्रेशः पार्श्वतस्तथा ।
क्षेत्रपालः पृष्ठदेशं क्षेत्राख्यो नाभितस्तथा ॥
कटीं पापौघनाशश्च वटुको लिङ्गदेशकम् ।
गुदं रक्षाकरः पातु ऊरू रक्षाकरः सदा ॥
जानू च घुर्घुरारावो जङ्घे रक्षतु रक्तपः ॥
गुल्फौ च पादुकासिद्धः पादपृष्ठं सुरेश्वरः ॥
आपादमस्तकञ्चैव आपदुद्धारणस्तथा ।
सहस्रारे महापद्मे कर्पूरधवलो गुरुः ॥
पातु मां वटुको देवो भैरवः सर्व्वकर्म्मसु ।
पूर्व्वस्यामसिताङ्गो मे दिशि रक्षतु सर्व्वदा ॥
आग्नेय्याञ्च रुरुः पातु दक्षिणे चण्डभैरवः ।
नैर्ऋत्यां क्रोधनः पातु मामुन्मत्तस्तु पश्चिमे ॥
वायव्यां मे कपाली च नित्यं पायात् सुरेश्वरः ।
भीषणो भैरवः पातूत्तरस्यां दिशि सर्व्वदा ॥
संहारभैरवः पातु दिश्यैशान्यां महेश्वरः ।
ऊर्द्ध्वे पातु विधाता वै पाताले नन्दिको विभुः ॥
सद्योजातस्तु मां पायात् सर्व्वतो देवसेवितः ।
वामदेवोऽवतु प्रीतो रणे घोरे तथावतु ॥
जले तत्पुरुषः पातु स्थले पातु गुरुः सदा ।
डाकिनीपुत्त्रकः पातु दारांस्तु लाकिनीसुतः ॥
पातु साकलको भ्रातॄन् श्रियं मे सततं गिरः ।
लाकिनीपुत्त्रकः पातु पशूनश्वानजांस्तथा ॥
महाकालोऽवतु च्छत्रं सैन्यं वै कालभैरवः ।
राज्यं राज्यश्रियं पायात् भैरवो भीति-हारकः ॥
रक्षाहीनन्तु यत् स्थानं वर्ज्जितं कवचेन च ।
तत् सर्व्वं रक्ष मे देव त्वं यतः सर्व्वरक्षकः ॥
एतत् कवचमीशान तव स्नेहात् प्रकाशितम् ।
नाख्येयं नरलोकेषु सारभूतञ्च सुप्रियम् ॥
यस्मै कस्मै न दातव्यं कवचेशं सुदुर्लभम् ।
न देयं परशिष्येभ्यः कृपणेभ्यश्च शङ्कर ॥
यो ददाति निषिद्धेभ्यः स वै भ्रष्टो भवेद्ध्रुवम् ॥
अनेन कवचेशेन रक्षां कृत्वा द्विजोत्तमः ।
विचरन् यत्र कुत्रापि विघ्नौघैः प्राप्यते न सः ॥
मन्त्रेण म्रियते योगी कवचं यन्न रक्षितः ।
तस्मात् सर्व्वप्रयत्नेन दुर्लभं पापचेतसाम् ॥
भूर्जे रम्भात्वचे वापि लिखित्वा विधिवत् प्रभो ।
धारयेत् पाठयेद्वापि सम्पठेद्वापि नित्यशः ।
सम्प्राप्नोति प्रभावं वै कवचस्यास्य वर्णितम् ॥
नमो भैरवदेवाय सारभूताय वै नमः ।
नमस्त्रैलोक्यनाथाय नाथनाथाय वै नमः ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे भैरव-भैरवीसंवादे वटुकभैरवकवचं समाप्तम् ॥
वटुकरणं, क्ली, (वटोः करणम् ।) उपनयनम् । इति त्रिकाण्डशेषः ॥
वट, स्थौल्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) स्थौल्यमिह सामर्थ्यम् । वठति दाता दातुं समर्थः स्यादित्यर्थः । इति दुर्गा-दासः ॥
वठ, इ ङ एकचरे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । इदित् ।) एककर्तृकचर-णम् । इ, वण्ठ्यते । ङ, वण्ठते चौरश्चोरयितुं एकचरतीत्यर्थः । इति दुर्गादासः ॥
वठरः, पुं, (वक्तीति । वच् + "वचिमनिभ्यां चिच्च ।" उणा० ५ । ३८ । इति अरप्रत्ययः । ठश्चान्तादेशः ।) मूर्खः । इत्युणादिकोषः ॥ अम्बष्ठः । इति हेमचन्द्रः ॥ शब्दकारः । वक्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥
वठरः, त्रि, (वच् + अरः । ठश्चान्तादेशः ।) शठः । मन्दः । इति त्रिकाण्डशेषः ॥
वड आरोहणे । सौत्रधातुरयम् । इति कवि-कल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) वड्भी । वड्शम् । इति दुर्गादासः ॥
वड, इ क विभागे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् । इदित् ।) इ क, वण्डयति । अयं केश्चिन्न पठ्यते । इति दुर्गादासः ॥
वड, इ ङ वेष्टे । विभागे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् । इदित् ।) इ, वण्ड्यते । ङ, वण्डते । इति दुर्गादासः ॥
वड्भी, स्त्री, (वध्यते आरुह्यतेऽनेति । वड् + बाहु-लकात् अभिच् । कृदिकारादिति ङीष् ।-) गृहचूडा । इत्यमरः ॥ मुदनि । इति भाषा । तत्पर्य्यायः । गोपानसी २ । इति तट्टीकासार-सुन्दरी ॥ चन्द्रशालिका ३ कूटागारम् ४ । इति त्रिकाण्डशेषः ॥
"चन्द्रशाला च वड्भी स्यातां प्रासादमूर्द्धनि ॥"
इति श्रीधरः ॥
वेलायां वड्भी चूड़ा । इति रुद्रः ॥
"वड्भी चन्द्रशालेति प्रासादादौ च मण्डपे ॥"
इति कोषान्तरम् ॥
"शुद्धान्ते वड्भी चन्द्रशाले सौधोर्द्धवेश्मनि ॥"
इति रभसः ॥
ह्रस्वान्तापि वड्भिः । तां कस्याञ्चिद्भवनवड्भौ सुप्तपारावतायामिति । मेघदूतम् । ४० ॥ वड्भिः वड्भी वलभिः वलभी चेति चातुरूप्य-मिति वृद्धाः । इति भरतः ॥ (यथा, हरिवंशे । ८४ । ११ ।
"सुवासिता बृहच्छन्नसुपनीतोत्तरच्छदाः ।
क्रियन्तां मत्तवाटाश्च वड्भ्यो वीथयस्तथा ॥")
वड़ा, स्त्री, (वड़् + अच् + टाप् ।) वटकः । यथा,—
"कदलेनाथवा तालैर्युक्तं यत्ताण्डुलं पिण्डम् ।
पिण्डं चूर्णं वटो वड़ा । इति शब्दचन्द्रिका ॥
वड्रं, त्रि (वड़्ते इति । वड़् + बहुलमन्यत्रा-पीति रक् ।) बृहत् । इत्यमरः । ३ । १ । ६१ ॥ अस्य भाषा वड़ ॥
वण, क्ष शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) क्ष, अवीवणत् अववाणत् । इति दुर्गादासः ॥
वण्ट, त क भागे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) वण्टयति वण्टापयति । इति दुर्गादासः ॥
वण्टः, पुं, (वण्ट्यते इति । वण्ट + घञ् ।) भागः । दात्रमुष्टिः । इति हेमचन्द्रः । ६ । ७० ॥ (वण्ट + अच् ।) अकृतोद्वाहः । इति शब्दमाला ॥

वण्टकः, पुं, (वण्ट एव । स्वार्थे कन् ।) भागः । इत्यमरः । ३।३।८६ ।(वण्ट् + ण्वुल् । विभागकर्त्तरि, त्रि ।)

वण्ठः, पुं, (वण्ठते इति । वठि ङ एकचरे + अच् ।) अकृतोद्वाहः । खर्व्वः । कुन्तायुधः । इति मेदिनी । ठे, ८ ।

वण्ठरः, पुं, स्थगिकारज्जुः । कुक्कुरस्य लाङ्गूलम् । करीरकोषः । तालस्य पल्लवम् । पयोधरः । इति मेदिनी । रे,१८८। तत्र ओष्ठ्यवकारादौ गणितोऽयम् । किन्तु वठि ङ एकचरे इत्यस्मात् अरच्प्रत्ययेन निष्पन्नत्वात् दन्त्यवकारादौ लिखितः ॥

वण्डालः, पुं, शूरयुद्धम् । नौका । खनित्रम् । इति मेदिनी हेमचन्द्रश्च ॥

व(ब)ण्डः, पुं, (वनते इति वनु सम्भक्तौ । वन् + "अमन्तात् डः ।" उणा० १ । ११३ । इति डः ।) अनावृतमेढ्रः । तत्पर्य्यायः । दुश्चर्म्मा २ हिनमकः ३ शिपिविष्टः ४ । इति हेमचन्द्रः ॥

वण्डः, त्रि, (वनते इति । वन सम्भक्तौ । वन् + "अमन्तात् डः ।"उणा० १।११३। इति डः ।) हस्तादिवर्ज्जितः । इति मेदिनी । डे, २४ । वेँडे इति भाषा ।

वण्डा, स्त्री, (वण्ड + टाप् ।) पांशुला । इति मेदिनी । डे, २४ ।

वत्, अ, (वातीति । वा + डति ।) साम्यम् । तत्पर्य्यायः । वा २ यथा ३ तथा ४ एव ५ एवम् ६ । इत्यमरः ॥

वत, अ, खेदः । अनुकम्पा । (यथा, शकुन्तलायाम् । प्रथमाङ्के ।
"क्व बत हरिणकानां जीवितञ्चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥")
सन्तोषः । विस्मयः । आमन्त्रणम् । इत्यमरः । ३ । ३ । २४३ ॥

वतंसः, पुं, (अवतंसयति अवतंस्यतेऽनेन वेति । अव + तसि + अच् । घञ् वा । अवस्याल्लोपः ।) कर्णपूरः । कर्णभूषणम् । शेखरः । शिरोभूषणम् । इति मेदिनी । से, ३७ ॥ (यथा, गीतगोविन्दे । २ । २ ।
"चलितदृगञ्चलचञ्चलमौलिकपोलविलोल-
वतंसम् ।
रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ॥")

वतण्डः, पुं, (वनतीति । वन् + "अण्डन् कृसृभृवृञः ।" उणा० १ । १२८ । इत्यत्र वनतेस्तकारान्तादेशः । वतण्ड इति काचिद्वृत्तिरित्युज्ज्वलदत्तोक्त्या अण्डन् प्रत्ययेन साधुः ।) मुनिभेदः । इत्युणादिकोषः ॥

वतूः, पुं, देवनदी । सत्यवाक् । पन्थाः । अक्षिरोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वतोका, स्त्री, (अवगतं तोकं अपत्यं यस्याः अवस्याल्लोपः ।) अवतोका । इत्यमरटीकायां भरतः ॥

वत्सं, क्ली, (वदतीति । वद् व्यक्तायां वाचि + "वृतृवदिहनिकमिकषिभ्यः सः ।" उणा० ३ । ६२ । इति सः ।) वक्षः । इत्यमरः ॥

वत्सः, पुं, (वदतीति । वद् + "वृतृवदिहनिकमिकषिभ्यः सः ।" उणा० ३ । ६२ । इति सः ।) वर्षः । गोशिशुः । बाछुर इति भाषा । तत्पर्य्यायः । शकृत्करिः २ तर्णकः ३ । इति वैश्यवर्गे नानार्थे चामरः ॥ दोग्धा ४ दोषकः ५ दोषः ६ । इति शब्दरत्नावली ॥ रौहिणेयः ७ बाहुलेयः ८ तन्तुभः ९ । सद्योजातस्य तस्य पर्य्यायः । तर्णकः १ तर्णभः २ तन्तुभः ३ कचः ४ । इति जटाधरः ॥ पुत्त्रादिः । इति मेदिनी । से, ११ ॥ बाछा इति भाषा । (यथा, भागवते । ४ । ८ । ११ ।
"न वत्स ! नृपतेर्धिष्ण्यं भवानारोढुमर्हति ।
न गृहीतो मया यत् त्वं कुक्षावपि नृपात्मज ! ॥"
दिवोदासपुत्त्रः । द्युमानित्यादीन्यस्य नामान्तराणि । यथा, भागवते । ९ । १७ । ५—६ ।
"तत्पुत्त्रः केतुमानस्य जज्ञे भीमरथस्ततः ।
दिवोदासो द्युमांस्तस्मात् प्रतर्द्दन इति स्मृतः ॥
स एव शत्रुजिन् वत्स ऋतध्वज इतीरितः ।
तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥"
देशभेदः । यथा, कथासरित्सागरे । ९ । ४ ।
"अस्ति वत्स इति ख्यातो देशो दर्पोपशान्तये ।
स्वर्गस्य निर्म्मितो धात्रा प्रतिमल्ल इव क्षितौ ॥")

वत्सकं, क्ली, (वत्स + संज्ञायां इवार्थे वा कन् ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ (विवरणमस्य पुष्पकासीसशब्दे ज्ञातव्यम् ॥)

वत्सकः, पुं, (वत्स + कन् ।) कुटजः । इत्यमरः ॥ (अस्य पर्य्यायो यथा,—
"वृषकः शक्रपर्य्यायो वत्सको गिरिमल्लिका ।
कुटजस्तत्फलञ्चेन्द्रयवश्चापि कलिङ्गकः ॥"
इति वैद्यकरत्नमालायाम् ॥
तथान्यः पर्य्यायः ।
"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
इन्द्रयवः । इति राजनिर्घण्टः ॥

वत्सकबीजं, क्ली, (वत्सकस्य बीजम् ।) इन्द्रयवः । इति राजनिर्घण्टः ॥ (यथा,—
"योषं वत्सकबीजञ्च निम्बभूनिम्बमार्कवम् ।
चित्रकं रोहिणीं पाठां दार्व्वीमतिविषां
समाम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वरातिसारे योषाद्यचूर्णे ॥)

वत्सकामा, स्त्री, (वत्सं कामयते इति । कम् + अच् । टाप् ।) वत्साभिलाषिणी गौः । तत्पर्य्यायः । वत्सला २ । इति राजनिर्घण्टः ॥ पुत्त्रादिकामा स्त्री च ॥

वत्सतरः, पुं, (प्रथमवया वत्सः । "वत्सोक्षाश्वर्षभेभ्यश्चेति ।"५।३।९१। इति ष्टरच् ।) प्राप्तदमनकालगवः । दोयाने बाछुर इति भाषा । तत्पर्य्यायः । दम्यः २ । इत्यमरः । २ । ९ । ६२ ॥ दुर्द्दान्तः ३ गड्डिः ४ । इति राजनिर्घण्टः ॥

वत्सतरी, स्त्री, (वत्सतर + ङीप् ।) वृषोत्सर्गे वृषपत्नीत्वेन कल्पिता त्रिहायणी गौः । यथा, कात्यायनसूत्रम् । पयस्विन्याः पुत्त्रो यूथे च रूपवान् स्यात् तमलङ्कृत्य यूथमुख्याश्चतस्रो वत्सतर्य्यस्ताश्चालङ्कृत्य एनं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण मनः साप्रजुषा सुभगा रायस्पोषेण समिषा मदेम इत्येतयैव ऋचोत्सृजेरन्निति । तदर्थस्तु हे वत्सतर्य्यो वो युष्माकं एनं युवानं पतिं स्वामिनं ददामीत्युक्त्वा प्रार्थयामि तेन वृषेण सह क्रीडन्तीः खेलन्त्यश्चरथ भ्रमथ हे वत्सतर्य्यो यूयमपि मानः नास्मत्स्वत्वविषया भविष्यथ किन्तु मया त्यक्तव्याः । वयं वृषस्य वत्सतरीणाञ्च त्यागेन रायस्पोषेण धनसम्पदा साप्रजुषा सप्रजन्मव्यापकेन इषा अन्नेन च सम्मदेम हृष्टा भवामः सुभगा लोकस्य प्रिया इति सम्मदेम इति भविष्यत्सामीप्ये वर्त्तमान इति पाणिनिस्मरणाद्भविष्यदर्थे वर्त्तमानः ॥ * ॥ वत्सतरीर्व्विशेषयति स्मृतिः ।
"अग्रतो लोहिता पत्नी पार्श्वाभ्यां नीलपाण्डरे ।
पृष्ठतस्तु भवेत् कृष्णा वृषभस्य तु मोचने ॥"
तासां वयःप्रमाणं यथा,—
"त्रिहायणीभिर्धन्याभिः सुरूपाभिः सुशो-
भितः ।
सर्व्वोपकरणोपेतः सर्व्वशस्यचरो महान् ।
उत्सृष्टव्यो विधानेन श्रुतिस्मृतिनिदर्शनात् ॥"
इति शुद्धितत्त्वे वृषोत्सर्गविचारः ॥

वत्सनाभः पुं, (वत्सान् नभ्यति हिनस्तीति । नभ हिंसायाम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) विषवृक्षविशेषः । इत्यमरः १।८।११। स तु स्थावरविषभेदः । प्रायो वत्सान् नभ्यति हिनस्ति वत्सनाभः णभ्य ण हिंसे ढात् बन्निति यत् । वत्सस्य नाभिरिव वत्सनाभः णः अनितश्चेति न वृद्धिः अयं सिन्धुवारपत्रसदृशपत्रः । इति भरतः ॥ * ॥ (यथा, हरिवंशे । २२३ । ६५ ।
"वचया वत्सनाभाश्च पनसाश्चन्दनैः सह ॥)
तत्पर्य्यायः । अमृतम् २ विषम् ३ उग्रम् ४ महौषधम् ५ गरलम् ६ मारणम् ७ नागः ८ स्तोककम् ९ प्राणहारकम् १० स्थावरादि ११ । अस्य गुणाः । अतिमधुरत्वम् । उष्णत्वम् । वातकफकण्ठरुक्सन्निपातनाशित्वम् । पित्तसन्तापकारकत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अस्य स्वरूपनिरूपणं यथा ।
"सिन्दुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वेन तरोर्वृद्धिर्व्वत्सनाभः स भाषितः ॥"
तस्य सामान्यगुणा यथा ।
"विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च ।
आग्नेयं वातकफहृद्योगवाहि मदावहम् ॥"
व्यवायि सकलकायव्यापनपूर्व्वकपाकगमनशीलम् ।

त्रिकाणि चोजःशोषणपूर्व्वकं सन्धिबन्धशिथिली करणशीलम्। आग्नेयं अधिकाग्निप्रशमम्। योगवाहि संसर्गगुणग्राहकम्। मदावहं तमोगुणाधिक्येन बुद्धिविध्वंसकम्।

"तदेव युक्तियुक्तं तु प्राणदायि रसायनम्॥
योगवाहि त्रिदोषघ्नं वृंहणं वीर्य्यवर्द्धनम्॥
ये दुर्गुणा विषेऽशुद्धे ते स्युर्हीना विशोधनात्।
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत्॥"

इति भावप्रकाशः॥

(क्लीवेऽपि दृश्यते। यथा,—
"चत्वारि वत्सनाभानि मुस्तके द्वे प्रकीर्त्तिते।"
"ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता॥"

इति सुश्रुते कल्पस्थाने द्वितीयेऽध्याये॥)

वत्सपत्तनं, क्ली, (वत्सस्य वत्सराजस्य पत्तनम्।) भारतवर्षस्योत्तरे देशविशेषः। तत्पर्य्यायः। कौशाम्बी २। इति हेमचन्द्रः। ४। ४१॥

वत्सपालः, पुं, (वत्सान् पालयतीति। वत्स+पालि+अण्) श्रीकृष्णः। बलदेवः। यथा,—

"वृन्दावनं गोवर्द्धनं यमुनापुलिनानि च।
वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप॥
एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितैः।
कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः॥"

इति श्रीभागवते। १०। ११। ३६॥

(वत्सपालके, त्रि। यथा, हरिवंशे। ६७।२४।
"स तत्र वयसा तुल्यैर्वत्सपालैः सहानघः।
रेमे वै दिवसं कृष्णः पुरा स्वर्गगतो यथा॥")

वत्सरः, पुं, (वसन्त्यस्मिन् अयनर्त्तुमासपक्षवारादय इति। वस निवासे+"वसेश्च।" उणा० ३। ७१। इति सरन्। "सः स्यार्द्धधातुके।" ७। ४। ४९। इति सस्य तः।) द्वादशमासात्मककालः। अयनद्वयात्मकश्च। तत्पर्य्यायः। संवत्सरः २ अब्दः ३ हायनः ४ शरत् ५ समा ६। इत्यमरः। १। ४। २०॥ शरदा ७ वर्षम् ८ वरिषम् ९ संवत् १०। इति शब्दरत्नावली॥*॥

"व्रतबन्धविवाहे च वत्सरपरिकल्पनमाहुराचार्य्याः।
आधानपूर्व्वमेके प्रसूतिपूर्व्वं सदान्ये तु॥"

सौरसावननाक्षत्रचान्द्रभेदेन चतुर्व्विधो वत्सरः। यथा चूडोपनयनादिषु वर्षगणना सावनेन शुभाशुभगणनन्तु सौरेणेति सिद्धम्। सावनसंवत्सरेण एकदिनाधिकवत्सरो नाक्षत्रो भवतीत्यनयोर्भेदः। सौरस्तु पञ्चषष्ट्यधिकत्रिशतदिनैर्भवति। यथा,—

"मेषादीनामहर्वृन्दं षष्ठ्या सप्ताष्टचन्द्रकम्॥१८७॥
तुलादीनामष्टसप्तचन्द्रकन्तु लिखेत्ततः॥"१७८॥

चान्द्रवत्सरोऽपि द्वादशमासैर्भवति। मलमासपाते तु त्रयोदशमासैर्भवति। तथा च श्रुतिः। द्वादशमासाः संवत्सरः क्वचित्त्रयोदशमासाः संवत्सर इति। त्रयोदशेत्यधिमासे। स्मृतिः। यस्मिन्नब्दे द्वादशैकश्च यत्र इति। यत्रो मास इति। यथा मासाः सप्तैकः संवत्सर इति शतपथश्रुत्या यत्र-सप्तैक-शब्दयोर्मासवर्षपर्य्याय-तोक्ता। इति मलमासतत्त्वम्॥*॥ अथ षष्टिसंवत्सरगणना।

"शकेन्द्रकालः पृथगाकृति-२२ घ्नः
शशाङ्कनन्दाश्वियुगैः ४२९१ समेतः।
शराद्रिवस्विन्दु-१८७५ हृतः सलब्धः
षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः॥
वर्षंवर्जन्तु यच्छेषं सूर्य्यैः संपूर्य्य खोर्म्मिभिः॥६०॥
हृतयुतक्रमतः खाग्निहृतेऽंशे माषकादयः॥"

अस्यार्थः। शकेन्द्रकालः शकराजाब्दकालः। पृथक् आकृतिघ्नः २२ द्वाविंशत्या पूरितः। शशाङ्कनन्दाश्वियुगैरेकनवत्यधिकशतद्वयाधिकचतुःसहस्रैः समेतोऽङ्कः। शराद्रिवस्विन्दुहृतः पञ्चसप्तत्यधिकाष्टादशशतैर्यावत्संख्यं हर्त्तुं शक्नोति तावता हृतः कर्त्तव्यः। सलब्धः पूर्व्वशकाब्दः शरेत्यादिना लब्धसंख्यया युतः कार्य्यः। षष्ट्यावशेषे पश्चाद्दशेषोऽङ्कः पूर्व्ववत् षष्ट्याहृतलब्धस्यावशिष्टे प्रभवादयः। एकावशेषे प्रभवः द्व्याद्यवशिष्टे विभवादिः। वर्षवर्जन्तु यच्छेषं वर्षातिरिक्तं शराद्रिवस्विन्दुहृतावशिष्टं तत् सूर्य्यैर्द्वादशभिः संपूर्य्य खोर्म्मिभिः षष्ट्या हृते युतक्रमत इत्यनेन षष्टिहृतावशिष्टा अङ्का दत्ताः षष्टिहृतलब्धांशके खाग्निहृते त्रिशता हृतेऽवशिष्टा अंशका लब्धा माषाः स्युरिति। प्रभवादिवर्षाण्युपक्रम्य।

"आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता।
तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवेत्॥"

भविष्यपुराणे।

भैरव उवाच।

"षष्ट्यब्दं कथयाम्यत्र क्रूराः सौम्याश्च ये प्रिये!।
संवत्सरफलं सम्यक् प्रभवादौ वरानने!॥
बहुतोयास्तथा मेघा बहुशस्या च मेदिनी।
बहुक्षीरास्तथा गावो व्याधिरोगविवर्ज्जिताः॥
प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिताः॥१॥
सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः॥
प्रशान्ता मानवास्तत्र बहुशस्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने!॥२॥
रोगा बहुविधाश्चैव मनुष्या वाजिकुञ्जराः।
सर्व्व एव प्रणश्यन्ति शुक्ले वर्षे वरानने!॥३॥
उन्मत्तञ्च जगत् सर्व्वं धनधान्यसमाकुलम्।
नित्योत्सवः प्रजावृद्धिः प्रमोदे जायते प्रिये॥४॥
नीरोगाश्च निराबाधा मानवा विगतद्विषः।
बहुक्षीरास्तथा गावः प्राजापत्ये वरानने॥५॥
निरातङ्कं जगत् सर्व्वं धनयौवनगर्वितम्।
अङ्गिरसि प्रजाः सर्व्वा नित्योत्साहा वरानने॥६॥
सुभिक्षं क्षेममारोग्यं वर्षाकालं सुशोभनम्।
शस्यवृद्धिं विजानीयात् श्रीमुखे सुरवन्दिते॥७॥
बहुक्षीरास्तथा गावो धान्यञ्च बलवत्तरम्।
जायन्ते सर्व्वशस्यानि भावे वर्षे वरानने॥८॥
महार्घं जायते सर्व्वं घृततैलरसादिकम्।
प्रजानाञ्च भवेद्वृद्धिर्युनि संवत्सरे शुभे॥९॥
निष्पत्तिः सर्व्वशस्यानां मध्या धातरि कीर्त्तिता।
इक्षुक्षीरगुडादीनां प्रबलत्वं वरानने॥१०॥
सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता।
लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये॥११॥
सुभिक्षं क्षेममारोग्यं प्रशान्ताः पार्थिवाः प्रिये।
तस्करोपहृतं वित्तं बहुधान्ये वरानने॥१२॥
राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैश्चोपपीडनम्।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने॥१३॥
जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा।
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये॥१४॥
कोद्रवाः शालिमुद्गाश्च शक्तुमाषास्तथैव च।
महार्घं जायते सर्व्वं वृषे च सुरवन्दिते॥१५॥
चणका मुद्गमाषाश्च अन्यच्च विदलं प्रिये।
महार्घं जायते सर्व्वं चित्रभानौ वरानने॥१६॥
सुभिक्षं क्षेममारोग्यं विश्वञ्च निरुपद्रवम्।
व्यवहारो भवेत् हृष्टः स्वभानौ देवपूजिते॥१७॥
अतिवृष्टिश्च जायेत धान्यस्याघ प्रपीडनम्।
शस्यं भवति सामान्यं दारुणे सुरवन्दिते॥१८॥
बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने।
सौराष्ट्रे लाटदेशे च पार्थिवे नात्र संशयः॥१९॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम्।
अनावृष्टिः समाख्याता व्यये संवत्सरे प्रिये॥२०॥
उद्धतो वर्षणे मेघो जलं नैवोपजायते।
महार्घं सर्व्वजिद्वर्षे सर्व्वमेव वरानने॥२१॥
कोद्रवाः शालिमुद्गाश्च कङ्गुमाषास्तथैव च।
सुलभं जायते सुस्थं जगद्वै सर्व्वधारिणि॥२२॥
अनग्निप्रबला लोका धान्यौषधिप्रपीडनम्।
जायते मानुषे कष्टं विरोधिनि न संशयः॥२३॥
सर्व्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते।
शिरोवक्षोऽक्षिरोगाश्च पापाद्धि विकृते जनाः॥२४॥
उपद्रुतं जगत् सर्व्वं तस्करैर्मूषिकैः खगैः।
पीडिताश्च प्रजाः सर्व्वा देशभङ्गाः खरे प्रिये॥२५॥
सुभिक्षं क्षेममारोग्यं शस्यं भवति शोभनम्।
बहुक्षीरास्तथा गावो नन्दनं नन्दने प्रिये॥२६॥
अल्पतोयास्तथा मेघा वर्षन्ति खण्डमण्डले।
नश्यन्ति सर्व्वशस्यानि विजये नात्र संशयः॥२७॥
क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पीडितास्ते वरारोहे जये सर्व्वे न संशयः॥२८॥
सरोगञ्च तथा देवि दाहज्वरसमन्वितम्।
अभिभूतं जगत् सर्व्वं मन्मथे सुरवन्दिते॥२९॥
तुषधान्यचयो देवि सर्व्वशस्यमहार्घता।
व्यवहाराश्च नश्यन्ति दुर्मुखे दुर्मुखाः प्रजाः॥३०॥
पीड्यन्ते सर्व्वशस्यानि देशे देशे शुचिस्मिते।
हेमलम्बे प्रजाः सर्व्वाः क्षीयन्ते नात्र संशयः॥३१॥
तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत्।
अर्घो भवति सामान्यो विलम्बे तु भयं महत्॥३२॥
विषमस्थं जगत् सर्व्वं विरोधे भयसंप्लवम्।
विकारी सर्व्वतोऽपायो मम वाक्यन्तु नान्यथा॥३३॥
क्वचिद्वर्षति पर्ज्जन्यो देशे संछिन्नमण्डलः।
दुर्भिक्षं शर्व्वरीवर्षे व्यवहारो विपर्य्ययः॥३४॥

दुर्भिक्षं जायते सर्व्वा मेदिनी दुष्यति प्रिये ।
प्रये व्रजन्ति तोयानि पीड़िता मानवा भुवि ॥३५॥
सुवर्णरूप्यधान्यानि जगत् सर्व्वं सुशोभनम् ।
ब्राह्मणा वणिजस्तुष्टाः सुभिक्षे शुभकृत्
प्रिये ॥ ३६ ॥
सुभिक्षं क्षेममारोग्यं तथा गोब्राह्मणाः प्रिये ।
सुस्थिताः शोभने वर्षे प्रजाः सर्व्वाः सुलो-
चने ॥ ३७ ॥
विषमस्थं जगत् सर्व्वं व्याकुलं समुदाकुलम् ।
जनानां जायते भद्रे क्रोधे क्रोधः परस्परम् ॥३८॥
सर्व्वत्र जायते क्षेमं सर्व्वशस्यमहार्घता ।
विश्वावसौ वरारोहे कार्पासस्य महार्घता ॥३९॥
पार्थिवैर्नृपसैन्यैश्च समस्तैः खण्डमण्डले ।
प्रपीडान्ते जनाः सर्व्वे भयभीताः पराभवे ॥४०॥
तृणधान्यानि पीड्यन्ते शोभि वर्षति वासवः ।
प्लवङ्गे पीड़िताः सर्व्वाः प्रजाश्च सुरवन्दिते ॥४१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यवृष्टिर्भवेद्राजा कीलके च शुभं वदेत् ॥४२॥
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम् ।
साम्यवृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकी-
र्त्तितम् ॥ ४३ ॥
तोयपूर्णो भवेन्मेघो वर्षते च दिने दिने ।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये ॥४४॥
वासवो वर्षते देवि देशे चाखण्डमण्डले ।
अहिच्छत्रे कान्यकुब्जे विरोधी कृषिनाश-
कृत् ॥४५॥
अभिभूतं जगत् सर्व्वं क्लेशैर्बहुविधैः प्रिये ।
मारुतैः फलदाहैश्च परिधाविनि शोभने ॥४६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये ।
प्रमाथिनि जलाहारी जलदो मोदते प्रजा ॥४७॥
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता ।
घृतं तैलसमं याति आनन्दे नन्दति प्रजा ॥४८॥
कोद्रवाः शालिमुद्गाश्च पीड्यन्ते वरवर्णिनि ।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुराः
प्रजाः ॥ ४९ ॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम् ।
अनले च समाख्यातं नात्र कार्य्या विचा-
रणा ॥ ५० ॥
देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्मदातटे ॥५१॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः ।
वासवो वर्षते देवि शस्यञ्च नहि जायते ॥
तिलसर्षपमाषादिकार्पासानां महार्घता ।
गोमहिष्यः सुवर्णानि कांस्यताम्राद्यशेषतः ॥
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्द्दिनम् ।
पार्थिवा मोषका दीनाः कालयुक्ते प्रपी-
ड़िताः ॥ ५२ ॥
तोयपूर्णाः स्तनिता मेघा बहुशस्या च मेदिनी ।
निष्ठुराः पार्थिवा देवि ! सिद्धार्थे च वरा-
नने ! ॥ ५३ ॥
अल्पतोया घनाश्चैव कीटकाः प्रबलाः स्तनाः ।
विरुद्धाः पार्थिवा देवि रौद्रे संवत्सरे प्रिये ॥
५४ ॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेद्धि मध्यमा वृष्टिर्दुर्म्मतौ समुपस्थिते ॥ ५५ ॥
सुभिक्षं जायते लोकः सर्व्वोपद्रववर्ज्जितः ।
प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि ॥५६॥
महिषीगोहिरण्यादिताम्रकांस्याद्यशेषतः ।
तत् सर्व्वं देवि ! विक्रीय कर्त्तव्यो धान्यसञ्चयः ॥
रक्ते संवत्सरे देवि ! क्रूरबुद्धिर्नराधिपः ।
मानवाः क्रूरचेष्टाश्च संग्रामे न जयो भवेत् ॥५७॥
दुर्भिक्षं मरणं रोगो धान्यौषधिप्रपीड़नम् ।
पापरोगो भवेद्देवि ! रक्ताक्षेऽमरवन्दिते ॥५८॥
रोगो मरणदुर्भिक्षं विरोधो बहुसंकुलः ।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये ! ॥५९॥
मेदिनी चलते देवि ! सर्व्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा ॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा ।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ! ॥
कौमुदीचर्म्मनद्योश्च यमुनानर्म्मदातटे ।
विन्ध्यायां सैन्धवे चापि विनश्यति न संशयः ॥
सिंहलं मध्यदेशञ्च कालञ्जरं तथैव च ।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि ॥”
६० ॥ * ॥

कार्त्तिकादिद्वादशवर्षाणि यथा । वराहसंहि-तायाम् ।

“नक्षत्रेण सहोदयमस्तं वा येन याति सुर-
राजमन्त्री ॥”
तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव ॥
वर्षाणि कार्त्तिकादीनि आग्नेयाद्भद्वयानु-
योगीनि ।
क्रमशस्त्रिभञ्च पञ्चममन्त्यमुपान्त्यञ्च विज्ञेयम् ॥”

नक्षत्रेण गुरुभुज्यमाननक्षत्रेण । आग्नेयं कृत्तिका । पञ्चमं फाल्गुनं वर्षम् । अन्त्य-माश्विनम् । उपान्त्यं भाद्रम् ।

“अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो
मतः ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥
द्वे द्वे चित्रादितारायां पूर्णपर्व्वेन्दुसङ्गते ।
मासाश्चैत्रादयो ज्ञेयास्त्रिकैः षष्ठान्त्यसप्तमाः ॥”
इति सङ्कर्षणकाण्डाच्च ।

पूर्णपर्व्वेन्दुसङ्गते पौर्णमासीयुते द्वे द्वे तारे तदेकवाक्यतया पूर्व्ववचने पौर्णमासीलाभः । यथा मासानां पौर्णमास्यां कृत्तिकादिसम्बन्धात् कार्त्तिकादित्वं तथा वर्षाणामपि गुरोः कृत्ति-कादावस्तोदयसम्बन्धात् कार्त्तिकादित्वं तेन कृत्तिकारोहिण्योरेकतरस्मिन् गुरोरस्तोदये-ऽन्यतरलाभे कार्त्तिकं वर्षम् । एवं मार्ग-शीर्षादि । अत्र वर्षद्वयघटकयोर्नक्षत्रयोरेक-तरस्मिन् अस्तं गतो गुरुरन्यतरस्मिन्नुदेति तत्र का गतिरिति चेत् कार्त्तिकोत्तरं मार्गशीर्षं ततः पौषमित्यादिक्रमाद्गतिरिति । फलानि च ।

“शकटानलोपजीविकगोपीड़ाव्याधिशोकश्च ।
वृद्धिस्तु रक्तपीतकुसुमानां कार्त्तिके वर्षे ॥ १ ॥
सौम्येऽब्देऽनावृष्टिर्मृगाखुशलभाण्डजैश्च शस्य-
नाशः ।
व्याधिभयं मित्रैरपि भूपानां जायते वैरम् ॥२॥
शुभकृज्जातः पौषो निवृत्तवैराः परस्परं
भूपाः ।
द्वित्रिगुणो धान्यार्घः पौष्टिककर्म्मप्रसिद्धिश्च ॥३॥
पितृपूजा परिवृद्धिर्म्माघे हार्दञ्च सर्व्वभूता-
नाम् ।
आरोग्यवृष्टिधान्यार्घसम्पदो वित्तलाभश्च ॥ ४ ॥
फाल्गुने वर्षे विद्यात् क्वचित् क्वचित् क्षेम-
वृष्टशस्यानि ।
दौर्भाग्यं प्रमदानां प्रबलाश्चौरा नृपाश्चोग्राः ॥५
चैत्रे मन्दा वृष्टिः प्रियमन्नं क्षेममवनिपा
मृदवः ।
वृद्धिश्च कोषधान्यस्य भवति पीड़ा च रूप-
वताम् ॥ ६ ॥
वैशाखे धर्म्मपरा विगतभयाः प्रमुदिताः प्रजाः
सनृपाः ।
यज्ञक्रियाप्रवृत्तिर्निष्पत्तिः सर्व्वशस्यानाम् ॥ ७ ॥
ज्यैष्ठे जातिकुलधर्म्मश्रेणीश्रेष्ठा नृपाः सर्व्व-
धर्म्मज्ञाः ।
पीड्यन्ते धान्यानि च हित्वा कङ्गुशमीजानि ॥८
आषाढ़े जायन्ते शस्यानि क्वचिद्वृष्टिरन्यत्र ।
योगक्षेमं मध्यं शस्यग्रा भवन्ति भूपाः ॥९॥
श्रावणे वर्षे क्षेमं कामं शस्यानि पाकमुप-
यान्ति ।
क्षुद्रा ये पार्थिवास्ते पीड्यन्ते ये च तद्भक्ताः ॥
१० ॥
भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्व्वशस्यञ्च ।
न भवत्यपरं शस्यं क्वचित् सुभिक्षं क्वचिच्च
दुर्भिक्षम् ॥ ११ ॥
आश्वयुजेऽप्यजस्रं पतति जलं प्रमुदिताः प्रजाः
क्षेमम् ।
प्राणचयः प्राणभृतां सर्व्वेषामर्घबाहुल्यम् ॥”
१२ ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥

समाद्यादिपञ्चवत्सरा यथा, —

“शकाब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्-
सराः ।
सम्परीदानुपूर्व्वाश्च तथोदापूर्व्वका मताः ॥”
संवत्सरादिफलमुक्तं विष्णुधर्म्मोत्तरे ॥
“संवत्सरे तथा दानं तिलस्य तु महाफलम् ।
परिपूर्व्वे तथा दानं यवानाञ्च द्विजोत्तमाः ॥
इदापूर्व्वेऽब्दवत्सायां धान्यानाञ्चानुपूर्व्वकं ।
उदासंवत्सरे दानं रजतस्य महाफलम् ॥
ज्योतिर्व्विदस्त्विष्यमध्यात् प्रभवादेश्च सम्भवम् ।
ऊचुस्तद्वत् समाद्यादिवर्षाणामपि सम्भवम् ॥”
इष्यमध्यात् । गुरुमध्यभोगगणनात् । प्रभवादेः । प्रभवादिवर्षषष्टेः । इति मलमासतत्त्वम् ॥ * ॥
(ध्रुवपुत्त्रः । यथा, भागवते । ४ । १० । १ ।
“प्रजापतेर्द्दुहितरं शिशुमारस्य वै ध्रुवः ।

उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ ॥”)

वत्सरान्तक:, पुं, (वत्सरस्यान्ते कायति शोभते इति। कै+क:। यद्वा, वत्सरस्यान्तो नाशो यस्मात् ।) फाल्गुनमास:। इति राजनिर्घण्ट: ॥

वत्सल:, त्रि, (वत्से पुत्त्रादिस्नेहपात्रे कामोऽस्यास्तीति। वत्स+“वत्सांसाभ्यां कामबले।” ५।२।९८। इति लच्।) स्नेहयुक्त:। तत्पर्य्याय:। स्निग्ध: २। इत्यमर:। ३।१।१४ ॥ (यथा, भागवते। १।५।३०।
“ज्ञानं गुह्यतमं यत्तत् साक्षात् भागवतोदितम्।
अन्ववोचन् गमिष्यन्त: कृपया दीनवत्सला: ॥”
वत्सं लाति गृह्णातीति। ला+क:। वत्सकामुके च ॥)

वत्सल:, पुं, (वत्स+लच्।) शृङ्गारादिदशरसान्तर्गतरसविशेष:। तत्पर्य्याय:। वात्सल्यम् २। इति जटाधर: ॥ (अस्य लक्षणोदाहरणे तु रसशब्दे ज्ञातव्ये ॥*॥ स्कन्दानुचरविशेष:। यथा, महाभारते। ९।४५।६९।
“वत्सलो मधुवर्णश्च कलसोदर एव च ॥”)

वत्सला, स्त्री, (वत्से कामोऽस्त्यस्या इति। लच्। यद्वा, वत्सं लातीति। ला+क:।) वत्सकामा गौ:। इति हेमचन्द्र:। ४।३२७ ॥ (यथा, रामायणे। २।४३।१८।
“साहं गौरिव सिंहेन विवत्सा वत्सला कृता।
कैकेय्या पुरुषव्याघ्र बालवत्सेव गौर्बलात् ॥”)

वत्साक्षी, स्त्री, (वत्सस्याक्षीव गात्रचिह्नं यस्या:। षच् समासे।) गोडुम्बा। इति जटाधर: ॥

वत्सादन:, पुं, (अत्तीति। अद्+ल्यु:। वत्सानां अदनो भक्षक:।) वृक:। इति राजनिर्घण्ट: ॥

वत्सादनी, स्त्री, (वत्सैरद्यते प्रियत्वादिति। अद् ल्युट्। ङीप्।) गुडूची। इत्यमर: ।२।४।८९ ॥

व(व)द, इ ङ स्तुत्यभिवादयो:। इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-सक०-सेट्।) अभिवादो नमस्कार:। इ, वन्द्यते। ङ, वन्दते गुरुं लोक:। नमस्करोति स्तौति वा इत्यर्थ:। इति दुर्गादास: ॥

व(ब)द, ऐ वाचि। इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट्।) ऐ, उद्यात्। इति दुर्गादास: ॥ (“क्विपि संवत् दन्त्योष्ठ्यात् पक्षे सानुनासिको वकार: संव्वत् यस्तु मन्यते नायं संप्रसारिणो वदे: प्रयोग: किन्तर्हि वद स्थैर्य्ये इत्यस्य ओष्ठ्यवकारादे: तन्मते मकारवदपि सम्बदिति वर्णदेशना।” इति मनोरमा ॥)

वद, क वाक्सन्देशयो:। इति कविकल्पद्रुम: ॥ (चुरा०-पर०-सक०-आत्म०-इत्येके-सेट्।) क, वादयति। सन्देशो वचनविशेष:। अयमात्मनेपदीत्येके। इति दुर्गादास: ॥

वद, ञ ङ वाक्सन्देशयो:। इति कविकल्पद्रुम: ॥ (भ्वा०-उभ०-आत्म०-इत्येके-सक०-सेट्।) ञ, वदति वदते। ङ, वदते। अयमात्मनेपदीत्यन्ये। इति दुर्गादास: ॥

वद:, त्रि, (वदति वक्तीति। वद्+पचाद्यच्।) वक्ता। इत्यमर:। ३।१।३५ ॥

वदनं, क्ली, (वदन्त्यनेनेति। वद्+करणे ल्युट्।) मुखम्। इत्यमर: ॥ (यथा, आर्य्यासप्तशत्याम्। २७६।
“दर्शनविनीतमाना गृहिणी हर्षोल्लसत्कपोलतलम्।
चुम्बननिषेधमिषतो वदनं पिदधाति पाणिभ्याम् ॥”
लक्षणया अग्रभाग:। यथा, सुश्रुते। १।७।
“त्रीण्यन्यानि (यन्त्राणि) जाम्बववदनानि त्रीण्यङ्कुशवदनानि षड्वाग्निकर्म्मस्वभिप्रेतानि॥”
वद्+भावे ल्युट्। कथनम् ॥)

वदनासव:, पुं, (वदनस्य आसव:।) अधरमधु। इति भूरिप्रयोग: ॥

वदन्ति:, वदन्ती, स्त्री, (वद्+“वदेश्च।” इत्युज्ज्वलदत्तोक्त्या झिच्प्रत्यय:।३।५०॥ कृदिकारादिति वा ङीष्।) कथा। इति सिद्धान्तकौमुदी ॥ विसर्गशून्यं वदन्तिपदं क्रियापदं भवति ॥ (यथा, मनु:। १२।११५।
“यं वदन्ति तमोभूता मूर्खा धर्म्ममतद्विद: ॥”)

वदन्य:, त्रि, वदान्य:। इत्यमरटीकासारसुन्दरी ॥

वदान्य:, त्रि, (वदति सर्व्वेभ्य एव दास्यामीति मनोहरवाक्यमिति। वद्+“वदेरान्य:।” उणा० ३।१०४। इति आन्य:।) बहुप्रद:। (यथा, रघु:। ५।२४।
“गतो वदान्यान्तरमित्ययं मे
माभूत् परीवादनवावतार: ॥”)
वल्गुवाक्। इत्यमर:। ३।१।६ ॥ (स्वनामख्यात ऋषिविशेषे, पुं। यथा, महाभारते। १३।१९।११।
“निवेष्टुकामस्तु पुरा अष्टावक्रो महातपा:।
ऋषेरथ वदान्यस्य वव्रे कन्यां महात्मन: ॥”)

वदामं, क्ली, फलविशेष:। बादाम इति भाषा ॥ तत्पर्य्याय:। सुफलम् २ वातवैरि: ३ नेत्रोपमम् ४। अस्य गुणा:। उष्णत्वम्। सुस्निग्धत्वम्। वातघ्नत्वम्। गुरुत्वम्। शुक्रकारित्वञ्च। इति राजनिर्घण्ट: ॥ अपि च।
“वातादो वातवैरी स्यान्नेत्रोपमफलस्तथा।
वाताद उष्ण: सुस्निग्धो वातघ्न: शुक्रकृत् गुरु: ॥
वातादमज्जा मधुरो वृष्य: पित्तानिलापह:।
स्निग्धोष्णकफकृत् श्रेष्ठो रक्तपित्तविकारिणाम्॥”
इति भावप्रकाश: ॥

वदाल:, पुं, (वद+घञर्थे क:। वदेन वदनेन अलति पर्य्याप्नोतीति। वद+अल्+अच्।) मत्स्यविशेष:। बोयालि इति भाषा। तत्पर्य्याय:। पाठीन: २। इति त्रिकाण्डशेष: ॥ हव्यकव्ययोस्तस्योपयोगित्वं यथा, मनु:।
“पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययो: ॥”

वदालक:, पुं, (वदाल एव। स्वार्थे कन्।) पाठीनमत्स्य:। इति भूरिप्रयोग: ॥

वदावद:, त्रि, (अत्यन्तं वदतीति। वद्+अच्। “चरिचलीति।”६।१।१३४। इत्यस्य वार्त्तिकोक्त्या निपातितम्।) वक्ता। इत्यमर:।३।१।३५॥

वध:, पुं, (हननमिति। हन्+अप्। वधादेश:।) प्राणवियोगफलकव्यापार:। तत्पर्य्याय:। प्रमापणम् २ निवर्हणम् ३ निकारणम् ४ निशारणम् ५ प्रवासनम् ६ परासनम् ७ निसूदनम् ८ निहिंसनम् ९ निर्व्वासनम् १० संज्ञपनम् ११ निर्ग्रन्थनम् १२ अपासनम् १३ निस्तर्हणम् १४ निहननम् १५ क्षणनम् १६ परिवर्ज्जनम् १७ निर्व्वापणम् १८ विशसनम् १९ मारणम् २० प्रतिघातनम् २१ उद्वासनम् २२ प्रमथनम् २३ क्रथनम् २४ उज्जासनम् २५ आलम्भ: २६ पिञ्ज: २७ विशर: २८ घात: २९ उन्माथ: ३०। इत्यमर: ॥ हिंसा ३१ घातनम् ३२ विशारणम् ३३ पिञ्जकम् ३४ पात: ३५ परिघ: ३६ परिघातनम् ३७ कदनम् ३८ निवारणम् ३९ समाघात: ४० निर्ग्रन्थनम् ४१ मारि: ४२ मारी ४३ उत्पात: ४४ मारक: ४५ मरक: ४६ मार: ४७ संघात: ४८। इति शब्दरत्नावली ॥*॥ पुण्यप्रदवधो यथा,—
“एकस्य यत्र निधने प्रवृत्ते दुष्टकारिण:।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वध: ॥
रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पग:।
आत्मानं घातयेद्यस्तु तस्य पुण्यप्रदो वध: ॥”
इति कालिकापुराणे २० अध्याय: ॥
अपि च।
“कथं नु स्त्रीवधं कुर्य्यां महापातकिनामपि।
स्त्रीवधे तु महापापं यथा ब्रह्मवधे मुने ॥
इति रामवच: श्रुत्वा विश्वामित्रस्तमाह वै ॥
यस्यास्तु बहवो मासान् म्रियन्तेऽपि द्विजन्मन:।
न पापं विद्यते तेन न दोषा नृपनन्दन ॥
यस्यास्तु निधनाद्राम जना: स्यु: सुखिनो भृशम्।
भवन्ति सततं तस्मात्तस्या: पुण्यप्रदो वध: ॥”
इत्यग्निपुराणम् ॥ * ॥
अपि च।
“नैकस्यार्थे बहून् हन्यादिति शास्त्रेषु निश्चय:।
एकं हन्याद्बहूनां हि न पापी तेन जायते ॥”
इति वामनपुराणे ५५ अध्याय: ॥ * ॥
“नाततायिवधे दोषो हन्तुर्भवति कश्चन।”
इति गीताया: १। २६ श्लोकटीकायां स्वामी ॥
पापजनकवध: प्रायश्चित्तशब्दे द्रष्टव्य: ॥ * ॥
वधयन्त्री पूर्व्वकर्म्मवश्यौ यथा,—
“न कश्चित्तात केनापि बध्यते हन्यतेऽपि वा।
वधयन्त्री पूर्व्वकर्म्मवश्यौ नृपतिनन्दन ॥”
इति वामनपुराणे ६२ अध्याय: ॥ * ॥
पारिभाषिकवधो यथा,—
“वपनं द्रविणादानं देशान्निर्यापनन्तथा।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिक: ॥”
इति महाभारते सौप्तिकपर्व्व ॥
(वधप्रकारो वधित्वभेदादिकञ्च वधिन्नितिशब्दे द्रष्टव्यम् ॥)

वधक:, पुं, (हन्तीति। हन्+क्वुन्।“हनो वध च।” उणा० २।३६ इति वधादेश:।) वधकर्त्ता।

हिंसः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ व्याधिः। स्मृतः। इति संक्षिप्तसारोणादिवृत्तिः॥

वधकर्म्म, क्ली, (वधः एव कर्म्म।) प्राणवियोगफलकव्यापारः। तद्वैदिकपर्य्यायः। दम्भोति १ श्नथति २ ध्वरति ३ धूर्व्वति ४ श्नथति ५ श्यति ६ क्नथति ७ क्रन्तति ८ चयिति ९ तर्हति १० अर्द्दयति ११ स्तृणाति १२ खेदयति १३ यातयति १४ स्फुरति १५ स्फुलति १६ निवर्त्तयति १७ अवतिरति १८ वियातः १९ आतिरत् २० तळित् २१ आखण्डलः २२ दृणाति २३ श्नाति २४ श्रणाति २५ शृणाति २६ तृणेळ्हि २७ ताळ्हि २८ मिनोति २९ निबर्हयति ३० मिनाति ३१ मिनोति ३२ धमति ३३। इति त्रयस्त्रिंशद्वधकर्म्माणः। इति वैदिकनिघण्टौ। २। १९॥

वधत्रं, क्ली, (वध्यतेऽनेन इति। वध + "अमिनक्षियजिवधिपतिभ्योऽत्रन्।" उणा० ३।१०५। इति अत्रन्।) अस्त्रम्। इत्युणादिकोषः॥

वधस्थली, स्त्री, (वधाय वधस्य वा स्थली स्थानम्।) प्राणिवधस्थलम्। मशान इति भाषा। तत्पर्य्यायः। आघातः २। इति त्रिकाण्डशेषः॥ प्रघातः ३ वधस्थानम् ४। इति शब्दरत्नावली॥ आघातनम् ५। इति हारावली॥

वधस्थानम्, क्ली, (वधाय वधस्य वा स्थानं भूमिः।) वधस्थली। इति हारावली। १९६॥

व(ब)धाङ्गकं, क्ली, (वधः बन्धनं एवाङ्गं यस्य। ततः कन्।) कारावेश्म। इति त्रिकाण्डशेषः॥

वधार्हः, त्रि, (वधं अर्हतीति। अर्ह + अण्।) वध्यः। हननयोग्यः। यथा, बृहस्पतिः।

"वधार्हः सुवर्णशतं दमं दाप्यस्तु पूरुषः।
अङ्गच्छेदार्हकस्तद्वर्द्ध सन्दंशार्हस्तदर्द्धकम्॥"

सन्दंशो हस्ताङ्गुलितर्ज्जन्योश्छेदः। इति प्रायश्चित्तविवेकः॥

वधी, [न्] त्रि, (प्राणवियोगफलकव्यापारो वधः स निष्पाद्यत्वेन निरूपितनिष्पादकत्वेनास्त्यस्येति। वध + इनिः।) वधकर्त्ता। प्राणवियोगफलकव्यापारो वधः तन्निष्पादकत्वञ्च साक्षात् परम्परोदासीनं स्मृतिकारपरिगणितं वधित्वम्। तच्च पञ्चविधं स्मृतिस्वरसात् कर्त्ता प्रयोजकोऽनुमन्तानुग्राहकौ निमित्ती चेति। नरान्तरव्यापारव्यवधानेन वधनिष्पादकः कर्त्ता। १। यः कर्त्तारं कारयति स प्रयोजकः। २। स च द्विविधः। एकः स्वतोऽप्रवृत्तमेव पदातिं वेतनादिना प्रेरयति। अपरः स्वतः प्रवृत्तमेव मन्त्रोपायोपदेशादिना प्रोत्साहयति। अनुमतिदाताऽनुमन्ता। ३। अनुमतिश्च द्विविधा एका यद्विरोधाद्धननं न भवति तस्य विरोधिनो मया निरोधः कर्त्तव्य इति प्रयुक्तिरनुमतिः। अपरा एवं कुर्व्वीति वचने प्रक्रान्ताप्रतिषेध एव। अनुग्राहकोऽपि द्विविधः। एको वध्यप्रतिरोधकः। अपरः वध्यप्रहर्त्ता। ४। उद्देश्यत्वेन हन्तुर्मन्युत्पादको निमित्ती। ५। अत्र प्रयोजकस्य कर्त्तृप्रयुक्तिद्वारेण वधकारणत्वम्। अनुमन्तुश्च हन्तुर्निर्भयत्वेन दृढतरप्रहारोत्पत्तिद्वारेण। अनुग्राहकस्य पलायनादसम्भवेन हननीयस्थैर्य्यं कुर्व्वतः प्रहारस्वरूपोत्पत्तिद्वारेण वा कारणत्वम्। निमित्तिनो हन्तुर्मन्यूत्पादनद्वारेणेति। प्रयोजकादीनां चतुर्णां यथोक्तहननकारणानामवान्तरभेदाद्भेदः। अतः पञ्चविधं वधित्वम्। इति प्रायश्चित्तविवेकः॥

वधोद्यतः, त्रि, (वधाय उद्यतः।) परवधायोद्युक्तः। तत्पर्य्यायः। सज्जः २ आततायी ३। इत्यमरः॥ आततायिवधापवादमाह बृहस्पतिः।

"नाततायिवधे हन्ता प्राप्नुयात् किल्बिषं क्वचित्।
विनाशार्थिनमायान्तं घातयन्नापराध्नुयात्॥"

कात्यायनः।

"आततायिनमायान्तमपि वेदान्तपारगम्।
जिघांसन्तं जिघांसीयात् न तेन ब्रह्महा भवेत्॥"

जिघांसी सन् ईयात् गच्छेदित्यर्थः। देवलः।

"उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम्।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्॥"

भ्रूणो ब्राह्मणविशेषः। दोषदर्शनं नियमार्थम्। मनुविष्णू।

"गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन्॥"

एवकारो नियमार्थः। तथा।

"नाततायिवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति॥"

यस्माद्धन्तुर्मन्युर्हन्यमानमन्युं नाशयति न पुनः पुरुषो हन्ति हन्यते वेति हननविधेरपवादः। आततायिनमाह वशिष्ठः।

"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षडेते आततायिनः॥"

विष्णुकात्यायनौ।

"उद्यतासिर्विषाग्निश्च शापोद्यतकरं तथा।
आथर्व्वणेन हन्तारं पिशुनश्चैव राजसु॥
भार्य्यातिक्रामिणश्चैव विद्यात् सप्ताततायिनः।
यशोवृत्तिहरानन्यानाहुर्धर्म्मार्थहारकान्॥"

विशेषमाह कात्यायनः।

"अनाचारिरपूर्व्वो यस्त्वपराधे प्रवर्त्तते।
प्राणद्रव्यापहारे च प्रवृत्तस्वाततायिना॥"

अनाचारितोऽनपकृतः। तेन पूर्व्वकृतापराधस्य मारणोद्यतस्य नाततायिता। एतेन प्रत्यपकारिवधे दोष एव। ननु आततायिनोऽपि गोब्राह्मणयोर्हनने दोषमाह सुमन्तुः।

"आततायिवधे न दोषोऽन्यत्र गोब्राह्मणात् यदा हन्यात् प्रायश्चित्तं कुर्य्यात्।" तथा भविष्ये।

"स्वसारमपि गोविप्रं न हन्यात् कदाचन॥"

अतः पूर्व्ववचनविरोधः। अत्र व्यवस्थामाह कात्यायनः।

"आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः।
वधस्तत्र तु नैव स्यात् पापे हीने वधो भृगुः॥"

जन्मपदेन जातिकुलञ्चोच्यते। तेन हन्तुरपेक्षया तपोविद्याजातिकुलैरुत्कृष्टो नाततायी वध्यः तदन्यो वध्य एव। भगवद्गीतायाम्। १। ३६।
यथा,—

"पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः॥"

इति।

एतान् भीष्मादीनत्युत्कृष्टगुणानित्यर्थः। एवम्भूताततायिनश्चाहनने फलमप्याह बृहस्पतिः।

"आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतम्।
यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत्॥"

यद्यपि गुरुं बहुश्रुतं हन्यादिति श्रूयते तथापि गुरोः सकाशात् कुलविद्यातपोभिः शिष्यस्यापकर्षसम्भवादेवं बहुश्रुतादपि। एवमधमवर्णस्य उत्तमवर्णो न वध्यः पूर्व्वापराधकृतविषयं वा सुमन्तुवचनम्। गौराततायपि न वध्यः।

"नखिनां शृङ्गिणाञ्चैव दंष्ट्रिणाञ्चाततायिनाम्।
हस्त्यश्वानां तथान्येषां वधे हन्ता न दोषभाग्॥"

इति कात्यायनवचनं गोव्यतिरिक्तशृङ्गिविषयम्॥ विशेषमाह कात्यायनः।

"उद्यतानान्तु पापानां हन्तुर्दोषो न विद्यते।
निवृत्तास्तु यदारम्भाद्ग्रहणं न वधः स्मृतः॥"

इति प्रायश्चित्तविवेकः॥

वध्यः, त्रि, (वधमर्हतीति। वध + यत्।) वधार्हः। तत्पर्य्यायः। शीर्षच्छेद्यः २। इत्यमरः। ३।१।४५॥

"किन्त्वया न श्रुतं लोके अवध्याः शत्रुयोषितः।
हीनवर्णोपसक्ता या त्याज्या वध्यापि वा भवेत्॥"

इति प्रायश्चित्ततत्त्वम्॥

अवध्या यथा,—

"गोब्राह्मणं हतमथापि सुप्तं
बालं स्वबन्धुं ललनां सुदुष्टाम्।
कृतापराधानपि नैव वध्या-
दाचार्य्यमुख्या गुरवस्तथैव॥"

इति वामनपुराणे ५५ अध्यायः॥

वध्यपालः, पुं, (वध्यं बन्धनस्थानं कारागारं पालयतीति। वध्य + पाल + अण्।) कारागाररक्षकः। यथा,—

"साध्वीविक्रयदश्च वध्यपालः केशरिविक्रयी।
तन्नरके तु पच्यन्ते यश्च भक्तं परित्यजेत्॥"

इति विष्णुपुराणे। २। ६। ११॥

वन, सम्भक्तिशब्दयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वनति। संभक्तिः सेवनम्। इति दुर्गादासः॥

वन, उ म याचने। इति कविकल्पद्रुमः। (भ्वा०-पर०-अक०-सेट्। उदित्त्वात् क्त्वावेट्।) उ, वनित्वा वत्वा। म, प्रवनयति। मित्त्वेऽपि अस्य ज्वलहलेत्यादिना केवलस्य हस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः। वनयति वानयति। याच्ञार्थापारः। अयन्तु कगेवत् क्रियामात्र इत्यन्ये। इति दुर्गादासः॥

वन, कि उपकृतिश्रद्धाघातशब्दोपतापेषु । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-अक०-च-सेट् ।) कि, वानयति वनति । अयं केचिन्न मन्यते । इति दुर्गादासः ॥

वन, ट ङ उ याचे । इति कविकल्पद्रुमः ॥ (तना०-आत्म०-द्विक०-सेट् । उदित्त्वात् क्त्वावेट् ।) ट ङ, वनुते । उ, वनित्वा वत्वा । इति दुर्गादासः ॥

वनं, क्ली स्त्री, (वनतीति । वन्+पचाद्यच् । यद्वा, वन्यते सेव्यते इति । “पुंसि संज्ञायां घः प्रायेण ।” ३।३।११८ । इति घः ।) बहुवृक्षयुक्तस्थानम् । (यथा, मनुः । ८ । ३५६ ।
“परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा ।
नदीनां वापि सम्भेदे ससंग्रहणमाप्नुयात् ॥”
स्त्रियान्तु यथा, साहित्यदर्पणे आर्थ्यव्यञ्जनायाम् ।
“कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः ।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु
र्दूरे पतिः कथय किं करणीयमद्य ॥”)
तत्पर्य्यायः । अटवी २ अरण्यम् ३ विपिनम् ४ गहनम् ५ काननम् ६ । इत्यमरभरतौ ॥ दावः ७ दवः ४ अटविः ८ भीरुकम् १० भ्राटम् ११ गुहिनम् १२ । इति शब्दरत्नावली ॥ ग्रवम् १३ समजम् १४ प्रान्तरम् १५ विक्रम् १६ ॥ इति जटाधरः ॥ कान्तारम् १७ । इति राजनिर्घण्टः ॥ * ॥ गृहसमीपकर्त्तव्यवनं यथा,—
“शिविराभ्यन्तरे भद्रा स्थापिता तुलसी शुभाम् ।
धनपुत्त्रप्रदात्री च पुण्यदा हरिभक्तिदा ।
प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत् ॥
मालती यूथिका कुन्दं माधवी केतकी तथा ।
नागेश्वरं मल्लिका च काञ्चनं वकुलं शुभम् ॥
अपराजिता च शुभदा तेषामुद्यानमीप्सितम् ।
पूर्व्वे च दक्षिणे चैव शुभदं नात्र संशयः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
मथुरायां द्वादश वनानि यथा,—
“रम्यं मधुवनं नाम विष्णुस्थानमनुत्तमम् ।
तद्दृष्ट्वा मनुजो देवि सर्व्वान् कामानवाप्नुयात् ॥
वनं तालवनञ्चैव द्वितीयं वनमुत्तमम् ।
तत्र स्नात्वा नरो देवि कृतकृत्यो हि जायते ॥
तृतीयं कुमुदं नाम वनं चैवोत्तमं तथा ।
तत्र गत्वा नरो देवि कृतकृत्यो हि जायते ॥
एकादश्यां शुक्लपक्षे मासि भाद्रपदे हि या ।
तत्र स्नातो नरो देवि रुद्रलोके महीयते ॥
चतुर्थं काम्यकवनं वनानां वनमुत्तमम् ।
तत्र गत्वा नरो देवि मम लोके महीयते ॥
विमलस्य च कुण्डे तु सर्व्वैः पापैः प्रमुच्यते ।
यस्तु प्रमुच्यते प्राणान् मम लोकं स गच्छति ॥
पञ्चमं वकुलवनं वनस्थानमनुत्तमम् ।
तत्र गत्वा नरो देवि अग्निस्थानं स गच्छति ॥
यमुनायाः परे पारे देवानामपि दुर्लभम् ।
अस्ति भद्रवनं नाम षष्ठं वनमनुत्तमम् ॥
तत्र गत्वा तु वसुधे मद्भक्तो मत्परायणः ।
तद्वनस्य प्रभावेण नागलोकं स गच्छति ॥
सप्तमन्तु वनं भूमे खादिरं लोकविश्रुतम् ।
तत्र गत्वा नरो भद्रे मम लोकं स गच्छति ॥
महावनं चाष्टमन्तु सदैव तु मम प्रियम् ।
तस्मिन् स्नात्वा तु मनुजो इन्द्रलोके महीयते ॥
लोहजं धवलं नाम लोहजङ्घेन रक्षितम् ।
नवमन्तु वनं देवि महापातकनाशनम् ॥
वनं बिल्ववनं नाम दशमं देवपूजितम् ।
तत्र गत्वा तु मनुजो ब्रह्मलोके महीयते ॥
एकादशन्तु भाण्डीरं योगिनां प्रियमुत्तमम् ।
तस्य दर्शनमात्रेण नरो गर्भं न गच्छति ।
भाण्डीरं समनुप्राप्य वनानां वनमुत्तमम् ॥
वासुदेवं ततो दृष्ट्वा पुनर्जन्म न विद्यते ॥
वृन्दावनं द्वादशमं वृन्दया परिरक्षितम् ।
मम चैव प्रियं भूमे महापातकनाशनम् ॥
वृन्दावनन्तु गोविन्दं ये पश्यन्ति वसुन्धरे ।
न ते यमपुरं यान्ति वैकुण्ठं प्राप्नुयुर्नराः ॥”
इति वाराहे मथुरातीर्थवनद्वादशकवर्णनं नामाध्यायः ॥ * ॥ वनविशेषे मरणफलं यथा,—
“यदेतत् कथितं पुण्यं मया ब्रह्मसुखावृतम् ।
तत् समग्रं भवेत्तस्य अरण्येष्वपरेषु च ॥
अरण्यानि प्रवक्ष्यामि तथा चैवोषराणि च ।
सैन्धवं दण्डकारण्यं नैमिषं कुरुजाङ्गलम् ॥
उपलावृतमारण्यं जम्बूमार्गोऽथ पुष्करम् ।
हिमवांस्ततोऽरण्य उत्तमः परिकीर्त्तितः ॥
नवस्वेतेष्वरण्येषु यस्तु प्राणान् परित्यजेत् ।
ब्रह्मलोकातिथिर्भूत्वा स याति परमं पदम् ॥”
इति देवीपुराणे अरण्योषरप्रशंसा ॥ * ॥ अरण्ये वर्णनीयानि यथा,—
“अरण्येऽहिवराहेभयूथसिंहादयो द्रुमाः ।
शुककाककपोताद्या भिन्नभल्लदवादयः ॥”
उद्याने वर्णनीयानि यथा,—
“उद्याने सरणिः सर्व्वफलपुष्पलताद्रुमाः ।
पिकालिकेकिहंसाद्याः क्रीड़ावाप्यध्वगस्थितिः ॥”
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥ (शङ्कराचार्य्यशिष्यस्य हस्तामलकस्य शिष्याणामुपाधिविशेषे, पुं । यदुक्तं प्राणतोषिण्याम् अवधूतप्रकरणे ।
“सुरम्ये निर्झरे देशे वने वासं करोति यः ।
आशापाशविनिर्म्मुक्तो वननामा स उच्यते ॥”)

वनं, क्ली, (वन्यते सेव्यते इति । वन्+“पुंसि संज्ञायां घः प्रायेण ।” ३ । ३ । ११८ । घः । इति निघण्टौ देवराजयज्वा । १ । १२ । ६ ।) जलम् । (यथा, रघुः । ६ । २२ ।
“नमयति स्म स केवलमुन्नतं
वनमुचे नमुचेररये शिरः ॥”)
निवासः । आलयः । इति मेदिनी । ने, १६ ॥ (चमसः । यथा, ऋग्वेदे । २ । १४ । ६ ।
“अध्वर्य्यवः कर्त्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम् ॥”
“वने संभजनीये वने उदके निपूतमाप्यायनेन शोधितं सोममुन्नयध्वमूर्द्धं नयत । यद्वा वने तद्विकारे चमसे निपूतं दशापवित्रेण शोधितं सोमं वने चमसे उन्नयध्वम् ।” इति तद्भाष्ये सायणः ॥) प्रस्रवणम् । इति हेमचन्द्रः ॥ (रश्मिः । इति निघण्टुः । १।५।८ ॥ “वन षण सम्भक्तौ भूवादिः परस्मैपदी । पुंसि संज्ञायां घः । वन्यते सेव्यते शीतादिनिवारणाय । अथवा वनतिर्हिंसार्थः । वन्यते हिंस्यतेऽनेन तमः । यद्वा, वनु याचने तनादि आत्मने भाषा । वन्यते याच्यते वृष्टिप्रदानाय । यद्वा, वनशब्दे भूवादिः परस्मैपदी वन्यते शब्द्यते स्तूयते स्तोतृभिः ।” इति तत्र देवराजयज्वा ॥ यथा, ऋग्वेदे । १ । २४ । ७ ।
“अबुध्ने राजा वरुणो वनस्य ।”)

वनकदली, स्त्री, (वनोद्भवा कदली ।) काष्ठकदली । इति राजनिर्घण्टः ॥ (विवृतिरस्याः काष्ठकदलीशब्दे ज्ञातव्या ॥)

वनकन्दः, पुं, (वनजातः कन्दः ।) वनसूरणः । धरणीकन्दः । इति राजनिर्घण्टः ॥

वनकार्पासी, स्त्री, (वनोद्भवा कार्पासी ।) वनोद्भवकार्पासः । तत्पर्य्यायः । त्रिपर्णा २ भारद्वाजी ३ वनोद्भवा ४ । इति रत्नमाला ॥

वनकोलिः, स्त्री, (वनोद्भवा कोलिः ।) वनबदरी । तत्पर्य्यायः । कर्कन्धिका २ फलकर्कन्धा ३ । इति कोषान्तरम् ॥

वनगोचरः, पुं, (वनं गोचरो देशो यस्य ।) व्याधः । इति केचित् ॥ (वनं जलं गोचरो निवासस्थानं यस्य । नारायणः । इति भागवतटीकायां श्रीधरस्वामी । ३ । १८ । ३ ॥ त्रि, जलचरः । यथा, भागवते । ३ । १८ । २ ।
“मुखान्तमस्त्रा स्वचोऽरुणश्रिया
जहास चाहो वनगोचरो मृगः ॥”
काननविहारी । यथा, मनुः । ८ । २५६ ।
“सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम् ।
इमानप्यनुयुञ्जीत पुरुषान् वनगोचरान् ॥”)

वनगौः, स्त्री, (वनस्य गौः ।) गवयः । इति राजनिर्घण्टः ॥

वनचन्दनं, क्ली, (वनजातं चन्दनम् ।) अगुरु । देवदारु । इति विश्वः ॥

वनचन्द्रिका, स्त्री, (वने चन्द्रिका ज्योत्स्नेव ।) मल्लिका । इति राजनिर्घण्टः ॥

वनचम्पकः, पुं, (वनजातश्चम्पकः । शाकपार्थिववत् समासः ।) वनजचम्पकपुष्पवृक्षः । तत्पर्य्यायः । वनदीपः २ हेमाङ्गः ३ सुकुमारः ४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । वातकफनाशित्वम् । वर्ण्यत्वम् । चक्षुष्यत्वम् । व्रणरोपणत्वम् । वयःस्तम्भकारित्वञ्च । इति राजनिर्घण्टः ॥

वनच्छागः, पुं, (वनस्य छागः।) अरण्यच्छागलः। तत्पर्य्यायः। एडकः २ शिशुवाहकः ३। इति त्रिकाण्डशेषः॥ (वने छाग इव।) शूकरः। इति शब्दमाला॥

वनजं, क्ली, (वने जले जायते इति। जन्+डः।) अम्बुजम्। इति मेदिनी। जे, २८॥ (यथा, रघुः।५।७३।

"दीर्घेष्वमी नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्ष! वनायुदेश्याः।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः॥"

जलजाते वनोद्भवे च त्रि। यथा, रामायणे।२।५४।७।

"दारूणि परिभिन्नानि वनजैरुपजीविभिः॥")

वनजः, पुं, (वने जले अरण्ये वा जायते इति। जन्+डः।) मुस्तकः। इति मेदिनी। जे, २८॥ गजः। इति विश्वः॥ वनशूरणः। इति राजनिर्घण्टः॥ (तुम्बुरुफलम्। तत्पर्य्यायो यथा,—
"तुम्बुरुः सौरवः सौरो वनजः सानुजोऽन्धजः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वनजा, स्त्री, (वने जायते इति। जन्+डः। टाप्।) मुद्गपर्णी। इति मेदिनी। जे, २८॥ अरण्यकार्पासी। वन्योपोदकी। अश्वगन्धा। गन्धपत्रा। मिश्रेया। ऐन्द्रम्। इति राजनिर्घण्टः॥

वनजीरः, पुं, (वनोद्भवो जीरः।) वनोद्भवजीरकः। तत्पर्य्यायः। हस्तपाली २ सूक्ष्मपत्रः ३ अरण्यजीरः ४ कणः ५। अस्य गुणाः। कटुत्वम्। शीतलत्वम्। व्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

वनतिक्तः, पुं, (वनेषु वनोद्भवेषु तिक्तः।) हरीतकी। इति शब्दमाला॥

वनतिक्ता, स्त्री, (वनेषु वनोद्भवेषु मध्ये तिक्ता।) वनतिक्तिका। इति रत्नमाला॥

वनतिक्तिका, स्त्री, (वनतिक्ता+कन्। टापि अत इत्वम्।) पाठा। इत्यमरः। २।४।८४॥ (गुणादिकमस्याः पाठाशब्दे ज्ञेयम्॥)

वनदः, पुं, (वनं जलं ददातीति। दा+कः।) मेघः। इति शब्दमाला॥ वनदातरि, त्रि॥

वनदमनः, पुं, (वनजातो दमनः।) अरण्यदमनः। इति राजनिर्घण्टः॥

वनदीपः, पुं, (वनस्य दीप इव।) वनचम्पकः। इति राजनिर्घण्टः॥

वनधेनुः, पुं, (वनस्य धेनुरिव।) गवयी। इति राजनिर्घण्टः॥

वनपल्लवः, पुं, (वनमिव निविडः पल्लवो यस्य।) शोभाञ्जनवृक्षः। इति जटाधरः॥ अरण्यजपत्रञ्च॥

वनपांशुलः, पुं, (वने पांशुलः पापिष्ठः।) व्याधः। इति शब्दरत्नावली॥

वनपिप्पली, स्त्री, (वनोद्भवा पिप्पली।) वनोद्भवपिप्पली। तत्पर्य्यायः। सूक्ष्मपिप्पली २ क्षुद्रपिप्पली ३ वनकणा ४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। तीक्ष्णत्वम्। रुच्यत्वम्। दीपनत्वम्। सा आमा गुणाढ्या। शुष्का स्वल्पगुणा। इति राजनिर्घण्टः॥

वनपुष्पा, स्त्री, (वनमिव निविडं पुष्पं यस्याः। टाप्।) शतपुष्पा। इति राजनिर्घण्टः॥ (शतपुष्पाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

वनपूरकः, पुं, (वनजातः पूरको बीजपूरकः।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनप्रियं, क्ली, (वनेषु वनजातेषु मध्ये प्रियम्।) त्वचम्। इति राजनिर्घण्टः॥

वनप्रियः, पुं, (वनं प्रियं यस्य।) कोकिलः। इत्यमरः।२।५।१९॥ (यथा,—

"अयि वनप्रिय विस्मृत एव किं
बलिभुजो विषमो भवताधुना।
यदनयैव कुहूरिति विद्यया
न पततश्चरणौ धरणौ तव॥"

इत्युद्भटः॥)

अरण्यप्रियमात्रे, त्रि॥

वनबीजः, पुं, (वनस्य वनोद्भवो वा बीजो बीजपूरकः।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनबीजकः, पुं, (वनबीज+स्वार्थे कन्।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनबीजपूरकः, पुं, (वनोद्भवो बीजपूरकः।) अरण्यजातबीजपूरः। तत्पर्य्यायः। वनजः २ वनबीजकः ३ वनबीजः ४ अत्यम्ला ५ गन्धाम्ला ६ वनोद्भवा ७ देवदूती ८ पीता ९ देवदासी १० देवेष्टा ११ मातुलुङ्गिका १२ पवनी १३ महाफला १४। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। उष्णत्वम्। रुचिप्रदत्वम्। वातामदोषकृमिकफश्वासनाशित्वञ्च। इति राजनिर्घण्टः॥

वनभद्रिका, स्त्री, (वने भद्रं यस्याः। ततः टापि अत इत्वम्।) भद्रबला। इति केचित्॥

वनभुक्, [ज्] पुं, (वनं भुङ्क्ते इति। वन्+भुज्+क्विप्।) ऋषभौषधम्। इति शब्दचन्द्रिका॥

वनमक्षिका, स्त्री, (वनस्य मक्षिका।) दंशः। इत्यमरः।२।५।२७॥

वनमल्ली, स्त्री, (वनोद्भवा मल्ली।) वनोद्भवमल्लिका। इति शब्दरत्नावली॥

वनमाला, स्त्री, (वनोद्भवपुष्परचिता माला। मध्यपदलोपिसमासः।) श्रीकृष्णस्य माला। तत्स्वरूपं यथा,—

"आजानुलम्बिनी माला सर्व्वर्त्तुकुसुमोज्ज्वला।
मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्त्तिता॥"

इति शब्दमाला॥

(वनपुष्पस्रक्। यथा, रघुः।९।५१।

"ग्रथितमौलिरसौ वनमालया
तरुपलाशसवर्णतनुच्छदः॥")

वनमालिनी, स्त्री, (वनमाली अस्त्यस्यामिति। इनिः। ङीप्।) द्वारकापुरी। इति त्रिकाण्डशेषः॥ वाराही। इति राजनिर्घण्टः॥

वनमाली, [न्] पुं, (वनमाला अस्त्यस्येति। इनिः।) श्रीकृष्णः। इत्यमरः।१।१।२१॥ (नारायणः। यथा, प्रद्युम्नविजये। ३ अङ्के।

"कमलयामलया वनमालिनं
गिरिजया गिरिशञ्च निशा विधुम्।
सुविहिता परियोजयतो विधे-
श्चतुरता ह्यनुरूपसमागमे॥")

वनमुक्, [च्] पुं, (वनं जलं मुञ्चतीति। मुच्+क्विप्।) मेघः। इति शब्दरत्नावली॥ (जलवर्षिणि, त्रि। इति रघुः।९।२२॥)

वनमुद्गः, पुं, (वनोद्भवो मुद्गः।) मुकुष्टकः। इत्यमरः।२।९।१७॥ तत्पर्य्यायः। वरकः २ निगूढकः ३ कुलीनकः ४ खण्डी ५। इति हेमचन्द्रः।४।२३९॥ अस्य अन्यपर्य्यायगुणौ मुकुष्टमकुष्टकशब्दयोर्द्रष्टव्यौ॥ (यथा, सुश्रुते।१।४६।
"वनमुद्गकलायमकुष्टमसूरमङ्गल्यचणकसतीनत्रिपुटकहरेणवाढकीप्रभृतयो वैदलाः॥")

वनमुद्गा, स्त्री, (वनमुद्ग+टाप्।) मुद्गपर्णी। इति राजनिर्घण्टः॥

वनमूतः, पुं, मेघः। वनं जलं मूतं बद्धं अनेन वनं मुञ्चति इति वा मनीषादिः। इत्यमरटीकायां भरतकृतजीमूतशब्दव्युत्पत्तिदर्शनात्॥

वनमूर्द्धजा, स्त्री, (वनस्य मूर्द्ध्नि जायते इति। जन्+डः।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनमोचा, स्त्री, (वनोद्भवा मोचा।) काष्ठकदली। इति राजनिर्घण्टः॥

वनरः, पुं, (वानरः। पृषोदरादित्वात् ह्रस्वे साधुः।) वानरः। इति भरतद्विरूपकोषः॥

वनराजः, पुं, (वनस्य वने वा राजा। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्।) सिंहः। इति शब्दमाला॥ वनस्य राजा च॥

वनलक्ष्मीः, स्त्री, (वनस्य लक्ष्मीः शोभा।) कदली। इति राजनिर्घण्टः॥

वनवर्व्वरः, पुं, (वनोद्भवो वर्व्वरः।) कृष्णार्जकः। इति राजनिर्घण्टः॥

वनवर्व्वरिका, स्त्री, (वनजाता वर्व्वरिका।) अरण्यजवर्व्वरी। वनवाबुइ इति भाषा। तत्पर्य्यायः। सुगन्धिः २ सुप्रसन्नकः ३ दोषाक्लेशी ४ विषघ्नः ५ सुमुखः ६ सूक्ष्मपत्रकः ७ निद्रालुः ८ शोफहारी ९ सुवक्त्रः १०। अस्य गुणाः। उष्णत्वम्। सुगन्धित्वम्। पिशाचवान्तिभूतघ्नत्वम्। घ्राणसन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥

वनवल्लरी, स्त्री, (वनोद्भवा वल्लरी।) निःश्रेणिकाख्यम्। इति राजनिर्घण्टः॥

वनवह्निः, पुं, (वनस्य वनोद्भवो वा वह्निः।) दावानलः। इति हेमचन्द्रः।४।१६७॥ (यथा, कथासरित्सागरे।५६।३४३।

"फणारत्नप्रभाजालजटिलं वनवह्निना।
गृहीतमिव तेनोग्रहेतिहस्तेन मूर्द्धनि॥")

वनवासनः, पुं, (वनं वासयति गन्धेनेति। वासि+ल्युः।) खट्टासः। इति त्रिकाण्डशेषः॥

वनवासी, [न्] पुं, (वनं वासयति सुरभीकरोतीति । वासि + णिनिः ।) ऋषभनामौषधम् । शृङ्गकन्दः । वाराहीकन्दः । शाल्मलीकन्दः । नीलमहिषकन्दः । इति राजनिर्घण्टः ॥ (वने वसतीति । वस् + णिनिः ।) वनवासकर्त्तरि, त्रि ॥ (यथा, मनुः । ६ । २७ ।
"तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥")

वनवृन्ताकी, स्त्री, (वनस्य वृन्ताकी वार्त्ताकी ।) वृहती । इति राजनिर्घण्टः ॥

वनव्रीहिः, पुं, (वनस्य व्रीहिः ।) नीवारः । इति हेमचन्द्रः । ४ । २४२ ॥

वनशूकरी, स्त्री, (वनस्य शूकरीव रोमशत्वात् मांसलत्वाच्च ।) कपिकच्छुः । इति राजनिर्घण्टः ॥ (वनस्य शूकरी ।) आरण्यवराही च ॥

वनशूरणः, पुं, (वनजातः शूरणः ।) वनोद्भवौलः । वन ओल इति भाषा । तत्पर्य्यायः । सितशूरणः २ वन्यः ३ वनकन्दः ४ अरण्यशूरणः ५ वनजः ६ श्वेतशूरणः ७ वनकन्दुलः ८ । अस्य गुणाः । रुच्यत्वम् । कटुत्वम् । उष्णत्वम् । कृमिगुल्मशूलादिदोषसर्व्वारोचकनाशित्वञ्च । इति राजनिर्घण्टः ॥

वनशृङ्गाटः, पुं, (वनस्य शृङ्गाट इव कण्ठकावृतत्वात् ।) गोक्षुरकः । इत्यमरः । २ । ४ । ६६ ॥ (अस्य पर्य्यायो यथा,—
"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ॥
पलङ्कषा श्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

वनशृङ्गाटकः, पुं, (वनशृङ्गाट + स्वार्थे कन् ।) गोक्षुरकः । इति राजनिर्घण्टः ॥

वनशोभनं, क्ली, (वनं जलं शोभयतीति । शुभ + णिच् + ल्युः ।) पद्मम् । इति शब्दचन्द्रिका ॥ वनस्य शोभाकर्त्तरि, त्रि ॥

वनश्वा, [न्] पुं, (वनस्य वने वा श्वा कुक्कुरः ।) गन्धमार्जारः । वृकः । व्याघ्रः । इति मेदिनी । ने, २०७ ॥

वनसङ्कटः, पुं, (वने सङ्कटो बाहुल्यं यस्य ।) मसूरः । इति शब्दचन्द्रिका ॥

वनसमूहः, पुं, (वनानां समूहः ।) अरण्यसंहतिः । तत्पर्य्यायः । वन्या २ । इत्यमरः । २ । ४ । ४ ॥ वान्या ३ । इति शब्दरत्नावली ॥ जलसमूहश्च ॥

वनसरोजिनी, स्त्री, (वनस्य सरोजिनी पद्मिनीव शोभाकरत्वात् ।) वनकार्पासी । इति शब्दरत्नावली ॥

वनस्थः, पुं, (वने तिष्ठतीति । स्था + कः ।) मृगः । इति शब्दचन्द्रिका ॥ (वानप्रस्थः । यथा, मनुः । ५ । १३७ ।
"एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
त्रिगुणं स्याद्वनस्थानां यतीनान्तु चतुर्गुणम् ॥")

वनवासिनि, त्रि ॥ (यथा, हरिवंशे ।१५२।२१।
"प्रवृत्तचक्रो नृपतिर्वनस्थान्
गजान् गजैः खैरिव वीर्य्यदीप्तान् ॥")

वनस्था, स्त्री, (वने तिष्ठति या । स्था + कः । टाप् ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥

वनस्पतिः, पुं, (वनस्य पतिः । पारस्करादित्वात् सुट् ।) विना पुष्पं फलिद्रुमः । (यथा, मनुः । १ । ४७ ।
"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः ॥")
वृक्षमात्रम् । इति मेदिनी । ते, २१६ ॥ (यथा, महाभारते । १ । १४१ । १६ ।
"कथं नु शाखास्तिष्ठेरंश्छिन्नमूले वनस्पतौ ॥")
स्थालीवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद्वनस्पतिः ॥"
इति भावप्रकाशे । १ । १ ॥
घृतपृष्ठस्य पुत्त्रविशेषः । यथा, भागवते । ५ । २०।२१ ॥ "आत्मा मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितवर्णो वनस्पतिरिति घृतपृष्ठसुताः ॥" वटवृक्षः ॥ तत्पर्य्यायो यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

वनहरिद्रा, स्त्री, (वनोद्भवा हरिद्रा ।) अरण्यजहरिद्रा । तत्पर्य्यायः । शोली २ शोलिका ३ वनारिष्टा ४ । अस्या गुणाः । कटुत्वम् । गौल्यत्वम् । रुच्यत्वम् । तिक्तत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"अरण्यहलदीकन्दः कुष्ठवातास्रनाशनः ॥"
इति भावप्रकाशः ॥

वनहासः, पुं, (वनस्य हास इव प्रकाशकत्वात् ।) काशतृणम् । इति त्रिकाण्डशेषः ॥ कुन्दवृक्षः । इति राजनिर्घण्टः ॥

वनहासकः, पुं, (वनहास + स्वार्थे कन् ।) काशतृणम् । इति शब्दरत्नावली ॥

वनाखुः, पुं, (वनस्याखुः ।) शशकः । इति त्रिकाण्डशेषः ॥

वनाखुकः, पुं, मुद्गः । इति त्रिकाण्डशेषः ॥

वनाजः, पुं, (वनस्य अजः ।) वनच्छागः । तत्पर्य्यायः । इड्डिक्कः २ शिशुवाहकः ३ पृष्ठशृङ्गः ४ । इति हेमचन्द्रः । ४ । ३४४ ॥

वनाटुः, पुं, वर्व्वणा । नीलमक्षिका । इति शब्दचन्द्रिका ॥

वनामलः, पुं, (वनस्य आमल आमलक इव ।) करमर्द्दकवृक्षः । इति शब्दमाला ॥

वनाम्रः, पुं, (वनस्य आम्र इव ।) कोशाम्रः । इति राजनिर्घण्टः ॥ (गुणादिविशेषोऽस्य कोशाम्रशब्दे ज्ञेयः ॥)

वनायुः, पुं, देशविशेषः । यथा,—
"गया गयश्च वानायुर्वनायुर्यदुवात्वतम् ।"
इति शब्दरत्नावली ॥
(यथा, महाभारते । ८ । ७ । ११ ।
"आजानेयैः सैन्धवैः पार्व्वतीयैर्नदीजकाम्बोजवनायुवाह्लिकैः ॥"
दानवविशेषः । यथा, महाभारते ।१।६५।३०।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥")

वनायुजः, पुं, (वनायौ देशे जायते इति । जन + डः ।) वनायुदेशोद्भवघोटकः । अस्य रूपान्तरं वानायुजः । इति शब्दरत्नावली ॥

वनारिष्टा, स्त्री, (वनजाता अरिष्टेव ।) वनहरिद्रा । इति राजनिर्घण्टः ॥

वनार्चकः, पुं, (वनस्य अर्चक इव । नियतपुष्पचायित्वात् तथात्वम् ।) पुष्पजीवी । मालाकारः । इति जटाधरः ॥

वनार्द्रका, स्त्री, (वनोद्भवा आर्द्रका ।) वनभवार्द्रकम् । इति राजनिर्घण्टः ॥ अस्याः पर्य्यायगुणौ ऐन्द्रशब्दे द्रष्टव्यौ ॥

वनालिका, स्त्री, (वनं अलति भूषयतीति । अल + ण्वुल् । टापि अत इत्वम् ।) हस्तिशुण्डी । यथा,—
"वज्रवल्लयस्थिसंहारो हस्तिशुण्डी वनालिका ।"
इति हारावली । ६५ ॥

वनाश्रयः, पुं, (वनमेव आश्रयो यस्याः ।) द्रोणकाकः । इति जटाधरः ॥ (अरण्याश्रयिणि, त्रि । यथा, मार्कण्डेये । १०६ । ४३ ।
"सीदिष्यत्यखिलो लोकस्त्वयि भूप ! वनाश्रये ॥")

वनाहिरः, पुं, (वनस्य आहिरः ।) शूकरः । इति त्रिकाण्डशेषः ॥

वनिः, पुं, अग्निः । खनि कषि अजि असि वसि सनि ध्वनि ग्रन्थि चलिभ्यश्च । इत्यनेन वनधातोः पूर्व्वानुवृत्त-इप्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । ४ । १३६ ॥

वनितः, त्रि, (वन + क्तः ।) याचितः । सेवितः । इति मेदिनी । ते, १४६ ॥

वनिता, स्त्री, (वन + क्त । टाप् ।) जातरागस्त्री । स्त्रीसामान्यम् । इति मेदिनी । ते, १४६ ॥ (यथा, रघुः । २ । १६ ।
"वशिष्ठधेनोरनुयायिनं तमावर्त्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥")

वनी, स्त्री, वनम् । इत्यमरटीकायां भरतः ॥ (यथा, साहित्यदर्पणे । २ ।
"केलीवनीयमपि वञ्जुलकुञ्जमञ्जुः ॥")

वनी, [न्] पुं, (वनं आश्रयत्वेनास्त्यस्येति । वन + इनिः ।) वानप्रस्थः । यथा,—
"गृहमेधी शरद्वसन्तयोः व्रीहियवाभ्यां यजेत वनी वर्षासु श्यामाकैरापत्कल्पेऽन्यैः पुरातनैर्वा ।" इति श्राद्धचिन्तामणौ हारीतः ॥

वनीकः, त्रि, याचकः । इत्यमरटीकासारसुन्दरी ॥

वनीयकः, त्रि, (वनिं याच्ञामिच्छतीति । क्यच् । ततो ण्वुल् ।) याचकः । इत्यमरः ।३।१।४६॥

वनेक्षुद्रा, स्त्री, (वने क्षुद्रा। अलुक्समासः।) करञ्जः। इति रत्नमाला॥

वनेचरः, त्रि, (वने चरतीति। चर+"चरेष्टः।" इति टः। तत्पुरुषे कृतीत्यलुक्।) अरण्यचारी। यथा,—

"वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः॥"
इति कुमारसम्भवे १ सर्गः॥

वनेज्यः, पुं, (वने इज्यः पूज्यः।) वहरसालः। इति राजनिर्घण्टः॥

वनेसर्ज्जः, पुं, (वने सर्ज्ज इव।) असनवृक्षः। इति रत्नमाला॥

वनोद्भवा, स्त्री, (वने उद्भवो यस्याः।) वनकार्पासी। इति रत्नमाला॥

वनौकाः, [स्] पुं, (वनमेव ओको गृहं यस्य।) वानरः। इत्यमरः। २। ५। ३॥ (वनवासिनि, त्रि। यथा, भागवते। ४। ८। २१।
"धर्म्मोऽपि कश्यपः शक्रो मुनयो ये वनौ-
कसः।
चरन्ति दक्षिणीकृत्य भ्रमन्तो यत् सतारकाः॥")

वन्दका, स्त्री, वन्दा। यथा,—
"वन्दाका शेखरी सेवा वन्दा च वन्दकेष्यते॥"
इति भरतधृतरुद्रः॥

वन्दथः, पुं, (वन्दते स्तौति वन्द्यते स्तूयते इति वा। वन्द+"शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः।" इत्यत्र वञ्चीत्यस्य स्थाने वन्दीति पाठोऽपि बहुसम्मतः इत्यतोऽथः।) स्तोता। स्तुत्यः। वन्दिधातोरथप्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥

वन्दनं, क्ली, (वन्दतेऽनेनेति। वन्द+करणे ल्युट्।) वदनम्। इति शब्दचन्द्रिका॥ (वन्द+भावे ल्युट्।) प्रणामः। स तु षोड़शधाभक्त्यन्तर्गतभक्तिविशेषः। यथा। पाद्मोत्तरखण्डे शिवपार्व्वतीसंवादे।

"आद्यं तु वैष्णवं प्रोक्तं शङ्खचक्राङ्कनं हरेः।
धारणञ्चोर्द्ध्वपुण्ड्राणां तन्मन्त्राणां परिग्रहः॥
अर्च्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम्॥
तत्पादोदकसेवा च तन्निवेदितभोजनम्।
तदीयानाञ्च संसेवा द्वादशीव्रतनिष्ठता॥
तुलसीरोपणं विष्णोर्द्देवदेवस्य शार्ङ्गिणः।
भक्तिः षोड़शधा प्रोक्ता भवबन्धविमुक्तये॥"
इति हरिभक्तिविलासे ११ विलासः॥

षोड़शोपचारपूजान्तर्गतशेषोपचारः। यथा,—
"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्कांचमनस्नानवसनाभरणानि च।
गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा॥"
इत्याह्निकतत्त्वे आचारचिन्तामणिः॥ * ॥

अथ वन्दनम्।
"प्रणमेद्दण्डवद्भूमावुभाभ्यां अष्टाङ्गं तन्मुद्राञ्च प्रदर्शयेत्।

पठेत् प्रतिप्रणामञ्च प्रसीद भगवन्निति॥"
तदुक्तमेकादशे श्रीभगवता।
"स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि।
स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत्॥"
अथ प्रणामविधिः। कालिकापुराणे।
"यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिम्।
शिरो मत्पादयोः कृत्वा बाहुभ्याञ्च परस्परम्।
प्रपन्नं पाहि मामीश भीतं मृत्युमहार्णवात्॥"
किञ्चागमे।
"दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः॥
जानुभ्याञ्चैव बाहुभ्यां शिरसा वचसा धिया।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ॥"
इति॥
"गरुड़ं दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो बुधः।
अवश्यञ्च प्रणामांस्त्रीन् शक्तश्चेदधिकाधिकान्॥"
तथा च नारदपञ्चरात्रे।
"सन्धिं वीक्ष्य हरिं चाद्यं गुरून् स्वगुरुमेव च।
द्विचतुर्व्विंशदथवा चतुर्व्विंशत्तदर्द्धकम्।
नमेत्तदर्द्धमथवा तदर्द्धं सर्व्वथा नमेत्॥"
विष्णुधर्म्मोत्तरे।
"देवार्च्चादर्शनादेव प्रणमेन्मधुसूदनम्।
स्थानापेक्षा न कर्त्तव्या दृष्टार्च्चा द्विजसत्तमाः।
देवार्च्चादृष्टपूतं हि शुचि सर्व्वं प्रकीर्त्तितम्॥"
अथ नमस्कारमाहात्म्यम्। नारसिंहे।
"नमस्कारः स्मृतो यज्ञः सर्व्वयज्ञेषु चोत्तमः।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"
स्कान्दे।
"दण्डप्रणामं कुरुते विष्णवे भक्तिभावितः।
रेणुसंख्यं वसेत् स्वर्गे शतमन्वन्तरं नरः॥"
तत्रैव श्रीकृष्णनारदसंवादे।
"प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत्।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि॥
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"
तत्रैव शिवोमासंवादे।
"भूमिमापीड्य जानुभ्यां शिर आरोप्य वै भुवि।
प्रणमेत् यो हि देवेशं सोऽश्वमेधफलं लभेत्॥"
तत्रैवान्यत्र।
"तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च।
नारायणप्रणामस्य कलां नार्हन्ति षोड़शीम्॥
शाठ्येनापि नमस्कारं कुर्व्वतः शार्ङ्गधन्विने।
शतजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति॥
रेणुगुण्ठितगात्रस्य कणा देहे भवन्ति ये।
तावद्वर्षसहस्राणि विष्णुलोके महीयते॥"
विष्णुधर्म्मोत्तरे।
"अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत्।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी॥
जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः।
कृत्वा प्रणामं देवस्य सर्व्वान् काममवाप्नुयात्॥"
ब्रह्मपुराणे।
"अनादिनिधनं देवं दैत्यदानवदारणम्।
ये नमन्ति नरा नित्यं नहि पश्यन्ति ते यमम्॥

ये जना जगतां नाथं नित्यं नारायणं द्विजाः।
नमन्ति नहि ते विष्णोः स्थानादन्यत्र गामिनः॥"
नारदीये।
"एकोऽपि कृष्णस्य सकृत्प्रणामो
दशाश्वमेधावभृथैर्न तुल्यः।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय॥"
भक्तिसुधोदये।
"विष्णोर्द्दण्डप्रणामार्थं भक्तेन पतता भुवि।
पातितं पातकं कृत्स्नं नोत्तिष्ठति पुनः सह॥
अपि पापं दुराचारं नरं त्वत्प्रणतं हरे।
नेक्षन्ते किङ्करा याम्या उलूकास्तपनं यथा॥"
श्रीविष्णुपुराणे। श्रीयमस्य निजभटानुशासने।
"हरिममरगणार्च्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्यः।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथाग्निमाज्यसिक्तम्॥"
ब्रह्मवैवर्त्ते।
"शरणागतरक्षणोद्यतं
हरिमीशं प्रणमन्ति ये नराः।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरति स्म तानसौ॥"
अष्टमस्कन्धे च बलिवाक्ये।
"अहो प्रणामाय कृतः समुद्यमः
प्रपन्नभक्तार्थविधौ समाहितः।
यल्लोकपालैस्त्वदनुग्रहोऽमरै-
रलब्धपूर्व्वोऽपसदेऽसुरेऽर्पितः॥"
अतएव नारायणव्यूहस्तवे।
"अहो भाग्यमहो भाग्यमहो भाग्यं नृणा-
मिदम्।
येषां हरिपदाब्जाग्रे शिरो न्यस्तं यथा तथा॥"
किञ्च नारसिंहे श्रीयमोक्तौ।
"तस्य वै नारसिंहस्य विष्णोरमिततेजसः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"
भविष्योत्तरे च जलधेनुप्रसङ्गे।
"विष्णोर्द्देवजगद्धातुर्जनार्द्दनजगत्पतेः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"
इत्यादि॥ * ॥

अथ प्रणामनित्यता। बृहन्नारदीये तु रुक्माङ्गदोपाख्यानारम्भे।
"सकृद्वा न नमेद्यस्तु विष्णवे शर्म्मकारिणे।
शवोपमं विजानीयात् कदाचिदपि नालपेत्॥"
किञ्च पाद्मे। वैशाखमाहात्म्ये यमब्राह्मणसंवादे।
"पश्यन्तो भगवद्द्वारं नामशङ्खपरिच्छदम्।
अकृत्वा तत्प्रणामादि यान्ति ते नरकौकसः॥"
अथ नमस्कारनिषिद्धानि। विष्णुस्मृतौ।
"जन्मप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥"
वाराहे।
"वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम्।
श्वित्री स जायते मूर्खः सप्तजन्मनि भामिनि!॥"

क्रियाऽयच ।
"अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ।
जपहोमनमस्कारान् न कुर्य्यात् केशवालये ॥"
अपि च ।
"सकृदपि निपतितो न शक्तः प्रणमेत् पृथक् ।
उत्थायोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम् ॥
ततः प्रदक्षिणं कुर्य्यात् भक्त्या भगवतो हरेः ।
नामानि कीर्त्तयन् शक्त्या नाथ साष्टाङ्गवन्द-
नाम् ॥"
इति हरिभक्तिविलासे ८ विलासः ॥ * ॥
अन्यत् नमस्कारशब्दे प्रणामशब्दे च द्रष्टव्यम् ॥
(विषविशेषः । यथा, ऋग्वेदे । ७ । ५१ । २ ।
"यदिजामन् परुषि वन्दनं भुवत् ॥"
असुरः । रक्षोविशेषः । इति ऋग्भाष्ये
सायणः । ७ । २१ । ५ ॥)
वन्दनमाला, स्त्री, (वन्दनार्था माला यत्र सा ।)
तोरणम् । इति हलायुधः । २ । १४६ ॥
(वन्दनार्था माला इति कर्म्मधारये ।) रम्भा-
स्तम्भचतुष्टयवेष्टिताम्रपल्लवमाला । यथा,
"कुर्य्याद्वन्दनमालां यो रम्भास्तम्भैः सुशोभनैः ।
चन्द्रचोद्भवैः पत्रैर्जगरे चक्रपाणिनः ॥
युगानि पत्रसंख्यानां स्वर्गे तस्योत्सवो भवेत् ।
पूज्यते वासवाद्यैश्च क्रीडते चाप्सरोगणैः ॥"
इति हरिभक्तिविलासे १३ विलासः ॥
वन्दनमालिका, स्त्री, (वन्दनमाला + स्वार्थे कन् ।)
वहिर्द्वारोपरि शुभदा माला । यथा,—
"तोरणोर्द्ध्वे तु मङ्गल्यं दामवन्दनमालिका ॥"
इति हेमचन्द्रः । ४ । ७४ ॥
वन्दना, स्त्री, (वन्द + "घट्टिवन्दिविदिभ्यश्चेति
वाच्यम् ।" ३ । ३ । १०७ । इत्यस्य वार्त्तिकोक्त्या
युच् । टाप् ।) स्तुतिः । तत्पर्य्यायः । समीची २ ।
इति त्रिकाण्डशेषः ॥ होमभस्मना तिलकम् ।
यथा,—
"ऐशान्यामाहरेद्भस्म स्रुचा वाथ स्रुवेण वा ।
वन्दनां कारयेत्तेन शिरःकण्ठांशकेषु च ।
कश्यपेतिमन्त्रेण यथाक्रमयोगतः ॥"
इति तिथ्यादितत्त्वे वशिष्ठवचनम् ॥
वन्दनी, स्त्री, (वन्द + ल्युट् । ङीप् ।) नतिः ।
जीवातुः । वटी । याचनकर्म्म । इति मेदिनी ।
ने, ६७ ॥ क्वचित् पुस्तके वटीस्थाने कटी याचन-
कर्म्मस्थाने मापनकर्म्म इति च पाठः । तत्र तु
पवर्गीयबकारादौ लिखितोऽयं शब्दः । किन्तु
वदि ङ स्तुत्यभिवादयोरित्यस्मात् अनट्प्रत्यय-
निष्पन्नत्वात् अन्तःस्थवकारादौ लिखितः ॥
वन्दनीयः, त्रि, (वदि + अनीयर् ।) स्तवनीयः ।
वन्द्यः । वन्दितव्यः । वदधातोरनीयप्रत्ययेन
निष्पन्नः ॥ (यथा, महाभारते । ७ । ८० । ३० ।
"ततः शुक्लाम्बरमासाद्य जानुभ्यां भूतले स्थितः ।
शिरसा वन्दनीयं तमभिवन्द्य जगत्पतिम् ॥")
वन्दनीयः, पुं, (वन्द्यते मेघनार्थं स्तूयते इति ।
वदि + अनीयर् ।) पीतभृङ्गराजः । इति राज-
निर्घण्टः ॥
वन्दनीया, स्त्री. (वदि + कर्म्मणि अनीयर् ।
टाप् ।) गोरोचना । इति त्रिकाण्डशेषः ॥
(विवृतिरस्या गोरोचनाशब्दे विज्ञेया ॥)
वन्दा, स्त्री, (वन्दते अपरवृक्षमिति । वदि +
अच् । टाप् ।) वृक्षोपरिवृक्षः । वाँड़ इति
परगाछा । इति च भाषा । तत्पर्य्यायः । वृक्षा-
दनी २ वृक्षरुहा ३ जीवन्तिका ४ । इत्यमरः ॥
वन्दाका ५ शेखरी ६ सेया ७ वन्दका ८ ।
इति भरतधृतदत्तः ॥ वन्दकः ९ नीलवल्ली १०
इति रत्नमाला ॥ वन्दाकी ११ परवासिका १२
इति शब्दरत्नावली ॥ वशिनी १३ पुष्पिणी १४
वन्ध्या १५ परपुष्टा १६ पराश्रया १७ । इति
शब्दचन्द्रिका ॥ लताविशेषः । भिक्षुकी । इति
मेदिनी । दे, १० ॥ अस्याः पर्य्यायान्तरं गुणाश्च
वन्दाकशब्दे द्रष्टव्याः ॥
वन्दाकः, पुं, वृक्षोपरिवृक्षः । वाँदा इति हिन्दी
भाषा । तत्पर्य्यायः । पादपरुहा २ शिखरी ३
तरुरोहिणी ४ वृक्षादनी ५ वृक्षरुहा ६ काम-
वृक्षः ७ शेखरी ८ केशरूपा ९ तरुरुहा १०
तरुस्था ११ गन्धमादनी १२ कामिनी १३
तरुभुक् १४ श्यामा १५ उपदी १६ । अस्य
गुणाः । तिक्तत्वम् । शिशिरत्वम् । कफपित्त-
श्रमापहत्वम् । वश्यादिसिद्धिदत्वम् । वृष्यत्वम् ।
कषायत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
"वन्दाकः स्वादुहिमस्तिक्तः कषायमधुरो रसे ।
मङ्गल्यः कफवातास्ररक्षोव्रणविषापहः ॥"
इति भावप्रकाशः ॥
वन्दाका, स्त्री, वन्दा । इति भरतधृतदत्तः ॥
वन्दाकी, स्त्री, वन्दा । इति शब्दरत्नावली ॥
वन्दारुः, त्रि, (वन्दते स्तौति अभिवादयतीति ।
वन्द + "शृवन्द्योरारुः ।" ३ । २ । १७३ । इति
आरुः ।) वन्दनशीलः । तत्पर्य्यायः । अभि-
वादकः २ । इत्यमरः । ३ । १ । २८ ॥ अभि-
वादयिता ३ । इति शब्दरत्नावली ॥ (यथा,
ऋग्वेदे । १ । १४७ । २ ।
"पीयति त्वो अनुत्वो गृणाति वन्दारुस्ते
तन्वं वन्दे अग्ने ॥"
स्तोत्रि, स्त्री । इति ऋग्वेदभाष्ये सायणः । ४ ।
४३ । १ ॥)
व(ब)न्दिः, स्त्री, (वन्दते स्तौति नृपादिकं स्तुत्य-
र्थमिति । वदि + "सर्व्वधातुभ्य इन् ।" उणा०
४ । ११७ । इति इन् ।) आलस्यमनुष्यगवादिः ।
कयेदी इति भाषा । तत्पर्य्यायः । प्रग्रहः २
उपग्रहः ३ वन्दी ४ । इत्यमरभरतौ ॥ वन्दिका
५ । इति शब्दरत्नावली ॥ सोपानकः । इत्यु-
णादिकोषः ॥ (स्त्वः । यथा, भागवते । ६ ।
१ । ६२ ।
"वन्द्यन्तैः कैतवैश्चौर्य्यैर्गर्हितां वृत्तिमास्थितः ॥"
पुं, स्तुतिपाठकः । यथा, हरिवंशे । ११२ ।
५० ।
"स्तुतमागधवन्दीनामेकैकस्य सहस्रिकम् ॥")
व(ब)न्दिग्राहः, पुं, (वन्दिमिव गृहस्थं गृह्णातीति ।
ग्रह + अण् ।) अस्त्रागारदेवतागारभेदकः ।
(डाकाइत इति भाषा ॥) यथा,—
"वन्दिग्राहांस्तथा वाजिकुञ्जराणाञ्च हारिणः ।
प्रसह्यघातिनश्चैव शूलानारोपयेन्नरान् ॥
वन्दिग्राहादीन् बलात्कारेण घातकांश्च नरान्
शूलानारोपयेत् । अयञ्च वधप्रकारविशेषो-
पदेशः ।
"अस्त्रागारायुधागारदेवतागारभेदकान् ।
हस्त्यश्वरथहर्त्तॄंश्च हन्यादेवाविचारयन् ॥"
इति मनुस्मरणात् । इति मिताक्षराव्यवहार-
काण्डे दण्डप्रकरणम् ॥
व(ब)न्दिचौरः, पुं, (वन्दिमिव विधाय चौरः अप-
हारकः । गृहस्थं वन्दिमिव कृत्वा समानद्रव्या-
णामपहारकत्वादस्य तथात्वम् ।) वन्दिग्राहः ।
तत्पर्य्यायः । मायनः २ । इति हारावली ।
१४५ ॥ वन्दीकारः ३ । इति त्रिकाण्डशेषः ॥
व(ब)न्दिपाठः, पुं, (वदि + भावे इन् । वन्दिः
स्तुतिस्तस्याः पाठो यत्र ।) स्तुतिग्रन्थः । तत्-
पर्य्यायः । भोगावली २ । इति त्रिकाण्डशेषः ॥
व(ब)न्दी, स्त्री, (वन्दि + "कृदिकारादक्तिनः ।"
इति ङीष् ।) वन्दिः । इत्यमरटीकायां भरतः ॥
(यथा, कुमारे । २ । ५२ ।
"गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो वन्दीमिव जयश्रियम् ॥")
व(ब)न्दी [न्], पुं, (वन्दते स्तौति नृपादीनिति ।
वदि स्तुतौ + णिनिः ।) राजादेर्यशःशौर्य्य-
वीर्य्यादिस्तुतिकारकः । तत्पर्य्यायः । स्तुति-
पाठकः २ । इत्यमरः ॥ मागधः ३ मगधः ४ ।
इत्यन्ये । इति तट्टीकायां भरतः ॥ (यथा,
रघुः । ४ । ६ ।
"परिकल्पितसान्निध्या काले काले च वन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥")
अस्योत्पत्तिर्यथा,—
"क्षत्त्रियाद्विप्रकन्यायां सूतो भवति जातितः ।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥"
इति मानवे १० अध्यायः ॥ * ॥
श्राद्धोत्तरमस्मै शक्तितो दानस्याकरणे निन्दा
यथा,—
"वन्दिभ्यश्चैवमर्थिभ्योऽन्यार्थिभ्यश्चाग्रमर्थिनः ।
यदि तत्र न दद्यात्तु विफलं श्राद्धिनो भवेत् ॥"
वन्दिनो वीर्य्यस्तोतारः । अर्थिनः सन् यदि
एभ्योऽन्नं न दद्यात् श्राद्धं विफलं भवेदित्यर्थः ।
"सूताः पौराणिकाः प्रोक्ता मागधा वंश-
शंसकाः ।
वन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥"
इत्युक्तेः । इत्यस्य श्राद्धोत्तरदाननिषेधात् श्राद्धे
वन्दिप्रभृतिभ्यो दानाकरणे निन्दाश्रवणाच्च
श्राद्धात् पूर्व्वं तदर्थं भोज्यादिकं उत्सृजेत् ।
इति श्राद्धतत्त्वम् ॥ (भृत्यः । यथा, भागवते ।
११ । ४ । १५ ।
"ओमित्यादेशमादाय नत्वा तं सुरवन्दिनः ।

उर्व्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥"
"सुरवन्दिनो देवभृत्याः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

व(ब)न्दीकारः, पुं, (वन्दीवत् ग्रहस्थं करोतीति । कृ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) वन्दिग्राहः । डाकाइत इति भाषा । तत्पर्य्यायः । मायनः २ प्रसह्यचौरः ३ चिल्लाभः ४ । इति त्रिकाण्डशेषः ॥

वन्ध्या, स्त्री, (वन्ध्यते स्तूयते इति । वदि+ण्यत् ।) वन्दा । इति शब्दचन्द्रिका ॥ गोरोचना । इति भावप्रकाशः ॥ (वन्दनीये, त्रि । यथा, साहित्यदर्पणे १ परिच्छेदे ।
"आशीः परम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥"
यथा च भागवते । ४ । १२ । २६ ।
"आतिष्ठ जगतां वन्द्यं तद्विष्णोः परमं पदम् ॥")

वन्द्रं, क्ली, (वन्द्यते स्तूयते इति । वदि स्तुतौ+ "स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् ।) कल्याणम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वन्द्रः, त्रि, (वन्दते स्तौति देवादीन् पूजाकाले इति । वदि+रक् ।) पूजकः । इत्युणादिकोषः ॥

वन्यं, क्ली, (वने भवम् । वन+यत् ।) त्वचम् । इति राजनिर्घण्टः ॥ (कुटन्नटम् । तत्पर्य्यायो यथा,—
"कुटन्नटं परं वन्यं सुस्ताभञ्च परीलवम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

वन्यः, त्रि, (वने भवः । वन्+यत् ।) वनोद्भूतः । इति मेदिनी । ये, ५४ ॥ (यथा, रघुः ।१।४५।
"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥")

वन्यः, पुं, (वन+यत् ।) वनसूरणः । वाराहीकन्दः । देवनलः । इति राजनिर्घण्टः ॥ (चीरविदारी । तत्पर्य्यायो यथा,—
"चीरी शुक्लपर्णाख्यः स्वुक्छदः कुष्ठनाशनः ।
वन्यो मूलकमूलाभः स्वस्कन्दः स च कञ्चुकी ॥"
इति वैद्यकरत्नमालायाम् ।)

वन्या, स्त्री, (वनानामरण्यानां जलानां वा संहतिः । वन+"पाशादिभ्यो यः ।" ४ । २ । ३६ । इति यः ।) वनसमूहः । इत्यमरः । २ । ४ । ४ ॥ जलसंहतिः । इति मेदिनी । ये, ५४ ॥ सुद्गपर्णी । (तत्पर्य्यायो यथा, रत्नमालायाम् ।
"सुद्गपर्णी क्षुद्रसहा काशुद्गा सिंहपर्णिका ।
वन्या मार्ज्जारगन्धेति सूर्पपर्ण्यावुभे च ते ॥")
गोपालकर्कटी । गुञ्जा । मिश्रेया । भद्रमुस्ता । गन्धपत्रा । इति राजनिर्घण्टः ॥ (अश्वगन्धा । तत्पर्य्यायो यथा,—
"हयगन्धाश्वगन्धाख्या वाजिगन्धाश्वगन्धकः ।
वन्या तुरगगन्धा च कञ्चुकाश्वावरोहकः ॥"
वन्या क्वचित् दृश्यते । इति वैद्यकरत्नमालायाम् ॥)

वन्योपोदकी, स्त्री, (वन्या वनोद्भूता उपोदकी ।) लताविशेषः । वनपुँइ इति भाषा । तत्पर्य्यायः । वनजा २ वनसाह्वया ३ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रोचनत्वञ्च । इति राजनिर्घण्टः ॥

वन्नः, पुं, (वनति भागमर्हतीति । वन सम्भक्तौ+ "कृत्येकाग्रवचेति ।" उणा० २ । २८ । इति रन्प्रत्ययः ।) अंशी । भागी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वप, औ ञ डु ऐ मुण्डनबीजोप्त्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) औ, वप्ता । ञ, वपति वपते । डु, उप्त्रिमम् । मुण्डो मुण्डितकरणम् । वपति मस्तकं नापितः । वपति तन्तुं तन्तुवायः । यदि वपति कृषाणः क्षेत्रमासाद्य बीजम् । इति दुर्गादासः ॥

वपः, पुं, (वप्+घः ।) केशमुण्डनम् । बीजवपनम् । इति वपधातोर्भावेऽल्प्रत्ययेन निष्पन्नः ॥

वपनं, क्ली, (वप्+भावे ल्युट् ।) केशमुण्डनम् । (यथा, मनुः । ५ । १४० ।
"शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम् ॥")
बीजाधानम् । इति मेदिनी । ने, १२२ ॥

वपनी, स्त्री, (उप्यते मस्तकादिकमस्यामिति । वप् +अधिकरणे ल्युट् । ङीप् ।) नापितशाला । इति हेमचन्द्रः । ४ । ६६ ॥ (तन्तुवायशाला । इति तद्धात्वर्थदर्शनात् ॥)

वपा, स्त्री, (उप्यतेऽत्रेति । वप्+भिदाद्यङ् । टाप् ।) छिद्रम् । (यथा, शतपथब्राह्मणे । ६ ।३।३।५ ।
"अथ वल्मीकवपा सुषिरा यत्रे निहिता भवति ॥") मेदः । इत्यमरः । २ । ६ । ६४ ॥ (यथा, रामायणे । १ । १४ । ३६ ।
"पतत्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियः ।
ऋत्विक् परमसम्पन्नः श्रपयामास शास्त्रतः ॥"
सा च हृदयस्थधातुः । यथा । "त्वक् च लोहितञ्च मांसञ्च मेदश्च नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधानञ्चामाशयश्च पक्वाशयश्चोत्तरगुदञ्चाधरगुदञ्च क्षुद्रान्त्रञ्च वपा च वपावहनञ्चेति मातृजानि ।" इति चरके शारीरस्थाने तृतीयेऽध्याये ॥)

वपिलः, पुं, (वपति बीजमिति । वप्+इलच् ।) पिता । इत्युणादिकोषः ॥

वपुः, [स्] क्ली, (उप्यन्ते देहान्तरभोगसाधनबीजीभूतानि कर्म्माण्यत्रेति । वप्+"अर्त्तिपृवपियजीति ।" उणा० २ । ११८ । इति उसिः ।) शरीरम् । इत्यमरः । २ । ६ । ७० ॥ (यथा, रघुः । २ । ४७ ।
"एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च ॥")
प्रशस्ताकृतिः । इति मेदिनी । सि, ३६ ॥ (अंशः । यथा, मनुः । ५ । ९६ ।
"अष्टानां लोकपालानां वपुर्धारयते नृपः ॥"
"वपुस्तेजोऽंशः ।" इति मेधातिथिः ॥ स्त्री, स्वनामख्याता दक्षकन्या । सा तु धर्म्मराजस्य पत्नी । यथा, मार्कण्डेये । ५० । २१ ।
"बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी ।
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ॥")

वपुःस्रवः, पुं, (वपुषः शरीरात् स्रवः क्षरणं यस्य ।) शरीरस्थरसधातुः । इति राजनिर्घण्टः ॥

वपुनः, पुं, (वप+उनन् । वयुन+पृषोदरादित्वात् यस्य पः इति केचित् ।) देवता । इति शब्दरत्नावली ॥

वपुषा, स्त्री, हपुषा । इति भावप्रकाशः ॥ (रूपे, क्ली । यथा, ऋग्वेदे । ३ । २ । १५ ।
"इयं न चित्रं वपुषाय दर्शतं
मनुर्हितं सदमिद्राय ईमहे ॥"
"वपुषाय रूपार्थं दर्शतं दर्शनीयम् ।" इति तद्भाष्ये सायणः ॥)

वपुष्टमा, स्त्री, पद्मचारिणी । इति जटाधरः ॥ (काशीराजस्य कन्या । जनमेजयस्य पत्नी । सा तु रम्भा नामाप्सरा । जनमेजयकृताश्वमेधकाले इन्द्रेणेयमश्वप्रविष्टेन धर्षितासीदतो जनमेजयेनेयं परित्यक्तापि पुनर्गन्धर्व्वराजविश्वावसुवाक्येन गृहीता । एतद्विवरणन्तु हरिवंशे १९८ अध्याये द्रष्टव्यम् ॥)

वप्ता, [ऋ] पुं, (वपति बीजमिति । वप्+तृच् ।) जनकः । इति मेदिनी ॥ कविः । इति जटाधरः ॥ (नापितः । यथा, ऋग्वेदे । १० । १४२ । ४ ।
"यदा ते वातो अनुवाति शोचिर्वप्तेव श्मश्रु वपसि प्र भूम ॥"
"यथा वप्ता नापितो वपति मुण्डयति तथा भूम भूमिं प्रवपसि प्रकर्षेण मुण्डयसि ॥" इति तद्भाष्ये सायणः ॥)

वप्ता, [ऋ] त्रि, (वपतीति ॥ वप् बीजोप्तौ+तृच् ।) वापकः । इति मेदिनी ॥ (कर्षकः । यथा, मनुः । ३ । १४२ ।
"यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम् ।
तथानृचे हविर्दत्त्वा न दाता लभते फलम् ॥")

वप्रं, क्ली, पुं, (उप्यतेऽत्रेति । वप+"वृषिवपिभ्यां रन् ।" उणा० २ । २७ । इति रन् ।) दुर्गनगरे परिखाया उद्धृतमृत्तिकास्तूपबद्धे यदुपरि प्राकारो निवेश्यते तत् । तथा चार्थशास्त्रम् । खातादुद्धृतमृदा वप्रं कारयेत् तस्योपरि प्राकारमिति । तत्पर्य्यायः । चयः २ । इत्यमरभरतौ ॥ मृत्तिकास्तूपः ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् ।५०५ ।
"लग्नं जघने तस्याः सुविशाले कलितकरिकरक्रीडे ।
वप्रे सक्तं द्विपमिव शृङ्गारस्तां विभूषयसि ॥")

महावप्रो यथा,—
"महोद्यानां महावप्रां तड़ागशतशोभिताम्।
प्राकारगृहसम्बाधामिन्द्रस्येवामरावतीम् ॥"
महान् वप्रो यस्याः।
"प्राकाराधारभूता, कृत्रिमोच्छ्रिता भूमि-
र्वप्रसंज्ञा ।"
इति विष्णुपुराणे ५ अंशे २३ अध्याये ॥ * ॥
वपति बीजमत्र। चेत इति भाषा। तत्-
पर्य्यायः। केदारः २ क्षेत्रम् ३। इत्यमरभरतौ॥
निष्कुटः ४ वनजम् ५ वाजिका ६ पाटीरः ७।
इति जटाधरः ॥ (यथा, वृहत्संहितायाम्।
१९।१६।
"शालीक्षुमत्यपि धरा धरणीधराभ-
धाराधरोज्झितपयः परिपूर्णवप्रा ।")
रेणुः। तटः। इति मेदिनीकरहेमचन्द्रौ ॥
(यथा, किराते। ७।११।
"तत् पूर्व्वं प्रतिविदधे सुरापगाया
वप्रान्तस्खलितविवर्त्तनं पयोभिः ।"
पर्व्वतसानुः। यथा, किराते। ५।३६।
"नानारत्नज्योतिषां सन्निपातै-
श्छन्नेष्वन्तः सानुवप्रान्तरेषु ।")
वप्रं, क्ली, (वप्+"सृधिवपिभ्यां रन्।" उणा०
२।२७। इति रन्) सीसकम्। इति हेम-
चन्द्रः। ४।४६ ॥ (तथास्य पर्य्यायान्तरम्।
"सीसं वध्रञ्च वप्रञ्च योगेष्टं नागनामकम् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
वप्रः, पुं, (वपति बीजमिति। वप्+रन्।)
तातः। इति मेदिनी। रे, ८२ ॥ प्राकारः।
इति विश्वः ॥ प्रजापतिः। इति संक्षिप्तसारो-
णादिवृत्तिः ॥
वप्रा, स्त्री, (वप्+रन्। टाप्।) मञ्जिष्ठा।
इति राजनिर्घण्टः ॥ (विवरणमस्या मञ्जिष्ठा-
शब्दे ज्ञातव्यम् ॥)
वप्रिः, पुं, (वपति बीजमत्र। वप्+"वह्न्यादयश्च।"
उणा० ४।६६। इति क्रिन्प्रत्ययेन
साधुः।) क्षेत्रम्। इति सिद्धान्तकौमुद्यां-
मुणादिवृत्तिः ॥ दुर्गतिः। समुद्रः। इति संक्षिप्त-
सारोणादिवृत्तिः ॥
वप्री, स्त्री, (वल्मी+पृषोदरादित्वात् साधुः।)
वल्मीकः। इति हलायुधः ॥
ववः, पुं, एकादशकरणान्तर्गतप्रथमकरणम्।
अस्याधिपतिरिन्द्रः। तत्र विहितानि यथा,—
"पौष्टिकस्थिरशुभानि ववाख्ये।"
इति ज्योतिस्तत्त्वम् ॥
अथ जातफलम्।
"ववाभिधाने जननं हि यस्य
शूरोऽतिधीरो मनुजः कृती स्यात्।
पद्मालया तन्निलये निवासं
करोति नित्यं सुविचक्षणः स्यात् ॥"
इति कोष्ठीप्रदीपः ॥
दाक्षिणात्यमते अस्य शब्दस्य प्रथमवकारः
पवर्गीयः शेषवकारोऽन्तःस्थः ॥

वभ्र, गत्याम्। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
सक०-सेट्।) वकारादिः। ओष्ठ्यवर्गचतुर्थो-
पधः। वभ्रति। इति दुर्गादासः ॥
वम्, त्र, (उ+अ+म्।) शिवपूजान्ते कपोल-
वाद्यविशेषः। तत्तु उकाराकारमकारात्मकं
शिवप्रणवस्वरूपम्। यथा,—
"डिम् डिम् डिम् डिम् डिडिम् डिम् डिडिमरु
डमरुं वादयन् छन्दनादं
वम् वम् वम् वम् ववम् वम् भ्रमितदशशिरा-
स्तालमानेन नृत्यन्।
कर्पूराभित्तभस्मापटितपटुजटालम्बिरुद्राक्ष-
माली
मायायोगी दशास्यो रघुरमणपुरः प्राङ्गणे
प्रादुरासीत् ॥"
इति रामलीलामृतकाव्यम् ॥ * ॥
वरुणबीजम्। यथा। नासापुटौ धृत्वा वमिति
वरुणबीजस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा
तस्मात् ललाटस्थचन्द्राद्गलितसुधया मातृका-
वर्णात्मिकया समस्तं देहं विरचय्य लमिति
पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढ़ं
विचिन्त्य दक्षिणेन वायुं रेचयेत्। इति भूत-
शुद्धिप्रकरणे तन्त्रसारः ॥
वम, ण उ टु उद्गिरि। इति कविकल्पद्रुमः ॥
(भ्वा०-पर०-सक०-सेट्।) वकारादिः। ण,
वेमतुः ववमतुः। अन्ये तु तत्कार्य्यविधायक-
सूत्रे फणादौ वेमं न पठन्ति वेमुश्च केचिद्बधिर-
मित्यादिसाधनाय तत्सूत्रे दन्त्यवकारादिवर्ज्जन-
स्यानित्यतां स्वीकुर्व्वन्ति। केचित् 'पुनर्व्वम्य-
वकारादिधात्वन्तरमप्यस्ति इति प्रलपन्ति।
ञ, वामः वमः। उ, वमित्वा वान्त्वा। टु,
वमथुः। उद्गिरि वान्तौ। वमति अन्नमजीर्ण-
वान्। अमन्तत्वेऽपि णौ ज्वलह्वल इत्यादिना
केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्य नित्यं
ह्रस्वः। वमयति वामयति प्रवमयति। इति
दुर्गादासः ॥
वमः, पुं स्त्री, वमनम्। इति वमधातोरप्प्रत्ययेन
निष्पन्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
वमथुः, पुं, (वमनमिति। वम्+"ट्वितोऽथुच्।"
३।३।८९। इति अथुच्।) वमिः। (यथा,
सुश्रुते उत्तरतन्त्रे ४५ अध्यायः।
"दौर्ब्बल्यश्वासकासज्वरवमथुमदाः पाण्डुता-
दाहमूर्च्छाः ।")
हस्तिशुण्डनिर्गतजलकणा। तत्पर्य्यायः। कर-
शीकरः २। इत्यमरः। २।६।५५ ॥ (यथा,
नैषधे। १९।६।
"रजनिवमथुप्रालेयाम्भः कणक्रमसंभृतैः
कुशकिशलयस्याग्रैरग्रेशयैरुदबिन्दुभिः ।")
वमनं, क्ली, (वम्+भावे ल्युट्।) छर्द्दनम्।
(यथा, सुश्रुते। १।१२।
"मधुराम्लौ रसौ वापि वमनाय प्रदापयेत् ।"
वमनद्रव्यमपि। यथा, कथासरित्सागरे।
६४।१७।

"स दत्त्वा वमनं तस्मात् स्वतकल्पमजी-
वयत् ।")
अर्द्दनम्। इति मेदिनी। ने, १२३ ॥ आहुतिः।
इति विश्वः ॥ (आहरणम्। यथा, रघुः।
१५।२९।
"या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशिता ।" * ॥
अथ वमनकल्पीयविधिः।
"वमने मदनं श्रेष्ठं त्रिवृन्मूलं विरेचने।
नित्यमन्यस्य तु व्याधि विशेषेण विशिष्यते ॥
फलानि तानि पाण्डूनि न चातिहरितान्यपि।
आदायाह्नि प्रशस्तर्क्षे मध्ये ग्रीष्मवसन्तयोः ॥
प्रमृज्य कुशमुत्तोल्यां क्षिप्त्वा बद्ध्वा प्रलेपयेत्।
गोमयेनानुमृत्तोली धान्यमध्ये निधापयेत् ॥
मृदुभूतानि मध्विष्टगन्धानि कुशवेष्टनात्।
निष्कृष्य निर्गतेऽष्टाहे शोषयेत्तान्यथातपे ॥
तेषां ततः सुशुष्काणामुद्धृत्य फलपिप्पलीः।
दधिमध्वाज्यपललैर्म्मृदित्वा शोषयेत् पुनः ॥
ततः सुगुप्तं संस्थाप्य कार्य्यकाले प्रयोजयेत्।
अथादाय ततो मात्रां जर्ज्जरीकृत्य वासयेत् ॥
शर्व्वरीं मधुयष्ट्या वा कोविदारस्य वा जले।
कर्ब्बुदारस्य बिम्ब्या वा नीपस्य विदुलस्य वा ॥
शणपुष्प्याः सदापुष्प्याः प्रत्यक्पुष्प्युदकेऽथवा।
ततः पिबेत् कषायं तं प्रातर्मृदितगालितम् ॥
सूत्रोदितेन विधिना साधु तेन तथा वमेत्।
श्लेष्मज्वरप्रतिश्यायगुल्मान्तर्व्विद्रधीषु च ।"
"पित्ते कफस्थानगते जीमूतादिजलेन तत्।
वृद्धाहेऽधोऽस्रपित्ते च क्षीरं तत्पिप्पली
घृतम् ॥
चैरेयीं वा कफच्छर्दिप्रसेकतमकेषु च।
दध्युत्तरं वा दधि वा तत्सुतक्षीरसम्भवम् ॥
फलादिक्वाथकल्काभ्यां सिद्धं तत् सिद्धदुग्ध-
जम्।
सर्पिः कफाभिभूतेऽग्नौ शुष्यद्देहे च वा मतम् ।"
"वत्सकादिप्रतीवापः कषायः फलमज्जनः।
निम्बार्कान्यतरक्वाथसमायुक्तो नियच्छति ॥
वह्निमूलानपि व्याधीन् सर्व्वान् सन्तर्पणोद्भवान्।
वाटपुष्पफलश्लक्ष्णचूर्णैर्माल्यं सुरूषितम् ॥
वमेत्तत्र वसादीनां हृष्टो जिघ्रन् सुखं सुखी ।"
"इक्ष्वाकुर्व्वमने शस्तः प्रताम्यति च मानवे।
फलपुष्पविहीनस्य प्रवालैस्तस्य साधितम्।
पित्तश्लेष्मज्वरे क्षीरं पित्तोद्रिक्ते प्रयोजयेत् ।"
"सक्तुभिर्व्वा पिबेन्मन्थं तुम्बीस्वरसभावितैः।
कफोद्भवे ज्वरे कासे गलरोगेष्वरोचके ॥
गुल्मे ज्वरे प्रसक्ते च कल्कं मांसरसैः पिबेत्।
नरः साधु वमत्येवं न च दौर्ब्बल्यमश्नुते ।"
"जीवकर्षभकौवीरा कपिकच्छूः शतावरी।
काकोलीश्रावणी मेदा महामेदा मधूलिका ॥
तद्रजोभिः पृथग्लेहा धामार्गवरजोऽन्विताः।
कासे हृदयदाहे च शस्ता मधुसिताद्रुताः ।"
"सर्षपाणां मधूकानां तोयेन लवणस्य वा।
पाययेत् कौटजं बीजं युक्तं हस्तरयाथवा ॥"

सप्ताहं शार्कराक्तं तच्चूर्णं पाययेत् पृथक् ।
स्वजीमूतकेक्ष्वाकु जीवन्तीजीवकोदनैः ॥
कल्पनैर्षधमुख्यानामिति कल्पदिगीरिता ।
दोषभावेन मतिमानन्यान्यपि च कल्पयेत् ॥"
इति वाभटे कल्पस्थाने प्रथमेऽध्याये ॥)

वमनः, पुं. (वमतीव शुक्लवर्णमिति । वम्+ल्युः ।) शणः । इति राजनिर्घण्टः ॥

वमनी, स्त्री, (वमन+ङीप् ।) जलौका । इति राजनिर्घण्टः ॥ (विवृतिरस्या जलौकाशब्दे ज्ञातव्या ॥)

वमनीया, स्त्री, (वमयतीति । वम्+ण्यर्थविवक्षायाम् । अभिधानात् कर्त्तरि अनीयर् ।) मक्षिका । इति राजनिर्घण्टः ॥ वमनयोग्ये, त्रि ।

वमिः, स्त्री, (वमनमिति । वम्+सर्व्वधातुभ्य इन् । उणा० ४ । ११७ ।) प्रच्छर्द्दिका । इत्यमरः । २ । ६ । ५५ ॥ (अस्याः सम्प्राप्तिलक्षणचिकित्सितं पथ्यापथ्यञ्च यथा,—
"आमये शूलरोगार्त्तिः पर्व्वभेदो भ्रमः क्लमः ।
शोषः शिरोव्यथा स्वेदो नेत्रे गम्भीरमिच्छति ॥
रक्तं वा पीतकं वापि अजीर्णाज्जायते वमिः ।
गम्भीरनेत्रो वमते विड्बन्धो वातिबाध्यते ॥
गात्रे खल्ली करं शूलं तथा शोषोऽतिमूर्च्छना ।
विकलाङ्गो भ्रमार्त्तश्च भ्रमत्तदीक्षते जगत् ॥
शिरोभिर्व्वेपतेऽत्यर्थं करपादौ हिमोपमौ ।
एतैर्लिङ्गैस्तु संयुक्तां छर्द्दिं दूरे परित्यजेत् ॥"
चिकित्सा ।
"स पञ्चमूलीक्वथितः कषायः
ससैन्धवश्चामलकस्य कल्कः ।
क्वाथं पिबेन्मिश्रितपिप्पलीकं
स वातछर्द्दिर्विनिवारणश्च ॥"
"आमलक्या रसेनाथ द्राक्षं चन्दनकं मधु ।
गुटिकामलमानेन लेह्यो हन्ति वमिं ध्रुवम् ॥
पिचुककटुकरञ्जबीजस्य फलत्रिकं मधुना च
यावशूकश्च ।
समकृतमिति चूर्णमेतन्मधुना युतं वमिं निवारयति ॥"
"काकोली काकमाची च क्वाथं शर्करया युतम् ।
लाजाशर्करसंयुक्तं हन्ति पित्तवमिं नृणाम् ॥
मातुलुङ्गरसश्चैव पथ्याशर्करया युतः ।
हन्ति कामं पित्तभवं वमिं शीघ्रं नियच्छति ॥
दृष्ट्वा पित्तवमिं घोरां सदाहभ्रमदायिनीम् ।
तथारग्वधपत्राणि मधुशर्करयान्वितम् ॥
नीरपानं प्रशस्तं वा मुस्ताशर्करयान्वितम् ।"
"जम्ब्वाम्रयोः प्रवालानि दाड़िमामलकन्तथा ।
मस्तुनोपोषितं पानं हन्याच्छ्लेष्मवमिं नृणाम् ॥
सर्ज्जार्ज्जुनं धवकदम्बककोलचूर्णं
शुण्ठ्या च धान्यसहितं सगुड़ं प्रदद्यात् ।
श्लेष्मोद्भवं वमनमाशु निहन्ति पुंसां
मुस्तीकणा मधुविड़ङ्गयुतोऽपि लेहः ॥"
"ऊर्द्ध्वभागगते दोषे विरेको हि प्रशस्यते ।
तस्मिन् जातेऽप्यधोभागं वमनं शाम्यति ध्रुवम् ॥
अथ द्विभागमामञ्चेत्तदा देयाभया मधु ।
क्रिमिजं वमनं ज्ञात्वा क्रिमीणां शमनक्रिया ॥
न चोष्णं नातिचाम्लञ्च न तीक्ष्णं न तथा लघु ।
तण्डुलीयकशाकं वा न मद्यं काञ्जिकं न तु ॥
वमिरोगे च कथितं पथ्यञ्चात्र शृणुष्व मे ।
आनूपं शालिभक्तञ्च शतपुष्पा च वास्तुकम् ॥
आढ़की मुद्गयूषञ्च दधि सर्पिर्गुड़ान्वितम् ।
अङ्गारमण्डका चाथ वमौ पथ्यं प्रशस्यते ॥
यथाबलं यथाकालं यथारोगं यथानलम् ।
तथा दृष्ट्वा प्रकुर्व्वन्ति पथ्यानां समुपक्रमम् ॥
दिवानिद्रां प्रयुञ्जीत वमौ श्वासेऽतिसारके ।
हिक्काशोषे तथा जीर्णे वमिर्भेदेऽथवा पुनः ॥
न चोष्णतोयपानञ्च नातिभोजनमेव च ।
मधावनञ्च कर्त्तव्यं वर्ज्जयेद्वमनार्द्दिते ॥"
इति वैद्यके ॥)

अथ छर्द्द्यधिकारः । तत्र छर्द्दिविप्रकृष्टसन्निकृष्टनिदानं पूर्व्वरूपं संप्राप्तिञ्चाह ।
"अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि ।
अकाले चातिमात्रैश्च तथा सात्म्यैश्च भोजनैः ॥
आमाद्भयात्तथोद्वेगादजीर्णात् क्रिमिदोषतः ।
नार्य्याश्चापन्नसत्त्वायास्तथातिद्रुतमश्नतः ॥
दुष्टैर्दोषैः पृथक् सर्व्वैर्बीभत्सालोकनादिभिः ।
बीभत्सैर्हेतुभिश्चान्यैर्भुक्तमुत्क्लिश्यते बलात् ॥"
आमात् असम्यक्पक्वाद्रसात् । अजीर्णात् यथास्थिताद्भुक्तात् । आपन्नसत्त्वायाः प्राप्तगर्भायाः । अन्यैर्बीभत्सैर्विगर्हितैर्हेतुभिः घृणाकारिभिः अनिष्टश्रवणस्पर्शनदर्शनभक्षणघ्राणैरुत्क्लिश्यते- ऊर्द्ध्वं नीत्वा मुखाद्बहिः क्षिप्यते ॥ * ॥ पूर्व्वरूपमाह ।
"हृल्लासोद्गाररोधौ च प्रसेको लवणास्यता ।
द्वेषोऽन्नपाने च भृशं वमीनां पूर्व्वलक्षणम् ॥"
छर्द्देः सामान्यलक्षणमाह ।
"छादयन्नाननं वेगैरर्द्दयन्नङ्गभञ्जनैः ।
निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः ॥
छादयन् पूरयन् अङ्गभञ्जनैः अङ्गभेदैः अर्द्दयन् अङ्गानि पीड़यन् । वक्त्रं प्रधावितः वक्त्रं प्रति धावितः दोषः छर्द्दिर्निरुच्यते ।" * ॥ वातजाया लक्षणमाह ।
"हृत्पार्श्वपीड़ामुखशोषशीर्ष-
नाभ्यर्त्तिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रबलं सफेनं
विच्छिन्नकृष्णं तनुकं कषायम् ॥
कृच्छ्रेण चाल्पं महता च वेगे-
नार्त्तोऽनिलाच्छर्द्दयतीव दुःखम् ॥"
कषायं कषायरसम् । दुःखं दुःखमिव छर्द्दयति ॥ * ॥ पित्तजामाह ।
"मूर्च्छापिपासामुखशोषमूर्द्ध-
ताल्वक्षिसन्तापतमोभ्रमार्त्तः ।
पीतं भृशोष्णं हरितञ्च तिक्तं
धूम्रञ्च पित्तेन वमेत् सदाहम् ॥" * ॥
कफजामाह ।
"तन्द्रास्यमाधुर्य्यकफप्रसेक-
सन्तोषनिद्रारुचिगौरवार्त्तः ।
स्निग्धं घनं स्वादु कफाच्छ शुक्लं
सलोमहर्षोऽल्परुजं वमेत्तु ॥"
सन्तोषस्तृप्तिः ॥ * ॥ त्रिदोषजामाह ।
"शूलाविपाकारुचिदाहतृष्णा-
श्वासप्रमोहप्रबलाप्रसक्तम् ।
छर्द्दिस्त्रिदोषाल्लवणाम्लनील-
सान्द्रोष्णरक्तं वमतां नृणां स्यात् ॥"
आगन्तुजामाह ।
"असात्म्यजा च क्रिमिजामजा च
बीभत्सजा दौर्हृदजा च या हि ।
सा पञ्चमी ताञ्च विभावयेच्च
दोषोच्छ्रयेणैव यथोक्तमादौ ॥"
एताः पञ्चागन्तुजत्वेन साम्यादेकैव अतएव सा आगन्तुजा पञ्चमी विभावयेत् अनुबन्धयेत् ॥ * ॥ उपद्रवानाह ।
"कासः श्वासो ज्वरस्तृष्णा हिक्का वैचित्त्यमेव च ।
हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्द्देरुपद्रवाः ॥
वैचित्त्यं विक्षतचित्तत्वम् । तमकोऽत्र तमः । श्वासपदेनैव तमकाख्यस्यापि श्वासस्योक्तत्वात् ॥ असाध्यां साध्याञ्चाह ।
"क्षीणस्य या छर्द्दिरतिप्रसक्ता
सोपद्रवा शोणितरूपयुक्ता ।
सचन्द्रिकां तां प्रवदेदसाध्यां
साध्यां चिकित्सेत् निरुपद्रवाञ्च ॥"
सचन्द्रिका मयूरपिच्छचन्द्रिकाप्रभायुक्ता ॥ * ॥
अथ छर्द्देश्चिकित्सा ।
"आमाशयोत्क्लेशभवा हि सर्व्वा-
श्छर्द्द्यो मता लङ्घनमेव तस्मात् ।
विधीयते मारुतजां विना तु
संशोधनं वा कफपित्तहारि ॥"
अथ द्वितीयपादे छर्द्दीशब्दः ॥
"हन्यात् क्षीरोदकं पीतं छर्द्दिं पवनसम्भ-
वाम् ।
मुद्गामलकयूषो वा ससर्पिष्कः ससैन्धवः ॥"
क्षीरोदकं नाशितस्य क्षीरस्य उदकम् ॥ २ ॥
"गुड़ूचीत्रिफलानिम्बपटोलैः क्वथितं जलम् ।
पिबेन्मधुयुतं तेन छर्द्दिर्नश्यति पित्तजा ॥ ३ ॥
हरीतकीनां चूर्णन्तु लिह्यान्माक्षिकसंयुतम् ।
अधोमार्गीकृते दोषे छर्द्दिः शीघ्रं निवर्त्तते ॥ ४ ॥
विड़ङ्गत्रिफलाविश्वाचूर्णं मधुयुतं पिबेत् ।
विड़ङ्गशवशुण्ठीनां चूर्णं वा कफजां वमिम् ॥"
शवं कैवर्त्तीमुस्तम् । गुड़तृणी इति लोके ॥ ५ ॥
"पिष्ट्वा धात्रीफलं लाजान् शर्करां च पलो-
न्मिताम् ।
दत्त्वा मधुपलञ्चापि कुड़वं सलिलस्य च ।
वाससा गालितं पीतं हन्ति छर्द्दिं त्रिदोष-
जाम् ॥ ६ ॥
गुड़ूच्या रचितं हन्ति हिमं मधुसमन्वितम् ।
दुर्न्निवारामपि च्छर्द्दिं त्रिदोषजनितां बलात् ॥ ७
एलालवङ्गगजकेशरकोलमज्ज-
लाजप्रियङ्गु घनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकसितासहितानि लीढ्वा

छर्दिं निहन्ति कफमारुतपित्तजाताम् ॥"
इति एलादिचूर्णम् ॥ ८ ॥
"अश्वत्थवल्कलं शुष्कं दग्धं निर्व्वापितं जले ।
तज्जलं पानमात्रेण छर्दिं जयति दुर्ज्जयाम् ॥९॥
पथ्यात्रिकटुधान्याकजीरकाणां रजो लिहन् ।
मधुना नाशयेच्छर्द्दिमरुचिञ्च त्रिदोषजाम् ॥१०॥
बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः ।
छर्दिं त्रिदोषजां हन्ति पर्प्पटः पित्तजां
तथा ॥११॥
आम्राम्रास्थिबिल्वनिर्यूहः पीतः समधुशर्करः ।
निहन्यात् छर्द्दतीसारं वैश्वानर इवाहुतिम् ॥"
इति निर्यूहक्वाथः ॥१२॥
"जम्ब्वाम्रपल्लवशृतं लाजरजःसंयुतं शीतम् ।
शमयति मधुना युक्तं वमिमतिसारं ज्वरार्त्ति-
युताम् ॥१३॥
बीभत्सजां हृद्यतमैरिष्टैर्दौर्हृदजां फलैः ।
लङ्घनैरामजां छर्दिं जयेत् सात्म्यैरसात्म्य-
जाम् ॥१४॥
कृमिहृद्रोगवद्धन्यात् वमिं कृमिसमुद्भवाम् ।
तत्र तत्र यथादोषं क्रियां कुर्य्यात् चिकित्-
सकः ॥"१५॥
इति छर्द्यधिकारः । इति भावप्रकाशः ॥

वमिः, पुं, (वमति उद्गिरति धूमादिकमिति । टु वम उद्गिरणे + "इक् कृष्यादिभ्यः ।" इतीक् ।) अग्निः । इति मेदिनी । मे, २६ ॥ धूर्त्तः । इति शब्दरत्नावली ॥

वमितः, त्रि, (वम् + क्तः ।) वान्तः । (यथा,—
"वमितं लङ्घयेत् प्राज्ञो लङ्घितं नतु वामयेत् ।
वमने श्लेष्मबाहुल्यात् हन्यात्लङ्घनकर्षितम् ॥"
इत्युद्भटः ।")
वमनकृतवस्तु ।" इति मुग्धबोधव्याकरणम् ॥

वम्भः, पुं, वंशः । इति शब्दरत्नावली ॥

वम्रीकूटः, पुं, वल्मीकः । इति हेमचन्द्रः ॥

वय, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, वयते । इति दुर्गादासः ॥

वयं, त्रि, अस्मदादिः । आमरा इति भाषा । अस्मच्छब्दस्य वयादेशे जसि रूपोऽयम् । इति व्याकरणम् ॥ (यथा,—
"एको भवामि स भवेऽहमादौ
दारैरथोभौ स भवाव आवाम् ।
वयं भवामो बहवः स पुत्त्रै-
स्तस्मात्तथाद्यापि विभो प्रसीद ॥"
इति मुग्धबोधव्याकरणम् ।)

वयः, [स्] क्ली, (वयते वेति अजतीति वा । वय ङ गतौ वीगतौ अजगतौ वा + असुन् । अजतेर्वीभावः ।) पक्षी । (यथा, विष्णुपुराणे । १ । ५ । ४६ ।
"ततः स्वच्छन्दतोऽन्यानि वयांसि वयसो-
ऽसृजत् ॥")
बाल्यादिः । इत्यमरः । ३ । ३ । २२८ ॥ (यथा, महाभारते । ३ । ६८ । २३ ।
"तुल्यशीलवयोयुक्तां तुल्याभिजनसंयुताम् ।
नैषधोऽर्हति वैदर्भीं तथेयमसितेक्षणा ॥"
अन्नम् । इति निघण्टुः । २ । ७ ॥ यथा, ऋग्वेदे । २ । २० । १ ।
"वयं ते वय इन्द्र विद्धि षुणः प्रभरामहे वाजयु-
र्नरथम् ॥")
यौवनम् । इति मेदिनी । से, ३५ ॥ * ॥ वयोविशेषे कर्त्तव्यानि यथा,—
"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥"
इति रघुवंशे १ सर्गः ॥*॥
अपि च ।
"प्रथमेनार्ज्जिता विद्या द्वितीये नार्ज्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ॥"
इति चाणक्यशतकम् ॥
वयोविशेषाणां नियमा यथा,—
"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम् ॥"
इति प्रायश्चित्ततत्त्वधृतवचनम् ॥*॥
अपि च ।
"आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम् ॥"
इति भरतधृता स्मृतिः ॥*॥
अन्यच्च ।
"बाल्यं वृद्धिर्वयो रूपं चक्षुस्त्वक् श्रोत्ररेतसी ।
दशकेन निवर्त्तन्ते मनः सर्व्वेन्द्रियाणि च ॥"
इति महाभारतम् ॥*॥
("कालप्रमाणविशेषापेक्षिणी हि शरीरावस्था वयोऽभिधीयते । तद्वयो यथा स्थूलभेदेन त्रिविधम् । बालं मध्यं जीर्णमिति । तत्र बालमपरिपक्वधातुमजातव्यञ्जनं सुकुमारामक्लेशसहमसम्पूर्णबलं श्लेष्मधातुप्रायं आषोड़शवर्षम् । विवर्द्धमानधातुगुणं पुनः प्रायेणानवस्थितसत्त्वमात्रिंशद्वर्षमुपदिष्टम् । मध्यं पुनः समत्वागतबलवीर्य्यपौरुषपराक्रमग्रहणधारणस्मरणवचनविज्ञानसर्व्वधातुगुणं पित्तधातुप्रायमाषष्टिवर्षमुद्दिष्टम् । अतःपरं परिहीयमानधात्विन्द्रियबलपौरुषपराक्रमग्रहणधारणस्मरणवचनविज्ञानं भ्रश्यमानधातुगुणं वातधातुप्रायं क्रमेण प्रजीर्णमुच्यते आवर्षशतम् ।" इति चरके विमानस्थानेऽष्टमेऽध्याये । "वयस्तु त्रिविधं बालं मध्यं वृद्धमिति । तत्रोनषोड़शवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति । तेषु संवत्सरपराः क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति ॥ षोड़शसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति । तत्राविंशतेर्वृद्धिरात्रिंशतो यौवनमाचत्वारिंशतः सर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता । अत ऊर्द्ध्वमीषत्परिहाणिर्यावत् सप्ततिरिति । सप्ततेरूर्द्ध्वं क्षीयमाणधात्विन्द्रियबलवीर्य्योत्साहमहन्यहनि वलीपलितखालित्यजुष्टं कासश्वासप्रभृतिभिरुपद्रवैरभिभूयमानं सर्व्वक्रियास्वसमर्थं जीर्णागारमिवाभिवृष्टमवसीदन्तं वृद्धमाचक्षते । तत्रोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषजमात्राविशेषा भवन्त्यृते च परिहाणेस्तत्राद्यापेक्षया प्रतिकुर्व्वीत । भवन्ति चात्र ।
बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु ।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् ॥
अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्ज्जयेत् ।
तत्साध्येषु विकारेषु मृद्वीं कुर्य्यात् क्रियां
शनैः ॥"
इति सुश्रुते सूत्रस्थाने ३५ अध्यायः ॥

वयःस्थः, त्रि, (वयसि यौवने तिष्ठतीति । वयस् + स्था + कः ।) युवा । इति हेमचन्द्रः । ३ । ३ ॥ (यथा, महाभारते । १ । ४२ । ४ ।
"पित्रा पुत्त्रो वयःस्थोऽपि सततं वाच्य एव तु ॥")

वयस्थः, त्रि, युवा । इत्यमरः । २ । ६ । ४२ ॥ वयसि यौवने तिष्ठति इति वयस्थः कः निपातात् विसर्गस्य वा लुक् वयःस्थश्च ॥ वयःपक्षिणि बाल्यादौ वयो यौवनमात्रके । इति विश्वः । इति भरतः ॥

वय(यः)स्था, स्त्री, (वयो यौवनं तिष्ठत्यनयेति । वयस् + स्था + घञर्थे कः । निपातनात् वा विसर्गस्य लोपः ।) आमलकी । हरीतकी । सोमवल्लरी । इत्यमरः । २ । ४ । १३७ ॥ गुडूची । सूक्ष्मैला । काकोली । ब्राह्मी । इति मेदिनी । थे, १२ ॥ शाल्मलिः । इति हेमचन्द्रः ॥ क्षीरकाकोली । इति भावप्रकाशः ॥ मत्स्याक्षी । (यथा, सुश्रुते उत्तरतन्त्रे । ६२ ।
"वचा वयस्था गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्गं इष्यते ॥")
मत्स्याक्षी । युवती । इति राजनिर्घण्टः ॥

वयस्यः, पुं, (वयसा तुल्यः । वयस् + "नौवयो-धर्म्मेति ।" ४ । ४ । ९१ । इति यत् ।) समानवयस्कः । तत्पर्य्यायः । स्निग्धः २ सवयाः ३ । इत्यमरः । २ । ८ । १२ ॥ (यथा, आर्य्यासप्तशत्याम् । ४०३ ।
"बहुयोषिति शाखाग्रधारिणि वयस्येन दयित
उपहसिते ।
तत्काककलितकण्ठा पिशुनयति सखीषु सौभा-
ग्यम् ॥")

वयस्या, स्त्री, (वयस्य + टाप्) सखी । इत्यमरः । २ । ६ । १२ । (यथा, कथासरित्सागरे । १० । २४५ ।
"यदर्थं सा च दृष्ट्वा त्वां जायते मदनातुरा ।
तां भजस्व वयस्यां मे ततः क्षेममवाप्स्यसि ॥"
इष्टका । यथा, शतपथब्राह्मणे । १० । ४ । ३ । १५ ।
"एकया न विंशतिर्व्वयस्यास्ता एकचत्वारिंशद्द्वितीया चितिः ।" तथाच, वाजसनेयसंहिताभाष्ये । १४ । ९ ।
"वयस्यासंज्ञका इष्टका उपदधात्येकोनविंशति-मन्त्रैरित्यर्थः ।")

वयुनं, क्ली, (वीयते गम्यते प्राप्यते विषयः अनेनेति । अज गतौ + "अजियमिशीङ्भ्यश्च ।"

उणा० ३ । ६१ । इति उनण् । स च कित् । अतेर्व्वीभाव: ।) ज्ञानम् । यथा,—
"हस्ताग्राह्ये रचयति विधिं पीठकोदूखलाद्यै-
श्छिद्रं ह्यन्तर्निहितवयुन: शिक्यभाण्डेषु तद्वित्।"
इति श्रीभागवते १० स्कन्धे ८ अध्याय: ॥
शिक्यभाण्डेषु अन्तर्निहितदध्यादौ वयुनं ज्ञानं यस्य स: । इति तट्टीकायां श्रीधरस्वामी ॥

वयुन:, पुं, (वीयते गम्यते ऽत्रेति । अज गतौ + उनण् ।) देवतागारम् । इत्युणादिकोष: । (एतदर्थे क्लीवलिङ्ग: । इति उज्ज्वलदत्त: । ३ । ६१ ॥ विवस्वागर्भजात: कृशाश्वस्य पुत्र: । यथा, भागवते । ६ । ६ । २० ।
"कृशाश्वोऽर्च्चिषि भार्य्यायां धूमकेतुमजीजनत् ।
धिषणायां वेदशिरं देवलं वयुनं मनुम् ॥")

वयोधा:, [स्] पुं. (वयो यौवनं दधातीति । वयस् + धा + "वयसि धाञ:।" उणा० ४ । २२८ । इति असि: । स च डित् ।) युवा । इत्युणादिकोष: ॥ (अन्नम् । यथा, वाजसनेयसंहितायाम् । १५ । ७ ।
"वयोधसाधीतेनाधीतं जिन्व ।"
"वयोधसा वयो दधाति पुष्णाति वयोधा अन्नं तेनाधीतेनाध्ययनायोपहिताधीतं जिन्व ॥" इति तद्भाष्ये महीधर: ॥ आयुर्दातरि, त्रि । यथा, वाजसनेयसंहितायाम् । २८ । २४ ।
"अग्निमिन्द्रं वयोधसम् ॥"
"देवो होता अग्निं वयोधसमिन्द्रञ्च यजतु वय आयुर्दधाति वयोधास्तमायुषो दातारं धारयितारं वा ।" इति तद्भाष्ये महीधर: ॥)

वयोवङ्गं, क्ली, (वयसा वङ्गमिव ।) सीसकम् । इति राजनिर्घण्ट: ॥

वर, त् क ईप्से । इति कविकल्पद्रुम: ॥ (अदन्त-चुरा०-पर०-सक०-सेट् ।) रेफोपध: । वरयति । इति दुर्गादास: ॥

वरं, क्ली, (व्रियते इति । वृ + कर्म्मणि अप् ।) कुङ्कुमम् । मनाक्प्रियम् । इत्यमर: । तथा च ।
"वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरति-
र्वरं मौनं कार्य्यं न च वचनमुक्तं यदनृतम् ।
वरं क्लीवं भाव्यं न च परकलत्राभिगमनं
वरं भिक्षाशित्वं न च परधनानां हि हरणम् ॥"
इति वामनपुराणे ५६ अध्याय: ॥
त्वचम् । वालकम् । आर्द्रकम् । इति राजनिर्घण्ट: ॥

वरं [म्) अ, मनाक्प्रियम् । यथा,—
"मनागिष्टे वरं क्लीवं केचिदाहुस्तदव्ययम् ॥"
इति मेदिनी । वे, ६३ ॥

वरंवरा, स्त्री, (वरं वृणोतीति । वृ + अच् । मुम् च ।) चक्रपर्णी । इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥

वर:, पुं, (वृ + अप् ।) वरणम् । तत्पर्य्याय: । वृति: २ । इत्यमर: । ३ । २ । ८ ॥ वृ वेष्टने । प्रार्थनाविशेषे इत्यन्ये । इति भरत: ॥ देवाद्-वृत: । देवसकाशात् याचित: । उक्तञ्च ।
"तपोभिरिष्यते यस्तु देवेभ्य: स वरो मत: ॥"
इति च भरत: ॥
जामाता । (यथा, रघु: । ६ । ८६ ।
"प्रमुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतो वितानम् ॥")
षिड्ग: । इति मेदिनी । रे, ६२ ॥ गुलगुलु: । इति शब्दरत्नावली ॥ पति: । इति हेमचन्द्र: । ३ । १८० ॥ (निग्रह: । यथा, ऋग्वेदे । १ । १४३ । ५ ।
"न यो वराय मरुतामिव स्वन: सेनेव सृष्टा
दिव्या यथाशनि: ॥"
"योऽग्निर्वराय वरणाय निग्रहाय शक्तो न भवति ॥" इति तद्भाष्ये सायण: ॥)

वर:, त्रि, (वृ + अप् ।) श्रेष्ठ: । इत्यमर: । ३ । ३ । १७२ ॥ (यथा, विष्णुपुराणे । १ । ११ । १८ ।
"राजासनं राजच्छत्रं वराश्वा वरवारणा: ।
यस्य पुण्यानि तस्यैते मत्वैतत् शाम्य पुत्रक ॥")

वरकं, क्ली, (व्रियते अनेन । वृ + अप् । तत: संज्ञायां कन् ।) पोताच्छादनम् । इति हारावली । ६६ ॥ धौताधौतसाधारणवस्त्रम् । इति शब्दरत्नावली ॥

वरक:, पुं. (व्रियते लोकैरिति । वृ + अप् । तत: कन् ।) वनमुद्ग: । इति हेमचन्द्र: । ४ । २३६ ॥ पर्प्पट: । इति राजनिर्घण्ट: ॥ तृणधान्यभेद: । चीना इति भाषा । तत्पर्य्याय: । स्थूलकङ्गु: २ रूक्ष: ३ स्थूलप्रियङ्गु: ४ । अस्य गुणा: । मधुरत्वम् । रूक्षत्वम् । कषायत्वम् । वातपित्तकारित्वञ्च । इति राजनिर्घण्ट: ॥ (वर + स्वार्थे कन् । प्रार्थनाविशेष: । यथा, महाभारते । ३ । १०७ । ५३ ।
"स वव्रे तुरगं तत्र प्रथमं यज्ञकारणात् ।
द्वितीयं वरकं वव्रे पितॄणां पावनेच्छया ॥")

वरक्रतु:, पुं, (वरा: श्रेष्ठा: क्रतवो यस्य शताश्वमेधित्वात् तथात्वम् । यद्वा, वर: क्रतुर्यस्मात् । पूतक्रतुत्वात् तथात्वम् ।) इन्द्र: । इति हेमचन्द्र: । २ । ८७ ॥

वरचन्दनं, क्ली, (वरं श्रेष्ठं चन्दनम् ।) कालीयम् । देवदारु । इति मेदिनी । ने, २४२ ॥

वरटं, क्ली, (व्रियते इति । वृ + "शकादिभ्योऽटन् ।" उणा० ४ । ८१ । इति अटन् ।) कुन्दपुष्पम् । इति शब्दरत्नावली ॥

वरट:, पुं, (वरति सेवते सरोवरमिति । वृ ञ सेवायाम् + "शकादिभ्योऽटन् ।" उणा० ४ । ८१ । इति अटन् ।) हंस: । इति मेदिनी । टे, ५१ ॥ कीटविशेष: । बोलता इति भाषा । तत्पर्य्याय: । गन्धोली २ वरटा ३ । इत्यमर: ॥ गन्धोलि: ४ वरला ५ । इति शब्दरत्नावली । वरली ६ । इति जटाधर: ॥ क्षुद्रा ७ क्रूरा ८ क्षुद्रवर्व्वणा ९ । इति राजनिर्घण्ट: ॥

वरटा, स्त्री, (वरट + टाप् ।) हंसी । (यथा, नैषधे । १ । १३५ ।
"मदेकपुत्त्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी ॥")
वरला । इत्यमर: । २ । ५ । २५ ॥ कुसुम्भबीजम् । इति भावप्रकाश: ॥ (अस्या गुणा यथा,—
"वरटा मधुरा स्निग्धा रक्तपित्तकफापहा ।
कषाया शीतला गुर्व्वी स्यादवृष्यानिलापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वरटी, स्त्री, (वरट + जातौ ङीष् ।) हंसी । इति मेदिनी । टे, ५१ ॥ गन्धोली । इति त्रिकाण्डशेष: ॥ (यथा, सुश्रुते कल्पस्थाने ३ अध्याये ।
"कणभतुण्डोच्चिटिङ्गवरटीशत पदीशूकवलभिकाशृङ्गीभ्रमरा: शूकतुण्डविषा: ॥")

वरट्टिका, स्त्री, कुसुम्भबीजम् । तत्पर्य्याय: । वरटा २ । अस्या गुणा: । मधुरत्वम् । स्निग्धत्वम् । रक्तपित्तकफापहत्वम् । कषायत्वम् । शीतलत्वम् । गुरुत्वम् । अवृष्यत्वम् । अनिलापहत्वञ्च । इति भावप्रकाश: ॥

वरणं, क्ली, (वृ + भावे ल्युट् ।) कन्यादिवरणम् । (यथा, महाभारते । १ । १९० । ७ ।
"न च विप्रेष्वधीकारो विद्यते वरणं प्रति ।
स्वयंवर: क्षत्त्रियाणामितीयं प्रथिता श्रुति: ॥")
वेष्टनम् । इति मेदिनी । णे, ६५ ॥ पूजनादि । इति शब्दरत्नावली ॥ * ॥ अथ वरणविधि: । तेषामाचार्य्यादीनां होमसाध्ये कर्म्मणि होमारम्भात् पूर्व्वमानत्यर्थं यजमानेन स्वयं वरणं कार्य्यम् । दानवाचनान्वारम्भवरणव्रतप्रमाणेषु यजमानं प्रतीयात् । इति हरिशर्म्मधृतकात्यायनसूत्रात् । तत्र ब्रह्मवरणं प्रथमत: । ज्योतिष्टोमे । ब्रह्मोद्गातृहोत्रध्वर्य्यृत्विगादिक्रमदर्शनेनान्यथाकाङ्क्षया दृष्टपरिकल्पनाया न्याय्यत्वात् । सुगतिसोपानप्रभृतयोऽप्येवम् । वरणन्तु । गन्धादिदानद्वारा प्रीतिमुत्पाद्य कर्म्मकरणायप्रेरणम् । तत्र च । सर्व्वत्र प्राङ्मुखो दाता ग्रहीता च उदङ्मुख: । इति वचनात् यजमानस्य प्राङ्मुखत्वं आचार्य्यादीनामुदङ्मुखत्वं प्रतीयते । वरणविधिमाह कात्यायन: । आसनमाहार्य्य आह साधु भवानास्तामर्च्चयिष्यामो भवन्तमिति । आसनमाहार्य्यानीय संस्थाप्याह साधु भवानास्तामिति । साध्वहमासे इति प्रतिवचनम् । अर्च्चयिष्यामो भवन्तमिति पुनरुक्ते अर्च्चय इति प्रतिवचनं सामर्थ्यात् । इति हरिशर्म्मा । इति संस्कारतत्त्वम् ॥ * ॥ मेदिनीमते पवर्गीयवकारादिशब्दोऽयम् । किन्तु अन्त:स्थवकारादिवृधातोरनट्प्रत्ययेन निष्पन्नत्वादत्र लिखित: ॥

वरण:, पुं, (व्रियते अनेन वृणोतीति वा । वृ + "सुयुरुवृञो युच् ।" उणा० २ । ७४ ॥ इति युच् ।) प्राकार: । वरणद्रुम: । इत्यमर: । २ । २ । ३ । (यथा, किराते । ५ । २५ ।
"इह सिन्धवश्च वरणावरणा:
करिणां मुदे सनलदानलदा: ॥")
उद्ग: । इति हारावली । ८१ ॥ संक्रम: । इति हलायुध: ॥ सांको इति भाषा ॥

वरणसी, स्त्री, वाराणसी । इति शब्दरत्नावली ॥

वरणा, स्त्री, (वरण+टाप् ।) नदीविशेषः । इति शब्दरत्नावली ॥ सा तु वाराणस्युत्तरसीमा । तस्या उत्पत्तिर्यथा,—

हरिरुवाच ।

"महेश्वर शृणुष्वेमां मम वाचं कलस्वनाम् ।
ब्रह्महत्याक्षयकरीं शुभदां पुण्यवर्द्धिनीम् ॥
योऽसौ प्राङ्मण्डले पुण्ये मदंशप्रभवोऽव्ययः ।
प्रयागे वसते नित्यं योगशायी तु विश्रुतः ॥
चरणाद्दक्षिणात्तस्य विनिर्याता सरिद्वरा ।
विश्रुता वरणेत्येवं सर्व्वपापहरा शुभा ॥
सव्यादन्या द्वितीया च असिरित्येव विश्रुता ।
ते उभे च सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः ॥
ताभ्यां मध्ये तु यो देशस्तत् क्षेत्रं योगशायिनः ।
त्रैलोक्यप्रवरं तीर्थं सर्व्वपापप्रमोचनम् ॥
न तादृशोऽस्ति गगने न भूम्यां न रसातले ।
तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा ।
यस्यान्तु भोगिनो नाशं प्रयान्ति भवतो लयम् ॥"

इति वामने ३ अध्यायः ॥

वरण्डः, पुं, (वृणोतीति । वृ+"अण्डन्कृसृभृवृञः ।" उणा० १ । १२८ । इति अण्डन् ।) अन्तरावेदिः । समूहः । मुखरोगः । स तु व्रण इति वयस् फोड़ा इति च भाषा । इति मेदिनी । डे, ३३ ॥ वस्तुतः पवर्गीयबकारादिरयं किन्तु अन्तःस्थवकारादिवृञ्धातोरौणादिक अण्डन् प्रत्ययनिष्पन्नत्वादत्र लिखितः ॥

वरण्डकः, पुं, (वरण्ड+स्वार्थे संज्ञायां वा कन् ।) मातङ्गवेदिः । हातीर हाओदा इति भाषा । यौवनकण्टकः । वयस् फोड़ा इति भाषा, वर्त्तुलः । गोल इति ख्यातः । इति मेदिनी । के, २०३ ॥ भित्तिः । इति हेमचन्द्रः ॥ मेदिनीकारेण अयं पवर्गीयबकारादौ लिखितः । किन्तु हेमचन्द्रेण वृञ्धातुनिष्पन्नत्वात् अन्तःस्थवकारादौ परिगणितः ॥

वरण्डकः, त्रि, (वरण्ड+कन् ।) विशालः । भयसम्पन्नः । लघ्वः । इति शब्दरत्नावली ॥

वरण्डा, स्त्री, (वरण्ड+टाप् ।) सारिका । वर्त्तिः । शस्त्रभेदः । इति मेदिनी । ते, ३६ ॥

वरण्डालुः, पुं, (वरण्ड इव आलुरत्र ।) एरण्डवृक्षः । इति त्रिकाण्डशेषः ॥

वरतिक्तः पुं, (वरः श्रेष्ठस्तिक्तस्तिक्तरसो यस्य ।) कुटजवृक्षः । इति राजनिर्घण्टः ॥ (पर्प्पटकः । तत्पर्य्यायो यथा,—
"पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः ।
कथितः पांशुपर्य्यायस्तथाकवचनामकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वरतिक्तिका, स्त्री, (वरतिक्त+स्वार्थे कन् । टाप् । अत इत्वम् ।) पाठा । इति राजनिर्घण्टः ॥ आकनादि इति भाषा ॥ (यथास्याः पर्य्यायः ।
"पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका ।
एकष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वरत्करी, स्त्री, रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

वरत्रा, स्त्री, (व्रियतेऽनयेति वृ+"वृञ्चित् ।" उणा० ३।१०७ । इति अत्रन् । टाप् ।) हस्तिकक्षरज्जुः । काछदड़ी इति ख्याता । तत्पर्य्यायः । चूषा २ कक्ष्या ३ कक्षा ४ । चर्म्मरज्जुः । तत्पर्य्यायः । नद्ध्री २ वद्ध्री ३ वर्द्ध्री ४ वाद्ध्री ५ । इत्यमरभरतौ ॥ (यथा, ऋग्वेदे । १० । ६० । ८ ।
"यथायुगं वरत्रया नह्यति धरुणायकम् ॥")

वरत्वचः, पुं, (वरा हितकरी त्वचा यस्य ।) निम्बवृक्षः । इति रत्नमाला ॥

वरदः, त्रि, (वरं ददातीति । दा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) अभीष्टदाता । तत्पर्य्यायः । समर्द्धकः २ । इत्यमरः । ३ । १ । ७ ॥ समर्द्धः ३ वाञ्छितार्थदः ४ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । २ । २१७ ।
"वरदं तं वरं वव्रे साहाय्यं क्रियतां मम ।
शल्यस्तस्मै प्रतिश्रुत्य जगामोद्दिश्य पाण्डवान् ॥")
प्रसन्नः । इति मेदिनी । दे, ३७ ॥

वरदा, स्त्री, (वरद+टाप् ।) कन्या । इति मेदिनी । दे, ३७ ॥ आदित्यभक्ता । इति राजनिर्घण्टः ॥ (पर्य्यायो यथा,—
"सुवर्च्चला सूर्य्यभक्ता वरदा बदरापि च ।
सूर्य्यावर्त्ता रविप्रीता परा ब्रह्मसुवर्च्चला ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अश्वगन्धा । इति भावप्रकाशः ॥ वरदात्री च । (यथा, भागवते । ३ । १६ । २२ ।
"धर्म्मस्य ते भगवतस्त्रियुगत्रिभिः स्वैः
पद्भिश्चराचरमिदं द्विजदेवतार्थम् ।
नूनं भृतं तदभिघाति रजस्तमश्च
सत्त्वेन नो वरदया तनुवा निरस्य ॥")

वरदाचतुर्थी, स्त्री, (वरदाख्या चतुर्थी ।) माघशुक्लचतुर्थी । तस्यां गौरी पूज्या । यथा । भविष्योत्तरे माघशुक्लपक्षमधिकृत्य ।
"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"
इति तिथ्यादितत्त्वम् ॥

वरदारुः, पुं, (ददातीति । दा+तुन् । वरस्य दारुः ।) वृक्षविशेषः । भूरुह इति हिन्दी भाषा । तत्पर्य्यायः । भूमीसहः २ दारदारुः ३ खरच्छदः ४ । अस्य गुणौ । शिशिरत्वम् । रक्तपित्तप्रसादनत्वञ्च । इति भावप्रकाशः ॥

वरपर्णाख्यः, पुं, (वराणि पर्णान्यस्य । वरपर्णेति आख्या यस्य ।) क्षीरकञ्चुकीवृक्षः । इति रत्नमाला ॥

वरप्रदा, स्त्री, (वरं प्रददातीति । प्र+दा+कः ।) लोपामुद्रा । इति हेमचन्द्रः । २ । ३७ ॥ वरदातरि, त्रि ॥

वरफलः, पुं, (वरं फलमस्य ।) नारिकेलवृक्षः । इति शब्दचन्द्रिका ॥ तत्फले श्रेष्ठफले च क्ली ॥

वरमुखी, स्त्री, (वरं मुखमस्याः । ङीष् ।) रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

वरयिता, [ऋ] पुं, (वृ+णिच् । तृच् ।) भर्त्ता । इति हेमचन्द्रः ॥ वरणकारयिता च ॥

वररुचिः, पुं, (वरा रुचिरस्य ।) कविविशेषः । तत्पर्य्यायः । पुनर्व्वसुः २ । इति त्रिकाण्डशेषः ॥ स च विक्रमादित्यराजसभास्थनवरत्नान्तर्गतरत्नविशेषः यथा,—
"धन्वन्तरिः क्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥"
इति नवरत्नम् ॥

वरलः, पुं स्त्री, (वृणातीति । वृ+अलच् ।) वरटः । बोल्ता इति भाषा । यथा,
"विषदक्षी भृङ्गरोलो वरलस्तृणषट्पदः ॥"
इति शब्दमाला ॥

वरलब्धः, पुं, (वरः उत्कर्षो लब्धः पुष्पेषु येन ।) चम्पकवृक्षः । इति त्रिकाण्डशेषः ॥ (वरेण लब्धः ।) वरप्राप्ते, त्रि ॥

वरला, स्त्री, (वृ+अलच्+टाप् ।) हंसी । इति मेदिनी । ले, ११६ ॥ तत्र पवर्गीयबकारादौ पठितोऽयम् । वरटा च ॥

वरली, स्त्री, (वरल+ङीष् ।) वरटा । इति जटाधरः ॥

वरवत्सला, स्त्री, (वरे जामातरि वत्सला ।) श्वश्रूरभार्य्या । इति शब्दमाला ॥

वरवर्णिनी, स्त्री, (वरः श्रेष्ठो वर्णः प्रशस्तः पीतादिर्वास्त्यस्या इति । वरवर्ण+इनिः । ङीप् ।) अत्युत्तमा स्त्री । तत्पर्य्यायः । वरारोहा २ मत्तकाशिनी ३ उत्तमा ४ । इत्यमरः । २ । ६ । ४ ॥ मत्तकाशिनी ५ । इति भरतः ॥ (यथा, विष्णुपुराणे । १ । १५ ।
"रत्नभूता च कन्येयं वार्क्षेयी वरवर्णिनी ।
भविष्यत् जानता पूर्व्वं मया गोभिर्व्विवर्द्धिता ॥")
लाक्षा । हरिद्रा । रोचना । फलिनी । साध्वी स्त्री । इति मेदिनी । ने, २४३ । गौरी ॥ (यथा, महाभारते । ६ । २२ । २१ ।
"भद्रकालि ! नमस्तुभ्यं महाकालि नमोऽस्तु ते ।
चण्डि ! चण्डे ! नमस्तुभ्यं तारिणि ! वर-
वर्णिनि ! ॥")
सरस्वती । लक्ष्मीः । इति शब्दरत्नावली ॥

वरवाह्लीकं, क्ली, कुङ्कुमम् । इत्यमरटीका ॥

वरवृद्धः, पुं, (वरः श्रेष्ठो वृद्धः पुरातनः ।) शिवः । इति त्रिकाण्डशेषः ॥

वरा, स्त्री, (वृ+अप्+टाप् ।) फलत्रिकम् । इति मेदिनी । रे, ६३ ॥ रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ गुडूची । मेदा । ब्राह्मी । विड़ङ्गम् । पाठा । हरिद्रा । इति राजनिर्घण्टः ॥ श्रेष्ठा च ॥

वराकः, पुं, (वृणीते तच्छील इति । वृ+"जल्पभिक्षकुट्टलुण्टवृङः षाकन् ।" ३ । २ । १५५ ।

इति शाकन्।) शिवः। इति मेदिनी। के, १२६॥ शुद्रः। इति हेमचन्द्रः॥

वराकः, त्रि, (वृ+"जल्पभिक्षेति।" ३।२।१५५। इति षाकन्।) शोचनीयः। इति मेदिनी। के, १२६॥ अधमः। इति शब्दमाला॥ (यथा, मुकुन्दमालायाम्। १७।
"नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका
वयम्॥")

वराङ्गं, क्ली, (वरमङ्गानाम्।) मस्तकम्। गुह्यम्। इत्यमरः। ३।३।२६॥ गुड़त्वक्। योनिः। इति त्रिकाण्डशेषः॥ श्रेष्ठावयवे, च॥ (वराण्यङ्गान्यस्य।) तद्युक्ते, त्रि॥ (चोचम्। यथा,
"त्वक्पत्रञ्च वराङ्गं स्याद्भृङ्गं चोचं तथोत्कटम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वराङ्गः, पुं, (वराणि स्थूलान्यङ्गानि यस्य।) हस्ती। इति त्रिकाण्डशेषः॥ विष्णुः। यथा,—
"सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी॥"
इति तस्य सहस्रनामस्तोत्रम्॥

वराङ्गकं, क्ली, (वरमङ्गमस्य। कप्।) गुड़त्वक्। इत्यमरः। २।४।१३४॥ श्रेष्ठावयवयुक्ते, त्रि॥

वराङ्गना, स्त्री, (वरा श्रेष्ठा अङ्गना।) अतिप्रशस्ताङ्गयुक्ता स्त्री। यथा,—
"शिरः सपुष्पं चरणौ सुपूजितौ
वराङ्गनासेवनमल्पभोजनम्।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट्॥"
इति लक्ष्मीचरित्रम्॥

वराङ्गरूपोपेतः, त्रि, (अङ्गानां रूपाणि अङ्गरूपाणि। वराणि अङ्गरूपाणि तैरुपेतः।) श्रेष्ठरूपयुक्तः। सुन्दर इत्यर्थः। तत्पर्य्यायः। सिंहसंहननः १। इत्यमरः॥

वराङ्गी, स्त्री, (वरमङ्गमन्तरवयवो यस्याः।) हरिद्रा। इति राजनिर्घण्टः॥

वराङ्गी, [न्] पुं, (वराङ्गमस्त्यस्येति। इनिः।) अम्लवेतसः। वराङ्गश्चाम्लवेतसं इति वा पाठः। इति रत्नमाला। श्रेष्ठाङ्गयुक्ते, त्रि॥

वराटः, पुं, (वरं मन्दमटतीति। अट्+कर्म्मणि अण्।) कपर्द्दकः। इति राजनिर्घण्टः॥ (अस्य शोधनादिविषयो यथा;—
"भूगर्त्ते च समे शुद्धे पत्तलीं स्थापयेत् सुधीः।
तुषेण पूरयेत्तस्याः किञ्चिन्मध्यं भिषग्वरः॥
वराटैः पूरितां मृत्वा तन्मध्ये विनिवेशयेत्।
कारीषाग्निं ततो दद्यात् पालिका यन्त्रमुत्तमम्।
अनेन म्रियते नूनं वराटः सर्व्वरोगजित्॥"*॥
अन्यच्च।
"वराटं तत्र चाङ्गेरी जम्बीराणां रसेन वा।
अर्द्धयाममपि चाम्लानां यावत् पीतं न गच्छति।
पश्चादुद्धृत्य प्रक्षाल्य गृह्णीयाच्च वराटकम्॥"
इति वराटशुद्धिः॥*॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥) रज्जुः। यथा। रज्जुः शुल्बा वराटो ना। इति स्त्रीकाण्डे रत्नकोषः। इत्यमरटीकायां भरतः॥

वराटकः, पुं स्त्री, (वराट्+स्वार्थे कन्।) कपर्द्दकः। इत्यमरः॥ कड़ि इति भाषा। तस्य संख्याभेदेन संज्ञाभेदा यथा,—
"वराटकानां दशकद्वयं यत्
सा काकिनी ताश्च पणश्चतस्रः।
ते षोड़श द्रम्म इहावगम्यो
द्रम्मैस्तथा षोड़शभिश्च निष्कः॥"
इति लीलावती॥*॥
अपि च। ताम्रिकः कार्षिकः पणः। इति याज्ञवल्क्यवचनेन गुञ्जाः पञ्चाद्यमाषकस्ते षोड़शाद्यः कर्षोऽस्त्री। इत्यमरसिंहोक्तेन च अशीतिरत्तिकापरिमितताम्रे पणशब्दः सङ्केतितः स च तावत्संख्यकवराटकैर्लभ्यते इति वराटकेष्वपि तथा व्यवहारः। एतन्मूलकं भविष्यमत्स्यतन्त्रयोर्व्वचनं यथा,—
"अशीतिभिर्व्वराटकैः पण इत्यभिधीयते।
तैः षोड़शैः पुराणं स्यादृजतं सप्तभिस्तु तैः॥"
इति प्रायश्चित्ततत्त्वम्॥*॥
ते च दक्षिणार्थं विधीयन्ते। यथा,—
"हतमश्रोत्रियं दानं हतो यज्ञस्त्वदक्षिणः।
तस्मात् पणं काकिणीं वा फलं पुष्पमथापि
वा।
प्रदद्यात् दक्षिणां यज्ञे तया च सफलो भवेत्॥"
इति शुद्धितत्त्वम्॥

वराटकः, पुं, (वराट एव। स्वार्थे कन्।) रज्जुः। पद्मवीजम्। इति मेदिनी। के, २०२॥

वराटकरजाः, [स्] पुं, (वराटक इव रजो यस्य।) नागकेशरवृक्षः। इति शब्दमाला॥

वराटिका, स्त्री, (वराट्+स्वार्थे कन्। टाप्। अत इत्वञ्च।) कपर्द्दकः। इत्यमरटीकायां भरतः राजनिर्घण्टश्च॥ (यथा, नैषधे।२।८८।
"बहुकम्बुमणिर्व्वराटिका
गणनाटत्करकर्कटोत्करः॥")
तुच्छवाचिका च। यथा,—
"प्रयागे मूत्रयते येन तस्य गङ्गा वराटिका॥"
इत्युद्भटः॥

वराणः, पुं, (म्रियते इति। वृ+शानच्। पृषोदरात् दीर्घः।) इन्द्रः। इति त्रिकाण्डशेषः। वरुणवृक्षः। इति शब्दरत्नावली॥

वराणसी, स्त्री, (वाराणसी पृषोदरादित्वात् साधु।) काशी। यथा,—
"काशी वराणसी वाराणसी शिवपुरी च
सा॥"
इति हेमचन्द्रः॥

वरादनं, क्ली, (वरै राजभिरद्यते इति। अद्+ल्युट्।) राजादनम्। इति शब्दचन्द्रिका।

वराभिधः, पुं, अम्लवेतसः। इति राजनिर्घण्टः॥ (वरा अभिधा यस्य।) श्रेष्ठनामा च॥

वराम्लः, पुं, (वरः श्रेष्ठः अम्लोऽत्र। रस्य लत्वम्।) करमर्द्दः। इति रत्नमाला॥ कराम्ल इति वा पाठः॥

वरारकं, क्ली, (वरं श्रेष्ठं धनिनं ऋच्छति गच्छति। ऋ+ण्वुल्।) हीरकम्। इति हेमचन्द्रः। ४।१३१॥ (गुणादयोऽस्य हीरकशब्दे ज्ञातव्याः॥)

वरारोहः, पुं, (हस्तिन उच्चत्वात् आयतपृष्ठत्वाच्च वर आरोहो यत्र।) हस्त्यारोहः। अवरोहः। इति विश्वः॥

वरारोहा, स्त्री, (वर आरोहो नितम्बो यस्याः।) उत्तमा स्त्री। इत्यमरः। २।६।४॥ (यथा, महानिर्व्वाणतन्त्रे। ४।४७।
"यदा तु वैदिकी दीक्षा दीक्षा पौराणिकी
तथा।
न स्थास्यति वरारोहे! तदैव प्रबलः कलिः॥")
कटिः। इति हेमचन्द्रः॥

वरालिका, स्त्री, (वरा आलिका सखी जयादिर्यस्याः।) दुर्गा। इति त्रिकाण्डशेषः॥

वराशिः, पुं, स्थूलवस्त्रम्। मोटा कापड़ इति भाषा। तत्पर्य्यायः। स्थूलशाटकः २। इत्यमरः॥ वरासिः ३ स्थूलशाटकम् ४ स्थूलशाटिका ५। इति तट्टीकायां भरतः॥ स्थूलपट्टाकः ६। इति शब्दरत्नावली॥ वराशि ७। क्लीवमिति जटाधरः॥

वरासनं, क्ली, (वरायै दुर्गायै अस्यते क्षिप्यते दीयते इति यावत्। अस्+ल्युट्।) ओड्रपुष्पम्। इति शब्दमाला॥ (वरमासनमिति।) उत्तमासनञ्च॥

वरासनः, पुं, (वरां स्त्रीयां नारीं अस्यति क्षपतीति। अस्+ल्युः।) षिड्गः। (वरानपि जनान् अस्यति दूरीकरोतीति।) द्वारपालः। इति विश्वः॥

वरासिः, पुं, (वरैः श्रेष्ठैः अस्यते क्षिप्यते इति। अस्+इन्।) स्थूलशाटकः। (वरोऽसिर्यस्य।) खड्गधरः। इति धरणिः॥

वरासी, स्त्री, नागवासः। इति शब्दमाला॥

वराहः, पुं, (वरान् आहन्ति इति दुर्गः। उज्ज्वल॰ ४।१।४६। हन्+डः।) पशुविशेषः। वरा इति भाषा। तत्पर्य्यायः। सूकरः २ घृष्टिः ३ कोलः ४ पोत्री ५ किरिः ६ किटिः ७ दंष्ट्री ८ घोणी ९ स्तब्धरोमा १० क्रोड़ः ११ भूदारः १२। इत्यमरः॥ किरः १३ सुखादः १४ मुखलाङ्गूलः १५। इति जटाधरः॥ स्थूलनासिकः १६ दन्तायुधः १७ वक्रवक्त्रः १८ दीर्घतरः १९ आखनिकः २० भूक्षित् २१ बहुसुः २२। इति शब्दरत्नावली॥ अस्य मांसस्य गुणाः। वृष्यत्वम्। वातघ्नत्वम्। बलवर्द्धनत्वञ्च। इति राजवल्लभः॥ बहुमूत्रत्वम्। विरूक्षणत्वञ्च। इति तत्रैव पाठान्तरम्। अन्यत् सूकरशब्दे द्रष्टव्यम्॥*॥

तन्मांसं विष्णवे न देयम्। यथा। "नाभक्ष्यं नैवेद्यार्थे भक्ष्येष्वजामहिषीचोरं वर्ज्जयेत्। पञ्चनखमत्स्यवराहमांसानि चेति।" इत्याह्निकतत्त्वधृतविष्णुसूत्रम्॥ *॥ वराहमांसं भुक्त्वा विष्णुपूजादिनिषेधो यथा,—

वराह उवाच।

"भुक्त्वा वाराहमांसन्तु यो वै मामुपसर्पति।
पतनं तस्य वक्ष्यामि यथा भवति सुन्दरि!॥
वराहो दश वर्षाणि भूत्वा तु चरते वने।
व्याधो भूत्वा महाभागे समाः सप्त च सप्तति:॥
कृमिर्भूत्वा समाः सप्त तिष्ठते तस्य पुष्कले।
अयोधेर्मूषिको भूत्वा वर्षाणाञ्च चतुर्द्दश॥
एकोनविंशवर्षाणि यातुधानश्च जायते।
शल्लकश्चाष्टवर्षाणि जायते भवने बहु॥
चाप्रत्रिंशतिवर्षाणि जायते पिशिताशनः।
एवं संसारितां गत्वा वाराहामिषभक्षकः॥
जायते विपुले सिद्धे कुले भागवतस्तथा।
हृषीकेशवचः श्रुत्वा सर्व्वसम्पूर्णलक्षणम्॥
शिरसा चाञ्जलिं कृत्वा वाक्यञ्चेदमुवाच ह।
एतन्मे परमं गुह्यं तव भक्तसुखावहम्।
वाराहमांसभक्षास्तु येन मुच्यन्ति किल्बिषात्॥

वाराह उवाच।

तरन्ति मानवा येन तिर्य्यक्संसारसागरात्।
गोमयेन दिनं पञ्च कणाहारेण सप्त वै॥
पानीयन्तु ततो भुक्त्वा तिष्ठेत् सप्तदिनं ततः।
अक्षारलवणं सप्त शक्तुभिश्च तथा त्रयः॥
तिलभक्षो दिनान् सप्त सप्त पाषाणभक्षकः।
पयो भुक्त्वा दिनं सप्त कारयेच्छुद्धिमात्मनः॥
शान्तदान्तपराः कृत्वा अहङ्कारविवर्ज्जिताः।
दिनान्येकोनपञ्चाशच्चरेत कृतनिश्चयः॥
प्रमुक्तः सर्व्वपापेभ्यः ससंज्ञो विगतज्वरः।
कृत्वा तु मम कर्म्माणि मम लोकाय गच्छति॥"
इति वाराहमांसभक्षणापराधप्रायश्चित्तम्।
इति वाराहपुराणम्॥ *॥

वन्यवराहमांसं श्राद्धादौ विहितम्। यथा अथ मन्त्रीऋगुहत्तौ हारीतः। महारण्यवासिनश्च वराहाश्चेति। एवञ्च विवदन्ते ग्राम्यशूकरांश्चेति वशिष्ठोक्तं श्वेतान्येतया व्यवस्थितम्। कल्पतरुस्तु। श्राद्धे नियुक्तानि युक्ततयेति। विष्णूपासकस्य सर्व्वथा निषेधः। यथा वाराहे भगवद्वाक्यम्।

"भुक्त्वा वाराहमांसन्तु यस्तु मामुपसर्पति।
वराहो दशवर्षाणि भूत्वा वै चरते वने॥"
इत्येकादशीतत्त्वम्॥*॥

याज्ञवल्क्यः।

"हविष्यान्नेन वै मासं पायसेन च वत्सरम्।
मात्स्यहारिणकौरभ्रशाकुनिच्छागपार्षतैः॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम्।
मासवृद्ध्याभितृप्यन्ति दत्तैरेह पितामहाः॥"
इति श्राद्धतत्त्वम्॥*॥

विष्णोरवतारविशेषः। यथा,—

स्वायम्भुव उवाच।

"कुत्र प्रजाः स्थास्यन्ति पृथिवी तावत् प्रलयार्णवे मग्ना तस्या उद्धरणे यत्नं कुरु। इति श्रुत्वा ब्रह्मा भगवन्तं ध्यातवान्। ध्यायतस्तस्य नासाविवरात् अङ्गुष्ठप्रमाणो वराहपोतो निरगात्। स च आकाशस्थः सन् क्षणमात्रेण पर्व्वतोपमो बभूव। तं विष्णुं मत्वा ब्रह्मा तुष्टाव। स च तेन स्तुतः प्रलयार्णवजलमध्ये प्रविश्य दन्ताग्रेण पृथ्वीमुद्धृत्य निजधारणशक्त्या संस्थाप्य अन्तर्हितो बभूव। ततः पृथिव्यां राजा स्वायम्भुवमनुरासीत्।" इति श्रीभागवतमतम्॥*॥ तदवतारकर्तृकहिरण्याक्षवधो यथा,—

"वराहपर्व्वतो नाम यः पुरा हरिनिर्म्मितः।
स एव भूतो भगवानाजगामासुरान्तिकम्॥
ततश्चन्द्रप्रतीकाशमगृह्णाच्छङ्खमुत्तमम्।
सहस्रारं ततश्चक्रं सूर्य्यवह्निसमप्रभम्॥
यो वैकुण्ठः सुरेन्द्राणामनन्तो भोगिनामपि।
विष्णुर्यो योगविदुषां यो यज्ञो यज्ञकर्म्मणाम्॥
विश्वे यस्य प्रसादेन सवनस्था दिवौकसः।
आज्यं महर्षिभिर्द्दत्तमश्नुवन्ति सुधाहुतम्॥
ततो दैत्यभयकरं पुराणं शङ्खमुत्तमम्।
वक्त्रेण दध्मौ वेगेन विक्षिपन् दैत्यजीवितम्॥
ततः संरक्तनयनो हिरण्याक्षो महासुरः।
कोऽयम्बिति वदन् रोषान्नारायणमुदैक्षत॥
वाराहरूपिणं देवं स्थितं पुरुषविग्रहम्।
शङ्खचक्रोद्यतकरं देवानामार्त्तिनाशनम्॥
रराज शङ्खचक्राभ्यां ताभ्यामसुरसूदनः।
सूर्य्याचन्द्रमसोर्मध्ये पौर्णमास्यामिवाम्बुदः॥
ततो हिरण्याक्षमुखाश्च सर्व्वे
समाद्रवन् दैत्यगणाः सुरेशम्।
निहन्तुकामाः सहसा वराहं
गृहीतशस्त्रा बलपूर्णदर्पाः॥
तैर्व्वध्यमानोऽतिशयेन शस्त्रै-
र्दैत्यासुरैर्दानवपुङ्गवैश्च।
नासौ चचालासुरवृन्दहा वै
मेघैः सुवृष्टा इव मन्दराद्रिः॥
दैत्यस्तनोऽसौ शुवराहमाहवे
निपातयामास वधाय ज्वलन्तीम्।
शक्तिं यथा विद्युतमाशु कृष्णे
प्रवर्षमाणोऽपि गिरिं सुमेघः॥
स हन्यमानो गदयाप्रमेयः
प्रोवाच दैत्यं शुवराहमूर्त्तिः।
प्रजापतेः सेतुमिमं निहत्य
प्रजेश क स्वस्ति यथा सुरेन्द्रः॥
बलं समासाद्य परैरजेयं
विनाशयिष्याम्यहमेवमाणौ।
दैत्यास्त्वया साकमतो हि देवान्
कृतस्वकीयान् सुनयोपपन्नान्॥
संस्थापयिष्यामि न संशयोऽत्र
दैत्येन्द्रदर्पः क नु मत्समीपे।
एवं ब्रुवति वाक्यन्तु विष्णौ वंस्त्ययपातयत्।
स बाहुमुद्यतमुद्यम्य सर्व्वप्रहरणं रणे।
दानवाश्चापि समरे मयतारपुरोगमाः।
उद्यतायुधनिस्त्रिंशाः सर्व्वे तं समुपाद्रवन्॥
स ताड्यमानोऽतिबलैर्दैत्यैः सन्नायुधोद्यतैः।
न चचाल वराहस्तु मैनाक इव पर्व्वतः॥
क्रोधसंरक्तनयनः शङ्खचक्रधरो हरिः।
अवर्द्धत स वेगेन व्याप्नुवन् सर्व्वतो दिशम्॥
तं जयायासुरेन्द्राणां वर्द्धमानं नभस्तले।
ऋषयः सह गन्धर्व्वैस्तुष्टुवुर्मधुसूदनम्॥
दीप्ताग्निसदृशं घोरं दर्शनीयसुदर्शनम्।
सुवर्णरेणुपर्य्यन्तं वज्रनाभं भयावहम्॥
मेदोऽस्थिमज्जारुधिरैः सिक्तं दानवसम्भवैः।
अद्वितीयं प्रहारेस्तु क्षुरपर्य्यन्तमण्डलम्॥
स्रग्दाममालाविततं कामगं कामरूपिणम्।
चक्रमुद्यम्य समरे वाराहः स्वेन तेजसा॥
चिच्छेद बाहूंश्चक्रेण हिरण्याक्षस्य वै तथा।
स छिन्नबाहुर्विशिरा न प्राकम्पत दानवः॥
कबन्धवत्स्थितः संख्ये विशाख इव पादपः।
ततः स्थितस्यैव शिरस्तस्य भूमावपातयत्।
हिरण्मयं रुक्मचित्रं मेरोः शृङ्गमिवोत्तमम्॥
हिरण्याक्षे हते दैत्या ये शेषास्तेव दानवाः।
सर्व्वे तस्य भयात् भक्ता जग्मुरार्त्ता दिशो दश॥"
इति वह्निपुराणम्।

अथ वराहावतारकारणम्। शरभरूपिमहादेवकर्तृकतच्छरीरनाशश्च।

"त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा।
अनन्तः पृथिवीं त्यक्त्वा विष्णोरन्तिकमागतः॥
तेन त्यक्ता तु पृथिवी क्षणमात्रादधोगता।
ततो वराहरूपेण निमग्नां पृथिवीं जले।
मग्नां समुद्धारान्न्यधात् तत्सलिलोपरि॥
वराहोऽपि स्वयं गत्वा लोकालोकाख्यं गिरिम्।
वाराह्या सह रेमे स पृथिव्या चारुरूपया॥
स तया रममाणस्तु सुचिरं पर्व्वतोत्तमे।
नावाप तोषं लोकेशः पोत्री परमकामुकः॥
पृथिव्याः पोत्रिरूपाया रमयन्त्यास्ततः सुताः।
त्रयो जाता द्विजश्रेष्ठास्तेषां नामानि वै शृणु॥
दुर्वृत्तः कनको घोरः सर्व्व एव महाबलाः।
स तैः पुत्रैः परिवृतो वाराहो भार्य्यया स्वया॥
रममाणस्तदा कामत्यागं नैवागमद्धिया।
इतस्ततश्च शिशुभिः क्रीडद्भिः पोत्रिभिस्तदा॥
जगन्ति तत्र भग्नानि नदीः कल्पतरूंस्तथा।
ततो देवगणाः सर्व्वे सहिता देवयोगिभिः॥
शक्रेण सहिता मन्त्रं चक्रुः सम्यक् जगद्धितम्।
ततो निश्चित्य ते सर्व्वे शक्राद्या मुनिभिः सह।
शरण्यं शरणं जग्मुर्नारायणमजं विभुम्॥
तं समासाद्य गोविन्दं वासुदेवं जगत्पतिम्।
प्रणम्य सर्व्वे त्रिदशास्तुष्टुवुर्गरुडध्वजम्॥

देवा ऊचुः।

नमस्ते देवदेवेश! जगत्कारणकारण।
कालस्वरूपिन् भगवन् प्रधानपुरुषात्मक॥
इति स्तुतो देवदेवो भूतभावनभावनः।
सेन्द्रैर्देवगणैरूचे तान् सर्व्वान् मेघनिस्वनः॥

श्रीभगवानुवाच ।
यदर्थमागता यूयं यद्वो भयमुपस्थितम् ।
यत्र यद्वा मया कार्य्यं तद्देवास्तूर्णमुच्यताम् ॥
देवा ऊचुः ।
शीर्य्यते वसुधा नित्यं क्रीड़या यज्ञपोत्रिणः ।
लोकाश्च सर्व्वे संक्षुब्धा नाप्नुवन्त्युपशान्तिताम् ॥
इति तेषां निगदतां श्रुत्वा वाक्यं जनार्द्दनः ।
उवाच शङ्करं देवं ब्रह्माणञ्च विशेषतः ॥
यत्कृते देवताः सर्व्वाः प्रजाश्च सकला इमाः ।
प्राप्नुवन्ति महद्दुःखं शीर्य्यते सकलं जगत् ॥
वाराहं तदहं कायं त्यक्तुमिच्छामि शङ्कर ।
निर्देशशक्तं तत् त्यक्तुं स्वेच्छया नहि शक्यते ॥
त्वं घातयस्व तत् कायं यथात्मा शङ्कराधुना ।
त्वमाप्यायस्व तेजोभिर्ब्रह्मन् स्मरहरं तनुः ॥
आप्यायन्तु तदा देवाः शङ्करो हन्तु पोत्रिणम् ।
रजस्वलायाः संसर्गात् विप्राणां मारणात् तथा ॥
कायः पापकरो भूतस्तं त्यक्तुं युज्यतेऽधुना ।
प्रायश्चित्तैरुपेतैर्यैः प्रायश्चित्तमहं ततः ।
चरिष्यामि तदर्थं मे तनुर्यत्नेन पात्यताम् ॥
प्रजा पाल्या मम सदा या हि सीदति नित्यशः ।
मत्कृते प्रत्यहं तस्मात् त्यक्ष्ये कायं प्रजाकृते ॥
श्रीमार्कण्डेय उवाच ।
इत्युक्तौ वासुदेवेन तदा च ब्रह्मशङ्करौ ।
त्वया यथोक्तं तत् कार्य्यमिति गोविन्दमूचतुः ॥
वासुदेवोऽपि तान् सर्व्वान् विसृज्य त्रिदशां-
स्तदा ।
वाराहं तेजसा हर्त्तुं स्वयं ध्यानपरोऽभवत् ॥
शनैः शनैर्यदा तेज आहरत्तेष माधवः ।
तदा देहन्तु वाराहं सत्वहीनं व्यजायत ॥
ब्रह्माद्यास्त्रिदशाः सर्व्वे महादेवमुमापतिम् ।
अनुजग्मुस्तथा तेज आधातुं स्मरनाशने ॥
ततः सर्व्वैर्देवगणैः स्वं स्वं तेजो वृषध्वजे ।
आदधे तेन बलवान् सोऽतीव समजायत ॥
ततः शरभरूपी स तत्क्षणाद्गिरिशोऽभवत् ।
ऊर्द्धाधोभावतश्चाष्टपादयुक्तः सुभैरवः ॥
द्विलक्षयोजनोच्छ्रायः सार्द्धलक्षैकविस्तृतः ॥
ऊर्द्ध्वं वराहकायस्तु लक्षयोजनविस्तृतः ।
लक्षार्द्धविस्तृतः पार्श्वे वर्द्धमानस्तदाभवत् ।
तमायान्तं ततो दृष्ट्वा क्रोधाद्धावन्तमञ्जसा ॥
सुवृत्तः कनको घोर आसेदुः क्रोधमूर्च्छिताः ।
उच्चैश्चिपुस्तं युगपत् पोत्रघातैर्महाबलाः ॥
ततस्तुण्डप्रहारेण शरभः कण्ठमध्यतः ।
भित्त्वा वपुर्वराहस्य पातयामास तज्जले ॥
तं पातयित्वा प्रथमं सुवृत्तं कनकं तथा ।
घोरञ्च कण्ठदेशेषु भित्त्वा भित्त्वा जघान ह ॥
त्यक्तप्राणास्तु ते सर्व्वे पेतुस्तोये महार्णवे ।
जलशब्दं वितन्वानाः कालानलसमार्च्चिषः ॥
पतितेषु वराहेषु ब्रह्मा विष्णुर्हरस्तथा ।
तदर्थं चिन्तयामासुः पुनरेव समागताः ॥"
इति कालिकापुराणीयाष्टाविंशत्यूनत्रिंशाध्यायात् सङ्कलितः ॥ * ॥ विष्णुः । मानभेदः । पर्व्वतभेदः । मुस्ता । इति मेदिनी । हे, २२ ॥ (पर्व्वतार्थे उदाहरणम् । यथा, महाभारते । २ । २१ । २ ।
"वैहारो विपुलः शैलो वराहो वृषभस्तथा ।
तथा ऋषिगिरिस्तात शुभाश्चैत्यकपञ्चमाः ॥")
शिशुमारः । वाराहीकन्दः । इति राजनिर्घण्टः ॥ अष्टादशद्वीपान्तर्गतक्षुद्रद्वीपविशेषः । यथा,—
"गान्धर्व्वो वरुणः सौम्यो वराहः कङ्क एव च ।
कुमुदश्च कसेरुश्च नागो भट्टारकस्तथा ॥
चन्द्रेन्द्रमलयाः शङ्खयवाङ्कगभस्तिमान् ।
ताम्राकुश्च कुमारी च तत्र द्वीपा दशाष्टभिः ॥"
इति शब्दमाला ॥
(कृष्णपिण्डीरः । तत्पर्य्यायो यथा,—
"वराहः कृष्णपिण्डीरः कृष्णपिण्डीतकस्तु सः ॥"
इति वैद्यकरत्नमालायाम् ॥)

वराहकन्दः, पुं, (वराहप्रियः कन्दो यस्य ।) वाराही । इति राजनिर्घण्टः ॥

वराहकान्ता, स्त्री, (वराहस्य कान्ता प्रियेति ।) वाराहीवृक्षः । इति शब्दरत्नावली ॥

वराहकाली, [न्] पुं. (वराहवत् कलते इति । कल् + णिनिः ।) सूर्य्यमणिपुष्पवृक्षः । तत्पर्य्यायः । सूर्य्यावर्त्तः २ । इति हारावली । ६४ ॥

वराहक्रान्ता, स्त्री, (वराहेन क्रान्ता अतिप्रियत्वात् ।) क्षुपविशेषः । इति शब्दमाला ॥ तत्पर्य्यायः, । लज्जालुः २ समङ्गा ३ लज्जकारिका ४ वराहनामा ५ वदरा ६ शूकरी ७ तिक्तगन्धिका ८ नमस्कारी ९ गण्डकाली १० खदिरी ११ । इति रत्नमाला ॥ लज्जालुका १२ अञ्जलिकारिका १३ कृताञ्जलिः १४ गण्डकारी १५ समीच्छदा १६ । इति ग्रन्थान्तरम् ॥ वाराही । चामारालु इति ख्याति । इति सुभूतिः । इत्यमरटीकायां भरतः ॥

वराहनामा, [न्] पुं, (वराहस्य नाम इव नाम यस्य ।) वाराहीकन्दः । इति शब्दमाला ॥

वराहिका, स्त्री, कपिकच्छुः । इति राजनिर्घण्टः ॥

वराही, स्त्री, (वराहो भक्षकत्वेनास्त्यस्येति । अच् । गौरादित्वात् ङीष् ।) भद्रमुस्ता । शूकरकन्दः । इति राजनिर्घण्टः ॥

वरिवसितः, त्रि, (वस् + "नमोवरिवश्चित्रङः क्यच् ।" ३ । १ । १९ । इति क्यच् । ततः क्तः । "क्यस्य विभाषा ।" ६ । ४ । ५० । इति पक्षे यलोपः ।) उपासितः । इत्यमरः । ३ । १ । १०२ ॥

वरिवस्या, स्त्री, (वरिवसः पूजायाः करणम् । वरिवस् + "नमोवरिवश्चित्रङः क्यच् ।" ३ । १ । १९ । इति क्यच् । "अ प्रत्ययात् ।" ३ । ३ । १०२ । इत्यः । टाप् ।) शुश्रूषा । इत्यमरः । २ । ७ । ३५ ॥ (यथा, ऋग्वेदे । १।९८।६ ।
"हुवे यद्वां वरिवस्या गृणानो
विद्यामेषं वृजनं जीरदानुम् ॥")

वरिवस्यितः, त्रि, (वरिवस्या संजाता अस्य तारकादित्वादितच् । यद्वा, वरिवस्य + क्तः । "क्यस्य विभाषा ।" ६।४।५० । इति पक्षे यलोपाभावः ।) उपासितः । इत्यमरः । ३।१।१०२ ॥

वरिशी, स्त्री, वड़िशी । इति शब्दरत्नावली ॥

वरिषं, क्ली, (वृ + सः । बाहुलकात् इट् ।) वत्सरः । इति शब्दरत्नावली ॥ ("वर्षः स्यात् वरिषोऽपि च ।" इत्युज्ज्वलदत्तधृतचन्द्रवचनम् । ३ । ६२ ॥)

वरिषाः, स्त्री भूम्नि, (वृ + सः । बहुवचनात् इट् ।) वर्षाः । इति भरतद्विरूपकोषः ॥

वरिषाप्रियः, पुं, (वरिषा वर्षा प्रिया यस्य ।) चातकपक्षी । इति शब्दरत्नावली ॥

वरिष्ठं, क्ली, (अतिशयेन वरम् । वर + इष्ठन् ।) ताम्रम् । इत्यमरः । ३ । २ । १११ ॥ (यथा,—
"रक्तं वरिष्ठं म्लेच्छाख्यं ताम्रं शुल्वमुडुम्बरम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
मरिचम् । इति मेदिनी । ठे, १५ ॥

वरिष्ठः, त्रि, (अयमेषामतिशयेन वर उरुर्वा अतिशायन इष्ठन् । प्रियस्थिरेति वरादेशः ।) इति व्याकरणम् ॥ वरतमः । (यथा, भागवते । १ । १० । १ ।
"हत्वा स्वरिक्थस्पृध आततायिनो
युधिष्ठिरो धर्म्मभृतां वरिष्ठः ॥")
उरुतमः । इति मेदिनी । ठे, १५ ॥ (यथा, ऋग्वेदे । ४ । ५६ । १ ।
"यत्सीं वरिष्ठे बृहती विमिन्वन्
रुवद्धोक्षापप्रथानेभिरेवैः ॥")
वत्सः । इत्यजयः ॥

वरिष्ठः, पुं, (वर + इष्ठन् ।) तित्तिरिपक्षी । इति मेदिनी । ठे, १५ ॥ नारङ्गवृक्षः । इति राजनिर्घण्टः ॥ (चाक्षुषमनुपुत्त्रः । यथा, महाभारते । १३ । १८ । २० ।
"वरिष्ठो नाम भगवांश्चाक्षुषस्य मनोः सुतः ॥"
धर्म्मसावर्णिमन्वन्तरस्य ऋषिविशेषः । यथा, मार्कण्डेये । ९४ । १९ ।
"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः ।
निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः ।
सप्तर्षयोऽन्तरे तस्मिन्नग्निदेवश्च सप्तमः ॥"
दैत्यविशेषः । तथा, हरिवंशे । २३२ । १३ ।
"वरिष्ठश्च गविष्ठश्च भूतलोन्मथनो विभुः ।
सुप्रघादः किरीटी च सूचीवक्त्रो महासुरः ॥")

वरिष्ठा, स्त्री, (वरिष्ठ + टाप् ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥

वरी, स्त्री, (वृणोतीति । वृ + पचाद्यच् । गौरादित्वात् ङीष् ।) शतावरी । इत्यमरः । २ । ४ । १०० ॥ सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥

वरीयान्, [स्] त्रि, (अयमनयोरतिशयेन उरुर्वरो वा । ईयसुन् । प्रियस्थिरेति वरादेशः ।) श्रेष्ठः । (यथा, भागवते । २ । १ । १ ।
"वरीयानेष ते प्रश्नः कृतो लोकहितो नृप ! ॥")
वरिष्ठः । अतियुवा । इति मेदिनी । ठे, १५ ॥

वरीयान्, पुं, विष्कम्भादिसप्तविंशतियोगान्तर्गता-ष्टादशयोगः। तत्र जातफलम्।

"दाता दयालुः सुतरां सुवेषः
सत्कर्म्मकर्त्ता मधुरस्वभावः।
नरो बलीयान् धनवान् जनाढ्यो
योगो वरीयान् यदि जन्मकाले॥"

इति कोष्ठीप्रदीपः॥

(पुलहस्य पुत्त्रः। इति भागवते।४।१।३४॥)

वरीवर्द्दः, पुं, बलीवर्द्दः। इत्यमरटीकायां रमानाथः॥

वरीषुः, पुं, कामः। इति त्रिकाण्डशेषः॥

वरुटः, पुं, म्लेच्छजातिविशेषः। यथा,—

"पुलिन्दा नाहला निष्ट्याः शवरा वरुटा भटाः।
माला भिल्लाः किराताश्च सर्व्वेऽपि म्लेच्छ-जातयः॥"

इति हेमचन्द्रः॥

वरुड़ः, पुं, अन्त्यजजातिविशेषः। यथा,—

"रजकश्चर्म्मकारश्च नटो वरुड़ एव च।
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः॥"

एषां स्त्रीगमनादौ दोषो यथा,—

"एतेषान्तु स्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति॥"

इति प्रायश्चित्ततत्त्वधृतयमवचनम्॥

अस्योत्पत्तिर्यथा,—

"कैवर्त्तस्य च कन्यायां शौण्डिकादेव सौचिकः।
सौचिकात् शौण्डिकाज्जातो नटो वरुड़ एव च॥"

इति पराशरपद्धतिः॥

वरुणः, पुं, (वृणोति सर्व्वं व्रियते अन्यैरिति वा। वृ+"कॄवृदारिभ्य उनन्।" उणा० ३।५३। इति उनन्।) देवताविशेषः। स च कश्यपस्य अदितिनाम्नि पत्न्यां जातः। तस्य चर्षण्यां पत्न्यां भृगुवाल्मीकी पुत्त्रौ जातौ। इति श्रीभागवतमतम्॥ स च जलाधिपतिः पश्चिमदिक्पालश्च। तत्पर्य्यायः। प्रचेताः २ पाशी ३ यादसांपतिः ४ अप्पतिः ५। इत्यमरः॥ यादःपतिः ६ अपांपतिः ७। इति तट्टीकायां भरतः॥ जम्बुकः ८ मेघनादः ९ जलेश्वरः १० परञ्जयः ११ दैत्यदेवः १२ जीवनावासः १३ नन्दपालः १४। इति शब्दरत्नावली॥ वारिलोमः १५ कुण्डली १६ रामः १७ सुखाशः १८। इति जटाधरः॥ *॥ जलाशयोत्सर्गादौ अस्य पूजाविधिर्यथा। हयशीर्षपञ्चरात्रे।

"अथ वाप्यामतः कुर्य्यात् स्वप्नरत्नादिनिर्म्मि-तम्।
द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम्॥
वामेन नागपाशन्तु धारयन्तं सुभोगिनम्।
ललितं वामभागे कारयेद्यादसांपतिम्॥
वामे तु कारयेद्वृद्धिं दक्षिणे पुष्करं शुभम्।
नागैर्नदीभिर्यादोभिः समुद्रैः परिवारितम्॥
कृत्वैवं वरुणं देवं प्रतिष्ठाविधिनार्च्चयेत्॥"

पुष्करं तत्पुत्त्रम्। ततो ध्यानम्।

"प्रसन्नवदनं सौम्यं हिमकुन्देन्दुसन्निभम्।
सर्व्वाभरणसंयुक्तं सर्व्वलक्षणलक्षितम्॥
किरणैः शीतलैः सौम्यैः प्रीणयन्तमवस्थितम्।
लावण्यामृतधाराभिस्तर्पयन्तमिव प्रजाः॥
राजहंससमारूढं पाशव्यग्रकरं शुभम्।
पुष्कराद्यैर्गणैः सर्व्वैः समन्तात् परिवारितम्॥
गौर्य्या कान्त्या चानुगतं नदीभिः परिवारितम्।
नागैर्यादोगणैर्युक्तं ब्रह्माणमिव चापरम्॥
सृष्टिसंहारकर्त्तारं नारायणमिवापरम्॥"

इति ध्यात्वा पूजयेत्। वरुणमन्त्रोद्धारस्तु तत्रैव।

"अष्टाविंशान्तबीजेन चतुर्द्दशस्वरेण च।
अर्द्धेन्दुविन्दुयुक्तेन प्रणवोद्दीपितेन च॥"

तेन ॐ वौँ इति मन्त्रः।

"प्रतिमायां स्थितिं कृत्वा प्रणवेन निबोधयेत्।
पूजयेद्गन्धपुष्पाद्यैः सान्निध्यं पाशमुद्रया॥"

स्थितिं प्रतिष्ठाम्। निबोधयेत् अन्तर्गताङ्गुष्ठमुष्टिभ्यां निबोधमुद्रां दर्शयेत्। नमस्कारमन्त्रस्तु

"वरुणो धवलो जिष्णुः पुरुषो निम्नगाधिपः।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः॥"

इति जलाशयोत्सर्गतत्त्वम्॥*॥

वृष्ट्यर्थं अस्य जपनीयमन्त्रा यथा,—

"पुष्करावर्त्तकैर्मेघैः प्लावयन्तं वसुन्धराम्।
विद्युद्गर्ज्जितसन्नद्धं तोयात्मानं नमाम्यहम्॥
यस्य केशेषु जीमूता नद्यः सर्व्वाङ्गसन्धिषु।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः॥"

इति ध्यात्वा मानसैरुपचारैर्व्वरुणं आराध्य मूलमन्त्रं जपेत्। प्रजापतिरृषिस्त्रिष्टुप् छन्दो वरुणो देवता एतावद्वाक्यमभिधाय सुवृष्ट्यर्थं जपे विनियोगः। मन्त्रस्तु गुरुमुखात् ज्ञेयः। स यथा। ॐ वृष्टिरिहानायन्तरयो मरुताः सृष्टौ गच्छ वशापमिद्द त्वा दिवं गच्छत तेनो वृष्टिमावह। इति मन्त्रस्य सहस्रजपानन्तरं सुवृष्टिमती वसुमती भवति। अत्र सन्देहो न कार्य्यः॥*॥ मन्त्रान्तरम्। कूर्च्चं लक्ष्मीं तथा मायां तेन हुँ श्रीँ ह्रीँ इति त्र्यक्षरमन्त्रं नाभिमात्रजलमध्ये प्रविश्य यदि जपति तदा अनावृष्टिं हरति महावृष्टिर्भवति। अष्टसहस्रजपः संख्या चतुर्गुणा तेन द्वात्रिंशत्सहस्रजपः। दिनत्रयानन्तरं चतुर्थदिने जपसमाप्तिः।

"नाभिमात्रजले स्थित्वा जपेन्मन्त्रं प्रसन्नधीः।
वसुसहस्रं जपेन्मन्त्रं त्रिदिनं व्याप्य यत्नतः॥"

अथवा।

"षट्सहस्रं जपेन्नित्यं तदा वृष्टिर्भवेत् ध्रुवम्।"

इति षट्कर्म्मदीपिका॥*॥

पुस्तकान्तरे वं इति एकाक्षरमन्त्रोऽपि जप्यत्वेन लिखितः॥*॥ महापातकिनो दण्डधनं गृहीत्वा राजा वरुणाय प्रतिपादयेत्। यथा,—

"नाददीत नृपः साधुर्म्महापातकिनो धनम्।
आददानस्तु तल्लोभात्तेन दोषेण लिप्यते॥
अप्सु प्रवेश्य तं दण्डं वरुणायोपपादयेत्।
श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत्॥
ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः।
ईशः सर्व्वस्य जगतो ब्राह्मणो वेदपारगः॥"

इति मानवे ९ अध्यायः॥*॥

स्वनामख्यातवृक्षः। तत्पर्य्यायः। वरणः २ सेतुः ३ तिक्तशाकः ४ कुमारकः ५। इत्यमरः। २।४।२५॥ श्वसरीगघ्नः ६ सेतुकः ७ वराणः ८ शिखिमण्डनः ९। इति शब्दरत्नावली॥ श्वेतवृक्षः १० श्वेतद्रुमः ११ साधुवृक्षः १२ तमालः १३ मारुतापहः १४। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। रक्तदोषशीतवातहरत्वम्। स्निग्धत्वम्। दीपनत्वम्। विद्रधिरोगजित्त्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"वरुणः पित्तलो भेदी श्लेष्मकृच्छ्राश्ममारुतान्।
निहन्ति गुल्मवातास्रक्रिमींश्चोष्णोऽग्निदीपनः।
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः॥"

इति भावप्रकाशः॥

अन्यच्च।

"वरुणोऽनिलशूलघ्नो भेदी चोष्णोऽश्मरीहरः।
पुष्पं वरुणजं ग्राहि पित्तघ्नं आमवातजित्॥"

इति राजवल्लभः॥*॥

जलम्। इति मेदिनी। णे, ६५॥ सूर्य्यः। इति विश्वः॥ (यथा, महाभारते।१।६५।१५।

"धाता मित्त्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा॥"

मुनिगर्भजातकश्यपपुत्त्रविशेषः। इति महाभारतम्।१।६५।४२॥)

वरुणात्मजा, स्त्री, (वरुणस्य जलस्य आत्मजा तदुद्भवत्वात्।) मद्यम्। इत्यमरः।२।१०।३९॥ (विवरणमस्या मद्यशब्दे ज्ञेयम्॥)

वरुणानी, स्त्री, (वरुणस्य पत्नी। वरुण+"इन्द्र-वरुणभवेति।" ४।१।४९। इति ङीष् आनुगागमश्च।) वरुणपत्नी। इति जटाधरः॥ (यथा, ऋग्वेदे।१।२२।१२।

"इहेन्द्राणीमुपह्वये वरुणानीं स्वस्तये।
अग्नायीं सोमपीतये॥")

वरुत्रं, क्ली, (वृणोति आवृणोत्यनेनेति। वृ+ "अशित्रादिभ्य इत्रोत्रौ।" उणा० ४।१७२। इति उत्रः।) उत्तरीयवस्त्रम्। वृधातोरुत्रप्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुदी-सुबादिवृत्तिः॥

वरुलः, पुं, (वृ+उलः।) संभक्तः। इति संक्षिप्तसारोणादिवृत्तिः॥

वरूथं, क्ली, (व्रियते शरीरमनेनेति। वृ वरणे + "जॄवृञ्भ्यामूथन्।" उणा० २।६। इति ऊथन्।) तनुत्राणम्। इति हेमचन्द्रः॥ चर्म्म। इति मेदिनी। थे, २१॥ तत्र पवर्गीयबकारादौ गणितोऽयं शब्दः॥ (गृहम्। इति निघण्टुः। ३।४॥ यथा, ऋग्वेदे।१।५८।९।

"भवा वरूथं गृणते विभावो
भवा मघवन् मघवद्भ्यः शर्म्म॥"

सैन्यम्। यथा, भागवते।९।१०।२०।

"तेऽनीकपा रघुपतेरभिपत्य सर्व्वे-
द्वन्द्वं वरूथमिभपत्तिरथाश्वयोधैः।

जम्बुद्रुमैर्गिरिगरेणुभिरङ्गदाद्याः
सीताभिमर्षहतमङ्गलरावशिष्टान् ।”)

वरूथः, पुं, (व्रियते रथोऽनेनेति । वृञ् वरणे + “जॄवृञ्भ्यामूथन् ।” उणा० २ । ६ । इति ऊथन् ।) परप्रहरणाभिघातरक्षार्थं रथस्य सन्नाहवद्यद्दारुणकादिरचितं तत् । तत्पर्य्यायः । रथगुप्तिः २ । इत्यमरभरतौ । २ । ८ । ५७ ॥ रथसंवृतिः ३ । इति जटाधरः ॥ (यथा, रामायणे । ६ । ५७ । २६ ।
“उरगध्वजदुर्द्धर्षं सुवरूथं सुपस्करम् ॥”
ग्रामविशेषः । यथा, तत्रैव । २ । ७१ । ११ ।
“तोरणं दक्षिणार्द्धेन जम्बूप्रस्थं समागमत् ।
वरूथञ्च ययौ सम्यक् ग्रामं दशरथात्मजः ॥”)

वरूथिनी, स्त्री, (वरूथं तनुत्रादिकमस्त्यस्या इति । वरूथ + इनिः । ङीप् ।) सेना । इत्यमरः । २ । ८ । ७८ ॥ (यथा, रघुः । ११ । ५८ ।
“तस्य जातु मरुतः प्रतीपगाः
वर्त्मसु ध्वजतरुप्रमाथिनः ।
चिक्लिशुर्भृशतया वरूथिनी-
मुत्तटा इव नदीरयाः स्थलीम् ॥”)

वरेण्यं, क्ली, (व्रियते लोकैरिति । वृ + “वृञ एण्यः ।” उणा० ३ । ९८ । इति एण्यः ।) कुङ्कुमम् । इति राजनिर्घण्टः ॥

वरेण्यः, त्रि, (वृ + एण्यः ।) प्रधानः । इत्यमरः । ३ । १ । ५७ ॥ (यथा, भट्टिः । १ । ४ ।
“पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः ॥”
वरणीयः । इति मल्लिनाथः ॥ यथा, कुमारे । ७ । ९० ।
“संस्कारपूतेन वरं वरेण्यं
वधूं सुखग्राह्यनिबन्धनेन ॥”
पुं, पितृगणानामन्यतमः । यथा, मार्कण्डेये । ९६ । ४५ ।
“वरो वरेण्यो वरदो पुष्टिदस्तुष्टिदस्तथा ॥”
भृगुपुत्त्रविशेषः । यथा, महाभारते । १३ । ८५ । १२९ ।
“भृगोस्तु पुत्त्राः सप्तासन् सर्व्वे तुल्या भृगोर्गुणैः ।
च्यवनो वज्रशीर्षश्च शुचिरौर्व्वस्तथैव च ।
शुक्रो वरेण्यश्च विभुः सवनश्चेति सप्त ते ॥”
महादेवः । यथा, तत्रैव शिवसहस्रनामकीर्त्तने । १३ । १७ । १२६ ।
“वरो वराहो वरदो वरेण्यः सुमहास्वनः ॥”)

वरेन्द्री, स्त्री, गौड़देशः । इति त्रिकाण्डशेषः ॥

वरेश्वरः, पुं, (वरः श्रेष्ठ ईश्वरः ।) शिवः । इति शब्दरत्नावली ॥

वरोटं, क्ली, (वराणि श्रेष्ठानि उटानि दलानि अस्य ।) मरुवकपुष्पम् । इति शब्दमाला ॥

वरोलः, पुं स्त्री, (वृ + ओलच् ।) वरटः । इति त्रिकाण्डशेषः ॥

वर्करः, पुं, (वृक्यते गृह्यते इति । वृक आदाने + बहुलवचनात् अरः । इत्युज्ज्वलदत्तः । ३ । १३१ ।) युवपशुः । इत्यमरः । २ । १० । २३ ॥ मेषशावकः । इति तट्टीकायां भरतः ॥ परिहासः । (यथा, अमरुशतके । ७ ।
“कान्तः केलिरुचिर्युवा सहृदयस्तादृक् पतिः कातरे
किन्नो वर्करकर्करैः प्रियशतैराक्रम्य विक्रीयते ॥”)
छागः । इति मेदिनी । रे, २१० ॥

वर्कराटः, पुं, (वर्करं परिहासं अटति गच्छतीति । अट् + अच् ।) कटाक्षः । तरुणादित्यरोचिः । नारीपयोधरोत्सङ्गकान्तदत्तनखक्षतः । इति मेदिनी । टे, ६५ ॥

वर्गः, पुं, (वृज्यते इति । वृजी वर्ज्जने + घञ् ।) सजातीयसमूहः । (यथा, रघुः । २ । ४ ।
“व्रताय तेनानुचरेण धेनो-
र्न्यषेधि शेषोऽप्यनुयायिवर्गः ॥”)
समानधर्म्मिभिः प्राणिभिरप्राणिभिरुपलक्षितं द्वन्द्वम् । यथा कवर्गः । अत्र कत्वखत्वादिना विजातीयत्वेऽपि स्थानसाम्यमस्ति । इत्यमरभरतौ ॥ ग्रन्थपरिच्छेदः । यथा,—
“सर्गो वर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः ।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् ।
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्धयः ॥”
इति त्रिकाण्डशेषः ॥
समानाङ्कद्वयस्य पूरणम् । तत्पर्य्यायः । कृतिः २ । वर्गे करणसूत्रं वृत्तद्वयम् ।
“समद्विघातः कृतिरुच्यतेऽथ
स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नः ।
स्वस्वोपरिष्टाच्च तथापरेऽङ्का-
स्त्यक्त्वान्त्यमुत्सार्य्य पुनश्च राशिम् ॥
खण्डद्वयस्याभिहतिर्द्विनिघ्नी
तत्खण्डवर्गैक्ययुता कृतिर्व्वा ।
इष्टोनयुग्राशिवधः कृतिः स्या-
दिष्टस्य वर्गेण समन्वितो वा ॥” * ॥
अस्योद्देशकः ।
“सखे नवानाञ्च चतुर्द्दशानां
ब्रूहि त्रिहीनस्य शतत्रयस्य ।
पञ्चोत्तरस्याप्ययुतस्य वर्गं
जानासि चेद्वर्गविधानमार्गम् ॥”
न्यासः ९ । १४ । २९७ । १०००५ । एषां यथोक्तकरणेन जाता वर्गाः ८१ । १९६ । ८८२०९ । १००१०००२५ ॥ अथवा नवानां खण्डे ४ । ५ । अनयोराहतिः २० । द्विनिघ्नी ४० । तत्खण्डवर्गैक्येन ४१ । युता जाता सैव कृतिः ८१ ॥ अथवा चतुर्द्दशानां खण्डे ६ । ८ । अनयोराहतिः ४८ । द्विनिघ्नी ९६ । तत्खण्डवर्गौ ३६ । ६४ । अनयोरैक्येन १०० । युता जाता सैव कृतिः १९६ ॥ अथवा खण्डे ४ । १० । तथापि सैव कृतिः १९६ ॥ अथवा राशिः २९७ । अयं त्रिभिरूनः पृथग्युतश्च २९४ । ३०० । अनयोर्घातः ८८२०० । त्रिवर्ग ९ युतो जातो वर्गः स एव ८८२०९ ॥ एवं सर्व्वत्रापि इति लीलावत्यां वर्गः ॥ (स्त्री, अप्सरोविशेषः । यथा, महाभारते । १ । २१७ । १५ ।
“अप्सरास्मि महाबाहो देवारण्यविहारिणी ।
इष्टा धनपतेर्नित्यं वर्गा नाम महाबल ॥”
मुनिशापात्ग्राहरूपिणीयं अर्ज्जुनात् शापमुक्तासीत् । एतद्वृत्तान्तन्तु तत्रैव द्रष्टव्यम् ।)

वर्गमूलं, क्ली, (वर्गस्य समानाङ्कद्वयस्य मूलम् आद्याङ्कः ।) पूरितसमानाङ्कद्वयस्याद्याङ्कः । यथा । वर्गमूले करणसूत्रं वृत्तम् ।
“त्यक्त्वान्त्याद्विषमात् कृतिं द्विगुणयेन्मूलं समे तद्धृते
त्यक्त्वालब्धकृतिं तदाद्यविषमाल्लब्धं द्विनिघ्नं न्यसेत् ।
पङ्क्त्यां पङ्क्तिहृते समेऽन्यविषमात् त्यक्त्वाप्तवर्गं फलं
पङ्क्त्यां तद्द्विगुणं न्यसेदिति मुहुः पङ्क्तेर्दलं स्यात् पदम् ॥” * ॥
अस्योद्देशकः ।
“मूलं चतुर्णाञ्च तथा नवानां
पूर्व्वं कृतानाञ्च सखे कृतीनाम् ।
पृथक् पृथग्वर्गपदानि विद्धि
बुद्धेर्व्विवृद्धिर्यदि तेऽत्र जाता ॥”
न्यासः ४ । ९ । ८१ । १९६ । ८८२०९ । १००१०००२५ । लब्धानि क्रमेण मूलानि २ । ३ । ९ । १४ । २९७ । १०००५ । इति लीलावत्यां वर्गमूलम् ॥
सजातीयाङ्कत्रयस्य घातः घनः । तस्य तन्मूलस्य च समुदायस्योदाहरणानि पूर्व्वं न लिखितानि प्रसङ्गादत्र पुनर्लिख्यन्ते । घने करणसूत्रं वृत्तत्रयम् ।
‘समत्रिघातश्च घनः प्रदिष्टः
स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः ।
आदित्रिनिघ्नस्तत आदिवर्ग-
स्त्र्यन्त्याहतोऽथादिघनश्च सर्व्वे ॥
स्थानान्तरत्वेन युता घनः स्यात्
प्रकल्प्य तत् खण्डयुगं ततोऽन्त्यम् ।
एवं मुहुर्व्वर्गघनप्रसिद्धा-
वाद्याङ्कतो वा विधिरेष कार्य्यः ॥
खण्डाभ्यां वा हतो राशिस्त्रिघ्नः खण्डघनैक्ययुक् ।
वर्गमूलघनस्वघ्नो वर्गराशेर्घनो भवेत् ॥” * ॥
अस्योद्देशकः ।
“नवघनं त्रिघनस्य घनं तथा
कथय पञ्चघनस्य घनञ्च मे ।
घनपदञ्च ततोऽपि घनात् सखे
यदि घनेऽस्ति घना भवतो मतिः ॥”
न्यासः ९ । २७ । १२५ । जाताः क्रमेण घनाः ७२९ । १९६८३ । १९५३१२५ ॥ अथवा राशिः ९ । अस्य खण्डे ४ । ५ । आभ्यां राशिर्हतः १८० त्रिनिघ्नश्च ५४० । खण्डघनैक्येन १८९ । युतो जातो घनः ७२९ ॥ अथवा राशिः २७ । अस्य खण्डे २० । ७ । आभ्यां हतस्त्रिघ्नश्च ११३४० । खण्डघनैक्येन ८३४३ । युतो जातो घनः १९६८३ ॥ अथवा राशिः ५ । अस्य

मूलम् २। घनः ८। अयं खण्डो जातश्चतुर्थो घनः ६४॥ अथवा राशिः ८। अस्य मूलम् ३। घनः २७। अस्य वर्गो नवानां घनः ७२९। य एव वर्गराशिघनः स एव वर्गमूलघनवर्गः॥ इतिघनः॥*॥ अथ घनमूले करणसूत्रं वृत्तद्वयम्।

"आद्यं घनस्थानमथाघने द्वे
पुनस्तथान्त्याद्घनतो विशोध्यम्।
घनं पृथक्स्थं पदमस्य कृत्या
त्रिघ्न्या तदाद्यं विभजेत् फलन्तु॥
पङ्क्त्यां न्यसेत्तत्कृतिमन्त्यनिघ्नीं
त्रिघ्नीं त्यजेत्तत्प्रथमात् फलस्य।
घनं तदाद्याद्घनमूलमेवं
पङ्क्तिर्भवेदेवमतः पुनश्च॥"

अत्रोद्देशकः। पूर्व्वघनानां मूलार्थं न्यासः ७२९। १६९८३। १९५३१२५। क्रमेण लब्धानि मूलानि ९। २७। १२५। इति लीलावत्यां घनमूलम्॥

वर्गोत्तमः, पुं, (वर्गेषु उत्तमः।) चराणां अर्थात् मेषकर्कटतुलामकरराशीनां प्रथमोऽंशः। स्थिराणां अर्थाद्वृषसिंहवृश्चिककुम्भराशीनां पञ्चमोऽंशः। द्व्यात्मकानां अर्थात् मिथुनकन्याधनुर्मीनराशीनां नवमोऽंशश्च। यथा,—

"चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा।
नवमे द्व्यात्मकानाञ्च वर्गोत्तम इति स्मृतः॥"

अपि च। राशीनां स्वकीयनवांशः। यथा,—

"स्वनवांशस्तु राशीनां वर्गोत्तम इति स्मृतः॥"

इति ज्योतिस्तत्त्वम्॥

वर्च्च, ङ दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ङ, वर्च्चते।। इति दुर्गादासः॥

वर्च्चः, [स्] क्ली, (वर्च्चते इति। वर्च्च+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) रूपम्। विष्ठा। (यथा, सुश्रुते उत्तरतन्त्रे ४० अध्याये।

"शूलाविष्टः सक्तमूत्रोऽन्त्रकूजी
स्रस्तापानः सप्रकट्यूरुजङ्घः।
वर्च्चो मुञ्चत्यल्पमल्पं सफेनं
रूक्षं श्यावं सानिलं मारुतेन॥")

तेजः। इति मेदिनी। से, ३५॥ (यथा, ऋग्वेदे। ९। ६६। २१।

"अग्ने पवस्व स्वपा अस्मे वर्च्चः सुवीर्य्यम्॥"

"वर्च्चः तेजः।" इति तद्भाष्ये सायणः॥ अन्नम्। यथा तत्रैव। ३। २४। १।

"अग्ने सहस्व पृतना अभिमातीरपास्य।
दुष्टरस्तरन्नरातीर्व्वर्च्चोधा यज्ञ वाहसे॥"

"वर्च्चोधाः अन्नं धेहि।" इति तद्भाष्ये सायणः॥)

वर्च्चस्कः, पुं क्ली, (वर्च्चस्+स्वार्थे कन्।) विष्ठा। इत्यमरः। २। ६। ६८॥ (दीप्तिः। यथा, महाभारते। १३। २५। १८॥

"देविकायामुपस्पृश्य तथा सुन्दरिकाह्रदे।
अश्विन्यां रूपवर्च्चस्कं प्रेत्य वै लभते नरः॥")

वर्च्चस्वी, [न्] पुं, (वर्च्चोऽस्यास्तीति। वर्च्चस्+ "अस्मायामेधेति।" ५। २। १२१। इति विनिः।) चन्द्रः। यथा,—

"रोहिण्यामभवद्वर्च्चा वर्च्चस्वी येन चन्द्रमाः॥"

इति वह्निपुराणम्॥

वर्च्चाः, [स्] पुं, (वर्च्चते इति। वर्च्च+असुन्।) चन्द्रपुत्त्रः। इति मेदिनी। से, ३६॥ अन्यच्च।

"रोहिण्यामभवद्वर्च्चा वर्च्चस्वी येन चन्द्रमाः।"

इत्याद्ये वह्निपुराणे सर्गानुकीर्त्तने सतीदेहत्यागनामाध्यायः॥

वर्ज्जनं, क्ली, (वृज्+ल्युट्।) त्यागः। हिंसा। इति मेदिनी। ने, १२२॥ मारणम्। इति हेमचन्द्रः॥

वर्ज्जितः, त्रि, त्यक्तः। वृजधातोः क्तप्रत्ययेन निष्पन्नः। यथा,—

"अवज्ञातञ्चावधूतं सरोषं विस्मयान्वितम्।
गुरोरपि न भोक्तव्यमन्नं सत्कारवर्ज्जितम्॥"

इति कौर्म्मे उपविभागे १६ अध्यायः॥

वर्ज्जनीयं, त्रि, (वृज्+अनीयर्।) वर्ज्जनयोग्यम्। त्यक्तव्यम्। वर्ज्जनीयान्नं यथा,—

"राजान्नं नर्त्तकान्नञ्च तक्ष्णोऽन्नञ्चक्रकारिणः।
गणान्नं गणिकान्नञ्च षण्ढान्नञ्चैव वर्ज्जयेत्॥
चक्रोपजीविरजकतस्करध्वजिनान्तथा।
गान्धर्व्वलोहकारान्नं सूतकान्नं विवर्ज्जयेत्॥
कुलालचित्रकर्म्मान्नं वार्द्धुषेः पतितस्य च।
पौनर्भवच्छात्त्रिकयोरभिशस्तस्य चैव हि॥
सुवर्णकारशैलूषव्याधितस्यातुरस्य च।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाम्भिकस्य च॥
स्तेननास्तिकयोरन्नं देवतानिन्दकस्य च।
सोमविक्रयिणश्चान्नं श्वपाकस्य विशेषतः॥
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे।
उत्सृष्टस्य कदर्य्यस्य तथैवोच्छिष्टभोजिनः॥
अपाङ्क्तान्नञ्च सङ्घान्नं शस्त्राजीवस्य चैव हि।
क्लीवस्यान्यासिनश्चान्नं मत्तोन्मत्तस्य चैव हि॥
भीतस्य रुदितस्यान्नमवक्रुष्टं परिक्षितम्।
ब्रह्मद्विषः पापरुचेः श्राद्धान्नं सूतकस्य च॥
वृथापाकस्य चैवान्नं शावान्नं श्वशुरस्य च।
अप्रजानान्तु नारीणां हतघ्नस्य तथैव हि॥
कन्दुकान्नं विशेषेण शस्त्रविक्रयिणस्तथा।
शौण्डान्नं घण्टकान्नञ्च भिषजामन्नमेव च॥
विद्धप्रजननस्यान्नं परिवित्तान्नमेव च।
पुनर्भुवो विशेषेण तथैव दिधिषूपतेः॥
अवज्ञातञ्चावधूतं सरोषं विस्मयान्वितम्।
गुरोरपि न भोक्तव्यं अन्नं सत्कारवर्ज्जितम्॥
दुष्कृतं हि मनुष्यस्य सर्व्वमन्ने व्यवस्थितम्।
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बिषम्॥"

इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः॥

वर्ज्ज्यः, त्रि, (वृज्+ण्यत्।) वर्ज्जनीयः। यथा,—

"अतः परं प्रवक्ष्ये त्वं वर्ज्यान्नर्थ्यप्रतिक्रियाम्।
भोज्यमन्नं पर्य्युषितं स्नेहाक्तं चिरसंस्थितम्॥
अस्नेहाश्चापि गोधूमयवगोरसविक्रियाः।
शशकः कच्छपो गोधा श्वाविन्मत्स्योऽथ शल्लकः॥
भक्ष्या ह्येते सदा वर्ज्यौ ग्रामशूकरकुक्कुटौ।
पितृदेवादिशेषञ्च श्राद्धे ब्राह्मणकाम्यया।
प्रोक्षितञ्चौषधार्थञ्च खादन् मांसं न दोषभाक्॥"

इति मार्कण्डेयपुराणे सदाचाराध्यायः॥

वर्ण, क वर्णे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, वर्णयति। अयं कश्चिन्न मन्यते। वर्णः शुक्लादिक्रिया। इति दुर्गादासः॥

वर्ण, त् क स्तुतिविस्तारशुक्लाद्युद्युक्तिदीपने। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-दीपने अक०-सेट्।) वर्णयति वर्णापयति कविः स्तौतीत्यर्थः। वर्णयति तन्तुं विस्तारयतीत्यर्थः। वर्णयति प्रतिमां शुक्लादिवर्णां करोतीत्यर्थः। वर्णयति उद्युङ्क्ते दीप्यते वेत्यर्थः। शुक्लाद्युक्तिदीपने इत्यपि पाठः। इति दुर्गादासः॥

वर्णं, क्ली, (वर्णयतीति। वर्ण+अच्।) कुङ्कुमम्। इति हेमचन्द्रः॥

वर्णः, पुं, (व्रियते इति। वृ+"कॄवॄजॄषिद्रुपन्यनिस्वपिभ्यो नित्।" उणा० ३। २०। इति नः। स च नित्।) जातिः। सा च ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रश्च। एषामुत्पत्त्यादिर्यथा। यदा भगवान् पुरुषरूपेण सृष्टिं कृतवान् तदास्य शरीरात् चत्वारो वर्णा उत्पन्नाः। मुखतो ब्राह्मणाः बाहुतः क्षत्त्रियाः ऊरुतो वैश्याः पादतः शूद्रा जाताः। एतेषां वर्णानां धर्म्माः शास्त्रेषु निरूपिताः सन्ति। तत्र ब्राह्मणधर्म्मा उच्यन्ते। अध्ययनं यजनं दानञ्चेति। जीविकात्रयः अध्यापनं याजनं प्रतिग्रहश्चेति। १। क्षत्त्रियस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। प्रजानां रक्षणं जीविका। २। वैश्यस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। चतस्रो जीविकाः। कृषिः गोरक्षणं वाणिज्यं कुसीदञ्चेति। ३। शूद्रस्य तु ब्राह्मणसेवैव शुश्रूषा धर्म्मो जीविका च। ४। ब्राह्मणा आश्रमचतुष्टयवन्तो भवन्ति। ब्रह्मचारी गृहस्थः वानप्रस्थः सन्न्यासी च। तत्र उपनयनानन्तरं नियमं कृत्वा यो गुरोः सन्निधौ स्थित्वा साङ्गवेदाध्ययनं करोति स ब्रह्मचारीत्युच्यते। १। साङ्गवेदाध्ययनं समाप्य यो दारपरिग्रहं कृत्वा स्वधर्म्माचरणं करोति स गृहस्थ उच्यते। २। पुत्त्रमुत्पाद्य यो वनवासं कृत्वा अक्लृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनं करोति स वानप्रस्थ उच्यते। ३। यः सर्व्वं गृहादिकं त्यक्त्वा मुण्डितमुण्डो गैरिककौपीनाच्छादनं दण्डं कमण्डलुञ्च बिभ्रत् भिक्षावृत्तिर्निर्ज्जने तीर्थे वा स्थित्वा केवलमीश्वराराधनं करोति स सन्न्यासीत्युच्यते। ४। क्षत्त्रियवैश्ययोस्तु प्रथमाश्रमत्रयं विहितम्। शूद्रस्यैक एव गृहाश्रमः। ईश्वराराधनन्तु सर्व्वेषां वर्णानामाश्रमाणाञ्च साधारणो धर्म्मः। तन्मध्ये यस्तु विष्णूपासकः स वैष्णव उच्यते। शिवोपासकः शैवः। दुर्गादिशक्त्युपासकः शाक्तः। सूर्य्योपासकः सौरः। गणेशोपासको गाणपत्य उच्यते। इति पुराणार्थप्रकाशः॥*॥ अपि च।

ब्रह्मोवाच ।
“सर्गादिकृद्धरिश्चैव पूज्यः स्वायम्भुवादिभिः ।
विप्राद्यैः स्वेन धर्म्मेण तद्धर्म्मं व्यास वै शृणु ॥
यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः ।
अध्यापनं चाध्ययनं षट् कर्म्माणि द्विजोत्तमे ॥
दानमध्ययनं यज्ञो धर्म्मः क्षत्त्रियवैश्ययोः ।
दण्डस्तथा क्षत्त्रियस्य कृषिर्वैश्यस्य शस्यते ॥
शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम् ।
कारुकर्म्मस्तथाजीवः पाकयज्ञोऽपि धर्म्मतः ॥
भिक्षाचर्य्याथ शुश्रूषा गुरोः स्वाध्याय एव च ।
सन्ध्याकर्म्माग्निकार्य्यञ्च धर्म्मोऽयं ब्रह्मचारिणः ॥
सर्व्वेषामाश्रमाणान्तु द्वैविध्यन्तु चतुर्व्विधम् ।
ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्च्चनम् ।
गृहस्थस्य समासेन धर्म्मोऽयं द्विजसत्तमाः ॥
उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् ।
कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ॥
ऋणानि त्रीण्यपाकृत्य त्यक्त्वा भार्य्याधना-
दिकम् ।
एकाकी यस्तु विचरेत् उदासीनः स मौक्षिकः ॥
भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्म्मोऽयं वनवासिनः ॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसाकर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥
योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रियः ।
ज्ञानाय वर्त्तते भिक्षुः प्रोच्यते पारमेष्ठिकः ॥
यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यक् च दमसम्पन्नः स योगी भिक्षुरुच्यते ॥
भैक्षं श्रुतञ्च मौनित्वं तपोध्यानं विशेषतः ।
सम्यक् च ज्ञानवैराग्यं धर्म्मोऽयं भिक्षुके मतः ॥
ज्ञानसन्न्यासिनः केचित् वेदसन्न्यासिनोऽपरे ।
धर्म्मसन्न्यासिनः केचित्त्रिविधः पारमेष्ठिकः ॥
योगी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमूर्त्तिसमाश्रितः ॥
प्रथमा भावना पूर्व्वे मोक्षे त्वक्षरभावना ।
तृतीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥
धर्म्मात् संजायते मोक्षः अर्थात् कामोऽभि-
जायते ।
प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म्म वैदिकम् ॥
ज्ञानपूर्व्वं निवृत्तं स्यात् प्रवृत्तञ्चाग्निदेववत् ।
क्षमा दमो दया दानमलोभोऽभ्यास एव च ॥
आर्जवञ्चानसूया च तीर्थानुसरणं तथा ।
सत्यं सन्तोष आस्तिक्यं तथा चेन्द्रियनिग्रहः ॥
देवताभ्यर्च्चनं पूजा ब्राह्मणानां विशेषतः ।
अहिंसा प्रियवादित्वमपैशुन्यमकल्कता ॥
एते आश्रमिका धर्म्माश्चातुर्व्वर्ण्यं ब्रवीम्यतः ।
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ॥
स्थानमैन्द्रं क्षत्त्रियाणां संग्रामेष्वपलायिनाम् ।
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तताम् ।
गान्धर्व्वं शूद्रजातीनां परिचारे च वर्त्तताम् ॥”
इति गारुडे ४९ अध्यायः ॥ * ॥
अन्यच्च ।
“ब्राह्मणस्य तु वक्ष्यामि शृणु कर्म्म वसुन्धरे ! ।
यानि कर्म्माणि कुर्व्वीत मम भक्तिपरायणः ॥
षट्कर्म्मनिरतो भूत्वा अहङ्कारविवर्ज्जितः ।
लाभालाभं परित्यज्य भिक्षाहारो जितेन्द्रियः ॥
मम कर्म्मसमायुक्तः पैशुन्येन विवर्ज्जितः ।
शास्त्रानुसारी मध्यस्थो न वृद्धः शिशुचेतनः ॥
एतद्वै ब्राह्मणः कर्म्म एकचित्तो जितेन्द्रियः ।
इष्टापूर्त्तञ्च कुरुते स मामेति वसुन्धरे ! ॥
क्षत्त्रियाणां प्रवक्ष्यामि मम कर्म्मसु निष्ठताम् ।
यानि कर्म्माणि कुर्व्वन्ति क्षत्त्रिया मध्यसंस्थिताः ॥
दानशूरश्च कर्म्मज्ञो यज्ञेषु कुशलः शुचिः ।
मम कर्म्मसु मेधावी अहङ्कारविवर्ज्जितः ॥
अल्पभाषी गुणज्ञश्च नित्यं भागवतप्रियः ।
गुरुविद्यानसूयात्मा गुह्यकर्म्मण्यतन्द्रितः ॥
अभ्युत्थानादिकुशलः पैशुन्येन विवर्ज्जितः ।
एतैर्गुणैः समायुक्तो यो मां भजति क्षत्त्रियः ॥
भजते मम यो नित्यं मम लोकाय गच्छति ।
वैश्यानान्तु प्रवक्ष्यामि मम कर्म्मसु निष्ठताम् ॥
यानि कर्म्माणि कुरुते मम भक्तिपथे स्थितः ।
एतैर्गुणैः स्वधर्म्मेण लाभालाभविवर्ज्जितः ॥
ऋतुकालाभिगामी च शान्तात्मा मोह-
वर्ज्जितः ।
शुचिर्दक्षो निराहारो मम कर्म्मरतः सदा ॥
गुरुसंपूजको नित्यं युक्तो भक्तानुवत्सलः ।
वैश्यस्त्वेवन्तु संयुक्तो यो नु कर्म्माणि कारयेत् ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥
अथ शूद्रस्य वक्ष्यामि कर्म्माणि शृणु माधवि ! ।
यानि कर्म्माणि कृत्वा तु शूद्रो मह्यं व्यवस्थितः ॥
दम्पती मम भक्तौ यौ मम कर्म्मपरायणौ ।
उभौ भागवतौ भक्तौ मत्परौ कर्म्मनिष्ठितौ ॥
देशकालौ च जानाति रजसा तमसोज्झितः ।
निरहङ्कारयुक्तात्मा आतिथेयो विनीतवान् ॥
श्रद्दधानोऽतिपूतात्मा लोभमोहविवर्ज्जितः ।
नमस्कारप्रियो नित्यं मम चिन्ताव्यवस्थितः ॥
शूद्रकर्म्माणि मे देवि ! य एवं स समाचरेत् ।
त्यक्त्वा ऋषिसहस्राणि शूद्रमेव भजाम्यहम् ॥”
इति वाराहे विधिकर्म्मोत्पत्तिनामाध्यायः ॥
अपरञ्च ।
सुकाग्निरुवाच ।
“विप्राणां चातुराश्रम्यं विस्तरान्मे तपोधनाः
आचचध्वं न मे तृप्तिः शृण्वतः प्रतिविद्यते ॥
ऋषय ऊचुः ।
कृतोपनयनः सम्यक् ब्रह्मचारी गुरौ वसन् ।
तत्र धर्म्मोऽस्य यस्तञ्च कथ्यमानं निशामय ॥
स्वाध्यायोऽथाग्निशुश्रूषा स्नानं भिक्षाटनन्तथा ।
गुरौ निवेद्य तच्चाद्यमनुज्ञातेन नित्यशः ॥
धर्म्मार्थकाममोक्षाणां सम्यक् प्रत्युदपादनम् ।
तेनाहूतः पठेच्चैव तत्परीभूय नित्यशः ॥
अवाप्य सकलान् वेदान् शास्त्रं प्राप्य गुरो-
र्मुखात् ।
ततो वरान्मुदा दद्याद्गुरवे दक्षिणान्ततः ॥
गार्हस्थ्याश्रमकामस्तु गार्हस्थ्याश्रममाश्रयेत् ।
वानप्रस्थाश्रमञ्चापि चतुर्थं स्वेच्छया वसेत् ॥
तथैव च गुरोर्गेहे द्विजो निष्ठामवाप्नुयात् ।
गुरोरभावे तत्पुत्रं तद्वदेव निषेवयेत् ॥
एवं जयति मृत्युं स द्विजः शालङ्कटङ्कट ! ।
उपावृत्तस्ततस्तस्मात् गृहस्थाश्रमकाम्यया ।
असमानकुलां कन्यामुद्वहेत निशाचर ! ॥
स्वकर्म्मणा धनं लब्ध्वा पितृदेवातिथीनपि ।
सम्यक् संप्रीणयेद्धर्म्मा सदाचाररतो द्विजः ॥
गार्हस्थ्यं ब्रह्मचर्य्यञ्च वानप्रस्थं त्रयाश्रमाः ।
क्षत्त्रियस्यापि गदिता य आचारा द्विजस्य हि ॥
वैखानसत्वं गार्हस्थ्यमाश्रमद्वितयं विशः ।
गार्हस्थ्यमुत्तमं त्वेकं शूद्रस्य क्षणदाचर ! ॥
स्वानि वर्णाश्रमोक्तानि कर्म्माणीह न हापयेत्
यो हापयति तस्यासौ परिकुप्यति भास्करिः ॥”
इति वामनपुराणे १४ अध्यायः ॥ * ॥
पुनश्च ।
श्रीऔर्व्व उवाच ।
“ब्राह्मणक्षत्त्रियविशां शूद्राणाञ्च यथाक्रमम् ।
त्वमेकाग्रमना भूत्वा शृणु धर्म्मान् मयोदितान् ॥
दानं दद्याद्यजेद्देवान् यज्ञैः स्वाध्यायतत्परः ।
नित्योदकी भवेद्विप्रः कुर्य्याच्चाग्निपरिग्रहम् ॥
वृत्त्यर्थं याजयेच्चान्यानन्यानध्यापयेत्तथा ।
कुर्य्यात् प्रतिग्रहादानं शुक्लार्थान्न्यायतो द्विजः ॥”
शुक्लार्थात् शुक्लः शुद्धो न्यायोपार्ज्जितोऽर्थो यस्य तस्मात् । इति तट्टीका ।
“सर्व्वलोकहितं कुर्य्यान्नाहितं कस्यचिद्द्विजः ।
मैत्री समस्तसत्त्वेषु ब्राह्मणस्योत्तमं धनम् ॥
ग्राव्णि रत्ने च पारक्ये समबुद्धिर्भवेत् द्विजः ।
ऋतावभिगमः पत्न्यां शस्यते चास्य पार्थिव ! ॥१
दानानि दद्यादिच्छातो द्विजेभ्यः क्षत्त्रियोऽपि
हि ।
यजेच्च विविधैर्यज्ञैरधीयीत च पार्थिव ॥
शस्त्राजीवो महीरक्षा प्रवरा तस्य जीविका ।
तस्यापि प्रथमे कल्पे पृथिवीपरिपालनम् ॥
धरित्रीपालनेनैव कृतकृत्यो नराधिपः ।
भवन्ति नृपतेरंशा यतो यज्ञादिकर्म्मणाम् ॥
दुष्टानां शासनाद्राजा शिष्टानां परिपालनात् ।
प्राप्नोत्यभिमताल्लोकान् वर्णसंस्कारको नृपः ॥२॥
पाशुपाल्यं वाणिज्यञ्च कृषिञ्च मनुजेश्वर ।
वैश्याय जीविकां ब्रह्मा ददौ लोकपितामहः ॥
तस्याप्यध्ययनं यज्ञो दानधर्म्मश्च शस्यते ।
नित्यनैमित्तिकादीनामनुष्ठानञ्च कर्म्मणाम् ॥३॥
द्विजातिसंश्रयं कर्म्म तादर्थ्यं तेन पोषणम् ।
क्रयविक्रयजैर्व्वापि धनैः कारूद्भवेन वा ॥
दानञ्च दद्यात् शूद्रोऽपि पाकयज्ञैर्यजेदपि ।
पित्र्यादिकञ्च सर्व्वं वै शूद्रः कुर्व्वीत तेन च ॥४॥
भृत्यादिभरणार्थाय सर्व्वेषाञ्च परिग्रहः ।
ऋतुकालाभिगमनं स्वदारेषु महीपते ॥

दया समस्तभूतेषु तितिक्षा नाभिमानिता ।
सत्यं शौचमनायासो मङ्गलं प्रियवादिता ॥
मैत्र्यस्पृहा तथा तद्वदकार्पण्यं नरेश्वर ।
अनसूया च सामान्या वर्णानां कथिता गुणाः ॥
आश्रमाणाञ्च सर्व्वेषामेते सामान्यलक्षणाः ।
गुणांस्तथापद्धर्म्मांश्च विप्रादीनामिमान् शृणु ॥
क्षात्त्रं कर्म्म द्विजस्योक्तं वैश्यकर्म्म तथापदि ।
राजन्यस्य च वैश्योक्तं शौद्रं कर्म्म न चैतयोः ॥
सामर्थ्ये सति तत्त्याज्यमुभाभ्यामपि पार्थिव ।
तदेवापदि कर्त्तव्यं न कुर्य्यात् कर्म्म सङ्करम् ॥
इत्येते कथिता राजन् वर्णधर्म्मा मया तव ।
धर्म्मानाश्रमिणां सम्यग्ब्रुवतो मे निशामय ॥*॥

श्रीउर्व्व उवाच ।

बालः कृतोपनयनो वेदाहरणतत्परः ।
गुरुगेहे वसेद्भूप ब्रह्मचारी समाहितः ॥
शौचाचारवता तत्र कार्य्यं शुश्रूषणं गुरोः ।
व्रतानि चरता ग्राह्या वेदाश्च कृतबुद्धिना ॥
उभे सन्ध्ये रविं भूप तथैवाग्निं समाहितः ।
उपतिष्ठेत्तथा कुर्य्याद्गुरोरप्यभिवादनम् ॥
स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चासति ।
शिष्यो गुरौ नृपश्रेष्ठ प्रतिकूलं न संचरेत् ॥
तेनैवोक्तः पठेद्वेदं नान्यचित्तः पुरःस्थितः ।
अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणा ततः ॥
अवगाहेदपः पूर्व्वमाचार्य्येणावगाहिताः ।
समिज्जलादिकं चास्य कल्यं कल्यमुपानयेत् ॥
गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्य वै ।
गार्हस्थ्यमाविशेत् प्राज्ञो निष्पन्नगुरुनिष्कृतिः ॥१॥
विधिनावाप्तदारस्तु धनं प्राप्य स्वकर्म्मणा ।
गृहस्थकार्य्यमखिलं कुर्य्याद्भूपाल ! शक्तितः ॥
निर्व्वापेन पितॄनर्च्चेद्यज्ञैर्देवांस्तथातिथीन् ।
अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥
बलिकर्म्मणा च भूतानि वात्सल्येनाखिलं जगत् ।
प्राप्नोति लोकान् पुरुषो निजकर्म्मसमर्ज्जितान् ॥
भिक्षाभुजश्च ये केचित् परिव्राट् ब्रह्मचारिणः ।
तेऽप्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परम् ॥
वेदाहरणकार्य्याय तीर्थस्नानाय च प्रभो ! ।
अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ॥
अनिकेता ह्यनाहारा यत्र सायं गृहाश्च ये ।
तेषां गृहस्थः सर्व्वेषां प्रतिष्ठा योनिरेव च ॥
तेषां स्वागतदानादि वक्तव्यं मधुरं वचः ।
गृहागतानां दद्याच्च शयनासनभोजनम् ॥
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते ।
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥
अवज्ञानमहङ्कारो दम्भश्चैव गृहे सतः ।
परितापोपघातौ च पारुष्यञ्च न शस्यते ॥
यस्तु सम्यक् करोत्येवं गृहस्थः परमं विधिम् ।
सर्व्वबन्धविनिर्म्मुक्तो लोकानाप्नोत्यनुत्तमान् ॥
वयःपरिणतौ राजन् कृतकृत्यो गृहाश्रमी ।
पुत्त्रेषु भार्य्यां निक्षिप्य वनं गच्छेत् सहैव वा ॥२॥
पर्णमूलफलाहारः केशश्मश्रुजटाधरः ।
भूमिशायी भवेत्तत्र मुनिः सर्व्वातिथिर्नृप ॥
चर्म्मकाशकुशैः कुर्य्यात् परिधानोत्तरीयके ।
तद्वत्त्रिषवणं स्नानं शस्तमस्य नरेश्वर ॥
देवताभ्यर्च्चनं होमः सर्व्वाभ्यागतपूजनम् ।
भिक्षा बलिप्रदानञ्च शस्तमस्य नरेश्वर ॥
वन्यस्नेहेन गात्राणामभ्यङ्गश्चास्य शस्यते ।
तपस्यतश्च राजेन्द्र शीतोष्णादिसहिष्णुता ॥
यस्त्वेतां नियतश्चर्य्यां वानप्रस्थश्चरेन्मुनिः ।
स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान् ॥३॥
चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥
पुत्त्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ।
त्रैवर्णिकांस्त्यजेत् सर्व्वानारम्भानवनीपते ।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्ज्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद्गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परित्यज्य परिव्राट् निर्म्ममो भवेत् ॥
अभयं सर्व्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनिः ।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥

कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निञ्च मुखे जुहोति ।
विप्रस्तु भैक्ष्योपगतैर्हविर्भि-
श्चिताग्निनां स व्रजति स्म लोकान् ॥"

चिताग्नीनां अग्निचितामित्यर्थः । चिताग्निना इति वा पाठः । इति तट्टीका ॥

"मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं व्रजति द्विजातिः ॥" ४ ।

इति विष्णुपुराणे ३ अंशे ८।९ अध्यायौ ॥*॥
प्रकारान्तरेण तेषामादिरुत्पत्तिर्यथा,—
"ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयम्भुवा ।
तस्मात् पद्मात् समभवद्ब्रह्मा वेदमयो विधिः ॥
प्रजाविसर्गं विविधं मानसो मनसासृजत् ।
असृजद्ब्राह्मणानेव पूर्व्वं ब्रह्मा प्रजापतिः ॥
आत्मतेजोभिनिर्वृत्तान् भास्कराग्निसमप्रभान् ।
ततः सत्यञ्च धर्म्मञ्च तपो ब्रह्म च शाश्वतम् ॥
आचारञ्चैव शौचञ्च स्वर्गाय विदधे विभुः ।
देवदानवगन्धर्व्वा दैत्यासुरमहोरगाः ॥
यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा ।
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्च नृपसत्तम ! ॥
ये चान्यभूतसंघानां वर्णास्तांश्च विनिर्म्ममे ।
ब्राह्मणानां सितो वर्णः क्षत्त्रियाणाञ्च लोहितः ॥
वैश्यस्य पीतको वर्णः शूद्राणामसितस्तथा ॥

मान्धातोवाच ।

चातुर्व्वर्ण्यस्य वर्णेन यदि वर्णो विभज्यते ।
सर्व्वेषां खलु वर्णानां दृश्यते वर्णसङ्करः ॥
कामः क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा श्रमः ।
सर्व्वेषां न प्रभवति कस्माद्वर्णो विभज्यते ॥
स्वेदमूत्रपुरीषाणि श्लेष्मा पित्तं सशोणितम् ।
तनुः क्षरति सर्व्वेषां कस्माद्वर्णो विभज्यते ॥
जङ्गमानामसंख्येयाः स्थावराणाञ्च जातयः ।
तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ॥

नारद उवाच ।

न विशेषोऽस्ति वर्णानां सर्व्वं ब्रह्ममयं जगत् ।
ब्रह्मणा पूर्व्वसृष्टं हि कर्म्मभिर्व्वर्णतां गतम् ॥
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः ।
त्यक्तस्वधर्म्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः ॥
गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ।
स्वधर्म्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥
हिंसानृतप्रिया लुब्धाः सर्व्वकर्म्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥
इत्येतैः कर्म्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः ।
इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती ॥
विहिता ब्रह्मणा पूर्व्वं लोभात्त्वज्ञानतां गताः ।
ब्राह्मणा धर्म्मतन्त्रस्थास्तपस्तेषां न नश्यति ॥
ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा ।
ब्रह्म चैव परं सृष्टं ये न जानन्ति तद्विदः ॥
ऋषिभिः स्वेन तपसा सृज्यन्ते चापरे परैः ।
आदिदेवसमुद्भूता ब्रह्ममूलाक्षताव्ययाः ।
सा सृष्टिर्म्मानसी नाम धर्म्मतन्त्रपरायणाः ॥

मान्धातोवाच ।

ब्राह्मणः केन भवति क्षत्त्रियो वा द्विजोत्तम ! ।
वैश्यः शूद्रश्च देवर्षे तद्ब्रूहि वदतांवर ॥

नारद उवाच ।

जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः ॥
शौचाचारपरो नित्यं विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥
क्षत्त्रजं सेवते कर्म्म वेदाध्ययनसंयुतः ।
दानादानरतिर्यस्तु स वै क्षत्त्रिय उच्यते ॥
विशत्याशु पशुभ्यश्च कृष्यादानरतिः शुचिः ।
वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः ॥
सर्व्वभक्ष्यरतिर्नित्यं सर्व्वकर्म्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥
शूद्रे चैव भवेल्लक्ष्यं द्विजे चैव न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥

मान्धातोवाच ।

के धर्म्माः सर्व्ववर्णानां चातुर्व्वर्ण्यस्य के पृथक् ।
चातुर्व्वर्ण्याश्रमाणाञ्च राजधर्म्माश्च के मताः ॥

नारद उवाच ।

अक्रोधः सत्यवचनं संविभागः क्षमा तथा ।

प्रजनः स्वेषु दारेषु शौचमद्रोह एव च ।
आनृशंस्यं भृत्यभरणं न वै ते सार्व्ववर्णिकाः ।
ब्राह्मणस्य तु यो धर्म्मस्तं ते वक्ष्यामि केवलम् ।
दममेव महाराज धर्म्ममाहुः पुरातनम् ।
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म्म समाप्यते ।
तं चेद्वित्तमुपागच्छेद्वर्त्तमानं स्वकर्म्मणि ।
अकुर्व्वाणं विकर्म्माणि शान्तं प्रज्ञानतर्पितम् ।
कुर्व्वीतोपेत्य सन्तानमथ दद्याद्यजेत च ।
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते ।
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः ।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते ॥*॥
क्षत्त्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव ।
दद्याद्राजा न याचेत यजेत न च याजयेत् ।
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत् ।
नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमम् ।
ये तु क्रतुभिरीजानाः श्रुतवन्तश्च पार्थिवाः ।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः ।
अविक्षतशरीरो हि संगराद्यो निवर्त्तते ।
क्षत्त्रियस्य तु तत् कर्म्म नोभयत्र यशःप्रदम् ।
क्षत्त्रियाणामयं धर्म्मो निर्णीतो मुनिभिः परः ।
नास्य कृत्यतमं किञ्चिद्राज्ञो दस्युविनिग्रहात् ।
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते ।
तस्माद्राज्ञा महाराज योद्धव्यं धर्म्मशीलिना ।
प्रजाः स्वेषु च धर्म्मेषु स्थापयेत महीपतिः ।
धर्म्मेणैव हि कर्म्माणि कारयेत् सततं प्रजाः ।
परमां सिद्धिमाप्नोति नृपतिः परिपालनात् ।
कुर्य्यादन्यन्न वा कुर्य्यादैन्द्रो राजन्य उच्यते ॥*॥
वैश्यस्य च प्रवक्ष्यामि यो धर्म्मो वेदसम्मतः ।
दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः ।
पालयेच्च पशून् वैश्यः पितृवद्धर्म्ममन्वेयन् ।
विकर्म्म तद्भवेदन्यत् कर्म्म यत् स समाचरेत् ।
रक्षया स हि तेषां वै महत् सुखमवाप्नुयात् ।
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः ।
ब्राह्मणेभ्यश्च राज्ञे च सर्व्वाः परिददे प्रजाः ।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
षण्णामेकां पिबेद्धेनुं शताच्च मिथुनं भवेत् ।
लब्धाच्च सप्तमं भागं तथा शृङ्गे कलाक्षुरे ।
शस्यानां सर्व्वबीजानि एषा सांवत्सरी भृतिः ।
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ।
वैश्ये रक्षति नान्येन रक्षितव्याः कथञ्चन ॥*॥
शूद्रस्यापि हि यो धर्म्मस्तं ते वक्ष्यामि भूपते ।
प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत् ।
तस्माच्छूद्रस्य वर्णानां परिचर्य्या विधीयते ।
तेषां शुश्रूषणाच्चैव महत् सुखमवाप्नुयात् ।
शूद्र एतान् परिचरेत् त्रीन् वर्णाननुपूर्व्वशः ।
सञ्चयांश्च न कुर्व्वीत जातु शूद्रः कथञ्चन ।
पापीयान् हि धनं लब्ध्वा वशे कुर्य्याद्गरीयसः ।
राज्ञा वा समनुज्ञातः कामं कुर्व्वीत धार्म्मिकः ।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
अवश्यं भरणीयो हि वर्णानां शूद्र उच्यते ।
छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे ।
अधार्य्याणि विशीर्णानि वसनानि द्विजातिभिः ।
शूद्रायैव प्रदेयानि तस्य धर्म्मधनं हि तत् ।
यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत् ।
कल्पन्तेऽस्य तु तेनाहुर्वृत्तिं धर्म्मविदो जनाः ।
देयः पिण्डोऽनपत्याय भर्त्तव्यौ वृद्धदुर्ब्बलौ ।
शूद्रेण च न हातव्यो भर्त्ता कस्याञ्चिदापदि ।
अतिरेकेण भर्त्तव्यो भर्त्ता द्रव्यपरिक्षये ।
न हि स्वमस्ति शूद्रस्य भर्त्तृहार्य्यधनो हि सः ।
उक्तस्त्रयाणां वर्णानां यज्ञस्तस्य च पार्थिव ।
स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते ।
तस्माच्छूद्रः पाकयज्ञैर्यजेत नच स्वयम् ।
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम् ॥*॥

श्रीनारद उवाच ।

इदानीमाश्रमाणाञ्च धर्म्मं वक्ष्यामि भूमिप ।
ब्रह्मचर्य्याश्रमं तावत् शृणु सर्व्वाधिवासन ।
गत्वा गुरुगृहं शिष्यो नमस्कृत्य गुरुं शुचिः ।
ब्रूयादध्येतुमायातः शिष्योऽहं तव मारिष ।
ततस्तस्याज्ञया नित्यमध्येतव्यं नराधिप ।
सदा विचारः शास्त्रस्य गुरुपादाभिवादनम् ।
तदाज्ञापालनञ्चापि ध्यानं दैवतभावना ।
लाभेन येन केनापि तुष्टिः सद्भिः समागमः ।
समाप्तविद्यो गुरवे दक्षिणां प्रतिपाद्य च ॥*॥
गृहाश्रमं ततो गच्छेद्गुरोराज्ञामधिव्रजन् ।
उद्वहेत् कुलजां कन्यां सुशीलां धर्म्मचारिणीम् ।
अनहंवादिनीं सौम्यां सुचरित्रां प्रियंवदाम् ।
गृहिणां प्रथमो धर्म्मोऽतिथिपूजैव पार्थिव ।
अप्राप्य पूजामतिथिर्यस्य गेहान्निवर्त्तते ।
स याति नरकं घोरं पुण्यं तस्मै प्रदाय च ।
प्रथमं स्वागतं पृच्छेदासनञ्चापि संदिशेत् ।
पाद्यञ्च मधुपर्कञ्च दद्यात् प्रणतिपूर्व्वकम् ।
संवादञ्च प्रियालापं कुर्य्यात्तेन सहात्मनः ।
भोजनञ्च यथाशक्ति कारयेदतिथिं नृप ।
देवाश्च पितरश्चापि प्रीयन्तेऽतिथिपूजने ।
आतिथ्यसदृशं कर्म्म गृहस्थानां न विद्यते ।
यस्य नित्यं स्थितिर्नास्ति सोऽतिथिः परिकीर्त्तितः ।
सर्व्वाश्रमाणामधिको गृहाश्रम उदाहृतः ।
यस्मात्तस्मिन् समायान्ति भिक्षार्थमाश्रमाश्रयाः ।
पितृदेवार्च्चनं कार्य्यं गृहिणा सुखमिच्छता ॥*॥
वानप्रस्थाश्रमं वक्ष्ये तृतीयं जगतीपते ।
वानप्रस्थाश्रमं गच्छेत् कृतकृत्यो गृहाश्रमात् ।
तदारण्यकशास्त्राणि समधीत्य स धर्म्मवित् ।
ऊर्द्ध्वरेताः प्रव्रजित्वा गच्छत्यक्षरसात्मताम् ।
सुते भार्य्यां परिन्यस्य वनं गच्छेत् सहैव वा ।
शान्तः शुद्धान्तरात्मा च सर्व्वभूतहिते रतः ।
चरितब्रह्मचर्य्यस्य ब्राह्मणस्य विशाम्पते ।
कर्म्मणामीदृशेनैव कथ्यन्ते मुनिपुङ्गवैः ।
भैक्ष्यचर्य्यास्वधीकारः प्रशस्त इह मोक्षिणः ।
यत्रास्तमितशायी स्यान्निरग्निरनिकेतनः ।
यथोपलब्धजीवी स्यान्मुनिर्दान्तो जितेन्द्रियः ।
निराशीः स्यात् सर्व्वसमो निर्योगो निर्व्विकारवान् ।
विवेकी धनपूजादौ विरक्तः करुणः सदा ।
संसारं स्वप्नवद्वीक्ष्य शान्तः सन्तुष्टमानसः ।
पत्रमूलफलाहारी जलाशी वायुभोजनः ।
निराहारोऽथवा शुद्धोऽहर्निशं तप आचरेत् ।
एवं कुर्व्वन् महाभाग ब्राह्मणः सिद्धिमाप्नुयात् ।
चतुर्थमाश्रमं वक्ष्ये मुक्तिसोपानमेव हि ।
गुरोः पुरोधमासाद्य भिक्षुः सन्न्यासधर्म्मवित् ।
विचरेत् सकलां पृथ्वीं लब्धाशी शान्त उत्सुकः ।
योगाभ्यासरतो नित्यं धर्म्मसञ्चयतत्परः ।
धर्म्माधर्म्मविहीनो वा भिक्षुकः सिद्धिमाप्नुयात् ॥"

इति पाद्मे स्वर्गखण्डे २५।२६।२७ अध्यायाः ॥*॥ अन्यत् नारसिंहपुराणे ५८ अध्याये मार्कण्डेयपुराणे मदालसोपाख्याने कूर्म्मपुराणे २।३ अध्याये च द्रष्टव्यम् ॥*॥*॥ गजचित्रकम्बलः । हातीर झुल् इति भाषा । तत्पर्य्यायः । प्रवेणी २ आस्तरणम् ३ परिस्तोमः ४ कुथः ५ कुथा ६ । इत्यमरः ॥ प्रवेणिः ७ परिस्तोमः ८ कुथम् ९ । इति भरतः ॥ शुक्लादिः । रङ् इति ख्यातः । स च बहुविधो यथा । श्वेतः १ पाण्डुः २ धूसरः ३ कृष्णः ४ पीतः ५ हरितः ६ रक्तः ७ शोणः ८ अरुणः ९ पाटलः १० श्यावः ११ धूम्रः १२ पिङ्गलः १३ कर्व्वुरः १४ । इति चामरः ॥ गर्भस्थबालकस्य षष्ठे मासि वर्णो भवति । इति सुखबोधः ॥ यशः । गुणः । स्तुतिः । इति मेदिनी । णे, २६ ॥ स्वर्णम् । व्रतम् । रूपम् । अक्षरम् । भेदः । गीतक्रमः । चित्रम् । तालविशेषः । अङ्गरागः । इति हेमचन्द्रः ॥

वर्णः, पुं क्ली, (वर्ण्यते भिद्यते इति । वर्ण + घञ् ।) भेदः । (वर्ण्यते दीप्यतेऽनेनेति ।) वर्ण + घञ् ।) रूपम् । (वर्णयति । वर्ण + अच् ।) अक्षरम् । (वर्ण्यते उच्यते इति । वर्ण + घञ् ।) विलेपनम् । इति मेदिनी । णे, २६ ॥*॥ वर्णश्च द्विविधः । ध्वन्यात्मकः अक्षरात्मकश्च । अस्योत्पत्तिप्रकारो यथा,—

"अन्नैवद्याम्बुखश्रोत्रमार्गस्याविशदाक्षरम् ।
अप्यव्यक्तं प्रलपति यदा सा कुण्डली तदा ।
मूलाधारे विष्वणति सुषुम्ना वेष्टते मुहुः ॥"

इति प्रपञ्चसारः ।

अस्यार्थः । सुखश्रोत्रमार्गस्यावैशद्यात् अनेने-ख्याहेतोर्यदा सा कुण्डली अविशदाक्षरं अविस्पष्टमक्षरं यत्राव्यक्ते ध्वनौ तं प्रलपति अर्थात् कलभाषणादिकं करोति तदा मूलाधारे विष्वणति शब्दायते सुषुम्नाञ्च मुहुर्व्वेष्टते । इति तट्टीका ॥*॥ अस्य कुण्डलीस्वरूपत्वं यथा,—

"कुण्डलीभूतसर्पाणामङ्गश्रियमुपेयुषी ।
त्रिधामजननी देवी शब्दब्रह्मस्वरूपिणी ।
द्विचत्वारिंशद्वर्णात्मा पञ्चाशद्वर्णरूपिणी ।
गुणिता सर्व्वगात्रेषु कुण्डली परदेवता ।
विश्वात्मनाप्रबुद्धा सा सूते मन्त्रमयं जगत् ।
एकधा गुणिता शक्तिः सर्व्वविश्वप्रवर्त्तिनी ।

त्रिपुष्करं स्वरान् देवी ब्रह्मादीनां त्रयं त्रयम् ॥”
इति सारदातिलकः ॥

अस्यार्थः । त्रिधामेति चन्द्रसूर्य्याग्निरूपा । द्विचत्वारिंशदिति भूतलिपिमन्त्रमयी । पञ्चाशदिति मातृकामयीत्यर्थः । सर्व्वगात्रेण सर्व्ववर्णेन गुणिता परस्परमिलिता सती मन्त्रमयं जगत् सूते प्रकाशयति इत्यर्थः । मूलाधारे सर्पवत् कुण्डलीभूता नाड़ी वर्त्तते तन्मध्यस्थायित्वादियं कुण्डली । सर्व्वविश्वेत्युभयोपादानात् शब्दार्थरूपोभयप्रतिपादिकेति सूचितम् । त्रिपुष्करमिति ज्येष्ठमध्यमकनिष्ठत्वेन तीर्थत्रयम् । स्वरानिति उदात्तानुदात्तसमाहारान् । इति तट्टीका ॥ * ॥ अपि च ।

“द्विचत्वारिंशता मूले गुणिता विश्वनायिका ।
सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः ॥
शक्तिं ततो ध्वनिस्तस्मान्नादस्तस्मान्निवोधिका ।
ततोऽर्द्धेन्दुस्ततो विन्दुस्तस्मादासीत् परा ततः ॥”
इति सारदायामाचार्य्याः ॥

मूले मूलाधारे द्विचत्वारिंशता गुणिता विश्वनायिका कुण्डलिनी अनेन क्रमेण अकारादिसकारान्तां द्विचत्वारिंशदात्मिकां भूतलिपिमन्त्रात्मिकां वर्णमालिकां सूते इत्यन्वयः । क्रममाह शक्तिमिति सा कुण्डलिनी शक्तिं सूते ततः शक्तेर्ध्वनिरासीदिति योजना । ततो ध्वनेरित्यादि ज्ञेयम् । अयञ्च क्रमः सर्व्वाक्षरोत्पत्तौ ज्ञेयः । तत्र सत्त्वप्रविष्टा चिच्छक्तिशब्दवाच्या । पुनराकाशस्था सैव सत्त्वप्रविष्टा रजोऽनुविद्धा सती ध्वनिशब्दवाच्या । अक्षरावस्था सैव तमोऽनुविद्धा नादशब्दवाच्या । अव्यक्तावस्था सैव तमःप्राचुर्य्यान्निवोधिकाशब्दवाच्या । सैव तदुभयप्राचुर्य्यादर्द्धेन्दुशब्दवाच्या । उक्तञ्च पदार्थादर्शे ।

“इच्छाशक्तिबलोद्बुद्धो ज्ञानशक्तिप्रदीपकः ।
पुंरूपिणी च सा शक्तिः क्रियाख्या सृजति
प्रभुः ॥”

अत्रैव विन्दुः स्थानान्तरगतः पराख्यो भवति ।

पश्यन्ती मध्यमा वाणी वैखरी शब्दजन्मभूः । तत्र परा मूले पश्यन्ती स्वाधिष्ठाने मध्यमा हृदये वैखरी मुखे । तदुक्तं पदार्थादर्शे ।

“स्वप्ना कुण्डलिनी मध्ये ज्योतिर्मात्रस्वरूपिणी ।
अश्रोत्रविषया तस्मादुद्गच्छत्यूर्द्धगामिनी ॥
स्वयं प्रकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत् ।
सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी ॥
ततः संजल्पमात्रा स्यादविभक्तोर्द्धगामिनी ।
सैवोरःकण्ठतालुस्था शिरोघ्राणरदस्थिता ॥
जिह्वामूलौष्ठनिर्धूतसर्व्ववर्णपरिग्रहा ।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥
इच्छाज्ञानक्रियात्मासौ तेजोरूपा गुणात्मिका ।
क्रमेणानेन सृजति कुण्डली वर्णमालिकाम् ॥
अकारादिसकारान्तां द्विचत्वारिंशदात्मिकाम् ।
पञ्चाशद्धारगुणिता पञ्चाशद्वर्णमालिकाम् ॥

सूते तदर्णतो भिन्नाः कला रुद्रादिकान्
क्रमात् ॥”
इति तट्टीका ॥

“अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु का ॥”
इति शिक्षासूत्रम् ॥ * ॥

किञ्च ।

“यथा भवन्ति देहान्तरमी पञ्चाशदक्षराः ।
भेदा येन प्रकारेण तथा वक्ष्यामि तत्त्वतः ॥
समीरिताः समीरेण सुषुम्नारन्ध्रनिर्गताः ।
व्यक्तिं प्रयान्ति वदने कण्ठादिस्थानघट्टिताः ॥
उच्चैरुन्मार्गगो वायुरुदात्तं कुरुते स्वरम् ।
नीचैर्गतोऽनुदात्तञ्च स्वरितं तिर्य्यगागतः ॥
अर्द्धैकद्वित्रिसंख्याभिर्मात्राभिर्लिपयः क्रमात् ।
व्यञ्जनह्रस्वदीर्घप्लुतसंज्ञा भवन्ति ताः ॥
अकारेकारयोर्योगादेकारो वर्ण इष्यते ।
तस्यैवैकारयोगेन स्यादैकाराक्षरं तथा ॥
उकारयोगात्तस्यैव स्यादोकाराह्वयः स्वरः ।
तस्यैवौकारयोगेन स्यादौकाराह्वयः स्वरः ॥
सन्ध्यक्षराः स्युश्चत्वारो मन्त्राः सर्व्वार्थसाधकाः ।
ऋवर्णवर्णयोर्व्यक्तिर्न वै सम्यक् प्रदर्श्यते ॥
विन्दुसर्गात्मनोर्व्यक्तिमनयोरजपा वदेत् ।
कण्ठात्तु निःसरन् सर्गः प्रायोऽचात्मकतः-
परः ॥
नश्वरः सर्ग एव स्यात् सोच्छ्वासः प्राणकस्तु हः ।
स सर्गः प्रेषितः कण्ठे वायुना कादिमीरयेत् ॥
वर्गस्पर्शनमात्रेण कं स्वरस्पर्शनात्तु खम् ।
स्तोकगम्भीरसंस्पर्शात् गघौ ङञ्च वहिर्गतम् ॥
विसर्गस्तालुगः सोष्मा शं चवर्गञ्च यं तथा ।
ऋटुरेफषकारञ्च मूर्द्धगो दन्तगस्तथा ॥
ऌतवर्गलसानोष्ठात्तुपूपभान् संज्ञकान् ।
दन्तौष्ठाभ्यां वञ्च तत्तत्स्थानगोऽर्णान् समी-
रयेत् ॥”
इति प्रपञ्चसारे ३ पटलः ॥

सर्गो विसर्ग एव नश्वरो विकृतः सोच्छ्वासः सकाररूपः उच्छ्वासोऽन्तःप्रवेशशाली वायुः स्यादित्यन्वयः । एवं प्राणको वहिर्निर्गमनशाली वायुर्हः स्यात् स एव उच्छ्वासः सोच्छ्वासः । प्राणश्चासौ को वायुश्चेति प्राणकः । इति तट्टीका ॥ * ॥ अवर्णकवर्गहविसर्ज्जनीयाः कण्ठ्याः । १ । इवर्णचवर्गयशास्तालव्याः । २ । ऋवर्णटवर्गरषा मूर्द्धन्याः । ३ । ऌवर्णतवर्गलसा दन्त्याः । ४ । उवर्णपवर्गोपध्मानीया ओष्ठ्याः । ५ । वो दन्त्यौष्ठ्यः । ६ । ए ऐ कण्ठ्यतालव्यौ । ७ । ओ औ कण्ठ्यौष्ठ्यौ । ८ । इति शिक्षासूत्रम् ॥ * ॥ अपि च ।

“यद्गुह्यं सर्व्वतन्त्रेषु वर्णोच्चारविधिं शिवे ! ।
तव स्नेहान्महेशानि ! तदद्य कथयामि ते ॥
पञ्चाशन्मातृकावर्णोच्चारणं गुरुतोऽभ्यसेत् ।
अ कु चु टु तु पु यु शु अष्टौ वर्गाः प्रकीर्त्तिताः ॥
अ कु हाः कण्ठतो ज्ञेयाः स्तालुस्थयशाः -
स्मृताः । २ ।
ऋ टु रषास्तु मूर्द्धन्याः ३ दन्त्या ऌ तु ल सा
मताः ॥ ४ ॥
उपवर्गोष्ठसंभूताः ५ स्थानानि कथितानि ते ।
विशेषं कथयाम्यद्य प्रोच्चार्य्यः कण्ठतः स्वराः ॥
ऋद्वयं जिह्वया मूर्द्धा ऌद्वयं जिह्वदन्तजम् ।
मुखस्थानाद्धलो वाच्याः चकारः काष्टघातजः ॥
व्यञ्जनद्वयसंयोगे भवेत् पूर्व्वस्वरो गुरुः ।
पदान्तादिमवर्णस्य संयोगेषु श्रुतिर्द्वयोः ॥
अपदान्तादिसंयोगे योरन्यत्र तथेष्यते ।
योः श्रुतिस्तु तिरोभूय स्वरवत् श्रुतितां व्रजेत् ॥
श्रिया वीजे शकारस्य छश्रुतिः परमेश्वरि ! ।
छश्रुतिश्च रादिस्थे तथादिस्थे तु चश्रुतिः ॥
सहस इत्यादौ नमस्तस्यै अस्या इत्यादौ च ।
रेफादिके तदन्ते वा हकारे समवाच्यता ॥
वर्हः ह्रद इत्यादौ ।
किन्तु वैजात्यमाश्रित्य स्फुटं नात्रास्य वाच्यता ॥
घु तूर्य्यध्वनिमाप्नोति यादिस्थे परमेश्वरि ! ।
वाह्य इत्यादौ ।
पु चतुर्थध्वनिं याति वादिस्थे तु विशेषतः ॥
आह्वानमित्यादौ ।
लादिस्थेऽप्यथ नादिस्थे वैजात्यं स्वल्पवाच्यता ।
प्रह्लाद अह्नाय इत्यादौ ।
मादिस्थे भे च मस्यापि नासिकामूलवाच्यता ॥
ङ ञ ण न मा विन्दुर्नासिकामूलजाः स्मृताः ।
यकारस्तु तृतीयत्वं पदादौ सर्व्वदा व्रजेत् ॥
केयूरादावपि तथा अन्यत्र कण्ठमात्रगः ।
नादिस्थशसयोश्छत्वं स्वरयोगान्तवर्गके ॥
प्रश्नः स्नान इत्यादौ ।
वर्णोत्तरेषु डढयोर्व्वक्रजिह्वादिवाच्यता ।
वैजात्यमपि तत्रास्ति गुरोरेव समभ्यसेत् ।
आदिरेफस्तु संप्रोक्तो ह्यशेरन्यो व्रजेद्धताम् ।
एवं ज्ञात्वा महेशानि ! पठेत् स्तोत्रं जपेन्मनुम् ॥
कवचञ्च महेशानि नान्यथा फलमाप्नुयात् ॥”
इति प्रपञ्चसारे ३ पटलः ॥ * ॥

अपि च ।

“ह्रस्वः स्वरेषु पूर्व्वोक्तः परो दीर्घः क्रमादिमे ।
शिवशक्तिमयास्ते स्युर्विन्दुसर्गावसानकाः ॥
विन्दुः पुमान् रविः प्रोक्तः सर्गः शक्तिर्निशा-
करः ।
स्वराणां मध्यगं यत्तु तच्चतुष्कं नपुंसकम् ॥
विना स्वरैस्तु नान्येषां जायते व्यक्तिरञ्जसा ।
शिवशक्तिमयान् प्राहुस्तस्माद्वर्णान् मनीषिणः ॥
कारणात् पञ्चभूतानामुद्भूता मातृका यतः ।
ततो भूतात्मका वर्णाः पञ्च पञ्च विभागतः ॥
वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात् ।
पञ्च ह्रस्वाः पञ्च दीर्घाः विन्द्वन्ताः सन्धिसम्भवाः ।
पञ्चशः कादयः य च ल स हान्ताः समी-
रिताः ॥”
इति सारदा ॥ * ॥

अक्षरस्फटिकारणं यथा,—

“शाब्दासिकेऽपि समये भ्रान्तिः संजायते
यतः ।

धान्ताक्षराणि रुद्राणि पञ्चारूढ़ान्यतः पुरा ।”
इति ज्योतिस्तत्त्वे वृहस्पतिः ॥
वर्णलेखनप्रकारस्तु तत्तद्वर्णे द्रष्टव्यः ॥ * ॥ वर्ण-
नामानि यथा,—
“तन्त्रसङ्केतबोधार्थमाहृत्य तन्त्रशास्त्रतः ।
वर्णनामानि कतिचित् वक्ष्यामि विदुषां मुदे ॥
ॐकारो वर्त्तुलस्तारो वामश्च हंसकारणम् ।
मन्त्राद्यः प्रणवः सत्यं बिन्दुशक्तिस्त्रिदैवतम् ॥
सर्व्वबीजोत्पादकश्च पञ्चदेवो ध्रुवस्त्रिकः ।
सावित्री त्रिशिखो ब्रह्म त्रिगुणो गुणजीवकः ॥
आदिबीजं वेदसारो वेदबीजमतः परम् ।
पञ्चरश्मिस्त्रिकूटे च त्रिभवे भवनाशनः ॥
गायत्त्रीबीजपञ्चांशौ मन्त्रविद्याप्रसूः प्रभुः ।
अक्षरं मातृकासूश्चानादिरद्वैतमोक्षदौ ॥ ॐ ॥
अः श्रीकण्ठः सुरेशश्च ललाटश्चैकमात्रिकः ।
पूर्णोदरी सृष्टिमेधौ सारस्वतः प्रियंवदः ॥
महाग्राह्मी वासुदेवो धनेशः केशवोऽमृतम् ।
कीर्त्तिर्निवृत्तिर्वागीशो नरकारिर्हरो मरुत् ॥
ब्रह्मा वामाद्यजो ह्रस्वः करसः प्रणवाद्यकः ।
ब्रह्माणी कामरूपश्च कामेशी वाशिनी वियत् ॥
त्रिश्वेशः श्रीविष्णुकण्ठौ प्रतिपत्तिर्विरंशिनी ।
अर्कमण्डलवर्णाद्यौ माधवः कामकर्षिणी ॥ अः ॥
आकारो विजयानन्दो दीर्घच्छायो विनायकः ।
क्षीरोदधिः पयोदश्च पाशो दीर्घास्यवृत्तकौ ॥
प्रचण्ड एकजो रुद्रो नारायण इभेश्वरः ।
प्रतिष्ठा मानदा कान्तो विश्वान्तकगणान्तकः ॥
पितामहो द्विठान्तोऽभूः क्रिया कान्तिश्च
सम्भवः ।
द्वितीया मानदा काशी विघ्नराजः कुजो वियत् ।
स्वरान्तकश्च हृदयमङ्गुष्ठो भगमालिनी ॥ आः ॥
इः सूक्ष्मा शाल्मली विद्या चन्द्रः पूषा सुगुह्यकः ।
सुमित्रं सुन्दरो वीरः कोटरः काटरः पयः ॥
भ्रूमध्यो माधवस्तुष्टिर्दक्षनेत्रञ्च नासिका ।
शान्तः कान्तः कामिनी च कामो विघ्नविना-
यकः ।
नेपालो भरणी रुद्रो नित्या क्लिन्ना च पावकः ॥
॥ इः ॥
ईस्त्रिमूर्त्तिर्महामाया लोलाक्षी वामलोचनम् ।
गोविन्दः शेखरः पुष्टिः सुभद्रा रतिसंज्ञकः ॥
विष्णुर्लक्ष्मीः प्रहासश्च वाग्विशुद्धः परापरः ।
कालोत्तरीयो भेरुण्डा रतिश्च पौण्ड्रवर्द्धनः ॥
शिवोत्तमः शिवा तुष्टिश्चतुर्थी बिन्दुमालिनी ।
वैष्णवी वैन्दवी जिह्वा कामकला सनादका ॥
पावकः कोटरः कीर्त्तिर्मोहिनी कालकारिका ।
कुचद्वन्द्वं तर्ज्जनी च शान्तिस्त्रिपुरसुन्दरी ॥ ईः ॥
उः शङ्करो वर्त्तुलाक्षी भूतःकल्याणवाचकः ।
अमरेशो दक्षकर्णः षड्वक्त्रो मोहनः शिवः ॥
उग्रः प्रभुर्धृतिर्विष्णुर्विश्वकर्म्मा महेश्वरः ।
शत्रुघ्नश्चेटिका पुष्टिः पञ्चमी वह्निवासिनी ॥
चेटिकास्थाने चेच्चिका इति वा पाठः ।
कामघ्नः कामना चेशो मोहिनी विघ्नहृन्मही ।
उटसः कुटिला श्रोत्रं पारङ्गीपो रमो हरः ॥
उटस इति कुत्रचित् पाठः । उः ॥
ऊः कण्टको रतिः शान्तिः क्रोधनो मधुसूदनः ।
कामराजः कुजेशश्च महेशो वामकर्णकः ॥
कण्ठकस्थाने कण्टक इति वा पाठः ।
अर्घीशो भैरवः सूक्ष्मो दीर्घघोणा सरस्वती ।
विलासिनी विघ्नकर्त्ता लक्ष्मणो रूपकर्षिणी ।
महाविद्येश्वरी षष्ठा षण्डो भूः कान्यकुब्जकः ॥
॥ ऊः ॥
ऋः पूर्दीर्घमुखी रुद्रो देवमाता त्रिविक्रमः ।
भावभूतिः क्रिया क्रूरा रेचिका नासिका धृतः ॥
एकपादशिरो माला मण्डला शान्तिनी जलम् ।
कर्णः कमलभा मेधो निवृत्तिर्गणनायकः ।
रोहिणी शिवदूती च पूर्णगिरिश्च सप्तमी ॥
मेधः स्थाने मेष इति च पाठः ॥ ऋः ॥
ॠः क्रोधोऽतिथिशो वाणी वामनोऽगोऽथ
श्रीर्धृतिः ।
ऊर्द्धमुखी निशानाथः पद्ममाला विगन्धौः ॥
शशिनी मोचिका श्रेष्ठा दैत्यमाता प्रतिष्ठिता ।
एकदन्ताङ्कयो माता हरिता मिथुनोदया ॥
माता स्थाने माया इति वा पाठः ।
कोमलः श्यामला मेधी प्रतिष्ठा पतिरष्टमी ।
अक्षरत्रयमिव कौलाले पावको गन्धकर्षिणी ॥
मिवस्थाने मवेति वा पाठः । ॠः ॥
ऌः स्थाणुः श्रीधरः शुद्धो मेधा धूम्रो बको वियत् ।
देवयोनिर्दक्षगण्डो वहेशः कौन्तरुद्रकौ ॥
वहेशस्थाने वाहग इति वा पाठः ।
विश्वेश्वरो दीर्घजिह्वा महेन्द्रो लाङ्गलिः परा ।
चन्द्रिका पार्थिवो धूम्रा द्विदन्तः कामवर्द्धनः ॥
शुचिस्मिता च नवमी कान्तिराषातकेश्वरः ।
चित्ताकर्मिणी काशश्च तृतीयकुलसुन्दरी ॥
चित्ताकर्षिणीस्थाने चिन्ताकर्षिणी इति वा
पाठः । ऌः ॥
ॡकारः कमला हर्षा हृषीकेशो मधुव्रतः ।
सूक्ष्मा कान्तिर्वामगण्डो वम्रः कामोदरी सुरा ॥
शान्तिकृत् स्वस्तिका शक्रो मायावी लोलुपो
वियत् ।
कुशमी सुस्थिरो माता नीलपीतो गजाननः ॥
कामिनी विश्वपा कालो नित्या शुद्धः शुचिः
सती ॥
विश्वपास्थाने विजया इति वा पाठः ।
सर्व्वो धैर्य्याकर्षणी च एकाकी दनुजप्रसूः ॥ ॡः ॥
एकारो वासवः शक्तिर्झिण्टीशोऽष्टौ भगं मरुत् ।
सूक्ष्मा भूतोऽर्द्धकेशी च ज्योत्स्ना श्रद्धा प्रमर्द्दनः ॥
भूतस्थाने द्रुत इति वा पाठः ।
भयं ज्ञानं कृशा धीरा जङ्घा सर्व्वसमुद्भवः ।
वह्निर्विष्णुर्भगवती कुण्डली मोहिनी वसुः ॥
योनिदाधारशक्तिश्च त्रिकोणा ईशसंज्ञकः ।
अग्निरेकादशी भद्रा पद्मनाभः कुलाचलः ॥ एः ॥
ऐर्लक्ष्मा भौतिकः कान्ता वायवी मोहिनी
विभुः ।
दक्षा दामोदरः प्रज्ञोऽधरो विकृतमुख्यपि ॥
क्षमात्मको जगद्योनिः परः परनिबोधकृत् ।
ज्ञानामृता कपर्द्दी श्रीः पीठेशाग्निः समातृकः ॥
त्रिपुरा लोहिता राज्ञी वाग्भवो भौतिकासनः ।
महेश्वरो द्वादशी च विमलश्च सरस्वती ।
कामकोटो वामजानुरंशुमान् विजया जटा ॥
॥ ऐः ॥
ओकारः सत्यपीयूषौ पश्चिमास्यः स्मृतिःस्थिरा ।
सद्योजातो वासुदेवो गायत्त्री दीर्घजङ्घकः ॥
आप्यायनी चोर्द्धदन्तो लक्ष्मीर्वाणी सुखी द्विजः ।
उद्देश्यदर्शकस्तीव्रः कैलासो वसुधाधरः ॥
प्रणवांशो ब्रह्मसूत्रमजेशः सर्व्वमङ्गला ।
त्रयोदशी दीर्घनासा रतिनाथो दिगम्बरा ॥
त्रैलोक्यविजया प्रज्ञा प्रीतिर्वीजादिकर्षिणी ॥
॥ ओः ॥
औकारः शक्तिको नाशस्तैजसो वामजङ्घकः ।
मनुवह्न्यद्देशश्च शङ्कुकर्णः सदाशिवः ॥
अधोदन्तश्च कण्ठोष्ठौ सङ्कर्षणः सरस्वती ।
आज्ञा चोर्द्धमुखी शान्तो व्यापिनी प्रकृतः
पयः ॥
अनन्ता ज्वालिनी व्योमा चतुर्दशी रतिप्रियः ।
नेत्रमात्माकर्षिणी च ज्वालामालिनिका भृगुः ॥
व्योमास्थाने रोमा इति वा पाठः । औः ॥
अङ्कारश्चक्षुषी दन्तो घटिका समगुह्यकः ।
प्रद्युम्नः श्रीमुखी प्रीतिर्बीजयोनिर्द्दवध्वजः ॥
दन्तस्थाने दम्भ इति वा पाठः ।
परं शशी प्रमाणीशः सोमबिन्दुः कलानिधिः ।
अक्रूरश्चेतना नादपूर्णा दुःखहरः शिवः ॥
शिरः शम्भुर्नरेशश्च सुखदुःखप्रवर्त्तकः ।
पूर्णिमा रेवती शुद्धः कन्या चरवियद्रविः ॥
अमृताकर्षिणी शून्यं विचित्रा व्योमरूपिणी ।
केदारो रात्रिनाथश्च कुब्जिका चैव बुद्बुदः ॥
॥ अं ॥
अः कण्ठको महासेनः कला पूर्णामृता हरिः ।
इच्छा भद्रा गणेशश्च रतिर्व्विद्यामुखी सुखम्
द्विबिन्दुरसना सोमोऽनिरुद्धो दुःखसूचकः ।
द्विजिह्वः कुण्डलं वक्त्रः सर्गः शक्तिर्निशाकरः ॥
सुन्दरी सुयशानन्ता गणनाथो महेश्वरः ॥ अः ॥
कः क्रोधीशो महाकाली कामदेवः प्रकाशकः ।
कपाली तैजसः शान्तिर्वासुदेवो जयानलः ॥
चक्री प्रजापतिः सृष्टिर्दक्षस्कन्धो विशाम्पतिः ।
अनन्तः पार्थिवो बिन्दुस्तापिनी परमात्मकः ॥
दक्षस्कन्धस्थाने दक्षकक्षो इति वा पाठः ।
वर्णाद्यश्च सुखी ब्रह्मा सत्याद्योऽम्भः शिवो
जलम् ।
माहेश्वरी तुला पूष्या मङ्गलचरणं करः ॥
नित्या कामेश्वरी सुखः कामरूपी गजेन्द्रकः ।
श्रीपुरं रमणो रङ्गः कुसुमा परमात्मकः ॥ कः ॥
खः प्रचण्डः कामरूपी बहिर्व्वह्निः सरस्वती ।
आकाशमिन्द्रियं दुर्गा चक्रीशस्तापिनी गुरुः ॥
शिखण्डी दन्तजातीशः कफोणिर्गस्ती यदि ।
शून्यं कपाली कल्याणी सूर्पकर्णोऽजरामरः ॥
सुधामेयो चक्रजिह्वो जयाख्याङ्गारखड्गकौ ॥
॥ खः ॥

गो गौरी गौरवो गङ्गा गणेशो गोकुलेश्वरः ।
शार्ङ्गी पञ्चान्तको गाथा गन्धर्व्वः सर्व्वगः स्मृतिः ॥
सर्व्वसिद्धिः प्रभा धूम्रा द्विजाख्यः शिवदर्शनः ।
विश्वात्मा गौः पृथग्रूपा वालबद्धस्त्रिलोचनः ॥
गीतं सरस्वती विद्या भोगिनी नन्दनो धरा ।
भोगवती च हृदयं ज्ञानं जालन्धरो लवः ॥
लवस्थाने नर इति वा पाठः । गः ॥
घः खड्‌गी घुर्घुरो घण्टी घण्टीशस्त्रिपुरान्तकः ।
वायुः शिवोत्तमः सत्या किङ्किणी वीरनायकः ॥
मरीचिर्व्वरुणो मेधा कालरूपी च दाम्भिकः ।
लम्बोदरा ज्वालमूलं नन्दीशो हननं ध्वनिः ।
त्रैलोक्यविद्या संहर्त्ता कामाख्यमनघामयः॥घः॥
ङः शङ्खी भैरवश्चण्डो बिन्दूत्तंसः शिशुप्रियः ।
एकरुद्रो दघनखः खर्पंरो विषयस्पृहा ॥
कान्तिः श्वेताङ्गयो घोरो द्विजात्मा ज्वालिनी वियत् ।
मन्त्रशक्तिश्च मदनो विघ्नेशो चात्मनायकः ॥
एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा यतिः ।
शिवयोषा नीलकण्ठः कामेशी च मर्याशुकौ ॥ ॥ङः॥
चः पुष्करो हली वाणी चात्मशक्तिः सुदर्शनः ।
चर्म्मसुण्डधरो भूत्वा महिषाचारसम्भिनी ॥
भूत्वास्थाने भौम इति च पाठः ।
एकरूपो रुचिः कूर्म्मश्चासुण्डा दीर्घवालुकः ।
वामवाहुर्म्मूलमाया चतुर्म्मूर्त्तिस्वरूपिणी ॥
दयितश्च द्विनेत्रश्च लक्ष्मीस्त्रितयलोचनः ।
चन्दनं चन्द्रमा देवश्चेतनो वृश्चिको बुधः ॥
देवी केटसुखेच्छात्मा कौमारपूर्व्वफल्गुनी ।
अनङ्गमेखला वायुर्म्मेदिनी च मूलावती ॥ चः ॥
छश्छन्दनं सुषुम्ना च पशुः पशुपतिर्म्मतिः ।
निर्म्मलं तरलं वह्निर्भूतमात्रा विलासिनी ॥
एकनेत्रश्च वृषली द्विशिरा वामकुर्परः ।
गोकर्णा लाङ्गली वामकाममत्ता सदाशिवः ॥
माता निशाचरः पायुर्व्विचलः स्थितिशब्दकः ॥ ॥छः॥
जः शवी वानरः शूली भोगदा विजया स्थिरा ।
ललदेवो जयो जेता धातकी सुमुखी विभुः ॥
लम्बोदरी स्मृतिः शाखा सुप्रभा कर्त्तृका धरा ।
दीर्घवाहू रुचिर्हंसो नन्दी तेजाः सुराधिपः ॥
जवनो वेगितो वामो मानवाद्यः सदात्मकः ।
ब्रह्मारुतेश्वरो वेगी चामोदा मदविह्वलः ॥जः॥
झो झङ्कारी गुहो झञ्झावायुः सत्यः षडुन्नतः ।
अजेशो द्राविणी नादः पाशी जिह्वा जलं स्थितिः ॥
विराजेन्द्रो धनुर्हस्तः कर्कशो नादजः कुजः ।
दीर्घवाहुर्वलो रूपमाकन्दितः सुचञ्चलः ॥
दुर्मुखो नष्ट आत्मा वान् विकटा कुचमण्डलः ।
कलहंसप्रिया वामा ह्यङ्गुलीमध्यपर्व्वकः ।
दक्षहावाहुहासश्च पाथात्मा यञ्जनः स्वरः ॥ ॥झः॥

ञकारो बोधनी विश्वा कुण्डली मखदो वियत् ।
कौमारी नागविज्ञानी सव्याङ्गुलनखरो वकः ॥
कुण्डलीस्थाने कुण्डली मखदस्थाने सुखद इति वा पाठः ।
सर्व्वेशश्चर्ग्गिता बुद्धिः स्वर्गात्मा घर्घरध्वनिः ।
धर्म्मैकपादौ सुमुखौ विरजा चन्दनेश्वरी ॥
बुद्धिस्थाने सिद्धिः स्वर्गस्थाने सर्ग इति वा पाठः ।
गायनः पुष्पधन्वा च रागात्मा च वराचिणी ॥ञः॥
टङ्कारः कपाली च सोमवाः खेचरी ध्वनिः ।
मुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः ॥
सोमवा स्थाने सोमेश इति क्वचित् पाठः ।
दक्षाङ्गकार्द्धचन्द्रश्च जरा भूतिः पुनर्भवः ।
वृहस्पतिर्धनुश्चित्रा प्रमोदा विमला कटिः ।
राजा गिरिर्म्महाधनुर्ज्ञानात्मा सुमुखो मरुत् ॥ टः ॥
ठः शून्यो मञ्जरी बीजः पाणिनी लाङ्गली चया ।
वनजो नन्दनो जिह्वा सुनम्रघूर्णकः सुधा ॥
वर्त्तुलः कुण्डलो वह्निरमृतं चन्द्रमण्डलः ।
दक्षजानूरुभावश्च देवभक्षो वृहद्ध्वनिः ॥
एकपादो विभूतिश्च ललाटं सर्व्वमित्रकः ।
वृषघ्नो नलिनी विष्णुर्म्महेशो ग्रामणीः शशी ॥ ठः ॥
डः स्मृतिर्दारुको नन्दिरूपिणी योगिनीप्रियः ।
कौमारी शङ्करस्त्रासस्त्रिवक्रो नदको ध्वनिः ॥
दुरूहो जटिली भीमा द्विजिह्वः पृथिवी सती ।
कोरगिरिः क्षमा कान्तिर्नाभिः स्वाती च लोचनम् ॥
जटिलीस्थाने जटिल इति कान्तिस्थाने शान्तिरिति वा पाठः ॥ डः ॥
ढो ढक्का निर्णयः पूर्व्वो यक्षेशादनदेश्वरः ।
अर्द्धनारीश्वरस्तोयमीश्वरी त्रिशिखी नवः ॥
यक्षेशादनदेश्वर इत्यत्र यक्षेशो धनदेश्वर इत्यपि पाठः ।
दक्षपादाङ्गुलेर्म्मूलं सिद्धिदण्डो विनायकः ।
प्रहासा त्रिवेरा ऋद्धिनिर्गुणो निधनो ध्वनिः ॥
प्रहासा स्थाने प्रहास इति वा पाठः ।
विघ्नेशः पालिनी त्वक्धारिणी क्रोड़पुच्छकः ।
एलापुरं त्वगात्मा च विशाखा श्रीर्म्मनो रतिः ॥
तक्स्थाने त्वक्‌च इति वा पाठः ॥ ढः ॥
णो निर्गुणं रतिर्ज्ञानं जम्भनः पक्षिवाहनः ।
जया शम्भो नरकजित् निष्कला योगिनीप्रियः ॥
दिमुखं कोटवी श्रोत्रं समृद्धिर्बोधनो मता ।
त्रिनेत्रो मानुषी व्योमदक्षपादाङ्गुलेर्मुखम् ॥
माधवः शङ्खिनी वीरो नारायणश्च निर्णयः ॥
मुखस्थाने नखं इति वा पाठः ॥ णः ॥
तः पूतना हरिः शुद्धिः शक्ती शक्तिर्नटी ध्वजा ।
वामस्फिक्वामकर्णो च कामिनी मध्यकर्णकः ॥
हरिस्थाने हविः इति वा पाठः ।
आषाढ़ी तण्डुलश्च कामिका पृष्ठपुच्छकः ।
रत्नकश्च श्यामसुखी वाराही मकरोऽरुणा ॥
आषाढ़ीतण्डुलश्चस्थाने आषान्तढ़ान्तसुदश्च इति रत्नकश्चस्थाने रत्नकण्ठ इति वा पाठः ।
सुगतोऽर्द्धसुखा बुद्धनाशुश्च क्रोड़पुच्छकः ।
गन्धो विश्वामरुच्छत्रश्चानुराधा च सौरकः ॥
बुद्धस्थाने वृद्ध इति सौरकस्थाने सैविक इति वा पाठः ।
जयन्ति पुलको भ्रान्तिरनङ्गमदनातुरा ॥ तः ॥
थः स्थिरामी महाग्रन्थिर्ग्रन्थिग्राही भयानकः ।
शिली शिरसिजो दण्डी भद्रकाली शिलोच्चयः ॥
कृष्णो बुद्धिर्व्विकर्म्मा च दक्षनाशाधिपोऽमरः ।
वरदा भोगदा केशो वामजानू रसोऽनलः ॥
कृष्णो बुद्धिर्विकर्म्मा स्थाने क्षमो वह्निर्व्विकर्णो इति वा पाठः ।
लोलीजञ्जयिनी गुह्यः शरचन्द्रो विदारकः ॥
लोली इत्यादिस्थाने लोलोञ्जयिनीपूर्गुह्यशरचन्द्रदिवाकरौ इति वा पाठः । थः ॥
दोऽद्रीशो धातकिर्धाता दाता दत्तं कलत्रकम् ।
दीनं ज्ञानश्च दानश्च भक्तिराहवनी धरा ॥
दाता दत्तं स्थाने दानादत्तु इति वा पाठः ।
सुषुम्ना योगिनी सद्यः कुण्डली वामगुल्फकः ।
कात्यायनी शिवा दुर्गा लङ्गना नान्निकण्डकी ॥
लङ्गनास्थाने सङ्गना कण्डकीस्थाने कण्टकी इति वा पाठः ।
स्वस्तिकः कुटिला रूपः क्षमाचोमाजितेन्द्रियः ।
धर्म्मह्रद्वामदेवश्च भ्रमा वहुसुचञ्चला ॥
धर्म्मह्रत्स्थाने धर्म्मक्षत् वहुस्थाने वह इति वा पाठः ।
हरिद्रा पुरमन्त्री च दक्षपाणिस्त्रिरेखकः ॥दः॥
धो धनार्थो रुचिः स्थाणुः शाश्वतो योगिनीप्रियः ।
मौनेशः शङ्खिनी तोयं नागेशो विश्वपावनी ॥
धनार्थस्थाने धनाख्य इति वा पाठः ।
धिषणा धरणा चिन्ता नेत्रयुग्मं प्रियो मतिः ।
पीतवासा त्रिवर्णा च धाता धर्म्मप्रवङ्गमः ॥
धरणाचिन्तास्थाने धरणी चित्रा इति वा पाठ. ।
सन्दशो मोहनो लज्जा वक्रतुण्डा धरं धरा ।
वामपादाङ्गुलेर्म्मूलं ज्येष्ठा सुरपुरं भवः ।
सर्व्वात्मा दीर्घजङ्घा च धनेशो धनसञ्चयः ॥धः॥
नो गर्व्विणी क्षमा सौरिर्व्वारुणी विश्वपावनी ।
मेषश्च सविता नेत्रं दन्तुरो नारदोऽञ्जनः ॥
वारुणीस्थाने वरुणा इति वा पाठः ।
ऊर्द्धवामी द्विरण्डश्च वामपादाङ्गुलेर्मुखम् ।
वैनतेयस्तुतिर्वर्त्म तरणिर्वालिरागमः ॥
वामनो ज्वालिनी दीर्घो निरीहः सुगतिर्व्वियत् ।
शब्दात्मा दीर्घघोणा च हस्तिनापुरमेचकौ ।
गिरिनायकनीलौ च शिवो नादिर्म्मेधामतिः ॥ नः ॥

पः दूरप्रियता तीक्ष्णा लोहितः पञ्चमो रमा।
गुह्यकर्त्ता निधिः शेषः कालरात्रिः सुवाहिता॥
तपनः पालनः पाता पद्मरेणुर्निरञ्जनः॥
सावित्री पातिनी पानं वीरतत्त्वो धनुर्द्धरः॥
पालनस्थाने पावन इति तत्त्वस्थाने तन्त्र इति वा पाठः।
दक्षपार्श्वश्च सेनानी मरीचिः पवनः शनिः।
उड्डीशं जयनी कुम्भोऽलसं रेखा च मोहकः॥
कुम्भस्थाने कान्ता इति रेखास्थाने रेषा इति वा पाठः।
मूला द्वितीयमिन्द्राणी लोकाक्षी मन आत्मनः॥
आत्मनः स्थाने आत्मक इति वा पाठः। पः॥
फः सखी दुर्गिणी धूम्रा वामपार्श्वो जनार्द्दनः।
जया पादः शिखा रौद्री फेत्कारः शाखिनी प्रियः॥
उमा विहङ्गमः कालकुब्जिनीप्रियपावकौ।
प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शशी॥
फुत्कारो यामिनी व्यक्ता पावनो मोहवर्द्धनः।
निष्फलवागहङ्कारः प्रयागो ग्रामणीः फलम्॥
व्यक्तास्थाने झञ्झा इति प्रयागस्थाने प्रयाण इति वा पाठः। फः॥
बो वनी भूधरो मार्गो घर्घरी लोचनप्रियः।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी॥
पृष्ठवंशो भया मातुः शिखिवाहो युगन्धरः।
मुखबिन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः॥
मुखबिन्दुस्थाने मुखबिन्दुरिति वा पाठः।
क्लेदिनी तापिता भूमिः सुगन्धिरवनिप्रियः।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः॥
सुपनिन्द्रस्थाने सुगन्धिश्चेति वा पाठः।
षष्ठी पुरश्च पेटा च मोदको गगनं प्रति।
पूर्व्वाषाढ़ामध्यलिङ्गौ शनिः कुम्भहतीयकौ॥बः॥
भः क्लिन्ना भ्रमरो भीमो विश्वमूर्त्तिर्निशातवम्।
हिरण्डो भूषणो मूलं यज्ञसूत्रस्य वाचकः॥
निशातवस्थाने निशाभयं इति वा पाठः।
नक्षत्रं भ्रमणा दीप्तिर्वयो भूमिः पयो नभः।
नाभिभद्रं महाबाहुर्विश्वमूर्त्तिर्वितास्तकः॥
वयःस्थाने भय इति वितास्तकस्थाने विमूर्त्तक इति वा पाठः।
प्रणात्मा तापिनी वक्षा विश्वरूपी च चन्द्रिका।
भीमसेनः सुधासेनः सुखो मायापुरं हरः॥
वक्षस्थाने रुद्रा इति सुखस्थाने सुख इति वा पाठः। भः॥
मः काली क्लेशितः कालो महाकालो महान्तकः।
वैकुण्ठो वसुधा चन्द्रो रविः पुरुषराजकः॥
वसुधास्थाने वसुदा इति वा पाठः।
कालभद्रो जया मेधा विश्वदा दीप्तसंज्ञकः।
जठरश्च भ्रमानानं लक्ष्मीमातोग्रबन्धनौ॥
दीप्तस्थाने दीप्र इति वा पाठः।
शिरः शिवो महावीरः शशिप्रभा जनेश्वरः।
प्रमत्तः प्रियश्च रुद्रः सर्व्वाङ्गो वह्निमण्डलम्॥
मातङ्गमालिनी बिन्दुः श्रवणाभरणो वियत्॥
रथस्थाने मख इति वा पाठः। मः॥
यो वाणी वसुधा वायुर्विकृतिः पुरुषोत्तमः।
युगान्तः श्वसनः शीघ्रो धूमार्च्चिः प्राणिसेवकः॥
युगान्तस्थाने युगाभ इति वा पाठः।
शङ्खा भ्रमो जटी लीला वायुवेगी यशस्करी।
सङ्कर्षणः चपा वालो हृदयं कपिला प्रभा॥
आग्नेयो व्यापकास्त्यागी होमी यानं प्रमा सुखम्।
चण्डः सर्व्वेश्वरी धूमचामुण्डा सुमुखेश्वरी॥
प्रमास्थाने प्रभा इति वा पाठः।
त्वगात्मा मलयो माता हंसिनी भृङ्गिनायकः।
तेजसः शोषको मीनो धनिष्ठानङ्गवेदिनी॥
त्वगात्मास्थाने विगात्मा इति तेजसस्थाने येमन इति वा पाठः।
मेरुः सोमः पक्तिनामा पापहा प्राणसंज्ञकः॥
मेरुस्थाने सेरु इति वा पाठः। यः।
रो रक्तः क्रोधिनी रेफः पावकस्त्वोजसो मतः।
प्रकाशा दर्शनी दीपो रतक्षणा परं बली॥
स्वोजसस्थाने तैजन इति रतक्षणास्थाने रक्तक्षण इति वा पाठः।
भुजङ्गेशो मतिः सूर्य्यो धातू रक्तः प्रकाशकः।
व्यापको रेवती दासं कुक्ष्यंशो वह्निमण्डलम्॥
दासस्थाने दानमिति कुक्ष्यंशस्थाने दक्षांश इति वा पाठः।
उग्ररेखा स्थूलदण्डो वेदकण्ठपला पुरा।
प्रकृतिः सुगलो ब्रह्मशब्दश्च गायको धनम्॥
वेदकण्ठपलास्थाने वेदकञ्चपला इति वा पाठः।
श्रीकण्ठ उष्णा हृदयं मुण्डी त्रिपुरसुन्दरी।
सबिन्दुर्योनिजो ज्वाला श्रीशैलो विश्वतोमुखी॥
श्रीशैलस्थाने श्रीशोण इति वा पाठः। रः।
लश्चन्द्रः पूतना पृथ्वी माधवः शक्रवाचकः।
बलानुजः पिनाकीशो व्यापको मांससंज्ञकः॥
माधवस्थाने माधवी इति वा पाठः।
खड्गी नादोऽमृतं देवी लवणं वारुणी पतिः।
शिखा वाणी क्रिया माता भामिनी कामिनी प्रिया॥
अमृतस्थाने भूड्मिति लवणस्थाने मरणमिति वा पाठः।
ज्वालिनी वेगिनी नादः प्रद्युम्नः शोषणो हरिः।
विश्वात्ममन्त्रौ बली चेतो मेरुगिरिः कला रसः॥
मन्त्रस्थाने मन्त्र इति कलास्थाने कणा इति वा पाठः। लः।
वो वाणी वारुणी सूक्ष्मा वरुणो मेदसंज्ञकः।
खड्गीशो ज्वालिनी वङ्कः कलसध्वनिवाचकः॥
वङ्कस्थाने रङ्क इति कलसध्वनिस्थाने कलसंरवि इति वा पाठः।
उत्कारीशस्तु ना वीतो वक्षा स्फिक् सागरः शुचिः।
त्रिधातुः शङ्करः श्रेष्ठो विशेषो यमसादनम्॥वः॥
शः सव्यश्च कामरूपी कामरूपो महामतिः।
सौख्यनामा कुमारोऽस्थि श्रीकण्ठो वृषकेतनः॥
शयनः शयनं शान्ता सुभगा विस्फुलिङ्गिनी।
मृत्युर्देवो महालक्ष्मीर्महेन्द्रः कुलकौलिनी॥
बाहुर्हंसो वियद्वक्त्रं हृदनङ्गाङ्कुशः खलः।
वामोरुः पुण्डरीकात्मा कान्तिः कल्याणवाचकः॥
हंसस्थाने हिंसा इति वा पाठः। शः॥
षः श्वेतो वासुदेवश्च पीता प्रज्ञा विनायकः।
परमेष्ठी वामबाहुः श्रेष्ठो गर्भविमोचनः॥
पीतास्थाने प्रीता इति प्रज्ञास्थाने श्रद्धा इति वा पाठः।
लम्बोदरो यमीजेशः कामधुक् कामधूमकः।
सुश्रीरश्मा वृषो लज्जा मरुद्भक्ष्यः प्रियः शिवः।
कामधूमकस्थाने कालधूमक इति वा पाठः।
सूर्य्यात्मा जठरः कोषो मत्ता वक्षोविदारिणी।
कलकण्ठो मध्यभिन्ना बुद्धात्मा मलपूः शिवः॥षः॥
सो हंसः सुयशा विष्णुर्भृगुश्चन्द्रसंज्ञकः।
जगद्बीजं शक्तिनामा मोहं वेशवती भृगुः॥
सुयशास्थाने सुजन इति मोहस्थाने सोऽहं इति वा पाठः।
प्रकृतिरीश्वरः शुद्धो प्रभा श्वेता कुलोज्ज्वलः।
दक्षपादो मृतं ब्राह्मी परमात्मा परोऽक्षरः॥
सुरूपा च गुणेशो गौः कलकण्ठो वृकोदरौ।
प्राणाद्याश्च पुरादेवी लक्ष्मीः सोमो हिरण्यपुः॥
दुर्गोत्तारिणि सक्तोद्वाक्षीवो मर्गिमनोहरः।
दुर्गोत्तारिणिस्थाने दुर्गोत्तारिणी इति सक्तोद्वातुस्थाने सक्तोद्वा इति मनोहरस्थाने मनोयव इति वा पाठः। सः।
हः शिवो गगनं हंसो नागलोकोऽम्बिकापतिः।
नकुलीशो जगत्प्राणः प्राणेशः कपिला मलः॥
मलस्थाने मत इति वा पाठः।
परमात्मात्मजो जीवो यवाकः शान्तिदोऽङ्गनः।
स्मरो भयो लक्षास्थाणुः क्रुटकूपविरावणः॥
यवाकस्थाने वराक इति अङ्गनस्थाने अङ्कुल इति क्रुटकूपविरावणस्थाने कूटकोपरिवारश्च इति वा पाठः।
लक्ष्मीर्मविहरः शम्भुः प्राणशक्तिर्ललाटजः।
सकोपवारणः शूली चैतन्यं पादपूरणः॥
मविहरस्थाने हरिहर इति सकोपस्थाने सकोप इति वा पाठः।
महालक्ष्मीः परं नादो मेघनादो हरिस्मितः।
बिन्दुर्दुर्गा प्रिया देवी मेघश्यामेश्वरः पुमान्॥
दक्षपादः सदाशम्भुः शाखोटः सोममण्डलम्॥हः॥
ळः पृथ्वी विमला मोघोऽनन्तो हयवहा सिता।
व्यापिनी शिवदा केतुजगत्सारतरं हठः॥
ज्लौम्टड़ानी च वेदार्थः सारो नारायणः स्वयम्।
जठरो नकुलिः पीता शिवेशोऽनङ्गमालिनी॥ळः॥
क्षः कोपस्तुम्बुकः कालो रूचः संवर्त्तकः परः।
नृसिंहो विद्युता माया महातेजा युगान्तकः॥
स्तुम्बुकस्थाने स्तुबुक इति रूचस्थाने चक्षमिति परस्थाने पय इति वा पाठः।
परात्मा क्रोधसंहारी बलान्तो मेरुवाचकः।
सर्व्वाङ्गः सागरः कामः संयोगान्त्यक्षिपूरकः॥

वर्णान्तस्थाने नलान्त इति सर्व्वाङ्गस्थाने सर्व्वाग इति वा पाठः ।
क्षेत्रपालो महाक्षोभो मातृकान्तानलक्षयः ।
मुखं कथवहानन्ता कालजिह्वा गणेश्वरः ।
छायापुत्रश्च संघातो मलयः श्रीर्ललाटकः ॥"च:॥
इति नन्दनभट्टाचार्य्यविरचितं वर्णाभिधानं समाप्तम् ॥

वर्णकं, क्ली, (वर्णयतीति । वर्ण + ण्वुल् ।) हरितालम् । इति रत्नमाला ॥ गात्रानुलेपनयोग्यं पिष्टं घृष्टं वा सुगन्धिद्रव्यम् । इत्यमरः ॥ चन्दनम् । इति शब्दरत्नावली ॥

वर्णकः, पुं, क्ली, (वर्ण+स्वार्थे संज्ञायां वा कन् ।) विलेपनम् । चन्दनम् । इति मेदिनी । के, १५२ ॥ (यथा, महाभारते । १३ ।१११।१०७।
"वर्णकादींस्तथा गन्धांश्चोरयित्वेह मानवः ।
छुछुन्दरित्वमाप्नोति राजन् ! लोभपरायणः ॥")

वर्णकः, पुं, स्त्री, (वर्ण्यते रज्यतेऽनेनेति । वर्ण + घञ् । स्वार्थे कन् ।) हिङ्गुलहरितालकाचनीलीकादिः । इत्यमरभरतौ ॥ (यथा, आर्य्यासप्तशत्याम् । १८६ ।
"कस्तां निन्दति लुम्पति कः स्मरफलकस्य वर्णकं सुग्धः ।
को भवति रत्नकण्टकमन्तरे कस्यार्च्चिचदेति ॥")

वर्णकः, पुं, (वर्णयति नृत्यादीन् विस्तारयतीति । वर्ण + ण्वुल् ।) चारणः । इति मेदिनी । के, ५२ । मण्डलम् । इति शब्दरत्नावली ॥

वर्णकविः, पुं, कुबेरपुत्रः । इति त्रिकाण्डशेषः ॥

वर्णकूपिका, स्त्री, (वर्णानां कूपिकेव ।) मस्याधारः । यथा,—
"मसीधानी मसिमणिर्मेलान्धुर्वर्णकूपिका ॥"
इति त्रिकाण्डशेषः ॥

वर्णचारकः, त्रि, (वर्णान् नीलादीन् चारयति विस्तारयतीति । चर + णिच् + ण्वुल् ।) चित्रकारः । इति शब्दमाला ॥

वर्णज्येष्ठः, पुं, (वर्णेषु चतुर्णं मध्ये ज्येष्ठः प्रथमोत्पन्नात् गुणोत्कृष्टत्वाच्च ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥

वर्णज्येष्ठः, त्रि, (वर्णेन ज्योतिषोक्तपारिभाषिकवर्णेन ज्येष्ठः श्रेष्ठः ।) स्ववर्णापेक्षोत्तमवर्णः । पारिभाषिकहीनवर्णकर्तृकपारिभाषिकवर्णज्येष्ठकन्याविवाहनिषेधो यथा,—
"मीनकर्कटवृश्चिकविप्राः
सिंहतुलाधनुः क्षत्रिय उक्तः ।
कुम्भनरद्वयमेषविशः स्यु-
र्मकरवृषकौ कथितावरजातिः ॥
वर्णज्येष्ठा च या नारी वर्णहीनश्च यः पुमान् ।
तयोर्व्विवाहे मृत्युः स्यात् वयसामान्न संशयः ॥"
इति ज्योतिस्तत्त्वे वर्णकोटनम् ॥

वर्णतूलिः, स्त्री, (वर्णानां तूलिरिव ।) लेखनी । इति शब्दरत्नावली ॥

वर्णतूलिका, स्त्री, (वर्णानां तूलिकेव ।) लेखनी । इति हारावली । २१२ ॥

वर्णतूली, स्त्री, (वर्णानां तूलीव ।) लेखनी । इति त्रिकाण्डशेषः ॥

वर्णदं, क्ली, (वर्णं ददातीति । दा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) कालीयकम् । इति जटाधरः ॥ वर्णदातरि, त्रि ॥

वर्णदात्री, स्त्री, (वर्णं ददातीति । दा + तृच् + ङीप् ।) हरिद्रा । इति राजनिर्घण्टः ॥ वर्णदातरि, त्रि ॥

वर्णदूतः, पुं, (वर्णा एव दूता यत्र ।) लिपिः । तत्पर्य्यायः । लेखः २ वाचिकहारकः ३ स्वस्तिमुखः ४ । इति त्रिकाण्डशेषः ॥

वर्णधर्म्मः, पुं,क्ली, (वर्णानां ब्राह्मणादीनां धर्म्मः ।) ब्राह्मणक्षत्रियवैश्यशूद्राणां कर्त्तव्यं कर्म्म । तद् यथा, —
"यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः ।
अध्यापनं चाध्ययनं षट्कर्म्माणि द्विजोत्तमाः ॥
दानमध्ययनं यज्ञो धर्म्मः क्षत्रियवैश्ययोः ।
दण्डो युद्धं क्षत्रियस्य कृषिर्वैश्यस्य शस्यते ॥
शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम् ।
कारुकर्म्म तथाजीवः पाकयज्ञोऽपि धर्म्मतः ॥
क्षमा दमो दया दानमलोभस्त्याग एव च ।
आर्ज्जवं चानसूया च तीर्थानुसरणं तथा ॥
सत्यं सन्तोष आस्तिक्यं श्रद्धा चेन्द्रियनिग्रहः ।
देवताभ्यर्च्चनं पूजा ब्राह्मणानां विशेषतः ॥
अहिंसा प्रियवादित्वमपैशुन्यमकल्कता ।
समासिकमिमं धर्म्मं चातुर्व्वर्ण्येऽब्रवीन्मनिः ॥
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम् ॥
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तताम् ।
गान्धर्व्वं शूद्रजातीनां परिचारे तु वर्त्तताम् ॥"
इति कौर्म्मे २ अध्यायः ॥*॥
अपि च ।
मार्कण्डेय उवाच ।
"हारीतस्त्वनुवाचाथ तैरेवं चोदितो मुनिः ।
शृण्वन्तु मुनयः सर्व्वे धर्म्मान् वक्ष्यामि शाश्वतान् ॥
वर्णानामाश्रमाणाञ्च योगशास्त्रञ्च सत्तमाः ।
यज्ज्ञात्वा मुनयो नित्यं मुच्यते जन्मबन्धनात् ॥
ब्राह्मण्यां ब्राह्मणेनैव उत्पन्नो ब्राह्मणः स्मृतः ।
तस्य धर्म्मं प्रवक्ष्यामि तं योग्यं देशमेव च ॥
कृष्णसारो मृगो यत्र स्वभावात्तु प्रवर्त्तते !
तस्मिन् देशे वसन् धर्म्मं कुरुते ब्राह्मणोत्तमः ॥
अध्यापनं चाध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव कर्म्मषट्कमिहोच्यते ॥
अध्यापनञ्च त्रिविधं धर्म्मार्थं चात्मकारणम् ।
शुश्रूषाकारणञ्चेति त्रिविधं परिकीर्त्तितम् ॥
नैषामन्यतमो वापि दृश्यते यत्र मानवे ।
तत्र विद्या न दातव्या पुरुषेण हितैषिणा ॥
योग्यानध्यापयेच्छिष्यान् यज्ञानपि च योजयेत् ।
विदितान् प्रतिग्रह्णानिच्छेद्गृहधर्म्मप्रसिद्धये ॥
वेदमेवाभ्यसेन्नित्यं शुचौ देशे समाहितः ।
यजेद्यज्ञं यथाशक्त्या दद्याद्वित्तानुसारतः ॥
नित्यं नैमित्तिकं धर्म्मं कर्म्म कुर्य्यात् प्रयत्नतः ।
गुरुशुश्रूषणञ्चैव यथान्यायमतन्द्रितः ॥
सायं प्रातरुपासीत विधिनाग्निं द्विजोत्तमः ।
कृतस्नानः प्रकुर्व्वीत वैश्वदेवं दिने दिने ॥
अतिथिञ्चागतं भक्त्या पूजयेच्छक्तितो गृही ।
अन्यानप्यागतान् विप्रान् पूजयेदविरोधतः ॥
स्वदारनिरतो नित्यं परदारविवर्ज्जितः ।
सत्यवादी जितक्रोधः स्वधर्म्मनिरतो भवेत् ॥
अकर्म्मणि च संप्राप्ते प्रमादे नैव रोचयेत् ।
प्रियां हितां वदेद्वाचं परलोकाविरोधिनीम्
एष धर्म्मः समुद्दिष्टो ब्राह्मणस्य समासतः ।
धर्म्ममेवन्तु यः कुर्य्यात् स याति ब्रह्मणः परम्
हारीत उवाच ।
क्षत्रादीनां प्रवक्ष्यामि यथावदनुपूर्व्वशः ।
येन येन प्रवर्त्तन्ते विधिना क्षत्रियादयः ॥
राजा च क्षत्रियश्चैव प्रजा धर्म्मेण पालयेत् ।
कुर्य्यादध्ययनं सम्यक् युगयुक्तो यथाविधि ।
दद्याद्दानं द्विजाग्रेभ्यो धर्म्मबुद्धिसमन्वितः ।
देवब्राह्मणभक्तश्च पितृकार्य्यपरस्तथा ॥
धर्म्मेण वै जयाकाङ्क्षी अधर्म्मस्य विवर्ज्जयेत् ।
उत्तमां गतिमाप्नोति क्षत्रियो ह्येवमाचरन् ॥*॥
गोरक्षं कृषिवाणिज्यं कुर्य्याद्वैश्यो यथाविधि ।
दानं धर्म्मं यथाशक्त्या द्विजशुश्रूषणं तथा ॥
लोभदम्भविनिर्म्मुक्तः सत्यवागनसूयकः ।
स्वदारनिरतो दान्तः परदारविवर्ज्जितः ॥
धनैर्विप्रान् समभ्यर्च्य यज्ञकाले त्वयाचितः ।
अप्रमत्तः स्वधर्म्मेषु वर्त्तेत देहपातनात् ।
यज्ञाध्ययनदानानि कुर्य्यान्नित्यमतन्द्रितः ।
पितृकार्य्यञ्च तत्काले नारसिंहार्च्चनं तथा ॥
एतद्वैश्यस्य कर्म्मोक्तं स्वधर्म्ममनुतिष्ठतः ।
एतदासेवमानस्तु मुक्तः स्यान्नात्र संशयः ॥*॥
वर्णत्रयस्य शुश्रूषां कुर्य्यात् शूद्रः प्रयत्नतः ।
दासवत् ब्राह्मणानान्तु विशेषेण समाचरेत् ॥
अयाचितः प्रदाता स्यात् कृषिं वृत्त्यर्थमाश्रयेत् ।
पाकयज्ञविधानेन यजेद्देवानतन्द्रितः ॥
शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम् ।
धारणं जीर्णवस्त्रस्य विप्रस्योच्छिष्टभोजनम् ॥
स्वदारेषु रतिश्चैव परदारविवर्ज्जितः ।
पुराणश्रवणं विप्रान्नारसिंहस्य पूजनम् ॥
तथा विप्रनमस्कारस्तथा मन्त्रं दिने दिने ।
सत्यं सम्भाषणं चैव रागद्वेषविवर्ज्जनम् ॥
इत्थं कुर्व्वंस्तथा शूद्रो मनोवाक्कायकर्म्मभिः ।
स्थानमैन्द्रमवाप्नोति नष्टपापः सुपुण्यकृत् ॥"
इति नारसिंहे ५३ ।५४ अध्यायौ । * ।
अन्यच्च ।
मदालसोवाच ।
"दानमध्ययनं यज्ञो ब्राह्मणस्य त्रिधोदितः ।
धर्म्मो नान्यश्चतुर्थोऽस्ति धर्म्मस्तस्यापदं विना ॥
याजनाध्ययने यज्ञस्तथा पुत्र प्रतिग्रहः ।

एतत् सम्यक् समाख्यातं त्रितयं चास्य
जीविका ॥
दानमध्ययनं यज्ञः क्षत्त्रियस्याप्ययं त्रिधा ।
धर्म्मः प्रोक्तः क्षिते रक्षा शस्त्राजीवश्च जीविका॥
दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ॥
दानं यज्ञोऽथ शुश्रूषा द्विजातीनां त्रिधा मया ।
व्याख्यातः शूद्रधर्म्मोऽपि जीविका कारुकर्म्मणा॥
तद्वद्द्विजातिशुश्रूषा पोषणं क्रयविक्रयैः ।
वर्णधर्म्मास्त्विमे प्रोक्ताः श्रूयतामाश्रमाश्रयः ॥”
इति मार्कण्डेयपुराणे मदालसानुशासनाध्यायः॥
अपरञ्च ।
“ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः।
ते सम्यगुपजीवेयुः षट्कर्म्माणि यथाक्रमम् ॥
अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट् कर्म्माण्यग्रजन्मनः
षसान्तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥
त्रयो धर्म्मा निवर्त्तन्ते ब्राह्मणात् क्षत्त्रियं प्रति।
अध्यापनं याजनञ्च तृतीयश्च प्रतिग्रहः ॥
वैश्यं प्रति तथैवैते निवर्त्तेरन्निति स्थितिः ।
न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजा-
पतिः ॥
शस्त्रास्त्रभृत्त्वं क्षत्त्रस्य वणिक्पशुकृषिर्विशः ।
आजीवनार्थं धर्म्मस्तु दानमध्ययनं यजिः ॥
वेदाभ्यासो ब्राह्मणस्य क्षत्त्रियस्य च रक्षणम् ।
वार्त्ताकर्म्मैव वैश्यस्य विशिष्टानि स्वकर्म्मसु ॥
अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्म्मणा ।
जीवेत् क्षत्त्रियधर्म्मेण स ह्यस्य प्रत्यनन्तरः ॥
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् ।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ॥
वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्त्रियोऽपि वा।
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ॥
कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ॥
इदन्तु वृत्तिवैकल्यात् त्यजतो धर्म्मनैपुणम् ।
विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम् ॥
सर्व्वान् रसानपोहेत कृतान्नञ्च तिलैः सह ।
अश्मनो लवणञ्चैव पशवो ये च मानुषाः ॥
सर्व्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च ।
अपि चेत् स्युररक्तानि फलमूले तथौषधीः ॥
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्व्वशः ।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥
आरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च।
मद्यं नीलीञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा ॥
काममुत्पाद्य कृष्यान्तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिर-
स्थितान् ॥
भोजनाभ्यञ्जनाद्दानाद्यदन्यत् कुरुते तिलैः ।
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥
सद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात् ॥

इतरेषान्तु पण्यानां विक्रयादिह कामतः ।
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥
रसा रसैर्निमातव्या न त्वेव लवणं रसैः ।
कृतान्नञ्चाकृतान्नेन तिला धान्येन तत्समाः ॥
जीवेदेतेन राजन्यः सर्व्वेणाप्यनयङ्गतः ।
न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् ॥
यो लोभादधमो जात्या जीवेदुत्कृष्टकर्म्मभिः ।
तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ॥
वरं स्वधर्म्मो विगुणो न पारक्यः स्वनुष्ठितः ।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः ॥
वैश्योऽजीवन् स्वधर्म्मेण शूद्रवृत्त्यापि वर्त्तयेत्।
अनाचरन्नकार्य्याणि निवर्त्तेत च शक्तिमान् ॥
अशक्नुवंस्तु शुश्रूषां शूद्रः कर्त्तुं द्विजन्मनाम् ।
पुत्त्रदारात्ययं प्राप्तो जीवेत कारुकर्म्मभिः ॥
यैः कर्म्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ।
तानि कारुककर्म्माणि शिल्पानि विविधानि च ॥
वैश्यवृत्तिमनातिष्ठन् ब्राह्मणः स्वे पथि स्थितः ।
अवृत्तिकर्षितः सीदन्निमं धर्म्मं समाचरेत् ॥
सर्व्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयङ्गतः ।
पवित्रं दुष्यतीत्येतत् धर्म्मतो नोपपद्यते ॥
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् ।
दोषो भवति विप्राणां ज्वलनाम्बुसमा हि ते ॥
जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥
अजीगर्त्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः ।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन् ॥
श्वमांसमिच्छन्नार्त्तोऽत्तुं धर्म्माधर्म्मविचक्षणः ।
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् ॥
भरद्वाजः क्षुधार्त्तस्तु सपुत्त्रो विजने वने ।
बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः ॥
क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् ।
चण्डालहस्तादादाय धर्म्माधर्म्मविचक्षणः ॥
प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि ।
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥
याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम् ।
प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ॥
जपहोमैरपैत्येनो याजनाध्यापनैः कृतम् ।
प्रतिग्रहनिमित्तन्तु त्यागेन तपसैव च ॥
शिलोञ्छमप्याददीत विप्रो जीवन् यतस्ततः ।
प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ॥
सीदद्भिः कुप्यमिच्छद्भिर्धनं वा पृथिवीपतिः ।
याच्यः स्यात् स्नातकैर्व्विप्रैरदित्सुंस्त्यागमर्हति ॥
अकृतञ्च कृतात् क्षेत्राद्गौरजाविकमेव च ।
हिरण्यं धान्यमन्नञ्च पूर्व्वं पूर्व्वमदोषवत् ॥
सप्तवित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥
विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः
कृषिः ।
धृतिर्भैक्षं कुसीदञ्च दश जीवनहेतवः ॥
ब्राह्मणः क्षत्त्रियो वापि वृद्धिं नैव प्रयोजयेत् ।
कामन्तु खलु धर्म्मार्थं दद्यात् पापीयसेऽल्पि-
काम् ॥

चतुर्थमाददानोऽपि क्षत्त्रियो भागमापदि ।
प्रजा रक्षन् परं शक्त्या किल्विषात् प्रतिमुच्यते ॥
स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ।
शस्त्रेण वैश्यान् रक्षित्वा धर्म्म्यमाहारयेद्बलिम् ॥
धान्येऽष्टमं विशां शुल्कं विंशं कार्षापणा-
वरम् ।
कर्म्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा ॥
शूद्रस्तु वृत्तिमाकाङ्क्षन् क्षत्त्रमाराधयेद्यदि ।
धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् ॥
स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः ।
जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता ॥
विप्रसेवैव शूद्रस्य विशिष्टं कर्म्म कीर्त्त्यते ।
यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलम् ॥
प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद्यथार्हतः ।
शक्तिञ्चावेक्ष्य दाक्ष्यञ्च भृत्यानाञ्च परिग्रहम् ॥
उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च ।
पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ॥
न शूद्रे पातकं किञ्चित् न च संस्कारमर्हति ।
नास्याधिकारो धर्म्मेऽस्ति न धर्म्मात् प्रतिषेध-
नम् ॥
धर्म्मेप्सवस्तु धर्म्मज्ञाः सतां वृत्तिमनुष्ठिताः ।
मन्त्रवर्ज्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥
यथा यथाहि सद्वृत्तमातिष्ठत्यनसूयकः ।
तथा तथेमञ्चामुञ्च लोकं प्राप्नोत्यनिन्दितः ॥
शक्तेनापि हि शूद्रेण न कार्य्यो धनसञ्चयः ।
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते ॥
एते चतुर्णां वर्णानामापद्धर्म्माः प्रकीर्त्तिताः ।
यान् सम्यगनुतिष्ठन्तो व्रजन्ति परमां गतिम् ॥
एष धर्म्मविधिः कृत्स्नश्चातुर्व्वर्ण्यस्य कीर्त्तितः ।
अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् ॥”
इति मानवे धर्म्मशास्त्रे भृगुप्रोक्तायां संहि-
तायां दशमोऽध्यायः ॥ * ॥ अन्यत् वर्णशब्दे
द्रष्टव्यम् ॥

वर्णनं, क्ली, (वर्ण स्तुतौ विस्तारे रञ्जनादौ +
ल्युट् ।) स्तवनम् । (यथा, भागवते । १० ।
७४ । ३० ।
“इत्थं निशम्य दमघोषसुतः स्वपीठा-
दुत्थाय कृष्णगुणवर्णनजातमन्युः ।
उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी
संश्रावयन् भगवते परुषाण्यभीतः ॥”)
विस्तरणम् । शुक्लादिवर्णयोजनम् । दीपनम् ।
इति वर्णधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥

वर्णना, स्त्री, (वर्ण + णिच् + युच् । टाप् ।)
गुणकथनम् । तत्पर्य्यायः । ईडा १ स्तवः २
स्तोत्रम् ४ स्तुतिः ५ नुतिः ६ श्लाघा ७
प्रशंसा ८ अर्थवादः ९ । इति हेमचन्द्रः । २ ।
१६३ ॥ (यथा, कथासरित्सागरे । ३२ ।
१६६ ।
“विदग्धा अपि वर्ण्यन्ते विटवर्णनया स्त्रियः ॥”)

वर्णनीयं, त्रि, (वर्ण + कर्म्मणि अनीयर् ।)
वर्ण्यम् । वर्णितव्यम् । (यथा, साहित्यदर्पणे
६ परिच्छेदे ।

"वर्णनीया यथायोगं साङ्गोपाङ्गा अमी
इह ।")

वर्ण्याः पदार्था यथा,--
"अथ वर्ण्यानि कथ्यन्ते तानि यानि कवी-
श्वरैः ।
महाकाव्यप्रभृतिषु प्रबन्धेषु ववन्धिरे ॥
राजा राजवधूपुरोहितकुमारामात्यसेनाधिपाः
देशग्रामपुरीसरोऽब्धिसरिदुद्यानाद्रारण्या-
श्रमाः ।
मन्त्री दूतरणप्रयाणमृगयाश्वेभर्त्विनेन्दूदया
वीवाहो विरहः स्वयंवरसुरा पुष्पाम्बुखेला
रतम् ॥"
इति कविकल्पलतायाम् १ स्तवके ३ कुसु-
मम् ॥ (स्तवार्हः । वर्णधात्वर्थदर्शनात् । यथा,
भागवते । ३ । २२ । ३७ ।
"एतत्त आदिराजस्य मनोश्चरितमद्भुतम् ।
वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ॥")

वर्णपात्रं, क्ली, (वर्णस्य पात्रम् ।) चित्रकारस्य
नील्यादिरागस्याधारः । यथा,—
"मल्लिका वर्णपात्रं स्यात् तूलिका लेख्य-
कूर्च्चिका ॥"
इति शब्दमाला ॥

वर्णपुष्पकः, पुं, (वर्णवन्ति नानावर्णानि पुष्पाणि
यस्य । कप् ।) राजतरुणीपुष्पवृक्षः । इति
राजनिर्घण्टः ॥

वर्णपुष्पी, स्त्री, (वर्णवन्ति पुष्पाणि यस्याः ।
ङीष् ।) उष्ट्रकाण्डीपुष्पवृक्षः । इति राज-
निर्घण्टः ॥

वर्णप्रसादनं, क्ली, (वर्णस्य प्रसादनं यस्मात् ।)
अगुरु । इति राजनिर्घण्टः ॥

वर्णमातृ, स्त्री, (वर्णस्य मातेव ककाराद्यक्षर-
प्रसूत्वात् ।) लेखनी । इति हारावली ॥

वर्णमातृका, स्त्री, (वर्णानां वर्णमालानां मातृ-
केव ।) सरस्वती । इति शब्दरत्नावली ॥

वर्णमाला, स्त्री, जातिमाला । (वर्णानां माला
समूहः ।) अक्षरश्रेणी । तत्र संस्कृतवर्णाः ५०
जपमालायाम् ५१ । इङ्गरेजीयवर्णाः २६ ।
फरासीयाः २३ । हिब्रू अर्थात् इहु-
दीयाः २२ । आरवीयाः २८ । पारसीयाः ३१ ।
तुरस्कीयाः ३३ । रूषीयाः ४१ । ग्रिक् अर्थात्
इयुनानीयाः २४ । लाटिन्देशीयाः २२ । डच्
अर्थात् ओलन्दाजीयाः२६ । स्पान्देशीयाः २७ ।
इटालिदेशीयाः २० । तातारीयाः २०२ ।
ब्रह्मदेशीयाः १६ । चीनदेशीयवर्णाः शब्दा-
त्मकाः तच्छब्दसंख्याः ८०००० ॥ * ॥ अका-
रादिक्षकारान्तवर्णरूपैकपञ्चाशज्जपमाला ।
यथा, सनत्कुमारसंहितायाम् ।
"क्रमोत्क्रमगतैर्माला मातृकार्णैः क्षमेरुकैः ।
सबिन्दुकैः साष्टवर्गैरन्तर्यजनकर्म्मणि ॥"
आदि कु चु टु तु पु यु शवोऽष्टौ वर्गाः प्रकी-
र्त्तिताः । अकारादिवर्णान् सबिन्दून् प्रत्येकं
कृत्वा शतं संजप्य अकारादीनां कवर्गा-
दीनाञ्च वर्णानां अन्तिमवर्णं सानुस्वारं
कृत्वा पूर्व्ववदुच्चार्य्य मन्त्रजपः कार्य्यः । अनेन
प्रकारेणाष्टोत्तरशतसंख्यो जपो भवति । अन्त-
र्य्यजनमित्युपलक्षणम् ।
"सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेत् सुधीः ।
अकारादिक्षकारान्तं विन्दुयुक्तं विभाव्य च ॥
वर्णमाला समाख्याता अनुलोमविलोमिका ।
क्षकारं मेरुमेवात्र तत्र मन्त्रं जपेन्नहि ॥"
इति नारदीयवचनात् ॥
प्रकारान्तरं विशुद्धेश्वरे ।
"अनुलोमविलोमेन वर्गाष्टकविभेदतः ।
मन्त्रेणान्तरितान् वर्णान् वर्णेनान्तरितान्
मनून् ॥
कुर्य्याद्वर्णमयीं मालां सर्व्वतन्त्रप्रकाशिनीम् ।
चरमार्णं मेरुरूपं लङ्घनं नैव कारयेत् ॥"
इति तन्त्रसारः ॥
अपि च ।
"अनुलोमविलोमेन कॢप्तया वर्णमालया ।
आदिलान्तलादि आन्तक्रमेण परमेश्वरि ! ।
क्षकारं मेरुरूपञ्च लङ्घयेन्न कदाचन ॥"
इति मुण्डमालातन्त्रम् ॥

वर्णरेखा, } स्त्री, (वर्णा लिख्यन्तेऽनयेति । लिख +
वर्णलेखा, } करणे घञ् । रलयोरैक्यम् ।) कठिनी ।
इति त्रिकाण्डशेषः ॥

वर्णलेखिका, स्त्री, (वर्णलेखा + स्वार्थे कन् । टापि
अत इत्वम् ।) कठिनी । इति रत्नमाला ॥

वर्णवती, स्त्री, (वर्णोऽस्त्यस्यामिति । वर्ण + "रसा-
दिभ्यश्च ।" ५ । २ । ९५ । इति मतुप् । मस्य
वः ।) हरिद्रा । इति जटाधरः ॥ वर्णविशिष्टे,
त्रि ॥

वर्णविलोडकः, पुं, (वर्णान् विलोडयतीति । वि +
लोडि + ण्वुल् ।) श्लोकस्तेनः । सन्धिचौरः ।
इति मेदिनी । के, २३६ ॥

वर्णसङ्करः, पुं, (वर्णतो ब्राह्मणादिभ्यः वर्णानां
वा सङ्करो मिश्रणं यत्र ।) मिश्रितजातिः ।
तद्विवरणं यथा,—
"बभूवुर्ब्रह्मणो वक्त्रादन्या ब्राह्मणजातयः ।
ब्रह्मणो बाहुदेशाच्च जाताः क्षत्त्रियजातयः ॥
ऊरुदेशाच्च वैश्याश्च पादतः शूद्रजातयः ।
तासां सङ्करजातेन बभूवुर्व्वर्णसङ्कराः ॥
गोपनापिततीलाश्च तथा मोदककूवरौ ।
ताम्बूलिपर्णकारौ च तथा वणिकजातयः ॥"
तीलास्थाने भाला इति कूवरस्थाने कूवर इति
च पाठः ।
"इत्येवमाद्या विप्रेन्द्र ! सच्छूद्राः परिकीर्त्तिताः ।
शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः ॥
विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्त्राश्च नवैते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षडेते शिल्पिनां वराः ॥
सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च ।
पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः ॥"
अजात्या इत्यत्र अयाज्या इत्यपि पाठः ।
"स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजो-
त्तम ।
बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा ॥
सूत्रधारो द्विजातीनां शापेन पतितो भुवि ।
शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना ॥
व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा ।
पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः ॥
कश्चिद्वणिग्विशेषश्च संसर्गात् स्वर्णकारिणः ।
स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः ॥
कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः ।
बभूवाट्टालिकाकारः पतितो जारदोषतः ॥
अट्टालिकाकारवीर्य्यात् कुम्भकारस्य योषिति ।
बभूव कोटिकः सद्यः पतितो गृहकारकः ॥
कुम्भकारस्य वीर्य्येण सद्यः कोटिकयोषिति ।
बभूव तैलकारश्च कुटिलः पतितो भुवि ।
सद्यः क्षत्त्रियवीर्य्येण राजपुत्त्रस्य योषिति ।
बभूव तीवरश्चैव पतितो जारदोषतः ॥
तीवरस्य तु वीर्य्येण तैलकारस्य योषिति ।
बभूव पतितो दस्युर्लेटश्च परिकीर्त्तितः ॥
लेटस्तीवरकन्यायां जनयामास षट्सुतान् ।
माल्लं मल्लं मातरञ्च भड़ं कोलञ्च कन्दरम् ॥"
कन्दरस्थाने कलन्दर इति वा पाठः ।
"ब्राह्मण्यां शूद्रवीर्य्येण पतितो जारदोषतः ।
सद्यो बभूव चाण्डालः सर्व्वस्मादधमोऽशुचिः ॥
तीवरेणैव चाण्डाल्यां चर्म्मकारो बभूव ह ।
चर्म्मकार्य्याञ्च चाण्डालात् मांसच्छेदी बभूव ह ॥
मांसच्छेद्यां तीवरेण कोँचश्च परिकीर्त्तितः ।
कोँचस्त्रियान्तु कैवर्त्तात् काण्डारः परिकीर्त्तितः ॥
सद्यश्चाण्डालकन्यायां लेटवीर्य्येण शौनक ! ।
बभूवतुस्तौ द्वौ पुत्त्रौ हड्डिडोम्बौ तथा ॥"
हड्डिशौण्डिकाविल्यत्र दुष्टौ हड्डिडमौ इत्यपि
पाठः ।
"क्रमेण हड्डिकन्यायां सद्यश्चाण्डालवीर्य्यतः ।
बभूवुः पञ्चपुत्त्राश्च धरा वनचराश्च ते ॥
लेटात्तीवरकन्यायां गङ्गातीरे च शौनक ।
बभूव सद्यो यो बालो गङ्गापुत्त्रः प्रकीर्त्तितः ॥
गङ्गापुत्त्रस्य कन्यायां वीर्य्येण वेशधारिणः ।
बभूव वेशधारी च पुत्त्रो युङ्गी प्रकीर्त्तितः ॥
वैश्यात्तीवरकन्यायां सद्यः शुण्डी बभूव ह ।
शुण्डीयोषिति वैश्यात्तु पौण्ड्रकश्च प्रकीर्त्तितः ॥
क्षत्त्रात् करणकन्यायां राजपुत्त्रो बभूव ह ।
राजपुत्त्र्यान्तु करणादागवीति प्रकीर्त्तितः ॥
क्षत्त्रवीर्य्येण वैश्यायां कैवर्त्तः परिकीर्त्तितः ।
कलौ तीवरसंसर्गाद्धीवरश्च प्रकीर्त्तितः ॥"
प्रकीर्त्तित इत्यत्र पतितो भुवि इति वा पाठः ।
"तीवर्य्यां धीवरात् पुत्त्रो बभूव रजकः स्मृतः ।
रजक्यां तीवराच्चापि कोयाली च बभूव ह ॥
नापिताद्गोपकन्यायां सर्व्वस्वी तस्य योषिति ।
क्षत्त्राद्बभूव व्याधश्च बलवान् मृगहिंसकः ॥
तीवरात् शुण्डिकन्यायां बभूवुः सप्त पुत्त्रकाः ।
ते कलौ हड्डिसंसर्गाद्बभूवुर्दस्यवः सदा ॥

ब्राह्मण्यामग्निवीर्य्येण ऋतोः प्रथमवासरे ।
कुत्सितश्चोदरे जातः कुदरस्तेन कीर्त्तितः ॥
तदशौचं विप्रतुल्यं पतित ऋतुदोषतः ।
सद्यः कोटकसंसर्गादधमो जगतीतले ॥
क्षत्त्रवीर्य्येण वैश्यायामृतोः प्रथमवासरे ।
जातः पुत्त्रो महादस्युर्बलवांश्च धनुर्द्धरः ॥
चकार वागतीतञ्च क्षत्त्रियो वारितस्तया ।
तेन जात्या स पुत्त्रश्च वागतीतः प्रकीर्त्तितः ॥
क्षत्त्रवीर्य्येण शूद्रायामृतुदोषेण पापतः ।
बलवन्तो दुरन्ताश्च बभूवुर्म्लेच्छजातयः ॥
अविद्धकर्णाः क्रूराश्च निर्भया रणदुर्ज्जयाः ।
शौचाचारविहीनाश्च दुर्द्धर्षा धर्म्मवर्ज्जिताः ॥
म्लेच्छात् कुविन्दकन्यायां जोलाजातिर्बभूव ह ।
जोलात् कुविन्दकन्यायां शराकः परिकीर्त्तितः ॥
वर्णसङ्करदोषेण बह्वाश्च शठजातयः ।
तासां नामानि संख्याश्च को वा वक्तुं द्विज
क्षमः ॥
वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति ।
वैद्यवीर्य्येण शूद्रायां बभूवुर्बहवो जनाः ॥
ते च ग्राम्यगुणज्ञाश्च मन्त्रौषधिपरायणाः ।
तेभ्यश्च जाताः शूद्रायां ते व्यालग्राहिणो
भुवि ॥”
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥*॥
अपि च ।
“अयं द्विजैर्हि विद्वद्भिः पशुधर्म्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेणे राज्यं प्रशासति ॥
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ।
वर्णानां सङ्करं चक्रे कामोपहतचेतसः ॥
ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥*॥
ब्राह्मणः क्षत्त्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥
सर्व्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु ।
आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते ॥
स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान् ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥
अनन्तरासु जातानां विधिरेष सनातनः ।
द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं
विधिम् ॥
ब्राह्मणात् वैश्यकन्यायामम्बष्ठो नाम जायते ।
निषादः शूद्रकन्यायां यः पारशव उच्यते ॥
क्षत्त्रियाच्छूद्रकन्यायां क्रूराचारविहारवान् ।
क्षत्त्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ॥
विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः ॥*
क्षत्त्रियाद्विप्रकन्यायां सूतो भवति जातितः ।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥
शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम् ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः ॥
एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ ।
क्षत्तृवैदेहकौ तद्वत् प्रातिलोम्येऽपि जन्मनि ॥*॥
पुत्त्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् ।
ताननन्तरनाम्नस्तु मातृदोषात् प्रचक्षते ॥
ब्राह्मणादुग्रकन्यायामावृतो नाम जायते ।
आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः ॥
आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम् ।
प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः ॥
वैश्यान्मागधवैदेहौ क्षत्त्रियात् सूत एव तु ।
प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः ॥
जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः ।
शूद्राज्जातो निषाद्यान्तु स वै कुक्कुटकः स्मृतः ॥
क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्त्यते ।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥
द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान् ।
तान् सावित्रीपरिभ्रष्टान् व्रात्या इति विनि-
र्द्दिशेत् ॥
व्रात्यात्तु जायते विप्रात् पापात्मा भूर्ज्जकण्टकः ।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ॥
झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च ।
नटश्च करणश्चैव खसो द्रविड़ एव च ॥
वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥
व्यभिचारेण वर्णानामवेद्यावेदनेन च ।
स्वकर्म्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः ॥*॥
सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः ॥
सूतो वैदेहकश्चैव चण्डालश्च नराधमः ।
मागधः क्षत्तृजातिश्च तथायोगव एव च ॥
एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु ।
मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥
यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते ।
आनन्तर्य्यात् स्वयोन्यान्तु तथा बाह्येष्वपि क्रमात् ॥
ते चापि बाह्यान् सुबहूंस्ततोऽप्यधिकदूषि-
तान् ।
परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥*॥
यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते ।
तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते ।
प्रतिकूलं वर्त्तमाना बाह्याबाह्यतरान् पुनः ।
हीना हीनान् प्रसूयन्ते वर्णान् पञ्चदशैव तु ॥
प्रसाधनोपचारज्ञमदासं दासजीवनम् ।
सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे ॥
मैत्रेयकन्तु वैदेहो माधूकं संप्रसूयते ।
नॄन् प्रशंसत्यजस्रं यो घण्टाताड़ोऽरुणोदये ॥
निषादो मार्गवं सूते दासं नौकर्म्मजीविनम् ।
कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः ॥
मृतवस्त्रभृत्सु नारीषु गर्हितान्नाशनासु च ।
भवन्त्यायोगवीष्वेते जातिहीनाः पृथक्त्रयः ॥
कारावरो निषादात्तु चर्म्मकारः प्रसूयते ।
वैदेहकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ॥
चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥
चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥
निषादस्त्री तु चण्डालात् पुत्त्रमन्त्यावसायिनम् ।
श्मशानगोचरं सूते बाह्यानामपि गर्हितम् ॥
सङ्करे जातयस्त्वेताः पितृमातृप्रदर्शिताः ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्म्मभिः ॥
स्वजातिजानन्तरजाः षट् सुता द्विजधर्म्मिणः ।
शूद्राणान्तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः ॥
तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे ।
उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मतः ॥
शनकैस्तु क्रियालोपादिमाः क्षत्त्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः ॥
मुखबाहूरुपज्जानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः ॥
ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः ।
ते निन्दितैर्वर्त्तयेयुर्द्विजानामेव कर्म्मभिः ॥*॥
सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम् ।
वैदेहकानां स्त्रीकार्य्यं मागधानां वणिक्पथः ॥
मत्स्यघातो निषादानां त्वष्टिस्त्वायोगवस्य च ।
मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ॥
क्षत्त्रुग्रपुक्कसानान्तु बिलौकोवधबन्धनम् ।
धिग्वणानां चर्म्मकार्य्यं वेणानां भाण्डवादनम् ॥
चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च ।
वसेयुरेते विज्ञाना वर्त्तयन्तः स्वकर्म्मभिः ॥*॥
चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः ।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्द्दभम् ॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन् ।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः ।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः ॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया ।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥
वर्णापेतमविज्ञातं नरं कलुषयोनिजम् ।
आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत् ॥
अनार्य्यता निष्ठुरता क्रूरता निष्क्रियात्मता ।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥
पित्र्यं वा भजते शीलं मातुर्व्वोभयमेव वा ।
न कथञ्चन दुर्य्योनिः प्रकृतिं स्वां नियच्छति ॥
कुले मुख्येऽपि जातस्य यस्य स्याद्योनिसङ्करः ।
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ॥
यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः ।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥
ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः ।
स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम् ॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एतं सामासिकं धर्म्मं चातुर्व्वर्ण्येऽब्रवीन्मनुः ॥*॥
शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत् प्रजायते ।
अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात् ॥
शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम् ।

क्षत्त्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च ।
अनार्य्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया ।
ब्राह्मण्यामप्यनार्य्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत् ॥
जातो नार्य्यामनार्य्यायामार्य्यादार्य्यो भवेद्गुणैः ।
जातोऽप्यनार्य्यादार्य्यायामनार्य्य इति निश्चयः ॥
तावुभावप्यसंस्कार्य्याविति धर्म्मो व्यवस्थितः ।
वैगुण्याज्जन्मनः पूर्व्व उत्तरः प्रतिलोमतः ॥
सुबीजञ्चैव सुक्षेत्रे जातं सम्पद्यते यथा ।
तथार्य्याज्जात आर्य्यायां सर्व्वं संस्कारमर्हति ॥
बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः ।
बीजक्षेत्रे तथैवान्ये तत्रेयन्तु व्यवस्थितिः ॥
अक्षेत्रे बीजमुत्सृष्टमन्तरैव विनश्यति ।
अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ॥
यस्माद्बीजप्रभावेण तिर्य्यग्जा ऋषयोऽभवन् ।
पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते ॥
अनार्य्यमार्य्यकर्म्माणमार्य्यञ्चानार्य्यकर्म्मिणम् ।
सम्प्रधार्य्याब्रवीद्धाता न समौ नासमाविति ॥"
इति मानवे ९ । १० अध्यायौ ॥ * ॥

वर्णसङ्करस्य कारणं दोषाश्च यथा,—
"अधर्म्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥
सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥
दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ।
उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः ॥
उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन ! ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

वर्णसिः, पुं, (वृणोति स्थलमिति । वृञ् आवरणे + "सानसिवर्णसिपर्णसीति ।" उणा० ४ । १०७ । इति असिः धातोर्नुक् च ।) जलम् । इत्युणादिकोषः ॥

वर्णा, स्त्री, (वृण्यते भक्ष्यते इति । वृण भक्षणे + कर्म्मणि घञ् । ततष्टाप् ।) आढ़की । इति हेमचन्द्रः ॥

वर्णाङ्का, स्त्री, (वर्णा अङ्क्यन्तेऽनयेति । अङ्क + करणे घञ् । ततष्टाप् ।) लेखनी । इति शब्दरत्नावली ॥

वर्णाटः, पुं, (वर्णान् अटतीति । अट + अण् ।) गायनः । चित्रकरः । स्त्रीकृतजीवनः । इति मेदिनी । टे, ५५ ॥

वर्णात्मा, [न्] पुं, (वर्णः अक्षरं आत्मा स्वरूपं यस्य ।) शब्दः । इति जटाधरः ॥

वर्णाधिपः, पुं, (वर्णानां ब्राह्मणादीनामधिपः ।) ब्राह्मणक्षत्त्रियवैश्यशूद्राणामधिपतिग्रहः । यथा,
"ब्राह्मणौ शुक्रवागीशौ क्षत्त्रियौ भौमभास्करौ ।
चन्द्रो वैश्ये बुधः शूद्रे पतिर्म्मन्दोऽन्त्यजे जने ॥"
इति ॥
"स्वाध्याये वेद वर्णाधिप इह शुभदे शौरिमेनादितो च ।"
इति च ज्योतिस्तत्त्वम् ॥

वर्णार्हः, पुं, (वर्णमर्हतीति । अर्ह + अण् ।) मुद्गः । इति राजनिर्घण्टः ॥

वर्णि, स्त्री, (वर्ण्यते स्तूयते इति । वर्ण स्तुतौ + इन् ।) स्वर्णम् । इति सिद्धान्तकौमुदी ॥ ("वर्णिर्वलिश्चाहिरण्ये ।"उणा० ४।१२३। इत्युक्तेः अहिरण्ये तु वलिरित्येव ॥ क्वचित् पुंलिङ्गोऽपि ॥)

वर्णिकः, पुं, (वर्णा लेखनेन सन्ति अस्येति । वर्ण + ठन् ।) लेखकः । यथा,—
"लेखकोऽक्षरपूर्व्वाः स्युश्चणजीवकचञ्चवः ।
वर्णिको लिपिकरश्चाक्षरन्यासे लिपिर्लिबिः ॥"
इति हेमचन्द्रः । ३ । १४८ ॥

वर्णिका, स्त्री, (वर्णा अक्षराणि लेखनेन सन्त्यस्या इति । वर्ण + ठन् + टाप् ।) कठिनी । यथा,—
"लेखन्यां वर्णिकापि स्यात् कठिन्यामपि वर्णिका ॥"
इति हारावली । २६६ ॥
मसिः । इति त्रिकाण्डशेषः ॥ काञ्चनस्य उत्कर्षः । यथा,—
"वर्णकाचारणेऽस्त्री तु चन्दने च विलेपने ।
द्वयोर्नीत्यादिषु स्त्री स्यादुत्कर्षे काञ्चनस्य च ।"
इति मेदिनी । वे, १५२ ॥

वर्णितः, त्रि, (वर्ण + क्त ।) स्तुतियुक्तः । तत्पर्य्यायः । ईलितः २ शस्तः ३ पणायितः ४ पनायितः ५ प्रणुतः ६ पणितः ७ पनितः ८ गीर्णः ९ अभिष्टुतः १० ईड़ितः ११ स्तुतः १२ । इत्यमरः । ३ । २ । ११० ॥ नुतः १३ । इति जटाधरः ॥ (विस्तारितः । यथा, महाभारते । १ । २ । २०६ ।
"चतुर्थमेतद्विपुलं वैराटं पर्व्व वर्णितम् ॥"
कथितः । यथा, कथासरित्सागरे । १६ । ३६ ।
"स्वभर्त्तुश्च न मया दरिद्रस्यापि वर्णितम् ।")

वर्णिनी, स्त्री, (वर्णोऽस्त्यस्या इति । वर्ण + इनिः । ङीप् ।) हरिद्रा । इति राजनिर्घण्टः ॥ वनिता । इति हेमचन्द्रः । ३ । १६८ ॥

वर्णी, [न्] पुं, (वर्णा अक्षराणि लेखनेन सन्त्यस्येति । वर्ण + इनिः ।) लेखकः । (वर्णा नील पीतादयः लेखनेन सन्त्यस्येति । इनिः ।) चित्रकरः । (यथा, महाभारते । १२ । ६८ । ५७ ।
"अङ्गारकुम्भतुल्यानां पत्राशरवर्णिनाम् ।
यवसेन्धनदिग्धानां कारयेत च सञ्चयान् ।" * ।
वर्ण + "वर्णाद्ब्रह्मचारिणि ।"५ । २ । १३४ ।"
इति इनिः ।) ब्रह्मचारी । यथा,—
"वर्णी स्यात् लेखके चित्रकरेऽपि ब्रह्मचारिणि ।"
इति मेदिनी । ने, १२७ ॥
(यथा, कुमारे । ५ । ५२ ।
"सखी तदीया तमुवाच वर्णिनं
निबोध साधो ! तव चेत् कुतूहलम् ।")

वर्णविशिष्टे, त्रि । (वर्णोत्तरपदात् तु "धर्म्मशीलवर्णान्ताच्च ।"५ । २ । १३२ । इति इनिः स्यात् । यथा, कामन्दकीये नीतिसारे । २ । १६ ।
"याजनाध्यापने शुद्धे विशुद्धाच्च प्रतिग्रहः ।

इतित्रयमिदं प्राहुर्म्मुनयो ज्येष्ठवर्णिनः ॥"
ज्येष्ठवर्णिनो ब्राह्मणस्येत्यर्थः ।)

वर्णुः, पुं, (वृङ संभक्तौ + "अजिवृरीभ्यो निच्च ।" उणा० ३ । ३८ । इति णुः । स च नित् ।) नदविशेषः । इत्युणादिकोषः ॥ आदित्यः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (देशविशेषः । इत्युज्ज्वलदत्तः ।)

वर्त्तकं, स्त्री, (वर्त्तते इति । वृत् + ण्वुल् ।) वर्त्तलोहम् । इति हेमचन्द्रः ॥ विदरि इति भाषा ॥ (पूजके, त्रि । यथा, गौ० रामायणे । २ । १०७ । १२ ।
"निवेश्य सेनां भरतः पक्षाा पादवतां वरः ।
अभिगन्तुं स काकुत्स्थमियेष गुरुवर्त्तकः ।")

वर्त्तकः, पुं, (वृत् + ण्वुल् ।) पक्षिविशेषः । भारद इति भाषा ॥ (यथा, महाभारते । १३ । १११ । १०३ ।
"कौशिकन्तु ततो हत्वा नरो जायति वर्त्तकः ॥"
अस्य पर्य्यायो गुणाश्च यथा,—
"वर्त्तको वर्त्तकश्चित्रस्ततोऽन्या वर्त्तकाः स्मृताः ।
वर्त्तकोऽग्निकरः शीतो ज्वरदोषत्रयापहः ।
सुरुच्यः शुक्रदो बल्यो वर्त्तकाल्पगुणास्ततः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।)
अश्वस्य खुरः । इत्यमरः । ३ । ३ । ११ ॥

वर्त्तका, स्त्री, (वर्त्तक + टाप् । "वर्त्तका शकुनौ प्राचाम् ।" इति वार्त्तिकोक्त्या न अत इत्वम् ।) वर्त्तकपक्षी । इत्यमरटीकायां रायमुकुटः ॥

वर्त्तजन्मा, [न्] पुं, (वर्त्तनि आकाशपथे जन्म यस्य ।) मेघः । इति शब्दमाला ॥

वर्त्तनं, क्ली, (वर्त्ततेऽनेनेति । वृत् + करणे ल्युट् ।) वृत्तिः । इत्यमरः । २ । ९ । १ ॥ (यथा, भागवते । ७ । ११ । २६ ।
"सम्मार्ज्जनोपलेपाभ्यां गृहमण्डनवर्त्तनैः ।
स्वयञ्च मण्डिता नित्यं परिमृष्टपरिच्छदा ॥")
साधारणवर्त्तनम् । इति शब्दरत्नावली ॥

वर्त्तनं, क्ली स्त्री, (वर्त्ततेऽनेनेति । वृत् + ल्युट् ।) तूलनाला । तर्कुपीठः । जीवनम् । इति मेदिनी । ने, १२६ ॥ (यथा, मार्कण्डेये ।५०।७१।
"देवतापितृमर्त्त्यानामतिथीनाञ्च वर्त्तनम् ।
यस्याविशेषेणान्नेन पुंसस्तस्य गृहं व्रज ॥")

वर्त्तनः, पुं, (वर्त्तते इति । वृत् + "अनुदात्तेतश्च हलादेः ।" ३ । २ । १४९ । इति युच् ।) वामनः । इति मेदिनी । ने, १२५ ॥ वर्त्तिष्णौ, त्रि । इत्यमरः । ३ । १ । २९ ॥ (यथा, भागवते । ३ । ११ । २६ ।
"एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः ।
तिर्य्यङ्नृपितृदेवानां सम्भवो यत्र कर्म्मभिः ॥")

वर्त्तनिः, पुं, पूर्व्वदेशः । इति त्रिकाण्डशेषः ॥ (स्त्री, वर्त्ततेऽनयेति । वृत् + "वृतेश्च ।" उणा० २ । १०७ । इति अनिः । पन्थाः । इत्युज्ज्वलदत्तः ॥)

वर्त्तनी, स्त्री,(वर्त्तनि + कृदिकारादिति पक्षे ङीष् ।) पन्थाः । पेषणम् । इति शब्दरत्नावली ।

वर्त्तमानः, पुं, (वर्त्तते इति । वृत्+शानच् । मुक् ।) प्रयोगाधिकरणीभूतकालः । इति नैयायिकाः ॥ तत्कालवृत्ति, त्रि । तयोः पर्य्यायौ । अद्यतनः २ अधुनातनः ३ । इति राजनिर्घण्टः ॥ वैयाकरणमते तु । आरब्धापरिसमाप्तिर्व्वर्त्तमानः कालः । यथा । महाभारतं पठति । स तु चतुर्विधः । यथा,—
"प्रवृत्तोपरतश्चैव वृत्ताविरत एव च ।
नित्यप्रवृत्तः सामीप्यो वर्त्तमानश्चतुर्व्विधः ॥"
क्रमेणोदाहरणानि । मांसं न खादति आदौ प्रवृत्तं मांसभोजनं निवर्त्तयति इत्यर्थः । इह कुमाराः क्रीडन्ति तदानीन्तनक्रीडनाभावेऽपि पूर्व्वक्रीडानां बुद्धौ वर्त्तमानत्वात् । पर्व्वतास्तिष्ठन्ति नित्यप्रवृत्तत्वात् । किञ्च पर्व्वतानां स्थितत्वे वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्व्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात् । सामीप्यो द्विविधः । भूतसामीप्यो भविष्यत्सामीप्यश्च । भूतसामीप्ये यथा । कदा आगतोऽसि इति प्रश्ने अध्वखेदादेर्व्वर्त्तमानत्वात् एषोऽहमागच्छामि इति आगतोऽपि वदति । भविष्यत् सामीप्ये यथा । कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमनक्रियमाणोद्यमोऽपि वदति । इति मुग्धबोधटीकायां दुर्गादासः ॥

वर्त्तरूकः, पुं, (वर्त्तो वर्त्तनं राति गृह्णातीति । रा+बाहुलकात् ऊकः ।) नदीभेदः । काकनीडः । जलावटः । इति मेदिनी । के, २१२ ॥ द्वारपालः । यथा,—
"मन्त्री पत्निहरोऽमात्यो द्वाःस्थितो वेत्रधारकः ।
द्वाःसाधिको वर्त्तरूको गर्व्वाटो दण्डवासिनि ॥"
इति त्रिकाण्डशेषः ॥

वर्त्तलोहं, क्ली, (वर्त्तते इति । वृत्+अच् । ततः कर्म्मधारयः ।) लोहविशेषः । विट्टरि इति भाषा । इति केचित् ॥ तत्पर्य्यायः । वर्त्तलोहकम् २ वर्त्तकम् ३ लोहसङ्करम् ४ नीलकम् ५ नीललोहम् ६ नीलजम् ७ वर्त्तलोहकम् ८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शिशिरत्वम् । कफदाहपित्तनाशित्वम् । मधुरत्वम् । पित्तदाहशमनत्वञ्च । इति राजनिर्घण्टः ॥

वर्त्तिः, स्त्री, (वर्त्ततेऽनया इति । वृत्+"ह्रुपिषिरुहिवृतिविदिच्छिदिकीर्त्तिभ्यश्च ।" उणा० ४ । ११८ । इति इन् ।) भेषजनिर्म्माणम् । नयनाञ्जनम् । लेखः । गात्रानुलेपनी । दीपदशा । (यथा, भागवते । ५ । ११ । ८ ।
"यथा प्रदीपो घृतवर्त्तिमश्नन्
शिखाः सधूमा भजति ह्यन्यदा स्वम् ॥")
दीपः । इति मेदिनी । ते, ५५ ॥ * ॥ वर्त्तिविशेषो यथा,—
"कतकस्य फलं शङ्खः सैन्धवं त्र्यूषणं वचा ।
फेनो रसाञ्जनं क्षौद्रं विडङ्गानि मनःशिला ।
एषा वर्त्तिर्हन्ति काचं तिमिरं पटलं तथा ॥"
इति गारुडे १९८ अध्यायः ॥

(वर्त्ततेऽनयेति । वृत्+"वृतेश्छन्दसि ।" उणा० ४ । १४० । इति इः । बाहुलकात् लोकेऽपि । योगकर्म्मद्वयम् । इत्युज्ज्वलदत्तः ॥)

वर्त्तिकः, पुं, पक्षिविशेषः । बटेर इति हिन्दी भाषा । तत्पर्य्यायः । वार्त्तिकः २ वर्त्ती ३ शाल्मिकायः ४ । अस्य मांसगुणाः ।
"लद्वच वार्त्तिकं मांसं निर्द्दोषं वीर्य्यपुष्टिदम् ।"
तद्वत् तित्तिरवत् । इति राजनिर्घण्टः ॥

वर्त्तिका, स्त्री, वर्त्तकपक्षी । इत्यमरः ॥ वर्त्तनि वर्त्तत इत्यच् वर्त्तः । स्वार्थे कः वर्त्तकः । भारद इति ख्यातः । वृतिलतिभ्यां तिकः वर्त्तिका स्त्रीलिङ्गा । वाट्भार इति ख्याता । नामद्वयमिदमित्यमरदीपिका । वर्त्तिकेति स्त्रियामीत्वप्रतिषेधार्थं द्वयोरुपादानमिति माधवी । रूपभेदप्रदर्शनार्थमिति रायमुकुटः । इति तट्टीका सारसुन्दरी ॥ सा च बटेर पक्षी इति भाषा ख्याता । अस्या मांसगुणाः ।
"वर्त्तिका मधुरा रूक्षा कफमारुतनाशिनी ॥"
इति राजवल्लभः ॥
अजशृङ्गी । इति राजनिर्घण्टः ॥ (वर्त्ति+स्वार्थे कन् । टाप् ।) वर्त्तिः । बाति इति शलिता इति पलिता इति च भाषा । इत्युणादिकोषः ॥ * ॥ सा पञ्चविधा । यथा,—
"पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा ।
शाणजा बादरी वापि फलकोषोद्भवाथवा ।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधा स्मृता ॥"
इति कालिकापुराणे ६८ अध्यायः ॥

वर्त्तिष्णुः, त्रि, (वर्त्तते इति । वृत+"अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ।" ३ । २ । १३६ । इति इष्णुच् ।) वर्त्तनशीलः । तत्पर्य्यायः । वर्त्तनः । इत्यमरः । ३ । १ । २९ ॥ वर्त्ती । इति हेमचन्द्रः । ३ । ५३ ॥ (यथा, भट्टौ । ५ । १ ।
"निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रणम् ।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ ॥")

वर्त्तिष्यमाणः, त्रि, (वृत्+भविष्यति स्यमानप्रत्ययः ।) भविष्यत्कालादिः । वर्त्तमानप्रागभावाश्रयः । इति राजनिर्घण्टः ॥ (यथा, साहित्यदर्पणे । ६ । ३०८ ।
"वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः ॥
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥")

वर्त्ती, स्त्री, (वर्त्ति+कृदिकारादिति ङीष् ।) वर्त्तिः । इत्यमरटीका ॥ (यथा, महाभारते । ४ । २१ । २३ ।
"आसीदभ्यधिका चास्य श्रीः श्रियं प्रमुमुचतः ।
निर्व्वाणकाले दीपस्य वर्त्तीमिव दिधक्षतः ॥")

वर्त्ती, [न्] (वर्त्तते इति । वृत्+णिनिः ।) वर्त्तिष्णुः । इति हेमचन्द्रः । ३ । ५३ ॥

वर्त्तुलं, त्रि, (वर्त्तते इति । वृत्+बाहुलकात् उलच् ।) गोलवस्तु । तत्पर्य्यायः । निस्तलम् २ वृत्तम् ३ । इत्यमरः । ३ । १ । ६९ ॥ मण्डलायितम् ४ । इति शब्दरत्नावली ॥ * ॥ (यथा, भागवते । ५ । १६ । ५ ।
"यो वा अयं द्वीपः कुवलयकमलकोशाभ्यन्तरनियुतयोजनविशालः समवर्त्तुलो यथा पुष्करपत्रम् ॥") सम्पूर्णगर्भवृत्तानि यथा,—
"सम्पूर्णगर्भवृत्तानि सुखपद्मेन्दुदर्पणाः ।
चक्रावर्त्तनिलकन्दरुकपुटशायकाः ॥
आवर्त्तः कमठो लूनाग्रं छत्रमपूपकम् ।
आलवालमहीजालचर्म्मकं शाणकादयः ॥" * ॥
वृत्तानि यथा,—
"वृत्तानि बाहुनारङ्गस्कन्धधम्मिल्लमोदकाः ।
रथाङ्गलावककुत्कुम्भिकुम्भाण्डकादयः ॥
कर्णपाशभुजापाशालयचापघटाननम् ।
मुद्रिकापरिखायोगपट्टहारस्रगादयः ॥"
इति कविकल्पलतायाम् २ शेषस्तबके ३ कुसुमम् ॥

वर्त्तुलं, क्ली, गुञ्जनम् । इति राजनिर्घण्टः ॥

वर्त्तुलः, पुं, कलायविशेषः । वाटुला । इति भाषा । यथा,—
"कलायस्य त्रयो भेदा त्रिपुटो वर्त्तुलोऽकुटी ।"
इति शब्दमाला ॥

वर्त्तुला, स्त्री, (वर्त्तुल+टाप् ।) तर्कुपाठी । इति हारावली । २१३ ॥ टेकोर वाँटुल इति भाषा ॥

वर्त्तुली, स्त्री, (वर्त्तुल+गौरादित्वात् ङीष् ।) गजपिप्पली । इति राजनिर्घण्टः ॥ (विवरणमस्या गजपिप्पलीशब्दे ज्ञातव्यम् ॥)

वर्त्म, [न्] क्ली, (वर्त्ततेऽनेनास्मिन् वेति । वृत्+मनिन् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, ऋग्वेदे । १ । ८५ । ३ ।
"गोमातरो यच्छुभयन्ते अञ्जिभि-
स्तनूषु शुभ्रा दधिरे विरुक्मतः ।
बाधन्ते विश्वमभिमातिनमप-
वर्त्मान्येषामनुरीयते घृतम् ॥"
"वर्त्मानि मार्गाननुसृत्य ।' इति तद्भाष्ये सायणः ॥ यथा च रघौ । २ । २० ।
"पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्म्मपत्न्या ।
तदन्तरे सा विरराज धेनु-
र्द्दिनक्षपामध्यगतेव सन्ध्या ॥")
नेत्रच्छदः । इति मेदिनी । ने, १२८ ॥ (यथा, अष्टाङ्गहृदये । २ । १० ।
"सितासितञ्च तन्मध्ये नेत्रयोर्म्मण्डलं हि तत् ।
प्रच्छादनं भवेद् वर्त्म चाक्षिकूटमतः परम् ॥")

वर्त्मनिः, स्त्री, (वर्त्तते इति । वृत्+"वृतेश्च ।" उणा० २ । १०७ । इति अनिः । चकारात् नुडागमोऽप्यत्रेति केचित् । वर्त्मनिरिति गोवर्द्धनः । इत्युज्ज्वलदत्तोक्त्या साधुः ।) पन्थाः । इत्युणादिकोषः ॥

वर्द्ध, क पूर्त्तिच्छेदोः । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, वर्द्धयति । वृध क दीप्तावित्यत्रैव पूर्त्तिच्छेदोश्च पाठादिष्टसिद्धा-

यस्य पाटसुरादिभ्यो णेरनित्यतां बोधयति। तेन कदाचिन् णिरप्राप्तौ यगादौ वृध क इत्यस्य वृध्यते इत्यादि अस्य तु वर्द्धते इत्यादिभेदः। इति दुर्गादासः॥

वर्द्ध, क्ली, (वर्द्धयति पूरयतीति। वर्द्ध + अच्।) सीसकम्। इति हेमचन्द्रः। ४। १०६॥

वर्द्धः, पुं, (वर्द्धते इति। वृध् छेदने + अच्।) ब्राह्मणयष्टिका। इति जटाधरः॥ पूर्त्तिः। छेदः। इति वर्द्धधात्वर्थदर्शनात्॥

वर्द्धकः, पुं, (वर्द्धते इति। वृध् + ण्वुल्।) ब्राह्मणयष्टिका। इत्यमरः। २। ४। ९०॥ (वर्द्धयतीति। वर्द्ध पूरणे छेदने च + ण्वुल्।) पूरके छेदके च, त्रि॥

वर्द्धकिः, पुं, (वर्द्धं छिनत्तीति। वर्द्ध + अच्। वर्द्धं कषतीति। कष हिंसायां + बाहुलकात् डिः।) त्वष्टा। इत्यमरः। २। १०। ९॥ (यथा, रामायणे। १। १३। ७।
"कर्म्मान्तिकान् शिल्पकरान् वर्द्धकीन् खनकानपि।
गणकान् शिल्पिनश्चैव तथैव नटनर्त्तकान्॥")

वर्द्धकी, [न्] पुं, (वर्द्धको वर्द्धोऽस्ति अस्येति। वर्द्धक + इनि।) वर्णसङ्करजातिविशेषः। बढ़ई इति हिन्दी भाषा। तत्पर्य्यायः। त्वष्टा २ वर्द्धकिः ३ तक्षा ४ सूत्रधारः ५ रथकारः ६ रथकरः ७ काष्ठतट् ८ काष्ठतक्षकः ९। इति शब्दरत्नावली॥ (यथा, वृहत्संहितायाम्। ४३। २२।
"अरभङ्गे बलभेदो
नेम्या नाशो बलस्य विज्ञेयः।
अर्थक्षयोऽक्षभङ्गे
तथाणिभङ्गे च वर्द्धकिनः॥")

वर्द्धनं, क्ली, (वृध् च्छेदपूर्त्त्योः + ल्युट्।) छेदनम्। (यथा, मनुः। २। २९।
"प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते॥")
वृद्धिः। इति मेदिनी। ने, १२३॥

वर्द्धनः, त्रि, (वर्द्धयतीति। वृध् + नन्द्यादित्वात् ल्युः। यद्वा, वर्द्धते तच्छील इति। वृध् पूर्त्तौ + "अनुदात्तेतश्चेति।" ३। २। १४९। इति युच्।) वर्द्धिष्णुः। इत्यमरः। ३। १। २८॥ (यथा, ऋग्वेदे। ३। ३२। १२।
"यज्ञो हि त इन्द्र वर्द्धनो भूदुत प्रियः सुतसोमो मियेधः॥")

वर्द्धनी, स्त्री, घटी। इति मेदिनी। ने, १२३॥ संमार्ज्जनी। इति हेमचन्द्रः। ४। ८२॥ सनालपात्रविशेषः। बद्ना इति भाषा। यथा,
"आलुः स्त्री कर्करी पारी वर्द्धनी च लल-न्तिका॥"
इति जटाधरः॥ *॥
प्रतिष्ठादिकर्म्मणि तत्प्रयोजनं यथा,—
"प्रतिष्ठा यस्य देवस्य तदाख्यं कलसं न्यसेत्।
ऐशान्यां पूजयेद्याम्ये अस्त्रेणैव च वर्द्धनीम्॥
कलसं वर्द्धनीञ्चैव ग्रहान् वास्तोष्पतिं तथा।
आसने तानि सर्व्वाणि प्रणवाख्यं जपेद्गुरुः॥
सूत्रग्रीवं रत्नगर्भं वस्त्रयुग्मेन वेष्टितम्।
सर्व्वौषधीगन्धलिप्तं पूजयेत् कलसं गुरुः॥
देवन्तु कलसे पूज्य वर्द्धन्या वस्त्रमुत्तमम्।
वर्द्धन्या तु समायुक्तं कलसं भ्रामयेद्गुरुः॥
वर्द्धनीं धारया सिञ्चन्नग्रतो धारयेत्ततः।
अभ्यर्च्य वर्द्धनीकुम्भं स्थण्डिले देवमर्च्चयेत्॥"
इति गारुडे ४८ अध्यायः॥

वर्द्धमानः, पुं, (वर्धते इति। वृध वृद्धौ + शानच्।) एरण्डवृक्षः। इत्यमरः। २। ४। ५१॥ (अस्य पर्य्यायो यथा,—
"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः।
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पशुभेदः। शरावः। (यथा, महाभारते। ७। ८०। १९।
"तथा गाः कपिला दोग्ध्रीः सवत्साः पाण्डु-नन्दनः।
हेमशृङ्गी रूप्यखुरा दत्त्वा चक्रे प्रदक्षिणम्।
स्वस्तिकान् वर्द्धमानांश्च नन्द्यावर्त्तांश्च काञ्च-नान्॥"
अस्मिन्नर्थे क्लीवलिङ्गेऽपि दृश्यते। यथा, तत्रैव। १३। ६४। १२।
"मत्रासु तिलपूर्णानि वर्द्धमानानि मानवः।
प्रदाय पुष्टपशुमानिह प्रेत्य च मोदते॥"
तथा च सुश्रुते सूत्रस्थाने २९ अध्याये।
"स्त्री पुत्त्रिणी सवत्सा गौर्वर्द्धमानमलङ्कृता।
कन्या मत्स्याः फलं चामं स्वस्तिकं मोदका दधि॥")
विष्णुः। इति मेदिनी। ने, २०८॥ (यथा, महाभारते। १३। १४९। ४१।
"वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः॥")
जिनविशेषः। तत्पर्य्यायः। वीरः २ चरमतीर्थकृत् ३ महावीरः देवार्य्यः ५ ज्ञातनन्दनः ६। इति हेमचन्द्रः।१। ३०॥ धनिनां गृहविशेषः। यथा,—
"स्वस्तिको वर्द्धमानश्च नन्द्यावर्त्तादयोऽपि च॥"
इति हलायुधः॥
(यथा, वृहत्संहितायाम्। ५३। ३३।
"द्वारालिन्दोऽन्तगतः प्रदक्षिणोऽन्यः शुभस्तत-श्चान्यः।
तद्वच्च वर्द्धमाने द्वारन्तु न दक्षिणं कार्य्यम्॥")
स्वनामख्यातदेशः। यथा,—
"प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़काः।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः॥"
इति ज्योतिस्तत्त्वे कूर्म्मचक्रम्॥
(भद्राश्ववर्षस्य कुलपर्व्वतविशेषः। यथा, मार्कण्डेये। ५९। १२।
"विशालः कम्बलः कृष्णो जयन्तो हरिपर्व्वतः।
विशोको वर्द्धमानश्च सप्तैते कुलपर्व्वताः॥"
वृद्धिविशिष्टे, त्रि॥)

वर्द्धमानकः, त्रि, (वर्द्धमान + स्वार्थे संज्ञायां वा कन्।) वृद्धिविशिष्टः। पुं, शरावः। इत्यमरः। २।९।३२॥ (यथा, महाभारते। १४।६५।१०।
"भृङ्गाराणि कटाहानि कलसान् वर्द्धमान-कान्॥")
स्वार्थे कप्रत्यये एरण्डवृक्षः॥ (आराात्रिकम्। इति महाभारतटीकायां नीलकण्ठः॥ यथा, महाभारते। ७। ५५। ४।
"नटनर्त्तकगन्धर्व्वैः पूर्णकैर्व्वर्द्धमानकैः।
नित्योद्योगैश्च क्रीड़द्भिस्तत्र स्म परिहर्षिताः॥")

वर्द्धापनं, क्ली, नाड़ीच्छेदनम्। यथा,—
"अर्द्धरात्रे दलोर्धारां पातयेद्गुडसर्पिषा।
ततो वर्द्धापनं षष्ठीं नामादेः करणं मम॥
कर्त्तव्यं तत्त्वयाकार्चौ प्रभाते नवमीदिने।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः॥"
वर्द्धापनं नाड़ीच्छेदनम्। इति तिथ्यादितत्त्वम्।

वर्द्धितं, त्रि, (वृध् + क्तः।) प्रवृद्धम्। छिन्नम्। पूरितम्। इति मेदिनी। ते, १४८॥ (परिपूर्णम्। यथा, मनुः। ३। २२४।
"पाणिभ्यान्तूपसंगृह्य स्वयमन्नस्य वर्द्धितम्।
विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत्॥"
"अन्नस्येति तृतीयार्थे षष्ठी। वर्द्धितं पूर्णं पिष्टरादिपात्रम्।" इति तट्टीकायां कुल्लूकभट्टः॥ वृध + णिच् + क्तः। वृद्धिं प्रापितम्। यथा, भागवते। ४। २१। १।
"इत्थात्मानं प्रत्ययसनेकदा वैश्य आत्मवान्।
आत्मना वर्द्धिताशेषस्वानुसर्गः प्रजापतिः॥")

वर्द्धिष्णुः, त्रि, (वर्द्धते इति। वृध + "अलङ्कृञिति।" ३। २। १३६। इति इष्णुच्।) वर्द्धनशीलः। तत्पर्य्यायः। वर्द्धनः २। इत्यमरः। ३। १। २८॥ (यथा, भट्टिः। ५। १।
"निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रणम्।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ॥")

वर्द्ध, स्त्री, (वर्द्धते दीर्घीभवतीति। वृध् + "वृधिवपिभ्यां रन्।" उणा० २। २७। इति रन्।) चर्म्म। इत्युणादिकोषः॥ (यथा, अथर्ववेदे। १४। १। ६०।
"त्वष्टा पिपेश मध्यतोऽनुवर्ध्रांत्स्या नो अस्तु सुमङ्गली॥")

वर्द्ध्री, स्त्री, (वर्द्ध + गौरादित्वात् ङीष्।) चर्म्मरज्जुः। बद्धी इति भाषा। तत्पर्य्यायः। नद्ध्री २ वरत्रा ३। इत्यमरः॥ वर्द्धी ४। इति भरतः॥

वर्पः, [स्] क्ली, (वृणोति संवृत्तं भवतीति। वृ + "वृङ्शीङ्भ्यां रूपाङ्गयोः पुट् च।" उणा० ४। २००। इति असुन् पुडागमश्च।) रूपम् इत्युणादिकोषः॥ (यथा, ऋग्वेदे।१।१४०।५।
"आदस्य ते ध्वसयन्तो वृथेरते
कृष्णमभ्वं महि वर्पः करिक्रतः॥"
स्तोत्रम्। यथा, तत्रैव। १। ३९। १।
"कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कंह धूतयः॥"
"कस्य यजमानस्य क्रत्वा क्रतुना सङ्कल्पेन इति

षेध:। तथा कस्य यजमानस्य वर्पस: स्तोत्रेण मन्त्रच्छ्ह इति तद्भाष्ये सायण:।)

वर्ब, गत्याम्। वधे। इति कविकल्पद्रुम:। (भ्वा०-पर०-सक०-सेट्।) वर्बति। इति दुर्गादास:।

वर्म्म, [न्] क्ली, (वृणोति आच्छादयति शरीरमिति। वृ+मनिन्।) तनुत्रम्। इत्यमर:। २। ८। ६४। (यथा, रघु:। ४। ५६।
"अभ्यभूयत वाहानां चरतां गात्रशिञ्जितै:।
वर्म्मभि: पवनोद्धूतराजतालीवनध्वनि:॥"
गृहम्। इति निघण्टु:। ३। ४। यथा, बृहत्संहितायाम्। ५१। ३।
"छिन्नभिन्नकृमिखातकण्टकिप्ररूढमकुटिलैर्न सत्तु नै:।
क्रूरपक्षियुतनिन्द्यनामभि: शुष्कशीर्णबहुपर्णवर्म्मभि:॥")

वर्म्मकण्टक:, पुं, पर्पट:। इति राजनिर्घण्ट:। (विवृतिरस्य पर्पटशब्दे विज्ञेया।)

वर्म्मकषा, स्त्री (वर्म्म कषतीति। कष+अच्। टाप्।) सप्तला। इति शब्दरत्नावली। चामार कषा इति भाषा।

वर्म्मा, [न्] पुं, (वृ+मनिन्।) क्षत्रियस्य पद्धति:। यथा,—
"शर्म्मान्तं ब्राह्मणस्य स्याद्वर्म्मान्तं क्षत्रियस्य च।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयो:॥"
इति आह्निकतत्त्वधृतशातातपवचनम्।

वर्म्मि:, पुं, मत्स्यविशेष:। बानि इति भाषा। अस्य मांसगुणा:। गुरुत्वम्। वृष्यत्वम्। कषायत्वम्। रक्तपित्तनाशित्वञ्च। इति राजवल्लभ:। (यथा, सुश्रुते। १। १३।
"वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षि: कर्व्वुरा।"
तथास्य गुणा यथा,—
"वर्म्मिमत्स्यो हरेद्वातं पित्तं रुचिकरो लघु:।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।)

वर्म्मित:, त्रि, (वर्म्म करोतीति। वर्म्म+णिच्। तत: कर्म्मणि क्त:। वर्म्म सञ्जातमस्येति। इतच् वा।) वर्म्मयुक्त:। कृतसन्नाह:। तत्पर्य्याय:। सन्नद्ध: २ सज्ज: ३ दंशित: ४ व्यूढकङ्कट: ५। इत्यमर:। २। ८। ६५। ऊढकङ्कट: ६। इति सुभूति:। (यथा, गो० रामायणे। २। ६१। १५।
"वाजिनो वर्म्मिताङ्गानां क्रुद्धस्य मम सायका:।
अत्र भित्त्वा प्रवेक्ष्यन्ति शरीराणि मयेरिता:॥")

वर्म्मीष:, पुं, मत्स्यविशेष:। वामिकृष इति भाषा। अस्य मांसगुणा:। वातनाशित्वम्। स्निग्धत्वम्। ग्रहदोषनाशित्वञ्च। इति राजवल्लभ:।

वर्य्य, त्रि, (वर्य्यते प्रार्थ्यते इति। वरत् क ईप्सायाम् +"अचो यत्।" ३। १। ९७। इति यत्।) प्रधानम्। इत्यमर:। ३। १। ५७। (यथा, भागवते। १। ५। ९।
"यथा धर्म्मादयश्चार्था मुनिवर्य्यानुकीर्त्तिता:।
न तथा वासुदेवस्य महिमा ह्यनुवर्णित:॥")
श्रेष्ठम्। इति मुग्धबोधव्याकरणम्। (यथा, किराते। ७। २०।
"माहेन्द्रं नगमभित: करेणुवर्य्या:
पर्य्यन्तस्थितजलदा दिव: पतन्त:॥")

वर्य्य:, पुं, (वर्य्यते प्रार्थ्यते इति। वर+यत्।) कामदेव:। इति मेदिनी। ये, ४०।

वर्य्या, स्त्री, (व्रियते इति। वृ+"अवद्यपण्यवर्य्येति।" ३। १। १०१। इति अप्रतिबन्धे यत्।) पतिंवरा। इत्यमर:। २। ६। ७। कन्या। इति मुग्धबोधव्याकरणम्।

वर्व्वणा, स्त्री, (वरित्यव्यक्तशब्देन वणति शब्दायते इति। वण शब्दे+अच्। टाप्।) नीलमक्षिका। इत्यमर:। २। ५। २७। नीलाकारवर्णा मक्षिका वर्व्वणा। भणभणिया इति ख्याता। मक्षिकाख्यायां इत्येके। वरिति वणति वर्व्वणा। अथ वण भण शब्दे पचादित्वादन् आप्। किंवा वृणीते पूतिगन्धं भणते इति वृङो विच् वर्। वणतेरणि वणा तत: कर्म्मधारये वर्व्वणा। इति तट्टीकायां भरत:।

वर्व्वरं, क्ली, (वृणुते वरयति नानागुणान् इति। वृ+"कृगृशृवृवञ्चिभ्य: ष्वरच्।" उणा० २। १२३। इति ष्वरच्।) हिङ्गुलम्। पीतचन्दनम्। बोलम्। इति राजनिर्घण्ट:।

वर्व्वर:, पुं, (वृणोति दोषानिति। वृ+ष्वरच्।) पामर:। स च नीचजाति:। केश:। बावरी इति भाषा। चक्रल:। देशविशेष:। (तद्देशवासिनि, पुंभूम्नि। यथा, मार्कण्डेये। ५७। ३८।
"काम्बोजा दरजाश्चैव वर्व्वरा हर्षवर्द्धना:॥")
पञ्जिका। इति मेदिनी। रे, २०९। वृक्षविशेष:। काल बावुइ इति भाषा। तत्पर्य्याय:। सुमुख: २ गरघ्न: ३ कृष्णवर्व्वरक: ४ सुकन्दज: ५ गन्धपत्र: ६ पूतगन्ध: ७ सुवाहक: ८। अस्य गुणा:। कटुत्वम्। उष्णत्वम्। सुगन्धित्वम्। वान्तिविसर्पविषत्वग्दोषनाशित्वञ्च। इति राजनिर्घण्ट:।

वर्व्वरकं, क्ली, (वर्व्वर+स्वार्थे कन्।) चन्दनभेद:। तत्पर्य्याय:। वर्व्वरोत्थम् २ श्वेतवर्व्वरकम् ३ शीतम् ४ सुगन्धि: ५ पित्तारि: ६ सुरभि: ७। अस्य गुणा:। शीतलत्वम्। तिक्तत्वम्। कफमारुतपित्तकुष्ठकण्डूव्रणनाशित्वम्। विशेषाद्रक्तदोषजित्त्वञ्च। इति राजनिर्घण्ट:।

वर्व्वरा, स्त्री, (वर्व्वरपुष्पस्येव आकृतिरस्यस्या इति। वर्व्वर+अच्। टाप्।) पुष्पभेद:। शाकभेद:। इति मेदिनी। रे, २०९। (वर्व्व इति शब्दं रातीति। रा+क:।) मक्षिकाभेद:। इति शब्दरत्नावली।

वर्व्वरा, } स्त्री, (वर्व्वर+टाप्। पक्षे षित्वात्
वर्व्वरी, } ङीष्।) क्षुद्रवृक्षविशेष:। बावुइ इति भाषा। तत्पर्य्याय:। कवरी २ तुङ्गी ३ खरपुष्पा ४ अजगन्धिका ५ अजगन्धा ६ कवरा ७ खरपुष्पिका ८। इत्यमरशब्दरत्नावल्यौ। तस्या: प्रकारा गुणाश्च।
"वर्व्वरी कवरी तुङ्गी खरपुष्पाजगन्धिका।
पर्णासस्तत्र कृष्णे तु कठिञ्जरकुठेरकौ।
कालमार: करालश्च मलूक: कृष्णमल्लिका।
तत्र शुक्लोऽर्ज्जक: प्रोक्तो वटपत्रस्ततोऽपर:॥
वर्व्वरीत्रितयं रूक्षं शीतं कटु विदाहि च।
तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च।
पित्तलं कफवातास्रकण्डूकृमिविषापहम्॥"
इति भावप्रकाश:।

वर्व्वरीक:, पुं, (वृणुते इति। वृञ् वरणे+"पर्फरीकादयश्च"/"शॄपॄ-वृञां द्वे रुक् चाभ्यासस्य।" उणा० ४। १९। इति ईकन् द्विर्वचनं अभ्यासस्य रुगागमश्च।) ब्राह्मणयष्टिकाशच:। कुटिलकुन्तल:। इत्युणादिकोष:। अजगन्धिका। बावुइ तुलसी इति भाषा। इति शब्दचन्द्रिका। महाकाल:। इति हेमचन्द्र:। तत्र पवर्गीयवकारादौ पठितोऽयं किन्तु मेदिन्यां चर्चरीकशब्दस्यायमर्थ:।

वर्व्वा, स्त्री, वर्व्वरी। इति शब्दचन्द्रिका।

वर्व्वि:, त्रि, (वृ+"वृदृभ्यां विन्।" उणा० ४। ५३। इति विन्।) घस्मर:। इत्युणादिकोष:।

वर्व्वूर:, पुं, (वृ+बाहुलकात् ऊरच्।) वृक्षविशेष:। बावला इति भाषा। तत्पर्य्याय:। युगलाक्ष: २ कण्टालु: ३ तीक्ष्णकण्टक: ४ गोशृङ्ग: ५ पंक्तिबीज: ६ दीर्घकण्ट: ७। कफान्तक: ८ दृढबीज: ९ अजभक्ष: १०। अस्य गुणा:। कषायत्वम्। उष्णत्वम्। कफकासामरक्तातिसारपित्तदाहार्शोनाशित्वञ्च। इति राजनिर्घण्ट:।

वर्ष, पुं, क्ली, (वृष्यते इति। वृषु सेचने+अब्विधौ भयादीनामुपसंख्यानमित्यच्। यद्वा, व्रियते प्रार्थ्यते इति। वृ+"वृतॄवदिहनिकमिकषिभ्य: स:।" उणा० ३। ६२। इति स:।) वृष्टि:। (यथा, मनु:। ४। १०३।
"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥"
जम्बुद्वीपांश:। वत्सर:। इत्यमर:। (यथा, मनु:। ५। ५३।
"वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समा:।
मांसानि च न खादेद् यस्तयो: पुण्यफलं समम्॥")
जम्बुद्वीप:। इति मेदिनी। षे, २४। (वर्षतीति। वृष्+पचाद्यच्।) मेघ:। इति हेमचन्द्र:। २। ७९। * । अथ सप्तद्वीपानां वर्षवर्णनम्। तत्र जम्बुद्वीपस्य नववर्षविभागो यथा। यत एव कृता: सप्त भुवो द्वीपा जम्बुप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञा:। तेषां परिमाणं पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो यथासंख्यं द्विगुणमानेन बहि: समन्तत उपकॢप्ता:। क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदा: सप्त जलधय:। सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्व्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् परित उपकल्पिता:। तेषु पुनर्ज्जम्बाकादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्

यथासंख्येन एकैकस्मिन्नेकमेवाधिपतिं विदधे। तस्य ह वा एते श्लोकाः।
"प्रियव्रतकृतं कर्म्म कोऽनुकुर्य्याद्विनेश्वरम्।
यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्तवारिधीन्॥"
छायां घ्नन् तमो निरस्यन्।
"भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः।
सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः॥"
एवं पितरि संप्रवृत्ते तदनुशासने वर्त्तमान आग्नीध्रो जम्बुद्वीपौकसः प्रजा औरसवद्धर्म्मावेक्षमाणः पर्य्यगोपायत्। तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्ब्बचित्तिं नामाप्सरसमभियापयामास। तस्यामु ह वा आत्मजान् स राजवर्य्य आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यक-हिरण्मय-कुरुभद्राश्वकेतुमालसंज्ञान् नव पुत्त्रानजनयत्। आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाविभागं जम्बुद्वीपवर्षाणि बुभुजुः। यस्मिन्नव वर्षाणि नवयोजनसहस्रायामानि अष्टभिर्मर्य्यादागिरिभिः सुविभक्तानि भवन्ति। एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसाहस्रं तावतान्तर्भूम्यां प्रविष्टः। उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्ब्बस्मात् पूर्ब्बस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एवाह्रसन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्। तथैवेलावृतमपरेण पूर्ब्बेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते।
भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः। मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लः सह्यो देवगिरिरृष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याताः। एतासामपो भारत्यः प्रजानामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति। चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णावेणा भीमरथी गोदावरी निर्व्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिरृषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूरोघवती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्ब्बेण सर्व्वा ह्येव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गश्च भवति॥ १॥ *॥ अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते। प्लक्षो जम्बुप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वस्तं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं यवसं सुभद्रं शान्तं क्षेममन्तमभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृमणा आङ्गीरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः॥ २॥ *॥ प्लक्षस्तु समानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्क्ते। यत्र ह वै शाल्मली प्लक्षायामा। तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत्। सुरोचनं सौमनस्यं रमणकं देववर्हं पारिभद्रमाप्यायनमभिज्ञातमिति। तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः। सुरसः शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्पवर्षः सहस्रश्रुतिरिति। अनुमती सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति॥ ३॥ *॥ एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथापूर्ब्बः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति। तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत्। वसुवसुदानदृढरुचिनाभिगुप्तसत्यव्रतविप्रनामदेवनामभ्यस्तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तैव। बभ्रुश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्धरोमा द्रविण इति। रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति॥ ४॥*॥ तथा बहिः क्रौञ्चद्वीपो द्विगुणः समानेन क्षीरोदेन परित उपक्लृप्तः। वृतो यथा कुशद्वीपो घृतोदेन। यस्मिन् क्रौञ्चनामा पर्व्वतराजो द्वीपनामनिर्व्वर्त्तक आस्ते। तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम। आत्मा मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुताः। तेषां वर्षगिरयः सप्तैव नद्यश्चाभिख्याताः। शुक्लो वर्द्धमानो भोजन उपवर्हणो नन्दो नन्दनः सर्व्वतोभद्र इति। अभया अमृतौघा आर्य्यका तीर्थवती रूपवती पवित्रवती शुक्लेति॥ ५॥*॥ एवं परस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन दधिमण्डोदेन परीतः। यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशकः। यस्य ह महासुरभिगन्धस्तं द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वाधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश। एतेषां वर्षमर्य्यादागिरयो नद्यश्च सप्त सप्तैव। ईशान उरुशृङ्गो बलभद्रः शतकेशरः सहस्रस्रोता देवपालो महानस इति। अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निजधृतिरिति॥ ६॥*॥ एवमेव दधिमण्डोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतः। तद्द्वीपमध्ये मानसोत्तरनामैक एवार्व्वाचीनपराचीनवर्षयोर्मर्य्यादाचलः अयुतयोजनोच्छ्रायायामः। यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानाम्। यदुपरिष्टात् सूर्य्यरथस्य मेरुं परिक्रामतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति। तद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स्वयं पूर्ब्बजवद्भगवत्कर्म्मशील आस्ते। तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्म्मकेण कर्म्मणाराधयन्ति॥ ७॥ इति श्रीभागवते ५ स्कन्धे १। २। १६। १८। २० अध्यायाः॥ *॥ अपि च।
"कन्ये द्वे दश पुत्राश्च सम्राट् कुक्षिश्च ते उभे।
ते सर्व्वे भ्रातरः शूराः प्रजापतिसमा दश॥
अग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्व्वपुः।
ज्योतिष्मान् द्युतिमान् हव्यः सवनो मित्र एव च।
मेधाग्निबाहुमित्रास्तु त्रयो योगपरायणाः।
जातिस्मरा महाभागा न राज्याय मनो दधुः॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान्।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे॥
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः कृतः॥
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये।
क्रौञ्चद्वीपे द्युतिमन्तं हव्यं शाकाह्वये सुतम्॥
पुष्कराधिपतिञ्चैव सवनं कृतवान् सुतम्।
महावीतो धातुकिश्च पुष्कराधिपतेः सुतौ॥
द्विधा कृत्वा ततो वर्षं पुष्करे स न्यवेशयत्।
हव्यस्य पुत्राः सप्तासन्नामतस्तान्निबोध मे॥
जलदश्च कुमारश्च सुकुमारो मणीवकः।

कुशोत्तरोऽथ मोदाकी सप्तमस्तु महाद्रुमः ।
तन्नामाङ्कानि वर्षाणि शाकद्वीपे चकार सः ।
तथा द्युतिमतः सप्त पुत्त्रांश्चापि निबोध मे ॥
कुशलो मनोऽनुगश्चोष्णः प्रधानश्चान्धकारकः ।
मुनिश्च दुन्दुभिश्चैव सप्तमस्तु तथापरः ॥
तेषां स्वनामधेयानि क्रौञ्चद्वीपे तथाभवन् ॥*॥
ज्योतिष्मतः कुशद्वीपे पुत्त्रनामाङ्कितानि वै ॥
तत्रापि सप्त वर्षाणि तेषां नामानि मे शृणु ।
उद्भिदं धेनुमच्चैव द्वैरथं लम्बमेव च ॥
धृतिमत् प्रभाकरञ्चैव कपिलञ्चापि सप्तमम् ।
वपुष्मतः सुताः सप्त शाल्मलेशस्य चाभवन् ॥
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव महौघः सुप्रभस्तथा ॥
तथैव शाल्मले तेषां स्वनामानि तु सप्त वै ।
सप्तमेधातिथेः पुत्त्राः प्लक्षद्वीपेश्वरस्य ये ॥
तेषां नामाङ्कितैर्द्वीपैस्तद्वर्षं सप्तभिर्वृतम् ।
पूर्व्वं शान्तभयं वर्षं शिशिरन्तु सुखोदयम् ॥
आनन्दञ्च शिवञ्चैव क्षेमकञ्च तथा ध्रुवम् ।
प्लक्षद्वीपादिषुक्तेषु शाकद्वीपान्तिकेषु च ॥
ज्ञेयः पञ्चसु धर्म्मोऽथ वर्णाश्रमविभागजः ॥*॥
यानि किंपुरुषाद्यानि वर्ज्जयित्वा हिमाह्वयम् ॥
सुखमायुश्च रूपञ्च बलं धर्म्मश्च नित्यशः ।
पञ्चस्वेतेषु वर्षेषु सर्व्वं साधारणं स्मृतम् ॥*॥
आग्नीध्राय पिता पूर्व्वं जम्बुद्वीपं ददौ द्विज ।
तस्य पुत्त्रा बभूवुर्हि प्रजापतिसमा नव ॥
ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः ।
हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः ॥
रम्यश्च पञ्चमः पुत्त्रो हिरण्यः षष्ठ उच्यते ।
कुरुस्तु सप्तमस्तेषां भद्राश्वश्चाष्टमः स्मृतः ॥
नवमः केतुमालस्तु तन्नाम्ना वर्षसंस्थितिः ॥*॥
यानि किंपुरुषाद्यानि वर्ज्जयित्वा हिमाह्वयम् ॥
तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः ।
विपर्य्ययो न तेष्वस्ति जरामृत्युभयं न च ॥
धर्म्माधर्म्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ।
न वै चतुर्युगावस्था नाश्रमाः ऋतवो न च ॥*॥
आग्नीध्रसूनोर्नाभेश्च ऋषभोऽभूत् सुतो द्विज ।
ऋषभाद्भरतो जज्ञे वीरः पुत्त्रशताद्वरः ।
सोऽभिषिच्यर्षभः पुत्त्रं महाप्राव्रज्यमास्थितः ।
तपस्तेपे महाभागः पुलहाश्रमसंश्रयः ॥*॥
हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता ।
तस्माच्च भारतं वर्षं तस्य नाम्ना महात्मनः ॥
भरतस्याप्यभूत् पुत्त्रः सुमतिर्नाम धार्म्मिकः ।
तस्मिन् राज्यं समावेश्य भरतोऽपि वनं ययौ ॥
एतेषां पुत्त्रपौत्त्रैश्च सप्तद्वीपा वसुन्धरा ।
प्रियव्रतस्य पुत्त्रैस्तु भुक्ता स्वायम्भुवेऽन्तरे ॥
एष स्वायम्भुवः सर्गः कथितस्ते द्विजोत्तम ।
पूर्व्वमन्वन्तरेऽशस्य किमन्यत् कथयामि ते ॥”
इति मार्कण्डेयपुराणे स्वायम्भुवे मन्वन्तरे भुवन-
कोषः ॥ * ॥ अन्यच्च ।

सूत उवाच ।

“केतुमाले नराः काकाः सर्व्वे पनसभोजनाः ।
स्त्रियश्चोत्पलपत्राभा जीवन्ति च वर्षायुतम् ॥
भद्राश्वे पुरुषाः शुक्लाः स्त्रियश्चन्द्रांशुसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति वायुभोजनाः ॥*॥
रम्यके पुरुषा नार्य्यो रमन्त्यारजतप्रभाः ।
दशवर्षसहस्राणि शतानि दशपञ्च च ॥
जीवन्ति तत्र सत्त्वस्था न्यग्रोधफलभोजनाः ।
हिरण्मये हिरण्याभाः सर्व्वे च लकुचाशनाः ॥
एकादशसहस्राणि शतानि दशपञ्च च ।
जीवन्ति कुरुवर्षे तु श्यामाङ्गाः क्षीरभोजनाः ॥
सर्व्वे मिथुनजाताश्च नित्यं सुखनिषेविणः ।
चन्द्रद्वीपे महादेवं यजन्ति सततं शिवम् ॥
तथा किंपुरुषे विप्रा मानवा हेमसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति प्लक्षभोजनाः ॥
यजन्ति सततं देवं चतुर्म्मूर्त्तिं चतुर्मुखम् ।
ध्याने मनः समाधाय सदा वा भक्तिसंयुताः ॥*
तथा च हरिवर्षेऽपि महारजतसन्निभाः ।
दशवर्षसहस्राणि जीवन्तीक्षुरसाशिनः ॥
तत्र नारायणं देवं विश्वयोनिं सनातनम् ।
उपासते सदा विष्णुं मानवा विष्णुभाविताः ॥
तत्र चन्द्रप्रभं शुभ्रं शुद्धस्फटिकनिर्म्मलम् ।
विमानं वासुदेवस्य पारिजातवनाश्रितम् ॥
चतुर्द्वारमनौपम्यं चतुस्तोरणसंयुतम् ।
प्राकारैर्दशभिर्युक्तं सुगन्धञ्च सदुर्गमम् ॥
स्फाटिकैर्मण्डपैर्युक्तं देवराजगृहोपमम् ।
स्वर्णस्तम्भसहस्रैश्च सर्व्वतः समलङ्कृतम् ॥
हेमसोपानसंयुक्तं नानारत्नोपशोभितम् ।
दिव्यसिंहासनोपेतं सर्व्वशोभासमन्वितम् ॥
सरोभिः स्वादुपानीयैर्नदीभिश्चोपशोभितम् ।
नारायणपरैः शुद्धैर्वेदाध्ययनतत्परैः ॥
योगिभिश्च समाकीर्णं ध्यायद्भिः पुरुषं हरिम् ।
स्तुवद्भिः सततं मन्त्रैर्नमस्यद्भिश्च माधवम् ॥
तत्र देवादिदेवस्य विष्णोरमिततेजसः ।
राजानः सर्व्वकालन्तु महिमानं प्रकुर्व्वते ॥
गायन्ति चैव नृत्यन्ति विलासिन्यो मनोरमाः ।
स्त्रियो यौवनशालिन्यः सदा मण्डनतत्पराः ॥
इलावृते पद्मवर्णा जम्बूफलरसाशिनः ।
त्रयोदशसहस्राणि वर्षाणां वै स्थिरायुषः ॥
भारते तु स्त्रियः पुंसो नानावर्णाः प्रकीर्त्तिताः ।
नानादेवार्च्चने युक्ता नानाकर्म्माणि कुर्व्वते ॥
परमायुर्मतं तेषां शतं वर्षाणि सुव्रताः ।
नवयोजनसाहस्रं वर्षमेतत् प्रकीर्त्तितम् ॥
कर्म्मभूमिरियं विप्रा नराणामाधिकारिणाम् ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ॥
विन्ध्यश्च पारिपात्रश्च सप्तात्र कुलपर्व्वताः ।
इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गन्धर्व्वस्त्वथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपः सागरावृतः ॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरः ।
पूर्व्वे किराताश्चास्यान्ते पश्चिमे यवनास्तथा ॥
ब्राह्मणाः क्षत्त्रिया वैश्या मध्ये शूद्रास्तथैव च ।
इज्यायुधवणिज्याभिर्व्वर्त्तयन्त्यत्र मानवाः ॥
स्रवन्ते पावना नद्यः पर्व्वतेभ्यो विनिःसृताः ।
शतद्रुश्चन्द्रभागा च सरयूर्यमुना तथा ॥
इरावती वितस्ता च विपाशा देविका कुहूः ।
गोमती धूतपापा च बाहुदा च दृषद्वती ॥
कौशिकी लोहिता चैव हिमवत्पादनिःसृताः ।
वेदस्मृतिर्व्वेदवती व्रतघ्नी त्रिदिवा तथा ॥
पर्णाशा वन्दना चैव सदानीरा मनोरमा ।
चर्म्मण्वती तथानूपा विदिशा वेत्रवत्यपि ॥
शिप्रः शशिन्यपि तथा पारिपात्राश्रयास्तथा ।
नर्म्मदा सुरसा शोणा दशार्णा च महानदी ॥
मन्दाकिनी चित्रकूटा तामसा च पिशाचिका ।
चित्रोत्पला विपाशा च माञ्जना वालुवाहिनी ॥
हिमवत्पादजा नद्यः सर्व्वपापहरा नृणाम् ।
तापी पयोष्णी निर्विन्ध्या शीघ्रोदा च महानदी ॥
वेण्वा वैतरणी चैव बलाका च कुमुद्वती ।
तोया चैव महागौरी दुर्गा चान्तःशिला तथा ॥
विन्ध्यपादप्रसूतास्तु नद्यः पुण्यजलाः शुभाः ।
ऋषिकुल्या त्रिसामा च मन्दगा मन्दगामिनी ॥
रूपा पालाशिनी चैव ऋषिका वंशकारिणी ।
शुक्तिमत्पादसंजाताः सर्व्वपापहरा नृणाम् ॥
आसां नद्युपनद्यश्च शतशो द्विजपुङ्गवाः ।
सर्व्वाः पापहराः पुण्याः स्नानदानादिकर्म्मसु ॥
तास्विमे कुरुपञ्चाला मध्यदेशादयो जनाः ।
पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः ॥
औड्राः कलिङ्गमगधा दाक्षिणात्याश्च सर्व्वशः ।
तथा परान्ताः सौराष्ट्राः शूद्राभीरास्तथा-
र्व्वुदाः ॥
मालका मालवाश्चैव पारिपात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः शाल्वाः कल्पनिवा-
सिनः ॥
मद्रा रामास्तथाम्बष्ठाः पारसीकास्तथैव च ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ॥
चत्वारि भारते वर्षे युगानि कवयोऽब्रुवन् ।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ॥
यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महर्षयः ।
न तेषु शोको नायासो नोद्वेगः क्षुद्भयन्न च ॥
स्वस्थाः प्रजा निरातङ्काः सर्व्वदुःखविवर्ज्जिताः ।
रमन्ते विविधैर्भावैः सर्व्वाश्च स्थिरयौवनाः ॥”
इति कूर्म्मपुराणे ४४ अध्यायः ॥
अपरं वामनपुराणे १६ अध्याये द्रष्टव्यम् ॥*॥
प्रभवादिषष्टिवर्षाणि वत्सरशब्दे द्रष्टव्यानि । तत्र
षष्ठिधा पूज्या देवी यथा,—
“संवत्सरप्रमाणेन देव्यः हत्वा पुरो हि ताः ।
यष्टव्या विधिना तात सर्व्वकामप्रसिद्धिदाः ॥
महाभयविनाशाय महारिपुवधाय च ।
महाभ्युदयकामाय महासिद्धिफलाय च ।
पूजयेत् तद्वयजेद्देवीं षष्टिधा परमेश्वरीम् ॥
ऋतुनागजता पीडा यच्चरचोग्रहोद्भवा ।
संवत्सरमहादोषजन्मर्क्षमुपमर्द्दना ॥
केतूल्काशनिराहूतो भौमार्कसितभानुजाः ।
शमयेद्यजमानस्य देवीहोमरतस्य च ॥
मण्डलादिविधानेन महास्नानाभिषेचनैः ।
चन्द्रसंपूर्णपुष्पकंफलरत्नाभिपूजनैः ॥
मङ्गला मङ्गलं धत्ते विधिना पूजिता सुरे ॥

उत्पातक्षोभनिर्घातविक्षतानां शमाय च ।
कथयामि महाप्राज्ञ शृणुष्वैकमनाधुना ॥ * ॥
मङ्गला विजया भद्रा शिवा शान्तिर्धृतिः क्षमा ।
ऋद्धिर्वृद्धिर्मतिः सिद्धिस्तुष्टिः पुष्टिः श्रिया उमा ॥
दीप्तिः कान्तिर्यशो लक्ष्मीरीश्वरीति प्रकीर्त्तिता ।
विंशतान्योत्तमा देव्यः सत्त्वभावव्यवस्थिताः ॥
प्रथमं संस्थिता वत्स ! सर्व्वसिद्धिप्रदायिकाः ।२०
ब्राह्मी जयावती शाक्री अजिता चापराजिता ॥
जयन्ती मानसी माया दितिः श्वेता विमोहनी ।
शरण्या कौशिकी गौरी विमला ललितालसा ॥
अरुन्धती क्रिया दुर्गा राजसा इति वायुना ।
मध्यभागे स्थिता देव्यो शुभानामशुभापहा ।२०॥
काली रौद्री कपाली च घण्टाकर्णा मयूरिकी ।
बहुरूपा सुरूपा च त्रिनेत्रा रिपुहाम्बिका ॥
माहेश्वरी कुमारी च वैष्णवी सुरपूजिताः ।
वैवस्वती तथा घोरा कराली विकटादिभिः ॥
चर्च्चिका चेति धातुस्था देव्यस्त्रैलोक्यविश्रुताः ।
पूजितव्या मुनिश्रेष्ठ ! सर्व्वकामप्रसाधिकाः ।२०॥
सिद्धशासुरगन्धर्व्वचरयोगणैर्नुताः ।
भावकालाश्रयाः कार्य्यद्रव्यरूपफलप्रदाः ॥
प्रत्येकशः समस्ता वा कर्त्तव्या मुनिसत्तम ! ।
अथवा शुभभेदेन पञ्च पञ्च प्रपूजिताः ॥”
इति देवीपुराणे संवत्सरदेवताविंशतिविधिनामाध्यायः ॥ (वर्षके, त्रि । यथा, भागवते । ३ । २१ । २० ।
“नमाम्यभीक्ष्णं नमनीयपादं
सरोजमल्पीयसि कामवर्षम् ॥”)

वर्षकरी, स्त्री, (वर्षं तत्सूचनं रवेण करोतीति । वर्ष+कृ+टः । ङीप् ।) झिल्लिका । इति हेमचन्द्रः । ४ । २८२ ॥

वर्षकेतुः, पुं, (वर्षस्य वृष्टेः केतुरिव । सति वर्षे भूरिश उत्पन्नत्वादस्य तथात्वम् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (अलर्कवंशीयकेतुमतः पुत्रः । यथा, हरिवंशे । ३२ । ४० ।
“क्षेम्यस्य केतुमान् पुत्त्रो वर्षकेतुस्ततोऽभवत् ॥”)

वर्षकोषः, पुं, (वर्षस्य वत्सरस्य कोष इव । सर्व्ववर्षज्ञानवत्त्वात् तथात्वमस्य ।) दैवज्ञः । इति शब्दरत्नावली ॥ (वर्षस्य अन्तःस्थितफलकोष इव कोषः ।) माषः । इति शब्दमाला ॥

वर्षजं, त्रि, (वर्षात् जातमिति । जन+डः ।) वृष्टिजातम् । वत्सरजातम् । जम्बुद्वीपजातम् । द्वीपांशजातम् । मेघजातम् । इति वर्षशब्दपूर्व्वजनधातोर्डप्रत्ययेन निष्पन्नम् ॥

वर्षणं, क्ली, (वृष+ल्युट् ।) वृष्टिः । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेयपुराणे । १०४।२१।
“तमेव सुचतः सर्व्वं रसं वै वर्षणाय यत् ।
रूपमाप्यायकं भास्वंस्तस्मै मेघाय ते नमः ॥”)

वर्षणिः, स्त्री, (वृष+अनिः ।) वर्त्तनम् । क्षतिः । इत्युणादिकोषः ॥ क्रतुः । वर्षणम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

वर्षपर्व्वतः, पुं, (वर्षाणां भारतादीनां विभाजकः पर्व्वत इति मध्यलोपी समासः ।) वर्षविभाजकगिरिः । यथा,—
“हिमवान् हेमकूटश्च निषधो मेरुरेव च ।
चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः ॥”
इति हारावली ॥

वर्षपाकी, [न्] पुं, (वर्षे वर्षाकाले पाकोऽस्यास्तीति । वर्षपाक+इनिः ।) आम्रातकः । इति हेमचन्द्रः । ४ । २१८ ॥ (तथास्य पर्य्यायः ।
“आम्रातको वर्षपाकी ।” इति वैद्यकरत्नमालायाम् ॥)

वर्षपुष्पा, स्त्री, (वर्षे वर्षाकाले पुष्पं यस्याः ।) सहदेवीलता । इति राजनिर्घण्टः ॥ (सहदेवीलताशब्देऽस्या विवृतिर्ज्ञेया ॥)

वर्षप्रियः, पुं, (वर्षो वर्षणं प्रियं यस्य ।) चातकपक्षी । इति त्रिकाण्डशेषः ॥

वर्षवरः, पुं, (वरतीति । वर आवरणे+अच् । वर्षस्य रेतोवर्षणस्य वर आवरकः ।) षण्ढः । इत्यमरः । २ । ८ । ६ ॥ खोजा । इति भाषा ॥ (यथा, रत्नावल्याम् २ अङ्के ।
“नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ॥”)

वर्षवृद्धिः, स्त्री, (वर्षस्य वृद्धिराधिक्यं यत्र ।) जन्मतिथिः । इति स्मार्त्तव्याख्यादर्शनात् ॥ अथ जन्मतिथिकृत्यम् । तन्मलमासे न कर्त्तव्यं चान्द्रमासीयत्वेन सावकाशत्वात् । न च तस्य सौरमासीयत्वं तथात्वे तन्मासे तत्तिथेः कदाचिदप्राप्तौ तद्वर्षे तत्कृत्यलोपापत्तेः । न चेष्टापत्तिः प्रतिसंवत्सरन्तद्विधानात् । यथा ब्रह्मपुराणं गर्गश्च ।
“सर्व्वैश्च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रञ्च पितरौ तथा देवप्रजापतिः ।
प्रति संवत्सरञ्चैव कर्त्तव्यश्च महोत्सवः ॥”
स्नातैस्तिलस्नातैः । प्रजापतिर्ब्रह्मा । तथा च तत्तिथिमधिकृत्य ।
“तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥
मङ्गलपाणिभिः अभिप्रेतार्थसिद्धिर्मङ्गलं तद्धेतुतया गोरोचनादिकमपि मङ्गलं तेन घृतगुग्गुल्वादिपाणिभिरित्यर्थः । तथा च कृत्यचिन्तामणौ ।
“गुडदुग्धतिलान्नाद्यञ्जन्मन्येव बन्धनम् ।
गुग्गुलुं निम्बसिद्धार्थं दूर्व्वागोरोचनायुतम् ।
संपूज्य भानुविप्रेशौ महर्षि प्रार्थयेदिदम् ॥
चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ! ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥”
स्वनक्षत्रेति स्वनक्षत्रं अश्विन्याद्यन्यतमं तज्जन्मकालीननक्षत्रम् । नामकरणे तथा दर्शनात् ब्रह्मपुराणोक्तप्रणवादिनमोऽन्तेन नाम्नैव पूजाविधानाच्च । तदज्ञाने स्वनक्षत्राय नम इत्युल्लेख्यम् ॥ * ॥ पूजायामर्घ्यानन्तरं पाद्यमाह मत्स्यपुराणम् । अर्घ्यं पाद्यादिकञ्चैव मधुपर्कं प्रयोजयेत् । पाद्यानन्तरं अर्घ्यमाह नरसिंहपुराणम् । पाद्यञ्चैव तृतीयया चतुर्थ्यार्घ्यं प्रदापयेत् । तृतीयया पुरुषसूक्तीयतृतीयया ऋचा । उभयक्रमदर्शनादिच्छाविकल्पः । इति श्रीदत्तः ॥ * ॥ श्रीपतिव्यवहारनिर्णये ।
“नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम् ॥”
तथा ।
“द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम् ।
मार्कण्डेयं नरो भक्त्या पूजयेत् प्रयतस्तथा ॥
ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम् ।
प्रह्लादञ्च हनूमन्तं विभीषणमथार्चयेत् ॥”
रामोऽत्र परशुरामः । चिरजीवित्वाच्चर्य्यात् ।
द्रौणिरश्वत्थामा ॥ * ॥ तथा,—
“स्वनक्षत्रं जन्मतिथिं प्राप्य सम्पूजयेन्नरः ।
षष्ठीञ्च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥”
योगियाज्ञवल्क्यः ।
“ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्म्मसु ।
तद्विष्णोरिति मन्त्रेण स्नायादप्सु पुनः पुनः ॥
गायत्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै ॥”
ध्यायेत् स्मरेत् । स च मन्त्रः ।
“तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥”
वामनपुराणम् ।
“सर्व्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम् ।
नारायणं नमस्कृत्य सर्व्वकर्म्माणि कारयेत् ॥” * ॥
सङ्कल्पाकरणे निन्दामाह भविष्यपुराणम् ।
“सङ्कल्पेन विना राजन् ! यत्किञ्चित् कुरुते नरः ।
फलञ्चाप्यल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत् ॥”
ब्रह्मपुराणम् ।
“प्रणवादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनामसर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥
अनेनैव विधानेन गन्धपुष्पे निवेदयेत् ।
एकैकस्य प्रकुर्व्वीत यथोद्दिष्टं क्रमेण तु ॥”
गन्धपुष्पमात्रं पञ्चोपचाराद्यसम्भवे ।
“मन्त्राच्छतगुणं प्रोक्तं भक्त्या लक्षगुणोत्तरम् ।
भक्तिमन्त्रसमेतन्तु कोटि कोटि गुणोत्तरम् ॥
सर्व्वञ्च कर्म्मोपदेशकं दक्षिणादिभिरर्च्चयेत् ।
तथोपदेष्टारमपि पूजयेच्च ततो गुरुम् ।
न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया ॥”
इति मत्स्यपुराणवचनात् ॥ * ॥
ततः कर्म्मानन्तरं तिलहोमस्तु पूजितदेवतानामभिः कार्य्यः ।
“एकैका देवता राम समुद्दिश्य यथाविधि ।
चतुर्थ्यन्तेन धर्म्मज्ञ नाम्ना च प्रणवादिना ॥
होमद्वयमथैकैकं शतसंख्यन्तु होमयेत् ॥”
इति विष्णुधर्म्मोत्तरदर्शनात् ॥
एवं होमे स्वाहान्तता च मन्त्रस्य ।

"स्वाहावसाने जुहुयात् ध्यायन् वै मन्त्रदेवताम् ॥"
इति स्मृते: ॥

अशक्तौ तु देवीपुराणम् ।
"होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥" * ॥

स्कान्दे ।
"खण्डनं नखकेशानां मैथुनाध्वानमेव च ।
आमिषं कलहं हिंसां वर्षवृद्धौ विवर्ज्जयेत् ॥"
अध्वानं अध्वगमनम् । कलहमित्यत्र सङ्गरमिति क्वचित् पाठः । सङ्गरं युद्धम् । वर्षवृद्धौ जन्मदिने ॥ * ॥ वृद्धमनुः ।
"मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥"
जन्मनि पुत्रजन्मनि । ज्योतिषे ।
"स्नात्वा जन्मदिने स्त्रियं परिहरन् प्राप्नोत्यभीष्टां श्रियं
मत्स्यान्भोजयतो द्विजाय ददतोऽप्यायुश्चिरं वर्द्धते ।
शक्तून् खादति यश्च तस्य रिपवो नाशं प्रयान्ति ध्रुवं
भुङ्क्ते यस्तु निरामिषं स हि भवेज्जन्मान्तरे पण्डित: ॥" * ॥

दीपिकायाम् ।
"जन्मर्क्षयुक्ता यदि जन्ममासे
यस्य ध्रुवं जन्मतिथिर्भवेच्च ।
भवन्ति तद्वत्सरमेव याव-
न्नैरुज्यसम्मानसुखानि तस्य ॥
शतान्तकुजयोर्व्वारे यस्य जन्मतिथिर्भवेत् ।
अशुभयोगसंप्राप्तौ विघ्नस्तस्य पदे पदे ॥"
शतान्तकुजयो: शनिमङ्गलयो: ।
"तस्य सर्व्वौषधिस्नानं ग्रहविप्रसुरार्च्चनम् ।
ग्रहानुद्दिश्य होमो वा ग्रहाणां प्रीतिमिच्छता ॥
सौरारयोर्द्दिने मुक्ता देयाशुचे तु काञ्चनम् ॥
मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।
शटी चम्पकमुस्तञ्च सर्व्वौषधिगण: स्मृत: ॥"
रजनीद्वयं हरिद्रा दारुहरिद्रेति । एतेषां पत्रादीनां ग्रहणम् । कषायावयवग्रहणे मत्स्यपुराणविष्णुधर्म्मोत्तरयोस्तथा दर्शनात् । तद्यथा,—
"एषां पञ्चानि सारानि मूलानि कुसुमानि च ।
एवमादीनि चान्यानि कषायाख्यो गण: स्मृत: ॥"
आयुर्व्वेदोक्ता परिभाषा ।
"अङ्गेऽप्यनुक्ते विहितन्तु मूलं
भागेऽप्यनुक्ते समता विधेया ॥"
तत्र क्रम: । तिलोद्वर्त्तनम् । तिलयुक्तजलेन स्नानम् । नववस्त्रपरीधानम् । गुग्गुलुनिम्बसिद्धार्थदूर्व्वा-गोरोचनात्मकजन्मग्रन्थिं दक्षिणे पाणौ बध्नीयात् । गुरुदेवाग्निविप्राश्च पूजनीया: । स्वनक्षत्रं पूजनीयम् । अत्र च । हस्ता स्वाती श्रवणा धनिष्ठे । मृगशिरो नपुंसि स्यात् । पुंसि च पुनर्व्वसुपुष्यौ । मूलं

त्वष्ट्री स्त्रियां शेषा: । इत्यनेन लिङ्गनिर्णय: ॥ * ॥ जन्मनक्षत्रादीनां गोपनमाह विष्णुधर्म्मोत्तरे ।
"गोपयेज्जन्मनक्षत्रं धनसारं गृहे मलम् ।
प्रभोरप्यपमानञ्च तस्य दुश्चरितञ्च यत् ॥"
धनसारं धनश्रेष्ठम् । मलं छिद्रम् ॥ पितरौ प्रजापति: सूर्य्यो गणपतिर्मार्कण्डेयश्च पूजनीय: । तत्र पार्थनमन्त्रौ ।
"चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥"
ततो व्यासपरशुरामाश्वत्थामकृपबलिप्रह्लादहनूमद्विभीषणा: पूजनीया: । षष्ठ्यपि पूजनीया ।
"त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णुशिवै: सार्द्धं रक्षां कुर्व्वन्तु तानि मे ॥"
इति मत्स्यपुराणीयं रक्षार्थं पठेत् ॥ * ॥
पितृमातृपादग्रहणक्रमस्तु विष्णुपुराणाद्‌ज्ञेय: । यथा,—
"कृष्णोऽपि वसुदेवस्य पादौ जग्राह सत्वर: ।
देवक्याश्च महाबाहुर्बलदेवसहायवान् ॥"
एवञ्च ।
"सहस्रन्तु पितुर्माता गौरवेणातिरिच्यते ॥"
इति मनुवचने पितुरपेक्षया यत् सहस्रं मातुर्गौरवमुक्तं यत् पोषणरक्षार्थम् । अतएव मनु: ।
"मृते भर्त्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥"
वाच्यो गर्हणीय: ॥ * ॥ गुड़दुग्धतिलपाने तु मन्त्र: ।
"सतिलं गुड़संमिश्रमञ्जल्यर्द्धमितं पय: ।
मार्कण्डेयवरं लब्ध्वा पिबाम्यायुष्यहेतवे ॥"
अत्र वैदिकेतरमन्त्रपाठे शूद्रादेरप्यधिकार: । जन्मतिथे: प्रागुक्तब्रह्मपुराणीयत्वात् पौर्णमास्यन्तमासादर: ॥ * ॥ जन्मतिथेरुभयदिनलाभे तु देवीपुराणम् ।
"युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥
घस्रद्वये जन्मतिथिर्यदि स्यात्
पूज्या तदा जन्मभसंयुतैव ।
असङ्गता भेन दिनद्वयेऽपि
पूज्या परा या भवतीह यस्मात् ॥"
भं नक्षत्रम् । परवचनं वृद्धगार्ग्यमार्कण्डेऽपि । पूर्व्वाह्णे तिथिनक्षत्रलाभ एवेदं लभ्यते ।
"नक्षत्रे खण्डिते येन प्राप्त: कालस्तु कर्म्मण: ।
नक्षत्रकर्म्माण्यत्रैव तिथिकर्म्म तथैव च ॥"
इति वृहस्पतिवचनात् ॥
खण्डिते खण्डद्वययुक्ते येन नक्षत्रखण्डेन विहितकाल: प्राप्त: । नक्षत्रद्वैधे तु बौधायनमार्कण्डेयौ ।
"तन्नक्षत्रमहोरात्रं यस्मिन्नस्तं गतो रवि: ।
यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं स्मृतम् ॥"
इति तिथ्यादितत्त्वम् ॥

वर्षा:, स्त्री भूम्नि, (वर्षो वर्षणमस्त्यासु इति । वर्ष + अर्शआदित्वात् अच् । टाप् । यद्वा, व्रियन्ते इति । वृ + "वृतॄवदीति ।" उणा० ३ । ६२ । इति स: । ततष्टाप् ।) स्वनामख्यात ऋतु: । तत्पर्य्याय: । प्रावृट् २ । इत्यमर: । १ । ४ । १९ ॥ घनकाल: ३ जलार्णव: ४ प्रवृट् ५ मेघागम: ६ घनाकर: ७ । इति शब्दरत्नावली ॥ प्रावृषा ८ । इति त्रिकाण्डशेष: ॥ स च ऋतु: सौरश्रावणभाद्रमासद्वयात्मक: । आषाढ़ादिमासचतुष्टयात्मकश्च । आद्यस्य प्रमाणम् । यथा । तपस्तपस्यौ शैशिरावृतु: । मधुश्च माधवश्च वासन्तिकावृतु: । शुक्रश्च शुचिश्च ग्रैष्मावृतु: । अयेतदुदगयनं देवानां दिनम् । नभाश्च नभस्यश्च वार्षिकावृतु: । इषश्च ऊर्ज्जश्च शारदावृतु: । सहाश्च सहस्यश्च हैमन्तिकावृतु: । अयेतद्दक्षिणायनं देवानां रात्रि: । इति मलमासतत्त्वधृता श्रुति: ॥ शेषस्य प्रमाणं तत्र चातुर्मास्यव्रतनियमश्च यथा । वाराहे ।
"आषाढ़शुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तच्चीर्णं चातुर्मास्यं व्रतं नर: ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तद्‌समापयेत् ॥"
मात्स्ये ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुस्वरो भवेन्नित्यं नरो गुड़विवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्ग: प्रजायते ।
कटुतैलपरित्यागात् शत्रुनाश: प्रजायते ॥
लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ।
सदा मुनि: सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निराधिर्नीरुगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणान्नखलोम्नाञ्च गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ॥
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ।
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ॥
नमो नारायणायेति जप्तानशनजं फलम् ।
पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम् ॥
एवमादिव्रतै: पार्थ तुष्टिमायाति केशव: ॥"
सनत्कुमार: ।
"इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव यद्यपूर्णे त्वहं म्रिये ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥"
समाप्तौ च ।
"इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
न्यूनं सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ॥" * ॥
अत्रैव यतिमधिकृत्य काठकगृह्यम् ।
"एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥"

एतदंशकविषयम्। ऊर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी इति शङ्खोक्तेः। इति तिथ्यादितत्त्वम्॥ वर्षर्त्तौ वर्णनीयानि यथा,—
"वर्षासु घनशिखिस्मयहंसगमाः पङ्ककन्दलोद्भेदौ।
जातीकदम्बकेतकझञ्झानिलनिम्नगाहलिप्रीतिः॥"
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम्॥
(एतत्कालजन्यादिकं यथा,—
"सघनवारिदवारिसमाकुला
निखिलभूः प्रबलोदकपूरिता।
समदवातकरा विदिशो दिशो
मुदितकीटसमिप्रभवा मही॥
नीलशस्यहरितोज्ज्वला मही
कुल्यकासलिलसंप्लुता सरित्।
इन्द्रगोपकविराजिता धरा
पङ्कभूषणविभूषिता च सा॥
चञ्चौ कूजति कानने च सरसौ स्नानाम्बुपूर्णा तथा
हंसा मानसमाश्रयन्ति कमलान्यम्भागता यान्ति च॥
गर्ज्जन्मेघमहेन्द्रकन्दरदरीशस्याहता श्यामला
भात्येवं पवनस्य कोपनकरो वर्षाऋतुः शोभितः॥"
"किञ्चिद्घर्म्मो भवेदत्र शस्यानां दृढता भवेत्।
बहुशस्या भवेद्धात्री वारिपूर्णा सरिन्नदाः॥
बहूदकधरा मेघा बहुदृष्टा घनस्वनाः।
एवं गुणसमायुक्ता वर्षा ज्ञेया ऋतूत्तमाः॥
तासु वातकफौ क्रुद्धौ जायेते हि नृणां भृशम्।
इति ज्ञात्वा भिषक् श्रेष्ठः कुर्य्यादस्य प्रतिक्रियाम्॥
स्वेदनं मर्द्दनं पथ्यं निर्व्वाते शयनन्तथा।
गौरवामारतं शस्तं व्यायामः क्रमविक्रमः॥
कट्वम्लक्षारमधुराः सेव्या वातकफापहाः।
निरूहा वस्तिकर्म्माद्याः कफवातरुजापहाः॥"
इति हारीते प्रथमे स्थाने चतुर्थेऽध्याये॥
"आदानग्लानवपुषामग्निः सन्नोऽपि सीदति।
वर्षासु दोषैर्दुष्यन्ति तेऽम्बुलम्बाम्बुदेऽम्बरे॥
सतुषारेण मरुता सहसा शीतलेन च।
भूबाष्पेणाम्लपाकेन मलिनेन च वारिणा॥
वह्निनैव च मन्देन तेष्वित्यन्योन्यदूषिषु।
भजेत् साधारणं सर्व्वमूष्मणस्तेजनञ्च यत्॥
आस्थापनं शुद्धतनुर्जीर्णं धान्यं रसान् कृतान्।
जाङ्गलं पिशितं यूषान् मध्वरिष्टं चिरन्तनम्॥
मस्तु सौवर्च्चलाढ्यं वा पञ्चकोलावचूर्णितम्।
दिव्यं कौपं शृतञ्चाम्भो भोजनन्त्वतिदुर्द्दिने॥
व्यक्ताम्ललवणस्नेहं संशुष्कं क्षौद्रवल्लघु।
अपादचारी सुरभिः सततं धूपिताम्बरः॥
हर्म्यपृष्ठे वसेद्बाष्पशीतशीकरवर्ज्जिते।
नदीजलोदमन्थाहःस्वप्नायासातपांस्त्यजेत्॥"
इति वाभटे सूत्रस्थाने तृतीयेऽध्याये॥)
वर्षांशः, पुं, (वर्षस्य वत्सरस्य अंशः।) माघः। इति त्रिकाण्डशेषः॥

वर्षाघोषः, पुं, (वर्षासु घोषो महान् शब्दोऽस्य।) महामण्डूकः। इति राजनिर्घण्टः॥
वर्षाङ्गः, पुं, (वर्षस्य वत्सरस्य अङ्गमिव। अभिधानात् पुंस्त्वम्।) मासः। इति हारावली। २८॥
वर्षाङ्गी, स्त्री, (वर्षासु अङ्गं यस्याः। तत्र जाताङ्कुरवद्‌र्ङ्गनादस्यास्तथात्वम्।) पुनर्नवा। इति शब्दरत्नावली॥ (विषयोऽस्याः पुनर्नवाशब्दे ज्ञातव्यः॥)
वर्षाभवः, पुं, (वर्षासु भवतीति। भू+अच्। वर्षासु भव उत्पत्तिर्यस्य वा।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ वर्षाजाते, त्रि॥
वर्षाभूः, पुं, (वर्षासु भवतीति। भू+क्विप्।) भेकः। इत्यमरः। १। १०। २४॥ (अस्य पर्य्यायो यथा,—
"मण्डूकः प्लवगो भेको वर्षाभूर्द्दर्दुरो हरिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) इन्द्रगोपः। इति राजनिर्घण्टः॥ भूलता। इति मेदिनी। भे, १८॥
वर्षाभूः, स्त्री, (वर्षासु भवतीति। भू+क्विप्।) पुनर्नवा। इति मेदिनी। भे, १८॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये।
"तिलपर्णिकावर्षाभूचित्रमूलकपोतिकाजशुनपलाण्डुकलायप्रभृतीनि॥") भेकी। इति भरतधृतरूपरत्नाकरः॥ वर्षाभवे, त्रि॥
वर्षाभ्वी, स्त्री, (वर्षाभू+ङीप्।) भेकी। इत्यमरः। १।१०।२४॥ पुनर्नवा। इत्यमरमाला भागुरिश्च॥
वर्षामदः, पुं, (वर्षासु माद्यतीति। मद्+अच्।) मयूरः। इति केचित्॥
वर्षाम्भःपारणव्रतः, पुं, (वर्षाम्भो वृष्टिजलं तस्य पारणं उपवासान्ते पानं व्रतमिव यस्य।) चातकपक्षी। इति केचित्॥
वर्षारात्रः, पुं, (वर्षाणां रात्रिः। ततः समासान्तोऽच्।) वर्षाकालीनरात्रिः। इति पुंलिङ्गसंग्रहटीकायां भरतः॥
वर्षार्च्चिः, [स्] पुं, (वर्षासु अर्च्चिर्दीप्तिरस्य।) मङ्गलग्रहः। इति शब्दरत्नावली॥
वर्षालङ्कायिका, स्त्री, एला। इत्यमरटीकायां भरतः॥
वर्षावसानः, पुं, (वर्षाणामवसानमत्र।) शरत्कालः। इति राजनिर्घण्टः॥
वर्षिकं, त्रि, वर्षासम्बन्धि। वर्षसम्बन्धि। वर्षाशब्दात् वर्षशब्दाच्च परेण ष्णिकप्रत्ययेन निष्पन्नम्॥
वर्षिष्ठः, त्रि, अतिशयवृद्धः। अयमनयोरतिशयेन वृद्धः इत्यर्थे वृद्धस्थाने वर्षादेशे इष्ठप्रत्ययेन निष्पन्नः॥
वर्षीयान्, [स्] त्रि, (अयमनयोरतिशयेन वृद्धः। वृद्ध+ईयसुन्। वर्षादेशः।) अतिवृद्धः। तत्पर्य्यायः। दशमी २ ज्यायान् ३। इत्यमरः। ३। २। २३४॥ (यथा,—
"आषोड़शाद् भवेद्बालस्तरुणस्तत उच्यते।
वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम्॥"
इति स्मृतिः॥)

वर्षुकः, त्रि, (वर्षति तच्छील इति। वृष+"लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्।" ३। २। १५४। इति उकञ्।) वर्षणकर्त्ता। वृषधातोर्णुकप्रत्ययेन निष्पन्नः॥ (यथा, भट्टी। २। १७।
"जग्मुः प्रसादं द्विजमानसानि
द्यौर्वर्षुका पुष्पचयं बभूव।
निर्व्याजमिज्या ववृते वचश्च
भूयो बभाषे मुनिना कुमारः॥")
वर्षुकाब्दः, पुं, (वर्षुकश्चासौ अब्दश्चेति कर्म्मधारयः।) वर्षणशीलमेघः। इति जटाधरः॥
वर्षेजः, त्रि, (वर्षे जायते इति। जन+डः। सप्तम्या अलुक्।) वर्षाकालजातः। वत्सरजातः। सप्तम्यन्तवर्षशब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नः॥
वर्षोपलः, पुं, (वर्षाणामुपलः।) मेघभवशिला। करका। इत्यमरः। १। ३। १२॥ (यथा, बृहत्संहितायाम्। ८९। २४।
"वर्षोपलवज्राशनिवायुस्कन्धाच सप्तमाद्भवनम्।
ह्रियते किल खाद्दिग्येस्तडित्प्रभं मेघसम्भूतम्॥")
वर्ष्म, [न्] क्ली, (वर्षति वृष्यते वेति। वृष्+मनिन्।) शरीरम्। (यथा, कथासरित्सागरे। २। ५।
"ददर्श च समीपेऽस्य पिशाचानां शतद्वयम्।
काणभूतिं पिशाचं तं वर्ष्मणा शालसन्निभम्॥")
प्रमाणम्। इत्यमरः। ३। ३। १२३॥ प्रमाणमत्रोन्नतिरिति स्वामी॥ (यथा, महाभारते। १। ३१। ८।
"अपापश्यद्दषीन् ह्रस्वान् अङ्गुष्ठोदरवर्ष्मणः।
पलाशवृन्तिकामेकां वहतः संहतान् पथि॥")
इयत्ता। इति भरतः॥ अतिसुन्दराकृतिः। इति मेदिनी। ने, १२८॥ (उन्नते स्थिरे च, त्रि। यथा, ऋग्वेदे। १०। २८। २।
"सरोधदुक्षभक्तिम्भदृज्ञो
वर्ष्मन्तस्थौ वरिमन्ना पृथिव्याः।"
"वर्ष्मन्शब्द उन्नतवचनः स्थिरवचनो वा।"
इति तद्भाष्ये सायणः॥ वर्षीयान्। यथा, भागवते। ५। १८। ३०।
"ॐ नमो भगवतेऽकूपाराय सर्व्वसत्त्वगुणविशेषणाय नमोऽनुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमोऽवस्थानाय नमस्ते॥" "वर्ष्मणे वर्षीयसे।" इति तट्टीकायां श्रीधरः॥)
वर्ष्मा, स्त्री, शरीरम्। इति द्विरूपकोषः॥
वर्हं, क वधे। दीप्तौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-वधे सक०-दीप्तौ अक०-सेट्।) रेफोपधः। क, वर्हयति। इति दुर्गादासः॥
वर्हं, ङ श्रैष्ठ्ये। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ङ, वर्हते अग्नी श्रेष्ठः स्यादित्यर्थः॥
व(ब)र्हं, क्ली, (वर्हयति दीप्यते इति। वर्ह+अच्।) मयूरपिच्छम्। इत्यमरः। २। ५। ३१॥ (यथा, महाभारते। १२। १२०। ४।

"यथा बर्हाणि चित्राणि बिभर्त्ति भुजगाशनः।
तथा बहुविधं राजा रूपं कुर्व्वीत धर्म्मवित्॥")
ग्रन्थिपर्णम्। इति भरतः॥ (बर्हतीति। बृह वृद्धौ+अच्।) पत्रम्। इति शब्दरत्नावली॥ (यथा, रघुः। ६। १७।
"विलासिनी विभ्रमदन्तपत्र-
मापाण्डुरं केतकबर्हमन्यः।
प्रियानितम्बोचितसन्निवेशै-
र्विपाटयामास युवा नखाग्रैः॥")
परीवारः। इति हेमचन्द्रः॥

बर्हणं, क्ली, (बर्हतीति। बृह वृद्धौ+ल्युः। बर्हयति शोभते इति। बर्ह दीप्तौ+ल्युर्वा।) पत्रम्। इति शब्दरत्नावली॥

ब(व)र्हिः [स्], पुं, (बृंहति वर्द्धते इति। बृहि वृद्धौ+"बृंहेर्नलोपश्च।" उणा० २।११०। इति इसिः नलोपश्च।) अग्निः। इति मेदिनी। से, ३६॥ दीप्तिः। इत्युणादिकोषः॥ यज्ञः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे। ७। ७५। ८।
"नूनो गोमद्वीरवद्धेहि रत्न-
मुषो अश्वावत् पुरुभोजो अस्मे।
मानो बर्हिः पुरुषता निदेक-
र्यूयं पातस्वस्तिभिः सदा नः॥"
"नोऽस्माकं बर्हिर्यज्ञम्।" इति तद्भाष्ये सायणः॥)
चित्रकम्। इत्यमरः॥ (हविर्धानस्य पुत्रः। यथा, भागवते। ६। १२। १३।
"हविर्धानस्तु तस्यापि बर्हिस्तस्मात् शत-
क्रतुः॥")

ब(व)र्हिः [स्], पुं, क्ली, (बृंहति वर्द्धते इति। बृहि वृद्धौ+"बृंहेर्नलोपश्च।" उणा० २। ११०। इति इसिः नलोपश्च।) कुशः। इति मेदिनी। से, ६३॥ (यथा, कुमारे। १। ६१।
"अवचितबलिपुष्पा वेदिसम्मार्गदक्षा
नियमविधिजलानां बर्हिषाञ्चोपनेत्री॥")

बर्हिः [स्] क्ली, (बृंहतीति। बृहि वृद्धौ+इसिः नलोपश्च।) ग्रन्थिपर्णम्। इति शब्दरत्नावली॥

बर्हिःपुष्पं, क्ली, (बर्हिर्दीप्तिस्तद्युक्तं पुष्पमस्य।) ग्रन्थिपर्णम्। इत्यमरटीकायां भरतः॥

बर्हिःशुष्मा [न्], पुं, (बर्हिषा कुशेन बर्हिषि यज्ञे वा शुष्म तेजो यस्य।) अग्निः। इत्यमरः। १।१।५७॥

बर्हिःष्ठं, क्ली, (बर्हिरिव तिष्ठतीति। स्था+कः।) बर्हिष्ठम्। ह्रीवेरम्। इत्यमरभरतौ॥

बर्हिकुसुमं, क्ली, (बर्हि बर्हयुक्तं कुसुमं यस्य।) ग्रन्थिपर्णम्। इति शब्दचन्द्रिका॥

ब(व)र्हिणः, पुं, (बर्हमस्यास्तीति। बर्ह+"फलबर्हाभ्यामिनच्।" इति इनच्। यद्वा "बहुलमन्यत्रापि।" उणा० २।४९। इत्यत्र बर्ह बल्ह प्राधान्ये। बर्हिणो मयूरः। इत्युज्ज्वलदत्तोक्त्या इनच्।) मयूरः। इत्यमरः। २। ५। ३०॥ (यथा, मनौ। १२। ६५।
"छुछुन्दरिः शुभान् गन्धान् पत्रशाकन्तु बर्हिणः।
श्वाविन् कृतान्नं विविधमकृतान्नन्तु शल्लकः॥"

क्ली। तगरम्। तत्पर्य्यायो यथा,—
"कालानुसार्य्यं तगरं कुटिलं मधुरं नतम्।
अपरं पिण्डतगरं दण्डहस्ती च बर्हिणम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

बर्हिणवाहनः, पुं, (बर्हिणो मयूरो वाहनं यस्य।) कार्त्तिकेयः। इति हलायुधः॥

बर्हिध्वजा, स्त्री, (बर्ही ध्वजो वाहनं यस्याः।) चण्डी। इति त्रिकाण्डशेषः॥

बर्हिपुष्पं, क्ली, (बर्हि बर्हशालि पुष्पं यस्य।) ग्रन्थिपर्णम्। इत्यमरः। २। ४। १३०॥

बर्हिर्ज्योतिः, [स्] पुं, (बर्हिषि यज्ञे ज्योतिरस्य।) वह्निः। इति हेमचन्द्रः। ४। १६४।

बर्हिर्मुखः, पुं, (बर्हिरग्निर्मुखं यस्य।) देवता। इत्यमरः। १। १। ६॥

बर्हिषदः, [द्] पुं, (बर्हिषि यज्ञे कुशासने वा सीदन्ति ये ते। बर्हिस्+सद्+क्विप्। पृषोदरादित्वात् साधुः।) पितृगणविशेषः। यथा,
"अयज्वानश्च यज्वानः पितरो ब्रह्मणः सुताः।
अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः॥"
इति कौर्म्मे १२ अध्यायः॥

अपि च।
"अपसव्यं ततः कृत्वा सव्यं जानु च भूतले।
अग्निष्वात्तांस्तथा सौम्यान् हविष्मन्तस्तथोष्मपान्॥
सुकालिनो बर्हिषद आज्यपांस्तर्पयेत्ततः।
तर्पयेच्च पितॄन् भक्त्या सतिलोदकचन्दनैः॥
दर्भपाणिस्तु विधिना हस्ताभ्यां तर्पयेत्ततः॥"
अत्र केचित् पितृधर्म्मातिदेशात् दिव्यपितॄणामपि अञ्जलित्रयदानम्। तदसत्।
"कव्यवालं नलं सौम्यं यममर्य्यमणं तथा।
अग्निष्वात्ताः सोमपाश्च बर्हिषदः स्वत स्वत॥"
इति छन्दोगपरिशिष्टेन विशिष्टैकाञ्जलिविधानात्। इत्याह्निकतत्त्वम्॥ (पृथुवंशजस्य हविर्द्धानेः पुत्रः। यथा, भागवते। ४।२४।८—९।
"हविर्द्धानाद्धाविर्द्धानिर्विदुरासूत षट्सुतान्।
बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम्॥
बर्हिषत्सु महाभागो हविर्द्धानिः प्रजापतिः।
क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह॥"
बर्हिषि यज्ञे सीदतीति। यज्ञस्थे, त्रि। यथा, ऋग्वेदे। २। ३। ३।
"स आ वह मरुतां शर्धो अच्युत-
मिन्द्रं नरो बर्हिषदं यजध्वम्॥")

बर्हिश्केशः, पुं, (बर्हिर्दीप्तिरेव केश इव यस्य।) अग्निः। इति शोचिष्केशशब्ददर्शनात्॥

बर्हिष्ठं, क्ली, (बर्हिषि तिष्ठतीति। स्था+कः। अम्बाम्बेति षत्वम्।) ह्रीवेरम्। इत्यमरः॥ (यथा, सुश्रुते उत्तरतन्त्रे ११ अध्यायः।
"लेहं विदध्यादथवाप्यलेपं
बर्हिष्ठशुण्ठीसुरकाष्ठकुष्ठैः॥"
त्रि, वृद्धतमः। इति सायणः। यथा, ऋग्वेदे। ३। १३। १।
"प्रवो देवायाग्नये बर्हिष्ठमर्च्चास्मै॥")

ब(व)र्ही, [न्] पुं, (बर्हमस्यास्तीति। बर्ह+इनिः।) मयूरः। इत्यमरः॥ (यथा, ऋतुसंहारे। २। ६।
"सदा मनोज्ञाम्बुदनादसोत्सुकं
विभाति विस्तीर्णकलापशोभितम्।
सविभ्रमालिङ्गनचुम्बनाकुलं
प्रवृत्तनृत्यं कुलमद्य बर्हिणाम्॥"
प्राधागर्भसम्भूतः कश्यपपुत्रविशेषः। यथा, महाभारते। १। ६५। ४७।
"सिद्धः पूर्णश्च बर्ही च पूर्णायुश्च महा-
यशाः॥")

बल, भि इ संवरणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) भि, बलयति बालयति। इ, बलते धनं लोकः संवृणोतीत्यर्थः। इति दुर्गादासः॥

बलभिः, } स्त्री, (बलभि+कृदिकारादिति वा
बलभी, } ङीष्।) वडभी। इति शब्दरत्नावली अमरटीका च॥ (यथा, कथासरित्सागरे। ८७। १२।
"हर्म्यप्रासादवलभीष्वन्विष्यन् सोऽभ्रमन्निशि॥"
पुरीविशेषः। यथा, भट्टिः। २३। ३५।
"काव्यमिदं विहितं मया वलभ्यां
श्रीधरसेननरेन्द्रपालितायाम्।
कीर्त्तिरतो भवतान्नृपस्य तस्य
क्षेमकरः क्षितिपो यतः प्रजानाम्॥")

बलयः, पुं क्ली, (बलते आवृणोति हस्तादिकमिति। बल्+"बलिमलितनिभ्यः कयन्।" उणा० ४। ९९। इति कयन्।) स्वर्णादिरचितप्रकोष्ठाभरणम्। बाला इति भाषा। तत्पर्य्यायः। आवापकः २ परिहार्य्यः ३ कटकः ४। इत्यमरः॥ पारिहार्य्यः ५ शंखकः ६। इति शब्दरत्नावली॥ कम्बुः ७ कङ्कणम् ८। इति जटाधरः॥ (यथा, रामायणे। २। ३२। ५।
"सहेमसूत्रैर्म्मणिभिः केयूरैर्व्वलयैरपि॥"
मण्डलम्। यथा, मार्कण्डेये। २०। ४९।
"अश्रान्तः सकलं भूमेर्वलयं तुरगोत्तमः।
समर्थः क्रान्तुमर्केण तवायं प्रतिपादितः॥"
अस्थिविशेषः। यथा, सुश्रुते शारीरस्थाने ५ अध्याये॥
"कपालरुचकतरुणवलयनलकसंज्ञानि।"
"पाणिपादपार्श्वपृष्ठोदरःसु वलयानि॥"
वैद्यकोक्ताग्निकर्म्मविशेषः। यथा, सुश्रुते। १।१२।
"तत्र रोगाधिष्ठानभेदादग्निकर्म्म चतुर्धाभिद्यते। तद्यथा वलयबिन्दुलेखाप्रतिसारणानीति दहनविशेषाः॥" * । वेष्टनम्। यथा, रघुः। १। ३०।
"सवेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्व्वीं शशासैकपुरीमिव॥")

बलयः, पुं, (वलयवदाकृतिरस्त्यस्येति। अर्श आदित्वात् अच्।) अष्टादशगलरोगान्तर्गतगलरोगविशेषः। यथा,—

"बलास एवायतमुन्नतञ्च
शोथं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवार्य्य वीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति ॥" * ।
अथ गलरोगाणां चिकित्सा ।
"कण्ठरोगेष्वसृङ्मोक्षस्तीक्ष्णैर्नस्यादिकर्म्मभिः ।
चिकित्सकश्चिकित्सान्तु कुशलोऽत्र समाचरेत् ॥
क्वाथं दद्याच्च दार्व्वीत्वङ्निम्बतार्क्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा हितो माक्षिकसंयुतः ॥
कटुकातिविषादारुपाठामुस्ताकलिङ्गकाः ।
गोमूत्रक्वथिताः पीताः कण्ठरोगविनाशनाः ॥
गृहीका कटुका चोषा दार्व्वी त्वक् त्रिफला घनम् ।
पाठा रसाञ्जनं दूर्व्वा तेजोह्वेति सुचूर्णितम् ॥
क्षौद्रयुक्तं विधातव्यं गलरोगे महौषधम् ।
योगास्त्विते त्रयः प्रोक्ता वातपित्तकफापहाः ॥
यवाग्रजं तेजवतीं सपाठां
रसाञ्जनं दारु निशां सकृष्णाम् ।
क्षौद्रेण कुर्य्यात् गुटिकां सुखेन
तां धारयेत् सर्व्वगलामयेषु ॥"
इति भावप्रकाशः ॥ * ॥
वेला । कङ्कणम् । इति जटाधरः ॥ (दण्डव्यूह-विशेषः । यथा, कामन्दकीये नीतिसारे । १६ । ४५ ।
"सुखाख्यो वलयश्चैव दण्डभेदाः सुदुर्ज्जयः ॥")
वलयितं, त्रि, (वलयवत् कृतमिति । वलय+तत्करोतीति णिच् ततः क्तः । यद्वा, वलयं तदाकृतिर्जातमस्येति । वलय+इतच् ।) वेष्टितम् । इत्यमरः ॥ (यथा, गीतगोविन्दे । ११।२६ ।
"नीलनलिनमिव पीतपरागपटलभरवलयित-मूलम् ॥"
यथा च, वैराग्यमङ्गले ।
"इन्धनमालावलयितबाहुः
परधनहरणे साधाराहुः ।
रत्नायौवनभञ्जनवीरः
कौर्त्तनपतने मत्तशरीरः ॥")
वलिरः, त्रि, (वलते संवृणोति चक्षुस्तारामिति । वल+बाहुलकात् किरच् ।) केकरः । इत्यमरः ॥
व(ब)लिशं, क्ली, (वलिना गन्धवद्द्रव्याद्युपहारेण श्यति छिनत्ति मत्स्यानिति । शो+कः ।) बडिशम् । इति शब्दरत्नावली ॥
व(ब)लिशिः, स्त्री, (वलिना आहारोपहारेण मत्स्यादीन् श्यति विनाशयतीति । शो+बाहुलकात् किः ।) बडिशम् । इति शब्दरत्नावली ॥
व(ब)लिशी, स्त्री, (वलिशि+कृदिकारादिति ङीष् ।) बडिशम् । इति शब्दरत्नावली ॥
व(ब)लूकं, क्ली, (वलते इति । वल संवरणे+"वलेरूकः ।" उणा० ४ । ४० । इति ऊकः ।) पद्ममूलम् । पक्षिविशेषे, पुं । इति सिद्धान्तकौमुदीधृतोणादिवृत्तिः उणादिकोषश्च ॥

व(ब)लूलः, त्रि, बलवान् । बलशब्दात् गोष्ठेत्यादिना ऊलप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥ अस्य पवर्गीयवकारादित्वेऽपि तत्रालिखितत्वादत्र लिखनम् ॥
वल्क, क भाषणे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, वल्कयति । भाषणं कथनम् । इति दुर्गादासः ॥
व(ब)ल्कं, क्ली, (वलते इति । वल संवरणे+"शूकवल्कोल्काः ।" उणा० ३ । ४२ । इति कप्रत्ययान्तो निपातितः ।) वल्कलः । (यथा, रघौ । ८ । ११ ।
"गुणवत् सुतरोपितश्रियः
परिणामे हि दिलीपवंशजाः ।
पदवीं तरुवल्कवाससां
प्रयताः संयमिनां प्रपेदिरे ॥")
शल्कः । इति मेदिनीशब्दरत्नावल्यौ ॥ खण्डम् । इति विश्वः ॥
व(ब)ल्कः, पुं, (वल संवरणे+कः निपातितश्च ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥
वल्कतरुः, पुं, (वल्कप्रधानस्तरुरिति मध्यलोपी समासः ।) पूगवृक्षः । इति राजनिर्घण्टः ॥
वल्कद्रुमः, पुं, (वल्कप्रधानो द्रुमः ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य भूर्ज्जशब्दे ज्ञातव्यम् ॥)
व(ब)ल्कलं, क्ली, (वलते संवृणोतीति । वल+बाहुलकात् कलन् ।) त्वचम् । इति राजनिर्घण्टः ॥ डालचिनि इति भाषा ॥
व(ब)ल्कलः, पुं क्ली, (वलते संवृणोतीति । वल+बाहुलकात् कलन् ।) वृक्षत्वक् । बाकल इति भाषा । तत्पर्य्यायः । त्वक् २ वल्कम् ३ । इत्यमरः ॥ त्वचा ४ त्वचम् ५ चोचम् ६ चोलकम् ७ शल्कम् ८ छल्लकम् ९ छल्लिः १० छल्ली ११ चोतकम् १२ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १५६ । २ ।
"तौ तु पूर्व्वेण कालेन तपोयुक्तौ बभूवतुः ।
क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ ॥")
वल्कला, स्त्री, (वल्कल+टाप् ।) शिलावल्का । इति राजनिर्घण्टः ॥
वल्कलोध्रः, पुं, (वल्कप्रधानो लोध्रः ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥
वल्कवान् [त्] पुं, (वल्कः शल्कोऽस्यस्येति । वल्क+मतुप् । मस्य वः ।) मत्स्यः । इति त्रिकाण्डशेषः ॥ वल्कयुक्ते, त्रि ॥
वल्किलः, पुं, (वल्कोऽस्यास्तीति । वल्क+इलच् ।) कण्टकः । इति शब्दरत्नावली ॥
वल्कुतं, क्ली, वल्कलः । इति शब्दचन्द्रिका ॥
वल्ग, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) वल्गति । अयं प्लुतगताविति भट्टमल्लः । इति दुर्गादासः ॥
वल्गनं, क्ली, (वल्ग+ल्युट् ।) प्लुतगमनम् । बहुभाषणम् । वल्गधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥

वल्गा, स्त्री, (वल्ग्यतेऽन्योऽनयेति । वल्ग+करणे घञ् । टाप् ।) दन्तालिका । लागाम् इति भाषा । तत्पर्य्यायः । अवक्षेपणी २ रश्मिः ३ कुशा ४ । इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम् । ५ । ३४७ ।
"वल्गन्मध्येऽश्ववाराणां नृत्यते वाग्रवाजिना ।
वल्गाकृष्टोद्वहक्लम्नं शिरस्कं वामपाणिना ॥")
वल्गितं, क्ली, (वल्ग+भावे क्तः ।) अश्वस्य विशेषगमनम् । तत्तु वेगेन विचित्रोपरिचरणम् । इत्यमरभरतौ ॥ प्लुतगमनम् । (यथा, शिशुपालवधे । २ । २७ ।
"अनिर्लोडितकार्य्यस्य वाग्जालं वाग्मिनो वृथा ।
निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम् ॥")
बहुभाषणञ्च ॥
व(ब)ल्गुः, पुं, (वलते इति । वल प्राणने+"वलेर्गुक्च ।" उणा० १ । २० । इति उप्रत्ययः । गुणागमश्च धातोः ।) छागः । सुन्दरे, त्रि । इति मेदिनी । गे, २५ ॥ (यथा, रघौ । ५ । ६८ ।
"तद्वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्तः
चक्षुस्तव प्रचलितभ्रमरञ्च पद्मम् ॥")
व(ब)ल्गुकं, क्ली, (वल्गु+संज्ञायां स्वार्थे वा कन् ।) चन्दनम् । विपिनम् । पणम् । रुचिरे, त्रि । इत्यजयः ॥ तत्र पवर्गीयवकारादौ लिखितोऽयं शब्दः । अस्माभिस्तु तत्रालिखितत्वादत्र लिखितः ॥
वल्गुपत्रः, पुं, (वल्गु मनोज्ञं पत्रं यस्य ।) वनमुद्गः । इति शब्दचन्द्रिका ॥
वल्गुला, स्त्री, (वल्गु लातीति । ला+कः । टाप् ।) वाकुची । पक्षिविशेषः । शेषस्य पर्य्यायः । चक्रविष्ठा २ दिवान्धा ३ निशाचरी ४ खेरिणी ५ दिवास्वापा ६ मांसेष्टा ७ मात्स्यादिणी ८ । इति राजनिर्घण्टः ॥
वल्गुलिका, स्त्री, (वल्गुल+संज्ञायां कन् । टापि अत इत्वञ्च ।) तैलपायिका । यथा,—
"वल्गुलिका सुखविष्ठा परोष्णी तैलपायिका ।"
इति हेमचन्द्रः ॥
(यथा, कथासरित्सागरे । ५५ । ७६ ।
"ततो वल्गुलिकातस्तं हृष्ट्वा पटमदर्शयत् ।
स चित्रकृत्तां चित्रस्थां राज्ञे मदनसुन्दरीम् ॥")
वल्भ, ङ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) वल्भते अन्नं लोकः । इति दुर्गादासः ॥
वल्भनं, क्ली, (वल्भ भक्षणे+भावे ल्युट् ।) भक्षणम् । इति हेमचन्द्रः ॥
वल्मिकः, पुं क्ली, वल्मीकः । इति शब्दरत्नावली ॥
वल्मिकिः, पुं क्ली, वल्मीकः । इत्यमरटीकायां भरतः ॥
व(ब)ल्मीकः, पुं, क्ली, (वलते इति । वल संवरणे+"अलीकादयश्च ।" उणा० ४ । २५ । इत्यत्र वलतेर्म्मुमागमश्चेति उज्ज्वलदत्तोक्त्या कीकन्प्रत्

निपात: ।) उयीकाक्षतमृत्तिकास्तूप: । तत्पर्य्याय: । वामलूर: २ नाकु: ३ । इत्यमर: ॥ इध्मिक: ४ वाल्मीक: ५ वाल्मीकि: ६ वाल्मिकि: ७ । इति तट्टीकायां भरत: ॥ पुगलक: ८ शक्रमूर्द्धा ९ कृमिशैलक: १० । इति शब्दरत्नावली ॥ * ॥ (यथा, मेघदूते । १५ ।
"वल्मीकाग्रात् प्रभवति धनु:खण्डमाखण्डलस्य ॥")
तन्मृत्तिकया शौचनिषेधो यथा । विष्णुपुराणम् ।
"वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा ।
शौचावशिष्टां गेहाच्च नाददीतलेपसम्भवाम् ।
अन्त:प्राण्यवपन्नाच्च हलोत्खातां न कर्द्दमाम् ॥"
इत्याह्निकाचारतत्त्वम् ॥ * ॥
देवप्रतिष्ठायां स्नानात् पूर्व्वं शिल्पिदोषशान्त्यर्थं तन्मृत्तिकया चालनं यथा,—
"वल्मीकमृत्तिकाभिस्तु गोमयेन सुभक्तया ।
चालयेत् शिल्पिसंस्पर्शदोषाणामुपशान्तये ॥"
वल्मीकमृदादिस्नाने मन्त्रविशेषानुपादानात् मन्त्राणादेशे गायत्रीति शूलपाणिलिखितात् गायत्र्या तत्तन्मूलमन्त्रेण वा स्नानं कारयितव्यम् । तथा स्नानं यथा,—
"स्नापयेत् प्रथमं देवं तोयै: पञ्चविधैरपि ।
पञ्चामृतै: पञ्चगव्यै: पञ्चमृत्तिकैरपि ॥
मृत्तिका करिदन्तस्य पर्व्वताग्रखुरस्य च ।
कुशवल्मीकसम्भूतं मृत्पञ्चकमुदीरितम् ॥"
इति देवप्रतिष्ठातत्त्वम् ।
वल्मीक:, पुं, (वल्मीक उयीकाक्षतमृत्तिकास्तूप: उत्पत्तिकारणत्वेनास्त्यस्येति । अच् ।) वाल्मीकिमुनि: । रोगविशेष: । इति विश्व: ॥ अथ वल्मीकरोगस्य लक्षणम् ।
"ग्रीवांसकक्षाकरपाददेशे
सन्धौ गले वा त्रिभिरेव दोषै: ।
ग्रन्थि: स वल्मीकवदक्रियाणां
जात: क्रमेणैव गतप्रवृद्धि: ॥
मुखैरनेकै: स्रुतितोदवद्भि-
र्विसर्पवत् सर्पति चोन्नताग्रै: ।
वल्मीकमाहुर्भिषजो विकारं
निष्प्रत्यनीकं चिरजं विशेषात् ॥"
ग्रीवा कृकाटिका । अंस: स्कन्ध: । कक्षा बाहुमूलम् । गल: कण्ठ: । वल्मीकवदित्यनेन प्रचुरशिखरत्वमुच्चत्वमवगाढ़मूलत्वञ्च सूच्यते । निष्प्रत्यनीकं उपचारायोग्यम् ॥ * ॥ अथ तस्य चिकित्सा ।
"शस्त्रेणोत्कृत्य वल्मीकं क्षाराग्निभ्यां प्रसाधयेत् ।
विधानेनार्ब्बुदोक्तेन शोधयित्वा च रोपयेत् ॥
वल्मीकन्तु भवेद्यस्य नातिवृद्धममर्म्मजम् ।
तत्र संशोधनं कृत्वा शोणितं मोक्षयेद्भिषक् ॥
कुलत्थिकानां मूलेन गुडूच्या लवणेन च ।
आरेवतस्य मूलेन दन्तीमूलेन तथैव च ॥
श्यामामूलै: सफलै: शक्तुमिश्रै: प्रलेपयेत् ।
सुस्निग्धेन सुखोष्णेन भिषक् तमुपनाहयेत् ॥
पक्वं तद्वा विजानीयाद्गती: सर्व्वा यथाक्रमम् ।
अभिज्ञाय गतीश्छित्त्वा प्रदिह्यान्मतिमान् भिषक् ॥
संशोध्य दुष्टमांसानि क्षारेण प्रतिसारयेत् ।
व्रणं विशुद्धं विज्ञाय रोपयेन्मतिमान् भिषक् ॥
मन:शिलालभल्लातसूक्ष्मैलागुरुचन्दनै: ।
जातीपल्लवसक्के च निम्बतैलं विपाचयेत् ॥
वल्मीकं नाशयेत्तद्धि बहुच्छिद्रं बहुव्रणम् ।
पाणिपादोपरिष्टात्तु छिद्रैर्बहुभिरावृतम् ॥
वल्मीकं यत् सशोफं स्यादसाध्यं तद्धि विजानता ॥"
मन:शिलाद्यं तैलम् । इति भावप्रकाश: ॥ (अस्या मृदो व्यवहारेण रोगनाशित्वं यथा,—
"क्षौद्रसर्पिर्वल्मीकमृत्तिकासंयुतं भिषक् ।
गाढ़मुत्सादनं कुर्य्यादूरुस्तम्भे प्रलेपनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ऊरुस्तम्भाधिकारे ॥)
वल्मीकि:, पुं, वल्मीक: । इति शब्दमाला ॥
वल्मीकशीर्षं, क्ली, (वल्मीकस्य शीर्षमिव शीर्षमस्य ।) स्रोतोऽञ्जनम् । इति राजनिर्घण्ट: ॥
वल्मीकूटं, क्ली, (वल्मीकस्य वल्मीकसञ्चितं वा कूटम् ।) वल्मीक: । इति हेमचन्द्र: ॥
वल्युल } त् क लूनिपूत्योः । इति कविकल्पद्रुम: ॥
वल्यूल } (अदन्तचुरा०-पर०-सक०-सेट् ।)
वल्यूलयति अववल्यूलत् । इति दुर्गादास: ॥
वल्ल, ङ संवरणे । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, वल्लते धनं लोक: संवृणोतीत्यर्थ: । इति दुर्गादास: ॥
वल्ल:, पुं, (वल्लते संवृणोतीति । वल्ल + अच् ।) गुञ्जात्रयपरिमाणम् । यथा,—
"वल्लस्त्रिगुञ्जो धरणञ्च तेऽष्टौ ।"
इति लीलावती ॥
द्विगुञ्जा । इति वैद्यकपरिभाषा । (यथा,—
"विषटङ्कबलिश्चेन्द्रदन्तीबीजं क्रमाद्बहु ।
दन्त्यम्बुमर्द्दितं यामं रसस्त्रिपुरभैरव: ॥
वल्लं वोधिन चार्द्रस्य रसे च सितया सह ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
सार्द्धगुञ्जा । यथा,—
"गोधूमद्वितयोन्मिता तु कथिता गुञ्जा तया सार्द्धया
वल्लो वल्लचतुष्टयेन भिषजां माषो मतस्तच्चतु: ।"
इत्यादि राजनिर्घण्ट: ॥
वल्लकी, स्त्री, (वल्लते इति । वल्ल + वुन् । गौरादित्वात् ङीष् ।) वीणा । इत्यमर: ॥ (यथा, हरिवंशे । ८४ । १११ ।
"वल्लकीं वाद्यमानो हि सप्तस्वरविमूर्च्छिताम् ॥")
शल्लकीवृक्ष: । इति राजनिर्घण्ट: ॥ (अस्या: पर्य्यायो यथा,—
"शल्लकी गजभक्ष्या च सुवहा सुरभीरसा ।
महेरुणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वल्लभ:, पुं, (वल्ल संवरणे + "रासिवल्लिभ्याञ्च ।" उणा० ३ । १२५ । इति अभच् ।) दयित: । अध्यक्ष: । सल्लक्षणतुरङ्गम: । इति मेदिनी । भे, १८ ॥ (जह्नुवंशीयबलाकाश्वस्य पुत्र: । स च कुशिकस्य पिता । यथा, महाभारते । १३ । ४ । ५ ।
"वल्लभस्तस्य तनय: साक्षाद्धर्म्म इवापर: ।
कुशिकस्तस्य तनय: सहस्राक्षसमद्युति: ॥")
वल्लभ:, त्रि, (वल्ल + अभच् ।) प्रिय: । (यथा, कामन्दकीयनीतिसारे । ५ । १९ ।
"पुत्त्रेभ्यश्च नमस्कुर्य्यात् वल्लभेभ्यश्च भूपति: ॥")
अध्यक्ष: । इत्यमर: ॥ अध्यक्षोऽत्र गवाध्यक्ष: । इति स्वामी ॥
वल्लभपालक:, त्रि, (वल्लभानां अश्वविशेषाणां पालक: ।) अश्वरक्षक: । इति भूरिप्रयोग: ॥
वल्लभा, स्त्री, प्रिया । यथा,—
"प्रेयसी दयिता कान्ता प्राणेशा वल्लभा प्रिया ।
हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा ॥"
इति हेमचन्द्र: ॥
वल्लरं, क्ली, (वल्लते इति । वल्ल + अरन् ।) कृष्णागुरु: । इति राजनिर्घण्ट: ॥ मञ्जरि: । इति शब्दरत्नावली ॥ गहनम् । कुञ्जम् । इति धरणि: ॥
वल्लरि: } स्त्री, (वल्ल + क्विप् । वल्लं संवरणं
वल्लरी } ऋच्छतीति । ऋ + अच् इ: । कृदिकारादिति वा ङीष् ।) मञ्जरी । इत्यमरभरतौ ॥ (लता । यथा, कुमारे । ४ । ३१ ।
"अनपायिनि संश्रयद्रुमे
गजभग्ने पतनाय वल्लरी ॥")
चित्रमूलम् । मेथिका । इति राजनिर्घण्ट: ॥ (अस्या: पर्य्यायो यथा,—
"मेथिका मिथिनिर्म्मेथिर्दीपनी बहुपुत्त्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पित्तजिद्वायुशुद्धिदा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वल्लव:, पुं, (वल्ल प्रीतौ + क्विप् । वल्लं प्रीतिं वातीति । वा + क: ।) गोप: । इत्यमर: ॥ (यथा, माघे । ११ । ८ ।
"दुततरकरदक्षा: क्षिप्रवैशाखशैले
दधति दधनि धीरानारवान् वारिणीव ।
शशिनमिव सुरौघा: सारमुद्धर्त्तुमेते
कलशिमुदधिगुर्व्वीं वल्लवा लोड़यन्ति ॥")
भीमसेन: । इति मेदिनी । वे, ४४ ॥ (विराटनगरे छद्मवासकाले एवास्य एतन्नाम आसीत् । यथा महाभारते । ४ । २ । १ ।
"पौरोगवो ब्रुवाणोऽहं वल्लवो नाम नामत: ।
उपस्थास्यामि राजानं विराटमिति मे मति: ॥")
वल्लव:, त्रि, (वल्लमानन्दं वातीति । वा + क: ।) सूपकार: । इत्यमर: ॥
वल्लवी, स्त्री, (वल्लव + ङीष् ।) वल्लवजातिस्त्री । वल्लवपत्नी । तत्पर्य्याय: । आभीरी २ गोपिका ३ गोपी ४ महाशूद्री ५ गोपालिका ६ । इति शब्दरत्नावली ॥ (यथा, किराते । ४ । १७ ।

"स मन्सरावलगित-पीवरस्तनीः
परिश्रमक्लान्तविलोचनोत्पलाः ।
निरीक्षितुं नोपरराम वल्लवी-
रभिप्रनृत्ता इव वारयोषितः ॥")

वल्लिः, स्त्री, (वल्लते संवृणोति वृक्षादीनिति । वल्ल + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इतीन् ।) लता । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । १२ । १८४ । १३ ।
"वल्लिर्वेष्टयते वृक्षं सर्व्वतश्चैव गच्छति ॥")
पृथिवी । इति शब्दमाला ॥

वल्लिकण्टकारिका, स्त्री, (वल्लिरूपा कण्टकारिका ।) अग्निदमनीक्षुपः । इति राजनिर्घण्टः ॥

वल्लिदूर्व्वा, स्त्री, (वल्लिरूपा दूर्व्वा ।) मालादूर्व्वा । इति राजनिर्घण्टः ॥

वल्लिशाकटपोतिका, स्त्री, (वल्लिप्रधाना शाकटपोतिका ।) मूलपोती । इति राजनिर्घण्टः ॥

वल्लिसूरणः, पुं, (वल्लिप्रधानः सूरणः ।) अग्न्यन्तपर्णी । इति राजनिर्घण्टः ॥

वल्ली, स्त्री, (वल्लि + ङीष् ।) लता । इत्यमरः ॥ सा च भूमिप्रसारा वर्षमात्रस्थायिनी कुष्माण्डाद्या । (यथा च ।
"विदारीसारिवारजनीगुडूच्योऽजश्रृङ्गीचेतिवल्लीसंज्ञः ॥" इति सुश्रुते सूत्रस्थाने ३८ अध्यायः ॥
यथा च, रामायणे । २ । ८० । ६ ।
"लतावल्लीश्च गुल्मांश्च स्थाणूनश्मन एव च ।
जनास्ते चक्रिरे मार्गं छिन्दन्तो विविधान्
द्रुमान् ॥")
अजमोदा । इति मेदिनी । ले, ३८ ॥ कैवर्त्तिका । चव्यम् । इति राजनिर्घण्टः ॥

वल्लीगड़ः, पुं, (वल्लीरूपो गड़ः ।) मत्स्यविशेषः । भोला इति वालिकाड़ा इति च भाषा । अस्य गुणाः । लघुत्वम् । रूक्षत्वम् । अनभिष्यन्दित्वम् । मरुत्करत्वम् । सर्य्यत्वम् । कफनाशनत्वञ्च । इति राजवल्लभः ॥

वल्लीजं, क्ली, (वल्ल्यां लतायां जायते इति । जन + डः ।) मरीचम् । इति राजनिर्घण्टशब्दचन्द्रिके ॥ (यथा, बृहत्संहितायाम् । ८ । १३ ।
"भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्व्वशस्यञ्च ॥")

वल्लीबदरी, स्त्री, (वल्लीरूपा बदरी ।) भूबदरी । इति राजनिर्घण्टः ॥

वल्लीमुद्गः, पुं, (वल्लीषु जातो मुद्गः ।) मकुष्टकः । इति राजनिर्घण्टः ॥

वल्लीवृक्षः, पुं, (वल्लीवत् दीर्घो वृक्षः ।) सालवृक्षः । इति राजनिर्घण्टः ॥

वल्लुरं, क्ली, (वल्ल्यते आव्रियते लतादिनेति । वल्ल + वाहुलकात् उरच् ।) कुञ्जम् । मञ्जरी । क्षेत्रम् । निर्जलस्थानम् । शाद्वलः । इति हेमचन्द्रः ॥ गहनम् । इति मेदिनी । रे, २१० ॥ विश्वधररत्नावलीषु वल्लरमिति पाठः ॥

वल्लूरं, त्रि, (वल्ल्यते संव्रियते इति । वल्ल + "खर्ज्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा० ४ । ९० । इति ऊरच् ।) आतपादिना शुष्कमांसम् । इत्यमरः । २ । ९ । ६३ ॥ (तस्याभक्ष्यत्वं यथा, मनुः । ५ । १३ ।
"निमन्त्रितश्च मत्स्यादान् सौनं वल्लूरमेव च ॥"
"वल्लूरं शुष्कमांसम् ।" इति तट्टीकायां कुल्लूकभट्टः ॥) शूकरमांसम् । इति मेदिनी । रे, २१० ॥ वनक्षेत्रम् । वाहनम् । ऊषरभूमिः । इति हेमचन्द्रः ॥

वल्ल्या, स्त्री, (वल्ल + भावे घञ् । वल्लाय संवरणाय साधुः । वल्ल + यत् ।) धात्रीवृक्षः । इति हारावली ॥

व(ब)ल्वजः, पुं, (वल्वे पर्व्वते जायते इति । जन् + डः ।) उलपः । इति हेमचन्द्रः ॥ वाव इति ख्याततृणम् । इत्यमरः ॥ वलते भुवं वेष्टयति विशादित्वात् वप्रत्यये वल्वः पर्व्वतः तत्र जाता वल्वजाः इत्यन्ये । स्वभावात् बहुत्वे वल्वजाः । एको वल्वज इति भाष्यकारवचनादेकत्वमपि अतएव सुमनोऽप्सरोवल्वजादेर्व्वेति पाक्षिकबहुत्वार्थं क्रमदीश्वरसूत्रम् । इति तट्टीकायां भरतः ॥ (यथा, मनुः । २ । ४३ ।
"मुञ्जालाभे तु कर्त्तव्याः कुशाश्मान्तकवल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥")

व(ब)ल्वजा, स्त्री, (वल्वे पर्व्वते जायते इति । जन + डः । टाप् ।) तृणविशेषः । सावे वागे इति हिन्दी भाषा । तत्पर्य्यायः । दृढ़पत्री २ तृणेक्षुः ३ तृणवल्वजा ४ मौञ्जीपत्रा ५ दृढ़तृणा ६ पानीयाश्रा ७ दृढ़क्षुरा ८ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । पित्तदाहतृषापहत्वम् । वातप्रकोपणत्वम् । रुच्यत्वम् । कण्ठशुद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

वल्ह, क त्विषि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, वल्हयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

वल्ह, ङ श्रैष्ठे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ङ, वल्हते धनी श्रेष्ठः स्यादित्यर्थः ।

वश, लु स्पृहि । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-सेट् ।) लु, वष्टि धनं लोकः । इति दुर्गादासः ॥

वशं, क्ली, (वश + "वशिरण्योरुपसंख्यानम् ।" ३ । ३ । ५८ । इत्यस्य वार्त्तिकोक्त्या अप् ।) इच्छा । प्रभुत्वम् । आयत्तता । इति शब्दरत्नावली ॥ (यथा, महाभारते । १२ । १३४ । ७ ।
"वशे बलवतां धर्म्मः सुखं भोगवतामिव ॥")

वशंवदः त्रि, (वशं तवाहं वश इति वाक्यं वदतीति । वश + वद् + "प्रियवशे वदः खच् ।" ३ । २ । ३८ । इति खच् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) वशं वदति यः । आयत्तकरवाक्यवक्ता । इति मुग्धबोधव्याकरणम् ॥ (वशीभूतः । यथा, राजतरङ्गिण्याम् । ४ । ३६५ ।
"स जहार दुराचारो भूभृत् लोभवशंवदः ॥")

वशः, त्रि, (वष्टीति । वश + अच् ।) आयत्तः । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । ८ । १७ ।
"गुणाढ्योऽपि तदाकर्ण्य सद्यः खेदवशो-
ऽभवत् ॥")

वशः, पुं, (वश + भावे अप् ।) इच्छा । इति संकीर्णवर्गे अमरः ॥ (उश्यते इष्यते इति । वश + कर्म्मणि अप् ।) वेश्यागृहम् । आयत्तता । प्रभुत्वम् । इति त्रिकाण्डशेषः ॥ जन्म । इति हेमचन्द्रः ।

वशका, स्त्री, (वशेन आयत्ततया कायति शोभते इति । कै + कः ।) वश्या नारी । इति शब्दरत्नावली ॥

वशक्रिया, स्त्री, (वशस्य क्रिया करणम् ।) वशीकरणम् । तत्पर्य्यायः । संवदनम् २ । इत्यमरः ६ मणिमन्त्रौषधैर्व्वशीकरणं संवदनं संपूर्व्वो वदिर्व्वशीकरणे भावेऽनट् । संवदना च इति केचित् । करणेऽनटि वशक्रियासाधने मणिमन्त्रादावपि । जयश्रियः संवदनं यतस्तदिति रघुः । संचलनं इति पाठान्तरम् । इति तट्टीकायां भरतः ॥

वशगा, स्त्री, (वशं गच्छतीति । गम + डः ।) वशीभूता । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । ४३ । ३२ ॥
"गाङ्गादिवाकरसुताजलचारुहारां
धात्रीं ससुद्ररसनां वशगां करोति ॥"
अस्मिन्नर्थे वाच्यलिङ्ग एवायं शब्दः । यथा, महाभारते । ४ । ६ । १२ ।
"ददानि ते हन्त वरं यमिच्छसि
प्रशाधि मत्स्यान् वशगोऽस्म्यहं तव ॥")

वशा, स्त्री, (वश स्पृहि + अच् । टाप् । "वशिरण्योरुपसंख्यानम् ।" इति अप् वा ।) वन्ध्या । (अस्या धनं राज्ञा रक्षितव्यम् । यथा, मनुः । ८ । २८ ।
"वशाऽपुत्त्रासु चैवं स्याद्रक्षणं निष्कुलासु च ।
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥")
सुता । योषा । स्त्रीगवी । करिणी । इति मेदिनी । शे, १३ ॥ (यथा, कथासरित्सागरे । ६ । ११० ।
"असिच्यत स ताभिश्च वशाभिरिव वारणः ॥")
वन्ध्या गवी । इत्यमरः ॥ (यथा, ऋग्वेदे । २ । ७ । ५ ।
"त्वं नो असि भारताग्ने वशाभिरुक्षभिः ॥"
"वशाभिर्व्वन्ध्याभिर्गोभिः ।" इति तद्भाष्ये सायणः ॥
वशीभूता । यथा, गारुड़े । १८३ अध्याये ।
"सप्तभिर्मन्त्रितं कृत्वा करवीरस्य पुष्पकम् ।
स्त्रीणामग्रे भ्रामयेच्च यस्याः सा वशा भवेत् ॥")

वशाढ्यकः, पुं, (वशया आढ्यकः । प्रचुरवशावत्त्वात् तथात्वम् ।) शिशुमारः । इति शब्दरत्नावली ॥

वशापायी [न्], पुं, (वशां पिबतीति । पा + णिनिः ।) कुक्कुरः । इति शब्दमाला ॥

वशि, क्ली, (वश + भावे इन् ।) वशित्वम् । इति शब्दमाला ॥

वशिकः, त्रि, शून्यम् । इत्यमरः । ३ । १ । ५६ ॥

वशिका, स्त्री, (वशो वशीकरणं साध्यत्वेनास्त्यस्या इति । वश् + ठन् ।) अगुरुः । इति शब्द-चन्द्रिका ॥

वशिता, स्त्री, (वशिनो भावः । वशिन् + तल् ।) वशित्वम् । इति हेमचन्द्रः ॥ (यथा, भागवते । ११ । १५ । ३६ ।
"नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते ।
मनो मय्यादधद्योगी मद्धर्म्मा वशितामियात् ॥")

वशित्वं, क्ली, (वशिनो भावः । वशिन् + त्व ।) आयत्तत्वम् । (यथा, षड्ले । १ ।
"शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीय-
माराधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥")
शिवस्याष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । यथा,—
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा
तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता ॥"
वशित्वं स्वातन्त्र्यं येन स्वतन्त्रश्चरति इत्यमर-टीकायां भरतः ॥

वशिनी, स्त्री, (वशो वशीकरणं साध्यत्वेनास्त्यस्या इति । वश् + इनिः । ङीप् ।) वन्दा । शमी-वृक्षः । इति शब्दरत्नावली ॥

वशिरं, क्ली, (उश्यते इष्यते इति । वश + बाहु-लकात् किरच् । यद्वा, वशिं वशत्वं रातीति । रा + कः ।) सामुद्रलवणम् । इत्यमरः ॥

वशिरः, पुं, (वश + किरच् ।) गजपिप्पली । इत्यमरः ॥ (अस्य पर्य्यायो यथा,—
"करिपिप्पली कपिवल्ली कपिवल्ली कपिल्लिका ।
श्रेयसी वशिरश्चापि गजाह्वा गजपिप्पली ॥"
सुविटा इति ख्यातः । अस्य पर्य्यायो यथा,—
"पार्व्वतीयश्च करभो वशिरः कपिपिप्पली ।
चामातासौ क्वचित्प्रोक्तः स्वर्णावर्त्तः सितोऽपरः ॥"
इति वैद्यकरत्नमाला ॥)
चव्यम् । इति राजनिर्घण्टः ॥ अपामार्गः । इति मेदिनी । रे, २०८ ॥ वचा । इति शब्दचन्द्रिका ॥

वशिष्ठः, पुं, (वशवतां वशिनां श्रेष्ठः । वशवत् + इष्ठन् । "विन्मतोर्लुक् ।" ५।३।६५ । इति लुक् ।) यद्वा, वरिष्ठः । पृषोदरादित्वात् साधुः । अस्य निरुक्तिर्यथा, महाभारते । १३ । ६३ । ८६ ।
"वशिष्ठोऽस्मि वरिष्ठोऽस्मि वशे वासगृहेष्वपि ।
वशिष्ठत्वाच्च वासाच्च वशिष्ठ इति विद्धि माम् ॥")
स्वनामख्यातमुनिः । तत्पर्य्यायः । अरुन्धती-जानिः २ । इति हेमचन्द्रः ॥ अरुन्धतीनाथः ३ वाशिष्ठः ४ । इति शब्दरत्नावली ॥ स तु ब्रह्मणः प्राणेभ्यो जातः । तस्य भार्य्या कर्द्दमकन्या अरु-न्धती । पुत्राः सप्तर्षयः । इति श्रीभागवतमतम् ॥ अपि च ।
"वशिष्ठश्च तयोर्ज्जायां सप्त पुत्रानजीजनत् ।
कन्याञ्च पुण्डरीकाक्षां सर्व्वशोभासमन्विताम् ॥
रजो गात्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा ।
सुतपाः शुक्र इत्येते सप्त पुत्रा महौजसः ॥
सर्व्वे तपस्विनः प्रोक्ताः सर्व्वे यज्ञेषु भागिनः ।
अयज्वानश्च यज्वानः पितरो ब्रह्मणः सुताः ॥"
इति कौर्म्मे १२ अध्यायः ॥
मित्रावरुणयोः पुत्रः । यथा,—
"इति पृष्टा नरेन्द्रेण कथ्यतामिति भूपते ।
वशिष्ठं चोदयामासुः समस्तास्ते तपोधनाः ॥
मुनिभिः प्रेरितः सोऽपि यथावद्यतमानसः ।
योगमास्थाय सुचिरं मैत्रावरुणिरात्मवान् ॥"
अन्यच्च ।
"मित्रावरुणयोश्चैव कुम्भिनो ये परिश्रुताः ।
एकार्णवास्तथैवान्ये वशिष्ठा नाम विश्रुताः ॥
एते पञ्च वशिष्ठानां स्मृता ह्येकादशैव तु ।
अष्टावेते समाख्याता ब्रह्मणो मानसाःसुताः ॥"
इति वह्निपुराणे घृतधेनुविधिवाराहप्रादुर्भावा-ध्यायौ ॥

वशीकरणं, क्ली, (वश + कृ + भावे ल्युट् । अभूत-तद्भावे च्विः ।) मणिमन्त्रौषधैरायत्तीकरणम् । इति भरतजटाधरौ ॥ अस्य पर्य्यायः वशक्रिया-शब्दे द्रष्टव्यः ॥ * ॥ तत्साधनौषधानि यथा,—
"ब्रह्मदण्डी वचा कुष्ठं प्रियङ्गुनागकेशरम् ।
दद्यात्ताम्बूलसंयुक्तं स्त्रीणां मन्त्रेण तद्वशम् ॥"
ॐ नारायणाय स्वाहेति ।
"ताम्बूलं दीयते यस्य स वशी स्यान्न संशयः ।"
ॐ हरि हरि स्वाहा ॥ १ ॥
"गोदन्तं हरितालञ्च संयुक्तं काकजिह्वया ।
चूर्णं कृत्वा यस्य शिरे दीयते स वशी भवेत् ॥२॥
खञ्जरीटस्य मांसन्तु मधुना सह पेषयेत् ।
ऋतुकाले योनिलेपात् पुरुषो दासतामियात् ॥३॥
अगुरुं गुग्गुलुञ्चैव नीलोत्पलसमन्वितम् ।
गुडेन धूपयित्वा तु राजद्वारे प्रियो भवेत् ॥४॥
श्वेतापराजितामूलं पिष्टं रोचनया युतम् ।
यं पश्येत्तिलकेनैव वशीकुर्य्यान् नृपालये ॥५॥
काकजिह्वा वचा कुष्ठं निम्बपत्रं सकुङ्कुमम् ।
आत्मरक्तं सभावेयं वशी भवति मानवः ॥६॥
ॐ नमः सर्व्वसत्त्वेभ्यो नमः । सिद्धिं कुरु कुरु स्वाहा ।
"सप्तभिर्मन्त्रितं कृत्वा करवीरस्य पुष्पकम् ।
स्त्रीणामग्रे भ्रामयेच्च चणाद्धै सा वशा भवेत् ॥७॥
ब्रह्मदण्डी वचा पत्रं मधुना सह पेषयेत् ।
अङ्गलेपाच्च वनिता नान्यं भर्त्तारमिच्छति ॥८॥
मूलं जयन्त्या वक्तस्थं व्यवहारे जयप्रदम् ॥९॥
भृङ्गराजस्य मूलन्तु पिष्टं शुक्रेण संयुतम् ।
अचिणी चाञ्जयित्वा तु वशीकुर्य्यान्नरं किल ॥१०
अपराजिताशिफां दद्यान्नीलोत्पलसमन्विताम् ।
ताम्बूलेन प्रदानाच्च वशीकरणमुत्तमम् ॥ ११ ॥
चतुःषष्टिकलाः प्रोक्ताः कामशास्त्रे वशीकराः ।
आलिङ्गनाद्या नृस्त्रीणां कुमार्य्यादेर्व्वशीकराः ॥
१२ ॥
रोचनां नागपुष्पाणि विल्वपुष्पं प्रियङ्गवः ।
कुङ्कुमं चन्दनञ्चैव तिलकेन जगद्वशे ॥ १३ ॥
दुरालभा वचा कुष्ठं कुङ्कुमञ्च शतावरी ।
तिलतैलेन संयुक्तं योनिलेपात् वशो नरः ॥१४॥
निम्बकाष्ठस्य धूपेन धूपयित्वा भगं स्त्रियः ।
सुभगा स्यात् सा च रुद्र पतिर्दासो भविष्यति ॥
१५ ॥
माहिषं नवनीतञ्च कुष्ठञ्च मधुयष्टिका ।
सौभाग्यं भगलेपात् स्यात् पतिर्दासो भवेत्तदा ॥
१६ ॥
पञ्च रक्तानि पुष्पाणि पृथग्जात्या समाहरेत् ।
कुङ्कुमेन समायुक्तमात्मरक्तसमन्वितम् ॥
पुष्येण तु स पिष्ट्वा च रोचनायां समेकतः ।
स्त्रिया पुंसा कृतो रुद्र तिलकोऽयं वशीकरः ॥
१७ ॥
ब्रह्मदण्डी तु पुष्येण याने पाने वशीकरः ॥१८॥
ॐ गं गणपतये स्वाहेति ।
अयं गणपतेर्मन्त्रो धनविद्याप्रदायकः ॥
इममष्टसहस्रञ्च जप्त्वा बद्धा शिखां ततः ।
व्यवहारे जयः स्याच्च शतजाप्यान्नृणां प्रियः ॥
१९ ॥
तिलानान्तु घृताक्तानां कृष्णानां रुद्र होमयेत् ।
अष्टोत्तरसहस्रन्तु राजा वश्यस्त्रिभिर्द्दिनैः ॥२०॥
ह्रींकारं सविसर्गञ्च प्रातःसूर्य्यसमद्युतिम् ।
स्त्रीणां ललाटे विन्यस्य वश्यतां नयति ध्रुवम् ॥
२१ ॥
यस्तु जुहुयादयुतं शुचिः प्रयतमानसः ।
दृष्टिमात्रे सदा तस्य वशमायान्ति योषितः ॥२२॥
मनःशिला पत्रकञ्च सगोरोचनकुङ्कुमम् ।
एभिः कृते च तिलके सदा स्त्री वश्यतामियात् ॥
२३ ॥
सहदेवो भृङ्गराजः सितापराजिता वचा ।
तेनैव तिलकं कृत्वा त्रैलोक्यं वश्यतामियात् ॥२४
गोरोचना मीनपित्तमाभ्याञ्च कृतवर्त्तिकाम् ।
यः पुमांस्तिलकं कुर्य्याद्वामहस्तकनिष्ठया ।
स करोति वशं सर्व्वं त्रैलोक्यं नात्र संशयः ॥
२५ ॥
गोरोचना महादेव ऋतुशोणितभाविता ।
ततः कृताच्च तिलकान्मानवं यं निरीक्षते ।
तच्च सर्व्वं वशं कुर्य्यान्नात्र कार्य्या विचारणा ॥
२६ ॥
नागेश्वरञ्च शैलेयं त्वक् पत्रञ्च हरीतकी ।
चन्दनं काष्ठकृष्णैला रक्तशालिसमन्विता ।
एतैर्धूपो वशकरः स्मरवाण इवेश्वर ॥ २७ ॥
रतिकाले महादेव पार्व्वतीप्रिय शङ्कर ।
निजशुक्रं गृहीत्वा तु वामहस्तेन यः पुमान् ।
कामिनीचरणं वामं लिम्पेत् स स्यात् स्त्रियाः
प्रियः ॥ २८ ॥
सैन्धवञ्च महादेव पारावतमलं मधु ।
एभिर्लिप्तन्तु लिङ्गं वै कामिनीवशकृद्भवेत् ॥२९॥
पुष्पाणि पञ्चरक्तानि गृहीत्वा यानि कानि च ।
तण्डुलञ्च प्रियङ्गुञ्च पेषयेदेकयोगतः ।
अनेन लिप्तलिङ्गस्य कामिनी वश्यतामियात् ॥"
३० ॥
इति गारुडे १८३ । १८६ । १८९ अध्यायाः ॥
"अथान्यत् संप्रवक्ष्यामि वशीकरणमुत्तमम् ।

येन विज्ञानमात्रेण मन्त्राः सिद्ध्यन्ति तत्त्वयात्॥
प्रतिमां कारयेद्देवि ! पलेन रजतस्य च ।
पलार्द्धेन महेशानि ! साध्यस्य प्रतिमां शिवे ॥
हरितालं पलार्द्धञ्च हरिद्राचूर्णकं तथा ।
गर्त्तं कृत्वा सार्द्धहस्तं यत्र निःक्षिप्य सुन्दरि ! ॥
रक्तासनं तत्र दत्त्वा विशेत्तद्गतमानसः ।
चतुर्द्दिक्षु महेशानि ! पताका विनिवेशयेत् ॥
रक्तासने चोपविश्य पूर्व्वास्यो जपमारभेत् ।
पूजाया नियमं देवि ! जानीहि नगनन्दिनि ॥
तिलपूर्णघटं तत्र स्थापयेत्तत्र देशिकः ।
प्राणप्रतिष्ठामन्त्रेण प्राणान् संस्थापयेद्बुधः ॥
न्यासं कृत्वा पूजयित्वा प्रवालमालया जपेत् ।
दशसाहस्रजापेन प्रयोगार्हो भवेत्ततः ॥
प्रणवं पूर्व्वमुच्चार्य्य मायावीजं द्वितीयकम् ।
का त्वं लक्षाकिनीयुक्तं वामकर्णेन्दुभूषितम् ॥
ततो रक्तपदं ब्रूयाच्चामुण्डे तदनन्तरम् ।
साध्यनाम ततो न्यस्य वशमानय तत्परम् ॥
वह्निजायावधिर्म्मन्त्रो जपेद्दशसहस्रकम् ।
दशांशादिप्रमाणेन होमादींश्च समाचरेत् ॥
प्रातः स्नात्वा हविष्याशी शुचिर्भूत्वा जिते-
न्द्रियः ।
प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि ॥
जपे समाप्ते देवेशि ! हुनेद्दिने दिने शुभे ।
जातीपुष्पस्य होमेन वशयेन्नात्र संशयः ॥
कर्पूरमिश्रितैस्तोयैस्तर्पयेत् परदेवताम् ।
पूर्व्वं प्रणवमुद्धृत्य चामुण्डां प्रवदेत्ततः ॥
तर्पयाम्यग्निजायान्तं मन्त्रं जानीहि सुन्दरि ! ।
अनेनैव विधानेन संतर्प्य परदेवताम् ॥
सिद्धिः प्रयोगाद्देवेशि ! जायते नात्र संशयः ।
अभिषेकं ततः कुर्य्यात् शङ्करि प्राणवल्लभे ॥
प्रणवञ्च महेशानि ! चामुण्डां तदनन्तरम् ।
अभिषिञ्चामि तत्पश्चात् ठद्वन्तेनाभिषिञ्चयेत् ॥
तद्दशांशेन देवेशि ! ब्राह्मणान् भोजयेत्तदा ।
एवं कृते महेशानि ! वशीकरणमुत्तमम् ॥
जायते नात्र सन्देहः सत्यं सत्यं न संशयः ।
कामतुल्यश्च नारीणां रिपूणां शमनोपमः ॥
यावज्जीवितपर्य्यन्तं स्मरणाच्च हरेश्वरि ! ।
जायते नात्र सन्देहः सत्यं सुरगणार्च्चिते ॥ * ॥
श्वेतापराजितामूलं पेषयेद्रोचनायुतम् ।
शतेनामन्त्रितं कृत्वा तिलकं कारयेत्ततः ॥
वशयेन्नात्र सन्देहः सत्यं सत्यं महेश्वरि ! ।
चन्द्रसूर्य्यौ यदि वृथा तदा निष्फलभाग्भवेत् ॥
रक्तवस्त्रेण चामुण्डां तोषयेद्बहुयत्नतः ।
सुवर्णं दक्षिणा देया वित्तानुसारतः प्रिये ! ॥
आद्यन्ते मन्त्रतो पूजां कुर्य्यात्तस्या वरानने ! ।
पञ्चदिनंप्रयोगेण राजानं वशमानयेत् ॥
तव प्रीत्यै महादेवि ! कथितं भुवि दुर्लभम् ॥"
इति ह्रस्मीलतन्त्रम् ॥

वशीभूतः, त्रि, वश्यतां प्राप्तः । अवशो वशो भूत इत्यर्थे च्विप्रत्ययेन निष्पन्नः ॥

वशीरः, पुं, (वश् + ईरन् ।) गजपिप्पली । इति जटाधरः ॥

वश्यं, क्ली, (वशाय वशीकरणाय साधु । "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) लवङ्गम् । इति शब्दचन्द्रिका ॥

वश्यः, त्रि, (वशमधीनत्वं गत इति । वश् + "वशं गतः ।" ४ । ४ । ८६ । इति यत् ।) आयत्ततां गतः । तत्पर्य्यायः । प्रणेयः २ । इत्यमरः ॥ वशः ३ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेयपुराणे । ३९ । १७ ।
"म्रदुत्वं सेव्यमानास्तु सिंहशार्दूलकुञ्जराः ।
यथा यान्ति तथा प्राणो वश्यो भवति
योगिनः ॥"
अग्निध्रस्य पञ्चमः पुत्त्रः । यथा, मार्कण्डेये । ५३ । ३४ ।
"हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः ।
वश्यश्च पञ्चमः पुत्रो हिरण्यः षष्ठ उच्यते ॥")

वश्यका, स्त्री (वश्या + स्वार्थे कन् ।) वशगा स्त्री । इति शब्दरत्नावली ॥

वश्या, स्त्री, (वश्य + टाप् ।) वशीभूता नारी । तत्पर्य्यायः । वशगा २ वशास्था ३ वश्यका ४ । इति शब्दरत्नावली ॥ (यथा, उत्तररामचरिते १ अङ्के । १ ।
"यं ब्राह्मणमियं देवी वाग्वश्येवानुवर्त्तते ।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते ॥")

वष, वधे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) वषति । इति दुर्गादासः ॥

वषट्, व्य, देवोद्देश्यकहविस्त्यागमन्त्रः । इत्यमरः ॥ स्वाहा श्रौषट् वौषट् वषट् स्वधा एते पञ्चशब्दा देवहविर्द्दाने वह्निमुखहुतौ वर्त्तन्ते । देवाय हविषो दानं देवहविर्द्दानं तत्र देवा इन्द्रादयः । अत्र पितरो देवता इति स्मृतेस्तेऽपि देवाः हविर्द्दान इत्यनेन एते मन्त्रा इति सूचितम् । इति भरतः ॥ (यथा, ऋग्वेदे । १० । ११५ । ९ ।
"इति त्वाग्ने वृष्टिहव्यस्य पुत्रा
उपस्तुतास ऋषयोऽवोचन् ।
तांश्च पाहि गृणतश्च सूरीन्
वषड् वषडित्यूर्ध्वासो अनक्षन्
नमो नम इत्यूर्ध्वासो अनक्षन् ॥")

वषट्कारः, पुं, (वषट् इत्यस्य कारः करणं यत्र ।) देवोद्देश्यकयागः । तत्पर्य्यायः । देवयज्ञः २ आहुतिः ३ होमः ४ होत्रम् ५ । इति हेमचन्द्रः ॥ (यथा कातन्त्रे कृत्षष्ठे इत्यणादिकेषु कारशब्देन वा समासः । यथा वषट्कारः । स्वाहाकारः ॥)

वषट्कृतं, त्रि, (वषडिति मन्त्रेण कृतम् ।) हुतम् । इत्यमरः ॥
"अग्नौ हुतन्तु यद्द्रव्यं तत् स्यात्त्रिषु वषट्-
कृतम् ॥"
इति शब्दरत्नावली च ॥

वष्क, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) क्विपि वट् । ङ, वष्कते । इति दुर्गादासः ॥

वष्कयः, पुं, (वष्कते इति । वष्क गतौ + बाहुलकात् अयन् ।) एकहायनो वत्सः । इत्यमरटीकायां रायमुकुटधृतशाकटायनः ॥

वष्कयणी, } स्त्री, (वष्कय एकहायनो वत्सः ।
वष्कयिणी, } तेन नीयते इति । नी + क्विप् । गौरादित्वात् ङीष् । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् । वष्कयिणीति पाठे । वष्कयोऽस्त्यस्या इति । "अत इनि ठनौ ।" इति इनिः । अट् कुप्वाङिति णत्वम् ।) चिरप्रसूता गौः । इत्यमरः ॥ "वष्कते परिक्रामति वष्कयश्चिरकालीनवत्सः वकना इति ख्यातः । वष्क ङ गतौ नाम्नीति अयः वष्कयस्त्वेकहायनो वत्स इति कोषः तद्योगात् वष्कयिणी नेकाजादिति इन् । वष्कयणीति पाठे गोष्ठश्व्यादिनापामादित्वात् नः नद्यादित्वादीप् । दुष्यसुधतो गणेषितवष्कयिणीति मूर्द्धन्यणमध्ये गदसिंहः ।" इति तट्टीकायां भरतः ॥

वस, ऐ औ निवासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) ऐ, उष्यात् । औ, अवात्सीत् । इति दुर्गादासः ॥

वस, क स्नेहच्छेदोच । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सक०-च सेट् ।) स्नेह इह प्रीतिः । क, वासयति बन्धुः । चकारात् वधे च । इति दुर्गादासः ॥

वस, त् क वासे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-अक०-सेट् ।) वसयति । इति दुर्गादासः ॥

वस, य उ इर् स्तम्भे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् । उदित्वात् क्त्वावेट् ।) य, वस्यति । उ, वसित्वा वस्त्वा । इर्, अवसत् अवासीत् अवसीत् । असात् पुषादित्वान्नित्यं ङ, इत्यन्ये । स्तम्भ इह नम्रतारहितीभावः । यो वस्यत्यरिष्विति हलायुधः । इति दुर्गादासः ॥

वस, ल ङ स्तृतौ । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-सक०-सेट् ।) स्तृतिरिह आच्छादनपूर्व्वकधारणम् । ल ङ, वस्ते लोकः वस्त्रम् । इति दुर्गादासः ॥

वसतिः, स्त्री, (वस निवासे + "वहिवस्यर्त्तिभ्यश्चित् ।" उणा० ४ । ६० । इति भावाधिकरणादौ अतिः)। वासः । (यथा, अमरुशतके । ११ ।
"धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे
ध्वनिं
दीर्घोच्छ्वासमुदश्रुणा विरहिणीं बालां चिरं
ध्यायता ।
अध्वन्येन विमुक्तकण्ठकरुणं रात्रौ तथा क्रन्दितं
ग्रामीणैर्व्रजतो जनस्य वसतिर्ग्रामे निषिद्धा
यथा ॥")
यामिनी । निकेतनम् । इति मेदिनी । ते, ९५ ॥
(यथा, कुमारे । ४ । ११ ।

"रजनीतिमिरावगुण्ठिते
पुरमार्गे घनशब्दविक्लवाः ।
वसतिं प्रिय ! कामिनां प्रियाः
त्वदृते प्रापयितुं क ईश्वरः ॥")

वसती, स्त्री, (वसति+कृदिकारादिति ङीष् ।) वासः । यामिनी । निकेतनम् । इति मेदिनी । ते, १५० ॥

वसनं, क्ली, (वस्यते आच्छाद्यतेऽनेनेति । वस्+ल्युट् ।) वस्त्रम् । इत्यमरः ॥ (यथा, गीतगोविन्दे । १ । १२ ।
"वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम् ।
केशव धृतहलधररूप !
जय जगदीश हरे ! ॥"
वसनमिति । वस्+भावे ल्युट् ।) छादनम् । इति मेदिनी । ने,१२३॥ (वस+आधारे ल्युट् ।) निवासः । (यथा, महाभारते । ५ । ४३ । ६० ।
"मौनान्न स मुनिर्भवति नारण्यवसनान्मुनिः ।
स्वलक्षणन्तु यो वेद स मुनिः श्रेष्ठ उच्यते ॥")
स्त्रीकटीभूषणम् । इति शब्दरत्नावली ॥

वसना, स्त्री, (वस+युच् ।) स्त्रीकटीभूषणम् । यथा,—
"सारसनं सारशनं वसना वशना तथा ।
वसनं वशनञ्चेति स्त्रीकटीभूषणे भवेत् ॥"
इति शब्दरत्नावली ॥

वसन्तः, पुं, (वसन्त्यत्र मदनोत्सवा इति । वस+"तॄभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च ।" उणा० ३ । १२८ । इति झच् ।) ऋतुविशेषः । स च चैत्रवैशाखमासद्वयात्मकः । यथा । मधुश्च माधवश्च वासन्तिकावृतुः । इति मलमासतत्त्वधृता श्रुतिः ॥ (फाल्गुनचैत्रात्मकश्चेति केचित् । वसन्तः कुम्भमीनयोरितिप्रयोगदर्शनात् ॥*॥) तत्पर्य्यायः ॥ पुष्पसमयः २ सुरभिः ३ । इत्यमरः ॥ मधुः ४ । इति शब्दरत्नावली ॥ माधवः ५ फल्गुः ६ । इति जटाधरः ॥ ऋतुराजः ७ पुष्पमासः ८ पिकानन्दः ९ कान्तः १० कामसखः ११ ॥ तत्कालीनजलगुणाः । कषायत्वम् । मधुरत्वम् । रूक्षत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, ऋतुसंहारे । ६ । २ ।
"द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्व्वं प्रिये ! चारुतरं वसन्ते ॥"
यथा च ।
"हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति ।
प्रायेण प्रशमं याति स्वयमेव समीरणः ।
शरत्काले वसन्ते च पित्तं प्रावृड्तौ कफः ॥"
इति पूर्व्वखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम् ॥
"मुदितकोकिलकूजितकाननं
मदनचम्पककिंशुकशोभितम् ।
कुसुमसौरभरञ्जितभूधरं ॥
कलितमत्तमधुव्रतलावसम् ।
मकरकेतनवाणसमाकुलं
मुदितमेव समस्तमिदं जगत् ।
मलयमारुतकल्पगुणान्वितः
कफकरो हि वसन्तऋतुर्भवेत् ।
कफजकोपविनाशनानलं
वमनमावनरूक्षनिषेवणम् ॥
विविधः सुरतानन्दः संश्रमः कफवारणः ।
कटुक्षाराम्लकाः सेव्याः शोधनं कफसम्भवे ॥
व्यायामश्रमसंरोधखिन्नो विश्रान्तमानसः ।
एवं क्रियासमापन्नो नरः शीघ्रं सुखी भवेत् ॥"
इति वसन्तोपचारः ॥
इति हारीते प्रथमस्थाने चतुर्थेऽध्याये ॥*॥
"कफश्चितो हि शिशिरे वसन्तेऽर्कांशुतापितः ।
हत्वाग्निं कुरुते रोगानतस्तं त्वरया जयेत् ॥
तीक्ष्णैर्वमननस्याद्यैर्लघुरूक्षैश्च भोजनैः ।
व्यायामोद्वर्त्तनाघातैर्जित्वा श्लेष्माणमुल्वणम् ॥
स्नातोऽनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः ।
पुराणयवगोधूमक्षौरजाङ्गलशूल्यभुक् ॥
सहकाररसोन्मिश्रानास्वाद्य प्रिययार्पितान् ।
प्रियास्यसङ्गसुरभीन् प्रियानेत्रोत्पलाङ्कितान् ॥
सौमनस्यकृतो हृद्यान् वयस्यैः सहितो पिवेत् ।
निर्गदानासवारिष्टसीधुमार्द्वीकमाधवान् ॥
शृङ्गवेराम्बु साराम्बु मध्वम्बु जलदाम्बु वा ।
दक्षिणानिलशीतेषु परितो जलवाहिषु ॥
अदृष्टनष्टसूर्य्येषु मणिकुट्टिमकान्तिषु ।
परपुष्टविघुष्टेषु कामकर्म्मान्तभूमिषु ॥
विचित्रपुष्पवृक्षेषु काननेषु सुगन्धिषु ।
गोष्ठीकथाभिश्चित्राभिर्मध्याह्नं गमयेत् सुखी ॥
गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरांस्त्यजेत् ॥"
इति वाभटे सूत्रस्थाने तृतीयेऽध्याये ॥
"हेमन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरितः ।
कायाग्निं वाधते रोगांस्ततः प्रकुरुते बहून् ॥
तस्माद्वसन्ते कर्म्माणि वमनादीनि कारयेत् ।
गुर्व्वम्लस्निग्धमधुरं दिवास्वप्नञ्च वर्ज्जयेत् ॥
व्यायामोद्वर्त्तनं धूमं कवड़ग्रहमञ्जनम् ॥
सुखाम्बुना शौचविधिं शीलयेत् कुसुमागमे ।
चन्दनागुरुदिग्धाङ्गो यवगोधूमभोजनः ॥
शारभं शाशमैणेयं मांसं लावकपिञ्जलम् ।
भक्षयेन्निगदं सीधुं पिवेन्माध्वीकमेव वा ॥
वसन्तेऽनुभवेत् स्त्रीणां काननानाञ्च यौवनम् ॥"
इति चरके सूत्रस्थाने षष्ठेऽध्याये ॥
"मधुमाधवौ वसन्तः । फाल्गुनचैत्रौ वसन्तः । ता एवौषधयः कालपरिणामात् परिणतवीर्य्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्व्यस्ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धाः स्नेहाच्छैत्यात् गौरवादुपलेपाच्च श्लेष्मणः सञ्चयमापादयन्ति स सञ्चयो वसन्तेऽर्करश्मिप्रविलापित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति ।" "पूर्व्वाह्णे वसन्तस्य लिङ्गम् ।"
"दिशो वसन्ते विमलाः काननैरुपशोभिताः ।
किंशुकाम्भोजवकुलचूताशोकादिपुष्पितैः ॥
कोकिलाषट्पदगणैरुपगीता मनोहराः ।
दक्षिणानिलसंवीताः सुमुखाः पल्लवोज्ज्वलाः ॥"
इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥*॥)
अस्याधिष्ठातृदेवतोत्पत्तिर्यथा,—
मन्मथ उवाच ।
"करिष्येऽहं तव विभो वचनाद्धरमोहनम् ।
किन्तु योषिन्महास्त्रं मे ततः कान्तां भवान् सृज ॥
मया संमोहिते शम्भौ यया तस्यानुमोहनम् ।
कार्य्यं मनोरमां कामां तां निर्दिशय लोकभृत् ॥
तामहं नहि पश्यामि यया तस्यानुमोहनम् ।
कर्त्तव्यमधुना धातस्तत्रोपायं ततः कुरु ॥
मार्कण्डेय उवाच ।
एवंवादिनि कन्दर्पे धाता लोकपितामहः ।
कया संमोहनीयोऽयमिति चिन्तां जगाम ह ॥
चिन्ताविष्टस्य तस्याथ निःश्वासो यो विनिःसृतः ।
तस्माद्वसन्तः संजातः पुष्पव्रातविभूषितः ॥
चूताङ्कुरांस्तत्कलिकां विभ्रद्भ्रमरसंहतिम् ।
किंशुकान् सारसा रेजे प्रफुल्ल इव पादपः ॥
शोणराजीवसङ्काशः फुल्लतामरसेक्षणः ।
सन्ध्योदिताखण्डशशिप्रतिमास्यः सुनासिकः ॥
शङ्खवत्कूवणावर्त्तः श्यामकुञ्चितमूर्द्धजः ।
सन्ध्यांशुमालिसदृशः कुण्डलद्वयमण्डितः ॥
प्रमत्तवारणगतिर्विस्तीर्णहृदयस्थलः ।
पीनस्थूलायतभुजः कठोरकरयुग्मकः ॥
सुवृत्तोरुकटीजङ्घः कम्बुग्रीवोन्नतांसकः ।
गूढ़जत्रुः पीनवक्षः संपूर्णः सर्व्वलक्षणैः ॥
तादृशेऽथ समुत्पन्ने सम्पूर्णे कुसुमाकरे ।
ववौ वायुः ससुरभिः पादपा अपि पुष्पिताः ॥
पिकाश्च नेदुः सततं पञ्चमं मधुरस्वराः ।
प्रफुल्लपद्मा अभवन् सरस्यः स्वच्छपुष्कराः ॥"
इति कालिकापुराणे ४ अध्यायः ॥*॥
हरमोहनकाले अस्य कर्म्माणि यथा,—
"मधुश्च कुरुते कर्म्म यद्यत्तस्य विमोहने ।
तत् शृणुष्व महाभाग नित्यं तस्योचितं पुनः ॥
चम्पकान् केशरानाम्रान् करुणान् पाटलांस्तथा ।
नागकेशरपुन्नागान् किंशुकान् केतकान् वकान् ॥
माधवीमल्लिकापर्णसारान् कुरुवकांस्तथा ।
उत्फुल्लयति तत्र स्म यत्र तिष्ठति वै हरः ॥
सरांस्युत्फुल्लपद्मानि वीजयन् मलयानिलैः ।
सुगन्धि कृतवान् यत्नात् अतीव शङ्कराश्रमम् ॥
लताः सर्व्वाः सुमनसो नूतनाङ्कुरसञ्चयाः ।
वृक्षान् रुचिरभावेन वेष्टयन्ति स्म तत्र च ॥
तान् वृक्षांश्चारुपुष्पौघास्तैः सुगन्धिसमीरणैः ।
दृष्ट्वा कामवशं याता न तत्र मुनिरप्युत ॥
तत्रस्था अपि लोकेश नानाभावैः सुशोभनैः ।
रमन्ते स्म सुराः सिद्धा ये ये चापि तपोधनाः ॥
न तस्य पुनरस्माभिर्दृष्टं मोहस्य कारणम् ।

भावं न कुरुते कामं कार्य्योत्थमपि शङ्करः ॥”
इति कालिकापुराणे ७ अध्यायः ॥ * ॥

वसन्ते वर्णनीयानि यथा,—
“सुरभौ दोला कोकिलमारुतसूर्य्यगतितरु-
दलोद्भिदाः ।
जातीतरपुष्पचयाम्रमञ्जरीभ्रमरझङ्काराः ॥”
इति कविकल्पलतायां प्रथमस्तवकः ॥ * ॥

अतिसारः । इति शब्दरत्नावली ॥ षड्रागान्तर्गतद्वितीयरागः । यथा,—
“रागाः षडेव तु प्रोक्ता रागिण्यस्त्रिंशदेव तु ।
भैरवोऽथ वसन्तश्च नटनारायणस्तथा ।”
इत्यादि ॥ तस्य पञ्चरागिण्यो यथा,—
“आन्दोलिता च देशाख्या लोला प्रथममञ्जरी ।
मन्दारी चेति रागिण्यो वसन्तस्य सदानुगाः ॥”
अस्य ध्यानं यथा,—
“शिखण्डिबर्होच्चयबद्धचूडः
पुष्णन् पिकं चूतलताङ्कुरेण ।
भ्रमन् मुदा काममनोज्ञमूर्त्ति-
र्मतङ्गमत्तः स वसन्तरागः ॥”
अस्य गानसमयो यथा,—
“श्रीपञ्चम्याः समारभ्य यावत् स्यात् शयनं हरेः ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः ॥”
इति सङ्गीतदामोदरः ॥

कल्लिनाथमते अस्य षड्रागिण्यो यथा । आन्धुली १ गमकी २ पठमञ्जरी ३ गौड़करी ४ धामकली ५ देवशाखा ६ ॥ हनूमन्मते हिन्दोलरागपुत्रनामानोऽस्याष्टौ पुत्राः । किन्तु तेषां मध्ये विभासस्थाने हिन्दोल इति लिखितम् ॥ सोमेश्वरमते तस्य षड्रागिण्यो यथा । देशी १ देवगिरी २ वैराटी ३ टोड़िका ४ ललिता ५ हिन्दोली ६ ॥ तन्मते अस्य रागस्य रागिणीसहितस्य वसन्तर्त्तुर्गानसमयः । इति सङ्गीतशास्त्रम् ॥ * ॥ तालविशेषः । यथा,—
“अयमङ्गलगन्धर्व्वमकरन्दत्रिभङ्गमाः ।
रतितालो वसन्तश्च जगन्झम्पोऽथ गारुगिः ॥”
इत्यादि ॥
“वसन्ततालो कर्णयो नगणो मगणस्तथा ।
जगन्झम्पे गुरुश्चैको विरामान्तश्च स्वद्वयम् ॥”
इति सङ्गीतदामोदरः ॥

वसन्तकः, पुं, (वसन्त + संज्ञायां कन् ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥ (रुमण्वतो नर्म्मसुहृदः पुत्रः । यथा, कथासरित्सागरे ।६।४४।
“सुप्रतीकस्य पुत्रश्च रुमण्वानित्यजायत ।
योऽस्य नर्म्मसुहृत्तस्य पुत्रोऽजनि वसन्तकः ॥”)

वसन्तकुसुमः, पुं, (वसन्ते कुसुमं यस्य ।) वृक्षविशेषः । यथा,—
“वसन्तकुसुमः सेलुः शयितो द्विजकुत्सितः ॥”
इति शब्दमाला ॥

वसन्तकुसुमाकरः, पुं, औषधविशेषः । यथा,—
“प्रवालरसमौक्तिकाभ्ररमिदं चतुर्भागभाक्
पृथक् पृथगथ स्मृते रजतहेमतो द्व्यंशके ।
अयोभुजगरङ्गकं त्रिलवकं विमर्द्याखिलं
शुभेऽहनि विभावयेत् भिषगिदं धिया सप्तशः ॥
द्रवैर्वृषनिशेक्षुजैः कमलमालतीपुष्पजैः
पयःकदलिकन्दजैर्मलयजेणनाभ्युद्भवैः ।
वसन्तकुसुमाकरो रसपतिर्द्दिवल्लोऽशितः
समस्तगदहृद्भवेत् किल निजानुपानैरयम् ॥”
इति वृद्धयोगतरङ्गिणी ॥
(अथापरश्च ।
“द्विभागं हाटकं चन्द्रं त्रयो वङ्गाहिकान्तकाः ।
चतुर्भागं शुद्धमभ्रं प्रवालं मौक्तिकन्तथा ॥
भावयेद्गव्यदुग्धेन भावनेक्षुरसेन च ।
वासालाक्षारसोदीच्यरम्भाकन्दप्रसूनकैः ॥
शतपत्ररसेनैव मालत्याः कुङ्कुमोदकैः ।
पश्चाद्मृगमदैर्भाव्यं सुगन्धिरससम्भवम् ॥
कुसुमाकरविख्यातो वसन्तपदपूर्व्वकः ।
गुञ्जाद्वयेन संसेव्यः सितामध्वाज्यसंयुतः ॥
मेहघ्नः कान्तिदश्चैव कामदः पुष्टिदस्तथा ।
वलीपलितनाशश्च स्मृतिभ्रंशं विनाशयेत् ।
पुष्टिदो बल्य आयुष्यः पुत्रप्रसवकारकः ॥
प्रमेहान् विंशतिश्चैव क्षयमेकादशन्तथा ।
तथा सोमरुजं हन्ति साध्यासाध्यमथापि
वा ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाद्यधिकारे ॥)

वसन्तघोषी [न्], पुं, (वसन्ते वसन्तकाले घोषति विरौति वसन्तं घोषयति विज्ञापयतीति वा । घुष + णिनिः ।) कोकिलः । इति केचित् ॥

वसन्तजा, स्त्री, (वसन्ते जायते इति । जन + डः ।) वासन्तीलता । इति राजनिर्घण्टः ॥ (वसन्तकालोद्भवे, त्रि ॥)

वसन्ततिलकं, क्ली, (वसन्तस्य तिलकमिव ।) पुष्पविशेषः । चतुर्द्दशाक्षरपादच्छन्दोविशेषः । यथा,—
“ज्ञेयं वसन्ततिलकं त भ जा ज गौ गः ॥
फुल्लं वसन्ततिलकं तिलकं वनाल्या
लीलापरं पिककुलं कलमत्र रौति ।
वात्येष पुष्पसुरभिर्मलयाद्रिवातो
यातो हरिः स मथुरां विधिना हताः स्मः ॥”
इति छन्दोमञ्जरी ॥ * ॥
औषधविशेषः । यथा,—
“अक्षारलूदहनसैन्धवविश्वशक्र-
चूर्णं करञ्जसहितं मथितेन पीतम् ।
नैवं प्ररोहति पुनर्गुदजः स्वदेतो-
स्तस्मै वसन्ततिलकैरपि कल्पकल्पम् ॥”
इति वृत्तरत्नावल्यां गुदजरोगचिकित्सा ॥
(अन्यविधमौषधम् । यथा,—
“हेम्नो भस्मकमभ्रकं द्विगुणितं लौहास्त्रयः
पारदा-
श्चत्वारो नियतन्तु वङ्गयुगलञ्चैकीकृतं मर्द्दयेत् ।
मुक्ताविद्रुमयो रसेन समता गोक्षुरवासेक्षुजा
सर्व्वं वन्यकरीषकेण सुदृढं शुभं पचेत् सप्तधा ।
कस्तूरीघनसारमर्द्दितरसः पश्चात् सुसिद्धो
भवेत् ।
कासश्वासमपित्तवातकफजित्पाण्डुक्षयादीन्
हरेत्
शूलादिग्रहणीं विषादिहरणो मेहांस्तथा
विंशतिम् ॥
हृद्रोगादिहरो ज्वरादिशमनो वृष्यो वयोवर्द्धनः
श्रेष्ठः पुष्टिकरो वसन्ततिलको मृत्युञ्जयेनोदितः ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाद्यधिकारे ॥)

वसन्तदूतः, पुं, (वसन्तस्य दूत इव ।) आम्रवृक्षः । कोकिलः । पञ्चमरागः । इति विश्वमेदिन्यौ ॥

वसन्तदूती, स्त्री, (वसन्तस्य दूतीव ।) पाटलीवृक्षः । माधवीलता । इति मेदिनी । ते, २३३ ॥ गणिकारी । पिकी । इति राजनिर्घण्टः ॥

वसन्तद्रुः, पुं, (वसन्तस्य द्रुर्वृक्षः ।) आम्रवृक्षः । इति शब्दमाला ॥

वसन्तपञ्चमी, स्त्री, (वसन्तस्य पञ्चमी ।) श्रीपञ्चमी । यथा,—
“मकरस्थे सहस्रांशौ शुक्लपक्षे यशस्विनि ! ।”
इत्यारभ्य ।
“पञ्चम्याञ्च जगद्धात्रीं प्रातरेव नदीजलैः ।
स्नापयित्वा सलक्ष्मीकां कुम्भैर्मारकतैरपि ॥
वसन्तपञ्चमी नाम सर्व्वपापप्रमोचनी ।
वसन्तञ्च समभ्यर्च्य कन्दर्पं सरतिं प्रिये ! ॥
वसन्तरागश्रवणात् श्रियमाप्नोत्यभीप्सिताम् ।
श्रीपञ्चमीन्तु केचित्तां मुनयः प्रवदन्ति वै ।
वर्त्तयेदेकभक्तेन श्रियो न विच्युतिर्भवेत् ॥”
इति मत्स्यसूक्ते ५५ पटलः ॥
अन्यच्च ।
‘माघस्य शुक्लपञ्चम्यां महापूजां समाचरेत् ।
नवैः प्रवालैः कुसुमैरशुचैर्विशेषतः ॥
गौराजनीत्सवं कृत्वा भक्त्या संमान्य वैष्णवान् ।
वसन्तरागं जनयन् गीतनृत्यादि कारयेत् ॥”
तदुक्तम् ।
“श्रीपञ्चमीं समारभ्य यावत् स्याच्छयनं हरेः ।
वसन्तरागः कर्णयो नान्यदा तु कदाचनेति ॥
कृत्वा वसन्तपञ्चम्यां श्रीकृष्णस्यार्च्चनोत्सवम् ।
स्याद्वसन्त इव प्रेयान् वृन्दावनविहारिणः ॥”
इति हरिभक्तिविलासे १४ विलासः ॥

वसन्तसखः, पुं, (वसन्तस्य सखा । “राजाहःसखिभ्यष्टच् ।” ५ । ४ । ९१ । इति टच् ।) कामदेवः । इति हलायुधः ॥

वसन्तोत्सवः, पुं, (वसन्तस्य उत्सवः ।) फाल्गुनोत्सवः । यथा,—
“फाल्गुन्यां पौर्णमास्यान्तु विदध्याद्वैष्णवैः सह
श्रीकृष्णप्रियभक्तस्य वसन्तस्यार्च्चनोत्सवम् ॥
भविष्योत्तरतो ज्ञेयस्तद्विधिश्चेदपेक्ष्यते ।
यः श्रीयुधिष्ठिरस्योक्तो यत्तं भगवता स्वयम् ॥”
तन्माहात्म्यञ्च तत्रैव ।
“एवं यः कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्सवम् ।
मत्प्रसादाच्च सिद्ध्यन्ति तस्य सर्व्वे मनोरथाः ॥
हन्ते तुषारसमये सितपञ्चदश्यां
प्रातर्व्वसन्तसमये समुपस्थिते च ।

संप्राश्य पूतकुसुमं सह चन्दनेन
मत्यं हि पापे पुरुषोऽब्दशतं सुखी स्यात्॥”
इति श्रीहरिभक्तिविलासे १४ विलासः॥
(वसन्तकालोद्भवोत्सवमात्रम्। यथा, कथासरित्सागरे। ४। ४६।
“अथ तस्मिन् महावेश्मो वसन्तोत्सववासरे।
आययौ प्रथमे यामे कुमारसचिवो निशि॥”)

वसा, स्त्री, (वसति वस्ते वा। वस निवासे वस आच्छादने वा+अच्। स्त्रियामाप्।) मांसप्रभवधातुविशेषः। इत्यमरः॥ (यथा, सुश्रुते शारीरस्थाने ४ अध्याये।
“शुद्धमांसस्य यः स्नेहः सा वसा परि-
कीर्त्तिता॥”)
अस्या विवरणं मेदःशब्दे द्रष्टव्यम्॥ मांसरोहिणी। इति राजनिर्घण्टः॥

वसाढ्यः, पुं, (वसया आढ्यः। प्रचुरवसावत्त्वादस्य तथात्वम्।) शिशुमारः। इति त्रिकाण्डशेषः॥

वसिः, पुं, (वस्ते आच्छादयत्यनेन वस्यते आच्छादनपूर्ब्बकं ध्रियते इति वा। वस आच्छादने+“खनिकष्यज्यसीति।” उणा० ४। १३६। इति इः।) वसनम्। इत्युणादिकोषः॥

वसिरं, क्ली, (वस्+किरच्।) सामुद्रलवणम्। गजपिप्पली। इति भरतधृतामरटीका॥ (अस्य गुणा यथा,—
“वसिरं शीतपाक्यश्च सारुष्करनिबन्धनम्।
विष्टम्भि दुर्ज्जरं रूक्षं शीतलं वातकोपनम्॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥
पुं, रक्तापामार्गः। तत्पर्य्यायो यथा,—
“रक्तोऽन्यो वसिरो वृत्तफलो धामार्गवोऽपि च।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

वसिष्ठः, पुं, (वशिष्ठः। पृषोदरादित्वात् शस्य सः।) वशिष्ठमुनिः। इति द्विरूपकोषः॥

वसु, क्ली, (वसत्यनेनेति। वस+“शॄस्वृस्निहीति।” उणा० १। ११। इति उः।) रत्नम्। धनम्। इत्यमरः॥ (यथा, रघुः। ८। ३१।
“बलमार्त्तभयोपशान्तये
विदुषां सत्कृतये बहुश्रुतम्।
वसु तस्य विभोर्न केवलं
गुणवत्तापि परप्रयोजनम्॥”)
वृद्ध्यौषधम्। श्यामम्। इति मेदिनी। से, ६॥ हाटकम्। इति विश्वः॥ जलम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

वसुः, पुं, (वसतीति। वस+उः।) वकवृक्षः। अनलः। रश्मिः। गणदेवताविशेषः। इत्यमरः॥ स चाष्टसंख्यातः। यथा,—
“धरो ध्रुवश्च सोमश्च विष्णुश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ क्रमात् स्मृताः॥”
इति भरतः॥
दक्षो द्वितीयजन्मनि षष्ठमन्वन्तरे असिक्न्यां पत्न्यां षष्टिकन्या जनयामास। ताः प्रजापतिभ्यो दत्तवान्। धर्म्माय दश। तासां नामानि। भानुर्लम्बा ककुद्यामिर्विश्वा साध्या मरुत्वती वसुर्मुहूर्त्ता सङ्कल्पा। आसां मध्ये वसोरष्टौ वसवः पुत्त्रा यथा। द्रोणः प्राणः ध्रुवः अर्कः अग्निः दोषः वास्तुः विभावसुरिति। द्रोणस्य अभिमत्यां पत्न्यां हर्षशोकभयादयः पुत्त्राः। १। प्राणस्य उर्ज्जस्वत्यां द्वौ पुत्त्रौ सहसायुः पुरोजवश्च। २। ध्रुवस्य धारण्यां पुरः पुत्त्रः।३। अर्कस्य वासनायां तर्षादयः पुत्त्राः।४। अग्नेर्वसोर्धारायां द्रविणकादयः पुत्त्राः। ५। दोषस्य शर्व्वर्य्यां शिशुमारो हरेरंशः। ६। वास्तोराङ्गिरस्यां विश्वकर्म्मा। विश्वकर्म्मणः पुत्त्रश्चाक्षुषो मनुरभूत्। विश्वे साध्या मनोः सुताः। ७। विभावसोरुषायां त्रयः पुत्त्राः व्युष्टरोचिरातपनामानः। ८। इति श्रीभागवतमतम्॥ *॥ मतान्तरे अष्टौ वसवो यथा,— धरः १ ध्रुवः २ सोमः ३ सावित्रः ४ अनिलः ५ अनलः ६ प्रत्यूषः ७ प्रभासः ८। इति महाभारते दानधर्म्मः॥ अपि च।
“आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः॥
आपस्य पुत्त्रो वैतण्डः श्रमः शान्तो ध्वनि-
स्तथा।
ध्रुवस्य पुत्त्रो भगवान् कालो लोकप्रकालनः॥
सोमस्य भगवान् वर्च्चा वर्च्चस्वी येन जायते।
धरस्य पुत्त्रो द्रविणो हुतो हव्यवहस्तथा॥
मनोहरायाः शिरसः प्राणोऽथ रमणस्तथा।
अनिलस्य शिवा भार्य्या तस्याः पुत्त्रः पुरोजवाः॥
अविज्ञातगतिश्चैव द्वौ पुत्त्रावनिलस्य तु।
अग्निपुत्त्रः कुमारस्तु शरस्तम्बे व्यजायत॥
तस्याः शाखो विशाखश्च नैगमेयश्च पृष्ठजाः।
प्रत्यूषस्य विदुः पुत्त्रं ऋषिं नाम्ना च देवलम्॥
द्वौ पुत्त्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ।
बृहस्पतेश्च भगिनी वरस्त्री ब्रह्मचारिणी॥
प्रभासस्य तु सा भार्य्या वसूनामष्टमस्य च।
विश्वकर्म्मा महाभागस्तस्यां जज्ञे प्रजापतिः॥”
इति वह्निपुराणे कश्यपीयप्रजासर्गनामाध्यायः कौर्म्मे १४ अध्यायश्च॥ *॥ (एते वशिष्ठस्य धेनुं नन्दिनीमपहृत्य तच्छापग्रस्ताः पृथिव्यां शान्तनुपुत्त्रा आसन्। तेषु द्यौनामा वसुरेव कुरुवृद्धो भीष्मः। एतद्विवरणं यथा, देवीभागवते। २। ३। २४—४४।
“एतस्मिन् समये चाष्टौ वसवः स्त्रीसम-
न्विताः।
वशिष्ठस्याश्रमं प्राप्ता रममाणा यदृच्छया॥
पृथ्वादीनां वसूनाञ्च मध्ये कोऽपि वसूत्तमः।
द्यौर्नामा तस्य भार्य्याथ नन्दिनीं गां ददर्श ह॥
दृष्ट्वा पतिं सा पप्रच्छ कस्येयं धेनुरुत्तमा।
द्यौस्तामाह वशिष्ठस्य गौरियं शृणु सुन्दरि!॥
दुग्धमस्याः पिबेद्यस्तु नारी वा पुरुषोऽथवा।
अयुतायुर्भवेन्नूनं सदैवागतयौवनः।
तच्छ्रुत्वा सुन्दरी प्राह मर्त्त्यलोकेऽस्ति मे सखी।
उशीनरस्य राजर्षेः पुत्त्री परमशोभना॥
तस्या हेतोर्महाभाग! सवत्सां गां पय-
स्विनीम्।
आनयस्वाश्रमश्रेष्ठं नन्दिनीं कामदां शुभाम्॥
यावदस्याः पयः पीत्वा सखी मम सदैव हि।
मानुषेषु भवेदेका जरारोगविवर्ज्जिता॥
तच्छ्रुत्वा वचनं तस्या द्यौर्जहार च नन्दिनीम्।
अवमत्य मुनिं दान्तं पृथ्वाद्यैः सहितोऽनघः॥
हृतायामथ नन्दिन्यां वशिष्ठस्तु महातपाः।
आजगामाश्रमपदं फलान्यादाय सत्वरः॥
नापश्यत् स यदा धेनुं सवत्सां स्वाश्रमे मुनिः।
मृगयामास तेजस्वी गह्वरेषु वनेष्वपि॥
नासादिता यदा धेनुश्चुकोपातिशयं मुनिः।
वारुणिश्चापि विज्ञाय ध्यानेन वसुभिर्हृताम्॥
वसुभिर्मे हृता धेनुर्यस्मान्मामवमन्य वै।
तस्मात् सर्व्वे जनिष्यन्ति मानुषेषु न संशयः॥
एवं शशाप धर्म्मात्मा वसूंस्तान् वारुणिः स्वयम्।
श्रुत्वा विमनसः सर्व्वे प्रययुर्दुःखितास्च ते॥
शप्ताः स्म इति जानन्त ऋषिं तमुपचक्रमुः।
प्रसादयन्तस्तमृषिं वसवः शरणं गताः॥
मुनिस्तानाह धर्म्मात्मा वसून्दीनान् पुरः-
स्थितान्।
अनुसंवत्सरं सर्व्वे शापमोक्षमवाप्स्यथ॥
येनेयं विहृता धेनुर्नन्दिनी मम वत्सला।
तस्माद्द्यौर्मानुषे देहे दीर्घकालं वसिष्यति॥
ते शप्ताः पथि गच्छन्तीं गङ्गां दृष्ट्वा सरिद्व-
राम्।
ऊचुस्तां प्रणताः सर्व्वे शप्तां चिन्तातुरां नदीम्॥
भविष्यामो वयं देवि! कथं देवाः सुधाशनाः।
मानुषाणाञ्च जठरे चिन्तेयं महती हि नः॥
तस्मात्त्वं मानुषी भूत्वा जनयास्मान् सरिद्वरे!।
शन्तनुर्नाम राजर्षिस्तस्य भार्य्या भवानघे!॥
जातान् जातान् जले चास्मान् निक्षिपस्व
सुरापगे!।
एवं शापविनिर्मोक्षो भविता नात्र संशयः॥
तथेत्युक्ताश्च ते सर्व्वे जग्मुर्लोकं स्वकं पुनः।
गङ्गापि निर्गता देवी चिन्तयमाना पुनः पुनः॥”)
योक्त्रम्। राजा। इति मेदिनी। से, ६॥ धनाधिपः। इति विश्वः॥ साधुः। इति शब्दरत्नावली॥ पीतमुद्गः। वृक्षः। इति हेमचन्द्रः॥ पुष्करिणी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शिवः। सूर्य्यः। इत्यनेकार्थकोषः॥ (विष्णुः। यथा, महाभारते। १३। १४९। ८७।
“वसुप्रदो वासुदेवो वसुर्वसुमना हरिः॥”
“वसन्ति भूतान्यत्र एतेषु स्वयमपीति वसुः।”
इति तत्र शाङ्करभाष्यम्॥) कुलीनकायस्थस्य पद्धतिविशेषः। यथा शूद्राणां नामकरणे वसुघोषादिपद्धतियुक्तनामत्वञ्च बोध्यम्। इत्युद्वाहतत्त्वम्॥ अष्टसंख्या। यथा,—
“युग्माग्निकृतभूतानि षण्मुन्योर्वसुरन्ध्रयोः॥”
इति तिथ्यादितत्त्वम्॥
(वकुलः। दृढद्रवोऽस्मरीति च ख्यातः। अस्य पर्य्यायो यथा,—

"शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वसुः, स्त्री, (वस् + उः ।) दीप्तिः । वृद्ध्यौषधम् । इति शब्दरत्नावली ॥ (दक्षस्य कन्याविशेषः । सा तु धर्म्मस्य पत्नीनामन्यतमा । इति विष्णुपुराणम् । १ । १५ । १०५ ॥)
वसुः, त्रि, (वस् + उः ।) मधुरम् । शुष्कम् । इति हेमचन्द्रः ॥
वसुकं, क्ली, (वसुवत् कायतीति । कै + कः ।) साम्भरिलवणम् । इत्यमरः ॥ पांशवम् । वास्तूकम् । इति राजनिर्घण्टः ॥
वसुकः, पुं, (वसुः सूर्य्यस्तन्नाम्ना कायतीति । कै + आतोऽनुपेति कः ।) अर्कवृक्षः । इत्यमरः ॥ शिवमल्ली । इति मेदिनी । के, १५२ ॥ पुष्पविशेषः । स तु श्वेतरक्तभेदेन द्विविधः । तत्पर्य्यायः । वसुः २ शैवः ३ वुकः ४ शिवमल्लिका ५ पाशुपतः ६ शिवमतः ७ सुरेष्टः ८ शिवशेखरः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । पाके शीतलत्वम् । दीपनत्वम् । अजीर्णवातगुल्मनाशित्वम् । श्वेतस्य रसायनत्वञ्च । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायान्तरं यथा,—
"वकपुष्पः काकशीर्षः स्थूलपुष्पः शिवप्रियः ।
वसुकः काकनामा च वसुहट्टः खपूरकः ॥"
इति वैद्यकरत्नमालायाम् ॥)
वसुकीटः, पुं, (वसुनि धने कीट इव प्रार्थकत्वात् ।) याचकः । इति हारावली । ३८ ॥
वसुच्छिद्रा, स्त्री, महामेदाख्यः । इति रत्नमाला राजनिर्घण्टश्च ॥ (तथास्याः पर्य्यायो यथा,—
"महामेदा वसुच्छिद्रा त्रिदन्ती देवतामणिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वसुदः, पुं, (वसूनि ददातीति । दा + कः ।) कुबेरः । इति धनदशब्ददर्शनात् ॥ (यथा, हरिवंशे । ८२ । १५ ।
"सनन्दगोपस्य गृहं वासाय वसुदोपमः ।
अवतीर्य्य ततो यानात् प्रविवेश महाबलः ॥"* ॥
वसु धनं ददातीति । विष्णुः । यथा, महाभारते । १३ । १४९ । ४२ ।
"सुमुखो दुर्द्धरो वाग्मी महेन्द्रो वसुदो वसुः ॥")
धनदातरि, त्रि ॥ (यथा, महाभारते । १२ । १२० । ३० ।
"अमोघक्रोधहर्षस्य स्वयंकृत्यान्ववेक्षितुः ।
आत्मप्रत्ययकोषस्य वसुदैव वसुन्धरा ॥")
वसुदेवः, पुं, (वसुना धनेन दीव्यतीति । दिव् + अच् ।) श्रीकृष्णजनकः । तत्पर्य्यायः । आनकदुन्दुभिः २ । इत्यमरः ॥ शूरः ३ कृष्णपिता ४ । इति शब्दरत्नावली ॥ अस्य विवरणं यथा,—
नारायण उवाच ।
"कश्यपो वसुदेवश्च देवमाता च देवकी ।
पूर्व्वपुण्यफलेनैव संप्राप श्रीहरिं सुतम् ॥
देवमीढ़ान्मारिषायां वसुदेवो महानभूत् ।
आनकाश्च महाहृष्टाः श्रीहरेर्ज्जन्मकाश्च नम् ।
सन्तः पुरातनास्तेन वदन्त्यानकदुन्दुभिम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः वह्निपुराणञ्च ॥ (स्वनामख्यातः कलियुगराजविशेषः । देवभूतेरमात्यः । स तु देवभूतिं निहत्य स्वयं राज्यञ्चकार । यथा, भागवते । १२ । १ । १८ ।
"शुङ्गं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ।
स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥"
वसवो देवता यस्य । धनिष्ठानक्षत्रे, क्ली । यथा, वराहसंहितायाम् । ७ । ११ ।
"घोरा श्रवणस्त्वाष्ट्रं वसुदेवं वारुणञ्चैव ॥")
वसुदेवता, स्त्री, (वसवो देवता यस्याः ।) धनिष्ठानक्षत्रम् । इति हेमचन्द्रः । २ । २८ ॥ (यथा, हरिवंशे । १२२ । ३५ ।
"देवपत्न्यस्तथैवान्या देवाश्च वसुदेवता ॥")
वसुदेवभूः, पुं, (वसुदेवात् भवतीति । भू + क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः । ३ । ३६१ ॥
वसुधा, स्त्री, (वसूनि रत्नानि दधाति धारयतीति । धा + कः । सुवर्णादीनामाकरत्वात् तथात्वम् ।) पृथिवी । इत्यमरः ॥ (यथा, साहित्यदर्पणे १० परिच्छेदे ।
"राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गना सर्व्वस्वम् ॥"* ॥
वसुधनं दधाति इत्ते इति । धा + क्विप् । धनदातरि, त्रि । यथा, वाजसनेयसंहितायाम् । २७ । १५ ।
"वसुश्चेतिष्ठो वसुधातमश्च ॥"
"वसुधातमः वसूनां धनानां दातृतमः । क्विबन्तात् तमप् ।" इति तद्भाष्ये महीधरः ॥)
वसुधाखर्ज्जूरिका, स्त्री, (वसुधाजाता खर्ज्जूरिका ।) भूखर्ज्जूरिका । इति राजनिर्घण्टः ॥
वसुधारा, स्त्री, (वसुवत् रत्नस्येव धारा यस्मो यस्याः ।) जिनशक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मजा १३ खदूरवासिनी १४ भद्रा १५ वैश्या १६ नीलसरस्वती १७ शङ्खिनी १८ महातारा १९ धनंददा २० त्रिलोचना २१ लोचना २२ । इति हेमचन्द्रः ॥ (वसूनां रत्नानां धारा सन्ततिर्यत्र ।) कुबेरपुरी । इति शब्दमाला ॥ (तीर्थविशेषः । यथा, महाभारते । ३ । ८२ । ७२ ।
"ततो गच्छेत धर्म्मज्ञ ! वसुधारामभिष्टुताम् ।
गमनादेव तस्यां हि हयमेधमवाप्नुयात् ॥"* ॥
वसोर्व्वह्निराजस्य प्रिया धारा । यद्वा,—
"वसु द्रव्यं घृतमाज्यमक्षतं हविकामिकम् ।
तस्य धारा सदा देया वसोर्धारा हि सा मता ॥"
इति देवीपुराणोक्तवचनात् वसुनो घृतस्य धारा ।) वृद्धिश्राद्धपूर्व्वकर्त्तव्यवेदिराजवसुहेमकक्कुयलम्बघृतधारा । यथा । छन्दोगपरिशिष्टे कात्यायनः ।
"कुड्यलग्नां वसोर्धारां सप्तवारान् घृतेन तु ।
कारयेत् पञ्चवारान् वा नातिनीचां न चोच्छ्रिताम् ॥
आयुष्मानिति शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥"
वसोर्व्वेदिराजस्य वसोर्धारामिति वसोर्धाराभिपातेनेत्यादिदर्शनात् अलुक्समासेनैव प्रयोगः कर्त्तव्यः । इति श्राद्धतत्त्वम् ॥ * ॥ सामगानां तत्पातनमन्त्रो यथा,—
"यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत ।
सत्यस्य ब्रह्मणो वर्चस्तेन मां संसृजामसि ॥"
यजुषां यथा । "वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्ष्व ।" इति श्राद्धप्रयोगतत्त्वम् ॥ * ॥ ऋग्वेदिनां यथा ।
"अपश्चर आगच्छन्ती भूरिधारे पयस्वती घृतप्रघाते सुव्रते शुचिव्रते । राजन्त्य यस्य यस्य भुवनस्य रोदसी आस्मे रेत सिञ्चितं यन्मनुर्हितम् । १ ।
अन्या इव वमुतमे तवासुत्रना अभिचाकशीमि । यत्र सोमः सूयते यत्र यज्ञो पठते घृतस्य धारा मधुमत् पवन्ते ॥ २ ॥
घृतवती भुवनानामभिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभिते अजरे भूरि रेतसा ॥ ३ ॥
शतधारमुत्सममीयमानं विपश्चितं पितरं वक्त्थाना अभिमदन्त पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचम् ॥ ४ ॥
शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्तेऽभिचक्षते हविः । ये च पृणन्ति प्रयच्छन्ति सङ्गमेति दुदुह्रे सप्तधारम् ॥ ५ ॥
वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु । वसोः पवित्रेण शतधारेण सुप्वा कामधुक्ष्व ॥ ६ ॥
मूर्द्धानन्दिवोरतिं पृथिव्या वैश्वानर मृत आजातमग्निं कविं सम्राजमतिथिं जनानामासन्नाः पात्रं जनयन्त देवाः स्वाहा ॥ ७ ॥
इत्येतैर्मन्त्रैः सप्तघृतधारा दद्यात् । इति कालेसिः ॥ * ॥ विशेषवसुधारा यथा,—
"न्यूना या वहते धारा मानात् सर्पिषः सा शुभा ।
नाधिका शस्यते विप्र दुर्भिक्षकलिकारिका ॥
सुच्यते वहमाना या शमते च हुताशनम् ।
सवर्णा हेमवर्णा च धारा राज्यविवृद्धये ॥
सन्तता पतते या तु तनोतीव च पावकम् ।
तनोति नृपराष्ट्रञ्च वसोर्धारा न संशयः ॥
सुगन्धि स्वच्छविमलं कृमिकीटविवर्ज्जितम् ।
शस्यते च वसोर्धारा या सर्पिर्गव्यपूजिता ॥
अभावात् गव्यजातं वा चोतयन्तु सुशोभनम् ।
घृतक्षीरपयोधारा सर्व्वपीड़ानिवारिणी ॥
वसु द्रव्यं घृतमाज्यमक्षतं हविकामिकम् ।
तस्य धारा सदा देया वसोर्धारा हि सा मता ॥

वसुना स्वर्गकामेन इन्द्रेण च महात्मना ।
मया च विष्णुना शक्र रुद्रेण च महोमया ॥
आत्मानञ्च स्वरूपेण धारायान्तु प्रपादितम् ।
देवी सान्निध्यमायाता सर्व्वकामप्रदायिका ॥
तस्मात्त्वमपि राजेन्द्र ! वसोर्धारां प्रपातय ।
नान्यः परतरं पुण्यं विद्यते नृपसत्तम ! ॥
वसोर्धाराप्रदानस्य एकाहमपि यद्भवेत् ।
नृपेणायुषकामेन पुत्र राज्यजिगीषुणा ।
देया धारा सदा वत्स ! रिपुनाशाय बुद्धिमन् ॥
दस्याभावे हृताभावे नृप तस्करजे भये ।
यदि नो वहते धारा तदा छिद्रं न विद्यते ॥
महाआश्विनमासे तु अष्टमीनवमीषु च ।
कार्त्तिक्यां माघचैत्रे तु चित्रायां रोहिणीषु च ॥
वैशाख्यान्तु प्रदातव्या ज्यैष्ठ्यां ज्येष्ठस्य सत्तम ! ।
आषाढ़द्वादशीसोमं अष्टमी पूर्णिमा नभे ॥
नभस्ये रोहिणी वत्स ! चतुर्थ्यां द्वादशीदिने ।
संक्रान्तिषु च सर्व्वासु गुरुशौरिभवासु च ।
चन्द्रसूर्य्योपरागेषु प्रतिष्ठायज्ञकर्म्मणि ।
शक्रोच्छ्रये प्रदातव्या अन्नपुष्याभिषेचने ।
मार्गे व्रतनिबन्धे तु शुभे वाक्ये तु दर्शने ।
चहस्रोपसर्गेषु धारा देयाः शुभावहाः ।
एवं यो वाहयेद्धाराः शास्त्रदृष्टेन कर्म्मणा ।
तस्य भूः सिद्ध्यते सर्व्वा सनागा सहसागरा ॥”
इति देवीपुराणे वसोर्धारानाम ३५ अध्यायः ॥

वसुन्धरा, स्त्री. (वसूनि धारयतीति । धृ + “संज्ञायां भृतॄवृजिधारिसहितपिदमः ।” ३ । २ । ४६ । इति खच् । “खचि ह्रस्वः ।” ६ । ४ । ९४ । इति ह्रस्वः । “अरुर्द्विषदजन्तस्य मुम् ।” ६ । ३ । ६७ । इति मुम् ।) पृथिवी । इत्यमरः ॥ (यथा, विष्णुपुराणे । १ । ४ । ११ ।
“निरीक्ष्य तं तदा देवी पातालतलमागतम् ।
तुष्टाव प्रणता भूत्वा भक्तिनम्रा वसुन्धरा ॥”
शफल्कस्य कन्या । यथा, हरिवंशे । ३८।५३।
“विश्रुता शाम्बमहिषी कन्या चास्य वसुन्धरा ।
रूपयौवनसम्पन्ना सर्व्वसत्त्वमनोहरा ॥”
पुं, प्लक्षद्वीपस्थ वर्षपुरुषभेदः । यथा, भागवते । ५ । २० । ११ । “ऋतवर्षपुरुषाः श्रुतिधरवीर्य्यधरवसुन्धरेषुन्धरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते ।”)

वसुप्राणः, पुं, (वसु दीप्तिः प्राणा इवास्य ।) अग्निः । इति शब्दरत्नावली ॥

वसुमती, स्त्री, (वसूनि धनरत्नानि सन्त्यस्या इति । वसु + मतुप् । ङीप् ।) पृथिवी । इत्यमरः ॥ (यथा, रघौ । ८ । ८३ ।
“तदलं तदपायचिन्तया
विपदुत्पत्तिमतामुपस्थिता ।
वसुधेयमवेक्ष्य तां त्वया
वसुमत्या हि नृपाः कलत्रिणः ॥)

वसुरोचिः, [स्] क्ली, (वसवः रोचन्ते अस्मिन्निति । रुच दीप्तौ + “वसौ रुचेः संज्ञायाम् ।” उणा० २ । ११२ । इति इसिन् ।) यज्ञः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वसुलः, पुं, (वसु दीप्तिं लाति गृह्णातीति । ला + कः ।) देवता । इति त्रिकाण्डशेषः ॥

वसुश्रेष्ठं, क्ली, (वसुना दीप्त्या श्रेष्ठम् ।) रूप्यम् । इति राजनिर्घण्टः ॥

वसुसेनः, पुं, कर्णराजः । इति त्रिकाण्डशेषः । (यथा, महाभारते । १ । ६७ । १४० ।
“राधायाः कल्पयामास पुत्त्रं सोऽधिरथस्तदा ।
चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ ।
दम्पती वसुसेनेति दिक्षु सर्व्वासु विश्रुतम् ॥”
क्वचित् वसुषेणेति पाठः ॥)

वसुस्थली, स्त्री, (वसूनां धनानां स्थली ।) कुबेरपुरी । इति शब्दमाला ॥

वसुहट्टः, पुं, (वसूनां दीप्तीनां हट्ट इव ।) वकवृक्षः । इति रत्नमाला ॥

वसुहट्टकः, पुं. (वसुहट्ट + स्वार्थे कन् ।) वकवृक्षः । इति शब्दमाला ॥

वसूकं, क्ली, साम्भरिलवणम् । इति हेमचन्द्रः ॥ वकपुष्पम् । इति द्विरूपकोषः ॥

वस्क, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) दन्त्यमध्य इति दुर्गसिंहः ॥ क्वापि वक् । मूर्द्धन्यमध्य इत्येके । क्वापि वट् । ङ, वस्कते । इति दुर्गादासः ॥

वस्कः, पुं, (वस्क् + भावे घञ् ।) अध्यवसायः । इति भूरिप्रयोगः ॥

वस्कयः, पुं, (वस्कते इति । वस्क गतौ + बाहुलकात् अयन् ।) एकहायनो वत्सः । इत्यमरटीकायां रायमुकुटः ॥

वस्कयनी, स्त्री, (वस्कय एकहायनो वत्सः । तेन नीयते इति । नी + क्विप् । ङीष् ।) चिरप्रसूता गौः । इत्यमरटीकायां रायमुकुटः ॥ अस्या दुग्धगुणाः ।
“वस्कयिन्यास्त्रिदोषघ्नं तर्पणं बलकृत् पयः ।”
इति भावप्रकाशः ॥

वस्कराटिका, स्त्री, वृश्चिकः । इति हारावली ॥

वस्त, क ङ वधे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, वस्तयते । गतिहिंसायाचनेष्वित्ति रमानाथः । इति दुर्गादासः ॥

व(ब)स्तः, पुं, (वस्यते यज्ञार्थं बध्यते इति । वस्त + कर्म्मणि घञ् ।) छागः । इत्यमरः । २ । ९ । ७६ ॥ (यथा, मार्कण्डेये । ४३ । १२ ।
“यस्य वस्तसमो गन्धो गात्रे शवसमोऽपि वा ।
तस्यार्द्धमासिकं ज्ञेयं योगिनो नृप ! जीवितम् ॥”)

वस्तकं, क्ली, कृत्रिमलवणम् । इति हेमचन्द्रः ॥

वस्तकर्णः, पुं, (वस्तस्य छागस्य कर्णाकृतिः पत्रावच्छेदे अस्त्यस्येति । वस्तकर्ण + अर्श-आदित्वादच् ।) शालवृक्षः । इति राजनिर्घण्टः ॥

वस्तगन्धा, स्त्री, (वस्तस्य गन्ध इव गन्धो यस्याः ।) इति राजनिर्घण्टः ॥

वस्तमोदा, स्त्री, (वस्तं छागं मोदयतीति । मुद + णिच् + अच् ।) अजमोदा । इति राजनिर्घण्टः ॥

वस्तयः, पुं स्त्री भूम्नि. (वस् + “वसेस्तिः ।” उणा० ४ । १७९ । इति तिः बहुवचनान्तोऽयम् ।) वस्त्रस्य दशाः । यथा, अमरः । २ । ६ । ११४ ।
“स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्व्वस्तयो द्वयोः ॥”

वस्ताम्ली, स्त्री, (वस्तस्येव अम्लमस्याः । गौरादित्वात् ङीष् ।) छगलाम्लीक्षुपः । तत्पर्य्यायः । वृषगन्धाख्या २ मेषाम्ली ३ वृषपत्त्रिका ४ अजाम्ली ५ चोकड़ी ६ । अस्या गुणाः । कटुरसत्वम् । कासदोषविनाशित्वम् । वीजदाढ्यत्वम् । गर्भजनकत्वञ्च । इति राजनिर्घण्टः ॥

वस्तिः, पुं, स्त्री, (वसति मूत्रादिकमत्र । वस् + “वसेस्तिः ।” उणा० ४ । १७९ । इति तिः ।) नाभेरधोभागः । इत्यमरः ॥ वस्ते आच्छादयति मूत्राशयपुटं वस्तिः । वस ल स्तुतौ नाम्नीति तिक् । मूत्राशयपुटो वस्तिरिति रत्नमाला । इति तट्टीकायां भरतः ॥ * ॥ अथ वस्तिविधिः ।
“वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परः ।
यः स्नेहैर्दीयते स स्यादनुवासननामकः ॥
कषायक्षारतैलैर्यो निरूहः स निगद्यते ।
वस्तिभिर्दीयते यस्मात् तस्माद्वस्तिरिति स्मृतः ॥”
वस्तिभिः मृगादीनां मूत्राशयैः ।
“तत्रानुवासनाख्यो हि वस्तिर्यः सोऽत्र कथ्यते ।
अनुवासनभेदश्च मात्रावस्तिरुदीरितः ॥
पलद्वयं तस्य मात्रा तस्मादर्द्धोऽपि वा भवेत् ।
अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली ॥
नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी ।
नास्थाप्या नानुवास्याः स्युरजीर्णोन्मादतृड्युताः ॥
शोथमूर्च्छारुचिभयश्वासकासक्षयातुराः ।
नेत्रं कार्य्यं सुवर्णादिधातुभिर्वृक्षवेणुभिः ।
नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते ॥”
नेत्रं नाड़ी । तथा च विश्वप्रकाशे ।
नेत्रं पथि गुणे वस्त्रे तरुमूले विलोचने ।
नेत्रवस्ते च नाथाच्च नेत्रो नेतरि भेदवदिति ॥
“एकवर्षात्तु षड्वर्षं यावन्मानं षडङ्गुलम् ।
ततो द्वादशकं यावन्मानं स्यादष्टसंमितम् ॥
ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता ।
मुद्गच्छिद्रं कलायाभं छिद्रं कोलास्थिरन्ध्रकम् ॥
यथासंख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसन्निभम् ॥”
मूले स्थूलम् । ततः क्रमात् कृशम् । मुद्गच्छिद्रादिप्रमाणं नेत्रं क्रमेण षड्वर्षाय द्वादशवर्षाय तदूर्द्ध्ववर्षाय ज्ञेयम् ।
“आतुराङ्गुष्ठमानेन मूले स्थूलं विधीयते ।
कनिष्ठिकापरीणाहमग्रे च गुटिकामुखम् ॥”
परिणाहोऽत्र स्थौल्यम् ।
“तन्मूले कर्णिके द्वे च कार्य्ये भागाच्चतुर्थकात् ।
कर्णिका गवादिकर्णवत् । कर्णिका छत्राकारा गुदाधिकान्तःप्रवेशरोधिनी कर्णिकेति । कर्णिकाकारत्वात् कर्णिकेति कथ्यते ।

"योजयेत्तत्र बस्तिञ्च बन्धद्वयविधानतः ।
मृगाजशूकरगवां महिषस्यापि वा भवेत् ॥"
बस्तिरिति शेषः ।
"मूत्रको यस्य बस्तिस्तु तदलाभे तु चर्म्मजः ।
कषायरक्तः सुदृढैर्वस्तिःस्निग्धो दृढो हितः ॥
व्रणवस्तेस्तु नेत्रं स्यात् श्लक्ष्णमष्टाङ्गुलोन्मितम् ।
मुद्गच्छिद्रं गृध्रपक्षनालिकापरिणाहि च ॥
शरीरोपचयं वर्णं बलमारोग्यमायुषः ।
कुरुते परिवृद्धिञ्च बस्तिः सम्यगुपासितः ॥
दिवा शीते वसन्ते च स्नेहबस्तिः प्रदीयते ।
ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनुवासनम् ।
नचातिस्निग्धमशनं भोजयित्वानुवासयेत् ।
मदं मूर्च्छाञ्च जनयेत् द्विधा स्नेहप्रयोजितः ॥"
द्विधाभाजने बस्तौ च ।
"रूक्षं भुक्तवतोऽत्यन्तं बलं वर्णञ्च ह्रापयेत् ।
युक्तस्नेहमतो जन्तुं भोजयित्वानुवासयेत् ॥"
युक्तस्नेहं यथोचितस्नेहं भोज्यं भोजयित्वा इत्यर्थः ।
"हीनमात्रावुभौ बस्ती नातिकार्य्यकरौ स्मृतौ ।
अतिमात्रौ तथानाहक्लमातिसारकारकौ ॥"
उभौ बस्ती अनुवासननिरूहाख्यौ ।
"उत्तमा स्यात् पलैः षड्भिर्मध्यमा स्यात् पलैस्त्रिभिः ।
पलद्वयेन हीना स्यादुक्ता मात्रानुवासने ॥"*॥
अथ स्नेहबस्तिः ।
"शताह्वासैन्धवाभ्यां च देयं स्नेहे च पूर्णकम् ।
तन्मात्रोत्तममध्यान्त्याः षट्चतुर्यवमाषकैः ॥
विरेचनात् सप्तरात्रे गते जातबलाय च ।
भुक्तान्नायानुवास्याय बस्तिर्देयोऽनुवासनः ॥
अथानुवास्यं स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः ।
भोजयित्वा यथाशास्त्रं कृतं चंक्रमणं ततः ॥
उत्सृष्टानिलविण्मूत्रं योजयेत् स्नेहबस्तिना ॥"
उष्णाम्बुस्वेदितं उष्णाम्बुना स्नापितम् ।
"सुप्तस्य वामपार्श्वेन वामजङ्घाप्रसारिणः ।
कुञ्चितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत् ॥
बद्धं बस्तिमुखं सव्येनवामहस्तेन धारयेत् ।
पीडयेद्दक्षिणेनैव मध्यवेगेन धीरधीः ॥
जृम्भाकासक्षवादींश्च बस्तिकाले न कारयेत् ।
त्रिंशन्मात्रामितः कालः प्रोक्तो बस्तेस्तु पीडने ॥
ततः प्रणिहिते स्नेहे उत्तानो वाक्शतं भवेत् ।
स्वजानुनः करावर्त्तं कुर्य्याच्छोटिकया युतम् ॥
एषा मात्रा भवेदेका सर्व्वत्रैवैष निश्चयः ।
निमेषोन्मेषकं पुंसामङ्गुल्या छोटिकाथ वा ॥
गुर्व्वक्षरोच्चारणं वा मात्रेयं स्मृता बुधैः ।
प्रसारितैः सर्व्वगात्रैर्यथावीर्य्यं प्रसर्पति ॥"
यथावीर्य्यं स्नेहादि ।
"ताडयेत्तलयोरेनं त्रींस्त्रीन् वारान् शनैः शनैः ।
स्फिचोश्चैव तथा श्रोण्यौ शय्याञ्चैवोत्क्षिपेत्ततः ॥
स्फिचोश्चैनं स्वपार्ष्णिभ्यां पूर्व्ववत्ताडयेद्बुधः ।
शय्याञ्च पादतस्तस्य त्रीन् वारानुत्क्षिपेत्ततः ।
जाते विधाने तु ततः कुर्य्यान्निद्रां यथासुखम् ॥
सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु ।
उपद्रवं विना शीघ्रं स सम्यगनुवासितः ॥"
उपद्रवस्थाने उषचोषाविति सुश्रुते पाठः ।
"जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः ।
लघ्वन्नं भोजयेत् कामं दीप्ताग्निस्तु नरो यदि ॥
अनुवासिताय देयमितरेऽह्नि सुखोदकम् ।
धान्यशुण्ठीकषायं वा स्नेहव्यापत्तिनाशनम् ॥"
सुखोदकं उष्णोदकम् । व्यापत्तिर्व्याधिः ।
"अनेन विधिना षड्वा सप्त वाष्टौ नवापि वा ।
विधेया बस्तयस्तेषामन्ते चैव निरूहणम् ॥
दत्तस्तु प्रथमो बस्तिः स्नेहयेद्बस्तिवङ्क्षणौ ।
सम्यग्दत्तो द्वितीयस्तु मूर्द्धस्थमनिलं जयेत् ॥
बलं वर्णञ्च जनयेत् तृतीयस्तु प्रयोजितः ।
चतुर्थपञ्चमौ दत्तौ स्नेहयेतां रसासृजौ ॥
षष्ठो मांसं स्नेहयति सप्तमो मेद एव च ।
अष्टमो नवमश्चापि मज्जानञ्च यथाक्रमम् ॥"
यथाक्रममिति वचनादष्टमोऽस्थि स्नेहयेत् ।
"एवं शुक्रगतान् दोषान् द्विगुणः साधु साधयेत् ॥
द्विगुणः अष्टादशदिवसाधिको बस्तिः ।
"अष्टादशाष्टादशकान् बस्तीनां यो निषेवते ।
स कुञ्जरबलोऽश्वस्य रये तुल्योऽमरप्रभः ॥
रूक्षाय बहुवाताय स्नेहबस्तिं दिने दिने ।
दद्याद्वैद्यस्तथान्येषामग्न्याबाधभयात्त्र्यहात् ॥
स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनत्ययः ।"
अनत्ययोऽबाधकः ।
"तथा निरूहः स्निग्धानां मलमात्रः प्रशस्यते ॥
अथवा यस्य तत्कालं स्नेहो निर्याति केवलः ।
तस्मान्योऽल्पतरो देयो नहि स्निह्यति तिष्ठति ॥"
स्निह्यति स्निग्धे तिष्ठति इत्यत्रैव इति शेषः ।
"अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ।
तदाङ्गसदनाध्माने शूलं श्वासश्च जायते ॥
पक्वाशये गुरुत्वञ्च तत्र दद्यान्निरूहणम् ।
तीक्ष्णं तीक्ष्णौषधैर्युक्तं फलवर्त्तिर्हिताथवा ॥
यथानुलोमगो वायुर्मलं स्नेहश्च जायते ।
तथा विरेचनं दद्यात् तीक्ष्णं नस्यं च शस्यते ॥
यस्य नोपद्रवं कुर्य्यात् स्नेहबस्तिर्विनिःसृतः ।
सर्व्वोऽल्पो वा वृतो रौक्ष्यादुपेक्ष्यः स विजानता ॥
अनायातं त्वहोरात्रे स्नेहं संशोधनैर्हरेत् ।
स्नेहबस्तावनायाते नान्यः स्नेहो विधीयते ॥
गुडूचीरण्डपूतीकभार्गीवृष्याकरौहिषम् ।
शतावरीसहचरं काकनासां पलोन्मिताम् ॥
यवमाषातसीकोलकुलत्थान् प्रसृतोन्मितान् ।
चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणशेषेण तेन च ॥
पचेत्तैलाढकं पेष्यैर्जीवनीयैः पलोन्मितैः ।
अनुवासनमेतद्धि सर्व्ववातविकारनुत् ॥"
पूतिकः करञ्जः । रौहिषं रोहिष इति सुगन्धतृणविशेषः । काकनासा कौयाठोठी । प्रसृतं पलद्वयम् ।
"षट्सप्ततिव्यापदस्तु जायन्ते बस्तिकर्म्मणः ।
दूषितात् बहुदायेन ताभिश्चिह्नाश्च सुश्रुतात् ॥"
बहुदायेन अनुचितनेत्रादिसामग्र्या ।
"पानाहारविहाराश्च बस्तिकर्म्मणि कृत्स्नशः ।
स्नेहपानसमाः कार्य्या नात्र कार्य्या विचारणा ॥"*॥
अथ निरूहबस्तिविधिः ।
"निरूहबस्तिर्बहुधा भिद्यते कारणान्तरैः ।
तैरेव तस्य नामानि कृतानि मुनिपुङ्गवैः ॥"
कारणान्तरैः समवायिकारणभेदैः ।
"निरूहस्यापरं नाम प्रोक्तमास्थापनं बुधैः ।
स्वस्थानस्थापनाद्दोषधातूनां स्थापनं मतम् ॥
निरूहस्य प्रमाणञ्च प्रस्थः पादोत्तरं परम् ।
मध्यमं प्रस्थमुद्दिष्टं हीनञ्च कुडवास्त्रयः ॥"
परं श्रेष्ठम् ।
"अतिस्निग्धोऽक्लिष्टदोषः क्षतोरस्कः कृशस्तथा ।"
अक्लिष्टदोषः अनुत्क्लिष्टदोषः । अदत्तोत्क्लेशन इति यावत् । क्षतोरस्कः उरःक्षतवान् ।
"आध्मानच्छर्द्दिहिक्कार्शःशोषश्वासप्रपीडितः ।
गुदशोफातिसारार्त्तो विसूचीकुष्ठसंयुतः ॥
गर्भिणी मधुमेही च नास्थाप्यश्च जलोदरी ।
वातव्याधावुदावर्त्ते वातासृग्विषमज्वरे ॥
मूर्च्छातृष्णोदरानाहमूत्रकृच्छ्राश्मरीषु च ।
वृद्ध्यसृग्दरमन्दाग्निप्रमेहेषु निरूहणम् ॥
शूलेऽम्लपित्ते हृद्रोगे योजयेद्विधिवद्बुधः ।
उत्सृष्टानिलविण्मूत्रं स्निग्धं स्विन्नमभोजितम् ॥
मध्याह्ने गृहमध्ये च यथायोग्यं निरूहयेत् ।"
स्निग्धं स्वभ्यक्तम् । स्विन्नं उष्णाम्बुस्नापितम् ।
"स्नेहबस्तिविधानेन बुधः कुर्य्यान्निरूहणम् ॥
जाते निरूहे च ततो भवेदुत्कटकासनः ।
तिष्ठेन्मुहूर्त्तमात्रन्तु निरूहागमनेच्छया ॥"
अत्र मुहूर्त्तमात्रशब्देनैतदपि बोधितम् ॥
निरूहप्रत्यागमनकालो मुहूर्त्तमात्रः ।
"अनायातं मुहूर्त्तात्तु निरूहं शोधनैर्हरेत् ।
निरूहैरेव मतिमान् क्षारमूत्राम्लसैन्धवैः ॥
यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः ।
लाघवञ्चोपजायेत सुनिरूढं तमादिशेत् ॥
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः ।
आस्थापनस्नेहबस्त्योः सम्यग्दाने तु लक्षणम् ॥"
विविक्तता दत्तौषधनिःसरणम् ।
"अनेन विधिना युञ्ज्यान्निरूहं बस्तिदानवित् ।
द्वितीयं वा तृतीयं वा चतुर्थं वा यथोचितम् ॥
सस्नेह एकः पवने पित्ते द्वौ पयसा सह ।
कषायकटुका रूक्षा कफे उष्णास्त्रयो हिताः ॥
पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात् ।
निरूढं भोजयित्वा च ततस्तमनुवासयेत् ॥
सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः ।
बस्तिस्तीक्ष्णा प्रयुक्ता हि तेषां हन्याद्बलायुषी ॥
दद्यादुत्क्लेशनं पूर्व्वं मध्ये दोषहरं ततः ।
पश्चात् संशमनीयञ्च दद्याद्बस्तिं विचक्षणः ॥
एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा ।
हपुषा फलकल्कश्च बस्तिरुत्क्लेशनः स्मृतः ॥"
इत्युत्क्लेशनबस्तिः ॥ * ॥

"शताह्वा मधुकं बिल्वं कौटजं फलमेव च ।
सकाञ्जिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः ।"
इति दोषहरवस्तिः । * ।
"प्रियङ्गुर्मधुकं मुस्ता तथैव च रसाञ्जनम् ।
सक्षीरः शस्यते वस्तिर्दोषाणां शमनः स्मृतः ।"
इति शमनवस्तिः ।*।
"त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः ।
ऊषकादिप्रतीवापा वस्तयो लेखनाः स्मृताः ।"
ऊषकादिप्रतीवापाः ऊषकादिगणविशेषचूर्ण-प्रक्षेपाः । इति लेखनवस्तयः । * ।
"बृंहणद्रव्यनिःक्वाथैः कल्कैर्मधुरकैर्युताः ।
सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः ।"
इति बृंहणवस्तयः । * ।
"बदर्य्यैरावतीशेलुशाल्मलीपुष्पजाङ्कुराः ।"
ऐरावती नारङ्गी । शेलुः बहुवारः ।
"क्षीरसिद्धाः क्षौद्रयुक्ता नाम्ना पिच्छिलसंज्ञिताः ।
अजोरभ्रैणरुधिरैर्युक्ता देया विचक्षणैः ।"
अजश्छागः । उरभ्रो मेषः । एणः कृष्णमृगः ।
"मात्रा पिच्छिलवस्तीनां पलैर्द्वादशभिर्मता ।"
इति पिच्छिलावस्तयः ।*।
"दत्त्वादौ सैन्धवस्याक्षं मधुनः प्रसृतिद्वयम् ।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतित्रयम् ।
एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत् ।
संमूर्च्छिते कषायन्तु चतुःप्रसृतिसम्मितम् ।
गृह्णीयाच्च तदावापमन्ते द्विप्रसृतोन्मितम् ।
क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक् ।
एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतो भवेत् ।
वाते चतुःपलं क्षौद्रं दद्यात् स्नेहस्य षट्पलम् ।
पित्ते चतुःपलं क्षौद्रं स्नेहं दद्यात् पलत्रयम् ।
कफे तु षट्पलं क्षौद्रं क्षिपेत् स्नेहं चतुः-पलम् ।"
इति निरूहमात्रा ।
"एरण्डक्वाथतुल्यांशं मधु तैलं पलाष्टकम् ।
शतपुष्पापलार्द्धेन सैन्धवार्द्धेन संयुतम् ।
मधुतैलिकसंज्ञोऽयं वस्तिर्दावविलोडितः ।
मेदोगुल्मक्रिमिप्लीहमलोदावर्त्तनाशनः ।
बलवर्णकरश्चैव वृष्यो दीपनबृंहणः ।"
इति मधुतैलिकवस्तिः ।
"क्षौद्राज्यक्षीरतैलानां प्रसृतं प्रसृतं भवेत् ।
हपुषा सैन्धवाक्षांशो वस्तिः स्याद्यापनः परः ।"
यापनः धारकः । इति यापनवस्तिः ।*।
"एरण्डमूलनिःक्वाथो मधु तैलं ससैन्धवम् ।
एष युक्तरथो वस्तिः सवचापिप्पलीफलः ।"
इति युक्तरथवस्तिः ।
"पञ्चमूलस्य निःक्वाथस्तैलं मागधिका मधु ।
ससैन्धवः सयष्ट्याह्वः सिद्धवस्तिरिति स्मृतः ।"
इति सिद्धवस्तिः ।
"जागरक्षोदकैः कुर्य्याद्दिवास्वप्नमजीर्णताम् ।
वर्ज्जयेदपरं सर्व्वमाचरेत् स्नेहवस्तिवत् ।"
अथोत्तरवस्तिविधिः ।
"अतः परं प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितम् ।
निरूहादुत्तरो यस्मात्तस्मादुत्तरसंज्ञकः ।
द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकम् ।
मालतीपुष्पवृन्ताभं छिद्रं सर्षपनिर्गमम् ।
पञ्चविंशतिवर्षाणामधोमात्रा द्विकार्षिका ।
तदूर्द्धं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः ।
अथ स्थापनशुद्धस्य कृतस्य स्नानभोजनैः ।
स्थितस्य जानुमात्रेण पीठेऽन्विष्य शलाकया ।
स्निग्धया मेढ्रमार्गन्तु ततो नेत्रं नियोजयेत् ।
शनैः शनैर्घृताभ्यक्ते मेढ्ररन्ध्रेऽङ्गुलानि षट् ।
ततोऽवपीडयेद्वस्तिं शनैर्नेत्रं विनिर्हरेत् ।
ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः ।
स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्य्याद्दशाङ्गुलम् ।
मुहुः प्रवेशं योन्यञ्च योन्यन्तश्चतुरङ्गुलम् ।
द्व्यङ्गुलं मूत्रमार्गे च सूक्ष्मनेत्रं वियोजयेत् ।
मूत्रकृच्छ्रविकारेषु बालानां त्वेकमङ्गुलम् ।
शनैर्निष्क्रम्यमाधेयं सूक्ष्मं नेत्रं विचक्षणैः ।"
मालतीपुष्पवृन्ताभं नेत्रमित्युक्तत्वात् पुनः सूक्ष्म-शब्दाभिधाने बालानां ततोऽपि नेत्रस्य सूक्ष्मता-बोधनार्थम् ।
"योनिमार्गेषु नारीणां स्नेहमात्रा द्विपालिका ।
मूत्रमार्गे पलोन्माना बालानाञ्च द्विकार्षिकी ।
उत्तानायै स्त्रियै दद्यात् ऊर्द्ध्वजान्वै विचक्षणः ।
अप्रत्यागच्छति भिषक् वस्तावुत्तरसंज्ञिते ।
भूयो वस्तिं विदध्याच्च संयुक्तं शोधनैर्गणैः ।
फलवर्त्तिं विदध्याद्वा योनिमार्गे दृढं भिषक् ।
सूत्रैर्विनिर्म्मितां स्निग्धां शोधनद्रव्यसंयुताम् ।
दह्यमाने तथा वस्तौ दद्याद्वस्तिं विशारदः ।
क्षीरिद्रुमकषायेण पयसा शीतलेन वा ।"
दह्यमाने वस्तौ अस्मिन् स्थाने वस्तिर्दत्तस्तस्मिन् दह्यमाने ।
"वस्तिः शुक्ररुजः पुंसां स्त्रीणामार्त्तवजा रुजः ।
हन्यादुत्तरवस्तिस्तु नोचिता मेहिनां क्वचित् ।
सम्यग्दत्तस्य लिङ्गानि व्यापदक्रम एव च ।
वस्तेरुत्तरसंज्ञस्य समानः स्नेहवस्तिना ।"* ।
अथ फलवर्त्तिविधिः ।
"घृताभ्यक्ते गुदे क्षिप्ता सूक्ष्मा स्वाङ्गुष्ठसन्निभा ।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता ।"
इति भावप्रकाशः । * ।
("चतुरङ्गुलां वेणुमयीं नाडीं प्रतिलक्ष्यं कृत्वा, तया वस्तिप्रतिकर्म्म कुर्य्यात् ।
नातिक्षीणे च काले च न शीते न च भोजिते ।
न निद्रालौ च मूत्रार्त्ते विष्ठार्त्ते न च वेदभाक् ।
वस्तिकर्म्म निरूहञ्च कारयेत्तं निरस्य च ।
आदौ मूत्रविष्ठोत्सर्गं कृत्वा गुदं प्रक्षाल्य नाति शिथिलशय्यायां शाययित्वा वामाङ्गे वामपादं दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य जङ्घोपरि-संस्थाप्य गुदाभ्यन्तरे द्व्यङ्गुलमात्रां नाडीं सुधीः प्रचारयेत् । ततः शनैः शनैर्वस्तिं निष्पीड्य द्विपलपरिमिततैलेन निरूहं कुर्य्यात् । निरूहा-नन्तरं शनैः शनैरुत्तानं शाययित्वा स्फिचौ हस्तं च पश्चात् सङ्कोच्य पाणिभिः पञ्च वारान् स्फिक्पिण्डान् मोटयेत् । ततः स्वस्थं कृत्वा क्षीणनाप्यामाशयं मलस्थानं शोधयति । वस्त्यु-दरवातान् दोषान् निवारयति । पण्डितास्तं वस्तिनिरूहं तद्वस्तिकर्म्म च विदुः ।" इति हारीते सूत्रस्थाने तृतीयेऽध्याये ।

"कृतक्षणं शैलवरस्य रम्ये
स्थितं धनेशायतनस्य पार्श्वे ।
महर्षिसंघैर्वृतमग्निवेशः
पुनर्व्वसुम्प्राञ्जलिरन्वपृच्छत् ।
वस्तिर्नरेभ्यः किमपेक्ष्य दत्तः
स्यात् सिद्धिमान् किम्मयनस्य नेत्रम् ।
कीदृक् प्रमाणाकृति किङ्गुणञ्च
केषाञ्च किं योनिगुणश्च वस्तिः ।
निरूहकर्म्म प्रणिधानमात्राः
स्नेहस्य वा काः शमने विधिः कः ।
के वस्तयः केषु मता इतीदं
श्रुत्वोत्तरं प्राह वचो महर्षिः ।
समीक्ष्य दोषौषधदेशकाल-
सात्म्याग्निसत्त्वौकवयोबलानि ।
वस्तिः प्रयुक्तो नियतं गुणाय
स्युः सर्व्वकर्म्माणि च सिद्धिमन्ति ।
सुवर्णरूप्यत्रपुताम्ररीति-
कांस्यास्थिशस्त्रद्रुमवेणुदन्तैः ।
नलैर्व्विषाणैर्मणिभिश्च तैस्तैः
कार्य्याणि नेत्राणि सुकर्णिकानि ।
षड्द्वादशाष्टाङ्गुलसम्मितानि
षड्विंशतिद्वादशवर्षजानाम् ।
स्युर्मुद्गकर्कन्धुसतीनवाहि-
छिद्राणि वर्त्त्या पिहितानि चापि ।
यथावयोऽङ्गुष्ठकनिष्ठिकाभ्यां
मूलाग्रयोः स्युः परिणाहवन्ति ।
ऋजूनि गोपुच्छसमाकृतीनि
श्लक्ष्णानि च स्युर्गुलिकामुखानि ।
स्यात् कर्णिकैकाग्रचतुर्थभागे
मूलाश्रिते वस्तिनिबन्धने द्वे ।
जरद्गवो माहिषहारिणो वा
स्यात् शौकरो वस्तिरजस्य चापि ।
दृढस्तनुर्नष्टशिरो विगन्धः
कषायरक्तः सुमृदुः सुशुद्धः ।
नृणां वयो वीक्ष्य यथानुरूपं
नेत्रेषु योज्यस्तु सुबद्धसूत्रः ।
वस्तेरभावे प्लवानां गलो वा
स्यादङ्कपादः सुघनः पटो वा ।
आस्थापनार्हं पुरुषं विधिज्ञः
समीक्ष्य पुण्येऽहनि शुक्लपक्षे ।
प्रशस्तनक्षत्रमुहूर्त्तयोगे
जीर्णान्नमेकाग्रमुपक्रमेत ।
बलां गुडूचीं त्रिफलां सरास्नां
द्वे पञ्चमूले च पलोन्मितानि ।
अष्टौ फलान्यर्द्धतुलाञ्च मांसा-
च्छागात् पचेदप्सु चतुर्थशेषम् ।
पूतं यवानीफलबिल्वकुष्ठ-
वचाशताह्वा घनपिप्पलीनाम् ।

कल्कैर्गुड़क्षौद्रयुतैः स तैलै-
र्युतं सुखोष्णं तु पिचुप्रमाणैः ।
गुड़ोत्पलं द्विप्रसृतास्तु मात्रा
स्नेहस्य युक्त्या मधुसैन्धवादि ॥
प्रक्षिप्य वस्तौ मथितं खजेन
सुबद्धमुच्छ्वास्य च निर्व्वलीकम् ।
अङ्गुष्ठमध्येन मुखं पिधाय
नेत्राग्रसंस्थामपनीयवर्त्तिम् ॥
तैलाक्तगात्रं कृतमूत्रविट्कं
नातिक्षुधार्त्तं शयने मनुष्यम् ।
समेऽथ वैषम्यतशीर्षकेवा
नात्युच्छ्रिते स्वास्तरणोपपन्ने ॥
सव्येन पार्श्वेन सुखं शयानं
कृत्वर्ज्जुदेहं स्वभुजोपधानम् ।
निकुञ्च्य सव्येतरमस्य सक्थि
वामं प्रसार्य्य प्रणयेत्ततस्तम् ॥
स्निग्धे गुदे नेत्रचतुर्थभागं
स्निग्धं शनैर्ऋजु पृष्ठवंशम् ।
अकम्पनावेपनलाघवादीन्
पाण्योर्गुणांश्चापि विदर्शयन् हि ॥
प्रपीड्य चैकग्रहणेन दत्तं
नेत्रं शनैरेव ततोऽपकर्षेत् ।
तिर्य्यक्प्रणीते तु न याति धारा
गुदव्रणः स्याच्चलिते च नेत्रे ॥
दत्तः शनैर्नाशयमेति वस्तिः
कण्ठं प्रधावत्यतिपीड़ितश्च ।
शीतस्त्वतिस्तम्भकरो विदाहं
मूर्च्छाञ्च कुर्य्यादतिमात्रमुष्णः ।
स्निग्धोऽतिजाड्यं पवनन्तु रूक्ष-
स्तन्वल्पमात्रा लवणस्त्वयोगम् ।
करोति मात्राभ्यधिकोऽतियोगं
क्षामन्तु सान्द्रः सुचिरेण चैति ॥
दाहातिसारौ लवणोऽतिकुर्य्या-
त्तस्मात् प्रयुक्तं सममेव दद्यात् ।
पूर्व्वं हि योज्यं मधुसैन्धवन्तु
स्नेहं विनिर्मथ्य ततोऽनुकल्कम् ॥
विमथ्य संयुज्य पुनर्द्रवैस्तत्
वस्तौ निदध्यान्मथितं खजेन ।
आमाशयोऽग्निर्ग्रहणीगुदञ्च
तत्पार्श्वसंस्थस्य सुखोपलब्धिः ॥
लीयन्त एवं वलयश्च तस्मात्
सव्यं शयानोऽर्हतिवस्तिदानम् ।
विड्वातवेगो यदि चार्द्धदत्ते
निष्कृष्य दत्ते प्रणयेदशेषम् ॥
उत्तानदेहस्य कृतोपधानः
स्याद्वीर्य्यमाप्नोति तथास्य देहम्
एकोऽपकर्षत्यनिलं स्वमार्गात्
पित्तं द्वितीयस्तु कफं तृतीयः ॥
प्रत्यागते कोष्णजलावसिक्तः
शाल्यन्नमद्यात्तनुना रसेन ।
जीर्णे तु सायं लघु चाल्पमात्रं
भुक्तोऽनुवास्यः परिबृंहणार्थम् ॥"

"स्निग्धोष्ण एकः पवने निरूहो
द्वौ स्वादुशीतौ पयसा च पित्ते ।
त्रयः समूत्राः कटुकोष्णतीक्ष्णाः
कफे निरूहा न परं विधेयाः ॥
रसेन वाते प्रति भोजनं स्यात्
क्षीरेण पित्ते तु कफे च यूषैः ।
तथानुवास्येषु च विल्वतैलं
स्याज्जीवनीयं फलसाधितञ्च ॥"

इति चरके सिद्धिस्थाने तृतीयेऽध्याये ॥

"तत्र स्नेहादीनां कर्म्मणां वस्तिकर्म्मप्रधानतममाहुराचार्य्याः । कस्मादनेककर्म्मकरत्वादस्तेरिह वस्तिर्नानाविधद्रव्यसंयोगाद्दोषाणां संशोधनसंशमनसंग्रहणानि करोति । क्षीणशुक्रं वाजीकरोति कृशं वृंहयति स्थूलं कर्षयति चक्षुः प्रीणयति वलीपलितमुपहन्ति वयः स्थापयति । शरीरोपचयं वर्णं बलमारोग्यमायुषः परिवृद्धिञ्च करोति वस्तिः सम्यगुपासितः ॥ तथा ज्वरातीसारतिमिरप्रतिश्यायशिरोरोगाधिमन्थार्द्दिताक्षेपकपक्षाघातैकाङ्गसर्व्वाङ्गरोगाध्मानोदरशर्कराशूलवृद्ध्युपदंशानाहमूत्रकृच्छ्रगुल्मवातशोणितवातमूत्रपुरीषोदावर्त्तशुक्रार्त्तवस्तन्यनाशहृद्ग्रहमन्यास्तम्भहनुग्रहाशोंऽश्मरी मूढ़गर्भप्रभृतिषु चात्यर्थमुपयुज्यते ॥"

"तत्र द्विविधो वस्तिः नैरूहिकः स्नैहिकश्च । आस्थापनं निरूह इत्यनर्थान्तरम् । तस्य विकल्पो माधुतैलिकः । तस्य पर्य्यायशब्दो यापनो युक्तरथः सिद्धवस्तिरिति । सदोषनिर्हरणाच्छरीररोगहरणाद्वा निरूहः । वयः स्थापनादायुःस्थापनाद्वास्थापनम् । माधुतैलिकविधानञ्च निरूहक्रमचिकित्सिते वक्ष्यामः ॥

तत्र यथा प्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवासनः पादावकृष्टः । अनुवसन्नपि न दुष्यत्यनुदिवसं दीयत इत्यनुवासनः ॥

तस्यापि विकल्पोऽर्द्धार्द्धमात्रावकृष्टोऽपरिहार्य्योमात्रावस्तिरिति ॥" इति सुश्रुते चिकित्सितस्थाने ३५ अध्यायः ॥

"अत ऊर्द्ध्वं प्रवक्ष्यामि व्यापदः स्नेहवस्तिजाः ।
बलवन्तो यदा दोषाः कोष्ठे स्युरनिलादयः ॥
अल्पवीर्य्यं तदा स्नेहमभिभूय पृथग्विधान् ।
कुर्व्वन्त्युपद्रवान् स्नेहः स चापि न निवर्त्तते ॥
तत्र वाताभिभूते तु स्नेहे मुखकषायता ।
जृम्भावातरुजाक्रान्ता वेपथुर्विषमज्वरः ॥
पित्ताभिभूते स्नेहे तु मुखस्य कटुता भवेत् ।
दाहस्तृष्णा ज्वरः स्वेदो नेत्रमूत्राङ्गपीतता ॥
श्लेष्माभिभूते स्नेहे तु प्रसेको मधुरास्यता ।
गौरवं छर्द्दिरुच्छ्वासः कृच्छ्रः शीतज्वरोऽरुचिः ॥
तत्र दोषाभिभूते तु स्नेहे वस्तिं निधापयेत् ।
यथास्वं दोषशमनान्युपयोज्यानि यानि च ॥
अत्याशितेऽन्नाभिभवात् स्नेहो नैति यदा तदा ।
गुरुरामाशयः शूलं वायुश्चाप्रतिसञ्चरः ॥
हृत्पीड़ामुखवैरस्यं श्वासो मूर्च्छा भ्रमोऽरुचिः ।
तत्रामतर्पणस्यान्ते दीपनो विधिरिष्यते ॥
अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ।
तदाङ्गसदनाध्माने श्वासः शूलञ्च जायते ॥
पक्वाशयगुरुत्वञ्च तत्र दद्यान्निरूहणम् ।
अतितीक्ष्णौषधैरेवं सिद्धञ्चाप्यनुवासनम् ॥
शुद्धस्य दूरागच्छते स्नेहे स्नेहस्य दर्शनम् ।
गात्रेषु सर्व्वेन्द्रियाणामुपलेपोऽवसादनम् ॥
स्नेहगन्धिमुखत्वञ्च कासश्वासावरोचकः ।
अतिपीड़ितदत्तश्च विविधा व्यापदस्तथा ॥
अखिन्नस्याविशुद्धस्य स्नेहोऽल्पः सम्प्रयोजितः ।
शीतो मृदुश्च नाभ्येति ततो मन्दं प्रवाहयेत् ॥
विबन्धगौरवाध्मानशूलाः पक्वाशयं प्रति ।
तत्रास्थापनमेवाशु प्रयोज्यं सानुवासनम् ॥
अल्पं भुक्तवतोऽल्पो हि स्नेहोमन्दगुणस्तथा ।
दत्तो नैति क्षमोत्कर्षे भृशं वा रतिमावहेत् ॥
तत्र वास्थापनं कार्य्यं शोधनीयेन वस्तिना ।
अन्नासवश्च स्नेहेन शोधनीयेन शस्यते ॥
अहोरात्रादपि स्नेहः प्रत्यागच्छन्न दूष्यति ।
कुर्य्याद्वस्तिगुणांश्चापि जीर्णस्त्वल्पगुणो भवेत् ॥
यस्य नोपद्रवं कुर्य्यात् स्नेहवस्तिरनिःसृतः ।
सर्व्वोऽल्पो वा वृतो रौक्ष्यादुपेक्ष्यः स विजानता ॥
अनायान्तमहोरात्रात् स्नेहं संशोधनैर्हरेत् ।
स्नेहवस्त्रावनायाते नान्यः स्नेहो विधीयते ।
इत्युक्ता व्यापदः सर्व्वाः सलक्षणचिकित्सिताः ॥"

इति च सुश्रुते चिकित्सितस्थाने३७अध्यायः ॥)

वस्तिकर्म्माढ्यः, पुं, (वस्तिकर्म्मणा तच्छोधनव्यापारेण आढ्यः । वस्तिशोधने एवास्य प्रचुरकार्य्यकरत्वात् तथात्वम् ।) अरिष्टवृक्षः । भूरिठा इति ख्यातः । यथा,—

"अरिष्टो वस्तिकर्म्माढ्यो वेशीरः फेनिलः क्षुपः ॥"

इति शब्दचन्द्रिका ॥

वस्तिमलं, क्ली, (वस्तेर्नाभ्यधोभागस्य मलम् ।) मूत्रम् । इति हेमचन्द्रः । ३ । २६७ ॥

वस्तु, क्ली, (वसतीति । वस + "वसेस्तुन् ।" उणा॰ १ । ७६ । इति तुन् ।) द्रव्यम् । यथा,—

"वृद्धद्रव्यं क्षौपिकं स्यात् सत्त्वं द्रव्यञ्च वस्तु च ॥"

इति ॥

(तथा, भागवते । ६ । ४ । २७ ।

"गृहेषु दारेषु सुतेषु बन्धुषु
द्विपोत्तमस्यन्दनवाजिवस्तुषु ।
अक्षय्यरत्नाभरणाम्बरादि-
ष्वनन्तकोषेष्वकरोदसन्मतिम् ॥"

पात्रभूतम् । यथा, रघौ । ३ । २९ ।

"अथोपनीतं विधिवद्विपश्चितो
विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते
क्रिया हि वस्तूपहिता प्रसीदति ॥")

पदार्थः । यथा,—
"भावः पदार्थो धर्म्मः स्यात् सत्त्वं तत्त्वञ्च
वस्तु च ।"
इति त्रिकाण्डशेषः ॥
(यथा, शकुन्तलायाम् १ अङ्के ।
"सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ॥")
जगति वस्तुद्वयं भावोऽभावश्च । इति न्याय-
शास्त्रम् ॥ सच्चिदानन्दाद्वयं ब्रह्म । इति वेदान्त-
सारः ॥ (यथा, कथासरित्सागरे । २१ । ४८ ।
"अहो वस्तुनि मात्सर्य्यमहो भक्तिरवस्तुनि ॥"
कार्य्यम् । यथा, कामन्दकीयनीतिसारे।१५।२५।
"वस्तुष्वशक्येषु समुद्यमश्चेत्
शक्येषु मोहादसमुद्यमश्च ।
शक्येषु कालेन समुद्यमश्च
त्रिधैव कार्य्यव्यसनं वदन्ति ॥"
अर्थः । इति मल्लिनाथः ॥ यथा, कुमारे ।
६ । ६५ ।
"अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।
ऋषयो नोदयामासुः प्रत्युवाच स भूधरम् ॥"
इतिवृत्तम् । यथा, विक्रमोर्व्वश्याम् ।
"अहमस्यां कालिदासग्रथितवस्तुना नवेन त्रोट-
केनोपस्थास्ये ॥")
वस्तुकं, क्ली, (वस्तु + संज्ञायां कन् ।) वास्तूकम् ।
इति शब्दरत्नावली राजनिर्घण्टश्च ॥
वस्तुकी, स्त्री, (वस्तुक + गौरादित्वात् ङीष् ।)
श्वेतचिल्लीशाकः । इति राजनिर्घण्टः ॥
वस्त्यं, क्ली, (वस् + क्तिन् । वस्तिर्वासस्तस्यां
साधु । वस्ति + "तत्र साधुः ।" ४ । ४ । ९८ ।
इति यत् ।) गृहम् । इत्यमरः ॥
वस्त्रं क्ली, (वस्यते आच्छाद्यतेऽनेनेति । वस
आच्छादने + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणा० ४ ।
१५८ इति ष्ट्रन् ।) परिधानाद्युपयुक्तकार्पासादि-
निर्म्मितवस्तु । कापड़ इति भाषा । तत्पर्य्यायः ।
आच्छादनम् २ वासः ३ चेलम् ४ वसनम् ५
अंशुकम् ६ । इत्यमरः ॥ सिचयः ७ पोतः ८
नक्तकः ९ कर्पटः १० शाटकः ११ कशिपुः १२ ।
इति जटाधरः ॥ वासनम् १३ छिपयम् १४
प्रोतम् १५ छादम् १६ वासम् १७ । इति
शब्दरत्नावली ॥*॥ अस्य परिधानविधिर्यथा,
भृगुः ।
"विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च ।
श्रौतं स्मार्त्तं तथा कर्म्म न नग्नश्चिन्तयेदपि ॥"
विकच्छः परीधानासंवृतकच्छः । तथा च ।
"परीधानाद्वहिःकच्छा निबद्धा ह्यासुरी भवेत् ॥"
स्मृतिः ।
"वामे पृष्ठे तथा नाभौ कच्छत्रयमुदाहृतम् ।
एभिः कच्छैः परीधत्ते यो विप्रः स शुचिः स्मृतः ॥"
बौधायनः ।
"नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी ।
अन्तरीयं प्रशस्तं तदच्छिन्नमुभयोस्तयोः ॥"
प्रचेताः । दशा नाभौ प्रयोजयेत् । स्मृतिः ।
न स्यात् कर्म्मणि कञ्चुकीति । उत्तरीयधारणं
चोपवीतवत् ।
"यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः ।
तथा सन्धार्य्यते यत्नादुत्तराच्छादनं शुभम् ॥"
इति स्मृतेः ॥
अत्र यथा द्विजोत्तमैः सव्यापसव्यत्वादिना उप-
वीतं धार्य्यते तथा उत्तराच्छादनमपि द्विजो-
त्तमैरिति प्रदर्शनमात्रम् । प्रागुक्तभृगुवचनेन
सर्व्वेषां द्विवस्त्रताप्रतीतेः । पारस्करः । एकचे-
दासो भवति तस्य उत्तरार्द्धेन प्रच्छादयतीति ।
इत्याह्निकतत्त्वम् ॥ * ॥ अस्य धारणगुणाः ।
यथा,—
"काम्यं यशस्यमायुष्यमलक्ष्मीघ्नं प्रहर्षणम् ।
श्रीमत्पारिषदं शस्तं निर्म्मलाम्बरधारणम् ॥"
इति राजवल्लभः ॥ * ॥
अपि च ।
"स्नातस्यानन्तरं सम्यग्वस्त्रेण तनुमार्जनम् ।
कान्तिप्रदं शरीरस्य कण्डूयादोषनाशनम् ॥
कौषेयं चित्रवस्त्रञ्च रक्तवस्त्रं तथैव च ।
वातश्लेष्महरं तत्तु शीतकाले विधारयेत् ॥"
कौषेयं पट्टाम्बरं तसरवस्त्रञ्च ।
"मेध्यं सुशीतं पित्तघ्नं कषायं वस्त्रमुच्यते ।
तद्धारयेदुष्णकाले तच्चापि लघु शस्यते ॥"
कषायं कोकची इति लोके । कषायरागरक्तं
वा ।
"शुक्लन्तु शुभदं वस्त्रं शीतातपनिवारणम् ।
न चोष्णं न च वा शीतं तत्तु वर्षासु धारयेत् ॥
यशस्यं काम्यमायुष्यं श्रीमदानन्दवर्द्धनम् ।
त्वच्यं वशीकरं रुच्यं नवं निर्म्मलमम्बरम् ॥"
काम्यं कामोद्दीपकम् ।
"कदापि न जनैः सद्भिर्धार्य्यं मलिनमम्बरम् ।
तत्तु कण्डूकृमिकरं ग्लान्यलक्ष्मीकरं परम् ॥"
अलक्ष्मीरशोभा दारिद्र्यं वा । इति भाव-
प्रकाशः ॥ * ॥ (अथ स्वप्ने वस्त्रादिदर्शनात्
शुभफलं यथा,—
"कन्यां कुमारकान् गौरान् शुक्लवस्त्रान् सुते-
जसः ।
यः पश्येल्लभते यो वा छत्रादर्शविषामिषम् ॥
शुक्लाः सुमनसो वस्त्रममेध्यालेपनं फलम् ।
यस्य स्यादायुरारोग्यं वित्तं बहु च सोऽश्नुते ॥"
इति वाभटे शारीरस्थाने षष्ठेऽध्याये ॥)
अथ नववस्त्रपरीधानदिनम् ।
"भ्रवाश्विराधवसुतिष्यविशाखहस्त-
चित्रोत्तराश्विपवनादितिरेवतीषु ।
जन्मर्क्षजीवबुधशुक्रदिनोत्सवादौ
धार्य्यं नवं वसनमीश्वरदैवतुष्टौ ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च ।
"सूर्य्ये चाल्पधनं शशः शशिदिने क्लेशः सदा
भूमिजे
वस्त्राणां बहुता बुधे सुरगुरौ विद्यागमः
सम्पदः ।
नानाभोगयुतः प्रमोदशयनं दिव्याङ्गना भार्गवे
शौरे स्युः खलु रोगशोककलहा वस्त्रे धृते
नूतने ॥"
इति कर्म्मलोचनम् ॥ * ॥
अस्य क्षारसंयोगनिषिद्धदिनानि यथा,—
"नन्दभद्रकषष्ठीषु द्वादश्यां श्राद्धवासरे ।
वस्त्राणां क्षारसंयोगो दहत्यासप्तमं कुलम् ॥"
इत्याह्निकाचारतत्त्वम् ॥
तद्दानफलं यथा,—
"वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ॥"
इति शुद्धितत्त्वम् ॥
अपि च ।
"द्विजानां ये तु सततं शुभवस्त्रप्रदा नराः ।
वस्त्रगन्धयुतः पन्थास्तेषां सुजलशीतलः ॥"
इत्याद्ये वह्निपुराणे यमधर्म्मिलोपाख्याननामा-
ध्यायः ॥ * ॥ तेन विष्णुपूजाविधिर्यथा,—
"दुकूलपट्टकौषेयवाल्ककार्पासिकादिभिः ।
वासोभिः पूजयेद्विष्णुं सुशुभैरात्मनः प्रियैः ॥"
इति तत्रैव क्रियायोगनामाध्यायश्च ॥
तद्ग्रहणविधिर्यथा । विष्णुधर्म्मोत्तरम् ।
"वस्त्रं दशान्तमादद्यात् परिधाय तथा पुनः ।
आचम्योपानहौ चानमारुह्यैव च पादुके ॥"
तस्याधिपतिर्यथा । तत्रैव ।
"बार्हस्पत्यं स्मृतं वासः सौम्यानि रजतानि च ।
पत्रिणश्च तथा सर्व्वे वायव्याः परिकीर्त्तिताः ॥"
तत्प्रतिग्रहप्रायश्चित्तं यथा । हारीतः । मणि-
वासोगवादीनां प्रतिग्रहे सावित्र्यष्टशतं जपेत् ।
अष्टसहस्रं अष्टोत्तरसहस्रम् । इति शुद्धि-
तत्त्वम् ॥ * ॥ अपि च ।
श्रीभगवानुवाच ।
"कार्पासं काम्बलं वाल्कं कौषजं वस्त्रमिष्यते ।
तत् पूर्व्वं पूजयित्वैव मन्त्रैर्देवाय चोत्सृजेत् ॥
निर्दशं मलिनं जीर्णं छिन्नं नाचावलिङ्गितम् ।
परकीयं वाखुदष्टं सूचीविद्धं तथोषितम् ।
उग्रकेशं विधौतञ्च श्लेष्मरक्तादिदूषितम् ॥
प्रदाने दैवताभ्यश्च दैवे पैत्रे च कर्म्मणि ।
वर्ज्जयेत् शापयोगेन यज्ञादावुपयोजने ॥"
शापयोगेन इत्यत्र खोपयोगेन इति क्वचित्
पुस्तके पाठः ।
"उत्तरीयोत्तरासङ्गौ निचोलो मोदचेलकः ।
परिधानञ्च पञ्चैतान्यस्यूतानि प्रयोजयेत् ॥
शाणवस्त्रं नीशारञ्च तथैवातपवारणम् ॥"
क्वचित् पुस्तके शाणवस्त्रमित्यत्र मणिवस्त्रमिति
पाठः ।
"चक्रांसकं तथा पूर्व्वं पञ्च स्यूतान्यदुष्टये ।
पताकाध्वजदण्डादौ स्यूतं वस्त्रं प्रयोजयेत् ॥
अन्यथावरणादौ च तद्विना शस्ततोऽपि च ।
रक्तं कौषेयवस्त्रञ्च महादेवे प्रशस्यते ॥
गीतं तथैव कौषेयं वासुदेवाय चोत्सृजेत् ।
रक्तन्तु कम्बलं दद्यात् शिवाय परमात्मने ॥
विचित्रं सर्व्वदेवेभ्यो देवीभ्योऽंशुं निवेदयेत् ।
कार्पासं सर्व्वतोभद्रं दद्यात् सर्व्वेभ्य एव तु ॥

नैकान्तरक्तं दद्यात्तु वासुदेवाय चेलकम् ।
तथा नैकान्तरक्तन्तु शिवाय विनिवेदयेत् ॥
नीलीरक्तन्तु यद्वस्त्रं तत् सर्व्वत्र विवर्ज्जितम् ।
दैवे पैत्रे स्वोपयोगे वर्ज्जयेत्तद्विचक्षणः ॥
नीलीरक्तं प्रमादात्तु यो दद्याद्विष्णवे बुधः ।
निष्फला तस्य तत्पूजा तदा भवति भैरव ॥
विचित्रे वाससि पुनर्लग्नं नीलीविरञ्जितम् ।
वस्त्रं दद्यान्महादेव्यै नान्यस्मै तु कदाचन ॥
द्विपदां ब्राह्मणो यद्वत् देवानां वासवो यथा ।
तथा भूषणवर्गेषु वस्त्रमुत्तममुच्यते ॥
वस्त्रेण त्रायते लज्जां वस्त्रेण त्रायते त्वघम् ।
वस्त्रात् स्यात् सर्व्वतः सिद्धिश्चतुर्व्वर्गप्रदश्च तत् ॥”
इति कालिकापुराणे ६८ अध्यायः ॥
राज्ञा सदा वस्त्राच्छादितशरीरं कर्त्तव्यम् ।
यथा,—
“सर्व्वदा मङ्गलं रत्नं धारयेत् सह दूर्व्वया ।
अवस्त्राच्छादितं गात्रं न विप्रेभ्यः प्रदर्शयेत् ॥”
इति तत्रैव ८९ अध्यायः ॥
नीलवस्त्रं परिधाय विष्णुपूजननिषेधो यथा,—
वराह उवाच ।
“भूषितो नीलवस्त्रेण यो हि मामुपसर्पति ।
वर्षाणाञ्च शतं पञ्च कृमिर्भूत्वा स तिष्ठति ॥
तस्य वक्ष्यामि सुश्रोणि अपराधविशोधनम् ।
प्रायश्चित्तं विशालाक्षि येन मुच्येत किल्बिषात् ॥
व्रतं चान्द्रायणं कृत्वा विधिदृष्टेन कर्म्मणा ।
मुच्यते किल्बिषात् भूमे एवमेतन्न संशयः ॥”
इति वाराहे नीलवस्त्रपरीधानप्रायश्चित्तनामाध्यायः ॥ * ॥ विष्णुपूजने रक्तवस्त्रपरीधाननिषेधो यथा,—
वराह उवाच ।
“रक्तवस्त्रेण संयुक्तो यो हि मामुपसर्पति ।
तस्यापि शृणु सुश्रोणि कर्म्म संसारमोक्षणम् ॥
रजस्वलासु नारीषु रजो यत्तत् प्रवर्त्तते ।
तेनासौ रजसा स्पृष्टो कर्म्मदोषेण जायते ॥
वर्षाणि दशपञ्चैव वसते तत्र निश्चयः ।
रजो भूत्वा महाभागे रक्तवस्त्रपरायणः ॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य कायविशोधनम् ।
येन शुध्यन्ति वै भूमे पुरुषाः शाठ्यवर्ज्जिताः ॥
एकाहारं ततः कृत्वा दिनानि दश सप्त च ।
वायुभक्षो दिनत्रीणि दिनमेकं जलाशनः ॥
एवं स मुच्यते भूमे मम विप्रियकारकः ।
प्रायश्चित्तं ततः कृत्वा ममासौ रोचते सह ॥
एतत्ते कथितं भूमे रक्तवस्त्रविभूषितम् ।
प्रायश्चित्तं महाभागे सर्व्वं संसारमोक्षणम् ॥”
इति तत्रैव रक्तवस्त्रपरीधानप्रायश्चित्तम् ॥
परिधृतकृष्णवस्त्रस्य विष्णूपासननिषेधो यथा,—
“यः पुनः कृष्णवस्त्रेण मम कर्म्मपरायणः ।
देवि कर्म्माणि कुर्व्वीत तस्य वै पतनं शृणु ॥
घुणा वै पञ्चवर्षाणि काष्ठभक्षश्च जायते ।
मशकस्त्रीणि वर्षाणि कच्छपस्त्रीणि च पञ्च च ॥
न च गच्छति संसारं मम कर्म्मपरायणः ।
पारावतश्च जायेत नववर्षाणि पञ्च च ।
जातो ममापराधेन स्थितः पारावतो भुवि ।
तिष्ठते मम पार्श्वेषु यत्रैवाहं प्रतिष्ठितः ॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य संसारमोक्षणम् ।
येनासौ लभते सिद्धिं कृष्णवस्त्रापराधतः ॥
सप्ताहं यावकं भुक्त्वा त्रिरात्रं शक्तुपिण्डिकाम् ।
त्रीणि पिण्डान् त्रिरात्रन्तु एवं मुच्येत किल्बिषात् ॥
य एतेन विधानेन देवि कर्म्माणि कारयेत् ।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः ।
न स गच्छति संसारं मम लोकाय गच्छति ॥”
इति तत्रैव कृष्णवस्त्रपरीधानप्रायश्चित्तम् ॥
परिधृताधौतवस्त्रस्य विष्णुकर्म्मकरणनिषेधो यथा,—
वराह उवाच ।
“वाससा न च धौतेन यो मे कर्म्माणि कारयेत् ।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः ॥
तस्य दोषं प्रवक्ष्यामि अपराधं वसुन्धरे ।
पतन्ति येन संसारं वाससोच्छिष्टकारिणः ॥
देवि भूत्वा गजोन्मत्तस्तिष्ठत्येकं नरो भुवि ।
उष्ट्रश्चैकं भवेज्जन्म जन्म चैकं खरस्तथा ॥
गोमायुरेकजन्मा वै जन्म चैकं हयस्तथा ।
सारङ्गश्चैकजन्मा वै मृगो भवति चैकतः ॥
सप्तजन्मान्तरं पश्चात्ततो भवति मानुषः ।
मद्भक्तश्च गुणज्ञश्च मम कर्म्मपरायणः ।
निरापराधो दक्षश्च अहङ्कारविवर्ज्जितः ॥
धरण्युवाच ।
श्रुतमेतत् प्रयत्नेन यत्त्वया समुदाहृतम् ।
संसारं वाससोच्छिष्टं येन गच्छन्ति मानवाः ॥
प्रायश्चित्तञ्च मे ब्रूहि सर्व्वकर्म्मसुखावहम् ।
किल्बिषात् येन मुच्यन्ति तव कर्म्मपरायणाः ॥
वराह उवाच ।
शृणु तत्त्वेन मे देवि कथ्यमानं मयानघे ।
प्रायश्चित्तं प्रवक्ष्यामि मम भक्तिपरायणः ॥
यावकेन दिनं त्रीणि पिण्याकेन पुनस्त्रयः ।
कणभक्षो दिनत्रीणि पायसेन दिनत्रयम् ॥
एवं कृत्वा महाभागे वाससोच्छिष्टकारिणः ।
अपराधं न विद्येत संसारञ्च न गच्छति ॥”
इति तत्रैव अधौतवासःपरिधानप्रायश्चित्तनामाध्यायः ॥*॥ अथ परिहितपरकीयवस्त्रस्य विष्णुपूजादिकरणे प्रायश्चित्तम् ।
वराह उवाच ।
“यः पारक्येण वस्त्रेण नावधूतेन माधवि ।
प्रायश्चित्ती पुमान्मूर्खो मम कर्म्मपरायणः ॥
करोति मम कर्म्माणि स्पृष्ट्वा ते मां तमःस्थितः ।
मृगो वै जायते देवि वर्षाणि त्रीणि सप्त च ॥
हीनपादेन जायेत त्रैकजन्म वसुन्धरे ।
मूर्खश्च क्रोधनश्चैव मद्भक्तश्चैव जायते ॥
तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं महौजसम् ।
येन गच्छति संसारं मम भक्तो व्यवस्थितः ॥
एकभक्तं ततः कृत्वा मम कर्म्मपरायणः ।
माघस्यैव तु मासस्य शुक्लपक्षस्य द्वादशी ॥
तिष्ठेज्जलाशये तत्र क्षान्तो दान्तो जितेन्द्रियः ।
अनन्यमानसो भूत्वा मम चिन्तापरायणः ॥
प्रभातायान्तु शर्व्वर्य्यां उदिते च दिवाकरे ।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्येत किल्बिषात् ॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वपापविनिर्मुक्तो मम लोकाय गच्छति ॥”
इति वाराहे परकीयवस्त्रपरीधानप्रायश्चित्तनामाध्यायः ॥ * ॥ काञ्चननिर्म्मितवस्त्रप्रमाणं यथा,—
“यावत् काञ्चनवस्त्राणां वाहिका गोपकन्यकाः ।
काञ्चितमाययुः शीघ्रं यत्र चन्द्रावली मुदा ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २८ अध्यायः ॥
“आसनं वसनं शय्या जायापत्यं कमण्डलुः ।
आत्मनः शुचिरेतानि न परेषां कदाचन ॥”
ईषद्धौतादिवस्त्रस्य पश्चिमाग्रादिप्रसारितवस्त्रस्य च अधौतत्वं यथा,—
“ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन तु ।
अधौतं तद्विजानीयाद्दृष्ट्वा दक्षिणपश्चिमे ॥”
इति कर्म्मलोचनम् ॥*॥
सत्यतपाः ।
“प्रागग्रमुदगग्रं वा धौतं वस्त्रं प्रसारयेत् ।
पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनात् शुचि ॥”
अन्याग्रं दृष्ट्वा दृष्टवत् ॥ * ॥ प्रचेताः ।
“स्वयं धौतेन कर्त्तव्या क्रिया धर्म्मार्था विपश्चिता ।
न च राजकधौतेन नाधौतेन भवेत् क्वचित् ॥
पुत्त्रमित्त्रकलत्त्रेण स्वजातिबान्धवेन च ।
दासवर्गेण यद्धौतं तत् पवित्रमिति स्थितिः ॥”
आनीत्तरं उष्णीषवस्त्रस्य धार्य्यत्वं यथा ।
उष्णीषधारणं शिरोजतापनयनाय । तेन तदन्तरं न धार्य्यम् । तथा महाभारतम् ।
“आप्लुतः साधिवासेन जलेन च सुगन्धिना ।
राजहंसनिभं प्राप्य उष्णीषं शिथिलार्पितम् ।
जलक्षयनिमित्तं वै वेष्टयामास मूर्द्धनि ॥”
शिथिलार्पितं अगाढ़बद्धम् ॥ * ॥ निषिद्धवस्त्राणि यथा । भारते ।
“न स्यूतेन न दग्धेन पारक्येण विशेषतः ।
मूषिकोत्कीर्णजीर्णेन कर्म्म कुर्य्याद्विचक्षणः ॥”
नारसिंहे ।
“न रक्तमुल्वणं वासो न नीलञ्च प्रशस्यते ।
मलाक्तञ्च दशाहीनं वर्ज्जयेदम्बरं बुधः ॥”
उल्वणं उत्कटरक्तविशेषणम् । आचाररत्ने उशनाः ।
“दशाहीनेन वस्त्रेण कुर्य्यात् कर्म्माण्यभावतः ।”
विष्णुधर्म्मोत्तरे ।
“वस्त्रं नान्यधृतं धार्य्यं न रक्तं मलिनं तथा ।
जीर्णं नापदशञ्चैव श्वेतं धार्य्यं प्रयत्नतः ॥
उपानहं नान्यधृतं ब्रह्मसूत्रञ्च धारयेत् ।
न जीर्णमलवद्वासो भवेच्च विभवे सति ॥”
योगियाज्ञवल्क्यः ।
“स्नात्वैवं वाससी धौते अक्लिन्ने परिधाय च ।
प्रक्षाल्योरू मृदद्भिश्च हस्तौ प्रक्षालयेत्ततः ॥
अभावे धौतवस्त्राणां शाणक्षौमाविकानि च ।
कुतपो योगपट्टं वा द्विर्व्वासा येन वा भवेत् ॥

अधीतेन च वस्त्रेण नित्यनैमित्तिकीं क्रियाम्।
कुर्व्वन् फलं न चाप्नोति दत्तं भवति निष्फलम्॥"
कुतपो नेपालकम्बलः॥ *॥ तर्पणात् पूर्व्वं स्नानवस्त्रनिष्पीड़ननिषेधो यथा,—
"निष्पीड़यति यः पूर्व्वं स्नानवस्त्रन्तु तर्पणात्।
निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह॥"
याज्ञवल्क्यः।
"स्नानं कृत्वार्द्रवासास्तु विण्मूत्रं कुरुते यदि।
प्राणायामत्रयं कृत्वा पुनः स्नानेन शुद्ध्यति॥*॥
नार्द्रमेकञ्च वसनं परिदध्यात् कथञ्चन॥"
हारीतः। आर्द्रञ्च सप्तवातहतमपि शुद्धमिति॥ *॥ मदनपारिजाते पारस्करः। एकवस्त्रेदासो भवति तस्योत्तरार्द्धेन प्रच्छादयतीति। इत्याह्निकतत्त्वम्॥ *॥ संक्रान्त्यादौ वस्त्रनिष्पीड़ननिषेधो यथा। षट्त्रिंशन्मतनिगमौ।
"संक्रान्त्यां पञ्चदश्याञ्च द्वादश्यां श्राद्धवासरे।
वस्त्रं न पीड़येत्तत्र न च क्षारेण योजयेत्॥"
इति तिथ्यादितत्त्वम्॥

वस्त्रकुट्टिमं, क्ली, (वस्त्रनिर्म्मितं कुट्टिममिव।) छत्रम्। इति त्रिकाण्डशेषः॥ (वस्त्रस्य कुट्टिमं सुन्दरगृहम्।) वस्त्रगृहञ्च॥

वस्त्रगृहं, क्ली, (वस्त्रनिर्म्मितं गृहम्।) वस्त्रनिर्म्मितशाला। ताँबु इति भाषा। तत्पर्य्यायः। पटवापः २ पटमयम् ३ दूष्यम् ४ स्थलम् ५। इति त्रिकाण्डशेषः॥

वस्त्रग्रन्थिः, पुं, (वस्त्रस्य ग्रन्थिः।) परिधानवस्त्रस्य ग्रन्थनम्। तत्पर्य्यायः। उच्चयः २ नीवी ३। इति त्रिकाण्डशेषः॥

वस्त्रपल्लवः, पुं, कोलकन्दः। इति राजनिर्घण्टः॥

वस्त्रपुत्त्रिका, स्त्री, (वस्त्रनिर्म्मिता पुत्त्रिका पुत्तलिका।) वस्त्रनिर्म्मितपुत्तलिका। इति शब्दमाला॥

वस्त्रभूषणः, पुं, (भूषयतीति। भूषि+ल्युः। वस्त्रस्य भूषणः रञ्जक इत्यर्थः।) शाकवृक्षः। इति राजनिर्घण्टः॥

वस्त्रभूषणा, स्त्री, (वस्त्रस्य भूषणं रागो यस्याः।) मञ्जिष्ठा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या मञ्जिष्ठाशब्दे ज्ञातव्याः॥)

वस्त्रयोनिः, स्त्री, (वस्त्रस्य योनिरुत्पत्तिकारणम्।) वसनोत्पत्तिकारणम्। यथा,—
"त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु॥"
इत्यमरः॥

वस्त्ररञ्जनः, पुं, (रञ्जयतीति। रञ्ज्+णिच्+ल्युः।) वस्त्राणां रञ्जनः। कुसुम्भः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"स्यात् कुसुम्भं वह्निशिखं वस्त्ररञ्जनमित्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वस्नं, क्ली, (वस निवासे आच्छादने वा+"धाप्टवस्य्यतिभ्यो नः।" उणा० ३। ६। इति करणादौ यथायथं नः।) वेतनम्। मूल्यम्। (यथा, ऋग्वेदे। ४। २४। ९।
"भूयसा वस्नमचरत् कनीयोऽविक्रीतो अकानिषं पुनर्यन्॥")
वसनम्। द्रव्यम्। इति विश्वः॥ धनम्। भृतिः। इति हेमचन्द्रः॥ (वस्ते आच्छादयति शरीरमिति। कर्त्तरि नः।) त्वक्। इत्यमरटीकायां रामाश्रयः॥

वस्नः, पुं, (वस्+नः।) मूल्यम्। इत्यमरः॥

वस्नणं, कटीभूषणम्। इति शब्दरत्नावली॥

वस्नसा, स्त्री, (वस्नं चर्म्म सीव्यति। वस्न+षिव+डः। स्त्रियां टाप्।) स्नायुः। इत्यमरः॥

व(स्वो)स्वौकसारा, स्त्री, (वस्वौकेषु रत्नाकरेषु सारा।) इन्द्रपुरी। (यथा, रघुः। १६। १०।
"वस्वौकसारामभिभूय साहं
सौराज्यबद्धोत्सवया विभूत्या।
समग्रशक्तौ त्वयि सूर्य्यवंश्ये
सति प्रपन्ना करुणामवस्थाम्॥")
इन्द्रनदी। (यथा, महाभारते। ३। १८८। १०१।
"वस्वौकसारां नलिनीं नर्म्मदाञ्चैव भारत!॥")
कुबेरपुरी। (यथा, महाभारते। ७। ६५। १५।
"नैतादृशं दृष्टपूर्व्वं कुबेरसदनेष्वपि।
धनञ्च पूर्य्यमाणं नः किं पुनर्मनुजेष्विति।
यत्तं वस्वौकसारेयमित्यूचुस्तत्र विस्मिताः॥")
कुबेरनदी। इति हेमचन्द्रः॥

वह, इ क त्विषि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ क, वंहयति। त्विषि दीप्तौ। इति दुर्गादासः॥

वह, ऐ ञ औ प्रापणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-द्विक०-अनिट्।) प्रापणमिह ण्यन्तस्य रूपम्। ऐ, उढ्वात्। ञ, वहति वहते भारं ग्रामं जनः प्रापयतीत्यर्थः। औ, अवाक्षीत्। अर्थान्तरे अकर्म्मकोऽयम्। यथा। जम्बूः सरिद्वहति सीमनि कम्बुकण्ठीति नैषधे। मन्दं मरुद्वहति गर्ज्जति वारिवाहः। इति महानाटके। ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः। इत्यादि सिद्धार्थमोष्ठादिषु वहधातुं मन्यते वर्णदेशशरणदेवौ। वस्तुतस्तु वकाद्यसम्मतत्वादेवौष्ठादिरनेनोपेक्षितः। ववाह इति चण्डीप्रयोगस्य तु वाह ङ यत्ने इत्यस्मात् गणकृतानित्यत्वात् परस्मैपदसिद्धिः। अनेकार्थत्वात् सुस्राव इत्यर्थः। अथवा वव इत्याह इत्येव व्याख्यानम्। इति दुर्गादासः॥

वहः, पुं, (वहति युगमनेनेति। वह+"गोचरसञ्चरेति।" ३। ३। ११९। इति घप्रत्ययेन साधु।) वृषस्कन्धप्रदेशः। इत्यमरः॥ (यथा, महाभारते। ४। २। २१।
"यस्य बाहू समौ दीर्घौ ज्याघातकठिनत्वचौ।
दक्षिणे चैव सव्ये च गवामिव वहः कृतः॥"
वहतीति। वह्+अच्।) घोटकः। वायुः। इति मेदिनी। हे, ८॥ पन्थाः। इति त्रिकाण्डशेषः॥ नदः। इति हेमचन्द्रः॥ (वाहके, त्रि। यथा, मनुः। १। ७६।
"आकाशात्तु विकुर्व्वाणात् सर्व्वगन्धवहः शुचिः।
बलवान् जायते वायुः स वै स्पर्शगुणो मतः॥")

वहतः, पुं, (वहतीति। वह्+अतच्।) वृषः। पान्थः। इत्युणादिकोषः॥

वहतिः, पुं, (वहतीति। वह्+"वहिवस्यर्त्तिभ्यश्चित्।" उणा० ४। ६०। इति अतिः।) वायुः। इत्युणादिकोषः। गौः। सचिवः। इति मेदिनी। ते, १४८॥

वहती, स्त्री, (वहतीति। वह्+अति। वा ङीष्।) नदी। इति केचित्॥

वहतुः, पुं, (वह्+"एधिवह्योश्चतुः।" उणा० १। ७८। इति चतुः।) पथिकः। वृषभः। इति मेदिनी। ते, १४९॥ (विवाहकाले कन्यायै देयवस्तु। यथा, ऋग्वेदे। १०। ८५। १३।
"सूर्य्याया वहतुः प्रागात् सवितायमवासृजत्।"
"वहतुः कन्याप्रियार्थं दातव्यो-गवादिपदार्थः।"
इति तद्भाष्ये सायणः॥ विवाहः। यथा, ऋग्वेदे। १०। ८५। १४।
"यदश्विना पृच्छमाना वयातं
त्रिचक्रेण वहतुं सूर्य्यायाः॥"
"सूर्य्याया वहतुं विवाहमित्यर्थः।" इति तद्भाष्ये सायणः॥ वहनकारके, त्रि। यथा, ऋग्वेदे। ७। १। १७।
"उभा कृण्वतो वहतू मियेधे।"
"उभौ वहतू वहनहेतू स्तोत्रं शस्त्रञ्च कृण्वतः कुर्व्वन्तो मियेधे।" इति तद्भाष्ये सायणः॥)

वहनं, क्ली, (उह्यतेऽनेनेति। वह+करणे ल्युट्।) होड़ः। डुङ्गी इति भाषा। यथा,—
"तरणो भेलके वारिरथो नौस्तरिकः प्लवः।
होड़स्तराश्च वहनं वहित्रं वार्व्वटः पुमान्॥"
इति त्रिकाण्डशेषः॥
(यथा, कथासरित्सागरे। २५। ४५।
"क्षणान्तरे च वणिजामाक्रन्दैस्तीव्रपूरितम्।
भरादिव तद्भुत्पत्य वहनं समभज्यत॥"
वह+भावे ल्युट्। प्रापणम्। धारणम्। यथा, महाभारते। २। ३१। ४१।
"पावनात् पावकश्चासि वहनात् हव्यवाहनः॥"
वहतीति। वह+ल्युः। वाहके, त्रि। यथा, कथासरित्सागरे। ११९। १९६।
"दैत्यानामधिपो विमानवहनः सान्तःपुरः सानुगः॥")

वहन्तः, पुं, (वहति वातीति। वह+"तॄभूवहिवसीति।" उणा० ३। १२८। इति झच्।) वायुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (उह्यते इति। कर्म्मणि झच्।) बाले, त्रि। इत्युणादिकोषः॥

व(ब)हलः, पुं, (उह्यतेऽनेनेति। वह+बाहुलकात् अलच्।) पोतः। इति हारावली। १४२॥ दृढ़े, त्रि। इति हेमचन्द्रः॥ (बहुत्वे च यथा, उत्तरचरिते। १।

"रत्नावस्था: स्पर्शो वपुषि बहलश्चन्दनरसः ।"
यथा वा प्रबोधचन्द्रोदये । १ ।
"येन त्रि:सप्तकृत्वो नृपबहलवसामांसमस्तिष्कपङ्क-
प्राग्भारेऽकारि भूरिश्च्युतरुधिरसरिद्वारिपूरे-
ऽभिषिक्तः ॥")

बहलगन्धं, क्ली, (बहल: प्रचुरो गन्धो यस्य ।) भ्रमरचन्दनम् । इति राजनिर्घण्टः ॥

बहलचक्षुः, [स्] पुं, (बहलानि प्रचुराणि चक्षूंषीव पुष्पाण्यस्य ।) मेषशृङ्गी । इति रत्नमाला ॥ पुस्तकान्तरे ।
"नन्दीवृक्षो मेषशृङ्गी तथा मेषविषाणिका ।
चक्षुर्बहलं चक्षुष्य मेढ्रशृङ्गी गृहद्रुमाः ॥"
इत्यपि पाठः ॥

बहलत्वचः, पुं, (बहला दृढ़ा त्वचा वल्कलं यस्य ।) श्वेतलोध्रः । इति राजनिर्घण्टः ॥

बहला, स्त्री, (बहलानि प्रचुराणि पुष्पाणि सन्त्यस्या इति । अर्श आदित्वादच् ।) शतपुष्पा । इति राजनिर्घण्टः ॥ स्थूलैला । इति भावप्रकाशः ॥ (अस्याः पर्य्यायो यथा,—
"एला तु बहला स्थूला मालेयं ताड़काफलम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

बहा, स्त्री, (वहतीति । वह+अच् । टाप् ।) नदी । इति हेमचन्द्रः । ४ । १४६ ॥

व(ब)हि:, [स्] व्य, बाह्यम् । इत्यमरः ॥ (यथा, मनुः । १० । ४५ ।
"मुखबाहूरुपज्जानां या लोके जातयो बहि: ।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः ॥"
यथा च, रामायणे । २ । ५३ । २ ।
"अद्येयं प्रथमा रात्रिर्याता जनपदाद् बहि: ।
या सुमन्त्रेण रहिता तां नोत्कण्ठितुमर्हसि ॥")

व(ब)हि:कुटीचरः, पुं, (बहि:कुट्यां चरतीति । चर+टः ।) कुलीरः । इति त्रिकाण्डशेषः ॥

बहितः, त्रि, (अवधीयते स्मेति । अव+धा+क्तः । अवस्यातो लोपः ।) अवहितः । इति द्विरूपकोषः ॥

बहित्रं, क्ली, (वहति द्रव्याणीति । वह+"अशित्रा-दिभ्य इत्रोत्रौ ।" उणा० ४।१७२। इति इत्रः ।) पोतः । तत्पर्य्यायः । वार्व्वटः २ । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे । १ । ५ ।
"प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ॥")

बहित्रकं, क्ली, (वहित्र+स्वार्थे कन् ।) जलयानम् । यथा, हेमचन्द्रे ।
"सांयात्रिकः पोतवणिक् यानपात्रं वहित्रकम् ।
वोहित्थं वहनं पोतः पोतवाहो नियामकः ॥"

व(ब)हिर्द्वारं, क्ली, (बहि:स्थं द्वारम् ।) तोरणम् । इत्यमरः ॥ (यथा,—
"धिगस्तैता विद्या धिगपि कविता धिक्सुजनता
वयो रूपं धिक् धिगपि च यशो निर्द्धनमतः ।
असौ जीयादेकः सकलगुणहीनोऽपि धनवान्
बहिर्द्वारे यस्मात्तृणलवसमाः सन्ति गुणिनः ॥"
इत्युद्भटः ॥)

व(ब)हिर्द्वारप्रकोष्ठकः, पुं, (बहिर्द्वारस्य प्रकोष्ठकः ।) गृहस्य द्वाराद्वहि: प्रकोष्ठम् । तत्पर्य्यायः । प्रघाणः २ प्रघणः ३ अलिन्दः ४ । इत्यमरः । २ । २ । १२ ॥

व(ब)हिर्भूतः, त्रि, (बहिस्+भू+क्तः ।) बहिर्गतः । बहि:शब्दपूर्व्वकप्राप्त्यर्थभूधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । यथा । "पञ्चविषयिता-बहिर्भूतसाध्यविषयिताघटितधर्म्मावच्छिन्नप्रति-बध्यताशालित्वं शय: पञ्चता ॥" इति जागदीशः ॥

व(ब)हिर्मुखः, त्रि, (बहिर्बाह्यविषये मुखं प्रवणता यस्य ।) विमुखः । यथा, नरसिंहवाचस्पतिधृतशातसंहितायाम् ।
"शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः ।
सर्व्वं पूजाफलं हन्ति शिवरात्रिबहिर्मुखः ॥"
इति तिथ्यादितत्त्वम् ॥

व(ब)हिश्चरः, पुं, (बहिश्चरतीति । चर+टः ।) कर्कटः । इति हेमचन्द्रः ॥ (बहिश्चरणशीले, त्रि । यथा, मार्कण्डेये । २३ । ८३ ।
"युवयोर्यच्छरीरं तन्नामकं युवयोः स्वकम् ।
एतत्सत्यं विजानीतं युवां प्राणा बहिश्चराः ॥")

बहेडुकः, पुं, विभीतकवृक्षः । इति राजनिर्घण्टः ॥

वह्निः, पुं, (वहति धरति हव्यं देवार्थमिति । वह+"वहिश्रिश्रुयुद्रु इति ।" उणा० ४ । ५१ । इति निः ।) चित्रकः । भल्लातकः । (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"मञ्जिष्ठाख्यौ वासको देवदारु
पथ्यावह्नी चोषधात्री विड़ङ्गम् ॥")
निम्बूकः । इति राजनिर्घण्टः ॥ रेफः । इति तन्त्रम् ॥ अग्निः । इत्यमरः ॥*॥ तस्य नामानि यथा,—
"ते जातवेदसः सर्व्वे कल्माषः कुसुमस्तथा ।
दहनः शोषणश्चैव तपनश्च महाबलः ।
पिटरः पतगः स्वर्णस्त्वगाधो भ्राज एव च ॥"
अन्यत्र तु नामान्तराण्युक्तानि यथा,—
"जृम्भकोद्दीपकश्चैव विभ्रमभ्रमशोभनाः ।
आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च ।
अन्वाहार्य्यो गार्हपत्य इत्येते दश वह्नयः ॥"
अन्यैरन्यथोक्तानि यथा,—
"भ्राजको रञ्जकश्चैव क्लेदकः स्नेहकस्तथा ।
धारको बन्धकश्चैव द्रावकाख्यश्च सप्तधा ।
व्यापकः पावकश्चैव श्लेष्मको दशमः स्मृतः ॥"
शरीरस्थवह्नेः स्थानानि यथा,—
"वह्नयो दोषदूष्येषु संलीना दश देहिनः ॥"
दोषदूष्यौ यथा,—
"वातपित्तकफा दोषा दूष्याः स्युः सप्त धातवः ॥"
इति सारदातिलकः ॥
तत्र निषिद्धकर्म्माणि यथा,—
"नाशुद्धोऽग्निं परिचरेत् न देवान् कीर्त्तयेदृषीन् ।
न चाग्निं लङ्घयेद्धीमान् नोपदध्यादधः क्वचित् ॥
न चैनं पादतः कुर्य्यात् मुखेन न धमेद्बुधः ।
अग्नौ न निःक्षिपेदग्निं नाद्भिः प्रशमयेत्तथा ॥
न वह्निं मुखनिश्वासैर्ज्वालयेन्नाशुचिर्बुधः ।
स्वमग्निं नैव हस्तेन स्पृशेन्नाप्सु चिरं वसेत् ॥
नापश्चिपेन्नोपधमेन्न शूर्पेण च पाणिना ।
मुखेनाग्निं समिन्धीत मुखादग्निरजायत ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
अस्योत्पत्तिर्यथा,—
शौनक उवाच ।
"सर्व्वं श्रुतं महाभाग परिपूर्णं मनो मम ।
अधुना श्रोतुमिच्छामि वह्न्युत्पत्तिमीप्सिताम् ॥
सूत उवाच ।
एकदा सृष्टिकाले च ब्रह्मानन्तमहेश्वराः ।
श्वेतद्वीपं ययुः सर्व्वे द्रष्टुं विष्णुं जगत्पतिम् ॥
परस्परञ्च संभाषां कृत्वा सिंहासनेषु च ।
ऊषुः सर्व्वे सभामध्ये सुरम्ये पुरतो हरेः ॥
विष्णुगात्रोद्भवास्तत्र कामिन्यः कमलाकलाः ।
तत्र नृत्यन्ति गायन्ति विष्णुगाथाश्च सुस्वरम् ॥
तासाञ्च कठिनां श्रोणिं कठिनं स्तनमण्डलम् ।
सस्मितं मुखपद्मञ्च दृष्ट्वा ब्रह्मा स कामुकः ॥
मनो निवारणं कर्त्तुं न शशाक पितामहः ।
वीर्य्यं पपात तच्छ्रात् लज्जया वाससा विभुः ॥
तद्वीर्य्यं वस्त्रसहितं प्रतप्तं कामतापितः ।
क्षीरोदे प्रेरयामास सङ्गीते विरते द्विज ॥
जलादुत्थाय पुरुषः प्रज्वलन् ब्रह्मतेजसा ।
उवास ब्रह्मणः क्रोड़े लज्जितस्य च संसदि ॥
एतस्मिन्नन्तरे रुष्टो जलादुत्थाय सत्वरः ।
प्रणम्य वरुणो देवान् बालं नेतुं समुद्यतः ॥
बालो दधार ब्रह्माणं बाहुभ्याञ्च भयाद्रुदन् ।
किञ्चिन्नोवाच जगतां विधाता लज्जया द्विज ॥
बालकस्य करे धृत्वा चकाराकर्षणं रुषा ।
वरुणश्च सभामध्ये तं चिक्षेप प्रजापतिः ॥
पपात दूरतो देवो वरुणो दुर्ब्बलस्तथा ।
मूर्च्छां संप्राप स्तवतु कोपदृष्ट्या विधेरहो ॥
चेतनं कारयामासाम्लतदृष्ट्या च शङ्करः ।
संप्राप्य चेतनां तत्र तमुवाच जलेश्वरः ॥
वरुण उवाच ।
बालो जले समुद्भूतो मम पुत्रोऽयमीप्सितः ।
अहं गृहीत्वा यास्यामि ब्रह्मा मां ताड़येत् कथम् ॥
ब्रह्मोवाच ।
बालकः शरणापन्नो मयि विष्णो महेश्वर ।
कथं दास्यामि भीतञ्च रुदन्तं शरणागतम् ॥
शरणागतदीनार्त्तं यो न रक्षेदपण्डितः ।
पच्यते निरये तावद् यावच्चन्द्रदिवाकरौ ॥
उभयोर्व्वचनं श्रुत्वा प्रहस्य मधुसूदनः ।
उवाच सर्व्वतत्त्वज्ञः सर्व्वेशञ्च यथोचितम् ॥
भगवानुवाच ।
दृष्ट्वा सकामिनीश्रोणिं वीर्य्यं धातुः पपात सन् ।
लज्जया प्रेरयामास क्षीरोदे निर्म्मले जले ॥
ततो बभूव बालश्च धर्म्मतो विधिपुत्रकः ।
क्षेत्रजश्च सुतः शास्त्रे वरुणस्यापि नोक्तः ॥
महादेव उवाच ।
यो विद्यायोनिसम्बन्धो वेदेषु च निरूपितः ।
शिष्ये पुत्रे च समता चेति वेदविदो विदुः ॥

मन्त्रं ददातु वरुणो विद्यां बालकाय च ।
पुत्रो विधातुर्मेधा च शिष्यश्च वरुणस्य च ।
विष्णुर्ददातु बालाय दाहिकां शक्तिमुत्तमाम् ।
सर्व्वदग्धो हुताशश्च निर्व्वाणो वरुणेन च ।
विष्णुश्च दाहिकां शक्तिं ददौ नत्ले शिवाज्ञया ।
मन्त्रं विद्याश्च वरुणो रत्नमालां मनोहराम् ।
क्रोडे कृत्वा च तं बालं चुचुम्ब मायया सुरः ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे वह्न्युत्पत्तिर्नाम १३० अध्यायः । * । तद्दाहनिवारणौषधानि यथा,—
"सामुद्रसैन्धवयवा विद्युद्दग्धा च मृत्तिका ।
तयानुलिप्तं यद्वेश्म नाग्निना दह्यते नृप ! ।"
इति मात्स्ये राजधर्म्मे राजरक्षानाम १६२ अः ।
अग्निवैकृत्यं तच्छान्तिश्च यथा,—
"अनग्निर्दीप्यते यत्र राष्ट्रे यस्य निरिन्धनः ।
न दीप्यते चेन्धनवान् स राष्ट्रः पीड्यते नृपैः ।
प्रज्वलेदप्सु मांसं वा तथार्द्रञ्चापि किञ्चन ।
प्रासादतोरणद्वारं नृपवेश्म सुरालयम् ।
एतानि यत्र दह्यन्ते तत्र राजभयं भवेत् ।
विद्युता वा प्रदह्यन्ते तत्रापि नृपतेर्भयम् ।
धूमञ्चानग्निजो यत्र तत्र विद्यान्महद्भयम् ।
विनाग्निं विस्फुलिङ्गाश्च दृश्यन्ते यत्र कुत्रचित् ।
शिरस्नोपोषितश्चात्र पुरोधाः सुसमाहितः ।
समिद्भिः क्षीरवृक्षाणां सर्षपैस्तु घृतेन च ।
दद्यात् सुवर्णञ्च तथा द्विजेभ्यो
गाश्चैव वस्त्राणि तथा भुवञ्च ।
एवं कृते पापमुपैति नाशं
यदग्निवैकृत्यभवं द्विजेन्द्र ! ।"
इति तत्रैवाद्भुतशान्तिरग्निवैकृत्यं नाम २०५ अध्यायः । * । सुखाग्नयो यथा,—
"गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः ।
एतेऽग्नयस्त्रयो मुख्याः शेषाश्चोपसदस्त्रयः ।"
इति वह्निपुराणे गणभेदनामाध्यायः । * ।
वह्निविप्रमध्यगमननिषेधो यथा,—
"द्वौ विप्रौ वह्निविप्रौ च दम्पत्योर्गुरुशिष्ययोः ।
हलाग्रे च न गन्तव्यं सभ्यहत्या पदे पदे ।"
इति कर्म्मलोचनः । * ।

अपि च ।
"नाग्निब्राह्मणयोरन्तरा व्रजेयात् नाग्न्योर्न ब्राह्मणयोर्न गुरुशिष्ययोरनुज्ञया तु व्रजेयात् ।
इति तिथ्यादितत्त्वधृतवचनम् ।* । अथ वह्निस्तम्भनम् ।
"मानुषस्य वसां गृह्य जलौकां तत्र पेषयेत् ।
हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम् ।
शाल्मलीरसमादाय खरमूत्रे निधाय तम् ।
अग्न्यागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमम् ।
वायसी उदरं गृह्य मण्डूकवसया सह ।
गुडिकां कारयेत्तेन ततोऽग्निं प्रक्षिपेद्बुधो ।
एवमेतत्प्रयोगेण अग्निस्तम्भनमुत्तमम् ।
सुशीतकवचायुक्तं मरीचं नागरं तथा ।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत् ।
गोरोचना भृङ्गराजं चूर्णं कृत्वा घृतं समम् ।
दिव्यस्तम्भञ्च पीत्वा स्यान्मन्त्रेणानेन वै तथा ।"
ॐ अग्निस्तम्भनं कुरु । इति गारुडे १८६ अध्यायः । (दैत्यविशेषः । यथा, महाभारते । १२ । २२७ । ५० ।
"वायुः कार्त्तस्वरो वह्निर्विश्वदंष्ट्रोऽथ नैर्ऋतिः ।"
मित्रविन्दागर्भजातः कृष्णस्य पुत्रविशेषः । यथा, भागवते । १० । ६१ । १६ ।
"महांशः पावनो वह्निर्मित्रविन्दात्मजाः
क्षुधिः ।"
तुर्व्वसुपुत्रः । यथा, हरिवंशे । ३२ । ११७ ।
"तुर्व्वसोस्तु सुतो वह्निर्गोभानुस्तस्य चात्मजः ।"
कुकुरपुत्रः । यथा, भागवते । ९ । २४ । १९ ।
"कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः ।")
वह्निकरी, स्त्री, (वह्निं देहस्थवह्निं करोतीति । कृ+टः । ङीप् ।) धात्रीश्वरी । इति शब्दचन्द्रिका । धाइ फुल इति भाषा ।
वह्निकाष्ठं, क्ली, (वह्निवत् दाहकं काष्ठम् ।) दाहागुरुः । इति राजनिर्घण्टः ।
वह्निगन्धः, पुं, (वह्निना वह्निसंयोगेन दहनेन गन्धो यस्य ।) यक्षधूपः । इति शब्दचन्द्रिका ।
वह्निगर्भः, पुं, (वह्निर्गर्भे यस्य ।) वंशः । इति शब्दचन्द्रिका ।
वह्निगर्भा, स्त्री, (वह्निरग्निर्गर्भे यस्याः ।) शमीवृक्षः । इति शब्दचन्द्रिका ।
वह्निचक्रा, स्त्री, (वह्नेरिव चक्रं आवर्त्तवत् चिह्नं यत्र ।) कलिकारीवृक्षः । इति भावप्रकाशः ।
वह्निज्वाला, स्त्री, (वह्नेर्ज्वालेव दाहकत्वात् ।) धातकी वृक्षः । इति राजनिर्घण्टः । (तथास्य पर्य्यायो यथा,—
"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा
स्मृता ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।)
वह्निदमनी, स्त्री, (दमयति शमयतीति । दम+णिच्+ल्युः । ङीप् । वह्नेर्दमनी । अग्निदाहक्लेशप्रशमनकारित्वादस्यास्तथात्वम् ।) अग्निदमनीक्षुपः । इति राजनिर्घण्टः ।
वह्निदीपकः, पुं, (वह्निं दीपयतीति । दीप+णिच्+ण्वुल् । वह्नेर्दीपक इति वा ।) कुसुम्भम् । इति शब्दरत्नावली । (गुणादिविशेषोऽस्य कुसुम्भशब्दे ज्ञेयः ।)
वह्निदीपिका, स्त्री, (वह्नेर्जठरानलस्य दीपिका उत्तेजिका ।) अजमोदा । इति राजनिर्घण्टः ।
वह्निनामा [न्], पुं, (वह्नेर्नाम नाम यस्य ।) चित्रकः । भल्लातकः । इति रत्नमाला ।
वह्निनी, स्त्री, (वह्निं तद्वत्कान्तिं नयतीति । नी+डः । गौरादित्वात् ङीप् ।) जटामांसी । इति रत्नमाला ।
वह्निपुष्पी, स्त्री, (वह्निरिव दाहकं रक्तवर्णं वा पुष्पमस्याः । ङीप् ।) धातकी । इति राजनिर्घण्टः ।
वह्निवधूः, स्त्री, (वह्नेर्वधूः ।) स्वाहा । इति शब्दरत्नावली ।
वह्निबीजं, क्ली, (वह्नेर्बीजम् ।) रंबीजम् । इति तन्त्रम् । (वह्निदायकं बीजमस्य ।) निम्बूकम् । इति राजनिर्घण्टः । (वह्नेर्बीजं वीर्य्यम् ।) स्वर्णम् । इति हेमचन्द्रः । तस्योत्पत्तिर्यथा,—
"एकदा सर्व्वदेवाश्च समूषुः स्वर्गसंसदि ।
तत्र कृत्वा च नृत्यञ्च गायन्त्यप्सरसां गणाः ।
विलोक्य रम्भां सुश्रोणीं सकामो वह्निरेव च ।
पपात वीर्य्यं चस्कन्द लज्जया वाससा तथा ।
उत्तस्थौ स्वर्णपुञ्जश्च वस्त्रं छित्त्वा ज्वलत्प्रभः ।
कालेन वर्द्धयामास स सुमेरुर्बभूव ह ।
हिरण्यरेतसं वह्निं प्रवदन्ति मनीषिणः ।
इति ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे हिरण्योत्पत्तिर्नाम १३० अध्यायः ।
वह्निभोग्यं, क्ली, (वह्नेरग्नेर्भोग्यं भोगार्हं हव्यत्वात् ।) घृतम् । इति शब्दचन्द्रिका ।
वह्निमन्थः, पुं, (वह्नये अग्न्युत्पादनार्थं मथ्यते इति । मन्थ+घञ् ।) गणिकारिकावृक्षः । इति जटाधरः । (अस्य पर्य्यायो यथा,—
"तेजोमन्थो हविर्मन्थो ज्योतिष्को पावकोऽरणिः ।
वह्निमन्थोऽग्निमन्थश्च मथनो गणिकारिका ।"
इति वैद्यकरत्नमालायाम् ।)
अग्निमन्थः । इति राजनिर्घण्टः ।
वह्निमारकं, क्ली, (वह्निं मारयति विनाशयतीति । मृ+णिच्+ण्वुल् ।) जलम् । इति शब्दचन्द्रिका ।
वह्निमित्रः, पुं, (वह्निर्मित्रं यस्य ।) वायुः । इति शब्दचन्द्रिका ।
वह्निरेताः [स्], पुं, (वह्नौ रेतो यस्य । अग्निनिषिक्तवीर्य्यत्वादेवास्य तथात्वम् ।) शिवः । इति हलायुधः ।
वह्निलोहकं, क्ली, (वह्निदेवताकं लोहकम् ।) कांस्यम् । इति राजनिर्घण्टः ।
वह्निवर्णं, क्ली, (वह्नेरिव रक्तो वर्णो यस्य ।) रक्तोत्पलम् । इति शब्दचन्द्रिका ।
वह्निवल्लभः, पुं, (वह्नेर्वल्लभः प्रियः उद्दीपकत्वात् ।) सर्ज्जरसः । इति त्रिकाण्डशेषः ।
वह्निशिखं, क्ली, (वह्निरिव शिखा यस्य ।) कुसुम्भम् । इत्यमरः । (अस्य पर्य्यायो यथा,—
"स्यात् कुसुम्भं वह्निशिखं वस्त्ररञ्जकमित्यपि ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।)
वह्निशिखरः, पुं, (वह्निरिव शिखरं यस्य ।) लोचमस्तकः । इति शब्दरत्नावली ।
वह्निशिखा, स्त्री, (वह्निरिव शिखा यस्याः ।) फलिनी । इति धरणिः । कलिकारी । धातकी । इति राजनिर्घण्टः । (लाङ्गलिकी । लाङ्गलिया विष इति ख्याता । तत्पर्य्यायो यथा,—
"गौरी लाङ्गलिकी दीप्ता हलिनी गर्भघातिनी ।
अग्निजिह्वेन्द्रपुष्पाग्निमुखी वह्निशिखा च सा ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।)

वह्निसंज्ञकः, पुं, (वह्नेः संज्ञा संज्ञा यस्य । ततः कन् ।) चित्रकः । इत्यमरः ॥

वह्निसखः, पुं, (वह्नेर्जठराग्नेः सखा । टच् समासे ।) जीरकः । इति राजनिर्घण्टः ॥ (वह्नेः सखा ।) वायुः । इति वह्निमित्रशब्ददर्शनात् ॥

वह्यं, क्ली, (वहतीति । वह + "अघ्न्यादयश्च ।" उणा० ४ । ११२ । इति यक् प्रत्ययेन साधुः ।) वाहनम् । इति हेमचन्द्रः ॥ (वहन्त्यनेनेति । वह + "वह्यं करणम् ।" ३ । १ । १०२ । इति यत् ।) शकटम् । इत्युणादिकोषः ॥ (यथा, अथर्व्ववेदे । ४ । २० । ३ ।
"सा भूमिमा रुरोहिथ वह्यं श्रान्ता वधू-रिव ॥")

वह्या, स्त्री, मुनिपत्नी । इत्युणादिकोषः ॥

वा, क सुखाप्तिगतिसेवासु । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सुखाप्तौ अक०-अन्यत्र सक०-सेट् ।) क, वापयति । इति दुर्गादासः ॥

वा, ल गमनहिंसयोः । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-सेट् ।) ओष्ठ्यादिरप्ययमित्येके । गमनमिह वायुकर्त्तृकमेव । ल, वाति वायुः । हिंसनं सूचनमिति चतुर्भुजः । इति दुर्गादासः ॥

वा, व्य, (वा + क्विप् ।) विकल्पः । (यथा, मनुः । २ । ११२ ।
"धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")
उपमा । (इवार्थे । यथा, रघुः । १६ । ५१ ।
"व्योम पश्चिमकलास्थितेन्दु वा
पङ्कशेषमिव घर्म्मपल्वलम् ॥")
वितर्कः । (यथा, महाभारते । १ । १५४ । २३ ।
"किं ते हिडिम्ब एतैर्वा सुखसुप्तैः प्रबोधितैः ।
मामासादय दुर्ब्बुद्धे तरसा त्वं नराशन ! ॥")
पादपूरणम् । (यथा, रामायणे । १ । २५ । ३ ।
"देवासुरगणान् वापि सगन्धर्व्वोरगान् भुवि ।
यैरमित्रान् प्रसह्याजौ वशीकृत्य जयिष्यसि ॥")
समुच्चयः । इति मेदिनी । वे, ७४ ॥ एवार्थः । इति विश्वः ॥ (यथा, किराते । ३ । १३ ।
"सुता न यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुणैरतीताः ॥")

वांशः, त्रि, वंशसम्बन्धी । वंशस्यायमित्यर्थे ण(अण्) प्रत्ययेन निष्पन्नः ॥

वांशिकः, पुं, (वंशीवादनं शिल्पमस्येति । वंश + ठक् ।) वंशीवादकः । इति जटाधरः ॥ (भारभूतान् वंशान् हरति वहति आवहति वा । "तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ।" ५ । १ । ५० । इति ठक् । भारभूतवंशहारके तद्वाहके च त्रि ॥)

वांशी, स्त्री, (वंशे भवा + वंश + अण् । ङीष् ।) वंशरोचना । इति राजनिर्घण्टः ॥ (तत्पर्य्यायो यथा,—
"तुगाक्षीरी शुभा वांशी वंशजा वंशलोचना ॥"
इति वैद्यकरत्नमाला ॥
"स्याद्वंशरोचना वांशी तुगाक्षीरी तुगा शुभा ।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वाः [र्], क्ली, (वार्य्यते तृषानेनेति । वृ + णिच् + क्विप् । यद्वा, "वृञ वरणे । स्वार्थिकोऽण् छान्दसः । तदन्तात् क्विप् । अणि लोपः । हल्ङ्यादिलोपः । रेफस्य विसर्जनीयः ।" इति निघण्टौ देवराजयज्वा । १ । १२ । ८ ।) जलम् । इत्यमरः ॥ (यथा, भागवते । ३ । १३ । १६ ।
"उज्जतो मे क्षितिर्व्वाभिः प्लाव्यमाना रसा-ङ्गता ॥")

वाःकिटिः, पुं, वारो जलस्य किटिः शूकरः । शिशुमारः । इति केचित् ॥

वाःसदनं, क्ली, (वारो जलस्य सदनम् ।) जलाधारः । इति त्रिकाण्डशेषः ॥

वाक् [च्], स्त्री, (उच्यतेऽसौ अनया वेति । वच् + "क्विप् वचिप्रच्छीति ।" उणा० २ । ५७ । इति क्विप् दीर्घोऽसम्प्रसारणञ्च ।) वाक्यम् । (यथा, मनुः । २ । १५९ ।
"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम् ।
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्म-मिच्छता ॥")
सरस्वती । इत्यमरः ॥ (यथा, कथासरित्-सागरे । १ । ३ ।
"प्रणम्य वाचं निःशेषपदार्थोद्द्योतदीपिकाम् ।
बृहत्कथायाः सारस्य संग्रहं रचयाम्यहम् ॥")

वाकं, त्रि, (वकस्येदमिति । वक + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकसम्बन्धि । वकस्येदं इत्यर्थे अप्रत्ययेन निष्पन्नम् ॥ (क्ली, वकस्य समूहः । "तस्य समूहः ।" ४ । २ । ३७ । इत्यण् । वकसमूहः ॥ उच्यतेऽसौ अनेनेति वा । वच् + घञ् । वाक्यम् । यथा, उत्तररामचरिते । १ । १ ।
"इदं कविभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे ॥"
वेदभागविशेषः । यथा, महाभारते । १२ । ४७ । २५ ।
"यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।
गृणन्ति सत्यकर्म्माणं सत्यं सत्येषु सामसु ॥"
पुं, वकस्यावयवो विकारो वा । प्राणित्वादञ् । वकावयवविशेषः ॥)

वाकुची, स्त्री, (वातीति वा वायुस्तं कुचति सङ्कोचयति पूतिगन्धित्वात् । कुच् + कः । गौरादित्वात् ङीष् ।) वृक्षविशेषः । हाकुच इति भाषा ॥ तत्पर्य्यायः । सोमराजी २ सोमवल्ली ३ सुवल्लिका ४ सिता ५ सितावरी ६ चन्द्रलेखा ७ चन्द्री ८ सुप्रभा ९ कुष्ठहन्त्री १० काम्बोजी ११ पूतिगन्धा १२ वल्गुला १३ चन्द्रराजी १४ कालमेषी १५ त्वग्दोषापहा १६ कान्तिदा १७ अवल्गुजा १८ चन्द्रप्रभा १९ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । क्रमिकुष्ठकफत्वग्दोषविषकण्डुखर्ज्जूनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ।
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥
विष्टम्भघ्नी हिमा रुच्या सरा श्लेष्मास्रपित्तनुत् ।
रूक्षा हृद्या श्वासकुष्ठमेहज्वरक्रमिप्रणुत् ॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ।
केश्यं त्वच्यं क्रमिश्वासकासशोथामपाण्डुहृत् ॥"
इति भावप्रकाशः ॥

वाकुलं, क्ली, (वकुलस्येदमिति । वकुल + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकुलफलम् । अस्य गुणाः ।
"वाकुलं मधुरं ग्राहि दन्तस्थैर्य्यकरं परम् ॥"
इति राजवल्लभः ॥

वाकोरः, पुं, (वाचि कौतुकवाक्ये कीरः शुक इव प्रियत्वात् ।) श्यालकः । इति शब्दरत्नावली ॥

वाक्छलं, क्ली, (वाचा छलम् ।) वाक्यजालः । यथा । वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । तत्त्रिविधम् । वाक्छलम् । सामान्यच्छलम् । उपचारच्छलञ्च । अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ १ ॥ सम्भवतोऽर्थस्यातिसामान्ययोगात् असम्भूतार्थकल्पना सामान्यच्छलम् ॥ २ ॥ धर्म्मविकल्पनिर्द्देशे अर्थसद्भावनिषेध उपचारच्छलम् ॥ ३ ॥ इति गोतमसूत्रम् ॥ शक्त्यैकार्थशब्दबोधतात्पर्य्यकशब्दस्य शक्त्या अर्थान्तरतात्पर्य्यकत्वकल्पनया दूषणाभिधानं वाक्छललक्षणम् । यथा । नेपालादागतोऽयं नवकम्बलवत्त्वात् । इत्युक्ते कुतोऽस्य नवसंख्यकाः कम्बलाः ॥ १ ॥ सामान्यविशिष्टसम्भवदर्थाभिप्रायेण उक्तस्य सामान्ययोगादसम्भवदर्थकल्पनया दूषणाभिधानं सामान्यच्छलम् । यथा । ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयति इति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पत् व्रात्ये व्यभिचारात् ॥ २ ॥ शक्तिलक्षणयोरेकतरवृत्त्या यः प्रतिषेधः स उपचारच्छलम् । यथा । मञ्चाः क्रोशन्ति इत्यत्र मञ्चस्था एव क्रोशन्ति न तु मञ्चाः । एवं शब्दं नित्य इति शक्त्या प्रयुक्ते अनुकादुत्पन्नस्य कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलम् ॥ ३ ॥ इति तट्टीका ॥ अपि च ।
"सर्व्वेष्वर्थविवादेषु वाक्छले नावसीदति ।
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते ॥"
इति व्यवहारतत्त्वम् ॥

वाक्पतिः, पुं, (वाचां पतिः ।) बृहस्पतिः ॥ इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । ८ । १५ ।
"उद्गारोग्यसुभिक्षक्षेमकरो वाक्पतिश्चरन् भानाम् ॥")

वाक्पतिः, त्रि, (वाचां पतिरिव पटुत्वात् ।) उद्दामवचनः । इति रायमुकुटः ॥ अनयो-

यमादिपटुवचन:। इति भरत:। सदुक्त्या वाक्यरचक:। इति सारसुन्दरी। पटुवचन:। इति पदार्थकौमुदी। व्यक्तवाग्जन:। इति नीलकण्ठ:। तत्पर्य्याय:। वागीश: २। इत्यमर:। अनवद्यामवचा: ३। इति जटाधर:।
"वाग्मी वाग्मिर्वावदूको वाचो युक्तिपटुस्तथा।
वागीशो वाक्पतिश्चेति वदते सुवक्तरि।"
इति शब्दरत्नावली।
(यथा, हरिवंशे। २१५। ३४।
"सम्भवं सर्व्वलोकस्य विदधाति स वाक्पति:।")

वाक्पारुष्यं, क्ली, (वाचा कृतं पारुष्यम्।) अप्रियवाक्योच्चारणम्। तत्तु सप्तधाव्यसनान्तर्गतव्यसनविशेष:। यथा,—
"मृगयाक्षा: स्त्रिय: पानं वाक्पारुष्यार्थदूषणे।
दण्डपारुष्यमित्येतज्ज्ञेयं व्यसनसप्तकम्।"
इति हेमचन्द्र:।*।
तल्लक्षणं नारदेनोक्तम्।
"देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम्।
यद्वच: प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते।"
देशादीनां आक्रोशन्यङ्गसंयुतम्। उच्चैर्भाषणमाक्रोश: न्यङ्गमवद्यं तदुभययुक्तं यत्प्रतिकूलार्थं उद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यं कथ्यते। तस्य च दण्डतारतम्यार्थं निष्ठुरादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं तेनैवोक्तम्।
"निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतम्।
गौरवानुक्रमात्तस्य दण्डोऽपि स्यात् क्रमाद्गुरु:।
साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम्।
पतनीयैरुपाक्रोशैस्तीव्रमाहुर्म्मनीषिण:।" इति।
तत्र निष्ठुराक्रोशे सवर्ण्णविषये दण्डमाह।
"सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम्।
क्षेपङ्करोति चेद्दण्ड्य: पणानर्द्धत्रयोदश।
काणञ्चाप्यथवा खञ्जमन्यं वापि तथाविधम्।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम्।"
इति यन्मनुवचनं तदतिदुर्वृत्तवर्ण्णविषयम्। यदा पुन: पुत्रादयो मात्रादीन् शपन्ति तदा शतं दण्डनीया इति तेनैवोक्तम्।
"मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम्।
आक्षारयन् शतं दाप्य: पन्थानञ्चाददद्गुरो:।"
इति च।
एतच्च सापराधेषु मात्रादिषु गुरुषु निरपराधायाश्च जायायां द्रष्टव्यम्।*। अश्लीलाक्षेपे दण्डमाह।
"अभिगन्तास्मि भगिनीं मातरं वा तवेति ह।
शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम्।
दण्डप्रणयनं कार्य्यं वर्ण्णजात्युत्तराधरै:।
प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमा:।
वर्ण्णानामानुलोम्येन तस्मादर्द्धार्द्धहानित:।"*।
मनु:।
"शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति।
वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति।
पञ्चाशद्ब्राह्मणो दण्ड्य: क्षत्रियस्याभिशंसने।
वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दम:।
बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दम:।
शत्यस्तदर्द्धिक: पादो नासाकर्णकरादिषु।
अशक्तस्तु वदन्नेव दण्डनीय: पणान् दश।
तथा शक्त: प्रतिभुवं दाप्य: क्षेमाय तस्य तु।
पतनीयकृते क्षेपे दण्डो मध्यमसाहस:।
उपपातकयुक्ते तु दाप्य: प्रथमसाहस:।
त्रैविद्यनृपदेवानां क्षेप उत्तमसाहस:।
मध्यमो जातिपूगानां प्रथमो ग्रामदेशयो:।"
इति मिताक्षरा।*।
वाक्पारुष्ये अभियोगमनिस्तीर्य्य प्रत्यभियोजने प्रतिप्रसवो यथा,—
"कुर्य्यात् प्रत्यभियोगञ्च कलहे साहसेषु च।"
वाक्पारुष्ये शस्त्रादिप्रहारेषु च यथा पूर्व्वमहमनेनाक्रुष्ट: शस्त्रेण हत: इत्यपराधाभावाय प्रत्यभियोगं कुर्य्यात्। इति व्यवहारतत्त्वम्।

वाक्यं, क्ली, (उच्यते इति। वच्+ण्यत्। "वचो: कु चिण्यतो:।" ७।३।५२। इति कुत्वम्। शब्दसंज्ञात्वात् "वचोऽशब्दसंज्ञायाम्।" ७।३।६७। इति निषेधो न।) पदसमुदाय:। इति व्याकरणम्। तिङन्तचय:। सुबन्तचय:। कारकान्विता क्रिया। इत्यमर:। इह श्रुतिलोकयोस्त्रिविधं निरुक्तं वाक्यमुक्तम्। तिङ्सुबन्तयोश्चय: समुदाय: कारकान्विता क्रिया च वाक्यम्। तिङ्शब्देन तिबादीनि साशीतिशतसंख्यकानि वचनानि उच्यन्ते। एवं सुप्शब्देन स्वादीन्येकविंशतिरुच्यन्ते द्वन्द्वात् परं य: श्रूयते लभतेऽसौ प्रत्येकं अभिसम्बन्धमित्यन्तशब्द उभयोरपि सम्बध्यते। अत्र तिङन्तसमूहो यथा। पचति भवति पाको भवति इत्यर्थ:। एतच्छान्दसमेव। सुबन्तसमूहो यथा। प्रकृतिसिद्धमिदं हि महात्मनाम्। धात्वर्थ: क्रिया कारकै: कर्त्रादिभिरन्विता सम्बन्धार्था कारकान्विता अन्वितत्वञ्च क्रियाकारकाणां आकाङ्क्षायोग्यतासन्निधिवशात् ज्ञेयम्। तिङ्सुबन्तचयात्मकेऽपि सम्बद्धार्थता बोध्या असम्बद्धार्थस्याप्रयोगात् अतएव परस्पराभिसम्बन्ध: पदसमूहो वाक्यमिति वृद्धा:। कारकान्विता क्रिया यथा। देवदत्तो ग्रामं गच्छति। इति तट्टीकायां भरत:।*। वाक्यस्वरूपमाह।
"वाक्यं स्यात् योग्यताकाङ्क्षासत्तियुक्त: पदोच्चय:।
वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम्।"
उक्तञ्च।
"स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुन: संभूय जायते।"
इति।
अत्र वाक्यं यथा। शून्यं वासगृहमित्यादि। महावाक्यं यथा। रामायणमहाभारतरघुवंशादि:। इति साहित्यदर्पणे २ परिच्छेद:।*।
अप्रियवाक्यभाषणनिषेधो यथा,—
"न हिंस्यात् सर्व्वभूतानि नानृतञ्च वदेत् क्वचित्।
नाहितं नाप्रियं वाक्यं न स्तेन: स्यात् कदाचन।*।
पाषण्डादिभिर्भाषणनिषेधो यथा,—
"पाषण्डिनो विकर्म्मस्थान् वामाचारांस्तथैव च।
पञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्च्चयेत्।"
इति कौर्म्मे उपविभागे १६ अध्याय:।*।
शुभाशुभवाक्यानि यथा,—
"नैव राज्येन महता न वै चार्थस्य राशिभि:।
प्राप्यते श्रवणकथनं परलोकसुभाषितम्।
स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत् सुशोभनम्।
वाक्यं मुनिवरै: शान्तैस्तद्विज्ञेयं सुभाषितम्।
रागद्वेषानृतक्रोधकामतृष्णानुसारि यत्।
वाक्यं निरयहेतुत्वात् तदभाषितमुच्यते।
संस्कृतेनापि किं तेन मृदुना ललितेन वा।
अविद्या रागवाक्येन संसारक्लेशहेतुना।
यत् श्रुत्वा जायते पुण्यं रागादीनाञ्च संक्षय:।
विरूपमपि तद्वाक्यं विज्ञेयमतिशोभनम्।"
इति वह्निपुराणे वैष्णवधर्म्मे शुभव्रतनामाध्याय:। (अथ वाक्यदोषो यथा,—
"वाक्यदोषो नाम यथा खल्वस्मिन्नर्थे न्यूनमधिकमनर्थकमपार्थकं विरुद्धञ्चेति। तत्र हेतूदाहरणोपनयनिगमनानामन्यतमेनापि न्यूनं न्यूनं भवति यद्वा बहूपदिष्टहेतुकमेकेन साध्यते हेतुना तच्च न्यूनं एतानि ह्यन्तरेण प्रकृतोऽप्यर्थ: प्रणश्येत।" इति चरके विमानस्थानेऽष्टमेऽध्याये।)

वाछ, ऋ काङ्क्षि। इति कविकल्पद्रुम:। (भ्वा०-पर०-सक०-सेट्।) ऋ, वाञ्छति। नमध्यपाठेनैवेष्टसिद्धौ ऋदनुबन्धो वेदसूचारणभेदार्थ:। इति तट्टीकायां दुर्गादास:।

वागर:, पुं, (वाचा इयर्त्ति गच्छतीति। ऋ+अच्।) वारक:। शाण:। निर्णय:। वाडव:। वृक:। मुमुक्षु:। पण्डित:। परित्यक्तभय:। इति हेमचन्द्र:।

वागारु:, त्रि, (वाचि आशावाक्ये आरु: कर्कट इव मर्म्मच्छेदकत्वात्।) आशाहन्ता। यथा,
"आशां बलवतीं कृत्वा यो हन्ति पिशुनो जन:।
स जीवलोकेऽपि वागारुर्ज्ञेयो दारुस्तु दारवि।"
इति शब्दमाला।

वागाशनि:, पुं, बुद्ध:। इति शब्दरत्नावली।

वागीश:, पुं, (वाचां ईश:।) बृहस्पति:। इति शब्दरत्नावली। (यथा, बृहत्संहितायाम्।१७।१७
"अयं विशेषोऽभिहितो हिताय
कुजज्ञवागीशसितासितानाम्।"
ब्रह्मा। यथा, कुमारे। २। ३।
"वागीशं वाग्भिरर्थ्याभि: प्रणिपत्योपतस्थिरे।")

वागीश:, त्रि, (वाचामीश:।) वाक्पति:। सुष्ठुवक्ता इति यावत्। इत्यमर:। (यथा, महाभारते। १०। ७। ४१।
"निद्रागन्धप्रमुदिता वागीशा वीतमत्सरा:।")

वागीशा, स्त्री, (वाचामीशा ।) सरस्वती । यथा,
"वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ते हृदये संवित् तं नृसिंहमहं भजे ॥"
इति श्रीमद्भागवतटीकायां श्रीधरस्वामी ॥

वागीश्वरः, पुं, (वाचामीश्वर इव ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥ (जैनविशेषः । इति च त्रिकाण्डशेषः । १ । १ । २३ ॥ बृहस्पतिः । ब्रह्मा । इति व्युत्पत्तिलब्धोऽर्थः ॥) वाचामीश्वरे, त्रि । यथा, गारुडे १९६ अध्याये ।
"रुद्रामलकचूर्णं वै मधुतैलसमन्वितम् ।
अश्नन् मासं युवा स्याच्च नरो वागीश्वरो भवेत् ॥"

वागीश्वरी, स्त्री, (वाचामीश्वरी ।) सरस्वती । इति त्रिकाण्डशेषः ॥ (यथा, तन्त्रसारे । "वागीश्वरीं ऋतुस्नाताम् ॥")

वागुजी, स्त्री, सोमराजी । इत्यमरः । २।४।९ ॥ (यथा, वैद्यकचक्रपाणिसंग्रहे कुष्ठाधिकारे ।
"घर्म्मसेवी कदुष्णेन वारिणा वागुजीं पिबेत् ।
क्षीरभोजी त्रिसप्ताहात् कुष्ठरोगाद्विमुच्यते ॥")

वागुणः, पुं, कर्म्मरङ्गः । इति शब्दमाला ॥

वागुरा, स्त्री, (वातीति । वा गतिबन्धनयोः + "मद्गुरादयश्च ।" उणा० १।४२ । इति उरच्-प्रत्ययेन गुगागमेन च साधुः ।) मृगबन्धनार्थजालविशेषः । इत्यमरः । २।१०।२६ ॥ (यथा, कथासरित्सागरे । २१ । १६ ।
"व्याधः श्वभ्रा वने तस्मिंस्तस्य वर्त्मसु वागुराः ॥")

वागुरिकः, पुं, (वागुरया चरतीति । वागुरा + "चरति ।" ४ । ४ । ८ । इति ठक् ।) व्याधः । वागुरया मृगादीन् बध्नाति यः । इत्यमरः । २ । १५ । ४ ॥ (यथा, रघुः । ९ । ५३ ।
"मृगवनवागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः ॥")

वाग्गुदः, पुं, (वाचा गोदते क्रीडतीवेति । गुद क्रीडायाम् + कः ।) पक्षिविशेषः । इति त्रिकाण्डशेषः ॥ एतद्योनिकारणं यथा,—
"क्षौमं हृत्वा भवेत् क्रौञ्चो गोधा गां वाग्गुदो गुडम् ।"
"कौषेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः । कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडम् ॥"
इति मानवे १२ अध्यायः ॥

वाग्गुलिः, पुं, (वाचा गुडति रक्षतीति । गुड् + "इगुपधात् कित् ।" उणा० ४ । ११८ । इति इन् । स च कित् ।) ताम्बूली । राज्ञां ताम्बूलदाता । इति शब्दमाला ॥

वाग्गुलिकः, पुं, (वाग्गुलि + स्वार्थे कन् ।) ताम्बूलदः । इति त्रिकाण्डशेषः ॥

वाग्दरिद्रः, त्रि, (वाचि दरिद्र इव ।) मितभाषी । तत्पर्य्यायः । वाग्यः २ । इति शब्दमाला ॥

वाग्दलं, क्ली, (वाचां दलमिव ।) ओष्ठाधरौ । इति त्रिकाण्डशेषः ॥

वाग्दुष्टः, पुं, (वाचा वाक्यमात्रेण दुष्टः ।) व्रात्यः । इति जटाधरः ॥

वाग्दुष्टः, त्रि, (वाचा शुद्धेऽपि वस्तुनि अशुद्धरूपत्वदुर्व्वाक्येन दुष्टः ।) वाचा दोषयुक्तः । यथा,—
"वाग्भावदुष्टाश्च तथा दुष्टैश्चोपहतास्तथा ।
वाससा चावधूतानि वर्ज्ज्यानि श्राद्धकर्म्मणि ॥"
इति श्राद्धतत्त्वम् ॥ * ॥
तदन्नभक्षणप्रायश्चित्तम् । तत्र शङ्खः ।
"वाग्दुष्टं भावदुष्टञ्च भाजने भावदूषिते ।
भुक्त्वान्नं ब्राह्मणः पश्चात् त्रिरात्रन्तु व्रती भवेत् ॥"
एतदभ्यासे व्रती यावकेन तत्र द्वादशपणा देयाः । इति प्रायश्चित्तविवेकः ॥

वाग्देवता, स्त्री, (वाचां देवता ।) सरस्वती । यथा,—
"पञ्चाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम् ।
मुद्रामक्षगुणं सुधाढ्यकलसं विद्याञ्च हस्ताम्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ॥"
इति तन्त्रसारः ॥

वाग्देवी, स्त्री, (वाचां देवी ।) सरस्वती । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । ५ । १६३ ।
"द्विजस्तयोर्नायकाख्यो गौरीशसुरसद्मनोः ।
चातुर्व्विद्यः कृतस्तेन वाग्देवी कुलमन्दिरम् ॥")

वाग्मी, [न्] त्रि, (प्रशस्ता वागस्यस्येति । "वाचो ग्मिनिः ।" ५ । २ । १२४ । इति ग्मिनिः ।) वक्ता । इत्यमरः ॥ (यथा, कामन्दकीयनीतिसारे । ४ । १५ ।
"वाग्मी प्रगल्भः स्मृतिमानुदग्रो बलवान् वशी ॥")
पटुः । इति मेदिनी । ने, १३० ॥

वाग्मी, [न्] पुं, (प्रशस्ता वागस्यस्येति । वाच् + ग्मिनिः ।) सुराचार्य्यः । इति मेदिनी । ने, १३० ॥ (पुरुवंशीयमनस्योः पुत्त्रविशेषः । यथा, महाभारते । १ । ९४ । ७ ।
"शक्तः संहननो वाग्मी सौवीरीतनयास्त्रयः ।
मनस्योरभवन् पुत्त्राः शूराः सर्व्वे महारथाः ॥")

वाग्यः, त्रि, (वाचं परिमितवाक्यं याति गच्छतीति । या + कः ।) वाग्दरिद्रः । इति शब्दमाला ॥ निर्व्वेदः । कल्यः । इत्यजयः ॥

वाग्यतः, त्रि, (वाचि वाक्ये यतः संयतः ।) वाक्यसंयतः । यथा,—
"प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ।
प्रायश्चित्तमुपासीनो वाग्यतस्त्रिसवनं स्पृशेत् ॥"
इति प्रायश्चित्ततत्त्वधृतशङ्खलिखितवचनम् ॥

वाग्यामः, त्रि, अशक्त्यादिना वाचं यच्छति यः । इति सिद्धान्तकौमुदी ॥

वाङ्कः, पुं, समुद्रः । इति त्रिकाण्डशेषः ॥

वाङ्मती, स्त्री, (स्तुतिरूपा वागस्त्यस्या इति । वाच् + मतुप् । ङीप् ।) नदीविशेषः । यथा,—
"हिमाद्रेस्तुङ्गशिखरात् प्रोद्भूता वाङ्मती नदी ।
भागीरथ्याः शतगुणं पवित्रं तज्जलं स्मृतम् ।
तत्र स्नात्वा हरेर्लोकानुपस्पृश्य दिवङ्गतः ।
स्नात्वा देहं नरा यान्ति मम लोकं न संशयः ॥"
इति वाराहे गोकर्णमाहात्म्ये जलेश्वरमाहात्म्यवर्णननामाध्यायः ॥

वाङ्मयं, त्रि, (वाक्स्वरूपम् । वाच् + मयट् ।) वाक्यात्मकम् । यथा,—
"व्यस्तसमस्तैर्लोन्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥"
अपि च ।
"पद्यं गद्यमिति प्राहुर्व्वाङ्मयं द्विविधं बुधाः ।
प्रागुक्तलक्षणं पद्यं गद्यं संप्रति गद्यते ॥"
पद्यं यथा,—
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥
सममर्द्धसमं वृत्तं विषमञ्चेति तत् त्रिधा ।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः ॥
आदिस्तृतीयवद्यस्य पादस्तूर्य्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ॥"
गद्यं यथा ।
"अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम् ।
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः ॥
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः ।
तद्धि वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ॥
भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् ।
वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुनः स्मृतम् ॥"
इति छन्दोमञ्जरी ॥ * ॥
वाङ्मयपापानि यथा,—
"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बन्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥"
तथा परुषवचनमपवादः पैशुन्यमनृतं वृथालापो निष्ठुरवचनं इति वाङ्मयानि षट् । परेषां देशजातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं परुषम् ।
"यच्चान्यत् क्रोधसन्तापत्राससंजननं वचः ।
परुषं तच्च विज्ञेयं यच्चान्यच्च तथाविधम् ॥
चक्षुष्मानिति लुप्ताक्षं चाण्डालं ब्राह्मणेति च ।
प्रशंसानिन्दनं देषात् परुषान्न विशिष्यते ॥"
तेषामेव परुषवचनानां परोक्षमुदाहरणमपवादः । गुरुनृपतिबन्धुभ्रातृमित्त्रसकाशे अर्थोपघातार्थं दोषोपाख्यानं पैशुन्यम् । अनृतं द्विविधं असत्यमसंवादश्चेति ।
"देशराष्ट्रप्रसङ्गाच्च परार्थपरिकल्पनात् ।
नर्म्महासप्रसङ्गाच्च भाषणं व्यर्थभाषणम् ॥
गुह्याङ्गमैथुनानां भाषणं निष्ठुरं विदुः ।
यदन्यद्वा वचो नीचस्त्रीपुंसोर्मैथुनाश्रयम् ॥
इत्येवं षड्विकल्पस्य दुष्टवाक्यस्य भाषणात् ।
इह चामुत्र च क्लेशमनर्थं प्रतिपद्यते ॥"

प्रशंसया निन्दनं प्रशंसानिन्दनम्। अत्र चतुर्व्विधषड्विधयोरविरोधः। समचत्वासमचत्वभेदानादरेण पारुष्यापवादयोरैक्यात् निष्ठुरस्य परुषान्तर्भावाच्च। असम्बद्धप्रलापव्यर्थभाषणयोः पर्य्यायत्वान्नार्थान्तरम्। इति तिथ्यादितत्त्वम् ॥

वाङ्मयी, स्त्री, (वाङ्मय + + ङीप्।) सरस्वती। इति केचित् ॥

वाङ्मुखं, क्ली, (वाचां मुखमिव।) उपन्यासः। इत्यमरः। १। ६। ६ ॥

वाचंयमः, पुं, (वाचो वाक्यात् यच्छति विरमतीति। यम उपरमे + "वाचि यमो व्रते।" ३। २। ४०। इति खच्। "वाचंयमपुरन्दरौ च।" ६। ३। ६९। इति अमन्तत्वं निपात्यते।) मुनिः। इत्यमरः। २। ७।४२ ॥ मौनव्रती। इति केचिदिति भरतः ॥ (यथा, छान्दोग्योपनिषदि। ५। २। ८।
"वाचंयमोऽप्रमाद्यः स यदि स्त्रियं पश्येत् समृद्धं कर्म्मेति विद्यात् ॥")

वाचः, पुं, (वाचयति गुणानिति। वच् + णिच् + अच्।) मत्स्यविशेषः। वाचा इति भाषा ॥ (यथा,—
"ईलिशो जितपीयूषो वाचो वाचामगोचरः।
रोहितो नो हितः प्रोक्तो मद्गुरो मद्गुरोः प्रियः॥"
इत्युद्भटः ॥)
अस्य गुणाः। स्वादुत्वम्। गुरुत्वम्। स्निग्धत्वम्। श्लेष्मलत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः ॥

वाचकः, पुं, (वक्ति अभिधावृत्त्या बोधयत्यर्थान् इति। वच् + ण्वुल्।) शब्दः। यथा। शास्त्रे शब्दस्तु वाचकः। इत्यमरः ॥ द्वे वाचके। प्रकृतिप्रत्ययद्वारेणार्थस्य वाचको गवादिरूपः शास्त्रे व्याकरणे तर्कादौ च शब्द उच्यते। लोके तु संस्कृतोऽसंस्कृतः शब्द उच्यते। वक्तीति वाचकः वक्ता। इति भरतः ॥ तत्पर्य्यायः। यथा। शब्दाभिलापौ त्वभिधाभिधानं वाचको ध्वनिः। स्वानः कुहरितश्चेति त्रिकाण्डशेषः ॥ * ॥ (तल्लक्षणं यदुक्तं मुग्धबोधटीकायां दुर्गादासः।
"साक्षात् सङ्केतितं योऽर्थमभिधत्ते स
वाचकः ॥*॥
वाचयतीति। वच् + णिच् + ण्वुल्।) कथकः। पुराणादिपाठकः। यथा,—
"ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात्।
श्रुत्वान्यवर्णजाद्राजन् वाचकान्नरकं व्रजेत् ॥"
तथा।
"देवार्च्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः।
ग्रन्थिश्च शिथिलं कुर्य्याद्वाचकः कुरुनन्दन !।
पुनर्ब्बध्नीत तत् सूत्रं न मुक्त्वा धारयेत् क्वचित् ॥
हिरण्यं रजतं गाश्च तथा कांस्योपदोहनाः।
दत्त्वा तु वाचकायेह श्रुतस्याप्नोति तत्फलम् ॥"
कांस्योपदोहनाः कांस्यक्रोडाः।
"वाचकः पूजितो येन प्रसन्नास्तस्य देवताः ॥"
तथा।
"स्नात्वा पर्व्वसमाप्तिञ्च पूजयेद्वाचकं बुधः।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम् ॥"
तथा।
"विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदं तथा।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥
बुध्यमानः सदा ह्यर्थं ग्रन्थार्थं कृत्स्नशो नृप।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थं चार्पयेन्नृप !।
य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते ॥"
तथा।
"सप्तस्वरसमायुक्तं काले काले विशाम्पते।
प्रदर्शयन् रसान् सर्व्वान् वाचयेद्वाचको नृप ! ॥"
इति तिथ्यादितत्त्वम् ॥

वाचनं, क्ली, (वच् + णिच् + ल्युट्।) पठनम्। यथा,—
"शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः।
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम् ॥"
इति वाराहीतन्त्रम् ॥
तथा।
"दानवाचनान्वारम्भवरणव्रतप्रमाणेषु यजमानं प्रतीयात् ॥" इति कात्यायनसूत्रम् ॥ (प्रतिपादनम्। यथा, साहित्यदर्पणे १० परिच्छेदे।
"शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम् ॥")

वाचनकं, क्ली, (वाचनेन कायतीति। कै + कः।) प्रहेलिका। इति हारावली। १ ५२ ॥

वाचसाम्पतिः, पुं, (वाचसां सर्व्वविद्यारूपवाक्यानां पतिः। अभिधानात् षष्ठ्या अलुक्।) बृहस्पतिः। इति शब्दरत्नावली ॥

वाचस्पतिः, पुं, (वाचः पतिः। "षष्ठ्याः पतिपुत्रेति।" ८।३।५३। इति षष्ठीविसर्गस्य सः।) बृहस्पतिः। इत्यमरः। १। ३। २४ ॥ (यथा, कुमारे। २। ३०।
"वाचस्पतिरुवाचेदं प्राञ्जलिर्ज्जलजासनम् ॥"
शब्दप्रतिपालके, त्रि। यथा, ऋग्वेदे। १०। १६६। ३।
"वाचस्पते निषेधे मान्यथा मदधरं वदान् ॥"
"हे वाचस्पते वाचः शब्दस्य पालयितर्देव ॥"
इति तद्भाष्ये सायणः।)

वाचा, स्त्री, (वाच् + भागुरिमते टाप्।) वाक्। इति त्रिकाण्डशेषः ॥ (यथा, कातन्त्रे।
"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
टापञ्चापि हलन्तानां क्षुधा वाचा निशा
गिरा ॥"
यथा च, पञ्चतन्त्रे। ४। ४८। "तत् श्रुत्वा ब्राह्मणेन शुचीभूय तिसृभिर्वाचाभिः स्वनीविताहं दत्तौ।")

वाचाटः, त्रि, (कुत्सितं बहु भाषते इति। वाच् + "आलजाटचौ बहुभाषिणि।"५। २। १२५। इति आटच्।) वाचालः। इत्यमरः।३।१।३६॥ (यथा, मनुः। ३। ८।
"नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्।
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् ॥")

वाचालः, त्रि, (बहु कुत्सितं भाषते इति। वाच् + "आलजाटचौ बहुभाषिणि।" ५।२।१२५। इति आलच्।) बहुकुत्सितभाषी। तत्पर्य्यायः। जल्पाकः २ वाचाटः ३। इत्यमरः ॥ सुबहुभाषिण्यपि जल्पाकादयस्त्रयो वर्त्तन्ते वाचाटो वाचालो जल्पाकः सुबहुभाषी स्यादिति श्लोकार्द्धपर्य्याये बोपालितः। नित्यप्रगल्भवाचालामुपतिष्ठे सरस्वतीम्। इति मुरारिरिति तट्टीकायां भरतः ॥ (यथा, कथासरित्सागरे। ४०। ३४।
"वाचालैः कलहः क्लीवैरुपाहहाहुशालिनाम् ॥")

वाचिकं, त्रि, (वाच् + ठक्।) वाचा कृतम्। यथा,—
"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
अपि च।
"कायिकं वाचिकञ्चैव मानसं यच्च दुष्कृतम्।
एकजप्येन तत् सर्व्वं प्रणश्यति ममाग्रतः ॥"
इति शाम्बपुराणे सूर्य्यस्तोत्रम् ॥
अन्यच्च। कायिकं मानसञ्च नमस्कारं हित्वा आचार्य्येण कथं वाचिको नमस्कारः कृतः। इति मुग्धबोधटीकायां दुर्गादासः ॥ (वागेव। वाक् + "वाचो व्याहृतार्थायाम्।" ५। ४।३५। इति ठक्। सन्देशोक्तौ, क्ली। इति हारावली। १६६ ॥ यथा, राजतरङ्गिण्याम्। ६। ३५।
"भृत्यमेकं वणिग्वेषं प्राहिणोद्दत्तवाचिकम् ॥")

वाचिकः, पुं, (वाचा निष्पन्नः। वाच् + ठक्।) वाक्यारम्भः। यथा,—
"आलापश्च विलापश्च संलापश्च प्रलापकः।
अनुलापोऽपलापश्च सन्देशश्चातिदेशकः॥
अपदेशोपदेशौ च निर्द्देशो व्यपदेशकः।
कीर्त्तिता वचनारम्भाद्द्वादशामी मनी-
षिभिः ॥"
इत्युज्ज्वलनीलमणिः ॥

वाचिकपत्रं, क्ली, (वाचिकस्य सन्देशस्य पत्रम्।) लिपिः। संवादपत्रम्। इति केचित् ॥

वाचिकहारकः, पुं, (वाचिकस्य सन्देशस्य हारकः।) लेखनम्। इति त्रिकाण्डशेषः ॥ (दूतः। इति व्युत्पत्तिलब्धोऽर्थः ॥)

वाचोयुक्तिः, त्रि, (वाचि वाक्ये युक्तिर्यस्य।) वाग्मी। इत्यमरटीकायां रामाश्रमः ॥ (स्त्री, वाचो वचसो युक्तिः। "वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु।" ६। ३। २१। इत्यस्य वार्त्तिकोक्त्या षष्ठ्या अलुक्। वाग्दर्शितन्यायः।)

वाचोयुक्तिपटुः, त्रि, (वाचोयुक्तौ वाक्दर्शितन्याये पटुः।) वाग्मी। इत्यमरः। ३। १। ३ ॥

वाच्यं, त्रि, (उच्यते इति । वच्+ण्यत् । “वचोऽशब्दसंज्ञायाम् ।” इति न कुत्वम् ।) कुत्सितम् । हीनम् । वचनार्हम् । इति मेदिनी । ये, ५५ ॥ (यदुक्तम् ।
“शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि ॥”)
शक्यम् । यथा,—
“न चाल्पत्वबहुत्वाभ्यां प्रयोगाणां विशिष्यते ।
वाच्यवाचकभावोऽयमचपादादिशब्दवत् ॥
विभीतकेऽप्यचशब्दो यद्यप्यल्पैः प्रयुज्यते ।
तथापि वाचकस्तस्य ज्ञायते शकटाङ्गवत् ॥”
इति मलमासतत्त्वधृतभट्टवार्त्तिकवचनम् ॥
अपि च ।
“अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः ।”
एषां स्वरूपमाह ।
“वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥”
इति साहित्यदर्पणे २ परिच्छेदः ॥

वाच्यं, क्ली, (वच्+ण्यत् ।) प्रतिपादनम् । दूषणम् । इति धरणिः ॥ (यथा,—
“परवाच्येषु निपुणः सर्व्वो भवति सर्व्वदा ॥”)

वाछ, इ कामे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, वाञ्छति । इति दुर्गादासः ॥

वाजं, क्ली, घृतम् । (यथा, वाजसनेयसंहितायाम् । ९ । १ ।
“वाचस्पतिर्वाजं नः स्वदतु ॥”)
यज्ञः । अन्नम् । (यथा, ऋग्वेदे ।४ । २२ । ३ ।
“यो देवो देवतमो जायमानो
महो वाजेभिर्महद्भिश्च शुष्मैः ॥”
“वाजेभिरन्नैः ।” इति तद्भाष्ये सायणः ॥)
वारि । इति मेदिनी । जे, १४ ॥ (संग्रामः । यथा, ऋग्वेदे । ५ । ३५ । १ ।
“अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम् ॥”
बलम् । यथा, तत्रैव । ५ । ८५ । २ ।
“वनेषु व्यन्तरिक्षं ततान वाजमर्व्वत्सु पय उस्रियासु ॥”)

वाजः, पुं, शरपक्षः । इत्यमरः । २ । ८ । ८७ ॥ (यथा, भागवते । १० । ५९ । १६ ।
“विचित्रवाजैर्निशितैः शिलीमुखैः ।”)
निस्वनः । पक्षः । वेगः । इति मेदिनी । जे, १६ ॥ मुनिः । इति विश्वः ॥

वाजपेयं, क्ली पुं, (वाजमन्नं घृतं वा पेयमत्रेति ।) यागविशेषः । इत्यमरभरतौ ॥ स तु श्रौतसप्तसंस्थान्तर्गतपञ्चमयागः । यथा । अग्निष्टोमोऽत्यग्निष्टोमो उक्थ्यः षोडशी वाजपेयश्च । इत्याश्वलायनसूत्रम् ॥ ऐन्द्रः पौण्डरीकश्चेति सप्तयागाः ॥

वाजभोजी [न्], पुं, (वाजं भुङ्क्ते इति । भुज+णिनिः ।) वाजपेययागः । इति शब्दरत्नावली ॥

वाजसनेयः, पुं, जनमेजयकृतवेदार्थग्रन्थः । स तु वैशम्पायनशापादुच्छन्नः । इति मत्स्यपुराणम् ॥ (वाजसनेः सूर्य्यस्य छात्रः । वाजसनि+ढक् । याज्ञवल्क्यः । यथा, बृहदारण्यके । “आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥”)

वाजसनेयी, [न्] पुं, (वाजसनेयेन प्रोक्तं वेदमस्यास्तीति । इनिः ।) यजुर्व्वेदी । यथा,—
“आर्षक्रमेण सर्व्वत्र स्मृता वाजसनेयिनः ।”
इति महाजनपरिगृहीतवचनात् यजुर्व्वेदविधिनैव कर्म्म कुर्य्युः । इति मलमासतत्त्वम् ॥ (यथा, हरिवंशे । १४० । २ ।
“ब्राह्मणो याज्ञवल्क्यस्य शिष्यो धर्म्मगुणान्वितः ।
ब्रह्मदत्तेति विख्यातो विप्रो वाजसनेयिनाम् ॥”)

वाजिगन्धा, स्त्री, (वाजिनो घोटकस्य गन्धोऽस्त्यस्यामिति । अच् । टाप् ।) अश्वगन्धा । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने ३७ अध्याये ।
“सरला गुरुविल्वाम्बु वाजिगन्धाग्निवृद्धिभिः ॥”)

वाजिदन्तः, पुं, (वाजिनां दन्त इव पुष्पं यस्य ।) वासकः । इति रत्नमाला ॥

वाजिदन्तकः, पुं, (वाजिदन्त इव । स्वार्थे कन् ।) वासकः । इत्यमरः । २ । ४ । १०३ ॥

वाजिनं, क्ली, आमिक्षामस्तु । इति हेमचन्द्रत्रिकाण्डशेषौ ॥ छानार जल इति भाषा ॥ (यथा, वाजसनेयसंहितायाम् । १९ । २१ ।
“सोमस्य रूपं हविष आमिक्षा वाजिनं मधु ॥”
अस्य गुणाः प्रस्तुतिनियमश्च यथा,—
“दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा ।
नष्टदुग्धभवन्नीरं मोरटस्त्वथ टोऽब्रवीत् ॥
सुखशोषस्तृषादाहरक्तपित्तज्वरप्रणुत् ।
लघुर्बलकरो रुच्यो मोरटः स्यात् सितायुतः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
हविः । यथा, वाजसनेयसंहितायाम् ।२८।१।
“वाजी वहन् वाजिनम् ।”
“वाजिनं हविः ।” इति तद्भाष्ये महीधरः ॥*॥
पुं, अर्घः । यथा, ऋग्वेदे । १० । ७१ । ५ ।
“नैनं हिन्वन्त्यपि वाजिनेषु ॥”
“वाक् इना ईश्वरा येषाम् ।” इति सायणः ॥)

वाजिनी, स्त्री, अश्वगन्धा । घोटकी । शेषस्य पर्य्यायः । वड़वा २ वामी ३ प्रसूका ४ आर्व्वती ५ । अस्याः क्षीरगुणाः ।
“अश्वाक्षीरन्तु रूक्षोष्णं लवणं दीपनं लघु ।
देहस्थैर्य्यकरं बल्यं गौरवं कान्तिकृत् परम् ॥”
तद्दधिगुणाः ।
“आश्वं दधि स्यान्मधुरं कषायं
कफार्त्तिमूर्च्छामयहारि रूक्षम् ।
वातापहं दीपनकारि नेत्र-
दोषापहं तत् कथितं पृथिव्याम् ॥”*॥
तन्नवनीतगुणाः ।
“आश्वन्तु नवनीतं स्यात् कषायं कफकासजित् ।
चक्षुष्यं कटुकञ्चोष्णमीषद्वातापहारकम् ॥”
तद्घृतगुणाः ।
“अश्वाघृतन्तु कटुकं मधुरञ्च कषायकम् ।
ईषद्दीपनदं मूर्च्छाहारि वातापहं गुरु ॥”
इति राजनिर्घण्टः ॥ * ॥
अपि च ।
“रूक्षोष्णं वड़वाक्षीरं बल्यं श्वासानिलापहम् ।
अम्लं कटु लघु स्वादु सर्व्वमेकशफं तथा ॥”
इति भावप्रकाशः ॥

वाजिपृष्ठः, पुं, (वाजिनः पृष्ठमिव आकृतिरस्येति ।) अम्लानवृक्षः । इति शब्दचन्द्रिका ॥

वाजिभक्षः, पुं, (वाजिभिर्भक्ष्यते इति । भक्ष+कर्म्मणि घञ् ।) चणकः । इति राजनिर्घण्टः ॥ (विवरणमस्य चणकशब्दे ज्ञातव्यम् ॥)

वाजिभोजनः, पुं, (वाजिभिर्भोज्यते इति । भुज्+कर्म्मणि ल्युट् ।) मुद्गः । इति राजनिर्घण्टः ॥

वाजिमान् [त्], पुं, पटोलः । इति रत्नमाला ॥

वाजिशाला, स्त्री, (वाजिनां शाला गृहम् ।) घोटकगृहम् । आस्तवल् इति आरवी भाषा ॥ तत्पर्य्यायः । मन्दुरा २ । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ४ । १६६ ।
“काम्बोजानां वाजिशाला जायन्ते स्म हयोज्झिताः ॥”)

वाजी [न्] पुं, (वाजो वेगोऽस्त्यस्येति । वाज+इनिः ।) घोटकः । (यथा, रघुः । ३ । ४३ ।
“शतैस्तमक्ष्णामनिमेषवृत्तिभि-
र्हरिं विदित्वा हरिभिश्च वाजिभिः ॥”
वाजः पक्षोऽस्त्यस्येति ।) वाणः । पक्षी । इत्यमरः ॥ वासकः । इति शब्दरत्नावली ॥ (वजति गच्छतीति । वज्+णिनिः । त्रि, चलनवान् यथा, वाजसनेयसंहितायाम् । २९ । १ ।
“वाजी वहन्वाजिनं जातवेदो देवानां वक्षि-प्रियमासधस्थम् ॥”
“वजति वाजी । वजगतौ चलनवान् ।” इति तद्भाष्ये महीधरः ॥ * ॥ वाजमन्नमस्यास्तीति अन्नवान् । यथा, ऋग्वेदे । ३ । २ । १४ ।
“तमीमहे नमसा वाजिनं बृहत् ॥”
“वाजिनं अन्नवन्तम् ।” इति तद्भाष्ये सायणः ॥
वाजः पक्षोऽस्त्यस्येति । पक्षिविशेषः । यथा, भागवते । ४ । ७ । १९ ।
“सुपर्णस्तेन उपानीतस्तार्क्ष्येण स्तोत्रवाजिना ॥”)

वाजीकरणं, क्ली, (अवाजी वाजीव क्रियतेऽनेनेति । कृ+ल्युट् । अभूततद्भावे च्विः ।) वीर्य्यवृद्धिकरम् । इति राजनिर्घण्टः ॥ वाजीकरणद्रव्यस्य लक्षणमाह ।
“यद्द्रव्यं पुरुषं कुर्य्यात् वाजिवत् सुरतक्षमम्
तद्वाजीकरमाख्यातं मुनिभिर्भिषजां वरैः ॥”
अत्र प्रसङ्गात् क्लैव्यस्य लक्षणं संख्या निदानञ्चाह ।
“क्लीवः स्यात् सुरताशक्तस्तद्भावः क्लैव्यमुच्यते ।
तच्च सप्तविधं प्रोक्तं निदानं तस्य कथ्यते

तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यतो नृणां क्लैब्यं समुपजायते ॥
द्वेष्यस्त्रीसंप्रयोगाच्च क्लैब्यं तन्मानसं स्मृतम् ॥”
तैस्तैर्भावैर्भयशोकक्रोधादिभिः । अहृद्यैः हृदयाहितैः दुःखदत्वात् । क्षते पीडिते व्यवच्छिन्न इति यावत् । ध्वजः शिश्नः । पतति न तूनमति । संप्रयोगो मैथुनम् ॥ १ ॥

“कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः ।
पित्ताच्छुक्रक्षयो दृष्टः क्लैब्यं तस्मात् प्रजायते ॥”
कट्वादिनातिमात्रेण प्रवृद्धेन पित्तेन शुक्रस्य दग्धत्वात् क्लैब्यं भवति । पित्तजमेतद्द्वितीयम् ॥ २ ॥

“अतिव्यवायशीलो यो न च वाजीक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥”
शुक्रक्षयजं तृतीयम् ॥ ३ ॥

“महता मेढ्ररोगेण चतुर्थी क्लीवता भवेत् । ४ ।
वीर्य्यवाहिशिराच्छेदान्मेहनानुन्नतिर्भवेत् ॥ ५ ॥
बलिनः क्षुब्धमनसो निरोधाद्ब्रह्मचर्य्यतः ।
षष्ठं क्लैब्यं स्मृतं तत्तु शुक्रस्तम्भनिमित्तकम् ॥”
बलिनः पुष्टस्य पुरुषस्य क्षुब्धमनसः कामात् सञ्चलितस्य । मनसः ब्रह्मचर्य्यतो निरोधात् क्लैब्यं भवति ॥ ६ ॥

“जन्मप्रभृति यत् क्लैब्यं सहजं तद्धि सप्तमम् ॥”७

असाध्यं क्लैब्यमाह ।

“असाध्यं सहजं क्लैब्यं मर्म्मच्छेदाच्च यद्भवेत् ।”
मर्म्मच्छेदात् वीर्य्यवाहिशिराच्छेदात् ॥” * ॥

अथ क्लैब्यस्य चिकित्सायां वाजीकरणविधिमाह ।

“नरो वाजीकरान् योगान् सम्यक् शुद्धो निरामयः ।
सप्तत्यन्तं प्रकुर्व्वीत वर्षादूर्द्ध्वन्तु षोडशात् ॥
न च वै षोडशादर्व्वाक् सप्तत्याः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
अथवृत्तुपदंशाद्या घोराश्चातीवदुर्ज्जयाः ।
अकालमरणञ्च स्याद्भजतस्त्वियमन्यथा ॥
विलासिनामर्थवतां रूपयौवनशालिनाम् ।
नराणां बहुभार्य्याणां विधिर्वाजीकरो हितः ॥
स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छताम् ।
योषित्प्रसङ्गात् क्षीणानां क्लीवानामल्परेतसाम् ॥
हिता वाजीकरा योगाः प्रीत्यपत्यबलप्रदाः ।
एतेऽपि पुष्टदेहानां सेव्याः कालाद्यपेक्षया ॥”

वाजीकराण्याह ।

“भोजनानि विचित्राणि पानानि विविधानि च ।
वाचः श्रोत्राभिरामाश्च त्वचः स्पर्शसुखावहाः ।
यामिनी इन्दुतिलका कामिनी नवयौवना ।
गीतं श्रोत्रमनोहारि ताम्बूलं मदिरा स्रजः ॥
गन्धा मनोज्ञा रूपाणि चित्राण्युपवनानि च ।
मनसश्चाप्रतीघातो वाजीकुर्व्वन्ति मानवम् ॥
माक्षीकधातुमधुपारदलोहचूर्णं
पथ्याशिलाजतुविडङ्गघृतानि लिह्यात् ।
एकान्नविंशतिदिनानि नराशितोऽपि
सोऽशीतिकोऽपि रमयेत् प्रमदा युवेव ॥
गवां विरूढवत्सानां सिद्धं पयसि पायसम् ।
गोधूमचूर्णञ्च तथा सितामधुघृतान्वितम् ।
भुक्त्वा हृष्यति जीर्णोऽपि दशदारान् व्रजत्यपि ॥”

अथ रसाला ।

“दध्नार्द्धाढकमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः
प्रस्थं क्षौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्मांषकान् ।
एलामाषचतुष्टयं मरिचतः कर्षं लवङ्गं तथा
धृत्वा शुक्लपटे शनैः करतलेनोन्मथ्य विस्रावयेत् ॥
न्यस्ताखे मृगनाभिचन्दनरसस्पृष्टेऽगुरूद्धूपिते
कर्पूरेण सुगन्धिके तदखिलं संशोध्य संस्थापयेत् ।
स्वस्यार्थे मथुरेश्वरेण रचिता ह्येषा रसाला स्वयं
भोक्तुर्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥ * ॥
गोक्षुरेक्षुरबीजानि वाजिगन्धा शतावरी ।
मुषली वानरीबीजं यष्टी नागबला बला ॥
एषां चूर्णं दुग्धसिद्धं गव्येनाज्येन भर्ज्जितम् ।
सितया मोदकं कृत्वा भक्ष्यं वाजीकरं परम् ॥
चूर्णादष्टगुणं क्षीरं घृतं चूर्णसमं स्मृतम् ।
सर्व्वतो द्विगुणं खण्डं खादेदग्निबलं यथा ॥
वाजीकराणि भूरीणि संगृह्य रचितो यतः ।
तस्मादमुष्य योगेषु योगोऽयं प्रवरो मतः ॥”
रतिवर्द्धनो मोदकः ॥ * ॥

“पिप्पलीलवणोपेते वस्ताण्डे घृतसाधिते ।
कच्छपस्याथ वा खादेत्ते तु वाजीकरे भृशम् ॥
पूगं दक्षिणदेशजं दशपलोन्मानं भृशं कर्त्तयेत्
तच्छिन्नं जलयोगतो मृदुतरं संकुट्य चूर्णीकृतम् ।
तच्चूर्णं पटशोधितं वसुगुणे गोशुद्धदुग्धे पचेत्
गव्याज्याञ्जलिसंयुतेऽतिनिविडे दद्यात्तुलार्द्धां सिताम् ॥
पक्वं तज्ज्वलनात् क्षितिं प्रतिनयेत् तस्मिन् पुनः प्रक्षिपेत्
द्रव्याण्यद्भुतहारि बहुला हृद्यादरात् संहिताः ।
एला नागबला बला सचपला जातीफलालिङ्गिका
जातीपत्रसुपत्रचित्रकयुतं तज्ज त्वचा संयुतम् ॥
विश्वावीरणवारिवारिदवरा वांशी वरी वानरीद्राक्षा श्वेक्षुरगोक्षुराश्च महती खर्ज्जूरिका चीरिका ।
धान्याकं सकशेरुकं समधुकं शृङ्गाटकं जीरकं
पृथ्वीकाथयवानिका वराटिका मांसी मिसिर्मेथिका ॥
कन्देश्च विदारिकाथ मुषली गन्धर्व्वगन्धा तथा
कर्पूरं करिकेशरं समरिचश्चारस्य बीजं नवम् ।
बीजं शाल्मलिसम्भवं करिकणा बीजञ्च राजीवजं
श्वेतं चन्दनमत्र रक्तमपि च श्रीसञ्ज्ञपुष्पैः समम् ॥
सर्व्वञ्चेति पृथक् पृथक् पलमितं संचूर्ण्य तत्र क्षिपेत्
भृतं वङ्गभुजङ्गलोहगगनं सम्मारितं स्वेच्छया ।
कस्तूरी घनसारचूर्णमपि च प्राज्ञं यथा प्रक्षिपेत्
पश्चादस्य तु मोदकान् विरचयेद्बिल्वप्रमाणानथ ॥
तान् भोक्ताति सदा यथानलबलं भुञ्जीत नान्यं रसं
पूर्व्वस्मिन्नशिते गते परिणतिं प्राग्भोजनात् भक्षयेत् ।
नित्यं श्रीरतिवल्लभाख्यकमिमं यः पूगपाकं भजेत्
स स्याद्वीर्य्यविवृद्धिहृष्टमदनो वाजीव शक्तो रतौ ॥
दीप्ताग्निर्ब्बलवान् बली विरहितो दुष्टः स पुष्टः सदा
वृद्धो योऽपि युवेव सोऽपि रुचिरः पूर्णेन्दुवत् सुन्दरः ॥”

वसुगुणे अष्टगुणे । अञ्जलिरर्द्धशरावम् । तुलार्द्धां पञ्चाशत्पलमिताम् । संहिताः सम्भृताद्याः । नागबला गुरसकरी गुरखड़ी इति च लोके । बला बरियार तस्या मूलत्वक् । चपला पिप्पली । जातीपत्रकं जाइपत्री । विश्वा शुण्ठी । वीरणं एतस्य मूलं उशीरं ग्राह्यम् । वारि सुगन्धवाला । वारिदः मुस्तकः । वरा त्रिफला वांशी वंशरोचना । वरी शतावरी । वानरी कपिकच्छूस्तस्या बीजं ग्राह्यम् । इक्षुरः कोकिलाक्षः तस्य बीजम् । गोक्षुरस्यापि बीजम् । महती खर्ज्जूरिका छोहारा । चीरिका चीरी । पृथ्वीका कारवी मगरैला इति लोके । वराटिका वररै इति लोके । शालूकमेषां कन्दः स्याद्बीजकोषो वराटिका । मांसी जटामांसी । मिसिः सौफः । गन्धर्व्वगन्धा अश्वगन्धा तस्या मूलम् । श्रीसंज्ञं लवङ्गम् । घनसारः कर्पूरः । बिल्वप्रमाणान् पलप्रमाणान् । रतिवल्लभाख्यपूगपाकः ॥ * ॥

“एतस्मिन्नतिवल्लभे यदि पुनः सम्यक् खराशाणिका
धुस्तूरस्य तु बीजमर्क्ककरभा याशोऽब्धिशोषस्तथा ।
सम्माजूफलकं तथा खसफलत्वक् वापि निःक्षिप्यते
चूर्णार्द्धा विजया तदा स हि भवेत् कामेश्वरः संज्ञया ॥”

इति महाकामेश्वरः ॥ * ॥

“रक्तपित्ताधिकारोक्तः खण्डकुष्माण्डको महान् ।
रक्तपित्तादिरोगघ्नो महावाजीकरः स्मृतः ॥ * ॥
पक्वाम्रस्य रसे द्रोणे सितामाढकसंमिताम् ।
घृतप्रस्थमिदं दद्यान्नागरस्य पलाष्टकम् ॥
मरिचं कुड़वोन्मानं पिप्पलीद्विपलोन्मितम् ।
सलिलस्याढकं दत्त्वा सर्व्वमेकत्र कारयेत् ॥
पचेत्तन्मृण्मये पात्रे दारुदर्व्व्या प्रचालयेत् ।

चूर्णान्येषां क्षिपेत्तत्र घनीभूतेऽवतारिते ॥
धान्यकं जीरकं पत्रं चित्रकं मुस्तकं त्वचम् ।
कृष्णजीरकमप्यत्र ग्रन्थिकं नागकेशरम् ॥
एलाबीजं लवङ्गञ्च पृथक् जातीफलं पलम् ।
सिद्धं शीते प्रदद्याच्च मधुनः कुडवद्वयम् ॥
भक्षयेद्भोजनादर्व्वाक् पलमात्रमिदं नरः ।
अथवा नियता नात्र मात्रा खादेद्यथानलम् ॥
मानवः सेवनादस्य वाजीव सुरते भवेत् ।
समर्थो बलवान् पुष्टो हृष्टो नित्यं निरामयः ॥
ग्रहणीं नाशयेदेष क्षयं श्वासमरोचकम् ।
अम्लपित्तञ्च पित्तञ्च रक्तपित्तञ्च पाण्डुताम् ॥"
कृष्णजीरकं नागागरेला । इति आम्रपाकः ॥
"शमयति गोक्षुरचूर्णं छागक्षीरेण साधितं समधु ।
भुक्तं क्षपयति कार्श्यं यज्जनितं कुप्रयोगेण ॥
द्रव्याणि चन्दनादिस्तु चन्दनं रक्तचन्दनम् ।
पतङ्गमथ कालीयागुरुकृष्णागुरूणि च ॥
देवद्रुमः ससरलः पद्मकं तुणिकोऽपि च ।
कर्पूरो मृगनाभिश्च लताकस्तूरिकापि च ॥
सिह्लकः कुङ्कुमं नखं जातीफलकमत्र च ।
जातीपत्रं लवङ्गञ्च सूक्ष्मैला महती च सा ॥
कक्कोलफलकं त्वक् च पत्रकं नागकेशरम् ।
बालकञ्च तथोशीरं मांसी दारु सितापि वा ॥
मुरा कर्पूरकश्चापि शैलेयं भद्रमुस्तकम् ।
रेणुका च प्रियङ्गुश्च श्रीवासो गुग्गुलुस्तथा ॥
लाक्षा नखश्च रालश्च धातकीकुसुमं तथा ।
ग्रन्थिपर्णञ्च मञ्जिष्ठा तगरं सिक्थकं तथा ॥
एतानि शाल्यमानानि कल्कीकृत्य शनैः पचेत् ।
तैलं प्रस्थमितं सम्यक् एततपात्रे शुभे क्षिपेत् ॥
अनेनाभ्यक्तगात्रस्तु वृद्धोऽशीतिसमोऽपि यः ।
युवा भवति शुक्राढ्यः स्त्रीणामत्यन्तवल्लभः ॥
वन्ध्यापि लभते गर्भं षण्ढोऽपि तरुणायते ।
अपुत्रः पुत्रमाप्नोति जीवेच्च शरदां शतम् ॥
चन्दनादिमहातैलं रक्तपित्तं क्षयं ज्वरम् ।
दाहप्रस्वेददौर्गन्ध्यं कुष्ठं कण्डुं विनाशयेत् ॥"
पतङ्गं बकम् इति लोके । कालीयं कलम्बक इति लोके । लताकस्तूरिका मुष्कदाना इति लोके। कक्कोलफलस्याभावे जातीपुष्पं ग्राह्यम्। तदलाभेऽपि लवङ्गं ग्राह्यम्। दारुशिला दारुचिनी। शैलेयं छरा इति लोके। श्रीवासः गुगुरी इति लोके। ग्रन्थिपर्णः गठिवन् इति लोके। अशीतिसमः अशीतिवार्षिकः। इति चन्दनादितैलम् ॥ * ॥
"बीजानि कौशकच्छ्वाः कुडवमितानि स्वेदये-च्छनकैः ।
प्रस्थे गोभवदुग्धे दुग्धं यावद्भवेद्गाढम् ॥
त्वग्रहितानि च कृत्वा सूक्ष्मं संपेषयेत्तानि ।
पिष्टिकया लघुवटिकाः कृत्वा गव्ये पचेदाज्ये ॥
द्विगुणितशर्करया वा वटिकाः संपक्वया क्षेप्याः ।
वटिका माक्षिकमध्ये मज्जनयोग्येऽखिलाः स्थाप्याः ।
पञ्चटङ्कमितास्तास्तु सायं प्रातश्च भक्षयेत् ।
अनेन शीघ्रद्रावी यो यश्च स्यात् पतितध्वजः ॥
सोऽपि प्राप्नोति सुरते सामर्थ्यमिति वाजिवत् ।
नानेन सदृशं किञ्चित् द्रव्यं वाजीकरं परम् ॥"
इति वानरीवटिका ॥ * ॥
"आकारकरभा शुण्ठी लवणं कुङ्कुमं कणा ।
जातीफलं जातिपुष्पं चन्दनं कार्षिकं पृथक् ॥
चूर्णयेदहिफेनन्तु तत्र दद्यात् पलोन्मितम् ।
सर्व्वमेकीकृतं माषमात्रं क्षौद्रेण भक्षयेत् ॥"
शुक्रस्तम्भकरं पुंसामिदमानन्दकारकम् ।
नारीणां प्रीतिजनकं सेवेत निशि कामुकः ॥"
इति भावप्रकाशः ॥
(यथा च ।
"विदारीकन्दी शुमतीबृहत्यौ ।
काकोलिकाभीरुपुनर्नवे द्वे ।
शृङ्गाटकं मागधिका बला च
चूर्णं सिताढ्यं सितया प्रयोज्यम् ॥
जीर्णे पयः पायसमेव योज्यं
करोति पुंसां बलमेवमोजः ।
स्त्रीणां सहस्रं भजतेऽपि षण्ढो
मासद्वयेनापि च सेवमानः ॥"
इति हारीते चिकित्सास्थाने ४६ अध्यायः ॥
"वाजीकरणमन्विच्छेत् सततं विषयी पुमान् ।
तुष्टिः पुष्टिरपत्यञ्च गुणवत्तत्र संश्रितम् ॥
अपत्यसन्तानकरं यत् सद्यः संप्रहर्षणम् ।
वाजीवातिबलो येन यात्यप्रतिहतोऽङ्गनाः ॥
भवत्यतिप्रियः स्त्रीणां येन येनोपचीयते ।
तद्वाजीकरणं तद्धि देहस्योर्ज्जस्करं परम् ॥
धर्म्यं यशस्यमायुष्यं लोकद्वयरसायनम् ।
अनुमोदामहे ब्रह्मचर्य्यमेकान्तनिर्म्मलम् ॥
अल्पसत्त्वस्य तु क्लेशैर्बाध्यमानस्य रागिणः ।
शरीरक्षयरक्षार्थं वाजीकरणमुच्यते ॥
कल्पस्योदग्रवयसो वाजीकरणसेविनः ।
सर्व्वेष्वृतुष्वहरहर्व्यवायो न निवार्य्यते ॥
अथ स्निग्धविशुद्धानां निरूहान् सानुवासनान् ।
घृततैलरसक्षीरशर्कराक्षौद्रसंयुतान् ॥
योगविद्योजयेत् पूर्व्वं क्षीरमांसरसाशिनम् ।
ततो वाजीकरान् योगान् शुक्रापत्यविवर्द्धनान् ॥
अच्छायः पूतिकुसुमः फलेन रहितो द्रुमः ।
यथैकश्चैकशाखश्च निरपत्यस्तथा नरः ॥
स्खलद्गमनमव्यक्तवचनं धूलिधूसरम् ।
अपि लालाविलमुखं हृदयाह्लादकारकम् ॥
अपत्यं तुल्यता केन दर्शनस्पर्शनादिषु ।
किंपुनर्यद्यशोधर्म्ममानश्रीकुलवर्द्धनम् ॥
शुद्धकाये यथाशक्ति वृष्य योगान् प्रयोजयेत् ।
शरेक्षुकुशकाशानां विदार्य्या वीरणस्य च ॥
मूलानि कण्टकार्य्याश्च जीवकर्षभकौ बलाम् ।
मेदे द्वे द्वे च काकोल्यौ शूर्पपर्ण्यौ शतावरीम् ॥
अश्वगन्धामतिबलामात्मगुप्तां पुनर्नवाम् ।
वीरां पयस्यां जीवन्तीं ऋद्धिं रास्नां त्रिकण्टकम् ॥
मधुकं शालिपर्णीञ्च भार्गीक्षिपर्णिकाम् पृथक् ।
माषाणामाढकञ्चैतद्विद्रोणे साधयेदपाम् ॥
रसेनाढकशेषेण पचेत्तेन घृताढकम् ।
दत्त्वा विदारीधात्रीक्षुरसानामाढकाढकम् ॥
घृताच्चतुर्गुणं क्षीरं पेष्याणीमानि चावपेत् ।
वीरां स्वगुप्तां काकोल्यौ यष्टीं फल्गूनि पिप्पलीम् ॥
द्राक्षां विदारीं खर्ज्जूरं मधुकानि शतावरीम् ।
तत्सिद्धपूतं चूर्णस्य पृथक् प्रस्थेन योजयेत् ॥
शर्करायास्तुगायाश्च पिप्पल्याः कुडवेन च ।
मरिचस्य प्रकुञ्चेन पृथगर्द्धपलोन्मितैः ॥
त्वगेलाकेशरैः सूक्ष्मैः क्षौद्राद्विकुडवेन च ।
पलमात्रं ततः खादेत् प्रत्यहं रसदुग्धभुक् ॥
तेनारोहति वाजीव कुलिङ्ग इव हृष्यति ।
विदारीपिप्पलीशालिप्रियालेक्षुरकाह्वजः ॥
पृथक् स्वगुप्तामूलाच्च कुडवांशं तथा मधु ।
तुलार्द्धं शर्कराचूर्णात् प्रस्थार्द्धं नवसर्पिषः ॥
सोऽक्षमात्रमतः खादेद् यस्य रामाशतं गृहे ।
स्वात्मगुप्ताफलान् क्षीरे गोधूमान् साधितान् हिमान् ॥
माषान् वा सघृतक्षौद्रान् खादन् गृष्टिपयोऽनुपः ।
जागर्त्ति रात्रिं सकलामखिन्नः खेदयेत् स्त्रियः ॥
बस्ताण्डसिद्धे पयसि भावितानसकृत्तिलान् ।
यः खादेत् सचितान् गच्छेत् स स्त्रीशतमपूर्व्ववत् ॥
चूर्णं विदार्य्या बहुशः स्वरसेनैव भावितम् ।
क्षौद्रसर्पिर्युतं लीढ्वा प्रमदाशतमृच्छति ॥"
"कृष्णाधात्रीफलरजः स्वरसेन सुभावितम् ।
शर्करामधुसर्पिर्भिर्लीढ्वा योऽनुपयः पिबेत् ॥
स नरोऽशीतिवर्षोऽपि युवेव परिहृष्यति ।
कर्षं मधुकचूर्णस्य घृतक्षौद्रसमन्वितम् ॥
पयोऽनुपानं यो लिह्यान्नित्यवेगः स वा भवेत् ॥"
"उच्चटाचूर्णमप्येवं शातवर्य्याश्च योजयेत् ॥
चन्द्रशुभ्रं दधिसरं सचितं शष्कुलीदनम् ।
पटे सुमार्ज्जितं भुक्त्वा वृद्धोऽपि तरुणायते ।"

"आचरेच्च सकलां रतिचर्य्यां
कामशास्त्रविहितामनवद्याम् ।
देशकालबलशक्त्यनुरोधाद्-
वैद्यतन्त्रसमयोऽविरुद्धाम् ॥
अभ्यङ्गोद्वर्त्तनस्नानगन्ध-
स्रक्चन्द्रवस्त्राभरणप्रकाराः ।
गान्धर्व्वकाव्यादिकथा प्रवीणाः
समानभावा वशगा वयस्याः ।
दीर्घिका स्वभवनान्तनिविष्टा
पद्मरेणुमधुमत्तविहङ्गाः ।
नीलसानुगिरिकूटनितम्बे
काननानि पुरकण्टमतानि ।
हृष्टसुखा विविधा तरुजातिः
श्रोत्रसुखः कलकोकिलनादः ।
ऋतुसुखस्तुवशेन विभूषा-
चित्तसुखः सकलः परिवारः ॥

ताम्बूलमच्छमदिरा कान्ता कान्ता निशा शशाङ्काङ्का।

यद्‌यच्च किञ्चिदिष्टं मनसो वाजीकरं तत्तत् ।
मधुमुखमिव सोत्पलं प्रियायाः
कलरशनापरिवादिनी प्रियेव ।
कुसुमचयमनोरमा च शय्या
किसलयिनी लतिकेव पुष्पिताग्रा ॥
देशे शरीरे च न काचिदर्त्ति-
रर्थेषु नाप्योऽपि मनोविघातः ।
वाजीकराः सन्निहिताश्च योगाः
कामस्य कामं परिपूरयन्ति ॥”
इति वाभटे उत्तरस्थाने ४० अध्यायः ॥

तथाच ।
“वाजीकरणमन्विच्छेत् पुरुषो नित्यमात्मवान् ।
तदायत्तौ हि धर्म्मार्थौ प्रीतिश्च यश एव च ॥
पुत्त्रस्यायतनं ह्येतद्‌गुणाश्चैते सुताश्रयाः ।
वाजीकरणमग्र्यञ्च क्षेत्रं स्त्री या प्रहर्षिणी ॥
इष्टा ह्येकैकशोऽप्यर्थाः परं प्रीतिकराः स्मृताः ।
किं पुनः स्त्रीशरीरे ये संघातेन व्यवस्थिताः ॥
सङ्घातो हीन्द्रियार्थानां स्त्रीषु नान्यत्र विद्यते ।
स्त्र्याश्रयो हीन्द्रियार्थो यः सप्रीतिजननो-
ऽधिकः ॥”
“चित्रदीपः सरःशुष्कमधातुर्धातुसन्निभः ।
निष्फलस्तृणपूलीति ज्ञातव्यः पुरुषाकृतिः ॥
अप्रतिष्ठश्च नग्नश्च शून्यश्चैकेन्द्रियश्च ना ।
मन्तव्यो निष्क्रियश्चैव यस्यापत्यं न विद्यते ॥
बहुमूर्त्तिर्बहुमुखो बहुव्यूहो बहुक्रियः ।
बहुचक्षुर्बहुज्ञानो बह्वात्मा च बहुप्रजः ॥
मङ्गल्योऽयं प्रशस्तोऽयं धन्योऽयं वीर्य्यवानयम् ।
बहुशाखोऽयमिति च स्तूयते ना बहुप्रजः ॥
प्रीतिर्ब्बलं सुखं वृत्तिर्विस्तारो विभवः कुलम् ।
यशोलोकाः सुखोदर्कास्तुष्टिश्चापत्यसंश्रिता ॥
तस्मादपत्यमन्विच्छन् गुणांश्चापत्यसंश्रितान् ॥
वाजीकरणनित्यः स्यादिच्छेत् कामसुखानि च ।
माषाणामात्मगुप्ताया बीजानामाढकं नवम् ॥
जीवकर्षभकौ वीरं मेदामृद्धिं शतावरीम् ।
मधुकञ्चाश्वगन्धाञ्च साधयेत् कुडवोन्मिताम् ॥
रसे तस्मिन् घृतप्रस्थं गव्यं दशगुणं पयः ।
विदार्य्या रसप्रस्थं प्रस्थमिक्षुरसस्य च ॥
दत्त्वा मृद्वग्निनासाध्यं सिद्धं सर्पिर्निधापयेत् ।
शर्करायास्तुगाक्षीर्य्याः क्षौद्रस्य च पृथक्
पृथक् ॥
भागांश्चतुष्पलांस्तत्र पिप्पल्याश्चावपेत् पलम् ।
पलं पूर्व्वमतो लीढ्वा ततोऽन्नमुपयोजयेत् ॥
य इच्छेदक्षयं शुक्रं शेफसश्चोत्तमं बलम् ।”
इति वाजीकरणं घृतम् ॥*॥
“चटकानां सहंसानां दक्षाणां शिखिना-
न्तथा ।
शिशुमारस्य नक्रस्य भिषक् शुक्राणि संहरेत् ॥
गव्यं सर्पिर्वराहस्य कुलिङ्गस्य वसामपि ।
षष्टिकानाञ्च चूर्णानि चूर्णं गोधूममेव च ॥
एभिः पूपलिकाः कार्य्याः शष्कुल्यो वर्त्तिका
स्तथा ॥
गुणाधानाश्च विविधा भक्ष्याश्चान्ये पृथग्विधाः ।
एषां प्रयोगाद्भक्ष्याणां स्वर्णेनापूर्णरेतसा ॥
शेफसा वाजिवद्‌याति यावदिच्छन् स्त्रियो
नरः ॥”
इति वृष्यपूपालिकयोगः ॥*॥
“मकुलैर्जातरूपस्य तस्या एव पयःशृतम् ।
अपत्यजननं सिद्धं सघृतक्षौद्रशर्करम् ॥”
“आर्द्राणि मत्स्यमांसानि भृष्टाश्च शफरीश्च वा ।
तप्ते सर्पिषि यः खादेत् स गच्छेत् स्त्रीषु न
क्षयम् ॥
घृतभृष्टान् रसे छागे रोहितान् फलसाधिते ॥
अनुपीतरसान् सिद्धानपत्यार्थी प्रयोजयेत् ॥”
इति गर्भाधानकरो योगः ॥*॥
“नर्त्ते वै षोड़शाद्वर्षात् सप्तत्याः परतो नच ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
अतिबालो ह्यसम्पूर्णसर्व्वधातुः स्त्रियो व्रजन् ।
उपतप्येत सहसा तड़ागमिव काजलम् ॥
शुष्करूक्षं यथाकाष्ठं जन्तुदग्धं विजर्ज्जरम् ।
स्पृष्टमाशु विशीर्य्येत तथा वृद्धस्त्रियो व्रजन् ॥
जरया चिन्तया शुक्रं व्याधिभिः कर्म्मकर्षणात् ।
क्षयं गच्छत्यनशनात् स्त्रीणाञ्चातिनिषेवणात् ॥
भयाद्भयादतिश्रम्भाच्छोकात् स्त्रीदोषदर्शनात् ।
नारीणामरसज्ञत्वादभिचारादसेवनात् ॥
वृषस्यापि स्त्रियो गन्तुं न शक्तिरुपजायते ।
देहसत्त्वबलापेक्षो हर्षः शक्तिश्च हर्षणा ॥”
इति चरके चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

वाञ्छा, स्त्री (वाञ्छनमिति । वाछि इच्छायाम् । गुरोश्चेत्यः । टाप् ।) आत्मवृत्तिगुणविशेषः । सा च द्विविधा यथा । उपायविषयिणी फल-विषयिणी वा । फलं सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम् । इति सिद्धान्तमुक्तावली ॥ तत्पर्य्यायः । इच्छा २ काङ्क्षा ३ स्पृहा ४ ईहा ५ तृट् ६ लिप्सा ७ मनोरथः ८ कामः ९ अभिलाषः १० तर्षः ११ । इत्यमरः ।१।७।२७। आकाङ्क्षा १२ कान्तिः १३ अग्रचयः १४ दोहदः १५ आभिलाषः १६ । इति शब्दरत्नावली ॥ वक् १७ रुचिः १८ मतिः १९ दोहलम् २० छन्दः २१ । इति जटाधरः ॥ (यथा, कथासरित्सागरे ।११।२७।
“सन्दिदेश च यद्यस्ति वाञ्छा मच्छिष्यतां प्रति ।
तत्पुत्त्रास्तदिहैवैषा भवता प्रेष्यतामिति ॥”)

वाञ्छितं, त्रि, (वाञ्छ + क्तः ।) अभिलषितम् । यथा,—
“अविच्छेदं पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम् ।
शुक्लाम्बरधरां देवीं शुक्लाभरणभूषिताम् ॥
वाञ्छितं फलमाप्नोति स लोके नात्र संशयः ।
इति ब्रह्मा स्वयं प्राह सरस्वत्याः स्तवं शुभम् ॥”
इति तन्त्रसारः ॥

वाञ्छिनी, स्त्री, (वाञ्छतीति । वाञ्छ + णिनिः । ङीप् ।) वाञ्छनीया नारी । तत्पर्य्यायः । लञ्जिका २ कलतूलिका ३ । इति त्रिकाण्ड-शेषः ॥ वाञ्छनीयमात्रे, त्रि ॥

वाटं, क्ली, वरण्डः । गात्रभेदः । इत्यमरटीका ॥ यथा,—
“वाटः पथि वृतौ वाटं वरण्डे गात्रभेदयोः ।”
इति हेमः ॥

वाटः, पुं, (वट्यते वेष्ट्यते इति । वट + घञ् ।) मार्गः । वृतिस्थानम् । इति मेदिनी । टे, २८ ॥ अपि च ।
“सुखं निःसरणे वाटे प्राचीनावेष्टकौ वृतिः ॥”
इति हेमचन्द्रः ।
(वास्तु । मण्डपः । यथा, भागवते । ८।१८।२१ ।
“छत्रं सदण्डं सजलं कमण्डलुं
विवेश विभ्रद्धयमेधवाटम् ॥”
वटस्येदमिति । वट + अण् । वटसम्बन्धिनि, त्रि । यथा, मनुः । २ । ४५ ।
“ब्राह्मणो वैल्वपालाशौ क्षत्त्रियो वाटखा-
दिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मतः ॥”)

वाटशृङ्खला, स्त्री, (वाटरोधिका शृङ्खला । शाकपार्थिवादिवत् मध्यपदलोपः ।) पथरोधक-शृङ्खला । तत्पर्य्यायः । लम्भा २ । इति हारावली ॥

वाटिका, स्त्री, (वट्यते वेष्ट्यते प्राचीरादिभि-रिति । वट वेष्टने + संज्ञायामिति ण्वुल् । टाप् । अत इत्वम् ।) वास्तु । (यथा, कथासरित्-सागरे । ७२ । २०६ ।
“सा स्नानाय गते तस्मिन् शाकार्थं शाकवाटि-
काम् ।
प्रविष्टा धावकखरं खादन्तं शाकमैक्षत ॥”)
वाच्चालकः । इति शब्दरत्नावली ॥ हिङ्गुपत्री । इति शब्दचन्द्रिका ॥

वाटी, स्त्री, (वट्यते वेष्ट्यते इति । वट वेष्टने + घञ् । गौरादित्वात् ङीष् ।) वाच्चालकः । इति शब्दरत्नावली ॥ कुटी । वास्तु । इति मेदिनी । टे, २८ ॥ शेषस्य पर्य्यायः ।
“वास्तुस्त्री वेश्म भूर्व्वाटी वाटिका गृहपोतकः ॥”
इति शब्दरत्नावली ॥
तस्या लक्षणादिर्यथा,—
विश्वकर्म्मोवाच ।
“के ते वृक्षाः प्रशस्ताश्च निषिद्धाश्चापि केचन ।
भद्रा भद्रप्रदाश्चापि तान् वदस्व जगद्‌गुरो ॥
केषामन्तनियुक्तश्च शिविरञ्च शुभाशुभम् ।
दिशि कुत्र फलं भद्रमशुभञ्च वद प्रभो ॥
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ।
भद्रप्रदश्च को वृक्षो दिशि कुत्र प्रवर्त्तते ॥
किं प्रमाणं गृहाणाञ्च प्राङ्गणानां जगद्‌गुरो ।
मङ्गलं कुसुमोद्यानं दिशि कुत्र तरोस्तथा ॥
प्राकारं किंप्रमाणञ्च परिखाणां सुरेश्वर ।
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ॥
कस्य कस्य तरोः काष्ठं प्रशस्तं शिविरे प्रभो ।
अमङ्गलं वा केषां वा सर्व्वं मां वक्तुमर्हसि ॥*॥
श्रीभगवानुवाच ।
आश्रमे नारिकेलश्च गृहिणाञ्च धनप्रदः ।

शिविरस्य यदीशाने पूर्व्वे पुत्त्रप्रदस्तथा ।
सर्व्वत्र मङ्गलार्हश्च नवराजो मनोहरः ।
रसालवृक्षः पूर्व्वस्मिन् नृणां सम्पत्प्रदस्तथा ॥
शुभप्रदश्च सर्व्वत्र सुरकान्ते ! निशामय ।
बिल्वश्च पनसश्चैव जम्बीरो बदरी तथा ॥
प्रजाप्रदश्च पूर्व्वस्मिन् दक्षिणे धनदस्तथा ।
सम्पत्प्रदश्च सर्व्वत्र यतो हि वर्द्धते गृही ॥
जम्बुवृक्षश्च दाड़िम्बः कदल्याम्रातकस्तथा ।
बन्धुप्रदश्च पूर्व्वस्मिन् दक्षिणे मित्रदस्तथा ॥
सर्व्वत्र शुभदश्चैव धनपुत्त्रशुभप्रदः ।
हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा ॥
ईशाने सुखदश्चैव सर्व्वत्रैवं निशामय ।
सर्व्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा ॥
अलावुश्चापि कुष्माण्डं मायाम्बुश्च सुकासुकः ।
खर्ज्जूरी कर्क्कटी चापि शिविरे मङ्गलप्रदाः ॥
वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदाः ।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥
प्रशस्तं कथितं कान्ते निषिद्धञ्च निशामय ॥
वन्यवृक्षो निषिद्धश्च शिविरे नगरेऽपि च ।
वटो निषिद्धः शिविरे नित्यं चौरभयं ततः ।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा ॥
हे कान्ते तिन्तिड़ीवृक्षो यत्नात्तं परिवर्ज्जय ॥
शरेण धनहानिः स्यात् प्रजाहानिर्भवेत् ध्रुवम् ।
शिविरेऽतिनिषिद्धश्च नगरे किञ्चिदेव च ॥
न निषिद्धः प्रसिद्धश्च नगरेषु तथा पुरे ।
वाट्यामतिनिषिद्धश्च प्राशस्त्यं परिवर्ज्जयेत् ॥
खर्ज्जूरश्च उडुश्चैव निषिद्धः शिविरे तथा ।
न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च ॥
वृक्षश्च चणकादीनां धान्यश्च मङ्गलप्रदम् ॥
ग्रामेषु नगरे चापि शिविरे च तथैव च ॥
इक्षुवृक्षश्च शुभदः सन्ततं शुभदस्तथा ।
अशोकश्च शिरीषश्च कदम्बश्च शुभप्रदः ॥
कचूो हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा ।
हरीतकी च शुभदा ग्रामेषु नगरेषु च ।
न वाट्यां भद्रदा नित्यं तथा चामलकी ध्रुवम् ॥
गजानामस्थि शुभदमश्वानाञ्च तथैव च ।
कल्याणसुचेःश्ववषां वास्तौ स्थापनकारिणाम् ॥
न शुभप्रदमन्येषामुच्छन्नकारणं परम् ।
वानराणां नराणाञ्च गर्द्दभानां गवामपि ॥
कुक्कुराणां शृगालानां मार्ज्जाराणामभद्रकम् ।
भेकानां शूकराणां सर्व्वेषाञ्चाशुभप्रदम् ॥
ईशाने चापि पूर्व्वस्मिन् पश्चिमे च तथोत्तरे ।
शिविरस्य जलं भद्रमन्यत्राशुभमेव च ॥
दीर्घे प्रस्थे समानञ्च न कुर्य्यान्मन्दिरं बुधः ।
चतुरस्रे गृहे कान्ते गृहिणां धननाशनम् ॥
दीर्घप्रस्थः परिमितो नैवाङ्केनापि संस्कृतम् ।
शून्येन रहितं भद्रं शून्यं शून्यप्रदं नृणाम् ॥
प्रस्थे हस्तद्वयात् पूर्व्वं दीर्घे हस्तत्रयं तथा ।
दक्षिणां शुभदं द्वारं प्राकारस्य गृहस्य च ॥
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम् ।
चतुरस्रं चक्रवेधं शिविरं मङ्गलप्रदम् ।
अभद्रदं सर्व्ववेधं शिविरं मङ्गलाप्रदम् ।
अभद्रदं सूर्य्यवेधं प्राशाङ्गनं तथैव च ॥ * ॥
शिविराभ्यन्तरे भद्रा स्थापिता तुलसी नृणाम् ।
धनपुत्त्रप्रदात्री च पुण्यदा हरिभक्तिदा ।
प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत् ॥
मालती यूथिका कुन्दमाधवी केतकी तथा ।
नागेश्वरं मल्लिका च काञ्चनं वकुलं शुभम् ॥
अपराजिता च शुभदा तेषामुद्यानमीप्सितम् ।
पूर्व्वे च दक्षिणे चैव शुभदं नात्र संशयः ॥
ऊर्द्ध्वं षोड़शहस्तेभ्यो नैवं कुर्य्याद्गृहं गृही ।
ऊर्द्ध्वं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् ॥ * ॥
सूत्रधारं तैलकारं स्वर्णकारञ्च हीरकम् ।
वाटीमूले ग्राममध्ये न कुर्य्यात् स्थापनं बुधः ॥
ब्राह्मणं क्षत्त्रियं वैश्यं सच्छूद्रं गणकं शुभम् ।
भट्टं वैद्यं पुष्पकारं स्थापयेत् शिविरान्तिके ॥ * ॥
प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम् ।
परितः शिविराणाञ्च गम्भीरं दशहस्तकम् ॥
सङ्केतपूर्व्वकञ्चैव परिखाद्वारमीप्सितम् ।
शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च ॥ * ॥
शाल्मलीनां तिन्तिड़ीनां हिन्तालानां
तथैव च ।
निम्बानां सिन्धुवाराणां उडुम्बराणामभद्रकम् ॥
धुस्तूराणां वटानाञ्चाप्येरण्डानामवाञ्छितम् ।
एतेषामतिरिक्तानां शिविरे काष्ठमीप्सितम् ॥
वृक्षञ्च वज्रहतकं दूरतो वर्ज्जयेद्बुधः ।
पुत्त्रदारधनं हन्यात् इत्याह कमलोद्भवः ।
कथितं लोकशिक्षार्थं कुरु कान्ते विना पुरीम् ।
शुभक्षणं चाप्यधुना गच्छ वत्स यथासुखम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अः ॥

वाटीदीर्घः, पुं, (वाट्यां वास्तुभूमौ दीर्घः सर्व्वोच्चत्वात् ।) इक्कटवृक्षः । इति रत्नमाला ॥

वाट्टकं, क्ली, भृष्टयवः । इति शब्दचन्द्रिका ॥

वाट्यपुष्पी, स्त्री, (वाट्यं वाट्यां साधु वेष्टनीयं वा पुष्पं यस्याः । गौरादित्वात् ङीष् ।) वाट्यालकः । इति रत्नमाला ॥

वाट्या, स्त्री, (वट्यते वेष्ट्यते इति । वट वेष्टने+ण्यत् । यद्वा, वाट्यां वास्तुप्रदेशे हिता । वाटी+यत् ।) वाट्यालकः । इति रत्नमाला ॥

वाट्यालः, पुं, (वाटीं अलति भूषयतीति । अल+अच् ।) वाट्यालकः । इति शब्दरत्नावली ॥ (गुणादयोऽस्य वाट्यालकशब्दे ज्ञातव्याः ॥)

वाट्यालकः, पुं, (वाट्याल एव । स्वार्थे कन् । वाटीं अलति भूषयतीति । अल+ण्वुल् वा ।) क्षुपविशेषः । वाड़ियाला इति भाषा । तत्पर्य्यायः । शीतपाकी २ वाट्या ३ भद्रौदनी ४ बला ५ घाटी ६ विनया ७ वाट्याली ८ वाटिका ९ । इति शब्दरत्नावली ॥ अस्य पर्य्यायान्तरं गुणाश्च बलाशब्दे द्रष्टव्याः ॥

वाट्याली, स्त्री, (वाटीमलति भूषयतीति । अल+अच् । गौरादित्वात् ङीष् ।) वाट्यालकः । इति शब्दरत्नावली ॥

वाड, ऋ ङ आप्लावे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अववाड़त् । ङ, वाड़ते लोकः । आप्लावः स्नानम् । उन्मज्जनम् । इत्येके । इति दुर्गादासः ॥

वाड़ः, पुं, (धातूनामनेकार्थत्वात् वाड़ वेष्टने+भावे घञ् ।) वेष्टनम् । इति शब्दमाला ॥

वा(वा)णिः, स्त्री, (वण+णिच्+“सर्व्वधातुभ्य इन् ।” उणा० ४ । ११७ । इति इन् ।) वपनम् । तत्पर्य्यायः । व्यूतिः २ । इत्यमरः । २ । १० । २८ ॥ व्युतिः ३ । इति तट्टीकायां भरतः ॥ (करणे इन् ।) वापदण्डः । इति हेमचन्द्रः । ३ । ५७७ ॥

वा(वा)णिनी, स्त्री, (वण शब्दे+णिनिः । ङीप् ।) नर्त्तकी । छेकः । मत्तस्त्री । इति हेमचन्द्रः ॥ (यथा, रघुः । ६ । ७५ ।

“यस्मिन् महीं शासति वाणिनीनां
निद्रां विहारार्द्धपथे गतानाम् ।
वातोऽपि नास्रंसयदंशुकानि
को लम्बयेदाहरणाय हस्तम् ॥” * ॥

षोड़शाक्षरच्छन्दोविशेषः । तल्लक्षणं यथा,—
“नजभजरैर्यदा भवति वाणिनी गयुक्तैः ॥”)

वा(वा)णी, स्त्री, (वाणि+वा ङीष् ।) सरस्वती । इत्यमरः । १ । ६ । १ ॥ वचनम् । (यथा, मार्कण्डेये । ४१ । ४ ।
“चक्षुःपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद्वाणीं बुद्धिपूतञ्च चिन्तयेत् ॥”)
वयनम् । इति शब्दरत्नावली ॥

वात, त् क गतिसेवयोः । सुखे । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) अववातत् । द्वयोरर्थाः । रमानाथस्तु गतिसुखसेवयोरिति मत्वा गतौ सुखं गतिसुखम् । वातयति पान्थं वातः गच्छन्तं सुखयतीत्यर्थः । इत्याह । सुखसेवनयोरिति कौमाराः । इति दुर्गादासः ॥

वातः, पुं, (वातीति । वा+क्तः ।) पञ्चभूतान्तर्गतचतुर्थभूतः । वातास इति भाषा । तत्पर्य्यायः । गन्धवहः २ वायुः ३ पवमानः ४ महाबलः ५ पवनः ६ स्पर्शनः ७ गन्धवाहः ८ मरुत् ९ आशुगः १० श्वसनः ११ मातरिश्वा १२ नभस्वान् १३ मारुतः १४ अनिलः १५ समीरणः १६ जगत्प्राणः १७ समीरः १८ सदागतिः १९ जीवनः २० पृषदश्वः २१ तरस्वी २२ प्रभञ्जनः २३ प्रधावनः २४ अनवस्थानः २५ धूननः २६ मोटनः २७ खगः २८ । अस्य गुणाः ॥ खरत्वम् । लघुत्वम् । शीतलत्वम् । रूक्षत्वम् ॥ सूक्ष्मत्वम् । संधानकत्वम् । क्षोभकारित्वञ्च ॥ तस्य कोपकारणं यथा । माधुर्य्यान्नभक्षणम् ॥ साभ्रकालः । अपराह्णकालः । प्रत्यूषकालः । अन्नजीर्णसमयश्च । इति राजनिर्घण्टः ॥ * ॥ रोगविशेषः । यथा । अथ वातव्याध्यधिकारः । तत्र वातव्याधीनां सामान्यतो विप्रकृष्टनिदानमाह ।
“कषायकटुतिक्तकप्रमितरूक्षलध्वशनतः
पुरःपवनजागरप्रतरणाभिघातश्रमैः ।

हिमादनशनात्तथा निधुवनाच्च धातुक्षयात्
मलादिरपधारणात् मदनशोकचिन्ताभयैः ।
अतिचलनमोचनात् गदकृतातिमांसक्षया-
दतीव वमनात्स्रुतामतिविरेचनादामतः ।
पयोदसमये दिनक्षपदयोस्तृतीयांशयो-
र्जरामतिगतेऽपि शिशिरसंज्ञकालेऽपि च ।
देहे स्रोतांसि रिक्तानि पूरयित्वानिलो बली ।
करोति विविधान् रोगान् सर्व्वाङ्गैकाङ्गसंश्रयान् ।”

प्रमितश्चात्र वैपरीत्ये प्रोपसर्गस्तेन अपरिमितमित्यर्थः । प्रकर्षेण मितमत्यल्पं वा अन्नमतिपुराणं शाल्यादि । कतिचिदन्नानि नवान्यपि वातलानि । यत आह । गुणरत्नमालायाम् ।

नीवारस्त्रिपुटः सतीनचणकश्यामाकमुद्गाढकी-
निष्पावाश्च मकुष्टकश्च वरटा मङ्गल्यकः
कोद्रवः ।

एते वातकरा इति शेषः । नीवारः प्रसाधिका सीनी इति लोके । त्रिपुटः खेसारी । सतीनः कलायः । निष्पावो राजमाषः । बोड़ा इति लोके । मकुष्टकः मोड़ः इति लोके । वरटा वरटिका बरे इति लोके । मङ्गल्यकः मसूरी इति लोके । पुरःपवनः प्राग्वातः । आमतः आमेन मार्गावरणात् । यत उक्तम् ।

वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति ।

पयोदसमये वर्षासु । जरामतिगतेऽपि भुक्तेऽतीव जीर्णताङ्गते । देहे स्रोतांसीत्यादिना संप्राप्तिरुक्ता । कषायादिभिर्हेतुभिर्व्वर्षादौ समये हेतुभूते बली अनिलः प्रवृद्धो वायुः करोति विविधान् रोगान् । ते रोगाः कथ्यन्ते ।

“शिरोग्रहोऽल्पकेशत्वं जम्भाव्यं हनुग्रहः ।
जिह्वास्तम्भो गद्गदत्वं मिम्मिनत्वञ्च मूकता ।
वाचालता प्रलापश्च रसानामनभिज्ञता ।
बाधिर्य्यं कर्णनादश्च स्पर्शाज्ञत्वं तथार्द्दितम् ।
मन्यास्तम्भोऽत्र गणितो बाहुशोषोपबाहुकः ।
चर्व्विता चैव विश्वाची ऊर्द्ध्ववात उदीरितः ।
आध्मानञ्च प्रत्याध्मानं वाताष्ठीला प्रत्यष्ठीला ।
तूणी च प्रतितूणी च वह्निवैषम्यमेव च ।
आटोपः पार्श्वशूलञ्च त्रिकशूलं तथैव च ।
मुहुश्च मूत्रलं मूत्रनिग्रहो मलगाढ़ता ।
पुरीषस्याप्रवृत्तिश्च गृध्रसी च ततः परः ।
कलापखञ्जता चापि खञ्जता पङ्गुता तथा ।
क्रोष्टुशीर्षककल्लौ च वातकण्टक एव च ।
पादहर्षः पाददाहः आक्षेपो दण्डकाभिधः ।
वातपित्तकृताक्षेपस्तथा दण्डापतानकः ।
अभिघातकृताक्षेप आयामो द्विविधः स्मृतः ।
आन्तरश्च तथा बाह्यो धनुर्वातश्च कुब्जकः ।
अपतन्त्रोपतानश्च पक्षाघातोऽखिलाङ्गकः ।
कम्पः स्तम्भो व्यथा तोदो भेदश्च स्फुरणं तथा ।
रौक्ष्यं कार्श्यञ्च कार्ष्ण्यञ्च शैत्यं लोम्नाञ्च हर्षणम् ।
अङ्गमर्दोऽङ्गविभ्रंशः शिरासङ्कोच एव च ।
अङ्गशोषश्च भीरुत्वं मोहश्चञ्चलचित्तता ।
निद्रानाशः स्वेदनाशो बलहानिस्तथैव च ।
शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः ।
एत एवाशीतिसंख्या रोगा योगेन रूढ़िताः ।
वातव्याधीति नामानो मुनिभिः परिकीर्त्तिताः ।”

एत एव शिरोग्रहादय एव । योगेन वातेन । वाताद्वा व्याधिर्व्वातव्याधिरिति निरुक्त्या तदा वातज्वरादिष्वपि प्रसङ्गः स्यादत आह रूढ़िनः प्रसिद्धितः । शिरोग्रहादयोऽशीतिरेव वातव्याधिसंज्ञा प्रसिद्धा न तु वातज्वरादयः ॥ * ॥
अथ वातव्याधीनां सामान्यचिकित्सामाह ।

“मधुरलवणसाम्लस्निग्धनस्योष्णनिद्रा
गुरुरविकरवस्तिस्वेदसन्तर्पणानि ।
दहनजलदसेकाभ्यङ्गसंमर्द्दनानि
प्रकुपितपवमानं शान्तमेतानि कुर्युः ॥”

इति भावप्रकाशः ॥ * ॥

अपि च ।

“बलपुष्टिकराण्येव वायुबीजं निशामय ।
भोजनानन्तरं सद्यो गमनं धावनं तथा ।
छेदनं वह्नितापश्च शश्वद्भ्रमणमैथुनम् ।
वृद्धस्त्रीगमनञ्चैव मनःसन्ताप एव च ।
अतिरूक्षमनाहारं युद्धं कलह एव च ।
कटुवाक्यं भयं शोकः केवलं वायुकारणम् ।
आशाख्यचक्रे तज्जन्म निशामय तदौषधम् ।
पक्वरम्भाफलञ्चैव सवीजं शर्करोदकम् ।
नारिकेलोदकञ्चैव सद्यस्तक्रं सुमिष्टकम् ।
माहिषन्दधि मिष्टञ्च केवलं वा सशर्करम् ।
सद्यःपर्युषितान्नञ्च सौवीरं शीतलोदकम् ।
पक्वतैलविशेषञ्च तिलतैलञ्च केवलम् ।
लाङ्गलीतालखर्ज्जूरमस्तमामलकोद्भवम् ।
शीतलोष्णोदकस्नानं सुस्निग्धचन्दनद्रवम् ।
स्निग्धपद्मपत्रतल्पं सुस्निग्धव्यजनानिलम् ।
एतत्ते कथितं वत्से सद्यो वातप्रणाशनम् ।
वायवस्त्रिविधाः पुंसां क्लेशसन्तापकामजाः ।”

इति श्रीब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥ * ॥

अन्यच्च ।

“बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकम् ।
प्रसारण्यश्वगन्धा च बृहती कण्टकारिका ।
बला चातिबला रास्ना श्वदंष्ट्रा च पुनर्नवा ।
एरण्डशारिवा पर्णीगुडूचीकपिकच्छुकः ।
एषां दशपलिकान् भागान् क्वाथयेत् सलिलेऽमले ।
तेन पादावशेषेण तिलं पात्रे विपाचयेत् ।
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् । * ।
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि तच्छृणु ।
शतपुष्पा देवदारु शालपर्णी वचागुरुः ।
कुष्ठमांसी सैन्धवञ्च पलमेकं पुनर्नवा ।
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ।
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ।
अपस्मारं वातरक्तमायुष्मांश्च पुमान् भवेत् ।
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी शिव ।
अन्त्राणां वातभग्नानां कुञ्जराणां नृणां तथा ।
तैलमेतत् प्रदातव्यं सर्व्ववातविकारिणाम् ।”

पुनश्च ।

“पलद्वयं सैन्धवस्य शुण्ठी चित्रकपञ्चकम् ।
पञ्चप्रस्थं त्वारनालं तैलप्रस्थं पचेत्ततः ।
गृध्रस्यूरुग्रहप्लीहसर्व्ववातविकारनुत् ।”

इति गारुडे १६८ अध्यायः ।

(तथास्य गुणादयः ।

“वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरुषविशदास्तस्य रौक्ष्याद्वातला रूक्षा पचिताल्पशरीराः प्रततरूक्षक्षामभिन्नसक्तजर्ज्जरस्वराः जागरूकाश्च लघुत्वाच्च लघुचपलगतिचेष्टाहारव्यवहाराः चलत्वादनवस्थितसन्ध्यक्षिभ्रूहन्वोष्ठजिह्वाशिरःस्कन्धपाणिपादाः बहुत्वाद्बहुप्रलापकण्डरासिराप्रतानाः शीघ्रत्वात् शीघ्रसमारम्भक्षोभविकाराः शीघ्रोत्त्रासरागविरागाः श्रुतग्राहिणोऽल्पस्मृतयश्च शैत्यात् शीतासहिष्णवः प्रततशीतकोद्वेपकस्तम्भाः पारुष्यात् परुषकेशश्मश्रुरोमनखदशनवदनपाणिपादाङ्गाः वैशद्यात् स्फुटिताङ्गावयवाः सततसन्धिशब्दगामिनः त एवं गुणयोगात् वातलाः प्रायेणाल्पबलाश्चाल्पायुषश्चाल्पापत्याश्चाल्पसाधनाश्चाधन्याश्च ।”

इति चरके विमानस्थानेऽष्टमेऽध्याये । अथास्य वृद्धिक्षयलक्षणं यथा ।

“तत्र वातवृद्धौ त्वक् पारुष्यं कार्श्यं कार्ष्ण्यं गात्रस्फुरणमुष्णकामिता निद्रानाशोऽल्पबलत्वं गाढ़वर्च्चस्त्वञ्च ।”

“तत्र वातक्षये मन्दचेष्टताल्पवाक्त्वमप्रहर्षो मूढ़संज्ञा च ।” इति सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये । * । स्थानविशेषेऽवस्थितस्यास्य चिकित्सा यथा,—

“विशेषतस्तु कोष्ठस्थे वाते क्षारं पिबेन्नरः ।
आमाशयस्थे शुद्धस्य यथा दोषहरी क्रिया ।
आमाशयगते वाते छर्द्दिताय यथाक्रमम् ।
देयः षड़्धरणो योगः सप्तरात्रं सुखाम्बुना ।”
“पक्वाशयगते वाते हितं स्नेहविरेचनम् ।
वस्तयः शोधनीयाश्च प्राशाश्च लवणोत्तराः ।”

स्नेहलवणम् ।

“स्नुहीलवणवार्त्ताकुस्नेहान् छन्ने घटे दहेत् ।
गोमयैः स्नेहलवणं तत्परं वातनाशनम् ।
कार्य्यो वस्तिगते चापि विधिर्वस्तिविशोधनः ।
त्वङ्मांसासृक्शिरा प्राप्ते कुर्य्याच्चासृग्विमोक्षणम् ।
स्नेहोपनाहाग्निकर्म्मबन्धनोन्मर्द्दनानि च ।
स्नायुसन्ध्यस्थि संप्राप्ते कुर्य्याद्वाते विचक्षणः ।
स्वेदाभ्यङ्गावगाहांश्च हृद्यञ्चान्नत्वगाश्रिते ।
शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् ।
विरेको मांसमेदःस्थे निरूहाः शमनानि च ।
बाह्याभ्यन्तरतः स्नेहैरस्थिमज्जगतं जयेत् ।
हर्षोऽन्नपानं शुक्रस्थे बलशुक्रकरं हितम् ।

विबद्धमार्गं शुक्रन्तु दृष्ट्वा दद्याद्विरेचनम् ॥
गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम् ।
सितामधुककाश्मर्य्यैर्हितमुत्थापने पयः ॥”
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारः ॥)

वातकः, पुं, (वात इव चञ्चलः । इवार्थे कन् । यद्वा, वातं करोतीति । कृ + अन्येभ्योऽपीति डः ।) अश्मन्तकः? अश्मपर्णी । इत्यमरः । २ । ४ ।१४९ ॥

वातकर्म्म [न्], (वातस्य कर्म्म ।) मरुत्क्रिया । पर्द्दनम् । यथा,—
वराह उवाच ।
“सृज्यमानेन मे भूमे ! वातकर्म्म प्रसुचति ।
एवं हि पुरुषो युक्तो वातपीड़ितमानसः ॥
मक्षिका पञ्च वर्षाणि त्रीणि वर्षाणि मूषकः ।
श्वा चैव त्रीणि वर्षाणि कूर्म्मो वै जायते नव ॥
एतु वै तापनं देवि ! मेहनं मम शंसति ।
यो वै शास्त्रं विजानाति मम कर्म्मपरायणः ॥
श्रुत्वा वाक्यं भगवतो प्रत्युवाच वसुन्धरा ॥
धरण्युवाच ।
अतुलं लभते पापं तव कर्म्मपरायणः ।
तस्य देव सुखार्थाय विशुद्धिं वक्तुमर्हसि ॥
वाराह उवाच ।
श्रृणु तत्त्वेन मे देवि ! कथ्यमानं मयानघे ।
अपराधमिमं कृत्वा सन्तरेद्‌येन कर्म्मणा ॥
यावकेन दिनत्रीणि सक्तेन च पुनस्त्रयः ।
कर्म्म चैवं ततः कृत्वा स च मे नापराध्यति ॥
सर्व्वशङ्कां परित्यज्य मम लोकाय गच्छति ।
एतत्ते कथितं भद्रे मरुत्कर्म्मापराधिनः ॥
दोषश्चैव गुणश्चैव यत्त्वया परिपृच्छितम् ।”
इति वराहपुराणे मरुत्कर्म्मप्रायश्चित्तम् ॥

वातकी, [न्] त्रि, (वातोऽतिशयितोऽस्यास्तीति । वात + “वातातीसाराभ्यां कुक् च ।”५।२।१२९। इति इनिः । कुक् च ।) वातरोगयुक्तः । तत्पर्य्यायः । वातरोगी २ । इत्यमरः ।३।१।५९।

वातकुम्भः, पुं, (वातस्य कुम्भ इव ।) गजकुम्भाधोभागः । इति हेमचन्द्रः । ४ । २९३ ॥

वातकेतुः, पुं, (वातस्य केतुरिव ।) धूलिः । इति त्रिकाण्डशेषः ॥

वातकेलिः, पुं, (वात तु क सुखे + भावे घञ् । वातेन सुखेन केलिर्यत्र ।) कलालापः । षिड्गदन्तक्षतः । इति मेदिनी । ले, १९३ ॥

वातगामी, [न्] पुं, (वातेन वायुना सह गच्छतीति । गम + णिनिः ।) पक्षी । इति केचित् ॥

वातगुल्मः, पुं, वातुलः । यथा,—
“वातुलो वातगुल्मः स्याद्वारवायुर्निदाघजः ।
झञ्झानिलः प्राड्विणो वासन्तो मलयानिलः ॥”
इति त्रिकाण्डशेषः ॥
(वातेन जातो गुल्मः ।) रोगविशेषः । (यथा, मार्कण्डेये । ३९ । ५४ ।
“वातगुल्मप्रशान्त्यर्थंमुदावर्त्ते तथोदरे ।
यवागूं वापि पवनं वायुग्रन्थिं प्रतिक्षिपेत् ॥”
अस्य चिकित्सा यथा,—
“वचायवानीत्रिकटुदशमूलीजलं शृतम् ।
क्वाथश्चोष्णो हितः पाने धान्यनागरकोऽथवा ॥
वातगुल्मेषु सर्व्वेषु ज्वरेषु विषमेषु च ।
रास्नादिपञ्चकं वापि वातगुल्मस्य पाचनम् ।
शठी सौवर्च्चलं शुण्ठी पाचनं वातगुल्मिने ॥”
“नागरं क्रिमिजित् पथ्या त्रिवृता त्रिगुणा-
युतम् ।
चूर्णं गुड़ान्वितं देयं वातगुल्मविरेचनम् ॥
दन्त्याश्च भाग एकस्तु द्वौ भागौ च हरी-
तकी ।
त्रिवृतायास्त्रिभागः स्यात् शुण्ठ्याश्चत्वार
एव च ।
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यगुड़ेन तु ॥
वटकं भक्षयेत् प्रातस्तस्योपरि जलं पिबेत् ।
कथितश्च विवेकश्च वातगुल्मोपशान्तये ॥”
इति वातगुल्मचिकित्सा ॥ इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये ॥) तस्य निदानादिर्गुल्मशब्दे द्रष्टव्यः ॥

वातघ्नी, स्त्री, (वातं हन्तीति । हन + टक् । ङीप् ।) शालपर्णी । अश्वगन्धा । शिम्बड़ीक्षुपः । इति राजनिर्घण्टः ॥

वाततूलं, क्ली, (वातेन उड्डीयमानं तूलम् ।) आकाशोड्डीयमानसूत्रम् । बुड़िर सूता इति भाषा । तत्पर्य्यायः । वृद्धसूत्रकम् २ इन्द्रतूलम् ३ ग्रीष्महासम् ४ वंशकफम् ५ मरुद्ध्वजम् ६ । इति हारावली । २३ ॥

वातध्वजः, पुं, (वातो वायुर्ध्वजो यस्य ।) मेघः । इति शब्दमाला ॥

वातपित्तजशूलं, क्ली, (वातपित्ताभ्यां जायते इति । जन् + डः । तच्च तत् शूलञ्चेति ।) शूलरोगविशेषः । तस्य औषधं यथा,—
“मातुलुङ्गस्य निर्य्यासं गुड़ाज्येन समन्वितम् ।
वातपित्तजशूलानि हन्ति वै पानयोगतः ॥”
इति गारुडे १८८ अध्यायः ॥
(तथास्यान्या चिकित्सा । यथा,—
“दुरालभा पर्पटकश्च विश्वा
पटोलनिम्बाब्दतिक्तिड़ीकम् ।
सशर्करं कल्कमिदं प्रयोज्यं
सपित्तवातोद्भवशूलशान्त्यै ॥”
इति हारीते चिकित्सितस्थानेऽष्टमेऽध्याये ॥)

वातपुत्त्रः, पुं, (वातस्य पुत्त्रः ।) भीमसेनः । हनूमान् । महाधूर्त्तः । इति मेदिनी । रे, ८६ ॥

वातपोथः, पुं, (वातं वातरोगं पुष्यति हिनस्तीति । पुथ + अच् ।) पलाशवृक्षः । इत्यमरः । २ । ४ । २९ ॥ (अस्य पर्य्यायो यथा,—
“वातपोथः पलाशः स्याद्रागप्रस्थश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोऽपरः ॥”
इति वैद्यकरत्नमालायाम् ॥)

वातप्रमीः, पुं, स्त्री, (वातं प्रमिमीते वाताभिमुखं गच्छतीति । वात + प्र + मा माने + “वातप्रमीः ।” उणा० ४ । १ । इति ईप्रत्ययेन साधुः ।) वातमृगः । इत्यमरः । २ । ५ । ७ ॥ वाञ्चोट् हरिण इति भाषा ॥ नकुलः । अश्वः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (वायुवद्वेगगामिनि, त्रि । यथा, ऋग्वेदे । ४ । ५८ । ७ ।
“सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ॥”)

वातफुल्लान्त्रं, क्ली, (वातेन फुल्लं विकशितं यदन्त्रं तत् ।) पुप्फुसः । इति भूरिप्रयोगः ॥

वातमजः, पुं, (वातमभिमुखीकृत्य अजति गच्छतीति । वात + अज + “वातशुनीतिलशर्द्धेष्वजधेट्तुदजहातीनां उपसंख्यानम् ।” ३ । २ । २८ । इत्यस्य वार्त्तिकोक्त्या खश् । “अरुर्द्विषदजन्तस्य मुम् ।” ६ । ३ । ६७ । इति मुम् ।) वातमृगः । इति जटाधरः ॥ (वातगामिनि, त्रि । यथा, भट्टिः । २ । १७ ।
“मेघात्ययोपात्तवनोपशोभं
कदम्बकं वातमजं मृगाणाम् ॥”)

वातमण्डली, स्त्री, (वातस्य मण्डली ।) वात्या । इति त्रिकाण्डशेषः ॥

वातमृगः, पुं, (वाताभिमुखगामी मृगः ।) वातप्रमीः । इत्यमरः । २ । ५ । ७ ॥

वातरक्तं, क्ली, (वातदूषितं रक्तं यत्र ।) रोगविशेषः । तस्य विप्रकृष्टं निदानमाह ।
“लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः ।
क्लिन्नशुष्काम्बुजानूपमांसपिण्याकमूलकैः ॥
कुलत्थमाषनिष्पावशाकादिपलले क्षुभिः ।
दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥
विरुद्धाध्यशनक्रोधदिवास्वप्नातिजागरैः ।
प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम् ।
स्थूलानां सुखिनां चापि प्रकुप्येद्वातशोणितम् ॥
हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्च
विदाह्यन्नं संविदाहाशनस्य ॥”
क्षारो यवक्षारादिः । अजीर्णभोजनैः अजीर्णाय भोजनैः । अतिमात्रभोजनैरित्यर्थः । क्लिन्नादीनि मांसस्य विशेषणानि । क्लिन्नं शटितम् । शुष्कमातपे शोषितम् । अम्बुजं मत्स्यादिमांसम् । आनूपं गौड़ादिपूर्व्वदेशजं मांसम् । पिण्याकं तिलखलिः । मूलकं प्रसिद्धमेव । निष्पावः शोड़ाशाकम् । शाकं पत्रशाकम् । आदिशब्देन टङ्काकादीनि फलशाकानि गृह्यन्ते । पललं शटितत्वादिदोषरहितमपि मांसं वातशोणितं प्रकोपयेत् । शटितादि तु मांसं विशेषतो वातशोणितं प्रकोपयेत् । आरनालं सन्धानभेदः । शुक्तं सन्धानभेदः । सौवीरं सन्धानभेदः । तक्रं चतुर्थांशजलयुक्तं वस्त्रपूतं दधि । सुरा सन्धानभेदः । आसवः सन्धानभेदः । विरुद्धं क्षीरमत्स्यादि । अध्यशनम् ।
अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते ।
अतिजागरो निशि । प्रायशः बाहुल्येन । सुकुमाराणां अल्पतरकायव्यापाराणाम् । अथवा मिथ्याहारविहारिणाम् । अयथाहारविहाराभ्यां स्थूलानां सुखिनाञ्च रक्तदुष्टा । हस्त्यश्वोष्ट्रैर्गच्छतः यतो वायुर्व्विवर्द्धते रुधिरञ्चाधो गच्छति । हस्त्यादय उपलक्षणानि । मद्यश-

मश्नाति चलतः । अन्नतः विदाह्यन्नम् । विदाहि निष्पावकुलत्थसर्षपशाकादि । संविदाह्यन्नस्य । संविदाहेऽन्नं यस्य भुक्ते विदग्धे तदुपरि भुक्तान्नस्येत्यर्थः । अध्यशनमुक्ताप्येतद्वचनं विदग्धाजीर्णभोजनस्य विशेषतो हेतुत्वार्थम् । पश्चात् वातशोणितं प्रकुप्येदित्यनेनान्वयः । एतेषां कारणानां मध्ये केनचिदायुः केनचिदुभयमपि प्रकुप्येत् ॥ * ॥ संप्राप्तिमाह ।

"कृत्स्नं रक्तं विदहत्याशु तच्च
दुष्टं स्रस्तं पादयोश्चीयते तु ।
तत् संपृक्तं वायुना दूषितेन
तत्प्राबल्यादुच्यते वातरक्तम् ॥"

पूर्व्वोक्तैर्हेतुभिः कृत्स्नं समस्तं रक्तं विदहति अत्र दहधातुरविवक्षितकर्म्मकः । तेन विदहति विदग्धं भवतीत्यर्थः । तच्च दुष्टं रक्तम् । स्रस्तं अधोगतम् । पादयोश्चीयते सञ्चितं भवति । तद्रुधिरं दूषितेन स्वहेतुवायुना संपृक्तं मिलितं वातरक्तं उच्यते । ननु चैतस्य संप्राप्तिरुक्ता सुश्रुतेन ।

"शीघ्रं रक्तं दुष्टिमायाति तच्च
वायोर्मार्गं संरुणद्ध्याशु यातः ।
क्रुद्धोऽत्यर्थं मार्गरोधात् स वायु-
रत्युद्रिक्तं दूषयेद्रक्तमाशु ॥"

अत्र प्रथमं रक्तस्य दुष्टिरतो रक्तवातमिति व्यपदेष्टुमुचितं भवत्यत आह । तत्प्राबल्यादिति । तस्य वातस्य दोषत्वेन प्राधान्याद्वातरक्तमिति व्यपदिश्यते ॥ * ॥ पूर्व्वरूपमाह ।

"स्वेदोऽत्यर्थं न वा कार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेऽतिरुक् ।
सन्धिशैथिल्यमालस्यं सदनं पिड़कोद्गमः ॥
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु ।
निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च ॥
कण्डूः सन्धिषु रुक् दाहो भूत्वा नश्यति चासकृत् ।
वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्व्वलक्षणम् ॥"

अथाधिकवातस्य वातरक्तस्य लक्षणमाह ।

"वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम् ।
शोथस्य रौक्ष्यं कृष्णत्वं श्यावताऽवृद्धिहानयः ॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः ॥"

तच्च पादयोः शूलादिकमधिकम् । यत आह सुश्रुतः ।

"स्पर्शोद्विग्नौ तोदभेदप्रशोषौ
स्वापोपेतौ वातरक्तेन पादौ ॥" इति ।

अत्र सुप्तिः स्पर्शाज्ञता ॥ * ॥ अधिकरक्तं वातरक्तमाह ।

"रक्ते शोथोऽतिरुक् तोदस्ताम्रश्चिमिचिमायते ।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः ॥"

अधिकपित्तं तदाह ।

"पित्ते विदाहः संमोहः स्वेदो मूर्च्छा मदस्तृषा ।
स्पर्शासहत्वं रुग्दाहः शोथपाकौ भृशोष्णता ॥"

विदाहश्च पादावेव बोद्धव्यः । यत आह सुश्रुतः ।

पित्ताद्दग्भ्यामुग्रदाहौ भवेता-
मत्यर्थोष्णौ रक्तशोथौ मृदू च ॥

पदाविति शेषः ॥ अधिककफं तदाह ।

कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतताः ।

गुरुतादयः पादयोरेव । यत आह सुश्रुतः ।

कण्डूमन्तौ श्वेतशीतौ सशोथौ
पीनस्तब्धौ श्लेष्मदुष्टे तु रक्ते ॥ * ॥

अतिक्रियमाणवातरक्तस्य उपद्रवानाह ।

"अस्वप्नारोचकश्वासमांसकोथशिरोग्रहाः ।
मूर्च्छा च मन्दरुक् तृष्णा ज्वरमोहप्रकोपकाः ॥
हिक्कापाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः ।
अङ्गुलीवक्रतास्फोटदाहमर्म्मग्रहार्व्वुदाः ॥"

मांसकोथो मांसगलनम् ॥ * ॥ असाध्यत्वादिकमाह ।

"एतैरुपद्रवैर्व्वर्ज्यं मोहेनैकेन वापि यत् ।
अकृत्स्नोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम् ॥
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजमसाध्यं स्याद्यस्य च स्युरुपद्रवाः ॥"

अथ वातरक्तस्य चिकित्सामाह ।

"वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् ।
अल्पाल्पं रक्षयेद्वायुं यथादोषं यथाबलम् ॥
उपाङ्गदाहतोदेषु जलौकोभिर्विनिर्हरेत् ।
शृङ्गतुम्बैश्चिमिचिमाकण्डूरुग्वेदनान्वितम् ॥
प्रच्छिन्नेन शिराभिर्व्वा देशाद्देशान्तरं व्रजेत् ।
अङ्गे ग्लाने न तत् स्राव्यं रूक्षे वातोत्तरे च यत् ।
गम्भीरं श्वयथुं स्तम्भं कम्पं ग्लानिं शिरामयात् ।
रोगानन्यांश्च वातोत्थान् कुर्य्याद्वायुररक्षितः ॥
विविधान् वातरोगान् वा मृत्युं वाप्यवशोषितम् ।
रक्तं कुर्य्यात्ततः स्निग्धात्तत्प्रमाणेन निर्हरेत् ॥
विरेचयेत्तु पित्ताढ्ये स्नेहयुक्तैर्विरेचनैः ।
बाह्यमालेपनाभ्यङ्गपरिषेकोपनाहनैः ।
विरेकास्थापना स्नेहपानैर्गम्भीरमाचरेत् ॥
दिवास्वप्नञ्च कोपञ्च व्यायामं मैथुनं तथा ।
कट्वुष्णं गुर्व्वभिष्यन्दि लवणाम्लौ च वर्ज्जयेत् ॥
पुराणा यवगोधूमशालयः षष्टिकास्तथा ।
भोजनार्थे रसार्थे तु विष्किराः प्रतुदा हिताः ॥
आढ़क्यश्चणका मुद्गा मसूराः सकुलत्थकाः ।
यूषार्थे बहुसर्पिष्काः प्रशस्ता वातशोणिते ॥
सुनिषण्णकवेत्राग्रं काकमाची शतावरी ।
वास्तूकोपोदिकाशाकं शाकं सौवर्च्चलं तथा ॥
घृतमांसरसैर्भृष्टं शाकमेतच्च दापयेत् ।
हितो गोधूमचूर्णैश्च छागक्षीरघृतप्लुतैः ॥
लेपस्तद्वत्तिला भृष्टाः पिष्टाः पयसि निर्व्वृताः ॥
क्षीरपिष्टातसीभिर्व्वा वर्द्धमानफलैरपि ।
दुग्धपिष्टैः प्रलेपैः स्याद्धितः पवनशोणिते ॥
गुड़ूचीक्वाथकल्काभ्यां सपयस्कं पक्वं घृतम् ।
वातरक्तं निहन्त्याशु कुष्ठं हरति दुस्तरम् ॥"

गुड़ूचीघृतम् ॥ * ॥

"तुलां पचेद्गुड़ूच्यास्तु जलद्रोणचतुष्टये ।
पादशेषः कषायस्तु गोदुग्धं द्रोणकस्तथा ॥
तिलतैलाढ़कं ताभ्यां पचेन्मृद्वग्निना भिषक् ।
वक्ष्यमाणैस्ततो द्रव्यैः सम्यक्कल्कीकृतैः पचेत् ॥
मञ्जिष्ठा मधुकं कुष्ठं जीवनीयगणस्तथा ।
एलागुरु च मृद्वीका मांसी व्याघ्रनखो नखी ॥
हरेणुः श्रावणी योषं स्थिरा त्वामलकी तथा ।
शृङ्गी श्यामा शताह्वा च विष्णुक्रान्ता च पत्रकम् ॥
नागकेशरवालत्वक्पद्मकोत्पलचन्दनम् ।
एतानि कल्कवस्तूनि कथितानीह कोविदैः ॥
पानेऽभ्यङ्गेऽनुवासे च तैलमेतन्निषेवितम् ।
वातरक्तं तदुद्भूतोपद्रवानाशु नाशयेत् ॥
धन्यं पुंसवनं स्त्रीणां गर्भदं वातपित्तनुत् ।
स्वेदकण्डूरुजायामशिरःकम्पादिकामयान् ।
हन्यात्प्रबलतान् दोषान् गुड़ूचीतैलमुत्तमम् ॥"

इति गुड़ूचीतैलम् । इति भावप्रकाशः ॥

(यथा च ।

"हुताग्निहोत्रमासीनमृषिमध्ये पुनर्व्वसुम् ।
पृष्टवान् गुरुमेकाग्रमग्निवेशोऽग्निवर्च्चसम् ॥
अग्निमारुततुल्यस्य संसर्गस्यानिलासृजोः ।
हेतुलक्षणभैषज्यान्यथास्मै गुरुरब्रवीत् ॥"

"अभिघातादशुद्ध्या च प्रदुष्टे शोणिते नृणाम् ।
कषायकटुतिक्ताल्परूक्षाहारादभोजनात् ॥
हयोष्ट्रयानयानाम्बुक्रीड़ाप्लवनलङ्घनात् ।
उष्णे चात्यध्वगमनाद्व्यवायाद्वेगनिग्रहात् ॥
वायुर्विवृद्धो वृद्धेन रक्तेनावारितः पथि ।
क्रुद्धस्तद्दूषयेद्रक्तं तज्ज्ञेयं वातशोणितम् ॥
खुड़ं वातबलासाख्यमाढ्यवातञ्च नामभिः ।
तस्य स्थानं करौ पादावङ्गुल्यः सर्व्वसन्धयः ॥
कृत्वादौ हस्तपादे तु मूलं देहे विधावति ।
सौक्ष्म्यात् सर्व्वसरत्वाच्च देहं गच्छन् शिरायनैः ।
पर्व्वस्वभिहतं क्षुब्धं वक्रत्वादभितिष्ठते ।
स्थितं पित्तादिसंसृष्टं तास्ताः सृजति वेदनाः ॥
करोति दुःखं तेष्वेव तस्मात् प्रायेण सन्धिषु ॥"

"उत्तानमथ गम्भीरं द्विविधन्तत् प्रचक्षते ।
त्वङ्मांसाश्रयमुत्तानं गम्भीरन्त्वन्तराश्रयम् ॥
कण्डूदाहरुगायामतोदस्फुरणकुञ्चनैः ।
अन्विता श्यावरक्ता त्वग्बाह्ये ताम्रा तथेष्यते ॥
गम्भीरे श्वयथुः स्तब्धः कठिनोऽन्तर्भृशार्त्तिमान् ।
श्यावस्ताम्रोऽथवा दाहतोदस्फुरणपाकवान् ॥
रुग्विदाहान्वितोऽभीक्ष्णं वायुः सन्ध्यस्थिमज्जसु ।
छिन्दन्निव चरत्यन्तर्वक्रीकुर्व्वंश्च वेगवान् ॥
करोति खञ्जं पङ्गुं वा शरीरे सर्व्वतश्चरन् ।
सर्व्वैर्लिङ्गैश्च विज्ञेयं वातासृगुभयाश्रयम् ॥"

"रक्तमार्गं निहन्त्याशु शाखासन्धिषु मारुतः ।
निविश्यान्योन्यमावार्य्य वेदनाभिर्हरेदसून् ॥
तत्र मुञ्चेदसृक्शृङ्गजलौकःसूच्यलाबुभिः ।
प्रच्छनैर्व्वा शिराभिर्वा यथादोषं यथाबलम् ॥
रुग्दाहभेदतोदार्त्तादसृक्स्राव्यं जलौकसा ।
शृङ्गैस्तुम्बैर्हरेत् सुप्तिकण्डूचिमिचिमायनात् ॥
देशाद्देशं व्रजेत् स्राव्यं शिराभिः प्रच्छनेन वा ॥"

"सर्पिस्तैलवसामज्जापानाभ्यञ्जनवस्तिभिः ।

सुखोष्णैरुपनाहैश्च वातोत्तरमुपाचरेत् ॥
विरेचनघृतक्षीरपानैः सेकैः सवस्तिभिः ।
शीतैर्निर्वापनैश्चापि रक्तपित्तोत्तरं जयेत् ॥
वमनं मृदुनात्यर्थं स्नेहसेकादिलङ्घनम् ।
कोष्णालेपाश्च शस्यन्ते वातरक्ते कफोत्तरे ॥
कफवातोत्तरे शीतैः प्रलिप्ते वातशोणिते ।
विदाहः शोथरुक्कण्डूविवृद्धिः स्तम्भनाद्भवेत् ॥
पित्तरक्तोत्तरे दाहः क्लेदोऽवदरणं भवेत् ।
उष्णैस्तस्माद्विपग्दोषबलं बुद्ध्वाचरेत् क्रियाम् ॥"
"दत्त्वापरूषकद्राक्षाकाश्मर्य्येक्षुरसान् समान् ।
पृथग्विदार्य्याश्च रसं तथा क्षीरचतुर्गुणम् ॥
एतत् प्रायोगिकं सर्पिः पारूषकमिति स्मृतम् ।
वातरक्ते क्षते क्षीणे वीसर्पे पैत्तिके ज्वरे ॥"
इति पारूषकं घृतम् ॥*॥
"मधुपर्ण्याः पलं पिष्ट्वा तैलप्रस्थं चतुर्गुणे ।
क्षीरे साध्यं शतकृत्वस्तदेवं मधुकात् शते ॥
सिद्धं देयं त्रिदोषे स्यात् वातासृग्श्वासकासनुत् ।
हृत्पाण्डुरोगवीसर्पकामलादाहनाशनम् ॥
बलाकषायकल्काभ्यां तैलं क्षीरसमन्तथा ।
सहस्रशतपाकं वा वातासृग्वातरोगनुत् ॥
रसायनं श्रेष्ठतमं इन्द्रियाणाम्प्रसादनम् ।
जीवनं बृंहणं स्वर्य्यं शुक्रासृग्दोषनाशनम् ॥"
"चन्द्रपादाम्बुसंसिक्ते क्षौमपद्मदलच्छदे ।
शयने पुलिनस्पर्शे शीतमारुतवीजिते ॥
चन्दनार्द्रकरार्द्राश्च प्रिया नार्य्यः प्रियंवदाः ।
स्पर्शात् शीतसुखस्पर्शा घ्नन्ति दाहं रुजं क्लमम् ॥"
"गम्भीरे रक्तमाक्रान्तं स्याच्चेद्धातुं विवर्ज्जयेत् ।
रक्तपित्तातिवृद्ध्या तु पाकमाशु नियच्छति ॥
भिन्नं स्रवति वा रक्तं विदग्धं पूयमेव वा ।
तयोः क्रिया विधातव्या व्यधः शोधनरोपणौ ॥
कुर्य्यादुपद्रवाणाञ्च क्रियां स्यात् स्वाच्चिकित्-
सितात् ॥"
इति चरके चिकित्सास्थाने २९ अध्यायः ॥
"गन्धकं पारदं लौहं वनं तालं मनःशिला ।
शिलाजतु पुरं शुद्धं समभागं विचूर्णयेत् ॥
विडङ्गं त्रिफला व्योषं वागुजी च पुनर्नवा ।
चित्रकं देवकाष्ठञ्च दार्व्वी श्वेतापराजिता ॥
चूर्णमेषां पृथक् तुल्यं सर्व्वमेकत्र कारयेत् ।
त्रिफलाभृङ्गराजस्य रसेनैव पृथक् त्रिधा ॥
विभाव्य भक्षयेत् प्रातर्माषमात्रं दिने दिने ।
क्रमानुपानं निम्बस्य पत्रं पुष्पं त्वचं समम् ॥
शाणमात्रं घृतैर्दद्यात् सर्व्ववातविकारनुत् ।
वातरक्तं महाघोरं गम्भीरं सर्व्वजञ्जयेत् ॥
सर्व्वोपद्रवसंयुक्तं साध्यासाध्यं निहन्त्यलम् ॥"
इति वातरक्तान्तको रसः ॥*॥
"अथ शुद्धेन तालेन गन्धतुल्येन मेलयेत् ।
द्वयोस्तुल्यं जीर्णताम्रं वालुकायन्त्रके पचेत् ॥
अयन्तालेश्वरो नाम रसः परमदुर्लभः ।
हन्यात् कुष्ठानि सर्व्वाणि वातरक्तमथापि वा ।
शूलमष्टविधं श्वित्रं रसस्तालेश्वरो महान् ॥"
इति महातालेश्वरो रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे वातरक्ताधिकारे ॥

अथात्र पथ्यापथ्यविधिः ।
"द्वयोरस्रस्रुतिः स्वचीजलौकाद्यलाबुभिः ।
शतधौतघृताभ्यङ्गो मेषीदुग्धावसेचनम् ॥
यवषष्टीकनीवारकलमारुणशालयः ।
गोधूमाश्चणका मुद्गास्तुवर्य्योऽपि मुकुष्टकाः ॥
अजानां महिषीणाञ्च गवामपि पयांसि च ।
लावतित्तिरिसर्पद्विट्ताम्रचूड़ादिविष्किराः ॥
प्रतुदाः शुकदात्यूहकपोतकटकादयः ।
उपोदिकाकाकमाची वेत्राग्रं सुनिषस्रकम् ॥
वास्तुकं कारवेल्लञ्च तण्डुलीयः प्रसारणी ।
चत्तूरो वृद्धकुष्माण्डं सर्पिः शम्याकपल्लवम् ॥
पटोलं रुवुतैलञ्च मृद्वीकाश्वेतशर्करा ।
नवनीतं सोमवल्ली कस्तूरी सितचन्दनम् ॥
शिंशपागुरुदेवाह्वसरलं स्नेहमर्द्दनम् ।
तिक्तञ्च पथ्यमुद्दिष्टं वातरक्तगदे नृणाम् ॥
दिवास्वप्नाग्निसन्तापव्यायामातपमैथुनम् ।
माषाः कुलत्था निष्पावाः कलायाः क्षारसेवनम् ॥
अम्बुजानूपमांसानि विरुद्धानि दधीनि च ।
इक्षवो मूलकं मद्यं पिण्याकोऽम्लानि काञ्जिकम् ॥
कटुश्च गुर्व्वभिष्यन्दि लवणानि च शक्तवः ।
इत्यपथ्यं निगदितं वातरक्तगदे नृणाम् ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे वातरक्ताधिकारः ॥)

वातरक्तघ्नः, पुं, (वातरक्तं रोगविशेषं हन्तीति । हन+टक् ।) कुक्कुरद्रुः । इति शब्दचन्द्रिका ॥ कुकुरसुड़ा इति भाषा ॥

वातरक्तारिः, पुं, (वातरक्तस्य अरिर्नाशकः ।) पित्तघ्नी लता । इति शब्दचन्द्रिका ॥ गुलञ्च इति भाषा ॥

वातरङ्गः, पुं, (वातेन वायुना रङ्गो यस्य । निरन्तरचलद्दलत्वादस्य तथात्वम् ।) अश्वत्थः । इति शब्दरत्नावली ॥

वातरथः, पुं, (वातो वायू रथो यस्य ।) मेघः । इति त्रिकाण्डशेषः ॥ (वातो रथः प्रापको यस्येति वायुप्रापके, त्रि । यथा, भागवते । ३ । २९ । २० ।
"यथा वातरथो घ्राणमावृङ्क्ते गन्ध आश्रयात् ।
एवं योगरतं चेत आत्मानमविकारि यत् ॥")

वातरायणः, पुं, (वातेन वायुजनितरोगेण रायति शब्दायते इति । रै शब्दे+ल्युः ।) उन्मत्तः । निष्प्रयोजनपूरुषः । काण्डम् । करपात्रम् । कूटः । परसंक्रमः । इति मेदिनी । ने, ११६ ॥ सरलद्रुमः । इति शब्दरत्नावली ॥

वातरूषः, पुं, (वातेन रूष्यते भूष्यते इति । रूष+घञ् ।) वातूलः । उत्कोचः । शक्रधनुः । इति मेदिनी । षे, ५७ ॥

वातरोगः, पुं, (वातजनितो रोगः ।) वायुव्याधिः । तत्पर्य्यायः । वातव्याधिः २ चलातङ्कः ३ अनिलामयः ४ । इति राजनिर्घण्टः ॥ (यथा,
"वातरोगं निहन्त्याशु अर्द्दितं सापतन्त्रकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ स्वल्परसोनपिण्डे ॥)

वातरोगी [न्] त्रि, (वातरोगोऽस्यास्येति । वातरोग+इनिः ।) वातरोगयुक्तः । तत्पर्य्यायः । वातकी २ । इत्यमरः ॥ (यथा, बृहत्संहितायाम् । ८७ । ११ ।
"परतोऽपि दर्शनं वातरोगिणां चन्दनागुरुप्राप्तिः ॥")

वातर्हिः, पुं, काष्ठलौहोभयनिर्मितपात्रम् । तत्पर्य्यायः । काष्ठलौही २ । इति त्रिकाण्डशेषः ॥

वातलः, पुं, (वातं लातीति । ला+कः ।) चणकः । इति शब्दचन्द्रिका ॥ वायुकारके त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अः ।
"वातलाः शीतमधुराः सकषाया विरूक्षणाः ।
कफशोणितपित्तघ्नाश्चणकाः पुंस्त्वनाशनाः ॥")

वातलमण्डली, स्त्री, वात्या । इति भूरिप्रयोगः ॥

वातवान् [त्] त्रि, वायुयुक्तः । वातो विद्यतेऽस्य इत्यर्थे वतुप्रत्ययेन निष्पन्नः ॥

वातवैरी [न्], पुं, (वातस्य वैरी ।) वाताद: । इति राजनिर्घण्टः ॥ वायुशत्रौ, त्रि ॥

वातव्याधिः, पुं, (वातजनितो व्याधिः ।) वातरोगः । इति राजनिर्घण्टः ॥ (यथा,
"शून्यं सुप्तत्वचं भग्नं कम्पाध्मानविपीड़ितम् ।
रुजार्त्तिमन्तञ्च नरं वातव्याधिर्विनाशयेत् ॥"
इति माधवकरकृते रुग्विनिश्चये वातरोगाधिकारे शेषांशे ॥)

वातशीर्षं, क्ली, (वातस्य शीर्षमिव ।) वस्तिः । इति राजनिर्घण्टः ॥

वातशोणितं, क्ली, (वातजं शोणितं दुष्टरक्तं यत्र ।) वातरक्तरोगः । इति भावप्रकाशः ॥ (अस्य सनिदानसम्प्राप्तिकं पूर्व्वरूपं लक्षणञ्च यथा,—
"विदाह्यन्नं विरुद्धञ्च तत्तच्चासृक्प्रदूषणम् ।
भजतां विधिहीनञ्च स्वप्नजागरमैथुनम् ॥
प्रायेण सुकुमाराणामचंक्रमणशीलिनाम् ।
अभिघातादशुद्ध्या च नृणामसृजि दूषिते ॥
वातलैः शीतलैर्वायुर्वृद्धः क्रुद्धो विमार्गगः ।
तादृशेनासृजा रुद्धः प्राक् तदेव प्रदूषयेत् ॥
आढ्यरोगं खुड़ं वातबलासं वातशोणितम् ।
तदाहुर्नामभिस्तच्च पूर्व्वं पादौ प्रधावति ॥
विशेषाद्यानयानाद्यैः प्रलम्बौ तस्य लक्षणम् ।
भविष्यतः कुष्ठसमं तथा सादः श्लथाङ्गता ॥
जानुजङ्घोरुकट्यंशहस्तपादाङ्गसन्धिषु ।
कण्डूस्फुरणनिस्तोदभेदगौरवसुप्तताः ॥
भूत्वा भूत्वा प्रणश्यन्ति मुहुराविर्भवन्ति च ।
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि ॥
आखोरिव विषं क्रुद्धं तद्देहं विधावति ।
त्वङ्मांसाश्रयमुत्तानं तत्पूर्व्वं जायते ततः ॥
कालान्तरेण गम्भीरं सर्व्वान् धातूनभिद्रवत् ।
कण्ड्वादिसंयुतोत्ताने त्वक्ताम्रश्यावलोहिता ॥
सायामा भृशदाहोष्मा गम्भीरेऽधिकपूर्व्वरुक् ।
श्वयथुर्ग्रथितः पाकी वायुः सन्ध्यस्थिमज्जसु ॥
छिन्दन्निव चरत्यन्तर्वक्रीकुर्व्वंश्च वेगवान् ।

करोति खञ्जं पङ्गुं वा शरीरे सर्व्वतश्चरन् ।
वातेऽधिकेऽधिकन्तत्र शूलस्फुरणतोदनम् ।
शोफस्य रौक्ष्यकृष्णत्वश्यावतावृद्धिहानय: ।
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तय: ।
रक्ते शोफोऽतिरुक्तोदस्ताम्रश्चिमिचिमायते ।
स्निग्धरूक्षै: शमं नैति कण्डूक्लेदसमन्वित: ।
पित्ते विदाह: सम्मोह: स्वेदो मूर्च्छामद: स-
तृट् ।
स्पर्शाक्षमत्वं रुग्राग: शोफपाको भृशोष्णता ।
कफे स्तैमित्यगुरुता सुप्तिस्निग्धत्वशीतता: ।
कण्डूर्मन्दा च रुग्द्वन्द्वसर्व्वलिङ्गञ्च सङ्करे ।
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजं त्यजेत् स्रावि स्तब्धमर्व्वुदकारि च ।
रक्तमार्गं निहन्त्याशु शाखासन्धिषु मारुत: ।
निविश्यान्योऽन्यमावार्य्य वेदनाभिर्हरत्यसून् ।”
इति वाभटे निदानस्थाने षोड़शेऽध्याये ।
“वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् ।
अल्पाल्पं पालयन् वायुं यथादोषं यथाबलम् ।
चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितम् ।
भेषजं शमनं शस्तं पर्य्यायै: स्मृतमौषधम् ।”
इति च वाभटे चिकित्सितस्थाने द्वाविंशतितमे-
ऽध्याये । अन्यद्वातरक्तशब्दे ज्ञातव्यम् ॥*॥)
वातसह:, त्रि, (वातं वातजनितरोगं सहते ।
सह+अच् ।) अत्यन्तवायुयुक्त: । यथा,—
“वातासहो वातसहो वातूलो वातुलोऽपि च ।”
इति शब्दरत्नावली ॥
(वायुवेगसहनशील: । यथा, महाभारते । १ ।
१४९ । ५ ।
“ततो वातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
ऊर्म्मिक्षमां दृढां कृत्वा कुन्तीमिदमुवाच च ।”)
वातसारथि:, पुं, (वात: सारथि: सहायो यस्य ।)
अग्नि: । इति केचित् ॥
वातस्कन्ध:, पुं, (वातस्य स्कन्ध इव ।) आकाशस्य
भागविशेष: । यत्र वायुर्व्वहति । इति केचित् ॥
वातहा, [न्] त्रि, (वातं हन्तीति । हन्+क्विप् ।)
वातघ्न: । वायुनाशकौषधम् । इति वैद्यकम् ॥
वाताट:, पुं, (वात इव अटति गच्छतीति । अट्
+अच् ।) सूर्य्याश्व: । इति त्रिकाण्डशेष: ॥
वातमृग: । इति शब्दरत्नावली ॥
वाताण्ड:, पुं, (वातदूषितौ अण्डौ यस्मात् ।)
मुष्करोगविशेष: । तस्य लक्षणं यथा,—
“वृषणौ दूषयेद्वायु: शिश्नका यस्य संवृत: ।
तस्य मुष्कवशात्येको रोगो वाताण्डसंज्ञक: ।”
इति माधवकर: ॥
वाताद:, पुं, (वाताय वातनिवृत्तये अद्यते इति ।
अद्+घञ् ।) फलवृक्षविशेष: । बादाम इति
ख्यात: । तत्पर्य्याय: । वातवैरी २ नेत्रोपम-
फल: ३ वाताम्र: ४ । अस्य गुणा: । उष्णत्वम् ।
सुस्निग्धत्वम् । वातघ्नत्वम् । शुक्रकारित्वम् ।
गुरुत्वञ्च । अस्य मज्जगुणा: । मधुरत्वम् ।
वृष्यत्वम् । पित्तानिलापहत्वम् । स्निग्धत्वम् ।
उष्णत्वम् । कफकारित्वम् । रक्तपित्तविकारिणां
श्रेष्ठत्वञ्च । इति भावप्रकाश: ॥
वातापि:, पुं, असुरविशेष: । स च ह्रादस्य धमनौ
पत्न्यां जात: । अगस्त्येन भक्षित: । इति
श्रीभागवतमतम् । कल्पान्तरे तु विप्रचित्ते:
सिंहिकायां जात: । यथा,—
“सिंहिकायामथोत्पन्ना विप्रचित्तेश्चतुर्द्दश ।
वंश: शल्यनाभश्च वज्र: शाल्वस्तथैव च ।
इल्वलो नमुचिश्चैव वातापी ह्यसृपो जिक: ।
हरकल्प: कालनाभो भौमश्च नरकस्तथा ।
राहुर्ज्येष्ठश्च तेषां वै चन्द्रसूर्य्यप्रमर्द्दन: ।
इत्येते सिंहिकापुत्त्रा देवैरपि दुरासदा: ।”
इति वह्निपुराणे काश्यपीयवंश: ॥
अन्यच्च ।
“विप्रचित्ति: सैंहिकेयान् सिंहिकायामजी-
जनत् ।
हिरण्यकशिपोर्ये वै भागिनेयास्त्रयोदश ।
वंश: शल्यश्च राजेन्द्रो नमो वातापिरेव च ।
इल्वलो नमुचिश्चैव सृमचाञ्जनस्तथा ।
नरक: कालनाभश्च सरमाणस्तथैव च ।
कल्पवीर्य्यश्च विख्यातो दनुवंशविवर्द्धन: ।”
इति मात्स्ये ६ अध्याय: ॥
(मुनिवरोऽगस्त्यस्तु एनं असुरेश्वरं भक्षितं-
वान् । एतद्वृत्तान्तस्तु महाभारते वनपर्व्वणि
९६ अध्यायमारभ्य द्रष्टव्य: ॥)
वातापिद्विट्, [ष्] पुं, (वातापिं द्वेष्टीति ।
द्विष्+क्विप् ।) अगस्त्यमुनि: । इति हेम-
चन्द्र: । २ । ३६ ॥
वातापिसूदन: पुं, (वातापिं सूदत इति । सूद्+
ल्यु: ।) अगस्त्य: । इति त्रिकाण्डशेष: ॥
वातापिहा [न्] पुं, (वातापिं हन्तीति । हन्+
क्विप् ।) अगस्त्य: । इति त्रिकाण्डशेष: ॥
वातामोदा, स्त्री, (वातेन प्रसृत आमोदो यस्या: ।)
कस्तूरी । इति शब्दमाला ॥
वातायनं, क्ली, (वातस्य अयनं गमनागमन-
मार्ग: ।) गवाक्ष: । इत्यमर: ॥ (यथा, आर्य्या-
सप्तशत्याम् । ५१० ।
“क्रीड़ागारस्य बहि: सखीषु चरणातिथौ
मयि प्रियया ।
प्रकटीकृत: प्रसादो दत्त्वा वातायने वदनम् ।”)
तेन परबाधानिषेधो यथा,—
“परबाधां न कुर्व्वीत जलवातायनादिभि: ।
कारयित्वा तु कर्म्माणि कारुं पश्चात् न वञ्च-
येत् ।”
इति कौर्म्मे उपविभागे १५ अध्याय: ॥
वातायन:, पुं, (वातस्येव अयनं गतिर्यस्य ।)
घोटक: । इति त्रिकाण्डशेष: ।
वातायु:, पुं, (वातमयते इति । अय+बाहु-
लकात् उण् ।) हरिण: । इत्यमर: ॥
वातारि:, पुं, (वातस्य वातरोगस्य अरि: ।)
एरण्डवृक्ष: । इति शब्दरत्नावली ॥ (अस्य
पर्य्यायो यथा,—
“शुक्लएरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तक: ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डक: ।
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते । १ ।
रक्तोऽपरो रुवूक: स्याद्रुवूको रुवुस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रक: ।” २ ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
शतमूली । इति शब्दचन्द्रिका । पुत्त्रदात्री ।
शेफालिका । यवानी । भार्गी । स्नुही ।
विड़ङ्ग: । शूरण: । भल्लातक: । जतुका । इति
राजनिर्घण्ट: ॥
वाताली, स्त्री, (वातस्य आली यत्र ।) वात्या ।
इति त्रिकाण्डशेष: ॥
वाताश्व:, पुं, (वात इव शीघ्रगोऽश्व: ।) कुली-
नाश्व: । तत्पर्य्याय: । हयोत्तम: २ जात्य: ३
आजानेय: ४ । इति त्रिकाण्डशेष: ॥ (यथा,
कथासरित्सागरे । ६६ । १७४ ।
“तदिमं मां विजानीहि लक्ष्मीसेनं वरानने ।
आनीतमिह वाताश्वेनाहत्याखेटनिर्गतम् ।”)
वातासह:, त्रि, (वातं वातजनितरोगं आसहते
इति । आ+सह+अच् ।) वातुल: । इति
शब्दरत्नावली ॥
वाति:, पुं, (वाति गच्छतीति । वा+“वातेर्नित् ।”)
उणा० ५ । ६ । इति अति: ।) वायु: । यथा,
“वातिर्वायुर्मरुद्वात: श्वसन: पवनोऽनिल: ।”
इत्यमरटीकायां भरतधृतवाचस्पति: ॥
सूर्य्य: । चन्द्र: । यथा । वातिरादित्यसोमयो: ।
इति रभस: ॥
वातिक:, पुं, (वातादागत: । वात+ठञ् ।)
वायुजव्याधि: । यथा,—
“वातिको वातजो व्याधि: पैत्तिक: पित्तसम्भव: ।
श्लैष्मिक: श्लेष्मसंभूत: समूह: सान्निपातिक: ।”
इति राजनिर्घण्ट: ॥
(क्ली, वातस्य शमनं कोपनं वा । “वातपित्त-
श्लेष्मभ्य: शमनकोपनयोरुपसंख्यानम् ।”५ । १ ।
३८ । इत्यस्य वार्त्ति० ठञ् । वातिकरोगाक्रान्ते
वाचाले, त्रि । यथा, महाभारते ।३।२५६।३।
“अपरे त्वब्रुवंस्तत्र वातिकास्तं महीपतिम् ।
युधिष्ठिरस्य यज्ञेन न समो ह्येष ते क्रतु: ।”)
वातिग:, पुं, (वातिं वायुं गच्छतीति । गम्+
ड: ।) भण्टाकी । धातुवादिनि, त्रि । इति
मेदिनी । गे, ४६ ॥
वातिगम:, पुं, (वातिं वायुं गमयतीति प्रापयति ।
गमि+अच् ।) वार्त्ताकु: । इति शब्दरत्ना-
वली ॥
वातिङ्गन:, पुं, वार्त्ताकु: । इति त्रिकाण्डशेष: ॥
वातीयं, क्ली, (वाताय वातनिवृत्तये हित: । वात
+छ: ।) काञ्जिकम् । इति शब्दचन्द्रिका ॥
वातुल:, पुं. वात्या । इत्यमरटीकायां भरत: ॥
वातुल:, त्रि, वातविकारासह: । उन्मत्त: । इत्य-
मरटीकायां भरत: ॥
वातुलि:, स्त्री, तरुतूलिका । इति हारावली ॥
बादुड़ इति भाषा ॥

वातूलः, पुं, (वातानां समूहः । "वाताडूलः ।" ४।२।४२ । इत्यस्य वार्त्तिकोक्त्या ऊलः । यद्वा, वाताः सन्त्यस्मिन्निति । वात+"सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् । "वातदन्तबलेति ।" ऊङ् । यद्वा, वातानां समूहः वातं न सहते इति वा । वात+"वातात् समूहे च । वातं न सहते इति च ।" ५।२।१२२ । इत्यस्य वार्त्ति० ऊलच् ।) वात्या । वातासहे,त्रि । इत्यमरः ॥ "वात्या वातसमूहः । अत्र जनङ्गलादिगौरथवातादिति ऊलः । वातासहो वातव्याध्यसहः । वाउया इति ख्यातः । अत्र गोविकारादिना ऊलः वातूलः । वातैर्गाम्नीति तुल्ये ह्रस्वोकारवानपि वातुलः । वातूलो वातुलोऽपि स्यादिति द्विरूपकोषः ॥ उन्मत्तेऽपि वातूलः ।" इत्यमरटीकायां भरतः ॥

वातोमा, स्त्री, (वातमूनयतीति । ऊन+अण् ।) गोजिह्वाक्षुपः । इति राजनिर्घण्टः ॥ वायुहीने, त्रि ॥

वात्या, स्त्री, (वातानां समूहः । वात+"पाशादिभ्यो यः ।" ४ । २ । ४९ । इति यः ।) वातसमूहः । यथा,—
"आषङ्गिनी च वाताली स्यात् वात्या वातमण्डली ॥"
इति त्रिकाण्डशेषः ॥
(यथा, भागवते । ३ । १७ । ५ ।
"ववौ वायुः सुदुःस्पर्शः फूत्कारानीरयन् मुहुः ।
उन्मूलयन्नगपतीन् वात्यानीको रजोध्वजः ॥")

वात्सकं, क्ली, (वत्सानां समूहः । वत्स+"गोत्रोक्षोष्ट्रेति ।" ४ । २ । ३९ । इति वुञ् ।) वत्ससमूहः । इत्यमरः ॥ (वत्सकस्येदमिति । वत्सक+अण् । कुटजसम्बन्धिनि इन्द्रयवसम्बन्धिनि च त्रि । यथा, सुश्रुते । ६ । ४० ।
"नागरातिविषामुस्तं पिप्पल्यो वात्सकं फलम् ॥")

वात्सल्यः, पुं, (वत्सल एव । स्वार्थे ष्यञ् ।) रसविशेषः । यथा,—
"वात्सल्यशान्तौ तु रसौ शृङ्गारः कौशिकः स्मृतः ।"
इति त्रिकाण्डशेषः ॥
एतद्रसाधिकारी यथा,—
"शान्ते ब्राह्मण एव स्यात् प्रीते दासः प्रकीर्त्तितः ।
प्रेयसि स्युः सखायो हि यशोदा वत्सले स्मृता ॥
मधुरे राधिका ज्ञेया हास्ये स्यान्मधुमङ्गलः ।
सखीयूथोऽद्भुते ज्ञेयो वीरे चारणगोष्ठपाः ॥
करुणे वत्सपादिर्जटिलाद्यास्तु रौद्रके ।
गोवर्द्धनेऽभिमन्युश्च भयानक उदाहृतौ ॥
तपस्विन्यादयो ह्यत्र वीभत्से परिकीर्त्तिताः ।
प्रणस्या नियता ज्ञेया आलम्बनविभावकाः ॥"
इत्युज्ज्वलनीलमणिः ॥
(वत्सलस्य भावः । वत्सल+ष्यञ् ।) वत्सलस्य भावे, क्ली ॥ (स्नेहः । यथा, भागवते ।४।९।३४।
"चरन्तं विश्वसुहृदं वात्सल्याल्लोकमङ्गलम् ॥")

वात्सीपुत्त्रः, पुं, नापितः । इति त्रिकाण्डशेषः ॥

वात्स्यः, पुं, (वत्सस्य गोत्रापत्यम् । वत्स+"गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) मुनिविशेषः । यथा । वात्स्यसावर्णिगोत्रयोरौर्व्वच्यवनभार्गवजामदग्न्याप्नुवत्प्रवराः । इत्युद्वाहतत्त्वम् ॥

वात्स्यायनः, पुं, (वत्सस्य गोत्रापत्यं युवा । वत्स+यञ् । ततो यूनि फक् ।) मुनिविशेषः । तत्पर्य्यायः । मल्लनागः २ पक्षिलः ३ स्वामी ४ । इति त्रिकाण्डशेषः ॥ (अयं हि कामसूत्रकर्त्ता । यथा, कुट्टनीमते । ७७ ।
"वात्स्यायनमयमबुधं
वाभ्राव्यं दूरेण दत्तकाचार्य्यान् ।
गणयति मन्मथतन्त्रे
पशुतुल्यं राजपुत्त्रश्च ॥")

वादः, पुं, (वद्+घञ् ।) यथार्थबोधेच्छोर्वाक्यम् । यथा,—
"विजिगीषोः कथा जल्पो वादस्तत्त्वविवेदिषोः ।"
इति जटाधरः ॥
अस्य लक्षणं यथा । प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः । इति गौतमसूत्रम् ॥ * ॥ अपि च ।
"सर्गाणामादिरन्तश्च मध्यञ्चैवाहमर्ज्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥"
इति भगवद्गीतायाम् १० अध्यायः ॥
"प्रवदतां वादिनां सम्बन्धिन्यो वादजल्पवितण्डाख्यास्त्रिस्रः कथाः प्रसिद्धास्तासां मध्ये वादोऽहम् । यत्र द्वाभ्यामपि प्रमाणतर्काभ्यां स्वपक्षः स्थाप्यते परपक्षश्छलजातिनिग्रहस्थानैर्दूष्यते स जल्पो नाम । यत्र त्वेकः स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रहस्थानैस्तत् पक्षं दूषयति न तु स्वपक्षं स्थापयति सा वितण्डा नाम कथा । तत्र जल्पवितण्डे विजिगीषमाणयोर्वादिनोः शक्तिपरीक्षामात्रफले । वादस्तु वीतरागयोः शिष्याचार्य्ययोरन्ययोर्वा तत्त्वनिरूपणफलः । अतोऽसौ श्रेष्ठत्वान्मद्विभूतिरित्यर्थः ।" इति तट्टीकायां श्रीधरस्वामी ॥ ("तत्र वादः । वादो नाम यः परस्परेण सह शास्त्रपूर्व्वकं विगृह्य कथयति । स वादो द्विविधः संग्रहेण जल्पो वितण्डा च । तत्र पक्षाश्रितयोर्वचनं जल्पः । जल्पविपर्य्ययो वितण्डा ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

वादकः, त्रि, (वादयतीति वद्+णिच्+ण्वुल् ।) वाद्यकरः । (यथा, भागवते । १० । १८ । ११ ।
"क्वचित् नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम् ।
शशंसतुर्महाराज साधु साध्विति वादिनौ ॥")
वक्ता । वदधातोः कर्त्तरि णक(ण्वुल्)प्रत्ययेन निष्पन्नः ॥

वादनं, क्ली, (वद्+णिच्+ल्युट् ।) वाद्यम् । (यथा, संगीतदर्पणे । ११ ।
"वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ॥")

वा(बा)दरं, त्रि, (वदरात् वदराकारकार्पासफलाद्भवम् । वदर+अण् ।) कार्पासनिर्म्मितवस्त्रादि । इत्यमरः । २।६।१११ ॥ वादरायाः कार्पास्या जातं इत्यर्थे अण्प्रत्ययेन निष्पन्नम् ॥

वा(बा)दरः, पुं, (वदर+स्वार्थे अण् ।) कार्पासवृक्षः । इति हेमचन्द्रः ॥ (वदरीवृक्षः । कुलगाछ इति भाषा ॥)

वादरङ्गः, पुं, अश्वत्थवृक्षः । इति त्रिकाण्डशेषः ॥

वा(बा)दरा,स्त्री, (वदरवत् फलमस्त्यस्याः । वदर+अच् । ततः टाप् ।) कार्पासवृक्षः । तत्पर्य्यायः । कार्पासी २ तूलपुष्पा ३ वदरी ४ समुद्रान्ता ५ तुण्डिकेरी ६ कार्पासिका ७ । इति शब्दरत्नावली ॥ अस्याः पर्य्यायान्तरं गुणाश्च कार्पासीशब्दे द्रष्टव्याः ॥

वादरायणः, पुं, (वदरायणे वदरिकाश्रमे निवसतीति । वदरायण+अण् ।) व्यासदेवः । इति शब्दरत्नावली ॥

वादरायणिः, पुं, (वादरायण एव । स्वार्थे इञ् ।) व्यासदेवः । इति शब्दरत्नावली ॥ (वादरायणस्यापत्यमिति अपत्यार्थे इञ् । शुकदेवः ॥)

वादरिकः, त्रि, वदरचयनकर्त्ता । वदरं चिनोतीत्यर्थे ष्णिकप्रत्ययेन निष्पन्नः ॥

वादलं, क्ली, मधुयष्टिका । इति शब्दचन्द्रिका ॥

वादवादी [न्], पुं, (वादं वदतीति । वद्+णिनिः ।) जिनभेदः । तत्पर्य्यायः । आर्हतः २ । इति हेमचन्द्रः ॥

वादामं, क्ली, स्वनामख्यातफलम् । तस्य गुणाः । उष्णत्वम् । सुस्निग्धत्वम् । वातघ्नत्वम् । बलशुक्रकारित्वञ्च । इति राजवल्लभः ॥

वादान्यः, त्रि, (वदान्य एव । स्वार्थे अण् ।) वदान्यः । बहुप्रदः । इति भरतद्विरूपकोषः ॥

वादालः, पुं, मत्स्यभेदः । बोयालि इति भाषा । तत्पर्य्यायः । सहस्रदंष्ट्रः २ । इति हेमचन्द्रः ॥

वादिः, त्रि, (वादयति वर्णानुच्चारयतीति । वद्+णिच्+"वसिवपियजीति ।"उणा० ४ । १२४ । इति इञ् ।) विद्वान् । इत्युणादिकोषः ॥

वादित्रं, क्ली, (वाद्यते । वद्+णिच्+"भूवादिगृभ्यो णित्रन् ।" उणा० ४ । १७० । इति णित्रन् ।) वाद्यम् । इत्यमरः ॥ (यथा, भागवते । ३ । २४ । ७ ।
"अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः ॥"
वादित्रेऽर्थिनश्चायते इति । चै+कः । अर्थिरक्षके, त्रि । यथा, वक्रोक्तिपञ्चाशिकायाम् ।२९ ।
"दृष्ट्वा त्वां पशुवच्चितं नहि मया दूतेन न प्रीयते
नैवाहं पशवः क्षशोदरि चितः शक्यो विधातुं त्वया ।
किं वादित्रविवर्ज्जिताच्च इयिते को वादित्रश्चायते
स्वात्मा निर्जितशैलराजसुत इत्यव्याज्जगद्धूर्जटिः ॥")

वादिरं, क्ली, वदरीसदृशक्षुद्रफलवृक्षः। इति शब्दरत्नावली ॥

वादिराट्, [ज्] पुं, (वादिषु वक्तृषु राजते इति। राज+क्विप्।) मञ्जुघोषः। इति त्रिकाण्डशेषः ॥

वादिशः, त्रि, साधुवादी। इति शब्दमाला ॥

वादी, [न्] त्रि, (वदतीति। वद्+णिनिः।) वक्ता। (यथा, मनुः। ७। ६१।
"न च हन्यात् स्थलारूढं न क्लीवं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम्॥")
अर्थी। विवादकर्त्ता। फरियादी इति पारस्यभाषा॥ यथा, सभापतेः कर्त्तव्यमाह कात्यायनः।
"अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनः।
स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनम्॥"
वादिनो भाषावादिनः उत्तरवादिनश्च ॥ * ॥
स्वयं विवादाशक्तौ प्रतिनिधिमाह नारदः।
"अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा।
यो यस्यार्थे विवदते तयोर्जयपराजयौ॥"
तयोर्व्वादिप्रतिवादिनोः। कात्यायनः।
"मनुष्यमारणे स्तेये परदाराभिमर्षणे।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे॥
पारुष्ये कूटकरणे नृपद्रोहे तथैव च।
प्रतिवादी न दातव्यः कर्त्ता तु विवदेत् स्वयम्॥"
भ्रात्रादीतरस्य पक्षस्थितस्य दण्डनीयत्वमाह नारदः।
"यो न भ्राता पिता वापि न पुत्त्रो न नियोजितः।
परार्थवादी दण्ड्यः स्यात् व्यवहारेषु विब्रुवन्॥"
नारदः।
"पूर्व्ववादं परित्यज्य योऽन्यमालम्बते पुनः।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः॥"
प्रत्यर्थी यदि कश्चित् कालं प्रार्थयते स लभते। अर्थी तु कालं प्रार्थयन् अर्थित्वमेव हन्यादिति तेन कालो न प्रार्थनीयः। तदाह।
"प्रत्यर्थी लभते कालं त्र्यहं सप्ताहमेव च।
अर्थी तु प्रार्थयन् कालं तत्क्षणादेव हीयते॥"
क्वचित् प्रत्यर्थी कालं न लभते। याज्ञवल्क्यः।
"साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम्।
विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः॥"
अथ भाषापादः। तत्र भाषास्वरूपमाहतुः कात्यायनबृहस्पती।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥"
नारदेनापि।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत्॥"
तच्छोधनमाह बृहस्पतिः।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
इति व्यवहारतत्त्वम्॥

वाद्यं, क्ली, (वद्+णिच्+यत्।) वादयन्ति ध्वनयन्ति यत्। बाजना इति भाषा। तत्पर्य्यायः। वादित्रम् २ आतोद्यम् ३। तच्चतुर्व्विधं यथा,
"ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्।
वंशादिकन्तु सुषिरं कांस्यतालादिकं घनम्॥"
इत्यमरः॥
"इदं ततादि चतुर्व्विधं चतुःप्रकारं वाद्यादिशब्दद्वयवाच्यम्।
'इदं चतुर्व्विधं वाद्यं वादित्रादिद्विनामकम्।'
वाद्यमितिसमस्तं प्रथमान्तं विशेष्यपदं इति कलिङ्गादयः। फलतो न विशेष्यः।" इति तट्टीकायां भरतः॥ * ॥

अथ वाद्यानि।
"तालेन राजते गीतं तालो वादित्रसम्भवः।
गरीयस्तेन वादित्रं तच्चतुर्व्विधमुच्यते॥
ततं सुषिरमानद्धं घनमित्थं चतुर्व्विधम्।
ततं तन्त्रीगतं वाद्यं वंशाद्यं शुषिरं तथा॥
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम्॥" * ॥
तत्र ततं यथा,—
"अलावणी ब्रह्मवीणा किन्नरी लघुकिन्नरी।
विपञ्ची वल्लकी ज्येष्ठा चित्रा घोषवती जया॥
हस्तिका कुब्जिका कूर्म्मी शारङ्गी परिवादिनी।
त्रिशवी शतचन्द्री च नकुलौष्ठी च ढंसवी॥
औडम्बरी पिनाकी च निबन्धः शुष्कलस्तथा।
गदावारणहस्तश्च रुद्रोऽथ शरमण्डलः।
कपिलासो मधुस्यन्दी घोणेत्यादि ततं भवेत्॥"
अलावणी यथा,—
"कनिष्ठिका परिधर्द्धिमध्यच्छिद्रेण संयुतः।
दशयष्टिमितो दण्डः खादिरो वैणवोऽथवा॥
अधःकरभवानूर्द्ध्वे छत्रावल्याभिशोभितः।
नवाङ्गुलादधश्छिद्रोपरि चन्द्रार्द्धसन्निभाम्॥
निवेश्य तुम्बिकां भद्रालाबुखण्डं निवेशयेत्।
द्वादशाङ्गुलविस्तारं दृढ़पक्कं मनोहरम्॥
तुम्बिकावेधमध्येन दण्डच्छिद्रे तु निर्म्मिताम्।
अलाबुमध्यगां डोर्वीं कृत्वा स्वल्पान्तु काष्ठिकाम्॥
तया संवेष्ट्य तन्मध्ये काष्ठिकां भ्रामयेत्ततः।
यथा स्यान्निश्चलालाबुर्ब्बन्धश्च करभोपरि॥
पञ्चाङ्गुलेषु संत्यज्यालाबु स्वल्पाञ्च बन्धयेत्।
कौशान्तनिर्म्मिता पट्टमयी सूत्रकृताथवा॥
समाः सूक्ष्मा दृढ़ा तत्र तन्त्री देया विचक्षणैः।
एतल्लक्षणसंयोग्यान्यालावणी प्रकीर्त्तिता॥
बिन्दुना न समुपेतं तुम्बं निःक्षिप्य वक्षसि।
मध्यमानामिकाभ्याञ्च वाद्या दक्षिणपाणिना॥
तारे मन्द्रे च घोषे च त्रिस्थाने बिन्दुरिष्यते।
तुम्बीमूलं समुत्पत्य वामाङ्गुष्ठेन धारयेत्॥
ततस्ताभिस्तु सर्व्वाभिः स्वरव्यक्तिर्विधीयते।
शिखरी दक्षिणः पाणिर्व्वामश्च चतुःस्वरः॥
अलावण्यां स्थिता ज्ञेयाः सप्त षड्जादयः स्वराः।
रागव्यक्तिर्यथा रागे भवेत् षड्जादिभेदतः।
अंशन्यासविभेदाच्च तथात्रापि विधीयते।
इयमलावणी प्रोक्ता मनःश्रवणरञ्जनी॥
प्रत्यक्षा शारदा देवी वीणारूपेण संस्थिता॥"
इत्यलावणी॥ अन्येषां लक्षणं विस्तरभयान्नोक्तम्॥ * ॥ शुषिरं यथा,—
"वंशोऽथ पारीमधुरीतित्तिरीशङ्खकाहलाः।
तोड़हीमुरलीबुक्काशृङ्गिकास्वरनाभयः॥
शृङ्गं कापालिकं वंशचर्म्मवंशस्तथापरः।
एते सुषिरभेदास्तु कथिताः पूर्व्वसूरिभिः॥
वर्त्तुलः सरलश्चैकपर्व्वदोषविवर्ज्जितः।
वैणवः खादिरो वापि रक्तचन्दनजोऽथवा॥
श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा।
राजतस्ताम्रजो वापि लौहजस्फाटिकोऽथवा॥
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः।
शिल्पविद्याप्रवीणेन वंशः कार्य्यो मनोहरः॥
वंशेनेव मतोऽपीति मतङ्गमुनिनोदितम्।
ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्त्तिताः॥
तत्र त्यक्त्वा शिरोदेशादयो द्विमितमङ्गुलम्।
फुत्काररन्ध्रं कुर्व्वीत मितमङ्गुलिपर्व्वणा॥
पञ्चाङ्गुलानि संत्यज्य तावद्रन्ध्राणि कारयेत्।
कुर्य्यात्तथान्यरन्ध्राणि सप्तसंख्यानि कौशलात्॥
वदरीबीजतुल्यानि संत्यज्यार्द्धार्द्धमङ्गुलम्।
प्रान्तयोर्ब्बन्धनं कार्य्यं स्वरादेर्नादहेतवे॥
सिक्थकेन कला देया तेन सुस्वरता भवेत्।
पञ्चाङ्गुलोऽयं वंशः स्यादेकैकाङ्गुलिवर्द्धितः॥
षडङ्गुलानि नाम्ना स्याद्यावदष्टादशाङ्गुलम्।
फुत्कारताररन्ध्रस्य यावदङ्गुलिमन्तरम्॥
तदेव नाम वंशस्य वांशिकैः परिकीर्त्त्यते॥
एकाङ्गुलो द्व्यङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुलः।
अतितारतरत्वेन वांशिकैः समुपेक्षितः॥
त्रयोदशाङ्गुलो वीणापरः।
निन्दितो वंशतत्त्वज्ञैस्तथा सप्तदशाङ्गुलः॥
महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा।
चत्वार उत्तमा वंशा मतङ्गमुनिसम्मताः॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः।
द्वादशाङ्गुलमानस्तु विजयः परिकीर्त्तितः॥
चतुर्द्दशाङ्गुलमितो जय इत्यभिधीयते।
ब्रह्मा रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः॥
नैविद्यं प्रौढ़ता चापि सुस्वरत्वञ्च शीघ्रता।
माधुर्य्यमिति पञ्चामी फुत्कृतेषु गुणाः स्मृताः॥
शीत्कारबहुलः स्तब्धो विस्वरः स्फुटितो लघुः।
अमधुराश्च विज्ञेयाः षड्दोषाः फुत्कृते क्रमात्॥
वृथा प्रयोगबाहुल्यमल्पता गीतवादने।
एभिर्दोषैर्युतोऽतीव निन्दितो वंशिको मतः॥
स्थानकादिलयाभिज्ञो गमकाढ्यः स्फुटाक्षरः।
शीघ्रहस्तः कलाभिज्ञो वांशिको रक्त उच्यते॥
प्रसक्तिर्बहुसक्तिश्च युक्तिश्चेत्यङ्गुलेर्गुणाः।
सुस्थानत्वं सुस्वरत्वं अङ्गुलीचालनक्रिया॥
समस्तगमकज्ञानं रागरागाङ्गवेदिता।
क्रियाभाषाविभाषासु दक्षता गीतवादने॥
स्वस्थाने चापि दुःस्थाने नादनिर्म्माणकौशलम्।
गातृणां स्थानदातृत्वं तद्दोषाच्छादनं तथा॥

वांशिकस्य गुणा एते मया संक्षिप्य दर्शिता: ॥”
इति वंशः ॥
काहला स्त्री निषङ्गः। तोड़ही मुरली बुक्का इत्येते च स्त्रियां सप्तस्वराणां गाभिरिव स्वरनाभिः स्त्रियां वर्त्तते। इतरेषां विस्तरभयान्नोक्तम् ॥ * ॥ आनद्धं यथा,—
“आनद्धे मर्द्दलः श्रेयान् इत्युक्तं भरतादिभिः ॥”
अपि च।

“मुरजपटहढक्का विश्वको दर्पवाद्यं
पणवघनसरुञ्जा लावजाहत्रिवल्यः।
करठकमठभेरी स्यात् कुडुक्का हुड़क्का
झनसमुरलि झल्ली ढुक्कली दौण्डिशाना ॥
डमरुटमुकिमड्डुः कुण्डलीस्तुङ्गनामा
रणमभिघटवाद्यं दुन्दुभी च रञ्जः।
कचिदपि ढुढुकी स्यात् दर्द्दुरं चाप्युपाङ्गं
प्रकटितमनवद्यं वाद्यमित्थं जगत्याम् ॥
त्रिपुरमथनकर्त्तुस्ताण्डवे तत्प्रयाणे
ततमखमुषिरञ्चानद्धमित्थं घनञ्च। * ।

मर्द्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः।
रक्तचन्दनजो वाद्यो गभीरध्वनिरुत्तके: ॥
सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते।
त्रयोदशाङ्गुलं वाममथवा द्वादशाङ्गुलम् ॥
दक्षिणञ्च भवेद्धीनमेकेनार्द्धाङ्गुलेन वा।
करणानद्धवदनो मध्ये चैव पृथुर्भवेत् ॥
शाखासीयो भवेत् वस्तस्तच्चर्म्म करणं मतम्।
मृत्तिकानिर्म्मितश्चैव मृदङ्गः परिकीर्त्तितः ॥
पातयेत् खरलिं वाद्यं मादनार्थञ्च मर्द्दले।
विभूतिर्गैरिकं भक्तं केन्दुकेन च सम्मतम् ॥
यद्वा चिपीटकं देयं जीवनीसत्त्वमिश्रितम्।
सर्व्वमेकत्र पिष्टन्तल्लेपः खरलिरुच्यते ॥
वामास्ये पूरिकां कृत्वा लेपं दद्याच्च दक्षिणे।
एवं मर्द्दलकः प्रोक्तः सर्व्ववाद्योत्तमो मतः ॥
अस्य संयोगमासाद्य सर्व्वं वाद्यञ्च शोभते।
एतदङ्गे बीजकाष्ठे दलमर्द्धाङ्गुलं विदुः ॥*॥
तधिधोतेमिति ज्ञेयाः पाटवर्णा मृदङ्गजाः।
थों दं टिं धिक्कटस्तद्वी तांकं दं दं थोगं धिधि ॥
खर्भं भ्निं नं गटं दं था कूटपाटा मता अमी।
तथिं थों टिं तक्क धी दों दं दं धिग् थां ततं
तधि ॥
तक्क तं धं धिदों तधि पाटखण्डे त्वयं क्रमः ।*।
तथा च यतिमाने पाटखण्डः। द्रगतथेणा द्रगतथेणा धो धो धिक ताधिका थोणा थोणां तक तता धिका थोता द्रगत ताधि धि धिधिकतता कड़ना थोधिक थोणा थोता द्रगतता द्रगतता द्रगतता धि। इति यतिमानपाटखण्डः ॥ * ॥
“यतिरोढ़ाप्यवच्छेदो गजरो रूपकं ध्रुवम्।
गलपः सारिगोणी च नादश्च कथितं तथा ॥
प्रहरणं छन्दनञ्च प्रबन्धा द्वादश स्मृताः ॥”
यथा दं थात इत्येकताल्यां यतिः ।* ॥
ओड़वाद्यं यथा। दां तथो तधिक तधिक दं था दं था थोधि थोधि तत्त तत्त थवि थवि दिश्चां दिश्चां टटुनकि टटुनकि तदटक्कु वदटक्कु खवटक्कु खवटक्कु तगिनगि तगिनगि दां दां दं दं दीं दीं दं ता तथा। इत्योड़वाद्यम् ॥ * ॥
अवच्छेदवाद्यं यथा। दं थात: दं थात: धिक्कि धिक्कि दिग्गं दं थात:। इत्यवच्छेदवाद्यम् ॥*॥
गजरवाद्यं यथा। थोकटे भ नेभ टिं डिं गथो गथोङ्क टेङ थोगतकि धिक्तकि धिक टेङ्गन धि धि कटतक थोक तधि कटतक्क कतथो गतङ्गीम्। इत्येकताल्यां गजरः ॥ * । रूपकवाद्यं यथा। तक धिक तक धिक्क थवितकि थवितक्कि धिक्क दं थात:। इति रूपकवाद्यम् ॥
ध्रुवकवाद्यं यथा। तक्क तक्कट धिक्क धिक्कट। इति निसारुताले ध्रुवकः ॥ * । गलपो यथा। तधिङ्कि धिकतक तधिगल गं था था दें तथा टेभन। इत्येकताल्यां गलपः ॥*॥ सारिगोणी यथा। थोङ्ग टेभ तक्क धिक्क तकाधक तकथो हटङ्गन हटङ्गन थोगककथोः। इति प्रथमखण्डः ॥ * ॥ टेभखोः धिखोहः टेभ टेभ दक्क तगदक्क धिक्क तदिदक्क दं गदं गखो गखोक तक तक धिकत धिकत धोटेभ धोटेभ घटेगल खोग गल खोग खोहट गें टगें खोहटभ इत्यस्य छन्दनम्। इति सारिगोणी ॥ * ॥
नादो यथा,—
“दांकारत्रितयं पूर्व्वं दां धिगिति ततस्त्रयम्।
दां दां धिकत्रयं यत्र इति नादः शम्भोप्रियः ॥”
इति नादः ॥
“द्रुतं मानसमारब्धं शुद्धं कूटविनिर्म्मितम्।
सप्तषट्कमयं वाद्यं करिभं तदिहोच्यते ॥”
द्रुतमानद्धात् प्रतिताले यथा। तत्तत तत्तत तक्कि तक्कि दिदं धिगनखो धिगनखो धिक्क धिक धिक्क धिक्क धिक नगि नगमि थो थो धि धि धिः दां दां धिक्क थो थो थो इत्योह नमियो नमिथो थोह थोह डेढि डेढि थोह थोह तटि तटि तटुक गीं गीं धगि धगि तत तथे तथे तत तगि डौभडी थोग थोग थों थोग गथो गथो तत्ताता।
“इति सप्तपदान्याहुः कथितं वाद्यपण्डिताः।
प्रतितालेन तालेन पादवर्णसमासतः ॥
गन्धर्व्वपतिना पूर्व्वमुर्व्वशीलास्यनर्त्तने।
सुधर्म्मारञ्जनार्थञ्च करीभं प्रकटीकृतम् ॥”
प्रहरणं यथा। थोगक्का तद्विकाथा गकटग गों दं थोग दिद्दिक धिक्क धिकटेभ। इत्येकताल्यां प्रहरणम् ॥
“वाद्यं विमुच्यते येन छन्दनं तन्निगद्यते।”
यथा। तद्दियो दिभ टेभ तम्रः। इति छन्दनम् ॥
“कलासो विकलासश्च ढाकणी चार्द्धढाकली।
जोलाटा कलिका चैव गोसृष्टी सुरजस्तथा ॥”
अलाबुजवाद्यं किच्छवाद्यम्। मर्द्दलः त्रयोदशाङ्गुलवाममुखो द्वादशाङ्गुलदक्षिणमुखः। सुरजः अष्टादशाङ्गुलवाममुखः सप्तदशाङ्गुलदक्षिणमुखः। मर्द्दलमुरजयोरयं भेदः ॥ * ॥ घनं यथा,—
“अनुरक्तं विरक्तञ्च द्विविधं घनवाद्यकम्।
गीतानुगमनुरक्तं विरक्तं तालसंश्रयम् ॥
करतालः कांस्यवलो जयघण्टोऽथ शुक्तिका।
कम्बिका पटवाद्यञ्च पट्टातोघश्च घर्घरम् ॥
झञ्झातालश्च मञ्जीरकर्त्तर्य्युङ्कर इत्यपि।
द्वादशैते मुनीन्द्रेण कथिता घनसंज्ञकाः ॥
त्रयोदशाङ्गुलव्यासौ शुद्धकांस्यविनिर्म्मितौ।
मध्यमुखौ स्तनाकारौ तन्मध्ये रज्जुगुम्फितौ ॥
पद्मिनीपत्रसदृशौ कराभ्यां रज्जुयन्त्रितौ।
करतालाभिधौ वाद्यौ पाटे झणटकैरिति ॥
यद्वा त्रयोदशयवव्यासं वक्त्रयवोन्नितम्।
यवपञ्चकगम्भीरं मध्ये च यवसप्तकम् ॥
विस्तृतं वर्त्तुलं निम्नं यवत्रयमितं ततः।
पृष्ठतो मध्यदेशे च शिवलिङ्गसमाकृतिम् ॥
अत्यम्बपेष्टौनिर्द्दग्धशुद्धकांस्यविनिर्म्मितम्।
संरक्ताङ्गुलिसुस्निग्धसुदीर्घमधुरध्वनिम् ॥
घना निसा विसंरक्तं दृढं शुष्कं मनोहरम्।
काश्मीरादिसमुद्भूतं तालमाहुर्मनीषिणः ॥
सुनादं दक्षिणं तालं ततो हीनञ्च वामकम्।
कुर्व्वीत तद्द्वयं कार्य्यं तर्ज्जन्यङ्गुष्ठयोगतः ॥
वामहस्तस्थतालस्य मध्यमं सन्निनादितम्।
तिर्य्यग्दक्षिणतालस्य परिघर्षेण ताडयेत् ॥
तालादौ वादयेच्चैव द्रुतदीर्घलघुद्रुतैः ॥”
इति करतालविशेषः। कर्त्तरीघनविशेषः। उडुरञ्च घनविशेषोऽदन्तरेफान्तपुंलिङ्गः। अन्येषां लक्षणं विस्तरभयान्नोक्तम् ॥ * ॥
“रुक्मिण्याः सत्यभामायाः कालिन्दीमित्र-
विन्दयोः।
जाम्बवत्या नाग्नजित्या लक्ष्मणाभद्रयोरपि ॥
कृष्णस्याष्टमहिषीणां पुरोदाहमहोत्सवे।
ततं शुषिरमानद्धं घनञ्च युगपज्जनाः ॥
अवादयन्नसंख्यातमिति पौराणिकी स्मृतिः।
ततं वाद्यन्तु देवानां गन्धर्व्वाणाञ्च शौषिरम् ॥
आनद्धं राक्षसानान्तु किन्नराणां घनं विदुः।
जिनावतारे गोविन्दः सर्व्वमेवानयत् क्षितौ ॥
यावन्ति वाद्यभाण्डानि रामरावणयोर्युधि।
तावन्त्यो नाभवन् सेनाः कुरुपाण्डवसङ्गरे ॥”
किञ्च।

“लिलिम्प व्रात्कम्पनतोमरेण
रणे सुरारेर्मथनात् सुरेण।
अभूत्तताद्यैरपि सिंहनादैः
सा पञ्चशब्दीति कणादवादः ॥

युद्धे सैन्यानां योऽहङ्काररवः स सिंहनादः। ततादिभिरेभिश्चतुर्भिर्वाद्यैश्चमूनां सिंहनादैश्च पञ्चशब्दीवाद्यमभूत्। सिंहनादेन सह वाद्यं पञ्चविधं भवतीत्यर्थः। इति सङ्गीतदामोदरः ॥
विष्णुगृहे वाद्यकरणफलं यथा,—
“अन्योपहारैर्विविधैर्घृतक्षीराभिषेचनैः।
गीतवादित्रनृत्याद्यैस्तोषयस्वाच्युतं नृप ॥
पुण्यरात्रिषु गोविन्दं गीतनृत्यरवोत्सवैः।
भूपजागरणैर्भक्त्या तोषयाच्युतमव्ययम् ॥
येषां न वित्तं तैर्भक्त्या मार्ज्जनाद्युपलेपनैः।

तोषितो भगवान् विष्णुर्ददात्यभिमतं फलम् ॥
देवकर्म्मणि सक्तानां तेषां संस्तुतिसंस्तवैः ।
तोषितोऽभिमतान् कामान् प्रयच्छति जनार्द्दनः ॥”
इति वह्निपुराणे क्रियायोगनामाध्यायः ॥

देवप्रतिष्ठायां वाद्यविधिर्यथा,—
“ततः प्रासादे स्थाप्योऽहं गीतवादित्रमङ्गलैः ।
सर्व्वगन्धांस्ततो दद्यु दर्मं मन्त्रमुदाहरेत् ॥”
इति वाराहे शैलार्च्चास्थापनाध्यायः ॥

देवताविशेषगृहे वाद्यविशेषनिषेधो यथा । योगिनीतन्त्रे ।
“शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम् ।
दुर्गागारे वंशीवाद्यं माधुरीञ्च न वादयेत् ॥”
झल्लकं कांस्यनिर्म्मितकरतालम् । मत्स्यपुराणे ।
“गीतवादित्रनिर्घोषं देवस्याग्रे च कारयेत् ।
विरिञ्चेश्च गृहे ढक्कां घण्टां लक्ष्मीगृहे त्यजेत् ॥
घण्टा भवेदशक्तस्य सर्व्ववाद्यमयी यतः ॥”
इति तिथ्यादितत्त्वम् ॥

वाद्यभाण्डं, क्ली, (वाद्यं वादनीयं भाण्डमिति ।) वादनीयपात्रम् । मुरजादि । यथा,—
“पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।”
इत्यमरश्लोकटीकायां भरतः ॥

अपि च ।
“वाद्यभाण्डमिदं देवि ! नानास्वरसमन्वितम् ।
भेरीपटहसंयुक्तं मया भक्त्या निवेदितम् ॥”
इति दृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतिः ॥

वाध, ऋ ङ विहतौ । इति कविकल्पद्रुमः । ऋ, अववाधत् । ङ, वाधते । इति दुर्गादासः ॥

वाधुक्यं, क्ली, विवाहः । इति त्रिकाण्डशेषः ॥

वाधूः, पुं, वहित्रम् । इति शब्दरत्नावली ॥

वाधीनसः, पुं, वाध्रीणसः । खड्गी । इति हलायुधः ॥

वानं, त्रि, (ओ वै शोषणे+क्तः । ओदितश्चेति नत्वम् ।) शुष्कफलम् । इत्यमरः ॥ शुष्कम् । इति मेदिनी । ने, २० ॥ (वनस्येदमिति । वन+अण् ।) वनसम्बन्धी ॥

वानं, क्ली, (वा+ल्युट् ।) स्यूतिकर्म्म । कटः । गतिः । इति मेदिनी । ने, २० ॥ जलसंप्लुतवातोर्म्मिः । सुवङ्गा । सौरभः । इति हेमचन्द्रः ॥ गोचीरजं तवक्षीरम् । इति राजनिर्घण्टः ॥

वानप्रस्थः, पुं, (वनप्रस्थे जातः । अण् ।) मधूकवृक्षः । (अस्य पर्य्यायो यथा,—
“मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पलाशवृक्षः । (अस्य पर्य्यायो यथा,—
“वानपोथः पलाशः स्याद्वानप्रस्थश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोऽपरः ॥”
इति वैद्यकरत्नमालायाम् ॥)
तृतीयाश्रमः । इति विश्वमेदिन्यौ ॥ * ॥ पुत्त्रमुत्पाद्य वनवासं कृत्वा अकृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनं करोति यः स वानप्रस्थः । स च द्विविधः । अश्मकुट्टः दन्तोदूखलिकश्च । इति श्रीभागवतमतम् ॥ तस्य धर्म्मो यथा,—
“भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्म्मोऽयं वनवासिनः ॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥”
इति गारुडे ४९ अध्यायः ॥

अपि च ।
याज्ञवल्क्य उवाच ।
“वानप्रस्थाश्रमं वक्ष्ये तत् शृण्वन्तु महर्षयः ।
पुत्त्रेषु भार्य्यां निःक्षिप्य वनं गच्छेत् सहैव वा ॥
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनः क्षमी ।
अफालकृष्टेनाग्नींश्च पितृदेवातिथींस्तथा ॥
भृत्यांस्तु तर्पयेत् श्मश्रुजटालोमभृदात्मवान् ।
दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात् ॥
स्वाध्यायवान् ध्यानशीलः सर्व्वभूतहिते रतः ।
अह्नो मासस्य वर्षां वा कुर्य्याद्धान्यपरिग्रहम् ॥
कृतं त्यजेदाश्वयुजे नयेत् कालं व्रतादिना ।
पक्षे मासे तु वाश्नीयाद्दन्तोलूखलिको भवेत् ॥
चान्द्रायणी स्वपेद्भूमौ कर्म्म कुर्य्यात् फलादिना ।
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ।
आर्द्रवासास्तु हेमन्ते योगाभ्यासाद्दिनं नयेत् ॥”
इति गारुडे १०२ अध्यायः ॥

पुनरपि ।
“जटित्वमग्निहोत्रित्वं भूशय्याजिनधारणम् ।
वने वासः पयो मूलं नीवारफलवृत्तिता ॥
प्रतिग्रहान्निवृत्तिश्च त्रिस्नानं व्रतधारिता ।
देवतातिथिपूजा च धर्म्मोऽयं वनवासिनः ॥”
इति गारुडे २१५ अध्यायः ॥

अन्यच्च ।
“वानप्रस्थाश्रमं धर्म्मं ते वक्ष्यामोऽवधार्य्यताम् ।
अपत्यसन्ततिं दृष्ट्वा प्राज्ञो देहस्य चायतिम् ॥
वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणम् ।
तत्रारण्योपभोगेन तपोभिश्चात्मदर्शनम् ।
भूमौ शय्या ब्रह्मचर्य्यं पितृदेवातिथिक्रिया ॥
होमस्त्रिषवणस्नानं जटावल्कलधारणम् ।
वन्यस्नेहनिषेवित्वं वानप्रस्थविधिस्त्वयम् ॥”
इति वामने १४ अध्यायः ॥

अपरञ्च ।
व्यास उवाच ।
“एवं गृहाश्रमे स्थित्वा द्वितीयं भागमायुषः ।
वानप्रस्थाश्रमं गच्छेत् सदारः साग्निरेव च ॥
निःक्षिप्य भार्य्यां पुत्त्रेषु गच्छेद्वनमथापि वा ।
दृष्ट्वापत्यस्य चापत्यं जर्ज्जरीकृतविग्रहः ॥
शुक्लपक्षस्य पूर्व्वाह्णे प्रशस्ते चोत्तरायणे ।
गत्वाप्यरण्यनियमांस्तपः कुर्य्यात् समाहितः ॥
फलमूलानि पत्राणि नित्यमाहारमाहरेत् ।
यदाहारो भवेत्तेन पूजयेत् पितृदेवताः ॥
पूजयेदतिथिं नित्यं स्नात्वा चाभ्यर्च्चयेत् सुरान् ।
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् समाहितः ॥
जटाश्च बिभृयान्नित्यं नखरोमाणि नो त्यजेत् ।
स्वाध्यायं सर्व्वदा कुर्य्यात् नियच्छेद्वाचमन्यतः ॥
अग्निहोत्रन्तु जुहुयात् पञ्चयज्ञं समाचरेत् ।
मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन तु ॥
चीरवासा भवेन्नित्यं स्नायात् त्रिषवणं शुचिः ।
सर्व्वभूतानुकम्पी स्यात् प्रतिग्रहविवर्जितः ॥
दर्शेन पौर्णमासेन यजेत नियतं द्विजाः ।
ऋक्षेष्ट्या आग्रयणं चैव चातुर्मास्यानि चाहरेत् ॥
उत्तरायणञ्च क्रमशो दक्षस्यायनमेव च ।
वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहरेत् ॥
पुरोडाशं चरूंश्चैव विधिवन्निर्व्वपेत् पृथक् ।
देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः ॥
शेषं समुपभुञ्जीत लवणञ्च स्वयं कृतम् ।
वर्ज्जयेन्मधुमांसादि भौमानि कवकानि च ॥
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ।
न फालकृष्टमश्नीयात् उत्सृष्टमपि केनचित् ॥
न ग्रामजातान्यार्त्तो वा पुष्पाणि च फलानि च ।
श्रावणेनैव विधिना वह्निं परिचरेत् सदा ॥
न द्रुह्येत् सर्व्वभूतानि निर्द्वन्द्वो निर्भयो भवेत् ।
न नक्तं किञ्चिदश्नीयात् रात्रौ ध्यानपरो भवेत् ॥
जितेन्द्रियो जितक्रोधस्तत्त्वज्ञानविचिन्तकः ।
ब्रह्मचारी भवेन्नित्यं न पत्नीमपि संश्रयेत् ॥
यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् ।
तद्व्रतं तस्य लुप्येत प्रायश्चित्ती भवेत् द्विजः ॥
तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभिः ।
न हि वेदाधिकारोऽस्य तद्वंशेऽप्येवमेव हि ॥
अधः शयीत सततं सावित्रीजपतत्परः ।
शरण्यः सर्व्वभूतानां संविभागपरः सदा ॥
परिवादं मृषावादं निद्रालस्येऽपि वर्ज्जयेत् ।
एकाग्निरनिकेतः स्यात् प्रोक्षितां भूमिमाश्रयेत् ॥
मृगैः सह चरेद्वासं तैः सहैव च संवसेत् ।
शिलायां शर्करायां वा शयीत सुसमाहितः ॥
सद्यः प्रक्षालको वा स्यात् माससञ्चयिकोऽपि वा ।
षण्मासनिचयो वा स्यात् समानिचय एव वा ॥
नक्तञ्चान्नं समश्नीयात् दिवा वाहृत्य शक्तितः ।
चतुःकालिकिको वा स्यात् स्याद्वा अष्टमकालिकः ॥
चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्त्तयेत् ।
पक्षे पक्षे समश्नीयात् यवागुं कथितां तथा ॥
पुष्पमूलफलैर्वापि केवलैर्वर्त्तयेत् सदा ।
स्वाभाविकैः स्वयं शीर्णैर्व्वैखानसमते स्थितः ॥
भूमौ वा परिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत् न क्वचिद्धैर्य्यमुत्सृजेत् ॥
ग्रीष्मे पञ्चतपाश्च स्याद्वर्षास्वभ्रावकाशिकः ।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्द्धयंस्तपः ॥
उपस्पृश्य त्रिषवणं पितृदेवांश्च तर्पयेत् ।
एकपादेन तिष्ठेत मरीचीर्वा पिबेत् सदा ॥
पञ्चाग्निधूमपो वा स्यादुष्मपः सोमपोऽथवा ।
पयः पिबेत् शुक्लपक्षे कृष्णपक्षे तु गोमयम् ॥
शीर्णपर्णाशनो वा स्यात् कृच्छ्रैर्वा वर्त्तयेत्सदा ।
योगाभ्यासरतो वा स्याद्रुद्राध्यायी भवेत् सदा ॥

अथर्व्वशिरसोपेतो वेदान्ताभ्यासतत्परः।
यमान् सेवेत सततं नियमांश्चाप्यतन्द्रितः॥
कृष्णाजिनी सोत्तरीयः शुक्लयज्ञोपवीतवान्।
अथवाग्नीन् समारोप्य स्वात्मनि ध्यानतत्परः॥
अनग्निरनिकेतः स्यान्मुनिर्मोक्षपरो भवेत्।
तापसेष्वेव विप्रेषु याचिकं भैक्षमाहरेत्॥
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु।
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन्॥
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा।
विविधाश्चोपनिषद आत्मसंसिद्धये जपेत्॥
विद्याविशेषान् सावित्रीं रुद्राध्यायं तथैव च।
महाप्रास्थानिकञ्चासौ कुर्य्यादनशनन्तथा॥
अग्निप्रवेशमन्यद्वा ब्रह्मार्पणविधौ स्थितः॥
ये तु सम्यगिममाश्रमं शिव-
माश्रयन्त्यशिवपुञ्जनाशनम्।
ते विशन्ति परमेश्वरं परं
यान्ति चैव जगतोऽस्य संस्थितिम्॥"
इति कूर्म्मपुराणे उपविभागे २६ अध्यायः॥
अन्यत् विष्णुपुराणे ३ अंशे ६ अध्याये द्रष्टव्यम्॥

वानरः, पुं, स्त्री, (वा विकल्पितो नरः। यद्वा, वानं वने भवं फलादिकं रातीति। रा+कः।) स्वनामख्यातपशुः। वाँदर इति भाषा। तत्पर्य्यायः। कपिः २ प्लवङ्गः ३ प्लवगः ४ शाखामृगः ५ वलीमुखः ६ मर्कटः ७ कीशः ८ वनौकाः ९। इत्यमरः॥ मर्कः १० प्लवः ११ प्रवङ्गः १२ प्रवगः १३ प्लवङ्गमः १४ प्रवङ्गमः १५ गोलाङ्गूलः १६ कपित्थास्यः १७ दधिशोणः १८ हरिः १९ तरुमृगः २० नगाटनः २१ झम्पी २२ झम्पारुः २३ कलिप्रियः २४। इति शब्दरत्नावली॥ किखिः २५ शालावृकः २६ इति जटाधरः॥ (एतद्धनने प्रायश्चित्तं यथा, मनुः। ११। १३६।
"हत्वा हंसं वलाकाञ्च वकं बर्हिणमेव।
वानरं श्येनभासौ च स्पर्शयेत् ब्राह्मणाय गाम्॥")

वानरप्रियः, पुं, (वानराणां प्रियः।) क्षीरिवृक्षः। इति रत्नमाला॥

वानराक्षः, पुं, (वानराणामक्षिणीव अक्षिणी यस्य।) वनच्छागः। इति हारावली॥

वानराघातः, पुं, (वानराणामाघातो यत्र।) लोध्रवृक्षः। इति शब्दचन्द्रिका॥

वानरी, स्त्री, (वानरस्य स्त्री। ङीष्।) मर्कटी। (यथा, कथासरित्सागरे। १२३। ६२।
"अथावतीर्य्य वृक्षात् तौ वानरी वानरीच सा।
अवतीर्णस्य मे पादावगृह्णीतामुभावपि॥")
शूकशिम्बी। इति शब्दरत्नावली॥ (वानरस्येयमिति। वानर+अण्+ङीप्। वानरसम्बन्धिनी। यथा, महानाटके।
"सुग्रीवे करुणा न सा हि करुणा लभ्या धरा वानरी।
मय्येषा करुणा तवैव भविता नो वा भवेत् कुत्रचित्॥")

वानरेन्द्रः, पुं, (वानराणामिन्द्रः।) सुग्रीवः। इति शब्दरत्नावली॥

वानलः, पुं, वाब्वयः। इति शब्दचन्द्रिका॥ कृष्णवावुइ इति ख्यातः॥

वानस्पत्यः, पुं, (वनस्पतौ भवः। वनस्पति+ "दित्यदित्यादित्येति।" ४। १। ८५। ण्यः।) पुष्पजातफलवृक्षः। स तु आम्रजम्ब्वादिः। इत्यमरः॥ (वनस्पतीनां समूहः। "दित्यदित्येति।" ण्यः। वनस्पतिसमूहे, क्ली। इति काशिका॥ वनस्पतिजाते, त्रि। यथा, वाजसनेयसंहितायाम्। १। १४।
"अद्रिरसि वानस्पत्यः।"
"हे उदूखल त्वं यद्यपि वानस्पत्यः दारुमयस्तथापि दृढ़त्वात् अद्रिरसि।" इति तद्भाष्ये महीधरः॥ यथाच, महाभारते।३।१२१।४।
"तस्य सप्तसु यज्ञेषु सर्व्वमासीद्धिरण्मयम्।
वानस्पत्यञ्च भौमञ्च यद्द्रव्यं नियतं मखे।
चषालयूपचमसाः स्थाल्यः पात्र्यः स्रुचः स्रुवाः॥")

वाना, स्त्री, वर्त्तिकापक्षी। इति जटाधरः॥

वानायुः, पुं, देशविशेषः। स तु भारतवर्षस्य उत्तरपश्चिमे वर्त्तते। इति शब्दरत्नावली॥

वानायुजः, पुं, (वनायौ देशविशेषे जायते इति। जन्+डः।) वनायुदेशोत्पन्नघोटकः। इत्यमरः॥

वानीरः, पुं, वेतसवृक्षः। इत्यमरः॥ वाञ्जु इति ख्यातवृक्षश्च। तत्पर्य्यायः। वृत्तपुष्पः २ शाखालः ३ जलवेतसः ४ व्याधिघातः ५ परिव्याधः ६ नादेयः ७ जलसम्भवः ८। अस्य गुणाः। तिक्तत्वम्। शिशिरत्वम्। रक्षोघ्नत्वम्। व्रणशोधनत्वम्। पित्तास्रकफदोषनाशित्वम्। संग्राहित्वम्। कषायत्वञ्च। इति राजनिर्घण्टः॥

वानीरकः, पुं, (वानीर इव प्रतिकृतिः। इवार्थे कन्।) मुञ्जतृणम्। इति राजनिर्घण्टः॥

वानीरजं, क्ली, कुष्ठम्। इति राजनिर्घण्टः॥

वानेयं, क्ली, (वने जले भवम्। वन+ढण्।) कैवर्त्तीमुस्तकम्। इत्यमरः॥

वान्तः, त्रि, वमितवस्तु। वमधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः॥ (यथा, साहित्यदर्पणे।
"कृतप्रवृत्तिरन्यार्थे कविर्वान्तं समश्नुते॥")

वान्तादः, पुं, (वान्तं अत्तीति। अद्+अण्।) कुक्कुरः। इति त्रिकाण्डशेषः॥

वान्तिः, स्त्री, (वम्+क्तिन्।) वमनम्। वाँति इति भाषा। यथा,—
"वान्तिरुल्लिखनं छर्द्दिर्वमनं वमथुर्व्वमिः॥"
इति रत्नमाला॥

वान्तिहृत्, पुं, (वान्तिं हरतीति। हृ+क्विप्।) लौहकण्टकवृक्षः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

वान्तिदा, स्त्री, (वान्तिं वमनं ददातीति। दा+कः। टाप्।) कटुकीवृक्षः। इति शब्दचन्द्रिका॥

वान्या, स्त्री, (वनानां समूह इति। वन+यत्। टाप्।) वनसमूहः। इति शब्दरत्नावली॥

वापः, पुं, वपनम्। वपधातोर्घञ्प्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। ३। ३४। १९।
"कालं प्रतीक्षस्व सुखोदयस्य
पङ्क्तिं फलानामिव बीजवापः॥"
मुण्डनम्। यथा, मनौ। ११। १०९।
"उपपातकसंयुक्तो गोघ्नो मासं यवान् पिवेत्।
कृतवापो वसेद्गोष्ठे चर्म्मणा तेन संवृतः॥"
उप्यते अस्मिन्निति। वप्+अधिकरणे घञ्। क्षेत्रं इति। ५।१।४५। पाणिनीयसूत्रे भट्टोजिदीक्षितः॥ तन्त्वादेर्वयनं वापदण्डादिदर्शनात्॥)

वापकः, त्रि, वपनकारयिता। ण्यन्तवपधातोः कर्त्तरि णकप्रत्ययेन निष्पन्नः॥

वापदण्डः, पुं, (वापाय वपनाय दण्डः।) वपनार्थदण्डः। वैँयु इति भाषा। तत्पर्य्यायः। वेमा २। इत्यमरः॥ वेम ३ वेमः ४ वायदण्डः ५। इति भरतः॥

वापिः, स्त्री, (उप्यते पद्मादिकमस्यामिति। वप्+"वसिवपियजिराजिव्रजीति।" उणा० ४। १२४। इति इञ्।) वापी। इति भरतद्विरूपकोषः॥

वापितं, त्रि, (वप्+णिच्+क्तः।) बीजाकृतम्। मुण्डितम्। इति मेदिनी। ते, १५०॥ धान्यविशेषे, क्ली। वाओया धान इति भाषा। तस्य गुणः।
"वापितं गुरु तद्धान्यं किञ्चिद्धीनमवापितम्॥"
इति राजवल्लभः॥

वापी, स्त्री, (वापि+कृदिकारादिति ङीष्।) दीर्घिका। इत्यमरः। १। १०। २८॥ उप्यते पद्मादिकं अस्याम्। वाप्यां वापिरपि स्मृता। इति द्विरूपकोषः॥ इति तट्टीकायां भरतः॥*॥ तस्या लक्षणं यथा। नववर्द्धमानधृतो वशिष्ठः। शतेन धनुर्भिः पुष्करिणी। त्रिभिः शतैर्दीर्घिका। चतुर्भिर्द्रोणः। पञ्चभिस्तड़ागः। द्रोणाद्दशगुणा वापी। तेन चतुर्द्दिक्षु पञ्चत्रिंशद्धस्तान्यूनतायां द्वादशशतहस्तान्तरान्यूनत्वेन दीर्घिका। चतुर्द्दिक्षु चत्वारिंशद्धस्तान्यूनतायां षोड़शशतहस्तान्तरान्यूनत्वेन द्रोणः। चतुर्द्दिक्षु त्रिंशदधिकशतहस्तान्यूनतायां षोड़शसहस्रहस्तान्तरान्यूनत्वेन वापी। इति जलाशयोत्सर्गतत्त्वम्॥*॥ तत्खननफलं यथा,—
"यो वापीमथवा कूपं देशे वारिविवर्ज्जिते।
खानयेत् स दिवं याति बिन्दौ बिन्दौ शतं समाः॥"
इति कल्पतरौ वायुपुराणम्॥
तज्जलगुणाः।
"वाप्यं गुरु कटु क्षारं पित्तलं कफवातजित्।"
इति राजवल्लभः॥
तत्खनने दिङ्निषेधो यथा,—
"वापीकूपतड़ागं वा प्रासादं वा निकेतनम्।
न कुर्य्यादृद्धिकामस्तु अनलानिलनैरृते॥

आग्नेय्यां मनवस्तापो नैरृते क्रूरकर्म्मकृत् ।
वायव्यां बलवित्तञ्च पीयमाने जले प्रिये ॥
स्थानस्य पावके भागे वापीकूपतडागकम् ।
अग्निदाहं सदा कुर्य्यात् समानुषपशुप्रदाम् ॥
नैरृते पीयमानन्तु आत्मना दुःखितो भवेत् ।
कन्यापि तज्जलं पीत्वा पतिं गृह्णाति कामतः ॥
　इति देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः ॥
तत्करणफलं यथा,—
　　शर्म्मिल उवाच ।
"तडागोदकवापीनां कृतानामिह यत् फलम् ।
विशेषेण पितःश्रेष्ठ वक्तुमर्हस्यशेषतः ॥
　　यम उवाच ।
धर्म्मस्यार्थस्य कामस्य यशसश्च द्विजोत्तम ।
तडागं सुप्रभूताम्बु परमायतनं स्मृतम् ॥
देवताः पितरो नागा गन्धर्व्वा यक्षराक्षसाः ।
पशुपक्षिमनुष्याश्च संश्रयन्ति जलाशयम् ॥
कृत्स्नं तारयते वंशं यस्य खाते जलाशये ।
गावः पिबन्ति पानीयं मनुष्याः पशवस्तथा ॥
शरत्काले तडागेषु सलिलं यस्य तिष्ठति ।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः ॥
येषां शिशिरकाले तु पानीयं प्रतितिष्ठति ।
वाजपेयातिरात्राभ्यां फलं विन्दन्ति मानवाः ॥
वसन्ते चैव ग्रीष्मे तु सलिलं यस्य तिष्ठति ।
राजसूयाश्वमेधाभ्यां स फलं समुपाश्नुते ॥
तडागं सर्व्वसत्त्वानां जीवनन्तु दिवानिशम् ।
तस्मात् सर्व्वात्मना वत्स तडागमिह कारयेत् ॥
कृत्स्नं हि तारयेद्वंशं पुरुषस्य न संशयः ।
सावतारः कृतः कूपः सम्भूतजलस्तथा ॥
यस्य स्वादुजलं कूपे पिबन्ति सततं जनाः ।
स नरो विरजो लोके देववद्दिवि मोदते ॥
पीत्वेक्षुरसं क्षीरं दधि मधु सुरासवम् ।
तावत् पिपासा नापैति यावत्तोयं न पीयते ॥
जीवन्ति चान्नरहिता दिवसानि बहून्यपि ।
तृषितस्तोयरहितो दिनमेकं न जीवति ॥
तस्माद्ददाति यो नित्यं पानीयं प्राणिनामिह ।
स ददाति नरः प्राणान् माभूत्तेऽत्र संशयः ॥
प्राणदानात् परं नाम नान्यद्दानं हि विद्यते ।
तस्माद्वापीश्च कूपांश्च तडागानि च कारयेत् ॥
सदृत्तानि ह विप्रर्षे यदीच्छेत् श्रियमात्मनः ।
शुष्कं परनिपानन्तु यः कारयति शक्तितः ।
सन्तारयति भूयोऽपि द्विगुणं तस्य वै फलम् ॥"
　इति वह्निपुराणे तडागदृष्टप्रशंसानामाध्यायः ॥
वापीहः, पुं, (वापीं जहातीति । हा त्यागे + कः । पाने वापीजलवर्ज्जनादस्य तथात्वम् ।) चातकपक्षी । इति त्रिकाण्डशेषः ॥
वाप्यं, क्ली, (वाप्यां भवमिति । वापी + "दिगादिभ्यो यत् ।" ४ । ३ । ५४ । इति यत् ।) कुष्ठौषधम् । इत्यमरः । १ । ४ । १२६ ॥ वापीभवे, त्रि । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"ताडागं वासवं स्वादु कषायं कटुपाकि च ।
वातश्लेष्महरं वाप्यं सक्षारं कटुपित्तलम् ॥"
वप् + ण्यत् ।) वपनीये च, त्रि ॥
वामं, क्ली, (वा + "अर्त्तिस्तुसुहुसृधृक्षीति ।" उणा० १ । १३६ । इति मन् ।) धनम् । इति मेदिनी । मे, २६ ॥ वास्तूकम् । इति जटाधरः ॥
वामः, त्रि, (वमति वम्यते वेति । वम उद्गिरणे + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः । यद्वा, वातीति । वा गतिगन्धनयोः + "अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदीति । उणा० १ । १३६ । इति मन् ।) वल्गुः । (यथा, रघौ । ७ । ५७ ।
　"स दक्षिणं तूणमुखेन वामं
　व्यापारयन् हस्तमलक्ष्यताजौ ।
　आकर्णकृष्टा सकृदस्य योद्धुः
　मौर्व्वीव बाणान् सुषुवे रिपुघ्नान् ॥")
प्रतीपः । (यथा, वैराग्यशतके । ५३ ।
"दुःखेनोपार्ज्जयन्ते पाल्यन्ते प्रत्यहञ्च लाल्यन्ते ।
वामाः स्त्रियो विमूढैरुपभुञ्जानाः सुखं विगुणम् ॥"
यथाच, साहित्यदर्पणे । १० ।
"वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो वर्त्तते ॥")
सव्यः । इत्यमरमेदिनीकारौ ॥ (यथा, राजतरङ्गिण्याम् । १ । २ ।
"भालं वह्निशिखाङ्कितं दधदधिश्रोत्रं वहन् सम्भृतक्रीडत् कुण्डलिजृम्भितं जलधिजच्छायाच्छकण्ठच्छविः ।
वक्षो बिभ्रदहीनकञ्चुकचितं बद्धाङ्गनार्द्धस्य वो भागः पुङ्गवलक्ष्मणोऽस्तु यशसे वामोऽथवा दक्षिणः ॥")
अधमः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
वामहस्तेन जलपानभोजननिषेधो यथा । हारीतः ।
"न पिबेन्न च भुञ्जीत द्विजः सव्येन पाणिना ।
नैकहस्तेन च जलं शूद्रेणावर्ज्जितं पिबेत् ॥"
　　　इति आह्निकतत्त्वम् ।
अपि च ।
"न वामहस्तेनोद्धृत्य पिबेद्वक्त्रेण वा जलम् ।
नोत्तरेदनुपस्पृश्य नाप्सु रेतः समुत्सृजेत् ॥"
　　　इति कौर्म्मे १५ अध्यायः ।
"वामः कायो ब्राह्मणोऽपि मांसमद्यादिभुक्तये ।
कृतो मया मोहनाय चार्व्वाकादिप्रवर्त्तकः ॥"
　　　इति कालिकापुराणे ७७ अध्यायः ॥
(वननीयः । यथा, ऋग्वेदे । ६ । ५१ । २ ।
"अभिनो नर्य्यं वसु वीरं प्रयतदक्षिणम् ।
वामं गृहपतिं नय ।"
"वामं वननीयम् ।" इति तद्भाष्ये सायणः ॥
वननीयं याचनीयं वसु याचने इत्यस्य प्रयोगो ज्ञातव्यः ॥)
वामः, पुं, (वातीति । वा गतिगन्धनयोः + मन् ।) हरः । (यथा, भागवते । ४ । ३ । ८ ।
"प्रजापतेस्ते श्वशुरस्य साम्प्रतं
निर्य्यापितो यज्ञमहोत्सवः किल ।
वयञ्च तत्राभिसराम वाम ! ते
यद्यर्थितामी विबुधा व्रजन्ति ॥")
कामदेवः । पयोधरः । इति मेदिनी । मे, २६ ॥
(श्रीकृष्णस्य भद्रागर्भोत्पन्नः पुत्त्रविशेषः । यथा, भागवते । १० । ६१ । १७ ।
"संग्रामजित् बृहत्सेनः शूरप्रहरणोऽरिजित् ।
जयः सुभद्रो भद्राया वाम आयुश्च सत्यकः ॥")
वामदृक् [श्], स्त्री, (वामा मनोहरा दृक् दृष्टिर्यस्याः ।) नारी । इति राजनिर्घण्टः ॥
वामदेवः, पुं, (वाम एव देवः ।) शिवः । इत्यमरः । १ । १ । ३४ ॥ (यथा, महाभारते । १३ । १७ । ७० ।
"वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ॥"
ऋषिप्रभेदः । यथा, पञ्चदश्याम् । ६ । ४५ ।
"आगामिप्रतिबन्धश्च वामदेवे समीरितः ।
एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ॥")
वामनः, पुं, (वामयति वमति वा मदमिति । वम + णिच् + ल्युः ।) दक्षिणदिग्गजः । (यथा, भागवते । ५ । २० । ३६ ।
"तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणा विनिवेशिता ये द्विरदपतयः ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥") ह्रस्वः । इत्यमरः । २ । ६ । ४६ ॥ (यथा, रघौ । १९।५१ ।
　"व्योमपश्चिमकलास्थितेन्दु वा
　पङ्कशेषमिव धर्म्मपल्वलम् ।
　राज्ञि ! तत्कुलमभूत् क्षयातुरे
　वामनार्च्चिरिव दीपभाजनम् ॥"
यथाच तत्रैव । १ । ३ ।
"प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥"
अङ्कोठवृक्षः । हरिः । इति मेदिनी । ने, १२६ ॥
(यथा, महाभारते । १३ । १४९ । ३० ।
"उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्ज्जितः ॥"
शिवः । यथा, महाभारते । १३ । १७ । ७० ।
"वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ॥"
अश्वभेदः । यथा, अश्ववैद्यके । ३ । १५३ ।
"एकेनाङ्गेन हीनेन भिन्नेन च विशेषतः ।
समजं वाजिनं विन्द्याद्वामनं वामनाकृतिम् ॥"
दनोः पुत्त्रभेदः । यथा, हरिवंशे । ३ । ८२ ।
"अयोमुखः शम्बरश्च कपिलो वामनस्तथा ॥"
भुजङ्गभेदः । यथा, महाभारते । १ । ३५ । ६ ।
"कालियो मणिनागश्च नागश्चापूरणस्तथा ।
नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः ॥"
गरुडवंशीयः पक्षिविशेषः । यथा, महाभारते । ५ । १०१ । १० ।
"पङ्कजिद्वज्रविष्कुम्भो वैनतेयोऽथ वामनः ।
वातवेगो दिशाचक्षुर्निमिषोऽनिमिषस्तथा ॥"
हिरण्यगर्भस्य सुतभेदः । यथा, हरिवंशे । २५३ । ६ ।
"नारः एणुस्तथैवाप्सो वाम्यो वामन एव च ॥"

क्रौञ्चद्वीपस्थपर्व्वतविशेषः। यथा, महाभारते। ६। १२। १७—१८।
"क्रौञ्चद्वीपे महाराज! क्रौञ्चो नाम महागिरिः।
क्रौञ्चात्परो वामनको वामनादन्धकारकः॥
अन्धकारात्परो राजन्! मैनाकः पर्व्वतोत्तमः।
मैनाकात्परतो राजन्! गोविन्दो गिरिरुत्तमः॥"
तीर्थभेदः। यथा, महाभारते।३।८४।१२२।
"ततस्तु वामनं गत्वा सर्व्वपापप्रमोचनम्॥"
महापुराणान्यतमः। यथा, देवीभागवते। १। ३। ७।
"अयुतं वामनाख्यञ्च वायव्यं षट् शतानि च।
चतुर्व्विंशतिसंख्यातः सहस्राणि तु शौनक!॥")
विष्णोः पञ्चमावतारः। तस्य प्रादुर्भावो यथा।

श्रीसदाशिव उवाच।

"प्रह्लादस्य सुतो यज्ञे विरोचन इतीरितः।
तस्य पुत्त्रो महाबाहुर्बलिर्वैश्वानरप्रभः॥
स तु धर्म्मविदां श्रेष्ठः सत्यशंसी जितेन्द्रियः।
हरेः प्रियतमो भक्तो नित्यं धर्म्मरतः शुचिः॥
स जित्वा सकलान् देवान् सेन्द्रांश्च समरुद्गणान्।
त्रिलोकान् स्ववशे स्थाप्य राज्यं चक्रे महाबलः॥
इन्द्रादित्रिदशास्तस्य किङ्कराः समुपस्थिताः।
भ्रष्टराज्यं सुरपतिं दृष्ट्वा तस्य पिताहितः॥
कश्यपो भार्य्यया सार्द्धं तपस्तेपे हरिं प्रति।
अदित्या सह धर्म्मात्मा पयोव्रतसमन्वितः॥
अर्च्चयामास देवेशं पद्मनाभं जनार्द्दनम्।
ततो वर्षसहस्राणि तेन संपूजितो हरिः॥
तथैवाविरभूत्तस्य देव्या सह सनातनः।
तं दृष्ट्वा जगतामीशं हर्षनिर्भरचेतसा॥
पत्न्या सह नमस्कृत्य तुष्टाव च द्विजोत्तमः॥

कश्यप उवाच।

नमो नमस्ते लक्ष्मीश! सर्व्वज्ञ जगदीश्वर।
सर्व्वात्मन् सर्व्वदेवेश! सृष्टिसंहारकारक॥
इत्यादिस्तुतिभिः सम्यक् स्तूयमानो महर्षिणा।
प्राह गम्भीरया वाचा परितुष्टो जनार्द्दनः॥
सन्तुष्टोऽस्मि द्विजश्रेष्ठ! त्वया भक्त्या समर्च्चितः।
वरं वृणीष्व भद्रं ते करोमि तव वाञ्छितम्॥
ततः प्राह हृषीकेशं भार्य्यया सह कश्यपः।
पुत्त्रत्वं मम देवेश संप्राप्य त्रिदशां हितम्॥
कुरुष्व बलिना देव त्रैलोक्यं निर्ज्जितं बलात्।
इन्द्रस्यावरजो भूत्वा उपेन्द्र इति नामतः॥
येन केनात्ममार्गेण बलिं निर्ज्जित्य मायया।
त्रैलोक्यं मम पुत्त्राय देहि शक्राय शाश्वतम्॥
इत्युक्तस्तेन विप्रेण तथेत्याह जनार्द्दनः।
संस्तूयमानस्त्रिदशैस्तत्रैवान्तरधीयत॥
एतस्मिन्नन्तरे काले कश्यपस्य महात्मनः।
अदित्या गर्भमापेदे भगवान् भूतभावनः॥"

इति पाद्मोत्तरखण्डे ४८ अध्यायः॥

श्रीशिव उवाच।

"अथ वर्षसहस्रान्ते सर्व्वलोकमहेश्वरम्।
अदितिर्जनयामास वामनं विष्णुमच्युतम्॥
श्रीवत्सकौस्तुभोरस्कं पूर्णेन्दुसदृशद्युतिम्।
सुन्दरं पुण्डरीकाक्षं अतिखर्व्वतरं हरिम्॥
वटुवेशधरं देवं सर्व्ववेदान्तगोचरम्।
मेखलाजिनदण्डादिचिह्नैनाङ्कितमीश्वरम्॥
तं दृष्ट्वा देवताः सर्व्वे शतक्रतुपुरोगमाः।
स्तुत्वा महर्षिभिः सार्द्धं नमश्चक्रुर्म्महौजसः॥
ततः प्रसन्नो भगवान् प्रोवाच सुरसत्तमान्।
किं कर्त्तव्यं मया चाद्य तदब्रवीत सुरोत्तमाः॥
ततः प्रहृष्टास्त्रिदशास्तमूचुः परमेश्वरम्।
अस्मिन् काले बलेर्यज्ञं वर्त्तते मधुसूदन॥
प्रथमं दानकालोऽयं तस्य दैत्यपतेः प्रभो।
याचित्वा त्रिदिवं लोकं ततस्तं दातुमर्हसि॥
इत्युक्तस्त्रिदशैः सर्व्वैराजगाम बलिं हरिः।
यागदेशे समासीनन्दृषिभिः सार्द्धमच्चयैः॥
अभ्यागतं वटुं दृष्ट्वा सहसोत्थाय दैत्यराट्।
अभ्यागतं स्वयं विष्णुं महाहर्षसमन्वितः॥
पूजयामास विधिना निवेश्य कुसुमासने।
प्रणिपत्य नमस्कृत्य प्राह गद्गदया गिरा॥
धन्योऽस्मि कृतकृत्योऽस्मि सफलं जीवितं मम।
त्वामर्च्चयित्वा विप्रेन्द्र! किं करोमि तव प्रियम्॥
आगतोऽसि यदर्थं त्वं मामुद्दिश्य द्विजोत्तम।
तत् प्रयच्छामि ते शीघ्रं ब्रूहि वेदविदां वर॥
ततः प्रहृष्टमनसा तमुवाच महीपतिम्।
शृणु राजेन्द्र! वक्ष्यामि ममागमनकारणम्॥
अग्निकुण्डस्य पृथिवीं देहि दैत्यपते मम।
मम त्रिविक्रमं पादं महीं संदातुमर्हसि॥
सर्व्वेषामेव दानानां भूमिदानमनुत्तमम्।
यो ददाति महीं राजन् विप्रायाकिञ्चनाय वै॥
अङ्गुष्ठमात्रमथवा स भवेत् पृथिवीपतिः।
न भूमिदानसदृशं पवित्रमिह विद्यते॥
तस्माद्भूमिं महीपाल प्रयच्छ त्रैपदं मम।
एतदल्पमहीं दातुं मा विशङ्क महीपते॥
जगत्त्रयप्रदानन्तत् मम भूप भविष्यति।
ततः प्रहृष्टवदनस्तथेत्याह महीपतिः॥
तस्मै महीप्रदानन्तु कर्त्तुं मेने विधानतः।
तं दृष्ट्वा दैत्यराजानं तदा तस्य पुरोहितः॥
उशना अब्रवीद्वाक्यं मा राजन् दीयतां मही।
एष विष्णुः परेशो यो देवैः संप्रार्थितो नृप!॥
वञ्चयित्वा महीं सर्व्वां ततः प्राप्तुमिहागतः।
तस्मान्मही न दातव्या तस्मै राजन् महात्मने॥
अन्यमर्थं प्रयच्छस्व वचनान्मम भूपते!।
ततः प्रहस्य राजासौ तं गुरुं प्राह धैर्य्यतः॥
प्रीतये वासुदेवस्य पुण्यं सर्व्वं कृतं मया।
अद्य धन्योऽस्म्यहं विष्णुः स्वयमेवागतो यदि॥
तस्यार्पयामि राज्यं हि जीवितञ्च महन्मम।
तस्मादस्मै प्रयच्छामि त्रीन् लोकानपि माचिरम्॥
इत्युक्त्वा भूपतिस्तस्य पादौ प्रक्षाल्य भक्तितः।
वाञ्छितां प्रददौ भूमिं वारिपूर्व्वं विधानतः॥
परिणीय नमस्कृत्य दत्त्वा वै दक्षिणां वसु।
उवाच तं वटुं विप्रं प्रहर्षेणान्तरात्मना॥
धन्योऽस्म्यनुगृहीतोऽस्मि तव दत्त्वा महीं द्विज।
यथेष्टं तव विप्रेन्द्र तद्गृहाण महीमिमाम्॥
पञ्चाशत्कोटिविस्तीर्णां सकाननमहीधराम्।
ससागराञ्च सद्वीपां सदेवासुरमानुषाम्॥
पादेनैकेन पुरुषो विक्रम्य मधुसूदनः।
उवाच तं दैत्यराजं किं करोमीति शाश्वतम्॥
तत्र त्रैविक्रमं रूपमीश्वरस्य महौजसः।
सम्मातुमपि देवानामृषीणाञ्च महात्मनाम्॥
न वक्तुमपि शक्यं स्यात् ब्रह्मणः शङ्करस्य च।
तत्पदं पृथिवीं सर्व्वामाक्रम्य गिरिजे शुभे॥
अतिरिक्तं समभवत् शतयोजनमायतम्।
दिव्यं चक्षुर्ददौ तस्मै दैत्यराज्ञे सनातनः॥
तस्मै सन्दर्शयामास स्वकं रूपं जनार्द्दनः।
तद्विश्वरूपं देवस्य दृष्ट्वा दैत्येश्वरो बलिः॥
प्रहर्षमतुलं लेभे सानन्दाश्रुपरिप्लुतः।
दृष्ट्वा देवं नमस्कृत्य स्तुत्वा स्तुतिभिरेव च॥
प्राह गद्गदया वाचा प्रहर्षेणान्तरात्मना।
धन्योऽस्मि कृतकृत्योऽस्मि त्वां दृष्ट्वा परमेश्वरम्॥
लोकत्रयं ममैवैतत् गृहाण मधुसूदन।
अथ सर्व्वेश्वरो विष्णुर्द्वितीयं पदमव्ययम्॥
ऊर्द्ध्वं प्रसारयामास ब्रह्मलोकान्तमच्युतः।
सनक्षत्रग्रहोपेतं सर्व्वदेवसमावृतम्॥
पादेनापरिपूर्णोऽभूदच्युतः स शुभानने।
ततः पितामहो दृष्ट्वा चक्रपद्मादिचिह्नितम्॥
श्रीपादं देवदेवस्य हर्षसंभ्रमचेतसा।
धन्योऽस्मीति वदन् ब्रह्मा गृहीत्वा स्वं कमण्डलुम्॥
भक्त्या प्रक्षालयामास तत्र संस्थितवारिणा।
अत्यद्भुतमभवत्तोयं तस्य विष्णोः प्रभावतः॥
तत्तीर्थं मेरुशिखरे प्रापतद्विमलं जलम्।
जगतः पावनार्थाय चतुर्द्दिक्षु प्रवाहितम्॥
सीता चालकनन्दा च वङ्क्षुर्भद्रा यथाक्रमात्॥
प्रसङ्गादिदमाख्यातं गङ्गाजन्म त्वनुत्तमम्॥
ततो नारायणः श्रीमान् बलेर्दैत्यपतेः प्रभुः।
रसातलं शुभं लोकं प्रददौ भक्तवत्सलः॥
सर्व्वेषां दानवानाञ्च नागानां यादसाम्पतेः।
राजानञ्च बलिञ्चक्रे यावदाभूतसंप्लवम्॥
प्रतिगृह्य बलेर्लोकान् वटुवेशेन दैत्यहा।
महेन्द्राय ददौ प्रीत्या काश्यपिर्व्विष्णुरव्ययः॥
ततो देवाः सगन्धर्व्वा ऋषयश्च महौजसः।
तुष्टुवुः स्तुतिभिर्दिव्यैः पूजयामासुरच्युतम्॥
संक्षिप्य तन्महद्रूपं तेषां सन्दर्शनाय वै।
संपूज्यमानस्त्रिदशैरन्तर्धानं ययौ हरिः॥"

इति पाद्मोत्तरखण्डे ४६ अध्यायः॥ *॥

तदवतारप्रकारान्तरं यथा,—

नारद उवाच।

"सांप्रतं भगवान् विष्णुस्त्रैलोक्याक्रमणं वपुः।
करिष्यति जगत्स्वामी बलेर्बन्धनमीश्वरः॥
तत् कथं पूर्व्वकालेऽपि विभुरासीत् त्रिविक्रमः।
कस्य वा बन्धनं विष्णुः कृतवांस्तच्च मे वद॥

पुलस्त्य उवाच।

श्रूयतां कथयिष्यामि योऽयं प्रोक्तस्त्रिविक्रमः।
यस्मिन् काले सम्भूत यश्च वञ्चितवानसौ॥

आसीत् धुन्धुरिति ख्यातः कश्यपस्यौरसः सुतः।
दनुगर्भसमुद्भूतो महाबलपराक्रमः ॥
स समाराध्य वरदं ब्रह्माणं तपसासुरः।
अवध्यत्वं सुरैः सर्व्वैः प्रार्थयन् स तु नारद ॥
तद्वरं तस्य च प्रादात् तपसा पङ्कजोद्भवः।
परितुष्टः स च बली निर्ज्जगाम त्रिपिष्टपम् ॥
चतुर्थस्य कलेरादौ जित्वा देवान् सवासवान्।
धुन्धुः शक्रत्वमकरोत् हिरण्यकशिपौ सति ॥
तस्मिन् काले स बलवान् हिरण्यकशिपुस्ततः।
चचार मन्दरगिरौ दैत्यं धुन्धुं समाश्रितः ॥
ततोऽसुरा यथाकामं विहरन्ति त्रिपिष्टपे।
ब्रह्मलोके च त्रिदशाः संस्थिता दुःखसंयुताः ॥
ततोऽमरान् ब्रह्मसदोनिवासिनः
श्रुत्वा च धुन्धुर्दितिजानुवाच ह।
गच्छाम दैत्या वयमप्यत्रस्य
सदो विजेतुं त्रिदशान् सशक्रान् ॥
ते धुन्धुवाक्यन्तु निशम्य दैत्याः
प्रोचुर्न नो विद्यति लोकपाल।
गतिर्यया याम पितामहाजिरं
सुदुर्गमोऽयं परतो हि मार्गः ॥
इतः सहस्रैर्बहुयोजनाख्यै-
र्लोको महर्नाम महर्षिजुष्टः।
येषां हि नासापवनोद्धितेन
दह्यन्ति दैत्याः सहसोच्छितेन ॥
तेषां वचनमाकर्ण्य धुन्धुः प्रोवाच दानवान्।
गन्तुकामः स सदनं ब्रह्मणो जेतुमीश्वरान् ॥
कथन्तु कर्म्मणा केन गम्यते दानवर्षभाः।
कथं तत्र सहस्राक्षः संप्राप्तः सह दैवतैः ॥
ते धुन्धुना दानवेन्द्राः पृष्टाः प्रोचुर्वचोऽधिपम्।
कर्म्म तत्र वयं विद्मः शुक्रस्तद्वेत्त्यसंशयम् ॥
दैत्यानां वचनं श्रुत्वा धुन्धुर्दैत्यपुरोहितम्।
पप्रच्छ शुक्र किं कर्म्म कृत्वा ब्रह्मसदोगतिः ॥
ततोऽस्मै कथयामास दैत्याचार्य्यः कलिप्रियः।
शक्रस्य चरितं श्रीमान् पुरा वृत्ररिपोः किल ॥
शक्रः शतन्तु पुण्यानां क्रतूनामजयत् पुरा।
दैत्येन्द्र! वाजिमेधानां तेन ब्रह्मसदो गतः ॥
तद्वाक्यं दानवपतिः श्रुत्वा शुक्रस्य वीर्य्यवान्।
यष्टुं तुरगमेधानां चकार मतिमुत्तमाम् ॥
आमन्त्र्याहासुरगुरुं दानवांश्चाप्यनुत्तमान्।
प्रोवाच यक्ष्येऽहं यज्ञैरश्वमेधैः सदक्षिणैः ॥
आहूयन्ताश्च निधयश्चाज्ञाप्यन्ताश्च गुह्यकाः।
प्रयामो देविका यत्र गङ्गा प्राचीनवाहिनी ॥
सा हि पुण्या सरिच्छ्रेष्ठा सर्व्वसिद्धिकरी शिवा।
जलं प्राचीनमासाद्य वाजिमेधान् यजामहे ॥
इत्थं सुरारिवचनं निशम्यासुरयाजकः।
बाढ़मित्यब्रवीद्धृष्टो निधयः सन्दिदेश सः ॥
ततो धुन्धुर्देविकायाः प्राचीने पापनाशने।
भार्गवेन्द्रेण शुक्रेण वाजिमेधाय दीक्षितः ॥
ततोऽग्निधूमेन मही सशैला
व्याप्ता दिशः खं विदिशश्च पूर्णाः।
तेनोग्रगन्धेन दिवस्पृशेन
समद्भवो ब्रह्मलोके महर्षैः ॥
तं गन्धमाघ्राय सुरा विषण्णा
जानन्त धुन्धुं हयमेधदीक्षितम्।
ततः शरण्यं शरणं जनार्द्दनं
जग्मुः सशक्रा जगतः परायणम् ॥
प्रणम्य वरदं देवं पद्मनाभं जनार्द्दनम्।
प्रोचुः सर्व्वे सुरगणा भयगद्गदया गिरा ॥
भगवन् देवदेवेश! चराचरपरायण!।
विज्ञप्तिः श्रूयतां विष्णो सुराणामार्त्तिनाशन! ॥
धुन्धुर्नाम्ना सुरपतिर्बलवान् बलदर्पितः।
शुक्रस्य मतमास्थाय सोऽश्वमेधाय दीक्षितः ॥
शतं क्रतूनामिष्ट्वासौ ब्रह्मलोकं महासुरः।
आरोढुमिच्छति बली विजेतुं त्रिदशानपि ॥
तस्मादकालहीनन्तु चिन्तयस्व जगद्गुरो।
उपायं मखविध्वंसे भवामो येन निर्वृताः ॥
श्रुत्वा सुराणां वचनं भगवान्मधुसूदनः।
दत्त्वाभयं महाबाहुः प्रेषयामास सोऽथ तान् ॥
विसृज्य देवताः सर्व्वा ज्ञात्वा जेतुं महासुरम्।
बन्धनाय मतिञ्चक्रे स धुन्धोरध्वरस्य वै ॥
ततः स कृत्वा भगवान् वामनं रूपमीश्वरः।
देहं कृत्वा निरालम्बं काष्ठवद्देविकाजले ॥
चखाम्भस्यंस्तयोभ्यश्चमुक्तकेशो यदृच्छया।
दृष्टोऽथ दैत्यपतिना दैत्यैश्चान्यैः सुरर्षिभिः ॥
ततः कर्म्म परित्यज्य यज्ञियं ब्राह्मणोत्तमाः।
समुत्तारयितुं विप्रमद्रवन्त समाकुलाः ॥
सदस्या यजमानाश्च ऋत्विजश्च महौजसः।
निमज्जमानमुद्धर्त्तुं सर्व्वे तं वामनं द्विजम् ॥
समुत्तार्य्य हसन्तस्ते पप्रच्छुः सर्व्व एव हि।
किमर्थं पतितोऽसीह केन क्षिप्तोऽसि वा वद ॥
तेषामाकर्ण्य वचनं कम्पमानो मुहुर्मुहुः।
प्राह धुन्धुपुरोगांस्तान् श्रूयतामत्र कारणम् ॥
ब्राह्मणो गुणवानासीत् प्रभास इति विश्रुतः।
तस्य पुत्त्रद्वयं जातं मन्दप्रज्ञं सुदुःखितम् ॥
तस्य ज्येष्ठो मम भ्राता कनीयानवरस्त्वहम्।
नेत्रभाल इति ख्यातो ज्येष्ठो भ्राता ततो-
ऽसुराः ॥
मम नाम पिता चक्रे इति भासोऽतिकौतुकात्।
ततः कालेन महता आवयोः स पिता मृतः ॥
तस्यौर्द्धदेहिकं कृत्वा गृहमावां समागतौ।
ततो मयोक्तः स भ्राता विभजामो गृहं वयम् ॥
तेनोक्तो नैव भवतो विद्यते भाग इत्यहम् ॥
कुब्जवामनखञ्जानां क्लीवानां श्वित्रिणामपि।
उन्मत्तानां तथान्धानां धनभागो न विद्यते ॥
एवमुक्तो मया सोऽथ किमर्थं पैतृकाद्गृहम्।
धनार्हभागमर्हामि नाहं न्यायेन केन वै ॥
इत्युक्तवति वाक्येऽसौ भ्राता मे कोपसंयुतः।
समुत्क्षिप्याक्षिपन्नद्यामस्यां मामिति कारणात् ॥
ममास्यां निम्नगायान्तु मध्ये च पुरतो गतः।
कालः संवत्सराख्यस्तु शुभाभिरिह चोहृतः।
के भवन्तश्च संप्राप्ताः सर्व्वे वा बान्धवा इव ॥
ते वामनवचः श्रुत्वा भार्गवा द्विजसत्तमाः।
प्रोचुर्दैत्यपतिं सर्व्वे वामनार्थकरं वचः ॥
इति द्विजानां वचनं श्रुत्वा दैत्यपतिर्व्वचः।
प्राह द्विज ददामीति यावदिच्छसि वै धनम् ॥
तद्वाक्यं दानवपतेः श्रुत्वा देवोऽथ वामनः।
प्राहासुरपतिं धुन्धुं स्वार्थसिद्धिकरं वचः ॥
सोदरेणापि हि भ्रात्रा ह्रियते यस्य सम्पदः।
तस्यावमस्य यद्दत्तं किमन्यो न हरिष्यति ॥
मम प्रमाणमालोक्य मामकञ्च क्रमत्रयम्।
संप्रयच्छस्व दैत्येन्द्र नाधिकं रक्षितुं क्षमः ॥
इत्येवमुक्ते वचने महात्मा
विहस्य दैत्याधिपतिः सऋत्विक्।
प्रादाद्द्विजेन्द्राय पदत्रयं तदा
यदा स नान्यत् जगृहे च किञ्चन ॥
क्रमत्रये तोयमवेक्ष्य दत्तं
महासुरेन्द्रेण विभुर्यशस्वी।
चक्रे ततो लङ्घयितुं त्रिलोकीं
त्रिविक्रमं रूपमनन्तशक्तिः ॥
कृत्वा तु रूपं दितिजांश्च हत्वा
प्रणम्य चर्षीन् प्रथमक्रमेण।
महीं महीध्रैः सहितां सहार्णवां
जहार रत्नाकरपत्तनैर्युताम् ॥
भुवं सनाकं त्रिदशाधिवासं
सोमार्कऋक्षैरभिमण्डितं नभः।
देवो द्वितीयेन जगाम वेगात्
क्रमेण देवप्रियलोकमीश्वरः ॥
क्रमं तृतीयं न यदास्य पूरितं
तदातिकोपाद्दनुपुङ्गवस्य।
पपात पृष्ठे भगवांस्त्रिविक्रमो
मेरुप्रमाणेन तु विग्रहेण ॥
पतता वासुदेवेन दानवोपरि नारद!।
त्रिंशद्द्वयोजनसाहस्री भूमिर्भूता घटीकृता ॥
ततो दैत्यं समुत्पाट्य तस्यां प्रक्षिप्य वेगतः।
वर्षसिक्ताभिरद्भिश्च तां गर्भभूमिमपूरयत् ॥
ततः स्वर्गं सहस्राक्षो वासुदेवप्रसादतः।
सुराश्च सर्व्वे त्रैलोक्यमवापुर्निरुपद्रवाः ॥
भगवानपि दैत्येन्द्रं प्रक्षिप्य सिकतार्णवे।
कालिन्द्यां रूपमाधाय तत्रैवान्तरधीयत ॥”
इति वामने ७५ अध्यायः ॥

वामनः, त्रि, (वामयतीति। वम+णिच्+ल्युः।) अतिक्षुद्रः। तत्पर्य्यायः। न्यङ् २ नीचः ३ खर्व्वः ४ ह्रस्वः ५। इत्यमरः ॥ अनुच्चः ६ अनायतः ७। इति जटाधरः ॥ (यथा, नैषधे। २२। ५७।
“विधिस्तुषारर्त्तुदिनानि कर्त्तुं
कर्त्तं विनिर्म्माति तदन्तभिन्नैः।
ज्योत्स्नीन चेत् तत्प्रतिमा इमा वा
कथं कथं तानि च वामनानि ॥”)

वामनव्रतं, क्लौ, (वामनदेवताकं व्रतम्।) श्रवणद्वादशीकर्त्तव्यो वामनदेवस्य व्रतविशेषः।
अथ श्रीवामनव्रतविधिः।
“नत्वा गुरुमनुज्ञाप्य पश्चान्नियममाचरेत्।
न हि सिद्धिर्गुरोर्भक्तिं नियमञ्च विना फलम् ॥”
नियममन्त्रः।
“एकादश्यां निराहारः स्थित्वा चैवापरेऽहनि।

भीष्मे श्रीवामनानन्त शरणागतवत्सल ॥” इति ॥
“एकादश्यां रजन्यां वा द्वादश्यां वार्च्चयेत् प्रभुम् ।
स्वर्णरूप्यमये पात्रे ताम्रवंशमयेऽपि वा ॥
कुण्डिकां स्थापयेत् शार्ङ्गे छत्रिकापादुकास्तथा ।
शुभाञ्च वैणवीं यष्टिमक्षसूत्रं पवित्रकम् ॥
पुष्पैर्गन्धैः फलैर्धूपैः प्रदीपैश्चार्च्चयेद्धरिम् ।
नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडौदनैः ॥
जागरं निशि कुर्व्वीत गीतवादित्रनर्त्तनैः ।
एवमाराध्य देवेशं प्रभाते विमले सति ॥
आदावर्घ्यं प्रदातव्यं पश्चाद्देवं प्रपूजयेत् ।
नारिकेलेन शुभ्रेण दद्यादर्घ्यञ्च पूर्व्ववत् ॥”
तत्र मन्त्रः ।
“वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ।
गृहाणार्घ्यं मया दत्तं वामनाय नमोऽस्तु ते ॥”
वामनाय अर्घ्यं नमः ।
“मत्स्यं कूर्म्मं वराहञ्च नरसिंहञ्च वामनम् ।
रामं रामञ्च कृष्णञ्च क्रमात् द्वौ बुद्धकल्किनौ ॥
पादयोर्ज्जानुनोर्गुह्ये नाभ्यामुरसि कण्ठयोः ।
भुजयोर्म्मूर्द्ध्नि सर्व्वाङ्गेष्वर्च्चयेदायुधानि च ॥
महापूजां ततः कृत्वा गोमहीं काञ्चनादिकम् ।
शक्त्याचार्य्याय दातव्यं ब्राह्मणेभ्यश्च मन्त्रतः ॥
ब्राह्मणश्चापि मन्त्रेण प्रतिगृह्णाति मन्त्रवित् ।
ददाति मन्त्रतो ह्येव दाता भक्तिसमन्वितः ॥”
तत्र दानमन्त्रः ।
“वामनो बुद्धिदो दाता द्रव्यस्थो वामनः स्वयम् ।
वामनश्च प्रतिग्राही तेन मे वामने रतिः ॥
वामनः प्रतिगृह्णाति वामनोऽपि ददाति च ।
वामनस्तारको द्वाभ्यां तेनेदं वामने नमः ॥”
इति ॥
“एवं कृत्वा विधानेन भोजनं घृतदाम्यकम् ।
पूर्व्वं दद्याद्ब्राह्मणेभ्यः पश्चाद्भुञ्जीत बन्धुभिः ॥
यद्वामनपुराणे च यद्भविष्योत्तरे व्रतम् ।
वामनस्योदितं तस्यानुसाराल्लिखितं त्विदम् ॥”
ब्रह्मवैवर्त्ते ।
“गृहीत्वा नियमं प्रातर्गत्वा नद्योश्च सङ्गमे ।
सौवर्णं वामनं कृत्वा सौवर्णमाषकेण वा ॥
यथाशक्त्याथ वित्तस्य कुम्भोपरि जगत्पतिम् ।
स्वर्णपात्रे स्थापयित्वा मन्त्रैरेतैश्च पूजयेत् ॥
ॐ वामनाय नमः पादौ कटिं दामोदराय च ।
ऊरू श्रीपतये गुह्यं कामदेवाय पूजयेत् ॥
पूजयेज्जगतां पत्युरुदरं विश्वधारिणे ।
हृदयं योगनाथाय कण्ठं श्रीपतये नमः ॥
मुखञ्च पङ्कजाक्षाय शिरः सर्व्वात्मने नमः ।
इत्थं संपूज्य वासोभिराच्छाद्य च जगद्गुरुम् ।
दद्यात् सुश्रद्धया चार्घ्यं नारिकेलादिभिः फलैः ॥
ॐ नमो नमस्ते गोविन्द बुध श्रवणसंज्ञक ।
अघौघसङ्क्षयं कृत्वा प्रेतमोक्षप्रदो भव ॥”
इत्यर्घ्यमन्त्रः ॥
“छत्रोपानद्गोदानं दद्याच्च कमण्डलुम् ।
विशेषेण द्विजाग्र्याय वामनः प्रीयतामिति ॥
दध्योदनसमायुक्तां वारिधानीं प्रदापयेत् ।
पूजयित्वा जगन्नाथं वामनः प्रीयतामिति ॥
यथाशक्त्या च दानानि द्विजाग्र्येभ्यः प्रदापयेत् ।
कुर्य्याज्जागरणं रात्रौ गीतशास्त्रसमन्वितम् ॥
श्रद्धया परया युक्तो निशामर्द्धिमिषेक्षणः ।
प्रभाते भोजयेद्विप्रान् द्वादश्यां पारणं ततः ।
कुर्य्यात् स्वयं श्रद्धया तत् सर्व्वं सफलतां व्रजेत् ॥”
तस्माद्धात्माय तत्रैव ।
“एवं कृते तु कान्तेय व्रतेऽस्मिन् विजयादिने ।
न दुर्लभतरं किञ्चिदिह लोकेऽथवा परे ॥
फलमस्य व्रतस्योक्तं दत्त्वा पित्रोर्नरोत्तमः ।
वंशोद्धारकरो मुक्तिं याति पैत्र्याद्दृणादपि ॥
न पावनतरं किञ्चिदतः परमिहोच्यते ।
विजयाव्रततुल्यञ्च न परं परिपठ्यते ॥”
भविष्योत्तरे च ।
“समाप्ते तु व्रते तस्मिन् यत् पुण्यं तन्निबोध मे ।
चतुर्युगानि राजेन्द्र ! सप्तसप्ततिसङ्ख्यया ॥
प्राप्य विष्णुपुरं राजन् क्रीडते कालमक्षयम् ।
इहागत्य भवेद्राजा प्रतिपक्षभयङ्करः ॥
हस्त्यश्वरथयानानां दाता भोक्ता विमत्सरः ।
रूपसौभाग्यसम्पन्नो दीर्घायुर्निरुजो भवेत् ।
पुत्रपौत्रैः परिवृतो जीवेच्च शरदां शतम् ॥”
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

वामनेत्रं, क्ली, (वर्णन्यासे वामं नेत्रं सूप्यं येन ।) दीर्घईकारः । यथा,—
“ईश्चिमूर्त्तिर्म्महामाया लोलाक्षी वामलोचनम् ।”
इत्यादि वर्णाभिधानम् ॥
अपि च ।
“ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो
बीजन्ते द्वन्द्वमन्यद्विगलितचिकुरे कालिके ये जपन्ति ।”
इति तन्त्रसारे महाकालविरचितं श्यामास्तोत्रम् ॥ (वामचक्षुश्च ॥)

वामलूरः, पुं, (वामं यथा तथा लुनातीति । लू + बाहुलकात् रक् ।) वल्मीकः । इत्यमरः । २ । १ । १४ ॥ (यथा, काशीखण्डे । २२ । ९८ ।
“जटाटवीकोटरान्तःकृतनीडाण्डजाश्च ये ।
प्ररूढवामलूराङ्गाः स्थाणुवद्दास्थिसञ्चयाः ॥”)

वामलोचना, स्त्री, वामे चारुणी लोचने यस्याः । स्त्रीभेदः । इत्यमरः । २ । ६ । ३ ॥ (यथा, हितोपदेशे । २ । १५९ ।
“नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ॥”)

वामवेधशुद्धिः, स्त्री, (वामे प्रतिकूले यो वेधस्तद्विषये शुद्धिर्विशोधनम् । यद्वा, वामेन विपरीतेन वेधेन शुद्धिः ।) स्वराश्यपेक्षया द्वादशचतुर्थनवमगृहस्थो विरुद्धोऽपि चन्द्रः यदि शुक्रशनिकुजजीवार्कयुक्तगृहात् सप्तमगृहे तिष्ठति तदा नराणां अभिलषितफलदाता भवति । यदि तु सितशनिकुजजीवार्कयुक्तगृहात् दशमपञ्चमाष्टमगृहे तिष्ठति तदा नराणां स्वराश्यपेक्षया यथासंख्यं अष्टमपञ्चमद्वितीयगृहगोऽपि चन्द्रः प्रचुरफलदाता भवति । यथा,—
“सितशनिकुजजीवार्कान्त इन्दुर्नराणां
व्ययसुखनवमस्थोऽपीष्टदाता नवैताम् ।
खसुतनिधनगर्भान्मत्स्वकृत्वार्थगोऽपि
प्रचुरशुभफलं स्याद्वामवेधेन शुद्धिः ॥”
वामवेधत्वञ्च दूनगेति एतमर्थेति वक्ष्यमाणवचनाभ्यामेकार्थत्वाद्बोध्यम् ॥ * ॥
अथ दक्षिणवेधवामवेधकथनम् ।
“लाभविक्रमखशत्रुषु स्थितः
शोभनो निगदितो दिवाकरः ।
खेचरैः सुतनयोजलान्त्यगैर्यार्किभिर्यदि न विध्यते तदा ॥
दूनजन्मरिपुलाभखस्थितश्चन्द्रमाः शुभफलप्रदस्तदा ।
स्वात्मजान्त्यन्ततिबन्धुधर्म्मगैर्विध्यते न विबुधैर्यदि ग्रहः ॥
विक्रमाय रिपुगः शुभः कुजः
स्यात्तदान्त्यसुतधर्म्मगैः खगैः ।
वेध विद्ध इनसूनुरप्यसौ
किन्तु घर्म्मरश्मिना न विध्यते ॥
स्वाम्बुशत्रुमतिस्वायगः शुभो
ज्ञस्तदा न खलु विध्यते यदा ।
व्याकजत्रिनवकाद्यनैधनप्रान्त्यगैर्विविधुभिर्नभश्चरैः ॥
स्वायधर्म्मतनयद्यूनस्थितो
नाकनायकपुरोहितः शुभः ।
रिप्फरन्ध्रखजलत्रिगैर्यदा
विध्यते गगनचारिभिर्नहि ॥
व्यासुताष्टमतपोव्ययायगो
विद्ध आस्फुजिदशोभनः स्मृतः ।
नैधनास्ततनुकर्म्मधर्म्मधीलाभवैरिसहजस्थखेचरैः ॥”
इति ज्योतिस्तत्त्वम् ॥

वामा, स्त्री, (वमति सौन्दर्य्यं इति । वम + ज्वलादित्वात् अण् । टाप् । यद्वा, वमति प्रतिकूलमेवार्थं कथयति । यद्वा, वामः कामोऽस्त्यस्या इति अर्श आदिभ्योऽच् इत्यच् ।) सामान्या स्त्री । इत्यमरः । २ । ६ । २ ॥ (यथा, गीतगोविन्दे । १ । ४६ ।
“श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति वामाम् ।
पश्यति सस्मितचारुपरामपरामनुगच्छति रामाम् ॥”)
दुर्गा । यथा,—
“वामं विरुद्धरूपन्तु विपरीतन्तु गीयते ।
वामेन सुखदा देवी वामा तेन मता बुधैः ॥”
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
“बालान्तु बाल्यदाक्षिण्यभावाभ्यामपि पूजयेत् ।
श्मशानभैरवीं देवीमुग्रतारां तथैव च ॥
उच्छिष्टभैरवीं चर्ण्डीं तारां त्रिपुरभैरवीम् ।

एतास्तु वामभावेन यजेत्त्रिपुरभैरवीम्।
सर्व्वत्र पित्रदेवादौ यस्माद्भवति दक्षिणः।
देवी च दक्षिणा यस्मात्तस्मात् दाक्षिण्यमुच्यते।
या पुनः पूज्यमाना तु देवादीनान्तु पूर्व्वतः।
यज्ञभागं स्वयं धत्ते सा वामा तु प्रकीर्त्तिता॥"
इति कालिकापुराणे ७७ अध्यायः॥

वामाक्षि, स्त्री, (वाममक्षि।) वामचक्षुः। (वर्ण-न्यासे न्यस्तं वाममक्षि येन।) दीर्घ ईकारः। यथा,—
"कर्पूरं मध्यमान्त्यस्वरपरिरहितं सेन्दु वामाक्षियुक्तं
बीजन्ते मातरेतत्त्रिपुरहरवधु त्रिःकृतं ये जपन्ति॥"
इत्यादिकर्पूराख्यस्तोत्रम्।

वामाक्षी, स्त्री, (वामे मनोहरे अक्षिणी अस्याः। षच्। ङीष्।) वामलोचना। इति हेमचन्द्रः॥

वामाचारः, पुं, (वामो विपरीतो वेदविरुद्धो वा आचारः।) आचारविशेषः। यथा,—
"पञ्चतत्त्वं खपुष्पञ्च पूजयेत् कुलयोषितम्।
वामाचारो भवेत्तत्र वामा भूत्वा यजेत् पराम्॥"
इत्याचारभेदतन्त्रम्।

तदाचारवतां नरकगमनं यथा,—
"स्वधर्म्मरहिता विप्रा वेदान्यसेविनः सदा।
भ्रष्टाचाराश्च वामाश्च ते यान्ति नरकं ध्रुवम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः॥
तत्प्रशंसा यथा,—
"चत्वारो देवि वेदाद्याः पशुभावे प्रतिष्ठिताः।
वामाद्याश्च आचारा दिव्ये वीरे प्रतिष्ठिताः॥"
इति नित्यातन्त्रम्॥
"सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत्।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम्॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम्।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं नहि॥"
इति कुलार्णवतन्त्रे २ खण्डम्॥ *॥
तदाचारयुक्तस्य निषिद्धकर्म्माणि यथा,—
"न दद्यात् ब्राह्मणो मद्यं महादेव्यै कथञ्चन।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्ष-येत्॥"
तदनुकल्पो यथा। कुलचूडामणौ।
"यत्रासवमवश्यन्तु ब्राह्मणन्तु विशेषतः।
तत्र गुड़ार्द्रकं दद्यात् ताम्रे वा विद्यतेऽथ मधु॥
देव्यास्तु दक्षिणे भागे चक्रपार्श्वे निवेदयेत्।
एतद्द्वयन्तु शूद्रस्य नार्पयेत्तु कदाचन॥
वैश्यस्य माक्षिकं शुद्धं क्षत्रियस्य तु साम्यकम्।
ब्राह्मणस्य गवां क्षीरं ताम्रे वा विद्यतेऽथ मधु।
नारिकेलोदकं कांस्ये सर्व्वेषां द्रव्यशोधनम्॥"
क्षत्रियवैश्ययोस्तु गौड़ी माध्वी च दातव्या तत्र तयोरधिकारात् तदभावे अनुकल्पविधानम्। तथा च।
"गोक्षीरं ब्राह्मणो दद्यात् द्रव्यमान्यच्च बाहुजः।
वैश्यश्च माक्षिकं द्रव्यं शूद्रः पैष्ट्यादिकं पुनः॥"
तेन शूद्रस्य नानुकल्पः॥ *॥ कुलार्णवे।
"जलं क्षीरं घृतं भद्रे मधु मैरेयमेव च।
पैष्ट्यं तदभवं धान्यसम्भवं तक्रनिर्म्मितम्॥
सहकारभवं देवि त्रिविधं बहुभेदकम्।
मादकं धर्म्मसंभेदात् वर्ज्जमासीत् सुलोचने॥
ज्ञानेन संस्कृतन्तत्तु महापातकनाशनम्।
तद्दाने पातकाभावो दिव्यभावविषयं वा॥ *॥
माकन्दफलजं रम्यं द्रव्यं सेव्यं द्विजातिभिः।
अमादकत्वाद्देवेशि ऐन्द्रवं सेवते बुधैः॥"
एतेन क्षत्रियादिभिरमादकं द्रव्यं सेव्यं मादकस्य पापहेतुकत्वमुक्तम्। भैरवतन्त्रे ;
"मद्यं मांसं विना वत्स यत्किञ्चित् कुलसाधनम्।
शक्त्यै दत्त्वा ततः शेषं गुरवे तन्निवेदयेत्।
तदनुज्ञां मूर्द्ध्नि कृत्वा शेषमात्मनि योजयेत्॥"
तेन क्षत्रियादीनां मुख्यदाने अधिकारः। न पाने। यत्तु।
"पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते॥"
तत्तु चतुर्थाश्रमिपरम्॥ *॥ तद्ग्रहणकरणे जातिचिन्तां न कुर्य्यात्।
"मदिरायां मैथुने च जातिचिन्तां न कार-येत्॥"
एतेषां शोधनस्यावश्यकत्वम्। तथा च।
"संशोधनमनाचर्य्य कौलु मद्येषु साधकः।
आचार्य्य सिद्धिहानिः स्यात् क्रुद्धा भवति सुन्दरी॥"
मद्येषु मुख्यानुकल्पेषु॥ *॥ तथा कुलपूजाया-मस्यावश्यकत्वम्। तथा च।
"मधु मांसं विना देवि कुलपूजां समाचरेत्।
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति॥"*॥
अथ मांसादिशोधनम्।
"मांसन्तु त्रिविधं ज्ञेयं जलखेचरभूचरम्।
मांसन्तु त्रिविधं प्रोक्तं देवताप्रीतिकारकम्॥
मत्स्यश्च त्रिविधं देवि उत्तमाधममध्यमम्।
उत्तमं त्रिविधं मत्स्यं शालपाठीनरोहितम्॥
प्रवीणं कण्टकैर्हीनं तैलाक्तं वल्कलैर्युतम्।
देव्याः प्रीतिकरञ्चैव मध्यमं तच्चतुर्विधम्।
क्षुद्राणि तानि सर्व्वाणि अधमानि विदुर्बुधाः॥"
भूचरमांसञ्च।
"गोमेषाश्वतुलायोत्यगोधाजोष्ट्रमृगोद्भवम्।
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारकम्॥"
मांसाभावे अनुकल्पः। समयाचारे।
"लवणार्द्रकपिण्याकतिलगोधूममाषकम्।
लशुनञ्च महादेवि मांसप्रतिनिधिः स्मृतः॥"*॥
मुद्रा तु द्विविधा। कुलार्णवे।
"क्षवरं मण्डलाकारं चन्द्रपद्मनिभं शुभम्।
चारु पद्मगन्धादि शर्करादीश्च पूरितम्।
पूजाकाले देवताया मुद्रैषा परिकीर्त्तिता॥"
यामले।
"भृष्टधान्यादिकं यावत् चर्व्वणीयं प्रकल्पयेत्।
तेषां संज्ञा कृता मुद्रा महामोदप्रदायिनी॥"
तेषां शोधनन्तु स्वतन्त्रतन्त्रे। ॐ प्रतद्विष्णु-रित्यादि मांसम्। त्र्यम्बकमित्यादि मीनम्। तद्विष्णोरित्यादि मुद्राम्॥ *॥ अथ शक्ति-शोधनम्। तत्र भावचूड़ामणौ।
"अदीक्षितकुलासङ्गात् सिद्धिहानिः प्रजायते।
तत्कथाश्रवणं चेत् स्यात् तत्सम्यगमनं यदि।
स कुलीनः कथं देवि पूजयेत् परमेश्वरीम्॥"
श्रीक्रमे। संशोधनमनाचर्य्येति। कौलिकतन्त्रे।
"अभिषेकाद्भवेच्छुद्धिर्म्मन्त्रस्योच्चारबिन्दुभिः।
बलाद्वा यत्नतो वापि अभिषेकं समाचरेत्॥"
अभिषेकमन्त्रस्तु।
"आदौ वाणीं समुच्चार्य्य त्रिपुरायै समुद्धरेत्।
नमःशब्दं समुच्चार्य्य इमां शक्तिं ततो वदेत्॥
पवित्रीकुरु शब्दान्ते मम सिद्धिं कुरु प्रिये।
वह्निजायां समुच्चार्य्य शुद्धिमन्त्रः सुरेश्वरि।
तस्याः कर्णे भेदयुक्ता मायाबीजं समुद्धरेत्॥"
इति शक्तिशोधनम्॥ *॥
ततः शोधितद्रव्यमर्घ्ये क्षिपेत्। श्रीक्रमे अर्घ्य-विधौ।
"पूर्व्वशोधितद्रव्यन्तु गुप्तेनैव च संक्षिपेत्॥"
स्वतन्त्रतन्त्रे।
"आद्यद्रव्यमर्घ्यपात्रे निःक्षिप्य प्रयतः सुधीः।
कुण्डगोलोद्भवं द्रव्यं स्वयम्भुकुसुमं तथा।
अर्घ्यं दत्त्वा महेशानि सर्व्वसिद्धीश्वरो भवेत्॥
सुरया चार्घ्यदानेन योगिनीनां भवेत् प्रियः।
महायोगी भवेद्देवि पीठप्रक्षालितैर्ज्जलैः॥"
भैरवतन्त्रे।
"पञ्चमात् तु परं नास्ति शाक्तानां सुखमोक्षयोः।
केवलैः पञ्चमैर्व्वापि सिद्धो भवति साधकः॥"
तेन पञ्चमकारेण पूजा कर्त्तव्या। इति तन्त्र-सारः॥

वामापीड़नः, पुं, पीलुवृक्षः। इति शब्दचन्द्रिका॥

वामिका, स्त्री, (वामा+स्वार्थे कन्। टापि अत इत्वम्।) चण्डिका। यथा,—
"बहुशस्तु चण्डिका देव्या वामिका मूर्त्तय: स्मृताः।
तन्मध्यात्तु वामिका मूर्त्तिरुक्ता दक्षभैरवी॥
नाम्निदाहं पुरग्राममन्दिरेषु करोत्यलम्।
अपूजिता महालक्ष्मीर्देव्यां तान्तु पूजयेत्॥
वाग्भैरवी सरस्वत्या वामिका मूर्त्तिरीरिता।
तस्या मन्त्रं पुरा प्रोक्तं मुख्यवर्णा तु सा स्मृता॥"
इति कालिकापुराणे ७७ अध्यायः॥

वामिलः, त्रि, (वाम+इलच्।) दाम्भिकः। वामः। इति मेदिनी। ले, १११॥

वामी, स्त्री, शृगाली। बड़वा। (यथा, रघौ। ५।३२।
"अथोष्ट्रवामीशतवाहितार्थं
प्रजेश्वरं प्रीतमना महर्षिः॥")
रासभी। करभी। इति मेदिनी। मे, १०॥

वामोरूः, स्त्री, वामौ सुन्दरौ ऊरू यस्याः। ("संहितप्रफलश्चवामादिश्च।" ४।१।७०।

इति रूढ् ।) नारीविशेषः । इति मुग्धबोध-व्याकरणम् ॥ (यथा, माघे । ८ । २४ ।

"त्रस्यन्ती चलशफरीविघट्टितोरू-
र्वामोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो-
र्लीलाभिः किमु सति कारणे तरुण्यः ॥")

वायकः, पुं, (वयतीति । वे + ण्वुल् ।) समूहः । इति शब्दचन्द्रिका ॥ (तन्तुवायः । यथा, भागवते । ५ । २६ । ३६ ।

"यत्र ह वित्तग्रहं पापपुरुषं धर्म्मराजपुरुषा वायका इव सर्व्वतोऽङ्गेषु सूत्रैः परिवयन्ति ॥")

वायदण्डः, पुं, (वायस्य दण्डः । यद्वा, वायतेऽनेनेति वायः । वाय एव दण्ड इति कर्म्मधारयः ।) वापदण्डः । इति भरतद्विरूपकोषः ॥

वायनं, क्ली, पिष्टकविशेषः । तत्पर्य्यायः । व्रतोपायनम् २ । प्रहेणकम् ३ । इति त्रिकाण्डशेषः ॥

वायवी, स्त्री, (वायोरियमिति । वायु + अण् । ङीप् ।) उत्तरपश्चिमदिक् । इति जटाधरः ॥ (कार्त्तिकेयस्यानुचरमातृगणभेदः । यथा, महाभारते । ९ । ४६ । ३७ ।

"वायव्यश्चाप कौमार्य्यो ब्राह्मी च भरतर्षभ ! ।
वैष्णवी च तथा सौर्य्यो वाराही च महाबलाः ॥")

वायव्यं, त्रि, (वायुर्देवतास्येति । वायु + "वाय्वृतुपित्रुषसो यत् ।" ४ । २ । ३१ । इति यत् ।) वायुसम्बन्धिदिगादि । यथा । विषयुग्मसुपक्रम्य गवाद्यतन्त्रे ।

"वायव्यस्यां नैरृतस्यां न गच्छीयात् कदाचन ।"
इति तिथ्यादितत्त्वम् ॥

(वायुदेवताकपशुहविरादि । यथा, ऋग्वेदे । १० । ९० । ८ ।

"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥"

"वायव्यान् वायुदेवताकान् ।" इति तद्भाष्ये सायणः ॥ * ॥ क्ली, षट्शताधिकचतुर्विंशतिसहस्रश्लोकात्मकवायुनामकमहापुराणम् । यथा, देवीभागवते । १ । ३ । ७ ।

"अयुतं वामनाख्यञ्च वायव्यं षट्शतानि च ।
चतुर्विंशतिः संख्यातः सहस्राणि तु शौनक ! ॥"

अस्त्रविशेषः । यथा, महाभारते ।१।१३६।१९।

"आग्नेयेनासृजद्वह्निं वारुणेनासृजत् पयः ।
वायव्येनासृजद्वायुं पार्जन्येनासृजद्घनान् ॥")

वायसः, पुं, (वयते इति । वय गतौ । "वयश्च ।" उणा० ३ । १२० । इति असच् । स च णित् ।) अगुरुवृक्षः । श्रीवासः । काकः । इति मेदिनी । से, ३८ ॥ (यथा, महाभारते । ३ । २७० । ३१ ।

"श्वश्वकङ्ककाकोलभासगोमायुवायसाः ।
अतृप्यंस्तत्र वीराणां हतानां मांसशोणितैः ॥")

अस्योत्पत्तिर्यथा,—

"अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ।
सम्पातिश्च जटायुश्च प्रभूतौ पक्षिसत्तमौ ।
सम्पातिर्जनयन् शश्वान् काकाः पुत्त्रा जटायुषः ॥"
इति वह्निपुराणे वाराहप्रादुर्भावः ॥ * ॥

अस्य एकाक्षिनाशकारणं यथा,—

मार्कण्डेय उवाच ।

"गते तु भरते तस्मिन् रामः कमललोचनः ।
लक्ष्मणेन सह भ्रात्रा भार्य्यया सीतया सह ।
शाकमूलफलाहारो विचचार महावने ॥
एकदा लक्ष्मणस्तत्र रामदेवः प्रतापवान् ।
चित्रकूटे वने देशे वैदेह्या अङ्कमाश्रितः ॥
सुष्वाप सुसुखेनैव ततः काको दुरात्मवान् ।
सीताभिमुखमभ्येत्य विददार स्तनान्तरम् ।
विदार्य्य वृक्षमारुह्य स्थितोऽसौ वायसाधमः ॥
ततः प्रबुद्धो रामोऽसौ दृष्ट्वा रक्तं स्तनान्तरम् ।
शोकाविष्टान्तु सीतां तामुवाच कमलेक्षणः ॥
किमिदं स्तनान्तरे भद्रे तव रक्तस्य कारणम् ।
इत्युक्ता सा च तं प्राह भर्त्तारं विनयान्विता ॥
पश्य राजेन्द्र वृक्षाग्रे वायसं दुष्टचेष्टितम् ।
येनैतच्च कृतं कर्म्म सुप्ते त्वयि महामते ॥
रामोऽपि दृष्ट्वा तं काकं तस्मिन् क्रोधमथाकरोत् ।
ऐषिकास्त्रं समादाय ब्रह्मास्त्रेणाभिमन्त्रितम् ॥
काकमुद्दिश्य चिक्षेप सोऽवधावद्भयान्वितः ॥
स त्विन्द्रस्य सुतो राजन् इन्द्रलोकं विवेश ह ।
रामास्त्रं प्रज्वलं दीप्तं तस्यानुप्रविवेश वै ॥
विदितार्थश्च देवेन्द्रो देवैः सर्व्वैः समन्वितः ।
निष्क्रामयच्च तं दुष्टं राघवस्यापकारिणम् ॥
ततोऽसौ सर्व्वदेवैस्तु देवलोकाद्बहिष्कृतः ।
पुनः सोऽभ्येत्य रामञ्च राजानं शरणं गतः ॥
त्राहि राम महाबाहो अज्ञानादपकारिणम् ।
इति ब्रुवन्तं स प्राह रामः कमललोचनः ॥
अमोघाय ममास्त्राय अक्षि एकं प्रयच्छ मे ।
ततो जीवसि दुष्टात्मन् मेऽपराधो महान् कृतः ॥
इत्युक्तोऽसौ स्वकं नेत्रमेकमस्त्राय दत्तवान् ।
अस्त्रञ्च नेत्रमेकन्तु भस्मीकृत्य शमं ययौ ॥
ततः प्रभृति सर्व्वेषां काकानामेकनेत्रता ।
चक्षुषैकेन पश्यन्ति हेतुनानेन पार्थिव ! ॥"
इति नरसिंहपुराणे ४३ अध्यायः ॥

(वायससम्बन्धिनि, त्रि । यथा, महाभारते । १२ । ८२ । ७—८ ।

"स काकं पञ्जरे बद्ध्वा विषयं क्षेमदर्शिनः ।
सर्व्वं पर्य्यचरद्युक्तः प्रवृत्तार्थी पुनः पुनः ॥
अधीध्वं वायसीं विद्यां शंसन्ति मम वायसाः ।
अनागतमतीतञ्च यच्च संप्रति वर्त्तते ॥")

वायसादनी, स्त्री, (वायसेन अद्यते इति । अद + कर्म्मणि ल्युट् + ङीप् ।) महाज्योतिष्मती । काकतुण्डी । इति राजनिर्घण्टः ॥

वायसारातिः, पुं, (वायसस्य अरातिः ।) पेचकः । इत्यमरः । २ । ५ । १५ ॥

वायसाह्वा, स्त्री, (वायसस्य आह्वा नाम यस्याः ।) काकनासा । काकमाची । इति राजनिर्घण्टः ॥

वायसी, स्त्री, (वायसानामियमिति तत्प्रियत्वात् । वायस + अण् । ङीष् ।) काकोडुम्बरिका । काकमाची । इति मेदिनी । से, ३८ ॥ महाज्योतिष्मती ॥ काकनासा । काकतुण्डी । इति राजनिर्घण्टः ॥

वायसेक्षुः, पुं, (वायसानामिक्षुरिव प्रियत्वात् ।) काशः । इति राजनिर्घण्टः ॥

वायसोलिका, स्त्री, (वायसोली + स्वार्थे कन् ।) काकोली । इति शब्दरत्नावली ॥

वायसोली, स्त्री, (वायसान् ओलण्डयतीति । ओलडि उत्क्षेपे + "अन्येष्वपि दृश्यते ।" इति डः । शकन्ध्वादित्वात् अस्य लोपः ।) काकोली । इत्यमरः । २ । ४ । १४४ ॥

वायुः, पुं, (वातीति । वा गतिगन्धनयोः + "कृवापाजिमिस्वदिसाध्यशूभ्य उण् ।" उणा० १ । १ । इति उण् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) उत्तरपश्चिमकोणाधिपतिः । वाति यः । वातास इति भाषा । स च पञ्चभूतान्तर्गतभूतविशेषः । तद्विशेषविवरणं यथा । वायवः प्राणापानव्यानोदानसमानाः । प्राणो नाम प्राग्गमनवान् नासाग्रस्थानवर्त्ती । अपानो नाम अवाग्गमनवान् पाय्वादिस्थानवर्त्ती । व्यानो नाम विष्वग्गमनवानखिलशरीरवर्त्ती । उदानः कण्ठस्थानीय ऊर्द्ध्वगमनवानुत्क्रमणवायुः । समानः शरीरमध्यगताशितपीतान्नादिसमीकरणकरः । समीकरणन्तु परिपाककरणं रसरुधिरशुक्रपुरीषादिकरणम् । केचित्तु नागकूर्म्मकृकरदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीत्याहुः । तत्र नागः उद्गिरणकरः । कूर्म्मः निमीलनादिकरः । कृकरः क्षुधाकरः । देवदत्तः जृम्भणकरः । धनञ्जयः पोषणकरः । एतेषां प्राणादिष्वन्तर्भावात् प्राणादयः पञ्चैवेति केचित् ॥ इदं प्राणादिपञ्चकं आकाशादिगतरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते । इदं प्राणादिपञ्चकं कर्म्मेन्द्रियसहितं सत् प्राणमयकोशो भवति । अस्य क्रियात्मकत्वेन रजोंऽशकार्य्यत्वम् । एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्त्तृरूपः । मनोमय इच्छाशक्तिमान् करणरूपः । प्राणमयः क्रियाशक्तिमान् कार्य्यरूपः । इति वेदान्तसारः ॥ तत्पर्य्यायः । श्वसनः २ स्पर्शनः ३ मातरिश्वा ४ सदागतिः ५ पृषदश्वः ६ गन्धवहः ७ गन्धवाहः ८ अनिलः ९ आशुगः १० समीरः ११ मारुतः १२ मरुत् १३ जगत्प्राणः १४ समीरणः १५ नभस्वान् १६ वातः १७ पवनः १८ पवमानः १९ प्रभञ्जनः २० । इत्यमरः ॥ अजगत्प्राणः २१ खश्वासः २२ वाहः २३ धूलिध्वजः २४ फणिप्रियः २५ वातिः २६ नभःप्राणः २७ भोगिकान्तः २८ स्वकम्पनः २९ अक्षतिः ३० कम्पलक्ष्मा ३१ शसीनिः ३२ आवकः ३३ हरिः ३४ । इति शब्दरत्नावली ॥ वासः ३५ सुखाशः ३६ मृगवाहनः ३७ सारः

३८ चपलः ३९ विहगः ४० प्रकम्पनः ४१ नभःस्वरः ४२ निश्वासकः ४३ स्तनूनः ४४ पृषताम्पतिः। इति जटाधरः ॥ * ॥ स च सृष्टिकाले आकाशाज्जातः। यथा। तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुः। इत्यादि तैत्तिरीयश्रुतिः ॥ * ॥ कश्यपाद्दशवायुरदितेः पुत्राः। ते सर्व्वे अप्रजाः। इन्द्रेण देवत्वं प्रापिताः। शरीरान्तर्व्वायुर्भेदेन दशधा। यथा। प्राणः १। तस्य कर्म्म बहिर्गमनम्। अपानः २। तस्य कर्म्म अधोगमनम्। व्यानः ३। तस्य कर्म्म आकुञ्चनप्रसारणादि। समानः ४। तस्य कर्म्म अशितपीतादीनां समं नयनम्। उदानः ५। तस्य कर्म्म ऊर्द्ध्वनयनम्।

"उद्गारे नाग ६ आख्यातः कूर्म्म ७ उन्मीलने स्मृतः।
कृकरः ८ क्षुत्करो ज्ञेयो देवदत्तो९ विजृम्भणे।
न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः१०॥"

इति भागवतटीकायां श्रीधरस्वामी ॥ * ॥

अन्यच्च।

"द्वितीयं मारुतो भूतं त्वगध्यात्मञ्च विश्रुता।
स्प्रष्टव्यमधिभूतञ्च विद्युत्तत्राधिदैवतम् ॥"

इति महाभारते आश्वमेधिकपर्व्व ॥

तस्य गुणाः। यथा,—

"वायोरनियमस्पर्शो वादस्थानं स्वतन्त्रता।
बलं शैघ्र्यञ्च मोक्षञ्च कर्म्म चेष्टात्मता भवः ॥"

इति महाभारते मोक्षधर्म्मः ॥ * ॥

अनियमस्पर्शः। अनुष्णाशीतस्पर्शः १। वादस्थानम्। वागिन्द्रियगोलकानि २। स्वतन्त्रता। गमनादौ ३। बलम् ४। शैघ्र्यम् ५। मोक्षः मलादेः ६। कर्म्म। उत्क्षेपणादि ७। चेष्टा श्वासप्रश्वासादि ८। आत्मता प्राणरूपेण चिदाधित्वम् ९। भवः। जन्ममरणे १०। इति तट्टीका ॥*॥ न्यायमते अस्य गुणादिर्यथा,—

"अपाकजानुष्णाशीतस्पर्शस्तु पवने मतः।
तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ॥
पूर्व्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम्।
प्राणादिस्तु महावायुपर्य्यन्तविषयो मतः ॥"

इति भाषापरिच्छेदः ॥

"वायुं निरूपयति अपाकज इति। अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वात् अपाकज इति। अपाकजस्पर्शस्य जलादावपि सत्त्वात् उक्तमनुष्णाशीत इति। एतेन वायोर्व्विजातीयस्पर्शो दर्शितः। तज्जनकतावच्छेदकं वायुत्वमिति भावः। एष वायुः स्पर्शादिलिङ्गकः। वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते। विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पनेन च वायोरनुमानात्। तथा च वायुर्न प्रत्यक्षस्तथाग्रे वक्ष्यते। वायुर्न्नित्योऽनित्यो वा परमाणुरूपो नित्यस्तदन्योऽनित्यः सावयवश्च। सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात्। अत्र शरीरमयोनिजं पिशाचादीनाम्। देहव्यापीति। शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक्। तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात्। अङ्गसंसर्गिसलिलशैत्यव्यञ्जकव्यजनवातवत्। विषयं दर्शयति प्राणादिरिति। यद्यप्यनित्यो वायुश्चतुर्व्विधः तस्य चातुर्व्विध्यं प्राणादिना इत्युक्तमाकरे। तथापि संक्षेपात् अत्र त्रैविध्यमुक्तं प्राणश्चैक एव हृदादिनानास्थानवशात् मुखनिर्गमादिनानाक्रियावशाच्च नानासंज्ञां लभते इत्यर्थः।" इति सिद्धान्तमुक्तावली ॥*॥ अस्योत्पत्तिर्यथा,—

पुलस्त्य उवाच।

"प्रविश्य जठरं शुक्रो दैत्यमातुः पुरन्दरः।
ददर्शोर्द्ध्वमुखं बालं कटिन्यस्तकरं महत् ॥
तेनैव गर्भं दितिजं वज्रेण शतपर्व्वणा।
चिच्छेद सप्तधा ब्रह्मन् स रुरोद सुविस्वरम् ॥
शक्रोऽपि प्राह मा मूढ़ रुदस्वेति सघर्घरम्।
इत्येवमुक्ता चैकैकं भूयश्चिच्छेद सप्तधा ॥
ते जाता मरुतो नाम देवा दिव्याः शतक्रतोः।
मातुरेवापचारेण बलवीर्य्यपुरस्कृताः ॥"

इति वामने ६८ अध्यायः ॥

"यदमी भवता प्रोक्ता मरुतो दितिसम्भवाः।
तत् केन पूर्व्वमासन् वै मरुन्मार्गेण कथ्यताम् ॥

पुलस्त्य उवाच।

श्रूयतां पूर्व्वमरुतामुत्पत्तिं कथयामि ते।
स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम् ॥
स्वायम्भुवस्य पुत्रोऽभून्मनोर्नाम प्रियव्रतः।
तस्यासीत् सवनो नाम पुत्रस्त्रैलोक्यपूजितः ॥

खमुत्पपाताथ स कामचारी
समं महिष्या वसुमानपुत्रा।
रराम तन्व्या सह कामचारी
ततोऽम्बरात् प्राच्यवतास्य शुक्रम् ॥

पतिभिः समनुज्ञाताः पपुः पुष्करसंस्थितम्।
तं शुक्रं पार्थिवेन्द्रस्य मन्यमानास्तदामृतम् ॥
पीतमात्रेण शुक्रेण पार्थिवेन्द्रोद्भवेन च।
ब्रह्मतेजोविहीनास्ता जाताः पत्न्यस्तपस्विनाम् ॥
सुषुवुः सप्त तनयांस्ते रुदन्तोऽथ भैरवम्।
तेषां रुदितशब्देन सर्व्वमापूरितं जगत् ॥
अथाजगाम भगवान् ब्रह्मलोकात् पितामहः।
समभ्येत्याब्रवीद्बालान् मा रुदध्वं महाबलाः ॥
मरुतो नाम यूयं वै भविष्यध्वं वियच्चराः।
इत्येवमुक्ता देवेशो ब्रह्मा लोकपितामहः ॥
तानादाय वियच्चारी मारुतानादिदेश ह।
ते चासन् मरुतस्त्वाद्या मनोः स्वायम्भुवान्तरे ॥*॥
स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद।
स्वारोचिषस्य पुत्रश्च श्रीमानासीत् क्रतुध्वजः ॥
तस्य पुत्रा भवन् सप्त सप्तार्च्चिःप्रतिमा मुने !।
तपोऽर्थं ते गताः शैलं महामेरुं नभश्चराः ॥
आराधयन्तो ब्रह्माणं पदमैन्द्रमभीप्सवः।
ततो विपश्चिन्नामाथ सहस्राक्षो भयातुरः।
पूतनामप्सरोमुख्यां प्राह नारद वाक्यवित् ॥
यथा हि तपसो विघ्नं तेषां भवति सुन्दरि !।
तथा कुरुष्व मा तेषां सिद्धिर्भवतु वै यथा ॥
इत्येवमुक्ता शक्रेण पूतना रूपशालिनी।
तत्राजगाम त्वरिता यत्र तप्यन्ति ते तपः ॥
आश्रमस्याविदूरे तु नदी मन्दोदवाहिनी।
तस्यां स्नातुं समायाताः सर्व्व एव सहोदराः ॥
सा तु स्नातुं सुचार्व्वङ्गी त्ववतीर्णा महानदीम्।
ददृशुस्ते नृपाः स्नातुं ततश्चुक्षुभिरे मुने ॥
तेषाञ्च प्राच्यवत् शुक्रं तत् पपौ जलचारिणी।
शङ्खिनी ग्राहमुख्यस्य महाशङ्खस्य वल्लभा।
ते वै विनष्टतपसो जग्मू राज्यञ्च पैतृकम् ॥
अथो बहुतिथे काले सा ग्राही शङ्खरूपिणी।
समुद्धृता महाजालैर्म्मत्स्यबन्धेन मानिनी ॥
स तां दृष्ट्वा महाशङ्खीं स्थलस्थां मत्स्यजीवनः।
निवेदयामास तदा क्रतुध्वजसुतेषु वै ॥
तथाभ्येत्य महात्मानो योगिनो योगधारिणः
नीत्वा स्वमन्दिरं सर्व्वे पुरवाप्यां समुत्सृजन् ॥
ततः क्रमाच्छङ्खिनी सा सुषुवे सप्त वै शिशून्।
जातमात्रेषु पुत्रेषु मोक्षभावमगाच्च सा ॥
अमातृपितृका बाला जलमध्यविचारिणः।
स्तन्यार्थिनो वै रुरुदुरथाभ्यागात् पितामहः ॥
मा रुदध्वमिति प्राह मारुतो नाम पुत्रकाः।
यूयं देवा भविष्यध्वं वायवोऽम्बरचारिणः ॥
इत्येवमुक्त्वादाय सर्व्वांस्तान् देवतान् प्रति।
नियोज्य च मरुन्मार्गे वैराजभवनं गतः ॥
एवमासंश्च मरुतो मनोः स्वारोचिषान्तरे ॥*॥
औत्तमे मरुतो ये च तान् शृणुष्व तपोधन।
औत्तमस्यान्ववाये च राजासीन्निषधाधिपः।
वपुष्मानिति विख्यातो वपुषा भास्करोपमः ॥
तस्य पुत्रो गुणश्रेष्ठो ज्योतिष्मान् धार्म्मिकोऽभवत्।
स पुत्रार्थी तपस्तेपे नदीं मन्दाकिनीमनु ॥
तस्य भार्य्या च सुश्रोणी देवाचार्य्यसुता शुभा।
तपश्चरणयुक्तस्य बभूव परिचारिका ॥
तेजोयुक्ता सुचार्व्वङ्गी दृष्टा सप्तर्षिभिर्व्वने।
तां तथा चारुसर्व्वाङ्गीं दृष्ट्वाथ तपसा कृशाम् ॥
पप्रच्छुस्तपसो हेतुं तस्यास्तद्भर्त्तुरेव च।
साब्रवीत्तनयार्थाय आवाभ्यां वै तपःक्रिया ॥
ते चास्यै वरदा ब्रह्मन् जाताः सप्त महर्षयः ॥
व्रजध्वं तनयाः सप्त भविष्यन्ति न संशयः।
युवयोर्गुणसंयुक्ता महर्षीणां प्रसादतः।
इत्येवमुक्ता जग्मुस्ते सर्व्व एव महर्षयः।
सोऽपि राजर्षिरगमत् सभार्य्यो नगरं निजम् ॥
ततो बहुतिथे काले सा राज्ञो महिषी प्रिया।
अवाप गर्भं तन्वङ्गी तस्मान्नृपतिसत्तमात् ॥
गुर्व्विण्यामथ भार्य्यायां ममारासौ नराधिपः।
सा चाप्यारोढुमिच्छन्ती भर्त्तारं वै पतिव्रता ॥
निवारिता तदामात्यैर्न तथापि व्यतिष्ठत।
तस्यामालिङ्ग्य भर्त्तारं चितायामारुहच्च सा ॥
ततोऽग्निमध्यात् सलिले मांसपेश्यपतन्मुने।
साम्भसा सुखशीतेन संसिक्ता सप्तधाभवत्।
तेऽजायन्ताथ मरुत औत्तमस्यान्तरे मनोः ॥*॥

तामसस्यान्तरे ये च मरुतोऽप्यभवन् पुरा ।
तानहं कीर्त्तयिष्यामि गीतनृत्यकलिप्रिय ! ॥
तामसस्य मनोः पुत्त्र ऋतध्वज इति श्रुतः ।
स पुत्त्रार्थी जुहावाग्नौ स्वमांसं रुधिरं तथा ॥
अस्थीनि रोम केशांश्च स्नायुमज्जा यकृद्‌ग्रहणम् ।
शुक्रं च विप्रसो राजा सुतार्थी चेति नः श्रुतम् ॥
सप्तार्च्चिर्मध्याच्च ततः शुक्रपातादनन्तरम् ।
मा मे चिपस्वेत्यसरत् शब्दः सोऽपि नृपो मृतः ॥
ततस्तस्माद्धुतवहात् सप्त सत्तेजसोपमाः ।
शिशवः समजायन्त ते रुदन्तश्च तन्मुने ॥
तेषान्तु ध्वनिमाकर्ण्य भगवान् पद्मसम्भवः ।
समागम्य निवार्य्याथ स चक्रे मरुतः सुतान् ॥
ते त्वाद्यमरुतो ब्रह्मंस्तामसे देवतागणाः ।*।
येऽभवन् वरे तांश्च शृणुष्व त्वं तपोधन ॥
रैवतस्यान्ववाये तु राजासीद्रिपुजिद्वशी ।
रिपुजिन्नाम स ख्यातो न तस्यासीत् सुतः किल ॥
स समाराध्य तपसा भास्करं तेजसां निधिम् ।
अवाप कन्यां सुरतिं तां प्रगृह्य गृहं ययौ ॥
तस्याः पितृगृहे ब्रह्मन् वसत्याश्च पिता मृतः ।
सापि दुःखपरीताङ्गी स्वां तनुं त्यक्तुमुद्यता ॥
ततस्तां वारयामासुरृषयः सप्त मानसाः ।
तस्यामासक्तचित्तास्तु सर्व्व एव तपोधनाः ॥
अपारयन्ती तद्दुःखं प्रज्वालाग्निं विवेश ह ।
ते चापश्यन्त ऋषयस्तच्चित्ताभाविताक्षया ॥
तां मृतां ऋषयो दृष्ट्वा कष्टं कष्टेति वादिनः ।
प्रजग्मुर्व्वनाच्चापि सप्ताजायन्त दारकाः ॥
ते च मात्रा विना भूता रुरुदुस्तान् पितामहः ।
निवारयित्वा कृतवान् लोकनाथो मरुद्गणान् ।
रैवतस्यान्तरे जाता मरुतोऽमी तपोधन ।*।
शृणुष्व कीर्त्तयिष्यामि चाक्षुषस्यान्तरे मनोः ॥
आसीन्मङ्कीति विख्यातो तपस्वी सत्यवाक् शुचिः ।
सप्त सारस्वते तीर्थे सोऽतप्यत महत्तपः ॥
विघ्नार्थं तस्य तपसो देवाः संप्रेरयन् वधूम् ।
सा चाभ्येत्य नदीतीरं चोभयामास भाविनी ॥
ततोऽस्य प्राच्यवच्छुक्रं सप्त सारस्वते जले ।
तां चैवाप्यशपन्मूढ़ां सुनिर्म्माङ्कणिको वधूम् ॥
गच्छालभ्येति मूढ़े त्वं पापस्यास्य फलं महत् ।
विध्वंसयिष्यति हयो भवतीं यज्ञसंसदि ॥
एवं शप्त्वा ऋषिः श्रीमान् जगामाथ स्वमाश्रयम् ।
सरस्वतीभ्यः सप्तभ्यः सप्त वै मरुतोऽभवन् ॥

एते तवोक्ता मरुतः पुरा यथा
जाता वियद्व्याप्तिकरा महर्षे ।
येषां श्रुते जन्मनि पापहानि-
र्भवेच्च धर्म्माभ्युदयो महान् वै ॥”

इति वामने मरुतोत्पत्तिर्नाम ६८ अध्यायः ॥*॥
अन्यच्च ।
“अतः परं प्रवक्ष्यामि मरुतोऽग्नीन् पितॄन् महान् ।
प्रावाहो निवहश्चैव उद्वहः संवहस्तथा ।
विवहः प्रवहश्चैव परिवाहस्तथैव च ।
अन्तरीक्षे च वाह्ये ते पृथङ्मार्गविचारिणः ॥
महेन्द्रप्रविभक्ताङ्गा मरुतः सप्त कीर्त्तिताः ।*।
सूर्य्याग्निश्च शुचिर्नामा वैद्युतः पावकः स्मृतः ॥
निर्म्मथ्य पवमानोऽग्निस्त्रयः प्रोक्ता इमेऽग्नयः ।
अग्नीनां पुत्त्रपौत्त्राश्च चत्वारिंशन्नवैव तु ।
मरुतामपि सर्व्वेषां विज्ञेयाः सप्त सप्तकाः ॥”
इति देवीपुराणे कालव्यवस्थानामाध्यायः ॥*॥
ऊनपञ्चाशद्वायुनामानि यथा,—
“एकज्योतिश्च द्विज्योतिस्त्रिज्योतिर्ज्योतिरेव च ।
एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः ॥
इन्द्रश्च मत्यहश्चैव ततः पतिसकृत्परः ।
मितश्च संमितश्चैव सुमितश्च महाबलः ॥
ऋतजित् सत्यजिच्चैव सुषेणः सेनजित्तथा ।
अन्तिमित्रोऽनमित्रश्च पुरुमित्रोऽपराजितः ॥
ऋतश्च ऋतवाहश्च धर्त्ता च धरुणो ध्रुवः ।
विधारणो नाम तथा देवदेवो महाबलः ॥
ईदृक्षश्चाप्यदृक्षश्च एते दश मिताशिनः ।
व्रतिनः प्रसदृक्षश्च सभरश्च महायशाः ॥
धाता दुर्गो धृतिर्भीमस्त्वभियुक्तस्त्वपात् सहः ।
द्युतिर्वपुरनाधृष्योऽथ वासः कामो जयो विराट् ।
इत्येकोनाश्च पञ्चाशन्मरुतः पूर्व्वसंभवाः ॥”
इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥
वायोर्विकारहेतुर्यथा,—
“व्यायामादपतर्पणात् प्रपतनाद्भङ्गात् क्षया-
ज्जागरात्
वेगानाञ्च विधारणादतिशुचः शैत्यादति-
त्रासतः ।
रूक्षक्षारकषायतिक्तकटुकैरेभिः प्रकोपं व्रजेत्
वायुर्व्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि
च ॥”*॥
तस्य लक्षणम् ।
“आध्मानस्तम्भरौक्ष्यस्फुटनविमथनक्षोभकम्प-
प्रतोदाः
कण्ठध्वंसावसादौ श्रमकविलपनं स्रंसशूल-
प्रभेदाः ।
पारुष्यं कर्णनादो विषयपरिणतिभ्रंशदृष्टि-
प्रमोहा
विस्पन्दोद्वेष्टनादिस्वपनमनशनं ताड़नं पीड़-
नञ्च ॥
नामोन्नामौ विषादो भ्रमपरिमर्दनं जृम्भणं
रोमहर्षो
विक्षेपाक्षेपशोषग्रहणसुषिरता छेदनं वेष्टनञ्च ।
वर्णः श्यावोऽरुणो वा तृड़पि च महती स्वाप-
विश्लेषसङ्गा
विद्यात् कर्म्माण्यमूनि प्रकुपितपवनः स्यात्
कषायो रसश्च ॥”*॥
अन्यच्च ।
“वदनविरसता स्याद्व्वेषः कर्कशत्वं
भवति वपुषि कार्श्यं रात्रिनिद्रानिवृत्तिः ।
त्वचि च परुषता स्यात् स्याच्च वैषम्यमग्ने-
रिति पवनविकारे लक्षणं प्रोक्तमेतत् ॥”*॥
तस्य प्रशमताकारणम् । यथा,—
“रूक्षशीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः ।
विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति ॥
स्निग्धोष्णस्थिरहृष्यबल्यलवणस्वाद्वम्लतैलातप-
स्नानाभ्यञ्जनवस्तिमांसमदिरासंवाहनोन्मर्द्दनैः ।
स्निग्धस्वेदनिरूहणोपशमनः स्नेहोपनाहादिकं
पानाहारविहारभेषजमिदं वातं प्रशान्तं
नयेत् ॥”*॥
ऋतुभेदेन विहारादिना च तस्य चयप्रकोप-
प्रशमनानि यथा,—
“ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति ।
प्रायेणोपशमं याति स्वयमेव समीरणः ॥
शरत्काले वसन्ते च पित्तं प्रावृड्‌ऋतौ कफः ।
चयकोपशमान्दोषा विहाराहारसेवनैः ।
समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्य्ययः ॥”*॥
स च प्राणादिभेदेन पञ्चविधः । यथा,—
“पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥
वायुरायुर्ब्बलं वायुर्व्वायुर्धाता शरीरिणाम् ।
वायुर्व्विश्वमिदं सर्व्वं प्रभुर्व्वायुः प्रकीर्त्तितः ॥
वाह्यमण्डलचक्रेषु यथा राजा प्रशस्यते ।
तथा शरीरमध्येऽपि वायुरेकः परो विभुः ॥
वायुः प्राणादिभेदेन सच पञ्चविधः स्मृतः ।
हृदि प्राणो गुदेऽपानः समानो नाभिमध्यगः ॥
उदानः कण्ठदेशे तु व्यानः सर्व्वशरीरगः ।
योऽनिलो रक्तसञ्चारी स प्राणो नाम देहधृक् ॥
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चैवावलम्बते ।
कुपितः कुरुते रोगान् हिक्काश्वासादिकानपि ॥
उदानो नाम यस्तूर्द्धमुपैति पवनोत्तमः ।
तेन भाषितगीतादिविशेषोऽपि प्रवर्त्तते ॥
ऊर्द्धजत्रुगतान् रोगान् करोति कुपितश्च सः ।
आमपक्वाशयचरः समानोऽग्निसहायवान् ॥
अन्नं पचति तज्जांश्च विकारान् विविनक्ति सः ।
गुल्माग्निसादातीसारान् कुपितश्च करोति सः ॥
पक्वाशयस्थोऽपानस्तु काले कर्षति चाप्यधः ।
वातमूत्रपुरीषाणि शुक्रगर्भार्त्तवानि च ॥
क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ।
सर्व्वदेहचरो व्यानो रससंवाहनोद्यतः ॥
स्वेदासृक्स्रावणश्चापि पञ्चधा चेष्टयत्यपि ।
क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेहगान् ॥
शुक्रदोषाः प्रमेहाश्च व्यानापानप्रकोपजाः ।
युगपत् कुपिताश्चामी देहं हन्युरसंशयः ॥”*॥
तत्प्रकृतिकस्य लक्षणं यथा,—
“अल्पकेशः कृशो रूक्षो वाचालश्चलमानसः ।
आकाशचारी स्वप्नेषु वातप्रकृतिको नरः ॥”*॥
प्राणादिपञ्चवायूनां यथाक्रमं संज्ञान्तरमाह ।
“प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
नागः कूर्म्मश्च कृकरो देवदत्तो धनञ्जयः ॥*॥
प्राणस्तु प्रथमो वायुर्नराणामधिपः प्रभुः ।
नित्यमावापयेत् सर्व्वान् प्राणिनामुरसि स्थितः ॥
निःश्वासोच्छ्वासकश्चैव प्राणो जीवं समाश्रितः ।
प्रयाराङ्गचनो वायुः प्रकाशो धारणस्तथा ॥

प्राणस्त्वेवंविधं कुर्य्यात् प्राणिनां प्राणधारकः ।
प्राणनं कुरुते यस्मात् तस्मात् प्राणः प्रकीर्त्तितः ॥
प्राणो हि भगवान् ईशः प्राणो विष्णुः पितामहः ।
प्राणेन धार्य्यते लोकः सर्व्वं प्राणमयं जगत् ॥
इन्द्रियाणि प्रवर्त्तन्ते यावत् प्राणानिलो हृदि ।
नष्टे न दृश्यते मर्त्त्ये तस्मात् प्राणन्तु रक्षयेत् ॥
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ।
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ॥
अपानयंस्तथाहारं मनुजानां यतोऽधमः ।
शुक्रमूत्रशकृद्वायुरपानस्तेन कीर्त्तितः ॥ * ॥
पीतं भक्षितमाघ्रातं रक्तं पित्तकफानिलान् ।
समं नयति गात्रेषु समानो नाम मारुतः ॥
समानोऽग्निसमीपस्थः कोष्ठे च चरति सर्व्वतः ।
अन्नं गृह्णाति पचति विरेचयति मुञ्चति ॥ * ॥
स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपनः ।
उद्वेजयति मर्म्माणि उदानो नाम मारुतः ॥ * ॥
व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोपनः ।
प्रीतिर्विनाशकश्चायं वाह्नेकोत्पादकस्तथा ॥” * ॥
वायूनां स्थानानि ।
“शिरसो नासिकाप्रान्तमुदानस्थानमुच्यते ।
नाभेः पादतलं यावदपानस्य प्रकीर्त्तितम् ॥
शरीरव्यापको व्यानः प्राणः सकलनायकः ।
उद्गारे नाग इत्युक्तः कूर्म्मश्चोन्मीलने स्थितः ॥
कृकरः क्षुधिते चैव देवदत्तो विजृम्भिते ।
धनञ्जयः स्थितो मेढ्रे मृतस्यापि न मुञ्चति ।
भूतावाप्तिस्ततस्तस्माज्जायतेन्द्रियगोचरात् ॥ * ॥
उत्साहोच्छ्वासनिःश्वासचेष्टाधातुगतिः समाः ।
समो मोक्षो गतिमतां वायोः कर्म्माविकारजम् ॥”
इति सुखबोधः ॥ * ॥
अथ दिग्भववायुगुणाः ।
“प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः ।
वैरस्यगौरवौष्ण्यानि करोत्यप्स्वोषधीषु च ॥
भयोत्पित्तरक्ताद्येषु रागश्वयथुदाहकृत् ।
सन्निपातज्वरश्वासत्वग्दोषार्शोविषक्रिमीन् ।
कोपयेदामवातञ्च घनसंघातकारणम् ॥
दाक्षिणो मारुतो बल्यश्चक्षुष्यः शस्त्रघातकः ।
मधुरश्चाविदाही च कषायानुरसो लघुः ॥
रक्तपित्तप्रशमनो न च मारुतकोपनः ।
शष्पदादिकीटानां जनकः प्राणकारकः ॥
पाश्चिमोऽग्निवपुर्वर्णबलारोग्यविवर्द्धनः ।
कषायः शोषणः स्वर्य्यो रोचनो विशदो लघुः ॥
अपां लघुत्वशैत्यवैमल्यकारकः ।
सर्व्वद्रव्येष्वभिव्यक्तप्रभावरसवीर्य्यकृत् ।
व्रणसंरोपणस्तृष्णो दाहशोषक्लमापहः ॥
औत्तरो मारुतः स्निग्धो मृदुर्म्मधुर एव च ।
कषायानुरसः शीतः सर्व्वदोषप्रकोपणः ॥
क्षीणक्षतविषार्त्तानां हितो दाहक्लमापहः ।
शीताधिकः समीहारः सविद्युत्स्तनयित्नुमान् ।
विश्ववायुरनायुष्यः प्राणिनां नैकदोषकृत् ।
सर्व्वर्त्तुनिन्दको हन्ता क्षयोत्पातपुरःसरः ॥” * ॥

व्यजनवायुगुणाः ।
“मूर्च्छादाहतृषास्वेदश्रमघ्नो व्यजनानिलः ।
तालवृन्तमयो वातस्त्रिदोषशमनो लघुः ॥
वंशव्यजनजो वातो रूक्षोष्णो वातपित्तदः ।
वालव्यजनमोजस्यं मक्षिकादीन् व्यपोहति ।
मायूरा वस्त्रजा वैत्रा वाता दोषत्रयापहाः ॥”
इति राजवल्लभः ॥ * ॥
अपि च । तत्र वायोः स्वरूपमाह ।
“दोषधातुमलादीनां नेता शीघ्रः समीरणः ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥”
नेता स्थानान्तरे प्रापयिता । शीघ्रः आशुकारी । अन्यच्च ।
“उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्त्तनैः ।
सम्यग्गत्या च धातूनामिन्द्रियाणाञ्च पाटवैः ॥
अनुगृह्णात्यविकृतो हृदयेन्द्रियचित्तधृक् ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥
स्वरो मृदुर्योगवाही संयोगादुभयार्थकृत् ।
दाहकृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात् ॥
विभागकरणाद्वायुः प्रधानं दोषसंग्रहे ।
पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ।
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥”
एको वायुः पित्तवच्छास्त्रमस्थानकर्म्मभेदैः पञ्चविधः ॥ * ॥ तेषां वायूनां नामान्याह ।
“उदानस्तदनु प्राणः समानोऽपान एव च ।
व्यानश्चेतानि नामानि वायोः स्थानप्रभेदतः ॥”
अथोदानादीनां स्थानान्याह ।
“कण्ठे हृदि तथाधस्तात् कोष्ठवह्नेर्मलाशये ।
सकलेऽपि शरीरेऽसौ क्रमेण पवनो वसेत् ॥”
अथ तेषां कर्म्माण्याह ।
“उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः ।
तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः ।
ऊर्द्ध्वजत्रुगतान् रोगान् विदधाति विशेषतः ॥
यो वायुः प्राणनामासौ मुखं गच्छति देहधृक् ।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ॥
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ।
आमपक्वाशयचरः समानो वह्निसङ्गतः ॥
सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि ॥”
तज्जानित्याह अन्नजान् । रसमलमूत्रादीन् पृथक्करोतीत्यर्थः ।
“स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि ।
पक्वाशयालयोऽपानः काले कर्षति चाप्ययम् ॥
समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः ।
क्रुद्धस्तु कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ।
शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् ॥”
स च ।
“कृत्स्नदेहचरो व्यानो रससंवहनो यतः ।
स्वेदासृक्स्रावणश्चापि पञ्चधा चेष्टयत्यपि ॥
गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः ।
प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् ॥

प्रस्यन्दनं चोद्वहनं पूरणञ्च विरेचनम् ।
धारणञ्चेति पञ्चेताश्चेष्टाः प्रोक्ता नभस्वतः ॥
क्रुद्धः स कुरुते रोगान् प्रायशः सर्व्वदेहगान् ।
युगपत् कुपिता एते देहं भिन्द्युरसंशयम् ॥”
देहं भिन्नं कुर्य्युर्मारयेयुरित्यर्थः । इति भावप्रकाशः ॥ * ॥ (असुरविशेषः । यथा, हरिवंशे । २ । ८५ ।
“दीर्घजिह्वोऽर्कनयनो मृदुचापो मृदुप्रियः ।
वायुर्गरिष्ठो नमुचिः शम्बरो विजयो महान् ॥”)
वायुकेतुः, स्त्री, (वायुः केतुर्ध्वजो वाहनं वा यस्याः ।) धूलिः । इति हारावली । १५८ ॥
वायुगण्डः, पुं, अजीर्णः । इति त्रिकाण्डशेषः ॥
वायुगुल्मः, पुं, (वायुना कृतो गुल्म इव ।) अम्भसां भ्रमः । इति त्रिकाण्डशेषः ॥
वायुदारुः, पुं, (वायुना दीर्य्यते इति । दॄ + उण् ।) मेघः । इति त्रिकाण्डशेषः ॥
वायुपुत्त्रः, पुं, (वायोः पुत्त्रः ।) भीमः । इति धनञ्जयः ॥ हनूमान् । यथा,—
“हनूमानञ्जनासूनुर्वायुपुत्त्रो महाबलः ।”
इति तस्य द्वादशनामस्तोत्रम् ॥
वायुफलं, क्ली, (वायुना फलति प्रतिफलतीति । फल् + अच् ।) शक्रधनुः । (वायोः फलमिव ।) करका । इति मेदिनी । ले, १६४ ॥
वायुभक्ष्यः, पुं, (वायुर्भक्ष्योऽस्येति ।) सर्पः । इति राजनिर्घण्टः ॥ वातभक्षके, त्रि ॥ (यथा, गो॰ रामायणे । ३ । १५ । १२ ।
“स हि तेपे तपस्तीव्रं मन्दकर्णिर्महामुनिः ।
दशवर्षसहस्राणि वायुभक्ष्यः शिलासनः ॥”)
वायुवर्त्म, [न्] क्ली, (वायोर्वर्त्म ।) आकाशः । इति शब्दचन्द्रिका ॥
वायुवाहः, पुं, (वायुना उह्यते इति । वह् + घञ् ।) धूमः । इति हेमचन्द्रः । ४ । १६६ ॥
वायुवाहिनी, स्त्री, (वायुं वहतीति । वह् + णिनिः । ङीप् ।) वायुसञ्चारिणी शिरा । इति वैद्यकम् ॥
वायुषः, पुं, मत्स्यविशेषः । कालवायुषपोना इति भाषा । तस्य गुणाः ।
“वायुषो बृंहणो वृष्यो मधुरो धातुवर्द्धनः ॥”
इति राजवल्लभः ॥
वायुसखः, पुं, (वायोः सखा । “राजाहःसखिभ्यष्टच् ।” ५ । ४ । ९१ । इति टच् ।) अग्निः । इति भरतः ॥
वायुसखा, [खि] पुं, (वायुः सखा यस्येति विग्रहे टजभावात् । “अनङ् सौ ।” ७ । १ । ९३ । इति अनङादेशः ।) अग्निः । इत्यमरः ।१।१।५८॥
वाय्वास्पदं, क्ली, (वायूनामास्पदं सञ्चरणस्थानम् ।) आकाशः । इति धनञ्जयः ॥
वार्, क्ली, (वारयतीति । वृञ् + णिच् + क्विप् ।) जलम् । इत्यमरः । १ । १० । ३ ॥ (यथा, भागवते । १० । ३३ । २२ ।
“गन्धर्व्वपालिभिरनुद्रुत आविशद् वाः
श्रान्तो गजीभिरिभराडिव भिन्नसेतुः ॥”)

वारं, क्ली, (वार्य्यतेऽनेनेति । वृ+णिच्+घञ् ।) मदिरापात्रम् । इति हेमचन्द्रः ॥

वारंवारं, अ, पुनःपुनः । यथा । वारंवारं मुहुः शश्वदिति शब्दरत्नावली ॥

वारः, पुं, (वारयति व्रियते वेति । वृ+णिच्+अच् । वृ+घञ् वा ।) समूहः । अवसरः । इत्यमरः ॥ (यथा, महाभारते ।१।१६१।७ ।
"एकैकश्चापि पुरुषस्तत्प्रयच्छति भोजनम् ।
स वारो बहुभिर्वर्षैर्भवत्यसुतरो नरैः ॥")
सूर्य्यादिवासरः । द्वारः । हरः । कुब्जवृक्षः । क्षणः । इति मेदिनी । रे, ६५ ॥ * ॥ अथ वाराणां संज्ञा ।
"चरः सौम्यो गुरुः क्षिप्रो मृदुः शुक्रो रविर्ध्रुवः ।
शनिश्च दारुणो ज्ञेयो भौम उग्रः शशी समः ॥
चरक्षिप्रैः प्रयातव्यं प्रवेष्टव्यं मृदुध्रुवैः ।
दारुणोग्रैश्च योद्धव्यं क्षत्रियैर्जयकाङ्क्षिभिः ॥
नृपाभिषेकोऽग्निकार्य्यं सूर्य्यवारे प्रशस्यते ।
सोमे तु लेपयानञ्च कुर्य्याच्चैव गृहादिकम् ॥
सेनापत्यं शौर्य्ययुद्धं शस्त्राभ्यासः कुजे तथा ।
सिद्धिकार्य्यञ्च मन्त्रञ्च यात्रा चैव बुधे स्मृता ॥
पठनं देवपूजा च वस्त्राद्याभरणं गुरौ ।
कन्यादानं गजारोहः शुक्रे स्यात् समयः स्त्रियाः ।
स्थाप्यं गृहप्रवेशश्च गजबन्धः शनौ शुभः ॥"
इति गारुडे ६१ अध्यायः ॥
सावनदिनवद्वारप्रवृत्तिः सूर्य्योदयावधिरेव । सूर्य्यसिद्धान्ते ।
"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा ।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिताः ॥"
अत्र दिनाधिपस्य रव्यादेर्भोग्यं दिनं वाररूपं सावनगणनोक्तं व्यवहारोऽपि तादृगेव । तिथिविवेकेऽपि । भवतु वारयोगे वस्तुतिथेग्रहणं तस्य दिनद्वयेऽसम्भवादित्युक्तम् । सावनदिनमाह सूर्य्यसिद्धान्तः ।
"उदयादोदयं भानोर्भौमसावनवासराः ॥"
भौमेति पित्र्यादिदिनव्यावृत्त्यर्थम् । यत्तु रेखापूर्ब्बपरयोरित्यादिना ज्योतिषे वारप्रवृत्तिरुक्ता तज्ज्योतिःशास्त्रोक्तकालहोरादिज्ञापनार्थमिति ज्योतिस्तत्त्वे बहुधा विवृतम् ।
"नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः ।
उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥
येयत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ॥"
इति विष्णुपुराणात् सूर्य्यदर्शनयोग्यकालादेव वारघटककर्म्मसु स एव कालः । इति ज्योतिस्तत्त्वम् ॥ * ॥ अथ शोभनवाराः ।
"रविः सोमो मङ्गलश्च बुधो जीवः सितः शनिः ।
एतेषां नामतो वारा विख्याताः सर्व्वकर्म्मसु ॥
सितेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥"
इति ज्योतिःसागरः ॥
अथ वारवेला ।
"कृतसुनियमशरमङ्गल-
दामर्तुषु भास्करादियामार्द्धे ।
प्रभवति हि वारवेला
न शुभाशुभकार्य्यकरणाय ॥"
अथ कालवेला ।
"कालस्य वेला रवितः शराग्नि-
कालानलागाम्बुधयो गजेन्दू ।
दिने निशायाम्तुवेदनेत्र-
नगेषु रामा विधुदन्तिनौ च ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
तयोर्व्वर्ज्यत्वं यथा,—
"रवौ वर्ज्यं चतुःपञ्च सोमे सप्तद्वयं तथा ।
कुजे षष्ठद्वयञ्चैव बुधे बाणतृतीयकम् ॥
गुरौ सप्ताष्टकं चैव त्रिचत्वारि च भार्गवे ।
शनावाद्यञ्च षष्ठञ्च शेषञ्च परिवर्ज्जयेत् ॥ * ॥
रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम् ।
शनावाद्यं तथा चान्त्यं रात्रौ कालं विवर्जयेत् ॥"
इति सारसंग्रहः ॥ * ॥
अथ स्त्रीणां प्रथमरजस्वलायां वारफलम् ।
"आदित्ये विधवा नारी सोमे चैव पतिव्रता ।
वेश्या मङ्गलवारे च बुधे सौभाग्यमेव च ॥
बृहस्पतौ पतिः श्रीमान् शुक्रे पुत्त्रवती भवेत् ।
शनौ वन्ध्या तु विज्ञेया प्रथमस्त्री रजस्वला ॥"
इति मथुरेशकृतसारसंग्रहः ॥
(बालः । यथा, ऋग्वेदे । २ । ४ । ४ ।
"वियोभरिभ्रदोषधीषु जिह्वा
मत्यो न रथ्यो दोधवीति वारान् ॥"
"रथ्यो रथार्होऽत्योन वाजी यथा वारान् दंशवारणसाधनान् वालान् दोधवीति कम्पयति ।"
इति तद्भाष्ये सायणः ॥ वरणीये, त्रि, । यथा, ऋग्वेदे । १ । १२८ । ६ ।
[दृखति ॥"
"विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारान्
"वारं सर्व्वैर्वरणीयम् ॥" इति तद्भाष्ये सायणः ॥)

वारकं, क्ली, (वारयतीति । वृ+णिच्+ण्वुल् ।) कष्टस्थानम् । इति हारावली । १२८ ॥ ह्रीवेरम् । इति हेमचन्द्रः । ४ । २२४ ॥

वारकः, पुं, (वृ+णिच्+ण्वुल् ।) अश्वविशेषः । इति विश्वः ॥ अश्वगतिः । निषेधके, त्रि । इति मेदिनी । के, १३१ ॥ (यथा, महाभारते ।१२। ३२१ । ३६ ।
"पुरा सम्मूलमाश्वेव प्रभुर्हरत्यदुःखवित् ।
तवेह जीवितं यमो न चास्ति तस्य वारकः ॥")

वारकी, [न्] पुं, (वारकोऽस्यस्येति । इनिः ।) चित्राश्वः । शत्रुः । पर्णजीवी । पयोधिः । इति मेदिनी । ने, १६५ ॥

वारकीरः, पुं, (वारो वरणीयः कीरः शुक इव । यद्वा, वारे अवसरे किरति कौतुकवाक्यमिति । कॄ+कः । निरुक्तलक्षणो दीर्घः । यद्वा, वारे अवसरे कीलति बध्नाति कौतुकार्थं रत्या प्रेम्णा वा । कील+कः । लस्य रत्वम् ।) श्यालकः । इति त्रिकाण्डशेषः ॥ वारग्राही । वाडवः । यूका । वेणिवेधिनी । नीराजितहयः । इति मेदिनी । रे, २८८ ॥

वारङ्कः, पुं, पक्षी । इति त्रिकाण्डशेषः ॥

वारङ्गः, पुं, (वारयतीति व्रियते इति वा । वृ+"वृणोतेर्ह्रिस्व ।" उणा० १ । १२१ । इति अङ्गच् । धातोर्ह्रिस्वः ।) खड्गादिमुष्टिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ मुट् इति बाँट इति च भाषा ॥ (यथा, सुश्रुते । १ । ७ ।
"तत्र स्वस्तिकयन्त्राणि ****न्येऽङ्कुशवदाकृतवारङ्गाणि अस्थिविनष्टशल्योद्धरणार्थमुपदिश्यन्ते ॥")

वारटं, क्ली, (वार् जलमटति प्राप्नोतीति । अट्+अच् ।) क्षेत्रम् । इति त्रिकाण्डशेषः । क्षेत्रसमूहः । इति शब्दरत्नावली ॥

वारटा, स्त्री, (वारि जले अटतीति । अट्+अच्+टाप् ।) हंसी । इति हेमचन्द्रः ।४।३६३॥

वारणं, क्ली, (वृ+णिच्+ल्युट् ।) प्रतिषेधः । इति मेदिनी । णे, ६६ ॥ (यथा, हरिवंशे ।१८०।४५॥
"अस्त्राणां वारणार्थाय वासुदेवोऽप्यमुञ्चत ॥")
हस्तिवारणम् । इति जटाधरः ॥ * ॥ दानकाले वारणनिषेधो यथा,—
"न देवगुरुविप्राणां दीयमानन्तु वारयेत् ।
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्ज्जयेत् ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥

वारणः, पुं, (वारयति परबलमिति । वृ+ल्युः ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, कुमारे । ५ । ७० ।
"इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्य्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥")
तनुत्रम् । वारवाणः । इति शब्दरत्नावली ॥ (यथा, महाभारते । ४ । ४० । २ ।
"वारणा यस्य सौवर्णाः पृष्ठे भासन्ति दंशिताः ।
सुपार्श्वं सुग्रहञ्चैव कस्यैतद्धनुरुत्तमम् ॥"
वारि जले रणति चरतीति । वार्+रण+अच् । जलजाते, त्रि । यथा, हरिवंशे ।३१।४८॥
"ततो वैभाण्डकिस्तस्य वारणं शक्रवारणम् ।
अवतारयामास महीं मन्त्रैर्वाहनमुत्तमम् ॥"
"वारि जले रणति चरतीति वारणः समुद्रोद्भव इत्यर्थः ।" इति तट्टीकायां नीलकण्ठः ॥)

वारणबुषा, स्त्री, (बुष्यते इति । बुष उत्सर्गे+कः । वारणानां बुषा । यद्वा, वारणान् पुष्णातीति । पुष+कः । पृषोदरादित्वात् पस्य वः ।) कदली । इत्यमरः । २ । ४ । ११३ ॥

वारणवल्लभा, स्त्री, (वारणानां वल्लभा प्रिया ।) कदलीवृक्षः । इति त्रिकाण्डशेषः ॥

वारणसी, स्त्री, (वरणा च असी च नदीद्वयं तस्य अदूरे भवा । "अदूरभवश्च ।" ४।२।७० । इत्यण् । ङीप् । पृषोदरादित्वात् साधुः ।) वाराणसी । काशी । इति हेमचन्द्रः ॥

वारणीयं, त्रि, (वृ+णिच्+अनीयर् ।) वारणयोग्यम् । वृञ्धातोः ण्यन्तादनीयप्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे ।५७।१।

"अवारणीयं रिपुभिर्वारणीयं करं गुम: ।
हेरम्बस्य सचिन्दूरमसिं दूरमपच्छिदम् ॥")

वारत्रं, क्ली, चर्म्मबन्धनी । इति केचित् ॥

वारवधू:, स्त्री, (वाराणां जनसमूहानां वधू: ।) वारमुख्या । इति हेमचन्द्र: । ३ । १९७ ॥ (यथा, आर्य्यासप्तशत्याम् । ३१८ ॥

"निजगात्रनिर्व्विशेषस्थापितमपि सारमखिल-
मादाय ।
निर्म्मोकश्च भुजङ्गी मुञ्चति पुरुषश्च वारवधू: ॥")

वारबाण:, पुं, क्ली, (वारं वारणीयं बाणं यस्मात् ।) कञ्चुक: । इत्यमर: । २ । ८ । ६३ ॥ (यथा, माघे । १५ । ८४ ।

"पीनकुचतटनिपीड़दल-
दरवारबाणसुरसा जिजिङ्गिरे ॥")

वारबुषा, स्त्री, (वारान् बालकान् पुष्णातीति । पुष् + क: । पृषोदरादित्वात् पस्य ब: ।) कदली । इति शब्दरत्नावली ॥

वारमुख्या, स्त्री, (वारेषु वेश्यासमूहेषु मुख्या श्रेष्ठा ।) जनै: सत्कृता वेश्या । इत्यमर: । २ । ६ । १९ ॥ (यथा, भागवते । १ । ११ । २० ।

"वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुका: ॥")

वारयिता, पुं, (वारयति दुर्नीतेरिति । वृ + णिच् + तृच् ।) पति: । इति हलायुध: ॥

वारला, स्त्री, (वारं लातीति । ला + क: ।) वरटा । हंसी । इति हेमचन्द्र: । ४ । ३९३ ॥

वारलीक:, पुं, बल्वजा । इति शब्दरत्नावली ॥ बाबुइ इति ख्यात: ॥

वारवाणि:, पुं, (वारं शब्दसमूहं वणते इति । वण + इण् ।) वंशीवादक: । इति त्रिकाण्ड-शेष: ॥ उत्तमगायक: । इति शब्दरत्नावली ॥ धर्म्माध्यक्ष: । संवत्सर: । इत्यजयपाल: ॥ एत-न्मते पवर्गीयादि: ॥

वारवाणि:, स्त्री, (वारे अर्थदानावसरे वाणि: प्रियालापो यस्या: ।) वेश्या । इति त्रिकाण्ड-शेष: ॥

वारवाणी, स्त्री, (वारवाणि + पक्षे ङीष् ।) वार-मुख्या । इति शब्दरत्नावली ॥

वारविलासिनी, स्त्री, (वाराणां जनसमूहानां विलासिनी स्त्री । यद्वा, वारान् विलासयतीति । वि + लस + णिच् + णिनि: । ङीप् ।) वेश्या । इति शब्दरत्नावली ॥ (यथा, कथासरित्-सागरे । १२ । ७८ ।

"अस्तीह मथुरा नाम पुरी कंसारिजन्मभू: ।
तस्यां रूपणिकेत्यासीत् ख्याता वारविला-
सिनी ॥")

वारवृषा, स्त्री, (वारान् हस्तिसमूहान् वर्षतीति । वृष + क: । टाप् । हस्तिभक्ष्यत्वेनास्यास्तथा-त्वम् ।) कदली । इति शब्दरत्नावली ॥

वारसुन्दरी, स्त्री, (वाराणां नरसमूहानां सुन्दरी ।) वेश्या । इति हारावली । १४४ ॥

वारसेवा, स्त्री, (वारे अवसरे सेवा ।) वेश्यानां क्रम: । तासां गण: । इति जटाधर: ॥

वारस्त्री, स्त्री, (वाराणां जनसमूहानां स्त्री ।) वेश्या । इत्यमर: । २ । ६ । १९ ॥

वारांनिधि:, पुं, (वारां जलानां निधि: । अलुक् समास: ।) समुद्र: । इति शब्दरत्नावली ॥

वाराणसी, स्त्री, (वरणा च असी च । तयोर्नद्यो-रदूरे भवा । "अदूरभवश्च ।" ४ । २ । ७० । इत्यण् । ङीप् । पृषोदरादित्वात् साधु: ।) अस्या निरुक्तिर्यथा,—

"वरणासी च नद्यौ द्वे पुण्ये पापहरे उभे ।
तयोरन्तर्गता या तु सैषा वाराणसी स्मृता ॥")

मोक्षदपुरीविशेष: । बनारस् इति हिन्दी भाषा । तत्पर्य्याय: । वारणसी २ काशी ३ शिवपुरी ४ । इति हेमचन्द्र: ॥ जित्वरी ५ तप:स्थली ६ वरणसी ७ तीर्थराजी ८ काशिका ९ । इति शब्दरत्नावली ॥ तस्या माहात्म्यं यथा,—

ईश्वर उवाच ।

"परं गुह्यतमं क्षेत्रं मम वाराणसी पुरी ।
सर्व्वेषामेव भूतानां संसारार्णवतारिणी ॥
तत्र भक्ता महादेवि ! मदीयं व्रतमाश्रिता: ।
निवसन्ति महात्मान: परं नियममास्थिता: ॥
उत्तमं सर्व्वतीर्थानां स्थानानामुत्तमञ्च यत् ।
ज्ञानानामुत्तमं ज्ञानं अविमुक्तपुरं मम ॥
स्थानान्तरं पवित्राणि तीर्थान्यायतनानि च ।
श्मशानसंस्थितान्येव दिव्यभूमिगतानि च ॥
भूर्लोके नैव संलग्नमन्तरीक्षे ममालयम् ।
अमुक्तास्तन्न पश्यन्ति मुक्ता: पश्यन्ति चेतसा ॥
श्मशानमेतद्विख्यातमविमुक्तमिति श्रुतम् ।
कालो भूत्वा जगदिदं संहराम्यत्र सुन्दरि ! ॥
देवीदं सर्व्वगुह्यानां स्थानं प्रियतरं मम ।
मद्भक्तास्तत्र गच्छन्ति मामेव प्रविशन्ति ते ॥
दत्तं जप्तं हुतं चेष्टं तपस्तप्तं कृतञ्च यत् ।
ध्यानमध्ययनं ज्ञानं सर्व्वं तत्राक्षयं भवेत् ॥
जन्मान्तरसहस्रेषु यत् पापं पूर्व्वसञ्चितम् ।
अविमुक्तं प्रविष्टस्य तत्सर्व्वं व्रजति क्षयम् ॥
ब्राह्मणा: क्षत्त्रिया वैश्या शूद्रा ये वर्णसङ्करा: ।
स्त्रियो म्लेच्छाश्च ये चान्ये संकीर्णा: पाप-
योनय: ॥
कीटा: पिपीलिकाश्चैव ये चान्ये मृगपक्षिण: ।
कालेन निधनं प्राप्ता: अविमुक्ते वरानने ! ॥
चन्द्रार्द्धमौलयस्त्र्यक्षा महावृषभवाहना: ।
शिवे मम पुरे देवि ! जायन्ते तत्र मानवा: ॥
नाविमुक्ते मृत: कश्चिन्नरकं याति किल्बिषी ।
ईश्वरानुगृहीता हि सर्व्वे यान्ति परां गतिम् ॥
मोक्षं सुदुर्लभं मत्वा संसारञ्चातिभीषणम् ।
अश्मना चरणौ हत्वा वाराणस्यां वसेन्नर: ॥
दुर्लभा तपसा चापि मृतस्य परमेश्वरि ! ।
यत्र तत्र विपन्नस्य गति: संसारमोक्षणी ॥
प्रसादाज्जायते ह्येतन्मम शैलेन्द्रनन्दिनि ! ।
अप्रबुद्धा न पश्यन्ति मम मायाविमोहिता: ॥
अविमुक्तं न पश्यन्ति मूढ़ा ये तमसावृता: ।
विण्मूत्ररेतसां मध्ये तेषां वास: पुन: पुन: ॥
हन्यमानोऽपि यो विद्वान् वसेद्विघ्नशतैरपि ।
स याति परमं स्थानं यत्र गत्वा न शोचति ॥
जन्ममृत्युजरायुक्तं परं यान्ति शिवालयम् ।
अपुनर्मरणानां हि सा गतिर्मोक्षकाङ्क्षिणाम् ॥
यां प्राप्य कृतकृत्य: स्यादिति मन्यन्ति पण्डिता: ।
न दानैर्न तपोभिश्च न यज्ञैर्नापि विद्यया ॥
प्राप्यते गतिरुत्कृष्टा या विमुक्ते तु लभ्यते ।
नानावर्णा विवर्णाश्च चाण्डालाद्या जुगुप्सिता: ॥
किल्बिषै: पूर्णदेहा ये विशिष्टै: पातकैस्तथा ।
भेषजं परमं तेषामविमुक्तं विदुर्ब्बुधा: ॥
अविमुक्तं परं ज्ञानमविमुक्तं परं पदम् ।
अविमुक्तं परं तत्त्वमविमुक्तं परं शिवम् ॥
कृत्वा वै नैष्ठिकीं दीक्षामविमुक्ते वसन्ति ये ।
तेषां तत् परमं ज्ञानं ददाम्यन्ते परं पदम् ॥
प्रयागं नैमिषं पुण्यं श्रीशैलोऽथ हिमालय: ।
केदारं भद्रकर्णञ्च गया पुष्करमेव च ॥
कुरुक्षेत्रं रुद्रकोटिर्नर्म्मदा ह्यातकेश्वरम् ।
शालग्रामञ्च कुब्जाम्रं कोकामुखमनुत्तमम् ॥
प्रभासं विजयेशानं गोकर्णं भद्रकर्णकम् ।
एतानि पुण्यस्थानानि त्रैलोक्ये विश्रुतानि तु ॥
न यास्यन्ति परं मोक्षं वाराणस्यां तथा मृता: ।
वाराणस्यां विशेषेण गङ्गा त्रिपथगामिनी ॥
प्रविष्टा नाशयेत् पापं जन्मान्तरशतै: कृतम् ।
अन्यत्र सुलभा गङ्गा श्राद्धं दानं तपो जप: ॥
व्रतानि सर्व्वमेवैतत् वाराणस्यां सुदुर्लभम् ।
यजेत जुहुयान्नित्यं ददात्यर्च्चयतेऽमरान् ॥
वायुभक्षश्च सततं वाराणस्यां स्थितो नर: ।
यदि पापो यदि शठो यदि वा धार्म्मिको नर: ॥
वाराणसीं समासाद्य पुनाति सकलं नर: ॥
वाराणस्यां महादेवं येऽर्च्चयन्ति स्तुवन्ति वै ।
सर्व्वपापविनिर्म्मुक्तास्ते विज्ञेया गणेश्वरा: ॥
अन्यत्र योगज्ञानाभ्यां सन्न्यासादथ वान्यत: ।
प्राप्यते तत् परं स्थानं सहस्रेणैव जन्मन: ॥
ये भक्ता देवदेवेशं वाराणस्यां वसन्ति वै ।
ते विन्दन्ति परं मोक्षमेकेनैव तु जन्मना ॥
यत्र योगस्तथा ज्ञानं मुक्तिरेकेन जन्मना ।
अविमुक्तं तदासाद्य नान्यद्गच्छेत्तपोवनम् ॥
ज्ञानाज्ञानाभिनिष्ठानां परमानन्दमिच्छताम् ।
या गतिर्विहिता सुभ्रु साविमुक्ते मृतस्य तु ॥
यानि चैवाविमुक्तस्य देहे उक्तानि कृत्स्नश: ।
पुरी वाराणसी तेभ्य: स्थानेभ्यो ह्यधिका शुभा ॥
यत्र साक्षान्महादेवो देहान्ते स्वयमीश्वर: ।
व्याचष्टे तारकं ब्रह्म तत्रैव ह्यविमुक्तके ॥
तत्तत् परतरं तत्त्वमविमुक्तमिति श्रुतम् ।
एकेन जन्मना देवि वाराणस्यां तदाप्नुयात् ॥
भ्रूमध्ये नाभिमध्ये च हृदये चैव मूर्द्धनि ।
यथाविमुक्तमादित्ये वाराणस्यां व्यवस्थितम् ।
वरणायास्तथा चास्या मध्यं वाराणसी पुरी ॥
तत्रैव संस्थितं भद्रं नित्यमेवाविमुक्तकम् ।
वाराणस्या: परं स्थानं न भूतं न भविष्यति ॥
यत्र नारायणो देवो महादेवाधिपीश्वर: ।
तत्र देवा: सगन्धर्व्वा: सयक्षोरगराक्षसा: ।

उपासते मां सततं देवदेवः पितामहः ॥
महापातकिनो ये च ये च वै पापकृत्तमाः ।
वाराणसीं समासाद्य ते यान्ति परमां गतिम् ।
तस्मान्मुमुक्षुर्विवशो वसेद्वै मरणान्तिकम् ॥
वाराणस्यां महादेवाज्ज्ञानं लब्ध्वा विमुच्यते ।
किन्तु विघ्ना भविष्यन्ति पापोपहतचेतसः ॥
यथा नारायणः श्रेष्ठो देवानां पुरुषोत्तमः ।
यथेश्वराणां गिरिशः स्थानानां वै तदुत्तमम् ॥
यैः समाराधितो रुद्रः पूर्व्वस्मिन्नेव जन्मनि ।
ते विन्दन्ति परं क्षेत्रमविमुक्तं शिवालयम् ॥
ये स्मरन्ति सदा कालं वदन्ति च पुरीमिमाम् ।
तेषां विनश्यति क्षिप्रमिहामुत्र च पातकम् ॥
आचक्षध्वमिदं स्थानं सेवितं मोक्षकाङ्क्षिणाम् ।
म्रतानाञ्च पुनर्जन्म न भूयो भवसागरे ॥
तस्मात् सर्व्वप्रयत्नेन वाराणस्यां वसेन्नरः ।
योगी वाप्यथवायोगी पापी वा पुण्यकृत्तमः ॥”
इति कौर्म्मे २८ अध्यायः ॥ * ॥

अन्यच्च ।
“वाराणसी नाम पुरी गङ्गातीरे मनोहरे ।
वरणायास्तथा वासेर्मध्ये चापाकृतिः सदा ॥
स्वयं वृषध्वजस्तत्र नित्यं वसति योगिनाम् ।
सदा प्रीतिकरो योगी स्वयं चाध्यात्मचिन्तकः ॥
वियत्स्था सा पुरी नित्यं भर्गयोगबलाद्धृता ।
दिव्यं ज्ञानं ददात्येष तत्र यो म्रियते जनः ॥
तस्मै स्वयं महादेवः संसारग्रन्थिमुक्तये ।
स भूत्वा परमो योगी म्रतस्तत्र भवान्तरे ॥
सुलभेनैव निर्व्वाणमाप्नोति स्मरहासमः ।
योगयुक्तो महादेवः पार्व्वत्या सहितः सदा ॥
देवगन्धर्व्वयक्षाणां मानुषाणाञ्च नित्यशः ।
श्रेयो हरः प्रकाशश्च क्षेत्रं तच्च प्रकाशितम् ॥
न तत्र कामदो देवो न चिराच्च प्रसीदति ।
आराधितश्चिरं भक्त्या निर्व्वाणाय प्रसीदति ॥
गौर्य्यादिवर्ज्जिता सा तु पुरी तत्र न गच्छति ।
योगस्थानं महाक्षेत्रं कदाचिदपि शाङ्करी ॥
आसन्नं युवयोः क्षेत्रमिदं वाराणसी तु यत् ।
कथितं नातिदूरे च वर्त्ततेऽमरसत्तमौ ॥”
इति कालिकापुराणे ५० अध्यायः ॥ * ॥

अथ काशीयात्राविधिः ।
सूत उवाच ।
“यात्रापरिक्रमं ब्रूहि जनानां हितकाम्यया ।
यथावत् सिद्धिकामानां सत्यवत्याः सुतो मम ॥
व्यास उवाच ।
निशामय महाप्राज्ञ लोमहर्षण वच्मि ते ।
यथा प्रथमतो यात्रा कर्त्तव्या यात्रिकैर्मुदे ॥
सचेलमादौ संस्नाय चक्रपुष्करिणीजले ।
सन्तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तपस्विनः ॥
आदित्यं द्रौपदीं विष्णुं दण्डपाणिं महेश्वरम् ।
नमस्कृत्य ततो गच्छेत् द्रष्टुं ढुण्ढिविनायकम् ॥
ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं समभ्यर्च्च्य महाकालेश्वरं ततः ॥
ततः पुनर्द्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
दैनन्दिनी विधातव्या महाफलमभीप्सुभिः ॥ * ॥
ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धये ।
द्विसप्तायतनानाञ्च कार्य्या यात्रा प्रयत्नतः ॥
कृष्णां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रसिद्धिमभीप्सुभिः ॥
तत्तत्तीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्च्चनः ।
मौनेन यात्रां कुर्व्वाणः फलं प्राप्नोति यात्रिकः ॥
ॐकारं प्रथमं पश्येत् मत्स्योदर्य्यां कृतोदकः ।
त्रिविष्टपमहादेवं ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ।
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ॥
यस्तु क्षेत्रमुषित्वापि नैतां यात्रां समाचरेत् ।
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनसूचकाः ॥ * ॥
अष्टायतनयात्रान्या कर्त्तव्या विघ्नशान्तये ॥
दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः ।
गङ्गेशो नर्म्मदेशश्च गभस्तीशः सतीश्वरः ॥
अष्टमस्तारकेशश्च प्रत्यष्टमि विशेषतः ।
दृष्टव्यान्येतानि लिङ्गानि महापापप्रशान्तये ॥ * ॥
अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपहन्त्री च कर्त्तव्या क्षेत्रवासिभिः ॥
शैलेशं प्रथमं वीक्ष्य वरणास्नानपूर्व्वकम् ।
स्नानन्तु सङ्गमे कृत्वा द्रष्टव्यः सङ्गमेश्वरः ॥
स्वर्लीनतीर्थे सुस्नातः पश्येत् स्वर्लीनमीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः ॥
पश्येद्धिरण्यगर्भाख्यं तत्र तीर्थे कृतोदकः ।
पञ्चचूड़ाह्रदे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् ॥
चतुःसमुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते ।
शुक्रेश्वरं ततः पश्येत्तत्कूपविहितोदकः ।
दण्डखाते नरः स्नात्वा व्याघ्रेशं पूजयेत्ततः ॥
शौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः ॥
कच्चिन्न जायते भूयः संसारे दुःखसागरे ।
समारभ्य प्रतिपदं यावत् कृष्णां चतुर्द्दशीम् ॥
एतत्क्रमेण कर्त्तव्यान्येतदायतनानि वै ।
इमां यात्रां नरः कृत्वा न भूयोऽप्यभिजायते ॥
अन्या यात्रा प्रकर्त्तव्यैकादशायतनोद्भवा ।
अग्नीध्रकुण्डसुस्नातः पश्येदग्नीध्रमीश्वरम् ॥
उर्व्वशीशं ततो गच्छेत्ततस्तु नकुलीश्वरम् ।
आषाढ़ीशं ततो दृष्ट्वा भावभूतेश्वरं ततः ॥
लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ।
ततो मनःप्रकामेशं प्रीतिकेशमथो व्रजेत् ॥
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं ततः ।
यात्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नतः ॥
इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः ॥ * ॥
अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ॥
शुक्लपक्षतृतीयायां या यात्रा विश्वरद्धिका ।
गोप्रेक्ष्यतीर्थे सुस्नाय मुखनिर्म्मालिकां व्रजेत् ॥
ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् ।
सौभाग्यगौरी संपूज्या ज्ञानवाप्यां कृतोदकैः ॥
ततः शृङ्गारगौरीञ्च तत्रैव च कृतोदकः ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ॥
सुस्नातो ललितातीर्थे ललितामर्च्चयेत्ततः ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ॥
मङ्गला च ततोऽभ्यर्च्च्या बिन्दुतीर्थकृतोदकैः ।
ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये ॥
इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन्मुक्तिजन्मनि ।
न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् ॥ * ॥
कुर्य्यात् प्रतिचतुर्थीह पूजां विघ्नेशितुः सदा ।
ब्राह्मणेभ्यस्तदुद्देशाद्देया वै मोदका मुदे ॥
भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रा षष्ठ्यां वा रविसंयुजि ॥
तथैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवा षष्ठ्यां चण्डीयात्रा शुभावहा ॥ * ॥
अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवत्सरम् ।
प्रातःस्नानं विधायादौ नत्वा पञ्च विनायकान् ।
नमस्कृत्वा च विश्वेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽघौघशान्तये ॥
गृहीत्वा नियमञ्चेति गत्वाथ मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् ॥
कम्बलाश्वतरौ नागौ वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशवमप्यथ ॥
ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः ।
ततो वै सोमनाथञ्च वराहञ्च ततो व्रजेत् ॥
ब्रह्मेश्वरं ततो नत्वा नत्वागस्तीश्वरं ततः ।
काश्यपेशं नमस्कृत्य हरिकेशवनन्त्वथ ॥
वैद्यनाथं ततो गत्वा ध्रुवेशमथ वीक्ष्य च ।
गोकर्णेशं ततोऽभ्यर्च्च्य हाटकेशमथो व्रजेत् ॥
अस्थिक्षेपतड़ागेऽथ दृष्ट्वा वै कीकशेश्वरम् ।
भावभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः ॥
चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् ।
पितामहेश्वरं गत्वा ततस्तु कलसेश्वरम् ॥
चन्द्रेशमथ वीरेशो विद्येशोऽग्नीश एव च ॥
नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायकः ।
सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वविघ्नहृत् ॥
वशिष्ठवामदेवौ च मूर्त्तिरूपधरावुभौ ।
द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशनौ ।
सीमाविनायकं नाथं करुणेशं ततो व्रजेत् ॥
त्रिसन्ध्येशो विशालाक्षी धर्म्मेशो विश्वबाहुका ।
आशाविनायकश्चाथ वृद्धादित्यस्ततः पुनः ॥
चतुर्वक्त्रेश्वरं लिङ्गं ब्रह्मेशस्तु ततः परम् ।
ततो मनःप्रकाशेश ईशानेशस्ततः परम् ॥
चण्डीचण्डीश्वरौ दृश्यौ भवानीशङ्करौ ततः ।
ढुण्ढिं प्रणम्य च ततो राजराजं समर्च्चयेत् ॥
लाङ्गलीशस्ततोऽभ्यर्च्च्यस्ततस्तु नकुलीश्वरः ।
पराज्ञेशमथो नत्वा परद्रव्येश्वरं ततः ॥
प्रतिग्रहेश्वरञ्चापि निष्कलङ्केशमेव च ।
मार्कण्डेयेशमभ्यर्च्च्य ततः अप्सरसेश्वरम् ॥
गङ्गेशोऽर्च्च्यस्ततो ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं ततः ॥
दण्डपाणिं महेशञ्च मोक्षेशं प्रणमेत्ततः ।
वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः ॥

विनायकांस्ततः पश्च विश्वनाथं ततो व्रजेत् ।
ततो मौनं विसृज्याथ मन्त्रमेवमुदीरयेत् ॥
अन्तर्गृहस्य यात्रेयं यथावद्यन्मया कृता ।
न्यूनातिरिक्तया शम्भुः प्रीयतामनया विभुः ॥
इति मन्त्रं समुच्चार्य्य क्षणं वै मुक्तिमण्डपे ।
विश्राम्य यायाद्भवनं निष्पापः पुण्यवान्नरः ॥*॥
संप्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्व्वतः ।
कार्य्या यात्रा प्रयत्नेन महापुण्यसमृद्धये ॥
नवम्यां पञ्चदश्याञ्च कुलस्तम्भं समर्चयेत् ।
दुःखदन्दपिशाचत्वे न भवेदस्य पूजनात् ॥
श्रुत्वा पूर्व्वमिमा यात्राः कर्त्तव्यास्तीर्थवासिभिः ।
पर्व्वस्वपि विशेषेण कार्य्या यात्राश्च सर्व्वतः ॥
न वन्ध्यं दिवसं कुर्य्यात् विना यात्रां क्वचित् कृती ।
यात्राद्वयं प्रयत्नेन कर्त्तव्यं प्रतिवासरम् ।
आदौ स्वर्गतरङ्गिण्यास्ततो विश्वेशितुर्भुवम् ॥
यस्य वन्ध्यं दिनं जातं काश्यां निवसतः सतः ।
निराशाः पितरस्तस्य तस्मिन्नेव दिनेऽभवन् ॥
स दष्टः कालसर्पेण स दष्टो मृत्युना स्फुटम् ।
स मुष्टस्तत्र दिवसे विश्वेशो यत्र नेक्षितः ॥
सर्व्वतीर्थेषु सस्नौ स सर्व्वयात्रां व्यधात् स च ।
मणिकर्ण्यान्तु यः स्नातो यो विश्वेशं निरैक्षत ॥
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ।
इष्टौ विश्वेश्वरो नित्यं स्नातव्या मणिकर्णिका ॥
व्यास उवाच ।
सूत स्कान्दमिमं श्रुत्वा काशीमाहात्म्यमुत्तमम् ।
नरो न निरयं याति हत्वाप्यघसहस्रकम् ॥"
इति काशीखण्डे १०० अध्यायः ॥

वाराणसेयः, त्रि, (वाराणसी + "नद्यादिभ्यो ढक् ।" ४।२।९७। इति ढक् ।) वाराणसीजातः । वाराणसी शब्दात् ण्येयप्रत्ययेन निष्पन्नः ॥

वारासनं, क्ली, (वारां आसनम् ।) जलाधारः । तत्पर्य्यायः । वाःसदनम् २ । इति त्रिकाण्ड-शेषः ॥

वाराहः, पुं, महापिण्डीतकवृक्षः । इति राज-निर्घण्टः ॥ वराह एव (वराह + स्वार्थे अण् ।) वाराहः । (कल्पभेदः । यथा, भागवते । ३ । ११ । ३७ ।
"अयन्तु कथितः कल्पो द्वितीयस्यापि भारत ! ।
वाराह इति विख्यातो यत्रासीत् शूकरो हरिः ॥"
वराहस्येदमिति । वराह + तस्येदमित्यण् ।) तत्सम्बन्धिनि, त्रि । (यथा, महाभारते ।२।४।२।
"शाल्येन पायसेनैव मधुना मिश्रितेन च ।
भक्ष्यैर्मूलैः फलैश्चैव मांसैर्वाराहहारिणैः ॥"
क्ली, तीर्थभेदः । यथा, महाभारते ।३।८३।१८
"ततो गच्छेत धर्म्मज्ञ ! वाराहं तीर्थमुत्तमम् ।
विष्णुर्वाराहरूपेण पूर्व्वं यत्र स्थितोऽभवत् ॥"
पुराणविशेषः । यथा, देवीभागवते । १।३।८ ।
"चतुर्व्विंशतिसाहस्रं वाराहं परमाद्भुतम् ॥")

वाराहकर्णी, स्त्री, (वाराहकर्ण इव पत्रमस्त्यस्याः । वाराहकर्ण + अच् । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति राजनिर्घण्टः ॥

वाराहपत्री, स्त्री, (वाराहस्तत्कर्ण इव पत्रमस्त्यस्याः । अच् । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति राजनिर्घण्टः ॥

वाराहाङ्गी, स्त्री, (वाराहमिवाङ्गमस्याः । ङीष् ।) दन्तीवृक्षः । इति भावप्रकाशः ॥

वाराही, स्त्री, (वाराह + ङीष् ।) ब्रह्माण्या-द्यष्टमातृकान्तर्गतमातृकाविशेषः । यथा,—
"वराहरूपधारी च वराहोपम उच्यते ।
वाराहजननी चाथ वाराही वरवाहना ॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५ ॥
योगिनीविशेषः । यथा,—
"दुर्गा चण्डेश्वरी चण्डी वाराही कार्त्तिकी तथा ।
हरसिद्धा तथा काली इन्द्राणी वैष्णवी तथा ॥
भद्रकाली विशालाक्षी भैरवी कामरूपिणी ।
एताः सर्व्वाश्च योगिन्यो भृङ्गारैः स्नापयन्तु ते ॥"
तीर्थविशेषः । यथा,—
"वाराही यमुना गङ्गा करतोया सरस्वती ।
कावेरी चन्द्रभागा च सिन्धुभैरवसागराः ।
पञ्चस्नानविधानाय सान्निध्यमिह कल्पय ॥"
इति हयशीर्षपञ्चरात्रोक्तदुर्गापूजापद्धतिः ॥
वराहदेवस्य शक्तिः । यथा,—
"यज्ञवाराहमतुलं रूपं या बिभ्रती हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥"
इति चण्डी ॥
अपि च ।
"वाराहरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम् ।
शुभदां सुप्रभां शुभ्रां वाराहीं तां नमाम्यहम् ॥"
इति हयशीर्षपञ्चरात्रोक्तदुर्गापूजापद्धतिः ॥
वराहक्रान्ता । चामालु इति ख्यातः । तत्-पर्य्यायः । विष्वक्सेनप्रिया २ वृष्टिः ३ वदरा ४ । इत्यमरः । गृष्टिः ५ । इति भरतः ॥ शूकरी ६ क्रोडकन्या ७ विष्वक्सेनकान्ता ८ वराही ९ कौमारी १० त्रिनेत्रा ११ ब्रह्मपुत्त्री १२ क्रोडी १३ कन्या १४ गृष्टिका १५ माधवेष्टा १६ शूकरकन्दः १७ क्रोडः १८ वनवासी १९ कुष्ठ-नाशनः २० वल्यः २१ अमृतः २२ महावीर्य्यः २३ महौषधम् २४ शम्बरकन्दः २५ वराह-कन्दः २६ वीरः २७ आश्नीकन्दः २८ सुकन्दः २९ ब्रह्मिदः ३० व्याधिहन्त्री ३१ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । विषपित्तकफकुष्ठप्रमेह-क्रिमिनाशित्वम् । वृष्यत्वम् । बल्यत्वम् । रसा-यनत्वञ्च । इति राजनिर्घण्टः ॥ अन्यच्च ।
"वाराहीकन्द एवान्यैश्चर्म्मकारालुको मतः ।
अनूपे स भवेद्देशे वाराह इव लोमवान् ॥"
इति भावप्रकाशः ॥
श्यामापक्षी । इति राजनिर्घण्टः ॥ मेदिनीमते पवर्गीयबकारादिरयं शब्दः ॥

वारि, क्ली, (वारयति तृषामिति । वृ + णिच् + "वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवा-रिभ्य इञ् ।" उणा० ४ । १२४ । इति इञ् ।) जलम् । इत्यमरः । १ । १० । ३ ॥ (यथा, मनौ । ४ । ६३ ।
"न कुर्व्वीत वृथा चेष्टां न वार्य्यञ्जलिना पिबेत् ।
नोत्सङ्गे भक्षयेद्भक्ष्यान्न जातु स्यात् कुतूहली ॥")
दिग्विशेषे तस्य निषेधविधी यथा,—
"ईशाने चापि पूर्व्वस्मिन् पश्चिमे च तथोत्तरे ।
शिविरस्य जलं भद्रमन्यत्राशुभमेव च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
जलक्रीडायां वर्णनीयानि यथा,—
"जलकेलौ सरःक्षोभचक्रहंसापसर्पणम् ।
पद्मम्लानिपयोबिन्दुद्युत्यागा भूषणच्युतिः ॥"
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥
ह्रीवेरम् । इति हेमचन्द्रः ॥

वारिः, स्त्री, (वारयतीति । वारि + इञ् ।) वाक् । सरस्वती । गजबन्धनी । हस्तिबन्धन-भूमिः । (यथा, रघौ । ५ । ४५ ।
"संहारविक्षेपलघुक्रियेण
हस्तेन तीराभिमुखः सशब्दम् ।
बभौ स भिन्दन् बृहतस्तरङ्गान्
वार्य्यर्गलाभङ्ग इव प्रवृत्तः ॥")
वल्लिः । कलसीति भाषा । इति मेदिनीकार-हेमचन्द्रौ ॥ (वरणीये, त्रि । यथा; वाजसनेय-संहितायाम् । २१ । ६१ ।
"ऋतुभ्य आ सक्तेभ्य एष मे देवेषु वसु वार्य्या-यक्ष्यते ।"
"एषोऽग्निर्मेमह्यं देवेषु वारि वरीतुं योग्यं वारि वरणीयं वसु धनमायक्ष्यते ।" इति तद्भाष्ये महीधरः ॥)

वारिकण्टकः, पुं, (वारिणः कण्टक इव ।) शृङ्गा-टकः । इति जटाधरः त्रिकाण्डशेषश्च ॥

वारिकर्णिका, स्त्री, (वारिषु कर्णा इव पत्रा-ण्यस्याः । गौरादित्वात् ङीष् । स्वार्थे कन् । टाप् पूर्व्वह्रस्वश्च ।) स्वन्नली । इति शब्द-रत्नावली । पाना इति भाषा ॥

वारिकर्पूरः, पुं, (वारिषु कर्पूर इव ।) इल्लिश-मत्स्यः । इति त्रिकाण्डशेषः ॥

वारिकुब्जः, पुं, (वारिषु कुब्ज इव वक्रत्वात् ।) शृङ्गाटकः । इति शब्दरत्नावली ॥

वारिकुब्जकः, पुं, (वारिकुब्ज + स्वार्थे कन् ।) शृङ्गाटकः । इति त्रिकाण्डशेषः ॥

वारिक्रिमिः, पुं, (वारिणः क्रिमिः ।) जलौकाः । इति त्रिकाण्डशेषः ॥

वारिचत्वरः, पुं, (वारिणि चत्वर इव ।) कुम्भिका । इति त्रिकाण्डशेषः ॥

वारिचरः, पुं, (वारिषु चरतीति । चर + टः ।) मत्स्यः । इति धनञ्जयः ॥ (यथा, भागवते । ६ । ९ । २३ ।
"यस्योरुशृङ्गे जगतीं स्वनावं
मनुर्यथाबध्य ततार दुर्गम् ।
स एव नस्त्वाष्ट्रभयाद्दुरन्तात्
त्राताश्रितान् वारिचरोऽपि नूनम् ॥")

जलचरजन्तुमात्रे, त्रि । (यथा, महाभारते । १२ । २४७ । १८ ।
"यथा वारिचरः पक्षी न लिप्यति जले चरन् ।
विमुक्तात्मा तथा योगी गुणदोषैर्न लिप्यते ॥")

वारिचामरं, क्ली, (वारिणश्चामरमिव तदाकारपुञ्जवत्त्वात् ।) शैवालः । इति त्रिकाण्डशेषः ॥

वारिजं, क्ली, (वारिणि जायते इति । जन+डः ।) द्रोणीलवणम् । गौरसुवर्णम् । पद्मम् । (यथा, अध्यात्मरामायणे । २ । ६ । २ ।
"स तत्र वज्राङ्कुशवारिजान्वित-
ध्वजादिचिह्नानि पदानि सर्व्वतः ॥")
लवङ्गम् । इति राजनिर्घण्टः ॥ (वारिजातमात्रे, त्रि । यथा, महाभारते ।१।८१।१४।
"केनास्यर्थेन नृपते ! इमं देशमुपागतः ।
जिघृक्षुर्वारिजं किञ्चिदथवा मृगलिप्सया ॥"
"वारिजं मीनपद्मादि वेति ।" तट्टीकायां नीलकण्ठः ॥)

वारिजः, पुं, (वारिणि जायते इति । जन+डः ।) शङ्खः । इति हेमचन्द्रः ॥ शम्बूकः । इति शब्दमाला ॥

वारितस्करः, पुं, (वारिणस्तस्करः । अलक्षितभावेन तदपहारकत्वात्तथात्वम् ।) मेघः । इति शब्दमाला ॥ वारिशोषणकर्त्तरि, त्रि । यथा,
"स्वरूपधारिणी चेमामानिनाय निजाश्रमम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥"
इति मार्कण्डेयपुराणम् ॥

वारित्रा, स्त्री, (वारिणस्त्रायते इति । त्रै+डः । टाप् ।) छत्रम् । इति त्रिकाण्डशेषः ॥

वारिदं, क्ली, वाला । इति शब्दरत्नावली ॥

वारिदः, पुं, (वारि ददातीति । दा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) मेघः । (यथा, मृच्छकटिकनाटके । ५ अङ्के ।
"विद्युद्वारिदगर्ज्जितैः सचकिता तद्दर्शनाकाङ्क्षिणी ।
पादौ नूपुरलग्नकर्द्दमधरौ प्रक्षालयन्ती
स्थिता ॥")
मुस्तकः । इत्यमरः ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ३८ अध्याये ।
"रास्नारग्वधवर्षाभूकटुकोशीरवारिदैः ।
त्रायमाणाम्रतारक्तापञ्चमूलविभीतकैः ॥"
वारिदातरि, त्रि । यथा, मनौ । ४ । २२९ ।
"वारिदस्तृप्तिमाप्नोति दीर्घमायुर्हिरण्यदः ।
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ॥")

वारिधिः, पुं, (वारीणि धीयन्ते अस्मिन्निति । धा+"कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) समुद्रः । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । १८ । ३०१ ।
"तद्रक्षोऽवततारैव वारिधौ स विदूषकः ।
न जात्ववसरे प्राप्ते सत्त्ववानवसीदति ॥")

वारिनाथः, पुं, (वारीणां नाथः ।) वरुणः । समुद्रः । मेघः । इति केचित् ॥

वारिनिधिः, पुं, (वारीणि निधीयन्ते अत्रेति । नि+धा+किः ।) समुद्रः । इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम् । ३ । ७८ ।
"पाराद्वारिनिधेः प्राप्ताः काश्मीरेष्वधुनापि ये ।
राज्ञां यात्रासु निर्यान्ति ख्याता वारिध्वजाः पुरः ॥")

वारिपथिकः, त्रि, (वारिपथेन गच्छतीति । वारिपथ+"उत्तरपथेनाहृतञ्च ।" ५ । १ । ७७ । इत्यत्र "आहृतप्रकरणे वारिजङ्गलकान्तारपूर्व्वादुपसंख्यानम् ।" इति वार्त्तिकसूत्रात् ठक् ।) जलपथगामी । वारिपथं गच्छतीत्यर्थे ष्णिकप्रत्ययेन निष्पन्नः ॥ (वारिपथेन आहृतम् । इति काशिका ।)

वारिपर्णी, स्त्री, (वारिणि पर्णान्यस्या इति । वारिपर्ण+"पाककर्णपर्णपुष्पेति ।" ४ । १।६४। इति ङीष् ।) कुम्भिका । इत्यमरः । १।१०।३८ ॥ अस्या गुणाः ।
"वारिपर्णी हिमा तिक्ता मृद्वी स्वाद्वी सरा पटुः ।
दोषत्रयकरी रूक्षा शोणितज्वरशोषकृत् ॥"
इति राजवल्लभः ॥

वारिपालिका, स्त्री, (वारीणि पालयति सूर्य्यरश्म्यादिभ्यो रक्षतीति । पालि+ण्वुल् । टाप् । अत इत्वम् ।) खम्बलिका । इति शब्दमाला ॥

वारिप्रवाहः, पुं, (वारिणः प्रवाहः ।) निर्झरः । इति शब्दमाला ॥

वारिप्रश्नी, स्त्री, (वारिजाता प्रश्नी ।) वारिपर्णी । इति शब्दमाला ॥

वारिबदरा, स्त्री, (वारिपरिपूर्णा बदरेव ।) प्राचीनामलकम् । इति त्रिकाण्डशेषः ॥

वारिबालकं, क्ली, (वारिणो बालकम् ।) ह्रीबेरम् । इति हारावली । १७८ ॥

वारिभवं, क्ली, (वारिणो नेत्रजलाय भवति प्रभवतीति । भू+अच् ।) स्रोतोऽञ्जनम् । इति राजनिर्घण्टः ॥ (जलभवमात्रे, त्रि ॥)

वारिमसिः, पुं, (वारि मसिरिव श्यामताजनकं यस्य । सजलमेघस्यैव कृष्णवर्णत्वात् तथात्वम् ।) मेघः । इति त्रिकाण्डशेषः ॥

वारिमुक्, [च्] पुं, (वारि मुञ्चतीति । मुच्+क्विप् ।) मेघः । इति शब्दरत्नावली ॥ (यथा, रघौ । ४ । ८६ ।
"स विश्वजितमाजह्रे यज्ञं सर्व्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥")

वारिमूली, स्त्री, (वारिणि मूलं यस्याः । "पाककर्णपर्णेति ।" ४ । १ । ६४ । इति ङीष् ।) वारिपर्णी । इति शब्दरत्नावली ॥

वारिरथः, पुं, (वारिषु रथ इव गमनसाधनत्वात् ।) भेलकः । इति त्रिकाण्डशेषः ॥

वारिराशिः, पुं, (वारीणां राशयो यत्र ।) समुद्रः । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ६३ । ८८ ।
"तस्य भग्नयतो हस्ताच्युतमेकमुदुम्बरम् ।
जग्राह शिशुमारोऽत्र वारिराशिजलाश्रयः ॥"
वारीणां राशिः । जलसमूहश्च । यथा, रघौ । ४ । ४६ ।
"शैलोपमः शैवलमञ्जरीणां
जालानि कर्षन्नुरसा स पश्चात् ।
पूर्व्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प ॥")

वारिरुहं, क्ली, (वारिणि रोहति जायते इति । रुह+"इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः ।) कमलम् । इति राजनिर्घण्टः ॥ (यथा, किरातार्ज्जुनीये । ५ । १३ ।
"विकचवारिरुहन्दधतं सरः
सकलहंसगणं शुचिमानसम् ।
शिवमगात्मजया च कृतेर्ष्यया
सकलहंसगणं शुचिमानसम् ॥")
जलजाते, त्रि ॥

वारिलोमा, [न्] पुं, (वारिणि लोमानि यस्य । यद्वा, वारि लोम्नि यस्य ।) वरुणः । इति जटाधरः ॥

वारिवदनं, क्ली, (वारियुक्तं वदनं यस्मात् । तत्सेवनेन मुखे जलनिस्रावात्तथात्वम् ।) प्राचीनामलकम् । इति भूरिप्रयोगः ॥

वारिवरं, क्ली, करमर्द्दकम् । इति जटाधरः ॥

वारिवल्लभा, स्त्री, (वारि वल्लभमस्याः । स्वजनकत्वात् ।) विदारी । इति राजनिर्घण्टः ॥

वारिवासः, पुं, (वारिसमीपे वासोऽस्य । यद्वा, वारि पर्य्युषितामादिजलं वासयति सुगन्धीकरोतीति । वास+अण् ।) शौण्डिकः । इति हेमचन्द्रः । ३ । ५६५ ॥

वारिवाहः, पुं, (वारि वहतीति । वह+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) मेघः । मुस्ता । इत्यमरः ॥

वारिवाहनः, पुं, (वाहयतीति । वाहि+ल्युः । वारीणां वाहनः ।) मेघः । इति शब्दरत्नावली ॥

वारिशः, पुं, (वारिणि सागरजले शेते इति । शी+डः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

वारिसम्भवं, क्ली, (वारिप्रधानदेशेषु सम्भव उत्पत्तिर्यस्य ।) लवङ्गम् । सौवीराञ्जनम् । उशीरम् । इति राजनिर्घण्टः ॥

वारिसम्भवः, पुं, (वारिप्रधानस्थानेषु सम्भव उत्पत्तिर्यस्य ।) यावनालशरः । इति राजनिर्घण्टः ॥ (वारिषु सम्भवोऽस्य । वारिजातमात्रे, त्रि । यथा, रामायणे । ५ । ६६ । ६ ।
"इतस्तु किं दुःखतरं यदिमं वारिसम्भवम् ।
मणिं पश्यामि सौमित्रे ! वैदेहीमागतं विना ॥")

वारी, स्त्री, (वार्य्यतेऽनयेति । वृ+णिच्+"वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ।" उणा० ४ । १२४ । इति इञ् । वा ङीष् ।) गजबन्धिनी । (यथा, रघुवंशे ।५।४५।

"वभौ स भिन्दन् इव तस्तरङ्गान्
वार्य्यर्गलाभङ्ग इव प्रवृत्तः ॥")
कलसी । इति धरणिः ॥
वारीटः, पुं, (वार्य्यां गजबन्धनभूम्यामेटतीति । इट्+कः ।) हस्ती । इति शब्दमाला ॥
वारीशः, पुं, (वारीणामीशः ।) समुद्रः । इति हेमचन्द्रः । ४ । १३६ ॥
वारुः, पुं, (वारयति रिपूनिति । वृ+णिच्+बाहुलकात् उण् ।) विजयकुञ्जरः । इति हारावली । १६० ॥
वारुटः, पुं, खट्टिः । अन्त्यशय्या । इति त्रिकाण्डशेषः ॥
वारुणं, क्ली, (वरुणो देवतास्येति । वरुण+अण् ।) जलम् । इति राजनिर्घण्टः ॥ (शतभिषानक्षत्रम् । यथा, तिथितत्त्वे ।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १५ ।
"वारुणं कालिकाख्यञ्च शाम्बं नन्दिकृतं शुभम् ।
सौरं पाराशरप्रोक्तमादित्यं चातिविस्तरम् ॥"
पुं, भारतस्य खण्डविशेषः । यथा, विष्णुपुराणे । २ । ३ । ६ ।
"इन्द्रद्वीपस्तथा सौम्यो गान्धर्व्वस्तथ वारुणः ॥")
वरुणसम्बन्धिनि, त्रि । यथा,—
"पश्चिमे पुष्पदन्तश्च वारुणश्च प्रशस्यते ।
उत्तरेण तु भल्लाटं सौम्यश्च शुभदं भवेत् ॥
उदुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः ।
प्लक्षश्चोत्तरतो धन्यो विपरीतास्त्वसिद्धये ॥"
इति मात्स्ये २२८ अध्यायः ॥
(यथा च महाभारते । ३ । १०२ । १ ।
"समुद्रं ते समाश्रित्य वारुणं निधिमम्भसाम् ।
कालेयाः संप्रवर्त्तन्ते त्रैलोक्यस्य विनाशने ॥")
वारुणकर्म्म, क्ली, (वारुणं जलसम्बन्धि कर्म्म ।) जलाशयखननादि । तस्य शुभाशुभकालादि यथा,—
यम उवाच ।
"सुदिने शुभनक्षत्रे चन्द्रताराबलैर्युते ।
सद्गुरुस्तु भवेद्यत्र काले तस्मिन् विधिः स्मृतः ॥
सद्गतौ तु कृतं कर्त्तुं संपूर्णस्तम्भतोरणः ।
कर्कटे पुत्त्रलाभस्तु सौख्यं तु मकरे भवेत् ॥
मीने यशोऽर्थलाभस्तु कुम्भे च सुवहूदकम् ।
वृषे च मिथुने वृद्धिर्वृश्चिके निर्जलं भवेत् ॥
पितृत्वप्रिस्तु कन्यायां तुलायां सत्यसङ्गतिः ।
सिंहे मेषे धनं नाशं जलस्य कुरुते द्विज ।
तथा चैतेषु लग्नेषु वारुणं कर्म्म नो दिशेत् ॥"
इति वह्निपुराणे वारुणारामप्रतिष्ठानामाध्यायः ॥
वारुणिः, पुं, (वरुणस्यापत्यं पुमान् । वरुण+इञ् ।) अगस्त्यमुनिः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । १०५ । १ ।
"समुद्रं स समासाद्य वारुणिर्भगवानृषिः ।
उवाच सहितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरुणालयम् ॥"
वशिष्ठः । यथा, महाभारते । १ । ६६ । ७ ।
"स वारुणिस्तपस्तेपे तस्मिन् भरतसत्तम ! ।
वने पुण्यकृतां श्रेष्ठः स्वादुमूलफलोदके ॥"
विनतापुत्त्रभेदः । यथा, महाभारते ।१।६५।४०।
"तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ ।
आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्त्तिताः ॥"
भृगुः । यथा, शतपथब्राह्मणे । ११ । ६ । १ । १ ।
"भृगुर्ह वै वारुणिः । वरुणं पितरं विद्ययातिमेने । तद्ध वरुणो विदाञ्चकार ॥")
वारुणी, स्त्री, (वरुणस्येयम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् । ङीप् ।) सुरा । (यथा, मनौ । ११ । १४७ ।
"अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति ।
मतिपूर्व्वमनिर्द्देश्यं प्राणान्तिकमिति स्थितिः ॥"
मदिराधिष्ठात्री देवी । यथा, विष्णुपुराणे । १ । ९ । ९३ ।
"किमेतदिति सिद्धानां दिवि चिन्तयतां ततः ।
बभूव वारुणी देवी मदाघूर्णितलोचना ॥"
"वारुणी मदिराधिष्ठात्री देवी ।" इति तट्टीकायां श्रीधरस्वामी ॥ वरुणपत्नी । वारुणीवल्लभशब्ददर्शनात् ॥ यथा, महाभारते । २ । ९ । ६ ।
"यस्यामास्ते स वरुणो वारुण्या च समन्वितः ।
दिव्यरत्नाम्बरधरो दिव्याभरणभूषितः ॥"
नदीविशेषः । यथा, गो॰ रामायणे ।२।७०।१२।
"पूर्व्वेण वारुणीं तीर्त्वा कुरुक्षेत्रे सरस्वतीम् ।
सरांसि च प्रफुल्लानि नदीश्च विमलोदकाः ॥")
पश्चिमदिक् । इत्यमरः । १ । ३ । ५१ ॥ (यथा, नैषधचरिते । ४ । ६० ।
"वद विधुन्तुदमालि मदीरितै-
स्त्यजसि किं द्विजराजधिया विधुम् ।
किमु दिवं पुनरेति यदीदृशः
पतित एष निषीय हि वारुणीम् ॥"
विद्याविशेषः । यथा, तैत्तिरीयोपनिषदि । ३ तृतीयवल्ल्याम् ६ षष्ठानुवाके । "आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति । सैषा भार्गवी वारुणी विद्या ॥"
अस्त्राणां च्छायाविशेषः । यथा, अश्ववैद्यके । ३ । १०३ ।
"शुद्धस्फटिकसङ्काशा सुस्निग्धा चैव वारुणी ॥")
शतभिषानक्षत्रम् । इति हेमचन्द्रः ॥ गण्डदूर्व्वा । इति मेदिनी । णे, ६८ ॥ इन्द्रवारुणी । दूर्व्वा । इति राजनिर्घण्टः ॥ शतभिषानक्षत्रयुक्तचैत्रकृष्णत्रयोदशी । यथा, स्कन्दपुराणे ।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
वारुणं शतभिषा ।
"शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ॥
शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥
अत्र संज्ञाविधिः सार्थकत्वाय निमित्तत्वेन मासपक्षतिथ्युल्लेखानन्तरं महावारुणीमहामहावारुण्युल्लेखनीये । तेन चैत्रे मासि कृष्णपक्षे त्रयोदश्यां तिथौ महावारुण्यां महामहावारुण्यां यथायथं प्रयोज्यम् । न चाच ।
"स्नानं कुर्व्वन्ति या नार्य्यश्चन्द्रे शतभिषां गते ।
सप्तजन्म भवेयुस्ता दुर्भगा विधवा ध्रुवम् ॥"
इति ॥
"त्रयोदश्यां तृतीयायां दशम्याञ्च विशेषतः ।
शूद्रविट्क्षत्त्रियाः स्नानं नाचरेयुः कथञ्चन ॥"
इति प्रचेतोजावालिवचनाभ्यां स्त्रीणां शूद्रादीनाञ्च स्नाननिषेध इति वाच्यम् ।
"भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः ।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु ॥"
इति हेमाद्रिधृतवचनेन रागप्राप्तस्नान एव निषेधात् मन्वन्तरेऽपि तथा कल्पनात् । अत्र त्रयोदश्यां पूर्णायां पूर्व्वाह्णेतरकाले नक्षत्रादिसत्त्वे परदिने पूर्व्वाह्णे तिथिनक्षत्रलाभेऽपि पूर्व्वदिन एव स्नानम् । रात्रावपि वारुण्यादिषु गङ्गायां स्नानम् ।
"दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः ।
स्नात्वाश्वमेधजं पुण्यं गृहेऽप्युद्धृतजलैः ॥"
इति ब्रह्माण्डपुराणे सामान्यतः प्रतिप्रसवात् । इति तिथ्यादितत्त्वम् ॥ * ॥ वरुणप्रेरितवृन्दावनस्थकदम्बतरुकोटरनिःसृतबलदेवपीतवारुणी । यथा,—
पराशर उवाच ।
"वने विचरतस्तस्य सह गोपैर्महात्मनः ।
मानुषच्छद्मरूपस्य शेषस्य धरणीधृतः ॥
निष्पादितोरुकार्य्यस्य कार्य्येणोर्व्वीविचारिणः ।
उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम् ॥
अभीष्टा सर्व्वदा यस्य मदिरे त्वं महौजसः ।
अनन्तस्योपभोगाय तस्य गच्छ मुदे शुभे ॥
इत्युक्ता वारुणी तेन सन्निधानमथाकरोत् ।
वृन्दावनसमुत्पन्नकदम्बतरुकोटरे ॥
विचरन् बलदेवोऽपि मदिरागन्धमुत्तमम् ।
आघ्राय मदिरातर्षमवापाथ पुरातनम् ॥
ततः कदम्बात् सहसा मद्यधारां स लाङ्गली ।
पतन्तीं वीक्ष्य मैत्रेय प्रययौ परमां मुदम् ॥
पपौ च गोपगोपीभिः समवेतो मुदान्वितः ।
उपगीयमानो ललितं गीतवाद्यविशारदैः ॥"
इति विष्णुपुराणे ५ अंशे २५ अध्यायः ॥
वारुणीवल्लभः, पुं, (वारुण्या वल्लभः । वारुणीवल्लभा यस्येति वा ।) वरुणः । इति शब्दमाला ॥
वारुण्डः, पुं, फणिनां राजा । इति मेदिनी । डे, ३३ ॥ तत्कृते पवर्गीयादिः । किन्तु वृधातोः उण्ड-प्रत्ययनिष्पन्नत्वात् अन्तःस्थादौ लिखितः ॥
वारुण्डः, पुं क्ली, (वृ+उण्डः ।) नौसेकपात्रम् । नेत्रमलम् । कर्णमलम् । इति मेदिनी । ते, ३३ ॥

वारण्डी, स्त्री, (वारण्ड+गौरादित्वात् ङीष् ।) द्वारपिण्डी । इति मेदिनी । ते, ३३ ॥
वारेन्द्री, स्त्री, देशविशेषः । इति शब्दरत्नावली ॥ यथा,—
"प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः ॥"
इति ज्योतिस्तत्त्वम् ॥
अधुना राजशाहीनामकदेशैकदेशः ॥
वार्क्षं, क्ली, (वृक्षाणां समूह इति । वृक्ष+"तस्य समूहः ।" ४ । २ । ३७ । इति अण् ।) वनम् । इति हेमचन्द्रः ॥ (वृक्षस्येदमित्यण् ।) वृक्षसम्बन्धिनि, त्रि । यथा,—
"वार्क्षं वित्तप्रदं लिङ्गं स्फाटिकं सर्व्वकामदम् ॥"
इति तिथ्यादितत्त्वम् ॥
वार्क्षी, स्त्री, (वृक्षस्यापत्यं स्त्री । वृक्ष+अण् । ङीप् ।) स्त्रीविशेषः । (यथा, महाभारते । १ । १९७ । १५ ।
"तथैव मुनिना वार्क्षी तपोभिर्भावितात्मनः ।
सङ्गताभूद्दश भ्रातॄनेकनाम्नः प्रचेतसः ॥"
इयं हि मारिषापरनाम्नी कण्डुमुनेरौरसात् प्रम्लोचागर्भगता सती पश्चात् वृक्षेभ्य उत्पन्ना । तत्कथा यथा, विष्णुपुराणे ।१।१५।१—५३ ।
पराशर उवाच ।
"तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्बभूवाथ प्रजाक्षयः ॥
नाशकन्मारुतो वातुं वृतं खमभवद्द्रुमैः ।
दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः ॥
तद्दृष्ट्वा जलनिष्क्रान्ताः सर्व्वे क्रुद्धाः प्रचेतसः ।
मुखेभ्यो वायुमग्निञ्च तेऽसृजन् जातमन्यवः ॥
उन्मूलानथ तान् वृक्षान् कृत्वा वायुरशोषयत् ॥
तानग्निरदहद्घोरस्तत्राभूद्द्रुमसंक्षयः ॥
द्रुमक्षयमथो दृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु ।
उपगम्याब्रवीदेतान् राजा सोमः प्रजापतीन् ॥
कोपं यच्छत राजानः शृणुध्वञ्च वचो मम ।
सन्धानं वः करिष्यामि सह क्षितिरुहैरहम् ॥
रत्नभूता च कन्येयं वार्क्षेयी वरवर्णिनी ।
भविष्यं जानता पूर्व्वं मया गोभिर्व्विवर्द्धिता ॥
मारिषा नाम नाम्नैषा वृक्षाणामिति निर्म्मिता ।
भार्य्या वोऽस्तु महाभागा ध्रुवं वंशविवर्द्धिनी ॥
युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ।
अस्यामुत्पत्स्यते विद्वान् दक्षो नाम प्रजापतिः ॥
मम चांशेन संयुक्तो युष्मत्तेजोमयेन वै ।
अग्निनाग्निसमो भूयः प्रजाः संवर्द्धयिष्यति ॥
कण्डुर्नाम मुनिः पूर्व्वमासीद्वेदविदां वरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥
तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः ।
प्रयुक्ता क्षोभयामास तमृषिं सा शुचिस्मिता ॥
क्षोभितः स तया सार्द्धं वर्षाणामधिकं शतम् ।
अतिष्ठन्मन्दरद्रोण्यां विषयासक्तमानसः ॥
सा तं प्राह महात्मानं गन्तुमिच्छाम्यहं दिवम् ।
प्रसादसुमुखो ब्रह्मन् अनुज्ञां दातुमर्हसि ॥
तयैवमुक्तः स मुनिस्तस्यामासक्तमानसः ।
दिनानि कतिचिद्भद्रे स्थीयतामित्यभाषत ॥
एवमुक्ता ततस्तेन सार्द्धं वर्षशतं पुनः ।
बुभुजे विषयांस्तन्वी तेन सार्द्धं महात्मना ॥
अनुज्ञां देहि भगवन् व्रजामि त्रिदिवालयम् ।
उक्तस्तयेति स मुनिः स्थीयतामित्यभाषत ॥
पुनर्गते वर्षशते साधिके सा शुभानना ।
यामीत्याह दिवं ब्रह्मन् प्रणयस्मितशोभनम् ॥
उक्तस्तयैवं स मुनिरुपगुह्यायतेक्षणाम् ।
प्राहास्यतां क्षणं सुभ्रु चिरं कालं गमिष्यसि ॥
तच्छापभीता सुश्रोणी सह तेनर्षिणा पुनः ।
शतद्वयं किञ्चिदूनं वर्षाणामन्वतिष्ठत ॥
गमनाय महाभागो देवराजनिवेशनम् ।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥
तं सा शापभयाद्भीता दाक्षिण्येन च दक्षिणा ।
प्रोक्ता प्रणयभङ्गार्त्तिवेदनी न जहौ मुनिम् ॥
तया च रमतस्तस्य महर्षेस्तदहर्निशम् ।
नवं नवमभूत् प्रेम मन्मथाविष्टचेतसः ॥
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः ।
निष्क्रामन्तञ्च कुत्रेति गम्यते प्राह सा शुभा ॥
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे ।
सन्ध्योपास्तिं करिष्यामि क्रियालोपोऽन्यथा भवेत ॥
ततः प्रहस्य मुदिता तं सा प्राह महामुनिम् ।
किमद्य सर्व्वधर्म्मज्ञ परिवृत्तमहस्तव ॥
बहूनां विप्र वर्षाणां परिणाममहस्तव ।
गतमेतन्न कुरुते विस्मयं कस्य कथ्यताम् ॥
मुनिरुवाच ।
प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभम् ।
मया दृष्टासि तन्वङ्गि प्रविष्टा च ममाश्रमम् ॥
इयञ्च वर्त्तते सन्ध्या परिणाममहर्गतम् ।
उपहासः किमर्थोऽयं सद्भावः कथ्यतां मम ॥
प्रम्लोचोवाच ।
प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न ते मृषा ।
किन्त्वद्य तस्य कालस्य गतान्यब्दशतानि ते ॥
सोम उवाच ।
ततः ससाध्वसो विप्रस्तां पप्रच्छायतेक्षणाम् ।
कथ्यतां भीरु कः कालस्त्वया मे रमतः सह ॥
प्रम्लोचोवाच ।
सप्तोत्तराण्यतीतानि नववर्षशतानि ते ।
मासाश्च षट् तथैवान्यत् समतीतं दिनत्रयम् ॥
ऋषिरुवाच ।
सत्यं भीरु वदस्येतत् परिहासोऽथ वा शुभे ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥
प्रम्लोचोवाच ।
वदिष्याम्यनृतं ब्रह्मन् कथमत्र तवान्तिके ।
विशेषेणाद्य भवता पृष्टा मार्गानुवर्त्तिना ॥
सोम उवाच ।
निशम्य तद्वचः सत्यं स मुनिर्नृपनन्दनाः ।
धिङ्मां धिङ्मामतीवेत्थं निनिन्दात्मानमात्मना ॥
मुनिरुवाच ।
तपांसि मम नष्टानि हृतं ब्रह्मविदां धनम् ।
हृतो विवेकः केनापि योषिन्मोहाय निर्म्मिता ॥
ऊर्म्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे ।
मतिरेषा हृता येन धिक् तं काममहाग्रहम् ॥
व्रतानि वेदविद्याप्तिकारणान्यखिलानि च ।
नरकग्राममार्गेण सङ्गेनापहृतानि मे ॥
विनिन्द्येत्थं स धर्म्मज्ञः स्वयमात्मानमात्मना ।
तामप्सरसमासीनामिदं वचनमब्रवीत् ॥
गच्छ पापे यथाकामं यत् कार्य्यं तत्कृतं त्वया ।
देवराजस्य मत्क्षोभं कुर्व्वन्त्या भावचेष्टितैः ॥
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना ।
सतां साप्तपदं मैत्रमुषितोऽहं त्वया सह ॥
अथवा तव को दोषः किं वा कुप्याम्यहं तव ।
ममैव दोषो नितरां येनाहमजितेन्द्रियः ॥
यया शक्रप्रियार्थिन्या कृतो मे तपसो व्ययः ।
त्वया धिक् तां महामोहमञ्जूषां सुजुगुप्सिताम् ॥
सोम उवाच ।
यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम् ।
तावद्गलत्स्वेदजला सा बभूवातिवेपथुः ॥
प्रवेपमानां सततं खिन्नगात्रलतां सतीम् ।
गच्छ गच्छेति सक्रोधं उवाच मुनिसत्तमः ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी स्वेदं ममार्ज्ज तरुपल्लवैः ॥
वृक्षाद्वृक्षं ययौ बाला तदग्रारुणपल्लवैः ।
निर्म्मार्ज्जमाना गात्राणि गलत्स्वेदजलानि वै ॥
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः ।
निर्ज्जगाम स रोमाञ्चस्वेदरूपी तदङ्गतः ॥
तं वृक्षा जगृहुर्गर्भमेकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा ववृधे शनैः ॥
वृक्षाग्रगर्भसंभूता मारिषाख्या वरानना ।
तां प्रदास्यन्ति वो वृक्षाः कोप एष प्रशाम्यताम् ॥
कण्डोरपत्यमेवं सा वृक्षेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रम्लोचा तनया च सा ॥
स चापि भगवान् कण्डुः क्षीणे तपसि सत्तमः ।
पुरुषोत्तमाख्यं मैत्रेय विष्णोरायतनं ययौ ॥
तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः ।
ब्रह्मपारमयं कुर्व्वन् जपमेकाग्रमानसः ।
ऊर्द्ध्वबाहुर्महायोगी स्थित्वासौ भूपनन्दनाः ॥")
वार्च्चः, पुं, हंसः । वारि चरतीत्यर्थे डप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥
वार्णिकः, त्रि, (वर्णलेखनं शिल्पमस्य । वर्ण+ठञ् ।) लेखकः । इति शब्दमाला ॥
वार्त्तं, क्ली, असारम् । आरोग्यम् । इत्यमरः । ३ । ३ । ७५ ॥
वार्त्तः, त्रि, (वृत्तिरस्यस्येति । "प्रज्ञाश्रद्धार्च्चा-वृत्तिभ्यो णः ।" ५ । २ । १०१ । इति णः ।) निरामयः । इत्यमरः । २ । ६ । ५७ ॥ वृत्ति-शाली । इत्यजयपालः ॥
वार्त्तकः, पुं, पक्षिविशेषः । वटेर इति भाषा । यथा,—

"वार्त्ताकी वार्त्तकश्चिच्चन्तोऽन्या वर्त्तका स्मृता।
वर्त्तकोऽग्निकरः प्रोक्तो ज्वरदोषभयापहः।
सुरुच्यः शुक्रदो बल्यो वर्त्तकाल्पगुणा तनः॥"
इति भावप्रकाशः॥

वार्त्ता, स्त्री, (वृत्तिरस्या अस्तीति। "प्रज्ञाश्रद्धा-र्चावृत्तिभ्यो णः।" ५।२।१०१। इति णः। ततष्टाप्।) दुर्गा। यथा,—
"पश्वादिपालनाद्देवी कृषिकर्म्मान्तकारणात्।
वर्त्तनाद्धारणाद्वापि वार्त्ता सा एव गीयते॥"
इति देवीपुराणे ४५ अध्यायः॥
वृत्तिः। जनश्रुतिः। इत्यमरः।१।६।६॥
उदन्तः। (यथा, मोहमुद्गरे। ८।
"यावद्वित्तोपार्ज्जनशक्तः
तावन्निजपरिवारो रक्तः।
तदनु च जरया जर्ज्जरदेहे
वार्त्तां कोऽपि न पृच्छति गेहे॥")
वार्त्तिज्ञः। कृष्यादि। इति मेदिनी। ते, ५६॥
(यथा, मनौ। ६।३२६।
"वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्।
वार्त्तायां नित्ययुक्तः स्यात् पशूनाञ्चैव रक्षणे॥"
वार्त्तेयं चतुर्विधा। यथा, भागवते।१०।२४।२१।
"कृषिवाणिज्यगोरक्षाकुसीदं तुर्य्यमुच्यते।
वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम्॥")
वार्त्ताकः, पुं, (वर्त्ततेऽनेनेति। वृत्+"वृतेर्ड्डिच।" उणा० ३।७८। इति काकुः। "बाहु-लकात् उकारस्यार्द्धेऽपि वार्त्ताकवार्त्ताकौ।" इत्युज्ज्वलदत्तोक्त्या सिद्धम्।) वार्त्ताकुः। इति त्रिकाण्डशेषः॥ वार्त्तकपत्री। इति भाव-प्रकाशः॥

वार्त्ताकी, [न्] पुं, वार्त्ताकुः। इत्यमरटीकायां भरतः॥

वार्त्ताकी, स्त्री, वृहती। इति भावप्रकाशः॥ वार्त्ताकुः। इत्यमरः।२।४।११४॥

वार्त्ताकुः, स्त्री, (वर्त्तते इति। वृत्+"वृते-र्ड्डिच।" उणा० १।७६। इति काकुः।) स्वनामख्यातफलवृक्षः। वेगुन इति भाषा॥ तत्पर्य्यायः। सिंहली २ सिंही ३ भण्टाकी ४ दुष्प्रधर्षिणी ५ वार्त्ताकी ६ वार्त्ता ७ वार्त्ति-घ्नः ८ वार्त्ताकः ९ शाकबिल्वः १० राज-कुष्माण्डः ११। इति जटाधरः॥ वार्त्तिकः १२ वातिगमः १३ वृन्ताकः १४ वङ्गणः १५ अङ्गणः १६। इति शब्दरत्नावली॥ कण्ट-वृन्ताकी १७ कण्टालुः १८ कण्टपत्रिका १९ निद्रालुः २० मांसफला २१ वृन्ताकी २२ महोटिका २३ चित्रफला २४ कण्टकिनी २५ महती २६ कटुफला २७ मिश्रवर्णफला २८ नीलफला २९ रक्तफला ३० शाकश्रेष्ठा ३१ वृत्तफला ३२ नृपप्रियफला ३३। अस्या गुणाः कटुत्वम्। रुच्यत्वम्। मधुरत्वम्। पित्तना-शित्वम्। बलपुष्टिकारित्वम्। हृद्यत्वम्। गुरु-त्वम्। यागेषु निन्दितत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"अग्निप्रदा मारुतनाशिनी च
शुक्रप्रदा शोणितवर्द्धिनी च।
हृल्लासकासारुचिनाशिनी च
वार्त्ताकुरेषा गुणसम्प्रयुक्ता॥
सा बाला कफवातघ्नी पक्वा सक्षारपित्तला।
सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी॥
अङ्गारपक्वा वार्त्ताकुः किञ्चित्पित्तकरी मता।
कफमेदोऽनिलहरा सरा लघुतरा परा॥"
इति राजवल्लभः॥
अन्यच्च।
"वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम्।
ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु॥
तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु।
वृन्ताकं पित्तलं किञ्चिदङ्गारोपरिपाचितम्॥
कफमेदोऽनिलामघ्नमत्यन्तं लघु दीपनम्।
तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम्॥
अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत्।
तदर्शःसु विशेषेण हितं हीनञ्च पूर्व्वतः॥"
इति भावप्रकाशः॥

वार्त्ताकुः, पुं. (वृत्+काकुः।) वार्त्ताकी। इति त्रिकाण्डशेषः॥

वार्त्तायनः, पुं, (वार्त्तानामयनमनेनेति।) प्रवृत्तिज्ञः। तत्पर्य्यायः। हैरिकः २ गूढ़पूरुषः ३ प्रणिधिः ४ यथार्हवर्णः ५ अवसर्पः ६ मन्त्रवित् ७ चरः ८ स्पशः ९ चारः १०। इति हेमचन्द्रः।३।३९८॥

वार्त्तावहः, पुं, धान्यतण्डुलादेर्वार्त्तां वहति यः। पसारी इति भाषा। तत्पर्य्यायः। वैवधिकः २। इत्यमरभरतौ॥ वार्त्तीवहः ३। इति शब्द-रत्नावली॥ संवादवाहके, त्रि॥

वार्त्तिकः, पुं, (वृत्तिं वेदेति। वृत्ति+उक्थादित्वात् ठक्।) प्रवृत्तिज्ञः। चरः। इति त्रिकाण्ड-शेषः॥ (यथा, कथासरित्सागरे।२४।७६।
"दुर्गतो वार्त्तिकजनो लोभात् किं नाम ना
चरेत्॥"
(वार्त्ता कृष्यादिस्तत्र साधुः। ठक्।) वैश्यः। (वार्त्ते आरोग्ये साधुरिति। ठक्।) वर्त्तिक-पक्षी। इति राजनिर्घण्टः॥ वार्त्ताकी। इति शब्दरत्नावली॥ (वृत्तौ साधुरिति। वृत्ति+"कथादिभ्यष्ठक्।" ४।४।१०२। इति ठक्। सूत्रवृत्तिनिपुणे, त्रि॥)

वार्त्तिकं, क्ली, (वृत्तिर्ग्रन्थसूत्रविवृतिः। तत्र साधुः। वृत्ति+"कथादिभ्यष्ठक्।" ४।४।१०२। इति ठक्।) उक्तानुक्तदुरुक्तार्थव्यक्तीकारक-ग्रन्थः। यथा,—
"उक्तानुक्तदुरुक्तार्थचिन्ताकारि तु वार्त्तिकम्॥"
इति हेमचन्द्रः॥

वार्त्तिका, स्त्री, (वार्त्तिक+टाप्।) पक्षिविशेषः। वटेर इति भाषा। तत्पर्य्यायः। विष्णुलिङ्गी २। इति हारावली॥

वार्त्रघ्नः, पुं. (वृत्रघ्न इन्द्रस्यापत्यं पुमान्। वृत्रघ्न +अण्।) अर्ज्जुनः। इति त्रिकाण्डशेषः॥
जयन्तः। वृत्रघ्नसम्बन्धिनि, त्रि॥ (यथा, भाग-वते।६।१२।३४।
"तदा च खे दुन्दुभयो विनेदु-
र्गन्धर्व्वसिद्धाः समहर्षिसङ्घाः।
वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना
मन्त्रैर्मुदा कुसुमैरभ्यवर्षन्॥")

वार्द्दरं, क्ली, कृष्णलावीजम्। दक्षिणावर्त्तशङ्खः। काकचिञ्चा। भारती। इति मेदिनी। रे,२११॥ कृमिजम्। जलम्। आम्रवीजम्। इति विश्वः॥

वार्द्दलं, क्ली, (वार्भिः सलिलैर्द्दलतीति। दल+अच्। सदा मेघाच्छन्नवृष्टिपातात्तथात्वम्।) दुर्द्दिनम्। इति मेदिनी। ले,११९॥ तन्मते पवर्गीयादिः॥ (वादल इति भाषा॥)

वार्द्दलः, पुं, (वार्द्दल्यतेऽनेनेति। दल+"पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) मेलानन्दा। सा तु मस्याधारः। इति मेदिनी। ले,११९॥

वार्द्धकं, क्ली, (वृद्धानां समूहः। "गोत्रोक्षोष्ट्रोर-भ्रेति।" ४।२।३९। इत्यत्र "वृद्धाच्चेति।" काशिकोक्तेः वुञ्।) वृद्धसंघातः। (वृद्धस्य भावः कर्म्म वेति। मनोज्ञादित्वात् वुञ्।) वृद्धस्य भावः। वृद्धस्य कर्म्म। इति मेदिनी। के, ५६॥ (यथा, मार्कण्डेयपुराणे।१०९। २४।
"बाल्ये बालक्रिया पूर्व्वं तद्वत् कौमारके च या।
यौवने चापि या योग्या वार्द्धके वनसंश्रया॥"
त्रि, वृद्धः। यथा, नैषधे।१।७७।
"फलानि पुष्पाणि च पल्लवे करे
वयोऽतिपातोद्गतवातवेपिते।
स्थितैः समादाय महर्षिवार्द्धकाद्
वने तदातिथ्यमशिक्षि शाखिभिः॥"
"महर्षीणां मुनिश्रेष्ठानां मध्ये यो वार्द्धको वृद्ध-स्तस्मात्। त्रिषु स्याद्वार्द्धको वृद्धे क्लीवं तद्भाव-संघयोरिति बलः।" इति तट्टीका॥)

वार्द्धक्यं, क्ली, (वार्द्धकमेव। वार्द्धक+चतुर्वर्णादि-त्वात् स्वार्थे ष्यञ्।) वृद्धावस्था। तत्पर्य्यायः। वार्द्धकम् २ वृद्धत्वम् ३ स्थाविरम् ४। इति जटाधरः॥ (यथा, महाभारते।९।५२।८।
"आत्मानं मन्यमानापि कृतकृत्यं श्रमान्विता।
वार्द्धक्येन च राजेन्द्र! तपसा चैव कर्षिता॥")

वार्द्धिः, पुं, (वारि जलानि धीयन्तेऽत्रेति। धा+किः।) समुद्रः। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते।८।२०।३१।
"सोऽनन्तो भगवान् देवोऽनन्तसत्त्वो महाशयः।
अनन्तगुणवार्द्धिश्च आदिदेवो महाद्युतिः॥")

वार्द्धिभवं, क्ली, (वार्द्धौ समुद्रे भवतीति। भू+अच्।) द्रोणीलवणम्। इति राजनिर्घण्टः॥

वार्द्धुषिः, पुं. (वार्द्धुषिकः। पृषोदरादित्वात् कलोपः।) वृद्ध्याजीवः। इत्यमरः।२।९।५॥ (यथा, मनौ।३।१५३।
"प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः।
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा॥")

वार्द्धुषिकः, पुं, (वृद्ध्यर्थं द्रव्यं वृद्धिः तां प्रयच्छतीति । "प्रयच्छति गर्ह्यम् ।" ४ । ४ । ३० । इति ठक् । "वृद्धेर्वृधुषिभावो वक्तव्यः ।" इति वार्त्तिकोक्तेः वृधुषिभावः ।) वृद्धिजीवी । लभ्यभुक् । वाड़िखोर इति सुदखोर इति च भाषा । तत्पर्य्यायः । कुसीदकः २ वृद्ध्याजीवः ३ वार्द्धुषिः ४ । इत्यमरः ॥ कुसीदः ५ कुसीदिकः ६ । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा,—
"समर्घं धान्यमादाय महार्घं यः प्रयच्छति ।
स वै वार्द्धुषिको नाम हव्यकव्यबहिष्कृतः ॥"
इति स्मृतिः ॥

तस्य वृद्धिग्रहणनियमो यथा, मनुः ।
"अशीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः शतात् ।
द्विकं शतं वा गृह्णीयात् सतां धर्म्ममनुस्मरन् ॥
द्विकं शतञ्च गृह्णानो न भवत्यर्थकिल्विषी ।
शतकार्षापणेऽशीतिभागं विंशतिकाः पणाः ॥"
द्विकं पुराणद्वयम् । एवंविधं नियममतिक्रम्य अनापदि स्वयमन्यद्वारा वा स्वाच्छन्द्येन यो व्यवहरति तस्यैव प्रायश्चित्तम् । आपदि तु स्वयं करणे नियमातिक्रमे च न दोषः । इति प्रायश्चित्तविवेकः । इत्याह्निकतत्त्वम् ॥

वार्द्धुष्यं, क्ली, (वार्द्धुषेर्भावः । वार्द्धुषि + ष्यञ् ।) धान्यवर्द्धनम् । इति त्रिकाण्डशेषः ॥ (यथा, मनौ । ११ । ६२ ।
"कन्याया दूषणञ्चैव वार्द्धुष्यं व्रतलोपनम् ।
तड़ागारामदाराणामपत्यस्य च विक्रयः ॥")

वार्द्धेयं क्ली, (वार्द्धेः समुद्रस्येदमिति । वार्द्धि + ढञ् ।) द्रोणीलवणम् । इति राजनिर्घण्टः ॥

वार्ध्रं, क्ली,स्त्री,(वर्ध्र्या इदमिति । वर्ध्री + "चर्म्मणोऽञ् ।" ५ । १ । १५ । इति अञ् ।) चर्म्मरज्जुः । इत्यमरटीकायां रायमुकुटः ॥

वार्ध्रीणसः, पुं, (वार्ध्रीव नासिकास्येति । "अञ् नासिकायाः संज्ञायां नसं चास्थूलात् ।" ५ । ४ । ११८ । इति अच् नसादेशश्च । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) पशुविशेषः । यथा,—
"त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् ।
वार्ध्रीणसः प्रोच्यतेऽसौ हव्ये कव्ये च संस्तुतः ॥"
पक्षिविशेषः । यथा,—
"नीलग्रीवो रक्तशीर्षः कृष्णपादः सितच्छदः ।
वार्ध्रीणसः स्यात् पक्षीशो मम विष्णोरतिप्रियः ॥"
तेषां बलिदानफलम् । यथा,—
"रोहितस्य तु मत्स्यस्य मांसैर्वार्ध्रीणसस्य च ।
तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि मत्प्रिया ॥
महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकीम् ।
तृप्तिमाप्नोति परमां शार्दूलरुधिरैस्तथा ॥"
इति कालिकापुराणे ६६ अध्यायः ॥

तन्मांसेन पितृतृप्तिर्यथा,—
"वार्ध्रीणसामिषं लौहं कालशाकं तथा मधु ।
रौहिणामिषमन्यच्च यद्दत्तं तत् कुलोद्भवैः ॥
अनन्तां तां प्रयच्छन्ति तृप्तिं गौरीसुतस्तथा ।
पितॄणां नात्र सन्देहो गयाश्राद्धं च पुत्रक ॥"
इति मार्कण्डेयपुराणे श्राद्धकल्पाध्यायः ॥
"त्रिविधं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् ।
वार्ध्रीणसन्तु तं प्राहुर्याज्ञिकाः श्राद्धकर्म्मणि ॥
रक्तपादो रक्तशिरा रक्तचक्षुर्विहङ्गमः ।
कृष्णवर्णेन च तथा पक्षी वार्ध्रीणसो मतः ॥"
लौहं रक्तच्छागः ।
"दौहित्रं खड्गमित्याहुरपत्यं दुहितुस्तिलाः ।
कपिलाया घृतञ्चैव दौहित्रमिति चोच्यते ॥"
गौरीसुतः दशवर्षोढ़ाजः । इति तट्टीका ॥

वार्ध्री(ध्रि)नसः, पुं, वार्ध्रीव नासिका यस्य । नासाया नसादेशः ।) गण्डकः । गण्डार इति भाषा । यथा,—
"वार्ध्रीनसस्त्वेकचरो गण्डोत्साहश्च गण्डकः ॥"
इति त्रिकाण्डशेषः ॥

वार्भटः, पुं, (वारि जले भट इव ।) कुम्भीरः । इति त्रिकाण्डशेषः ॥

वार्म्मणं, क्ली, (वर्म्मणां समूहः । वर्म्मन् + "भिक्षादिभ्योऽण् ।" ४।२।३८। इति अण् ।) वर्म्मसमूहः । इत्यमरटीकायां सारसुन्दरी ॥

वार्म्मिणं, क्ली, (वर्म्मिणां समूहः । वर्म्मिन् + अण् ।) वर्म्मिसमूहः । इत्यमरटीकायां स्वामी ॥

वार्मुक्, [च्] पुं, (वाः वारि मुञ्चतीति । मुच् + क्विप् ।) मेघः । इति शब्दरत्नावली ॥ (यथा, भागवते । १० । २४ । ८ ।
"तं तात ! वयमन्ये च वार्मुचां पतिमीश्वरम् ।
द्रव्यैस्तद्रेतसा सिद्धैर्यजन्ते क्रतुभिर्नराः ॥")

वार्य्युद्भवं, क्ली, (वारिणि उद्भव उत्पत्तिर्यस्य ।) पद्मम् । इति धनञ्जयः ॥ जलजे, त्रि ॥

वार्य्यं, त्रि, (वारि + ष्यञ् ।) वारिसम्बन्धि । वारिशब्दात् ष्यप्रत्ययेन निष्पन्नम् ॥ (वृङ् सम्भक्तौ + "ऋहलोर्ण्यत् ।" ३।१।१२४ । इति ण्यत् । वरणीये, त्रि । यथा, ऋग्वेदे । ३ । २१ । २ ।
"स्वधर्म्मन् देववीतये श्रेष्ठं नो धेहि वार्य्यम् ॥"
निवारणीयः । यथा, महाभारते ।५।१८६।६।
"स्त्रीभावे परिनिर्विण्णा पुंस्त्वार्थे कृतनिश्चया ।
भीष्मे प्रतिचिकीर्षामि नास्मि वार्य्येति वै पुनः ॥")

वाराशिः, पुं, (वारां राशिर्यत्र ।) समुद्रः । इति पुराणम् ॥ (वाराशनशब्दात् प्रागयं स्यात् ॥)

वार्व्वटः, पुं, (वार्भिर्वेष्ट्यते वेष्ट्यते इति । वट + घञर्थे कः ।) वहित्रम् । इति त्रिकाण्डशेषः ॥

वार्व्वणा, स्त्री, नीलीमक्षिका । इति शब्दरत्नावली ॥

वार्षकं, क्ली, (वर्षस्येदम् । वर्ष + अण् । स्वार्थे कन् ।) सद्वीपवतपृथिवीदशभागान्तर्गतभागविशेषः । यथा,—
"दशधा विभजन् चैवमकरोत् पृथिवीमिमाम् ।
इन्द्राकुर्य्यैस्तदायादो मध्यदेशमवाप्तवान् ।
कोणवे वार्षकं चैवं दशहरिर्बभूव ह ॥"
इति वह्निपुराणे सागरोपाख्यानाध्यायः ॥

वार्षभानवी, स्त्री, (वृषभानोरपत्यं स्त्री । वृषभानु + अण् ।) वृषभानुकन्या । श्रीराधा । यथा,—
"यथा परात्परः कृष्णस्तथेयं वार्षभानवी ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥

वार्षिकं, क्ली, (वर्षासु जातमिति । वर्षा + "वर्षाभ्यष्ठक् ।" ४ । ३ । १८ । इति ठक् ।) त्रायमाणा । इति मेदिनी । के, १५६ ॥

वार्षिकः, त्रि, (वर्षे भवः । वर्ष + "कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) वर्षभवः । वात्सरिकः । इति मेदिनी । के, १५६ ॥ (यथा, भागवते । ११ । ११ । ३७ ।
"यात्राबलिविधानञ्च सर्व्ववार्षिकपर्व्वसु ॥")
यथाच ।
"शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥"
इति मार्कण्डेयपुराणम् ॥
वर्षाकालोद्भवश्च ॥ (यथा, अध्यात्मरामायणे । ४ । ४ । १ ।
"तत्र वार्षिकदिनानि राघवो
लीलया मणिगुहासु सञ्चरन् ।
पक्वमूलफलभोगतोषितो
लक्ष्मणेन सहितोऽवसत् सुखम् ॥")

वार्षिकी, स्त्री, (वर्षासु भवा । वर्ष + "वर्षाभ्यष्ठक् ।" ४ । ३ । १८ । इति ठक् । ङीष् ।) त्रायमाणा । इति राजनिर्घण्टः ॥

वार्षिला, स्त्री, (वार्जाता शिला । "शाकपार्थिवादिनामुपसंख्यानं उत्तरपदलोपश्च ।" २ । १ । ६० । इत्यस्य वार्त्तिकोक्त्या शाकपार्थिवादित्वात् समासः । पृषोदरादित्वात् शस्य षः ।) करका । इति शब्दचन्द्रिका ॥

वार्षुकः, त्रि, वर्षणशीलः । वृषधातोर्णुकप्रत्ययेन निष्पन्नो वर्षुकः । ततः स्वार्थे अप्रत्ययः ॥

वा(बा)र्हतं, क्ली, (वृहत्याः फलमिति । "प्लक्षादिभ्योऽण् ।" ४ । ३ । १६४ । इति अण् । विधानसामर्थ्यात्तस्य फले न लुक् ।) वृहतीफलम् । इत्यमरः ॥

वा(बा)र्हद्रथः, पुं, (वृहद्रथस्यापत्यं पुमान् । वृहद्रथ + अण् ।) जरासन्धः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ४ । १८ । १६ ।
"कंसः कुजोऽथ यवनेन्द्रसुतश्च केशी-
वार्हद्रथो वकबकीखरशाल्वमुख्याः ॥"
वृहद्रथस्येदमिति अण् ॥) वृहद्रथराजसम्बन्धिनि, त्रि ॥

वा(बा)र्हद्रथिः, पुं, (वृहद्रथस्यापत्यं पुमान् । वृहद्रथ + इञ् ।) जरासन्धः । इति त्रिकाण्डशेषः ॥

वा(बा)ल्कः, पुं, क्ली, पारिहार्य्यः । अङ्गुरीयके, त्रि । इति मेदिनी । के, १५३ ॥ अस्यार्यान्तराणि पवर्गीयबकारादौ द्रष्टव्यानि ॥ (गन्धयुक्तद्रव्यविशेषे, पुं । यथा, वृहत्संहितायाम् ।७७।५।
"त्वक्कुष्ठरेणुनलिकास्पृक्कारसतगरवाल्कैस्तुल्यैः ।
केशरपत्रविमिश्रैर्नरपतियोग्यं शिरःस्नानम् ॥")

वालवः, पुं, ववाद्येकादशकरणान्तर्गतद्वितीय-करणः। तत्र जातफलम्।

"कार्य्यस्य कर्त्ता स्वजनस्य भर्त्ता
सेनाप्रणेता कुलशीलयुक्तः।
उदारबुद्धिर्ब्बलवान् मनुष्य-
श्चेद्बालवाख्ये जननं हि यस्य॥"

इति कोष्ठीप्रदीपः॥

वाल्कं, त्रि, (वल्कस्य वल्कलस्य विकारः। वल्क + "तस्य विकारः।" ४।३।१३४। इति अण्।) वल्कसम्बन्धिवस्त्रम्। क्षौमादि। इत्यमरः॥ (यथा, मार्कण्डेयपुराणे। १५। २८।
"तथैवाजाविकं हृत्वा वस्त्रं क्षौमञ्च जायते।
कार्पासिके हृते क्रौञ्चो वाल्कहर्त्ता बकस्तथा॥")

वाल्कलं, त्रि, वल्कलनिर्म्मितम्। वल्कलस्येदं इत्यर्थे ष्णप्रत्ययेन निष्पन्नम्॥

वाल्कली, स्त्री, मदिरा। इति त्रिकाण्डशेषः॥

वाल्मिकिः, पुं, (वल्मिके भवः। वल्मिक + इञ्।) वाल्मीकमुनिः। इति द्विरूपकोषः॥

वाल्मीकः, पुं, (वल्मीके भवः। वल्मीक + अण्।) रामायणकर्त्ता मुनिः। तत्पर्य्यायः। प्राचेतसः २ वाल्मीकिः ३ कविज्येष्ठः ४ कुशीवशः ५ वल्मीकः ६। इति त्रिकाण्डशेषः॥ कविः ७ आद्यकविः ८। इति जटाधरः॥

वाल्मीकिः, पुं, (वल्मीके भवः। वल्मीक + इञ्।) भृगुवंशीयमुनिविशेषः। इति त्रिकाण्डशेषः॥ यथा —
"रावणान्तकरो राजा रघूणां वंशवर्द्धनः।
वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः॥"
इति मात्स्ये १२ अध्यायः॥
(यथा वा काव्यादर्शभूमिकायाम्।
"जाते जगति वाल्मीकौ कविरित्यभिधाभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥")

वावदूकः, त्रि, (पुनः पुनरतिशयेन वा वदतीति। वद + यङ् लुक् + "उलूकादयश्च।" उणा० ४। ४१। इति ऊकः। "सर्व्वस्व तु 'यजजपदशामिति।' ३। २। १६६। इति बहुलवचनादन्यतोऽपि भवत्यूकप्रत्ययः इति कृत्वा वावदूक इति साधितम्।" इत्युणादिवृत्तौ उज्ज्वलदत्तः।) अतिशयवचनशीलः। तत्पर्य्यायः। वाचोयुक्तिपटुः २ वाग्मी ३ वक्ता ४। इत्यमरः॥ वचक्नुः ५ सुवचाः ६ प्रवाक् ७। इति जटाधरः॥ (यथा, महाभारते। १२। १६। २४।
"अन्तस्त्वावमन्तारो वक्तारो जनसंसदि।
चरन्ति वसुधां कृत्स्नां वावदूका बहुश्रुताः॥")

वावयः, पुं, तुलसीविशेषः। इति शब्दचन्द्रिका॥ कृष्णवावुइ इति भाषा॥

वावुटः, पुं, वहित्रम्। इति शब्दरत्नावली॥

वावृत, य ङ उ संभक्तौ। वरणे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-सेट्। क्त्वावेट्।) य ङ, वावृत्यते। उ, वावर्त्तित्वा वावृत्त्वा। संभक्तिःसेवनम्। इति दुर्गादासः॥ ("ततो वावृत्यमानासाविति भट्टिः॥)

वावृत्तः, त्रि, कृतवरणः। इत्यमरः। ३।१।६२॥

वाश, य ङ ऋ शब्दे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-आह्वाने सक०-सेट्।) शब्द इह तिरश्चामेव। तिरश्चां वाशितं रुतमित्यमरात्। य ङ, वाश्यते पक्षी। ऋ, अववाशत्। उद्वाश्यमानः पितरं स राममिति भट्टौ। अनेकार्थत्वादाह्वानार्थः। वासितं सुरभीकृते। ज्ञानमात्रे खगारावे वासितं वस्त्रवेष्टिते। इति विश्वप्रकाशादन्त्यान्तोऽयमपीति। इति दुर्गादासः॥

वाशा, स्त्री, (वाश्यते इति। वाशृ शब्दे + "गुरोश्च हलः।" ३। ३। १०३। इति अः। स्त्रियां टाप्।) वासकः। इति शब्दरत्नावली॥

वाशिः, पुं, (वाश्यते इति। वश + णिच् + "वसिवपियजिराजिव्रजिसदिहनिवाशिवादीति।" उणा० ४। १२४। इति इञ्।) अग्निः। इत्युणादिकोषः॥

वाशिका, स्त्री, (वाशा + स्वार्थे कन्। टाप्। अत इत्वम्।) वासकः। इति शब्दरत्नावली॥

वाशितं, क्ली, (वाशृ शब्दे + भावे क्तः।) पशुपक्ष्यादीनां शब्दः। इत्यमरः॥ (यथा, महाभारते। ६। ३१। ५३।
"आर्त्तप्रलापान् मा तात! सलिलस्थः प्रभाषिथाः।
नैतन् मनसि मे राजन्! वाशितं शकुनेरिव॥")

वाशितः, त्रि, (धातूनामनेकार्थत्वात् वाश सुरभीकरणे + क्तः।) सुरभीकृतः। इत्यमरटीकायां स्वामी॥

वाशिता, स्त्री, (वाश + क्त। टाप्।) स्त्रीमात्रम्। करिणी। इत्यमरः॥

वाशिष्ठः, त्रि, वशिष्ठसम्बन्धी। वशिष्ठस्येदं इत्यर्थे ष्णप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। १। ११५। ८।
"लोमशस्तस्य तान् सर्व्वानाचख्यौ तत्र तापसान्।
भृगूनङ्गिरसश्चैव वाशिष्ठानथ काश्यपान्॥"
क्ली, उपपुराणविशेषः। यथा, देवीभागवते। १। ३। १६।
"माहेश्वरं भागवतं वाशिष्ठञ्च सविस्तरम्।
एतान्युपपुराणानि कथितानि महात्मभिः॥"
तीर्थभेदः। यथा, महाभारते। ३। ८४। ४५।
"ऋषिकुल्यां समासाद्य वाशिष्ठञ्चैव भारत!।
वाशिष्ठं समतिक्रम्य सर्व्वे वर्णा द्विजातयः॥")

वाशिष्ठी, स्त्री, (वशिष्ठस्येयमिति। वशिष्ठ + अण्। ङीप्।) गोमतीनदी। इति हेमचन्द्रः॥

वाशुरा, स्त्री, (वाश्यते अस्यामिति। वाशृ शब्दे + "मन्दिवाशिमथिचतिचंक्यङ्किभ्य उरच्।" उणा० १। ३६। इति उरच्। टाप्।) रात्रिः। इत्युणादिकोषः॥

वाश्रं, क्ली, (वाश्यतेऽस्मिन्निति। वाशृ + "स्फायितञ्चिवञ्चिशकीति।" उणा० २। १३। इति रक्।) मन्दिरम्। चतुष्पथः। इति मेदिनी। रे, ८३॥

वाश्रः, पुं, (वाश्यतेऽस्मिन्निति। वाशृ + "स्फायितञ्चीति।" उणा० २। १३। इति रक्।) दिवसः। इति मेदिनी। रे, ८३॥

वाष्पः, पुं, (बाधते इति। बाधृ लोडने + "खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः।" उणा०। ३। २८। इति पप्रत्यये धस्य षत्वं निपातनात्।) उष्मा। (यथा, रघौ। ७। ६८।
"तस्याः प्रतिद्वन्द्वभवाद्विषादात्
सद्यो विमुक्तं मुखमावभासे।
निश्वासवाष्पापगमात् प्रपन्नः
प्रसाद मात्मीयमिवात्मदर्शः॥")
लोहः। इति मेदिनी। पे, ११॥ अश्रुः। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। ३६४।
"प्राङ्गण एव कदा मां श्लिष्यन्ती मन्युकम्पि-कुचकलसा।
अंशनिषण्णमुखी सा स्नपयति वाष्पेण मम पृष्ठम्॥")

वाष्पकः, पुं, (वाष्प + संज्ञायां कन्।) मारिषः। नटिया शाक इति भाषा। यथा,—
"मारिषो वाष्पको मार्षः श्वेतो रक्तश्च स स्मृतः।
मारिषो मधुरः शीतो विष्टम्भी पित्तनुद्गुरुः॥
वातश्लेष्मकरो रक्तपित्तनुद्विषमाग्निजित्।
रक्तमार्षो गुरुर्नाति सक्षारो मधुरः सरः।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः॥"
इति भावप्रकाशः॥

वाष्पका, स्त्री, (वाष्प + संज्ञायां कन्। टाप्। अभिधानादिदभावः।) हिङ्गुपत्री। इति शब्दरत्नावली॥

वाष्पिका, स्त्री, (वाष्प + संज्ञायां कन् टाप् अत इत्वम्।) हिङ्गुपत्री। तत्पर्य्यायः। कारवी २ पृथ्वी ३ कवरी ४ पृथुः ५। इत्यमरः॥ त्वक्पत्री ६ वाष्पीका ७ कर्व्वरी। इति तट्टीका॥

वाष्पी, स्त्री, (वाष्प + गौरादित्वात् ङीष्।) वाष्पिका। इति शब्दरत्नावली॥

वाष्पीका, स्त्री, हिङ्गुपत्री। इति राजनिर्घण्टः॥ राँधुनी इति ख्यातञ्च। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। उष्णत्वम्। कृमिश्लेष्मनाशित्वञ्च। इति राजवल्लभः॥

वास, तृ क उपसेवायाम्। इति कविकल्पद्रुमः। (अदन्त चुरा०-पर०-सक०-सेट्।) उपसेवा तु गुणान्तराधानाम्। अववासद्वस्त्रं चन्दनः। इति दुर्गादासः॥

वासः, पुं, (वसन्त्यत्रेति। वस निवासे + "हलश्च।" ३। ३। १२१। इति घञ्।) गृहम्। इत्यमरः॥ (यथा, हरिवंशे। १७४। ३४।
"उत्तिष्ठोत्तिष्ठ भद्रन्ते विषादं मात्मधाः शुभे।
नैवं विधेषु वासेषु भयमस्ति वरानने!॥"
वास्यते इति। वास + घञ्।) वस्त्रम्। इति तट्टीका॥ (वस + भावे घञ्।) अवस्थानम्।

इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १२८ । ५० ।
"विहारावसथेष्वेव वीरा वासमरोचयन् ॥")
वासकः । इति शब्दरत्नावली ॥ सुगन्धिः । इति वासशब्दस्यार्थदर्शनात् ॥ * ॥ स्थानविशेषे वासस्य कर्त्तव्याकर्त्तव्यत्वं यथा,—

देवयान्युवाच ।
"वेदाहं तात बालापि कार्य्याणान्तु गतागतिम् ।
क्रोधे चैवाभिवादे वा वेद चापि बलाबलम् ॥
शिष्यस्याशिष्यवृत्तेर्हि न क्षन्तव्यं बुभूषता ।
तस्मात् सङ्कीर्णवृत्तेषु वासो मम न रोचते ॥
पुंसो येनाभिनन्दन्ति वृत्तेनाभिजनेन च ।
न तेषु च वसेत् प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु ॥
ये त्वेवमभिजानन्ति वृत्तेनापि जनेन च ।
तेषु साधुषु वस्तव्यं स वासः श्रेय उच्यते ॥"
इति मात्स्ये २८ अध्यायः ॥ * ॥

अपि च ।
"धार्म्मिकैरावृते ग्रामे न व्याधिबहुले भृशम् ।
न शूद्रराज्ये निवसेत् न पाषण्डजनैर्वृते ॥
हिमवद्विन्ध्ययोर्म्मध्यं पूर्ब्बपश्चिमयोः शुभम् ।
मुक्ता समुद्रयोर्देशं नान्यत्र निवसेत् द्विजः ॥
अर्द्धक्रोशान्नदीकूलं वर्जयित्वा द्विजोत्तमः ॥
नान्यत्र निवसेत् पुण्यं नान्त्यजग्रामसन्निधौ ॥
न संवसेच्च पतितैर्न चण्डालैर्न पुक्कशैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥"
इति कौर्म्मे उपविभागे २५ अध्यायः ॥

वासः, [स्] क्ली, (वस्यतेऽनेनेति । वस आच्छादने + "वसेर्णित् ।" उणा० ४ । २१७ । इत्यसुन् । स च णित् ।) वस्त्रम् । इत्यमरः ॥ (यथा, मनौ । ४ । ६६ ।
"उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ॥")
पत्रकम् । इति राजनिर्घण्टः ॥

वासकः, पुं, (वासयतीति । वासि + ण्वुल् ।) वृक्षविशेषः । वाकस इति भाषा । तत्पर्य्यायः । वैद्यमाता २ सिंही ३ वासिका ४ वृषः ५ अटरूषः ६ सिंहास्यः ७ वाजिदन्तकः ८ । इत्यमरः ॥ वाशा ९ वाशिका १० वृशः ११ अटरूषः १२ वाशकः १३ । इति तट्टीका ॥ वासा १४ वासः १५ वाजी १६ वैद्यसिंही १७ मातृसिंही १८ । इति शब्दरत्नावली ॥ वासका १९ सिंहपर्णी २० । इति जटाधरः ॥ सिंहिका २१ भिषङ्माता २२ वसादनी २३ सिंहमुखी २४ कण्ठीरवी २५ शितकर्णी २६ वाजिदन्ती २७ नासा २८ पञ्चमुखी २९ सिंहपत्री ३० मृगेन्द्राणी ३१ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । शीतत्वम् । कासरक्तपित्तकामलाकफवैकल्यज्वरश्वासक्षयनाशित्वञ्च । तत्पुष्पगुणाः । कटुपाकित्वम् । तिक्तत्वम् । कासक्षयहरत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वासको वासिका वासा भिषङ्माता च सिंहिका ।
सिंहास्यो वाजिदन्तः स्यादाटरूषोऽटरूषकः ॥
आटरूषो वृषो नाम्ना सिंहपर्णश्च स स्मृतः ।
वासको वातकृत् स्वर्य्यः कफपित्तास्रनाशनः ॥
तिक्तस्तुवरको हृद्यो लघुः शीतस्तृड्र्तिहृत् ।
श्वासकासज्वरच्छर्द्दिमेहकुष्ठक्षयापहः ॥"
इति भावप्रकाशः ॥ * ॥

गानाङ्गविशेषः । यथा,—
"मनोहरोऽथ कन्दर्पश्चारुनन्दन एव च ।
चत्वारो वासकाः प्रोक्ताः शङ्करेण स्वयं पुरा ॥"
केषाञ्चिन्मते नामान्यपि पृथक् ।
"विनोदो वरदश्चैव नन्दः कुमुद एव च ।
चत्वारो वासकाः प्रोक्ता गीतवाद्यविशारदैः ॥"
इति सङ्गीतदामोदरः ॥
(वासरः । इति वासकसज्जाशब्दार्थे आलङ्कारिकाः ॥)

वासकर्णी, स्त्री, यज्ञशाला । इति शब्दरत्नावली ॥

वासकसज्जा, स्त्री, (वासके प्रियसमागमवासरे सज्जतीति । सज्ज् + अच् । टाप् । यद्वा, वासकं वासवेश्म सज्जयतीति । सज्जि + अण् । टाप् ।) स्वीयादिनायिकाभेदः । (यथा, गीतगोविन्दे । ६ । ८ ।
"भवति विलम्बिनि विगलितलज्जा
विलपति रोदिति वासकसज्जा ॥")
तस्या लक्षणं यथा । अद्य मे प्रियवासर इत्थं निश्चित्य या सुरतसामग्रीं सज्जीकरोति सा वासकसज्जा । वासको वासरः । अस्याश्चेष्टा मनोरथसखीपरिहासदूतीप्रश्नसामग्रीविधानमार्गविलोकनादयः । मुग्धावासकसज्जा यथा,
"हारं गुम्फति तारकातिरुचिरं गृह्णाति काञ्चीलतां
दीपं न्यस्यति किन्तु तत्र बहुलं स्नेहं न दत्ते पुनः ।
आलीनामिति वासकस्य रजनौ कामानुरूपाः क्रियाः
साचिस्मेरमुखी नवोढ़सुमुखी दूरात् समुद्वीक्षते ॥"
मध्या वासकसज्जा यथा,—
"शिल्पं दर्शयितुं करोति कुतुकात् कह्लारहारस्रजं
चित्रप्रेमणकैतवेन किमपि द्वारं मसृणीयते ।
गृह्णात्याभरणं नवं सहचरी भूषाजिगीषामिषादित्थं पद्मदृशः प्रतीत्य चरितं स्मेराननोऽभूत् स्मरः ॥"
प्रौढ़ा वासकसज्जा यथा,—
"कृतं वपुषि भूषणं चिकुरधोरणी धूपिता
कृता शयनसन्निधौ क्रमुकवीटिकासम्भृतिः ।
अकारि हरिणीदृशा भवनमेत्य देहत्विषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दुर्दिनम् ॥"
मनोरथश्च यथा,—
"आवयोरङ्गयोर्दैधे भूयो विरहपल्लवः ।
अद्वैते च स्मितस्फीतं न स्यादन्योन्यवीक्षणम् ॥"
परकीया वासकसज्जा यथा,—
"श्वश्रूं स्वापयितुं छलेन च तिरोधत्ते प्रदीपाङ्कुरान्
धत्ते सौधकपोतपोतनिनदैः साङ्केतिकं चेष्टितम् ।
शश्वत्पार्श्वविवर्त्तिताङ्गलतिकं लोलत्कपोलद्युति
क्वापि क्वापि कराम्बुजं प्रियधिया तल्पान्तिकं न्यस्यति ॥"
इति रसमञ्जरी ॥
(तथाच साहित्यदर्पणे । ३ । ८९ ।
"कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा ॥")

वासका, स्त्री, (वासक + टाप् ।) वासकवृक्षः । इति जटाधरः ॥

वासगृहं, क्ली, (वासाय गृहम् ।) गर्भागारम् । इत्यमरः ॥ "हे गृहमध्यभागे शयनगृहे च गृहान्तर्गृहे इत्येके निर्व्वातत्वात् गर्भ इवागारं गर्भागारम् । वासाय गृहं वासगृहम् । वासवेश्मादि चात्र ।" इति भरतः ॥ (यथा, वृहत्संहितायाम् । ५३ । ७० ।
"वासगृहाणि च विन्द्याद्
द्विजादीनामुदग्दिगाद्यानि ।
विशताञ्च यथा भवनम्
भवन्ति तान्येव दक्षिणतः ॥")

वासतः, पुं, (वास्यते इति । वाश्र शब्दे + बाहुलकात् अतच् ।) गर्द्दभः । इति शब्दरत्नावली ॥

वासतेयी, स्त्री, (वसतौ साधुरिति । वसति + "पथ्यतिथिवसतिस्वपतेर्ढञ् ।" ४ । ४ । १०४ । इति ढञ् ।) रात्रिः । इति त्रिकाण्डशेषः ॥ (वसतिसाधुमात्रे, त्रि । यथा, भट्टौ । ४ । ८ ।
"वनेषु वासतेयेषु निवसन् पर्णसंस्तरः ।
शय्योत्थायं मृगान् विध्यन्नातिथेयो विचक्रमे ॥")

वासनं, क्ली, (वास्यते इति । वासि + ल्युट् ।) धूपनम् । वारिधानी । वस्त्रम् । इति मेदिनी । ने, १२९ ॥ वासः । इति शब्दरत्नावली ॥ ज्ञानम् । इति धरणिः ॥ निक्षेपाधारः । यथा, याज्ञवल्क्यः ।
"आधिसीमोपनिक्षेपजड़बालधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरिह ॥"
उपनिक्षेपस्तु ।
"वासनस्थमनाख्याय समुद्रं यद्विधीयते ॥"
इति नारदोक्तेः ॥
वासनं निक्षेपाधारभूतं सम्पुटादिकं समुद्रं ग्रन्थ्यादियुतम् । इति व्यवहारतत्त्वम् ॥ वसनसम्बन्धिनि, त्रि ॥ (वसनेन क्रीतमिति । वसन + "शतमानविंशतिकसहस्रवसनादण् ।" ५।१।२७। इति अण् । वसनेन क्रीते च, त्रि ॥)

वासना, स्त्री, (वासयति कर्म्मणा योजयति जीवमनांसीति । वस + णिच् + युच् । टाप् ।) प्रत्याशा । (यथा, भागवते । २ । २ । २ ।
"शाब्दस्य हि ब्रह्मण एष पन्था
यन्नामभिर्ध्यायति धीरपार्थैः ।

परिभ्रमंस्तत्र न विन्दतेऽर्थान्
मायामये वासनया शयानः ॥”)
ज्ञानम् । इति मेदिनी । ने, १३० ॥ स्मृतिहेतुः । तत्पर्य्यायः । संस्कारः२ भावना ३ । इति जटाधरः ॥ देहात्मबुद्धिजन्यमिथ्यासंस्कारः । इति न्यायशास्त्रम् ॥ दुर्गा । यथा,—
“वसत्यहरहा सर्व्वेषु भूतेष्वन्तर्हिताय च ।
धातुर्व्वस निवासेति वासना तेन सा स्मृता ॥”
इति देवीपुराणे ४५ अध्यायः ॥
(अर्कस्य भार्य्या । यथा, भागवते । ६।६।१३ ।
“अर्कस्य वासना भार्य्या पुत्रास्तर्षादयः स्मृताः ॥”)

वासन्तः, पुं, (वसन्ते भवः । वसन्त+“सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।” ४।३।१६ । इति अण् ।) उष्ट्रः । इति मेदिनी । ते, १५२ ॥ कोकिलः । इति राजनिर्घण्टः ॥ मलयवायुः । मुद्गः । इति त्रिकाण्डशेषः ॥ कृष्णमुद्गः । इति हेमचन्द्रः ॥ मदनद्रुमः । इति शब्दमाला ॥ अवहिते, त्रि । इति मेदिनी । ते, १५२ ॥ (वसन्तोऽस्मिन् च त्रि । इति सिद्धान्तकौमुदी । ४ । ३ । ४६ ॥)

वासन्तकं, त्रि, वसन्तसम्बन्धि । वसन्तस्येदमित्यर्थे कण्प्रत्ययेन निष्पन्नम् ॥ (वसन्ते उप्तम् । वसन्त+“ग्रीष्मवसन्तादन्यतरस्याम् ।” ४ । ३ । ४६ । इति वुञ् । (वसन्तोऽस्मिन्, त्रि ॥ इति सिद्धान्तकौमुदी ॥)

वासन्तिकः, त्रि, (वसन्तमधीते वेद वेति । वसन्त+“वसन्तादिभ्यष्ठक् ।” ४।२।६३। इति ठक् ।) विदूषकः यथा । वासन्तिकः केलिकिलो वैहासिको विदूषकः । इति हेमचन्द्रः ॥ (वसन्तस्येदमिति । “वसन्तात् च ।” ४ । ३ ।.२० । इति ठञ् । वसन्तसम्बन्धिनि, त्रि । यथा, भागवते । ५ । ८ । ५ ।
“सप्तसवशिरश्छिपदा सावित्री ग्रैष्मवासन्तिकान् मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥”)

वासन्ती, स्त्री, (वसन्तस्येयमिति । वसन्त+अण् । ङीष् ।) माधवी । यूथी । इति मेदिनी । ते,१५२॥ (यथा, रामायणे । ४ । १ । ७१ ।
“मालतीमल्लिकापद्मकरवीराश्च पुष्पिताः ।
केतक्यः सिन्धुवाराश्च वासन्त्यश्च सुपुष्पिताः ॥”)
पाटला । इति विश्वः ॥ कामोत्सवः । तत्पर्य्यायः । चैत्रावली २ मधूत्सवः ३ सुवसन्तः ४ काममहः ५ कर्द्दमी ६ । इति त्रिकाण्डशेषः ॥ गणिकारी । पुष्पलताविशेषः । तत्पर्य्यायः । प्रहसन्ती २ वसन्तजा ३ माधवी ४ महाजातिः ५ शीतसहा ६ मधुबहुला ७ वसन्तदूती ८ । अस्या गुणाः । शिशिरत्वम् । हृद्यत्वम् । सुरभित्वम् । श्रमहारित्वम् । धम्मिल्लामोदित्वम् । मन्दमदोन्मादनदायित्वञ्च । इति राजनिर्घण्टः ॥ नवमल्लिका । नेवारि इति हिन्दी भाषा । यथा,—
“नेपाली कथिता तज्ज्ञैः सप्तला नवमालिका ।
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयापजित् ॥”
इति भावप्रकाशः ॥ * ॥
अथ वासन्तीदुर्गापूजाप्रमाणम् । तत्र भविष्यपुराणम् ।
“मीनराशिस्थिते सूर्य्ये शुक्लपक्षे नराधिप ।
सप्तमीं दशमीं यावत् पूजयेदम्बिकां सदा ॥”
भविष्योत्तरे ।
“चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विधिवद्दुर्गां दशम्याञ्च विसर्ज्जयेत् ॥”
कालकौमुद्यां जावालिः ।
“चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विविधैर्द्रव्यैर्नववस्त्रकुसुमैस्तथा ॥
नानाविधैश्च बलिभिर्म्मधाभेर्दोषवर्ज्जितैः ।
विचित्राभरणैः पार्थ पट्टवस्त्रादिभिस्तथा ॥
एवं यः कुरुते पूजां वर्षे वर्षे विधानतः ।
ईप्सितान् लभते कामान् पुत्रपौत्रादिकान्नृप ॥”
अत्र भविष्योत्तरे निरुपपदमासशब्दसङ्केतात् भविष्यपुराणवचने मीनराशिस्थित इति मीनस्थरव्यारब्धचान्द्रमासीयतिथिपरम् । सौररव्यारब्धत्वे कदाचित् सप्तम्यादितिथित्रयालाभात् तदर्थे तत्तत्कृत्यलोपः स्यात् । न चेष्टापत्तिः भविष्यपुराणे सदापदोपादानात् जावालिवचने वर्षे वर्षे इत्युपादानाच्च नित्यत्वम् । एतदिष्टतं कालविवेके । एवं जावालौ शेषवचनपरार्द्धे पुत्रादिरूपफलश्रवणात् काम्यत्वञ्च । ततश्च काम्यतया पूजने कृते प्रसङ्गात् नित्यत्वसिद्धिः ।
“सिताष्टम्यान्तु चैत्रस्य पुष्पैस्तत्कालसम्भवैः ।
अशोकैरपि यः कुर्य्यात् मन्त्रेणानेन पूजनम् ।
न तस्य जायते शोको रोगो वाप्यथ दुर्गतिः ॥”
इति कालिकापुराणवचनात् केवलाष्टमीकल्प उक्तः । चैत्रमासमधिकृत्य ।
“नवम्यां पूजयेद्देवीं महिषासुरमर्द्दिनीम् ।
कुङ्कुमागुरुकस्तूरीधूपान्नध्वजतर्पणैः ।
दमनैर्मुरपत्रैश्च विजयाख्यपदं लभेत् ॥”
इत्यनेन केवलनवमीकल्प उक्तः । यवस्था तु शारदीयपूजाप्रकरणोक्ता ग्राह्या । विशेषस्तत्र बोधनप्रक्रिया नास्ति बोधितायाः बोधनासम्भवात् । इति प्राक् विवृतम् । होमादिकञ्च पूर्व्ववज्ज्ञेयमिति दिक् । इति दुर्गोत्सवविवेकः ॥ * ॥
अपि च ।
श्रीनारायण उवाच ।
“पुरा स्तुता सा गोलोके कृष्णेन परमात्मना ।
संपूज्य मधुमासे च प्रीतेन रासमण्डले ॥
मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा ।
तत्रैव काले सा दुर्गा ब्रह्मणा प्राणसङ्कटे ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६३ अध्यायः ॥
(चतुर्द्दशाक्षरवृत्तिविशेषः । इति छन्दोमञ्जरी । अस्या लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

वासन्तीपूजा, स्त्री, (वासन्ती तदाख्या पूजा ।) चैत्रमासीयदुर्गापूजा । यथा,—
“चैत्रे मासि सिते पक्षे नवम्यादिदिनत्रये ।
प्रातः प्रातर्महादेवीं दुर्गां भक्त्या प्रपूजयेत् ॥”
इति ॥
तत्राष्टम्यां अन्नपूर्णापूजा यथा,—
“तत्राष्टम्यामन्नपूर्णां पूर्व्वाह्णे साधकोत्तमः ।
रक्तवासै रक्तपुष्पैर्बलिभिः पूजयेच्छिवाम् ॥”
इति च मायातन्त्रे ७ पटलः ॥
अपि च ।
“विशेषाच्चैत्रमासस्य या तिथिः स्यात् सिताष्टमी ।
तस्यां यः पूजयेद्भक्त्या प्रसादयति मां ध्रुवम् ॥”
इति शाम्भवीतन्त्रे १४ पटलः ॥

वासयोगः, पुं, (वासाय सुगन्धार्थं युज्यते इति । युज+घञ् ।) चूर्णम् । इत्यमरः ॥ “हे आविर इति ख्याते । पटरसा चोदे इत्यन्ये । चूर्ण्यन्ते पेष्यन्ते चूर्णानि चूर्ण प्रेरणे अल् । वासे सुरभीकरणे युज्यन्ते उपयुज्यन्ते इति घञि वासयोगः ।” इति तट्टीकायां भरतः ॥ तत्पर्य्यायः । गन्धचूर्णम् २ पटवासम् ३ चूर्णकम् ४ । इति शब्दरत्नावली ॥

वासरः, पुं क्ली, (वासयतीति । वस्+णिच्+“अर्त्तिकमिभ्रमिचमिदेविवासिभ्यश्चित् ।”उणा० ३ । १३२ । इति अरः ।) दिवसः । इत्यमरः ॥ (यथा, कथासरित्सागरे । ४ । २३ ।
“प्रवृत्ते चावयोर्वादे प्रयाताः सप्त वासराः ॥”)
नागभेदे, पुं । इति मेदिनी । रे, २१३ ॥

वासवः, पुं, (वसुरेव । प्रज्ञाद्यण् ।) इन्द्रः । इत्यमरः ॥ (यथा, महाभारते । ३ । ४३ । २२ ।
“सहस्राक्षनियोगात् स पार्थः शक्रासनं गतः ।
अध्यक्रामदमेयात्मा द्वितीय इव वासवः ॥”)

वासवी, स्त्री, (वसोरपत्यं स्त्री । वसु+अण् । ङीप् ।) व्यासमाता । यथा,—
“व्यासस्याम्बा सत्यवती वासवी गन्धकालिका ।
योजनगन्धा दासेयी शालं कायनजीवसूः ॥”
इति हेमचन्द्रः ॥
(यथा, महाभारते । १ । ६३ । ७० ।
“दित्वा तां वासवीं कन्यां रम्भोरूं मुनिपुङ्गवः ।
सङ्गमं मम कल्याणि ! कुरुष्वेत्यभ्यभाषत ॥”)

वाससज्जा, स्त्री, (वासं गृहं सज्जयतीति । सज्ज+णिच्+अण् । टाप् ।) नायिकाभेदः । यथा,
“खण्डितोत्कण्ठिता लब्धा तथा प्रोषितभर्त्तृका ।
कलहान्तरिता वाससज्जा स्वाधीनभर्त्तृका ॥
अभिसारिकाप्यष्टौ ता बन्धक्यां पांशुलासती ॥”
इति जटाधरः ॥
अस्या विवरणं वासकसज्जाशब्दे द्रष्टव्यम् ॥

वासा, स्त्री, (वासयतीति । वस्+णिच्+अच् । टाप् ।) वासकः । इति शब्दरत्नावली ॥ (यथा, वैद्यके ।
“वासायां विद्यमानायामाशायां जीवितस्य च ।
रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥”)

वासागारं, क्ली, (वासाय वासस्य वा आगारम् ।) वासगृहम् । तत्पर्य्यायः । भोगगृहम्२ वासाटः३

३ पत्नाटः ४ निष्कुटः ५। इति त्रिकाण्ड-
शेषः ॥

वासिः, पुं, (वस निवासे + "वसिवपियजिराजीति।" उणा० ४।१२४। इति इञ्। कुठारभेदः। वाइस इति भाषा। इत्युणादिकोषः ॥

वासिका, स्त्री, (वासैव। स्वार्थे कन्। टाप्। अत इत्वञ्च।) वासकः। इति शब्दरत्नावली ॥

वासितं, क्ली, (वास्यते स्मेति। वास + क्तः।) रुतम्। इति मेदिनी। ते, १५२ ॥ ज्ञानमात्रम्। इति हेमचन्द्रः ॥ खगवरः। इति विश्वः ॥

वासितः, त्रि, (वास्यते स्मेति। वासि सुरभीकरणे + क्तः।) सुरभीकृतः। तत्पर्य्यायः। भावितः २। इत्यमरः ॥ द्वे सुगन्धिपुष्पादिवासितद्रव्ये। भाव्यते प्राप्यते भावितं भू क ङ प्राप्तौ कर्म्मणि क्तः। वासं सौरभं करोति इति ण्यन्तात्। कर्म्मणि क्ते वासितम्। इति तट्टीकायां भरतः ॥ जलादौ वासितः। इति शब्दरत्नावली ॥ ख्यातः। वस्त्रवेष्टितः। इति धरणिः ॥

वासिता, स्त्री, (वासयतीति वस निवासे + णिच् + क्तः। टाप्।) स्त्रीमात्रम्। करिणी। इत्यमरः ॥

वासिनी, स्त्री, (वासोऽस्या अस्तीति। वास + इनिः।) शुक्लझिण्टी। इति शब्दचन्द्रिका ॥

वासिष्ठं, क्ली, रुधिरम्। इति हेमचन्द्रः ॥

वासिष्ठं, त्रि, वशिष्ठकृतयोगशास्त्रादि। वशिष्ठेन कृतमित्याद्यर्थे (अण्) प्रत्ययेन निष्पन्नम् ॥ वसिष्ठसम्बन्धि च ॥

वासी, स्त्री, (वासयतीति वासि अच्। गौरादित्वात् ङीष्।) तक्षणी। वाइस इति ख्याताऽस्त्रम्। इति त्रिकाण्डशेषः ॥

वासुः, पुं, (सर्व्वोऽत्र वसति सर्व्वत्रासौ वसतीति वा। वस + बाहुलकात् उण्। इति १।१ संख्यक उणादिसूत्रवृत्तौ उज्ज्वलदत्तः।) नारायणः। इति त्रिकाण्डशेषः ॥ श्रीनिवासोऽप्यणो वासुः। इति जटाधरश्च ॥ विश्वरूपः। पुनर्व्वसुः। इत्युणादिकोषः ॥

वासुकिः, पुं, वसुकस्यापत्यमिति। वसुक + इञ्।) अहिपतिः। तत्पर्य्यायः। सर्पराजः २। इत्यमरः ॥ वासुकेयः ३। इति शब्दरत्नावली। तस्योत्पत्तिर्यथा,—

"सुरसा जज्ञिरे सर्पास्तेषां राजा तु तक्षकः।
वासुकिश्चैव नागानां गणाः क्रोधतमोऽधिकः ॥"

इति वह्निपुराणे काश्यपीयवंशः ॥

(जरत्कारुमुनिपत्नी मनसादेवी तु अस्यैव भगिनी।
"आस्तीकस्य मुनेर्माता भगिनी वासुकेस्तथा।
जरत्कारुमुनेः पत्नी नागमातर्नमोऽस्तु ते ॥"

इति मनसाप्रणाममन्त्रः ॥)

वासुकेयः, पुं, (वसुकस्यापत्यमिति। वसुक + ढञ्।) वासुकिः। इति शब्दरत्नावली ॥

वासुकेयस्वसा, [ऋ] स्त्री, (वासुकेयस्य वासुकेः स्वसा भगिनी।) मनसादेवी। इत्यमरः ॥

वासुदेवः, पुं, (वसुदेवस्यापत्यमिति। वसुदेव + "ऋष्यन्धकवृष्णिकुरुभ्यश्च।" ४। १। ११४। इति अण्। यद्वा, सर्व्वत्रासौ वसत्यात्मरूपेण विश्वम्भरत्वादिति। वस् + बाहुलकात् उण् वासुः। वासुश्चासौ देवश्चेति कर्म्मधारयः। अस्य नामनिरुक्तिस्तु परतो ज्ञेया।) श्रीकृष्णः। इत्यमरः ॥ तत्पर्य्यायः। वसुदेवभूः २। इति हेमचन्द्रः ॥ सत्यः ३ सुभद्रः ४ वासुभद्रः ५ षड्गजित् ६ षड्बिन्दुः ७ पृश्निशृङ्गः ८ पृश्निभद्रः ९ गदाग्रजः १० मार्जः ११ बभ्रुः १२ लोहिताक्षः १३ परमात्मलङ्कः १४। इति शब्दमाला ॥ अन्यत् कृष्णशब्दे द्रष्टव्यम् ॥ श्रीकृष्णशरीरस्य नित्यत्वं यथा,—

श्रीसनत्कुमार उवाच।

"भद्रं वो मुनयः शश्वत्तपसां फलमीप्सितम्।
कृष्णस्य कुशलप्रश्नं शिवबीजस्य निष्फलम् ॥
साम्प्रतं कुशलं वश्च दर्शनं परमात्मनः।
भक्तानुरोधाद्देहस्य परस्य प्रकृतेरपि ॥
निर्गुणस्य निरीहस्य सर्व्वबीजस्य तेजसः।
भारावतारणायैव चाविर्भूतस्य साम्प्रतम् ॥

श्रीकृष्ण उवाच।

शरीरधारिणश्चापि कुशलप्रश्नमीप्सितम्।
तत्कथं कुशलप्रश्नं मयि विप्र न विद्यते ॥

सनत्कुमार उवाच।

शरीरे प्राकृते नाथ सन्ततञ्च शुभाशुभम्।
नित्यदेहे क्षेमबीजे शिवप्रश्नमनर्थकम् ॥

श्रीभगवानुवाच।

यो यो विग्रहधारी च स च प्राकृतिकः स्मृतः।
देहो न विद्यते विप्र तां नित्यां प्रकृतिं विना ॥

सनत्कुमार उवाच।

रक्तबिन्दूद्भवा देहास्ते च प्राकृतिकाः स्मृताः।
कथं प्रकृतिनाथस्य बीजस्य प्राकृतं वपुः ॥
सर्व्वबीजस्य सर्व्वादिर्भवांश्च भगवान् स्वयम्।
सर्व्वेषामवताराणां प्रधानं बीजमव्ययम् ॥
त्वां वदन्ति वेदाश्च नित्यं नित्यं सनातनम्।
ज्योतिःस्वरूपं परमं परमात्मानमीश्वरम् ॥
मायया सगुणश्चैव मायेशं निर्गुणं परम्।
प्रवदन्ति च वेदाङ्गास्तथा वेदविदः प्रभो ॥

श्रीकृष्ण उवाच।

साम्प्रतं वासुदेवोऽहं भक्तवीर्य्याश्रितं वपुः।
कथं न प्राकृतो विप्र शिवप्रश्नमभीप्सितम् ॥

सनत्कुमार उवाच।

वासः सर्व्वनिवासश्च विश्वानि यस्य लोमसु।
तस्य देवः परं ब्रह्म वासुदेव इतीरितः ॥
वासुदेवेति तन्नाम वेदेषु च चतुर्षु च।
पुराणेष्वितिहासेषु यात्रादिषु च दृश्यते ॥
रक्तवीर्य्याश्रितो देहः कृते वेदे निरूपितः।
साक्षिणो मुनयश्चात्र धर्म्मः सर्व्वत्र एव हि ॥
साक्षिणो मम वेदाश्च रविचन्द्रौ च साम्प्रतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८७ अध्यायः ॥

तस्य नामव्युत्पत्तिः।

"सर्व्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः।
ततः स वासुदेवेति विद्वद्भिः परिगीयते ॥"

इति विष्णुपुराणे १ अंशे २ अध्यायः ॥

अपि च।

"सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि।
भूतेष्वपि च सर्व्वात्मा वासुदेवस्ततः स्मृतः ॥
खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः ॥
भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत्।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः ॥"

इति तत्रैव। ६। ५। ८०—८२ ॥*॥

(तथा च महाभारते। ५। ७०। ३।
"वसनात् सर्व्वभूतानां वसुत्वात् देवयोनितः।
वासुदेवस्ततो वेद्यो बृहत्वात् विष्णुरुच्यते ॥")

अस्य अङ्गप्रत्यङ्गमन्त्रा यथा,—

"बीजन्तु वासुदेवस्य पुरैव प्रतिपादितम्।
तदङ्गमन्त्रं राजेन्द्र द्वादशाक्षरमुच्यते ॥
ॐ नमो भगवते वासुदेवाय वै पदम्।
अङ्गमन्त्रं तथैतस्य वासुदेवस्य कीर्त्तितम् ॥
अस्य प्रत्यङ्गरूपन्तु दधिवामनसंज्ञकम्।
तस्य मन्त्रं नरश्रेष्ठ शम्भुना भाषितं शृणु ॥
ॐ नमो विष्णवे पूर्व्वं पदं तस्य प्रकीर्त्तितम्।
पदन्तु सुरपतये चतुर्थ्यन्तं महाबलम् ॥
स्वाहान्तं हृदयासन्नं प्रत्यङ्गं वैष्णवं मतम्।
मन्त्रद्वयन्तु यो वेद बीजं प्रत्यङ्गमन्त्रकम् ॥
स पूषा देवकायस्तु न स भूयोऽभिजायते।
सर्व्वसूत्ररतन्त्रोक्तः क्रमो ग्राह्यः प्रपूजने ॥
त्रिषु मन्त्रेषु च बुधो विशेषं शृणु भूपते।
रूपन्तु बीजमन्त्रस्य प्रथमं शृणु भूपते ॥
पूर्णचन्द्रोपमः शुक्लः पक्षिराजोपरिस्थितः।
चतुर्भुजः पीतवस्त्रैस्त्रिभिः संवीतदेहभृत् ॥
दक्षिणोर्द्धे गदां धत्ते तदधो विकचाम्बुजम्।
वामोर्द्धे चक्रमत्युग्रं धत्तेऽधः शङ्खमेव च ॥
श्रीवत्सवक्षाः सततं कौस्तुभं हृदि चाद्भुतम्।
धत्ते कक्षे ह्यधो वामे तूणीरं बाणपूरितम् ॥
दक्षिणे कोषगं खड्गं नन्दकं सशरासनम्।
शीर्षे किरीटं सद्योतं कर्णयोः कुण्डलद्वयम् ॥
आजानुलम्बिनीं चित्रां स्वर्णमालां गलस्थिताम्।
दधानं दक्षिणे देवीं श्रियं पार्श्वे तु बिभ्रतम् ॥
सरस्वतीं वामपार्श्वे चिन्तयेद्वरदं हरिम्।
मन्त्रस्य बीजरूपन्तु कथितं तव पार्थिव ॥
द्वादशाक्षरमन्त्रस्य रूपमन्यत् शृणुष्व मे।
नीलोत्पलदलश्यामं तथैव च चतुर्भुजम् ॥
दक्षिणोर्द्धे स्थितं पद्मं गदाञ्चाधः प्रचोदयेत्।
वामेऽधश्चक्रमतुलमूर्द्धे शङ्खञ्च बिभ्रतम् ॥
चिन्तयेद्वरदं देवं सर्व्वमन्यच्च पूर्व्ववत् ॥
अष्टादशाक्षरस्यास्य प्रत्यङ्गस्य च विस्तरम्।
शृणु राजन्नवहितो दारिद्र्यभयभञ्जनम् ॥
पूर्णेन्दुसदृशं कामं शुक्लवस्त्रं विचिन्तयेत्।
करे विचिन्तयेद्वामे पीयूषापूरितं घटम् ॥
दध्यन्नखण्डसंयुक्तं दक्षिणे स्वर्णभाजनम्।
पद्मासनगतं देवं चन्द्रमण्डलमध्यगम् ॥

शुक्लवस्त्रधरं देवं प्रमाणाद्वामनं सदा ।
इंसद्वासमायुक्तं चिलोकेशं त्रिविक्रमम् ।
चिन्तयेद्वरदं देवं सर्व्वकामफलप्रदम् ॥”
इति कालिकापुराणे ८२ अध्यायः ॥*॥
तस्योत्पत्तिर्यथा,—
“नभस्तु दशमे मासि विधौ ब्रह्मर्क्षसङ्गते ।
अष्टम्यामर्द्धरात्रौ च तस्यां जातो जनार्द्दनः ॥
इन्दीवरदलश्यामः पद्मपत्रायतेक्षणः ।
चतुर्भुजः सुन्दराङ्गो दिव्याभरणभूषितः ॥
श्रीवत्सकौस्तुभोरस्को वनमालाविभूषितः ।
वसुदेवस्य जातोऽसौ वासुदेवः सनातनः ॥
इति पाद्मोत्तरखण्डे ६० अध्यायः ॥*॥
तस्य चतुर्धा मूर्त्तिर्यथा,—
“एकांशेन जगत् कृत्स्नं व्याप्य नारायणः स्थितः ।
चतुर्द्धावस्थितो व्यापी सगुणो निर्गुणोऽपि वा ॥
एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला ।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला ॥
द्वितीया कालसंज्ञान्या तामसी शेषसंज्ञिता ।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः ॥
सत्त्वोद्रिक्ता तृतीयान्या प्रद्युम्नेति च संज्ञिता ।
जगत् स्थापयते सर्व्वं सा विष्णुप्रकृतिर्ध्रुवा ॥
चतुर्थी वासुदेवस्य मूर्त्तिर्ब्राह्मी सुसंज्ञिता ।
राजसी चानिरुद्धाख्या प्राद्युम्नी सृष्टि-
कारिका ॥
यः स्वपित्यखिलं हत्वा प्रद्युम्नेन सह प्रभुः ।
नारायणाख्यो ब्रह्मासौ प्रजासर्गकरो हि सः ॥
या सा नारायणतनुः प्रद्युम्नाख्या मुनीश्वराः ।
तया संमोहयेद्विश्वं सदेवासुरमानुषम् ॥
सैव सर्व्वजगत्सूतिः प्रकृतिः परिकीर्त्तिता ।
वासुदेवो ह्यनन्तात्मा केवलो निर्गुणो हरिः ॥
प्रधानं पुरुषः कालस्तत्त्व त्रयमनुत्तमम् ।
वासुदेवात्मकं नित्यमेतत् विज्ञाय मुच्यते ॥
एकवेदं चतुष्पादं चतुर्द्धा पुनरच्युतः ।
बिभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः ॥”
इति कूर्म्मपुराणे ४८ अध्यायः ॥

वासुदेवप्रियङ्करी, स्त्री, (वासुदेवस्य प्रियङ्करी ।) शतावरी । इति राजनिर्घण्टः ॥ श्रीकृष्णप्रियकारिणी च ॥

वासुपूज्यः, पुं, (वासुर्नारायण इव पूज्यः ।) जिनविशेषः । इति हेमचन्द्रः । १ । २७ ॥

वासुभद्रः, पुं, श्रीकृष्णः । इति शब्दमाला ॥ (यथा, विष्णुपादादि-केशान्तवर्णनस्तोत्रे । ३१ ।
“या वायावानुकूल्यात् सरति मणिरुचा भासमानासमाना
साकं साकम्पमंसे वसति विदधती वासुभद्रं सुभद्रम् ॥”)

वासुरा, स्त्री, स्त्रीमात्रम् । करिणी । रात्रिः । भूमिः । इति हेमचन्द्रः ॥

वासूः, स्त्री, (वास्यते स्नेहे इति । वास+बाहुलकात् ऊः ।) नाट्योक्तौ बाला । इत्यमरः ॥

वासौकः, [स्] क्ली, (वासाय ओकः स्थानम् ।) वासगृहम् । यथा,—
“गर्भागारेऽपवरको वासौकः शयनास्पदम् ।”
इति हेमचन्द्रः ॥

वास्तवं, क्ली, (वस्त्वेव । वस्तु+अण् ।) यथार्थभूतम् । यथा,—
“धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।”
इत्यादि श्रीभागवते प्रथमस्कन्धे १ अध्यायः ।
“वास्तवं परमार्थभूतं वस्तु । यद्वा, वास्तवशब्देन वस्तुनोऽंशो जीवः वस्तुनः कार्य्यं जगच्च तत् सर्व्वं वस्त्वेव न ततः पृथक् ।” इति तट्टीकायां श्रीधरस्वामी ॥

वास्तविकं, त्रि, (वस्तव वस्तु+ठक् ।) परमार्थभूतं वस्तु । वास्तवमेव इत्यर्थे वास्तवशब्दात् स्वार्थिकप्रत्ययेनापि निष्पन्नम् ॥

वास्तवोषा, स्त्री, रात्रिः । इति त्रिकाण्डशेषः ॥ किन्तु वास्तवा ऊषा इति नामद्वयमिति साधुपाठः ॥

वास्तव्यः, त्रि, वसतीति वस+“वसेस्तव्यत् कर्त्तरि णिच्च ।” ३ । १ । ९६ । इत्यस्य वार्त्तिकोक्त्या वासकर्त्ता । कर्त्तरितव्यत् । इति सिद्धान्तकौमुदी ॥ (यथा, कथासरित्सागरे । ३८ । १०७ ।
“इहैवास्मि महीराज वास्तव्यो नगरे द्विजः ॥”)
वासयोग्यश्च । वसतौ, पुं ॥

वास्तु, क्ली, वास्तूकशाकम् । इति राजनिर्घण्टः ॥

वास्तु, क्ली पुं, (वसन्ति प्राणिनो यत्र । वस निवासे +“वसेरगारे णिच्च ।” उणा० १ । ७० । इति तुण् । स च णित् ।) गृहकरणयोग्यभूमिः । तत्पर्य्यायः । वेश्मभूः २ । इत्यमरः ॥ पोतः ३ वाटी ४ । इति जटाधरः ॥ वाटिका ५ गृहपोतकः ६ । इति शब्दरत्नावली ॥ वास्तुकरणप्रमाणादिर्यथा,—
श्रीहरिरुवाच ।
“वास्तु संक्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम् ।
ईशानकोणादारभ्य ह्येकाशीतिपदे यजेत् ॥
ईशाने च शिरःपादौ नैरृतेऽग्न्यानिले करौ ।
आवासवासवेश्मादौ पुरे ग्रामे वणिक्पथे ॥
प्रासादारामदुर्गेषु देवालयमठेषु च ।
द्वात्रिंशत्तु सुरान् वाह्ये तदन्तश्च त्रयोदश ॥
ईशश्चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षेत्रयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो गणाधिपः ।
असुरः शेषपापौ च रोगोऽहिर्मुख्य एव च ॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
वहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ॥
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगान् ।
देवानेकोत्तरानेतान् पूर्व्वादौ नामतः शृणु ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्मृताः ।
ईशानकोणादारभ्य दुर्न्नयो वंश उच्यते ॥
आग्नेयकोणादारभ्य वंशो भवति दुर्द्धरः ।
अदितिं हिमवन्तञ्च जयन्तञ्च इदं त्रयम् ॥
नादिका कारिका नाम शक्राद्यन्यर्व्वगा पुनः ।
वास्तुदेवान् पूजयित्वा गृहप्रासादकृद्भवेत् ॥
सुरेभ्यः पुरतः कार्य्यं दिशाग्नेय्यां महानसम् ।
रूपनिर्गमणे येन पूर्व्वतः सत्रमण्डपम् ॥
गन्धपुष्पगृहं कार्य्यमैशान्यां पट्टसंयुतम् ।
भाण्डागारञ्च कौवेर्य्यां गोष्ठागारञ्च वायवे ॥
उदगाश्रयञ्च वारुण्यां वातायनसमन्वितम् ।
समित्कुशेन्धनस्थानमायुधानाञ्च नैरृते ॥
अभ्यागतालयं रम्यं शय्यासनसपादुकाम् ।
तोयाग्निदीपसद्भृत्यैर्युक्तां दक्षिणतो भवेत् ॥
गृहान्तराणि सर्व्वाणि सजलैः कदलीगृहैः ।
पञ्चवर्णैश्च कुसुमैः शोभितानि प्रकल्पयेत् ॥
प्राकारं तद्बहिर्दद्यात् पञ्चहस्तं प्रमाणतः ।
एवं विष्ण्वाश्रमं कुर्य्याद्वनैश्चोपवनैर्युतम् ॥
चतुःषष्टिपदो वास्तुः प्रासादादौ सुपूजितः ।
मध्ये चतुष्पदो ब्रह्मा द्विपदास्त्वर्य्यमादयः ॥
कर्णे चैवाथ पश्चाद्यास्तथा देवाः प्रकीर्त्तिताः ।
तेभ्योऽप्युभयतः सार्द्धा अन्येऽपि द्विपदाः सुराः ॥
चतुःषष्टिपदे देवा इत्येवं परिकीर्त्तिताः ।
चरकी च विदारी च पूतना पापराक्षसी ॥
ईशानाद्यास्तथा वाह्ये देवाद्या हेतुकादयः ।
हेतुकस्त्रिपुरान्तश्च अग्निर्वेतालको यमः ॥
अग्निजिह्वः कालकस्तु करालो ह्येकपादकः ।
ईशान्यां भीमरूपस्तु पाताले प्रेतनायकः ॥
आकाशे गन्धमाली स्यात् क्षेत्रपालास्तथा
यजेत् ।
विस्ताराभिहतं दीर्घं राशिद्वारन्तु कारयेत् ॥
वसुभिर्भागशुद्धिश्च शेषाङ्कादायमादिशेत् ।
पुनर्गुणितमष्टाभिर्ऋक्षभागन्तु भावयेत् ॥
यच्छेषं तद्भवेद्धिष्ण्यं भागैर्हृत्य व्ययं भवेत् ।
ऋक्षं चतुर्गुणं कृत्वा नवभिर्भागहारितम् ॥
शेषमंशं विजानीयात् देवलस्य मतं यथा ।
अष्टाभिर्गुणितं पिण्डं षष्टिभिर्भागहारितम् ॥
यच्छेषन्तु भवेज्जीवं मरणं भूतहारितम् ।
वास्तुक्रोडे गृहं कुर्य्यात् न पृष्ठे मानवः सदा ॥
वामपार्श्वेन स्वपिति नात्र कार्य्या विचारणा ।
सिंहकन्यातुलायाश्च द्वारं शुद्धिरथोत्तरम् ॥
एवञ्च वृश्चिकादौ स्यात् पूर्व्वदक्षिणपश्चिमम् ।
द्वारं दीर्घार्द्धविस्तारं द्वाराण्यष्टौ स्मृतानि च ॥
सुताप्यशेष्यमौचत्वं सुयानं सुत्रभूषणम् ।
पुत्त्रहीनन्तु रौद्रेण वीर्य्यघ्नं दक्षिणे तथा ॥
बद्धोऽन्नञ्चायुर्वृद्धिः पुत्त्रलाभसुहृत्प्रदे ।
धनदं नृपपीडादमर्थघ्नं रोगदं जले ॥
नृपभीतिर्म्मृतापत्या अनपत्यञ्च वैरिदम् ।
अर्थदं वार्थहाञ्चैव दोषदं पुत्त्रमृत्युदम् ॥
द्वाराण्युत्तरसंज्ञानि पूर्व्वद्वाराणि वच्म्यहम् ।

अभिभीतिर्बन्धुकन्या धनसम्मानकोपदम् ।
राजभ्नं कोपदं पूर्व्वे फलतो द्वारमीरितम् ।
ईशानादौ भवेत् पूर्व्वे आग्नेयादौ तु दक्षिणे ॥
नैरृत्यादौ पश्चिमे स्यात् वायव्यादौ तु चोत्तरे ।
अष्टभागे कृते भागे द्वाराणाञ्च फलाफलम् ॥
अश्वत्थप्लक्षन्यग्रोधाः पूर्व्वादौ स्यादुडुम्बरः ।
गृहस्य शोभनः प्रोक्त ईशाने चैव शाल्मलिः ॥
पूजितो विघ्नहारी स्यात् प्रासादस्य गृहस्य
च ।”
इत्यादि गारुड़े वास्तुमानलक्षणं ४६ अध्यायः ।
प्रासादलक्षणन्तु प्रासादशब्दे द्रष्टव्यम् । * ।
अपि च ।

ऋषय ऊचुः ।

“प्रासादभवनादीनां निवेशं विस्तरान्नृप ।
कुर्य्यात् केन विधानेन कश्च वास्तुरुदाहृतः ।

सूत उवाच ।

भृगुरत्रिर्व्वशिष्ठश्च विश्वकर्म्मा मयस्तथा ।
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ।
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च ।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ।
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः ।
संक्षेपेणोपदिष्टं यन्मनवे मत्स्यरूपिणा ॥
तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम् ।
पुरान्धकवधे घोरे घोररूपस्य शूलिनः ।
ललाटस्वेदसलिलमपतद्भुवि भीषणम् ।
करालवदनं तस्मात् समुद्भूतं समुल्वणम् ॥
ग्रसमानमिवाकाशं सप्तद्वीपां वसुन्धराम् ।
ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ ॥
तेन तत्समरे सर्व्वं पतितं यन्महीतले ।
तथापि तृप्तिमगमत्तद्भूतं न तदा यदा ॥
तदा शिवस्य पुरतस्तपश्चक्रे सुदारुणम् ।
क्षुधाविष्टन्तु तद्भूतमाहर्त्तुं जगतां त्रयम् ॥
ततः कालेन सन्तुष्टो भैरवस्तस्य चादरात् ।
वरं वृणीष्व भद्रं ते यदभीष्टं तवानघ ॥
तमुवाच ततो भूतं त्रैलोक्यग्रसनक्षमम् ।
भवामि देवदेवेश तथेत्युक्तश्च शूलिना ॥
ततस्तत् त्रिदिवं सर्व्वं भूमण्डलमशेषतः ।
स्वदेहेनान्तरीयञ्च बन्धानं प्रापतद्भुवि ॥
भीतभीतैस्ततो देवैर्ब्रह्मणा वाथ शूलिना ।
दानवासुररक्षोभिरवष्टब्धं समन्ततः ॥
येन यत्रैव चाक्रान्तं स तत्रैवाभवत् पुनः ।
निवासात् सर्व्वदेवानां वास्तुरित्यभिधीयते ॥
अवष्टब्धेन तेनापि विज्ञप्ताः सर्व्वदेवताः ।
प्रसीदध्वं सुराः सर्व्वे युष्माभिर्निश्चलीकृतः ॥
स्थास्यामि किं यदाहारमवष्टब्धमधोमुखम् ।
ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः ॥
आहारो वैश्वदेवान्ते न्यूनमस्मिन् भविष्यति ।
वास्तूपशमनो यज्ञस्तवाहारो भविष्यति ॥
एवमुक्तस्ततो हृष्टः स वास्तुरभवत्तदा ।
वास्तुयज्ञः स्मृतस्तस्मात् ततः प्रभृति शान्तये ।”
इति मात्स्ये वास्तुभूतोद्भवो नाम २२६ अध्यायः । * ॥

सूत उवाच ।

“अथातः संप्रवक्ष्यामि गृहकालविनिर्णयम् ।
यथाकालं शुभं ज्ञात्वा सदा भवनमारभेत् ॥
चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्यैष्ठे मृत्युं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे भृत्यलाभञ्च हानिं भाद्रपदे तथा ॥
पत्नीनाशोऽश्वयुजे विन्द्यात् कार्त्तिके धन-
धान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ॥
लाभञ्च बहुशो विन्द्यादग्निं माघे विनिर्द्दिशेत् ।
फाल्गुने काञ्चनं पुत्रानिति कालबलं स्मृतम् ॥
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ॥
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूलेषु व्यतीपातातिगण्डयोः ॥
विष्क भगण्डपरिघवर्ज्जं योगेषु कारयेत् ।
श्वेते मैत्रेय माहेन्द्रे गान्धर्व्वेऽभिजिद्रौहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ।
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र परिवर्ज्जयेत् ॥
प्रासादेष्वेवमेव स्यात् कूपवापीषु चैव हि ।
पूर्व्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत् ॥
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ।
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम् ॥
विप्राणां मधुरास्वादा कषाया क्षत्त्रियस्य च ।
कषायकटुका तद्वद्वैश्यशूद्रेषु शस्यते ॥
रत्निमात्रे तु वै गर्त्ते स्वनुलिप्ते तु सर्व्वतः ।
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेत् भूपरीक्षार्थं पूर्व्वं तत् सर्व्वदिङ्मुखम् ॥
दीप्तौ पूर्व्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ।
वास्तुः सामूहिको नाम दीप्यते सर्व्वतस्तु यः ॥
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
रत्निमात्रमधो गर्त्तं परीक्ष्यं खातपूरणे ।
अधिके श्रियमाप्नोति न्यूने हानिः समे समम् ।
हलकृष्टेऽथवा देशे सर्व्वबीजानि वापयेत् ॥
त्रिपञ्चसप्तमात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठोत्तमा कनिष्ठा भूर्व्वर्ज्जनीयतरा मता ॥
पञ्चगव्योषधिजलैः परीक्षित्वा च सेचयेत् ॥
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ।
पश्चात् पिष्टेन चालिप्येत् सूत्रेणालोक्य सर्व्वतः ॥
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्वा वास्तुविभागेषु विज्ञेया नवका नव ॥
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवांस्त्रिंशत् पञ्चदशैव तु ॥
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश ।
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत ॥
ईशानकोणादिषु तान् पूजयेद्धविषा नरः ।
शिखी चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ॥
सूर्य्यसत्यौ भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ॥
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ॥
असुरः शेषपापौ च रोगोऽहिर्मुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ॥
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्यथा ।
आपश्चैवाथ सावित्रो जयो भद्रस्तथैव च ॥
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगान् ।
साध्या नेकान्तरान् विद्यात् पूर्व्वाद्यान् नामतः
शृणु ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः स्मृतः ॥
अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृताः ।
आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्दितिस्तथा ॥
पदिकानाञ्च वर्गोऽयमेवं कोणेष्वशेषतः ।
तन्मध्ये तु बहिर्विंशत् द्विपदास्ते तु सर्व्वतः ॥
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥ * ॥
वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक् ।
वायुं यावत्तथा रोगात् पितृभ्यः शिखिनं पुनः ॥
मुख्याद्भृशमथो शेषात् वितथं यावदेव तु ।
सुग्रीवाददितिं यावत् भृगोः पर्ज्जन्यमेव च ॥
एते वंशाः समाख्याताः क्वचिद्दुर्ज्जय एव च ।
एतेषां यस्तु सम्पातः पदं मध्यं समन्ततः ॥
मर्म्म चैतत् समाख्यातं त्रिशूलं कोणगञ्च यत् ।
स्तम्भन्यासे तु वर्ज्यानि तुलाविधिषु सर्व्वदा ॥
कीलोच्छिष्टोपघातानि वर्ज्जयेद्यत्नतो नरः ।
सर्व्वत्र वास्तुर्निर्द्दिष्टः पितृवैश्वानरायतः ॥
मूर्द्धन्यग्निः समाविष्टो मुखे चापः समाहितः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावदधिष्ठितौ ॥
वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्द्दितिपर्ज्जन्यौ श्रोत्रेऽदितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ च पूजनीयौ प्रयत्नतः ।
स्कन्धे रोगादयस्तद्बाहौ पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्ते समास्थितौ ।
सावित्रः सविता तद्वद्धस्तं दक्षिणमाश्रितौ ॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्मणिबन्धने ।
तथैवासुरशोषौ च वामपार्श्वे समास्थितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सगृहक्षतः ॥
ऊर्व्वोर्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृङ्गसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः ॥
जयशक्रौ तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ॥
चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः ।
ब्रह्मा चतुष्पदस्तत्र कोणेष्वर्द्धपदास्ततः ॥
बहिष्कोणे तु चाष्टौ तु सार्द्धाश्चोभयसंस्थिताः ।
विंशतिर्द्विपदाश्चैषां चतुःषष्टिपदे स्मृताः । * ।
गृहारम्भे तु कण्डूतिः स्वाम्यङ्गे यत्र जायते ।
शल्यमपनयेत्तत्र प्रासादे भवनेऽपि वा ॥
सशल्यं भयदं तस्मादशल्यं शुभदायकम् ।
हीनाधिकाङ्गभावास्तु सर्व्वथा तु विवर्ज्जयेत् ॥
नगरग्रामदेशेषु सर्व्वत्रैवं प्रकल्पयेत् ।

चतुःशालं त्रिशालञ्च द्विशालञ्चैकशालकम् ।
नामतस्तानि वक्ष्यामि स्वरूपेण द्विजोत्तमाः ॥”
इति मात्स्ये एकाशीतिपदवास्तुनिर्णयो नाम
२२७ अध्यायः ॥ * ॥

सूत उवाच ।
“चतुःशालं प्रवक्ष्यामि स्वरूपान्नामतस्तथा ।
चतुःशालं चतुर्द्वारैरलिन्दैः सर्व्वतोमुखम् ॥
नाम्ना तत् सर्व्वतोभद्रं शुभं देवनृपालये ।
पश्चिमद्वारहीनन्तु नन्द्यावर्त्तं प्रचक्ष्यते ॥
दक्षिणद्वारहीनं तद्वर्द्धमानमुदाहृतम् ।
पूर्व्वद्वारविहीनन्तत् स्वस्तिकं नाम विश्रुतम् ॥
रुचकं चोत्तरद्वारविहीनं तत्प्रचक्ष्यते ।
सौम्यशालाविहीनन्तु त्रिशालं धन्यकञ्च तत् ॥
क्षेमवृद्धिकरं नृणां बहुपुत्त्रफलप्रदम् ।
शालया पूर्व्वया हीनं सुक्षेत्रमिति विश्रुतम् ॥
धन्यं यशस्यमायुष्यं शोकमोहविनाशनम् ।
चुल्ली तु याम्यया हीनं त्रिशालं शालया तु यत् ॥
कुलक्षयकरं नृणां सर्व्वव्याधिभयावहम् ।
हीनं पश्चिमया यत्तु पक्षघ्नं नाम तत् पुनः ॥
मित्रबन्धुसुतान् हन्ति तथा सर्व्वभयावहम् ।
याम्यापराभ्यां शालाभ्यां धनधान्यफलप्रदम् ॥
क्षेमवृद्धिकरं नृणां तथा पुत्त्रफलप्रदम् ।
यमं सूर्य्यञ्च विज्ञेयं पश्चिमोत्तरशालकम् ॥
राजाग्निभयदं नृणां कुलक्षयकरञ्च तत् ।
उदक्पूर्व्वे तु शाले द्वे दण्डाख्ये यत्र तद्भवेत् ॥
अकालमृत्युभयदं परचक्रभयावहम् ।
धनाख्यं यामपूर्व्वाभ्यां शालाभ्यां यद्द्विशालकम् ।
तच्छस्त्रभयदं नृणां पराभवभयावहम् ।
चुल्ली पूर्व्वापराभ्यान्तु सा भवेत् मृत्युसूचनी ॥
वधबन्धाय शस्त्राणामनेकभयकारकम् ।
काचसुत्तरयामाभ्यां शालाभ्यां भयदं नृणाम् ॥
सिद्धार्थवर्ज्यं वर्ज्यानि द्विशालानि सदा बुधैः ॥ * ॥
अथातः संप्रवक्ष्यामि भवनं पृथिवीपतेः ।
पञ्चप्रकारं तत् प्रोक्तमुत्तमादिविभेदतः ॥
अष्टोत्तरं हस्तशतं विस्तारश्चोत्तमो मतः ।
चतुर्ष्वन्येषु विस्तारो हीयते चाष्टभिः करैः ॥
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ।
युवराजस्य वक्ष्यामि तथा भवनपञ्चकम् ॥
षड्भिः षड्भिस्तथाशीतिर्हीयते तत्र विस्तरात् ।
त्र्यंशेन चाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥ * ॥
सेनापतेः प्रवक्ष्यामि सदा भवनपञ्चकम् ।
चतुःषष्टिस्तु विस्तारात् षड्भिः षड्भिस्तु हीयते ।
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ॥ * ॥
मन्त्रिणामथ वक्ष्यामि तथा भवनपञ्चकम् ।
चतुश्चतुर्भिर्हीना स्यात् करषष्टिः प्रविस्तरे ।
अष्टांशेनाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥ * ॥
सामन्तामात्यलोकानां वक्ष्ये भवनपञ्चकम् ।
चत्वारिंशत्तथाष्टौ च चतुर्भिर्हीयते क्रमात् ।
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वेतेषु शस्यते । * ।
शिल्पिनां कञ्चुकीनाञ्च वेश्यानां गृहपञ्चकम् ।
अष्टाविंशत् कराणान्तु द्विहीनं विस्तरेण तत् ।
द्विगुणं दैर्घ्यमेवोक्तं मध्यमेष्वेवमेव तु ॥ * ॥
दूतकर्म्मान्तिकादीनां वक्ष्ये भवनपञ्चकम् ।
चतुर्थांशाधिकं दैर्घ्यं विस्तारो द्वादशैव तु ॥
अध्यर्द्धकरहानिः स्यात् विस्तारात् पञ्चसु क्रमात् । * ।
दैवज्ञगुरुवैद्यानां सभास्तारपुरोधसाम् ॥
तेषामपि प्रवक्ष्यामि सदा भवनपञ्चकम् ।
चत्वारिंशच्च विस्ताराच्चतुर्भिर्हीयते क्रमात् ॥
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ॥ * ॥
चतुर्व्वर्णस्य वक्ष्यामि सामान्यं गृहपञ्चकम् ॥
द्वात्रिंशकं कराणान्तु चतुर्भिर्हीयते क्रमात् ।
आषोड़शादिति परं नूनमन्त्यावसायिनाम् ॥
दशांशेनाष्टभागेन त्रिभागेणाथ पादिकम् ।
अधिकं दैर्घ्यमित्याहुर्ब्राह्मणादेः प्रशस्यते ॥
सेनापतेर्नृपस्यापि गृहस्यैवोत्तरेण तु ।
नृपवासगृहं कार्य्यं भाण्डागारन्तथैव च ॥
सेनापतेर्गृहस्यापि चातुर्व्वर्ण्यस्य चान्तरम् ।
वासकोषगृहं कार्य्यं राजपूज्येषु सर्व्वदा ॥
अन्तरप्रभवाणाञ्च स्वपितुर्द्दूरमिष्यते ।
तथा हस्तशतादर्व्वाक् गदितं वनवासिनाम् ॥
सेनापतेर्नृपस्यापि सप्तत्या सहितेऽन्विते ।
चतुर्द्दशहृते व्यासे शालाव्यासः प्रकीर्त्तितः ॥
पञ्चत्रिंशद्धृते तस्मिन् अलिन्दः समुदाहृतः ।
तथा षट्त्रिंशद्धस्तात्तु सप्ताङ्गुलसमन्वितः ॥
विप्रस्य महती शाला न दैर्घ्यं परतो भवेत् ।
दशाङ्गुलाधिका तद्वत् क्षत्त्रियस्य विधीयते ॥
पञ्चत्रिंशत् करा वैश्ये अङ्गुलानि त्रयोदश ।
तावत्करैस्तु शूद्रस्य युता पञ्चदशाङ्गुलैः ॥
शालायास्तु त्रिभागेण यस्याग्रे वीथिका भवेत् ।
सोष्णीषं नाम तद्वास्तु पश्चाच्छ्रायोच्छ्रयम्भवेत् ॥
पार्श्वयोर्वीथिका यत्र सावष्टम्भन्तदुच्यते ।
समन्ताद्वीथिका यत्र सुस्थितं तदिहोच्यते ॥
शुभदं सर्व्वमेतत् स्यात् चातुर्व्वर्ण्यं चतुर्व्विधम् ।
विस्तरात् षोड़शो भागस्तथा हस्तचतुष्टयम् ॥
प्रथमो भूमिकोच्छ्राय उपरिष्टात् प्रहीयते ।
द्वादशांशेन सर्व्वासु भूमिकासु तथोच्छ्रयः ॥
पक्वेष्टके भवेद्भित्तिः षोड़शांशेन विस्तरात् ।
दारवेन विकल्पः स्यात् तथा मृण्मयभित्तिके ॥
गर्भमानेन मानन्तु सर्व्ववास्तुषु शस्यते ।
गृहव्यासस्य पञ्चाशदष्टादशभिरङ्गुलैः ॥
संयुतो द्वारविष्कम्भो द्विगुणश्चोच्छ्रयो भवेत् ।
द्वारशाखासु बाहुल्यमुच्छ्रायं करसम्मितैः ॥
अङ्गुलैः सर्व्ववास्तूनां पृथुत्वं शस्यते बुधैः ।
उडुम्बरोत्तमाङ्गे च तदर्द्धार्द्धं प्रविस्तरैः ॥”
इति मात्स्ये वास्तुविद्यासु गृहमाननिर्णयो
नाम २२८ अध्यायः ॥ * ॥

सूत उवाच ।
“अथातः संप्रवक्ष्यामि स्तम्भमानविनिर्णयम् ।
कृत्वा स्वभवनोच्छ्रायं सदा सप्तगुणं बुधः ॥
अशीत्यन्तं पृथुत्वं स्यादग्रे नवगुणैः सह ।
रुचकश्चतुरस्रः स्यादष्टाश्री वज्र उच्यते ।
द्विवज्रः षोड़शास्रस्तु द्वात्रिंशास्रः प्रलीनकः ।
मध्यप्रदेशे यः स्तम्भो वृत्तो वृत्त इति स्मृतः ॥
एते पञ्च महास्तम्भाः प्रशस्ताः सर्व्ववास्तुषु ।
पद्मवल्लीलता कार्य्या पत्रदर्शनरूपिता ॥
स्तम्भस्य नवमांशेन पद्मकुम्भोत्तराणि च ।
स्तम्भतुल्या तुला प्रोक्ता हीनाश्चोपतुला ततः ॥
त्रिभागेणेह सर्व्वत्र चतुर्भागेण वा पुनः ।
हीनं हीनञ्चतुर्थांशात्तथा सर्व्वासु भूमिषु ॥
वासगेहानि सर्व्वेषां प्रवेशे दक्षिणेन तु । * ।
द्वाराणि तु प्रवक्ष्यामि प्रशस्तानीह यानि तु ॥
पूर्व्वेणेन्द्रं जयन्तञ्च द्वारं सर्व्वत्र शस्यते ।
याम्यञ्च वितथञ्चैव दक्षिणेन विदुर्बुधाः ॥
पश्चिमे पुष्पदन्तञ्च वारुणञ्च प्रशस्यते ।
उत्तरेण तु भल्लाटं सौम्यञ्च शुभदं भवेत् ॥
तथा वास्तुषु सर्व्वत्र वेधं द्वारस्य वर्ज्जयेत् ।
द्वारे तु रथ्यया विद्धे भवेत् सर्व्वकुलक्षयः ॥
तरुणा दोषबाहुल्यं शोकः पङ्केन जायते ।
अपस्मारो भवेन्नूनं कूपवेधेन सर्व्वदा ॥
व्यथा प्रस्रवणेन स्यात् कीलेनाग्निभयम्भवेत् ।
विनाशो देवताविद्धे स्तम्भेन स्त्रीकृतो भवेत् ॥
गृहभर्त्तुर्व्विनाशः स्यात् गृहेण च गृहे कृते ।
अमेध्यावस्करैर्व्विद्धे गृहिणीबन्धनम्भवेत् ॥
तथा शस्त्रभयं विद्यादन्त्यजस्य गृहेण तु ।
उच्छ्रायद्विगुणां भूमिं त्यक्त्वा वेधो न विद्यते ॥
स्वयमुद्घाटिते द्वारे उन्मादो गृहमेधिनाम् ।
स्वयञ्च पिहिते विन्द्यात् कुलनाशं विचक्षणः ॥
मानाधिके राजभयं नीचे तस्करतो भयम् ।
द्वारोपरि च यद्द्वारं तदन्तकमुखं स्मृतम् ॥
आध्मानं मध्यदेशे तु अधिको यस्य विस्तरः ।
वज्रन्तु शकटं मध्ये सद्यो भर्त्तृविनाशनम् ॥
तथान्यपीड़ितद्वारं बहुदोषकरम्भवेत् ।
मूलद्वारं तथान्यन्तु नाधिकं शोभनम्भवेत् ॥
कुम्भश्रीपर्णिवल्लीभिर्म्मूलद्वारन्तु शोभयेत् ।
पूजयेच्चापि तन्नित्यं बलिना चाक्षतोदकैः ॥ * ॥
भवनस्य वटः पूर्व्वे दिग्भागे सर्व्वकालिकः ।
उडुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः ॥
प्लक्षश्चोत्तरतो धन्यो विपरीतस्त्वसिद्धये ।
कण्टकी क्षीरवृक्षश्च आसन्नः सफलो द्रुमः ॥
भयं हानिं प्रजाहानिं कुर्व्वन्ति क्रमशः सदा ।
न छिन्द्याद्यदि तानन्यानन्तरे स्थापयेत् शुभान् ॥
पुन्नागाशोकवकुलशमीतिलकचम्पकान् ।
दाड़िमी पिप्पली द्राक्षा तथा कुसुममण्डपम् ॥
जम्बीरपूगपनसद्रुमकेतकीभि-
र्जातीसरोजशतपत्त्रिकमल्लिकाभिः ।
यन्नारिकेलकदलीदलपाटलाभि-
र्युक्तं तदत्र भवनं श्रियमातनोति ॥”
इति मात्स्ये वास्तुविद्यासु वेधपरिवर्ज्जनो नाम
२२९ अध्यायः ॥ * ॥

सूत उवाच ।
“उदगादिप्लवं वास्तु समानशिरसन्तथा ।
परीक्ष्य पूर्व्ववत् कुर्य्यात् स्तम्भोच्छ्रायं विचक्षणः ॥

न देवधूर्त्तसचिवचत्वराणां समीपतः ।
कारयेद्भवनं प्राज्ञो दुःखशोकभयं यतः ॥
तस्य प्रदेशाश्चत्वारस्तस्योत्सङ्गोऽग्रतः शुभः ।
पृष्ठतः पृष्ठभङ्गस्तु सव्यावर्त्तः प्रशस्यते ॥
अपसव्यो विनाशाय दक्षिणे शीर्षकस्तथा ।
सर्व्वकामफलो नॄणां संपूर्णो नाम वामतः ॥
एवं प्रदेशमालोक्य यत्नेन गृहमारभेत् । * ।
अथ संवत्सरे पूर्णे मुहूर्त्ते शुभलक्षणे ॥
रत्नोपरि शिलां कृत्वा सर्व्वबीजसमन्विताम् ।
चतुर्भिर्ब्राह्मणैस्तम्भं वस्त्रालङ्कारपूजितम् ॥
शुक्लाम्बरधरः शिल्पी सहितो वेदपारगैः ।
स्थापितं विन्यसेत् तद्वत् सर्व्वौषधिसमन्वितम् ॥
नानाक्षतफलोपेतं वस्त्रताम्बूलसंयुतम् ।
ब्रह्मघोषेण वाद्येन गीतमङ्गलनिस्वनैः ॥
पायसं भोजयेद्विप्रान् होमस्तु मधुसर्पिषा ।
वास्तोष्पते प्रतिजानीहि मन्त्रेणानेन सर्व्वदा ॥
सूत्रपाते तथा कार्य्यमेवं स्तम्भोदये पुनः ।
द्वारवंशोच्छ्रये तद्वत् प्रवेशसमये तथा ॥
वास्तूपशमने तद्वत् वास्तुयज्ञस्तु पञ्चधा ।
ईशाने सूत्रपातः स्यादाग्नेये स्तम्भरोपणम् ॥
प्रदक्षिणञ्च कुर्व्वीत वास्तोः पदविलेखनम् ।
तर्ज्जनी मध्यमा चैव तथाङ्गुष्ठस्तु दक्षिणे ॥
प्रवालरत्नकनकं फलपिष्टकृतोदकम् ।
सर्व्ववास्तुविभागेषु शस्तम्पदृविलेखने ॥
न भस्माङ्गारकाष्ठेन न शस्त्रनखचर्म्मभिः ।
न च साश्मिकपालेन क्वचिद्वास्तु प्रलेखयेत् ॥
एभिर्विलेखनं कुर्य्यात् दुःखशोकामयादिकम् ।
यदा गृहप्रवेशः स्याच्छिल्पी तत्रोपलेखयेत् ॥
स्तम्भसूत्रादिके तद्वत् शुभाशुभफलोदयम् । * ।
आदित्याभिमुखं रौति शकुनः परुषं यदि ॥
तुल्याकालं स्पृशेदङ्गं गृहभर्त्तुः समात्मनः ।
वास्त्वङ्गे तद्विजानीयान्नरशल्यं भयप्रदम् ॥
शकुनानन्तरं तत्र हस्त्यश्वश्वापदम्भवेत् ।
तदङ्गसम्भवं विद्यात्तत्र शल्यं विचक्षणः ॥
प्रसार्य्यमाणे सूत्रे तु श्वगोमायुविलङ्घिते ।
तत्र शल्यं विजानीयात् खरशब्दे च भैरवे ॥
यदीशान्तेऽथ दिग्भागे मधुरं रौति वायसः ।
धनन्तत्र विजानीयादङ्गे वा स्वाम्यधिष्ठिते ॥
सूत्रच्छेदे भवेन्मृत्युर्व्याधिः कीले त्वधोमुखे ।
अङ्गारेषु तथोन्मादं कपालेषु च सम्भ्रमम् ।
कम्बुशल्ये च जानीयात् पुंश्चल्यं स्त्रीषु वास्तुवित् ।
गृहभर्त्तुर्गृहस्यापि विनाशः शिल्पिसम्भ्रमे ॥
स्तम्भस्थाने च्युते कुम्भे शिरोरोगं विनिर्द्दिशेत् ।
कुम्भापहारे सर्व्वस्य कुलस्यापि क्षयो भवेत् ॥
मृत्युं स्थानच्युते कुम्भे भग्ने बन्धं विदुर्ब्बुधाः ।
करसंख्याविनाशे तु नाशं गृहपतेर्विदुः ॥
बीजौषधिविहीने तु भूतेभ्यो भयमादिशेत् ।
प्रागुदक्षिणेन विन्यस्य स्तम्भे छत्रं विवेशयेत् ॥
ततः प्रदक्षिणेनान्यन्न्यसेत् स्तम्भं विचक्षणः ।
यस्माद्भयकरं नॄणां योजिताप्रदक्षिणम् ॥
रक्षां कुर्व्वीत यत्नेन स्तम्भोपद्रवनाशिनीम् ।
तथा फलवतीं शाखां स्तम्भोपरि निवेशयेत् ॥
प्रागुदक्प्लवनं कार्य्यं द्विमुखन्तु न कारयेत् ।
स्तम्भंवा भवनं वापि द्वारंवा स्वगृहन्तथा ॥
दिङ्मूढे कुलनाशः स्यात् न च सम्वर्द्धयेद्गृहम् ।
यदि सम्वर्द्धयेद्गेहं सर्व्वदिक्षु विवर्द्धयेत ॥
पूर्व्वेण वर्द्धितं वास्तु कुर्य्याद्वैराणि वै सदा ।
दक्षिणे वर्द्धितं वास्तु मृत्यवे स्यान्न संशयः ॥
पश्चाद्वृद्धन्तु यद्वास्तु तदर्थक्षयकारकम् ।
वर्द्धापितं तथा सौम्ये बहुसन्तापकारकम् ॥
आग्नेये यत्र वृद्धिः स्यात् तदग्निभयदम्भवेत् ।
वर्द्धितं राक्षसे कोणे शिशुक्षयकरं भवेत् ॥
वर्द्धापितन्तु वायव्ये वातव्याधिप्रकोपकृत् ।
ईशाने तु प्रजाहानिर्वास्तौ सम्वर्द्धिते सदा ॥*॥
ईशाने देवतागारं तथा शान्तिगृहं भवेत् ।
महानसं तथाग्नेये तत्पार्श्वे चोत्तरं जलम् ॥
गृहस्योपस्करं सर्व्वं नैरृते स्थापयेद्बुधः ।
बन्धस्थानं बहिःकुर्य्यात् स्नानमण्डपमेव च ॥
धनधान्यञ्च वायव्ये कर्म्मशाला ततो बहिः ।
एवं वास्तुनिवेशः स्यात् गृहभर्त्तुः शुभावहः ॥”
इति मात्स्ये वास्तुविद्यागृहनिर्णयो नाम २३० अध्यायः ॥ * ॥

सूत उवाच ।

“अथातः संप्रवक्ष्यामि दार्व्वाहरणमुत्तमम् ।
धनिष्ठापञ्चकं त्यक्त्वा विष्ट्यादिकमतः परम् ॥
ततः साम्वत्सरोद्दिष्टे दिने यायाद्वनं बुधः ।
प्रथमं बलिपूजान्तु कुर्य्यात् वृक्षाय सर्व्वदा ॥
पूर्व्वोत्तरेण पतितं गृहे दारु प्रशस्यते ।
अन्यथा न शुभं विद्याद्याम्यापरनिपातने ॥
क्षीरवृक्षोद्भवं दारु न गृहे विनिवेशयेत् ।
कृताधिवासं विहगैरनिलानलपीड़ितम् ॥
गजावभग्नञ्च तथा विद्युन्निर्घातपीड़ितम् ।
अर्द्धशुष्कं तथा दारु भग्नशुष्कं तथैव च ॥
चैत्यदेवालयोत्पन्नं नदीसङ्गमजन्तथा ।
श्मशानकूपनिलयं तड़ागादिसमुद्भवम् ॥
वर्ज्जयेत् सर्व्वथा दारु यदीच्छेद्विपुलां श्रियम् ।
तथा कण्टकिनो वृक्षान्नीपनिम्बविभीतकान् ॥
श्लेष्मातकान् एलतरून् वर्ज्जयेत् गृहकर्म्मणि ।
असनं शाकमधुकसर्ज्जशालाः शुभावहाः ॥
चन्दनं पनसं धन्यं सुरदारु हरिद्रका ।
द्वाभ्यामेकेन वा कुर्य्यात् त्रिभिर्व्वा भवनं शुभम् ॥
बहुभिः कारितं यस्मादनेकभयदं भवेत् ।
एकैकं शिंशपा धन्या श्रीपर्णी तिन्दुकी तथा ॥
एता नान्यसमायुक्ता कदाचिच्छुभकारिकाः ।
स्यन्दनः पनसस्तद्वत् सरलार्ज्जुनपद्मकाः ॥
एते नान्यसमायुक्ता वास्तुकार्य्ये शुभप्रदाः ।
तरुच्छेदे महापीते गोधां विद्याद्विचक्षणः ॥
माञ्जिष्ठवर्णे भेकः स्यात् नीले सर्पं विनिर्द्दिशेत् ।
अरुणे सरटं विद्यात् मुक्ताभे शुकमादिशेत् ॥
कपिले मूषिकां विद्यात् खड्गाभे जलमादिशेत् ।
एवंविधं सगर्भन्तु वर्ज्जयेद्वास्तुकर्म्मणि ॥
पूर्व्वं छिन्नन्तु गृह्णीयात् निमित्तं शकुनैः शुभैः ।*।
व्यासेन गुणिते दैर्घ्ये अष्टभिर्व्विहृते तथा ॥
यच्छेषमायतं विद्यादष्टभेदं वदामि वः ।
ध्वजो धूमश्च सिंहश्च श्वा वृषः खर एव च ॥
हस्ती ध्वाङ्क्षश्च पूर्व्वाद्याः करिशेषा भवन्त्यमी ।
ध्वजः सर्व्वमुखो धन्यः प्रत्यग्द्वारो विशेषतः ॥
उदङ्मुखो भवेत् सिंहः प्राङ्मुखो वृषभो भवेत् ।
दक्षिणाभिमुखो हस्ती सप्तभिः स उदाहृतः ॥
एकेन ध्वज उद्दिष्टस्त्रिभिः सिंह उदाहृतः ।
पञ्चभिर्वृषभः प्रोक्तो विकोणस्थांस्तु वर्ज्जयेत् ॥
तमेवाष्टगुणं कृत्वा विद्याद्राशिं विचक्षणः ।
सप्तविंशद्धृते भागे ऋक्षं विद्याद्विचक्षणः ॥
अष्टभिर्भाजिते ऋक्षे यच्छेषं स व्ययो मतः ।
व्ययाधिकं न कुर्व्वीत यतो दोषकरम्भवेत् ।
आयाधिके भवेच्छान्तिरित्याह भगवान् हरिः ॥
कृत्वाग्रतो द्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्रदलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनानि तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयाय गृहं विशेच्च ॥
गृह्योक्तहोमविधिना बलिकर्म्म कुर्य्यात्
प्रासादवास्तुशमने च विधिर्य उक्तः ।
सन्तर्पयेत् द्विजवरानथ भक्ष्यभोज्यैः
शुक्लाम्बरश्च भवनं प्रविशेत् सधूमम् ॥”
इति मात्स्ये वास्तुविद्यानुकीर्त्तनं समाप्तम् २३१ अध्यायः ॥ * ॥ अन्यच्च । अथ वास्तुयुक्तिः ।
तत्र स्थाननिर्णयः ।
“नदीश्मशानशैलानां वनस्य निकटे तथा ।
न वास्तुकर्म्म कुर्व्वीत न द्वन्द्व-नगरान्तयोः ॥”*॥
तत्र दिङ्निर्णयः ।
“राक्षसानिलवह्नीनां यमस्य दिशि वेश्मनः ।
नारम्भं कारयेद्राजा भीरुग्दाहक्षयप्रदम् ॥”
तथा हि ।
“भोगः कीर्त्तिर्धनं रोगः स्थिरता च भयः क्षयः ।
दाह इत्येव कथितो दिशि वास्तुफलोद्भवः ॥”
भोजे च ।
“यल्लग्ने जायते राजा तस्य लग्नस्य यः पतिः ।
या दिक् तस्य नृपस्तस्यां वास्त्वारम्भं समा-
चरेत् ॥”
एवञ्च ।
“कुजाधिपतिके मेषलग्ने जातस्य भूपतेः ॥”
कुजाधिपतिकायां दक्षिणस्यामपि वास्तुर्न दुष्यतीति । पराशरस्तु ।
“यद्दशाजनितो राजा वास्तुस्तम्भस्तु तद्दिशि ॥”
एतेन सूर्य्यादिजनितस्य नृपतेः पूर्व्वादिदिक्षु वास्तुकरणम् । तेन शुक्रदशायां जातस्याग्नेय्यामपि न दुष्यति ॥ * ॥ अथ लक्षणम् ।
“वास्तु कुर्य्यान्महीपालः समं सुस्निग्धमृत्तिकम् ।
प्रागुदक्प्लवनं रम्यं रम्यवृक्षोपशोभितम् ॥
लक्ष्मीर्वृद्धिः क्षयो भीतिर्धननाशोऽथ्यशून्यता ।
सम्पद्वृद्धिरिति प्रोक्तं पूर्व्वादिककुभां फलम् ॥”
तथा हि मदनमन्यत् ।
“जन्मलग्नेन दिक् पश्चात् राज्ञो वास्तुश्रवोमतः ॥”
एतेन सूर्य्याधिपतितुलालग्ने जातस्य नृपतेः सूर्य्याधिपतेः पूर्व्वस्याः पश्चात् पश्चिमश्रवोऽपि न दुष्यति । अन्ये तु ।

"यद्दण्डाज्जनितो राजा तद्दिग्दोषप्लवो मतः ॥"
एतेन गुरुदण्डाजातस्य नृपतेर्द्दक्षिणप्लवोऽपि न दुष्यति । अन्यत्र तु ।
"ब्रह्मक्षत्त्रियविट्शूद्राः पूर्व्वादिदिग्युगे क्रमात् ।
वास्तुप्लवनमिच्छन्ति निजसम्पत्तिहेतवे ॥"
नीतिशास्त्रे च ।
"वास्तुकर्म्म नृपः कुर्य्याद्बलवद्वैरिणो दिशि ।
दीर्घां वा चतुरस्रां वा वास्तुभूमिम्महीक्षिताम् ।
एतयोर्लक्षणं तद्वत् फलञ्च नगरे यथा ॥"*॥
अथ मानम् ।
"राजकाण्डेन नृपतिर्वास्त्वारम्भं समाचरेत् ।
जयो भङ्गः सुखं दुःखं प्रीतिर्भीतिश्च यः स्थिरः ।
इत्यष्टौ वास्तुनामानि राजकाण्डैरनुक्रमात् ॥"
अन्यत्र तु ।
"जन्मलग्ने महीभर्त्तुर्द्दण्डयोरन्त एव हि ।
राजकाण्डैस्तु तावद्भिर्वास्तु कुर्य्यान्महीपतिः ॥
सुदर्शाच्छन्दसंज्ञेन राजपट्टेन भूपतेः ।
वास्तुकर्म्मसमारम्भो धनधान्यजयप्रदः ॥"
एतयोरपि पूर्व्ववद्व्याख्यानम् ।
"राजच्छत्रेण कुत्रापि वास्तुपत्तनमिष्यते ।
तस्यापि पूर्व्ववन्मानमिति भागुरिभाषितम् ॥"
अथ दोषगुणौ ।
"परनिर्म्मितवास्तुस्थो न तिष्ठति चिरं नृपः ।
न सुखाय न धर्म्माय तत्तस्य भुवि जायते ॥"
अन्यत्रापि ।
"राजान्यवीर्य्यप्रत्याशी परवास्तुकृतस्थितिः ।
न सुखाय भवेन्नृणां यथा परगृहे ग्रहः ॥
यः स्वनिर्म्मितवास्तुस्थो निजलग्नादिसंयुतः ।
विचारितपुरो राजा स चिरं सुखमश्नुते ॥"
अन्यत्रापि ।
"राजा स्वबाहुवीर्य्याढ्यो निजनिर्म्मितवास्तु-
भाक् ।
स चिरं तनुते सौख्यं स्वगृहस्थो ग्रहो यथा ॥"
अथ कालः ।
"वर्षान्तेऽभ्युदिते शुक्रे केन्द्रे सुरगुरौ शुभे ।
वास्तुकर्म्मसमारम्भं शुक्रचन्द्रार्कभूमिजे ॥
ग्रहयुक्तो यः समयः कर्त्तव्यस्तत्र वै शुभे ।
वास्त्वारम्भः कार्य्यः शुभसम्पत्तिकामिना
राज्ञा ॥"
इति वास्तुयुक्तौ वास्तूद्देशः ॥*॥
अन्येषां यथा । यदाह वास्तुकुण्डल्याम् ।
"स्वामिहस्तैश्चतुर्भिः स्याद्दण्डस्तेनैव मापयेत् ।
क्षेमो भयङ्करो भयः शोककृद्विजयः शुचिः ॥
वंशकृत् पापकारी च विकारी शोभनः शिवः ।
कुणपः कामदो धूम्रो धौम्यो धनहरस्तथा ॥
धनदः सुखकृच्चेति वाच्योऽष्टादश कीर्त्तिताः ॥"
तद्यथा ।
"आयामपरिणाहाभ्यां योऽङ्कपिण्डोऽभिजायते ।
ऊनविंशतिहृते भागे शेषेणैता यथाक्रमम् ॥
क्षेमे सर्व्वार्थसंसिद्धिर्भयकारी भयङ्करः ।
भयो भोगं प्रकुरुते शोककृद्बन्धुनाशनः ॥
विजयः कुरुते वृद्धिं शुचिः सर्व्वसुखं वदेत् ।
वंशकृत् कुरुते वंशं पापकारी कुलापहः ॥
विकारौ कुरुते दुःखं शोभनः शुभमावहेत् ।
शिवः सर्व्वार्थसिद्धिः स्यात् कुणपः सर्व्वनाशनः ॥
कामदोऽभीष्टलाभः स्यात् धूम्रो दहति सर्व्वशः ।
धौम्ये धर्म्ममतिः सौख्यं दुःखं धनहरे भवेत् ॥
धनदे धनलाभः स्यात् सुखकृत् सुखकारकः ।
इति प्रोक्तोऽतिसंक्षेपाद्वास्तुलक्षणसंग्रहः ॥"
भोजस्तु । दण्डमानं तथैव किन्तु युक्तिरन्या ।

स्वदशाब्दतो द्विगुणैस्तैः शुभावह-
श्चतुरस्र एव नववास्तु शिष्यते ।
किन्तु लग्नदण्डमितदण्डसम्मितः
प्रकरोति वास्तुरतिसौख्यसम्पदम् ॥

ऊषरा वालुका क्षिप्रा त्रयमेतद्विनिन्दितम् ।
त्रिकोणो वर्त्तुलो दीर्घो यवमध्योऽर्द्धचन्द्रमुखः ॥
तथा डमरुरूपश्च सर्पाकारस्तथैव च ।
छिन्नो भिन्नो मध्यनिम्नो गजनाभश्चतुष्पथः ॥
त्रिपथो जलदोषी च वृक्षदोषी तथा परः ।
गजसुण्डाकृतिश्चैवोपद्रवाः परिकीर्त्तिताः ॥
वास्तुखण्डे महादोषा हेयास्तस्माद्विचक्षणैः ।
चतुरस्रः शुभो दीर्घस्तुल्यः प्रान्तः समाश्रितः ।
दोषैर्विहीनो विज्ञेयो वास्तुखण्डः सुखावहः ॥"
इति युक्तिकल्पतरौ वास्तुयुक्तिः ॥*॥
तत्र कालनिर्णयः ।
"वैशाखश्रावणाषाढ़मार्गफाल्गुनकार्त्तिकाः ।
सुप्रशस्ता गृहारम्भे पत्नीपुत्त्रसन्दहिदाः ॥
शुक्लपक्षे भवेत् सौख्यं कृष्णे च भवति भयम् ।
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ॥"
तथान्यत्र ।
"पूर्णिमाद्यष्टमीं यावत् पूर्व्वास्यं वर्ज्जयेद्गृहम् ।
उत्तरास्यं न कुर्व्वीत नवम्यादिचतुर्द्दशीम् ॥
अमावास्याष्टमीं यावत् पश्चिमास्यं विवर्ज्जयेत् ।
नवम्यादि तथा याम्यं यावत् शुक्लचतुर्द्दशीम् ।
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ॥
विष्कम्भगण्डयोश्चैव गृहारम्भं न कारयेत् ॥
आदित्यहस्तरोहिण्यो मृगशिरो ज्येष्ठा धनिष्ठो-
त्तरा
रेवत्याच मघानुराधहरिभिः शुद्धैः स्वभा-
चादिभिः ।
सौम्यानां दिवसेऽथ पापरहिते योगे विरिक्तै
तिथौ
विद्धित्यक्तदिने वदन्ति मुनयो वेश्मादिकार्य्यं
शुभम् ॥"
मत्स्यपुराणेऽपि ।
"चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र तु विवर्ज्जयेत् ॥
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम् ।
स्वातिर्हस्तानुराधा च वास्तुकर्म्मणि शस्यते ॥"
तथा च ।

"त्रिभिस्त्रिभिर्वेश्मनि कृत्तिकाद्यै-
रग्निशपुत्त्राग्निधनानि शोकाः ।
शत्रोर्भयं राजभयञ्च मृत्युः
सुखं प्रवासश्च नव प्रभेदाः ॥
नाशं दिशन्ति मकरालिकुलीरलग्ने
मेषे घटे धनुषि कर्म्मसु दीर्घसूत्रम् ।
कन्याझषे मिथुनके ध्रुवमर्थलाभो
ज्योतिर्व्विदः कलससिंहवृषेषु वृद्धिम् ॥

अमेऽर्के वह्निसम्पातः कोषहानिश्च शीतगौ ।
मृत्युर्वसुन्धरापुत्त्रे चान्द्रजे सुखसम्पदः ॥
जीवे धर्म्मार्थकामाश्च सुतोत्पत्तिश्च भार्गवे ।
शनैश्चरे तु दारिद्र्यं राहावश्वं प्रवर्त्तते ॥"*॥
अथ प्रवेशकालः ।
"शुद्धैर्द्वादशकेन्द्रगैर्न्निधनगैः पापैस्त्रिषष्ठायगै-
र्लग्ने केन्द्रगतेऽथवा सुरगुरौ दैत्यपूज्येऽपि वा ।
सर्व्वारम्भफलप्रसिद्धिरुदये राशौ च भर्त्तुः शुभे
स्वग्राम्यस्थिरतोदये च भवनं कार्य्यं प्रवेशोऽपि
वा ॥

पौष्णे धनिष्ठा अथ वारुणेषु
स्वायम्भुवर्क्षे त्रिषु चोत्तरेषु ।
अक्षीणचन्द्रे शुभवासरे च
तथा दिरिक्ते च गृहप्रवेशः ॥

तिथिर्व्वारश्च लग्नादि समारम्भे यथोदितम् ।
प्रवेशेऽपि गृहस्याहुस्तथा ज्योतिर्व्विदो जनाः ॥"
अथ द्वारम् ।
"नैकद्वारं वास्तुखण्डं न चतुर्द्वारमारभेत् ।
एकद्वारं दुःशरणं चतुर्द्वारं दुरावरम् ॥
त्रिद्वारमेव नृपतेर्व्वास्तुकर्म्म प्रशस्यते ।
द्वे सुखे तत्र चान्यत् स्यादसुखमिति निर्णयः ॥
राजद्वारस्तु तत्रैको यमद्वारस्तथा परः ।
अपद्वारं तथान्यत् स्यादिति द्वारस्य निर्णयः ॥
ब्रह्मक्षत्त्रियवैश्यानां प्रागुदक्पश्चिमैः क्रमात् ।
सुखद्वारं दक्षिणस्य परं तस्यापि दक्षिणे ॥
बलवद्वैरिसुखं द्वारमित्यन्यसम्मतम् ।
राजद्वारेऽन्यभूपानां शिष्टानां वा प्रवेशयेत् ॥
यात्राप्रसादपर्व्वाणि राजद्वारेषु कारयेत् ।
यमद्वारे छिदाकर्म्म द्विषताञ्च प्रवेशनम् ॥
निःसारणं मृतानाञ्च दुष्टानाञ्च निबन्धनम् ।
अपद्वारेऽवरोधस्य गमनागमनक्रिया ॥
राज्ञि विलासयात्रा च मर्म्मज्ञस्य प्रवेशनम् ॥"
अथ प्राचीरनिर्णयः ।

"मन्त्रैरभेद्या मनुजैरलङ्घ्याः
प्राचीरखण्डा नृपतेर्भवन्ति ॥

राजदण्डोन्नताः सर्व्वे प्राचीराः पृथिवीभुजः ।
विंशतिस्ते तु पश्चाग्रे पार्श्वयोः पञ्च पञ्च च ॥
पश्चात् पञ्च च विज्ञेयाः प्राचीरा पृथिवीभुजः ।
सर्व्वप्रान्ते त्वावरणो नाम प्राचीर उच्यते ॥
प्रतिप्राकारसंस्थानं द्वारं नाभिमुखस्थितम् ।
तत्र जयाख्यस्य दीर्घस्य वास्तुखण्डस्य निर्णयः ॥
तद्यथा ।
"राजच्छत्रान्तरे पञ्च राजद्वारे महीपतेः ।
राजदण्डत्रये सार्द्धं जयद्वारे प्रतिष्ठिताः ॥
अद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः ।
एवं व्यवस्थिते स्थाने मध्यमेतद्धि तिष्ठति ॥
राजच्छत्रद्वयं सार्द्धमायामे जयवास्तुनि ।
परिणाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः ॥

राजपट्टाभिधानेन स्थानमेतन्निगद्यते ।
अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते ॥
अज्ञानाद्दम्भतो राजा योऽन्यत्र गृहमारभेत् ।
सोऽचिरात् मृत्युमाप्नोति रोगं शोकं भयं तथा ॥
यमदण्डोदयदण्डौ केनाहतिरुपप्लवः ।
ये चान्ये वास्तुदोषाः स्युः स्थाने दोषाश्च ये पुनः ।
न स्पृशते राजपट्टस्तैः सर्पैर्गरुड़ो यथा ॥
द्विगुणादिरतोऽपि स्यात् क्रमाद्दण्डादिवास्तुषु ।
राजच्छत्रमितेऽप्येवं प्राचीरे गुणदोषकौ ॥"*॥
अथ जयाख्यस्य चतुरस्रस्य वास्तुखण्डनिर्णयः ।
"राजद्वारे हि प्राकारा राजच्छत्रान्तरे मताः ।
यमद्वारे सार्द्धराजच्छत्रान्तरे च ये नृपाः ॥
अपद्वारे राजदण्डं जिता आरम्भिताः पुनः ।
अद्वारे भूपतेस्तस्य राजदण्डत्रयान्तरे ॥
एवं व्यवस्थिते स्थाने मध्यमे तत् प्रवक्ष्यते ।
आयामे राजच्छत्राणि चत्वारि परिणाहतः ॥
राजच्छत्रैकमानेन राजदण्ड उदाहृतः ।
अयञ्च सप्तमो भागो वास्तोर्भवति शोभनः ॥
अस्मिन् गृहं नृपः कृत्वा सुचिरं पाति मेदिनीम् ।
अस्मिन् विजयवृद्धिश्च सौख्यञ्च समवाप्नुयात् ॥
यो राजा दम्भतोऽन्यत्र वेश्मारम्भं समाचरेत् ।
य उक्तो राजदण्डोऽयं तस्येदं स्थानपञ्चकम् ॥
गजो व्याघ्रश्च सिंहश्च मृगो भृङ्गो यथाक्रमम् ।
सिंहे सिंहासनं स्थानं व्याघ्रे स्यात् द्वारमन्दिरम् ॥
गजे यात्रालयं कुर्य्यात् मृगे केलिनिकेतनम् ।
भ्रमरेऽन्तःपुरं कुर्य्यात् क्रमेण पृथिवीपतेः ॥
तेन मध्यमेव सिंहासनं दीर्घस्य चतुरस्रके ॥"
तत्र भविष्योत्तरे ।
"मेषादिचन्द्रे जातस्य नृपतेः स्युरनुक्रमात् ।
द्वादशैव गृहान् वक्ष्ये तेषां लक्षणमग्रतः ॥
सुनन्दः सर्व्वतोभद्रो भद्रो नान्दीसुखस्तथा ।
विनोदश्च विलासश्च विजयो विमलस्तथा ।
रङ्गः केलिर्जयो वीरो द्वादशैते प्रकीर्त्तिताः ॥"
अथैषां लक्षणानि ।
"यद्यत्रैवोच्यते मानं तस्य तेनैव कल्पना ।
राज्ञः स्वहस्तमेकन्तु दीर्घं सर्व्वत्र निक्षिपेत् ॥
आयामेन सुन्दरः स्यात् राजहस्तैश्च पञ्चभिः ।
परिणाहे चतुर्भिश्च राजहस्तैः प्रतिष्ठितः ॥
अस्याधिदेवता भौमो रक्षतीदं वसुन्धरा ।
द्वाराणि विंशतिश्चास्य रक्तचित्रावृतानि च ॥
रक्तपट्टावृतो गेहः सकलार्थप्रसाधकः ।
अत्र स्थित्वा महीपालः सुचिरं पाति मेदिनीम् ॥"
दीर्घम् ५१ । प्रस्थम् ४० । इति सुन्दरः ॥*॥
"द्वौ राजहस्तावायामे परिणाहे तथैव च ।
इत्ययं सर्व्वतोभद्रः शुक्रश्चास्याधिदेवता ॥
दानवा रक्षकाश्चैव पूर्ण्यास्ते चात्र यत्नतः ।
चतुर्द्दशास्य द्वाराणि कृष्णचित्रावृतानि च ॥
पीतपट्टावृतो ह्येष सर्व्वानिष्टविनाशनः ।
अत्र स्थित्वा महीपालः सर्व्वान् शत्रून् निकृन्तति ॥"
दीर्घम् २१ । प्रस्थम् २० । इति सर्व्वतोभद्रः॥*॥
"अष्टकोणो भवेद्भद्रः कोणो हस्तचतुष्टयः ।
राजहस्तोन्नतः कार्य्यो बुधश्चास्याधिदेवता ॥
रक्षका वसवश्चास्य पूर्ण्यास्तेऽत्र प्रयत्नतः ।
अष्टौ द्वाराणि चास्य स्युः पीतचित्रावृतानि च ॥
पीतपट्टावृतो ह्येष सर्व्वानिष्टविनाशनः ।
अत्र स्थाता क्षितिपतिर्न रिष्टैरवमृद्यते ॥
राजदण्डो भवेद्दीर्घः प्रसरे राजहस्तकः ।
राजहस्ते राजहस्ते प्रकोष्ठां स्तत्र कारयेत् ॥
अयं नान्दीसुखो नाम चन्द्रश्चास्याधिदेवता ।
नक्षत्रलोकः पूर्ण्योऽत्र स यस्मादस्य रक्षकः ॥
द्वाविंशतिस्तु द्वाराणि दीर्घे दश तथान्तरे ।
अन्यत्र दीर्घे एकं स्यात् प्रसरे एकमेव च ॥"
दीर्घद्वितये दश द्वाराणि प्रसरद्वितये एकं कृत्वा द्वितयं एवं २२ द्वाराणि ।
"शुक्लचित्रेण सहितः शुक्लपट्टेन शोभितः ।
सर्व्वार्थसाधको राज्ञां लक्ष्मीविजयवर्द्धनः ॥"
दीर्घम् ११ । प्रस्थम् १० । इति नान्दीसुखः॥*॥
"दीर्घे त्रयो राजहस्ताः प्रसरे द्वौ प्रतिष्ठितौ ।
विनोद एष द्वाराणि त्रिंशत्कोष्ठद्वयं भवेत् ॥
रक्तचित्रेण चित्राङ्गो रक्तवस्त्रोपगूहितः ।
अत्र स्थाता नरपतिर्भवेत् कीर्त्तिप्रतापवान् ॥
सूर्य्याधिदेवता चास्य रक्षकाः शकलग्रहाः ॥"
दीर्घम् ३१ । प्रस्थम् २० । इति विनोदः ॥ * ॥
"दीर्घेण राजदण्डार्द्धं प्रसरे राजहस्तकौ ।
विलास एष द्वाराणि चत्वारिंशद्बुधा विदुः ॥
गन्धर्व्वा रक्षकाश्चास्य प्रकोष्ठत्रितयं भवेत् ।
चित्रपट्टेन शस्तेन चित्रवस्त्रेण शोभितः ॥
दुर्भिक्षशमनो ह्येष शस्यसम्पत्तिकारकः ।
तत्र स्थित्वा नरपतिः प्रचुरं सुखमश्नुते ॥"
दीर्घम् ५१ । प्रस्थम् २० । इति विलासगृहम् ॥ * ॥
"द्वादशहस्ताः प्रसरे दीर्घे द्वौ राजहस्तकौ कथितौ ।
विजये द्वादश भवनद्वाराणि स्युर्जयप्रदान्यत्र ॥
सूर्य्योऽधिदेवता चास्य रक्षतीमं विहङ्गराट् ।
अरुणाम्भोजचित्राङ्गो अरुणाम्बरभूषितः ।
तत्र स्थित्वा नरपतिः कृत्स्नां शास्ति वसुन्धराम् ॥"
दीर्घम् २१ । प्रस्थम् १२ ॥ * ॥
"आयामे राजदण्डौ द्वौ प्रसरे राजदण्डकः ।
शतद्वारोपसहितः प्रकोष्ठैर्द्दशभिर्युतः ॥
दिक्पाला रक्षकाश्चास्य कुजश्चास्याधिदेवता ।
नानावर्णेन चित्रेण वसनेन विभूषितः ॥
अत्र स्थित्वा नरपतिः सुचिरं सुखमश्नुते ।
यस्मिन्नाम्ये प्रतिष्ठेत विमलो गृहसत्तमः ॥
दुर्भिक्षं नात्र जायेत नेतयोर्न च विप्लवः ।
न रोगो नापि शोकश्च नैवोत्पातभवस्तथा ।
इत्यादि गुणबाहुल्यमन्यच्च कथितं बुधैः ॥"
दीर्घम् २०० । प्रस्थम् १०० ॥ * ॥
"आयामपरिणाहाभ्यां राज्ञः षोड़शहस्तकः ।
द्वाराणि षोड़शैवास्य गुरुरस्याधिदेवता ॥
रक्षिका देवता चास्य शुक्लवस्त्रैर्विभूषणम् ।
अत्र स्थित्वा नरपतिः सर्व्वार्थान् भुवि साधयेत् ॥"
दीर्घम् १७ । प्रस्थम् १६ । इति रङ्गः ॥ * ॥
"आयामे राजदण्डः स्यात् प्रसरे च तदर्द्धकम् ।
दश प्रकोष्ठा द्वाराणि शनिरस्याधिदेवता ॥
पिशाचा रक्षकाश्चास्य नीलवस्त्रादिभूषणम् ।
नाम्नायं केलिराख्यातो भयरोगविनाशनः ।
अत्र स्थित्वा नरपतिः सुखं विजयते रिपून् ॥"
दीर्घम् १०० । प्रस्थम् ५० ॥ * ॥
"राजहस्तेन कोणः स्यादेवं केलिश्चतुर्द्दश ।
चतुर्द्दशैव द्वाराणि राहुरस्याधिदेवता ॥
नक्तञ्चरा रक्षकास्तु नानावर्णाम्बरादिकम् ।
अयं जयः प्रकटितः सर्व्वत्रैव जयप्रदः ॥
आयामे राजहस्तः स्यात् परिणाहेऽष्टहस्तकः ।
नानारूपः कुटीरूपो वीरो नाम यशप्रदः ॥
बृहस्पतिर्देवतास्य रक्षकाश्चास्य खेचराः ।
विचित्रवसनोपेतः सर्व्वकामार्थदायकः ॥"
दीर्घम् ११ । प्रस्थम् ८ । इति वीरः ॥ * ॥
"यो यस्य गदितो वर्णस्तथा स्याच्चामरोऽपि च ।
राजहस्तान्तरे पञ्च चामराः स्युर्महीभुजाम् ॥
चन्द्रोऽपि दर्पणो हस्त उपरि क्रमतो न्यसेत् ।
पताकाध्वजयुक्ताश्च गृहरक्षक-रक्षसाम् ।
छत्रयुक्तं गृहं राज्ञां विज्ञेयं चक्रवर्त्तिनाम् ॥"
एषां नियमः परवत् ।
"इति द्वादशचिह्नानि गृहाणां कथितानि वै ।
विमृश्यैतानि नृपतिर्गृहारम्भं समाचरेत् ॥
इति सिंहासनस्थानमिति राष्ट्रस्य मस्तकम् ।
इतोऽन्ये चित्तहर्षार्थाः प्रासादाः पृथिवीभुजः ॥
जलयन्त्रादयो येऽन्ये तेषां नास्ति विनिश्चयः ।
स्वजन्मगेहसंस्थो यो नृपतिः शुभचेतनः ॥
स चिरं पृथिवीं शास्ति सर्व्वार्थान् साधयत्यपि ।
यो वा तत्परगेहस्थो दुर्म्मोहात् धरणीपतिः ॥
स चिरं पाति वसुधां घोरं रोगञ्च विन्दति ।
स्वलग्नपतिमित्रस्य गृहवासो न दुष्यति ॥"*॥
परञ्च ।
"हीरकस्य विशुद्धस्य वज्रजातस्महाद्युतेः ।
सूर्य्याङ्गस्पर्शमात्रेण वमतो दीप्तिमञ्जसा ।
गृहाग्रे धारयेद्राजा तद्वज्रं वज्रवारणम् ॥"
वात्स्यस्तु ।
"गृहेषु मणिविन्यासो विज्ञेयो न च दण्डवत् ।
विशुद्धहीरकन्यासो विधेयः सदनोपरि ।
तेन सर्व्वाणि नश्यन्ति अरिष्टानि महीभुजाम् ॥"
भोजोऽपि ।
"वास्तुखण्डोऽष्टरूपः स्यात् यथार्थैर्नामभिः स्वकैः ।
यमद्वारात् समारभ्य यावद्द्वारमिष्यते ॥"
तद्यथा,—
"मृत्युर्भयः स्थिरश्चक्रो धनं विभव एव च ।
वीरस्तापश्च इत्यष्टौ वास्तुभागा यथाक्रमम् ॥

यमनैर्ऋतनोदेशवायुयक्षेशशङ्कराः ।
इन्द्रो वह्निरिति प्रोक्ता विभागानामधीश्वराः ॥
इन्द्रे कारालयं कुर्य्यात् भयस्थाने च पशवः ।
शिरे सहचरान् रक्षेत् षष्ठे वाजिगजादयः ॥
धने धान्यादिकं रक्षेत् विभवे कोषरक्षणम् ।
राजपट्टे भवेद्वीरो नापि कश्चिन्नरालयम् ।
प्राचीरपतिभागान्ते इति भोजस्य सम्मतम् ॥"
इति युक्तिकल्पतरौ राजगृहयुक्तिः ॥ * ॥
"वास्तुमानेन नियमो गृहमानेन निर्णयः ॥"
तत्र वास्तुप्लवलक्षणम् ।
"पूर्व्वप्लवो वृद्धिकरो धनदश्चोत्तरप्लवः ।
दक्षिणो मृत्युदो वास्तुर्व्वनदा पश्चिमप्लवः ॥
कोणे रेखाद्वयं कृत्वा मध्ये रेखाद्वयं तथा ।
ऐशानकोणतो रेखा दक्षिणादेर्ध्वजाख्यया ॥
नाचामरो नामशिख नापताकापि नाध्वजः ।
नाकुम्भादिर्नाविमानो ना चित्रो नातिचित्रभृक् ॥
नाल्पो नातिनीचो वा नाप्रकीर्णप्रकीर्णकः ।
ना धातुर्नागवाक्ष न चैकानेकद्वारभाक् ॥
नियमोऽस्तु महीन्द्राणां सर्व्वसम्पत्तिहेतवे ॥"
इति राजगृहयुक्तिः ॥ * ॥
अन्येषान्तु यथा वास्तुमानेन नियमः ।
"ध्वजो धूमस्तथा सिंहः श्वा वृषो गर्द्दभो गजः ।
काक इत्येव गदितो वास्तुस्थानस्य निर्णयः ।
अयुग्मे सुखसम्पत्तिर्युग्मेच विपदास्पदम् ॥"
एवमन्यत्रापि ।

"ध्वजे विभूतिर्विपदश्च धूमे
सिंहे विभोगः शुनि सर्व्वनाशः ।
वृषे सुखं गर्द्दभतो विनाशो
गजे धनं काकपदे च मृत्युः ॥

कोणरेखा कोणशुचिः सुखसम्पत्तिनाशिनी ।
पूर्व्वपश्चिमतो दण्ड उदयाख्यः सुखावहः ॥
दक्षिणोत्तरतो दण्डो वंशहा यमदण्डकः ।
गृहाणि पातयेद्धीमानेषां दण्डयथान्तरे ॥ * ॥
एका चेद्दक्षिणे शाला द्वे च दक्षिणपश्चिमे ।
तिस्रश्चेत् पूर्व्वतो हीनाश्चतुःशालं सुखावहम् ॥
पश्चिमास्यं ध्वजे वेश्म सिंहे तूदङ्मुखं शुभम् ।
पूर्व्वालयं वृषस्थाने दक्षिणाभिमुखं गजे ॥
पदाघातः परिखाघातः पथाघातस्तथैव च ।
जलदोषो वृक्षदोषो दोषा इत्येवमादयः ॥
गच्छतां पदतालस्य श्रवणं यदि वेश्मनि ।
पदाघातो नाम दोषः पुत्त्रपौत्त्रधनापहः ॥
परिखादण्डयोर्घातो वास्तुनोः प्रतिवेशिनोः ।
परिखाघातो नाम दोषः कुलवीर्य्यधनापहः ॥
पथाघातो नाम दोष आघातो वास्तुनः पथः ।
स हन्ति भोगं वंशञ्च तस्य भेदमतः शृणु ॥
चक्रमार्गं सुखं कुर्य्यात् त्रिपथं कुलवर्द्धनम् ।
त्रिपथं कुलनाशाय सर्व्वनाशश्चतुष्पथे ॥
स्ववाप्यां परवाप्याञ्च यत्तिष्ठति जलाशयः ।
तद्दोषो जलदोषः स्यात् स हन्ति कुलसम्पदः ॥
ऋद्धिमानसुखैश्वर्य्यमृत्युक्लेशभयामयाः ।
एते जलाशये दोषाः पूर्व्वादिदिक्षु च क्रमात् ॥
खवास्तुरपतो दोषः कुलसम्पत्तिनाशनः ।
वर्ज्जयेत् पूर्व्वतोऽश्वत्थं प्लक्षं दक्षिणतस्तथा ॥
ऐशान्यां रक्तपुष्पञ्च आग्नेय्यां क्षीरिणस्तथा ।
यत्र तत्र स्थिता वृक्षा बिल्वदाडिमकेशराः ।
पनसा नारिकेलाश्च शुभं कुर्व्वन्ति निश्चयम् ।
निशा नीली पलाशश्च चिञ्चा श्वेतापराजिता ।
कोविदारश्च सर्व्वत्र सर्व्वं निघ्नन्ति मङ्गलम् ॥ * ॥
गृहपातनमिच्छन्ति नागस्य स्वपने क्रमात् ।
पूर्व्वादिषु शिरः कृत्वा नागः शेते त्रिभि-
स्त्रिभिः ।
भाद्राद्यैर्व्वामपार्श्वेन तस्य क्रोड़े गृहं शुभम् ॥"
तत्र प्रमाणम् ।
"स्वामिहस्तप्रमाणेन ज्येष्ठपत्नीकरेण वा ।
गृहाभ्यन्तरसंस्थानं मापयेदभितो नरः ॥" * ॥
तत्र सामान्यलक्षणम् ।

"गृहभूमिसमाहृतपिण्डपदं
वसुलोचनरन्ध्रगजैर्गुणितम् ।
रविभूधरचिंश्रद्योगहृतं
भवनाय ययस्थितिकल्पपदम् ॥

एकाशीतिगुणे हस्ते दिवाणैकहृते च ते ।
षड्विंशयुग्मसम्भक्ते पिण्डः स्यात् सर्व्ववेश्मनः ॥"
तद्यथा ।
"ध्वजादिगेहसंस्थाने गृहमानं शुभावहम् ।
दीर्घे भानुः परीणाहे सप्त चैवाङ्गुलिद्वयम् ॥
इदं पुत्त्रफलं गेहं वृषस्थानेऽप्युदीरितम् ।
दीर्घे षट्प्रस्तरे पञ्च चतस्रोऽङ्गुलयोऽपि च ॥
इदं पुत्त्रफलं गेहं गजस्थाने प्रकीर्त्तितम् ।
दीर्घे त्रयोदश भुजाङ्गुलयश्चैकविंशतिः ॥
प्रसरेऽष्टौ सुखफलं गजस्थाने गृहं विदुः ।
इति द्वादशकं प्रोक्तं गृहाणां सर्व्वसंमतम् ।
एवं गृहं समाचर्य्य गृहस्थः शुभमिच्छति ॥" * ॥
भोजस्तु ।
"आयामपरिणाहाभ्यां योऽङ्कपिण्डो विजायते ।
येन केनापि चाङ्केन शोधनीयः स इष्यते ॥
एकद्विपञ्चसप्तानि शुभान्यन्यानि चान्यथा ।
आयामपरिणाहाभ्यां सार्द्धद्वादशहस्तकम् ॥
एतत्तु मङ्गलं नाम गृहं सुखविवर्द्धनम् ।
आयामपरिणाहाभ्यां सार्द्धहस्तचतुर्द्दश ॥
इदं कमलकं नाम गृहं सम्पत्तिकारकम् ।
आयामपरिणाहाभ्यां सार्द्धहस्तास्तु षोड़श ।
इदं हि सर्व्वतोभद्रं स्वामिनः सुखकारकम् ॥
आयामपरिणाहाभ्यां सार्द्धाष्टादशहस्तकम् ।
कल्याणनाम वेश्मेदं धनधान्यसुखप्रदम् ॥
आयामपरिणाहाभ्यां सार्द्धविंशतिहस्तकम् ।
इदं हि सुखदं नाम भर्त्तुः सुखविवर्द्धनम् ॥
मया यदिदमुद्दिष्टं गृहपञ्चकमद्भुतम् ।
न तेषु स्थाननियमः सर्व्वेष्वेतानि कारयेत् ॥
स्थानं मानञ्च दोषाश्च ये प्रोक्तास्तु मया क्रमात् ।
तद्विचार्य्य गृहं कृत्वा गृहस्थः सुखमश्नुते ॥
अज्ञानादथ मोहाद्वा योऽन्यथा गृहमाचरेत् ।
स विषीदति नश्येत तस्य कीर्त्तिः कुलं बलम् ।
प्राचीराणां न नियमो गृहस्थानाञ्च विद्यते ।
यथावास्तु यथाशक्ति प्राचीरानचयेद्गृही ॥
गृहरोधो यथा न स्यात् तथा प्राचीरकल्पना ॥"
इति युक्तिकल्पतरौ गृहयुक्तिः ॥ * ॥
अथ वास्तुयागप्रमाणम् । लैङ्गे ।
चतुःषष्टिपदं वास्तु सर्व्वदेवगृहं प्रति ।
एकाशीतिपदं वास्तु मानुषं प्रति सिद्धिदम् ॥
अग्रतः शोधयेद्वास्तुभूमिं यस्य पुरोदिताम् ।
चतुर्हस्तं द्विहस्तं वा जलान्तं वापि शोध्य च ॥
सुसमञ्च तदा कृत्वा सदार्च्चनं ततो भवेत् ॥"
पुरोदितां ब्राह्मणादिभेदेन प्रशस्तत्वेनोपपादि-
ताम् ॥ * ॥ तथा च मत्स्यपुराणम् ।
"अरत्निमात्रे गर्त्ते वै अनुलिप्ते च सर्व्वशः ।
कृतमामशरावन्तं कृत्वा वर्त्तिचतुष्टयम् ॥
ज्वालयेत्तु परीक्षार्थं पूर्व्वं तत् सर्व्वदिङ्मुखम् ।
दीप्ता पूर्व्वादि गृह्णीयात् वास्तूनामनुपूर्व्वशः ॥
वास्तुः समृद्धिको नाम दीप्यते सर्व्वतो हि यः ।
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ॥"
वास्तुकर्त्तुररत्निमात्रे गर्त्ते तत्रैव स्थापिते आम-
शरावे पूर्व्वादिक्रमेण वर्त्तिचतुष्टयं कृत्वा गव्य-
घृतेनापूर्य्य वर्त्तिचतुष्टयं प्रज्वालयेत् । तत्र
प्राच्यां दीपशिखाया उज्ज्वलत्वे तद्वास्तु ब्राह्म-
णस्य प्रशस्तम् । एवं दक्षिणादिदिशि शिखाया-
स्तथात्वे क्षत्त्रियादेः । सर्व्वशिखासमत्वे सर्व्व-
वर्णानां स वास्तुदेशः प्रशस्तः । जलान्तमिति
तु मत्स्यपुराणपरिभाषितं प्रासादपरम् ॥ * ॥
तथा च मात्स्ये ।
"पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत् ।
प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तिकम् ॥
प्रासादभवनादीनां निवेशं विस्तराद्वद ।
कुर्य्यात् केन विधानेन कश्च वास्तुरुदाहृतः ॥"
इत्युपक्रम्य वाप्यादीनामभिधानादादिपदात्
कूपादयो गृह्यन्ते । प्रासादेऽप्येवमेव स्यात् कूप-
वापीषु चैव हि । इत्यभिधानाच्च कूपादावपि ॥
वास्तुपुरुषश्च ।

"कश्यपस्य गृहिणी तु सिंहिका
राहुवास्तुतनयावजीजनत् ।
पूर्व्वजो हरिनिकृत्तकन्धरो
दैवतैरवरजो निपातितः ॥"

तथा ।
"चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्यैष्ठे मृत्युमवाप्नुयात् ॥
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे मित्रलाभस्तु हानिर्भाद्रपदे तथा ॥
आश्विने पत्नीनाशः स्यात् कार्त्तिके धनधान्य-
कम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ॥
माघे चाग्निभयं विद्यात् काञ्चनं फाल्गुने
सुतान् ।
शुक्लपक्षे भवेत् सौख्यं कृष्णे तस्करतो भयम् ॥
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्द्रवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ॥
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ॥

विष्कम्भगण्डपरिघवर्ज्जं योगेषु कारयेत् ।
श्वेतमैत्रेयगान्धर्व्वेष्वभिजिद्रौहिणेऽपि च ॥
तथा विजयसावित्रे मुहूर्त्ते गृहमारभेत् ।
चन्द्रादित्यबलं लब्ध्वा तथा शुभनिरीक्षितम् ।
प्रासादेऽप्येवमेव स्यात् कूपवापीषु चैव हि ॥"
ऐन्दवं मृगशिरः ॥ * ॥ मुहूर्त्ते संवर्त्तः ।
"रौद्रः श्वेतश्च मैत्रेयस्तथा शारभटः स्मृतः ।
सावित्रश्च जयन्तश्च गान्धर्व्वः कुतपस्तथा ॥
रौहिणश्च विरिञ्चिश्च विजयो नैरृतस्तथा ।
माहेन्द्रो वारुणश्चैव वटः पञ्चदश स्मृताः ॥"
तेन द्वितीयतृतीयसप्तमाष्टमनवमैकादशपञ्चमान्यतममुहूर्त्ते श्वेतादौ वास्तुकर्म्म कुर्य्यात् । चैत्रादिफलन्तु नरगृहे देवगृहे तु प्रतिष्ठाकालवशात् तत्कालपरिग्रहः ॥ * ॥ तथा च कल्पतरौ देवीपुराणम् ।
"यस्य देवस्य यः कालः प्रतिष्ठाध्वजरोपणे ।
गर्त्तापूरशिलान्यासे शुभदस्तस्य पूजितः ॥"
यस्य देवस्य प्रतिष्ठाध्वजरोपणे यः कालः शुभदस्तस्य गर्त्तापूरशिलान्यासे गृहारम्भे स कालः पूजित इति ॥ * ॥ प्रतिष्ठाकालश्च मात्स्ये ।
"चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा ।
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ॥
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत् ॥"
प्रतिष्ठासमुच्चये ।
"माघे वा फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्यैष्ठाषाढ़कयोर्व्वापि प्रतिष्ठा शुभदा भवेत् ॥"
कल्पतरौ देवीपुराणम् ।
"महिषासुरहन्त्र्याश्च प्रतिष्ठा दक्षिणायने ॥"
ज्योतिषे ।
"गुरोर्भृगोरस्तबाल्यं वार्द्धके सिंहगे गुरौ ।
गुर्व्वादित्ये दशाहे तु वक्रिजीवाष्टविंशके ॥
पूर्व्वराशावनायातातिचारिगुरुवत्सरे ।
प्राग्राशिगन्तृजीवस्य चातिचारे त्रिपक्षके ॥
कन्याद्यन्तसप्ताहे नीचस्थे मलिम्लुचे ।
पौषादिकचतुर्म्मासे चरवाङ्कितवर्षके ॥
एकेनाह्ना चैकदिने द्वितीयेन दिनत्रये ।
तृतीयेन तु सप्ताहे माङ्गल्यानि विवर्ज्जयेत् ॥
व्रतारम्भप्रतिष्ठे च गृहारम्भप्रवेशने ।
प्रतिष्ठारम्भणे देवकूपादेः परिवर्ज्जयेत् ॥" * ॥
स्मृतिसागरे ।
"उल्कापाते च भूकम्पे अकालवर्षगर्जिते ।
वज्रकेतूद्गमोत्पाते ग्रहणे चन्द्रसूर्य्ययोः ॥
प्रयाणन्तु त्यजेत् शूद्रः सप्तरात्रमतः परम् ।
ब्राह्मणः क्षत्रियो वैश्यस्त्यजेत् कर्म्म त्रिरात्रकम् ॥
शूद्रस्त्यक्ता चैकरात्रं ततः कर्म्म समाचरेत् ॥"
पराशरः ।
"प्रयाणे सप्तरात्रन्तु त्रिरात्रं व्रतबन्धने ।
एकरात्रं परित्यज्य कुर्य्यात् पाणिग्रहं गृहे ॥"

मत्स्यपुराणे ।
"नवग्रहमखं कृत्वा ततः कर्म्म समाचरेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥"
नयवर्द्धमानधृतवचनम् ।
"पितृभ्यो वृद्धये वृद्धिश्राद्धं दत्त्वा सदक्षिणम् ।
क्रूरभूतबलिञ्चैव संपूज्य वास्तुदेवताः ॥"
एकदिने वास्तुयागगृहोत्सर्गयोः करणे सकृदेव वृद्धिश्राद्धं करणीयम् ।
"गणशः क्रियमाणे तु मातृभ्यः पूजनं सकृत् ।
सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु ॥"
इति छन्दोगपरिशिष्टात् ॥
मात्स्ये ।
"ऊहापोहार्थतत्त्वज्ञो वास्तुशास्त्रस्य पारगः ।
आचार्य्यश्च भवेन्नित्यं सर्व्वदा दोषवर्जितः ॥"
देवीपुराणम् ।
"प्रासादे च चतुःषष्टिरेकाशीतिपदं गृहे ।
चतुरस्रीकृते क्षेत्रे चाष्टधा नवधा कृते ॥
कोणे रेखास्ततो दत्त्वा नव भागान् प्रकल्पयेत् ।
ईशः कोणार्द्धतो ज्ञेयः पर्ज्जन्यः पदसंस्थितः ॥
द्विपदस्थो जयन्तश्च शक्रः स्यादेककोष्ठगः ।
भास्करश्च पदो ज्ञेयो द्विपदः सत्य उच्यते ॥
भृशः पदस्थो ज्ञातव्यो व्योम चैव पदार्द्धकम् ।
हुताशनः पदार्द्धे तु पूषा च पदसंस्थितः ॥
वितथो द्विपदो ज्ञेयः पदैकस्थो गृहक्षतः ।
वैवस्वतः पदकस्थो गन्धर्व्वो द्विपदस्थितः ॥
भृङ्गश्चैकपदो ज्ञेयो मृगश्चार्द्धपदस्थितः ।
पितरोऽर्द्धपदे ज्ञेयाः पदे दौवारिकस्तथा ॥
सुग्रीवो हि पदे ज्ञेयः पदस्थः पुष्पदन्तकः ।
पयसां पतिरेकस्थोऽसुरो द्विपदसंस्थितः ॥
शोषश्चैकपदो ज्ञेयः पापोऽर्द्धपद उच्यते ।
रोगश्चार्द्धपदो ज्ञेयो नागश्चापि पदे स्थितः ॥
द्विपदे विश्वकर्म्मा तु भल्लाटः पदसंस्थितः ।
यज्ञेश्वरः पदो ज्ञेयो नागराड्द्विपदस्थितः ॥
पादस्था श्रीर्महादेवी दितिश्चार्द्धपदस्थिता ।
आपान्तपादसंस्थः स्यादापवत्सः पदस्थितः ॥
चतुष्पदस्थो विज्ञेयश्चार्य्यमा मध्यपूर्व्वगः ।
सावित्रस्तु पदो ज्ञेयः सावित्री पदसंस्थिता ॥
ततो विवस्वान् विज्ञेयश्चतुर्ष्वैर्मध्यसंस्थितः ।
इन्द्रश्चेन्द्रात्मजश्चोभावेकैकपदसंस्थितौ ॥
मित्रश्चतुष्पदश्चैव पश्चिमे च व्यवस्थितः ।
रुद्रश्चैकपदो ज्ञेयो राजयक्ष्मा पदस्थितः ॥
धराधरश्च विज्ञेय उत्तरे च चतुष्पदे ।
चतुष्पदचतुर्द्दस्तो मध्ये ज्ञेयः प्रजापतिः ॥
देवताद्युचरा बाह्ये सर्व्वे चान्तस्तथासुराः ।
एवं प्रयत्न कोष्ठानि रचयापूर्य्य दैशिकः ।
एतेषामेव देवानां बलिं दद्यात्तु कामिकम् ॥"
रचक्षेति पञ्चवर्णरजोभिः । तथा च शारदायाम् ।
"उक्तानामपि देवानां पदान्यापूर्य्य पञ्चभिः ।
रजोभिस्तैर्यथोक्तेभ्यः पायसान्नैर्बलिं हरेत् ॥"
तथा ।
"पीतं हरिद्राचूर्णं स्यात् सितं तण्डुलसम्भवम् ।
कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाकजम् ।
विल्वादिपत्रजं श्याममित्युक्तं वर्णपञ्चकम् ॥"
स्यात् पुलाकस्तुच्छधान्ये इत्यमरोक्तेः तुच्छं अपकृष्टम् ।
"पूज्या मण्डलबाह्ये तु पूर्व्वाद्यग्न्यादिकक्रमात् ।
स्कन्दश्चैव विदारी च अर्य्यमा पूतना तथा ।
जम्भका पापराक्षस्यौ पिलिपिञ्जश्चरक्यपि ॥"
मण्डलकरणासामर्थ्ये शालग्रामसमीपे सर्व्वे पूज्याः ।
"शालग्रामशिलारूपी यत्र तिष्ठति केशवः ।
तत्र देवासुरा यक्षा भुवनानि चतुर्द्दश ॥"
इति पद्मपुराणवचनात् ।
तत्रावाहनविसर्ज्जने न स्तः ।
"शालग्रामे स्थावरे च नावाहनविसर्ज्जने ॥"
इति वचनात् ॥
तदसम्भवे घटादिजले । प्रतिमास्थानेष्वपस्तु आवाहनविसर्ज्जनवर्ज्जम् । इति बौधायनवचनात् ॥ * ॥ एषां विशेषबलिर्मत्स्यपुराणदेवीपुराणाभ्यामुक्तोऽपीदानीन्तनैर्न व्यवह्रियते । इति न लिखितः । किन्तु मत्स्यपुराणोक्तपायसबलिर्दीयते । तथा च ।
"पायसं वापि दातव्यं स्वनाम्ना सर्व्वतः क्रमात् ।
नमस्कारेण मन्त्रेण प्रणवाद्येन सर्व्वतः ॥"
अतएव प्रागुक्तशारदावाक्ये पायसमात्रमुक्तं तेन एष पायसबलिः ॐ ईशानाय नमः । इत्यादिना प्रयोगः । न च वाचस्पतिमिश्रोक्तममुकदेवतायै एष पायसबलिर्नम इत्यादि प्रणवादिनमस्कारान्तस्वनामरूपमन्त्रमध्ये देयप्रवेशस्यायुक्तत्वात् । तथा च ब्रह्मपुराणम् ।
"ॐकारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥"
इति देवीपुराणम् ॥
"एवं भूतगणानान्तु बलिर्देयस्तु कामिकः ।
एतान् प्रपूजयेद्देवान् कुशपुष्पाक्षतैर्बुधः ॥
एवं प्रपूजिता देवाः शान्तिपुष्टिप्रदा नृणाम् ।
अपूजिता विनिघ्नन्ति कारकं स्थापकं तथा ।
एतान् प्रपूजयेद्देवान् कुशपुष्पाक्षतैस्तथा ॥"
अत्र पूजाया नित्यत्वात् वक्ष्यमाणमत्स्यपुराणवचने होमानन्तरं बलिदानाच्च बलेः काम्यत्वात् पूजा होमानन्तरं बलिदानाचारः । तथा च ।
"ब्रह्मस्थाने तथा कुर्य्याद्वास्तुदेवस्य पूजनम् ।
शिवाय पूजनं कुर्य्याद्वास्तुदेवगणस्य च ॥
गन्धार्घ्यपुष्पनैवेद्यधूपाद्यैः सुरसत्तम ।
ततः संपूजयेत् तस्मिन् सर्व्वलोकधरां महीम् ॥
सुरूपां प्रमदारूपां दिव्याभरणभूषिताम् ।
ध्यात्वा तामर्च्चयेद्देवीं परितुष्टां स्मिताननाम् ॥
ततः स्वनाममन्त्रेण सर्व्वदेवमयं हरिम् ।
ध्यात्वा समर्च्चयेत्तत्र यजेद्वास्तुनरं परम् ॥
ब्रह्मस्थाने ततो विद्वान् कुर्य्याद्धारमचलैः ।
तस्मिन् संस्थापयेत् कुम्भं वर्द्धन्या सह पूरितम् ।
हैमं वा राजतं पात्रं मृन्मयं वा दृढं शुभम् ।
सर्व्वबीजौषधीयुक्तं सुवर्णरजतान्वितम् ॥

ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत् ।
तस्मिंश्चतुर्म्मुखं देवं प्राजेशं मन्त्रविग्रहम् ॥
गन्धैः पुष्पैश्च धूपैश्च नैवेद्यैः सुमनोहरैः ।
ततो मण्डलबाह्ये तु प्रतीच्यां प्राङ्मुखः स्थितः ॥
आचार्य्यो गृह्य सम्भारं ब्रह्मादींस्तर्पयेत् सुरान् ।
प्राजेशं तर्पयेद्विद्वान् आहुतीनां शतेन च ॥
इतरान् दशभिर्द्देवानाहुतिभिः प्रतर्पयेत् ।
ततः प्रणम्य विज्ञाप्य कृत्वा वै स्वस्तिवाचनम् ॥
प्रगृह्य कर्करीं सम्यङ्मण्डलान्तःप्रदक्षिणम् ।
सूत्रमार्गेण देवेन तोयधारेण कारयेत् ॥
पूर्ब्बवत् तेन मार्गेण सप्तबीजानि वापयेत् ।
आरम्भं तेन मार्गेण तस्य खातस्य कारयेत् ॥
ततो गर्त्तं खनेन्मध्ये हस्तमानप्रमाणतः ।
चतुरङ्गुलमात्रं तदधः खन्यात् सुसम्मितम् ॥
गोमयेन प्रलिप्याथ चन्दनेन विलेपितम् ।
मध्ये दत्त्वा तु पुष्पाणि शुक्लान्यक्षतमेव च ॥
आचार्य्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतुर्म्मुखम् ।
तूर्य्यमङ्गलघोषेण ब्रह्मघोषरवेण च ॥
अर्घ्यं दद्यात् सुरश्रेष्ठ कुम्भतोयेन मन्त्रवित् ।
प्रगृह्य कर्करीं तान्तु तत् खातं पूजयेज्जलैः ॥
सर्ब्बरत्नसमायुक्तैर्व्विमलैश्च सुगन्धिभिः ।
तस्मिन् पुष्पाणि शुक्लानि प्रक्षिपेदोमिति स्मरन् ॥
नद्यावर्त्तं परीक्षेत दधिभक्तान्वितं क्षिपेत् ।
शुभं स्याद्दक्षिणावर्त्तेऽशुभं वामे भवेत्ततः ॥
बीजैः शालियवादीनां गर्त्तं तं पूरयेत्ततः ।
क्षेत्रजाभिः पवित्राभिर्मृद्भिर्गर्त्तं प्रपूरयेत् ॥
एवं निष्पाद्य विधिना वास्तुयागं सुरोत्तम ।
सुवर्णं गाश्च वस्त्रञ्च आचार्य्याय निवेदयेत् ॥”
इतरानीशादीन् होमस्तु प्रणवादिस्वाहान्त-
तत्तन्नामभिः । तथा च विष्णुधर्म्मोत्तरे ।
“एकैका देवता राम समुद्दिश्य यथाविधि ।
चतुर्थ्यन्तेन धर्म्मज्ञो नाम्ना च प्रणवादिना ।
होमद्वयमथैकैकं शतसङ्ख्यन्तु होमयेत् ॥”
शतसङ्ख्यमिति पूर्ब्बोक्तवचनानुसारेण वास्तु-
यागेतरपरम् । स्मृतिः ।
“स्वाहावसाने जुहुयात् ध्यायन् वै मन्त्रदेव-
ताम् ॥”
होमदक्षिणासम्प्रदानमाह छन्दोगपरिशिष्टम् ।
“ब्रह्मणे दक्षिणा देया यत्र या परिकीर्त्तिता ।
कर्म्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत् ॥
विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्द्धहरो भवेत् ।
स्वयञ्चेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत् ॥”
अन्यो यजमानभिन्नः । उभयं ब्रह्मकर्म्म होतृ-
कर्म्म च । उपसंहारे वास्तुयागमिति श्रुतेः
सङ्कल्पवाक्ये तेनैवोल्लेखमाचरन्ति । अत्र
मिलितामिलितदक्षिणादानात् पक्षतार-
तम्यम् ॥ * ॥ मात्स्ये ।
“ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत् ॥”
देवीपुराणम् ।
“कालहस्त्यपती पूज्यौ वैष्णवान् शक्तितोऽर्च्चयेत् ।
ब्राह्मणान् भोजयित्वा तु नृत्यगीतादि कारयेत् ॥
प्रासादं कारयेद्विद्वान् गृहं वापि मनोहरम् ।
कार्य्यस्तु पञ्चभिर्व्विल्वैर्व्विल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुयागे बलिं हरेत् ॥”
इति मत्स्यपुराणे होमान्ते बलिविधानात्
अत्रापि होमं कृत्वा बल्यादिप्रागुदितसर्व्वकर्म्म-
करणाचारः ॥ * ॥ अत्र प्रजापतिनामाग्निः ।
“प्रतिष्ठायां लोहितश्च वास्तुयागे प्रजापतिः ।
जलाशयप्रतिष्ठायां वरुणः समुदाहृतः ॥”
इति मत्स्यसूक्तवचनात् । एकाशीतिपदवास्तु-
यागे मत्स्यपुराणम् । भूम्यधिकारे ।
“पञ्चगव्यौषधिजलैः परीक्षित्वा तु सेचयेत् ।
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ॥
पश्चात्पिष्टेन चालिप्य सूत्रेणालोक्य सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्ववास्तुविभागे तु विज्ञेया नवधा नव ॥”
पञ्चगव्यमन्त्रमाह शङ्खः ।
“गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ।
तेजोऽसीति घृतञ्चैव देवस्यत्वा कुशोदकम् ॥”
ओषधीराह कात्यायनः ।
“व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः ॥”
व्रीहिः शरत्पक्वधान्यं षष्टिकाख्यम् । शालयो
हैमन्तिकाः । दशेति वास्तुमण्डलवायव्ये उप-
विश्य पूर्व्वाभिमुखो गुरुः उत्तरत आरभ्य दश-
रेखाः प्राङ्मुखीर्यथादक्षिणं कुर्य्यात् । एवं
नैरृत्यामुपविश्य पश्चिमतः पूर्व्वापरगा दशो-
त्तरायता रेखाः कुर्य्यात् कनकशलाकादिना ।
रुद्रयामले तासां नामानि ।
“शान्ता यशोवती कान्ता विशाला प्राण-
वाहिनी ।
शची सुमनसा नन्दा सुभद्रा सुरथा तथा ॥”
इत्याद्या दश रेखाः ॥
“हिरण्या सुव्रता लक्ष्मीर्व्विभूतिर्व्विमला प्रिया ।
जया कला विशोका च इड़ा संज्ञा दशो-
त्तराः ॥”
इत्यन्तदश रेखाः ॥
“एकाशीतिपदं कृत्वा वास्तुवत् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवान् त्रिंशत् पञ्चदशैव तु ॥
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश ।
नामतस्तानि वक्ष्यामि स्थानानि च निबोध मे ॥
ईशानकोणादिषु तान् पूजयेच्च विधानतः ।
शिखी चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ॥
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ॥
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ॥
असुरः शोषपापौ च रोगोऽहिर्म्मुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ॥
बहिर्द्वात्रिंशदेते च तदन्तश्चतुरः शृणु ।
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः ॥
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ।
मध्ये नवपदे ब्रह्मा तस्याष्टौ च समीपगाः ॥
सर्व्वानेकान्तरान् विद्यात् पूर्व्वाद्यान्नामतः शृणु ।
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ॥
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्मृताः ॥
आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्दितिस्तथा ।
पादिकानाञ्च वर्गोऽयमेवं कोणेषु शेषतः ॥
तन्मध्ये तु बहिर्विंशद्विपदास्ते तु सर्व्वतः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥”
एवमिति यथा ईशानकोणे कोष्ठचतुष्टये अन्त-
स्थितैककोष्ठसहिते देवतापञ्चकमेवमाग्नेयादि-
कोणेष्वपीत्यर्थः । दिक्षु पूर्व्वादिदिक्षु ॥ * ॥
“वंशानिदानीं वक्ष्यामि वहूनपि पृथक् पृथक् ।
वायुं यावत् तथा रोगात् पितृभ्यः शिखिनं
पुनः ॥
मुख्याद्भृशमथो शोषाद्वितथं यावदेव तु ।
सुग्रीवाददितिं यावद्भृङ्गाज्जयन्तमेव च ॥
एते वंशाः समाख्याताः क्वचिज्जठर एव च ।
एतेषां चैव सम्पातः पदमध्ये समस्तथा ॥
मर्म्म चैतत् समाख्यातं त्रिमूलं कोणगं च यत् ।
स्तम्भन्यासेषु वर्ज्यानि तुलाविधिषु सर्व्वदा ॥
कीलोच्छिष्टोपघातानि वर्ज्जयेत् यत्नतो नरः ।
सर्व्वत्र वास्तुर्निर्द्दिष्टः पितृवैश्वानरायतः ॥
मूर्द्धन्यग्निः समाविष्टो मुखे चापः समाश्रितः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावधिष्ठितौ ॥
वक्षःस्थले चापवत्सः पूजनीयस्तथा बुधैः ।
नेत्रयोर्द्दितिपर्ज्जन्यौ श्रोत्रे दितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ च पूजनीयौ प्रयत्नतः ।
सोमसूर्य्यादयस्तद्वद्बाह्वोः पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्तसमाश्रितौ ।
सावित्रः सविता तद्वद्धस्तं दक्षिणमाश्रितौ ॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्म्मणिबन्धके ॥
तथैवासुरशोषौ च वामपार्श्वे समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सगृहक्षतः ॥
ऊर्व्वोर्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृङ्गसुग्रीवौ कच्यां दौवारिको मृगः ॥
जयः शक्रस्तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ॥
चरकीच विदारीच पूतनां पापराक्षसीम् ।
ईशानयादिकोणेषु मण्डलाद्बाह्यतो यजेत् ॥”
पितृभ्य इति पितृगणादारभ्य वह्निं यावत् यो
वंशः प्रसारितस्तद्वदायतो वास्तुपुरुषः । अम्बुपो
वरुणः । पुष्पकः पुष्पदन्तः । तथा ।
“प्रदक्षिणन्तु कुर्व्वीत वास्तोः पदविलेखनम् ।”
कोष्ठानां लिखनं प्रदक्षिणं कार्य्यम् । तथा ।
“तर्ज्जनी मध्यमा चैव तथाङ्गुष्ठश्च दक्षिणः ।
प्रवालरत्नकनकं फलपुष्पाक्षतोदकम् ।
सर्व्वेषु वामभागेषु शस्तं पदविलेखने ।” * ॥
तथा ।
“वास्तौ परीक्षिते सम्यग्वास्तुदेहे विचक्षणः ।
वास्तूपशमनं कुर्य्यात् समिद्भिर्बलिकर्म्मणा ॥

जीर्णोद्धारे तथोद्याने तथा गृहनिवेशने ।
द्वाराभिवर्द्धने तद्वत् प्रासादेषु गृहेषु च ॥
वास्तूपशमनं कुर्य्यात् पूर्व्वमेव विचक्षणः ।
एकाशीतिपदं लेख्यं लेखकैर्वास्तुपिण्डके ।
होमस्त्रिमेखले कार्य्यः कुण्डे हस्तप्रमाणके ॥”
विश्वकर्म्मा ।
“खाताधिके भवेद्रोगी हीने धेनुधनक्षयः ।
वक्रकुण्डे तु सन्तापो मरणं छिन्नमेखले ॥
मेखलारहिते प्रोक्तो ह्यधिके वित्तसंक्षयः ।
भार्य्याविनाशकं कुण्डं प्रोक्तं योन्या विना कृतम् ।
अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्ज्जितम् ॥”
वशिष्ठसंहितायाम् ।
“तस्मात् सम्यक् परीक्ष्यैवं कर्त्तव्यं शुभवेदिकम् ।”
एवंविधकुण्डासम्भवे क्रियासारः ।
“कुण्डमेवंविधं न स्यात् स्थण्डिलं वा समाश्रयेत् ॥”
मत्स्यपुराणम् ।
“यवैः कृष्णतिलैस्तद्वत् समिद्भिः क्षीरसम्भवैः ।
पालाशैः खादिरैरापामार्गोडुम्बरसम्भवैः ॥
कुशदूर्व्वामयैर्व्वापि मधुसर्पिःसमन्वितैः ।
कार्य्यस्तु पञ्चभिर्व्विल्वैर्व्विल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेशे बलिं हरेत् ॥”
अत्र होमे मन्त्रानाह विष्णुधर्म्मोत्तरम् ।
“वास्तोष्पतेन मन्त्रेण यजेच्च गृहदेवताम् ।”
वास्तोष्पतेन वास्तोष्पतिदैवतेन पञ्चमन्त्रेण ।
बलिद्रव्यञ्च पायसं प्रागेव लिखितम् ॥ * ॥
ब्रह्मस्थाने ततः कुर्य्याद्वासुदेवस्य पूजनमित्यादि । सुवर्णं गां वस्त्रयुग्ममाचार्य्याय निवेदयेत् । इत्यन्तमत्रापि बोध्यम् कल्पतरौ मत्स्यपुराणम् ।
“ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत् ।
द्विजांश्च पूजयेद्भक्त्या ये चान्ये गृहमागताः ॥
एतद्वास्तूपशमनं कृत्वा कर्म्म समाचरेत् ।
प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ॥
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये ।
इति वास्तूपशमनं कृत्वा सूत्रेण वेष्टयेत् ।”
इति मत्स्यपुराणे उपक्रमोपसंहारयोर्वास्तूपशमनेनाभिधानात् वास्तूपशमनं कर्म्मणो नामधेयं इति तेनैवोल्लिखः सर्व्वदोषापनुत्तये इति श्रुतेश्च वास्तुसर्व्वदोषापनोदनं फलं संकल्पे तु तदुल्लिखः कार्य्यः । एतत्तु प्रारम्भप्रवेशान्यतरस्मिन्नवश्यं कर्त्तव्यम् । आवश्यकत्वे प्रमाणं प्रागेवोक्तम् । इति श्रीरघुनन्दनभट्टाचार्य्यविरचितं वास्तुयागतत्त्वं समाप्तम् ॥

वास्तुकं, क्ली, (वास्तु एव । वास्तु + स्वार्थे कन् ।) वास्तूकशाकम् । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते । १ । ४६ ।
“तण्डुलीयकजीवन्तीसुनिषण्णकवास्तुकैः ॥”)

वास्तुकी, स्त्री, चिल्लीशाकम् । इति राजनिर्घण्टः ॥

वास्तूकं, क्ली, (वसन्ति गुणा अत्रेति । वस + ऊलूकादयश्चेति साधुः ।) शाकविशेषः । वेतुया इति भाषा । तत्पर्य्यायः । वास्तू २ वास्तुकम् ३ वस्तुकम् ४ वस्तूकम् ५ हिलमोचिका ६ शाकराजः ७ राजशाकः ८ चक्रवर्त्ती ९ । अस्य गुणाः । मधुरत्वम् । सुशीतलत्वम् । क्षारत्वम् । मादनत्वम् । त्रिदोषजित्त्वम् । रोचनत्वम् । ज्वरहरत्वम् । महार्शसां नाशनत्वम् । मलमूत्रशुद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
“वास्तूकं वास्तुकञ्च स्यात् क्षारपत्रञ्च शाकराट् ।
तदेव तु वृहत्पत्रं रक्तं स्यात्गौडवास्तुकम् ॥
प्रायशो यवमध्ये स्यात् यावत् शाकमतः स्मृतम् ।
वास्तूकद्वितयं स्वादु क्षारं पाके कटूदितम् ॥
दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम् ।
सरं प्लीहास्रपित्तार्शःकृमिदोषत्रयापहम् ॥”
इति भावप्रकाशः ॥

वास्तेयं, त्रि, वस्तिसम्बन्धि । वस्त्रसम्बन्धि । वस्तुसम्बन्धि । वास्तुसम्बन्धि । वस्तिवस्त्रवस्तुवास्तुशब्देभ्यः ढेयप्रत्ययेन निष्पन्नम् ॥ (वस्तौ भवम् । वस्ति + “दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ।” ४ । ३ । ५६ । इति ढञ् । वस्तिभवम् ॥ यथा, छान्दोग्योपनिषदि । ३ । १९ । २ ।
“तत् यत् रजतं सेयं पृथिवी यत् सुवर्णं सा द्यौर्यज्जरायु ते पर्व्वता यदुल्वं स मेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेयमुदकं स समुद्रः ।” वस्तिरिव । वस्ति + “वस्तेर्ढञ् ।” ५ । ३ । १०१ । इति ढञ् । वस्तिसदृशम् । इति सिद्धान्तकौमुदी ।)

वास्तोष्पतिः, पुं, (वास्तोर्गृहक्षेत्रस्य पतिरधिष्ठाता । “वास्तोष्पतिगृहमेधाच्छ च ।” इति निपातनात् अलुक् षत्वञ्च । यद्वा, “वास्वन्तरिक्षं तस्य पतिः पाता विसर्ज्जनं ।” इति निघण्टुटीकायां देवराजयज्वा । ५ । ४ । ६ ।) इन्द्रः । इत्यमरः ॥ (देवतामात्रम् । यथा, भागवते । १० । ५० । ५३ ।
“वास्तोष्पतीनाञ्च गृहैर्व्वलभीभिश्च निर्म्मितम् ।
चातुर्व्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत् ॥”
“किञ्च नगरगृहादौ वास्तोष्पतीनां देवानाञ्च गृहैर्वलभीभिश्चन्द्रशालिकाभिश्च निर्म्मितम् ।” इति तट्टीकायां स्वामी ॥ गृहपालयितरि, त्रि । यथा, ऋग्वेदे । ७ । ५४ । १ ।
“वास्तोष्पते प्रतिजानीह्यस्मान्
स्वावेशो अनमीवो भवान्ः ॥”
“हे वास्तोष्पते गृहस्य पालयितर्देव त्वं अस्मान् त्वदीयान् स्तोतृनिति प्रतिजानीहि ।” इति तद्भाष्ये सायणः ॥)

वास्त्रः, पुं, (वस्त्रेण परिवृतो रथः । वस्त्र + “परिवृतो रथः ।” ४ । २ । १० । इति अण् ।) वस्त्राहृतरथः । इत्यमरः । २ । ८ । ५४ ॥ त्रि, वस्त्रसम्बन्धी ॥

वास्यः, त्रि, वारि तिष्ठति यः । वार्शब्दपूर्ब्बस्थाधातोर्डप्रत्ययेन निष्पन्नः ॥

वास्यः, पुं, उष्मा । लोहम् । इति केचित् ॥ महत्यमध्य इति साधुपाठः ॥

वास्येयः, पुं, नागकेशरः । इति रत्नमाला ॥

वाह, ऋ ङ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अववाहत् । ङ, वाहते । ववाहे रत्नं पुरुषास्ततो जाताः सहस्रशः इत्यादि सिद्धार्थमोह्रादिषु वहधातुं मन्यते वर्द्धमानरक्षितौ । वस्तुतस्तु बहुवाक्यसम्मतत्वादेवोह्रादिरनेनोपेक्षितः ववाहेति चक्रीप्रयोगस्य तु वाह ऋ ङ यत्ने इत्यस्मात् गणकृतानित्यत्वात् परस्मैपदसिद्धिः अनेकार्थत्वात् सुसावित्यर्थः । अथवा वव इत्याह इत्येव व्याख्यानम् । इति दुर्गादासः ॥

वाहः, पुं, (उह्यतेऽनेनेति । वह + करणे घञ् ।) घोटकः । (यथा, अध्यात्मरामायणे ।२।५।५१।
“इत्याश्वास्य सुमन्त्रोऽपि रथं वाहैरयोजयत् ॥”) परिमाणविशेषः । इत्यमरः ॥ यथाहुः ।
“पलं प्रकुञ्चकं मुष्टिः कुडवस्तच्चतुष्टयम् ।
चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढकम् ॥
अष्टाढको भवेत् द्रोणो द्विद्रोणः सूर्प उच्यते ।
सार्द्धसूर्पो भवेत् खारी द्वे खार्य्यौ गोणुदाहृता ।
तामेव भारं जानीयात् वाहो भारचतुष्टयम् ॥”
इति भरतः ॥
चतुर्द्दशभेदात् संख्यान्यथात्वम् । तथा च ।
“चतुराढको द्रोणः षोडशद्रोणा खारी ।
विंशतिद्रोणः कुम्भः दशकुम्भो वाहः । इति स्वामी । * ॥ भुजः । वृषः । वायुः । इति शब्दरत्नावली ॥ (प्रवाहः । यथा, कथासरित्सागरे । ६३ । ८१ ।
“यत्रार्च्चिरादिधूमादिमार्गाविव समागतौ ।
गङ्गायमुनयोर्वाहौ भातः सुगतये नृणाम् ॥”
वाहनम् । यथा, तत्रैव । ६२ । १५७ ।
“तच्छ्रुत्वा तत्र भिक्षार्थं राजा वाहसमुत्सुकः ।
जलादुत्तीर्य्य तत्पृष्ठमारोहत् गतभीर्मुदा ॥”)

वाहकः, त्रि, (वहतीति । वह + ण्वुल् ।) वहनकर्त्ता । वहति यः । इत्यर्थे णकप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । १० । १८ । २१ ।
“आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥”)

वाहद्विषत्, [द्] पुं, (वाहानां घोटकानां द्विषन् शत्रुः ।) महिषः । इत्यमरः ॥

वाहनं, क्ली, (वहत्यनेनेति । वह + करणे ल्युट् ।
“वाहनमाहितात् ।” ८ । ४ । ८ । इत्यत्र “वहतेर्ण्यन्ताद्वृद्धिरत्रैव सूत्रे निपातनात् ।” इति भट्टोजिदीक्षितोक्त्या निपातनात् वृद्धिः ।) हस्त्यश्वरथदोलादिः । तत्पर्य्यायः । यानम् २ युग्यम् ३ पत्रम् ४ धोरणम् ५ । इत्यमरः । २ । ८ । ५८ ॥ * ॥ (यथा, रघुः । ११ । १० ।
“पूर्व्ववृत्तकथितैः पुराविदः
सानुजः पितृसखस्य राघवः ।
उह्यमान इव वाहनोचितः
पादचारमपि न व्यभावयत् ॥”)

देव्या वाहनानि यथा,—
"विष्णुर्ब्रह्मशिवैर्देवैर्ध्रियते सा जगन्मयी ॥
शिवप्रेतो महादेवो ब्रह्मा लोहितपङ्कजः ।
हरिर्हरिस्तु विज्ञेयो वाहनानि महौजसः ॥
स्वमूर्त्त्या वाहनत्वन्तु तेषां यस्मान्न युज्यते ।
तस्मान्मूर्त्त्यन्तरं कृत्वा वाहनत्वं गतास्त्रयः ॥
यस्मिन् यस्मिन्महामाया प्रीणाति सततं
शिवा ।
तेन तेनैव रूपेण आसनान्यभवन् त्रयः ॥"
इति कालिकापुराणे ५७ अध्यायः ॥*॥
देवदानवानां वाहनानि यथा,—
पुलस्त्य उवाच ।
"शृणुष्व कथयिष्यामि सर्व्वेषामपि नारद ।
वाहनानि समासेन एकैकस्यानुपूर्व्वशः ॥
रुद्रहस्ततलोत्पन्नं महाकायं महागजम् ।
श्वेतवर्णं महावीर्य्यं देवराजस्य वाहनम् ॥
रौद्रोरुःसम्भवं भीमं कृष्णवर्णं मनोजवम् ।
पौण्ड्रकं नाम महिषं धर्म्मराजस्य नारद ॥
रुद्रमानस-सम्भूतं श्यामं जलधिसंज्ञकम् ।
शिशुमारं दिव्यगतिं वाहनं वरुणस्य च ॥
रौद्रं शकटचक्राक्षं शैलाकारनरोत्तमम् ।
अम्बिकापादसम्भूतं वाहनं धनदस्य तु ॥
एकादशानां रुद्राणां वाहनानि महामुने ।
गन्धर्व्वाश्च महावीर्य्या भुजगेन्द्राः सुदारुणाः ॥
श्वेतानि सौरभेयाणि वृषाण्युग्रजवानि च ।
रथं चन्द्रमसश्चार्द्धं सहस्रहंसवाहनम् ॥
हयोढ़रथवाहाश्च आदित्या मुनिसत्तम ।
कुञ्जरस्थाश्च वसवो यक्षाश्च नरवाहनाः ॥
किन्नरा भुजगारूढ़ा हयारूढ़ौ तथाश्विनौ ।
शारङ्गाधिष्ठिता ब्रह्मन् मरुतो घोरदर्शनाः ॥
शुकारूढ़ाश्च कवयो गन्धर्व्वाश्च पदातिनः ।
आरुह्य वाहनान्येवं स्वानि स्वान्यमरोत्तमाः ॥
सन्नह्य निर्य्ययुर्हृष्टा युद्धाय सुमहौजसः ॥*॥
नारद उवाच ।
गदितानि सुरादीनां वाहनानि महामुने ।
दैत्यानां वाहनान्येवं यथावद्वक्तुमर्हसि ॥
पुलस्त्य उवाच ।
शृणुष्व दानवादीनां वाहनानि द्विजोत्तम ।
कथयिष्यामि तत्त्वेन यथावत् श्रोतुमर्हसि ॥
अन्धकस्य रथो युक्तः श्रेष्ठः परमवाजिभिः ।
कृष्णवर्णः सहस्रारस्त्रिनल्वपरिमाणवान् ॥
प्रह्लादस्य रथो दिव्यः श्वेतवर्णैर्हयोत्तमैः ।
उह्यमानस्तथाष्टाभिः श्वेतरुक्ममयः शुभः ॥
विरोचनस्य तु गजः कुम्भस्य तु तुरङ्गमः ।
जम्भस्य तु रथो दिव्यो हयैः काञ्चनसन्निभैः ॥
शङ्कुकर्णस्य तुरगो हयग्रीवस्य कुञ्जरः ।
रथो मयस्य विख्यातो दुन्दुभेश्च महोरगः ।
शम्बरस्य विमानोऽभूदयः शङ्कोर्म्मृगाधिपः ॥"
इति श्रीवामनपुराणे ८ अध्यायः ॥
(वाहयतीति । वह + स्वार्थे णिच् + ल्युः ।
वाहके, त्रि । यथा, कथासरित्सागरे । १२४ ।
२२०—२२२ ।
"स वाहनानां नागानां शीकराम्बुमहाभरैः ।
शूकरप्रेयसीपृष्ठे स्वयं चक्रे कृषिं नृपः ॥"
"नागानां वाहना मेघाः शूकरप्रेयसी चितिः ।
विष्णोः शूकररूपस्य सा हि प्रियतमोच्यते ॥
तस्यां मेघाम्बुभिर्धान्यमुत्पन्नं चेत् किमद्भुतम् ॥")
वाहश्रेष्ठः, पुं, (वाहेषु वाहनेषु श्रेष्ठः ।) अश्वः ।
इति राजनिर्घण्टः ॥
वाहसः, पुं, (उह्यते इति । वह + "वहियुभ्यां
णित् ।" उणा० ३ । ११८ । इति असच् । स च
णित् ।) अजगरः । इत्यमरः ॥ (यथा, तैत्ति-
रीयसंहितायाम् । ५ । ५ । १४ । १ ।
"त्वाष्ट्रः प्रतिश्रुत्कायै वाहसः ॥")
वारिनिर्य्यासम् । सुनिषण्णकम् । इति मेदिनी ।
से, २७ ॥
वाहा, स्त्री, (वाह + अजादित्वात् टाप् ।)
वाहुः । इत्यजयपालद्विरूपकोषौ ॥
वा(बा)हावा(बा)हवि,ब, (वाहुभिर्वाहुभिः प्रहृत्य
इदं युद्धं प्रवृत्तं तत् ।) वाहुयुद्धम् । हाता-
हाति इति भाषा । इति मुग्धबोधव्याकरणम् ॥
वाहिकः, पुं, (वाहेन परिमाणविशेषेण क्रीतः ।
वाह + "असमासे निष्कादिभ्यः ।" ५ । १ । २० ।
इति ठक् ।) ढक्का । गोवाहः । शकटादि ।
इति धरणिः ॥ त्रि, भारवाहकश्च ॥
वाहित्थं, क्ली, गजकुम्भस्याधोभागः । इत्यमरः ॥
वाहिनी, स्त्री, (वाहा वाहनानि घोटकादीनि
सन्त्यस्यामिति । वाह + इनिः । ङीप् ।) सेना ।
(यथा, रघुः । ११ । ६ ।
"लक्ष्मणानुचरमेव राघवं
नेतुमैच्छदृषिरित्यसौ नृपः ।
आशिषं प्रयुयुजे न वाहिनीं
सा हि रक्षणविधौ तयोः क्षमा ॥" *॥
वाहः प्रवाहोऽस्त्यस्या इति ।) नदी । (यथा,
रामायणे । २ । ८९ । ९ ।
"उत्तिष्ठत प्रबुध्यध्वं भद्रमस्तु हि वः सदा ।
नावः समुपकर्षध्वं तारयिष्याम वाहिनीम् ॥")
सेनाभेदः । तद्यथा । गजाः एकाशीतिः ।
रथाः एकाशीतिः । अश्वास्त्रिचत्वारिंशदधिक-
शतद्वयम् । पदातिकाः पञ्चाधिकचतुःशतम् ।
समुदायेन दशाधिकाष्टशतं वाहाः सन्त्यस्याम् ।
इत्यमरभरतौ ॥ (यथा, महाभारते । १ । २ ।
१९—२१ ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिस्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः ॥"
प्रवाहशीला । यथा, मार्कण्डेये । ७८ । २९ ।
"यमुना च नदी यत्र कलिन्दान्तरवाहिनी ॥")
वाहिनीपतिः, पुं, (वाहिन्याः सेनायाः पतिः ।)
सेनापतिः । इत्यमरः ॥ (यथा, महाभारते ।
४ । २१ । ६ ।
"प्रवादेनेह मत्स्यानां राजा नाम्नायमुच्यते ।
अहमेव हि मत्स्यानां राजा वै वाहिनीपतिः ॥"
वाहिन्या नद्याः पतिः ।) समुद्रः । इति शब्द-
रत्नावली ॥
वाहीकः, पुं, देशभेदः । तत्पर्य्यायः । आरट्टः २ ।
इति हेमचन्द्रः ॥ जातिकजातिः । जाट् इति
भाषा ॥ यथा,—
"तत्र वृद्धः पुरावृत्ताः कथाः कश्चिद्द्विजोत्तमः ।
वाहीकदेशं मद्रांश्च कुत्सयन् वाक्यमब्रवीत् ॥
पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः ।
तान् धर्म्मवाह्यानशुचीन् वाहीकान् परि-
वर्ज्जयेत् ॥
शाकलं नाम नगरमापगानामनिम्नगा ।
जर्त्तिका नाम वाहीकास्तेषां वृत्तं सुनिन्दि-
तम् ॥"
इति महाभारते कर्णपर्व्वणि २०० अध्यायः ॥
वा(बा)हुः, पुं, (बाधते शत्रूनिति । बाधृ लोड़ने
+ "अर्त्तिकृशिकमीति ।" उणा० । १ । २८ ।
इति कुः हकारादेशश्च ।) कक्षावध्यङ्गुल्यग्र-
पर्य्यन्तावयवः । यथा । भुजबाहू प्रवेष्टो दोरि-
त्यमरः ॥ वहुत्वेन बाहुः नास्तीति उज्ज्वल । पश्चि
वाहोऽदन्तः । वाहोऽश्वभुजयोः पुमान् । इति
दामोदरः । स्त्रियां वाहा च । वाहो वाहा
भुजा वाहुर्दोषो दोषा च दोः पुमान् । इति
कोषान्तरम् ॥ इति तट्टीकायां भरतः ॥ कूर्प-
रस्योर्द्ध्वभागो वाहुस्तस्याधोभागः प्रवाहुः ।
यथा,—
"मुखं वाहू प्रवाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्वव्याहतैश्वर्य्यस्तव नारायणोऽव्ययः ॥"
इति विष्णुपुराणे ५ अंशे ५ अध्यायः ॥
वाहुप्रवाहू च कूर्परस्योर्द्धाधोभागौ । इति
तट्टीका ॥ अन्यत् पवर्गीयवकारादिवाहुशब्दे
द्रष्टव्यम् ॥ * ॥ अस्य शुभाशुभलक्षणं यथा,—
"निर्मांसौ चैव भग्नाख्यौ श्लिष्टौ च विपुलौ भुजौ ।
आजानुलम्बिनौ वाहू वृत्तौ पीनौ नृपेश्वरे ॥
निःस्वानां रोमशौ ह्रस्वौ श्रेष्ठौ करिकरप्रभौ ।
हस्ताङ्गुलय एव स्युरायुर्दा ललिताः शुभाः ॥
मेधाविनाश्च सूक्ष्माः स्युर्भृत्यानां चिपिटाः
स्मृताः ।
स्थूलाङ्गुलीभिर्निःस्वाः स्युर्नताःस्युर्वहिरन्तराः ॥
कपितुल्यकरा निःस्वा व्याघ्रतुल्यकरैर्धनम् ।
मणिबन्धैर्निगूढ़ैश्च सुश्लिष्टशुभसन्धिभिः ॥
नृपा हीनैः करच्छेदः सशब्दैर्धनवर्ज्जिताः ।
पितृवित्तविहीनाश्च निम्नात् करतलान्नराः ॥
संवृत्तैश्चैव निम्नैश्च धनिनः परिकीर्त्तिताः ।
प्रोक्ता नरकदातारो विषमैर्विषमा नराः ॥
करैः करतलैश्चैव लाक्षाभैरीश्वरास्तकैः ।
परदाररताः पीतै रूक्षैर्निःस्वा नरा मताः ॥
तुषतुल्यनखाः क्लीवाः कुटिलैः स्फुटितैर्नराः ।
निःस्वाश्चक्रनखैस्तद्वद्विवर्णैः परतर्कुकाः ॥
ताम्रैर्भूपा धनाढ्याश्च अङ्गुष्ठैः यववैस्तथा ।
अङ्गुष्ठमूलजैः श्रेष्ठः स्याद्दीर्घाङ्गुलिपर्व्वकः ॥

दीर्घायुः सुभगश्चैव निर्धनो विरलाङ्गुलिः ।
घनाङ्गुलिश्च सधनस्तिस्रो रेखाश्च यस्य वै ॥
नृपतेः करतलगा मणिबन्धे समुत्थिताः ।
युगमीनाङ्कितकरो भवेत् सत्त्रप्रदो नरः ॥
वज्राकाराश्च धनिनां मत्स्यपुच्छनिभा बुधे ।
शङ्खातपत्रशिविकागजपद्मोपमा नृपे ॥
कुम्भाङ्कुशपताकाभा म्टणालाभा निरीश्वरे ।
दामाभाश्च गवाढ्यानां स्वस्तिकाभा नृपेश्वरे ॥
चक्रासितोमरधनुःकुन्ताभा नृपतेः करे ।
उदूखलाभा यज्वाढ्ये वेदीभाश्चाग्निहोत्रिणि ॥
वापीदेशकुलाभाश्च त्रिकोणाभाश्च धार्म्मिके ।
अङ्गुष्ठमूलगा रेखाः पुत्त्राः स्युश्चाश्च दारिकाः ॥
प्रदेशिनीगता रेखा कनिष्ठामूलगामिनी ।
शतायुषश्च कुरुते छिन्नया तरुतो भयम् ।
निस्वाश्च बहुरेखाः स्युर्निर्द्दयाश्चिबुकैः कृशैः ॥”

इति गारुडे ६६ अध्यायः ॥

बा(वा)हुमूलं, क्ली, (बाह्वोर्मूलम् ।) भुजद्वयस्य आद्यभागः । काँक् इति बगल् इति च भाषा । तत्पर्य्यायः । कक्षः २ । इत्यमरः ॥ भुजकोटरः ३ दोर्म्मूलम् ४ खण्डिकः ५ कचा ६ । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ३ । १२४

“कापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥”

बा(वा)हुलः, पुं, कार्त्तिकमासः । इत्यमरः ॥ अथ कार्त्तिकमाहात्म्यम् ।

नारद उवाच ।

“कार्त्तिकस्य तु माहात्म्यं मासस्य वक्तुमर्हसि ।
पूर्व्वं कार्त्तिकमाहात्म्यं यथावत् वक्तुमर्हसि ॥

ब्रह्मोवाच ।

साधु पृष्टं त्वया पुत्त्र लोकोद्धारकहेतवे ।
कथयामि न सन्देहस्त्वत्समो नास्ति वैष्णवः ॥
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञाः सदक्षिणाः ।
कार्त्तिकस्य च मासस्य कोट्यंशं नापि बिभ्रति ॥
एकतः पुष्करे वासः कुरुक्षेत्रे हिमाचले ।
एकतः कार्त्तिको वत्स ! सर्व्वपुण्याधिको मतः ॥
स्वर्णानि मेरुतुल्यानि सर्व्वदानानि चैकतः ।
एकतः कार्त्तिको वत्स ! सर्व्वदा केशवप्रियः ॥
हत्वा कोटिसहस्राणि पापानि सुबहून्यपि ।
निमेषार्द्धेन सर्व्वाणि विलयं यान्ति कार्त्तिके ॥
यत्किञ्चित् कुरुते पुण्यं विष्णुमुद्दिश्य कार्त्तिके ।
तदक्षयं भवेत् सर्व्वं सत्योक्तं तव नारद ! ॥
तस्य क्षयं न पश्यामि सत्यमुक्तं तवानघ ।
सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभम् ॥
तथात्मानं समादध्यात् यथा न स्यादितः पुनः ।
दुष्प्राप्यं प्राप्य मानुष्यं कार्त्तिकोक्तं चरेन्न यः ॥
धर्म्मं धर्म्मभृतां श्रेष्ठ स मातृपितृघातकः ।
कार्त्तिकं खलु वै मासं सर्व्वमासेषु चोत्तमम् ॥
पुण्यानां परमं पुण्यं पावनानाञ्च पावनम् ।
अस्मिन् मासे त्रयस्त्रिंशद्देवाः सन्निहिता ऋषे ॥
अत्र स्नानानि दानानि भोजनानि व्रतानि च ।
तिलधेनुहिरण्यानां रजतं भूमिवाससाम् ॥
गोप्रदानानि कुर्व्वन्ति सर्व्वभावेन नारद ! ।
ब्राह्मणानाञ्च ये कन्यां दास्यन्ति विधिवन्नराः ॥
दानानां फलमेतेषां प्राप्नुयुस्ते विधानतः ।
तानि दानानि गच्छन्ति दत्तानि विधिवत् सुराः ॥
यत्किञ्चित् कार्त्तिके दत्तं तपश्चैव तथा कृतम् ।
तदक्षयफलं प्रोक्तं विष्णुना लोककर्त्तृणा ॥
तृषार्त्तां मोचयन् चैव कार्त्तिके मासि यैः कृतम् ।
अश्वमेधादिकं पुण्यं तैश्च प्राप्तं न संशयः ॥
तस्माद्यत्नेन विप्रेन्द्र कार्त्तिके मासि दीयते ।
यत्किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः ॥
हुतं दत्तञ्च विप्रेन्द्र तपश्चैव तथा कृतम् ।
तदक्षयं लभन्ते ते शस्यदानं विशेषतः ॥
यथा नदीनां विप्रेन्द्र शैलानाञ्चैव नारद ।
उदधीनाञ्च विप्रर्षे क्षयो नैवोपपद्यते ॥
तद्वत् कार्त्तिकमासे तु यत्किञ्चिद्दीयते मुने ।
न तस्यास्ति क्षयो विप्र पापं याति सहस्रधा ॥
तस्मात् सर्व्वप्रयत्नेन कर्म्मणा मनसा गिरा ।
पापं समाचरेन्नैव कार्त्तिके विष्णुतत्परः ॥
ज्ञानाद्वा यदि वाज्ञानाद्दुष्कृतं येन यत्कृतम् ।
तत्तस्य नश्यति क्षिप्रं वायुना पांशवो यथा ॥
संप्राप्तं कार्त्तिकं दृष्ट्वा परान्नं यस्तु वर्ज्जयेत् ।
दिने दिने च कृच्छ्रस्य फलं प्राप्नोत्यसंशयम् ॥
प्रवृत्तानान्तु भक्ष्याणां कार्त्तिके नियमे कृते ।
अवश्यं विष्णुरूपत्वं प्राप्यते मुक्तिदं शुभम् ॥
न कार्त्तिकसमो मासो न कृतेन समं युगम् ।
न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम् ॥
न चान्नेन समं दानं न सुखं भार्य्यया समम् ।
न कृषेस्तु समं वित्तं न लाभः सुरभीसमः ॥
न तपोऽनशनैस्तुल्यं न दमात् परमो जयः ।
न च धर्म्मो दयातुल्यो न ज्योतिश्चक्षुषा समम् ॥
न तृप्ती रसनातुल्या न प्रीतिस्तु सुतं विना ।
न कार्त्तिकसमो मासो वैष्णवानां प्रियः सदा ॥
अव्रतेन क्षपेद्यस्तु मासं दामोदरप्रियम् ।
तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृतः ॥
दुर्लभं वैष्णवं ज्ञानं दुर्लभा वैष्णवी कथा ।
दुर्लभा वैष्णवी दीक्षा दुर्लभो जागरस्तथा ॥
दुर्लभं कपिलादानं दुर्लभं जाह्नवीजलम् ।
दुर्लभो वैष्णवो विप्रो दुर्लभं नीलमोक्षणम् ॥
दुर्लभं पुष्करे दानं दुर्लभाः कार्त्तिके तिलाः ।
दुर्लभो जागरो विष्णोः पक्षयोरुभयोरपि ॥
दुर्लभा कार्त्तिके विप्र द्वादशी हरिबोधिनी ।
दुर्लभा मालतीपूजा दुर्लभा तुलसी मुने ॥
दुर्लभं कार्त्तिके स्नानं दुर्लभं साधुवन्दनम् ।
शालग्रामशिलापूजा दुर्लभा मुनिपुङ्गव ॥
समुद्रगा नदी यत्र दुर्लभा स्नानशालिनाम् ।
कुलशीलवती कन्या दुर्लभा दम्पती नृणाम् ॥
दुर्लभा जननी लोके पिता चैव विशेषतः ।
दुर्लभं साधुसम्मानं दुर्लभो धार्म्मिकः सुतः ॥
दुर्लभैकादशी लोके दशमीसङ्गवर्ज्जिता ।
पक्षद्वयं व्रतं वत्स अयने दक्षिणोत्तरे ॥
दुर्लभं वैष्णवे दानं माघस्नानं नदीजले ।
ज्यैष्ठाषाढ़े तु पानीयमिन्धनं पौषमाघयोः ॥
शास्त्रं दुर्लभं विप्र दुर्लभं तीर्थसेवनम् ॥
न्यायेनोपार्ज्जितं वित्तं दुर्लभं कुलवर्द्धनम् ।
दुर्लभं वत्स दयाणां पात्रे यत् प्रतिपादितम् ॥
पात्राणामपि तत्पात्रं सदाचारक्रियान्वितम् ।
संप्राप्य कार्त्तिकं मासं विमुखा ये जनार्द्दने ।
तेषां यमपुरे वासः पितृभिः सह नारद ! ॥”

इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये ११४ अः ॥

ब्रह्मोवाच ।

“कार्त्तिकस्य तु माहात्म्यं पुनरेव शृणुष्व मे ।
यत् श्रुत्वा मुनिशार्दूल ! सर्व्वान् कामानवा-
प्नसि ॥
व्रतानामिह सर्व्वेषामेकजन्मानुगं फलम् ।
कर्त्तुर्विष्णुव्रतस्योक्तं शतजन्मानुगं फलम् ॥
आश्विनस्य सिते पक्षे एकादश्यां द्विजोत्तम ! ।
वैष्णवैर्वैष्णवं धर्म्मं प्रारम्भोऽस्य विधीयते ॥
यावत् कार्त्तिकशुक्लस्य पौर्णमासी तिथिर्भवेत् ।
तावदस्य व्रतस्योक्तं सम्यगाचरणं बुधैः ॥
अन्यथा तु कृतं विप्र व्रतमेतत् सुदुर्लभम् ।
कार्य्यं सद्भिः प्रयत्नेन कार्त्तिके तु विशेषतः ॥
त्रिंशद्दिनानि पुण्यानि विप्रप्रीतिकराणि वै ।
कार्त्तिकस्य व्रतं विप्र ! श्रीविष्णुप्रीतिकारणम् ॥
तदहं भीष्मस्य व्रतं मुने तुष्टिकरं परम् ।
पुण्यं पञ्चदिनं प्रोक्तं दत्तं तस्मै च विष्णुना ॥
नरो वा यदि वा नारी कुरुते वैष्णवं व्रतम् ।
दिने दिनेऽसह्यफलं भवेत्तस्यैव कार्त्तिके ॥
अतस्त्वं विधिवत् पुत्त्र ! वैष्णवं व्रतमुत्तमम् ।
श्रीदामोदरतुष्ट्यर्थं प्रकुरुष्व समाहितः ॥
ऊर्ज्जे मासि मुनिश्रेष्ठ प्रातःकाले तथामले ।
गोष्पदेऽपि जले स्नानं स्वर्गदं पापिनामपि ॥”

इति पाद्मे उत्तरखण्डे ११५ अध्यायः ॥*॥

ब्रह्मोवाच ।

“पुराणश्रवणं यत्र कुर्व्वन्ति द्विजसत्तम ।
तेषां करस्थिता मुक्तिर्विद्यते नात्र संशयः ॥
कार्त्तिके मासि यो भक्त्या कुर्य्याद्ब्राह्मणभोज-
नम् ।
प्रत्यहं विष्णुतुष्ट्यर्थं स याति भवनं हरेः ॥
कार्त्तिके मासि यः कुर्य्यात् तिलतैलेन दीपकम् ।
अहोरात्रान् मुनिश्रेष्ठ स याति परमं पदम् ॥
कार्त्तिके मासि यो दद्यात् पादत्राणं द्विजन्मने ।
दद्याद्वस्त्रान्वितं वत्स यमं नैव स पश्यति ॥
यज्ञोपवीतं यो दद्यात् भूमिं वै ब्राह्मणाय तु ।
स याति ब्रह्मसदनं पुनरावृत्तिवर्ज्जितम् ॥
ताम्बूलञ्चैव यो दद्यात् सपूगं विधिवद्द्विज ।
गन्धर्व्वलोकमाप्नोति भुक्त्वा भोगान् मनोरमान् ॥
श्रीचन्दनञ्च यो दद्यात् देवपूजार्थमादरात् ।
विप्राय वेदविदुषे पुरन्दरपुरं व्रजेत् ॥
नारिकेलफलं वत्स सवस्त्रञ्च सदक्षिणम् ।
यो दद्याद्वेदविदुषे स शश्वत् पुत्त्रवान् भवेत् ॥”

इति पाद्मे उत्तरखण्डे ११६ अध्यायः ॥

वा(बा)हुल्यं, क्ली, बहुलम् । बहुलस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

बाहुवारः, पुं, श्लेष्मान्तकवृक्षः । इति राजनिर्घण्टः ॥ अन्यत् पवर्गीयवकारादितच्छब्दे द्रष्टव्यम् ॥

वाह्यं, क्ली, (वाह्यते चाल्यते इति वाहि + ण्यत् ।) यानम् । यथा, हेमचन्द्रे ।
"यानं युग्यं पत्रं वाह्यं वह्यं वाहनधोरणे ।"
वाह्य:, त्रि, (वह + ण्यत् ।) वहनीय: । (यथा, रघु: । ६ । १० ।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि ।
विवेश मञ्चान्तरराजमार्गं
पतिंवरा कॢप्तविवाहवेशा ।"
वहिस् + ष्यञ् ।) वहि: । वाहिर इति भाषा । यथा, स्मृति: ।
"अपवित्र: पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
य: स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तर: शुचि: ॥"
वा(बा)ह्येन्द्रियं, क्ली, (वाह्यमिन्द्रियम् ।) वहिरिन्द्रियम् । तद्यथा । चक्षु: । जिह्वा । नासिका । त्वक् । श्रोत्रम् । एतदेकैकगुणा: । यथा,—
"एते तु श्रीन्द्रियग्राह्या अथ स्पर्शान्तशब्दका: ।
वाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावना ॥"
इति भाषापरिच्छेद: ॥
वाह्लिक:, पुं, वाह्लीकदेश: । इत्यमरटीकायां भरत: ॥ (तद्देशजाते, त्रि । यथा, महाभारते । १ । २२२ । ४६ ।
"एष्ठानामपि चाश्वानां वाह्लिकानां जनार्द्दन: ।
ददौ शतसहस्राणि कन्याधनमनुत्तमम् ॥");
वाह्लिकं, } क्ली, कुङ्कुमम् । हिङ्गु । इत्यमर-
वाह्लीकं, } मेदिनीकरौ ॥
वाह्लीक:, पुं, देशभेद: । वलख् इति आरवी भाषा । तद्देशजातघोटक: । इत्यमरमेदिनीकरौ । गन्धर्व्वविशेष: । इति शब्दरत्नावली ॥ (प्रतीपपुत्रविशेष: । यथा, महाभारते । १ । ६५ । ४४ ।
"प्रतीप: खलु शैव्यामुपयेमे सुनन्दां नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं वाह्लीकञ्चेति ॥")
वि, व्य, निग्रह: । नियोग: । पदपूरणम् । निश्चय: । असहनम् । हेतु: । व्याप्ति: । विनियोग: । ईषदर्थ: । परिभव: । शुद्धम् । अवलम्बनम् । विज्ञानम् । इति मेदिनी । वे, ७६ ॥ विशेष: । गति: । आलस्य: । पालनम् । इति शब्दरत्नावली ॥ उपसर्गविशेष: । अस्यार्था: । वि विशेषवैरूप्यनञर्थगतिदानेषु । इति मुग्धबोधटीकायां दुर्गादास: ॥
वि:, पुं, स्त्री, (वाति गच्छतीति । वा + "वातेर्डिच्च ।" उणा० ४ । १३३ । इति इञ् । स च डित् ।) पक्षी । इत्यमर: ॥ (यथा, साहित्यदर्पणे १० परिच्छेदे ।
"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रय: ।
किं ब्रूते विहग: स वा फणिपतिर्यत्रास्ति सुप्तो हरि: ॥")
विंश:, त्रि, (विंशति + पूरणे डट् । तेर्लोप: ।) विंशते: पूरण: । इति सिद्धान्तकौमुदी । (यथा, मनु: । ८ । ३६८ ।
"शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी ।
मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम् ॥"
"कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ॥")

विंशक:, त्रि, (विंशत्या क्रीत: । विंशति + "विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ।" ५ । १ । २४ । इति ड्वुन् । "ति विंशतेर्डिति ।" ६ । ४ । १४२ । इति तिलोप: ।) विंशतिक्रीत: । इति सिद्धान्तकौमुदी ॥
विंशति:, स्त्री, (द्वौ दश परिमाणस्य । पङ्क्तिविंशतीति निपातनात् सिद्धम् ।) संख्याविशेष: । विश इति कुड़ि इति च भाषा । यथा,—
"विंशत्याद्या: सदैकत्वे सर्व्वा: संख्येयसंख्ययो: ।
संख्यार्थे द्विवहुत्वे स्तस्तासु चानवते: स्त्रिय: ॥"
इत्यमर: ॥
तद्वाचकानि । रावणवाहु: १ । अङ्गुलि: २ । इति कविकल्पलता ॥ नखम् ३ । इति मतृकल्पमुक्तावली ॥
विंशतिक:, त्रि, विंशतियोग्य: । यथा । संख्याया: कन् स्यादार्हीयेऽर्थे । विंशतित्रिंशद्भ्यां कन् संज्ञायाम् । अभ्यां कन् स्यात् असंज्ञायान्तु ड्वुन् स्यात् । विंशक: : संज्ञायान्तु विंशतिक: । इति सिद्धान्तकौमुदी ॥
विंशतितम:, त्रि, (विंशते: पूरण: । विंशति + डट् । "विंशत्यादिभ्यस्तमडन्यतरस्याम् ।" ५ । २ । ५६ । इति तमडागम: ।) विंश: । इति सिद्धान्तकौमुदी ॥
विंशी, पुं, विंशति: । इति सिद्धान्तकौमुदी ॥
विकं, क्ली, सद्य:प्रसूताया गो: क्षीरम् । यथा,—
"क्षीरं सद्य:प्रसूताया: पेयूषं पालनं विकम् ।"
इति शब्दचन्द्रिका ॥
विकङ्कट:, पुं, गोक्षुर: । इति शब्दमाला ॥
विकङ्कत:, पुं, वदरीसदृशक्षुद्रफलवृक्ष: । बैँइच इति भाषा । तत्पर्य्याय: । स्वादुकण्टक: २ सुवाहच: ३ ग्रन्थिल: ४ व्याघ्रपात् ५ । इत्यमर: ॥ स्रुवावृक्ष: ६ मधुपर्णी ७ । इति रत्नमाला ॥ कण्टपाद: ८ वहुफल: ९ गोपघण्टा १० सुवाद्रुम: ११ मृदुफल: १२ दन्तकाष्ठ: १३ यज्ञीयब्रह्मपादप: १४ पिण्डार: १५ हिमक: १६ पूत: १७ किङ्किणी १८ वैकङ्कत: १९ व्रुतिङ्कुर: २० कण्टकारी २१ । इति शब्दरत्नावली ॥ किङ्किरी २२ स्रुगदारु २३ । इति जटाधर: ॥ अस्य गुणा: । अम्लमधुरत्वम् । पाकेऽतिमधुरत्वम् । लघुत्वम् । दीपनत्वम् । कामलास्रशोधनाशित्वम् । पाचनत्वञ्च । इति राजनिर्घण्ट: ॥ अपि च ।
"स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ।
विकङ्कतफलं पक्वं मधुरं सर्व्वदोषजित् ॥"
इति भावप्रकाश: ॥
विकङ्कता, स्त्री, अतिवला । इति राजनिर्घण्ट: ॥
विकच:, पुं, (विगत: कचो यस्य केशशून्यत्वात् । यद्वा, विशिष्ट: कचो यस्य प्रभूतकेशत्वात् ।) क्षपण: । केतु: । इति मेदिनी । चे, ॥ (यथा, वृहत्संहितायाम् । ११ । १९ ।
"विकचा नाम गुरुसुता:
सितैकतारा: शिखिपरित्यक्ता: ।
षष्टि: पञ्चभिरधिका
स्निग्धा याम्याश्रिता: पापा: ॥")
विकच:, त्रि, (विकचति विकशतीति । वि + कच् + अच् ।) विकसित: । इत्यमर: ॥ (यथा, माघे । ११ । १९ ।
"विकचकमलगन्धैरन्धयन् भृङ्गमाला:
सुरभितमकरन्दं मन्दमावाति वात: ।
प्रमदमदनमाद्यद्यौवनोद्दामरामा-
रमणरभसखेदस्वेदविच्छेददक्ष: ॥"*॥
विगत: कचो यस्य ।) केशशून्य: । इति मेदिनी । चे, ॥ (यथा, महाभारते । ३ । २५९ । १२ ।
"विभ्रत्वानियतं वेशमुन्मत्त इव पाण्डव ।
विकच: परुषा वाचो व्याहरन् विविधा मुनि: ॥")
विकचा, स्त्री, महाश्रावणिका । इति राजनिर्घण्ट: ॥
विकच्छ:, त्रि, (विगत: कच्छो यस्य ।) कच्छरहित: । मुक्तकच्छ: । इति स्मृति: ॥
विकट:, पुं, (विकटति पूयरक्तादिकं वर्षतीति । वि + कट + पचाद्यच् ।) विस्फोटक: । इति शब्दरत्नावली ॥ साकुरुण्डवृक्ष: । इति राजनिर्घण्ट: ॥ (धृतराष्ट्रस्य पुत्रविशेष: । यथा, महाभारते । १ । ६७ । ९६ ।
"दुर्म्मदो दुष्प्रहर्षश्च विवित्सुर्विकट: सम: ॥")
विकट:, त्रि, (वि + "संप्रोदश्च कटच् ।" ५ । २ । २९ । इति कटच् ।) विशाल: । (यथा, माघे । १० । ४२ ।
"उत्तरीयविनयात्त्रपमाणा
रुन्धती किल तदीक्षणमार्गम् ।
आवरिष्ट विकटेन विवोढु-
र्वक्षसैव कुचमण्डलमन्या ॥")
विकराल: । इति मेदिनी । टे, ॥ सुन्दर: । इति विश्व: ॥ दन्तुर: । इति धरणि: ॥ (यथा, मार्कण्डेये । ४३ । २० ।
"करालैर्विकटै: कृष्णै: पुरुषैरुद्यतायुधै: ।
पाषाणैस्ताड़ित: स्वप्ने सद्यो मृत्युं लभेन्नर: ॥")
विकृत: । इति त्रिकाण्डशेष: ॥
विकटा, स्त्री, (विकट + टाप् ।) मायादेवी । सा च बौद्धदेवीभेद: । तत्पर्य्याय: । मारीची २ त्रिमुखा ३ वज्रकालिका ४ वज्रवाराही ५ गौरी ६ पोत्रिरथा ७ । इति त्रिकाण्डशेष: ॥
विकण्टक:, पुं, (विशिष्ट: कण्टको यस्य ।) यवास: । इति जटाधर: ॥ वृक्षविशेष: । तत्पर्य्याय: । मृदुफल: २ ग्रन्थिल: ३ स्वादुकण्टक: ४ गोकण्टक: ५ काकनास: ६ व्याघ्रपाद: ७ घनद्रुम: ८ गर्ज्जाफल: ९ घनफल: १० मेघस्तनितोद्भव: ११ रुदिरफल: १२ प्रावृष्य: १३ हास्यफल: १४ स्तनितफल: १५ । अस्य गुणा: । कषायत्वम् । कटुत्वम् । उष्णत्वम् । रुचिप्रदत्वम् । दीपनत्वम् । कफहारित्वम् । वस्त्ररङ्गविधायकत्वञ्च । इति राजनिर्घण्ट: ॥
विकत्थनं, क्ली, (विकत्थ्यते इति । वि + कत्थ श्लाघायाम् + भावे ल्युट् ।) मिथ्याश्लाघा । यथा,—

"श्लाघा प्रशंसार्थवादः सा तु मिथ्याविकत्थनम् ॥"
इति हेमचन्द्रः ॥
(यथा, भागवते । १ । १५ । १६ ।
"शय्यासनाटनविकत्थनभोजनादि-
ष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः ॥"
विकत्थते आत्मानमिति । वि + कत्थ + ल्युः ।
आत्मश्लाघाकारिणि, त्रि । यथा, महाभारते ।
२ । ७३ । ३२ ।
"असूयितारं द्वेष्टारं प्रवक्तारं विकत्थनम् ।
भीमसेननियोगात्ते हन्ताहं कर्णमाहवे ॥"॥
स्त्री, वि + कत्थ + णिच् + युच् । टाप् । आत्म-
श्लाघा । यथा, विख्यातविजयनाटके । २ ।
"सम्भवोक्तापि शक्तानां न प्रशस्ता विकत्थना ।
शारदीयघनध्वानैर्व्वाचोभिः किं भवादृशाम् ॥")
विकम्पितः, त्रि, विशेषेण कम्पविशिष्टः । विपूर्व्वक-
कम्पधातोः क्तप्रत्ययेन निष्पन्नः ॥
विकरः, पुं, (विकीर्य्यते हस्तपदादिकमनेनेति ।
वि + कॄ + "ऋदोरप् ।" इत्यप् ।) रोगः ।
इति शब्दचन्द्रिका ॥
विकरालः, त्रि, (विशेषेण करालः ।) भयानकः ।
इति विकटशब्दार्थे मेदिनी ॥ (यथा, मार्क-
ण्डेये । ११८ । ४८ ।
"विकरालं महावक्त्रमतिभीषणदर्शनम् ।
समुद्यतमहाशूलं प्रभूतमतिदारुणम् ॥")
विकर्णः, पुं, दुर्य्योधनपक्षीयशूरः । यथा,—
"अश्वत्थामा विकर्णश्च सौमदत्तिर्जयद्रथः ।
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥"
इति भगवद्गीतायाम् १ अध्यायः ॥
(विगतौ कर्णौ यस्येति विग्रहे कर्णरहिते,
त्रि ॥)
विकर्णिकः, पुं, सारस्वतदेशः । इति हेमचन्द्रः ॥
विकर्त्तनः, पुं, (विशेषेण कर्त्तनं यस्य । विश्वकर्म्म-
यन्त्रखोदितत्वादस्य तथात्वम् ।) सूर्य्यः । अर्क-
वृक्षः । इत्यमरः ॥
विकर्म्मकृत्, त्रि, (विकर्म्म विरुद्धं कर्म्म करो-
तीति । कृ + क्विप् ।) निषिद्धकर्म्मकारी । यथा,
"न साक्षी नृपतिः कार्य्यो न कारुककुशीलवौ ।
न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः ॥
नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्म्मकृत् ।
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ॥"
इति मानवे । ८ । ६६ ॥
"विकर्म्मकृत् निषिद्धकर्म्मकारी ।" इति कुल्लूक-
भट्टः ॥
विकर्म्मस्थः, त्रि, (विकर्म्मणि विरुद्धाचारे तिष्ठ-
तीति । स्था + कः ।) निषिद्धकृत् । यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान्
शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥
(तथा मनौ । ४ । ३० ॥)
विकर्षः पुं, (विकृष्यतेऽसौ इति । यद्वा, विकृष्यन्ते
परप्राणा अनेनेति । वि + कृष् + घञ् ।)
बाणः । इति त्रिकाण्डशेषः ॥ (वि + कृष +
भावे घञ् । विकर्षणम् ॥)
विकर्षणं, क्ली, (वि + कृष + ल्युट् ।) आकर्षणम् ।
विपूर्व्वकृषधातोरनट्प्रत्ययेन निष्पन्नम् ॥ (यथा,
किराते । ३ । ५७ ।
"अविलङ्घ्यविकर्षणं परैः
प्रथितज्यारवकर्म्मकार्म्मुकम् ॥"
विभागः । यथा, भागवते । ३ । ७ । ३० ।
"वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ।
ऋषीणां जन्मकर्म्माणि वेदस्य च विकर्षणम् ॥")
विकलः, त्रि, (विगतः कलो व्यक्तध्वनिर्यस्य ।)
विह्वलः । इति जटाधरः ॥ स्वभावहीनः । इति
भरतः ॥ (यथा, महाभारते । १ । ४६ । ११ ।
"विधवानाथविकलान् कृपणांश्च बभार सः ।
सुदर्शः सर्व्वभूतानामासीत् सोम इवापरः ॥")
विकलपाणिकः, पुं, (विकलः पाणिर्यस्य । कन् ।)
स्वभावहीनपाणियुक्तः । यथा । कुणिर्विकल-
पाणिकः । इति हलायुधः ॥
विकला, स्त्री, (विगतः कलो मधुरालापो यस्याः ।
ऋतौ तु स्त्रिया मौनित्वविहितत्वात् ।) ऋतु-
हीना । इति शब्दरत्नावली ॥
विकलाङ्गः, त्रि, (विकलानि अङ्गानि यस्य ।)
स्वभावतो न्यूनाङ्गः । तत्पर्य्यायः । अपोगण्डः
२ । इत्यमरः ॥ पोगण्डः ३ अङ्गहीनकः ४ ।
इति शब्दरत्नावली ॥ (यथा, महाभारते ।
१ । ३१ । ३४ ।
"जनयामास पुत्त्रौ द्वावरुणं गरुडं तथा ।
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः ॥")
विकली, स्त्री, (विगता कला यस्याः । गौरादि-
त्वात् ङीष् ।) ऋतुहीना । इति शब्दरत्ना-
वली ॥
विकल्पः, पुं, (विरुद्धं कल्पनमिति । वि +
कृप + घञ् ।) भ्रान्तिः । (यथा, देवीभाग-
वते । १ । १६ । ३२ ।
"विकल्पोपहतस्त्वं वै दूरदेशमुपागतः ।
न मे विकल्पसन्देहो निर्व्विकल्पोऽस्मि सर्व्वथा ॥")
कल्पनम् । इति मेदिनी । पे, ॥ (यथा, भाग-
वते । ५ । १६ । २ ।
"तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः
सप्त सिन्धवः उपकॢप्ताः । यत एतस्याः सप्त-
द्वीपविशेषविकल्पस्त्वया भगवन् खलु सूचितः ।"
संशयः । यथा, रघुः । १७ । ४६ ।
"रात्रिन्दिवविभागेषु यथादिष्टं महीक्षिताम् ।
तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥"
नानाविधः । यथा, मनुः । ६ । २२८ ।
"प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः ।
तस्य दण्डविकल्पः स्याद्यथेष्टं नृपतेस्तथा ॥")
विविधकल्पः । स च द्विविधः । व्यवस्थितः ।
ऐच्छिकश्च । सोऽप्याकाङ्क्षाविरहे युक्तः । तथा
च भविष्ये ।
"एकविशाख्ये विकल्पस्तु आकाङ्क्षापूरणे सति ॥"
इच्छाविकल्पेऽष्टदोषाः । यथा,—
"प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना ।
प्रत्युज्जीवनहानिभ्यां प्रत्येकमष्टदोषता ॥"
व्रीहिभिर्य्यजेत यवैर्य्यजेत इति श्रूयते । तत्र
व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः ।
अप्रतीतयवाप्रामाण्यपरिकल्पनम् । इदन्तु पूर्व्व-
स्मात् पृथक् वाक्यं अन्यथा समुच्चयेऽपि याग-
सिद्धिः स्यात् । अतएव विकल्पे न उभयः
शास्त्रार्थं इत्युक्तम् । प्रयोगान्तरे यवे उपा-
दीयमाने परित्यक्तयवप्रामाण्योज्जीवनं स्वीकृत-
यवाप्रामाण्यहानिरिति चत्वारो दोषाः । एवं
व्रीहावपि चत्वारः । इत्यष्टौ दोषा इच्छा-
विकल्पे । तथा चोक्तम् ।
"एवमेवाष्टदोषोऽपि यद्व्रीहियववाक्ययोः ।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते ॥"
इति ॥
एकार्थतया विविधं कल्प्यते इति विकल्पः ।
तस्मादष्टदोषभिया उपोष्य द्वे तिथी इत्यत्र
न इच्छाविकल्पः किन्तु व्यवस्थितविकल्पः ।
इत्येकादशीतत्त्वम् ॥ (अवान्तरः कल्पः । यथा,
भागवते । २ । ८ । ११ ।
"यावान् कल्पो विकल्पो वा यथा कालोऽनु-
मीयते ॥"
देवता । यथा, भागवते । १० । ८५ । ११ ।
"वैकारिको विकल्पानां प्रधानमनुशायि-
नाम् ॥"
"विविधं आधिदैवाध्यात्माधिभूतभेदेन कल्प्यन्ते
इति विकल्पा देवास्तेषां कारणं वैकारिकः
सात्त्विकोऽहङ्कारश्च त्वम् ॥" इति तट्टीकायां
स्वामी ॥)
विकश्वरः, त्रि, (वि + कश + वरच् ।) विकाशी ।
इत्यमरटीकायां भरतः ॥ (यथा, नैषधे ।२।५।
"अयमेत्य तडागनीरजै-
र्लघुपर्य्यग्रियताथ शङ्कितैः ।
उदडीयत वैकृतात् कर-
ग्रहजादस्य विकश्वरस्वरैः ॥")
विकषा, स्त्री, (विकषतीति । वि + कष गतौ +
अच् । टाप् ।) मञ्जिष्ठा । इत्यमरटीकायां
रायमुकुटः ॥ मांसरोहिणी । इति राज-
निर्घण्टः ॥
वकस्वरः, त्रि, (वि + कस + वरच् ।) विकस्वरः ।
इत्यमरटीकायां भरतः ॥
विकसः, पुं, (विकसतीति । वि + कस + अच् ।)
चन्द्रः । इति त्रिकाण्डशेषः ॥
विकसा, स्त्री, (विकसतीति । वि + कस + अच् ।
टाप् ।) मञ्जिष्ठा । इत्यमरः ॥
विकसितं, त्रि, (वि + कस + क्तः ।) दलानामन्यो-
न्यविश्लेषः । तत्पर्य्यायः । उज्जृम्भितम् २ उज्जृ-
म्भम् ३ स्मितम् ४ उन्मिषितम् ५ विनिद्रम् ६
उन्निद्रम् ७ उन्मीलितम् ८ विजृम्भितम् ९
उद्बुद्धम् १० उद्भिदुरम् ११ भिन्नम् १२ उद्-
भिन्नम् १३ हसितम् १४ विकस्वरम् १५ विक-
चम् १६ व्याकोषम् १७ फुल्लम् १८ संफुल्लम् १९

स्फुटम् २० उद्भिन्नम् २१ दलितम् २२ दीर्णम् २३ स्फुटितम् २४ उत्फुल्लम् २५ प्रफुल्लम् २६। इति राजनिर्घण्टः। (यथा, आर्य्यासप्तशत्याम्। ४७६।
"यदवधिविदलद्दमाला विकसितकुसुमोत्करा ग्रामग्रेणी।
पीतांशुकप्रियेयं तदवधि पल्लीपतिः पुत्त्री।")

विकस्वरः, त्रि, (विकसतीति। वि+कस गतौ+"स्थेशभासपिसकसो वरच्।" ३।२।१७५। इति वरच्।) विकासशीलः। तत्पर्य्यायः। विकासी २। इत्यमरः। "विकसति कस ज गतौ दन्त्यान्तः यायाय भासकसेति वरे विकस्वरः। विकाशः स्फुटने व्यक्तावेति दन्त्यान्ते धरणिः।
'कुशेशयैरत्र जलाशयोषिता
मुदा रमन्ते कलभा विकस्वरैः।
प्रगीयते सिद्धगणैश्च योषिता
मुदा रमन्ते कलभा विकस्वरैः।'
इति माघयमकेऽपि दन्त्यवत्त्वम्। (३।३३) कश शब्दे मूर्द्धन्यान्त इत्यस्य रूपमिति केचित्। काश शब्दे इत्यस्य तालव्यान्तस्य रूपमिति केचित्।" इति तट्टीकायां भरतः। (यथा, कथासरित्सागरे। ४। १५।
"एकस्याः सोत्सुका दृष्टिः पालोकविकस्वरा।
श्रुतिः पार्श्वमपश्यन्त्यास्तदाश्रातुमिवाययौ।")

विकस्वरा, स्त्री, (विकस्वर+टाप्।) रक्तपुनर्नवा। इति राजनिर्घण्टः। (विवरणमस्या रक्तपुनर्नवाशब्दे ज्ञातव्यम्।)

विकारः, पुं, (वि+कृ+घञ्।) प्रकृतेरन्यथाभावः। तत्पर्य्यायः। परिणामः २ विकृतिः ३ विक्रिया ४। इत्यमरः। विक्रमा ५। इति भरतः। केचित्तु पूर्व्वद्वयं प्रकृतिध्वंसजन्यविकारे यथा काष्ठस्य विकारो भस्म। मृत्पिण्डस्य घट इति। परद्वयं विकारमात्रे यथा सुखस्य विकृतिः क्रोधरक्तता। काष्ठस्य भस्म च। इति भरतः। (यथा, कुमारे। ७। ६५।
"अपि शयनसखिभ्यो दत्तवाचं कथञ्चित् प्रमथमुखविकारैर्हासयामास गूढ़म्।"
प्रकृतिविकृतिः। यथा, हरिवंशे। २४९। ३५।
"शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च।
प्रकृतिश्च विकारश्च यथान्यत् कारणं महत्।"
अस्य विशेषविवरणं विकृतिशब्दे द्रष्टव्यम्।) रोगः। इति मेदिनी। रे, २१८। (यथा,—
"विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते।
सुखसंज्ञकमारोग्यं विकारो दुःखमेव च।"
इति चरके सूत्रस्थाने नवमेऽध्याये।
मत्स्यः। तत्पर्य्यायो यथा,—
"मत्स्यो मीनो विकारश्च झषो वैशारिणोऽण्डजः।
शकुली एणुरोमा च स सुदर्शन इत्यपि।
रोहिताद्यास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।)

विकालः, पुं, (विरुद्धः कार्य्यानर्हः कालः।) दैवपैत्रादिकर्म्मणि विरुद्धकालः। वैकाल इति भाषा। तत्पर्य्यायः। सायः २ दिनान्तः ३ सायाह्नः ४ सायम् ५। इति शब्दरत्नावली। उत्सवः ६ विकालकः ७। इति त्रिकाण्डशेषः। (यथा, मार्कण्डेये। ३५। ३०।
"न लङ्घयेत् तथैवाद्यक् ष्ठीवनोद्वर्त्तनानि च।
नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत्कदाचन।")

विकालकः, पुं, (विकाल एव। स्वार्थे कन्।) विकालः। इति त्रिकाण्डशेषः।

विकालिका, स्त्री, (विगतः कालो यया। कन्। टापि अत इत्वम्।) मानरन्ध्रा। ताम्री। इति त्रिकाण्डशेषः। ताँबी इति भाषा।

विकाशः, पुं, (वि+काश दीप्तौ+घञ्।) रहः। प्रकाशः। इत्यमरटीकायां भरतः। विकाशो विजने स्फुटे। इत्यजयः। (यथा, राजतरङ्गिण्याम्। ४। १५५८।
"विकाशः केषाञ्चित् नयनविषमैर्व्विश्लुदयैः परेषामुद्भूतिः श्रवणकटुभिर्घोरचरितैः।
नवोदा काप्यन्योपलतिपरिहीना जलमुचो जड़ो वर्षादन्यं गमयति गुणं नास्य तु जनः।")

विकाशनं, क्ली, (वि+काश+ल्युट्।) विकाशः। दिपूर्व्व-काश्ङ दीप्तौ इत्यस्मात् अनट्प्रत्ययेन निष्पन्नम्।

विकाशी, [न्] त्रि, (विकाशोऽस्यास्तीति। विकाश+इनिः।) विकाशशीलः। इत्यमरटीकायां रायमुकुटः। (यथा, मार्कण्डेये।
"कात्यायनीं तुष्टुवुरिष्टलम्भात्
विकाशिवक्त्रास्तु विकाशिताशाः।")

विकासी, [न्] त्रि, (विकाश+इनिः।) विकाश-शीलः। इत्यमरटीकायां भरतः।

विकासी, [न्] त्रि, (विकसते इति। वि+कस+णिनिर्वा।) विकस्वरः। इत्यमरः।

विकिरः, पुं, (विकिरति क्षितिकादीन् भोजनार्थमिति। वि+कॄ विक्षेपे+इगुपधेति कः।) पक्षी। इत्यमरः। (अस्य पर्य्यायो यथा,—
"पक्षी खगो विहङ्गश्च विहगश्च विहङ्गमः।
शकुन्तिः पतत्री च विष्किरो विकिरोऽण्डजः।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।) कूपः। इति त्रिकाण्डशेषः। (विकीर्य्यते इति। वि+कॄ+घञर्थे कः।) पूजाकालीनविघ्नोत्सारणार्थचेपणीयतण्डुलादिः। यथा। पङ्क्तिमध्ये जपान् विकिरानादाय।
"अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया।"
इति विकिरेत्।
यथा,—
"लाजचन्दनसिद्धार्थभस्मदूर्व्वाकुशाक्षताः।
विकिरा इति सन्दिष्टाः सर्व्वविघ्नौघनाशकाः।"
इति तन्त्रसारः।
अग्निदग्धादीनां पिण्डम्। यथा, मनुः। ३।२४५।
"असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्।
उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः।"
अपि च।
"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते।"
इति श्राद्धतत्त्वम्।
(यथा च मार्कण्डेये। ३१। १२।
"ये वा दग्धाः कुले बाला: क्रियायोग्या ह्यसंस्कृताः।
विपन्नास्तेऽन्नविकिरसम्मार्ज्जनजलाशिनः।"*।
जलविशेषे, क्ली। तथा च चिन्तामणिधृतवचनम्।
"नद्यादिनिकटे भूमिर्या भवेद्वालुकामयी।
उद्धायते ततो यत्तु तज्जलं विकिरं विदुः।
विकिरं शीतलं स्वच्छं निर्दोषं लघु च स्मृतम्।
तुवरं स्वादु पित्तघ्नं मनाक् कफकरं स्मृतम्।")

विकिरणं, क्ली, (वि+कॄ+ल्युट्। इत्वं रपरत्वम्।) विक्षेपणम्। विहिंसनम्। विज्ञानम्। इति कृधात्वर्थदर्शनात्। (अर्कवृक्षे, पुं। इत्यमरः। २। ४। ८०।)

विकीरणः, पुं, अर्कवृक्षः। इत्यमरः। २।४।८०।
(तथास्य पर्य्यायः।
"अलर्कौ गुणरूपः स्यान्मन्दारो वसुकोऽपि च।
श्वेतपुष्पः सदापुष्पः सबालार्कः प्रतीपसः।
रक्तोपरोऽर्कनामा स्यादर्कपर्णो विकीरणः।
रक्तपुष्पः शुक्लफलस्तथास्फोटः प्रकीर्त्तितः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।)

विकीर्णः, त्रि, (विकीर्य्यते स्मेति। वि+कॄ+क्तः।) विक्षिप्तः। छड़ान इति भाषा। यथा,—
"अथ सा पुनरेव विह्वला
वसुधालिङ्गनधूसरस्तनी।
विललाप विकीर्णमूर्द्धजा
समदुःखामिव कुर्व्वती स्थलीम्।"
इति कुमारसम्भवे ४ सर्गः।

विकीर्णरोम, [न्] क्ली, (विकीर्णानि रोमाण्यस्मिन्निति।) स्थौणेयम्। इति राजनिर्घण्टः।

विकीर्णसंज्ञं, क्ली, (विकीर्णमिति संज्ञा यस्य।) स्थौणेयम्। इति राजनिर्घण्टः।

विकुक्षिः, पुं, इक्ष्वाकुराजपुत्त्रः। यथा,—
"वैवस्वतमनोरासीदिक्ष्वाकुः पृथिवीपतिः।
तस्य पुत्त्रशतस्यासीद्विकुक्षिर्ज्येष्ठ उच्यते।
सोऽयोध्याधिपतिर्व्वीरस्तस्य पञ्चदश स्मृताः।"
इति वह्निपुराणे सागरोपाख्याननामाध्यायः।

विकुर्व्वाणः, त्रि, (विकुरुते इति। वि+कृ+शानच्।) हर्षमाणः। इत्यमरः। (विकृतिप्राप्ते च। यथा, सांख्यदर्शने। १। ६२।
"आकाशस्तु विकुर्व्वाणः स्पर्शमात्रं ससर्ज्ज ह।
बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः।")

विकुस्रः, पुं, (विकसतीति। वि+कस+"वौ कसेः।" उणा० २। १५। इति रक्। उलश्चोपधायाः।) चन्द्रः। इत्युणादिकोषः।

विकुणिका, स्त्री नासिका । इति हेमचन्द्रः ॥

विकृतं, त्रि, (वि+कृ+क्तः ।) वीभत्सम् । रोगितम् । असंस्कृतम् । इति मेदिनी । ते, १५८ ॥ (अङ्गविहीनम् । यथा, मनुः । ६ । २४७ ।

"बालाश्च न प्रमीयन्ते विकृतं न च जायते ॥"

अप्रकृतिस्थः । यथा, महाभारते ।३।१११।१८।

"अपश्यदङ्गं विकृतं समीक्ष्य
पुनः पुनः पीड्य च कायमस्य ।
अविक्ष्यमाणा शनकैर्जगाम
कृत्वाग्निहोत्रस्य तदापदेशम् ॥"* ।

मायावी । यथा, रघुः । १२ । ३९ ।

"लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम् ।
शिवाघोरस्वनां पश्चात् बुबुधे विकृतेति ताम् ॥")

विकृतं, क्ली, विकारः । तस्य लक्षणम् । यथा,—

"ह्रीमानेर्ष्यादिभिर्यत्र नोच्यते स्वं विवक्षितम् ।
व्यज्यते चेष्टयैवेदं विकृतं तद्विदुर्बुधाः ॥"
इत्युज्ज्वलनीलमणिः ॥

प्रभवादिषष्टिसंवत्सरान्तर्गतचतुर्व्विंशवर्षम् । यथा, भविष्यपुराणे ।

भैरव उवाच ।

"सर्व्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते ।
शिरोवधोऽक्षिरोगाश्च पापाद्धि विकृते जनाः ॥"
इति ज्योतिस्तत्त्वम् ॥

(नायिकालङ्कारविशेषः । यथा, साहित्यदर्पणे । ३ । १४६ ।

"वक्तव्यकालेऽप्यवचो व्रीड़या विकृतं मतम् ॥")

विकृतिः, स्त्री, (वि+कृ+क्तिन् ।) विकारः । इत्यमरः ॥ (यथा, कुमारे । ७ । ३४ ।

"यथाप्रदेशं भुजगेश्वराणां
करिष्यतामाभरणान्तरत्वम् ।
शरीरमात्रं विकृतिं प्रपेदे
तथैव तस्थुः फणरत्नशोभाः ॥")

रोगः । डिम्बः । मद्यादिः । इति हेमचन्द्रः ॥ (सांख्योक्तविकृतिः । यथा, सांख्यकारिकायाम् । ३ ।

"मूलप्रकृतिरविकृति-
र्म्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोड़शकस्तु विकारो
न प्रकृतिर्न विकृतिः पुरुषः ॥"

संक्षेपतः शास्त्रस्य चतस्रो विधाः । कश्चिदर्थः प्रकृतिरेव कश्चिदर्थो विकृतिरेव कश्चित् प्रकृतिविकृतिरेव कश्चिदनुभयरूपः । तत्र का प्रकृतिरेवेत्यत उक्तं मूलप्रकृतिरविकृतिरिति । प्रकरोतीति प्रकृतिः प्रधानं सत्वरजस्तमसां साम्यावस्था सा प्रकृतिः प्रकृतिरेव इत्यर्थः । कस्मादित्यत उक्तम् मूलेति मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्य्यसंघातस्य सा मूलं न त्वस्या मूलान्तरमस्तीति भावः । कतमाः पुनः प्रकृतिविकृतयः कियत्यश्च इत्यत उक्तं महदाद्याः प्रकृतिविकृतयः सप्तेति । प्रकृतयश्च ता विकृतयश्च ता इति । तथाहि महत्तत्त्वमहङ्कारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः । एवमहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणाञ्च प्रकृतिर्विकृतिश्च महतः । एवं पञ्चतन्मात्राणि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारस्य । अथ का विकृतिरेव कियती च इत्यत उक्तं षोड़शकस्तु विकार इति षोड़शसंख्यापरिमितो गणः षोड़शकः । तु शब्दोऽवधारणे भिन्नक्रमश्च । पञ्चमहाभूतान्येकादशेन्द्रियाणि चेति षोड़शको गणो विकार एव न प्रकृतिरिति । यद्यपि पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां दध्यङ्कुरादयस्तथापि गवादयो वीजादयो वा न पृथिव्यादिभ्यस्तत्त्वान्तरम् । तत्त्वान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिप्रेतमिति न दोषः सर्व्वेषां गोघटादीनां स्थूलता इन्द्रियग्राह्यता च समेति न तत्त्वान्तरम् । अनुभयरूपसुक्तं तदाह न प्रकृतिर्न विकृतिः पुरुष इति तत्त्वकौमुदी ॥ ३ ॥)

विकृष्टः, त्रि, विशेषेण कृष्टः । आकृष्टः । विपूर्व्वकृषधातोः क्तप्रत्ययेन निष्पन्नः ॥

विकृष्टकालः, पुं, (विकृष्टः कालः ।) चिरकालः । यथा,—

"विकृष्टकालैर्या वेगैर्म्मन्दैः समभिवर्त्तते ।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधावति ॥"
विकृष्टकालैः चिरेण । जत्रु कक्षोरसोः सन्धिः । इति भावप्रकाशः ॥

विकेशी, स्त्री, (विगतः केशो यस्याः । ङीष् ।) केशवर्ज्जिता । पटवर्निः । इति धरणिः ॥ महीरूपशिवस्य पत्नी । यथा,—

"सूर्य्यो जलं मही वह्निर्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ॥
सुवर्च्चला तथैवोषा विकेशी चापरा शिवा ।
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम् ।
सूर्य्यादीनामिमाः पत्न्यो रुद्राद्यैर्नामभिः सह ॥"
इति मार्कण्डेयपुराणे रुद्रसर्गः ॥

विकोकः, पुं, वृकासुरपुत्त्रः । स च कल्किदेवेन हतः । यथा,—

"कल्किः कोकविकोकाभ्यां गदापाणिर्युधां पतिः ।
युयुधे विशने विष्णुर्लोकानां जनयन् भयम् ।
वृकासुरस्य पुत्त्रौ तौ नप्तारौ शकुनेर्हरिः ।
तयोः कल्किः संयुयुधे मधुकैटभयोर्यथा ॥
तयोर्गदाप्रहारेण चूर्णिताङ्गस्य भूपतेः ।
कराच्च्युतोऽपतद्भूमौ हस्तोच्चुरित्यहो जनाः ॥
ततः पुनः क्रुधा विष्णुर्ज्जिष्णुर्म्महाभुजः ।
नन्दकेन शिरस्तस्य विकोकस्याच्छिनत् प्रभुः ॥"
इति कल्किपुराणे २१ अध्यायः ॥

विकोषः, त्रि, (विगतः कोषो यस्य ।) कोषरहितः । निष्कोषः । इति पुराणम् ॥ (यथा, महाभारते । ३ । ६२ । १८ ।

"परिधावन्नथ नल इतश्चेतश्च भारत ।
आससाद सभोद्देशे विकोषं खड्गमुत्तमम् ॥"

आच्छादनरहितः । यथा, मनोः । ११ । ४९ । श्लोकटीकायां कुल्लूकः ।

"गुरुभार्य्यागामी विकोषमेहनत्वमिति ॥")

विक्कः, पुं, (विक् इति कायति शब्दायते इति । कै+कः ।) करिशावकः । इति त्रिकाण्डशेषः ॥

विक्रमः, पुं, (विशेषेण क्रामतीति । वि+क्रम+अच् ।) विष्णुः । यथा, विष्णुसहस्रनामस्तोत्रे ।

"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥"

(वि+क्रम+घञ् ।) शौर्य्यातिशयः । तत्पर्य्यायः । अतिशक्तिता २ । इत्यमरभरतौ ॥ (यथा, रघुः । १२ । ८७ ।

"अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात् ।
रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥")

क्रान्तिमात्रम् । इति मेदिनी । मे,५४ ॥ (पादविक्षेपः । यथा, रामायणे । १ । १ । १० ।

"आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥")

विक्रमादित्यराजा । यथा,—

"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥"
इति नवरत्नश्लोकः ॥

चरणः । शक्तिः । इति राजनिर्घण्टः ॥ (स्थितिः । यथा, भागवते । २ । ८ । २० ।

"संप्लवः सर्व्वभूतानां विक्रमः प्रतिसंक्रमः ।
इष्टापूर्त्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥"
"विक्रमः स्थितिः प्रतिसंक्रमो महाप्रलयः ।"
इति तट्टीकायां श्रीधरस्वामी ॥ * ॥) प्रभवादिषष्टिसंवत्सरान्तर्गतचतुर्द्दशवर्षम् । यथा

"जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा ।
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये ॥"
इति ज्योतिस्तत्त्वम् ॥

(स्वनामख्यातकविविशेषः । स च नेमिदूताख्यखण्डकाव्यं विरचितवान् । तथा च नेमिदूते उक्तम् ।

"सद्भूताय प्रचरकवितुः कालिदासस्य काव्याद्न्त्यं पादं सुपदरचितान् मेघदूताद्गृहीत्वा ।
श्रीमन्नेमेश्चरितविशदं साङ्गणस्याङ्गजन्मा
चक्रे काव्यं बुधजनमनःप्रीतये विक्रमाख्यः ॥"

वत्सप्रीपुत्त्रः । यथा, मार्कण्डेये । ११७ । १ ।

"तस्य तस्यां सुनन्दायां पुत्त्रा द्वादश जज्ञिरे ।
प्रांशुः प्रवीरः शूरश्च सुचक्रो विक्रमः क्रमः ॥")

विक्रमादित्यः, पुं, (विक्रमेणादित्य इव ।) स्वनामख्यातो राजा । स च उज्जयनीदेशाधिपतिः संवत्कर्त्ता च । तत्पर्य्यायः । साहसाङ्कः २ शकारिः ३ । इति जटाधरः ॥ अस्य विवरणं द्वात्रिंशत्पुत्तलिकाकथायां तथा विक्रमार्कशब्दे च द्रष्टव्यम् ॥ (मोदकविशेषः । यदुक्तं चिन्तामणौ । यथा,—

"घृते गुन्द्रपलं विंशत् पचेत् सम्यग्भिषग्वरः ।
उत्तार्य्य च क्षिपेदेषां खण्डञ्च पलविंशतिः ॥

तालमूली तुरङ्गी च शुण्ठी चेति पलार्द्धकम् ।
जातीफलञ्च कक्कोलं लवङ्गञ्चेति कार्षिकम् ॥
मालतीच कुलिञ्जञ्च कवाबं करभं त्वचम् ।
एतेषां कोलमात्राञ्च आयसस्य पलद्वयम् ॥
पलैकं मोदकं कृत्वा एकैकं भक्षयेद् दिने ।
धातुक्षीणोऽग्निक्षीणश्च बलानलकरं परम् ॥
नेत्ररोगेषु सर्व्वेषु कासश्वासे च कामले ।
प्रमेहान् विंशतिं हन्याद्विक्रमादित्यमोदकः ॥”)

विक्रमार्कः, पुं, (विक्रमेण अर्क इव ।) विक्रमादित्यः । इति केचित् ॥ (अथ विक्रमार्कवर्णनं सन्दधाति ज्योतिर्व्विदाभरणसमाप्तौ श्रीकालिदासः ।

“वर्षे श्रुतिस्मृतिविचारविवेकरम्ये
श्रीभारते खधृतिसम्मित-१८० देशपीठे ।
मत्तोऽधुनाकृतिरियं सति मालवेन्द्रे
श्रीविक्रमार्कनृपराजवरे समासीत् ॥”

प्रथमं नृपसभायां पण्डितवर्गं वर्णयति ।

“शङ्कुः सुवाग् वररुचिर्म्मणिरंशुदत्तो
जिष्णुस्त्रिलोचनहरी घटकर्पराख्यः ।
अन्येऽपि सन्ति कवयोऽमरसिंहपूर्व्वा
यस्यैव विक्रमनृपस्य सभासदोऽमी ॥
सत्यो वराहमिहिरः श्रुतसेननामा
श्रीवादरायणमणित्थकुमारसिंहाः ।
श्रीविक्रमार्कनृपसंसदि सन्ति चैते
श्रीकालतन्त्रकवयस्त्वपरे मदाद्याः ॥
धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥”

अथ परिजनान् वर्णयति ।

“अष्टौ यस्य शतानि मण्डलधराधीशाः सभायां सदा
स्युः संसत्परिवाहकोटिसुभटाः सत्पण्डिताः षोडश ।
देवज्ञा दश वणिजश्च भिषजो भट्टास्तथा षड्गुणो
वेदज्ञा रसचन्द्रमा १६ विजयते श्रीविक्रमः सोऽधिभूः ॥”

अथास्य सैन्यं वर्णयति ।

“यस्याष्टादशयोजनानि कटके पादातिकोटित्रयम् ३००००००
वाहानामयुतायुतञ्च १०००००००नवतेस्त्रिशताकृति-२४३०० र्हस्तिनाम् ।
नौकालक्षचतुष्टयं ४००००० विजयिनो यस्य प्रयाणे भवेत्
सोऽयं विक्रमभूपतिर्व्विजयते नान्यो धरित्रीतले ॥”

अथास्य शाकप्रवृत्तिं दर्शयति ।

“येनास्मिन् वसुधातले शकगणान् सर्व्वा दिशः सङ्गरे
हत्वा पञ्चनवप्रमान् ५५५५५५५५५ कलियुगे शाकप्रवृत्तिः कृता ।
श्रीमद्विक्रमभूभुजा प्रतिदिनं मुक्तामणिस्वर्णगो
सप्तीभाद्यपवर्ज्जनेन विहितो धर्म्मः सुवर्णानन: ॥”

अथास्य दिग्विजयमाह ।

“उद्दामद्रविड़द्रुमैकपरशुर्लाटाटवीपावको
वलगद्वङ्गभुजङ्गराजगरुड़ो गौड़ाब्धिकुम्भोद्भवः ।
गर्ज्जद्गुर्ज्जरराजसिन्धुरहरिर्धारान्धकारार्य्यमा
काम्बोजाम्बुजचन्द्रमा विजयते श्रीविक्रमार्को नृपः ॥”

अथास्य प्रभुत्वादिगुणान् वर्णयति ।

“येनाप्युग्रमहीधराग्रविषये दुर्गाण्यसह्यान्यहो
नीत्वा यानि गतीकृतास्तदविपा दत्तानि तेषां पुनः ।
इन्द्राम्भोध्यमरद्रुमस्मरसुरध्माभृद्गुणेनाञ्जसा
श्रीमद्विक्रमभूभृताखिलजनाम्भोजेन्दुना मण्डले ॥”

अस्य पुरीं वर्णयति ।

“यद्राजधान्युज्जयिनी महापुरी
सदा महाकालमहेशयोगिनी ।
समाश्रितप्राण्यपवर्गदायिनी
श्रीविक्रमार्कोऽवनिपो जयत्यपि ॥
यो रूमदेशाधिपतिं शकेश्वरं
जित्वा गृहीत्वोज्जयिनीं महाहवे ।
आनीय सम्भ्राम्य मुमोच तन्त्वहो
श्रीविक्रमार्कः समसह्यविक्रमः ॥
तस्मिन् सदा विक्रममेदिनीशे
विराजमाने समवन्तिकायाम् ।
सर्व्वप्रजामङ्गलसौख्यसम्प-
द्बभूव सर्व्वत्र च वेदकर्म्म ॥
शङ्कादिपण्डितवराः कवयस्त्वनेके
ज्योतिर्व्विदः सगभवंश्च वराहपूर्व्वाः ।
श्रीविक्रमार्कनृपसंसदि मान्यबुद्धि-
स्तैरप्यहं नृपसखा किल कालिदासः ॥”
इति ज्योतिर्व्विदाभरणम् ॥)

विक्रमी, [न्] पुं, (विक्रमोऽस्यास्तीति । विक्रम + इनिः ।) सिंहः । इति राजनिर्घण्टः ॥ विष्णुः । यथा,—

“ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।”

इति महाभारते अनुशासनपर्व्वणि तस्य सहस्रनामस्तोत्रे १४६ अध्याये २२ श्लोकः ॥ अतिशक्तिविशिष्टे, त्रि ॥ (यथा, महाभारते । १ । १२८ । २८ ।

“प्राणवान् विक्रमी चैव शौर्य्येण महतान्वितः ।
सर्हते चापि सहितानस्तानेको वृकोदरः ॥”)

विक्रयः, पुं, (विक्रयणमिति । वि + क्री + “एरच् ।” ३ । ३ । ५६ । इति अच् ।) विक्रयणक्रिया । वेचा इति भाषा ॥ तत्पर्य्यायः । विपणः २ । इत्यमरः ॥ विपणनम् ३ पणनम् ४ । इति शब्दरत्नावली ॥ व्यवहारः ५ पणाया ६ । इति जटाधरः ॥ अस्य विहिताविहितनक्षत्राणि यथा,—

“यमाहिशक्राग्निहुताशपूर्व्वा
नेष्टाः क्रये विक्रयणे प्रशस्ताः ।
पौष्णाश्विचित्राशतभिन्दुवाताः
क्रये हिता विक्रयणे निषिद्धाः ॥”
इति ज्योतिःसारसंग्रहः ॥ * ॥

क्रयविक्रयनिर्णयो यथा । मूल्यं दास्यामीति कृत्वा ग्रहणादपि क्रयसिद्धिः । तथा च विवादचिन्तामणौ कात्यायनः ।

“पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् ।
ऋतुत्रयस्योपरिष्टात् तद्धनं वृद्धिमाप्नुयात् ॥”

अतएव वृहस्पतिः ।

“गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् ।
पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते ॥”

क्रयविक्रये समयविशेषाभ्यन्तरे पश्चात्तापादसिद्धिः । यथा मनुः ।

“क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् ।
सोऽन्तर्दशाहे तद्द्रव्यं दद्याच्चैवाददीत वा ॥”

एतद्याज्ञवल्क्योक्तेतरपरम् । यथा याज्ञवल्क्यः ।

“दशैकपञ्चसप्ताहमासत्र्यहार्द्धमासिकम् ।
बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥”

अत्र वृहस्पतिः ।

“अतोऽर्व्वाक् पण्यदोषस्तु यदि संजायते क्वचित् ।
विक्रेतुः प्रतिदेयन्तत् क्रेता मूल्यमवाप्नुयात् ॥”

अतस्तद्द्रव्यपरीक्षणकालात् । कात्यायनः ।

“अविज्ञातन्तु यत् क्रीतं दुष्टं पश्चाद्विभावितम् ।
क्रीतं तत् स्वामिने देयं पण्यं कालेऽन्यथा न तु ॥”

काले प्रागुक्तपरीक्षाकालाभ्यन्तरे । परीक्षिते तु वृहस्पतिः ।

“परीक्षेत स्वयं पण्यं अन्येषाञ्च प्रदर्शयेत् ।
परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत् ॥”

अत्र विशेषयति नारदः ।

“क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षतम् ॥
द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमाहरेत् ।
द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥”

आहरेत् दद्यात् विक्रेत्रे इति शेषः । द्विगुणं त्रिंशांशस्य । याज्ञवल्क्यः ।

“राजदैवोपघातेन पण्ये दोष उपागते ।
हानिर्व्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥”

नारदः ।

“उपहन्येत वा पण्यं दह्येतापह्रियेत वा ।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः ॥
दीयमानं न गृह्णाति क्रीतं पण्यन्तु यः क्रयी ।
स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः ॥”
इति प्रायश्चित्ततत्त्वम् ॥ * ॥

अपि च ।

“न्यासं कृत्वा परत्राधिं कृत्वा वाधिं करोति च ।
विक्रयं वा क्रिया तत्र पश्चिमा बलवत्तरा ॥”

न्यासं कृत्वा आधिं करोति आधिं कृत्वा वा विक्रयं करोति। विक्रयपदं स्वत्वध्वंसकत्वात् दानं लक्षयति परा क्रिया सिद्ध्यर्थः। एवञ्च विक्रेतृदात्रोर्मरणादिना आध्युद्धारे विक्रयदाने तत्कर्तृतुल्यस्वत्वजननात् तत्र तत्क्रेतृप्रतिग्रहीतृभ्यामाध्युद्धारः कार्य्यः। इति। तत्र च।

"न च स्थावरस्य समस्तस्य गोत्रसाधारणस्य च।
नैकः कुर्य्यात् क्रयं दानं परस्परमतं विना॥
विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः।
एको ह्यनीशः सर्व्वत्र दानाधमनविक्रये॥"

इति व्यासवचनाभ्यामेकस्य दानबन्धकविक्रयाधिकारः इति वाच्यं यथेष्टविनियोगार्हत्वरूपस्य स्वत्वस्य द्रव्यान्तर इवात्राप्यविशेषात् वचनञ्च स्वामित्वेन दुर्वृत्तपुरुषगोचरविक्रयादिना कुटुम्बविरोधादधर्म्मज्ञापनार्थंनिषेधरूपं न तु विक्रयाद्यनिष्पत्त्यर्थमिति दायभागः॥ *॥ एवञ्च।

"स्थावरे विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया॥"

इति स्थावरस्य केवलविक्रयप्रतिषेधात् एवं भूमिं यः प्रतिगृह्णातीत्यादिवचने दानप्रशंसादर्शनाच्च विक्रयेऽपि कर्त्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रय इति विज्ञानेश्वरः। वस्तुतस्तु स्थावरविक्रयनिषेधो अविभक्तस्थावरविषयः। तत्रापि यदि विक्रयं विना व्यवस्थितिर्न भवति तदा विक्रयः कर्त्तव्यः। पूर्व्वपुरुषार्ज्जितनष्टोद्धारे विशेषयति मिताक्षरायाम्।

"स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितम्।
असम्भूय सुतान् सर्व्वान् न दानं न च विक्रयः॥"
इत्यादि॥

अस्यापवादमाह।

"एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्।
आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः॥"
इति दायतत्त्वम्॥

द्रव्यविशेषविक्रयनिषेधो यथा। स्मृतिः।

"विक्रीणन् मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम्।
कुर्व्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात्॥
कपिलाक्षीरपानेन ब्राह्मणीगमनेन च।
वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत्॥"
कालिकापुराणम्।

"विक्रयं सर्व्ववस्तूनां कुर्व्वन् शूद्रो न दोषभाक्।
मधु चर्म्म सुरां लाक्षां त्यक्त्वा मांसञ्च पञ्चमम्॥"
मनुः।

"सद्यः पतति मांसेन लाक्षया लवणेन च।
त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात्॥
अशक्तौ भेषजस्यार्थे यज्ञहेतोस्तथैव च।
यद्यवश्यन्तु विक्रेयास्तिला धान्येन तत्समाः॥"
इत्याह्निकतत्त्वम्॥

"गवां विक्रयकारी च गवि लोमानि यानि च।
तावद्वर्षसहस्राणि गवां गोष्ठे क्रिमिर्भवेत्॥"
इति यमवचनम्॥

"गोवधोऽयाज्यसंयाज्यपारदार्य्यात्मविक्रयाः।
तड़ागारामदाराणामपत्यस्य च विक्रयः।
भृतकाध्ययनादानमपण्यानाञ्च विक्रयः॥"
इत्यादि मानवे ११ अध्याये उपपातकमध्ये गणितम्॥

विक्रयणं, क्ली, (वि + क्री + ल्युट्।) विक्रयः। यथा,

"यमाहिशक्राग्निहुताशपूर्व्वा
नेष्टाः क्रये विक्रयणे प्रशस्ताः।
पौष्णाश्विचित्राशतविष्णुवाताः
क्रये हिता विक्रयणे निषिद्धाः॥"
इति ज्योतिःसारसंग्रहः॥

विक्रयिकः, पुं, (विक्रयेण जीवतीति। विक्रय + "वस्नक्रयविक्रयात् ठन्।" ४।४।१३। इति ठन्। यद्वा, विक्रीणातीति। वि + क्री + "क्रिय इकन्।" उणा० २। ४४। इति इकन्।) विक्रेता। इत्यमरः॥ (यथा, महाभारते। १२। ३६। ३०।

"दीक्षितस्य कदर्य्यस्य क्रतुविक्रयिकस्य च।
तक्ष्णश्चर्म्मावकर्त्तुश्च पुंश्चल्या रजकस्य च।
चिकित्सकस्य यच्चान्नमभोज्यं रक्षिणस्तथा॥")

विक्रयी, [न्] त्रि, (विक्रीणातीति। वि + क्री + णिनिः।) विक्रयकर्त्ता। इति शब्दरत्नावली॥ (यथा, याज्ञवल्क्ये। २। १७३।

"क्रेता मूल्यमवाप्नोति तस्मात् यस्तस्य
विक्रयी॥")

विक्रान्तं, क्ली, (वि + क्रम + क्तः।) वैक्रान्तमणिः। इति राजनिर्घण्टः॥ (त्रिविक्रमावतारस्य विष्णोर्द्वितीयपादक्षेपेण अन्तरिक्षं विक्रान्तमिति ख्यातम्। तथा च वाजसनेयसंहितायाम्। १०। १६।

"विष्णोर्विक्रमणमसि। विष्णोर्विक्रान्तमसि। विष्णोः क्रान्तमसि।"

"हे द्वितीयप्रक्रम त्वं विष्णोर्विक्रान्तं द्वितीयपादप्रक्षेपेण जितमन्तरिक्षमसि।" "इमे वै लोका विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तमिति श्रुतेः।" इति तद्भाष्ये महीधरः॥)

विक्रान्तः, पुं, (वि + क्रम + क्तः।) शूरः। इत्यमरः॥ (वाच्यलिङ्गेऽपि दृश्यते। यथा, मुद्राराक्षसे। १।

"विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीर्व्वक्रनासादिभिः॥")

सिंहः। इति राजनिर्घण्टः॥ (मदालसागर्भजात-ऋतध्वजपुत्त्रः। यथा, मार्कण्डेये। २५।८।

"मदालसायाः सञ्जज्ञे पुत्त्रः प्रथमजस्ततः।
तस्य चक्रे पिता नाम विक्रान्त इति धीमतः॥"

हिरण्याक्षपुत्त्रविशेषः। यथा, हरिवंशे। ३। ७८—७६।

"हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः।
झर्झरः शकुनिश्चैव भूतसन्तापनस्तथा।
महानाभश्च विक्रान्तः कालनाभस्तथैव च॥")

विक्रान्तिः, स्त्री, (वि + क्रम् + क्तिन्।) अश्वगतिः। तत्पर्य्यायः। पुलायितम् २। इति त्रिकाण्डशेषः॥ विक्रमश्च॥ (यथा, राजतरङ्गिण्याम्। ४। १२६।

"पार्थिवः पृथुविक्रान्तिर्युधि क्रोधं मुमोच यः॥"

पादन्यासः। यथा, शतपथब्राह्मणे।१।९।३।१६।

"विष्णुक्रमान् क्रमतामिति यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैतां वेवैष एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते॥")

विक्रायकः, पुं, (विक्रीणातीति। वि + क्री + ण्वुल्।) विक्रेता। इति हेमचन्द्रः। ३। ५३२॥ (यथा, महाभारते। ५। ३८। ४।

"चिकित्सकः शल्यकर्त्तावकीर्णी
स्तेनः क्रूरो मद्यपो भ्रूणहा च।
सेनाजीवी श्रुतिविक्रायकश्च
भृशं प्रियोऽप्यतिथिर्नोदकार्हः॥")

विक्रिया, स्त्री, (विकरणमिति। वि + कृ + "कृञः श च।" ३। ३। १००। इति शः। टाप्।) विकारः। इत्यमरः॥ (यथा, रघुः।१३।७१।

"श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च
प्लक्षान् प्ररोहजटिलानिव मन्त्रिवृद्धान्॥"

प्रकृतेरन्यथाभावः। यथा, मार्कण्डेये। ३५।२।

"अस्नेहाश्चापि गोधूमयवगोरसविक्रियाः॥"

विरुद्धा क्रिया। विरुद्धकार्य्यम्। यथा, रघुः। १५। ४८।

"इत्याप्तवचनाद्रामो विनेष्यन् वर्णविक्रियाम्।
दिशः पपात पत्रेण वेगनिष्कम्पकेतुना॥")

विक्रीतः, त्रि, (वि + क्री + क्तः।) कृतविक्रयः। यथा, बृहस्पतिः।

"नास्तिकश्चैव कुरुते तद्धनं ज्ञातिभिः स्वकम्।
अदत्तत्यक्तविक्रीतं कृत्वा स्वं लभते धनी॥"
इति प्रायश्चित्ततत्त्वम्॥

विक्रुष्टं, त्रि, (वि + क्रुश + क्तः।) निष्ठुरम्। इति हेमचन्द्रः॥

विक्रेता, [ऋ] त्रि, (विक्रीणातीति। वि + क्री + तृच्।) विक्रयकर्त्ता। तत्पर्य्यायः। विक्रयिकः २। इत्यमरः॥ विक्रयी ३। इति शब्दरत्नावली॥ विक्रायकः ४। इति हेमचन्द्रः॥ (यथा, याज्ञवल्क्यः। २। १७३।

"विक्रेतुर्द्दर्शनात् शुद्धिः स्वामी द्रव्यं नृपो दमम्।
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी॥")

विक्रेयं, त्रि, (विक्रीयते इति। वि + क्री + "अचो यत्।" ३।१।९७। इति यत्।) विक्रययोग्यद्रव्यम्। तत्पर्य्यायः। पणितव्यम् २ पण्यम् ३। इत्यमरः॥ विक्रययोग्यायोग्यानि यथा,—

"इदन्तु वृत्तिवैकल्यात्त्यजतो धर्म्मनैपुणम्।
विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम्॥
सर्व्वान् रसानपोहेत कृतान्नञ्च तिलैः सह।
अश्मनो लवणञ्चैव पशवो ये च मानुषाः॥
सर्व्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च।
अपि चेत् स्युररक्तानि फलमूले तथौषधीः॥
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्व्वशः।

क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ।
अरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च ।
मद्यं नीलीञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा ॥
काममुत्पाद्य कृष्यान्तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिर-
स्थितान् ॥"
इति मानवे १० अध्यायः ॥

विक्लवः, त्रि, (विक्लवते इति । वि + क्लु + पचाद्यच् ।) विह्वलः । इत्यमरः ॥ (यथा, माघे । १२ । ६३ ।
"नूनं सहायेन वियोगविक्लवा
पुरः पुरस्त्रीरपि निर्ययौ तदा ॥") ॥
क्ली, दुःखम् । यथा, रामायणे । २।४४।२५ ।
"किमिदानीमिदं देवि! करोति हृदि विक्लवम् ।")

विक्लिन्नः, त्रि, (वि + क्लिद् + क्तः ।) जरसा जीर्णः । शीर्णः । आर्द्रः । इति मेदिनी । ने, १६३ ॥

विक्षतः, त्रि, (वि + क्षण + क्तः ।) विशेषेण क्षतः । (यथा, महाभारते । २ । ४६ । ३३ ।
"अङ्गारेण विनिर्गच्छन् द्वारसंस्थानरूपिणा ।
अभिहत्य शिलां भूयो ललाटेनास्मि विक्षतः ॥")

विक्षावः, पुं, (विक्षवणमिति । वि + क्षु + "वौ क्षुश्रुवः ।" ३ । ३ । २५ । इति घञ् ।) शब्दः । इत्यमरः ॥ (यथा, भट्टिः । ७ । ३६ ।
"यात यूयं यमश्रायं दिशं नायेन दक्षिणाम् ।
विक्षावैर्व्योयविश्रावं तर्ज्जयन्तो महोदधेः ॥")
कासः । इति स्वामिकलिङ्गौ । इति भरतः ॥

विक्षिप्तः, त्रि, (वि + क्षिप् + क्तः ।) त्यक्तः । (यथा, महाभारते । १ । २७ । ७ ।
"वायुविक्षिप्तकुसुमैस्तथान्यैरपि पादपैः ॥"
कम्पितः । यथा, भागवते । ८ । ८ । ४६ ।
"स व्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः ।
दैत्ययूथपचेतःसु काममुद्दीपयन् मुहुः ॥"
क्ली, चित्तवृत्तिविशेषः । यथा, पातञ्जलभाष्ये ।१। "क्षिप्तं मूढं विक्षिप्तमेकाग्रनिरुद्धमितिचित्त भूमयः ॥" "क्षिप्ताद्विशिष्टं विक्षिप्तमितिमणिप्रभा ॥")

विक्षीरः, पुं, (विशिष्टं क्षीरं यत्र ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥

विक्षेपः, पुं, (वि + क्षिप् + घञ् ।) प्रेरणम् । त्यागः । विक्षेपणम् । यथा,—
"नैकत्रामिशुविक्षेपमतीत्य ह्यधिकं ध्रुवम् ।"
इत्याद्याह्निकाचारतत्त्वम् ॥
(कम्पनम् । यथा, कुमारे । १ । १३ ।
"लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति वालव्यजनैश्चमर्यः ॥")
अद्वितीयवस्त्ववलम्बनेन चित्तस्य अन्यावलम्बनम् । इति वेदान्तसारः ।

विक्षेपशक्तिः, स्त्री, (विक्षेपाय शक्तिः ।) मायाशक्तिः । यथा । रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति । एवं अज्ञानमपि स्वावृतात्मनि तथा विक्षेपशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम् । इति वेदान्तसारसुबोधिनीटीका ॥

विखः, त्रि, (विख्यः । निपातनात् यलोपः ।) गतनासिकः । इति भरतद्विरूपकोषः ॥

विखनाः, [स्] पुं, ब्रह्मा । यथा,—
"न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां कुले ॥"
इति श्रीभागवते । १० । ३१ । ४ ॥

विखुः, त्रि, (विगता नासिका यस्य । बहुलवचनात् नासिकायाः खुः ।) गतनासिकः । इति भरतद्विरूपकोषः ॥

विखुरः, पुं, राक्षसः । इति त्रिकाण्डशेषः ॥ चौरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

विख्यः, त्रि, (विगता नासिकास्येति । "ख्यश्च ।" ५ । ४ । २८ । इत्यस्य वार्त्तिकोक्त्या नासिकायाः ख्यः ।) गतनासिकः । इति केचित् ॥

विख्यातः, त्रि, ख्यातापन्नः । विपूर्व्वख्याधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १ । ६७ । ३२ ।
"चन्द्रवर्म्मेति विख्यातः काम्बोजानां नराधिपः ॥")

विख्यातिः, स्त्री, प्रसिद्धिः । सुख्यातिः । विपूर्व्वख्याधातोः क्तिप्रत्ययेन निष्पन्नः ॥

विख्यापनं, क्ली, (वि + ख्या + णिच् + ल्युट् ।) व्याख्यानम् । विपूर्व्वण्यन्तख्याधातोरनट्प्रत्ययेन निष्पन्नम् ॥

विख्रुः, विख्रः, त्रि, (विगता नासिका यस्य । "ख्रुख्रौ च वक्तव्यौ ।" इति नासिकाया ख्रुः ख्रश्च ।) अनासिकः । इति हेमचन्द्रः ॥ छिन्ननासिकः । इति शब्दरत्नावली ॥

विगणनं, क्ली, (वि + गण + ल्युट् ।) ऋणमुक्तिः । इति त्रिकाण्डशेषः ॥ (यथा, पाणिनिः । १ । ३ । ३६ ।
"संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥" "विगणनं ऋणादेर्निर्यातनम् ।" इति काशिका ॥)

विगतः, त्रि, (वि + गम + क्तः ।) प्रभारहितः । तत्पर्य्यायः । निष्प्रभः २ अरोकः ३ । इत्यमरः ॥ वीतः ४ । इति रुद्रः ॥ विशेषेण गतः । इति हेमचन्द्रः ॥ (यथा, माघे । ११ । २६ ।
"विगततिमिरपङ्कं पश्यति व्योम यावत्
धुवति विरहखिन्नः पक्षती यावदेव ।
रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना
सरिदपरतटान्तादागता चक्रवाकी ॥")

विगतश्रीकः, त्रि, श्रीरहितः । विगता श्रीर्यस्य इति बहुव्रीहौ कप्रत्ययेन निष्पन्नः ॥

विगतार्त्तवा, स्त्री, (विगतं आर्त्तवं रजो यस्याः ।) पञ्चपञ्चाशदब्देभ्य ऊर्द्धं निवृत्तरजस्का । तत्पर्य्यायः । निष्कली २ निष्कला ३ निष्कली ४ निष्फला ५ विकली ६ विकला ७ । इति शब्दरत्नावली ॥

विगमः, पुं, (वि + गम + "ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) नाशः । यथा । एकदेशिनो वेदान्तिनस्तु यदुपाध्यवच्छिन्नस्य ब्रह्मणो विशुद्धरूपता तादृशोपाधिविगम एव कैवल्यम् । चिदेकदेशिनस्तु आनन्दमयपरमात्मनि जीवात्मनो लयो मोक्षः । जीवात्मपरमात्मनोरभेदेऽपि उपाधिविशेषविशिष्टस्यात्मनो जीवरूपतया तस्यौपाधिकः परमात्मभेदः । इति भेदकोपाधिविगम एव जीवस्य परमात्मनि लयः । यथा घटाकाशस्य घटविगम एव शुद्ध आकाशे तस्य लयः । लिङ्गशरीरावच्छिन्नस्यैवात्मनो जीवभाव इति लिङ्गशरीरनाश एव पर्य्यवसितो मोक्षः । इति मुक्तिवादः ॥ (विच्छेदः । यथा, भागवते । १ । १३ । ४३ ।
"यथा क्रीडोपस्कराणां संयोगविगमाविह ।
इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम् ॥")

विगन्धकः, पुं, (विरुद्धो गन्धो यस्मिन् । बहुव्रीहिलक्षणः कः ।) इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥

विगन्धिका, स्त्री, हपुषा । इति राजनिर्घण्टः ॥

विगर्हणं, क्ली, (वि + गर्ह + ल्युट् ।) निन्दनम् । भर्त्सनम् । (यथा, हरिवंशे । ७६ । २३ ।
"कृष्णे च भवतो द्वेष्ये वसुदेवविगर्हणात् ॥")

विगर्हणा, स्त्री, (वि + गर्ह + णिच् + युच् । टाप् ।) निन्दनम् । भर्त्सनम् । (यथा, महाभारते । १२ । ११४ । २१ ।
"विगर्हणां परमदुरात्मना कृतां
सहेत यः संसदि दुर्ज्जनान्नरः ॥")

विगर्हितः, त्रि, (विशेषेण गर्हितः ।) निन्दितः । (यथा, नैषधे । १ । १३१ ।
"न केवलं प्राणिवधो वधो मम
त्वदीक्षणाद्विश्वसितान्तरात्मनः ।
विगर्हितं धर्म्मधनैर्निबर्हणं
विशिष्य विश्वासजुषां द्विषामपि ॥")
निविडः । इति विपूर्व्वगर्हधातोः क्तप्रत्ययेन निष्पन्नः ॥

विगलितः, त्रि, (विशेषेण गलितः ।) स्खलितः । यथा, गीतगोविन्दे ५ सर्गे ।
"विगलितवसनं परिहृतरसनं
घटय जघनमपिधानम् ।
किशलयशयने पङ्कजनयने
निधिमिव हर्षनिधानम् ॥"

विगाढः, त्रि, (विगाह्यते स्मेति । वि + गाह + क्तः ।) स्नातः । अवगाहितः । विपूर्व्वगाहधातोः क्तप्रत्ययेन निष्पन्नः ॥ (प्रगाढः । यथा, महाभारते । ३ । ४६ । ५ ।
"निर्गम्य चन्द्रोदयने विगाढे रजनीमुखे ।
प्रस्थिता सा पृथुश्रोणी पार्थस्य भवनं प्रति ॥")

विगानं, क्ली, (विरुद्धं गानं परस्य ।) निन्दा । इति हेमचन्द्रः ॥

विगाहमानः, त्रि, (वि+गाह+शानच् ।) विलोड़नकर्त्ता । अवगाहनकर्त्ता । विपूर्व्व-गाहधातोः शानप्रत्ययेन निष्पन्नः ॥ (यथा, रघुः । १३ । १ ।
"अथात्मनः शब्दगुणं गुणज्ञः
पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां
रामाभिधानो हरिरित्युवाच ॥")

विगुणः, त्रि, (विपरीतो गुणो यस्य ।) गुण-वैपरीत्यविशिष्टः । यथा,—
"यथा मनो ममाचष्ट नेयं माता तथा मम ।
विगुणेष्वपि पुत्त्रेषु न माता विगुणा भवेत् ॥"
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तराध्यायः ॥
(सत्त्वः । यथा, भागवते । ७ । ६ । ४८ ।
"सत्त्वं त्वमेव सगुणो विगुणश्च भूमन्
नान्यत् त्वदस्त्यपि मनो वचसा निरुक्तम् ॥"
गुणहीनः । यथा, शिशुपालवधे । ६ । १२ ।
"अवसन्नतापमतमिस्रमभा-
दपदोषतेव विगुणस्य गुणः ॥")

विगूढ़ः, त्रि, (विशेषेण गूढ़ः ।) गर्हितः । गुप्तः । इति मेदिनी । ढ़े, ६—१० ॥

विग्रः, त्रि, (विगता नासिकास्य । "वेर्ग्रो वक्तव्यः ।" ८ । ४ । २८ । इत्यस्य वार्त्तिकोक्त्या नासिकायाः ग्रः ।) गतनासिकः । इत्यमरः ॥ * ॥ (त्रि,"विविधं गृह्णात्यर्थानिति विपूर्व्वात् गृह्णातेः 'अन्येष्वपि दृश्यते ।' इति डः ।" इति देव-राजयज्वा । मेधावी । इति निघण्टुः । ३ ।१५॥ यथा, ऋग्वेदे । १ । ४ । ४ ।
"परेहि विग्रमस्तृतमिन्द्रं पृच्छाविपश्चितम् ॥")

विग्रहः, पुं, (विविधं सुखदुःखादिकं गृह्णातीति । वि+ग्रह+अच् । यद्वा, विविधैर्दुःखादिभि-र्गृह्यते इति । वि+ग्रह+"ग्रहवृदृनिश्चि-गमश्च ।"३ । ३ । ५८ । इति अप् ।) शरीरम् । (यथा, रघुः । ११ । १३ ।
"विग्रहेण मदनस्य चारुणा
सोऽभवत् प्रतिनिधिर्न कर्म्मणा ॥")
युद्धम् । इत्यमरः ॥ (यथा, मनुः । ७ । १६० ।
"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥"
विरोधमात्रम् । यथा, रघुः । ९ । ४७ ।
"त्यजत मानमलं वत विग्रहै-
र्न पुनरेति गतं चतुरं वयः ।
परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः ॥")
विभागः । इति मेदिनी । हे, २४ ॥ (यथा, भागवते । ३ । ३१ । ३ ।
"मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्ग-
विग्रहः ।
नखलोमास्थिचर्म्माणि लिङ्गच्छिद्रोद्भव-
स्त्रिभिः ॥")
वाक्यभेदः । स तु समासवाक्यम् । तत्पर्य्यायः । विस्तरः २ । इत्यमरः ॥ (वीनां पक्षिणां ग्रहो ग्रहणमिति वाक्ये विहङ्गग्रहणम् । यथा, वक्रोक्तिपञ्चाशिकायाम् । ४ ।
"नो सन्ध्या च्छितमत्सरा तव तनौ वत्स्याम्यहं सन्धिना
न प्रीतासि वरोरु चेत्कथय तत् प्रस्तौमि किं विग्रहम् ।
कार्य्यं तेन न किञ्चिदस्ति शठ मे वीनां ग्रहेच्छेति वो
दिश्यासुः प्रतिबद्धकेलिगिरिशयोः श्रेयांसि वक्रोक्तयः ॥")
देवविग्रहकरणादिप्रमाणं शिल्पशब्दे द्रष्टव्यम् ॥

विग्रहः, पुं स्त्री, (विगृह्णन्ति शत्रवो यस्मिन् । वि+ग्रह+अप् ।) युद्धम् । इत्यमरः ॥ (यथा, मनुः । ७ । १७० ।
"यदा प्रहृष्टा मन्येत सर्व्वास्ताः प्रकृतीर्भृशम् ।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम् ॥")

विग्रहावरं, क्ली, (विग्रहमाहणोतीति । आ+ह्व+अच् ।) पृष्ठम् । इति शब्दचन्द्रिका ॥

विघटिका, स्त्री, (विभक्ता घटिका यया ।) पलम् । इति राजनिर्घण्टः ॥

विघट्टितं, त्रि, विशेषेण चालितम् । विपूर्व्वघट्ट-धातोः क्तप्रत्ययेन निष्पन्नम् ॥ (यथा, बृहत्-संहितायाम् । ३५ । १ ।
"सूर्य्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे ।
वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः ॥"
विद्धम् । यथा, माघे । ८ । २४ ।
"उत्सङ्गे चलशफरीविघट्टितोरु-
र्वामोरूरतिशयमाप विभ्रमस्य ॥")

विघसं, क्ली, (विशेषेण अद्यते इति । वि+अद्+"उपसर्गेऽदः ।" ३ । ३ । ५९ । इति अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घस्लृ-आदेशः ।) सिक्थकम् । इति राजनिर्घण्टः ॥

विघसः, पुं, (वि+अद्+अप् ।) भोजनशेषः । इत्यमरः ॥ देवपितृतिथिगुर्व्वादिभुक्तस्य शेषः । इति भरतः ॥ (यथा, मनुः । ३ । २८५ ।
"विघसाशी भवेन्नित्यं नित्यं वामृतभोजनः ।
विघसो भुक्तशेषन्तु यज्ञशेषं तथामृतम् ॥")
आहारः । इति शब्दरत्नावली ॥ (यथा,—
"अयि वनप्रिय ! विस्मृत एव किं
बलिभुजो विघसो भवताधुना ।
यदनयैव कुहूरिति विद्यया
न पततश्चरणौ धरणौ तव ॥"
इत्युद्भटः ।)

विघातः, पुं, (विशेषेण हननमिति । वि+हन+घञ् ।) आघातः । यथा, अमरे ।
"वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ ॥"
आघातः । (यथा, महाभारते ।
"चक्रे शरविघातञ्च क्रीड़न्निव पितामहः ॥"
विनाशः । यथा महाभारते । १ । २६ । २३ ।
"क्षुत्पिपासाविघातार्थं भक्ष्यमाख्यातु मे भवान् ॥")

विघाती, [न्] त्रि, निवारकः । घातकः । विघात-शब्दादिन्प्रत्ययेन विपूर्व्वहनधातोर्ग्रहादित्वा-णिन्प्रत्ययेन वा निष्पन्नः ॥ (यथा, हरि-वंशे । ८७ । ४५ ।
"एवमूर्ज्जितवीर्य्यस्य ममामरविघातिनः ॥")

विघ्नः, पुं, (विहन्यते अनेनेति । वि+हन+"घञर्थे कविधानम् ।" ३ । ३ । ५८ । इत्यस्य वार्त्तिकोक्त्या कः ।) आघातः । तत्पर्य्यायः । अन्तरायः २ प्रत्यूहः ३ । इत्यमरः ॥ (यथा मुद्राराक्षसे । २ ।
"प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमाना
प्रारब्धमुत्तमगुणास्त्वमिवोद्वहन्ति ॥"
कृष्णपाकफला । इति शब्दचन्द्रिका ॥ शेषार्थे अमरे अविघ्न इति पाठः ॥

विघ्नकारी, [न्] त्रि, (विघ्नं कर्त्तुं शीलमस्येति । कृ+णिनिः ।) घोरदर्शनः । विघाती । इति मेदिनी । ने, २५५ ॥

विघ्ननायकः, पुं, (विघ्नानां नायकः विघ्नाधीश्वर-त्वात् ।) गणेशः । इति शब्दरत्नावली ॥

विघ्ननाशकः, पुं, (विघ्नानां नाशकः ।) गणेशः । इति शब्दरत्नावली ॥

विघ्ननाशनः, पुं, (नाशयतीति नाशनः विघ्नानां नाशनः ।) गणेशः । इति शब्दरत्नावली ॥

विघ्नराजः, पुं, (विघ्नानां राजा । "राजाहः सखिभ्यष्टच् ।" ५।४।९१ । इति टच् ।) गणेशः । इत्यमरः ॥ (यथा, कथासरित्सागरे ।२०।१०१।
"आर्य्यपुत्त्र पुरा गत्वा विघ्नराजमपूजयत् ॥")

विघ्नविनायकः, पुं, (विघ्नानां विनायकः ।) गणेशः । इति काशीखण्डः ॥

विघ्नहारी, [न्] पुं, (विघ्नं हर्त्तुं शीलमस्य इति । हृ+णिनिः ।) गणेशः । इति त्रिकाण्डशेषः ॥ विघ्ननाशके, त्रि ॥

विघ्नितः, त्रि, जातविघ्नः । विघ्नोऽस्य जात इत्यर्थे विघ्नशब्दादितच्प्रत्ययेन निष्पन्नः ॥

विघ्नेशः, पुं, (विघ्नानां ईशः ।) गणेशः । इति शब्द-रत्नावली ॥ (यथा कथासरित्सागरे ।२०।८४।
"विघ्नोऽत्र तव जातोऽयं विना विघ्नेशपूज-
नम् ॥")

विघ्नेशवाहनः, पुं, (विघ्नेशस्य वाहनः ।) महा-मूषकः । इति राजनिर्घण्टः ॥

विघ्नेशानकान्ता, स्त्री, (विघ्नेशानस्य गणेशस्य कान्ता प्रिया । तत् पूजायां एतस्याः प्राश-स्त्यात् ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

विङ्कः पुं, अश्वखुरः । इति त्रिकाण्डशेषः ॥

विच, इर् लि ष औ ञ पृथक्कृतौ । इति कवि-कल्पद्रुमः ॥ (अदा०-ह्वा०-रुधा०-प-उभ०-अक०-सकच-अनिट् ।) इर्, अविचत् । अवैचीत् । लि, ञ, वेवेक्ति वेविक्ते सूक्ष्मान् पण्डितः पृथक् स्यादित्यर्थः । विज इति चान्द्रो यः स एव चान्द्रोऽपि पठ्यते कस्यचिदज्ञरोषात्

तेन निर्जां खेरेगुरित्यस्य वृत्तौ विजयरक्षि-तेनास्य ग्रहणात् खेर्गुणः। ध त्म, विनक्ति विङ्क्ते। विविनच्मि दिवः सुरान् इति पृथक् करोमीत्यर्थः। चौ, वेल्ला। इति दुर्गादासः॥

विचकिलः, पुं, मल्लीभेदः। मदनकण्टकः। इति मेदिनी। ले,१६४॥ (यथा, राजेन्द्रकर्णपूरे।७०।
"कुन्दः कन्दलितयं विचकिलः कम्पाकुलं केतकः
सातङ्कं मदनः सदैन्यमलसं सङ्कोटतिसृक्तद्रुमः॥")

विचक्षणः, पुं, (विशेषेण चष्टे धर्म्मादिमुपदिशतीति। वि+चक्ष+"अनुदात्तेतश्च हलादेः।" ३।२।१४९। इति कर्त्तरि युच्।) पण्डितः। इत्यमरः॥ (यथा रघुवंशे।५।१९।
"ततो यथावद् विहिताध्वराय
तस्मै स्मयावेशविवर्ज्जिताय।
वर्णाश्रमाणां गुरवे सवर्णी
विचक्षणः प्रस्तुतमाचचक्षे॥")
निपुणे, त्रि। इति राजनिर्घण्टः॥ (यथा भागवते।१।५।१६।
"विचक्षणोऽस्यार्हति वेदितुं विभो
रनन्तपारस्य निवृत्तितः सुखम्॥"
नानार्थदर्शी। यथा ऋग्वेदे।४।५३।२
"विचक्षणः प्रथयन्नापृणन्नुर्व्वजीजनत् सविता सुम्नमुक्थ्यम्।"
"विचक्षणः विविधं द्रष्टा।" इति तद्भाष्ये सायणः॥)

विचक्षणा, स्त्री, नागदन्ती। इति राजनिर्घण्टः॥

विचक्षुः, [स्] त्रि, (विगतं प्रत्यक्षितेऽपि वस्तुनि अपगतं चक्षुर्यस्य।) विमनाः। इति त्रिकाण्डशेषः॥ (विगते नष्टे चक्षुषी यस्य।) विगतचक्षुषि, त्रि। (यथा, महाभारते।१२।६५।३४।
"अन्तरा विलयं यान्ति यथा पथि विचक्षुषः॥*"॥
विशिष्टे चक्षुषी यस्य सः। इक्ष्वाकुवंशीयः कश्चिद् योद्धा। यथा, हरिवंशे।१४१।६।
"शतवर्म्मा सुदंष्ट्रश्च विचक्षुररिमर्द्दनः॥")

विचयनं, क्ली, (विशेषेण चयनम्।) मार्गणम्। इत्यमरः॥

विचर्च्चिका, स्त्री, (विशेषेण चर्च्चति पाणिपादस्य त्वक् विदार्य्यते अनया इति। चर्च्च तर्ज्जने+"रोगाख्यायां ण्वुल् बहुलम्।"३।३।१०८। इति ण्वुल्। टापि अत इत्वम्।) रोगविशेषः। विकच इति भाषा। तत्पर्य्यायः। कच्छूः २ पाम ३ पामा ४। इत्यमरः॥ अपि च।
"कच्छुः कच्छूः पाम पामा पादरोगे विचर्च्चिका।"
इति शब्दरत्नावली॥*॥
तदौषधम् यथा,—
"करवीरं भृङ्गराजं लवणं कुष्ठकर्कटम्।
चतुर्गुणेन मूत्रेण पचेत्तैलं हरेत्ततः।
पामां विचर्च्चिकां कुष्ठमभ्यङ्गाद्धि व्रणानि वै॥"
इति गारुडे २८७ अध्यायः॥*॥
अन्यच्च।
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विशाला करवीरञ्च अर्कक्षीरं सकृत् पलम्।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
मृत्पात्रे लौहपात्रे वा शनैर्म्मृद्वग्निना पचेत्॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च।
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते॥
प्रसूतान्यपि श्वित्राणि तैलेनानेन म्रक्षयेत्।
चिरोत्थितमपि श्वित्रं विवर्णं तत्क्षणाद्भवेत्॥"
इति गारुडे १९८ अध्यायः॥*॥
क्षुद्रकुष्ठविशेषः। यथा।
"एकं कुष्ठं स्मृतं पूर्व्वं गजचर्म्म ततः स्मृतम्।
ततश्चर्म्मदलं प्रोक्तं ततश्चापि विचर्च्चिका॥
विपादिकाभिधा सैव पामा कच्छूस्ततः परा।
ततो दद्रुश्च विस्फोटः किटिमञ्च ततः परम्
ततश्चालसकं प्रोक्तं शतारुश्च ततः परम्।
क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः॥
सकण्डुः पिड़का श्यावा बहुस्रावा विचर्च्चिका॥"
पिड़का क्षुद्रपिड़का।
"दाल्यते त्वक् खरा रूक्षा जान्वोर्य्या विचर्च्चिका।
पादे विपादिका ज्ञेया स्थानभेदाद्विचर्च्चिका॥"
दाल्यते विदार्य्यते। केचिद्विचर्च्चिकातो विपादिकां विभिन्नमाहुः। इति भावप्रकाशः॥
(सा च महापातकशेषभोगचिह्नं वैदिककर्म्मप्रतिबन्धिका च। यथा, शुद्धितत्त्वधृतभविष्यपुराणीयमध्यतन्त्रे षष्ठाध्याये।
"ब्रह्म कुष्ठगणं विप्र उत्तरोत्तरतो गुरुम्।
विचर्च्चिका तु दुश्चर्म्मा चर्व्वरीयस्तृतीयकः॥
विकर्च्चूर्ब्राह्मणास्त्रौ च ज्ञायन्ते तथाष्टकम्।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु॥
व्रणवत् सर्व्वगात्रेषु गण्डे भाले तथानसि।
स्ते च प्रोषयेत् तीर्थे अथवा तत्समूलके॥"
कदाचित् अभिजन्यभूमिकर्म्मैरपि विचर्च्चिका उत्पद्यते। यथा वृहत्संहितायाम्।३२।१४।
"आग्नेयेऽम्बुदनाशः
सलिलाशयसङ्क्षयो नृपतिवैरम्।
दद्रुविचर्च्चिकाज्वर-
विसर्पिकाः पाण्डुरोगश्च॥")

विचलः, त्रि, अस्थिरः। विपूर्ब्बचलधातोरल्प्रत्ययेन निष्पन्नः॥

विचलितः, त्रि, पतितः। स्खलितः। विपूर्व्वचलधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, मनुः।७।२८।
"दण्डो हि सुमहत् तेजो दुर्द्धरश्चाकृतात्मभिः।
धर्म्माद्विचलितं हन्ति नृपमेव सबान्धवम्॥")

विचारः, पुं, (विशेषेण चरणं पदार्थादिनिर्णये ज्ञानमिति। वि+चर+घञ्।) तत्त्वनिर्णयः। इति व्यवहारतत्त्वम्॥ सन्दिग्धे वस्तुनि प्रमाणेन तत्त्वपरीक्षा। इति गोयीचन्द्रः। प्रमाणेरर्थपरीक्षणं विमर्शमात्रमिति केचित्। इति भरतः॥ तत्पर्य्यायः। तर्कः २ निर्णयः ३ गुञ्जा ४ चर्चा ५। इति त्रिकाण्डशेषः॥ संख्या ६ विचारणा ७। इत्यमरः॥ चर्च्चनम् ८ संख्यानम् ९। इति तट्टीका॥ विचारणम् १० वितर्कः ११ ऊहः १२ वहः १३ उहः १४ वितर्कणम् १५। इति शब्दरत्नावली॥ प्रणिधानम् १६ समाधानम् १७। इति जटाधरः॥ (यथा, कथासरित्सागरे। ३६।८८।
"न चैवं क्षमते नारी विचारं मारमोहिता।
यदियं क्रमते राज्ञी तव कार्य्यं विपन्नतम्॥"
नाट्योक्तलक्षणविशेषः। तल्लक्षणं यथा, साहित्यदर्पणे।६।४४७।
"विचारो युक्तिवाक्यैर्यदप्रत्यक्षार्थसाधनम्॥"

विचारणं, क्ली, (वि+चर+णिच्+ल्युट्।) विचारः। इति शब्दरत्नावली॥ (यथा, भागवते।१२।१३।१८।
"तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्म्यमाविष्कृतम्।
तच्छृण्वन् सुपठन् विचारणपरो भक्त्या विमुच्येन्नरः॥"
"एकस्मिन् धर्म्मिणि विरुद्धनानार्थविमर्शो विचारणम्। स च संशयस्त्रिधा स्यात् एको विशेषादर्शने समानधर्म्मदर्शनात्। अहिर्व्वा रज्जुर्व्वा। द्वितीयो विशेषादर्शनमात्रे। अत्र शब्दो नित्योऽनित्यो वा। तृतीयोऽसाधारणधर्म्मेण यथा भूर्नित्या अनित्या वा। अत्र गन्धोऽसाधारणधर्म्मः विशेषमपश्यन् संशेते गन्धाधिकरणं नित्यं अनित्यं वेति दिक्।" इति।
"विचारणे पूर्व्वस्य।" इति श्रीपतिदत्तकृतकातन्त्रपरिशिष्टे गोपीनाथतर्काचार्य्यः॥)

विचारणा, स्त्री, (वि+चर+णिच्+युच्। टाप्।) विचारः। इत्यमरः॥ (यथा, देवीभागवते।१।१८।४२।
"जीवो ब्रह्म सदैवाहं नात्र कार्य्या विचारणा।
भेदबुद्धिस्तु संसारे वर्त्तमाना प्रवर्त्तते॥")
मीमांसाशास्त्रम्। इति हेमचन्द्रः॥

विचारणीयं, त्रि, विचार्य्यम्। विपूर्ब्बण्यन्त(णिजन्त)चरधातोरनीयप्रत्ययेन निष्पन्नम्। क्ली, शास्त्रम्। इति हेमचन्द्रः॥

विचारितः, त्रि, (विचारः संजातोऽस्य इति विचार+"तदस्य संजातं तारकादिभ्य इतच्।" ५।२।३६। इति इतच्।) कृतविचारः। तत्पर्य्यायः। विन्नः २ वित्तः ३। इत्यमरः॥ (यथा, मनौ।११।२८।
"आपत्कल्पेन यो धर्म्मं कुरुतेऽनापदि द्विजः।
स नाप्नोति फलं तस्य परत्रेति विचारितम्॥")

विचार्य्यं, त्रि, विचारितव्यम्। विचारणीयम्। विपूर्ब्बचरधातोर्ण्यन्तात् यप्रत्ययेन निष्पन्नम्॥ (यथा, मार्कण्डेये।६६।१८।

"हाःस्थेनां दुष्टहृदयामादाय विजने वने ।
परित्यजाशु नैतत्ते विचार्य्यं वचनं मम ॥")

विचालं, त्रि, अभ्यन्तरम् । अन्तरालम् । इति हेमचन्द्रः ॥ (पुं, संख्यान्तरापादनम् । यथा, पाणिनौ । ५ । ३ । ४३ । "अधिकरणे विचाले च ॥")

विचिः, पुं स्त्री, (विवेक्ति जलानि पृथगिव करोति । विच + "इगुपधात् कित् ।" उणा० ४ । ११६ । इन् । स च कित् ।) वीची । तरङ्गः । इत्यमरटीकायां भरतः ॥

विचिकित्सा, स्त्री, (विचिकित्सनमिति । वि + कित + सन् + अः । टाप् ।) सन्देहः । इत्यमरः ॥ (यथा, भागवते । ३ । ९ । ३६ ।
"तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽवहिः ।
नालेन सलिले मूलं पुष्करस्य विचिन्वतः ॥")

विचित्रं, क्ली, (विशेषेण चित्रम् ।) कर्व्वुरवर्णः । इति शब्दरत्नावली ॥ तद्वति, त्रि । (यथा, महाभारते । ३ । ५४ । १० ।
"विचित्रमाल्याभरणैर्ब्बलैर्दृश्यैः स्वलङ्कृतैः ॥")
आश्चर्य्यम् । यथा,—
"विचित्रमिदमाख्यातं भगवन् भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तवीजवधाश्रितम् ॥"
इति देवीमाहात्म्यम् ॥
(यथा च, उपदेशशतके । ३३ ।
"दुहिता विदेहभर्त्तुर्द्दाशरथेर्भामिनी सीता ।
वधमाप राक्षसीनां विधेर्व्विचित्रा गति-
र्ब्बोध्या ॥"
पुं, रौच्यमनुपुत्त्रः । यथा, मार्कण्डेये । ९४ । ३१ ।
"चित्रसेनो विचित्रश्च नयतिर्निर्भयो दृढ़ः ।
सुनेत्रः क्षत्त्रबुद्धिश्च सुव्रतश्चैव तत्सुताः ॥"
अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ७२२ ।
"विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् ।
यथा,—
प्रणमत्युन्नतिहेतोर्जीवनहेतोर्व्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढ़ः सेवकादन्यः ॥")

विचित्रकः, पुं, (विविधानि चित्राणि यस्मिन् । बहुव्रीहौ कन् ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः ॥

विचित्रदेहः, पुं, (विचित्रा देहा यस्य सः ।) मेघः । इति शब्दचन्द्रिका ॥ आश्चर्य्यशरीरे नानावर्णदेहे च, त्रि ॥

विचित्रवीर्य्यः, पुं, (विचित्राणि वीर्य्याणि यस्य सः ।) चन्द्रवंशीयराजविशेषः । स च शान्तनोर्दासकन्यायां जातः । तस्य क्षेत्रे सत्यवत्याज्ञया व्यासो धृतराष्ट्रं पाण्डुञ्च जनयामास । इति श्रीभागवतमतम् ॥

विचित्रवीर्य्यसूः, स्त्री, (विचित्रवीर्य्यस्य सूः प्रसूर्जननी ।) सत्यवती । इति शब्दरत्नावली ॥

विचित्रा, स्त्री, (विचित्रं नानाविधवर्णमस्त्यस्या इति । अर्श आदित्वादच् । स्त्रियां टाप् ।) मृगेर्व्वारुः । इति राजनिर्घण्टः ॥

विचित्राङ्गः, त्रि, (विचित्राणि अङ्गानि यस्य ।) मयूरः । इति शब्दरत्नावली ॥ व्याघ्रः । इति शब्दचन्द्रिका ॥ आश्चर्य्यशरीरे, त्रि ॥

विचित्रितः, त्रि, (विचित्रमस्य जातमिति । विचित्र + इतच् ।) नानावर्णयुक्तः । यथा,—
"आसनं सर्व्वशोभाढ्यं सद्रत्नमणिनिर्म्मितम् ।
विचित्रितञ्च चित्रेण गृह्यतां शोभनं हरे ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥

विची, स्त्री, (विचि + कृदिकारादिति ङीष् ।) तरङ्गः । इति द्विरूपकोषः ॥

विचेताः, [स्] त्रि, (विगतं विरुद्धं वा चेतो यस्य ।) विगतचित्तः । (यथा, भागवते । ६ । ११ । ६ ।
"एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥")
विरुद्धचित्तः । दुष्टचित्तः ॥ तत्पर्य्यायः । दुर्म्मनाः २ अन्तर्म्मनाः ३ विमनाः ४ । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । ४९ । १७ ।
"ये चास्य सचिवा मन्दाः कर्णसौवलका-
दयः ।
ते तस्य भूयसो दोषान् वर्द्धयन्ति विचेतसः ॥" * ॥
विशिष्टं चेतो यस्मादिति । विशिष्टज्ञानहेतुभूतः । यथा, ऋग्वेदे । १ । ८३ । १ ।
"तमित् पृणक्षि वसुना भवीयसा
सिन्धुमापो यथाभितो विचेतसः ॥"
"विचेतसः विशिष्टज्ञानहेतुभूता आपो यथा अभितः सर्व्वासु दिक्षु सिन्धुं समुद्रं पूरयन्ति तद्वत् ।" इति तद्भाष्ये सायणः ॥ * ॥ विशिष्टं चेतो यस्येति । विशिष्टज्ञानः । यथा, ऋग्वेदे । १ । ४५ । २ ।
"श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ॥"
"हे अग्ने विचेतसो विशिष्टप्रज्ञाना देवाः ।"
इति तद्भाष्ये सायणः ॥)

विचेष्टितः, त्रि, (विशेषेण चेष्टितं गतिर्यस्य ।) विगतः । (विशेषेण चेष्टितः ।) ईहितः । इति मेदिन्यां चेष्टितशब्दार्थदर्शनात् ॥ (विगतं चेष्टितमस्येति वाक्ये चेष्टाशून्यश्च ॥ * ॥ क्ली, वि + चेष्ट + भावे क्तः । विशेषेण चेष्टा । यथा, भागवते । १ । ५ । १३ ।
"उरुक्रमस्याखिलबन्धमुक्तये
समाधिनानुस्मर तद्विचेष्टितम् ॥")

विच्छ, क त्विषि । इति कविकल्पद्रुमः (चुरा०-पर०-अक०-सेट् ।) क, विच्छयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

विच्छ, श गतौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) विच्छायति विच्छायते आयन्तत्वादुभयमिति वोपदेवः । पक्षे विच्छति । श, विच्छती विच्छन्ती । इति दुर्गादासः ॥

विच्छन्दकः, पुं, ईश्वरसद्मप्रभेदः । इत्यमरः ॥ विशिष्टश्छन्दोऽभिप्रायोऽत्र विच्छन्दकः । किंवा विशिष्टेच्छानिर्म्मितो विच्छन्दकः ष्टधे कादिति कः । एवं लक्षणमुपन्यस्तं सार्व्वेण । यथा,—
"उपर्य्युपरि यद्गेहं तद्विच्छन्दकसंज्ञकम् ॥"
इति भरतः ॥

विच्छर्द्दकः, पुं, विच्छन्दकः । इत्यमरटीकायां रायमुकुटः ॥

विच्छायं, क्ली, पक्षिणां छाया । इत्यमरः ॥ समासे षष्ठ्यन्तात् परा छाया क्लीवे स्यात् । सा चेत् बहूनां सम्बन्धिनी स्यात् । स्वयमुदाहरति । वीनां पक्षिणां छाया विच्छायम् । इत्यमरटीकायां भरतः ॥ (यत्तु भागवते । १० । १२ । ८ ।
"विच्छायाभिः प्रधावन्तो गच्छन्तः साधु
हंसकैः ॥"
इति दृश्यते तत्तु वेः पक्षिणश्छाया विच्छाया तत एकशेषद्वन्द्वे कृते विच्छायाश्चाभिर्विच्छायाभिरिति सिद्धं स्यादिति सुधीभिर्विभाव्यम् ॥ * ॥ विगता छाया यस्य ।) छायारहिते, त्रि ॥ (विगता छाया कान्तिर्यस्य । कान्तिरहिते च त्रि । यथा, भागवते । १ । १४ । २४ ।
"विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः ।
पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितम् ॥")

विच्छायः, पुं, (विशिष्टा छाया कान्तिर्यस्य ।) मणिः । इति यान्तवर्गे छायाशब्दटीकायां भरतः ॥

विच्छित्तिः, स्त्री, (वि + छिद् + क्तिन् ।) अङ्गरागः । विच्छेदः ॥ (यथा, कामन्दकीयनीतिसारे । १४ । ४४ ।
"लोभो धर्म्मक्रियालोपः कर्म्मणामप्रवर्त्तनम् ।
सत्समागमविच्छित्तिरसद्भिः सह वर्त्तनम् ॥")
हारभेदः । इति मेदिनी । ते, १८५ ॥ छेदः । विनाशः । इति त्रिकाण्डशेषः ॥ (यथा, बृहत्संहितायाम् । १२ । ६ ।
"दिनकररथमार्गविच्छित्तयेऽभ्युद्यतं यश्चल-
शृङ्गम् ॥")
अङ्गहारः । गेहावधि । इति हेमचन्द्रः ॥ (वैचित्र्यम् । यथा, साहित्यदर्पणे । १० । ७११ ।
"अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साध-
नात् ॥"
स्त्रीणां स्वाभाविकालङ्कारविशेषः ।) यथा,—
"आकल्पकल्पनाल्पापि विच्छित्तिः कान्तिपोष-
कृत् ॥"
इत्युज्ज्वलनीलमणिः ॥
(यथा च साहित्यदर्पणे । ३ । १३८ ।
"स्तोकाप्याकल्परचना विच्छित्तिः कान्ति-
पोषकृत् ॥")

विच्छिन्नः, त्रि, (वि + छिद् + क्तः ।) समालब्धः । विभक्तः । इति मेदिनी । ने, १३४ ॥ (यथा, शाकुन्तले १ अङ्के ।
"यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदन्तर्व्विच्छिन्नं भवति कृतसन्धानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे पार्श्वे किञ्चित् क्षणमपि न दूरे रथ-
जवात् ॥")
कुटिलः । इति हेमचन्द्रः ॥

विच्छेदः, पुं, (वि+छिद्+घञ् ।) वियोगः । विरहः । भेदः । यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ।
"कान्तायाः कान्तविच्छेदो मरणादतिरिच्यते ॥"
(लोपः । यथा, रघुवंशे । १ । ६६ ।
"नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥")

विच्युतः, त्रि, विगतः । विपूर्व्वच्युधातोः क्तप्रत्ययेन निष्पन्नः । विचरितः । विपूर्व्वच्युतधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते ।८।१२।२१।

विच्युतिः, स्त्री, (वि+च्यु+क्तिन् ।) वियोगः । यथा,—
"सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्व्विण्णमानसः ।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

विज, इर् लि ञ औ वेके । इति कविकल्पद्रुमः ॥ (अदा०-ह्वा०-उभ०-अक०-अनिट् ।) वेक इति विचिर्लि धौ ञ पृथक्के इत्यस्य घञि रूपम् । इर्, अविजत् अवैक्षीत् । लि ञ, वेवेक्ति वेविक्ते मर्त्त्यान् पश्चितः क्षयक् स्वादित्यर्थः । औ, वेक्ता । इति दुर्गादासः ॥

विज, ई ओ ध भीकम्पे । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-अक०-सेट् । अनिड्निष्ठः ।) ई ओ, विग्नः । ध, विनक्ति । इति दुर्गादासः ॥

विज, ङ श ई ओ भीकम्पे । इति कविकल्पद्रुमः ॥ (तुदा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) ङ श, विजते । ई ओ, विग्नः । द्वावर्थौ । इति दुर्गादासः ॥

विजनः, त्रि, (विगतो जनो यस्मात् ।) निर्ज्जनः । तत्पर्य्यायः । विविक्तः २ छन्नः ३ निःशलाकः ४ रहः ५ उपांशु ६ । इत्यमरः ॥ (यथा, महाभारते । १ । १५२ । १५ ।
"ततो भीमो वनं घोरं प्रविश्य विजनं महत् ।
न्यग्रोधं विपुलच्छायं रमणीयं ददर्श ह ॥")

विजननं, क्ली, (वि+जन+ल्युट् ।) प्रसवः । इति हेमचन्द्रः ॥

विजपिलं, क्ली, पङ्कः । यथा,—
"पिच्छलं स्यात् विजपिलं पङ्कः शादो निषद्वरः ॥"
इति हलायुधः ॥

विजन्मा, [न्] त्रि, (विरुद्धं जन्म यस्य ।) जारजः । विरुद्धजन्मविशिष्टः । इति लोकप्रसिद्धः ॥ (पुं, वर्णसङ्करजातिविशेषः । यथा, मनुः । १० । २३ ।
"वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥")

विजयः, पुं, (वि+जि+भावे अच् ।) जयः । इत्यमरः ॥ (यथा, मनौ । १० । ११९ ।
"स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ।
शस्त्रेण वैश्यान् रक्षित्वा धर्म्म्यमाहारयेद्बलिम् ॥")
अर्ज्जुनः । इति मेदिनी । ये, १०३ ॥ (यथा, महाभारते । ४ । ४२ । १७ ।
"अभिप्रयामि संग्रामे यदहं युद्धदुर्म्मदान् ।
नाजित्वा विनिवर्त्तामि तेन मां विजयं विदुः ॥"
यथा च विख्यातविजयनाटके । २ ।
"इतो भीमः क्रूरो नृपतिसहजन्मानमवधीत्
इतः क्रुद्धो वत्सं व्यथयति शरौघैश्च विजयः ।
न मे चेतःस्थैर्य्यं दृढयति सखे कुत्र गमनं
विधेयं तद्ब्रूहि त्वमसि सदसद्वाक्यविषयः ॥")
हत्तार्हत्पिता । जिनबलदेवः । विमानः । इति हेमचन्द्रः ॥ यमः । इति शब्दचन्द्रिका ॥ कल्किपुत्त्रः । यथा,—
"ततः कल्केश्च पद्मायां जयो विजय एव च ।
द्वौ पुत्त्रौ जनयामास लोकख्यातौ महाबलौ ॥"
इति श्रीकल्किपुराणे १३ अध्यायः ॥
भैरववंशीयकल्पराजपुत्त्रः । स काशीराजः खाण्डववनकर्त्ता च । यथा,—
"सुमतेरभवत् कल्पः सुतः सत्यस्य डिण्डिमः ।
विरूपस्याभवद्गाधिर्गाधेर्म्मित्त्रोऽभवत् सुतः ॥
तेषां कल्पोऽभवद्राजा कल्पात्तु विजयोऽभवत् ॥
यो विजित्य क्षितिं सर्व्वां पार्थिवान् भूरितेजसा ।
शक्रस्यानुमते चक्रे खाण्डवं शतयोजनम् ॥
यत् सव्यसाची ह्यदहत् पाण्डुपुत्त्रः प्रतापवान् ।
आवहन् परमां प्रीतिं ज्वलनस्य महात्मनः ॥"
इति कालिकापुराणे भैरववंशानुकीर्त्तनम् ६० अध्यायः ॥ विष्णुचरविशेषः । यथा । विष्णुचराश्चण्डप्रचण्डजयविजयादयः । इति पुंलिङ्गसंग्रहे भरतः ॥

विजयकुञ्जरः, पुं, (विजयाय यः कुञ्जरः ।) राजवाह्यहस्ती । इति त्रिकाण्डशेषः ॥

विजयच्छन्दः, पुं, (विजयस्य छन्दो यस्मात् ।) पञ्चशतमौक्तिकहारः । इति हेमचन्द्रः ॥ (यथा, बृहत्संहितायाम् । ८१ । ३१ ।
"सुरभूषणं लतानां सहस्रमष्टोत्तरं चतुर्हस्तम् ।
इन्द्रच्छन्दो नाम्ना विजयच्छन्दस्तदर्द्धेन ॥")

विजयनन्दनः, पुं, इक्ष्वाकुवंशजराजविशेषः । तत्पर्य्यायः । जयः २ । इति हेमचन्द्रः ॥

विजयमर्द्दलः, पुं, (विजयाय मर्द्दलः ।) ढक्का । इति त्रिकाण्डशेषः ॥ जयढाक इति भाषा ॥

विजया, स्त्री, तिथिविशेषः । सा विजयादशमीति ख्याता । तत्कृत्यं दुर्गाशब्दे द्रष्टव्यम् । उमासखी । इति मेदिनी । ये, ४० ॥ सा तु गौतमकन्या । यथा,—
"समागतां सतीं दृष्ट्वा जयामेकात्सुवाच ह ।
किमर्थं विजया नागाज्जयन्ती चापराजिता ॥
सा देव्या वचनं श्रुत्वा उवाच परमेश्वरीम् ।
गता निमन्त्रिताः सर्व्वा मखे मातामहस्य ताः ॥
समं पित्रा गौतमेन मात्रा चाप्यहल्यया ॥"
इति वामनपुराणे ४ अध्यायः ॥
कालिकापुराणे १७ अध्यायेऽप्येवम् ॥*॥ विश्वामित्त्रोपासितविद्याविशेषः । यथा,—
"विद्यामथैनं विजयां जयाञ्च
रक्षोगणं क्षिप्नुमविघ्नतात्मा ।
अध्यापिपत् गाधिसुतो यथाव-
न्निघातयिष्यन् युधि यातुधानान् ॥"
इति भट्टिः । २ । २१ ॥*॥
दुर्गा । इति हेमचन्द्रः ॥ तथा च ।
"विजित्य पद्मनामानं दैत्यराजं महाबलम् ।
विजया तेन सा देवी लोके चैवापराजिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥*॥
यमभार्य्या । हरीतकी । इति जटाधरः ॥ वचा । इति रत्नमाला ॥ जयन्ती । शेफालिका । मञ्जिष्ठा । शमीभेदः । अग्निमन्थः । इति राजनिर्घण्टः ॥ मादकद्रव्यविशेषः । भाङ् इति सिद्धि इति च भाषा । तत्पर्य्यायः । त्रैलोक्यविजया २ भङ्गा ३ इन्द्राशनम् ४ जया ५ । इति शब्दचन्द्रिका ॥ वीरपत्त्रा ६ गञ्जा ७ चपला ८ अजया ९ आनन्दा १० हर्षिणी ११ । अस्या गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । तिक्तत्वम् । वातकफापहत्वम् । संग्राहित्वम् । वाक्प्रदत्वम् । बल्यत्वम् । मेधाकारित्वम् । श्रेष्ठदीपनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"भङ्गा गञ्जा मातुलानी मादिनी विजया जया ।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोहमदवाग्वह्निवर्द्धिनी ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"शक्राशनं तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनम् ।
बलमेधाग्निकृत् श्लेष्मदोषहारि रसायनम् ॥
जाता मन्दरमन्थनाज्जलनिधौ पीयूषरूपा पुरा
त्रैलोक्ये विजयप्रदेति विजया श्रीदेवराजप्रिया ।
लोकानां हितकाम्यया क्षितितले प्राप्ता नरैः कामदा
सर्व्वातङ्कविनाशहर्षजननी यैः सेविता सर्व्वदा ॥"
इति राजवल्लभः ॥*॥
अष्टमहाद्वादश्यन्तर्गतद्वादशीविशेषः । यथा, अथ विजयाव्रतम् । ब्रह्मपुराणे ।
"यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत् ।
तदा सा तु महापुण्या द्वादशी विजया स्मृता ॥
तस्यां स्नातः सर्व्वतीर्थे स्नातो भवति मानवः ।
संपूज्य वर्षपूजायाः सकलं फलमश्नुते ॥
एकजप्यात् सहस्रस्य जप्यस्याप्नोति सत् फलम् ।
दानं सहस्रगुणितं तथा वै विप्रभोजनम् ॥
होमस्तथोपवासश्च सहस्रगुणितो भवेत् ॥"*॥
अथ व्रतविधिः ।
"आदौ गुरुं नमस्कृत्य ततः सङ्कल्पमाचरेत् ।
शरशार्ङ्गधरं देवं सौवर्णं रचयेत्तराम् ॥"
सङ्कल्पमन्त्रः ।
"द्वादश्याहं निराहारः स्थित्वाहमपरेऽहनि ।
भोक्ष्ये त्रिविक्रमानन्त शरणं मे भवाच्युत ॥
सोपवीतन्तु कलसं पूर्व्ववत् स्थापयेद्व्रती ।

पात्रं तदुपरि न्यस्येत्ताम्रं वैणवमेव वा ।
तत्रोपवेश्य संस्नाप्य देवं विशदचन्दनैः ।
आलिप्य शुभ्रं वसनं दद्याच्छत्रञ्च पादुके ।
वासुदेवायेति शिरः श्रीधरायेति वै मुखम् ।
कृष्णायेति च कण्ठं वै वक्षः श्रीपतये इति ।
शस्त्रास्त्रधारिणे बाहू कक्षे च व्यापकाय वै ।
कवीशायोदरं मेढ्रं त्रैलोक्यजननाय च ।
अघमं चार्च्चयेद्विद्वान् सर्व्वाधिपतये इति ।
सर्व्वात्मने इति पदावेवमङ्गानि पूजयेत् ।
शङ्खचक्रगदापद्मशार्ङ्गशरविभूषितम् ।
गृहाणार्घ्यं मया दत्तं शार्ङ्गपाणे ! नमोऽस्तु ते ।
इत्यर्घ्यं पूर्व्ववत् कृत्वा धूपदीपौ समर्प्य च ।
घृतपक्वप्रधानानि नैवेद्यानि निवेदयेत् ।
ताम्बूलादीनि दत्त्वाथ कृत्वा जागरणं निशि ।
प्रातःस्नात्वार्च्चयित्वेशं पुष्पाञ्जलिमथार्च्चयेत् ।
नमस्ते अस्तु गोविन्द बुध श्रवणसंज्ञक ।
अघौघं संक्षयं कृत्वा सर्व्वसौख्यप्रदो भव ।
इति प्रार्थ्य ततः सर्व्वं दत्त्वा चार्घ्यं प्रतोष्य

च ।

शक्त्या विप्रान् भोजयित्वा सुखं पारणमाचरेत् ।
भाद्रे मासि बुधस्याह्नि यदि स्याद्विजयाव्रतम् ।
तदा सर्व्वव्रतेभ्योऽस्य माहात्म्यमतिरिच्यते ।"

इति श्रीहरिभक्तिविलासे १३ विलासः ।

(सहदेवपत्नी । यथा, महाभारते ।१।९५।८०।
"सहदेवोऽपि माद्रीमेव स्वयंवरे विजयां नामोपयेमे मद्रराजस्य द्युतिमतो दुहितरं तस्यां पुत्रमजनयत् सुहोत्रं नाम ।"*।
पुरुवंशीयभूमन्योः पत्नी । यथा, तत्रैव । १ । ९५ । ३३ ।
"भूमन्युः खलु दाशार्हीमुपयेमे विजयां नाम तस्यामस्य जज्ञे सुहोत्रः ।")

विजयासप्तमी, (विजयाख्या सप्तमी ।) रविवारे शुक्लपक्षीया सप्तमी । यथा,—
"शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत् ।
सप्तमी विजया नाम तत्र दत्तं महाफलम् ।"

इति तिथ्यादितत्त्वम् । * ।

अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सासितूणधनुर्व्वाणपाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं शमीवृक्षतलं नयेत् ।
सीताकान्तं शमीयुक्तं भक्तानामभयङ्करम् ।
अर्च्चयित्वा शमीवृक्षमर्च्चयेद्विजयाप्तये ।"
तत्र मन्त्रः ।
"शमी शमयते पापं शमी लोहितकण्टका ।
धरित्र्यर्ज्जुनबाणानां रामस्य प्रियवादिनी ।
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ।
गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ।
केचिद्दधेस्तत्र भाव्यं केचिद्गायन्ति वानरैः ।
केचिद्दन्तसुखैर्भाव्यं कोशलेन्द्रस्य तुष्टये ।
निर्ज्जिता राक्षसा दैत्या वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ।
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवद्भुवि ।
महाप्रसादवस्त्रादि धारयेद्वैष्णवैः सह ।
इति श्रीविष्णुधर्म्मोक्तानुसारेण यथेच्छयम् ।
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ।
सीता दृष्टेति हनुमद्वाक्यं श्रुत्वाकरोत्प्रभुः ।
विजयं वानरैः सार्द्धं वासरेऽस्मिन् शमीतलात् ।"

इति श्रीहरिभक्तिविलासे १५ विलासः ।

विजयिनं, त्रि, विजितम् । इत्यमरटीकायां रायमुकुटः ।

विजयी, [न्] त्रि, (विशेषेण जेतुं शीलमस्य । वि + जि + "जिदृक्षिविश्रीति ।" ३ । २ ।१५७। इति इनिः ।) जययुक्तः । यथा,—
"वज्रपञ्जरनामेदं यो रामकवचं पठेत् ।
स चिरायुः सुखी पुत्री विनयी विजयी भवेत् ।"

इति तन्त्रसारः ।

(पुं, अर्ज्जुनः । यथा,—
"अर्ज्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्व्विजयी कृष्णः सव्यसाची धनञ्जयः ।
एतान्यर्ज्जुननामानि प्रातरुत्थाय यः पठेत् ।
उद्यतेष्वपि शस्त्रेषु हन्ता तस्य न विद्यते ।"

इति सर्व्वजनप्रसिद्धम् ।)

विजयोत्सवः, पुं, (विजयायास्तदुत्सवः ।) आश्विनशुक्लदशमीविहितभगवदुत्सवविशेषः । यथा,
"आश्विनस्य सिते पक्षे दशम्यां विजयोत्सवः ।
कार्य्यो वैष्णवैः सार्द्धं सर्व्वत्र विजयार्थिना ।"
अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सासितूणधनुर्व्वाणपाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं शमीवृक्षतलं नयेत् ।
सीताकान्तं शमीयुक्तं भक्तानामभयङ्करम् ।
अर्च्चयित्वा शमीवृक्षमर्च्चयेद्विजयाप्तये ।"
तत्र मन्त्रः ।
"शमी शमयते पापं शमी लोहितकण्टका ।
धरित्र्यर्ज्जुनबाणानां रामस्य प्रियवादिनी ।
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ।"

इति ।

"गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ।
केचिद्दधेस्तत्र भाव्यं केचित् भाव्यञ्च वानरैः ।
केचिद्दन्तसुखैर्भाव्यं कोशलेन्द्रस्य तुष्टये ।
निर्ज्जिता राक्षसा दैत्या वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ।
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवत् भुवि ।
महाप्रसादवस्त्रादि धारयेत् वैष्णवैः सह ।*।
इति श्रीविष्णुधर्म्मोक्तानुसारेण यथेच्छयम् ।
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ।
सीता दृष्टेति हनुमद्वाक्यं श्रुत्वाकरोत् प्रभुः ।
विजयं वानरैः सार्द्धं वासरेऽस्मिन् शमीतलात् ।"

इति श्रीहरिभक्तिविलासे १५ विलासः ।

विजरः, त्रि, जरारहितः । विगता जरा यस्येति बहुव्रीहिसमासनिष्पन्नः । (यथा, कथासरित्सागरे । ४९ । ११ ।
"यः सर्व्वौषधियुक्तिज्ञश्चक्रे सिद्धरसायनः ।
आत्मानं तच्च राजानं विजरं चिरजीवितम् ।")

विजलं, त्रि, विजिलम् । इति हेमचन्द्रः । (विगतं जलं यस्मात् ।) निर्जलञ्च । (यथा, बृहत्संहितायाम् । १६ । २० ।
"नष्टर्कचन्द्रकिरणातिरजोऽन्नगह्वा
तोयाशयाश्च विजलाः सरितोऽपि तन्व्यः ।")

विजल्पः, पुं, (विशेषेण जल्पनमिति । वि + जल्प + घञ् ।) वाक्यविशेषः । यथा,—
"अव्यक्तासूयया गूढ़मानमुद्रान्तरालया ।
अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः ।"

इत्युज्ज्वलनीलमणिः ।

विजातः, त्रि, (विरुद्धं जातं जन्म यस्य ।) विजन्मा । इति लोकप्रसिद्धः ।

विजाता, स्त्री, (विशेषेण जातः पुत्रो यस्याः ।) जातापत्या । यथा,—
"विजाता च प्रजाता च जातापत्या प्रसूतिका ।"

इति हेमचन्द्रः ।

विजातीयः, त्रि, (विभिन्नां जातिमर्हतीति । विजाति + छः ।) विभिन्नधर्म्माक्रान्तः । यथा,
"प्रायश्चित्ताद्विजातीयात् तादृक्पापविनाशनम् ।"

इति प्रायश्चित्ततत्त्वम् ।

(यथा च साहित्यदर्पणे ७ परिच्छेदे ।
"एवं पददोषसजातीया वाक्ये दोषा उक्ताः सम्प्रति तद्विजातीया उच्यन्ते ।") विशेषजातिविशिष्टः । यथा,—
"प्रवाहो नादिमानेव न विजात्येकशक्तिमान्
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ।"
एष कार्य्यकारणप्रवाहो नादिमान् अनादिः । विजातीयेषु तृणादिषु एकशक्तिमान् न प्रवाहः । अन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे नियतात्वनिर्व्वाहे यत्नवता भाव्यं यत्नः करणीयः वैजात्यमिति भावः । वह्निसामान्यं प्रति विजातीयोष्णस्पर्शवत्त्वेन एव कारणम् । इति हरिदासीयकुसुमाञ्जलिटीका ।

विजिगीषः, त्रि, (विजिगीषा अस्यस्येति । अर्श आदित्वादच् ।) जयेच्छुः । इति सिद्धान्तकौमुदी ।

विजिगीषा, स्त्री, (विजेतुमिच्छा । वि + जि + सन् + अः । स्त्रियां टाप् ।) स्वोदरपूरणाशक्तिनिमित्तकनिन्द्यात्यागेच्छा । इत्यमरटीकायां

रमानाथः ॥ व्यवहारः । कश्चित् प्रकर्षः । इति तत्रैव भरतः ॥ विजयेच्छा च ॥ (यथा, कथासरित्सागरे । ३६ । ७१ ।
"दारे विधिमिवान्यं तत्तद्दृष्ट्वा विजिगीषया । आगतं पुरुषं कश्चिद्ददर्शाश्चर्य्यदायकम् ॥")

विजिगीषाविवर्ज्जितः, त्रि, (विजिगीषया विवर्ज्जितः ।) केवलमुदराधीनः । तत्पर्य्यायः । आद्यूनः २ औदरिकः ३ । इत्यमरः ॥ विजिगीषा व्यवहारः कश्चित् प्रकर्षो वा तेन विवर्ज्जितो विहीनो यः केवलमुदराधीनः तत्र द्वाविमौ वर्त्तेते इत्यर्थः । जिगीषा जेतुमिच्छायां व्यवहारप्रकर्षयोः । इति मेदिनी ॥ तत्र स्वोदरपूरणाशक्तिनिमित्तकनिन्दात्यागेच्छा विजिगीषा तया रहिते द्वयमिति रमानाथः । इति तट्टीकायां भरतः ॥

विजिगीषुः, त्रि, (विजेतुमिच्छुः । वि + जि + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) जयेच्छाशीलः । यथा,—
"जेतुमेषणशीलश्च विजिगीषुरिति स्मृतः ॥"
इति शब्दमाला ॥
(यथा, कामन्दकीयनीतिसारे । ८ । ३ ।
"रोचते सर्व्वभूतेभ्यः शशीवाखण्डमण्डलः । सम्पूर्णमण्डलस्तस्माद्विजिगीषुः सदा भवेत् ॥")

विजितः, त्रि, (विशेषेण जितः ।) पराजितः । यथा,—
"पथ्याशिनां शीलवतां नराणां
सद्वृत्तिभाजां विजितेन्द्रियाणाम् ।
एवं विधानामिदमायुरत्र
चिन्त्यं सदा शङ्खमुनिप्रवादः ॥"
इति मलमासतत्त्वम् ॥

विजिता, [ऋ] त्रि, (विज + तृच् ।) पृथक् । भीतः । कम्पितः । इति विजधात्वर्थदर्शनात् ॥

विजितिः, स्त्री, (वि + जि + क्तिन् ।) विजयः । यथा,—
"क्षितिविजितिस्थितिविहितिव्रतरतयः परगतयः ।
उरुरुधुर्गुरु दुधुवुर्युधि कुरवः स्वमरिकुलम् ॥"
इति दण्डी ॥

विजिनं, त्रि, विजिलम् । इत्यमरटीकायां रायमुकुटः ॥

विजिलं, त्रि, ईषत् सरसव्यञ्जनादि । तत्पर्य्यायः । पिच्छिलम् २ । इत्यमरः ॥ विजयिनम् ३ विजिनम् ४ विज्जलम् ५ उज्ज्वलम् ६ लालसीकम् ७ । इति वाचस्पतिः ॥ विजिविलम् ८ विजलम् ९ । इति हेमचन्द्रः ॥
"पाकरूपरसासक्तं व्यञ्जने तु भवेत् त्रयम् ।
तैलपाकसुसंस्कारे प्रायस्तत्सुपसंस्कृतम् ।
पिच्छिलं लालसीकञ्च विजिनं विज्जिलञ्च तत् ॥"
इति शब्दरत्नावली ॥

विजिविलं, त्रि, विजिलम् । इति हेमचन्द्रः ॥

विजिह्मः, त्रि, (विशेषेण जिह्मः ।) वक्रः । कुटिलः । इति केचित् ॥ (यथा, रघुः ।१९।३५।
"शिल्पकार्य्य उभयेन वेजिता-
स्तं विजिह्मनयना व्यलोभयन् ॥")

विजुलः, पुं, शाल्मलीकन्दः । इति राजनिर्घण्टः ॥

विजृम्भणं, क्ली, (वि + जृम्भ + ल्युट् ।) जृम्भणम् । (यथा, सुश्रुते । ५ । २ ।
"निद्रागुरुत्वञ्च विजृम्भणञ्च
विश्लेषहर्षाविषवाङ्गमर्द्दः ॥")
विकसनम् । इति केचित् ॥ (यथा, रघुः । १६ । ४७ ।
"वनेषु सायन्तनमल्लिकानां
विजृम्भणोद्गन्धिषु कुड्मलेषु ॥"
व्यापनम् । सङ्कोचः । यथा, भागवते ।७।५।४९।
"जितं त्वयैकेन जगत्त्रयं भ्रुवो-
र्विजृम्भणत्रस्तसमस्तधिष्ण्यपम् ॥")

विजृम्भितं, क्ली, (वि + जृम्भ + क्तः ।) चेष्टा । इति मेदिनी । ते, २१७ ॥ (यथा, कथासरित्सागरे । ४ । १३ ।
"अथागत्य समाख्यातं तत्सख्या मन्त्रिनन्दनम् ।
उद्गाढ़सुपकोशाया नवानङ्गविजृम्भितम् ॥")

विजृम्भितः, त्रि, (वि + जृम्भ + क्तः ।) विकस्वरः । इति मेदिनी । ते, २१७ ॥ यथा, भागवते । ४ । २१ । ८ ।
"सदादिराजस्य यशो विजृम्भितं
गुणैरशेषैर्गुणवत्सभाजितम् ॥"
व्याप्तः । यथा, रघुः । ७ । ४२ ।
"आवृण्वतो लोचनमार्गमाजौ
रजोऽन्धकारस्य विजृम्भितस्य ॥"*॥
विजृम्भा सञ्जाता अस्येति । तारकादित्वादितच् ।) जृम्भायुक्तश्च ॥ (यथा, हरिवंशे । १८९ । ६ ।
"सशरं सधनुष्कञ्च दृष्ट्वात्मानं विजृम्भितम् ।
ततो ननाद भूतात्मा स्निग्धगम्भीरनिःस्वनः ॥")

विज्जनं, त्रि, विजिलम् । इत्यमरटीकायां रायमुकुटः ॥

विज्जलं, क्ली, वाणम् । यथा,—
"पञ्चवाहो विकर्षोऽथ तीरं विज्जलशायके ।
लोहनालस्तु नाराचः प्रसरः काण्डगोचरः ॥"
इति त्रिकाण्डशेषः ॥
त्रि, विजिलम् । इति हेमचन्द्रः ॥ (यथा, वृहत्संहितायाम् । ५५ । २९ ।
"श्लेष्मातकस्य बीजानि
निष्कुलीकृत्य भावयेत् प्राज्ञः ।
अङ्कोलविज्जलाद्भि-
श्छायायां सप्तकृत्वैवम् ॥")

विज्जिलं, त्रि, विजिलम् । इति शब्दरत्नावली ॥

विज्जुलं, क्ली, त्वचम् । इति राजनिर्घण्टः ॥

विज्जुलिका, स्त्री, जतुका । इति राजनिर्घण्टः ॥

विज्ञः, त्रि, (विशेषेण जानातीति । वि + ज्ञा + "आतश्चोपसर्गे ।" इति कः ।) प्रवीणः । इत्यमरः ॥ (यथा, भागवते । ६ । १६ । ६१ ।
"एवं विपर्य्ययं बुद्ध्वा नृणां विज्ञाभिमानिनाम् ।
आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम् ॥")
अस्य पर्य्यायो निपुणशब्दे द्रष्टव्यः ॥ पण्डितः । इति राजनिर्घण्टः ॥ (यथा, नैषधे । ३ । ८६ ।
"विज्ञेन विज्ञाप्यमिदं नरेन्द्रे
तस्मात्त्वयास्मिन् समयं प्रतीक्ष्य ।
अत्यन्तिकासिद्धिविलम्बसिद्ध्योः
कार्य्यस्य कार्य्यस्य शुभा विभाति ॥")

विज्ञबुद्धिः, स्त्री, जटामांसी । इति शब्दचन्द्रिका ॥

विज्ञातः, त्रि, (वि + ज्ञा + क्तः ।) ख्यातः । इत्यमरः ॥ (विदितः । यथा, हरिवंशे । १६५ । १७ ।
"विज्ञातोऽसि मया चिह्नैर्विना चक्रं जनार्द्दन ॥")

विज्ञानं, क्ली, (वि + ज्ञा + ल्युट् ।) ज्ञानम् । कर्म्म । इति मेदिनी । ने, ११३ ॥ कार्म्मणम् । इति हेमचन्द्रः ॥
"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ॥"
इत्यमरः ॥
"विशेषेण सामान्येन चावबोधो मोक्षो मुक्तिः शिल्पं चित्रादिशास्त्रं व्याकरणादि । मोक्षे शिल्पे शास्त्रे च या धीः सा ज्ञानं विज्ञानञ्चोच्यते एषा विशेषप्रवृत्तिः । अन्यत्र घटपटादौ या धीः सापि ज्ञानं विज्ञानञ्चोच्यते । एषा सामान्यप्रवृत्तिः । मोक्षे धीर्ज्ञानं विज्ञानञ्च यथा । ज्ञानान्मुक्तिरिति । सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति इति । अन्यत्र यथा । ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति । घटत्वप्रकारकज्ञानमिति । ये केचित् प्राणिनो लोके सर्व्वे विज्ञानिनो मता इति । ब्रह्मणो नित्यविज्ञानानन्दरूपत्वात् इति । एवं चित्रज्ञानं व्याकरणज्ञानं घटपटविज्ञानमित्यादिकं प्रयुज्यत एव । तद्विगमे गरुत्मदादिशब्दवत् गरुत्मच्छब्दो हि गरुड़े पक्षिमात्रे च वर्त्तते । मोक्ष इति निमित्तसप्तमी मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते । तन्निमित्ततोऽन्यनिमित्तं या तयोर्धीः सा विज्ञानमिति केचित् । मोक्षविषया मोक्षफला धीर्ज्ञानं अन्यधीर्व्विज्ञानम् । क्वान्यत्र इत्याह शिल्पशास्त्रयोरिति केचित् । अवबोध इत्यध्याहृत्य मोक्षविषयेऽवबोधो धीर्ज्ञानं अन्यत्र घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञानमिति केचित् । जानातेरनट् ज्ञानं विविधं विरूपं वा ज्ञानं विज्ञानम् ।" इत्यमरटीकायां भरतः ॥*॥
तत्तु ब्राह्मणस्य लक्षणविशेषः । यथा,—
"क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मनित्यता ज्ञानमेतद्ब्राह्मणलक्षणम् ॥"
ज्ञानविज्ञानयोर्लक्षणं यथा,—
"चतुर्द्दशानां विद्यानां धारणं हि यथार्थतः ।
विज्ञानमितरं विद्याद्येन धर्म्मो विवर्द्धते ॥
अधीत्य विधिवद्विद्यामर्थञ्चैवोपलभ्य तु ।
धर्म्मकार्य्यान्निवृत्तश्चेन्न तद्विज्ञानमिष्यते ॥
यथा स देवो भगवान् विद्यते यत्र विद्यते ।

साक्षादेव महादेवस्तज्ज्ञानमिति कीर्त्तितम् ॥”
इति कौर्म्मे उपविभागे १४ अध्यायः ॥

विज्ञानपादः, पुं, (विज्ञानमेव पादं लक्ष्यं यस्य ।) वेदव्यासः । इति केचित् ॥

विज्ञानमयकोषः, पुं, (विज्ञानमयस्तदात्मकः कोष इवाच्छादकत्वात् ।) ज्ञानेन्द्रियैः सहिता बुद्धिः । इति वेदान्तसारः ॥

विज्ञानमातृकः, पुं, (विज्ञानं मातेव यस्य । बहुव्रीहौ कप् ।) बुद्धः । इति हेमचन्द्रः ॥

विज्ञानिकः, त्रि, (विज्ञानमस्त्यस्येति । विज्ञान + ठन् ।) ज्ञानविशिष्टः । विज्ञः । इति वैज्ञानिकशब्दटीकायां भरतः ॥

विज्ञापनं, क्ली, (वि + ज्ञा + णिच् + ल्युट् ।) बोधनम् । जानान इति भाषा । विपूर्व्वण्यन्तज्ञाधातोरनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे । ११ । ५८ ।
“तया विज्ञापनायाहं प्रेषितः स्वीकुरुष्व ताम्।
युवयोरस्तु योगोऽयं कौमुदीचन्द्रयोरिव ॥”*॥
स्त्री, वि + ज्ञा + णिच् + युच् । टाप् । विज्ञापना । यथा, रघुः । १७ । ४० ।
“ततः परमभिव्यक्तसौमनस्यनिवेदितैः ।
युयोज पाकाभिमुखैर्भृत्यान् विज्ञापनाफलैः ॥”)

विज्ञप्तिः, स्त्री, (वि + ज्ञा + णिच् + क्तिन् ।) विज्ञापनम् । विपूर्व्वण्यन्तज्ञाधातोः क्तिप्रत्ययेन निष्पन्ना ॥ (विकल्पेन ह्रस्वे विज्ञप्तिरपि ॥)

विज्ञेयं, त्रि, (विज्ञातुं योग्यम् । वि + ज्ञा + “अचो यत् ।” ३ । १ । ९७ । इति यत् । “ईद्यति ।” ६ । ४ । ६५ । इति आत ईत् ।) विज्ञातव्यम् । विज्ञानीयम् । विपूर्व्वज्ञाधातोर्यप्रत्ययेन निष्पन्नम् ॥ (यथा, मनुः । २ । १० ।
“श्रुतिस्तु वेदो विज्ञेयो धर्म्मशास्त्रन्तु वै
स्मृतिः ।”)

विज्ञामरं, क्ली, चक्षुःशुक्लरोगम । इति केचित् ॥

विज्झोली, स्त्री, पङ्क्तिः । इति त्रिकाण्डशेषः ॥

विट, आक्रोशे । स्वने । इति कविकल्पद्रुमः ॥ (भ्वा॰-पर॰-सक॰-स्वने अक॰-सेट् ।) वेटति । आक्रोशः । केचिन्न पठन्ति । स्वनः शब्दः । इति दुर्गादासः ॥

विटः, पुं, (वेटतीति । विट + कः ।) षिड्गः । इत्यमरः ॥ (यथा, भागवते । १० । १३ । २ ।
“सतामयं सारभृतां निसर्गो
यदर्थवाणीश्रुतिचेतसामपि ।
प्रतिक्षणं नव्यवदच्युतस्य यत्
स्त्रिया विटानामिव साधु वार्त्ता ॥”)
कामुकानुचरः । धूर्त्तः । इति भरतः ॥ कामतन्त्रकलाकोविदः । इति रसमञ्जरी ॥ पर्व्वतविशेषः । लवणभेदः । खदिरविशेषः । मूषिकः । इति मेदिनी । टे, २८ ॥ नारङ्गवृक्षः । इति शब्दमाला ॥

विटङ्कः, पुं क्ली, (विशेषेण टङ्क्यते सौधादिषु इति । वि + टकि बन्धने + घञ् ।) कपोतपालिका । पायरार खोप इति भाषा । इत्यमरः ॥ हि सौधादिषु प्रान्ते काष्ठादिरचिते गृहपक्षिस्थाने । कपोतान् पालयतीति कपोतपाली ढात् घण् इति घण् स्वार्थे कः कपोत इत्युपलक्षणं पक्षिमात्रपालिकेति बोध्यम् । वीन् पक्षिणष्टङ्कयति बध्नाति विटङ्कं टकि क बन्धे घञ् विशेषेण टङ्कयत्यत्रेति वा अल् घञ् वा । इति भरतः ॥ (यथा, माघे । ३ । ५५ ।
“रत्नान्तरे यत्र गृहान्तरेषु
वितर्द्दिनिर्यूहविटङ्कनीड़ः ।
रुतानि शृण्वन् वयसां गणोऽन्तेवासित्वमाप स्फुटमङ्गनानाम् ॥”*॥
सुन्दरे, त्रि । यथा, भागवते । ३ । १५ ।२७ ।
“देवावचक्षत गृहीतगदौ परार्द्ध्य-
केयूरकुण्डलकिरीटविटङ्कवेशौ ॥”)

विटङ्ककः, पुं क्ली, (विटङ्क एव । स्वार्थे कन् ।) विटङ्कः । इति शब्दरत्नावली ॥

विटपः, पुं क्ली, (वेटति शब्दायते इति । विट + “विटपपिष्टपविशिपोलपाः ।” उणा॰ ३।१४५ । इति कप्रत्ययेन निपातनात् साधुः ।) शाखापल्लवसमुदायः । तत्पर्य्यायः । विस्तारः २ । इत्यमरः ॥ स्तम्बः ३ । इति मेदिनी । पे, २२ ॥ शाखा । (यथा, रघुः । १० । ११ ।
“बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ।
आविर्भूतमपां मध्ये पारिजातमिवापरम् ॥”)
पल्लवः । इति शब्दरत्नावली ॥ (यथा, ऋतुसंहारे । १ । २४ ।
“तरुविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥”)
क्ली, मुष्कवङ्क्षणान्तरम् । यथा,—
“विटपन्तु मध्यमोऽप्यमन्तरामुष्कवङ्क्षणम् ॥”
इति हेमचन्द्रः ॥
(यथा, सुश्रुते । ३ । ६ ।
“वङ्क्षणवृषणयोरन्तरे विटपं नाम तत्र षाण्ढ्यमल्पशुक्रता वा भवति ॥”)

विटपः, पुं, (विटान् पातीति । पा + कः ।) विटाधिपः । पारदारिकश्रेष्ठः । इति मेदिनी । पे, २२ ॥ आदित्यपत्रः । इति राजनिर्घण्टः ॥

विटपी, [न्] पुं, (विटपः शाखादिरस्त्यस्येति । विटप + इनिः ।) वृक्षः । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ४८६ ।
“यूथपते तव कश्चिन्नहि मानस्यानुरूप इह
विटपी ।
प्रेरय दिनं निदाघक्लान्तः क्व खलु ते छाया ॥”)
वटः । इति राजनिर्घण्टः ॥ (विटपयुक्ते, त्रि । यथा, महाभारते । १ । ४३ । १० ।
“अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम् ।
पलाशिनं शाखिनञ्च तथा विटपिनं पुनः ॥”)

विटप्रियः, पुं, (विटानां प्रियः ।) मुद्गरवृक्षः । इति राजनिर्घण्टः ॥

विटमाक्षिकः, पुं, (विटप्रियो माक्षिकः ।) धातुविशेषः । तत्पर्य्यायः । ताप्यः २ नदीजः ३ कामारिः ४ तारारिः ५ । इति हेमचन्द्रः ॥

विटलवणं, क्ली, (विटसंज्ञकं लवणम् ।) विड्लवणम् । इति केचित् ॥

विटिः, स्त्री, (विटतीति । विट् + इन् । स च कित् ।) पीतचन्दनम् । इति शब्दमाला ॥

विट्, [श्] पुं, (विश् + क्विप् ।) वैश्यः । (यथा, मनुः । २ । ३६ ।
“गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः ॥”)
मनुजः । इत्यमरः ॥ (यथा, रघुः । १ । ९३ ।
“अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक् स्रष्टुः विससर्जोदितश्रियम् ॥”)
प्रवेशः । इति विश्वः ॥

विट्, [ष्] स्त्री, (विष व्याप्तौ + क्विप् ।) विष्ठा । इत्यमरः ॥ कन्या । इति विट्पतिशब्ददर्शनात् ॥ (व्याप्ते, त्रि । यथा, ऋग्वेदे । ८ । १९ । ११ ।
“हव्या वा वेविषद्विषः ।”
“विषः व्याप्तान् देवान् वेविषत् प्रापयेत् ।” इति तद्भाष्ये सायणः ॥)

विट्कारिका, स्त्री, पक्षिविशेषः । तत्पर्य्यायः । कुणपी २ गोराटी ३ गोकिराटिका ४ । इति भूरिप्रयोगः ॥ विट्सारिका ५ । इति हारावली ॥

विट्खदिरः, पुं, (विड्वत् दुर्गन्धः खदिरः ।) विष्ठावद्गन्धखदिरः । गुयेबावला इति भाषा ॥ तत्पर्य्यायः । अरिमेदः २ । इत्यमरः ॥ इरिमेदः ३ अग्निमेदः ४ । इति शब्दरत्नावली ॥ इरिमेदः ५ कालस्कन्धः ६ अरिमेदकः ७ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । मुखदन्तगदास्रकण्डूविषश्लेष्मक्रिमिकुष्ठव्रणग्रहनाशित्वञ्च । इति भावप्रकाशः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ अरिमेदशब्दे द्रष्टव्यौ ॥

विट्चरः, पुं, (विषि विष्ठायां चरतीति । चर + टः ।) ग्राम्यशूकरः । इत्यमरः ॥

विट्पतिः, पुं, (विषः कन्यायाः पतिः ।) जामाता । इति जटाधरः ॥ (यथा, मनुः । ३ । १४८ ।
“मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ॥” * ॥
वैश्यानां पतिः । यथा, भागवते ।४।२३ । ३२ ।
“वैश्यः पठन् विट्पतिः स्यात् शूद्रः सत्तमतामियात् ॥”
“विशां पद्मादीनां वैश्यादीनां वा पतिः स्यात् ।” इति तट्टीका ॥)

विट्सारिका, स्त्री, (विट्प्रिया सारिका ।) पक्षिविशेषः । इति जटाधरः ॥ गुये शालिक् इति भाषा ॥

विठरः, पुं, वाग्मी । इति संक्षिप्तसारोणादिवृत्तिः ॥

विड, आक्रोशे । इति कविकल्पद्रुमः ॥ (भ्वा॰-पर॰-सक॰-सेट् ।) वेडति शत्रुं बली । इति दुर्गादासः ॥

विड़ं, क्ली, (विड् आक्रोशे + इगुपधेति कः ।) लवणविशेषः । विट्लुण इति भाषा । यथा,—
"पाक्यं विड़ञ्च कृतके द्वयम् ।" इत्यमरः ॥ द्वे समुद्रतीरासन्नभवां लवणमृत्तिकां पाचयित्वा निष्पादिते लवणे । विट्लवणे । इति केचित् । कृतके कृत्रिमे । पाक्यविड़्लवणयोर्भेदेऽपि कृतकत्वात् ऐक्यमिति स्वामी । पच्यते इति पाक्यम् । डु पच ष पाके ऋहलोर्ण्यदिति ण्यत् चजोः कु घिण्ण्यतोरिति कः पाकेन निष्पादितमिति ष्यञो वा । वेड़ति भिनत्ति विड़ं विड़ाक्रुशि इगुपधत्वात् कः । इति भरतः ॥ तत्पर्य्यायः । विड़्गन्धम् २ काललवणम् ३ विड़्लवणम् ४ । इति रत्नमाला ॥ द्राविड़कम् ५ खण्डम् ६ कृतकम् ७ क्षारम् ८ आसुरम् ९ सुपाक्यम् १० खण्डलवणम् ११ धूर्त्तम् १२ कृत्रिमकम् १३ । अस्य गुणाः । उष्णत्वम् । दीपनत्वम् । रुच्यत्वम् । वाताजीर्णशूलगुल्ममेहनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"विड़ं सक्षारमूर्द्ध्वाधः कफं वातानुलोमनम् ।
ऊर्द्धं कफमधो वातं सञ्चारयेदिह्यर्थः ।
दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च ।
विबन्धानाहविष्टम्भहृद्गौरवशूलनुत् ॥"
इति भावप्रकाशः ॥

अन्यच्च ।
"विड़ं लवणमुत्क्लेदि वह्नेर्बलविवर्द्धनम् ।
मलवातामविष्टम्भशूलाटोपविबन्धनुत् ।"
इति राजवल्लभः ॥

विड़ङ्गं, क्ली पुं, (विड़ आक्रोशे + "विड़ादिभ्यः कित् ।" उणा० १ । १२० । इति अङ्गच् । सच कित् ।) स्वनामख्यातौषधम् । (यथा, बृहत्संहितायाम् । ५५ । ७ ।
"घृतोशीरतिलक्षौद्रविड़ङ्गक्षीरगोमयैः ।
आमूलस्कन्धलिप्तानां सङ्क्रामणविरोपणम् ॥")
तत्पर्य्यायः । वेल्लम् २ अमोघा ३ चित्रतण्डुला ४ तण्डुलः ५ क्रिमिघ्नः ६ । इत्यमरः ॥ रसायनः ७ पावकः ८ भस्मकम् ९ । इति जटाधरः । वेलुः १० मोघा ११ तण्डुः १२ । इति शब्दरत्नावली ॥ जन्तुघ्नम् १३ चित्रतण्डुलम् १४ क्रिमिघ्नम् १५ क्रिमिशत्रुः १६ गर्द्दभम् १७ केवलम् १८ । इति रत्नमाला ॥ विड़ङ्गा १९ कृमिहा २० चित्रा २१ तण्डुला २२ तण्डुलीयका २३ वातारितण्डुला २४ जन्तुघ्नी २५ मृगगामिनी २६ कैराली २७ गहरा २८ कापाली २९ वरासुः ३० चित्रबीजा ३१ अमुघ्नी ३२ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । लघुत्वम् । वातकफार्त्तिमान्द्यारुचिभ्रान्तिकृमिदोषविनाशित्वञ्च । इति राजनिर्घण्टः ॥ ईषत्तिक्तत्वम् । क्रिमिविषनाशित्वञ्च । इति राजवल्लभः ॥

"विड़ङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु ।
शूलाध्मानोदरश्लेष्मक्रिमिवातविबन्धनुत् ॥"
इति भावप्रकाशः ॥

विड़ङ्गः, त्रि, (विड् + अङ्गच् ।) अभिज्ञः । इति मेदिनी । गे, ४९ ॥

विड़म्बनं, क्ली, (वि + ड़म्ब + ल्युट् ।) अनुकरणम् । यथा,—
"न वेद कश्चिद्भगवंश्चिकीर्षितं
तवेहमानस्य नृणां विड़म्बनम् ।
न यस्य कश्चिद्दयितोऽस्ति कर्हिचि-
द्द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम् ॥"
इति श्रीभागवते । १ । ८ । २९ ॥

प्रतारणम् । यथा, तत्रैव ।
"जन्म कर्म्म च विश्वात्मन्नजस्याकर्त्तुरात्मनः ।
तिर्य्यङ्नृषिषु यादःसु तदत्यन्तविड़म्बनम् ॥" ३० ॥

विड़म्बना, स्त्री, (वि + ड़म्ब + णिच् + युच् । टाप् ।) अनुकरणम् । (यथा, कुमारे । ४ । १२ ।
"असति त्वयि वारुणीमदः
प्रमदानामधुना विड़म्बना ॥")
प्रतारणम् । (यथा, पञ्चतन्त्रे । ४ । ४६ ।
"नो चेदेतेषां सकाशात् विड़म्बनां प्राप्य मरिष्यसि ॥"*॥ परिहासः । यथा, कुमारे । ५ । ७० ।
"इयञ्च तेऽन्या पुरतो विड़म्बना
यदूढ़या वारणराजहार्य्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥")

विड़म्बितः, त्रि, (वि + ड़म्ब + क्तः ।) कृतविड़म्बनः । तत्पर्य्यायः । व्यस्तः २ आकुलः ३ दुर्गतः ४ । इति शब्दमाला ॥ (अनुकृतः । यथा, रघुः । ३ । ५२ ।
"अतिष्ठदालीढ़विशेषशोभिना
वपुःप्रकर्षेण विड़म्बितेश्वरः ॥")

विड़ारकः, पुं, (विड़ाल एव । स्वार्थे कन् । लस्य रः ।) विड़ालः । इति शब्दरत्नावली ॥

वि(बि)ड़ालः, पुं, (विड़ आक्रोशे + "तमिविशिविड़ीति ।" उणा० १ । ११७ । इति कालन् ।) नेत्रपिण्डः । इति मेदिनी । ले, १३३ ॥ नेत्रौषधविशेषः । इति भावप्रकाशः ॥ स्वनामख्यातपशुः । बिल्ली इति हिन्दीभाषा । तत्पर्य्यायः । ओतुः २ मार्ज्जारः ३ वृषदंशकः ४ आखुभुक् ५ । इत्यमरः ॥ विरालः ६ बिलालः ७ । इति तट्टीका ॥ दीप्ताक्षः ८ नक्तञ्चारी ९ जाहकः १० विड़ारकः ११ । इति शब्दरत्नावली ॥ त्रिशङ्कुः १२ जिह्वापः १३ मेनादः १४ शुचकः १५ । इति जटाधरः ॥ भूषिकारातिः १६ शालावृकः १७ मायावी १८ दीप्तलोचनः १९ । इति राजनिर्घण्टः ॥ (यथा, मनुः । ११ । १६० ।
"विड़ालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च ।
केशकीटावपन्नञ्च पिबेद्ब्रह्मसुवर्च्चलाम् ॥")

वि(बि)ड़ालकं, क्ली, हरितालम् । इति हेमचन्द्रः ॥

वि(बि)ड़ालकः, पुं, (विड़ाल एव । स्वार्थे कन् ।) विड़ालः । नेत्ररोगस्य औषधविशेषः । यथा । अथ विड़ालकविधिः ।
"विड़ालको बहिर्लेपो नेत्रे पक्ष्मविवर्ज्जिते ।
तस्य मात्रा परिज्ञेया मुखालेपविधानवत् ॥"

मुखालेपो यथा,—
"अङ्गुलस्य चतुर्थांशो मुखालेपः कनिष्ठकः ।
मध्यमस्तु त्रिभागः स्यादुत्तमोऽर्द्धाङ्गुलो भवेत् ॥
स्थितिकालोऽपि तस्योक्तो यावत् कल्को न शुष्यति ।
तेनापि गुणहीनः स्यात्तथा दूषयति त्वचम् ॥"
स यथा ।
"यष्टिगैरिकसिन्धूत्थदार्व्वीतार्क्ष्यैः समांशकैः ।"
जलपिष्टैर्बहिर्लेपः सर्व्वनेत्रामयापहः ॥"
तार्क्ष्यं रसाञ्जनम् ।
"रसाञ्जनेन वालेयः पथ्याबिल्वदलैरपि ।
वचाहरिद्राविश्वैर्व्वा तथा नागरगैरिकैः ॥
इति भावप्रकाशः ॥

वि(बि)ड़ालपदः, पुं, तोलकद्वयपरिमाणम् । यथ
"तोलौ द्वौ पिचुरक्षश्च सुवर्णकड़षग्रहः ।
विड़ालपदकर्षौ च पाणितलमुदुम्बरम् ॥"
इति शब्दमाला ॥

मार्ज्जारचरणे, क्ली ॥

वि(बि)ड़ालपदकं, क्ली, कर्षपरिमाणम् । इति वैद्यकपरिभाषा ॥

वि(बि)ड़ाली, स्त्री, विदारी । इति राजनिर्घण्टः ॥ (मार्ज्जारी ॥)

विडीनं, क्ली, (वि + डी + क्तः ।) खगगतिविशेषः । यथा,—
"डीनं प्रडीनमुड्डीनं संडीनं परिडीनकम् ।
विडीनमवडीनञ्च निडीनं डीनडीनकम् ॥
गतागतप्रगतितसम्पाताद्याश्च पक्षिणाम् ।
गतिभेदाः पक्षिगृहं कुलायो नीड़मस्त्रियाम् ॥"
इति जटाधरः ॥

विड़ुलः, पुं, वेतसवृक्षः । इति हेमचन्द्रः ॥

विड़ोजाः, [स्] पुं, (विष् व्याप्तौ + क्विप् । विट् व्यापकं ओजो यस्य ।) इन्द्रः । इत्यमरः ॥

विड़ौजाः, [स्] पुं, (विड़ं आक्रोशि शत्रुद्वेषमसहिष्णु ओजो यस्य ।) इन्द्रः । इति भरतीयद्विरूपकोषः ॥ (यथा, रघौ । ३ । ५९ ।
"रघुः शशाङ्कार्द्धमुखेन पत्रिणा
शरासनज्यामलुनाद्बिड़ौजसः ॥")

विड्, [श्] पुं, (विशतीति । विश + क्विप् ।) वैश्यः । यथा विट् विड् विशौ विशः । इति मुग्धबोधव्याकरणम् ॥ (मनुजः । विशांपतिशब्ददर्शनात् ॥)

विड्, [ष्] स्त्री, विष्ठा । इति विड्गन्धादिशब्ददर्शनात् ॥

विड्गन्धं, क्ली, (विड्वत् गन्धो यस्य ।) विड्लवणम् । इति रत्नमाला ॥

विड्जः, त्रि, विष्ठाजातः । विड्शब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नः ॥

विड्लवणं, क्ली, (विड्वत् दुर्गन्धं लवणम् ।) विड़म् । इति रत्नमाला ॥ विट्लुण इति भाषा ॥

विड्वराहः, पुं, (विट्प्रियो वराहः ।) ग्राम्यशूकरः । इति जटाधरः ॥ (यथा, मनुः ५ । १९ ।

"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम् ।
पलाण्डुं गृञ्जनञ्चैव मत्या जग्ध्वा पतेद्द्विजः ॥")

वितंसः, पुं, (वि+तंस+घञ् ।) वीतंसः । मृग-पक्षिणां बन्धनोपकरणम् । इत्यमरटीकायां भरतः ॥

वितण्डा, स्त्री, (वितण्ड्यते विहन्यते परपक्षो-ऽनयेति । वि+तडि+गुरोश्चेत्यः । टाप् ।) स्वपक्षास्थापना परपक्षव्युदासः । इत्यमर-भरतौ ॥ (यथा, महाभारते । २ । ३६ । ३ ।

"एवमेतन्न चाप्येवमेवं चैतन्न चान्यथा ।
प्रत्युचुर्बहवस्तत्र वितण्डां वै परस्परम् ॥")

कच्वीशाकः । शिलाह्वयः । करवीरी । इति मेदिनी । डे, ३६ ॥ दर्व्वी । इति हारावली ॥

विततं, त्रि, (वि+तन्+क्तः ।) विस्तृतम् । (यथा, प्रबोधचन्द्रोदये । ३ । ५ ।

"उद्गायन्ति यशांसि यस्य वितते र्नादैः प्रचण्डा-
निल-
प्रक्षुभ्यत्करिकुम्भकूटकुहरव्यक्तै रणाग्रे
यशः ॥")

वीणादिवाद्यम् । इत्यमरे ततशब्दार्थदर्शनात् ॥

विततिः,स्त्री, विस्तारः । विपूर्व्वतनधातोः क्तिप्रत्ययेन निष्पन्ना ॥ (यथा, भागवते । ६।१०।१५ ।

"वध्नीहि सेतुमिह ते यशसो वितत्यै
गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥")

वितथं, त्रि, मिथ्या । इत्यमरः ॥ (यथा, मनुः । ८ । ६४ ।

"अवाक्शिरास्तमस्यन्धे किल्विषी नरकं
व्रजेत् ।
यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्म्मनिश्चये ॥"

निष्फलः । व्यर्थः । यथा, भागवते । ६।२०।३५ ।

"तस्यैवं वितथे वंशे तदर्थं यजतः सुतम् ।
मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ॥"

पुं, भरद्वाजपुत्त्रः । स च दौष्मन्तेर्भरतस्य पौत्त्रः । यथा, हरिवंशे । ३२ । १८—१६ ।

"ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत् ।
पौत्त्रेऽथ वितथे जाते भरतस्तु दिवं ययौ ॥
वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ ॥")

वितथ्यं, त्रि, असत्यम् । वितथशब्दात् स्वार्थे यत्प्रत्ययेन निष्पन्नम् ॥

वितद्रुः, स्त्री, (वितनोतीति । वि+तन+"जत्वा-दयश्च ।" उणा० ४ । १०२ । इति रुप्रत्ययेन साधुः ।) नदीविशेषः । सा च पञ्जावाख्यदेशे वर्त्तते । इत्युणादिकोषः ॥

वितरणं, क्ली, (वि+तॄ+भावे ल्युट् ।) दानम् । इत्यमरः ॥ (यथाह कश्चित् ।

"वित्तेन किं वितरणं यदि नास्ति तस्य ॥")

वितर्कः, पुं, (वि+तर्क+घञ् ।) ऊहः । (यथा, भागवते । १० । ८६ । १ ।

"सरस्वत्यास्तटे राजन् ऋषयः सत्रमासत ।
वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥")

संशयः । इति मेदिनी । के, १५७ ॥ (यथा, महाभारते । १ । १६० । २३ ।

"यौ तौ कुमाराविव कार्त्तिकेयौ
द्वावश्विनेयाविति मे वितर्कः ॥")

ज्ञानस्फुरकः । इति शब्दरत्नावली ॥ * ॥ आहो उताहो किमुत किं किमु उत एते षट् विकल्पवितर्कार्थे । यथा स्थाणुराहो पुरुषः । इति आहो इत्यादि च । विकल्पे विस्मयेऽप्यहो इति रुद्रः । किमु इत्यन्तं उत इत्यादि । चकारात् उताहोस्वित् आहोस्विदिति च यथा भारते । "उताहोस्विन्नवेदाणा नलः परपुरञ्जयः ।" इति आहोस्विन्मुखमिति भारवौ । इति भरतः ॥

वितर्कणं, क्ली, (वि+तर्क+ल्युट् ।) वितर्कः । इति शब्दरत्नावली ॥

वित(र्द्दि)र्द्दिः, स्त्री, (वि+तर्द्द हिंसायाम्+"सर्व्व-धातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) वेदिका । इत्यमरः ॥ (यथा, माघे । ३।५५ ।

"रतान्तरे यत्र गृहान्तरेषु
वितर्द्दिनिर्य्यूहविटङ्कनीड़ः ॥")

वित(र्द्दि)र्द्दिका, स्त्री, (वितर्द्दिरेव । स्वार्थे कन् ।) वेदिका । इति शब्दरत्नावली ॥ (यथा, राज-तरङ्गिण्याम् । ८ । २६८५ ।

"क्षेमराजाभिधानेन डामरेशेन सोऽन्वितः ।
शिलां वितर्द्दिकातुल्यामध्यास्त स्वप्रमथ्यगाम् ॥")

वितर्द्दी, स्त्री, (वितर्द्दि+कृदिकारादिति ङीष् ।) वेदिका । इति शब्दरत्नावली ॥

वितर्द्धी, स्त्री, वेदिका । इत्यमरटीकायां भरतः ।

वितलं, क्ली, (विशेषेण तलम् ।) पातालभेदः ॥ यथा,—

"अतलं नितलञ्चैव वितलञ्च गभस्तिमत् ।
तलं सुतलपातालं पाताला हि तु सप्त वै ॥"
इति शब्दरत्नावली ॥

(अस्य विवरणं यथा, देवीभागवते । ८ । १६ । ८—१२ ।

"द्वितीयविवरस्यात्र वितलस्य निबोधत ।
भूतलाधस्तले चैव वितले भगवान् भवः ॥
हाटकेश्वरनामायं स्वपार्षदगणैर्वृतः ।
प्रजापतिकृतस्यापि सर्गस्य वृंहणाय च ॥
भवान्या मिथुनीभूय आस्ते देवाधिपूजितः ।
भवयोर्वीर्य्यसंभूता हाटकी सरिदुत्तमा ॥
समिद्धो मरुता वह्निरोजसा पिबतीव हि ।
तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं दैत्यवल्लभम् ॥
दैत्याङ्गनाभूषणार्थं सदा सन्धारयन्ति हि ॥")

वितस्तिः, पुं स्त्री, (वि+तसु उपक्षेपे+"वौ तसेः ।" उणा० ४ । १८१ । इति तिः ।) विस्तृतसकनिष्ठाङ्गुष्ठः । विगत् इति भाषा ॥ तत्पर्य्यायः । द्वादशाङ्गुलः २ । इत्यमरः ॥ (यथा, मार्कण्डेये । ४६ । ३६ ।

"द्वे वितस्ती तथा हस्तो ब्राह्मतीर्थादिवेष्टनम् ॥")

वितानं, क्ली, (वितन्यते यत् । वि+तन+घञ् ।) वृत्तिविशेषः । इति मेदिनी । ने, १३९ ॥ अव-सरः । इति विश्वः ॥

वितानः, पुं क्ली, (वि+तन्+घञ् ।) क्रतुः । (यथा, माघे । १४ । १० ।

"सोमपायिनि भविष्यते मया
वाञ्छितोत्तमवितानयाजिना ॥")

विस्तारः । (यथा, भागवते । ३ । ७ । ३१ ।

"यज्ञस्य च वितानानि योगस्य च पथं प्रभो ।
नैष्कर्म्म्यस्य च साङ्ख्यस्य तन्त्रं वा भगवत्-
स्मृतम् ॥")

उल्लोचः । इत्यमरः ॥ चाँदोया इति भाषा । अस्य पर्य्यायश्चन्द्रातपशब्दे द्रष्टव्यः ॥ (यथा, रघुः । १७ । २८ ।

"वितानसहितं तत्र भेजे पैतृकमासनम् ।
चूड़ामणिभिरुद्घृष्टपादपीठं महीक्षिताम् ॥"

समूहः । यथा, माघे । ११ । ४३ ।

"नवकनकपिशङ्गं वासराणां विधातुः
ककुभि कुलिशपाणेर्भाति भासां वितानम् ॥"

शय्याबन्धनविशेषः । यथा, सुश्रुते । १ । १८ ।

"तत्र कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डल-स्थगिकायमकखट्टाचीनविबन्धवितानगोफणाः पञ्चाङ्गी चेति चतुर्द्दशबन्धविशेषाः ॥")

वितानः, त्रि, (वि+तन+घञ् ।) तुच्छः । (यथा, रघुः । ६ । ५० ।

"गगनमश्वखुरोद्धतरेणुभि-
र्नृसविता स वितानमिवाकरोत् ॥")

मन्दः । इत्यमरः ॥ शून्यः । इति धरणिः ॥ (यथा, माघे । ३ । ५० ।

"हरिन्मणिश्यामतृणाभिरामैर्…"

वित्तं, क्ली, (विद + क्तः । "वित्तो भोगप्रत्यययोः ।" ८ । २ । ५८ । इति साधुः ।) धनम् । इत्यमरः ॥ (यथा, मनुः । ८ । ३६ ।
"अनृतन्तु वदन् दण्ड्यः स्ववित्तस्यांशमष्टमम् ।
तस्यैव वा निधानस्य संख्यायाल्पीयसीं कलाम् ॥")

वित्तः, त्रि, (विद् + क्तः । "नुदविदेति ।" ८ । २ । ५६ । इति पक्षे नत्वाभावः ।) विचारितः । विख्यातः । इत्यमरः । लब्धः । इति तट्टीकायां रायमुकुटः ॥ (विख्यातः । अत्र वित्तो भोगप्रत्यययोः इति साधुः । यथा च पाणिनिः । "तेन वित्तश्चुञ्चुपचणपौ ।" ५ । २ । २६ ॥)

वित्तदः, त्रि, धनदाता । वित्तं ददाति य इत्यर्थे कप्रत्ययेन निष्पन्नः ॥

वित्तिः, स्त्री, (विद् + क्तिन् ।) विचारः । लाभः । (यथा, वाजसनेयसंहितायाम् । १८ । १४ ।
"मे वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ।") सम्भावना । इति मेदिनी । ते, ५६ ॥ ज्ञानम् । इति हेमचन्द्रः ॥

वित्तेशः, पुं, (वित्तानामीशः ।) कुवेरः । यथा,—
"त्वं ब्रह्मा हरिहरसंज्ञितस्त्वमिन्द्रो
वित्तेशः पितृपतिरम्बुपः समीरः ।
सोमोऽग्निर्गगनमहीधरोऽब्धिरूपः
किन्त्वयं सकलतरस्वरूपधाम्नः ।"
इति मार्कण्डेयपुराणे । १०४ । ३७ ॥

वित्रस्तः, त्रि, त्रासयुक्तः । विपूर्व्वत्रसधातोः क्तप्रत्ययेन निष्पन्नः ॥

वित्रासः, पुं, भयम् । विपूर्व्वत्रसधातोर्भावे घञ्प्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । १० । ५० । १६ ।
"ततोऽभूत् परसैन्यानां हृदि वित्रासवेपथुः ॥")

वित्सनः पुं, वृषभः । इति शब्दचन्द्रिका ॥

विथ, ऋ ङ याचे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-द्विक०-सेट् ।) वेथते । इति दुर्गादासः ॥

विथुरः, पुं, (व्यथते इति । व्यथ भयचलनयोः । "व्यथेः संप्रसारणं किच्च ।" उणा० १ । ४० । इति उरच् । स च कित् सम्प्रसारणञ्च धातोः ।) चौरः । राक्षसः । इत्युणादिकोषः ॥ (स्त्री, भर्तृवियुक्ता नारी । यथा, ऋग्वेदे ।१।८७।३।
"प्रैषामज्मेषु विथुरेव रेजते भूमिः ॥
"विथुरेव यथा भर्त्रा वियुक्ता जाया राजोपद्रवादिषु सत्सु निरालम्बा सती कम्पते तद्वत् ।" इति तद्भाष्ये सायणः ॥)

विथ्या, स्त्री, गोजिह्वा । इति शब्दचन्द्रिका ॥

विद, ऌ प श ञौ लाभे । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-अनिट् ।) ऌ, अविदत् । प श ञ, विन्दति विन्दते । औ, वेत्ता । इति दुर्गादासः ॥

विद, क ङ ञ चेतनाख्याननिवासवादे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-उभ०-च-सक०-वासे स्थैर्य्ये च अक०-सेट् ।) चेतना ज्ञानम् । वादः स्थैर्य्यम् । क ङ, वेदयते शास्त्रं धीरः जानातीत्यर्थः । वेदयते स्वार्थं लोकः आख्यातीत्यर्थः । वेदयते तीर्थे साधुर्वसतीत्यर्थः । वेदयते वृक्षः स्थिरः स्यादित्यर्थः । ञ, वेदयति वेदयते । केचित्तु वादं न पठन्ति । चेतनाख्याने वेदनेति पठित्वा वेदयते दुःखं व्यथते इत्यर्थः । इत्युदाहरन्ति । अस्माच्च परस्मैपदमन्यमाना जिनां सप्रश्नेन निवेदयिष्यत इति निवेदनं करोतीत्यर्थे ण्यौ समादधते । इति दुर्गादासः ॥

विद, ङ घौ मीमांसे । इति कविकल्पद्रुमः ॥ (रुधा०-आत्म०-सक०-अनिट् ।) मीमांसो विचारणम् । ङ घ, विन्ते शास्त्रं धीरः । औ, वेत्ता । इति दुर्गादासः ॥

विद, य ङ औ भावे । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-अनिट् ।) भावः सत्ता स चेह विद्यमानतैव । य ङ, विद्यते विष्णुः । औ, वेत्ता । इति दुर्गादासः ॥

विद, ल मतौ । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-सेट् ।) ल, वेत्ति । इति दुर्गादासः ॥

विदंशः, पुं, (वि + दंश + घञ् ।) अवदंशः । इति राजनिर्घण्टः ॥

विदः, पुं, पण्डितः । विदधातोः कर्त्तरि कप्रत्ययेन निष्पन्नः ॥

विदग्धः, त्रि, (वि + दह + क्तः ।) नागरः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । ९ ।
"विदग्धाया विदग्धेन सङ्गमो गुणवान् भवेत् ॥")
निपुणः । इति त्रिकाण्डशेषः ॥ (यथा आर्य्यासप्तशत्याम् । ५०६ ।
"जिघ्नं न सुखं नाङ्गं न पचतौ चरणाः परागेण ।
अस्पृशतैव नलिन्या विदग्धमधुपेन मधु पीतम् ॥")
पण्डितः । इति शब्दरत्नावली ॥ (विशेषेण दग्धः । यथा, सुश्रुते । ४ । १ ।
"शोफयोरुपनाहन्तु कुर्य्यादामविदग्धयोः ।
अविदग्धः शमं याति विदग्धः पाकमेति च ॥")

विदग्धता, स्त्री, विदग्धत्वम् । विदग्धस्य भाव इत्यर्थे तप्रत्ययेन निष्पन्ना ॥

विदग्धा, स्त्री, (विदग्ध + टाप् ।) परकीयान्तर्गतनायिकाभेदः । यथा । गुप्ताविदग्धालक्षिताकुलटानुशयानामुदिताप्रभृतीनां परकीयायामेवान्तर्भावः । अस्या लक्षणम् । वाक्कौशलयुक्तत्वम् । सा च द्विविधा । वाग्विदग्धा क्रियाविदग्धा च । प्रथमा यथा,—
"निविड़तमतमालमञ्जुवल्ली-
विचकिलराजिविराजितोपकण्ठे ।
पथिकसमुचितस्तवाद्य तस्मिन्
सवितरि तत्र सरित्तटे निवासः ॥"
द्वितीया यथा,—
"दासाय भवननाथे बदरीमपनेतुमादिशति ।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति ॥"
इति रसमञ्जरी ॥

विदथः, पुं, (वेत्तीति । विद + "रुविदिभ्यां ङित् ।" उणा० ३ । ११६ । इति अथः । स च ङित् ।) योगी । कृती । इति मेदिनी । थे, २४ ॥ (यज्ञः । इति निघण्टुः । ३ । १७ । "विद ज्ञाने विद विचारणे विद्लृ लाभे विद सत्तायाम् । 'रुदिविदिभ्यां ङित् ।' इति अथप्रत्ययः । ज्ञायते हि यज्ञः । लभते हि दक्षिणादिरत्र । विचार्य्यते हि विद्वद्भिः । भावयत्यनेन फलम् ॥" इति तत्र देवराजयज्वा ॥ * ॥ वेदितव्ये, त्रि । यथा, ऋग्वेदे । ३ । २७ । ७ ।
"होता देवो अमर्त्यः पुरस्तादेति मायया ।
विदथानि प्रचोदयन् ॥")

विदन्, [त्] त्रि, पण्डितः । विदधातोः शतृप्रत्ययेन निष्पन्नः ॥

विदरं, क्ली, (विदीर्य्यतीति । वि + दॄ + अच् ।) विश्वसारकम् । इति शब्दचन्द्रिका । फणीमनसा इति भाषा ॥ (विदीर्णे, त्रि । यथा, कामन्दकीये नीतिसारे । १६ । १० ।
'अल्पवृक्षोपला च्छिद्रा लतिका विदरा स्थिरा ।
निःशर्करा च निःपङ्का सापसारा च वारिभूः ॥')

विदरः, पुं, (वि + दॄ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) विदरणम् । फाटन इति चेरण इति च भाषा । तत्पर्य्यायः । स्फुटनम् २ भिदा ३ । इत्यमरः ॥ दारणम् ४ विदारणम् ५ । इति शब्दरत्नावली ॥

विदर्भः, पुं, स्त्री, (विगता दर्भाः कुशा यत्र ।) कुण्डिननगरम् । इति हेमचन्द्रः ॥ स तु वङ्गदेशस्य दक्षिणपश्चिमे वर्त्तते अधुना वड़नागपुर इति ख्यातः । * । यथा, पूर्ब्बनैषधे २ सर्गः ।
"स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः ।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥"
(यथा च रघुः । ५ । ६० ।
"एको ययौ चैत्ररथप्रदेशान्
सौराज्यरम्यानपरो विदर्भान् ॥"* ॥
पुं, नृपविशेषः । स च ज्यामघात् शैब्यायां जातः । अस्य कुशक्रथलोमपादाः पुत्त्राः । यथा, भागवते । ९ । २४ । १ ।
"तस्यां विदर्भोऽजनयत् पुत्त्रौ नाम्ना कुशक्रथौ ।
तृतीयं रोमपादञ्च विदर्भकुलनन्दनम् ॥"
अस्य नाम्नैव विदर्भनगरी समुत्पन्ना ॥ मुनिविशेषः । यथा, हरिवंशे । १६६ । ८४ ।
"द्वैपायनो विदर्भश्च जैमिनिर्माठरः कठः ॥")

विदर्भजा, स्त्री, (विदर्भे जायते इति । जन + डः ।) अगस्त्यपत्नी । तत्पर्य्यायः । कौशीतकी २ लोपामुद्रा ३ । इति त्रिकाण्डशेषः ॥ दमयन्ती । यथा, पूर्ब्बनैषधे २ सर्गः ।
"धृतलाञ्छनगोमयाञ्चनं
विधुमालेपनपाण्डरं विधिः ।

भ्रमयत्युचितं विदर्भजा-

ननतीराजनवर्द्धमानकम् ॥”

रुक्मिणी च ॥

विदर्भराजः, पुं, (विदर्भानां राजा । “राजाहःसखिभ्यष्टच् ।” इति टच् ।) विदर्भदेशाधिपतिः । तस्य नामान्तरं भीमराजः । यथा,—

“अरोपलम्भोऽपि भ्रमं न स प्रभु-

र्विदर्भराजं तनयामयाचत ।

त्यजन्त्यसून् शर्म्म च मानिनो वरं

त्यजन्ति न त्वेकमयाचितव्रतम् ॥

इति पूर्व्वनैषधे । १ । ५० ॥

विदर्भसुभ्रूः, स्त्री, (विदर्भस्य सुभ्रू रमणी ।) दमयन्ती । यथा,—

“विदर्भसुभ्रूस्तनतुङ्गताप्तये

घटानिवापश्यदलं तपस्यतः ।

फलानि धूमस्य धयानधोमुखान्

स दाडिमे दोहदधूपिनि द्रुमे ॥”

इति पूर्व्वनैषधे १ सर्गः ॥

विदर्भाधिपतिः, पुं, (विदर्भाणामधिपतिः ।) कुण्डिनपतिः । स च भीष्मकराजः रुक्मिणीपिता च । यथा,—

“तं वै विदर्भाधिपतिः समभ्येत्याभिवाद्य च ।

निवेशयामास मुदा कल्पितान्यनिवेशने ॥”

इति श्रीभागवतीयदशमस्कन्धे ५३ अध्यायः ॥

विदलं, क्ली, (विघट्टितं दलं यस्य ।) द्विधाकृतकलायादि । दालि इति भाषा । स्वर्णादेरवयवः । दाडिमकल्कः । वंशादिकृतपात्रविशेषः । इति क्लीवलिङ्गसंग्रहे अमरभरतौ ॥

विदलः, पुं, (विघट्टितानि दलानि यस्य ।) रक्तकाञ्चनः । इति शब्दरत्नावली ॥ पिष्टकः । इति शब्दचन्द्रिका ॥

विदला, स्त्री, (विघट्टितानि दलानि यस्याः ।) त्रिवृत् । इति राजनिर्घण्टः ॥ पञ्चमुन्या । यथा,

“विशीर्णा विदला ह्रस्वा वक्रा स्थूला द्विधाकृता ।

कृमिदष्टा च दीर्घा च समिधो नैव कारयेत् ॥”

इति तन्त्रम् ॥

विदा, स्त्री, (विद ज्ञाने + “षिद्भिदादिभ्योऽङ् ।” ३ । ३ । १०४ । इत्यङ् । टाप् ।) ज्ञानम् । बुद्धिः । इति मेदिनी । दे, १४ ॥

विदायः, पुं, (विगतो दायः साक्षात्करणादिरूपकर्म्म येन ।) गमनानुमतिः । यथा,—

“क्षणं वा चम्पकवनं गच्छ वा तिष्ठ सुन्दरि ।

क्षणं गृहञ्च यास्यामि विशिष्टं कार्य्यमस्ति मे ।

विदायं देहि संप्रीत्या क्षणं मे प्राणवल्लभे ॥”

इति ब्रह्मवैवर्त्ते जन्मखण्डे श्रीराधां प्रति श्रीकृष्णवाक्यम् ॥

विदारः, पुं, (वि + दॄ + घञ् ।) जलोच्छ्वासः । विदारणम् । इति मेदिनी । रे, ११६ ॥ युद्धम् । इति हेमचन्द्रः ॥

विदारकं, क्ली, (विदारयतीति । वि + दॄ + ण्वुल् ।) वचग्वारम् । इति राजनिर्घण्टः ॥

विदारकः, पुं, (विदारयति जलयानादीनिति । वि + दॄ + ण्वुल् ।) जलमध्यस्थिततरुशिलादिः । तत्पर्य्यायः । कूपकः २ । इत्यमरः ॥ जलवन्धकः । इति शब्दरत्नावली ॥ शुष्कनद्यादौ जलावस्थानार्थं गर्त्तः । इति सर्व्वधरः ॥ अतएव कूपा इव कूपकाः । कुत्सिताश्च कूपा इति वा । विदारयन्तीति विदारकाः । जलान्तर्गतास्तरुशिलादयोऽत्रानाक्षोकादिविदारकाः कूपकाः । इति स्वामी । बहुत्वमतन्त्रम् । इति भरतः ॥

विदारणं, क्ली, (वि + दॄ + णिच् + भावे ल्युट् ।) विडम्बः । भेदः । इति मेदिनी । णे, १०७ ॥ (यथा, हरिवंशे । ६५ । ७६ ।

“आयुधावाप्तिरन्वैव वपुषो वैष्णवस्य च ।

लब्धाश्च तेजसश्चैव यूहानाञ्च विदारणम् ॥”)

मारणम् । इति शब्दरत्नावली ॥

विदारणः, पुं क्ली, (विदार्य्यन्ते शत्रवोऽस्मिन्निति । वि + दॄ + णिच् + ल्युट् ।) युद्धम् । इति मेदिनी । णे, १०७ ॥ (विदारयतीति । वि + दॄ + णिच् + ल्युः । विदारके, त्रि । यथा, मार्कण्डेये । २० । २ ।

“तस्यात्मजो महावीर्य्यो बभूवारिविदारणः ॥”)

विदारणः, पुं, (विदार्य्यतेऽसौ इति । वि + दॄ + णिच् + कर्म्मणि ल्युट् ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥

विदारिका, स्त्री, (वि + दॄ + णिच् + ण्वुल् । टापि अत इत्वम् ।) शालपर्णी । इति शब्दरत्नावली ॥ (यथा, वृहत्संहितायाम् । ७६ । ५ ।

“विदारिकाया स्वरसेन चूर्णं

सुहुर्मुहुर्भावितशोषितञ्च ।

शृतेन दुग्धेन सशर्करेण

पिबेत् स यस्य प्रमदाः प्रभूताः ॥”)

विदारिणी, स्त्री, (विदारयतीति । वि + दॄ + णिनिः । ङीप् ।) काश्मरी । इति राजनिर्घण्टः ॥ (विदारणकर्त्री । यथा, कथासरित्सागरे । ५३ । १७२ ।

“एकानंशे शिवे दुर्गे नारायणि सरस्वति ।

भद्रकालि महालक्ष्मि सिद्धे रुरुविदारिणि ॥”)

विदारी, स्त्री, (विदारयतीति । वि + दॄ + णिच् + अच् । गौरादित्वात् ङीष् ।) शालपर्णी । इति मेदिनी ॥ भूमिकुष्माण्डः । तत्पर्य्यायः । क्षीरशुक्ला २ इक्षुगन्धा ३ क्रोष्ट्री ४ । इत्यमरः ॥ विदारिका ५ स्वादुकन्दा ६ सिता ७ शुक्ला ८ शृगालिका ९ वृष्यकन्दा १० विडाली ११ वृष्यवल्लिका १२ भूकुष्माण्डी १३ स्वादुलता १४ गजेष्टा १५ वारिवल्लभा १६ गन्धफला १७ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । गुरुत्वम् । स्निग्धत्वम् । अस्रपित्तनाशित्वम् । कफकारित्वम् । पुष्टिबलवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ विदारी वातपित्तघ्नी वृष्या बल्या रसायनी इति राजवल्लभः ॥ * ॥ अष्टादश-प्रकारकण्ठरोगान्तर्गत-रोगविशेषः । यथा, अथ विदारीमाह ।

“यदाहतोदं श्वयथुं सुताम्र-

मन्तर्गले पूतिविशीर्णमांसम् ।

पित्तेन विद्याद्वदने विदारीं

पार्श्वे विशेषात् स तु येन शेते ॥”

स पुरुषो येन पार्श्वेन विशेषाद्बाहुल्येन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थः । इति भावप्रकाशः ॥ अस्याश्चिकित्सादि रोहिणीशब्दे द्रष्टव्यम् ॥

विदारी, [न्] त्रि, विदारणकर्त्ता । विपूर्व्वदॄधातोः कर्त्तरि णिनिप्रत्ययेन निष्पन्नः ॥

विदारीगन्धा, स्त्री, (विदार्य्या भूमिकुष्माण्डस्येव गन्धो यस्याः ।) शालपर्णी । इत्यमरः ॥

विदारुः, पुं, कृकचपादः । कृकलासः । इति हारावली । २१८ ॥

विदाहि, [न्] क्ली, (विदहतीति । वि + दह + णिनिः ।) दाहजनकद्रव्यम् । अस्य गुणः । पित्तकृत्त्वकारित्वे । इति राजवल्लभः ॥ (दाहजनकमात्रे, त्रि । यथा, गीतायाम् । १७ । ९ ।

“कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।

आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥”)

विदिक्, [श्] स्त्री, (दिग्भ्यां विगता ।) दिशोर्मध्यम् । अग्निनैर्ऋतिवायवीशानकोणचतुष्टयम् । तत्पर्य्यायः । अपदिशम् २ । इत्यमरः ॥ प्रदिक् ३ । इति जटाधरः ॥ विदिशम् ४ । इति शब्दरत्नावली ॥ कोणः ५ । इति राजनिर्घण्टः ॥ (यथा, भागवते । ४ । १७ । १६ ।

“सा दिशो विदिशो देवी रोदसी चान्तरं तयोः ।

धावन्ती तत्र तत्रैनं ददर्शानुद्यतायुधम् ॥”)

विदिक्चक्षुः, पुं, हरिद्राङ्गपक्षी । इति शब्दचन्द्रिका ॥

विदितं, त्रि, (विद + क्तः ।) अवगतम् । इत्यमरः ॥ (यथा, महाभारते । ७ । २८ । २२ ।

“सजायाः सधनुष्काञ्च ससुरासुरमानुषान् ।

शक्तो लोकानिमान् जेतुं तच्चापि विदितं

तव ॥”)

अर्थितम् । इति मेदिनी । ते, १०८ ॥ उपगमः । इति शब्दरत्नावली ॥

विदितः, पुं, (विदितं ज्ञानमस्यास्तीति । अर्श आदित्वात् अच् ।) कविः । इति जटाधरः ॥ (ज्ञाताथये, त्रि । यथा, किराते । १ । १ ।

“श्रियः कुरूणामधिपस्य पालनीं

प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।

सवर्णिलिङ्गी विदितः समाययौ

युधिष्ठिरं द्वैतवने वनेचरः ॥”

विदिथः, पुं, पण्डितः । योगी । इति शब्दरत्नावली हस्तासारमेदिनी च ॥ मुद्राङ्कितमेदिन्यां हेमचन्द्रे च विदथ इति पाठः ॥

विदीर्णः, त्रि, (वि + दॄ + क्तः ।) कृतविदारणः । चेरा इति भाषा । यथा,—

पितर ऊचुः ।

“श्राद्धानि नोऽधिभुजे प्रसभं तनूजै-

र्दत्तानि तीर्थसमयेऽप्यपिवत्तिलाम्बु ।

तस्योदराग्रखविदीर्णवपादृय आच्छं-
तस्मै नमो नृहरयेऽखिलधर्म्मगोप्त्रे ।”
इति श्रीमद्भागवते ७ स्कन्धे ८ अध्यायः ।
अपि च ।
“अहोऽपि त्रिपती समस्तजगती सश्लोकशोका-
मुधी
राधा सम्भृतकाकुराकुलमधौ चक्रे तथा
क्रन्दनम् ।
येन स्यन्दननेमिनिर्म्मितमहाघोषस्तदम्भादिदं
हा सर्वं सहयापि निर्भरमभूद्दूराद्विदीर्णं
सुवा ।”
इत्युज्ज्वलनीलमणिः ।

विदुः, पुं, (वेत्ति संग्राममनेनेति । विद् + बाहु-
लकात् कुः ।) गजकुम्भद्वयमध्यभागः । इत्य-
मरः । (अश्वकर्णाधोभागः । यथा, अश्व-
वैद्यके । २ । १४ ।
“विदुर्मर्म्मविदुश्चैव कर्णस्याधः षडङ्गुले ।”)
जानन्ति । इति क्रियापदम् । (यथा, महा-
भारते । १ । १२० । २८ ।
“अपत्यं नाम लोकेषु प्रतिष्ठा धर्म्मसंहिता ।
इति कुन्ति ! विदुर्धीराः शाश्वतं धर्म्म-
वादिनः ।”)

विदुरः, पुं, (वेत्ति तच्छीलः । विद् + “विदिभिदि-
च्छिदेः कुरच् ।” ३ । २ । १६२ । इति कुरच् ।)
नागरः । धीरः । कौरवाणां मन्त्री । इति
मेदिनी । रे, ११५ । विदुरोत्पत्तिर्यथा,—
“क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः ।
धृतराष्ट्रञ्च पाण्डुञ्च विदुरञ्चाप्यजीजनत् ।”
इति श्रीभागवते । ९ । २२ ।
ज्ञातरि, त्रि । इत्यमरः । * ।

विदुलः, पुं, (विशेषेण दोलयतीति । वि + दुल +
कः ।) वेतसः । अम्बुवेतसः । इत्यमरः । गन्ध-
रसः । इति रत्नमाला ।

विदुषी, स्त्री, (वेत्तीति । विदेः शतुर्वसुः । उगित-
श्चेति ङीप् ।) पण्डिता स्त्री । इति मुग्धबोध-
व्याकरणम् । (यथा, नैषधे । २ ।
“चिकुरप्रकरा जयन्ति ते
विदुषी मूर्द्धनि सा बिभर्त्ति यान् ।”)

विदुष्मती, त्रि, (विद्यास्ति अस्यामिति । विद्वस्
मतुप् । स्त्रियां ङीप् ।) पण्डितवती । यथा,—
“धौम्याचक्षतिनेव पत्तनपुरी शेषाहिनेवा-
भवद्-
वेनैकेन विदुष्मती वसुमती सुखेन संख्याव-
ताम् ।”
इति वोपदेवप्रशंसा ।

विदूः, पुं, विदुः । गजकुम्भयोर्मध्यम् । इत्यमर-
टीका ।

विदूरः, त्रि, (विशिष्टं दूरं यस्य ।) अतिदूरस्थ-
देशादि । यथा,—
“मासानष्टौ तव जलधरोत्कण्ठया शुष्ककण्ठः
सारङ्गोऽसौ युगशतमिव यापितवानतिज्ञ-
घ्रात् ।
आस्तां तावन्नवजलकणाभाजनत्वं विदूरे
वर्षारम्भप्रथमसमये दारुणो वज्रपातः ।”
इति चातकाष्टकम् ।
(पर्व्वतविशेषे, पुं । यथा, कुमारे । १ । २४ ।
“तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे ।
विदूरभूमिर्नवमेघशब्दा-
दुद्भिन्नया रत्नशलाकयेव ।”)

विदूरगः, त्रि, अतिदूरगन्ता । विदूरे गच्छती-
त्यर्थे डप्रत्ययेन निष्पन्नः ।

विदूरजं, क्ली, (विदूरे पर्व्वते जायते इति । जन +
डः ।) विदूरपर्व्वतजरत्नम् । वैदूर्य्यमणिः ।
अतिदूरजाते, त्रि । इति केचित् ।

विदूरथः, पुं, राजविशेषः । यथा,—
“मनोस्तु दक्षपुत्रस्य द्वादशास्यात्मजान् शृणु ।
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ।
मित्रवान् मित्रदेवश्च मित्रविन्दश्च वीर्य्यवान् ।
मित्रवाहः सवर्च्चाश्च दक्षपुत्रमनोः सुताः ।”
इति गारुड़े ८७ अध्यायः ।
(कुरुपुत्त्रः । यथा, महाभारते । १ । ९५ ।
३९—४० ।
“कुरुः खलु दाशार्हीमुपयेमे सुभाङ्गीं नाम
तस्यामस्य जज्ञे विदूरथः । विदूरथस्तु माधवी-
मुपयेमे संप्रियां नाम तस्यामस्य जज्ञे अनश्वा
नाम ।” * । वृष्णिवंशीयानामन्यतमः । यथा,
भागवते । ९ । २४ । १८ ।
“पृथुर्विदूरथाद्याश्च बहवो वृष्णिनन्दनाः ।”
अस्य पुत्त्रः शूरः । यथा, तत्रैव ।९।२४।२६।
“शूरो विदूरथादासीत् भजमानस्तु तत्सुतः ।
शिनिस्तस्मात् स्वयं भोजो हृदिकस्तत्सुतो
मतः ।”)

विदूरभूमिः, स्त्री, (विदूरस्य भूमिः ।) विदूर-
देशः । यत्र वैदूर्य्यमणिरुत्पद्यते । यथा,—
“तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे ।
विदूरभूमिर्नवमेघशब्दा-
दुद्भिन्नया रत्नशलाकयेव ।”
इति कुमारसम्भवम् ।

विदूराद्रिः, पुं, (विदूरनामकोऽद्रिः ।) विदूर-
पर्व्वतः । इति जटाधरः ।

विदूषकः, त्रि, (विदूषयति आत्मानमिति । वि +
दूष + णिच् + ण्वुल् ।) कामुकः । तत्पर्य्यायः ।
विड़्गः २ अलीकः ३ षट्प्रज्ञः ४ कामकेलिः
५ पीठकेलिः ६ पीठमर्द्दः ७ भविलः ८ छिदुरः
९ विटः १० । इति त्रिकाण्डशेषः । चाटुवटुः
११ वासन्तिकः १२ केलिकिलः १३ वैहासिकः
१४ प्रहासी १५ प्रीतिदः १६ । इति हेम-
चन्द्रः । परनिन्दाकरः । इति मेदिनी । के, २१४ ।
तत्पर्य्यायः । खलः २ रञ्जकः ३ अभीकः ४ क्रूरः
५ सूचकः ६ कण्टकः ७ नागः ८ मलिनास्यः
९ परद्वेषी १० । इति शब्दमाला । चतुर्धा-
नायकान्तर्गतनायकविशेषः । तस्य लक्षणं
यथा । अङ्गादिवैकृत्यैर्हास्यकारी विदूषकः ।
अस्योदाहरणं यथा,—
“आनीय गौरजमुखीं शयनोपकण्ठ-
मुत्कण्ठतोऽस्मि कुचकञ्चुकमोचनाय ।
अत्रान्तरे सुहुरकारि विदूषकेण
प्रातस्तनस्तरुणकुक्कुटकण्ठनादः ।”
इति रसमञ्जरी ।
(अयन्तु शृङ्गारसहायः । यथा, साहित्यदर्पणे ।
३ । ७७ ।
“शृङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः ।
भक्ता नर्म्मसु निपुणाः कुपितवधूमानभञ्जनाः
शुद्धाः ।”
दूषणकारके, त्रि । यथा, भागवते ।५।६।१०।
“येनह वाव कलौ मनुजापसदा देवमाया-
विमोहिताः * * * * ब्रह्मब्राह्मणयज्ञपुरुष-
लोकविदूषकाः प्रायेण भविष्यन्ति ।”)

विदूषणं, क्ली, विशेषेण दूषणम् । विपूर्व्वान्न्त-
दुषधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम् ।

विदेशः, पुं, (विप्रकृष्टो देशः ।) परदेशः । देशा-
न्तरम् । यथा । अशौचकालाभ्यरे विदेशस्था-
शौचश्रवणे शेषाहैः शुद्धिः । इति शुद्धितत्त्वम् ।
अन्यच्च ।
“कोऽतिभारः समर्थानां किं दूरं व्यवसायि-
नाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥”
इति चाणक्ये ।
अन्यत् देशान्तरशब्दे द्रष्टव्यम् ।

विदेहः, पुं, जनकान्वयभूमिपः । (यथा, देवी-
भागवते । १ । १६ । ५२ ।
“द्रष्टुमिच्छाम्यहं भूपं विदेहं नृपसत्तमम् ।
कथं तिष्ठति संसारे पद्मपत्रमिवाम्भसि ।”
विगतो देहो यस्मात् ।) कायशून्ये, त्रि । इति
मेदिनी । हे, २४ । (यथा, महाभारते ।
३ । १०७ । २६ ।
“छिन्नशीर्षा विदेहाश्च भिन्नत्वगस्थिसन्धयः ।
प्राणिनः समदृश्यन्त शतशोऽथ सहस्रशः ।”)
निमिराजस्य विदेहत्वकारणम् । यथा,—
“असमाप्ते ततो यज्ञे वशिष्ठस्त्वागमद्दिवः ।
तं दृष्ट्वा कुपितः प्राह प्रत्याख्यातोऽस्मि
पार्थिव ।
यस्मात्तस्मात् शपेयं त्वां विदेहस्त्वं भविष्यसि ।”
इति वह्निपुराणे सूर्य्यवंशसमाप्ताध्यायः ।

विदेहा, स्त्री, मिथिला । इति हेमचन्द्रः । (यथा,
रघुः । १२ । २६ ।
“सभौ तमनुगच्छन्ती विदेहाधिपतेः सुता ।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ।”)

विद्धः, त्रि, (विध्यते स्मेति । व्यध + क्तः ।)
छिद्रितः । इत्यमरः । क्षिप्तः । सदृशः ।
बाधितः । इति मेदिनी । धे, १६ । (यथा,
मार्कण्डेये । ५० । ७० ।
“तरुगुल्मादिभिर्द्वारं न विद्धं यस्य वेश्मनः ।
मर्म्मभेदोऽथवा पुंसस्तत् श्रेयो भवनं न ते ।”)

ताड़ितः । इत्यजयपालः ॥ (यथा, विष्णुसंहितायाम् । २० । ४४ ।
"नाकाले म्रियते कश्चित् विद्धः शरशतैरपि ।
कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥")

विद्धकर्णः, पुं, (विद्धः कर्ण इव पत्रमस्य ।) विद्धकर्णी । इति भरतद्विरूपकोषः ॥ (विद्धौ कर्णौ यस्येति । क्षतकर्णवेधे, त्रि ॥)

विद्धकर्णा, स्त्री, विद्धकर्णी । इति भरतद्विरूपकोषः ॥

विद्धकर्णिका, स्त्री, (विद्धकर्णा । स्वार्थे कन् ।) विद्धकर्णी । इति शब्दरत्नावली ॥

विद्धकर्णी, स्त्री, (विद्धः कर्ण इव पत्रमस्याः ।) वृक्षविशेषः । आकनादि इति भाषा ॥ तत्पर्य्यायः । पाठा २ अम्बष्ठा ३ स्थापनी ४ श्रेयसी ५ रसा ६ एकाष्ठीला ७ पापचेली ८ प्राचीना ९ वनतिक्तिका १० । इत्यमरः ॥ अविद्धकर्णी ११ अविद्धकर्णा १२ । इति तट्टीका ॥ आविद्धकर्णिका १३ विद्धकर्णिका १४ । इति शब्दरत्नावली ॥ अन्यत् पाठाशब्दे द्रष्टव्यम् ॥

विद्यमानः, त्रि, (विद + शानच् ।) वर्त्तमानः । इति सच्छब्दटीकायां भरतः ॥ (यथा, वैद्यके ।
"बाधायां विद्यमानायामाशायां जीवितस्य च ॥")

विद्या, स्त्री, (विद्यतेऽसौ इति । विद + "संज्ञायां समजनिषदनिपतेति ।" ३ । ३ । ९९ । इति क्यप् ।) दुर्गा । इति शब्दरत्नावली ॥ गणिकारिका । इति शब्दचन्द्रिका ॥ ज्ञानम् । तत्तु मोक्षे धीः । इति जटाधरः ॥ परमोत्तमपुरुषार्थसाधनीभूता विद्या ब्रह्मज्ञानरूपा । इति वाणोजीभट्टः ॥ मन्त्रः । यथा । शारदायाम् ।
"भान्तं वियत्सनयनं श्वेतो मर्द्दिनि ठद्वयम् ।
अष्टाक्षरी समाख्याता विद्या महिषमर्द्दिनी ॥"
विश्वसारे ।
"प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधीः ।"
महिषमर्द्दिनीमन्त्रः ॥
"दशाक्षरी समाख्याता विद्या त्रिभुवनेश्वरी ।
प्रणवश्च तथा माया भवेद्विद्या पुनर्द्दश ।
कामं प्रणवमित्युक्तं भवेद्विद्या पुनर्द्दश ॥"
दुर्गामन्त्रः ।
"वाग्बीजाद्या यदा विद्या वागीशत्वप्रदायिनी ।
कामाद्या च यदा विद्या सर्व्वकामप्रदायिनी ॥
तारमायादिका विद्या भोगमोक्षैकदायिनी ।
यद्बीजाद्या भवेद्विद्या तद्बीजेनाङ्गकल्पना ॥"
अन्नपूर्णामन्त्रः । इति तन्त्रसारः ॥ * ॥ महाविद्या । कलौ तस्या नानामूर्त्तिशालास्थो पूजा सर्व्वत्र भविता । अधुना सा वारीयवारीपूजा इति ख्याता । यथा,—
"अस्मिन् काले सुरेशानि प्रकाशो जायते भुवि ।
तमोधर्म्मेण सर्व्वत्र देवताप्रतिमा सदा ॥
अष्टम्याञ्च चतुर्द्दश्यां नवम्यां शनिभौमयोः ।
संक्रान्त्यां पञ्चदश्याञ्च पक्षयोरुभयोरपि ॥
कृत्वा तु पूजयिष्यन्ति महाविद्यां सभैरवाम् ।
विद्याञ्च विविधां देवि तथान्यप्रतिमां शुभाम् ॥
एवं हि तामसीं पूजामनित्याञ्च भवेत् कलौ ।"
इति मायातन्त्रे १७ पटलः ॥
शास्त्रम् । तत्तु अष्टादशविधम् । यथा । शिक्षा १ कल्पः २ व्याकरणम् ३ निरुक्तम् ४ ज्योतिषम् ५ छन्दः ६ ऋग्वेदः ७ यजुर्व्वेदः ८ सामवेदः ९ अथर्व्ववेदः १० मीमांसा ११ न्यायः १२ धर्म्मशास्त्रम् १३ पुराणम् १४ आयुर्व्वेदः १५ धनुर्व्वेदः १६ गान्धर्व्ववेदः १७ अर्थशास्त्रम् १८ ॥ यथा, विष्णुपुराणम् ।
"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्द्दश ॥
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वश्चेति ते त्रयः ।
अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः ॥"
इति प्रायश्चित्ततत्त्वम् ॥ * ॥
नीचादप्युत्तमा विद्या ग्राह्या यथा,—
"श्रद्दधानः शुभां विद्यामाददीतावरादपि ।
अन्त्यादपि परं धर्म्मं स्त्रीरत्नं दुष्कुलादपि ॥"
इति मानवे २ अध्यायः ॥ * ॥
विद्याप्रशंसा यथा,—
"ये बालभावान्न पठन्ति विद्यां
ये यौवनस्था अधना अदाराः ।
ते शोचनीया इह जीवलोके
मनुष्यरूपेण मृगाश्चरन्ति ॥
भोजने भोजनं चित्तं न कुर्य्याच्छास्त्रसेवकः ।
सुदूरमपि विद्यार्थी व्रजेत् गरुड़वेगवान् ॥
ये बालभावान्न पठन्ति विद्यां
कामातुरा यौवननष्टचित्ताः ।
ते वृद्धकाले परिभूयमाना
सन्दह्यमानाः शिशिरे यथाब्जम् ॥
माता शत्रुः पिता वैरी बालो येन न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥
विद्या नाम कुरूपरूपमधिकं प्रच्छन्नमन्तर्द्धनं
विद्या साधुजनप्रिया शुचिकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनार्त्तिनाशनकरी विद्या परं देवता
विद्या भोग्ययशःकुलोन्नतिकरी विद्याविहीनः पशुः ॥
गृहे चाभ्यन्तरे द्रव्यं लग्नं चैव तु दृश्यते ।
अशेषं हरणीयञ्च विद्या न ह्रियते परैः ॥"
इति गारुड़े ११०।११५ अध्यायौ ॥
अथ विद्यादानफलम् ।
"यस्तु देया गृहे नित्यं विद्यादानं प्रवर्त्तयेत् ।
स भवेत् सर्व्वलोकानां पूज्यः पूजापदं व्रजेत् ॥
विद्यादानं प्रवक्ष्यामि येन तुष्यन्ति मातरः ।
लिख्यते दीयते येन विधिना तं शृणुष्व नः ॥
सिद्धान्तमोक्षशास्त्राणि वेदान् स्वर्गादिसाधकान् ।
तदङ्गानीतिहासानि देया धर्म्मविवृद्धये ॥
गारुड़ं बालतन्त्रञ्च भूततन्त्राणि भैरवम् ।
शास्त्राणि पठनाद्दानात् मातरः फलदा नृणाम् ॥
ज्योतिषं वैद्यशास्त्राणि कलाकाव्यं स्वभाष्यतः ।
दानादारोग्यमाप्नोति गान्धर्व्वं लभते पदम् ॥
विद्याभ्यो वर्त्तते लोको धर्म्माधर्म्मेषु वृद्धये ।
तस्माद्विद्या सदा देया दृष्टादृष्टफलार्थिभिः ॥
महीदानञ्च गोदानं हैमवस्त्रतिला जलम् ।
धान्यदीपान्नदानञ्च महादानानि दानसु ॥
इहाप्ने क्षीयते दानं दीपदानं नराधिप ।
विद्या वृद्धिमवाप्नोति दीयमानापि नित्यशः ॥
एकोच्चारेण भूदानं दत्तं भवति भूमिप ।
नहि तद्विद्यते भूप देहपातादनन्तरम् ॥
विद्यादानं न तद्वत्स एकधा दशधा भवेत् ।
शतधा कोटिधा गच्छेदिहामुत्र च पारगः ॥
राज्ञा तस्करदायादैर्जलवह्निपरीप्सुभिः ।
सर्व्वदानानि क्षीयन्ते विद्या केनापि क्षीयते ॥
विद्यादानात् परं दानं न भूतं न भविष्यति ।
विद्यादानेन दानानि नहि तुल्यानि बुद्धिमन् ॥
विद्या एव परं मन्ये यत्तत् पदमनामयम् ।
स्वर्गमुत्पद्यते भक्तिर्भक्त्या गुरुमुपासते ॥
स च विद्यामवाप्नोति विद्या पुस्ताश्रिता नृप ।
विद्याविवेकबोधेन शुभाशुभविचारिणाम् ॥
विद्यते सर्व्वकामाप्तिस्तस्माद्विद्या परा मता ॥
विद्यादानात् परं दानं न भूतं न भविष्यति ।
येन दत्तेन चाप्नोति शिवं परमकारणम् ॥
विद्याविचारतत्त्वज्ञा राज्ञः सन्मार्गगामिनः ।
भुञ्जतेऽपि हि भोगानि गच्छन्ति परमां गतिम् ॥
अन्त्यजा अपि यां प्राप्य क्रीड़न्ति नृपराघवैः ।
सा विद्या केन मीयेत यस्याः कोऽन्यः समोऽपि न ॥
ज्वरेण कुञ्जरं हन्ति सर्पेण तुरङ्गमम् ।
मक्षिकापदमात्रस्य विषस्य विषमा गतिः ॥
एवंविधं विधिं वत्स विद्यामन्त्रप्रभावतः ।
जीर्य्यते भक्षितं पुंभिस्तस्माद्विद्या परात्परा ॥
नहि विद्या कुलं जातिरूपं पौरुषपात्रताम् ।
वशते सर्व्वलोकानां पठिता उपकारिका ॥
भूतैर्ग्रहीता विध्वस्ता दष्टा वा महपन्नगैः ।
विद्या उत्थापयेत् वत्स अन्त्यजस्यापि हस्तस्थिता ॥
सर्व्वेषामेव वृद्धानां विद्यावृद्धे हि मान्यता ॥
वयोवृद्धो हि शूद्राणां विशानां धनवान् यथा ।
क्षत्त्रियाणान्तु वीर्य्येण विप्राणां शास्त्रपारगः ॥
वित्तं बन्धुर्वयश्चैव तपो विद्या यथोत्तरम् ।
पूजनीयानि सर्व्वेषां विद्या तेषां गरीयसी ॥
गुरुशुश्रूषया विद्यां पुष्कलेन धनेन वा ।
विद्यया लभ्यते विद्या चतुर्थी नोपलभ्यते ॥
यः शतृणान्तु महीं दद्यात् मेरुतुल्यञ्च काञ्चनम् ।
स यदध्यायतः पक्षेण तस्योपविशेत् क्वचित् ॥
एवंविधं महाभाग विद्यारूपं हि वर्णितम् ।

संक्षेपाच्च विस्तारात्तस्या दानफलं शृणु ॥
श्रीताड़ीपत्रके सर्व्वे समे पत्रसुसञ्चिते ।
विचित्रके विपार्श्वे च चर्म्मणा सवटोलते ॥
रक्तेन अथ कृष्णेन मुक्तामालविचित्रितेन च ।
दृढ़सूत्रसुबन्धेन एवंविधकृतेन च ॥
यस्तु द्वादशसाहस्रीं संहितां तूपलेखयेत् ।
ददाति चाभियुक्ताय स याति परमां गतिम् ॥
पूर्व्वोत्तरप्लवे देशे सर्व्वबाधाविवर्ज्जिते ।
गोमयेन शुभेनैव कुर्य्यान्मण्डलकं बुधः ॥
चतुर्हस्तप्रमाणेन सुभव्यं चतुरस्रकम् ।
तस्य मध्ये लिखेत् पद्मं सितरक्तरजादिभिः ॥
सर्व्वर्त्तुकमयैः पुष्पैर्भूषयेत् सर्व्वतो दिशम् ।
वितानं दापयेन्मूर्द्ध्नि शुभचित्रविचित्रितम् ।
पार्श्वतः सितवस्त्रैस्तु सम्यक् शोभां प्रकल्पयेत् ।
कन्दुकैरर्द्धचन्द्रैश्च दर्पणैश्चामरैस्तथा ॥
घण्टाकिङ्किणिशब्दैश्च सर्व्वत्र उपकल्पयेत् ।
तस्य मध्ये न्यसेद्यन्त्रं नागदन्तमयं शुभम् ॥
अधः कश्चिन्निबद्धन्तु पार्श्वतो हरिदन्तिभिः ।
शोभितं दृढ़बन्धेन बद्धं सम्यक् च बुद्धिमान् ॥
तस्योर्द्धे विन्यसेद्देव्याः पुस्तकं लिखितं शुभम् ।
आलेख्यमपि तत्रैव पूजयेद्विधिना ततः ॥
निवदकैस्तथा पुष्पैः कृमिकीटविवर्ज्जितैः ।
चन्दनेन सदा तत्र भक्त्या चात्र धूपयेत् ॥
धूपञ्च गुग्गुलुं देयं तुरुष्कागुरुमिश्रितम् ।
दीपमालां तथा चाग्रे नैवेद्यं विविधं पुनः ॥
खाद्यं पेयान्वितं लेह्यं चोष्यञ्चापि निवेदयेत् ।
पूजयेद्दिग्विपालांस्तु लोकपालान् यथाक्रमम् ॥
कन्याः स्त्रियस्तु संपूज्य मातरः कल्पयेच्च ताः ।
पुस्तकं देवदेवीञ्च विप्राणां दक्षिणां तथा ॥
स्वशक्त्या चैव दातव्या नृपं पौरांश्च पूजयेत् ।
तथा संपूजयेद्वत्स लेखकं धर्म्मभागकम् ॥
छन्दोलक्षणतत्त्वज्ञं सत्कविं मधुरस्वरम् ।
प्रणष्टं स्मरते ग्रन्थं श्रेष्ठं पुस्तकलेखकम् ॥
नातिसम्पातविच्छिन्नैर्न स्थूलैर्न च कर्कशैः ।
नन्दिनागरकैर्व्वर्णैर्लेखयेच्छिवपुस्तकम् ॥
प्रारम्भे पञ्चश्लोकानि पुनः शान्तिन्तु कारयेत् ।
रात्रौ जागरणं कुर्य्यात् सर्व्वापेक्षं प्रकल्पयेत् ॥
नटचारणनग्नैश्च देव्याः कथनसम्भवैः ।
प्रत्यूषे पूजयेल्लोकांस्ततः सर्व्वं विसर्ज्जयेत् ॥
एकान्ते सुमनस्केन विश्वस्तेन दिने दिने ।
निष्पाद्यं विधिनानेन स्वर्ग्ये च शुभवासरे ॥
ततः पूर्व्वोक्तविधिना पुनः पूजां प्रकल्पयेत् ।
तथा विद्याविमानन्तु सप्तपञ्चत्रिभूमिकम् ॥
विचित्रवस्त्रशोभाढ्यं शुभलक्षणलक्षितम् ।
कारयेत् सर्व्वतोभद्रं किङ्किणीवरकान्वितम् ।
दर्पणैरर्द्धचन्द्रैश्च घण्टाचामरमण्डितम् ।
तस्मिन्धूपं समुत्क्षिप्य सुगन्धं चन्दनागुरुम् ॥
तुरुष्कं गुग्गुलुं वत्स शर्करामधुमिश्रितम् ।
पूर्व्ववत् पूजयेत् सर्व्वान् कन्याश्चीद्विजपौरवान् ॥
तथा तं पुस्तकं वत्स विन्यसेद्विधिपूजितम् ।
एवं कृत्वा तथा चिन्त्या मातरः प्रीयतां मम ॥
यस्यैव मूल्यं तच्छास्त्रं पुस्ते पुरि विकल्पयेत् ।

तथा तपस्विनः पूज्याः सर्व्वशास्त्रार्थपारगाः ॥
शिवव्रतधरा मुख्या विष्णुधर्म्मपरायणाः ।
महता जनसंघेन रथस्थं वाद्यवादनैः ॥
प्रधानैर्व्वापि तन्नेयं यत्र देवस्य चायतनम् ।
श्रामाद्यं शिवतीर्थेषु मातरो भवनेषु च ॥
तस्मिन् पूजां तथा कृत्वा देवदेवेन शूलिना ।
समर्पयेत् प्रयत्नेन मातरः प्रीयतां मम ॥
सदाध्ययनयुक्ताय विद्यादानरताय च ।
विद्यासंग्रहयुक्ताय सर्व्वशास्त्ररताश्रमे ॥
तेनैव वर्त्तते यस्तु तस्य तं विनिवेदयेत् ।
जगद्धिताय वै शान्तिं सन्ध्यायां वाचयेत्तथा ॥
तेन तोयेन दातारं मूर्द्ध्नि समभिषिञ्चयेत् ।
वरमेतु ततः शब्दसुचार्थ्यं जगतस्तथा ॥
एवं कृते महाकान्तिर्देशस्य नगरस्य च ॥
अनेन विधिना यस्तु सर्व्वबाधाः शमन्ति च ॥
अनेन विधिना यस्तु विद्यादानं प्रयच्छति ।
स भवेत् सर्व्वलोकानां दर्शनादघनाशनः ।
मृतोऽपि गच्छते स्थानं ब्रह्मविष्णुनमस्कृतम् ॥
सप्त पूर्व्वापरान् वंशानात्मनः सर्व्व एव च ।
उद्धृत्य पापकलिलाद्विष्णुलोके महीयते ॥
यावत् तत्पत्रसंख्यानमक्षराणि विधीयते ।
तावत् स विष्णुलोकेषु क्रीड़ते विविधैः सुखैः ॥
तदा क्षितिं समायातो देव्या भक्तिरतो भवेत् ।
समस्तभोगसम्पन्ने विद्वान् संजायते कुले ॥
विद्यादानप्रभावेन योगशास्त्रं ददेद्यदि ।
आत्मवित्तानुरूपेण यः प्रयच्छति मानवः ।
अशाठ्यात् फलमाप्नोति सत्यं सत्यं न संशयः ॥
स्त्रिया वानेन विधिना विद्यादानफलं लभेत् ।
भर्त्तुर्व्वाज्ञया दत्तं विधवा वा तदुद्दिशन् ॥ * ॥
विद्यार्थिने सदा देयं वस्त्रमभ्यङ्गभोजनम् ।
छत्रिका उदकं दीपं यस्मात्तेन विना नहि ॥
लेखनीघटनं तीक्ष्णमसिपत्रन्तु लेखनीम् ।
दत्त्वा तु लभते वत्स विद्यादानमनुत्तमम् ॥
पुस्तकास्तरणं दत्त्वा तत्प्रमाणं सुशोभनम् ।
विद्यादानमवाप्नोति सूत्रबन्धन्तु बुद्धिमान् ॥
पट्टकामासनञ्चैव दण्डासनमथापि वा ।
विद्याधारणशीलाय दत्तं भवति राज्यदम् ॥
अञ्जनं नेत्रपादानां दत्तं विद्यापरायणे ।
भूमिं यच्छन्तु येनन्तु स्वर्गराज्यफलप्रदाम् ॥
यस्य भूम्यां स्थितो नित्यं विद्यादानं प्रवर्त्तते ।
तस्यापि भवते स्वर्गं तत्प्रभावान्नराधिप ॥
तस्मात् सर्व्वप्रयत्नेन विद्या देया सदा नरैः ।
इह कीर्त्तिमवाप्नोति मृतो याति परां गतिम् ॥”
इति देवीपुराणे विद्यादानमहाभाग्यफला-
ध्यायः ॥ * ॥ अपि च ।
“दशवापीसमा कन्या भूमिदानञ्च तत्समम् ।
भूमिदानाद्दशगुणं विद्यादानं विशिष्यते ॥
यथा सुराणां सर्व्वेषां रामश्च परमेश्वरः ।
तथैव सर्व्वदानानां विद्यादानन्तु देहिनाम् ॥
राजसूयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत् फलं लभते विप्रो विद्यादानेन पुण्यवान् ॥
सर्व्वशस्यसमापूर्णां सर्व्वरत्नोपशोभिताम् ।

विप्राय वेदविदुषे मह्यीं दत्त्वा प्रशिष्यते ।
यत्फलं लभते विप्रो विद्यादानेन तत् फलम् ॥
कपिलानां सहस्रेण सम्यग्दत्तेन यत् फलम् ।
तत् फलं समवाप्नोति पुस्तकस्य प्रदानतः ॥
यावच्च पातकं तेन कृतं जन्मशतैरपि ।
तत् सर्व्वं नाशयत्याशु विद्यादानेन भो द्विज ॥
धर्म्मोपदेशं यः कुर्य्यात् शास्त्रं ज्ञात्वा तु वैष्णवे ।
कृत्स्नां धरित्रीं यो दद्यात् उभयोस्तत्समं
फलम् ॥
विद्यादानात् परं दानं न भूतं न भविष्यति ।
येन दत्तेन चाप्नोति शिवं परमकारणम् ॥
विद्या च श्रूयते लोके सर्व्वधर्म्मप्रदायिका ।
तस्माद्विद्या सदा देया पण्डितैर्धार्म्मिकैर्द्विजैः ॥
आत्मविद्याप्रदातारो ये भवन्ति सदा मुने ।
न पुनस्तेऽपि निरयं प्रविशन्ति सुनिश्चयम् ॥
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज ।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात् ॥
शास्त्रदृष्ट्या जगत् सर्व्वं सुस्थितञ्च शुभाशुभम् ।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके ॥
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्याञ्च यो दद्यात् तस्य संख्या न
विद्यते ॥
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च ।
शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती ॥
यत्किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः ।
तदक्षयञ्च लभते त्वन्नदानाद्विशेषतः ॥
इह लोके बहून् भोगान् भुक्त्वा याति शिवा-
लयम् ॥”

इति पाद्मोत्तरखण्डे ११७ अध्यायः ॥

अथ विद्यारम्भदिनानि ।

विष्णुधर्म्मोत्तरे ।
“संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्द्दने ।
षष्ठीं प्रतिपदञ्चैव वर्ज्जयित्वा तथाष्टमीम् ॥
रिक्तां पञ्चदशीञ्चैव सौरिभौमदिनं तथा ।
एवं सुनिश्चिते काले विद्यारम्भन्तु कारयेत् ॥
पूजयित्वा हरिं लक्ष्मीं देवीञ्चापि सरस्वतीम् ।
स्वविद्यासूत्रकारांश्च स्वाञ्च विद्यां विशेषतः ॥
नमस्ते बहुरूपाय विष्णवे परमात्मने ।
स्वाहेत्यनेन हरिं त्रिः पूजयेत् ।
भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ॥
स्वाहेति ब्रह्मपुराणीयेन च त्रिः पूजयेत् ॥” * ॥
लिखनविधिमाह नन्दिपुराणम् ।
“शुभे नक्षत्रदिवसे शुभे वारे दिनमुखे ।
लेखयेत् पूज्य देवेशान् रुद्रब्रह्मजनार्द्दनान् ॥
पूर्व्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तमः ।
शिरोधो हस्तशाखोच्च मषीपत्रावधारणे ॥”
मत्स्यपुराणञ्च ।
“शीर्षोपेतान् सुसंपूर्णान् समश्रेणीगतान्
समान् ।
अक्षरान् विलिखेद्यस्तु लेखकः स परः
स्मृतः ॥”

नाधीयीतेत्यनुवृत्तौ मनुः ।
"रुधिरे च स्रुते गात्रात् शस्त्रेण च परीक्षते ।"
रुधिरस्रवं विना शस्त्रेण क्षतमात्रेऽपि । दीपिकायाम् ।
"लघुचरशिवमूलाधोमुखत्वष्टृपौष्ण-
श्रविष्ठासु च हरिबोधे शुक्रजीवार्कवारे ।
उदितवति च जीवे केन्द्रकोणेषु सौम्यै-
रपठनदिनवर्ज्जं पाठयेत् पञ्चमेऽब्दे ।"
मदनपारिजाते ।
"विद्यारम्भे गुरुः श्रेष्ठो मध्यमौ भृगुभास्करौ ।
मरणं शनिभौमाभ्यामविद्या बुधसोमयोः ॥
विद्यारम्भः सुरगुरुसितश्रेष्ठभीष्टार्थदायी
कर्त्तुश्चायुश्चिरमपि करोत्यंशुमान् मध्यमोऽत्र ।
नीहारांशौ भवति जड़ता पञ्चता भूमिपुत्त्रे
छायासूनावपि च तनयः कीर्त्तयन्त्येवमाद्याः ॥
रवेर्गुरोर्भृगोर्लग्ने तत्स्थेऽर्केऽपीन्दुसंस्थितः ।
गुर्व्वर्केन्दूडुशुद्धौ च विद्यारम्भः प्रशस्यते ।"*॥
बृहस्पतिः ।
"प्राङ्मुखो गुरुरासीनो वरुणाभिमुखं शिशुम् ।
अध्यापयेच्च प्रथमं द्विजाशीर्भिः प्रपूजितम् ।"
कूर्म्मपुराणम् ।
"स्वाध्यायस्य त्रयो भेदा वाचिकोपांशु-
मानसाः ।"
शिवधर्म्मे ।
"संस्कृतैः प्राकृतैर्वाक्यैः शिष्यमनुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ।"
आदिः ग्रन्थकरणादिः । * । नन्दिपुराणम् ।
"प्रशस्तशब्दसंयोगे कुर्य्यात् यतिविरामणम् ।"
विरामणं तद्दिनपाठसमाप्तिम् ॥ * ॥
"समाप्ते वाचकाभीष्टं कुर्य्यादेव विचक्षणः ।
सुव्रतं सुव्रतं भूयादस्तु व्याख्या तु निर्व्वहा ॥
लोकः प्रवर्त्ततां धर्म्मे राजा चास्तु सदा जयी ।
धर्म्मवान् धनसम्पन्नो गुरुश्चास्तु निरामयः ॥*॥
इति प्रोच्य यथायातं गन्तव्यञ्च विभावितैः ।
शिष्यैः परस्परं शास्त्रं चिन्तनीयं विचक्षणैः ॥
कथावस्तुप्रसङ्गेन नानाख्यानसम्भवैः ।
युक्तिभिश्च स्मरेद्व्याख्यां चिह्नैश्चापि स्वयंकृतैः ।
एवं दिने दिने व्याख्यां शृणुयान्नियतो नरः ।"
विष्णुपुराणम् ।
"पुत्त्रैरध्यापिता ये च ते पतन्ति श्वभोजने ।"
सूत उवाच ।
"प्रागल्भ्यहीनस्य नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते ।
न तुष्टिमुत्पादयते शरीरे
अन्धस्य दारा इव दर्शनीयाः ।"*॥
लिङ्गपुराणम् ।
"यो गुरुं पूजयेन्नित्यं तस्य विद्या प्रसीदति ।
तत्प्रसादेन यस्मात् स प्राप्नुते सर्व्वसम्पदः ।"
दुर्व्वासाः ।
"सन्ध्यायां गर्ज्जिते मेघे शास्त्रचिन्तां करोति
यः ।
चत्वारि तस्य नश्यन्ति चायुर्विद्या यशो बलम् ।"

अधीतस्यार्थिने दानमावश्यकं तथा च स्मृतिः ।
योऽधीत्यार्थिभ्यो विद्यां न प्रयच्छेत् स कार्य्यहा
स्यात् श्रेयसो द्वारमावृणुयात् इति । * ।
तद्दानञ्च अध्यापनेन व्याख्यया विजिज्ञासार्थेन
च सम्भवतीत्यतो धीमद्भिर्निबन्धः क्रियते ॥ * ॥
तथा च विष्णुपुराणम् ।
"प्राणिनामुपकाराय यदेवेह परत्र च ।
कर्म्मणा मनसा वाचा तदेव मतिमान् भजेत् ।"
बृहस्पतिरपि ।
"अज्ञानतिमिरोपेतान् सन्देहपटलान्वितान् ।
निरामयान् यः कुरुते शास्त्राञ्जनशलाकया ॥
इह कीर्त्तिं राजपूजां लभते सद्गतिञ्च सः ।
शास्त्राविज्ञे तु समये भ्रान्तिः सञ्जायते यतः ॥
धानाचराणि दृष्टानि पश्चाद्रूढ़ान्यतः पुरा ।
उपदेशानुमन्ता च लोके तुल्यफलौ स्मृतौ ।"
एवञ्च । एकलव्येनानुपदेष्टापि द्रोणाचार्य्यो गुरुः
कृतः अतो ग्रन्थकर्त्तुः सुतरां गुरुत्वम् । यथा,
महाभारते ।
"अरण्यमनुसंप्राप्य कृत्वा द्रोणं महीमयम् ।
तस्मिन्नाचार्य्यवृत्तिञ्च परमामास्थितस्तदा ।
इष्वस्त्रे योगमातस्थे परं नियममास्थितः ।"*॥
शङ्खलिखितौ ।
"न वेदमनधीतानां विद्यामधीयीतान्यत्र वेदाङ्ग-
स्मृतिभ्यः ।" * । अङ्गानि च ।
"शिक्षा कल्पो व्याकरणं छन्दो ज्योतिषमेव च ।
निरुक्तञ्चेति चाङ्गानि वेदानां गदितानि षट् ।"
स्मृतिस्तु धर्म्मसंहितेत्यमरः । * । शिष्यस्य
गुरुऋणित्वमाह लघुहारीतः ।
"एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽनृणी भवेत् ।"
नन्दिपुराणम् ।
"यच्च शुश्रूषतः शास्त्रं संस्कारं प्राप्य वै दृढ़म् ।
अन्यस्य जनयेत् कीर्त्तिं गुरोः स ब्रह्महा भवेत् ॥
विस्मरेच्च तथा मौढ्याद्योऽपि शास्त्रमनुत्तमम् ।
स याति नरकं घोरमक्षयं भीमदर्शनम् ।"*॥
अतएव गृहस्थादीनामपि पुनरध्ययनमाह
आपस्तम्बः । यथा विद्यया न विरोधेत पुनरा-
चार्य्यमुपेत्य साधयेदिति । * । विष्णुः । यच्च
विद्यामासाद्य तथा जीवेत् न च सा तस्य पर-
लोकफलप्रदा भवति यच्च विद्यया परेषां यशो
हन्तीति । * । देवलः ।
"इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात् ।
श्लाघानुशोचनाभ्याञ्च भग्नतेजो विभिद्यते ॥
तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत् ।"
अनुकीर्त्तनं कथनम् । श्लाघा प्रशंसा । अनु-
शोचनं धनव्ययेन पश्चात्तापः । भग्नतेजः बल-
जनकशक्तिहीनम् । वृथा दयादिप्रयोजनं
विना ॥ * ॥ वैद्यवाचस्पते भविष्यपुराणम् ।
"उपाध्यायस्य यो वृत्तिं दत्त्वाध्यापयति
द्विजान् ।
किन्न दत्तं भवेत्तेन धर्म्मकामार्थमिच्छता ।"
इति ज्योतिस्तत्त्वम् ॥

विद्याचणः, } (विद्यया वित्तः । विद्या + "तेन-
विद्याचुञ्चुः, } वित्तश्चुञ्चुप्चणपौ ।" ५ । २ । २६ ।
इति चणप् चुञ्चुप् च ।) विद्यया ख्यातः । इति
व्याकरणम् ॥
विद्यादलः, पुं, भूर्जवृक्षः । इति शब्दमाला ॥
विद्यादाता, [ऋ] त्रि, (विद्यां ददातीति । दा +
तृच् ।) विद्यादानकर्त्ता । यथा,—
"अन्नदाता भयत्राता पत्नीतातस्तथैव च ।
विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम् ।"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
अपि च ।
"न च विद्यासमो बन्धुर्नास्ति कश्चित् गुरोः
परः ।
विद्यादातुः पुत्त्रदारौ तत्समौ नात्र संशयः ।"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥
विद्यादानं, क्ली, (विद्याया दानम् ।) अध्यापनम् ।
पुस्तकदानम् । यथा,—
वशिष्ठ उवाच ।
"विद्यादानं प्रवक्ष्यामि याथातथ्यात्तवाधुना ।
तथा देयं फलं यच्च तच्छृणुष्व नृपोत्तम ! ॥
पुण्येऽह्नि शुभनक्षत्रे मण्डपं शुभवेदिकम् ।
चतुरस्रं वितानं वा कृत्वा तत्रोपवेशयेत् ।
गोमयेनोपलिप्ते तु पुष्पप्रकरशोभिते ।
तत्र न्यस्यासनं दिव्यं दिव्यगन्धादिवासितम् ॥
संस्थाप्य पुस्तकं तत्र धर्म्मशास्त्रस्य धीमता ।
ब्राह्मणान् वेदसंपूर्णान् छन्दोलक्षणपारगान् ॥
वेष्टयित्वा तु वस्त्रेण तत्समग्रं शुभाक्षरैः ।
चन्द्रसूर्य्योपरागे वा संक्रान्त्ययनवासरे ॥
पुण्येऽह्नि तत् सुसंपूज्य वस्त्रालङ्कारभूषणैः ।
कृतधेन्वा युतं रत्नैर्दद्यात् गुणवते ततः ॥
शास्त्रज्ञाय विदुषे वाचकेऽतिप्रियंवदे ।
तच्छास्त्रं शृण्वतां नित्यं जनानां नाशयत्यघम् ।
दातुस्तस्माच्छतत्रेयं फलं तच्छृणु भूपते ॥
यत् पुण्यं सर्व्वतीर्थानां विधिवद्यजतां तथा ।
तत् पुण्यं समवाप्नोति विधिवच्छ्रावकः पुमान् ॥
कपिलानां सहस्रेण सम्यग्दत्तेन यत् फलम् ।
तद्दानात् सकलं लेभे धर्म्मशास्त्रप्रदायकः ॥
पुराणं भारतं वापि रामायणमथापि वा ।
दत्त्वा यत् फलमाप्नोति न तत् सर्व्वैर्महामखैः ॥
देवानामालये नित्यं धर्म्मशास्त्राणि यः पुमान् ।
अध्यापयति धर्म्मात्मा तस्य दानफलं शृणु ॥
धनभूमिहिरण्यानां दानेन यदवाप्यते ।
फलं तत् सकलं राजन् नित्यं कारापकस्य च ॥
योऽधीते धर्म्मशास्त्राणि देवानां पुरतोऽनिशम् ।
द्विजो वीप्सुरथार्थानामेवमेवार्हति ध्रुवम् ॥
प्रातरुत्थाय यो वेदं वेदाङ्गं शास्त्रमेव वा ।
पृथिवीदानतुल्यं स्यात् फलं तस्य नृपोत्तम ॥
दानैर्योऽपि विभर्त्तीतान्मीमांसाधर्म्मतत्परः ।
त्रिगुणं पृथिवीदानात् फलं तस्य भवेन्नृप ! ।
यो भक्तं पठमानानां करोत्यनुदिनं नृप ! ।
स यज्ञफलमादत्ते दानाच्छादनभोजनैः ॥
विवेकी जीवितं दीर्घं धर्म्मकामार्थसम्पदः ।

सर्व्वं तेन भवेद्दत्तं शास्त्राणां पोषणे कृते ॥
वाजपेयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत् फलं समवाप्नोति विद्यादानान्न संशयः ॥
तस्माद्देवालये नित्यं धर्म्मशास्त्रस्य वा श्रुतेः ।
पठनं कारयेद्राजन् यदीच्छेद्धर्म्ममात्मनः ॥
गोभूहिरण्यवासांसि शयनान्यासनानि च ।
प्रत्यहं तेन दत्तानि भवन्ति नृपसत्तम ! ॥
धर्म्माधर्म्मं न जानाति लोकोऽयं विद्यया विना ।
तस्मात् सदैव धर्म्मात्मन् विद्यादानरतो भव ॥”
इति वह्निपुराणे विद्यादाननामाध्यायः ॥

विद्यादेवी, स्त्री, (विद्याया देवी ।) जिनषोड़शदेव्यन्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥ सरस्वती च ॥

विद्याधनं, क्ली, विद्यया अर्ज्जितधनम् । यथा । विद्याधनमाह कात्यायनः ।
“उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्व्वकम् ।
विद्याधनन्तु तद्विद्यात् विभागे न नियोजयेत् ॥
शिष्यादार्त्विज्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात् ।
स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत् ॥
विद्याधनन्तु तत् प्राहुर्विभागे न प्रयोजयेत् ।
शिल्पेष्वपि हि धर्म्मोऽयं मूल्याद्यच्चाधिकं भवेत् ॥
परं निरस्य यल्लब्धं विद्यया द्यूतपूर्व्वकम् ।
विद्याधनन्तु तद्विद्यात् न विभाज्यं बृहस्पतिः ॥”
यदि भवान् भद्रमुपन्यस्यति तदा भवत एव मयैतद्देयमिति पणितं यत्रोपन्यासं निस्तीर्य्य लभते तत्र विभाज्यम् । शिष्यादध्यापितात् आर्त्विज्यतः यजमानादृत्विज्यया लब्धं धनं न प्रतिग्रहलब्धं वेतनरूपत्वात्तस्य । तथा यत्किञ्चिद्विद्याप्रश्ने निस्तीर्णेऽपणितं यदि कश्चित् परितोषाद्ददाति । तथा यो ह्यस्मिन् शास्त्रार्थे अस्माकं संशयमपनयति तस्मै धनमिदं दास्यामीत्युपस्थितस्य संशयमपनीय यल्लब्धम् । तथा वादिनोर्व्वादसन्देहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणे यल्लब्धं षष्ठांशादिकम् । तथा शास्त्रादिप्रकृष्टज्ञानं सम्भाव्य यत् प्रतिग्रहादिना लब्धम् । तथा शास्त्रज्ञानविवादे अन्यत्रापि यत्र कुत्रचिदन्योऽन्यज्ञानविवादे निर्ज्जित्य यल्लब्धम् । तथैकस्मिन् देये बहूनामुपप्लवे येन प्रकर्षात् यल्लब्धम् । तथा शिल्पादिविद्यया चित्रकारसुवर्णकारादिभिर्यल्लब्धम् । तथा द्यूतेनापि परं निर्ज्जित्य यल्लब्धं तत् सर्व्वमविभाज्यमितरैः । तस्माद्यया कयाचित् विद्यया लब्धमर्ज्जकस्यैव तन्न इतरेषामिति । प्रदर्शनार्थन्तु कात्यायनेन विस्तारितमिति दायभागः ॥ नारदः ।
“कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन् ॥”
बिभृयादित्येकवचननिर्द्देशान्न बहवः । यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्द्धयति तदा तद्विद्यार्ज्जितधने तस्याधिकारः । अश्रुतो मूर्खः । कल्पतरुमिताक्षरादीपकलिकासु कात्यायनः ।
“परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या ।
तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते ॥”
अन्यतः पितृमातृकुलव्यतिरिक्तात् । अत्र विशेषयति स एव ।
“नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित् ।
समविद्याधिकानान्तु देयं वैद्येन तद्धनम् ॥”
तत्रोच्चरितविद्यापदसुभाभ्यां सम्बध्यते । तेन समविद्याधिकविद्यानां भागो न तु न्यूनविद्याविद्ययोः । वैद्येन विदुषा । पुनर्विशेषयति ।
“कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा ।
शौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः ॥”
कुले स्वकुले पितामहपितृव्यादिभ्यः पितृत एव वा शिक्षितविद्यानां भ्रातॄणां यद्विद्याशौर्य्यप्राप्तं धनं तद्विभजनीयमिति कल्पतरुरत्नाकरौ । इति दायतत्त्वम् ॥

विद्याधरः, पुं, देवयोनिविशेषः । इत्यमरः ॥ विद्यां मन्त्रादिकं धरति पचादित्वात् । पुष्पदन्तादिः कामरूपी खेचरः । इति भरतः ॥ (यथा, रघुः । २ । ६० ।
“तस्मिन् क्षणे पालयितुः प्रजाना-
मुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता ॥”)
तस्योत्पत्त्यादिर्यथा,—
“नैकेयंचगणेयांश त्रैलोक्यमभरोगणैः ।
तेषामुत्पादितान्योन्यं महागन्धर्व्वनायकाः ॥
उत्पादिताः पुनस्तैर्यै विक्रान्ता युद्धदुर्म्मदाः ।
विद्याधरेश्वरास्ते तु खेचराः कामचारिणः ॥
हिरण्यरोमा कपिलः सुलोमा माधवस्तथा ।
इन्द्रकेतुश्च पिङ्गाक्षो नारदश्चैव महाबलः ॥
गण इत्येवमादिस्तु द्वे चान्ये वै सुलोचने ।
शिवा च सुमनाश्चैव ताभ्यामपि च विश्रवाः ॥
पुनश्चोत्पादयामास विद्या सौमनसं गणम् ।
एतैर्व्याप्तो ह्ययं लोको विद्याधरगणैस्त्रिभिः ॥
एभ्योऽनेकानि जातानि ह्यवरान्तरचारिणाम् ।
लोकेऽस्मिन् गणशस्तानि मन्त्रविद्याविचारिणाम् ।
विद्याधरास्तथान्येऽपि विद्याबलसमन्विताः ॥”
इति वह्निपुराणे काश्यपीयवंशः ॥ ● । षोड़शरतिबन्धान्तर्गतचरमबन्धः । तस्य लक्षणं यथा, रतिमञ्जर्य्याम् ।
“नार्य्या ऊरुयुगं धृत्वा कराभ्यां ताड़येत् पुनः ।
कामयेन्निर्भरं कामी बन्धो विद्याधरो मतः ॥”

विद्यावान्, [त्] त्रि, (विद्यास्त्यस्येति । विद्या + मतुप् । मस्य वः ।) विद्याविशिष्टः । विद्याशब्दात् वतुप्रत्ययेन निष्पन्नः । (यथा, प्रबोधचन्द्रोदये । २ । ३१ ।
“विद्यावन्त्यपि कीर्त्तिमन्त्यपि सदाचारावदातान्यपि ।
प्रोच्चैः पौरुषभूषणान्यपि कुलान्युद्दत्तमीशः
क्षणात् ॥”)

विद्युज्जिह्वः, पुं, (विद्युदिव चञ्चला जिह्वा यस्य ।) राक्षसविशेषः । यथा,—
“अग्निकेतुश्च दुर्द्धर्षो रश्मिकेतुश्च वीर्य्यवान् ।
विद्युज्जिह्वो द्विजिह्वश्च सूर्य्यशत्रुश्च राक्षसः ॥”
इति रामायणे उत्तरकाण्डे ६० सर्गः ॥
(स्त्री, कुमारानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । ८ ।
“मेघस्वना भोगवती सुभ्रूश्च कनकावती ।
अलाताक्षी वीर्य्यवती विद्युज्जिह्वा च भारत ! ॥”)

विद्युज्ज्वाला, स्त्री, (विद्युत इव ज्वाला यस्याः ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥ (विद्युतो ज्वाला ।) तड़ित्प्रभा च ॥

विद्युत्, स्त्री, (विशेषेण द्योतते इति तच्छीला वा । वि + द्युत + “भ्राजभासेति ।” ३ । २ । १७७ । इति क्विप् ।) सन्ध्या । इति मेदिनी । ते, १५५ ॥ विद्योतते या । तत्पर्य्यायः । शम्पा २ शतह्रदा ३ ह्रादिनी ४ ऐरावती ५ क्षणप्रभा ६ तड़ित् ७ सौदामिनी ८ चञ्चला ९ चपला १० । इत्यमरः ॥ वीपा ११ सौदाम्नी १२ चिलमीलिका १३ शम्पूः १४ अचिरप्रभा १५ सौदामनी १६ अस्थिरा १७ मेघप्रभा १८ अशनिः १९ । इति शब्दरत्नावली ॥ चटुला २० अचिररोचिः २१ राधा २२ नीलाञ्जना २३ । इति जटाधरः ॥ सा चतुर्व्विधा । यथा,—
“अरिष्टनेमिपत्नीनामपत्यानीह षोड़श ।
बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः ॥”
इति विष्णुपुराणे १ अंशे १५ अध्यायः ॥
चतस्रो विद्युतस्तु ।
“वाताय कपिला विद्युदातपाय हि लोहिता ।
पीता वर्षाय विज्ञेया दुर्भिक्षायासिता भवेत् ॥”
इति ज्योतिःशास्त्रे प्रसिद्धाः । इति तट्टीका ॥

विद्युत्, त्रि, (विगता द्युत् कान्तिर्य्यस्य ।) निष्प्रभः । इति मेदिनी । ते, १५५ ॥ (विशिष्टा द्युत् दीप्तिर्यस्येति विग्रहे । विशेषेण दीप्तिशालिनि । यथा, ऋग्वेदे । १ । २३ । १२ ।
“हस्काराद्विद्युतस्पर्य्यतो जाता अवन्तु नः ।”
“हस्कारात् दीप्तिकारात् विद्युतो विशेषेण दीप्यमानात् ।” इति तद्भाष्ये सायणः ॥)

विद्युत्केशः, पुं, (विद्युत इव दीप्तिशालिनः केशा यस्य ।) राक्षसविशेषः । यथा,—
“स कालभगिनीं कन्यां भयां नाम महाभयाम् ।
उदावहदमेयात्मा स्वयमेव महामतिः ॥
स तस्यां जनयामास हेती राक्षसपुङ्गवः ।
पुत्त्रं पुत्त्रवतां श्रेष्ठो विद्युत्केशमिति श्रुतम् ॥”
इति रामायणे उत्तरकाण्डे ४ सर्गः ॥

विद्युत्प्रियं, क्ली, (विद्युतः प्रियम् । तदाकर्षकत्वात् ।) कांस्यम् । इति हेमचन्द्रः ॥

विद्युत्वान्, [त्] त्रि, (विद्युतः सन्त्यस्मिन्निति । विद्युत् + मतुप् ।) विद्युद्विशिष्टः । विद्यु-

च्छन्दात् वतुप्रत्ययेन निष्पन्नः । (यथा, मेघदूते । ६६ ।
"विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।"
पुं, पर्व्वतविशेषः । यथा, हरिवंशे ।२२८।६१।
"विद्युत्वान् पर्व्वतः श्रीमानायतः शतयोजनम् ।
विद्युतो यत्र सम्पाता निपात्यन्ते नगोत्तमे ।")

विद्युन्माला, स्त्री, अष्टाक्षरपादच्छन्दोविशेषः । यथा । "मो मो गो गो विद्युन्माला ।"
"वासो वस्त्री विद्युन्माला वर्हश्रेणी शाक्रश्चापः ।
यस्मिन्नास्तां तापोच्छित्त्यै गोमध्यस्थः कृष्णाम्भोदः ।"
इति छन्दोमञ्जरी ।

अपि च ।
"सर्व्वे वर्णा दीर्घा यस्या विश्रामः स्याद्वेदैर्वेदैः ।
विद्वद्वृन्दैर्वीणावाणि ! व्याख्याता सा विद्युन्माला ।"
इति श्रुतबोधः ।

विद्युन्माली, [न्] पुं, राक्षसविशेषः । यथा । विद्युन्माली नाम कश्चिद्राक्षसो माहेश्वरः तस्मै रुद्रेण सौवर्णं विमानं दत्तं ततोऽर्कस्य पृष्ठतो भ्रमन् विमानदीप्त्या रात्रिं विलोपितवान् ततोऽर्केण निजतेजसा द्रावयित्वा तद्विमानं पातितं तच्छ्रुत्वा कुपिते रुद्रे भयादर्कः पराद्रवत् ततो रुद्रस्य क्रूरया दृष्ट्या दन्दह्यमानः पतन् वाराणस्यां पतितो लोलार्कनाम्ना विख्यातः । इति श्रीभागवते १ स्कन्धे ७ अध्यायटीकायां श्रीधरस्वामी । अपि च ।
"धर्म्मस्य पुत्त्रो बलवान् सुषेण इति विश्रुतः ।
स विद्युन्मालिना सार्द्धं अयुध्यत महाकपिः ।"
इति रामायणे युद्धकाण्डे ४३ सर्गः ।

विद्रं, क्ली, छिद्रम् । इति शब्दचन्द्रिका ।

विद्रधिः, पुं, रोगविशेषः । तत्पर्य्यायः । विदरणम्१ हृद्ग्रन्थिः २ हृद्व्रणः ४ । इति राजनिर्घण्टः । तत्र विद्रधेः संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह ।
"त्वग्रक्तमांसमेदांसि प्रदुष्यास्थिसमाश्रिताः ।
दोषाः शोथं शनैर्घोरं जनयन्त्युच्छ्रिता भृशम् ।
महामूलं रुजावन्तं वृत्तं वाप्यथवायतम् ।
स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः ।"
अस्थिसमाश्रिता दोषा इति वचनात् नाशाद्व्रणशोथादिभ्यो विद्रधेर्भेदार्थम् । यतो व्रणशोथे दोषाणामस्थिसमाश्रयनियमो नास्ति । घोरं व्रणशोथादारुणम् । आयतं दीर्घम् । । षड्विधत्वं विवृणोति ।
"पृथग्दोषैः समस्तैश्च क्षतेनाप्यसृजा तथा ।
षण्णामपि हि तेषान्तु लक्षणं संप्रचक्ष्यते ।" ।
तत्र वातिकस्य लक्षणमाह ।
"कृष्णोऽरुणो वा विषमो भृशमत्यर्थवेदनः ।
चित्रोत्थानप्रपाकश्च विद्रधिर्व्वातसम्भवः ।"
विषमो भग्नं चयमल्पः क्वचं महान् । चित्रोत्थानप्रपाकः । चित्रौ नानाविधौ उद्गमप्रपाकौ यस्य सः ।*। पैत्तिकमाह ।
"पक्वोडुम्बरसङ्काशः श्यावो वा ज्वरदाहवान् ।
क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः ।"
श्लैष्मिकमाह ।
"शरावसदृशः पाण्डुः शीतस्निग्धोऽल्पवेदनः ।
चिरोत्थानप्रपाकश्च विद्रधिः श्लेष्मसम्भवः ।
तनुपीतसिताश्चैषामास्रावाः क्रमशो मताः ।"
सान्निपातिकमाह ।
"नानावर्णरुजः स्रावी घाटालो विषमो महान् ।
विषमं पच्यते वापि विद्रधिः सान्निपातिकः ।"
नाना अनेकविधाः । वर्णाः कृष्णरक्तपाण्डुरूपाः । रुजः तोददाहकण्ड्वादिरूपाः । स्रावाः तनुपीतसिता यस्य । घाटालः घाटा शृङ्गाटिकास्यास्ति इति घाटालः । अत्युच्छ्रिताग्र इत्यर्थः । विषमः निम्नोन्नतः । विषमं पच्यते चापि चिराचिरगभीरोत्तानोर्द्धाद्धिभेदेन विषमं यथा स्यात्तथा पच्यते । * । अभिघातजस्यागन्तोः संप्राप्तिपूर्व्वकं लक्षणमाह ।
"तैस्तैर्भावैरभिहते क्षते वापथ्यकारिणः ।
क्षतोष्मा वायुविसृतः सरक्तं पित्तमीरयेत् ।
ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः ।
आगन्तुविद्रधिर्ह्येष पित्तविद्रधिलक्षणः ।"
तैस्तैर्भावैः काष्ठलोष्टपाषाणादिभिर्हते यथा रक्तस्रावो न भवति तथाभिहते क्षते क्षते वा । अथवा खड्गशूलादिभिः क्षते यथा रक्तस्रावो भवति तथा क्षते क्षते क्षतोष्मा अत्र क्षतशब्देन हतमात्रमुच्यते । तेनाभिहतक्षतयोरप्युष्मवायुविसृतः । अभिहतः अभिघातात् क्षते रक्तक्षयात् कुपितेन वायुना प्रसृतः ईरयेत् कोपयेत् ।*। रक्तजमाह ।
"कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरः ।
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते ।"*।
अधिष्ठानविशेषेण लिङ्गविशेषं बोधयितुमाभ्यन्तरान् विद्रधीनाह ।
"आभ्यन्तरानतस्तूर्द्ध्वं विद्रधीन् परिचक्ष्यते ।
गुर्व्वसात्म्यविरुद्धान्नशुष्कशाकान्नभोजनात् ।
अतिसक्तीयव्यायामवेगाघातविदाहिभिः ।
पृथक् सम्भूय वा दोषाः कुपिता गुल्मरूपिणम् ।
वल्मीकवत् समुन्नद्धमन्तः कुर्व्वन्ति विद्रधिम् ।
गुदे वस्तिमुखे नाभ्यां कुक्षौ वंक्षणयोस्तथा ।
वृक्कयोः प्लीह्नि यकृति हृदि वा क्लोम्नि वाप्यथ ।
येषां चिह्नानि जानीयात् बाह्यविद्रधिलक्षणैः ।
सम्भूय वा मिलित्वा वा समुन्नद्धं तदुन्नतम् ।"*।
स्थानविशेषेण रूपविशेषमाह ।
"गुदे वातनिरोधस्तु वस्तौ कृच्छ्राल्पमूत्रता ।
नाभ्यां हिक्का तथाटोपः कुक्षौ मारुतकोपनम् ।
कटीपृष्ठग्रहस्तीव्रो वंक्षणोत्थे च विद्रधौ ।
वृक्कयोः पार्श्वसंकोचः प्लीह्नः श्वासनिरोधनम् ।
सर्व्वाङ्गप्रग्रहस्तीव्रो हृदि कासश्च जायते ।
श्वासो यकृति हिक्का च क्लोम्नि पेपीयते पयः ।"
स्रावमार्गमाह ।
"नाभेरुपरिजाः पक्वा यान्त्यूर्द्ध्वमितरे त्वधः ।
अधः स्रुतेषु जीवेच्च स्रुतेषूर्द्ध्वं न जीवति ।"
नाभेरुपरिजा वृक्कादिजाताः । यान्ति स्रवन्ति ऊर्द्ध्वमुखात् । इतरे वस्त्यादिजाः । अधः गुदात् । नाभिजस्तूभाभ्यां मार्गाभ्याम् । तथा च हारीतः ।
"ऊर्द्ध्वप्रभिन्नेषु मुखान्नराणां
प्रवर्त्ततेऽसृक्सहितो हि पूयः ।
अधःप्रभिन्नेषु तु पायुमार्गाद्-
द्वाभ्यां प्रवृत्तिस्त्विह नाभिजेषु ।"*।
साध्यत्वादिकमाह ।
"अधःस्रुतेषु जीवेत्तु स्रुतेषूर्द्ध्वं न जीवति ।
हृन्नाभिवस्तिपर्य्याये तेषु भिन्नेषु बाह्यतः ।
जीवेत् कदाचित् पुरुषो नेतरेषु कदाचन ।"
हृन्नाभिवस्तिपर्य्याये प्लीहक्लोमादिजातेषु । बाह्यतः शस्त्रवैद्यव्यापारेण भिन्नेषु पुरुषः कदाचित् जीवेत् । इतरेषु हृन्नाभिवस्तिजेषु तथा भिन्नेषु न जीवेत् । हृदादीनां मर्म्मत्वात् । अतएव भोजः ।
"असाध्यो मर्म्मजो ज्ञेयः पक्वोऽपक्वश्च विद्रधिः ।
सन्निपातोत्थितोऽप्येवं पक्व एव हि वस्तिजः ।
हृन्नाभेरधोजश्च साध्या मर्म्मसमीपतः ।
अपक्वश्चेव पक्वश्च साध्यो नोपरि नाभितः ।
आध्मानं बद्धनिष्यन्दं छर्द्दिहिक्कातृषान्वितम् ।
रुजाश्वाससमायुक्तं विद्रधिर्नाशयेन्नरम् ।"*।
बाह्यविद्रधीनां साध्यासाध्यत्वमाह ।
"साध्या विद्रधयः पञ्च विवर्ज्यः सान्निपातिकः ।
आमं पक्वं विदग्धत्वं तेषां शोथवदादिशेत् ।"
शोथवत् वक्ष्यमाणव्रणशोथवत् । * ।
अथ विद्रधेश्चिकित्सा ।
"जलौकापातनं शस्तं सर्व्वस्मिन्नपि विद्रधौ ।
मृदुर्व्विरेको लघ्वन्नं स्वेदः पित्तोत्तरं विना ।
अपक्वविद्रधौ युञ्ज्याद्व्रणशोथवदौषधम् ।
वातघ्नमूलकल्कैर्व्वा वसातैलघृतान्वितैः ।
सुखोष्णो बहलो लेपः प्रयोज्यो वातविद्रधौ ।
यवगोधूममुद्गैश्च पिष्टैराज्येन लेपयेत् ।
विलीयते क्षणेनैव त्वविपक्वस्तु विद्रधिः ।
पैत्तिकं विद्रधिं वैद्यः प्रदिह्यात् सर्पिषा युतैः ।
पयस्योशीरमधुकचन्दनैर्दुग्धपेषितैः ।
पयस्यानेकार्थत्वात् अत्र क्षीरकाकोली गुणाधिक्यात् । तस्या अलाभे अश्वगन्धा ग्राह्या ।
"पञ्चवल्कलकल्केन घृतमिश्रेण लेपयेत् ।
पिबेद्वा त्रिफलाक्वाथं त्रिवृत्कल्काक्षसंयुतम् ।
इष्टिकासिकतालोहकीट्टैर्गोशकृता सह ।
मूत्रैः सुखोष्णैर्लेपन स्वेदयेत् श्लेष्मविद्रधिम् ।
दशमूलीकषायेण सस्नेहेन घृतेन च ।
शोथं व्रणं वा कोष्णेन समूलं परिषेचयेत् ।
पित्तविद्रधिवत् सर्व्वाः क्रिया निरवशेषतः ।
विद्रधौ कुशलः कुर्य्यात् रक्तागन्तु निमित्तयोः ।
रक्तचन्दनमञ्जिष्ठाविशालमधुकगैरिकैः ।
क्षीरेण विद्रधौ लेपो रक्तागन्तु निमित्तके ।

कृष्णाजाजी विशाला च धामार्गवफलं तथा ।
पीतं हन्ति निहन्त्याशु विद्रधीन् कोष्ठसम्भवान् ॥"
धामार्गवफलं कोषातकीफलम् ।
"श्वेतवर्षाभुवो मूलं मूलं वरुणकस्य च ।
जलेन क्वथितं पीतमन्तर्विद्रधिहृत् परम् ॥
गायत्रीत्रिफलानिम्बकटुका मधुकं समम् ।
त्रिवृत्पटोलमूलाभ्यां चत्वारोऽंशाः पृथक् पृथक् ॥
मसूरान्निस्तुषान् दद्यात् एव क्वाथो घृताञ्चयेत् ।
विद्रधिगुल्मवीसर्पदाहमोहज्वरापहः ।
तृष्णामूर्च्छावमिहृद्रोगपित्तासृक्कुष्ठकामलाः ॥"
वाग्भटात् ।
"शिग्रुमूलं जले धौतं पिष्टं वस्त्रेण गालयेत् ।
तद्रसं मधुना पीत्वा हन्त्यन्तर्विद्रधिं नरः ॥
शोभाञ्जनकनिर्यूहो हिङ्गुसैन्धवसंयुतः ।
हन्त्यन्तर्विद्रधिं जन्तोः प्रातः प्रातर्निषेवितः ॥"
निर्यूहः क्वाथः । इति विद्रध्यधिकारः । इति भावप्रकाशः ॥

विद्रधिनाशनः, पुं, (विद्रधिं रोगविशेषं नाशयतीति । नश + णिच् + ल्युः ।) शोभाञ्जनवृक्षः । इति त्रिकाण्डशेषः ॥

विद्रवः, पुं, (विद्रवणमिति । वि + द्रु + "ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् ।) पलायनम् । इत्यमरः । (यथा, महाभारते ।७।१०६। ३८ ।
"तैः शरैस्तव सैन्यस्य विद्रवः सुमहानभूत् ॥")
बुद्धिः । इति मेदिनी । वे, ५१ ॥ निन्दा । इति शब्दरत्नावली ॥ क्षरणम् । इति केचित् ॥ (विनाशः । यथा, बृहत्संहितायाम् । ३४।१२।
"भौमे कुमारबलपति-
सैन्यानां विद्रवोऽग्निश्चभयम् ॥")

विद्रावः, पुं, विद्रवः । विपूर्व्वद्रुधातोर्घञ्प्रत्ययेन निष्पन्नः ॥

विद्रावितं, त्रि, (वि + द्रु + णिच् + क्तः ।) पलायितम् । यथा,—
"विद्राविते भूतगणे ज्वरस्तु त्रिशिराभयात् ॥"
इति श्रीभागवते बाणयुद्धम् ॥

विद्रुतः, त्रि, (वि + द्रु + क्तः ।) प्राप्तद्रवीभावघृतादिः । तत्पर्य्यायः । विलीनः २ द्रुतः ३ । इत्यमरः ॥ पलायितश्च ॥ (यथा, रघुः ।११।४४।
"विद्रुतक्रतुमृगानुसारिणं
येन बाणमसृजत् वृषध्वजः ॥"
पीड़ितः । यथा, मनुः । ७ । ३ ।
"अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः ॥")

विद्रुमः, पुं, (विशिष्टो द्रुमः । यद्वा, विशिष्टो दुर्वृत्तोऽस्त्यस्येति । "द्युद्रुभ्यां मः ।" ५ । २ । १०८ । इति मः ।) प्रवालः । (यथा, ऋतुसंहारे । ६ । १७ ।
"आमूलतो विद्रुमरागताम्राः
सपल्लवाः पुष्पचयं दधानाः ।
कुर्व्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥")
रत्नवृक्षः । इति मेदिनी । मे, ५३ ॥ (यथा, रघुः । १३ । १३ ।
"तवाधरस्पर्द्धिषु विद्रुमेषु
पर्य्यस्तमेतत् सहसोर्म्मिवेगात् ।
ऊर्द्ध्वाङ्कुरप्रोतमुखं कथञ्चित्
क्लेशादपक्रामति शङ्खयूथम् ॥")

विद्रुमलता, स्त्री, (विद्रुम इव लता ।) नलीनामगन्धद्रव्यम् । इत्यमरः ॥

विद्रुमलतिका, स्त्री, (विद्रुमलता । स्वार्थे कन् । टापि अत इत्वम् ।) नलिका । इति राजनिर्घण्टः ॥

विद्वत्कल्पः, त्रि, (विद्वस् + कल्पः ।) ईषदूनो विद्वान् । इति मुग्धबोधव्याकरणम् ॥

विद्वत्तमः, त्रि, (विद्वस् + तमः ।) अयमेषामतिशयेन विद्वान् । इति व्याकरणम् ॥

विद्वत्तरः, त्रि, (विद्वस् + तर ।) अयमनयोरतिशयेन विद्वान् । इति व्याकरणम् ॥

विद्वद्देशीयः, त्रि, (ईषदूनो विद्वान् । विद्वस् + देशीयर् ।) विद्वत्कल्पः । इति व्याकरणम् ॥

विद्वद्देश्यः, त्रि, (ईषदूनो विद्वान् । विद्वस् + देश्यः ।) विद्वत्कल्पः । इति मुग्धबोधव्याकरणम् ॥

विद्वान्, [स्] त्रि, (वेत्तीति । विद् + शतृ । "विदेः शतुर्व्वसुः ।"७।१।३६ । इति शतुर्वसुरादेशः ।) आत्मवित् । प्राज्ञः । पण्डितः । इति मेदिनी ॥ (यथा, मनुः । १ । ९७ ।
"ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः ।
कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः ॥")

विद्विषः, पुं, (विशेषेण द्वेष्टीति । वि + द्विष् + इगुपधेति, कः ।) शत्रुः । विद्वेषके, त्रि । विपूर्व्वकद्विषधातोः कप्रत्ययेन निष्पन्नः ॥

विद्वेषः, पुं, (वि + द्विष + घञ् ।) शत्रुता । तत्पर्य्यायः । वैरम् २ विरोधः ३ । इत्यमरः ॥ अनुशयः ४ द्वेषः ५ समुच्छ्रयः ६ वैरत्वम् ७ । इति जटाधरः ॥ द्वेषणम् ८ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ६०२ ।
"सुभग स्वभवनभित्तौ भवता संमर्द्य पीड़िता सुतनुः ।
सा पीडयैव जीवति दधती वैलक्ष्य विद्वेषम् ॥")

विद्वेषकः, त्रि, विद्वेष्टा । द्वेषकर्त्ता । विरोधकः । वैरी । विद्वेष्टीति विपूर्व्वद्विषधातोर्ण्वक(ण्वुल्) प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १३ । ७१ । २४ ।
"न मित्रध्रुङ्नैकृतिकः कृतघ्नः
शठोऽनृजुर्धर्म्मविद्वेषकश्च ॥")

विद्वेषणं, क्ली, विद्वेषः । विपूर्व्वद्विषधातोरनट् (ल्युट्)प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । ३ । १६५ । ३ ।
"विद्वेषणं परमं जीवलोके
कुर्य्यान्नरः पार्थिव याच्यमानः ।
तत्त्वां पृच्छामि कथयन्तु राजन्
दद्याद्भवान् दयितश्च मेऽद्य ॥")
अभिचारकर्म्मविशेषः । तस्य विहितदिनादि यथा,—
"सूर्य्योदयं समारभ्य घटिकादशकं क्रमात् ।
ऋतवः स्युर्वसन्ताद्या अहोरात्रं दिने दिने ॥
वसन्तग्रीष्मवर्षाख्य शरद्धेमन्तशिशिराः ।
हेमन्तः शान्तिके प्रोक्तो वसन्तो वश्यकर्म्मणि ॥
शिशिरः स्तम्भने ज्ञेयो विद्वेषे ग्रीष्म ईरितः ।
पौर्णमासी मन्दभानुयुक्ता विद्वेषकर्म्मणि ॥
वश्यं पूर्व्वाह्णे मध्याह्ने विद्वेषोच्चाटनं तथा ।
शान्तिपुष्टी दिनस्यान्ते सन्ध्याकाले च मारणम् ॥
कुर्य्याच्च स्तम्भनं कार्य्यं हर्य्यक्षवृश्चिकोदये ।
द्वेषोच्चाटादिकं कर्म्म कुलीरे वा तुलोदये ॥"
भूतोदयनियममाह ।
"जलं शान्तिविधौ शस्तं वश्ये वह्निरुदीरितः ।
स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कीर्त्तितम् ॥"
दिङ्नियममाह ।
"याम्ये रक्षसि विद्वेषं शान्तिं वारुणवायवे ॥
नक्षत्रनियममाह ।
"विद्वेषोच्चाटनं वह्निवायुयोगे च कारयेत् ॥*॥
अथ विद्वेषणं वक्ष्ये मिथो विद्वेषणं रिपोः ।
करणीयं महेशानि ! यदुक्तं मालिनीमते ॥
अन्योन्ययुद्धसंरम्भरुषितौ समरे युतौ ।
तदीयनखरोत्कीर्णधूलिमादाय साधकः ॥
धूलिना तेन विद्वेषस्ताड़नादभिजायते ॥ * ॥
परस्परं रिपोर्व्वैरं मित्रेण सह निश्चितम् ।
महिषाश्वपुरीषाभ्यां गोमूत्रेण समालिखेत् ॥
यस्य नाम तयोः शीघ्रं विद्वेषश्च परस्परम् ।
रक्तेन महिषाश्वेन श्मशानवस्त्रके लिखेत् ॥
यस्य नाम भवेत्तस्य काकपक्षेण वेष्टितम् ।
वेष्टयेत् द्विजवालाग्रकेशैरेकतरेक्षतः ॥
गर्त्ते आमशरावस्तु पिहिताननमध्यतः ।
षट्कोणचक्रमध्ये तु रिपोर्नामसमन्वितम् ॥
मन्त्रराजं प्रवक्ष्यामि महाभैरवसंज्ञकम् ।
ॐ नमो महाभैरवाय रुद्ररूपाय श्मशानवासिने अमुकामुकयोर्व्विद्वेषं कुरु कुरु सुरु सुरु हुँ हुँ फट् ।
एतन्मन्त्रं लिखेत्तत्र विद्वेषो जायते ध्रुवम् ॥"
इति षट्कर्म्मदीपिका ॥
(विशेषेण द्वेष्टीति । वि + द्विष + ल्युः । विद्वेषके, त्रि । यथा, हरिवंशे । २८ । ३० ।
"नास्ति-वादार्थशास्त्रं हि धर्म्मविद्वेषणं परम् ॥"
तथा च महाभारते । १३ । १२६ । २ ।
"ब्राह्मणानां परीवादो मम विद्वेषणं महत् ।
ब्राह्मणैः पूजितैर्नित्यं पूजितोऽहं न संशयः ॥")

विद्वेष(षि)णी, स्त्री, स्त्रीविशेषः । यथा,—
"विद्वेषिणी तु या कन्या भ्रूकुटीकुटिलानना ।
तस्या द्वौ तनयावास्तामयकारप्रकाशकौ ॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिः ॥

विद्वेषी, [न्] त्रि, (विशेषेण द्वेष्टीति । वि + द्विष् + णिनिः ।) यद्वा, विद्वेषशब्दादस्त्यर्थे इनप्रत्ययेन निष्पन्नः । विद्वेषविशिष्टः । वैरी । (यथा,

महाभारते । १३ । १४५ । ५८ ।
"अपरे स्वल्पविज्ञाना धर्म्मविद्वेषिणो नराः ।
ब्राह्मणान् वेदविदुषो नेच्छन्ति परिसर्पितुम् ॥")

विध, श विधौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) विधिर्विधानम् । श, विधति वेधा जगत् । अनेकार्थत्वात् छिद्रकरणेऽप्ययम् । विधितश्छिद्रितौ विद्धे । इत्यमरः ॥ कर्णवेधः । इति दुर्गादासः ॥

विधः, पुं, (विध्यते क्रियते इति । विध + घञर्थे कः ।) विमानम् । हस्त्यन्नम् । प्रकारः । वेधनम् । ऋद्धिः । इति भरतधृतरभसाजयौ ॥

विधवनं, क्ली, कम्पनम् । विपूर्व्वधूधातोर्भावे अनट् (ल्युट्)प्रत्ययेन निष्पन्नम् ॥

विधवा, स्त्री, (विगतो धवो भर्त्ता यस्याः ।) मृतभर्तृका । तत्पर्य्यायः । विश्वस्ता २ । इत्यमरः ॥ जालिका ३ रण्डा ४ यतिनी ५ यतिः ६ । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे ।१०।४०।२।
"को वां शयुत्रा विधवेव देवरं
मर्य्यं न योषा कृणुते सधस्थ आ ॥")
तस्याः कर्त्तव्याकर्त्तव्यानि यथा । विष्णुः ।
"मृते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा इति ।"
ब्रह्मचर्य्यं मैथुनवर्ज्जनं ताम्बूलादिवर्ज्जनञ्च ।
यथा, प्रचेताः ।
"ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्ज्जयेत् ॥"
अभ्यञ्जनं आयुर्वेदोक्तं पारिभाषिकम् । स्मृतिः ।
"एकाहारः सदा कार्य्यो न द्वितीयः कदाचन ।
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ॥
गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः ।
तर्पणं प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः ॥"
एतत्तु तर्पणं पुत्त्रपौत्त्राद्यभाव इति मदनपारिजातः ॥
"वैशाखे कार्त्तिके माघे विशेषनियमञ्चरेत् ।
स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ॥"
इति शुद्धितत्त्वम् ॥ * ॥
अपि च ।
"ब्राह्मणी पतिहीना या भवेन्निष्कामिनी सदा ।
एकभक्ता दिनान्ते सा हविष्यान्नरता सदा ॥
न धत्ते दिव्यवस्त्रञ्च गन्धद्रव्यं सुतैलकम् ।
स्रजञ्च चन्दनञ्चैव शङ्खसिन्दूरभूषणम् ॥
त्यक्त्वा मलिनवस्त्रा स्यान्नित्यं नारायणं स्मरेत् ।
नारायणस्य सेवाञ्च कुरुते नित्यमेव च ॥
तन्नामोच्चारणं शश्वत् कुरुतेऽनन्यभक्तितः ।
पुत्त्रतुल्यञ्च पुरुषं सदा पश्यति धर्म्मतः ॥
मिष्टान्नं न च भुङ्क्ते सा न कुर्य्याद्विभवं व्रजम् ।
एकादश्यां न भोक्तव्यं कृष्णजन्माष्टमीदिने ॥
श्रीरामस्य नवम्याञ्च शिवरात्रौ पवित्रया ।
अघोरायाञ्च प्रेतायां चन्द्रसूर्य्योपरागयोः ॥
अष्टद्रव्यं परित्याज्यं भुज्यते परमेव च ।
ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
सन्न्यासिनाञ्च गोमांसं सुरातुल्यं श्रुतौ श्रुतम् ॥
रक्तशाकं मसूरञ्च जम्बीरं पर्णमेव च ।
अलावुर्व्वर्त्तुलाकारा वर्ज्जनीया च तैरपि ॥
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ।
यान आरोहणं कृत्वा विधवा नरकं व्रजेत् ॥
न कुर्य्यात् केशसंस्कारं गात्रसंस्कारमेव च ।
केशवेणीजटारूपं तत्क्षौरं तीर्थकं विना ॥
तैलाभ्यङ्गं न कुर्व्वीत न हि पश्यति दर्पणम्
मुखञ्च परपुंसाञ्च यात्रां नृत्यं महोत्सवम् ॥
नर्त्तकं गायनञ्चैव सुवेशं पुरुषं शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥
(विधवायास्तु पत्यन्तर-ग्रहणं निषिद्धं न तद्विवाहशब्दवाच्यञ्च । तत्तु विशेषतो विचारेण ग्रन्थविस्तृतिर्भवेदतस्तन्नोक्तः केवलं कतिपयानि वचनान्युद्धृत्य दर्शयामि तानि सुधीभिर्व्विचारणीयानीति ॥ तत्र याज्ञवल्क्यः ।
"अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीम् ॥"
अनन्यपूर्व्विकां दानेनोपभोगेन वा पुरुषान्तरापरिगृहीताम् ॥ व्यासः । २ । ३ ।
"सवर्णामसमानार्षाममातृपितृगोत्रजाम् ।
अनन्यपूर्व्विकां लघ्वीं शुभलक्षणसंयुताम् ॥"
गौतमः । ४ । १ ।
"गृहस्थः सदृशीं भार्य्यां विन्देतानन्यपूर्व्विकाम् ॥"
वशिष्ठः । ८ । १ ।
"गृहस्थो विनीतक्रोधहर्षो गुरुणानुज्ञातः स्नात्वा असमानार्षां अस्पृष्टमैथुनां भार्य्यां विन्देत ॥" हारीतः । ४ । १ ।
"असमानार्षगोत्रां हि कन्यां सभ्रातृकां शुभाम् ।
सर्व्वावयवसम्पन्नां सुवृत्तामुद्वहेन्नरः ॥"
पारस्करगृह्यसूत्रम् ।
"अग्निमुपधाय कुमार्य्याः पाणिं गृह्णीयात् त्रिषु त्रिषूत्तरादिषु ॥"
कन्याशब्दार्थः कथ्यते । "कन्या कुमारी" इत्यमरः । "कन्यापदस्यादत्तस्त्रीमात्रवचनेन ।" इत्यादि दायभागटीकायां आचार्य्यचूड़ामणिः । "कन्यापदस्यापरिणीतामात्रवचनात् ।" इति रघुनन्दनः ॥ "अनूढ़ात्वेन कन्यापदस्य सपत्नीकन्याबोधकतया असुस्थत्वप्रसक्तेः तद्रूपेणैव कन्यापदस्य शक्तेः ।" इति श्रीकृष्णतर्कालङ्कारः ॥ पूर्व्वोक्तैर्व्वचनैः कुमारीणामेव परिणये विवाहशब्दवाच्यत्वं नतूढ़ानाम् ॥
मनुः । ५ । १५१—१५२ ।
"यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितञ्च न लङ्घयेत् ॥
मङ्गलार्थं स्वस्त्ययनं यज्ञस्तासां प्रजापतेः ।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम् ॥"
तत्रैव । १६०—१६२ ।
"मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्त्रापि यथा ते ब्रह्मचारिणः ।
अपत्यलोभात् या तु स्त्री भर्त्तारमतिवर्त्तते ।
सेह निन्दामवाप्नोति पतिलोकाच्च हीयते ॥
नान्योत्पन्ना प्रजास्तीह न चाप्यन्यस्य परिग्रहे ।
न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदिश्यते ॥
पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
लघुहारीतः ।
"स्वगोत्राद्भ्रश्यते नारी विवाहात् सप्तमे पदे ।
पतिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया ॥"
मनुः । ९ । ४७ ।
"सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाहुर्ददानीति त्रीण्येतानि सतां सकृत् ॥"
तत्रैव । ५९—६५ ।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्त्रं न द्वितीयं कथञ्चन ।
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ॥
अनिर्वृत्तं नियोगार्थं पश्यन्तो धर्म्मतस्तयोः ॥
विधवायां नियोगार्थे निर्व्वृत्ते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम् ॥
नियुक्तौ यौ विधिं हित्वा वर्त्तेयातान्तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषाग-गुरुतल्पगौ ॥
नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्म्मं हन्युः सनातनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं क्वचित् ॥"
"न च विवाहविधायकशास्त्रे अन्येन पुरुषेण सह पुनर्व्विवाह उक्तः ॥" इति कुल्लूकः ॥
तत्रैव । ६८—७० ।
"ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेदाप्रसवात् सकृत् सकृदृतावृतौ ॥"
"वाग्भङ्गभयात् सकृद्गमनोपदेशाच्च यस्मै वाग्दत्ता तस्यैवापत्यं भवति ।" इति कुल्लूकभट्टः ॥ तत्रैव । ७१ ।
"न दत्त्वा कस्यचित् कन्यां पुनर्दद्याद्विचक्षणः ।
दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥"
तत्रैव । ७९ ।
"उन्मत्तं पतितं क्लीवमबीजं पापरोगिणम् ।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्त्तनम् ॥"
तत्रैव । ९७ ।
"कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यानुमन्यते ॥"
आश्वलायनगृह्यसूत्रम् । ४ । २ । २१ ।
तामुत्थापयेत् देवरः पतिस्थानीयः अन्तेवासी जरद्दासः । उदीर्ष्व नार्य्यभि जीवलोकम् ॥
अथ पत्नीमुत्थापयेत् कः देवरः पतिस्थानीयः स पतिस्थानीय इत्युच्यते । अनेन ज्ञायते पतिकर्त्तृकं कर्म्म पुंसवनादि पत्यसम्भवे देवरः

कुर्य्यात् । अन्तेवासी शिष्यः स वा यो बहुकालं दास्यं कृत्वा वृद्धोऽभूत् स वा ॥ * ॥ पराशरः । ४ । २५—२६ ।

"ज्येष्ठभ्राता यदा तिष्ठेत् आधानं नैव कारयेत् ।
अनुज्ञातस्तु कुर्व्वीत शङ्खस्य वचनं यथा ॥
नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥"
पराशरः । १० । २५—२७ ।
"बन्दिग्राहेण या भुक्ता हत्वा बद्धा बलाद्-भयात् ।
कृत्वा सान्तपनं कृच्छ्रं शुध्येत् पराशरोऽब्रवीत् ॥
सकृद्भुक्ता तु या नारी नेच्छन्ती पापकर्म्मभिः ।
प्राजापत्येन शुद्ध्येत ऋतुप्रस्रवणेन तु ॥
पतत्यर्द्धं शरीरस्य यस्य भार्य्या सुरां पिबेत् ।
पतितार्द्धशरीरस्य निष्कृतिर्न विधीयते ॥
गायत्रीं जपमानस्तु कृच्छ्रं सान्तपनञ्चरेत् ।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ।
जारेण जनयेद्गर्भं गते त्यक्ते मृते पतौ ॥
तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीम् ।
ब्राह्मणी तु यदागच्छेत् परपुंसा समन्विता ॥
सा तु नष्टा विनिर्द्दिष्टा न तस्या गमनं पुनः ।
कामान्मोहाद् यदा गच्छेत् त्यक्त्वा बन्धुं सुतान् पतिम् ॥
सा तु नष्टा परे लोके मानुषेषु विशेषतः ।
दशमे तु दिने प्राप्ते प्रायश्चित्तं न विद्यते ॥
दशाहं न त्यजेन्नारी त्यजेन्नष्टश्रुता तथा ।
भर्त्ता चैव चरेत्कृच्छ्रं कृच्छ्रार्द्धं चैव बान्धवाः ॥
तेषां भुक्त्वा च पीत्वा च अहोरात्रेण शुध्यति ।
ब्राह्मणी तु यदागच्छेत् परपुंसा विवर्ज्जिता ॥
गत्वा पुंसां शतं याति त्यजेयुस्तान्तु गोत्रिणः ।
पुंसो यदि गृहं गच्छेत् तदशुद्धं गृहं भवेत् ॥
पितृमातृगृहं यस्य जारस्यैव तु तद्गृहम् ।
उल्लिख्य तद्गृहं पश्चात् पञ्चगव्येन शुद्ध्यति ॥"
बृहन्नारदीयम् । उद्वाहतत्त्वे ।
"समुद्रयात्रास्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥
देवरेण सुतोत्पत्तिर्म्मधुपर्के पशोर्व्वधः ।
मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥
दत्तायाश्चैव कन्यायाः पुनर्द्दानं परस्य च ।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ॥
महाप्रस्थानगमनं गोमेधञ्च तथा मखम् ।
इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनीषिणः ॥"
हेमाद्रिपराशरभाष्ययोरादित्यपुराणम् ।
"दीर्घकालं ब्रह्मचर्य्यं धारणञ्च कमण्डलोः ।
देवरेण सुतोत्पत्तिर्दत्ता कन्या प्रदीयते ॥
कन्यानामसवर्णानां विवाहश्च द्विजातिभिः ।
आततायिद्विजाग्र्याणां धर्म्मयुद्धे निर्हिंसनम् ॥
वानप्रस्थाश्रमस्यापि प्रवेशो विधिदेशितः ।
वृत्तस्वाध्यायसापेक्षमघसङ्कोचनन्तथा ॥
प्रायश्चित्तविधानञ्च विप्राणां मरणान्तिकम् ।
संसर्गदोषः पापेषु मधुपर्के पशोर्व्वधः ॥
दत्तौरसेतरेषान्तु पुत्त्रत्वेन परिग्रहः ।
शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम् ॥
भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः ।
ब्राह्मणादिषु शूद्रस्य पक्वतादिक्रियापि च ॥
भृग्वग्निमरणञ्चैव वृद्धादिमरणं तथा ।
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ॥
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्व्वकं बुधैः ।
समयश्चापि साधूनां प्रमाणं वेदवद्भवेत् ॥"
याज्ञवल्क्यः । १ । ६५ ।
"सकृत् प्रदीयते कन्या हरंस्तां चौरदण्डभाक् ।
दत्तामपि हरेत् कन्यां श्रेयांश्चेद्वर आव्रजेत् ॥"
गोतमः ।
"प्रतिश्रुत्याप्यधर्म्मसंयुक्ताय न दद्यात् ॥"
वशिष्ठः ।
"कुलशीलविहीनस्य षण्ढादिपतितस्य च ।
अपस्मारिविधर्म्मस्य रोगिणां वेशधारिणाम् ।
दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव च ॥"
वशिष्ठः उद्वाहतत्त्वे ।
"अद्भिर्व्वाचा प्रदत्तायां म्रियेतोर्द्ध्वं वरो यदि ।
न च मन्त्रोपनीता स्यात् कुमारी पितुरेव सा ॥"
उद्वाहतत्त्वे । यमः ।
"नोदकेन न वा वाचा कन्यायाः पतिरिष्यते ।
पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे ॥"
उद्वाहतत्त्वे कात्यायनः ।
"अनेकेभ्योऽपि दत्तायामनूढायान्तु तत्र वै ।
वरागमश्च सर्व्वेषां दत्तं पूर्व्ववरो हरेत् ॥
नान्योत्पन्ना प्रजास्तीह नचाप्यन्यपरिग्रहे ।
न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदिश्यते ॥
व्यभिचारात्तु भर्त्तुः स्त्री लोके प्राप्नोति निन्दितम् ।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥"
नारदसंहिता ।
"अज्ञातदोषेणोढा या निर्द्दोषा नान्यमाश्रिता ।
बन्धुभिः सा नियोक्तव्या निर्ब्बन्धुः स्वयमाश्रयेत् ॥
नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥
अष्टौ वर्षाण्यपेक्षेत ब्राह्मणी प्रोषितं पतिम् ।
अप्रसूता च या नारी परतोऽन्यं समाश्रयेत् ॥
क्षत्त्रिया षट् समास्तिष्ठेत् अप्रसूता समात्रयम् ।
वैश्या प्रसूता चत्वारि द्वे वर्षे इतरा वसेत् ॥
न शूद्रायाः स्मृतः कालः एष प्रोषितयोषिताम् ।
जीवति श्रूयमाणे तु स्यादेष द्विगुणो विधिः ॥
अतोऽन्यगमने स्त्रीणां एष दोषो न विद्यते ॥"
ऋग्वेदे । १० । ४० । २ ।

"को वां शयुत्रा विधवेव देवरम् ॥"

"तत्र दृष्टान्तं दर्शयति शयुत्रा शयने विधवेव यथा मृतभर्त्तृका नारी देवरं भर्त्तृभ्रातरं अभिमुखीकरोति ।" "तथाच यास्कः क्वस्विद्दोषा भवथः क्व दिवा क्वाभिप्राप्तिं कुरुथः क्व वसथः को वां शयने विधवेव देवरं देवरः कस्माद्द्वितीयो वर उच्यते । विधवा विधातृका भवति विधवनाद्वा विधावनाद्वेति चर्म्मशिरा अपिवा धव इति मनुष्यनाम तद्वियोगाद्विधवा देवरो दीव्यतिकर्म्मा मर्य्यो मनुष्यो मरणधर्म्मा योषा यौतेराकुरुते सधस्थाने इति ।" इति तद्भाष्ये सायणः ॥

एतेन पूर्व्वोल्लिखितप्रमाणपर्य्यालोचनेन एतत् प्रतीयते यत् विधवाया विवाहो नास्ति किन्तु देवरादिना नियोगोऽस्ति । सोऽपि कलौ क्षेत्रजादिपुत्त्रवत् नास्त्येव । नष्टे मृते इत्यादि वचने अन्यवचनैरेकवाक्यतया पतिशब्दस्य पालकार्थत्वं वाग्दानपर्य्यन्तत्वं वा दत्तामपि हरेत्कन्यामित्यादिवचने दत्ताशब्दस्य वाग्दत्तापरार्थत्वञ्च एतच्च सर्व्वं सुधीभिर्भाव्यमिति ।)

विधा, स्त्री, (विधानमिति । वि + धा + क्विप् ।) विधिः । प्रकारः । इत्यमरः ॥ यथा, तैत्तिरीयोपनिषदि । ३ । ९ । २ ।

"तस्मात् यया कया च विधया बह्वन्नं प्राप्नुयात् ॥")

ऋद्धिः । गजान्नम् । वेतनम् । इति मेदिनी-शब्दरत्नावल्यौ ॥ कर्म्म । इति हेमचन्द्रः ॥ वेधनम् । इति त्रिकाण्डशेषः ॥ (आपः । यथा, वाजसनेयसंहितायाम् । १४ । ७ ।

"सजूरृतुभिः सजूर्विधाभिः सजूर्वसुभिः ।"

"विधाभिर्या त्वं सजूरसि विदधति दधन्ति जगदिति विधा आपस्ताभिः । आपो वै विधा अद्भिर्हीदं सर्व्वं विहितमिति श्रुतेः । अप एव ससर्ज्जादौ इति स्मृतेश्च ।" इति तद्भाष्ये महीधरः ॥)

विधाः, [स्] पुं, ब्रह्मा । इत्युणादिकोषः ॥

विधाता, [ऋ] पुं, (विदधातीति । वि + धा + तृच् ।) ब्रह्मा । इत्यमरः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ६४ ।

"अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥"

"विशेषेण शेषदिग्गजभू भूधरान् समस्तभूतानि च दधातीति विधाता ।" इति तत्र शाङ्करभाष्यम् ॥ * ॥ महेश्वरः । यथा, महाभारते । १३ । १७ । १०४ ।

"उग्रश्च विधाता च मान्धाता भूतभावनः ॥")

कामदेवः । इति मेदिनी । ते, १६ ॥ मदिरा । इति राजनिर्घण्टः ॥ भृगुमुनिपुत्त्रः । तस्य भार्य्या मेरुकन्या नियतिः । तस्य पुत्त्रः प्राणः । तस्य सुतः वेदशिराः कविश्च । इति श्रीभागवतमतम् ॥ * ॥ विधातुर्विचित्रा गतिर्य्यथा,—

कंस उवाच ।

"वृक्षेण पर्व्वतं हन्तुं शक्तो भ्राता च दैवतः ।
कीटेन सिंहशार्दूलं मशकेन गजं तथा ॥
शिशुना च महावीरं महान्तं क्षुद्रजन्तुभिः ।
मूषिकेण च मार्ज्जारं मण्डूकेन भुजङ्गमम् ॥
एवं जन्येन जनकं भक्ष्येणैव च भक्षकम् ।
वह्निना च जलं नष्टं वह्निं शुष्कतृणेन च ॥
पीताः सप्त समुद्राश्च द्विजेनैकेन जह्नुना ।

धातुर्गतिर्विचित्रा च दुर्ज्ञेया भुवनत्रये ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
अपि च ।

भलन्दन उवाच ।

“सम्बन्धो हि विधिवशो न मे साध्यो व्रजाधिप ।
प्रजापतिर्योगकर्त्ता जन्मदाताहमेव च ॥
का कस्य पत्नी कन्या वा वरः को वा ससाधनः ॥
कर्म्मानुरूपफलदः सर्व्वेषां कारणं विधिः ।
भवितव्यं कृतं कर्म्म तदमोघं श्रुतौ श्रुतम् ॥
अन्यथा निष्फलं सर्व्वमनीशस्योद्यमो यथा ।
वृषभानुप्रिया धात्रा लिखिता चेत् सुता मम ॥
पुरा भूतेव को वाहं केनान्येन निवार्य्यते ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अः ॥*॥
अन्यच्च ।
“त्यागे दोषः कामुकीनां शापभाक् पापभाक् गृही ।
ब्रह्मा जगद्विधातापि न विरक्तः कलत्रवान् ।
त्यागे दोषस्तु कदाचिन्नास्माकं व्यक्तयोषिताम् ॥”*॥
अपरञ्च ।
“स्वान्तर्दुःखेन दुःखार्त्तो यो यं शपति निश्चितम् ।
तं शापं खण्डितुं शक्तो न विधाता जगत्प्रभुः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २० अः ॥*॥
असौ जगतां पतिर्यथा,—
“द्वौ धाता च विधाता च पौराणौ जगतां पती ।
द्वौ शास्तारौ त्रिलोकेऽस्मिन् धर्म्माधर्म्मौ प्रकीर्त्तितौ ॥”
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(त्रि, मेधावी । इति निघण्टुः । ३ । १५ ॥ विहितकर्म्मानुष्ठाता । यथा, मनुः ।११।३५।
“विधाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते ।
तस्मै नाकुशलं ब्रूयात् न शुष्कां गिरमीरयेत् ॥”
स्रष्टा । सर्व्वसमर्थः । यथा, रघुः । १ । ७० ।
“तया हीनं विधातर्म्मां कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमपादपम् ॥”
जनयिता । दाता । यथा, कुमारे । १ । ५७ ।
“स्वयं विधाता तपसः फलानां
केनापि कामेन तपश्चचार ॥”)

विधातृभूः, पुं, (विधातुर्ब्रह्मणो भूरुत्पत्तिर्यस्य ।) नारदमुनिः । इति त्रिकाण्डशेषः ॥

विधात्रायुः, [स्] पुं, (विधातुरायुर्ज्जीवितकालपरिमाणं यस्मात् । सूर्य्यक्रियां विना वत्सरादिज्ञानासम्भवादेवास्य तथात्वम् ।) सूर्य्यः । यथा,—
“वेशदानो विधात्रायुर्द्दिव्यवक्षो दिवाकरः ॥”
इति शब्दचन्द्रिका ।
क्ली, ब्रह्मणो वयः । तद्यथा । चतुर्द्दशमन्वन्तरैर्ब्रह्मणः एकं दिनं भवति । तन्मनुष्यमानेनैकः कल्पस्त्रिंशत्कल्पे ब्रह्मण एको मासो भवति । एतादृशैर्द्वादशमासैर्ब्रह्मणः संवत्सरो भवति । एवं वर्षशतं ब्रह्मण आयुः । तत्र पञ्चाशत् वर्षा व्यतीताः । एकपञ्चाशदारम्भेऽधुना श्वेतवाराहकल्पः । अत्र मन्वन्तराणि व्यतीतानि षट् अधुना वैवस्वतमन्वन्तरं वर्त्तते । इति श्रीभागवतमतम् ॥

विधात्री, स्त्री, (वि+धा+तृच् । ङीप् ।) पिप्पली । इति शब्दचन्द्रिका ॥ विधानकर्त्री । यथा,—
“गतासूनां बाहुप्रकरकृतकाञ्चीपरिलसन्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शवहृदि महाकालसुरतप्रयुक्तां त्वां ध्यायन् जननि जड़चेता अपि कविः ॥”
इति तन्त्रसारे कर्पूरादिस्तोत्रम् ॥

विधानं, क्ली, (वि+धा+ल्युट् ।) विधिः । इति जटाधरः ॥ (यथा, मनुः । ७ । १८१ ।
“यदा तु यानमातिष्ठेत् परराष्ट्रं प्रति प्रभुः ।
तदानेन विधानेन यायादरिपुरं शनैः ॥”)
करणम् । इति नानार्थविधिशब्दटीकायां भरतः ॥ (यथा, रघुः । ७ । १४ ।
“परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां वितथोऽभविष्यत् ॥”)
करिकवलः । इति हारावली ।१६१ ॥ (वेदादिशास्त्रम् । यथा, मनुः । १ । ३ ।
“त्वमेको ह्यस्य सर्व्वस्य विधानस्य स्वयम्भुवः ।
अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित् प्रभो ! ॥”
नाटकाङ्गविशेषः । यथा, साहित्यदर्पणे । ६ । ३४६ ।
“सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम् ॥”
यथा, बालचरिते ।
“उत्साहातिशयं वत्स तव बाल्यञ्च पश्यतः ।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥”)

विधानकं, क्ली, व्यथा । इति शब्दरत्नावली ॥ (विधिः । यथा, कथासरित्सागरे ।४६।१८०।
“ततस्तुष्टो भदन्तोऽसौ तस्मायादित्यशर्म्मणे ।
ददौ सुलोचनामन्त्रमर्थितं सविधानकम् ॥”)
विधानवेत्तरि, त्रि ॥

विधानगः, पुं, (विधानं गायतीति । गै+टक् ।) पण्डितः । इति शब्दरत्नावली ॥

विधायकः, त्रि, विपूर्व्वधाञ्धातोर्णक(ण्वुल्)प्रत्ययेन निष्पन्नः ॥ विधानकर्त्ता । (यथा, राजतरङ्गिण्याम् । १ । १६६ ।
“स विहारस्य निर्म्माता जुष्को जुष्कपुरस्य यः ।
जयस्वामिपुरस्यापि शुद्धधीः स विधायकः ॥”)
विधिज्ञापकः ॥

विधायी, [न्] त्रि, विधानकर्त्ता । विपूर्व्वकधाञ्धातोर्णिन्प्रत्ययेन निष्पन्नः ॥ (यथा, कथासरित्सागरे । ४२ । ११३ ।
“भार्य्याञ्च कायालङ्कारां तादृक्कार्य्यविधायिनीम् ।
भूगृहे स निचिक्षेप पापां तां पुत्त्रघातिनीम् ॥”)

विधाय्यं, क्ली, कम्पनम् । विपूर्व्वधूधातोर्घ्यण्प्रत्ययेन निष्पन्नम् ॥

विधिः, पुं, (विधति विदधाति विश्वमिति । विध विधाने+“इगुपधात् कित् ।” उणा० ४।११६। इति इन् । स च कित् ।) ब्रह्मा । (यथा, नैषधे । २२ । ४७ ।
“विधिर्विधत्ते विधुना वधूनां
किमाननं काञ्चनसञ्चकेन ॥”*॥
विधीयेते सुखदुःखे अनेनेति । वि+धा+“उपसर्गे घोः किः ।”३ । ३ । ९२ । इति किः ।) भाग्यम् । (यथा, मार्कण्डेये । ८ । १८२ ।
“राज्यनाशं सुहृत्त्यागो भार्य्यातनयविक्रयः ।
हरिश्चन्द्रस्य राजर्षेः किं विधे ! न कृतं त्वया ॥”)
क्रमः । विधानम् । इत्यमरः ॥ कालः । इति मेदिनी । धे, १७ ॥ विधिवाक्यम् । (यथा, गीतायाम् । १६ । २३ ।
“यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥”)
प्रकारः । नियोगः । इति हेमचन्द्रः ॥ विष्णुः । इति हलायुधः । कर्म्म । इति त्रिकाण्डशेषः ॥ (यथा, देवीपुराणे ।
“तस्मात् सूर्य्यः शशाङ्कश्च चयवृद्धिविधिर्विभुः ॥”)
गजान्नम् । इति जटाधरः ॥ वैद्यः । इति राजनिर्घण्टः ॥ यागोपदेशकग्रन्थः । इति भरतधृतकोषः ॥ षड्विधसूत्रलक्षणान्तर्गतसूत्रविशेषः । यथा,—
“संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥”
अप्राप्तप्रापको विधिः । स तु द्विविधः । वर्णोत्पादनरूपोऽभावरूपश्च । वर्णोत्पादनरूपो यथा सहर्षे घं इत्यादि । अभावरूपो द्विविधः । नाशो निषेधरूपश्च । नाशविधिर्यथा । लोपोऽस्योमाङोरित्यादि । निषेधविधिर्यथा । नाणोऽन्त इत्यादि । सामान्यप्राप्तस्य विशेषावधारणं नियमविधिः । यथा । रङो विः सुपि इत्यादि । अन्यधर्म्मस्यान्यत्रारोपणमतिदेशविधिः । यथा । इन्वदिक् इत्यादि । पूर्व्वसूत्रस्थितपदस्य परसूत्रेषूपस्थितिरधिकारविधिः । स तु त्रिविधः ।
“सिंहावलोकिताख्यश्च मण्डूकप्लुतिरेव च ।
गङ्गास्रोत इति ख्यातस्त्वाधिकारास्त्रयो मताः ॥”
सिंहावलोकितो यथा । वावगोर्दान्ते इत्यस्मात् दान्ते इति पदस्य ऋत्यनित्यन्तेषूपस्थितिः । मण्डूकप्लुतिर्यथा । टाभिस्ङिङसीत्यस्मात् अत इति पदस्य आत्मिमभवि इत्यत्रोपस्थितिः । गङ्गास्रोतो यथा । जेः सि औ जस् इत्यस्मात् ङेरिति पदस्य तद्धितपर्य्यन्तेषूपस्थितिरिति । एवञ्च ।
“कार्य्यी कार्य्यं निमित्तञ्च त्रिभिः सूत्रमुदाहृतम् ।
कदाचित् कार्य्यिकार्य्याभ्यां क्वचित् कार्य्यनिमित्ततः ॥
यस्य निर्द्दिश्यते कार्य्यं स कार्य्यी गदितो बुधैः ।

क्रियते यत्तु तत् कार्य्यमादेशप्रत्ययागमम् ॥
यस्मात् परं परे यस्मिन् तन्निमित्तं द्विधा मतम् ।
आकाङ्क्षायान्तु सर्व्वेषामनुवृत्तिः परे भवेत् ।”
इति ।

एवञ्च ।
“बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्ब्बली ।
प्रत्ययाश्रितकार्य्यन्तु बहिरङ्गमुदाहृतम् ।
प्रकृत्याश्रितकार्य्यं स्यादन्तरङ्गमिति ध्रुवम् ।
प्रकृतेः पूर्व्वपूर्व्वं स्यादन्तरङ्गतरं तथा ॥
सावकाशविधिभ्यः स्याद्बली निरवकाशकः ।
कस्यचिद्भिन्नकार्य्यस्य प्रथमे परतस्तथा ।
सम्भवेद्विषयो यस्य स भवेत् सावकाशकः ।
आदौ हि विषयो यस्य परतो न हि संभवेत् ।
स पण्डितगणैरुक्तो विधिर्निरवकाशकः ॥
तथा सामान्यकार्य्येभ्यो विशेषकविधिर्ब्बली ।
बहवो विषया यस्य स सामान्यविधिर्भवेत् ।
स्वल्पः स्याद्विषयो यस्य स विशेषविधिर्म्मतः ।
आगमादेशयोर्म्मध्ये बलीयानागमो विधिः ॥
प्रकृतिं प्रत्ययञ्चापि यो न हन्ति स आगमः ।
आदेश उपघातो यः प्रकृतेः प्रत्ययस्य वा ॥
सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्बली ।”
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥ * ॥
अथ विधिभेदाः । तत्र कश्चित् प्रधानविधिः । स तु स्वतः फलहेतुक्रियाबोधकः । यथा । यजेत स्वर्गकाम इत्यादि । कश्चिदङ्गविधिः । स तु स्वतः फलहेतुक्रियायां कथमित्याकाङ्क्षायां विधायकः । यथा । इड़ो यजति इत्यादि । कश्चित् प्रयोगविधिः । स तु यावदङ्गयुक्तक्रियाबोधकः । यथा । यावदङ्गयुक्तं यजेत विलम्बं स्वर्गकाम इत्यादि । कश्चिद्गुणफलविधिः । स तु आकाङ्क्षानिवृत्तौ अधिकफलाय प्राप्तकर्म्मणि गुणविधिः । यथा । गोदोहेनापः प्रणयेत् पशुकाम इत्यादि । प्रधानविधिश्च द्विविधः । उत्पत्तिर्नियोगश्चेति । तत्रोत्पत्तिस्तु कर्म्मस्वरूपबोधकः । यथा आग्नेयाष्टाकपालः अमावास्यायां पौर्णमास्याञ्चाच्युतो भवति इत्यादि । नियोगश्च स्वर्गकामाद्यधिकारिबोधकः । यथा । स्वर्गकामो यजेत इत्यादि । अङ्गविधिस्तु कालदेशकर्त्रादिबोधकतया अनियत एव । प्रधानाङ्गविध्योर्विधेयाप्राप्तिप्राप्तिभ्यां त्रैविध्यम् । तत्र अप्राप्तितो द्वैविध्यम् । तत्राप्यत्यन्ताप्राप्तौ अपूर्व्वविधिः । पक्षतोऽप्राप्तौ नियमविधिः । विधेयतत्प्रतिपक्षयोः प्राप्तौ परिसङ्ख्याविधिः । अतएवोक्तम् ।
“विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्या विधीयते ॥”
तत्र प्रधानस्य विधिभेदो यथा । अहरहः सन्ध्यामुपासीत इत्यादिरपूर्व्वविधिः । अत्र विधेयस्य सन्ध्यादेः शास्त्रतो रागतो न्यायतो वा क्वचिदप्यप्राप्तेः । तथा ऋतौ भार्य्यामुपेयात् इत्यादिर्नियमविधिः । विधेयस्य भार्य्याभिगमनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तेः । तथा । प्रोक्षितं मांसं भुञ्जीत इत्यादिः परिसङ्ख्याविधिः । विधेयस्य प्रोक्षितमांसभक्षणस्य च रागतः प्राप्तेः । अङ्गस्य विधिभेदो यथा । शारदीयपूजायामष्टम्यामुपवसेत् इत्यादिरपूर्व्वविधिः । अत्र विधेयस्योपवासस्य एतदन्यशास्त्रतो रागतो न्यायतो वा क्वचिदप्राप्तेः । तथा श्राद्धे भुञ्जीत पितृसेवितमित्यादिर्नियमविधिः । विधेयस्य श्राद्धशेषभोजनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तेः । तथा । वृद्धिश्राद्धे प्रातरामन्त्रितान् विप्रान् इत्यादिः परिसङ्ख्याविधिः । तत्र विधेयस्य प्रातर्निमन्त्रणस्य तत्प्रतिपक्षस्य पूर्व्वदिनसायं निमन्त्रणस्य च पार्व्वणवन्न्यायतः प्राप्तिरिति स्मृतेरुदाहरणम् । इति धर्म्मदीपिका ॥ * ॥ न्यायमते विधिर्यथा,—
“प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥”
विधिजन्यज्ञानात् प्रवृत्तिर्हश्यते सा इच्छातः चिकीर्षातः चिकीर्षा च कृतिसाध्यत्वेष्टसाधनत्वज्ञानात् तज्ज्ञानस्य विषयः कार्य्यत्वं इष्टसाधनत्वञ्च विधिरिति प्राचीनमतम् । स्वमतमाह तज्ज्ञापकोऽथवेति इष्टसाधनत्वानुमापक आप्ताभिप्रायो विधिप्रत्ययार्थः । इति हरिदासीयकुसुमाञ्जलिः ॥ * ॥ अपि च आश्रयत्वसम्बन्धेन प्रत्ययोपस्थापितेष्टसाधनत्वान्वितस्वार्थपरपदघटितवाक्यत्वं विधित्वम् । मीमांसकमते इष्टसाधनत्वं कृतिसाध्यत्वञ्च पृथग्विध्यर्थः । इति गदाधरभट्टाचार्य्यकृतविधिस्वरूपः ॥

विधिदर्शी, [न्] पुं, (विधिं द्रष्टुं शीलमस्य । दृश् + णिनिः ।) सदस्यः । इत्यमरः ॥

विधिदेशकः, पुं, (विधिं दिशतीति । दिश + ण्वुल् ।) सदस्यः । इति शब्दरत्नावली ॥

विधिवत्, व्य, यथाविधि । विध्यनुसारेण । यथा,—
“तोषयेत् सततं भार्य्यां विधिवत् पाणिपीड़िताम् ।”
इति कालिकापुराणे १८ अध्यायः ॥ * ॥
अपि च ।
“सन्ध्यामुपास्य विधिवत् विल्वपत्राद्युपार्च्चयेत् ।”
इति शिवरात्रिव्रतकथा ॥ * ॥
अन्यच्च ।
“पूजयेद्ब्रह्मविष्ण्वर्कंरुद्रवस्वात्मकं शिवम् ।
व्रतोपवासैर्विधिवत् श्रद्धया च विमत्सरः ॥”
इति मत्स्यपुराणे योगमाहात्म्यम् ४८ अध्यायः ॥
अपरञ्च ।
“इति नक्षत्रपुरुषमुपोष्य विधिवत् स्वयम् ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ।”
इति तत्रैव ५१ अध्यायः ॥

विधुः, पुं, (विध्यति विरहिणं विध्यते राहुणेति वा । व्यध ताड़े + “पृभिदिव्यधीति ।” उणा० १ । २४ । इति कुः ।) चन्द्रः । (यथा,—
“पिक ! विधुस्तव हन्ति समं तम-
स्त्वमपि चन्द्रविरोधिकुहूरवः ।
तदुभयोरनिशं हि विरोधिता
कथमहो समता मम तापने ॥” * ॥
विध्यति असुरानिति ।) विष्णुः । कर्पूरः । इति मेदिनी । धे, १६ ॥ ब्रह्मा । इति शब्दरत्नावली ॥ राक्षसः । इति विश्वः ॥ आयुधः । वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ * ॥
चन्द्रस्य द्वादशावस्थास्तत्फलादिञ्च यथा,—
“चन्द्रस्य द्वादशावस्था भवन्ति प्रत्यु ता अपि ।
त्रिषु त्रिषु च ऋक्षेषु अश्विन्यादि वदाम्यहम् ॥
प्रवासस्थं पुनर्नष्टं म्लानावस्थं जयावहम् ।
हास्यावस्थं क्रीड़ावस्थं प्रमोदावस्थमेव च ।
विषादावस्थभोगस्थे ज्वरावस्थं व्यवस्थितम् ॥
कम्पावस्थं सुस्थावस्थं द्वादशावस्थगं भवेत् ॥
प्रवासो हानिर्मृत्युश्च जयो हासो रतिः सुखम् ।
शोको भोगो ज्वरः कम्पः सुस्थावस्थाक्रमात्फलम् ॥
जन्मस्थः कुरुते तुष्टिं द्वितीये नास्ति निर्वृतिः ।
तृतीये राजसम्मानं चतुर्थे कलहागमः ॥
पञ्चमेन स्त्रमाक्षिप्य स्त्रीलाभो वै तथा भवेत् ॥
धनधान्यागमः षष्ठे रतिः पूजा च सप्तमे ।
अष्टमे प्राणसन्देहो नवमे कोषसञ्चयः ॥
दशमे कार्य्यनिष्पत्तिर्ध्रुवमेकादशे जयः ।
द्वादशेन शशाङ्केन मृत्युरेव न संशयः ।”
इति गारुड़े । ६१ । ३—८ ॥ * ॥
चन्द्रस्य क्षयवृद्धिकारणम् यथा,—
ब्रह्मोवाच ।
“राका चानुमती चैव द्विविधा पूर्णिमा मता ।
सिनीवाली कुहुश्चैव अमावास्या द्विधैव तु ॥
अमा नाम रवे रश्मिश्चन्द्रलोके प्रतिष्ठिता ।
यस्मात् सोमो वसत्यस्याममावासी ततः स्मृता ॥
पूर्व्वोदितकलाभिन्नपौर्णमास्या निशाकरे ।
पूर्णिमानुमती ज्ञेया पश्चास्तमितभास्करे ॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोद्गमः ।
युगपत् सोत्तरा रागस्तदानुमतिपूर्णिमा ।
राकान्तामनुमन्यन्ते देवताः पितृभिः सह ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयोऽब्रुवन् ॥
सिनीवालीप्रमाणन्तु क्षीणशेषो निशाकरः ।
अमावास्यां विशत्यर्कं सिनीवाली ततः स्मृता ॥
कुहेति कोकिलेनोक्तो यः कालस्तु समाप्यते ।
तत्कालसंज्ञा त्वेषा वै अमावास्या कुहूः स्मृता ।
अनुमत्याशवाः कार्य्याः सिनीवाल्याः कुहूं विना ।
एतासां विरलः कालः कुमाचेति कुहूः स्मृता ॥
कलाः षोड़श सोमस्य शुक्ले वर्द्धयते रविः ।
अमृतेनामृतं कृष्णे पीयते दैवतैः क्रमात् ॥
प्रथमां पिबते वह्निर्द्वितीयां पवनः कलाम् ।
विश्वेदेवास्तृतीयान्तु चतुर्थीन्तु प्रजापतिः ॥
पञ्चमीं वरुणश्चापि षष्ठीं पिबति वासवः ।

सप्तमीन्त्वथयो दिशा वसवोऽष्टौ तथाष्टमीम् ॥
नवमीं कृष्णपक्षस्य पिबतीन्द्रः कलामपि ।
दशमीं मरुतश्चापि रुद्रा एकादशीं कलाम् ।
द्वादशीन्तु कलां विष्णुर्धनदश्च त्रयोदशीम् ।
चतुर्द्दशीं पशुपतिः कलां पिबति नित्यशः ।
ततः पञ्चदशीञ्चैव पिबन्ति पितरः कलाम् ॥
कलावशिष्टो निष्पीतः प्रविष्टः सूर्य्यमण्डलम् ।
अमायां विशति रश्मौ अमावासी ततः स्मृता ॥
पूर्व्वाह्णे विशते चार्कं मध्याह्ने तु वनस्पतिम् ।
अपराह्णे विशत्यपस्तु स्वयोनिवारिसम्भवः ॥
आपः प्रविष्टः सोमस्य शेषया कलयैकया ।
तृणगुल्मलताश्चाग्निष्पादयति चौषधीः ॥
तमोषधिं स्थितं गावश्चरन्त्यापः पिबन्ति च ।
तदङ्गानुगतं गोभ्यः क्षीरत्वमुपगच्छति ॥
तत्क्षीरमन्मृतं भूत्वा मन्त्रभूतं द्विजातयः ।
स्वाहाकारवषट्कारैर्जुहुन्त्वाहुतयः क्रमात् ॥
हुतमग्निषु देवाय पुनः सोमं विवर्द्धयेत् ।
एवं संक्षीयते सोमः क्षीणश्चाप्यायते पुनः ।
तस्मात् सूर्य्यः शशाङ्कस्य क्षयवृद्धिविधिर्व्विभुः ॥”
इति देवीपुराणे चन्द्रक्षयवृद्धिः ॥ * ॥
ब्रह्मोवाच ।
“यदयं वदते लोको बालिशत्वान्महामते ।
तदहं संप्रवक्ष्यामि चन्द्रसूर्य्योपरागिकम् ॥
यदि सत्वमयं ग्रस्तस्तेजोराशिर्दिवाकरः ।
तत्कथं नोदरस्थेन राहुर्न भस्मसात् कृतः ॥
अथवा राहुणाक्रम्य शनुवक्त्रं प्रवेशितः ।
तत् कथं दशनैस्तीक्ष्णैः शतधा न विखण्डितः ॥
विमुक्तश्च पुनर्दृष्टस्तथैवाखण्डमण्डलः ।
न चास्यापहृतं तेजो न स्थानादपसारितः ॥
यदि वा क्षेव निष्पीतः कथं दीप्ततरोऽभवत् ।
तस्मान्न तेजसां राशौ राहोर्वक्त्रं गमिष्यति ॥
भक्ष्यार्थं सर्व्वदेवानां सोमः सृष्टः स्वयम्भुवा ।
तत्रस्थममृतञ्चापि सम्भृतं सूर्य्यतेजसा ॥
पिबन्त्यमृतमयं देवाः पितरश्च स्वधामृतम् ।
त्रयश्च त्रिंशतश्चैव त्रयस्त्रिंशत्तथैव च ॥
त्रयश्च त्रिसहस्राश्च देवाः सोमं पिबन्ति ये ।
राहोरप्यमृतं भाग्यं पुरा सृष्टं स्वयम्भुवा ॥
तस्मात्तद्राहुरागत्य पातुमिच्छति पर्व्वसु ।
उद्धृत्य पार्थिवीं छायां महाकारान्तमोमयः ॥
पातुमिच्छन् ततश्चेन्दुमाच्छादयति छायया ।
शुक्ले च चन्द्रमभ्येति कृष्णे पर्व्वणि भास्करम् ॥
सूर्य्यमण्डलसंस्थन्तु चन्द्रमेव जिघांसति ।
तस्मात् पिबति तं राहुस्तमुमस्याविनाशयन् ॥
अविहिंसन् यथा पद्मं पिबति भ्रमरो मधु ।
चन्द्रस्यमृतं तद्वदभेदाद्राहुरश्नुते ॥
चन्द्रकान्तो मणिर्यद्वत्तुहिनं क्षरते क्षयात् ।
क्षरन्नपि न क्षीयेत तेजसा नैव मुच्यते ॥
यथा सूर्य्यमणिः सूर्य्याद्गुत्पाद्य पावकं शुभम् ।
न भवत्यङ्गहीनोऽपि तेजसा नैव मुच्यते ॥
एवं चन्द्रश्च सूर्य्यश्च छादितावपि राहुणा ।
स्वतेजसा न मुच्येत नाङ्गहीनौ बभूवतुः ॥
पर्व्वक्षय च चन्द्रस्य मासिकक्रमधाहृतिः ।
सोमो देवतसंयोगात् छायायोगाच्च पार्थिवात् ।
राहोश्च वरलब्धारे पश्चरेदमृतं शशी ॥
स्वदोहकाले संप्राप्ते वत्सं दृष्ट्वा च गौर्यथा ।
स्वाङ्गादेव चरेत् क्षीरं तथेन्दुः क्षरतेऽमृतम् ।
पितेव सूर्य्यो देवानां सोमो मातेव लक्ष्यते ॥
यथा मातुः स्तनं पीत्वा जीवन्ति सर्व्वजन्तवः ।
पीत्वामृतं तथा सोमात् तृप्यन्ति सर्व्वदेवताः ॥
सम्भृतं सर्व्वयोगेषु तथायं क्षरते शशी ।
तं क्षरन्तं यथाभागमुपजीवन्ति देवताः ॥
तस्मिन् काले समभ्येति राहुरप्यवकर्षति ।
सर्व्वमर्हन्ति भागञ्च पादं पादार्द्धमेव च ॥
आक्रम्य पार्थिवी छाया यावती चन्द्रमण्डलम् ।
स्मृतः स भागो राहोस्तु देवभागास्तु शेषकाः ॥
तृप्तिं विधाय देवानां राहोः पर्व्वगतस्य च ।
चन्द्रो न क्षयमायाति तेजसा नैव मुच्यते ॥
तिथिभागाश्च यावन्तः पुनस्तथर्कं प्रमाणतः ।
सर्व्वच्छायास्थितः कालस्तावानेव प्रकीर्त्तितः ॥
अतो राहुभुजः सोमः सोमाद्वृद्धिं दिवाकरः ।
पर्व्वकाले स्थितिस्त्वेवं विपरीता: पुनः पुनः ॥
अतश्छादयते राहुरभ्रवच्छशिभास्करौ ।
राहुरम्भकसंस्थानः सोममाच्छाद्य तिष्ठति ॥
उद्धृत्य पार्थिवीं छायां धूममेघ इवोत्थितः ।
चन्द्रस्य यदवस्थं राहुणा भास्करस्य च ॥
गात्रावखण्डितं तस्य कैवल्यं श्यामलीकृतम् ।
कर्द्दमेन यथा वस्त्रं शुक्लमप्युपदह्यते ॥
एकोद्देशेऽथ सर्व्वत्रा राहुणा चन्द्रमास्तथा ।
प्रक्षालितं तदेवेह पुनः शुक्लतरं भवेत् ॥
राहुयुक्तं भवेत्तद्विन्निर्म्मलं चन्द्रमण्डलम् ।
राहुणाच्छादितौ वापि दृष्ट्वा चन्द्रदिवाकरौ ॥
विप्राः शान्तिपरा भूत्वा पुनराप्याययन्ति तम् ।
एवं न गृह्यते सूर्य्यश्चन्द्रमास्तत्र गृह्यते ॥
अबुधास्तं न पश्यन्ति मानुषा मांसचक्षुषः ।
जगत्सम्मोहनं चैतत् ग्रहणं चन्द्रसूर्य्ययोः ॥”
इत्यादौ देवीपुराणे ग्रहणविकल्पः ॥ * ॥
विधोर्द्देवपित्राद्यन्नकारणत्वं राजयक्ष्मादिकारणत्वञ्च कालिकापुराणे २०।२१ अध्याययोर्द्रष्टव्यम् ॥ * ॥ (कर्त्तरि, त्रि । यथा, ऋग्वेदे । १० । ५५ । ५ ।
“विधुं दद्राणं समने बहूनां
युवानं सन्तं पलितो जगार ॥”
“विधुं विधातारं सर्व्वस्य युद्धादेः कर्त्तारं विपूर्व्वो दधातिः करोत्यर्थे ।” इति तद्भाष्ये सायणः ।)
विधुतः, त्रि, (वि+धु+क्तः ।) त्यक्तः । इत्यमरः । (यथा, भागवते । ६ । १६ । २५ ।
“स तत्र निर्म्मुक्तसमस्तसङ्ग
आत्मानुभूत्या विधुतत्रिलिङ्गः ।
परेऽमले ब्रह्मणि वासुदेवे
लेभे गतिं भागवतीं प्रतीतः ॥”)
कम्पितश्च ॥
विधुतिः, स्त्री, कम्पनम् । विपूर्व्वधुधातोः क्तिप्रत्ययेन निष्पन्ना । (यथा, भागवते । १० । ३३ । ८ ।
“पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ॥”
निराकृतिः । यथा, तत्रैव । ४ । २२ । ३८ ।
“यस्मिन्निदं सदसदात्मतया विभाति
मायाविवेकविधुतिस्रजि वाहिबुद्धिः ॥”)
विधुननं, क्ली, (वि+धू+णिच् । ल्युट् । नुक् च । पृषोदरादित्वात् ह्रस्वः ।) कम्पनम् । इति जटाधरः ॥
विधुन्तुदः, पुं, (विधुं तुदति पीडयतीति । विधु+तुद+“विध्वरुषोस्तुदः ।” ३ । २ । ३५ । इति खश् । मुम् ।) राहुः । इत्यमरः ॥ (यथा, माघे । २ । ६१ ।
“नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये ।
विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ॥”)
विधुपञ्जरः, पुं, (विधोः पञ्जरः वक्राक्षि इव तत्-सादृश्यात् ।) खड्गः । इति शब्दमाला ॥
विधुप्रिया, स्त्री, (विधोश्चन्द्रस्य प्रिया ।) चन्द्रपत्नी । यथा । दाक्षायण्यो विधुप्रिया । इति कोषान्तरम् ॥
विधुरं, क्ली, (विगता धूर्भारो यस्मात् । समासे अः ।) प्रविश्लेषः । इत्यमरः ॥ कैवल्यम् । इति त्रिकाण्डशेषः ॥ (प्रत्यवायः । कष्टम् । यथा, किरातटीकायां मल्लिनाथधृतवैजयन्ती ।
“विधुरं प्रत्यवाये स्यात् कष्टविश्लेषयोरपि ।”
तथा च किराते । २ । ७ ।
“विधुरं किमतः परं परै-
रवगीतां गमिते दशामिमाम् ।
अवसीदति यत् सुरैरपि
त्वयि सम्भावितवृत्ति पौरुषम् ॥”)
विधुरः, त्रि, (विगता धूः कार्य्यभारो यस्मात् । ऋक्पूरित्यः ।) विकलः । इति मेदिनी । रे, २१६ ॥ (यथा, कुमारे । ४ । ३२ ।
“तदिदं क्रियतामनन्तरं
भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्ज्जनात्
ननु मां प्रापय पत्युरन्तिकम् ॥”)
विधुरा, स्त्री, रसाला । इति मेदिनी । रे, २१६ ॥ (जत्रूर्द्ध्वस्नायुमर्म्म । यथा, सुश्रुते । ३ । ६ ।
“जत्रूर्द्ध्वं मर्म्माणि चतस्रो धमन्योऽष्टौ मातृका द्वे कृकाटिके द्वे विधुरे ॥”)
विधुवनं, क्ली, (वि+धु+ल्युट् । कुटादित्वात् साधुः ।) कम्पनम् । इत्यमरः । ३ । २ । ४ ॥
विधूतं, त्रि, (वि+धू+क्तः ।) कम्पितम् । (यथा, कलाविलासे । २ । २८ ।
“तं वदति सोऽन्यदृष्टिः सभ्रूभङ्गं विधूतहस्ताग्रः ।
वक्रकवचनः पापो दृतिच्छीवः कृतोऽयमायातः ॥”)
व्यक्तम् । इति हेमचन्द्रः ॥ (यथा, महागणपतिस्तोत्रे । १ ।
“योगं योगविदां विधूतविविधव्यासङ्गशुद्धाशय-
प्रादुर्भूतसुधारसप्रसृमरध्यानास्पदाध्यासिनाम् ॥”)

विधूतिः, स्त्री, कम्पनम्। विपूर्व्वधूधातोः क्तिप्रत्ययेन निष्पन्नमिति ॥
विधूननं, क्ली, (वि+धू+णिच्+ल्युट्। नुक् च।) कम्पनम्। तत्पर्य्यायः। विधुवनम् २। इत्यमरः। ३। २। ४ ॥ विधुननम् ३। इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे। ३। १४२।
"केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात्।
प्राहुः कुट्टमितं नाम शिरःकरविधूननम् ॥")
विधूनितं, त्रि, कम्पितम्। विपूर्व्वण्यन्तधूधातोः क्तप्रत्ययेन निष्पन्नम् ॥
विधृतं, क्ली, विशेषेण धृतम्। यथा,—
"अथावलम्ब्य विष्टम्भं लोष्टकाष्ठतृणादिना।
उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहनः ॥"
इत्याह्निकतत्त्वम् ॥
विधेयः, त्रि, विधातुं शक्यः। (वि+धा+"अचो यत्।"३।१।९७। इति यत्। "ईद्यति।"६।४। ६५। इति आत ईत्।) वाक्यस्थः। तत्पर्य्यायः। विनयग्राही २ वचनेस्थितः ३ आश्रवः ४। इत्यमरः ॥ (यथा, महाभारते। ५। २३। १३।
"कच्चिद्राजा कुशली तात कच्चित्
सुयोधनो यस्य मन्दो विधेयः ॥")
विधिजन्यबोधविषयः। यथा,—
"अनुवाद्यमनुक्त्वा तु न विधेयमुदीरयेत्।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ॥"
इत्येकादशीतत्त्वम् ॥
अपि च। प्रमाणान्तरासन्निहितं कर्म्म प्रथमं बुद्धौ न विषयीभवति शब्दादेव तस्य कर्म्मण उपस्थितिरित्युपादेये विधेये कर्म्मणि पूजादौ शुचितत्कालजीविनः कर्म्माधिकारात् प्रमाणान्तरलभ्यत्वेनाविधेयत्वात्तिथ्यादिर्गुणः। इति तिथ्यादितत्त्वम् ॥ (कर्त्तव्यम्। यथा, बृहत्संहितायाम्। ८५। ४८।
"द्वात्रिंशत्प्रविभक्ते दिक्चक्रे यद्यथा समुद्दिष्टम् ॥
तत्तथा विधेयं गुणदोषफलं यियासूनाम् ॥"*॥
अधीनः। यथा, रघुः। १८। ४।
"सन्निवेश्य सचिवेष्वतः परं
स्त्रीविधेयनवयौवनोऽभवत् ॥"
तथा च तत्रैव। ७। ६२।
"तस्थौ ध्वजस्तम्भनिषण्णदेहं
निद्राविधेयं नरदेवसैन्यम् ॥")
विधेयता, स्त्री, (विधेयस्य भावः। विधेय+तल्।) विधेयत्वम्। विधिजन्यबोधविषयत्वम्। यथा। यथा ब्रह्मवधादिषु पापस्य निषिद्धतयोपयुक्तब्राह्मणादिस्थाने वैगुण्यं तथा गङ्गास्नानादिषु पुण्यस्य विधेयतावच्छेदकगङ्गादिस्थाने वैगुण्यम्। इति प्रायश्चित्ततत्त्वम् ॥ (अधीनता। यथा, किराते। ११। ३३।
"परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः।
अविधेयेन्द्रियः पुंसां गौरिवैति विधेयताम् ॥")
विध्वंसः, पुं, (वि+ध्वंस+घञ्।) विनाशः। यथा, तिथ्यादितत्त्वे।
"हरिते रोगोऽनुतापः शस्यानामीतिभिश्च विध्वंसः।
कपिले शीघ्रगसत्त्वैस्तद्ध्वंसोऽथ दुर्भिक्षम् ॥"
(अपकारः। यथा, किराते। ३। १६।
"विधाय विध्वंसमनात्मनीनं
शमैकवृत्तेर्भवतश्छलेन।
प्रकाशितत्वन्मतिशीलसाराः
कृतोपकारा इव विद्विषस्ते ॥")
विनतः, त्रि, (वि+नम+क्तः।) प्रणतः। (यथा, आर्य्यासप्तशत्याम्। ६१६।
"सखि दुरवगाहगहनो विदधानो विप्रियं प्रियजनेऽपि।
खल इव दुर्लक्ष्यस्तव विनतमुखस्योपरि स्थितः कोपः ॥")
भुग्नः। (यथा, बृहत्संहितायाम्। ६१। ३।
"दशसप्तचतुर्दन्त्यः प्रलम्बमुण्डानना विनतपृष्ठाः।
ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च ॥")
शिक्षितः। इति मेदिनी। ते, १५६ ॥ (सङ्कुचितः। यथा, रामायणे। १। ४३। २४।
"विनतं क्वचिदुद्भूतं क्वचिद्याति शनैः शनैः।
सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः ॥"
पुं, स्वनामख्यातवानरविशेषः। यथा, भट्टिः। ७। ५२।
"प्राचीं तावद्विरथ्यः कपिभिर्विनतो ययौ।
अप्रग्राहैरिवादित्यो वाजिभिर्दूरपातिभिः ॥")
विनता, स्त्री, गरुड़माता। (सा तु दक्षप्रजापतेः कन्या। यथा, महाभारते। १। ६५। १२।
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः।
कद्रुश्च मनुजव्याघ्र दक्षकन्यैव भारत ॥")
पिड़काभेदः। इति मेदिनी। ते, १५६ ॥ (यथा, सुश्रुते। २। ६।
"महती पिड़का नीला पिड़का विनता स्मृता॥")
विनतासूनुः, पुं, (विनतायाः सूनुः पुत्त्रः।) अरुणः। इति हेमचन्द्रः ॥ गरुड़श्च ॥
विनदः, पुं, (विशेषेण नदति शब्दायते पत्रफलादिनेति। नद्+अच्।) विन्याकवृक्षः। इति शब्दचन्द्रिका ॥ छातियान् इति ख्यातः ॥
विनम्रकं, क्ली, तगरपुष्पम्। इति राजनिर्घण्टः ॥
विनयः, त्रि, वणिक्। क्षिप्तः। निभृतः। विजितेन्द्रियः। इत्यजयपालः ॥ (विशेषेण नयतीति। नी+अच्। विशेषेण प्रापकः। पृथक्कर्त्ता। यथा, ऋग्वेदे। २। २४। ९।
"स संनयः स विनयः पुरोहितः
ससुष्टुतः सयुधि ब्रह्मणस्पतिः ॥"
"विनयः संगतानां विविधं नेता पृथक्कर्त्ता स एव।" इति तद्भाष्ये सायणः ॥)
विनयः, पुं, (वि+नी+अच्।) शिक्षा। (यथा, रघुः। १। २४।
"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः ॥")
प्रणतिः। इति मेदिनी। ये, १०५ ॥*॥ (यथा,
"जितेन्द्रियत्वं विनयस्य कारणं
गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः ॥"
इत्युद्भटः ॥)
अथ विनयप्रशंसा।
"वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन्।
तेभ्यो हि शिक्षेत् विनयं विनीतात्मा हि नित्यशः ॥
समग्रां वशगां कुर्य्यात् पृथिवीन्नात्र संशयः।
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः।
वनस्थाश्चैव राज्यानि विनयात् प्रतिपेदिरे ॥"
इति मत्स्यपुराणे १८९ अध्यायः ॥*॥
(विशिष्टो नयः।) दण्डः। यथा। "यत्तु।
'पूर्व्वमाचारयेद्यस्तु नियतं स्यात् स दोषभाक्।
पश्चाद्यः सोऽप्यसत्कारी पूर्व्वे तु विनयो गुरुः ॥'
इति नारदवचनम् ॥
तत्पूर्व्वापचया परस्याधिकवाक्पारुष्योत्पादकस्यापि स्वल्पदण्डविधायकम्। युगपत्संप्रवर्त्तने अधिकदण्डाभावमाह स एव।
'पारुष्ये साहसे चैव युगपत्संप्रवर्त्तयोः।
विशेषश्चेन्न लभ्येत विनयः स्यात् समस्तयोः ॥'
विनयो दण्डः।" इति व्यवहारतत्त्वम् ॥
विनयग्राही, [न्] त्रि, (विनयं गृह्णातीति। ग्रह+णिनिः।) वचनेस्थितः। इत्यमरः ॥
विनयस्थः, त्रि, (विनये तिष्ठतीति। स्था+कः।) आज्ञाकारी। तत्पर्य्यायः। विधेयः २ आश्रवः ३ वचनस्थितः ४ वश्यः ५ प्रणेयः ६। इति हेमचन्द्रः। ३। ८६ ॥
विनया, स्त्री, वाट्यालकः। इति मेदिनी ॥
विनशनं, क्ली, (विनश्यति अन्तर्दधाति सरस्वत्यत्रेति। वि+नश+अधिकरणे ल्युट्।) कुरुक्षेत्रम्। तच्च हस्तिनाया उत्तरपश्चिमे वर्त्तते। इति त्रिकाण्डशेषः ॥ (यथा, महाभारते। ३। ८२। १०५।
"ततो विनशनं गच्छेन्नियतो नियताशनः।
गच्छत्यन्तर्हिता यत्र मेरुपृष्ठे सरस्वती ॥"
वि+नश+भावे ल्युट्।) विनाशश्च ॥
विनष्टः, त्रि, (वि+नश+क्तः।) नाशाश्रयः। ध्वंसविशिष्टः। यथा। शिखी विनष्टः पुरुषो न नष्टः। इति विशेषव्याप्तिटीकायां मथुरानाथः ॥ पतितः। यथा नारदः।
"विनष्टे वाप्यशरणे पितर्य्युपरतस्पृहे।"
विनष्टे पतिते। इति दायभागः ॥
विनष्टिः, स्त्री, विनाशः। इति विपूर्व्वनशधातोर्भावे क्तिप्रत्ययेन निष्पन्नमिति। इति सिद्धान्तकौमुदी ॥ (यथा, भागवते ३। १। २०।
"तत्राथ शुश्राव सुहृद्विनष्टिं
वनं यथा वेणुजवह्निसंश्रयम्।

संसङ्गेया जघमथानुग्रोचन्
सरस्वतीं प्रत्यगियाय तूष्णीम् ॥")
विनसः, त्रि, (विगता नासिका यस्य । नसादेशः।)
गतनासिकः । तत्पर्य्यायः । विग्रः २ विख्रः ३
विनासकः ४ । इति जटाधरः ॥
विना, व्य, (वि+"विनञ्भ्यां नानाञौ न सह ।"
५।२।२७। इति ना।) वर्ज्जनम् । तत्पर्य्यायः ।
पृथक् २ अन्तरेण ३ ऋते ४ हिरुक् ५ नाना
६ । इत्यमरः ॥ (शब्देनानेन योगे "पृथग्-
विनेति ।" २।३।३२। इत्यनेन तृतीया पञ्चमी
च स्यात् । एवं "पृथग्विना नानाभिरिति
योगविभागो द्वितीयार्थः ।" इति काशिकोक्त्या
द्वितीयापि । यथा, तत्रैव।
"विना वातं विना वर्षं विद्युत्प्रपतनं विना ।
विना हस्तिकृतान्दोषान् केनेमौ पातितौ द्रुमौ ॥"
तृतीयाप्रयोगो यथा, रघुवंशे २ । १४ ।
"शशाम वृष्ट्यापि विना दवाग्निः ।"
पञ्चमीप्रयोगो यथा, सांख्यकारिकायाम् ।४१।
"चित्रं यथाश्रयमृते
स्थाण्वादिभ्यो विना यथा छाया ।
तद्वद्विना विशेषै-
र्न तिष्ठति निराश्रयं लिङ्गम् ॥")
विनाकृतं, त्रि, (विना अन्तरेण कृतम् ।) त्यक्तम् ।
इति त्रिकाण्डशेषः ॥
विनायकः, पुं, (विशिष्टो नायकः ।) बुद्धः । गणेशः ।
इत्यमरः ॥ (यथा, कथासरित्सागरे ।३०। ५५ ।
"अस्तीह प्रमदोद्याने तरुमण्डलमध्यगः ।
दृष्टप्रभावो वरदो देवदेवो विनायकः ॥")
गरुडः । विघ्नः । (यथा, हरिवंशे ।१८२।६५।
"राक्षसाश्च पिशाचाश्च भूतानि च विना-
यकाः ॥")
गुरुः । इति मेदिनी । के, ११२ ॥ * ॥ विना-
यकगणो यथा,—
"गाङ्गेयो विष्णवश्चैव द्वौ विज्ञेयौ विनायकौ ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥ * ॥
विनायकस्योत्पत्तिर्यथा,—
प्रजापाल उवाच ।
"कथं गणपतेर्जन्म मूर्त्तिमत्त्वञ्च सत्तम ! ।
एतन्मे संशयं छिन्धि धृतिकरं व्यवस्थितम् ॥
महातपा उवाच ।
पूर्व्वं देवगणाः सर्व्वे ऋषयश्च तपोधनाः ।
कार्य्यारम्भे यथा प्राप्ताः सिद्धिं ते च न संशयः ॥
सन्मार्गावस्थितेषु यथा सिध्यन्ति विघ्नतः क्रियाः ।
असत्कारिषु सर्व्वेषु तद्वदेवमविघ्नतः ॥
ततो देवाः सपितरश्चिन्तयामासुरोजसा ।
असत्कार्य्येषु विघ्नार्थं सर्व्व एवाभ्यमन्त्रयन् ॥
ततस्तेषां तदा मन्त्रं कुर्व्वतां त्रिदिवौकसाम् ।
बभूव बुद्धिर्गमने रुद्रं प्रति महामते ॥
ते तत्र रुद्रमामन्त्र्य कैलासनिलयं गुरुम् ।
ऊचुः सविनयं सर्व्वे प्रणिपातपुरःसरम् ॥
देवा ऊचुः ।
देवदेव महादेव शूलपाणे त्रिलोचन ।
विघ्नार्थमविशिष्टानां उत्पादयितुमर्हसि ॥
एवमुक्तस्तदा देवैर्भवः परमया मुदा ।
उमां निरीक्षयामास चक्षुषानिमिषेण ह ॥
देवानां सन्निधौ तस्य पश्यतो मां महात्मनः ।
चिन्ताभूद्व्योम्नि मूर्त्तेभ्यो दृश्यते केन हेतुना ॥
पृथिव्या विद्यते मूर्त्तिरपां मूर्त्तिस्तथैव च ।
तेजसः श्वसनस्यापि मूर्त्तिरेषा तु दृश्यते ॥
आकाशस्य कथं नेति मत्वा देवो जहास च ।
ज्ञानशक्तिः परान् दृष्ट्वा यद्दृष्टं व्योम्नि शम्भुना ॥
यच्चोक्तं ब्रह्मणा पूर्व्वं शरीरन्तु शरीरिणाम् ।
यच्चापि हसितं तेन देवेन परमेष्ठिना ॥
एतत्कार्य्यचतुष्केण पृथिव्यादिचतुर्ष्वपि ।
मूर्त्तिमानतितेजस्वी हसतः परमेष्ठिनः ॥
प्रदीप्तास्यो महादीप्तः कुमारो भासयन् दिशम् ।
परमेष्ठिगुणैर्युक्तः साक्षाद्रुद्र इवापरः ॥
उत्पन्नमात्रो देवानां योषितः संप्रमोहयन् ।
कान्त्या दीप्त्या तथा मूर्त्त्या रूपेण च
महात्मवान् ॥
तं दृष्ट्वा परमं रूपं कुमारस्य महात्मनः ।
उमा निमिषनेत्राभ्यां तमपश्यत भामिनी ॥
तं दृष्ट्वा कुपितो देवस्तीव्रकोपसमन्वितः ।
मत्वा कुमाररूपन्तु शोभनं मोहनं दृशाम् ।
ततः शशाप तं देवो गणेशं परमेश्वरः ॥
कुमार गजवक्त्रस्त्वं प्रलम्बजठरस्तथा ।
भविष्यति तथा सर्पैरुपवीतगतिर्ध्रुवम् ॥
एवं शशाप तं देवस्तीव्रकोपसमन्वितः ।
धुन्वन् शरीरमुत्थाय ततो देवो रुषान्वितः ॥
यथा यथासौ स शरीरमाद्यं
धुनोति देवस्त्रिशिखाग्रपाणिः ।
तथा तथा चाङ्गरुहावकाश
जलं च्युतौ संन्यपतंस्तथान्ये ॥
विनायकानेकमुखा गजास्या-
स्तमालनीलाञ्जनसन्निकाशाः ।
उत्तस्थुरुग्रैर्विविधास्त्रहस्ता-
स्ततस्तु देवा मनसाकुलेन ॥
किमेतदित्यद्भुतकर्म्मकारी
ह्येकः करोत्यप्रतिमं महच्च ।
कार्य्यं सुराणां कृतमेतदिदं
भवेत्तथेत्थं चरितं कुतस्तत् ॥
दिवौकसां चिन्तयतां तथा तु
विनायकैः क्ष्मा क्षुभिता बभूव ।
चतुर्मुखश्चाप्रतिमो विमान-
मारुह्य खे वाक्यमिदं जगाद ॥
धन्यास्तु देवा सुरनायकेन
त्रिलोचनेनाद्भुतरूपिणा च ।
अनुगृहीताः परमेश्वरेण
सुरद्विषां विघ्नकृतां नतौ च ।
इत्येवमुक्ता प्रपितामहस्ता-
मुवाच देवस्त्रिशिखाग्रपाणिम् ॥
यस्ते विभो वक्त्रसमुद्भवः प्रभु-
र्विनायका नाम वसन्त्विमेऽनुगाः ।
भवन्त्वपाथास्त्ववरेण चाम्बरे
त्वया च तुष्टस्तु शरीरधारी ॥
आकाशमेतद्बहुधा व्यवस्थितं
त्वया चैको वदतां ते प्रयाताः ।
प्रभुर्भवत्वप्रतिमास्त्रपाणिना
इमान् हि चास्त्रैः सुतरांश्च देहि ॥
इत्येवमुक्ताभिगते पितामहे
त्रिलोचनस्त्वात्मभवं जगाद ।
विनायको विघ्नकरो गजास्यो
गणेशनामा तु भवस्य पुत्रः ॥
एते च सर्व्वे त्वपयान्तु भृत्या
विनायकाः क्रूरदृशः प्रचण्डाः ।
उच्छुष्मदानादिविरुद्धदेहाः
कार्य्येषु सिद्धिं प्रतिपादयन्तः ॥
भवांश्च वेदेषु तथा मखेषु
कार्य्येषु चान्येषु महानुभावात् ।
अग्रेषु पूजां लभतेऽन्यथा च
विनाशयिष्यस्यथ कार्य्यसिद्धिम् ॥
इत्येवमुक्तः परमेश्वरेण
सुरैः समं काञ्चनकुम्भसंस्थैः ।
जलैस्तथासावभिषिक्तगात्रो
रराज राजेन्द्रः विनायकानाम् ॥
दृष्ट्वाभिषिच्यमानं तु देवास्तं गणनायकम् ।
तुष्टुवुः प्रयताः सर्व्वे त्रिशूलाङ्कस्य सन्निधौ ॥
देवा ऊचुः ।
नमस्ते गजवक्त्राय नमस्ते गणनायक ।
विनायक नमस्तेऽस्तु नमस्ते चण्डविक्रम ॥
नमोऽस्तु ते विघ्नकर्त्रे नमस्ते सर्पमेखल ।
नमस्ते रुद्रवक्त्रोत्थ प्रलम्बजठराश्रित ।
सर्व्वदेवनमस्कारादविघ्नं कुरु सर्व्वदा ॥
एवं स्तुतस्तदा देवैर्महात्मा गणनायकः ।
अभिषिक्तस्तु रुद्रेण सोमस्यापत्यतां गतः ॥
एतच्चतुर्थ्यां सम्पन्नं गणाध्यक्षस्य पार्थिव ।
यतस्ततोऽयं महती तिथीनां परमा तिथिः ॥
एतस्यां यस्तिलान् भक्त्या भुक्त्वा गणपतिं नृप ।
आराधयति तस्याशु तुष्यते नात्र संशयः ॥
यश्चैतत् पठते स्तोत्रं यश्चैतत् शृणुयात्तथा ।
तस्य विघ्ना न जायन्ते न पापं सर्व्वथा नृप ॥"
इत्यादि वाराहे विनायकोत्पत्तिनामाध्यायः ॥ * ॥
विनायकस्य नामाष्टकस्तोत्रं यथा,—
श्रीविष्णुरुवाच ।
"गणेशमेकदन्तञ्च हेरम्बं विघ्ननायकम् ।
लम्बोदरं शूर्पकर्णं गजवक्त्रं गुहाग्रजम् ॥
नामाष्टकार्थं पुत्त्रस्य शृणु मत्तो हरप्रिये ।
स्तोत्राणां सारभूतञ्च सर्व्वविघ्नहरं परम् ॥
ज्ञानार्थवाचको गश्च णश्च निर्व्वाणवाचकः ।
तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहम् ॥१॥
एकशब्दः प्रधानार्थो दन्तश्च बलवाचकः ।
बलं प्रधानं सर्व्वस्मादेकदन्तं नमाम्यहम् ॥२॥
दीनार्थवाचको हेश्च रम्बः पालनवाचकः ।
परिपालकं दीनानां हेरम्बं प्रणमाम्यहम् ॥३॥
विपत्तिवाचको विघ्नो नायकः खण्डनार्थकः ।
विपत्खण्डनकारन्तं नमामि विघ्ननायकम् ॥४॥

विष्णुदत्तैश्च नैवेद्यैर्यस्य लम्बोदरं पुरा ।
पित्रा दत्तैश्च विविधैर्वन्दे लम्बोदरञ्च तम् ॥ ५ ॥
शूर्पाकारौ च तत्कर्णौ विघ्नवारणकारणौ ।
सम्पदास्तालरूपौ च शूर्पकर्णं नमाम्यहम् ॥ ६ ॥
विष्णुप्रसादपुष्पञ्च यन्मूर्द्ध्नि मुनिदत्तकम् ।
तद्गजेन्द्रवक्त्रयुक्तं गजवक्त्रं नमाम्यहम् ॥ ७ ॥
गुहस्याग्रे च जातोऽयमाविर्भूतो हरगृहे ।
वन्दे गुहाग्रजं देवं सर्व्वदेवाग्रपूजितम् ॥ ८ ॥
एतन्नामाष्टकं दुर्गे नामार्थसंयुतं परम् ।
पुत्त्रस्य पश्य वेदे च तदा कोपं तथा कुरु ॥
एतन्नामाष्टकं स्तोत्रं नामार्थसंयुतं शुभम् ।
त्रिसन्ध्यं यः पठेन्नित्यं स सुखी सर्व्वतो जयी ।
ततो विघ्नाः पलायन्ते वैनतेयाद्यथोरगाः ।
गणेश्वरप्रसादेन महाज्ञानी भवेद्ध्रुवम् ।
पुत्त्रार्थी लभते पुत्त्रं भार्य्यार्थी विपुलां स्त्रियम् ।
महाजडः कवीन्द्रश्च विद्यावांश्च भवेद्ध्रुवम् ।”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥
अस्य कवचं यथा,—
नारद उवाच ।
“संसारमोहनस्यास्य कवचस्य प्रजापतिः ।
ऋषिश्छन्दश्च बृहती देवो लम्बोदरः स्वयम् ।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ।
सर्व्वेषां कवचानाञ्च सारभूतमिदं मुने ॥
ॐ गौँ गँ श्रीँ गणेशाय स्वाहा मे पातु मस्तकम् ।
द्वात्रिंशदक्षरो मन्त्रो ललाटं मे सदावतु ॥
ॐ ह्रीँ क्लीँ श्री गमिति च सततं पातु लोचनम् ।
तालुकं पातु विघ्नेशः सततं धरणीतले ।
ॐ ह्रीँ श्रीँ क्लीमिति सततं पातु नासिकाम् ।
ॐ गौँ गं शूर्पकर्णाय स्वाहा पात्वधरं मम ।
दन्तांश्च तालुकां जिह्वां पातु मे षोड़शाक्षरः ।
ॐ श्रीं लम्बोदरायेति स्वाहा गण्डं सदावतु ।
ॐ गौं गं गजाननायेति स्वाहा स्कन्धं सदावतु ।
श्रीं ह्रीं क्लीमिति कङ्कालं पातु वक्षःस्थलञ्च गं ।
पाणी पादौ सदा पातु सर्व्वाङ्गं विघ्ननिघ्नकृत् ।
प्राच्यां लम्बोदरः पातु आग्नेय्यां विघ्ननायकः ।
दक्षिणे पातु विघ्नेशो नैर्ऋत्यान्तु गजाननः ।
पश्चिमे पार्व्वतीपुत्त्रो वायव्यां शङ्करात्मजः ।
कृष्णस्यांशश्चोत्तरे तु परिपूर्णतमस्य च ।
ऐशान्यामेकदन्तश्च हेरम्बः पातु चोर्द्ध्वतः ।
गणाधिपोऽप्यधः पातु सर्व्वपूज्यश्च सर्व्वतः ।
स्वप्ने जागरणे चैव पातु मे योगिनां गुरुः ।
इति ते कथितं वत्स ! सर्व्वमन्त्रौघविग्रहम् ।
संसारमोहनं नाम कवचं परमाद्भुतम् ।
श्रीकृष्णेन पुरा दत्तं गोलोके रासमण्डले ।
वृन्दावने विनीताय मह्यं दिनकरात्मज ।
मया दत्तञ्च तुभ्यञ्च यस्मै कस्मै न दास्यसि ।
परं वरं सर्व्वपूज्यं सर्व्वसङ्कटतारणम् ।
गुरुमभ्यर्च्य विधिवत् कवचं धारयेत्तु यः ।
कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशयः ।
अश्वमेधसहस्राणि राजसूयशतानि च ।
ग्रहेन्द्रकवचस्यास्य कलां नार्हन्ति षोड़शीम् ।
इदं कवचमज्ञात्वा यो भजेच्छङ्करात्मजम् ।
शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ।”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे गणेशकवचं नाम १३ अध्यायः ॥ * ॥ अथ विनायकशान्तिः ।
याज्ञवल्क्य उवाच ।
“विनायकोपसृष्टस्य लक्षणानि निबोधत ।
स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति ।
विमना विफलारम्भः स सीदत्यनिमित्ततः ।
राजा राज्यं कुमारी च पतिं पुत्त्रञ्च गुर्व्विणी ।
नाप्नुयात् स्नपनन्तस्य पुण्येऽह्नि विधिपूर्व्वकम् ।
गौरसर्षपकल्केन सर्पिषोत्सादितस्य च ।
सर्व्वौषधैः सर्व्वगन्धैर्व्विलिप्तशिरसस्तथा ।
भद्रासनोपविष्टस्य स्वस्तिवाच्य द्विजान् शुभान् ।
मृत्तिका रोचना गन्धान् गुग्गुलुं चाप्सु निक्षिपेत् ॥
या आहृता ह्येकवर्णैश्चतुर्भिः कलसैर्ह्रदात् ।
चर्म्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं तथा ॥
सहस्राक्षं शतधारं ऋषिभिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ।
भगन्ते वरुणो राजा भगं सूर्य्यो बृहस्पतिः ।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ।
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि ।
ललाटे कर्णयोरक्ष्णोरापस्तत् घ्नन्तु ते सदा ।
स्नातस्य सार्षपं तैलं स्रुवेणौडुम्बरेण तु ।
जुहुयान्मूर्द्धनि कुशान् सव्येन परिगृह्य च ।
मितश्च संमितश्चैव तथा शालकटंकटाः ।
कूष्माण्डो राजपुत्त्रश्चेत्यन्ते स्वाहासमन्वितैः ।
दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य्य सर्व्वशः ।
कृताकृतांस्तण्डुलांश्च पललौदनमेव च ।
पुष्पं चित्रं सुगन्धिञ्च सुराञ्च त्रिविधामपि ।
मूलकं पूरिका पूपास्तथैवैरण्डिकाः स्रजः ।
दधि पायसमन्नञ्च गुड़पिष्टं समोदकम् ।
एतान् सर्व्वानुपाहृत्य भूमौ कृत्वा ततः शिरः ।
अम्बिकामुपतिष्ठेच्च दद्यादर्घ्यं कृताञ्जलिः ।
दूर्व्वासर्षपपुष्पैश्च पूर्णमञ्जलिमग्रतः ।
कृतस्वस्त्ययनं चैव प्रार्थयेदम्बिकां सतीम् ।
रूपं देहि यशो देहि भगं भगवति देहि मे ।
पुत्त्रान् देहि श्रियं देहि सर्व्वकामांश्च देहि मे ।
ब्राह्मणान् भोजयेत् पश्चात् शुक्लवस्त्रानुलेपनैः ।
वस्त्रयुग्मं गुरोर्द्दद्यात् संपूज्य ग्रहांस्तथा ।
श्रेयःकर्म्मफलं विद्यात् सूर्य्यार्च्चनरतस्तथा ।”
इति गारुड़े १०० अध्यायः ॥ * ॥
अथ गणेशमन्त्राः ।
“पञ्चान्तकं शशिधरं बीजं गणपतेर्विदुः ।”
पञ्चान्तको गकारः । ध्यानन्तु गणेशशब्दे द्रष्टव्यम् । अस्य पुरश्चरणं चतुर्लक्षजपः ॥ * ॥
अथ महागणपतिमन्त्रः । निबन्धे ।
“श्रीशक्तिस्मरभूविघ्नबीजानि प्रथमं वदेत् ।
ङेऽन्तं गणपतिं पश्चात् वरान्ते वरदं पदम् ।
उक्त्वा सर्व्वजनं मेऽन्ते वशमानय ठद्वयम् ।
अष्टाविंशत्यक्षरोऽयं ताराद्यो मनुरीरितः ।”
भूबीजमाह ।
“स्मृतिस्थं मांसमौविन्दुयुक्तं भूबीजमीरितम् ।”
स्मृतिर्गकारः । मांसं लकारः ॥ * ॥ अस्य ध्यानम् ।
“नवरत्नमयं द्वीपं स्मरेदिक्षुरसाम्बुधौ ।
तद्वीचिधौतपर्य्यन्तं मन्दमारुतसेवितम् ॥
मन्दारपारिजातादिकल्पवृक्षलताकुलम् ।
उद्धूतरत्नच्छायाभिररुणीकृतभूतलम् ।
उद्यद्दिनकरेन्दुभ्यासुद्भासितदिगन्तरम् ।
तस्य मध्ये पारिजातं नवं रत्नमयं स्मरेत्
ऋतुभिः सेवितं षड्भिरनिशं प्रीतिवर्द्धनम् ॥
तस्याधस्तात् महापीठे रचिते मातृकाम्बुजे ।
षट्कोणान्तस्त्रिकोणस्थं महागणपतिं स्मरेत् ।
हस्तीन्द्राननमिन्दुचूड़मरुणच्छायं त्रिनेत्रं रसादाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया सन्ततम् ।
बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पल-
ब्रीह्यग्रस्वविषाणरत्नकलसान् हस्तैर्व्वहन्तं भजे ।
गण्डपालिगलद्दानपूरलालसमानसान् ।
द्विरेफान् कर्णतालाभ्यां वारयन्तं मुहुर्मुहुः ।
कराग्रधृतमाणिक्यकुम्भवक्त्रविनिःसृतैः ।
रत्नवर्षैः प्रीणयन्तं साधकं मदविह्वलम् ।
माणिक्यमुकुटोपेतं रत्नाभरणभूषितम् ।”
अस्य पुरश्चरणं चतुर्लक्षजपः ॥ * ॥ अपि च ।
“शक्तिवह्निगतं बीजं महागणपतिं वदेत् ।
ङेऽन्तमग्निवधूप्रोक्तो मन्त्रोऽयं द्वादशाक्षरः ।”
अस्य ध्यानम् ।
“मुक्तागौरं मदगजमुखं चन्द्रचूड़ं त्रिनेत्रं
हस्तैः स्वीयैर्दधतमरविन्दाङ्कुशौ रत्नकुम्भम् ।
अङ्कस्थायाः सरसिजरुचेस्तद्दृगालम्बिपाणि-
र्देव्या योनौ विनिहितकरं रत्नमौलिं भजामि ।”
अस्य पुरश्चरणं लक्षजपः ॥ * ॥ मन्त्रान्तरम् ।
“शक्तिरुद्रं निजं बीजं वशमानय ठद्वयम् ।
ताराद्यो मनुराख्यातो रुद्रसंख्याक्षरान्वितः ।”
अस्य ध्यानम् ।
“हस्तैर्विभ्रतमिक्षुदण्डवरदौ पाशाङ्कुशौ पुष्कर-
स्पृष्टस्वप्रमदावराङ्गमनयाश्लिष्टं ध्वजाग्रस्पृशा ।
श्यामाङ्ग्या विधृताब्जया त्रिनयनं चन्द्रार्द्धचूड़ं जवा-
रक्तं हस्तिमुखं स्मरामि सततं भोगातिलोलं विभुम् ।”
अस्य पुरश्चरणं लक्षत्रयजपः ॥ * ॥ अथ हेरम्बमन्त्रः । स च ऊकारयुक्तो गकारः सबिन्दुः प्रणवादिनमोऽन्तश्चतुरक्षरः । निबन्धे ।
“पञ्चान्तको बिन्दुयुक्तो वामकर्णविभूषितः ।
तारादिहृदयान्तोऽयं हेरम्बमनुरीरितः ।
चतुर्वर्गात्मको नृणां चतुर्व्वर्गफलप्रदः ।”

अस्य ध्यानम् ।
"मुक्ताकाञ्चननीलकुन्दघुसृणच्छायैस्त्रिनेत्रान्वितै-
र्नागास्यैर्हरिवाहनं शशिधरं हेरम्बमर्कप्रभम् ।
दृप्तं दानमभीतिमोदकरदान् टङ्कं शिरोऽक्षात्मिकां
मालां मुद्गरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं भजे ॥"
अस्य पुरश्चरणं त्रिलक्षसंख्यकजपः ॥ * ॥ मन्त्रान्तरम् । गं क्षिप्रप्रसादनाय नमः । तथा च विवस्ते ।
"सवर्णको नेत्रयुतः पार्श्वो वह्न्यासने स्थितः ।
प्रसादनाय ङेऽन्तश्च स्वबीजाद्यो दशाक्षरः ॥"
अस्य ध्यानम् ।
"पाशाङ्कुशौ कल्पलतां विषाणं
दधत् स्वशुण्डाहितबीजपूरः ।
रक्तस्त्रिनेत्रस्तरुणेन्दुमौलि-
र्हारोज्ज्वलो हस्तिमुखोऽवतान्नः ॥"
अस्य पुरश्चरणं लक्षजपः ॥ * ॥ अथ हरिद्रागणेशमन्त्रः ।
"पञ्चान्तको धरासंस्थो बिन्दुभूषितमस्तकः ।
एकाक्षरो महामन्त्रः सर्व्वकामफलप्रदः ॥"
ध्यानञ्च ।
"हरिद्राभं चतुर्ब्बाहुं हारिद्रवसनं विभुम् ।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च ॥"
अस्य पुरश्चरणं चतुर्लक्षजपः । इति तन्त्रसारः ॥ * ॥ (पीठस्थानविशेषः । यथा, देवीभागवते । ७ । ३० । ७१ ।
"करवीरे महालक्ष्मीरुमादेवी विनायके ।
आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ॥"
विगतो नायको यस्येति विग्रहे अनाथे, त्रि ॥)

विनायिका, स्त्री, (विनायकस्य स्त्री । भार्य्यार्थे ङीप् ।) गरुडपत्नी । इति शब्दमाला ॥

विनारुहा, स्त्री, (विना आश्रयं रोहतीति । रुह+कः । स्त्रियां टाप् ।) त्रिपर्णिका । इति राजनिर्घण्टः ॥

विनाशः, पुं, (विनशनमिति । वि+नश+घञ् ।) विनशनम् । (यथा, गीतायाम् । २ । १७ ।
"अविनाशि तु तद्विद्धि येन सर्व्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति ॥")
तत्पर्य्यायः । अदर्शनम् २ । इत्यमरः ॥ छम्बट् ३ । यथा, श्रीभागवते ।
"एषा घोरतमा सन्ध्या लोकछम्बट्करी विभो ॥"
छम्बडित्यव्ययं विनाशे वर्त्तते । इति श्रीधरस्वामी ॥

विनाशकः, त्रि, विनाशकर्त्ता । विपूर्ब्बकनशधातोर्णक(ण्वुल्)प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १२ । ९१ । ९ ।
"राजैव कर्त्ता भूतानां राजैव च विनाशकः ।
धर्म्मात्मा यः स कर्त्ता स्यादधर्म्मात्मा विनाशकः ॥")

विनाशी, [न्] त्रि, विनाशकरणशीलः । विपूर्ब्बनशधातोर्णिनिप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १२ । १०७ । ११ ।
"लोभमेको हि वृणुते ततोऽमर्षमनन्तरम् ।
तौ क्षयव्ययसंयुक्तावन्योन्यस्य विनाशिनौ ॥"
यथा च मनौ । १ । २७ ।
"अण्व्यो मात्रा विनाशिन्यो दशार्द्धानान्तु याः स्मृताः ।
ताभिः सार्द्धमिदं सर्व्वं सम्भवत्यनुपूर्व्वशः ॥")

विनाशोन्मुखं, त्रि, (विनाशाय पतनाय उन्मुखम् ।) पक्कम् । इत्यमरः ॥ नाशोद्यतञ्च ॥

विनासकः, त्रि, (विगता नासा यस्य । बहुव्रीहौ कन् ह्रस्वश्च ।) गतनासिकः । इति जटाधरः ॥

विनाहः, पुं, (विशेषेण नह्यते अनेन । वि+नह+"हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) कूपाननपिधानकः । इति शब्दरत्नावली ॥

विनिक्षिप्तः, त्रि, विनिक्षेपाश्रयः । परित्यक्तः । विनिपूर्ब्बकक्षिपधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, देवीभागवते । २ । ८ । २७ ।
"पितुः कण्ठेऽद्य मे येन विनिक्षिप्तो मृतोरगः ॥")

विनिगमना, स्त्री, एकतरपक्षपातिनी युक्तिः । एकतरावधारणा । यथा । उच्यते । एकदेशोपात्तस्यैव भूहिरण्यादावनुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः । इति दायभागः ॥ उच्यत इति भूहिरण्यादावुत्पन्नस्य एकदेशोपात्तस्य तत्तदंशावच्छिन्नस्य विनिगमना इदममुकस्य नान्यस्येत्यवधारणरूपा तत्प्रमाणाभावेन वैशेषिकव्यवहारः परस्परनैरपेक्ष्येण दानविक्रयादिलक्षणस्तदनर्हतया अव्यवस्थितस्य सतोऽप्यसत्कल्पस्य गुटिकापातादिना व्यञ्जनं इदं अमुकस्येत्यवधारणं विभाग इत्यर्थः । इति तट्टीकायां श्रीकृष्णतर्कालङ्कारः ॥

विनिद्रः, त्रि, (विगता निद्रा मुद्रणा यस्य ।) उन्मीलितः । इति शब्दमाला ॥ (यथा, नैषधे । १ । ३४ ।
"विनिद्ररोमाजनि शृण्वती नलम् ॥"
तथा च साहित्यदर्पणे । १० परिच्छेदे ।
"उत्पत्तिरिन्दोरपि निष्फलैव
दृष्टा विनिद्रा नलिनी न येन ॥")
निद्रारहितः । (यथा, महाभारते । ३ । २८५ । २१ ।
"स्वस्थमासीनमव्यग्रं विनिद्रं राक्षसाधिपः ।
ततोऽब्रवीद्दशग्रीवः कुम्भकर्णं महाबलम् ॥")

विनिद्रत्वं, क्ली, (विनिद्रस्य भावः ।) प्रबोधः । इति हेमचन्द्रः ॥ निद्रारहितत्वञ्च ॥

विनिपातः, पुं, (विशेषेण निपतनम् । वि+नि+पत+घञ् ।) निपातः । दैवादिव्यसनम् । इति मेदिनी । ते, २१७ ॥ अवमानः । इति हेमचन्द्रः ॥ (यथा, मनौ । ४ । १४६ ।
"मङ्गलाचारयुक्तानां नित्यञ्च प्रयतात्मनाम् ।
जपतां जुह्वताञ्चैव विनिपातो न विद्यते ॥")

विनिमयः, पुं, (वि+नि+मी+अप् ।) परिदानम् । प्रतिदानम् । इति शब्दरत्नावली ॥ (यथा, रघुः । १ । २६ ।
"दुदोह गां स यज्ञाय शस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥")
बन्धकः । इति शब्दमाला ॥ यथा,—
"विक्रयैर्गां विनिमयैर्दत्त्वा गोमांसखादके ।
व्रतं चान्द्रायणं कुर्य्याद्बधे साक्षाद्बधी भवेत् ॥"
इति प्रायश्चित्ततत्त्वधृतगोभिलवचनम् ॥

विनियोगः, पुं, (वि+नि+युज्+घञ् ।) फले अर्पणम् । इति हेमचन्द्रः ॥ विनियोजनम् । यथा,—
"अनेनेदन्तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः ॥"
इत्याह्निकतत्त्वम् ॥
(यथा, सन्ध्याविधौ ।
"ॐकारस्य ब्रह्मऋषिर्गायत्रीच्छन्दः सविता देवता प्राणायामे विनियोगः ॥")

विनियोजितः, त्रि, विनियुक्तः । विनिपूर्ब्बण्यन्तयुजधातोः क्तप्रत्ययेन निष्पन्नः ॥

विनिर्धूतः, त्रि, (वि+निर्+धू+क्तः ।) दूरवस्थया चलितः । यथा,—
"ततो देवा विनिर्धूता असुराभ्यां पराजिताः ।
हृताधिकारास्त्रिदशास्ताभ्यां सर्व्वे निराकृताः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥

विनिर्भयः, पुं, (विशेषेण निर्गच्छति भयं यस्य ।) साध्यगणविशेषः । यथा,—
"मनो मन्ता तथा प्राणो नरो यानश्च वीर्य्यवान् ।
विनिर्भयो नयश्चैव हंसो नारायणो वृषः ।
प्रभुश्चेति समाख्याताः साध्या द्वादश पौर्व्विकाः ॥"
इति वह्निपुराणे काश्यपीयवंशः ॥
भयरहितश्च ॥

विनिर्म्मोकः, पुं, व्यतिरेकः । यथा । दिवाकरवारविनिर्म्मोके तु गर्गः । इति चूडाप्रकरणे ज्योतिस्तत्त्वम् ॥ (विगतो निर्म्मोको यस्य इति विग्रहे मुक्तकञ्चुके, त्रि ॥)

विनिर्वृत्तः, त्रि, समाप्तः । निष्पन्नः । विनिर्पूर्ब्बकवृतुधातोः क्तप्रत्ययेन निष्पन्नः ॥

विनिवृत्तः, त्रि, निवृत्तिविशिष्टः । शान्तः । निरस्तः । विनिपूर्ब्बकवृतुधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, गीतायाम् । १५ । ५ ।
"निर्म्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ॥")

विनिहतः, त्रि, विनष्टः । विनिपूर्ब्बकहनधातोः क्तप्रत्ययेन निष्पन्नः ॥

विनीतः, त्रि, (वि+नी+क्तः ।) विनयान्वितः । विनयः शास्त्रतः संस्कारः इन्द्रियजयो वा ।

तत्पर्य्यायः । निभृतः २ प्रश्रितः ३ । इत्यमरभरतौ ॥ (यथा, रघुवंशे । १४ । ७५ ।
"तपस्विसंसर्गविनीतसत्त्वे
तपोवने वीतभया वसास्मिन् ॥")
जितेन्द्रियः । (यथा, तन्त्रसारे ।
"शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ॥")
अपनीतः । (यथा, महाभारते ।७।११०।५५।
"विनीतशल्यास्तुरगाश्चतुरो हेममालिनः ॥")
ह्रतः । इति मेदिनीकारहेमचन्द्रौ । क्षिप्तः । इत्यजयपालः ॥ कृतदण्डः । इति स्मृतिः ॥
(अनुद्धतः । यथा, मनौ । ६ । ४१ ।
"सत्यार्थेन विनीतेन ज्ञानविज्ञानवेदिना ॥")
विनीतः, पुं, (वि + नी + क्तः ।) सुवहाश्वः । तत्पर्य्यायः । साधुवाही २ । इत्यमरः । सुवहनशीलकः ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ७ । ११० । ५६ ।
"तांस्तदा रूप्यवर्णाभान् विनीतान् शीघ्रगामिनः ॥")
वणिक् । इति मेदिनी । ते, १५४ ॥ दमनकवृक्षः ।
(अस्य पर्य्यायो यथा,—
"उक्तो दमनको दान्तो मुनिपुत्त्रस्तपोधनः ।
गन्धोत्कटो ब्रह्मजटो विनीतः फलपत्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शिक्षितदम्यादिः । इति राजनिर्घण्टः ॥
विनीतकं, क्ली पुं, वैनीतकम् । परम्परावाहनम् । इत्यमरटीकायां रायमुकुटः ॥
विनीयः, पुं, (वि + नी + "विपूयविनीयजित्याः ।" ३ । १ । ११७ । क्यप्प्रत्ययेन निपातितः ।)
कल्कः । इति मुग्धबोधव्याकरणम् ॥ (यथा,—
"एक्रातुरुष्कलशुलाभतया विनीयः ।"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ एलादितैले ।) पापम् । इति सिद्धान्तकौमुदी ॥
विनेता, [ऋ] पुं, (वि + नी + तृच् ।) राजा । आदेशके, त्रि । इति मेदिनी । ते, १५६ ॥
(यथा, रघुवंशे । १४ । २३ ।
"तेनास लोकः पितृमान् विनेत्रा ॥"
गुरुः । शिक्षकः । यथा, महाभारते ।११।२६।
"अर्ज्जुनस्य विनेतारमाचार्य्यं सात्यकेस्तथा ।
तं पश्य पतितं द्रोणं कुरूणां द्विजसत्तमम् ॥"
यथाच रघुवंशे । ८ । ६१ ।
"स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज्ज मुनिम् ॥")
विनेयः, त्रि, (वि + नी + यत् ।) नेतव्यः । विपूर्व्वनीधातोर्यप्रत्ययेन निष्पन्नः ॥ दण्डनीयः । यथा,
"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणाम् ।
श्रावयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नतः ॥"
विनेयाः दण्डनीयाः । इति ज्योतिस्तत्त्वम् ॥
विनोदः, पुं, (वि + नुद + घञ् ।) कौतूहलम् ।
इति हलायुधः ॥ (यथा, कथासरित्सागरे । १५ । १२५ ।
"बाधते तच्च नैकत्वात् सर्व्वं स मगधेश्वरः ।
तत्तच्च रत्नादितोऽस्य विनोदायतनस्य ताम् ॥")
क्रीडा । इति भूरिप्रयोगः ॥ (यथा, भागवते । ३ । १६ । २४ ।
"नैतावता त्र्यधिपतेर्बत विश्वभर्त्तुस्तेजः क्षतं त्वनु न तस्य स ते विनोदः ॥"
अपनयनम् । यथा, शिशुपालवधे । १ । ४८ ॥
"विनोदमिच्छन्नथ दर्पजन्मनो
रणेन कण्ड्वास्त्रिदशैः समं पुनः ॥"
प्रमोदः । यथा, हितोपदेशे ।
"काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥")
आलिङ्गनविशेषः । तल्लक्षणं यथा । नायको नायिकाया दक्षिणपादं वामपादं वा स्वमध्यदेशे स्वदक्षिणपादं वामपादं वा नायिकामध्यदेशे निधाय वक्षसि वक्षः ओष्ठे ओष्ठं दत्त्वा यदाश्लिषति तत् । इति कामशास्त्रम् ॥ राजगृहविशेषः । यथा,—
"दीर्घे त्रयो राजहस्ताः प्रसरे द्वौ प्रतिष्ठितौ ।
विनोद एव द्वाराणि त्रिंशत् कोष्ठद्वयं भवेत् ॥"
इति युक्तिकल्पतरुः ॥
"द्वादशैते गृहान् वक्ष्ये तेषां लक्षणमग्रतः ।
सुनन्दः सर्व्वतोभद्रो भयो नान्दीमुखस्तथा ॥
विनोदश्च विलासश्च विजयो विमलस्तथा ।
रङ्गः कैलासजयो वीरो द्वादशैते प्रकीर्त्तिताः ॥"
इति भविष्योत्तरपुराणम् ॥
वि(बि)न्दुः, पुं, (बिदि अवयवे + बाहुलकात् उः ।) जलकणा । तत्पर्य्यायः । पृषत् २ पृषतः ३ विप्रुट् ४ । इत्यमरः ॥ पृषन्ति ५ विप्रट् ६ । इति तट्टीका ॥ (यथा, पञ्चतन्त्रे ।
"जलबिन्दुनिपातेन क्रमशः पूर्य्यते घटः ।
स हेतुः सर्व्वविद्यानां धर्म्मस्य च धनस्य च ॥")
दन्तक्षतविशेषः । भ्रुवोर्मध्यम् । रूपकार्थप्रकृतिः । इति मेदिनी । दे,१०-११ ॥ अनुस्वारः ।
यथा ।"बिन्दुद्विबिन्दुमात्रौ वर्णौ क्रमात्तुर्वी संज्ञौ स्तः ।" इति मुग्धबोधव्याकरणम् ॥ अपि च ।
"शिवो वह्निसमायुक्तो वामाक्षिबिन्दुभूषितः ।
एकाक्षरो महामन्त्रः श्रीसूर्य्यस्य प्रकीर्त्तितः ॥"
इति सूर्य्यकवचम् ॥
बिन्दूत्पत्तिर्यथा,—
"सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः ॥"
इति सारदातिलके १ पटलः ॥
अपि च ।
"आसीद्बिन्दुस्ततो नादो नादाच्छक्तिः समुद्भवा ।
नादरूपा महेशानी चिद्रूपा परमा कला ॥
नादाच्चैव समुत्पन्नः अर्द्धबिन्दुर्महेश्वरि ।
सार्द्धत्रितयबिन्दुभ्यो भुजङ्गी कुलकुण्डली ॥"
इति कुब्जिकातन्त्रे १ पटलः ॥
"बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः ।
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः ॥
समवायः समाख्यातः सर्व्वागमविशारदैः ॥"
इति सारदातिलकः ॥
अन्यच्च ।
"बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं स्मृतम् ।
तयोर्योगे भवेन्नादस्ताभ्यो जातास्त्रिशक्तयः ॥"
इति क्रियासारः ॥
वि(बि)न्दुः, त्रि, (वेत्ति तच्छीलः । विद ज्ञाने + "बिन्दुरिच्छुः ।" ३ । २ । १६९ । इति उप्रत्ययो नुमागमश्च निपात्यते ।) ज्ञाता । इत्यमरः ॥ दाता । इत्यजयपालः ॥ वेदितव्यः । इति शब्दरत्नावली ॥
वि(बि)न्दुचित्रकः, पुं, (बिन्दुभिश्चित्रविशेषैश्चित्रक इव ।) मृगभेदः । इति शब्दरत्नावली ॥
वि(बि)न्दुजालं, क्ली, (बिन्दूनां जालम् ।) हस्तिशुण्डोपरिविचित्रबिन्दुसमूहः । इति हेमचन्द्रः ॥
वि(बि)न्दुजालकं, क्ली, (बिन्दूनां जालकम् ।) गजस्य मुखादिस्थो बिन्दुसमूहः । तत्पर्य्यायः । पद्मकम् २ । इत्यमरः । पद्मम् ३ । अतएव पद्मी हस्तीति भरतः ॥
वि(बि)न्दुतन्त्रः, पुं, (बिन्दुश्चिह्नं तन्त्रं यस्य ।) अक्षः । इति हारावली ॥ तुरङ्गकः । यथा,—
"बिन्दुतन्त्रः पुमान् शारिफलके च तुरङ्गके ॥"
इति पवर्गीयवादौ मेदिनी ॥
वि(बि)न्दुपत्रः, पुं, (बिन्दुः पत्रे यस्य ।) भूर्ज्जवृक्षः । इति रत्नमाला ॥
वि(बि)न्दुरेखकः, पुं, (बिन्दुविशिष्टा रेखा यत्र । कप् ।) पक्षिभेदः । इति शब्दचन्द्रिका ॥
वि(बि)न्दुवासरः, पुं, (बिन्दुपातस्य वासरः ।) गर्भसन्तानोत्पत्तिकारकशुक्रपातदिनम् । इति ज्योतिषम् ॥
वि(बि)न्दुसरः, [स्] क्ली, (बिन्दुनामकं सरः ।) सरोवरविशेषः । यथा,—
"अभ्युत्तरेण कैलासं शिवं सर्व्वौषधिं गिरिम् ।
गौरन्तु पर्व्वतश्रेष्ठं हरितालमयं प्रति ॥
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः ।
तस्य पादे महद्दिव्यं सरः काञ्चनसन्निभम् ॥
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ।
गङ्गार्थं स तु राजर्षिरुवास बहुलाः समाः ॥
दिवं यास्यन्ति मे पूर्व्वे गङ्गातोयपरिप्लुताः ।
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ॥
सोमपादात् प्रसूता सा सप्तधा प्रतिभज्यते ।
यूपा मणिमयास्तत्र चितयश्च हिरण्मयाः ॥
तत्रेष्ट्वा क्रतुभिः सिद्धः शक्रः सुरगणैः सह ।
दिव्यच्छायापथस्तत्र नक्षत्राणान्तु मण्डलम् ॥
दृश्यते भास्वरा रात्रौ देवी त्रिपथगा तु सा ।
अन्तरीक्षं दिवञ्चैव भावयित्वा भुवं गताः ॥
भवस्य स्वाङ्गे पतिता संरुद्धा योगमायया ।
तस्या ये बिन्दवः केचित् क्रुद्धायाः पतिता भुवि ।
कृतन्तु तैर्बिन्दुसरस्ततो बिन्दुसरः स्मृतम् ॥"
इति मात्स्ये । १२० । २७—३३ ॥
विन्ध्यपर्णी, क्ली, ज्वरापहा । इति शब्दचन्द्रिका ॥ वेलगुंटा इति भाषा ॥

विन्धसः, पुं, चन्द्रः । इति त्रिकाण्डशेषः ॥

विन्ध्यः, पुं, पर्व्वतविशेषः । इत्यमरः ॥ (यथा, मनौ । २ । २१ ।
"हिमवद्विन्ध्ययोर्मध्यं यः प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥")
व्याधः । इति मेदिनी ॥ विन्ध्यपर्व्वतस्य निम्नशृङ्गत्वकारणम् । यथा,—

नारद उवाच ।
"किमर्थमद्रिं भगवानगस्त्य-
स्तं निम्नशृङ्गं कृतवान् महर्षिः ।
कस्मै कृते केन च कारणेन
तत्त्वदत्स्वाखिलसत्त्ववृत्ते ॥
पुलस्त्य उवाच ।
पुरा हि विन्ध्येन दिवाकरस्य
गतिर्न्निरुद्धा गगनेचरस्य ।
रविस्ततः कुम्भभवं समेत्य
होमावसाने वचनं बभाषे ॥
समागतोऽहञ्च द्विजर्षभ त्वां
कुरुष्व मय्युद्धरणं मुनीन्द्र ।
ददस्व दानं मम यन्मनीषितं
चरामि येन त्रिदिवे सुनिर्वृतः ।
इत्थं दिवाकरवचो गुणसङ्गयोगि
श्रुत्वा तदा कलसजो वचनं बभाषे ।
दानं ददामि तव यन्मनसा त्वभीष्टं
नार्थी प्रयाति विमुखो मम कश्चिदेव ॥
श्रुत्वा वचोऽमृतमयं कलशोद्भवस्य
प्राह प्रभुः करपुटं प्रणिधाय मूर्द्ध्नि ।
एषोऽद्य मे गिरिवरः प्ररुणद्धि मार्गं
विन्ध्यस्य निम्नकरणे भगवान् यतस्व ॥
इति रविवचनादुवाच कुम्भजन्मा
कृतमिति नहि मया हि नीचशृङ्गम् ।
तव किरणजितो भविष्यतीति महीध्रो
मम हि शरणसमागतस्य का व्यथा ते ॥
इत्येवमुक्त्वा कलशोद्भवस्तु
सूर्य्यं च संस्तूय विनम्य भक्त्या ।
जगाम संत्यज्य हि दण्डकं हि
विन्ध्याचलं वृद्धवपुर्महर्षिः ॥
गत्वा वचः प्राह मुनिर्महीध्रं
यास्ये महातीर्थवरं सुपुण्यम् ।
वृद्धोऽप्यशक्तश्च तवाधिरोढुं
तस्माद्भवान् नीचतरोऽस्तु सद्यः ॥
इत्येवमुक्तो मुनिसत्तमेन
स नीचशृङ्गस्त्वभवन् महीध्रः ।
समाक्रमच्चापि महर्षिमुख्यः
प्रोल्लङ्घ्य विन्ध्यं द्विज आह शैलम् ॥
यावन्न भूयो निजमाव्रजामि
महाश्रमं धौतवपुः सुतीर्थात् ।
त्वया न तावत्त्विह वर्द्धितव्यं
न चेत् शपिष्येऽहमवज्ञया ते ॥
इत्येवमुक्त्वा भगवान् जगाम
दिशं स याम्यां सहसान्तरीक्षम् ।
आक्रम्य तस्थौ स हि तां तदाशां
काले व्रजाम्यत्र यदा मुनीन्द्र ॥
तत्राश्रमं रम्यतरं हि कृत्वा
संशुद्धजाम्बूनदतोरणान्तम् ।
तत्राथ निःक्षिप्य विदर्भपुत्त्रीं
स्वमाश्रमं सौम्यमुपाजगाम ॥
ऋतावृतौ काम्यपरो ह्यगस्त्यो
नित्यं तदा स्वाश्रममावसत् सः ।
शेषञ्च कालं स हि दण्डकस्थ-
स्तपश्चचारामितकान्तिमान्मुनिः ॥
विन्ध्योऽपि दृष्ट्वा गगने महाश्रमं
वृद्धिं न यात्येव भयान्महर्षेः ।
नासौ निवृत्तेऽभिमतिं निधाय
स संस्थितो नीचतराग्रशृङ्गः ॥
एवं त्वगस्त्येन महाचलेन्द्रः
स नीचशृङ्गो हि कृतो महर्षे ।
तस्योर्द्ध्वशृङ्गे मुनिसंस्तुता सा
दुर्गा स्थिता दानवनाशनार्थे ॥
देवाश्च सिद्धाश्च महोरगाश्च
विद्याधरा भूतगणाश्च सर्व्वे ।
सर्व्वाप्सरोभिः सहिता दिवानिशं
कात्यायनीं तस्थुरपेतशोकाः ॥"
इति वामनपुराणे देवीमाहात्म्ये १८अध्यायः ॥
"आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः ।"
इत्यमरः ॥
"विन्ध्यस्य पश्चिमे भागे मत्स्यभुक् पतितो भवेत् ।"
इति प्राचीनाः ॥

विन्ध्यकूटः, पुं, (विन्ध्ये कूटं माया कैतवं वा यस्य । याचेन तस्यावनतीकरणादस्य तथात्वम् ।) अगस्त्यमुनिः । इति त्रिकाण्डशेषः ॥

विन्ध्यवासी, [न्] पुं, (विन्ध्ये वसतीति । वस + णिनिः ।) व्याडमुनिः । इति हेमचन्द्रः ॥

विन्ध्यवासिनी, स्त्री, (विन्ध्ये वसतीति । वस् + णिनिः । ततः स्त्रियां ङीप् ।) दुर्गा । यथा,—
"सहस्राक्षोऽपि तां गृह्य विन्ध्यं वेगाज्जगाम ह ।
तत्र गत्वा सथोवाच तिष्ठस्वात्र महावने ॥
पूज्यमाना सुरैर्नाम्ना ख्याता त्वं विन्ध्यवासिनी ।
तत्र स्थाप्य हरिर्देवीं दत्त्वा सिंहञ्च वाहनम् ।
भवामरारिहन्त्रीति स्तुत्वा स्वर्गमवाप्नुयात् ॥"
इति वामने ५१ अध्यायः ॥ * ॥
अन्यच्च देवीपुराणे ४५ अध्याये ।
"विन्ध्येऽवतीर्य्य देवार्थं हतो घोरो महाभटः ।
अद्यापि तत्र सावासा तेन सा विन्ध्यवासिनी ॥"

विन्ध्यस्थः, पुं, (विन्ध्ये विन्ध्यपर्व्वते तिष्ठतीति । स्था + कः ।) व्याडिमुनिः । इति जटाधरः ॥

विन्ध्या, स्त्री, लवलीवृक्षः । इति मेदिनी ॥ त्रुटिः । इति हेमचन्द्रः ॥ एलाचि इति भाषा ॥

विन्ध्यावली, स्त्री, बलिपत्नी । बाणराजमाता । इति पुराणम् ॥ (यथा, भागवते । ८ । २० । १७ ।
"विन्ध्यावली तदागत्य पत्नी जालकमालिनी ।")

विन्ध्यावलीपुत्त्रः, पुं, (विन्ध्यावल्याः पुत्त्रः ।) बाणराजः । इति त्रिकाण्डशेषः ॥

विन्ध्यावलीसुतः, पुं, (विन्ध्यावल्याः सुतः ।) बाणराजः । इति जटाधरः ॥

विन्नः, त्रि, (विद् + क्तः । "नुदविदेति ।" ८।२।५६। नत्वम् ।) विचारितः । प्राप्तः । इत्यमरः ॥ ज्ञातः । स्थितः । इति विश्वः ॥

विन्यस्तः, त्रि, (वि + नि + अस + क्तः ।) कृतविन्यासः । यथा,—
"सद्दलया गुणगुम्फिता सुकृतिनां सत्कर्म्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिता भावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥"
इति सिद्धान्तमुक्तावली ॥

विन्याकः, पुं, (वि + नि + अक + घञ् ।) विड्‌ङ्गवृक्षः । इति शब्दचन्द्रिका ॥ छातियान् इति भाषा ॥

विन्यासः, पुं, (वि + नि + अस + घञ् ।) स्थापनम् । रचनम् । यथा, ज्ञानार्णवे । वैष्णवे तु ।
"एकैकवर्णमुच्चार्य्य मूलाधाराच्छिरोऽन्तकम् ।
नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः ॥"
अपि च ।
"ओमाद्यन्तो नमोऽन्तो वा सबिन्दुर्बिन्दुवर्ज्जितः ।
पञ्चाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः ॥"
इति भट्टः । इति तन्त्रसारः ॥
अन्यच्च ।
"गृहेषु मणिविन्यासो विज्ञेयो न च दण्डवत् ।
विशुद्धहीरकन्यासो विधेयः सदनोपरि ।
तेन सर्व्वाणि नश्यन्ति अरिष्टानि महीभुजाम् ॥"
इति युक्तिकल्पतरुः ॥
किञ्च ।
"तया कवितया किंवा तया वनितया च किम् ।
पदविन्यासमात्रेण यया नापहृतं मनः ॥"
इत्युद्भटः ॥

विप, क क्षेपे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, वेपयति । इति दुर्गादासः ॥

विपक्षः, पुं, (विरुद्धः पक्षो यस्य ।) शत्रुः । इत्यमरः ॥ (यथा, हरिवंशे । ५२ । ५४ ।
"तत्र वंशा विभज्यन्तां विपक्षः पक्ष एव च ।
पुत्त्राणां हि तयो राज्ञो भविता विग्रहो महान् ॥"
यथा च रघुवंशे । १७ । ७५ ।
"इन्दोरगतयः पद्मे सूर्य्यस्य कुमुदेंऽशवः ।
गुणास्तस्य विपक्षेऽपि गुणिनो लेभिरेऽन्तरम् ॥"
न्यायमते साध्याभाववत्पक्षः । यथा, भाषापरिच्छेदे । ७१ ।

"यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः।"
"सपक्षविपक्षवृत्तिः साधारणः। सपक्षः साध्यवान्। विपक्षः साध्याभाववान्।" इति मुक्तावली। विकल्पः पक्षः। उक्ताकरणम्। यथा, आर्य्यासप्तशत्याम्। ३५४।
"प्रतिभूः शुको विपक्षे दक्षः शृङ्गारसंकथा गुरवः।"
विगतः पक्षो यस्य। पक्षहीने, त्रि।)

विपञ्चिका, स्त्री, (वि+पचि विस्तारे+ण्वुल्। स्त्रियां टाप् अत इत्वञ्च।) वीणा। इति शब्दरत्नावली।

विपञ्ची, स्त्री, (वि+पञ्च+अच्। स्त्रियां गौरादित्वात् ङीष्।) वीणा। इत्यमरः। (यथा, कथासरित्सागरे। ४६। २०।
"अहं श्वेतद्विपायामि तच्छ्रीमच्छृङ्गारशालिनी।
इत्युक्ता शुभ्रवर्म्मोद्दाना विपञ्चीं समोप सः।")
केलिः। इति मेदिनी। चे, १७।

विपणः, पुं, (वि+पण व्यवहारे+घञ्। संज्ञापूर्व्वकत्वात् न वृद्धिः।) विक्रयः। इत्यमरः। (यथा, मनौ। ३। १५२।
"विपणेन च जीवन्तो वर्ज्ज्याः स्युर्हव्यकव्ययोः।"
विशेषेण पण्यतेऽस्मिन्निति। विपणिः। यथा, महाभारते। १२। ६६। ५३।
"विपणान् राजमार्गांश्च कारयेत नराधिपः।
प्रपाश्च विपणांश्चैव यथोद्देशं समादिशेत्।")

विपणिः, पुं स्त्री, (विपण्यतेऽस्मिन्निति। वि+पण+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) पण्यविक्रयशाला। इति हलायुधः। हट्टः। इत्यन्ये। विक्रयार्थप्रसारितनानाद्रव्यायां वणिग्वीथ्यां वाणिज्यावीथी इति बाजार इति च ख्यातायामिति केचित्। हट्टमण्डपः। इति केचित्। हट्टमध्यस्थपण्यविक्रयवीथी। इति केचित्। इति भरतः। तत्पर्य्यायः। पण्यवीथिका २। इत्यमरः। आपणः ३ पण्यवीथी ४ पण्यम् ५। इति रभसः। निषद्या ६ वणिक्पथम् ७। इत्यमरदत्तः। विपणम् ८ वीथी ९। इति कोषः।
"निषद्या विपणिः पण्यवीथिका त्वापणिस्तथा।
पण्यविक्रयशालायां भवेदेतच्चतुष्टयम्।"
इति शब्दरत्नावली।
"विपणिः पण्यवीथ्याञ्च भवेदापणपण्ययोः।"
इति मेदिनी। णे, ७८।
(यथा, महाभारते। ६। ३५। ३०।
"विपण्यापणपण्यानां नानाजनशतैर्वृतः।"
वाणिज्यम्। यथा, मनौ। १०। ११६।
"विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः।
धृतिर्भैक्ष्यं कुसीदञ्च दश जीवनहेतवः।")

विपणी, [न्] पुं, (विपणः विक्रयोऽस्यास्तीति। विपण+इनिः।) वणिक्। इति जटाधरः। (यथा, शिशुपालवधे। ५। २४।
"पूर्णापणा विपणिनो विपणीर्व्विभेजुः।")

विपणी, स्त्री, (विपणि+वा ङीष्।) हट्टः। इति द्विरूपकोषः। (यथा, कथासरित्सागरे। २०। ६५।
"ययौ भोजनमूल्यार्थी विपणीमात्तमूलकः।")

विपत्तिः, स्त्री, (वि+पद+क्तिन्।) आपत्। विपत्। इत्यमरः। यातना। इति मेदिनी। ते, १५६। यथा,—
भृगुरुवाच।
"श्रुतं सर्व्वं सुरश्रेष्ठ नारोदीर्व्वचनं शृणु।
न कातरो हि नीतिज्ञो विपत्तौ च कदाचन।
सम्पत्तिर्व्वा विपत्तिर्व्वा नश्वरा स्वप्नरूपिणी।
पूर्व्वस्वकर्म्मायत्ता च स्वयं कर्त्ता तयोरपि।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३४ अध्यायः।
विनाशः। यथा,—
"यस्मिन् राशिगते भानौ विपत्तिं यान्ति मानवाः।
तेषां तत्रैव कर्त्तव्या पिण्डदानोदकक्रिया।"
इति मलमासतत्त्वम्।

विपथः, पुं, (विरुद्धः पन्थाः। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इत्यकारप्रत्ययः।) निन्दितपथः। तत्पर्य्यायः। व्यध्वः २ दुरध्वः ३ कदध्वा ४ कापथः ५। इत्यमरः। कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८। इति शब्दरत्नावली। (यथा, महाभारते। १२। ३५६। ११।
"सत्पथं कथमुत्सृज्य यास्यामि विपथं वद।")

विपत् } स्त्री, (वि+पद्+सम्पदादित्वात् क्विप्।)
विपद् } विपत्तिः। इत्यमरः। (यथा,—
"कैवर्त्तकर्कशकरात् सफरश्च्युतोऽपि
जाले पुनर्निपतितः सफरो विपाकः।
दैवात्ततो विगलितो गिलितो वकेन
वामे विधौ वद कथं विपदां निवृत्तिः।"
इत्युद्भटः।
यथा च भागवते। १। ६। १५।
"यत्र धर्म्मसुतो राजा गदापाणिर्वृकोदरः।
कृष्णोऽस्त्री गाण्डिवं चापं सुहृत् कृष्णस्ततो विपत्।")

विपदा, स्त्री, (विपद्+भागुरिमते हलन्तानां टाप्।) विपत्। इत्यमरटीकायां रायमुकुटः।

विपन्नः, त्रि, (वि+पद+क्तः।) विपदाक्रान्तः। इति मेदिनी। ने, १३४। नष्टः। इति शब्दरत्नावली।

विपन्नः, पुं, सर्पः। इति मेदिनी। ने, १३४।

विपरीतः, त्रि, (वि+परि+इ+क्तः।) विपर्य्ययः। उलटा इति भाषा। तत्पर्य्यायः। प्रतिसव्यः २ प्रतिकूलः ३ अपसव्यः ४ अपष्टुः ५ विलोमकः ६। इति जटाधरः। प्रसव्यम् ७ पराचीनम् ८ प्रतीपम् ९। इति शब्दरत्नावली। (यथाच शङ्करदिग्विजये।
"मत्तो जातः कलञ्जाशी विपरीतानि भाषसे।
सत्यं ब्रवीषि पितृवत् त्वत्तो जातः कलञ्जभुक्॥"
सुमर्षुः। यथा, रामायणे। ६। १७। १५।
"स च न प्रतिजग्राह रावणः कालचोदितः।
उच्यमानं हितं वाक्यं विपरीत इवौषधम्।")
षोडशरतिबन्धान्तर्गतदशमबन्धः। यथा,—
"पादमेकमूरौ कृत्वा द्वितीयं कटिसंस्थितम्।
नारीषु रमते कामी विपरीतस्तु बन्धकः।"
इति रतिमञ्जरी।
अपि च।
"पादमेकमूरौ कृत्वा द्वितीयं स्कन्धसंस्थितम्।
कामिन्याः कामयेत् कामी बन्धः स्याद्विपरीतकः।"
इति स्मरदीपिका।

विपरीता, स्त्री, कामुकी। इति धनञ्जयः।

विपर्णकः, पुं, (विशिष्टानि पर्णानि यस्य।) पलाशवृक्षः। इति शब्दचन्द्रिका। (पर्णरहिते, त्रि।)

विपर्य्ययः, पुं, (वि+परि+इ+"एरच्।" इत्यच्।) व्यतिक्रमः। तत्पर्य्यायः। व्यत्यासः २ विपर्य्यासः ३ व्यत्ययः ४। इत्यमरः। विपर्य्यायः ५। इति भरतः। (यथा, भागवते। १०। १। ५०।
"विपर्य्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया।
उपस्थितो निवर्त्तेत निवृत्तः पुनरापतेत्।"
सांख्यमते विपर्य्ययाः पञ्च। ते च सांख्यकारिकायां द्रष्टव्याः।)

विपर्य्यायः, पुं, (विगतः पर्य्यायो यस्य। यद्वा, वि+परि+इ+घञ्।) विपरीतमयनम्। अन्यस्यान्यरूपग्रहणम्। इति भरतः।
"विपर्य्याये कुलं नास्ति न कुलं रक्तपित्तयोः।"
इति कुलाचार्य्यकारिका।

विपर्य्यासः, पुं, (वि+परि+अस+घञ्।) विपर्य्ययः। इत्यमरः। (यथा, उत्तरचरिते। २
"पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति।"
अप्रमात्मकबुद्धिभेदः। यथा, भाषापरिच्छेदे।
"तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः।
आद्यो देहे ह्यात्मबुद्धिः शङ्खादौ पीततामतिः।"
"आद्यो विपर्य्यासः।" इति मुक्तावली।)

विपव्यं, त्रि, (वि+पू+"अचो यत्।" इति यत्।) शोधनीयम्। विपूर्व्वपूधातोर्यप्रत्ययेन निष्पन्नम्।

विपश्यी, [न्] पुं, बुद्धभेदः। इति हेमचन्द्रः।

विपश्चित्, त्रि, (विशेषं पश्यति विप्रकृष्टं चेतति चिनोति चिन्तयति वा। पृषोदरादित्वात् साधुः।) पण्डितः। इत्यमरः। (यथा, मनौ। ७। ५८।
"सर्व्वेषान्तु विशिष्टेन ब्राह्मणेन विपश्चिता।")

विपाकः, पुं, (वि+पच+भावे कर्म्मणि वा घञ्।) पचनम्। (यथा, भागवते। ५। १६। २०।
"तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति।")

स्वेदः । कर्म्मणो विसदृक्फलम् । इति मेदिनी । (फलमात्रम् । यथा, भागवते ।१०।८१।१०।
"जरासन्धवधः कृष्ण भूर्य्यर्थायोपकल्पते ।
प्रायःपाकविपाकेन तव चाभिमतः क्रतुः ।"
चरमोत्कर्षः । यथा, तत्रैव । ४ । ६ । २ ।
"स वै धिया योगविपाकतीव्रया
हृत्पद्मकोषे स्फुरितं तडित्प्रभम् ।")
परिणामः । दुर्गतिः । स्वादुः । इति हेमचन्द्रः । जातिः । आयुः । भोगः । इति कुसुमाञ्जलिः । * । (कर्म्मफलरूपस्यैव विपाकस्य त्रैविध्यम् । यथाच पातञ्जले । २ । १३ ।
"सति मूले तद्विपाको जात्यायुर्भोगाः ।"
"सत्सु क्लेशेषु कर्म्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलोऽपि । यथैव तुषावनद्धाः शालितण्डुला दग्धबीजभावाः प्ररोहसमर्था भवन्ति नापनीततुषा दग्धबीजभावा वा । तथा क्लेशावनद्धः कर्म्माशयो विपाकप्ररोही भवति नापनीतक्लेशोन प्रसंख्यानदग्धबीजभावो वेति । स च विपाकस्त्रिविधो जातिरायुर्भोगश्चेति ।" इति तद्भाष्यम् ।)
"जाठरेणाग्निना योगात् यदुदेति रसान्तरम् ।
रसानां परिणामान्ते स विपाक इति स्मृतः ।"
इति सुश्रुतः ।
अपि च ।
"मिष्टः कटुश्च मधुरमम्लोऽम्लं पच्यते रसः ।
कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः ।"
तथा च वाग्भटः ।
"त्रिधा रसानां पाकः स्यात् स्वाद्वम्लकटुकात्मकः ।"
प्रायः पद्देन व्रीहिः स्वादुरम्लविपाकः । शिवा कषाया मधुपाका । शुण्ठी कटुकमधुरपाकेत्यादिः । * । अथ विपाकानां गुणाः ।
"श्लेष्मकृन्मधुरः पाको वातपित्तहरो मतः ।
अम्लस्तु कुरुते पित्तं वातश्लेष्मापहः ।
कटुः करोति पवनं कफं पित्तञ्च नाशयेत् ।
विशेष एव रसतो विपाकानां निदर्शितः ।"
इति भावप्रकाशः ।
(तथास्य विवरणम् ।
"नैवाहुरन्ये । विपाकः प्रधानमिति कस्मात् सम्यङ्मिथ्याविपाकत्वादिह सर्व्वद्रव्याण्यभ्यवहृतानि सम्यङ्मिथ्याविपक्वानि गुणं दोषं वा जनयन्ति । तत्राहुरन्ये प्रतिरसं पाक इति । केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकञ्चेति तत्तु न सम्यक् भूतगुणादागमाच्चाम्लो विपाको नास्ति पित्तं हि विदग्धमम्लतामुपैत्यग्नेर्मन्दत्वात् । यद्येवं लवणोऽप्यन्यः पाको भविष्यति श्लेष्मा हि विदग्धो लवणतामुपैति मधुरो मधुरस्याम्लोऽम्लस्यैवं सर्व्वेषामिति । केचिदाहुर्दृष्टान्तं चोपदिशन्ति यथा तावत् क्षीरं स्थालीगतमभिसन्तप्तं मधुरमेवस्यात्तथा शालियवमुद्गादयः प्रकीर्णाः स्वभावमुत्तरकालेऽपि न परित्यजन्ति तद्वदिति ।"
"किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा ।"
इति सुश्रुते सूत्रस्थाने ४० अः ।)

विपाट्, [श्] स्त्री, विपाशानदी । इत्यमरः । (यथा, ऋग्वेदे । ३ । ३३ । १ ।
"गावेव शुभ्रे मातरा रिहाणे
विपाट्छुतुद्री पयसा जवेते ।"
"विपाट् कूलविपाटनात् विपाशनात् शतपुत्रमरणोद्भूतमोहतैर्मुमूर्षोर्वशिष्ठस्य पाशा अस्यां व्यपास्यन्त विमोचनाद्वा विपाट् । शुतुद्री शुचिप्रं तुन्ना तुन्नेव द्रवति गच्छतीति शुतुद्री एतन्नामके नद्यौ । प्रजवेते समुद्रं प्रति शीघ्रं गच्छतः । *** विपाट् पठन्तौ । पशबाधनस्पर्शनयोरिति वा व्यन्तावेतौ विपूर्व्वौ शकारस्य व्रश्चादिना षत्वम् ।" इति तद्भाष्ये सायणः ।)

विपा(ट)ठः, पुं, बाणः । इति त्रिकाण्डशेषः । (यथा, महाभारते । ३ । २७० । १७ ।
"एकैकेन विपाठेन जघ्ने माद्रवतीसुतः ।"
स्त्री, दुर्गमराजभार्य्या । यथा, मार्कण्डेये । ७५ । ४६ ।
"विपाठा नन्दिनीचैव वेश्य भार्य्या धृते द्विज ।")

विपादिका, स्त्री, पादस्फोटः । इत्यमरः । (यथा, राजतरङ्गिण्याम् । ८ । १६७ ।
"छिन्नोपानत् कथान्ते शतं चर्म्मशतैरर्पितम् ।
विपादिकाक्षते दास्या नीतं पश्चाच्छतो हतम् ।")
"वैपादिकं पाणिपादे स्फुटनं तीव्रवेदनम् ।
कण्डूमद्भिः सरागैश्च गण्डैरलसकं चितम् ।"
विपादिका वातश्लेष्मोद्भवा । इति माधवकरः । अयं क्षुद्ररोगः । (अस्या लक्षणम् । यथा,—
"कण्डूमती दाहरुजोपपन्ना
विपादिका पादगतेयमेव ।"
इति सुश्रुते निदानस्थाने पञ्चमेऽध्याये ।)
प्रहेलिका । इति शब्दमाला । * ।

विपाशा, स्त्री, (पाशं विमोचयतीति । पाश + "सत्यापपाशेति ।" ३।१।२५ । विमोचने णिच् । ततः पचाद्यच् ।) नदीविशेषः । इत्यमरः । पुत्रशोकादेव नद्यां पाशं बद्धा प्रविष्टं वशिष्ठं पाशच्छेदात् विपाशितवती विगतपाशं करोतीति विपाशा णिः कर्म्मादेरिति पाशं विमोचयति इत्यर्थे णिः पचादित्वादच् आप् । एवं क्विपि विपाट् । इति तट्टीकायां भरतः ॥ * ॥ (यथा, हरिवंशे । १६६ । २० ।
"इरावती विपाशा च सरयूर्यमुना तथा ।")
तस्या जलगुणाः ।
"शतद्रोर्विपाशाशुजः सिन्धुनद्याः
सुशीतं लघु स्वादु सर्व्वामयघ्नम् ।
जलं निर्म्मलं दीपनं पाचनञ्च
प्रदत्ते बलं बुद्धिमेधायुषञ्च ।"
इति राजनिर्घण्टः ।
(अस्या नामनिरुक्त्यादि विशेषविवरणं महाभारते । १ । १७८ । अध्याये द्रष्टव्यम् । अस्यास्तीरे पीठस्थाने अमोघाक्षीदेवी वर्त्तते । यथा, देवीभागवते । ७ । ३० । ६५ ।
"विपाशायाममोघाक्षी पाटला पुण्ड्रवर्द्धने ।"
तथा अत्र यज्ञस्कन्धनामकविष्णुमूर्त्तिरपि वर्त्तते । यथा, नरसिंहपुराणे ६२ अध्याये ।
"यज्ञस्करं विपाशायां माहिष्मत्यां हुताशनम् ।"
विगतः पाशो यस्य ।) पाशवर्ज्जिते, त्रि । इति धरणिः । (यथा, महाभारते ।३।१३०।८।
"अत्र वै पुत्रशोकेन वशिष्ठो भगवानृषिः ।
बद्धात्मानं निपतितो विपाशः पुनरुत्थितः ।"
पाशाक्षहीने च त्रि । यथा, हरिवंशे । ४७ । ४८ ।
"निर्व्यापारः शतस्तेन विपाशो वरुणो व्यधि ।")

विपिनं, क्ली, (वेपन्ते जना यत्रेति । "वेपितुह्योर्ह्रस्वश्च ।" उणा॰ २ । ५२ । इनन् । ह्रस्वत्वञ्च ।) वनम् । इत्यमरः । (यथा, महानाटके ।
"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति ।
प्रातर्भवामि वसुधाधिपचक्रवर्त्ती
सोऽहं व्रजामि विपिने जटिलस्तपस्वी ।"
भीतिप्रदे, त्रि । यथा, भागवते ।६।१५।२३।
"स एकदा तु मृगयां विचरन् विपिने वने ।
यदृच्छयाश्रमपदं जमदग्नेरुपाविशत् ।"
विजने वने इत्यपि क्वचित् पाठः ।)

विपुलः, त्रि, (विशेषेण पोलतीति । वि + पुल महत्त्वे + कः ।) बृहत् । इत्यमरः । (यथा, साहित्यदर्पणे । १० ।
"विपुलेन सागरशयस्य कुक्षिणा ।")
अगाधम् । इति मेदिनी । ले, १३२ ।

विपुलः, पुं, (वि + पुल + कः ।) मेरुपश्चिमभूधरः । इति मेदिनी । ले, १३२ । (अयं हि सुमेरोर्व्विष्कम्भपर्व्वतानामन्यतमः । यथा, विष्णुपुराणे । २ । २ । १७ ।
"विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः ।"
अस्मिंस्तु पीठस्थाने विपुलेति पीठदेवी वर्त्तते । यथा, देवीभागवते । ७ । ३० । ६६ ।
"विपुले विपुला देवी कल्याणी मलयाचले ।")
सुमेरुः । हिमाचलः । इति धरणिः । (वसुदेवपुत्रः । यथा, भागवते । ९ । २४ । ४६ ।
"बलं गदं सारणञ्च दुर्म्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ।")

विपुलरसः, पुं, (विपुलो रसो यत्र ।) इक्षुः । इति केचित् ॥

विपुला, स्त्री, (वि + पुल महत्त्वे + कः । ततस्त्रियां टाप् ।) पृथिवी । आर्य्याच्छन्दोभेदः । इति हेमचन्द्रः । अस्या लक्षणादिर्यथा,—
"पथ्या विपुला चपला मुखचपला जघनचपला च ।
गीत्युपगीत्युद्गीतय आर्य्यागीतिश्च नवधार्य्या ॥"

संलग्नं गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ।
यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ।
पुंसां कलिकालव्यालहतानां नास्त्युपहतिरन्यापि ।
वीर्यविपुला सुखे चेत् स्यात् गोविन्दाख्यमन्त्रकला ।"

इति छन्दोमञ्जरी ।

(विपुलपर्व्वतस्थादेवी । इति देवीभागवतम् । ७ । ३० । ६६ ।)

विपुलास्रवा, स्त्री, (विपुलं रसं आस्रवतीति । आ + स्रु + अच् । टाप् ।) गृहकन्या । इति राजनिर्घण्टः ।

विपूयः, पुं, (वि + पू + "विपूयविनीयेति ।" ३ । १ । ११७ । इति कर्म्मणि क्यबन्तनिपातः ।) मुञ्जः । इति मुग्धबोधव्याकरणम् । यथा,—
"वासांसि वल्कले शुद्धे विपूयैः क्लृप्तमेखलाम् ।
श्यामामञ्जनपिण्डाभां दक्षिणेमजिनान्तराम् ।"

इति भट्टिः ।६।६०।

विप्रः, पुं,(वप + "ऋज्रेन्द्राग्रवज्रेति ।" उणा० २।२८। निपातनात् रप्रत्ययेन साधुः ।) ब्राह्मणः । इत्यमरः । विशेषेण प्राति पूरयति षट् कर्म्माणि विप्रः । प्रा ल पूर्त्तौ इत्यस्मात् डप्रत्ययः । किंवा । उप्यते धर्म्मबीजमत्र इति वपेर्नाम्नीति रे निपातनादत इत्वम् । इति भरतः । तस्य लक्षणं यथा,—
"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियलक्षणम् ।"

इति प्रायश्चित्तविवेकः ।

(यथाच मनौ । १ । ९८ ।
"उत्पत्तिरेव विप्रस्य मूर्त्तिर्धर्म्मस्य शाश्वती ।
स हि धर्म्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ।"
अस्य पादोदकमाहात्म्यं यथा, ब्रह्मवैवर्त्ते । १ । ११ । २६—३३ ।
"पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे ।
सागरे यानि तीर्थानि विप्रपादेषु तानि च ।
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी ।
तावत् पुष्करपात्रेषु पिबन्ति पितरो जलम् ।
विप्रपादोदकं पुण्यं भक्तियुक्तश्च यः पिबेत् ।
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
महारोगी यदि पिबेत् विप्रपादोदकं द्विज ।
मुच्यते सर्व्वरोगेभ्यो मासमेकन्तु भक्तितः ।
अविद्यो वा सविद्यो वा सन्ध्यापूतो हि यो द्विजः ।
स एव विष्णुसदृशो न हरौ विमुखो यदि ।
घ्नन्तं विप्रं शपन्तं वा न हन्यान्नच तं शपेत् ।
गोभ्यः शतगुणं पूज्यो हरिभक्तश्च ब्राह्मणः ।
पादोदकञ्च नैवेद्यं भुङ्क्ते विप्रस्य यो द्विज ।
नित्यं नैवेद्यभोजी यो राजसूयफलं लभेत् ।
एकादश्यां न भुङ्क्ते यो नित्यं विष्णुं समर्च्चयेत् ।
तस्य पादोदकं प्राप्य स्थलं तीर्थं भवेद्ध्रुवम् ।")

अश्वत्थः । इति राजनिर्घण्टः । (त्रि, मेधावी । यथा, ऋग्वेदे । १० । ११२ । ९ ।
"निषुसीद गणपते गणेषु त्वा माहुर्व्विप्रतमं कवीनाम् ।")
"विप्रतमं अतिशयेन मेधाविनम् ।" इति तद्भाष्ये सायणः । स्तवकर्त्ता । यथा, ऋग्वेदे । १० । ४० । १४ ।
"विप्रस्य वा यजमानस्य वा गृहम् ।"
"विप्रस्य मेधाविनः स्तोतुर्व्वा ।" इति तद्भाष्ये सायणः ।)

विप्रकारः, पुं, (वि + प्र + कृ + भावे घञ् ।) अपकारः । तत्पर्य्यायः । निकारः २ । इत्यमरः । (यथा, महाभारते । १ । ६२ । १४ ।
"तेषान्तु विप्रकारेषु तेषु तेषु महामतिः ।
मोक्षणे प्रतिकारे च विदुरोऽवहितोऽभवत् ।")
खलीकारः । इति स्वामी । तिरस्कारः । इति हेमचन्द्रः । (विविधप्रकारः । यथा, महाभारते । ३ । २७५ । ३ ।
"स बाधते प्रजाः सर्व्वा विप्रकारैर्म्महाबलः ।
ततो नस्त्रातु भगवान्नान्यस्त्राता हि विद्यते ।")

विप्रकाष्ठं, स्त्री, तूलवृक्षः । इति राजनिर्घण्टः ।

विप्रकृतः, त्रि, (वि + प्र + कृ + क्तः ।) तिरस्कृतः । तत्पर्य्यायः । निकृतः २ । इति हेमचन्द्रः । (यथा, कुमारसम्भवे । २ । १ ।
"तस्मिन् विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः ।")

विप्रकृतिः, स्त्री, विप्रकारः । विप्रपूर्व्वकृधातोः क्तिप्रत्ययेन निष्पन्नमिदम् ।

विप्रकृष्टः, त्रि, (वि + प्र + कृष + क्तः ।) दूरः । इति हलायुधः । (यथा,—
"सन्निकृष्टविप्रकृष्टव्यभिचारिप्राधानिकभेदाच्चतुर्धा इति । नच ते चयादिकमपेक्षन्ते । विप्रकृष्टो यथा । हेमन्ते निचितः श्लेष्मा वसन्ते कफरोगकृत् । किंवा सन्निकृष्टो ज्वरस्य रुक्षादिसेवा विप्रकृष्टो रुद्रकोपः ।" इति माधवकृत रुग्विनिश्चयव्याख्याने विजयः ।)

विप्रकृष्टकं, त्रि, (विप्रकृष्ट एव । स्वार्थे कन् ।) दूरम् । इत्यमरः ।

विप्रचित्तिः, पुं, दनुपुत्रः । यथा,—

सूत उवाच ।

"अभवद्दनुपुत्राश्च वंशे ख्याता महासुराः ।
विप्रचित्तिप्रधानास्ते शतं तीव्रपराक्रमाः ।"

इति वह्निपुराणे काश्यपीयवंशः ।

(तथाच महाभारते । १ । ६५ । २१ ।
"चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र भारत ।
तेषां प्रथमजो राजा विप्रचित्तिर्म्महायशाः ।")

विप्रतिपत्तिः, स्त्री, (वि + प्रति + पद + क्तिन् ।) विरोधः । यथा,—
"परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु ।
वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः ।
भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृद्धिभिः ।
आह्निकश्चतुरंशस्तु चतुष्पादभिधीयते ।"

इति मिताक्षरायां व्यवहारमातृका ।*।

विकृतिः । यथा प्रथमाध्याये कात्यायनसूत्रम् । शब्देऽविप्रतिपत्तिरिति । प्रतिनिहितद्रव्ये श्रुतशब्दः प्रयोज्यः । श्रुतद्रव्यबुद्ध्या प्रतिनिध्युपादानात् शब्दान्तरप्रयोगे द्रव्यान्तरबुद्धिप्रसङ्गात् । इत्येकादशीतत्त्वम् । (अन्यथाभावः । अरिष्टविशेषः । यथा, सुश्रुते ।१।३०। "अथातः पञ्चेन्द्रियार्थविप्रतिपत्तिमध्यायं व्याख्यास्यामः ।" एवं छायाविप्रतिपत्तिः । स्वभावविप्रतिपत्तिः ।)

विप्रतिसारः, पुं, (वि + प्रति + सृ + घञ् ।) विप्रतीसारः । इत्यमरटीकायां रायमुकुटः । (यथा, शिशुपालवधे । १० । २० ।
"प्रापि चेतसि स विप्रतिसारे शुभ्रुवामवसरः सरकेण ।"
"विप्रतिसारे पश्चात्तापयुक्ते । पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि । इत्यमरः ।" इति तट्टीकायां मल्लिनाथः ।)

विप्रतिषिद्धं, त्रि, (वि + प्रति + षिध + क्तः ।) निषिद्धम् । इति स्मृतिः ।

विप्रतीसारः, पुं, अनुतापः । इत्यमरः । कौकृत्यम् । अनुशयः । रोषः । इति मेदिनी । रे, ३०७ ।

विप्रदुष्टः, पुं, (विशेषेण प्रकृष्टश्च दह्यते इति । दह + घः ।) फलमूलादिशुष्कद्रव्यम् । इति शब्दचन्द्रिका ।

विप्रप्रियः, पुं, (विप्राणां प्रियः । यज्ञीयद्रुमत्वात् ।) पलाशवृक्षः । इति केचित् । ब्राह्मणवल्लभे, त्रि । यथा,—
"रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं धार्म्मिकम् ।"

इति रामायणम् ।

विप्रयाणं, क्ली, (विशेषेण प्रयाणम् ।) पलायनम् । इति केचित् ।

विप्रयुक्तः, त्रि, (प्र + युज + भावे क्तः । विगतं प्रयुक्तं प्रयोगो यस्मात् ।) विश्लिष्टः । विभिन्नः । इति केचित् ।

विप्रयोगः, पुं, (विगतः प्रकृष्टो योगो यत्र ।) विप्रलम्भः । इत्यमरः । विरहो विसंवादो वा । इति स्वामी । रागिणोर्विच्छेदः । इति सुभूतिः । (यथा, मनौ । ९ । १ ।
"पुरुषस्य स्त्रियाश्चैव धर्म्म्ये वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्म्मान् वक्ष्यामि शाश्वतान् ।"
संयोगाभावः । यथा, साहित्यदर्पणे । २ ।
"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता ।")

विप्रलब्धः, त्रि, (वि + प्र + लभ + क्तः ।) वञ्चितः । इति हेमचन्द्रः । (यथा, महाभारते । ५ । १८९ । २१ ।
"दशार्णराजो राजंस्तामिदं वचनमब्रवीत् ।
अभिषङ्गात् प्रकुपितो विप्रलब्धस्तयानघ ।")

विप्रलब्धा, स्त्री, (विशेषेण प्रलब्धा प्रतारिता ।) स्वीयादिनायिकाभेदः । तस्या लक्षणं यथा,— सङ्केतनिकेतने प्रियमनवलोक्य समाकुलहृदया विप्रलब्धा । अस्याश्चेष्टा निर्व्वेदनिश्वाससखी-जनोपालम्भभयमूर्च्छाचिन्ताश्रुपातादयः । * । मुग्धा विप्रलब्धा यथा,—

"आलीभिः शपथैरनेककपटैः कुञ्जोदरं नीतया
शून्यं तच्च निरीक्ष्य विक्षुभितया न प्रस्थितं न
स्थितम् ।
न्यस्ताः किन्तु नवोढ़नीरजदृशा कुञ्जोपकण्ठे
यथा
भ्राम्यद्भृङ्गकदम्बडम्बरचमत्कारस्पृशो
दृष्टयः ॥" * ।

मध्या विप्रलब्धा यथा,—

"सङ्केतकेलिगृहमेत्य निरीक्ष्य शून्य-
मेणीदृशो निभृतनिश्वसिताधरायाः ।
अन्तश्चरं वचनमर्द्धविकाशि नेत्रं
ताम्बूलमर्द्धकवलीकृतमेव तस्थौ ॥"* ।

प्रगल्भा विप्रलब्धा यथा,—

"शून्यं कुञ्जगृहं निरीक्ष्य कुटिलं विज्ञात-
चेतोभवं
दूती नापि निवेदिता सहचरी दृष्टापि नो वा
तथा ।
शम्भो शङ्कर चन्द्रशेखर हरश्रीकण्ठ शूलिन्
शिव
त्रायस्वेति परन्तु पङ्कजदृशा भर्गस्य चक्रे
स्तुतिः ॥"* ।

परकीया विप्रलब्धा यथा,—

"दत्वा धैर्य्यभुजङ्गमूर्द्धि चरणावुल्लङ्घ्य लज्जा-
नदी-
मङ्गीकृत्य घनान्धकारपटलं तन्व्या न दृष्टः
प्रियः ।
सन्तापाकुलया तया च परितः पाथोधरे
गर्ज्जति
क्रोधाक्रान्तकृतान्तमत्तमहिषध्वान्ता दृशौ
योजिते ॥"

सामान्या विप्रलब्धा यथा,—

"कपटवचनभाजा केनचिद्धारयोषा
सकलरसिकगोष्ठीवञ्चिका वञ्चितासौ ।
इति तरलितरिङ्गद्भृङ्गविच्छिन्नचञ्चु-
र्हसति विकचकुन्दच्छद्मना केलिकुञ्जः ॥"
इति रसमञ्जरी ।

विप्रलम्भः, पुं, (वि+प्र+लभ+घञ् । नुम् ।) विसंवादः । (यथा, महाभारते । ३।३१।२७।
"विप्रलम्भोऽयमत्यन्तं यदि स्युरफलाः क्रियाः ॥")
वञ्चनम् । (यथा, महाभारते ।५।१८१।१६।
"ततो दशार्णाधिपतेः प्रेष्याः सर्व्वा न्यवेदयन् ।
विप्रलम्भं यथा वृत्तं स च चुक्रोध पार्थिवः ॥")
विप्रयोगः । विच्छेदः । इत्यमरः । शृङ्गाररस-भेदः । यथा, शब्दरत्नावल्याम् ।
"नामान्येतानि शृङ्गारे केशिकः शुचिरुज्ज्वलः ।
सम्भोगो विप्रलम्भश्च तस्य भेदद्वयं भवेत् ॥"
शृङ्गाराङ्गविशेषः । यथा,—
"यूनोरयुक्तयोर्भावो युक्तयोर्वाथ यो मिथः ।
अभीष्टालिङ्गनादीनामनवाप्तौ प्रहृष्यते ।
स विप्रलम्भो विज्ञेयः सम्भोगोन्नतिकारकः ॥"
इत्युज्ज्वलनीलमणिः ।

विप्रलापः, पुं, (वि+प्र+लप+घञ् ।) विरो-धोक्तिः । इत्यमरः । परवचनविरोधिवचनं विप्रलापः । अन्योन्यविवदनमिति यावत् । यथा एको ब्रूते आगता कल्याणीति अन्यो ब्रूते नहीति । तथाप्युदाजहार सर्व्वानन्दः ।
"एकः स्तवन्मधुसरोजमवैति वक्त्र-
मन्यः सुधाकिरणबिम्बमदो मृगाक्ष्याः ।
यूनोर्म्मुहुर्व्विवदतोर्व्वदने बभूवुः
सिद्धान्तवन्मधुपशालिगतागतानि ॥"
विरुद्धः प्रलापो विप्रलापः घञ् । विरोधे उक्तिर्वचनं विरोधोक्तिः । इति भरतः । (यथा, महाभारते । ६ । ८२ । २५ ।
"स धर्म्मराजस्य वचो निशम्य
कृपान्तरं विप्रलापापविद्धम् ॥")
अनर्थकवाक्यम् । इति हेमचन्द्रः । (यथा, महाभारते । ३ । ५ । २१ ।
"सत्यं श्रेयः पाण्डव विप्रलापं
तुल्यचान्नं सह भोज्यं सहायैः ॥")

विप्रलोभी, [न्] पुं, किङ्किरातवृक्षः । इति राज-निर्घण्टः ।

विप्रश्निका, स्त्री, (विविधः प्रश्नोऽस्त्यस्या इति । विप्रश्न+"अत इनिठनौ ।" ५।२।११५ । इति ठन् ।) दैवज्ञा । इत्यमरः ।

विप्रियः, पुं, (विरुद्धं प्रीणातीति । प्री+कः ।) अपराधः । तत्पर्य्यायः । मन्तुः २ व्यलीकम् ३ आगः ४ । इति हेमचन्द्रः । (यथा, भाग-वते । ६ । ५ । ४२ ।
"यन्नस्त्वं कर्म्मसन्धानां साधूनां गृहमेधिनाम् ।
कृतवानसि दुर्म्मर्षं विप्रियं तव मर्षितम् ॥")
अप्रिये, त्रि । (यथा, महाभारते ।१।१६०।८।
"पित्र्यं पितॄणां व्युच्छित्तिस्तेषां विप्रियं
भवेत् ॥")

विप्रुट्, [ष्] स्त्री, (विशेषेण प्रोषति दहति पापानि । वि+प्रुष+क्विप् ।) बिन्दुः । इत्य-मरः । (यथा, महाभारते । १२ । १०७ । १३५ ।
"विप्रुषश्चैव यावन्त्यो निपतन्ति नभस्तलात् ॥")
वेदपाठे विप्रुषो मुखनिर्गतजलबिन्दवो ब्रह्म-बिन्दव उच्यन्ते । ते शुद्धाः । यथा,—
"मक्षिका विप्रुषश्छाया गौरश्वः सूर्य्यरश्मयः ।
रजो भूर्व्वायुरग्निश्च स्पर्शे मेध्यानि निर्द्दिशेत् ॥"
इति शुद्धितत्त्वे मनुवचनम् ।
(यथा च मनौ । ५ । १४१ ।
"नोच्छिष्टं कुर्व्वते मुख्या विप्रुषोऽङ्गे पतन्ति याः ।
न श्मश्रूणि गतान्यास्यं न दन्तान्तरधिष्ठितम् ॥")
आचमनकाले मुखनिर्गता विप्रुषो न उच्छिष्ट-जनिकाः । यथा,—
"नोच्छिष्टं कुर्व्वते मुख्या विप्रुषोऽङ्गं नयन्ति याः ।
दन्तवद्दन्तलग्नेषु जिह्वास्पर्शेऽशुचिर्भवेत् ॥"
इति कौर्म्मे उपविभागे १२ अध्यायः ॥

विप्रोषितः, त्रि, प्रवासितः । विप्रपूर्व्वकवसधातोः क्तप्रत्ययेन निष्पन्नः ।

विप्लवः, पुं, (वि+प्लु+अप् ।) परचक्रादिभयम् । इति भरतः । राष्ट्राद्युपद्रवः । इति सार-सुन्दरी । तत्पर्य्यायः । डिम्बः २ डमरः ३ । इत्यमरः । (यथा, राजतरङ्गिण्याम् ।८।१०४१।
"सर्व्वा मण्डलराज्योर्व्वी वीरः शमितविप्ल-
वाम् ॥")
अस्त्रकलहः । इति स्वामी । (संशः । उप-द्रवः । यथा, भागवते । ४ । २६ । ६ ।
"विप्लवोऽभूद्दुःखितानां दुःसहः करुणात्मनाम् ॥
विनाशः । यथा, कथासरित्सागरे । १२ ।८२।
"संमन्त्र्य कौतुकात् पापास्तज्ञायाशीलविप्लवम् ।
चिकीर्षवो ययुः शीघ्रं ताम्रलिप्तीमलक्षिताः ॥"
विप्लवते इति अच् । जलोपर्य्यवस्थितः । यथा, महाभारते । ६ । ३ । ५ ।
"वणिजो नावि भग्नायामगाधे विप्लवा इव ॥")

विप्लावः, पुं, अश्वस्य प्लुतगतिः । इति विपूर्व्व-प्लुधातोर्घञ्प्रत्ययेन निष्पन्नम् ।

विप्लुट्, [ष्] स्त्री, (विशेषेण प्लोषतीति । वि+प्लुष्+क्विप् ।) विप्रुट् । बिन्दुः । इत्यमर-टीकायां रामाश्रमः ।

विप्लुतः, त्रि, (वि+प्लु+क्तः ।) व्यसनार्त्तः । तत्-पर्य्यायः । पञ्चभद्रः २ व्यसनी ३ । इति हेम-चन्द्रः ।

विफलं, त्रि, (विगतं फलं यस्य ।) निरर्थकम् । तत्पर्य्यायः । मोघम् २ वृथम् ३ । इति जटा-धरः । (यथा, कुमारसम्भवे । ७ । ६६ ।
"परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां विफलोऽभविष्यत् ॥")

विफला, स्त्री, (विगतं फलं यस्याः ।) केतकी । इति राजनिर्घण्टः ।

विबन्धः, पुं, आनाहरोगः । इत्यमरः । तस्य चिकित्सा ।
"तुल्यकारणकार्य्यत्वात् उदावर्त्तहरीं क्रियाम् ।
आनाहेऽपि च कुर्व्वीत विशेषश्चाभिधीयते ॥
त्रिवृत्कृष्णा हरीतक्यो द्विचतुःपञ्चभागिकाः ।
गुडेन तुल्या वटिका हरन्त्यानाहमुल्बणम् ॥
वर्त्तिस्त्रिकटुसैन्धवसर्षपगृहधूमकुष्ठमदनफलैः ।
मधुनि गुडे वा पक्त्वा निहिता स्वाङ्गुष्ठपरिमाणा ॥
वर्त्तिरियं दृष्टफला शनैः प्रणिहिता गुदे घृता-
भ्यक्ते ।
आनाहोदावर्त्तौ शमयति जठरं तथा गुल्मम् ॥"
त्रिकटुकाद्या वर्त्तिः । इति भावप्रकाशः । (विशेषेण बन्धः । विशेषबन्धनम् । यथा, महा-भारते । ८ । १४० । ४४ ।
"पादोदरविबन्धेश्च भूमावुद्भ्रमणैस्तथा ॥")

विबाधा, स्त्री, विहेठनम्। इति त्रिकाण्डशेषः॥

विबुधः, पुं, (विशेषेण बुध्यते इति। बुध+कः।) देवः। इत्यमरः॥ (यथा, मनौ। १२। ४७।
"गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये॥")
पण्डितः। इति मेदिनी। धे, २६॥ (यथा, कथासरित्सागरे। ६३। १०५।
"ब्रवीमि विबुधः खेदं जनानां निह्नुते कथम्॥"
अस्मिन्नर्थे वाच्यलिङ्गेऽपि दृश्यते॥॥) चन्द्रः। इति हलायुधः॥

विबुधानः, पुं, (वि+बुध+शानच्।) आचार्य्यः। पण्डितः। देवः। इति संक्षिप्तसारोणादिवृत्तिः॥

विबोधः, पुं, (विगतो बोधः।) अनवधानता। इति केचित्॥ (विशिष्टो बोधः।) प्रबोधश्च॥ (यथा, भागवते। ३। ४। २०।
"स एवमाराधितपादतीर्थी-
दधीत तत्त्वात्मविबोधमार्गः॥"
द्रोणपक्षिपुत्रः। यथा, मार्कण्डेये। १। २१।
"पिङ्गाक्षश्च विबोधश्च सुपुत्रः सुमुखस्तथा।
द्रोणपुत्राः खगश्रेष्ठास्तत्त्वज्ञाः शास्त्र-
चिन्तकाः॥")

विबोधनं, क्ली, (वि+बुध+ल्युट्।) प्रबोधनम्। यथा,—
"सुष्वाप योगनिद्रान्तामेकार्णवहृदयस्थितः।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम्॥"
इति देवीमाहात्म्यम्॥
(जागरणम्। यथा, महाभारते।१।१९०।७
"वीतशोकभयाबाधाः सुखस्वप्नविबोधनाः॥"
प्राप्तिबोधके, त्रि। यथा, ऋग्वेदे। १८। २२।
"अदान्नायो विबोधनम्।"
"रायो धनस्य विबोधनं विशेषेण बोधकं बहुधनप्राप्तिहेतुमित्यर्थः।" इति तद्भाष्ये सायणः॥)

विभक्तः, त्रि, (वि+भज्+क्तः।) प्राप्तविभागः। विभिन्नः। पृथक्। यथा। बृहस्पतिः।
"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः॥
जघन्यजाश्च ये तेषां पितृभागहरास्तु ते।
अनीशः पूर्व्वजः पित्र्ये भ्रातृभागे विभक्तजः॥"
विभक्तजो विभागानन्तरं गर्भाधानेन जातः॥ अपि च। व्यासः।
"भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते।
तदभावे विभक्तानां धर्म्मस्तेषां विवर्द्धते॥"
विभक्तानां स्वमात्रधने वैदिककर्म्मकरणात्तत्मात्रधर्म्मत्वेन तद्वृद्धिरित्यर्थः।
"विभक्ता अविभक्ता वा सपिण्डाः स्थावरे
समाः।
एको ह्यनीशः सर्व्वत्र दानाधमनविक्रये॥"
अपि च।
"दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः।
विभक्तानां पृथक् ज्ञेयाः पाकधर्म्मागमव्ययाः॥
साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम्॥
येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वरिक्थतः।
विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान्॥"
इति नारदवचनानि॥
तथा।
"भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तत् स्मृतम्॥"
इति याज्ञवल्क्यवचनम्॥॥
तथा।
"विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र
संस्थितः।
पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यते॥",
इति बृहस्पतिवचने येषामेव हि पितृभ्रातृपितृव्यादीनां पितृपितामहोपार्ज्जितद्रव्येणाविभक्तत्वसम्पत्तिः सम्भवति त एव विभक्ताः सन्तः परस्परप्रीत्या पूर्व्वकृतविभागध्वंसेन यत्तव धनं तन्मम धनं यन्मम धनं तत्तवापि इत्येकस्मिन् कार्य्ये एकगृहिरूपतया स्थिताः संसृष्टाः। न त्वेवं रूपाणां धनसंसर्गमात्रेण। नापि विभक्तानां प्रीतिपूर्व्वकाभिसन्धानं विना॥॥ तथा।
"बन्धूनामविभक्तानां भोगं नैव प्रदापयेत्॥"
इति कात्यायनवचनम्॥
तथा।
"भ्रातॄणामविभक्तानामेको धर्म्मः प्रवर्त्तते।
विभागे सति धर्म्मोऽपि भवेत्तेषां पृथक्पृथक्॥"
तथा।
"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत् सह।
न तत्र भागं विषमं पिता दद्यात् कथञ्चन॥"
इति मनुवचनम्॥
तथा। कात्यायनः।
"अविभक्ते मृते पुत्रे तत्सुतं रिक्थभागिनम्।
कुर्व्वीत जीवनं येन लब्धं नैव पितामहात्।
लभेतांशं स पित्र्यं च पितृव्यात् तस्य वा
सुतात्॥"
तथा। विष्णुः। पितृविभक्ता विभागानन्तरोत्पन्नस्य विभागं दद्युः॥॥ अपि च।
"अविभक्तविभक्तानां कुल्यानां वसतां सह।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः॥"
इति कात्यायनवचनम्॥
अविभक्तानां सह वसतां संसृष्टानां वा पुनर्विभागो भ्रातृतत्सुततत्सुतपर्य्यन्तमेव तत्सुताचतुर्थान्निवर्त्तते। इति॥ तथा।
"अविभक्तं स्थावरं यत् सर्व्वेषामेव तद्भवेत्।
विभक्तं स्थावरं प्राप्तं नान्योदर्य्यैः कदाचन॥"
इति यमवचनम्। एतानि वचनादीनि दायतत्त्वधृतानि॥॥ अपि च।
"अविभक्ता विभक्ता वा कुर्य्युः श्राद्धमदैविकम्।
मघासु च तथान्यत्र नाधिकारः पृथक् विना॥"
इति श्राद्धतत्त्वम्॥
अन्यच्च।
"बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः।
सर्व्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम्।
द्रव्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत्॥"
इति शुद्धितत्त्वम्॥
(पुं, कार्त्तिकेयः। यथा, महाभारते।३।२३१।६।
"षष्ठीप्रियश्च धर्म्मात्मा पवित्रो मातृवत्सलः।
कन्याभर्त्ता विभक्तश्च स्वाहेयो रेवतीसुतः॥")

विभक्तजः, पुं, (विभक्ते सति जायते इति। जन+डः।) विभागानन्तरं गर्भाधानेन जातः। यथा। बृहस्पतिः।
"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः।
जघन्यजाश्च ये तेषां पितृभागहरास्तु ते॥
अनीशः पूर्व्वजः पित्र्ये भ्रातृभागे विभक्तजः।
यथा धने तथर्णेऽपि सुता शौचोदकक्रियाः॥"
इति दायतत्त्वम्॥

विभक्तिः, स्त्री, (विभजनमिति। संख्याकर्म्मादयो ह्यर्थाः विभज्यन्ते आभिरिति वा। वि+भज+क्तिन्।) विभागः। स्वादिः त्यादिश्च। यथा।
"संख्यात्वव्याप्यसामान्यैः शक्तिमान् प्रत्ययस्तु
यः।
सा विभक्तिर्द्विधा प्रोक्ता सुप्तिङ् चेति प्रभे-
दतः॥"
संख्यात्वावान्तरजात्यवच्छिन्नशक्तिमान् यः प्रत्ययः सा विभक्तिः। सुप् तिङ् इति भेदाद्द्विविधा। इति शब्दशक्तिप्रकाशिका॥ (उभयार्थोदाहरणम्। यथा, नैषधे। ३। २३।
"क्रियेत चेत् साधु विभक्तिचिन्ता
व्यक्तिस्तदा सा प्रथमाभिधेया।
या स्वौजसां साधयितुं विलासै-
स्तावत् क्षमा नाम पदं बहु स्यात्॥")

विभजनीयं, त्रि, विभाज्यम्। विभागयोग्यम्। यथा। यद्द्रव्यस्य प्रयोजनार्हं पुस्तकादि तन्मूर्खादिभिः सह पण्डितादिभिर्न विभजनीयम्। इति दायतत्त्वम्॥ भजनार्हम्। विपूर्व्वभजधातोरनीयप्रत्ययेन निष्पन्नम्॥

विभवः, पुं, धनम्। (यथा, मनौ। ४। ३४।
"न जीर्णमलवद्वासा भवेच्च विभवे सति॥")
मोक्षः। ऐश्वर्य्यम्। इति मेदिनी। वे, ५१॥ (यथा, भागवते। ७। ८। ५५।
"भवता हरे स वृजिनोऽवसादितो
नरसिंह नाथ विभवाय नो भव॥")
प्रभवादिषष्टिसंवत्सरान्तर्गतद्वितीयवर्षम्। यथा, भविष्यपुराणे।
भैरव उवाच।
"सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः।
प्रशान्ता मानवास्तत्र बहुशस्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने॥"
इति ज्योतिस्तत्त्वम्॥

विभा, स्त्री, (वि+भा+क्विप्।) किरणः। इति हेमचन्द्रः॥ प्रकाशः। शोभा। इति राजनिर्घण्टः॥ (यथा, साहित्यदर्पणे। १०।६६७।
"कमलेव मतिर्मतिरिव कमला
तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति वत यस्य तव॥"
प्रकाशके, त्रि। यथा, ऋग्वेदे।१०।५५।४।

"यदुष औच्छः प्रथमा विभानाम् ॥"
"विभानां विभासकानां यज्ञनक्षत्रादीनाम् ।"
इति तद्भाष्ये सायणः ॥)

विभाकरः, पुं, (वि+भा+कृ+"दिवाविभानिशेति ।" ३ । २ । २१ । इति टः ।) सूर्य्यः । (यथा, साहित्यदर्पणे । १० । अर्थश्लेषे ।
"अहसा भूयसाविष्टो विभाति च विभाकरः ॥")
अर्कवृक्षः । चित्रकवृक्षः । इत्यमरः । अग्निः । इति मेदिनी ।रे, २६७॥ (त्रि, प्रकाशशीलः ॥)

विभागः, पुं, (वि+भज+घञ् ।) भागः । अस्य पर्य्यायः अंशशब्दे द्रष्टव्यः ॥ अस्य लक्षणं यथा ।
"एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः । विशेषेण भजनं स्वत्वज्ञापनं वा विभागः ।" इति दायभागः ॥
अपि च ।
"विभागोऽर्थस्य पित्र्यस्य पुत्त्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥"
इति नारदवचनम् ॥
पूर्व्वस्वामिस्वत्वोपरमे सम्बन्धविशेषात् सम्बन्धिनां सर्व्वधनप्रसृतस्य स्वत्वस्य गुटिकापातादिना प्रादेशिकस्वत्वव्यवस्थापनं विभागः ॥ * ॥
अपि च । कात्यायनः ।
"जीवद्विभागे तु पिता नैकं पुत्त्रं विशेषयेत् ।
निर्भाजयेत् न चैवैकमकस्मात् कारणं विना ॥"
उक्तकारणशून्ये तु नारदः ।
"व्याधितः कुपितश्चैव विषयासक्तचेतनः ।
अयथाशास्त्रकारी च न विभागे पिता प्रभुः ॥"
निवृत्तरजस्कायामेव मातरि पितामहधनविभागमाह वृहस्पतिः ।
"पित्रोरभावे भ्रातृणां विभागः संप्रदर्शितः ।
मातुर्निवृत्ते रजसि जीवतोरपि शस्यते ॥"
अन्यच्च । याज्ञवल्क्यः ।
"विभागञ्चेत् पिता कुर्य्यादिच्छया विभजेत् सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः ॥"
अपि च देवलः ।
"अविभक्तविभक्तानां कुल्यानां वसतां सह ।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः ॥"
विष्णुः । पितृविभक्ता विभागानन्तरोत्पन्नस्य विभागं दद्युरिति ।
"गोत्रभागविभागार्थे सन्देहे समुपस्थिते ।
गोत्रजैश्चापरिज्ञाते कुलं साक्षित्वमर्हति ॥"
इति शङ्खवचनम् ॥ इति दायतत्त्वम् ॥
सामान्यधर्म्मावच्छिन्नानामेव वहूनां परस्परविरुद्धतद्व्याप्यधर्म्मप्रकारेण प्रतिपादनं हि विभागः । इति श्राद्धविवेकटीकायां श्रीकृष्णतर्कालङ्कारः ॥ * ॥ न्यायमते चतुर्व्विंशतिगुणान्तर्गतगुणविशेषः । स त्रिविधः । यथा,—
"शब्दाहेतुर्द्वितीयः स्यात् विभागोऽपि त्रिधा भवेत् ।
एककर्म्मोद्भवस्त्वाद्यो द्वयकर्म्मोद्भवः परः ॥
विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् ।
हेतुमात्रविभागोत्थ हेत्वहेतुविभागजः ॥"
इति भाषापरिच्छेदः ॥ * ॥
विभक्तप्रत्ययकारणं विभागं निरूपयति विभाग इति एककर्म्मेति । उदाहरणन्तु । श्येनशैलविभागादिकं पूर्व्ववत् बोध्यं तृतीयो विभागजः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति आद्यस्तावत् यत्र कपालकर्म्म ततः कपालद्वयविभागस्ततो घटारम्भकसंयोगनाशस्ततो घटनाशः ततस्तेन एककपालविभागेन सकर्म्मणः कपालस्य देशान्तरविभागो जन्यते तत उत्तरदेशसंयोगः ततः कर्म्मनाश इति । न च तेन कर्म्मणैव कथं देशान्तरविभागो न जन्यते इति वाच्यं एकस्य कर्म्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिवन्धिविभागजनकत्वविरोधात् अन्यथा विकसत्कमलकुट्मलभङ्गप्रसङ्गात् तस्माद्यदीदं अनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्तदा आरम्भकसंयोगप्रतिवन्धिविभागं न जनयेत् । न च कारणविभागेनैव द्रव्यनाशात् पूर्व्वं कुतो देशान्तरविभागो न जन्यते इति वाच्यं आरम्भकसंयोगप्रतिवन्धिविभागवतः अवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात् यत्र हस्तक्रियया हस्ततरुविभागः ततः शरीरेऽपि विभक्तप्रत्ययो भवति तत्र च शरीरतरुविभागे हस्तक्रिया न कारणं व्यधिकरणत्वात् शरीरे तु क्रिया नास्ति अवयविकर्म्मणो यावदवयवकर्म्मनियतत्वात् । अतस्तत्र कारणाकारणविभागेन कार्य्याकार्य्यविभागो जन्यते इति अतएव विभागो गुणान्तरं अन्यथा शरीरे विभक्ताविभक्तप्रत्ययो न स्यात् अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति । इति सिद्धान्तमुक्तावली ॥ ("सामान्यधर्म्मावच्छिन्नानामेव वस्तूनां परस्परविरुद्धतद्व्याप्यधर्म्मप्रकारेण प्रतिपादनम् ॥" यथा द्रव्यत्वधर्म्मावच्छिन्नानां क्षित्यादीनां परस्परविरुद्धेन क्षितित्वजलत्वादिना अथ द्रव्यत्वव्याप्येन विशेषेण तथा प्रतिपादनं नवधा द्रव्यविभागः ॥ यागः । यथा, ऋग्वेदे । ५ । ७७ । ४ ।
"यो भूयिष्ठं नासत्याभ्यां विवेष च निष्ठं पित्वो ररते विभागे ।"
"यो यजमानो विभागे हविर्व्विभागवति यागे ।"
इति तद्भाष्ये सायणः ॥")

विभाज्यं, त्रि, विभजनीयम् । विभागार्हम् । यथा,
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा ।
शौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्वृहस्पतिः ॥
शिल्पेष्वपि हि धर्म्मोऽयं मूल्याद्यच्चाधिकं भवेत् ।
परं निरस्य यल्लब्धं विद्यया द्यूतपूर्व्वकम् ।
विद्याधनन्तु तद्विद्यान्न विभाज्यं वृहस्पतिः ॥"
तथा ।
"शौर्य्यभार्य्याधने चोभे यच्च विद्याधनं भवेत् ।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ॥"
इति दायतत्त्वम् ॥

विभाण्डकः, पुं, मुनिविशेषः । स तु ऋष्यशृङ्गपिता । इति रामायणम् ॥ (यथा, महाभारते । ३ । ११९ । २९ ।
"सोऽपश्यदासीनमुपेत्य पुत्त्रं
ध्यायन्तमेकं विपरीतचित्तम् ।
विनिश्वसन्तं मुहुरूर्द्ध्वदृष्टिं
विभाण्डकः पुत्त्रमुवाच दीनम् ॥")

विभाण्डी, स्त्री, आवर्त्तकीलता । इति राजनिर्घण्टः ॥

विभातं, क्ली, (वि+भा+क्तः ।) प्रत्यूषः । इति शब्दरत्नावली ॥

विभावः, पुं, (विशेषेण भावयति रसं सामाजिकानिति । वि+भावि+अच् ।) परिचयः । रसस्योद्दीपनादिः । इति मेदिनी ॥ तल्लक्षणादिर्यथा,—
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥"
विभावादयो वक्ष्यन्ते । विभावादीनां यथासंख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते ।
"कारणकार्य्यसञ्चारिरूपा अपि हि लोकतः ।
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः ॥
सद्भावश्च विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ॥
विभावादिपरामर्शविषयत्वात् सचेतसाम् ।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम् ॥" * ॥
"अथ के ते विभावानुभावव्यभिचारिण इत्यपेक्षायां विभावमाह ।
रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः ।
ये हि लोके रामादिगतरतिहासादीनां उद्बोधकारणानि सीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तो विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिरिति विभावा उच्यन्ते ।
आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ॥"
इति साहित्यदर्पणे ३ परिच्छेदे ।
(विविधप्रकारेण प्रकाशवति, त्रि । यथा, ऋग्वेदे । १ । १४८ । १ ।
"न चित्रं वपुषे विभावम् ।"
"विभावं विविधप्रकाशवन्तम् ।" इति तद्भाष्ये सायणः ॥)

विभावनं, क्ली, } (विभावयति कारणं विना
विभावना, स्त्री, } कार्य्योत्पत्तिं चिन्तयति पण्डितमिति । वि+भावि+ल्युः । युच् वा ।) अलङ्कारविशेषः । स च विनाकारणं उपनिबद्ध्यमानोऽपि कार्य्योदयरूपः । यथा,—
"विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते ।

उक्तानुक्तनिमित्तत्वात् द्विधा सा परि-
कीर्त्तिता ॥"

उक्तहेतौ यथा,—
"अनायासकृशं मध्यमशङ्कतरले दृशौ ।
अभूषणमनोहारि वपुर्वयसि सुभ्रुवः ॥"
अनुक्तहेतौ यथा,—
"स एव जीवि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं तस्य शम्भुना न हृतं बलम् ॥"
इति साहित्यदर्पणे १० परिच्छेदे ।
(पालनम् । यथा, भागवते । ४ । ८ । २० ।
"यस्याङ्घ्रिपद्मं परिचर्य्यविश्व-
विभावनायात्तगुणाभिपत्तेः ॥")

विभावरी, स्त्री, रात्रिः । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ३ । २०७ ।
"प्रभातायां विभावर्य्यां यथास्थानस्थितो नृपः ।
आकार्य्यतां मातृगुप्त इति चत्तारमादिशत् ॥"
मन्दारविद्याधरकन्या । यथा, मार्कण्डेये ।६३।
१४ ।
"मन्दारविद्याधरजा सखी मम विभावरी ।"
सुमेरूत्तरस्था पुरी । यथा, भागवते ।७५।२१।७।
"उत्तरतः सौम्यां विभावरीं नाम ॥")
हरिद्रा । कुट्टनी । वक्रयोषित् । विवादवस्त्र-
सुखी । इति मेदिनी । रे, २८६ ॥ मौखर्य्य-
निरतस्त्री । इति शब्दरत्नावली ॥ मेदाहयः ।
इति रत्नमाला ॥

विभावसुः, पुं, (विभा प्रभा एव वसु सम्पद्यस्य ।)
सूर्य्यः । (यथा, महाभारते । १ । ८६ । ७ ।
"वर्द्धनः कुरुवंशस्य विभावसुसमद्युतिः ॥")
अर्कवृक्षः । अग्निः । (यथा, महाभारते ।
३ । ६८ । ७ ।
"निगूढां धूमजालेन प्रभामिव विभावसोः ॥")
चित्रकवृक्षः । इत्यमरः ॥ चन्द्रः ॥ हारभेदः ।
इति हेमचन्द्रः ॥ (वसुपुत्रविशेषः । यथा,
भागवते । ६ । ६ । १०,१६ ।
"वसवोऽष्टौ वसोः पुत्त्रास्तेषां नामानि मे शृणु ।
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वास्तुर्विभा-
वसुः ।
विभावसोरसूतोषा व्युष्टं रोचिषमातपम् ।"
सुरासुरपुत्त्रः । यथा, तत्रैव । १० । ५९ । १२ ।
"ताम्रोऽन्तरिक्षः श्रवणो विभावसुः
वसुर्नभस्वानरुणश्च सप्तमः ॥"
दनुपुत्त्रोऽसुरविशेषः । यथा, तत्रैव ।६।६।३०।
"त्रिमूर्द्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः ॥")

विभावितः, त्रि, विचिन्तितः । विशेषेण उत्पा-
दितः । विशेषेण प्रापितः । विमिश्रयितः । इति
व्याप्तभूधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा,
शिशुपालवधे । १ । २ ।
"चयस्त्विषामित्यवधारितं पुरा
ततः शरीरीति विभाविताकृतिः ॥")

विभाषा, स्त्री, (विकल्पत्वेन भाष्यते इति ।
भाष् + "गुरोश्च हलः ।" ३।३।१०३ । इत्यः ।
ततष्टाप् ।) विकल्पः । यथा । द्वयोर्विभाषयो-
र्मध्ये विधिर्नित्यः । इति मुग्धबोधव्याकरणम् ॥
("नवेति विभाषा ।" इति पाणिनिः ।१।१।४४।)

विभिन्नः, त्रि, (वि + भिद् + क्तः ।) विभक्तः ।
विदीर्णः । यथा,—
"गदापरशुखड्गैश्च चक्रतोमरशायकैः ।
विभिन्ने वेदना या हि सुधया सापि निर्ज्जिता ॥"
इति इतिहाससमुच्चयः ॥
(विचलितः । यथा, शिशुपालवधे । १ । ५५ ।
"विभिन्नशङ्खः कलुषीभवन्मुहु-
र्म्मदेन दन्तीव मनुष्यधर्म्मणः ॥")

विभीतकः, त्रि, वृक्षविशेषः । वहेड़ा इति भाषा ।
तत्पर्य्यायः । अक्षः २ तुषः ३ कर्षफलः ४ भूत-
वासः ५ कलिद्रुमः ६ । इत्यमरः ॥ कल्पवृक्षः ७
संवर्त्तः ८ । इति रत्नमाला ॥ तैलफलः ९
भूतावासः १० संवर्त्तकः ११ वासन्तः १२
कलिवृक्षः १३ वहेडुकः १४ हार्य्यः १५ विषघ्नः
१६ अनिलघ्नः १७ कासघ्नः १८ । (यथा, महा-
भारते । ३ । ६४ । ५ ।
"पियालतालखर्ज्जूरहरीतकविभीतकैः ॥")
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कषा-
यत्वम् । उष्णत्वम् । कफापहत्वम् । चक्षुष्यत्वम् ।
पलितघ्नत्वम् । विपाके मधुरत्वञ्च ॥ तन्मज्ज-
गुणाः । तृष्णाच्छर्द्दिकफवातहरत्वम् । लघु-
त्वम् । मधुरत्वम् । मदकारित्वञ्च ॥ तत्तैल-
गुणाः । स्वादुत्वम् । हिमत्वम् । केश्यत्वम् ।
गुरुत्वम् । पित्तानिलार्त्तिनाशित्वञ्च । इति
राजनिर्घण्टः ॥ * ॥ अपि च । अथ विभीतक-
नामानि गुणाश्च ।
"विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलस्तु यः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ॥
विभीतकं स्वादुपाकं कषायं कफपित्तनुत् ।
उष्णवीर्य्यं हिमस्पर्शं भेदनं कासनाशनम् ।
रूक्षं नेत्रहितं केश्यं कृमिवैस्वर्य्यनाशनम् ॥
विभीतमज्जा तृट्छर्द्दिकफवातहरो लघुः ।
कषायो मदकृच्चाथ धात्रीमज्जापि तद्गुणाः ॥"
इति भावप्रकाशः ॥ * ॥
अन्यच्च ।
"विभीतं भेदि तीक्ष्णोष्णं वैस्वर्यं कृमिनाशनम् ।
चक्षुष्यं स्वादुपाकञ्च कषायं कफपित्तनुत् ॥"
इति राजवल्लभः ॥ * ॥
अस्य कलिद्रुमत्वकारणं यथा,—
पुलस्त्य उवाच ।
"ततो गतेषु देवेषु ब्रह्मलोकं प्रति द्विज ।
त्रैलोक्यं पालयामास बलिर्धर्म्मान्वितः सदा ॥
कलिस्तदा धर्म्मयुतं जगद्दृष्ट्वा कृते यथा ।
ब्रह्माणं शरणं भेजे स्वभावस्य निषेधनात् ॥
प्रणिपत्य तमाहाथ तिष्यो ब्रह्माणमीश्वरम् ।
मम स्वभावो बलिना नाशितो देवसत्तम ॥
तं प्राह भगवान् योगी स्वभावो जगतोऽपि हि ।
न केवलं हि भवतो हृतस्तेन बलीयसा ॥
पश्याद्य तिष्य देवेन्द्रं वरुणञ्च समागतम् ।
भास्करोऽपि हि दीनत्वं प्रयातो हि बलाद्बलेः ।
इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्ययः ।
दीनान् दृष्ट्वा च शक्रादीन् विभीतकवनं गतः ॥"
इति वामने १७ अध्यायः ॥
(अन्यच्च । यथा, महाभारते ३।७२ अध्याये ।
"एवमुक्ता ददौ विद्यामृतुपर्णो नलाय वै ।
तस्याक्षहृदयाज्ञस्य शरीरान्निःसृतः कलिः ॥"
"तं शप्तुमैच्छत् कुपितो निषधाधिपतिर्नलः ।
तमुवाच कलिर्भीतो वेपमानः कृताञ्जलिः ॥
कोपं संयच्छ नृपते कीर्त्तिं दास्यामि ते पराम् ॥"
"एवमुक्तो नलो राजा न्ययच्छत् कोपमात्मनः ।
ततो भीतः कलिः क्षिप्रं प्रविवेश विभी-
तकम् ॥"
"विभीतकश्चाप्रशस्तः संवृत्तः कलिसंश्रयात् ॥")

विभीषणः, पुं, (विभीषयतीति । वि + भीषि +
"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।" ३ । १ । १३४ । इति
ल्युः ।) रावणभ्राता । इति रामायणम् ॥
(यथा, भागवते । ४ । १ । ३४ ।
"रावणः कुम्भकर्णश्च तथान्यस्तो विभीषणः ।
पुलहस्य गतिर्भार्य्या त्रीनसूत सती सुतान् ॥")
नलतृणम् । इति राजनिर्घण्टः ॥ भयानके त्रि ॥
(यथा, ऋग्वेदे । ५ । ३४ । ६ ।
"इन्द्रो विश्वस्य दमिता विभीषणः ॥"
"विभीषणः भयजनकः ।" इति तद्भाष्ये
सायणः ॥)

विभीषिका, स्त्री, (विभीषा + स्वार्थे कन् । स्त्रियां
टाप् अत इत्वञ्च ।) भयप्रदर्शनम् । यथा,—
"कृत्वा शस्त्रविभीषिकां कतिपयग्रामेषु दीनाः
प्रजाः
मथ्नन्तो विटपक्षपातैरुपहताः चौर्य्योत्सुकास्ते
ऽखिलाः ।
विद्वांसोऽपि वयं परं निजगता सर्गस्थिति-
व्यापदा-
मीशस्तत्परिचर्य्यया न गणितो येरेष नारा-
यणः ॥"
इति शान्तिशतकम्

विभुः, पुं, (वि + भू + "विप्रसंभ्यो ड्वसंज्ञायाम्
३ । २ । १८० । इति डुः ।) प्रभुः । (यथा,
शिशुपालवधे ।
"विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यबोधि सः ॥")
सर्व्वगतः । शङ्करः । (यथा, महाभारते ।११
१७ । १६ ।
"त्रिजटश्चीरवासाश्च रुद्रः सेनापतिर्विभुः ॥")
ब्रह्मा । इति मेदिनी । भे, ७ ॥ भृत्यः । इति
त्रिकाण्डशेषः ॥ विष्णुः । इति शब्दमाला ॥
(यथा, महाभारते । १३ । १४९ । १०७ ।
"विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥"
जीवात्मा । यथा,—
"न शक्यश्चक्षुषा द्रष्टुं देहे सूक्ष्मतमो विभुः ।
दृश्यते ज्ञानचक्षुर्भिस्तपश्चक्षुर्भिरेव च ॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ।)
नित्यः । अर्हन् । इति हेमचन्द्रः ॥

विभुः, त्रि, सर्व्वमूर्त्तसंयोगी । परममहत्त्ववान् । स तु आत्मादिः । यथा,—

"आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्त्तृकम् ।
विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ॥"
इति भाषापरिच्छेदः ॥

विभुरिति विभुत्वं परममहत्त्ववत्त्वम् । इति सिद्धान्तमुक्तावली ॥

"कालखात्मदिशां सर्व्वगतत्वं परमं महत् ।"
इति भाषापरिच्छेदः ॥

दृढः । इत्यजयपालः ॥ व्यापकः । इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे । १० । ४० । १ ।

"प्रातर्य्यावाणं विभ्वं विशे विशे ॥"

"विभ्वं विभुं व्यापिनम् ।" इति तद्भाष्ये सायणः ॥ व्याप्तः । यथा, ऋग्वेदे । १ । ३४ । १ ।

"त्रिश्चिन्नो अद्याभवतं न वेद सा
विभुर्व्वायाम उत रातिरश्विना ॥"

"विभुः व्याप्तः ।" इति तद्भाष्ये सायणः ॥ सर्व्वत्र गमनशीलः । यथा, ऋग्वेदे ।२।१६५।१० ।

"एकस्य चिन्मे विभ्वस्त्वोजो
या नु दधृष्वान् कृणवै मनीषा ॥"

"विभु सर्व्वत्र गमनशीलम् ।" इति तद्भाष्ये सायणः ॥ ईश्वरः । यथा, ऋग्वेदे । ४ । ७ । १ ।

"यमप्नवानो भृगवो विरुरुचुर्व्वनेषु चित्रं विभ्वं
विशे विशे ॥"

"विभ्वं विभुं ईश्वरम् ।" इति तद्भाष्ये सायणः ॥ महान् । यथा, ऋग्वेदे । ५ । ३८ । १ ।

"उरोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ॥"

"विभ्वी महती ।" इति तद्भाष्ये सायणः ॥)

विभूतिः, स्त्री, (वि + भू + क्तिन् ।) अणिमादिकमष्टधा । तत्पर्य्यायः । भूतिः २ ऐश्वर्य्यम् ३ । इत्यमरः ॥ (यथा, ऋग्वेदे । १ । ८ । ६ ।

"एवाहि ते विभूतय ऊतय इन्द्र मावते ॥"

"विभूतयः ऐश्वर्य्यविशेषाः ।" इति तद्भाष्ये सायणः ॥) शिवधृतभस्म । अस्य शिवस्य अणिमाद्यष्टप्रकारं वैभवं विभूत्यादिपदत्रयं वाच्यं केचित्तु विभूतिर्भूतिरिति द्वयं शम्भुधृतभस्मनि अणिमाद्यष्टके तु ऐश्वर्य्यमित्याहुः । विभवत्यनया विभूतिः क्तिः भवतेः क्तिः भूतिः विग्रहणमन्योपसर्गनिरासार्थं ईश्वरगुणैश्वर्य्यं भावे ष्यञः अणिमादि लघिमादि । तथा च ।

"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा
तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता ॥"
इति ।

अणुत्वमणिमा येन सूक्ष्मो भूत्वा विचरति । लघुत्वं लघिमा येन वायुरिव लघुतरो भवति । प्राप्तिरभीप्सितप्रापणं प्राकाम्यमिच्छानभिघातः । महिमा महत्त्वं येन चतुर्द्दशभुवनान्यस्योदरे वर्त्तन्ते । ईशित्वं प्रभुता येन स्थावरजङ्गमादिभूतान्यादेशकारीणि भवन्ति । वशित्वं स्वातन्त्र्यं येन स्वतन्त्रश्चरति । कामेन इच्छया अवशायितुं स्थातुं शीलमस्य कामावशायी शीलो ग्रहादित्वाणिन् तस्य भावः कामावशायिता । सर्व्वानन्दस्तु अनेकार्थत्वाद्धातूनां स्थितिरिह तिष्ठत्यर्थः । अवशायी इत्तमध्य इत्याह । इति भरतः ॥ * ॥ अपि च ।

श्रीभगवानुवाच ।

"परात्परतरं तत्त्वं परं ब्रह्मैकमव्ययम् ।
नित्यानन्दं स्वयं ज्योतिरक्षयं तमसः परम् ।
ऐश्वर्य्यं तस्य यन्नित्यं विभूतिरिति गीयते ॥"
इति कौर्म्मे १ अध्यायः ॥

(लक्ष्मीः । यथा, ऋग्वेदे । १ । ३० । ५ ।

"विभूतिरस्तु सूनृता ।"

"विभूतिर्लक्ष्मीः ।" इति तद्भाष्ये सायणः ॥ विभवहेतुः । यथा, तत्रैव । ६ । २१ । १ ।

"रयिर्व्विभूतिरीयते वचस्या ॥"

"विभूतिर्व्विगतो विभवहेतुः ॥" इति तद्भाष्ये सायणः ॥ विविधसृष्टिः । यथा, भागवते । ४ । २४ । ४३ ।

"शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने ।
चेत आकूतिरूपाय नमो वाचोविभूतये ॥"

सम्पत् । यथा, रघुवंशे । ८ । ३६ ।

"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम् ॥")

विभूतिद्वादशी, स्त्री, (विभूतिवर्द्धिका द्वादशी ।) व्रतविशेषः । यथा,—

नन्दिकेश्वर उवाच ।

"शृणु नारद ! वक्ष्यामि विष्णोर्व्रतमनुत्तमम् ।
विभूतिद्वादशीनाम सर्व्वपापनिसूदनम् ॥
कार्त्तिके चैव वैशाखे मार्गशीर्षेऽथ फाल्गुने ।
आषाढ़े वा दशम्यान्तु शुक्लायां लघुभुङ्नरः ।
कृत्वा सायन्तनीं सन्ध्यां गृह्णीयान्नियमं बुधः ॥
एकादश्यां निराहारः समभ्यर्च्य जनार्द्दनम् ।
द्वादश्यां विधिसंयुक्तः करिष्ये भोजनं विभो ।
तदविघ्नेन मे यातु साफल्यं मधुसूदन ॥
ततः प्रभाते चोत्थाय कृतस्नानजपः शुचिः ।
पूजयेत् पुण्डरीकाक्षं शुक्लमाल्यानुलेपनैः ॥
विभूतिदाय नमः पादावशोकाय च जानुनी ।
नमः शिवायेत्यूरू च विश्वमूर्त्तये नमः कटिम् ॥
कन्दर्पाय नमो मेढ्रमादित्याय नमः करौ ॥
दामोदरायेत्युदरं वासुदेवाय च स्तनौ ।
माधवायेति हृदयं कण्ठमुत्कण्ठिते नमः ॥
श्रीधराय मुखं केशान् केशवायेति नारद ।
पृष्ठं शार्ङ्गधरायेति श्रवणौ च स्वयम्भुवे ॥
स्वनाम्ना शङ्खचक्रासिगदापरशुपाणयः ।
सर्व्वात्मने शिरो ब्रह्मन् नम इत्यभिपूजयेत् ॥
मत्स्यमुत्पलसंयुक्तं हैमं कृत्वा तु शक्तितः ।
उदकुम्भसमायुक्तमग्रतः स्थापयेद्विभोः ॥
गुड़पात्रं तिलैर्युक्तं सितवस्त्राभिवेष्टितम् ।
रात्रौ जागरणं कुर्य्यादितिहासकथादिना ॥
प्रभातायाञ्च शर्व्वर्य्यां ब्राह्मणाय कुटुम्बिने ।
सकाञ्चनोत्पलं देवं सोदकुम्भं निवेदयेत् ॥
यथा न मुच्यसे विष्णोः सदा सर्व्वविभूतिभिः ।
तथा मामुद्धराशेषदुःखसंसारसागरात् ॥
दशावतारूपाणि प्रतिमासं क्रमान्मुने ।
दत्तात्रेयं ततो व्याससुत्पलेन समन्वितम् ।
दद्यादेवं समा यावत् पाषण्डानभिवर्ज्जयेत् ॥
समाप्यैवं यथाशक्त्या द्वादशद्वादशीं नरः ।
संवत्सरान्ते लवणपर्व्वतेन समन्विताम् ।
शय्यां दद्यान्मुनिश्रेष्ठ गुरवेऽमरसंयुताम् ॥
ग्रामञ्च शक्तिमान् दद्यात् क्षेत्रमाभरणान्वितम् ।
गुरुं संपूज्य विधिवत् वस्त्रालङ्कारभूषणैः ॥
अन्यानपि यथाशक्त्या भोजयित्वा द्विजोत्तमान्
तर्पयेद्वस्त्रगोदानैरन्यत्र धनसञ्चयात् ॥
अल्पवित्तो यथाशक्त्या स्तोकं स्तोकं समाचरेत् ।
यश्चातिनिःस्वः पुरुषो भक्तिमान् माधवं प्रति ।
पुष्पार्च्चनविधानेन स कुर्य्याद्वत्सरद्वयम् ॥
अनेन विधिना यस्तु विभूतिद्वादशीव्रतम् ।
कुर्य्यात् स पापनिर्म्मुक्तः पितॄणान्तारयेच्छतम् ॥
जन्मनां शतसाहस्रं न शोकफलभाग्भवेत् ।
न च व्याधिर्भवेत्तस्य न दारिद्र्यं न बन्धनम् ॥
वैष्णवो वाथ शैवो वा भवेज्जन्मनि जन्मनि ।
यावद्युगसहस्राणां शतमष्टोत्तरं भवेत् ।
तावत् स्वर्गे वसेद्ब्रह्मन् भूपतिश्च पुनर्भवेत् ॥"
इति मात्स्ये ८२ अध्यायः ॥

विभूषणं, क्ली, (विशेषेण भूषयत्यनेनेति । वि + भूष + णिच् + ल्युट् ।) आभरणम् । इत्यमरः ॥ (यथा, कथासरित्सागरे । १७ । ६४ ।

"अस्ति पाटलिपुत्राख्यं पुरं पृथ्वीविभूषणम् ॥")

विभूषा, स्त्री,(वि + भूष् भूषणे + "गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यः । स्त्रियां टाप् ।) शोभा । इति हेमचन्द्रः ॥ (यथा, कामन्दकीये ।१५।४६।

"ततः प्रबुद्धः शुचिरिष्टदेवः
श्रीमद्विभूषोज्ज्वलितः प्रहृष्टः ॥")

आभरणञ्च ॥ (यथा, आर्य्यासप्तशत्याम् ।४५६।

"मानग्रहगुरुकोपादनुदयिताद्येव रोचते मह्यम् ।
काञ्चनमयी विभूषा दाहाचितशङ्खभावेव ॥")

विभूषितः, त्रि, (वि + भूष + क्तः । यद्वा, विभूषा संजातास्य इति । विभूषा + इतच् ।) अलङ्कृतः । यथा,—

"विशुद्धरत्नांशुविभूषिताङ्गी
शिलातले हैममये सुरम्ये ।
सुखोपविष्टं मदनाङ्गनाशनं
जगाद वाक्यं गिरिराजपुत्री ॥"
इति स्कान्दे नीलकण्ठस्तोत्रम् ॥

विभृतः, त्रि, धृतः । पुष्टः । विपूर्व्वभृधातोः क्तप्रत्ययेन निष्पन्नः ॥

वि(बि)भ्रत्, त्रि, (भृ + शतृ ।) बिभर्त्ति यः । धारणपोषणकर्त्ता । यथा,—

"चतुर्द्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्ज्जितम् ।
ददार करजैरूरावेरकां कटकृद्यथा ॥"
इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥

अपि च ।

"तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः ।"
इत्यादि तन्त्रसारे सरस्वतीध्यानम् ॥

(पवर्गीयबकारादिः साधुरेव ॥)

विभ्रमः, पुं, (वि+भ्रम+घञ् ।) हावभेदः । स तु स्त्रीणां शृङ्गारभावजक्रियाविशेषः । इत्यमरः ॥ (यथा, मेघदूते । २८ ।
"स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥")
मदरागहर्षजनितविपर्य्यासो विभ्रमः । यथा अन्यनिमित्तमानसादुत्थायान्यत्र गमनं प्रियारब्धकथामाक्षिप्य सख्या सहालपनसुचिर्हसितक्रोधौ पुष्पादीनां याच्ञा सहसैव तत्परित्यागः । वस्त्राभरणमाल्यानामकारणतः खण्डनं माननञ्च । यदुक्तम् ।
"क्रोधः स्मितञ्च कुसुमाभरणादियाच्ञा
तद्वर्जनञ्च सहसैव विमण्डनञ्च ।
आक्षिप्य कान्तवचनं लपनं सखीभि-
र्निष्कारणोत्थितगतं वद विभ्रमं तत् ॥" इति ।
"चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो भवेत् ॥"
इत्यन्यत्र च ॥ तथान्यत्र ।
"विभ्रमस्त्वरया काले भूषास्थानविपर्य्ययः ।"
यथा,—
"श्रुत्वायातं बहिः कान्तमसमापितभूषया ।
भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः ॥"
इति ।
योषितां यौवनजो विकारो विभ्रमः । इत्येके । विश्रान्तिर्विभ्रमः घञ् । इति भरतः ॥ अपि च ।
"वल्लभप्राप्तिवेलायां मदनावेशसंभ्रमात् ।
विभ्रमो हारमाल्यादिभूषास्थानविपर्य्ययः ॥"
इत्युज्ज्वलनीलमणिः ॥*॥
भ्रान्तिः । इति मेदिनी । मे, ५२ ॥ (यथा, भागवते । ४ । ७१ । १२ ।
"तमन्वभिगवानैच्छत् त्वरमाणं विहायसा ।
आमुक्तमिव पाषण्डं योऽधर्म्मे धर्म्मविभ्रमः ॥")
शोभा । (यथा, राजतरङ्गिण्याम् ।३।३६७।
"ललाटे मुखमुद्राङ्के चराशुक्ताः शिरोरुहाः ।
तस्य शम्भुश्रमासङ्गिगङ्गाम्भोविभ्रमं दधुः ॥"
यथा च अमरुशतके । १ ।
"व्याकुञ्चिवल्लखटकामुखपाणिपृष्ठे
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ।
त्वां पातुमञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥")
संशयः । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । १८ । ६५ ।
"पूरयन् बहुनादाभिर्व्वाहिनीभिर्भुवस्तलम् ।
कुर्व्वन्नकाण्डनिर्म्मेघवर्षासमयविभ्रमम् ॥")
भ्रमणम् । इति शब्दरत्नावली ॥ (विकारविशेषः । यथा,—
"तीव्रार्त्तिरपि नाजीर्णी पिबेच्छूलघ्नमौषधम् ।
आमसन्नोऽनलो नालं पक्तुं दोषौषधाशनम् ॥
निहन्यादपि चैतेषां विभ्रमः सहसातुरम् ।
जीर्णाशने तु भैषज्यं युञ्ज्यात् स्तब्धगुरूदरे ॥"
इति वाभटे सूत्रस्थानेऽष्टमेऽध्याये ॥)
विभ्रमा, स्त्री, वार्द्धक्यम् । इति शब्दरत्नावली ॥
विभ्राट्, [ज्] } त्रि, (विशेषेण भ्राजते इति ।
विभ्राड्, [ज्] } वि+भ्राज् + "अन्येभ्योऽपि दृश्यते ।" ३।२।१७७ । इति क्विप् ।) अलङ्कारादिना दीप्तिशीलः । तत्पर्य्यायः । भ्राजिष्णुः २ रोचिष्णुः ३ । इत्यमरः ॥ (यथा, ऋग्वेदे । १० । १७० । १ ।
"विभ्राड् बृहत्पिबतु सोम्यं
मध्वायुर्द्दधद्यज्ञपतावविह्रुतम् ॥"
"विभ्राड् विभ्राजमानः विशेषेण दीप्यमानः ।"
इति तद्भाष्ये सायणः ॥)
विभ्रान्तः, त्रि, विभ्रमयुक्तः । विपूर्व्वभ्रमधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, गीतायाम् । १६ । १६ ।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ॥")
विभ्रान्तिः, स्त्री, (वि+भ्रम+क्तिन् ।) विभ्रमः । इति विभ्रमशब्दटीकायां भरतः ॥ (यथा, प्रबोधचन्द्रोदये । "स्फुरदद्वैतविभ्रान्तिसन्तानसन्तप्तवन्दारुसंसारनिद्रापहारैकदक्षेति ॥")
विमतः, त्रि, विरुद्धमतिविशिष्टः । विपूर्व्वमनधातोः क्तप्रत्ययेन निष्पन्नः ॥
विमनस्कः, त्रि, विमनाः । विनिगृहीतं मनोऽस्येति बहुव्रीह्यर्थे कप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । ७ । १० । ६१ ।
"विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम् ॥")
विमनाः, [स्] त्रि, (विरुद्धं मनो यस्य ।) चिन्तादिव्याकुलचित्तः । तत्पर्य्यायः । दुर्म्मनाः २ अन्तर्म्मनाः ३ । इत्यमरः ॥ दुःखितमानसः ४ ॥ इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । १८ । १० ।
"मिष्टमस्ति सदा राजन् मुदितो विमनास्तथा ।
मालायाञ्च तथा सर्पे समदृक् त्वं नृपोत्तम ! ॥")
विमयः, पुं, (वि+मी+"एरच् ।" इत्यच् ।) विनिमयः । इति हेमचन्द्रः ॥
विमर्द्दः, पुं, (विमृद्यतेऽसौ इति । वि+मृद्+घञ् ।) कालकृतवृक्षः । इति रत्नमाला ॥ कालकासुन्दिया इति भाषा ॥ विमर्द्दनम् । इति शब्दरत्नावली ॥ (यथा, रघुः । ५ । ६५ ।
"तं कर्णभूषणनिपीड़ितपीवरांसं
शय्योत्तरच्छदविमर्द्दकृशाङ्गरागम् ॥"
सम्पर्कः । यथा, रघुः । १३ । २० ।
"असौ महेन्द्रद्विपदानगन्धि-
स्त्रिमार्गगावीचिविमर्द्दशीतः ॥"
"त्रिमार्गगा गङ्गा तस्या वीचीनां त्रिमर्द्देन सम्पर्केण शीतः ।" इति तट्टीकायां मल्लिनाथः ॥*॥ युद्धम् । यथा, रामायणे ।३।३२।७।
"देवासुरविमर्द्देषु वज्राशनिहतव्रणम् ॥"
कलहः । यथा, तत्रैव । ७ । ६३ । २४ ।
"कार्य्यार्थिनां विमर्द्दो हि राज्ञां दोषाय
कल्पते ॥")
विमर्द्दकः, पुं, (विमर्द्द एव । स्वार्थे कन् ।) चक्रमर्द्दः । इति राजनिर्घण्टः ॥ (चक्रमर्द्दशब्देऽस्य गुणादयो विज्ञेयाः ॥)
विमर्द्दनं, क्ली, (वि+मृद्+ल्युट् ।) कुङ्कुमादिमर्द्दनम् । तत्पर्य्यायः । परिमलः २ । इत्यमरः ॥ विमर्द्दः ३ । इति शब्दरत्नावली ॥ विशेषेण मर्द्दनञ्च ॥ (यथा, महाभारते । ३ । ३६ । ३ ।
"धर्म्मस्य जानमानोऽहं गतिमग्र्यां सुदुर्व्विदाम् ।
कथं बलात्करिष्यामि मेरोरिव विमर्द्दनम् ॥"
त्रि, विशेषेण मृद्नातीति । वि+मृद्+ल्युः । मर्द्दनकारी । पीड़ादायकः । यथा, कथासरित्सागरे । ११३ ।१८ ।
"अभूच्च वारणस्तस्य परसेनाविमर्द्दनः ।
महान् कुवलयापीड़ इति ख्यातो महीतले ॥"
यथा च साहित्यदर्पणे । ४ । २६६ ।
"अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥")
विमर्द्दोत्थः, पुं, (विमर्द्दादुत्तिष्ठतीति । उत्+स्था +कः ।) मर्द्दनाज्जातसुगन्धादिः । यथा,—
"अथ गन्धे परिमलो विमर्द्दोत्थे मनोहरे ।
दूरगामी मनोहारी गन्ध आमोद ईरितः ॥"
इति शब्दरत्नावली ॥
विमर्शनं, क्ली, (वि+मृश+ल्युट् ।) परामर्शः । वितर्कः । यथा,—
"वितर्कः स्यादूहनं परामर्शो विमर्शनम् ।
अध्याहारस्तर्क ऊहोऽस्त्र्याम्यगुणदूषणम् ॥"
इति हेमचन्द्रः ॥
(विमृश्यतेऽनेनेति । करणे ल्युट् । ज्ञानम् । यथा, भागवते ६ । १ । ११ ।
"कर्म्मणा कर्म्मनिर्हारो न ह्यात्यन्तिक इष्यते ।
अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् ॥")
विम(र्श)र्षः, पुं, (वि+मृ(श)ष+घञ् ।) विचारणा । इति जटाधरः ॥ (यथा, कथासरित्सागरे । २० । १२४ ।
"प्रत्ययः स्त्रीषु मुष्णाति विम(र्श)र्षं विदुषामपि ॥")
विमलं, क्ली, (विगतो मलो यस्मात् ।) तारहेमद्विधातुतम् । तत्पूरसविशेषः । तत्पर्य्यायः । निर्म्मलम् २ स्वच्छम् ३ अमलम् ४ स्वच्छधातुकम् ५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । त्वग्दोषव्रणनाशित्वम् । रसवीर्य्यादौ तुल्यत्वम् । वेधे भिन्नवीर्य्यकत्वञ्च । इति राजनिर्घण्टः ॥ (तथास्य शोधनमारणविधिः ।
"मूत्रारनालतैलेषु गोदुग्धे कदली रसे ।
कौलत्थे कोद्रवक्वाथे माक्षिकं विमलन्तथा ॥
मुहुः सूरणकन्दस्थं स्वेदयेद्वरवर्णिनि ! ।
क्षाराम्ललवणैश्चैव तैलसर्पिःसमन्वितम् ॥
पुटत्रयं प्रदातव्यं ततस्तु शोधितं भवेत् ।
जम्बीरस्य रसे स्विन्नो मेषशृङ्गीरसैस्तथा ।
रम्भातोयेन वा पाच्यं घस्रं विमलशुद्धये ॥"
इति विमलशुद्धिः ॥ इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)
विमलं, त्रि, (विगतो मलो यस्मात् ।) निर्म्मलम् । तत्पर्य्यायः । वीध्रम् २ । इत्यमरः ॥ प्रयतम् ३ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ४८ । १४ ।

"प्रस्रविष्यन्ति तोयानि विमलानि महीधराः।
विदर्शयन्तो विविधान् भूयश्चित्रांश्च निर्झ-
रान् ॥")
चारुः। इति च शब्दरत्नावली ॥ (यथा, माघे।
८।१३।
"दधिघान्ति भर्त्तरि भृशं विमलाः
परलोकमभ्युपगते विविशुः ॥")
विमलः, पुं, (विगतो मलः पापं यस्मात्।) अर्हन्।
इति हेमचन्द्रः ॥ (सुद्युम्नपुत्रः। यथा, भाग-
वते। ९।१।४१।
"तस्योत्कलो गयो राजन् विमलश्च त्रयः सुताः॥")
विमलदानं, क्ली, (विमलं विशुद्धं दानम्।) नित्य-
नैमित्तिककाम्यदानम्। ईश्वरप्रीणनार्थदानञ्च।
यथा,—
"नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम्।
अहन्यहनि यत्किञ्चिद्दीयतेऽनुपकारिणे।
अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्य-
कम् ॥
यत्तु पापप्रशान्त्यै च दीयते विदुषां करे।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥
अपत्यविजयैश्वर्य्यस्वर्गार्थं यत् प्रदीयते।
दानं तत् काम्यमाख्यातमृषिभिर्द्धर्म्मचिन्तकैः ॥
चेतसा सत्त्वयुक्तेन दानं तद्विमलं स्मृतम्।"
इति गारुडे ५१ अध्यायः ॥
विमलमणिः, पुं, (विमलः स्वच्छो मणिः।)
स्फटिकः। इति राजनिर्घण्टः ॥
विमला, स्त्री, (विमल+टाप्।) सप्तला।
इत्यमरः ॥ चामरकषा इति भाषा ॥ (अस्याः
पर्य्यायो यथा,—
"सातला सप्तला सारा विमला विदुला च सा।
तथा निगदिता भूरिफेना चर्म्मकषेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भूमिभेदः। इति मेदिनी। ले, १३१ ॥ देवी-
भेदः। यथा,—
"यूथाख्यविमला कार्य्या शुद्धहारेन्दुवर्च्चसा।
सत्ताक्षसूत्रधारी च कमण्डलुकरा वरा ॥
नावासनसमारूढा श्वेतमाल्याम्बरप्रिया।
दधिक्षीरोदनाहारा कर्पूरमदचर्च्चिता।
सितपङ्कजहोमेन राज्यायुर्गृपवर्द्धिनी।"
इति देवीपुराणे संवत्सरदेवताद्वितीयविंश-
तिकाविधिः ॥ * ॥ अन्यच्च।
"पूजयेत् कर्णिकामध्ये वासुदेवन्तु नायकम्।
विमला नायिका तस्य वासुदेवस्य कीर्त्तिता।"
इति कालिकापुराणे ८२ अध्यायः ॥ * ॥
अपरञ्च।
"उत्कले नाभिदेशश्च विरजाक्षेत्र उच्यते।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥"
इति तन्त्रचूडामणौ ५१ पीठनिर्णयः ॥
(यथा च देवीभागवते। ७।३०।६४।
"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥")
विमलात्मकः, त्रि, (विमलो निर्म्मल आत्मा यस्य।)
निर्म्मलः। इत्यमरटीकायां रायमुकुटः ॥

विमलाद्रिः, पुं, (विमलः अद्रिः।) शत्रुञ्जय-
पर्व्वतः। इति हेमचन्द्रः ॥
विमलार्थकः, त्रि, निर्म्मलः। इत्यमरटीकायां
रायमुकुटः ॥
विमांसं, क्ली, (विरुद्धं मांसम्।) अशुद्धमांसम्।
तत्तु कुक्कुरादिमांसम्। इति केचित् ॥
विमाता, [ऋ] स्त्री, (विरुद्धा माता।) मातृ-
सपत्नी। सतमा इति भाषा। सा कनीयस्यपि
नमस्या। यथा, स्मृतिः।
"मातुः पितुः कनीयांसं न नमेद्वयसाधिकः।
नमस्कुर्य्यात् गुरोः पत्नीं भ्रातृजायां विमा-
तरम् ॥"
स्मृत्यर्थसारे।
"स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः ॥"
यतः पत्युर्व्वयसा तास्त्रियो वृद्धा अतः कनिष्ठा
अपि नमस्याः। इति मलमासतत्त्वम् ॥ * ॥
विमातृजोनिवृत्तावपि पितामहधनविभाग-
कर्त्तृत्वम्। यथा बृहस्पतिः।
"पित्रोरभावे भ्रातृणां विभागः संप्रदर्शितः।
मातुर्निवृत्ते रजसि जीवतोरपि शस्यते ॥"
अत्र मातृपदं विमातृपरमपि पुत्त्रान्तरोत्पत्ति-
सम्भावनातौल्यात्। इति दायतत्त्वम् ॥ * ॥
अस्या अनंशित्वं यथा। सोदरभ्रातृभिर्विभागे
क्रियमाणे मात्रे पुत्त्रसमांशो दातव्यः। समांश-
हारिणी माता इति वचनान्मातृपदस्य जननी-
परत्वात् न सपत्नीमातृपरत्वमपि। तत्स्तुतस्य
सुख्यगौणत्वानुपपत्तेः। इति दायभागः ॥
विमातृजः, पुं, (विमातुर्जायते इति। विमातृ+
जन+डः।) मातृसपत्नीपुत्त्रः। तत्पर्य्यायः।
वैमात्रेयः २। इत्यमरः ॥ वैमात्रः ३। इति
जटाधरः ॥
विमानः, पुं क्ली, (विगतं मानमुपमा यस्य।)
देवरथः। तत्पर्य्यायः। व्योमयानम् २। इत्य-
मरः ॥ (यथा, कुमारसम्भवे। २।४५।
"भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते।
खिलीभूते विमानानां तदापातभयात् पथि ॥")
सार्व्वभौमगृहम्। (तत्तु सप्तभूमिगृहम्। यथा,
रामायणे। १।५।१६।
"सर्व्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥"
"विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि ॥"
इति तट्टीकाधृतनिघण्टुः ॥)
घोटकः। यानमात्रम्। इति मेदिनी। ने,
१३२ ॥ (त्रि, परिच्छेदकम्। यथा, ऋग्वेदे।
२।४०।३।
"सोमापूषणा रजसो विमानं
सप्तचक्रं रथमविश्वमिन्वम् ॥"
"विमानं परिच्छेदकं सर्व्वमानमित्यर्थः।" इति
तद्भाष्ये सायणः ॥ साधनम्। यथा, तत्रैव।
३।३।४।
"पिता यज्ञानामसुरो विपश्चितां
विमानमग्निर्वयुनञ्च वाघताम् ॥")
"विमानं विमीयतेऽनेन फलमिति विमानं

यज्ञादिकर्म्मसाधनम्।" इति तद्भाष्ये सायणः ॥
विगतो मानो यस्येति विग्रहे। अपमानः।
यथा, भागवते। ५।१२।१०।
"कर्हिस्वचित् क्षुद्ररसान् विचिन्वं-
स्तन्मक्षिकाभिर्व्यथितो विमानः।
तत्रातिकृच्छ्रं प्रति लब्धमानो
बलाद्विलुम्पन्त्यथ तान्ततोऽन्ये ॥")
विमार्गः, पुं, विपूर्व्वकमृजधातोर्घञ्प्रत्ययेन निष्पन्नः॥
सम्मार्ज्जनी। (विरुद्धो मार्गः।) कुपथः।
(यथा, शाकुन्तले ५ अङ्के।
"नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय ॥")
विमुक्तः, त्रि, (वि+मुच्+क्तः।) विशेषेण मुक्तः।
यथा,—
"येऽन्येऽरविन्दाक्ष विमुक्तमानिन-
स्त्वय्यस्तभावादविशुद्धबुद्धयः।
आरुह्य कृच्छ्रेण परं पदं ततः
पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः ॥"
इति श्रीभागवते १० स्कन्धे १४ अध्यायः ॥
त्यक्तः। (यथा, महाभारते। ७।२८।३५।
"विमुक्तं परमास्त्रेण जहि पार्थं महासुरम्।
वैरिणं युधि दुर्द्धर्षं भगदत्तं सुरद्विषम् ॥"
पुं, माधवी। तत्पर्य्यायो यथा,—
"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
विमुक्तिः, स्त्री, (वि+मुच्+क्तिन्।) विमोचनम्।
मोक्षः। यथा, प्रायश्चित्ततत्त्वे।
"पितृवंशमस्ते दिवि ये च मर्त्त्याः
स्वधाभुजः काम्यफलाभिसन्धौ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु ॥"
विमुखः, त्रि, (विरुद्धं अननुकूलं मुखं यस्य।)
बहिर्मुखः। विरतः। यथा,—
"स्वागमैः कल्पितैस्त्वञ्च जनान् मद्विमुखान्
कुरु।
माञ्च गोपय येन स्यात् सृष्टिरेषोत्तरोत्तरा ॥"
इति पाद्मोत्तरखण्डे शिवं प्रति विष्णुवाक्यम् ॥
विमुदः, त्रि, (विगता मुदा मुद्भावो यस्य।)
प्रफुल्लः। इति हेमचन्द्रः ॥ मुदारहितश्च ॥
विमोचनं, क्ली, (वि+मोच+ल्युट्।) विमो-
चनम्। परित्यजनम्। यथा,—
"यं धर्म्मकामार्थविमुक्तिकामा
भजन्त इष्टां गतिमाप्नुवन्ति।
किञ्चाशिषो रात्यपि देहमव्ययं
करोतु मेऽदभ्रदयो विमोचनम् ॥"
इति श्रीभागवते १०।८३ अध्यायः ॥
विमोचनं, क्ली, (वि+मुच्+ल्युट्।) दूरीकरणम्।
विमुक्तिः। विपूर्व्वमुचधातोरनट्प्रत्ययेन निष्प-
न्नम् ॥ (यथा, महाभारते। १।१६०।१३।
"अथवाहं करिष्यामि कुलस्यास्य विमोचनम्।
फलसंज्ञा भविष्यामि कृत्वा कर्म्म सुदुष्करम् ॥"

तीर्थविशेष:। यथा, महाभारते ।३।८३।१५०।
"विमोचनमुपस्पृश्य जितमन्युर्जितेन्द्रिय:।
प्रतिग्रहकृतैर्दोषै: सर्व्वै: स परिमुच्यते ॥"
पुं, महादेव:। यथा, महाभारते ।१३।१७।५८।
"विमोचन: सुसरणो हिरण्यकवचोद्भव: ॥")

विमोहनं, क्ली, वैचित्तीकरणम्। विपूर्व्वमुहधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम्॥ (विमोहयतीति। वि+मुह+णिच्+ल्यु:। विमोहके, त्रि। यथा, भागवते। ११। २४। ६।
"ततो विकुर्व्वतो जातो योऽहङ्कारो विमोहन: ॥")

विमोहित:, त्रि, (वि+मुह+णिच्+क्त:।) मोहयुक्त:। मोहित:। यथा,—
"तावप्यतिबलोन्मत्तौ महामायाविमोहितौ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्॥"
इति देवीमाहात्म्यम्॥

वि(बि)म्बं, क्ली, (वी गत्यादिषु+"उल्वादयश्च।" उणा० ४। ९५। इति वन् प्रत्ययेन निपातनात् साधु:।) प्रतिबिम्बम्। कमण्डलु:। इति संक्षिप्तसारोणादिवृत्ति:॥ (मूर्त्ति:। यथा, भागवते। ३। २। ११।
"प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम्।
आदायान्तरधाद् यस्तु स्वबिम्बं लोकलोचनम्॥"
तथाच राजतरङ्गिण्याम्। ३। ४६६।
"मेघवाहनभूभर्त्तृपत्न्या भिन्नाख्यया कृते।
विहारेऽपि तया बुद्धबिम्बं साधु निवेशितम्॥")
बिम्बिकाफलम्। तेलाकुचा इति भाषा। इति मेदिनी। वे, ७॥ (यथा, कुमारे। ३। ६७।
"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि॥")
अस्य पर्य्याय:। तुण्डिकेरी २ रक्तफला ३ बिम्बिका ४ पीलुपर्णी ५। इत्यमर:॥ ओष्ठी ६ बिम्बी ७। इति रत्नमाला॥ बिम्बा ८ बिम्बकम् ९ बिम्बजा १०। इति शब्दरत्नावली॥ अस्य गुणा:। पित्तकफच्छर्दिरक्तदाहकासकुष्ठनाशित्वम्। इति राजवल्लभ:॥ अपि च।
"बिम्बी रक्तफला तुण्डी तुण्डिकेरी च बिम्बिका।
ओष्ठोपमफला प्रोक्ता पीलुपर्णी च कथ्यते॥
बिम्बीफलं स्वादु शीतं गुरु पित्तास्रवातजित्।
स्तम्भनं लेखनं रुच्यं विबन्धाध्मानकारकम्॥"
इति भावप्रकाश:॥

वि(बि)म्ब:, पुं क्ली, (वी+"उल्वादयश्च।" उणा० ४। ९५। इति वन्प्रत्ययेन साधु:।) सूर्य्यचन्द्रमण्डलम्। इत्यमर:॥ (यथा, प्रबोधचन्द्रोदये ६ अङ्के।
"असौ त्वदन्यो न सनातन: पुमान्
भवान् न देवात् पुरुषोत्तमात् पर:।
स एव भिन्नस्त्वमनादिमायया
द्विधेव बिम्बं सलिले विवस्वत:॥"
यथाच मार्कण्डेये। ८४। १९।
"ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम्॥"
मण्डलमात्रेऽपि। यथा, ऋतुसंहारे। १। ४।
"नितम्बबिम्बै: सुदुकूलमेखलै:
स्तनै: सहाराभरणै: सचन्दनै:।
शिरोरुहै: स्नानकषायवासितै:
स्त्रियो निदाघं शमयन्ति कामिनाम्॥"
यथाच कुमारे। ७। २२।
"आत्मानमालोक्य च शोभमान-
मादर्शबिम्बे स्तिमितायताक्षी।
हरोपयाने त्वरिता बभूव
स्त्रीणां प्रियालोकफलो हि वेश:॥")

वि(बि)म्ब:, पुं, (वी+वन्प्रत्ययेन साधु:।) कृकलास:। इति मेदिनी। वे, ७॥

वि(बि)म्बकं, क्ली, (बिम्ब+स्वार्थे कन्।) चन्द्रसूर्य्यमण्डलम्। बिम्बिकाफलम्। इति शब्दरत्नावली॥ (सञ्चक:। साँच इति भाषा॥ यथा, नैषधे। २२। ४७।
"विधिर्व्विधत्ते विधिना वधूनां
किमाननं काञ्चनसञ्चकेन॥"
अत्र। "काञ्चनस्य सञ्चकेन बिम्बकेन।" इति नारायणीटीका॥)

वि(बि)म्बजा, स्त्री, (बिम्बं फलं जायतेऽस्यामिति। जन+ड:।) बिम्बिका। इति शब्दरत्नावली॥

वि(बि)म्बट: पुं, सर्षप:। इति शब्दचन्द्रिका॥

वि(बि)म्बा, स्त्री, (बिम्बं फलमस्त्यस्यामिति। बिम्ब+अच्। टाप्।) बिम्बिका। इति शब्दरत्नावली॥

वि(बि)म्बिका, स्त्री, बिम्बम्। इत्यमर:॥ (यथा,—
"तुम्बी रक्तफला बिम्बी तुण्डीकेरी च बिम्बिका।"
इति वैद्यकरत्नमालायाम्॥)
चन्द्रसूर्य्यमण्डलम्। इति शब्दरत्नावली॥

वि(बि)म्बी, स्त्री, (बिम्ब+गौरादित्वात् ङीष्।) बिम्बिका। इति शब्दरत्नावली॥ (यथा,—
"काकादनीं चित्रफलां बिम्बीं गुञ्जाञ्च
धारयेत्॥"
इति सुश्रुते उत्तरतन्त्रे ३२ अध्याय:॥)

वि(बि)म्बु:, स्त्री, गुवाक:। इति केचित्॥

वि(बि)म्बोष्ठ:, वि(बि)म्बौष्ठ: } त्रि, (बिम्ब+ओष्ठ:। "ओत्वोष्ठयो: समासे वा।" इति पाक्षिकोऽकारलोप:।) बिम्ब इव ओष्ठौ यस्य। इति मुग्धबोधव्याकरणम्॥

वियच्चारी, [न्] पुं, (वियति आकाशे चरतीति। चर+णिनि:।) चिल्ल:। इति शब्दमाला॥ आकाशगामिनि, त्रि॥

वियत्, क्ली, (वियच्छति न विरमतीति। वि+यम+"अन्येभ्योऽपि दृश्यते।" ३। २। १७८। इति क्विप्। क्वौ चगमादीनामिति मलोपे तुक्।) आकाशम्। इत्यमर:॥ (यथा, भागवते। ३। ८। ३३।
"तर्ह्येव तन्नाभिसर:सरोज-
मात्मानमम्भ: श्वसनं वियच्च।
ददर्श देवो जगतो विधाता
नात: परं लोकविसर्गदृष्टि:॥"
द्यावापृथिवी। अत्र द्विवचनस्य प्रयोग: स्यात्। यथा, तैत्तिरीयब्राह्मणे। १। १। ३। २।
"द्यावापृथिवी सहास्ताम्। ते वियती अब्रूताम्।"
तथाच शतपथब्राह्मणे। ७। १। २। २३।
"तयोर्वियत्योर्योऽन्तरेणाकाश आसीत् तदन्तरिक्षमभवत्॥" *॥ वि+या+शतृ। गमनशीले, त्रि। यथा, भागवते। ७। ६। १४।
"कुटुम्बपोषाय वियन्निजायु-
र्न बुध्यतेऽर्थं विहतं प्रमत्त:॥"
तथा, तत्रैव। ८। २१। ३।
"वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षत:।
निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदत:।
व्यतीयुरष्टचत्वारिंशदहान्यपिबत: किल॥"
"वियद्वित्तस्य वियतो गगनादिव उद्यमं विनैव दैवादुपस्थितं वित्तं भोग्यं यस्य। यद्वा वियत् व्ययं प्राप्नुवद्वित्तं भोग्यं यस्य।" इति तट्टीकायां श्रीधरस्वामी॥)

वियद्गङ्गा, स्त्री, (वियतो गङ्गा।) स्वर्गगङ्गा। इत्यमर:॥

वियद्भूति:, स्त्री, (वियतो भूतिर्भस्मेव।) अन्धकार:। इति त्रिकाण्डशेष:॥

वियन्मणि:, पुं, (वियतो मणि:।) सूर्य्य:। इति हारावली॥

वियम:, पुं, (वि+यम+"यम: समुपनिविषु च।" ३। ३। ६३। इत्यप्।) संयम:। इत्यमर:॥ दु:खम्। इति स्वामी॥

वियात:, त्रि, (विरुद्धं निन्द्यं यात: प्राप्त:।) निर्लज्ज:। इत्यमर:॥

वियाम:, पुं, (वि+यम+घञ्।) संयम:। इत्यमर:॥

वियुक्त:, त्रि, वियोगविशिष्ट:। विपूर्व्वयुजधातो: क्तप्रत्ययेन निष्पन्न:॥ (यथा, देवीभागवते।२। ८। १३।
"किं करोमि क्व गच्छामि मृता मे प्राणवल्लभा।
न वै जीवितुमिच्छामि वियुक्त: प्रिययानया॥")

वियोग:, पुं, (वि+युज+घञ्।) विच्छेद:। तत्पर्य्याय:। विप्रलम्भ:२ विप्रयोग:३ विरह:४। इति हेमचन्द्र:॥ (यथा, भागवते ।८।१३। ८।
"यस्य योगं न वाञ्छन्ति वियोगभयकातरा:।
भजन्ति चरणाम्भोजं मुनयो हरिमेधस:॥")

वियोगभाक्, [ज्] त्रि, (वियोगं भजते इति। भज+ण्वि।) विच्छेदयुक्त:। यथा, नैषधे।
"वियोगभाजोऽपि नृपस्य पश्यता
तदेव साक्षादमृतांशुमाननम्।
पिकेन रोषारुणचक्षुषा मुहु:
कुहूरुताहूयत चन्द्रवैरिणी॥"

वियोगी, [न्] पुं, (वियोगोऽस्यास्तीति। वियोग+इनि:।) चक्रवाक:। इति शब्दचन्द्रिका॥ वियोगयुक्ते, त्रि॥ (यथा, मार्कण्डेये।२२।२५।
"ता: शोच्या या वियोगिन्यो न शोच्या या
मृता: सह।
भर्त्तुर्व्वियोगस्त्वनया नानुभूत: कृतज्ञया॥")

वियोजितः, त्रि, वियोगं प्रापितः। विपूर्व्वण्यन्त-
युजधातोः क्तप्रत्ययेन निष्पन्नः ॥
विरक्तः, त्रि, (वि+रन्ज+क्तः।) विरागयुक्तः।
अननुरक्तः। यथा,—
"ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥"
इति श्रीभागवते ११ स्कन्धे १८ अध्यायः ॥
(यथा च।
"त्वयि प्रसन्ने मम किं गुणेन
त्वय्यप्रसन्ने मम किं गुणेन।
रक्ते विरक्ते च वरे वधूनां
निरर्थकः कुङ्कुमराग एषः ॥"
इत्युद्भटः ॥)
विरक्ता, स्त्री, दुर्भगा। इति त्रिकाण्डशेषः ॥
अननुकूला। यथा, नीतिशतके। १।
"यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृतेऽपि परितुष्यति काचिदन्या
धिक् ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च ॥"
विरक्तिः, स्त्री, (वि+रन्ज+क्तिन्।) विरागः।
यथा,—
"देहो गुरुर्मम विरक्तिविवेकहेतु-
र्विभ्रत् स्म सत्त्वनिधनं सततार्त्त्युदर्कम्।
तत्त्वान्यनेन विमृशामि यथा तथापि
पारक्यमित्यवसितो विचराम्यसङ्गः ॥"
इति श्रीभागवते। ११। ९। २५ ॥
विरङ्गं, क्ली, कङ्कुष्ठम्। इति राजनिर्घण्टः ॥
विरचितः, त्रि, (वि+रच+क्तः।) विशेषेण
रचितः। निर्म्मितः। यथा,—
"एष श्रीलहनूमता विरचिते श्रीमन्महानाटके
वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्धृते विक्रमैः ॥"
इत्यादि महानाटकम् ॥
विरजस्तमाः, [स्] पुं, सत्त्वगुणविशिष्टः। तत्-
पर्य्यायः। द्वयातिगः २। इत्यमरः।२।७।४५।
"विगते रजस्तमसी येषां ते रजस्तमोगुणशून्याः
सत्त्वैकनिष्ठाः साक्षात्कृतब्रह्माणो जीवन्मुक्ता
यासादयो द्वयातिगा उच्यन्ते। द्वयं द्वैतं अति-
क्रम्य गच्छति इति डः।" इति भरतः ॥
विरजाः, [स्] स्त्री, (विनिवृत्तं रजः शोणितं
यस्याः।) विगतार्त्तवा। इति जटाधरः ॥
(नास्ति रजो धूलिर्यत्र। धूलिरहिते, त्रि।
यथा, महाभारते। १। ९३। १५।
"सर्व्वैरिदानीं गन्तव्यं सह स्वर्गजितो वयम्।
एष नो विरजाः पन्था दृश्यते देवसद्मनः ॥"
निर्म्मलः। यथा, महाभारते। २। ७। ५।
"विरजोऽम्बरश्चित्रमाल्यो स्त्रीकीर्त्तिद्युतिभिः
सह ॥"
पुं, नागविशेषः। यथा, महाभारते।१।३५।१४।
"विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्य-
वान् ॥")
विरजा, स्त्री, कपित्थानीवृक्षः। इति रत्नमाला ॥
दूर्व्वा। इति हारावली ॥ ययातिमाता। यथा,
"उत्पन्नाः पितृकन्यायां विरजायां महाबलाः।
यतिर्ययातिः संयातिरायातिः पञ्चमो शुकः।
तेषां ययातिः पञ्चानां महाबलपराक्रमाः ॥"
इति कौर्म्मे २० अध्यायः ॥
श्रीकृष्णसखी। सा राधाभयात्त्यक्तप्राणा सती
सरिद्रूपाभवत्। तस्याः सप्त पुत्त्राः सप्त समुद्रा
अभवन्। यथा,—
"एकदा राधिकासार्द्धं गोलोके श्रीहरिः स्वयम्।
विजहार महारण्ये निर्ज्जने रासमण्डले ॥
कृत्वा विहारं श्रीकृष्णस्तामदृष्ट्वा विहाय च।
गोपिकां विरजामन्यां शृङ्गारार्थं जगाम ह ॥
दृष्ट्वा च श्रीहरिस्तूर्णं विजहार तया सह।
तयासक्तं श्रीहरिञ्च रत्नमण्डपसंस्थितम् ॥
दृष्ट्वा च राधिकान्याश्च चक्रुस्ताश्च निवेदनम्।
जगाम सहसा देवी तं रत्नमण्डपं मुने ॥
द्वारे नियुक्तं ददर्श द्वारपालं मनोहरम्।
तमुवाच रुषा देवी रक्तपङ्कजलोचना ॥
दूरं गच्छ गच्छ दूरं रतिलम्पटकिङ्कर!।
कीदृशीं मत्परां कान्तां द्रक्ष्यामि तत्प्रभो-
रहम् ॥
श्रुत्वा कोलाहलं शब्दं गोपिकानां हरिः
स्वयम्।
ज्ञात्वा च कोपितां राधामन्तर्धानं चकार ह ॥
विरजा राधिकाशब्दात् अन्तर्धानं हरेरपि।
दृष्ट्वा राधाभयार्त्ता सा जहौ प्राणांश्च योगतः ॥
सद्यस्तत्र सरिद्रूपं तच्छरीरं बभूव ह ॥
आप्रस्थ वर्त्तुलाकारं तया गोलोकमेव च।
कोटियोजनविस्तीर्णं प्रस्थेऽतिनिम्नमेव च ॥
दैर्घ्ये दशगुणं चारु नानारत्नाकरं परम्।
राधा रतिगृहं गत्वा न ददर्श हरिं मुने ॥
विरजाञ्च सरिद्रूपां दृष्ट्वा गेहं जगाम सा।
श्रीकृष्णो विरजां दृष्ट्वा सरिद्रूपां प्रियां सतीम् ॥
उच्चै रुरोद विरजातीरे नीरमनोहरे।
त्वया विनाहं सुभगे कथं जीवामि सुन्दरि! ॥
नद्यधिष्ठातृदेवी त्वं भव मूर्त्तिमती सति।
पुरातनं शरीरं ते सरिद्रूपमभूत् सति ॥
जलादुत्थाय चागच्छ विधाय नूतनां तनुम्।
आजगाम हरेरग्रं साक्षाद्राधेव सुन्दरी ॥
पश्यन्तं प्राणनाथञ्च पश्यन्ती वक्रचक्षुषा।
ताञ्च रूपवतीं दृष्ट्वा प्रेमुणोद्रेकां जगत्पतिः ॥
चकारालिङ्गनं तूर्णं चुचुम्ब च मुहुर्मुहुः।
नानाप्रकारशृङ्गारविपरीतादिकं प्रभुः ॥
रहसि प्रेयसीं प्राप्य चकार च पुनः पुनः।
विरजा सा रजोयुक्ता धृत्वा वीर्य्यममोघकम् ॥
सद्यो बभूव तत्रैव धन्या गर्भवती सती।
तस्थौ तत्र सुखासीना सार्द्धं पुत्त्रैश्च सप्तभिः ॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्ज्जने।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा ॥
एतस्मिन्नन्तरे तत्र मातुः क्रोडं जगाम ह।
कनिष्ठपुत्त्रस्तस्याश्च भ्रातृभिः पीड़ितो भिया ॥
भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः।
क्रोड़े चकार बालं सा कृष्णो राधागृहं ययौ ॥
प्रबोध्य बालं सा साध्वी न ददर्शान्तिकं प्रियम्।
विललाप भृशं तत्र शृङ्गाराहतमानसा ॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यसि।
शशाप सर्व्वान् बालांश्च यान्तु मूढ़ा रसातलम् ॥
श्रुत्वा विवरणं सर्व्वे प्रजग्मुर्धरणीतलम्।
सप्तद्वीपे समुद्राश्च सप्त तस्थुर्विभागशः ॥
कनिष्ठादूर्द्ध्वपर्य्यन्तं द्विगुणं द्विगुणं मुने।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः।
एतेषाञ्च जलं पृथ्व्यां शस्यार्थञ्च भविष्यति ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २।३ अध्यायौ ॥
जगन्नाथक्षेत्रम्। यथा,—
"उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥"
इति तन्त्रचूड़ामणौ ५१ पीठनिर्णयः ॥*॥ तत्र
मुण्डनोपवासौ न कर्त्तव्यौ। यथा। स्कान्दे।
"मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः।
वर्जयित्वा गयां गङ्गां विशालां विरजां तथा ॥"
इति प्रायश्चित्ततत्त्वम् ॥
विरञ्चः, पुं, ब्रह्मा। इति हेमचन्द्रः ॥
विरञ्चिः, पुं, ब्रह्मा। इति हेमचन्द्रः ॥
विरणं, क्ली, वीरणतृणम्। इति शब्दरत्नावली ॥
विरतः, त्रि, (वि+रम+क्तः।) निवृत्तः।
यथा—
"आत्तविद्यो मुनेर्जातो भ्रातृस्नातो निजैर्भवात्।
विरतोऽन्तर्हितो दुष्टाच्छोकाद्रामेण वारितः ॥"
इति मुग्धबोधव्याकरणम् ॥
विरतिः, स्त्री, (वि+रम+क्तिन्।) निवृत्तिः।
तत्पर्य्यायः। आरतिः २ अवरतिः ३ उप-
रामः ४। इत्यमरः ॥ उपरमः ५ विरामः ६।
इति भरतः ॥ (यथा, कथासरित्सागरे।
१०१। ६।
"तच्छ्राच दुःखदीर्घायां गतायां विरतिं
निशि ॥")
विरलं, क्ली, दधि। इति राजनिर्घण्टः ॥
विरलः, त्रि, अवकाशः। फाक् इति भाषा।
तत्पर्य्यायः। पेलवः २ तनुः ३। इत्यमरः ॥
(यथा, हहत्कथायाम्। ६७। ३।
"शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरास-
न्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःख-
प्रदौ ॥")
विरलद्रवा, स्त्री, (विरलो निर्म्मलो द्रवो यस्याः।)
सुसिद्धयवागूः। यथा,—
"यवागूरुष्णिका श्राणा सैव तु द्रुतसिक्थिका।
विलेपी तरला च स्यात् सा श्लक्ष्णा विरलद्रवा ॥"
इति जटाधरः ॥
विरहः, पुं, (वि+रह त्यागे+घः।) विच्छेदः।
तत्पर्य्यायः। विप्रलम्भः २ विप्रयोगः ३
वियोगः ४। इति हेमचन्द्रः ॥ * ॥ (यथा,
साहित्यदर्पणे। १०।
"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गम-
स्तस्याः।

सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ।”
भर्तृविरहस्तु स्त्रीणां दोषाय भवति । यथा,
मनौ । ६ । १३ ।
“पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहे वासश्च नारीणां दूषणानि षट् ॥”)
विरहे वर्णनीयानि यथा । तापः । निश्वासः ।
चिन्ता । मौनम् । कृशाङ्गता । वत्सरतुल्य-
रात्रिदैर्घ्यम् । जागरणम् । शीतत्वे उष्णता-
ज्ञानम् । इति कविकल्पलता ॥

विरहिणी, स्त्री, (विरहोऽस्या अस्तीति । विरह
+इनि+स्त्रियां ङीप् ।) विच्छेदविशिष्टा
नारी । यथा,—
“रतिः पुंसो विरहिणी शिवः स्त्रीविरही
चिरम् ।
द्वयोर्द्वयोश्च संप्राप्तौ किं बभूव द्वयोः सुखम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४६ अध्यायः ॥
भर्त्तृः । इति शब्दमाला ॥

विरहितः, त्रि, (वि+रह+क्तः ।) त्यक्तः ।
विहीनः । यथा,—
“अभिभूतश्चावमतं त्यक्तस्तु स्यात् समुज्झितम् ।
हीनं विरहितं धूतसुत्सृष्टविधुते अपि ॥”
इति जटाधरः ॥
(यथा, साहित्यदर्पणे । १० ।
“इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः
सुधाधाराधारश्चिरपरिणतं बिम्बमधरः ॥
इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥”)

विरही, [न्] पुं, (विरहोऽस्यास्तीति । इनिः ।)
विरहविशिष्टः । वियोगी । यथा,—
“विहरति हरिरिह सरसवसन्ते ।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य
दुरन्ते ॥”
इति जयदेवः ॥

विरागः, पुं, (वि+रञ्ज+घञ् ।) अननुरागः ।
रागशून्यः । यथा,—
“विषयेष्वतिसंरागो मानसो मल उच्यते ।
तेष्वेव हि विरागो हि नैर्मल्यं समुदाहृतम् ॥”
इति प्रायश्चित्ततत्त्वम् ॥
(त्रि, विविधवर्णविशिष्टः । यथा, महाभारते ।
२ । २१ । २५ ।
“बलाद्गृहीत्वा माल्यानि मालाकारान्महा-
बलाः ।
विरागवसनाः सर्व्वे स्रग्विणो मृष्टकुण्डलाः ॥”
विगतो रागो विषयवासना यस्येत्यर्थे । वीत-
रागः । यथा, भागवते । ३ । १५ । ४७ ।
“यत्तेऽनुतापविदितैर्दृढभक्तियोगैः
उद्ग्रन्थयो हृदि विदुर्मुनयो विरागाः ॥”)

विरागार्हः, त्रि, (विरागं अर्हतीति । अर्ह+
अच् ।) विरागयोग्यः । तत्पर्य्यायः । वैर-
ङ्गिकः २ । इति हेमचन्द्रः ॥

विराजः, पुं, (विशेषेण राजते इति । वि+राज
+अच् ।) विराट् । यथा,—
“इन्द्राग्नी वदनात्तुभ्यं पशवो मलसम्भवाः ।
ओषध्यो रोमसम्भूता विराजस्त्वं नमोऽस्तु ते ॥”
इति वामने ८३ अध्यायः ॥

विराजमानः, त्रि, (वि+राज+शानच् ।) दीप्ति-
विशिष्टः । यथा,—
“जटाकटाहसम्भ्रमद्भ्रमन्निलिम्पनिर्झरी
विलोलवीचिवल्लरीविराजमानमूर्द्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥”
इति काशीखण्डे रावणकृतशिवताण्डवस्तोत्रम् ॥

विराजितः, त्रि, (वि+राज+क्तः ।) शोभितः ।
दीप्तः । यथा,—
“अतीव निर्म्मलं सारं सूर्य्यभासविनिन्दकम् ।
परिष्कृतञ्च माणिक्यैर्हीरकैश्च विराजितम् ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १० अध्यायः ॥

विराट्, [ज्] पुं, (विशेषेण राजते इति । राज
दीप्तौ+क्विप् ।) क्षत्रियः । इत्यमरः ॥ स्थूल-
शरीरसमष्ट्युपहितचैतन्यम् । इति वेदान्त-
सारः ॥ * ॥ (ब्रह्मणो विराड्मूर्त्तिवर्णनं यथा,
शङ्करविजये ६ प्रकरणे । “यूहमूर्त्तिर्विराट्
चतुर्द्दशलोकात्मकः । तस्य ब्रह्माण्डकर्परपर्य्यन्त-
माकाशः शिरः, चन्द्रसूर्य्यौ नेत्रे, प्रागादिदिशः
श्रोत्रे, अन्तरीक्षलोको घ्राणं, मेरुः पृष्ठवंशः,
शिखरत्रयं भुजकक्षाः, प्रत्यन्तपर्व्वताः पृष्ठपार्श्व-
वर्षाणि, उपपर्व्वताः शाल्मल्यादीनि, समुद्रा रक्तं,
लता स्नायूनि, तृणवृक्षाः रोमाणि, भूमिः
कुक्षिः, द्वीपा वलयः, भूरेखा रोमराजिः,
भूमध्यप्रदेशो वस्तिः, शेषः शिश्नं, दिग्दन्ति-
पङ्क्तिर्नितम्बोरुभागः, अतलादिसप्तकं कटि-
पादान्तरालः, कूर्म्मः पादौ इति ॥” * ॥) महा-
विराडुत्पत्तिर्यथा,—
श्रीनारायण उवाच ।
“अथ डिम्बो जले तिष्ठन् यावद्वै ब्रह्मणो वयः ।
ततः स काले सहसा द्विधा भूतो बभूव ह ॥
तन्मध्ये शिशुरेकश्च शतकोटिरविप्रभः ।
क्षणं रोरूयमानश्च स्तनान्धः पीड़ितः क्षुधा ॥
पितृमातृपरित्यक्तो जलमध्ये निराश्रयः ।
ब्रह्माण्डसंघनाथो यो ददर्शोर्द्धमनाथवत् ॥
स्थूलात् स्थूलतमः सोऽपि नाम्ना देवो महा-
विराट् ।
परमाणुर्यथा सूक्ष्मात् परः स्थूलात्तथाप्यसौ ॥
तेजसा षोड़शांशो यः कृष्णस्य परमात्मनः ।
आधारोऽसंख्यविश्वानां महान् विष्णुश्च प्राकृतः ।
प्रत्येकं लोमकूपेषु विश्वानि निखिलानि च ।
तस्यापि तेषां संख्याञ्च कृष्णो वक्तुं न हि क्षमः ॥
संख्या चेद्रजसामस्ति विश्वानां न कदाचन ।
ब्रह्मविष्णुशिवादीनां तथा संख्या न विद्यते ॥
प्रतिविश्वेषु सन्त्येवं ब्रह्मविष्णुशिवादयः ।
पातालाद्ब्रह्मलोकान्तं ब्रह्माण्डं परिकीर्त्तितम् ॥
अत ऊर्द्ध्वञ्च वैकुण्ठो ब्रह्माण्डाद्बहिरेव च ।
स च सत्यस्वरूपश्च शश्वन्नारायणो यथा ॥
अत ऊर्द्ध्वञ्च गोलोकः पञ्चाशत्कोटियोजनात् ।
नित्यं सत्यस्वरूपश्च यथा कृष्णस्तथाप्ययम् ॥
सप्तद्वीपमिता पृथ्वी सप्तसागरसंयुता ।
ऊनपञ्चाशदुपद्वीपासंख्यशैलसमन्विता ॥
ऊर्द्ध्वं स्वर्गाः सप्त लोका ब्रह्मलोकसमन्विताः ।
पातालानि च सप्ताधश्चैवं ब्रह्माण्डमेव च ॥
ऊर्द्ध्वं धराया भूर्लोको भुवर्लोकस्ततः परः ।
ततः परश्च स्वर्लोको जनो लोकस्ततः परः ॥
ततः परस्तपोलोकः सत्यलोकस्ततः परः ।
ततः परो ब्रह्मलोकस्तप्तकाञ्चननिर्म्मितः ॥
एवं सर्व्वं कृत्रिमञ्च धराभ्यन्तरमेव च ।
तद्विनाशे विनाशश्च सर्व्वेषामेव नारद ॥
जलबुद्बुदवत् सर्व्वं विश्वसंघमनित्यकम् ।
नित्यौ वैकुण्ठगोलोकौ सत्यौ शश्वदकृत्रिमौ ॥
प्रतिलोमकूपे ब्रह्माण्डं प्रत्येकमस्य निश्चितम् ।
एषां संख्या न जानाति कृष्णोऽन्यस्यापि का
कथा ॥
प्रत्येकं प्रतिब्रह्माण्डे ब्रह्मविष्णुशिवादयः ।
तिस्रः कोट्यः सुराणाञ्च संख्याः सर्व्वत्र पुत्त्रक ॥
दिगीशाश्चैव दिक्पाला नक्षत्राणि ग्रहादयः ।
भुवि वर्णाश्च चत्वारोऽप्यधो नागाश्चराचराः ॥
अथ काले च स विराट् ऊर्द्ध्वं दृष्ट्वा पुनः पुनः ।
डिम्बान्तरञ्च शून्यञ्च न द्वितीयञ्च कञ्चन ॥
चिन्तामवाप क्षुद्युक्तो रुरोद च पुनः पुनः ।
ज्ञानं प्राप्य तदा दध्यौ कृष्णं परमपूरुषम् ॥
ततो ददर्श तत्रैव ब्रह्मज्योतिः सनातनम् ।
नवीनजलदश्यामं द्विभुजं पीतवाससम् ॥
सस्मितं मुरलीहस्तं भक्तानुग्रहकारकम् ।
जहास बालकस्तुष्टो दृष्ट्वा जनकमीश्वरम् ॥
वरं तस्मै ददौ तुष्टो वरेशः समयोचितम् ।
मत्समो ज्ञानयुक्तश्च क्षुत्पिपासादिवर्ज्जितः ॥
ब्रह्माण्डासंख्यनिलयो भव वत्स लयावधि ।
निष्कामो निर्भयश्चैव सर्व्वेषां वरदो वरः ॥
जरामृत्युरोगशोकपीड़ादिवर्ज्जितो भव ।
इत्युक्त्वा च तत्कर्णे महामन्त्रं षड़क्षरम् ॥
त्रिःकृत्वश्च प्रजजाप वेदाङ्गमवरं परम् ।
प्रणवादिचतुर्थ्यन्तं कृष्ण इत्यक्षरद्वयम् ॥
वह्निजायान्तमिष्टञ्च सर्व्वविघ्नहरं परम् ।
मन्त्रं दत्त्वा तदाहारं कल्पयामास स प्रभुः ॥
श्रूयतां मद्वचः श्रुत्वा निबोध कथयामि ते ।
प्रतिविश्वेषु यन्नैवेद्यं ददाति विष्णवे जनः ॥
तत्षोड़शांशं विषयिणो विष्णोः पञ्चदशस्य वै ।
निर्गुणस्यात्मनश्चैव परिपूर्णतमस्य च ॥
नैवेद्येन च कृष्णस्य नहि किञ्चित् प्रयोजनम् ।
यद्यद्ददाति नैवेद्यं यस्मै देवाय यो जनः ॥
स च खादति तत् सर्व्वं लक्ष्मीदृष्ट्या पुनर्भवेत् ।
तञ्च मन्त्रं वरं दत्त्वा तमुवाच पुनर्व्विभुः ॥
वरमन्यं किमिष्टन्ते तन्मे ब्रूहि ददामि च ।
कृष्णस्य वचनं श्रुत्वा तमुवाच महाविराट् ॥
अदन्तो बालकस्तत्र वचनं समयोचितम् ॥
श्रीमहाविराडुवाच ।
वरं मे त्वत्पदाम्भोजे भक्तिर्भवतु निश्चला ।
सन्ततं यावदायुर्मे क्षणं वा सुचिरं हि वा ॥

त्वद्भक्तियुक्तो यो बालो जीवन्मुक्तश्च सन्ततम् ।
तद्भक्तिहीनो मूर्खश्च जीवन्नपि मृतो हि सः ॥
किन्तज्जपेन तपसा यज्ञेन पूजनेन च ।
कृष्णभक्तिविहीनस्य मूर्खस्य जीवनं वृथा ॥
येनात्मना जीवितश्च तमेव नहि मन्यते ।
यावदात्मा शरीरेऽस्ति तावत् स शक्तिसंयुतः ॥
पश्चाद्यान्ति गते तस्मिन् न स्वतन्त्राश्च शक्तयः ।
स च त्वञ्च महाभाग सर्व्वात्मा प्रकृतेः परः ॥
स्वेच्छामयश्च सर्व्वाद्यो ब्रह्मज्योतिः सनातनः ।
इत्युक्त्वा बालकस्तत्र विरराम च नारद ॥
उवाच कृष्णः प्रत्युक्तिं मधुरां श्रुतिसुन्दरीम् ॥
श्रीकृष्ण उवाच ।
सुचिरं सुस्थिरं तिष्ठ यथाहं त्वं तथा भव ।
ब्रह्मणोऽसंख्यपाते च पातस्ते न भविष्यति ॥
अंशेन प्रतिब्रह्माण्डे त्वञ्च क्षुद्रविराड्भव ।
त्वन्नाभिपद्मे ब्रह्मा च विश्वस्रष्टा भविष्यति ॥
ललाटे ब्रह्मणश्चैव रुद्राश्चैकादशैव तु ।
शिवांशेन भविष्यन्ति सृष्टिसंहारणाय वै ॥
कालाग्निरुद्रस्तेष्वेको विश्वसंहारकारकः ।
पाता विष्णुश्च विषयी क्षुद्रांशेन भविष्यति ॥
मद्भक्तियुक्तः सततं भविष्यसि वरेण मे ।
ध्यानेन कमनीयं मां नित्यं द्रक्ष्यसि निश्चितम् ॥
मातरं कमनीयाञ्च मम वक्षःस्थलस्थिताम् ।
यामि लोकं तिष्ठ वत्सेत्युक्त्वा सोऽन्तरधीयत ॥
गत्वा स्वलोकं ब्रह्माणं शङ्करं स उवाच ह ।
स्रष्टारं स्रष्टुमीशञ्च संहर्त्तारञ्च तत्क्षणम् ॥
श्रीकृष्ण उवाच ।
सृष्टिं स्रष्टुं गच्छ वत्स नाभिपद्मोद्भवो भव ।
महाविराड्लोमकूपे क्षुद्रस्य च विधे शृणु ॥
गच्छ वत्स महादेव ब्रह्मभालोद्भवो भव ।
अंशेन च महाभाग स्वयञ्च सुचिरं तपः ॥
इत्युक्त्वा जगतां नाथो विरराम विधिस्ततः ।
जगाम ब्रह्मा तं नत्वा शिवश्च शिवदायकः ॥
महाविराड्लोमकूपे ब्रह्माण्डे गोलके जले ।
बभूव च विराट् क्षुद्रो विराडंशेन सांप्रतम् ॥
श्यामो युवा पीतवासाः शयानो जलतल्पके ।
ईषद्धास्यः प्रसन्नास्यो विश्वव्यापी जनार्द्दनः ॥
तन्नाभिकमले ब्रह्मा बभूव कमलोद्भवः ।
संभूय पद्मदण्डञ्च बभ्राम युग-लक्षकम् ॥
नान्तं जगाम दण्डस्य पद्मनाभस्य पद्मजः ।
नाभिजस्य च पद्मस्य चिन्तामाप पिता तव ॥
स्वस्थाने पुनरागत्य दध्यौ कृष्णः पदाम्बुजम् ।
ततो ददर्श क्षुद्रन्तं ध्यानेन दिव्यचक्षुषा ॥
शयानं जलतल्पे च ब्रह्माण्डे गोलकावृते ।
यल्लोमकूपे ब्रह्माण्डं तञ्च तत् परमेश्वरम् ।
श्रीकृष्णञ्चापि गोलोकं गोपगोपीसमन्वितम् ॥
तं संस्तूय वरं प्राप ततः सृष्टिञ्चकार सः ।
बभूवुर्ब्रह्मणः पुत्त्रा मानसाः सनकादयः ॥
ततो रुद्राः कपालाच्च शिवांश्चैकादश स्मृताः ।
बभूव पाता विष्णुश्च क्षुद्रस्य वामपार्श्वतः ॥
चतुर्भुजश्च भगवान् श्वेतद्वीपनिवासकृत् ।
क्षुद्रस्य नाभिपद्मे च ब्रह्मा विष्णुं ससर्ज्ज च ॥
स्वर्गं मर्त्यञ्च पातालं त्रिलोकं सचराचरम् ।
एवं सर्व्वं लोमकूपे विश्वं प्रत्येकमेव च ॥
प्रतिविश्वे क्षुद्रविराट् ब्रह्मविष्णुशिवादयः ।
इत्येवं कथितं वत्स श्रीकृष्णकीर्त्तनं परम् ॥
सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३ अध्यायः ॥
स्वायम्भुवमनुः । यथा,—
"गतेषु तेषु सृष्ट्यर्थं प्रणामावनतामिमाम् ।
उपयेमे स विश्वात्मा शतरूपामनिन्दिताम् ॥
सम्बभूव तया सार्द्धमतिकामातुरो विभुः ।
सलज्जां चकमे देवः कमलोदरमन्दिरे ॥
यावदब्दशतं दिव्यं यथान्यः प्राकृतो जनः ।
ततः कालेन महता ततः पुत्त्रोऽभवन्मनुः ॥
स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम् ।
तद्रूपगुणसामान्यादधिपूरुष उच्यते ॥
वैराजा यत्र ते जाता बहवः शंसितव्रताः ।
स्वायम्भुवा महाभागा सप्त सप्त तथापरे ॥
स्वारोचिषाद्या सर्व्वे ते ब्रह्मतुल्याः स्वरूपिणः ।
औत्तमिप्रमुखास्तद्वद्येषां त्वं सप्तमोऽधुना ॥"
इति मात्स्ये ३ अध्यायः ॥

विराटः, पुं, देशविशेषः । इति शब्दरत्नावली ॥ (अत्रैव पञ्चपाण्डवाः सह द्रौपद्या अज्ञातसुषितवन्तः । यथा, महाभारते ।४ । १ । १ ।
"कथं विराटनगरे मम पूर्व्वपितामहाः ।
अज्ञातवाससुषिता दुर्य्योधनभयार्द्दिताः ॥")
तद्देशीयराजा । यथा,—
"अत्र शूरा महेष्वासा भीमार्ज्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

विराटकः, पुं, राजपट्टः । इति हेमचन्द्रः ॥

विराटजः, पुं, (विराटे जायते इति । जन् + डः ।) विराटदेशीयहीरकः । तत्पर्य्यायः । राजपट्टः २ राजावर्त्तः ३ । इति हेमचन्द्रः ॥ विराटराजजाते, त्रि ॥ (यथा, महाभारते । १४ । ६२ । ८ ।
"सुबहूनि च राजेन्द्र दिवसानि विराटजा ।
नाभुङ्क्त पतिदुःखार्त्ता तदाभूत्करुणं महत् ॥")

विराणी, [न्] पुं, हस्ती । इति शब्दमाला ॥

विराधः, पुं, (विराधयति लोकान् पीडयतीति । वि + राध + अच् ।) राक्षसभेदः । यथा,—
"लक्ष्मणस्य तु तद्वाक्यं श्रुत्वा रामं ततोऽब्रवीत् ।
पिता मेऽभूत् सुपर्ज्जन्यो माता मे च शतह्रदा ॥
विराध इति मामाहुः पृथिव्यां सर्व्वराक्षसाः ।
उत्सृज्य प्रमदामेनां पलायेतां पराङ्मुखौ ॥
तच्छ्रुत्वा राममाहेदं लक्ष्मणः किं प्रतीक्षसे ॥
इत्युक्तो लक्ष्मणो वीर आनम्य सुमहद्धनुः ।
उत्ससर्ज्ज शरं घोरं कालदण्डोपमं ततः ॥
तच्छरीरं महाकायं भित्त्वा पातालमाविशत् ॥
पपातासु गतप्राणः सफेनं रुधिरं वमन् ।
ततोऽसौ राममाहेदं प्राञ्जलिर्विनयान्वितः ॥
तुम्बुरुर्नाम गन्धर्व्वः प्रविष्टो राक्षसीं तनुम् ।
अभिशापादहं घोरं शप्तो वैश्रवणेन वै ॥
प्रसाद्यमानः स मया प्रावचच्छ्ना पुनः पुनः ।
यदा दाशरथी रामो भविष्यति महाबलः ॥
शापस्यान्तोऽभविष्यत्ते तेन रामेण संयुगे ।
प्रसादात्तव मुक्तोऽहं गमिष्यामि स्वमालयम् ॥"
इति वह्निपुराणे शूर्पणखाकर्णनासिकोत्कर्त्तनं नामाध्यायः ॥

विराधनं, क्ली, (वि + राध + ल्युट् ।) पीडा । इति शब्दरत्नावली ॥

विराधानं, क्ली, पीडा । इति शब्दरत्नावली । विबाधानमिति च पाठः ॥

विरामः, पुं, (वि + रम + घञ् ।) शेषः । निवृत्तिः । विरतिः । तत्पर्य्यायः । अवसानः २ सातिः ३ । इति जटाधरः ॥ मध्यम् ४ । इति त्रिकाण्डशेषः ॥ (यथा, मनौ । २ । ७३ ।
"अध्येष्यमाणन्तु गुरुं नित्यकालमतन्द्रितः ।
अधीष्व भो इति ब्रूयात् विरामोऽस्त्विति चारमेत् ॥")
परवर्णाभावः । इति व्याकरणम् ॥ (यथा, पाणिनौ ।१।४। ११० । "विरामोऽवसानम् ॥")

विरालः, पुं, विडालः । इत्यमरटीका ॥

विरावः, पुं, (वि + रु + घञ् ।) शब्दः । इत्यमरः ॥ (यथा, महाभारते । ३ । १४६ । ६४ ॥
"सिंहनादभयत्रस्तैः कुञ्जरैरपि भारत ! ।
मुक्तो विरावः सुमहान् पर्व्वतो येन पूरितः ॥"
हस्तलप्रदत्ताश्वान्यतरः । यथा, महाभारते । ३ । ६६ । १७ ।
"विरावश्च सुरावश्च तस्मिन् युक्तौ रथे हयौ ॥")

विरावी, [न्] त्रि, विरावविशिष्टः । विरावो विद्यतेऽस्येति इनूप्रत्ययेन निष्पन्नः ॥ (यथा, बृहत्संहितायाम् । ५३ । ९ ।
"दिशि शान्तायां शकुनो मधुरविरावी यदा
तदा वाच्यः ।
अर्थस्तस्मिन् स्थाने गृहेश्वराधिष्ठितेऽङ्गेवा ॥")

विरिक्तः, त्रि, कृतविरेकः । यथा,—
"दुर्विरिक्तस्य नाभिस्तु स्तब्धता कुक्षिशूलरुक् ।
पुरीषवातसङ्गश्च कण्डुमण्डलगौरवम् ॥"
इति भावप्रकाशः ॥

विरिञ्चः, पुं, ब्रह्मा । (यथा, भागवते ।८।५।३९।
"बलाम्महेन्द्रस्त्रिदशाः प्रसादा-
न्मन्योर्गिरीशो धिषणाद्विरिञ्चः ॥")
विष्णुः । शिवः । इति शब्दरत्नावली ॥

विरिञ्चनः, पुं, ब्रह्मा । इति हेमचन्द्रः ॥

विरिञ्चिः, पुं, शिवः । विष्णुः । विधाता । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १९ । १७ ।
"एवमस्त्विति तं देवाः पितामहमथा
ब्रुवन् ।
उक्त्वैवं वचनं देवान् विरिञ्चिस्त्रिदिवं ययौ ॥")

विरिब्धः, पुं, स्वरः । इति मुग्धबोधव्याकरणम् ॥

विरुदः, पुं, गुणोत्कर्षादिवर्णनम् । यदुक्तम् ।
"वाशिकः कम्पितश्चेति विरुदो द्विविधो मतः ।
संयुक्तनियमो ह्यत्र वर्णितः पूर्व्ववद्बुधैः ॥

द्विचतुःषड्दशभ्यश्च कलास्तु विरुदे मताः ।
दशभ्यो नाधिकाः कार्य्याः कलास्तु विरुदे बुधैः ॥
कलिकाभ्यस्तु विरुदे भिदामात्रेव कीर्त्तिता ।
विरुदं कवयः प्राहुर्गुणोत्कर्षादिवर्णनम् ।
विरुदः कलिका चान्ते धीरवीरादिशब्दभाक् ॥
इत्युपोद्घातः । इति श्रीरूपगोस्वामिकृतश्रीगोविन्दविरुदावलीभाष्ये श्रीबलदेवविद्याभूषणः ॥

विरुदावली, स्त्री, (विरुदानामावली ।) विरुदश्रेणी । स्तवमाला । तल्लक्षणादि यथा,—
"अधीत्य विरुदावल्या लक्षणं ग्रन्थकृत्तमम् ।
एतांश्चेत् पठति प्राज्ञस्तदा बोधोऽस्य पुष्कलः ॥
सामान्यविरुदावल्या गोविन्दविरुदावली ।
योऽभ्यधायि विशेषस्तैः स तावदिह लिख्यते ॥
कलिका लोकविरुदैर्युता विविधलक्षणैः ।
कीर्त्तिप्रतापशौटीर्य्यसौन्दर्य्योन्मेषशालिनी ॥
कलिकाद्यन्तसंसर्गिपद्या दोषविवर्ज्जिता ।
शब्दाडम्बरसंवद्धा कर्त्तव्या विरुदावली ॥"
इति श्रीरूपगोस्वामिकृते श्रीगोविन्दविरुदावलीभाष्ये श्रीबलदेवविद्याभूषणः ॥ * ॥ कलिकालक्षणं कलिकाशब्दे लिखितम् । विरुदलक्षणं तच्छब्दे द्रष्टव्यम् ॥

विरुद्धः, त्रि, (वि+रुध+क्तः ।) विरोधविशिष्टः । यथा । विरुद्धधर्म्मसमवाये भूयसां स्यात् सधर्म्मकत्वम् । इति जैमिनीसूत्रम् ॥
"विरुद्धं गुरुवाक्यस्य यदत्र भाषितं मया ।
तत् क्षन्तव्यं बुधैरेव स्मृतितत्त्वबुभुत्सया ॥
स्मृतितत्त्वे प्रमादाद्यद्विरुद्धं बहुभाषितम् ।
गुणलेशानुरागेण तच्छोध्यं धर्म्मदर्शिभिः ॥"
इति तिथ्यादितत्त्वम् ॥
(दशममनोर्म्मन्वन्तरवर्त्ती देवतान्यतमः । यथा, भागवते । ८ । १३ । २२ ।
"हविष्मान् सुकृतः सत्यो जयो मूर्त्तिस्तदा द्विजाः ।
सुवासना विरुद्धाद्या देवाः शम्भुः सुरेश्वरः ॥"
क्ली, विचाराङ्गीयदोषविशेषः । यथा । "विरुद्धं नाम यद्दृष्टान्तसिद्धान्तसमयैर्विरुद्धं तत्र दृष्टान्तसिद्धान्तावुक्तौ । समयः पुनर्यथायुर्व्वेदिकसमयो याज्ञिकसमयो मोक्षशास्त्रिकसमय इति । तत्रायुर्व्वेदिकसमयः चतुष्पादभेषजमिति । आलभ्याः पशव इति याज्ञिकसमयः । सर्व्वभूतेष्वहिंसेति मोक्षशास्त्रिकसमयस्तत्र स्वसमयविपरीतमुच्यमानं विरुद्धमिति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ।)

विरूढ़ः, त्रि, अङ्कुरितः । (यथा, "विरूढ़ानां अङ्कुरितधान्यकृतमन्नम् ।" इति माधवकृतरुग्विनिश्चये शूलव्याख्याने विजयरक्षितः ॥) जातः । इति मेदिनी । ढ,६ । (यथा, रघुवंशे ।२। २६।
"गङ्गाप्रपातान्तविरूढ़शष्पं
गौरीगुरोर्गह्वरमाविवेश ॥")
आरोहणविशिष्टः । यथा ।
"सम्मुखे निरुणां पुरामपि रिपौ कण्ठस्थलीमण्डली
लीलालूनपुनर्विरूढ़शिरसो वीरस्य लिप्सुर्व्वरम् ।"
इत्यादि मुरारिः ॥

विरूपं, क्ली, पिप्पलीमूलम् । इति राजनिर्घण्टः ॥

विरूपः, त्रि, (विकृतं रूपं यस्य ।) कुत्सितः । कुरूपः । यथा,—
"विरूपोन्मत्तनिःस्वानामकृत्वापूर्व्वकं हि यत् ।
पूरणं दानमानाभ्यामनुग्रह उदाहृतः ॥"
इति रामतर्कवागीशः ।
(यथा, बृहत्संहितायाम् । ७० । २३ ।
"या तूत्तरोष्ठेन समुन्नतेन
रूक्षाग्रकेशी कलहप्रिया सा ।
प्रायो विरूपासु भवन्ति दोषा
यत्राकृतिस्तत्र गुणा वसन्ति ॥"
परित्यक्तरूपः । यथा, ऋग्वेदे ।१०।९५।१६।
"यद्विरूपाचरं मर्त्त्येष्ववसं रात्रीः शरदश्चतस्रः ।"
"यद्यदा विरूपा परं मनुष्यस्य सम्पर्कात् विगतस्वस्वभूतदेवरूपाः ।" इति तद्भाष्ये सायणः । नानारूपः । यथा, ऋग्वेदे । ३ । ५३ । ७ ।
"इमे भोजा अङ्गिरसो विरूपा
दिवस्पुत्रासो असुरस्य वीराः ॥"
"हे इन्द्र इमे यागं कुर्व्वाणा भोजाः सौदासाः क्षत्रियाः तेषां याजका विरूपाः विविधरूपा मेधातिथिप्रभृतयः ।" इति तद्भाष्ये सायणः ॥
विरुद्धः । यथा, साहित्यदर्पणे । १० परिच्छेदे ।
"विरूपयोः संघटना या च तद्विषमं मतम् ।"
उदाहरणं यथा,—
"क वनं तरुवल्कभूषणं
नृपलक्ष्मीः क महेन्द्रवन्दिता ।")
स्वार्थे के विरूपकश्च ।

विरूपः, पुं, सुमनोराजपुत्रः । यथा,—
"जाताः सुमनसः पुत्राश्चयः शूरा महाबलाः ।
सुमतिश्च विरूपश्च सत्यः शास्त्रार्थपारगाः ॥"
इति कालिकापुराणे ९० अध्यायः ॥

विरूपा, स्त्री, दुरालभा । अतिविषा । इति राजनिर्घण्टः ॥

विरूपाक्षः, पुं, (विरूपे अक्षिणी यस्य । "सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।" इति षच् ।) शिवः । इत्यमरः ॥ (यथा, साहित्यदर्पणे । १० ।
"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ॥")
रुद्रभेदः । इति जटाधरः ॥ तस्य पुरी सुमेरोर्नैरृतकोणे वर्त्तते । यथा,—
"तथा चतुर्थे दिग्भागे नैरृताधिपतेः स्मृता ।
नाम्ना कृष्णावती नाम विरूपाक्षस्य धीमतः ॥"
इति वाराहे रुद्रगीता ॥
(विरूपे, त्रि । यथा, कुमारे । ५ । ७२ ।
"वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ॥")

विरूपिका, स्त्री, (विकृतं रूपं यस्याः । कन् । टापि अत इत्वम् ।) कुरूपा । यथा,—
"नाग्नयः परिविन्दन्ति न यज्ञा न तपांसि च ।
न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका ॥"
इत्युद्वाहतत्त्वम् ॥

विरूपी, [न्] पुं, (विरुद्धं रूपमस्यास्तीति । इनिः ।) जाहकजन्तुः । इति राजनिर्घण्टः ॥ कुरूपविशिष्टे, त्रि ॥

विरेकः, पुं, (वि+रिच+घञ् ।) मलभेदः । तत्पर्य्यायः । रेचनम् २ रेकः ३ रेचना ४ विरेचनम् ५ । इति शब्दरत्नावली ॥ प्रस्कन्दनम् ६ । इति रत्नमाला ॥ (यथा, वैद्यके ।
"धूमात्युष्णशिरो विरेकवमनस्वेदोपनाहादिकं
पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं जयेत् ॥"
अस्य योग्यायोग्या यथा,—
"बालवृद्धकृशक्षीणपीनसार्त्तभयार्द्दिताः ।
रूक्षशोषक्षयायुक्ता गर्भिणी च नवज्वरी ॥
अधो गच्छति यस्यासृक् सूतिकातङ्करोगिणी ।
नैते विरेकयोग्याः स्युरन्येषाञ्च बलाबलम् ॥
नवज्वरे च ये योगा भेदकाः परिकीर्त्तिताः ।
ते तथैव प्रयोक्तव्या वीक्ष्य देहमलादिकम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे विरेकाधिकारे ।)

विरेचकः, त्रि, रेचकः । विरेककारकः । सारकः । मलभेदकः । जोलाब इति पारसीभाषा ॥ विपूर्व्वकरिच्धातोर्वुन्प्रत्ययेन निष्पन्नः । (यथा, वैद्यके ।
"पटोलपत्रं पित्तघ्नं नाड़ी तस्य कफापहा ।
फलं तस्य त्रिदोषघ्नं मूलं तस्य विरेचकम् ॥")

विरेचनं, क्ली, (वि+रिच+ल्युट् ।) विरेकः । इति शब्दरत्नावली ॥ तत्कारकौषधं यथा,—
"हरीतकी समगुड़ा मधुना सह पेषिता ।
विरेचनकरी रुद्र भवतीति न संशयः ॥
त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी ।
जलस्तम्भहरो ह्येष उत्तमश्च विरेचनम् ॥"
अपि च ।
"त्रिफला बदरं द्राक्षा पिप्पली च विरेचकृत् ।
हरीतकी सोष्णनीरा लवणञ्च विरेचकृत् ॥"
इति गारुड़े १८७ । १९९ अध्यायौ ॥ * ॥
अन्यच्च । अथ विरेचनविधिः ।
"स्निग्धस्विन्नाय वान्ताय दद्यात् सम्यग्विरेचनम् ।
अवान्तस्य त्वधःस्रस्तो ग्रहणीं छादयेत् कफः ॥
मन्दाग्निगौरवं कुर्य्याज्जनयेद्वा प्रवाहिकाम् ।
अथवा पाचनैरामं बलासं परिपाचयेत् ।
अन्यदात्ययिके कार्य्ये शोधनं शीलयेद्बुधः ॥"
आत्ययिके प्राणसङ्कटे ।
"पित्ते विरेचनं युञ्ज्यादामोद्भूते गदे तथा ।
उदरे च तथाध्माने कोष्ठशुद्धौ विशेषतः ॥
दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः ।
शोधनैः शोधिता ये तु न तेषां पुनरुद्भवः ॥
बालो वृद्धो भृशं स्निग्धः क्षतक्षीणो भयान्वितः ।
श्रान्तस्तृषार्त्तः स्थूलश्च गर्भिणी च नवज्वरी ॥

अधोगरक्तपित्ती च न विरेच्या विजानता ।
नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी ॥
शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता ।
जीर्णज्वरी गरव्याप्तो वातरक्ती भगन्दरी ॥
अर्शःपाण्डूदरग्रन्थिहृद्रोगारुचिपीडिताः ।
योनिरोगप्रमेहार्त्तगुल्मप्लीहव्रणार्द्दिताः ॥
विद्रधिच्छर्द्दिविस्फोटविसूचीकुष्ठसंयुताः ।
कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः ॥
प्लीहशोथाक्षिरोगार्त्ताः कृमिक्षारानलार्द्दिताः ।
शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः ॥
बहुपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्यमः ।
बहुवातः क्रूरकोष्ठो दुर्व्विरेच्यः स कथ्यते ॥
मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा ।
क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकैः ॥
मृदुर्द्राक्षापयश्चञ्चुतैलैरपि विरिच्यते ।
मध्यमस्त्रिवृतातिक्ताराजवृक्षैर्व्विरिच्यते ।
क्रूरः स्नुक्पयसा हेमक्षीरीदन्तीफलादिभिः ॥"
चञ्चुतैलमेरण्डतैलम् । राजवृक्षः धनवहेरा । हेमक्षीरी चोकम् । दन्तीफलं वृहद्दन्तीफलं जयपाल इति प्रसिद्धम् ।
"मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफान्तिका ।
वेगैर्व्विंशतिभिर्म्मध्या हीनोक्ता दशवेगिका ॥
द्विपलं श्रेष्ठमाख्यातं मध्यमञ्च पलं भवेत् ।
पलार्द्धञ्च कषायाणां कनीयस्तु विरेचनम् ॥
कल्कमोदकचूर्णानां कर्षमध्वाज्यलेहतः ।
कर्षद्वयं पलं वापि वयोरोगाद्यपेक्षया ॥
पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत् ।
त्रिफलाक्वाथगोमूत्रैः पिबेत् व्योषं कफार्द्दितः ॥
त्रिवृत्सैन्धवशुण्ठीनां चूर्णमम्लैः पिबेन्नरः ।
वातार्द्दितो विरेकाय जाङ्गलानां रसेन वा ॥
एरण्डतैलं त्रिफलाक्वाथेन द्विगुणेन वा ।
युक्तं पीतं पयोभिर्व्वा न चिरेण विरिच्यते ॥"
शीघ्रमेव विरिच्यत इत्यर्थः ।
"त्रिवृता कौटजं बीजं पिप्पली विश्वभेषजम् ।
समृद्वीकारसं क्षौद्रं वर्षाकाले विरेचनम् ॥
त्रिवृद्दुरालभामुस्तशर्करोदीच्यचन्दनम् ।
द्राक्षाम्बुना सयष्ट्याह्वं शीतलं च घनात्यये ॥"
उदीच्यं बाला । घनात्यये शरदि ।
"पिप्पली नागरं सिन्धुश्यामास्त्रिवृतया सह ।
लिह्यात् क्षौद्रेण शिशिरे वसन्ते च विरेचनम् ॥"
श्यामा अक्षसाउ ।
"त्रिवृता शर्करातुल्या ग्रीष्मकाले विरेचनम् ।
अभया मरिचं शुण्ठीविडङ्गामलकानि च ।
पिप्पली पिप्पलीमूलं त्वक्पत्रं मुस्तमेव च ।
एतानि समभागानि दन्ती तु द्विगुणा भवेत् ।
त्रिवृताष्टगुणा ज्ञेया षड्गुणा चात्र शर्करा ।
मधुना मोदकान् कृत्वा कर्षमात्रान् प्रमाणतः ॥
एकैकं भक्षयेत् प्रातः शीतञ्चानुपिबेज्जलम् ।
तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते ।
पानाहारविहारेषु भवेन्नियन्त्रणः सदा ॥
विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान् ।
दुर्नामकुष्ठयक्ष्मार्शोगलगण्डोदरभ्रमान् ।
विदाहप्लीहमेहांश्च यक्ष्माणं नयनामयान् ।
वातरोगांस्तथाध्मानं मूत्रकृच्छ्राणि चाश्मरीम् ।
पृष्ठपार्श्वोरुजघनजङ्घोदररुजं जयेत् ।
सततं शीलनादेषां पलितानि प्रणाशयेत् ।
अभया मोदका ह्येते रसायनवराः स्मृताः ॥"
अभयामोदको रसायनः ॥ * ॥
"पीत्वा विरेचनं शीतजलैः संसिच्य चक्षुषी ।
सुगन्धि किञ्चिदाघ्राय ताम्बूलं शीलयेद्वरम् ॥
निर्व्वातस्थो न वेगांश्च धारयेन्न शयीत च ।
शीताम्बु न स्पृशेत् क्वापि कोष्णनीरं पिबेन्मुहुः ॥
बलासौषधपित्तानि वायुर्व्वान्ति यथा व्रजेत् ।
रेकात्तथा मलं पित्तं भेषजं च कफो व्रजेत् ॥
दुर्व्विरिक्तस्य नाभेस्तु स्तब्धता कुक्षिशूलरुक् ।
पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम् ॥
विदाहोऽरुचिराध्मानं भ्रमश्छर्द्दिश्च जायते ।
तं पुनः पाचनैः स्नेहैः पक्त्वा संस्निह्य रेचयेत् ॥
तेनास्योपद्रवा यान्ति दीप्ताग्निर्लघुता भवेत् ।
विरेकस्यातियोगेन मूर्च्छा भ्रंशो गुदस्य च ॥
शूलं कफातियोगः स्यान्मांसधावनसन्निभम् ।
मेदोनिभं जलाभासं रक्तञ्चापि विरिच्यते ॥
तस्य शीताम्बुभिः सिक्त्वा शरीरं तण्डुलाम्बुभिः ।
मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु ॥
सहकारत्वचः कल्को दध्ना सौवीरकेण वा ।
पिष्टो नाभिप्रलेपेन हन्त्यतीसारमुल्बणम् ॥
सौवीरन्तु यवैरामैः पक्वैर्व्वा निस्तुषीकृतम् ॥"
सौवीरं सन्धानम् ।
"आजं क्षीरं रसञ्चापि वैष्किरं हारिणं तथा ॥
शालिभिः षष्टिकैस्तुल्यं मसूरैर्व्वापि भोजयेत् ।
वर्त्तिकालावविकिरकपिञ्जलकतित्तिराः ॥
चकोरक्रकराद्याश्च विष्किराः समुदाहृताः ।
कपिञ्जल इति ख्यातो लोके कपिशतित्तिरः ॥"
क्रकरः कएर इति लोके । हरिणस्ताम्रवर्णमृगः ।
"शीतैः संग्राहिभिर्द्रव्यैः कुर्य्यात् संग्रहणं भिषक् ।
लाघवे मनसस्तुष्टावनुलोमं गतेऽनिले ।
सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि ।
इन्द्रियाणां बलं बुद्धेः प्रसादो वह्निदीप्तता ॥
धातुस्थैर्य्यं वयःस्थैर्य्यं भवेद्रेचनसेवनात् ।
प्रवातसेवां शीताम्बु स्नेहाभ्यङ्गमजीर्णताम् ॥
व्यवायं मैथुनं चैव न सेवेत विरेचितः ।
शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत् कृताम् ॥
जाङ्गलविष्किराणां वा रसैः शाल्योदनं हितम् ।
हरिणैणकुरङ्गर्ष्यवातायुन्दगमालकाः ।
राजीवः एषतश्चैव जङ्गाला सरभादयः ॥"
इति भावप्रकाशः ॥

विरेचनः, पुं, (विशेषेण रेचयतीति । वि + रिच् + णिच् + ल्युः ।) पीलुवृक्षः । इति राजनिर्घण्टः ॥ (विरेचके, त्रि । यथा, सुश्रुते । चिकित्सितस्थाने २४ अध्याये ।
"तेजनं स्वगतस्थानैः शिरःसुखविरेचनम् ॥")

विरेफः, पुं, नदमात्रम् । इति धनञ्जयः ॥ रेफशून्यञ्च ॥

विरेभितः, त्रि, शब्दितः । विपूर्व्वकरेभधातोः क्तप्रत्ययेन निष्पन्नः ॥

विरोकं, क्ली, (वि + रुच् + घञ् । कुत्वम् ।) छिद्रम् । इति त्रिकाण्डशेषः ॥ (यथा, माघे । ५ । ५४ ।
"नासाविरोकपवनोल्लसितं तनीयो
रोमाञ्चतामिव जगाम रजः पृथिव्याः ॥")
सूर्य्यकिरणे, पुं । इति हलायुधः ॥ (प्रातःकालः । यथा, ऋग्वेदे । ६ । ५ । २ ।
"पूर्व्वीर्ऋतस्य सन्दृशश्चकानः संदूतो अद्यौ
दुषसो विरोके ॥"
"विरोके विरोचने प्रातःकाले ।" इति तद्भाष्ये सायणः ।)

विरोचनः, पुं, (विशेषेण रोचते इति । वि + रुच् + "अनुदात्तेतश्च हलादेः ।" ३ । २ । १४९ । इति युच् ।) सूर्य्यः । (यथा, महाभारते । ३ । ३ । ६३ ।
"दिवाकरः सप्तसप्तिर्धामकेशी विरोचनः ॥")
अर्कवृक्षः । इत्यमरः ॥ प्रह्लादतनयः । (यथा, महाभारते । १ । ६५ । १९ ।
"प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत ।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ॥")
अग्निः । चन्द्रः । इति मेदिनी ॥ (यथा, महाभारते । ६ । ३५ । ५२ ।
"तासां तद्वचनं श्रुत्वा इन्द्रः सोममथाब्रवीत् ।
समं वर्त्तस्व भार्य्यासु मा त्वां शप्से विरोचन ॥")
रोहितकवृक्षः । श्योनाकभेदः । पूतिकरञ्जः । इति राजनिर्घण्टः ॥ (दीप्तिशालिनि, त्रि । यथा, महाभारते । १२ । ३४३ । ३४ ।
"तेजसाभ्यधिकौ सूर्य्यात् सर्व्वलोकविरोचनात् ॥")

विरोचनसुतः, पुं, (विरोचनस्य सुतः ।) बलिराजः । इति त्रिकाण्डशेषः ॥

विरोधः, पुं, (वि + रुध + घञ् ।) शत्रुता । तत्पर्य्यायः । वैरम् २ विद्वेषः ३ । इत्यमरः ॥ द्वेषः ४ द्वेषणम् ५ । इति शब्दरत्नावली ॥ अनुशयः ६ सन्तुक्षयः ७ । इति जटाधरः ॥ पर्य्यवस्था ८ विरोधनम् ९ । इति संकीर्णवर्गे अमरः ॥ (यथा, रघुः । ६ । ४६ ।
"नीपान्वयः पार्थिव एष यज्वा
गुणैर्यमाश्रित्य परस्परेण ।
सिद्धाश्रमं शान्तमिवैत्य सत्त्वै-
र्नैसर्गिकोऽप्युत्ससृजे विरोधः ॥")
विरोधकरणे दोषो यथा,—
"अथ पुत्रं रेणुका सा कृत्वा क्रोडात् स्तनन्धयम् ।
उवाच किञ्चिद्वचनं परिणामसुखावहम् ।
अविरोधो भवाब्धौ च सर्व्वमङ्गलमङ्गलम् ।
विरोधो नाशबीजञ्च सर्व्वोपद्रवकारणम् ॥
अकर्मण्यो विरोधश्च दारुणैः क्षत्रियैः सह ।
प्रतिज्ञा चैषा कर्त्तव्या मदीयं वचनं शृणु ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २९ अध्यायः ॥

अपि च ।
“न कुर्य्याद्बहुभिः सार्द्धं विरोधं बन्धुभिस्तथा ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥”
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
न्यायमते साध्यव्यापकाभावप्रतियोगित्वम् । इति चिन्तामणिः ॥ साध्यासामानाधिकरण्यम् । इति दीधितिः ॥ * ॥ प्रभवादिषष्टिसंवत्सरान्तर्गतत्रयस्त्रिंशवर्षम् । यथा, भविष्यपुराणे ।
भैरव उवाच ।
“विषमस्थं जगत् सर्व्वं विरोधे भयसंप्लवम् ।
विकारी सर्व्वतोऽपायो मम वाक्यन्तु नान्यथा ॥”
इति ज्योतिस्तत्त्वम् ॥
अनैक्यः । विपरीतार्थः । यथा,—
“श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता ॥”
इति स्मृतिः ॥
(नाशः । यथा, महाभारते । ३ । ३०० । ३ ।
“यस्त्वं प्राणविरोधेन कीर्त्तिमिच्छसि शाश्वतीम् ।
सा ते प्राणान् समादाय गमिष्यति न संशयः ॥”
नाटकोक्तप्रतिमुखाङ्गान्यतमः । यथा, साहित्य-दर्पणे । ६ । ३५१ ।
“विरोधश्च प्रतिमुखे तथा स्यात् पर्य्युपासनम् ॥”
तल्लक्षणोदाहरणे यथा, तत्रैव । ३५८ ।
“विरोधो व्यसनप्राप्तिः । यथा, चण्डकौशिके राजा । नूनमसमीक्ष्यकारिणा मयान्धेनेव स्फुरच्छिखाकलापो ज्वलनः पद्भ्यां समाक्रान्तः ॥” * ॥ अलङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ७१८ ।
“क्रियाक्रियादलाभ्यां यद्द्रव्यं द्रव्येण वा मिथः ।
विरुद्धमिव भाषेत विरोधोऽसौ दशाकृतिः ॥”)
विरोधनं, क्ली, (वि + रुध + ल्युट् ।) विरोधः । इत्यमरः ॥ (यथा, कथासरित्सागरे ।५६।१६६।
“ईदृक्पापफलं पुत्त्र मातापित्रोर्विरोधनम् ॥”
नाशः । यथा, रामायणे । २ । ३६ । २८ ।
“अदुष्टस्य हि संत्यागः सत्पथे निरतस्य च ।
निर्द्दहेदपि शक्रस्य द्युतिं धर्म्मविरोधनात् ॥”
नाटकोक्तविमर्षाङ्गान्यतमः । यथा, साहित्य-दर्पणे । ६ । ३७८ ।
“शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम् ॥”
तल्लक्षणादिकं यथा, तत्रैव । ३८७ ।
“कार्य्यात्ययोपगमनं विरोधनमिति स्मृतम् ॥”)
विरोधिनी, स्त्री, (विरुणद्धि या । वि + रुध + णिनि । ङीप् ।) विरोधकारिका । यथा,—
“विरोधं कुरुते चान्या दम्पत्योः प्रीयमाणयोः ।
बधूनां सुहृदां पित्रोः पुत्त्रैः सारमिकेव या ।
विरोधिनी सा तद्दत्ता कुर्व्वीत बलिकर्म्मणा ॥”
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिः ॥
विरोधी, [न्] पुं, (विरुणद्धीति । वि + रुध + णिनि ।) शत्रुः । इति हलायुधः ॥ (यथा, मनुः । ४ । १७ ।
“सर्व्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः ॥”
विरोधोऽस्यास्मिन्निति । विरोध + इनिः ।) प्रभवादिषष्टिसंवत्सरान्तर्गतत्रयोविंशवर्षम् । यथा, भविष्यपुराणे । भैरव उवाच ।
“अनघ्निप्रबला लोका धान्यौषधिप्रपीडनम् ।
जायते मानुषे कष्टं विरोधिनि न संशयः ॥”
इति ज्योतिस्तत्त्वम् ॥
विरोधविशिष्टे, त्रि । (यथा, कुमारे ।५।१७।
“विरोधिसत्त्वोज्झितपूर्व्वमत्सरं
द्रुमैरभीष्टप्रसवार्च्चितातिथि ॥”)
विरोधोक्तिः, स्त्री, (विरोधस्य उक्तिः ।) पर-वचनविरोधिवचनम् । तत्पर्य्यायः । विप्रलापः २ विरोधवाक् ३ क्रोधोक्तिः ४ प्रलापः ५ । इति शब्दरत्नावली ॥
विल, श स्तृतौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) स्तृतिरिह आच्छादनम् । श, विलति वस्त्रं लोकः परिदधाति इत्यर्थः । वेलिता । अयं केश्चिन्न मन्यते । इति दुर्गा-दासः ॥
वि(बि)लं, क्ली, (विल + कः ।) छिद्रम् । इत्यमरः ॥ (यथा, महाभारते । १ । १४८ । १७ ।
“पाण्डवाश्चापि ते सर्व्वे सह मात्रा सुदुःखिताः ।
विलेन तेन निर्गत्य जग्मुर्द्रुतमलक्षिताः ॥”)
गुहा । इति मेदिनी ॥ (यथा, कुमारे । ६ । ३८ ।
“जितसिंहभया नागा यत्राश्वा विलयोनयः ।
यक्षाः किंपुरुषाः पौरा योषितो वनदेवताः ॥”)
वि(बि)लः, पुं, उच्चैःश्रवा हयः । इति मेदिनी ॥ वेतसः । इति शब्दचन्द्रिका ॥
वि(बि)लकारी, [न्] पुं, (विलं करोतीति । कृ + णिनिः ।) मूषकः । इति राजनिर्घण्टः ॥ गर्त्त-कारके, त्रि ॥
विलक्षः, त्रि, (विशेषेण लक्षयतीति । वि + लक्ष + पचाद्यच् ।) विस्मयान्वितः । इत्यमरः ॥ (यथा, कथासरित्सागरे । ३८ । १५ ।
“इत्युक्ता स विलक्षं तं वैद्यं स्वदारनृपोऽब्रवीत् ।
किं तस्य च्छगलस्यापि मांसशेषोऽपि कश्चन ॥”)
विलक्षणं, क्ली, (विगतं लक्षणं आलोचनं यत्र ।) हेतुशून्यास्था । निष्प्रयोजनस्थितिः । यथा,—
“विलक्षणं मतं स्थानं यद्भवेन्निष्प्रयोजनम् ॥”
इति भागुरिः । इत्यमरभरतौ ॥
(यथा, भागवते । १० । ७० । ३८ ।
“यद्विद्यमानात्मतयावभासते
तस्मै नमस्ते स्वविलक्षणात्मने ॥ * ॥)
विलक्षणः, त्रि, (विभिन्नं लक्षणं यस्य ।) भिन्नः । इति जटाधरः ॥ (यथा, भागवते ।५ । ६ । ६ ।
“अथैवमखिललोकपालसमो विलक्षणैर्जड़-वदभूतवेशभाषाचरितैरविलक्षितभगवत्प्रभाव इति ॥” * ॥ यथा च भाषापरिच्छेदे । ११४ ।
“अस्मात् पृथगिदं नेति प्रतीतिर्हि विल-क्षणा ॥”
विशिष्टं लक्षणं यस्याः ।) विशेषलक्षणयुक्तः । यथा, मत्स्यपुराणे ।
“अशौचान्ताद्द्वितीयेऽह्नि शय्यां दद्याद्विल-क्षणाम् ।
काञ्चनं पुरुषं तद्वत् फलपुष्पसमन्वितम् ॥
संपूज्य द्विजदाम्पत्यं नानाभरणभूषणैः ।
वृषोत्सर्गश्च कर्त्तव्यो देया च कपिला शुभा ॥”
द्विजदम्पती पूजयित्वा काञ्चन प्रेतप्रतिकृतिरूपं पुरुषं फलवस्त्रयुतं शय्यायामारोप्य भूषित-द्विजदम्पतीभ्यां शय्यां दद्यात् । इति शुद्धि-तत्त्वम् ॥
विलग्नं, क्ली, (विशेषेण लग्नम् ।) मध्यः । यथा,—
“मध्योऽवलग्नं विलग्नं मध्यमोऽथ कटः कटिः ॥”
इति हेमचन्द्रः ॥
जन्मलग्नम् । यथा,—
“गोचरे वा विलग्ने वा ये ग्रहा रिष्टसूचकाः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥
गोचरे स्वराश्यपेक्षया यदा कदापि । विलग्ने जन्मलग्ने । इति संस्कारतत्त्वम् ॥ मेषादिलग्न-मात्रम् । यथा,—
“शुभग्रहार्कवारे च मृदुक्षिप्रध्रुवेषु च ।
शुभराशिविलग्ने च शुभं शान्तिकपौष्टिकम् ॥”
इति दीपिका ॥
संलग्ने, त्रि । यथा,—
“विलग्नं न स्त्रियां मध्ये त्रिषु स्यात्लग्नमात्रके ॥”
इति मेदिनी ॥
विलज्जः, त्रि, (विगता लज्जा यस्य ।) लज्जा-रहितः । निर्लज्जः । यथा,—
“तनयगतदिनेशे शैशवे सौख्यभागी
न भवति फलभागी यौवने व्याधियुक्तः ।
जनयति सुतमेकं निर्ण्णयं नाशयित्वा
चपलमतिविलज्जः क्रूरकर्म्मा कुचेलः ॥”
इति ज्योतिषे पञ्चमस्थानस्थरविफलम् ॥
विलपनं, क्ली, (वि + लप + ल्युट् ।) विलापः । भाषणम् । विपूर्व्वलपधातोः अनट्प्रत्ययेन निष्पन्नम् ॥
विलम्बः, पुं, (वि + लम्ब + घञ् ।) लम्बनम् । गौणः । यथा, देवीपुराणे ।
“अकालेऽप्यथवा काले तीर्थश्राद्धं तथा नरैः ।
प्राप्तैरेव सदा कार्य्यं कर्त्तव्यं पितृतर्पणम् ॥
पिण्डदानं तत्र शस्तं पितॄणाञ्चातिदुर्लभम् ।
विलम्बो नैव कर्त्तव्यो न च विघ्नं समाचरेत् ॥”
इति प्रायश्चित्ततत्त्वम् ॥
प्रभवादिषष्टिसंवत्सरान्तर्गतद्वात्रिंशवर्षम् । यथा, भविष्ये ।
“तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत् ।
अर्घो भवति सामान्यो विलम्बे तु भयं महत् ॥”
इति ज्योतिस्तत्त्वम् ॥
विलम्बनं, क्ली, (वि + लम्ब + ल्युट् ।) अशीघ्रम् । इति विलम्बितशब्दटीकायां भरतः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ४१ । २२ ।
“आगच्छ त्वरितं तथा न ते कार्य्यं विलम्बनम् ॥”)
विलम्बितं, त्रि, (वि + लम्ब + क्तः ।) अशीघ्रम् । इत्यमरे शीघ्रपर्य्यायेऽविलम्बितशब्ददर्शनात् ॥

(यथा, रघुवंशे । १ । ३३ ।
"विलम्बितफलै: कालं स निनाय मनोरथै: ॥")
मन्दत्वे, क्ली । यथा,—
"विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ॥"
इत्यमर: ॥
मन्दत्वशीघ्रत्व उभयेतरत्वयुतेषु नृत्यविषयकगमनविशेषेषु क्रमात्तत्त्वादिनामत्रयं विलम्बितादीनां त्रयाणां लयानां तत्त्वादिका: संज्ञा: । इति मधु: ॥ साक्षे ।
"द्वतामध्ययने वृत्तिं प्रयोगार्थे तु मध्यमाम् ।
शिष्याणामुपरोधार्थे विलम्बितां समाचरेत् ॥"
इति वैद्यवस्था ॥
नृत्यगीतादौ च प्रत्येकमवसरबोधार्थं कण्ठस्वरादि विलम्बनात् । विलम्बन्ते करचरणादय: प्रत्येकं गतिविशेषप्रदर्शनायात्रेति विलम्बितम् । लवि ङ स्रंसने शौचग्रामबदनार्थादिति आधारे क्त: । भावे क्त: इति सुकुट: । इति भरत: ॥
विलम्बगमनशीलपशु: । तद्यथा । द्विरदखड्गोष्ट्रमहिषगोवयचमरवराहा: । इति राजनिर्घण्ट: ॥
विलम्बी, [न्] त्रि, विलम्बविशिष्ट: । इति विलम्बशब्दादिनप्रत्ययेन निष्पन्न: ॥ (यथा, गीतगोविन्दे । ६ । ८ ।
"भवति विलम्बिनि विगलितलज्जा
विलपति रोदिति वासकसज्जा ॥"
विशेषेण लम्बते इति । वि+लम्ब+णिनि: ।
लम्बमान: । यथा, किराते । ५ । ६ ।
"उदितपक्षमिवारतनि:स्वनै:
पृथुनितम्बविलम्बिभिरम्बुदै: ॥"
पुं, क्ली । वत्सरविशेष: । यथा, बृहत्संहितायाम् । ८ । ३६ ।
"हेमलम्ब इति सप्तमे युगे
स्यादिलम्बि परतो विकारि च ।
शर्वरीति तदनु प्लव: स्मृतो
वत्सरो गुरुवशेन पञ्चम: ॥")
विलम्भ:, पुं, (वि+लभ+घञ् । नुम् ।) अतिदानम् । तत्पर्याय: । अतिसर्जनम् २ । इत्यमर: ॥
विलय:, पुं, (विशेषेण लीयन्ते पदार्था अस्मिन्निति । वि+ली+"एरच् ।" इत्यच् ।) प्रलय: । इति शब्दरत्नावली ॥ (यथा, भागवते । ७ । ६ । ३२ ।
"नस्येदमात्मनि जगद्विलयाम्बुमध्ये
शेषे त्मना निजसुखानुभवो निरीह: ॥"
विनाश: । यथा, माघे । ६ । १७ ।
"द्विवसोऽनुमित्रमगमद्विलयं
किमिहास्यते बत मयाबलया ॥")
विलवा, क्ली, श्वेतवला । इति रत्नमाला ॥
वि(बि)लवास:, पुं, (विले वासो यस्य ।) गाहकजन्तु: । इति राजनिर्घण्ट: ॥
वि(बि)लवासी, [न्] पुं, (विले वसतीति । वस+णिनि: ।) सर्प: । इति शब्दरत्नावली ॥ (रन्ध्रवासिनि, त्रि । यथा, महाभारते ।१.४।४३।२।
"अवि: पशूनां सर्व्वेषामहिश्च बिलवासिनाम् ॥)
श्रेष्ठ इति शेष: ॥)
वि(बि)लशय:, पुं, (विले शेते इति । शी+अच् ।) सर्प: । इति शब्दरत्नावली ॥ (बिलवासिनि, त्रि । यथा, महाभारते । १४ । ९० । ६ ।
"सक्तुप्रस्थेन तं नाहं जातयामो न्यनाद्विजान् ।
मानुषं वचनं प्राह धृष्टो बिलशयो महान् ॥")
विलसत्, [त्] त्रि, (वि+लस+शतृ ।) विलासयुक्त: । यथा,—
"व्रजसुभ्रुवो विलसत्कला: ।
अभवन् प्रिया सुरवैरिण: ॥"
इति छन्दोमञ्जरी ॥
विलाप:, पुं, (वि+लप+घञ् ।) अनुशोचनोक्ति: । तत्पर्याय: । परिदेवनम् २ । इत्यमर: ॥
अपि च ।
"क्रन्दनादौ विलाप: स्यात् परिदेवनमित्यपि ।"
इति शब्दरत्नावली ॥
विलापो दु:खजं वच: । इत्युज्ज्वलनीलमणि: ॥
(यथा, गीतगोविन्दे । १ । २६ ।
"उन्मादमदनमनोरथपथिक-
वधूजनजनितविलापे ।
अलिकुलसङ्कुलकुसुमसमूह-
निराकुलवकुलकलापे ॥")
विलाल:, पुं, यन्त्रम् । इति शब्दचन्द्रिका ॥
विडाल: । इत्यमरटीका ॥
विलास:, पुं, (वि+लस+घञ् ।) हावभेद: ।
इत्यमर: ॥ (यथा, कुमारे । ५ । १५ ।
"लतासु तन्वीषु विलासचेष्टितं
विलोलदृष्टं हरिणाङ्गनासु च ॥")
लीला । इति मेदिनी ॥ (यथा, भागवते । ३ । २५ । ३५ ।
"तैर्दर्शनीयावयवैरुदार-
विलासहासेक्षितवामसूक्तै: ॥")
"स्त्रीणां विलासादय: शृङ्गारभावजा: क्रिया हावशब्देनोच्यन्ते । प्रियसमीपगमने य: स्थानासनगमनविलोकनेषु विकारोऽकस्माच्च क्रोधस्मितचमत्कारमुखविकूणनं स विलास: । तथा च ।
'यो वल्लभां चानुगतो विकारो
गत्यासनस्थानविलोकनेषु ।
तथा स्मृतं क्रोधचमत्कृती च
विकूणनञ्चास्यगतं विलास: ॥'
तथान्यत्र ।
'तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु ।'
तात्कालिको दयितालोकनादिभव: ।" इति भरत: ॥ * ॥ अपि च ।
"गतिस्थानासनादीनां मुखनेत्रादिकर्म्मणाम् ।
तात्कालिकन्तु वैशिष्ट्यं विलास: प्रियसङ्गजम् ॥"
इत्युज्ज्वलनीलमणि: ॥
अन्यच्च ।
"यद्रूपं तदभेदेन स्वरूपेण विराजते ।
आह्लादादिभिरन्यादृक् स तदेकात्मरूपक: ।
स विलास: स्वांश इति धत्ते भेदद्वयं पुन: ॥"
तत्र विलास: ।
"स्वरूपमन्याकारं यत्तस्य भाति विलासत: ।
प्रायेणात्मसमं शक्त्या स विलासो निगद्यते ॥
परमव्योमनाथस्तु गोविन्दस्य यथा स्मृतम् ।
परमव्योमनाथस्य वासुदेवस्य यादृश: ॥"
स्वांश: ।
"तादृशो न्यूनशक्तिं यो व्यनक्ति स्वांश ईरित: ।
सङ्कर्षणादिर्मत्स्यादिर्यथा तत्तत् स्वधामसु ॥"
इति भागवतामृतम् ॥
विलासमन्दिरं, क्ली, (विलासस्य मन्दिरम् ।) क्रीडागृहम् । इति केचित् ॥
विलासविपिनं, क्ली, (विलासस्य विपिनम् ।) क्रीडावनम् । यथा,—
"यदीयहलतो विलोक्य विपदं
कलिन्दतनया जलोद्धतगति: ।
विलासविपिनं विवेश सहसा
करोतु कुशलं हली स जगताम् ॥"
इति छन्दोमञ्जरी ॥
विलासविभवालस:, त्रि, लुब्ध: । इति जटाधर: ॥
विलासिनी, स्त्री, (विलासोऽस्या अस्तीति । विलास+इनि: । ङीप् ।) नारी । इति राजनिर्घण्ट: ॥ (यथा, ऋतुसंहारे । ४ । ३ ।
"न बाहुयुग्मेषु विलासिनीनां
प्रयान्ति सङ्गं वलयाङ्गदानि ॥")
वेश्या । इति धनञ्जय: ॥ (यथा, महाभारते । ३ । ४६ । १४ ।
"सिद्धचारणगन्धर्व्वै: सा प्रयाता विलासिनी ।
बह्वाश्चर्य्येऽपि वै स्वर्गे दर्शनीयतमाकृति: ॥"
विलासशालिनी । यथा, गीतगोविन्दे ।१।४०।
"विलासिनि ! विलसति केलिपरे ॥")
विलासी, [न्] पुं, (विलासोऽस्यास्तीति । विलास+इनि: ।) भोगी । बाल: । (उभयार्थे प्रमाणं यथा, कुट्टनीमते । १८ ।
"तस्यां खगपतितनुरिव विलासिनां हृदयशोकसंजननी ॥"
"विले आसत इति विलासिन: सर्पा: पक्षे विलसनशीला भोगिन: ।" इति तट्टीका ॥ * ॥)
कृष्ण: । अग्नि: । चन्द्र: । इति मेदिनी ॥
स्मर: । हर: । इति शब्दरत्नावली ॥ (विलासशीले, त्रि । यथा, रघु: । ६ । ४१ ।
"परभृताविरुतैश्च विलासिन:
स्मरबलैरबलैकरसा: कृता: ॥")
विलीन:, त्रि, (वि+ली+क्त: ।) प्राप्तद्रवीभावघृतादि: । तत्पर्याय: । विद्रुत: २ द्रुत: ३ ।
इत्यमर: ॥ विश्लिष्ट: । विशेषेण लीन: । यथा,—
"करादस्य भ्रष्टे मधु शिखरिणि द्राक्सति शिशोर्विलीना: स्म: सत्यं नियतमवधेयं तदखिलै: ।
इति त्रस्यद्गोपाकुचितनिभृतालापजनितस्मितं बिभ्रद्देवो जगदवतु गोवर्द्धनधर: ॥"
इति छन्दोमञ्जरी ॥

विलेखनं, स्त्री, लेखनम्। विपूर्व्वकलिखधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम्॥

विलेपः, पुं, लेपः। विपूर्व्वकलिपधातोर्घञ्प्रत्ययेन निष्पन्नः॥ (यथा, भागवते। १०। ४२। ९।

"अथ व्रजन् राजपथेन माधवः
स्त्रियं गृहीताङ्गविलेपभाजनाम्।
विलोक्य कुब्जां युवतीं वराननां
पप्रच्छ यान्तीं प्रहसन् रसप्रदः॥")

विलेपनं, स्त्री, (विलिप्यन्तेऽङ्गान्यनेनेति। वि+लिप+ल्युट्।) गात्रानुलेपनयोग्यं पिष्टं घृष्टं वा सुगन्धिद्रव्यम्। तत्पर्य्यायः। गात्रानुलेपनी २ वर्त्तिः ३ वर्णकम् ४। इत्यमरः॥ "द्वे गात्रानुलेपनयोग्ये वर्त्तितविलेपने।
'वर्णकादिद्वयं घृष्टचन्दनादिविलेपने॥'
इति केचित्। विलिप्यतेऽनेन करणेऽनटि विलेपनम्।" इति तट्टीकायां भरतः॥ कुङ्कुमादिविलेपनम्। तत्पर्य्यायः। समालम्भः २। इति च संकीर्णवर्गे अमरः॥

विलेपनी, स्त्री, (वि+लिप्+कर्म्मणि करणे वा ल्युट्। ङीप्।) यवागूः। सुवेशस्त्री। इति मेदिनी॥

विलेपी, स्त्री, (विलिप्यतेऽसाविति। वि+लिप+कर्म्मणि घञ्। स्त्रियां ङीष्।) यवागूः। इत्यमरः॥
"अन्नं पञ्चगुणे साध्यं विलेपी च चतुर्गुणे।
मण्डश्चतुर्द्दशगुणे यवागूः षड्गुणेऽम्भसि॥"
इति वैद्यकोक्तो भेद इह नादृतः। इति तट्टीकायां भरतः॥ अस्या गुणाः।
"विलेपी तर्पणी लघ्वी ग्राहिणी क्षुत्तृषापहा॥"
इति राजवल्लभः॥

विलेपी, [न्] त्रि, लेपनकर्त्ता। विलेपयति यः इत्यर्थे णिनिप्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्सागरे। ३७। २५।
"ततः प्रागनुरागेण रञ्जितः स्वान्तरान् मम।
पश्चात् एतद्विलेपिन्या अङ्गरागेण ते करः॥")

विलेप्यः, पुं, (वि+लिप्+यत्।) यवागूः। इति शब्दरत्नावली॥ विलेपनीये, त्रि॥ (यथा, भागवते। ११। २७। १४।
"स्नपनं त्वविलेप्यायामन्यत्र परिमार्ज्जनम्॥")

वि(बि)लेवासी, [न्] पुं, (बिले गर्त्ते वसतीति। वस+णिनिः। "शयवासेति।" ६। ३। १८। सप्तम्या अलुक्।) सर्पः। इति शब्दरत्नावली॥

वि(बि)लेशयः, पुं, (बिले शेते इति। बिले+शी+"अधिकरणे शेतेः।" ३।२।१५। इत्यच्। शयवासेत्यलुक्।) सर्पः। इत्यमरः॥ मूषिकः। इति जटाधरः॥ गोधा। शशः। शल्लकी। यथा,—
"गोधाशशभुजङ्गाखुशल्लक्याद्या विलेशयाः।
बिलेशया वातहरा मधुरा रसपाकयोः।
बृंहणा बद्धविण्मूत्रा वीर्य्योष्णा अपि कीर्त्तिताः॥"
इति भावप्रकाशः॥
(गर्त्तशायिनि, त्रि। यथा, महाभारते। १। ४५। ४।
"स ददर्श पितॄन् गर्त्ते लम्बमानानधोमुखान्।
एकतन्त्ववशिष्टं वै वीरणस्तम्बमाश्रितान्।
तं तन्तुञ्च शनैराखुमाददानं बिलेशयम्॥")

विलोकनं, स्त्री, आलोकनम्। विपूर्व्वलोकधातोरनट्-(ल्युट्)-प्रत्ययेन निष्पन्नम्॥ (यथा, किराते। ३। १६।
"अनुचरेण धनाधिपतेरथो
नगविलोकनविस्मितमानसः॥")

विलोकितं, त्रि, आलोकितम्। विपूर्व्वलोकधातोः क्तप्रत्ययेन निष्पन्नम्॥

विलोचनं, स्त्री, (विलोच्यते दृश्यतेऽनेनेति। वि+लोचि+ल्युट्।) चक्षुः। इति जटाधरः॥ (यथा, कुमारे। ३। ६७।
"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि॥")
दर्शनञ्च॥ (विरुद्धे लोचने यस्येति। विकृतनयने, त्रि। यथा, देवीभागवते। ५। ३१। ४३।
"यदि ते मङ्गरेच्छास्ति कुरूपा भव भामिनि।
लम्बोष्ठी कुनखी क्रूरा ध्वाङ्क्षवर्णा विलोचना॥")

विलोटकः, पुं, (विशेषेण लुटतीति। वि+लुट्+ण्वुल्।) नलमीनः। इति शब्दचन्द्रिका। वेले माछ इति भाषा॥

विलोडनं, स्त्री, (वि+लुड्+ल्युट्।) मन्थनम्। आलोडनम्। यथा,—
"राधिका दधिविलोडनस्थिता
कृष्णवेणुनिनदैरथोद्धता।
यामुनं तटनिकुञ्जमञ्जसा
सा जगाम सलिलाहृतिच्छलात्॥"
इति छन्दोमञ्जरी॥

विलोडितं, स्त्री, (वि+लुड्+क्तः।) तक्रम्। इति राजनिर्घण्टः॥ आलोडिते, त्रि॥

विलोपः, पुं, विशेषेण लोपः। विपूर्व्वलुपधातोर्घञ्प्रत्ययेन निष्पन्नः॥ (यथा, कामन्दकीयनीतिसारे। ५। ६५।
"काले स्थाने च पात्रे च न हि वृत्तिं विलोपयेत्।
एतद्वृत्तिविलोपेन राजा भवति गर्हितः॥")

विलोभः, पुं, विलोभनम्। विशेषलोभः। विपूर्व्वकलुभधातोर्घञ्प्रत्ययेन निष्पन्नः॥

विलोमं, स्त्री, अरघट्टकः। इति मेदिनी॥

विलोमं, त्रि, विपरीतम्। तत्पर्य्यायः। प्रतिकूलम् २ अपसव्यम् ३ अपष्ठुरम् ४ वामम् ५ प्रसव्यम् ६ प्रतीपम् ७ प्रतिलोमम् ८ अपष्ठु ९। इति हेमचन्द्रः॥ सव्यम् १० विलोमकम् ११। इति जटाधरः॥ (यथा, वृहत्संहितायाम्। ९४। १२।
"हुतभुक्ज्वलितदृष्टिः स्वप्नशीलो विलोमो
भयकृतहितभक्षी नैकशोऽस्वक्छत्रच्च॥")

विलोमः, पुं, सर्पः। वरुणः। कुक्कुरः। इति मेदिनी॥

विलोमकः, त्रि, (विलोम एव। स्वार्थे कन्।) विपरीतः। इति जटाधरः॥

विलोमजिह्वः, पुं (विलोमा जिह्वा यस्य।) हस्ती। इति त्रिकाण्डशेषः॥

विलोमवर्णः, पुं. (विलोमः प्रतिलोमो वर्णः।) वर्णसङ्करजातिः। इति स्मृतिः॥

विलोमी, स्त्री, आमलकी। इति मेदिनी॥

विलोलः, त्रि, (विशेषेण लोलः।) चञ्चलः। यथा,—
"कापि विलासविलोलविलोचनखेलनजनितमनोजम्।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम्॥"
इति श्रीगीतगोविन्दे। १। ४२॥

वि(बि)ल्लं, स्त्री, आलवालम्। यथा,—
"अवधट्टावटौ तुल्यौ खल्लं बिल्लं तलञ्च तत्।
हिलप्रपालवालं स्यात् केदारः पांशुमर्द्दनः॥"
इति त्रिकाण्डशेषः॥
हिङ्गुः। इति शब्दचन्द्रिका॥

वि(बि)ल्लमूला, स्त्री, वाराहीकन्दः। इति शब्दचन्द्रिका॥

वि(बि)ल्लसूः, स्त्री, प्रसूतदशपुत्रा। यथा,—
"सप्तपुत्त्रप्रसूतायां सप्तसूः सुतवस्करा।
बिल्लसूर्दशपुत्त्रा स्यादेकाधिका तु वत्ससूः॥"
इति शब्दरत्नावली॥

वि(बि)ल्वं, स्त्री, बिल्ववृक्षस्य फलम्। इति, मेदिनी॥ (यथा,—
"खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥"
इत्युद्भटः॥)
पलपरिमाणम्। इति शब्दमाला॥ (यथा, सुश्रुते। ६। १८।
"अत ऊर्द्ध्वं प्रवक्ष्यामि पुटपाकप्रसाधनम्।
द्वौ बिल्वमात्रौ श्लक्ष्णस्य पिण्डौ मांसस्य पेषितौ।
द्रव्याणां बिल्वमात्रन्तु द्रवाणां कुडवो मतः॥")

वि(ब)ल्वः, पुं, (बिल भेदने+उल्वादयश्चेति साधुः।) फलवृक्षविशेषः। बेलगाछ इति भाषा॥ तत्पर्य्यायः। शाण्डिल्यः २ शैलूषः ३ मालूरः ४ श्रीफलः ५। इत्यमरः॥ महाकपित्थः ६ गोहरीतकी ७ पूतिवातः ८ अतिमङ्गल्यः ९ महाफलः १०। इति रत्नमाला॥ शल्यः ११ हृद्यगन्धः १२ शलाटुः १३ कर्कटाहः १४ शैलपत्रः १५ शिवेष्टः १६ पत्रश्रेष्ठः १७ त्रिपत्रः १८ गन्धपत्रः १९ लक्ष्मीफलः २० गन्धफलः २१ दुरारुहः २२ त्रिशाखपत्रः २३ त्रिशिखः २४ शिवद्रुमः २५ सदाफलः २६ सत्यफलः २७ सुभूतिकः २८ समीरसारः २९। अस्य फलगुणाः। मधुरत्वम्। हृद्यत्वम्। कषायत्वम्। गुरुत्वम्। पित्तकफज्वरातिसारनाशित्वम्। रुचिकारित्वम्। दीपनत्वञ्च। अस्य मूलगुणाः। त्रिदोषघ्नत्वम्। मधुरत्वम्। लघुत्वम्। वान्तिनाशित्वञ्च॥ अस्य कोमलफलगुणाः। स्निग्धत्वम्। गुरुत्वम्। संग्राहित्वम्।

दीपनत्वञ्च ॥ अस्य पक्वफलगुणाः । मधुरत्वम् । गुरुत्वम् । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । संग्राहित्वम् । त्रिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
“श्रीफलस्तुवरस्तिक्तो ग्राही रूक्षोऽग्निपित्तकृत् ।
वातः श्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ॥”
इति भावप्रकाशः ॥ * ॥
किञ्च ।
“विल्वं बालं कषायोष्णं पाचनं वह्निदीपनम् ।
संग्राहि तिक्तकटुकं तीक्ष्णं वातकफापहम् ।
पक्वं सुगन्धि मधुरं दुर्ज्जरं ग्राहि दोषलम् ॥
फलेषु परिपक्वेषु यो गुणः समुदाहृतः ।
विल्वादन्यत्र स ज्ञेयो विल्वमामं गुणोत्तरम् ॥
कफवातामपित्तघ्नी ग्राहिणी विल्वपेषिका ॥”
इति राजवल्लभः ॥
अन्यच्च ।
“काञ्जिके संस्थितं विल्वमग्निसन्दीपनं परम् ॥”
इति वैद्यकम् ॥ * ॥
विल्वोत्पत्त्यादिर्यथा,—
“विल्वादिपालनं कुर्य्यात् शुभं भयदमन्यथा ।
श्रीवृक्षान् रोपयेत् यत्र यदि स्वर्गान्न हीयते ॥
भग्नो लक्ष्मीश्च या धेनुर्गोरूपा सा गता
महीम् ।
तद्गोमयभवो विल्वः श्रीश्च तस्मादजायत ॥
निराकृतिं पतिं दृष्ट्वा क्रोधेन महता ततः ।
शप्ता सा उमया देवी सर्व्वभोग्या भवाधमे ॥
ततः संप्रणता भाना मामेवं भवतु प्रिये ।
प्रियत्वं सर्व्वलोकेऽपि सुरासुरनमस्कृता ॥
माता त्वं सर्व्वलोकानामबलानां विशेषतः ।
एवमात्मवशां कृत्वा शापमोक्षमयाचत ॥
वरं ददौ च सा कामं शापमोक्षप्रदं नृप ।
क्षीराब्धौ त्वं भगात्मेन सह गोभिर्धनेन च ॥
वसस्व मथने यावत् ततो विष्णुमवाप्स्यसि ।
पतिं त्वं सर्व्वलोकानां पूज्यं श्रेष्ठं महाबलम् ॥
तस्य वक्षःस्थिता भद्रे तुष्टा त्वं विचरिष्यसि ।
लोकभोग्या च भूतित्वादन्यथेषु नृपेषु च ॥
न जातिरूपशौर्य्यादि न वेषस्य न-शुभा मतिः ।
भविष्यति यदा चेह चञ्चला जलबिन्दुवत् ॥
विल्ववृक्षः प्रियः शम्भोस्तव योनिर्भविष्यति ।
सर्व्वपुष्पोत्तमश्रेष्ठो देवाहारो मनोरमः ॥ * ॥
अच्छेद्यः सर्व्वलोकानां क्लेशनाशः सदा नृणाम् ।
ये च पापा दुराचाराः श्रीतरोश्छेदकारिणः ।
ते सर्व्वेऽपि नरके पात्यन्ते अक्षयो दिनम् ॥
सदुःखिता भविष्यन्ति नरा दुष्कुलिनः सदा ।
तत्र देशे भयं नित्यं चिरं राजा न जीवति ।
न च द्रव्यपतिः कश्चिद्विल्ववृक्षस्य छेदकः ॥
क्रियते यत्र विच्छेदः सपुष्पफलिनस्तरोः ।
अनावृष्टिभयं घोरं तस्मिन् देशे प्रजायते ॥”
इति वह्निपुराणे वामनप्रादुर्भावनामाध्यायः ॥ * ॥
मतान्तरे तस्योत्पत्तिर्यथा,—
शिव उवाच ।
“मातः समुद्रतनये मा मा छिन्धि स्तनं परम् ।
यस्ते छिन्नस्तनो वामो जायतां पुनरेव सः ।
ज्ञाता ते परमा भक्तिः पूर्णस्तेन मनोरथः ॥
यश्च छिन्नस्तनो दत्तो मल्लिङ्गोपरि ते शुभे ।
सोऽस्तु वृक्षः क्षितौ पुण्यो नाम्ना श्रीफल
इत्युत ॥
मूर्त्तिर्मामिव वै भक्तिर्वृक्षः श्रीफलनामकः ।
त्वत्कीर्त्तये स्थितावाप्तां यावच्चन्द्रदिवाकरौ ॥
स तरुर्म्मम वै जद्मि परमः सुप्रियो भवेत् ।
तत्पत्रेणैव मे पूजा भविष्यति न चान्यथा ॥
स्वर्णमुक्ताप्रवालादि पुष्पाण्यन्यानि च ध्रुवम् ।
श्रीफलच्छदलेशस्य कलां नार्हन्ति कोटिकाम् ॥
यथा मे श्रीफलतरुर्यथा गङ्गाजलं मम ।
तथा प्रियतमं जद्मि त्रिपत्रः श्रीफलच्छदः ॥
इत्युक्तः स तथेत्युक्त्वा महेशोऽन्तर्हधे सखि ।
कृपालमोचनक्षेत्रे वृक्षः श्रीफलकोऽर्च्चितः ॥”
इति वृहद्धर्म्मपुराणे १० अध्यायः ॥ * ॥
तस्य गोमयोद्भवत्वं यथा,—
“यज्ञानां चेह संभूत्यै यथा हरिहरस्य च ।
गोमयो रोचना क्षीरं मूत्रं दधि घृतं गवाम् ॥
षड़ङ्गानि पवित्राणि तथा सिद्धिकराणि च ।
उत्थितो विल्ववृक्षस्तु गोमयान्मुनिसत्तम ।
तत्रासौ वसते लक्ष्मीः श्रीवृक्षस्तेन चोच्यते ॥”
इति वह्निपुराणे वैष्णवधर्म्मे शुद्धिव्रतनामाध्यायः ॥ * ॥
देव्युवाच ।
“वैशाखशुक्लपक्षस्य तृतीयायां सखि त्वयम् ।
जातो वै श्रीफलतरुर्म्माहात्म्यं तस्य कथ्यते ॥
जाते तु श्रीफलतरौ देवाः सर्व्वे सवासवाः ।
ब्रह्मा नारायणश्चापि देवपत्न्यः समागताः ॥
ददृशुः स्निग्धविटपं त्रिपत्रैर्मृदुलैर्युतम् ।
दीप्यमानं तेजसैव शिवरूपं शिवप्रदम् ॥
प्रणेमुः सिषिचुस्तत्र वासचक्रुः सुखान्विताः ।
तद्दृष्ट्वाय भगवानुवाच विष्णुरव्ययः ॥
विष्णुरुवाच ।
अयं नाम्ना विल्व इति मालूरः श्रीफलस्तथा ।
शाण्डिल्यश्चाथ शैलूषः शिवः पुण्यः शिवप्रियः ॥
देवावासस्तीर्थपदः पापघ्नः कोमलच्छदः ।
जयो विजयनामा च विष्णुस्त्रिनयनो वरः ॥
धूम्राक्षः शुक्लवर्णश्च संयमी श्राद्धदेवकः ।
इत्येकविंशतिं नाम्नां दधात्वेष तरूत्तमः ॥ * ॥
अमुःशतञ्चास्य मूलात् स्वर्गात्तीर्थसुच्यते ।
अधो भूमेस्तथा तीर्थमतस्तीर्थत्रयं सखि ॥
ऊर्द्ध्वपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्वयम् ।
अहं दक्षिणपत्रञ्च त्रिपत्रदलमित्युत ॥
अस्य च्छायाञ्च पत्रञ्च लङ्घयेन्न पदा स्पृशेत् ।
हरते लक्ष्मणादायुः पदा स्पृशेत् श्रियं हरेत् ॥
पद्मपुष्पसहस्रस्य फलपत्रसमापि च ।
दर्शने प्रसूतौ स्पर्शे स्नानसम्मार्ज्जने तथा ।
पूजने चयने दाने क्रमान्मन्त्रानुदीरयेत् ॥
विल्ववृक्ष महाभाग महेशस्य सदा प्रियः ।
शिवदर्शनकज्योतिः प्रसीदाश्रितताञ्चन ॥
नर एतेन मन्त्रेण प्रफुल्लाक्षः प्रगे शुभम् ।
प्रपश्येत् स शिवं पश्येत् प्रणमेत्तदनन्तरम् ॥
ॐ नमो विल्वतरवे सदा शङ्कररूपिणे ।
सफलानि ममाङ्गानि कुरुष्व शिवहर्षद ॥
मन्त्रेणानेन मालूरमष्टाङ्गैः प्रणमेत् कृती ।
स वैष्णवो मतो भक्तः स मे प्रियतरः परः ॥
शिवपूजक मालूर प्रियस्पर्श मङ्गलालय ।
स्पृशामि त्वां महापापसञ्चयान् मे प्रणाशय ॥
देवव्रतपरश्रेष्ठ स्थानक्ते सुमनोहरम् ।
क्रीड़न्त्यागत्य विबुधा मार्ज्जये तत् प्रसीद मे ॥
मन्त्रेणानेन विल्वस्य दशहस्तस्थलं न्यसेत् ।
सगोमयजलैः प्रातःसमये स तु वैष्णवः ॥
ॐ द्रुमाय श्रीफलाय नमो दशभिरक्षरैः ।
मन्त्रेण पूजयेद्विल्वं यथेच्छशक्तिक्रमात्तथा ॥
पुण्यवृक्ष महाभाग मालूर श्रीफल प्रभो ।
महेशपूजनार्थाय तत्पत्राणि चिनोम्यहम् ॥
मन्त्रेणानेन चिनुयाद्विल्वपत्राणि भक्तितः ।
पक्षान्तराद्दशीतायं मध्याह्नभिन्नकालतः ॥
शाखाभङ्गो न कर्त्तव्यो नैवारोहेत्तथा तरुम् ।
वरमारुह्य चिनुयान्न शाखाभञ्जनं क्वचित् ॥
खण्डितैश्च शिवः पूज्यः पत्रैरन्यैश्च खण्डितैः ।
षण्मासानन्तरं विल्वपत्रं पर्य्युषितं भवेत् ॥
पूज्या एतेन वै देवाः सर्व्वलम्बोदरौ विना ।
विल्ववृक्षवनं यत्र सा तु वाराणसी पुरी ॥
पञ्च विल्वद्रुमा यत्र तत्र तिष्ठेत् स्वयं हरिः ।
सप्त विल्वद्रुमा यत्र तत्र दुर्गायुतो हरः ॥
एको विल्वतरुर्यत्र तत्र शम्भुर्म्मया सह ।
विल्ववृक्षा यत्र दश तत्र शम्भुर्गणैः सह ॥
एतान्युक्तानि तीर्थानि देवाः सर्व्वे मरुद्गणैः ।
यत्र वाह्यां गृहस्यस्य कोणे ईशाननामके ।
जायते श्रीफलतरुर्न तत्र विपदः क्वचित् ॥
पूर्व्वस्यां सुखदः स स्याद्दक्षिणे यमभीतिहा ।
पश्चिमे च प्रजादायी वृक्षो विल्व उदाहृतः ।
श्मशाने च नदीतीरे प्रान्तरे वा वनान्तरे ।
विल्ववृक्षतलं प्रोक्तं सिद्धपीठस्थलं सुधीः ॥
न मध्यप्राङ्गणे वृक्षं स्थापयेत् श्रीफलाख्यकम् ।
दैवाद्यदि प्रजायेत तदा शिववदर्च्चयेत् ॥
चैत्रादिचतुरो मासान् शम्भवे परमात्मने ।
दत्तं स्याद्विल्वपत्रैकं लक्षधेनुसमं सुराः ॥
मध्याह्नकाले ये मर्त्या विल्वं कुर्य्युः प्रदक्षिणम् ।
तैः सुमेरुगिरिवरः कृत एव प्रदक्षिणम् ॥
न छिन्द्यात् श्रीफलतरुं न दहेत् काष्ठमेव च ।
विना ब्राह्मणयज्ञार्थं पतितो विल्वविक्रयी ॥
पक्वविल्वसमुद्दृष्टं यो धत्ते मूर्ह्नि मानवः ।
यमाधिकारो नात्र स्यात् हृतः पापोपपातकैः ॥
विल्वपत्रं फलं वीजं भूमौ पतितमीश्वरः ।
स्वयं गृह्णाति शिरसा वैयर्थ्यभयशङ्कितः ॥
चैत्रादिचतुरो मासान् सिञ्चेद्विल्वतरुं कृती ।
यथा स्निग्धो भवेद्वृक्षस्तथा तत्पितरोऽपि च ॥
चैत्रादिचतुरो मासान् सदा भ्रमति शङ्करः ।
नवीनविल्वपत्रार्थी भुक्तिमुक्तिप्रदायकः ॥
हरिनामगारे यत्र वैद्यनाथो महेश्वरः ।
तत्राद्यो विल्ववृक्षः स्वर्गवृक्ष उदाहृतः ॥

कामरूपे कामतरुः काश्यामुक्तस्तथादिमः ।
काञ्चीपुरे पुरः प्रोक्तः श्रीफलोऽव्ययपुण्यदः ।
तेऽपि तीर्थविशेषाः स्युस्तीर्थेष्वपि सदातुलाः ॥
देव्युवाच ।
एतस्मिन्नेव काले तु शम्भुरागत्य वै सखि ।
ब्रह्मणा विष्णुना पत्रैः पूजितः श्रीफलैरभूत् ॥
ततः सर्व्वे यथास्थानं जग्मुर्नारायणादयः ।
कथितोऽयं मया सख्यौ विल्वदृक्षस्तरूत्तमः ॥
अयं वा संप्रोक्तः शिवतरुकथापुण्यनिचयः
पवित्रः श्रोतव्यः श्रवणरमणीयः खलु सताम् ।
शिवे विष्णौ भेदापहरण उदारः सुमनसां
सुसेव्यः संपाद्यः प्रभवति शिवस्यापि निकटः ॥”
इति च वृहद्धर्म्मपुराणे विल्ववृक्षमाहात्म्यम्
११ अध्यायः ॥*॥ तन्त्रमते तस्योत्पत्तिर्यथा,—
देव्युवाच ।
“कथं सा विष्णुवनिता विल्ववृक्षो बभूव ह ।
ज्योतीरूपं महेशं प्रार्थिता ब्रह्मादिभिः सदा ॥
तत्र मेऽनुग्रहाद्वाणी सर्व्वेषां प्रियतां गता ।
विष्णोरतिप्रिया नित्यं साभूत् सरस्वती सदा ॥
तादृक् प्रीतिर्न लक्ष्म्याश्च जायते केशवस्य च ।
इतिचिन्तापरा लक्ष्मीर्ययौ श्रीशैलमन्दिरम् ॥
शम्भु मल्लिङ्गमेकान्तं तपस्तेपेऽतिदारुणम् ।
तथापि यदि नैवाभूत् कृपा मे परमेश्वरि ॥
तदा सा वृक्षरूपेण स्थिता लिङ्गप्रिया सती ।
पत्रैः पुष्पैः फलैः स्वीयैः पूजयामास सन्ततम् ॥
कोटिवर्षं महादेवि ततो मेऽनुग्रहोऽभवत् ।
तेनैवानुग्रहेणैव विष्णोर्वक्षःस्थिताभवत् ॥
सदैव परमेशानि विप्रलब्धा सदैव हि ।
अतस्तु कारणाद्देवि तद्रूपेण हरिप्रिया ॥
सदैव पूजयेन्मां सा मद्भक्ता सातुला शिवे ।
अतस्तं वृक्षमाश्रित्य तिष्ठामि च दिवानिशम् ॥
सर्व्वतीर्थमयो देवि सर्व्वदेवमयः सदा ।
श्रीवृक्षः परमेशानि अतएव न संशयः ॥*॥
तत्फलैस्तत्प्रसूनैर्व्वा तत्पत्रैः प्रपूजयेत् ।
तत्काष्ठचन्दनैर्व्वापि स मे भक्तः स मे प्रियः ॥
तत्काष्ठचन्दनं भाले यो धारयति सम्भ्रमात् ।
तत्तु शिवमुद्रा वा नमेद्देवी मुदान्विता ॥
अतस्तच्चन्दनं देवि न धारयति कश्चन ।
तत्पत्रं तत्प्रसूनं वा कदापि धारयेन्नहि ॥
विल्वमूले महेशानि प्राणांस्त्यजति यो नरः ।
रुद्रदेहो भवेत् सद्यः पापकोटियुतोऽपि सन् ॥”
इति योगिनीतन्त्रे पूर्व्वखण्डे ५ पटलः ॥*॥
अपि च ।
“विल्ववृक्षं तथा देवि भगवान् शङ्करः स्वयम् ।
विल्ववृक्षतले स्थित्वा यदि प्राणांस्त्यजेत् सुधीः ॥
तत्क्षणान्मोक्षमाप्नोति किन्तस्य तीर्थकोटिभिः ॥
यत्र ब्रह्मादयो देवास्तिष्ठन्ति शक्तिहेतवे ।
विल्ववृक्षतले स्थानं यदि विष्ठादिपूरितम् ।
तदेव शाङ्करं क्षेत्रं सर्व्वतीर्थमयं सदा ॥
सर्व्वपीठमयं तत्तु सर्व्वदेवमयं सदा ।
न त्यजेत् शाङ्करं क्षेत्रं न च गङ्गां त्यजेत्
प्रिये ॥
समीपे स च पार्व्वत्ति विल्ववृक्षो यदि प्रिये ।
काशीपुरसमं तत्तु तत्र प्राणान् त्यजेद्यदि ।
किन्तस्य कोटितीर्थेन काशीवासेन किं प्रिये ॥”
इति पुरश्चरणरसोल्लासे १० पटलः ॥*॥
तद्दानविधिर्यथा,—
“पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखम् ।
यथोत्पन्नं तथा देयं विल्वपत्राण्यधोमुखम् ॥”
इति मातृकातन्त्रे ५५ पटलः ॥
श्रीशिव उवाच ।
“शृणु देवि प्रवक्ष्यामि रहस्यं त्रिजटात्मकम् ।
पत्रं ब्रह्ममयं देवि अद्भुतं वरवर्णिनि ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा ॥
ब्रह्मविष्णुशिवाः पत्रे वृन्तञ्च शक्तिरूपिणी ।
वृन्तमूले तु वज्रं स्यात् पत्रे ब्रह्मपदं प्रिये ॥
त्रिजटापत्रकेकेन हरं वा हरिमर्च्चयेत् ।
कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः ॥
पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकम् ।
दत्त्वा यद्यत् फलं प्राप्तं तस्मात् कोटिगुणं
भवेत् ॥
सर्व्वैरर्च्चनतो देवि त्रिजटामेकमर्पणम् ।
कैवल्यदो हरिश्चैव दास्येऽहं त्वां स्वरूपताम् ॥
त्वयि कैवल्यदं ज्ञानं धर्म्मकामार्थदं प्रिये ।
वज्रहीनमिदं देवि प्राप्नुयाद्वाञ्छितं फलम् ॥
सवज्रं म्रियते नूनं वज्राघातेन पार्व्वति ।
तस्माच्च साधकेन्द्रेण वज्रहीनं प्रदापयेत् ॥”*॥
विल्वपत्रशाखाग्रहणानन्तरगमनफलम् । यथा,
“शाखां गृहीत्वा यो गच्छेत् सर्व्वसिद्धिमवा-
प्नुयात् ।
ऊर्द्ध्वे सुदर्शनं रक्षेदधः पाशुपतस्तथा ।
पुरो माहेश्वरी रक्षेत् पृष्ठे च शूलधारिणी ।
दक्षपार्श्वे च श्रीनाथो वामपार्श्वे प्रजापतिः ।
चन्द्रसूर्य्यौ धृतौ छत्रमहं पादौ करौ सदा ॥”
इति ज्ञानभैरवतन्त्रे शिवपार्व्वतीसंवादे ६
पटलः ॥ (अस्य गुणाः यथा,—
“बालं विल्वफलं ग्राहि दीपनम्पाचनङ्कटु ।
कषायोष्णं लघु स्निग्धं तिक्तं वातकफापहम् ॥
पक्वं गुरु त्रिदोषं स्याद्दुर्ज्जरं पूतिमारुतम् ।
विदाहि विष्टम्भकरं मधुरं वह्निमान्द्यकृत् ॥
फलेषु परिपक्वं यद्गुणवत्तदुदाहृतम् ।
विल्वादन्यत्र विज्ञेयमामन्तद्धि गुणाधिकम् ॥
द्राक्षाविल्वशिवादीनां फलं शुष्कं गुणाधि-
कम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वि(वि)ल्वपेषिका, स्त्री, (विल्वस्य पेषिका ।) शुष्कविल्वखण्डम् । वेलशुँठा इति भाषा । यथा,—
“कफवातामशूलघ्नी ग्राहिणी विल्वपेषिका ।”
इति राजनिर्घण्टः ॥

त्रि(वि)ल्वा, स्त्री, (विल्व+टाप् ।) हिङ्गुपत्री । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या हिङ्गुपत्रीशब्दे ज्ञातव्याः ॥)

विवक्षा, स्त्री, वक्तुमिच्छा । सनन्तवचधातोरप्रत्ययेन निष्पन्नमिदम् । यथा । विवक्षावशात् कारकाणि भवन्ति । इति व्याकरणटीका ॥ शक्तिः । यथा,—
“प्रकृत्यर्थोऽपि खल्वेतद्दृश्यस्य विशेषणम् ।
संख्यया तुल्यनीतित्वादविवक्षां प्रपद्यते ॥”
एत्येकादशीतत्त्वम् ॥

विवक्षितः, त्रि, वक्तुमिष्टः । सनन्तवचधातोः क्तप्रत्ययेन निष्पन्नमिदम् । शक्यार्थः । यथा । उपादेयगतायाः संख्याया विवक्षितत्वं युक्तम् । अनुपादेयगता संख्या न विवक्षिता । इति माधवाचार्य्यः । इत्येकादशीतत्त्वम् ॥

विवदमानः, त्रि, विवादकर्त्ता । विपूर्व्ववदधातोः शानप्रत्ययेन निष्पन्नः ॥

विवधः, पुं, (विविधो वधो हननं गमनं वा यत्र ।) पर्य्याहारः । स तु धान्यतण्डुलादिः । मार्गः । पन्थाः । इत्यमरभरतौ ॥ व्रीह्यादेः पर्य्याहरणम् । इति स्वामी ॥ उपरितो बद्धशिक्यस्कन्धवाह्यकाष्ठम् । वाँक् इति ख्यातम् । इति भानुदीक्षितः ॥ भारः । इति मुकुटधृतविश्वः ॥

विवधिकः, पुं, (विवधेन हरतीति । विवध+“विभाषा विवधवीवधात् ।” ४ । ४ । १७ । इति ष्ठन् ।) वैवधिकः । इत्यमरटीका सारसुन्दरी ॥

विवरं, क्ली, (विवृणोतीति । वि+वृ+पचाद्यच् ।) छिद्रम् । इत्यमरः ॥ (यथा, रघुः ।११।१८।
“यश्चकार विवरं शिलाघने
ताड़कोरसि स रामसायकः ।
अप्रविष्टविषयस्य रक्षसां
द्वारतामगमदन्तकस्य तत् ॥”)
दोषः । इति मेदिनी ॥ (यथा, महाभारते । १ । १४१ । १७ ।
“एकाग्रः स्यादविवृतो नित्यं विवरदर्शकः ।
राजन्नाध्यं सपत्नेषु नित्योद्विग्नः समाचरेत् ॥”
अवकाशः । यथा, भागवते । ५ । १० । १२ ।
“विशेषबुद्धेर्विवरं मनाक् च
पश्याम यन्न व्यवहारतोऽन्यत् ॥”)

विवरणं, क्ली, (वि+वृ+ल्युट् ।) व्याख्या । इति हलायुधः ॥

विवरनालिका, स्त्री, (विवरयुक्तं नालं यस्याः ।) वेणुः । इति त्रिकाण्डशेषः ॥

विवर्णः, पुं, (विरुद्धो वर्णः ।) नीचः । इत्यमरः ।२।१०।१६॥ (यथा, मार्कण्डेये । ४१।१० ।
“भैक्षचर्य्या विवर्णेषु जघन्या वृत्तिरिष्यते ॥”
त्रि, विकृतो वर्णो यस्य ।) मलिनः ॥ (यथा, रामायणे । २ । २६ । ८ ।
“विवर्णवदनं दृष्ट्वा तं प्रस्विन्नममर्षणम् ।
आह दुःखाभिसन्तप्ता किमिदानीमिदं प्रभो ॥”)

विवर्त्तः, पुं, (वि+वृत्+घञ् ।) समुदायः । अपवर्त्तनम् । नृत्यम् । इति विश्वः ॥ (प्रतिपन्नः । यथा, नैषधे । ३ । ६४ ।
“ईशाणिमैश्वर्य्यविवर्त्तमध्ये
लोकेशलोकेशयलोकमध्ये ॥”

समवायिकारणविसदृशकार्य्योत्पत्तिः । यथा, सांख्यतत्त्वकौमुद्याम् ।
“एकस्य सतो विवर्त्तः कार्य्यजातं नतु वस्तु सत् ।”)

विवर्त्तनं, क्ली, परिभ्रमणम् । विपूर्व्वकवृतधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम् ॥ (यथा, किराते । ५ । ४० ।
“कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥”)

विवशः, त्रि, (विरुद्धं वष्टीति । वि+वश+अच् ।) अवश्यात्मा । अरिष्टदुष्टधीः । इति मेदिनी ॥ द्वे आसन्नमरणसूचितलक्षणेन दूषितबुद्धौ । विरुद्धं वष्टि विवशः अल् । आसन्नमरणज्ञापकं लिङ्गमरिष्टम् । तेन दुष्टा धीर्यस्य स तथा । इत्यमरटीकायां भरतः ॥

विवस्वती, स्त्री, सूर्य्यनगरी । इति मेदिनी ॥

विवस्वान्, [त्] पुं, (विशेषेण वस्ते आच्छादयतीति । वि+वस्+क्विप् । विवस्तेजोऽस्यास्तीति । विवस्+मतुप् । मस्य वः । “तसौ मत्वर्थे ।” १।४।१९ । इति भत्वाद्रुत्वाभावः ।) सूर्य्यः । (यथा, किराते । ५ । ३८ ।
“भवति दीप्तिरदीपितकन्दरा
तिमिरसंवलितेव विवस्वतः ॥”)
अर्कवृक्षः । इत्यमरः ॥ देवता । इति मेदिनी ॥ अरुणः । इति शब्दरत्नावली ॥ वैवस्वतमनुः । इत्यजयः ॥ (मनुष्यः । इति निघण्टुः ।२।३।२४॥ “वस निवासे इत्यस्मात् ‘अन्येभ्योऽपि दृश्यन्ते’ इति क्विप् । इग्निग्रहणात् भावे भवति । विविधं वसनं विवः । तद्वन्तो विवस्वन्तः । सर्व्वस्यापि मनुष्यस्य यत्किञ्चित् विवसनमस्ति ;” इति तट्टीका ॥ * ॥ परिचरणशीले, त्रि । यथा, ऋग्वेदे । १० । ६५ । ६ ।
“देवेभ्यो दाशद्धविषा विवस्वते ॥”
“हविषा अन्नेन देवान् विवस्वते परिचरते ।”
इति तद्भाष्ये सायणः ॥)

विवाकः, त्रि, विवेचनकर्त्ता । यथा,—
“अर्थिप्रत्यर्थिनोर्व्वचनं विरुद्धाविरुद्धं सभ्यैः सह विविनक्ति विवेचयति वा विवाकः ।” इति मिताक्षरा ॥

विवादः, पुं, विरुद्धो वादो विवादः । स च धनविभागादिविषयन्यायादिः । इति भरतः ॥ तत्पर्य्यायः । व्यवहारः २ । इत्यमरः ॥ ऋणादिन्यायः ३ । इति जटाधरः ॥
“ऋणादिदायकलहे द्वयोर्ब्बहुतरस्य वा ।
विवादो व्यवहारश्च द्वयमेतन्निगद्यते ॥”
इति शब्दरत्नावली ॥ * ॥
मात्रादिना विवादनिषेधो यथा,—
“आचरेत् सर्व्वधर्म्मं तद्विरुद्धन्तु न चाचरेत् ।
मातापित्रतिथीत्युच्चैर्विवादं नाचरेत् गृही ॥”
इति गारुडे ९६ अध्यायः ॥ * ॥
अष्टादश विवादस्थानानि यथा,—
“तेषामाद्यमृणादानं निःक्षेपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्यानपकर्म्म च ॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥
सीमाविवादधर्म्मश्च पारुष्ये दण्डवाचिके ।
स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेव च ॥
स्त्रीपुंधर्म्मो विभागश्च द्यूतमाह्वयमेव च ।
पदान्यष्टादशैतानि व्यवहारस्थिताविह ॥”
इति मनुः ॥
अस्यार्थः । स्वधनस्यान्यस्मिन्नर्पणरूपो निक्षेपः । अस्वामिना च कृतो विक्रयः । सम्भूय वणिगादीनां क्रियानुष्ठानम् । दत्तस्य धनस्यापात्रबुद्ध्या क्रोधादिना वा ग्रहणम् । कर्म्मकारस्य भृतेरदानम् । कृतव्यवस्थातिक्रमः । क्रये विक्रये च कृते पश्चात् या विप्रतिपत्तिः । स्वामिपशुपालयोर्विवादः । ग्रामादिसीमाविप्रतिपत्तिः । वाक्पारुष्यं आक्रोशनादि । दण्डपारुष्यं ताडनादि । स्तेयं निह्नवेन धनग्रहणम् । साहसं प्रसह्य धनहरणादि स्त्रियाश्च परपुरुषसम्पर्कः । स्त्रीसहितस्य पुंसो धर्म्मव्यवस्था । पैतृकादिधनस्य विभागः । द्यूतं अक्षादिक्रीडा । आह्वय पणव्यवस्थापूर्व्वकं पक्षिमेषादिप्राणियोधनम् । इति कुल्लूकभट्टः ॥ (कलहः । यथा, रघुः । ७ । ५३ ।
“परस्परेण क्षतयोः प्रहर्त्तो-
रुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्त्यभावेऽपि कयोश्चिदासी-
देकाप्सरःप्रार्थितयोर्विवादः ॥”)

विवादानुगतः, त्रि, (विवादं अनु गतः ।) विवादकर्त्ता । यथा, मिताक्षरायाम् ।
“विवादानुगतं पृष्ट्वा ससभ्यस्तत् प्रयत्नतः ।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः ॥”

विवादी, [न्] त्रि, (विवादोऽस्यास्तीति । विवाद+इनिः ।) विवादकर्त्ता । यथा,—
“अनुभावी च यः कश्चित् कुर्य्यात् साक्ष्यं
विवादिनाम् ॥”
इति व्यवहारतत्त्वम् ॥

विवाहः, पुं, (विशिष्टं वहनम् । वि+वह+घञ् ।) उद्वाहः । दारपरिग्रहः । तत्पर्य्यायः । उपयमः २ परिणयः ३ उद्वाहः ४ उपयामः ५ पाणिपीडनम् ६ । इत्यमरः ॥ दारकर्म्म ७ करग्रहः ८ । इति शब्दरत्नावली ॥ पाणिग्रहणम् ९ निवेशः १० पाणिकरणम् ११ । इति जटाधरः ॥ स चाष्टविधः । यथा,—
“ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥
यज्ञस्थायर्त्विजे दैवमादायार्षस्तु गोयुगम् ।
चतुर्द्दशप्रथमजः पुनात्युत्तरजश्च षट् ॥
इत्युक्त्वा चरतां धर्म्मं सह या दीयतेऽर्थिने ।
सकायः पावयेत्तज्जः षड्वंश्यांश्च सहात्मना ॥
आसुरो द्रविणादानात् गान्धर्व्वः समयान्मिथः ।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात् ॥”
इति याज्ञवल्क्यः ॥ * ॥
अपि च ।
“गृहीतविद्यो गुरवे दत्त्वा च गुरुदक्षिणाम् ।
गार्हस्थ्यमिच्छन् भूपाल कुर्य्याद्दारपरिग्रहम् ॥
वर्षैरेकगुणां भार्य्यामुद्वहेत्त्रिगुणः स्वयम् ।
नातिकेशामकेशां वा नातिकृष्णां न पिङ्गलाम् ॥
निसर्गतोऽधिकाङ्गीं वा न्यूनाङ्गीमपि नोद्वहेत् ।
अविशुद्धां सरोमां वा कुलजां वातिरोमिणीम् ॥
न दुष्टां दुष्टवाचाटां व्याधिनीं पितृमातृतः ।
न श्मश्रुव्यञ्जनवतीं न चैव पुरुषाकृतिम् ॥
न घर्घरस्वरां क्षामवाक्यां काकस्वरां न च ।
नानिबद्धेक्षणां तद्वद्वृत्ताक्षीं नोद्वहेद्बुधः ॥
यस्याश्च रोमशे जङ्घे गुल्फौ चैव तथोन्नतौ ।
कूपौ यस्या हसन्त्याश्च गण्डयोस्तां च नोद्वहेत् ॥
नातिरूक्षच्छविं पाण्डुकरजामरुणेक्षणाम् ।
आपीनहस्तपादाञ्च न कन्यामुद्वहेद्बुधः ॥
न वामनां नातिदीर्घां नोद्वहेत् संहतभ्रुवम् ।
न चातिच्छिद्रदशनां न करालमुखीं नरः ॥
पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् ।
गृहस्थश्चोद्वहेत् कन्यां न्यायेन विधिना नृप ॥
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वराक्षसौ चान्यौ पैशाचश्चाष्टमोऽधमः ॥
एतेषां यस्य यो धर्म्मो वर्णस्योक्तो मनीषिभिः ।
कुर्व्वीत दाराहरणं तेनान्यं परिवर्ज्जयेत् ॥
स धर्म्मचारिणीं प्राप्य गार्हस्थ्यं सहितस्तया ।
समुद्वहेद्ददात्येतत् सम्यगूढं महाफलम् ॥”
इति विष्णुपुराणे ३ अंशे १० अध्यायः ॥ * ॥
अन्यच्च ।
याज्ञवल्क्य उवाच ।
“शृण्वन्तु मुनयो धर्म्मान् गृहस्थस्य यतव्रताः ।
गुरवे च धनं दत्त्वा स्नात्वा च तदनुज्ञया ॥
अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीम् ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।
पञ्चमात् सप्तमादूर्द्ध्वं मातृतः पितृतस्तथा ॥
दशपूरुषविख्यातात् श्रोत्रियाणां महाकुलात् ।
सवर्णः श्रोत्रियो विद्वान् वरदोषान्वितो न च ॥
यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
न तन्मम मतं यस्मात्तत्रायं जायते स्वयम् ॥
तिस्रो वर्णानुपूर्व्व्येण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्य्या वा शूद्रजन्मनः ॥
ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥
यज्ञस्थायर्त्विजे दैवमादायार्षस्तु गोयुगम् ।
चतुर्द्दश प्रथमजः पुनात्युत्तरतश्च षट् ॥
इत्युक्त्वा चरतां धर्म्मं सह या दीयतेऽर्थिने ।
सकायः पावयेत्तज्जः षड्वंश्यानात्मना सह ॥
आसुरो द्रविणादानात् गान्धर्व्वः समयान्मिथः ।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात् ॥
चत्वारो ब्राह्मणस्याद्यास्तथा गान्धर्व्वराक्षसौ ।
राज्ञस्तथासुरो वैश्ये शूद्रे चान्त्यस्तु गर्हितः ॥
पाणिर्ग्राह्यः सवर्णासु गृह्णीत क्षत्रिया शरम् ।
वैश्या प्रतोदमादद्याद्वेदने चाग्रजन्मनः ॥

पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्व्वनाशे प्रकृतिस्थः परः परः ॥
अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ ।
एषामभावे दातॄणां कन्या कुर्य्यात् स्वयंवरम् ॥
सकृत् प्रदीयते कन्या हरंस्तां चौरदण्डभाक् ।
अदुष्टां हि त्यजन् दण्ड्यः सुदुष्टां हि परि-
त्यजेत् ।"

इति गारुडे ९५ अध्यायः ॥ * ॥

अपरञ्च ।

यम उवाच ।

"कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वल-
ङ्कृताम् ।
ब्रह्मदेयां द्विजश्रेष्ठ ब्रह्मलोकं व्रजन्ति ते ॥
कन्यादानन्तु सर्व्वेषां दानानामुत्तमं स्मृतम् ।
महान्त्यपि समृद्धानि गोऽजाविकधनान्यतः ।
श्रोत्रियस्य दरिद्राणि कुलानि परिवर्ज्जयेत् ॥
हीनक्रियाणि पापानि सुनेऽप्युद्वेगकारिणाम् ।
क्षयामयवदापस्मारिश्वित्रिकुष्ठिकुलानि च ॥
यस्यास्तु न भवेद्भ्राता न च विज्ञायते पिता ।
नोपयच्छेत तां प्राज्ञः पुत्त्रिकाधर्म्मशङ्कया ॥
चतुर्णामपि वर्णानां प्रेत्य चेह हिताय च ।
अष्टाविमान् समासेन स्त्रीविवाहान्निबोधत ॥
ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥
प्रसाद्य चार्च्चयित्वा च श्रुतशीलवते स्वयम् ।
दद्यात् कन्यां यथान्यायं ब्राह्मो धर्म्मः प्रकी-
र्त्तितः ॥ १ ॥
यज्ञे तु वितते सम्यगृत्विजे कर्म्म कुर्व्वते ।
अलङ्कृत्य तथा दानं दैवो धर्म्मः प्रशस्यते ॥२॥
एकं गोमिथुनं द्वे वा वरादादाय धर्म्मतः ।
कन्यादानन्तु विधिवदार्षो धर्म्मः स उच्यते ॥३॥
सहोभौ चरतां धर्म्ममिति चैवानुभाष्य तु ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥४॥
ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म्म उच्यते ॥५॥
इच्छयान्योन्यसंयोगात् कन्यायाश्च वरस्य च ।
गान्धर्व्वः स तु विज्ञेयो मिथुन्यः कामसम्भवः ॥६॥
हत्वा छित्त्वा च भित्त्वा च प्रसह्य रुदतीं गृहात् ।
हरणं क्रियते यत्र राक्षसो विधिरुच्यते ॥ ७ ॥
सुप्तां मत्तां रहः कन्यां छद्मना नीयते तु या ।
स पापिष्ठो विवाहानां पैशाचः प्रथितो-
ऽष्टमः ॥ ८ ॥
पञ्चानान्तु त्रयो धर्म्या द्वावधर्म्म्यौ द्विजोत्तम ।
पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन ॥
चतुर्णामपि वर्णानामेष धर्म्मः सनातनः ।
पृथक् पृथग्वा मिश्रौ वा कर्त्तव्यौ नात्र संशयः ॥
कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
विवाहकाले संप्राप्ते यथोक्ते सदृशे वरे ।
क्रमात् क्रमं क्रतुशतमनुपूर्व्वं लभन्ति ते ॥
श्रुत्वा कन्याप्रदानन्तु पितरः प्रपितामहाः ।
विमुक्ताः सर्व्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते ॥
ब्राह्मेण तु विवाहेन यस्तु कन्यां प्रयच्छति ।
ब्रह्मलोकं व्रजेच्छीघ्रं ब्रह्माद्यैः पूजितः सुरैः ।
दैवेन तु विवाहेन यस्तु कन्यां प्रयच्छति ।
भित्त्वा द्वारन्तु सूर्य्यस्य स्वर्गलोकञ्च गच्छति ॥
गान्धर्व्वेण विवाहेन यस्तु कन्यां प्रयच्छति ।
गन्धर्व्वलोकमासाद्य क्रीडते देववच्चिरम् ॥
शुल्केन दत्त्वा यो कन्यां तां पश्चात् सम्यगर्च्चयेत् ।
स किन्नरैश्च गन्धर्व्वैः क्रीडते कालमक्षयम् ।
न मन्युं कारयेत् तासां पूज्याश्च सततं गृहे ।
ब्रह्मदेया विशेषेण ब्राह्मभोज्या सदा भवेत् ॥
कन्यायां ब्रह्मदेयायामश्नन् सुखमश्नुते ।
अथ भुङ्क्ते यो मोहात् भुक्त्वा स नरकं व्रजेत् ॥*
अप्रजायाश्च कन्यायां न भुञ्जीयात् कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि ॥
महापत्यसमाकीर्णान्नास्ति ते नरकाद्भयम् ।
तीर्णस्त्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ॥"
इत्याद्ये वह्निपुराणे तडागवृक्षप्रशंसानामा-
ध्यायः ॥ * ॥ विवाहकाले मिथ्यावचने दोषा-
भावो यथा,—

शर्म्मिष्ठोवाच ।

"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन् न विवाहकाले ।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥"

इति मात्स्ये ३१ अध्यायः ॥ * ॥

विवाहे वर्णनीयानि यथा,—
"विवाहे स्नानशुभ्राङ्गभूषोलूलुध्वनीरवाः ।
देवी संगीततारेभ्या लाजमङ्गलवर्त्तनम् ॥"
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥*॥
अथ विवाहोक्तदिनानि । तत्राब्दादिशुद्धि-
र्यथा,—
"प्रसूत्याधानतः शुद्धिर्विषमेऽब्दे समे क्रमात् ।
विवाहे योषितां चन्द्रार्केज्यशुद्धिर्न्न योषितोः ॥
सभर्त्तृकक्रियारम्भे भर्त्तुर्गोचरशुद्धितः ।
यात्रोद्वाहे गर्भकृत्ये स्वशुद्ध्याप्नोति तत् फलम् ॥
प्रारभ्य जन्मसमयात् युवतेर्विवाह-
मोजाब्दकेषु मुनयः शुभमादिशन्ति ।
आधानतः प्रभृतिनः समवत्सरेषु
प्रोक्तस्तयोर्न शुभदस्तु विलोमवर्षे ॥ * ॥
अयुग्मे दुर्भगा नारी युग्मे च विधवा भवेत् ।
तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रता ॥
माघत्रयादूर्द्ध्वमयुग्मवर्षे
युग्मे च माघत्रयमेव यावत् ।
विवाहशुद्धिं प्रवदन्ति सर्व्वे
वात्स्यादयो ज्योतिषि जन्ममासात् ॥
युग्माब्दकेषु युवतेरपि जन्ममासात्
मासत्रयं विवहने परमब्दशुद्धिम् ।
प्राहुः समस्तमुनयो विषमे तु वर्षे
मासत्रयादुपरितः खलु जन्ममासात् ॥"*॥
राजमार्त्तण्डे ।
"माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च ।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्ज्जिताः ॥"
कन्यासंवरणे हस्तोदकविधौ ।
"दम्पत्योर्द्दिनवाहराशिरहिते ताराशुकूले रवौ
चन्द्रे चार्ककुजार्किशुक्रवियुते मध्येऽथवा
पापयोः ।
त्यक्त्वा च व्यतिपातवैधृतिदिनं विष्टिञ्च रिक्तां
तिथिं
क्रूराक्रान्तचैत्रपौषरहिते लग्नांशके मानुषे ॥"*
योगविशेषे दोषविशेषानाह रत्नमालायाम् ।
"कुलोच्छेदो व्यतीपाते परिघे स्वामिघातिनी ।
वैधृतौ विधवा नारी विपदाद्येऽतिगण्डके ॥
व्याघाते व्याधिसंघातः शोकार्त्ता हर्षणे तथा ।
मूले च बद्धमूलं स्यात् गण्डे रोगभयं तथा ॥
विष्कम्भेऽप्यहिदंशः स्यात् वज्रके मरणं भवेत् ।
एते वै दारुणाः सर्व्वे दश योगाः प्रकीर्त्तिताः ॥"
आश्वलायनः । उदगयने आपूर्य्यमाणे पक्षे
कल्याणे नक्षत्रे चौडकर्म्मोपनयनगोदान-
विवाहाः । विवाहः सार्व्वकालिक इत्येक इति ।
"आषाढ़े धनधान्यभोगरहिता नष्टप्रजा श्रावणे
वेश्या भाद्रपदे इषे च मरणं रोगान्विता
कार्त्तिके ।
पौषे प्रेतवती वियोगबहुला चैत्रे मदोन्मादिनी
अन्येष्वेव विवाहिता पतिरता नारी सम्हा
भवेत् ॥
हरौ च सुप्ते न च दक्षिणायने
तिथौ च रिक्ते शशिनि क्षयं गते ।
राजग्रस्ते तथा युद्धे पितॄणां प्राणसंशये ।
अतिप्रौढ़ा च या कन्या नानुकूलं प्रतीक्षते ॥
अतिप्रौढ़ा च या कन्या कुले धर्म्मविरोधिनी ।
अविशुद्धापि सा देया चन्द्रलग्नबलेन तु ॥
अयनस्योत्तरस्यादौ मकरं याति भास्करः ।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम् ॥"
इति विष्णुपुराणोक्तस्य चूड़ादावयनस्य परिग्रहः
दिनमानादिबोधे तु सिद्धान्तादयनपरिग्रहः ॥*॥
सार्व्वकालिक इत्यस्य विषयमाह भुजबलभीमे ।
"ग्रहशुद्धिमब्दशुद्धिं शुद्धिं मासायनर्त्तुदिव-
सानाम् ।
अर्व्वाक् दशवर्षेभ्यो मुनयः कथयन्ति कन्य-
कानाम् ॥
एतत्परन्तु विषयमङ्गिरोवचनं यथा ।
कालात्यये च कन्यायाः कालदोषो न विद्यते ।
मलमासादिकालानां विवाहाद्ये प्रयत्नतः ।
पुंसः प्रति सदा दोषात् सर्व्वदैव हि वर्ज्जिता ॥"
ज्ञानचिन्तामणौ ।
"वापीकूपतड़ागयागगमनचौरप्रतिष्ठाव्रतं
विद्यामन्दिरकर्णवेधनमहादानं वनं सेवनम् ।
तीर्थस्नानविवाहदेवभवनं मन्त्रादिदेवेक्षणं
दूरेणैव जिजीविषुः परिहरेदस्तं गते भार्गवे ॥"
दृहद्राजमार्त्तण्डे ।
"सर्व्वाणि शुभकर्म्माणि कुर्य्यादस्तं गते शिते ।
विवाहं मेखलाबन्धं यात्राञ्च परिवर्ज्जयेत् ॥"
यात्राञ्चेति चकारो वचनान्तरोक्तप्रातिस्विक-
निषिद्धकर्म्मान्तरं समुच्चिनोति ।
"बाले शुक्रे वृद्धे शुक्रे नष्टे शुक्रे जीवे नष्टे ।

बाले जीवे वृद्धे जीवे सिंहादित्ये गुर्व्वादित्ये ।
तथा मलिम्लुचे मासि सुराचार्य्येऽतिचारगे ।
वापीकूपतड़ागादिक्रियाः प्रागुदितास्त्यजेत् ॥
अतीचारं गते जीवे वक्रे चैव बृहस्पतौ ।
कामिनी विधवा प्रोक्ता तस्मात्तौ परिवर्ज्जयेत् ॥
अतीचारं गतो जीवः पूर्व्वभं नैव गच्छति ।
समचारेऽपि कर्म्माणि नैव तत्रैव संस्थिते ॥”*॥
देवलः ।
“बाले वृद्धे तथैवास्ते कुरुते दैव्यमन्तिणि ।
उद्वाहितायां कन्यायां दम्पत्योरेव नाशनम् ॥
प्रागुद्गतः शिशुरहस्त्रितयं सितः स्यात्
पश्चाद्दशाहमिति पञ्चदिनानि वृद्धः ।
प्राक् पञ्चमेव कथितोऽत्र वशिष्ठगर्गौ-
जीवस्तु पञ्चमपि वृद्धशिशुर्व्विवर्ज्यः ॥”
अत्यन्ताशक्तौ राजमार्त्तण्डः ।
“बाले वृद्धे च सन्त्यांशे चतुःपञ्चत्रिवासरान् ।
जीवे च भार्गवे चैव विवाहादिषु वर्ज्जयेत् ॥
वक्रे चैवातिचारे त्रिदशपतिगुरौ देवपूज्ये च सुप्ते
गुर्व्वादित्येऽधिमासे दिवसकररिपौ वाक्पतौ चैत्रपौषे ।
विद्यां केतूद्गमे वा शरदि सुरगुरौ सिंहसंस्थे मनोज्ञे
वर्षाद्राप्नोति चोढ़ा सुनियतमरणं देवकन्यापि भर्त्तुः ॥”*॥
शुक्रमधिकृत्य राजमार्त्तण्डे ।
“बाले च दुर्भगा नारी वृद्धे नष्टप्रजा भवेत् ।
नष्टे च मृत्युमाप्नोति सर्व्वमेतद्गुरावपि ॥
सिंहे गुरौ परिणीता पतिमात्मानमात्मजान् हन्ति ।
क्रमशस्त्रिषु पित्रादिषु वशिष्ठगर्गादयः प्राहुः ॥
गुरौ हरिस्थे न विवाहमाहु-
र्हारीतगर्गप्रमुखा मुनीन्द्राः ।
यदा न माघी मघसंयुता स्यात्
तदा तु कन्योद्वहनं वदन्ति ॥”
अत्रैव माण्डव्यः ।
“मघाक्रयं परित्यज्य यदा सिंहे गुरुर्भवेत् ।
तत्राब्दे कन्यका चोढ़ा सुभगा सुप्रिया भवेत् ॥”
हारीतः ।
“अतीचारं गते जीवे वृषे वृश्चिककुम्भयोः ।
यश्चोद्वाहादिकं कुर्य्यात् तत्र कालो न लुप्यते ॥”
कृत्यचिन्तामणौ ।
“अतीचारं गते जीवे वृषे वृश्चिककुम्भयोः ।
तत्र चोद्वाहिता कन्या संप्रणीयात् कुलद्वयम् ॥”
सङ्केतकौमुद्यां भीमपराक्रमे ।
“यदातिचारं सुरराजमन्त्री
करोति गोमन्मथमीनसंस्थः ।
न याति चेद्यद्यपि पूर्व्वराशिं
शुभाय पाणिग्रहणं वशिष्ठः ॥
अतीचारं गते जीवे स्थिरराशौ च संस्थिते ।
तत्र न लुप्यते कालो वदत्येवं पराशरः ॥
वापीकूपतड़ागादि निषिद्धं सिंहगे गुरौ ।
मकरस्थे च तत् कार्य्यं न दोषः काललोपजः ॥”
यत्तु ।
“कन्यावृश्चिकमेषेषु मन्मथे च झषे वृषे ।
अतिचारेऽपि कर्त्तव्यं विवाहादि बुधैः सदा ॥”
इत्येतदमूलं द्वैतनिर्णयेऽप्युक्तम् ॥ * ॥ दीपिकायाम् ।
“त्रिकोणजाया धनलाभराशौ
वक्रातिचारेण गुरुः प्रयातः ।
यदा तदा प्राह शुभे विलग्ने
हिताय पाणिग्रहणं वशिष्ठः ॥”
देवीपुराणम् ।
“मकरस्थो यदा जीवो वर्ज्जयेत् पञ्चमांशकम् ।
शेषेष्वपि च भागेषु विवाहः शोभनो मतः ॥”
भोजराजः ।
“यो जन्ममासे क्षुरकर्म्म यात्रां
कर्णस्य वेधं कुरुते च मोहात् ।
नूनं स रोगं धनपुत्त्रनाशं
प्राप्नोति मूढ़ो वधबन्धनानि ॥
जातं दिनं दूषयते वशिष्ठ-
श्चाष्टौ च गर्गो जवनो दशाहम् ।
जन्माख्यमासं किल भागुरिश्च
चौड़े विवाहे क्षुरकर्णवेधे ।”
श्रीपतिसमुच्चये ।
“स्नानं दानं तपो होमः सर्व्वमङ्गल्यवर्द्धनम् ।
उद्वाहश्च कुमारीणां जन्ममासे प्रशस्यते ॥”
कृत्यचिन्तामणौ ।
“जन्ममासे च पुत्राढ्या धनाढ्या च धनोदये ।
जन्मभे जन्मराशौ च कन्या हि शुभसन्ततिः ॥”
गर्गः ।
“ज्यैष्ठे मासि तथा मार्गे चौरं परिणयं व्रतम् ।
ज्येष्ठपुत्त्रदुहित्रोश्च यत्नतः परिवर्ज्जयेत् ॥”
अत्र ज्येष्ठत्वमादिगर्भजातत्वम् । तथा च ।
“जन्ममासि न च जन्मभे तथा
नैव जन्मदिवसेऽपि कारयेत् ।
आद्यगर्भभवपुत्त्रकन्ययो-
र्ज्यैष्ठमासि न च जातु मङ्गलम् ॥”
अत्र जन्ममासादौ पुत्त्रमात्रस्य निषेधः ज्येष्ठमासे तु ज्येष्ठपुत्त्रस्येति विशेषः ।
“कृत्तिकास्थं रविं त्यक्त्वा ज्यैष्ठे ज्येष्ठस्य कारयेत् ।
उत्सवेषु च सर्व्वेषु दिनानि दश वर्ज्जयेत् ॥ * ॥
रेवत्युत्तररोहिणीमृगशिरोमूलानुराधामघा-
हस्तास्वातिषु तौलिषष्ठमिथुनेषूद्यत्सु पाणिग्रहः ।
सप्ताष्टान्त्यबहिःशुभैरुडुपतावेकादशद्वित्रिगे
क्रूरैस्त्र्यायषड़ष्टगैर्न तु भृगौ षष्ठे कुजे चाष्टमे ॥”
ज्योतिर्व्विहितनक्षत्रात् अधिकं चित्राश्रवणाधनिष्ठाश्विनीनक्षत्रं पारस्करोक्तं यथा,—
“कुमार्य्याः पाणिं गृह्णीयात् त्रिषु त्रिषूत्तरादिषु ॥”
उत्तरफल्गुन्यादित्रयोत्तराषाढ़ादित्रयोत्तरभाद्रपदादित्रयेषु नवसु नक्षत्रेष्वित्यर्थः ॥ * ॥ भीमपराक्रमे ।
“पूर्व्वात्रये विशाखायां शिवाद्ये भचतुष्टये ।
ऊढ़ा चाशु भवेत् कन्या विधवातो विवर्जयेत् ॥
विष्णुभाद्ये त्रिके चित्रे ज्येष्ठायां ज्वलने यमे ।
एभिर्व्विवाहिता कन्या भवत्येव सुदुःखिता ॥”
एतच्च पारस्करोक्तं यजुर्व्वेदिविषयमापद्विषयं वा बोध्यम् ॥ * ॥
“आद्ये मघाचतुर्भागे नैर्ऋतस्याद्य एव च ।
रेवत्यन्त्यचतुर्भागे विवाहः प्राणनाशकः ॥
कर्णवेधे विवाहे च व्रते पुंसवने तथा ।
प्राशने चाद्यचूड़ायां विद्धर्क्षं विवर्ज्जयेत् ॥”
विद्धर्क्षन्तु ।
“तिथ्य१५ङ्ग६वेदे१४क१दशो१०नविंश१९
भे२७कादशा११द्वादश१८विंश२०संख्याः ।
इष्टोडुना सूर्य्ययुतोडुना च
योगादमूक्षेद्दशयोगभङ्गः ॥”
कर्म्मकालीननक्षत्रसूर्य्यभुज्यमाननक्षत्रयोर्म्मिलने यदि पञ्चदशाद्यन्यतमसंख्या भवति तदा न कर्म्मयोग्यमित्यर्थः । सप्तविंशाधिकत्वे सप्तविंशतिमपहाय शेषात् फलं अन्यथैकसंख्यानुपपत्तेः ॥ * ॥ अपवादस्तु ।
“आद्यपादे स्थिते सूर्य्ये तुरीयांशं प्रदुष्यति ।
द्वितीयस्थे तृतीयन्तु विपरीतमतोऽन्यथा ॥”
यत्तमाह स्वरोदये ।
“आद्यांशेन चतुर्थांशं चतुर्थांशेन चादिमम् ।
द्वितीयेन तृतीयन्तु तृतीयेन द्वितीयकम् ॥”
अत्रैव खर्ज्जूरवेधः । तथा च रत्नमाला ।
“एकामर्द्धगता नयोदश तथा तिर्य्यग्गताः स्थापयेत्
रेखाचक्रमिदं बुधैरभिहितं खार्ज्जूरिकं तत्र तु ।
व्याघातादि तु मूर्ध्नि भन्तु कथितं तत्रैकरेखास्थयोः
सूर्य्याचन्द्रमसोर्म्मिथो निगदिता दृक्पात एकार्गलः ॥”
व्याघातादीतिव्याघातयोगसंख्याङ्कस्थयोर्दशाङ्कम् । तथा च हस्तादीनि नक्षत्राणि देयानीत्यर्थः ॥ * ॥ अथ सप्तशलाकावेधः । दीपिकायाम् ।
“कृत्तिकादिचतुःसप्तरेखाराशौ परिभ्रमन् ।
यद्यत्रैकरेखास्थो वेधः सप्तशलाकजः ॥
सप्त सप्त विलिखेत् प्ररेखिका-
स्तिर्य्यगूर्द्ध्वमथ कृत्तिकादिकम् ।
लेखयेदभिजिता समन्वितं
चैकरेखगखगेन विध्यते ॥
वेधस्य चतुर्थेऽंशे श्रवणादौ लिप्तिकाचतुष्के च ।
अभिजित्तस्थे खेचरे विज्ञेया रोहिणीविद्धा ॥”
लिप्तिकाद्वन्द्वः ॥ * ॥
“यस्याः शशी सप्तशलाकभिन्नः
पापैरपापैरथवा विवाहे ।
रक्तांशुकेनैव तु रोदमाना
श्मशानभूमिं प्रमदा प्रयाति ॥”

अस्यापवादो यथा, राजमार्त्तण्डे।
"विषप्रदिग्धेन हतस्य पत्त्रिणा
मृगस्य मांसं शुभदं यताहते।
यथा तथाप्युडुपाद एव
प्रदूषितोऽप्योडुपदं शुभावहम्॥"
अथ पञ्चशलाकचक्रम्।
"ऊर्द्धं रेखास्थिताः पञ्च तिर्य्यक् पञ्च तथैव च।
द्वे द्वे च कोणयो रेखे साभिजित् कृत्तिकादिकम्॥
शम्भुकोणे द्वितीये तु लेखयेत् सर्व्वकर्म्मणि।
क्रूरैर्भिन्नमथो सौम्यैर्नक्षत्रं परिवर्ज्जयेत्॥
नलापाते च ये दोषा ये च सप्तशलाकके।
ते सर्व्वे प्रभवन्त्यत्र नाम्ना पञ्चशलाकके॥
अथ चक्रान्वये कश्चित् पादवेध इहेष्यते।"
तदुक्तं रत्नमालायाम्। केचित्तत्रापीष्यते पादवेध इति। इति पञ्चशलाकाचक्रम्॥ * ॥
रत्नमालायाम्।
"ऋक्षं द्वादशमुष्णरश्मिरवनीसूनुस्तृतीयं गुरुः
षष्ठं चाष्टममर्कजस्तु पुरतो हन्ति स्फुटं नलया।
पश्चात् सप्तममिन्दुजस्तु नवमं राहुः सितः पञ्चमम्।
द्वाविंशं परिपूर्णमूर्त्तिरुडुपः सन्ताडयेन्नेतरत्॥"
नलापातोऽयम्॥ * ॥
"पापात् सप्तमगः शशी यदि भवेत् पापेन युक्तोऽथवा
यत्नात् तं परिवर्ज्जयेत् सुविमतो दोषो ह्ययं कथ्यते।
यात्रायां विपदो गृहे सुतवधः चौरेषु रोगोद्भवोऽप्युद्वाहे विधवा व्रते च मरणं शूलञ्च पुंस्कर्म्मणि॥" * ॥
"रविमन्दकुजाक्रान्तं मृगाङ्कात् सप्तमं त्यजेत्।
विवाहयात्राचूड़ासु गृहकर्म्मप्रवेशने॥"
यामित्रवेधः॥ * ॥
"मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो
मित्रर्क्षसौम्यगृहगोऽथ तदीक्षितो वा।
यामित्रवेधविहितानपहृत्य दोषान्
दोषाकरः शुभमनेकविधं विधत्ते॥" * ॥
भोजराजः।
"त्रिषड्दशैकादशगो दिनेशः
सुतार्थसौभाग्यशुभप्रदः स्यात्।
वैधव्यदाताष्टमराशिसंस्थः
शेषेषु रुग्दुःखशुचः करोति॥"
रविशुद्धिः॥ * ॥
"कन्यानक्षत्रशुद्धौ स्याद्विवाहः शुभलग्नगाम्।
पश्चाद्भर्त्तुर्व्विशुद्ध्या तु यात्रापुण्योत्सवादयः॥"
विद्याधरीविलासे।
"पुंसामर्कः स्मृतो योनिर्योषितामन्दतद्युतिः।
अतः पुंयोषितोः शस्तं बलमर्कशशाङ्कनम्॥
गोचरशुद्धाविन्दुं कन्याया यत्नतः शुभं वीक्ष्य।
तिग्मकिरणञ्च पुंसः शेषैरबलैरपि विवाहः॥
द्वितीयपुत्त्राङ्कगतः प्रभाकरः
त्रयोदशाहात् परतः शुभप्रदः।
न जन्मसप्तत्र्यरन्ध्रगस्तथा
करोति पुंसामपि तादृशं फलम्॥"
तथा त्रयोदशाहात् परतः॥ * ॥
"त्रयोदशदिनान्यर्को दश षड्धरणीसुतः।
साह्नं दिनञ्च शीतांशुर्मासमेकादशं तमः॥
सौरिः पादाधिकं वर्षं मासानष्टौ बृहस्पतिः।
भवनार्द्धं भृगुः सौम्यो यावन्नाश्यशुभाः फलम्॥
कष्टं व्रतादिके दद्युर्न तथा शेषभागगाः॥ * ॥
लग्ने तत्पञ्चमे तूर्य्ये नवमे दशमे तथा।
गुरुर्भृगुर्व्वा दोषघ्नो विवाहे वर्द्धते शुभम्॥"
अयमेव सुतहिबुकयोगः॥ * ॥
"गोधूलिं त्रिविधां वदन्ति मुनयो नारीविवाहादिके
हेमन्ते शिशिरे प्रयाति मृदुतां पिण्डीकृते भास्करे।
ग्रीष्मेऽर्द्धास्तमिते वसन्तसमये भानौ गते दृश्यतां
सूर्य्ये चास्तमुपागते च नियतं प्रावृट्शरत्कालयोः॥ * ॥
लग्नं यदा नास्ति विशुद्धमन्यद्
गोधूलिकां तत्र शुभां वदन्ति।
लग्ने विशुद्धे सति वीर्य्ययुक्ते
गोधूलिका नैव फलं विधत्ते॥ * ॥
नास्मिन् ग्रहा न तिथयो न च विष्टिवारा
ऋक्षाणि नैव जनयन्ति कदापि विघ्नम्।
अव्याहतः सततमेव विवाहकाले
यात्रासु चायमुदितो भृगुजेन योगः॥ * ॥
मार्गे गोधूलियोगे प्रभवति विधवा माघमासे तथैव
पुत्त्रायुर्धनयौवनेन सहिता कुम्भे स्थिते भास्करे।
वैशाखे सुखदा प्रजाधनवती ज्यैष्ठे पतेर्म्मानदा
आषाढ़े धनधान्यपुत्त्रबहुला पाणिग्रहे कन्यका॥" * ॥
विवाहपटले।
"वूढ़ा धनुषि च कुलटा तत्पूर्व्वार्द्धे सतीत्यपरे जगुः॥" * ॥
ज्योतिःसारसंग्रहे।
"विवाहे तु दिवाभागे कन्या स्यात् पुत्त्रवर्ज्जिता।
विरहानलदग्धा सा नियतं स्वामिघातिनी॥" * ॥
महाभारते।
"रात्रौ दानं न शंसन्ति विना चाभयदक्षिणाम्।
विद्यां कन्यां द्विजश्रेष्ठा दीपमन्नं प्रतिश्रयम्॥" *
व्यासः।
"रिक्तासु विधवा कन्या दर्शेऽपि स्याद्विवाहिता।
शनैश्चरदिने चैव यदा रिक्ता तिथिर्भवेत्।
तस्मिन् विवाहिता कन्या पतिसन्तानवर्ज्जिता॥"
स्मृतिः।
"धर्म्मार्थकाममोक्षाणां दाराः संप्राप्तिहेतवः।
परीक्ष्यन्ते प्रयत्नेन पूर्व्वमेव करग्रहात्॥" * ॥
मनुः।
"अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत् स्त्रियम्॥" *
शातातपः।
"हंसस्वनां मेघवर्णां मधुपिङ्गललोचनाम्।
तादृशीं वरयेत् कन्यां गृहस्थः सुखमेधते॥" * ॥
भविष्ये।
"प्रतिष्ठिततलाः सम्यक् रक्ताम्भोजसमत्विषः।
तादृशाश्चरणा धन्या योषितां भोगवर्द्धनाः॥"
प्रतिष्ठितो भूमौ लग्नः समस्तोऽधोभागो येषां ते तथा॥ * ॥ मनुः।
"नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्।
नालोमिकां नातिलोम्नीं न वाचाटां न पिङ्गलाम्॥
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्व्वतनामिकाम्।
न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम्॥"
प्रतिप्रसवमाह मत्स्यसूक्ते।
"गङ्गा च यमुना चैव गोमती च सरस्वती।
नद्यश्चासां नाम वृक्षे मालती तुलसी अपि।
रेवती चाश्विनी भेषु रोहिणी शुभदा भवेत्॥"
कृत्यचिन्तामणौ।
"नेत्रे यस्याः केकरे पिङ्गले वा
स्याद्दुःशीला श्यावलोलेक्षणा च।
कूपौ यस्या गण्डयोः सस्मितायाः
निःसन्दिग्धं बन्धकीं तां वदन्ति॥" * ॥
नन्दिकेश्वरपुराणे।
"श्यामा सुकेशी तनुलोमराजी
सुभ्रूः सुशीला सुगतिः सुदन्ता।
वेदीविमध्या यदि पङ्कजाक्षी
कुलेन हीनापि विवाहनीया॥
पृष्टा कुदन्ता यदि पिङ्गलाक्षी
लोम्ना समाकीर्णसमाङ्गयष्टिः।
मध्ये च पुष्टा यदि राजकन्या
कुलेऽपि योग्या न विवाहनीया॥" * ॥
हारीतः।
"तस्मात् कुलनक्षत्रविज्ञानोपपन्नां वरयेत्।"
नक्षत्रोपपन्नां नाड़ीनक्षत्रहीनाम्॥ * ॥
नाड़ीनक्षत्रमाह स्वरोदये।
"अश्विन्यादि लिखेच्चक्रं सर्पाकारं त्रिनाड़िकम्।
तत्र वेधवशाज्ज्ञेयं विवाहादि शुभाशुभम्॥
त्रिनाड़ीवेधनक्षत्रमश्विन्यार्द्रायुगोत्तरा।
हस्तेन्द्रमूलवारुण्यः पूर्व्वभाद्रपदास्तथा॥
याम्यः सौम्यो गुरुर्योनिश्चित्रा मित्रजलाङ्कयम्।
धनिष्ठा चोत्तराभद्रा मध्यनाड़ीव्यवस्थिताः॥ * ॥
कृत्तिका रोहिणी सर्पो मघा स्वातीविशाखके।
उत्तरा श्रवणा पौष्णं पृष्ठनाड़ीव्यवस्थिताः॥ * ॥
अश्व्यादिनाड़ीवेधर्क्षे षष्ठं द्वितीयकं क्रमात्।

विवाहः
विवाहः

याम्यादितूर्य्यतूर्य्यं च कृत्तिकादिद्विषट्ककम् ॥
एवं निरीक्षयेद्वेधं कन्यामन्त्रे सुरे गुरौ ।
पण्यस्त्रीस्वामिमित्रेषु देशे ग्रामे पुरे गृहे ॥
एकनाड़ीस्थधिष्ण्यानि यदि स्युर्व्वरकन्ययोः ।
तदा वेधं विजानीयात् गुर्व्वादिषु तथैव च ॥
प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो वधः ।
प्रनष्टं जन्मभं यस्य तस्य नामर्क्षतो वदेत् ॥
द्वयोर्जन्मभयोर्वेधो द्वयोर्नामभयोस्तथा ।
नामजन्मर्क्षयोर्वेधो न कर्त्तव्यं कदाचन ॥
एकनाड़ीस्थिता चेत् स्यात् भर्त्तुर्नाशाय चाङ्गना ।
तस्मान्नाड़ीव्यधो वीक्ष्यो विवाहे शुभमिच्छता ॥
प्राङ्नाड्या वेधतो भर्त्ता मध्यनाड्योभयं तथा ।
पृष्ठनाड़ीव्यधे कन्या म्रियते नात्र संशयः ॥
एकनाड़ीस्थिता यत्र गुरुर्मन्त्रश्च देवताः ।
तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत् ॥
प्रभुः पण्याङ्गनामित्रं देशो ग्रामः पुरं गृहम् ।
एकनाड़ीगता भव्या अभव्या वेधवर्ज्जिताः ॥”
प्रतिप्रसवमाह ज्योतिषे ।
“एकराश्यादियोगे तु नाड़ीदोषो न विद्यते ॥”
स यथा ।
“एकराशौ च दम्पत्योः शुभं स्यात् समसप्तके ।
चतुर्थे दशमे चैव तृतीयैकादशे तथा ॥”
समग्रहणाद्विषमसप्तके दोषः । तथा च ।
“घोटके सप्तके मेषतुले युग्महयौ तथा ।
सिंहघटौ सदा वर्ज्यौ मृतिं तत्राब्रवीच्छिवः ॥”
श्रीपतिव्यवहारनिर्णये ।
“सुहृदेकाधिपयोगे ताराबले वश्यराशौ वा ।
अपि नाड्यादिवेधे भवति विवाहो हितार्थाय ॥”
राजमार्त्तण्डे ।
“न राजयोगे ग्रहवैरिता च
न तारशुद्धिर्न गणात्रयं स्यात् ।
न नाड़िदोषो न च वर्गदुष्टि-
र्गर्गादयस्ते मुनयो वदन्ति ॥”* ॥
राजयोगस्तु एकराश्यादियोग एव तत्रैव नाड्यादिप्रतिप्रसवात् ॥ श्रीपतिरत्नमालायाम् ।
“अश्वि भाजफणिद्वयश्च वृषभुङ्मेषोन्दुरुस्तूंषिकश्चाखुर्गौः क्रमशस्ततोऽपि महिषी व्याघ्रः पुनः सौरभी ।
व्याघ्रेणौ मृगकुक्कुरौ कपिरथोरभ्रद्वयं वानरः
सिंहोऽश्वो मृगराट् पशुश्च करटी योनिश्च भानामियम् ॥
गोव्याघ्रं गजसिंहमश्वमहिषं श्वैणञ्च बभ्रूरगं
वैरं वानरमेषकञ्च सुमहत्तद्विड़ालोन्दुरुम् ।
लोकानां व्यवहारतोऽन्यदपि च ज्ञात्वा प्रयत्नादिदं
दम्पत्योर्न्नृपभृत्ययोरपि सदा वर्ज्यः शुभस्थार्थिभिः ॥
मकरसमेतं मिथुनं कन्याकलशौ मृगेन्द्रमीनौ च ।
वृषभतुलेऽलिमेषौ कर्कटधनुषी च मित्रविधौ ॥”
षड़ष्टकाविति शेषः ॥ * ॥ अरिषड़ष्टकमाह ।
“मकरः करिकुलरिपुणा
कन्या मेषेण सह झषस्तुलया ।
कर्किघटौ वृषधनुषी
वृश्चिकमिथुने चारिविधौ ॥ * ॥
यदि कन्याष्टमे भर्त्ता भर्त्तुः षष्ठे च कन्यका ।
षड़ष्टकं विजानीयाद्वर्ज्जितं त्रिदशैरपि ॥* ॥
पुंसो गृहात् सुतगृहे सुतहा च कन्या
धर्म्मे स्थिता सुतवती पतिवल्लभा च ।
द्विद्वादशे धनगृहे धनहा च कन्या
व्यये स्थिता धनवती पतिवल्लभा च ॥”
षड़ष्टकादौ तारानियममाह भीमपराक्रमः ।
“सौहृद्ये शुभयोर्द्वयोरपि तयोरेकाधिपत्येऽपि वा
तारा षष्ठसुमित्रमित्रदहनक्षेमार्थसम्पद्यदि ।
षट्काष्टे नवपञ्चमे व्ययधने योगे च पुंयोषितोः
प्रीत्यायुःसुखवृद्धिपुष्टिजनकः कार्य्यो विवाहस्तदा ॥” * ॥
गर्गः ।
“मरणं ताराविरोधे ग्रहरिपुभावे चिरेण ।
रोगादि नरनार्य्योः षट्काष्टके वैरमवश्यं भवेदासु ॥”* ॥
व्यासः ।
“मैत्रादियोगेऽपि षड़ष्टकादौ
तारा विपत्प्रत्यरिनैधनाख्याः ।
वर्ज्या विवाहे पुरुषोद्भवो हि
प्रीतिः परा जन्मसु तारकासु ॥
नक्षत्रमेकं यदि भिन्नराशि-
र्न दम्पती तत्र सुखं लभेताम् ।
विभिन्नऋक्षं यदि चैकराशि-
स्तदा विवाहः सुतसौख्यदायी ॥
एकर्क्षा च यदा कन्या राश्येका च यदा भवेत् ।
धनपुत्त्रवती नारी साध्वी भर्तृप्रिया सदा ॥
षड़ष्टके गोमिथुनं प्रदेयं
कांस्यं सरूप्यं नवपञ्चके तु ।
द्विद्वादशाख्ये कनकाम्रताम्रं
विप्रार्च्चनं हेम च नाड़ीदोषे ।
मरणं नाड़ीदोषे कलहः षट्काष्टके विपत्तिर्वा ।
अनपत्यता त्रिकोणे द्विद्वादशे च दारिद्र्यम् ॥”* ॥
कृत्यचिन्तामणौ ।
“हस्तास्वातिश्रुतिमृगशिरःपुष्यमैत्राश्विभानि
पौष्णादित्ये जगुरिह बुधा देवसंज्ञानि भानि ।
पूर्व्वास्तिस्रः शिवभभरणीरोहिणी चोत्तराश्च
प्राहुर्मर्त्याह्वयमुडुगणं नूनमेतं मुनीन्द्राः ॥
चित्राश्लेषानिरृतिपितृभे वासवं वासवर्क्षं
शक्राग्न्योर्भे वरुणदहनर्क्षे च रक्षोगणोऽयम् ॥”
फलमाह श्रीपतिः ।
“स्वकुले चोत्तमा प्रीतिर्मध्यमा देवमानुषे ।
देवासुरे कनिष्ठा च मृत्युर्मानुषराक्षसे ॥
राक्षसी च यदा कन्या मानुषश्च वरो भवेत् ।
तदा मृत्युर्न्न दूरस्थो निर्धनत्वमथापि वा ॥”
राजमार्त्तण्डे ।
“यदि स्याद्राक्षसो भर्त्ता कन्यका मानुषी भवेत् ।
विवाहे सुखमाप्नोति वैपरीत्यं विवर्ज्जयेत् ॥”
युद्धजयार्णवे ।
“देवा जयन्ति युद्धेन सर्व्वथा नात्र संशयः ।
रक्षसां मानुषाणाञ्च संग्रामे निश्चया मृतिः ॥
कर्किमीनालयो विप्राः क्षत्त्राः सिंहतुलाह्वयाः ।
वैश्या युग्माजकुम्भाख्याः शूद्रा वृषमृगाङ्गनाः ॥
सर्व्वाः परिणयेद्विप्रः क्षत्त्रियो नवभाग्भवेत् ।
षड़ाश्रयो भवेद्वैश्यस्तिस्रः शूद्रे प्रकीर्त्तिताः ॥
वर्णश्रेष्ठा च या नारी हीनवर्णश्च यः पुमान् ।
महत्यपि कुले जाता नासौ भर्त्तरि रज्यते ॥”
इति ज्योतिस्तत्त्वम् ॥ * ॥
अन्यत् उद्वाहशब्दे द्रष्टव्यम् ॥*॥*॥ तत्प्रयोग यथा । अथ कृतवृद्धिश्राद्धः संप्रदाता लग्नसमये संप्रदानशालायां गत्वा उत्तरतः स्त्रीगवीं बद्ध्वा विष्टरादिकं सज्जीकृत्य पश्चिमाभिमुखोऽनुपविष्टस्तिष्ठेत् । ततोऽग्रत उपस्थिते वरे संप्रदाता कृताञ्जलिर्वरणं कुर्य्यात् । ॐ साधु भवानास्तामिति पृच्छेत् । जामाता ॐ साध्वहमासे इति वदेत् । संप्रदाता ॐ अर्च्चयिष्यामो भवन्तं इति पृच्छेत् । जामाता ॐ अर्च्चय इति वदेत् । ततः संप्रदाता पाद्यार्घ्याचमनीयगन्धमाल्ययथाशक्त्यङ्गुरीयसपट्टकयज्ञोपवीतसपर्णपूगादिकं प्रदाय जामातरमर्च्चयेत् । ततः संप्रदाता दक्षिणं जानु धृत्वा ॐ अद्येत्यादि अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः प्रपौत्त्रं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पौत्त्रं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पुत्त्रं अमुकगोत्रं अमुकप्रवरं अमुकदेवशर्म्माणं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः प्रपौत्त्रीं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पौत्त्रीं अमुकगोत्रस्यामुकप्रवरस्य अमुकदेवशर्म्मणः पुत्त्रीं अमुकगोत्रां अमुकप्रवरां श्रीअमुकीदेवीं एनां कन्यां शुभविवाहेन दातुं एभिः पाद्यादिभिः अभ्यर्च्य भवन्तमहं वृणे । जामाता ॐ वृतोऽस्मि इति वदेत् । संप्रदाता यथाविहितं विवाहकर्म्म कुरु । जामाता ॐ यथाज्ञानतः करवाणीति वदेत् । ततः स्त्र्याचारादिकं कारयित्वा सुखचन्द्रिकां कारयेत् । ततोऽग्रे उपस्थिते वरे संप्रदाता इमं मन्त्रं जपति । प्रजापतिरृषिरनुष्टुप् छन्दोऽर्हणीया गौर्देवता गवोपस्थापने विनियोगः । ॐ अर्हणा पुत्त्रवाससा धेनुरभवद्यमे सा नः पयस्वती दुहा उत्तरां उत्तरां समाम् । ततो जामाता प्रजापतिरृषिर्गायत्त्री छन्दो विराड्देवता उपविशदर्हणीयजपे विनियोगः । ॐ इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामि । इमं मन्त्रं जपन्नासने प्राङ्मुख उपविशति । ततः संप्रदातापि पश्चिमाभिमुख उपविशेत् । ततो दाता साग्रपञ्चविंशतिकुशपत्रैः द्विर्वामावर्त्तसुखग्रन्थिं रचितं

विष्टरं उत्तराग्रं उत्तानहस्ताभ्यां गृहीत्वा ॐ विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामित्यादधानो विष्टरमर्पयति। जामाता च ॐ विष्टरं प्रतिगृह्णामि इति विष्टरं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप्छन्द ओषध्यो देवता विष्टरस्यासनदाने विनियोगः।

"ॐ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः।
ता मह्यमस्मिन्नासने अच्छिद्राः शर्म्म यच्छत॥"

इत्यासने विष्टरमुत्तराग्रं दत्त्वा उपविशति। ततः सम्प्रदाता पुनस्तादृशमेव विष्टरं गृहीत्वा ॐ विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामिति तथैव पुनरर्पयति। जामाता च ॐ विष्टरं प्रतिगृह्णामीति तथैव गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप् छन्द ओषध्यो देवता विष्टरस्य पादयोरधस्तादाने विनियोगः।

"ॐ या ओषधीः सोमराज्ञीर्व्विष्ठिताः पृथिवीमनु।
ता मह्यमस्मिन् पादयोरच्छिद्राः शर्म्म यच्छत॥"

इति पादयोरधस्तादुत्तराग्रं विष्टरं स्थापयेत्॥ ततः सम्प्रदाता पानीयपात्रं गृहीत्वा ॐ पाद्याः पाद्याः पाद्याः प्रतिगृह्यन्तामिति पानीयपात्रमर्पयति। जामाता ॐ पाद्यं प्रतिगृह्णामीति गृहीत्वा प्रजापतिर्ऋषिर्व्विराड्गायत्री छन्द आपो देवता पादप्रक्षालनार्थोदकवीक्षणे विनियोगः। ॐ यतो देवीः प्रतिपश्याम्यापस्ततो मा ऋद्धिरागच्छतु। अनेनोदकं वीक्षेत्। ततो जामाता तस्मात् पात्रादुदकं गृहीत्वा प्रजापतिर्ऋषिर्व्विराड्गायत्री छन्दः श्रीर्द्देवता सव्यपादप्रक्षालने विनियोगः ॐ सव्यं पादमवनेनिज्जे अस्मिन्राष्ट्रे श्रियं दधे। अनेन वामपादे उदकाञ्जलिं दद्यात्। ततोऽपरमञ्जलिं गृहीत्वा प्रजापतिर्ऋषिर्व्विराड्गायत्री छन्दः श्रीर्द्देवता दक्षिणपादप्रक्षालने विनियोगः। ॐ दक्षिणं पादमवनेनिज्जे अस्मिन्राष्ट्रे श्रियमावेशयामि। अनेन दक्षिणपादे उदकाञ्जलिं दद्यात्। ततः पुनरुदकाञ्जलिं गृहीत्वा प्रजापतिर्ऋषिर्व्विराड्गायत्री छन्दः श्रीर्द्देवता उभयपादप्रक्षालने विनियोगः। ॐ पूर्व्वमन्यमपरमन्यमुभौ पादाववनेनिज्जे राष्ट्रस्यर्द्ध्या अभयस्यावरुद्ध्यै। अनेन पादद्वये उदकाञ्जलिं दद्यात्। ततः सम्प्रदाता साक्षतदूर्व्वापुष्पवान् शङ्खादिपात्रे निधाय। ॐ अर्घ्यमर्घ्यमर्घ्यं प्रतिगृह्यताम्। इत्यभिधायार्घ्यमर्पयति। जामाता च ॐ अर्घ्यं प्रतिगृह्णामीति गृहीत्वा प्रजापतिर्ऋषिरर्घ्यं देवता अर्घ्यप्रतिग्रहणे विनियोगः। ॐ अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासम्। अनेनार्घ्यं शिरसि दद्यात्। ततः सम्प्रदाता उदकपात्रं गृहीत्वा। ॐ आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतां इत्युदकपात्रमर्पयति। जामाता च ॐ आचमनीयं प्रतिगृह्णामीति गृहीत्वा प्रजापतिर्ऋषिराचमनीयं देवता आचमनीयाचमने विनियोगः। ॐ यशोऽसि यशो मयि धेहि। अनेनोत्तराभिमुखीभूयाचामेत्। ततः सम्प्रदाता घृतदधिमधुयुक्तं कांस्यपात्रं कांस्यपात्रान्तरेणापिधाय गृहीत्वा ॐ मधुपर्को मधुपर्को मधुपर्कः प्रति गृह्यतामिति मधुपर्कं समर्पयति। जामाता च ॐ मधुपर्कं प्रतिगृह्णामीति गृहीत्वा प्रजापतिर्ऋषिर्म्मधुपर्को देवता अर्हणीयमधुपर्कग्रहणे विनियोगः। ॐ यशसो यशोऽसि। अनेन मधुपर्कं गृहीत्वा भूमौ निधाय प्रजापतिर्ऋषिर्म्मधुपर्को देवता अर्हणीयमधुपर्कप्राशने विनियोगः। ॐ यशसो भक्ष्योऽसि महसो भक्ष्योऽसि श्रीर्भक्ष्योऽसि श्रियं मयि धेहि। अनेन मन्त्रेण वारत्रयं भक्षयित्वा सकृत् तूष्णीं भक्षयेत्। ततो जामाता आचान्तो मङ्गलौषधिलिप्तेन दक्षिणहस्तेन तादृशमेव कन्याया दक्षिणहस्तं स्वहस्तोपरि निदध्यात्। ततः सौभाग्यपतिपुत्त्रवती नारी मङ्गलपूर्व्वकं कुशेन हस्तद्वयं बध्नाति। ततः सम्प्रदाता तिलकुशसहितमुदकपात्रं गृहीत्वा वामहस्तेनार्च्चितां कन्यां धृत्वा ओमद्यामुके मासि अमुकराशिस्थे भास्करे अमुके पक्षे अमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुककामः अमुकगोत्रस्यामुकप्रवरस्य अमुकदेवशर्म्मणः प्रपौत्त्राय अमुकगोत्रस्य अमुकप्रवरस्य अमुकदेवशर्म्मणः पौत्त्राय अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पुत्त्राय अमुकगोत्राय अमुकप्रवराय श्रीअमुकदेवशर्म्मणे ब्राह्मणाय वराय अर्च्चिताय अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः प्रपौत्त्रीं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पौत्त्रीं अमुकगोत्रस्य अमुकप्रवरस्य अमुकदेवशर्म्मणः पुत्त्रीं अमुकगोत्रां अमुकप्रवरां श्रीअमुकीदेवीं इति त्रिरुच्चार्य्य एनां कन्यां सवस्त्रालङ्कृतां प्रजापतिदेवताकां तुभ्यमहं सम्प्रददे। इति हस्तद्वयोपरि सतिलजलकुशानर्पयति। जामाता ॐ स्वस्तीत्यभिधाय कन्येयं प्रजापतिदेवताका इति वदेत्। गायत्रीं कामस्तुतिञ्च पठेत्। ॐ क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते।*। ततः ॐ अद्येत्यादि कृतैतत्कन्यादानकर्म्मणः साङ्गतार्थं दक्षिणामेतत् सुवर्णं अमुकगोत्रायामुकदेवशर्म्मणे ब्राह्मणाय वराय तुभ्यमहं सम्प्रददे। ततो जामाता ॐ स्वस्तीति वदेत्। ततः पतिपुत्त्रवती नारी दाम्पत्योर्व्वस्त्रेण ग्रन्थिं बध्नाति। ततः कुशग्रन्थिं मुक्त्वा वस्त्रेणाच्छाद्यान्योन्यावलोकनं कारयेत्। ततो भर्त्तुर्द्दक्षिणपार्श्वे वधूमुपवेशयेत्। ततो नापितेन गौर्गौरित्युक्ते जामाता पठति। प्रजापतिर्ऋषिर्ब्बृहती छन्दो गौर्द्देवता पूर्व्वबद्धगवीमोक्षणे विनियोगः। ॐ मुञ्च गां वरुणपाशाद्द्विषन्तं मेऽभिधेहि तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि पिबतूदकम्। इति पठेत्। ततो नापितेन मुक्तायां गवि जामाता पठति। प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दो गौर्द्देवता गवानुमन्त्रणे विनियोगः। ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट। अनेन गां विसर्ज्जयेत्। ततो मङ्गलं कुर्य्यात्। ततो भर्त्तुर्व्वामपार्श्वे वधूमुपवेशयेत्। इति सम्प्रदानं समाप्तम्॥*॥ इति भवदेवभट्टः॥

विवाहितः, पुं स्त्री, (वि+वह+णिच्+क्तः।) कृतविवाहः। यथा,—

"शनैश्चरदिने चैव यदि रिक्ता तिथिर्भवेत्।
तस्मिन् विवाहिता कन्या पतिसन्तानवर्द्धिता॥"

अपि च।

"विशाखाद्ये त्रिके चित्रे ज्येष्ठायां ज्वलने यमे।
एभिर्व्विवाहिता कन्या नित्यमेव सुदुःखिता॥"

इति ज्योतिस्तत्त्वम्॥

विवाह्यः, पुं, (वि+वह+णिच्+यत्।) जामाता। इति केचित्॥ विवाहयोग्ये, त्रि॥ (यथा, कथासरित्सागरे। ४३। १६०।

"पद्मावत्या ऋते राज्ञा न विवाह्यापरेति यत्।
प्रोक्तं देवि प्रतिज्ञातं मया निर्व्यूढमद्य तत्॥")

विविक्तं, त्रि, (वि+विच+क्तः।) पवित्रम्। विजनम्। इत्यमरः॥ (यथा, गीतायाम्।१३।१०।

"विविक्तदेशसेवित्वमरतिर्ज्जनसंसदि॥")

असम्पृक्तः। (यथा, माघे। ११। १७।

"पुनरुषसि विविक्तैर्म्मातरिश्वावचूर्णं
ज्वलयति मदनाग्निं मालतीनां रजोभिः॥")

विवेकी। इति मेदिनी॥

विविक्ता, स्त्री, दुर्भगा। इति त्रिकाण्डशेषः॥ मुद्राङ्कितपुस्तके विरिक्ता इति पाठः॥

विविधं, त्रि, नानाप्रकारम्। इत्यमरः॥ (यथा, कौतुकसर्व्वस्वे। २।

"कृतं विविधदुष्कृतं सततमेव प्रत्यूहतः॥")

विवीतः, पुं, भूमिविशेषः। यथा,—

"सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्।

विवीतः प्रचुरतृणकाष्ठो रक्ष्यमाणः परिगृहीतो भूप्रदेशः तदुपघातेऽपीतरक्षेत्रसमं दण्डं एषां महिष्यादीनां विद्यात्। इति मिताक्षरायां स्वामिपालविवादप्रकरणम्॥

विवीतभर्त्ता, [ऋ] पुं, विवीतभूस्वामी। इति मिताक्षरा॥

विवृक्ता, स्त्री, (वि+वृज+क्तः। स्त्रियां टाप्।) दुर्भगा। इति भूरिप्रयोगः॥

विवृतं, त्रि, (वि+वृ+क्तः।) विस्तृतम्। इति मेदिनी। (यथा, शाकुन्तले १ अङ्के।

"दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः
कीर्णवर्त्मा॥"

वर्णोच्चारणे प्रयत्नविशेषः। यथा, सिद्धान्तकौमुद्याम्। १। १। ९। "स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्।" "विवृतमूष्मणां स्वराणाञ्च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायान्तु विवृतमेव॥")

विवृता, स्त्री, क्षुद्ररोगभेदः । इति मेदिनी ॥
तल्लक्षणं यथा,—
"विवृतास्यां महादाहां पक्वोडुम्बरसन्निभाम् ।
विवृतामिति तां विद्यात् पित्तोत्थां परिमण्ड-
लाम् ॥"
परितः शोथवतीम् ॥ * ॥ अस्याश्चिकित्सा ।
"विवृतामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम् ।
पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक् ।
पाके तु रोपयेदाज्यैः पक्वैर्म्मधुरभेषजैः ।"
इति भावप्रकाशः ॥
(विवृत्तेति क्वचित् पाठः ॥)

विवृताक्षः, पुं, (विवृते अक्षिणी यस्य ।) कुक्कुटः ।
इति हेमचन्द्रः ॥

विवृतिः, स्त्री, व्याख्या । विपूर्ब्बवृधातोः क्तिप्रत्य-
येन निष्पन्नमिदम् । विवरणम् । यथा,—
"शक्तिग्रहं व्याकरणोपमान-
कोषाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषात् विवृतेर्व्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः ।"
इति मलमासतत्त्वम् ॥

विवृत्तं, त्रि, (वि+वृत्+क्तः ।) चलितम् ।
यथा,—
"विवृत्तपार्श्वं रुचिराङ्गहारं
समुद्वहच्चारु नितम्बरम्यम् ।
आमन्द्रमन्थध्वनिदत्तताल
गोपाङ्गनानृत्यमनन्दयत्तम् ।"
इति भट्टिः ।
विवृत्तं तिर्य्यक्चलितं पार्श्वं यत्र । इति
तट्टीका ।

विवृत्तिः, स्त्री, चक्रवद्भ्रमणम् । घूर्णनम् । विपूर्ब्ब-
वृतधातोः क्तिप्रत्ययेन निष्पन्नमिदम् ॥ (विविध-
वृत्तिः । यथा, भागवतटीकायां श्रीधरः ।१।६।१० ।
"विश्वसृजां विवृत्तये त्रिविधवृत्तिलाभाय ।")

विवेकः, पुं, परस्परव्यावृत्तया वस्तुस्वरूपनिश्चयः ।
प्रकृतिपुरुषयोर्विभागेन ज्ञानं इत्यन्ये । इति
भरतः ॥ तत्पर्य्यायः । पृथगात्मता २ । इत्य-
मरः ॥ विवेचनम् ३ । इति शब्दरत्नावली ॥
पृथग्भावः ४ । इति धरणिः ॥
"विवेको वस्तुनो भेदः प्रकृतेः पुरुषस्य वा ॥"
इति जटाधरः ॥
यथा । नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं
वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् ।
इति वेदान्तसारः ॥ (यथा, मनौ । १ । २६ ।
"कर्म्मणाञ्च विवेकार्थं धर्म्माधर्म्मौ व्यवेचयत् ।")
जलद्रोणी । विचारः । इति मेदिनी ॥ (यथा,
मनौ । १ । ११२ ।
"तस्य कर्म्मविवेकार्थं शेषाणामनुपूर्ब्बशः ॥")

विवेकिता, स्त्री, (विवेकिन्+तल् ।) विवेकित्वम् ।
विवेकिनो भावः । यथा,—
"यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु तत्र चतुष्टयम् ॥"
इति हितोपदेशः ॥
(यथा, याज्ञवल्क्ये । ३ । १५६ ।
"आचार्य्योपासनं वेदशास्त्रार्थेषु विवेकिता ॥")

विवेकी, [न्] पुं, (विवेकोऽस्यास्तीति । विवेक+
इनिः ।) देवसेनराजपुत्त्रः । यथा,—
"देवसेनोऽपि कैशिन्यां जनयामास पुत्त्रकान् ।
सप्त शृणुत तान् यूयं नामतः कीर्त्तितांस्तथा ॥
सुमना वसुदानश्च कृतप्रगयवनः कृती ।
नीलो विवेकीत्येते वै सर्व्वशास्त्रविशारदाः ॥"
इति कालिकापुराणे भैरववंशानुकीर्त्तने ९०
अध्यायः ॥ विचारकर्त्ता । इति मेदिन्यां विवेक-
शब्दार्थदर्शनात् ॥ विवेकविशिष्टे, त्रि ॥ (यथा,
मार्कण्डेये । ६६ । ३४ ।
"इष्टाइष्टांस्तथा भोगान् वाञ्छमाना विवे-
किनः ।
दानानि च प्रयच्छन्ति पूर्त्तधर्म्मांश्च कुर्व्वते ।")

विवेचकः, पुं, (वि+विच्+ण्वुल् ।) विवेचन-
कर्त्ता । विवेचयति य इत्यर्थे णकप्रत्ययेन
निष्पन्नमिदम् ॥

विवेचनं, क्ली, (वि+विच्+ल्युट् ।) विवेकः ।
इति शब्दरत्नावली ॥ (यथा, हरिवंशे भविष्य-
पर्व्वणि । ४३ । १८ ।
"विदद्भिर्गीयसे विष्णो त्वमेव जगतीपते ।
इच्छया सर्व्वमाप्नोषि इष्टाइष्टविवेचनम् ॥"*॥
निर्णयः । यथा, मनुः । ८ । २१ ।
"यस्य शूद्रस्तु कुरुते राज्ञो धर्म्मविवेचनम् ।
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः ।")

विवेचनीयः, त्रि, विवेच्यः । विवेचितव्यः । इति
विपूर्ब्बविचधातोरनीयप्रत्ययेन निष्पन्नमिदम् ॥

विब्रु(ब्रु)वन्, [त्] त्रि, (वि+ब्रू+शतृ ।) विरुद्ध-
वक्ता । यथा,—
"यो न भ्राता पिता वापि न पुत्त्रो न नियो-
जितः ।
परार्थवादी दण्ड्यः स्यात् व्यवहारेषु विब्रुवन् ॥"
विब्रुवन् विरुद्धं ब्रुवन् । इति व्यवहारतत्त्वम् ॥

विवोढा, [ऋ] पुं, (वि+वह+तृच् ।) वरः ।
पतिः । इति हेमचन्द्रः ॥

विव्वोकः, पुं, स्त्रीणां शृङ्गारभावजा क्रिया । इत्य-
मरः ॥ अभिमतवस्तुप्राप्तावपि गर्व्वादनादरः
सापराधस्य च संयमनं ताडनञ्च विव्वोकः ।
यदुक्तम् ।
"गर्व्वाभिमानादिष्टेऽपि विव्वोकोऽनादरक्रिया ।"
तथा ।
"अभिमतवस्तूपहृतावपि गुरुगर्व्वादनादर-
स्तस्याः ।
स्खलति प्रियस्य हृदयं संयमताडनमयनु
विव्वोकः ।"
इति भरतः ॥
"विव्वोकस्त्वतिगर्व्वेण वस्तुनीष्टेऽप्यनादरः ।
न त्वराहर्षवागादेर्दयितागमनादिषु ।"
इति सारसुन्दरी ॥
"इष्टेऽपि गर्व्वमानाभ्यां विव्वोकः स्यादनादरः ।"
इत्युज्ज्वलनीलमणिः ॥

विश, ओ श प्रवेशे । इति कविकल्पद्रुमः ।
(तुदा०-पर०-सक०-अनिट् ।) श, विशति ।
ओ, अविक्षत् । विवेश कश्चिज्जटिलस्तपोवनम् ।
विपराजिपरिव्यवक्रीनिविशेत्यादिनात्मनेपदवि-
धानेऽपि भर्त्तुरङ्के निविशती भयादिति रघौ ।
केवलात् शतृप्रत्ययं विधाय पश्चादुपसर्गयोगा-
दिति दुर्घटवृत्तिः । निशब्द इह उपसर्गप्रति-
रूपको वा । यस्मादिश्वमिदं सर्व्वं तस्य शक्त्या
महात्मनः । तस्मादेवोच्यते विष्णुर्विशधातोः
प्रवेशनादिति पुराणे विष्णुशब्दव्युत्पादनात्
मूर्द्धन्यान्तोऽयमिति केचित् तच्चिन्त्यम् । ताल-
व्यान्तस्यैव सर्व्वसम्मतत्वात् । इति दुर्गादासः ॥

विशं, क्ली, (विश+कः ।) मृणालम् । इत्यमर-
टीकायां रायमुकुटः ॥ (तत्पर्य्यायो यथा,—
"पद्मनालं मृणालं स्यात्तथा विशमिति स्मृतम् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

विशंवरा, स्त्री, (विशं मनुष्यं वृणोतीति । वृ+
अच् । अभिधानात् द्वितीयाया अलुक् ।)
पत्नी । इति राजनिर्घण्टः ॥

विशकण्ठी, स्त्री, (विशमिव कण्ठो यस्याः ।
विशकण्ठ+ङीष् ।) बलाका । इति राज-
निर्घण्टः ॥

विशङ्कः, त्रि, विगता शङ्का यस्य बहुव्रीहिः ।
शङ्कारहितः । (यथा, रघुः । २ । ११ ।
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विशङ्कैः ।")

विशङ्कटः, त्रि, (वि+"वेः शालच्छङ्कटचौ ।"
५ । २ । २८ । इति शङ्कटच् ।) विशालः ।
इत्यमरः ॥ (यथा, भट्टिः । २ । ५० ।
"विशङ्कटो वक्षसि बाणपाणिः
सम्पन्नतालद्वयसः पुरस्तात् ।"
भयानकः । यथा, कथासरित्सागरे ।१०८।१०७।
"मांसासृक्स्नुतवेतालतालवाद्यविशङ्कटः ।
अभूत्तत्यक्तबन्धोऽसौ भूतप्रीत्यै रणोत्सवः ।")

विशदः, पुं, (वि+शद्+अच् ।) श्वेतवर्णः ।
इत्यमरः ॥ (जयद्रथपुत्त्रः । यथा, भागवते ।
९ । २१ । २३ ।
"बृहत्कायस्ततस्तस्य पुत्त्र आसीज्जयद्रथः ।
ततसुतो विशदस्तस्य स्येनजित् समजायत ।")

विशदः, त्रि, (वि+शद्+अच् ।) निर्म्मलः ।
इति हेमचन्द्रः ॥ (यथा, रघुः । ४ । १८ ।
"प्रसादसुमुखे तस्मिन् चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः ॥")
व्यक्तः । इति मेदिनी ॥ (यथा, रघुः । ८ । ३ ।
"विशदोच्छ्वसितेन मेदिनी
कथयामास कृतार्थतामिव ।")
शुक्लगुणयुक्तः । इत्यमरः ॥ (उज्ज्वलः । यथा,
माघे । ८ । ७० ।
"स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासश्च प्रतनु विविक्तमस्त्वितीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः ॥")

विशय:, पुं, (वि+शी+अच्।) संशय:। यथा,
"विषयो विशयश्चैव पूर्व्वपक्षस्तथोत्तरम्।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥"
विषयो विचारार्हवाक्यम्। विशयोऽस्यायमर्थो न वा इति संशय:। इति तिथ्यादितत्त्वम्॥ आश्रय:। इति केचित्॥

विशयी, [न्] त्रि, (विशयोऽस्त्यस्येति। विशय+इनि:।) संशयी। इति विशयशब्दार्थदर्शनात्॥

विशर:, पुं, (वि+शॄ हिंसायाम्+अप्।) वध:। इत्यमर:॥

विशरणं, क्ली, (वि+शॄ+ल्युट्।) मारणम्। इति हेमचन्द्र:॥

विशल्य:, त्रि, (विगतं शल्यं यस्मात्।) शल्यरहित:। यथा,—
"सशल्य: स समाघ्राय लक्ष्मण: परवीरहा।
विशल्यो विरुज: शीघ्रमुदतिष्ठन्महीतलात्॥"
इति श्रीरामायणे युद्धकाण्डे १०२ सर्ग:॥

विशल्याकरणी, स्त्री, (विशल्यं क्रियतेऽनयेति। विशल्य+कृ+ल्युट्। ङीप्।) औषधिविशेष:। यथा,—
"पूर्व्वन्तु कथितो योऽसौ वीर जाम्बवता तव।
दक्षिणे शिखरे जातां महौषधिमिहानय॥
विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा।
संजीवकरणीं वीर सन्धानीञ्च महौषधीम्॥"
इति रामायणे वाल्मीकीये युद्धकाण्डे १०३ सर्ग:॥

विशल्यकृत्, पुं, (विशल्यं तत्प्रहारजन्यवेदनादिनाशं करोतीति। कृ+क्विप्।) विशालोटच:। हापरमालीति ख्यात:। तत्पर्य्याय:। अचोड़क: २ सुकल्क: ३ भूपलाश: ४। इति रत्नमाला॥ आस्फोत: ५ आचरत्प्रिय: ६। इति शब्दचन्द्रिका। विशल्यकारिणि, त्रि॥

विशल्या, स्त्री, (विगतं शल्यन्तत्प्रहारादिजनितवेदनादिनाशो यया।) गुडूची। (अस्या: पर्य्यायो यथा,—
"गुडूची मधुपर्णी स्यादमृतामृतवल्लरी।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली।
चक्रलक्षणिका धीरा विशल्या च रसायनी॥
चन्द्रहासी वय:स्था च मण्डली देवनिर्म्मिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे।)
अग्निशिखावृक्ष:। (अस्या: पर्य्यायो यथा,—
"कलिहारी तु हलिनी लाङ्गली शक्रपुष्प्यपि।
विशल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भनुत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे।)
दन्ती। इत्यमर:॥ (अस्या: पर्य्यायो यथा,—
"लघुदन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि।
तथैरण्डफला शीघ्रा श्येनघण्टाघुणप्रिया॥
वाराहाङ्गी च कथिता निकुम्भश्च मकूलक:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
त्रिपुटा। इति मेदिनी॥ कलिकारी। अजमोदा। इति राजनिर्घण्ट:॥ (नदीविशेष:। यथा, महाभारते। २। ९। २०।
"किम्पुना च विशल्या च तथा वैतरणी नदी॥")

विशसनं, क्ली, (वि+शस हिंसायाम्+ल्युट्।) मारणम्। इत्यमर:॥ (यथा, हरिवंशे। ९९। ४३।
"तस्मिन् विशसने घोरे चक्रलाङ्गलसंप्लवे।
दारुणानि प्रवृत्तानि रक्षांस्यौत्पातिकानि च॥"
नरकविशेष:। यथा, भागवते। ५। २६। ७।
"प्राणरोधो विशसनं लालाभक्ष: सारमेयादनमवीचिरय:पानमिति॥"*॥ विनाशकारिणि, त्रि। यथा, महाभारते। ६। ५९। ६०।
"यमदण्डोपमां गुर्व्वीमिन्द्राशनिसमस्वनाम्।
अपश्याम महाराज रौद्रीं विशसनीं गदाम्॥")

विशसन:, पुं, (विशसति छिनत्तीति। वि+शस हिंसायाम्+ल्यु:।) खड्ग:। इति त्रिकाण्डशेष:॥ (यथा, महाभारते। १२। १६६। ८३—८४।
"असेरष्टौ हि नामानि रहस्यानि निबोध मे।
पाण्डवेय सदा यानि कीर्त्तयन् लभते जयम्॥
असिर्व्विशसन: खड्गस्तीक्ष्णधारो दुरासद:।
श्रीगर्भो विजयश्चैव धर्म्मपालस्तथैव च॥")

विशसित:, त्रि, मारित:। विपूर्व्वशसधातो: क्तप्रत्ययेन निष्पन्न:। इति सिद्धान्तकौमुदी॥

विशस्त:, त्रि, अविनीत:। धृषिशसी वैयात्ये। एतौ निष्ठायामविनये एवानिटौ स्त:। धृष्टो विशस्त:। अन्यत्र धर्षित:। विशसित:। इति सिद्धान्तकौमुदी॥

विशस्ता, [ऋ] पुं, (वि+शस हिंसायाम्+तृच्।) चाण्डाल:। इति संक्षिप्तसारोणादिवृत्ति:॥ (हिंसाकारके, त्रि। यथा, महाभारते। १२। ११५। ४९।
"आहर्त्ता चानुमन्ता च विशस्ता क्रयविक्रयी।
संस्कर्त्ता चोपभोक्ता च खादक: सर्व्व एव ते॥"
पापिन इति शेष:।)

विशाकर:, पुं, भद्रचूड़:। इति शब्दचन्द्रिका। लङ्कासिज् इति भाषा॥

विशाख:, पुं, कार्त्तिकेय:। इत्यमर:॥ (यथा, महाभारते। ३। २३१। ७।
"प्रभुर्नेता विशाखश्च नैगमेय: सुदुश्चर:॥")
धन्विनां वितस्त्यन्तरेण पादसंस्थानम्। इति भरत:॥ याचक:। इति मेदिनीकरहेमचन्द्रौ॥ पुनर्नवा। इति राजनिर्घण्ट:॥ (विगता शाखा यस्य। शाखाविहीने, त्रि। यथा, हरिवंशे। ४८। ५२।
"कबन्धोऽवस्थित: संख्ये विशाख इव पादप:॥")

विशाखज:, पुं, नारङ्ग:। इति शब्दचन्द्रिका॥ विशाखजाते, त्रि॥

विशाखलं, क्ली, युद्धकाले मध्ये विन्यस्तपादद्वयम्। यथा,—
"वितस्त्यन्तरविन्यस्ते पादयुग्मे विशाखलम्॥"
इति शब्दमाला॥

विशाखा, स्त्री, कठिल्लक:। इति मेदिनी॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतषोड़शनक्षत्रम्। तत्पर्य्याय:। राधा २। इत्यमर:॥ "विशाखे द्वे।
'पत्नीमध्यगतस्तत्र सुग्रीव: प्लवगेश्वर:।
विशाखयोर्मध्यगत: संपूर्ण इव चन्द्रमा:॥'
इति रामायणम्॥
अतएव द्वित्वमुचितं किन्तु एकतारापेक्षया एकवचनमिहोक्तम्।" इति भरत:॥ तस्याकृपं तोरणाकारचतुस्ताराभयम्। इति मुहूर्त्तचिन्तामणि:॥
"तोरणाकृतिनि पञ्चतारके
तारकेशवदने विशाखभे।
सन्ति यान्ति विबुधाध्वमध्यगे
कुम्भतो रसभुजा: कला: प्रिये॥"
दं। ०।२६। इति कालिदासकृतरात्रिलग्ननिरूपकग्रन्थ:॥ अस्या अधिदेवते शक्राग्नी। इयं मिश्रगणान्तर्गता। इति ज्योतिस्तत्त्वम्॥ *॥ तत्र जातफलम्।
"सदानुरक्तो विविधक्रियायां
सुवर्णकारैरपि सख्यमेति।
यस्य प्रसूतौ च भवेत् विशाखा
सखा न कस्यापि भवेत् प्रसूत:॥"
इति कोष्ठीप्रदीप:॥

विशातन:, त्रि, (वि+शत+णिच्+ल्यु:।) मोचनकर्त्ता। (यथा, महाभारते। ७। ८१। १८।
"नमस्ते देवदेवेश सनातन विशातन।
विष्णो जिष्णो हरे कृष्ण वैकुण्ठ पुरुषोत्तम॥")
यथा च।
"साधु वीर त्वया पृष्टमवतारकथां हरे:।
यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीम्॥"
इति श्रीभागवते ३ स्कन्धे १४ अध्याय:॥
"मृत्यो: पाशं विशातयति मोचयतीति तथा।"
इति तट्टीकायां श्रीधरस्वामी॥ (वि+शत+णिच्+ल्युट्। पातने, क्ली। यथा, महाभारते। ७। १२। १९।
"यतमाना: प्रयत्नेन द्रोणानीकविशातने।
न शेकु: सृञ्जया युद्धे तद्धि द्रोणेन पालितम्॥")

विशाय:, पुं, (वि+शी+"व्युपयो: शेते: पर्य्याये।" ३। ३। ३९। इति घञ्।) प्रहरिकादीनां क्रमेण शयनम्। यथा, अमरे।
"उपशायो विशायश्च पर्य्यायशयनार्थकौ॥"

विशारणं, क्ली, (वि+शॄ+णिच्+ल्युट्।) मारणम्। इति हेमचन्द्र:॥

विशारद:, त्रि, विद्वान्। (यथा, मनु:। ७। ६३।
"दूतञ्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम्॥")
प्रगल्भ:। इत्यमर:॥ प्रसिद्ध:। इति हारावली॥ श्रेष्ठ:। इत्यजयपाल:॥ वकुले, पुं। इति राजनिर्घण्ट:॥

विशारदा, स्त्री, क्षुद्रदुरालभा। इति राजनिर्घण्ट:॥

विशाल:, त्रि, (वि+"वे: शालच्छङ्कटचौ।" इति शालच्। यद्वा, विश प्रवेशने+"तमिविशि-

विड़ीति।" उणा० १। ११७। इति कालन्।) वृहत्। इत्यमरः॥ (यथा, रघुः। ६। ३२।
"अवन्तिनाथोऽयमुदग्रबाहु-
विंशालवक्षास्तनुवृत्तमध्यः॥"
विगतः शालः स्तम्भो यस्य। स्तम्भरहितः। यथा, शिशुपालवधे। ३। ५०।
"गृहैर्व्विशालैरपि भूरिशालैः॥")

विशालः, पुं, (विश+कालन्।) मृगभेदः। पक्षि-भेदः। इति मेदिनी॥ नृपभेदः। वृक्षभेदः। इति शब्दरत्नावली॥

विशालता, स्त्री, (विशालस्य भावः। विशाल+तल्।) पार्श्वविस्तारः। ओसार इति ख्यातः॥ तत्पर्य्यायः। परिणाहः २। इत्यमरः॥ (यथा, वृहत्संहितायाम्। ४। ८।
"उन्नतमीषच्छृङ्गं नौसंस्थाने विशालता चोक्ता॥")
सामान्यविशालत्वम्। इति शब्दरत्नावली॥

विशालतैलगर्भः, पुं, (विशालं प्रचुरं तैलं गर्भे यस्य।) अङ्कोठवृक्षः। इति राजनिर्घण्टः॥

विशालत्वक्, [च्] पुं, (विशाला त्वक् यस्य।) सप्तपर्णवृक्षः। इत्यमरः॥ (यथास्य पर्य्यायः।
"सप्तपर्णो विशालत्वक् शारदो विषमच्छदः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

विशालपत्रः, पुं, (विशालानि पत्राणि यस्य।) कासालुः। श्रीतालः। इति राजनिर्घण्टः॥

विशालफलिका, स्त्री, (विशालं फलं यस्याः। ततः स्वार्थे कन्। टापि अत इत्वम्।) निष्पावी। इति राजनिर्घण्टः॥

विशाला, स्त्री, (विशाल+टाप्।) इन्द्रवारुणी। इत्यमरः॥ यथाच।
"विशाला कफवातघ्नी हेमकुष्ठहरा सरा॥"
इति राजवल्लभः॥
उज्जयनी। इति मेदिनी॥ उपोदकी। महेन्द्र-वारुणी। इति राजनिर्घण्टः॥ (यथा,—
"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी।
वारुणी च गवाप्युक्ता सा विशाला महाफला।
श्वेतपुष्पा मृगाक्षी च मृगैर्व्वारुर्मृगादनी॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
तीर्थविशेषः। यथा,—
"मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः।
वर्ज्जयित्वा गयां गङ्गां विशालां विरजां तथा॥"
इति प्रायश्चित्ततत्त्वम्॥
दक्षकन्या। यथा,—
"मनोरमां भानुमतीं विशालां बाहुदामपि।
दक्षः प्रादान्महादेव चतस्रोऽरिष्टनेमिने॥"
इति गारुडे ६ अध्यायः॥

विशालाक्षः, पुं, (विशाले अक्षिणी यस्य। समासे षच्।) हरः। (यथा, महाभारते।१३।५६।८०।
"ततस्तां भगवान्नीतिं पूर्ब्बं जग्राह शङ्करः।
बहुरूपो विशालाक्षः शिवः स्थाणुरुमापतिः॥")
गरुड़ः। (तद्वंशीयविशेषः। यथा, महा-भारते। ५। १०१। ६।
"अनिलश्चानलश्चैव विशालाक्षोऽथ कुण्डली॥")
सुनेत्रे, त्रि। इति मेदिनी॥ (यथा, महा-भारते। ३। ३६। ७०।
"ददामि ते विशालाक्ष चक्षुः पूर्ब्बकृषि-र्भवान्॥")
विष्णुः। इति केचित्॥ (धृतराष्ट्रपुत्रः। यथा, महाभारते। १। ११७। ६।
"अपराजितः कुण्डशायी विशालाक्षो दुरा-धरः॥")

विशालाक्षी, स्त्री, (विशाले अक्षिणी यस्याः।) वरस्त्री। इति विश्वः॥ (यथा, महाभारते। १। ७७। १३।
"यत्रोषितं विशालाक्षि त्वया चन्द्रनिभानने।
तत्राहमुषितो भद्रे कुत्सौ काव्यस्य भामिनि॥")
नागदन्ती। इति राजनिर्घण्टः॥ पार्व्वती। यथा, आदियामले।
ईश्वर उवाच।
"भुवमाद्यं समुद्धृत्य मायाबीजं समुद्धरेत्।
विशालाक्षीपदं ङेऽन्तं हृदन्तं मन्त्रमुद्धरेत्॥
अष्टाक्षरी महाविद्या अष्टसिद्धिप्रदा शिवे।
प्रसङ्गात् कथिता विद्या त्रैलोक्यदुर्लभा प्रिये॥
ऋषिरस्या महेशानि सदाशिवो महाप्रभुः।
पंक्तिश्च छन्दः कथितं विशालाक्षी च देवता॥
शक्तिः प्रणवमित्युक्तं लज्जाबीजञ्च बीजकम्।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः॥
अङ्गन्यासकरन्यासौ यथावदभिधीयते।
षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्॥
मूलेन व्यापकं न्यस्य ध्यायेद्देवीं परां शिवाम्।
ध्यायेद्देवीं विशालाक्षीं तप्तजाम्बूनदप्रभाम्॥
द्विभुजामम्बिकां चण्डीं खड्गखर्परधारिणीम्।
नानालङ्कारसुभगां रक्ताम्बरधरां शुभाम्॥
सदा षोड़शवर्षीयां प्रसन्नास्यां त्रिलोचनाम्।
मुण्डमालावतीं रम्यां पीनोन्नतपयोधराम्॥
शिवोपरि महादेवीं जटामुकुटमण्डिताम्।
शत्रुक्षयकरीं देवीं साधकाभीष्टदायिकाम्॥
सर्व्वसौभाग्यजननीं महासम्पत्प्रदां स्मरेत्।
एवं ध्यात्वा महादेवीमुपचारैः प्रपूजयेत्॥
पुरश्चरणकाले तु वर्णलक्षं जपेत् सुधीः।
यन्त्रमध्ये समावाह्य प्रतिष्ठां कारयेत्ततः॥
त्रिकोणञ्चाष्टपत्रञ्च ततो वृत्तं समालिखेत्।
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत्॥
तत्रावाह्य यजेद्देवीं सर्व्वसौभाग्यसुन्दरीम्।
विशालाक्षीं विशालास्यां यथाविधि प्रपूजयेत्॥
त्रिकोणान्तर्महादेवीं संपूज्य मातरः क्रमात्।
पङ्कजाक्षी विरूपाक्षी रक्ताक्षी पद्मलोचना॥
एकनेत्रा द्विनेत्रा च कोटराक्षी त्रिलोचना।
एताः पूज्या महेशानि पत्राग्रेष्वष्टयोगिनीः॥
पश्चिमादिक्रमेणैव अष्टसिद्धिस्वरूपिणीः।
चतुरस्रे महादेवि लोकपालान् समर्च्चयेत्॥
तद्बहिश्चैव वज्राद्यान् पूजयेच्छान्त्यहेतवे।
ततो यथाशक्ति जप्त्वा पूर्ब्बवच्च समाचरेत्॥"
इति तन्त्रसारः॥ * ॥
चतुःषष्टियोगिन्यन्तर्गतयोगिनीविशेषः। इति दुर्गार्च्चापद्धतिः॥

विशाली, स्त्री, अजमोदा। इति राजनिर्घण्टः॥

विशिखः, पुं, (विशिष्टा शिखा यस्य।) शर-वृक्षः। इति राजनिर्घण्टः॥ वाणः। इत्यमरः॥ (यथा, भागवते। ४। १७। १३।
"सन्दधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा॥")
तोमरः। इति मेदिनी॥ (विगता शिखा यस्य।) शिखारहिते, त्रि॥ यथा,—
"विशिखोऽनुपवीती च यत् कर्म्म न तत् कृतम्॥"
इति स्मृतिः॥

विशिखा, स्त्री, खनित्री। रथ्या। (यथा, माघे। १५। १७।
"विशिखान्तराण्यतिपपात
सपदि जवनैः स वाजिभिः॥")
नालिका। इति मेदिनी॥

विशिपं, क्ली, (विशन्त्यत्रेति। विश+"विटप-पिष्टपविशिपोलपाः।" उणा० ३।१४५। इति कप्रत्ययेन निपातनात् साधुः।) मन्दिरम्। इत्युणादिकोषः॥

विशिष्टः, त्रि, (वि+शिष्+क्तः। यद्वा, शास+क्तः।) युक्तः। यथा। स्नानचत्रगङ्गा-रूपगुणद्वयविशिष्टधर्म्मोविधेयस्मिन् अहनि तल्लाभस्तत्र स्नानम्। इति तिथ्यादितत्त्वे स्मार्त्त-भट्टाचार्य्यलिखनम्। विशेषेण शिष्टश्च॥ (यथा, हितोपदेशे।
"समेषु समतां याति विशिष्टेषु विशिष्टताम्॥")

विशिष्टः, पुं, विष्णुः। यथा। विशिष्टः शिष्टकृत् शुचिः। इति तस्य सहस्रनामस्तोत्रम्॥

विशिष्टाद्वैतवादी, [न्] त्रि, (विशिष्टं युक्तं अद्वैतं वदतीति। वद्+णिनिः।) प्रकृति-पुरुषयोर्भिन्नत्वेऽपि मिलितयोस्तयोर्ब्रह्मत्ववादी। तस्य मतं यथा। पुरुषस्तद्व्यतिरिक्ता प्रकृतिः किन्तूभयमिलितं ब्रह्म चणकद्विदलवत्। इत्थं ब्रह्मण एकत्वं व्यवस्थितम्। चित् परमाणु-स्वरूपो जीवः समस्तविश्वं ब्रह्मांशः। इति माधवभाष्यादिः॥ * ॥ अद्वैतवादिमतं यथा। ब्रह्मैव सत्यं प्रत्यक्षादिसिद्धं विश्वं ब्रह्मणि आरोपितम्। यथा रज्जुः रज्जुस्वरूपाज्ञानात् सर्पवत् प्रतिभाति। तथा ब्रह्मस्वरूपाज्ञानात् विश्वं वस्तुवत् प्रतिभाति। प्रकृतिर्जीवश्चापि पर्य्यवसाने ब्रह्मैव ब्रह्मान्यत् सद्वस्तु नास्ति। अत्र प्रमाणं शारीरिकसूत्रस्य शङ्कराचार्य्य-कृतभाष्यतट्टीकाकल्पतरुभाष्यरत्नप्रभादि॥

विशीर्णः, त्रि, (वि+शॄ+क्तः।) शुष्कः। यथा,
"विशीर्णा विदला ह्रस्वा वक्राः स्थूला द्विधा-कृताः।
क्रिमिदष्टाश्च दीर्घाश्च समिधो नैव कारयेत्॥"
इति तन्त्रसारः॥

विशीर्णपर्णः, पुं, (विशीर्णानि पर्णानि यस्य।) निम्बवृक्षः। इति राजनिर्घण्टः॥

विशुद्धं, त्रि, विशेषेण शुद्धम् । तत्पर्य्याय: । उज्ज्वलम् २ विमलम् ३ विशदम् ४ वीध्रम् ५ अवदातम् ६ अनाविलम् ७ शुचि: ८ । इति हेमचन्द्र: ॥ निर्म्मलम् । सत्यम् । इत्यजयपाल: ॥ षट्चक्रान्तर्गतपञ्चमचक्रम् । तत्तु कण्ठस्थं अकारादिषोडशस्वरयुक्तधूम्रवर्णषोडशदलपद्मम् । तन्मध्ये शिव आकाशश्चास्ति । यथा,—

"तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोडशपङ्कजम् ।
स्वरैश्च षोडशैर्युक्तं धूम्रवर्णं महत्प्रभम् ।
विशुद्धपद्ममाख्यातमाकाशाख्यं महाद्भुतम् ॥"
इति तन्त्रम् ॥

अगस्त्यसंहितायाम् । अकारादिषोडशस्वरान् सविन्दून् षोडशदलकमले कण्ठमूले न्यसेत् । विशुद्धे षोडशदले धूम्राभे स्वरभूषिते । इति तन्त्रसार: ॥

विशुद्धि:, स्त्री, (वि + शुध + क्तिन् ।) शम: । शोधनम् । इति त्रिका: ॥

"सर्व्वकर्म्मस्वुपादेया विशुद्धिश्चन्द्रतारयो: ॥"
इति ज्योतिषम् ॥

विशृङ्खल:, त्रि, शृङ्खलारहित: । (यथा, कथासरित्सागरे । ५ । ३ ।

"अचिन्तयं ततश्चाहं राजा तावद्विशृङ्खल: ।
तत्कार्य्यचिन्तयाक्रान्त: स्वधर्म्मो मेऽवसीदति ॥")

अबद्ध: । विगता शृङ्खला यस्येति बहुब्रीहिनिष्पन्नमिदम् ॥

विशेष:, पुं, (वि + शिष + घञ् ।) प्रभेद: । (यथा, मनु: । ९ । २६ ।

"प्रजनार्थं महाभागा: पूजार्हा गृहदीप्तय: ।
स्त्रिय: श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥")

प्रकार: । इति जटाधर: ॥ व्यक्ति: । इति हेमचन्द्र: ॥ तिलक: । इति हारावली ॥ सप्तपदार्थान्तर्गतपदार्थविशेष: । यथा,—

"द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम् ।
समवायस्तथाभाव: पदार्था: सप्त कीर्त्तिता: ॥"
इति भाषापरिच्छेद: ॥

विशेषं निरूपयति । अन्त्यो नित्यद्रव्यवृत्तिर्विशेष: परिकीर्त्तित: । अन्तेऽवसाने वर्त्तते इति अन्त्य: यदपेक्षया विशेषो नास्तीत्यर्थ: । घटपटादीनां द्व्यणुकपर्य्यन्तानां तत्तदवयवभेदात् परस्परभेद: । परमाणूनां भेदको विशेष एव स तु स्वत एव व्यावृत्त: । तेन तत्र विशेषान्तरापेक्षा नास्ति इत्यर्थ: । इति सिद्धान्तमुक्तावली ॥ * ॥ अलङ्कारप्रभेद: । यथा,—

"विशेष: ख्यातमाधारं विनाप्याधेयवर्णनम् ।
गते सूर्य्येऽपि दीपस्थास्तमश्छिन्दन्ति तत्करा: ॥१
विशेष: सोऽपि यद्येकं वस्त्वनेकत्र वर्ण्यते ।
अन्तर्बहि: पुर: पश्चात् सर्व्वदिक्ष्वपि सैव मे ॥२॥
किञ्चिदारम्भतोऽशक्यवस्त्वन्तरकृतिश्च स: ।
त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणम् ॥"३
इति चन्द्रालोक: ॥

(पृथिवी । यथा, भागवते । २ । ५ । २९ ।

"विशेषस्तु विकुर्व्वाणादम्भसो गन्धवानभूत् ॥"

तथाच तत्रैव । ३ । ११ । ४० ।

"विकारै: सहितो युक्तैर्विशेषादिभिरावृत: ॥"

अतिशयिते, त्रि । यथा, रघु: । २ । १४ ।

"शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धि: ॥")

विशेषक:, पुं क्ली, (विशेष एव । स्वार्थे कन् ।) ललाटकृततिलक: । इत्यमर: ॥ (यथा, माघे । ३ । ६३ ।

"विशेषको वा विशिशेष यस्या:
श्रियं त्रिलोकीतिलक: स एव ॥")

तिलकवृक्षे, पुं । इति राजनिर्घण्ट: ॥ (क्ली, पद्यविशेष: । स तु त्रिभि: श्लोकैरन्वितश्चेत् तदा भवति । यथा,—

"द्वाभ्यान्तु युग्मकं प्रोक्तं त्रिभि: श्लोकैर्विशेषकम् ॥")

विशेषयितरि, त्रि । इति मेदिनी ॥

विशेषकच्छेद्यं, क्ली, (विशेषकैश्छेद्यम् ।) चतु:षष्टिकलान्तर्गतषष्ठकला । इति शैवतन्त्रम् ॥ सा तु तिलकेषु नानाविच्छेदरचना । इति दशमस्कन्धीयपञ्चचत्वारिंशाध्यायटीकायाम् ॥

विशेषगुण:, पुं, (विशेषो गुण: ।) बुद्ध्यादिषट्कम् । रूपादिचतुष्टय: । स्नेह: । स्वाभाविकद्रवत्वम् । अदृष्ट: । भावना । शब्द: । इति भाषापरिच्छेद: ॥

विशेषविधि:, पुं, (विशेषो विधि: ।) अल्पविषयकविधि: । यथा,—

"तथा सामान्यकार्य्येभ्यो विशेषकविधिर्ब्बली ।
बहवो विषया यस्य स सामान्यविधिर्भवेत् ।
अल्प: स्याद्विषयो यस्य स विशेषविधिर्म्मत: ॥"
इति दुर्गादास: ॥

सामान्यविशेषयोर्मध्ये विशेषविधिर्बलवान् । इति स्मृति: ॥

विशेषणं, क्ली, (विशिष्यतेऽनेनेति । वि + शिष + ल्युट् ।) विशेष्यधर्म्म: । स तु गुणादि: । यथा । नीलोत्पलमित्यादि । विशिष्यते सम्बुध्यते अनेन । छत्रेण छात्रमद्राक्षीदिति । भेदयति अन्यपदार्थं पृथक् करोति इति भेदकम् । नाम्ना शिव: गोत्रेण गार्ग्य: । विशेषणं दृष्टमेव भेदयति । भेदकन्तु अदृष्टमेव भेदयति । इति विशेषणभेदकयोर्भेद: । इति मुग्धबोधटीकायां दुर्गादास: ॥

विशेषव्याप्ति:, स्त्री, (विशेषा असामान्या व्याप्ति: ।) व्याप्तिभेद: । तल्लक्षणं यथा । प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावा-प्रतियोगित्वम् । इति चिन्तामणि: ॥

विशेषितं, त्रि, (वि + शिष् + णिच् + क्त: ।) भिन्नम् । अवच्छिन्नम् । इति जटाधर: ॥

विशेषोक्ति:, स्त्री, (विशेषेणोक्ति: ।) अलङ्कारभेद: । तल्लक्षणोदाहरणे यथा,—

"कार्य्याजनिर्व्विशेषोक्ति: सति पुष्कलकारणे ।
हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि ॥"
इति चन्द्रालोक: ॥

विशेष्य:, त्रि, (विशिष्यते गुणादिभिरिति । वि + शिष + ण्यत् ।) धर्म्मिपदार्थ: । स च द्रव्यादि: । विशिष्यते य: । घटपटादि: । भासमानवैशिष्ट्यानुयोगी । अस्य लक्षणं यथा । भासमानवैशिष्ट्यानुयोगित्वं अस्ति च घट इति ज्ञाने घटादौ तत् तत्र हि भासमानवैशिष्ट्यं घटघटत्वयो: सम्बन्धस्तदनुयोगित्वस्य घटादौ सत्त्वात् । अनुयोगित्वमपि स्वरूपसम्बन्धविशेष: प्रतियोगित्वमनुयोगित्वव्यतिरिक्तपदार्थ इत्यप्येकदेशिन: । इति कणाद: ॥

विशोक:, पुं, (विगत: शोको यस्मात् ।) अशोकवृक्ष: । इति राजनिर्घण्ट: ॥ (शोकाभाव: । यथा, भागवते । १ । १० । ७ ।

"उषित्वा हास्तिनपुरे मासान् कतिपयान् हरि: ।
सुहृदाञ्च विशोकाय स्वसुश्च प्रियकाम्यया ॥"

युधिष्ठिरस्यानुचरविशेष: । यथा, महाभारते । २ । ३३ । ३० ।

"इन्द्रसेनो विशोकश्च पुरुश्चार्ज्जुनसारथि: ॥")

शोकरहिते, त्रि ॥ (यथा, भागवते । १ । १९ । २१ ।

"लोकं परं विरजस्कं विशोकं
यास्यत्ययं भागवतप्रधान: ॥"

स्त्री, संप्रज्ञातसमाधे: पूर्व्वकालीना चित्तवृत्ति: । यथा, पातञ्जले । १ । ३६ ।

"विशोका वा ज्योतिष्मती ॥")

विशोधनी, स्त्री, (विशोध्यतेऽनयेति । वि + शुध + ल्युट् । ङीप् ।) दन्तीवृक्ष: । इति राजनिर्घण्ट: ॥

विशोधिनी, स्त्री, नागदन्ती । इति राजनिर्घण्ट: ॥

विशोधिनीबीजं, क्ली, जयपाल: । इति केचित् ॥

विश्र:, पुं, (विच्छ दीप्तौ + "यजयाचयतविच्छेति ।" ३ । ३ । ९० । इति नङ् ।) दीप्ति: । इति सिद्धान्तकौमुदी ॥ गति: । इति मुग्धबोधटीकायां दुर्गादास: ॥

विश्रणनं, क्ली, (वि + श्रण + ल्युट् ।) दानम् । इति शब्दरत्नावली ॥

विश्रब्ध:, त्रि, (वि + श्रन्भ + क्त: ।) अनुद्भट: । शान्त: । विश्वस्त: ॥ (यथा, राजतरङ्गिण्याम् । ८ । २१२१ ।

"विश्रब्धभृत्य: शृङ्गारनामा चाप्यब्रवीत् प्रभो: ।
तं दृष्ट्वांस्तृतीयेऽह्नि शयनेऽवगतं स्थितम् ॥")

अत्यर्थ: । इति हेमचन्द्र: ॥ गाढ: । इति मेदिनी ॥ (निर्व्विशङ्क: । यथा, रामायणे । २ । १९ । ५ ।

"नियुज्यमानो विश्रब्ध: किं न कुर्य्यामहं प्रियम् ॥")

विश्रब्धनवोढ़ा, स्त्री, (विश्रब्धा विश्वस्ता नवोढ़ा ।) मुग्धानवोढ़ाभेद: । यथा । स्वीया त्रिविधा मुग्धा मध्या प्रगल्भा च । यथा अङ्कुरितयौवना मुग्धा । सा च ज्ञातयौवना अज्ञातयौवना च । सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढ़ा । सैव क्रमशो जातप्रश्रया विश्रब्ध-

नवोढ़ा। अस्याश्चेष्टा क्रिया मनोहरा कोपे मार्द्दवं नवविभूषणे समीहा च। विश्रब्धनवोढ़ा यथा,—

"दरमुकुलितनेत्रपालिनीवी-
नियमितबाहुकृतोरुयुग्मबन्धम्।
करकलितकुचस्थलं नवोढ़ा
स्वपिति समीपमुपेत्य कस्य यूनः॥"

इति रसमञ्जरी॥

विश्रमः, पुं, (वि+श्रम+घञ्। वृद्ध्यभावः।) विश्रामः। इति भरतद्विरूपकोषः॥ (यथा, कातन्त्रकृतम्। १। ३।

"अविश्रमं यावदिदं शरीरं-
पतत्यवश्यं परिणामदुर्व्वहम्॥")

विश्रम्भः, पुं, (वि+श्रम्भ+घञ्।) विश्वासः। इत्यमरः॥ (यथा, भागवते। ३। २३। २।

"नित्यं पर्य्यचरत् प्रीत्या भवानीव भवं प्रभुम्।
विश्रम्भेणात्मशौचेन गौरवेण दमेन च॥")

केलिकलहः। प्रणयः। इति मेदिनी। भे, २०॥ वधः। इति विश्वः॥

विश्राणनं, क्ली, (वि+श्रण+णिच्+ल्युट्।) दानम्। इत्यमरः॥ (यथा, रघुः। २। ५४।

"कथं नु शक्योऽनुनयो महर्षे-
र्विश्राणनाच्चान्यपयस्विनीनाम्॥")

विश्रान्तः, त्रि, श्रान्तियुक्तः। विपूर्व्वकश्रमधातोः क्तप्रत्ययेन निष्पन्नमिदम्॥

विश्रान्तिः, स्त्री, विश्रामः। विपूर्व्वश्रमधातोः क्तिप्रत्ययेन निष्पन्नमिदम्। (यथा, रामायणे। २। २। ८।

"जीर्णस्यास्य शरीरस्य विश्रान्तिमभिरोचये॥")

तीर्थविशेषः। यथा,—

राक्षस उवाच।

"पुरी उज्जयनी नाम तस्यां वासो हि मे सदा।
कस्मिंश्चिदथ कालेन गतोऽहं विष्णुमन्दिरम्॥
तस्याग्रे तिष्ठते विप्रो वाचको वेदपारगः।
विश्रान्तितीर्थमाहात्म्यं श्रावयेत् स दिने दिने॥
यस्य श्रवणमात्रेण मम भक्तिर्हृदि स्थिता।
सा संज्ञा च श्रुता तत्र विश्रान्तेश्च मयानघ॥
वासुदेवो महाबाहुर्जगत्स्वामी जनार्द्दनः।
विश्रामं कुरुते तत्र तेन विश्रान्तिसंज्ञिका॥"

इति वाराहे विश्रान्तिमाहात्म्यनामाध्यायः॥

विश्रामः, पुं, (वि+श्रम+घञ्।) विरामः। इति भरतद्विरूपकोषः॥ अस्य गुणाः।

"विश्रामो वलकृत् खेदश्रमजित् स्वाप्यदः शुभः॥"

इति राजवल्लभः॥

विश्रावः, पुं, (विश्रवणमिति। वि+श्रु+"वौ क्षुश्रुवः।" ३। ३। २५। इति घञ्।) अतिप्रसिद्धिः। इत्यमरः॥ (ध्वनिः। यथा, भट्टिः। ७। २६।

"विद्यावेलोयविश्रावं तर्ज्जयन्तो महोदधेः॥")

विश्विः, पुं, वायुः। इति संक्षिप्तसारोणादिवृत्तिः॥

विश्रुतः, त्रि, (वि+श्रु+क्तः।) ख्यातः। इत्यमरः॥ (यथा, कथाविलासे। २। ५६।

"विद्वान् सुभगो मानी
विश्रुतकर्म्मा कुलोन्नतः शूरः।
वित्तेन भवति सर्व्वो
वित्तहीनस्तु सद्गुणोऽप्यगुणः॥")

ज्ञातः। संहृष्टः। इति विश्वः॥

विश्रुतिः, स्त्री, विख्यातिः। विपूर्व्वश्रुधातोः क्तिप्रत्ययेन निष्पन्नमिदम्॥ (यथा, भागवते। ३। २५। २।

"विश्रुतौ श्रुतदेवस्य भूयि तृप्यन्ति मेऽसवः॥")

विश्लेषः, पुं, (वि+श्लिष्+घञ्।) विधुरः। अयोगः। इति मेदिनी॥ (यथा, रघुः। १३। २३।

"सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमुर्व्याम्।
अदृश्यत त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम्॥")

विश्वं, क्ली, (विशति सकारणमिति। विश प्रवेशने+"अशूप्रुषिलटिकणीति।" उणा० १। १५१। इति क्वन्।) जगत्। इति मेदिनी। वे, २३॥ (यथा, भागवते। ३। १०। १२।

"विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया।
ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना॥")

शुण्ठी। (अस्य पर्य्यायो यथा,—

"विश्वं महौषधं शुण्ठी नागरं विश्वभेषजम्॥"

इति वैद्यकरत्नमालायाम्॥

"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्।
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

बोलम्। इति राजनिर्घण्टः॥

विश्वः, पुं, गणदेवताविशेषः। इत्यमरः॥

"वसुसत्यौ क्रतुदक्षौ कालकामौ धृतिः कुरुः।
पुरूरवा माद्रवाश्च विश्वेदेवाः प्रकीर्त्तिताः॥"

इति भरतः॥*॥

"इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नान्दीमुखे वसुः।
नैमित्तिके कालकामौ काम्ये च धूरिलोचनौ।
पुरूरवा माद्रवाश्च पार्व्वणे समुदाहृतौ॥"

इति स्मृतिः॥

ते तु धर्म्मात् दक्षकन्यायां विश्वायां जाताः। इति मात्स्ये ५ अध्यायः॥*॥ नागरः। इति विश्वः॥ स्थूलशरीरव्यष्ट्युपहितचैतन्यम्। इति वेदान्तसारः॥*॥ परिमाणविशेषः। यथा,—

"गुञ्जाभिस्त्वतिस्रोभी दशशं तद्भवेत् पलम्।
विश्वा विंशपलं प्रोक्तं दिव्यं कोटिगुणं हि तत्।
सैव कोटिगुणा माषी विश्वाः शस्यादि-
सम्भवाः॥"

इति ज्योतिस्तत्त्वम्॥

विश्वः, त्रि, (विश+क्वन्।) सकलम्। इत्यमरः॥ (यथा, महाभारते। ३। २१८। १६।

"यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति।
तं प्राहुरध्यात्मविदो विश्वजिन्नाम पावकम्॥"

बहु। इति निघण्टुः। ३। १॥)

विश्वकद्रुः, पुं, मृगयाकुशलकुक्कुरः। इत्यमरः॥ ध्वानः। इति मेदिनी। रे, २६६॥

विश्वकद्रुः, त्रि, खलः। इति मेदिनी। रे, २६६॥

विश्वकर्म्मजा, स्त्री, (विश्वकर्म्मणः जायते इति। जन+डः।) सूर्य्यभार्य्या। संज्ञा। इति शब्दरत्नावली॥

विश्वकर्म्मसुता, स्त्री. (विश्वकर्म्मणः सुता।) सूर्य्यभार्य्या। संज्ञा। इति शब्दरत्नावली॥

विश्वकर्म्मा, [न्] पुं, (विश्वेषु कर्म्म यस्य।) सूर्य्यः। देवशिल्पी। इत्यमरः। तत्पर्य्यायः। त्वष्टा २ विश्वकृत् ३ देववर्द्धकिः ४। इति हेमचन्द्रः॥ (यथा, महाभारते। १। २१२। १०।

"दृष्ट्वा च विश्वकर्म्माणं व्यादिदेश पितामहः॥")

मुनिभेदः। इति मेदिनी। ने, २४७॥ स प्रभासस्य वसोः पुत्त्रः। यथा,—

"विश्वकर्म्मा प्रभासस्य पुत्त्रः शिल्पप्रजापतिः।
प्रासादभवनोद्यानप्रतिमाभूषणादिषु।
तड़ागारामकूपेषु स्मृतः सोऽमरवर्द्धकिः॥"

इति मात्स्ये ५ अध्यायः॥*॥

अन्यच्च।

"प्रत्यूषस्य विदुः पुत्त्रमृषिं नाम्ना तु देवलम्।
विश्वकर्म्मा प्रभासस्य विख्यातो देववर्द्धकिः॥"

इति गारुड़े ६ अध्यायः॥*॥

अपि च।

"वृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी।
योगसिद्धा जगत् कृत्स्नमसक्ता विचरत्युत॥
प्रभासस्य तु भार्य्या सा वसूनामष्टमस्य तु।
विश्वकर्म्मा महाभागस्तस्यां जज्ञे महामतिः॥
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः।
भूषणानाञ्च सर्व्वेषां कर्त्ता शिल्पवतां वरः॥
यः सर्व्वेषां विमानानि देवतानां चकार ह।
मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः॥"

इति विष्णुपुराणे १ अंशे १५ अध्यायः॥

अन्यच्च।

"द्वौ प्रोक्तौ विश्वकर्म्माणौ मयस्त्वष्टा च योग-
वित्।
द्वौ धाता च विधाता च पौराणौ जगतः-
पती॥"

इति वह्निपुराणे गणभेदो नामाध्यायः॥

(चेतनाधातुः। तद्विवृतिर्यथा। "तत्र पूर्व्वं चेतनाधातुः सत्त्वकारणो गुणग्रहणाय प्रवर्त्तते। स हि हेतुः कारणं निमित्तमक्षरं कर्त्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्म्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यो गुणी ग्रहणं प्राधान्यमव्यक्तं जीवो ज्ञः प्रभुश्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति।" इति चरके शारीरस्थाने चतुर्थेऽध्याये॥)

विश्वका, स्त्री, गङ्गाचिल्ली। यथा,—

"गङ्गाचिल्ली तु देवट्टी विश्वका जलकुक्कुटी।"

इति हारावली॥

विश्वकृत्, पुं, (विश्वं करोतीति। कृ+क्विप्।) विश्वकर्म्मा। इति हेमचन्द्रः॥ (यथा, महाभारते। १। २१२। १३।

"त्रिषु लोकेषु यत्किञ्चित् भूतं स्थावरजङ्गमम्।

समानयद्दर्शनीयं तत्तदत्र स विश्वकृत् ।”
ब्रह्मा । यथा, भागवते । ६ । १४ । ८ ।
“निर्व्वर्दितोऽथाङ्गिरसा सोमं निर्भर्त्स्य विश्व-
कृत् ।
तारां स्वभर्त्रे प्रायच्छदन्तर्व्वत्नीमवैत्पतिः ॥”)
विश्वकेतुः, पुं, (विश्वमेव केतुर्यस्य । विश्वव्यापी वा केतुर्य्यस्य ।) अनिरुद्धः । इत्यमरः ।
विश्वक्, व्य, सर्व्वतः । इत्यमरटीका ।
विश्वक्सेनः, पुं, विष्णुः । इत्यमरटीकायां भरतः ॥ त्रयोदशमनुः । यथा,—
“मनुर्भूतेः सुतस्तद्वत् भौत्यो नाम भविष्यति ।
ततस्तु मेरुसावर्णब्रह्मसूनुर्मनुः स्मृतः ॥
ऋतुश्च ऋतुधामा च विश्वक्सेनो मनुस्तथा ।
अतीतानागताश्चैते मनवः परिकीर्त्तिताः ॥”
इति मात्स्ये ९ अध्यायः ॥ * ॥
विष्णोर्निर्म्माल्यधारिदेवता । यथा,—
“निर्म्माल्यधारी विष्णोस्तु विश्वक्सेनश्चतुर्भुजः ।
शङ्खचक्रगदापाणिर्दीर्घश्मश्रुजटाधरः ।
रक्तपिङ्गलवर्णस्तु सितपद्मोपरिस्थितः ।
व-तृतीयस्वरान्तेन संयुतो विन्दुनेन्दुना ।
कीर्त्तितस्तस्य मन्त्रोऽयं तेन तं परिपूजयेत् ।
विसर्ज्जनं तथा विष्णोरैशान्यां परिकल्पयेत् ॥”
इति कालिकापुराणे ८२ अध्यायः ।
(क्वचित् विश्वक्सेन इति पाठोऽपि दृश्यते ॥)
विश्वक्सेना, स्त्री, प्रियङ्गुवृक्षः । इति केचित् ॥ (केचित् द्वितीयशकारस्थाने सकारं पठन्ति । यथा,—
“विश्वक्सेना प्रियाकान्ता प्रियङ्गुः फलिनी
फली ॥”
इति वैद्यकरत्नमालायाम् ।
“प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया ।
गुन्द्रागुन्द्रफला श्यामा विश्वक्सेनाङ्गनाप्रिया”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
विश्वगः, पुं, (विश्वं गच्छतीति । गम + डः ।) ब्रह्मा । इति हेमचन्द्रः ॥
विश्वगन्धं, क्ली, (विश्वे सर्व्वस्थाने गन्धो यस्य ।) बोलम् । इति राजनिर्घण्टः ॥
विश्वगन्धः, पुं, (विश्वे सर्व्वदेशे गन्धो यस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥
विश्वगन्धा, स्त्री, (विश्वेषु समस्तपदार्थेषु मध्ये गन्धा गन्धविशिष्टा । चितावेव गन्ध इति न्यायादस्यास्तथात्वम् ।) पृथिवी । इति शब्दचन्द्रिका ॥
विश्वगोप्ता, [ऋ] पुं, (विश्वस्य गोप्ता ।) विष्णुः । इन्द्रः । इति केचित् ॥ (विश्वपालके, त्रि । यथा, हरिवंशे । २५१ अध्याये ।
“त्वमेव विश्वगोप्तासि विश्वम्भर पवित्रमसि ॥”)
विश्वग्रन्थिः, स्त्री, हंसपदी । इति राजनिर्घण्टः ॥
विश्वग्वायुः, पुं, (विश्वग्गतो वायुः ।) सर्व्वतोगामिपवनः । अस्य गुणाः ।
“विश्वग्वायुरनायुष्यं प्राणिनां नैकदोषकृत् ।
स चेत्तुल्लिङ्गको हन्ता कर्ल्योत्पातपुरःसरः ॥”
इति राजवल्लभः ॥

विश्वद्, [च्] त्रि, सर्व्वत्रगामी । विश्वं अञ्चति इत्यर्थे क्विप्प्रत्ययेन निष्पन्नमिदम् ॥
विश्वङ्करः, पुं, (विश्वं सर्व्वं करोति प्रकाशयतीति । कृ + बाहुलकात् टः द्वितीयाया अलुक् च ।) चक्षुः । इति केचित् ॥
विश्वचक्रं, क्ली, (विश्वतः सर्व्वत्र चक्रं यस्य ।) महादानविशेषः । यथा,—
मत्स्य उवाच ।
“अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
विश्वचक्रमिति ख्यातं सर्व्वपातकनाशनम् ॥
तपनीयस्य शुद्धस्य विश्वचक्रन्तु कारयेत् ।
श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमम् ॥
तस्यार्द्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतम् ।
अन्यद्विंशत्पलादूर्द्ध्वमशक्तोऽपि निवेदयेत् ॥
षोड़शारं ततश्चक्रं भूमिनेम्यष्टकावृतम् ॥
नाभिपद्मे स्थितं विष्णुं योगारूढ़ं चतुर्भुजम् ।
शङ्खचक्रस्य पार्श्वे तु देव्यष्टकसमावृतम् ।
द्वितीयावरणे तद्वत् पूर्व्वतो जलशायिनम् ॥
अत्रिर्भृगुर्व्वशिष्ठश्च ब्रह्मा काश्यप एव च ।
मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च रामश्च बुद्धः कल्की च ते दश ॥
तृतीयावरणे गौरी मातृभिर्बहुभिर्युता ।
चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च ॥
पञ्चमे पञ्चभूतानि रुद्राश्चैकादशैव तु ।
लोकपालाष्टकं षष्ठे दिङ्मातङ्गास्तथैव च ॥
सप्तमेऽस्त्राणि सर्व्वाणि मङ्गल्यानि च कारयेत् ।
अन्तरान्तरतो देवान् विन्यसेदष्टमे पुनः ॥
तुलापुरुषवत् शेषं समन्तात् परिकल्पयेत् ।
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ॥
विश्वचक्रं ततः कुर्य्यात् कृष्णाजिनतिलोपरि ।
तथाष्टादश धान्यानि रसाश्च लवणादयः ॥
पूर्णकुम्भाष्टकश्चैव वस्त्राणि विविधानि च ।
माल्येक्षुफलरत्नानि वितानं चापि कल्पयेत् ॥
ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो गृही ।
होमाधिवासनान्ते तु गृहीतकुसुमाञ्जलिः ॥
इममुच्चारयेन्मन्त्रं त्रिः कृत्वा तु प्रदक्षिणम् ।
नमो विश्वमयायेति विश्वचक्रात्मने नमः ॥
परमानन्दरूपि त्वं पाहि नः पापकर्द्दमात् ।
तेजोमयमिदं यस्मात् सदा पश्यन्ति योगिनः ॥
हृदि तत् त्रिगुणातीतं विश्वचक्रं नमाम्यहम् ।
वासुदेवे स्थितश्चक्रं चक्रमध्ये च माधवम् ॥
अन्योन्याधाररूपेण प्रणमामि स्थिताविह ।
विश्वचक्रमिदं यस्मात् सर्व्वपापहरं परम् ।
आयुधञ्चाधिवासश्च भवादुद्धर मामितः ॥
इत्यामन्त्र्य च यो दद्यात् विश्वचक्रममत्सरः ।
विमुक्तः सर्व्वपापेभ्यो विष्णुलोके महीयते ॥
वैकुण्ठलोकमासाद्य चतुर्व्वाहुः सनातनः ।
सेव्यतेऽप्सरसां संघैस्तिष्ठेत् कल्पशतत्रयम् ॥
प्रणमेद्वाथ यः कुर्य्यात् विश्वचक्रन्दिने दिने ।
तस्यायुर्व्वर्द्धते नित्यं लक्ष्मीश्च विपुला भवेत् ॥
इति सकलजगत्सुराधिवासं
वितरति यस्तपनीयषोड़शारम् ।
हरिभवनमुपागतः स सिद्धै-
श्चिरमधिगम्य नमस्यते शिरोभिः ॥
असुदर्शनतां प्रयाति शत्रो-
र्मदनसुदर्शनताञ्च कामिनीनाम् ।
ससुदर्शनकेशवानुरूपं
कनकसुदर्शनदानदग्धपापः ॥
कृतगुरुदुरितारिषोड़शारं
प्रवितरणप्रवरात्मतिं मुरारेः ।
अभिभवति भवोद्भवानि भित्त्वा
भवमभितो भवने भवानि भूयः ॥”
इति मात्स्ये महादानानुकीर्त्तने विश्वचक्रप्रदानिको नाम २५९ अध्यायः ॥
विश्वचक्रात्मा, [न्] पुं, (विश्वचक्रं ब्रह्माण्डमेव आत्मा स्वरूपं यस्य ।) विष्णुः । यथा,—
“नमो विश्वमयायेति विश्वचक्रात्मने नमः ।
परमानन्दरूपी त्वं पाहि नः पापकर्द्दमात् ॥”
इति मात्स्ये २५९ अध्यायः ॥
विश्वजित्, पुं, (विश्वं जयतीति । जि + क्विप् । तुक् च ।) यज्ञभेदः । इति जटाधरः ॥ (यथा, रघुः । ५ । १ ।
“तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः ॥”)
न्यायविशेषः । यथा । यत्तु फलाश्रुतेर्नित्यत्वमभिहितं तत् फलाश्रुतौ विश्वजिन्न्यायात् स्वर्गः कल्प्यते । इत्यनेन विरुद्धमिति । स च न्यायो यथा । विश्वजिता यजेत इत्यादि श्रूयते । इत्येकादशीतत्त्वम् ॥ वरुणपाशः । इति केचित् ॥ (अग्निविशेषः । यथा, महाभारते ।३।२१८।१६।
“यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति ।
तं प्राहुरध्यात्मविदो विश्वजिन्नामपावकम् ॥”
दानवविशेषः । यथा, तत्रैव । १२ ।२२७।५१।
“विश्वजित् प्रतिरूपश्च वृषान्तो विष्करो
मधुः ॥”
दृढ़रथस्य पुत्रः । यथा, हरिवंशे । ३१।५१।
“आसीद्दृढ़रथस्यापि विश्वजिज्जनमेजय ॥”
सत्यजित्तनयः । यथा, तत्रैव । २० । १९ ।
“सत्यजित्तनयस्तस्य विश्वजित्तस्य चात्मजः ॥”
विश्वजयिनि, त्रि । यथा, भागवते ।७।४।७।
“सर्व्वसत्त्वपतीन् जित्वा वशमानीय विश्वजित् ।
जहार लोकपालानां स्थानानि सह तेजसा ॥”)
विश्वतः, [स्] व्य, (विश्व + तसिल् ।) सर्व्वतः । इत्यमरटीका ॥ (यथा, भागवते ।१०।३१।३।
“वृषमयात्मजाद्विश्वतो भयात्
ऋषभ ते वयं रक्षिता मुहुः ॥”)
विश्वदेवः, पुं, (विश्वे दीव्यतीति । दिव + अच् ।) गणदेवताविशेषः । इत्यमरटीका ॥
“विश्वदेवौ क्रतुदक्षौ सर्व्वास्विष्टिषु विश्रुतौ ।
नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके ॥
नवान्नालम्भने देवौ कामकालौ सदैव हि ।
अपि कन्यागते सूर्य्ये श्राद्धे च ध्वनिरोचकौ ।

पुरूरवामाद्रवाश्च विश्वदेवौ च पर्व्वणि ।”
इति वह्निपुराणे गणभेदनामाध्याय: ।
(विश्वस्य देवतास्वरूपे, त्रि । यथा, हरिवंशे । १९६ । १६ ।
“श्रुतं मे विश्वदेवानां यद्रहस्यं महर्षिणाम् ।
तदिदं सर्व्वदेवानां तत्त्वतस्तत्त्ववादिनाम् ।”)

विश्वदेवा, स्त्री, कृष्णमवेधुका । गोरक्षाकुलिया इति भाषा । इति जटाधर: । नागबला । अदग्धपुष्पदक्षोत्पल: । इति रत्नमाला ।

विश्वद्राङ्, [च्] त्रि, सर्व्वगमनकर्त्ता । विश्वक् समन्तात् अञ्चति गच्छति विश्वद्राङ् सर्व्वतोगामी मूर्द्धन्यमध्य: तालव्यमध्योऽपीत्येके । इत्यमरभरतौ ।

विश्वधारिणी, स्त्री, (विश्वं सर्व्वं धरतीति । धृ+ णिनि: । ङीप् ।) पृथिवी । इति केचित् ।

विश्वनाथ:, पुं, (विश्वस्य नाथ: ।) शिव: । इति शब्दरत्नावली । (यथा, वैराग्यशतके ।१०१।
“न गृहीतं श्रुतिहृदयं
न च न गृहीतं परिश्रवं हृदयम् ।
इच्छामि च धाम परं
गच्छामि तु विश्वनाथपुरीम् ।”
साहित्यदर्पणप्रणेता पण्डितविशेष: । यथा, साहित्यदर्पणे ।
“श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-
श्रीविश्वनाथकविराजकृतं प्रबन्धम् ।
साहित्यदर्पणममुं सुधियो विलोक्य
साहित्यतत्त्वमखिलं सुखमेव वित्त ।”
विद्यानिवासभट्टाचार्य्यपुत्र: पञ्चाननोपाधिक: भाषापरिच्छेदसिद्धान्तमुक्तावलीप्रणेता पण्डितविशेष: ।)

विश्वपर्णी, स्त्री, भूम्यामलकी । इति राजनिर्घण्ट: ।

विश्वपा:, पुं, (विश्वं पातीति । पा+विच् ।) विश्वपालनकर्त्ता । स तु परमेश्वर: । इति मुग्धबोधव्याकरणम् । (यथा, हरिवंशे । २५१ अध्याये ।
“विश्वस्य पते घृताच्यसि अनन्तकर्म्मन् हुतवहवंशप्राग्रयंश विश्वपालम् ।”)

विश्वप्सा, [न्] पुं, (विश्वं प्सातीति । प्सा+भक्षणे + “श्वन्नुक्षन्पूषन्प्लीहन्निति ।” उणा० १ । १५८ । इति कनिन्प्रत्ययेन साधु: ।) अग्नि: । चन्द्र: । इति हेमचन्द्र: । देव: । विश्वकर्म्मा । इति संक्षिप्तसारोणादिवृत्ति: । सूर्य्य: । इति शब्दरत्नावली ।

विश्वबोध:, पुं, (विश्वस्य बोधो यस्य ।) बुद्ध: । इति त्रिकाण्डशेष: ।

विश्वभू:, पुं, बुद्धभेद: । इति हेमचन्द्र: ।

विश्वभेषजं, क्ली, (विश्वेषां भेषजम् ।) शुण्ठी । इत्यमर: । (यथा, सुश्रुते । १ । ४४ ।
“विश्वभेषजमञ्जिकाचित्रकैर्व्वभावितै: ।”
तथास्य गुणा: ।
“शक्तेर्दीपनं हृद्यं वातकफापहम् ।
विपाके मधुरं हृद्यं रोचनं विश्वभेषजम् ।”
इति चरके सूत्रस्थाने २७ अध्याय: ।)

विश्वभोजा:, [स्] पुं, सर्व्वभुक् । विश्वशब्दपूर्व्वकभुजधातो: औणादिकासिप्रत्ययेन निष्पन्नमिदम् । (विश्वरक्षके, त्रि । यथा, ऋग्वेदे ।५।४१।४।
“पूषाभाग:प्रभृथे विश्वभोजा: ।”
“विश्वभोजा विश्वरक्षका: ।” इति तद्भाष्ये सायण: ।)

विश्वमदा, स्त्री, अग्निजिह्वा । यथा,—
“काली कराली च मनोजवा च
सुलोहिता चैव च धूम्रवर्णा ।
स्फुलिङ्गिनी विश्वमदार्चिषोऽग्ने:
सप्तैव जिह्वा: कथिता मुनीन्द्रै: ।”
इति शब्दमाला ।

विश्वम्भर:, पुं, (विश्वं बिभर्त्तीति । भृ+“संज्ञायां भृतॄवृजीति ।” ३।२।४६ । इति खच् । “अरुर्द्विषदिति ।” ६।३।६७ । इति मुम् ।) विष्णु: । (यथाह कश्चित् ।
“विश्वम्भर ! भरास्माकं विश्वस्याङ्का बहि:कुरु ।
अथ पक्षद्वयाभावे व्रज विश्वम्भरत्वकम् ।”)
इन्द्र: । इति मेदिनी । रे, २६५ ।

विश्वम्भरा, स्त्री, (विश्वं बिभर्त्तीति । भृ+खच् । मुम् । टाप् ।) पृथिवी । इत्यमर: । अस्या व्युत्पत्तिर्यथा,—
“विश्वम्भरा तद्धरणाच्चानन्तानन्तरूपत: ।
पृथिवी पृथुकन्यात्वाद्विस्तृतत्वाच्च नारद ।”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्याय: ।
(यथा, उत्तरचरिते । १ अङ्के ।
“विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनक: पिता ते ।”)

विश्वयु:, पुं, वायु: । इति केचित् ।

विश्वरूप:, पुं, (विश्वमेव रूपं यस्य ।) विष्णु: । इति हेमचन्द्र: । (महादेव: । यथा, महाभारते । ७ । २०० । १२४ ।
“विश्वे देवाश्च यत्तस्मिन् विश्वरूपस्तत: स्मृत: ।”
त्वष्टृपुत्र: । यथा, विष्णुपुराणे । १ ।१५।१२२ ।
“त्वष्टुश्चाप्यात्मज: पुत्त्रो विश्वरूपो महायशा: ।”
सर्व्वरूपे, त्रि । यथा, भागवते । ६ । ४ । २८ ।
“स सर्व्वनामा स च विश्वरूप:
प्रसीदतामनिरुक्तात्मशक्ति: ।”)

विश्वरूपकं, क्ली, कृष्णागुरु । इति राजनिर्घण्ट: ।

विश्वरेता:, [स्] पुं, (विश्वे रेत: शक्तिर्यस्य ।) ब्रह्मा । इति हेमचन्द्र: ।

विश्वरोचन:, पुं, (विश्वान् रोचयतीति । रुच्+ ल्यु: ।) नाडीचशाक: । यथा,—
“केमुकं चेचुली चेचुर्नाडीचो विश्वरोचन: ।”
इति त्रिकाण्डशेष: ।

विश्ववेदा:, [स्] त्रि, सर्व्वज्ञ: । विश्वं वेत्ति इत्यर्थे विश्वशब्दपूर्व्वविदधातोरसुप्रत्ययेन निष्पन्नमिदम् । यथा,—
“स्वस्ति न इन्द्रो वृद्धश्रवा:
स्वस्ति न: पूषा विश्ववेदा: ।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमि:
स्वस्ति नो बृहस्पतिर्दधातु ।”
इति यजुर्व्वेदिस्वस्तिवाचनमन्त्र: ।
(यथाच भागवते । ८ । ३ । २६ ।
“सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम् ।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ।”)

विश्वसहा, स्त्री, अग्निजिह्वाविशेष: । यथा,—
“हेति: शिखा च सप्ताग्नेर्जिह्वास्ता एव कीर्त्तिता: ।
काली कराली सुहिता धूम्रवर्णा मनोजवा ।
स्फुलिङ्गिनी विश्वसहा संज्ञास्तासां सदाह्वता: ।”
इति जटाधर: ।

विश्वसारं, क्ली, (विश्वेषां सारम् ।) तन्त्रविशेष: । इति प्रसिद्धम् ।

विश्वसारकं, क्ली, (विश्वसार+संज्ञायां कन् ।) विटरटच: । इति शब्दचन्द्रिका । फणिमनसा । इति भाषा ।

विश्वसित:, त्रि, (वि+श्वस+क्त: ।) विश्वस्त: । इति मुग्धबोधव्याकरणम् । (यथा, नैषधे ।१।१३१।
“न केवलं प्राणिवधो वधो मम
त्वदीक्षणाद्विश्वसितान्तरात्मन: ।”)

विश्वसृक्, [ज्] पुं, (विश्वं सृजतीति । सृज्+ क्विप् ।) ब्रह्मा । इत्यमर: । (विश्वस्रष्टरि, त्रि । यथा, रघु: । १० । १६ ।
“नमो विश्वसृजे पूर्व्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने ।”)

विश्वस्त:, त्रि, (वि+श्वस+क्त: ।) जातविश्वास: । इति मेदिनी । ते, ९५५ । यथा,—
“न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति ।”
इति गारुडे ११४ अध्याय: ।

विश्वस्ता, स्त्री, विधवा । इत्यमर: । (यथा, साहित्यदर्पणे । १० परिच्छेदे ।
“स्तनयुगमुक्ताभरणा:
कण्टककलिताङ्गयष्टयो देव ।
त्वयि कुपितेऽपि विश्वस्ता:
प्रागेव रिपुस्त्रियो जाता: ।”)

विश्वस्था, स्त्री, (विश्वत: सर्व्वत: तिष्ठतीति । विश्व+स्था+क: ।) शतावरी । इति राजनिर्घण्ट: ।

विश्वा, स्त्री, (विश+क्वन् । स्त्रियां टाप् ।) अतिविषा । इत्यमर: । शतावरी । इति राजनिर्घण्ट: । पिप्पली । इति शब्दचन्द्रिका । (दक्षकन्याविशेष: । यथा, महाभारते । १ । ६५ । १२ ।
“क्रोधा प्राधा च विश्वा च वनिता कपिला मुनि: ।”)

विश्वाची, स्त्री, अप्सरोविशेष: । यथा,—
“उर्व्वशी मेनका रम्भा मिश्रकेशी घृताचिका ।
विश्वाची च घृताची च पञ्चचूडा तिलोत्तमा ।

भानुमत्यबला वर्गा वाद्यशास्त्र: शुभा: ।"
इति वह्निपुराणे गणभेदनामाध्याय: ।
(वातरोगविशेष: । तल्लक्षणादिकं यथा,—
"अथ विश्वाचीलक्षणमाह ।
'तलं प्रत्यङ्गुलीनां या कण्डरा बाहुपृष्ठत: ।
बाह्वो: कर्म्मक्षयकरी विश्वाची नाम सा स्मृता ।"
कण्डरा महास्नायु: तलं हस्तस्योपरिभाग: ।
तलशब्दोऽत्र उपरिवाचक: यथा भूमितल-
मिति । तेनायमर्थ: । बाहुपृष्ठत: बाह्वो: पृष्ठं
बाहुपृष्ठमारभ्य तलं प्रतिहस्ततलं यावत्प्रत्यो-
ङ्गल कण्डरास्ता: सन्दूष्य बाह्वो: प्रसारणा-
कुञ्चनादिकर्म्मक्षयकरा भवति सा इह वात-
व्याधिषु विश्वाचीत्युच्यते बाह्वोरिति द्वित्वं
सम्भवपरम् । एकस्मिन्नपि बाहौ विश्वाची
भवति ।" इति भावप्रकाश: ।)
विश्वात्मा, [न्] पुं, (विश्वमेव आत्मा यस्य विश्वस्य
आत्मा इति वा ।) विष्णु: । यथा,—
"जन्म कर्म्म च विश्वात्मन्नजस्याकर्त्तुरात्मन: ।
तिर्य्यङ्नृषिषु याद:सु तदत्यन्तविड़म्बनम् ।"
इति श्रीभागवते १ स्कन्धे ८ अध्याय: ।
(महादेव: । यथा, कुमारे । ६ । १ ।
"अथ विश्वात्मने गौरी सन्दिदेश मिथ: सखीम् ।
दाता मे भूभृतां नाथ: प्रमाणीक्रियतामिति ।")
विश्वाधाया: [स्] पुं, देवता । इति सिद्धान्त-
कौमुदी ।
विश्वामित्र:, पुं, (विश्वमेव मित्रमस्य । "मित्रे
चर्षौ ।" ६ । ३ । १३० । इति विश्वस्य दीर्घ: ।)
महर्षिविशेष: । तत्पर्य्याय: । गाधिज: २ ।
इति त्रिकाण्डशेष: । विश्वकुत्सात्मज: ३ गाधेय: ४
कौशिक: ५ । इति हेमचन्द्र: । गाधिभू: ६ ।
इति शब्दरत्नावली । तस्योत्पत्तिर्यथा,—
"सदारं सुतं श्रुत्वा द्रष्टुं पुत्रं स्वकं भृगु: ।
अथाजगाम मतिमान् स्नुषां दृष्ट्वा ननन्द च ।
दम्पती तं समासीनं भृगुं देवगणार्च्चितम् ।
पूजयित्वा समासीनं तस्थतुस्तौ कृताञ्जली ।
ततो भृगु: स्नुषां स्वीयां सुप्रीत इदमब्रवीत् ।
वरं वृणीष्व दास्यामि वाञ्छितं वरवर्णिनि ।
अदेयं दुष्करं वापि यत्र ते वर्त्तते स्पृहा ।
तत: सत्यवती पुत्रं तपस्वाध्यायपारगम् ।
मातुश्च गौरमतुलं पुत्रं वरमयाचत ।
स चैवमस्त्वित्युक्त्वैव भूत्वा ध्यानपरस्तदा ।
विश्वमावर्त्तत् मनसा ययात् ज्ञातं यदन्तर: ।
तस्य विश्वावर्त्तात् नि:सृतं वै चरुद्वयम् ।
तस्ये तत् द्वितयं दत्त्वा भृगुस्तामिदमब्रवीत् ।
चरुद्वयं गृहाण त्वं शुचि सत्यवति स्वयम् ।
स्नात्वा त्वमृतौ माता तदा त्वच करिष्यथ: ।
आलिङ्गत्वावश्वत्थं ते माता पुंसवनाय वै ।
चरुमारक्तकं चैकं त्वं भोक्ष्यसि सुतव्रत: ।
त्वञ्चोडुम्बरवृक्षन्तु समालिङ्ग्य सितं चरुम् ।
भोक्ष्यस्येतेन पुत्रस्ते भविष्यति सनातन: ।
एवमुक्त्वा भृगुर्यातो यथेच्छं वापि संसदम् ।
अथाप माता दुहिता भर्त्ता पित्रा च भाविनी ।
अथ स्नानदिनेऽश्वत्थमालिङ्ग्यारक्तकं चरुम् ।
अद्यात् सत्यवती तस्या माता फल्गुं सितं
चरुम् ।
परिवर्त्तन्तु तं ध्यात्वा दिव्यध्यानो भृगुर्मुनि: ।
अथागत्य स्नुषां तान्तु वचनञ्चेदमब्रवीत् ।
विपर्य्ययस्त्वया भद्रे हृचालिङ्गनकर्म्मणि ।
तथा चरुप्राशने च तन्नेदन्ते भविष्यति ।
ब्राह्मण: क्षत्रियाचारस्तव पुत्रो भविष्यति ।
क्षत्रियो ब्राह्मणाचारो मातुस्ते भविता सुत: ।
इत्युक्ता भृगुणा साध्वी तदा सत्यवती भृगुम् ।
पुन: प्रसादयामास पौत्रो मेऽस्त्विति ताहश: ।
एवमस्त्विति प्रोक्ता स तत्रैवान्तर्दधे भृगु: ।
अथ काले सुतं दीप्तं यमदग्निञ्च गाधिजा ।
सुषुवे जननी तस्या विश्वामित्रं तपोनिधिम् ।
यमदग्निस्ततो वेदान् चतुर: प्राप नाचिरम् ।
प्रादुरासद्धनुर्व्वेद: स्वयं तस्मिन् महात्मनि ।
विश्वामित्रोऽपि सकलान् वेदानपि तथाचिरात् ।
धनुर्व्वेदं तथा कृत्स्नं विप्रत्वाभूतपोधन: ।
आब्रह्मज्ञामगस्त्यश्च यमदग्निर्महातपा: ।
वेदैस्तपोभि: स मुनीनगच्छत्कामञ्च स्वयंवत् ।"
इति कालिकापुराणे ८४ अध्याय: ।
(आयुर्व्वेदपारदर्शी सुश्रुतोऽस्य पुत्र: । यथा,—
"अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽविदन् ।
अयं धन्वन्तरि: काश्यां काशिराजोऽयमुच्यते ।
विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान् ।
वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ।
तत्र नाम्ना दिवोदास: काशिराजोऽस्ति
बाहुज: ।
स हि धन्वन्तरि: साक्षादायुर्व्वेदविदांवर: ।
आयुर्व्वेदं ततोऽधीत्य लोकोपकृतिहेतवे ।
सर्व्वप्राणिदयालोर्यदुपकारो महामख: ।
पितुर्व्वचनमाकर्ण्य सुश्रुत: काशिकां गत: ।
तेन सार्द्धं समध्येषु मुनिसूनुशतं ययौ ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"विश्वामित्रसुत: श्रीमान् सुश्रुत: परिपृच्छति ।"
इत्युत्तरतन्त्रे षट्षष्टितमेऽध्याये सुश्रुतेनोक्तम् ।
विश्वस्मिन्नामित्रं यस्मात् । परममित्रम् । यथा,
"जनकेनाभिरामाय ददौ राज्यमकण्टकम् ।
विश्वामित्रं पुरस्कृत्य वनवासं ततो ययौ ।"
इत्युद्भट: ।)
विश्वामित्रप्रिय:, पुं, (विश्वामित्रस्य प्रिय: ।) नारि-
केल: । इति शब्दरत्नावली । (कार्त्तिक: ।
यथा, महाभारते । ३ । २३१ । ८ ।
"विश्वामित्रप्रियश्चैव देवसेनाप्रियस्तथा ।")
विश्वाराट्, [ज्] पुं, विश्वेषु राजते य: । विश्वेषां
राट् राजा इति वा । इति मुग्धबोधव्याकर-
णम् । ("विश्वस्य वसुराटो: ।" ६ । ३ । १२८ ।
इति दीर्घ: ।)
विश्वावसु:, पुं, (विश्वं वसु यस्य । "विश्वस्य वसु-
राटो: ।" ६ । ३ । १२८ । इति पूर्व्वपदान्तस्य
दीर्घ: ।) गन्धर्व्वभेद: । इति मेदिनी । यथा,—
"अथालोऽङ्गारिवर्म्मारी सूर्य्यवर्च्चास्तथा प्रभु: ।
हस्त: सुहस्त: स्वाहेव मूर्द्धन्वांश्च महामना: ।
विश्वावसु: कृशानुश्च गन्धर्व्वैकादशो गण: ।"
इति वह्निपुराणे गणभेदनामाध्याय: ।
(विष्णु: । यथा, महाभारते । १३ । १४९ । ४५ ।
"विश्वावसुर्विश्वमूर्त्तिर्विश्वेशो
विश्वक्सेनो विश्वकर्म्मा वशी च ।"*।
वत्सरविशेष: । यथा, बृहत्संहितायाम् । ८ । ४१ ।
"क्रोधी तृतीय: परत: क्रमेण
विश्वावसुश्चेति पराभवश्च ।"
तत्फलं यथा, चिन्तामणिधृतवचनम् ।
"सर्व्वत्र जायते क्षेमं सर्व्वशस्यमहार्घता ।
विश्वावसौ वरारोहे कार्पासस्य महार्घता ।")
निशि स्त्री । इति मेदिनी ।
विश्वास:, पुं, (वि + श्वस + घञ् ।) प्रत्यय: । तत्-
पर्य्याय: । विश्रम्भ: २ । इत्यमर: । आश्वास: ३
आश्रम: ४ । इति शब्दरत्नावली । * ।
"लोभप्रमादविश्वासै: पुरुषो नश्यति त्रिभि: ।
तस्माल्लोभो न कर्त्तव्य: प्रमादो न न विश्वसेत् ।
सा श्रीर्या न मदं कुर्य्यात् स सुखी तृष्णयोज्-
झित: ।
तन्मित्रं यस्य विश्वास: पुरुष: स जितेन्द्रिय: ।"
इति गारुड़े नीतिसारे ११५ अध्याय: ।
"यस्य यावांश्च विश्वासस्तस्य सिद्धिश्च तावती ।
एतावानिति तत्त्वस्य प्रभाव: परिमीयते ।"
इति तत्रैव २३४ अध्याय: ।
"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति ।"
इति च गारुड़े ११४ अध्याय: ।*।
"नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम् ।
विश्वासो नैव कर्त्तव्य: स्त्रीषु राजकुलेषु च ।
न विश्वसेदविश्वस्तं मित्रञ्चापि न विश्वसेत् ।
कदाचित् कुपितं मित्रं गुह्यदोषं प्रकाशयेत् ।"
इति चाणक्यम् ।
विश्वासघातक:, त्रि, विश्वासं हन्ति य: । (विश्वास
+ हन् + ण्वुल् ।) विश्रम्भनाशक: । यथा,—
"न भारा: पर्व्वता भारा न भारा: सप्त
सागरा: ।
निन्दका हि महाभारा भारा विश्वास-
घातका: ।"
इति कर्म्मलोचनम् ।
विश्वेदेवा:, पुं, अग्नि: । आद्यदेव: । इति संक्षिप्त-
सारोणादिवृत्ति: ।
"क्रतुर्दक्षो वसु: सत्य: काम: कालस्तथा ध्वनि: ।
रोचकश्चाद्रवाश्चैव तथा चान्ये पुरूरवा: ।
विश्वेदेवा भवन्त्येते दश सर्व्वत्र पूजिता: ।"
इति वह्निपुराणे गणभेदनामाध्याय: ।
अन्यद्विश्वशब्दे द्रष्टव्यम् ।
विश्वेश:, पुं, (विश्वस्य ईश: ।) शिव: । इति शब्द-
रत्नावली । (विष्णु: । यथा, भागवते । १ ।
८ । ४१ ।
"अथ विश्वेश विश्वात्मन् विश्वमूर्त्ते स्वकेषु मे ।
स्नेहपाशमिमं छिन्धि दृढं पाण्डुषु वृष्णिषु ।")

विश्वेश्वरः, पुं, (विश्वस्य ईश्वरः ।) काशीस्थमहादेवः । यथा,—
"सर्व्वतीर्थेषु सस्नौ स सर्व्वयात्रां यथात् स च ।
मणिकर्णीन्तु यः स्नातो यो विश्वेशं निरैक्षत ॥
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ।
दृश्यो विश्वेश्वरो नित्यं स्नातव्या मणिकर्णिका ॥"
इति काशीखण्डम् ॥
(यथाच तन्त्रे ।
"सुखेन वाद्यं सलिलेन पाद्यं
मूर्त्तिस्तदा बिल्वदलेन पूजा ।
फलं पुनस्तस्य भवेदनन्तं
निःस्वस्य विश्वेश्वर एव देवः ॥")

विश्वौषधं, क्ली, (विश्वेषामौषधम् ।) शुण्ठी । इति राजनिर्घण्टः ॥

विष, इर् लि ञ औ ङ व्याप्तौ । इति कविकल्पद्रुमः ॥ (ह्वा०-उभ०-आत्म०-इर्के-सक०-अनिट् ।) इर्, अविषत् अविक्षत् । लि ञ, वेवेष्टि वेविष्टे । औ, वेष्टा । ङ, वेविष्टे । उभयपदीत्यन्ये । अपवत् कर्त्तरि आत्मने पदार्थो ङकारः । इति दुर्गादासः ॥

विष, उ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, वेषित्वा विष्ट्वा । इति दुर्गादासः ॥

विष, श औ विप्रयोगे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-अक०-अनिट् ।) श, विष्णाति प्राणी पुत्त्रादिभ्यो वियुक्तः स्यात् इत्यर्थः । औ, अविक्षत् । इन्त्यान्तोऽयमिति । विष्णुव्युत्पत्तौ सुभूतिः । इति दुर्गादासः ॥

विषं, क्ली, (विष सेचने + कः ।) जलम् । इत्यमरः । पद्मकेशरम् । इति तट्टीकायां सुकुटः ॥ बोलम् । वत्सनाभः । सामान्यविषम् । इति राजनिर्घण्टः ॥

विषः, पुं, क्ली, (विष + कः ।) विषम् । तत्पर्य्यायः । क्ष्वेडः २ गरलम् ३ । इत्यमरः ॥ आहेयम् ४ अमृतम् ५ गरदम् ६ कालकूटम् ७ कलाकूलम् ८ हारिद्रम् ९ रक्तशृङ्गिकम् १० नीलम् ११ गरम् १२ घोरम् १३ हालाहलम् १४ हलाहलम् १५ शृङ्गी १६ भूगरम् १७ । इति राजनिर्घण्टः ॥ जाङ्गलम् १८ तीक्ष्णम् १९ रसः २० रसायनम् २१ मरः २२ । इति जटाधरः ॥ जहुलम् २३ जाङ्गुलम् २४ । इति शब्दरत्नावली ॥ काकोलः २५ वत्सनाभः २६ प्रदीपनः २७ शौल्किकेयः २८ ब्रह्मपुत्त्रः २९ । इति रत्नमाला ॥ तद्भेदा यथा,—
"पुंसि क्लीवे च काकोलकालकूटहलाहलाः ।
सौराष्ट्रिकः शौल्किकेयो ब्रह्मपुत्त्रः प्रदीपनः ।
दारदो वत्सनाभश्च विषभेदा अमी नव ॥"
इति पातालवर्गे अमरः ॥ * ॥
अपि च ।
"विषः क्ष्वेडो रसस्तीक्ष्णं गरलोऽथ हलाहलः ।
वत्सनाभः कालकूटो ब्रह्मपुत्त्रः प्रदीपनः ।
सौराष्ट्रिकः शौल्किकेयः काकोलो दारदोऽपि च ।
अहिच्छत्रो मेषशृङ्गकुष्ठवालूकनन्दनाः ।
कैराटको हैमवतो मर्कटः करवीरकः ।
सर्षपो मूलको गौरार्द्रकः सक्तुककर्द्दमौ ।
अङ्कोल्लसारः कालिङ्गः शृङ्गिको मधुसिक्थकः ।
इन्द्रो लाङ्गलिको विस्फुलिङ्गपिङ्गलगौतमाः ।
मुस्तको दालवश्चेति स्थावरा विषजातयः ॥"
इति हेमचन्द्रः ॥
अथ विषस्य नामलक्षणगुणाः ।
"विषं तु गरलं क्ष्वेडस्तस्य भेदानुदाहरेत् ।
वत्सनाभः सहारिद्रः सक्तुकश्च प्रदीपनः ।
सौराष्ट्रिकः शृङ्गकश्च कालकूटस्तथैव च ।
हालाहलो ब्रह्मपुत्त्रो विषभेदा अमी नव ॥"
तत्र वत्सनाभस्य स्वरूपनिरूपणम् ।
"सिन्धुवारसदृक्पत्त्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥"
अथ हारिद्रस्य स्वरूपम् ।
"हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः ॥"
अथ सक्तुकस्य स्वरूपम् ।
"यद्ग्रन्थिः सक्तुकेनेव पूर्णमध्यः स सक्तुकः ॥"
अथ प्रदीपनस्य स्वरूपम् ।
"प्रदीपकोहितो यः स्याद्दीप्तिमान् दहनप्रभः ।
महादाहकरः पूर्व्वैः कथितः स प्रदीपनः ॥"
अथ सौराष्ट्रिकस्य स्वरूपम् ।
"सुराष्ट्रविषये यः स्यात् स सौराष्ट्रिक उच्यते ॥"
अथ शृङ्गकस्य स्वरूपम् ।
"यस्मिन् गोशृङ्गके बद्धे दुग्धं भवति लोहितम् ।
स शृङ्गक इति प्रोक्तो द्रव्यतत्त्वविशारदैः ॥"
अथ कालकूटस्य स्वरूपम् ।
"देवासुररणे देवैर्हतस्य पृथुमालिनः ।
दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः ।
निर्य्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः ।
सोऽहिच्छत्रे शृङ्गवेरे कोङ्कणे मलये भवेत् ॥"
अथ हालाहलस्य स्वरूपम् ।
"गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा ।
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः ।
असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये ।
दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते ॥"
अथ ब्रह्मपुत्त्रस्य स्वरूपम् ।
"वर्णतः कपिलो यः स्यात् तथा भवति साधकः ।
ब्रह्मपुत्त्रः स विज्ञेयो जायते मलयाचले ।
ब्राह्मणः पाण्डुरस्तेषु क्षत्त्रियो लोहितप्रभः ।
वैश्यः पीतोऽसितः शूद्रो विष उक्तश्चतुर्व्विधः ।
रसायने विषं विप्रं क्षत्त्रियं देहपुष्टये ।
वैश्यं कुष्ठविनाशाय शूद्रं दद्याद्वधाय हि ॥"
अथ विषस्य गुणाः ।
"विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च ।
आग्नेयं वातकफहृद्योगवाहि मदावहम् ॥"
व्यवायि सकलकायगुणव्यापनपूर्व्वकपाकागमनशीलम् । विकाशि ओजःशोषणपूर्व्वकं सन्धिबन्धशिथिलीकरणशीलम् । आग्नेयं अधिकाग्न्यंशम् । योगवाहि संसर्गगुणवाहकम् ।
"मदावहं तमोगुणाधिक्येन बुद्धिविध्वंसकम् ।
तदेव युक्तियुक्तन्तु प्राणदायि रसायनम् ।
योगवाहि परं वातश्लेष्मजित् सन्निपातहृत् ।
योगवाहि त्रिदोषघ्नं बृंहणं वीर्य्यवर्द्धनम् ।
ये दुर्गुणा विषेऽशुद्धे ते स्युर्हीना विशोधनात् ।
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत् ॥"
अथोपविषाणां निरूपणम् ।
"अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका ।
करवीरोऽथ धुस्तूरः पञ्च चोपविषाः स्मृताः ॥"
उपविषा गौणविषाः । एषां गुणास्तत्र तत्र द्रष्टव्याः । अपि च ।
"अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः ।
गुञ्जाहिफेनो धुस्तूरः सप्तोपविषजातयः ॥"
एतेषां शोधनं चिन्त्यम् । गुणास्तत्र द्रष्टव्याः ॥
अथ विषाणां शोधनविधिः ।
"गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुद्ध्यति ।
रक्तसर्षपतैलाक्तं तथा धार्य्यञ्च वाससि ॥
येगुणा गरले प्रोक्तास्ते स्युर्हीना विशोधनात् ॥
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत ॥"
इति भावप्रकाशे पूर्व्वखण्डः ॥
अथ विषाधिकारः । तत्र विषस्य द्वैविध्यमाह ।
"स्थावरं जङ्गमञ्चैव द्विविधं विषमुच्यते ।
दशाधिष्ठानमाद्यन्तु द्वितीयं षोड़शाश्रयम् ॥"
स्थावरविषस्य दशाश्रयानाह ।
"मूलं पत्त्रं फलं पुष्पं त्वक् क्षीरं सारमेव च ।
निर्य्यासो धातवः कन्दः स्थावरस्याश्रया दश ॥"
तद्यथा । मूलविषं करवीरादि १ । पत्त्रविषं विषपत्त्रिकादि २ । फलविषं कर्कोटकादि ३ । पुष्पविषं वेत्रादि ४ । त्वक्सारनिर्य्यासविषाणि करम्भादीनि ५ । ६ । ७ । क्षीरविषं स्नुह्यादि ८ । धातुविषं हरितालादि ९ । कन्दविषं वत्सनाभसक्तुकादि १० ॥ * ॥ जङ्गमविषस्य षोड़शाश्रयानाह ।
"दृष्टिनिश्वासदंष्ट्राश्च नखमूत्रमलानि च ।
शुक्रं लाला मुखं स्पर्शः संदंशश्चावमर्द्दितम् ।
गुदास्थिपित्तशूकानि दश षट् जङ्गमाश्रयाः ॥"
तद्यथा । दृष्टिनिश्वासविषा दिव्याः सर्पाः १ । २ । दंष्ट्राविषा भौमाः सर्पाः ३ । दंष्ट्रानखविषा व्याघ्रादयः ४ । मूत्रपुरीषविषा गृहगोधिकादयः ५ । ६ । शुक्रविषा मूषिकादयः ७ । लालाविषा उच्चिटिङ्गादयः ८ । लालाशुक्रमूत्रपुरीषार्त्तवमुखसंदंशदंष्ट्रास्पर्शावमर्द्दितगुदपुरीषविषाश्चित्रशीर्षादयः ९ । १० । ११ । १२ । १३ । अस्थिविषाः सर्पादयः १४ । पित्तविषा शकुलमत्स्यादयः १५ । शूकविषा भ्रमरादयः १६ ॥ * ॥ स्थावरविषाणां सामान्यानां कार्य्याण्याह ।
"स्थावरन्तु ज्वरं हिक्कां दन्तहर्षं गलग्रहम् ।
फेनच्छर्द्यरुचिश्वासमूर्च्छाश्च कुरुते विषम् ॥"

आश्रयभेदेन विशिष्टानां विषाणां कार्य्याण्याह । तत्र मूलविषस्य कार्य्यमाह ।
"उद्वेष्टनं मूलविषैर्मोहः प्रलपनं भवेत् ॥"
पत्रविषस्य कार्य्यमाह ।
"जृम्भणं वेपनं श्वासो तृष्णा पत्रविषैर्भवेत् ॥"
फलविषस्य कार्य्यमाह ।
"मुष्कशोथः फलविषैर्दाहो द्वेषश्च भोजने ।"
पुष्पविषस्य कार्य्यमाह ।
"भवेत् पुष्पविषैश्छर्द्दिराध्मानं मूर्च्छनं तथा ।"
त्वक्सारनिर्य्यासविषाणां कार्य्याण्याह ।
"त्वक्सारनिर्य्यासविषैरुपयुक्तैर्भवन्ति हि ।
आस्यदौर्गन्ध्यपारुष्यशिरोरुक्कफसंस्रवाः ॥"
क्षीरविषकार्य्यमाह ।
"फेनागमः क्षीरविषैर्विड्भेदो गुरुजिह्वता ।"
धातुविषकार्य्यमाह ।
"हृत्पीड़नं धातुविषैर्मूर्च्छा दाहश्च तालुनि ।
प्रायेण कालघातीनि विषाण्येतानि निर्द्दिशेत् ॥
एतानि मूलादीनि विषाणि नव कालघातीनि कालान्तरे मारकाणि ॥ * ॥ कन्दविषस्य कार्य्यमाह ।
"कन्दजान्युग्रवीर्य्याणि यान्युक्तानि त्रयोदश ।
सर्व्वाण्येतानि कुशलैर्ज्ञेयानि दशभिर्गुणैः ॥
स्थावरं जङ्गमञ्चापि कृत्रिमञ्चापि यद्विषम् ।
सद्यो निहन्ति तत् सर्व्वं गुणैर्युक्तं दशभिर्युतम् ॥"
तान् दशगुणानाह ।
"रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च ।
विकाशि विशदं चैव लघ्वपाकि च ते दश ॥"
तैर्गुणैर्विषस्य कार्य्यमाह ।
"तद्रौक्ष्यात् कोपयेद्वायुमौष्ण्यात् पित्तं सशोणितम् ।
तैक्ष्ण्यान्मतिं मोहयति मर्म्मबन्धांश्छिनत्ति हि ॥
शरीरावयवान् सौक्ष्म्यात् प्रविशेद्विकरोति च ।
आशुत्वादाशु तद्धन्ति व्यवायात् प्रकृतिं हरेत् ॥
विकाशित्वात् क्षपयति दोषान् धातून् मलान्यपि ।
अतिरिच्यत वैशद्याद्दुश्चिकित्स्यञ्च लाघवात् ।
दुर्ज्जरं चाविपाकित्वात्तस्मात् क्लेशयते चिरम् ॥"
विषलिप्तशस्त्रहतस्य लक्षणमाह ।

"सद्यः पाकं याति यस्य क्षतं तत्
स्रवेद्रक्तं पच्यते चाप्यभीक्ष्णम् ।
कृष्णीभूतं क्लिन्नमत्यर्थपूति-
क्षतात् मांसं शीर्य्यते यस्य चापि ॥
तृष्णातापौ दाहमूर्च्छे च यस्य
दिग्धाविद्धं तं मनुष्यं व्यवस्येत् ।
लिङ्गान्येतान्येव कुर्य्यादमित्रै-
र्दत्तः क्षुण्डो वा व्रणो यस्य चापि ॥"

पच्यते चाप्यभीक्ष्णं पुनः पुनः पाकमेति । तापो बहिस्तप्तता । दाहोऽभ्यन्तरे । कुर्य्यादित्यत्र क्षतं कर्तृपदं बोद्धव्यम् । प्रायेण राजादीनामन्नादौ शत्रवो विषं ददति ॥ * ॥ तेषां ज्ञानार्थं लक्षणमाह ।
"इङ्गितज्ञो मनुष्याणां वाक्चेष्टामुखवैकृतैः ।
जानीयाद्विषदातारमेभिर्लिङ्गैश्च बुद्धिमान् ॥
न ददात्युत्तरं पृष्टो विवक्षुर्मोहमेति च ।
अपार्थं बहु संकीर्णं भाषते चापि मूढ़वत् ॥
अङ्गुलीः स्फोटयेदुर्व्वीं विलिखेत् प्रहसेदपि ।
वेपथुश्चास्य भवति त्रस्तश्चैकैकमीक्षते ॥
विवर्णवक्त्रो ध्यामश्च नखैः किञ्चिच्छिनत्ति च ।
आलभेत सकृद्दीनः करेण च शिरोरुहान् ॥
निर्य्यियासुरपद्वारैर्वीक्षते च पुनः पुनः ।
वर्त्तते विपरीतञ्च विषदाता विचेतनः ॥"
इङ्गितमभिप्रायसूचक आकारः । मुखवैकृतं मुखवैवर्ण्यादिः । एभिर्लिङ्गैः वक्ष्यमाणैः । न ददात्युत्तरं पृष्टः स्वीयासत्कर्म्मजनितव्यामोहात् । संकीर्णं अस्फुटम् । भयजवायुजनितपर्व्वव्यथापनोदायाङ्गुलीः स्फोटयेत् । प्रहसेत् अहेतावपि । ध्यामः दग्धसमानवर्णः । आलभेत् स्पृशेत् । विपरीतं यथा स्यादेवं वर्त्तेत ।
जङ्गमविषाणां सामान्यानां कार्य्यमाह ।
"निद्रातन्द्राक्लमं दाहं सम्पाकं लोमहर्षणम् ।
शोथञ्चैवातिसारञ्च कुरुते जङ्गमं विषम् ॥"
जङ्गमेषु तीक्ष्णतरत्वेन सर्पानाह ।
"वातपित्तकफात्मानो भोगिमण्डलिराजिलाः ।
यथाक्रमं समाख्याता द्व्यन्तरा द्वन्द्वरूपिणः ॥"
भोगिनः फणिनः । ते च विंशतिः ।
"मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः ।
षट् ते मण्डलिनो ज्ञेया ज्वलनार्कसमा विषैः ॥
स्निग्धा विविधवर्णाभिस्तिर्य्यगूर्द्ध्वञ्च राजिभिः ।
विचित्रा इव ये भान्ति राजिलास्ते हि तेऽपि षट् ॥"
एते यथाक्रमं वातपित्तकफात्मानः । द्व्यन्तरा द्वे अन्तरे भेदौ येषां ते द्व्यन्तराः । यथा भोगिनो मण्डलिभ्यां जाताः इत्यादि ॥ * ॥
भोगिप्रभृतिदष्टदंशलक्षणभेदमाह ।
"दंशो भोगिकृतः कृष्णः सर्व्ववातविकारकृत् ।
पीतो मण्डलिनः शोथो मृदुः पित्तविकारवान् ॥
राजिलोत्थो भवेद्दंशः स्थिरशोथश्च पिच्छिलः ।
पाण्डुः स्निग्धोऽतिसान्द्रासृक्सर्व्वश्लेष्मविकारवान् ॥"
देशविशेषे कालविशेषे च दष्टस्यासाध्यत्वमाह ।

"अश्वत्थदेवायतनश्मशान-
वल्मीकसन्ध्यासु चतुष्पथेषु ।
याम्ये सपित्र्ये परिवर्ज्जनीया
ऋक्षे नरा मर्म्मसु ये च दष्टाः ॥"

याम्ये भरण्याम् । पित्र्ये मघायाम् ।

"दार्व्वीकराणां विषमाशु हन्ति
सर्व्वाणि चोष्णे द्विगुणीभवन्ति ॥"

उष्णे उष्णसंयोगे । दार्व्वीकरलक्षणमाह ।
"रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः ।
ज्ञेया दार्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः ॥"
अपरेषु येषु विषमाशु मारकं भवति तानाह ।

"अजीर्णपित्तातपपीड़ितेषु
बालेषु वृद्धेषु बुभुक्षितेषु ।
क्षीणे क्षते मेहिनि कुष्ठजुष्टे
रूक्षे बले गर्भवतीषु चापि ॥
शस्त्रक्षते यस्य न रक्तमेति
राज्यो लताभिश्च न संभवन्ति
शीताभिरद्भिश्च न रोमहर्षो
विषाभिभूतं परिवर्ज्जयेत्तम् ॥
जिह्मं मुखं यस्य च केशशातो
नासावसादश्च सकण्ठभङ्गः ।
कृष्णश्च रक्तः श्वयथुश्च दंशे
हन्वोः स्थिरत्वञ्च स वर्ज्जनीयः ॥"

केशशातः आकर्षणात् । नासावसादः नासाया नतत्वम् । कण्ठभङ्गः ग्रीवाधारणाशक्तिः । हन्वोः स्थिरत्वं हनुद्वयस्तम्भः ॥ * ॥ अपरञ्च ।

"वर्त्तिर्घना यस्य निरेति वक्त्रा-
द्रक्तं स्रवेदूर्द्ध्वमधश्च यस्य ।
दंष्ट्रानिपाताश्चतुरश्च यस्य
यस्यापि वैद्यैः परिवर्ज्जनीयः ॥"

वर्त्तिः रुधिरस्यम् । रक्तं स्रवेदूर्द्ध्वमधश्च यस्य यस्य च नासामुखलिङ्गगुदादिभ्यो रक्तं स्रवेत् ।

"उन्मत्तमत्यर्थमुपद्रुतं वा
हीनस्वरं वाप्यथवा विवर्णम् ।
सारिष्टमत्यर्थमवेगिनञ्च
जह्यान्नरं तस्य न कर्म्म कुर्य्यात् ॥"

अत्यर्थमुपद्रुतं वा ज्वरातिसारादिभिरतिशयेनोपद्रुतम् । हीनस्वरं वक्तुमक्षमम् । विवर्णं कृष्णवर्णम् । सारिष्टं नासाभङ्गादियुक्तम् । अवेगिनं वेगो विषवेगः लहरि इति लोके तद्रहितम् । * । स्थावरं जङ्गमं विषमेव जीर्णत्वादिभिः कारणैर्दूषीविषसंज्ञां लभते । तदाह ।

"जीर्णं विषघ्नौषधिदूषितं वा
दावाग्निवातातपशोषितं वा ।
स्वभावतो वा गुणविप्रहीनं
विषं हि दूषीविषतामुपैति ॥"

जीर्णं अतिपुराणम् । विषघ्नौषधिदूषितं विषघ्नाभिरोषधीभिर्व्वीर्य्यहीनीकृतम् । स्वभावतो वा गुणविप्रहीनं स्वभावादेव दशानां गुणानां मध्ये द्वित्र्यादिगुणहीनम् ॥ * ॥ दूषीविषस्य कार्य्यमाह ।

"वीर्य्याल्पभावान्न निपातयत्तत्
कफान्वितं वर्षगुणानुबन्धि ।
तेनार्द्दितो भिन्नपुरीषवर्णो
विगन्धवैरस्ययुतः पिपासी ॥
मूर्च्छां भ्रमं गद्गदवाग्वमिञ्च
विचेष्टमानोऽरतिमाप्नुयाद्वा ॥"

न निपातयेत् न मारयति । कफान्वितं कफेन मन्दीकृततैक्ष्ण्यादिगुणम् । वर्षगुणानुबन्धि कफेनाग्निमान्द्यादीनत्याकाचिरमास्थायि । भिन्नपुरीषवर्णः भिन्नपुरीषो द्रुतमलः भिन्नवर्णश्च । विचेष्टमानो विरुद्धां चेष्टां कुर्व्वन् मूर्च्छादीन् व्याधीन् लभते ॥ * ॥ स्थानविशेषस्थिते दूषीविषे लिङ्गविशेषमाह ।

"आमाशयस्थे कफवातरोगी
पक्वाशयस्थेऽनिलपित्तरोगी।
भवेत् समुद्ध्वस्तशिरोऽङ्गरुट्को
विलूनपक्षश्च यथा विहङ्गः॥"

समुद्ध्वस्तशिरोरुहः केशाः अङ्गरुहि च रोमाणि यस्य सः। एतदपि लिङ्गं पक्वाशयस्थे दूषीविषे बोद्धव्यम्। स्थिरं रसादिष्वथ तद्यथोक्तान् करोति धातुप्रभवान् विकारान्। तत् दूषीविषम्। यथोक्तान् सुश्रुते व्याधिसमुद्देशीयोक्तान्।*। दूषीविषस्य प्रकोपसमयमाह।

"कोपन्तु शीतानिलदुर्द्दिनेषु
यात्याशु पूर्व्वं शृणु तस्य रूपम्॥"*।

कुपितस्य तस्य दूषीविषस्य पूर्व्वरूपमाह।

"निद्रागुरुत्वञ्च विजृम्भणञ्च
विश्लेषहर्षावथवाङ्गमर्दः॥"

विश्लेषः गात्रशैथिल्यम्। हर्षः रोमाञ्चः।*। रूपमाह।

"ततः करोत्यन्नमदाविपाका-
वरोचकं मण्डलकोटजन्म।
मांसक्षयं पाणिपदादिशोथं
मूर्च्छां तथा च्छर्द्दिमथातिसारम्॥"

दूषीविषं श्वासतृषौ ज्वरांश्च कुर्य्यात् प्रवृद्धिं जठरस्य चापि। अन्नमदः अन्ने भुक्ते पूगफलेनेव मदः अविपाकः।*। अन्नस्य दूषीविषभेदेन विकारभेदमाह।

"उन्मादमन्यज्जनयेत्तथान्य-
दानाहमन्यत् क्षपयेच्च शुक्रम्।
गाद्गद्यमन्यज्जनयेच्च कुष्ठं
तांस्तान् विकारांश्च बहुप्रकारान्॥"

अन्यत् दूषीविषम्। तांस्तान् विकारान् विसर्पविस्फोटादीन्।*। दूषीविषस्य निरुक्तिमाह।
"दूषितं देशकालान्नं दिवास्वप्नैरभीक्ष्णशः।
यस्मात् संदूषयेद्धातुं तस्मात् दूषीविषं स्मृतम्॥"
देशः अनूपादिः। कालो दुर्द्दिनादिः। अन्नं कुलत्थतिलमसुरादि। धातुदूषकत्वाद्दूषीविषम्।*। दूषीविषस्य साध्यत्वादिकमाह।
"साध्यमात्मवतः सद्यो याप्यं संवत्सरोषितम्।
दूषीविषमसाध्यं स्यात् क्षीणस्याहितसेविनः॥"
कृत्रिमं विषं द्विविधम्। एकं सविषं दूषीविषसंज्ञम्। अपरमविषं तदेव गरसंज्ञम्। तथा च काश्यपसंहितायाम्।
"संयोगजञ्च द्विविधं द्वितीयं विषमुच्यते।
दूषीविषन्तु सविषमविषं गर उच्यते॥"
संयोगजं कृत्रिमं विषम्। द्वितीयं स्वाभाविकात्। तच्च द्विविधम्।*। तत्र दूषीविषमभिधाय गरं दर्शयितुमाह।
"सौभाग्यार्थं स्त्रियः स्वेदरजोनानाङ्गजान्
मलान्।
शत्रुप्रयुक्तांश्च गरान् प्रयच्छन्त्यन्नमिश्रितान्॥"*
गरकार्य्यमाह।
"तैः स्यात् पाण्डुः कृशोऽल्पाग्निर्ज्वरश्चास्योपजायते।
मर्म्मप्रधमनाध्मानं हस्तयोः शोथसम्भवः॥
जठरं ग्रहणीरोगा यक्ष्मा गुल्मः क्षयो ज्वरः।
एवंविधस्य चान्यस्य व्याधेर्लिङ्गञ्च जायते॥"
तैर्गरैः स्वेतरजःप्रभृतिभिः। ज्वरश्चास्योपजायत इति अपाठात्। मर्म्मप्रधमनं मर्म्मव्यथाम्। क्षयो धातुक्षयः॥*॥ लूतानां जन्तुविशेषाणामुत्पत्तिं संख्याञ्चाह।
"यस्माल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदबिन्दवः।
तेभ्यो जातास्ततो लूता इति ख्यातास्तु
षोड़श॥"
तत्र सुश्रुतः।
"विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम्।
वशिष्ठं कोपयामास गत्वाश्रमपदं किल॥
कुपितस्य मुनेस्तस्य ललाटात् स्वेदबिन्दवः।
अपतन्दर्शनादेव शुष्कस्तात्तीव्रवर्च्चसः।
लूने तृणे महर्षेस्तु धेन्वर्थे सम्भृतेऽपि च॥
ततो जातास्त्विमे घोरा नानारूपा महाविषाः।
तासामष्टौ कष्टसाध्या वर्ज्यास्तावन्त एव हि॥
तत्र तृणमण्डलाप्रभृतयोऽष्टौ कष्टसाध्याः। सौवर्णिकाप्रभृतयोऽष्टावसाध्याः॥*॥ तासां सामान्यानां दंशलक्षणमाह।
"ताभिर्दष्टे दंशकोथ्यः प्रवृत्तिः क्षतजस्य च।
ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदो-
षजाः॥
पिड़का विविधाकारा मण्डलानि महान्ति च।
शोथो महान्तो मृदवो रक्ताः श्यावाश्चला-
स्तथा॥
सामान्यं सर्व्वलूतानामेतद्दंशस्य लक्षणम्॥"
दंशकोथ्यः दंशमध्ये पूतिभावः।
"दंशमध्ये तु यत् कृष्णं श्यावं वा जालमावृतम्॥
दग्धाकृति भृशं पाकं क्लेदशोथज्वरान्वितम्।
दूषीविषाभिर्लूताभिस्तं दष्टमिति निर्द्दिशेत्॥"
सौवर्णिकादयोऽष्टावसाध्याः प्राणहरास्तासां लक्षणमाह।
"शोथः श्वेता सिता रक्ता पीता वा पिड़का
ज्वरः।
प्राणान्तिको भवेद्दाहः श्वासहिक्का शिरो-
ग्रहः॥"
आखुदूषीविषलक्षणमाह।
"आदंशाच्छोणितं पाण्डुमण्डलानि ज्वरो-
ऽरुचिः।
लोमहर्षश्च दाहश्चाप्याखुदूषीविषार्द्दिते॥"
प्राणहरमूषकविषकार्य्यमाह।
"मूर्च्छाङ्गशोथवैवर्ण्यं क्लेदशब्दाश्रुतिज्वराः।
शिरोगुरुत्वं लालासृक्‌छर्द्दिश्चासाध्यमूषकात्॥"
अङ्गशोथोऽत्र मूषकाकारो बोद्धव्य इति तन्त्रान्तरे॥*॥ कृकलासदष्टस्य लक्षणमाह।
"शोथस्य कार्ष्ण्यमथवा नानावर्णत्वमेव च।
मोहोऽथ वर्च्चसो भेदो दष्टस्य कृकलासकैः॥"
वृश्चिकविषस्य लक्षणमाह।
"दहत्यग्निरिवादौ च भिनत्तीवोर्द्ध्वमाशु च।
वृश्चिकस्य विषं याति पश्चात् दंशोऽवतिष्ठते॥"
असाध्यवृश्चिकदष्टस्य लक्षणमाह।
"दष्टोऽसाध्यैस्तु हृद्घ्राणरसनोपहतो नरः।
मांसैः पतद्भिरत्यर्थं वेदनार्त्तो जहात्यसून्॥"
असाध्यैर्वृश्चिकैस्तेषामेवानुवृत्तिः। हृदादिषूपहतः हृदादिकार्य्यरहितो भवति। अत्यर्थं वेदनार्त्त इत्यन्वयः॥ कणभदष्टस्य लक्षणमाह।
"विसर्पः श्वयथुः शूलं ज्वरश्छर्द्दिरथापि च।
लक्षणं कणभैर्दष्टे दंशश्चैवावशीर्य्यते॥"
कणभः कीटविशेषः॥ उच्चिटिङ्गदष्टस्य लक्षणमाह।
"हृष्टरोमोच्चिटिङ्गेन स्तब्धलिङ्गो भृशार्त्ति-
मान्।
दष्टः शीतोदकेनेव सिक्तान्यङ्गानि मन्यते॥"
हृष्टरोमा अधिकतरहृष्टरोमा। उच्चिटिङ्गः कीटाकीटविशेषः॥*॥ सविषमण्डूकदष्टस्य लक्षणमाह।
"एकदंष्ट्रार्द्दितः शूनः सरुजः पीतकः सतृट्।
सनिद्रश्छर्द्दिमान् दष्टो मण्डूकैः सविषैर्भवेत्॥"
एकदंष्ट्रार्द्दितः स्वभावादेकयैव दंष्ट्रया दष्टो भवति॥*॥ मत्स्यविषस्य कार्य्यमाह।
"मत्स्यास्तु सविषाः कुर्य्युर्दाहं शोथं रुजं तथा॥"
जलौकोविषकार्य्यमाह।
"कण्डूशोथं ज्वरं मूर्च्छां सविषास्तु जलौकसः।"
कुर्य्युरिति शेषः॥*॥ गृहगोधिकाविषकार्य्यलक्षणमाह।
"विदाहं श्वयथुं तोदं प्रस्वेदं गृहगोधिकाः।"
कुर्य्युः। इति शेषः॥*॥ शतपदीविषकार्य्यमाह।
"दंशे स्वेदं रुजं दाहं कुर्य्यात् शतपदीविषम्।"
शतपदी गिजाइ इति लोके॥*॥ मशकविषकार्य्यमाह।
"कण्डूमान् मशकैरीषच्छोथः स्यान्मन्दवेदनः॥"
असाध्यमशकलक्षणमाह।
"असाध्यकीटसदृशमसाध्यं मशकक्षतम्।"
असाध्यकीटसदृशं असाध्यैः कीटैर्लूताभिः क्षतं यत् क्षतं तत्सदृशवेदनम्॥*॥ मक्षिकादंशस्य लक्षणमाह।
"सद्यःसंस्राविणी श्यावा दाहमूर्च्छाज्वरा-
न्विता।
पिड़का मक्षिकादंशे तासान्तु स्थगिकाशुहृत्॥"
तासामित्यादि। तासां सुश्रुतोक्तानां षसां मक्षिकाणां मध्ये स्थगिकानाम्नी शीघ्रं प्राणं हरतीत्यर्थः॥ व्याघ्रादिविषाणां कार्य्यमाह।
"चतुष्पाद्भिर्द्विपाद्भिर्वा नखदन्तैश्च यत् क्षतम्।
शूयते पच्यते तत्तु स्रवते ज्वरयत्यपि॥"
चतुष्पाद्भिर्व्याघ्रादिभिः। द्विपाद्भिर्वनमानुषादिभिः। शूयते शूनं भवति॥*॥ विषोज्झितस्य लक्षणमाह।

"प्रसन्नदोषं प्रकृतिस्थधातु-
मन्नाभिकामं सममूत्रविट्कम्।
प्रसन्नवर्णेन्द्रियचित्तचेष्टं
वैद्योऽवगच्छेदविषं मनुष्यम्॥"

प्रसन्नदोषं प्रकृतिस्थदोषं शेषं सुगमम्॥*॥

अथ विषाणां चिकित्सा। तत्र स्थावरविषस्य चिकित्सा।
"स्थावरेण विषेणार्त्तंनरं यत्नेन वामयेत्।
वमनेन समं नास्ति यतस्तस्य चिकित्सितम्॥
विषमत्यर्थमुष्णञ्च तीक्ष्णञ्च कथितं यतः।
अतः सर्व्वविषे युक्तः परिषेकस्तु शीतलः॥
औष्ण्यात्तैक्ष्ण्याद्विशेषेण विषं पित्तं प्रकोपयेत्।
वामितं सेचयेत्तस्माच्छीतलेन जलेन च॥
पाययेन्मधुसर्पिर्भ्यां विषघ्नं भेषजं द्रुतम्।
भोक्तुमन्नं रसं दद्यात् वर्ज्जयेन्मरिचानि च॥
यस्य यस्य च दोषस्य पश्येल्लिङ्गानि भूरिशः।
तस्य तस्यौषधैः कुर्य्याद्विपरीतगुणैः क्रियाम्॥
शालयः षष्टिकाश्चैव कोरदूषाः प्रियङ्गवः।
भोजनार्थे विषार्त्तानां हिताः पटुश्च सैन्धवम्॥"
प्रियङ्गुः कङ्गुः।
"मूलत्वक्फलपत्रपुष्पाणि बीजश्चेति शिरीषतः।
गवां मूत्रेण संपिष्टं लेपाद्विषहरं भवेत्॥
दूषीविषार्त्तः सुस्निग्धमूर्द्ध्वं चाधश्च शोधितम्।
पाययेदगदं सुख्यमिदं दूषीविषापहम्॥
पिप्पलीध्यामकं मांसी लोध्रमेला सुवर्च्चिका।
मरिचं वालकं चैला तथा कनकगैरिकम्॥
क्षौद्रयुक्तः कषायोऽयं दूषीविषमपोहति॥"
ध्यामकं रोहिषम्। तदलाभे उशीरं देयम्। कनकगैरिकं सोणागेरू इति लोके। अत्यन्तमारक्तम्॥*॥ अथ जङ्गमविषस्य चिकित्सा।
"अभया रोचना कुष्ठमर्कपुष्पं तथोत्पलम्।
नलवेतसमूलानि गरलं सुरसां तथा॥
सकलिङ्गं समञ्जिष्ठामनन्ताञ्च शतावरीम्।
शृङ्गाटकं समङ्गाञ्च पद्मकेशरमित्यपि॥
कल्कीकृत्य पचेत् सर्पिः पयो दद्याच्चतुर्गुणम्।
सम्यक्पक्केऽवतीर्णे च शीते तस्मिन् विनिःक्षिपेत्॥
सर्पिस्तुल्यं भिषक् क्षौद्रं शतरत्नं निधापयेत्।
विषाणि हन्ति दुर्गाणि गरदोषकृतानि च॥
अशीतिहन्ति विषं सर्व्वं गरैरुपहितां त्वचाम्।
योगजन्मकं कण्डूं मांससादं विसंज्ञताम्॥
नाशयत्यञ्जनाभ्यङ्गपानवस्तिषु योजितम्।
सर्पकीटाखुलूतादिदष्टानां विषहृत् परम्॥"
स्नुपाशर्क्कादि घृतम्।
"धुस्तूरस्य शिफा पेया चीरेण परिपाचिता।
अङ्कोठवंशजा चापि श्वविषघ्नी प्रयत्नतः॥
रजनीयुग्मपत्तङ्गमञ्जिष्ठानागकेशरैः।
शीताम्बुपिष्टैरालेपः सद्यो लूतां विनाशयेत्॥
जीरकस्य कृतः कल्को घृतसैन्धवसंयुतः।
सुखोष्णो मधुना लेपो वृश्चिकस्य विषं हरेत्॥
गन्धमाघ्राय सुदितस्यर्थावर्त्तदलस्य तु।
वृश्चिकेन नरो विद्धः क्षणाद्भवति निर्व्विषः॥"
इति विषाधिकारः। इति भावप्रकाशः॥*॥
पारिभाषिकविषा यथा,—
"न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
देवस्वञ्चापि यत्नेन सदा परिहरेत्ततः॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥

अपि च।
"दुरधीता विषं विद्या अजीर्णे भोजनं विषम्।
विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम्॥
विषं चंक्रमणं रात्रौ विषं राज्ञोऽनुकूलता।
विषं स्त्रियोऽप्यन्यहृदो विषं व्याधिरवीक्षितः॥"
इति चाणक्यम्॥

विषकण्टकिनी, स्त्री, (विषयुक्तः कण्टकोऽस्या अस्तीति। इनिः। ङीप्।) वन्ध्याकर्कोटकी। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—
"वन्ध्याकर्कोटकी देवी कन्यायोगीश्वरीति च।
नागारिनक्रदमनी विषकण्टकिनी तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
विषकन्दः, पुं, (विषयुक्तः कन्दो यस्य।) नीलकन्दः। इति राजनिर्घण्टः॥
विषघा, स्त्री, गुडूची। इति शब्दचन्द्रिका॥
विषघाती, [न्] पुं, (विषं हन्तीति। हन + णिनिः।) शिरीषवृक्षः। इति शब्दमाला॥ विषनाशके, त्रि॥
विषघ्नः, पुं, (विषं हन्तीति। हन + टक्।) शिरीषवृक्षः। इति शब्दचन्द्रिका॥ यवासः। विभीतकः। इति राजनिर्घण्टः॥ चम्पकवृक्षः। इति जटाधरः॥ विषनाशके, त्रि॥ (यथा, मनुः। ७। २१८।
"विषघ्नैरगदैश्चास्य सर्व्वद्रव्याणि योजयेत्।
विषघ्नानि च रत्नानि नियतो धारयेत् सदा॥")
विषघ्नौषधानि यथा,—
मनुरुवाच।
"रक्षोघ्नानि विषघ्नानि यानि धार्य्याणि भूभुजा।
अगदादि समाचक्ष्व तानि धर्म्मभृतांवर॥
मत्स्य उवाच।
विल्वाढ़कायवक्षारं पाटला वाह्लिकोषणा।
श्रीपर्णी शल्लकीयुक्ता निष्क्वाथ्य प्रोक्षणं परम्।
सविषं प्रोक्षितं तेन सद्यो भवति निर्व्विषम्॥१॥
यवसेन्धनपानीयवस्त्रशय्यासनोदनम्।
कवचाभरणं छत्रं वालव्यजनवेश्मनी॥
शेलुः पाटल्यतिविषा शोभी भार्गी पुनर्नवा।
समङ्गावृषमूलत्वक्कपित्थवृषशोणितम्।
महादन्तशठन्तद्वत् प्रोक्षणं विषनाशनम्॥२॥
लाक्षा प्रियङ्गु मञ्जिष्ठा सममेला हरेणुका।
सयष्ट्या मधुना युक्ता वभ्रुपित्तेन कल्किता॥
निखनेद्गोविषाणस्थं सप्तरात्रं महीतले।
ततः कृत्वा मणिं हेम्ना बद्धं हस्तेन धारयेत्।
संस्पृष्टं सविषन्तेन सद्यो भवति निर्व्विषम्॥३॥
मनो जलं शमीपुष्पं दुग्धर्क्षी चैव कर्षकाः।
कपित्थकुष्ठमञ्जिष्ठाः पित्तेन शुनकल्किताः॥
शुनो गोः कपिलायाश्च सौम्याक्षेयापरोऽगदः।
विषजित् परमं कार्य्यं मणिरत्नञ्च पूर्व्ववत्।
मूषिका जतुका वापि हस्ते बद्धा विषापहा॥४॥
हरेणु मांसी मञ्जिष्ठा रजनी मधुका मधु।
अक्षत्वक् सुरसं लाक्षाम्बुपित्तं पूर्व्ववद्भुवि॥
वादित्राणि पताकाश्च पिष्टैरेतैः प्रलेपिताः।
श्रुत्वा दृष्ट्वाथ चाघ्राय सद्यो भवति निर्व्विषः॥५॥

शुग्धयं पञ्चलवणं मञ्जिष्ठा रजनीद्वयम्।
सूक्ष्मैला त्रिवृतापत्रं विड़ङ्गमिन्द्रवारुणी॥
मधुकं वेतसं क्षौद्रं गोविषाणे निधापयेत्।
तस्मादुष्णाम्बुना मात्रा प्रागुक्तां योजयेत्तथा।
विषं भुक्तं जारयति निर्व्विषेऽपि न दोषकृत्॥६॥
सक्तुं सर्ज्जरसोपेतं सर्षपा एलवालुकैः।
सुवर्णी तस्करतरोः कुसुमैरर्ज्जुनस्य तु॥
धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम्।
न तत्र कीटाः सविषा न दर्दुरसरीसृपाः।
न कृत्या कर्म्मणस्तत्र धूपोऽयं यत्र दह्यते॥७॥
कल्कितैश्चन्दनक्षीरपलाशद्रुमवल्कलैः।
दूर्व्वैलवालुसुरसानाकुलीतण्डुलीयकैः।
क्काथः सर्व्वोदकार्थेषु काकमाचीयुतैर्हृतः॥८॥
रोचनापत्रनेपालीकुङ्कुमैस्तिलकोऽन्वहम्।
विषैर्न वाध्यते स्याच्च नरनारीनृपप्रियः॥९॥
चूर्णैर्हरिद्रामञ्जिष्ठाकिणिहीकणनिम्बजैः।
दिग्धं निर्व्विषतामेति गात्रं सर्व्वविषार्द्दितम्॥१०
शिरीषस्य फलं पत्रं पुष्पं त्वङ्मूलमेव च।
गोमूत्रघृष्टो ह्यगदः सर्व्वकर्म्मकरः स्मृतः॥११॥
एकवीरमहौषध्यः शृणु चातः परं द्विज।
वन्ध्याकर्कोटकी राजन् विष्णुक्रान्ता तथोत्कटा।
शतमूली शतानन्दी वला मोचा पटोलिका॥
सोमा पिण्डनिशा चैव तथा दग्धरुहा च या।
स्थले कमलिनी या च विशाली शङ्खमूलिका॥
चण्डाली हस्तिचण्डाली गोचण्डाली च गन्धिका।
रक्ता चैव महारक्ता तथा बर्हिशिखा च या।
कोषातकी नक्तमाला पियाला शुभलक्षणा।
वारुणा च सुगन्धा च तथा वै गन्धनाकुली॥
ईश्वरी च शिलीन्ध्री च सोमकी वंशतालिका।
जतुकाली महाश्वेता श्वेता च मधुयष्टिका॥
वज्रंटः पारिभद्रश्च तथा वै सिन्धुवारिका।
जीवानन्दा वसुमती नतनागरकण्टकी॥
तालता जालयाताला तथा च वटपत्रिका।
कार्त्तस्वरी महानीला कुन्दरं हंसपादिका॥
मण्डूकपर्णी वाराही द्वे तथा तण्डुलीयके।
सर्पाक्षी लवणा ब्राह्मी विश्वरूपा सुखङ्करी॥
रणापहा वृद्धिकरी तथा शल्यापहा च या।
पत्रिका रोहिणी चैव रक्तमाला महौषधी॥
तथामलकवन्दाकं या च चित्रा पटोलिका।
काकोली क्षीरकाकोली पीलुपर्णी तथैव च॥
केशिनी वृश्चिकाली च महानागा शतावरी।
तथा गरुड़वेगा च स्थले कुमुदिनी तथा॥
स्थले चोत्पलिनी या च महाभूमिलता च या।
उन्मादिनी सोमराजी सर्व्वरत्नानि पार्थिव॥
विशेषान्मरकतान्यत्र कीटपक्षं विशेषतः।
जीवजाताश्च मणयः सर्व्वे धार्य्या विशेषतः॥*॥
रक्षोनाश यशस्याश्च तथा वेतालनाशनाः।
विशेषान्नरनागाश्च गोखरोष्ट्रसमुद्भवाः॥
सर्पतित्तिरिगोमायुवभ्रुमण्डूकजाश्च ये।
सिंहव्याघ्रर्क्षमार्ज्जारद्वीपिवानरसम्भवाः॥
कपिञ्जलागगोधाहिमहिषेषु भवाश्च ये।

इत्येवमेतैः सकलैरुपेतै-
र्द्रव्यैश्च सर्व्वैः स्वपुरं सुरक्षितम् ।
राजा वसेत्तत्र गृहञ्च शुभ्रं
गुणान्वितं लक्षणसंप्रयुक्तम् ॥"
इति मात्स्ये १६२ अध्यायः ॥
(तण्डुलीयः । तत्पर्य्यायो यथा । अथ च वराह ।
अल्पमरुषा इति च ।
"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुलीबीजो विषघ्नश्चाल्पमारिषः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

विषघ्नी, स्त्री, (विषं हन्ति या । हन+टक् । स्त्रियां ङीप् ।) हिलमोचिका । इति त्रिकाण्डशेषः ॥ (अस्याः पर्य्यायो यथा,—
"मारी विषघ्नी मत्स्याक्षी चक्राङ्गी हिल-
मोचिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
इन्द्रवारुणी । वनवर्व्वरिका । स्वल्पफला । भूम्यामली । रक्तपुनर्नवा । हरिद्रा । वृश्चिकाली । (अस्याः पर्य्यायो यथा,—
"वृश्चीपत्री वृश्चिकाली विषघ्नी नागदन्तिका ।
सर्पदंष्ट्रामराकाली चोद्धूधर पुच्छिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
महाकरञ्जः । इति राजनिर्घण्टः ॥ (क्षुपा । तत्पर्य्यायो यथा,—
"क्षुपा पुष्पवल्ला च पराश्वत्थफला मता ।
मत्स्यगन्धा शोफहन्त्री विषघ्नी ध्वाङ्क्षनाशिनी ॥"
देवदाली । ततृपर्य्यायो यथा,—
"देवदाली तु वेणी स्यात् कर्कटी च गरागरी ।
देवताडी वृत्तकोशस्तथा जीमूत इत्यपि ।
पीतापरा खरस्पर्शा विषघ्नी गरनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

विषजिह्वः, पुं, देवताड़वृक्षः । इति रत्नमाला ।

विषज्वरः, पुं. (विषवत् प्राणनाशको ज्वरो यस्य ।) महिषः । इति शब्दरत्नावली । विषजज्वरश्च ॥

विषण्डं, क्ली, मृणालम् । इति शब्दरत्नावली ॥

विषस्सः, त्रि, (वि+षद+क्तः ।) विषादप्राप्तः । यथा,—
"इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् ।
विषस्सा भग्नसङ्कल्पा चिन्तामापुर्दुरत्ययाम् ॥"
इति श्रीभागवते १० स्कन्धे २६ अध्यायः ॥

विषस्सता, स्त्री, (विषस्सस्य भावः । तल् ।) जड़ता । यथा,—
"जाड्यं मौख्यं विषादोऽवसादः सादो विष-
स्सता ॥"
इति हेमचन्द्रः ॥

विषतिन्दुः, पुं, कारस्करवृक्षः । इति राजनिर्घण्टः ॥ कुचीलुः । इति भावप्रकाशः ॥

विषदं, क्ली, (विषं ददातीति । दा+कः ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ शुक्लवर्णे, पुं । इत्यमरटीका ॥ (निर्म्मले प्रसन्ने च त्रि । यथा, रघुः । १० । १४ ।
"योगनिद्रान्तविषदैः पावनैरवलोकनैः ।")

विषदंष्ट्रा, स्त्री, (विषं दंष्ट्रायां यस्याः ।) सर्पकङ्काली । इति रत्नमाला ॥

विषदन्तकः, पुं, (विषं दन्ते यस्य । कन् ।) सर्पः । इति शब्दचन्द्रिका ॥

विषदर्शनमृत्युकः, पुं, (विषदर्शने मृत्युर्यस्य । कन् ।) चकोरपक्षी । इति हेमचन्द्रः ॥

विषद्रुमः, पुं, (विषयुक्तो द्रुमः ।) कारस्करवृक्षः । इति राजनिर्घण्टः ॥

विषधरः, पुं, (धरतीति । धृ+अच् । विषस्य धरः ।) सर्पः । इत्यमरः ॥ (यथा, गीतगोविन्दे । १ । १६ ।
"कालियविषधरगञ्जनजनरञ्जन ॥"
स्त्रियां विषधरी । यथाह कश्चित् ।
"धावद्घोरविभावरी विषधरीभोगस्य भीमो
मणिः ॥")

विषधर्म्मा, स्त्री, कुलत्थया । इति शब्दचन्द्रिका ॥ आलकुशी इति भाषा ॥

विषधात्री, स्त्री, (विषाणां विषधरसर्पाणां धात्री मातेव ।) जरत्कारुमुनिपत्नी । इति शब्दमाला ॥

विषनाशनः, पुं, (विषं नाशयति । ल्युः ।) शिरीषवृक्षः । इति हारावली ॥ विषनाशके, त्रि ॥

विषनाशिनी, स्त्री, (विषं नाशयतीति । नाशि+णिनिः ।) सर्पकङ्काली । इति शब्दचन्द्रिका ॥ (अथ राखा भेदनाइ इति लोके । तत्पर्य्यायो यथा,—
"नाकुली सरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाङ्गी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

विषनुत्, पुं, (विषं नुदति दूरीकरोति । नुद+क्विप् ।) श्योनाकवृक्षः । इति शब्दचन्द्रिका ॥

विषपुष्पं, क्ली, नीलपद्मम् । इति शब्दमाला ॥ विषयुक्तपुष्पञ्च ॥

विषपुष्पः, पुं, (विषयुक्तं पुष्पं यस्य ।) छर्द्दनवृक्षः । इति रत्नमाला ॥ मनफल इति भाषा ॥

विषपुष्पकः, पुं, (विषयुक्तं पुष्पं यस्य बहुव्रीहौ कन् ।) मदनवृक्षः । इति भावप्रकाशः ॥ विषपुष्पभक्षणजन्यरोगः । इति केचित् ॥

विषभिषक्, [ज्] पुं, (विषस्य विषचिकित्सको वा भिषक् ।) विषवैद्यः । इति हेमचन्द्रः ॥

विषभुजङ्गः, पुं, विषयुक्तसर्पः । इति केचित् ॥

विषमं, त्रि, असमानम् । यथा, मनुः ।
"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत् सह ।
न तत्र भागं विषमं पिता दद्यात् कथञ्चन ॥"
इति दायतत्त्वम् ॥
(सङ्कटः । यथा, गीतायाम् । २ । २ ।
"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ॥"
अनतिक्रमणीयः । यथा, साहित्यदर्पणे । १० ।
"का विषमा दैवगतिः किं दुर्ल्लभं जनः खलो
लोके ॥")

विषमं, क्ली, पद्यस्य त्रिविधवृत्तान्तर्गतवृत्तविशेषः । यथा,—
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा ।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः ॥
आदिस्तृतीयवद्यस्य पादस्तूर्य्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ॥"
इति छन्दोमञ्जर्य्यां प्रथमस्तवकः ॥
वर्गमूलोक्तोर्द्धरेखा । यथा,—
"त्यक्त्वान्त्याद्विषमात् कृतिं द्विगुणयेन्मूलं समे
तद्धृते
त्यक्त्वा लब्धकृतिन्तदाद्यविषमाल्लब्धं द्विनिघ्नं
न्यसेत् ।
पङ्क्त्यां पङ्क्तिहृते समेऽन्यविषमात् त्यक्त्वाप्तवर्गं
फलं
पङ्क्त्यान्तद्द्विगुणं न्यसेदिति मुहुः पङ्क्तेर्द्दलं
स्यात् पदम् ॥"
इति लीलावती ॥
(अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे । १० ।
"यद्वारब्धस्य वैफल्यं अनर्थस्य च सम्भवः ।
विरूपयोः सङ्घटना या च तद्विषमं मतम् ॥"
उदाहरणम् ।
"क्व वनं तरुवल्कभूषणं
नृपलक्ष्मीः क्व महेन्द्रवन्दिता ॥")

विषमः, पुं, अयुग्मराशिः । स तु मेषः मिथुनः सिंहः तुला धनुः कुम्भश्च । यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
इति ज्योतिस्तत्त्वम् ॥
तालविशेषः । यथा, सङ्गीतदामोदरे ।
"चतुर्व्विधः परिज्ञेयस्तालः कङ्कणनामकः ।
पूर्णः खण्डः समश्चैव विषमश्चैव कथ्यते ॥
लचतुष्कं गणौ पूर्णे खण्डे बिन्दुद्वयं गुरुः ।
यगणस्तु समे ज्ञेयस्तगणो विषमे भवेत् ॥"
(जठराग्निविशेषः । यथा,—
"मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः ।
विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमि-
त्तजान् ॥"
इति वैद्यकचक्रपाणिसंग्रहे मन्दाग्न्यधिकारे ॥)

विषमच्छदः, पुं, (विषमः अयुग्मः छदो यस्य ।) सप्तच्छदवृक्षः । इत्यमरः ॥

विषमज्वरः, पुं, (विषमः ज्वरः ।) ज्वररोगविशेषः । तस्य निदानकथनपूर्व्विकां संप्राप्तिमाह ।
"दोषोऽल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः ।
धातुमन्यतमं प्राप्य करोति विषमज्वरम् ॥"
अयमर्थः । ज्वरोत्सृष्टस्य ज्वरेण त्यक्तस्य । सन्निकृष्टं लक्षणमाह । दोषः अल्पः ज्वरमुक्तावस्थोऽपि । विप्रकृष्टं हेतुमाह । अहितमाहारविहारादि तेन सम्भूतः संपूर्णो जातः अन्यतमं धातुं रसरक्तादिकं प्राप्य दूषयित्वा

पुनः विषमज्वरं करोति। ज्वरोत्सृष्टस्य वेति वाशब्देनेति बोध्यते। प्रथमतोऽपि विषमज्वरो भवति। यत उक्तम्। आरम्भाद्विषमो यस्त्वित्यादिकम्। धातुं दूषयित्वा कं विषमज्वरं करोतीत्यपेक्षायामाह।

"सन्ततं रसरक्तस्थः सततं रक्तधातुगः।
दोषः क्रुद्धो ज्वरं पुंसां सोऽन्येद्युः पिशिताश्रितः॥
मेदोगतस्तृतीयेऽह्नि अस्थिमज्जगतः पुनः।
कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम्॥"

अन्तकं अन्तकमिव मारकत्वात्। *। विषमज्वरस्य सामान्यलक्षणमाह।

"यः स्यादनियतात् कालाच्छीतोष्णाभ्यां तथैव च।
वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः॥"

यस्त्वनियतात् कालात् स्यादित्यस्यायमर्थः। यथा, वातिको ज्वरः सप्तदिनानि पैत्तिको दश दिनानि श्लैष्मिको द्वादश दिनानि दोषाणां प्राबल्ये वातिकश्चतुर्द्दश दिनानि पैत्तिको विंशतिदिनानि श्लैष्मिकश्चतुर्व्विंशतिदिनानि स्यात् तथा विषमज्वरो नियतं कालं व्याप्य न स्यादित्यर्थः। शीतोष्णाभ्यां गुणाभ्यां स्यात्।

"वेगतश्चापि विषमः कदाचिदपि वेगवान्॥"

कदाचिदपि शान्तवेगः॥ विषमज्वरस्य भेदानाह।

"सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ।"

तत्र सन्ततस्य लक्षणमाह।

"सप्ताहं वा दशाहं वा द्वादशाहमथापि वा।
सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते॥"

त्रिकल्पो वातिकादिभेदात्। सन्तत्या नैरन्तर्य्येण अविसर्गी अपरित्यागी। ननु मुक्तानुबन्धित्वं विषमत्वमिति विषमलक्षणं तदत्र न घटत इति कथमयं विषमेषु पठ्यते। घटत एव इति न दोषः। यत उक्तं चरकेण।

"विसर्गं द्वादशे कृत्वा दिवसेऽव्यक्तलक्षणम्।
दुर्लभोपशमः कालं दीर्घमप्यनुवर्त्तते॥"

यत्तु खरनादः।

"ज्वराः पञ्च च ये प्रोक्ताः पूर्व्वं सततकादयः।
चत्वारः सन्ततं हित्वा ज्ञेयास्ते विषमज्वराः॥"

इति। तच्चिरेण त्यागाभिप्रायेण। *। सततलक्षणमाह।

"अहोरात्रे सततको द्वौ कालावनुवर्त्तते।"

द्वौ कालौ अहन्येककालं रात्रावेककालम्। यतो दोषाणामहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोपकालौ। यत उक्तं वाग्भटेन।

"वयोऽहोरात्रिभुक्तानामन्तमध्यादिकाः क्रमात्।" इति।

अन्येद्युष्कलक्षणमाह।

"अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते।"

एककालं दोषापेक्षया एककालमपि द्वितीयं प्रथमकाले ह्यत्रैव दोषस्थितिः। *। तृतीयकचतुर्थकयोर्लक्षणमाह।

"तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः।"

तृतीयेऽह्नि इत्यागमनदिनं गृहीत्वा। यत उक्तम्।

"दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः।
दिनद्वयं त्वतिक्रम्य यः स्यात् स हि चतुर्थकः॥" इति।

अत्राह वृद्धसुश्रुतः।

"कफस्थानविभागेन यथासंख्यं करोति हि।
सतताद्येद्युष्कत्र्याख्यचतुर्थकप्रलेपकान्॥
अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते।
दोष आमाशयं प्राप्य करोति विषमज्वरम्॥"

अयमर्थः। आमाशयोरःकण्ठशिरःसन्धयः पञ्च कफस्थानानि एषु तिष्ठन् दोषो यथासंख्यं सततादीन् करोति। तत्रामाशये स्थितो दोषः सततं करोति द्वौ कालौ अहोरात्रे कालद्वये दोषप्रकोपात्। हृदये स्थितो दोष आमाशयमागत्य अन्येद्युष्कं करोति। एककालं नैकस्मादेकस्मिन्नेवाहोरात्रे दोष आमाशयमायाति। तत्र द्वौ दोषकोपकालौ एकस्मिन् काले हृदये तिष्ठत्यपरस्मिन्नामाशय इति। कण्ठे स्थितो दोषोऽहोरात्रात् हृदयमायाति। तृतीये दिने आमाशयमागत्य स्वप्रकोपकाले तृतीयकं ज्वरं करोति एककालं न तु द्वौ कालौ स्वभावात्। एवं शिरःस्थितो दोषोऽहोरात्रात् कण्ठमायाति। ततः पुनरहोरात्राद्धृदयमायाति चतुर्थेदिने आमाशयमागत्य स्वप्रकोपकाले चतुर्थकं ज्वरं करोति। एककालं न तु द्वौ कालौ स्वभावादेव। *। ननु दोषस्यागमनक्रमेण निजस्थानगमनक्रमात् कथं तृतीयचतुर्थदिवसयोर्ज्वरागमनम्। उच्यते। दोषो हि प्रकोपशमये वेगवत्तया लाघवात् स्वस्थानन्तु वेगदिन एव याति। यत आह।

"दोषः प्रकोपकाले हि वेगवत्त्वेन लाघवात्।
वेगवासर एवायं स्वस्थानमभिगच्छति॥"

सन्धिषु स्थितः प्रलेपं करोति। सन्धयश्चामाशयेऽपि सन्ति तेषु स्थितः प्रलेपकं सर्व्वदा करोति। *।

"निवृत्तः पुनरायाति विषमो नियते दिने।
स्वभावं कारणं तत्र मन्यन्ते मुनिपुङ्गवाः॥"

स्वभावस्य कारणत्वे कफस्थानविभागनिरपेक्षाः चतुर्थकादिविपर्य्यया अपि ज्वराः स्वस्य काले भवन्ति।

"अनुशेते यथा भूमिं बीजं काले प्ररोहति।
अनुशेते तथा धातुं दोषः काले प्रकुप्यति॥"

सुश्रुतोऽप्याह।

"स चापि विषमो देहं न कदाचित् प्रमुञ्चति।
ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते।
वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते।
धात्वन्तरस्थो लीनत्वात् सौक्ष्म्यान्नैवोपलभ्यते॥"

द्विदोषोल्वणस्य तृतीयकस्य लक्षणमाह।

"कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः।
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः॥"

त्रिकग्राही वेदनया त्रिकं गृह्णाति इत्यर्थः। *। ननु कफपित्तात्त्रिकग्राही वेदनया त्रिकव्यापी त्रिकस्य वातस्थानं तत्कथं तद्गृहीतौ पित्तकफौ अन्यस्थानगत्वेन दुर्ब्बलत्वेन दुर्ब्बलौ वेगं कुरुते। उच्यते दोषाणां स्थाननियमः न तु कुपितानाम्। तथा च सुश्रुतः।

"कुपितानां हि दोषाणां शरीरे परिधावताम्।
यत्र सङ्गः खवैगुण्याद्व्याधिस्तत्रोपजायते॥"

एवं अन्यस्थानगत्वेन चतुर्थकोऽपि वाच्यम्। वातकफात्मकः पृष्ठात् अथवा पृष्ठं व्याप्य भवति इत्यर्थः। यत्लोपकर्म्मण्यधिकरणे चेति सूत्रेण पञ्चमी। *। कफोल्वणस्य वातोल्वणस्य च चतुर्थकस्य लक्षणमाह।

"चतुर्थको दर्शयति स्वभावं द्विविधं ज्वरः।
जङ्घाभ्यां श्लैष्मिकः पूर्व्वं शिरसोऽनिलसंभवः॥"

श्लैष्मिकः श्लेष्मोल्वणः तथा अनिलसंभवः वातोल्वणः। सन्ततादीनां त्रिदोषजत्वात्। उक्तञ्च चरकेण।

"प्रायशः सन्निपातेन पञ्च स्युर्व्विषमज्वराः।" इति।

प्रायशो ग्रहणादेकदोषजाः द्विदोषजा अपि न भवन्ति इति जेज्जटः। पूर्व्वं प्रथमं जङ्घाभ्यां अथवा जङ्घे व्याप्य पश्चात् सकलं शरीरं व्याप्नोति। एवमुल्वणवातजातः शिरसः पूर्व्वं अथवा शिरो व्याप्य सकलं शरीरं व्याप्नोतीत्यर्थः।

"विषमज्वर एवान्यश्चतुर्थकविपर्य्ययः।
अस्थिमज्जगतो दोषश्चतुर्थकविपर्य्ययः॥"

अन्यः सन्ततादिपञ्चकादपरं चतुर्थकविपर्य्ययाख्यो ज्वरः सोऽपि विषमज्वर एव। स किंधातुस्थ इत्यपेक्षायामाह अस्थीत्यादि। तस्य चतुर्थकविपर्य्ययस्य लक्षणमाह।

"स मध्ये ज्वरयत्यह्नी आद्यन्ते च विमुञ्चति।"

चतुर्थकविपर्य्यय इत्युपलक्षणम्। सततादिविपर्य्ययोऽपि बोद्धव्यः। यथा, अहोरात्रे द्वौ कालौ मुञ्चति शेषं सर्व्वमहोरात्रं तिष्ठतीति सततविपर्य्ययः। अहोरात्रे एकं कालं मुञ्चति शेषं सर्व्वमहोरात्रं तिष्ठति इत्यन्येद्युष्कविपर्य्ययः। मध्ये एकं दिनं ज्वरयति आद्यावन्ते च दिने मुञ्चति इति तृतीयकविपर्य्ययः। एते विषमज्वरा उपलक्षकाः अन्ये रात्रिज्वरादयोऽपि विषमज्वरा बोद्धव्याः। यथा,—

"समौ वातकफौ यस्य क्षीणपित्तस्य देहिनः।
रात्रौ प्रायो ज्वरस्तस्य दिवा हीनकफस्य तु॥"

प्रायो बाहुल्येन। *। सन्ततादीनां शीतपूर्व्वत्वे दाहपूर्व्वत्वे च हेतुमाह।

"त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरम्।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च॥"

शीतं शीतसहितं प्रशान्तयोः प्रशान्तवेगयोः।

अन्त: अभ्यन्तरे ।
"करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुत: शीतमन्तत: ॥"
अन्तत: हस्तपादादित: । * । शीतादिदाहा-
दिज्वरयोस्त्रिदोषजत्वमाह ।
"द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्व्वस्तयो: कष्ट: सुखसाध्यतमोऽपर: ॥"
संसर्गजौ सान्निपातिकौ । कष्ट: कष्टसाध्य: ॥*॥
विषमज्वरविशेषानाह ।
"विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्धं शीतलं देहं चार्द्धमुष्णं प्रजायते ॥"
अन्नरसे विदग्धे आहाररूपे रसे दुष्टे श्लेष्मपित्ते
च व्यवस्थिते दुष्टे स्थिते तेन हेतुना शीतलं
कफेन उष्णं पित्तेन अर्द्धत्वं चार्द्धनारीश्वरा-
कारेण नरसिंहाकारेण वा ।
"काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थित: ।
तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयो: ॥"
अन्ते हस्तपादादौ ।
"काये श्लेष्मा यदा दुष्ट: पित्तञ्चान्ते व्यवस्थित: ।
शीतत्वं तेन गात्रे स्यादुष्णत्वं हस्तपादयो: ॥"
विषमज्वरविशेषस्य प्रलेपकस्य लक्षणमाह ।
"प्रलिम्पन्निव गात्राणि घर्म्मेण गौरवेण च ।
मन्दज्वरविलेपी च सशीत: स्यात् प्रलेपक: ॥"
गौरवेण उपलक्षित: । मन्दज्वरविलेपी मन्द-
वेगस्य ज्वरस्य सदा सम्बन्धोऽस्यास्तीति मन्द-
ज्वरविलेपी अयं विषमज्वर: । यथा च सुश्रुत: ।
प्रलेपकाख्यो विषम: प्राय: क्षयाय शोषिणा-
मिति । * । अथ विषमज्वराणां सामान्य-
चिकित्सा ।
"ज्वराश्च विषमा: सर्व्वे सन्निपातसमुद्भवा: ।
यथोल्वणस्य दोषस्य तेषु कार्य्यं चिकित्सितम् ।
विषमेष्वथ कर्त्तव्यमूर्द्ध्वं वाधश्च शोधनम् ।
स्निग्धोष्णैरन्नपानैश्च शमयेद्विषमज्वरम् ॥*॥
कालिङ्गक: पटोलस्य पत्रं कटुकरोहिणी ।
पटोलं सारिवा मुस्तं पाठा कटुकरोहिणी ।
निम्ब: पटोलस्त्रिफला मृद्वीका मुस्तवत्सकौ ।
किराततिक्तममृता चन्दनं विश्वभेषजम् ।
गुडूच्यामलकं मुस्तमर्द्धश्लोकसमापना: ।
कषाया: शमयन्त्याशु पञ्च पञ्चविधज्वरम् ॥"
कालिङ्गक: इन्द्रयव: । वत्सक: कुटज: । चन्दन-
मत्र रक्तचन्दनम् । कषाया: पञ्च । पञ्चविधं
सन्ततसतताऽन्येद्युष्कतृतीयचतुर्थकरूपम् । * ।

"महाबलामूलमहौषधाभ्यां
क्वाथो निहन्याद्विषमज्वरं हि ।
शीतं सकम्पं परिदाहयुक्तं
विनाशयेत् द्वित्रिदिनं प्रयोगात् ॥*॥
क्षुद्रामृतानागरपुष्कराद्यै:
कृत: कषाय: कफमारुतोत्तरे ।
सश्वासकासारुचिपार्श्वरुग्ज्वरे
सदा त्रिदोषप्रभवेऽपि शस्यते ॥"*॥

क्षुद्रादि । * ।

"क्षुद्रामृतापद्मकचन्दनैर्घनै-
र्भूनिम्बपर्पटपटोलपौष्करै: ।
तिक्ताकलिङ्गपिचुमर्द्दवासकै-
र्महौषधं भार्गिवितुन्नकै: समै: ।
शृतं पिबेत् पूर्व्वदिनं कषायं
निहन्ति दुष्टज्वरमुग्रशीतम् ।
सश्वासमूर्च्छारुचिदाहयुक्तां
तृष्णां वमिं कासमतीव शूलकम् ।
श्वासाहहिक्कादिषु सन्निपाते
गलग्रहे तन्द्रिशिरोरुजायाम् ॥"

इहन्नुद्रादिविषमज्वरे । * ।
"मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्वाथ: ।
पीत: सकणाचूर्ण: समधुर्विषमज्वरं हन्ति ॥*॥
तिलतैललवणयुक्तकल्को लशुनसेवित: प्रात: ।
विषमज्वरमपहरते वातव्याधीनशेषांश्च । * ।
काकजाङ्घी तु सगुडा विषमज्वरनाशिनी ।
मधुनाढ्याभया लीढा हन्त्याशु विषमज्वरान् ॥"
काकजाङ्घी मगरेला इति लोके । सा च
किञ्चिद्भृष्टा गुडतुल्या कर्षमिता भक्षणीया ।*
"पीतो मरीचचूर्णेन तुलसीपत्रजो रस: ।
द्रोणपुष्पीभवो वापि निहन्ति विषम-
ज्वरान् । * ।
अमृताया: शतं चूर्णं वाससा परिशोधितम् ।
पृथक् षोडशभागा: स्युर्गुडमाक्षिकसर्पिषाम् ।
यथाग्नि भक्षयेदेतन्नरो हितमिताशन: ।
नास्य कश्चिद्भवेद्व्याधिर्न जरा पलितं न च ।
न ज्वरा विषमा नैव मेहवातास्ररक्तकम् ।
न च नेत्रगता रोगा: परमेतद्रसायनम् ।
मेधाकरं त्रिदोषघ्नं प्रयोगादस्य बुद्धिमान् ।
जीवद्वर्षशतं साग्रं यथैवादितिजस्तथा ॥"
गुडूचीकल्क: । * । अथान्नमाह ।
"तक्रमांसं पयोमांसं दधिमांसमथापि वा ।
मांसमांसञ्च भुञ्जानो मुच्यते विषमज्वरात् ॥"*
अग्निवेशश्च ।
"सुरा समण्डा पानाय भोजने चरणायुधा: ।
तित्तिरा विष्किरा: पथ्या: कुक्कुटा विषमज्वरे ॥
चरणायुधा गृहकुक्कुटा: । कुक्कुटा वनकुक्कुटा: ।
विष्किरा: वर्त्तिकालावविगिरचकोराद्या: । *।
अथ सन्ततादीनां विशिष्टा चिकित्सा ।
"त्रायन्तीकटुकानन्तासारिवाभि: शृतं जलम् ।
सन्तताख्ये ज्वरे देयं वातादीनां निवृत्तये ॥"
अनन्ता दुरालभा । * ।
"पटोलाब्दविशातिक्तासारिवाभि: शृतं जलम् ।
सन्तताख्ये ज्वरे देयं वातादीनां निवृत्तये ॥"
इमा इहद्न्ती एरण्डवत्पत्रविटपा तदलाभे
दन्ती च ग्राह्या समानगुणत्वात् । * ।
"पटोलेन्द्रयवानन्तापथ्यारिष्टामृताजलम् ।
क्वथितं तज्जलं पीतं ज्वरं सन्ततकं जयेत् ॥"
अनन्ता सारिवा । अरिष्ट: निम्ब: । जलं
बालकम् । * ।
"द्राक्षापटोलनिम्बाब्दशक्राह्वत्रिफलाशृतम् ।
जलं जन्तु: पिबेच्छीघ्रमन्येद्युर्ज्वरशान्तये ॥"
शक्राह्व: इन्द्रयव: । * ।
"कर्म्मसाधारणं त्यक्त्वा तृतीयकचतुर्थकौ ।
भिषजा प्रतिकर्त्तव्यौ विशेषोक्तचिकित्सितै: ।
उशीरं चन्दनं मुस्तं गुडूचीधान्यनागरम् ।
अम्भसा क्वथितं पेयं शर्करामधुयोजितम् ॥*॥
ज्वरे तृतीयके पुंसां तृष्णादाहसमन्विते ।
अपामार्गजटा कट्यां लोहितै: सप्ततन्तुभि: ।
बद्धा वारे रवेस्तूर्णं ज्वरं हन्ति तृतीयकम् ॥*॥
स्थिरातामलकीदारुशिवाशुण्ठमहौषधै: ।
सितामधुयुत: क्वाथश्चतुर्थकहर: पर: ॥"
स्थिरा शालिपर्णी । तामलकी भूम्यामली । शिवा
हरीतकी । शुण्ठी वाचा । * ।

"अगस्तिपत्रस्य रसेन नस्यं
निहन्ति चातुर्थकमुग्रवीर्य्यम् ।
शिरीषपुष्पस्य निशाद्वयस्य
कल्केन वा तत्घृतसंयुतेन ॥"

तत् नस्यम् । * ।
"ज्वरस्य वेगकालञ्च चिन्तयन् ज्वर्य्यते तु य: ।
तस्येष्टैरद्भुतैश्चापि विषयैर्नाशयेत् स्मृतिम् ।
सन्ततं विषमञ्चापि क्षीणस्य सुचिरोत्थितम् ।
ज्वरं सभोजनै: पथ्यैर्ल्लंघनै: समुपाचरेत् ॥"*॥
सततादिविपर्य्ययाणां विषमज्वराणां चिकित्सा
सततादीनामिव कर्त्तव्या ।
"शीताभिभूते पुरुषे कुर्य्याच्छीतहरीं क्रियाम् ।
दाहाभिभूते तु विधिं विदध्याद्दाहनाशनम् ।
आच्छादनैश्चगुरुभिर्गुरुभि: कम्बलादिभि: ।
तूलवत्या महाशीतं शीतादिज्वरिणो हरेत् ॥"
तूलवती तुलाई इति लोके ।
"तं स्तनाभ्यां सुपीनाभ्यां पीवरोरुनितम्बिनी ।
युवतिर्गाढमालिङ्गेत्तेन शीतं प्रशाम्यति ।
कान्ताङ्गसङ्गसंजातं तस्य शीते निवारिते ।
प्रह्लादं चास्य विज्ञाय पृथक् तां कारयेत्
स्त्रियम् ।
ततो दाहे तु संजाते पद्मैरेरण्डसम्भवै: ।
शीतलैर्धारितैर्देहे दाहं तस्यापनोदयेत् ।
तालकं शुक्तिकाचूर्णं तुल्यं तत्रोभयोरपि ।
नवमांसञ्च तुल्यं स्यात् मर्द्दयेत् कन्यकाद्रवै: ।
तत् तु संशुष्कसुपलैर्वह्निगजपुटै: पचेत् ।
शीतं तच्चूर्णयेच्चूर्णं गुञ्जामात्रं सितायुतम् ।
प्रभाते भक्षयेत्तेन याति शीतज्वर: क्षयम् ।
वान्तिर्भवति कस्यापि कस्यापि न भवत्यपि ।
एकेन दिवसेनैव शीतज्वरहरं परम् ।
मध्याह्नसमये पथ्यं शिखरिणी भक्तकं च ॥"*॥
शीतज्वरे भूतभैरवचूर्णम् ।
"एला जातीफलं चौचत्रिफलाजीरकं घन: ।
सविडङ्गं सितायुक्तं चूर्णं शीतज्वरापहम् ।
कायस्थानाकुलीतिक्तावयस्थापुरचोरकै: ।
सहदेवावचाकुष्ठै: शीतघ्नैघ्रं पचेत्पचेत् ।
एतैरेवौषधै: पिष्टैर्लवणक्षारसंयुतै: ।
साध्वैर्विपाचितं तैलमभ्यङ्गाच्छीतनाशनम् ॥"
कायस्था हरितकी । नाकुली रास्ना । भेदसाई
इति लोके । वयस्था गुडूची । पुरो गुग्गुलु: ।
चोरक: । भटेउर । तदलाभे गठिवन । सह-

देवा इन्द्रलुप्ता। क्षारो यवक्षारः। कायस्थादिधूपं लेपनं तैलञ्च।

"एरण्डस्य तु पत्राणि शिशिरभूमौ निधापयेत्।
दाहादिज्वरिणो देहे तानि पत्राणि धारयेत्॥
तेन नश्यति दाहोऽस्य ज्वरश्चैवोपशाम्यति।
दाहे शान्ते यदा शैत्यं तच्च युक्त्या निवारयेत्॥

जघनचक्रचलत्कणिमेखला
सरसचन्दनचन्द्रविलेपना।
घनलतेव तनुं परिवेष्टयेत्
प्रबलदाहनिपीड़ितमङ्गना॥"

चन्द्रः कर्पूरः।

"तदङ्गसङ्गसंजातशैत्ये दाहे निवारिते।
प्रज्ञादन्यास्य विज्ञाय तां क्षौममपनयेत् पुनः॥*॥

सुवर्चिकानागरकुष्ठमूर्व्वा-
लाक्षानिशालोहितयष्टिकाभिः।
सिद्धं हरेत् षड्गुणतक्रपक्वं
तैलं ज्वरं दाहसमन्वितञ्च॥"

षट्तक्रतैलम्॥ * ॥

"रास्नानागरकुष्ठचन्दननिशायष्ट्याह्वलाक्षावला
लाक्षासैन्धवसारिवामधुरसादेवद्रुरोहीतकैः।
लोध्रौराम्बुधिफेनरौहिषजलैस्तैलं पचेत् षड्-
गुणे
तक्रेतच्छमयेज्ज्वरं दृढ़तरं दाहादिशीतादि-
कम्॥"

चन्दनमत्र श्वेतम्। मधुरसा मूर्व्वा। रोहीतकः रोहिणि इति लोके। रौहिषं रोहिष इति तृणविशेषः। जलं बालकम्। महाषट्तक्रतैलम्॥ * ॥

"पद्मकोत्पलकह्लारमृणालबिसपौष्करैः
कुमुदोशीरमञ्जिष्ठापद्मगैरिककट्फलैः॥
सारिवाह्वयलोध्राब्दक्षीरीखर्ज्जुरमस्तकैः।
धात्रीशतावरीयुक्तैः क्वाथे कल्के प्रयोजितैः॥
लाक्षारसपयः शुक्तमस्तुभिः सह काञ्जिकैः।
पक्वतैलमिदं लघ्वं दाहज्वरहरं परम्॥"

लाक्षारसादिः पृथक् तैलतुल्यः पद्मकादितैलम्॥ * ॥

"प्रलेपके प्रयुञ्जीत शीतज्वरहरीं क्रियाम्।
रुद्रजटा गोश्चृङ्गं विड़ालविष्ठोरगस्य निर्म्मोकः।
मदनफलभूतकेश्यौ वंशत्वग्रुद्रनिर्म्माल्यम्॥
घृतयवमयूरचन्द्रच्छगलकरोमाणि सर्षपाः
सवचाः।
हिङ्गुमवाशिमरीचाः समभागाश्छागमूत्र-
संपिष्टाः॥
धूपनविधिना शमयन्त्येते सर्व्वान् ज्वरान्नियतम्।
ग्रहडाकिनीपिशाचप्रेतविकारानयं धूपः॥"

रुद्रजटा जटाधारी। भूतकेशी जटामांसी। रुद्रनिर्म्माल्यं रुद्रनिर्म्माल्यपुष्पादि। मयूरचन्द्रः मयूरपुच्छचन्द्रकम्। माहेश्वरो धूपः॥ * ॥

"सोमं सानुचरं देवं समातृगणमीश्वरम्।
पूजयन् प्रयतः शीघ्रं मुच्यते विषमज्वरात्॥"

सोमं उमादिसहितम्। सानुचरं नन्द्यादिगणसहितम्। प्रयतः पवित्रः॥ * ॥

"विष्णुं सहस्रमूर्द्धानं चराचरपतिं विभुम्।
स्तुवन्नामसहस्रेण ज्वरान् सर्व्वान् व्यपोहति॥"

सहस्रमूर्द्धानमिति सहस्रशीर्षेत्यादि वेदाभिहितम्। नामसहस्रेण भारतोक्तेनेत्यर्थः॥ * ॥ ज्वरस्यापि देवतात्वात् पूजा कार्य्या। यत आह विदेहः।

"तीर्थायतनदेवाग्निगुरुवृद्धोपसर्पणैः।
श्रद्धया पूजनेनापि सहसा शाम्यति ज्वरः॥"

तीर्थं ऋषिजुष्टं जलम्। आयतनं देवाधिष्ठितं पुरुषोत्तमक्षेत्रश्रीशैलादि॥ * ॥

"निम्बपत्रं वरा व्योषं यवानी लवणत्रयम्।
क्षारो दिग्वह्निरामेषुत्रिनेत्रक्रमशोऽंशकाः॥
सर्व्वमेकीकृतं चूर्णं प्रत्यूषे भक्षयेन्नरः।
एकाहिकं द्व्याहिकञ्च तथा त्रिदिवसज्वरम्॥
चातुर्थिकं महाघोरं सन्ततं सततं हि वा।
धातुस्थञ्च त्रिदोषोत्थं ज्वरं हन्ति च मान-
वम्॥"

निम्बादि चूर्णम्। इति विषमज्वराधिकारः॥ इति भावप्रकाशः॥

विषमनयनः, पुं, (विषममयुग्मं नयनं यस्य। त्रिनेत्रत्वात्तथात्वम्।) शिवः। इति हारावली॥

विषमन्त्रः, पुं, (विषनिवर्त्तको मन्त्रो यत्र।) सर्पधारकः। बादिया इति ख्यातः। तत्पर्य्यायः। जाङ्गुली २। इति जटाधरः॥

विषममयं, त्रि, (विषम + मयट्।) विषमादागतम्। इति सिद्धान्तकौमुदी॥

विषमरूप्यं, त्रि, (विषम + रूप्यः।) विषमादागतम्। इति सिद्धान्तकौमुदी॥

विषमर्द्दनिका, विषमर्द्दनी, स्त्री, (विषं मर्द्दयतीति। मर्द्द + ल्युः ङीप्। स्वार्थे कन् च।) गन्धनाकुली। इति राजनिर्घण्टः॥

विषमविभागः, पुं, (विषमो विभागः।) असमांशः। यथा, यत्र तु भ्रातर एव विभागमर्थयन्ते तत्र विषमविभागाभावमाह मनुः।

"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत् सह।
न तत्र भागं विषमं पिता दद्यात् कथञ्चन॥"

इति दायतत्त्वम्॥

विषमस्थः, त्रि, (विषमे तिष्ठतीति। स्था + कः।) असमानस्थितः। इति केचित्॥ उपप्लवदेशस्थः। यथा नारदः।

"अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती।
विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृपः॥"

विषमस्थाः उपप्लवदेशस्थाः। इति व्यवहारतत्त्वम्॥

विषमशिष्टः, पुं, दोषविशेषः। स च अनुचितशासनरूपः। महद्वैषम्यम्। यथा, अत्र कामत एव चान्द्रायणतप्तकृच्छ्रयोर्विषमशिष्टत्वेन इच्छाविकल्पासम्भवात् कामतश्चान्द्रायणं अकामतस्तप्तकृच्छ्रम्। इति प्रायश्चित्ततत्त्वम्॥

विषमाक्षः, पुं, (विषमं अयुग्मं अक्षि यस्य। त्रिनयनत्वादस्य तथात्वम्।) शिवः। इति त्रिकाण्डशेषः॥

विषमायुधः, पुं, (विषमा अयुग्मा आयुधा यस्य। तस्य पञ्चबाणत्वात्तथात्वम्। यद्वा, विषमः अनुग्र असह्य इत्यर्थः आयुधो यस्य।) कामदेवः। इति हलायुधः॥

विषमीयं, त्रि, (विषम + "गहादिभ्यश्च।" ४। २। १३८। इति छः।) विषमादागतम्। इति सिद्धान्तकौमुदी॥

विषमुष्टिः, पुं, क्षुपविशेषः। विषडोड़ि इति कड़्सिङ्गि इति च हिन्दीभाषा। तत्पर्य्यायः। केशमुष्टिः २ सुमुष्टिः ३ रणमुष्टिकः ४ क्षुपडोड़्मुष्टिः ५। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। दीपनत्वम्। कफवातकण्ठामयरक्तपित्तादिदाहनाशित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥

विषमृत्युः, पुं, (विषेण तद्दर्शनमात्रेण मृत्युर्यस्य।) जीवञ्जीवपक्षी। इति जटाधरः॥ चकोर इति ख्यातः॥

विषयः, पुं, ("विषिण्वन्ति विषयिणं स्वेन रूपेण निरूपणीयं कुर्व्वन्ति।" इति सांख्यतत्त्वकौमुदी। वि + षि + अच्।) चक्षुरादिग्राह्यः। स तु शब्दस्पर्शरूपरसगन्धरूपः। तत्पर्य्यायः। गोचरः २ इन्द्रियार्थः ३। देशः। (यथा, रघुः। ११। १८।

"यच्चकार विवरं शिलाघने
ताड़कोरसि स रामसायकः।
अप्रविष्टविषयस्य रक्षसां
द्वारतामभवदन्तकस्य तत्॥")

आश्रयः। इत्यमरः॥ न्यायमते क्षित्यप्तेजोवायूनां विषया यथा,—

"तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता।
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः॥
स्पर्शस्तस्यापि विज्ञेयो ह्यनुष्णाशीतपाकजः।
नित्यानित्या च सा द्वेधा नित्या स्यादणु-
लक्षणा॥
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी।
सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा।
योनिजादिर्भवेद्देह इन्द्रियं घ्राणलक्षणम्।
विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः॥
वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ।
स्नेहस्तत्र द्रवत्वन्तु सांसिद्धिकमुदाहृतम्॥
नित्यतादि प्रथमवत् किन्तु देहमयोनिजम्।
इन्द्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः॥*॥
स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकद्रवत्वन्तु नित्यतादि तु पूर्व्ववत्॥
इन्द्रियं नयनं वह्निस्वर्णादिर्विषयो मतः॥*॥
अपाकजानुष्णाशीतस्पर्शस्तु पवने मतः॥
तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः।
पूर्व्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम्॥
प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः॥"

इति भाषापरिच्छेदः॥

विषय इति। भोगसाधनं विषयः। सर्व्वमेव हि कार्य्यं अदृष्टाधीनं यच्च कार्य्यं यददृष्टाधीनं

तत्तदुपभोगं साक्षात्परम्परया जनयत्येव नहि भोगप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिब्रह्माण्डान्तं सर्व्वमेव विषयो भवतीत्यर्थः । इति सिद्धान्तमुक्तावली ॥ * ॥ नित्यसेवित: । इति भरतधृतजयः ॥ अव्यक्त: । शुक्र: । इत्यजयपाल: ॥ जनपद: । इति मेदिनी ॥ कान्तादि: । इति शब्दरत्नावली ॥ नियामक: । यथा,—

"विशब्दो हि विशेषार्थः सिनोतेर्बन्ध उच्यते ।
विशेषेण सिनोतीति विषयोऽतो नियामकः ॥"
इति भट्टकारिका ॥ * ॥

आरोपाश्रय: । यथा,—

"सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।
विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥"

यथा, गौर्व्वाहीक: । इति काव्यप्रकाशे २ उल्लास: ॥ ("भोगसाधनं विषयः ।" इति तर्ककौमुदी ॥)

विषयाज्ञानं, स्त्री, (विषयस्याज्ञानं यस्याम् ।) तन्द्रा । इति राजनिर्घण्ट: ॥

विषयायी, [न्] पुं, (विषयान् अयते प्राप्नोतीति । अय गतौ + णिनि: ।) राजा । वैषयिकजन: । इन्द्रियः । कामदेवः । विषयासक्तपुरुष: । इति मेदिनी । ने, २४६ ॥

विषयि, [न्] क्ली, (विषया: सन्त्यस्येति । विषय + इनि: ।) इन्द्रियम् । इति मेदिनी । ने, २११ ॥

विषयी, [न्] त्रि, (विषयोऽस्यस्येति । इनि: ।) विषयासक्त: । इति मेदिनी । ने, २११ ॥

विषयी, [न्] पुं, (विषयोऽस्यास्तीति । इनि: ।) नृपति: । कामदेव: । वैषयिक: । इति मेदिनी । ने, २११ ॥ ध्वनि: । इत्यजयपाल: ॥ आरोप्यमाण: । यथा,—

"विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ।"

विषयिणा आरोप्यमाणेन अन्तःकृते निगीर्णेऽन्यस्मिन् आरोपविषये सति सा स्यात् साध्यवसानिका । इति काव्यप्रकाश: ॥

विषरूपा, स्त्री, अतिविषा । इति राजनिर्घण्ट: ॥

विषर्च्चं, क्ली, विषम् । इति शब्दचन्द्रिका ॥

विषलता, स्त्री, (विषस्य लता ।) इन्द्रवारुणी । इति राजनिर्घण्ट: ॥ (विषप्रधानलतामात्रे । यथा, गीतायां श्रीधर: । २ । ४२ । "विषलतावदापातत्तो रमणीयाम् ।")

विषविद्या, स्त्री, विषघ्नमन्त्र: । इति विषवैद्यशब्दटीकायां भरत: ॥

विषवैद्य:, पुं, (विषस्य वैद्य: ।) विषघ्नमन्त्रवेत्ता । ओझा इति ख्यात: । यथा । विषविद्यां वेत्ति अधीते वा विषवैद्य: प्रज्ञपाठ्यादित्वादन्त्यवद्धि: । विषस्य वैद्यश्चिकित्सक: इति वा । इति भरत: ॥ तत्पर्य्याय: । जाङ्गुलिक: २ । इत्यमर: ॥ जाङ्गलिक: ३ नरेन्द्र: ४ कौशिक: ५ कथाप्रसङ्ग: ६ चक्राट: ७ । इति जटाधर: ॥ व्यालग्राही ८ जाङ्गुलि: ९ जाङ्गलि: १० अहितुण्डिक: ११ व्यालग्राह: १२ गारुड़िक: १३ । इति शब्दरत्नावली ॥

विषवैरिणी, स्त्री, (विषस्य वैरिणी ।) निर्व्विषा । इति राजनिर्घण्ट: ॥

विषशालूक:, पुं, (विषस्य शालूक: ।) पद्मकन्द: । अस्य गुणा: । गुरुत्वम् । विष्टम्भित्वम् । शीतलत्वञ्च । इति राजवल्लभ: ॥

विषशूक:, पुं, (विषं शूके यस्य ।) भृङ्गरोल: । इति भूरिप्रयोग: ॥

विषशृङ्गी, [न्] पुं, (विषं विषयुक्तं शृङ्गं तदस्यास्तीति । विषशृङ्ग + इनि: ।) भृङ्गरोल: । इति हारावली ॥

विषसूचक:, पुं, (विषं सूचयति विषयुक्तान्नादिदर्शने स्वतः सन् ज्ञापयतीति । सूच् + णिच् + ण्वुल् ।) चकोरपक्षी । इति हेमचन्द्र: ॥

विषसृक्का, [न्] पुं, (विषं सृक्कणि यस्य ।) भृङ्गरोल: । इति त्रिकाण्डशेष: ॥

विषहन्त्री, स्त्री, (विष + हन + तृच् । स्त्रियां ङीप् ।) अपराजिता । निर्व्विषा । इति राजनिर्घण्ट: ॥

विषहर:, त्रि, (हरतीति । हृ + अच् । विषस्य हर: ।) गरलनाशकौषधादि: । यथा । ॐ हूँ फ: ।

"मन्त्रोऽयं हरते रुद्र सर्व्ववृश्चिकगं विषम् ।
पिप्पली नवनीतञ्च शृङ्गवेरञ्च सैन्धवम् ।
मरीचं दधि कुष्ठञ्च नस्ये पाने विषं हरेत् ॥
त्रिफला टङ्कुष्ठञ्च चन्दनं घृतसंयुतम् ।
एतत्पानाच्च लेपाच्च विषनाशो भवेच्छिव ॥
पारावतस्य चाप्यक्षि हरितालं मनःशिला ।
एष योगो विषं हन्ति वैनतेय इवोरगान् ॥
सैन्धवं सुषवं चूर्णं दधिमध्वाज्यसंयुतम् ।
वृश्चिकस्य विषं हन्ति लेपोऽयं वृषभध्वज ॥"
इति गारुड़े १८६ अध्याय: ॥

विषहरा, स्त्री, मनसादेवी । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ९ । ४७ । ५२ ।
"जरत्कारुप्रियास्तीकमाता विषहरेति च ॥")

विषहरी, स्त्री, मनसादेवी । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ९ । ४७ । ४७ ।
"विषं संहर्त्तुमीशा या तस्माद्विषहरी स्मृता ॥")

विषहा, स्त्री, (विषह + टाप् ।) देवदालीलता । निर्व्विषा । इति राजनिर्घण्ट: ॥

विषा, स्त्री, अतिविषा । इत्यमर: ॥ बुद्धि: । इत्युणादिकोष: ॥ (अस्या: पर्य्यायो गुणाश्च यथा,
"काश्मीरातिविषा श्वेता श्यामा शुक्ला विषा स्मृता ।"
इति वैद्यकरत्नमालायाम् ॥
"विषात्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा ।
शुक्लकन्दा चोपविषा भङ्गुराघुणवल्लभा ॥
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् ।
कफपित्तातिसारामविषकासवमिक्रिमीन् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

विषाङ्कुर:, पुं, (विषस्याङ्कुर: ।) शल्यास्त्रम् । इति त्रिकाण्डशेष: ॥

विषाणं, क्ली, कुष्ठौषधम् । पशुशृङ्गम् । (यथा, साहित्यदर्पणे । १० ।

"पिबसि शुकं दधदंशुकवदने
न्यगमर्पयसि न्यगादनरदने ।
वितरसि तुरगं महिषविषाणे
विदधच्चेतो भोगविताने ॥")

हस्तिदन्त: । इति मेदिनी । णे, ७७ ॥ (यथा, शिशुपालवधे । १ । ६० ।

"न जातु वैनायकमेकमुद्धृतं
विषाणमद्यापि पुन: प्ररोहति ॥")

कोलदन्त: । इति हेमचन्द्र: ॥ (विशेषेण मद्दातरि, त्रि । यथा, ऋग्वेदे । ५ । ४४ । ११ ।

"विषाणं परिपानमन्ति ते ।"

"विषाणं विशेषेण मदस्य दातारम् ।" इति तद्भाष्ये सायण: ॥)

विषाणिका, स्त्री, मेषशृङ्गी । इति रत्नमाला ॥ (अस्या: पर्य्यायो यथा,—
"शृङ्गी कर्कटशृङ्गी स्यात् कुलीरञ्च विषाणिका ।
अजशृङ्गी च रक्ता च कर्कटाख्या च कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) सातला । कर्कटशृङ्गी । आवर्त्तकी । इति राजनिर्घण्ट: ॥

विषाणी, स्त्री, क्षीरकाकोली । अजशृङ्गी । इति मेदिनी । णे, ७७ ॥ वृश्चिकाली । इति राजनिर्घण्ट: ॥ तिन्तिड़ी । इति शब्दचन्द्रिका ॥

विषाणी, [न्] पुं, (विषाणमस्यास्तीति । विषाण + इनि: ।) हस्ती । शृङ्गी । इत्यजय: ॥ (यथा, हरिवंशे । २०४ । २२ ।
"खड्गा विषाणिनश्चैव वृषभाश्च न्यगास्तथा ॥")
ऋषभनामौषधम् । शृङ्गाटक: । इति राजनिर्घण्ट: ॥

विषाद:, पुं, (वि + षद + घञ् ।) अवसाद: । यथा,—
"जाड्यं मौर्ख्यं विषादोऽवसाद: सादो विषण्णता ।"
इति हेमचन्द्र: ॥
(यथा, भागवते । १ । ११ । १ ।
"दध्मौ दरवरं तेषां विषादं शमयन्निव ॥")

विषादनी, स्त्री, पलाशीलता । इति राजनिर्घण्ट: ॥

विषानन:, पुं, (विषमानने यस्य ।) सर्प: । इति शब्दमाला ॥

विषान्तक:, पुं, (विषस्य अन्तक: नाशक: । पीतविषत्वात् ।) शिव: । इति हेमचन्द्र: ॥ विषनाशके, त्रि ॥

विषापह:, पुं, (विषं अपहन्तीति । हन + ड: ।) मुष्ककवृक्ष: । इति राजनिर्घण्ट: ॥ (विषनाशके, त्रि । यथा, मनौ । ७ । २१७ ।
"सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्व्विषापहै: ॥")

विषापहा, स्त्री, इन्द्रवारुणी । निर्व्विषा । इति राजनिर्घण्ट: ॥ नागदमनी । इति भावप्रकाश: ॥

अर्कमूला। ईशुरमूल इति भाषा। इति शब्दचन्द्रिका। (अस्याः पर्य्यायो यथा,—
"अर्कपत्रा सुगन्धा स्यादर्कमूला विषापहा।"
इति वैद्यकरत्नमालायाम्॥)
सर्पकङ्कालिका। इति रत्नमाला॥
विषाभावा, स्त्री, (विषस्याभावो यत्र सा।) निर्व्विषा। इति राजनिर्घण्टः॥
विषायुधः, पुं, (विषमेवायुधं यस्य।) सर्पः। इति शब्दरत्नावली। विषयुक्तास्त्रे, क्ली॥
विषारः, पुं. (विषेण ऋच्छतीति। ऋच+अच्। तस्य रत्वम्।) सर्पः। इति शब्दचन्द्रिका॥
विषारातिः, पुं, (विषस्यारातिः नाशकः।) कृष्णधत्तूरकः। इति राजनिर्घण्टः॥
विषारिः, पुं, (विषस्यारिः।) महाचञ्चुशाकः। घृतकरञ्जः। इति राजनिर्घण्टः॥ (विषनाशकमात्रे, त्रि॥)
विषास्यः, पुं, (विषमास्ये यस्य।) सर्पः। इति शब्दरत्नावली॥ विषयुक्तमुखे, त्रि॥
विषास्या, स्त्री, भल्लातकः। इति शब्दचन्द्रिका॥ (भल्लातकशब्देऽस्या विषयो विज्ञेयः॥)
विषु, अ, साम्यम्। इति विषुवच्छब्दटीकायां भरतः॥ नानारूपम्। इति रामाश्रमः॥
विषुणः, पुं, (विषु साम्यमस्मिन्नस्तीति। "लोमादीति।" ५।२।१००। इति नः। पश्चात् णत्वम्।) विषुवम्। यथा। "विषु नानारूपं गमनं विष्वक् तदस्यास्तीति विग्रहे अमिलुत्तरपदलोपश्चाख्यातस्य चेरिति पामादि लक्षणेन नः णत्वम्।" इत्यमरटीकायां रामाश्रमः॥ (नानारूपम्। यथा, ऋग्वेदे। १।५४।८।
"चरत्पतत्रि विषुणं विजातम्॥"
"विषुणं विश्वक् नानारूपम्।" इति तद्भाष्ये सायणः॥ सर्व्वगः। यथा, ऋग्वेदे।८।२९।१।
"बभ्रुरेको विषुणः।"
"विषुणः विश्वगमनः।" इति तद्भाष्ये सायणः॥ विप्रकीर्णः। यथा, ऋग्वेदे। ५।१२।५।
"सखायस्ते विषुणा अग्न एते।"
"विषुणाः विप्रकीर्णाः सर्व्वव्याप्ताः।" इति तद्भाष्ये सायणः॥ पराङ्मुखः। यथा, ऋग्वेदे। ५।३४।६।
"बिल्वघ्नः सञ्चतौ चक्रमासजो-
ऽसुन्वतो विषुणः सुन्वतो वृधः।"
"विषुणः पराङ्मुखः।" इति तद्भाष्ये सायणः॥)
विषुपं, क्ली, विषुवम्। इत्यमरटीकायां भरतः॥
विषुवं, क्ली, समरात्रिन्दिवकालः। तत्पर्य्यायः। विषुवत् २। इत्यमरः॥ विषुपम् ३ विष्वक् ४ विश्वक् ५। इति शब्दरत्नावली॥ विषुणः ६। इति रामाश्रमः॥ विषुवः ७। इति मुकुटः॥ तत्तु मेषतुलयोः संक्रान्तौ। यथा,—
"मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने।
विषुवती तुलामेषे गोलमध्ये तथापराः॥"
इति तिथ्यादितत्त्वम्॥*॥
ते तु महाविषुवजलविषुवनामभ्यां क्रमेण ख्याते।
यथा,—
"विषुवाभ्यां वत्सरः स्यादिति शब्दविदां मतम्।
महाविषुवमाख्यातं क्षतिभिश्चैत्रचिह्नितम्।
तथा स्याज्जलविषुवं क्रमादाश्विनचिह्नितम्॥"
इति शब्दरत्नावली॥*॥
विषुवारम्भकालो यथा,—
"मृगसंक्रान्तितः पूर्व्वं पश्चात् तारा दिनान्तरे।
एकवर्षे चतुःपञ्चपलमानक्रमेण तु।
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः।
एवं चतुःपञ्चदिनमयनारम्भणं क्रमात्॥
अनुक्रमेण च तद्वत् स्यादुदगयानं रवेर्ध्रुवम्।
कर्किसंक्रमणे तद्वदभितो दक्षिणायनम्॥
अयनांशक्रमेणैव विषुवारम्भणं तथा।
रविसंक्रान्तितो मेषतुलयोरभितः पुनः॥
विषुवं मीनकन्यार्द्धे लेकाचीन्द्रशकाब्दके।
दिनमानाय मीनार्द्धमेषार्द्धे पालिकं शतम्॥
ततो वृषार्द्धपर्य्यन्तमशीतिः पलभाजिनी।
मिथुनार्द्धे चतुस्त्रिंशत्पलानां वर्द्धते क्रमात्॥
कर्कटार्द्धेन्तु षट्त्रिंशत् सिंहार्द्धेन्तु त्रयोदशकम्।
कन्यार्द्धेन्तु द्विनवतिः क्रमात् क्षुभ्यति वासरे।
कन्यार्द्धादजमीमानं बोध्यं पूर्व्वक्रमेण हि।
दिने दिने भागहाराज्ज्ञानं बोध्यं दिवानिशोः॥
एकमानं दण्डषष्ट्या ह्यन्याम्यमाननिर्णयः।
षट्षष्टिवत्सरानेवं ततः स्यात् षोड्शांशके।
पुनस्तद्वत्सरोत्तद्वत् एवं सप्तदशादिके॥"
इति ज्योतिस्तत्त्वम्॥*॥
अन्यच्च
"मेषसंक्रमतः पूर्व्वं पश्चात्तारा दिनान्तरे।
प्रातिलोम्यानुलोम्येन विषुवारम्भणं भवेत्॥
त्रयोदशदिने सौरे चैत्रे नवतिथौ शके।
विषुवारम्भणं तत्र समं मानं दिवानिशोः॥
ततः प्रतिदिनं वेला सपादत्रिपलात्मिका।
वर्द्धते मेषविम्बांशपर्य्यन्तं स्थूलमानतः॥
तथा ज्येष्ठान्तपर्य्यन्तं पादोनत्रिपलात्मिका।
ताडगाषाढ़पर्य्यन्तं पलैकप्रमिता मता॥
ततः कर्कटविम्बांशपर्य्यन्तं प्रत्यहं क्रमात्।
सपादपलमानेन वेला क्षुभ्यति निश्चितम्॥
ताडग्भाद्रान्तपर्य्यन्तं पादोनत्रिपलात्मिका।
ताडगाश्विनशेषान्तं त्ररनैकपलात्मिका॥
दिवामानं दण्डषष्ट्युक्ता रात्रेः प्रमाणकम्।
वैशाखादौ दिवामानं रात्रिमानं तुलादिषु॥
षट्षष्टिवत्सरानेवं ततः स्यात् द्वादशांशके।
पुनस्तद्वत्सरोत्तद्वत् तत एकादशादिके॥"
इति सतृत्यमुक्तावली॥
विषुवत्, क्ली, विषुवम्। इत्यमरः॥ (यथा, महाभारते। १।१९९।२१।
"भवति सहस्रगुणं दिनस्य राहो-
र्विषुवति चाक्षयमश्नुते फलम्॥"
व्यापकः। यथा, ऋग्वेदे। १।८४।१०।
"स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्य्यः॥"
"विषुवत इत्यमनेन प्रकारेण सर्व्वेषु यज्ञेषु व्याप्तियुक्तस्य * * * विषूवः व्याप्ती अस्मादोकादिकः कुप्रत्ययः। ततो मतुप् हस्वनुड्भ्यामतुबिति मतुप उदात्तत्वम्। अन्येषामपि दृश्यत इति संहितायां दीर्घः व्यत्ययेन मतोर्व्वत्वम्।" इति तद्भाष्ये सायणः॥)
विषौषधी, स्त्री, (विषस्यौषधी।) नागदन्ती। इति रत्नमाला॥
विष्कम्भः, पुं, सप्तविंशतियोगान्तर्गतप्रथमयोगः। शुभकर्म्मणि तस्य पञ्च दण्डाश्त्याज्याः। यथा,—
"वज्रादौ पञ्च विष्कम्भे सप्त शूले च नाड़िकाः।
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः।
वैधृतिव्यतिपातौ च समस्तौ परिवर्ज्जयेत्॥"
इति सतृत्यमुक्तावली।*।
तत्र जातफलम्।
"विष्कम्भयोगो यदि जन्मकाले
कार्य्ये स्वतन्त्रो मनुजस्तदानीम्।
सद्रत्नजालाञ्चसौख्ययुक्तं
गृहस्य निर्म्माणविधौ समर्थः॥"
इति कोष्ठीप्रदीपः॥*॥
विस्तारः। (यथा, वृहत्संहितायाम्।५३।२४।
"उच्छ्रायोऽङ्गुलतुल्यो द्वारस्यार्द्धेन विष्कम्भः॥")
प्रतिबन्धः। रूपकाङ्गप्रभेदः। योगिनां बन्धभेदः। इति मेदिनी। भे, १९। वृक्षः। इति शब्दचयः॥ अर्गला। इति भरतः॥
विष्कम्भी, [न्] पुं, (विष्कभ्नाति रुणद्धीति। वि+स्कम्भ+णिनिः।) अर्गला। यथा।"तद्विष्कम्भोऽर्गलं न ना। इत्यमरोक्तौ कपाटधारककाष्ठं अर्गलं हुड़कादस्तु इति ख्यातम्। तत् कपाटं विष्कभ्नाति रुणद्धि इति ग्रहादित्वाखिन् तद्विष्कम्भी गर्हंण्यवत् स्वार्थकथनमेतत् विष्कम्भीति नाम च इत्येके। तद्विष्कम्भोऽर्गलमिति मूलपाठः। विष्कम्भो बन्धननिमित्तदण्डः। इति भट्टः। इति मुकुटः॥
'विष्कम्भो योगभेदे स्यात् विस्तारप्रतिबन्धयोः।
कपाटाङ्गप्रभेदे च।' इति मेदिनीदर्शनात् विष्कम्भ इति पाठः।" इति तट्टीकायां भरतः॥
विष्कलः, पुं, (विषं विष्ठां कलयति भक्षयतीति। कल+अच्।) ग्राम्यशूकरः। इति राजनिर्घण्टः॥
विष्किरः, पुं, (विकिरतीति। वि+कॄ श विक्षेपे+इगुपधेति कः। "विष्किरः शकुनिर्व्विकिरो वा।" ६।१।१५०। इति सुट्। परिनिविभ्य इति षत्वम्।) पक्षी। इत्यमरः॥ विष्किरास्तित्तिरिमयूरकुक्कुटादयः।
"लावाद्या वैष्किरो वर्गः प्रतुदा जाङ्गला मृगाः।
लघवः शीतमधुराः सकषाया हिता नृणाम्॥"
इति राजवल्लभः॥*॥
अथ विष्किराणां गणना गुणाश्च।
"वर्त्तकालावविकिरकपिञ्जलकतित्तिराः।
कलिङ्गकुक्कुटाद्याश्च विष्किराः समुदाहृताः॥
विकीर्य्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः।
कपिञ्जल इति प्रोक्तः कथितो गौरतित्तिराः॥"
कुलिङ्ग गवरैया इति लोके।

"विष्किरा मधुराः शीताः कषायाः कटु-
पाकिनः ।
बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः ॥"
इति भावप्रकाशः ॥
("लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तक-
नप्तृकावातीकचकोरकलविङ्कमयूरक्रकरोपचक्र-
कुक्कुटसारङ्गशतपत्रकुतित्तिरिकुरवाकुकयव-
लकप्रभृतयस्त्वाह्वला विष्किरा लघवः शीत-
मधुराः कषाया दोषघ्नाश्च ।" इति सुश्रुते
सूत्रस्थाने ४६ अध्यायः ॥ * ॥ दर्व्वीकरान्तर्गत-
सर्पविशेषः । यथा,— "पुण्डरीको भृकुटी
मुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्पं ऋजु-
सर्पः श्वेतोदरो महाशिरा अलगर्द्दो आशी-
विष इति ।" इति च सुश्रुते कल्पस्थाने चतुर्थे-
ऽध्याये ।)

विष्टः त्रि, प्रविष्टः । विशधातोः क्तप्रत्ययेन
निष्पन्नमिदम् ॥

विष्टपं, क्ली, ("विटपविष्टपविशिपोलपाः ।" इत्यु-
णादिसूत्रे पिष्टपस्थाने विष्टपपाठेन विशधातोः
कपन्प्रत्ययेन साधुः इति केचित् ।) भुवनम् ।
इत्यमरः ॥ पिष्टपं पिष्टपः । इति तट्टीकायां
रूपद्वयम् । (यथा, रघुः । ११ । ८९ ।
"बाणभिन्नहृदया निपेतुषी
सा स्वकाननभुवं न केवलाम् ।
विष्टपत्रयपराजयस्थिरां
रावणश्रियमपि व्यकम्पयत् ।")

विष्टम्भः, पुं, (वि + स्तम्भ + क्तः ।) प्रतिबन्धः ।
(यथा, भागवते । ५ । २२ । १२ ।
"स वृष्टिविष्टम्भग्रहोपशमनः ।"* ।
आक्रमणम् । यथा, भारविः । १३ । १६ ।
"प्रविकर्षनिनादभिन्नरन्ध्रः
पदविष्टम्भनिपीडितस्तदानीम् ।")
रोगविशेषः । इति मेदिनी । भे, २० ॥ स तु
आनाहरोगः । तस्य लक्षणमाह ।
"आमं शकृद्वा निचितं क्रमेण
भूयो विबद्धं विगुणानिलेन ।
प्रवर्त्तमानं न यथास्वमेनं
विकारमानाहमुदाहरन्ति ॥"
आमं अपक्वमाहारसारं शकृत् पुरीषं वा
क्रमेण निचितं सञ्चितम् । भूयो विगुणानिलेन
दुष्टवायुना विबद्धं आमशोषितं वा यथास्वं
पूर्व्ववदप्रवर्त्तमानं एनं विकारं आनाह-
माहुः ॥ * ॥ तमामजमानाहमाह ।
"तस्मिन् भवत्यामसमुद्भवे तु
तृष्णा प्रतिश्यायशिरोविदाहाः ।
आमाशये शूलमथो गुरुत्वं
हृत्स्तम्भ उद्गारविघातनञ्च ।"
विघातनं अप्रवृत्तिः ॥ * ॥ शकृज्जमानाहमाह ।
"स्तम्भः कटीपृष्ठपुरीषमूत्रे
शूलोऽथ मूर्च्छा शकृतो वमिश्च ।
श्वासश्च पक्वाशयजे भवन्ति
तथालसोक्तानि च लक्षणानि ।"
पक्वाशयजे शकृज्जे आनाहे । अलसोक्तानि
आध्मानवातनिरोधादीनि ॥ * ॥ आनाहोदा-
वर्त्तयोश्चिकित्सायास्तुल्यत्वादुभयचिकित्सा अत्र
लिख्यते । अथोदावर्त्तानां चिकित्सा ।
"अधोवातनिरोधोत्थे ह्युदावर्त्ते हितं मतम् ।
स्नेहपानं तथा स्वेदो वस्तिर्यैश्चानुलोमनम् ॥
विड्विघातसमुत्थे तु विड्भेद्यन्नं तथौषधम् ।
वर्त्त्यभ्यङ्गावगाहाश्च स्वेदो वस्तिर्हितो मतः ॥"
वर्त्तिः फलवर्त्तिः ।
"मूत्रावरोधजनिते क्षीरवारिचयाः पिबेत् ।
दुस्पर्शास्वरसं चापि कषायं ककुभस्य च ।
दुस्पर्शा कण्टकारी दुरालभा च तुल्यगुणत्वात् ।
एर्व्वारुबीजं तोयेन पिबेद्वा लवणीकृतम् ।
सितामिक्षुरसं क्षीरं द्राक्षारसमथापि वा ॥
सर्व्वथैव प्रकुर्व्वीत मूत्रकृच्छ्राश्मरीविधिम् ।
जृम्भाभिघातजे स्नेहं स्वेदं चापि प्रयोजयेत् ॥
अन्यानपि प्रयुञ्जीत समीरणहरान् विधीन् ।
नेत्रनीरावरोधोत्थे सुस्वेदुश्चेद्रं प्रशीलम् ॥
सुप्यात् सुखेन तत्राशु कथयेच्च कथाः प्रियाः ।
छिक्काभिघातजे तीक्ष्णाघ्राणनस्यार्कदर्शनैः ॥
प्रवर्त्तयेत् क्षुतं सक्तं स्नेहस्वेदौ प्रशीलयेत् ॥"
तीक्ष्णं मरीचराजिकादि ।
"उद्गारस्यावरोधे तु स्नैहिकं धूममाचरेत् ॥
छर्द्दिनिग्रहसंजाते वमनं लङ्घनं हितम् ।
विरेचनं चात्र मतं तैलेनाभ्यञ्जनं तथा ॥
वस्तिशुद्धिकरैः सिद्धं चतुर्गुणजलं पयः ।
आवारिनाशात् क्वथितं पीतवन्तं प्रकामतः ॥
रमयेयुः प्रिया नार्य्यः शुक्रोदावर्त्तिनं नरम् ।
तस्याभ्यङ्गोऽवगाहश्च मदिरा चरणायुधः ॥
शालिः पयो निरूहश्च हितं मैथुनमेव च ।
क्षुद्विघातसमुद्भूते स्निग्धमुष्णं तथा लघु ॥
रुच्यमन्नं हितं भक्ष्यं पुष्पं सेव्यं सुगन्धि यत् ।
तृषाविघातसम्भूते शीतः सर्व्वो विधिर्हितः ॥
कर्पूरशिशिरं स्वच्छं पिबेत्तोयं शनैः शनैः ।
श्रमश्वासे धृते शस्तो विश्रामः सरसौदनः ॥
निद्रावेगविघातोत्थे पिबेत्क्षीरं सितायुतम् ।
सुवाहनं सुशय्याश्च हिताः श्रोत्रप्रियाः कथाः ॥"
वातादिवेगविघातजनितानामुदावर्त्तानां चिकि-
त्सामभिधाय रूक्षादिकुपितवातजनितस्य उदा-
वर्त्तस्य चिकित्सामाह ।
"हिङ्गुमाक्षिकसिन्धूत्थैः पिष्टैर्वर्त्तिर्विनिर्म्मिताम् ।
घृताभ्यक्तां गुदे न्यस्येदुदावर्त्तविनाशिनीम् ॥"
फलवर्त्तिः ।
"मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः ।
गुडक्षीरसमायुक्ता फलवर्त्तिरिहोदिता ॥"
मदनफलादिवर्त्तिः ॥ * ॥
"स्वच्छपत्रं त्रिवृताद्याः श्यामाकर्षं द्वयोश्चूर्णम् ।
प्राग्भोजनस्य मधुना विड्लावपदकं नरो
लिह्यात् ॥
एतन्नाढ़पुरीषे देयं विशेषदावर्त्ते ।
मधुरं नरपतियोग्यं चूर्णं नाराचकं नाम्ना ।"
इति नाराचचूर्णम् ॥ * ॥
"सयोषं पिप्पलीमूलं त्रिवृद्दन्ती च चित्र-
कम् ।
तच्चूर्णं गुडसंमिश्रं भक्षयेत् प्रातरुत्थितः ॥
एतद्गुडाष्टकं नाम्ना बलवर्णाग्निवर्द्धनम् ।
उदावर्त्तप्लीहगुल्मशोथपाण्ड्वामयापहम् ॥"
इति गुडाष्टकम् ॥ * ॥
"मूलकं शुष्कमार्द्रञ्च वर्षाभूपञ्चमूलकम् ।
आरनालफलं चाप्सु पक्त्वा तैल घृतं
पचेत् ।
तत् पीतं शमयेत् क्षिप्रमुदावर्त्तमशेषतः ।"
पञ्चमूलकमत्र बृहत् । शुष्कमूलकाद्यघृतम् ॥*॥
अथ आनाहस्य चिकित्सा ।
"गुल्मकारणकार्य्यत्वादुदावर्त्तहरीं क्रियाम् ।
आनाहेऽपि च कुर्व्वीत विशेषश्चाभिधीयते ॥
त्रिवृत्कृष्णाहरीतक्यो द्विचतुःपञ्चभागिकाः ।
गुडेन तुल्या वटिका हरत्यानाहमुल्बणम् ॥
वर्त्तिस्त्रिकटुसैन्धवसर्षपगृहधूमकुष्ठमदनफलैः ।
मधुनि गुडे वा पक्वैर्विहिता अङ्गुष्ठपरि-
माणाः ॥
वर्त्तिरियं दृष्टफला शनैः प्रणिहिता गुदे घृता-
भ्यक्ते ।
आनाहोदावर्त्तौ शमयति जठरं तथा
गुल्मम् ।"
त्रिकटुकाद्या वर्त्तिः ॥ इति भावप्रकाशः ॥
(त्रि, विशेषेण स्तम्भयिता । यथा, ऋग्वेदे ।
९ । ८६ । ३५ ।
"दिवो विष्टम्भ उपमो विचक्षणः ।")

विष्टम्भी, [न्] त्रि, (विष्टभ्नातीति । वि + स्तम्भ
+ णिनिः ।) विष्टम्भरोगजनकः । यथा,—
"वैदला गुरवो मध्या विष्टम्भिनस्तमाहृताः ।"
इति राजवल्लभः ॥
(यथा च सुश्रुते । १ । ४५ ।
"प्रायः प्राभातिकं क्षीरं गुरु विष्टम्भि शीत-
लम् ।"
विष्टम्भोऽस्यास्तीति । विष्टम्भ + इनिः ।)
विष्टम्भरोगविशिष्टश्च ॥

विष्टरः, पुं, (विस्तीर्य्यते इति । वि + स्तॄ + अप् ।
"वृक्षासनयोर्विष्टरः ।" ८ । ३ । ९३ । इति
निपातनात् षत्वम् ।) विटपी । इत्युणादिः ।
पीठाद्यासनम् । इत्यमरः ॥ आदिना कुशा-
सनादिग्रहः । इति भरतः ॥ * ॥ (यथा,
भागवते । ३ । २८ । १६ ।
"काञ्चीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम् ।
दर्शनीयतमं शान्तं मनोनयनवर्द्धनम् ।")
विष्टरलक्षणमाह । विष्टरस्तु सार्द्धत्रिलयचामा-
वर्णवलिताधोमुखाग्रा असंख्यातदर्भाः । तथा
च गृह्यासंग्रहः ।
"ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥"
इति ॥
छन्दोगपरिशिष्टम् ।
"दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि ।"

एवञ्च ।
"पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः ।"
इति यदि समूलं तदा शाखान्तरीयम् । एतेन विष्टरे पञ्चविंशतिसंख्या भवदेवभट्टोक्ता निरस्ता । एवं विष्टरग्रहणं हस्ताभ्यामपि यदुक्तं तदपि निरस्तम् ।
"यत्रोपदिश्यते कर्म्म कर्त्तुरङ्गं न चोच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः ।"
इति छन्दोगपरिशिष्टात् । इति संस्कारतत्त्वम् ।

विष्टरश्रवाः, [स्] पुं, ("विष्टराविव श्रवसी यस्येति ।" शिशुपालवधस्य १४ । १२ । टीकायां मल्लिनाथः । "विष्टरेऽश्वत्थवृक्षे श्रूयते नित्यं तत्र वसतीति ।" उणा० ४ । २२६ । इत्यत्र उज्ज्वलदत्तः ।) विष्णुः । इत्यमरः । (यथा, हरिवंशे भविष्यपर्व्वणि । ५१ । १७ ।
"उत्पाद्य एषं देवेन्द्रः शतशाखं महाशिखम् ।
तेन तं पोषयामास विष्टरश्रवसं प्रभुम् ।")

विष्टरा, स्त्री, गुण्डासिनी । इति राजनिर्घण्टः ।

विष्टरहा, स्त्री, स्वर्णकेतकी । इति राजनिर्घण्टः । विष्टावहा इति च क्वचित् पाठः ।

विष्टारः, पुं, छन्दोविशेषः । यथा, विष्टारः पङ्क्तिश्छन्दः । इति घञ्प्रकरणे दुर्गादासः ।

विष्टिः, स्त्री, (विष + क्तिन् ।) वेतनं विना हठाद्वारोहणादिक्लेशः । वेगार इति ख्यातः । तत्पर्य्यायः । आजूः २ । इत्यमरः । हठाद्भृतिकः क्लेशो विजातरूपो विष्टिरिति भट्टस्वामी । द्वे वेतनमन्तरेण कर्म्मकरणे कर्म्मकारिणि चेत्यन्ये । निष्कर्म्मकरे विष्टिः स्त्रियामभृतिकर्म्मणीति रुद्रः । इति भरतः ॥ * ॥ (यथा, रामायणे । २ । ८२ । २० ।
"विष्टिकर्म्मान्तिकाः सर्व्वे मार्गशोधकरक्षकाः ।")
वेतनम् । कर्म्म । इति मेदिनी । टे, २९ । (यथा, भागवते । ७ । ८ । ५५ ।
"वयमीश किन्नरगणास्तवानुगा
दितिजेन विष्टिममुनानुकारिताः ।")
भद्रा । वर्षणम् । इति विश्वः । प्रेषणम् । इति हेमचन्द्रः । सा च भद्रा ववादेकादशकरणान्तर्गतसप्तमकरणं पञ्जिकायां तस्या अङ्कं शून्यम् । यथा,—
"ववबालवकौलवतैतिल
गरवणिजाः सविष्टयः सप्त ।
शकुनिचतुष्पदनागाः
किन्तुघ्नञ्च ध्रुवाणि करणानि ।
शुक्लादितिथिशेषार्द्धात् पञ्चमे तत्तुरीयके ।
चाद्यन्तार्द्धात् क्रमेण स्युरष्टावृत्त्या ववादयः ।
एकादश्याश्चतुर्थ्याश्च शेषार्द्धे शुक्लपक्षके ।
अष्टमीपौर्णमास्योश्च पूर्व्वार्द्धे विष्टिरीरिता ।
कृष्णपक्षे तृतीयाया दशम्याश्च परार्द्धतः ।
सप्तम्याश्च चतुर्द्दश्याः पूर्व्वार्द्धे विष्टिसम्भवः ।
विनाय विषरौद्रादि विष्टिं सर्व्वत्र वर्ज्जयेत् ।
विष्टिशेषे त्रिदण्डे हि पुच्छे कार्य्यं जयावहम् ।"
कर्म्मप्रकाशे ।
"नाड्यस्तु पञ्च वदनं गलकस्तथैका
वक्षो दशैकसहिता नियतं चतस्रः ।
नाभिः कटिः षडथ पुच्छलता च तिस्रो
विष्टेर्वं निगदितोऽङ्गविभाग एषः ॥
मुखे कार्य्यध्वंसिर्भवति मरणं चाथ गलके
धनग्लानिर्वक्षस्यथ कटितटे बुद्धिविलयः ।
कलिर्नाभीदेशे विजयमथ पुच्छे च जगदुः
शरीरे भद्रायाः पृथगिति फलं पूर्व्वमुनयः ॥
मनुवसुमुनितिथियुगदश-
शिवगुणसंख्यासु तिथिषु पूर्व्वांशयोः ।
१४।८।७।१५।४।१०।११।३।
चायाति विष्टिरेषा पृष्ठे शुभदा पुरस्त-
शुभदा ।"
पूर्व्वांशयोः पूर्व्वांशादिदिङ्मुखी भवति इत्यर्थः ॥
"एकेन हीना द्विगुणा तिथिस्तु
सप्तावशिष्टं करणं ववादि ।
पूर्व्वे परेऽप्येवमयं विशेषो
दिक्संगुणा चन्द्रविवर्ज्जिता च ॥
किन्तुघ्नसंज्ञं करणं प्रदिष्ट-
मादेः सितेरादिदले सदैव ।
उपान्त्यशेषे शकुनिस्तु दर्शे
पूर्व्वे चतुष्पादपरे च नागः ॥
इन्द्रकमलजमित्रार्य्यमभूश्रियः सयमा ववादेः ।
कलिदमपश्चिमारुताः पतयः शकुन्यादेः ।"
ववाद्यधिपकथनम् ॥
"पौष्टिकस्थिरशुभानि ववाख्ये
बालवे द्विजहिताद्यपि कर्म्म ।
कौलवे प्रमदमित्रविधानं
तैतिले शुभगताश्रयकर्म्म ॥
गरे च बीजाश्रयकर्षणानि
वणिज्यपि स्थैर्य्यवणिक्क्रिया च ।
न सिद्धिमाप्नोति कृतञ्च विष्ट्यां
विषाभिघातादिषु तत्र सिद्धिः ॥
मन्त्रौषधानि शकुनौ च सपौष्टिकानि
गोविप्रराज्यपितृकर्म्म चतुष्पदे तु ।
सौभाग्यदारुणकृतिध्रुवकर्म्मनागे
किन्तुघ्ननाम्नि शुभपौष्टिकमङ्गलानि ।"
इति ज्योतिस्तत्त्वम् ॥
(यथा, कलाविलासे । २ । ११ ।
"कश्चिद्वदति समेत्य द्रविणं निःस्वस्य हन्त गन्तास्मि ।
आतःपरं प्रभाते विष्टिदिनं किं करोम्यद्य ।")

विष्टिः, त्रि, (विष + क्तिच् ।) कर्म्मकरः । इति मेदिनी । टे, २९ ॥

विष्ठलं, क्ली, (विदूरं स्थलम् ।) दूरस्थानम् । यथा । विकुशमिपरिभ्यः स्थलस्य । एभ्यः स्थलस्य सस्य षः स्यात् । विष्ठलं कुष्ठलं शमिष्ठलं परिष्ठलम् । इति सिद्धान्तकौमुदी ॥

विष्ठा, स्त्री, (विविधप्रकारेण तिष्ठति उदरे इति । वि + स्था + कः । उपसर्गादिति षः ।) विविधप्रकारेणोदरे तिष्ठति या । तत्पर्य्यायः । उच्चारः २ अवस्करः ३ शमलम् ४ शकृत् ५ गूथम् ६ पुरीषम् ७ वर्च्चस्कम् ८ विट् ९ । इत्यमरः ॥ वर्च्चः १० । इति जटाधरः ॥ अमेध्यम् ११ दूष्यम् १२ कल्कम् १३ मलम् १४ । इति शब्दरत्नावली ॥ किट्टम् १५ पूतिकम् १६ । इति राजनिर्घण्टः ॥ (यथा,—
"गुरोरहितं प्रकर्त्तव्यं वाङ्मनःकायकर्म्मभिः ।
अहिताचरणादेव विष्ठायां जायते क्रिमिः ।"
इति लघ्वागमीयतन्त्रसारे ॥)
तद्दर्शननिषेधो यथा,—
"न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन ।
न च मूत्रं पुरीषं वा न च संसृष्टमैथुनम् ।"
जले तदुत्सर्गनिषेधो यथा,—
"नाद्यैः क्रीडेन धावेत नाप्सु विण्मूत्रमाचरेत् ।
नोच्छिष्टः संविशेन्नित्यं न नग्नः स्नानमाचरेत् ।"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
तदुत्सर्गविधानं पुरीषप्रातःकृत्यशब्दयोर्द्रष्टव्यम् ॥

विष्णुः, पुं, अग्निः । इति शब्दमाला ॥ शुद्धः । वसुदेवता । इति धरणिः ॥ (द्वादशादित्यानामन्यतमः । यथा, महाभारते । १।६५।१६।
"एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः ।")
धर्म्मशास्त्रकर्तृमुनिविशेषः । यथा,—
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगोतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ।"
इति याज्ञवल्क्यसंहिता ॥
नारायणो रूपविशेषः । तस्य व्युत्पत्तिर्यथा । वेवेष्टि व्याप्नोति विश्वं यः । वेषति सिञ्चति आप्याययति विश्वमिति वा । विष्णाति वियुनक्ति भक्तान् मायापसारणेन संसारादिति वा । विशति सर्व्वभूतानि विशन्ति सर्व्वभूतानि अत्रेति वा ।
"यस्माद्विश्वमिदं सर्व्वं तस्य शक्त्या महात्मनः ।
तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात् ।"
इति विष्णुपुराणम् । इत्यमरटीकायां भरतः ॥ ("बृहत्त्वात् विष्णुरुच्यते ।" इति महाभारते । ५।७०।३॥) तत्पर्य्यायः । नारायणः २ कृष्णः ३ वैकुण्ठः ४ विष्टरश्रवाः ५ दामोदरः ६ हृषीकेशः ७ केशवः ८ माधवः ९ स्वभूः १० दैत्यारिः ११ पुण्डरीकाक्षः १२ गोविन्दः १३ गरुड़ध्वजः १४ पीताम्बरः १५ अच्युतः १६ शार्ङ्गी १७ विष्वक्सेनः १८ जनार्द्दनः १९ उपेन्द्रः २० इन्द्रावरजः २१ चक्रपाणिः २२ चतुर्भुजः २३ पद्मनाभः २४ मधुरिपुः २५ वासुदेवः २६ त्रिविक्रमः २७ देवकीनन्दनः २८ शौरिः २९ श्रीपतिः ३० पुरुषोत्तमः ३१ वनमाली ३२ बलिध्वंसी ३३ कंसारातिः ३४ अधोक्षजः ३५ विश्वम्भरः ३६

कैटभजित् ३७ विधुः ३८ श्रीवत्सलाञ्छनः ३९। इत्यमरः ॥ पुराणपुरुषः ४० वृष्णिः ४१ शतधामा ४२ गदाग्रजः ४३ एकशृङ्गः ४४ जगन्नाथः ४५ विश्वरूपः ४६ सनातनः ४७ मुकुन्दः ४८ राहुभेदी ४९ वामनः ५० शिवकीर्त्तनः ५१ श्रीनिवासः ५२ अजः ५३ वासुः ५४। इति जटाधरः ॥ श्रीहरिः ५५ कंसारिः ५६ नृहरिः ५७ विभुः ५८ मधुजित् ५९ मधुसूदनः ६० कान्तः ६१ पुरुषः ६२ श्रीगर्भः ६३ श्रीकरः ६४ श्रीमान् ६५ श्रीधरः ६६ श्रीनिकेतनः ६७ श्रीकान्तः ६८ श्रीशः ६९ प्रभुः ७० सुरलीधरः ७१ जगदीशः ७२ गदाधरः ७३ नन्दात्मजः ७४ नरसिंहः ७५ हरेशः ७६ गोपालः ७७ नन्दनन्दनः ७८ नरकजित् ७९ धामगर्भः ८० अजितः ८१ जितामित्रः ८२ ऋतधामा ८३ शशविन्दुः ८४ पुनर्व्वसुः ८५ आदिदेवः ८६ श्रीवराहः ८७ सहस्रवदनः ८८ त्रिपात् ८९ ऊर्द्धदेवः ९० हरिः ९१ दधिशुः ९२ यादवः ९३ अरिष्टसूदनः ९४ पूतनारिः ९५ सदायोगी ९६ ध्रुवः ९७ चाणूरसूदनः ९८ हेमशङ्खः ९९ शतावर्त्तो १०० कालनेमिरिपुः १०१ धेनुकारिः १०२ सोमसिन्धुः १०३ विरिञ्चिः १०४ धरणीधरः १०५ वहुमर्द्दी १०६ वर्द्धमानः १०७ शतानन्दः १०८ वृषान्तकः १०९ मधुरेशः ११० द्वारकेशः १११ रन्तिदेवः ११२ वृषाकपिः ११३। इति शब्दरत्नावली ॥ जिष्णुः ११४ दाशार्हः ११५ अब्धिशयनः ११६ इन्द्रानुजः ११७ नरायणः ११८ जलशय: ११९ यज्ञपुरुषः १२० तार्क्ष्यध्वजः १२१ षड्विन्दुः १२२ पद्मेशः १२३ मार्ज्जः १२४ जिनः १२५ कुमोदकः १२६ अङ्कुः १२७ वसुः १२८ शतावर्त्तः १२९ सुक्ष्मकेशौ १३० बभ्रुः १३१ वेधाः १३२ पृश्निशृङ्गः १३३ आत्मभूः १३४ पाञ्चरायणः १३५ सुवर्णविन्दुः १३६ श्रीवत्सः १३७ देवकीसुतः १३८ गोपेन्द्रः १३९ गोवर्द्धनधरः १४० यदुनाथः १४१ गदाभृत् १४२ शार्ङ्गभृत् १४३ चक्रभृत् १४४ श्रीवत्सभृत् १४५ शङ्खभृत् १४६ ॥*॥ अस्य वध्यादयो यथा,—

"मधुधेनुकचाणूरपूतनायमलार्ज्जुनाः।
कालनेमिहयग्रीवशकटारिष्टकैटभाः ॥
कंसः केशिमुरौ साल्वमैन्दद्विविदराहवः।
हिरण्यकशिपुर्व्वाणः कालीयो नरको बलिः ॥
शिशुपालश्चास्य वध्या वैनतेयश्च वाहनम्।
शङ्खोऽस्य पाञ्चजन्योऽङ्कः श्रीवत्सोऽसिस्तु नन्दकः ॥
गदा कौमोदकी चापं शार्ङ्गं चक्रं सुदर्शनम्।
मणिः स्यमन्तको हस्ते भुजमध्ये तु कौस्तुभः ॥"

इति हेमचन्द्रः ॥*॥

तस्य शतनामानि पाद्मोत्तरखण्डे १११ अध्याये सहस्रनामानि च महाभारतीयशान्तिपर्व्वणि १४९ अध्याये द्रष्टव्यानि ॥*॥ अस्य मन्त्रो वर्णश्च यथा,—

"स्वरमाद्यं द्वितीयञ्च उपान्त्यं चान्त्यमेव च।
वासुदेवो बलः कामो ह्यनिरुद्धो यथाक्रमम् ॥
प्रणवस्तत् सहितेतत् हुं चौं भूरतिमन्त्रकाः।
नारायणस्तथा ब्रह्मा विष्णुः सिंहो वराहराट् ॥
सितारुणहरिद्राभा नीलश्यामललोहिताः।
मेघाग्निमधुपिङ्गाभा वर्णतो नव नायकाः ॥"*॥

अस्याङ्गानि तेषां मन्त्रवर्णाश्च यथा,—

"कं टं चं शं गरुत्मानं स्याज्जं खं वं सुदर्शनम्।
खं चं कं चं गदादेवी ठं नं मं चाथ शङ्खकम् ॥
घं टं भं हं भवेच्छ्रीश्च गं जं वं सञ्च पुष्टिकम्।
घं वं सं वनमाला स्याच्छ्रीवत्सं सं दं नं भवेत् ॥
छं तं पं कौस्तुभः प्रोक्तश्चानन्तो ह्यहमेव च।
इत्यङ्गानि यथायोगं देवदेवस्य वै दश ॥*॥
गरुडोऽम्बुजसङ्काशो गदा चैवासिताकृतिः।
पुष्टिः शिरीषपुष्पाभा लक्ष्मीः काञ्चनसन्निभा ॥
पूर्णचन्द्रनिभः शङ्खः कौस्तुभस्तरुणद्युतिः।
चक्रं सूर्य्यसहस्राभं श्रीवत्सः कुन्दसन्निभः ॥
पञ्चवर्णा मता माला ह्यनन्तो मेघसन्निभः।
विद्युद्रूपाणि चास्त्राणि यानि नोक्तानि वर्णतः ॥"

इति गारुडे ११ अध्यायः ॥*॥

तस्य जगत्पालनादिर्यथा,—

"रजोगुणमयं चान्यद्रूपं तस्यैव धीमतः।
चतुर्म्मुखः स भगवान् जगत्सृष्टौ प्रवर्त्तते ॥
सृष्टञ्च पाति सकलं विश्वात्मा विश्वतोमुखः।
सत्त्वं गुणमुपाश्रित्य विष्णुर्व्विश्वेश्वरः स्वयम् ॥
अन्तकाले स्वयं देवः सर्व्वात्मा परमेश्वरः।
तमोगुणं समाश्रित्य रुद्रः संहरते जगत् ॥
एकोऽपि सन्महादेवस्त्रिधासौ समवस्थितः।
सर्गरक्षालयगुणैर्निर्गुणोऽपि निरञ्जनः ॥
एकः सन् स द्विधा चैव त्रिधा च बहुधा पुनः।
त्रिधा विभज्य चात्मानं त्रैलोक्ये संप्रवर्त्तते ॥
सृजते वीक्षते चैव ग्रसते च विशेषतः।
यस्मात् सृष्ट्वानुगृह्णाति ग्रसते च पुनः प्रजाः ॥
गुणात्मकत्वात्त्रैलोक्ये तस्मादेकः स उच्यते।
अग्रे हिरण्यगर्भः स प्रादुर्भूतः सनातनः ॥
आदित्वादादिदेवोऽसावजातत्वादजः स्मृतः।
देवेषु च महादेवो महादेव इति स्मृतः ॥
पाति यस्मात् प्रजाः सर्व्वाः प्रजापतिरिति स्मृतः।
बृहत्त्वाच्च स्मृतो ब्रह्मा परत्वात् परमेश्वरः ॥
वशित्वादप्यवश्यत्वादीश्वरः परिभाषितः।
ऋषिः सर्व्वगतत्वेन हरिः सर्व्वहरो यतः ॥
अनुत्पादात् चानुपूर्व्वात् स्वयम्भुरिति स स्मृतः।
नराणामयनं यस्मात् तस्मान्नारायणः स्मृतः ॥
हरः संसारहरणाद्विभुत्वाद्विष्णुरुच्यते।
भगवान् सर्व्वविज्ञानादवनादोमिति स्मृतः ॥
सर्व्वज्ञः सर्व्वविज्ञानात् सर्व्वः सर्व्वमयो यतः।
शिवः स्यान्निर्म्मलो यस्माद्विभुः सर्व्वगतो यतः ॥
तारणात् सर्व्वदुःखानां तारकः परिगीयते।
बहुनात्र किमुक्तेन सर्व्वं विष्णुमयं जगत् ॥"

इति कौर्म्मे ४ अध्यायः ॥*॥

अपि च।

मत्स्य उवाच।

"महाप्रलयकालान्तु एतदासीत्तमोमयम्।
प्रसुप्तमिव चातर्क्यमप्रज्ञातमलक्षणम् ॥
अविज्ञेयमविज्ञातं जगत् स्थास्नु चरिष्णु च।
ततः स्वयम्भूरव्यक्तः प्रभवः पुण्यकर्म्मणाम् ॥
व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुदः।
योऽतीन्द्रियः परो व्यक्तादणुर्ज्यायान् सनातनः ॥
नारायण इति ख्यातः स एव स्वयमुद्बभौ।
स्वशरीरादभिध्यायन् सिसृक्षुर्व्विविधं जगत् ॥
अप एव ससर्ज्जादौ तासु बीजमवासृजत्।
तदेवाण्डं समभवद्धेमरूप्यमयं महत् ॥
संवत्सरसहस्रेण सूर्य्यायुतसमप्रभम्।
प्रविश्यान्तर्म्महातेजाः स्वयमेवात्मसम्भवः।
प्रभावादपि तद्व्याप्त्या विष्णुत्वमगमत् पुनः ॥"

इति मात्स्ये २ अध्यायः ॥*॥

अस्य तिस्रो मूर्त्तयो यथा।

"सृष्टिस्थित्यन्तकरणात् ब्रह्मविष्णुशिवात्मिकाः।
स संज्ञां याति भगवान् एक एव जनार्द्दनः ॥
ब्रह्मत्वे सृजते चैव विष्णुत्वे पाति नित्यशः।
रुद्रत्वे चैव संहर्त्ता एको देवस्त्रिधा स्थितः ॥

> स एव सृज्यः स च सर्गकर्त्ता
> स एव पाता स च पाल्यते च।
> ब्रह्माद्यवस्थाभिरशेषमूर्त्ति-
> र्व्विष्णुर्व्वरिष्ठो वरदो वरेण्यः ॥"

इति वह्निपुराणे सर्गानुशासननामाध्यायः ॥*॥

नारायणस्य मूर्त्तिविशेषो यथा।

"योऽसौ नारायणो देवः परात्परतरो नृप।
तस्य चिन्ता समुत्पन्ना सृष्टिं प्रति नरोत्तम ॥
सृष्टा चेयं महासृष्टिः पालनीया मयैव हि।
कर्म्मकाण्डस्यमूर्त्तेन कर्त्तुं नैवेह शक्यते ॥
तस्मात् मूर्त्तिं सृजाम्येकां यया पाल्यमिदं जगत्।
एवं चिन्तयतस्तस्य सम्यगभिध्यायितो नृप ॥
प्राक्सृष्टिजातं राजन् वै मूर्त्तिमत्तत्पुरो बभौ।
पुरोभूते ततस्तस्मिन् देवो नारायणः स्वयम् ॥
प्रविश्यन्तं ददर्शाथ त्रैलोक्यं तस्य देहतः।
ततः सस्मार भगवान् वरदानं पुरातनम् ॥
बाणादीनां ततस्तुष्टः प्रादात्तस्य पुनर्व्वरम्।
सर्व्वज्ञः सर्व्वकर्त्ता त्वं सर्व्वलोकनमस्कृतः ॥
त्रैलोक्यप्रतिपालश्च भव विष्णुः सनातनः।
देवानां सर्व्वदा कार्य्यं कर्त्तव्यं ब्रह्मणस्तथा ॥
सर्व्वेशत्वञ्च भवतु तव देव न संशयः।
एवमुक्त्वा ततो देवः प्रकृतिस्थो बभूव ह ॥
विष्णुरप्यधुना पूर्व्वां बुद्धिं सस्मार स प्रभुः।
तदा संचिन्त्य भगवान् योगनिद्रां महातपाः ॥
तस्यां संस्थाप्य भगवान् इन्द्रियार्थोद्भवाः प्रजाः।
ध्यात्वा परेण रूपेण ततः सुष्वाप वै प्रभुः ॥
तस्य सुप्तस्य जठरान्निःसृतं पद्मं विनिःसृतम्।
सप्तद्वीपवती पृथ्वी ससमुद्रा सकानना ॥
तस्य मूलस्य विस्तारं पातालतलसंस्थितम्।

कर्णिकायां तथा मेरुस्तन्मध्ये ब्रह्मणो भव: ।
एवं दृष्ट्वा परं तस्य शरीरस्य तु सम्भवम् ।
सुषुपे तच्छरीरस्थो वायुर्वायुसमं स्वपन् ।
अविद्याविजयश्चेमं शङ्खरूपेण धारय ।
अज्ञानच्छेदनार्थाय खड्गं तेऽस्तु तथा करे ।
कालचक्रमयं घोरं चक्रं त्वं धारयाच्युत ।
अधर्म्मराजघातार्थं गदां धारय केशव ।
मालेयं भूतमाता ते कण्ठे तिष्ठतु सर्व्वदा ।
श्रीवत्सकौस्तुभौ चेमौ चन्द्रादित्यच्छलेन च ।
मारुतस्ते गतिर्वीर: गरुत्मांस्तव कीर्त्तित: ।
त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया ।
द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते ।
घृताशनो भवेद्यस्तु द्वादश्यां तत्परायण: ।
स्वर्गवासी च भवतु पुमान् स्त्री वा विशेषत: ।
एष विष्णुस्तवाख्यातो मूर्त्तयो देवदानवा: ।
हन्ति पाति शरीराणि सृजन्त्यन्यानि चात्मन: ।
युगे युगे सर्व्वगोऽयं वेदान्ते पुरुषो ह्ययम् ।
न चीनपुण्या पश्यन्ति मनुष्योऽयं कदाचन ।"
इति वाराहे परापरनिर्णयनामाध्याय: ॥ * ॥
ब्रह्मविष्णुशिवानामेकत्वं यथा,—
"ततो ब्रह्मा शरीरं तत् त्रिधा चक्रे महेश्वर: ।
प्रधानेच्छावशाच्छम्भोस्त्रिगुणं त्रिगुणीकृतम् ।
तदूर्द्धभाग: संजातश्चतुर्वक्त्रश्चतुर्भुज: ।
स्फटिकाभ्रसम: काय: शुक्ल: स चन्द्रशेखर: ।
ईशस्ततो ब्रह्मकाये सृष्टिशक्तिं न्ययोजयत् ।
स्वयमेवाभवत् स्रष्टा ब्रह्मरूपेण लोकभृत् ।
स्थितिशक्तिं निजां मायां प्रज्ञाख्यां न्ययोजयत् ।
महेशो वैष्णवे काये ज्ञानशक्तिं निजां तथा ।
स्थितिकर्त्ताभवद्विष्णुरहमेव महेश्वर: ।
सर्व्वशक्तिनियोगेन सदा तद्रूपता मम ।
अन्तशक्तिं तथा काये शाम्भवे स न्ययोजयत् ।
अन्तकर्त्ताभवच्छम्भु: स एव परमेश्वर: ।
अतस्त्रिषु शरीरेषु स्वयमेव प्रकाशते ।
ज्ञानरूपं परं ज्योतिरनादिर्भगवान् प्रभु: ।
सृष्टिस्थित्यन्तकरणादेक एव महेश्वर: ।
ब्रह्मा विष्णु: शिवश्चेति संज्ञामाप पृथक् पृथक् ।
अतस्त्वञ्च विधाता च तथाहमपि नो पृथक् ।
एवं शरीरं रूपञ्च ज्ञानमस्माकमन्तरात् ।"
इति कालिकापुराणे १२ अध्याय: ॥ * ॥
अन्यच्च ।
"गुणातीत: स भगवान् व्यापक: पुरुष: पर: ।
अनन्तभोगशायी च यन्नाभिकमलादभूत् ।
विष्णुश्च स च गोविन्द ईश्वरश्च सनातन: ।
यस्तं वेद महात्मानं स जीवन्मुक्त उच्यते ।"
इति वामनपुराणे ४२ अध्याय: ॥ * ॥
तेन गजेन्द्रमोचनं यथा,—
पुलस्त्य उवाच ।
"भक्तिं तस्याथ संचिन्त्य नागस्यामोघदर्शन: ।
प्रीतिमानभवद्विष्णु: शङ्खचक्रगदाधर: ।
सान्निध्यं कल्पयामास तस्मिन् सरसि केशव: ।
गरुड़स्थो जगन्नाथो लोकाधारस्तपोधन: ।
ग्राहग्रस्तं गजेन्द्रं तं तञ्च ग्राहं जलाशयात् ।
उज्जहाराप्रमेयात्मा तरसा मधुसूदन: ।
स्थलस्थं दारयामास ग्राहं चक्रेण माधव: ।
मोचयामास नागेन्द्रं पाशेभ्य: शरणागतम् ।
स हि देवलशापेन हूहूर्गन्धर्व्वसत्तम: ।
ग्राहत्वमगमत् कृष्णाद्वधं प्राप्य दिवङ्गत: ।
गजोऽपि विष्णुना स्पृष्टो जातो दिव्यवपु: पुमान् ।"
इति वामनपुराणे ८१ अध्याय: ॥ * ॥
अस्य मन्त्रपूजादिर्यथा,—
"अथ वक्ष्ये महामन्त्रान् विष्णो: सर्व्वार्थसाधकान् ।
यस्य संस्मरणात् सन्तो भवाब्धे: पारमाश्रिता: ।
तारं नम: पद ब्रूयात् नरौ दीर्घसमन्वितौ ।
पवनो णाय मन्त्रोऽयं प्रोक्तो वस्वक्षर: पर: ।"
अस्य पूजाप्रयोग: । प्रात:कृत्यादिस्नानान्तं कर्म्म कृत्वा पूजामण्डपमागत्य वैष्णवाचमनं कुर्य्यात् । तद्यथा गौतमीये ।
"केशवाद्यैस्त्रिभि: पीत्वा द्वाभ्यां प्रक्षालयेत् करौ ।
द्वाभ्यामोष्ठौ च संमृज्य द्वाभ्यां मृज्यान्मुखं तत: ।
एकेन हस्तं प्रक्षाल्य पादावपि तथैकत: ।
संप्रोक्ष्यैकेन मूर्द्धानं तत: सङ्कर्षणादिभि: ।
आस्यनासाक्षिकर्णांश्च नाभ्युर:स्कं भुजौ क्रमात् ।
स्पृशेदेवं भवेदाचमनञ्च वैष्णवान्वये ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ।"
केशवादयस्तु केशवनारायणमाधवगोविन्दविष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदरसङ्कर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्द्दनोपेन्द्रहरिविष्णव: । वाक्यन्तु प्रणवादि केशवाय नम इत्यादि । तथा च ।
"सचतुर्थीनमोऽन्तेन नामभिर्विन्यसेत् सुधी: ।"
तत: सामान्यार्घ्यादिमातृकान्तं कर्म्म विधाय केशवकीर्त्त्यादिन्यासं कुर्य्यात् । अस्य ऋष्यादिन्यास: । शिरसि प्रजापतये ऋषये नम: । मुखे गायत्र्यैच्छन्दसे नम: । हृदि अर्द्धलक्ष्मीहरये देवतायै नम: ॥ * ॥ तत: कराङ्गन्यासौ । श्रीं अङ्गुष्ठाभ्यां नम इत्यादि । श्रीं हृदयाय नम इत्यादि । तथा च गौतमीये ।
"ऋषि: प्रजापतिश्छन्दो गायत्री देवता पुन: ।
अर्द्धलक्ष्मीहरि: प्रोक्त: श्रीबीजेन षड़ङ्गकम् ।"
ततो ध्यानम् ।
"उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ।"
एवं ध्यात्वा न्यसेत् । यथा । अं केशवाय कीर्त्त्यै नम: ललाटे । वर्णानुक्त्वा सार्द्धचन्द्रान् पुरस्तादित्यादिदर्शनात् सर्व्वत्र सानुस्वार: । आं नारायणाय कान्त्यै नमो मुखे । इं माधवाय तुष्ट्यै नमो दक्षनेत्रे । ईं गोविन्दाय पुष्ट्यै नमो वामनेत्रे । उं विष्णवे धृत्यै दक्षकर्णे । ऊं मधुसूदनाय शान्त्यै वामकर्णे । ऋं त्रिविक्रमाय क्रियायै दक्षनासापुटे । ॠं वामनाय दयायै वामनासापुटे । ऌं श्रीधराय मेधायै दक्षगण्डे । ॡं हृषीकेशाय हर्षायै वामगण्डे । एं पद्मनाभाय श्रद्धायै ओष्ठे । ऐं दामोदराय लज्जायै अधरे । ओं वासुदेवाय लक्ष्म्यै ऊर्द्धदन्तपंक्तौ । औं सङ्कर्षणाय सरस्वत्यै अधोदन्तपंक्तौ । अं प्रद्युम्नाय प्रीत्यै मस्तके । अ: अनिरुद्धाय रत्यै मुखे । कं चक्रिणे जयायै । खं गदिने दुर्गायै । गं शार्ङ्गिणे प्रभायै । घं खड्गिने सत्यायै । ङं शङ्खिने चण्डायै दक्षकरमूलसन्ध्यग्रकेषु । चं हलिने वाण्यै । छं मुषलिने विलासिन्यै । जं शूलिने विजयायै । झं पाशिने विरजायै । ञं अङ्कुशिने विश्वायै वामकरमूलसन्ध्यग्रकेषु । टं मुकुन्दाय विनदायै । ठं नन्दजाय सुनन्दायै । डं नन्दिने स्मृत्यै । ढं नराय ऋद्ध्यै । णं नरकजिते समृद्ध्यै दक्षपादमूलसन्ध्यग्रकेषु । तं हरये शुद्ध्यै । थं कृष्णाय बुद्ध्यै । दं सत्याय भूत्यै । धं सात्वताय मत्यै । नं सौराय क्षमायै वामपादमूलसन्ध्यग्रकेषु । पं शूराय रमायै दक्षपार्श्वे । फं जनार्द्दनाय उमायै वामपार्श्वे । बं भूधराय क्लेदिन्यै पृष्ठे । भं विश्वमूर्त्तये क्लिन्नायै नाभौ । मं वैकुण्ठाय सुदायै उदरे । यं त्वगात्मने पुरुषोत्तमाय वसुधरायै हृदि । रं असृगात्मने बलिने परायै दक्षांसे । लं मांसात्मने बलानुजाय परायणायै ककुदि । वं मेदआत्मने बलाय सूक्ष्मायै वामांसे । शं अस्थ्यात्मने वृषघ्नाय सन्ध्यायै हृदादिदक्षकरे । षं मज्जात्मने वृषाय प्रज्ञायै हृदादिवामकरे । सं शुक्रात्मने हंसाय प्रभायै हृदादिदक्षपादे । हं प्राणात्मने वराहाय निशायै हृदादिवामपादे । ळं जीवात्मने विमलाय अमोघायै हृदाद्युदरे । क्षं क्रोधात्मने नृसिंहाय विद्युतायै हृदादिमुखे । इति न्यसेत् ॥ * ॥ तथा च । गौतमीये ।
"केशवादिरयं न्यासो न्यासमात्रेण देहिनाम् ।
अच्युतत्वं ददात्येव सत्यं सत्यं न संशय: ।
मातृकार्णं समुच्चार्य्य केशवाय इति स्मरेत् ।
कीर्त्त्यै च मनसा युक्तमित्यादि न्यासमाचरेत् ।
केशवाय तत: कीर्त्त्यै कान्त्यै नारायणाय च ।"
इत्याद्यगस्त्यसंहितावचनाच्चायं क्रम: । न तु केशवकीर्त्तिभ्यां नम इति । तथा भुक्तिमुक्तिमिच्छता अयं न्यास: कर्त्तव्य: श्रीबीजादिक: । यथा । श्रीं अं केशवाय कीर्त्त्यै नम इत्यादि । तथा च गौतमीये ।
"एवं प्रविन्यसेन्न्यासं लक्ष्मीबीजपुर:सरम् ।
स्फूर्तिं धृतिं महालक्ष्मीं प्राप्यान्ते हरितां व्रजेत् ।"
ततस्तत्त्वन्यासपीठन्यासमूर्त्त्यादिन्यासविष्णुपञ्जरादिन्यासान् कुर्य्यात् । तत्त्वन्यासादयस्तु ग्रन्थ-

गौरवभिया नोक्ताः । * । ततो ध्यायेत् ।
"उद्यत्कोटिदिवाकराभमनिशं शङ्खं गदां पङ्कजं
चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभिपार्श्वद्वयम् ।
कोटीराङ्गदहारकुण्डलधरं पीताम्बरं कौस्तुभो-
द्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे ॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात् । तत्र वैष्णवपात्रं गौतमीये ।
"ताम्रपात्रन्तु विप्रर्षे विष्णोरतिप्रियं मतम् ।
तथैव सर्व्वपात्राणां मुख्यं शङ्खं प्रकीर्त्तितम् ॥
मृत्पात्रञ्च तथा प्रोक्तं स्वर्णं वा राजतं तथा ।
पद्मपात्रं हरेः शुद्धं नान्यत्तत्र नियोजयेत् ॥"
नैवेद्यदाने तु तत्रैव ।
"स्वर्णे वा ताम्रपात्रे वा रौप्ये वा पङ्कजे दले ॥"
आगमकल्पद्रुमे ।
"हैरण्यं राजतं कांस्यं ताम्रं मृण्मयमेव वा ।
पालाशं श्रीहरेः पात्रं नैवेद्ये कल्पयेद्बुधः ॥"
पुरश्चरणचन्द्रिकायाम् । सुवर्णे राजते रैत्ये इत्यादि । * । ततः सामान्यपीठपूजानन्तरं विमलादिशक्तिसहितपीठमन्त्रान्तं पूजां कृत्वा पुनर्ध्यात्वा मूलेन कल्पितमूर्त्तावावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजां कुर्य्यात् । अग्न्यादिचतुष्कोणेषु दिक्षु च ॐ क्रुद्धोल्काय हृदयाय नमः इत्यादिना पूजयेत् । * । ततः केशरेषु पूर्व्वादि ॐ नमः नं नमः मों नमः भां नमः गं नमः वं नमः तीं नमः यं नमः । ततो दलेषु पूर्व्वादिदिक्षु ॐ वासुदेवाय नमः । एवं सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय । अग्न्यादिकोणदलेषु ॐ शान्त्यै नमः एवं श्रियै सरस्वत्यै रत्यै । ततः पत्राग्रेषु पूर्व्वादि ॐ चक्राय नमः एवं शङ्खाय गदायै पद्माय कौस्तुभाय मुषलाय खड्गाय वनमालायै । तद्बहिरग्रे ॐ गरुडाय नमः । दक्षिणे ॐ शङ्खनिधये नमः । वामे ॐ पद्मनिधये नमः । पश्चिमे ॐ ध्वजाय नमः । अग्निकोणे ॐ विघ्नाय नमः । नैरृते ॐ आर्य्यायै नमः । वायुकोणे ॐ दुर्गायै नमः । ऐशाने ॐ सेनान्यै नमः । एवं सर्व्वत्र । तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयित्वा धूपदीपौ दत्त्वा नैवेद्यं दद्यात् । * । यथा । नैवेद्यमानीय देवतायै मूलेन पाद्यार्घाचमनीयं दत्त्वा फडिति मन्त्रेण नैवेद्यं संप्रोक्ष्य चक्रमुद्रयाभिरक्ष्य यमिति मन्त्रेण दोषसमूहं संशोष्य रमिति दोषं संदह्य वामकरसौधधाराभिपूर्णं वमिति मन्त्रेण अमृतीकृत्य मूलमन्त्रमष्टधा जपेत् । ततो वमिति धेनुमुद्रयामृतीकृत्य गन्धपुष्पाभ्यां संपूज्य कृताञ्जलिः सन् हरिं प्रार्थयेत् । अस्य मुखतो महः प्रसवेदिति विभाव्य स्वाहान्तं मूलमुच्चार्य्य नैवेद्ये जलं दद्यात् । ततो मूलमुच्चार्य्य एतन्नैवेद्यं अमुकदेवतायै नमः । ततो नैवेद्यं हस्ताभ्यामुद्धृत्य ॐ निवेदयामि भवते जुषाणेदं हविर्हर इति नैवेद्यं समर्प्य अमुकदेवतायै एतज्जलममृतोपस्तरणमसीति जलं दत्त्वा वामहस्ते ग्रासमुद्रां प्रदर्श्य दक्षिणहस्तेन प्राणादिमुद्राः प्रदर्शयेत् । * । यथा । ॐ प्राणाय स्वाहेति कनिष्ठानामिके अङ्गुष्ठेन स्पर्शयेत् । ॐ अपानाय स्वाहेति तर्ज्जनीमध्यमे अङ्गुष्ठेन स्पर्शयेत् । ॐ व्यानाय स्वाहेति मध्यमानामे अङ्गुष्ठेन स्पर्शयेत् ॐ उदानाय स्वाहेति तर्ज्जनीमध्यमानामा अङ्गुष्ठेन स्पर्शयेत् । ॐ समानाय स्वाहेति सर्व्वाङ्गुलीरङ्गुष्ठेन स्पर्शयेत् । ततः अङ्गुष्ठाभ्यामनामिकाग्रं स्पृशन् क्लीं नमः पराय अन्तरात्मने अनिरुद्धाय नैवेद्यं कल्पयामीति नैवेद्यमुद्रां प्रदर्श्य मूलमुच्चार्य्य अमुकदेवतां तर्पयामीति चतुर्धा संतर्प्य अमुकदेवतायै एतज्जलममृतापिधानमसि इति जलं दत्त्वा आचमनीयादिकं दद्यात् । * । वैष्णवे तु नैवेद्यदाने सर्व्वत्रायमेव विधिः । ततः सामान्यपूजापद्धत्युक्तक्रमेण विसर्ज्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं षोडशलक्षजपः । तथा च ।
"विकारलक्षं प्रजपेन्मनुमेनं समाहितः ।
तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः ॥"
इति तन्त्रसारः ।
अन्यान्यविष्णुपूजा आह्निकतत्त्वादौ द्रष्टव्या ॥*॥ शिवस्याष्टमूर्त्तिपूजानन्तरं तत्रैव विष्णोरष्टमूर्त्तिपूजा यथा,—
"कृता पूजा मया देवि अष्टमूर्त्तेः शिवस्य च ।
यथा हि परमेशानि तच्छृणुष्व वरानने ॥"
इत्युपक्रम्य ।
"कृत्वा पूजां महेशानि कुलज्या वाञ्छवेष्टने ।
अष्ट विष्णोर्म्महेशानि नामानि शृणु कामिनि ॥
उग्रं विष्णुं महाविष्णुं ज्वलन्तं संप्रतापनम् ।
नृसिंहं भीषणं भीमं मृत्युमृत्युं प्रकीर्त्तितम् ।
एतान् विष्णून् महेशानि यथा संपूज्य तच्छृणु ।
समुखादिक्रमाद्देवि पूजयेद्विष्णुमव्ययम् ।
तन्मन्त्रं शृणु चार्व्वङ्गि ज्ञानसारं वरानने ॥"
ॐ उग्राय विष्णवे नमः । ॐ महाविष्णवे नमः । ॐ ज्वलन्ताय विष्णवे नमः । ॐ संप्रतापनाय विष्णवे नमः । ॐ नृसिंहाय विष्णवे नमः । ॐ भीषणाय विष्णवे नमः । ॐ भीमाय विष्णवे नमः । ॐ मृत्युञ्जयाय विष्णवे नमः ।
"इति पूजां महेशानि कृत्वा हि परमेश्वरि ।
विष्णुज्ञानं मया प्रोक्तं सर्व्वशक्तिसमन्वितम् ॥"
इति विज्ञार्थेनतन्त्रे ७ पटलः ।
तस्य नमस्कारस्तत्फलादिञ्च यथा,—
सूत उवाच ।
"मुक्तिहेतुमनाद्यन्तमजमव्ययमक्षयम् ।
यो नमेत् सर्व्वलोकस्य नमस्यो जायते नरः ॥
विष्णुमानन्दमद्वैतं विज्ञानं सर्व्वगं प्रभुम् ।
प्रणमामि सदा भक्त्या चेतसा हृदयालयम् ॥
योऽन्तस्तिष्ठन्नशेषस्य पश्यतीशः शुभाशुभम् ।
तं सर्व्वसाक्षिणं विष्णुं नमस्ये परमेश्वरम् ॥
साध्येनापि नमस्कारप्रयुक्तश्चक्रपाणये ।
संसारशूलवर्गाणामुद्वेजनकरो हि सः ॥
जयति स्फुरज्जलधरोदरवारिजाक्षो
लोकाधिकारिपुरुषो परमेश्वरोऽप्रमेयो ।
एकोऽपि चारुगुणमाकलितप्रणामः
सद्यः श्वपाकमपि शोधयितुं समर्थः ॥
प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत् ।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ॥
दुर्गसंसारकान्ताराकूपारमभिधावताम् ।
एकः कृष्णनमस्कारः अस्ति तीरस्य देशकः ॥
आसीनो वा शयानो वा तिष्ठन् वा यत्र तत्र वा ।
नमो नारायणायेति मन्त्रैकशरणो भवेत् ॥
नारायणेति शब्दोऽस्ति वागस्ति वशवर्त्तिनी ।
तथापि नरके घोरे पतन्तीति किमद्भुतम् ॥
चतुर्मुखायुर्यदि कोटिवक्त्रो
भवेन्नरः कोऽपि विशुद्धचेताः ।
सर्व्वं गुणानामयुतैकदेशं
वदेन्न वा देववरस्य विष्णोः ॥
व्यासाद्या मुनयः सर्व्वे स्तुवन्तो मधुसूदनम् ।
मतिक्षयान्निवर्त्तन्ते न गोविन्दगुणक्षयात् ॥
अवशेनापि यन्नाम्नि कीर्त्तिते सर्व्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥
स्वप्नेऽपि नामस्मृतिरादिपुंसः
क्षयं करोत्यक्षयपापराशिम् ।
प्रत्यक्षतः किं पुनरत्र पुंसां
संकीर्त्तिते नाम्नि जनार्द्दनस्य ॥
नमः कृष्णाच्युतानन्त वासुदेवेत्युदीरितम् ।
यैर्भावभावितैर्विप्र न ते यमपुरं ययुः ॥
शमायालं जलं वह्नेस्तमसो भास्करोदयः ।
शान्तिः कलेरघौघस्य नामसंकीर्त्तनं हरेः ॥
न नाकपृष्ठगमनं पुनरायाति लक्षणम् ।
न जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ॥
गच्छतां दूरमध्वानं तृष्णामूर्च्छितचेतसाम् ।
पाथेयं पुण्डरीकाक्षनामसंकीर्त्तनामृतम् ॥
नम इत्येव यो ब्रूयात्तद्भक्तः श्रद्धयान्वितः ।
तस्याक्षयो भवेल्लोकः श्वपाकस्यापि शौनक ॥
संसारसर्पदष्टस्य निर्व्विषैकैकभेषजम् ।
कृष्णेति वैष्णवं मन्त्रं जप्त्वा मुक्तो भवेन्नरः ॥
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्त्य केशवम् ॥
नूनं तत्कण्ठशालूकमथवाप्युपजिह्विका ।
रोगाधारा न सा जिह्वा या न वक्ति हरेर्गुणान् ॥
कुलचैलैव किं तस्य काश्या वा पुष्करेण वा ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥
विष्णातदुष्कृतसहस्रसमावृतोऽपि
श्रेयः परन्तु परिशुद्धिमभीप्समानः ।
स्वप्नान्तरेऽपि किल योनिभयं न पश्ये-
न्नारायणस्तुतिकथापरमो मनुष्यः ॥"
इत्यादि गारुडे नारायणभक्तिनमस्कारो नाम २३९ अध्यायः ॥ * ॥

सूत उवाच ।
"असारभूते संसारे सारमेकं विनिर्द्दिशेत् ।
असाराशेषलोकस्य सारमाराधनं हरेः ॥
दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
अर्च्चितं स्यात्तदा चैव तेन सर्व्वं चराचरम् ॥
माहात्म्यत् परिरक्षन्तं सृष्टिसंहारकारकम् ।
यो न पूजयते विष्णुं तं विद्याद्ब्रह्मघातकम् ॥
यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततम् ।
स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दन्ति मानवाः ॥
नरके पच्यते यस्तु यमेन परिभाषितः ।
किं त्वया नार्च्चितो देवः केशवः क्लेशनाशनः ॥
उदकेनाप्यभावेन द्रव्याणामर्च्चितः प्रभुः ।
यो ददाति स्वकं लोकं स त्वया किं न चार्च्चितः ॥
न तत् करोति सा माता न पिता नापि बान्धवाः ।
यत् करोति हृषीकेशः सन्तुष्टः श्रद्धयार्च्चितः ॥
वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥
न दानैर्व्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्द्दनः ॥
सम्पदैश्वर्य्यमाहात्म्यज्ञानसन्ततिकर्म्मणाम् ।
विमुक्तेश्चैकतालभ्यं मूलमाराधनं हरेः ॥
प्रणामैस्तुष्यते विष्णुरेतद्वै परमं धनम् ।
अन्यथा वा विशेषेण कस्तमर्च्चितुमर्हति ॥"
इति गारुडे पूजास्तुतिः २२३ अध्यायः ॥*॥

सूत उवाच ।
"आलोड्य बहुशास्त्राणि विचार्य्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।
यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥
षष्टितीर्थसहस्राणि षष्टितीर्थशतानि च ।
नारायणप्रणामस्य कलां नार्हन्ति षोड़शीम् ॥
प्रायश्चित्तान्यशेषाणि तपःकर्म्मादिकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्यैकं हरिसंस्मरणं परम् ॥
मुहूर्त्तमपि यो ध्यायेन्नारायणमतन्द्रितः ।
सोऽपि तद्गतिमाप्नोति किं पुनस्तत्परायणः ॥
जाग्रत्स्वप्नसुषुप्तेषु योगस्थस्य च योगिनः ।
या काचिन्मनसो वृत्तिः सा भवत्यच्युताश्रयात् ॥
उत्तिष्ठन्निपतन्विष्णुं व्रजन् वै विवशस्तथा ।
भुञ्जन् स्वपंश्च जाग्रच्च गोविन्दं माधवं स्मरेत् ॥
स्वे स्वे कर्म्मण्यभिरतः कुर्य्याच्चित्तं जनार्द्दने ।
एषा शास्त्रानुसारोक्तिः किमन्यैर्बहुभाषितैः ॥
ध्यानमेव परो धर्म्मो ध्यानमेव परं तपः ।
ध्यानमेव परं शौचं तस्मात् ध्यानपरो भवेत् ॥
नास्ति विष्णोः परं ध्येयं तपो नानशनात् परम् ।
तस्मात् प्रधानमत्रोक्तं वासुदेवस्य चिन्तनम् ॥
यद्दुर्लभं परं प्राप्यं मनसो यन्न गोचरम् ।
तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः ॥
प्रमादात् कुर्व्वतां कर्म्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥
ध्यानेन सदृशं नास्ति शोधनं पापकर्म्मणाम् ।
आगामिदेहहेतूनां दाहकोऽप्येष पावकः ॥
विनिष्पन्नसमाधिस्तु मुक्तिमत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मचयोऽचिरात् ॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्व्वकिल्बिषम् ॥
यथाग्निदाहात् कनकमपदोषं प्रजायते ।
संश्लिष्टं वासुदेवेन मनुष्याणां तथा मनः ॥
गङ्गास्नानसहस्रेषु पुष्करस्नानकोटिषु ।
यत् पापं विलयं याति स्मृते नश्यति तद्धरौ ॥
प्राणायामसहस्रैस्तु यत् पापं नश्यति ध्रुवम् ।
क्षणमात्रेण तत् पापं हरेर्ध्यानात् प्रणश्यति ॥
एकस्मिन्नप्यतिक्रान्ते मुहूर्त्ते ध्यानवर्ज्जिते ।
दस्युभिर्म्मुषितेनेव युक्तमाक्रन्दितं भृशम् ॥
कलिप्रभावो दुष्टोक्तिः पाषण्डानां तथोक्तयः ।
न क्रमेरन् मनस्तस्य यस्य चेतसि केशवः ॥
सा तिथिस्तदहोरात्रं स योगः स च चन्द्रमाः ।
लग्नं तदेव विख्यातं यत्र संस्मर्य्यते हरिः ॥
सा हानिस्तन्महच्छिद्रं सा चान्धजड़मूकता ।
यन्मुहूर्त्तं क्षणं वापि वासुदेवो न चिन्त्यते ॥
कलिः कृतयुगन्तस्य कलिस्तस्य कृते युगे ।
हृदये यस्य गोविन्दो यस्य चेतसि नाच्युतः ॥
यस्याग्रतस्तथा पृष्ठे गच्छतस्तिष्ठतोऽपि वा ।
गोविन्दे नियतं चित्तं कृतकृत्यः सदैव सः ॥
वासुदेवे मनो यस्य जपहोमार्च्चनादिषु ।
तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥
असंलभ्य च गार्हस्थ्यमतप्त्वा च महत्तपः ।
छिनत्ति वैष्णवीं मायां केशवार्पितमानसः ॥
क्षमां कुर्व्वन्ति क्रुद्धेषु दयां मूर्खेषु मानवाः ।
मुदञ्च धर्म्मशीलेषु गोविन्दे हृदयस्थिते ॥
ध्यायेन्नारायणं देवं स्नानादिषु च कर्म्मसु ।
प्रायश्चित्तं हि सर्व्वस्य दुष्कृतस्येति विश्रुतम् ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्द्दनः ॥
कीटपक्षिगणानाञ्च हरौ संन्यस्तचेतसाम् ।
ऊर्द्ध्वमेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम् ॥
वासुदेवतरुच्छाया नातिशीता न घर्म्मदा ।
नरकद्वारशमनी सा किमर्थं न सेव्यते ॥
न च दुर्व्वाससः शापो वज्रञ्चापि शचीपतेः ।
हन्तुं समर्थो हि सखे हृद्गते मधुसूदने ।
वदतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म्म कुर्व्वतः ।
नापयाति यदा चिन्ता सिद्धां मन्ये च धारणाम् ॥

ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

किमत्र बहुनोक्तेन युष्माकमधुना हरिम् ।
स्मरताहर्निशं विष्णुमशेषदुरितापहम् ।
न हि ध्यानेन सदृशं पवित्रमिह विद्यते ।
श्वपाकेष्वपि भुञ्जानः पापं नैवात्र लिप्यते ॥
यदा चित्तं समासक्तं जन्तोर्व्विषयगोचरे ।
यदि नारायणेऽप्येवं को न मुच्येत बन्धनात् ॥
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥
तच्चानया धारणया योगिनो यान्ति ये लयम् ।
संसारकर्म्मणोऽप्येते यान्ति निर्व्वीजतां द्विजाः ॥"
इति गारुडे ध्यानस्तुतिः २२४ अध्यायः ॥
तस्य माहात्म्यं यथा,—
सूत उवाच ।
"विष्णुचित्तो भवेन्नित्यं यजेत नमेत् सदा ।
तमेवैष्यति मुक्तैवमात्मानं हरितत्परः ॥
तद्ध्यानं यत्र गोविन्दः सा कथा यत्र केशवः ।
तत् कर्म्म यत्तदर्थाय किमन्यैर्बहुभाषितैः ॥
सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितम् ।
तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥

प्रणामनीशस्य शिरःफलं विदु-
स्तदर्च्चनं प्राणिफलं दिवौकसः ।
मनःफलं तद्गुणकर्म्मचिन्तनं
वाचस्तु गोविन्दगुणस्तवः फलम् ॥

मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्म्मणः ।
केशवं वैद्यमासाद्य दुर्व्याधिरिव नश्यति ॥
यत्किञ्चित् कुरुते कर्म्म पुरुषः साध्वसाधु वा ।
सर्व्वं नारायणे न्यस्य कुर्व्वन्नपि न लिप्यते ॥
ब्रह्मादिचतुरास्यान्तं भूतग्रामं चतुर्व्विधम् ।
चराचरं जगत् सर्व्वं प्रसुप्तं मायया तव ॥
यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः ।
मुक्तिं चेतसि संस्थितो जड़धियां पुंसां ददात्यव्ययः
किञ्चित्रं दुरितं प्रयाति विलयं तत्राच्युते कीर्त्तिते ॥
महता पुण्यपण्येन येन क्रीतोऽखिलं ध्रुवम् ।
तस्य विष्णोः प्रसादेन इह कश्चित् प्रमुह्यति ॥
अग्निकार्य्यं जपं स्नानं विष्णोर्ध्यानञ्च पूजनम् ।
गन्तुं दुःखोदधेः पारं कुर्य्युर्येन भवन्ति ते ॥
राष्ट्रस्य शरणं राजा पितरौ बालकस्य च ।
धर्म्मश्च सर्व्वमर्त्त्यानां सर्व्वस्य शरणं हरिः ॥
ये नमन्ति जगद्योनिं वासुदेवं सनातनम् ।
न तेभ्यो विद्यते तीर्थमधिकं मुनिसत्तम ॥
अनर्घरत्नपूजान्तु कुर्य्यात् स्वाध्यायमेव च ।
तं समुद्दिश्य गोविन्दं ध्यानं नित्यमतन्द्रितः ॥
शूद्रं वा भगवद्भक्तं निषादं श्वपचं तथा ।
द्विजजातिसमं मन्ये न याति नरकं नरः ॥
आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्त्तारं को न मुच्येत बन्धनात् ॥
यथा जातबलो वह्निर्दहत्यार्द्रमपीन्धनम् ।
तथाविधः स्मृतो विष्णुर्योगिनां सर्व्वकिल्बिषम् ॥
प्रदीप्तं पर्व्वतं यद्वत् नाश्रयन्ति मृगादयः ।

तद्वत् पापानि सर्व्वाणि योगाभ्यासरतं नरम् ॥
यस्य यावांश्च विश्वासस्तस्य सिद्धिश्च तावती ।
एतावानिति कृष्णस्य प्रभावः परिमीयते ॥
विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन् ।
शिशुपालो गतस्तत्त्वं किं पुनस्तत्परायणः ॥
अयं देवो मुनिर्वन्द्य एष ब्रह्मा बृहस्पतिः ।
इत्याख्या जायते तावद्यावन्नार्चयते हरिम् ॥"
इति गारुडे विष्णुमाहात्म्यं २३५ अध्यायः ॥
तस्य पादोदकपानादिफलम् ।
"हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोऽच्युतः ॥
नैवेद्यमन्नं तुलसीविमिश्रं
विशेषतः पादजलं पिवेच्च ।
योऽश्नाति नित्यं पुरतो मुरारेः
प्राप्नोति सुप्रेमयुतां स भक्तिम् ॥
हत्यां हन्ति यदङ्घ्रिसङ्गतुलसी स्तेयञ्च पादोदकं
नैवेद्यं बहुमद्यपानदुरितं गुर्व्वङ्गनासङ्गमम् ॥"
इति पाद्मोत्तरखण्डे १० अध्यायः ॥ * ॥
तस्य नाम्नां व्युत्पत्तयो यथा,—
पृथिव्युवाच ।
"जातेषु शेषो भवसि तस्माच्छेषोऽसि कीर्त्तितः ॥
यस्तोत्पत्तियुक्तेषु ब्रह्मेन्द्रवरुणादिषु ।
यस्मान्न च्यवसे स्थानात्तस्मात् कीर्त्त्यसेऽच्युतः ॥
ब्रह्माणमिन्द्रं रुद्रञ्च यमं वरुणमेव च ।
निगृह्य हरसे यस्मात्तस्माद्धरिरिहोच्यसे ॥
सम्मानयसि भूतानि वपुषा यशसा श्रिया ।
चिरेण वपुषा देव तस्मात्त्वासि सनातनः ॥
यस्माद्ब्रह्मादयो देवा मुनयश्चोग्रतेजसः ।
न तेऽन्तं त्वधिगच्छन्ति तेनानन्तस्त्वमुच्यसे ॥
न क्षीयसे न क्षरसे कल्पकोटिशतैरपि ।
तस्मात्त्वमक्षरत्वाच्च विष्णुर्वेति प्रकीर्त्त्यसे ॥
विष्टब्धञ्च त्वया सर्व्वं जगत् स्थावरजङ्गमम् ।
जगद्विष्टम्भनाच्चैव विष्णुर्वेति प्रकीर्त्त्यसे ॥
विष्टभ्य तिष्ठसे नित्यं त्रैलोक्यं सचराचरम् ॥
यक्षगन्धर्व्वनरं समहद्भूतपन्नगम् ।
व्याप्य त्वामेव विशवे त्रैलोक्यं सचराचरम् ।
तस्माद्विष्णुरिति प्रोक्तः स्वयमेव स्वयम्भुवा ॥
नारा इत्युच्यते आपः ऋषिभिस्तत्त्वदर्शिभिः ।
अयनं तस्य तत्पूर्व्वं तेन नारायणः स्मृतः ॥
युगे युगे प्रनष्टां गां विष्णो विन्दसि तत्त्वतः ।
गोविन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा ॥
हृषीकाणीन्द्रियाण्याहुस्तत्त्वज्ञानविशारदाः ।
ईशित्वे वर्त्तसे तेषां हृषीकेशस्तथोच्यसे ॥
वसन्ति त्वयि भूतानि ब्रह्मादीनि युगक्षये ।
त्वं वा वससि भूतेषु वासुदेवस्तदुच्यसे ॥
सङ्कर्षयसि भूतानि कल्पे कल्पे पुनः पुनः ।
ततः सङ्कर्षणः प्रोक्तस्तत्त्वज्ञानविशारदैः ॥
प्रव्यूहेन न तिष्ठन्ति सदेवासुरराक्षसाः ।
प्रतिद्युः सर्व्वधर्म्माणां प्रद्युम्नस्तेन चोच्यते ॥
निरोधो विद्यते यस्मान्न ते भूतेषु कश्चन ।
अनिरुद्धस्ततः प्रोक्तः पूर्व्वमेव महर्षिभिः ॥"
इति मात्स्ये २२२ अध्यायः ॥ * ॥

विष्णुलोकगमनकारणं यथा,—
"कर्म्मभोगी सकामः स्यान्निष्कामो निरुपद्रवः ।
स याति देहं त्यक्त्वा च पदं विष्णोर्निरामयम् ।
पुनरागमनं नास्ति तेषां निष्कामिणां सति ॥
ये सेवन्ते च द्विभुजं कृष्णमात्मानमेव च ।
गोलोकं ते नरा यान्ति दिव्यरूपविधारिणः ॥
ये च नारायणं भक्त्या सेवन्ते च चतुर्भुजम् ।
वैकुण्ठं यान्ति ते सर्व्वे दिव्यरूपविधारिणः ॥
सकामिनो वैष्णवाश्च गत्वा वैकुण्ठमेव च ।
भारतं पुनरायान्ति तेषां जन्म द्विजातिषु ॥
कालेन ते च निष्कामा भवन्त्येव क्रमेण च ।
भक्तिञ्च निर्म्मलां बुद्धिं तेभ्यो दास्यति निश्चितम् ॥
हरिभक्ताश्च निष्कामाः स्वधर्म्मरहिता द्विजाः ।
तेऽपि यान्ति हरेर्लोकं क्रमाद्भक्तिबलादहो ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥

विष्णुऋक्षं, क्ली, (विष्णुधिदेवताकं ऋक्षम् ।) श्रवणानक्षत्रम् । यथा,—
"उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम् ।
एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयः ॥"
इति तिथ्यादितत्त्वम् ॥

विष्णुकन्दः, पुं, (विष्णुप्रियः कन्दः ।) मूलविशेषः । तत्पर्य्यायः । विष्णुगुप्तः २ सुपुटः ३ बहुसंपुटः ४ जलवासः ५ बृहत्कन्दः ६ दीर्घपत्रः ७ हरिप्रियः ८ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । पित्तदाहशोषहरत्वम् । रुच्यत्वम् । सन्तर्पणकारित्वञ्च । इति राजनिर्घण्टः ॥

विष्णुक्रान्ता, स्त्री, अपराजिता । इत्यमरः ॥ अपराजिताया अन्या क्षुपजातिः । तत्पर्य्यायः । हरिक्रान्ता २ नीलपुष्पा ३ अपराजिता ४ नीलक्रान्ता ५ सुनीला ६ विक्रान्ता ७ छर्द्दिका ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कफवातामयविषदोषनाशित्वम् । मेधाकारित्वम् । पावनित्वम् । शुभदत्वञ्च । इति राजनिर्घण्टः ॥

विष्णुगुप्तः, पुं, (विष्णुना गुप्तः ।) वात्स्यायनमुनिः । यथा,—
"विष्णुगुप्तस्तु कौटिल्यश्चाणक्यो द्रोमिलोऽङ्गुलः ।
वात्स्यायनो मल्लनागः पक्षिलस्वामिनावपि ॥"
इति त्रिकाण्डशेषः ॥
विष्णुकन्दः । इति राजनिर्घण्टः ॥

विष्णुगुप्तकं, क्ली, चाणक्यमूलकम् । इति राजनिर्घण्टः ॥

विष्णुगृहं, क्ली, (विष्णवे प्रतिष्ठितं गृहम् ।) विष्णुमन्दिरम् । तम्रपुरम् । इति हेमचन्द्रः ॥
विष्णुगृहकरणफलं यथा,—
"अष्टेष्टकासमायुक्तं यः कुर्य्याद्वैष्णवं गृहम् ।
न तस्य फलसम्पत्तिर्वक्तुं शक्येत केनचित् ॥"
इति हरिभक्तिविलासे । २० । १४ ॥
"यस्तु देवालयं विष्णोः शुभं दारुमयं कृतम् ।
कारयेन्मृण्मयं वापि शृणु तस्य फलं मुने ॥
अहन्यहनि योगेन यजतो यन्महाफलम् ।
प्राप्नोति तत् फलं विष्णोर्यः कारयति मन्दिरम् ॥
कुलानां शतमागामि समतीतं तथा शतम् ।
कारयेद्भगवद्धाम नयत्यच्युतलोकताम् ॥
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ।
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ॥
सप्तलोकमयो विष्णुर्यस्तस्य कुरुते गृहम् ।
प्रतिष्ठां समवाप्नोति स नरः साप्तलौकिकीम् ॥
प्रशस्तदेशे भूभागे प्रशस्तं भवनं हरेः ।
कारयत्यखिलान् लोकान् स नरः प्रतिपद्यते ॥
इष्टकानाञ्च विन्यासो यावद्वर्षाणि तिष्ठति ।
तावद्वर्षसहस्राणि तत्कर्त्ता दिवि संस्थितः ॥
चिकीर्षोरपि कृष्णस्य मन्दिरं पुण्यकारिणः ।
नरस्य क्षयमायाति पापं जन्मशतोद्भवम् ॥
ये ध्यायन्ति सदा कृत्वा करिष्यामि हरेर्गृहम् ।
तेषां विलीयते पापं पूर्व्वजन्मशतोद्भवम् ॥
येऽनुमोदन्ति कृष्णस्य क्रियमाणं हरेर्गृहम् ।
तेऽपि पापविनिर्म्मुक्ता वैष्णवं लोकमाप्नुयुः ॥
कनिष्ठं मध्यमं श्रेष्ठं कारयित्वा हरेर्गृहम् ।
स्वर्गञ्च वैष्णवं लोकं मोक्षञ्च लभते क्रमात् ॥
समतीतं भविष्यञ्च कुलानामयुतं नरः ।
विष्णुलोकं नयत्याशु कारयित्वा हरेर्गृहम् ॥
दुष्प्राप्यं यत् फलं विप्रा वाजिमेधादिभिर्म्मखैः ।
प्राप्यते तत् सुखेनैव निवेश्य भवनं हरेः ॥
ये हताभिमुखाः शूरा गोविप्रार्थे रणाजिरे ।
स तत्फलमवाप्नोति कारयित्वा हरेर्गृहम् ॥
पक्वेष्टरचितं रम्यं पञ्चप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम धूतपापो व्रजेद्दिवम् ॥
लक्षेणार्द्धसहस्रेण शतेनार्द्धेन वा हरेः ।
तुल्यं फलं समाख्यातं तदीश्वरदरिद्रयोः ॥
पतितं पतमानन्तु तथार्द्धपतितं तथा ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥"
इति वह्निपुराणे वैष्णवक्रियायोगे यमानुशासननामाध्यायः ॥

विष्णुचक्रं, क्ली, (विष्णोश्चक्रमिव ।) हस्तस्थरेखामयचक्रविशेषः । यथा,—
"विष्णुचक्रं करे चिह्नं सर्व्वेषां चक्रवर्त्तिनाम् ।
भवत्यव्याहतो यस्य प्रभावस्त्रिदशैरपि ॥"
इति विष्णुपुराणे १ अंशे १३ अध्यायः ॥
रेखाक्षरानाकुलं रेखामयचक्रम् । इति तट्टीका ॥
सुदर्शनचक्रञ्च ॥

विष्णुतैलं, क्ली, (विष्णुनामकं तैलम् ।) अश्विनीकुमारकृतपक्वतैलविशेषः । यथा,—
"स्नानीयं विष्णुतैलञ्च स्वर्व्वैद्येन विनिर्म्मितम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १३ अध्यायः ॥ * ॥
अथ स्वल्पविष्णुतैलम् ।
"शालपर्णीपृश्निपर्णीबलागोरक्षतण्डुलाः ।
एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च ॥
शतावरी सहचरं पचेदेतैः पलोन्मितैः ।
तैलप्रस्थं पयो दत्त्वा गव्यं वाजं चतुर्गुणम् ॥
अस्य तैलस्य पक्वस्य शृणु वीर्य्यमतः परम् ।
वातार्त्ता नरनागाश्च पीत्वा दृढतनुत्वचः ॥
हृत्पार्श्वशूले वातासे गलगण्डेऽर्द्दिते क्षये ।
शर्कराश्मरिपाण्डुत्वकामलार्द्धावभेदके ॥

क्षीणेन्द्रियेऽल्पशुक्रे च जराजर्ज्जरिते हितम्।
स्त्रीणामप्रजसां चैव गर्भस्थितिकरं परम्।
एतदङ्गवरं तैलं विष्णुना परिकीर्त्तितम्॥"
सङ्कुलः गोरक्षतण्डुलः। हस्त्योष्ठैस्तीकण्टकार्य्यौ। पूतिको नाटाकरञ्जः। सहचरो झिण्टी। अत्र क्वाथान्तराभावात् क्षीरस्य चतुर्गुणं जलं कश्चिद्ददाति।
"स्वरसक्षीरमाङ्गल्यैः पाको यत्रेरितः क्वचित्।
जलं चतुर्गुणं तत्र वीर्य्याधानार्थमारपेत्॥"
इति परिभाषावचनात्।
क्वचिदिति पाठात् क्वाथान्तररहिते केवलक्षीरादिसहिततैलादिपाके ज्ञातव्यं न तु सर्व्वत्र।
"एलाचन्दनकुङ्कुमागुरुसुराकक्कोलमांसीशटी-
शैलाख्यन्दयग्रन्थिपर्णशशश्चनृपश्चौचीच्ययोशी-
रकम्।
कस्तूरिनखपूतिशैलजलमुक्मेषीलवङ्गादिकं
गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु॥"
अथ दृहद्विष्णुतैलम्।
"जलधरमश्वगन्धाजीवकर्षभकौ शटी।
काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका।
मधूरिका देवदारु पद्मकाष्ठञ्च सैन्धवम्।
मांसी चैला त्वचं कुष्ठं रक्तचन्दनशैलजम्।
मञ्जिष्ठा मृगनाभिश्च श्वेतचन्दनकुङ्कुमम्।
चर्मी कुन्दुरु खोटिश्च ग्रन्थिकञ्च नखी तथा।
एतेषां पलिकैर्भागैस्तैलस्यापि तथाढकम्।
शतावरीरससमं दुग्धञ्चापि समं भवेत्॥
विष्णुतैलवरं श्रेष्ठं सर्व्ववातविकारनुत्।
ऊर्द्ध्ववाते ह्यधोवाते अङ्गविग्रह एव च।
शिरोमध्यगता ये च मन्या स्तम्भे गलग्रहे।
यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विक्लवा।
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः।
सर्व्वांस्तान्नाशयत्याशु सूर्य्यस्तम इवोदितः॥"
इति भैषज्यरत्नावली।

विष्णुदैवतं, } त्रि, (विष्णुर्द्दैवतं दैवत्यं वा यस्य।)
विष्णुदैवत्यं, } विष्ण्वधिष्ठातृदेवताकम्। यथा,—
"व्रतोपकरणं सर्व्वं कथितं सर्व्वदैवतम्।
यद्यत्तु सर्व्वदैवत्यं यदुक्तं द्विजोत्तमाः।
तज्ज्ञेयं विष्णुदैवत्यं सर्व्वं वा विष्णुदैवतम्॥"
इति शुद्धितत्त्वे विष्णुधर्म्मोत्तरवचनम्।
क्ली, श्रवणानक्षत्रम्। इति ज्योतिषम्।

विष्णुदैवत्या, स्त्री, (विष्णुर्द्दैवत्यमस्याः।) एकादशीतिथिः। द्वादशीतिथिः। यथा,—
"एकादशी द्वादशी च प्रोक्ता श्रीचक्रपाणिनः।
त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्द्दशी॥"
इति स्मृतिः।
"एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्।
न चात्र विधिलोपः स्यादुभयोर्द्दैवता हरिः॥"
इति तिथ्यादितत्त्वम्।

विष्णुधर्म्मः, पुं, (विष्णुप्रधानो धर्म्मोऽस्मिन्।) शास्त्रविशेषः। यथा। "ब्रह्मचारिकाण्डे भविष्यपुराणम्।
'अष्टादश पुराणानि रामस्य चरितं तथा।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत।
कार्ष्णश्च पञ्चमो वेदो यन्महाभारतं स्मृतम्।
सौराश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते।
जयेति नाम एतेषां प्रवदन्ति मनीषिणः॥'
जयत्यनेन संसारमिति जयस्तत्तद्ग्रन्थः॥" इति तिथ्यादितत्त्वम्॥*॥ विद्याविशेषः। यथा,—
"अवाप जम्भा चेन्द्रत्वं विष्णुधर्म्माख्यविद्यया।
सर्व्वान् शत्रून् विनिर्जित्य तान्त्र वक्ष्ये महेश्वर।
पादयोर्जानुनोरूर्व्वोरुदरे हृदयोरसि।
मुखे शिरस्यानुपूर्व्व्यादोङ्काराद्दिं विनिर्द्दिशेत्।
ॐ नमो नारायणायेति विपर्य्ययमथापि वा।
करन्यासं ततः कुर्य्यात् द्वादशाक्षरविद्यया।
प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्व्वसु।
न्यसेत् हृदय ॐकारं नकारं मम मूर्द्धनि।
मोकारन्तु भ्रुवोर्म्मध्ये शिखानेत्रादिमूर्द्धतः।
ॐ विष्णवे नम इति इमं मन्त्रमुदाहरेत्।
आत्मानं परमं ध्यायेच्छेषषट्शक्तिभिर्युतम्।
मम रक्षां ततः कुर्य्यान्मत्स्यमूर्त्तिर्जलेऽवतु।
त्रिविक्रमस्तथाकाशे स्थले रक्षतु वामनः।
अटव्यां नरसिंहस्तु रामो रक्षतु पर्व्वते।
भूमौ रक्षतु वाराहो हंसो नारायणोऽवतु।
कर्म्मबन्धाच्च कापिल्यदत्तो योगान्तु रक्षतु।
हयग्रीवो देवतायाः कुमारो मकरध्वजात्।
नारदोऽप्यार्च्चनात् पायात् कूर्म्मो वै नैर्ऋतेः
सदा।
धन्वन्तरिरपथ्याच्च नागः क्रोधवशात् किल।
यज्ञलोकाहवः कालाद्व्यासो ज्ञानाच्च रक्षतु।
बुद्धः पाषण्डसंघातात् कल्किरव्यात् कलेः समम्।
पायान्मध्यं दिने विष्णुः प्रातर्नारायणोऽवतु।
मधुहा चापराह्णे च सायं रक्षतु माधवः।
हृषीकेशः प्रदोषेऽव्यात् प्रत्यूषेऽव्याज्जनार्द्दनः।
श्रीधरोऽव्यादर्द्धरात्रे पद्मनाभो निशान्तके।
चक्रकौमोदकीबाणाः घ्नन्तु शत्रूंश्च राक्षसान्।
शङ्खशब्दश्च शत्रुभ्यः शार्ङ्गो वै गरुडस्तथा।
बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः।
शेषैः सर्व्वैर्मुदायन्नः सदा सर्व्वत्र पान्तु माम्।
विदिक्षु दिक्षु च सदा नरसिंहश्च रक्षतु।
एतद्धारयमाणश्च यं यं पश्यति चक्षुषा।
स वशी स्याद्विपाप्मा च रोगान्मुक्तो दिवं
व्रजेत्॥"
इति गारुडे २०१ अध्यायः।

विष्णुधर्म्मोत्तरं, क्ली, संहिताविशेषः। तत्र प्रश्नकर्त्ता जनमेजयसुतः। वक्तारः शौनकाद्या ऋषयः। तत्र १०० इत्यन्तास्तद्ग्रन्थे द्रष्टव्याः।

विष्णुपञ्जरं, क्ली, (विष्णुरेव पञ्जरमिव यस्मिन्। तद्धारयितुर्निर्भयरक्षकारित्वादस्य तथात्वम्।) विष्णुकवचविशेषः। यथा,—
"प्रवक्ष्याम्यधुना त्वेतद्वैष्णवं पञ्जरं शुभम्।
नमो नमस्ते गोविन्द चक्रं गृह्य सुदर्शनम्।
प्राच्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः।
गदां कौमोदकीं गृह्य पद्मनाभामितद्युते।
याम्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः।
हलमादाय सौनन्दं नमस्ते पुरुषोत्तम।
प्रतीच्यां रक्ष मां विष्णो भवन्तं शरणागतम्।
पाञ्चजन्यं तथा शङ्खं शार्ङ्गञ्चाप्यथ पङ्कजम्।
प्रगृह्य रक्ष मां विष्णो आग्नेय्यां यज्ञसूकर।
चर्म्म सूर्य्यशतं गृह्य खड्गं चन्द्रसमं तथा।
नैर्ऋत्यां माञ्च रक्षस्व दिव्यमूर्त्ते नृकेशरिन्।
वैजयन्तीं प्रगृह्य त्वं श्रीवत्सकण्ठभूषण।
वायव्यां रक्ष मां देव अश्वशीर्ष नमोऽस्तु ते।
वैनतेयं समारुह्य अन्तरीक्षे जनार्द्दन।
मां त्वं रक्षाजित सदा नमस्तेऽस्त्वपराजित।
विशालाक्षं समारुह्य रक्ष मां त्वं रसातले।
अकूपार नमस्तुभ्यं महामीन नमोऽस्तु ते।
करशीर्षाङ्घ्रिसर्व्वेषु तथाष्टभुजपञ्जरम्।
कृत्वा त्वं रक्ष मां देव नमस्ते पुरुषोत्तम।
एतदुक्तं भगवता वैष्णवं पञ्जरं महत्।
पुरा रक्षार्थमीशेन कात्यायन्या द्विजोत्तम।
यदा सा नाशयामास दानवं महिषासुरम्।
चामरं रक्तवीजञ्च तथान्यान् सुरकण्टकान्॥"
इति वामने १७ अध्यायः।

विष्णुपदं, क्ली, (विष्णोः पदम्।) आकाशम्। इत्यमरः। (यथा, रघुवंशे। १६। २८।
"वसुन्धराविष्णुपदं द्वितीय-
मध्यारुरोहेव रजश्छलेन॥")
क्षीरोदः। इति मेदिनी। पद्मम्। इति हेमचन्द्रः। (तीर्थविशेषः। यथा, महाभारते। ७। ८३। ६५।
"तत्र विष्णुपदे स्नात्वा अर्च्चयित्वा च वामनम्।
सर्व्वपापविशुद्धात्मा विष्णुलोकं स गच्छति॥"
कैलासपर्व्वतस्य स्थानविशेषः। यथा, महाभारते। ५। १११। २२।
"अत्र विष्णुपदं नाम क्रमता विष्णुना कृतम्॥"
पर्व्वतविशेषः। यथा, हरिवंशे। ३१। ४२।
"तेन चिचरयेनाथ तदा विष्णुपदे गिरौ॥")
विष्णोः स्थानम्। यथा,
"अपुण्यपुण्योपरमे क्षीणाशेषाप्तिहेतवः।
यत्र गत्वा न शोचन्ति तद्विष्णोः परमं पदम्।
धर्म्मध्रुवाद्यास्तिष्ठन्ति यत्र ते लोकसाक्षिणः।
तत्साष्ट्योत्पन्नयोगेद्धास्तद्विष्णोः परमं पदम्।
यत्रैतदोतं प्रोतं च यद्भूतं सचराचरम्।
भाव्यञ्च विश्वं मैत्रेय तद्विष्णोः परमं पदम्।
दिवीव चक्षुराततं विततं तन्महात्मनाम्।
विवेकज्ञानदृष्टञ्च तद्धि विष्णोः परं पदम्॥"
इति विष्णुपुराणे २ अंशे ८ अध्यायः।
भ्रूमध्यम्। यथा,—
"अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च।
आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम्।
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्म्मातृमण्डलम्॥"
इति काशीखण्डे ४२ अध्याये १३।१४ श्लोकौ।

विष्णुपदी, स्त्री, (विष्णोः पदं स्थानं यस्याः। गौरादित्वात् ङीष्।) गङ्गा। इत्यमरः। (यथा, भागवते। १। १६। ७।

"इति व्यवच्छिद्य स पाण्डवेयः
प्रायोपवेशं प्रति विष्णुपद्याम् ।
दध्यौ मुकुन्दाङ्घ्रिमनन्यभावो
मुनिव्रतो मुक्तसमस्तसङ्गः ॥")
अस्याः कारणं यथा,—
नारद उवाच ।
"कलेः पञ्चसहस्राब्दे समतीते सुरेश्वरी ।
क्व गता सा महाभाग तन्मे व्याख्यातुमर्हसि ॥
नारायण उवाच ।
गङ्गा सरस्वती लक्ष्मीश्चैतास्तिस्रो हरेः प्रियाः ।
तुलसीसहिता ब्रह्मन् चतस्रः कीर्त्तिताः श्रुतौ ॥
नारद उवाच ।
बभूव सा मुनिश्रेष्ठ गङ्गा नारायणप्रिया ।
अहो केन प्रकारेण तन्मे व्याख्यातुमर्हसि ॥
नारायण उवाच ।
पुरा बभूव गोलोके गङ्गा सा द्रवरूपिणी ।
राधाकृष्णाङ्गसंभूता तदंशा तत्स्वरूपिणी ॥
द्रवाधिष्ठातृदेवी सा रूपेणाप्रतिमा भुवि ।
सा सकामा कृष्णपार्श्वे समुवास सलज्जिता ॥
प्रफुल्लवदना हर्षान्नवसङ्गमलालसा ।
मूर्च्छिता प्रभुरूपेण पुलकाङ्कितविग्रहा ॥
एतस्मिन्नन्तरे तत्र विद्यमाना च राधिका ।
गोपीभिस्त्रिंशत्कोटिस्रुता कोटिचन्द्रसमप्रभा ॥
कोपेन रक्तपद्मास्या रक्तपङ्कजलोचना ।
सुधाधरागसंयुक्तमोष्ठं कम्पयती रुषा ॥
तां च दृष्ट्वा समुत्तस्थौ कृष्णः सादरपूर्व्वकम् ।
उत्थाय गङ्गा सहसा सम्भाषां च चकार सा ॥
कुशलं परिपप्रच्छ भीतातिविनयेन च ।
ध्यानेन शरणापन्ना श्रीकृष्णचरणाम्बुजे ॥
तद्धृत्पद्मस्थितो विष्णुर्भीतायै चाभयं ददौ ।
बभूव स्थिरचित्ता सा सर्व्वेश्वरवरेण च ॥
ऊर्द्ध्वं सिंहासनस्थां च राधां गङ्गा ददर्श सा ।
एतस्मिन्नन्तरे राधा जगदीशमुवाच सा ॥
केयं प्राणेश कल्याणी सस्मिता त्वन्मुखाम्बुजम् ।
पश्यन्ती सस्मितं पार्श्वे सकामा वक्रलोचना ॥
त्वञ्चापीमां सन्निरीक्ष्य सकामः सस्मितः सदा ।
मयि जीवति गोलोके भूता दुर्वृत्तिरीदृशी ॥
त्वमेवैवञ्च दुर्वृत्तं वारंवारं करोषि च ।
क्षमां करोमि प्रेम्णा च स्त्रीजातिः स्निग्ध-
मानसा ॥
संगृह्येमां प्रियामिष्टां गोलोकाद्गच्छ लम्पट ।
अन्यथा न हि ते भद्रं भविष्यति व्रजेश्वर ॥
इत्येवमुक्त्वा सा राधा रक्तपङ्कजलोचना ।
गङ्गां वक्तुं समारेभे नम्रास्यां लज्जितां सतीम् ।
गङ्गा रहस्यं विज्ञाय योगेन सिद्धयोगिनी ।
तिरोभूय सभामध्यात् स्वजलं प्रविवेश सा ॥
राधा योगेन विज्ञाय सर्व्वत्रावस्थिताञ्च ताम् ।
पानं कर्त्तुं समारेभे गण्डूषात् सिद्धयोगिनी ॥
गङ्गा रहस्यं विज्ञाय योगेन सिद्धयोगिनी ।
श्रीकृष्णचरणाम्भोजं विवेश शरणं ययौ ॥
गोलोकञ्चैव वैकुण्ठं ब्रह्मलोकादिकं तथा ।
ददर्श राधा सर्व्वत्र नैव गङ्गां ददर्श सा ॥
ब्रह्मविष्णुशिवानन्तधर्म्मेन्द्रेन्दुदिवाकराः ।
मनवो मुनयः सर्व्वे देवाः सिद्धास्तपस्विनः ॥
गोलोकञ्च समाजग्मुः शुष्ककण्ठोष्ठतालुकाः ।
सर्व्वे प्रणेमुर्गोविन्दं सर्व्वेशं प्रकृतेः परम् ।
विज्ञाय तदभिप्रायं तानुवाच सुरेश्वरः ॥
श्रीभगवानुवाच ।
आगताः सुमहाभागा गङ्गानयनकारणात् ।
गङ्गा मच्चरणाम्भोजे भयेन शरणं गता ॥
राधेमां पातुमिच्छन्ती दृष्ट्वा मां सन्निधानतः ।
दास्यामीमां बहिष्कृत्य यूयं कुरुत निर्भयाम् ॥
श्रीकृष्णस्य वचः श्रुत्वा सस्मितः कमलोद्भवः ।
तुष्टाव सर्व्वाराध्यां तां राधां श्रीकृष्णपूजिताम् ॥
वक्त्रैश्चतुर्भिः संस्तूय भक्तिनम्रात्मकन्धरः ।
धाता चतुर्णां वेदानामुवाच चतुराननः ॥
गङ्गा त्वदङ्गसंभूता प्रभोश्च रासमण्डले ।
युवयोर्द्रवरूपा सा मुग्धयोः शङ्करस्वरात् ॥
कृष्णांशा च त्वदंशा च त्वत्कन्यासदृशी प्रिया ।
त्वन्मन्त्रग्रहणं कृत्वा करोतु पूजनं तव ॥
भविष्यति पतिस्तस्या वैकुण्ठेशश्चतुर्भुजः ।
ब्रह्मणो वचनं श्रुत्वा स्वीचकार च सस्मिता ॥
बहिर्बभूव सा कृष्णपादाङ्गुष्ठनखाग्रतः ।
तत्रैव संवृता शान्ता तस्थौ तेषाञ्च मध्यतः ॥
उवास तोयादुत्थाय तदधिष्ठातृदेवता ।
तत्तोयं ब्रह्मणा किञ्चित् स्थापितञ्च कमण्डलौ ॥
किञ्चिद्दधार शिरसि चन्द्रार्द्धं चन्द्रशेखरः ।
गङ्गायै राधिकामन्त्रं प्रददौ कमलोद्भवः ॥
गङ्गा तामेव संपूज्य वैकुण्ठं प्रययौ सती ।
गोलोके च स्थिता गङ्गा वैकुण्ठे शिवलोकके ॥
ब्रह्मलोके तथान्यत्र यत्र तत्र पुरा स्थिता ।
तत्रैव सा गता गङ्गा चाज्ञया परमात्मनः ॥
निर्गता विष्णुपादाब्जात् तेन विष्णुपदी स्मृता ॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे गङ्गोपाख्यानं ६ अध्यायः ॥*॥ वृषवृश्चिकसिंहकुम्भसंक्रान्तयः ।
यथा, भविष्यमात्स्यज्योतिषेषु ।
"धनुर्मिथुनकन्यासु मीने च षडशीतयः ।
वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता ॥"
अपि च ।
"एवञ्च षडशीत्यादिष्वर्कांशमलभमानम् ।
अर्व्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च षोडश ।
कालः पुण्योऽर्कसंक्रान्तेर्विद्वद्भिः परिकीर्त्तितः ॥"
इति शातातपीयं दिवा विष्णुपदीविषयम् ॥
अतएव जावालीदृहद्वशिष्ठौ ।
"पुण्यायां विष्णुपद्याञ्च प्राक् पश्चादपि षोडश ।"
तत्र स्नानादिफलम् ।
"अयने कोटिगुणितं लक्षं विष्णुपदीषु च ।
षडशीतिसहस्रन्तु षडशीत्यामुदाहृतम् ॥"
इति तिथ्यादितत्त्वम् ॥
विष्णुपदीचक्रं, क्ली, (विष्णुपद्याश्चक्रम् ।) ज्यैष्ठाग्रहायणभाद्रफाल्गुनमासीयरविसंक्रमकालीननक्षत्रविन्यासाङ्कशुभाशुभफलज्ञापकनराकारचक्रम् । यथा,—
"त्र्यर्क्षे संक्रमणं यत्र विष्णुपद्यां सखे तु तत् ।
चत्वारि दक्षिणे बाहौ त्रीणि त्रीणि पदद्वये ॥
चत्वारि वामबाहौ च हृदये पञ्च निर्द्दिशेत् ।
अस्योर्द्ध्वं द्वयं योज्यं मूर्द्ध्नि द्वौ चैककं गुदे ॥"
फलं यथा,—
"रोगो भोगस्तथा यानं बन्धनं लाभ एव च ।
ऐश्वर्यं राजपूजा च अपमृत्युरिति क्रमात् ॥"
इति ज्योतिस्तत्त्वम् ॥
विष्णुभक्तिः, स्त्री, (विष्णौ भक्तिः ।) भगवत्सेवा । यथा,—
सूत उवाच ।
"विष्णुभक्तिं प्रवक्ष्यामि यया सर्व्वमवाप्यते ।
यथा भक्त्या हरिस्तुष्येत्तथा नान्येन केनचित् ॥
महतः श्रेयसो मूलं प्रवसः पुण्यसन्ततेः ।
जीवितस्य फलं स्वादु दद्याति स्मरणं हरेः ॥
भज इत्येष वै धातुः सेवायां परिकीर्त्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी ॥
ते भक्ता लोकनाथस्य नामकर्म्मादिकीर्त्तने ।
मुञ्चन्त्यश्रूणि संहर्षात् ये च हृष्टतनूरुहाः ॥
जगद्धातुर्म्महेशस्य दियाद्या चरणाश्रयाः ।
इह नित्यक्रियाः कुर्य्युः स्निग्धा ये वैष्णवास्तु ते ॥
प्रणामपूर्व्वकं क्षान्त्या यो वदेद्वैष्णवो हि सः ।
तद्भक्तजनवात्सल्यम्पूजायाञ्चानुमोदनम् ।
तत्कथाश्रवणे प्रीतिः स्मरणेनाङ्गविक्रिया ॥
येन सर्व्वात्मना विष्णौ भक्त्या भावो निवेशितः ।
विप्रेभ्योऽपीश्वरदक्षिञ्च महाभागवतो हि सः ॥
विष्णोश्च कारणं नित्यं तदग्नं दम्भवर्जितम् ।
स्वयमभ्यर्चनञ्चैव यो विष्णुं चोपजीवति ॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ।
स विप्रेन्द्रो मुनिः श्रीमान् सजातः स च पण्डितः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा हरिः ॥
स्मृतः संभाषितोऽप्यापि पूजितो वा द्विजोत्तमः ।
पुनाति भगवद्भक्तश्चण्डालोऽपि यदृच्छया ॥
प्रणताय प्रपन्नाय तवास्मीति च यो वदेत् ।
अभयं सर्व्वभूतेभ्यो दद्यादेतद्व्रतं हरेः ॥
मन्त्रयाजिसहस्रेभ्यः सर्व्ववेदान्तपारगाः ।
सर्व्ववेदान्तवित् कोट्या विष्णुभक्तो विशिष्यते ।
ऐकान्तिकाश्च पुरुषा गच्छन्ति परमं पदम् ॥
एकान्तिनासमो विष्णुर्यस्मादेषां परायणः ।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥
प्रियाणामपि सर्व्वेषां देवदेवस्य सुप्रियः ।
आपत्स्वपि सदा यस्य भक्तिरव्यभिचारिणी ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
विष्णुं संस्मरतः सा मे हृदयान्मोपसर्पतु ॥
अन्तर्गतोऽपि वेदानां सर्व्वशास्त्रार्थवेद्यपि ।
यो न सर्व्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् ॥
नाधीतवेदशास्त्रोऽपि न कृताध्वरसंस्तरः ।
यो भक्तिं वहते विष्णौ तेन सर्व्वं कृतं भवेत् ॥
यज्ञानां क्रतुमुख्यानां सर्व्वेषां पारगा अपि ।
न तां यान्ति गतिं भक्त्या यां यान्ति मुनिसत्तम ॥
यः कश्चिद्वैष्णवो लोके मिथ्याचारोऽप्यनाश्रमी ।
पुनाति सकलान् लोकान् सहस्रांशुरिवोदितः ॥
ये नृशंसा दुरात्मानः पापाचाररतास्तथा ।

तेऽपि यान्ति परं स्थानं नारायणपरायणाः ।
दृढा जनार्द्दने भक्तिर्यद्येवाव्यभिचारिणी ।
तदा कियत् स्वर्गसुखं सैव निर्व्वाणहेतुकी ।
भ्राम्यतां तत्र संसारे नराणां कर्म्मदुर्गमे ।
हस्तावलम्बनो ह्येको भक्तितुष्टो जनार्द्दनः ।
न शृणोति गुणान् दिव्यान् देवदेवस्य चक्रिणः ।
स नरो बधिरो ज्ञेयः सर्व्वधर्म्मबहिष्कृतः ।
नाम्नि संकीर्त्तिते विष्णोर्यस्य पुंसो न जायते ।
शरीरं पुलकोल्लासि तद्भवेत् कुणपोपमम् ।
यस्मिन् स्तुते द्विजश्रेष्ठ मुक्तिरप्यचिराद्भवेत् ।
विष्णौ निविष्टमनसां किं पुनर्वृजिनक्षयः ।

स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ।

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ।
क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं नियच्छति ।
विप्रेन्द्र प्रतिजानीहि विष्णुभक्तो न नश्यति ।
धर्म्मार्थकामैः किन्तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा हरौ ।
दैवी ह्येषा गुणमयी हरेर्म्मायां दुरत्यया ।
तमेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।
कियदाराधने पुंसामिष्यते हरिमेधसः ।
भक्त्यैवाराध्यते विष्णुर्नान्यत्तत्तोषकारणम् ।
न दानैर्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्द्दनः ।
संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
कदाचित् केशवे भक्तिस्तद्भक्तैर्व्वा समागमः ।

पत्रेषु पुष्पेषु फलेषु तोये-
ष्वक्रयलभ्येषु सदैव सत्सु ।
भक्त्येकलभ्ये पुरुषे पुराणे
मुक्त्यै कथं न क्रियते प्रयत्नः ।

आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
वैष्णवोऽस्मत्कुले जातः स नः सन्तारयिष्यति ।

अज्ञानिनः सुरवरं समधिक्षिपन्ति
ये पापिनोऽपि शिशुपालसुयोधनाद्याः ।
मुक्तिं गताः स्मरणमात्रविधूतपापाः
कः संशयः परमभक्तिमतां जनानाम् ।

शरणं तं प्रपन्ना ये ध्यानयोगविवर्ज्जिताः ।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम् ।

भवोद्भवक्लेशशताहतस्तथा
परिभ्रमन्निन्द्रियवञ्चकैः पथैः ।
नियम्यतां माधव मे मनोहय-
स्त्वदङ्घ्रिशङ्कौ दृढभक्तिबन्धने ।

विष्णुरेव परं ब्रह्म त्रिभेदमिह पठ्यते ।
वेदसिद्धान्तमार्गेषु तं न जानन्ति मोहिताः ।

वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः ।
क्षितिरसनमतिरम्यमात्मनोऽन्तः
कथयति चारुतयैव शालपतेः ।”

इति गारुडे २३१ अध्यायः ।

विष्णुमाया, स्त्री, (विष्णोर्माया ।) दुर्गा । यथा,—

नारद उवाच ।

“दुर्गा नारायणीशाना विष्णुमाया शिवा सती ।
नित्या सत्या भगवती सर्व्वाणी सर्व्वमङ्गला ।
अम्बिका वैष्णवी गौरी पार्व्वती च सनातनी ।
नामानि कौथुमोक्तानि शुभानि शुभदानि च ।
अर्थं षोडशनाम्नाञ्च सर्व्वेषामीप्सितं परम् ।
ब्रूहि वेदविदां श्रेष्ठ वेदोक्तं सर्व्वसम्मतम् ।

नारायण उवाच ।

सृष्टा मायां पुरा सृष्टौ विष्णुना परमात्मना ।
मोहितं मायया विश्वं विष्णुमाया च
कीर्त्तिता ।”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ।

अपि च ।

ब्रह्मोवाच ।

‘विष्णुमायान्तते दक्ष महामायां जगन्मयीम् ।
नाम्ना संमोहकर्त्रीं स्यात् सन्ध्या सावित्र्य-
पासिका ।
तस्मादहं विष्णुमायां योगनिद्रां जगत्प्रसूम् ।
स्तौमि सा चारुरूपेण शङ्करं मोहयिष्यति ।
भवांश्च दक्ष तामेव यजतां विश्वरूपिणीम् ।
यथा तव सुता भूत्वा हरजाया भविष्यति ।”

इति कालिकापुराणे ५ अध्यायः ।

विष्णुयशाः, [स्] पुं, (विष्णु व्यापकं यशो यस्य । नारायणपितृत्वादेवास्य तथात्वम् । यद्वा, विष्णुना गृहीतव्यजन्मना यशो यस्य ।) ब्रह्म-यशःपुत्त्रः । स च कल्किपिता । यथा,—

नारद उवाच ।

“अहो बलवती माया सर्व्वाश्चर्य्यमयी शुभा ।
पितरं मातरं विष्णोर्नैव स्पृशति कर्हिचित् ।
पूर्णो नारायणो यस्य सुतः कल्किर्जगत्पतिः ।
तं विहाय विष्णुयशा मत्तो मुक्तिमभीप्सति ।
विविच्येत्यं ब्रह्मसुतः प्राह ब्रह्मयशःसुतम् ।
विविक्ते विष्णुयशसं ब्रह्मसम्पद्विवर्द्धनम् ।”

इति कल्किपुराणे ३० अध्यायः ।

विष्णुरथः, पुं, (विष्णो रथः ।) गरुड़ः । इत्यमरः । विष्णोः स्यन्दनञ्च ।

विष्णुरातः, पुं, (विष्णुना रातो रक्षितः ।) परी-क्षिद्राजः । यथा,—

“दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि ।
रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ।
तस्मान्नाम्ना विष्णुरातो लोके ख्यातिं गमिष्यति ।
न सन्देहो महाभाग महाभागवतो महान् ।”

इति श्रीभागवते ९ स्कन्धे १२ अध्यायः ।

विष्णुलिङ्गी, स्त्री, वर्त्तिकापक्षी । इति त्रिकाण्ड-शेषः ।

विष्णुवल्लभा, स्त्री, (विष्णोर्व्वल्लभा ।) तुलसी । इति राजनिर्घण्टः । लक्ष्मीः । यथा,—

“त्रैलोक्यपूजिते मातः कमले विष्णुवल्लभे ।
यथा त्वमचला कृष्णे तथा भव मयि स्थिरा ।”

इति तन्त्रसारः ।
अग्निशिखाद्रुमः । इति शब्दचन्द्रिका ।

विष्णुवाहनं, क्ली, (विष्णोर्व्वाहनम् ।) गरुड़ः । इति हेमचन्द्रः । २ । १४४ ।

विष्णुवाह्यः, पुं, (विष्णुर्व्वाह्यो येन ।) गरुड़ः । इति शब्दरत्नावली ।

विष्णुशिला, स्त्री, (विष्णुनाधिष्ठिता शिला ।) शालग्रामशिला । कलौ तस्य स्थितिकालो यथा,—

“अयुताब्दे कलेर्याते व्रजेद्विष्णुशिला महीम् ।
तदर्द्धाब्जाह्नवीतोयं तदर्द्धाद्देवताशिला ।”

इति मेरुतन्त्रे ५ प्रकाशः ।

विष्णुशृङ्खलः, पुं, योगविशेषः । यथा, मात्स्ये ।

“द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदा ।
स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः ।
तस्मिन्नुपोष्य विधिवन्नरः सङ्क्षीणकल्मषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ।”

इति ।

विष्णुधर्म्मोत्तरे द्वितीयविष्णुशृङ्खलयोगमाह ।

“एकादशी द्वादशी च वैष्णव्यमपि भं भवेत् ।
तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ।
तस्मिन्नुपोषणाद्गच्छेच्छ्वेतद्वीपपुरं ध्रुवम् ।”

इति श्रीहरिभक्तिविलासे १५ विलासः ।

विष्फारः, पुं, (वि + ष्फुर स्फुरणे + घञ् । “स्फुरति-स्फुलत्योर्घञि ।” ६।१।४७। इत्यात्वम् । “स्फुरति स्फुलत्योर्निर्निविभ्यः ।” ८।३।७६। इति षत्वञ्च ।) धनुर्गुणशब्दः । इत्यमरः । धनुर्गुणस्य स्वान-टङ्कारो विष्फारः । स्फुर शि च स्फुर्त्तौ चले घञस्य दैर्घ्यावोदेति निपातः । किंवा स्फुरधातो रूपं विष्कम्भेत्यादिना पाक्षिकषत्वात् विस्फारो दन्त्यसो मूर्द्धन्यषश्च । इति भरतः ।

विष्यः, त्रि, (विषेण वध्यः । विष + “नौवयो-धर्म्मेति ।” ४ । ४ । ९१ । इति यत् ।) विषेण यो वध्यः । इत्यमरः । (विषेण क्रीतः । विषाय हित इति वा । इत्यर्थे “उगवादिभ्यो यत् ।” ५ । १ । २ । इति यत् ।)

विष्वः, त्रि, हिंस्रः । इत्युणादिकोषः ।

विष्वक्, व्य, परितः । सर्व्वतः । इत्यमरः । (यथा, भागवते । ६ । ९ । १३ ।

“कृतान्त इव लोकानां युगान्तसमये यथा ।
विष्वग्विवर्द्धमानं तमिषुमात्रं दिने दिने ।”)

विष्वक्, क्ली, विषुवम् । इति शब्दरत्नावली । विष्वं अञ्चति इत्यर्थे त्रिलिङ्गम् । (यथा, भाग-वते । १ । ९ । ३४ ।

“युधि तुरगरजोविधूम्रविष्वक्-
कचलुलितश्रमवार्य्यलङ्कृतास्ये ।”)

विष्वक्सेनः, पुं, विष्णुः । इत्यमरः । (यथा, शिशु-पालवधे । १० । ५५ ।

“साम्यमाप कमलासखविष्वक्-
सेनसेवितयुगान्तपयोधेः ।”)

विष्णोर्निर्म्माल्यधारी । यथा,—

“निर्म्माल्यधारी विष्णोस्तु विष्वक्सेनश्चतुर्भुजः ।
शङ्खचक्रगदापाणिर्दीर्घश्मश्रुर्जटाधरः ।
रक्तपिङ्गलवर्णस्तु सितपद्मोपरिस्थितः ।

षष्ठतीयः स्वरान्तेन संयुतो बिन्दुनेन्दुना ।
कीर्त्तितस्तस्य मन्त्रोऽयं तेन तं परिपूजयेत् ॥”
इति कालिकापुराणे ८२ अध्यायः ॥

त्रयोदशमनुः । यथा,—
“ततश्च मेरुसावर्णो ब्रह्मसूनुर्म्मनुः स्मृतः ।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा ॥”
इति मात्स्ये ९ अध्यायः ॥

विष्वक्सेनप्रिया, स्त्री, (विष्वक्सेनस्य प्रिया ।) वाराही । इत्यमरः ॥ चामार आलु इति भाषा ॥ लक्ष्मीः । इति मेदिनी । ये, १३४ ॥

विष्वक्सेना, स्त्री, प्रियङ्गुः । इत्यमरः ॥

विष्वणनं, क्ली, भोजनम् । इति जटाधरः ॥ शब्दकरणम् । यथा । विष्वणति वीणा । इति मुग्धबोधव्याकरणम् ॥

विष्वद्र्यङ्, [च्] त्रि, (विष्वगञ्चतीति । अञ्च + क्विप् । “विष्वग्देवयोश्चेति ।” ६।३।९२। इति टेः स्थाने अद्रीत्यादेशः ।) सर्व्वतोगामी । इत्यमरः ॥ (यथा, माघे । १८ । २५ ।
“विष्वद्रीचीर्विक्षिपन् सैन्यवीचीराजावन्तः क्वापि दूरं प्रयातम् ॥”)

विष्वाणः, पुं, भक्षणम् । इति हेमचन्द्रः ॥

विसं, क्ली, मृणालम् । इत्यमरः ॥ (यथा, कलाविलासे । ६ ।
“नवविसकिसलयकवलन-
कषायकलहंसकलरवो यत्र ।
कमलवनेषु प्रसरति
लक्ष्म्या इव नूपुरारावः ॥”)

विसंवादः, पुं, (वि + सं + वद + घञ् ।) विप्रलम्भः । इत्यमरः ॥ (यथा, महाभारते ।१२ । २५८ । ११ ।
“अद्रोहमविसंवादं प्रवर्त्तन्ते तदाश्रयाः ॥”)

विसकण्ठिका, स्त्री, (विससदृशः शुभ्रः कण्ठो यस्याः इति बहुव्रीहौ कन् टापि अत इत्वम् ।) बलाका । इत्यमरः ॥

विसकुसुमं, क्ली, (विसस्य कुसुमम् ।) कमलम् । इति राजनिर्घण्टः ॥

विसकूटः, पुं, सिंहः । इति शब्दचन्द्रिका ॥ इक्षुदीर्घः । इति राजनिर्घण्टः ॥

विसजं, क्ली, (विसाज्जायते इति । जन् + डः ।) पद्मम् । विसं मृणालं तत्र जातत्वात् ॥

विसनाभिः, पुं, (विसं नाभिरुत्पत्तिस्थानं यस्य ।) पद्मिनी । पद्मसमूहः । इति त्रिकाण्डशेषः ॥

विसप्रसूनं, क्ली, पद्मम् । इत्यमरः । (यथा, शिशुपालवधे । ५ । २८ ।
“चक्षुर्व्विसं धृतविकासिविसप्रसूनाः ॥”)

विसरः, पुं, (विसरतीति । वि + सृ + पचाद्यच् ।) समूहः । इत्यमरः ॥ प्रसरः । इति मेदिनी । रे, २१७ ॥

विसर्गः, पुं, (वि + सृज + घञ् ।) दानम् । (यथा, रघुवंशे । ४ । ८६ ।
“आदानं हि विसर्गाय सतां वारिमुचामिव ॥”)
त्यागः । (यथा, महाभारते । १ । ३२ । १३ ।
“नानाशस्त्रविसर्गैस्तैर्व्विध्यमानः समन्ततः ॥”)
मलनिर्गमः । विसर्ज्जनीयः । (यथा, भागवते । ६ । ८ । १० ।
“सविसर्गं फडन्तं तत् सर्व्वदिक्षु विनिर्द्दिशेत् ॥”)
सूर्य्यस्यायनभेदः । इति मेदिनी । गे, ५० ॥ मोक्षः । इति हलायुधः ॥ विरहः । इति शब्दरत्नावली ॥ विशेषसृष्टिः । यथा,—
“पुरुषानुगृहीतानामेतेषां वासनामयः ।
विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम् ॥”
इति श्रीभागवतम् ॥

विसर्ज्जनीयस्य पर्य्यायः ।
“अः सर्गो रसना वक्त्रं विसर्गश्च द्विबिन्दुकः ।
नादोऽर्द्धेन्दुरर्द्धमात्रा कला रात्री सदाशिवः ।
अनुचार्य्या तुरीया च विश्वमातृकला परा ॥”
इति बीजाभिधानम् ॥

अपि च ।
“अः कण्ठको महासेनः कला पूर्णामृता हरिः ।
इच्छा भद्रा गणेशश्च रतिविद्यासखी सुखम् ॥
द्विबिन्दुरसना सोमोऽनिरुद्धो दुःखसूचकः ।
द्विजिह्वः कुण्डलं वक्त्रं सर्गः शक्तिर्निशाकरः ।
सुन्दरी सुयशानन्ता गणनाथो महेश्वरः ॥”
इति बीजवर्णाभिधानान्तरम् ॥

अन्यच्च ।
“विसर्गः सर्गमाख्यातो वियद्विषयमासनः ।
अनिरुद्धो महेशानि कालघ्नोऽपि रमापि च ॥”
इति वर्णाभिधानम् ॥
(प्रयोगः । यथा, भागवते । १ । ५ । ११ ।
“तद्वाग्विसर्गो जनताघविप्लवः ॥”)

विसर्ज्जनं, क्ली, (वि + सृज् + ल्युट् ।) दानम् । परित्यागः । इत्यमरः ॥ (यथा, रघुवंशे ।८।२५।
“श्रुतदेहविसर्ज्जनं पितु-
श्चिरमश्रूणि विमुच्य राघवः ॥”)
संप्रेषणम् । इति मेदिनी । ने,२०५॥ (पुं, यदुवंशीयानामन्यतमः । यथा,भागवते ।११।३०।१८।
“विसर्ज्जना: कुकुरा: कुन्तयश्च
मिथस्तु जघ्नुः सुविसृज्य सौहृदम् ॥”
विशेषेण सृज्यते इति । वि + सृज + कर्म्मणि ल्युट् । उत्पादिते, त्रि । यथा, भागवते । १० । १६ । ५७ ।
“त्वया सृष्टमिदं विश्वं धातुर्गुणविसर्ज्जनम् ॥”)

विसर्पः, पुं, (वि + सृप + घञ् ।) रोगविशेषः । तत्पर्य्यायः । विसर्पिः २ सर्पिवामयः ३ । इति राजनिर्घण्टः ॥ तस्य विप्रकृष्टं निदानं संख्यां निरुक्तिञ्चाह ।
“लवणाम्लकट्वादिसेवनाद्दोषकोपतः ।
विसर्पः सप्तधा ज्ञेयः सर्व्वतः परिसर्पणात् ॥”
आदिशब्दाच्चरकोक्तहरितशाकशिण्डाकप्रभृतीनां ग्रहणम् ॥ * ॥ सप्तधात्वं विवृणोति ।
“पृथक् त्रयस्त्रिभिश्चैको विसर्पा द्वन्द्वजास्त्रयः ।
वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः
चत्वार एते वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः ॥
आग्नेयो वातपित्ताभ्यां ग्रन्थ्याख्यः कफवातजः ।
यस्तु कर्द्दमको घोरः स पित्तकफसम्भवः ॥” * ॥
विसर्पदोषदूष्याणि संगृह्याह ।
“रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः ।
विसर्पाणां समुत्पत्तौ हेतवः सप्त धातवः ॥”
त्रयो मलाः वातपित्तकफाः । दोषाः दूषका इत्यर्थः । अन्यथा दोषा मला इत्यत्र पुनरुक्तिदोषोऽभविष्यत् ॥ * ॥ वातिकस्य लक्षणमाह ।
“तत्र वातात् परीसर्पो वातज्वरसमव्यथः ।
शोफस्फुरणनिस्तोदभेदायामार्त्तिहर्षवान् ॥”
परीसर्पो विसर्पः । वातज्वरसमव्यथः शिरोहृद्गात्रोदरशूलादियुक्तः । भेदः विदारणेनेव व्यथा । आयामः आकर्षणेनेव व्यथा ॥ * ॥ पैत्तिकमाह ।
“पित्ताद्द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ॥”
द्रुतगतिः शीघ्रप्रसरणशीलः ॥ * ॥ श्लैष्मिकमाह ।
“कफात् कण्डुयुतः स्निग्धः कफज्वरसमानरुक् ॥”
सान्निपातिकमाह ।
“सन्निपातसमुत्थश्च सर्व्वरूपसमन्वितः ॥” * ॥
वातपैत्तिकस्याग्निविसर्पाख्यस्य च लक्षणमाह ।
“वातपित्तज्वरच्छर्द्दिमूर्च्छातीसारतृड्भ्रमैः ।
अस्थिभेदाग्निसदनतमकारोचकैर्युतः ॥
करोति सर्व्वमङ्गञ्च दीप्ताङ्गारावकीर्णवत् ।
यं यं देशं विसर्पश्च संसर्पति भवेत् स सः ॥
शान्ताङ्गारासितो नीलो रक्तो वा स्वपचीयते ।
अग्निदग्ध इव स्फोटैः शीघ्रगत्वात् द्रुतश्च सः ॥
मर्म्मानुसारी वीसर्पः स्यादतोऽतिबलस्ततः ।
व्यथेताङ्गं हरेत् संज्ञां निद्राञ्च श्वासमीरयेत् ॥
हिक्काञ्च संगतोऽवस्थामीदृशीं लभते नरः ।
क्वचिच्छर्म्मारतिग्रस्तो भूमिशय्यासनादिषु ॥
चेष्टमानस्ततः क्लिष्टो मनोदेहसमुद्भवाम् ।
दुःप्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते ॥”
स्फोटैः उपचीयत इत्यन्वयः । मर्म्मानुसारी हृदयानुसारी । हरेत् वीसर्प इत्यन्वयः । हिक्कां हिक्काम् । ईरयेत् उत्पत्तुं प्रेरयेत् । मनोदेहसमुद्भवां निद्रां मरणरूपाम् । अश्नुते प्राप्नोति ॥ *
वातश्लैष्मिकग्रन्थिविसर्पमाह ।
“कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम् ।
रक्तं वा वृद्धरक्तस्य त्वक्शिरास्नायुमांसगम् ।
दूषयित्वा तु दीर्घाणुवृत्तस्थूलखरात्मनाम् ।
ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वराम् ॥
श्वासकासातिसारास्यशोषहिक्कावमिभ्रमैः ।
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युतः ।
इत्ययं ग्रन्थिवीसर्पो वातश्लेष्मप्रकोपजः ॥”
कफेन स्वहेतुदुष्टेन पवनोऽपि स्वहेतुदुष्टः । तेनायं वातश्लैष्मिकः । तं कफं बहुधा भित्त्वा रक्तं वा दूषयित्वा इत्यन्वयः । त्वगादिकमिति रक्तविशेषणम् ॥ * ॥ पित्तश्लैष्मिकं कर्द्दमाख्यं विसर्पमाह ।
“कफपित्तज्वरास्तम्भो निद्रातन्द्राशिरोरुजा ।
अङ्गावसादविक्षेपप्रलापारोचकभ्रमाः ॥
मूर्च्छाग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवम् ।

आमोपवेशनं लेपशोतसाञ्च विसर्पति ॥
प्रायेणामाशये गृह्णन्नेकदेशं न चातिरुक् ।
पिड़कैरवकीर्णोऽति पीतलोहितपाण्डुरैः ॥
स्निग्धोऽसितो मेचकाभो मलिनः शोफवान् गुरुः ।
गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नो विदीर्य्यते ।
पङ्कवत् शीर्णमांसस्य स्पष्टस्नायुशिरागणः ।
शवगन्धिश्च वीसर्पः कर्द्दमाख्यमुशन्ति तम् ॥"
स च सर्पति एकदेशमित्यन्वयः । पिड़कैः पिड़काभिः । अवकीर्णः व्याप्तः । असितः कृष्णः । मेचकः कृष्णकृष्णः । प्राज्योष्मा प्रचुरोष्मा । स्पृष्टः क्लिन्नोऽवदीर्य्यते स्पृष्टः सन्नार्द्रो भवति विदीर्य्यते च । पङ्कवत् कर्द्दमवर्णा त्वग् यत्र सः । शीर्णमांसः गलितमांसः । अतएव स्पष्टस्नायुशिरागणः ॥ * ॥ सान्निपातिकमाह ।
"सन्निपातसमुत्थस्तु सर्व्वरूपसमन्वितः ॥" * ॥
चतजञ्च विसर्पमाह ।
"बाह्यहेतोः चतात् क्रुद्धः सरक्तं पित्तमीरयन् ।
वीसर्पमारुतः कुर्य्यात् कुलत्थसदृशैश्चितः ।
स्फोटैः शोथज्वररुजा दाहाढ्यं श्यावशोणितम् ॥"
बाह्यहेतोः शस्त्रप्रहारव्यालदन्तनखाद्यागन्तुहेतोः । श्यावशोणितं धूम्रवर्णरक्तम् ॥ * ॥
उपद्रवानाह ।
"ज्वरातीसारवमथुस्त्वङ्मांसदरणक्लमाः ।
अरोचकाविपाकौ च विसर्पाणामुपद्रवाः ॥" * ॥
साध्यत्वादिकमाह ।

"सिध्यन्ति वातकफपित्तकृता विसर्पाः
सर्व्वात्मकश्चतकृतश्च न सिद्धिमेति ।
पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः
कृच्छ्राश्च मर्म्मसु भवन्ति च सर्व्व एव ॥"

पित्तात्मकोऽञ्जनवपुः पित्तजः सन् कज्जलवर्णः । सर्व्व एवासाध्या अपि ॥ * ॥ अथ विसर्पस्य चिकित्सा ।
"विरेकवमनालेपसेचनासृग्विमोचणैः ।
उपाचरेद्यथादोषं विसर्पानविदाहिभिः ॥
रास्ना नीलोत्पलं दारु चन्दनं मधुकं बला ।
घृतं चीरयुतो लेपो वातवीसर्पनाशनः ॥"
चन्दनमत्र रक्तं ग्राह्यम् ।

"कसेरुशृङ्गाटकपद्मगुन्द्रैः
सशैवलैः सोत्पलकर्द्दमैश्च ।
वस्त्रान्तरैः पित्तकृते विसर्पे
लेपो विधेयः सघृतः सुशीतः ॥" * ॥

त्रिफलापद्मकोशीरसमङ्गाकरवीरकम् ।
नलमूलमनन्ता च लेपः श्लेष्मविसर्पहा ॥
समङ्गा लज्जालुः ।
"वातपित्तप्रशमनमग्निवीसर्पणे हितम् ।
वातश्लेष्महरं कर्म्म ग्रन्थिवीसर्पणे हितम् ॥
पित्तश्लेष्मप्रशमनं हितं कर्द्दमसंज्ञके ।
त्रिदोषजक्रियां कुर्य्यात् विसर्पे चिमलापहाम् ॥ *

शिरीषयष्टीनतचन्दनैला
मांसीहरिद्राद्वयकुष्ठवालैः ।
लेपो दशाङ्गः सघृतः प्रयोज्यो
विसर्पकुष्ठज्वरशोथहारी ॥"

नतं तगरम् । चन्दनमत्र रक्तं ग्राह्यम् । दशाङ्गो लेपः ॥ * ॥
"परिषेकाः प्रलेपाश्च शस्यन्ते पञ्चवल्कलैः ।
पद्मकोशीरमधुकं चन्दनैला विसर्पणे ॥

भूनिम्बवासा कटुका पटोल-
फलत्रयं चन्दननिम्बसिद्धः ।
विसर्पदाहज्वरशोथकण्डू-
विस्फोटतृष्णावमिहृत् कषायः ॥

कुष्ठानि यानि सर्पींषि व्रणेषु विविधेषु च ।
विसर्पे तानि योज्यानि सेकालेपनभोजनैः ॥ * ॥

करञ्जसप्तच्छदलाङ्गलीक-
स्नुह्यर्कदुग्धानलभृङ्गराजैः ।
तैलं निशामूत्रविषैर्विपक्वं
विसर्पविस्फोटविचर्च्चिकाघ्नम् ॥
इति करञ्जादितैलम् ॥ * ॥
"कुष्ठामयस्फोटमसूरिकोक्त-
चिकित्सयाप्याशु हरेद्विसर्पान् ।
सर्व्वान् विकारान् परिशोध्य धीमान्
व्रणं क्रमेणोपचरेद्यथोक्तम् ॥"

इति विसर्पाधिकारः । * । इति भावप्रकाशः ॥
(वेगः । यथा, उत्तरचरिते ।
"प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ॥"
नाट्यालङ्कारविशेषः । तल्लक्षणादिकं यथा, साहित्यदर्पणे । ६ । ४८५ ।
"विसर्पो यत्समारब्धं कर्म्मानिष्टफलप्रदम् ॥"
यथा वेण्याम् । एकस्य तावत् पाकोऽयमित्यादि ॥)

विसर्पणं, क्ली, (वि + सृप + ल्युट् ।) प्रसरः । इत्यमरः ॥ तन्तुशाखविटपादेर्विसर्पणम् । इति भरतः ॥ (निक्षेपः । यथा, महाभारते । ७ । ८ । १३ ।
"शोषणं सागरस्येव मेरोरिव विसर्पणम् ।
पतनं भास्करस्येव न मृष्ये द्रोणपातनम् ॥")

विसर्पिः, पुं, विसर्पः । इति राजनिर्घण्टः ॥

विसल्लं, क्ली, (विसं लातीति । ला + कः ।) पल्लवः । इति त्रिकाण्डशेषः ॥

विसारः, पुं, (विशेषेण सरतीति । सृ गतौ + "व्याधिमत्स्यबलेष्विति वक्तव्यम् ।" ३ । ३ । १७ । इत्यस्य वार्त्तिकोक्त्या घञ् ।) मत्स्यः । इत्यमरः ॥ (भावे घञ् । निर्गमः । यथा, ऋग्वेदे । १ । ७६ । १ ।

"हिरण्यकेशो रजसो विसारे
ऽहिर्धुनिर्वात इव ध्रजीमान् ॥"

"रजस उदकस्य विसारे विसरणे मेघान्निर्गमने ।" इति तद्भाष्ये सायणः ॥)

विसारिणी, स्त्री, (विशेषेण सरतीति । सृ + णिनिः । ङीप् ।) माषपर्णी । इति राजनिर्घण्टः ॥) प्रसरणशीला । यथा, राजतरङ्गिण्याम् । ८ । ६८२ ।
"निर्धूमस्य विसारिण्यो ज्वाला हव्यभुजो दधुः ॥")

विसारितः, त्रि, प्रसारितः । विपूर्ब्बण्यन्तसृधातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥

विसारी, [न्] त्रि, (वि + सृ + णिनिः ।) प्रसरणशीलः ॥ तत्पर्य्यायः । विसृत्वरः २ विसृमरः ३ प्रसारी ४ । इत्यमरः ॥ (यथा, रघुः । ३ । १५ ।

"अरिष्टशय्यां परितो विसारिणा
सुजन्मनस्तस्य निजेन तेजसा ॥")

विसिनी, स्त्री, (विसमस्त्यस्या इति । विस + "पुष्करादिभ्यश्च ।" इति इनिः । ङीप् ।) पद्मिनी । इत्यमरः ॥ मृणालम् । इति राजनिर्घण्टः ॥

विसूचिका, स्त्री, (विसूची + स्वार्थे कन् ।) अजीर्णरोगविशेषः । इति भावप्रकाशः ॥ (अस्या विशेषविवृतिस्तु अजीर्णविसूचीशब्दयोर्द्रष्टव्या ॥)

विसूची, स्त्री, (विशेषेण सूचयति मृत्युमिति । वि + सूच् + अच् । स्त्रियां ङीष् । यद्वा, विशिष्टा सूचीव ।) अजीर्णरोगविशेषः । ओलाउटा इति भाषा ॥ तस्य निरुक्तिर्यथा,—
"सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिलः ।
यस्याजीर्णेन सा वैद्यैर्विसूचीति निगद्यते ॥"
तस्या निदानमाह ।
"न तां परिमिताहारा लभन्ते विदितागमाः ।
मूढ़ास्तामजितात्मानो लभन्तेऽशनलोलुपाः ॥"
विदितागमा ज्ञातायुर्व्वेदाः ॥ * ॥
तस्या लक्षणमाह ।

"मूर्च्छातिसारो वमथुः पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहाः ।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः ॥"

उद्वेष्टनं हस्तपादयोः । शिरसो भेदः शिरःशूलम् ॥ * ॥ तस्या उपद्रवानाह ।
"निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता ।
अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः ॥"
अमी उपद्रवा घोराः अमी निद्रानाशादय उपद्रवाः सर्व्वेषामेव रोगाणां घोरा भयङ्कराः । विसूच्याः पञ्च दारुणाः विसूच्यास्तु पञ्चापि यदि स्युस्तदा दारुणाः प्राणभयङ्कराः ॥ * ॥
तस्या अरिष्टमाह ।

"यः श्यावदन्तौष्ठनखोऽल्पसंज्ञ-
श्छर्द्यर्द्दितोऽभ्यन्तरयातनेत्रः ।
क्षामस्वरः सर्व्वविमुक्तसन्धि-
र्यायान्नरः सोऽपुनरागमाय ॥"

सर्व्वविमुक्तसन्धिः सर्व्वे विमुक्ताः शिथिलीभूताः सन्धयो यस्य सः ॥ इति भावप्रकाशः ॥ * ॥
अस्याश्चिकित्सा अजीर्णशब्दे द्रष्टव्या ॥

विसूरितं, क्ली, अनुतापः । इति जटाधरः ॥

विसृतं, त्रि, (वि + सृ + क्तः ।) विस्तृतम् । इत्यमरः ॥

विसृत्वरः, त्रि, (विसरति तच्छीलः । वि + सृ + "इण्नश्जिसर्त्तिभ्यः क्वरप् ।" ३ । २ । १६३ ।

इति क्वरप्। ह्रस्वस्येति तुक्।) प्रसरणशीलः। इत्यमरः॥ "विसरणम्। गतिविशेषः। विसृत्वरो नदः। विसृत्वरी नदी। विसृत्वरं तैलमित्यादि। विसरति विसृत्वरः सृ गतौ क्वरप्-सृजीणिति क्वरप् ह्रस्वस्य तन् पिति तन्।" इति भरतः॥

विसृमरः, त्रि. (विशेषेण सरति तच्छीलः। वि+सृ+"सृघस्यदः क्मरच्।" ३।२।१६०। इति क्मरच्।) प्रसरणशीलः। इत्यमरः॥

विसृष्टः, त्रि, (वि+सृज्+क्तः।) निक्षिप्तः। इति जटाधरः॥ (यथा, मृच्छकटिके। १ अङ्के।
"उद्विग्नचञ्चलकटाक्षविसृष्टदृष्टि-
र्व्याधानुसारचकिता हरिणीव यासि॥")
विशेषेण सृष्टश्च॥ (त्यक्तः। यथा, भागवते। १।१६।२४।
"अन्तर्हितस्य स्मरती विसृष्टा
कर्म्माणि निर्व्वाणविलम्बितानि॥"
प्रेषितः। यथा, रघुः। ५।३९।
"आप्तः कुमारानयनोत्सुकेन
भोजेन दूतो रघवे विसृष्टः॥"
पुं, विसर्गः। बिन्दुद्वयरूपः। यथा, कातन्त्रे।८।२।
"रसकारयोर्व्विसृष्टः॥")

विस्तः, पुं, क्ली, (विस उत्सर्गे+क्तः।) हेम्नोऽक्षः। अशीतिरत्तिकापरिमितस्वर्णम्। इत्यमरः॥

विस्तरः, पुं, (वि+स्तॄ+"प्रथने वावशब्दे।" ३।३।३३। इति घञः प्रतिषेधे "ऋदोरप्।" इत्यप्।) शब्दस्य विस्तारः। इत्यमरः॥ (यथा, शिशुपालवधे। २।२४।
"सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे॥"
वेदाङ्गम्। यथा, भागवते। ३।३।२।
"सान्दीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरम्॥")
विस्तारः। (यथा, गीतायाम्। १०।१९।
"प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे॥")
प्रणयः। इति मेदिनी॥ पीठः। समूहः। इति शब्दरत्नावली॥ (त्रि, बहुः। यथा, साहित्यदर्पणे। ६।३१४।
"अपेक्षितं परित्यज्य नीरसं वस्तु विस्तरम्।
यदा सन्दर्शयेच्छेषमामुखानन्तरं तदा॥")

विस्तारः, पुं, (वि+स्तॄ+"प्रथने वावशब्दे।" ३।३।३३। इति घञ्।) विटपः। विस्तीर्णता। तत्पर्य्यायः। विग्रहः २ व्यासः ३। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। ५५८।
"वंशावलम्बनं यद्यो विस्तारो गुणस्य यावनतिः।
तज्जालस्य खलस्य च निजाङ्गसम्प्रणाशाय॥")
स्तम्बः। इति मेदिनी। रे, २१५॥

विस्तीर्णः, त्रि, (वि+स्तॄ+क्तः। "रदाभ्यामिति।" ८।२।४२। इति नः।) विपुलम्। विस्तृतम्। यथा,—
"विस्तीर्णं विकटं वड्रं विशालं विपुलं पृथु।"
इति जटाधरः॥ (यथा,—
"पर्णानि स्वर्णवर्णानि विस्तीर्णाकर्णलोचने।
तूर्णमानीयतां चूर्णं पूर्णचन्द्रनिभानने॥"
इत्युद्भटः॥)

विस्तीर्णपर्णं, क्ली, (विस्तीर्णं पर्णं पत्रमस्य।) मानकम्। इति शब्दचन्द्रिका॥

विस्तृतः, त्रि, (वि+स्तृ+क्तः।) लब्धविस्तारः। तत्पर्य्यायः। विसृतम् २ ततम् ३। इत्यमरः॥ (यथा, भागवते। २।२४।६०।
"तत्त्वं ब्रह्मपरं ज्योतिराकाशमिव विस्तृतम्॥")

विस्पष्टः, त्रि, (विशेषेण स्पष्टः।) सुस्पष्टः। यथा,
"विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदं तथा।
कलस्वरसमायुक्तं रसभावसमन्वितम्॥"
इति तिथ्यादितत्त्वम्॥

विस्फारः, पुं, (वि+स्फुर+घञ्। "स्फुरतिस्फुलत्योर्घञि।" ६।१।४७। इत्यात्वम्।) धनुर्गुणशब्दः। इत्यमरः॥ अस्य विवरणं मूर्द्धन्यषकारमध्यविष्फारशब्दे द्रष्टव्यम्॥ (यथा, महाभारते। ३।२७९।३६।
"विस्फारस्तस्य धनुषो वज्रस्येव तदा बभौ॥"
विस्तृतिः। यथा, साहित्यदर्पणे। ३।२०७।
"विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः॥")

विस्फारितः, त्रि, प्रकाशितः। चलितः। विपूर्व्वण्यन्तस्फरधातोः क्तप्रत्ययेन निष्पन्नमिदम्॥ (यथा, महाभारते। ३।११।२०।
"स नष्टमायोऽतिबलो क्रोधविस्फारितेक्षणः।
कामरूपधरः क्रूरः कालकल्पो व्यदृश्यत॥"
निर्घोषितः। यथा, किराते। १४।३०।
"उदूढवक्षःस्थगितैकदिङ्मुखो
विकृष्टविस्फारितचापमण्डलः॥")

विस्फुरितः, त्रि, (वि+स्फुर+क्तः।) स्फूर्त्तिविशिष्टः। चञ्चलः। यथा,—
"रक्तरक्तोत्पलाङ्गश्च रक्तविस्फुरितेक्षणम्।
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्॥"
इति दशभुजादुर्गाध्यानैकदेशः॥

विस्फुलिङ्गः, पुं, विषभेदः। इति हेमचन्द्रः॥ (विशिष्टः स्फुलिङ्गः।) अग्निकणा च॥

विस्फोटः, पुं, (विस्फोटतीति। वि+स्फुट्+अच्।) विशेषस्फोटकः। विस्फोड़ा इति भाषा। तत्पर्य्यायः। पिटकः २ पिटका ३ पिटकम् ४। इत्यमरः। विटकः ५ विटका ६ विटकम् ७। इति तट्टीका॥ स्फोटकः ८ स्फोटः ९। इति राजनिर्घण्टः॥ (यथा, कथासरित्सागरे। ८५।१८।
"किमेतदिति संभ्रान्तः प्रबुद्धोऽथ ददर्श सः।
उत्थाय राजा विस्फोटानङ्गे तस्या विनिर्गतान्॥")
तस्य विप्रकृष्टनिदानपूर्व्विकां संप्राप्तिमाह।
"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्षारैरजीर्णाध्यशनातपैश्च।
तथर्त्तुदोषेण विपर्य्ययेण
कुप्यन्ति दोषाः पवनादयस्तु॥
त्वचमाश्रित्य ते रक्तमांसास्थीनि प्रदुष्य च।
घोरान् कुर्व्वन्ति विस्फोटान् सर्व्वाञ्ज्वरपुरः-
सरान्॥"
ऋतुदोषेण ऋतुहेतुकशीतोष्णादीनामतियोगेन। ऋतूचिताहारविहारवैपरीत्येन त्वचमाश्रित्य विस्फोटान् कुर्व्वन्तीत्यर्थः। ज्वरपुरःसरान् ज्वरपूर्व्वान्॥ *॥ रूपमाह।
"अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्तजाः।
क्वचित् सर्व्वत्र वा देहे विस्फोटा इति ते
स्मृताः॥"
रक्तपित्तजाः एतेन सर्व्वेषु विस्फोटेषु रक्तपित्तयोः प्रधानकारणत्वम्। यथा शूलेषु वातस्य तथा वातानुगतिरपि बोद्धव्या। तथा च भोजः।
"यदा रक्तञ्च पित्तञ्च वातेनानुगतं त्वचि।
अग्निदग्धनिभान् स्फोटान् कुरुतः सर्व्वदेह-
गान्॥"*॥
वातिकमाह।
"शिरोरुक्शूलभूयिष्ठज्वरतृट्पर्व्वभेदनम्।
सकृष्णवर्णता चेति वातविस्फोटलक्षणम्॥"
शूलमत्र तोदरूपम्॥*॥ पैत्तिकमाह।
"ज्वरदाहरुजापाकः स्रावतृष्णासमन्वितम्।
पीतलोहितवर्णञ्च पित्तविस्फोटलक्षणम्॥"
रुजादित्रयं स्फोटेषु॥*॥ वातपैत्तिकमाह।
"वातपित्तकृतो यस्तु तत्र स्युस्तीव्रवेदनाः।
स्तैमित्यं गौरवं कण्डुर्भवेद्वातबलासजे॥"*॥
पित्तश्लैष्मिकमाह।
"कण्डूर्दाहो ज्वरश्छर्दिर्जायते कफपैत्तिके॥"
सान्निपातिकमाह।
"मध्ये निम्नोन्नतश्चान्ते कठिनः स्वल्पपाकवान्।
रागदाहतृषामोहच्छर्द्दिमूर्च्छारुजाज्वराः।
प्रलापो वेपथुस्तन्द्रा सोऽसाध्यश्च त्रिदोषजः॥"
मोहो विपरीतज्ञानम्। मूर्च्छा सर्व्वथा ज्ञानशून्यता॥ * रक्तजमाह।
"वेदितव्याश्च रक्तेन पैत्तिकेन च हेतुना।
गुञ्जाफलसमा रक्ता रक्तस्रावा विदाहिनः।
न ते सिद्धिं समायान्ति सिद्धैर्योगशतैरपि॥"
पैत्तिकेन च हेतुना पित्तस्य हेतुना कट्वादिना रक्तस्य पित्तस्य तुल्यत्वात् न च ते साध्याः।
"एते चाष्टविधा बाह्या आन्तरोऽपि भवेदयम्।
तस्मिन्नन्तर्व्यथा तीव्रा ज्वरयुक्ताभिजायते॥
तस्मिन् बहिर्गते स्वास्थ्यन्तु आमस्य बहिर्गतिः।
तत्र वातिकविस्फोटक्रिया कार्य्या विजानता॥"
उपद्रवानाह।
"हृट्श्वासमांससङ्कोथदाहहिक्कामदज्वराः।
विसर्पमर्म्मसंरोधास्तेषामुक्ता उपद्रवाः॥"
मांससङ्कोथः मांसस्य शटितत्वम्। मर्म्मसंरोधो मर्म्मव्यथा। तेषां विस्फोटकानाम्॥ *॥
केचिदुपद्रवाणां लक्षणान्तरं पठन्ति।
"हिक्का श्वासोऽरुचिस्तृष्णा स्वाङ्गमर्दो हृदि-
व्यथा।
विसर्पज्वरहृल्लासा विस्फोटानामुपद्रवाः॥"
साध्यत्वादिकमाह।

"एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः ।
सर्व्वरूपान्वितो घोरो ह्यसाध्यो भूर्य्युपद्रवः ॥"
अथ विस्फोटस्य चिकित्सा ।
"विस्फोटे लङ्घनं कार्य्यं वमनं पथ्यभोजनम् ।
यथादोषबलं वीक्ष्य प्रयुञ्जीत विरेचनम् ॥ * ॥
जीर्णाः शालियवा मुद्गा मसूराश्चाढ़की तथा ।
एतान्यन्नानि विस्फोटे हितानि मुनयोऽब्रुवन् ॥
द्वे पञ्चमूल्यौ रास्ना च दार्व्युशीरं दुरालभा ।
गुडूची धान्यकं मुस्तमेषां क्वाथं पिबेन्नरः ।
विस्फोटान्नाशयत्याशु समीरणनिमित्तकान् ।
द्राक्षाकाश्मर्य्यखर्ज्जूरपटोलारिष्टवासकैः ।
कटुकालाजदुस्पर्शैः पैत्तिके क्वथितं हतम् ॥
भूनिम्बवचावासात्रिफलेन्द्रयवासकैः ।
पिचुमर्द्दपटोलाभ्यां कफजे मधुयुक् शृतम् ॥ * ॥
किराततिक्तकारिष्टयष्ट्याह्वामुदवासकैः ।
पटोलपर्पटोशीरत्रिफलाकौटजान्वितैः ॥
क्वथितैर्द्वादशाङ्गस्तु सर्व्वविस्फोटनाशनम् ॥ * ॥
विस्फोटव्याधिनाशाय तण्डुलाम्बुदपेषितैः ।
बीजैः कुटजवृक्षस्य लेपः कार्य्यो विजानता ॥ * ॥
छिन्ना पटोलभूनिम्बवासकारिष्टपर्पटैः ।
खदिराब्दयुतैः क्वाथो हन्ति विस्फोटकं ज्वरम् ॥
चन्दनं नागपुष्पञ्च सारिवा तण्डुलीयकम् ।
शिरीषवल्कलं जाती लेपः स्याद्दाहनाशनः ॥"
"उत्पलं चन्दनं लोध्रमुशीरं शारिवाद्वयम् ।
जलेन पिष्टं लेपेन स्फोटदाहार्त्तिनाशनम् ॥ * ॥
पुत्त्रजीवस्य मज्जानं जले पिष्ट्वा प्रलेपयेत् ।
कालस्फोटं विषस्फोटं सद्यो हन्यात् सवेदनम् ॥
कक्षाग्रन्थिं गलग्रन्थिं कर्णग्रन्थिञ्च नाशयेत् ।
अन्यञ्च स्फोटकं ताम्रं पुत्त्रजीवो विनाशयेत् ॥"
इति विस्फोटकाधिकारः । इति भावप्रकाशः ॥
अन्यच्च ।
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ॥
विशाला करवीरञ्च अर्कक्षीरं सकृत्फलम् ।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत् ॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत् ।
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत् ॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च ।
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते ॥
प्रसूतान्यपि श्वित्राणि तैलेनानेन लेपयेत् ।
चिरोत्थितमपि श्वित्रं विवर्णं तत्क्षणात्
भवेत् ॥"
अपि च ।
"भूनिम्बनिम्बत्रिफलापर्पटैश्च शृतं जलम् ।
पटोलमुस्तकाभ्याञ्च वासकेन च नाशयेत् ।
विस्फोटकानि यत्नानि नात्र कार्य्या विचारणा ॥"
इति गारुड़े १६८ अध्यायः ॥ * ॥
विस्फोटकस्य स्वरूपं यथा, भावप्रकाशे ।
"स्फोटाः श्यावारुणाभासा विस्फोटाः स्युस्तनुत्वचः ॥"

विस्मयः, पुं, (वि + स्मि + "एरच् ।" इत्यच् ।) आश्चर्य्यम् । तत्पर्य्यायः । अद्भुतः २ ह्री ३ । इत्यमरः ॥ "अन्यदद्भुतशब्दे द्रष्टव्यम् ।
'अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः ।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ॥'
इति भावरसयोः पर्य्यायत्वं अद्भुतस्य विस्मयस्थायिभावात्मकत्वात् ।" इति भरतः ॥ * ॥ तस्य लक्षणम् । यथा,—
"विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु ।
विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ॥"
इति साहित्यदर्पणम् ।
(अस्मात्तपःक्षयो भवति । यथा, मनुः । ४।२३७।
"यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् ।")
दर्पः । इति मेदिनी । सन्देहः । इति शब्दरत्नावली ॥ (विगतः स्मयो गर्व्वो यस्येति । गतगर्व्वे, त्रि । यथा, भागवते । ३ । १७ । ३० ।
"तं वीरमारादभिपद्य विस्मयः
शयिष्यसे वीरशये श्वभिर्वृतः ॥")
विस्मयान्वितः, त्रि, (विस्मयेन अन्वितः युक्तः ।) विस्मययुक्तः । आश्चर्य्यविशिष्टः । तत्पर्य्यायः । विलक्षः २ । इत्यमरः ॥
विस्माप(य)नः, पुं, (विस्माप(य)यतीति । वि + स्मि + णिच् + ल्युः ।) कुहकः । गन्धर्व्वनगरम् । कामदेवः । इति मेदिनी ॥ क्ली, विस्मापनम् ॥ (यथा, हरिवंशे । १२६ । २६ ।
"पारिजाततरोः पुष्पं तस्य दत्तं मयानघ ।
विस्मापनार्थं देवेश पत्नीनां सुरतेजसः ॥"
विस्मयकारके, त्रि । यथा, भागवते । १ । १५ । ५ ।
"वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा ।
येन मेऽपहृतं तेजो देवविस्मापनं महत् ॥")
विस्मितः, त्रि, (वि + स्मि + क्तः ।) विस्मयान्वितः । यथा,—
"महापाशुपतान् दृष्ट्वा समुत्थाय महेश्वरः ।
संपरिष्वजत यत्नं ते प्रणेमुर्म्महेश्वरम् ।
ततस्तदद्भुततमं दृष्ट्वा सर्व्वगणेश्वराः ।
सुविस्मितास्तदा सन्तः किमिदं चिन्तयन्निति ॥
विस्मितांस्तान् गणान् दृष्ट्वा शैलादिर्योगिनांवरः ।
प्राह प्रहस्य देवेशं शूलपाणिं गणाधिपः ॥
विस्मितामी गणा देव सर्व्व एव महेश्वर ।
महापाशुपतानां हि यत् त्वयालिङ्गनं कृतम् ॥"
इति वामने ६४ अध्यायः ॥
विस्मितिः, स्त्री, विस्मरणम् । विपूर्व्वस्मिधातोर्भावे क्तिन्प्रत्ययेन निष्पन्नमिदम् ॥
विस्मृतः, त्रि, (वि + स्मृ + क्तः ।) स्मरणाविषयः । तत्पर्य्यायः । अन्तर्गतम् २ । इत्यमरः ॥ (यथा,
"पठिता सर्व्वशास्त्राणि विस्मृतान्यक्षराणि च ।
स्मर्त्ते किञ्चित् मम स्वान्ते टवर्गस्य तु पञ्चमः ॥"
इत्युद्भटः ।)
विस्मृतिः, स्त्री, विस्मरणम् । विपूर्व्वकस्मृधातोः क्तिन् प्रत्ययेन निष्पन्नमिदम् । (यथा, कथासरित्सागरे । ४४ । ६६ ।
"जामातरञ्च स तथा सूर्य्यप्रभमुपाचरत् ।
यथा तस्य निजा भोगाः सर्व्वे विस्मृतिमाययुः ॥")
विस्रं, क्ली, आमगन्धः । इत्यमरः ॥ इदं चिताधूमादिगन्धे अपक्वमांसगन्धे इत्यन्ये । इति भरतः ॥ (यथा, कथासरित्सागरे ।७४।१६६ ।
"समाश्लिषच्च धावित्वा सिञ्चन् धरास्रुभिः स तम् ।
मीनोदरदरीवासविस्रं प्रक्षालयन्निव ॥"
तद्विशिष्टे, त्रि । यथा, कथासरित्सागरे । ८२ । ७ ।
"अहमेनं न शक्नोमि गृहीतुं विस्रपिच्छलम् ॥")
विस्रगन्धा, स्त्री, (विस्रं गन्धो यस्याः ।) हपुषा । इति राजनिर्घण्टः ॥
विस्रगन्धिः, पुं, (विस्रमिव गन्धो यस्य ।) हरितालम् । इति हेमचन्द्रः ॥
विस्रब्धः, त्रि, (वि + स्रन्भ + क्तः ।) विश्रब्धः । इति केचित् ॥ (यथा, साहित्यदर्पणे । १ । ७ ।
"विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीम् ॥")
विस्रम्भः, पुं, (वि + स्रन्भ + घञ् ।) विश्वासः । (यथा, उत्तरचरिते । १ ।
"विस्रम्भादुरसि निपत्य लब्धनिद्राम् ॥")
प्रणयः । इत्यमरः ॥ प्रणयः परिचयः शृङ्गारप्रार्थना वा ।
"परिचयप्रार्थनयोः प्रणयः परिकीर्त्तितः ।
इत्यमरमाला ॥
प्रणयः क्रीड़ापारतन्त्र्यम् । इति रमानाथः ॥"
इति तट्टीकायां भरतः ॥ (यथा, रामायणे । २ । ६० । ७ ।
"विजनेऽपि वने सीता वासं प्राप्य गृहेष्विव ।
विस्रम्भं लभतेऽभीता रामे विन्यस्तमानसा ॥")
केलिकलहः । वधः । इति हेमचन्द्रः ॥
विस्रम्भी, [न्] त्रि, (विस्रम्भते विश्वसितीति । वि + स्रम्भ + "वौ कषलसकत्थस्रम्भः ।" ३ । २ । १४३ । इति घिनुण् ।) विश्वासी । (यथा, भागवते । ६ । ५ । २० ।
"कथं तदनुरूपाय गुणविस्रम्भ्युपक्रमेत् ॥")
प्रणयी । विस्रम्भशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्नमिदम् ॥
विस्रसा, स्त्री, जरा । इत्यमरः ॥
विस्रा, स्त्री, (विस्रं गन्धोऽस्त्यस्या इति । अच् ततष्टाप् ।) हपुषा । इति राजनिर्घण्टः ॥
विस्रुतः, त्रि, (वि + स्रु + क्तः ।) विस्तृतः । विपूर्व्वकस्रुधातोः क्तप्रत्ययेन निष्पन्नमिदम् ।
विहगः, पुं, (विहायसा गच्छतीति । गम + "प्रियवशेति ।" ३ । २ । ३८ । इत्यत्र "डेच विहायसो विहादेशो वक्तव्यः ।" इति काशिकोक्तेः डप्रत्यये विहायःशब्दस्य विहादेशः ।) पक्षी । इत्यमरः ॥ (यथा, भागवते । ४ । १८ । २४ ।
"सुपर्णवत्सा विहगाश्चरञ्चाचरमेव च ।")
बाणः । (यथा, महाभारते । ७।१६१।४० ।

"अयोमुखैश्च विहगैर्दंष्ट्रविषयिष्ये महारथान् ।")
सूर्य्यः । चन्द्रः । इति शब्दरत्नावली ॥ यक्षः ।
इति धरणिः ॥

विहङ्गः, पुं, (विहायसा गच्छतीति । ३।२।३८ ।
इत्यत्र "गमेः सुपीति ।" खच् । "विहायसो
विह च ।" इति विहादेशः । "खच डिद्वा
वक्तव्यः ।" इति डित्त्व ।) पक्षी । इत्यमरः ॥
(यथा, रघुवंशे । १ । ५१ ।
"सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥")
बाणः । (यथा, महाभारते । ८ । ६६ । ३५ ।
"त्वत्प्रेरितैर्लोहिताङ्गैर्विहङ्गैः ॥")
मेघः । चन्द्रः । सूर्य्यः । इति शब्दरत्नावली ॥
(नागविशेषः । १ । ५७ । ११ ।
"विहङ्गः शरभो मेदः प्रमोदः संहतोपनः ॥")

विहङ्गमः, पुं, (विहायसा गच्छतीति । ३।२।३८ ।
इत्यत्र । "खच्प्रकरणे गमेः सुप्युपसंख्यानम् ।"
इति काशिकोक्त्या खच् । "विहायसो विह
च ।" इति विहादेशः ।) पक्षी । इत्यमरः ॥
(यथा, महाभारते । ३ । २७४ । ३६ ।
"आक्रम्य रक्षांस्यहरत्कामरूपी विहङ्गमः ॥"
सूर्य्यः । यथा, मार्कण्डेये । १०६ । ६७ ।
"छन्दोभिरश्वरूपैश्च महद्युक्तैर्विहङ्ग-
मम् ॥")

विहङ्गमा, स्त्री, भारयष्टिः । इति शब्दरत्नावली ॥
बाँक इति भाषा ॥

विहङ्गराजः, पुं, (विहङ्गानां राजा । समासे
टच् ।) गरुडः । इति हलायुधः ॥ (यथा,
शिशुपालवधे । १ । ७ ।
"विहङ्गराजाङ्गरुहैरिवायतै-
र्हिरण्मयोर्वीरुहवल्लितन्तुभिः ॥")

विहङ्गिका, स्त्री, भारयष्टिः । इत्यमरः ॥ बाँक
इति भाषा ॥

विहत्, स्त्री, गर्भोपघातिनी गौः । इति संक्षिप्त-
सारोणादिवृत्तिः ॥

विहतः, त्रि, विशेषेण हतः । विनष्टः । विपूर्व्वक-
हनधातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥

विहननं, क्ली, (वि+हन+ल्युट् ।) विघ्नः ।
हिंसा । तूलपिञ्जनः । इति मेदिनी । ने, २९० ॥

विहरः, पुं, (वि+हृ+अप् ।) वियोगः । इति
हलायुधः ॥

विहरणं, क्ली, विहारः । विपूर्व्वकहृधातोरनट्-
प्रत्ययेन निष्पन्नमिदम् । (यथा, भागवते ।१०।
३१ । १० ।
"विहरणञ्च ते ध्यानमङ्गलम् ।"
प्रसारणम् । यथा, पाणिनौ । १ । ३ । २० ।
"आङो दोऽनास्यविहरणे ।"
आहरणम् । यथा, मार्कण्डेये । २६ । ३० ।
"नाग्निविहरणञ्चैव कृतभावश्च लक्ष्यते ।
नवाप्यायनमस्माकं विना होमेन जायते ।")

विहसितं, क्ली, (वि+हस्+क्तः ।) मध्यम-
हास्यम् । इत्यमरः ॥

विहस्तः, त्रि, व्याकुलः । इत्यमरः ॥ (यथा,
रघुः । ५ । ४९ ।
"रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार ॥")
पण्डितः । इति मेदिनी ॥ (यथा, हरिवंशे ।
२३७ । २८ ।
"नानायुधविहस्तानां त्वरितानां प्रधावताम् ।
चूर्णितोत्कृष्टनिनदैर्गजबृंहितनिस्वनैः ॥")
विकरः । (यथा, विख्यातविजये । २ अङ्के ।
"विगतरयविहस्तन्यस्तशास्त्रप्रमत्त-
स्खलितगतिभयार्त्तान्नैव जातु प्रहर्त्ता ॥")
षण्ढे, पुं । इति शब्दरत्नावली ॥

विहा, व्य, (ओहाक् त्यागे+"विहाविहा ।"
उणा० ४ । ३६ । इति निपातनात् आ ।)
स्वर्गः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

विहापितं, क्ली, (वि+हा+णिच्+क्तः ।)
दानम् । इत्यमरः ॥

विहायः, [स्] क्ली पुं, आकाशः । इत्यमरः ॥
(यथा, साहित्यदर्पणे । १० ।
"कान्तायते स्पर्शसुखेन वारि
वारीयते स्वच्छतया विहायः ॥"
त्रि, महान् । यथा, निरुक्ते । ४ । १५ ।"विहा-
यसस्तेभिरिन्द्रम् ।" "विहायसो महान्तः ॥"
इति यास्कः ॥ यथा च निघण्टुटीकायाम् । ३ ।
३।१२ । "विहायाः । वहिहाधाञ्भ्यश्छन्दसि ।
उणा० ४ । २२५ । इति जहातेर्जिहीतेर्वा
बाहुलकात् युगभावेऽपि युगागमो निपात्यते ।"
यथा, ऋग्वेदे । ४ । ११ । ४ ।
"तस्याजी वाजंभरो विहायाः ।"
"विहायाः महान् ।" इति तद्भाष्ये सायणः ॥)

विहायाः, [स्] पुं, पक्षी । इत्यमरः ॥

विहायसं, क्ली पुं, आकाशः । इत्यमरटीकायां
मथुरेशः ॥ (यथा, महाभारते ।१।६३।१४।
"आतिष्ठस्व रथं राजन् विक्रमस्व विहाय-
सम् ॥")

विहायसः, पुं, पक्षी । इत्यमरटीकायां भरतः ॥

विहायसा, व्य, आकाशः । इत्यमरटीकायां मथु-
रेशः हेमचन्द्रश्च ॥ (पाणिनौ च "स्वरादि-
निपातमव्ययम् ।" १।१।३७ । इत्यत्र गणितम् ॥)

विहारः, पुं, (वि+हृ+घञ् ।) क्रीडार्थं पद्भ्यां
गमनम् । तत्पर्य्यायः । परिक्रमः २ । इत्यमरः ॥
(यथा, गीतायाम् । ११ । ४२ ।
"यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ॥")
भ्रमणम् । स्कन्धः । लीला । (यथा, रघुवंशे ।
६ । ४८ ।
"प्रचालशाद्वारिविहारकाले ।")
सुगतालयः । इति मेदिनी ॥ बिन्दुरेखकपक्षी ।
इति शब्दचन्द्रिका ॥ वैजयन्तः । इति शब्द-
माला ॥

विहारी, [न्] त्रि, (विहर्त्तुं शीलमस्येति । वि+
हृ+णिनिः ।) परिक्रमी । विहारकर्त्ता ।
विहारशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नमिदम् ॥
(यथा, नैषधे । ३ । १५ ।
"धार्य्यः कथङ्कारमहं भवत्या
वियद्विहारी वसुधैकगत्या ॥")

विहितः, त्रि, (वि+धा+क्तः ।) विधेयः । यथा,
"विहितस्याननुष्ठानात् निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥"
इति प्रायश्चित्ततत्त्वम् ॥

विहितिः, स्त्री, (वि+धा+क्तिन् ।) विधानम् ।
यथा,—
"क्षितिविजितिस्थितिविहितिव्रतरतयः पर-
गतयः ।
उरु रुरुधुर्गुरुदुधुवुर्युधि कुरवः स्वमरिकुलम् ॥"
इति दण्डी ॥

विहीनः, त्रि, (वि+हा+क्तः ।) विशेषेण हीनः ।
यथा, तन्त्रसारे ।
"मौढ्यान्न्यासविहीनो यः प्रणमेद्देवि पार्व्वतीम् ।
सोऽचिरान्मृत्युमाप्नोति नरकञ्च प्रपद्यते ॥"
त्यक्तः । यथा,—
"विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ।
वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

विहृतं, क्ली, (वि+हृ+क्तः ।) स्त्रीणां स्वाभाविक-
दशविधालङ्कारान्तर्गतालङ्कारविशेषः । यथा,
"लीला विलासो विच्छित्तिर्विव्वोकः किल-
किञ्चितम्
मोट्टायितं कुट्टमितं ललितं विहृतं तथा ।
विभ्रमश्चेत्यलङ्काराः स्त्रीणां स्वाभाविका दश ॥"
इति हेमचन्द्रः ॥

विहृतिः, स्त्री, विशेषेण हरणम् । विशेषेण बला-
त्कारः । विपूर्व्वहृधातोः क्तिप्रत्ययेन निष्पन्न-
मिदम् ॥

विहेठः, पुं, (वि+हेठ+घञ् ।) विहेठनम् ।
विपूर्व्वहेठधातोरल्प्रत्ययेन निष्पन्नमिदम् ॥

विहेठनं, क्ली, (वि+हेठ+ल्युट् ।) हिंसा ।
मर्द्दनम् । विडम्बनम् । इति मेदिनी ॥ विबाधा ।
इति त्रिकाण्डशेषः ॥

विह्वलः, त्रि, (वि+ह्वल+अच् ।) भयादिना-
भिभूतः । स्वाङ्गधारणाशक्तः । तत्पर्य्यायः ।
विक्लवः २ । इत्यमरः ॥ (यथा, रघुः ।८।३७।
"क्षणमात्रसखीं सुजातयोः
स्तनयोस्तामवलोक्य विह्वला ।
निमिमील नरोत्तमप्रिया
हृतचन्द्रा तमसेव कौमुदी ॥")
विलीनम् । इति हेमचन्द्रः ॥

वी, ल ईलवत् । कान्तिगतिव्याप्तिक्षेपप्रजनखादने ।
इति कविकल्पद्रुमः ॥ (अदा०-पर०-कान्तौ
सक०-गतौ व्याप्तौ क्षेपे प्रजने खादने च सक०-
अनिट् ।) ल, वेति । इति दुर्गादासः ॥

वीः, पुं, (वयनमिति । वी गतौ + न्यङ्क्वादित्वात् भावे
क्विप् । अभिधानात् पुंस्त्वम् ।) गमनम् । इत्ये-
काक्षरकोषः ॥

वीकः, पुं, (अजतीति । अज+“अजियुधूनीभ्यो दीर्घश्च।”उणा० ३।४७। कन्। अजे वींभावः।) वायुः। पक्षी। इत्युणादिकोषः। मनः। इति संक्षिप्तसारोणादिवृत्तिः ॥

वीकाशः, पुं, (विकाशनमिति। वि+काश+घञ्। “इकःकाशे।”६।३।१२३। इति वेरुपसर्गस्य दीर्घः।) रहः। प्रकाशः। इत्यमरः ॥

वीचः, पुं स्त्री, वृद्धिः। विपूर्व्वचधातोरल्प्रत्ययेन निष्पन्नमिदम् ॥

वीक्षणं, क्ली, विशेषेण ईक्षणम्। दर्शनम्। विपूर्व्वक्षधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम्। (यथा, भागवते। ६। १८। २८।
“मनो जग्राह भावज्ञा सस्मितापाङ्गवीक्षणैः॥”)

वीक्षापन्नः, त्रि, (वीक्षामापन्नः।) विस्मयापन्नः। इति हेमचन्द्रः।३।६०। (वीक्ष्यापन्नः। इत्येवमेव।)

वीक्षितः, त्रि, (वि+ईक्ष+क्तः।) विशेषेण ईक्षितः। दृष्टः। यथा,—
“पापर्क्षे प्रश्नलग्ने तु पापसंयुतवीक्षिते।
तथैव चाष्टमस्थाने रोगिणां मरणं दिशेत्॥”
इति दीपिका ॥

वीक्ष्यं, क्ली, (वीक्ष्यते इति। वि+ईक्ष+ण्यत्।) विस्मयः। दृश्यम्। इति मेदिनी। ये, ५६ ॥

वीक्ष्यः, पुं, (वि+ईक्ष दर्शने+ण्यत्।) लासकः। घोटकः। इति मेदिनी। दर्शनीये, त्रि ॥

वीङ्खा, स्त्री, (वीङ्खनमिति। वि+इङ्ख+“गुरोश्च हलः।” इति अः। टाप्।) शूकशिम्बी। गतिभेदः। नर्त्तनम्। इति हेमचन्द्रः॥ अश्वगतिभेदः। सन्धिः। इति शब्दरत्नावली ॥

वीचिः, पुं,स्त्री, (वयति जलं तटे वर्द्धयतीति। वे+“वेञो डिच्च।”उणां० ४। ७२। ईचिः। स च डित्।) तरङ्गः। इत्यमरः॥ (यथा, रघुवंशे। १। ४३।
“सरसीष्वरविन्दानां वीचिविक्षोभशीतलम्।
आमोदमुपजिघ्रन्तौ स्वनिश्वासानुकारिणम्।”)
स्वल्पतरङ्गः। अवकाशः। सुखम्। इति मेदिनी। चे, १०॥ अल्पः। इति हेमचन्द्रः॥ किरणः। इति जटाधरः ॥

वीची, स्त्री, (वीचि+कृदिकारादिति ङीष्।) वीचिः। इत्यमरटीकायां भरतः॥ (यथा, वृहत्संहितायाम्। ५६। ४।
“सरःसु नलिनीच्छत्रनिरस्तरविरश्मिषु।
हंसांसाक्षिप्तकह्लारवीचीविमलवारिषु।”)

वीचीतरङ्गः, पुं, न्यायविशेषः। स तु श्रोत्रे शब्दस्य उत्पत्तिकारणरूपः। यथा,—
“वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता।
कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते॥”
इति भाषापरिच्छेदः॥
ननु भेर्य्याद्यवच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरित्यत आह वीचीति आद्यशब्दस्य वहिर्दशदिगवच्छिन्नोऽन्यः शब्दस्तेनैव शब्देन जन्यते तेन चापरस्तद्व्यापक एवं क्रमेण श्रोत्रोत्पन्नो गृह्यत इति। कदम्ब इति आद्यशब्दाद्दशदिक्षु दश शब्दा उत्पद्यन्ते तेभ्यश्चान्ये दश शब्दा उत्पद्यन्ते इति भावः। अस्मिन् कल्पे गौरवादुक्तं कस्यचिन्मते इति। इति सिद्धान्तमुक्तावली ॥

वी(बी)जं, क्ली, (विशेषेण कार्य्यरूपेण अपत्यतया च जायते इति। वि+जन+“उपसर्गे च संज्ञायाम्।” इति डः। “अन्येषामपीति।” उपसर्गस्य दीर्घः। यद्वा विशेषेण ईजते कुक्षिं गच्छति शरीरं वा। ईज गतिकुत्सनयोः+पचाद्यच्। यद्वा, वीजते गच्छति गर्भाशयमिति। वीज्+अच्। यद्वा, “वीजप्रजननकान्त्यसनखादनेषु। इत्यस्मादच्प्रत्ययः। तथा च भोजराजीये वियो जक् इति व्युत्पादितम्। बवयोरभेदः। वेति प्रजायते गच्छत्यनेनाङ्कुरत्वं पितेति वा। अत्र क्षीरस्वामी वीज्यते वेति वा वीजं वाजिलौकिकः इति। वीजिः स्यात् प्रेरणक्रिया इति माधवः॥ प्रेर्य्यते हि कार्य्यकरणाय वा वीजम्।” इति निघण्टौ देवराजयज्वा। २। २। १५।) कारणम्। (यथा, गीतायाम्। ७। १०।
“वीजं मां सर्व्वभूतानां विद्धि पार्थ सनातनम्॥”
यथा च मनौ। १। ५६।
“यदाणुमात्रिको भूत्वा वीजं स्थास्नु चरिष्णु च।”)
शुक्रम्। इत्यमरः॥ (यथा मनौ। १। ८।
“अप एव ससर्ज्जादौ तासु वीजमवासृजत्॥”
वीजं शुक्रम्। इति मेधातिथिः॥ वीजं शक्तिरूपम्। इति कुल्लूकः॥ यथा च तत्रैव।१०।७२।
“यस्माद्वीजप्रभावेण तिर्य्यग्जा ऋषयोऽभवन्।
पूजिताश्च प्रशस्ताश्च तस्माद्वीजं प्रशस्यते॥”)
श्रीकृष्णस्य सर्व्वावतारवीजत्वं यथा,—
राधिक उवाच।
“अधुना कृष्णरूपस्त्वं परिपूर्णतमः स्वयम्।
सर्व्वेषामवताराणां वीजरूपः सनातनः॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २२ अध्यायः॥
अङ्कुरः। (यथा, महाभारते। ५। १२। १६।
“न तस्य वीजं रोहति वीजकाले
न चास्य वर्षं वर्षति वर्षकाले।
भीतं प्रपन्नं प्रददाति शत्रवे
न त्रातारं लभते त्राणमिच्छन्॥”)
तत्त्वाधानम्। इति मेदिनी॥ मज्जा। इति राजनिर्घण्टः॥ गणितविशेषः। यथा,—
“उत्पादकं यत्प्रवदन्ति बुद्धे-
रधिष्ठितं सत्पुरुषेण सांख्याः।
व्यक्तस्य कृत्स्नस्य तदेकवीज-
मव्यक्तमीशं गणितं च वन्दे॥
पूर्व्वं प्रोक्तं व्यक्तमव्यक्तवीजं
प्रायः प्रश्ना नो विना व्यक्तयुक्त्या।
ज्ञातुं शक्या मन्दधीभिर्नितान्तं
यस्मात्तस्माद्वच्मि वीजक्रियाञ्च॥”
इति भास्कराचार्य्यविरचिते सिद्धान्तशिरोमणौ वीजगणिताध्यायस्य प्रथमद्वितीयश्लोकौ॥*॥
मन्त्रः। यथा। अथ भुवनेश्वरीमन्त्रः।
“नकुलीशोऽग्निमारूढो वामनेत्रार्द्धचन्द्रवान्।
वीजं तस्याः समाख्यातं सेवितं सिद्धि-
काङ्क्षिभिः॥”
नकुलीशो हकारः। अग्नी रेफः। वामनेत्रमीकारः। अर्द्धचन्द्रोऽनुस्वारः। ह्रीं॥*॥ अन्नपूर्णाया वीजम्। ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा॥*॥ अथ त्रिपुटावीजम्। श्रीं ह्रीं क्लीं॥*॥ त्वरितावीजम्। ॐ ह्रीं हुं खे च छे क्षः स्त्रीं हूं क्षे ह्रीं फट्॥*॥ अथ नित्यावीजम्। ऐं क्लीं नित्यक्लिन्ने मदद्रवे स्वाहा॥*॥ वज्रप्रस्तारिण्याः। ऐं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा॥*॥ अथ दुर्गावीजम्। ॐ ह्रीं दुं दुर्गायै नमः॥*॥ महिषमर्द्दिनीवीजम्। ॐ महिषमर्द्दिनि स्वाहा॥*॥ जयदुर्गावीजम्। ॐ दुर्गे दुर्गे रक्षणि स्वाहा॥*॥ शूलिनीवीजम्। ज्वल ज्वल शूलिनि दुष्टग्रह हुं फट् स्वाहा॥*॥ वागीश्वरीवीजम्। वद वद वाग्वादिनि स्वाहा॥*॥ पारिजातसरस्वतीवीजम्। ॐ ह्रीं ह्सौं ॐ ह्रीं सरस्वत्यै नमः॥*॥ गणेशवीजम्। गं॥*॥ हेरम्बवीजम्। ॐ गूं नमः॥*॥ हरिद्रागणेशवीजम्। ग्लौं॥*॥ लक्ष्मीवीजम्। श्रीं॥*॥ महालक्ष्मीवीजम्। ॐ ऐं ह्री श्रीं क्लीं ह्सौं जगत्प्रसूत्यै नमः॥*॥ सूर्य्यवीजम्। ॐ घृणि सूर्य्य आदित्य॥*॥ श्रीरामवीजम्। रां रामाय नमः। जानकीवल्लभाय हुं स्वाहा॥*॥ विष्णुवीजम्। ॐ नमो नारायणाय॥*॥ श्रीकृष्णवीजम्। गोपीजनवल्लभाय स्वाहा॥*॥ वासुदेवस्य। ॐ नमो भगवते वासुदेवाय॥*॥ बालगोपालस्य। ॐ क्लीं कृष्णाय॥*॥ लक्ष्मीवासुदेवस्य। ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मीवासुदेवाय नमः॥*॥ दधिवामनस्य। ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा॥*॥ हयग्रीवस्य।
ॐ उद्गिरत्प्रणवोद्गीथसर्व्ववागीश्वरेश्वर।
सर्व्ववेदमयाचिन्त्य सर्व्वं बोधय बोधय॥*॥
नृसिंहस्य।
उग्रं वीरं महाविष्णुं ज्वलन्तं सर्व्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्॥*॥
नरहरिवीजम्। क्ष्रौं ह्रीं घ्रौं हुं फट्॥*॥ हरिहरस्य। ॐ ह्रीं ह्रौं शङ्करनारायणाय नमः ह्रौं ह्रीं ॐ॥*॥ वराहस्य। ॐ नमो भगवते वराहरूपाय भूर्भुवस्वःपतये भूपतित्वं मे देहि ददापय स्वाहा॥*॥ शिवस्य। ह्रौं॥*॥ मृत्युञ्जयस्य। ॐ जुं सः॥*॥ दक्षिणामूर्त्तिवीजम्। ॐ नमो भगवते दक्षिणामूर्त्तये मह्यं मेधां प्रयच्छ स्वाहा॥*॥ चिन्तामणिवीजम्। र क्ष म र य औं ऊं॥*॥ नीलकण्ठस्य। प्रों नृीं ठः नमः शिवाय॥*॥ चण्डस्य। रूध्व फट्॥*॥ क्षेत्रपालस्य ॐ क्षौं क्षेत्रपालाय नमः॥*॥ वटुकभैरवस्य। ॐ ह्रीं वटुकाय आपदुद्धरणाय कुरु कुरु वटुकाय

ह्रीं ॥ * ॥ त्रिपुरायाः । हसरैं । हसकलरीं । हसरौंः ॥ * ॥ सम्पत्प्रदाभैरव्याः । हसरैं । हसकलरीं । हसरौं ॥ * ॥ कौलेशभैरव्याः । सहरैं । सहकलरीं । सहरौं ॥ * ॥ भयविध्वंसिनीभैरव्याः । हसैं । हसकलरीं । हसौं ॥*॥ सकलसिद्धिदाभैरव्याः । सहैं । सहकलरीं । सहौं ॥ * ॥ चैतन्यभैरव्याः । सहैं । सकलह्रीं । सहरौः ॥ * ॥ कामेश्वरीभैरव्याः । सहैं । सकलह्रीं । नित्यक्लिन्ने मदद्रवे सहरौः । षट्‌कूटाभैरव्याः । डरलकसहैं । डरलकसहीं । डरलकसहौं ॥ * ॥ नित्याभैरव्याः । हसकलरडैं । हसकलरडीं । हसकलरडौं ॥ * ॥ रुद्रभैरव्याः । हसखफरैं । हसकलरीं । हसौः ॥*॥ भुवनेश्वरीभैरव्याः । हसैं । हसकलह्रीं । हसौः ॥ * ॥ सकलेश्वर्य्याः । सहैं । सहकलह्रीं । सहौः ॥*॥ त्रिपुरावालायाः । ऐं क्लीं सौः ॥*॥ नवकूटावालायाः । ऐं क्लीं सौः । हसैं । हसकलरीं । हसौंः । हसरैं हसकलरीं हसरौंः ॥*॥ अन्नपूर्णाभैरव्याः । ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ॥ * ॥ श्रीविद्यायाः । कएईल ह्रीं । हसकहलह्रीं । सकलह्रीं ॥ * ॥ छिन्नमस्तायाः । श्रीं क्लीं ह्रूं ऐं वज्रवैरोचनीये हूँ हूँ फट् स्वाहा ॥ * ॥ श्यामायाः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं स्वाहा ॥*॥ गुह्यकालिकायाः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं गुह्ये कालिके क्रीं क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं स्वाहा ॥ * ॥ भद्रकाल्याः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं भद्रकाल्ये क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॥*॥ श्मशानकालिकायाः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं श्मशानकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॥ * ॥ महाकाल्याः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं महाकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॥ * ॥ तारायाः । ह्रीं स्त्रीं हूं फट् ॥ * ॥ चण्डोग्रशूलपाणेः । ॐ ह्रीं हूं शिवाय फट् ॥ * ॥ मातङ्गिन्याः । ॐ ह्रीं क्लीं हूं मातङ्गिन्यै फट् स्वाहा ॥ * ॥ उच्छिष्टचाण्डालिन्याः । उच्छिष्टचाण्डालिनी सुमुखीदेवी महापिशाचिनी ह्रीं ठँः ठँः ठँः ॥*॥ धूमावत्याः । धूं धूं स्वाहा ॥ * ॥ भद्रकाल्याः । ह्रौं कालि महाकालि किलि किलि फट् स्वाहा ॥ * ॥ उच्छिष्टगणेशस्य । ॐ हस्तिपिशाचि लिखे स्वाहा ॥ * ॥ धनदायाः । धं ह्रीं श्रीं देवि रतिप्रिये स्वाहा ॥ * ॥ श्मशानकालिकायाः । ऐं ह्रीं श्रीं क्लीं कालिके ऐं ह्रीं श्रीं क्लीं ॥ * ॥ वगलायाः । ॐ ह्लीं वगलामुखि सर्व्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय कीलय बुद्धिं नाशय ह्लीं ॐ स्वाहा ॥ * ॥ कर्णपिशाच्याः । ॐ कर्णपिशाचि वदातीतानागतशब्दं ह्रीं स्वाहा ॥ * ॥ मञ्जुघोषस्य । क्रौं ह्रीं श्रीं ॥ * ॥ तारिण्याः । क्रौं क्रौं हृष्टदेवि ह्रीं क्रीं ऐं ॥*॥ सारस्वतवीजम् । ऐं ॥ * ॥ कात्यायन्याः । ऐं ह्रीं श्रीं चौं चण्डिकायै नमः ॥ * ॥ दुर्गायाः । दूं ॥ * ॥ विशालाक्ष्याः । ॐ ह्रीं विशालाक्ष्यै नमः ॥ * ॥ गौर्य्याः । ह्रीं गौरि रुद्रदयिते योगेश्वरि हूं फट् स्वाहा ॥ * ॥ ब्रह्मश्रीमन्त्रः । ह्रीं नमो ब्रह्मश्रीराजिते राजपूजिते जये विजये गौरि गान्धारि त्रिभुवनशङ्करि सर्व्वलोकवशङ्करि सर्व्वस्त्रीपुरुषवशङ्करि सुदुद्दुघोररावे ह्रीं स्वाहा ॥ * ॥ इन्द्रस्य । इं इन्द्राय नमः ॥ * ॥ गरुड़स्य । क्षिप ॐ स्वाहा ॥ * ॥ विषहरायाः वीजम् । खः खं ॥ * ॥ वृश्चिकविषहरवीजम् । ॐ सरह स्फुः । ॐ हिलि हिमि चिलि हस्फुः । ॐ हिलि हिलि चिलि चिलि स्फुः । ब्रह्मणे फुः । सर्व्वेभ्यो देवेभ्यस्फुः ॥*॥ मूषिकविषहरवीजम् । ॐ गैं क्षं ठं । आगमचन्द्रिकायां ॐ गं गां ठः ॥ * ॥ मूषिकनाशमन्त्रः । ॐ सरणे फुः असरणे फुः विसरणे फुः । एतन्मन्त्रं जपन् श्वेतसर्षपप्रक्षेपात् मूषिकनाशो भवति ॥ * ॥ लूताविषहरमन्त्रः । ॐ ह्रीं ह्रीं हूं जसतु ॐ स्वाहा गरुड़ हूं फट् ॥ * ॥ सर्व्वकीटविषहरवीजम् । ॐ नमो भगवते विष्णवे सर सर हन हन हुं फट् स्वाहा ॥ * ॥ सुखप्रसवमन्त्रः । ॐ मन्मथ मन्मथ वाहि वाहि लम्बोदर मुञ्च मुञ्च स्वाहा । ॐ मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्य्येण रश्मयः । मुक्तः सर्व्वभयाद्गर्भ एह्येहि मारीच मारीच स्वाहा । एतयोरन्यतरेणाष्टवारं जलमभिमन्त्र्य देयं पीत्वा सुखप्रसवा भवति ॥ * ॥ हनूमतः । हं हनूमते रुद्रात्मकाय हुं फट् ॥ * ॥ वीरसाधनस्य । हं पवननन्दनाय स्वाहा ॥ * ॥ अथ आर्द्रपटी । ॐ नमो भगवति चामुण्डे रक्तवाससे अप्रतिहतरूपपराक्रमे अमुकवधाय विचेतसे स्वाहा । आर्द्ररक्तपटेनावृतः समुद्रगामिनीनदीतटे ऊषरभूमौ वा दक्षिणामुख ऊर्द्ध्वबाहुर्जपेत् । यावत् पटः शुष्यति तावत् प्राणाः शुष्यन्ति शत्रोः ॥ * ॥ श्मशानभैरव्याः । श्मशानभैरवि नररुधिरास्थिवसाभक्षिणि सिद्धिं मे देहि मम मनोरथान् पूरय हुं फट् स्वाहा ॥*॥ ज्वालामालिन्याः । ॐ नमो भगवति ज्वालामालिनि गृध्रगणपरिवृते हुं फट् स्वाहा ॥ * ॥ महाकाल्याः । ॐ फ्रें फ्रें क्रौं क्रौं पशून् गृहाण हुं फट् स्वाहा ॥ * ॥ अथ निगड़बन्धनमोचनस्य । ॐ नम ऋते निर्ऋते तिग्मतेजो यस्मयं विचृता बन्धमेतं यमेन दत्तं तस्या संविदा नोत्तमे नाके अधोवोऽवैरम् ॥ * ॥ अथ चिटिमन्त्रः । ॐ चिटि चिटि चाण्डालि महाचाण्डालि अमुकं मे वशमानय स्वाहा ॥ * ॥ त्र्यम्बकस्य ।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनात् मृत्योर्मुक्षीयमामृतात् ॥

अथ मृतसञ्जीवनीमन्त्रः । ह्रौं ॐ जुं सः ॐ भूर्भुवः स्वः ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॥

ॐ भूर्भुवः स्वः । इत्यादि तन्त्रसारः ॥ आकर्षणादिवीजानि वाहुल्यभयान्नोक्तानि ॥ * ॥

(अथ वीजाभिधानम् । यथा, —

"वीजसङ्केतबोधार्थमाहृत्य तन्त्रशासनः ।
वीजनामानि कतिचित् वक्ष्यामि विदुषां मुदे ॥
माया लज्जा परा संवित् त्रिगुणा भुवनेश्वरी ।
हृल्लेखा शम्भुवनिता शक्तिर्देवीश्वरी शिवा ॥
महामाया पार्व्वती च संस्थानकृतरूपिणी ।
परमेश्वरी च भुवना धात्री जीवनमध्यगा ॥ह्रीं॥
वह्निहीनेऽस्य शुक्लाया स्थिरमाया प्रकीर्त्तिता ॥
क्लीं ॥
शान्तिशान्तिर्बिन्दुनादैर्लक्ष्मीप्रणव उच्यते ।
श्रीर्लक्ष्मीर्विष्णुवनिता रमा क्षीरसमुद्रजा ॥श्रीं ॥
षोड़शस्वरसंयुक्तं वह्निवामाक्षिबिन्दुसंयुतम् ।
चन्द्रवीजसमारूढं वधूवीजमिदं स्मृतम् ।
वधूर्वामेक्षणा योषिदेकाक्षी स्त्रीचकामिनी ॥स्त्रीं
नादबिन्दुसमायुक्तो द्वादशस्वरो भगम् ।
योनिः सरस्वतीवीजमधरं वाग्भवश्च वाक् ॥ऐं
हकारो वामकर्णाढ्यो नादबिन्दुविभूषितः ।
कूर्च्चं क्रोध उग्रदर्पो दीर्घहुङ्कार उच्यते ।
शब्दश्च दीर्घकवचं तारा प्रणव इत्यपि ॥ हूं ॥
कामाक्षरं वह्निसंस्थं रतिबिन्दुविभूषितम् ।
कालीवीजमिदं प्रोक्तं रतिवीजं तदेव हि ॥क्रीं॥
कामाक्षरं धरासंस्थं रतिबिन्दुविभूषितम् ।
शुभकालीवीजमिदं गोपालवीजमित्यपि ।
तत्कामवीजं कामेशी वीजं शक्तिरसौ परा॥क्लीं॥
सद्यान्तयुक्थोमसेन्दुश्चैवं प्रासादमुच्यते । हौं ॥
कलाढ्यं क्षेत्रिनीवीजं क्रोङ्कारस्त्वङ्कुशाभिधः॥क्रों॥
आकारो बिन्दुमान् पाशः शेषश्च समुदीरितः ।
सकला भुवनेशानी कामेशी वीजमुच्यते ।
नमस्तु हृदयं स्वाहा द्विठठयुगलं ठठः ॥
नमः ॥ स्वाहा ॥
चन्द्रयुग्मं शिवो वेदमाता ज्वलनसुन्दरी ।
स्वाहा परा देवभोज्यं ठद्वयं चन्द्रयुग्मकम् ।
स्रुवो हविर्व्वेदमाता देवास्यं वह्निसुन्दरी ॥स्वाहा॥
शिखा वषट् शिरोमध्य शक्रमाता हरप्रिया ।
शिखा वषट् च । वषट् कवचं क्रोधो वर्म्मकूर्चमित्यपि ।
क्रोधाख्योऽहं तनुत्रञ्च शस्त्रादौ रिपुसंज्ञकः ॥हूं॥
अक्षिनेत्रयुगं वौषट् । वौषट् । फड़स्त्रं शस्त्रमायुधम् । फट् ।
तार्त्तीयस्तु ह्सौः प्रेतवीजम् । ह्सौः । हंसोऽजपामनुः । हंसः ।
गकारो बिन्दुमान् विघ्नवीजं गणेशवीजकम्॥गं॥
स्थितिस्थं मांसमौबिन्दुयुतं भूवीजमीरितम् ॥लं॥
ठान्तं दहननेत्रेन्दुयुतन्तु विश्ववीजकम् । ड्रीं ।
अथ कामकलावामनयनं बिन्दुसंयुतम् ।
अर्कमात्राकलावाणीनादोऽर्द्धेन्दुः सदाशिवः ।
अनुच्चार्य्यतुरीया च विश्वमातृकला परा ॥ ँ ॥
नादः ॥

भूतडामरसङ्केतबोधार्थं भूतडामरीयवीजनामा-
न्यपि लिख्यन्ते ।
प्रणवो विषवीजं स्यात् ध्रुवं हालाहलं स्मृतम् ।
कालमृत्युपथं ज्ञेयं बहुरूपी निरञ्जनम् ।प्रणवम्।
चन्द्रस्थं वोमवक्त्रं धूम्रभैरवभूषितम् ।
नादविन्दुसमायुक्तं वीजं प्राणात्मकं स्मृतम् ।ह्रीँ
क्रोधीशं चतमारूढं धूम्रभैरवभूषितम् ।
विद्या जिह्वा विन्दुयुतं पिष्टभूषाविनी स्मृतम्।क्रीँ
क्रोधकालात्मकं कुर्य्याज्जैतिकं वाग्भवं स्मृतम् ।
नादविन्दुसमायुक्तं समाधायोग्रभैरवीम् ।
वीजमेतत्तु कथितं शुद्धबुद्धिप्रवर्त्तकम् । ऐँ ।
क्रोधीशं बलभद्रधूम्रभैरवीनादविन्दुभिः ।
त्रिमूर्त्तिमन्मथं कामराजस्त्रैलोक्यमोहनम् ।
इन्द्रासनगतो ब्रह्म समूर्त्तिस्तु समन्मथः ।क्लीँ ।
संयुक्तं धूम्रभैरव्यारक्तस्थं बलिभोजनम् ।
नादविन्दुसमायुक्तं किङ्किणी वीजमुत्तमम् ।स्त्रीँ ।
नादविन्दुसमायुक्तं रक्तस्थं बलिभोजनम् ।
कालरात्र्यासनोपेतं विशिखाख्यं महामनुम्।ह्रीँ।
विदार्य्यालिङ्गितोग्रात्मीवसितचतजोचतः ।
नादविन्दुसमायुक्तो विज्ञेयः पिशिताशनम् ।हुँ।
धूम्रध्वजाधः कालाग्निः सोह्यंकैशीन्दुविन्दुभिः ।
युगान्तकारकं वीजं भैरवेण प्रकाशितम् ।स्रौँ।
कपर्द्दिनं समादाय चतजः चितिविग्रहम् ।
संयुक्तं धूम्रभैरव्या चोहयं नादविन्दुमान् ।प्रीँ।
कपालीद्वयमादाय महाकालेन मण्डितम् ।
समासनमिति प्रोक्तं चण्डिकाठंप्रयोजयेत् ।
ठं ठं ठः ठः ।
चतजस्थं वोमवक्त्रं चन्द्रचतविभूषितम् ।
खद्योतमिति संप्रोक्तं ग्रासिनी कालरात्रियुक् ।
हूँ ह्रूँ ।
चतजो चतमाकाशं नादविन्दुविभूषितम् ।
विदारी भूषितञ्चैव वीजं वैवस्वतोदकम् ।ह्रूँ।
कौलिनाख्या कालवक्त्रा च महाकालेन साधितम्।
तदनादिपचरश्मिः सृष्टिस्थित्यन्ततद्विधिः । ॐ ।
वोमस्थं तालजङ्घाख्यं विन्दुनादविभूषितम् ।
हूँ काली महाकालः क्रोधवीजं निरञ्जनम्।हूँ।
इति प्राणतोषिणी ।)

वीजकः, पुं, मातुलुङ्गकः इति जटाधरः । वृच-
विशेषः । विजयासार इति हिन्दी भाषा ।
तत्पर्य्यायः । पीतसारः २ पीतशालकः ३
बन्धूकपुष्पः ४ प्रियकः ५ सर्ज्जकः ६ आसनः ७ ।
अस्य गुणाः । कुष्ठवीसर्पश्चित्रमेहगुदक्रिमि-
श्लेष्मासपित्तनाशित्वम् । त्वच्यत्वम् । केश्यत्वम् ।
रसायनत्वञ्च । इति भावप्रकाशः । (यथा,
हरिवंशे । १५५ । २० ।
"अशनैर्व्वीजकैश्चैव मन्दारैश्चोपशोभितम् ।")
वीजे, क्ली ।

वीजकृत्, क्ली, (वीजं वीर्य्यं करोति वर्द्धयतीति ।
कृ + क्विप् ।) वाजीकरणम् । इति राजनिर्घण्टः ।

वीजकोशः } पुं, (वीजानां कोष आधार इव ।)
वीजकोषः } पद्मवीजाधारचक्रिका । कौँपल
इति ख्यातः । इति भरतः । तत्पर्य्यायः ।
वराटकः २ । इत्यमरः । कर्णिका ३ । इति
जटाधरः । वारिकुब्जः ४ शृङ्गाटकः ५ । इति
शब्दरत्नावली ।

वीजगर्भः, पुं, (वीजानि गर्भेऽभ्यन्तरे यस्य ।)
पटोलः । इति राजनिर्घण्टः ।

वीजगुप्तिः, स्त्री, (वीजानां गुप्तिर्यत्र ।) शिम्बी ।
इति राजनिर्घण्टः ।

वीजधान्यं, क्ली, (वीजप्रधानं धान्यम् ।) धान्य-
कम् । इति राजनिर्घण्टः ।

वीजनं, क्ली, (वीज्यतेऽनेनेति । वि + ईज + करणे
ल्युट् ।) व्यजनम् । (यथा, आर्य्यासप्तशत्याम् । ३५० ।
"मलयजमपसार्य्य घनं वीजनविघ्नं विधाय
बाहुभ्याम् ।
स्मरसन्तापादग्रथितनिदाघमालिङ्गते मिथु-
नम् ।")
वस्तु । कोके जीवञ्जीवे च पुं । इति सारस्वतः ।

वीजपादपः, पुं, (वीजप्रधानः पादपः ।) भल्ला-
तकः । इति राजनिर्घण्टः । (वीजोत्पन्न-
वृचमात्रञ्च ।)

वीजपुष्पं, क्ली, (वीजप्रधानं पुष्पं यस्य ।) मरु-
वकः । मदनवृचः । इति मेदिनी । पे, २६ ।

वीजपूरः, पुं, (वीजानां पूरः समूहो यत्र ।) फल-
पूरः । इत्यमरः । टावा लेवु इति बङ्गभाषा ।
बिजौरा इति हिन्दी भाषा । तत्पर्य्यायः ।
वीजपूर्णः २ पूर्णवीजः ३ सुकेशरः ४ वीजकः ५
केशराम्लः ६ मातुलुङ्गः ७ सुपूरकः ८ रुचकः ९
वीजफलकः १० जन्तुघ्नः ११ दन्तुरच्छदः १२
पूरकः १३ रोचनफलः १४ । अस्य फलगुणाः ।
अम्लत्वम् । कटुत्वम् । उष्णत्वम् । श्वासकास-
पवनशमनत्वम् । कण्ठशोधनकरत्वम् । लघु-
त्वम् । हृद्यत्वम् । दीपनत्वम् । रुचिकारि-
त्वम् । पाचनत्वम् । आध्मानगुल्महृद्रोगप्लीहो-
दरार्त्तिनाशित्वम् । विबन्धे हिक्कायां शूले
छर्द्यां च प्रशस्तत्वञ्च । इति राजनिर्घण्टः । * ।
अपि च ।
"वीजपूरफलं स्वादु रसेऽम्लं दीपनं लघु ।
रक्तपित्तहरं कण्ठजिह्वाहृदयशोधकम् ।
श्वासकासारुचिहरं हृद्यं तृष्णाहरं स्मृतम् ।"
तद्भेदमधुकर्कटी । यथा,—
"वीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ।
मधुकर्कटिका स्वादी रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ।"
इति भावप्रकाशः ।
(यथा, महाभारते । ३ । १५८ । ४२ ।
"सुभ्रातकांस्तथा जीवान् दाडिमान् वीज-
पूरकान् ।")

वीजपूर्णः, पुं, (वीजेन पूर्णः ।) कोलङ्गः । इति
रत्नमाला । वीजपूरः । इति राजनिर्घण्टः ।

वीजपेशिका, स्त्री, (वीजस्य शुक्रस्य पेशिकेव ।)
अण्डकोषः । इति राजनिर्घण्टः ।

वीजफलकः, पुं, (वीजप्रधानं फलं यस्य । कन् ।)
वीजपूरः । इति राजनिर्घण्टः ।

वीजमातृका, स्त्री, (वीजानां वीजमन्त्राणां मातेव
जपमालात्वादस्यास्तथात्वम् ।) पद्मवीजम् ।
यथा,—
"पद्माख्यं पद्मवीजञ्च कर्णिका वीजमातृका ।"
इति हारावली ।

वीजरत्नः, पुं, (वीजं रत्नमिव यस्य ।) माष-
कलायः । इति हेमचन्द्रः ।

वीजरुहः, पुं, (वीजात् रोहतीति । रुह +
इगुपधात् कः ।) शाल्यादिः । यथा,—
"कुरण्टाद्या अग्रवीजा मूलजास्तूत्पलादयः ।
पर्व्वयोनय इक्ष्वाद्याः स्कन्दजाः शल्लकीमुखाः ।
शाल्यादयो वीजरुहा संमूर्च्छनजास्तृणादयः ।
स्युर्व्वनस्पतिका यस्य षड़ेते मूलजातयः ।"
इति हेमचन्द्रः ।
(क्वचित् वाच्यलिङ्गोऽपि दृश्यते ।)

वीजरेचनं, क्ली, (वीजं रेचनं रेचकं यस्य ।)
जयपालः । इति राजनिर्घण्टः ।

वीजवपनं, क्ली, (वीजानां वपनम् ।) क्षेत्रे वीजस्य
क्षेपणम् । तस्य दिनं दीपिकायाम् ।
"पूर्व्वाश्रियाम्यफल्गुपित्र्याश्विवान्यभेशु
रिक्ताष्टमीविगतचन्द्रतिथिं विहाय ।
इराङ्गालिगोसमुदये विकुजार्किवारे
शस्तेन्दुयोगकरणेषु हलप्रवाहः ।
हलप्रवाहवद्वीजवपनस्य विधिः स्मृतः ।
चित्रायाञ्च शुभे केन्द्रे स्थिरस्वमशुभोदये ।
हेमवारिविलिप्तस्य वीजस्योन्नयतः शुचिः ।
इन्द्रं चित्ते निधायाथ स्वयं सुष्टिचयं वपेत् ।
कृत्वा चान्योन्यप्रोत्साहं नर्त्तको हृष्टमानसः ।
प्राङ्मुखः कलसं गृह्य इमं मन्त्रमुदीरयेत् ।
त्वं वै वसुन्धरे सीते बहुपुष्पफलप्रदे ।
नमस्ते मे शुभं नित्यं कृषिं मेधां शुभे कुरु ।
रोहन्तु सर्व्वशस्यानि काले देवः प्रवर्षतु ।
कर्षकास्तु भवन्त्वग्र्या धान्येन च धनेन च
स्वाहा ।
उप्ता वीजन्तु तत्रैव भोक्तव्यं बान्धवैः सह ।
वीजवपनं प्राजापत्यतीर्थेन । यथा, हारीतः ।
कनिष्ठायाः पश्चात् प्राजापत्यमाचमनम् । होम-
तर्पणे प्राजापत्येन कुर्य्यादिति । होमतर्पणे
लाजहोमशनकादितर्पणे । पराशरः ।
"वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ ।
अतः परस्मिन्नधमं न जातु श्रावणे शुभम् ।"
ज्योतिषे ।
"पूर्व्वभाद्रपदा मूलं रोहिण्युत्तरफल्गुनी ।
विशाखा शतभिषा चाथ धान्यानां रोपणे
वरा ।
सदोप्ता रजनी नीली पुष्यवित्तैर्विमुच्यते ।
स्वयंजाते पुनस्ते हि पालयन् नैव दुष्यति ।
आरामे गृहमध्ये वा मोहात् सर्षपमावपन् ।
पराभवं रिपोर्याति ससाधनधनक्षयम् ।
निशा नीली पलाशश्च चिञ्चा श्वेतापराजिता ।
कोविदारश्च सर्व्वत्र सर्व्वं निघ्नन्ति मङ्गलम् ।"
निशा हरिद्रा । कोविदारको रक्तकाञ्चनः ।

"हेमाम्भसा हृत्वबीजं स्नातो मन्त्रेण रोपयेत्।
वसुधेति सुशीतेति पुण्यदेति धरेति च।
नमस्ते शुभगे नित्यं द्रुमोऽयं वर्द्धतामिति॥"
इति ज्योतिस्तत्त्वम्॥

बीजरुहः, पुं, (बीजादेव रुहो यस्य। बीजप्रधानो रुहो वा।) असनः। इति राजनिर्घण्टः॥

बीजसञ्चयः, पुं, (बीजानां सञ्चयः।) बीजसंग्रहः। तच्छुभाशुभदिनादिर्यथा,—
"हस्ताचित्रादितिस्वातीरेवत्यां श्रवणद्वये।
स्थिरे लग्ने गुरौ शुक्रे बीजं धार्य्यं शुभावसरे॥
माघे वा फाल्गुने वापि सर्व्वबीजानि संग्रहेत्।
शोषयेत्तापयेद्रौद्रे रात्रौ चोपनिधापयेत्॥
ततश्च पुटिकां बद्धा शोषयेच्च पुनः पुनः।
स्थापयेच्च प्रयत्नेन यथा भूमिश्च न स्पृशेत्॥
दीपाग्निना च संस्पृष्टं दृष्ट्या चोपहतञ्च यत्।
वर्ज्जनीयं तथा बीजं यत् स्यात् कीटसमन्वितम्॥*॥
याम्याहिरुद्राग्निविशाखपूर्व्वा-
माहेन्द्रपित्रोत्तरभैः शुभाहे।
धान्यादिसंस्थापनमेषु शस्तं
मृगस्थिरद्व्यङ्गघटोदयेषु॥
सौम्यादितिमघाज्येष्ठोत्तरात्तरेषु च कारयेत्।
मीने लग्ने शुभे चन्द्रे निधनक्रूरवर्ज्जिते॥
चैत्रमथं कोष्ठके धान्यं गर्गो वदति सर्व्वदा।
धनदाय सर्व्वलोकहिताय देहि मे धान्यं स्वाहा।
नम ईहायै ईहादेवी सर्व्वलोकविवर्द्धिनी कामरूपिणि धान्यं देहि स्वाहा।
लेखयित्वा इमं मन्त्रं धान्यागारे विनिक्षिपेत्॥"
पुराणसर्व्वस्वे।
"मन्त्रं लिखित्वा पत्रे च मध्ये धान्यस्य धारयेत्।
पञ्चम धान्यराशेस्तु मूषिकादिनिवृत्तये॥
दक्षिणदिङ्मुखगमनं स्यादभिनवासु नारीषु।
चयमपि शस्यफलानां न बुधो बुधवासरे कुर्य्यात्॥
त्रिपूर्व्वेषु रेवत्यां धनिष्ठावारुणेषु च।
एतेषु षट्सु विज्ञेयं धान्यनिष्क्रयणं बुधैः॥
श्रवणात्रयं विशाखाध्रुवपौष्णपुनर्व्वसूनि पुष्यञ्च।
अश्विन्यथ ज्येष्ठा धनधान्यविवर्द्धिनी कथिता॥"
इति ज्योतिस्तत्त्वम्॥

बीजसूः, स्त्री, (बीजानि सूते इति। सू+क्विप्।) पृथ्वी। इति हेमचन्द्रः॥

बीजाकृतं, त्रि, (बीजेन सह कृतं कृष्टमिति। "कृञो द्वितीयतृतीयशम्बबीजात् कृषौ।" ५।४।५८। इति डाच्।) उप्तकृष्टम्। इत्यमरः॥ द्वे बीजेन सह कृष्टे क्षेत्रे। बीजेन सह कृतं कृष्टं बीजाकृतम्। तीयशम्बबीजेति डाच्। आदौ उप्तं पश्चात् कृष्टं उप्तकृष्टम्। इति भरतः॥

बीजाम्लं, क्ली, (बीजे अम्लोऽम्लरसो यस्य।) वृक्षाम्लम्। इति राजनिर्घण्टः॥

बीजी, [न्] पुं, (बीजमस्त्यस्येति। बीज+इनिः।) पिता। इति हेमचन्द्रः॥ (यथा, उद्वाहतत्त्वे।
"अतएव द्वैतनिर्णयेऽपि सापिण्ड्यगणने बीजिनमारभ्येत्युक्तम्।" यथा च गौतमसंहितायाम्। ४। १।
"असमानप्रवरैर्व्विवाह ऊर्द्ध्वं सप्तमात् पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्॥")
बीजविशिष्टे, त्रि॥ (यथा, मनौ। ९। ५१।
"तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः।
कुर्व्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम्॥")

बीजोदकं, क्ली, (बीजमिव कठिनमुदकम्। तस्य कठिनत्वात्तथात्वम्।) करका। इति त्रिकाण्डशेषः॥

बीजोप्तिचक्रं, क्ली, (बीजानामुप्तये शुभाशुभसूचकं चक्रम्।) बीजवपनजन्यशुभाशुभज्ञानार्थसर्पाकारचक्रम्। यथा,—
"सूर्य्यभादुरगः स्थाप्यस्त्रिनाड्यकान्तरक्रमात्।
मुखे त्रीणि गले त्रीणि भानि द्वादश तूदरे॥
पुच्छे चतुर्व्वहिः पञ्च दिनभाच्च फलं वदेत्।
वदने चोषकं विद्यात् गलकेऽङ्गारकस्तथा॥
उदरे धान्यवृद्धिः स्यात् पुच्छे धान्यक्षयो भवेत्।
ईतिरोगभयं राज्ये चक्रे बीजोप्तिसम्भवे॥"
सूर्य्यभात् सूर्य्यभुज्यमाननक्षत्रात्। त्रिनाड्यकान्तरक्रमादिति यद्यश्विन्यां रविस्तदा तामारभ्य गणयेत्। त्रिनाडीषु अश्विनीभरणीकृत्तिकासु दत्त्वा रोहिणी वहिः कार्य्या मृगशिरश्च आर्द्रापुनर्व्वसुनाडीषु दत्त्वा पुष्यो वहिः कार्य्यः। एवं क्रमेणान्या लेख्याः। चोषकं शस्यशून्यताम्। ईतयः।
"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः।
प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृताः॥"
इति ज्योतिस्तत्त्वम्॥

बीज्यः, त्रि, (विशेषेण इज्यः पूज्यः। अथवा बीजाय हितः इति। "उगवादिभ्यो यत्।" ५।१।२। इति यत्।) यस्य कस्यचित् कुलभवः। तत्पर्य्यायः। कुलसंभवः २। इत्यमरः॥ वंश्यः ३ कौलकेयः ४ कुलजः ५। इति शब्दरत्नावली॥ कुलीनः ६ कुल्यः ७ कुलभवः ८। इति जटाधरः॥

बीटिः, स्त्री, (विशेषेण इटति छायानिखातयष्ट्यादिं वेष्टयित्वा प्रवर्त्तते। वि+इट+"इगुपधात् कित्।" उणा० ४।११९। इति इन्। स च कित्।) ताम्बूलवल्ली। इति केचित्॥ सुसज्जीकृतताम्बूलम्। पानेर बीड़ा इति भाषा। इति केचित्॥

बीटिका, स्त्री, (बीटिरेव। स्वार्थे कन् स्त्रियामाप्।) ताम्बूलवल्ली। इति केचित्॥ सुसज्जीकृतताम्बूलम्। पानेर बीड़ि इति भाषा। इति केचित्॥ (यथा, राजतरङ्गिण्याम्। ४। ४३०।
"भूसंशयासि कस्य त्वं पृष्टाया इति सुभ्रुवः।
ददत्या बीटिकां तस्या वृत्तान्तमुपलब्धवान्॥")

बीटी, स्त्री, (बीटि+वा ङीष्।) ताम्बूलवल्ली। इति केचित्॥ सुसज्जीकृतताम्बूलम्। पानेर बीड़ि इति भाषा। इति केचित्॥

बीणा, स्त्री, (वेति वृद्धिमात्रमपगच्छतीति। वी गतौ+"रास्नासास्नास्थूणावीणाः।" उणा० ३। १५। इति नः निपातनाद्गुणाभावो णत्वञ्च।) विद्युत्। इति मेदिनी। णे, २८॥ (वेति श्रोतुश्चित्तं व्याप्नोतीति। वी व्याप्तौ+नः।) स्वनामख्यातवाद्यम्। तत्पर्य्यायः। वल्लकी २ विपञ्ची ३। सा तु सप्ततन्त्रीयुक्ता चेत्परिवादिनी ४। इत्यमरः॥ ध्वनिमाला ५। इति जटाधरः। घण्टमक्षी ६ विपञ्चिका ७। इति शब्दरत्नावली॥ घोषवती ८ कण्ठकूणिका ९। (यथा, महाभारते। ९। १३४। १४।
"सप्तर्षयः सप्त चाप्यर्हणानि
सप्ततन्त्री प्रथिता चैव बीणा॥")
तद्भेदा यथा। शिवस्य बीणा लम्बी १ सरस्वत्याः कच्छपी २ नारदस्य महती ३ गणानां प्रभावती ४ विश्वावसोः वृहती ५ तुम्बुरोः कलावती ६ चाण्डालानां कण्डोलबीणा चाण्डालिका च ७। तस्याङ्गादीनां नामादि यथा। तस्याः कायः कोलम्बकः। तस्या निबन्धनं उपनाहः। तस्या दण्डः प्रवालः। तस्याः प्रान्तवक्रकाष्ठं ककुभः प्रसेवकश्च। तस्या मूले वंशशलाका कलिका कूणिकापि च। तस्या वादनं कोणः। इति हेमचन्द्रादयः॥ अस्या विवरणं वाद्यशब्दे द्रष्टव्यम्॥

बीणादण्डः, पुं, (बीणाया दण्डः।) बीणास्थितालाबूपरिकाष्ठम्। तत्पर्य्यायः। प्रवालः २। इत्यमरः॥

बीणानुबन्धः, पुं, (बीणाया अनुबन्धः।) उपनाहः। इति हारावली॥

बीणावादः, त्रि, (बीणां वादयतीति। वद्+णिच्+अण्।) बीणावादकः। तत्पर्य्यायः। वैणिकः २। इत्यमरः॥ (यथा, वाजसनेयसंहितायाम्। ३०। १९।
"शब्दायाडम्बराघातं महसे बीणावादमिति॥")

बीणावादकः, पुं, (बीणाया वादकः।) बीणावाद्यकर्त्ता। इति शब्दरत्नावली॥

बीणास्यः, पुं, (बीणा आस्यमिव यस्य। तथैव स्फुटगानकरणात्।) नारदः। इति जटाधरः॥

बीतं, क्ली, (वेति स्म। वी+क्तः। अथवा अजति स्म। अज्+गत्यर्थेति क्तः।) असारहस्त्यश्वम्। युद्धाक्षममित्यर्थः। इत्यमरः॥ अङ्कुशकर्म्म। इति मेदिनी। ते, ५८॥ (यथा, माघे। ५। ४७।
"निर्धूतबीतमपि बालकमुन्नमन्तं
यन्ता क्रमेण परिसान्त्वनतर्ज्जनाभिः॥"
सांख्योक्तानुमानविशेषः। यथा, सांख्यतत्त्वकौमुद्याम्। ५।
"प्रथमं तावद्द्विविधं बीतमबीतञ्च। अन्वयमुखेन प्रवर्त्तमानं विधायकं बीतम्।" अस्य विशेषविवरणं तत्रैव द्रष्टव्यम्॥ त्रि। कमनीयः। यथा, ऋग्वेदे। ४। ७। ६।
"तं शश्वतीषु मातृषु वन आ बीतमश्रितम्॥"
"बीतं कान्तम्।" इति तद्भाष्ये सायणः॥)

वीतंसः, पुं, (विशेषेण बहिरेव तस्यते भूष्यते इति। वि+तनुस+घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्।" ६।३।१२२। इति दीर्घः।) मृगपक्षिणां बन्धनोपकरणम्। इत्यमरः॥ मृगपक्षिणां विश्वासहेतोः प्रावरणम्। इति मेदिनी। से, ४०॥

वीतः, त्रि, (विशेषेण इति स्म। वि+इण्+क्तः।) शान्तः। इति हेमचन्द्रः॥ गतः। विपूर्व्व-णधातोः क्तप्रत्ययेन निष्पन्नमिदम्॥ (यथा, रघौ। ५।२।

"स मृण्मये वीतहिरण्मयत्वात्
पात्रे निधायार्घ्यमनर्घ्यशीलः॥")

वीतदम्भः, त्रि, (वीतस्त्यक्तो दम्भो येन सः।) त्यक्त-दम्भः। तत्पर्य्यायः। अवल्कनः २। इति जटाधरः॥

वीतनः, पुं, गलकपार्श्वद्वयम्। यथा, हेमचन्द्रे।
"गलस्तु कन्धरामध्यं गलपार्श्वौ तु वीतनौ॥"

वीतभयः, पुं, (वीतं भयं यस्य यस्माद्वा।) विष्णुः। यथा,—
"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्त्तनः॥"
इति तस्य सहस्रनामस्तोत्रम्॥

वीतरागः, पुं, (वीतो रागो विषयवासना यस्य।) बुद्धः। इति त्रिकाण्डशेषः॥ विगतरागे, त्रि। यथा,—
"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥"
इति भगवद्गीता॥

(यथा च महाभारते। १२। ३४६। ४७।
"वीतरागश्च पुत्रस्ते परमात्मा भविष्यति।
महेश्वरप्रसादेन नैतद्वचनमन्यथा॥")

वीतशोकः, पुं, अशोकवृक्षः। इति शब्दमाला॥ (वीतः शोको यस्मात्। अशोकाष्टम्यां तत्पानेन शोकनाशत्वात्तस्य तथात्वम्। तथा च तिथितत्त्वे।
"त्वामशोक हराभीष्ट मधुमाससमुद्भव।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु॥"
विगतः शोको यस्य।) विगतशोके, त्रि। (यथा, महाभारते। ३। १७३। १०।
"सर्व्वकामगुणोपेतं वीतशोकमनामयम्॥")

वीतिः, स्त्री (वयनमिति। वी+क्तिन्।) गतिः। दीप्तिः। (यथा, गो॰ रामायणे। २। १००। ४७।
"सुवर्णवीतिप्रतिमाः पद्मकिञ्जल्कसप्रभाः।
दिव्या विंशति साहस्राः कुवेरप्रहिताः स्त्रियः॥")
प्रजननम्। अशनम्। धावनम्। इति मेदिनी। ते, ५६॥ (पानम्। यथा, ऋग्वेदे। ७।६८।२।
"प्रवामन्धांसि मद्यान्यस्थुररं गन्तं हविषो
वीतये मे॥"
"हविषो वीतये पानाय।" इति तद्भाष्ये सायणः॥
प्राप्तिः। यथा, ऋग्वेदे। ३। १३। ४।
"स नः शर्म्माणि वीतयेऽग्निर्यच्छतु शन्तमा॥"
"वीतये सम्भजनाय अग्निहोत्रादिकर्म्म प्राप्त्य-र्थम्।" इति तद्भाष्ये सायणः॥ यज्ञः। यथा, ऋग्वेदे। ६। १। ४।
"अभ्यर्षमहानां देवानां वीतिमन्धसा॥"
"वीतिं यज्ञं अन्धसा धानाद्यन्नेन सह अभ्यर्ष अभिगच्छ।" इति तद्भाष्ये सायणः॥)

वीतिः, पुं, घोटकः। इति हेमचन्द्रः॥ (यथा, राजतरङ्गिण्याम्। ७। ३७७।
"अस्मिंस्तु वीतिमारूढ़े वीतिहोत्रसमे नृपे।
कस्माता च त्वदीयानां हयानामिव शक्ति-
ताम्॥")

वीतिहोत्रः, पुं, (वी गतिकान्त्यसनखादनेषु+कर्म्मणि क्तिन्। वीतिः पुरोडाशादिः हूयते अस्मिन्निति। "हुयामाश्रुभसिभ्यस्त्रन्।" उणा॰ ४। १६७। इति त्रन्। अथवा वीतये पानाय होत्रं हव्यं यस्य।) अग्निः। इत्यमरः॥ सूर्य्यः। इति मेदिनी। ते, २६७॥ (यथा, राजतरङ्गिण्याम्। ७। ३७७।
"अस्मिंस्तु वीतिमारूढ़े वीतिहोत्रसमे नृपे॥"
प्रियव्रतपुत्त्रान्यतमः। यथा, भागवते। ५।१।२५।
"अग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतो घृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व्व एवाग्निनामानः॥" राजविशेषः। यथा, महाभारते। ७। ६८। १०।
"रथोवाहान् वीतिहोत्रान् त्रिगर्त्तान् मार्त्ति-
कावतान्॥"
हैहयवंशीयराजविशेषः। यथा, हरिवंशे। ३३। ५०।
"तेषां कुले महाराज हैहयानां महात्मनाम्।
वीतिहोत्रः सुजाताश्च भोजाश्चावन्तयः
स्मृताः॥"
त्रि, प्राप्तयज्ञः। यथा, ऋग्वेदे। १।८४।१८।
"कस्मै देवा आवहानाशु होम
को मंसते वीतिहोत्रः सुदेवः॥"
"वीतिहोत्रः प्राप्तयज्ञः। * * *। वीतिहोत्रः वीगत्यादिषु अस्मात् कर्म्मणि मन्त्रे वृषेत्यादिना क्तिन् स चोदात्तः। होत्रं होमः हुयामाश्रु-भसिभ्यस्त्रन् इति त्रन्प्रत्ययः। वीतिः प्राप्तो होमो येन बहुव्रीहौ पूर्व्वपदप्रकृतिस्वरत्वम्॥" इति तद्भाष्ये सायणः॥ कान्तयज्ञः। यथा, ऋग्वेदे। २। ३८। १।
"नूनं देवेभ्यो विहिधाति रत्न-
मथाभजद्वीतिहोत्रं स्वस्तौ॥"
"वीतिहोत्रं कान्तयज्ञं यजमानं स्वस्तौ अवि-नाशे क्षेमे आ अभजद्भागिनं करोतु।" इति तद्भाष्ये सायणः॥)

वीथिः, स्त्री, (विध्यतेऽनया। विध+इगुपधात् किदितीन्। बाहुलकाद्दीर्घः।) वीथी। यथा,—
"पङ्क्तिवर्त्मगृहाङ्गेषु वीथिर्वीथी च वीथिका।"
इति रत्नकोषः॥
(यथा, राजतरङ्गिण्याम्। ३। ३६२।
"तद्विना नगरं कुत्र पवित्राः सुलभा भुवि।
सुभगाः सिन्धुसम्भेदाः क्रीड़ावसथवीथिषु॥"
वर्त्मार्थे यथा, राजतरङ्गिण्याम्। ३। ३०७।
"चिरं खलु खिलीभूताः कलहंसस्य वीथयः।
धीर त्वयैव न तासु सञ्चारो यदि दृश्यते॥")

वीथिका, स्त्री, (वीथिरेव। स्वार्थे कन् ततष्टाप्।) वीथिः। इति शब्दरत्नावली॥ (यथा, कथा-सरित्सागरे। ७३। ३०।
"अस्ति दक्षिणदिक्प्रान्ते प्रावृषो जन्मभूरिव।
पिहितार्का घनश्यामा तमालवनवीथिका॥")

वीथी, स्त्री, (वीथि+वा ङीष्।) पङ्क्तिः। गृहा-ङ्गम्। (यथा, हरिवंशे। ८३। १८।
"तावुभौ सुवसनौ जग्मतुर्माल्यकारणात्।
वीथीं माल्यापणानां वै गन्धाघ्रातौ द्विपाविव॥")
नाट्यरूपकः। वर्त्म। इति मेदिनी। थे, ११॥
(यथा, महाभारते। ५। ५१। ३२।
"वीथीं कुर्व्वन् महाबाहुर्द्रावयन् मम वाहि-
नीम्।
नृत्यन्निव गदापाणिर्युगान्तं दर्शयिष्यति॥" *॥)
अथ वीथी।
"वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र कल्प्यते।
आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः॥
सूचयेद्भूरि शृङ्गारं किञ्चिदन्यान् रसानपि।
मुखनिर्व्वहणे सन्धी अर्थप्रकृतयोऽखिलाः॥
कश्चिदित्युत्तमो मध्यमोऽधमो वा शृङ्गारबहुल-
भाषास्याः कैशिकीवृत्तिबहुलत्वम्॥ *॥
अस्यास्त्रयोदशाङ्गानि निर्द्दिशन्ति मनीषिणः।
उद्घात्यकावलगिते प्रपञ्चस्त्रिगतं छलम्॥
वाक्केल्यधिवले गण्डमवस्यन्दितनालिके।
असत्प्रलापव्याहारमृदवानि च तानि तु॥*॥
तत्रोद्घात्यकावलगिते प्रस्तावनाप्रस्तावे सोदा-
हरणं लक्षिते॥ *॥
मिथोवाक्यसमुद्भूतं प्रपञ्चो हास्यकृन्मतः॥
यथा, विक्रमोर्व्वश्याम्। वड़भीस्थविदूषकचेट्यो-
रन्योन्यवचनम्। *।
त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः॥
यथा। तत्रैव राजा।
सर्व्वक्षितिभृतां नाथ दृष्टा सर्व्वाङ्गसुन्दरी।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया॥
नेपथ्ये तत्रैव प्रतिशब्दः राजा कथं दृष्टेत्याह।
अत्र प्रश्नवाक्यमेवोत्तरवाक्यत्वेन योजितम्।
नटादित्रितयविषयमेवेदमिति कश्चित्॥ *॥
प्रियाभैरप्रियैर्व्वाक्यैर्विलोभ्य छलनात् छलम्।
यथा, वेण्यां भीमार्ज्जुनौ।
कर्त्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः
सोऽभिमानी
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य
मित्रम्।
कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य
दासाः
क्वास्ते दुर्य्योधनोऽसौ कथयतु न रुषा द्रष्टुम-
भ्यागतौ स्वः॥
अन्ये त्वाहुश्छलं किञ्चित् कार्य्यमुद्दिश्य कस्य-
चित्।

उद्दीर्य्यते यद्वचनं वचनाद्धास्यरोषकृत् ॥ * ॥
वाक्केलिर्हास्यसम्बन्धो द्वित्रिप्रत्युक्तितोभवेत् ॥
द्वित्रीत्युपलक्षणं यथा,—
भिक्षो मांसनिषेवणं प्रकुरुषे किन्तेन मद्यं विना
मद्यञ्चापि तव प्रियं प्रियमहो वाराङ्गनाभिः
सह ।
तासामर्थरुचिः कुतस्तव धनं द्यूतेन चौर्य्येण वा
चौर्य्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या
गतिः ॥
केचित् प्रक्रान्तवाक्यस्य साकाङ्क्षस्यैव निर्व्वृत्ति-
र्वाक्केलिरित्याहुः । अन्ये चानेकस्य प्रश्नस्यै-
कमुत्तरम् ॥ * ॥
अन्योन्यवाक्याधिक्योक्तिः स्पर्द्धयाधिबलं मतम् ॥
यथा, मम प्रभावत्यां वज्रनाभः ।
अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयिष्यामि भुवनद्वयमद्य वः ॥
प्रद्युम्नः । अरे रे असुरापसद अलमसुना बहु-
प्रलापेन मम खलु ।
अद्य प्रचण्डभुजदण्डसमर्पितोरु-
कोदण्डनिर्गलितकाण्डसमूहपातैः ।
आस्तां समस्तदितिजक्षतजोक्षितेयं
क्षौणी क्षणेन पिशिताशनशोभनीया ॥ * ॥
गण्डं प्रस्तुतसम्बन्धि भिन्नार्थं सत्वरं वचः ॥
यथा वेण्यां राजा ।
अध्यासितुं तव चिराज्जघनस्थलस्य
पर्य्याप्तमेव करभोरु ममोरुयुग्मम् ।
अनन्तरं प्रविश्य कञ्चुकी देव भग्नं भग्नमित्यादि ।
अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे सम्बन्धि
सम्बद्धम् ॥ * ॥
व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत् ॥
यथा छलितरामे सीता । जाद कल्लं क्खु उ
अज्झा एत्थ गन्तव्वं तहिं सो राआ विणएण
पणमयिदव्वो । लवः । अथ किमावाभ्यां राजो-
पजीविभ्यां भवितव्यम् । सीता । जादसो
तुह्माणं पिदा । लवः । किमावयो रघुपतिः
पिता । सीता । साशङ्कं मा अण्णधा सङ्कधं
क्खु तुह्माणं स आलाअ्जे एव पुहवीएत्ति ॥*॥
प्रहेलिकेव हास्येन युक्ता भवति नालिका ॥
संवरणकार्य्युत्तरं प्रहेलिका । यथा रत्नावल्याम् ।
सुसङ्गता सहि जस्स कदे तुमं आअदा सो
इधज्जेव चिट्ठदि साअरिआ कस्स कदे अहं
आअदा सुसंगा चित्तफलअस्स । अत्र त्वं राज्ञः
कृते आगतेत्यर्थः संवृतः ॥ * ॥
असत्प्रलापो यद्वाक्यमसम्बद्धं तथोत्तरम् ।
अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं
वचः ॥
तत्राद्यं यथा मम प्रभावत्याम् । प्रद्युम्नः सह-
कारवल्लीमवलोक्य सानन्दं अहो कथमिहैव ।
अलिकुलमञ्जुलकेशी
परिमलबहुला रसावहा तन्वी ।
किशलयपेशलपाणिः
कोकिलकलभाषिणी प्रियतमा मे ॥

एवमसम्बन्धोत्तरेऽपि । तृतीयं यथा । वेण्यां
दुर्य्योधनं प्रति गान्धारीवाक्यम् ।
व्याहारो यत् परस्यार्थे हास्यलोभकरं वचः ।
यथा मालविकाग्निमित्रे । लास्यप्रयोगावसाने
मालती निर्गन्तुमिच्छति विदूषकः मादवे उप-
देशं सुध्वा गमिष्यसि । इत्युपक्रमेण दासः ।
विदूषकं प्रति आर्य्ये उच्यतां यस्तया क्रमभेदो
लक्षितः । विदूषकः पढमं । बह्मण पूआभोदि
साइ माए लङ्घिदा मालती अयत इत्यादिना ।
नायकस्य विशुद्धनायिकादर्शनप्रयुक्तेन हास-
लोभकारिणा वचसा व्याहारः ॥ * ॥
दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ॥
क्रमेण यथा,—
प्रियजीवितता क्रौर्य्यं नस्नेहत्वं कृतघ्नता ।
भूयस्तद्दर्शनादेव ममैते गुणतां गताः ॥
तस्यास्तद्रूपसौन्दर्य्यं भूषितं यौवनश्रिया ।
सुखैकायतनं जातं दुःखायैव ममाधुना ॥
एतानि चाङ्गानि नाटकादिषु संभवन्त्यपि
वीथ्यामवश्यं विधेयानि निष्पष्टतया नाटकादिषु
विनिविष्टान्यपि इहोदाहृतानि । वीथी च
नानारसानाञ्चात्र मालारूपतया स्थितत्वाद्-
वीथीयम् । यथा मालविका ।” इति साहित्य-
दर्पणम् ॥ * ॥ * ॥ सूर्य्यगमनपथः । यथा,—
“नागवीथ्युत्तरा वीथी अजवीथ्याश्च दक्षिणे ।
उभे आषाढ़मूलन्तु अजवीथ्युदयास्त्रयः ॥
अभिजित् पूर्व्वतः स्वाती नागवीथ्युत्तरास्त्रयः ।
अश्विनी कृत्तिका याम्या नागवीथ्युत्तराः स्मृताः ।
रोहिण्यार्द्रा मृगशिरो नागवीथिरिति स्मृता ॥
पुष्याश्लेषापुनर्व्वसोर्वीथिरैरावती स्मृता ।
तिस्रस्तु वीथयो ह्येता उत्तरो मार्ग उच्यते ॥
पूर्व्वा उत्तरफल्गुण्योर्मघाश्चैरावती भवेत् ।
पूर्व्वोत्तरे प्रोष्ठपदे गोवीथी रेवती स्मृता ॥
श्रवणा च धनिष्ठा च वारुणञ्च जरद्गवम् ।
एताश्च वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥
हस्ता चित्रा तथा स्वाती नागवीथिरिति स्मृता ॥
विशाखमित्रपैत्र्यञ्च नागवीथिरिहोच्यते ॥
मूलपूर्व्वोत्तराषाढ़ा वीथिर्वैश्वानरी तथा ।
स्मृतास्तिस्रस्तु वीथ्यस्ता मार्गे वै दक्षिणे बुधैः ॥”
इति मात्स्ये १०१ अध्यायः ॥ * ॥
अपि च ।
“उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम् ।
पितृयानः स वै पन्था वैश्वानरपथाद्बहिः ॥
तत्रासते महात्मान ऋषयो येऽग्निहोत्रिणः ॥”
इति विष्णुपुराणे २ अंशे ८ अध्यायः ॥ * ॥
तत्र ज्योतिश्चक्रे वीथीक्रमो वायुनोक्तः ।
“सर्व्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः ।
स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम् ।
वैश्वानरं दक्षिणतो निर्द्दिष्टमिह तत्त्वतः ॥”
तदेव मध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथि-
त्रयेण त्रिधा भिद्यते । तथा हि त्रिभिस्त्रिभि-
रश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती
चेत्युत्तरमार्गे वीथित्रयम् । आर्षभी गोवीथी
जारद्गवी चेति वैषुवते मध्यमार्गे वीथित्रयम् ।
अजवीथी मृगवीथी वैश्वानरी चेति दक्षिण-
मार्गे वीथीत्रयम् । तदुक्तं तत्रैव ।
“अश्विनी कृत्तिका याम्या नागवीथीति
शब्दिता ।
रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥
पुष्याश्लेषे तथादित्या वीथी चैरावती स्मृता ।
एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥
तथा द्वे चापि फल्गुण्यौ मघा चैवार्षभी
मता ।
हस्ता चित्रा तथा स्वाती गोवीथीति तु
शब्दिता ॥
ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता ।
एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥
मूलाषाढ़ोत्तराषाढ़ा अजवीथीति शब्दिता ।
श्रवणञ्च धनिष्ठा च मार्गी शतभिषस्तथा ॥
वैश्वानरी भाद्रपदे रेवती चैव कीर्त्तिता ।
एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते ॥”
याम्या भरणी । आदित्या अदितिर्देवताका
पुनर्व्वसुः । मार्गी मृगवीथी । एवं स्थिते
अगस्त्यादुत्तरमजवीथ्यास्तु दक्षिणम् । किन्तु
अगस्त्यनिरूढ़वर्त्तिनो वैश्वानरपथाद्बहिर्वैश्वा-
नरवीथीं विहाय मृगवीथीमात्रं पितृयान-
मित्यर्थः । इति तट्टीकायां श्रीधरस्वामी ॥

वीथ्यङ्गः, त्रि, (वीथ्या अङ्गमिवाङ्गं यस्य ।)
नाटकभेदः । इति हेमचन्द्रः ॥ अस्य विवरणं
वीथीशब्दे द्रष्टव्यम् ॥

वीध्रं, क्ली, (विशेषेण इन्धते दीप्यते इति । वि +
इन्ध + “वाविन्धेः ।” उणा० २ । २६ । इति
क्रन् ।) नभः । (यथा, अथर्व्ववेदे ।४ । २० । ७।
“वीध्रे सूर्य्यमिव सर्पन्तं मा पिशाचं तिर-
स्करः ।”)
वायुः । अग्निः । इति संक्षिप्तसारोणादि-
वृत्तिः ॥

वीध्रः, त्रि, (वि + इन्ध + क्रन् ।) विमलः । इत्यमरः ॥

वीनाहः, पुं, (विशेषेण नह्यते इति । वि + नह +
घञ् । उपसर्गस्य दीर्घः ।) कूपस्य मुखबन्ध-
नम् । इत्यमरः ॥ अस्य कूपस्य यन्मुखबन्धनं
येन मुखं बध्यते तत् वीनाहः नान्दीपट्ट इति
ख्यातः । विशेषेण नह्यते कूपमुखमनेन ।
वीनाहः । णह्य बन्धे घञ् मनीषादित्वात्
वेर्व्वा दीर्घः विनाहः वीनाहः कूपमुखबन्ध-
पट्ट इति सारः । इति भरतः ॥

वीपा, स्त्री, विद्युत् । इति शब्दरत्नावली ॥

वीप्सा, स्त्री, क्रियागुणद्रव्यैर्युगपद्व्याप्तुमिच्छा ।
यथा,—
“सुक्तिर्नर्त्तेऽच्युतोपास्तिं भूतं भूतमभि प्रभुः ।
भक्तो विष्णुमभि प्राणी गोविन्दमभितिष्ठति ॥”
अच्युतोपास्तिं ऋते मुक्तिर्न स्यादित्यर्थः ।
प्रभुरीश्वरः भूतं भूतं अभि सर्व्वप्राणिषु अस्ति
इत्यर्थः । वीप्सायां प्रयुक्तस्य पदस्य द्विर्भावः ।
इति मुग्धबोधटीकायां दुर्गादासः ॥

वीर, ड तृ क शौर्य्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-आत्म०-अक०-सेट्।) ड, अविवीरत। शौर्य्यमुद्यमः। इति दुर्गादासः॥

वीरं, क्ली, (अज्+"स्फायितञ्चिवञ्चीति।" उणा० २। १३। इत्यादिना रक्। अजेर्व्वीभावः। वीर+अच् वा।) शृङ्गी। नडः। इति मेदिनी। रे, ६७॥ मरिचम्। पुष्करमूलम्। काञ्जिकम्। उशीरम्। आरूकम्। इति राजनिर्घण्टः॥ वीरशब्दो मेदिन्यां पवर्गीयबकारादौ दृष्टोऽपि वीरधातोरन्तःस्थवकारादौ दर्शनादत्र लिखितः॥

वीरः, पुं, (वीरयतीति। वीर विक्रान्तौ+पचाद्यच्। यद्वा, विशेषेण ईरयति दूरीकरोति शत्रून्। वि+ईर+इगुपधात् कः। यद्वा, अजति क्षिपति शत्रून्। अज+स्फायितञ्चीत्यादिना रक्। अजेर्व्वीः।) शौर्य्यविशिष्टः। तत्पर्य्यायः। शूरः २ विक्रान्तः ३। इत्यमरः।२।८।७७॥ गभीरः ४ तरस्वी ५। इति जटाधरः॥ (यथा, महाभारते। १। १४१। ४५।
"मृगराजो वृकश्चैव बुद्धिमानपि मूषिकः।
निर्ज्जिता यत्त्वया वीरास्तस्माद्वीरतरो भवान्॥"
यथा च ऋग्वेदे। १। ११४। ८।
"वीरान्मा नो रुद्र भामितो वधी-
र्हविष्मन्तः सदमित् त्वा हवामहे।"
"वीरान् वीक्रान्तान्।" इति सायणः॥ पुत्त्रः। यथा, ऋग्वेदे। ५। २०। ४।
"वीरैः स्याम सधमादः।"
"वीरैः पुत्त्रैश्च सधमादः सहमाद्यन्तः स्याम तथा कुरु।" इति तद्भाष्ये सायणः।॥ ॥
पतिः। पुत्त्रश्च। यथा, मार्कण्डेये। ३५। ११।
"न चावेक्षेत नग्नां स्त्रीं वीरहीनां तथा स्त्रियम्।
गृहादुच्छिष्टविण्मूत्रपादाम्भांसि क्षिपेद्बहिः॥"
यथा च अवीरा निष्पतिसुता। इत्यमरदर्शनाच्च।॥ दनायुदैत्यपुत्त्रः। यथा, महाभारते। १। ६५। ३३।
"दनायुषः पुनः पुत्त्राश्चत्वारोऽसुरपुङ्गवाः।
विक्षरो बलवीरौ च वृत्रश्चैव महासुरः॥")
जिनः। नटः। इति हेमचन्द्रः॥ विष्णुः। यथा, वीरोऽनन्तो धनञ्जयः। इति विष्णुसहस्रनाम॥ शृङ्गारादिरसान्तर्गतरसविशेषः। तत्पर्य्यायः। उत्साहवर्द्धनः २। इत्यमरः॥
"उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः॥"
उत्साहं वर्द्धयति इति उत्साहवर्द्धनः नन्द्यादित्वाल्ल्युः। दानधर्म्मयुद्धेषु जीवानपेक्षोत्साहकारी रसो वीरः। वीरयन्ति अत्र वीरः। वीर तद्वत् शौर्य्ये घञ् स्फीततयैव ज्ञायते इति सर्व्वरसलक्षणं कटाक्षितम्। इति भरतः॥ ॥
तान्त्रिकभावविशेषः। यथा,—
"तत्रैव त्रिविधो भावो दिव्यवीरपशुक्रमः।
दिव्यवीरैकजः प्रोक्तः सर्व्वसिद्धिप्रदायकः॥"
इति रुद्रयामले ११ पटलः॥

अपि च।
"भावस्तु त्रिविधः प्रोक्तो दिव्यवीरपशुक्रमात्।
गुरवश्च त्रिधा चात्र तथैव मन्त्रदेवता॥"
इति तत्रैव ६ पटलः॥
अन्यच्च।
"पशुभावं हि प्रथमे द्वितीये वीरभावकम्।
तृतीये दिव्यभावश्च इति भावत्रयं क्रमात्॥
आदौ दशमदण्डेन पशुभावमथापि वा।
मध्याह्ने दशदण्डेन वीरभावसुदाहृतम्।
सायाह्ने दशदण्डे तु दिव्यभावं शुभप्रदम्॥"
इति च तत्रैव १९ पटलः॥
अन्यच्च।
"जन्ममात्रं पशुभावं वर्षषोड़शकावधि।
ततश्च वीरभावस्तु यावत् पञ्चाशतो भवेत्॥
द्वितीयांशे वीरभावस्तृतीये दिव्यभावकः।
एवं भावत्रयेणैव भावमैक्यं भवेत् प्रिये॥"
इति वामकेश्वरतन्त्रे ५१ पटलः॥
वीराचारविशिष्टः। यथा,—
"कुलाचाररतो वीरः कुलसङ्गी सदा भवेत्।
संविदासेवनं कुर्य्यात् सोमपानं महेश्वरि॥
सर्व्वथा कुरुते देवि वीरश्चोद्धतमानसः।
दिव्यस्तु देवता चायचन्दनागुरुलेपनैः।
रक्तचन्दनगन्धैश्च सुदिग्धो नात्र संशयः॥
भस्माङ्गधूसरो वीर उन्मत्तवद्विचेष्टितः।
सुरापानरतो नित्यं बलिपूजापरायणः॥
नरश्छागश्च महिषो मेषः शूकर एव च।
शशकः शल्लकी गोधा खड्गी कूर्म्मो दश
स्मृताः॥
वानरश्च खरश्चैव गजाश्वादिविहङ्गमाः।
इत्यादिभिर्बलिदानैः पूजयेत् स्वेष्टदेवताम्॥
सिद्धमन्त्रो भवेत् वीरो न वीरो मद्यपानतः।
कलौ तु भारते वर्षे लोका भारतवासिनः।
गृहे गृहे सुरां पीत्वा वर्णभ्रष्टा भवन्ति हि॥"
इत्युत्पत्तितन्त्रम्॥ ॥
कलौ तदाचारनिषेधो यथा,—
"दिव्यवीरमयो भावः कलौ नास्ति कदाचन।
केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्॥"
इति महानिर्व्वाणतन्त्रम्॥ ॥
तण्डुलीयः। वराहकन्दः। लताकरञ्जः। करवीरः। अर्ज्जुनः। इति राजनिर्घण्टः॥ यज्ञाग्निः। इति वीरशब्दटीकायां भरतः॥ उत्तरः। सुभटः। इति मेदिनी॥

वीरः, त्रि, श्रेष्ठः। इति हेमचन्द्रः॥ (कर्म्मठः। यथा, ऋग्वेदे। ८। २३। १९।
"इमं घा वीरो अमृतं वीरं सन्दीतमर्त्यः॥"
"वीरः कर्म्मणि समर्थः।"इति तद्भाष्ये सायणः॥ यथा च। तत्रैव। ६। २१। २।
'कर्त्ता वीराय सुष्वय उलोकं
दाता वसु स्तुवते कीरये चित्॥"
"वीराय यज्ञादि कर्म्मसु प्रेरकाय।" इति तद्भाष्ये सायणः। प्रेरयिता। यथा, तत्रैव। ६। ६५। ४।
"इदा हि वो विधते रत्नमस्तीदा
वीराय दाशुष उषासः॥"
"वीराय प्रेरयित्रे।" इति तद्भाष्ये सायणः॥)

वीरकः, पुं, (वीर एव। स्वार्थे कन्।) करवीरः। इति राजनिर्घण्टः॥ (विक्रान्तः। समर्थः। यथा, ऋग्वेदे। ८। ८०। २।
"असौ य एषि वीरको गृहं गृहं विचाकशत्॥"
"वीरको वीरः समर्थस्त्वम्।" इति तद्भाष्ये सायणः॥ अपकृष्टदेशविशेषवासी। यथा, महाभारते। ८। ४४। ४२।
"कारस्करान् माहिषकान् कालिङ्गान् केरलां-
स्तथा।
कर्कोटकान् वीरकांश्च दुर्द्धर्म्मांश्च विवर्ज्जयेत्॥"
चाक्षुषमन्वन्तरीयसुव्यन्यतमः। यथा, भागवते। ८। ५। ८।
"सुनयस्तत्र वै राजन् हर्य्यस्वद्वीरकादयः॥")

वीरजयन्तिका, स्त्री, (वीराणां जयन्तिकेव।) रणे वीराणां नृत्यम्। इति हेमचन्द्रः॥

वीरणं, क्ली, उशीरतृणम्। तत्पर्य्यायः। वीरणम् २ कटायनम् ३। इति शब्दरत्नावली॥ वीरतरम् ४। इत्यमरः॥ वीरभद्रम् ५। इति रुद्रः॥ (यथा, भागवते। १०। ११। ५१।
"तमापतन्तं स निगृह्य तुण्डयो-
र्दोर्भ्यां बकं कंससखं सतां गतिः।
पश्यत्सु बालेषु ददार लीलया
मुदावहो वीरणवद्दिवौकसाम्॥")
अपि च।
"स्याद्वीरणं वीरतरु वीरञ्च बहुमूलकम्।
वीरणं पाचनं शीतं स्तम्भनं लघु तिक्तकम्॥
मधुरं ज्वरनुद्वान्तिमदजित् कफपित्तहृत्।
तृष्णास्रविषवीसर्पकृच्छ्रदाहव्रणापहम्॥
वीरणस्य तु मूलं स्यादुशीरमभयं तथा।
अमृणालञ्च सेव्यञ्च समगन्धिकमित्यपि॥
उशीरं पाचनं शीतं स्तम्भनं लघु तिक्तकम्।
मधुरं ज्वरहृद्वान्तिमदनुत् कफपित्तनुत्।
तृषास्रविषवीसर्पदाहकृच्छ्रव्रणापहम्॥"
इति भावप्रकाशः॥
(पुं, प्रजापतिविशेषः। यथा, महाभारते। १२। ३४८। ४९।
"सनत्कुमारादपि च वीरणो वै प्रजापतिः।
कृतादौ कुरुशार्द्दूल धर्म्ममेतदधीतवान्॥"
यथा च मात्स्ये। ४। ४०।
"वीरणस्यात्मजायान्तु चक्षुर्म्मनुमजीजनत्॥")

वीरतरं, क्ली, वीरणम्। इत्यमरः॥

वीरतरः, पुं, शरः। इति भूरिप्रयोगः॥ (त्रि, सामर्थ्यवान्। यथा, ऋग्वेदे। ८। २४। १५।
"नह्यङ्ग पुरा चन जज्ञे वीरतरस्त्वत्॥"
"वीरतरः सामर्थ्यवान्।" इति तद्भाष्ये सायणः॥ अयमनयोरतिशयेन वीरः। वीरश्रेष्ठः। यथा, महाभारते। ४। ५२। १४।
"नरर्षभास्ते तु नरर्षभेण
वीरा रणे वीरतरेण भग्नाः॥")

वीरतरासनं, क्ली, (वीरतराणां साधकश्रेष्ठानां आसनम् ।) आसनविशेषः । यथा,—
"मृदु कोमलमास्तीर्णं संग्रामपतितं हि यत् ।
अस्तुयापादितं वापि मृतं वा नरमासनम् ॥
गर्भच्युतं त्वचं वापि नारीणां योनिजां
त्वचम् ।
सर्व्वसिद्धिप्रदं देवि सर्व्वतोऽतिसमृद्धिदम् ।
त्वचं वा यौवनस्थानां कुर्य्याद्वीरतरासनम् ॥"
इति मुण्डमालातन्त्रे ३ पटलः ॥

वीरतरुः, पुं, (वीरस्तन्नाम्ना ख्यातस्तरुः ।) अर्ज्जुनवृक्षः । इत्यमरः ॥ कोकिलाक्षवृक्षः । इति रत्नमाला । विल्वान्तरवृक्षः । भल्लातकः । इति राजनिर्घण्टः ॥

वीरपर्णं, क्ली, सुरपर्णम् । इति राजनिर्घण्टः ॥

वीरपत्नी, स्त्री, (वीराणां पत्नी । यद्वा, वीरः पतिर्य्यस्याः । "नित्यं सपत्न्यादिषु ।" ४।१।३५। इति पत्युर्नकारादेशः । "ऋन्नेभ्यो ङीप् ।" ४।१।५। इति ङीप् ।) वीरभार्य्या । इत्यमरः ॥ (यथा, मार्कण्डेये । १२५ । ७ ।
"तेषामेतद्वचः श्रुत्वा वीरा वीरप्रजावती ।
वीरगोत्रसमुद्भूता वीरपत्नी प्रहर्षिता ॥"
नदीविशेषः । यथा, ऋग्वेदे ।१।१०४।४।
"अञ्जसी कुलिशी वीरपत्नी
पयो हिन्वाना उदभिर्भरन्ते ॥"
"वीरपत्नी वीरस्य पालयित्री एतत्संज्ञितास्तिस्रो नद्यः ।" इति तद्भाष्ये सायणः ॥)

वीरपत्रा, स्त्री, (वीरप्रियाणि पत्राणि यस्याः ।) विजया । इति राजनिर्घण्टः ॥

वीरपाणं, क्ली, वीराणां श्रमनाशाय पानम् । यथा,—
"वीरपाणन्तु यत् पानं वृत्ते भाविनि वा रणे ।"
इत्यमरः ॥
("वा भावकरणयोः ।" ८ । ४ । १० । इति विकल्पेन णत्वमपि । यथा, गो॰ रामायणे । ४ । ६ । ७२ ।
"मत्तोऽयमिति दुर्ब्बुद्धे मोहान्मामवमन्यसे ।
मदीये संप्रहारेऽस्मिन् वीरपाणं समर्थ्यताम् ॥")

वीरपुष्पी, स्त्री, सिन्दूरपुष्पी । इति राजनिर्घण्टः ॥

वीरबाहुः, पुं, (वीराः समर्थाः बाहवो यस्य ।) विष्णुः । यथा, "वीरबाहुर्विदारणः ।" इति तस्य सहस्रनामस्तोत्रम् । (धृतराष्ट्रपुत्त्रान्यतमः । यथा, महाभारते । १ । ६७ । १०२ ।
"उग्रो भीमरथो वीरो वीरबाहुरलोलुपः ॥"
रावणपुत्त्रः । इति रामायणम् ॥ वानरविशेषः । यथा, गो॰ रामायणे । ६ । १७ । १५ ।
"वीरबाहुः सुबाहुश्च नलश्च वनगोचरः ॥")

वीरभद्रः, पुं, (वीराणां भद्रं येन ।) अश्वमेधाश्वः । वीरश्रेष्ठः । वीरणम् । इति मेदिनी ॥ शिवगणविशेषः । तस्योत्पत्तिर्यथा,—
"इत्याकर्ण्य महाकालः सम्यक् ज्ञात्वा सतीक्षयम् ।
सत्यं सुने सती देवी दक्षयज्ञे व्यजीवितम् ।
जीर्ण स्थिते सुनौ तत्र तन्महाकालसाध्वसात् ।
रुद्रस्यातीवरौद्रोऽभूत् बहुकोपाग्निदीपितः ॥
ततस्तत्क्रोधजाद्दिर्राविरासीन्महाद्युतिः ।
प्रत्यक्षः प्रतिमाकारः कालमृत्युः प्रकम्पनः ॥
उवाच च प्रणम्येशं भूसुक्षौं महतीं दधत् ।
आज्ञां देहि पितः किन्ते करवै दासमुत्तमम् ।
ब्रह्माण्डमेककवलं करवाणि त्वदाज्ञया ॥
इति प्रतिज्ञां तस्येशः श्रुत्वा ज्ञातममन्यत ।
ज्ञातकृत्यमिवात्मानं तं मुदा प्रत्युवाच ह ॥
महावीरोऽसि रे भद्र मम सर्व्वगणेष्विह ।
वीरभद्राख्यया हि त्वं प्रथितिं परमां व्रज ।
कुरु मे सत्वरं कार्य्यं दक्षयज्ञं क्षयं नय ॥"
इति काशीखण्डे ८९ अध्यायः ॥
(यथा च महाभारते । १२ । २८३ । ५१ ।
"वीरभद्र इति ख्यातो रुद्रकोपाद्विनिःसृतः ।
भद्रकालीति विख्याता देव्याः कोपाद्विनिःसृता ॥")

वीरभद्रकं, क्ली, (वीरभद्रमेव । स्वार्थे कन् ।) वीरणम् । इति जटाधरः ॥

वीरभार्य्या, स्त्री, (वीराणां भार्य्या ।) वीरपत्नी । इत्यमरः ॥

वीरमाता, [ऋ] स्त्री, (वीराणां माता ।) वीरजननी । तत्पर्य्यायः । वीरसूः २ । इत्यमरः ॥ (यथा, भागवते । ६ । १४ । ४० ।
"अन्तर्व्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरीम् ।
पुनस्तत्र गतोऽब्दान्ते उर्व्वशीं वीरमातरम् ॥")

वीररजः, [स्] क्ली, (वीराणां वीरभाविनां धारणार्थं रजः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥ वीरस्य धूलिश्च ॥

वीररेणुः, पुं, (वीरा रेणव इव यस्य ।) भीमसेनः । इति त्रिकाण्डशेषः ॥

वीरवती, स्त्री, मांसरोहिणी । इति भावप्रकाशः ॥ (विक्रमपुराधीश्वरविक्रमतुङ्गनृपकर्म्मचारिवीरवरस्य कन्या । यथा, कथासरित्सागरे । ५३ । ६० ।
"यस्य धर्म्मवती नाम भार्य्या वीरवती सुता ।
पुत्त्रः सत्यवरश्चेति त्रयं परिकरो गृहे ॥")

वीरवत्सा, स्त्री, (वीरो वत्सः पुत्त्रो यस्याः ।) वीरजननी । इति जटाधरः ॥

वीरविश्रावकः, पुं, शूद्रधनेन होमकर्त्ता । यथा,—
"वीरविश्रावको जुह्वन् धनैः शूद्रसमाहृतैः ।"
इति हेमचन्द्रः ॥

वीरवृक्षः, पुं, (वीरनामको वृक्षः ।) भल्लातकः । इत्यमरः ॥ अर्ज्जुनवृक्षः ॥ इति हेमचन्द्रः ॥ विल्वान्तरः । इति राजनिर्घण्टः ॥ वृक्षविशेषः । देधान इति भाषा । तत्पर्य्यायः । वीरतरः २ इन्द्रद्रुतः ३ अप्सरोहरः ४ । इति रत्नमाला ॥

वीरसूः, स्त्री, (वीरान् पुत्त्रानेव सूते इति । वीर + सू + क्विप् ।) वीरमाता । इत्यमरः ॥ (यथा, महाभारते । १ । २०० । ७ ।
"जीवसूर्व्वीरसूर्भद्रे बहुसौख्यसमन्विता ।
सुभगा भोगसम्पन्ना यज्ञपत्नी पतिव्रता ॥"
पुत्त्रप्रसविनी । यथा, ऋग्वेदे ।१०।८५।४४।
"वीरसूर्देवकामा स्योना शन्नो भवद्विपदे शं
चतुष्पदे ॥"
"वीरसूः पुत्त्राणामेव सवित्री ।" इति तद्भाष्ये सायणः ॥)

वीरसैनं, क्ली, आरूकवृक्षः । इति राजनिर्घण्टः ॥

वीरसेनः, पुं, नलराजपिता । इति नैषधम् ॥ (यथा, महाभारते । ३ । ५२ । ५४ ।
"निषधेषु महीपालो वीरसेन इति श्रुतः ।
तस्य पुत्त्रोऽभवन्नाम्ना नलो धर्म्मार्थकोविदः ॥")

वीरसेनजः, पुं, (वीरसेनात् जायते इति । जन + डः ।) नलराजः । इति नलोदयः ॥

वीरहा, [न्] पुं, (वीरान् हन्तीति । हन + क्विप् ।) नष्टाग्निब्राह्मणः । इत्यमरः ॥ यस्याग्निहोत्रिणः प्रमादादिना कारणान्तरेण वा अग्निर्नष्टो निर्व्वाणः स्यात् स वीरहोच्यते । वीरयति शौर्य्यं कारयति इति वीर ड त् क तु शौर्य्ये इत्यस्मात् चुरादि णिः प्रेरणे अच्प्रत्ययात् पचाद्यच् वीरो यज्ञाग्निः तं हतवान् इति क्विपि वीरहा । इति भरतः ॥ (यथा, वाजसनेयसंहितायाम् । ३० । ५ । "नरकाय वीरहणम् ।" "वीरहणं नष्टाग्निं शूरं वा ।" इति तद्भाष्यम् ॥) विष्णुः । यथा । वीरहा माधवो मधुः । इति विष्णुसहस्रनाम । वीरहन्तरि, त्रि ॥

वीरा, स्त्री, सुरा । क्षीरकाकोली । तामलकी । एलवालुका । पतिपुत्त्रवती । रम्भा । विदारी । दुग्धिका । मलपूः । क्षीरविदारी । इति मेदिनी । रे, ६८ ॥ पुस्तकान्तरे सुरास्थाने मुरा विदारीस्थाने गम्भारी इति पाठः । काकोली महाशतावरी । गृहकन्या । ब्राह्मी । अतिविषा । मदिरा । इति राजनिर्घण्टः ॥ शिंशपावृक्षः । इति रत्नमाला ॥ (करन्धमराजपत्नी । यथा, मार्कण्डेये । १२३ । १ ।
"वीर्य्यचन्द्रसुता सुभ्रूर्व्वीरा नाम शुभव्रता ।
स्वयंवरे सा जगृहे महाराजं करन्धमम् ॥"
नदीविशेषः । यथा, महाभारते ।६।९।२२।
"पूर्व्वाभिरामां वीराञ्च भीमां मोघवतीं
तथा ॥"
विक्रमशालिनी । यथा, मार्कण्डेये ।१२५।७।
"तेषामेतद्वचः श्रुत्वा वीरा वीरप्रजावती ।
वीरगोत्रसमुद्भूता वीरपत्नी प्रहर्षिता ॥")

वीराम्लः, पुं, अम्लवेतसः । इति राजनिर्घण्टः ॥

वीरारुकं, क्ली, आरूकम् । इति राजनिर्घण्टः ॥

वीराशंसनं, क्ली, (वीरान् आशंसयति अद्य स्थास्यामि वा नवेति चिन्तां जनयतीति । आ + शंस + णिच् + ल्युः ।) अतिभयप्रदा युद्धभूमिः इत्यमरः ॥

वीरासनं, क्ली, (वीराणां साधकानामासनम् ।) भित्त्याद्यनाश्रित्योपवेशनम् । यथा,—
"दिवाशुगच्छेत्ता गास्तु तिष्ठन्नूर्द्ध्वं रजः पिबेत् ।

शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनं वसेत् ॥"
इति प्रायश्चित्ततत्त्वे मनुः ॥
अन्यच्च।
"एकपादमथैकस्मिन् विन्यसेदुरु संस्थितम्।
इतरस्मिन् तथा पश्चाद्वीरासनमिदं विदुः ॥"
इति घेरण्डसंहिता ॥
(यथा, रघुवंशे । १३ । ५२ ।
"वीरासनैर्ध्यानजुषामृषीणा-
ममी समध्यासितवेदिमध्याः ।
निवातनिष्कम्पतया विभान्ति
योगाधिरूढ़ा इव शाखिनोऽपि ॥")
वीरिणी, स्त्री, असिक्नी । यथा,—
"उपयेमे वीरणस्य तनयां दक्ष ईप्सिताम्।
वीरिणी नाम तस्यास्तु असिक्नीत्यपि सत्तमाः ॥"
इति कालिकापुराणे ८ अध्यायः ॥
(यथा च महाभारते । १ । ७५ । ५ ।
"वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः ।
आत्मतुल्यानजनयत् सहस्रं संशितव्रतान् ॥"
वीरः पुत्त्रोऽस्या अस्तीति । वीर + इनि । ङीप् ।
पुत्त्रवती । यथा, ऋग्वेदे । १० । ८६ । ९ ।
"उताहमस्मि विरिणीन्द्रपत्नी ॥"
"विरिणी पुत्त्रवती ।" इति तद्भाष्ये सायणः ॥)
वीरुत्, [ध्] स्त्री, (विशेषेण रुणद्धि इतरानन्यान् ।
वि + रुध + क्विप् । "अन्येषामपीति ।" दीर्घः ।
अथवा विरोहतीति वीरुत् । विपूर्व्वस्य रुहेः
क्विपि धकारो विधीयते इति काशिका ।७।३।
५३ ।) विस्तृता लता । तत्पर्य्यायः । गुल्मिनी २
उलपः ३ । इत्यमरः ॥ वीरुधा ४ । इति शब्द-
रत्नावली ॥ प्रताना ५ कक्षः ६ । इति जटा-
धरः ॥ (यथा, रघुवंशे । ८ । ३६ ।
"अभिभूय विभूतिमार्त्तवी
मधुगन्धातिशयेन वीरुधाम् ॥"
ओषधिः । यथा, ऋग्वेदे । २ । ६७ । ५ ।
"वियो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसू-
ष्वन्तः ॥"
"वीरुत्सु ओषधीषु ।" इति तद्भाष्ये सायणः ॥
वृक्षमात्रे, पुं । यथा, महाभारते ।१।४५।२४।
"यानि पश्यसि वै ब्रह्मन् मृतानीहास्य वीरुधः ।
एते नक्तन्तवस्तात कालेन परिभक्षिताः ॥"
यथा च ऋग्वेदे । ६ । ११३ । २ ।
"सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिः ॥"
"वीरुधां वनस्पतीनामिति ।" इति तद्भाष्ये
सायणः ॥ लतानां वीरुधाञ्च कथञ्चिद्भेदमाह ।
यथा, भागवते । ३ । १० १९ ।
"वनस्पत्योषधिलता त्वक्सारा वीरुधो द्रुमाः ।"
"ये पुष्पं विना फलन्ति ते वनस्पतयः । ओषधयः
फलपाकान्ताः । लता आरोहणापेक्षाः । त्वक्-
सारा वेण्वादयः । लता एव काठिन्येनारोहणा-
नपेक्षा वीरुधः । ये पुष्पैः फलन्ति ते द्रुमाः ।"
इति तट्टीकायां श्रीधरस्वामी ॥)
वीरुधा, स्त्री, (विशेषेण रुणद्धीति । वि + रुध +
इगुपधादिति कः । ततस्त्रियां टाप् । अथवा
वीरुध् शब्दात् भागुरिमते टाप् । यथा,—
"वष्टि भागुरिरल्लोपः अवाप्योरुपसर्गयोः ।
टापञ्चापि हलन्तानां क्षुधा वाचा निशा
गिरा ॥")
वीरुत् । इति शब्दरत्नावली ॥
वीरेशः, पुं, (वीराणामीशः ।) शिवः । यथा,—
"अथ त्रयोदशे मासि स्नात्वा त्रिपथगाम्भसि ।
प्रत्यूष एव वीरेशं यावदायाति स द्विजः ॥"
इति वीरेश्वरस्तोत्रम् ॥
वीरेश्वरः, पुं, (वीराणामीश्वरः ।) महादेवः ।
यथा,—
"तिलान्तरोऽपि नो काश्यां भूमिर्लिङ्गं विना
क्वचित् ।
परं वीरेशसदृशं न लिङ्गन्त्वाशु सिद्धिदम् ॥
धर्म्मदञ्चार्थदं सम्यक् कामदं मोक्षदं तथा ।
यथा वीरेश्वरं लिङ्गं काश्यां नान्यत्तथा ध्रुवम् ॥"
इति काशीखण्डे १० अध्यायः ॥
(मैथिलानां दशकर्म्मपद्धतिकर्त्ता । तत्पद्धतिश्च ॥)
वीरोज्भः, पुं, होमाकर्त्ता । यथा,—
"अभ्युदिताभिनिर्म्मुक्तौ वीरोज्झो न जुहोति
यः ॥"
इति हेमचन्द्रः ॥
वीरोपजीविकः, पुं, अग्निहोत्रमुपजीविका यस्य ।
यथा,—
"अग्निहोत्रच्छलाद्याचापरो वीरोपजीविकः ॥"
इति हेमचन्द्रः ॥
वीर्य्यं, क्ली, (वीरे साधु । तत्र साधुः इति यत् । यद्वा,
वीर्य्यतेऽनेनेति वीर विक्रान्तौ + "अचो यत् ।"
३।१।९७। इति यत् । यद्वा वीरस्य भावः । यत् ।)
चरमधातुः । तत्पर्य्यायः । शुक्रम् २ तेजः ३
रेतः ४ बीजम् ५ इन्द्रियम् ६ । इति मनुष्य-
वर्गे अमरः ॥ वीर्य्यं शक्तिः सा च पृथिव्यादीनां
यः सारभागः तदतिशयरूपा । सा द्विविधा
चिन्त्याचिन्त्यक्रियाहेतुत्वेन । तत्र चिन्त्यक्रिया-
हेतुर्या द्रव्यरसादीनां स्वस्वकर्म्मणि स्वभाव-
सिद्धा शक्तिः । अचिन्त्यक्रियाहेतुश्च प्रभावपर-
पर्य्यायः । द्रव्याणां रसाद्यननुरूपकार्य्यकरण-
शक्तिः । उक्तञ्च ।
"भूतप्रभावातिशयो द्रव्ये पाके रसे स्थितः ।
चिन्त्याचिन्त्यक्रियाहेतुर्वीर्य्यं धन्वन्तरेर्म्मतम् ॥"
इति चक्रदत्तोपरि शिवदासीयटीका ॥ * ॥
परवीर्य्योदरपातदोषो यथा,—
"परवीर्य्यं यदुदरं कामतोऽकामतोऽपि वा ।
अहल्येः याति दैवेन तदुपायं निशामय ॥
अकामतो न दुष्टा सा प्रायश्चित्तेन शुध्यति ।
कामभोगेन त्याज्या सा कर्म्मभोगेन शुध्यति ॥
पितृपाके देवपाके पूजायां नाधिकारिणी ।
षष्टिं वर्षसहस्राणि क्षयं कृत्वा स्वकर्म्मणः ।
प्रयाति भोगदेहं सा तस्यान्ते पापकर्म्मणः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४७ अध्यायः ॥
अतिशयशक्तिभागुत्साहः । इति स्वर्गवर्गे
अमरः ॥ कर्म्मसु सुकरः प्रत्ययः उत्साहः ।
इति मधुः । कर्म्मसु दृढ़यत्नकारको भाव
उत्साहः । इति रमानाथः । कर्म्मसु प्रत्यय
उत्साह इति नयनानन्दः । अशक्ये बलोद्यम
उत्साह इति केचित् । स उत्साहः अतिशय-
शक्तिभाक् वीर्य्यम् । अतिशयितोऽध्यवसायो
वीर्य्यं साधु वीर्य्यमित्यर्थः । वीर्य्या स्त्री च वीर्य्यं
वीर्य्य इति कोषान्तरम् । इति भरतः ॥ * ॥
बलम् । प्रभावः । इति नानार्थे अमरः ॥
(यथा, ऋग्वेदे । ३ । २५ । २ ।
"अग्निः सनोति वीर्य्याणि विद्वान्
सनोति वाजममृताय भूषन् ॥"
"वीर्य्याणि पशुपुत्त्रादिसम्पद्रूपाणि सामर्थ्यानि ।"
इति तद्भाष्ये सायणः ॥ यथा च भागवते । ६ ।
१७ । ३१ ।
"ज्ञानवैराग्यवीर्य्याणां नहि कश्चिद्व्यपाश्रयः ॥"
शरीरसामर्थ्यम् । यथा, ऋग्वेदे । ४ । ५० । ७ ।
"स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्था-
वभि वीर्य्येण ॥"
"वीर्य्येण शरीरसामर्थ्येन ।" इति तद्भाष्ये
सायणः ॥ शक्तिः । यथा, मनौ । ११ । ३१ ।
"न ब्राह्मणो वेदयेत किञ्चिद्राजनि धर्म्मवित् ।
स्ववीर्य्येणैव तान् शिष्यान्मानवानपकारिणः ॥
स्ववीर्य्याद्राजवीर्य्याच्च स्ववीर्य्यं बलवत्तरम् ।
तस्मात् स्वेनैव वीर्य्येण निगृह्णीयादरीन् द्विजः ॥"
मनःशक्तिः । यथा, भागवते । ४ । १८ । १५ ।
"कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन् ।
हिरण्मयेन पात्रेण वीर्य्यमोजो बलं पयः ॥")
औषधानां वीर्य्यस्य स्थितिकाला यथा,—
"यामं कल्ककषायवीर्य्यमखिलं चूर्णञ्च पक्षत्रयं
षण्मासान् घृतमोदकौ षड्गुड़ौ मासत्रयं
गुग्गुलोः ।
सिद्धानां रसभस्मनां सुविपुलं वीर्य्यञ्च वर्षत्रयं
किञ्चिद्गन्धविवर्ज्जितं गुणपरं तैलं पुराणं महत् ॥"
इति नारायणदासकृतपरिभाषा ॥
तेजः । इति मेदिनी ॥ चेतः । दीप्तिः । इति
शब्दरत्नावली ॥
वीर्य्यजः, पुं, (वीर्य्याज्जायते इति । जन + डः ।)
पुत्त्रः । इति केचित् ॥ (यथा, भागवते । ३ ।
५ । १९ ।
"नैतच्चित्रं त्वयि कारुण्याद्बादरायणवीर्य्यजे ॥")
वीर्य्यवान्, [त्] त्रि, (वीर्य्यमस्यास्तीति । मतुप् ।)
मांसलः । इति शब्दरत्नावली ॥ वीर्य्ययुक्तश्च ॥
(यथा, किराते । २ । ४ ।
"अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥")
वीर्य्यवृद्धिकरं, क्ली, (वीर्य्याणां वृद्धिकरम् ।) शुक्र-
वृद्धिकारकौषधादि । तत्पर्य्यायः । वृष्यम् २
वाजीकरणम् ३ बीजकृत् ४ । इति राज-
निर्घण्टः ॥
वीर्य्या, स्त्री, (वीर्य्यतेऽनयेति । वृ + "अचो यत् ।"
इति यत् । टाप् ।) वीर्य्यम् । इत्यमरटीकायां
भरतः ॥

वीवधः, पुं पर्य्याहारः । परित आह्रियतेऽसौ धान्यतण्डुलादिः । (यथा, माघे । २ । ६४ ।
"निरुद्धवीवधासारप्रसारा गा इव व्रजम् ।
उपरुन्धन्तु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥")
मार्गः । पन्थाः । इत्यमरभरतौ ॥ भारः । इति शब्दरत्नावली ॥

वीवधिकः त्रि, (वीवधेन हरतीति । वीवध + "विभाषा विवधवीवधात् ।" ४ । ४ । १७ । इति ठन् ।) भारवाहकः । इति सिद्धान्तकौमुदी ॥

वीहारः, पुं, (विहरन्त्यत्रेति । वि + हृ + घञ् । उपसर्गस्य दीर्घः ।) महालयः । स तु बुद्धमन्दिरम् । इति शब्दमाला ॥ विहारः । इत्यमरटीका ॥

वुग, इ त्यागे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, वुङ्गति । इति दुर्गादासः ॥

वुट, इ क हिंसायाम् । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । इ, वुण्टति । क, वुण्टयति । हिंसितिर्हिंसा । इति दुर्गादासः ॥

वु(बु)द्धिः, स्त्री, (वुध + क्तिन् ।) आत्मनो गुणविशेषः । सा त्रिविधा यथा,—
"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये ।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥
यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥
अधर्म्मं धर्म्ममिति या मन्यते तमसावृता ।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥

वृ, क ष वृतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, वारयति । इति दुर्गादासः ॥

वृ, ङ ग संभक्तौ । इति कविकल्पद्रुमः ॥ (क्र्या०-आत्म०-सक०-सेट् ।) संभक्तिः सेवनम् । ङ ग, वृणीते । वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः । इति दुर्गादासः ॥

वृ, ञ वृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ञ, वरति वरते । इति दुर्गादासः ॥

वृ, न ग ञ वृतौ । इति कविकल्पद्रुमः ॥ (स्वा०-क्र्या०च-उभ०-सक०-सेट् ।) न ञ, वृणोति वृणुते । ग ञ, वृणाति वृणीते । वकारस्य दन्त्यत्वात् संवृणोति इत्यादौ नानुस्वारस्य मकारः । ओष्ठ्यत्वाच्च युवृर्मतीत्यादौ ऋदिरयाविलूर् । न च दन्त्यस्य कथमोष्ठ्यकार्य्यमिति वाच्यं यतः स्वभावादोष्ठ्यस्य वकारस्य ओष्ठ्यकार्य्यं स्वाभाविकमेव । क्वचिद्दन्त्यमध्ये पाठः नह्येकवर्णस्योभयस्थानं सम्भवति । इति दुर्गादासः ॥

वृंहणः, त्रि, (वृंहि + ल्युः ।) पुष्टिकारकः । यथा । संयावो वृंहणो गुरुः । इति शब्दचन्द्रिका ॥

वृंहितं, क्ली, (वृहि + क्तः ।) हस्तिगर्ज्जनम् । तत्पर्य्यायः । करिगर्ज्जितम् २ । इत्यमरः ॥ (यथा, महाभारते । ६ । १८ । २ ।
"शङ्खदुन्दुभिघोषैश्च वारणानाञ्च वृंहितैः ।
नेमिघोषै रथानाञ्च दीर्य्यतीव वसुन्धरा ॥")

वृक, ङ आदाने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, वर्कते । वरीवृक्यते । इति दुर्गादासः ॥

वृकः, पुं, (वृणोतीति । वृ + "सृवृभूशुषिमुषिभ्यः कक् ।" उणा० ३ । ४१ । इति कक् ।) कुक्कुरप्रमाणहरिणभक्षकपशुविशेषः । वोँय इति ख्यातः । हुण्डार इति हिन्दी भाषा । तत्पर्य्यायः । कोकः २ ईहामृगः ३ । इत्यमरः ॥ वत्सादनः ४ विरक् ५ गोवत्सादी ६ छागभोजी ७ छागलान्त्री ८ अजाशनः ९ । इति राजनिर्घण्टः ॥ (यथा, भागवते । ३ । १० । २३ ।
"श्वा शृगालो वृको व्याघ्रो मार्ज्जारः शशशल्लकौ ॥")
काकः । इत्युणादिकोषः ॥ (पेचकः । इत्युणादिटीकाधृतविश्वः । ३ । ४१ ॥) वकवृक्षः । इति शब्दरत्नावली ॥ शृगालः । इति हारावली ॥ (यथा, मनुः । ८ । २३५ ।
"अजाविके तु संरुद्धे वृकैः पाले त्वनायति ।
यां प्रसह्य वृको हन्यात् पाले तत् किल्बिषं भवेत् ॥"
"वृकैः शृगालप्रभृतिभिः ।" इति मेधातिथिः ॥)
क्षत्त्रियः । अनेकधूपः । सरलद्रवः । इति भरतधृतरभसः ॥ (तस्करः । इति निघण्टुः । ३ । २४ ॥ * ॥ वर्कते शत्रुप्राणानादत्ते इति । वृक आदाने + कः । वज्रः । इति निघण्टुः । २ । २० ॥)

वृकदंशः, पुं, (वृकान् दशतीति । दन्श + अण् ।) कुक्कुरः । इति हेमचन्द्रः ॥

वृकधूपः, पुं, (वृकोऽनेकधूपः एव धूपः । वृकः सरलद्रवस्तत्प्रधानो धूपो वा ।) नानासुगन्धिद्रव्यकृतदशाङ्गादिधूपः । तत्पर्य्यायः । कृत्रिमधूपकः २ । इत्यमरः ॥ वकधूपः ३ । इति तट्टीका ॥ सरलवृक्षरसः । टारपिन् इति भाषा । तत्पर्य्यायः । पायसः २ श्रीवासः ३ श्रीवेष्टः ४ सरलद्रवः ५ । इत्यमरः ॥

वृकधूर्त्तः, पुं, (धूर्त्तो वृकः राजदन्तादिवत् पूर्व्वनिपातः ।) शृगालः । इति हारावली ॥

वृका, स्त्री, अम्बष्ठा । इति रत्नमाला ॥

वृकाक्षी, स्त्री, (वृकस्याक्षीव अक्षि चिह्नं यस्याः ।) त्रिवृत् । इति रत्नमाला ॥

वृकारातिः, पुं, (वृकस्यारातिः ।) कुक्कुरः । इति शब्दमाला ॥

वृकारिः, पुं, (वृकस्यारिः ।) कुक्कुरः । इति राजनिर्घण्टः ॥

वृकी, स्त्री, पाठा । इति राजनिर्घण्टः ॥

वृकोदरः, पुं, (वृकस्येवोदरो यस्य । यद्वा, वृकः वृकनामकोऽग्निरुदरे यस्य ।) भीमसेनः । तत्पर्य्यायः । भीमः २ मरुत्पुत्त्रः ३ किर्म्मीरनिसूदनः ४ कीचकनिसूदनः ५ वकनिसूदनः ६ हिडम्बनिसूदनः ७ । इति हेमचन्द्रः ॥ वकवैरी ८ मारुतिः ९ । इति जटाधरः ॥ अस्य व्युत्पत्तिर्यथा,—
"कथासु भीमसेनेन परिपृष्टः प्रतापवान् ।
त्वया पृष्टस्य धर्म्मस्य रहस्यस्यास्य भेदकृत् ॥
भविता स तदा ब्रह्मन् कर्त्ता चैव वृकोदरः ।
प्रवर्त्तकोऽस्य धर्म्मस्य पाण्डुसूनुर्महाबलः ॥
यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः ।
मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः ॥"
इति मात्स्ये ६५ अध्यायः ॥

वृक्णं, त्रि, (व्रश्च + क्तः ।) छिन्नम् । इत्यमरः ॥ (यथा, सांख्यतत्त्वकौमुद्याम् ।
"नहि पाणौ वृक्णे स्तने वा जाते कुमारी स्तनाघाता वेति ॥")

वृच, ङ वृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) सप्तमस्वरी । ङ, वृचते वरं कन्या । इति दुर्गादासः ॥

वृक्षः, पुं, (व्रश्च छेदने + "स्नुव्रश्चिकृत्यृषिभ्यः कित् ।" उणा० ३।६६। इति सः । स च कित् । "वृक्ष वरणे । अतोऽप्यावृणोतीति वृक्ष इति सिद्धे प्रपञ्चार्थं व्रश्चिग्रहणम् ।" इति तट्टीकायामुज्ज्वलदत्तः ।) स्थावरयोनिविशेषः । गाछ इति भाषा । तत्पर्य्यायः । महीरुहः २ शाखी ३ विटपी ४ पादपः ५ तरुः ६ अनोकहः ७ कुटः ८ सालः ९ पलाशी १० द्रुः ११ द्रुमः १२ आगमः १३ । इत्यमरः ॥ अगच्छः १४ विटरः १५ महीरुट् १६ कुचिः १७ स्थिरः १८ कारस्करः १९ नगः २० अगः २१ कुटारः २२ । इति शब्दरत्नावली ॥ विटपः २३ कुजः २४ वनस्पतिः २५ अद्रिः २६ शिखरी २७ कुठः २८ । इति जटाधरः ॥ कुञ्जः २९ क्षितिरुहः ३० अङ्घ्रिपः ३१ भूरुहः ३२ भूजः ३३ महीजः ३४ धरणीरुहः ३५ क्षितिजः ३६ शालः ३७ । इति राजनिर्घण्टः ॥ तस्य षड्जातिर्यथा,—
"कुरण्टाद्या अग्रबीजा मूलजास्तूत्पलादयः ।
पर्व्वयोनय इक्ष्वाद्याः स्कन्धजाः सल्लकीमुखाः ॥
शाल्यादयो बीजरुहाः संमूर्च्छजास्तृणादयः ।
स्युर्व्वनस्पतिकायस्य षडेते मूलजातयः ॥"
इति हेमचन्द्रः ॥
"संस्वेदजापि विज्ञेया वृक्षगोपशुजन्तवः ।"
इत्यग्निपुराणम् ॥
भद्रप्रदवृक्षा यथा,—
श्रीभगवानुवाच ।
"आश्रमे नारिकेलश्च गृहिणाञ्च धनप्रदः ।
शिविरस्य यदीशाने पूर्व्वे पुत्त्रप्रदस्तरुः ॥
सर्व्वत्र मङ्गलार्हश्च तरुराजो मनोहरः ।
रसालवृक्षः पूर्व्वस्मिन् नृणां सम्पत्प्रदस्तथा ॥
शुभप्रदश्च सर्व्वत्र सुरकारी निशामय ।
बिल्वश्च पनसश्चैव जम्बीरो बदरी तथा ।
प्रजाप्रदश्च पूर्व्वस्मिन् दक्षिणे धनदस्तथा ॥

सम्पत्प्रदश्च सर्व्वत्र यतो हि वर्द्धते गृही।
जम्बूवृक्षश्च दाड़िम्बः कदल्याम्रातकस्तथा॥
बन्धुप्रदश्च पूर्व्वस्मिन् दक्षिणे मित्रदस्तथा।
सर्व्वत्र शुभदश्चैव धनपुत्त्रशुभप्रदः॥
हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा।
ईशाने सुखदश्चैव सर्व्वत्रैवं निशामय॥
सर्व्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा।
अलाबूश्चापि कुष्माण्डो मायाम्बुश्च सुकासुकः॥
खर्ज्जूरी कर्कटी चापि शिविरे मङ्गलप्रदा।
वास्तूकः कारविल्लश्च वार्त्ताकुश्च शुभप्रदा।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम्॥"
निषिद्धवृक्षा यथा,—
"प्रशस्तं कथितं कारो! निषिद्धञ्च निशामय।
वन्यवृक्षो निषिद्धश्च शिविरे नगरेऽपि च॥
वटो निषिद्धः शिविरे नित्यं चौरभयं ततः।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा॥
हे कारो! तिन्तिड़ीवृक्षो यत्नात्तं परिवर्ज्जयेत्।
शरेण धनहानिः स्यात् प्रजाहानिर्भवेद्ध्रुवम्॥
शिविरेऽतिनिषिद्धश्च नगरे किञ्चिदेव च।
न निषिद्धः प्रसिद्धश्च नगरेषु तथा पुरे॥
वाच्यामतिनिषिद्धश्च प्राज्ञस्तं परिवर्ज्जयेत्।
खर्ज्जूरश्च वटुश्चैव निषिद्धः शिविरे तथा॥
न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च।
वृक्षश्च चणकादीनां धान्यञ्च मङ्गलप्रदम्॥
ग्रामेषु नगरे चापि शिविरे च तथैव च।
इक्षुवृक्षश्च शुभदः सन्ततं शुभदस्तथा॥
अशोकश्च शिरीषश्च कदम्बश्च शुभप्रदः।
कर्पूरी हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा॥
हरीतकी च शुभदा ग्रामेषु नगरेषु च।
न वाप्यां भद्रदा नित्यं तथा चामलकी ध्रुवम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अः॥
अपि च।
"अपुत्त्रस्य च पुत्त्रत्वं पादपा इह कुर्व्वते।
यत्नेनापि च राजेन्द्र! अश्वत्थारोपणं कुरु॥
स ते पुत्त्रसहस्राणां कार्य्यमेकः करिष्यति।
धनी चाश्वत्थवृक्षेण अशोकः शोकनाशनः॥
प्लक्षो यज्ञप्रदः प्रोक्तो निम्बश्चायुप्रदः स्मृतः।
जम्बुकी नाकदा प्रोक्ता भार्य्यादा दाड़िमी तथा॥
डुम्बरो रोगनाशाय पलाशो ब्रह्मदस्तथा।
अर्कपुष्पारोपकाणां नित्यं तुष्येद्दिवाकरः॥
श्रीवृक्षः शङ्करो देवः पाटलायान्तु पार्व्वती।
शिंशपायामप्सरसः कुन्दे गन्धर्व्वसत्तमाः॥
विभीतके दासवृद्धिर्व्वकुलो दास्यदस्तथा।
अपत्यनाशकस्तालो वकुलः कुलवर्द्धनः॥
बहुभार्य्या नारिकेली द्राक्षः सर्व्वाङ्गसुन्दरः।
रतिप्रदा तथा केली केतकी सर्व्वनाशिनी।
प्रतिष्ठां ते गमिष्यन्ति ये नराः वृक्षरोपकाः॥"
इति पाद्मे सृष्टिखण्डे वृक्षारोपणं नाम ९६ अध्यायः॥*॥ अस्य रोपणफलम्।
यम उवाच।
"वृक्षगुल्मलतावल्लीत्वक्सारात्तृणजातयः।
वर्द्धते वृक्षजातीयास्तासां रोपे फलं शृणु॥
यः पुमान् रोपयेद्वृक्षान् छायापुष्पफलोपगान्।
सर्व्वसत्त्वोपभोगाय स याति परमां गतिम्॥
छायापुष्पोपगांस्त्रिंशत् फलपुष्पद्रुमांस्तथा।
रोपयित्वा दशाम्रांस्तु नरो न नरकं व्रजेत्॥
देवदानवगन्धर्व्वाः किन्नरोरगगुह्यकाः।
पशुपक्षिमनुष्याश्च संश्रयन्ति सदा द्रुमान्॥
पुष्पैः सुरगणाः सर्व्वे फलैश्च पितरः सदा।
छायया मे मनुष्यास्तु पशुपक्षिमृगास्तथा॥
पुष्पोपगन्धांश्च फलोपगन्धान्
यः पादपान्रोपयते मनुष्यः।
सन्दृष्टदेशे वरवेश्मवेश्यां
लभेदधिष्ठानवरं स विप्रः॥
तस्मात् सुबहवो वृक्षा रोप्याः श्रेयोऽभिवाञ्छता।
पुत्त्रवत् परिपाल्याश्च ते पुत्त्रा धर्म्मतः स्मृताः॥
किं धर्म्मविमुखैर्म्मर्त्त्यैः केवलं स्वार्थहेतुभिः।
तरुपुत्त्रा वरं ये तु परार्थैकानुवृत्तयः॥
पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।
परेषामुपकुर्व्वन्ति तारयन्ति पितामहान्॥
छेत्तारमपि संप्राप्तं छायापुष्पफलादिभिः।
पूजयन्त्येव तरवो मुनिवद्द्वेषवर्जिताः॥
पितरं नोपहिंसन्ति द्रुमा द्रविणलोभतः।
तारयन्ति च मे सम्यक् सर्व्वस्यातिथ्यदायकाः॥
तस्मात्ते पुत्त्रवत् स्थाप्या विधिवद्द्विजपुङ्गव।
द्विजैः पितृमनुष्याणामभोज्याः स्युर्यदा सदा॥
जलकृत् वृक्षरोपी यः प्रतिग्राह्यार्थविद्द्विजः।
एते स्वर्गान्न हीयन्ते ये चान्ये सत्यवादिनः॥"
इत्याद्ये वह्निपुराणे तड़ागवृक्षप्रशंसानामाध्यायः॥*॥ अपि च।
"भूमिदानेन ये लोका गोदानेन च कीर्त्तिताः।
ते लोकाः प्राप्यते पुंभिः पादपानां प्ररोहणे॥
अश्वत्थमेकं पिचुमर्द्दमेकं
न्यग्रोधमेकं दश पुष्पजातीः।
द्वे द्वे तथा दाड़िममातुलुङ्गे
पञ्चाम्ररोपी नरकं न याति॥
यथा सुपुत्त्रः कुलमुद्धरेद्धि
यथातिव्रतस्त्वान्नियमप्रयत्नात्।
तथाच वृक्षाः फलपुष्पभूताः
स्वं स्वामिनं नरकादुद्धरन्ति॥
गोकर्ण उवाच।
इन्धनार्थं यथा नीतमग्निहोत्रं तदुच्यते॥
छायाविश्रामपथिकैः पक्षिणां निलयेन च।
पत्रमूलत्वगाद्यैश्च औषधार्थन्तु देहिनाम्॥
उपकुर्व्वन्ति वृक्षस्य पञ्चयज्ञः स उच्यते।
गृहकृत्यानि काष्ठानि क्षुद्रजन्तुगृहास्तथा॥
सत्रनिर्व्वर्त्तनं प्रोक्तं भिक्षा पत्रैः समाहृता।
फलन्ति वत्सरे मध्ये द्विवारं शाकुनादयः॥
सांवत्सरं पितुर्मातुरुपकारं फलैः कृतम्।
एवं पुत्त्र समारोप्या एवं तत्त्वविदो विदुः॥"
इत्यादि वाराहपुराणे गोकर्णमाहात्म्यनामाध्यायः॥*॥ अच्छेद्यवृक्षा यथा,—
"अश्वत्थो वटवृक्षश्च न च्छेत्तव्यः कदाचन।
न च्छेत्तव्यो निम्बवृक्ष उडुम्बरश्च कदाचन।
कर्म्मण्याश्चैव ये वृक्षा न च्छेत्तव्याः कदाचन॥"
इति च वाराहपुराणे ब्राह्मणदीक्षासूत्रं नामाध्यायः॥*॥ वृक्षोत्पाता यथा,—
"पुरेषु येषु दृश्यन्ते पादपाश्चैव रोदिताः।
रुदन्तो वा हसन्तो वा स्रवन्तो वा बहून्रसान्॥
अरोगा वा विना वातं शाखा मुञ्चन्त्यथ द्रुमाः।
फलं पुष्पं तथा काले दर्शयन्ति द्विजायनाः॥
पूर्व्वावस्था दर्शयन्ति फलं पुष्पं तथा भवेत्।
क्षीरं स्नेहं मदं रक्तं मधु तोयं स्रवन्ति च॥
शुष्यन्त्यरोगाः सहसा शुष्का रोहन्ति वा पुनः।
उत्तिष्ठन्तीह पतिताः पतन्ति च तथोन्नताः॥
एवं वक्ष्यामि ते ब्रह्मन् विपाकफलमेव च।
रोदने व्याधिमभ्येति हसने देशविभ्रमम्॥
शाखाप्रपतने कुर्य्यात् संग्रामे योधपातनम्।
बालानां मरणं कुर्य्याद्बालानां फलपुष्पिता॥
स्वराष्ट्रभेदं कुरुते फलपुष्पमनन्तरम्।
चयं सर्व्वत्र गोक्षीरे स्नेहे दुर्भिक्षलक्षणम्॥
वाहनापचयं मद्यं रक्तं संग्राममादिशेत्।
मधुस्रावे भवेद्व्याधिर्जलस्रावे न वर्षति॥
अरोगं शोषणं ज्ञेयं ब्रह्मन् दुर्भिक्षलक्षणम्।
शुष्केषु संप्ररोहस्तु वीर्य्यमन्नञ्च हीयते॥
उत्थाने पतितानाञ्च भयभेदकरं भवेत्।
स्थानात् स्थानन्तु गमने देशभङ्गन्तथादिशेत्॥
ज्वलत्स्वपि च वृक्षेषु रोदत्सु च धनक्षयम्।
एतत् पूजितवृक्षेषु सर्व्वं राज्ञो विपद्यते॥
पुष्पे फले वा विकृते राज्ञो मृत्युं तथादिशेत्।
अन्येषु दैवयुक्तेषु वृक्षोत्पातेषु मन्त्रितः॥
आच्छादयित्वा तं वृक्षं गन्धमाल्यैर्विभूषयेत्।
वृक्षोपरि तथा छत्रं कुर्य्यात् पापप्रशान्तये॥
शिवमभ्यर्च्चयेद्देवं पशुञ्चास्मै निवेदयेत्।
मूलेभ्य इति यद्धोमा हुत्वा रुद्रं जपेत्तथा॥
मध्वाज्ययुक्तेन तु पायसेन
संपूज्य विप्रांश्चतुरश्च दद्यात्।
गीतेन नृत्येन तथार्च्चनेन
देवं हरं पापविनाशहेतोः॥"
इति मात्स्ये अद्भुतशान्तिवृक्षोत्पातप्रशमनं नाम २०६ अध्यायः॥*॥ अथ वृक्षप्रतिष्ठा।
भीष्म उवाच।
"पादपानां विधिं ब्रह्मन् यथावद्विस्तराद्वद।
विधिना येन कर्त्तव्यं पादपोद्यापनं बुधैः।
ये च लोकाः स्मृतास्तेषां तानि चैव वदस्व मे॥
पुलस्त्य उवाच।
पादपानां विधिं वक्ष्ये तथैवोद्यानभूमिषु।
तड़ागविधिवत् सर्व्वं समाप्तिं जगदीश्वर॥
कृत्वा मण्डपसंभारं स्नात्वा प्रयतमानसः।
पूजयेद्ब्राह्मणं तद्वद्धेमवस्त्रानुलेपनैः॥
सर्व्वौषध्युदकैः सिक्तान्नानापुष्पविभूषितान्।
वृक्षान्माल्यैरलंकृत्य वासोभिरभिवेष्टयेत्॥
सूच्या चैव तथा कार्य्यं सर्व्वेषां कर्णवेधनम्।

कुङ्कुमञ्चापि दातव्यं तद्धेमशलाकया ॥
फलानि सप्त चाष्टौ वा कलधौतानि कारयेत् ।
प्रत्येकं सर्व्ववृक्षाणां वेद्यां तानधिवासयेत् ॥
धूपन्तु गुग्गुलुं श्रेष्ठं ताम्रपात्रैरधिष्ठितम् ।
सर्व्वान् धान्यभृतः कृत्वा गन्धमाल्यानुलेपनैः ॥
कुम्भान् स सर्व्ववृक्षेषु स्थापयित्वा व्रती स्वयम् ।
पूजयित्वा दिनान्ते च कुर्य्याद्द्विजनिमन्त्रणम् ॥
यथा च लोकपालानामिन्द्रादीनां विधानतः ।
वनस्पतेरधिवासमेवं कार्य्यं द्विजातिभिः ॥
ततः शुक्लाम्बरधरः सौवर्णकृतशेखराम् ।
स्वर्णशृङ्गीं कांस्यदोहां गां दद्याच्छुभशालिनीम् ॥
पयस्विनीं वृक्षमध्यादुत्सृजेन्नामुदङ्मुखीम् ।
ततोऽभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः ॥
ऋग्यजुःसामाथर्व्वाणां धारावैरभितस्तथा ।
तैश्च कुम्भैः संस्नपनं कुर्य्याद्ब्राह्मणपुङ्गवः ॥
शुक्लाम्बरधरः शुद्धो यजमानः स्वयं जपेत् ।
गोभिर्व्विभवतः सार्द्धानृत्विजस्तु समाहितः ॥
हेमसूत्रैः सकटकैरङ्गुलीयैः पवित्रकैः ।
वासोभिः शयनीयैश्च सद्योपस्करपादुकैः ॥
क्षीरामिषैर्व्वलिं दद्याद्यावद्दिनचतुष्टयम् ।
होमश्च सर्पिषा कार्य्यो यवैः कृष्णतिलैरपि ॥
पलाशसमिधः शस्ताश्चतुर्थेऽह्नि तथोत्सवः ।
दक्षिणा च पुनस्तद्वत् श्रेष्ठा तत्रापि शक्तितः ॥
यद्यदिष्टतमं किञ्चित्तत्तद्द्यादमत्सरः ।
आचार्य्ये द्विगुणं दत्त्वा प्रणिपत्य समापयेत् ॥
अनेन विधिना यस्तु कुर्य्याद्वृक्षोत्सवं सदा ।
सर्व्वान् कामानवाप्नोति तत् तदानन्त्यमश्नुते ॥
यश्चैकमपि राजेन्द्र वृक्षं संस्थापयेद्बुधः ।
सोऽपि स्वर्गे वसेद्राजन् यावदिन्द्रशतत्रयम् ॥
भूतभव्यांश्च मनुजांस्तारयेद्रोमसंमितान् ।
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥
य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः ।
सोऽपि संपूज्यते देवैर्ब्रह्मलोके महीयते ॥"

इति पाद्मे सृष्टिखण्डे २६ अध्यायः ॥ * ॥

वृक्षच्छेदने दोषो यथा,—
"तस्मान्न च्छेदयेत् वृक्षान् सुपुष्पफलितान् कदा ।
यदीच्छेत् कुलवृद्धिञ्च धनवृद्धिञ्च शाश्वतीम् ॥
सन्निधौ देवतानाञ्च श्मशानेष्वचितानपि ।
छेदितांश्छेदयेल्लोकान् नरकवृश्चिसुत्रये: ॥
श्मशानभिन्नेष्वश्वत्थं निपातितैः निपातिते ।
सन्नियोगी क्षयं याति सीमावृक्षे निपातिते ।
तस्मान्न च्छेदयेद्वृक्षं देवताधिष्ठितं क्वचित् ॥
वापीकूपतडागानां छेदने रोधने कृते ।
कुलान्यकुलतां यान्ति नराणां सुदुरात्मनाम् ॥
तद्वच्च छेदयेद्यस्तु वृक्षान् छायासुशीतलान् ।
असिपत्रवने घोरे पीड्यते यमकिङ्करैः ॥
नगरोपवने वृक्षान् प्रमादाद्धि च्छिनत्ति यः ।
स गच्छेन्नरकं नाम जृम्भणं रौद्रदर्शनम् ॥
विल्वादिपालनं कुर्य्याच्छुभं भयदमन्यथा ।
श्रीवृक्षानोपयेत् यश्च यदि स्वर्गान्न हीयते ॥"
इत्याद्ये वह्निपुराणे वापरारामप्रतिष्ठाध्यायः ॥

अथ वृक्षारोपणनक्षत्रादि । शतभिषा मूलं विशाखा मृगशिरः उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् रोहिणी हस्ता पुष्यः रेवती च ॥ * ॥ राजमार्त्तण्डे ।
"शाक्रेशश्रवणोत्तरादितिमघामार्त्तण्डतिष्याश्विनी-
पौष्णानुराधमरीचयः शतभिषा स्वातिर्विशाखा तथा ।
जिवार्केन्दुसितेन्दुनन्दनदिने वारे स्थिरस्योदये
शस्तानां वपने भवन्ति लवने शस्ते तिथौ रोपणे ॥ * ॥
हेमाम्भसा वृक्षबीजं स्नातो मन्त्रेण रोपयेत् ।
वसुधेति सुशीतेति पुण्यदेति धरेति च ।
नमस्ते सुभगे नित्यं द्रुमोऽयं वर्द्धतामिति ॥" * ॥
अथ वृक्षप्रतिष्ठानक्षत्राणि । पूष्यः अश्विनी ज्येष्ठा पूर्व्वफल्गुनी धनिष्ठा मृगशिरः स्वाती आर्द्रा मघा रोहिणी मूलं हस्ता रेवती अनुराधा श्रवणा पुनर्व्वसुश्च । यथा हि ।
"पुष्याश्विशक्रभगदैवतवासवेषु
चन्द्रानिलेशमघरोहिणिमूलहस्ते ।
पौष्णानुराधहरिभेषु पुनर्व्वसौ च
कार्य्याभिषेकतरुभूतपतिप्रतिष्ठा ॥" * ॥
अथ विहिततिथ्यादिः । भविष्ये ।
"प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ।
दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता ॥
सोमो बृहस्पतिश्चैव शुक्रश्चैव तथा बुधः ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठायागकर्म्मणि ॥"
इति ज्योतिस्तत्त्वम् ॥

वृक्षकः, पुं, कुटजवृक्षः । इति रत्नमाला ॥ वृक्ष-मात्रञ्च ॥ (यथा, रघुवंशे । १ ।३० ।
"सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ॥")

वृक्षचरः, पुं, (वृक्षे चरतीति । चर+टः ।) वानरः । इति धनञ्जयः ॥

वृक्षच्छायं, क्ली, बहूनां वृक्षाणां छाया । यथा । वृक्षस्य वृक्षयोर्वा छाया वृक्षच्छाया वृक्ष-च्छायम् । बहुत्वे तु वृक्षच्छायमिति । महा-च्छाया बहूनाञ्चेदिति क्लीवत्वम् । इति स्त्री नपुंसकलिङ्गसंग्रहे भरतः ॥

वृक्षधूपः, पुं, श्रीवेष्टः । इति राजनिर्घण्टः ॥

वृक्षनाथः, पुं, (वृक्षाणां नाथः ।) वटवृक्षः । इति शब्दरत्नावली ॥

वृक्षपाकः, पुं, वटवृक्षः । इति शब्दचन्द्रिका ॥

वृक्षभवनं क्ली, (वृक्षस्थितं भवनम् ।) वृक्षकोटरम् । इति शब्दचन्द्रिका ॥

वृक्षभक्षा, स्त्री, (वृक्षं भक्षयतीति । भक्ष+अच् । ततष्टाप् ।) वन्दाकः । इति भावप्रकाशः ॥

वृक्षभित्, } स्त्री, (वृक्षं भिनत्तीति । भिद्+क्विप् ।)
वृक्षभिद्, } वासी । इति हेमचन्द्रः ॥

वृक्षभेदी, [न्] पुं, (वृक्षं भिनत्तीति । भिद्+णिनिः ।) वृक्षादनः । इत्यमरः ॥ नेहानि इति भाषा ॥ टङ्कः । इति हेमचन्द्रः ॥

वृक्षमर्कटिका, स्त्री, (वृक्षस्य मर्कटिका ।) जन्तु-विशेषः । काठ्‌विड़ाल इति भाषा ॥ इति केचित् ॥

वृक्षरुहूः, पुं, (वृक्षरुहि भवतीति । भू+क्विप् ।) जलवेतसः । इति शब्दचन्द्रिका ॥

वृक्षरुहा, स्त्री, (वृक्षे रोहतीति । रुह+कः । ततष्टाप् ।) वन्दा । इत्यमरः ॥ अमृतस्रवा । इति राजनिर्घण्टः ॥

वृक्षवाटिका, स्त्री, (वृक्षस्य वाटिका ।) अमात्य-गणिकागेहोपवनम् । इत्यमरः ॥

वृक्षादनः, पुं, (वृक्षमत्ति नाशयतीति । अद्+ल्युः ।) वृक्षभेदी । इत्यमरः ॥ नेहानि इति भाषा । (यथा, महाभारते । ५ । १५४ । ८ ।
"सकीलकवचाः सर्व्वे वाणी वृक्षादनान्विताः ॥")
अश्वत्थवृक्षः । मधुच्छत्रम् । कुठारः । इति मेदिनी ॥ पियालः । इति धरणिः ॥

वृक्षादनी, स्त्री, (वृक्षमत्तीति । अद+ल्युः । स्त्रियां ङीष् ।) वन्दा । विदारीकन्दः । इति मेदिनी । ने, २१३ ॥

वृक्षादिरुहकं, } क्ली, आलिङ्गनम् । इति शब्द-
वृक्षादिरूढ़कं, } माला ॥

वृक्षाम्लं, क्ली, (वृक्षस्याम्लम् ।) महाम्लम् । तेन्तु-लीति ख्यातम् । इति रायमुकुटः ॥ महादा । इति भरतादयः ॥ अम्लकुटा । इति सार-सुन्दरी ॥ चुका । इति भानुदीक्षितादयः ॥ तत्पर्य्यायः । तिन्तिड़ीकम् २ चुक्रम् ३ । इत्य-मरः ॥ अम्लशाकम् ४ चुक्राम्लम् ५ तिन्तिड़ी-फलम् ६ शाकाम्लम् ७ अम्लपूरम् ८ पूराम्लम् ९ रक्तपूरकम् १० चुड़ाम्लम् ११ वीजाम्लम् १२ फलाम्लकम् १३ अम्लवृक्षम् १४ अम्लफलम् १५ रसाम्लम् १६ श्रेष्ठाम्लम् १७ अत्यम्लम् १८ अम्लवीजम् १९ चुक्रफलम् २० । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । कफार्श-स्तृष्णासमीरोदरहृद्रदादिगुल्मातिसारग्रहदोष-नाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वृक्षाम्लमाममत्योष्णं वातघ्नं कफपित्तलम् ।
पक्वन्तु गुरु संग्राहि कटुकं तुवरं लघु ॥
अत्युष्णं रोचनं रूक्षं दीपनं कफवातजित् ।
तृष्णार्शोग्रहणीगुल्मशूलहृद्रोगजन्तुजित् ॥"
इति भावप्रकाशः ॥

वृक्षाम्बः, पुं, (वृक्षे अम्बो यस्य ।) आम्रातकः । इति शब्दचन्द्रिका ॥

वृक्षायुर्व्वेदः, पुं, (वृक्षस्यायुर्व्वेदः ।) तच्चिकित्-सादिशास्त्रम् । तद्यथा,—
धन्वन्तरिरुवाच ।
"वृक्षायुर्व्वेदमाख्यास्ये प्लक्षश्चोत्तरतः शुभः ।
प्राग्वटो याम्यतस्त्वाम्रं आप्येऽश्वत्थं क्रमेण तु ।
दक्षिणां दिशमुत्पन्नाः समीपे कण्टकद्रुमः ॥
उद्यानं गृहवासे स्यात् तिलान् वाप्यथ पुष्पितान् ।
गृह्णीयाद्रोपयेद्वृक्षान् द्विजं चन्द्रं प्रपूजयेत् ॥
ध्रुवाणि पञ्च वायव्यं हस्तं प्राजेशवैष्णवम् ।

नक्षत्राणि तथा मूलं प्रशस्तं द्रुमरोपणे ।
प्रवेशयेन्नदीवाहान् पुष्करिण्यां तु कारयेत् ।
हस्ता मघा तथा मैत्रमाद्यं पुष्यं सवासवम् ।
जलाशयसमारम्भे वारुणं चोत्तरात्रयम् ।
संपूज्य वरुणं विष्णुं पर्ज्जन्यं तत् समारभेत् ।
अरिष्टाशोकपुन्नागशिरीषाश्च प्रियङ्गवः ।
अशोककदलीजम्बुस्तथा वकुलदाड़िमाः ।
सायं प्रातस्तु घर्म्मर्त्तौ शीतकाले दिनान्तरे ।
वर्षारात्रे भुवः शोषे सेक्तव्या रोपिता द्रुमाः ।
उत्तमं विंशतिर्हस्ता मध्यमं षोड़शान्तरम् ।
स्थानात् स्थानान्तरं कार्य्यं वृक्षाणां द्वादशान्तरम् ।
विफलाः स्युर्घना वृक्षाः शस्त्रेणादौ हि शोधनम् ।
विड़ङ्गघृतपङ्काक्तान् सेचयेच्छीतवारिणा ।
फलनाशे कुलत्थैश्च माषैर्मुद्गैर्यवैस्तिलैः ।
घृतशीतपयःसेकः फलपुष्पाय सर्व्वदा ।
आविकाजशकृच्चूर्णं यवचूर्णं तिलानि च ।
गोमांसमुदकञ्चेति सप्तरात्रं निधापयेत् ।
उत्सेकः सर्व्ववृक्षाणां फलपुष्पादिवृद्धिदः ।
मत्स्याम्भसा तु सेकेन वृद्धिर्भवति शाखिनः ।
विड़ङ्गतण्डुलोपेतं मत्स्यं मांसं हि दोहदम् ।
सर्व्वेषामविशेषेण वृक्षाणां रोगवर्द्धनम् ।"
इत्याग्नेये महापुराणे वृक्षायुर्व्वेदः ॥
(अस्यान्यद्विवरणं वृहत्संहितायां ५५ अध्याये द्रष्टव्यम् ॥)

वृक्षार्हा, स्त्री, (वृक्षे अर्हतीति । अर्ह + अच् । टाप् ।) महामेदा । इति राजनिर्घण्टः ॥

वृक्षालयः, पुं, (वृक्ष आलयो यस्य ।) पक्षी । इति शब्दमाला ॥

वृक्षावासः, पुं, (वृक्षे आवासो यस्य ।) वृक्षकोटरवासी । इति केचित् ॥

वृक्षाश्रयी, [न्] पुं, (वृक्षमाश्रयतीति । आ + श्रि + णिनिः ।) क्षुद्रोलूकः । इति राजनिर्घण्टः ॥

वृक्षोत्पलः, पुं, कर्णिकारः । इति रत्नमाला ॥

वृच, ई ध वृतौ । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-सक०-सेट् । अनिड़्निष्ठः ।) ई, वृक्तः । ध, वृणक्ति । वरीवृच्यते । वर्णनायामित्यन्ये । इति दुर्गादासः ॥

वृज, ई कि त्यागे । इति कविकल्पद्रुमः ॥ (चुरा०-भ्वा० च-पर०-सक०-सेट् । अनिड़्निष्ठः ।) ई, वृक्तः । कि, वर्ज्जयति वर्ज्जति । इति दुर्गादासः ॥

वृज, ई ध वृतौ । त्यागे । इति कविकल्पद्रुमः ॥ (रुधा० पर०-सक०-सेट् । अनिड़्निष्ठः ।) ई, वृक्तः । ध, वृणक्ति । वरीवृज्यते । इति दुर्गादासः ॥

वृज, ल ङ ई त्यागे । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-सक०-सेट् ।) सप्तमस्वरी । ल, ङ, वृक्ते । ई, वृक्णाते । इति दुर्गादासः ॥

वृज, ल ङ ई त्यागे । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-सक०-सेट् । अनिड़्निष्ठः ।) सप्तमस्वरी । ल, ङ, वृक्ते । ई, वृक्तः । इति दुर्गादासः ॥

वृजनं, क्ली, (वृज + "कृपृवृजीति ।" उणा० २।८१। इति क्युः ।) पापम् । इत्युणादिकोषः ॥ आकाशम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ निराकरणम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (संग्रामः । यथा, ऋग्वेदे । १ । ६३ । ३ ।
"त्वं शुष्णं वृजने पृक्ष ।"
"वृजन इत्यादीनि त्रीणि संग्रामनामानि अत्र पूर्व्वे विशेषणे वृजने वर्ज्जनयुक्ते संग्रामे हि वीराः पुरतो वर्ज्जन्ति हिंसन्ति ।" इति तद्भाष्ये सायणः ॥ बलम् । इति निघण्टुः । २ । ९ ॥ यथा, ऋग्वेदे । १ । १६६ । १५ ।
"विद्यामेषं वृजनं जीरदानुम् ।"
"वृजनं बलम् ।" इति तद्भाष्ये सायणः ॥
प्राणिजातम् । यथा, ऋग्वेदे ।१ । ४८ । ५ ।
"जरयन्ती वृजनं पद्वदीयते ।"
"वृजनं गमनशीलं जङ्गमं प्राणिजातं जरयन्ती * * * वृजनं वृजी वर्ज्जने । वर्ज्यते इति वृजनं प्राणिजातम् । कृ पृ वृजिमन्दिनिधाभ्यः क्युरिति क्युप्रत्ययः । कित्त्वाल्लघूपधगुणाभावः योरनादेशे प्रत्ययस्वरः ।" इति तद्भाष्ये सायणः ॥)

वृजनः, पुं, (वृज + क्युः ।) केशः । कुटिले, त्रि । इत्युणादिकोषः ॥ (बाधके च त्रि । यथा, ऋग्वेदे । ६ । ३५ । ५ ।
"तमागूनं वृजनमन्यथा चिच्छूरो ।"
"वृजनं बाधकम् ।" इति तद्भाष्ये सायणः ॥)

वृजिः, स्त्री, व्रजभूमिः । इति केचित् ॥

वृजिनं, क्ली, (वृजी वर्ज्जने + "वृजेः किच्च ।" उणा० २ । ४७ । इति इनच् । स च कित् ।) पापम् । इत्यमरः ॥ (यथा, भागवते । १० । २६ । ३८ ।
"तन्नः प्रसीद वृजिनार्द्दन तेऽङ्घ्रिमूलम् ।"
दुःखम् । यथा, तत्रैव । १ । ७ । ४६ ।
"वृजिनं नार्हति प्राप्तुं पूज्यं वन्द्यमभीक्ष्णशः ।"
पापविशिष्टे, त्रि । यथा, महाभारते ।२।२२।४।
"वृजिनां गतिमाप्नोति श्रेयसोऽप्युपहन्ति च ।")
रक्तचर्म्म । भुग्नम् । इति हेमचन्द्रः ॥

वृजिनः, पुं, केशः । कुटिले, त्रि । इति मेदिनी । ने, १२६ ॥ (यथा, ऋग्वेदे । ६ । ४६ । १३ ।
"अधमने अध्वनि वृजिने पथि श्येनां इव श्रवस्यतः ।"
"वृजिने कुटिले पथि ।" इति तद्भाष्ये सायणः ॥)

वृण, इ ण उ भक्षे । इति कविकल्पद्रुमः ॥ (तना०-उभ०-सक०-सेट् । क्त्वावेट् ।) इ ण, वृणोति वर्णोति वृणुते वर्णुते । उ, वर्णित्वा वृत्वा । इति दुर्गादासः ॥

वृत, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, वर्त्तयति । इति दुर्गादासः ॥

वृत, ङ उ व ऌ वर्त्तने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-स्वपर०-उभ०-अक०-सेट् । क्त्वावेट् ।) ङ, वर्त्तते । उ, वर्त्तित्वा वृत्त्वा । व, वर्त्स्यति विवृत्सति । ऌ, अवृतत् । इति दुर्गादासः ॥

वृत, य ङ उ सम्भक्तौ । वरणे । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-सेट् । क्त्वावेट् ।) य ङ, वृत्यते । उ, वर्त्तित्वा वृत्त्वा । सम्भक्तिः सेवनम् । इति दुर्गादासः ॥

वृतः, त्रि, (वृ + क्तः ।) कृतवरणः । तत्पर्य्यायः । वृत्तः २ वावृत्तः ३ । इत्यमरः ॥ (यथा, हरिवंशे । १२७ । १७ ।
"तथा वृत्रवधे प्राप्ते साहाय्यार्थं वृतो मया ।")
आवृतश्च ॥

वृतपत्रा, स्त्री, (वृतानि पत्राण्यस्याः ।) पुत्रदात्री । इति राजनिर्घण्टः ॥

वृतिः, स्त्री, (वृ + क्तिन् ।) वेष्टनम् । तत्पर्य्यायः । वरः २ । इत्यमरः ॥ (यथा,—
"न हि च्छायादानैः पथिकजनसन्तापहरणं
फलैर्व्वा पुष्पैर्व्वा न सुरमनुजप्रीणनमपि ।
अरे रे मन्दारद्रुम सकलमेतत्त्वनुचितं
वृतीभूतो रक्षस्यपरमपरेषां फलमपि ॥"
इत्युद्भटः ।)
प्रार्थनाविशेषः । इत्यजयः । इति भरतः । वरणम् । इति मेदिनी ॥ गोपनम् । इति शब्दरत्नावली ॥

वृतिङ्करः, पुं, विकङ्कतवृक्षः । इति शब्दरत्नावली ॥ वृतिकारके, त्रि ॥

वृत्तं, क्ली, (वृत + क्तः ।) चरित्रम् । (यथा, कथासरित्सागरे । ३ । १४ ।
"तत्र तस्थुर्निजान् भर्त्तॄन् ध्यायन्त्यः क्षिप्तवृत्तयः ।
आपद्यपि सतीवृत्तं किं मुञ्चन्ति कुलस्त्रियः ॥")
पद्यम् । इत्यमरः ॥ यथा, छन्दोमञ्जर्य्याम् ।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ।
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा ॥"
वृत्तिः । इति मेदिनी ॥ वेदबोधितस्याचारस्य परिपालनम् । इति वृत्ताध्ययनर्द्धिशब्दटीकायां भरतः ॥ (वार्त्ता । यथा, कथासरित्सागरे । ५८ । ११६ ।
"न मार्गवृत्तमेतन्मे वाच्यं पितरि ते त्वया ।"
आचारः । यथा, मनौ । ४ । २६० ।
"अनेन विप्रो वृत्तेन वर्त्तयन् वेदशास्त्रवित् ।
अपेतकल्मषो नित्यं ब्रह्मलोके महीयते ॥")

वृत्तः, त्रि, (वृत् + क्तः ।) अतीतः । (यथा, रामायणे । २ । ६० । ७ ।
"जानन् दशरथं वृत्तं न राजानमुदाहरत् ॥"
"वृत्तमतीतम् ।" इति तट्टीका ।) दृढ़ः । वर्त्तुलः । (यथा, भागवते । ४ । २५ । २४ ।
"स्तनौ व्यक्तिकिशोरौ समवृत्तौ निरन्तरौ ।")
कृतावरणः । इत्यमरटीका ॥ अधीतः । मृतः । इति मेदिनी ॥ (निष्पन्नः । यथा, रघुः ।३।२८।
"स वृत्तचूड़श्चलकाकपक्षकै-
रमात्यपुत्रैः सवयोभिरन्वितः ॥"
जातः । यथा, रघुवंशे । २ । ५८ ।
"सम्बन्धमाभाषणपूर्व्वमाहु-
र्वृत्तः स नौ सङ्गतयोर्व्वनान्ते ।")

अथ वृत्तवस्तूनि। यथा,—
"वृत्तानि बाहुनारङ्गस्कन्धधम्मिल्लमोदकाः।
रथाङ्गलावककक्कुत्कुम्भिकुम्भाण्डकादयः॥
कर्णपाशभुजापाशाक्षरचापघटाननम्।
मुद्रिकापरिखायोगपट्टहारस्रगादयः॥"॥॥
संपूर्णगर्भवृत्तानि यथा,—
"संपूर्णगर्भवित्तानि सुखपद्मेन्दुदर्पणाः।
चक्रावर्त्ततिलकच्छदङ्गपुटप्रायकाः॥
आवर्त्तः कमठो लूताण्डं छत्रमपूपकम्।
आलवालमहीजालचर्म्मकं सानकादयः॥"
इति कविकल्पलतायाम् २ स्तबके प्रकीर्णं नाम ३ कुसुमम्॥

वृत्तः, पुं, (स्वल्पो वृत्तः। स्वल्पार्थे कन्।) कूर्म्मः। इति राजनिर्घण्टः॥ (नागविशेषः। यथा, महाभारते। १।३५।१०।
"वृत्तसम्वर्त्तकौ नागौ द्वौ च पद्माविति श्रुतौ॥")

वृत्तकर्कटी, स्त्री, (वृत्ता वर्त्तुला कर्कटी।) षड्भुजा। इति राजनिर्घण्टः॥

वृत्तगन्धि, क्ली, (वृत्तस्य पद्यस्य गन्धो लेश इव गन्धो यस्मिन्।) गद्यविशेषः। तस्य लक्षणं यथा,—
"भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्।
वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनः स्मृतम्॥"
तस्य उदाहरणं यथा। जय जय जनार्द्दन सुकृतिजनमनस्तडागविकस्वरचरणपद्मपद्मनयन-पद्मापद्मिनीविनोदराजहंसभासुरयशःपटल-परिपूरितभुवनकुहर। हरकमलासनादिवृन्दारकवृन्दवन्दनीयपादारविन्दद्वन्द्वनिर्म्मुक्तयोगीन्द्र-हृदयमन्दिराविस्तनिरञ्जनज्योतिःस्वरूपनाथ नाथ जगन्नाथ मामनवधिभवदुःखयाकुलं रक्ष रक्ष। इति छन्दोमञ्जर्य्याम् ६ स्तवकः॥

वृत्तगुण्डः, पुं, तृणविशेषः। तत्पर्य्यायः। वृत्तः १ दीर्घनालः ३ जलाश्रयः ४। द्विधायं एकः स्थूलः द्वितीयो लघुः। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। कफपित्तातिसारदाहरक्तनाशित्वम्। तेषां मध्ये स्थूलतरस्याधिकगुणत्वञ्च। इति राजनिर्घण्टः॥

वृत्ततः, [स्] व्य, (वृत्त+तसिल्।) वृत्तेन। यथा,
"अतिग्रहाव्यथनक्षेपेष्वकर्त्तरि तृतीयायाः।
अकर्त्तरि तृतीयान्तात् वा तसिः स्यात्। अव्यथनं अचलनम्। वृत्तेन न व्यथते वृत्ततो न व्यथते। वृत्तेन न चलतीत्यर्थः। क्षेपे। वृत्तेन क्षिप्तः वृत्ततः क्षिप्तः। वृत्तेन निन्दित इत्यर्थः। हीयमानपापयोगाच्च। हीयमानपापयुक्तादकर्त्तरि तृतीयान्ताद्वा तसिः। वृत्तेन हीयते वृत्तेन पापः वृत्ततः। इति सिद्धान्तकौमुदी॥

वृत्ततण्डुलः, पुं, (वृत्तस्तण्डुलः।) यावनालः। इति राजनिर्घण्टः॥

वृत्तनिष्पाविका, स्त्री, नखनिष्पावी। इति राजनिर्घण्टः॥

वृत्तपर्णी, स्त्री, (वृत्तं वर्त्तुलं पर्णं यस्याः। ङीष्।) महाश्रावणिका। पाठा। इति राजनिर्घण्टः॥

वृत्तपुष्पः, पुं, (वृत्तं वर्त्तुलं पुष्पं यस्य।) शिरीषः। कदम्बः। वाणीरः। कुब्जकः। मुद्गरः। इति राजनिर्घण्टः॥

वृत्तफलं, क्ली, (वृत्तं वर्त्तुलं फलं यस्य।) मरीचम्। इति राजनिर्घण्टः॥ गोलफलमात्रञ्च॥

वृत्तफलः, पुं, (वृत्तं फलं यस्य।) दाड़िमः। वदरः। इति राजनिर्घण्टः॥

वृत्तफला, स्त्री, (वृत्तं वर्त्तुलं फलं यस्याः।) वार्त्ताकी। शशाण्डुली। आमलकी। इति राजनिर्घण्टः॥

वृत्तबीजः, पुं, (वृत्तं बीजं यस्य।) शिम्बा। इति राजनिर्घण्टः॥

वृत्तबीजका, स्त्री, (वृत्तं वर्त्तुलं बीजं यस्याः। कन् ततष्टाप्।) पाण्डुरफली। इति राजनिर्घण्टः॥

वृत्तबीजा, स्त्री, (वृत्तं बीजं यस्याः।) आढ़की। इति राजनिर्घण्टः॥

वृत्तमल्लिका, स्त्री, (वृत्ता मल्लिकेव।) श्वेतार्कः। मोदिनी। इति राजनिर्घण्टः॥

वृत्तस्थः, त्रि, (वृत्त+स्था+कः।) वृत्ते तिष्ठति यः। यथा, मनुः।
"तुरीयो ब्रह्महत्यायाः क्षत्त्रियस्य वधे स्मृतः।
वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोड़शः॥"
वृत्तं यथा,—
"गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः।
प्रवर्त्तनं हितानाञ्च तत् सर्व्वं वृत्तमुच्यते॥"
इति गोपालचक्रवर्त्तिसङ्कलितस्मृतिसंग्रहः॥

वृत्ता, स्त्री, भिञ्झिरिटाहृक्षः। रेणुका। प्रियङ्गुः। मांसरोहिणी॥ इति राजनिर्घण्टः॥

वृत्ताध्ययनर्द्धिः, स्त्री, (वृत्ताध्ययनयोरर्द्धिः।) ब्रह्मवर्च्चसम्। इत्यमरः॥ वेदबोधितस्याचारस्य परिपालनं वृत्तम्। व्रतग्रहणपूर्व्वकं गुरुमुखेन वेदाभ्यासः अध्ययनम्। तयोरर्द्धिस्तत्परिपालनकृततेजस उपचयो ब्रह्मवर्च्चसं स्यात्। ब्रह्महस्तिराजेति अः। इति भरतः॥

वृत्तान्तः, पुं, संवादः। तत्पर्य्यायः। वार्त्ता २ प्रवृत्तिः ३ उदन्तः ४। इत्यमरः॥ श्रुतिः ५। इति जटाधरः॥ उदन्तकः ६। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। २।२६।
"सर्व्वमामूल वृत्तान्तं विस्तरादिदमब्रवीत्॥")
प्रक्रिया। कार्त्स्न्यम्। वार्त्ताप्रभेदः। प्रस्तावः। इति मेदिनी॥ (यथा, मनौ। ३।१४।
"न ब्राह्मणक्षत्त्रिययोरापद्यपि हि तिष्ठतोः।
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्य्योपदिश्यते॥"
"वृत्तान्ते इतिहासाख्याने॥" इति कुल्लूकमेधातिथी॥) अवसरः। भावः। एकान्तवाचकः। इति विश्वः॥

वृत्तिः, स्त्री, (वृत+क्तिन्।) जीविका। इत्यमरः॥ (यथा, मनौ। ४।२५६।
"एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती॥")
विवरणम्। (यथा, कातन्त्रे। "सूत्रस्यार्थविवरणं वृत्तिः॥") कौशिक्यादिः। प्रवर्त्तनम्। इति मेदिनी॥ (यथा, शाकुन्तले। ४।
"उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया विरतानुबन्धम्॥")
विवृतिः। इति धरणिः॥ ॥ कौशिक्यादिवृत्तयो यथा,—
"शृङ्गारे कौशिकी वीरे सात्त्वत्यारभटी पुनः।
रसे रौद्रे च वीभत्से वृत्तिः सर्व्वत्र भारती।
चतस्रो वृत्तयो ह्येताः सर्व्वनाट्यस्य मातृकाः॥"
इति साहित्यदर्पणे ६ परिच्छेदः॥
वृत्तिहरणे दोषा यथा,—
श्रीनारायण उवाच।
"स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः।
स कृतघ्न इति ज्ञेयः फलं तत् शृणु भूमिप!॥
यावन्तो रेणवः सिक्ता विप्राणां नेत्रविन्दुभिः।
तावद्वर्षसहस्रञ्च कृतघ्नोते स तिष्ठति॥
तप्ताङ्गारञ्च तद्भक्ष्यं पानञ्च तप्तमूत्रकम्।
तप्ताङ्गारे च शयनं ताड़ितो यमकिङ्करैः॥
तदन्ते च महापापी विष्ठायां जायते कृमिः।
षष्टिवर्षसहस्राणि देवमानेन भारते।
ततो भूमिविहीनश्च प्रजाहीनश्च मानवः।
दरिद्रः कृपणो रोगी शूद्रो निन्द्यस्ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६६ अध्यायः॥
(व्यवहारः। यथा, मनौ। २।२०५।
"गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्॥"
वर्त्ततेऽस्मिन्निति क्तिन्नत्ययात्। आधेयः। यथा, व्याप्तिपञ्चके। १। "साध्याभाववदवृत्तित्वम्।"
यथा च भाषापरिच्छेदे।
"सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्॥"
चित्तस्यावस्थाविशेषः। यथा, पातञ्जले। २।
"योगश्चित्तवृत्तिनिरोधः॥" चित्तवृत्तिप्रकारास्तु तत्रैव द्रष्टव्याः॥ ॥ व्यापारः। यथा, सांख्यतत्त्वकौमुद्याम्। ५।
"अर्थसन्निकृष्टस्य इन्द्रियस्य वृत्तौ सत्यां तमोऽभिभवे यः सत्त्वसमुद्रेकः॥" युक्तार्थः। यथा, कातन्त्रव्याकरणादौ।
"कारकप्रतियोगिभ्यां यद्दृयदन्यदपेक्षते।
अपेक्षेकत्ववाचित्वाद्वृत्तिस्तत्र तु नेष्यते॥")

वृत्तिस्थः, पुं, (वृत्तये तिष्ठतीति। स्था+कः।) सरटः इति राजनिर्घण्टः॥ वृत्तौ तिष्ठति, त्रि॥

वृत्तेर्व्वारुः, पुं, (वृत्तो वर्त्तुल इर्व्वारुः।) षड्भुजा। इति राजनिर्घण्टः॥

वृत्यं, त्रि, वरणीयम्। वृतधातोः क्यपा वृञ्धातोश्च क्यप्तुक्प्रत्ययाभ्याञ्च निष्पन्नमिदम्। इति सिद्धान्तकौमुदी॥

वृ(ब्र)त्रः, पुं, (वृत्+"स्फायितञ्चिवञ्चीति।" उणा० २।१३। इति रक्।) अन्धकारः। शत्रुः। (यथा, ऋग्वेदे। ७।४८।२।
"इन्द्रेण युजा तरुषेम वृत्रम्।"
"वृत्रं शत्रुम्।" इति तद्भाष्ये सायणः॥)
दानवविशेषः। स तु त्वष्टृपुत्त्र इन्द्रेण हतः। इत्यमरः॥ (यथा, हरिवंशे। १२७।१७।

"तथा वृत्रवधे प्राप्ते साहाय्यार्थं हृतो मया ।"
अस्य विशेषविवरणन्तु देवीभागवते षष्ठस्कन्धे १ अध्यायमारभ्य द्रष्टव्यम् । * ।) मेघः । (यथा, ऋग्वेदे । ३ । ३३ । ६ ।
"इन्द्रो अस्मा अरदद्वज्रबाहु-
रपाहन् वृत्रं परिधिं नदीनाम् ।"
"वृत्रं वृणोति आकाशमिति वृत्रो मेघस्तं मेघमपाहन् जघान ।" इति तद्भाष्ये सायणः ।) पर्व्वतविशेषः । इति मेदिनी ॥ इन्द्रः । इति विश्वः ॥ शब्दः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वृत्रद्विट्, [ष्] पुं, (वृत्रं द्वेष्टीति । द्विष् + क्विप् ।) इन्द्रः । इति हेमचन्द्रः ॥

वृत्रभोजनः, पुं, मकुष्ठकः । मसुर इति ख्यातः । इति शब्दचन्द्रिका ॥

वृत्रहा, [न्] पुं, (वृत्रं हतवान् । हन् + "ब्रह्मभ्रूणवृत्रेषु क्विप् ।" ३ । २ । ८७ । इति क्विप् ।) इन्द्रः । इत्यमरः ॥ (यथा, भागवते ।६।७।१६।
"अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाह वृत्रहा ॥"
यथा च ऋग्वेदे । १ । १०६ । ६ ।
"इन्द्रं कुत्सः वृत्रहणं शचीपतिम् ।"
"वृत्रहणं वृत्राणां शत्रूणां हन्तारम् ।" इति तद्भाष्ये सायणः ।)

वृत्रारिः, पुं, (वृत्रस्यारिः ।) इन्द्रः । इति शब्दार्णवः ॥

वृथा, व्य, निरर्थकः । तत्पर्य्यायः । मुधा २ व्यर्थकम् ३ अविधिः ४ । इत्यमरः ॥ यथा,—
"अदत्तपाशिको यामो ब्रदाशीकश्च यद्गृहम् ।
अग्राह्यभोजनं यच्च वृथा तदिति मे मतिः ॥"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥ अपि च ।
"वृथा वृष्टिः समुद्रस्य तृप्तस्य भोजनं वृथा ।
वृथा दानं समृद्धस्य नीचस्य सुकृतं वृथा ॥"
इति गारुडे ११५ अध्यायः ॥

वृथाजन्म, [न्] क्ली, (वृथा निरर्थकं जन्म ।) निरर्थकजननम् । यथा,—
"वृथा जन्मानि चत्वारि वृथा दानानि षोड़श ।
तान्यहं संप्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
अपुत्रस्य वृथा जन्म धर्म्मबाह्या नराः सदा ।
परपाकं सदाश्नन्ति परदाररताश्च ये ॥"
इत्याद्ये वह्निपुराणे दानावस्थानिर्बन्धनामाध्यायः ॥ अपि च ।
"येनैं श्रुतं भागवतं पुराणं
नाराधितो यैः पुरुषः प्रधानम् ।
मुखे हुतं यैर्न धरामराणां
तेषां वृथा जन्म नराधमानाम् ॥"
इति पुराणम् ॥

वृथादानं, क्ली, (वृथा निरर्थकं दानम् ।) निष्फलदानम् । तत् षोड़शविधम् । यथा,—
"देवपितृविहीनं यदीश्वरेभ्यः सदोषतः ।
दत्वानुकीर्त्तनाच्चैव वेदाग्निव्रतत्यागिने ॥
अन्यायोपार्ज्जितं दानं व्यर्थं ब्रह्महणे तथा ।
गुरवेऽनृतवक्त्रे च स्तेनाय पतिताय च ॥
कृतघ्नाय च यद्दत्तं सर्व्वदा ब्रह्मविद्विषे ।
याचकाय च सर्व्वस्य वृषल्याः पतये तथा ॥
परिचारकाय भृत्याय सर्व्वत्र पिशुनाय च ।
इत्येतानि तु राजेन्द्र वृथादानानि षोड़श ॥"
इति वह्निपुराणे दानावस्थानिर्बन्धनामाध्यायः ॥ अन्यच्च । व्यासमार्गेण यद्दत्तं तत् सप्तविधमपि पुनर्नापहर्त्तव्यम् । यत् पुनरन्यायेन दत्तं तद्दत्तं षोड़शमपि प्रत्याहर्त्तव्यमेव । इत्यर्थादुक्तं भवति । नारदेन च ।
"दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकम् ।"
इति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतम् ।
"पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥
अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्ज्जितम् ।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते ।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतम् ॥"
इति मिताक्षरा ॥

वृथामांसं, क्ली, (वृथा निरर्थकं मांसम् ।) देवपितृशुद्धिहीनमांसम् । तद्भक्षणे प्रेतत्वं भवति । यथा,
"वृथारेता वृथामांसो वृथावादी वृथामतिः ।
निन्दको द्विजदेवानां स प्रेतो जायते नरः ॥"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥

वृद्धं, क्ली, शैलजनामगन्धद्रव्यम् । इत्यमरः ॥

वृद्धः, पुं, वृद्धदारकः । इति राजनिर्घण्टः ॥

वृद्धः, त्रि, (वृधु वृद्धौ + क्तः । "वस्य विभाषा ।" ७ । २ । १५ । इति नेट् ।) गतयौवनः । प्रवृद्धः । (यथा, मनुः । २ । १५६ ।
"न तेन वृद्धो भवति येनास्य पलितं शिरः ।
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥")
पण्डितः । इति मेदिनी ॥ आद्यस्य पर्य्यायः । प्रवयाः २ स्थविरः ३ जीनः ४ जीर्णः ५ जरन् ६ । इत्यमरः ॥ यातयामः ७ जर्ज्जरः ८ । इति राजनिर्घण्टः ॥ पलितः । इति जटाधरः ॥

वृद्धकाकः, पुं, (वृद्धः काकः ।) काकविशेषः । दाँड़काक इति भाषा । तत्पर्य्यायः । द्रोणकाकः २ दग्धकाकः ३ लम्बकाकः ४ पर्व्वतकाकः ५ वनाश्रयः ६ काकोलः ७ । इति हेमचन्द्रः ॥

वृद्धगङ्गा, स्त्री, (वृद्धा गङ्गा ।) नदीविशेषः ॥ बुड़ीगङ्गा इति ख्याता । यथा,—
"अस्ति नाटकशैले तु सरो मानससन्निभम् ।
यत्र सार्द्धं शैलपुत्त्र्या जलक्रीड़ां सदा हरः ॥
कुरुते नरशार्दूल स्वर्णपङ्कजशोभिते ।
तस्य पश्चान्मध्यपूर्व्वभागेभ्यश्च सरित्त्रयम् ॥
अवतीर्य्य प्रयात्येव दक्षिणं सागरं प्रति ।
तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया ॥
दिग्गजाः क्षेत्रसंजाताः तेन दिक्करिका स्मृता ।
मध्यभागात् स्रुता या तु शङ्करेणावतारिता ॥
वृद्धगङ्गाह्वया सा तु गङ्गेव फलदायिनी ॥
या निःसृता पूर्व्वभागात्तस्माद्गिरिवरान्नदी ।
स्वर्णश्रीरेति विख्याता सा गङ्गासदृशी फले ॥"
इति कालिकापुराणे कामरूपपीठनिर्णयनाम ८२ अध्यायः ॥

वृद्धत्वं, क्ली, (वृद्ध + त्व ।) वृद्धस्य भावः । तत्पर्य्यायः । स्थाविरम् २ । इत्यमरः ॥ वार्द्धक्यम् ३ वार्द्धकम् ४ । इति शब्दरत्नावली ॥ (यथा, रघुः । १ । २३ ।
"अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्म्मरतेरासीद्वृद्धत्वं जरसा विना ॥")
बाल्यादेरवधिमाह सुश्रुतः ।
"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा ।
ऊनषोड़शवर्षस्तु नरो बालो निगद्यते ॥
त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्नभुक् ।
दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्द्वयम् ॥
तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः ॥
मध्ये षोड़शसप्तत्योर्मध्यमः कथितो बुधैः ।
चतुर्धा मध्यमं प्राहुर्युवा द्वात्रिंशतो मतः ॥
चत्वारिंशत्समा यावत्तिष्ठेद्वीर्य्यादिपूरितः ।
ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः ॥"
वीर्य्यादीत्यादिशब्देन रसादिसर्व्वधात्विन्द्रियबलोत्साहा उच्यन्ते । क्षीणः सर्व्वधात्विन्द्रियबलोत्साहैर्हीनः ।
"ततस्तु सप्ततेरूर्द्ध्वं क्षीणधातुरसादिकः ।
क्षीयमाणेन्द्रियबलः क्षीणरेता दिने दिने ॥
वलीपलितखालित्ययुक्तः कर्म्मसु चाक्षमः ।
कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ॥
बाल्ये विवर्द्धते श्लेष्मा पित्तं स्यान्मध्यमेऽधिकम् ।
वार्द्धक्ये वर्द्धते वायुर्विचार्य्यैतदुपक्रमेत् ॥"
उपक्रमेत् चिकित्सेत् । तन्त्रान्तरे तु ।
"बाल्यं वृद्धिश्छविर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ ।
बुद्धिः कर्म्मेन्द्रियं चेतो जीवितं दशतो ह्रसेत् ॥"
इति भावप्रकाशः ॥

वृद्धदारकः, पुं, (वृद्धो दारको बालक इव यस्मात् ।) वीरताड़कवृक्षः । इति भरतः ॥ बिद्धड़क् इति बीजताड़का इति च वङ्गभाषा । विधारा इति हिन्दीभाषा । तत्पर्य्यायः । ऋष्यगन्धा २ छगलान्त्री ३ आवेगी ४ जुङ्गः ५ । इत्यमरः ॥ ऋष्यप्रोक्ता ६ छगलाङ्घ्री ७ छगला ८ अन्त्री ९ जुङ्गा १० । इति तट्टीका ॥ छगली ११ जुङ्गकः १२ श्यामः १३ । इति जटाधरः ॥ वृष्यगन्धा १४ छगलान्त्रिका १५ । इति शब्दरत्नावली ॥ दीर्घवालुका १६ छागलान्त्रिका १७ वृद्धः १८ कोटरपुष्पी १९ अजान्त्री २० वृद्धदारु २१ । ग्रन्थान्तरे कोटरपुष्पीस्थाने वृद्धकोटरपुष्पीति पाठः । अस्य गुणाः । शीतत्वम् । पिच्छिलत्वम् । कफवातकासामदोषनाशित्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥ अन्यच्च ।
"रसायनो वृद्धदारः शोथवातामवातजित् ।"
इति राजवल्लभः ॥

वृद्धदारु, क्ली, (वृद्धत्वनाशकं दारु यस्य ।) वृद्धदारकवृक्षः । यथा, राजनिर्घण्टे ।
"वृद्धदारुद्वयं गौल्यं पिच्छिलं कफवातनुत् ।
बल्यं कासामदोषघ्नं द्वितीयं स्वल्पवीर्य्यदम् ॥"
वृद्धनाभिः, त्रि, (वृद्धः प्रवृद्धो नाभिर्यस्य ।) उन्नतनाभिः । गोँड़नाभियुक्तव्यक्ति इति भाषा । तत्पर्य्यायः । तुन्दिलः २ तुन्दिभः ३ । इत्यमरः ॥
वृद्धप्रपितामहः, पुं, (प्रपितामहाद्वृद्धः ।) प्रपितामहतातः । इति शब्दरत्नावली । तत्र कन्यायाः सपिण्डता नास्ति । यथा । तेनात्मपञ्चमे वृद्धप्रपितामहे सापिण्ड्यं निवर्त्तते इति प्रतिपादितम् । अतएव प्रपितामहभ्रात्रा तत्सन्ततिभिः सह सापिण्ड्याभावात् कन्याजननमरणयोस्तेषां सपिण्डाशौचं नास्ति किन्तु समानोदकनिमित्तमेवाशौचमिति । इति शुद्धितत्त्वम् ॥
वृद्धबला, स्त्री, (वृद्धा बला ।) महासमङ्गा । इति राजनिर्घण्टः ॥
वृद्धराजः, पुं, अम्लवेतसः । यथा,—
"अत्यम्लो वृद्धराजश्च द्वावेतौ तत्र कीर्त्तितौ ॥"
इति केचित् ॥
वृद्धवाहनः, पुं, आम्रवृक्षः । यथा । सुपक्वो वृद्धवाहनः । इति केचित् ॥
वृद्धविभीतकः, पुं, (वृद्धः प्रवृद्धो विभीतक इव ।) आम्रातकः । इति शब्दमाला ॥
वृद्धश्रवाः, [स्] पुं, (वृद्धात् वृहस्पतेः शृणोतीति । श्रु + असुन् । "वृद्धेभ्यः शृणोतीति वृद्धश्रवाः ।" इत्युज्ज्वलदत्तः । ४ । २२६ । "वृद्धं प्रभूतं श्रवः श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य ।" इति ऋग्भाष्ये सायणः । १ । ८९ । ६ । "वृद्धं श्रवो धनं कीर्त्तिर्वा यस्य ।" इति वेददीपे महीधरः । १० । ९ ।) इन्द्रः । इत्यमरः ॥
वृद्धसंघः, पुं, वृद्धानां समूहः । तत्पर्य्यायः । वार्द्धकम् । इत्यमरः । २ । ६ । ४० ॥
वृद्धसूत्रकं, क्ली, (वृद्धस्य सूत्रम् । ततः स्वार्थे कन् ।) इन्द्रतूलम् । बुड़ीर सुता इति भाषा । यथा, हारावल्याम् ।
"वृद्धसूत्रकमित्याहुरिन्द्रतूलं मनीषिणः ।
ग्रीष्महासं वंशकफं वाततूलं मरुद्ध्वजम् ॥"
वृद्धा, स्त्री, (वृद्ध + टाप् ।) गतयौवना । बुड़ी इति भाषा । तत्पर्य्यायः । पलिक्नी २ । इत्यमरः ॥ पलिता ३ । इति भरतः ॥ स्थविरा ४ निष्कला ५ जरती ६ गतार्त्तवा ७ । इति राजनिर्घण्टः ॥ तदवस्थाकालो यथा,—
"आषोड़शाद्भवेद्बाला तरुणी त्रिंशता मता ।
पञ्चपञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम् ॥"
इति कालिदासः ॥ * ॥
अपि च ।
"बालेति गीयते नारी यावद्वर्षाणि षोड़श ।
ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि ॥
तदूर्द्ध्वमधिरूढ़ा स्यात् पञ्चाशद्वत्सरावधि ।
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्ज्जिता ॥"
इति भावप्रकाशः ॥ * ॥
तस्याः सम्भोगे दोषो यथा,—
"बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥
नार्वाक् षोड़शाद्वर्षात् सप्तत्याः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
पञ्चपञ्चाशतो नारी सप्तसप्ततितः पुमान् ।
द्वावेतौ न प्रसूयेते प्रसूयेते विपर्य्ययात् ॥"
इति राजवल्लभः ॥ * ॥
"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् ॥"
इति चाणक्यम् ॥ * ॥
अङ्गुष्ठः । इति शब्दरत्नावली ॥ महाश्रावणिका । इति राजनिर्घण्टः ॥
वृद्धाङ्गुलिः, स्त्री, (वृद्धा अङ्गुलिः ।) हस्तपादयोः स्थूलाङ्गुलिः । बुड़ आङ्गुल इति भाषा । तत्पर्य्यायः । अङ्गुष्ठः २ वृद्धा ३ । इति शब्दरत्नावली ॥
वृद्धिः, स्त्री, (वृध + क्तिन् ।) अष्टवर्गान्तर्गतौषधविशेषः । तत्पर्य्यायः । योग्या २ ऋद्धिः ३ सिद्धिः ४ लक्ष्मीः ५ । इत्यमरः ॥ युवदा ६ वृद्धिदात्री ७ मङ्गल्या ८ श्रीः ९ सम्पत् १० आशीः ११ जनेष्टा १२ भूतिः १३ सुत् १४ सुखम् १५ जीवभद्रा १६ । अस्या गुणाः ।
"ऋद्धिर्वृद्धिश्च मधुरा सुस्निग्धा तिक्तशीतला ।
रुचिमेधाकरी श्लेष्मकुष्ठक्रिमिहरा परा ॥
प्रयोगेऽनयोरेकं यथालाभं प्रयोजयेत् ।
तत्र यद्यनुमितिः स्याद्द्वयमप्यत्र योजयेत् ॥"
इति राजनिर्घण्टः ॥ * ॥
ऋद्धिवृद्ध्योरुत्पत्तिलक्षणनामगुणाः ।
"ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोषयामले ।
श्वेतलोमान्वितः कन्दो लताजातः सरन्ध्रकः ॥
स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्ब्रुवे ।
तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा ॥
वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः ।
ऋद्धिर्योग्या सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ॥
ऋद्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः ।
प्राणैश्वर्य्यकरी मूर्च्छारक्तपित्तविनाशिनी ॥
वृद्धिर्गर्भप्रदा शीता वृंहणी मधुरा स्मृता ।
वृष्या पित्तास्रशमनी क्षतकासक्षयापहा ॥
राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्लभः ।
तस्मादस्य प्रतिनिधिं गृह्णीयात्तद्गुणं भिषक् ॥"
शुखसहशः प्रतिनिधिः ॥ * ॥ एतस्य प्रतिनिधिमाह ।
"मेदा जीवककाकोली ऋद्धिद्वन्द्वेऽपि चासति ।
वरीविदार्य्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत् ॥"
मेदा महामेदास्थाने शतावरीमूलं जीवकर्षभकस्थाने विदारीमूलं काकोलीक्षीरकाकोलीस्थानेऽश्वगन्धामूलं ऋद्धिवृद्धिस्थाने वाराहीकन्दं गुणैस्तत्तुल्यं क्षिपेत् । इति भावप्रकाशः ॥ * ॥
नीतिवेदिनां क्षयादित्रिवर्गान्तर्गतवर्गविशेषः । इत्यमरः ॥ नीतिवेदिनां नीतिशास्त्रज्ञानां क्षयादिभिस्त्रिवर्गः । अन्येषान्तु धर्म्मकामार्थैः पूर्व्वमुक्तः । अष्टवर्गस्यापचयः क्षयः । तस्यैवोपचयो वृद्धिः । तस्य नोपचयो नाप्यपचयः स्थानम् । अष्टवर्गो यथा,—
कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ।
कन्याकरबलादानं सैन्यानाञ्च निवेशनम् ॥
अष्टवर्गः स्मृतो राज्ञामिति भरतः ॥ * ॥
वर्द्धनम् । तत्पर्य्यायः । स्फातिः २ । इत्यमरः ॥
(यथा, मनुः । १२ । १२४ ।
"एष सर्व्वाणि भूतानि पञ्चभिर्व्याप्य मूर्त्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥")
विष्कम्भादिसप्तविंशतियोगान्तर्गतैकादशयोगः । तत्र जातफलं यथा,—
"प्रसूतिकाले यदि वृद्धियोगो
नरः सुभोगी विनयान्वितश्च ।
धनप्रयोगग्रहणेषु दक्षो
विचक्षणः स्यात् क्रयविक्रयाभ्याम् ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
कलान्तरम् । सुद इति भाषा । अभ्युदयः । समृद्धिः । इति मेदिनी ॥ (यथा, शिशुपालवधे । १५ । १ ।
"अथ तत्र पाण्डुतनयेन
सदसि विहितं मधुद्विषः ।
मानमसहत न चेदिपतिः
परवृद्धिमत्सरि मनो हि मानिनाम् ॥")
वृद्धिग्रहणनियमो यथा,—
"अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके ।
वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा ॥"
मासि मासि प्रतिमासं बन्धकं विश्वासार्थं यदाधीयते आधिरिति यावत् । बन्धकेन सह वर्त्तत इति सबन्धकः प्रयोगस्तस्मिन् सबन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिर्धर्म्या भवति । अन्यथा बन्धकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वित्रिचतुःपञ्चकं शतं धर्म्म्यं भवति । ब्राह्मणेऽधमर्णे द्विकं शतम् । क्षत्त्रिये त्रिकम् । वैश्ये चतुष्कम् । शूद्रे पञ्चकम् । मासि मासीत्येव । द्वौ वा त्रयो वा चत्वारो वा पञ्च वा इति द्वित्रिचतुःपञ्चाः । द्वित्रिचतुःपञ्चा अस्मिन् शते वृद्धिर्दीयत इति द्वित्रिचतुःपञ्चकं शतम् । तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते इति कन् । इयं वृद्धिर्मासि मासि गृह्यत इति कालिका । एवमेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्यमाणा कायिका भवति । तथा च नारदेन ।
"कायिका कालिका चैव कारिता च तथा परा ।
चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्व्विधा ॥"
इत्युक्तम् ॥
"कायाविरोधिनी शश्वत् पणपादादि कायिका ।
प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मता ॥
वृद्धिः सा कारिता नाम ऋणिकेन स्वयं कृता ।
वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति ॥"

गृहीतनिशेषणेन वृद्धेः प्रकारान्तरमाह।
कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्।
कान्तारमरण्यं तत्र गच्छन्तीति कान्तारगाः
ये वृद्ध्या धनं गृहीत्वा अधिकलाभार्थं अति-
गहनं प्राणधनविनाशशङ्कास्थानं प्रविशन्ति ते
दशकं शतं दद्युः। ये च समुद्रगास्ते विंशकं
शतं मासि मासीत्येवं। एतदुक्तं भवति
कान्तारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विंशकं
शतं उत्तमर्णं आददीत। मूलविनाशस्यापि
शङ्कितत्वात् इति ॥ * ॥ इदानीं कारितां वृद्धि-
माह।
"दद्युर्वा स्वकृतां वृद्धिं सर्व्वे सर्व्वासु जातिषु ॥"
सर्व्वे ब्राह्मणादयोऽधमर्णा अबन्धके सबन्धके वा
स्वकृतां स्वाभ्युपगतां वृद्धिं सर्व्वासु जातिषु
दद्युः। क्वचिदकृतापि वृद्धिर्भवति यथाह
नारदः।
"न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता
क्वचित्।
अनाकारितमप्यूर्द्धं वत्सरार्द्धाद्विवर्द्धते।" इति।
यस्तु याचितकं गृहीत्वा देशान्तरं गतस्तं प्रति
कात्यायनेनोक्तम्।
"यो याचितकमादाय तमदत्त्वा दिशं व्रजेत्।
ऊर्द्धं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्॥"
इति॥
यश्च याचितकमादाय याचितोऽप्यदत्त्वा देशा-
न्तरं याति तं प्रति तेनैवोक्तम्।
"कृतोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत्।
ऊर्द्धं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात्॥"
इति॥
यः पुनः स्वदेशे स्थित एव याचितो याचितकं
न ददाति तं याचनकालादारभ्य वृद्धिं दापये-
द्राजा। यथाह।
"स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्।
तं ततो कारितां वृद्धिमनिच्छन्तञ्च दापयेत्॥"
इति॥
अनाकारितवृद्धेरपवादो नारदेनोक्तः।
"पण्यमूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः।
वृथादानाक्षिकपणा वर्द्धन्ते नाविवक्षिताः॥
अविवक्षिता अनाकारिता इति ॥ * ॥ अधुना
द्रव्यविशेषे वृद्धिविशेषमाह। सन्ततिस्तु पशु-
स्त्रीणाम्। पशूनां स्त्रीणां सन्ततिरेव वृद्धिः।
पशूनां स्त्रीणां पोषणासमर्थस्य तत्पुष्टिसन्तति-
कामस्य प्रयोगः सम्भवति। ग्रहणञ्च चौर-
परिचर्य्यार्थिनः। अधुना प्रयुक्तस्य द्रव्यस्य
वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य कस्य
द्रव्यस्य कियती परा वृद्धिरित्यपेक्षित आह।
रसस्याष्टगुणा परा।
"वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा॥"
रसस्य तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिर-
कालावस्थितस्य स्वकृतया वृद्ध्या वर्द्धमान-
स्याष्टगुणा वृद्धिः परा नातःपरं वर्द्धते। तथा
वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणा
त्रिगुणा द्विगुणा च वृद्धिः परा। वशिष्ठेन तु
रसस्य त्रैगुण्यमुक्तम्। द्विगुणं हिरण्यं त्रिगुणं
धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूल-
फलानि च। तुला धृतं त्वितयमष्टगुणमिति।
मनुना तु धान्यस्य पुष्पमूलफलादीनाञ्च पञ्च-
गुणत्वमुक्तम्। "धान्ये शदे लवे वाह्ये नातिक्रा-
मति पञ्चतामिति।" शदः क्षेत्रफलं पुष्पमूल-
फलादि। लवो मेषोर्णाचमरीकेशादि। वाह्यो
बलीवर्द्दतुरगादि। धान्यशदलववाह्यविषया वृद्धिः
पञ्चगुणत्वं नातिक्रामतीति। तत्राधमर्णयोग्य-
तावशेन दुर्भिक्षादिकालवशेन च व्यवस्था
द्रष्टव्या। एतच्च सकृत्प्रयोगे सकृदाहरणे च
वेदितव्यम्। पुरुषान्तरसंक्रमणेन प्रयोगान्तर-
करणे तस्मिन्नेव वा पुरुषे अनेकशः प्रयोगा-
न्तरकरणे सुवर्णादिकं द्वैगुण्याद्यतिक्रम्य पूर्व्व-
वद्वर्द्धते। सकृत्प्रयोगेऽपि प्रतिदिनं प्रति-
मासं प्रतिवत्सरं वा वृद्ध्याहरणेऽधमर्णदेयस्य
द्वैगुण्यसम्भवात्। पूर्व्वाहृतवृद्ध्या सह द्वैगुण्य-
मतिक्रम्य वर्द्धत एव। यथाह मनुः। कुसीद-
वृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता। सकृदाहि-
तेत्यपि पाठोऽस्ति। उपचयार्थं प्रयुक्तं द्रव्यं
कुसीदं तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यं नात्येति
नातिक्रामति। यदि सकृदाहिता सकृत्प्रयुक्ता
पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे
द्वैगुण्यमत्येति सकृदाहृतेति पाठे शनैः शनैः
प्रतिदिनं प्रतिमासं प्रतिवत्सरं वाधमर्णादा-
हृता द्वैगुण्यं नात्येतीति व्याख्येयम्। तथा
गौतमेनाप्युक्तम्। चिरस्थाने द्वैगुण्यं प्रयोग-
स्येति प्रयोगस्येत्येकवचननिर्द्देशात् प्रयोगान्तर-
करणे द्वैगुण्यातिक्रमोऽभिप्रेतः। चिरस्थान
इति निर्द्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्याति-
क्रमो दर्शितः। इति मिताक्षरा। कुरण्ड-
रोगः। हर्षः। इति हेमचन्द्रः। समूहः।
इति शब्दचन्द्रिका। शेवेयम्। धनम्। इति
राजनिर्घण्टः। * ।

वृद्धिका, स्त्री, (वृद्धिरेव : स्वार्थे कन्।) ऋद्धिना-
मौषधम्। इति शब्दमाला॥

वृद्धिजीविका, स्त्री, (वृद्ध्या जीविका।) कुसीदान-
जीविका। तत्पर्य्यायः। अर्थप्रयोगः २ कुसी-
दम् ३। इत्यमरः॥ कलान्तिका ४। इति
शब्दरत्नावली॥

वृद्धिदः, पुं, (वृद्धिं ददातीति। दा + कः।) जीवकः।
शूकरकन्दः। इति राजनिर्घण्टः॥ वृद्धिदातरि,
त्रि॥ (यथा, वृहत्संहितायाम्। ५३। ९७।
"प्राक्शालया वियुक्तं सुचैत्रं वृद्धिदं वास्तु॥")

वृद्धिश्राद्धं, क्ली, (वृद्धये यत् श्राद्धम्।) वृद्धिनिमि-
त्तकश्राद्धम्। तत्तु अभ्युदयनिमित्तं पित्राद्युद्देशेन
श्रद्धया अन्नादेर्द्दानम्। तत् कर्म्मविशेषात् पूर्व्वं
कर्त्तव्यं यथा। निर्णयामृते मत्स्यपुराणम्।
"अन्नप्राशे च सीमन्ते पुत्त्रोत्पत्तिनिमित्तके।
पुंसवने निषेके च नववेश्मप्रवेशने॥
देववृक्षजलादीनां प्रतिष्ठायां विशेषतः।
तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम्॥"
हलायुधधृतकूर्म्मपुराणम्।
"तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमेऽपि च।
वृद्धिश्राद्धं प्रकुर्व्वीत बहुसर्पिःसमन्वितम्॥"
इति श्राद्धतत्त्वम्॥
आभ्युदयिकश्राद्धम्। नान्दीमुखश्राद्धम्।
यथा,—
"वृद्धिश्राद्धं प्रवक्ष्यामि पूर्व्वचत्तद्विशेषकम्॥
जातपुत्त्रमुखदर्शनादौ वृद्धिश्राद्धम्। पूर्व्वाभि-
मुखेषु दक्षिणोपवीतिषु मधुयववदरकुशै-
र्द्दैवतीर्थेन नमस्कारान्तेन दक्षिणोपचारेण
कर्त्तव्यम्। दक्षिणजानु गृहीत्वा ॐ अद्या-
स्मदीयामुकवृद्धौ अमुकसगोत्राणामस्मत्पितृ-
पितामहप्रपितामह-मातामहप्रमातामहवृद्ध-
प्रमातामहानां अमुकशर्म्मणां सपत्नीकानां
नान्दीमुखानां श्राद्धे कर्त्तव्ये वसुसत्यसंज्ञकानां
विश्वेषां देवानां श्राद्धं सिद्धान्नेन युष्मासु मया
कर्त्तव्यमिति देवब्राह्मणामन्त्रणम्। ॐ करिष्य-
सीति तेनोक्ते इत्थमेव मातृपितामहीप्रपिता-
महीनां देवब्राह्मणामन्त्रणम्। तत ॐ अद्य
अमुकसगोत्राया मत्प्रपितामह्या अमुकीदेव्या
नान्दीमुख्याः श्राद्धं सिद्धान्नेन युष्मासु मया
कर्त्तव्यमिति प्रपितामहीब्राह्मणामन्त्रणम्।
करिष्यसीति तेनोक्ते इत्थमेव मातामह्यादि-
ब्राह्मणामन्त्रणम्। देवपितृसर्व्वदेवब्राह्मणश्राद्ध-
करणानुज्ञापनम्। आसने ॐ विश्वेदेवास
आगत शृणुताम इमं हवं एदं बर्हिर्निषीदत।
ॐ विश्वेदेवाः शृणुतेमं हवं ये मेऽन्तरीक्षे य
उपद्यविष्ठ ये अग्निजिह्वा उत वा यजत्रा आ
सद्यास्मिन् बर्हिषि मादयध्वम्। ॐ आगच्छन्तु
इति विश्वेदेवावाहनं गन्धादिदानं अच्छि-
द्रावधारणवाचनम्। ततः प्रपितामहीप्रभृती-
नामनुज्ञापनम्। आसनम् आवाहनं गन्धादि-
दानञ्च। अच्छिद्रावधारणवाचनम्। इत्थं
पितामह्या मातुः। ततः प्रपितामहादीनामनु-
ज्ञापनमासनमावाहनं गन्धादिदानम्। एवं
वृद्धप्रमितामहादीनां अनुज्ञापनादिकरणम्।
ॐ वसुसत्यसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतदन्नं
सघृतं सपानीयं सव्यञ्जनं सवदरं सदधि प्रति-
सिद्धवर्ज्जितं नमः। इति अन्नकल्पनम्॥
ॐ अमुकगोत्रे मत्पितामहि अमुकि देवि
नान्दीमुखि एतदन्नं सवदरं सदधि नमः। एवं
मातामहप्रमातामहेभ्यः।" इति गारुडे २२१
अध्यायः॥ अन्यच्च।
"तृतीयमाभ्युदयिकं वृद्धिश्राद्धं तदुच्यते।
उत्सवानन्दसम्भारे यज्ञोद्वाहादिमङ्गले॥
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम्।
ततो मातामहा राजन् विश्वेदेवास्तथैव च॥
प्रदक्षिणोपचारेण दध्यक्षतफलोदकैः।
प्राङ्मुखो निनयेत् पिण्डान् पूर्व्वया चतुरो
युतान्।
सम्पन्नमित्यभ्युदये दद्यादर्घ्यं द्वयोर्द्वयोः।

युग्मा द्विजातयः पूज्याः वस्त्रकार्त्तस्वरादिना ।
तिलार्थन्तु यवैः कार्य्या नान्दीशब्दानुपूर्ब्बकम् ।
मङ्गलानि च सर्व्वाणि वाचयेत् द्विजपुङ्गवान् ॥
एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धञ्च सर्व्वदा ।
नमस्कारेण मन्त्रेण कुर्य्यादामान्नवान् बुधः ॥
दानप्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः ।
दानेन सर्व्वकामाप्तिरस्य संजायते यतः ॥"
इति मात्स्ये साधारणाभ्युदयकीर्त्तनो नाम १७ अध्यायः । विस्तारस्तु श्राद्धतत्त्वे श्राद्धविवेके च द्रष्टव्यः ॥

वृद्धोक्षः, पुं, (वृद्धश्चासौ उक्षा चेति । "अचतुरेत्यादि ।" ५ । ४ । ७७ । इत्यादिना अच् प्रत्ययः ।) वृद्धवृषः । तत्पर्य्यायः । जरद्गवः २ । इत्यमरः ॥ (यथा, कुमारसम्भवे । ५ । ७० ।
"विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥")

वृद्ध्याजीवः, त्रि, (वृद्ध्या आजीवतीति । आ+जीव+अच् ।) वृद्ध्युपजीवी । तत्पर्य्यायः । वार्द्धुषिः २ वार्द्धुषिकः ३ कुसीदः ४ कुसीदिकः ५ । इति शब्दरत्नावली ॥ साधुः ६ । इति जटाधरः ॥

वृध, उ ङ व ऌ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । क्त्वावेट् ।) उ, वर्द्धित्वा वृद्ध्वा । ङ, वर्द्धते जनः । व, वर्त्स्यति विवृत्सति । ऌ, अवृधत् । इति दुर्गादासः ॥

वृध, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, वर्द्धयति । इति दुर्गादासः ॥

वृधसानः, पुं, (वृध+"ऋञ्जिवृधीति ।" उणा० २ । ८७ । इत्यनेन असानच् । स च कित् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (वर्द्धनशीले, त्रि । यथा, ऋग्वेदे । २ । २ । ५ ।
"हरिश्रिप्रो वृधसानासु जर्भुरत् ॥"
"वृधसानासु प्रवर्द्धमानासु ।" इति तद्भाष्ये सायणः । यथा च तत्रैव । ४ । ३ । ६ ।
"कद्धिष्ण्यासु वृधसानो
अग्ने कद्वाताय प्रतवसे शुभं ये ॥"
"वृधसानः घृताद्याहुतिभिर्वर्द्धमानस्त्वम् ।" इति तद्भाष्ये सायणः ॥)

वृधसानुः, पुं, (वृध+बाहुलकात् असानुच् । स च कित् ।) पुरुषः । पत्रम् । कृतिः । इत्युणादिकोषः ॥

वृध्यं, त्रि, (वृध+"ऋदुपधाच्चाक्लृपिचृतेः ।" ३ । १ । ११० । इति क्यप् ।) वर्द्धनीयम् । वृधधातोः क्यप्प्रत्ययेन निष्पन्नमिदम् ॥

वृन्तं, क्ली, फलपुष्पपत्रादिर्येन धार्य्यते तत् । बोटा इति भाषा । तत्पर्य्यायः । प्रसवबन्धनम् २ । इत्यमरः ॥ (यथा, रघुवंशे । ५ । ६९ ।
"वृन्तश्लथं हरति पुष्पमनोकहानाम् ॥")
घटीधारा । कुचाग्रम् । इति मेदिनी ॥

वृन्ताकः, पुं, वार्त्ताकी । इति शब्दरत्नावली ॥

वृन्ताकी, स्त्री, वार्त्ताकी । इति राजनिर्घण्टः ॥

वृन्तिता, स्त्री, कटुका । इति शब्दचन्द्रिका ॥

वृन्दं, क्ली, (वृञ्+"वृन्दादयश्चेति ।" उणा० ४ । ९८ । इति दन् नुम् गुणाभावश्च निपात्यते ।) समूहः । इत्यमरः ॥ (यथा, भागवते । ३ । २८ । ३० ।
"भृत्या स्वया कुटिलकुन्तलवृन्दजुष्टम् ॥")

वृन्दः, पुं, दशार्व्वुदः । शतकोटिरिति यावत् । इति ज्योतिषम् ॥ अस्य नामान्तरं महार्व्वुदः ॥

वृन्दा, स्त्री, तुलसी । इति शब्दरत्नावली ॥ जलन्धरपत्नी । अस्या विवरणं तुलसीशब्दे द्रष्टव्यम् ॥ केदारराजकन्या । राधाषोडशनामान्तर्गतनामविशेषः । एतद्विवरणं वृन्दावनशब्दे द्रष्टव्यम् ॥

वृन्दारः, त्रि, मनोज्ञम् । इति शब्दमाला ॥

वृन्दारकः, पुं, (वृन्दमस्यास्तीति । वृन्द+"शृङ्गवृन्दाभ्यामारकन् वक्तव्यः ।" ५ । २ । १२२ । इत्यस्य वार्त्तिकोक्त्या आरकन् ।) देवता । इत्यमरः ॥ (यथा, भागवते । ६ । १० । ३० ।
"अपि वृन्दारका यूयं न जानीथ शरीरिणाम् ॥")
यूथपाता । यथा,—
"वृन्दारकः सुरे श्रेष्ठे मनोज्ञे यूथपातरि ॥"
इति भरतधृतवाडिः ॥

वृन्दारकः, त्रि, (वृन्दार+स्वार्थे कन् ।) मनोज्ञः । (यथा, महाभारते । ११ । १९ । ५ ।
"युवा वृन्दारकः शूरो विकर्णः पुरुषर्षभः ॥")
श्रेष्ठः । इति मेदिनी ॥ तन्मते पवर्गीयादिः । वृन्दारकौ रूपिमुख्यौ । इत्यमरः ॥

वृन्दावनं, क्ली, स्वनामख्याततीर्थम् । तन्नामकारणं यथा,—

श्रीनारायण उवाच ।

"पुरा केदारनृपतिः सप्तद्वीपपतिः स्वयम् ।
आसीत् सत्ययुगे ब्रह्मन् सत्यधर्म्मरतः सदा ॥
स रेमे सह नारीभिः पुत्त्रपौत्त्रगणैः सह ।
पुत्त्रानिव प्रजाः सर्व्वाः पालयामास धार्म्मिकः ॥
कृत्वा शतक्रतुं राजा लेभे त्विन्द्रत्वमीप्सितम् ।
कृत्वा नानाविधं पुण्यं फलकाङ्क्षी न च स्वयम् ॥
नित्यं नैमित्तिकं सर्व्वं श्रीकृष्णप्रीतिपूर्व्वकम् ।
केदारतुल्यो राजेन्द्रो न भूतो भविता पुनः ॥
पुत्त्रेषु राज्यं संन्यस्य प्रिया त्रैलोक्यमोहिनी ।
जैगीषव्योपदेशेन जगाम तपसे वनम् ॥
हरेरैकान्तिको भक्तो ध्यायते सन्ततं हरिम् ।
शश्वत् सुदर्शनं चक्रमस्ति यत्सन्निधौ मुने ॥
चिरं तप्त्वा नृपश्रेष्ठो गोलोकञ्च जगाम सः ।
केदारनामतीर्थं तत्तन्नाम्ना च बभूव ह ॥
तत्राद्यापि मृतः प्राणी सद्यो मुक्तो भवेत् ध्रुवम् ।
कमलांशा तस्य कन्या नाम्ना वृन्दा तपस्विनी ॥
न वव्रे सा वरं कञ्चित् योगशास्त्रविशारदा ।
दत्तं दुर्व्वाससा तस्यै हरेर्मन्त्रं सुदुर्ल्लभम् ॥
सा विरक्ता गृहं त्यक्त्वा जगाम तपसे वनम् ।
षष्टिं वर्षसहस्राणि तपस्तेपे सुनिर्ज्जने ॥
आविर्ब्बभूव श्रीकृष्णस्तत्पुरो भक्तवत्सलः ।
प्रसन्नवदनः श्रीमान् वरं वृणित्युवाच सः ॥
दृष्ट्वा सा राधिकाकान्तं शान्तं सुन्दरविग्रहम् ।
मूर्च्छां संप्राप सा सद्यः कामवाणप्रपीड़िता ॥
सा च शीघ्रं वरं वव्रे पतिस्त्वं मे भवेति च ।
ओमित्युक्त्वा च रहसि चिरं रेमे तया सह ॥
सा जगाम च गोलोकं कृष्णेन सह कौतुकात् ।
राधासमा सा सौभाग्यात् गोपीश्रेष्ठा बभूव सा ॥
वृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम् ।
वृन्दा यत्र कृता क्रीड़ा तेन वा मुनिपुङ्गव ॥ * ॥
अथान्यच्चेतिहासञ्च शृणुष्व वत्स पुण्यदम् ।
येन वृन्दावनं नाम निबोध कथयामि ते ॥
कुशध्वजस्य कन्ये द्वे धर्म्मशास्त्रविशारदे ।
तुलसीवेदवत्यौ च विरक्ते भवकर्म्मणि ॥
तपस्तप्त्वा वेदवती प्राप नारायणं परम् ।
सीता जनककन्या या सर्व्वत्र परिकीर्त्तिता ॥
तुलसी च तपस्तप्त्वा वाञ्छां कृत्वा हरिं पतिम् ।
दैवाद्दुर्व्वाससः शापात् प्राप्य शङ्खासुरं पतिम् ॥
पश्चात् संप्राप कमलाकान्तं कान्तं मनोहरम् ।
तस्याश्च तपसः स्थानं उदितञ्च तपोधन ।
तेन वृन्दावनं नाम प्रवदन्ति मनीषिणः ॥ * ॥
अथवा ते प्रवक्ष्यामि परं चेत्यन्तरं शृणु ।
येन वृन्दावनं नाम पुण्यक्षेत्रञ्च भारते ॥
राधाषोड़शनाम्नाञ्च वृन्दा नाम श्रुतौ श्रुतम् ।
तस्याः क्रीड़ावनं रम्यं तेन वृन्दावनं स्मृतम् ॥
गोलोके प्रीतये तस्याः कृष्णेन निर्म्मितं पुरा ।
क्रीड़ार्थं भुवि तन्नाम्ना वनं वृन्दावन स्मृतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे वृन्दावनप्रस्तावः १७ अध्यायः ॥ * ॥
अथ वृन्दावनवर्णनम् ।

ईश्वर उवाच ।

"गुह्याद्गुह्यतरं हृद्यं परमानन्दकारणम् ।
अत्यद्भुतं रहस्यानां रहस्यं परमं परम् ॥
दुर्ल्लभानाञ्च परमं दुर्ल्लभं मोहनं परम् ।
सर्व्वशक्तिमयं देवि सर्व्वस्थानेषु गोपितम् ॥
सात्वतां स्थानमूर्द्धन्यं विष्णोरत्यन्तवल्लभम् ।
नित्यं वृन्दावनं नाम ब्रह्माण्डोपरि संस्थितम् ॥
पूर्णब्रह्मसुखैश्वर्य्यं नित्यमानन्दमव्ययम् ।
वैकुण्ठादि तदंशांशं स्वयं वृन्दावनं भुवि ॥
गोलोकैश्वर्य्यं यत्किञ्चित् गोकुले तत्प्रकीर्त्तितम् ।
वैकुण्ठादिवैभवं यत् द्वारकायां प्रकाशयेत् ॥
यद्ब्रह्मपरमैश्वर्य्यं नित्यं वृन्दावनाश्रयम् ।
तस्मात् त्रैलोक्यमध्ये तु पृथ्वी धन्येति विश्रुता ॥
यत् स्यान्माथुरकं धाम विष्णोरेकान्तवल्लभम् ।
स्वस्थानमधिकं नामधेयं माथुरमण्डलम् ॥
निगूढं परमं स्थानं पुर्य्यभ्यन्तरसंस्थितम् ।
सहस्रपत्रकमलाकारं माथुरमण्डलम् ॥
विष्णुचक्रपरिभ्रामद्धाम वैष्णवमद्भुतम् ।
कर्णिकापत्रविस्तारं रहस्यक्रममीरितम् ॥
प्रधानं द्वादशारण्यं माहात्म्यं कथितं क्रमात् ।
भद्रश्रीलोहभाण्डीरमहातालखदीरकाः ॥
बहुलं कुमुदं काम्यं मधु वृन्दावनं तथा ।
द्वादशैता वने संख्याः कालिन्द्याः सप्त पश्चिमे ॥

पूर्व्वे पञ्चवनं प्रोक्तं तत्रास्ति गुह्यमुत्तमम् ।
महावनं गोकुलाख्यं रम्यं मधुवनं तथा ॥
पूर्व्वे तु पञ्च भद्राद्यास्तालाद्याः सप्त पश्चिमे ।
अन्यच्चोपवनं प्रोक्तं कृष्णक्रीड़ारसस्थलम् ॥
कदम्बखण्डिकं नन्दवनं नन्दीश्वरं तथा ।
नन्दनानन्दखण्डञ्च पालाशाशोककेतकम् ॥
सुगन्धिमानसं कैलममृतं भोजनस्थलम् ।
सुखप्रसाधनं वत्सहरणं शेषशायनम् ॥
श्यामपूर्व्व दधिग्रामं चक्रभानुपुरं तथा ।
शङ्कितं विपदञ्चैव बालक्रीड़ञ्च धूसरम् ॥
कैसुद्रुमं खरो वीरसनुसुकञ्चापि नन्दनम् ।
इत्यमेव वने संख्यास्त्रिंशच्चोपवनं स्मृतम् ॥
पूर्व्वोक्तं द्वादशारण्यं प्रधानं वनमुत्तमम् ।
तत्रोत्तरे चतुर्थञ्च वनञ्च समुदाहृतम् ॥
नानाविधरसक्रीड़ानानालीलामयस्थलम् ।
दलविस्पष्टविस्ताररहस्यक्रममीरितम् ॥
सहस्रपत्रकमलं गोकुलाख्यं महत् पदम् ।
कर्णिका तन्महद्धाम गोविन्दस्थानमुत्तमम् ॥
तत्रोपरि स्वर्णपीठे मणिमण्डपमण्डितम् ।
तत्र तत्र क्रमाद्दिक्षु विदिक्षु दलमीरितम् ॥
यद्दलं दक्षिणे प्रोक्तं परं गुह्योत्तमोत्तमम् ।
तस्मिन् दले महापीठं निगमागमदुर्गमम् ॥
योगीन्द्रैरपि दुष्प्रापं सर्व्वात्मा यत्र गोकुलम् ।
द्वितीयं दलमाग्नेयं तद्रहस्यं द्विधा तथा ॥
निकुञ्जकुटीवीरकुटीरौ तद्दले स्थितौ ।
पूर्व्वदलं तृतीयं यत् प्रधानं स्थानमुच्यते ॥
गङ्गादिसर्व्वतीर्थानां स्पर्शाच्छतगुणं भवेत् ।
चतुर्थदलमैशान्यां सिद्धपीठेप्सितप्रदम् ॥
कामयन् नूनना गोपी तत्र कृष्णपतिं लभेत् ।
वस्त्रालङ्कारहरणं तद्दले समुदाहृतम् ॥
उत्तरे पञ्चमं प्रोक्तं दलं सर्व्वदलोत्तमम् ।
द्वादशादित्यमत्रैव दलञ्च कर्णिकासमम् ॥
वायव्यन्तु दलं षष्ठं तत्र कालीह्रदः स्मृतः ।
दलोत्तमोत्तमञ्चैव प्रधानस्थानमुच्यते ॥
सर्व्वोत्तमदलं श्रेष्ठं पश्चिमे सप्तमं दलम् ।
यज्ञपत्नीगणानाञ्च तदीप्सितवरप्रदम् ॥
अघासुरस्य निर्व्वाणं चक्रे त्रिदशदर्शितम् ।
ब्रह्ममोहनमत्रैव दलं ब्रह्मह्रदावहम् ॥
नैरृत्यान्तु दलं प्रोक्तमष्टमं व्योमघातनम् ।
शङ्खचूड़वधस्तत्र नानाकेलिरसस्थलम् ॥
स्मृतमष्टदलं प्रोक्तं वृन्दारण्यान्तरस्थितम् ।
श्रीमद्वृन्दावनं धन्यं यमुनायाः प्रदक्षिणम् ॥
शिवलिङ्गमधिष्ठाता रुद्रो गोपीश्वराभिधः ।
तदाद्ये षोड़शदलं श्रिया पूर्णं तदीरितम् ॥
सर्व्वासु दिक्षु यत् प्रोक्तं प्रादक्षिण्याद्यथाक्रमम् ।
महत् पदं महद्धाम प्रधानं षोड़शं दलम् ॥
प्रथमैकदलं श्रेष्ठं माहात्म्यं कर्णिकासमम् ।
तस्मिन् मधुवनं प्रोक्तं तत्र प्रादुरभूत् स्वयम् ॥
चतुर्भुजो महाविष्णुः सर्व्वकारणकारणम् ।
तत्राधिष्ठिततद्देवं मुनिश्रेष्ठ सनातनम् ॥
दलं द्वितीयमाख्यातं किञ्चिल्लीलारसस्थलम् ।
खदिरारण्यमत्रैव दलञ्च समुदाहृतम् ॥
सर्व्वश्रेष्ठदलं प्रोक्तं माहात्म्यं कर्णिकासमम् ।
तत्र गोवर्द्धने रम्ये नित्यानन्दरसाश्रये ॥
कर्णिकायां महालीला तल्लीला रसगह्वरे ।
यत्र कृष्णो नित्यवृन्दाकाननस्य पतिर्भवेत् ॥
कृष्णो गोविन्दतां प्राप्तः किमन्यैर्बहुभाषितैः ।
दलं तृतीयमाख्यातं सर्व्वश्रेष्ठोत्तमोत्तमम् ॥
चतुर्थदलमाख्यातं महाद्भुतरसस्थलम् ।
हरिर्यस्य पतिः साक्षान्नित्यं गोवर्द्धनः स्वयम् ॥
कदम्बखण्डी तत्रैव पूर्णानन्दरसाश्रयः ।
स्निग्धं हृद्यं प्रियं रम्यं दलञ्च समुदाहृतम् ॥
नन्दीश्वरदलं रम्यं तत्र नन्दालयः स्मृतः ।
कर्णिकादलमाहात्म्यं पञ्चमं दलमुच्यते ॥
अधिष्ठातात्र गोपालो धेनुपालस्ततः परम् ।
दलं षष्ठं यदाख्यातं तत्र नन्दवनं स्मृतम् ॥
सप्तमं बकुलारण्यं दलं रम्यं प्रकीर्त्तितम् ।
दलाष्टमं तालवनं तत्र धेनुवधः स्मृतः ॥
नवमं कुमुदारण्यं दलं रम्यं प्रकीर्त्तितम् ॥
काम्यारण्यं दलं हृद्यं दशमं सर्व्वकारणम् ।
ब्रह्मप्रसादनं तत्र विष्णुवृन्दं प्रदर्शितम् ॥
कृष्णक्रीड़ारसस्थानं प्रधानं दलमुच्यते ।
दलमेकादशं प्रोक्तं भक्तानुग्रहकारणम् ॥
निर्व्वाणं सेतुबन्धस्य नानारसमयस्थलम् ।
भाण्डीरं द्वादशदलं वनं रम्यं मनोहरम् ॥
कृष्णक्रीड़ारसस्तत्र श्रीदामादिभिरावृतः ।
त्रयोदशदलं श्रेष्ठं तत्र भद्रवनं स्मृतम् ॥
चतुर्दशदलं प्रोक्तं सर्व्वसिद्धिप्रदं स्थलम् ।
श्रीवनं तत्र रुचिरं सर्व्वैश्वर्य्यस्य कारणम् ॥
कृष्णलीलामयदलं श्रीकीर्त्तिकान्तिवर्द्धनम् ।
पञ्चदशदलं श्रेष्ठं तत्र लौहवनं स्मृतम् ॥
कथितं षोड़शदलं माहात्म्यं कर्णिकासमम् ।
महावनं तत्र गीतं तत्रास्ति गुह्यमुत्तमम् ॥
बालक्रीड़ारसस्तत्र वत्सपालैः समावृतः ।
पूतनादिवधस्तत्र यमलार्ज्जुनभञ्जनम् ॥
अधिष्ठाता तत्र बालगोपालः पञ्चमाब्दिकः ।
नाम्ना दामोदरः प्रोक्तः प्रेमानन्दरसार्णवः ॥
दलं प्रसिद्धमाख्यातं सर्व्वश्रेष्ठदलोत्तमम् ।
कृष्णक्रीड़ा च किञ्जल्की विहारदलमुच्यते ।
सिद्धप्रधानं किञ्जल्कं दलञ्च समुदाहृतम् ॥ * ॥

पार्व्वत्युवाच ।

वृन्दावनस्य माहात्म्यं रहस्यं परमाद्भुतम् ।
तदहं श्रोतुमिच्छामि कथयस्व महाप्रभो ॥

ईश्वर उवाच ।

कथितं ते प्रियतमे गुह्याद्गुह्यतमोत्तमम् ॥
रहस्यानां रहस्यं यत् दुर्लभानाञ्च दुर्लभम् ।
त्रैलोक्यगोपितं देवि ! देवेश्वरसुपूजितम् ॥
ब्रह्मादिवाञ्छितं स्थानं सुरसिद्धादिसेवितम् !
योगीन्द्रादिमुनीन्द्रादिसदातद्ध्यानतत्परम् ॥
अप्सरोभिश्च गन्धर्व्वैर्नृत्यगीतनिरन्तरम् ।
श्रीमद्वृन्दावनं रम्यं पूर्णानन्दरसाश्रयम् ॥
भूमिश्चिन्तामणिस्तोयममृतं रसपूरितम् ।
वृक्षाः सुरद्रुमास्तत्र सुरभिवृन्दसेविताः ॥
स्त्री लक्ष्मीः पुरुषो विष्णुस्तद्दशांशसमुद्भवः ।
तत्र कैशोरवयसं नित्यमानन्दविग्रहम् ॥
गतिर्नाट्यं कथागानं स्मितवक्त्रं निरन्तरम् ।
शुद्धसत्त्वैः प्रेमपूर्णैर्वैष्णवैस्तद्वनाश्रयम् ॥
पूर्णब्रह्मसुखे मग्नं स्फुरत्तन्मूर्त्तितन्मयम् ।
प्रमत्तकोटिभृङ्गाद्यैः कूजत्कलमनोहरम् ॥
कपोतशुकसंगीतमुन्मत्तालिसहस्रकम् ।
भुजङ्गशत्रुनृत्याढ्यं सकान्ताभोदविभ्रमम् ॥
नानावर्णैश्च कुसुमैस्तद्रेणुपरिपूरितम् ।
सुस्निग्धसौरभाश्रान्तसुगन्धीकृतजगत्त्रयम् ॥
मन्दमारुतसंसिक्तवसन्तऋतुसेवितम् ।
पूर्णेन्दुनित्याभ्युदयं सूर्य्यमन्दांशुसेवितम् ।
अदुःखसुखविच्छेदं जरामरणवर्ज्जितम् ।
अक्रोधगतमात्सर्य्यं अभिन्नमनहंकृतम् ॥
पूर्णानन्दामृतरसं पूर्णप्रेमसुखावहम् ।
गुणातीतं परं धाम पूर्णप्रेमस्वरूपकम् ॥
यत्र वृक्षादिपुलकैः प्रेमानन्दाश्रुवर्षितम् ।
किं पुनश्चेतनायुक्तैर्विष्णुभक्तैः किमुच्यते ॥
गोविन्दाङ्घ्रिरजःस्पर्शान्नित्यवृन्दावनं भुवि ।
सहस्रदलपद्मस्य वृन्दारण्यं वराटकम् ॥
यस्य स्पर्शनमात्रेण पृथ्वी धन्या जगत्त्रये ।
गुह्याद्गुह्यतमं रम्यं मेध्यं वृन्दावनस्थितम् ॥
अक्षरं नित्यमानन्दं गोविन्दस्थानमव्ययम् ।
गोविन्ददेहतोऽभिन्नं पूर्णब्रह्म सुखाश्रयम् ॥
मुक्तिस्तत्र यतः स्पर्शात्तन्माहात्म्यं किमुच्यते ।
तस्मात् सर्व्वात्मना देवि ! हृदिस्थं कुरु तद्वनम् ॥
वृन्दावनविहारेषु कृष्णं कैशोरविग्रहम् ।
अन्यारण्येषु स्थानेषु बाल्यपौगण्डयौवनम् ॥
कालिन्दीमकरन्दोऽस्य कर्णिकायाः प्रदक्षिणम् ।
नानानिर्म्माणगम्भीरं जलसौरभमोहनम् ।
आनन्दाद्भुतसम्भ्रमकरन्दघनालयम् ।
पद्मोत्पलाद्यैः कुसुमैर्नानावर्णैः समुज्ज्वलम् ॥
चक्रवाकादिविहगैर्म्मञ्जुनानाकलस्वनैः ।
शोभमानं जलं रम्यं तरङ्गातिमनोहरम् ॥
तस्योभयतटी रम्या शुद्धकाञ्चननिर्म्मिता ।
गङ्गाकोटीगुणः प्रोक्तो यत्र स्पर्शवराटकः ॥
कर्णिकायां कोटिगुणो यत्र क्रीड़ारतो हरिः ।
कालिन्दीकर्णिकाकृष्णमभिन्नमेकविग्रहम् ॥”

इति पाद्मे पातालखण्डे १ अध्यायः ॥

(इदमेव भगवत्याः पीठस्थानानामन्यतमम् ।
यथा, देवीभागवते । ७ । ३० । ६८ ।
“रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥”)

वृन्दावनेश्वरः, पुं, (वृन्दावनस्य ईश्वरः ।) श्रीकृष्णः ।
यथा,—
“यन्नखेन्दुरुचिर्ब्रह्म ध्येयं ब्रह्मादिभिः सुरैः ।
गुणत्रयमतीतं तं वन्दे वृन्दावनेश्वरम् ॥”
अपि च ।
“पुरुषः प्रकृतिश्चाद्यौ राधावृन्दावनेश्वरौ ।
प्रकृतिर्विकृतिः सर्व्वं विना वृन्दावनेश्वरम् ॥”

इति पाद्मे पातालखण्डे ६ अध्यायः ॥ * ॥

अन्यच्च ।
“यदा नित्यः स्वयं कृष्णः सच्चिदानन्दविग्रहः ।
षण्णां गुणानां शाली तु भगवच्छब्दसंज्ञितः ।

नित्यधामा गुणातीतः साक्षाद्वृन्दावनेश्वरः ।
असौ प्रकटलीलायां वासुदेवोऽभवत् प्रभुः ॥
गोपीनां कामपूर्णाय नित्यानां रमणाय च ।
गोपालानां विनोदाय स्वयं नन्दसुतोऽभवत् ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥

वृन्दावनेश्वरी, स्त्री (वृन्दावनस्येश्वरी ।) राधा । यथा,—
"राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
साक्षाल्लक्ष्मीस्तु विज्ञेया प्राकट्येनैव पार्व्वति ! ॥
वृषभानुसुता या तु नित्यानन्दस्वरूपिणी ।
गान्धर्व्विकान्तलीलायां श्रीः श्यामा कृष्णवल्लभा ।
वृन्दावनेश्वरी राधा साक्षात् कृष्णात्मिका परा ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥

वृन्दिष्ठः, त्रि, (अयमेषामतिशयेन वृन्दारकः श्रेष्ठः । वृन्दारक + इष्ठन् । "प्रियस्थिरेति ।" ६।४।१५७ । वृन्दादेशः ।) अयमनयोरेषां वा अतिशयेन वृन्दारको देवो मुख्यो वा । इति मुग्धबोधटीकायां दुर्गादासः ॥

वृन्दीयान्, [स्] त्रि, (अयमनयोरतिशयेन वृन्दारकः । वृन्दारक + ईयसुन् । प्रियस्थिरेति वृन्दादेशः ।) वृन्दिष्ठः । अयमनयोरेषां वा अतिशयेन वृन्दारकः इत्यर्थे ईयसुप्रत्ययेन निष्पन्नमिदम् । इति मुग्धबोधव्याकरणम् ॥

वृश, इर् य वृत्याम् । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) इर्, अवृशत् अवर्शीत् । अस्मात् पृषादित्वान्नित्यं ङ इत्यन्ये । य, वृश्यति वरं कन्या । इति दुर्गादासः ॥

वृशः, पुं, (वृ + "जनिदाच्युसृवृमदीति ।" उणा० ४ । १०४ । इति शक् ।) उन्दुरुः । इति शब्दरत्नावली ॥ वासकः । इत्यमरटीकायां भरतः ॥

वृशा, स्त्री, ओषधीविशेषः । इत्युणादिकोषः ॥

वृश्चिकः, पुं, (व्रश्च छेदने + "वृश्चिकृष्योः किकन् ।" उणा० २ । ४० । इति किकन् ।) शूककीटः । इत्यमरः ॥ शुयापोका इति भाषा ॥ तत्पर्य्यायः । शूककीटकः २ । इति शब्दरत्नावली ॥ कीटविशेषः । विछा इति भाषा । तत्पर्य्यायः । अलिः २ द्रोणः ३ वृश्चनः ४ । इति राजनिर्घण्टः ॥ द्रुणः ५ । इति शब्दरत्नावली ॥ पृदाकुः ६ अरुणः ७ अली ८ । इति जटाधरः ॥ * ॥ वृश्चिकविषस्य लक्षणमाह ।
"दहत्यग्निरिवादौ च भिनत्तीवोर्द्ध्वमाशु च ।
वृश्चिकस्य विषं याति पश्चाद्दंशेऽवतिष्ठते ॥"
असाध्यवृश्चिकदष्टस्य लक्षणमाह ।
"दष्टोऽसाध्यैस्तु हृद्घ्राणरसनोपहतो नरः ।
मांसैः पतद्भिरत्यर्थं वेदनार्त्तो जहात्यसून् ॥"
असाध्यैर्वृश्चिकैस्तेषामेवानुवृत्तेः । हृदादिषूपहतः हृदादिकार्य्यरहितो भवति । अत्यर्थं वेदनार्त्त इत्यन्वयः ॥ * ॥ अस्य चिकित्सा ।
"जीरकस्य कृतः कल्को घृतसैन्धवसंयुतः ।
सुखोष्णो मधुना लेपाद्वृश्चिकस्य विषं हरेत् ॥
गन्धमाघ्राय च्छर्दितस्य प्यावर्त्तदलस्य तु ।
वृश्चिकेन नरो विद्धः क्षणाद्भवति निर्व्विषः ॥"
इति भावप्रकाशः ॥ * ॥

अथ वृश्चिकविषहरमन्त्रः । ॐ सर स्फुः ह ॐ छिलि मिलि चिलि चिलि स्फुः ब्रह्मणे स्फुः सर्व्वेभ्यो देवेभ्यः स्फुः । इति तन्त्रसारः ॥ * ॥ (यथा, ऋग्वेदे । १ । १९१ । १६ ।
"वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥"
"वृश्चिकस्यैतद्विषं अरसमसारं बाधकं न भवति ।"
इति तद्भाष्ये सायणः ॥ विषस्य विशेषविवरणन्तु अत्रैव १—१६ मन्त्रेषु द्रष्टव्यम् ॥ * ॥) मेषादिद्वादशराश्यन्तर्गताष्टमराशिः । अस्याधिष्ठात्री देवता वृश्चिकः । विशाखाशेषपादानुराधाज्येष्ठासमुदायेनैतद्राशिर्भवति । स च शीर्षोदयः । श्वेतवर्णः । जलराशिः । उत्तरदिक्पतिः । कफप्रकृतिः । जलचरः । बहुपुत्रः । बहुस्त्रीसङ्गः । छिन्नतनुः । विप्रवर्णश्च । अस्य विशेषसंज्ञाः । सौम्यः । अङ्गना । युग्मम् । समः । स्थिरः । पुष्करः । सरीसृपजातिः । ग्राम्यः । तद्राशिजात एतादृशो भवति । मौनी । मन्दगतिः । कृपालुः । कुबुद्धिः । नीचसङ्गश्च । इति वृहज्जातकादयः ॥ * ॥ तल्लग्नजातफलम् ।
"वृश्चिकोदयसंजातः शौर्य्यवानतिदुष्टधीः ।
भवेद्विज्ञानसम्पन्नो विग्रही सुभगः सुधीः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
ओषधीभेदः । इति मेदिनी ॥ हालिकः । हालः । इति संक्षिप्तसारोणादिवृत्तिः ॥ मदनवृक्षः । कर्कटः । गोमयकीटः । इति भरतः ॥ अग्रहायणमासः । इति सारसुन्दरी ॥

वृश्चिकप्रिया, स्त्री, (वृश्चिकस्य प्रिया ।) पूतिका । इति शब्दमाला ॥

वृश्चिकर्णी, स्त्री, आखुकर्णी । इति राजनिर्घण्टः ॥

वृश्चिका, स्त्री, क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । नखपर्णी २ पिच्छिला ३ अलिपत्रिका ४ । अस्या गुणाः । पिच्छिलत्वम् । अम्लत्वम् । अन्तर्वृद्ध्यादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

वृश्चिकाली, स्त्री, (वृश्चिकानामालिर्यत्र ।) क्षुपविशेषः । विछाटी इति भाषा । तत्पर्य्यायः । वृश्चिपत्री २ विषघ्नी ३ नागदन्तिका ४ सर्पदंष्ट्रा ५ अमरा ६ काली ७ उष्ट्रधूसरपुच्छिका ८ । इति रत्नमाला ॥ विषाणी ९ नेत्ररोगहा १० उष्ट्रिका ११ अलिपर्णी १२ दक्षिणावर्त्तकी १३ कालिका १४ आगमावर्त्ता १५ देवलाङ्गूलिका १६ करभी १७ भूरिदुग्धा १८ कर्कशा १९ स्वर्णदा २० युग्मफला २१ चीरविषाणिका २२ भासुरपुष्पा २३ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । हृद्वक्त्रशुद्धिकारित्वम् । रक्तपित्तविबन्धारोचकापहत्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वृश्चिकाली विषघ्नी तु कासमारुतनाशिनी ॥"
इति राजवल्लभः ॥

वृश्चिपत्री, स्त्री, वृश्चिकाली । इति रत्नमाला ॥

वृश्चीरः, पुं, श्वेतपुनर्णवा । इति रत्नमाला ॥

वृष, उ सेचने । प्रजनैश्वर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक० च-सेट् । क्त्वावेट् ।) उ, वर्षित्वा वृष्ट्वा । इति दुर्गादासः ॥

वृष, क ङ प्रजनैश्वर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-अक०-सेट् ।) क ङ, वर्षयते । अस्य पञ्चमस्वरानुबन्धो लेखकभ्रमकृतः सुधीभिर्ह्येयः । आन्तेभ्यः सर्व्वत्र नित्यम् साम्प्रदायिकत्वात् । न च शाणामनुरोधात् पाठ इति वाच्यम् । तर्हि अरुक् वक्तौ । क ङ वरु वचने । इत क ङ दीप्तौ । दिव क ङ परिकूजने । कदि वर्द्धे । वृष क ङ शक्तिबन्धे । अघक् वधेऽनादरे । इत्येषामष्टानामपि पञ्चमस्वरानुबन्धापत्तेः वस्तुतस्तु एषां पञ्चमस्वरानुबन्धः प्राचीनपठितोऽप्यनर्थः । अतएव रमानाथोऽपि एषामुदनुबन्धः पूर्व्वपठितधातवोऽर्थान्तरेषु चुरादयः स्युर्न्नत्वेते पृथग्धातव इति ज्ञापनार्थं इत्याह । प्रजनो गर्भग्रहणं ऐश्वर्य्यमैश्वर्य्यम् । इति दुर्गादासः ॥

वृषं, स्त्री, (वृष ऐश्वर्य्ये + कः ।) वर्हम् । इति शब्दमाला ॥

वृषः, पुं, (वर्षति सिञ्चति रेत इति । वृष सेचने + कः ।) पुरुषगवः । एँड़े इति भाषा । तत्पर्य्यायः । उक्षा २ भद्रः ३ बलीवर्द्दः ४ ऋषभः ५ वृषभः ६ अनड्वान् ७ सौरभेयः ८ गौः ९ । इत्यमरः ॥ शृङ्गी १० ककुद्मान् ११ । इति शब्दरत्नावली ॥ शिखी १२ गन्धमैथुनः १३ पुङ्गवः १४ । इति जटाधरः ॥ * ॥ अस्य लक्षणादि यथा,—
"अम्भोभक्षणे शुक्ला वश्यन्तेऽन्ये चतुष्पदाः ।
गावः कृतयुगे सृष्टाः स्वयमेव स्वयम्भुवा ।
ब्रह्मक्षत्रियविट्शूद्रजातिभेदाच्चतुर्व्विधाः ॥
शुक्लाङ्गाः शुचयोऽक्रुद्धा मृदवः शुद्धचेतसः ।
अल्पाशिनो बहुबला वृषभा ब्रह्मजातयः ॥
द्वयोर्लक्षणसम्बन्धात् द्विजातिर्वृषभो भवेत् ।
त्रिलक्षणसमावेशात् त्रिगुणः स वृषाधमः ॥
पीताङ्गा मृदवः शुद्धा अक्रोधा भारवाहिनः ।
यहच्छाभोजिनः चीणा वृषभा वैश्यजातयः ॥
कृष्णाङ्गाः क्रूरहृदया अपवित्राः सदाशिनः ।
दृढदृष्टयरोषाश्च वृषभाः शूद्रजातयः ॥
द्वयोर्लक्षणसम्पर्कात् द्विजातिर्वृषभो भवेत् ॥" * ॥
मात्स्येस्तु ।
"पृथ्वीतले समुत्पन्ना गजाश्वा ये चतुष्पदाः ।
गुणत्रयविभेदेन तेषां भेदत्रयं भवेत् ।
एतन्मतानुसारेण भोजः प्राह महीपतिः ॥
ये शुक्लाः शुचयः शुद्धा भृशं भारवहा अपि ।
बह्वाशिनः स्वल्परोषास्ते वृषाः सात्त्विका मताः ॥
व्यक्ताव्यक्तरुषः शुद्धा दृढा भारवहाः शुभाः ।
बह्वाशिनो बहुबलास्ते वृषा राजसा मताः ॥
विवर्णा विकृताङ्गाश्च निर्व्बला स्वल्पभोजिनः ।
अपवित्रा दुष्टदोषास्ते वृषास्तामसा मताः ॥
लक्षणद्वयसम्बन्धात् द्विगुणो वृषभो भवेत् ।

त्रिलक्षणसमावेशात् त्रिगुणः स वृषाधमः ।”*।
अथ गुणाः ।
“नीलः शुभो ध्वजो नाम क्षेमो भद्रः शिवः स्थिरः ।
भोजदेवेन लिखिता इत्यष्टौ वृषभे गुणाः ।”
तद्यथा,—
“श्वेतादन्यतरो वर्णः श्वेतः खुरविषाणयोः ।
ललाटपुच्छयोः श्वेतः स नीलः शुभमावहेत् ॥१॥
यो हृष्टपुष्टो रम्यात्मा सुविभक्ततनुः शुभः ।
कुरुते धनवृद्धिं स दोषैर्मुक्तो यदा स्वयम् ॥२॥
वर्णैस्तु सहजः पुच्छो रम्यश्च ध्वज उच्यते ।
भर्त्तुः कुलं धनं धान्यं विवर्द्धयति निश्चयम् ॥३॥
पूर्व्वार्द्धे चोन्नतो यस्तु परार्द्धे चैव नीचकः ।
निर्द्दोषो नाम इत्येष कुरुते रिपुसंक्षयम् ॥४॥
चन्द्रकं दृश्यते यस्य ललाटे देवनिर्म्मितम् ।
क्षेमनामा वृषः कुर्य्याद् धनधान्यविवर्द्धनम् ॥५॥
आवर्त्ताश्च शुभा यस्य मुष्कयश्चापि वा शुभाः ।
भद्रनामा वृषः कुर्य्यात् भर्त्तुः सर्व्वार्थसाधनम् ॥६॥
आवर्त्तयुक्तिविज्ञानं हयेषु वृषभेष्वपि ।
पादाः सर्व्वे सिता यस्य पुच्छभालौ सितौ तथा ।
महोच्चा चायते नेत्रे कर्णौ चातिलघू स्थिरौ ।
मुष्कयोः श्यामता चैव शृङ्गे चातिशुभे दृढे ।
तनुरोमा महावेगः स्निग्धगम्भीरनिस्वनः ।
शिव इत्येव कथितः शिवं प्रकुरुते ध्रुवम् ॥७॥
चरणाः पञ्जराः स्थूलाः शिरः शुभ्रं भवेत्तनुः ।
आपुच्छादायता शुभ्रा रेखा मस्तकगामिनी ।
रक्तताम्रोष्ठजिह्वस्तु स्थिरः स्थैर्य्यकरः श्रियाः ।
नाल्पपुण्येन लभ्योऽयं वृषभः शुभलक्षणः ।”८,
गर्गस्तु ।
“महत्त्वं तनुलोमत्वं पुष्टता भारवाहिता ।
कुमारकत्वमित्येते वृषभाणां गुणा मताः ।”*।
अथ दोषाः ।
“व्यङ्गो विवर्णो विषमः श्वित्री धूम्रश्चलः खरः ।
एते सप्त महादोषा वृषभाणामुदीरिताः ।
विषाणौ विषमौ यस्य खुराश्च विषमास्तथा ।
नेत्रकान्तेऽथवा गात्रे पञ्जरे वैकृतं भवेत् ।
व्यङ्ग इत्येष कथितो धनधान्यविनाशनः ॥१॥
पूर्व्वार्द्धमन्यवर्णन्तु परार्द्धं चान्यवर्णकम् ।
पृष्ठं क्रोडो विवर्णो वा विवर्णः कुलनाशनः ॥२॥
परार्द्धमुन्नतं यस्य पूर्व्वार्द्धञ्चातिनीचकम् ।
गच्छतश्चरणौ यस्य शब्दायेते खरस्वरः ।
विषमो नाम वृषभः सम्पत्तिक्षयकारकः ॥३॥
हिमकुन्देन्दुसङ्काशा गात्रेषु लोमबिन्दवः ।
श्वित्री नाम महादोषो दूरतस्तं परित्यजेत् ॥४॥
शृङ्गाये दीपिकाकारं ज्वलते केकरे दृशौ ।
कपिलः पुच्छभागश्चेत् स धूम्रो मृत्युमावहेत् ॥५॥
दन्तशृङ्गखुरादीनां यद्येकोऽपि चलेत् स्वयम् ।
मुष्को वा चलते यस्य स चलः कुलनाशनः ॥६॥
आवर्त्ताः मुष्कयो रेखा विषमाश्च विसंस्थिताः ।
न्यूनाधिकाः पञ्जरास्तु खुरास्तु विषमास्तथा ।
गुदान्मेढ्रान्तरे यावद्रेखा वक्रेव दृश्यते ।
विस्तृते विषमे घोणे जिह्वा चैवासिता भवेत् ।
स खरो दूरतस्त्याज्यो भर्त्तुः सर्व्वार्थनाशनः ।
७ ।
स्वल्पता दीर्घरोमत्वं क्षीणता भारवाहिता ।
व्यङ्गत्वं मारकत्वञ्च वृषदोषा उदाहृताः ।*।
ब्रह्मादिजातिभेदेन चत्वारो ये वृषा मताः ।
चतुर्व्विधानां लोकानां त एव स्युः शुभावहाः ।
यो मोहादन्यजातीयं कुरुते वृषभं नरः ।
तस्य नश्यन्ति वित्तानि धनमायुः कुलं बलम् ।
वातपित्तकफोद्रेका व्याधयो ये वृषे मताः ।
तेषामुपशमः कार्य्यो यथास्वं विधिना बुधैः ।”
इति वृषपरीक्षा । इति भोजराजकृतयुक्तिकल्पतरुः ।*। अस्य लक्षणं उत्सर्गविधिश्च यथा,—
मनुरुवाच ।
“भगवन् श्रोतुमिच्छामि वृषभस्य च लक्षणम् ।
वृषोत्सर्गविधिञ्चैव तथा पुण्यफलं महत् ।
मत्स्य उवाच ।
धेनुमादौ परीक्षेत सुशीलां लक्षणान्विताम् ।
अव्यङ्गामपरिक्लिष्टां जीववत्सामरोगिणीम् ।
स्निग्धवर्णां स्निग्धखुरां स्निग्धशृङ्गां तथैव च ।
मनोहराकृतिं सौम्यां सुप्रमाणामनुद्धताम् ।
आवर्त्तैर्द्दक्षिणावर्त्तैर्युक्ता दक्षिणतश्च या ।
वामावर्त्तैर्वामतश्च विस्तीर्णजघना तथा ।
मृदुसंहतताम्रोष्ठीं रक्तजिह्वां सुपूजिताम् ।
अश्यावदीर्घस्फुटिता रक्तजिह्वा तथा च या ।
असन्नाविलनेत्रा च सर्व्वैरविरलैर्द्दृढैः ।
वैदूर्य्यमधुवर्णैश्च जलबुद्बुदसन्निभैः ।
रक्तस्निग्धैश्च नयनैस्तथा रक्तकनीनिकैः ।
सप्त चतुर्द्दश दन्तास्तथा चाश्यामतालुका ।
षडुन्नता सुपार्श्वोरु पृथु पञ्च समायता ।
अष्टायतशिरोग्रीवाधराजन्मसुलक्षणा ।
मनुरुवाच ।
षडुन्नताः के भगवन् ! के च पञ्च समायताः ।
आयताश्च तथैवाष्टौ धेनूनां के शुभावहाः ।
मत्स्य उवाच ।
उरः पृष्ठं शिरः कुक्षिः श्रोणी च वसुधाधिप ।
षडुन्नतानि धेनूनां पूजयन्ति विचक्षणाः ।
कर्णनेत्रललाटञ्च पञ्च भास्करनन्दन ! ।
समायतानि शंसन्ति पुच्छं सास्ना च सक्थिनी ।
चत्वारश्च समा राजन्नेवमष्टौ मनीषिभिः ।
शिरोग्रीवायतान्येते भूमिपाल स्मृता दश ।
तस्याः सुतं परीक्षेत वृषभं लक्षणान्वितम् ।
उन्नतस्कन्धककुदं ऋजुलाङ्गूलकम्बलम् ।
महाकटितटस्कन्धं वैदूर्य्यमणिलोचनम् ।
प्रवालगर्भशृङ्गाग्रं सुदीर्घपृथुवालधिम् ।
नवाष्टदशसंख्यैर्वा तीक्ष्णाग्रैर्द्दशनैः शुभैः ।
मल्लिकाक्षश्च मोक्तव्यो गृहेऽपि धनधान्यदः ।
वर्णतस्ताम्रकपिलो ब्राह्मणस्य प्रशस्यते ।
श्वेतो रक्तश्च कृष्णश्च गौरः पाटल एव च ।
भद्रिकस्ताम्रपृष्ठश्च शबलः पञ्चकालकः ।
पृथुकर्णो महास्कन्धः श्लक्ष्णरोमा च यो भवेत् ।
रक्ताक्षः कपिलो यश्च रक्तशृङ्गतलो भवेत् ।
श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य प्रशस्यते ।
स्निग्धरक्तेन वर्णेन क्षत्रियस्य प्रशस्यते ।
काञ्चनाभेन वैश्यस्य कृष्णेनाप्यन्त्यजन्मनः ।
यस्य प्रागायते शृङ्गे भ्रूमुखाभिमुखे सदा ।
सर्व्वेषामेव वर्णानां स च सर्व्वार्थसाधकः ।
मार्ज्जारपादः कपिलो धन्यः कपिलपिङ्गलः ।
श्वेतोमार्ज्जारपादस्तु धन्यो मणिनिभेक्षणः ।
करटः पिङ्गलश्चैव श्वेतपादस्तथैव च ।
सर्व्वपादशिरो यस्य द्विपादश्वेत एव च ।
कपिञ्जलनिभो धन्यस्तथा तित्तिरिसन्निभः ।
आकर्णमूलात् श्वेतस्तु मुखं यस्य प्रकाशते ।
नन्दीमुखः स विज्ञेयो रक्तवर्णो विशेषतः ।
श्वेतञ्च जठरं यस्य भवेत् पृष्ठञ्च गोपतेः ।
वृषभः स समुद्राख्यः सततं कुलवर्द्धनः ।
मल्लिकापुष्पचित्रस्तु धन्यो भवति पुङ्गवः ।
कमलैर्मण्डलैश्चापि चित्रो भवति भाग्यदः ।
अतसीपुष्पवर्णस्तु तथा धन्यतरः स्मृतः ।*।
एते धन्यास्तथाधन्यान् कीर्त्तयिष्यामि तेऽनघ ।
कृष्णताल्वोष्ठदशना रूक्षशृङ्गशफाश्च ये ।
अव्यक्तवर्णा ह्रस्वाश्च व्याघ्रभस्मनिभाश्च ये ।
ध्वाङ्क्षगृध्रसवर्णाश्च तथा मूषिकसन्निभाः ।
कुण्ठाः काणास्तथा खञ्जाः केकराक्षास्तथैव च ।
विषमश्वेतपादाश्च उद्भ्रान्तनयनास्तथा ।
नैते वृषाः प्रमोक्तव्या न च धार्य्यास्तथा गृहे ।
मोक्तव्यानाञ्च धार्य्याणां भूयो वक्ष्यामि लक्षणम् ।*।
स्वस्तिकाकारशृङ्गाश्च मेघौघसदृशस्वनाः ।
महाप्रमाणाश्च तथा मत्तमातङ्गगामिनः ।
महोरस्का महोत्साहा महाबलपराक्रमाः ।
शिरः कर्णौ ललाटञ्च वालधिश्चरणानि च ।
नेत्रे पार्श्वे च कृष्णानि शस्यन्ते चन्द्रभांसि च ।
श्वेतान्येतानि शस्यन्ते कृष्णस्य तु विशेषतः ।
भूमौ कर्षति लाङ्गूलं प्रलम्बस्थूलवालधिः ।
पुरस्तादुद्यते नीलवृषभश्च प्रशस्यते ।
शुक्तिध्वजपताकाभा येषां राजी विराजते ।
अनड्वाहश्च ते धन्या वित्तसिद्धिजयावहाः ।
प्रदक्षिणं निवर्त्तन्ते स्वयं ये विनिवर्त्तिताः ।
समुन्नतशिरोग्रीवा धन्यास्ते यूथवर्द्धनाः ।
रक्तशृङ्गाग्रनयनः श्वेतवर्णो भवेद्यदि ।
शफैः प्रवालसदृशैर्नास्ति धन्यतरस्ततः ।
एते धार्य्याः प्रयत्नेन मोक्तव्या यदि वा वृषाः ।
धारिता यदि वा मुक्ता धनधान्यविवर्द्धनाः ।
चरणानि मुखं पुच्छं यस्य श्वेतानि गोपतेः ।
लाक्षारससवर्णश्च तन्नीलमिति निर्द्दिशेत् ।
वृष एव स मोक्तव्यो न स धार्य्यो गृहे भवेत् ।
तदर्थमेषा चरति लोके गाथा पुरातनी ।
एष्टव्या बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत् ।
गौरीं वाप्युद्वहेत् कन्यां नीलं वा वृषमुत्सृजेत् ।
एवं वृषं लक्षणसंप्रयुक्तं
गृहोद्भवं क्रीतमथापि राजन् ।

मुक्त्वा न शोचेन्नरकं महात्मा
मोक्षे मतिञ्चाहमतोऽभिधास्ये ॥"
इति मात्स्ये वृषभलक्षणं नाम १८१ अध्यायः ॥
जलपानार्थमागतवृषस्य निवारणे दोषो यथा,
"गवां तृष्णाभिभूतानां पानार्थमभिधावताम् ।
अन्तरायो भवेद्यस्तु स भवेद्ब्रह्मघातकः ॥"
इति कर्म्मलोचनम् ॥*॥
अस्य दानविधिर्यथा,—
वशिष्ठ उवाच ।
"यदीश्वरो दरिद्रो वा करोति विधिना नृप ।
दानं सर्व्वगुणोपेतं तच्छृणुष्व यथातथम् ॥
भारादित्रिपलान्तञ्च वृषं कृत्वा विधानतः ।
युतं धेन्वाथवा दद्याच्छक्तितो नृपसत्तम ॥
यच्छया धेनवः प्रोक्ता वृषास्तावन्त एव हि ।
हरावेते नियोक्तव्याः सुर्हराय च तथा वृषाः ॥
सर्व्वाभावात्ततो राजन् तिलपात्राणि निक्षिपः ।
सर्व्वपापविनाशाय दीयन्ते नृपसत्तम ॥
गोमयेन समालिप्य यववस्त्रसमावृते ।
वृषं हेममयं तत्र रौप्यं वा रत्नसंयुतम् ॥
तस्य नीलमयैः शृङ्गैर्मौक्तिकाञ्चितयष्टयो रदाः ।
दाडिमश्चक्षुभवत्वाणि विद्रुमौष्ठौ सुनासिका ॥
मारकतौ विनिर्द्दिष्टौ कर्णौ चैवास्य कौ मतौ ।
पद्मरागस्य वै पादाः खुरा रौप्यमयास्तथा ॥
राजताभ्यस्य रोमाणि चौमवस्त्रेण कम्बलम् ।
पट्टेन पुच्छमुद्दिष्टं सर्व्वेषामप्ययं विधिः ॥
वृषणौ स्फटिकस्यापि लिङ्गं मणिः प्रकीर्त्तितः ।
यथा धेनुस्तथानड्वान् सुवर्णस्य तु कारयेत् ॥
सर्व्वासां फलमाप्नोति धेनूनां वृषभप्रदः ।
राज्ञः स विभवाद्दानं भक्त्या यः प्रतिपादयेत् ॥
वृषभस्याप्यशक्तौ हि तदनन्तफलं स्मृतम् ।
निःस्वो वाप्येवमेवं हि कृत्वा व्रतमतन्द्रितः ।
तत्फलं समवाप्नोति स्वल्पदानान्न संशयः ॥"
इति वह्निपुराणे वृषदानाध्यायः ॥*॥
तद्दानफलं यथा,—
"कन्यादानं वृषोत्सर्गं तीर्थसेवां श्रुतं तथा ।
ये कुर्व्वन्ति गृहस्थास्तु न वै तद्विषयोपमाः ॥"
इति तत्रैव कन्यादाननामाध्यायः ॥*॥
अपि च ।
ब्रह्मोवाच ।
'वृषगावौ समादाय युवानौ लक्षणान्वितौ ।
हेमशृङ्गौ शफे रौप्ये सवत्सौ पूजयेन्मुने ! ॥
शिवोमां पूजयित्वा तु तद्दिने यः प्रयच्छति ।
शिवभक्ताय विप्राय रोहिण्यां वा स्वगेश वा ॥
न वियोगो भवेत्तस्य सतपत्नीपतेः क्वतः ।
यावदहस्वैमानेर्गच्छेच्छिवपुरं द्विज ॥
तत्र भोगांश्चिरं भुक्त्वा इह आगत्य जायते ।
सम्पन्नो धनधान्याभ्यां पुत्त्रमित्रसमाकुलः ॥
यो वा रत्नसमायुक्तं गोयुगं पूजयेन्मुने ।
प्रयच्छति शिवोमा च प्रीयेतां भावितात्मनः ॥
स सर्व्वपापदुःखाभ्यां विमुक्तः क्रीडते सदा ।
इह लोके भवेद्धन्यो देहान्ते परमं पदम् ॥"
इति देवीपुराणे गोरत्नव्रतनामाध्यायः ॥*॥

शिववृषकारणं यथा,—
श्रीकृष्ण उवाच ।
"अथ गर्व्वान्वितो रुद्रो हन्तुं त्रिपुरमुल्वणम् ।
मत्वा मनसि संहर्त्ता सर्व्वेषां जगतामिति ।
कोऽयं पतङ्गवद्दैत्य इति मत्वा ययौ रणम् ।
विहाय शूलं मद्दत्तं मदीयं कवचं परम् ॥
चिरं बभूव समरं वर्षमेकं दिवानिशम् ।
न कोऽपि जेतुं कं शक्तो द्वौ समौ समरे
सदा ॥
पृथिव्याञ्च रणं कृत्वा दैत्येन्द्रो मायया प्रिये ।
अत्यूर्द्धञ्च समुत्तस्थौ पञ्चाशत्कोटियोजनम् ॥
उत्तस्थौ शङ्करस्तूर्णं हन्तुं दैत्यं जगत्प्रभुः ।
जघान मुष्टिना रुद्रो दानवेन्द्रं प्रकोपतः ॥
वज्रमुष्टिप्रहारेण सद्यो मूर्च्छामवाप सः ।
क्षणेन चेतनां प्राप्य कोपाद्दानवपुङ्गवः ।
शिवं सयानमुत्तोल्य पातयामास भूतले ॥
तदाहं कलया शीघ्रं वृषरूपं विधाय च ।
सयानं शङ्करं धृत्वा विषाणाभ्यामुदक्रमम् ।
ददौ तस्मै स्वकवचं स्वशूलमरिमर्द्दनम् ॥
मया दत्तेन शूलेन जघान त्रिपुरं हरः ।
मामेव दर्पहन्तारं तुष्टाव व्रीडितः पुनः ॥
तत्याज शङ्करो दर्पं विप्रदीर्णं ततो विभुः ।
ज्ञानानन्दस्वरूपश्च निर्लिप्तः सर्व्वकर्म्मसु ॥
ततोऽहं वृषरूपेण वहामि तेन तं प्रियम् ।
मम प्रियतमो नास्ति त्रैलोक्येषु शिवात् परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २६ अध्यायः ॥
मेषादिद्वादशराश्यन्तर्गतद्वितीयराशिः । तत्प-
र्य्यायः । तावुरिः २ । अस्य विशेषसंज्ञा ।
सौम्यः । अङ्गना । युग्मम् । समः । स्थिरः ।
पृष्ठरः । अयं चतुष्पात् । निशासु याम्यः ।
दिवा वन्यः । ह्रस्वाख्यः । दक्षिणदिक्पतिः ।
निशाख्यः।पृष्ठोदयाख्यः। अस्याधिष्ठात्री देवता
वृषः । कृत्तिकापादत्रयरोहिणीसमुदायमृगशि-
रोऽर्द्धेनैतद्राशिर्भवति । स च शीलस्वभावः ।
सुन्दरभूमिस्वामी । वातप्रकृतिः । श्वेतवर्णः ।
वैश्यजातिः । महाशब्दकरः । मध्यमस्त्रीसङ्गः ।
मध्यमसन्तानश्च । एतद्राशिजात एतादृग्-
भवति । दाता । वाग्दुःखरः । निर्भयः । पर-
दाराभिलाषी । इति दृहज्जातकादयः ॥ * ॥
एतद्राशिजातफलम् ।
"स्थिरमतिं सुमतिं कमनीयतां
कृशजतां हि सुखासुपभोगताम् ।
वृषगतो हिमगुर्ब्भ्रमादिशेत्
सुललितः क्षतिनश्च सुखान्यपि ॥"*॥
तल्लग्नजातफलम् ।
"वृषलग्ने भवेज्जातो गुरुभक्तः प्रियंवदः ।
गुणी कृती धनी लुब्धः शूरः सर्व्वजनप्रियः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
चतुर्व्विधपुरुषमध्ये पुरुषविशेषः । (यथा,—
"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
शशो मृगो वृषोऽश्वश्च स्त्रीपुंसोर्जातिलक्षणम् ॥"
इति रतिमञ्जरी ।)

तस्य लक्षणं यथा,—
"बहुगुणबहुवन्धः शीघ्रकामो नताङ्गः
सकलरुचिरदेहः सत्यवादी वृषोऽयम् ॥"
इति च रतिमञ्जरी ॥ * ॥
एकादशमन्वन्तरीयेन्द्रः । यथा,—
"रुद्रपुत्त्रस्य ते पुत्त्रान् वक्ष्याम्येकादशस्य तु ।
सर्व्वत्रगः सुशर्म्मा च देवानीकः पुरुर्गुरुः ॥
क्षत्त्रवर्द्धा दृढायुश्च आर्द्रकः पुत्त्रकस्तथा ।
विहङ्गमाः कामगमा निर्म्माणरुचयस्तथा ॥
एकैकस्त्रिंशकस्तेषां गणाश्चेन्द्रश्च वै वृषः ।
दशग्रीवो रिपुस्तस्य स्त्रीरूपी घातयिष्यति ॥"
इति गारुडे ८७ अध्यायः ॥
(कामान् वर्षतीति । वृष+कः ।) धर्म्मः ।
(यथा, मनुः । ८ । १६ ।
"वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते ह्यलम् ।
वृषलं तं विदुर्द्देवास्तस्माद्धर्म्मं न लोपयेत् ॥")
शृङ्गी । उत्तरपदस्थश्चेत् श्रेष्ठः । (यथा, हरि-
वंशे । १४१ । ६८ ।
"शारदं वर्षणं यद्वत् सहेद्गौरो गवांपतिः ।
तद्वद्युद्धवृषः सेहे बाणवर्षमरिन्दमः ॥")
मूषिकः । शुक्रलः । वास्तुस्थानभेदः । इति
मेदिनी ॥ वासकः । इति विश्वः ॥ श्रीकृष्णः ।
इति त्रिकाण्डशेषः ॥ शत्रुः । इति जटाधरः ॥
कामः । बलवान् । इत्यनेकार्थकोषः ॥ ऋषभे-
नामौषधम् । इति राजनिर्घण्टः ॥ (पतिः ।
यथा, काशीखण्डे ।
"स्ववृषं या परित्यज्य परवृषे वृषायते ।
वृषली सा हि विज्ञेया न शूद्री वृषली भवेत् ॥")
वृषकर्णी, स्त्री, सुदर्शना । इति रत्नमाला ॥
सुदर्शनगुलञ्च इति भाषा ॥
वृषगन्धा, स्त्री, (वृषस्य गन्धो यस्याः ।) वृद्धाङ्गी ।
इति राजनिर्घण्टः ॥
वृषचक्रं, क्ली, (वृषाकारं चक्रम् ।) कृषिकर्म्मोक्त-
वृषाकारचक्रम् । यथा,—
"वृषचक्रं वृषाकारं सर्व्वावयवसंयुतम् ।
लिखित्वा विन्यसेद्भानि वृषनामर्क्षपूर्व्वकम् ॥
मुखादिकर्कशीर्षेषु शृङ्गे स्कन्धे द्विकं द्विकम् ।
त्रीणि पृष्ठे द्वयं पुच्छेऽष्टौ पादे तूदरे त्रिकम् ॥
वृषप्रवाहयोग्योऽपि प्रारम्भाद्दिनचक्रकम् ।
यदङ्गेषु स्थितं तस्मादस्य सर्व्वं शुभाशुभम् ॥
आस्ये हानिः सुखं नेत्रे कर्णे भिक्षाटनं तथा ।
शीर्षे धृतिस्तथा शृङ्गे सौख्यं स्कन्धे च मङ्गलम् ॥
पृष्ठे कष्टं शुभं पुच्छे भ्रमः पादे सुखं हृदि ।
चन्द्रयोगादिदं प्रोक्तं वृषचक्रं फलं बुधैः ॥"
इति ज्योतिस्तत्त्वम् ॥
वृषणः, पुं, अण्डकोषः । इत्यमरः ॥ तस्य लक्षणं
यथा,—
"स्थूललिङ्गो दरिद्रः स्याद्दुःख्येकवृषणो भवेत् ।
विषमे स्त्रीचपलो वै नृपः स्याद्वृषणे समे ।
प्रलम्बवृषणोऽल्पायुर्निर्द्धनो मणिभिर्भवेत् ॥"
अपि च ।
"जलान्त एकवृषणो वृषणाभ्यां चलः स्त्रियाम् ।

समाभ्यां क्षितिपः प्रोक्तः प्रलम्बेन प्रतापवान्॥”
इति गारुडे ६३।६५ अध्यायौ ।

वृषणकच्छूः, स्त्री, (वृषणस्य कच्छूः ।) क्षुद्ररोगविशेषः । तल्लक्षणं यथा,—
“स्नानोत्सादनहीनस्य मलो वृषणसंश्रितः ।
प्रक्लिद्यते यदा स्वेदात् कण्डूं जनयते तदा ॥
ततः कण्डूयनात् क्षिप्रं स्फोटं स्रावश्च जायते ।
प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजाम् ॥
उत्सादनं उद्वर्त्तनम् । मलः मैल् इति लोके । प्रक्लिद्यते आर्द्रो भवति ॥ * ॥ तच्चिकित्सा यथा,—
“सर्ज्जाब्दकुष्ठसैन्धवसितसिद्धार्थैः प्रकल्पितो योगः ।
उद्वर्त्तनेन नियतं शमयति वृषणस्य कच्छूतिम् ॥
भिषग्वृषणकच्छून्तु चिकित्सेत् पामरोगवत् ।
अहिपूतननिर्द्दिष्टक्रियया पि च तां हरेत् ॥”
इति भावप्रकाशः ॥

वृषणश्वः, पुं, इन्द्रस्य घोटकः । इति त्रिकाण्डशेषः ॥ (एतन्नामकनृपविशेषः । यथा, ऋग्वेदे । १ । ५१ । १३ ।
“मेनाभवो वृषणश्वस्य सुक्रतो ॥”
“वृषणश्वस्य एतदाख्यस्य राज्ञः मेनाभवो मेनानाम कन्या भूः ।”इति तद्भाष्ये सायणः ॥ * ॥ सेचनसमर्थाश्वयुक्ते, त्रि । यथा, ऋग्वेदे । ८ । २० । १० ।
“वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना ॥”
“वृषणश्वेन वृषभिः सेचनसमर्थैरश्वैरुपेतेन ।” इति तद्भाष्ये सायणः ॥)

वृषण्वसु, क्ली, इन्द्रस्य धनम् । इति जटाधरः ॥ (त्रि, वर्षणकर्त्ता । यथा, ऋग्वेदे ।२।४१।८।
“न यत्परो नान्तर आदधर्षद्वृषण्वसू ॥”
“वृषण्वसू हे धनस्य वर्षितारौ ।” इति तद्भाष्ये सायणः ॥)

वृषदंशकः, पुं, (वृषं मूषिकं दशतीति । दंश + ण्वुल् ।) विडालः । इत्यमरः ॥ (यथा, साहित्यदर्पणे १० परिच्छेदे ।
“पिपसि सुकं वृषदंशकवदने ॥”)

वृषध्वजः, पुं, (वृषो ध्वजो वाहनं यस्य ।) शिवः । इत्यमरः ॥ (यथा, काव्यादर्शे २ स्वभावाख्याने ।
“जटाभिःस्निग्धताम्राभिराविरासीद्वृषध्वजः॥”) हेरम्बः । पुण्यकर्म्मा । इति विश्वः ॥

वृषध्वाङ्क्षी, स्त्री, नागरमुस्ता । इति राजनिर्घण्टः ॥

वृषनाशनः, पुं, (वृषस्य नाशनं यस्मात् ।) विडङ्गः । इति शब्दमाला ॥

वृषपतिः, पुं, (वृषस्य पतिः ।) षण्डः । शिवः । इति केचित् ॥

वृषपत्रिका, स्त्री, वस्त्राम्नी । इति राजनिर्घण्टः ॥

वृषपर्णी, स्त्री, (वृषस्य मूषिकस्य कर्ण इव पर्णं यस्याः । ङीष् ।) आखुपर्णी । इति रत्नमाला ॥ वृषविशेषः । पुराती इति भाषा । तत्पर्य्यायः । दध्याली २ चक्राङ्गी ३ सुदर्शना ४ । इति राजनिर्घण्टः ॥

वृषपर्व्वा, [न्] पुं. शिवः । दैत्यभेदः । (यथा, महाभारते । १ । ६७ । १६ ।
“वृषपर्व्वेति विख्यातः श्रीमान् यस्तु महासुरः ॥”
अस्य विवरणन्तु तत्रैव द्रष्टव्यम् ॥ * ॥) भृङ्गराजः । कशेरुः । इति विश्वः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ४१ ।
“वृषाही वृषभो विष्णुर्वृषपर्व्वा वृषोदरः ॥”
राजविशेषः । यथा, मार्कण्डेयपुराणे ।१३४।५।
“जग्राह नरराजस्य सकाशाद्वृषपर्व्वणः ॥”)

वृषभः, पुं, (वृष सेचने । वृष + “ऋषिवृषिभ्यां कित् ।”उणा० ३। १२३। इति अभच् । स च कित् ।) वृषः । (यथा, मनौ । ९ । ५० ।
“यदन्यगोषु वृषभो वत्सानां जनयेच्छतम् ॥”)
श्रेष्ठः । (यथा, महाभारते । ३ । ३३ । ८७ ।
“सृञ्जयैः सह कैकेयैर्वृष्णीनां वृषभेण च ॥”)
वैदर्भीरीतिभेदः । इति मेदिनी ॥ आदिजिनः । इति हेमचन्द्रः ॥ कर्णरन्ध्रम् । ऋषभनामौषधम् । इत्युणादिकोषः ॥ * ॥ (चतुर्व्विधपुरुषान्तर्गतपुरुषविशेषः । यथा,—
“शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम् ।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥”
इति रतिमञ्जरी ॥)
गोशब्दे अलिखनात् प्रसङ्गादत्र आतिदेशिकगोहत्या लिख्यते ।
“गामाहारं प्रकुर्व्वन्तं पिबन्तं यो निवारयेत् ।
याति गोविप्रयोर्मध्ये गोहत्याञ्च लभेत्तु सः ॥
दण्डैर्गास्ताडयन्मूढो यो विप्रो वृषवाहनः ।
दिने दिने गवां हत्यां लभते नात्र संशयः ॥
ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम् ।
भोजयेद्वृषवाहान्नं स गोहत्यां लभेद्ध्रुवम् ॥
वृषलीपतिं याजयेद्यो भुङ्क्तेऽन्नं तस्य यो नरः ।
गोहत्याशतकं सोऽपि लभते नात्र संशयः ॥
पादं ददाति वह्नौ यो गाश्च पादेन ताडयेत् ।
गृहं विशेदधौताङ्घ्रिः स्नात्वा गोवधमालभेत् ॥
यो भुङ्क्तेऽस्निग्धपादेन शेते स्निग्धाङ्घ्रिरेव च ।
सूर्य्योदये च द्विर्भोजी स गोहत्यां लभेत् ध्रुवम् ॥
अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः ।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद्ध्रुवम् ॥
पितॄंश्च पर्व्वकाले च तिथिकाले च देवताः ।
न सेवतेऽतिथिं यो हि स गोहत्यां लभेद्ध्रुवम् ॥
स्वभर्त्तरि च कृष्णे वा भेदबुद्धिं करोति या ।
कटूक्त्या ताडयेत् कान्तं सा गोहत्यां लभेत् ध्रुवम् ।
गोमार्गं खननं कृत्वा ददाति शस्यमेव च ।
तडागे वा तदूर्द्ध्वे वा स गोहत्यां लभेद् ध्रुवम् ॥
प्रायश्चित्तं गोवधस्य यः करोति व्यतिक्रमम् ।
अर्थलोभादथाज्ञानात् स गोहत्यां लभेत् ध्रुवम् ॥
राजके दैवके यत्नाद्गोस्वामी गां न पालयेत् ।
दुःखं ददाति यो मूढो गोहत्यां लभते ध्रुवम् ॥
प्राणिनं लङ्घयेद् यो हि देवार्च्चामनलं जलम् ।
नैवेद्यं पुष्पमन्नञ्च स गोहत्यां लभेद्ध्रुवम् ॥
शश्वन्नास्तीति यो वादी मिथ्यावादी प्रतारकः ।
देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम् ॥
देवताप्रतिमां दृष्ट्वा गुरुं वा ब्राह्मणं सति ! ।
न सम्भ्रमान्नमेद्यो हि स गोहत्यां लभेत् ध्रुवम् ॥
न ददात्याशिषं कोपात् प्रणताय च यो द्विजः ।
विद्यार्थिने च विद्याञ्च स गोहत्यां लभेत् ध्रुवम् ॥
गोहत्या ब्रह्महत्या च कथिता चातिदेशिकी ।
यथा श्रुतं सूर्य्यवक्त्रात् किं भूयः श्रोतुमिच्छसि ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

वृषभगतिः, पुं, (वृषभेण गतिर्यस्य ।) शिवः । इति हारावली ॥

वृषभध्वजः, पुं, (वृषभः ध्वजो वाहनं यस्य ।) शिवः । इति केचित् ॥ (यथा, रघुः ।२।३६।
“अमुं पुरः पश्यसि देवदारुं
पुत्त्रीकृतोऽसौ वृषभध्वजेन ॥”)

वृषभाक्षी, स्त्री, इन्द्रवारुणी । इति राजनिर्घण्टः ॥ वृषचक्षुषि, स्त्री ॥

वृषभानुः, पुं, सुरभानपुत्त्रः । स च राधिकापिता । यथा,—
“सुचन्द्रो वृषभानुश्च लेभाते जन्म गोकुले ।
पद्मावत्याश्च जठरे सुरभानस्य रेतसा ॥
जातिस्मरो हरेरंशः सुरूपश्च यथा शशी ।
ववृधेऽनुदिनं तत्र व्रजगेहे व्रजाधिपः ॥
कलावती कान्यकुब्जे बभूवायोनिसम्भवा ।
जातिस्मरा महासाध्वी सुन्दरी कमलाकला ॥
कान्यकुब्जे नृपश्रेष्ठो भलन्दन उरुक्रमः ।
स तां संप्राप योगान्ते यज्ञकुण्डसमुत्थिताम् ॥
कृत्वा वक्षसि राजेन्द्र स्वकान्तायै ददौ मुदा ।
मालावती स्तनं दत्त्वा तां पुपोष प्रहर्षिता ।
ददर्श नन्दः पथि तां गच्छतीञ्च मुदान्वितः ॥
नन्द उवाच ।
शृणु राजेन्द्र वक्ष्यामि विशेषवचनं शुभम् ।
सम्बन्धं कुरु कन्याया विशिष्टेन च साम्प्रतम् ॥
सुरभानसुतः श्रीमान् वृषभानुर्व्रजाधिपः ।
नारायणांशो गुणवान् सुन्दरश्च सुपण्डितः ॥
कन्या तेऽयोनिसंभूता यज्ञकुण्डसमुद्भवा ।
त्रैलोक्यमोहिनी शान्ता कमलांशा कलावती ।
स च योग्यस्तद्दुहितुस्तद्योग्या ते च कन्यका ॥
भलन्दन उवाच ।
सम्बन्धो हि विधिवशो न मे साध्यो व्रजाधिप ।
प्रजापतिर्योगकर्त्ता जन्मदाताहमेव च ॥
वृषभानुप्रिया धात्रा लिखिता चेत् सुता मम ।
पुरा भूतेव को वाहं केनान्येन निवार्य्यते ॥
नृपाज्ञामुपादाय व्रजश्रेष्ठो व्रजं गतः ।
गत्वा स कथयामास सुरभानस्य संसदि ॥
सुरभानश्च यत्नेन नन्देन च समादरम् ।
सम्बन्धं योजयामास गर्गद्वारा च सत्वरम् ॥
वृषभानुर्मुदा युक्तः प्राप्य तां च कलावतीम् ।

रेमे सुनिर्ज्जने रम्ये बुबुधे न दिवानिशम् ॥
तयोः कन्या च कालेन राधिका सा बभूव ह ।
दैवात् श्रीदामशापेन श्रीकृष्णस्याज्ञया पुरा ।
अयोनिसम्भवा सा च कृष्णप्राणाधिका सती ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥

वृषभाषा, स्त्री, (वृषेण धर्म्मेण भाषते इति । भास + अच् । स्त्रियां टाप् ।) अमरावती । इति त्रिकाण्डशेषः ॥

वृषयः, पुं, (वृ + “वृह्रोः षुग्दुकौ च ।” उणा० ४ । १०० । इति कयन् षुगागमश्च ।) आश्रयः । इत्युणादिकोषः ॥

वृषलः, पुं, गृञ्जनः । शूद्रः । (यथा, मनौ । ४ । १४० ।
“नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ॥”
अस्य नामनिरुक्तिर्यथा, तत्रैव । ८ । १६ ।
“वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते ह्यलम् ।
वृषलं तं विदुर्द्देवास्तस्माद्धर्म्मं न लोपयेत् ॥”)
चन्द्रगुप्तराजः । वाजी । इति मेदिनी ॥ अधार्म्मिकः । इति जटाधरः ॥

वृषलात्मजः, त्रि, (वृषलस्यात्मजः ।) अधार्म्मिकजातः । इति केचित् ॥ शूद्रोद्भवश्च ॥

वृषली, स्त्री, पितृगृहे अविवाहिता रजस्वला कन्या । यथा । अत्रिकाश्यपौ ।
“पितुर्गेहे च या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥”
इत्युद्वाहतत्त्वम् ॥
स्वपतिं परित्यज्य या परपतिगामिनी । यथा,—
“स्ववृषं या परित्यज्य परवृषे वृषायते ।
वृषली सा हि विज्ञेया न शूद्री वृषली भवेत् ॥”
इति काशीखण्डः ॥
(वृषलस्य भार्य्या । ङीप् ।) शूद्री च ॥ (यथा, महानिर्व्वाणतन्त्रे । १ । ४७ ।
“शूद्रान्नभोजिनः क्रूरा वृषलीरतिकामुकाः ॥”)

वृषलीपतिः, पुं, (वृषल्याः पतिः ।) वृषलीविवाहकर्त्ता । यथा,—
“यस्तु तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्ब्बलः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥”
इत्युद्वाहतत्त्वम् ॥
“यदि शूद्रां व्रजेत् विप्रो वृषलीपतिरेव सः ॥”
इति ब्रह्मवैवर्त्तपुराणम् ॥

वृषलोचनः, पुं, (वृषस्य लोचने इव लोचने यस्य ।) मूषिकः । इति हेमचन्द्रः ॥ वृषनयने, क्ली ॥

वृषवाहनः, पुं, (वृषो वाहनं यस्य ।) शिवः । इति केचित् ॥

वृषशत्रुः, पुं, (वृषस्यासुरविशेषस्य शत्रुः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

वृषसृक्की, [न्] पुं, भङ्गरोलः । इति शब्दमाला ॥

वृषस्यन्ती, स्त्री, (वृषं नरं शुक्रलं वा इच्छति मैथुनाय । वृष + “सुप आत्मनः क्यच् ।” ३ । १ । ८ । इति क्यच् । “अश्वक्षीरेति ।” ७ । १ । ५१ । इति सुगागमः । ततः । “लटः शतृशानचाविति ।” ३ । २ । १२४ । इति शतृ । “उगितश्च ।” ४।१।६ । इति ङीप् ।) कामुकी । इत्यमरः ॥ वृषेण जम्बुमिच्छन्ती गौः । इति व्याकरणम् ॥ तथा च ।
“लज्जमाना सा वृषस्यन्ती महोक्षं गौरिवागमत् ।
मन्मथायुधसम्पातव्यथमानमतिः पुनः ॥”
इति भट्टिः ॥

वृषा, स्त्री, मूषिकपर्णी । इत्यमरः ॥ कपिकच्छूः । इति हेमचन्द्रः ॥

वृषा, [न्] पुं, (वर्षतीति । वृष सेचने + “कनिन् युवृषितक्षीति ।” उणा० १ । १५६ । इति कनिन् ।) इन्द्रः । (यथा, रघुः । १० । ५२ ।
“प्राजापत्योपनीतं तत् अन्नं प्रत्यग्रहीन्नृपः ।
वृषेव पयसां सारमाविष्कृतमुदन्वता ॥”)
कर्णः । वेदनाज्ञानम् । दुःखम् । इति मेदिनी ॥ वृषः । (यथा, ऋग्वेदे । १० । ४३ । ८ ।
“वृषा न क्रुद्धः पतयत् रजःसु ॥”
“रजःसु लोकेषु वृषा न यथा वृषभः क्रुद्धः सन् प्रतिवृषभवधाय पतयत् गच्छति ।” इति तद्भाष्ये सायणः ॥) घोटकः । इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे । ७ । ६८ । १ ।
“आवां रथो रोदसी बद्बधानो
हिरण्ययो वृषभिर्यात्वश्वैः ॥”
“हे अश्विनौ वां रथो वृषभिः युवभिरश्वैर्युक्तः समायातु ।” इति तद्भाष्ये सायणः ॥ पिता । यथा, ऋग्वेदे । ७ । २० । ५ ।
“वृषा जजान वृषणं रणाय ॥”
“वृषा सेक्ता पिता कश्यपो वृषणं कामानां वर्षितारमिन्द्रम् ।” इति तद्भाष्ये सायणः ॥ त्रि, वर्षकः । यथा, ऋग्वेदे । १० । ६७ । ७ ।
“ब्रह्मणस्पतिर्वृषभिर्वराहैः ॥”
“वृषभिर्वर्षितृभिर्वराहैर्वराहारैः ।” इति तद्भाष्ये सायणः ॥)

वृषाकपायी, स्त्री, (वृषाकपेः विष्णोः शिवस्य अग्नेरिन्द्रस्य वा भार्य्या । वृषाकपि + “वृषाकप्यग्नीति ।” ४।१।३७ । इति ङीप् । ऐकारादेशश्च ।) लक्ष्मीः । गौरी । इत्यमरः ॥ स्वाहा । इति भरतः ॥ शची । इति स्वामी ॥ (यथा, ऋग्वेदे । १० । ८६ । १३ ।
“वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ॥”
“हे वृषाकपायि कामानां वर्षकत्वादभीष्टदेशगमनाच्चेन्द्रो वृषाकपिस्तस्य पत्नि ।” इति तद्भाष्ये सायणः ॥) जीवन्ती । शतावरी । इति मेदिनी ॥

वृषाकपिः, पुं, (“वृषः कपिरस्येति । अन्येषामपीति दीर्घः ।” इति उणा० ४ । १४३ । इत्यस्य वृत्तौ उज्ज्वलदत्तः ।) विष्णुः । (यथा हरिवंशे । २१६ । ४७ ।
“ततो विभुः प्रवरवराहरूपधृक्
वृषाकपिः प्रसभमथैकदंष्ट्रया ॥”)
शिवः । (यथा, हरिवंशे । ३ । ५२ ।
“वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥”)
अग्निः । इति मेदिनी ॥ इन्द्रः । इति वृषाकपायीशब्दस्य शचीवाचकत्वदर्शनात् ॥ (यथा, भागवते । ६ । १३ । १० ।
“एवं सञ्चोदितो विप्रैर्मरुत्वानहनद्रिपुम् ।
ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥”)
सूर्य्यः । यथा, महाभारते । ३ । ३ । ६१ ।
“त्वं हंसः सविता भानुरंशुमाली वृषाकपिः ॥”)

वृषाकरः, पुं, माषः । इति राजनिर्घण्टः ॥

वृषाङ्कः, पुं, (वृषोऽङ्कोऽस्य ।) शिवः । (यथा, भागवते । ८ । ८ । १ ।
“पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः ॥”)
साधुः । भल्लातकः । षण्डः । इति मेदिनी ॥

वृषाङ्कजः, पुं, डमरुः । इति शब्दरत्नावली ॥

वृषाञ्चनः, पुं, (वृषेण अञ्चति गच्छतीति । अञ्चु गतौ + ल्युः ।) शिवः । इति त्रिकाण्डशेषः ॥

वृषाणकः, पुं, शिवः । इति त्रिकाण्डशेषः ॥

वृषान्तकः, पुं, (वृषस्यासुरस्यान्तकः ।) विष्णुः । इति शब्दरत्नावली ॥

वृषायणः, पुं, चटकः । इति हारावली ॥ (वृषेण अयनं गमनं यस्य ।) शिवश्च ॥

वृषाहारः, पुं, (वृष उन्दूर आहारो यस्य ।) विडालः । इति हारावली ॥

वृषी, [न्] पुं, मयूरः । इति शब्दमाला ॥

वृषी, स्त्री, व्रतिनां कुशादिमयासनम् । इत्यमरः ॥ (यथा, देवीभागवते । ५ । ३२ । ३० ।
“शिष्यो ददौ वृषीं तस्मै गुरवे नोचितच्छदा ॥”)

वृषोत्सर्गः, पुं, (वृषस्योत्सर्गः ।) अशौचान्तद्वितीयदिनादिकर्त्तव्यत्रिशूलचक्राङ्कितवत्सतरीचतुष्टययुक्तवृषत्यागः । वृषाभावे तत्प्रतिनिधिर्यथा,—
“एकादशेऽह्नि सम्प्राप्ते वृषाभावो भवेद्यदि ।
दर्भैः पिष्टैस्तु संपाद्य तं वृषं मोचयेद्बुधः ॥
वृषोत्सर्ज्जनवेलायां वृषाभावः कथञ्चन ।
मृत्तिकाभिस्तु दर्भैर्व्वा वृषं कृत्वा विमोचयेत् ॥”
इति गारुडे प्रेतकल्पे ६ अध्यायः ॥
तस्य विधिर्यथा । कालविवेकेऽप्यग्निपुराणम् ।
“एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः ।
प्रेतलोकं परित्यज्य स्वर्गलोकं स गच्छति ॥
आद्यश्राद्धे त्रिपक्षे वा षष्ठे मासि च वत्सरे ।
वृषोत्सर्गश्च कर्त्तव्यो यावन्न स्यात् सपिण्डता ।
सपिण्डीकरणादूर्द्ध्वं कालोऽन्यः शास्त्रचोदितः ॥”
यस्य प्रेतस्येति सामान्यतः श्रुतेः पितृभिन्नस्यापि वृषोत्सर्गः प्रतीयते ॥ * ॥ अथ वृषोत्सर्गं व्याख्यास्यामः । कार्त्तिक्यां पौर्णमास्यां रेवत्यामाश्वयुज्यां दशाहे गते संवत्सरेऽतीते वेति । अत्र मृततिथिमादाय संवत्सरगणना दशाहपदस्यविरोधः । एकादशाह इति आद्यश्राद्ध इति चाशौचान्तद्वितीयदिनपरम् ।
“अशौचान्ताद्द्वितीयेऽह्नि शय्यां दद्याद्विलक्षणाम् ।
काञ्चनं पुरुषं तद्वत् फलवस्त्रसमन्वितम् ॥
संपूज्य द्विजदाम्पत्यं नानाभरणभूषणैः ।
वृषोत्सर्गश्च कर्त्तव्यो देया च कपिला शुभा ॥”
इति मत्स्यपुराणेनैकवाक्यत्वात् ॥
प्रेतवृषोत्सर्गे वृद्धिश्राद्धं न कर्त्तव्यम् ।

"नार्व्वाक् संवत्सरादूर्द्धं वृषोत्सर्गं विधीयते।
सपिण्डीकरणादूर्द्धं वृद्धिश्राद्धं विधीयते॥"
इत्युशनसो वचनात्॥ * ॥
वृषलक्षणमाह कात्यायनः।
"अव्यङ्गो जीववत्सायाः पयस्विन्याः सुतो बली।
एकवर्णो द्विवर्णो वा यो वा स्यादष्टकासुतः॥
यूथादुन्नततरो यस्तु समो वा नीच एव वा।
अभावतान् तत्र परानुत्सृजेत् तारयेद्वृषः॥"
अष्टकासुतः अष्टकासु जातः। कामधेनुप्रभृतिषु मत्स्यपुराणम्।
"चरणानि मुखं पुच्छं यस्य श्वेतानि गोपतेः।
लाक्षारससवर्णश्च तं नीलमिति निर्द्दिशेत्॥
वृष एव स मोक्तव्यो न सन्धार्य्यो गृहे वसन्।
तदर्थमेषा चरति लोके गाथा पुरातनी॥
एष्टव्या बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत्।
गौरीं वाप्युद्वहेद्भार्य्यां नीलं वा वृषमुत्सृजेत्॥"
वत्सतरीर्विंशयन्ति।
"अग्रतो लोहिता पत्नी पार्श्वाभ्यां नीलपाण्डरे।
पृष्ठतश्च भवेत् श्यामा वृषभस्य च मोचने॥" * ॥
वेधकर्म्मार्थमक्षपान्तच्छिलानमुक्तं वृषयोर्मपञ्चरात्रम्। "नवेन चित्रवर्णेन वितानं कल्पयेद्बुधः।" अत्र च।
"शुक्लवासाः शुचिर्भूत्वा ब्राह्मणान् स्वस्तिवाच्य च।
कीर्त्तयेद्भारतञ्चैव तथा स्यादक्षयं हविः॥"
इति दानधर्म्मस्थवृषोत्सर्गप्रकरणीयवचनात् अक्षयहविष्कामेन स्वस्तिवाचनानन्तरं भारतनामोच्चारणं कार्य्यम्।
"यदह्ना कुरुते पापं ब्राह्मणस्त्विन्द्रियैश्चरन्।
महाभारतमाख्याय पूर्व्वां सन्ध्यां विमुच्यति॥"
इत्यादि-पुराणोक्त-प्रातर्महाभारतोच्चारणवत् राढ़देशीयास्तु विराटपर्व्व पाठयन्ति। भविष्ये।
"वृषोत्सर्गश्च द्विविधो जीवतो वा मृतस्य च।"
इत्युपक्रम्य।
"अनुष्ठा यज्ञ च पुनर्गेहेषु पूजयेद्वटे।
यद्वाचैव यजेत् पश्चात् विष्णुं संपूजयेत् ततः॥"
छन्दोगपरिशिष्टम्।
"गोशालायां प्रणीयाग्निं संस्कृत्य ब्रीहितण्डुलान्।
अग्निपूषेन्द्रेश्वरेभ्यो निर्व्वपेत् पायसं चरुम्॥"
गोशालायामिति प्रधानकल्पः। तत्र इत्युपक्रम्य।
"उत्सवश्चो विधानेन श्रुतिस्मृतिनिदर्शनात्।
प्रागुदक्प्रवणे देशे मनोज्ञे निर्जने वने॥"
सङ्कल्पानन्तरं यजमान एव प्रथमं ब्रह्मवरणादिकं कुर्य्यात् तत्र ब्रह्मवरणं प्रथमतः। ज्योतिष्टोमे ब्रह्मोद्गातृहोत्रध्वर्य्यु इत्यादिदर्शनेन। गृह्यसंग्रहे।
"द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति।
एकः कर्म्मनियुक्तः स्यात् द्वितीयस्तन्त्रधारकः॥
तृतीयः प्रब्रूयात् प्रश्नं ततः कर्म्म समाचरेत्॥"

चरणानन्तरं कुशण्डिकां समाप्य यथाविधिना चरुपाकञ्च कृत्वा चरुहोमं कुर्य्यात्। ततः स्विष्टकृद्धोममहाव्याहृतिहोमौ कार्य्यौ॥ * ॥ ततः
"वृषस्य दक्षिणे पार्श्वे त्रिशूलाङ्कं समुल्लिखेत्।
वृषा ह्यसीति मन्त्रेऽस्य चक्राङ्कमपि दर्शयेत्।
तन्त्रेण पश्चादयसा स्फोटौ तावेव कारयेत्॥
अथैनं कलसस्थाभिरद्भिरेको वृषेण वा।
सर्व्वौषधिसुगन्धीभिः स्नापयेद्वत्सिका अपि॥
परिधाप्याहते शुक्ले वाससी हेमपट्टकम्।
सत्यमिथ्याविवादेभ्यामभ्यां शिरसि न्यसेत्॥"
ततो वृषवत्सतरीणामलङ्कारादिकं दत्त्वा विल्ववकुलनिर्म्मितयूपे उपयूपे च बद्ध्वा एनं युवानं इति मन्त्रं पठित्वा वत्सतरीचतुष्टयसहितं वृषं तत्तत्फलकामी अद्येत्यादिवाक्येनोत्सृजेत्॥ * ॥ ततो यूपाद्विमुच्य वत्सतरीचतुष्टयसहितं वृषमैशान्यां चालयित्वा प्रार्थयेत्। यथा,—
"न खादेत् परशस्यानि नाक्रामेद्गर्भिणीञ्च गाम्।
धर्म्मोऽसि त्वं चतुष्पादश्चतस्रस्ते प्रियास्त्विमाः।
चतुर्णां पोषणार्थाय मयोत्सृष्टास्त्वया सह॥
देवानाञ्च पितॄणाञ्च मनुष्याणाञ्च योषितः।
भूतानां तृप्तिजननास्त्वया सार्द्धं व्रजन्त्विमाः॥
नमो ब्रह्मण्यदेवेश पितृभूतर्षिपोषक।
त्वयि मुक्तेऽथवा लोका मम सन्तु निरामयाः॥
मा मे ऋणोऽस्तु दैवोऽथ पैत्रो भौतोऽथ मानुषः।
धर्म्मस्त्वं त्वत्प्रपन्नस्य या गतिः सास्तु मे ध्रुवा॥
यत्किञ्चित् दुष्कृतं कर्म्म लोभमोहात् कृतं भवेत्।
तस्मादुद्धृत्य देवेश पितुः स्वर्गं प्रयच्छ मे॥
यावन्ति तव लोमानि शरीरे सम्भवन्ति च।
तावद्वर्षसहस्राणि स्वर्गे वासोऽस्तु मे पितुः॥"
इति मत्स्यपुराणोक्तं पठेत्। तत आचाराद्वृषपुच्छगलितोदकेन ब्रह्मपुराणोक्ततर्पणं कुर्य्यात् ततः प्रकृतदक्षिणां कृत्वा कर्म्मकारयितृभ्यो दक्षिणां दद्यात्। इति वृषोत्सर्गतत्त्वम्॥ * ॥
अपि च।
"कार्त्तिक्यां कारयेत् पूजां यागं देवीप्रियं सदा।
गोत्सर्गन्तु प्रकर्त्तव्यं नीलं वा वृषमुत्सृजेत्।
सर्व्वयज्ञफलं ब्रह्म प्राप्नुयादविचारयन्॥
मनुरुवाच।
अश्वमेधसमं पुण्यं वृषोत्सर्गादवाप्यते॥
रेवत्याश्विने माघि कार्त्तिक्यां कार्त्तिकस्य वा॥
गोविवाहोऽथवा कार्य्यो माघ्यां वै फाल्गुनेऽपि वा॥
शिवोमामङ्गलञ्चैव तृतीयायां महाफलम्।
अश्वत्थोदुम्बरीयागं विवाहविधिना भवेत्॥
सतोरणं भवेत्तीर्थे उत्सर्गो गोकुलेऽपि वा।
चतस्रो वत्सिका भद्रा द्वौ वा संभवतोऽपि वा॥
वत्सं सर्व्वाङ्गसंपूर्णं कन्या सा वत्सिका भवेत्।
अलंकृत्य यथाशोभमुत्सर्गं कारयेन्मुने॥
विवाहमेकवत्सीयनीलेन भवते सदा।
वृषेण अश्वमेधस्य यागस्य फलदायकम्॥
जायेरन् बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत्।
यजेद्वा अश्वमेधेन नीलं वा वृषमुत्सृजेत्॥
रोहितो यस्तु वर्णेन शुक्लवर्णखुरो वृषः।
लाङ्गूलशिरसश्चैव स वै नीलवृषः स्मृतः॥
अङ्कित्वोत्सृज्यते पूर्व्वं गात्रालंकृत्य सर्व्वतः।
तप्तेन वामतश्चक्रं याम्ये शूलं समालिखेत्॥
धातुना हेमताम्रेण आयसेनाथवाङ्कयेत्।
एवं कृत्वा अवाप्नोति फलं वाजिमखोदितम्॥
यस्तु द्विश्चोत्सृजेद्वत्सं स लभेताविचारणात्।
यथा शिवोमया अर्च्चा पूजिता सर्व्वकामदा।
एवं देवत्रयं यष्ट्वा अनन्तं लभते फलम्॥
मङ्गलाविहितं यच्च यच्च गोदानजं फलम्।
सहस्रकृतवत्तेन वृषोत्सर्गादवाप्नुयात्॥"
इति देवीपुराणे पूजाविधि नामाध्यायः॥

वृष्टिः, स्त्री, (वृष + क्तिन्।) मेघाम्बुविन्दुपतनम्। तत्पर्य्यायः। वर्षम् २। इत्यमरः। गोवृतम् ३ पराम्बृतम् ४ वर्षणम् ५। इति शब्दरत्नावली। तत्कारणं यथा,—
"अम्बुतादित्रये यत्र भवन्ति सर्व्वखेचराः।
तदा वृष्टिः क्रमाज्ज्ञेया पृथ्वीकेवसुवासरैः॥"
इति स्वरोदयः॥ * ॥
अपि च।
"शृणु परमार्थञ्च किमिन्द्राद्वृष्टिरेव च।
सूर्य्याद्धि जायते तोयं तस्मात् शस्यानि प्राणिनः॥
तेभ्योऽन्नानि फलान्येव तेभ्यो जीवन्ति जीविनः।
सूर्य्यग्रस्तञ्च नीरञ्च काले तस्मात् समुद्भवः।
सूर्य्यो मेघादयः सर्व्वे विधात्रा ते निरूपिताः॥
यत्राब्दे यो जलधरो गजश्च सागरो महत्।
शस्याधिपो नृपो मन्त्री विधात्रा ते निरूपिताः॥
चलाद्रकाणां शस्यानां तृणानाञ्च निरूपितम्।
अब्देऽब्देऽप्येव तत् सर्व्वं कल्पे कल्पे युगे युगे॥
हस्ती समुद्रादादाय करेण जलमीप्सितम्।
ददाति वाय तद्वायाहतेन प्रेरितो घनः।
स्थाने स्थाने पृथिव्याञ्च काले काले यथोचितम्॥
ईश्वरेच्छयाविर्भूतं तूर्णं भूतं प्रतिबन्धकम्।
भूतं भव्यं भविष्यच्च महत् क्षुद्रञ्च मध्यमम्।
धात्रा निरूपितं कर्म्म केन तात निवार्य्यते॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २१ अः॥
आसन्नवृष्टिसूचकानि यथा,—
"मयूराः स्वनयिन्नो शब्देन हर्षिता मुहुः।
केकायन्ति प्रतिवने सततं वृष्टिसूचकाः॥
मेघोत्सुकानां मधुरश्चातकानां मनोहरः।
श्रूयतामतिमत्तानां वृष्टिसन्निधिसूचकः॥
गगने शक्रचापेन कृतं साम्प्रतमाम्बरम्।
धारासारशरैस्तापं हेतुं प्रति यथोद्गतः॥"
इति कालिकापुराणे १५ अध्यायः॥ * ॥

वृष्टिफलं यथा,—
"पतिव्रताया वचनान्नोद्गच्छति दिवाकरः ।
सूर्य्योदयं विना नैव स्नानदानादिकाः क्रियाः ॥
नाग्नेर्व्विहरणञ्चैव क्रतुभावश्च लक्ष्यते ।
नैवाप्यायनमस्माकं विना होमेन जायते ॥
वयमाप्यायिता मर्त्त्यैर्यज्ञभागैर्यथोदितैः ।
वृष्ट्यादिनाशुगृह्णीमो मर्त्यान् शस्यादिसिद्धये ॥
निष्पादितास्वोषधीषु मर्त्या यज्ञैर्यजन्ति नः ।
एषां वयं प्रयच्छामः कामान् यज्ञादिपूजिताः ॥
अधो हि वर्षाम वयं मर्त्याश्चोर्द्ध्वप्रवर्षिणः ।
तोयवर्षेण हि वयं हविर्व्वर्षेण मानवाः ॥
येऽस्माकं न प्रयच्छन्ति नित्या नैमित्तिकीः
क्रियाः ।
क्रतुभागं दुरात्मानः स्वयं येऽश्नन्ति लोलुपाः ॥
विनाशाय वयं तेषां तोयसूर्य्याग्निमारुतैः ।
क्षितिञ्च संदूषयामः पापानामपकारिणाम् ॥
दुष्टतोयादिदोषेण तेषां दुष्कृतकारिणाम् ।
उपसर्गाः प्रवर्त्तन्ते मरणाय सुदारुणाः ॥
ये चास्मान् प्रीणयित्वा तु भुञ्जते शेषमात्मना ।
तेषां पुण्यानयं लोकान् वितरामो महा-
त्मनाम् ॥"
इति मार्कण्डेयपुराणे पतिव्रतामाहात्म्यनामा-
ध्यायः ॥ * ॥ वृष्टिजलगुणाः ।
"गगनाम्बु त्रिदोषघ्नं गृहीतं यत् सुभाजने ।
बल्यं रसायनं मेध्यं पात्रापेक्षि च तत्परम् ॥
दिवार्ककिरणैर्जुष्टं सृष्टमिन्दुकरैर्निशि ।
अरूक्षमनभिष्यन्दि तत्तुल्यं गगनाम्बुना ॥
वर्षासु चरन्ति घनैः सहोरगा विषति कीट-
लूताश्च ।
तद्विषजुष्टमपेयं खजलमगस्त्योदयात् पूर्व्वम् ॥
कालेन पक्वं निर्द्दोषमगस्त्येनाविषीकृतम् ।
हंसोदकमितिख्यातं शारदं विमलं जलम् ॥"
इति राजवल्लभः ॥ * ॥
अथ तस्य भेदाः ।
"पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति
द्विधा ।
दिव्यं चतुर्व्विधं प्रोक्तं धाराजं करकाभवम् ।
तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम् ॥" *
तत्र धारस्य लक्षणं गुणाश्च ।
"धाराभिः पतितं तोयं गृहीतं स्फीतवाससा ।
शिलायां वसुधायां वा धौतायां पतितं च यत् ॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्म्मिते ।
भाजने मृण्मये चापि स्थापितं धारमुच्यते ॥
धारनीरं त्रिदोषघ्नमनिर्द्देश्यं रसं लघु ।
सौम्यं रसायनं बल्यं तर्पणं ह्लादि जीवनम् ॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान् ।
तृष्णां हरति तत् पथ्यं विशेषात् प्रावृषि
स्मृतम् ॥" * ॥
अथ धाराजलस्य भेदौ ।
"धाराजलञ्च द्विविधं गाङ्गसामुद्रभेदतः ।"
तत्र गाङ्गसामुद्रयोर्लक्षणं गुणाश्च ।
"आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ।
मेघैरन्तरिता वृष्टीः कुर्व्वन्तीति वचः सताम् ॥
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः ।
सर्व्वथा तज्जलं देयं तथैव चरके वचः ॥
स्थापितं हैमने पात्रे राजते मृण्मयेऽपि वा ।
शाल्यन्नं येन संसिक्तं भवेदक्लेदिवर्णवत् ॥
तत् गाङ्गं सर्व्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ।
तत्तु सक्षारलवणं शुक्रदृष्टिबलापहम् ॥
विस्रञ्च दोषलं तीक्ष्णं सर्व्वकर्म्मसु गर्हितम् ।
सामुद्रं त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत् ॥
यतोऽगस्त्यस्य विप्रर्षेरुदयात् सकलं जलम् ।
निर्म्मलं निर्व्विषं स्वादु शुक्रलं स्याददोषलम् ॥" *
अपरञ्चाह ।
"कुत्कारविषवातेन नागानां व्योमचारिणाम् ।
वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना ॥"
इति भावप्रकाशः ॥

वृष्टिघ्नी, स्त्री, भृङ्गपर्णिका । इति शब्दचन्द्रिका ॥ गुजराटी एलाइच इति भाषा । वृष्टिनाशके, त्रि ॥

वृष्टिजीवनः, पुं, (वृष्ट्या वृष्टिर्वा जीवनं यस्मिन् ।) देवमातृकदेशः । इति हेमचन्द्रः ॥ वृष्टि-जीवने, त्रि ॥

वृष्टिभूः, पुं, (वृष्टौ वर्षाकाले भूरुत्पत्तिर्यस्य ।) भेकः । इति हारावली ॥ वृष्टिभवे, त्रि ॥

वृष्णिः, पुं, (वृष + "सृवृषिभ्यां कित् ।" उणा० ४ ४९ । इति निः । स च कित् ।) मेषः । इत्यमरः ॥ यादवः । इति शब्दरत्नावली ॥ (यथा, महा-भारते । ५ । ७२ ।४ ।
"यथा हि सर्व्वास्वापत्सु पासि वृष्णीनरिन्दम ।
तथा ते पाण्डवा रक्ष्याः पाहि अस्मान् महतो
भयात् ॥")
वृषभः । इति त्रिकाण्डशेषः ॥

वृष्णिः, त्रि, पाषण्डः । चण्डः । इति शब्दरत्ना-वली ॥

वृष्णिगर्भः, पुं, श्रीकृष्णः । इति हारावली ॥

वृष्यं, क्ली, (वृष + "विभाषा कृवृषोः ।" ३ । १ । १२० । इति क्यप् ।) वाजीकरम् । इति राज-निर्घण्टः ॥

वृष्यः, पुं, (वृषाय हितः । वृष + यत् ।) माषः । इति हेमचन्द्रः ॥

वृष्यः, त्रि, (वृषाय कामुकाय हितः । वृष + "खलयवमाषेति ।"५।१।७। इति यत् ।) शुक्र-वृद्धिकारकौषधादिः । इति भावप्रकाशः ॥

वृष्यकन्दा, स्त्री, (वृष्यं बलकारकं कन्दं यस्याः ।) विदारी । इति राजनिर्घण्टः ॥

वृष्यगन्धा, स्त्री, (वृष्यो गन्धो यस्याः ।) वृद्ध-दारकः । इति शब्दरत्नावली ॥

वृष्यगन्धिका, स्त्री, (वृष्यो गन्धो यस्याः । स्वार्थे कन् । टापि अत इत्वम् ।) अतिबला । इति राजनिर्घण्टः ॥

वृष्यवल्लिका, स्त्री, विदारी । इति राजनिर्घण्टः ॥

वृष्या, स्त्री, ऋद्धिनामौषधम् । इति रत्नमाला ॥ शतावरी । आमलकी । इति राजनिर्घण्टः ॥

वृह, वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) वर्हति । शृहिर्ध्वनिवृद्ध्योरित्यने-नैवेष्टसिद्धेऽस्य पाठो वृद्धौ इरन्तत्वफलार्थः । किन्तु अनेनैवेष्टसिद्धे तत्र वृद्धि ग्रहणं परत्रा-नुवृत्त्यर्थमेव । अयं धातुः कैश्चिन्न मन्यते । इति दुर्गादासः ॥

वृह, इ ध्वने । वृद्धौ । सप्तमस्वरी ॥ (भ्वा०-पर०-अक०-सेट् ।) इ, वृंह्यते । वबृंहिरे गजपतयः । इति माघः ॥ आत्मनेपदं प्रमादादिति वल्लभः ॥ ध्वनयेति हलिकर्तृकः । वृंहितं करिगर्जित-मित्यमरसिंहात् । वृंहितं करिगर्जायां शब्द-मात्रेऽपि कथ्यते । इति शब्दमहार्णवात् । कदाचिदन्यकर्तृकोऽपि । तेन श्रीहर्षचरिते सिंहवृंहितमिति वाणभट्टप्रयोगः । इति दुर्गा-दासः ॥

वृह, इ कि त्विषि । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-अक०-सेट् ।) सप्तमस्वरी । इ, वृंह्यते । कि, वृंहयति वृंहति । इति दुर्गादासः ॥

वृह, इ ङ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) इ, वृंह्यते । ङ, वृंहते । इति दुर्गादासः ॥

वृह, इर् ध्वने । वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) इर्, अवृहत् । अवर्हीत् । ध्वनः शब्दः । वृद्धिर्व्वृद्धिः । इति दुर्गादासः ॥

वृह, श ऊ उद्यमे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-वेट् ।) श, वृहति । ऊ, अवर्हीत् । अवृक्षत् । इति दुर्गादासः ॥

वृ(बृ)हच्चञ्चुः, पुं. (वृहती चञ्चुः शाकविशेषः ।) महाचञ्चुशाकः । इति राजनिर्घण्टः ॥ (वृहती चञ्चुर्यस्येति दीर्घचञ्चुयुक्ते, त्रि ॥)

वृ(बृ)हच्चित्तः, पुं, जम्बीरः । इति शब्दचन्द्रिका ॥

वृ(बृ)हच्छल्कः,पुं, (वृहत् शल्को यस्य ।) चिङ्गट-मत्स्यः । इति जटाधरः ॥

वृ(बृ)हज्जीवन्ती, स्त्री, वृहज्जीवन्तिकावृक्षः । तत्पर्य्यायः । पत्रभद्रा २ प्रियङ्करी ३ मधुरा ४ जीवपुष्टा ५ वृहज्जीवा ६ यशस्करी ७ । अस्या गुणाः । बहुवीर्य्यदातृत्वम् । भूतविद्रावणत्वम् । वेगाद्रसनियामकत्वञ्च । इति राजनिर्घण्टः ॥

वृ(बृ)हड्ढक्का, स्त्री, (वृहती ढक्का ।) ढक्का-विशेषः । यथा,—
"वृहड्ढक्का तु भेरी स्त्री पुमान् दुन्दुभिरा-
नकः ।
डगड़ः प्रतिपत्तूर्य्यमानकः पटहोऽस्त्रियाम् ॥"
इति जटाधरः ॥

वृ(बृ)हतिका, स्त्री, (वृहती + "इवप्रतिकृतौ" ... "इवेप्रतिकृतौ" । ५ । ३ ।९६। इति स्वार्थे कन् ।) उत्तरीय-वस्त्रम् । इत्यमरः ॥ वृहती । इति रत्नमाला ॥

वृ(बृ)हती, स्त्री, (वृहत् + गौरादित्वात् ङीष् ।) क्षुद्रवार्त्ताकी । व्याकुड़ इति भाषा । तत्पर्य्यायः । महती २ कान्ता ३ वार्त्ताकी ४ सिंहिका ५

कुली ६ राष्ट्रिका ७ स्थूलकण्टा ८ भण्टाकी ९ महोटिका १० बहुपर्णी ११ कण्टतनुः १२ कण्टालुः १३ कटुफला १४ डोरली १५ वनवृन्ताकी १६। इति राजनिर्घण्टः॥ सिंही १७ प्रसहा १८ रक्तपाकी १९ लतावृहतिका २०। इति रत्नमाला॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातज्वरारोचकामकासश्वासहृद्रोगनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"बृहती पाचनी सोष्णा ग्राहिणी वात-
नाशिनी॥"

इति राजवल्लभः॥ *॥

महती। इत्यमरः॥ (इयन्तु नारदस्य वीणा। केचित्तु विश्वावसोर्गन्धर्व्वराजस्य वीणां बृहतीमाहुः। तथा च।

"विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी॥"

इति माघटीकायां मल्लिनाथधृतवैजयन्ती। १।१०॥ *॥) उत्तरीयवस्त्रम्। वारिधानी। वाक्॥ कण्टकारी। इति मेदिनी॥ (मर्म्मस्थानविशेषः। यथा, सुश्रुते। ३।६।

"स्तनमूलादुभयतः पृष्ठवंशस्य बृहती नाम तत्र शोणितातिप्रवृत्तिनिवृत्तिनिमित्तैरुपद्रवैर्म्रियते॥") छन्दोभेदः। स तु नवाक्षरपादः। यथा,—

"उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपू-
र्व्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च॥"

इत्यादि। तद्भेदानाह। बृहती नवाक्षरा यथा, भुजगशिशुसृता नौ मः।

हृदतटनिकटक्षोणी भुजगशिशुसृता यासीत्।
मुररिपुदलिते नागे व्रजजनसुखदा साभूत्॥

पुनेत्येवं शम्भुप्रभृतिषु पाठः। भूतेत्येवमाधुनिकाः पठन्ति। स्वाम्बुमध्यं चेद्गमथाः। कालियभोगा भोगगतस्तम्बिमध्यस्फीतरुचा।
चित्रपदा भो नन्दसुतस्याव नगर्त्तेऽरसुखः॥
नगरैर्भुजङ्गसङ्गता।
तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता।
कथमेतु वत्सचारकश्चपलः सदैव तां हरिः॥"

इति छन्दोमञ्जरी॥

बृ(व)हतीपतिः, पुं, (बृहतीनां वाचां पतिः।) बृहस्पतिः। इति हेमचन्द्रः॥

बृ(व)हत्, त्रि, (बृह वृद्धौ + "वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च।" उणा० २।८४। इति अतिप्रत्ययेन निपातनात् साधु।) महत्। इत्यमरः॥ (यथा, माघे। २। १०।

"बृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति।
संभूयाम्भोधिमभ्येति महानद्या नगापगा॥")

बृ(व)हत्कः, त्रि, (बृहत्प्रकारः। बृहत् + "चञ्चद्बृहतोरुपसंख्यानम्।" ५।४।३। इत्यस्य वार्त्तिकोक्त्या कन्।) बृहत्। बृहच्छब्दात् कन्प्रत्ययेन निष्पन्नमिदम्॥

बृ(व)हत्कन्दः, पुं, (बृहत् कन्दं यस्य।) गृञ्जनः। इति रत्नमाला॥ विष्णुकन्दः। इति राजनिर्घण्टः॥

बृ(व)हत्कालशाकः, पुं, (बृहन् महान् कालशाकः।) शोथजित्। इति त्रिकाण्डशेषः॥ बृहत्कालकासुन्दिया इति भाषा॥

बृ(व)हत्काशः, पुं, (बृहन् काशः।) खड्गटः। इति हारावली॥ खागड़ा इति भाषा॥

बृ(व)हत्कुक्षिः, त्रि, (बृहन् कुक्षिर्यस्य।) तुन्दिलः। इत्यमरः॥

बृ(व)हत्तालः, पुं, (बृहन् तालः।) हिन्तालः। इति राजनिर्घण्टः॥

बृ(व)हत्तिक्ता, स्त्री, (बृहन् तिक्तो यस्याः।) पाठा। इति राजनिर्घण्टः॥

बृ(व)हत्तृणः, पुं, वंशः। इति शब्दचन्द्रिका॥ (क्वचित् क्लीवेऽपि दृश्यते॥)

बृ(व)हत्त्वक्, [च्] पुं. (बृहती त्वक् यस्य।) सप्तच्छदवृक्षः। इति रत्नमाला॥ छातियान् इति भाषा॥

बृ(व)हत्पत्रः, पुं, (बृहत्पत्रं यस्य।) हस्तिकन्दः। इति राजनिर्घण्टः॥

बृ(व)हत्पत्रा, स्त्री, (बृहत्पत्रं यस्याः।) त्रिपर्णिका। इति राजनिर्घण्टः॥

बृ(व)हत्पाटलिः, पुं, धुस्तूरः। इति त्रिकाण्डशेषः॥

बृ(व)हत्पादः पुं. (बृहन् पादो यस्य।) वटवृक्षः। इति शब्दचन्द्रिका॥

बृ(व)हत्पारेवतं, क्ली, (बृहत् महत् पारेवतम्।) महापारेवतम्। इति राजनिर्घण्टः॥

बृ(व)हत्पाली, [न्] पुं, वनजीरः। इति राजनिर्घण्टः॥

बृ(व)हत्पीलुः, पुं, (बृहन् पीलुः।) महापीलुः। इति राजनिर्घण्टः॥

बृ(व)हत्पुष्पी, स्त्री, (बृहत् पुष्पं यस्याः। ङीष्।) घण्टारवा। इति जटाधरः॥

बृ(व)हत्फलः, पुं, (बृहत् फलं यस्य।) चचेण्डा। इति राजनिर्घण्टः॥

बृ(व)हत्फला, स्त्री, (बृहत् फलं यस्याः।) कटुतुम्बी। महेन्द्रवारुणी। कुष्माण्डी। महाजम्बूः। इति राजनिर्घण्टः॥

बृ(व)हदङ्गः, पुं, (बृहदङ्गं यस्य।) मतङ्गजः। इति शब्दचन्द्रिका॥

बृ(व)हदम्लः, पुं, (बृहन् अम्लो यस्य।) कर्म्मरङ्गः। इति शब्दचन्द्रिका॥ कामराङ्गा इति भाषा॥

बृ(व)हदेला, स्त्री, (बृहती एला।) स्थूलैला। इति राजनिर्घण्टः॥

बृ(व)हद्गृहः, पुं, (बृहद्गृहं यस्मिन्।) कारूषदेशः। स तु विन्ध्यपर्व्वतस्य पश्चात् मालवदेशस्य निकटे वर्त्तते। इति हेमचन्द्रः॥ त्रिकाण्डशेषे बृहद्गृह इति पाठः॥

बृ(व)हद्गोलं, क्ली, (बृहत् गोलं गोलाकारफलं यस्य।) शीर्णवृन्तम्। इति शब्दचन्द्रिका॥ तरमुज इति भाषा॥

बृ(व)हद्दलः, पुं, (बृहद्दलं यस्य।) पट्टिकालोध्रः। हिन्तालः। इति राजनिर्घण्टः॥

बृ(व)हद्धलं, क्ली, (बृहत् हलं यस्य।) महालाङ्गलम्। तत्पर्य्यायः। हलिः २। इति त्रिकाण्डशेषः॥

बृ(व)हद्बीजः, पुं, (बृहत् बीजं यस्य।) आम्रातकः। इति शब्दचन्द्रिका॥

बृ(व)हद्भट्टारिका, स्त्री, दुर्गा। इति शब्दमाला॥

बृ(व)हद्भानुः पुं, (बृहन् भानू रश्मिर्यस्य।) अग्निः। (यथा, महाभारते। ३। २२०। ८।

"तपसश्च मनुं पुत्त्रं भानुञ्चाप्यङ्गिराः सृजत्।
बृहद्भानुन्तु तं प्राहुर्ब्राह्मणा वेदपारगाः॥")

चित्रकवृक्षः। इत्यमरः॥ (सत्यभामापुत्त्रः। यथा, भागवते। १०। ६१। १०।

"चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः॥"

सत्रायणपुत्त्रः। यथा, भागवते। ८।१३।३५।

"सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः॥"

पृथुलाक्षस्य पुत्त्रः। यथा, भागवते। ९।२३।११।

"चतुरङ्गो रोमपादात् पृथुलाक्षस्य तत्सुतः।
बृहद्रथो बृहत्कर्म्मा बृहद्भानुश्च तत्सुताः॥"

बृहद्रश्मिविशिष्टे, त्रि। यथा, ऋग्वेदे। १। ३६। १५।

"बृहद्भानो यविष्ठ्य॥"

"हे अग्ने हे बृहद्भानो बृहन्तो भानवो यस्य तादृश।" इति तद्भाष्ये सायणः॥)

बृ(व)हद्रथः, पुं, (बृहन् रथो यस्य।) इन्द्रः। यज्ञपात्रम्। मन्त्रविशेषः। सामवेदांशः। नदीविशेषे, स्त्री। इति केचित्॥ (तिग्मपुत्त्रः। यथा, मात्स्ये। ५०। ८५।

"तिग्माद्बृहद्रथो भाव्यो वसुदामा बृहद्रथात्॥"

शतधन्वपुत्त्रः। यथा, भागवते। १२।१।१३।

"शतधन्वा ततस्तस्य भविता तद्बृहद्रथः॥"

देवरातपुत्त्रः। यथा, भागवते। ९। १२। १५।

"तस्माद्बृहद्रथस्तस्य माहावीर्य्यः सुधृतिपिता॥"

तिमिराजपुत्त्रः। यथा, तत्रैव। ९।२२। ४३।

"तिमेर्बृहद्रथस्तस्मात् शतानीकः सुदासजः॥"

पृथुलाक्षस्य पुत्त्रः। यथा, तत्रैव। ९।२३।११।

"बृहद्रथो बृहत्कर्म्मा बृहद्भानुश्च तत्सुताः॥"

प्रभूतरथे, त्रि। यथा, ऋग्वेदे। ५। ८०। २।

"बृहद्रथा बृहती विश्वमिन्वा।"

"बृहद्रथा प्रभूतरथा।" इति तद्भाष्ये सायणः॥)

बृ(व)हद्रावी, [न्] पुं, (बृहद्रतिशयं द्रवतीति। द्रु + णिनिः।) क्षुद्रोलूकः। इति राजनिर्घण्टः॥

बृ(व)हद्वल्कः, पुं, (बृहद्वल्कः वल्कलं यस्य।) पट्टिकालोध्रः। इति राजवल्लभः॥

बृ(व)हद्वातः, पुं, (बृहन् वातो यस्मात्।) श्यामशीरहरः। इति रत्नमाला॥ देधान इति भाषा॥

बृ(व)हद्वारुणी, स्त्री, महेन्द्रवारुणी। इति राजनिर्घण्टः॥

बृ(व)हन्नलः, पुं, (बृहन् नलः।) महापोटगलः। इति मेदिनी॥ अर्ज्जुनः। यथा,—

"पार्थः किरीटी गाण्डीवी गुडाकेशो बृहन्नलः।
अर्ज्जुनः फाल्गुनो जिष्णुर्विजयश्च धनञ्जयः॥

सव्यसाची सुभद्रेशः शब्दभेदी कपिध्वजः ।
पार्थान्नश्चापि वीभत्सुः ॥" इति त्रिकाण्डशेषः ॥

अपि च ।
"अर्ज्जुनः फाल्गुनः पार्थः सव्यसाची धनञ्जयः ।
राधावेधी किरीटीन्द्री जिष्णुः श्वेतहयो नरः ॥
बृहन्नलो गुडाकेशः सुभद्रेशः कपिध्वजः ।
वीभत्सुः कर्णजित्तस्य गाण्डीवं गाण्डिवं धनुः ॥"
इति हेमचन्द्रः ॥

बृहन्नला, स्त्री, अर्ज्जुनः । इति मेदिनी ॥ द्वादशवर्ष-वनवासानन्तरमज्ञातवासे विराटभवने विराट-कन्यायाः नृत्यगीतादिशिक्षार्थं स्त्रीक्लीववेशे-नार्ज्जुनो बृहन्नलेति नाम्ना ख्यातोऽभूत् । यथा,

अर्ज्जुन उवाच ।
"गायामि नृत्याम्यथ वादयामि
भद्रोऽस्मि नृत्ये कुशलोऽस्मि गीते ।
त्वमुत्तरायै प्रदिशस्व मां स्वयं
भवामि देव्या नरदेव ! नर्त्तकः ॥
इदन्तु रूपं मम येन किन्तव
प्रकीर्त्तयित्वा भृशशोकवर्द्धनम् ।
बृहन्नलां मां नरदेव विद्धि
सुतं सुतां वा पितृमातृवर्जिताम् ॥
विराट उवाच ।
ददामि ते हन्त वरं बृहन्नले
सुताञ्च मे नर्त्तय याश्च तादृशीः ॥"
इति महाभारते विराटपर्व्व ॥

बृ(ह)हस्पतिः, पुं, (बृहतां वाचां पतिः । "पारस्करेति ।" ६ । १ । १५७ । इति सुट् निपात्यते ।) अङ्गिरसः पुत्त्रः । स च देवानां गुरुः धर्म्मशास्त्र-प्रयोजकः नवग्रहमध्ये पञ्चमग्रहश्च । तत्-पर्य्यायः । सुराचार्य्यः २ गीष्पतिः ३ धिषणः ४ गुरुः ५ जीवः ६ आङ्गिरसः ७ वाचस्पतिः ८ चित्रशिखण्डिजः ९ । इत्यमरः ॥ उतथ्यानुजः १० गोविन्दः ११ चारुः १२ द्वादशार्च्चिः १३ गिरीशः १४ दिदिवः १५ पूर्व्वफल्गुनीभवः १६ । इति जटाधरः ॥ सुरगुरुः १७ वाक्पतिः १८ वचसाम्पतिः १९ इन्द्रेज्यः २० देवेज्यः २१ बृहताम्पतिः २२ इज्यः २३ वागीशः २४ पचाः २५ दीदिविः २६ द्वादशकरः २७ प्राक्फाल्गुनः २८ गीरथः २९ । इति शब्दरत्नावली ॥ स च पीतवर्णः । ईशान-कोणपुरुषमाणवजातिऋग्वेदसत्त्वगुण-मधुर-रसधनुर्मीनराशिपुष्यनक्षत्रपुष्परागमणि-सिन्धुदेशानां अधिपतिः । षडङ्गुलशरीरः । पद्मस्थः । चतुर्भुजः । अक्षवरकमण्डलुदण्डधारी । अस्याधिदेवता ब्रह्मा । प्रत्यधिदेवता इन्द्रः । स तु सूर्य्यास्यः । अङ्गिरोमुनिपुत्त्रः । प्रातःकाले प्रबलः । शुभग्रहः । देवग्रहस्वामी । वृद्धः । रक्तद्रव्यस्वामी । वातपित्तकफात्मकः । वणिक्-कर्म्मकर्त्ता । अङ्गिरोगोत्रः । इति ग्रहयाग-तत्त्वादयः ॥ * ॥ तद्वारजातफलम् ।
"नृपेन्द्रमन्त्री नृपलब्धकामो
विद्याविनोदी चतुरः प्रगल्भः ।
आचार्य्यपूज्यो मधुरस्वभावो
वारे भवेद्देवगुरोर्मनुष्यः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥

स च शिवस्य गुरुपुत्त्रः यथा,—
महेन्द्र उवाच ।
"कथं वा देवकर्त्तुश्च सिद्धानां योगिनां गुरोः ।
मृत्युञ्जयस्य शम्भोश्च गुरुपुत्त्रो बृहस्पतिः ।
ततो ज्ञानी महादेवः कथं शिष्यो गुरोः पितुः ॥
ब्रह्मोवाच ।
कथेयमतिगुप्ता च पुराणेषु पुरन्दर ।
इमां पुरा प्रवृत्तिञ्च कथयामि निशामय ॥
मृतवत्सा कर्म्मदोषाद्भार्य्या अङ्गिरसः पुरा ।
व्रतं चकार मद्वाक्यात् कृष्णस्य परमात्मनः ॥
व्रतं पुंसवनं नाम वर्षैकं चकार सा ।
सनत्कुमारो भगवान् कारयामास तां व्रतम् ॥
स्वेच्छामयः परं ब्रह्म भक्तानुग्रहविग्रहः ।
तदागत्य च गोलोकात् परमात्मा कृपामयः ॥
स व्रतानशनक्षीणां तामुवाच कृपानिधिः ।
प्रणतां साश्रुनेत्राञ्च विनीताञ्च तया स्तुतः ॥
श्रीकृष्ण उवाच ।
गृहाणेदं यज्ञफलं मम तेजःसमन्वितम् ।
सुहृत् मद्वरपुत्त्रस्ते भविष्यति मदंशतः ॥
पतिर्गुरुश्च देवानां बृहतां ज्ञानिनां वरः ।
पुत्त्रस्ते भविता साध्वि ! मद्वरेण भविष्यति ॥
मद्वरेण भवेद्यो हि स च मद्वरपुत्त्रकः ।
त्वद्गर्भे मम पुत्त्रोऽयं चिरजीवी भविष्यति ॥
वरजो वीर्य्यजश्चैव क्षेत्रजः पालकस्तथा ।
विद्यामन्त्रसुतानाञ्च गृहीतः सप्तमः सुतः ॥
इत्युक्त्वा राधिकानाथः स्वलोकञ्च ययौ पुरा ।
श्रीकृष्णवरपुत्त्रोऽयं ज्ञानी सुरगुरुः स्वयम् ।
मृत्युञ्जयं महाज्ञानं शिवाय प्रददौ पुरा ।
दिव्यं वर्षत्रिलक्षञ्च तपःकर्म्मे हिमालये ॥
सुयोगज्ञानममलं तेजः स्वात्मा समं परम् ।
स्वशक्तिविष्णुमायाञ्च स्वांशञ्च वाहनं वृषम् ॥
स्वशूलञ्च स्वकवचं स्वमन्त्रं द्वादशाक्षरम् ।
कृपामयः स्तुतस्तेन श्रीकृष्णश्च परात्परः ॥
शिवलोके शिवा या च विष्णुमाया शिव-प्रिया ।
शक्तिर्नारायणस्येयं तेन नारायणी स्मृता ॥
तेजःसु सर्व्वदेवानां साविर्भूता सनातनी ।
जघान दैत्यनिकरं देवेभ्यः प्रददौ पदम् ॥
कल्पान्ते दक्षकन्या च सा मूलप्रकृतिः सती ।
पितृयज्ञे तनुं त्यक्त्वा योगेन सिद्धयोगिनी ॥
बभूव शैलकन्या सा साध्वी च भर्तृनिन्दया ।
कालेन कृष्णतपसा शङ्करं प्राप शङ्करी ॥
श्रीकृष्णो हि गुरुः शम्भोः परमात्मा परात्परः ।
कृष्णस्य वरपुत्त्रोऽयं स्वयमेव बृहस्पतिः ।
अतो हेतोः सुरगुरुर्गुरुपुत्त्रः शिवस्य च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥

(पुरोहितः । मन्त्रपालके तु त्रि । यथा, ऋग्वेदे । ४ । ५० । ७ ।
"बृहस्पतिं यः सुभृतं बिभर्त्ति ॥"
"बृहस्पतिं बृहतां महतां मन्त्राणां पालयितारं देवं उक्तलक्षणं पुरोहितं वा ।" इति तद्भाष्ये सायणः ॥)

बृ(ह)हस्पतिचक्रं, क्ली, (बृहस्पतेः चक्रम् ।) नृणां शुभाशुभज्ञानार्थं बृहस्पतिसञ्चारकालीन-अश्विन्यादिसप्तविंशतिनक्षत्रयुक्तनराकारचक्रम् । यथा,—
"शीर्षे चत्वारि राज्यं जलधिरपि करे दक्षिणे चापि सौख्यं
चैकं कण्ठे विभूतिं मदनशरमितं वक्षसि प्रीतिसंघम् ।
पादस्थाः षट् च पीडां पुनरपि जलधिर्वामहस्ते च मृत्युं
नेत्रे त्रीणि प्रदद्युः सुखमथ निजभे वाक्पतेः संक्रमर्क्षात् ॥"
इति ज्योतिस्तत्त्वम् ॥

वृ, गि ञ वृत्याम् । इति कविकल्पद्रुमः ॥ (क्र्या०-उभ०-सक०-सेट् ।) गि, ञ, वृणाति वृणीते । वूर्णः । वूर्णिः । इति दुर्गादासः ॥

वे, ऐ ञ स्यूतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) स्यूतिस्तन्तुसन्तानम् । ऐ, वयात् । ञ, वयति वयते तन्त्रं तन्त्रवायः । इति दुर्गादासः ॥

वेकटः, पुं, वैकटिकः । मत्स्यभेदः । भेट्की इति भाषा । युवा । इति मेदिनी ॥ विदूषकः । इति शब्दरत्नावली ॥ तत्र पवर्गीयबकारादौ लिखितः ॥

वेगः, पुं, (विज + घञ् ।) प्रवाहः । तत्पर्य्यायः ओघः २ वेणी ३ धारा ४ । इति हेमचन्द्रः ॥ जवः । तत्पर्य्यायः । रंहः २ तरः ३ रयः ४ स्यदः ५ । इत्यमरः ॥ (यथा, मनौ । ५ । १०८ ।
"मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति ॥")
महाकालफलम् । इति मेदिनी ॥ रेतः । इति हेमचन्द्रः ॥ मूत्रविष्ठादिनिर्गमप्रवृत्तिः । इति भरतः ॥ संस्कारविशेषः । यथा,—
"स्पर्शादयोऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः ।
अष्टौ स्पर्शादयो रूपं द्रवो वेगश्च तेजसः ।
स्पर्शादयोऽष्टौ वेगश्च द्रवत्वञ्च गुरुत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्द्दश ॥"
इति भाषापरिच्छेदः ॥ * ॥
(यथा, भागवते । ७ । ८ । २५ ।
"ततोऽभिपद्याभ्यहनन्महासुरो
रुषा नृसिंहं गदयोरुवेगया ॥")
वेगधारणनिषेधो यथा,—
"वेगरोधो न कर्त्तव्यश्चान्यत्र क्रोधवेगतः ॥"
इति आह्निकतत्त्वधृतविष्णुधर्म्मोत्तरवचनम् ॥
अपि च ।
"स्वभावतः प्रवृत्तानां मलादीनां जिजीविषुः ।
न वेगान्धारयेद्धीरः कामादीनाञ्च धारयेत् ॥"
इति राजवल्लभः ॥

वेगनाशनः, पुं, (वेगस्य नाशनं येन ।) श्लेष्मा । इति शब्दरत्नावली ॥

वेगसरः, पुं, (वेगेन सरति गच्छतीति । सृ + अच् ।) वेगगामिहयः । तत्पर्य्यायः । वेसरः २ अश्वतरः ३ । इति हेमचन्द्रः ॥

वेगितः, त्रि, (वेगः सञ्जातोऽस्य । तारकादित्वादितच् ।) वेगविशिष्टः । यथा, आयुर्व्वेदीये ।
"न वेगितोऽन्यसिद्धिः स्यात् नाजित्वा साध्यमामयम् ॥"
इत्याह्निकतत्त्वम् ॥

वेगिहरिणः, पुं, (वेगी वेगवान् हरिणः ।) श्रीकारी मृगः । इति राजनिर्घण्टः ॥

वेगी, [न्] त्रि, (वेगोऽस्यास्तीति । वेग + इनिः ।) वेगवान् । तत्पर्य्यायः । जङ्घाकारिकः २ जाङ्घिकः ३ तरस्वी ४ त्वरितः ५ प्रजवी ६ जवनः ७ जवः ८ । इत्यमरः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । २० । १४ ।
"अश्वाश्च वेगिनः सन्ति रथा वायुजवा मम ॥")
श्येनपक्षी । इति राजनिर्घण्टः ॥

वेचा, स्त्री, (विच पृथग्भावे + अच् । टाप् ।) मूल्यम् । विचिर्लिधौ ञ पृथक्त्वे इत्यस्मात् अन् तत आप् । यथा । वेचा मूल्यञ्च वेतनम् । इति हलायुधः ॥

वेजानी, स्त्री, (विज + अच् । तमानयतीति । आ + नी + डः । गौरादित्वात् ङीष् ।) सोमराजी । इति शब्दचन्द्रिका ॥

वेडं, क्ली, (विड + अच् ।) सान्द्रविच्छिन्नचन्दनम् । इति राजनिर्घण्टः ॥

वेडा, स्त्री, (वेड + टाप् ।) नौका । इति हेमचन्द्रः ॥ वेडीति क्वचित् पाठः ॥

वेढमिका, स्त्री, रोटिकाविशेषः । यथा,—
"माषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः ।
रचिता रोटिका सैव प्रोक्ता वेढमिका बुधैः ॥
भवेद्वेढमिका बल्या वृष्या रुच्यानिलापहा ।
उष्णा संतर्पणी गुर्व्वी बृंहणी शुक्रला परम् ॥
भिन्नमूत्रमलास्तन्यमेदःपित्तकफप्रदा ।
गुदकीलार्दितश्वासयकृच्छूलानि नाशयेत् ॥"
इति भावप्रकाशः ॥

वेण, ऋ ञ निशामने । वादित्रादानगमनज्ञानचिन्तासु । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अविवेणत् । ञ, वेणति वेणते । निशामनं चाक्षुषज्ञानम् । वादित्रं मुरजादि तस्यादानं वादित्रादानम् । वादित्रं वादित्रविषयक्रिया इत्येकोऽर्थः इत्यन्ये । इति दुर्गादासः ॥

वेणः, पुं, (वेण + अच् ।) वर्णसङ्करजातिविशेषः । स तु अम्बष्ठ्यां वैदेहकाज्जातः । यथा,—
"वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥"
इति मानवे । १० । १९ ।
त्रेतायुगीयसूर्य्यवंशीयचतुर्थनृपः । स तु पृथुराजपिता । यथा, विष्णुपुराणे ।
"सत्पुत्त्रेण तु जातेन वेणोऽपि त्रिदिवं ययौ ।
पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना ॥"
तेन सुपुत्त्रेण मृतवेणदक्षिणहस्तमन्थनजातेन पृथुना । इति शुद्धितत्त्वम् ॥

वेणिः, स्त्री, (वी + "वीज्याज्वरिभ्यो निः ।" उणा० ४ । ४८ । इति निः । पृषोदरादित्वात् णत्वम् ।) प्रोषितभर्त्तृकादिधार्य्यकेशरचनाविशेषः । इति भरतः ॥ विरहिस्त्रीबद्धकचः । इति जटाधरः ॥ (यथा, माघे । १४ । ३० ।
"तत्र नित्यविहितोपहूतिषु
प्रोषितेषु पतिषु द्युयोषिताम् ।
गुम्फिताः शिरसि वेणयोऽभव-
न्न प्रफुल्लसुरपादपस्रजः ॥")
तत्पर्य्यायः । प्रवेणिः २ । इत्यमरः ॥ वेणी ३ प्रवेणी ४ । इति भरतः ॥ वेणिका ५ । इति शब्दमाला ॥ जलसमूहः । इति जटाधरः ॥ यथा । प्रयागे गङ्गायमुनासरस्वतीमेलनं त्रिवेणी ॥

वेणिका, स्त्री, (वेणि + कन् । टाप् ।) केशबन्धनविशेषः । इति शब्दमाला ॥

वेणिवेधनी, स्त्री, जलौका । इति त्रिकाण्डशेषः ॥

वेणिमाधवः, पुं, प्रयागस्थपाषाणमयचतुर्भुजदेवताविशेषः । इति लोकप्रसिद्धः ॥

वेणी, स्त्री, (वेणि + वा ङीष् ।) प्रवेणी । चुलेर विउनी इति भाषा । इति भरतः ॥ तत्पर्य्यायो वेणिशब्दे द्रष्टव्यः । (यथा, कुमारे । २ । ६१ ।
"तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्य्यविभूतिभिः ॥")
देवताडवृक्षः । इत्यमरः ॥ मेषी । प्रवाहः । इति हेमचन्द्रः ॥ नदीविशेषः । इति मेदिनी ॥ तस्या उत्पत्तिर्यथा,—

पृथुरुवाच ।
"कृष्णावेण्योस्तटाद्यस्याश्छिवविष्णुगणैः पुरा ।
वणिक्शरीरात् कलहा निरस्ता कथिता त्वया ॥
प्रभावस्तु तयोर्नद्योः किं वा चैतस्य तस्य वा ।
तन्मे कथय सर्व्वज्ञ ! विस्मयोऽत्र महान् मम ॥

नारद उवाच ।
कृष्णा कृष्णतनुः साक्षाद्वेणी साक्षान्महेश्वरः ।
तत्सङ्गमप्रभावन्तु नालं वक्तुं चतुर्म्मुखः ॥
तथापि तत्समुत्पत्तिं कीर्त्तयिष्यामि ते शृणु ।
चाक्षुषस्यान्तरे पूर्व्वं मनोर्देवपितामहः ॥
स सह्यगिरिशिखरे रम्ये यजनायोद्यतोऽभवत् ।
स कृत्वा यज्ञसम्भारान् सर्व्वदेवगणैर्वृतः ॥
युक्तो हरिहराभ्यां हि तद्गिरेः शिखरं ययौ ।
भृग्वादयो मुनिगणा मुहूर्त्ते ब्रह्मदैवते ॥
तस्य दीक्षाविधानाय समाजं चक्रुरादृताः ।
अथ ज्येष्ठां स्वरां पत्नीमाहूयाचक्रुरीश्वराः ॥
सा शनैराययौ तावत् भृगुर्विष्णुमुवाच ह ॥

भृगुरुवाच ।
विष्णो स्वरा त्वयाहूता साद्यायाति न हि त्वरम् ।
मुहूर्त्तातिक्रमे चैव कार्य्यो दीक्षाविधिः कथम् ॥

विष्णुरुवाच ।
नायाति चेत् स्वरा शीघ्रं गायत्र्यात्र विधीयताम् ।
एषापि न भवेदस्य भार्य्या किं पुण्यकर्म्मणि ॥

नारद उवाच ।
एवमेव हि रुद्रोऽपि विष्णुवाक्यममन्यत ।
तच्छ्रुत्वा स भृगुर्व्वाक्यं गायत्रीं ब्रह्मणस्तदा ॥
निवेश्य दक्षिणे भागे दीक्षाविधिमथाकरोत् ।
यावद्दीक्षाविधिं तस्य विधिचक्रुर्मुनीश्वराः ॥
तावदभ्याययौ तत्र स्वरा यज्ञस्थले नृप ।
ततस्तां दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह ।
सपत्नीं सा परा क्रोधात् स्वरा वचनमब्रवीत् ॥

स्वरोवाच ।
अपूज्या यत्र पूज्यन्ते पूज्यानाञ्च व्यतिक्रमः ।
त्रीणि तत्र भविष्यन्ति दुर्भिक्षं मरणं भयम् ॥
मदासने कनिष्ठेयं भवद्भिः सन्निवेशिता ।
तस्मात् सर्व्वे जडीभूता नदीरूपा हि निश्चितम् ॥
इयञ्च दक्षिणे भागे ह्युपविष्टा मदासने ।
तस्माल्लोके सदादृश्या तनुरूपास्तु निम्नगा ॥

नारद उवाच ।
ततस्तच्छापमाकर्ण्य गायत्री कम्पिताधरा ।
समुत्थायाशपद्देवीर्थमाशापि तां स्वराम् ॥

गायत्र्युवाच ।
तव भर्त्ता यथा ब्रह्मा ममाप्येष तथा खलु ।
वृथा शपसि यस्मात्त्वं भव त्वमपि निम्नगा ॥

नारद उवाच ।
ततो हाहाकृताः सर्व्वे शिवविष्णुमुखेश्वराः ।
प्रणम्य दण्डवत् भूमौ स्वरां तत्र विजिज्ञपुः ॥

देवा ऊचुः ।
देवि शप्ता वयं सर्व्वे ब्रह्माद्याश्च त्वयाधुना ।
यदि सर्व्वे जडीभूता भविष्यामोऽत्र निम्नगाः ॥
तदा लोकत्रयं चैतत् विनश्यति च निश्चितम् ।
अविवेककृतस्तस्मात् शापोऽयं विनिवर्त्त्यताम् ॥

स्वरोवाच ।
नार्च्चितो हि गणाध्यक्षो भवद्भिर्यत् सुरोत्तमाः ।
तस्माद्विघ्नं समुत्पन्नमबोधजनितं खलु ॥
नापि मद्वचनं ह्येतदसत्यं खलु जायते ।
तस्मात् स्वांशैर्जडीभूता यूयं भवत निम्नगाः ॥
आवामपि सपत्न्यौ च स्वांशाभ्यामपि निम्नगे ।
भविष्यावोऽत्र भो देवाः पश्चिमाभिमुखावहे ॥

नारद उवाच ।
इति तद्वचनं श्रुत्वा ब्रह्मविष्णुमहेश्वराः ।
जडरूपाभवन्नद्यः स्वांशेनैव तदा नृप ।
तस्माद्विष्णुरभूत् कृष्णा वेणी देवो महेश्वरः ।
ब्रह्मा ककुद्मिनी चान्या पृथगेव बभूव तु ॥"
इति पाद्मोत्तरखण्डे १५६ अध्यायः ॥

अन्यच्च ।
"सरस्वती रजोरूपा तमोरूपा कलिन्दजा ।
सत्त्वरूपा च गङ्गात्र नयन्ति ब्रह्मनिर्गुणम् ॥
इयं वेणी हि निःश्रेणी ब्रह्मवर्त्म प्रयास्यतः ।
जन्तोर्व्विशुद्धदेहस्य श्रद्धा श्रद्धामृतस्य च ॥
काशीति काचिदबला भुवनेषु रूढा
लोलार्ककेशवविलोलविलोचना च ।

तद्दोयु गच्छ वरणासिरियं तदीया
वेणीति याच गदिताच्यथशर्म्मभूमिः ॥"
इति काशीखण्डे ७ अध्यायः ।

वेणीरः, पुं, अरिष्टवृक्षः । इति शब्दचन्द्रिका ॥

वेणीसंहारः, पुं, (वेण्याः द्रौपदीवेणिकायाः संहारो भीमेन मारितदुर्य्योधनशोणितेन मोचनं यत्र ।) भट्टनारायणकृतसप्ताङ्कयुक्तनाटकविशेषः । तत्र दुर्य्योधनकर्तृकद्रौपदीकेशाकर्षणावधि तद्बधानन्तरं तस्या वेणीबन्धनपर्य्यन्तविवरणमस्ति । तस्यायमाद्यश्लोकः ।
"निषिद्धैरप्येभिर्लुलितमकरन्दो मधुकरैः
करैरिन्दोरन्तश्छुरित इव सम्भिन्नमुकुलः ।
विधत्तां सिद्धिं नो नयनसुभगामस्य सदसः
प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥"

वेणुः, पुं, (अज + "अजिवृरीभ्यो निच ।" उणा० ३। ३८। इति णुः। स च नित्। अजेर्वीभावो गुणश्च।) वंशः। इत्यमरः। (यथा, रामायणे ।४।४३।१७।
"तं तु देशमतिक्रम्य शैलोदा नाम निम्नगा ।
उभयोस्तीरयोस्तस्याः कीचका नाम वेणवः॥")
वंशी । इति शब्दरत्नावली। वेणोरुत्पत्तिर्यथा,—
"वेणुर्यः पश्य तं विप्र तथापि विदितं तथा ।
द्विज आसीच्छान्तमनाः शतसाक्षपनादिभिः ॥
नाम्ना देवव्रतो दान्तः कर्म्मकाण्डविशारदः ।
अवैष्णवजनव्रातमध्यवर्त्ती क्रियापरः ॥
एकदापि न शुश्राव यन्निशोऽस्तीति भूपते ।
तस्य गेहमथाभ्यागाद्दैदान्तकृतनिश्चयः ।
मद्भक्तः कोऽपि पूर्णां स तुलसीदलवारिणा ।
कृतवांस्तु गृहे किञ्चित् फलमूलं न्यवेदयत् ।
स्नानवारि फलं किञ्चित् तस्मै प्रीत्या ददौ सुधीः ।
अश्रद्धयान्वितं कृत्वा सोऽप्यश्नात् द्विजाधमः ॥
तेन पापेन संजातं वेणुत्वमतिदारुणम् ।
तेन पुण्येन तस्यार्थो मदीयप्रियतां गतः ॥
अधुना सोऽपि राजेव केतुमाले विराजते ।
युगान्ते तु विष्णुपरो भूत्वा ब्रह्मत्वमाप्स्यति ॥"
इति पाद्मे पातालखण्डे ५ अध्यायः ।
नृपविशेषः । इति मेदिनी ॥

वेणुकं, क्ली, तोत्रम् । इति हेमचन्द्रः ॥ (पुं, ह्रस्वो वेणुः । "संज्ञायां कन् ।" ५।३।८७। इति कन् । क्षुद्रवेणुः । यथा, हरिवंशे भविष्यपर्व्वणि । ३६ । ५६ ।
"पश्येदं बहुधा देव भिन्नं भिन्नं सहस्रशः ।
शिरश्च दारवं पात्रं द्विदलान् वेणुकान् बहून्।")

वेणुकर्करः, पुं, करीरवृक्षः । इति त्रिकाण्डशेषः ॥

वेणुजः, पुं, (वेणोर्ज्जायते इति । जन + डः ।) वेणुयवः । इति राजनिर्घण्टः ॥ (वेणुजातमात्रे, त्रि । यथा, भागवते । ३ । १ । २० ।
"वनं यथा वेणुजवह्निसंश्रयम् ॥")

वेणुध्मः, पुं, (वेणुं धमतीति । ध्मा + कः ।) वेणुवादकः । इत्यमरः ॥

वेणुनं, क्ली, मरिचम् । इति रत्नमाला ॥ वेणुजमिति च पाठः ॥

वेणुपत्री, स्त्री, (वेणोरिव पत्रं यस्याः ।) वंशपत्रीवृक्षः । तत्पर्य्यायः । हिङ्गुपर्णी २ नाड़ी ३ हिङ्गुशिराटिका ४ । इति रत्नमाला ॥

वेणुबीजं, क्ली, (वेणोर्बीजम् ।) वेणुयवः । इति राजनिर्घण्टः ॥

वेणुयवः, पुं, (वेणोर्यवः ।) वंशफलम् । बाँशेर चाउल इति भाषा॥ (यथा, विष्णुपुराणे ।१६।२५।
"तथा वेणुयवाः प्रोक्तास्तद्वन् मर्कटका मुने ॥")
तत्पर्य्यायः । वेणुजः २ वेणुबीजम् ३ वंशजः ४ वंशतण्डुलः ५ वंशधान्यम् ६ वंशाङ्कः ७ । अस्य गुणाः । रूक्षत्वम् । कषायत्वम् । कटुपाकित्वम् । बद्धमूत्रत्वम् । कफघ्नत्वम् । वातपित्तकरत्वम् । सारकत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"तद्यवास्तु सरा रूक्षाः कषायाः कटुपाकिनः ।
वातपित्तकरा उष्णा बद्धमूत्राः कफापहाः ॥"
इति भावप्रकाशः ॥

वेणुवादः, पुं, (वेणुं वादयतीति । वद + णिच् + अण् ।) वैणुकः । इति रत्नमाला ॥

वेतः, पुं, वेत्रः । इति राजनिर्घण्टः ॥

वेतनं, क्ली, (वी + "वीपतिभ्यां तनन् ।" उणा० ३ । १५० । इति तनन् ।) कर्म्मदक्षिणा । माहिना इति मजुरि इति च भाषा । तत्पर्य्यायः । कर्म्मण्या २ विधा ३ भृत्या ४ भृतिः भर्म्म ६ भरण्यम् ७ भरणम् ८ मूल्यम् ९ निर्व्वेशः १० पणः ११ । इत्यमरः ॥ विष्टिः १२ । इति जटाधरः ॥ (यथा, मनौ । ७ । १२६ ।
"पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम् ॥")
जीवनोपायः । तत्पर्य्यायः । आजीवः २ जीवनम् ३ वार्त्ता ४ जीविका ५ वृत्तिः ६ । इति हेमचन्द्रः ॥ रूप्यम् । इति शब्दचन्द्रिका ॥

वेतसः, पुं, (वि + "वेञस्तुट् च ।" उणा० ३।११८। इति असच् । तुडागमश्च ।) लताविशेषः । वयसा इति भाषा । इति भरतः ॥ वेति जलप्रवतां गच्छति इति वेतसः । बीज ईश्वत् नाप्नोति तसः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । रथः २ अभ्रपुष्पः ३ विदुलः ४ शीतः ५ वानीरः ६ वञ्जुलः ७ । इत्यमरः ॥ प्रियः ८ । इति रत्नमाला ॥ गन्धपुष्पः ९ रथाभ्रः १० वेतसी ११ । इति शब्दरत्नावली ॥ निचुलः १२ दीर्घपत्रकः १३ कलमः १४ मञ्जरीनम्रः १५ सुषेणः १६ गन्धपुष्पकः १७ । (यथा, भागवते ।३।२।१७।
"कदम्बवेतसनलनीपवञ्जुलकैर्वृतम् ॥")
अस्य गुणाः । स्वादे कटुत्वम् । शीतत्वम् । भूतरक्तपित्तोद्भवरोगकृच्छ्रदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अस्य पर्य्यायगुणाः ।
"वेतसो नम्रकः प्रोक्तो वानीरो वञ्जुलस्तथा ।
अभ्रपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः ॥
वेतसः शीतलो दाहशोथार्शोयोनिरुग्व्रणान् ।
हन्ति वीसर्पकृच्छ्राश्मपित्तास्रदरिकफानिलान् ॥"
इति भावप्रकाशः ॥
जलवेतसस्य पर्य्यायगुणाः । अथ जलवेतसः ।
"निकुञ्चकः परिव्याधो नादेयो जलवेतसः ।
जलजो वेतसः शीतः संग्राही वातकोपनः ॥"
इति भावप्रकाशः ॥
(जलजाताग्निः । यथा, ऋग्वेदे । ४ । ५८ । ५ ।
"हिरण्ययो वेतसो मध्य आसाम् ॥"
"वेतसोऽप्सम्भवोऽग्निः ।" इति तद्भाष्ये सायणः ॥")

वेतसाम्लः, पुं, (वेतसप्रधानोऽम्लः ।) अम्लवेतसः । इति जटाधरः ॥

वेतसी, स्त्री, वेतसः । इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे । १ ।
"रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ।")

वेतस्वान्, [त्] त्रि, (वेतसाः सन्त्यत्र । "कुमुदनड्वेतसेभ्यो ड्मतुप् ।" ४ । २ । ८७ । इति ड्मतुप् । "मादुपधायाः ।" ८ । २ । ९ । इति मस्य वत्वम् ।) वेतसलताबहुलदेशः । इत्यमरभरतौ ॥

वेतालः, पुं, द्वारपालकः । इति शब्दरत्नावली । भूताधिष्ठितशवः । इत्यमरः ॥ मल्लभेदः । इति भरतः ॥ शिवगणाधिपविशेषः । यथा,—
सगर उवाच ।
"कोऽसौ भैरवनामाभूत् को वा वेतालसंज्ञकः ।
कथं वा तौ शरीरेण मानुषेण गणाधिपौ ।
अभूतां द्विजशार्द्दूल तन्मे वद महामुने ॥
श्रीऔर्व्व उवाच ।
शृणु राजन् प्रवक्ष्यामि महाकालस्य भृङ्गिणः ।
भैरवस्यापि चरितं वेतालस्य महात्मनः ॥
सोऽसौ भृङ्गी हरसुतौ महाकालोऽपि भर्गजः ।
तावेव गौरीशापेन संभूय नरयोनिजौ ।
वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि ॥"
इति कालिकापुराणे ४५ अध्यायः ॥
तस्योत्पत्त्यादि यथा,—
श्रीदेव्युवाच ।
"ममैव मानुषी मूर्त्तिरियं वृषभकेतन ! ।
विशामि तेऽत्र वचनादुत्पादय सुतद्वयम् ॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यास्तु कामार्थं समुपस्थितः ॥
ततः सापर्ण्याविष्टा देवी तारावती सती ।
कामयानं महादेवं स्वयमेवाभवन्मुदा ।
तस्मिन् कालेऽभवद्गर्भः कापाली चास्थिमाल्यधृक् ।
कामावसाने तस्यास्तु सद्यो जातं सुतद्वयम् ॥
अभवन्नृपशार्दूल तथा शाखामृगाननम् ।
अथ तारावती देवी सुतौ दृष्ट्वा क्षितिस्थितौ ॥
भूमौ मलिनवेशेन मन्युना समुपाविशत् ।
भर्त्तुरागमनं शश्वत् काङ्क्षन्ती भर्गभाषितम् ॥
अथ चन्द्रमहाभागः स राजा चन्द्रशेखरः ।
प्रासादपृष्ठे आगच्छद्द्रष्टुं तारावतीं तदा ॥
ददर्श पतितां भूमौ मुक्तकेशीं निराभवाम् ।
सुतौ च पतितौ भूमौ चन्द्रसूर्य्यसमप्रभौ ॥
वानरास्यौ स ददृशे पदचोभं वृषस्य च ।
ततः स राजा न्यगदत् तं मुनिं प्रहसन्मुदा ॥
पालयिष्ये शम्भुसुतौ यथा लभ्यं सदैव हि ।
किन्त्वेतौ मुनिशार्दूल त्वं संस्कुरु यथाविधि ॥

और्व्व उवाच ।
ततस्तयोर्नाम चक्रे नारदो वचनानृप ।
ज्येष्ठो भैरवनामाभूत् वीरः पुत्त्रो भयङ्करः ।
वेतालसदृशः कृष्णो वेतालोऽभूत्तथापरः ।
इति चक्रे तयोर्नाम देवर्षिर्नृपसत्तमः सुतः ।”
इति कालिकापुराणे ४८ अध्यायः ॥

वेतालभट्टः, पुं, राजविक्रमादित्यस्य नवरत्नान्तर्गतरत्नविशेषः । यथा,—
“धन्वन्तरिः क्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥”
इति नवरत्नश्लोकः ॥

वेत्ता, [ऋ]-त्रि, ज्ञाता । वेत्तीति विदधातोस्तृण्प्रत्ययेन निष्पन्नमिदम् ॥ (यथा, हितोपदेशे ।
“यथा खरश्चन्दनभारवाही
भारस्य वेत्ता नतु चन्दनस्य ।”)

वेत्रः, पुं, (वी+“गुधृवीपचीति ।” उणा० ४ । १६६ । इति त्रः ।) स्वनामख्यातवृक्षः । तत्पर्य्यायः । वेतः २ योगिदण्डः ३ सुदण्डः ४ मृदुपर्व्वकः ५ ॥ (यथा, शाकुन्तले । ५ ।
“आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।”)
स तु पञ्चविधः । तेषां गुणाः । शीतलत्वम् । कषायत्वम् । भूतपित्तहरत्वञ्च । इति राजनिर्घण्टः ॥ तस्याग्रं वेताग् इति ख्यातम् । तद्गुणाः । दीपनत्वम् । रुच्यत्वम् । तिक्तत्वम् । पित्तकफनाशित्वञ्च । तत्फलगुणाः । वातपित्तनाशित्वम् । अम्लत्वञ्च । इति राजवल्लभः ॥ असुरविशेषः । तस्य प्रमाणं वेत्रासुरशब्दे द्रष्टव्यम् ॥

वेत्रकीयः, त्रि, (वेत्र+“नड़ादीनां कुक् च ।” ४ । २ । ९१ । इति कुक् छश्च ।) वेत्रसमूहयुक्तदेशादिः । इति सिद्धान्तकौमुदी ॥ (एकचक्रा नगरी तु वेत्रप्राचुर्य्यवशेन तदाख्ययापि प्रसिद्धा । यथा, महाभारते । १ । १६१ । ८ ।
“वेत्रकीयगृहे राजा नायं नयमिहास्थितः ।
उपायं तं न कुरुते यत्नादपि स मन्दधीः ।”)

वेत्रधरः, पुं, (वेत्रस्य धरः ।) द्वारपालः । इति हलायुधः ॥ यष्टिधारके, त्रि ॥

वेत्रधारकः, पुं, (वेत्रस्य धारकः ।) द्वारपालः । इति जटाधरः ॥

वेत्रवती, स्त्री, नदीविशेषः । इत्यमरः ॥ सा तु मालवदेशात् कालपीनामनगरे यमुनायां मिलिता । वेत्रासुरमाता । यथा, वराहपुराणे ।
“वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत् ॥”

वेत्रहा, [न्] पुं, (वेत्रं हतवान् । हन+क्विप् ।) इन्द्रः । इत्यमरः ॥

वेत्रावती, स्त्री, वेत्रवती नदी । यथा,—
“तत्रान्या दृश्यते जलं सुमधुरं कान्तिप्रदं पुष्टिदं
हृद्यं दीपनपाचनं बलकरं वेत्रावती तापिनी ॥”
इति राजनिर्घण्टः ॥

वेत्रासनं, क्ली, (वेत्रस्यासनम् ।) वेत्रनिर्म्मितासनम् । तत्पर्य्यायः । आसन्दी २ । इति हेमचन्द्रः ॥

वेत्रासुरः, पुं, (वेत्रनामकोऽसुरः ।) स्वनामख्यातासुरः । तस्योत्पत्तिर्यथा,—
महातपा उवाच ।
“आसीद्राजा पुरा राजन् सिन्धुद्वीपः प्रतापवान् ।
वारुणांशो महाराजोऽसौ अरण्ये तपसि स्थितः ॥
पुत्त्रो मे शत्रुनाशाय भवेदिति नराधिपः ।
एवं कृतमतिः सोऽथ महता तपसा स्वकम् ।
कलेवरं स्थिरो भूत्वा शोषयामास सुव्रतः ॥
प्रजापाल उवाच ।
कथं तस्य द्विजश्रेष्ठ शक्रेणापकृतं भवेत् ।
येनासौ तद्विनाशाय पुत्त्रमिच्छन् व्रते स्थितः ॥
महातपा उवाच ।
सोऽन्यजन्मनि पुत्त्रोऽभूत् त्वष्टुर्बलवतां वरः ।
अवध्यः सर्व्वशस्त्रौघैरपां फेनेन नाशितः ॥
जलफेनेन निहितस्तस्मिन्क्षयमवाप्नुयात् ।
पुण्यवंशान्वयो जातः सिन्धुद्वीपेति संज्ञितः ॥
स तेपे परमं तीव्रं शक्रवैरमनुस्मरन् ।
ततः कालेन महता नदी वेत्रवती शुभा ॥
मानुषं रूपमास्थाय सालङ्कारा मनोरमम् ।
आजगाम यतो राजा तेपे परमकं तपः ॥
तां दृष्ट्वा रूपसम्पन्नां स राजा क्षुब्धमानसः ।
उवाच कासि सुश्रोणि सत्यं कथय भामिनि ॥
नद्युवाच ।
अहं जलपतेः पत्नी वरुणस्य महात्मनः ।
नाम्ना वेत्रवती पुण्या त्वामिच्छन्तीह आगता ॥
साभिलाषां परस्त्रीं यो भजमानां विसर्ज्जयेत् ।
स पापपुरुषो ज्ञेयो ब्रह्महत्याञ्च विन्दति ॥
एवं ज्ञात्वा महाराज भजमानां भजस्व माम् ।
एवमुक्तस्तया राजा साभिलाषोपभुक्तवान् ॥
तस्य सद्योऽभवत् पुत्त्रो द्वादशार्कसमप्रभः ।
वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत् ॥
बलवानतितेजस्वी प्राग्ज्योतिषः पतिर्भवेत् ।
स कालेन युवा जातो बलवान् दृढ़विक्रमः ॥
महायोगेन संयुक्तो जिगाय च वसुन्धराम् ।
सप्तद्वीपवतीं पश्चान्मेरुपर्व्वतमारुहत् ।
तत्रेन्द्रं प्रथमं जिग्ये पश्चादग्निं यमं ततः ॥”
इति वराहपुराणे देव्युत्पत्तिनामाध्यायः ॥

वेत्री, [न्] पुं, (वेत्रोऽस्यास्तीति । वेत्र+इनिः ।) द्वारपालकः । इति हेमचन्द्रः ॥ वेत्रयुक्ते, त्रि ॥

वेथ, ऋ ङ याचे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-द्विक०-सेट् ।) ङ, वेथते । इति दुर्गादासः ॥

वेदः, पुं, (विद+घञ् ।) विष्णुः । यथा,—
“वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥”
इति विष्णुसहस्रनामस्तोत्रम् ॥
वृत्तम् । इति मेदिनी ॥ क्वचित् पुस्तके वित्तमित्यपि पाठः । यज्ञाङ्गम् । इति नानार्थरत्नमाला ॥ मीनशरीरावच्छेदेन भगवद्वाक्यम् । इति न्यायशास्त्रम् ॥ धर्म्मब्रह्मप्रतिपादकमपौरुषेयवाक्यम् । इति वेदान्तशास्त्रम् ॥ ब्रह्ममुखनिर्गतधर्म्मज्ञापकशास्त्रम् । इति पुराणम् ॥ तत्पर्य्यायः । श्रुतिः २ आम्नायः ३ । इत्यमरः ॥ छन्दः ४ ब्रह्म ५ निगमः ६ । इति शब्दरत्नावली ॥ प्रवचनम् ७ । इति जटाधरः ॥*॥ वेदस्य प्रादुर्भावो । यथा । कदाचित् कथं सृक्ष्यामीति ध्यायतो ब्रह्मणो मुखचतुष्टयेभ्यश्चत्वारो वेदाः प्रादुरासन् । यथा । एकविंशतिशाखात्मक-ऋक् १ शतशाखात्मकयजुः २ सहस्रशाखामयसाम ३ नवशाखामयाथर्व्व ४ । इति पुराणम् ॥ अपि च ।
श्रीमार्कण्डेय उवाच ।
“तस्मादण्डाद्विनिर्भिन्नाद्ब्रह्मणोऽव्यक्तजन्मनः ।
ऋचो बभूवुः प्रथमं प्रथमाद्वदनान्मुने ॥
जवापुष्पनिभाः सद्यस्तेजोरूपा ह्यसंहताः ।
पृथक् पृथग्विभिन्नाश्च रजोरूपा महात्मनः ॥
यजूंषि दक्षिणादस्मादनिबद्धानि कानिचित् ।
यादृक्वर्णं तथा वर्णान्यसंहतिपराणि वै ॥
पश्चिमं यद्विभोर्व्वक्त्रं ब्रह्मणः परमेष्ठिनः ।
आविर्भूतानि सामानि ततः कुन्दसितान्यथा ॥
अथर्व्वाणमशेषेण भृङ्गाञ्जनचयप्रभम् ।
घोराघोरस्वरूपं तदाभिचारिकशान्तिमत् ॥
उत्तरात् प्रकटीभूतं वदनात्तत्तु वेधसः ।
सुखं सत्त्वतमःप्रायं सौम्यासौम्यस्वरूपवत् ॥
ऋचो रजोगुणाः सत्त्वं यजुषाञ्च गुणो मुने ।
तमोगुणानि सामानि तमःसत्त्वमथर्व्वसु ॥
एतानि ज्वलमानानि तेजसाप्रतिमेन वै ।
पृथक् पृथगवस्थानं भान्ति पूर्व्वमिवाभवत् ॥
ततस्तदाद्यं यत्तेज ओमित्युक्ताभिशस्यते ।
तस्यानुभावादृक्तेजस्तमाश्चाहत्य संस्थितम् ॥
यथा यजुर्म्मयं तेजो यच्च साम्नां महामुने ।
एकत्वमुपयातानि परतेजसि संश्रयात् ॥
शान्तिकं पौष्टिकञ्चैव तथा चैवाभिचारिकम् ।
ऋगादिषु त्रयं ब्रह्मंस्तत्त्रयं त्र्यपागमत् ॥
ततो विश्वमिदं सद्यस्तमोनाशात् सुनिर्म्मलम् ।
बभावतीव विप्रर्षे तिरश्चोर्द्ध्वमधस्तथा ॥
ततस्तन्मण्डलीभूतं छान्दसं तेज उत्तमम् ।
परेण तेजसा ब्रह्मन् ! एकत्वमुपगम्य तत् ॥
आदित्यसंज्ञामगमदाद्यावेव यतोऽभवत् ।
विश्वस्यास्य महाभाग कारणञ्चाव्ययात्मकम् ॥
प्रातर्मध्यन्दिने चैव तथा चैवापराह्णके ।
त्रयी तपति सा काले ऋग्यजुःसामसंश्रिता ॥
ऋचस्तपन्ति पूर्व्वाह्णे मध्याह्ने च यजूंषि वै ।
सामानि चापराह्णे तु तपन्ति मुनिसत्तम ॥
शान्तिकं ऋक्षु पूर्व्वाह्णे यजुः स्वञ्चपौष्टिकम् ।
अपराह्णे स्थितं नित्यं सामस्वेवाभिचारिकम् ॥
सृष्टौ च ऋङ्मयो ब्रह्मा स्थितौ विष्णुर्यजुर्म्मयः ।
रुद्रः साममयोऽन्ते च तस्मात्तस्या शुचिर्ध्वनिः ॥
तदेवं भगवान् भास्वान् वेदात्मा वेदसंस्थितः ।
वेदविद्यात्मकश्चैव परः पुरुष उच्यते ॥
सर्गस्थित्यन्तहेतुः स रजःसत्त्वादिकैर्गुणैः ॥

आश्रित्य ब्रह्मविद्यादिसंज्ञामभ्येति शाश्वतः ॥
वेदैः स वेद्यः स तु वेदमूर्त्ति-
रमूर्त्ति-राद्योऽखिलविश्वमूर्त्तिः ।
विश्वाश्रयं ज्योतिरवेद्यवर्त्मा
धर्म्मावदातः परमः परेभ्यः ॥"
इति श्रीमार्कण्डेयपुराणे सूर्य्यमाहात्म्ये सूर्य्योत्पत्तिनामाध्यायः ॥ * ॥ अन्यच्च ।
"अष्टाविंशे पुनः प्राप्ते ह्यस्मिन् वै द्वापरे द्विजाः ।
पराशरसुतो व्यासः कृष्णद्वैपायनोऽभवत् ॥
स एव सर्व्ववेदानां पुराणानां प्रदर्शकः ।
पाराशर्य्यो महायोगी कृष्णद्वैपायनो हरिः ॥
आराध्य देवमीशानं दृष्ट्वा साम्बं त्रिलोचनम् ।
तत्प्रसादादसौ व्यासो वेदानामभवत् प्रभुः ॥
अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान् ।
जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च ॥
पैलं तेषां चतुर्थञ्च पञ्चमं मां महामुनिः ।
ऋग्वेदश्रावकं पैलं प्रजग्राह महामुनिः ॥
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च ।
जैमिनिं सामवेदस्य श्रावकं सोऽन्वपद्यत ॥
तथैवाथर्व्ववेदस्य सुमन्तुमृषिसत्तमम् ।
इतिहासपुराणानि प्रवक्तुं मामयोजयत् ॥
एक आसीद्यजुर्व्वेदस्तञ्चतुर्द्धा व्यकल्पयत् ।
चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथाकरोत् ॥
आध्वर्य्यवं यजुर्भिः स्यादृग्भिर्होत्रं द्विजोत्तमाः ।
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्व्वभिः ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि च यजुर्व्वेदं सामवेदञ्च सामभिः ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानान्तु शतेनाथ यजुर्व्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानाञ्च विभेदतः ।
अथर्व्वाणमथो वेदं बिभेद नवकेन तु ॥
भेदैरष्टादशैर्व्यासः पुराणं कृतवान् प्रभुः ।
सोऽयमेकश्चतुष्पादो वेदः पूर्व्वं पुरातनात् ॥
ओँकारो ब्रह्मणो जातः स दोषविषशोधनः ।
वेदवेद्यो हि भगवान् वासुदेवः सनातनः ॥
स गीयते परो देवो यो वेदैवं स वेदवित् ।
एतत् परतरं ब्रह्मज्योतिरानन्दमुत्तमम् ॥
वेदवाक्योदितं तत्त्वं वासुदेवं परं पदम् ।
वेदवेद्यमिदं वेत्ति वेदं वेदपरो मुनिः ॥
अवेदं परमं वेत्ति वेदनिष्ठः सदेश्वरः ।
स एव वेदो वेद्यश्च तमेवाश्रित्य मुच्यते ॥
इत्येतदक्षरं वेद्यमोङ्कारं वेदमव्ययम् ।
अवेदञ्च विजानाति पाराशर्य्यो महामुनिः ॥"
इति कौर्म्मे ४९ अध्यायः ॥*॥
वेदाध्ययनपात्रं यथा,—
व्यास उवाच ।
"एवं दण्डादिभिर्युक्तः शौचाचारसमन्वितः ।
आहूतोऽध्ययनं कुर्य्याद्वीक्षमाणो गुरोर्म्मुखम् ॥
नित्यमुद्यतपाणिः स्यात् सन्ध्याचारः सुसंयतः ।
आस्यतामिति चोक्तः सन्नासीताभिमुखं
गुरोः ॥
प्रतिश्रवणसम्भाषे शयानो न समाचरेत् ।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥
नीचं शय्यासनं चास्य सर्व्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥
नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम् ॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
दूरस्थो नार्च्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ।
न चैवास्योत्तरं ब्रूयात् स्थिते नासीत सन्निधौ ॥
उदकुम्भं कुशान् पुष्पं समिधोऽस्याहरेत् सदा ।
मार्ज्जनं लेपनं नित्यमङ्गानां वै समाचरेत् ॥
नास्य निर्म्माल्यशयनं पादुकोपानहावपि ।
नाक्रामेदासनञ्चास्य छायादीन् वै कदाचन ॥
साधयेद्दन्तकाष्ठादीन् लब्धञ्चास्मै निवेदयेत् ।
अनापृच्छ्य न गन्तव्यं भवेत् प्रियहिते रतः ॥
न पादौ धावयेदस्य सन्निधाने कदाचन ।
जृम्भितं हसितञ्चैव कण्ठप्रावरणं तथा ॥
वर्ज्जयेत् सन्निधौ नित्यमवस्फोटनमेव च ।
यथाकालमधीयीत यावन्न विमना गुरुः ॥
आसीताधो गुरोर्दर्भे फलके वा समाहितः ।
आसने शयने याने नैव तिष्ठेत् कथञ्चन ॥
धावन्तमनुधावेत्तं गच्छन्तमनुगच्छति ।
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ।
जितेन्द्रियः स्यात् सततं वश्यात्माक्रोधनः
शुचिः ॥
प्रयुञ्जीत सदा वाचं मधुरां हितकारिणीम् ।
गन्धं माल्यं रसं कन्यां शुक्तं प्राणिविहिंसनम् ॥
अभ्यङ्गञ्चाञ्जनोपानच्छत्रधारणमेव च ।
कामं लोभं भयं निद्रां गीतं वादित्रनृत्यकम् ॥
आतर्ज्जनं परीवादं स्त्रीप्रेक्षालम्भनं तथा ।
परोपघातपैशुन्यं प्रयत्नेन विवर्ज्जयेत् ॥
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ।
आहरेद्यावदर्थानि भैक्षञ्चाहरमाचरेत् ॥
कृतञ्च लवणं सर्व्वं वर्ज्ज्यं पर्य्युषितञ्च यत् ।
अनृत्यदर्शी सततं भवेद्गीतादिनिस्पृहः ॥
नादित्यं वै समीक्षेत नाचरेद्दन्तधावनम् ।
एकान्तमशुचिस्त्रीभिः शूद्रान्त्यैरभिभाषणम् ॥
गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत न कामतः ।
मलापकर्षणं स्नानं नाचरेद्धि कथञ्चन ॥
न कुर्य्यान्मानसं विप्र गुरोस्त्यागे कथञ्चन ।
मोहाद्वा यदि वा लोभात्त्यक्तेन पतितो भवेत् ॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तन्न द्रुह्येत् कदाचन ॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य मनुस्त्यागं समब्रवीत् ॥
गुरोर्गुरोः सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
न चाविसृष्टगुरुणा स्वान् गुरूनभिवादयेत् ॥
विद्यागुरुष्वेतदेव नित्यवृत्तिस्स्वयोनिषु ।
प्रतिषेधात्स चाधर्म्मा द्विजश्चोपदिशत्स्वपि ॥
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्त्रेषु दारेषु गुरोश्चैव स्वबन्धुषु ॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्म्मणि ।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ॥
उत्सादनं वा गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्य्याद्गुरुपुत्त्रस्य पादयोः शौचमेव च ॥
गुरुवत् प्रतिपूज्यास्तु सवर्णा गुरवस्तथा ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम् ॥
गुरुपत्नीन्तु युवतीं नाभिवाद्येत पादयोः ।
कुर्व्वीत वन्दनं भूमावसावहमिति च ब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा ।
प्रपूज्या गुरुपत्नी च समास्ता गुरुभार्य्यया ॥
भ्रातृभार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि ।
विप्रस्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥
एवमाचारसम्पन्नमात्मवन्तमदाम्भिकम् ।
वेदमध्यापयेद्धर्म्मं पुराणाङ्गानि नित्यशः ॥
तथा चिरोषिते शिष्ये गुरुर्ज्ञानमनिर्द्दिशन् ।
हरते दुष्कृतं तस्य शिष्यस्यैवं ततो गुरुः ॥
आचार्य्यपुत्त्रः शुश्रूषुर्ज्ञानदो धार्म्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुरध्याप्या दश धर्म्मतः ॥
कृतज्ञश्च तथाद्रोही मेधावी शुभकृन्नरः ।
आप्तः प्रियोऽथ विधिवत् षडध्याप्या द्विजातयः ।
एतेषु ब्रह्मणो दानमन्यत्र तु यथोदितात् ॥"*॥
वेदाध्ययनविधिर्यथा,—
"आचम्य संयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ वीक्षमाणो गुरोर्म्मुखम् ॥
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ।
प्राक्कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्द्विजाः ॥
कुर्य्यादध्यापनं नित्यं स ब्रह्माञ्जलिना पूर्व्वतः ।
सर्व्वेषामेव भूतानां वेदश्चक्षुः सनातनः ॥
अधीतानध्ययन्नित्यं ब्राह्मण्याद्धीयतेऽन्यथा ।
अधीयीत ऋचो नित्यं क्षीरहुत्वा सदैवता ॥
प्रीणाति तर्पयन्त्येनं कामैस्तृप्ताः सदैवताः ।
यजूंष्यधीते नियतं दध्ना प्रीणाति देवताः ॥
सामान्यधीते प्रीणाति घृताहुतिभिरन्वहम् ।
अथर्व्वाङ्गिरसो नित्यं मध्वा प्रीणाति देवताः ॥
धर्म्मार्थञ्च पुराणानि मांसैस्तर्पयते सुरान् ।
अपां समीपे प्रयतो नैत्यिकं विधिमाश्रितः ॥
गायत्त्रीमप्यधीयीत गत्वारण्यं समाहितः ।
सहस्रपरमां देवीं शतमध्यां दशावराम् ॥
गायत्त्रीं वै जपेन्नित्यं जपयज्ञः प्रकीर्त्तितः ॥
गायत्त्रीञ्चैव वेदांश्च तुलयातोलयत् प्रभुः ।
एकतश्चतुरो वेदान् गायत्त्रीञ्च तथैकतः ॥
ओँकारमादितः कृत्वा व्याहृतीस्तदनन्तरम् ।
ततोऽधीयीत सावित्त्रीमेकाग्रः श्रद्धयान्वितः ॥
पुराकल्पे समुत्पन्ना भूर्भुवःस्वःसनातनाः ।

महायाहृतयस्तिस्रः सर्व्वाशुभनिवर्हणाः ।
प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वराः ।
सत्त्वं रजस्तमस्तिस्रः क्रमाद्व्याहृतयः स्मृताः ।
ओँकारस्तत्परं ब्रह्म सावित्री स्यात्तदक्षरम् ।
एष मन्त्रो महाभागः सारात्सार उदाहृतः ॥
योऽधीतेऽहन्यहन्येतां सावित्रीं वेदमातरम् ।
विज्ञायार्थं ब्रह्मचारी स याति परमां गतिम् ॥
गायत्री वेदजननी गायत्री लोकपावनी ।
न गायत्र्याः परं जप्यं एतद्विज्ञाय मुच्यते ॥
श्रावणस्य च माघस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपकरणं स्मृतः ॥
उत्सृज्य ग्रामनगरं मासान् विप्रोऽर्द्धपञ्चमान् ।
अधीयीत शुचौ देशे ब्रह्मचारी समाहितः ॥
पुष्ये तु छन्दसां कुर्य्याद्बहिरुत्सर्ज्जनं द्विजः ।
माघशुक्लस्य तु प्राप्ते पूर्व्वाह्णे प्रथमेऽहनि ॥
छन्दांस्यूर्द्ध्वमथो जप्यात् शुक्लपक्षे तु वै द्विजः ।
वेदाङ्गानि पुराणानि कृष्णपक्षे तु मानवः ॥*॥
इमान्नित्यमनध्यायानधीयानो विवर्जयेत् ।
अध्यापनञ्च कुर्व्वाणो अभ्यस्यन्नपि यत्नतः ॥
कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे ॥
आकालिकमनध्यायमेतेष्वाह प्रजापतिः ।
एतानभ्युदितान् विद्याद्यदा प्रादुष्कृताग्निषु ॥
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ।
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ॥
नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धेषु नित्यशः ॥
अन्तःशवगते ग्रामे वृषलस्यैव सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥
उदके मध्यरात्रे च विण्मूत्रस्य विसर्ज्जने ।
उच्छिष्टः श्राद्धं भुक्त्वैव मनसापि न चिन्तयेत् ॥
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥
यावदेकान्नदुष्टस्य स्नेहो लेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् ॥
शयानः प्रौढ़पादश्च तथा चैवावसक्थिकः ।
नाधीयीतामिषं जग्ध्वा सूतकाद्यान्नमेव च ॥
नीहारे वाणशब्दे सन्ध्ययोरुभयोरपि ।
अमावास्याचतुर्द्दश्योः पौर्णमास्यष्टमीषु च ॥
उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥
मार्गशीर्षे तथा पौषे माघमासे तथैव च ।
तिस्रोऽष्टकाः समाख्याताः कृष्णपक्षेषु सूरिभिः ॥
श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च ।
कदाचिदपि नाध्येयं कोविदारकपित्थयोः ॥
समानविद्ये तु मृते तथा सब्रह्मचारिणि ।
आचार्य्ये संस्थिते वापि त्रिरात्रं क्षपणं स्मृतम् ॥
छिद्राण्येतानि विप्राणां येऽनध्यायाः प्रकी-
र्त्तिताः ।
हिंसन्ति राक्षसास्तेषु तस्मादेतानि वर्ज्जयेत् ॥
नैत्यके नास्त्यनध्यायः सन्ध्योपासन एव च ।
उपाकर्म्मणि कर्म्मान्ते होममन्त्रे तथैव च ।
एकामृचमथैकं वा यजुः सामाथवा पुनः ।
अष्टकाद्यास्वधीयीत मारुते चातिवायति ॥
अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥*॥
एष धर्म्मः समासेन कीर्त्तितो ब्रह्मचारिणाम् ।
ब्रह्मणाभिहितः पूर्व्वमृषीणां भावितात्मनाम् ॥
योऽन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजाः ।
स संमूढ़ो न संभाष्यो वेदबाह्यो द्विजातिभिः ॥
न वेदपाठमात्रेण सन्तुष्टो वै भवेत् द्विजः ।
पाठमात्रावसन्नस्तु पङ्के गौरिव सीदति ॥
अधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स सान्वयः शूद्रकल्पः पात्रतां न प्रपद्यते ॥
पठित्वात्यन्तिकं वासं कर्त्तुमिच्छति चे गुरोः ।
युक्तः परिचरेदेनं न शरीरविमोचनम् ॥
गत्वा वनं यो विधिवज्जुहुयाज्जातवेदसम् ।
अधीयीत सदा नित्यं ब्रह्मनिष्ठः समाहितः ॥
सावित्रीं शतरुद्रीयं वेदान्तांश्च विशेषतः ।
अभ्यसेत् सततं मुक्तो भस्मस्नानपरायणः ॥

> एतद्विधानं परमं पुराणं
> वेदागमे सम्यगिहेरितं वः ।
> पुरा महर्षिप्रवराभिपृष्टः
> स्वायम्भुवो यन्मनुराह देवः ॥
> एतमीश्वरसमीरितं नरो
> योऽनुतिष्ठति विधिं विधानवित् ।
> मोहजालमपहाय सोऽमृतो
> याति तत्पदमनामयं शिवम् ॥"

इति कौर्म्मे उपविभागे १३ अध्यायः ॥

अथ ऋग्वेदस्य संहिता ।
"बिभेद प्रथमं विप्र पैल ऋग्वेदपादपम् ।
इन्द्रप्रमितये प्रादात् वास्कलाय च संहिते ॥
चतुर्द्धा स विभेदाथ वास्कलो निजसंहिताम् ।
बोध्यादिभ्यो ददौ तास्तु शिष्येभ्यः स महामतिः ॥
बोध्याग्निमाठरौ तद्वत् जातुकर्णपराशरौ ।
प्रतिशाखास्तु शाखायास्तस्यास्ते जगृहुर्मुने ॥
इन्द्रप्रमितिरेकान्तु संहितां स्वसुतं ततः ।
माण्डूकेयं महात्मानं मैत्रेयाध्यापयत्तदा ॥
तस्य शिष्यप्रशिष्येभ्यः पुत्त्रशिष्यक्रमाद्ययौ ।
वेदमित्रस्तु शाकल्यः संहितां तामधीतवान् ॥
चकार संहिताः पञ्च शिष्येभ्यः प्रददौ च ताः ।
तस्य शिष्याश्च ये पञ्च तेषां नामानि मे शृणु ॥
मुद्गलो गालवश्चैव वात्स्यः शालीय एव च ।
शैशिरः पञ्चमश्चासीन्मैत्रेय सुमहामतिः ॥
संहितात्रितयञ्चक्रे शाकपूर्णिरथेतरः ।
निरुक्तमकरोत्तद्वच्चतुर्थं मुनिसत्तम ॥
क्रौञ्चो वैतालिकस्तद्वद्बलाकश्च महामतिः ।
निरुक्तकृच्चतुर्थोऽभूद्वेदवेदाङ्गपारगः ॥
इत्येताः प्रतिशाखाभ्यो ह्यनुशाखा द्विजोत्तम ।
वास्कलिश्चापरास्तिस्रः संहिताः कृतवान्
द्विजः ॥
शिष्यः कालायनिर्गार्ग्यस्तृतीयश्च तथा जवः ।
इत्येते बह्वृचाः प्रोक्ताः संहिता यैः प्रव-
र्त्तिताः ॥"

इति विष्णुपुराणे ३ अंशे वेदविभक्तिर्नाम ४ अध्यायः ॥*॥ यजुर्व्वेदस्य संहिता यथा,—
"यजुर्व्वेदतरोः शाखाः सप्तविंशन्महामतिः ।
वैशम्पायननामासौ व्यासशिष्यश्चकार वै ।
शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् ॥
याज्ञवल्क्यस्तु तस्याभूद्ब्रह्मरातसुतो द्विज ।
शिष्यः परमधर्म्मज्ञो गुरुवृत्तिपरः सदा ॥
ऋषिर्य्योऽद्य महामेरोः समाजे नागमिष्यति ।
तस्य वै सप्तरात्रन्तु ब्रह्महत्या भविष्यति ।
पूर्व्वमेव मुनिगणैः समयोऽयं कृतो द्विज ॥
वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्ततः ।
स्वस्रीयं बालकं सोऽथ पदा स्पृष्टमघातयत् ॥
स शिष्यानाह भोः शिष्याः ब्रह्महत्यापहं
व्रतम् ।
चरध्वं मत्कृते सर्व्वे न विचार्य्यमिदं तथा ॥
अथाह याज्ञवल्क्यस्तं किमेभिर्भगवन्द्विजैः ।
क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् ॥
ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिम् ।
मुच्यतां यत् त्वयाधीतं मत्तो विप्रावमन्यक ! ॥
निस्तेजसो वदस्येतान् यत्त्वं ब्राह्मणपुङ्गवान् ।
तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा ॥
याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् ।
ममाप्यलं त्वयाधीतं यन्मया तदिदं द्विज ॥

श्रीपराशर उवाच ।

इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंषि सः ।
छर्द्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः ॥
यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज ।
जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः ॥
ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः ।
चरकाध्वर्य्यवस्ते तु चरणान्मुनिसत्तम ॥
याज्ञवल्क्योऽपि मैत्रेय प्राणायामपरायणः ।
तुष्टाव प्रयतः सूर्य्यं यजूंष्यभिलषंस्ततः ॥

श्रीयाज्ञवल्क्य उवाच ।

नमः सवित्रे द्वाराय मुक्तेरमिततेजसे ।
ऋग्यजुःसामभूताय त्रयीधामवते नमः ॥

श्रीपराशर उवाच ।

इत्येवमादिभिस्तेन स्तूयमानः स्तवै रविः ।
वाजिरूपधरः प्राह व्रियतामभिवाञ्छितम् ॥
याज्ञवल्क्यस्तदा प्राह प्रणिपत्य दिवाकरम् ।
यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ ॥

श्रीपराशर उवाच ।

एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः ।
अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः ॥
यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम ।
वाजिनस्ते समाख्याताः सूर्य्योऽश्वः सोऽभवद्-
यतः ॥
शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम् ।
काण्वाद्याः सुमहाभाग याज्ञवल्क्यप्रवर्त्तिताः ॥"

इति श्रीविष्णुपुराणे ३ अंशे वाजिनामाख्यानं ५ अध्यायः ॥*॥ सामवेदस्य संहिता यथा,—
"सामवेदतरोः शाखा व्यासशिष्यः स जैमिनिः ।
क्रमेण येन मैत्रेय बिभेद शृणु तन्मम ॥

सुमन्तुस्तस्य पुत्त्रोऽभूत् सुकर्म्मास्याप्यभूत् सुतः।
अधीतवन्तावेकैकां संहितां तौ महामुनी ॥
सहस्रं संहिताभेदं सुकर्म्मा तत्सुतस्ततः।
चकार तच्च तच्छिष्यौ जगृहाते महाव्रतौ ॥
हिरण्यनाभिः कौशल्यः पौष्यञ्जिश्च द्विजोत्तमः।
उदीच्याः सामगाः शिष्यास्तस्य पञ्चशताः
स्मृताः ॥
हिरण्यनाभात्तावत्यः संहिता यैर्द्विजोत्तम।
गृहीतास्तेऽपि चोच्यन्ते पण्डितैः प्राच्य सामगाः॥
लोकाक्षिः कुथमिश्चैव कुषीदिर्लाङ्गलिस्तथा।
पौष्यञ्जिशिष्यास्तद्भेदैः संहिता बहुलीकृताः ॥
हिरण्यनाभशिष्यश्च चतुर्विंशतिसंहिताः।
प्रोवाच कृतिनामासौ शिष्येभ्यः सुमहामतिः ॥
तैश्चापि सामवेदोऽसौ शाखाभिर्बहुलीकृतः ॥"*

अथर्व्ववेदस्य संहिता यथा,—
"अथर्व्वणामथो वक्ष्ये संहितानां समुच्चयम्।
अथर्व्ववेदं स मुनिः सुमन्तुरमितद्युतिः ॥
शिष्यमध्यापयामास कबन्धं सोऽपि तद्द्विधा।
कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान् ॥
वेददर्शस्य शिष्यास्तु मोदो ब्रह्मबलिस्तथा।
शौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तम ॥
पथ्यस्यापि त्रयः शिष्याः कृता यैर्द्विज संहिताः।
जाजलिः कुमुदादिश्च तृतीयः शौनको द्विज ॥
शौनकस्तु द्विधा कृत्वा ददावेकान्तु बभ्रवे।
द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने ॥
सैन्धवा मुञ्जकेशाश्च भिन्नवेदा द्विधा पुनः।
नक्षत्रकल्पो वेदानां संहितानान्तथैव च ॥
चतुर्थः स्यादङ्गिरसः शान्तिकल्पश्च पञ्चमः।
श्रेष्ठाश्चाथर्व्वणामेते संहितानां विकल्पकाः ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥

अन्यत् कूर्म्मपुराणवत् ॥ * ॥ अपरञ्च।
"वेदो हरेर्व्वाक् सावित्री वेदमाता प्रतिष्ठिता।
त्रिगुणञ्च त्रिवृत्सत्त्वं तेन विप्राः प्रतिष्ठिताः ॥
दशयज्ञैः संस्कृता ये ब्राह्मणा ब्रह्मवादिनः।
तत्र वेदाश्च लोकानां त्रयाणामिह पोषकाः ॥
यज्ञाध्ययनदानादितपःस्वाध्यायसंयमैः।
प्रीणयन्ति हरिं भक्त्या वेदतन्त्रविधानतः ॥"
इति कल्किपुराणे २ अध्यायः ॥ * ॥

वेदोक्तकर्म्म कर्त्तव्यं यथा,—
"श्रुतिस्मृतिसदाचारविहितं कर्म्म केवलम्।
सेवितव्यं चतुर्व्वर्णैर्भजद्भिः केशवं सदा ॥
अन्यथा निरयं याति कुमार्गगणसेवनात्।
अतो वेदविरुद्धार्थं शास्त्रोक्तं कर्म्म संत्यजेत् ॥"
इति पाद्मोत्तरखण्डे १७ अध्यायः ॥ * ॥

वेदाचाराल्लौकिकाचारो बलवान् यथा,—
पार्व्वत्युवाच।
"केवलं वेदमाश्रित्य कः करोति विनिर्णयम्।
बलवान् लौकिको वेदाल्लोकाचारश्च कस्यजेत्॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ७ अध्यायः ॥*॥

अथ वेदस्य स्थितिकालः।
"कवेदंशसहस्रान्ते ययौ त्यक्त्वा हरेः पदम्।
वैष्णवाश्च पुराणानि शस्तानि आहृतपर्व्वणम्।
वेदोक्तानि च कर्म्माणि यशुस्ते सार्द्धमेव च।
हरिपूजा हरेर्नाम तत्कीर्त्तिगुणकीर्त्तनम् ॥
वेदाङ्गानि च शास्त्राणि ययुस्ते सार्द्धमेव च।
सत्यञ्च धर्म्मः सत्यञ्च वेदाश्च ग्रामदेवताः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥*॥

आयुर्व्वेदस्योत्पत्तिलक्षणे यथा,—
"षडङ्गेभ्यः पञ्चसंख्यागतेभ्यो
वेदा जाता ऋग्यजुःसामभेदाः।
आयुर्व्वेदोऽथर्व्ववेदश्चेति कणादः ॥
आस्ते वेदः पञ्चमो वैद्यकाख्यो
वेत्ता कश्चित्तस्य नास्ति महेशात्।
तस्माज्ज्ञाताध्येत तस्मात्तुराषाट्-
तस्माज्ज्ञात्वा वक्तुमर्हामि शास्त्रम् ॥"
इति गूढ़बोधः ॥

"हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते ॥"
इति सुखबोधः ॥ * ॥ * ॥

चतुर्वेदानां विवरणं यथा। अथातश्चरणव्यूहं व्याख्यास्यामः। तत्र यदुक्तं चातुर्व्वेद्यम्। चत्वारो वेदा विज्ञाता भवन्ति। ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्ववेदश्चेति। तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति। चर्चाश्रावकः १ चर्चकः २ श्रवणीयपारः ३ क्रमपारः ४ क्रमरथः ५ क्रमजटः ६ क्रमशटः ७ क्रमदण्डश्चेति ८। चतुष्पारायणमेतेषाम्। शाखाः पञ्चविधा भवन्ति। आश्वलायनी १ संख्यायनी २ शाकला ३ वास्कला ४ माण्डूकेयाश्चेति ५। तेषामध्ययनम्। अध्यायाश्चतुःषष्टिः। मण्डलानि च दशैव तु।
"एकर्चं एकवर्गस्यादेकञ्च नवकस्तथा।
द्वौ वर्गौ द्वे ऋचौ ज्ञेये त्रीणि ऋक्शतं
स्मृतम् ॥
चतुरृचं समाख्यातं षट्सप्तत्युत्तरं शतम्।
पञ्चर्चं द्वादश शतान्यष्टाविंशोत्तराणि च ॥
शतत्रयं षड्र्चञ्च सप्तपञ्चाशदुत्तरम्।
सप्तर्चमेकाशं त्रिंशदुत्तरं शतमेककम् ॥
अष्टर्चाः पञ्चपञ्चाशद्वर्गाः सुर्गाधिकोत्तराः।
वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे ॥
सहस्रमेकं सूक्तानां निर्व्विशद्धं विकल्पनाम्।
दशसप्तसु पञ्चन्ते संख्यातं वै पदक्रमम् ॥
एकशतं सहस्रं वा द्विपञ्चाशत् सहस्राद्धेम्।
एतानि च चतुर्द्दश वाशिष्ठानाम्। इतरेषां पञ्चाशीतिक्रमकाण्डे तु वेद्यम्। चतुस्त्रिंशत्-सहस्राणि दिखक्कानां सहस्राणां द्वात्रिंशत् षोड़शोत्तराः। चत्वारिंशत्सहस्राणि द्वात्रिंशतश्चाक्षरसहस्राणि।
ऋचां दशसहस्राणि ऋचां पञ्चशतानि च।
ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥
एक ऋचैकवर्गश्च एकश्च नवकस्तथा।
द्वौ वर्गौ द्वे ऋचौ ज्ञेये त्रीणि त्रीणि शत-
स्तथा ॥
सहस्रमेकं सूक्तानां पञ्चानां शतमानविंशतिः।
सप्तकानां द्वे च सप्तोत्तरे शते। चतुरृचे त्रीणि शतानि षट्कानां त्रीण्याः षडिरदकानाम् ॥*॥

यजुर्व्वेदस्य षड़शीतिर्भेदा भवन्ति। तत्र चरकाणां द्वादशभेदा भवन्ति। चरकाः १ आह्वरकाः २ कठाः ३ प्राच्यकठाः ४ कपिष्ठल-कठाः ५ औपमन्यवाः ६ आह्लकठाः ७ चारायणीयाः ८ वारायणीयाः ९ वार्त्तान्तवेयाः १० श्वेताश्वतराः ११ श्वेताश्वेततरा इति वा पाठः। मैत्रायणीयाश्चेति १२। तत्र मैत्रायणीयानां सप्तभेदा भवन्ति। मानवाः १ दुन्दुभाः २ चैकेयाः ३ वाराहाः ४ हारिद्र-वेयाः ५ श्यामाः ६ श्यामायनीयाश्चेति ७। तेषामध्ययनमष्टौ। यजुःसहस्राण्यधीत्य शाखा-पारो भवति। तान्येव द्विगुणान्यधीत्य पदपारो भवति। तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति। षड़ङ्गान्यधीत्य षड़ङ्गविद्भवति। शिक्षा१ कल्पो २ व्याकरणम् ३ निरुक्तम् ४ छन्दो ५ ज्योतिषमित्यङ्गानि ६। तत्र प्राच्योदीच्यां नैऋत्यां निरुक्तः। तत्र वाजसनेयानां सप्त-दशभेदा भवन्ति। जावालाः १ औधेयाः २ काण्वाः ३ माध्यन्दिनाः ४ शापीयाः ५ तापा-यनीयाः ६ कापालाः ७ पौण्ड्रवत्साः ८ आव-टिकाः ९ पामावटिकाः १० परमावटिकापि पाठः। पाराशरीयाः ११ वैधेयाः १२ वैनेयाः १३ औधेयाः १४ गालवाः १५ वैजवाः १६ कात्यायनीयाश्चेति १७। प्रतिपदमनुपदं छन्दो भाषा धर्म्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि ॥ उपज्योतिषम्। साङ्गलक्षणम्। प्रतिज्ञान-वाक्यम्। परिसंख्या। चरणव्यूहम्। श्राद्ध-कल्पः। प्रवराध्यायश्च। शाल्वम्। क्रतुः। संख्यानः। आगमः। यज्ञम्। पार्श्वान्। होत्रकम्। पारस्याशुहोत्रकमपि पाठः। पशवः। उक्थानि। कूर्म्मलक्षणमित्यष्टादश परिशिष्टानि।
"द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके।
इत्युक्तं परिसंख्यातमेतत् सकलं सशुक्रियम् ॥
ग्रन्थाश्च परिसंख्यातं ब्राह्मणञ्च चतुर्गुणम्।
आदावारभ्य वेदान्तं ब्रह्मयाहुतिपूर्व्वकम्।
वेदमध्याय एतेषां होमान्ते तु समारभेत् ॥"
तत्र तैत्तिरीयकाणाम् द्विभेदा भवन्ति। औख्याः १ खमध्योऽपि पाठः। खाण्डिकेया-श्चेति २। तत्र खाण्डिकेयानाम् पञ्चभेदा भवन्ति। आपस्तम्बी १ बौधायनी २ सत्या-षाढ़ी ३ हिरण्यकेशी ४ औधेयाश्चेति ५ औधेयी च पाठः। तत्र कठानाम्नूपगान-विशेषाः। चतुश्चत्वारिंशत्युपग्रन्थान्।
"मन्त्रब्राह्मणयोर्व्वेदस्त्रिगुणं यत्र पठ्यते।
यजुर्व्वेदः स विज्ञेयः शेषाः शाखान्तराः
स्मृताः ॥"*॥

सामवेदस्याखिलसहस्रभेद आसीत्। अखिल-स्थाने किल इति भाष्यसम्मतः। अनध्याये-ष्वधीयानास्ते शतक्रतुवज्रेणाभिहताः प्रनष्टाः।

तेषां प्रवक्षाम्यासुरायणीया वासुरायणीया वार्त्तान्तवेया प्राञ्जला ऋग्वर्णभेदा प्राचीनयोग्या ज्ञानयोग्या राणायनीयाश्चेति। तत्र राणायनीयानां नव भेदा भवन्ति। राणायनीयाः। शाट्यायनीयाः। शाखायनीयाः इति शाट्यमुग्राः इति च पाठः। सात्वलाः। सात्यमुद्गला इति वा पाठः। मौद्गलाः। इति तु भाष्ये नास्ति। खल्वलाः। महाखल्वलाः। लाङ्गलाः। कौथुमाः। गौतमाः। जैमिनीयाश्चेति। तेषामध्ययनमष्टौ सामसहस्राणि सामानि च चतुर्दश अष्टौ शतानि। दशेति दशसप्त वालखिल्याः ससुपर्णप्रैष्यः। क्वचित् पुस्तके नवतिदशतिवालखिल्यः ससुपर्णप्रैष्यः इति च पाठः। एतत् सामगणं स्मृतम्॥ *॥ अथर्व्ववेदस्य नव भेदा भवन्ति। पैप्पलाः। दान्ताः। प्रदान्ताः। स्नाताः। स्नौता इति च पाठः। सौल्लाः। ब्रह्मदावलाः। शौनकी। देविदर्शती। चरणविद्याश्चेति। दाता प्रदाता स्नौता ब्रह्मदीपशौ वेदशौ इति भाष्ये नामान्तरम्। तेषामध्ययनं पञ्च कल्पानि भवन्ति। नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः संहिता शान्तिकल्पश्चेति। सर्व्वेषामेव वेदानामुपवेदा भवन्ति। ऋग्वेदस्यायुर्व्वेदः। यजुर्व्वेदस्य धनुर्व्वेद उपवेदः। सामवेदस्य गान्धर्व्ववेद उपवेदः। अथर्व्ववेदस्य शस्त्रशास्त्राणि भवन्ति॥ *॥ (अथर्व्ववेदस्य तन्त्रशास्त्राणीति सुष्ठु मन्यते। तथा च शुक्रनीतौ। ४। ३। २७।
"ऋग्यजुःसामचाथर्व्वा वेदा आयुर्धनुःक्रमात्।
गान्धर्व्वश्चैव तन्त्राणि उपवेदाः प्रकीर्त्तिताः॥")
ऋग्वेदस्यात्रेयगोत्रं ब्रह्मदैवत्यं गायत्रं छन्दः। ऋग्वेदो रक्तवर्णः पद्मपत्रायताक्षः सुविभक्तग्रीवः कुञ्चितकेशः श्मश्रुश्वेतवर्णः द्विरत्निसंयुतः॥*॥ यजुर्व्वेदस्य भारद्वाजगोत्रं रुद्रदैवतं त्रैष्टुभं छन्दः। यजुर्व्वेदः कृशो दीर्घः कपाली ताम्रवर्णः काञ्चननयनः आदित्यवर्णो वर्णेन पञ्चारत्निमात्रः॥*॥ सामवेदस्य काश्यपगोत्रं विष्णुदैवत्यं जागतं छन्दः। सामवेदो नित्यस्रग्वी शुचिः शुचौ वासी स्रुचिवासाः इति च पाठः। चौमी इत्यपि पाठः। दान्तो चर्म्मी दण्डी काञ्चननयनः आदित्यवर्णो वर्णेन षडरत्निमात्रः॥*॥ अथर्व्ववेदस्य वैतानगोत्रं इन्द्रदैवत्यं आनुष्टुभं छन्दः। अथर्व्ववेदस्तीक्ष्णचण्डः तथा कामरूपी क्षुद्रकर्म्मा स्रव साध्याः क्षुद्रकर्म्मिस्वेव साध्या इति वा पाठः। सविग्रहाः सकलहाः मृधि गालवः सदानत्यः परस्त्रियाग्यश्चेति नवरत्निमात्रः। ग्रन्थान्तरे विश्वात्मा विश्वकर्म्मा स्वशाखाध्यायी। प्राशो महानीलोत्पलवर्णो वर्णेन दशरत्निमात्र इति च पाठः॥ *॥ अथ ध्यानम्।

"ध्यायामि त्वां पद्मपत्रायताक्षं
कुञ्चितकेशं ब्रह्मदैवत्यमाद्यम्।
गायत्रं ऋग्वेदमात्रेयगोत्रं
रक्तवर्णं श्मश्रुलोमप्रमाणम्॥

वन्दे रौद्रं त्रैष्टुभं ताम्रवर्णं
भारद्वाजं रक्तनेत्रं कृशाङ्गम्।
यजुर्व्वेदं दीर्घमादित्यवर्णं
कापालिनं पञ्च चारत्निमात्रम्॥"*॥

य इदं दैवतं रूपं गोत्रप्रमाणं छन्दोवर्णं वर्णयति स विद्यां लभते स विद्यां लभते। जन्म जन्म वेदपारो भवति अव्रतो व्रती भवति अप्रयतः प्रयतो भवति अब्रह्मचारी ब्रह्मचारी भवति जातिस्मरो जायते॥*॥
"य इदं चरणव्यूहं पर्व्वसु श्रावयेद्द्विजः।
धौतपाप्मा शुचिर्विप्रो ब्रह्मभूयाय कल्पते॥
य इदं चरणव्यूहं श्राद्धकाले सदा पठेत्।
अक्षयमभवत् श्राद्धं पितॄणामुपतिष्ठते॥
योऽधीते चरणव्यूहं स विप्रः पङ्क्तिपावनः।
पावयत्यखिलान् पूर्व्वान् पुरुषान् सप्त सप्त च॥
य इमा विपुला देवा अमृतत्वञ्च गच्छति।
लोकातीतं महाशान्तं अमृतत्वञ्च गच्छति॥"
गच्छध्वं नम इत्याह भगवान् व्यासः पाराशरीयो व्यासः पाराशरीयः। इति व्यासरचितं चरणव्यूहं समाप्तम्॥ (धनम्। यथा, ऋग्वेदे। ८। ७३। १।
"अग्निं रथं न वेद्यम्।"
"वेद्यं वेदो धनम् धनहितम्।" इति तद्भाष्ये सायणः॥ चतुःसंख्यावाचकः। यथा, साहित्यदर्पणे। ४। २६४।
"तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्मताः।
सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया।
वेदखाग्निशराः शुद्धैरिषुबाणाग्निशायकाः॥"
दर्भमुष्टिः। यथा, मनुः। ४। ३६।
"वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम्।
यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले॥")

वेदगर्भः, पुं, (वेदा गर्भे अन्तरे यस्य।) ब्रह्मा। (यथा, भागवते। २। ४। २४।
"एतदेवात्मभू राजन् नारदाय विपृच्छते।
वेदगर्भोऽभ्यधात् साक्षाद्यदाह हरिरात्मनः॥")
ब्राह्मणः। इति हेमचन्द्रः॥

वेदगुप्तिः, स्त्री, (वेदानां गुप्तिः।) ब्राह्मणादिकर्त्तृकवेदरक्षा। इति केचित्॥

वेदनं, वेदना, } क्ली, स्त्री, (विद्+ल्युट्। पक्षे। "घट्टिवन्दिविदिभ्य उपसंख्यानम्।" ३। ३। १०७। इत्यस्य वार्त्तिकोक्त्या युच्।) अनुभवः। तत्पर्य्यायः। संवेदः २। इत्यमरः॥ ज्ञानम्। दुःखम्। इति मेदिनी॥ विवाहः। यथा,—
"पाणिग्रहणसंस्कारः सवर्णास्वपदिश्यते।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि॥
शरः क्षत्त्रियया ग्राह्यः प्रतोदो वैश्यकन्यया।
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने॥"
इति मानवे ३ अध्यायः॥*॥
पाणीति। समानजातीयासु उह्यमानासु हस्तग्रहणलक्षणः संस्कारो गृह्यादिशास्त्रेण विधीयते। विजातीयासु पुनरुह्यमानासु विवाहकर्म्मणि पाणिग्रहणस्थाने अयमनन्तरश्लोके वक्ष्यमाणो विधिर्ज्ञेयः। शर इति। क्षत्त्रियया पाणिग्रहणस्थाने ब्राह्मणविवाहे ब्राह्मणहस्तपरिगृहीतकाण्डैकदेशो ग्राह्यः। वैश्यया ब्राह्मणक्षत्त्रियविवाहे ब्राह्मणक्षत्त्रियविधृतप्रतोदैकदेशो ग्राह्यः। शूद्रया पुनर्द्विजातित्रयविवाहे प्रावृतवसनदशा ग्राह्या। इति कुल्लूकभट्टः॥

वेदनिन्दकः, पुं, (वेदं निन्दतीति। निन्द+ण्वुल्।) नास्तिकः। इति जटाधरः॥ (यथा, यमः। ३०।
"दुर्भगो हि तथा षण्ढः पापक्षो वेदनिन्दकः॥")
बुद्धश्च॥

वेदपारगः, त्रि, (वेदस्य पारं गच्छतीति। गम+डः।) वेदवेत्ता। ब्रह्मज्ञानी। यथा,—
"चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे।
वेऽभिजाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः॥"
इति श्राद्धतत्त्वे पितृगाथा॥

वेदमाता, [ऋ] स्त्री, (वेदानां माता।) गायत्री। यथा,—
"योऽधीतेऽहन्यहन्येतां सावित्रीं वेदमातरम्।
विज्ञायार्थं ब्रह्मचारी स याति परमां गतिम्॥
गायत्रीं वेदजननीं गायत्रीं लोकपावनीम्।
न गायत्र्याः परं जप्यं एतद्विज्ञाय मुच्यते॥"
इति कौर्म्मे उपविभागे १३ अध्यायः॥*॥
दुर्गा। यथा,—
"ब्रह्मिष्ठा वेदमातृत्वाद्गायत्री चरणायना।
वेदेषु चरते यत्नात्तेन सा ब्रह्मचारिणी॥"
इति देवीपुराणे ४५ अध्यायः॥

वेदवती, स्त्री, (वेदं ज्ञानमस्त्यस्या इति। वेद+मतुप्। मस्य वः। स्त्रियां ङीप्।) कुशध्वजराजकन्या। सा जन्मान्तरे सीता। यथा,
वह्निरुवाच।
"त्वं गच्छ तपसे देवि! पुष्करञ्च सुपुण्यदम्।
कृत्वा तपस्यां तत्रैव स्वर्गलक्ष्मीर्भविष्यति॥
सा च तद्वचनं श्रुत्वा प्रतप्य पुष्करे तपः।
दिव्यं त्रिलक्षवर्षञ्च स्वर्गलक्ष्मीर्बभूव ह॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा।
कामिनी पाण्डवानाञ्च द्रौपदी द्रुपदात्मजा॥
सत्ये युगे वेदवती कुशध्वजसुता शुभा।
त्रेतायां रामपत्नी सा सीतेति जनकात्मजा॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा।
त्रिहायणीति सा प्रोक्ता विद्यमानयुगत्रये॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १२ अध्यायः॥
(पारिपात्रपर्व्वतस्थनदीविशेषः। यथा, मार्कण्डेये। ५७। १८।
"वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च॥")

वेदवदनं, क्ली, (वेदानां वदनमिव।) व्याकरणम्। यथा,—
"यो वेद वेदवदनं सदनं हि सम्यग्-
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः॥

(वेदा वदने यस्येति विग्रहे ब्रह्मणि, पुं। यथा, देवीभागवते। ७। ३०। ८१।
"गायत्री वेदवदने पार्व्वती शिवसन्निधौ॥")

वेदवासः, पुं, (वेदानां वासो यस्मिन्।) ब्राह्मणः। इति शब्दरत्नावली॥

वेदवित्, [द्] पुं, (वेदान् वेत्तीति। विद्+क्विप्।) विष्णुः। यथा,—
"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः॥"
इति तस्य सहस्रनामस्तोत्रम्॥
वेदत्री, त्रि। (यथा, मनुः। २। ७८।
"एतदक्षरमेतां च जपन् व्याहृतिपूर्व्विकाम्।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते॥")

वेदव्यासः, पुं, (वेदं व्यस्यति पृथक् करोतीति। वि+अस+अण्। निरुक्तिस्तु परत्र द्रष्टव्या।) मुनिविशेषः। तत्पर्य्यायः। माठरः २ द्वैपायनः ३ पाराशर्य्यः ४ कानीनः ५ वादरायणः ६ व्यासः ७। इति हेमचन्द्रः॥ कृष्णद्वैपायनः ८ सत्यभारतः ९ पाराशरिः १० सात्यवतः ११। इति त्रिकाण्डशेषः॥ वादरायणिः १२ सत्यवतीसुतः १३ सत्यरतः १४ पाराशरः १५। इति शब्दरत्नावली॥ (यथा, विष्णुपुराणे।
"वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक्।
द्वापरे तु युगे विष्णुर्व्यासरूपी महामुने।
वेदमेकं स बहुधा कुरुते जगतो हितः॥
यथा च कुरुते तत्त्वा वेदमेकं पृथक् प्रभुः।
वेदव्यासाभिधाना तु सा सा मूर्त्तिर्मधुद्विषः॥")
अस्यान्यत् विवरणं व्यासशब्दे द्रष्टव्यम्॥

वेदाग्रणीः, स्त्री, (वेदानामग्रणीः।) सरस्वती। इति राजनिर्घण्टः॥

वेदाङ्गं, क्ली, (वेदस्य अङ्गम्।) श्रुत्यवयवषट्प्रकारशास्त्रम्। तद्यथा। शिक्षा १ कल्पः २ व्याकरणम् ३ निरुक्तम् ४ ज्योतिषम् ५ छन्दः ६। यदुक्तम्।
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः।
छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते॥" इति।
तत्र अकारादिवर्णानां स्थूलकरणप्रयत्नबोधिका अकुहविसर्ज्जनीयाः कण्ठ्या इत्यादिका शिक्षा। यागक्रियाणामुपदेशः कल्पः। साधुशब्दान्वाख्यानं व्याकरणम्। वर्णागमो वर्णविपर्य्ययश्च इत्यादिना निश्चयेनोक्तं निरुक्तम्। ग्रहणादिगणनशास्त्रं ज्योतिः। श्रुतिच्छन्दसां प्रत्यायकं शास्त्रं छन्दोविचितिः। इत्यमरभरतौ॥ (यथा, मनुः। ४। ९८।
"वेदाङ्गानि च सर्व्वाणि कृष्णपक्षेषु सम्पठेत्॥")

वेदादि, क्ली, (वेदानामादि। "क्वचिदौपचारिकाः शब्दाः स्वलिङ्गमपि त्यजन्तीति" न्यायादस्य क्लीवत्वम्।) प्रणवम्। यथा,—
"वेदादि भुवनेशीञ्च श्रीबीजं ङेयुतं भृगुम्।
कारयित्वा वह्निकान्तं शुक्रस्य च षड़क्षरम्॥"
इति रुद्रयामलम्॥
(वेदस्य पूर्व्वं, पुं। यथा, तैत्तिरीयारण्यके।
"यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः॥")

वेदादिबीजं, क्ली, (वेदस्यादौ प्रयुक्तं बीजम्।) प्रणवम्। यथा,—
"वेदादि भुवनेशीञ्च श्रीबीजं ङेयुतं भृगुम्।
कारयित्वा वह्निकान्तं शुक्रस्य च षड़क्षरम्॥
ॐ ह्रीँ श्रीशुक्राय। इति रुद्रयामलम्॥
"वेदादिबीजं ह्रूँ बीजं स्त्रीबीजं तन्निकेतनम्।
शक्तिबीजं रमाबीजं मायाबीजं सुखाकरम्॥"
इति राजराजेश्वरीतन्त्रम्॥

वेदाधिपः, पुं, (वेदानामधिपः।) चतुर्व्वेदाधिपतिग्रहः। यथा,—
"ऋग्वेदाधिपतिर्जीवो यजुर्व्वेदाधिपः सितः।
सामवेदाधिपो भौमः शशिजोऽथर्व्ववेदराट्॥"
इति ज्योतिस्तत्त्वम्॥

वेदान्तः, पुं, (वेदानां अन्तः।) उपनिषत्। इति हेमचन्द्रः। वेदव्यासप्रणीतदर्शनशास्त्रविशेषोऽपि। यथा। वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च। इति। परमहंसपरिव्राजकाचार्य्यश्रीसदानन्दयोगीन्द्रविरचितवेदान्तसारः॥ *॥ "इदानीं सर्व्वस्यापि वस्तुविचारोद्देशपूर्व्वकत्वात् प्रतिज्ञातं वेदान्तं नामतो निर्दिशति वेदान्त इति। उपनिषद एव प्रमाणं उपनिषत्-प्रमाणम्। उपनिषदो यत्र प्रमाणमिति वा। तदुपकारीणि वेदान्तवाक्यसंग्राहकाणि शारीरकसूत्रादीनि च। शरीरमेव शारीरं तत्र भवो जीवः शारीरकः। सूत्र्यते याथातथ्येन निरूप्यते यैः तानि शारीरकसूत्राणि 'अथातो ब्रह्मजिज्ञासा' इत्यादीनि। आदिशब्दो भाष्यादिसंग्रहार्थः। चशब्दो वेदान्तशब्दानुषङ्गार्थः। यद्वा शारीरकसूत्राणि तद्व्याख्यायार्थवादिवेदान्तार्थसंग्रहवाक्यानि। 'अथातो ब्रह्मजिज्ञासा' इत्यादिसूत्रादीनि। आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यन्ते। तेषामपि उपनिषच्छब्दवाच्यत्वादिति भावः।" इति श्रीनृसिंहसरस्वतीकृता तट्टीका सुबोधिनी॥ अस्य नामान्तरं उत्तरमीमांसा। तत्र चत्वारः अध्यायाः। तेषु ब्रह्मनिरूपणम्। तद्विवरणं यथा,—
"अव्यक्तादण्डमभूदण्डाद्ब्रह्मा ततः प्रजासर्गः।
मायामयी प्रवृत्तिः संह्रियते पुनः पुनः क्रमशः॥
मायामयोऽप्यचेता गुणकरणगणः करोति कर्म्माणि।
तदधिष्ठाता देही सचेतनोऽपि न करोति किञ्चिदपि॥
यद्वदचेतनमपि सन्निकटस्थे भ्रामके भ्रमति लोहम्।
तद्वत् करणसमूहश्चेष्टति चिदधिष्ठिते देहे॥
यद्वत् सवितर्य्युदिते करोति कर्म्माणि जीवलोकोऽयम्।
न च तानि करोति रविर्न्न कारयति तद्वदात्मापि॥
मनसोऽहंकारविमूर्च्छितस्य चैतन्यबोधितस्येह।
पुरुषाभिमानसुखदुःखभावना भवति मूढ़स्य॥
कर्त्ता भोक्ता द्रष्टास्मि कर्म्मणामुत्तमादीनाम्।
इति तत्स्वभावविमलोऽभिमन्यते सर्व्वगोऽप्यात्मा॥
नानाविधवर्णानां वर्णान् धत्ते यथामलस्फटिकः।
तद्वदुपाधिगुणभावितस्य भावं विभुर्धत्ते॥
गच्छति गच्छति सलिले दिनकरबिम्बं स्थिते स्थितिं याति।
अन्तःकरणे गच्छति गच्छत्यात्मापि तद्वदिह॥
राहुरदृश्योऽपि यथा शशिबिम्बस्थः प्रकाशते जगति।
सर्व्वगतोऽपि तथात्मा बुद्धिस्थो दृश्यतामेति॥
आदर्शे मलरहिते यद्वद्रूपं विचिनुते लोकः।
आलोकयति तथात्मा विशुद्धबुद्धौ स्वमात्मानम्॥
सर्व्वगतं तत निरुपममद्वैतं तच्च चेतसा गम्यम्।
यद्बुद्धिगतं ब्रह्मोपलभ्यते शिष्यबोध्यं तत्॥
बुद्धिमनोऽहंकारास्तन्मात्रेन्द्रियगणाः सभूतगणाः।
संसारसर्गपरिरक्षणक्षमाः प्राकृता ज्ञेयाः॥
धर्म्माधर्म्मौ सुखदुःखकल्पना स्वर्गनरकवासश्च।
उत्पत्तिनिधनवर्णाश्रमा न सन्तीह परमार्थे॥
मृगतृष्णायामुदकं शुक्तौ रजतं भुजङ्गमो रज्ज्वाम्।
तैमिरिकचन्द्रयुगवत् भ्रान्तं निखिलं जगद्रूपम्॥
यद्वद्दिनकर एको विभाति सलिलाशयेषु सर्व्वेषु।
तद्वत् सकलोपाधिष्ववस्थितो भाति परमात्मा॥
खमिव घटादिष्वन्तर्ब्बहिःस्थितं ब्रह्म सर्व्वपिण्डेषु।
देहोऽहमित्ययमात्मनि बुद्धिः संसारबन्धाय॥
सर्व्वविकल्पनहीनः शुद्धो बुद्धोऽजरोऽमरः शान्तः।
अमलः सकृद्विभातश्चेतन आत्मा खवद्व्यापी॥
रसफाणितशर्करिका गुड़खण्डा विकृतयो यथैवेक्षोः।
तद्वदवस्थाभेदाः परमात्मन्येव बहुरूपाः॥
विश्वात्मान्तर्य्यामिप्राणविराट्देहजातिपिण्डान्ताः।
व्यवहारस्यस्यात्मन एतेऽवस्थाविशेषाः स्युः॥
रज्ज्वां नास्ति भुजङ्गः सर्पभयं भवति हेतुना केन।
तद्वद्द्वैतविकल्पभ्रान्तिरविद्या न सत्यमिदम्॥
एतत्तदन्धकारं यदनात्मन्यात्मताभ्रान्त्या।
न विदन्ति वासुदेवं सर्व्वात्मानं नरा मूढ़ाः॥
प्राणादनन्तभेदैरात्मानं संविलत्य जालमिव।
संहरति वासुदेवः स्वविभूत्या क्रीड़मान इव॥
त्रिभिरेव विश्वतैजसप्राज्ञैस्तैरादिमध्यनिधनाख्यैः।
जाग्रत्स्वप्नसुषुप्तैर्भ्रमभूतैश्छादितं तुर्य्यम्॥
मोहयतीवात्मानं स्वमायया द्वैतरूपया देवः।
उपलभते स्वयमेवं गुहागतं पुरुषमात्मानम्॥

ज्वलनाद्धूमोद्गतिभिर्विविधाकृतिरम्बरे यथा भाति ।
तद्वद्विष्णोः सृष्टिः स्वमाययाद्वैतविस्तरो भाति ॥
श्रान्त इव मनसि श्रान्ते हृष्टे हृष्ट इव मूढ इव मूढे ।
व्यवहारस्थो न पुनः परमार्थेन ईश्वरो भवति ॥
जलधरधूमोन्नतिभिर्मलिनीक्रियते यथा न गगनतलम् ।
तद्वत् प्रकृतिविकारैरपरामृष्टः परः पुरुषः ॥
एकस्मिन्नपि च घटे धूमादिमलावृते घटाः शेषाः ।
न भवन्ति मलोपेता यद्वज्जीवोऽपि तद्वदिह ॥
देहेन्द्रियेषु नियताः कर्म्मगुणाः कुर्व्वते स्वभोगार्थम् ।
नाहं कर्त्ता न ममेति ज्ञानतः कर्म्म नैव बध्नाति ॥
अन्यशरीरेण कृतं कर्म्म भवे येन देह उत्पन्नः ।
तदवश्यं भोक्तव्यं भोगादेव क्षयोऽस्य निर्दिष्टः ॥
प्राक् ज्ञानोत्पत्तिचितं यत् कर्म्म ज्ञानशिखिशिखालीढम् ।
बीजमिव दहनदग्धं जन्मसमर्थं न तद्भवति ॥
ज्ञानोत्पत्तेरूर्द्ध्वं क्रियमाणं कर्म्म यत्तदपि ।
न श्लिष्यति कर्त्तारं पुष्करपर्णं यथा वारि ॥
वाग्देहमानसैरिह कर्म्मचयः क्रियत इति बुधाः प्राहुः ।
एकोऽपि नाहमेषां कर्त्ता तत्कर्म्मणामस्मि ॥
कर्म्मफलबीजनाशाज्जन्मविनाशो न चात्र सन्देहः ।
बुद्ध्वैवमपगततमाः सवितेव विभाति भास्वरूपः ॥
यद्वदिषीकातूलं पवनोद्धूतं दश दिशो याति ।
ब्रह्मणि तत्त्वज्ञानात्तथैव कर्म्माणि तत्त्वविदः ।
क्षीरादुद्धृतमाज्यं क्षिप्तं यद्वन्न पूर्व्ववत्तस्मिन् ।
प्रकृतिगुणेभ्यस्तद्वत् पृथक्कृतश्चेतनोऽप्यात्मा ॥
गुणमयमायागहनं निर्हूय यथा तमः सहस्रांशुः ।
बाह्याभ्यन्तरचारी सैन्धवघनवत् भवेत् पुरुषः ॥
यद्वद्देशोऽवयवा मृदेव तस्या विकारजातानि ।
तद्वत् स्थावरजङ्गममद्वैतं द्वैतवद्भाति ॥
एकस्मात् चैत्रशाद्दवः चैत्रजातयो जाताः ।
लौहगतादिव दहनाः समन्ततो विस्फुलिङ्गकणाः ॥
ते गुणसङ्गमदोषाद्दग्धा इव धान्यजातयः स्वतुषैः ।
जन्म लभन्ते तावद्यावन्न ज्ञानवह्निना दग्धाः ॥
त्रिगुणा चैतन्यात्मनि सर्व्वगतेऽवस्थिताखिलाधारे ।
कुरुते सृष्टिमविद्या सर्व्वत्र स्पृश्यते तया नात्मा ॥
रज्ज्वां भुजङ्गहेतौ प्रभवविनाशौ यथा न स्तः ।
जगदुत्पत्तिविनाशौ न च कारणमस्ति तद्वदिह ॥
जन्मविनाशनगमनागमनमलैः सङ्गवर्जितो नित्यम् ।
आकाश इव घटादिषु सर्व्वात्मा सर्व्वतोपेतः ॥
कर्म्मशुभाशुभजनितैः सुखदुःखैर्बन्धो भवत्युपाधीनाम् ।
तत्संसर्गाद्बद्धस्तस्करसङ्गादतस्करवत् ॥
देहगुणकरणगोचरसङ्गात् पुरुषस्य यावदिह भावाः ।
तावन्मायापाशैः संसारे बद्ध इव भाति ॥
मातृपितृबान्धवधनभोगसंमूढः ।
जन्मजरामरणमये चक्र इव भ्राम्यते जन्तुः ॥
लोकव्यवहारकृतां य इहाविद्यामुपासते मूढाः ।
ते जननमरणधर्म्माणो भ्रान्तमनित्य खिद्यन्ते ॥
हिमफेनबुद्बुदा इव जलस्य धूमो यथा वह्नेः ।
तद्वत् स्वभावभूता मायैषा कीर्त्तिता विष्णोः ॥
एवं द्वैतविकल्पां भ्रमस्वरूपां विमोहिनीं मायाम् ।
उत्सृज्य सकलं निष्कलमद्वैतं भावयेद्ब्रह्म ॥
यद्वत् सलिले सलिलं क्षीरे क्षीरं समीरणे वायुः ।
तद्वद्ब्रह्मणि विमले भावनया तन्मयत्वमुपयाति ॥
इत्थं द्वैतसमूहे भावनया ब्रह्मभूयमुपयाति ।
को मोहः कः शोकः सर्व्वं ब्रह्मावलोकयतः ॥
विगतोपाधिस्फटिकः स्वप्रभया भाति निर्म्मलो यद्वत् ।
चिद्दीपः स्वप्रभया तथा विभातीह निरुपाधिः ॥
गुणकरणगणशरीरप्राणैस्तनुमात्रजातिसुखदुःखैः ।
अपरामृष्टो व्यापी चिद्रूपोऽयं सदा विमलः ॥
द्रष्टा श्रोता घ्राता स्पर्शयिता रसयिता ग्रहीता च ।
देही देहेन्द्रियधीविवर्जितः स्यान्न कर्त्तासौ ॥
एको नैकत्रावस्थितो महैश्वर्यं योगतो व्याप्तः ।
आकाशवदखिलमिदं न कश्चिदप्यत्र सन्देहः ॥
आत्मैवेदं सर्व्वं निष्कलसकलं यदेव भावयति ।
मोहगहनाद्विमुक्तस्तदैव परमेश्वरीभूतः ॥
यद्यत् सिद्धान्तागमतर्केषु प्रभ्रमन्ति रागान्धाः ।
अनुमोदामस्तत्तेषां सर्व्वात्मवादिधियाम् ॥
सर्व्वाकारो भगवानुपास्यते येन येन भावेन ।
तं तं भावं भूत्वा चिन्तामणिवत् समभ्येति ॥
नारायणमात्मानं ज्ञात्वा सर्गस्थितिप्रलयहेतुम् ।
सर्व्वज्ञः सर्व्वगतः सर्व्वः सर्व्वेश्वरो भवति ॥
आत्मज्ञस्तरति शुचं यस्माद्विद्वान्न बिभेति कुतश्चित् ।
मृत्योरपि मरणभयं न भवत्यन्यद्भयं कुतस्तस्य ॥
वध्यद्विड्वध्यघातकबन्धनमोक्षैर्व्विवर्ज्जितं नित्यम् ।
परमार्थतत्त्वमेतत् यदतोऽन्यत्तदनृतं सर्व्वम् ॥
एवं प्रकृतिपुरुषं विज्ञाय निरस्तकल्पनाजालः ।
आत्मारामः प्रशमं समास्थितः केवलीभवति ॥
नलकदलिवेणुवाणा नश्यन्ति यथा स्वपुष्पमासाद्य ।
तद्वत्स्वभावभूताः स्वभावतां प्राप्य नश्यन्ति ॥
भिन्ने ज्ञानग्रन्थौ छिन्ने संशयगणे शुभाशुभे क्षीणे ।
दग्धे च जन्मबीजे परमानन्दं हरिं याति ॥
मोक्षस्य नैव किञ्चिद्धामास्ति न चापि गमनमन्यत्र ।
अज्ञानमयग्रन्थिर्भेदो यस्तं विदुर्मोक्षम् ॥
बुद्ध्वैवमसत्यमिदं विष्णोर्मायात्मकं जगद्रूपम् ।
विगतद्वन्द्वोपाधिकभोगासङ्गो भवेच्छान्तः ॥
बुद्ध्वा विभक्तां प्रकृतिं पुरुषः संसारमध्यगो भवति ।
निर्मुक्तः सर्व्वकर्म्मभिरम्बुजपत्रं यथा सलिलैः ॥
अश्नन् यद्वा तद्वा संवीतो येन केनचिच्छान्तः ।
यत्र क्वचन च शायी विमुच्यते सर्व्वभूतात्मा ॥
हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः ॥
मदकोपहर्षमत्सरविषादभयपरुषवर्ज्यवाग्बुद्धिः ।
निस्तोत्रवषट्कारो जड़वद्विचरेदगाधमतिः ॥
उत्पत्तिनाशवर्ज्जितमेवं परमार्थमुपलभ्य ।
कृतकृत्यः सफलजनुः सर्व्वगतस्तिष्ठति यथेष्टम् ॥
व्यापिनमभिन्नमित्थं सर्व्वात्मानं विधूतनानात्वम् ।
निरुपमपरमानन्दं यो वेद स तन्मयो भवति ॥
तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम् ।
ज्ञानसमकालं मुक्तः कैवल्यं याति हतशोकः ॥
पुण्याय तीर्थसेवा निरयाय श्वपचसदननिधनगतिः ।
पुण्यापुण्यकलङ्कस्पर्शाभावे तु किन्तेन ॥
दृषाग्राघ्रातपादो यद्वदनिच्छन्नरः क्षितौ पतति ।
तद्वद्गुणपुरुषज्ञोऽनिच्छन्नपि केवलीभवति ॥
परमार्थमार्गसाधनमारभ्याप्राप्य योगमपि नाम ।
सुरलोकभोगभोगी मुदितमना मोदते सुचिरम् ॥
विषयेषु सार्व्वभौमः सर्व्वजनैः पूज्यते यथा राजा ।
भुवनेषु सर्व्वदेवैर्योगभ्रष्टस्तथा पूज्यः ।
महता कालेन महान् मानुष्यं प्राप्य योगमभ्यस्य ।
प्राप्नोति दिव्यममृतं यत्तत् परमं पदं विष्णोः ॥
वेदान्तशास्त्रमखिलं विलोक्य शेषोऽखिलाधारः ।
आर्य्यापञ्चाशीत्या बबन्ध परमार्थसारमिदम् ॥”
इति श्रीशेषनागविरचितं परमार्थसारं समाप्तम् ॥

वेदान्ती, [न्] पुं, (वेदान्तोऽस्यास्तीति । वेदान्त + इनिः ।) वेदान्तशास्त्रवेत्ता । तत्पर्य्यायः । ब्रह्मवादी २ । इति जटाधरः ॥

वेदारः, पुं, कृकलासः । इति त्रिकाण्डशेषः ॥

वेदाभ्यासः, पुं, (वेदस्य अभ्यासः ।) वेदानुशीलनम् । स च पञ्चविधः । यथा, दक्षः ।
"द्वितीये च तथा भागे वेदाभ्यासो विधीयते ।
वेदाभ्यासो हि विप्राणां परमं तप उच्यते ॥
ब्रह्मयज्ञपरं ज्ञेयः षडङ्गसहितश्च यः ।
वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः ।
तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥
शङ्खलिखितौ । न वेदमनधीत्यान्यां विद्यामधीयीतान्यत्र वेदाङ्गस्मृतिभ्यः ।" इत्याह्निकतत्त्वम् ॥

वेदि, स्त्री, (विद् + इन् ।) अभिज्ञा । इति शब्दचन्द्रिका ॥

वेदिः, स्त्री, (विद्यते पुण्यमस्यामिति । विद् + "हृपिषिरुहिवृतिविदिछिदीति ।" उणा० ४ । ११८ । इति इन् ।) परिष्कृता भूमिः । इत्यमरः ॥ परिष्कृता यज्ञार्थं पशुबन्धनाय यज्ञपात्रासादनाय चातिसंस्कारा भूमिर्व्वेदिरुच्यते । सा च डमरुकाद्याकारा पिण्डिका । वेदयति निवारयति दयनार्त्तं वेदिः । विद ङ क ञ चेतनाख्याने चायवादे नाम्नीति इः । वेदिः स्त्री वेदी च । इति भरतः ॥ (यथा, रघुः । ११ । २५ ।
"वीक्ष्य वेदिमथ रक्तबिन्दुभिः-
र्बन्धुजीवपृथुभिः प्रदूषिताम् ॥")
अङ्गुलिमुद्रा । इति मेदिनी ॥ (गृहोपकरणविशेषः । यथा, भागवते । १० । ४१ । २१ ।
"वैदूर्य्यवज्रामलनीलविद्रुमै-
र्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥")

वेदिः, पुं, (वेत्तीति । विद् + इन् ।) पण्डितः । इति मेदिनी ॥

वेदिका, स्त्री, (वेदिरिव । स्वार्थे + कन् ।) मङ्गलकर्म्मार्थं निर्म्मितवेदिः । तत्पर्य्यायः । वितर्द्दिः २ । इत्यमरः ॥ वितर्द्दी ३ वेदिः ४ वेदी ५ । इति तट्टीका ॥ हे आरामाङ्गनादिमध्यस्थवेदिकायाम् । देवागारादौ काष्ठादिचतुष्किकायामित्यन्ये । दारुपरिष्कृता चतुरस्रा विश्रामभूम्बितर्द्दिरित्यपरे । स्तम्भसंलग्नपीठिका वितर्द्दिरिति केचित् । मङ्गल्याङ्गनमध्यस्थचतुष्किकेति केचित् । मङ्गलस्नानार्थं निर्म्मितवेदिकेति केचित् । अशुभं वितर्दयति वितर्द्दिः । तर्द हिंसे नाम्नीति इः । वेदिका साहचर्य्यात् स्त्री इदन्तत्वात् पक्षे ईप् वितर्द्दी च । वितर्द्दिः काष्ठलोष्ट्रौ स्यादिति रत्ने । वितर्द्दिरपीति मधुः । विदम्भि विद्यते वा अस्यामिति वेदिः पूर्व्ववदिः स्वार्थे कः । अतएव वेदिर्व्वेदी च । इति भरतः ॥ (यथा, कुमारे । ३ । ४४ ।
"स देवदारुद्रुमवेदिकायां
शार्द्दूलचर्म्मव्यवधानवत्याम् ॥")

वेदिजा, स्त्री, (वेद्या जायते इति । जन + डः ।) द्रौपदी । इति हेमचन्द्रः ॥

वेदितः, त्रि, ज्ञापितः । ण्यन्तविदधातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥

वेदितव्यं, त्रि, (विद् + तव्य ।) वेद्यम् । ज्ञातव्यम् । यथा,—
"आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥"
इति तिथ्यादितत्त्वम् ॥

वेदिता, [ऋ] त्रि, (विद् + तृच् ।) ज्ञाता । तत्पर्य्यायः । विदुरः २ विन्दुः ३ । इति हेमचन्द्रः ॥ यथा, महाभारते । ५ । ४३ । ५२ ।
"न वेदानां वेदिता कश्चिदस्ति
वेदेन वेदं न विदुर्न वेद्यम् ॥")

वेदी, [न्] पुं, (वेत्तीति । विद् + णिनिः ।) पण्डितः । इति शब्दरत्नावली ॥ ब्रह्मा । इति केचित् ॥ ज्ञातरि, त्रि ॥ (यथा, रघुः । ८ । २७ ।
"स परार्द्ध्यगतेरशोच्यतां
पितुरुद्दिश्य सदर्थवेदिभिः ॥")

वेदी, स्त्री, (वेदि + कृदिकारादिति वा ङीष् ।) वेदिः । इत्यमरटीकायां भरतः ॥ सरस्वती । इति शब्दमाला ॥

वेदीशः, पुं, (वेदीनां पण्डितानामीशः ।) ब्रह्मा । इति त्रिकाण्डशेषः ॥

वेदोक्तः, त्रि, (वेदे उक्तः ।) श्रुतिकथितः । यथा,
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥"
इति मलमासतत्त्वम् ॥

वेदोदयः, पुं, (वेदः विषयज्ञानमुदये यस्य ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥

वेदोदितः, त्रि, (वेदे उदितः ।) वेदोक्तः । यथा,—
"वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥"
इति मलमासतत्त्वम् ॥

वेद्यं, त्रि, (विद् + ण्यत् ।) वेदितव्यम् । यथा,—
"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सताम्
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किंवा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥
(धनाय हितम् । यथा, ऋग्वेदे । २ । २ । ३ ।
"रयमिव वेद्यं शुक्रशोचिषमग्निम् ।"
"वेद्यं वेदो धनम् । तस्मै हितम् ।" इति तद्भाष्ये सायणः ॥ स्तुत्यम् । तथा, तत्रैव । ५ । १५ । १ ।
"प्रवेधसे कवये वेद्याय गिरम् ।"
"वेद्याय स्तुत्याय ।" इति तद्भाष्ये सायणः ॥ लभ्यम् । यथा, वाजसनेयसंहितायाम् । १८ । ११ ।
"वित्तं च मे वेद्यञ्च मे ।"
"वेद्यं लभ्यम् ।" इति तद्भाष्ये महीधरः ॥ वेदाय हितमिति । वेद + यत् । वेदहितम् । वेदप्रतिपाद्यम् । यथा, महाभारते ।१३।१५८।३६।
"वेद्यञ्च यत् वेदयते च वेद्यं
विधिश्च यश्चाश्रयते विधेयम् ।
धर्म्मे च वेदे च बले च सर्व्वं
चराचरं केशवं त्वं प्रतीहि ॥")

वेधः, पुं, (विध + घञ् ।) वेधनम् । बँधा इति भाषा । तत्पर्य्यायः । व्यधः २ । इत्यमरः ॥ (यथा, महाभारते । १२ । १६८ । ३६ ।
"बाणवेधे परं यत्नमकरोच्चैव गौतमः ॥")
गभीरता । गहरा इति चाड़ा इति च भाषा ॥ यथा,—
"गणयित्वा विस्तारं बहुषु स्थानेषु तद्युति-
र्भाज्या ।
स्थानकमित्यासममितिरेवन्दैर्घ्ये च वेधे च ।
क्षेत्रफलं वेधगुणं खाते घनहस्तसंख्या स्यात् ।"
इति लीलावत्यां खातव्यवहारः ॥ * ॥
अथ सप्तशलाकावेधः ।
"कृत्तिकादिचतुःसप्तरेखाराशौ परिभ्रमन् ।
ग्रहश्चेदेकरेखास्थो वेधः सप्तशलाकजः ॥"
इति दीपिका ॥ * ॥
अथ खार्ज्जूरवेधः ।
"एकाम्बरगतां मयोदग्र तथा तिर्य्यग्गताः
स्थापयेत्
रेखाचक्रमिदं बुधैरभिहितं खार्ज्जूरिकं तत्र तु ।
बाधातादि तु मूर्ध्नि भन्तु कथितं तत्रैक्यरेखा-
स्थयोः
सूर्य्याचन्द्रमसोर्मिथो निगदिता दृक्पात एका-
र्गलः ॥"
इति रत्नमाला ॥ * ॥
अथ युतवेधः ॥
"पापात् सप्तमगः शशी यदि भवेत् पापेन वा
संयुतो
यत्नात्तं परिवर्ज्जयेत् सुमतिमतो दोषो ह्ययं
कथ्यते ॥"
अथ यामित्रवेधः ।
"रविमन्दकुजाक्रान्तं लग्नाच्चात् सप्तमं त्यजेत् ।
विवाहयात्राचूड़ासु गृहकर्म्मप्रवेशने ॥"
इति रत्नमाला ॥
वामदक्षिणवेधौ वामवेधशब्दे द्रष्टव्यौ ॥

वेधकं, क्ली, (विध + ण्वुल् ।) धान्यकम् । इति राजनिर्घण्टः ॥

वेधकः, पुं, (विध + ण्वुल् ।) कर्पूरः । इति त्रिकाण्डशेषः ॥ अम्लवेतसः । इति राजनिर्घण्टः ॥ (मणिमुक्तादिवेधोपजीवी । यथा, रामायणे । २ । ८४ । १३ ।
"मायूरिकाः क्राकचिका वेधका रोचका-
स्तथा ॥")
वेधकर्त्तरि, त्रि ॥ (यथा, महाभारते । १३ । २३ । ८० ।
"अप्राप्तदमकाश्चैव नासानां वेधकाश्च ये ।
बन्धकाश्च पशूनां ये ते वै निरयगामिनः ॥")

वेधनिका, स्त्री, (विध्यतेऽनयेति । विध + करणे ल्युट् । ततः स्वार्थे कन् ।) मणिशुक्तादिवेधनोपकरणम् । भोमरी इति भाषा । तत्पर्य्यायः । आस्फोटनी । इत्यमरः ॥ तास्फोटनी ३ स्फोटनी ४ प्रवर्द्धिका ५ । इति भरतधृतवाचस्पतिः ॥

वेधनी, स्त्री, (विध्यतेऽनयेति । विध + ल्युट् । स्त्रियां ङीप् ।) हस्तिकर्णवेधनास्त्रम् । इति त्रिकाण्डशेषः ॥ मेधिका । इति भावप्रकाशः ॥

वेधमुख्यः, पुं, (वेधे वेधने मुख्यः श्रेष्ठः ।) कर्पूरः । इति राजनिर्घण्टः ॥

वेधमुख्यकः, पुं, (वेधमुख्य + स्वार्थे कन् ।) हरिद्राभः । काँचा हलदि इति ख्यातः । तत्पर्य्यायः । कर्चूरकः २ द्राविड़कः ३ कल्पकः ४ काल्यकः ५ । इत्यमरभरतौ ॥

वेधमुख्या, स्त्री, (वेधे मुख्या ।) कस्तूरी । इति राजनिर्घण्टः ॥

वेधसं, क्ली, ब्राह्मतीर्थम् । अङ्गुष्ठमूलम् । इति शब्दचन्द्रिका ॥

वेधाः, [स्] पुं,(विदधातीति । वि + धा + "विधाञो वेध च ।" उणा० ४ । २२४ । इति असिः । वेधादेशश्च सोपसर्गधातोः ।) ब्रह्मा । (यथा, रघुः । १ । २९ ।
"तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्व्वे तस्यासन् परार्थैकफला गुणाः ॥")
विष्णुः । इत्यमरः ॥ (शिवः । यथा, हरिवंशे भविष्यपर्व्वणि । १५ । १२ ।
"नमस्ते शितिकण्ठाय नीलग्रीवाय वेधसे ॥")
सूर्य्यः । इति शब्दरत्नावली ॥ पण्डितः । इति विश्वः ॥ श्वेतार्कवृक्षः । इति शब्दचन्द्रिका ॥ अनन्तपुत्त्रः । यथा,—
"इक्ष्वाकुर्व्यंशदायादो मध्यदेशमवाप्तवान् ।
सुद्युम्नस्य प्रतिष्ठानं तस्य पुत्त्रः पुरूरवाः ॥
नरिष्यतः शकाः पुत्त्राः शाकं चत्रमुदाहृतम् ।
नाभागस्याम्बरीषोऽभूत् स चात्रं पार्थिवं ततः ॥
कोऽपवे वार्षकं चैत्रं रक्षरश्मिर्बभूव ह ।
शर्य्यातिर्मिथुनस्त्वासीदनन्तो नाम विश्रुतः ॥
सुकन्या नाम कन्या च या पत्नी यादवस्य च ।
अनन्तस्य च पुत्त्रोऽभूत् वेधो नाम महाप्रभुः ।
आनर्त्तविषये तेन पुरी कुशस्थली कृता ॥"
इति वह्निपुराणे सागरोपाख्याननामाध्यायः ॥
(प्रजापतिर्दक्षादिः । यथा, कुमारे ।२ । १४ ।
"परतोऽपि परश्चासि विधाता वेधसामपि ॥"
त्रि, मेधावी । इति निघण्टुः । ३।१५ ॥ विविधकर्त्ता । यथा, ऋग्वेदे । ५ । ४३ । १२ ।
"आ वेधसं नीलपृष्ठं बृहन्तम् ।"
"कीदृशं देवं वेधसं विविधकर्त्तारम् ।" इति तद्भाष्ये सायणः ॥)

वेधितः, पुं, (विध + णिच् + क्तः ।) कारितविद्धः । छिद्रितः । इत्यमरः ॥

वेधिनी, स्त्री, (विधति त्वचमिति । विध छिद्रीकरणे + णिनिः । ङीप् ।) रक्तपा । इति शब्दरत्नावली ॥ जोँक इति भाषा ॥ मेथिका । इति राजनिर्घण्टः ॥

वेधी, [न्] त्रि, (विध्यतीति । विध छिद्रीकरणे + णिनिः ।) वेधकर्त्ता । (यथा, महाभारते । ५ । ८६ । ३० ।
"तेषामपीषि कर्णांश्च नासिकाश्चैव मायया ।
निमित्तवेधी स मुनिरीषीकाभिः समर्पयत् ॥")
वेधशिरिटः । विधधातोर्णिनुप्रत्ययेन वेधशब्दादस्त्यर्थे इनुप्रत्ययेन वा निष्पन्नः ॥ अम्लवेतसे, पुं । इति राजनिर्घण्टः ॥

वेध्यं, क्ली, (विध + ण्यत् ।) लक्ष्यम् । इति जटाधरः ॥ (यथा, मार्कण्डेये । ४२ । ७ ।
"प्रणवो धनुः शरो ह्यात्मा ब्रह्म वेध्यमनुत्तमम् ।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ॥")
वेधनीये, त्रि । यथा,—
"षट्कर्णोत्पत्तिमाश्रित्य भानोः शुद्धा समेऽपि च ।
कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत् ॥"
इति मलमासतत्त्वम् ॥

वेनः, पुं, (अजतीति । अज गतौ + "धापृवस्यज्यतिभ्यो नः ।" उणा० ३।६। इति नः । अजतेर्वीभावः ।) प्रजापतिः । इत्युणादिकोषः ॥ (पृथुराजपिता । यथा, मार्कण्डेये ।२७।१५।
"हतमैर्लं तथा लोभात् मदाद्वेनं द्विजैर्हतम् ॥"
अस्याख्यानान्तरं महरण्यान्तवेणशब्दे द्रष्टव्यम् ॥ * ॥ देवविशेषः । इति निघण्टुः ।५।४।२४॥ यथा, ऋग्वेदे । १० । १२३ । १ ।
"अयं वेनश्चोदयत् पृश्निगर्भाः ॥"
"वेनः कान्तः एतत्संज्ञो मध्यमस्थानो देवः ।" इति तद्भाष्ये सायणः ॥ * ॥ अजति गच्छत्यनेन स्वर्गमिति । यज्ञः । इति निघण्टुः । ३ । १७२ ॥ त्रि, मेधावी । इति निघण्टुः । ३।१५।५ ॥ यथा, वाजसनेयसंहितायाम् । १३ । ३ ।
"सीमतः सुरुचो वेन आवः ॥"
"वेनः कामनीयो मेधावी वा ।" इति तद्भाष्यम् ॥ कामयमानः । यथा, ऋग्वेदे । ८ । ८९ । ५ ।
"आयन्नमा वेना आरुहन्नृतस्य ॥"
"वेनाः कामयमानाः ।" इति तद्भाष्ये सायणः ॥)

वेन्ना, स्त्री, (वन शब्दे संभक्तौ वा + "वनेरिच्चोपधायाः ।" उणा० ३ । ८ । इति नः उपधाया इत्वं च ।) नदीविशेषः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । (यथा, महाभारते ।३।८८।३।
"वेन्ना भीमरथी चोभे नद्यौ पापभयापहे ॥")

वेप, ट् ऋ ङ चले । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-अक०-सेट् ।) चलः कम्पनम् । टु, वेपथुः । ऋ, अविवेपत् । ङ, वेपते वायुना द्रुमः । इति दुर्गादासः ॥

वेपः, [स्] क्ली, (वेप कम्पने + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इत्यसुन् ।) अनवद्यम् । यथा,—
"स्यादलभ्योतिषोः क्लीबं वचो वाच्यच धातुषु ।
मेदो वेपोऽनवद्येऽथ सभायाञ्च सदो न ना ॥"
इत्युणादिकोषः ॥
(विरेपः । इति साधुपाठः ॥ इत्युज्ज्वलः । ४ । १८९ ॥ * ॥ कर्म्म । इति निघण्टुः । २।१।५ ॥ यथा, ऋग्वेदे ।१० । ४६ । ८ ।
"प्रजिह्वया भरते वेपो अग्निः ॥"
"वेपः कर्म्मनामैतत् ।" इति तद्भाष्ये सायणः ॥)

वेपथुः, पुं, (वेपनमिति । वेप + "ट्वितोऽथुच् ।" ३ । ३ । ८९ । इति अथुच् ।) कम्पः । इत्यमरः ॥ (यथा, गीतायाम् । १ । २९ ।
"वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥")

वेपनं, क्ली, (वेप + ल्युट् ।) कम्पनम् । इति शब्दरत्नावली ॥ (यथा, सुश्रुते शारीरस्थाने १० अध्यायः । "तत्र विह्वलस्य क्रोशनविनमनमोहनभ्रमणवेपनानि मरणं वा भवति ॥")

वेमः, पुं, वापदण्डः । यथा,—
"वापदण्डः पुंसि वेमा वेमो ना वेम न द्वयोः ॥"
इति शब्दरत्नावली ॥

वेमा, [न्] पुं, (वयत्यनेनेति । वे + "वेञः सर्व्वत्र ।" उणा० ४ । १४९ । इति इमनिन् ।) वापदण्डः । इत्यमरभरतौ ॥ (यथा, नैषधे । १ । १२ ।
"सितांशुवर्णैर्वयति स्म तद्गुणै-
र्महासिवेम्नः सहकृत्वरी बहुम् ॥"
अर्द्धर्चादित्वात् क्लीवलिङ्गोऽपि । यथा, वाजसनेयसंहितायाम् । १९ । ८३ ।
"नग्नहुर्धीरस्तसरं न वेम ॥")

वेरं, क्ली, शरीरम् । वार्त्ताकुः । कुङ्कुमम् । इति मेदिनी ॥

वेरकं, क्ली, कर्पूरम् । इति हारावली ॥

वेल, ऋ चाले । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अविवेलत् । इति दुर्गादासः ॥

वेल, त् क कालार्थे । इति कविकल्पद्रुमः । (अदन्तचुरा०-पर०-अक०-सेट् ।) कालार्थः कालोपदेशः । अविवेलत् । कालमियत्तया गणकः एतावती वेलेति कथितवानित्यर्थः । इति दुर्गादासः ॥

वेलं, क्ली, उपवनम् । यथा, हेमचन्द्रे ।
"अथोपाभ्यां वनं वेलमारामः कृत्रिमे वने ॥"

वेला, स्त्री, (वेल्यतेऽनयेति । वेल + गुरोश्च हलः इत्यः । ततष्टाप् ।) कालः । तत्पर्य्यायः । समयः २ क्षणः ३ वारः ४ अवसरः ५ प्रस्तावः ६ प्रक्रमः ७ अन्तरम् ८ । इति हेमचन्द्रः ॥ तत्परिमाणानि यथा,—
"अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तितः ।
द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः ॥
द्विलवः क्षण इत्युक्तः काष्ठा प्रोक्ता दश क्षणाः ।
दश काष्ठाः किला नाम तत्संख्या स्याच्च नाड़िका ॥
घटिके द्वे मुहूर्त्तः स्यात्त्रिंशता दिवानिशम् ।
चतुर्व्विंशतिवेलाभिरहोरात्रं प्रचक्षते ।
सूर्य्योदयादि विज्ञेयो मुहूर्त्तानां क्रमः सदा ।
पश्चिमादर्द्धरात्रादि होराणां विद्यते क्रमः ॥
पैत्र्यं पित्र्यमहोरात्रं पक्षौ कृष्णसितासितौ ।
त्रिंशता च दिनैर्मासो द्विमास ऋतुरुच्यते ।
भवेद्दिव्यमहोरात्रं षड्भिरुत्तरदक्षिणौ ।
वर्षं द्वादशभिर्मासैर्मलमासस्त्रयोदश ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥ * ॥
मर्य्यादा । इत्यमरः ॥ (यथा, महाभारते ।२। ६३ । ३८ ।

"धिगस्तु नष्टः खलु भारतानां
धर्म्मस्तथा क्षत्रविदाञ्च वृत्तम् ।
यत्र प्रतीतां कुरुधर्म्मवेलां
प्रेक्षन्ति सर्व्वे कुरवः सभायाम् ॥")
समुद्रकूलम् । (यथा, रघुः । १ । ३० ।
"स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्व्वीं शशासैकपुरीमिव ॥")
समुद्रजलविकारः । (यथा, रघुः । १२ । ३६ ।
"संरम्भं मैथिलीहासः क्षणसौम्यां निनाय
ताम् ।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ॥")
अक्लिष्टमरणम् । रागः । ईश्वरस्य भोजनम् ।
इति मेदिनी । अत्र पवर्गीयवकारादौ
लिखितः । रागस्थाने रोगः । वाक् । बुधस्त्री ।
इति विश्वः ॥ दन्तमांसम् । इति हारावली ॥

वेलाकूलं, क्ली, (वेला एव कूलं यस्य ।) ताम्रलिप्त-
देशः । यथा,—
"वेलाकूलं ताम्रलिप्तं ताम्रलिप्ती तमालिका ॥"
इति त्रिकाण्डशेषः ॥
(समुद्रकूलम् । यथा, भागवते । १० । ६७ । ५ ।
"क्वचित् समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलम् ।
देशान् नागायुतप्राणो वेलाकूले न्यमज्जयत् ॥")

वेलिभुक्प्रियः, पुं, सौरभयुक्ताम्रः । यथा,—
"————————रसाले त्वतिसौरभे ।
महाकाशश्च किम्पाक उर्व्वटो वेलिभुक्प्रियः ॥"
इति शब्दरत्नावली ॥
(वलिभुक्प्रिय इत्येव पाठः साधुः ॥)

वेल्ल, ऋ चाले । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) ऋ, अविवेल्लत् । चालः
सञ्चलनम् । उद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः
क्षणं वार्य्यताम् । गताविति के । इति दुर्गादासः ॥

वेल्लं, क्ली पुं, (वेल्लतीति । वेल्ल चलने + पचाद्यच् ।)
विडङ्गः । इत्यमरः ॥ (भावे घञ् ।) गमने, पुं ।
इति वेल्लधात्वर्थदर्शनात् ॥

वेल्लजं, क्ली, (वेल्लवत् जायते इति । जन + डः ।)
मरिचम् । इत्यमरः ॥

वेल्लनं, क्ली, (वेल्ल + ल्युट् ।) भूमौ अश्वस्य
लुण्ठनम् । तत्पर्य्यायः । लुण्ठनम् २ । इति
त्रिकाण्डशेषः ॥ (सञ्चलनम् । यथा, राज-
तरङ्गिण्याम् । ८ । १५६५ ।
"धन्या सरित् स्ववसतेर्जलधिप्रवेशे
वेलोर्म्मिवेल्लनवशेन विवर्त्तमाना ॥")
रोटिकादिनिर्म्माणार्थस्थूलवर्त्तुलकाष्ठविशेषः ।
इति भावप्रकाशः ॥ वेलन् इति भाषा ॥

वेल्लनी, स्त्री, (वेल्लति लुठति अश्वादिरत्रेति ।
वेल्ल + ल्युट् । ङीष् ।) मालादूर्व्वा । इति
राजनिर्घण्टः ॥

वेल्लन्तरः, पुं, वीरतरुः । यथा, भावप्रकाशे ।
"वेल्लन्तरो जगति वीरतरुः प्रसिद्धः
श्वेतासिताऽरुणविलोहितनीलपुष्पः ।
स्यादर्ज्जुनोपमतरुः शमिसूक्ष्मपत्रः
स्यात् कण्टकी च जलदेशज एष वृक्षः ॥"
अस्य गुणाः ।
"वेल्लन्तरो रसे पाके तिक्तस्तृष्णाकफापहः ।
मूत्राघाताश्मजिद्ग्राही योनिमूत्रानिलार्त्ति-
जित् ॥"

वेल्लहलः, पुं, केलिनागरः । इति जटाधरः ॥

वेल्लिः, स्त्री, (वेल्लति सञ्चलतीति । वेल्ल + इन् ।)
लता । इति शब्दरत्नावली ॥

वेल्लिकाख्या, स्त्री, (वेल्लिका आख्या यस्याः ।)
क्षुपविशेषः । वेलसुठा इति भाषा । यथा,—
"मरुन्माला वेल्लिकाख्या विल्लपत्री ज्वरा-
पहा ॥"
इति शब्दचन्द्रिका ॥

वेल्लितं, क्ली, (वेल्ल + क्तः ।) गमनम् । इति मेदिनी ॥

वेल्लितः, त्रि, (वेल्ल + क्तः ।) कुटिलः । कम्पितः ।
इत्यमरः ॥

वेवी, ङ ल ञ ड कान्तिगतिव्याप्तिक्षेपप्रजनखादने ।
इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-कान्तौ
अक०-अन्यत्र सक०-सेट् ।) ङ, वेदिकः ।
ल, अवेवयुः । बहुलं ब्रह्मणीति परस्मैपदे
अतुस् सिद्धेरित्यन् उस् सुरस्याभिति गुणः ।
लु ङ, वेवीते । इति दुर्गादासः ॥

वेशः, पुं, (विशन्ति नयनमनांस्यत्रेति । विश् +
अधिकरणे घञ् । यद्वा, विशति अङ्गमिति ।
"पदरुजविशस्पृशो घञ् ।" ३।३।१६। इति घञ् ।)
अलङ्काररचनादिकृतशोभा । तत्पर्य्यायः ।
आकल्पः २ नेपथ्यम् ३ प्रतिकर्म्म ४ प्रसा-
धनम् ५ । इत्यमरः ॥ वेषः ६ । इति तट्टीकायां
भरतः ॥ (यथा, भागवते । १ । १७ । ५ ।
"नरदेवोऽसि वेशेन नटवत् कर्म्मणा द्विजः ॥"* ॥
विशन्ति कामुका यत्रेति । अधिकरणे घञ् ।)
वेश्यागृहम् । गृहमात्रम् । इति मेदिनी ॥
(वस्त्रगृहम् । ताबु इति भाषा ॥ यथा,
महाभारते । ५ । १५१ । ५३ ।
"शकटापणवेशाश्च यानयुग्यञ्च सर्व्वशः ।
* * *
तत् संगृह्य ययौ राजा ये चापि परिचारकाः ॥")
प्रवेशः । इति विशधात्वर्थदर्शनात् ॥ (पण्य-
स्त्रिया भृतिः । यथा, मनुः । ४ । ८४—८५ ।
"न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः ।
सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ॥
दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमो वेशो दशवेशसमो नृपः ॥")

वेशकः, पुं, (वेश एव । स्वार्थे कन् ।) गृहम् । इति
शब्दरत्नावली ॥ वेशकारके, त्रि ॥

वेशदानः, पुं, सूर्य्यशोभा । इति शब्दचन्द्रिका ॥

वेशधारी, [न्] पुं, (वेशं तापसलिङ्गं धरतीति ।
धृ + णिनिः ।) छलतपस्वी । इति शब्दरत्ना-
वली ॥ (सङ्करजातिविशेषः । यथा, ब्रह्म-
वैवर्त्ते ब्रह्मखण्डे । १० अध्यायः ।
"गङ्गापुत्त्रस्य कन्यायां वीर्य्येण वेशधारिणः ।
बभूव वेशधारी च पुत्त्रो युङ्गी प्रकीर्त्तितः ॥")
वेशधारके, त्रि ॥

वेशन्तः, पुं, (विशन्त्यत्र भेकादय इति । विश +
"जृविशिभ्यां झच् ।" उणा० ३ । १२६ । इति
झच् ।) क्षुद्रसरोवरः । इत्यमरः ॥ अग्निः
इत्युणादिकोषः ॥

वेशरः, पुं, अश्वतरः । इति त्रिकाण्डशेषः ॥

वेशवारः, पुं, वेसवारः । इत्यमरटीकायां राय-
मुकुटः ॥

वेशीजाता, स्त्री, पुत्त्रदात्रीलता । इति राज-
निर्घण्टः ॥

वेश्म, [न्] क्ली, (विशन्त्यत्रेति । विश + मनिन् ।)
गृहम् । इत्यमरः ॥ (यथा, मनुः । ४ । ७३ ।
"अद्वारेण च नातीयात् ग्रामं वा वेश्म वावृ-
तम् ॥")

वेश्मकलिङ्गः, पुं, (वेश्मनः कलिङ्गः ।) चटकः ।
अस्य मांसगुणौ । सन्निपातनाशित्वम् । अति-
शुक्रकारित्वञ्च । इति राजवल्लभः ॥

वेश्मकूलः, पुं, (वेश्म गृहं कूलयतीति । कूल + कः ।)
पचेषडा । इति राजनिर्घण्टः ॥

वेश्मनकुलः, पुं, (वेश्मनो गृहस्य नकुलः ।) गन्ध-
मूषिकः । यथा,—
"पिकः स्याद्वेश्मनकुलश्चिक्का च बालमूषिका ।
गन्धमुखी गन्धमूषी गिरिका स्याच्छुछुन्दरी ॥"
इति शब्दरत्नावली ॥

वेश्मभूः, स्त्री, (वेश्मनो भूः ।) गृहकरणयोग्य-
भूमिः । तत्पर्य्यायः । वास्तुः २ । इत्यमरः ॥

वेश्यं, क्ली, (वेशे भवम् । वेश + "दिगादिभ्यो
यत् ।" ४ । ३ । ५४ । इति यत् । यद्वा, वेश्यायै
हितम् । वेश्या + यत् ।) वेश्यालयः । इति
मेदिनी ॥ (प्रवेशार्हे, त्रि । यथा, ऋग्वेदे ।
४ । २६ । ३ ।
"शततमं वेश्यं सर्व्वताता दिवोदासमतिथिग्वं
यदावम् ॥"
"वेश्यं दिवोदासनाम्ने प्रवेशार्हम् ।" इति
तद्भाष्ये सायणः ॥)

वेश्या, स्त्री, टुक्कादिचः । आकनादि इति भाषा ।
इति शब्दचन्द्रिका ॥ (वेशमर्हति वेशेन
दीव्यत्याचरति वेशेन पण्ययोगेन जीवति वा ।
वेश + यत् ।) स्वनामख्यातनारी । खानकी
इति भाषा । तत्पर्य्यायः । वारस्त्री २
गणिका ३ रूपाजीवा ४ । इत्यमरः ॥ वेष्या ५ ।
इति तट्टीका ॥ क्षुद्रा ६ शालभञ्जिका ७ ।
इति जटाधरः ॥ झर्झरा ८ मूला ९ वार-
विलासिनी १० वारवाणिः ११ भक्षहासिनी
१२ । इति शब्दरत्नावली ॥ लञ्जिका १३
बन्धुरा १४ कुम्भा १५ कामरेखा १६ वर्व्वटी
१७ । इति शब्दमाला ॥ साधारणस्त्री १८
पण्याङ्गना १९ पणाङ्गना २० भुजिष्या २१
वारवधूः २२ । इति हेमचन्द्रः ॥ भोग्या २३
स्मरवीथिका २४ । इति राजनिर्घण्टः ॥ तस्या
लक्षणगमनफलादि यथा,—
"पतिव्रता चैकपत्नी द्वितीये कुलटा स्मृता ।
तृतीये वृषली ज्ञेया चतुर्थे पुंश्चली स्मृता ॥

वेश्या च पञ्चमे षष्ठे पुंश्ची च सप्तमेऽष्टमे ।
तत ऊर्द्ध्वं महावेश्या साऽस्पृश्या सर्व्वजातिषु ॥ * ॥
यो द्विजः कुलटाङ्गच्छेत् स्वैरिणीं पुंश्चलीमपि ।
पुंश्चीं वेश्यां महावेश्यां अवटोदं प्रयाति सः ॥
शताब्दं कुलटागामी षट्टागामी चतुर्गुणम् ।
षड्गुणं पुंश्चलीगामी वेश्यागामी गुणाष्टकम् ॥
पुंश्चीगामी दशगुणं वसेत्तत्र न संशयः ।
महावेश्यागामुकश्च ततः शतगुणं भवेत् ॥
तदेव सर्व्वगामी चेत्येवमाह पितामहः ।
तत्रैव यातनां भुङ्क्ते यमदूतेन ताडितः ॥
तित्तिरिः कुलटागामी षट्टागामी च वायसः ।
कोकिलः पुंश्चलीगामी वेश्यागामी वृकस्तथा ॥
पुंश्चीगामी शूकरः स्यात् सप्तजन्मसु भारते ।
महावेश्यागामुकश्च जायते शाल्मलिस्तरुः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २८ अध्यायः ॥ * ॥
वेश्यागमनपापं प्रकीर्णकम् । तस्य प्रायश्चित्तम् ।
तत्र सम्वर्त्तः ।
"पशुवेश्याभिगमने प्राजापत्यं विधीयते ।"
तेन वेश्यागमने प्राजापत्यम् । तदशक्तौ धेनु-
रेका । एतत् सकृद्गमने । अभ्यासे तु । चान्द्रा-
यणेन चैकेन सर्व्वपापक्षयो भवेदिति आप-
स्तम्बवचनाच्चान्द्रायणम् । इति प्रायश्चित्त-
विवेकः ॥ * ॥ तद्गमनादिकं निषिद्धम् । यथा,—
"पुंश्चल्यन्नञ्च यो भुङ्क्ते पुंश्चल्याजीवजीवनः ।
स्वर्लोमसमानवर्षञ्च लालाकुण्डे वसेद्ध्रुवम् ॥
ताडितो यमदूतेन तद्भोजी तत्र तिष्ठति ।
ततस्त्रिजन्मनि भवेत् कृष्णवर्णः पशुः शुचिः ॥
त्रिजन्मनि भवेच्छागस्ततो भवेत् सुदुःखितः ।
ततश्चक्षुःशूलरोगी ततः शुद्धः क्रमेण च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥ * ॥
अपि च ।
"पुंश्चल्यन्नञ्च यो भुङ्क्ते वेश्यान्नञ्च पतिव्रते ।
तद्व्रणेषु द्विजो यो हि कालसूत्रं प्रयाति सः ॥
शतवर्षं कालसूत्रे स्थित्वा शूद्रो भवेद्ध्रुवम् ।
तत्र जन्मनि रोगी च ततः शुद्धो भवेद्द्विजः ॥"
इति तत्रैव २८ अध्यायः ॥ * ॥
यात्राकाले तस्या दर्शनं शुभम् । यथा,—
"धेनुर्वत्सप्रयुक्ता वृषतुरगरथा दक्षिणावर्त्तवह्नि-
र्दिव्यस्त्रीपूर्णकुम्भा द्विजनृपगणिकाः पुष्पमाला
पताका ।
सद्योमांसं घृतं वा दधि मधु रजतं काञ्चनं
शुक्लधान्यं
दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवो
गन्तुकामः ॥"
इति समयप्रदीपः ॥
वेश्यागणः, पुं, (वेश्यानां गणः ।) वेश्यासमूहः ।
तत्पर्य्यायः । वेश्यावारः २ । इति शब्द-
माला ॥
वेश्याचार्य्यः, पुं, (वेश्यानां आचार्य्यः ।) पीठ-
मर्द्दः । इति हेमचन्द्रः ॥
वेश्याजनसमाश्रयः, पुं, (वेश्याजनानां समाश्रयः
आश्रयस्थानम् ।) वेश्यालयः । तत्पर्य्यायः ।
वेशः २ । इत्यमरः ॥ वेश्याश्रयः ३ पुरम् ४ ।
इति हेमचन्द्रः ॥ वेश्मम् ५ । इति जटा-
धरः ॥
वेश्वरः, पुं, अश्वतरः । यथा । वेश्वरोऽश्वतरः
खरः । इति भूरिप्रयोगः । त्रिकाण्डशेषे वेसर
इति पाठः ॥
वेषः, पुं, वेवेष्टि व्याप्नोति अङ्गं वेषः पचादित्वादच्
मूर्द्धन्यान्तः । विशन्ति नयनमनांस्यत्रेत्याधारे
घञि वेशस्तालव्यान्तश्च । इति भरतः ॥ नेप-
थ्यम् । (यथा, मनुः । ८ । २ ।
"विनीतवेषाभरणः पश्येत्कार्य्याणि कार्य्यि-
णाम् ॥")
वेश्याजनाश्रयः ।"हे दारिकाणां निवासस्थाने ।
विशति यूनां मनः कामुको वा वेशः शौ विश
प्रवेशे घञ् ।
'नेपथ्ये गृहमात्रे च वेशो वेश्यागृहेऽपि च ।'
इति तालव्यान्ते रभसः ॥
'गृहमात्रे गणिकायाः सद्मनि वेशो भवेत्तु
तालव्यः ।
तालव्यो मूर्द्धन्योऽलङ्करणे कथित आचार्य्यैः ॥'
इत्यूष्मविवेकः ।
वेविषति व्याप्नुवन्ति जनमनांसीति घञि वेषो
मूर्द्धन्यान्तोऽपि इत्येके तत्तु न हृद्यं मूर्द्धन्यान्तेषु
सर्व्वत्र कोषादावनुपात्तत्वादिति मुकुटः ।" इति
च भरतः ॥ (संस्थानविशेषः । यथा, रामा-
यणे । १ । १७ । १८ ।
"यस्य देवस्य यद्रूपं वेषो यश्च पराक्रमः ॥"
"वेषः संस्थानविशेषः ।" इति तट्टीका ॥ * ॥
वेवेष्टि व्याप्नोति कर्त्तॄनिति । पचाद्यच् । कर्म्म ।
इति निघण्टुः । २ । १ ॥ * ॥ विष व्याप्तौ +
घञ् । व्याप्तिः । यथा, वाजसनेयसंहितायाम्
१ । ६ ।
"कर्म्मणे वां वेषाय वाम् ।"
"वेषाय च । विषॢ व्याप्तौ । घञ् वेषो व्याप्तिः ।
उचितकर्म्मसु व्याप्त्यर्थं च वां युवामह-
माददे ।" इति तद्भाष्ये महीधरः ॥)
वेषणः, पुं, (विष व्याप्तौ + ल्युः ।) कासमर्द्दः ।
इति हारावली ॥ (क्ली, विष + ल्युट् ।)
प्रवेशनञ्च ॥ (परिचर्य्या । यथा, ऋग्वेदे । ५ ।
७ । ५ ।
"अवस्मयस्य वेषणे स्वेदं पथिषु जुह्वति ॥"
"यस्याग्नेर्वेषणे परिचर्य्यायाम् ।" इति तद्भाष्ये
सायणः ॥)
वेषणा, स्त्री, (वेवेष्टि व्याप्नोतीति । विष + ल्युः ।
टाप् ।) वितुन्नकद्रुमः । इति रत्नमाला ॥
धन्या इति भाषा ॥
वेषवारः, पुं, वेसवारः । इत्यमरटीकायां राय-
मुकुटः ॥
वेष्ट, ङ वेष्टे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-
सक०-सेट् ।) ङ, वेष्टते । इति दुर्गादासः ॥
वेष्टः, पुं, (वेष्ट + घञ् ।) वेष्टनम् । इति शब्द-
माला ॥ (यथा, महाभारते । ७ । २५ । ९७ ।
"ग्रीवायां वेष्टयित्वैनं स गजो हन्तुमैहत ।
करवेष्टं भीमसेनो भ्रमं दत्त्वा व्यमोचयत् ॥")
श्रीवेष्टः । इति राजनिर्घण्टः ॥ निर्य्यासः ।
आटा इति भाषा ॥ इति वैद्यकम् ॥ (मुख-
रोगविशेषः । यथा, सुश्रुते । २ । १६ ।
"दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ॥")
वेष्टकं, क्ली, (वेष्टते इति । वेष्ट + ण्वुल् ।) उष्णीषः ।
इति शब्दरत्नावली ॥ निर्य्यासः । इति शब्द-
माला ॥ श्रीवेष्टः । इति राजनिर्घण्टः ॥
वेष्टकः, पुं, (वेष्टते इति । वेष्ट + ण्वुल् ।) प्राचीरः ।
यथा प्राचीनावेष्टकौ वृतिः । इति हेमचन्द्रः ॥
कुष्माण्डः । यथा,—
"कुष्माण्डकः पुष्पफलो घनवासश्च वेष्टकः ॥"
इति हारावली ॥
श्रीवेष्टः । इति राजनिर्घण्टः ॥ वेष्टनकारके,
त्रि ॥ (यथा, महाभारते । ७ । १३६ । २१ ।
"वलयैरपरिक्लेश्च तथैवाङ्गुलिवेष्टकैः ॥")
वेष्टनं, क्ली, (वेष्टते इति । वेष्ट + ल्युः ।) कर्ण-
शष्कुली । उष्णीषः । (यथा, रघुः । ८ । १२ ।
"समरव्यसमाश्रयोन्मुखं
शिरसा वेष्टनशोभिना सुतः ॥")
मुकुटः । वृतिः । इति मेदिनी ॥ गुग्गुलुः ।
इति शब्दचन्द्रिका ॥ (वेष्ट + ल्युट् । वलयनम् ।
यथा, रघुः । ४ । ४८ ।
"भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ॥")
वेष्टनकः, पुं, (वेष्टनेन कायतीति । कै + कः ।)
रतिबन्धविशेषः । यथा,—
"ऊरुगं पादमेकञ्च भुजाभ्यां वेष्टयेद्यदि ।
कान्तकण्ठाश्रितां नारीं बन्धो वेष्टनकः स्मृतः ॥"
इति रतिमञ्जरी ॥
वेष्टनवेष्टकः, पुं, (वेष्टनेन वेष्टते इति । वेष्ट +
ण्वुल् ।) रतिबन्धविशेषः । यथा,—
"ऊर्द्ध्वं पादद्वयं नार्य्या भुजाभ्यां वेष्टयेद्यदि ।
कराभ्यां कण्ठमालिङ्ग्य बन्धो वेष्टनवेष्टकः ॥"
इति रतिमञ्जरी ॥
वेष्टवंशः, पुं, (वेष्टः वेष्टनकारी वंशः ।) कण्ट-
किनः । इति शब्दचन्द्रिका ॥ वेडुँवाश इति
भाषा ॥
वेष्टसारः, पुं, (वेष्टानां सारो यत्र ।) श्रीवेष्टः ।
इति राजनिर्घण्टः ॥
वेष्टितं, क्ली, (वेष्ट + क्तः ।) रुद्धम् । लासकः ।
करणान्तरम् । इति मेदिनी ॥
वेष्टितः, त्रि, (वेष्ट + क्तः ।) नदीप्राचीरादिना
कृतवेष्टनः । वेड़ा इति भाषा । तत्पर्य्यायः ।
वलयितम् २ संवीतम् ३ रुद्धम् ४ आवृतम् ५ ।
इत्यमरः ॥
वेष्यः, पुं, (वेविष्टीति । विष व्याप्तौ + "पानी-
विषिभ्यः पः ।" उणा० ३ । २३ । इति पः ।)
पानीयम् । इत्युणादिकोषः ॥
वेस, ऋ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) ऋ, अविवेसत् । विवेसतुः ।
गतौ गत्याम् । इति दुर्गादासः ॥

वेसनं, क्ली, (वेस + ल्युट्।) द्विदलचूर्णम्। यथा,—
"दालयश्चणकानान्तु निस्तुषा यन्त्रपेषिताः।
तच्चूर्णं वेसनं प्रोक्तं पाकशास्त्रविशारदैः॥"
तद्वटिकागुणाः।
"वटिका वेसनस्यापि क्वथितायां निमज्जति।
रुच्या विष्टम्भजननी बल्या पुष्टिकरी स्मृता॥"
इति भावप्रकाशः॥

वेसरः, पुं, अश्वतरः। इति हेमचन्द्रः॥ (यथा, माघे। १२। १६।
"तूर्णं प्रणेत्रा कृतनादमुच्चकैः
प्रणोदितं वेसरयुग्ममध्वनि॥")

वेसवारः, पुं, धन्याकसर्षपादिपिष्टः। वेसार इति वाटना इति च ख्यातः। तत्पर्य्यायः। उपस्करः २। इत्यमरः। वेषवारः ३। इति भरतः॥ वेशवारः ४। इति मुकुटः॥ (यथा, सुश्रुते। १। ४६।
"मुद्गादिवेसवाराणां पूर्णा विष्टम्भिनो मताः।
वेसवारैः सपिशितैः सम्पूर्णा गुरुबृंहणाः॥")
व्यञ्जनविशेषः। यथा,—
"निरस्थि पिशितं पिष्टं सिद्धं गुडघृतान्वितम्।
कृष्णामरिचसंयुक्तं वेसवार इति स्मृतम्॥"
अस्य गुणाः।
"वेसवारो गुरुः स्निग्धो बलोपचयवर्द्धनः॥"
इति राजवल्लभः॥
हिङ्ग्वार्द्रकमरीचजीरकहरिद्राधन्याकाः क्रमेण द्विगुणपरिमाणेनैकचीकृताः। इति पाकराजेश्वरे पाकपरिभाषा॥

वेह, ऋ ङ यत्ने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ, अविवेहत्। ङ, वेहते। विवेहे। इति दुर्गादासः॥

वेहत्, स्त्री, (विशेषेण हन्ति गर्भमिति। वि + हन + "संश्चत्तृपद्वेहत्।" उणा० २। ८५। इति अतिप्रत्ययेन निपातनात् साधुः।) गर्भोपघातिनी गौः। इत्यमरः॥ ऋतौ वृषोपगमनादिवशात् यस्या गर्भपातो भवति सा। विहन्ति गर्भं शश्वत् वेहत्। हन स्त्री गतौ वधे क्विप् निपातः। इति भरतः॥ (यथा, वाजसनेयसंहितायाम्। १८। २७।
"वशा च मे ऋषभश्च मे वेहच्च मे ऽनड्वांश्च मे॥")

वेहारः, पुं, स्वनामख्यातदेशः। यथा,—
"वेहारे चैव श्रीहट्टे कोशले शवकर्णिके।
अष्टादशभुजा कार्य्या माहेन्द्रे च हिमालये॥"
इति मत्स्यसूक्ते ५० पटलः॥

वेड, ऋ चाले। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अविवेडत्। ऋदनुबन्धः वेदेष्वारणभेदार्थः। चालः प्रचलनं गताविवेके। इति दुर्गादासः॥

वै, ओ शोषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) वकारादिः। वायति। ओ, वानः। इति दुर्गादासः॥

वै, व, पादपूरणम्। यथा। तु हि च स्म ह वै पादपूरणे। इत्यमरः॥ (यथा, भागवते। ४। १। २८।
"सत्सङ्कल्पस्य ते ब्रह्मन्! यद्वै ध्यायति ते वयम्॥")
सम्बोधनम्। अनुनयः। इति मेदिनी॥ (निश्चयः। यथा, मनुः। १। १००।
"सर्व्वं स्वं ब्राह्मणस्येदं यत्किञ्चित् जगतीगतम्।
श्रैष्ठ्येनाभिजनेनेदं सर्व्वं वै ब्राह्मणोऽर्हति॥")

वैंशतिकः, त्रि, विंशत्या क्रीतः। विंशतिकशब्दादण्प्रत्ययेन निष्पन्नमिदम्। इति सिद्धान्तकौमुदी॥ (पा ५। २। २७॥)

वैकक्षं, क्ली, (विशिष्टः कक्षः विकक्ष उरस्तत्र भवम्। विकक्ष + अण्।) तिर्य्यग्वक्षोलम्बिमाल्यम्। इति हेमचन्द्रः॥

वैकक्षकं, क्ली, (वैकक्षमेव। स्वार्थे कन्।) उरसि तिर्य्यक् उपवीतवत् कण्ठात् क्षिप्तमाल्यम्। इत्यमरः॥

वैकङ्कतः, पुं, (विकङ्कत एव। स्वार्थे अण्।) वृक्षविशेषः। वैँच इति भाषा। तत्पर्य्यायः। वृनिङ्कुरः २ स्रुवावृक्षः ३ ग्रन्थिलः ४ स्वादुकण्टकः ५ व्याघ्रपात् ६ कण्टकारी ७ विकङ्कतः ८। इति शब्दरत्नावली॥ (विकङ्कतस्यावयवो विकारो वा। "पलाशादिभ्यो वा।" ४। ३। १४१। इत्यञ्। विकङ्कतनिर्म्मितस्रुवादौ, त्रि। यथा, शतपथब्राह्मणे। ५। २। ३। १५।
"स पालाशे वा स्रुवे वैकङ्कते वा॥")

वैकतिकः, पुं, मणिकारः। इति हेमचन्द्रः॥

वैकर्णः, पुं, (विकर्णस्यापत्यमिति। विकर्ण + "विकर्णशुङ्गच्छगलात् वत्सभरद्वाजात्रिषु।" ४। १। ११७। इत्यण्।) वात्स्यमुनिः। इति सिद्धान्तकौमुदी॥ (जनपदविशेषः। यथा, ऋग्वेदे। ७। १८। ११।
"वैकर्णयोर्जनानाजा न्यस्तः।"
"वैकर्णयोर्जनपदयोर्विद्यमानान्।" इति तद्भाष्ये सायणः॥)

वैकल्पिकः, त्रि, विकल्पेन भवः। विकल्पशब्दात् ष्णिकप्रत्ययेन निष्पन्नमिदम्॥

वैकल्यं, क्ली, विकलत्वम्। विकलस्य भाव इत्यर्थे ष्यप्रत्ययेन निष्पन्नमिदम्॥ (यथा, कथासरित्सागरे। ७४। ३१०।
"स्मराङ्कदत्तसचिवं चक्षुर्वैकल्यमागतम्॥")

वैकुण्ठः, पुं, कृष्णः। (यथा, भागवते। १। १५। ४६।
"ते साधुकृतसर्व्वार्था ज्ञात्वात्यन्तिकमात्मनः।
मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम्॥")
इन्द्रः। इति मेदिनी॥ सितार्जकः। इति राजनिर्घण्टः। अस्य व्युत्पत्तिर्यथा। "विकुण्ठाया अपत्यं वैकुण्ठः शाकटायन इति शिवादित्वात् ष्णः।
'चाक्षुषस्यान्तरे देवो वैकुण्ठः पुरुषोत्तमः।
विकुण्ठायामसौ जज्ञे वैकुण्ठे दैवतैः सह॥'
इति विष्णुपुराणम्॥
किंवा कुण्ठत्यनया कुण्ठा माया। कुठि खोटनवैकल्यालस्ये सेभक्तान् सरोरिति अः। विविधा कुण्ठा माया विद्यतेऽस्य वैकुण्ठः विकारसंज्ञेति अस्त्यर्थे ष्णः। विष्णुसहस्रनामटीकायां शङ्कराचार्य्यस्त्वाह विविधा कुण्ठा गतेः प्रतिहतिस्तस्याः कर्त्ता इति वैकुण्ठः। जगदारम्भे विशिष्टानि भूतानि परस्परं संश्लेषयन् तेषां गतिं प्रत्यबध्नादिति वा वैकुण्ठः।
'मायासंश्लेषिता भूमिरद्भिर्व्योम्ना च वायुना।
वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम॥'
इति शान्तिपर्व्वणीति।"
इत्यमरटीकायां भरतः॥ * ॥ अपि च।
"कुण्ठं जड़ञ्च विश्वौघं विशिष्टञ्च करोति या।
विकुण्ठां प्रकृतिं वेदाश्चत्वारस्तु वदन्ति ताम्॥
गुणाश्रयेण भगवान् तस्यां जातः स्वलेच्छया।
परिपूर्णतमं तेन वैकुण्ठञ्च विदुर्बुधाः॥" *॥
अस्य नाम्नो माहात्म्यम्। यथा,—
"राम नारायणानन्त मुकुन्द मधुसूदन।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन॥
इत्येकादश नामानि पठेद्वा पाठयेद्यदि।
जन्मकोटिसहस्राणां पातकादवमुच्यते॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥
"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥"
इति श्रीभागवते अजामिलोपाख्यानाध्यायः॥*
विष्णुधामविशेषः। तद्वर्णनं यथा,—
"उपरिष्टात्क्षितेरष्टौ कोटयः सत्यमीरितम्।
सत्यादुपरि वैकुण्ठो योजनानां प्रमाणतः॥
भूर्लोकात् परिसंख्यातः कोटिरष्टादश प्रभो।
यत्रास्ते श्रीपतिः साक्षात् सर्व्वेषामभयप्रदः॥
वैकुण्ठादुत्तरे शैवो लोकः षोड़शकोटयः।
तिर्य्यगेव महाराज कैलासाख्यस्तु पर्व्वतः।
पार्व्वत्या सहितः शम्भुर्यत्रास्ते स्वगणैर्वृतः॥"
इति पाद्मे स्वर्गखण्डे ६ अध्यायः॥ * ॥
अपि च।
"अम्बरं शाश्वतं नित्यमनन्तं परमं पदम्।
हिरण्मयं मोक्षप्रदं ब्रह्मानन्दसुखाश्रयम्॥
एवमादिगुणोपेतं तद्विष्णोः परमं पदम्।
यद्गत्वा न निवर्त्तन्ते तद्धाम परमं हरेः॥
नहि वर्णयितुं शक्यं कल्पकोटिशतैरपि।
अपि द्रष्टुमशक्यं तद्ब्रह्मरुद्रादिदैवतैः॥
ज्ञानेन शास्त्रमार्गेण दृश्यते योगिपुङ्गवैः।
तत् स्थानमुपभोक्तव्यमथक्तब्रह्मसेविनाम्॥
श्रीशाङ्घ्रिभक्तिसैवैकरसाभोगविवर्ज्जिताः।
महात्मानो महाभागा भगवत्पदसेवकाः॥
तद्विष्णोः परमं धाम यान्ति ब्रह्मसुखप्रदम्।
नानाजनपदाकीर्णं वैकुण्ठं तद्धरेः पदम्।
प्राकारैश्च विमानैश्च सौधै रत्नमयैर्वृतम्।
तन्मध्ये नगरी दिव्या सायोध्येति प्रकीर्त्तिता॥
चतुर्द्वारसमायुक्ता हेमगोपुरसंयुता।
चण्डादिद्वारपालैस्तु कुमुदाद्यैः सुरक्षिता॥
चण्डप्रचण्डौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ।

वारुण्यां जयविजयौ सौम्ये धातृविधातरौ ।
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।
शङ्कुकर्णः सर्व्वनिद्रः सुमुखः सुप्रतिष्ठितः ॥
तस्मिन् बन्धविनिर्म्मुक्ताः प्राप्यन्ते सुसुखं परम् ।
यं प्राप्य न निवर्त्तन्ते तस्मान्मोक्ष उदाहृतः ॥
मोक्षं परं पदं लिङ्गमस्तं विष्णुमन्दिरम् ।
अक्षरं परमं धाम वैकुण्ठं शाश्वतं परम् ॥
नित्यञ्च परमव्योम सर्व्वोत्कृष्टं सनातनम् ।
पर्य्यायवाचकान्यस्य परं धाम्नोऽच्युतस्य हि ॥"
इति पाद्मे उत्तरखण्डे २६ अध्यायः ॥*॥
अन्यच्च ।
"अन्तःपुरनिवासिन्यः सर्व्वलक्षणभूषिताः ।
ताभिः परिवृतो देवः शुशुभे परमः पुमान् ॥
एवं वैकुण्ठनाथोऽसौ नायते परमे पदे ।
तद्व्यूहभेदाल्लोकांश्च वक्ष्यामि गिरिजे शुभे ॥
प्राच्यां वैकुण्ठलोकस्य वासुदेवस्य मन्दिरम् ।
आग्नेय्यां लक्ष्मीलोकस्तु याम्यां सङ्कर्षणालयः ॥
सारस्वतन्तु नैरृत्यां प्राद्युम्नः पश्चिमे तथा ।
रतिलोकस्तु वायव्यामुदीच्यामनिरुद्धभूः ॥
ऐशान्यां शान्तिलोकः स्यात् प्रथमावरणं
स्मृतम् । १ ।
केशवकीर्त्त्यादिलोका द्वितीयावरणं तथा ।२।
मत्स्यकूर्म्मादिलोकस्तु तृतीयावरणं परम् । ३ ।
सत्ययुतानन्तदुर्गाविष्वक्सेनगजाननाः ।
शङ्खपद्मनिधीलोकाश्चतुर्थावरणं स्मृतम् । ४ ।
ऋग्यजुःसामाथर्व्वाणो लोकादिषु महत्सु च ।
सावित्र्या विहगेशस्य धर्म्मस्य च मुखस्य च ।
पञ्चमावरणं प्रोक्तमक्षयं सर्व्ववाङ्मयम् । ५ ।
शङ्खचक्रगदापद्मखड्गशार्ङ्गहलं तथा ।
मौषलञ्च तथा लोकाः सर्व्वशस्त्रास्त्रसंयुताः ।
षष्ठमावरणं प्रोक्तं शस्त्रास्त्रमयमक्षयम् । ६ ।
ऐन्द्रपावकयाम्यञ्च नैरृतं वरुणं तथा ।
वायव्यं सौम्यमैशानं सप्तमं मुनिभिः स्मृतम् ।
साध्या मरुद्गणाश्चैव ये चान्ये च दिवौकसः ।
नित्याः सर्व्वे परे धाम्नि विश्वेदेवास्तथैव च ।
ते वै प्राकृतनाकेऽस्मिन्न नित्यास्त्रिदिवेश्वराः ।
तेनाहं वच्मि माये न सञ्चिन्त्य इति वै
स्मृतिः ।
एवं परं पदैर्नित्यैर्युक्तैर्भोगपरायणैः ।
दिव्याभिर्महिषीभिश्च राजते विष्णुरीश्वरि ।
न तद्भासयते सूर्य्यो न शशाङ्को न पावकः ॥
यद्गत्वा न निवर्त्तन्ते योगिनः शंसितव्रताः ।
हर्य्येकमन्त्रनिष्ठा ये ते वै यान्ति तदव्ययम् ॥
न वेदयज्ञाध्ययनैर्न वेदैर्न व्रतैः शुभैः ।
न तपोभिर्निराहारैर्न च साधनकर्म्मभिः ॥
एकेन कृष्णमन्त्रेण तथा भक्त्या त्वनन्यया ।
तद्रम्यं शाश्वतं दिव्यं प्रपद्ये वै सनातनम् ॥"
इति पाद्मोत्तरखण्डे ३० अध्यायः ॥
(तत्रस्थदेवगणे, पुं भूम्नि । यथा, भागवते ।
८ । ५ । ४ ।
"पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः ।
तयोः स्वकलया जज्ञे वैकुण्ठो भगवान् स्वयम् ॥")

वैकृतं, क्ली, (विकृतमेव । "सान्नायानुलेति ।"
५।४।३६ । इत्यस्य वार्त्तिकोक्त्या अण् । विकारः ।
यथा, रामायणे । ६ । ४८ । ३२ ।
"प्रायेण गतसत्त्वानां पुरुषाणां गतायुषाम् ।
दृश्यमानेषु वक्त्रेषु परं भवति वैकृतम् ॥"
दुर्निमित्तम् । यथा, रघुः । ११ । ६२ ।
"तत्प्रतीपपवनादिवैकृतं
प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् ॥"
तथाच महाभारते । ३ । १३७ । ३ ।
"वैकृतं त्वग्निहोत्रे स लक्षयित्वा महातपाः ।
तमन्धं शूद्रमासीनं गृहपालमथाब्रवीत् ॥")
वीभत्सरसः । तदालम्बने मांसशोणितादौ, त्रि ।
इत्यमरटीकायां भरतः ॥ तथाच ।
"विकृतं वैकृतञ्च स्यात्तच्च वैकृत्यमुच्यते ॥"
इति भरतद्विरूपकोषः ॥
(विकारजाते । यथा, भागवते । २ । १० ।४५।
"अयन्तु ब्रह्मणः कल्पः सविकल्प उदाहृतः ।
विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥")

वैकृत्यं, क्ली, (विकृतमेव । स्वार्थे ष्यञ् ।) वीभत्स-
रसः । तदालम्बने, त्रि । यथा,—
"त्रिषु वीभत्सविकृतं वैकृत्यं विततन्तथा ॥"
इति शब्दरत्नावली ॥

वैक्रान्तं, क्ली, (विक्रान्त्या दीव्यति । विक्रान्ति +
अण् ।) मणिविशेषः । तत्पर्य्यायगुणौ ।
"वैक्रान्तश्चैव विक्रान्तं नीचवज्रं कुवज्रकम् ।
गोनाशः क्षुद्रकुलिशं जीर्णवज्रञ्च गोनसः ॥
वज्राभावे च वैक्रान्तं रसवीर्य्यादिके समम् ।
क्षयकुष्ठविषघ्नञ्च पुष्टिदं सुरसायनम् ॥
वैक्रान्तं वज्रसादृश्यं वज्रवद्रसवीर्य्यकम् ।
तथाप्यभावे वज्रस्य ग्राह्यं वैक्रान्तमुत्तमम् ॥
वज्राकारतयैव प्रसह्य हरणाय सर्व्वरोगाणाम् ।
यद्विक्रान्तिं धत्ते तद्वैक्रान्तं बुधैरिदं कथितम् ॥"
इति राजनिर्घण्टः ॥

वैखरी, स्त्री, मुखगत्यितकण्ठगतनादरूपवर्णः ।
यथा,—
"मूलाधारात् प्रथममुदितो यस्तु तारः पराख्यः ।
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।
वक्त्रे वैखर्य्यथ रुरुदिषोरस्य जन्तोः सुषुम्ना-
बद्धस्तस्माद्भवति पवनप्रेरितो वर्णसंघः ॥"
इत्यलङ्कारकौस्तुभः ॥
अस्यार्थः । यस्तु तारो नादः वर्णरूपः स
नाभिरूपमूलाधारात् प्रथममुदयप्राप्तश्चेत् पर
इति आख्या संज्ञा यस्य तथाभूतो भवति ।
अथानन्तरं स एव हृदयं चित्तं गतश्चेत् रोदन-
समये नासिकाद्वारा यथाकथञ्चित् भवति ।
रुरुदिषोर्जन्तोर्नासामध्यस्थितसुषुम्नानाड्या बद्धः ।
तथा च नासाद्वारेव यथाकथञ्चित् नादस्वरूपः
प्रत्यक्षभवतीत्यर्थः । तस्मात् वैखरीदशापन्नात्
नादात् पवनप्रेरितो वर्णसमूहो बहिः सर्व्वेषां
प्रत्यक्षविषयो भवतीत्यर्थः । परा पश्यन्ती
दशापन्नस्य तु योगिनामेव प्रत्यक्षं न तु सर्व्वेषा-
मित्यपि बोध्यम् । इति तट्टीका ॥

वैखानसः, पुं, (विखनसं ब्रह्माणं वेत्ति तपसा ।
विखनस् + अण् ।) वानप्रस्थः । यथा । वानप्रस्थो
वैखानसोऽग्रहः । इति त्रिकाण्डशेषः ॥ (यथा,
देवीभागवते । १ । १६ । १७ ।
"वैखानसा ये मुनयो मिताहारा जितव्रताः ।
तेऽपि मुह्यन्ति संसारे जानन्तोऽपि ह्यसत्य-
ताम् ॥"
वैखानसस्येदमित्यर्थेऽणि । वैखानससम्बन्धिनि,
त्रि । यथा, शाकुन्तले । १ ।
"वैखानसं किमनया व्रतमाप्रदानात्
व्यापाररोधि मदनस्य निषेवितव्यम् ॥")

वैगुण्यं, क्ली, (विगुणस्य भावः । विगुण + ष्यञ् ।)
विगुणत्वम् । विगुणस्य भावः । यथा,—
"यात्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य च ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमः ॥"
मनुः ।

वैचक्षण्यं, क्ली, विचक्षणत्वम् । विचक्षणस्य भाव
इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् ॥ (यथा,
साहित्यदर्पणे । १ ।
"धर्म्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ॥")

वैचित्र्यं, क्ली, विचित्रता । विचित्रस्य भाव इत्यर्थे
ष्यञ्प्रत्ययेन निष्पन्नमिदम् । (यथा, राजेन्द्र-
कर्णपूरे । २८ ।
"वैचित्र्यं वितनोति वाचकविधौ वाचस्पते-
रन्तिके
देव त्वद्गुणवर्णनाय कुरुते किं किं न वाग्-
देवता ॥")

वैजननः, पुं, (विजायतेऽस्मिन्निति । जन् +
आधारे ल्युट् । ततः स्वार्थे अण् ।) प्रसव-
मासः । तत्पर्य्यायः । सूतिमासः २ । इत्यमरः ॥
(यथा, राजतरङ्गिण्याम् । १ । ७४ ।
"अथ वैजनने मासि सा देवी दिव्यलक्षणम् ।
निर्दग्धस्यान्वयतरोरङ्कुरं सुषुवे सुतम् ॥")

वैजयन्तः, पुं, (वैजयन्ती अस्त्यत्रेति । अर्श आद्यच् ।)
इन्द्रप्रासादः । इत्यमरः ॥ इन्द्रध्वजः । इति
मेदिनी ॥ (यथा, महाभारते । २ ।२२।१६।
"एष ह्यैन्द्रो वैजयन्तो गुणैर्नित्यं समाहितः ।
येनासुरान् पराजित्य जगत्पतिशतक्रतुः ॥")
गुहः । इति हेमचन्द्रः ।

वैजयन्तिकः, त्रि, (वैजयन्त्यस्यास्तीति । व्रीह्यादि-
भ्यश्चेति ठन् । यद्वा, वैजयन्त्या चरतीति । चर-
तीति ठक् ।) पताकाधारी । इत्यमरः ॥

वैजयन्तिका, स्त्री, (वैजयन्ती + स्वार्थे कन् ।)
जयन्तीवृक्षः । पताका । इत्यमरः ॥ (यथा,
"निर्धनं निधनमेतयोर्द्वयो-
स्तारतम्यविधिमुग्धचेतसा ।
बोधनाय विधिना विनिर्म्मिता
रेफ एव जयवैजयन्तिका ॥"
इत्युद्भटः ॥)
अग्निमन्थः । इति राजनिर्घण्टः ॥

वैजयन्ती, स्त्री, पताका । इत्यमरः ॥ (यथा,
रघुः । ६ । ८ ।

"सञ्चारिते चागुरुसारयोनौ
धूपे समुत्सर्पति वैजयन्तीः ॥")
जयन्तीद्रुमः । इति मेदिनी ॥ अग्निमन्थद्रुमः । इति हेमचन्द्रः ॥ पञ्चवर्णमयी जानुपर्य्यन्तलम्बिता माला । यथा,—
"उपगीयमान उद्गायन् वनिताशतयूथपः ।
मालां बिभ्रद्वैजयन्तीं व्यचरन् मण्डयन् वनम् ॥"
इति श्रीभागवते १० स्कन्धे २१ अध्यायः ॥
वैजयिः, पुं, मघवा । स तु जिनचक्रवर्त्तिविशेषः । इति हेमचन्द्रः ॥
वैजयिकं, त्रि, (विजयस्य निमित्तं विजयिना संयोग इति वा । विजय+"तस्य निमित्तमिति ।" ५ । १ । ३८ । इति ठञ् ।) विजयसम्बन्धि । इति सिद्धान्तकौमुदी ॥ (यथा, हरिवंशे । २४२ । ३१ ।
"रणे प्रवेशसदृशं कर्म्म वैजयिकं कृतम् ॥")
वै(बै)जिकं, क्ली, (बीजादुत्पन्नम् । बीज+ठक् ।) शिग्रुतैलम् । हेतुः । इति मेदिनी ॥ आत्मा । इति शब्दमाला ॥
वै(बै)जिकः, पुं, सद्योऽङ्कुरः । इति मेदिनी ॥ बीजसम्बन्धिनि, त्रि ॥ (वीर्य्यसम्बन्धिनि च त्रि । यथा, मनौ । २ । २७ ।
"गार्भैर्होमैर्जातकर्म्मचौड़मौञ्जीनिबन्धनैः ।
वैजिकं गार्भिकञ्चैनो द्विजानामपमृज्यते ॥")
वैज्ञानिकः, त्रि, (विज्ञाने युक्तः । विज्ञान+"तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् ।) निपुणः । इत्यमरः ॥
वै(बै)ड़ालव्रतं, क्ली, (वैड़ालं विड़ालसम्बन्धि व्रतम् ।) दुष्टाचारविशेषः । यथा,—
"यस्य धर्म्मध्वजो नित्यं शक्रध्वज इवोच्छ्रितः ।
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम् ॥"
इति दानसागरे यमवचनम् ॥
वै(बै)ड़ालव्रतिः, पुं, अज्ञानाद्यभावात् छलव्रतचर्य्यः । इति जटाधरः ॥
वै(बै)ड़ालव्रतिकः, पुं, (विड़ालव्रतेन चरतीति । विड़ालव्रत+ठक् ।) छद्मतपस्वी । तत्पर्य्यायः । छद्मतापसः २ सर्व्वाभिसन्धी ३ । इति त्रिकाण्डशेषः ॥ तस्यासंभाष्यत्वं यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान् शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥
"यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः ।
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम् ॥"
तद्वान् वैड़ालव्रतिकः । इति तट्टीका ॥
वै(बै)ड़ालव्रती, [न्] पुं, (वैड़ालव्रतमस्त्यस्येति । इनिः ।) भण्डतापसः । विड़ालतपस्वी । इति भाषा । यथा, कौर्म्मे उपविभागे ५ अध्याये ।
"छद्मना चरितं तच्च व्रतं रक्षांसि गच्छति ।
अलिङ्गी लिङ्गवेशेन यो लिङ्गमुपजीवति ।
स लिङ्गिनां हरेदेनस्तिर्य्यग्योनौ च जायते ॥
वैड़ालव्रतिनः पापाः सर्व्वधर्म्मविनाशकाः ।
सद्यः पतन्ति पापेषु कर्म्मणस्तस्य तत्फलम् ॥
पाषण्डिनो विकर्म्मस्थान् वामाचारांस्तथैव च ।
पञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्च्चयेत् ॥"
वैणः, पुं, वेणुजीवी । वेणुशब्दादण्प्रत्ययेन उकारस्य लोपेन च निष्पन्नमिदम् । इति सिद्धान्तकौमुदी ॥ (यथा, याज्ञवल्क्ये । १ । १६१ ।
"वैणाभिशस्तवार्द्धुषिगणिकागणदीक्षिणाम् ॥")
वैणवं, क्ली, (वेणोरिदम् । वेणु+अण् ।) वेणुफलम् । इत्यमरः ॥ वेणुसम्बन्धिनि, त्रि ॥ (यथा, भागवते । ११ । ३० । २४ ।
"ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनाम् ।
स्पर्द्धाक्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वनम् ॥")
वैणवः, पुं, (वेणोरवयवो विकारो वा । वेणु+"बिल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् ।) उपनयने वेणुदण्डः । तत्पर्य्यायः । दाम्भः २ । इत्यमरः ॥ (वेणुः । यथा, महाभारते । ५ । ६० । १६ ।
"भेरीमृदङ्गनिनदैः शङ्खवैणवनिस्वनैः ॥")
वैणविकः, त्रि, (वैणवो वेणुस्तद्वादनं शिल्पमस्य । वैणव+"शिल्पम् ।" ४ । ४ । ५५ । इति ठक् ।) वेणुवादकः । तत्पर्य्यायः । वेणुध्माः २ । इत्यमरः ॥ वैणुकः ३ । इति शब्दरत्नावली ॥
वैणवी, स्त्री, (वेणोर्विकृतिः । वेणु+"बिल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् । ततो ङीप् ।) वंशलोचना । इति राजनिर्घण्टः ॥ (वेणुसम्बन्धिनी । यथा, मनुः । ४ । ३६ ।
"वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ॥")
वैणिकः, त्रि, (वीणावादनं शिल्पमस्य । वीणा+"शिल्पम् ।" ४ । ४ । ५५ । इति ठक् ।) वीणावादकः । इत्यमरः ॥ (यथा, कथासरित्सागरे । ६३ । १६२ ।
"तच्छ्रुत्वा विहताशोऽपि हसित्वा वैणिको ययौ ॥")
वैणुकं, क्ली, गजस्य तोदनदण्डम् । तत्तु हस्तिचालनार्थं लौहमुखवंशदण्डम् । तत्पर्य्यायः । तोत्रम् २ । इत्यमरः ॥ वैणुकम् ३ । इति भरतः ॥
वैणुकः, पुं, (वेणुना कायति शब्दायते इति । कै+कः । ततः स्वार्थे अण् ।) वेणुवादकः । इति शब्दरत्नावली ॥
वैणुकीयः, त्रि, (वेणुकस्यायमिति । "वेणुकादिभ्यश्छण् ।" ४ । २ । १३८ । इत्यस्य वार्त्तिकोक्त्या छण् ।) वेणुसम्बन्धीयः । इति सिद्धान्तकौमुदी ॥
वैण्यः, पुं, (वेणोरपत्यमिति । वेण+ष्यञ् ।) पृथुः । स तु सूर्य्यवंशीयपञ्चमराजः । यथा,—
"आदिराजः पृथुर्वैण्यो मान्धाता यौवनाश्वकः ॥"
इति जटाधरः ॥
वैतंसिकः, त्रि, (वीतंसो मृगपक्ष्यादिबन्धनोपायस्तेन चरतीति । वितंस+"चरति ।" ४ । ४ । ८ । इति ठक् ।) मांसविक्रेता । तत्पर्य्यायः । कौटिकः २ मांसिकः ३ । इत्यमरः ॥ कौटकिकः ४ । इति शब्दरत्नावली ॥ मृगपक्ष्यादिबन्धनोपायो वीतंसः तेन चरतीति वैतंसिकः । इति भरतः ॥ (यथा, महाभारते । ३ । १३ । १२ ।
"इमान् शकुनकान् राजन् हन्ति वैतंसिको यथा ।
एतद्रूपमधर्म्मस्य भूतेषु हि विहिंसता ॥")
वैतनिकः, त्रि, (वेतनेन जीवतीति । वेतन+"वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक् ।) वेतनभुग्भृत्यः । तत्पर्य्यायः भृतकः २ भृतिभुक् ३ कर्म्मकरः ४ । इत्यमरः ॥ (यथा, उपदेशशतके । २० ।
"वीरो वैतनिकः स्वविराटनगरोषितः कुमारीणाम् ।
नर्त्तयिताऽर्ज्जुन आसीत् भजेदवश्योचितां वृत्तिम् ॥")
वैतरणिः, वैतरणी, स्त्री, नरकसिन्धुः । इत्यमरः ॥ "वितरणेन दानेन तीर्य्यते वैतरणी । णः बिल्वादीप् णौ वैतरणिश्च । घटविघटिघाटीवैतरण्यर्थिश्रुश्रीरिति ह्रस्वान्तेषु रुद्रः । ततोऽपि पाच्छोणादीति वा ङीप् । विरुद्धं तरणं वितरणं तदस्यामस्तीति वैतरणीत्यन्ये । वितरणौ विसर्ग्गे पाताले भवा वैतरणीत्यन्ये । वितरणिर्नौका तरणशून्येत्यर्थः स्वार्थे ष्णे वैतरणीत्येके । सिन्धुर्नदी ।
'नारका जन्तवः प्रेता नदी वैतरणी स्मृता ।'
इति त्रिकाण्डम् ॥"
इति भरतः ॥ * ॥ सा नदी दुर्गन्धा तप्तजला महावेगा अस्थिकेशरक्तपरिपूर्णा यमद्वारे वर्त्तते । यथा,—
"नदी वैतरणी नाम दुर्गन्धा रुधिरावहा ।
उष्णतोया महावेगा अस्थिकेशतरङ्गिणी ॥"
इति प्रायश्चित्तविवेकधृतयमदग्निवचनम् ॥ * ॥
अस्या उत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
"ततो ब्रह्मादयो देवाः सर्व्वे ते शङ्करान्तिकम् ।
गत्वा हरं संस्तुवुः सांसार्थ्या योगमायया ॥
शनैश्चरोऽपि भूतशमाधाद्यान्तर्हितस्तदा ।
बाष्पवृष्टिं दुराधर्षामवजग्राह मायया ॥
यदा स नाशकद्बाष्पान् सन्धारयितुमर्कजः ।
तदा महागिरौ चिक्षेप बाष्पांस्ते जलधारके ॥
लोकालोकस्य निकटे जलधाराह्वयो गिरिः ।
पुष्करद्वीपपृष्ठस्थस्तोयसागरपश्चिमे ॥
स तु सर्व्वप्रमाणेन मेरुपर्व्वतसन्निभः ।
तस्मिन् विन्यस्तवान् बाष्पान् न धर्त्तुं क्षम ईशितुः ॥
विदीर्णस्तैस्तु बाष्पौघैर्भग्नमध्योऽभवद्द्रुतम् ।
ते बाष्पाः पर्व्वतं भित्त्वा विविशुस्तोयसागरम् ॥
सागरोऽपि ग्रहीतुं तान्न शशाक खरागति ।
ततस्तु सागरं मध्ये भित्त्वा बाष्पाः समागताः ॥
तोयधेः प्रागभवां वेलां स्वगमाच्चाद्बिभेद ताम् ।
विभिद्य वेलां ते बाष्पाः पुष्करद्वीपमध्यगाः ॥
नदी वैतरणी भूत्वा पूर्व्वसागरगाभवन् ।
जलधारस्य वेगेन संसर्गात् सागरस्य च ॥
अवाप्य सौम्यतां किञ्चिद्बाष्पास्ते नाभिदन् क्षितिम् ।
तदाप्यत्याकुला पृथ्वी विदीर्णा स्यान्न चेच्छनैः ॥

अवतरन्त्याश्च ते तासां सोऽपि क्षुब्धोऽभवद्धठात् ।
शनैश्चरेण ते वोढुमसमर्थेन लोतकैः ।
निम्नैर्विदारितः सोऽसौ जलधारो महागिरिः ।
निर्भिद्य पर्व्वतं शम्भोर्व्वाक्यात्ते सागरं ययुः ।
वैवस्वतपुरद्वारे योजनद्वयविस्तृता ।
अद्यापि तिष्ठत्यपगा हरशीतकसम्भवा ।
भित्त्वा वेलां ततः पृथ्वीं विभिद्याशु तरङ्गिणीम् ।
चक्रुर्वैतरणीनाम्ना पूर्व्वसागरगामिनीम् ।
नानायानविमानेन न द्रोण्या स्यन्दनेन च ।
तर्त्तुं शक्या सा तु नदी तप्ततोया विभीषणा ।
दुःखेन तां तु पृथिवी बिभर्त्ति महताधुना ।
सदा चोर्द्ध्वगतैर्वाष्पैर्विक्षिपन्ति नभश्चरान् ।
तस्या उपरि नो यान्ति देवा अपि भयातुर ।
यमद्वारं समावृत्य योजनद्वयविस्तृता ।
नित्यं वहति संपूर्णा भीषयन्ती जगत्त्रयम् ।"
इति कालिकापुराणे १८ अध्यायः ॥ * ॥
आसन्नमृत्युकाले वैतरणीगवीदानं यथा,—
"आसन्नमृत्युना देया गौः सवत्सा च पूर्व्ववत् ।
तदभावे च गौरेका नरकोद्धारणाय वै ।
तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम् ।
शक्तोऽन्योऽरुक् तदा दत्त्वा श्रेयो दद्यान्मृतस्य च ।"
पूर्व्ववद्धेमशृङ्गादिना। अत्र मृतस्य चेति अवश्या-
दैकादशाहेऽपि वैतरणीदानाचारः । इति शुद्धितत्त्वम् । * । वैतरणीगोदानानन्तरं प्रार्थनामन्त्रो यथा,—
"यमद्वारे महाघोरे तप्ता वैतरणी नदी ।
ताञ्च तर्त्तुं ददाम्येनां कृष्णां वैतरणीञ्च गाम् ।"
इति तत्प्रयोगः । अन्यत् सुनृगुशब्दे द्रष्टव्यम् ॥
पितृकन्या । यथा,—
"अयज्वानश्च यज्वानः पितरो ब्रह्मणः सुताः ।
अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः ।
तेभ्यः स्वधा सुतां जज्ञे मेनां वैतरणीं तथा ।"
इति कौर्म्मे १३ अध्यायः ॥ * ॥
(कलिङ्गदेशस्थ-नदीविशेषः । यथा, महाभारते । ३ । ११४ । ४ ।
"एते कलिङ्गाः कौन्तेय ! यत्र वैतरणी नदी ।
यत्रायजत धर्म्मोऽपि देवाञ्छरणमेत्य वै ।")

वैतसः, पुं, (वेतस एव । स्वार्थे अण् ।) अम्लवेतसः । इति जटाधरः ॥ (पुंस्प्रजननम् । शिश्नदण्डम् । इति निघण्टुः । ३ । २९ । यथा, ऋग्वेदे । १० । ९५ । ४ ।
"दिवा नक्तं श्नथिता वैतसेन ।"
"वैतसेन शेपो वैतस इति पुंस्प्रजननस्येति निरुक्तम् । ३ । २१ । पुंस्प्रजननेन श्नथिता ताड़िता भवति ।" इति तद्भाष्ये सायनः ॥ * ॥ वेतसस्यायमिति । तस्येदमिति अण् । वेतससम्बन्धिनि, त्रि । यथा, रघुः । ४ । ३५ ।
"आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ।")

वैतानिकः, पुं, (विताने भवः । वितान+ठक् ।) श्रौतहोमः । यथा,—
"मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निना ।
दाहादूर्द्धमशौचं स्याद्यस्य वैतानिको विधिः ।"
इति शुद्धितत्त्वम् ।
वितानसम्बन्धीये, त्रि । वितानशब्दात् ष्णिकप्रत्ययेन निष्पन्नमेतत् । (यज्ञादिकार्य्यकारी । यथा च भागवते । १० । ४० । ५ ।
"त्रय्या च विद्यया केचित् त्वां वै वैतानिका द्विजाः ।
यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया ।")

वैतालिकः, पुं, (विविधेन तालेन चरतीति । वितालं+ठक् ।) बोधकरः । इत्यमरः ॥ दे निशान्ते बोधकारके । विविधो मङ्गलगीतिवाद्यादिकृतस्तालशब्दः तेन व्यवहरन्ति वैतालिकाः ष्ठघे कादिति ष्णिकः । निशान्तं निवेदयन्तो ये नृपं बोधयन्ति जागरयन्ति ते बोधकराः डुकृञ् इति टः । इति भरतः ॥ (यथा, शिशुपालवधे । ५ । ६७ ।
"वैतालिकाः स्फुटपदप्रकटार्थसूक्ति-
भोगावलीः कलगिरोऽवसरेषु पेठुः ।")
खेङ्गितालः । यथा,—
"वैतालिकः पुमान् खेङ्गिताले बोधकरे त्रिषु ।"
इति मेदिनी ।
हेमचन्द्रे तु पाठान्तरं यथा,—
"वैतालिकः खङ्गताले मङ्गलपाठकेऽपि च ।"
वेतालसम्बन्धिनि, त्रि ।

वैत्रकः, त्रि, वेत्रसम्बन्धी । वेत्रशब्दात् कण्प्रत्ययेन निष्पन्नमिदम् ।

वैत्रकेयः, त्रि, वेत्रसम्बन्धीयः । वेत्रशब्दात् ष्णेयप्रत्ययेन निष्पन्नमेतत् ।

वैदः, त्रि, पण्डितसम्बन्धी । विच्छब्दात् ष्णप्रत्ययेन निष्पन्नमेतत् ।

वैदग्धं, क्ली, (विदग्धस्य भावः । ष्यञ् ।) विदग्धत्वम् । यथा । वैदग्ध्यमपि वैदग्धी । इति भरतद्विरूपकोषः ॥ (यथा, साहित्यदर्पणे । १ ।
"वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् ।")

वैदग्धी, स्त्री, (विदग्धस्येयमिति । विदग्ध+ष्यञ् । स्त्रियां ङीप् ।) भङ्गिः । यथा,—
"छलं मिषञ्च वैदग्धी भङ्गिस्त्वभिनिमीलिका ।"
इति त्रिकाण्डशेषः ।
(यथा, कथासरित्सागरे । २० । १०६ ।
"धात्रा वैरूप्यनिर्म्माणवैदग्धीं दर्शितामिव ।")

वैदग्ध्यं, क्ली, (विदग्ध+ष्यञ् ।) विदग्धस्य भावः । विदग्धशब्दात् ष्यञ्प्रत्ययेन निष्पन्नमेतत् । (यथा, कथासरित्सागरे । १ । १२ ।
"वैदग्ध्यख्यातिलोभाय मम नैवायमुद्यमः ।")

वैदर्भं, क्ली, वाक्यवक्रत्वम् । इति मेदिनी । विदर्भसम्बन्धिनि, त्रि ।

वैदर्भः, पुं, (विदर्भो निवासोऽस्येति । विदर्भ+अण् ।) विदर्भदेशीयराजः । (यथा, रघुः । ५ । ६२ ।
"मेने यथा तत्र जनः समेतो
वैदर्भमागन्तुमजं गृहेशम् ।")
दमयन्तीपिता भीमसेनः । रुक्मिणीपिता भीष्मकश्च । वाक्यवक्रिमा । इति धरणिः ॥

वैदर्भी, स्त्री, वाक्यरीतिभेदः । इति मेदिनी ॥ यथा, रीतिमाह ।
"पदसंघटना रीतिरङ्गसंस्था विशेषवत् ।
उपकर्त्री रसादीनां——————।"
रसादीनामर्थात् शब्दार्थशरीरस्य काव्यस्यात्मभूतानाम् ।
"—————सा पुनः स्याच्चतुर्व्विधा ।
वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा ।"
सा रीतिः । तत्र ।
"माधुर्य्यव्यञ्जकैर्व्वर्णै रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ।"
यथा । अनङ्गमङ्गलभुव इत्यादि । रुद्रटस्त्वाह ।
"असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया ।"
अत्र दशगुणास्तन्मतोक्ताः श्लेषादयः ।
"ओजःप्रकाशकैर्व्वर्णैर्बन्ध आडम्बरः पुनः ।
समासबहुला गौड़ी——————।"
यथा । चञ्चद्भुजेत्यादि । पुरुषोत्तमस्त्वाह ।
बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौड़ीया ।
रीतिरनुप्रासमहिमपरतन्त्रा स्तोभवाक्या च ।"
"——————वर्णैः शेषैः पुनर्द्वयोः ।
समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ।"
द्वयोर्वैदर्भीगौड्योः । यथा,—
"मधुरया मधुबोधितमाधवी-
मधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मद-
ध्वनिभृता निभृताक्षरमुज्जगे ।" * ।
भोजस्त्वाह ।
"समस्तपञ्चषपदामोजःकान्तिसमन्विताम् ।
मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ।"
"लाटी तु रीतिर्व्वैदर्भीपाञ्चाल्योरन्तरा स्थिता ।"
यथा,—
"अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोड़ताम्रस्तमांसि ।"
कश्चिदाह ।
"मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ।"
अन्ये त्वाहुः ।
"गौड़ी डम्बरबद्धा स्यात् वैदर्भी ललिता क्रमात् ।
पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः ।"
क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः ।
वक्त्रादीत्यादिशब्दाद्वाच्यप्रबन्धौ रचनादीत्यादिशब्दाद्वृत्तिवर्णौ । तत्र वक्त्रौचित्याद्यथा । मन्थायस्तार्णवाम्भ इत्यादि । अत्र वाच्यस्य

क्रोधाद्यव्यञ्जकत्वेऽपि भीमसेनवक्तृत्वेनोद्धता वच-
नादयः। वाच्यौचित्याद्यथोदाहृते। मूर्द्ध-
न्याधूयमानेत्यादौ ॥ * ॥ प्रबन्धौचित्याद्यथा।
नाटकादौ रौद्रेऽप्यभिनयप्रतिकूलत्वेन न दीर्घ-
समासादयः। एवमाख्यायिकायां शृङ्गारेऽपि
न मसृणवर्णादयः। कथायां रौद्रेऽपि नात्यन्त-
मुद्धताः। एवमन्यदपि ज्ञेयम्। इति साहित्य-
दर्पणे रीतिविवेको नाम ९ परिच्छेदः ॥ * ॥
अगस्त्यपत्नी। इति शब्दरत्नावली ॥ दमयन्ती।
यथा,—

"वैदर्भी विपुलानुरागकलना सौभाग्यमत्ता-
खिल-
क्षौणीचक्रशतक्रतौ निजगदे तद्वृत्तवृत्तक्रमैः।
किन्त्वाखाकनरेन्द्रभूसुभगता संभूतये लम्भकं
देवेन्द्रावरजप्रसादितशचीविश्राणिताशीर्व्वचः ॥
इति उत्तरनैषधे-१५ सर्गः ॥

रुक्मिणी। यथा,—
"वैदर्भ्याः स तु सन्देशं निशम्य यदुनन्दनः।
प्रगृह्य पाणिना पाणिं प्रहसन् द्विजमब्रवीत् ॥"
इति श्रीभागवते १० स्कन्धे ५३ अध्यायः ॥

वैदलं, क्ली, भिक्षुकस्य त्वक्मयादिपात्रम्। यथा,
"पात्रन्तु दारवालाबुत्वक्मयान्यपि वैदलम् ॥"
इति जटाधरः ॥

वैदलः, पुं, (विदलो दालिस्तस्मात् जातः। विदल
+ अण्।) पिष्टकः। यथा,—
"पूपोऽपूपः पिष्टकः स्याद्वैदलो विदलोऽपि च।"
इति शब्दचन्द्रिका ॥
विदलो दालिस्तन्निर्म्मितपिष्टको वैदलः। तद्-
गुणाः।
"वैदला गुरवो भक्ष्या विष्टम्भिष्टम्भमारुताः ॥"
इति राजवल्लभः ॥

वैदिकः, पुं, (वेदं जानातीति। वेद+ठञ्।)
वेदज्ञब्राह्मणः। वेदोक्ते, त्रि। यथा, तन्त्रसारे।
"वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोगतः ॥"

वैदिशं, त्रि, विदिशाया अदूरभवं नगरम्। इति
सिद्धान्तकौमुदी ॥

वैदुष्यं, क्ली, (विदुषः कर्म्म भावो वा। विद्वस्+
ष्यञ्।) विदुषो भावः। विद्वस्शब्दात् ष्यञ्-
प्रत्ययेन निष्पन्नमिदम् ॥ (यथा, राजतरङ्गि-
ण्याम्। १। १२।
"पाटवं दृष्टवैदुष्यतीव्रा सुव्रतभारती ॥")

वैदूर्य्यं, क्ली, (विदूरात् प्रभवतीति। विदूर+
"विदूरात् ञ्यः।" ४। ३। ८४। इति ञ्यः।)
मणिविशेषः। स तु कृष्णपीतवर्णः। लहसुनीया
इति हिन्दी भाषा। अस्य देवता केतुः।
तत्पर्य्यायः। बालवायजम् २। इति हेमचन्द्रः ॥
केतुरत्नम् ३ कैतवम् ४ प्रावृष्यम् ५ अभ्र-
रोहम् ६ खराब्दाङ्कुरकम् ७ विदूररत्नम् ८
विदूरजम् ९। अस्य गुणाः। अम्लत्वम्। उष्ण-
त्वम्। कफवायुनाशित्वम्। गुल्मशूलप्रशमन-
त्वम्। भूषितश्चेत् शुभावहत्वञ्च। इति राज-
निर्घण्टः ॥ अपि च।

"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम्।
मणिरत्नं सरं शीतं कषायं स्वादु लेखनम्।
चाक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम् ॥"
इति राजवल्लभः ॥ * ॥

तच्छायलक्षणं यथा,—
"एकं वेणुपलाशकोमलरुचा मायूरकण्ठत्विषा
मार्जारेक्षणपिङ्गलच्छविरुचा ज्ञेयं त्रिधा
च्छायया।
यद्गात्रं गुरुतां दधाति नितरां स्निग्धन्तु
दोषोज्झितं
वैदूर्य्यं विमलं वदन्ति सुधियः स्वच्छञ्च तच्छो-
भनम् ॥"

तस्य कुलक्षणं यथा,—
"विच्छायं मृच्छिलागर्भं लघु रूक्षञ्च सक्षतम्।
सत्रासं परुषं कृष्णं वैदूर्य्यं दूरतो नयेत् ॥"

तत्परीक्षा यथा,—
"घृष्टं यदात्मना स्वच्छं स्वच्छायां निकषाश्मनि।
स्फुटं प्रदर्शयेदेतद्वैदूर्य्यं जात्यमुच्यते ॥"
इति राजनिर्घण्टः ॥ * ॥

सूत उवाच।
"वैदूर्य्यपुष्परागाणां कर्केतभीष्मके वदे।
परीक्षां ब्रह्मणा प्रोक्तां व्यासेन कथितां द्विज ॥
कल्पान्तकालक्षुभिताम्बुराशि-
निर्ह्रादकल्पाद्दितिजस्य नादात्।
वैदूर्य्यमुत्पन्नमनेकवर्णं
शोभाभिरामं द्युतिवर्णबीजम् ॥
अविदूरे वैदूर्य्यस्य गिरेस्तुङ्गरोधसः।
कामभूतिकसीमानमनु तस्याकरोऽभवत् ॥
तस्य नादसमुत्थत्वादाकरः सुमहागुणः।
अभूदुत्तरितो लोके लोकत्रयविभूषणः ॥
तस्यैव दानवपतेर्निनदानुरूप-
प्रावृट्पयोदवरदर्शितचारुरूपाः।
वैदूर्य्यरत्नमणयो विविधावभासा-
स्तस्मात् स्फुलिङ्गनिवहा इव सम्बभूवुः ॥
पद्मरागमुपादाय मणिवर्णा हि ये क्षितौ।
सर्व्वांस्तान् वर्णशोभाभिर्वैदूर्य्यमनुगच्छति ॥
तेषां प्रधानं शिखिकण्ठनीलं
यद्वा भवेद्वेणुदलप्रकाशम्।
चाषाग्रपक्षप्रतिमश्रियो ये
न ते प्रशस्ता मणिशास्त्रविद्भिः ॥
गुणवान् वैदूर्य्यमणिर्योजयति स्वामिनं वरभाग्यैः।
दोषैर्युक्तो दोषैस्तस्माद्यत्नात् परीक्षेत ॥
गिरिकाचशिशुपालौ काचस्फटिकाश्च भूमि-
निर्भिन्नाः।
वैदूर्य्यमणेरेते विजातयः सन्निभाः सन्ति ॥
लिखाभावात् काचं लघुभावाच्छैशुपालकं
विद्यात्।
गिरिकाचमदीप्तित्वात् स्फटिकं वर्णोज्ज्वलत्वेन ॥
यदिन्द्रनीलस्य महागुणस्य
सुवर्णसंख्याकलितस्य मूल्यम्।
तदेव वैदूर्य्यमणेः प्रदिष्टं
पलद्वयोन्मापितगौरवस्य ॥
जातस्य सर्व्वेऽपि मणेस्तु यादृग्-
विजातयः सन्ति समानवर्णाः।
तथापि नानाकरणानुमेय-
भेदप्रकारः परमः प्रदिष्टः ॥
सुखोपलक्ष्यश्च सदा विचार्य्यो
ह्ययं प्रभेदो विदुषा नरेण।
स्नेहप्रभेदो लघुता मृदुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम् ॥
कुशलाकुशलैः प्रयुज्यमानाः
प्रतिबद्धाः प्रतिसन्क्रियाप्रयोगैः।
गुणदोषसमुद्भवं लभन्ते
मणयोऽर्थान्तरमूल्यमेव भिन्नाः ॥
क्रमशः समतीतवर्त्तमानाः
प्रतिबद्धा मणिबन्धकेन यत्नात्।
यदि नाम भवन्ति दोषहीना
मणयः षड्गुणमाप्नुवन्ति मूल्यम् ॥
आकरान् समतीतानामुदधेस्तीरसन्निधौ।
मूल्यमेतन्मणीनान्तु न सर्व्वत्र महीतले ॥
सुवर्णो मनुना यस्तु प्रोक्तः षोड़शमाषकः।
तस्य सप्ततिमो भागः संज्ञारूपं करिष्यति ॥
शाणश्चतुर्थांशमानो माषकः पञ्चकृष्णलः।
पलस्य दशमो भागो धरणः परिकीर्त्तितः ॥
इति मानविधिः प्रोक्तो रत्नानां मूल्यनिश्चये ॥"
इति गारुड़े वैदूर्य्यपरीक्षा ७३ अध्यायः ॥ * ॥

अन्यच्च।
"सितञ्च धूम्रसङ्काशमीषत्कृष्णाचितं भवेत्।
वैदूर्य्यं नाम तद्रत्नं रत्नविद्भिरुदाहृतम् ॥
ब्रह्मक्षत्त्रियविट्शूद्रजातिभेदाच्चतुर्व्विधम्।
सितनीलो भवेद्विप्रः सितारक्तस्तु बाहुजः ॥
पीतानीलस्तु वैश्यः स्यात् नील एव हि शूद्रकः ॥"

अथ गुणाः।
"मार्ज्जारनयनप्रख्यं रवीनप्रतिमं हि वा।
कलितं निर्म्मलं स्वङ्गं वैदूर्य्यं देवभूषणम् ॥
सुतारं घनमत्यच्छं कलितं स्वङ्गमेव च।
वैदूर्य्याणां समाख्याता एते पञ्च महागुणाः ॥"

तद्यथा,—
"उद्गिरन्निव दीप्तिं योऽसौ सुतार इति गद्यते।
प्रमाणतोऽल्पं गुरु यत् घनमित्यभिधीयते ॥
कलङ्कादिविहीनं तदत्यच्छमिति कीर्त्तितम्।
मध्यसूत्रं कणाकारञ्चञ्चलो यत्र दृश्यते ॥
कलितं नाम तत्प्राहुः सर्व्वसम्पत्तिकारकम्।
विशिष्टाङ्गन्तु वैदूर्य्यं स्वङ्गमित्यभिधीयते ॥ * ॥
कर्करं कर्कशं त्रासः कलङ्को देह इत्यपि।
एते पञ्च महादोषा वैदूर्य्याणामुदीरिताः ॥
शर्कराशुक्तमिव यत् प्रतिभाति च कर्करम्।
स्पर्शेऽपि च यत्तज्ज्ञेयं कर्कशं बन्धुनाशनम्।
भिन्नभ्रान्तिकरस्त्रासः स कुर्य्यात् कुलसंक्ष-
यम् ॥
विरुद्धवर्णो यस्याङ्गे कलङ्कः क्षयकारकः।
मलदिग्ध इवाभाति देहो देहविनाशनः ॥
जयति यदि सुवर्णं त्यागहीनो यदा वा
बहुविधमणिहारी भूपतिर्वा यतिर्वा।

दधदपि हृतदोषं जातु वैदूर्य्यरत्नं
प्रतिग्रहपतिरूपः पातमेध्यव्ययश्रम् ।"
इति युक्तिकल्पतरौ वैदूर्य्यपरीक्षा ।
अन्यत् गरुड़पुराणवत् ।

वैदेहः, पुं, वणिक् । इत्यमरटीकायां भरतः ॥ (विदेहस्यापत्यमिति । विदेह+अण् ।) निमिराजपुत्रः । अस्योत्पत्तिर्यथा । अपुत्रस्य तस्य भूभुजः शरीरमराजकभीरवस्ते मुनयः अरण्यां ममन्थुः । तत्र च कुमारो जज्ञे । जननाज्जनकसंज्ञां चावाप । अभूद्विदेहोऽस्य पितेति वैदेहः । मथनान्मिथिरभूत्तस्योदावसुः पुत्रोऽभवत् । इति विष्णुपुराणे ४ अंशे निमिवंश-कथनं नाम ५ अध्यायः ॥ तस्य विदेहनामकारणं निमिशब्दे द्रष्टव्यम् ॥ (वर्णसङ्करजातिविशेषः । स तु वैश्यात् ब्राह्मण्यां जातः । यथा, मनुः । १० । ११ ।
"वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ।")

वैदेहकः, पुं, (वैदेह एव । स्वार्थे कन् ।) वणिक् । इत्यमरः ॥ शूद्रात् वैश्यासुतः । इति मेदिनी ॥ (वैश्याद्ब्राह्मण्यां जातो वर्णसङ्करविशेषः । यथा, मनुः । १० । १९ ।
"वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ।"
अस्यान्तःपुररक्षणं कार्य्यम् । यथा, तत्रैव । १० । ४७ ।
"वैदेहकानां स्त्रीकार्य्यं मागधानां वणिक्पथः ।")

वैदेहिकः, पुं, वणिक् । इत्यमरटीकासारसुन्दरी ॥ (वर्णसङ्करविशेषः । यथा, मनुः । १० । ३६ ।
"वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ।")

वैदेही, स्त्री, (विदेहेषु भवा विदेहस्यापत्यं स्त्री वा । विदेह+अण् । ङीप् ।) रोचना । सीता । (यथा, रघुः । १२ । २० ।
"रामोऽपि सह वैदेह्या वने वन्येन वर्त्तयन् ।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ॥"
यथा च ।
"वैदेहि ! याहि कलसोद्भवधर्म्मपत्नीं
तस्याः पुरः कथय पूर्व्वकथाः समस्ताः ।
एतामपि मा वद पयोनिधिबन्धनं मे
सेयं पुनश्चुलुकिताम्बुनिधेः कलङ्कम् ॥"
इत्युद्भटः ।)
वणिक्स्त्री । पिप्पली । इति मेदिनी । (वैदेहपत्नी । यथा, मनुः । १० । ३७ ।
"आहिण्डिको निषादेन वैदेह्यामेव जायते ।"
विदेहदेशोत्पन्नमात्रे च । यथा, महाभारते । १ । ९५ । २१ । "देवातिथिः खलु वैदेहीमुपयेमे मर्य्यादां नाम तस्यामस्य जज्ञे अरिहो नाम ।")

वैद्यः, पुं, (विद्यां वेदेति । विद्या+"तदधीते तद्वेद ।" ४ । २ । ५९ । इति अण् ।) पण्डितः । यथा । कात्यायनः ।
"नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित् ।
समविद्याधिकानान्तु देयं वैद्येन तद्धनम् ।"
वैद्येन विदुषा । इति दायतत्त्वम् ॥ वासकवृक्षः । इति शब्दचन्द्रिका ॥ आयुर्व्वेदवेत्ता । स चाम्बष्ठजातिश्चिकित्सावृत्तिश्च । तत्पर्य्यायः । रोगहारी २ अगदङ्कारः ३ भिषक् ४ चिकित्सकः ५ । इत्यमरभरतौ ॥ सद्यः ६ विधिः ७ विद्वान् ८ आयुर्व्वेदी ९ । इति राजनिर्घण्टः ॥ स चतुर्व्विधः । रोगहरः १ विषहरः २ शल्यहरः ३ कृत्याहरः ४ । इति महाभारते राजधर्म्मः ।
अस्योत्पत्तिर्यथा,—
"वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति ।
वैद्यवीर्य्येण शूद्रायां बभूवुर्बहवो जनाः ॥
ते च ग्रामगुणज्ञाश्च मन्त्रौषधिपरायणाः ।
तेभ्यश्च जाताः शूद्रायां ते व्यालग्राहिणो भुवि ॥
शौनक उवाच ।
कथं ब्राह्मणपत्न्यान्तु सूर्य्यपुत्त्रोऽश्विनीसुतः ।
अहो केन विपाकेन वीर्य्याधानं चकार सः ॥
सौतिरुवाच ।
गच्छन्तीं तीर्थयात्रायां ब्राह्मणीं कुरुनन्दन ।
ददर्श कामुकीं कान्तः पुष्पोद्याने मनोहरे ॥
तया निवारितो यत्नात् बलेन बलवान् सुरः ।
अतीव सुन्दरीं दृष्ट्वा वीर्य्याधानं चकार सः ॥
द्रुतं तत्याज गर्भं सा पुष्पोद्याने मनोरमे ।
सद्यो बभूव पुत्त्रश्च तप्तकाञ्चनसन्निभः ॥
सपुत्त्रा स्वामिनो गेहं जगाम व्रीड़िता तदा ।
स्वामिनं कथयामास यस्माद्दैवादिसङ्कटम् ।
विप्रो रोषेण तत्याज तञ्च पुत्त्रं स्वकामिनीम् ।
सरिद्बभूव योगेन सा च गोदावरी स्मृता ॥
पुत्त्रं चिकित्साशास्त्रञ्च पाठयामास यत्नतः ।
नानाशिल्पञ्च मन्त्रञ्च स्वयं स रविनन्दनः ॥
विप्रश्च ज्योतिर्गणनात् वेदनाच्च निरन्तरम् ।
वेदधर्म्मपरित्यक्तो बभूव गणको भुवि ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥*॥
नरकभोगान्ते वैद्यजन्म यथा,—
"यः करोत्यपहारञ्च देवब्राह्मणयोर्धनम् ।
पातयित्वा स्वपुरुषान् दश पूर्व्वान् दशापरान् ॥
स्वयं याति च धूमान्धं धूमध्वान्तसमन्वितम् ।
धूमक्लिष्टो धूमभोजी वसेत्तत्र चतुर्युगम् ॥
ततो मूषिकजातिश्च शतजन्मनि भारते ।
ततो नानाविधाः पक्षिजातयः कृमिजातयः ॥
ततो नानाविधा वृक्षजातयश्च ततो नरः ।
भार्य्याहीनो वंशहीनः शवरो व्याधिसंयुतः ॥
ततो भवेत् स्वर्णकारः स सुवर्णवणिक् ततः ।
ततो यवनसेवी च ब्राह्मणो गणकस्ततः ।
विप्रो देवलोपजीवी वैद्यजीवी चिकित्सकः ॥"*
अपि च ।
"वाच्यालोचादिव्यापारी रसादिविक्रयी च यः ।
स याति नागवेष्टञ्च नागैर्व्वेष्टित एव च ।
वसेत् स लोममानाब्दं तत्रैव नागदंशितः ॥
ततो भवेत् स गणको वैद्यश्च सप्तजन्मसु ।
गोपश्च कर्म्मकारश्च रङ्गकारस्ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २८ अध्यायः ॥*॥
राजवैद्यस्य लक्षणं यथा,—
"परं पारं गतो यः स्यादष्टाङ्गे तु चिकित्सिते ।
अनाहार्य्यः स वैद्यः स्याद्धर्म्मात्मा च कुलोद्गतः ।
प्राणाचार्य्यः स विज्ञेयो वचनं तस्य भूभुजः ।
राजन् राज्ञा सदा कार्य्यं यथा कार्य्यं पृथग्जनैः ॥"
इति मात्स्ये १८९ अध्यायः ॥*॥
सामान्यवैद्यलक्षणं यथा,—
"चिकित्सां कुरुते यस्तु स चिकित्सक उच्यते ।
स च यादृक् समीचीनस्तादृशोऽपि निगद्यते ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी प्रियंवदः ।
सत्यधर्म्मपरो यश्च वैद्य ईदृक् प्रशस्यते ॥"
दृष्टकर्म्मा दृष्टा परेण कृता चिकित्सा येन सः । स्वयंकृती स्वयंचिकित्साकुशल । लघुहस्तः सिद्धहस्तः ॥*॥ निषिद्धवैद्यो यथा,—
"कुचेलः कर्कशः स्तब्धो ग्रामीणः स्वयमागतः ।
पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि ॥"
कर्कशः अप्रियवादी । स्तब्धः साभिमानः । ग्रामीणः व्यवहाराचतुरः ॥*॥
अथ वैद्यस्य कर्म्म आह ।
"व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥"
अस्यायमर्थः । व्याधेः सम्यक् परिचयः । व्यथाशान्तिकरणं वैद्यस्य कर्म्म । न तु वैद्यः आयुषः प्रभुरित्यर्थः । अपरे त्वेवं व्याचक्षते । व्याधेस्तत्त्वपरिचयः । वेदनायाः शान्तिकरणञ्च । एतदेव वैद्यस्य वैद्यत्वं न किन्तु वैद्य आयुषः प्रभुरित्यर्थः ॥*॥
अथ वैद्यानयनदूतस्य लक्षणम् ।
"यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च यादृक् समुचितस्तादृगत्र निगद्यते ॥
दूताः सुजातयोऽव्यङ्गाः पटवो निर्म्मलाम्बराः ।
सुखिनोऽश्ववृषारूढाः शुभ्रपुष्पफलैर्युताः ॥
सजातयः सुचेष्टाश्च स्वस्तिवादिशि सङ्गताः ।
भिषजं समये प्राप्ता रोगिणः सुखहेतवः ॥"
सजातयः रोगिसमानजातयः ।
"यस्यां प्राणमरुद्वाति सा नाड़ी जीवसंज्ञिता ॥"*॥
अथ दूतयात्रायां शकुनविचारः ।
"वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते ।
न शुभं सौम्यशकुनप्रदीप्तन्तु सुखावहम् ॥"
प्रदीप्तमग्निः । दूतो रोगी च रिक्तहस्तो वैद्यं न पश्येत् । तथा च ।
"रिक्तहस्तो न पश्येत्तु राजानं भिषजं गुरुम् ।"
अथ आयुर्व्विदां प्रादुर्भावः । तत्रादौ ब्रह्मप्रादुर्भावः ।
"विधातार्थर्व्वसर्व्वस्वमायुर्व्वेदं प्रकाशयन् ।
स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुम् ॥
ततः प्रजापतिं दक्षं दक्षं सकलकर्म्मसु ।
विधिर्धीनीरधिः साङ्गमायुर्व्वेदमुपादिशत् ॥"*॥

अथ दक्षप्रादुर्भावः ।
"अथ दक्षः क्रियादक्षः स्वर्वैद्यौ वेदमायुषः ।
वेदयामास विद्वांसौ सूर्य्यांशौ सुरसत्तमौ ॥"*॥
अथाश्विनीसुतप्रादुर्भावः ।
"दक्षादधीत्य दस्रौ वितेनतुः संहितां स्वीयाम् ।
सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम् ॥
स्वयम्भुवः शिरश्छिन्नं भैरवेण रुषा च तत् ।
अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ ॥
देवासुररणे देवा दैत्यैर्ये सक्षताः कृताः ।
अक्षतास्ते कृताः सद्यो दस्राभ्यामद्भुतं महत् ॥
वज्रिणोऽभूद्भुजस्तम्भः स दस्राभ्यां चिकित्सितः ।
सोमाभिपतितश्चन्द्रस्ताभ्यामेव सुखीकृतः ॥
विशीर्णा दशनाः पूष्णो नेत्रे नष्टे भगस्य च ।
शशिनो राजयक्ष्माभूदश्विभ्यां ते चिकित्सिताः ॥
भार्गवश्च्यवनः कामी वृद्धः सन् विकृतिं गतः ।
वीर्य्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा ॥
एतैश्चान्यैश्च बहुभिः कर्म्मभिर्भिषजां वरौ ।
बभूवतुर्भृशं पूज्याविन्द्रादीनां दिवौकसाम् ॥"*
अथेन्द्रप्रादुर्भावः ।
"संवीक्ष्य दस्रयोरिन्द्रः कर्म्माण्येतानि यत्नवान् ।
आयुर्व्वेदं निरुद्वेगं तौ ययाचे शचीपतिः ॥
नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ ।
आयुर्व्वेदं यथाधीतं ददतुः शतमन्यवे ॥
नासत्याभ्यामधीत्यैव आयुर्व्वेदं शतक्रतुः ।
अध्यापयामास बहूनात्रेयप्रमुखान् मुनीन् ॥"*
अथात्रेयप्रादुर्भावः ।
"एकदा जगदालोक्य गदाकुलमितस्ततः ।
चिन्तयामास भगवानात्रेयो मुनिपुङ्गवः ॥
किं करोमि क गच्छामि कथं लोका निरामयाः ।
भवन्ति सामयानेतान्न शक्नोमि निरीक्षितुम् ॥
दयालुत्वमत्यर्थं स्वभावो दुरतिक्रमः ।
एतेषां दुःखतो दुःखं ममापि हृदयेऽधिकम् ॥
आयुर्व्वेदं पठिष्यामि नैरुज्याय शरीरिणाम् ।
इति निश्चित्य गतवानात्रेयस्त्रिदशालयम् ॥
तत्र मन्दिरमिन्द्रस्य गत्वा शक्रं ददर्श सः ।
सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः ॥
भासयन्तं दिशो भासा भास्करप्रतिमं त्विषा ।
आयुर्व्वेदमहाचार्य्यं शिरोधार्य्यं दिवौकसाम् ॥
शक्रस्तु तं निरीक्ष्यैव त्यक्तसिंहासनो ययौ ।
तदर्घ्ये पूजयामास भृशं भूरितपःश्रमम् ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ।
स मुनिर्व्वक्तुमारेभे निजागमनकारणम् ॥
देवराज न रात्राविव दिव एव यतो भवान् ।
विधात्रा विहितो यस्मात्त्रिलोकी लोकपालकः ॥
व्याधिभिर्व्यथिता लोकाः शोकाकुलितचेतसः ।
भूतले सन्ति सन्तापं तेषां हर्त्तुं कृपां कुरु ॥
आयुर्व्वेदोपदेशं मे कुरु कारुण्यतो द्रुतम् ।
तथेत्युक्त्वा सहस्राक्षोऽध्यापयामास तं मुनिम् ॥
मुनीन्द्र इन्द्रतः साङ्गमायुर्व्वेदमधीत्य सः ।
अभिनन्द्य तमाशीर्भिराजगाम पुनर्महीम् ॥
अथात्रेयो मुनिश्रेष्ठो भगवान् करुणापरः ।
स्वनाम्ना संहितां चक्रे नरचक्रानुकम्पया ।
ततोऽग्निवेशं भेडञ्च जातूकर्णं पराशरम् ।
क्षीरपाणिञ्च हारीतमायुर्व्वेदमपाठयत् ॥
तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽभवत् पुरा ।
ततो भेडादयश्चक्रुः स्वं स्वं तन्त्रं कृतानि च ॥
श्रावयामासुरात्रेयं मुनिवृन्देन वन्दितम् ।
श्रुत्वा च तानि तन्त्राणि हृष्टोऽभूदत्रिनन्दनः ॥
यथावत् सूत्रितं तस्मात् प्रहृष्टा मुनयोऽभवन् ।
दिवि देवर्षयो देवाः श्रुत्वा साध्विति चाब्रुवन् ॥"
अथ भरद्वाजप्रादुर्भावः ।
"एकदा हिमवत्पार्श्वे दैवादागत्य संगताः ।
मुनयो बहवस्तांश्च नामभिः कथयाम्यहम् ॥
भरद्वाजो मुनिवरः प्रथमं समुपागतः ।
ततोऽङ्गिरास्ततो गर्गो मरीचिर्भृगुभार्गवौ ॥
पुलस्त्योऽगस्तिरसितो वशिष्ठः सपराशरः ।
हारीतो गौतमः सांख्यो मैत्रेयश्च्यवनोऽपि च ॥
यमदग्निश्च गार्ग्यश्च काश्यपः कश्यपोऽपि च ।
नारदो वामदेवश्च मार्कण्डेयः कपिष्ठलः ॥
शाण्डिल्यः सहकौण्डिन्यः शाकुनेयः सशौनकः ।
आश्वलायनसांकृत्यौ विश्वामित्रः परीक्षितः ॥
देवलो गालवो धौम्यः काण्यकात्यायनावुभौ ।
काङ्कायनो वैजवापः कुशिको बादरायणिः ॥
हिरण्याक्षश्च लोकाक्षिः शरलोमा च गोभिलः ।
वैखानसा वालखिल्यास्तथैवान्ये महर्षयः ॥
ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च ।
तपसस्तेजसा दीप्ता हूयमाना इवाग्नयः ॥
सुखोपविष्टास्ते तत्र सर्व्वे चक्रुः कथामिमाम् ।
धर्म्मार्थकाममोक्षाणां मूलमुक्तं कलेवरम् ॥
तत्र सर्व्वार्थसंसिद्धिर्भवेद्यदि निरामयम् ।
तपःस्वाध्यायधर्म्माणां ब्रह्मचर्य्यव्रतायुषाम् ॥
हर्त्तारः प्रबला रोगा यत्र तत्र च सर्व्वतः ।
रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहरा-
दृशादीन्द्रियशक्तिसंक्षयकराः सर्व्वाङ्गपीडाकराः ।
धर्म्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम् ॥
तत्तेषां प्रशमाय कश्चन विधिश्चिन्त्यो भवद्भिर्बुधै-
र्योगैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन् ।
त्वं योग्यो भगवान् सहस्रनयनं याचस्व लब्धुं क्रमात्
आयुर्व्वेदमधीत्य यं गदभयान्मुक्ता भवामो वयम् ॥
इत्थं स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः ।
भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयम् ॥
तत्रेन्द्रभवनं गत्वा सुरर्षिगणमध्यगम् ।
ददर्श वृत्रहन्तारं दीप्यमानमिवानलम् ॥
दृष्ट्वैव स मुनिं प्राह भगवान् मघवा मुदा ।
धर्म्मज्ञ स्वागतं तेऽस्तु मुनिं तं समपूजयत् ॥
सोऽधिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम् ।
ऋषीणां वचनं सम्यगश्रावयत सत्तमम् ॥
व्याधयो हि समुत्पन्नाः सर्व्वप्राणिभयङ्कराः ।
तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि ॥
तमुवाच मुनिं साङ्गमायुर्व्वेदं शतक्रतुः ।
जीवेद्वर्षसहस्राणि देही नीरुङ्निशम्य यत् ॥
सोऽनन्तागारं त्रिस्कन्धमायुर्व्वेदं महामतिः ।
यथावदचिरात् सर्व्वं बुबुधे तन्मना मुनिः ॥
तेनायुः सुचिरं लेभे भरद्वाजो निरामयम् ।
अन्यानपि मुनींश्चक्रे नीरुजः सुचिरायुषः ॥
ततश्च जनितज्ञानचक्षुषा ऋषयोऽखिलाः ।
गुणान् द्रव्याणि कर्म्माणि दृष्ट्वा तद्विधिमाश्रिताः ॥
आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतम् ।
आयुर्व्वेदोक्तविधिनान्येऽपि स्युर्मुनयो यथा ॥"
अथ चरकप्रादुर्भावः ।
"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् ॥
अथर्व्वान्तर्गतं सम्यगायुर्व्वेदञ्च लब्धवान् ।
एकदा स महद्वृत्तं द्रष्टुं चर इवागतः ॥
तत्र लोकान् गदैर्ग्रस्तान् व्यथया परिपीडितान् ।
स्थलेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान् ॥
तान् दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः ।
अनन्तश्चिन्तयामास रोगोपशमकारणम् ॥
सञ्चिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह ।
यतश्चर इवायातो न ज्ञातः केनचिद्यतः ॥
तस्माच्चरकनामासौ विख्यातः क्षितिमण्डले ।
स भाति चरकाचार्य्यो देवाचार्य्यो यथा दिवि ॥
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ।
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् ॥
मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम् ।
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता ।
चरकेणात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः ॥"
अथ धन्वन्तरिप्रादुर्भावः ।
"एकदा देवराजस्य दृष्टिर्निपतिता भुवि ।
तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः ॥
तान् दृष्ट्वा हृदयं तस्य दयया परिपीडितम् ।
दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह ॥
धन्वन्तरे सुरश्रेष्ठ भगवन् किञ्चिदुच्यते ।
योग्यो भवति भूतानामुपकारपरो भव ॥
उपकाराय लोकानां केन किं न कृतं पुरा ।
त्रैलोक्याधिपतिर्व्विष्णुरभून्मत्स्यादिरूपवान् ॥
तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव ।
प्रतीकाराय रोगाणामायुर्व्वेदं प्रकाशय ॥
इत्युक्त्वा सुरशार्दूलः सर्व्वभूतहितैषया ।
समस्तमायुषो वेदं धन्वन्तरिमुपादिशत् ॥
अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ॥
नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ ।
बाल एव विरक्तोऽभूच्चचार च महत्तपः ॥
यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम् ।

ततो धन्वन्तरिर्लोकैः काशीराजोऽभिधीयते ।
हिताय देहिनां स्वीयसंहिता विहितामुना ।
अयं विद्यार्थिनो लोकान् संहितां तामपाठ-
यत् ॥"

अथ सुश्रुतप्रादुर्भावः ।

"अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽवदन् ।
अयं धन्वन्तरिः काश्यां काशीराजोऽयमुच्यते ॥
विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान् ।
वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ॥
तत्र नाम्ना दिवोदासः काशीराजोऽस्ति
बाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्व्वेदविदां वरः ॥
आयुर्व्वेदं ततोऽधीत्य लोकोपकृतिहेतवे ।
सर्व्वप्राणिदया तीर्थमुपकारो महामखः ॥
पितुर्व्वचनमाकर्ण्य सुश्रुतः काशिकां गतः ।
तेन सार्द्धं समध्येतुं मुनिपुत्रशतं ययौ ॥
अथ धन्वन्तरिं सर्व्वे वानप्रस्थाश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्ब्बहुभिः स्तुतम् ॥
काशीराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
स्वागतञ्च इति स्माह दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ।
ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम् ॥
भगवन् मानवान् दृष्ट्वा व्याधिभिः परिपीड़ितान् ।
क्रन्दतो म्रियमाणांश्च जातास्माकं हृदि व्यथा ॥
आमयानां शमोपायं विज्ञातुं वयमागताः ।
आयुर्व्वेदं भवानस्मानध्यापयतु यत्नतः ॥
अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत् ।
व्याख्यातं तेन ते यत्नाच्छुश्रुवुर्नयो मुदा ॥
काशीराजं तथाशीर्भिरभिनन्द्य मुदान्विताः ।
सुश्रुताद्याः सुधिद्वार्यां जग्मुर्गेहं स्वकं स्वकम् ॥
प्रथमं सुश्रुतस्तेषु स्वं तन्त्रं कृतवान् स्फुटम् ।
सुश्रुतस्य सखायोऽपि पृथक् तन्त्राणि तेनिरे ।
सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः ।
तस्मात्तं सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले ॥"
इति भावप्रकाशः ॥

अथ मतान्तरे वैद्योत्पत्तिकथनम् ।

"सत्यत्रेताद्वापरेषु युगेषु ब्राह्मणाः किल ।
ब्रह्मक्षत्रियविट्शूद्रकन्यका उपयेमिरे ॥
तत्र वैश्यसुतायां ये जज्ञिरे तनया अमी ।
सर्व्वे ते मुनयः ख्याता वेदवेदाङ्गपारगाः ॥
तेषां मुख्योऽम्बष्ठाचार्य्यस्तस्यावम्ना कुले हि तत् ।
अम्बष्ठ इत्यथाद्युक्तस्ततो जातिप्रवर्त्तनात् ॥
परे सर्व्वेऽपि चाम्बष्ठा वैश्या ब्राह्मणसम्भवाः ।
जननीतो जनुर्लब्धा यज्जाता वेदसंस्कृतेः ॥
अम्बष्ठास्तेन ते सर्व्वे द्विजा वैद्याः प्रकीर्त्तिताः ।
अथ रुक्प्रतिकारित्वाद्भिषजस्ते प्रकीर्त्तिताः ॥
सत्ये वैद्याः पितुस्तुल्यास्त्रेतायाञ्च तथा स्मृताः ।
द्वापरे चत्वरप्रोक्ताः कलौ वैश्योपमाः स्मृताः ॥
अथाम्बष्ठेषु सर्व्वेषु विख्याता अभवन्नमी ।
सेनो दासश्च गुप्तश्च दत्तो देवः करो धरः ॥
राजः सोमश्च नन्दिश्च कुण्डश्चन्द्रश्च रक्षितः ।
एषां वंशाः समुत्पन्ना एतत्पद्धतयो मताः ॥
अन्यपद्धतयोऽप्येयें सन्ति वैद्या न ते श्रुताः ।
बहवस्त्वेकनामानो नानागोत्रसमुद्भवाः ॥
यथाष्टौ विश्रुताः सेना इत्येवमपरे मताः ।
यस्य यस्य मुनेर्यो यः सन्तानः स स विश्रुतः ॥
तत्तद्गोत्रादिना वैद्याः श्रेष्ठाद्यन्तु स्वकर्म्मणा ॥"
तथा हि ।

"तिस्रो वर्णानुपूर्व्वेण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्य्याः स्वाः शूद्रजन्मनः ॥
यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
नैतन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥
पाणिं भर्त्तुः सवर्णासु गृह्णीयात् क्षत्रिया शरम् ।
वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ॥
सवर्णेभ्यः सवर्णासु जायन्ते च सजातयः ।
अनिन्द्येषु विवाहेषु पुत्राः सन्तानवर्द्धनाः ॥
विप्रान्मूर्द्धाभिषिक्तो हि क्षत्रियायां विशः
स्त्रियाम् ।
जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्शवोऽपि वा ॥
वैश्याशूद्र्योश्च राजन्यान्माहिष्यौ द्वौ सुतौ
स्मृतौ ।
वैश्यात्तु करणः शूद्रां विन्नास्वेष विधिः स्मृतः ॥"
एते षट् श्लोका याज्ञवल्कीयाः ॥

"शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाग्रजन्मनः ॥
पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि ॥
शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया ।
वसनस्य दशा ग्राह्याः शूद्रयोत्कृष्टवेदने ॥"
इति पद्मत्रयम् ॥

"ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते ॥"
इति च पद्यार्द्धं मानवीयम् ॥

"वैश्यायां ब्राह्मणाज्जातोऽम्बष्ठो हि मुनि-
सत्तम ।
ब्राह्मणानां चिकित्सार्थं निर्द्दिष्टो मुनिपुङ्गवैः ॥"
इति पराशरः ॥

"वेदाज्जातो हि वैद्यः स्यादम्बष्ठो ब्रह्मपुत्रकः ।"
इति शङ्खः ॥

ब्रह्मा मूर्द्धाभिषिक्तश्च वैद्यः क्षत्रविशावपि ।
अमी पञ्च द्विजा एषां यथापूर्व्वञ्च गौरवम् ॥"
इति हारीतः ॥

"मातुर्यदा प्रजायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ॥"
इति याज्ञवल्क्यवचनम् ॥

मूर्द्धाभिषिक्ताम्बष्ठयोरपि पितृवत्त्वात् द्विजत्वम् ॥
इति वृद्धाः ॥

"आयुर्व्वेदोपनयनाद्वैद्यो द्विज इति स्मृतः ॥"
इति वैद्यकेऽप्यविशेषः ॥

"तपोयोगात् पुरा वैद्यास्तेऽथवा पितृवत् स्मृताः ।
विप्रात् क्षत्रादयतो न्यूनाः क्रियया वैश्यवत्
कृताः ॥
शनैः शनैः क्रियालोपादथ ता वैद्यजातयः ।
कलौ शूद्रत्वमापन्ना यथा क्षत्रा यथा विशः ॥"
इति विष्णुः ॥

"युगे जघन्ये द्वे जाती ब्राह्मणः शूद्र एव च ।"
इति यमः ॥

"शनकैश्च क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वङ्गता लोके ब्राह्मणादर्शनेन च ॥"
इति मनुवचनं धृत्वा एवमम्बष्ठादीनामपि कलौ
शूद्रत्वमिति स्वस्वग्रन्थेषु वाचस्पतिमिश्रादिभि-
स्तथा शुद्धितत्त्वे स्मार्त्तभट्टाचार्य्येणाप्युक्तम् ।
अतएव कुलपञ्जिकायामुक्तम् । अतिदिष्टं हि
वैद्यस्य शूद्रत्वं क्षत्रियादिवदिति । तस्मात्
क्षत्रविशोस्तुल्यो वैद्यः शूद्रस्य पूजित इति ॥ * ॥
"युगे युगे कर्म्मणैवोत्कर्षापकर्षौ वाह मनुः ।
तपोरीतिप्रभावेण ते गच्छन्ति युगे युगे ॥"
मनुष्येष्विह जन्मत इति ॥

"अम्बष्ठेष्वम्बष्ठाचार्य्यः ख्यातोऽभूद्भुवनत्रये ।
सिद्धविद्याह्वयां कन्यां स्ववैद्यस्य तु मानसीम् ॥
उपयेमे महौजा यश्चिकित्सितकया श्रुतः ।
अथैतस्य वरेणैव ख्याता वैद्या महौजसः ॥
सेनो दासश्च गुप्तश्च दत्तो देवः करो धरः ।
राजः सोमश्च नन्दिश्च कुण्डश्चन्द्रश्च रक्षितः ॥
सन्ताना बहवस्तेषां बभूवुश्च चिकित्सकाः ।
कुलानुरूपतस्तेषां जाताः पद्धतयोऽप्यमूः ॥
तेषां प्रशंसा निन्दा च बभूव स्वेन कर्म्मणा ।
उत्तमौ सेनदासौ च गुप्तदत्तौ तथैव च ॥
देवः करश्च मध्यस्थौ राजसोमौ कुलाधमौ ।
नन्दिप्रभृतयो निन्द्या शुभपद्धतयोऽपि च ॥
केचिज्जात्या परिख्यातास्तथा वृत्त्यनुसारतः ।
सर्व्वासामेव जातीनां वृत्तिरेव गरीयसी ।
वृत्तिः स्वर्म्यां च पथ्या च वृत्त्या जातिः प्रव-
र्त्तते ॥"

इति प्राचीनकुलपञ्जिकाधृतव्यासवचनानि ॥
इति वैद्योत्पत्तिकथनम् ॥ * ॥ अथ वैद्यानां
गोत्राणि ।

"अष्टाविंशदमी गोत्राः सर्व्वेषां भिषजामपि ।
प्रत्येकन्ते विलिख्यन्ते सेनदासादितः क्रमात् ॥
धन्वन्तरिश्च शक्तिश्च तथा वैश्वानराह्वकौ ।
मौद्गल्यकौशिकौ कृष्णात्रेय आङ्गिरसोऽपि च ॥
अष्टौ गोत्राणि सेनानां दासानां तदनन्तरम् ।
मौद्गल्योऽथ भरद्वाजः शालङ्कायन एव च ॥
शाण्डिल्यश्च वशिष्ठश्च वात्स्यश्च षडमी मताः ।
गुप्तानां त्रीणि गोत्राणि काश्यपो गौतमस्तथा ।
सावर्णिरपि दत्तानां चत्वारः परिकीर्त्तिताः ।
कौशिकः काश्यपश्चैव शाण्डिल्यश्चापि तत्परः ॥
मौद्गल्य इति विज्ञेयाश्चत्वारो देवसम्भवाः ।
आत्रेयकृष्णात्रेयौ च शाण्डिल्य आलमानकः ॥
धरस्य काश्यपः प्रोक्तो भरद्वाजश्च कुण्डजः ।
काश्यपो रक्षितस्यैको गोत्रा एते प्रकीर्त्तिताः ॥
दत्तानामाद्यगोत्राणां देशभेदेऽस्ति सन्ततिः ।
एवमात्रेयगोत्रोऽपि दत्तो देशान्तरे श्रुतः ॥
दत्ताः कृष्णात्रेयगोत्रा दृश्यन्ते बहवस्तथा ।
तस्माद्दत्तस्य गोत्राणि सप्त ज्ञेयानि पण्डितैः ॥
कराणां काश्यपो गोत्रो वात्स्यमौद्गल्यकावपि ।
देशभेदे हि विद्यन्ते तत्करः सप्तगोत्रकः ॥

राजः काश्यपगोत्रोऽप्यस्ति तद्राजर्षिगोत्रकः।
श्रूयन्ते च जामदग्न्यगोत्रा देशान्तरे धराः॥
बहवोऽपि भरद्वाजगोत्रजाः सन्ति रक्षिताः।
इन्द्रादित्यौ परौ यौ द्वौ वैद्यौ गोत्रास्तयोरिमे॥
इन्द्रस्य काश्यपो गोत्र एक एव प्रकीर्त्तितः।
आदित्यानामिमौ गोत्रावादित्यकौशिकौ स्मृतौ॥
पश्चाद्देशे विख्यातास्तस्माद्गोत्रा भिषक्कुले।
यत्तु देशान्तरे गोत्रमन्यत् किमपि च श्रुतम्।
दत्तादीनां न तत् प्रोक्तमप्रसिद्धमतीव तत्॥"*
अथ पञ्जिकान्तरोक्तराढ़ीयवैद्यकुलाष्टकीयगोत्रसंख्याश्रेष्ठत्वादि लिख्यते।
"काश्यपाद्दुर्षिसेनस्य गोत्राण्यष्टौ भवन्ति च।
शक्तिधन्वन्तरी श्रेष्ठौ मध्यौ वैश्वानराद्यकौ।
मौद्गल्यकौशिकौ तथात्रेय आङ्गिरसोऽधमाः॥"
अथ राढ़ीयाद्यष्टवैद्यानां प्रवरानाह।
"प्रवराः पञ्च सेनानां धन्वन्तरिकुलोद्भवाम्।
विनिर्द्दिष्टा यथा ते च धन्वन्तर्यपराशरौ॥
नैध्रुवश्चाङ्गिरसो बार्हस्पत्य इति क्रमात्।
शक्तिगोत्रे त्रयः शक्तिपराशरवशिष्ठकाः॥
प्रवराः पञ्च दासानामौर्व्वच्यवनभार्गवाः।
जामदग्न्यश्चाप्नुवानः प्रोक्ता मौद्गल्यगोत्रजाः॥
गुप्तानां त्रय एवैते काश्यपोऽप्यपसारकः।
नैध्रुवोऽमी प्रवराः काश्यपान्वयसम्भुवाम्॥
दत्ते त्रयं कौशिकानां शाण्डिल्यासितदेवलाः।
श्यावाश्वो वशिष्ठश्च आत्रेयश्चेति ते त्रयः॥
दत्तानां प्रवरा एते दत्तात्रेयकुलोद्भुवाम्।
आत्रेयगोत्रजातानां देवानाञ्च तथा त्रयः॥
आत्रेय आङ्गिरसको बार्हस्पत्य इति क्रमात्।
करे भरद्वाजगोत्रे त्रयोऽमी प्रवराः स्मृताः॥
भरद्वाजो भार्गवश्च च्यवनश्च क्रमादमी।
राजवंशे वात्स्यगोत्रे कथिताः प्रवरास्त्रयः॥
वात्स्योऽसितस्तथा मार्कण्डेय एवं क्रमादिति।
अथ कौशिकगोत्रस्य सोमस्य प्रवरास्त्रयः॥
कौशिकः काश्यपश्चैव भार्गवश्चेत्यमी क्रमात्।
सेनादीनामनुक्ता ये आद्यगोत्रादिसम्भुवाम्॥
प्रवरास्तेऽपि विज्ञेयास्तत्तत्कुलभुवां सुखात्।
नन्द्यादीनां वरेन्द्रेषु चतुर्णां प्रवराश्च ये।
विज्ञेयास्ते च लिखितास्तेषां कुलभुवां सुखात्॥"
इदि वैद्यानां प्रवराः॥ * ॥
अथ वैद्येषु राढ़ीयादिकथनम्।
"सेनो दासश्च गुप्तश्च दत्तो देवः करस्तथा।
राजसोमावपीत्यष्टौ राढ़ीयाः परिकीर्त्तिताः॥
नन्दिश्चन्द्रो धरः कुण्डो रक्षितश्चेति पञ्च ये।
ते वरेन्द्रेषु विख्याता दासदत्तकरा अपि॥
राढ़ीया भिषजो ये ये प्रायस्ते वङ्गजा अपि।
नन्द्यादयो महाराष्ट्रे निवसन्ति च केचन॥"
तथा च पञ्जिकान्तरे।
"सेनो दासश्च गुप्तश्च पञ्च दत्तादयस्तथा।
अष्टौ राढ़ास्तु विख्याताः प्रायोऽमी वङ्गजा अपि॥"

तथान्यत्र।

"नन्दिचन्द्रधरदत्तरक्षिता-
स्ते स्वनामनि वरेन्द्रविश्रुताः।
बीजिपूरुष इहैव वक्ष्यते
तत्कुलं खलु वरेन्द्रजं पुनः॥"

तथा हि नारायणदासोऽन्तरङ्गस्वानस्य।
"दासो दत्तो धरश्चैव नन्दिकुण्डौ करस्तथा।
चन्द्रश्च रक्षितश्चेति वरेन्द्रकुलमष्टकम्॥" इति॥
तथान्यत्र।
"अष्टौ सेनादयो राढ़े वङ्गेष्वपि वसन्त्यमी।
नन्द्यादयो महाराष्ट्रे लुप्तपद्धतयोऽपि च।
केचिच्चाप्या परिख्याता दृष्टा देशान्तरेष्वपि॥" इति॥
"सम्बन्धः श्रूयते सर्व्वैरेकदेशनिवासिनोः।
निन्द्यते किल सम्बन्धो भिन्नदेशनिवासिनोः॥"
इति वैद्येषु राढ़ीयादिकथनम्॥ * ॥
अथ सेनादीनां पूर्व्वस्थानमाह।
"श्रीकाञ्चीशा गोनगरं करञ्जकोठ एव च।
मोरग्रामनकान्तारौ समानुस्थानमेव च॥
मेटाग्रामनमप्यन्यो यावग्रामस्तथैव च।
अष्टानां सेनमुख्यानां राढ़ायां स्थानमष्टकम्॥"
तथाह दुर्ज्जयः।
"काञ्ची गोरं करञ्जञ्च मोरकान्तासमानुका।
मेटग्री मालञ्च राढ़ायां वैद्यानां कुलमष्टकम्॥"
इति वैद्यानां पूर्व्वस्थानकथनम्॥ * ॥
अथ स्थानभेदेन सेनादिभेदमाह।
"ऊनविंशतिधा सेना अष्टाविंशतिधा पुरम्।
भवन्ति भेदैनैतेषां वक्ष्यते कुललक्षणम्॥
एको विनायकः सेनो भेदेन नवधाभवत्।
मालञ्चो धलहण्डीयः खानाजः सेनहाटिकः॥
नारहट्टो गिरोलीयस्तथा मङ्गलकोठजः।
रायिग्रामी वैतणीयो नव वैनायका अमी॥
विशेषतो विनिर्दिष्टा ज्ञेयाश्चान्यस्थलोद्भवाः।
सामान्यस्थानकथने सम्बन्धभावतो तथा।
सर्व्वेषामेव वैद्यानामितरेषामयं क्रमः॥"
इति विनायकसेनवंशनिर्णयः॥
"एकः पुनर्गयीसेनो भेदेनैव चतुर्विधः।
विषपाड़ाभवः श्रेष्ठस्तिकायिपुरजस्तथा।
अन्यः कड़यिसम्भूतो धाड़ाग्रामी ततः परः॥"
इति गयीसेनवंशनिर्णयः॥
"एको राघवसेनोऽभूत् खण्डग्रामेण विश्रुतः।
स खण्डज इति ख्यातो नापरा तस्य च स्थली॥"
इति राघवसेनवंशनिर्णयः॥
"राजा विमलसेनोऽभूत् सेनभूमिकृताश्रयः।
स सेनभूमौ विख्यातो नापरं तस्य च स्थलम्॥"
इति राज्ञो विमलसेनस्य वंशनिर्णयः॥
"पात्रदामोदरः सेनः पात्रः शिखरभूपतेः।
असौ शिखरभूजातो नापरं तस्य च स्थलम्॥"
इति पात्रदामोदरवंशनिर्णयः॥
"विनसेनोऽपि यश्चैको धलभूमिकृताश्रयः।
स एव धलभूमिष्ठो नापरा तस्य च स्थली॥"
इति विनसेनवंशनिर्णयः॥

"सप्तमो दुर्षिसेनो यो वङ्गभूमौ प्रतिष्ठितः।
हाण्डियाग्रामसम्भूतस्तन्नाम्ना तस्य तत्कुलम्॥"
इति हाण्डियादुर्षिसेनवंशनिर्णयः॥
इति धन्वन्तरिगोत्रजातानां सप्तविधानां सेनानां भेदेनाष्टादशप्रकारनिर्णयः॥
"श्रीवत्ससेनप्रमुखाः षड़मी शक्तिगोत्रजाः।
भेदेन सप्तधा ज्ञेया यथाक्रममभी पुनः॥
एकः श्रीवत्ससेनोऽभूत्तैहट्टग्रामविश्रुतः।
तैहट्टज इति ख्यातो नापरं तस्य च स्थलम्॥"
इति श्रीवत्ससेनवंशनिर्णयः॥
"एकः शियालसेनोऽसौ भेदेन द्विविधोऽभवत्।
पोड़ागाछाभवः श्रेष्ठः परः पोखरियाभवः॥"
इति शियालसेनवंशनिर्णयः॥
"एको यः पुरुसेनोऽभूद्भुठिनागड़िमाश्रितः।
भूठिनागड़िजत्वेन ख्यातोऽसौ नापरं स्थलम्॥"
इति पुरुसेनवंशनिर्णयः॥
"चन्द्रसेनोऽपरस्त्वेकश्चन्द्रदीपनिवासकृत्।
शक्तिगोत्रसमुद्भूत इदीलपुरमाश्रितः॥"
इति चन्द्रसेनवंशनिर्णयः॥
"एको सुखीरसेनोऽसौ स्वर्णपीठीनृपाश्रयात्।
स एव स्वर्णपीठीति विख्यातो मल्लभूभवः॥"
इति सुखीरसेनवंशनिर्णयः॥
"रामसेनः परस्तस्यैवान्तर्भूतो बभूव यः।
स मल्लभूमिवसतौ विदितानेकपौरुषः॥"
इति शक्तिगोत्रजातानां श्रीवत्ससेनप्रमुखानां षण्णां सप्तप्रकारनिर्णयः॥
"आद्यसेनस्तु षड़्बीजी भेदेन त्रिविधोऽभवत्।
नपाड़ासम्भवस्त्वेकः शालग्रामभवोऽपरः॥
मानकरीय एवान्यस्त्रय आद्याः प्रकीर्त्तिताः।
आद्यर्षिगोत्रसम्भूताः स्वतन्त्राः सर्व्व एव हि॥"
इति सकलसेनानां भेदनिर्णयः॥ * ॥
अथ दासानां भेदमाह।
"पञ्चदशविधा दासास्तेऽमी विंशतिधा पुनः।
एकः पुनश्चायुदासो भेदेन द्विविधोऽभवत्।
एकस्तैहट्टसम्भूतो मानिकाहारजः परः॥"
इति चायुवंशे द्विविधनिर्णयः॥
"पन्थदासः पुनस्त्वेको भेदेन पञ्चधाभवत्।
वालिनाछीभवश्चैकः परो मक्कजानिकः।
मौड़म्बरभवः पालिग्रामजः पाञ्चनौरजः॥"
इति पन्थवंशे पञ्चविधनिर्णयः॥
"एकोऽपरः कायुदासो वङ्गभूमौ प्रतिष्ठितः।
कोग्रामीय इति ख्यातो दासो मौद्गल्यगोत्रजः॥"
इति कायुदासवंशनिर्णयः॥
भोयीदासोऽपि तत्पुत्रौ ख्यातौ दीघलकेकारौ।
अमी त्रयो वङ्गभूमौ प्रसिद्धाः सर्व्व एव हि॥"
इति भोयीदासस्य तत्पुत्रयोश्च वंशनिर्णयः॥
"एको वराहदासोऽसौ वौहारियामवासकृत्।
स वौहारिजदासोऽपि मतो मौद्गल्यगोत्रजः॥"
इति वौहारीयवराहदासवंशनिर्णयः॥
"नृसिंहनागदासौ द्वौ वङ्गदेशे प्रतिष्ठितौ।
तौ वङ्गजाविति ख्यातौ कुलकार्य्यपरायणौ॥"
इति नृसिंहदासयोर्वंशनिर्णयः॥

"वीरदासोऽपि यस्त्वेक: स वङ्गज इति स्मृत: ।
तत्रैव वङ्गे सम्बन्धस्तस्याभूद्दरकन्ययो: ॥"
इति वीरदासवंशनिर्णय: ॥
"ख्यात: पाथरडाग्रामे रामदासोऽपि तादृश: ।
सन्तानस्तस्य चत्वारो वीजिनस्तेऽपि विश्रुता: ॥
ख्याता उमेड्-गामेड्-धाड्-चौड़ालदासका: ।
मौद्गल्यगोत्रसम्भूता: स्वतन्त्रा: सर्व्व एव हि ॥"
इति रामदासस्य तत्पुत्राणाञ्च वंशनिर्णय: ॥
इति मौद्गल्यगोत्रजानां सकलदासानां पञ्चदशप्रकाराणां भेदेन विंशतिप्रकारनिर्णय: ॥*
अथ गुप्तानां भेदमाह ।
"गुप्ताश्च षड्विधा भेदास्त्रयोदशविधा: पुन: ।
काश्यपान्वयसंभूता: स्वतन्त्रा: सर्व्व एव हि ॥
एक: पुन: कायुगुप्तो भेदेनाष्टविधोऽभवत् ।
वराह नगरीयश्च श्रेष्ठोऽभूत् कुलकर्म्मणि ॥
यशिनालाभवस्त्वान्यस्तथैव कुलशीलवान् ।
वाराशतसमुद्भूतस्तृतीयस्तदनन्तरम् ॥
नीलगुप्तभवा ये ते निरोलत्रिपुराश्रिता: ।
भट्टवालीनिवासस्था: कायुगुप्तोद्भवाश्च ये ॥
माटियारीभवा: केचिल्लोकगुप्तस्य वंशजा: ।
पश्चिमस्थानमाश्रित्य केचित्सन्ति निजेच्छया ॥"
इति कायुगुप्तवंशेऽष्टविधनिर्णय: ॥
"परमेश्वरगुप्तो य: श्रेष्ठस्तद्वंशसम्भव: ।
योऽभूत्त्रिपुरगुप्तोऽर्णौ धौड़ालाविहितस्थिति: ॥"
इति धौड़ालीयत्रिपुरगुप्तवंशनिर्णय: ॥
"परमेश्वरगुप्तस्य वंशजौ द्वौ प्रतिष्ठितौ ।
भौँपुरीखाड़ियामस्थौ महत्त्वस्याधिकारिणौ ॥"
इति महाधिकारित्वस्याधिकारिणोर्वंशनिर्णय: ॥
"चड़ालगुप्तो य: प्रोक्त: स तु शिङ्गानसम्भव: ।
काश्यपान्वयसंभूत: कुलकार्य्यपरायण: ॥"
इत्यड़ालगुप्तवंशनिर्णय: ॥
"वीरगुप्तस्तु य: प्रोक्तो भौँपुरग्रामवासवत् ।
भौँपुरीय इति ख्यात: स च काश्यपगोत्रज: ॥"
इति वीरगुप्तवंशनिर्णय: ॥ इति काश्यपगोत्रजातानां सकलगुप्तानां षड्विधानां भेदेन त्रयोदशप्रकारनिर्णय: ॥
"दत्तौ च द्विविधौ श्रेयौ रामदत्तश्च पाविता ।
पूर्व्व: शाण्डिल्यगोत्रीयो वटग्रामसमुद्भव: ॥
अपर: पाविना दत्त: खाँगड़ीय: स एव हि ।
जात: कौशिकगोत्रे च स्वतन्त्रौ द्वौ गुणान्वितौ ॥"
इति दत्तवंशनिर्णय: ॥
"विकारवत्त देवस्य वंशा आत्रेयगोत्रजा: ।
समादृस्थानसंभूता: केतुग्रामेऽधुना तु ते ॥
केतुग्रामीयदेवोऽसौ विकारवकुलोद्भव: ।
निजैश्च पौरुषैरेव कुलकार्य्यपरायण: ॥
कृष्णात्रेयभवा ये च ये च शाण्डिल्यगोत्रजा: ।
गालमातभवा ये च ते नानादेशवासिन: ॥"
इति देववंशनिर्णय: ॥
"एक: कान्तारवासी च करो भेदादसौ त्रय: ।
शाण्डिल्यशक्तिगोत्रे द्वौ वङ्गदेशे च विश्रुतौ ॥
यस्तु धर्म्मकरो सोमो भरद्वाजकुलोद्भव: ।
तद्वंश्या: साम्प्रतं सन्ति हिमोड़ायाजिगाँपुरे ॥"
इति करवंशनिर्णय: ॥
"भेटाग्रामसमसंभूतौ राजवंशोद्भवावुभौ ।
शशिराजमहीराजौ वात्स्यगोत्रसमुद्भवौ ॥
एलाचिधामनगरे शशिराज: कृताश्रय: ।
महीराज: खेपड़ीयो वङ्गभूमौ च संस्थित: ॥"
इति राजवंशे द्विविधनिर्णय: ॥
"मालग्रामसमुद्भूतो धर्म्मसोमो महामति: ।
जात: कौशिकगोत्रे च तद्वंश्या बहुदेशगा: ॥"
इति सोमवंशनिर्णय: ॥ इति राढ़प्रसिद्धानां महतां सेनादीनां भेदेन वंशनिर्णय: ॥ * ॥
"अपरे ये नन्दिचन्द्रौ धरकुण्डौ च रक्षित: ।
वारेन्द्रा अपि पञ्चैते प्रसिद्धास्तत्र ते पुन: ॥"
इति त्रयोदशराढ़ानां वैद्यानां यथाक्रमभेदेन कुलनिर्णय: ॥ * ॥ अथ सेनादीनां सामान्यत: सम्बन्धलिखनानुरोधादवसतिस्थानमाह ।
"श्रीखण्डनामनगरी राढ़े वङ्गे च विश्रुता ।
सर्व्वेषामेव वैद्यानामाश्रयो यत्र विद्यते ॥
यत्र गोष्ठी कृता वैद्यै: खण्डोऽभूद्भिषक्प्रिय: ।
विशेषत: कुलीनानां सर्व्वेषामेव वासभू: ॥"
इति सामान्यत: सकलवैद्यानां वासस्थानसत्तम् ॥ * ॥ इति गौराङ्गमल्लिकात्मजभरतसेनकृतवैद्यकुलतत्त्वम् ॥

वैद्य:, त्रि, वेदसम्बन्धीय: । वेदशब्दात् ष्णप्रत्ययेन निष्पन्नमेतत् ॥

वैद्यकं, क्ली, आयुर्व्वेद: । चिकित्साशास्त्रम् । यथा,—
"यस्य व्याकरणे वरेण्यघटनास्फीता: प्रबन्धा दश
प्रख्याता नव वैद्यकेऽपि तिथिनिर्द्धारार्थमेकोऽद्भुत: ।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयस्तस्य सुधन्वन्नाणि शिरोमणेरिह गुणा: के के न लोकोत्तरा: ॥"
इति मुग्धबोधव्याकरणशेषे वोपदेवप्रशंसाश्लोक: ॥ * ॥ तच्छास्त्रकर्त्तृनामानि यथा,—
"ऋग्यजु:सामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजापति: ।
विचिन्त्य तेषामर्थञ्चैवायुर्व्वेदं चकार स: ॥
कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभु: ।
स्वतन्त्रसंहितां तस्माद्भास्करश्च चकार स: ॥
भास्करश्च स्वशिष्येभ्य आयुर्व्वेदं स्वसंहिताम् ।
प्रददौ पाठयामास ते चक्रु: संहितास्तत: ॥
तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च ।
व्याधिप्रणाशबीजानि साध्वि मत्तो निशामय ॥
धन्वन्तरिर्दिवोदास: काशीराजोऽश्विनीसुतौ ।
नकुल: सहदेवोऽर्किश्च्यवनो जनको बुध: ॥
जावालो जाजलि: पैल: करथोऽगस्त्य एव च ।
एते वेदाङ्गवेदज्ञा: षोड़श व्याधिनाशका: ॥*॥
चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोरमम् ।
धन्वन्तरिश्च भगवांश्चकार प्रथमे सति ॥
चिकित्सादर्पणं नाम दिवोदासश्चकार स: ।
चिकित्साकौमुदीं दिव्यां काशीराजश्चकार स: ॥
चिकित्सासारतन्त्रञ्च भ्रमघ्नं चाश्विनीसुतौ ।
तन्त्रं वैद्यकसर्व्वस्वं नकुलश्च चकार स: ॥
चकार सहदेवश्च व्याधिसिन्धुविमर्द्दनम् ।
ज्ञानार्णवं महातन्त्रं यमराजश्चकार स: ॥
च्यवनो जीवदानञ्च चकार भगवानृषि: ।
चकार जनको योगी वैद्यसन्देहभञ्जनम् ॥
सर्व्वसारं चन्द्रसुतो जावालस्तन्त्रसारकम् ।
वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनि: ॥
पैलो निदानं करथस्तन्त्रं सर्व्वधरं परम् ।
द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भव: ॥
चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोड़श ।
व्याधिप्रणाशबीजानि बलाधानकराणि च ॥
मथित्वा ज्ञानमन्थानैरायुर्व्वेदपयोनिधिम् ।
ततस्तन्त्राण्युद्धृत्य नवनीतानि कोविदा: ॥
एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहिताम् ।
आयुर्व्वेदं सर्व्वबीजं सर्व्वं जानामि सुन्दरि ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्याय: ॥

वैद्यनाथ:, पुं, देशविशेष: । यथा,—
"करवीरे महालक्ष्मीरुमादेवी विनायके ।
अरोगा वैद्यनाथे तु महाकाले महेश्वरी ॥"
इति मात्स्ये गौरीनामाष्टशतं १३ अध्याय: ॥
(तथा देवीभागवते पीठस्थान माहात्म्ये । ७ । ३० । ७१ ॥) अपि च ।
"वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे ।
तावदङ्गाभिधो देशो यात्रायां न हि दुष्यति ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटल: ॥
भैरवविशेष: । यथा,—
"हार्द्दपीठं वैद्यनाथे वैद्यनाथस्तु भैरव: ।
देवता जयदुर्गाख्या नेपाले जानुनो मम ॥"
इति तन्त्रचूड़ामणौ पीठनिर्णय: ॥
अपि च ।
"हरिद्वानगरे यत्र वैद्यनाथो महेश्वर: ।
तमाश्रयो विल्ववृक्ष: स्ववंशश्च उदाहृत: ॥"
इति बृहद्धर्म्मपुराणे ११ अध्याय: ॥
अन्यच्च ।
"झारखण्डे वैद्यनाथो वक्रेश्वरस्तथैव च ।
वीरभूमौ सिद्धिनाथो राढ़े च तारकेश्वर: ॥"
इति महालिङ्गेश्वरतन्त्रे पीठादिक्रमेण शिवशतनामस्तोत्रम् ॥

वैद्यबन्धु:, पुं, (वैद्यानां बन्धुरिव ।) आरग्वधवृक्ष: । इति शब्दचन्द्रिका । वैद्यस्य बन्धुश्च ॥

वैद्यमाता, [ऋ] स्त्री, (वैद्यानां मातेव ।) वासक: । इत्यमर: । भिषग्जननी च ॥

वैद्यसिंही, स्त्री, (वैद्ये वैद्यशास्त्रोक्तौषधादौ सिंहीव प्रभूतवीर्य्यवत्त्वात् ।) वासकवृक्ष: । इति शब्दरत्नावली ॥

वैद्या, स्त्री, काकोली । इति शब्दचन्द्रिका ॥

वैध:, त्रि, (विधिना बोधित: । विधि + अण् ।) विधिबोधित: । यथा । अदृष्टार्थैकजातीयकर्म्मण: कालदेशकर्त्रादीनां प्रयोगानुबन्धवैधहेतुभूतानामभेदे उद्देशाविशेषादाय: । इति

प्रायश्चित्ततत्त्वम् ॥*॥ अथ वैधहिंसाविचारः। "मा हिंस्यात् सर्व्वा भूतानि इत्यत्र सर्व्वशब्दस्य व्यापकार्थपरतया एतद्विधिमनुल्लङ्घ्य वायव्यं श्वेतमालभेत। इत्यादिविधेर्विषयाप्राप्तेरगत्या वैधातिरिक्तविषयत्वम्। सर्व्वाः सर्व्वाणि छन्दांसि वा इत्यनेन तत् पदं सिद्धम्। यद्यपि नानादर्शनटीकाकृद्भिर्व्वाचस्पतिमिश्रैस्तत्त्वकौमुद्यामभिहितम्। 'न च मा हिंस्यात् सर्व्वा भूतानि इति सामान्यशास्त्रं विशेषशास्त्रेण अग्नीषोमीयं पशुमालभेत इत्यनेन बाध्येत इति वाच्यं विरोधाभावात्। विरोधे हि बलीयसा दुर्ब्बलं बाध्यते। न चास्ति विरोधः भिन्नविषयत्वात्। तथा हि। मा हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरक्रत्वर्थत्वमपि। न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः। हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्च उपकरिष्यति' इत्यन्तेन। तदपि सांख्यनये। मीमांसकमते तु विरोध एव। तथा हि। गुरुनये न खलु सर्व्वभूतहिंसाभावविषयकं कार्य्यमिति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपश्वालम्भनविषयकं कार्य्यमिति भावविध्यर्थे उपपद्यते। भट्टनये तु अङ्गे यथा तथास्तु। न च सुत्यपशुयागे पुरुषार्थे पशुहिंसनस्यार्थसाधनत्वमनर्थ-साधनत्वञ्चोपपद्यते विरोधात्। वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कुतः विधेरेष स्वभावो यः स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति। अन्यथा अङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियते। अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वं अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति। अतएवोक्तं तस्माद्यज्ञे वधोऽवधः इति। नन्वेवं श्येनेनाभिचरन् यजेत इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतम्। अभिचारो मूलकर्म्म च इति मनुना उपपातकगणमध्ये पाठादनिष्टसाधनत्वमवगतम्। तदेतत् कथमुपपद्यतामिति चेन्नैवम्। आततायिनमायान्तं हन्यादेवाविचारयन् इत्येकवाक्यतया आततायित्वे इष्टसाधनत्वं अनाततायित्वे तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध इति। गुरुचरणा अप्येवम्।" इति तिथ्यादितत्त्वम्॥

वैधात्रः, पुं, (विधातुरपत्यं पुमान्। विधातृ+अण्।) सनत्कुमारः। स च विधातृपुत्त्रः। इत्यमरः॥

वैधात्री, स्त्री, (विधातुरियमिति। विधातृ+अण्। ङीप्।) ब्राह्मी। इति राजनिर्घण्टः॥ (विधातृसम्बन्धिनि, त्रि। यथा, राजतरङ्गिण्याम्। ४। ४१२।
"अभङ्गुरास्तेऽभिमानास्तस्यैवासन् मनस्विनः।
अभ्यवर्त्तत येरेष वैधात्रीरपि वामताः॥")

वैधूमाग्नी, स्त्री, शाल्वदेशीयनगरी। इति सिद्धान्तकौमुदी॥

वैधृतिः, पुं, विष्कम्भादिसप्तविंशतियोगान्तर्गतशेषयोगः। तस्य त्याज्यत्वं यथा,—
"परिघस्य त्यजेदर्द्धं सप्त शूले च नाडिकाः।
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः।
वैधृतिव्यतिपातौ च समस्तौ परिवर्ज्जयेत्॥"
इति ज्योतिस्तत्त्वम्॥*॥
तत्र जातफलं यथा, कोष्ठीप्रदीपे।
"मैत्रीविहीनः कुटिलः खलश्च
मूर्खो दरिद्रः परवञ्चकश्च।
कुकर्म्मकर्त्ता परदारभर्त्ता
भवेन्नरो वैधृतिलब्धजन्मा॥"
अन्तयोगे तस्य वर्ज्यत्वमवर्ज्यत्वञ्च यथा,—
"यदि धृतिव्यतीपातौ दिनं वाप्यशुभं भवेत्।
हन्यतेऽन्तयोगेन भास्करेण तमो यथा॥
हन्त्यन्तताख्यो योगः सर्व्वाण्यशुभानि हेलया नियतम्।
न भवति पुनरिह शक्तो वैधृतिधृतिव्यतीपाते॥"
इति ज्योतिस्तत्त्वम्॥
(देवताविशेषः। यथा, भागवते। ८।१।२९।
"देवा वैधृतयो नाम विधृतेस्तनया नृप।
नष्टाः कालेन यैर्व्वेदा विधृताः स्वेन तेजसा॥")

वैधेयः, त्रि, (विधिं पद्धतिमेवानुसृत्य व्यवहरति। विधि+ढक्। यद्वा, विधेये कर्त्तव्ये अनभिज्ञः। विधेय+अण्। यद्वा, विरुद्धं धेयमस्य। ततः स्वार्थे अण्। पद्धतिमाश्रित्य क्रियाकारित्वात् युक्तायुक्तविवेकशून्यत्वाच्च तथात्वमस्य।) मूर्खः। इत्यमरः। ३। १। ४८॥ (यथा, राजतरङ्गिण्याम्। ६। १५९।
"पुंश्चली जाल्मवैधेयबालकाक्रोशनिर्भरा।
समभूदप्रवेशार्हा राजपर्षन्मनस्विनाम्॥")
विधिसम्बन्धी विधेयसम्बन्धी च॥

वैध्यतः, पुं, यमप्रतीहारः। इति हेमचन्द्रः॥

वैनतेयः, पुं, (विनताया अपत्यमिति। विनता+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) गरुडः। इत्यमरः॥ (यथा, देवीभागवते। ८। १२। २९।
"समानीयान्ततं मात्रे वैनतेयः समर्पयत्॥")
अरुणः। इति मत्स्यपुराणम्॥ (विनतापत्यमात्रे। यथा, महाभारते। १। ६५। ४०।
"तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ।
आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्त्तिताः॥")

वैनयिकः, पुं, शस्त्राभ्यासरथः। तत्पर्य्यायः। योग्यरथः २। इति हेमचन्द्रः। ३। ४१६॥ (विनय एव। "विनयादिभ्यष्ठक्।" ५। ४। ३४। इति स्वार्थे ठक्। विनयः॥) विनयसम्बन्धिनि, त्रि॥ (यथा, महाभारते। १२। ६८। ४।
"सर्व्वं वैनयिकं कृत्वा विनयज्ञो बृहस्पतिम्।
दक्षिणानन्तरो भूत्वा प्रणम्य विधिपूर्व्वकम्।
विधिं पप्रच्छ राज्यस्य सर्व्वलोकहिते रतः॥")

वैनायिकः, पुं, बौद्धः। इति त्रिकाण्डशेषः॥ यथा,
"भिक्षुकः श्रपणोऽह्रीको बौद्धो वैनायिकः स्मृतः॥"
इति त्रिकाण्डशेषः॥

वैनाशिकं, क्ली, (विनाशं सूचयतीति। विनाश+ठक्।) नाडीनक्षत्रविशेषः। स तु जन्मर्क्षावधित्रयोविंशनक्षत्रम्। यथा। जन्माद्यं कर्म्म ततोऽपि दशमं सांघातिकं षोडशभम्। समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशं स्यात्तु पञ्चविंशं मानसमेवं नरः षड्भः स्यात्॥ तत्फलं यथा,—
"देहादेहार्थहानिः स्याज्जन्मर्क्षे उपतापिते।
कर्म्मर्क्षे कर्म्मणां हानिः पीडा मनसि मानसे॥
मूर्त्तिद्रविणबन्धूनां हानिः सांघातिके तथा।
संतप्ते सामुदयिके मित्रभृत्यार्थसंक्षयः॥
वैनाशिके विनाशः स्यात् देहद्रविणसम्पदाम्॥"
इति ज्योतिस्तत्त्वम्॥
निधनतारा। यथा,—
"वैनाशिकर्क्षे दृष्टं ग्रहणं सुधांशुभास्करयोः।
जनयति रोगं बहुधा क्लेशं वित्तक्षयञ्चाशु॥"
वैनाशिकर्क्षे त्रयोविंशनक्षत्रे। इति केचित्। वस्तुतस्तु वैनाशिकपदं निधनतारापरम्। निधनेऽपि चेत्येकवाक्यत्वात्। इति तिथ्यादितत्त्वम्॥

वैनाशिकः, पुं, (विनाशो मतमस्य। विनाश+ठक्। सर्व्वं द्रव्यं क्षणिकमिति क्षणिकविज्ञानवादित्वादस्य तथात्वम्।) क्षणिकः। परतन्त्रः। ऊर्णनाभः। इति मेदिनी॥ विनाशसम्बन्धिनि, त्रि॥

वैनीतकः, पुं, क्ली, परम्परावाहनम्। इत्यमरः॥ आरूढं वाह्यं यत् साक्षात् न वहति परम्परयैव वहति तद्वैनीतकम्। यथा दोलां वहन् दोलावाहकः विनीयते स्मेति क्तात् विकारसंघेति के विनीतकः तेनैव स्वार्थे ष्णि वृद्धौ वैनीतकम्। इति भरतः॥ विनीतसम्बन्धिनि, त्रि॥

वैन्यः, पुं, (वेनस्यापत्यं पुमान्। वेन+"कुर्व्वादिभ्यो ण्यः।" ४। १। १५१। इति ण्यः।) वेनपुत्त्रः। स तु पृथुराजः। यथा,—
"वेनस्य मथिते पाणौ स बभूव महापुमान्।
वैन्यो नाम महीपालो यः पृथुः परिकीर्त्तितः।
येन दुग्धा मही पूर्व्वं प्रजानां हितकारणात्॥"
इति वह्निपुराणे सर्गांशप्राशननामाध्यायः॥
(यथाच ऋग्वेदे। ८। ९। १०।
"पृथी यद्वां वैन्यः सादनेष्वेव।"
"वैन्यो वेनस्य पुत्त्रः पृथी एतत्संज्ञो राजर्षिः।"
इति तद्भाष्ये सायणः॥)

वैपरीत्यं, क्ली, (विपरीत+ष्यञ्।) विपरीतस्य भावः। तत्पर्य्यायः। व्यत्यासः २ विपर्य्यासः ३ विपर्य्ययः ४ व्यत्ययः ५। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। ४२। ३४।
"स्वभाववैपरीत्यन्तु प्रकृतेश्च विपर्य्ययः॥")

वैपरीत्यलज्जालुः, स्त्री, पुं, (वैपरीत्या लज्जालुः।) स्वल्पक्षुपहतफला लज्जालुः। यथा,—
"लज्जालुर्व्वैपरीत्याख्या स्वल्पक्षुपहतफला।
वैपरीत्या च लज्जालुरभिधाने प्रयोजयेत्॥
लज्जालुर्व्वैपरीत्याख्यः कटूष्णः कफापहृत्।
रसे नियामकश्चैव नानाविज्ञानकारकः॥"
इति राजनिर्घण्टः॥

वैभवं, क्ली, विभवस्य भावः। विभवशब्दात् ष्यप्रत्ययेन निष्पन्नमिदम् ॥ (यथा, कथासरित्सागरे। ६६। १६१।
"सोऽप्यावेद्य यथार्थमम्बरचराधीशः क्षणात् कल्पिता-
शेषस्वोचितदिव्यवैभवविधिः सिद्धिप्रभावात्ततः॥"
अतिशयः। यथा, भागवते। ५। १८। ११।
"यत्तद्गलब्धं निजवीर्य्यवैभवं
तीर्थं मुहुः संस्पृशतां हि मानसम्॥"
विभोर्भाव इत्यर्थे ष्यप्रत्यये ऐश्वर्य्यम्। यथा, भागवते। १०। १४। ३८।
"जानन्त एव जानन्तु किं बहूक्त्या न मे प्रभो।
मनसो वपुषो वाचो वैभवं तव गोचरः॥")

वैभाजित्रं, क्ली,(विभाजयितुर्धर्म्म्याम्। विभाजयितृ+"क्षत्तोऽञ्।" ४। ४। ४६। इति अञ्। विभाजयितुर्णिलोपश्चेति काशिकोक्त्या णिलोपः।) विभाजयितुर्धर्म्म्याम्। इति सिद्धान्तकौमुदी ॥

वैभ्राजं, क्ली, देवोद्यानम्। इति त्रिकाण्डशेषः॥ (यथा, मार्कण्डेये। ५५। २।
"पूर्व्वे चैत्ररथं नाम दक्षिणे नन्दनं वनम्।
वैभ्राजं पश्चिमे शैले सावित्रश्चोत्तराचले॥"
विभ्राजराजस्य तपःस्थानम्। यथा, हरिवंशे। २३। १४।
"ततो विभ्राजितं तेन वैभ्राजं नाम तद्वनम्॥"
पुं, पर्व्वतविशेषः। यथा, मार्कण्डेये। ५६। १३।
"तरस्युरिति विख्यातो वैभ्राजं सापरं ययौ।"
लोकविशेषः। यथा, हरिवंशे। १८। ४६।
"वैभ्राजा नाम ते लोका दिवि भान्ति सुदर्शनाः॥")

वैमात्रः, पुं, (विमातुरपत्यमिति। विमातृ+अण्।) वैमात्रेयः। इति जटाधरः॥

वैमात्रा, स्त्री, (विमातुरपत्यं स्त्री।) विमातृकन्या। वैमात्रशब्दादाप्प्रत्ययेन निष्पन्नम्॥

वैमात्रेयः, पुं, (विमातुरपत्यम्। विमातृ+"शुभ्रादिभ्यश्च।"४।१।१२३। इति ढक्।) विमातृपुत्रः। तत्पर्य्यायः। विमातृजः २ वैमात्रः ३। इति जटाधरः। ("तयोरभावे तथाविधौ वैमात्रेयौ।" इति शुद्धितत्त्वे प्रेतश्राद्धाधिकारिप्रस्तावे।)

वैमात्रेयी, स्त्री, (विमातुरपत्यं स्त्री। विमातृ+ढक्। ततो ङीप्।) विमातृकन्या। वैमात्रेयशब्दादीप्प्रत्ययेन निष्पन्नमिदम्॥

वैमुक्तः, त्रि, विमुक्तिविशिष्टः। तद्भावे, क्ली। विमुक्तशब्दात् ष्यप्रत्ययेन निष्पन्नमिदम्॥

वैमेयः, पुं, विनिमयः। इति हेमचन्द्रः॥

वैयाकरणः, त्रि, (व्याकरणं वेत्ति अधीते वा। व्याकरण+"ऋगयनादिभ्यः।"४।३।७३। इति अण्। "नय्याभ्यां पदान्ताभ्यामिति।"७।३।३। इति यकारात् पूर्व्वं ऐच्।) व्याकरणवेत्ता। व्याकरणाध्येता। व्याकरणशब्दात् ष्यप्रत्ययेन योगेनेति इमा जिस्ते त्रिरिति इह्यौ च निष्पन्नमिदम्। व्याकरणसम्बन्धी च॥ (यथा, पाणिनौ। ६। ३। ७।
"वैयाकरणाख्यायां चतुर्थ्याः॥"
यथा च महाभारते। ५। ४३। ६१।
"सर्व्वार्थानां व्याकरणाद्वैयाकरण उच्यते।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा॥")

वैयाकरणभार्य्यः, पुं, वैयाकरणी भार्य्या यस्य। इति मुग्धबोधव्याकरणम्॥

वैयाघ्रः, पुं, (व्याघ्रस्य विकारः। व्याघ्र+"प्राणिरजतादिभ्यः।" ४। ३। १५४। इति अञ्। ततः वैयाघ्रेण चर्म्मणा परिवृतो रथः। "द्वैपवैयाघ्रादञ्।"४।२।१२। इति अञ्।) व्याघ्रचर्म्माच्छादितरथः। तत्पर्य्यायः। द्वैपः२। इत्यमरः।२।८।५२॥ (यथा, महाभारते।२।५८।४।
"अयं सहस्रसमितो वैयाघ्रः सुप्रतिष्ठितः।
सुचक्रोपस्करः श्रीमान् किङ्किणीजालमण्डितः॥")
व्याघ्रसम्बन्धिनि, त्रि। यथा,—
"उत्तराभिमुखो भूत्वा निराहारो निरन्तरम्।
वैयाघ्रचर्म्मवसनः सोऽर्द्धमहाननः सती॥
ज्योतिर्मयं शिवं शान्तं परं शिवकरं परम्॥"
इति कालिकापुराणे ४४ अध्यायः॥
(यथा च बृहत्संहितायाम्। ४४। १३।
"पूर्व्वाभिमुखः श्रीमान् वैयाघ्रे चर्म्मणि स्थितो राजा॥")

वैयाघ्रपद्यः, पुं, (व्याघ्रपदोऽपत्यमिति। व्याघ्रपद्+यञ्। यद्वा, व्याघ्रस्येव पादावस्य इति बहुव्रीहौ "पादस्य लोपः इति।" ५।४।१३८। इति अकारलोपे गर्गादित्वात् यञ्। "पादः पत्।" ६।४।१३०। इति पदादेशः। "न य्वाभ्यामिति।" ७। ३। ३। यकारात् पूर्व्वमैच्।) गोत्रकारकमुनिविशेषः। यथा, तिथ्यादितत्त्वे।
"वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च।
अपुत्त्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे॥"
(यथा, महाभारते। ४। ६। ११।
"युधिष्ठिरस्यासमहं पुरा सखा
वैयाघ्रपद्यः पुनरस्मि विप्रः॥")

वैयासकिः, पुं, (व्यासस्यापत्यम्।"व्यासवरुडनिषादेति।" ४। १। ९७। इत्यस्य काशिकोक्त्या इञ् अकङादेशश्च। न य्वाभ्यामिति ऐच्।) व्यासस्यापत्यम्। इति मुग्धबोधव्याकरणम्॥ (यथा, भागवते। १०। १। १४।
"एवं निशम्य भृगुनन्दन साधुवादं
वैयासकिः स भगवानथ विष्णुरातम्।
प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं
व्याहर्त्तुमारभत भागवतप्रधानः॥")

वैयासिकः, त्रि, (व्यासेन कृतः। व्यास+ठञ्। तत ऐच्।) व्यासकृतसंहितादिः। इति श्रीभागवतम्॥

वैयुष्टः, त्रि, (व्युष्टे दीयते कार्य्यम्। "व्युष्टादिभ्योऽण्।" ५।१।९७। इति अण्। नय्वाभ्यामितैच्।) प्रातर्भवः। इति सिद्धान्तकौमुदी॥

वैरं, क्ली, (वीरस्य कर्म्म भावो वा। वीर+अण्।) विरोधः। इत्यमरः॥ (यथा, भागवते। ८। ७। ३६।
"बहुवैरेषु भूतेषु मोहितेष्वात्ममायया॥")
तस्य समुत्थानं पञ्च। स्त्रीकृतम् १ यथा कृष्णशिशुपालयोः। वास्तुजम् २ यथा कौरवपाण्डवानाम्। वाग्जम् ३ यथा द्रोणद्रुपदयोः। सापत्नम् ४ यथा मूषिकमार्जारयोः। अपराधजम् ५ यथा पूजनीब्रह्मदत्तयोः। इति महाभारतम्॥

वैरक्तं, क्ली, (विरक्तस्य भावः। विरक्त+ष्यञ्।) विरक्तता। विरक्तशब्दाद्भावार्थे ष्यप्रत्ययेन निष्पन्नमिदम्॥

वैरङ्गिकः, त्रि, (विरङ्गं नित्यमर्हतीति। "छेदादिभ्यो नित्यम्।"५। १। ६४। इति ठञ्।) विरागार्हः। इति हेमचन्द्रः॥

वैरनिर्यातनं, क्ली, (वैरस्य निर्यातनम्।) कृतापकारस्य प्रत्यपकारः। तत्पर्य्यायः। वैरशुद्धिः २ प्रतीकारः ३। इत्यमरः॥

वैरप्रतिक्रिया, स्त्री, (वैरस्य प्रतिक्रिया।) वैरनिर्यातनम्। इति हेमचन्द्रः॥

वैरशुद्धिः, स्त्री, (वैरस्य शुद्धिः।) वैरनिर्यातनम्। इत्यमरः॥

वैरागिकः, त्रि, (विरागं नित्यमर्हतीति। विराग+ठञ्।) विरागार्हः। इति सिद्धान्तकौमुदी॥

वैरागी, [न्] त्रि, (विरागस्य भावो वैरागम्। तदस्यास्तीति इनिः।) विषयेच्छारहितः। वैराग्ययुक्तः। यथा,—
"सनकश्च सनन्दश्च तृतीयश्च सनातनः।
सनत्कुमारो वैरागी चतुर्थः पुत्र एव च॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २४ अध्यायः॥

वैराग्यं, क्ली, (विरागस्य भावः। विराग+ष्यञ्।) विषयतुच्छधीः। यथा,—
"ज्ञानवैराग्ययोर्भक्तिप्रवेशायोपयोगिता।
ईषत् प्रथममेवेति नाङ्गत्वमुचितं तयोः॥
यदुभे चित्तकाठिन्यहेतू प्रायः सतां मते।
सुकुमारस्वभावेयं भक्तिस्तद्धेतुरीरिता॥"
यथा एकादशस्कन्धे।
"तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह॥"
इति॥
किन्तु ज्ञानविरक्त्यादिसाध्यं भक्त्यैव सिद्ध्यति। यथा तत्रैव।
"यत् कर्म्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्।
योगेन दानधर्म्मेण श्रेयोभिरितरैरपि॥
सर्व्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा।
स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति॥
रुचिमुद्दहतस्तत्र जनस्य भजने हरेः।
विषयेषु गरिष्ठोऽपि रागः प्रायो विलीयते॥
अनासक्तस्य विषयान् यथार्हमुपयुञ्जतः।
निर्ब्बन्धः कृष्णसम्बन्धे युक्तं वैराग्यमुच्यते॥
प्रापञ्चिकतया बुद्ध्या हरिसम्बन्धिवस्तुनः॥

मुमुक्षुभिः परित्यागो वैराग्यं फल्गु कथ्यते ।”
इति भक्तिरसामृतसिन्धौ पूर्व्वभागे साधन-लहरी ॥

वैराटः, पुं, इन्द्रगोपकीटः । इति हेमचन्द्रः ॥ विराटसम्बन्धिनि, त्रि । (क्ली, विराटपर्व्व । यथा, महाभारते । १ । २ । ५७ ।
“आरण्येयन्ततः पर्व्व वैराटन्तदनन्तरम् ॥”
विराटकन्यायां स्त्री । यथा, तत्रैव । १।२।५८ ।
“अभिमन्योश्च वैराट्या पर्व्व वैवाहिकं स्मृतम् ॥”
तथा च देवीभागवते । २ । ७ । ४ ।
“अभिमन्योर्वैरा भार्य्या वैराटी चाति-
सुन्दरी ॥”
विस्तृते च त्रि । यथा, महाभारते ।१३।७६।२१।
“वैराटपृष्ठसुयाचं सर्व्वरत्नैरलङ्कृतम् ।
प्रदाय मरुतां लोकान् स राजन् प्रतिपद्यते ॥”)

वैराट्या, स्त्री, जिनषोड़शविद्यादेव्यन्तर्गतदेवी-विशेषः । इति हेमचन्द्रः ॥

वैरातङ्कः, पुं, अर्ज्जुनवृक्षः । इति राजनिर्घण्टः ॥

वैरी, [न्] पुं, (वैरमस्यास्तीति । इनिः ।) शत्रुः । इत्यमरः ॥ (यथा, मनौ । ४ । १३३ ।
“वैरिणं नोपसेवेत सहायञ्चैव वैरिणः ॥”)
वीरसम्बन्धिनि, त्रि ॥

वैरूप्यं, क्ली, (विरूपस्य भावः ।) विरूपता । यथा,—
“वैरूप्यमङ्गेषु कशानिपातो
मौण्ड्यं तथा सद्मवसन्निवेशः ।
एतान् वधानर्हति रूढवादी
शास्त्रेषु दूतस्य वधो न दृष्टः ॥”
इति महानाटके ५ अङ्कः ॥
(असाधारणत्वम् । यथा, महाभारते । ५ । ४३ । ७ ।
“निर्द्दिश्य सम्यक् प्रवदन्ति वेदा-
स्तं विश्ववैरूप्यमुदाहरन्ति ॥”
विसदृशत्वम् । यथा, तत्रैव । १२ । २४० । २ ।
“एतच्चान्योन्यवैरूप्यं वर्त्तते प्रतिकूलतः ॥”)

वैरोचनः, पुं, (विरोचनस्यापत्यम् । विरोचन+अण् ।) बुद्धः । बलिराजः । (यथा, महाभारते । ३ । २८ । १७ ।
“अथ वैरोचने दोषानिमान् विद्धि क्षमा-
वताम् ॥”)
अग्निपुत्त्रः । सूर्य्यपुत्त्रः । सिद्धगणः । इति शब्दरत्नावली ॥

वैरोचननिकेतनं, क्ली, (वैरोचनस्य बलेर्निकेतनम् ।) पातालम् । इति हलायुधः ॥

वैरोचनिः, पुं, (विरोचनस्यापत्यम् । विरोचन+इञ् ।) बुद्धः । बलिराजः । (यथा, विष्णु-पादादिकेशवर्णनस्तोत्रे । १ ।
“याभ्यां वैरोचनीन्द्रौ युगपदपि विपत्संपदो-
रेकधाम ॥”)
सूर्य्यपुत्त्रः । इति मेदिनी ॥

वैरोचिः, पुं, बाणदैत्यः । यथा । वैरोचिर्ब्बलि-नन्दनः । इति शब्दरत्नावली ॥

वैरोद्धारः, पुं, (वैरस्योद्धारः ।) कृतापकारस्य प्रत्यपकारः । यथा,—
“प्रतिकारः प्रतीकारो वैरनिर्यातनं तथा ।
निर्यातनं वैरशुद्धिर्वैरोद्धारो निगद्यते ॥”
इति शब्दरत्नावली ॥

वैलक्षण्यं, क्ली, (विलक्षणस्य भावः । विलक्षण+ष्यञ् ।) विलक्षणत्वम् । विलक्षणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् । (यथा, भागवते । १० । ५५ । २६ ।
“अवधार्य्य शनैरीषद्वैलक्षण्येन योषितः ॥”
विभिन्नत्वम् । यथा, मनौ कुल्लूकः । १ । ८५ ।
“त्रेतादिष्वपि युगापचाररूपेण धर्म्मवैल-
क्षण्यम् ॥”)

वैल्वं, क्ली, (विल्वस्येदम् । अण् ।) विल्वफलम् । इत्यमरटीका ॥ विल्वसम्बन्धिनि, त्रि ॥ (यथा, मनौ । २ । ४५ ।
“ब्राह्मणो वैल्वपालाशौ क्षत्त्रियो वाट-
खादिरौ ॥”)

वैवधिकः, त्रि, (विवधेन धान्यतण्डुलादिना व्यवहरति । “विभाषा विवधवीवधात् ।” ४ । ४ । १७ । इति ठक् ।) विवधेन धान्यतण्डुलादिना व्यवहरति यः । पसारि इति भाषा । (यथा, राजतरङ्गिण्याम् । ६ । ३०८ ।
“वल्गाभिधा वैवधिकी वल्गामठमकारयत् ॥”)
तत्पर्य्यायः । वार्त्तावहः २ । इत्यमरभरतौ ॥ वार्त्तीवहः ३ । इति शब्दरत्नावली ॥

वैवर्ण्यं, क्ली,) विवर्णस्य भावः ।) विवर्णता । विवर्णस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्न-मिदम् ॥ (यथा, कथासरित्सागरे ।९६।६८।
“सा वार्त्ता कर्णमागत्य तस्या वैवर्ण्यदायिनी ॥”
तत्तु स्त्रीणां सात्त्विकभावानामन्यतमम् । यथा, साहित्यदर्पणे । ३ । १६६ ।
“स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥”)

वैवस्वतः, पुं, (विवस्वतोऽपत्यमिति । अण् ।) यमः । इत्यमरः ॥ (यथा, बृहत्संहितायाम् ।६८।२३।
“एवं शशः सप्ततिहायनोऽयं
वैवस्वतस्यालयमभ्युपैति ॥”
यथा च ऋग्वेदे । १० । १४ । १ ।
“वैवस्वतं संगमनं जनानां
यमं राजानं हविषा दुवस्य ॥”
“वैवस्वतं विवस्वतः सूर्य्यस्य पुत्त्रम् ।”इति तद्भाष्ये सायणः । यथा च राजतरङ्गिण्याम् । ४ । १५१ ।
“वनराजिश्यामलेन दिशं वैवस्वताङ्किताम् ॥”)
रुद्रविशेषः । इति जटाधरः ॥ शनिः । सप्तमो मनुः । (यथा, रघुवंशे । १ । ११ ।
“वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ॥”)
वर्त्तमानोऽयम् । अस्मिन्मन्वन्तरे वामनोऽवतारः । पुरन्दरः इन्द्रः । आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः । अश्विनावृभवः । इत्याद्या देवाः । कश्यपः अत्रिः वशिष्ठः विश्वामित्रः गोतमः जमदग्निः भरद्वाजः एते सप्तर्षयः । इक्ष्वाकुः नृगः शर्य्यातिः दिष्टः धृष्टः करूषकः नरिष्यन्तः पृषध्रः नाभागः कविः एते मनुपुत्त्रा दश । इति श्रीभागवतमतम् ॥*॥ अपि च ।
“सप्तमञ्च प्रवक्ष्यामि यद्वैवस्वतमुच्यते ।
अत्रिश्चैव वशिष्ठश्च कश्यपो गौतमस्तथा ॥
भरद्वाजस्तथा योगी विश्वामित्रः प्रतापवान् ।
यमदग्निश्च सप्तैते सांप्रतं ये महर्षयः ॥
साध्या विश्वाश्च रुद्राश्च मरुतो वसवोऽश्विनौ ।
आदित्याश्च सुरास्तद्वत् सप्त देवगणाः स्मृताः ॥
इक्ष्वाकुप्रमुखाश्चास्य दशपुत्त्राः स्मृता भुवि ।
मन्वन्तरेषु सर्व्वेषु सप्त सप्त महर्षयः ॥
कृत्वा धर्म्मव्यवस्थानं प्रयान्ति परमं पदम् ॥”
इति मात्स्ये मन्वन्तरानुकीर्त्तनो नाम ९ अः ॥
अन्यच्च ।
श्रीमार्कण्डेय उवाच ।
“आदित्या वसवो रुद्राः साध्या विश्व मरुद्-
गणाः ।
भृगवोऽङ्गिरसश्चाष्टौ यत्र देवगणाः स्मृताः ॥
आदित्या वसवो रुद्रा विज्ञेयाः कश्यपात्मजाः ।
साध्याश्च मरुतो विश्वे धर्म्मपुत्त्रा गणास्त्रयः ॥
भृगोस्तु भृगवः पुत्त्राः ह्यङ्गिरोऽङ्गिरसः सुताः ।
एष सर्गस्तु मारीचो विज्ञेयः सांप्रताधिपः ॥
तेजस्वी नाम चेन्द्रोऽपि महात्मा यज्ञभागभुक् ।
अतीतानागता ये च वर्त्तन्ते ये च सांप्रतम् ॥
सर्व्वे ते त्रिदशेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ।
सहस्राक्षाः कुलिशिनः सर्व्व एव पुरन्दराः ॥
मघवन्तो वृषाः सर्व्वे शृङ्गिणो गजगामिनः ।
ते शतक्रतवः सर्व्वे भूताभिभवतेजसः ॥
धर्म्माद्यैः कारणैरेतैराधिपत्यगुणान्विताः ।
भूतभव्यभवन्नाथाः शृणु चैतत् त्रयं द्विज ॥
भूर्लोकोऽयं स्मृतो भूमिरन्तरीक्षं भुवः स्मृतम् ।
स्वराख्यश्च तथा स्वर्गस्त्रैलोक्यमिति गद्यते ॥
अत्रिश्चैव वशिष्ठश्च कश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रश्च कौशिकः ॥
तथैव पुत्त्रो भगवानृचीकस्य महात्मनः ।
जमदग्निश्च सप्तैते मुनयोऽत्र तथान्तरे ॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्य्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभागो दिष्ट एव च ॥
करूषश्च पृषध्रश्च भूमिपा लोकविश्रुताः ।
मनोर्वैवस्वतस्यैते नव पुत्त्राः प्रकीर्त्तिताः ॥
वैवस्वतमिदं देवि ! कथितं ते मयान्तरम् ।
अस्मिन् श्रुते नरः सद्यः पठिते चैव सत्तम ।
मुच्यते पातकैः सर्व्वैः पुण्यञ्च महदश्नुते ॥”
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरं समाप्तम् ॥

वैवस्वती, स्त्री, (वैवस्वतस्य इयम् । अण् । ततो ङीप् ।) दक्षिणदिशा । इति राजनिर्घण्टः ॥

वैवाहिकः, पुं, (विवाहाद्भवः । विवाह+ठञ् ।) कन्यापुत्त्रयोः श्वशुरः । वेयाइ इति वङ्गभाषा ॥ समधी इति हिन्दीभाषा । (तत्पर्य्यायः । सम्बन्धी २ ॥ यथा, कौतुकसर्व्वस्वे । ३ ।

"असमामसमानतासखसुतावैवाहिक-
श्यालक-
श्वश्रूकासुकरश्यया गतवती न्याय्या तदेषा मम॥")
विवाहसम्बन्धिनि, त्रि । यथा,—
"पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया ।
ते च सान्तानिकाः सर्व्वे पतिताः शूद्रतां गताः ॥"
इत्युद्वाहतत्त्वम् ॥
अपि च ।
"कन्याभ्यश्च पितृद्रव्यात् देयं वैवाहिकं वसु ।
अपुत्त्रकस्य कन्या स्वा धर्म्मजा पुत्त्रवद्धरेत् ॥"
इति दायतत्त्वे देवलः ॥
(यथा च मनुः । २ । ६७ ।
"वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः
स्मृतः ॥")

वैशम्पायनः, पुं, (विशम्पस्य गोत्रापत्यम् । "अश्वा-
दिभ्यः फञ् ।" ४ । १ । ११० । इति फञ् ।)
मुनिविशेषः । यथा,—
"अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान् ।
जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च ॥
पैलं तेषां चतुर्थञ्च परमं मां महामुनिः ।
ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ।
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च ।"
इति कौर्म्मे ४९ अध्यायः ॥
स च वज्रवारकः । यथा,—
"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः ॥"
इति पुराणम् ॥

वैशस्त्रं, क्ली, (विशसितुर्धर्म्मोऽयम् । विशसितृ+
"ऋतोऽञ् ।" ४ । ४ । ४९ । इति अञ् । तत्र
"विशसितुरिड्लोपश्च ।" इति काशिकोक्त्या
इड्लोपः ।) अधिकारः । शस्त्राभावविशि-
ष्टत्वम् । विगतं शस्त्रं यत्र । विपूर्व्वशस्त्रशब्दा-
दण्प्रत्ययेन निष्पन्नमिदम् । इति सिद्धान्त-
कौमुदी ॥

वैशाखं, क्ली, (विशाख एव । स्वार्थे अण् ।) धनु-
र्व्विदां संस्थानभेदः । यथा,—
"स्थानान्यालीढवैशाखप्रत्यालीढानि मण्डलम् ।
समपादञ्च————————————————।"
इति हेमचन्द्रः ॥
(यथा, हरिवंशे । १२० । ४४ ।
"वज्रपातनिभं वेगं पातयित्वा ममोपरि ।
भूयः प्रहर्त्तुकामो मां वैशाखेनास्थितो
महीम् ॥"
पुरविशेषः । यथा, कथासरित्सागरे । ६७।५।
"वैशाखाख्ये पुरे राज्ञः पुत्त्रावावां द्विमातृकौ ।")

वैशाखः, पुं, (विशाखा प्रयोजनमस्य । विशाखा
+"विशाखाषाढादिति ।" ५ । १ । ११० ।
इति अण् ।) मन्थानदण्डः । (यथा, शिशुपाल-
वधे । ११ । ८ ।
"द्रुततरकरदक्षाः क्षिप्रवैशाखशैले ।"
वैशाखी पौर्णमासी अस्मिन् । "सास्मिन्
पौर्णमासीति ।" ४ । २ । २१ । इति अण् ।)
द्वादशमासान्तर्गतप्रथममासः । तत्पर्य्यायः ।
माधवः २ राधः ३ । इत्यमरः ॥ चान्द्रस्य
तस्य लक्षणम् ।
"विशाखातारकायुक्ता वैशाखी पूर्णिमा भवेत् ।
सा वैशाखी यत्र मासि स वैशाखः प्रकीर्त्तितः ॥"
इति शब्दरत्नावली ॥
स तु मेषस्थरविकः सौरः । तत्र जातफलम् ।
"पुमान् विनीतो द्विजदेवभक्तो
धर्म्मस्य कर्त्ता सुजनस्य भर्त्ता ।
गुणाभिरामोऽथ जगत्प्रियः स्यात्
वैशाखमासे खलु जन्म यस्य ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
अथ वैशाखकृत्यम् । तत्र पद्मपुराणम् ।
"तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम् ॥"
वैष्णवामृते ।
"गवामर्द्धप्रसूतानां लक्षं दत्त्वा तु यत् फलम् ।
तत् फलं लभते राजन् मेषे स्नात्वा तु जाह्न-
वीम् ॥"
पितामहः ।
"कार्त्तिकस्य तु यत् स्नानं माघे मासि विशेषतः ।
तच्छुक्लादिनियमानाञ्च चान्द्रमानप्रमाणतः ॥"
आभ्यां कार्त्तिकादिस्नाने सौरचान्द्रयोर्व्विकल्पे-
नानुष्ठानम् । तत्र चान्द्रमपि द्विविधम् । तथा
च विष्णुः ।
"दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत् ।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे ॥"
दर्शं दर्शान्तयागसम्बन्धिनीं प्रतिपदमारभ्य
त्रिंशत्तिथिम् । नारायणोपाध्यायस्तु दर्शपौर्ण-
मासीति पूर्व्वदिनसङ्कल्पपरमिति । तत्र सौर-
कल्पे राश्युल्लेखः कार्य्यः ।
"संक्रान्तिविहिते कार्य्ये संक्रान्तिः परि-
कीर्त्तिता ।
मासोल्लेखश्चेतरस्मिन् रविराशिस्थितिस्तथा ॥"
इति गारुड़ात् ॥ * ॥
ततश्चारुणोदयकाले मज्जनं कृत्वाचम्य उदङ्-
मुखः ॐ तत् सदित्युच्चार्य्य अद्य वैशाखे मासि
अमुकपक्षे अमुकतिथावारभ्य मेषस्थरविं यावत्
प्रत्यहं अमुकगोत्रः श्रीअमुकदेवशर्म्मा श्रीविष्णु-
प्रीतिकामः प्रातःस्नानमहं करिष्ये । इति ।
गङ्गायान्तु अर्द्धप्रसूतगवीलक्षदानजन्यफलसम-
फलप्राप्तिकामो विष्णुप्रीतिकामो वा इति
सङ्कल्प्य यथोक्तविधिना स्नायात् । प्रतिदिन-
सङ्कल्पे तु आरभ्य मेषस्थरविं यावत् प्रत्यह-
मिति न वक्तव्यं किन्तु मासीत्यनन्तरं मेष-
राशिस्थरवौ इत्यधिकं वक्तव्यम् । चान्द्रे तु
मासानन्तरं शुक्लपक्षे प्रतिपदि तिथावारभ्य
दर्शपर्य्यन्तमित्यूहनीयम् । प्रतिदिनसङ्कल्पे
त्वारभ्य प्रत्यहमित्यन्तं न वक्तव्यम् । एवं कृष्ण-
प्रतिपदारम्भे ऊहनीयम् । एवं मासान्तरे
चोहनीयम् । सङ्कल्पाकरणे फलहानिमाह
भविष्यपुराणम् ।
"सङ्कल्पेन विना राजन् यत्किञ्चित् कुरुते नरः ।
फलञ्चाल्पाल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत् ॥" *
महार्णवे ।
"यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान् ।
पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते ॥
विप्रेभ्यः पादुकां छत्रं पितृभ्यो विषुवे शुभम् ।"
पितृभ्यः पितॄनुद्दिश्य । अत्र विष्णुरहस्यम् ।
"अयने कोटिगुणितं लक्षं विष्णुपदीषु च ।
षड़शीतिसहस्रन्तु षड़शीत्यामुदाहृतम् ॥
शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये ।
विषुवे शतसाहस्रमा-का-मा-वैष्वनन्तकम् ॥"
इति मत्स्यपुराणोक्तशतसहस्रगुणिततत्कर्म्मफल-
जनकत्वेन विवक्षणीयत्वान्मेषादावित्यपि विषुव-
संक्रान्तिपुण्यकालपरम् । अन्यथा कालद्वय-
कल्पनापत्तिः । व्यवहारोऽपि तथा ॥ * ॥ संक्र-
मणपुण्यकालस्तु दिनसंक्रमणे कृत्स्नं दिनम् ।
"षड़शीतिमुखेऽतीते वृत्ते च विषुवद्वये ।
भविष्यत्ययने पुण्यमतीते चोत्तरायणे ॥"
इति तु पुण्यतरकालपरं दिनवृत्तोत्तरायणादि
विहितविंशतिदण्डादीनां रात्रिप्रविष्टभाग-
स्यापि पुण्यत्वम् । रात्रिसंक्रमे तु दण्डन्यून-
प्रथमयामद्वयाभ्यन्तरे तद्दिवसीयशेषयामद्वयं
पुण्यम् । दण्डद्वयात्मकमध्यरात्रे तद्दिवसीय-
तिथेरभेदे तु तद्दिवसीयशेषयामद्वयं पुण्यम् ।
भेदे तु तद्दिवसीयशेषयामद्वयं पुण्यं परदिव-
सीयाद्ययामद्वयञ्च । तिथ्यभेदभेदयोर्दक्षिणायने
तद्दिवसीयशेषयामद्वयम् । उत्तरायणे पर-
दिवसीयशेषयामद्वयम् । दण्डाधिकशेषार्द्ध-
रात्रिसंक्रमणे परदिनाद्ययामद्वयम् । सन्ध्या-
संक्रमणे तु दिनदण्डे दिनस्य रात्रिदण्डे रात्रे-
र्व्वस्येति ॥ * ॥ संक्रान्त्यां स्नानमावश्यकम् ।
अनिष्टसंक्रमणे तु तद्दोषशान्त्यर्थं धुस्तूरबीज-
सलिलेन सर्व्वौषधिजलेन च स्नानं विष्णुपूजनं
तन्मन्त्रजपः । संक्रान्तिकाल एव स्त्रीतैलमांस-
वर्ज्यम् । इन्दुक्षयेऽमावास्यायाम् । दिनक्षये तिथि-
क्षये । आ-का-मा-वैषु आषाढ़कार्त्तिकमाघ-
वैशाखपौर्णमासीषु ॥ * ॥ ततः कृतस्नानादिः
प्राङ्मुख उदङ्मुखं ब्राह्मणं गन्धपुष्पाभ्यां पूज-
यित्वा जलघटान्वितशक्तूंश्च जलघटान्वित-
शक्तुभ्यो नमः इति पूजयित्वा ब्राह्मणहस्ते जलं
दत्त्वा घटं संप्रोक्ष्य वामहस्ते धृत्वा कुशत्रय-
तिलजलान्यादाय ॐ तत् सदित्युच्चार्य्य ओम्
अद्यामुके मास्यमुकपक्षेऽमुकतिथौ महाविषुव-
संक्रान्त्यां अमुकगोत्रस्य पितुरमुकदेवशर्म्मणः
सर्व्वपापविमुक्तिकामः एतान् जलघटान्वित-
शक्तून् विष्णुदैवतकान् अमुकगोत्राय अमुक-
देवशर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददानीति
ब्राह्मणहस्ते जलं दद्यात् ब्राह्मणस्तु दक्षिण-
हस्ततलमध्यभागार्पितशीर्षेण ओमित्यनेन गृ-
हीत्वा स्वस्तीत्युक्त्वा गायत्त्रीं कामस्तुतिञ्च पठेत् ।
जलघटान्विताः शक्तवो विष्णुदेवताकाः । इति
वदेत् । ततो दक्षिणां दद्यात् । यथा ॐ अद्ये-

त्यादि कृत्वैतत् जलघटान्वितशक्तुदानकर्म्मणः प्रतिष्ठार्थं दक्षिणां किञ्चित् काञ्चनमूल्यं ब्राह्मणायाहं ददानीति। ततः अच्छिद्रावधारणम्। ब्राह्मणविशेषानुपदेशे यथासम्भवगोत्रनाम्ने ब्राह्मणायेति विशेषः। तत्र ब्राह्मणासन्निधाने तुभ्यमिति न देयम्। भूमौ त्यागजलप्रक्षेपः। एवमन्यत्रापि सम्प्रददे इति वाक्ये विशेषः। सत्पात्राभावे तत्सत्त्वेऽपि तत्तत्कामो विष्णुप्रीतिकामो वा विष्णवे दत्त्वा ब्राह्मणाय पश्चात् प्रतिपादयेत्।

"देवे दत्त्वा तु दानानि देवे दत्त्वा तु दक्षिणाम्।
तत् सर्व्वं ब्राह्मणे दद्यादन्यथा निष्फलं भवेत्॥"
इति मत्स्यसूक्तात्॥

दत्त्वेत्यत्र देयानीति वाराहीये पाठः। *।
"वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने।
दद्यात्सुक्ता राजेन्द्र स याति परमां गतिम्॥"
अत्रापि यथायोग्यं संपूज्य पूर्व्ववद्वाक्येन मनोरथफलार्थिना सभोज्यघटो देयः। *। स्मृतिः।
"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी॥"
तत्रापि यथायोग्यं संपूज्य पूर्व्ववत् वाक्यं कृत्वा पठेत्
"ॐ एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः॥"
इति मन्त्रलिङ्गान्मनोरथफलत्वं ज्ञेयम्। *।
कृत्यचिन्तामणौ।
"मसूरं निम्बपत्राभ्यां योऽत्ति मेषगते रवौ।
अपि रोषान्वितस्तस्य तक्षकः किं करिष्यति॥"
उत्तरार्द्धे तु।
"मेषस्थे च विधौ तत्र नास्त्यङ्गे विषजं भयम्॥"
इति संवत्सरप्रदीपे पाठः।
ततश्च मेषस्थरविस्थितिकाले मसूरं निम्बपत्रद्वयञ्च भक्षयेत्। *। भविष्ये।
"या शुक्ला नरशार्दूल वैशाखे मासि वै तिथिः
तृतीया साक्षया ख्याता गीर्व्वाणैरपि वन्दिता।
योऽस्यां ददाति करकान् वारिवाजसमन्वितान्।
स याति पुरुषो वीर लोकान् वै हेममालिनः॥"
वाजमन्नम्। हेममालिनः सूर्य्यस्य। ततो जलान्नसमन्वितकरकदाने सूर्य्यलोकगमनं फलम्। दानानुष्ठानं पूर्व्ववत्। *। ब्रह्मपुराणम्।
"वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम्।
कार्त्तिके शुक्लपक्षे च त्रेता च नवमेऽहनि।
अथ भाद्रपदे मासि त्रयोदश्यान्तु द्वापरम्।
माघे तु पौर्णमास्यान्तु घोरं कलियुगं स्मृतम्।
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः॥"
तत्र वैशाखादयः पौर्णमास्यन्ता एव तथैव तिथिकृत्याभिधानात्। मुख्यचान्द्रे कार्त्तिके नवमेऽहनीति सिद्धौ शुक्लपक्ष इति व्यर्थं स्यात्। *। आसां प्रशंसामाह विष्णुपुराणम्।
"एता युगाद्याः कथिताः पुराणै-
रनन्तपुण्यास्तिथयश्चतस्रः।
उपप्लवे चन्द्रमसो रवेश्च
त्रिष्वष्टकास्वप्ययनद्वये च।
पानीयमप्यत्र तिलैश्च मिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः।
श्राद्धं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति॥"
उपप्लवे ग्रहणे। *। देवीपुराणम्।
"युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता॥"*।
अक्षयतृतीयामधिकृत्य ब्रह्मपुराणम्।
"तस्यां कार्य्यो यवैर्होमो यवैर्विष्णुं समर्च्चयेत्।
यवान् दद्यात् द्विजातिभ्यः प्रयतः प्राशयेद्-
यवान्॥
पूजयेच्छङ्करं गङ्गां कैलासञ्च हिमालयम्।
भगीरथञ्च नृपतिं सागराणां सुखावहम्॥"*।
स्कान्दे।
"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता।
तत्र मां लेपयेद्गन्धैर्लेपनैरतिशोभनैः॥"
मां जगन्नाथम्। *। अन्यत्रापि।
तथा च जगन्नाथस्नानमधिकृत्य भविष्ये।
"संवत्सरफलं राजन् नवम्यां कार्त्तिके तथा।
मन्वादौ च युगादौ च मासत्रयफलं भवेत्॥"*
मन्वादयस्तु भविष्यमात्स्ययोः।
"अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च।
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा।
आषाढ़स्यापि दशमी तथा माघस्य सप्तमी।
श्रावणस्याष्टमी कृष्णा तथाषाढ़स्य पूर्णिमा।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी
सिता।
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः॥"
अमावास्याष्टमीव्यतिरिक्ताः शुक्लाः उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनात्। *। नारदीये।
"वैशाखे शुक्लपक्षे तु द्वादशी वैष्णवी तिथिः।
तस्यां शीतलतोयेन स्नापयेत् केशवं शुचिः॥"
इयं पिपीतकद्वादशी। नात्र युग्मादरापेक्षा। तत्र विष्णुपूजने उपवासोत्तरविधानात्। *।
अथ यवान्नश्राद्धम्। तत्र वैशाखशुक्लपक्षे कुजशनिशुक्रेतरवारे नन्दारिक्ताभयोदशीतरतिथौ जन्मचन्द्राष्टमचन्द्रजन्मतिथिजन्मनक्षत्रत्रयपञ्चमताराञ्चयेतरेषु पूर्व्वफल्गुनीपूर्व्वभाद्रपदपूर्व्वाषाढ़ामघाभरण्यश्लेषार्द्रेतरनक्षत्रेषु यवश्राद्धं कर्त्तव्यम्। तच्छेषभोजनन्तु एताद्दगनिषिद्धायां विषुवसंक्रान्तौ अक्षयतृतीयायाञ्च विशेषतः कर्त्तव्यम्। वैशाखाकरणे ज्यैष्ठशुक्लपक्षे आषाढ़शुक्लपक्षे च हरिशयनेतरत्र कर्त्तव्यम्। इति कृत्यतत्त्वम्। *। *। अथ वैशाखमाहात्म्यम्।
"ये कार्त्तिकव्रतपरा ये माघपरिनिष्ठिताः।
ये वैशाखव्रतासक्तास्तेषां तुष्टः सदा हरिः।
सर्व्वेषामेव मासानां वैशाखः प्रवरः स्मृतः।
पुरा हरिमुखे राजन् श्रुतमेतन्न संशयः।
तत्र स्नानं जपो होमः श्राद्धं दानादि यत्
कृतम्।
तत् सर्व्वं भूपतिश्रेष्ठ सत्यमक्षयमुच्यते।
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञाः सदक्षिणाः।
भूप वैशाखमासस्य कोट्यंशेनापि नो समाः॥
मेरुतुल्यानि हेमानि सर्व्वदानानि चैकतः।
एकतः सर्व्वदा भूप माधवो माधवप्रियः॥
असंख्यानि च पापानि बहुजन्मार्ज्जितानि च।
निमेषार्द्धेन राजेन्द्र विलयं यान्ति माधवे॥
वैशाखमागतं दृष्ट्वा पितॄणामुत्सवो भवेत् :
पुत्त्रो नियममाचर्य्य अस्मभ्यमुद्धरिष्यति॥
आगतं माधवं दृष्ट्वा कम्पन्ते पापसञ्चयाः।
अस्माकं नाशकालोऽयं भूपते भुवमागतः॥
वैशाखं परमं मासं माधवस्येति ह प्रियम्।
नियमेन समाचर्य्य न भूयो जायते नरः॥
मनसा संस्मरेद्यस्तु नियमं माधवोद्भवम्।
धूयते पातकैः सर्व्वैः शक्रेण सह मोदते॥
वचसा यो वदेद्भूप वैशाखं माधवप्रियम्।
अहं समाचरिष्यामि स गच्छेद्ब्रह्मणः पुरम्॥
यः समाचरते भूप नियमेन तु माधवम्।
स विष्णो रूपमासाद्य विष्णुना सह मोदते॥
नियमेन समाचर्य्य एकाहमपि भूपते।
पितरस्तारितास्तेन यास्यन्ति परमां गतिम्॥
तस्मिन् स्नात्वा विशुद्धात्मा दम्भमात्सर्य्यवर्ज्जितः।
ईप्सितान् लभते कामान् श्रीविष्णोर्दयितो भवेत्॥
ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नस्त्रीविघातकः।
नियमेन नयेन्मासं स मुक्तः सर्व्वपातकात्॥
पातकानामेकमेव प्रायश्चित्तं विदुर्ब्बुधाः।
सर्व्वपापसमुद्भूतौ नात्र कार्य्या विचारणा॥
वैशाखस्नायिनो लोकाः श्रीविष्णुसेवनोत्सुकाः।
पापं न तेषां मतिमन्निह लोके परत्र च॥
सर्व्वस्वदानं विधिवत् सर्व्वदा परिशोषणम्।
चान्द्रायणञ्च विधिना कृच्छ्रं चैवातिकृच्छ्रकम्॥
पुण्यक्षेत्राभिगमनं सर्व्वपापप्रणाशनम्।
देवताभ्यर्च्चनं चैव तथैवातिथिसेवनम्॥
कदापि यैर्नाचरितं वाङ्मनःकायकर्म्मभिः।
संप्राप्य ते तु कुर्व्वन्तु माधवे नियमं नराः॥
समाचरन्ति ये मासं माधवं कृतबुद्धयः।
सदा प्रीतिमनास्तेषां श्रीकृष्णो देवकीसुतः॥
या नारी विधवा भूत्वा माधवे नियमं चरेत्।
कुलायुतसहस्रन्तु नयते परमं पदम्॥
पुंस्त्रियापीह किं कार्य्यं येन नाचरितं नृप।
वैशाखं पुत्रशतकात् नारी धन्या हरिप्रिया॥
यो माधवेऽर्च्चयेद्राजन् गोविन्दं गोपवल्लभम्।
न तस्य विद्यते संख्या पूजनस्य फलस्य च॥
वैशाखस्य तु धर्म्मस्य पारं गन्तुं यदीच्छसि।
नरेन्द्र माधवं मासं नियमेन समाचर॥
किं करिष्यति सांख्येन योगेन नरनायक।
मुक्तिमिच्छसि चेद्राजन् माधवं माधवेऽर्च्चय॥
अभक्ष्यसम्भवं राजन् कुप्रतिग्रहसम्भवम्।
तत्पापं संक्षयं याति माधवे नियमे कृते॥
रवौ यदि रिपुं जेतुं त्वमिच्छसि नराधिप।
नियमेन सदा विष्णोः प्रियं माधवमाचर॥
यदि सांसारिकं दुःखं हन्तुमिच्छसि भूमिप।

तदा नियममास्थाय माधवे माधवं भज ।
राज्यभोगांश्च विपुलान् पुत्त्रमित्रादिसम्पदम् ।
यदिच्छसि तदा विष्णोः प्रियं माधवमाचर ॥
त्यक्तुमिच्छसि राजेन्द्र जन्ममृत्युजरादिकम् ।
भयं यदि तदा विष्णोः प्रियं माधवमाचर ॥
यैर्नाचरितो मासो माधवः पापबुद्धिभिः ।
नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना हरेः ॥
न वैशाखसमो मासो विशेषः केशवप्रियः ।
अव्रतेन क्षिपेद्यस्तु तं विद्याच्छिकषात्मज ॥
यतिश्च विधवा चैव विशेषेण वनाश्रमी ।
वैशाखे नरकं याति ह्यकृत्वा नियमं नरः ॥
तस्माद्राजन् प्रयत्नेन कुरु त्वं माधवव्रतम् ।
यस्याचरणमात्रेण हरिस्तुष्टो भविष्यति ॥
तावद्गर्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले ।
यावन्नायाति राजेन्द्र माधवो माधवप्रियः ॥
अणुमात्रन्तु यत्किञ्चिद्दत्तो ददाति च माधवे ।
काले वा यदि वाकाले कोटिकोटिगुणं भवेत् ॥
यथोदधीनां राजर्षे ! क्षयो नैवोपपद्यते ।
तथैव माधवे मासि न क्षयं पापपुण्ययोः ॥
नाचारि धर्म्माचरणेन माधवं
नाराधितो यैः पुरुषप्रधानः ।
येन श्रुता भूप कथा मुरारे-
स्तेषां वृथा जन्म नराधमानाम् ॥
न पीड़यन्ति ग्रहराक्षसा गणा
यक्षाः पिशाचोरगभूतदानवाः ।
यो माधवे मासि नरेन्द्रवर्य्य
ध्रुवं मुरारेर्व्रतमाचरन्ति ह ॥”
इति पाद्मोत्तरखण्डे वैशाखमाहात्म्यकथने १६८ अध्यायः ॥

वैशाखी, स्त्री, (विशाखया युक्ता पौर्णमासी । “नक्षत्रेण युक्तः कालः ।” ४ । २ । ३ । इत्यण् । ततो ङीप् ।) वैशाखमासस्य पूर्णिमा । यथा,
“विशाखातारकायुक्ता वैशाखी पूर्णिमा भवेत् ।”
इति शब्दरत्नावली ॥
तत्र तर्पणफलम् । वैशाखीमुपक्रम्य यमः ।
“गौरान् वा यदि वा कृष्णान् तिलान् क्षौद्रेण संयुतान् ।
प्रीयतां धर्म्मराजेति पितॄन् देवांश्च तर्पयेत् ॥
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।
अब्दायुतञ्च तिष्ठेत्तु स्वर्गलोके न संशयः ॥”
इति तिथ्यादितत्त्वम् ॥ * ॥
रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (वसुदेवस्य स्त्रीणामन्यतमा । यथा, हरिवंशे । ३५ । २ ।
“वैशाखी च तथा भद्रा सुनामा चैव पञ्चमा ॥”)

वैशिकः, पुं, (वेशेन जीवतीति । वेश + “वेतनादिभ्यो जीवति ।” ४ । ४ । १२ । इति ठक् ।) त्रिविधनायकान्तर्गतनायकविशेषः । यथा,— शृङ्गारस्य उभयसाध्यत्वान्नायकोऽपि निरूप्यते । स च त्रिविधः । पतिरुपपतिर्वैशिकश्च । बहुवेश्याभोगोपरसिको वैशिकः । यथा,—
“काञ्चीकलक्वणितकोमलनागिकाभ्तं
पारावतध्वनिविचित्रितकण्ठपालिम् ।
उद्भ्रान्तलोचनचकोरमनङ्गरङ्ग-
माशास्महे कमपि वारविलासवत्याः ॥” * ॥
वैशिकस्तूत्तममध्यमाधमभेदात् त्रिविधः । दयिताश्रमप्रकोपे अपि उपचारपरायणः उत्तमः । यथा,—
“चक्षुःप्रान्तमुदीक्ष्य पक्ष्मलदृशः शोणारविन्दश्रियं
नोच्चैर्जल्पति न स्मितं वितनुते गृह्णाति वीटीं न वा ।
तल्पोपान्तमुपेत्य किन्तु पुलकभ्राजत्कपोलद्युतिः
कान्तः केवलमानतेन शिरसा मुक्तासनं गुम्फति ॥” * ॥
प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः । यथा,—
“आस्यं यद्यपि हास्यवर्ज्जितमिदं लास्येन हीनं वचो
नेत्रं शोणसरोजकान्तिरुचिरे क्वापि क्षणं स्थीयते ।
मालायाः करणोद्यमो न कविकारम्भः कुचाभोजयो-
र्भूपः कुन्तलधोरणीषु सुतनोः सायन्तनो दृश्यते ॥” * ॥
भयलज्जापालज्जाशून्यः कामक्रीड़ायामकृतकृत्याकृत्यविचारोऽधमः । यथा,—
“उदयति हृदि नैव यस्य लज्जा
न च करुणा न च कोऽपि भीतिलेशः ।
वकुलमुकुलकोषकोमलां मां
पुनरपि तस्य करेण घातयेथाः ॥” * ॥
मानी चतुरः शठ एवान्तर्भवति । मानी यथा,
“बाह्याकूतपरायणं तव वचो वच्योपमेयं मनः
श्रुत्वा वाचमिमामपास्य विनयं याजाहृतिः प्रस्थिते ।
प्रातर्व्यक्रविलोकने परिहृतालापे विवृत्तानने
प्रांशौ नियतं पतन्ति कृपणा वामभ्रुवो दृष्टयः ॥”
वाक्चेष्टाव्यङ्ग्यसमागमश्चतुरः । वचनव्यङ्ग्यसमागमो यथा,—
“तमोजटाले हरिदन्तराले
काले निशायास्तव निर्गतायाः ।
तटे नदीनां निकटे वनानां
घटेत शातोदरि ! कः सहायः ॥”
चेष्टाव्यङ्ग्यसमागमो यथा,—
“कान्ते कनकजम्बीरं करे कमपि कुर्व्वति ।
अगारलिखिते भानौ बिन्दुमिन्दुमुखी ददौ ॥”
इति रसमञ्जरी ॥
(वेशसम्बन्धिनि, त्रि । यथा, मृच्छकटिके । १ अङ्के ।
“ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां
ज्ञात्वा शर्व्वप्रसादात् व्यपगततिमिरे चक्षुषी चोपलभ्य ॥”)

वैशिष्ट्यं, क्ली, (विशिष्टस्य भावः ।) विशिष्टत्वम् । तत्तु सम्बन्धपदार्थः । विशिष्टधीनियामक इति यावत् । यथा । “विशिष्टवैशिष्ट्याद्यभ्युपगमवादः ।” इति शिरोमणिः ॥ दण्डसंयोगवान् इति शाब्दबोधो न विशिष्टवैशिष्ट्यावगाही । खले कपोतन्यायेनैव तत्स्वीकारात् । इति भावः । इति जागदीशी सामान्यलक्षणा ॥ * ॥ (असाधारणत्वम् । यथा, महाभारते । १३ । १५६ । ४१ ।
“त्रिषु लोकेषु तावच्च वैशिष्ट्यं प्रतिपत्स्यसे ।
सुप्रियः सर्व्वलोकस्य भविष्यसि जनार्द्दन ॥”)

वैशेषिकः, पुं, (विशेषं वेत्ति अधीते वा । विशेष + ठक् ।) कणादमुनिकृतदर्शनशास्त्रवेत्ता । तत्पर्य्यायः । औलुक्यः २ । इति हेमचन्द्रः ॥ (विशेषमधिकृत्य कृतो ग्रन्थः । विशेष + “अधिकृत्य कृते ग्रन्थे ।” ४ । ३ । ८७ । इति ठक् ।) कणादमुनिकृतदर्शनशास्त्रविशेषः । स तु विशेषपदार्थनिरूपकग्रन्थः । अस्य मतं न्यायदर्शनमततुल्यम् । अत्र जगतः कारणं परमाणुपर्य्यन्तं निरूपितम् ॥ * ॥ इह खलु निखिलप्रेक्षावन्निसर्गप्रतिकूलवेदनीयतया निखिलात्मसंवेदनसिद्धं दुःखं जिहासतस्तद्धानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारमुपायमाकलयति ।
“यदा चर्म्मवदाकाशं वेष्टयन्तीह मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥”
इत्यादिवचननिचयप्रामाण्यात् । परमेश्वरस्य साक्षात्कारश्च श्रवणमननभावनाभिर्भावनीयः । यदाह ।
“आगमेनानुमानेन ध्यानाभ्यासबलेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥”
इति ॥
तत्र मननमनुमानाधीनम् । अनुमानञ्च व्याप्तिज्ञानाधीनम् । व्याप्तिज्ञानञ्च पदार्थविवेकसापेक्षम् । अतः पदार्थषट्कम् “अथातो धर्म्मं व्याख्यास्यामः ।” इत्यादिकायां दशलक्षण्यां कणभक्षेण भगवता व्यवस्थापि । तत्राह्निकद्वयात्मके प्रथमेऽध्याये समवेताशेषपदार्थकथनमकारि । तत्रापि प्रथमाह्निके जातिमन्निरूपणम् । द्वितीयाह्निके जातिविशेषयोर्निरूपणम् । आह्निकद्वयात्मके द्वितीये भूतदिक्कालक्षणम् । तत्रापि प्रथमाह्निके भूतविशेषलक्षणम् । द्वितीये दिक्कालप्रतिपादनम् । आह्निकद्वयात्मके तृतीये आत्मान्तःकरणलक्षणम् । तत्राप्यात्मलक्षणं प्रथमे । द्वितीये अन्तःकरणलक्षणम् । आह्निकद्वययुक्ते चतुर्थे शरीरतदुपयोगिविवेचनम् । तत्रापि प्रथमे तदुपयोगिविवेचनम् । द्वितीये शरीरविवेचनम् । आह्निकद्वयवति पञ्चमे कर्म्मप्रतिपादनम् । तत्रापि प्रथमे शरीरसम्बन्धिकर्म्मचिन्तनम् । आह्निकद्वयशालिनि षष्ठे श्रौतधर्म्मनिरूपणम् । तत्रापि प्रथमे दानप्रति-

गृहधर्म्मविवेकः। द्वितीये चातुराश्रम्योचितधर्म्मनिरूपणम् : तथाविधे सप्तमे गुणसमवायप्रतिपादनम्। तत्रापि प्रथमे बुद्धिनिरपेक्षगुणप्रतिपादनम्। द्वितीये तत्सापेक्षगुणप्रतिपादनं समवायप्रतिपादनञ्च। अष्टमे निर्व्विकल्पकसविकल्पकप्रत्यक्षप्रमाणचिन्तनम्। नवमे बुद्धिविशेषप्रतिपादनम्। दशमे अनुमानप्रतिपादनम्। तत्र उद्देशो लक्षणं परीक्षा चेति त्रिविधास्य शास्त्रस्य प्रवृत्तिः। इति वैशेषिकग्रन्थविवरणम्॥ *॥
(न्यायमते आत्मादिगतपारिभाषिकगुणः। यथा, भाषापरिच्छेदे।
"बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको-
द्रवः।
अदृष्टभावना शब्दा अमी वैशेषिका गुणाः॥"
विशेष एव। "विनयादिभ्यष्ठक्।" ५।४।३४। इति स्वार्थे ठक्॥ असाधारणे, त्रि। यथा, महाभारते। ७।५।१५।
"गुणपश्चतु ते शक्या कर्त्तुं सर्व्वे पुरःसरा।
एक एव तु कर्त्तव्यो यस्मिन् वैशेषिका गुणाः॥")

वैश्यः, पुं, (विश् + ष्यञ्।) ब्रह्मोरुदेशजाततृतीयवर्णः। (यथा, ऋग्वेदे। १०।९।१२।
"ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥")
तत्पर्य्यायः। ऊरव्यः २ ऊरुजः ३ अर्य्यः ४ भूमिस्पृक् ५ विट् ६। इत्यमरः॥ द्विजः ७। इति जटाधरः॥ भूमिजीवी ८। इति शब्दरत्नावली॥ व्यवहर्त्ता ९ वार्त्तिकः १० वणिकः ११ पणिकः १२। इति राजनिर्घण्टः॥ प्लक्षद्वीपे अस्य संज्ञा ऊर्द्ध्वायनः। शाल्मलद्वीपे वसुन्धरः। कुशद्वीपे अभियुक्तः। क्रौञ्चद्वीपे द्रविणः। शाकद्वीपे दानव्रतः। पुष्करद्वीपे सर्व्वे एकवर्णाः। इति भागवतमतम्॥ अस्य शास्त्रनिरूपितधर्म्माश्रयः। अध्ययनम् १ यजनम् २ दानम ३। चतस्रो जीविकाः। कृषिः १ गोरक्षणम् २ वाणिज्यम् ३ कुसीदम् ४। अस्याश्रमाश्रयः। ब्रह्मचर्य्यम् १ गार्हस्थ्यम् २ वानप्रस्थम् ३॥ तस्य लक्षणादिर्य्यथा,—
"विशत्याशु पशुभ्यश्च कृष्यादानरुचिः शुचिः।
वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः॥
वैश्यस्य च प्रवक्ष्यामि यो धर्म्मो वेदसम्मतः।
दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः॥
पालयेच्च पशून् वैश्यः पितृवद्धर्म्ममर्ज्जयन्।
विकर्म्म तद्भवेदन्यत् कर्म्म यत् स समाचरेत्॥
रक्षया स हि तेषां वं महत् सुखमवाप्नुयात्।
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः॥
ब्राह्मणेभ्यश्च राज्ञे च सर्व्वाः परिददे प्रजाः।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्॥
षण्णामेका पिवेद्धेनुं शताच्च मिथुनं भवेत्।
लब्धाच्च सप्तमं भागं तथा शृङ्गेकलक्षुरे॥
शस्यानां सर्व्वबीजानि एषा सांवत्सरी भृतिः।
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति॥
वैश्ये रक्षति नान्येन रक्षितव्याः कथञ्चन॥"
इति पाद्मे स्वर्गखण्डे वर्णविभागः २६ अः॥
अन्यच्च।
"दानमध्ययनं यज्ञो धर्म्मः क्षत्त्रियवैश्ययोः।
दण्डस्तथा क्षत्त्रियस्य कृषिर्वैश्यस्य शस्यते॥
स्थानमैन्द्रं क्षत्त्रियाणां संग्रामेष्वपलायिनाम्।
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तताम्॥"
इति गारुडे ४९ अध्यायः॥
(वैश्यसम्बन्धिनि, त्रि। यथा, महाभारते। १२।६२।४।
"क्षात्त्राणि वैश्यानि च सेवमानः
शौद्राणि कर्म्माणि च ब्राह्मणः सन्।
अस्मिँल्लोके निन्दितो मन्दचेताः
परे च लोके निरयं प्रयाति॥")

वैश्या, स्त्री, (वैश्य + टाप्।) वैश्यजातिस्त्री। तत्पर्य्यायः। अर्य्याणी २ अर्य्या ३। इति जटाधरः॥ (यथा, मनौ। ८।३८२।
"वैश्यश्चेत् क्षत्त्रियां गुप्तां वैश्यां वा क्षत्त्रियो
व्रजेत्॥")

वैश्रवणः, पुं, (विश्रवणस्यापत्यम्। "शिवादिभ्योऽण्।" ४।१।११२। इति अण्।) कुवेरः। इत्यमरः॥ (यथा, महाभारते। २।१०।२।
"तपसा निर्म्मिता राजन् स्वयं वैश्रवणेन
सा॥"
शिवः। यथा, महाभारते। १३।१७।१०३।
"धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा॥")

वैश्रवणालयः, पुं, (वैश्रवणस्यालयः।) वटवृक्षः। इति हेमचन्द्रः॥ (यथा, देवीभागवते। ७।३०।८१।
"अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये॥")
कुवेरपुरी च॥

वैश्रवणावासः, पुं, (वैश्रवणस्यावासः।) वटवृक्षः। इति जटाधरः॥ कुवेरगृहञ्च॥

वैश्रवणोदयः, पुं, (वैश्रवणस्योदयो यस्मिन्।) वटवृक्षः। इति रत्नमाला॥

वैश्वदेवः, पुं, (विश्वदेवस्यायम्। विश्वदेव + अण्।) विश्वदेवसम्बन्धिहोमादिः। यथा,—
ब्रह्मोवाच।
"वैश्वदेवं प्रवक्ष्यामि होमलक्षणमुत्तमम्।
पर्य्युक्षणमग्निं पर्य्युक्ष्य। क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः। इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्। ॐ पावक वैश्वानर इदमासनम्। अवनीगर्भसंस्कृतः तेजोरूपो महाब्रह्मन्मसमूर्त्ताखिल वैश्वानरं प्रतिबोधयामि। वैश्वानरोऽत्र उभयं प्रायातु परावतः। अग्निर्नः सुष्टुतीरुपस्पृष्टे दिवि पृष्टोऽग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश। वैश्वानरः सहसा पृष्टोऽग्निः स नोऽग्निः स्वं दिवा सर्व्वस्मात्तु नक्तं ॐ प्रजापतये स्वाहा। सोमाय स्वाहा। वृहस्पतये स्वाहा। अग्नीषोमाभ्यां स्वाहा। इन्द्राग्नीभ्यां स्वाहा। द्यावापृथिवीभ्यां स्वाहा। धन्वन्तरये स्वाहा। इन्द्राय स्वाहा। विश्वेभ्यो देवेभ्यः स्वाहा। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुवः स्वः स्वाहा। देवकृतस्यैनसोऽवयजनमसि स्वाहा। मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा। पितृकृतस्यैनसोऽवयजनमसि स्वाहा। आत्मकृतस्यैनसोऽवयजनमसि स्वाहा। एनस एनसोऽवयजनमसि स्वाहा। यच्चाहं मे विद्वांश्चकार यच्चाविद्वांस्तस्य सर्व्वस्यैनसोऽवयजनमसि स्वाहा। अग्नये स्विष्टिकृते स्वाहा। स्वर्य्याय स्वाहा। प्रजापतये स्वाहा। वनस्पतये स्वाहा। अद्भ्यः स्वाहा। ओषधिवनस्पतिभ्यः स्वाहा। गृहाय स्वाहा। गृहदेवताभ्यः स्वाहा। वास्तुदेवताभ्यः स्वाहा। इन्द्राय स्वाहा। इन्द्रपुरुषेभ्यः स्वाहा। यमाय स्वाहा। यमपुरुषेभ्यः स्वाहा। वरुणाय स्वाहा। वरुणपुरुषेभ्यः स्वाहा। सोमाय स्वाहा। सोमपुरुषेभ्यः स्वाहा। ब्रह्मणे स्वाहा। ब्रह्मपुरुषेभ्यः स्वाहा। विश्वेभ्यो देवेभ्यः स्वाहा। सर्व्वेभ्यो भूतेभ्यः स्वाहा। दिवाराभिभ्यः स्वाहा। रक्षोभ्यः स्वाहा। स्वधा पितृभ्यः स्वाहा। ये भूताः प्रचरन्ति दिवा चरन्ति दिवाचरमिच्छन्तो भुवनस्य मध्ये तेभ्यो बलिं पुष्टिकामो ददामि। मयि पुष्टिं पुष्टिपतिर्द्ददातु। श्वचाण्डालपतितवायसेभ्यः।" इति गारुडे वैश्वदेवविधिः २१९ अध्यायः॥ *॥ तस्य प्रयोगो यथा। पूर्व्वाभिमुखः शुचिरुपवीती कुशहस्तः कुशासनोपविष्टः कर्त्ता घृताक्तं दुग्धाक्तं तैलाक्तं जलाक्तं अन्नं आमान्नं वा फलं जलं वा जुहुयात्। यथा जले ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। ॐ देवकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ पितृकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ यद्दिवा च नक्तञ्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ यत् स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ एनस एनसोऽवयजनमसि स्वाहा। ॐ अग्नये स्विष्टिकृते स्वाहा। इत्यनेन जुहुतात्। इति वैश्वदेवकर्म्म। इत्याह्निकप्रयोगतत्त्वम्॥
(विश्वदेव एव। स्वार्थे अण्। गणदेवताविशेषः। बन्धुभिरकृतविषादस्यैव वैश्वदेवलोकप्राप्तिः। यथा, मनौ। ४।१८३।
"यामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः।
सम्बन्धिनो ह्यपां लोके पृथिव्यां मातृमातुलौ॥"
विश्वदेवसम्बन्धिनि, त्रि। यथा, महाभारते। १२।३०१।८।
"आसुरान् विषयान् ज्ञात्वा वैश्वदेवांस्तथैव
च॥")

वैश्वानरः, पुं, (विश्वश्चासौ नरश्चेति। "नरे संज्ञायाम्।" ६।३।१२९। इति दीर्घः। ततो

विश्वानर एव। स्वार्थे अण्। यद्वा, “विश्वान् नरान् इतो लोकात् लोकान्तरं नयति। इदमर्थेन विश्वानराणां नेतृत्वेन सम्पद्यन्ते वा कर्म्मार्थप्रणेतृत्वेन सम्पादिनोऽस्य वैश्वानरः। ‘अन्येषामपि दृश्यते।’ ६।३।१३७। इति दीर्घः। अपि वा विश्वान् जन्तून् अरः। ऋ गतौ इत्यस्य छान्दसत्वात् पचाद्यच् उपपदविभक्त्यालुक्। सर्व्वाणि भूतानि अरः प्रत्यृतः प्रतिगतः प्रविशति विश्वानरः प्राणः। तेन जन्यमानत्वात् तस्यापत्यं वैश्वानरः।” इति निघण्टुटीकायां देवराजयज्वा।५।२।) अग्निः। (यथा, गीतायाम्। १५। १४।

“अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्व्विधम्।”)

चित्रकवृक्षः। इत्यमरः। अस्योत्पत्तिकारणं यथा,—

“तथापि दृष्टि यो रूपे दे हे प्रत्येकशोऽधुना।
भूतकार्य्येम्बभूतेन देवलोके तु मर्त्तिना।
तिष्ठध्वमपि कालान्ते लयं त्वाविशतु द्रुतम्।
शरीराणि पुनर्न्नैव कर्त्तयोऽहमिति क्वचित्।
मूर्त्तानाञ्च तथा युष्मं दृश्ये नामानि योऽधुना।
अग्निर्व्वैश्वानरो नाम प्राणापानौ तथाश्विनौ।
भविष्यति तथा गौरी हिमशैलसुता तथा।
पृथिव्यादिगणश्चैव गणवक्त्रो भविष्यति।
शरीरधातवश्चैते नानाभूतानि एव तु।
अहङ्कारस्तथा स्कन्दः कार्त्तिकेयो भविष्यति।”

इति वाराहे आदिकृतायां महातपोपाख्याननामाध्यायः।

वैश्वी, स्त्री, उत्तराषाढ़ानक्षत्रम्। इतिहेमचन्द्रः।

वैषम्यं, क्ली, (विषम + भावे ष्यञ्।) विषमत्वम्। विषमशब्दात् भावे ष्यञ्प्रत्ययेन निष्पन्नम्। (नतोन्नतत्वम्। यथा, महाभारते। १२। ५६। ११४।

“समतां वसुधायाश्च स सम्यगुदपादयत्।
वैषम्यं हि परं भूमेरासीदिति च नः श्रुतम्।”)

तारतम्यम्। यथा, महाभारते।३।२०८।२१।

“मध्ये फलवैषम्यं दृश्यते कर्म्मसन्धिषु।”

दुःखम्। यथा, तत्रैव। ३। ६१। २०।

“वैषम्यं परमं प्राप्तो दुःखितो गतचेतनः।
भर्त्ता तेऽहं निबोधेदं वचनं हितमात्मनः।”)

वैषयिकः, त्रि, विषयसम्बन्धी। विषयशब्दात् ष्णिकप्रत्ययेन निष्पन्नः। (यथा, साहित्यदर्पणे। ३। २४०।

“यत्रास्मिन् सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः।”)

वैहुतं, क्ली, होमभस्म। इति हेमचन्द्रः।

वेष्टं, क्ली, (विश + “अमृणिगमिनमिहनिविश्यशां हृद्धिश्च।” उणा० ४। १५६। इति क्तन् हृद्धिश्च।) पिष्टपम्। इत्युणादिकोषः। द्यौः। वायुः। विष्णुः। इति संक्षिप्तसारोणादिवृत्तिः।

वैष्णवं, क्ली, (विष्णोरिदम्। विष्णु + अण्।) होमभस्म। इति शब्दरत्नावली। (महापुराणविशेषः। यथा, देवीभागवते। ३। १। ८।

“त्रयोविंशतिसाहस्रं वैष्णवं परमाद्भुतम्।”)

विष्णुसम्बन्धिनि, त्रि। (यथा, रघुः।११।८५।

“मां गतस्य तव धाम वैष्णवं
कोपितो ह्यसि मया दिदृक्षुणा।”)

वैष्णवः, पुं, (विष्णुर्द्देवता अस्य। अण्।) विष्णुमन्त्रोपासकः। विष्णुभक्तः। तत्पर्य्यायः। कार्ष्णः २ हारः ३। तस्य लक्षणं यथा,—

“गृहीतविष्णुदीक्षाको विष्णुसेवापरो नरः।
वैष्णवश्चात्र संग्राह्यः स्कान्दाद्युक्तानुसारतः।”

तथा च स्कान्दे।

“परमापदमापन्नो हर्षे वा समुपस्थिते।
नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी।
समात्मा सर्व्वजीवेषु निजाचारादविप्लुतः।
विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते।”

इति श्रीहरिभक्तिविलासे १२ विलासः। *।

अथ श्रीवैष्णवनिन्दादिदोषः। स्कान्दे मार्कण्डेयभगीरथसंवादे।

“यो हि भागवतं लोकमुपहासं नृपोत्तम।
करोति तस्य नश्यन्ति अर्थधर्म्मयशःसुताः।”*

अथ वैष्णवसमागमविधिः। तेजोद्रविणपञ्चरात्रे।

“वैष्णवो वैष्णवं दृष्ट्वा दण्डवत् प्रणमेद्भुवि।
उभयोरन्तरा विष्णुः शङ्खचक्रगदाधरः।”*।

अथ वैष्णवसम्माननित्यता। स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

“दृष्ट्वा भागवतं दूरात् संमुखे यो न याति हि।
न गृह्णाति हरिस्तस्य पूजां द्वादशवार्षिकीम्।”

अथ वैष्णवस्तुतिः। स्कान्दे।

“धन्योऽहं कृतकृत्योऽहं यद्यूयं गृहमागताः।
दुर्लभं दर्शनं नूनं वैष्णवानां यथा हरेः।”*।

अथ वैष्णवाभिगमनमाहात्म्यम्। स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

“संमुखं गच्छमानस्य वैष्णवानां नराधिप।
पदे पदे यज्ञफलं प्राहुः पौराणिका द्विजाः।”

अथ वैष्णवस्तुतिमाहात्म्यम्। तत्रैव।

“प्रत्यक्षं वा परोक्षं वा यः प्रशंसति वैष्णवम्।
ब्रह्महा मद्यपः स्तेयी गुरुगामी सदा नृणाम्।
मुच्यते पातकात् सद्यो विष्णुराह नृपोत्तम।”*

अथ वैष्णवसम्माननमाहात्म्यम्। शैवेपाख्यतसारोद्धारे।

“अहो! या दत्तमन्नञ्च वैष्णवाय निवेदितम्।
तदन्नं मेरुणा तुल्यं भवते च दिने दिने।”*।

अथ वैष्णवशास्त्रमाहात्म्यम्। स्कान्दे श्रीब्रह्मनारदसंवादे।

“वैष्णवानि च शास्त्राणि ये शृण्वन्ति पठन्ति च।
धन्यास्ते मानवा लोके तेषां कृष्णः प्रसीदति।”

इति च श्रीहरिभक्तिविलासे १० विलासः।

तस्य लक्षणमाहात्म्यादि यथा,—

“फलसन्त्यागरहिता विष्णुभक्ताश्च वैष्णवाः।
मत्प्रीतिभक्तिकामास्ते सर्व्वदा सर्व्वकर्म्मसु।
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रवेक्ष्यति।
जीवन्मुक्तं वैष्णवन्तं वेदाः सर्व्वे वदन्ति च।
पुरुषाणां शतं पूर्व्वं पैतृकञ्च शतं परम्।
मातामहस्य च शतं मातरं मातृमातरम्।
भगिनीं भ्रातरञ्चैव भागिनेयञ्च मातुलम्।
श्वश्रूञ्च श्वशुरञ्चैव गुरुपत्नीं गुरोः सुतम्।
गुरुञ्च ज्ञानदातारं मित्रञ्च सहचारिणम्।
भृत्यं शिष्यं तथा चेटीं प्रजाः स्वाश्रमसन्निधौ।
उद्धरेदात्मना सार्द्धं मन्त्रग्रहणमात्रतः।
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः।
तस्य संस्पर्शमात्रेण पूतं तीर्थञ्च भारतम्।
तस्यैव पादरजसा सद्यः पूता वसुन्धरा।
पादोदकन्तु तं स्थानं तीर्थमेव भवेत् ध्रुवम्।”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः। *।

अपि च।

श्रीशिव उवाच।

“शिवमस्तु च साधूनां वैष्णवानां सतामिह।
अवैष्णवानामसतामशिवञ्च पदे पदे।
ददाति वैष्णवेभ्यश्च यो दुःखं मूर्च्छितो जनः।
श्रीकृष्णस्य च संहर्त्ता विघ्नस्तस्य पदे पदे।
अवैष्णवानां हृदयं न हि शुद्धं सदा मलम्।
श्रीकृष्णमन्त्रस्मरणं मनोनैर्म्मल्यकारणम्।
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः।
विष्णुमन्त्रोपासनया क्षीयते कर्म्म वै नृणाम्।
ये ब्राह्मणा वैष्णवाश्च स्वतन्त्राः परमं पदम्।
यान्त्यन्योपासकाश्चान्ये सार्द्धञ्च प्रकृतेर्लये।
वर्णानां ब्राह्मणाः श्रेष्ठाः साधवो वैष्णवा यदि।
विष्णुमन्त्रविहीनेभ्यो द्विजेभ्यः श्वपचो वरः।
परिपक्वाश्चाविपक्वा वैष्णवाः साधवश्च ते।
सन्ततं पतिताश्चैव विष्णुचक्रं सुदर्शनम्।
यथा वह्नौ शुष्कदारुं भस्मीभूतं भविष्यति।
तथा पापं वैष्णवेषु तेजस्विषु हुताशनात्।
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रवेक्ष्यति।
तं वैष्णवं महापूतं प्रवदन्ति मनीषिणः।
प्रशंसितं पितृणाञ्च शतं मातामहस्य च
सहोदराश्च जननीसुहृदस्तस्य वैष्णवाः।
गयायां पिण्डदानेन पिण्डदाः पिण्डभोजिनम्।
समुद्धरन्ति पुंसाञ्च वैष्णवाश्च शतं शतम्।
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः।
यमस्तस्मान्महाभीतो वैनतेयाद्यथोरगः।
निष्पुनन्त्येव तीर्थानि गङ्गादीनि च भारते।
कृष्णमन्त्रोपासकाश्च स्पर्शमात्रेण वाक्पते।
पापानि पापिनां तीर्थे यावन्ति प्रभवन्ति च।
नश्यन्ति तानि सर्व्वाणि वैष्णवस्पर्शमात्रतः।
कृष्णमन्त्रोपासकानां रजसा पादपद्मयोः।
सद्यो मुक्ता पातकेभ्यो हृष्टा पूता वसुन्धरा।
वायुश्च वरुणो वह्निः सूर्य्यः सर्व्वं पुनाति च।
एते पूता वैष्णवानां स्पर्शमात्रेण लीलया।
अहं ब्रह्मा च शेषश्च साक्षी धर्म्मश्च कर्म्मणाम्।
एते हृष्टाश्च वाञ्छन्ति वैष्णवानां समागमम्।
फलं कर्म्मानुसारेण सर्व्वेषां भारते भवेत्।
न भवेत्तद्वैष्णवे च सिद्धधान्ये यथाङ्कुरम्।
हन्ति तेषां कर्म्म पूर्व्वं भक्तानां भक्तवत्सलः।

कृपया स्वपदं तेभ्यो ददात्येव कृपानिधिः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५७ अध्यायः ॥*॥
अन्यच्च ।

श्रीभगवानुवाच ।
“अहं प्राणा वैष्णवानां मम प्राणाश्च वैष्णवाः ।
तानेव द्वेष्टि यो मूढ़ो ममात्मनां स हिंसकः ॥
पुत्त्रान् पौत्त्रान् कलत्राश्च राजलक्ष्मीं विधाय च ।
ध्यायन्ते सन्ततं ये मां को मे तेभ्यः परः प्रियः ॥
परा भक्ता तु मे प्राणा न च लक्ष्मीर्न शङ्करः ।
न भारती न च ब्रह्मा न दुर्गा न गणेश्वरः ॥
न ब्राह्मणा न वेदाश्च न वेदजननी सुराः ।
न गोपी न च गोपाला न राधा प्राणतः प्रिया ॥
इत्येवं कथितं सर्व्वं सत्यं सारञ्च वास्तवम् ।
न प्रशंसापरं तेषां ते च प्राणाधिकाः प्रियाः ॥
मां द्विषन्ति च ये मूढ़ा ज्ञानहीनाश्च वञ्चिताः ।
स्वात्मानञ्च न जानन्ति ते यान्ति निरयं चिरम् ॥
ये द्विषन्ति च मद्भक्तान् प्राणानामधिकप्रियान् ।
तेषां शास्ताहं तूर्णञ्च परत्र निरयं चिरम् ॥
प्रभवोऽहञ्च सर्व्वेषामीश्वरः परिपालकः ।
तथापि न स्वतन्त्रोऽहं भक्ताधीनो दिवानिशम् ॥
गोलोके वाथ वैकुण्ठे द्विभुजञ्च चतुर्भुजम् ।
रूपमात्रमिदं सर्व्वं प्राणा मे भक्तसन्निधौ ॥
यद्भक्तं भक्तदत्तञ्च भक्षणीयञ्च तन्मम ।
अभक्ष्यं द्रव्यमन्येन दत्तञ्चेदन्टतोपमम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २५ अध्यायः ॥
अपि च ।
“सर्व्वान् कामान् परित्यज्य दृढ़भक्तिञ्च साधयेत्
स एव वैष्णवाचारः कामसङ्कल्पवर्ज्जितः ॥”
इत्याचारभेदतत्त्वम् ॥ * ॥
अपरञ्च ।
“रजस्वलायाः संभोगे कर्म्मक्षेत्रे च भारते ।
त्वयोक्तञ्च भवेत् पापं नात्र स्वर्गे च सुन्दरि !
कर्म्मक्षेत्रे च तत् कर्म्म यद्वेदोक्तं शुभाशुभम् ।
न भवेद्वैष्णवानाञ्च ज्वलतां ब्रह्मतेजसा ॥
यथा प्रदीपवह्नौ च शुष्काणि च तृणानि च ।
भवन्ति भस्मीभूतानि तथा पापानि वैष्णवे ॥
वह्निसूर्य्यब्राह्मणेभ्यस्तेजीयान् वैष्णवः सदा ।
रचितो विष्णुचक्रेण स्वतन्त्रो मत्तकुञ्जरः ॥
न विचारो न भोगश्च वैष्णवानां स्वकर्म्मणाम् ।
लिखितं चास्ति कौथुम्यां कुरु प्रश्नं बृहस्पतिम् ॥
अस्मांश्च सर्व्वे जानन्ति चन्द्रवंशांश्च वैष्णवान् ।
देवमन्यं न सेवन्ते चन्द्रवंश्या हरिं विना ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥
अपि च ।

सूत उवाच ।
“अथ वेण्यराजाय सोऽश्वमेधेन भूपतिः ।
ब्राह्मणेभ्यो ददौ दानं नानारूपमनेकधा ॥
जगाम वैष्णवं लोकं सकायो जगतीपतिः ।
विष्णुना सह धर्म्मात्मा नित्यमेव प्रवर्त्तते ।
एतत्ते सर्व्वमाख्यातं चरितं तस्य भूपतेः ॥
यद्वेणो वैष्णवद्वेषी सर्व्वधर्म्मबहिष्कृतः ।
पृथुना पुत्त्रतीर्थेन पवित्रोऽगात् परं पदम् ॥
सत्पुत्त्रं परमं तीर्थं प्राप्य मुच्यन्ति पूर्व्वजाः ।
पितापि ऋणमुक्तः स्यात् जाते पुत्त्रे महात्मनि ॥
वैष्णवो यदि पुत्त्रः स्यात् स तारयति पूर्व्वजान् ।
पितृनधस्तना वंशास्तारयन्त्यतिपावनाः ॥”
इति पाद्मे भूमिखण्डे १२० अध्यायः ॥ * ॥
अथ वैष्णवधर्म्मतत्कर्त्तव्यपञ्चविधपूजे । यथा,—

श्रीपार्व्वत्युवाच ।
“वैष्णवानाञ्च यद्धर्म्मं कर्म्मापि तस्य तद्वद ।
यत् कृत्वा मानवाः सर्व्वे भवाम्भोधौ तरन्ति वै ॥

ईश्वर उवाच ।
अथ द्वादश शुद्धिश्च वैष्णवानामिहोच्यते ।
गृहोपसर्पणञ्चैव तथानुगमनं हरेः ॥
भक्त्या प्रदक्षिणञ्चैव पादयोः शोधनं पुनः ॥१॥२
पूजार्थं पत्रपुष्पाणां भक्त्यैवोत्तोलनं हरेः ।
करयोः सर्व्वशुद्धीनामियं शुद्धिर्विशिष्यते ।३।४॥
तन्नामकीर्त्तनञ्चैव गुणानाञ्चैव कीर्त्तनम् ।
भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते ॥ ५ ॥
तत्कथाश्रवणञ्चैव तस्योत्सवनिरीक्षणम् ।
श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिहोच्यते । ६ ।
७ । ८ । ९ ॥
पादोदकञ्च निर्म्माल्यं मालानामपि धारणम् ।
उच्यते शिरसः शुद्धिः प्रणतस्य हरेः पुनः ॥१०॥
आघ्राणं गन्धपुष्पादेर्निर्म्माल्यस्य तपोधने ।
विशुद्धिः स्यादनन्तस्य घ्राणस्यापि विधीयते ।११।
१२ ॥
तत्र पुष्पादिकं यच्च कृष्णपादयुगार्पितम् ।
तदेव पावनं लोके तद्धि सर्व्वं विशोधयेत् ॥*॥
पूजा च पञ्चधा प्रोक्ता तासां भेदान् शृणुष्व मे ।
अभिगमनमुपादानं योगः स्वाध्याय एव च ॥
इज्याः पञ्चप्रकारार्च्चाः क्रमेण कथयामि ते ।
तत्राभिगमनं नाम देवतास्थानमार्ज्जनम् ॥
उपलेपनिर्म्माल्यदूरीकरणमेव च । १ ।
उपादानं नाम गन्धपुष्पादिचयनं यथा । २ ॥
इज्या नाम हि चेष्टादेः पूजनञ्च यथार्थतः ।३ ।
स्वाध्यायो मन्त्रराजस्य अर्थसन्धानतो जपः ॥
सूक्तस्तोत्रादिपाठश्च हरेः संकीर्त्तनं तथा ।
तन्नामशास्त्राभ्यासश्च स्वाध्यायः परिकीर्त्तितः ॥
४ ॥
योगो नाम सुदेवस्य चात्मने येव भावना ।५ ।
इति पञ्चप्रकारार्च्चाः कथितास्तव सुव्रते ॥”
इति पाद्मे पातालखण्डे १० अध्यायः ॥*॥
अथ वैष्णवानां खाद्याखाद्यम् ।
“सायं प्रातर्द्विजातीनां शास्त्रोक्तमशनं तथा ।
विष्णुभुक्तावशिष्टेन दिनपापात् प्रमुच्यते ॥
अन्नं ब्रह्मा रसो विष्णुः खादयन्नाम चोच्चरन् ।
एवं ज्ञात्वा तु यो भुङ्क्ते सोऽन्नदोषैर्न लिप्यते ॥
अलावुं वर्त्तुलाकारं मसूरञ्च सवल्कलम् ।
तालं शुक्लन्तु वार्त्ताकुं न खादेद्वैष्णवो जनः ॥
वटाश्वत्थार्कपत्रेषु कुम्भीतिन्दुकपत्रयोः ।
कोविदारकदम्बे च न खादेद्वैष्णवो नरः ॥
श्रावणे वर्ज्जयेच्छाकं दधि भाद्रपदे त्यजेत् ।
दुग्धन्तु आश्विने मासि कार्त्तिके चामिषं त्यजेत् ॥
दुग्धमन्नञ्च जम्बीरं यद्विष्णोरनिवेदितम् ।
वीजपूरञ्च शाकञ्च प्रत्यक्षलवणन्तथा ॥
यदि दैवाच्च भुञ्जन्ते तदा तन्नामकं स्मरेत् ॥
कलायं कङ्गुधान्यानि शाकञ्च हिलमोचिकाम् ।
षष्टिकाकालशाकञ्च मुस्तकं क्रमुकं तथा ॥
लवणे सैन्धवं प्रोक्तं वचा च दधिसर्पिषी ।
पयोऽनुद्धृतसारञ्च पनसाम्रे हरीतकी ॥
पिप्पलीजीरकञ्चैव नागरङ्गकतिन्तिड़ी ।
कदलीलवलीधात्रीफलान्यगुड़मैक्षवम् ।
अतैलपक्वं भुञ्जीत हविष्येषु प्रपद्यते ॥”
इति पाद्मे पातालखण्डे ११ अध्यायः ॥*॥
अथ वैष्णवलक्षणविशेषादिः ।
“माहात्म्यमथ भक्तानां यत् कार्य्यं यच्च लक्षणम् ।
करणीयं हरेर्विप्र सावधानमनाः शृणु ॥
हरिरेव सदा सेव्यो नान्यो यस्य महात्मनः ।
लोकस्य जगदाराध्यो हरिभक्तः स उच्यते ॥
अनन्यनिर्म्माल्यभुजो भक्तास्तेऽनन्यमानसाः ।
गोविन्दोपासका ये तु नित्यं देवान्तरं विना ॥
अनन्यधिषणोऽनन्यहृदयोऽनन्यसेवकः ।
केवलं हरिसेवज्ञः स भक्तः परिकीर्त्तितः ॥
सत्त्व सत्त्वाश्रयं सत्त्वगुणं सेवेत केशवम् ।
योऽनन्यत्वेन मनसा सात्त्वतः समुदाहृतः ॥
सर्व्वदेवान् परित्यज्य नित्यं भगवदाश्रयः ।
एतत्तदीयसेवायां स भागवत उच्यते ॥
विहाय काम्यकर्म्मादीन् भजेदेकाकिनं हरिम् ।
सत्यं सत्त्वगुणोपेतो भक्त्या तं सात्त्वतं विदुः ॥
मुकुन्दपादसेवायां तन्नामश्रवणेऽपि च ।
कीर्त्तने च रतो भक्तो नान्वः स्यात् स्मरणे हरेः ॥
वन्दनार्च्चनयोर्भक्तिरनिशं दास्यसख्ययोः ।
रतिरात्मार्पणे यस्य दृढ़ानन्तस्य सात्त्वतः ॥
स्मर्त्तव्यः कीर्त्तनीयश्च श्रोतव्यः पूज्य एव च ।
यस्यैको विष्णुराराध्यो वैष्णवः समुदाहृतः ॥
यथालब्धोऽपि सन्तुष्टः समचित्तो जितेन्द्रियः ।
हरिपादाश्रयो लोके विप्राः साधुरनिन्दकः ॥
निर्व्वैरः सदयः शान्तो दम्भाहङ्कारवर्ज्जितः ।
निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते ॥
लोभमोहमदक्रोधकामादिरहितः सुखी ।
कृष्णाङ्घ्रिशरणः साधुः सहिष्णुः समदर्शनः ॥
यद्विष्णूपासना नित्यं विष्णुर्यस्येश्वरो मुने ।
पूज्यो यस्यैकविष्णुः स्यादिष्टो लोके स वैष्णवः ।
हरेः सर्व्वावताराणां मत्स्यादीनामुपासकाः ।
तन्मन्त्रेष्टा अनन्यास्ते वैष्णवास्ते न संशयः ॥
यदिष्टो रघुनाथस्तु नृसिंहो वामनो हरिः ।
एतन्मन्त्रो वराहादिर्वासुदेवः स वैष्णवः ॥
विष्णोरुपासको दासस्तन्मन्त्रस्तत्तदाश्रयः ।
तमाहुर्वैष्णवं लोके विष्णुसेवापरायणम् ॥
साध्वी यथा पतिं नारी नान्यं जानाति तं विना ।

जगदीशं तथानन्यो यदि विष्णुं स वैष्णवः ।
समचित्तो मुनिः पूतो गोविन्दचरणाश्रयः ।
सर्व्वभूतदयः कार्ष्णो विवेकी साधुरुत्तमः ॥
कृष्णार्पितप्राणशरीरबुद्धिः
शान्तेन्द्रियश्चीर्णुतसम्पदादिः ।
आसक्तचित्तः श्रवणादिभक्ति-
ष्वस्त्वेह साधुः सततं हरेर्यः ॥
कृष्णाश्रयः कृष्णकथानुरक्तः
कृष्णेष्टमन्त्रस्तुतिपूजनीयः ।
कृष्णानिशध्यानमनास्त्वनन्यो
यो वै स साधुर्मुनिवर्य्य कार्ष्णः ॥
यस्येष्टं श्रीभागवतं शास्त्रं श्रीभगवान् हरिः ।
भगवत्या समं लक्ष्म्या भक्त्या भागवतश्च सः ॥
ये कृष्णश्रवणाद्धृष्टा ये तदुच्छिष्टभोजिनः ।
ये कृष्णोपासका लोका दासास्ते परि-
कीर्त्तिताः ॥"

इति पाद्मे उत्तरखण्डे ६६ अध्यायः ॥*॥

अपि च ।

ब्रह्मोवाच ।

"अहो ध्यानैरपि ध्यातुं देवैस्त्वं न हि शक्यसे ।
स त्वं वैष्णवदेहेषु तिष्ठसीत्यद्भुतं महत् ॥
चणमात्रमपि स्वामिंस्तुष्टे त्वयि न किं भवेत् ।
स त्वं वैष्णवसङ्गेन भ्रमसीत्यद्भुतं महत् ॥
के वैष्णवाः कैटभारे ! किं वा तेषाञ्च लक्षणम् ।
कथं ज्ञेयाश्च ते सर्व्वे तन्मे कथय केशव ॥

भगवानुवाच ।

वैष्णवानां लक्षणानि कल्पकोटिशतैरपि ।
सम्यग्वक्तुं न शक्नोमि संक्षेपात् शृणु सत्तम ॥
संसारो वैष्णवाधीनो देवा वैष्णवपालिताः ।
अहञ्च वैष्णवाधीनस्तस्मात् श्रेष्ठाश्च वैष्णवाः ॥
क्षणमात्रमपि ब्रह्मन् विहाय वैष्णवं जनम् ।
तिष्ठामि नाहमन्यत्र वैष्णवो मम बान्धवः ॥
कामक्रोधविहीना ये हिंसादम्भविवर्ज्जिताः ।
लोभमोहविहीनाश्च ते ज्ञेया वैष्णवा जनाः ॥
अमत्सरा दयायुक्ताः सर्व्वभूतहितैषिणः ।
सत्योक्तिभाषिणश्चैव ज्ञेयास्ते वैष्णवा जनाः ॥
पितृभक्ता मातृभक्ता जातिपोषणतत्पराः ।
धर्म्मोपदेशिनो ये च ज्ञेयास्ते वैष्णवा जनाः ॥
समानं ये च पश्यन्ति त्वाञ्च माञ्च महेश्वरम् ।
कुर्व्वन्ति पूजामतिथेर्ज्ञेयास्ते वैष्णवा जनाः ॥
वेदविद्यानुरक्ता ये द्विजभक्तिरताः सदा ।
नपुंसकाः परस्त्रीषु ज्ञेयास्ते वैष्णवा जनाः ॥
एकादशीव्रतं ये च भक्तिभावेन कुर्व्वते ।
गायन्ति मम नामानि ज्ञेयास्ते वैष्णवा जनाः ॥
देवायतनकर्त्तारस्तुलसीमाल्यधारिणः ।
रुद्राक्षधारिणो ये च ज्ञेयास्ते वैष्णवा जनाः ॥
मत्पादसलिलैर्येषां सिक्तानि मस्तकानि वै ।
मम नैवेद्यमश्नन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
शङ्खचक्रगदापद्मैरङ्कितानि ममायुधैः ।
ब्रह्मन् येषां शरीराणि ज्ञेयास्ते वैष्णवा जनाः ॥
कर्णयोश्चैव शीर्षेषु तुलसीपत्रमुत्तमम् ।
सततं दृश्यते येषां ज्ञेयास्ते वैष्णवा जनाः ॥
तृणानि तुलसीमूलाद्ये छिन्दन्ति नरोत्तमाः ।
सिञ्चन्ति तुलसीं ये च विज्ञेयास्ते च वैष्णवाः ॥
तुलसीमूलमृद्भिश्च तिलकानि नयन्ति ये ।
तुलसीकाष्ठपङ्कैश्च विज्ञेया वैष्णवा जनाः ॥
गङ्गास्नानपरा ये च गङ्गानामपरायणाः ।
गङ्गामाहात्म्यवक्तारो विज्ञेयास्ते च वैष्णवाः ॥
धात्रीफलस्रजो येषां गलेषु कमलासन ।
यजन्ति ये च तन्मन्त्रैर्व्विज्ञेयास्ते च वैष्णवाः ॥
शालग्रामशिला येषां गृहे वसति सर्व्वदा ।
शास्त्रं भागवतञ्चैव ज्ञेयास्ते वैष्णवा जनाः ॥
सम्मार्ज्जयन्ति ये नित्यं मम स्थानानि सर्व्वदा ।
दीपं यच्छन्ति तत्रैव ज्ञेयास्ते वैष्णवा जनाः ॥
शीर्णं मन्मन्दिरं ये च कुर्व्वते नूतनं पुनः ।
तत्रायनञ्च शोभाञ्च ज्ञेयास्ते वैष्णवा जनाः ॥
अभयं ये च यच्छन्ति भीरुभ्यश्चतुरानन ।
विद्यादानञ्च विप्रेभ्यो ज्ञेयास्ते वैष्णवा जनाः ॥
क्षुत्तृट्प्रपीड़ितेभ्यश्च ये यच्छन्त्यन्नमम्बु च ।
कुर्य्युर्ये रोगिशुश्रूषां ज्ञेयास्ते वैष्णवा जनाः ॥
आरामकारिणो ये च पिप्पलारोपिणोऽपि च ।
गोसेवां ये च कुर्व्वन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
अत्यन्तभक्ता ये ब्रह्मन् पितृयज्ञं प्रकुर्व्वते ।
कुर्व्वन्ति दीनशुश्रूषां ज्ञेयास्ते वैष्णवा जनाः ॥
तड़ागग्रामकर्त्तारः कन्यादानप्रदाश्च ये ।
सेवन्ते स्वगुरौ ये च ज्ञेयास्ते वैष्णवा जनाः ॥
सेवन्ते ज्येष्ठभगिनीं ज्येष्ठं भ्रातरमेव च ।
परनिन्दां न कुर्व्वन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
देवस्वं ब्राह्मणद्रव्यं परस्वञ्च चतुर्म्मुख ।
पश्यन्ति विषवद्द्ये च ज्ञेयास्ते वैष्णवा जनाः ॥
पाषण्डसङ्गरहिताः शिवभक्तिपरायणाः ।
चतुर्द्दशीव्रतरता ज्ञेयास्ते वैष्णवा जनाः ॥
बहुनात्र किमुक्तेन भाषितेन पुनः पुनः ।
मदर्च्चां ये च कुर्व्वन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
वैष्णवेषु गुणाः सर्व्वे दोषलेशो न विद्यते ।
तस्माच्चतुर्मुख त्वञ्च वैष्णवो भव साम्प्रतम् ॥
समाराधय मां नित्यं क्रियायोगैः प्रजापते ।
सर्व्वमेव शुभद्रं ते भविष्यति न संशयः ॥
भूयः पूर्व्वस्थितमिव सृज्यतां सकलं जगत् ।
इत्युक्त्वान्तर्द्दधे देवस्तत्रैव जगदीश्वरः ॥
ततस्तु पूर्व्ववद्ब्रह्मा सृष्टवान् सकलं जगत् ।
क्रियायोगैर्हरिं यष्ट्वा जगाम परमं पदम् ॥
ये पठन्ति ममाध्यायं भक्त्या नारायणाग्रतः ।
सर्व्वपापविनिर्म्मुक्ता अन्ते यान्ति हरेः पदम् ॥"

इति पाद्मे क्रियायोगसारे २ अध्यायः ॥*॥

कालिङ्ग उवाच ।

"स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥"

[margin note, handwritten/printed fragment: ।रदर्शितस्तरेण कथितो रहस्यः परमो मम । वैष्णवानि चयोर्योऽभूत् संवादस्तं ब्रवीमि ते । शास्त्रे]

इति श्रीविष्णुपुराणे तृतीयेऽंशे यमगीतं ७ अध्यायः ॥*॥ अपि च ।

"कर्म्मक्षयाणि कर्म्माणि यतः साधुर्हरिः
स्वयम् ।
मन्ये न भौतिको देहो वैष्णवस्य जगत्त्रये ॥"

इति कल्किपुराणे १० अध्यायः ॥

वैष्णवाचमनं, क्ली, (वैष्णवस्याचमनम् ।) विष्णुपूजादिपूर्व्वकर्त्तव्यकर्त्तृसंस्कारकाङ्ग--ॐकारादिनमोऽन्तचतुर्थ्यन्ततन्नामोच्चारणपूर्व्वकत्रिर्ज्जलपानादि । यथा,—

"त्रिःपाने केशवं नारायणं माधवमप्यथ ।
प्रक्षालने द्वयोः पाण्योर्गोविन्दं विष्णुमप्युभौ ॥
मधुसूदनमेकञ्च मार्ज्जनेऽन्यं त्रिविक्रमम् ।
उन्मार्ज्जनेऽप्यधरयोर्व्वामनश्रीधरावुभौ ॥
प्रक्षालने पुनः पाण्योर्हृषीकेशञ्च पादयोः ।
पद्मनाभं प्रोक्षणे तु मूर्द्ध्नि दामोदरं ततः ॥
वासुदेवं मुखे सङ्कर्षणं प्रद्युम्नमित्युभौ ।
नासयोर्नेत्रयुगलेऽनिरुद्धं पुरुषोत्तमम् ॥
अधोक्षजं नृसिंहञ्च कर्णयोर्नाभितोऽच्युतम् ।
जनार्द्दनञ्च हृदये उपेन्द्रं मस्तके ततः ॥
दक्षिणे तु हरिं बाहौ वामे कृष्णं यथाविधि ।
नमोऽन्तञ्च चतुर्थ्यन्तमाचामेत् क्रमतो जपन् ॥
अशक्तः केवलं दक्षं स्पृशेत् कर्णं तथा च वाक् ।
कुर्व्वीतालभनं वापि दक्षिणश्रवणस्य वै ॥"

तथा च वाक् इति यतस्तथैव वचनमस्ति । कुर्व्वीतालभनं वापीति मार्कण्डेयपुराणवचनमतो न पौनरुक्तम् । इति श्रीहरिभक्तिविलासे ३ विलासः ॥

वैष्णवाचारः, पुं, (वैष्णवानामाचारः ।) विष्णुभक्तानामाचरणम् । यथा,—

"अथाचारा बहुविधाः शिष्टाचारानुसारतः ।
श्रीवैष्णवानां कर्त्तव्या लिख्यन्तेऽत्र समासतः ॥"

अथाचाराः श्रीविष्णुपुराणे और्व्वसगरसंवादे गृहस्थाचारकथनारम्भे ।

"देवगोब्राह्मणान् सिद्धान् वृद्धाचार्य्यांस्तथा-
र्च्चयेत् ।
द्विकालञ्च नमेत् सन्ध्यामग्नीनुपचरेत्तथा ॥
सदानुपहते वस्त्रे प्रशस्ताश्च तथौषधीः ।
गारुड़ानि च रत्नानि बिभृयात् प्रयतो नरः ॥
प्रसिद्धामलकेशश्च सुगन्धिश्चारुवेशधृक् ।
किञ्चित् परस्वं न हरेत् नाल्पमप्यप्रियं वदेत् ।
प्रियञ्च नानृतं ब्रूयान्नान्यदोषानुदीरयेत् ।
नान्याश्रयं तथा वैरं रोचयेत् पुरुषेश्वरः ॥
न दुष्टयानमारोहेत् कूलच्छायां न संश्रयेत् ।
विद्विष्टपतितोन्मत्तबहुवैरातिकीटकैः ॥
बन्धकीबन्धकीभर्त्तृक्षुद्रानृतकथैः सह ।
तथातिव्ययशीलैश्च परिवादरतैः शठैः ॥
बुधो मैत्रीं न कुर्व्वीत नैकः पन्थानमाश्रयेत् ।
नावगाहेज्जलौघस्य वेगमग्रे जनेश्वर ॥
प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं तरोः ।
न कुर्य्याद्दन्तसङ्घर्षं न कृष्णीयाच्च नासिकाम् ।
नासंवृतमुखो जृम्भेत् श्वासकाशौ विवर्ज्जयेत् ।
नोच्चैर्हसेत् सशब्दञ्च न मुञ्चेत् पवनं त्वधः ॥
नखान्न वादयेच्छिन्द्यान्न तृणं न महीं लिखेत् ।

न श्मश्रु भक्षयेल्लोष्टान्न मृद्नीयाद्विचक्षणः ।
ज्योतींष्यमेध्याशस्तानि नाभिवीक्षेत च प्रभो ।
न हुङ्कुर्य्याच्छवं चैव शवगन्धो हि सोमजः ॥
चतुष्पथं चैत्यतरुं श्मशानोपवनानि च ।
दुष्टस्त्रीसन्निकर्षञ्च वर्ज्जयेन्निशि सर्व्वदा ॥
पूज्यदेवद्विजज्योतिश्छायां नातिक्रमेद्बुधः ।
नैकः शून्याटवीं गच्छेन्न च शून्यं गृहं व्रजेत् ॥
केशास्थिकण्टकामेध्यबलिभस्मतुषांस्तथा ।
स्नानार्द्रां धरणीं चैव दूरतः परिवर्ज्जयेत् ॥
नानार्य्यानाश्रयेत् कांश्चिन्न जिह्मं रोचयेद्बुधः ।
उपसर्पेन्न च व्यालांश्चिरं तिष्ठेन्न चोत्थितः ॥
यथेष्टभोजकांश्चैव तथा देवपराङ्मुखान् ।
वर्णाश्रमक्रियातीतान् दूरतः परिवर्ज्जयेत् ॥
अतीवजागरस्वप्नौ तद्वत् स्थानासने बुधः ।
न सेवेत तथा शय्यां व्यायामञ्च नरेश्वर ॥
दंष्ट्रिणः शृङ्गिणश्चैव प्राज्ञो दूरेण वर्ज्जयेत् ।
अवश्यायञ्च राजेन्द्र पुरोवातातपौ तथा ॥
न स्नायान्न स्वपेन्नग्नो न चैवोपस्पृशेद्बुधः ।
मुक्तकच्छश्च नाचामेद्देवाद्यर्च्चाञ्च वर्ज्जयेत् ॥
नैकवस्त्रः प्रवर्त्तेत द्विजवाचनके जपे ।” * ॥
किञ्च ।
“न च निर्द्धूनयेत् केशान्नाचामेन्नैव चोत्थितः ।
पादेन नाक्रमेत् पादं न पूज्याभिमुखं नयेत् ॥
अपसव्यं नैव गच्छेद्देवागारचतुष्पथान् ।
मङ्गल्यपूज्यांश्च तथा विपरीतान्न दक्षिणाम् ॥
सोमार्काग्न्यम्बुवायूनां पूज्यानाञ्च न संमुखम् ।
कुर्य्यात् ष्ठीवनविण्मूत्रसमुत्सर्गांश्च पण्डितः ॥
तिष्ठन्न मूत्रयेत्तद्वत् पन्थानं नावमूत्रयेत् ।
श्लेष्मविण्मूत्ररक्तानि सर्व्वदैव न लङ्घयेत् ॥
श्लेष्मष्ठीवनकोत्सर्गो नान्नकाले प्रशस्यते ।
बलिमङ्गलजप्यादौ न होमे न महाजने ॥
योषितो नावमन्येत न चासां विश्वसेद्बुधः ।
न चैवेर्षी भवेत्तासु नाधिकुर्य्यात् कदाचन ॥
मङ्गल्यपुष्परत्नाज्यपूज्याननभिवाद्य च ।
न निष्क्रामेत् गृहात् प्राज्ञः सदाचारपरो नरः ॥
चाकालगर्ज्जितादौ तु पर्व्वस्वाशौचकादिषु ।
अनध्यायं बुधः कुर्य्यादुपरागादिके तथा ॥
शर्वातपादिके च्छत्री दण्डी रात्र्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥
नोर्द्ध्वं न तिर्य्यक् दूरं वा निरीक्षन् पर्य्यटेद्बुधः ।
युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन् ।” * ॥
किञ्च ।
“प्रियमुक्तं हितं नैतदिति मत्वा न तद्वदेत् ।
श्रेयस्तद्धितं वाच्यं यद्यप्यत्यन्तमप्रियम् ॥
प्राणिनामुपकाराय यदेवेह परत्र च ।
कर्म्मणा मनसा वाचा तदेव मतिमान्
भजेत् ।” * ॥
वृहन्नारदीये सदाचारप्रसङ्गे ।
“असावहमिति ब्रूयाद्द्विजो वै ह्यभिवादने ।
श्राद्धं व्रतं जपं दानं देवताभ्यर्च्चनं तथा ॥
यज्ञञ्च तर्पणञ्चैव कुर्व्वन्तं नाभिवादयेत् ।
तथा स्नानं प्रकुर्व्वन्तं धावन्तमशुचिन्तथा ॥
भुञ्जानञ्च शयानञ्च अभ्यक्तशिरसन्तथा ।
भिक्षान्नधारिणं चैव रमन्तं जलमध्यगम् ॥
कृताभिवादनो यो न कुर्य्यात् प्रत्यभिवादनम् ।
नाभिवाद्यः स विज्ञेयो यथा शूद्रस्तथैव सः ॥” *
मार्कण्डेयपुराणे मदालसालर्कसंवादे ।
“असत्प्रलापमनृतं वाक्पारुष्यञ्च वर्ज्जयेत् ।
असच्छास्त्रमसद्वादमसत्सेवाञ्च पुत्रक ॥
केशप्रसाधनादर्शदर्शनं दन्तधावनम् ।
पूर्व्वाह्ण एव कार्य्याणि देवतानाञ्च तर्पणम् ॥
उदक्यादर्शनं स्पर्शं वर्जेत् संभाषणं तथा ।
न चाभीक्ष्णं शिरःस्नानं कुर्य्यान्निष्कारणं नरः ॥
शिरःस्नातश्च तैलेन नाङ्गं किञ्चिदपि स्पृशेत् ।
पन्था देयो ब्राह्मणानां राज्ञो दुःखातुरस्य च ॥
विद्याधिकस्य गुर्व्विण्या भारार्त्तस्य महीयसः ।
मूकान्धबधिराणाञ्च मत्तस्योन्मत्तकस्य च ॥
पुंश्चल्याः कृतवैरस्य बालस्य पतितस्य च ।
उपानद्वस्त्रमाल्यानि धृतान्यन्यैर्न धारयेत् ॥
उपवीतमलङ्कारं करकञ्चैव वर्ज्जयेत् ।
न छिन्नबाहुजङ्घश्च प्राज्ञस्तिष्ठेत् कदाचन ॥
न चापि विक्षिपेत् पादौ पाणी न च धूनयेत् ।
मूर्खोन्मत्तव्यसनिनो विरूपान् मायिनस्तथा ॥
न्यूनाङ्गांश्चाधमांश्चैव नोपहासेन दूषयेत् ।
परस्य दण्डं नोद्यच्छेत् शिक्षार्थं पुत्रशिष्ययोः ॥
नानुलेपनमादद्यादस्नातः स्नातको क्वचित् ।
न चापि रक्तवासाः स्याच्चित्रवासधरोऽपि वा ॥
क्षुरकर्म्मणि चान्ते च स्त्रीसम्भोगे च पुत्रक ।
स्नायीत चैलवान् प्राज्ञः कटभूमिमुपेत्य च ।
युगपच्चलनमप्यत्र विश्रयान्न विचक्षणः ॥”
कटभूमिं श्मशानम् ।
“नाचक्षीत धयन्तीं गां जलं नाञ्जलिना
पिबेत् ॥”
धयन्तीं पिबन्तीम् ।
“शौचकालेषु सर्व्वेषु गुरुष्वल्पेषु वा पुनः ।
न विलम्बेत शौचार्थं न मुखेनानलं धमेत् ॥
विप्रुषो मक्षिकाद्याश्च दुष्टसङ्गाददोषिणः ।
अजाश्वौ मुखतो मेध्यौ न गोर्व्वत्सस्य चाननम् ॥
मातुः प्रस्नवने मेध्यं शकुनिः फलपातने ।
उदक्याशौचिनस्ताश्च सूतिकान्त्यावसायिनः ।
स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः ॥
नारं स्पृष्ट्वास्थि सस्नेहं स्नातः शुध्यति मानवः ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥
न चालपेत् जनं द्विष्टं वीरहीनां तथा स्त्रियम् ।
देवतातिथिसच्छास्त्रयज्ञविद्वादिनिन्दकैः ।
कृत्वा तु स्पर्शमालापं शुद्ध्यतेऽर्कावलोकनात् ॥
अवलोक्य तथोदक्यामन्त्यजान् पतितं शठम् ।
विधर्म्मिसूतिकाषण्डविवस्त्रान्त्यावसायिनः ॥
मृतनिर्यातकांश्चैव परदाररताश्च ये ।
एतदेव हि कर्त्तव्यं प्राज्ञैः शोधनमात्मनः ॥” * ॥
किञ्च ।
“यद्यपि कुर्व्वतो मात्रा जुगुप्सामेति पुत्रक ।
तत् कर्त्तव्यमशङ्केन यन्न गोप्यं महाजने ॥” * ॥
भविष्योत्तरे श्रीकृष्णयुधिष्ठिरसंवादे ।
“उपासते न ये पूर्व्वां द्विजाः सन्ध्यां न पश्चि-
माम् ।
सर्व्वांस्तान् धार्म्मिको राजा शूद्रकर्म्मणि योज-
येत् ॥
दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टोत्सर्ज्जनं भूप सदा कार्य्यं हितैषिणा ॥
उच्छिष्टो न स्पृशेच्छीर्षं सर्व्वे प्राणास्तदाश्रयाः ।
केशग्रहान् प्रहारांश्च शिरस्येतानि वर्ज्जयेत् ॥
न पाणिभ्यामुभाभ्यान्तु कण्डूयाच्चातु वै शिरः ॥”
किञ्च ।
“सुवासिनीं गुर्व्विणीञ्च वृद्धं बालातुरौ तथा ।
भोजयेत् संस्कृतान्नेन प्रथमं चरमं गृही ॥
अघं स केवलं भुङ्क्ते यद्वै गोवाहनादिके ।
यो भुङ्क्ते पाण्डवश्रेष्ठ प्रेक्षतामप्रदाय च ॥
वर्ज्जयेद्दधि सक्तुञ्च रात्रौ धानाश्च वासरे ॥”
किञ्च ।
“स्रजञ्च नापकर्षेत न बहिर्धारयीत च ।
गृहे पारावता धन्याः शुकाश्च सहकारिकाः ॥”
कौर्म्मे व्यासगीतायाम् ।
“तृणं वा यदि वा शाकं मृदं वा जलमेव वा ।
परस्यापहरन् जन्तुर्नरकं प्रतिपद्यते ॥
न राज्ञः प्रतिगृह्णीयान्न शूद्रात् पतितादपि ।
नान्यस्माद्याचकत्वञ्च निन्दिताद्वर्ज्जयेद्बुधः ॥
नित्यं याचनको न स्यात् पुनस्तन्नैव याचयेत् ।
प्राणानपहरत्येष याचकस्तस्य दुर्म्मतिः ॥
न देवद्रव्यहारी स्याद्विशेषेण द्विजोत्तमाः ।
ब्रह्मस्वञ्च नापहरेदापद्यपि कदाचन ॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
देवस्वं चापि यत्नेन सदा परिहरेत्ततः ॥
न धर्म्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् ।
व्रतेन पापं प्रच्छाद्य कुर्व्वन् स्त्रीशूद्रदम्भनम् ।
प्रेत्येह चेदृशो विप्रो गर्ह्यते ब्रह्मवादिभिः ।
देवद्रोहाद्गुरुद्रोहः कोटिकोटिगुणाधिकः ॥
ज्ञानापवादो नास्तिक्यं तस्मात् कोटिगुणा-
धिकम् ।” * ॥
किञ्च ।
“हिमवद्विन्ध्ययोर्मध्ये पूर्व्वपश्चिमयोः शुभम् ।
मुक्त्वा समुद्रयोर्द्देशं नान्यत्र निवसेद्द्विजः ॥
कृष्णो वा यत्र चरति मृगो नित्यं स्वभावतः ।
पुण्याश्च विश्रुता नद्यस्तत्र वा निवसेद्द्विजः ॥
अर्द्धक्रोशान्नदीकूलं वर्ज्जयित्वा द्विजोत्तमाः ॥”
किञ्च ।
‘अग्निना भस्मना चैव सलिलेन विशेषतः ।
द्वारेण स्तम्भमार्गेण षड्भिः पङ्क्तिर्व्विभिद्यते ॥
परक्षेत्रे चरन्तीं गां न चाचक्षीत कस्यचित् ।
न सूर्य्यपरिवेषं वा नेन्द्रचापं न चाग्निकम् ॥
परस्मै कथयेद्विद्वान् शशिनं वा कथञ्चन ।
तिथिं पक्षस्य न ब्रूयान्नक्षत्राणि विनिर्द्दिशेत् ॥
न देवगुरुविप्राणां दीयमानन्तु वारयेत् ।
निन्दयेद्द्यो गुरून् देवान् वेदं वा सोपबृंहणम् ।
कल्पकोटिशतं साग्रं रौरवे पच्यते नरः ।
तूष्णीमासीत निन्दायां न ब्रूयात् किञ्चिदुत्तरम् ॥

कर्णौ पिधाय गन्तव्यं न चैनमवलोकयेत् ।
वर्ज्जयेद्वै रहस्यञ्च परेषां गूहयेद्बुधः ॥
विवादं स्वजनैः सार्द्धं न कुर्य्याद्वै कदाचन ।
न पापं पापिनां ब्रूयादपापं वा द्विजोत्तमाः ॥
नेक्षेतोद्यन्तमादित्यं शशिनं चानिमित्ततः ।
नास्तं यान्तं न वारिस्थं नोपसृष्टं न मध्यगम् ॥
तिरोहितं वाससा वा न दर्शान्तरगामिनम् ।
नग्नां स्त्रियं पुमांसं वा पुरीषं मूत्रमेव वा ॥
पतितव्यङ्गचाण्डालानुच्छिष्टान्नावलोकयेत् ।
न युक्तबन्धनाङ्गां वा नोन्मत्तं मत्तमेव वा ॥
स्पृशेन्न भोजने पत्नीं नैनामीक्षेत मेहतीम् ।
क्षुवन्तीं जृम्भमाणां वा नासनस्थां यथासुखम् ॥
नोदके चात्मनो रूपं न कूलं श्वभ्रमेव वा ।
न शूद्राय मतिं दद्यात् कृशरं पायसं दधि ॥
नोच्छिष्टं वा घृतमधु न च कृष्णाजिनं हविः ।
न कुर्य्यात् कस्यचित् पीड़ां सुतं शिष्यञ्च ताड़येत् ॥
नात्मानमवमन्येत दैन्यं यत्नेन वर्ज्जयेत् ।
न च शिष्टान्न सत् कुर्य्यान्नात्मानं शंसयेद्बुधः ॥
न नद्याश्च नदीं ब्रूयात् पर्व्वतेषु न पर्व्वतम् ।
आवसेत्तेन नैवापि यस्त्यजेत् सहवासिनम् ॥
शिरोऽभ्यङ्गावशिष्टेन तैलेनाङ्गं न लेपयेत् ।
रोमाणि च रहस्यानि स्वानि स्वानि च न स्पृशेत् ॥
न पाणिपादवाङ्नेत्रचापलानि समाश्रयेत् ।
नाभिहन्याज्जलं पद्भ्यां पाणिना न कदाचन ॥
न घातयेदिष्टिकाभिः फलानि न फलेन च ।
न म्लेच्छभाषां शिक्षेन्न कर्षेच्च पदासनम् ॥
नोत्सङ्गे भक्षयेद्भक्ष्यान् गाश्च संवेशयेन्न हि ।
नाक्षैः क्रीड़ेन्न धावेत स्त्रीभिर्व्वादं न चाचरेत् ॥
न दन्तैर्नखलोमानि छिन्द्यात् सुप्तं न बोधयेत् ।
न बालातपमासेवेत् प्रेतधूमं विवर्ज्जयेत् ॥
नैकः सुप्यात् शून्यगृहे स्वयं नोपानहौ वहेत् ।
नाकारणाद्वा निष्ठीवेन्न बाहुभ्यां नदीं तरेत् ॥
न पादक्षालनं कुर्य्यात् पादेनैव कदाचन ।
नाग्नौ प्रतापयेत् पादौ न कांस्ये धावयेद्बुधः ॥
नाभिप्रसारयेद्देवान् ब्राह्मणान् गामथापि वा ।
न स्पृशेत् पाणिनोच्छिष्टो विप्रगोब्राह्मणानलान् ॥
न चैवान्नं पदा वापि न देवप्रतिमां स्पृशेत् ।
नोत्तरेदनुपस्पृश्य स्रवन्तीं नो व्यतिक्रमेत् ॥
चैत्यं वृक्षं नैव छिन्द्यान्नाप्सु ष्ठीवनमुत्सृजेत् ।
न चाग्निं लङ्घयेद्धीमान् नोपदध्यादधः क्वचित् ॥
न चैनं पादतः कुर्य्यात् तिलबद्धं निशि त्यजेत् ।
न कूपमवरोहेत नावेक्षेताशुचिः क्वचित् ॥
अग्नौ न प्रक्षिपेदग्निं नाद्भिः प्रशमयेत्तथा ।
सुहृन्मरणमार्त्तिं वा न स्वयं श्रावयेत् परान् ॥
अपण्यमथ पण्यं वा विक्रयं न प्रयोजयेत् ।
पुण्यस्थानोदकस्थाने सीमान्तं वा कृषेन्न तु ॥
न भिन्द्यात् पूर्व्वसमयं सत्योपेतं कदाचन ।
परस्परं पशून् व्यालान् पक्षिणो न च योधयेत् ॥
कारयित्वा स्वकर्म्माणि कारून् विद्वान् न वञ्चयेत् ।
वहिर्गन्धञ्च कुद्वारप्रवेशञ्च विवर्ज्जयेत् ॥
नैकश्चरेत् सभां विप्रः समवायञ्च वर्ज्जयेत् ।
न वीजयेद्वा वस्त्रेण न देवायतने स्वपेत् ।
नाग्निगोब्राह्मणादीनामन्तरेण व्रजेत् क्वचित् ।
नाक्रामेत् कामतश्छायां ब्राह्मणानां गवामपि ॥
स्वान्तु नाक्रामयेच्छायां पतिताद्यैर्न रोगिभिः ।
वर्ज्जयेन्मार्ज्जनीरेणुं वस्त्रस्नानघटोदकम् ॥
नाश्नीयात् पयसा तक्रं न बीजान्युपजीवयेत् ॥
विवत्सायाश्च गोक्षीरमौष्ट्रं वा निर्द्दशस्य च ।
आविकं सन्धिनीक्षीरमपेयं मनुरब्रवीत् ॥
हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः ।
दद्यादतिथये नित्यं बुध्येत परमेश्वरम् ॥
भिक्षामाहुर्ग्रासमात्रमग्रं तस्माच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमिष्यते ॥”
मार्कण्डेये ।
“भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा ।
अदत्त्वा तु न भोक्तव्यं यथा विभवमात्मनः ॥”*
काशीखण्डे ।
“नैवोत्कटासनेऽश्नीयान्नाग्नौ वस्त्रशुचि क्षिपेत् ॥
श्राद्धं कृत्वा परश्राद्धे योऽश्नीयात् ज्ञानवर्जितः ।
दातुः श्राद्धफलं नास्ति भोक्ता किल्बिषभुग्भवेत् ॥
नोत्पाटयेल्लोमनखं दशनेन कदाचन ।
करजैः करजच्छेदं करेणैव विवर्ज्जयेत् ॥
अपद्वारे न गन्तव्यं स्ववेश्मपरवेश्मनोः ।
उत्कोचद्यूतदेवार्थद्रव्यं दूरात् परित्यजेत् ॥
निष्ठीवनञ्च श्लेष्माणं गृहात् दूरे विनिःक्षिपेत् ।
उद्धृत्य पञ्च मृत्पिण्डान् स्नायात् परजलाशये ।
अनुद्धृत्य च तत्कर्त्तुरेनसः स्यात्तुरीयभाक् ॥”
मात्स्ये ।
“यस्तु पाणितले भुङ्क्ते यस्तु फुत्कारसंयुतम् ।
प्रसृताङ्गुलिभिर्यस्तु तस्य गोमांसवच्च तत् ॥”
अत्रिस्मृतौ ।
“न्यूनाधिकस्तनी या गौर्याथवाभक्ष्यचारिणी ।
तयोर्दुग्धं न होतव्यं न पातव्यं कदाचन ॥
अजा गावो महिष्यश्च यामेध्यमपि भक्षयेत् ।
हव्ये कव्ये च तद्दुग्धं गोमयञ्च विवर्ज्जयेत् ॥
अङ्गुल्या दन्तकाष्ठञ्च प्रत्यक्षलवणन्तथा ।
मृत्तिकाप्राशनञ्चैव तुल्यं गोमांसभक्षणैः ॥”
अत्रापवादो मनुस्मृतौ ।
“सामुद्रं सैन्धवञ्चैव लवणे परमाद्भुते ।
प्रत्यक्षे अपि ते ग्राह्ये निषेधस्त्वन्यगोचरः ॥”
अत्रिस्मृतौ ।
“दिवा कपित्थच्छाया च निशायां दधिभोजनम् ।
कार्पासं दन्तकाष्ठञ्च शक्रादपि हरेत् श्रियम् ॥”
विष्णुस्मृतौ च ।
“कपिलायाः पयः पीत्वा शूद्रस्तु नरकं व्रजेत् ।
होमशेषं पिबेद्विप्रो विप्रः स्यादन्यथा पशुः ।
पारक्यं पुनर्लेखं तत्तच्छाखोक्तमन्यथा ।
यदत्र लिखितं किञ्चित्तत् क्षन्तव्यं महात्मभिः ॥
आचाराश्चेदृशाः सन्ति परेऽपि बहुलाः सताम् ।
ते लोकशास्त्रतो ज्ञेया अपेक्ष्या यदि वैष्णवैः ॥
नित्यत्वमेषां माहात्म्यमप्यत्र लिखितात् पुरा ।
सदाचारस्य नित्यत्वान्माहात्म्याच्च सुसिद्ध्यति ॥”
इति श्रीहरिभक्तिविलासे नित्यकृत्यसमापनो नाम ११ विलासः ॥

वैष्णवी, स्त्री, (विष्णोरियम् । विष्णु + अण् । स्त्रियां ङीप् ।) विष्णुशक्तिः । यथा,—
“एषा त्रिशक्तिरुद्दिष्टा नयसिद्धान्तगामिनी ।
एषा श्वेता परा सृष्टिः सात्त्विकी ब्रह्मसंहिता ॥
एषैव कृष्णा तमसि रौद्री देवी प्रकीर्त्तिता ।
अष्टादश यथा कोट्यो वैष्णव्या भेद उच्यते ।
या विष्णो राजसी शक्तिः पालिनी चैव वैष्णवी ॥”
इति वाराहे त्रिशक्तिमाहात्म्यनामाध्यायः ॥
अपि च ।
“शङ्खचक्रगदाधारी विष्णुमाता तथारिहा ।
विष्णुरूपाथवा देवी वैष्णवी तेन गीयते ॥”
इति देवीपुराणे ४५ अध्यायः ॥
अपरञ्च ।
“विष्णुभक्ता विष्णुरूपा विष्णोः शक्तिस्वरूपिणी ।
सृष्टौ च विष्णुना सृष्टा वैष्णवी तेन कीर्त्तिता ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥
दुर्गा । इति शब्दरत्नावली ॥ गङ्गा । यथा, पद्मपुराणम् ।
“विष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता ।
पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात् ॥”
इत्यादि आह्निकाचारतत्त्वे स्नानार्थगङ्गावाहनमन्त्रः ॥ अन्यच्च ।
“विष्णुपादप्रसूतासि वैष्णवीनामधारिणी ।
सर्व्वत्र रक्ष मां नित्यं गङ्गा त्रिपथगामिनी ॥”
इति गङ्गाकवचम् ॥
अपराजिता । इति शब्दचन्द्रिका ॥ शतावरी । इति राजनिर्घण्टः ॥ तुलसी । इति शब्दमाला ॥

वैसारिणः, पुं, (विशेषेण सरतीति विसारी मत्स्यः स एव । “विसारिणो मत्स्ये ।” ५ । ४ । १६ । इति अण् ।) मत्स्यः । इत्यमरः ॥

वैस्रवणं, क्ली, (विशेषेण स्रवयतीति विस्रवणम् । तदेव । स्वार्थे अण् ।) नाभ्यां पुरुषस्य लोमवेशधारणम् । इति केचित् ॥

वैहार्य्यः, त्रि, (विशेषेण ह्रियते इति । वि + हृ + ण्यत् । विहार्य्य एव । स्वार्थे अण् ।) परिहासेन लालनीयः । श्यालसम्बन्ध्यादि । इत्यर्जुनमिश्रः ॥ यथा,—
“यथा बालेषु नारीषु वैहार्य्येषु तथैव च ।
सङ्गरेषु निपातेषु तथापद्व्यसनेषु च ।
अनृतं नोक्तपूर्व्वं मे तेन सत्येन खं व्रज ॥”
इति महाभारते उद्योगपर्व्व ॥

वैहासिकः, पुं, (विहास + ठक् ।) विहासं करोति यः । भण्ड इति ख्यातः । तत्पर्य्यायः ।

वासन्तिक: २ केलिकिल: ३ विदूषक: ४ प्रहासी ५ प्रीतिद: ६। इति हेमचन्द्र:॥ (यथा, नैषधे। १६। ६४।
"दूरारूढतिमिरजलधेर्वाडववह्निभानु-
भांनुस्तास्यैव वह्वनीकेलिवेहासिकोऽयम्॥")
वोटा, स्त्री, दासी। यथा,—
"पोटा वोटा च चेटी च दासी च कुट-
हारिका॥"
इति हेमचन्द्र:॥
वोड़:, पुं, गुवाक:। इति शब्दरत्नावली॥ जटाधरे भूरिप्रयोगे च भोड़ इति पाठ:॥
वोड्र:, पुं, गोनसमर्प:। वोड़ा इति भाषा। यथा। गोनासो मण्डली वोड्र:। इति भरतधृतविक्रमादित्य:॥ मत्स्यविशेष:। इति मेदिनी॥
वोड्री, स्त्री, पणचतुर्थांश:। इति मेदिनी॥ वुड़ि इति भाषा॥
वोढ्य:, त्रि, वहधातोस्तयप्रत्ययेन निष्पन्नमेतत्। वहनीय:। वाह्य:। इति मुग्धबोधव्याकरणम्॥ (यथा, हरिवंशे। ७५। ८८।
"वोढ्या पुङ्गवेनेव धू:सदा रथमर्हति॥"
परिणेतव्य:। यथा, महाभारते।१३।४४।४५।
"न चैतेभ्य: प्रदातव्या न वोढ्या तथाविधा॥")
वोढ़ा, [ऋ] पुं, (वहतीति। वह+तृच्। "सहिवहोरोदवर्णस्य।" ६। ३। ११२। इति अकारस्यौकार:।) भारिक:। (यथा, भागवते। ५। १०। २।
"विषमगतां स्वशिबिकां रहूगण उपधार्य्य पुरुषानधिवहत आह हे वोढ़ार: साध्वतिक्रामत॥") मूढ़:। परिणेता। इति शब्दरत्नावली॥ (यथा, मनु:। ८। २०४।
"अन्यां चेद्दर्शयित्वान्या वोढु: कन्या प्रदीयते। उभे ते एकशुल्केन वहेदित्यब्रवीन्मनु:॥")
सूत:। इति मेदिनी॥ अनड्वान्। ऋषभ:। इति राजनिर्घण्ट:॥ (यथा, महाभारते। ११। २६। ५।
"तपोऽर्थीयं ब्राह्मणी धत्त गर्भं
गौर्वोढ़ारं धावितारं तुरङ्गी॥"
वहनकर्त्तरि, त्रि। यथा, कुमारे। १। १५।
"भागीरथीनिर्झरशीकराणां
वोढ़ा मुहु: कम्पितदेवदारु:॥")
वोढु:, पुं, मुनिविशेष:। यथा,—
"सनकश्च सनन्दश्च तृतीयश्च सनातन:।
कपिलश्चासुरिश्चैव वोढु: पञ्चशिखस्तथा।
सर्व्वे ते ह्रप्तिमायान्तु मद्दत्तेनाम्बुना सदा॥"
इत्याह्निकाचारतत्त्वम्॥
वोण्ट:, पुं, वृन्तम्। इति शब्दरत्नावली॥ वोँटा इति भाषा॥ किन्तु लिपिकरप्रमादपाठोऽयम्। यतो मूलग्रन्थे।
"तथा वोँट इति ख्याते वृन्तं प्रसवबन्धनम्॥"
वोद:, त्रि, आर्द्र:। इति त्रिकाण्डशेष:॥
वोदाल:, पुं, (वोद: आर्द्र: सन् अलतीति। अल+अच्।) मत्स्यविशेष:। बोयालि इति भाषा॥

तत्पर्य्याय:। सहस्रदंष्ट्री २ पाठीन: ३ वदालक: ४। इति शब्दरत्नावली॥
वोरक:, पुं, लेखक:। इति त्रिकाण्डशेष:॥
वोरट:, पुं, कुन्दपुष्पम्। इति त्रिकाण्डशेष:॥
वोरपट्टी, स्त्री, मन्दुरा। इति शब्दमाला॥ माडुर इति भाषा॥
वोरव:, पुं, धान्यविशेष:। वोरो इति भाषा। अस्य गुणा:।
"वोरवस्तु बुधै: प्रोक्तस्त्रिदोषस्य प्रकोपण:।
मधुरश्चाम्लपाकश्च व्रीहि: पित्तकरो गुरु:॥"
इति राजवल्लभ:॥
वोरुखान:, पुं, पाटलवर्णाश्व:। इति हेमचन्द्र:॥
वोलं, क्ली, (वोलयति प्रायशो निमग्नं भवतीति। वुल+अच्। यद्वा, वा गतौ पिच्छादित्वात् ऊलच्।) स्वनामख्यातवणिग्द्रव्यम्। तत्पर्य्याय:। रक्तापहम् २ सुरूमम् ३ सुरसम् ४ पिण्डकम् ५ विषम् ६ निर्लोहम् ७ बर्ब्बरम् ८ पिण्डम् ९ सौरभम् १० रक्तगन्धकम् ११ रसगन्धम् १२ महागन्धम् १३ विन्नम् १४ शुभगन्धम् १५ विश्वगन्धम् १६ गन्धरसम् १७ व्रणारि: १८। अस्य गुणा:।
"वोलश्च कटु तिक्तोष्णं कषायं रक्तदोषनुत्।
कफपित्तामयान् हन्ति प्रदरादिरुजापहम्॥"
इति राजनिर्घण्ट:॥
तत्पर्य्यायगुणा:।
"वोलं गन्धरस: प्राणपिण्डगोपरसा: समा:।
वोलं रक्तहरं शीतं मेध्यं दीपनपाचनम्॥
मधुरं कटु तिक्तञ्च यद्वं स्वेदत्रिदोषजित्।
ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशुद्धकृत्॥"
इति भावप्रकाश:॥
वोल:, पुं, (वातीति। वा+ऊलच्।) रसगन्ध:। इत्यमर:॥
वोलक:, पुं, लेखक:। इति शब्दरत्नावली॥
वोल्लाह:, पुं, अश्वविशेष:। यथा,—
"वोल्लाहस्त्वयमेव स्यात् पाण्डुकेशरबालधि:।"
इति हेमचन्द्र:॥
वोहित्थं, क्ली, यानपात्रम्। इति हेमचन्द्र:॥ जाहाज इति भाषा॥
वौ(बौ)द्धं, क्ली, (बुद्धेन कृतम्। बुद्ध+अण्।) बुद्धकृतनिरीश्वरशास्त्रम्। तत् सर्व्वै: शास्त्रकारै: खण्डितं अतएवाग्राह्यम्। जिनधर्म्म:। यथा,
"ततो बृहस्पति: शक्रमकरोद्बलदर्पितम्।
ग्रहशान्तिविधानेन पौष्टिकेन च कर्म्मणा॥
गत्वाथ मोहयामास राजपुत्त्रान् बृहस्पति:।
जिनधर्म्मं समास्थाय वेदवाह्यं स वेदवित्॥
वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिप:।
वेदवाह्यान् परिज्ञाय हेतुवादसमन्वितान्।
जघान शक्रो वज्रेण सर्व्वधर्म्मबहिष्कृतान्॥"
इति मात्स्ये सोमवंशानुकीर्त्तनं नाम २४ अ:॥
बुद्धसम्बन्धिनि, त्रि॥
वौषट्, व, (उह्यतेऽनेन हविरिति। वह+बाहुलकात् डौषट्।) देवहविर्दानमन्त्र:। तत्पर्य्याय:। स्वाहा २ श्रौषट् ३ वषट् ४ स्वधा ५। इत्य-

मर:॥ एते पञ्च शब्दा देवहविर्दाने वह्निमुखाहुतौ वर्त्तन्ते। देवाय हविषो दानं देवहविर्दानम्। तत्र देवा इन्द्रादय: अत्र पितरो देवता इति स्मृतेस्तेऽपि देवा हविर्दान इत्यनेन एते मन्त्रा इति सूचितम्। अमन्त्रके स्वाहैव हविर्भुजमिति रघु:। स्वाहायं मन्त्रभेदे स्त्रियां स्वाहाग्निसयोषितीति कोषान्तरम्। स्वाहा इत्यादि। श्रौषट् तालव्यादि मूर्द्धन्यमध्यम्। वौषट् वषट्द्वयं मूर्द्धन्यमध्यम्। स्वधा इत्यादि। इन्द्राय स्वाहा। इत्यादिप्रयोग:। इति भरत:॥
व्यंशक:, पुं, (विगतोऽंशो विभागो यस्य। छेदादिना प्रायो विभागानर्हत्वादस्य तथात्वम्।) पर्व्वत:। इति त्रिकाण्डशेष:॥
व्यंसक:, पुं, (वि+अंस+ण्वुल्।) धूर्त्त:। इति हेमचन्द्र:॥
व्यंसित:, त्रि, (वि+अंस+क्त:।) प्रतारित:। इति त्रिकाण्डशेष:॥
व्यक्त:, त्रि, (वि+अञ्जू व्याप्तौ+क्त:।) प्राज्ञ:। इत्यमर:॥ स्फुट:। इति मेदिनी॥ (यथा, साहित्यदर्पणे। ३। १।
"विभावेनानुभावेन व्यक्त: सञ्चारिणा तथा।
रसतामेति रत्यादि: स्थायी भाव: सचेतसाम्॥")
पुं, विष्णु:। यथा,—
"व्यक्तो वायुरधोक्षज:।"
इति तस्य सहस्रनामस्तोत्रम्॥
व्यक्तदृष्टार्थ:, पुं, (व्यक्तं स्फुटं यथा स्यात् तथा दृष्टोऽर्थो येन।) साक्षी। तत्पर्य्याय:। प्रत्यक्षी २। इति त्रिकाण्डशेष:॥
व्यक्तरूप:, पुं, (व्यक्तं रूपं यस्य।) विष्णु:। यथा,
"अहश्शो व्यक्तरूपश्च सहस्रजिदनन्तजित्।"
इति तस्य सहस्रनामस्तोत्रम्॥
स्पष्टरूपयुक्ते, त्रि॥
व्यक्ति:, स्त्री, (व्यज्यतेऽनयेति। वि+अञ्ज+क्तिन्।) पृथगात्मिका। इत्यमर:॥ जन:। इति हेमचन्द्र:॥ स्फुटता च। (यथा, रघु:।१।१०।
"तं सन्त: श्रोतुमर्हन्ति सदसद्व्यक्तिहेतव:।
हेम्न: संलक्ष्यते ह्यग्नौ विशुद्धि: श्यामिकापि
वा॥"
भूतमात्रम्। यथा, गीतायाम्। ८। १८।
"अव्यक्ताद्व्यक्तय: सर्व्वा: प्रभवन्त्यहरागमे॥"
"अव्यक्तादीनि भूतानि।" इति तट्टीकायां स्वामी॥ न्यायशास्त्रोक्तशक्त्यपदार्थ:। यथा, साहित्यदर्पणे। २। २५।
"सामर्थ्यमौचिती देश: कालो व्यक्ति: स्वरादय:।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव:॥")
व्यग्र:, त्रि, (विरुद्धं अगतीति। अग+रन्प्रेति साधु:।) आसक्त:। (यथा, महानिर्व्वाणतन्त्रे। ३। १२४।
"लुब्धा धनार्जने व्यग्रा: सदा चञ्चलमानसा:॥")
आकुल:। इत्यमर:॥ (यथा, कुमारे।७।२।
"वैवाहिकै: कौतुकसंविधानै-
र्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम्॥"

सम्भ्रमः। इति श्रीधरस्वामी। यथा, भागवते। ३। १८। ५।

"तं व्यग्रचक्रं दितिजाधमेन
स्वपार्षदमुख्येन विषज्जमानम्।")

पुं, विष्णुः। यथा,—

"प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः।"

इति तस्य सहस्रनामस्तोत्रम्।

व्यङ्गः, पुं, (विगतानि अङ्गानि यस्य।) भेकः। इति मेदिनी। (विगतानि अङ्गानि यस्मात्।) मुखरोगविशेषः। तस्य लक्षणं यथा,—

"क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः।
मुखमागत्य सहसा मण्डलं विसृजत्यतः।
नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत्॥"

इति माधवकरः॥*॥

तस्य चिकित्सा।

"वटाङ्कुरा मसूराश्च प्रलेपाद्व्यङ्गनाशनः।
व्यङ्गे मञ्जिष्ठया लेपः प्रशस्तो मधुयुक्तया॥
अथवा लेपनं शस्तं शशस्य रुधिरेण च।
जातीफलस्य लेपस्तु हरेद्व्यङ्गञ्च नीलिकाम्॥
वटस्य पाण्डुपत्राणि मालती रक्तचन्दनम्।
कुष्ठं कालीयकं लोध्रं एभिर्लेपं प्रयोजयेत्॥"

इति भावप्रकाशः।

(त्रि, विगतं अङ्गं यस्य।) हीनाङ्गः। इति मेदिनी। (यथा, महाभारते। ९। १६। २०।

"यद्येनमपि मातङ्गं मामिवाङ्कविभेदनात्।
न करिष्यस्यनङ्गं वा व्यङ्गं वापि यशस्विनम्॥")

व्यङ्ग्यः, त्रि, व्यञ्जनया बोध्योऽर्थः। यथा,—

"वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥"

इति साहित्यदर्पणे २ परिच्छेदः।

व्यच, शि व्याजे। सम्बन्धे। इति कविकल्पद्रुमः॥ (तुदा०-कुटा०-पर०-सक०-सेट्।) व्याजश्छलः। शि, विचति सतं खलः। छलयति इत्यर्थः। अविचीत् विव्याच। इति दुर्गादासः।

व्यजः, पुं, (व्यजत्यनेनेति। वि+अज+"गोचर-सञ्चरेति।" ३। ३। ११९। इति घः। निपातनादजेर्वीभावो न भवति।) व्यजनम्। विपूर्व्वाजधातोरल्प्रत्ययेन निष्पन्नमिदम्।

व्यजनं, क्ली, (व्यजत्यनेनेति। वि+अज+ल्युट्। 'वा यौ।' २।४।५७। इति पक्षे वीभावो नास्ति।) तालवृन्तकम्। इत्यमरः॥ पाखा इति भाषा॥ (यथा, ऋतुसंहारे। १। ८।

"सचन्दनाम्बुव्यजनोद्भवानिलैः
सहारयष्टिस्तनमण्डलार्पणैः।
सवल्लकीकाकलिगीतनिस्वनैः
प्रबुध्यते सुप्त इवाद्य मन्मथः॥")

अस्य सामान्यगुणः। मूर्च्छादाहतृष्णाघर्म्मश्रमनाशित्वम्। तालव्यजनगुणः। त्रिदोषशमनत्वम्। लघुत्वञ्च। वंशव्यजनगुणः। रूक्षत्वम्। उष्णत्वम्। वायुपित्तकारित्वञ्च। वेत्रवस्त्रमयूरपुच्छव्यजनगुणः। त्रिदोषनाशित्वम्। वालव्यजनगुणः। तेजस्करत्वम्। मक्षिकादिनिवारकत्वञ्च। इति राजवल्लभः।

व्यञ्जकः, पुं, (व्यनक्तीति। वि+अञ्ज+ण्वुल्।) अभिनयः। इत्यमरः॥ द्वे हृद्गतक्रोधादिभावाभिव्यञ्जके। व्यनक्तीति व्यञ्जकः। अञ्ज व्यक्तिगतिम्रक्षणेषु णकः। आङ्गिकसात्त्विकवाचिकाहार्य्यभेदात् व्यञ्जकश्चतुर्व्विधः। अभिमुखं नीयते अर्थोऽनेन इति अभिनयः। णीञ् प्रापणे अल्। हस्तादिभिः शस्त्रघातादिसूचनमभिनयः। घटाद्याकारसूचकं करादिसंस्थानमभिनयः इत्यन्येऽपि। इति भरतः॥ व्यञ्जनया प्रतिपादकः। (यथा, साहित्यदर्पणे।२।११।

"अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा॥"

प्रकाशके, त्रि। यथा, मनुः। २। ६८।

"उत्पत्तिव्यञ्जकः पुण्यः कर्म्मयोगं निबोधत॥")

व्यञ्जनं, क्ली, (व्यज्यते म्रक्ष्यते अन्नादि संयोज्यतेऽनेनेति। वि+अञ्ज+ल्युट्।) अन्नोपकरणम्। तत्तु सूपशाकादि। इति राजनिर्घण्टः॥ तत्पर्य्यायः। तेमनम् २ निष्ठानम् ३। इत्यमरः॥ तेमः ४। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८। ६७। २।

"आनो भर व्यञ्जनं गामश्वमभ्यञ्जनम्॥")

अस्य गुणाः।

"व्यञ्जनं शाकमत्स्याख्यं हृद्यं वृष्यञ्च पुष्टिदम्।
द्रव्येण येन येनेह व्यञ्जनं मत्स्यमांसयोः।
तस्य तस्य तयोश्चैतद्गुणदोषैर्विभावयेत्॥"

इति राजवल्लभः।

व्यञ्जनविशेषगुणाः तत्तच्छब्दे द्रष्टव्याः॥*॥

चिह्नम्। (व्यञ्जना। यथा, साहित्यदर्पणे।३।५६।

"अवाच्यत्वादिकं तस्य वच्मि व्यञ्जनरूपणे॥")

श्मश्रु। (यथा, महाभारते। ९। १५८। ३४।

"कुत एव परित्यक्तुं सुतं शक्ष्याम्यहं स्वयम्।
बालमप्राप्तवयसमजातव्यञ्जनाकृतिम्॥")

अवयवः। दिनम्। इति मेदिनी॥ स्त्रीपुंसयोर्गुह्यदेशः। स तु उपस्थः। अर्द्धमात्रकम्। स तु ककारादिहकारान्तवर्णः। इति धरणिः (यथा, साहित्यदर्पणे। १०। ६४०।

"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥")

व्यञ्जना, स्त्री, (वि+अञ्ज+णिच्+युच्। टाप्।) शब्दस्य वृत्तिविशेषः। तस्या लक्षणं यथा,—

"विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥"

शब्दबुद्धिकर्म्मणां विरम्य व्यापाराभाव इति नयेनाभिधा लक्षणा तात्पर्य्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वा उपक्षीणासु ययान्योऽर्थो बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च वृत्तिर्व्यञ्जन-ध्वनन-गमन-प्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम। तत्र।

"अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा॥"

अभिधामूलामाह।

"अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया॥"

आदिशब्दाद्विप्रयोगादयः। उक्तं हि।

"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥"

इति॥

सशङ्खचक्रो हरिरित्यत्र शङ्खचक्रसंयोगेन हरिशब्दो विष्णुमेवाभिधत्ते। अशङ्खचक्रो हरिरिति तद्वियोगेन तमेव। भीमार्ज्जुनाविति अर्ज्जुनः पार्थः। कर्णार्ज्जुनाविति कर्णः सूतपुत्रः। स्थाणुं वन्दे भवच्छिदे इति स्थाणुः शिवः। सर्व्वं जानाति देव इति देवो भवान्। कुपितो मकरध्वज इति मकरध्वजः कामः। देवः पुरारिरिति पुरारिः शिवः। मधुना मत्तः पिक इति मधुर्वसन्तः। पातु वो दयितामुखमिति मुखं साम्मुख्यम्। विभाति गगने चन्द्र इति चन्द्रः शशी। निशि चित्रभानुरिति चित्रभानुर्वह्निः। भाति रथाङ्गमिति नपुंसकव्यक्त्या रथाङ्गं चक्रम्। स्वरस्तु वेद एव विशेषप्रतीतिकृन्न काव्य इति तस्य विषये नोदाहृतम्। इदञ्च केऽप्यसहमाना आहुः स्वरोऽपि काक्वादिरूपः काव्ये विशेषप्रतीतिकृदेव। उदात्तादिरूपोऽपि मुनेः पाठोक्तदिशा शृङ्गारादिरसविशेषप्रतीतिकृदेवेति। एतद्विषये उदाहरणमुचितमेव इति तन्न तथाहि स्वराः काक्वादय उदात्तादयो वा व्यङ्ग्यरूपमेव विशेषं प्रत्याययन्ति न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियन्त्रणरूपं विशेषम्। किञ्च यदि यत्र क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयोरनुरूपस्वरवशेनैकत्र नियमनं वाच्यं तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्गः न च तथा अतएवाहुः श्लेषनिरूपणप्रस्तावे काव्यमार्गे स्वरो न गण्यते इति च नय इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण। आदिशब्दादेतावन्मात्रस्तनीत्यादौ हस्तादिचेष्टादिभिः स्तनादीनां कमलकोरकाद्याकारत्वम्। एवमेकस्मिन्नर्थेऽभिधया नियन्त्रिते या शब्दस्यान्यार्थबुद्धिहेतुः शक्तिः सा अभिधामूला व्यञ्जना। यथा मम तातपादानां महापात्रचतुर्दशभाषावारविलासिनीभुजङ्गमहाकवीश्वरश्रीचन्द्रशेखरसान्धिविग्रहिकाणाम्।

"दुर्गालङ्घितविग्रहो मनसिजं संमीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो
भोगिभिः।
नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं
धारयन्।
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः॥"

अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्य उमानाम्नी महादेवी तद्वल्लभभानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपो-

ऽर्थो बोध्यते । एवमन्यत् । * । लक्षणामूला-
माह ।
"लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम् ।
यया प्रत्याय्यते सा स्याद्व्यञ्जना लक्षणाश्रया ।"
गङ्गायां घोष इत्यादौ जलमयाद्यर्थबोधनादभि-
धायां विरतायां तटाद्यर्थबोधनाच्च लक्षणायां
विरतायां यया शीतत्वपावनत्वाद्यतिशयादि-
र्बोध्यते सा लक्षणामूला व्यञ्जना । * । एवं
शाब्दीं व्यञ्जनामुक्त्वा आर्थीं व्यञ्जनामाह ।
"वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः ।
प्रस्तावकालदेशानां काकोश्चेष्टादिकस्य च ।
वैशिष्ट्यादन्यमर्थं या बोधयेत् सार्थसम्भवा ।"
व्यञ्जना इति संबध्यते । तत्र वक्तृवाक्यप्रस्ताव-
देशकालवैशिष्ट्ये यथा मम ।
"कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः ।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-
र्दूरे पतिः कथय किं करणीयमद्य ।"
अत्र एतं देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया
प्रेष्यतामिति सखीं प्रति कयाचित् द्योत्यते । * ।
बोद्धव्यवैशिष्ट्ये यथा,—
"निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडा-
गमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्या-
न्तिकम् ।"
अत्र तदन्तिकमेव गतासीति विपरीतलक्षणया
लक्ष्यं तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्य दूती-
वैशिष्ट्याद्बोध्यते । * । अन्यसन्निधिवैशिष्ट्ये
यथा,—
"उअ णिच्चल णिप्पन्दाभिसिणीपत्तम्मि रेहइ
बलाआ ।
णिम्मल मरगअ भाअण परिट्ठिआ संख
सुत्तिव्व ।"
अत्र बलाकाया निष्पन्दत्वेन विश्वस्तत्वं तेनास्य
देशस्य विजनत्वमतः सङ्केतस्थानमेतदिति
कयापि सन्निहितप्रच्छन्नकामुकं प्रत्युच्यते ।
अत्रैव स्थाननिर्जनत्वरूपव्यङ्ग्यार्थवैशिष्ट्यं प्रयो-
जनम् ।
"भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते ।"
इत्युक्तप्रकारायाः काकोर्भेदा आकारादिभ्यो
ज्ञातव्याः । * । एतद्वैशिष्ट्ये यथा,—
"गुरुपरतन्त्रतया बत
दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते
नैष्यति सखि ! सुरभिसमयेऽसौ ।"
अत्र नैष्यतीत्यपि तर्हि एष्यत्येव इति काका
व्यज्यते । * । चेष्टावैशिष्ट्ये यथा,—
"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ।"
अत्र सन्ध्या सङ्केतकाल इति पद्मनिमीलनादि-
चेष्टया कयाचित् द्योत्यते । एवं वक्त्रादीनां
व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम् । * ।
"त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता ।"
अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्व्वा
अप्यनन्तरोक्ता व्यञ्जनास्त्रिविधाः । तत्र वाच्या-
र्थस्य व्यञ्जना यथा । कालो मधुरित्यादि ।
लक्ष्यार्थस्य यथा । निःशेषच्युतचन्दनमित्यादि ।
व्यङ्ग्यार्थस्य यथा । उअ णिच्चल इत्यादि । * ।
प्रकृतिप्रत्ययादिव्यञ्जकत्वं तु प्रपञ्चयिष्यते ।
"शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ।"
यतः शब्दो व्यञ्जकत्वेऽर्थान्तरमपेक्षते । अर्थो-
ऽपि शब्दं तदेकस्य व्यञ्जकत्वेऽन्यस्य सहकारि-
त्वमवश्यमङ्गीकरणीयम् ।
"अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः ।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ।"
अभिधोपाधिको वाचकः । लक्षणोपाधिको
लक्षकः । व्यञ्जनोपाधिको व्यञ्जकः । किञ्च ।
"तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।
तात्पर्य्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे ।"
अभिधाया एकैकपदार्थबोधनविरमात् वाक्यार्थ-
रूपस्य पदार्थान्वयस्य बोधिका तात्पर्य्या नाम
वृत्तिस्तदर्थश्च तात्पर्य्यार्थस्तद्बोधकञ्च वाक्यमित्य-
भिहितान्वयवादिनां मतम् । इति साहित्यदर्पणे
वाक्यस्वरूपनिरूपणो नाम द्वितीयः परि-
च्छेदः ।

व्यड्म्बकः, पुं, एरण्डः । इत्यमरः ।

व्यतिकरः, पुं, (वि + अति + कृ + अप् ।) व्यसनम् ।
(यथा, कथासरित्सागरे । ७४ । ८६ ।
"अस्मिन् व्यतिकरे वृत्ते शत्रुतामेव ते गताः ।")
व्यतिषङ्गः । इति मेदिनी । (विनाशः । यथा,
भागवते । १ । ७ । ३२ ।
"प्रजोपद्रवमालक्ष्य लोकव्यतिकरञ्च तम् ।
मतञ्च वासुदेवस्य संजहारार्ज्जुनो द्वयम् ।"
मिश्रणम् । यथा, माघे । ४ । ५३ ।
"अन्योन्यव्यतिकरचारुभिर्विचित्रै-
रत्रस्यन्नवमणिजन्मभिर्मयूखैः ।")

व्यतिक्रमः, पुं, (वि + अति + क्रम + घञ् ।) क्रम-
विपर्य्ययः । यथा,—
"सर्व्वत्र प्राङ्मुखो दाता ग्रहीता च उदङ्मुखः ।
एष एव विधिर्दाने विवाहे च व्यतिक्रमः ।"
इत्युद्वाहतत्त्वम् ।

व्यतिरिक्तः, त्रि, व्यतिरेकविशिष्टः । भिन्नः । वि-
अति-पूर्व्वरिचधातोः क्तप्रत्ययेन निष्पन्नमेतत् ।
(अधिकः । यथा, कातन्त्रचतुष्टयस्य प्रथमा-
विभक्तिर्लिङ्गार्थवचने इत्यस्य पञ्जी । "विशेषि-
व्यतिरिक्तोऽधिको व्यतिरिक्तः ।")

व्यतिरेकः, पुं, (वि + अति + रिच + घञ् ।) विना ।
अभावः । यथा । यद्व्यतिरेकज्ञानं यदुत्पत्ति-
प्रतिबन्धकं तत् तन्निष्ठयसाध्यम् । इति परा-
मर्शग्रन्थः । (यथा, कथासरित्सागरे । ३९ ।
१९९ ।
"न पतिव्यतिरेकेण स्त्रीणामपरा गतिः ।")
अलङ्कारविशेषः । यथा,—
"व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।
शैला इवोन्नताः सन्तु किन्तु प्रकृतिकोमलाः ।"
इति चन्द्रालोकः ।

व्यतिषङ्गः, पुं, (वि + अति + षञ्ज + घञ् ।) पर-
स्परमेलनम् । (यथा, महाभारते ।१२।१०३।५।
"सेनयोर्व्यतिषङ्गेण जयः साधारणोऽभवत् ।"
विनिमयः । यथा, भागवते । ५ । १३ । १९ ।
"अन्योन्यवित्तव्यतिषङ्गवृद्ध-
वैरानुबन्धो विहरन् मिथश्च ।")

व्यतिहारः, पुं, (वि + अति + हृ + घञ् ।) विनि-
मयः । यथा,—
"परिदानं विनिमयो नैमेयः परिवर्त्तनम् ।
व्यतिहारः परावर्त्तो वैमेयो विमयोऽपि च ।"
इति हेमचन्द्रः ।
(यथा, रघुः । १२ । ९२ ।
"विक्रम-व्यतिहारेण सामान्याभूद्द्वयोरपि ।
जयश्रीरन्तरावेदिर्मत्तवारणयोरिव ।")

व्यतीतः, त्रि, (वि + अति + इ + क्तः ।) अतीतः ।
गतः । यथा,—
"अर्द्धरात्रे व्यतीते तु संक्रान्तिर्यदहर्भवेत् ।
पूर्व्वे व्रतादिकं कुर्य्युः परेद्युः स्नानदानयोः ।"
इति तिथितत्त्वे भौमपराक्रमीयम् ।

व्यतीपातः, पुं, (वि + अति + पत + घञ् । "उप-
सर्गस्य घञीति ।" ६ । ३ । १२२ । इति उप-
सर्गस्य दीर्घः ।) महोत्पातः । अपयानम् ।
इति मेदिनी । विष्कम्भादिसप्तविंशतियोगान्त-
र्गतसप्तदशयोगः । तत्र सर्व्वकर्म्मवर्जनं यथा,—
"निरंशं दिवसं विष्टिं व्यतीपातञ्च वैधृतिम् ।
केन्द्रं वापि शुभैर्हीनं पापाक्रमपि वर्जयेत् ।
परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ।
गण्डव्याघातयोः षट् च नव शूलवज्रयोः ।
वैधृतिव्यतिपातौ च समस्तौ परिवर्जयेत् ।" * ।
अस्य प्रतिप्रसवमाह भौमपराक्रमे ।
"न विष्कम्भो नवा गण्डो न व्यतीपातवैधृतौ ।
चन्द्रताराबले प्राप्ते दोषा गच्छन्त्यसंशयाः ।
नवम्यङ्गारको विष्टिः शनैश्चरदिनं तथा ।
व्यतीपातो न दुष्येत्तु यस्यार्को दशमे स्थितः ।
यदि विष्टिव्यतीपातौ दिनं वाप्यशुभं भवेत् ।
हन्यतेऽमृतयोगेन भास्करेण तमो यथा ।"
इति ज्योतिस्तत्त्वम् । * ।
तत्र जातफलम् ।
"कठोरवाक्यः पिशुनस्वभावो
गदातुरो मातृहितो मनुष्यः ।
परस्य कार्य्ये कृतपक्षपातो
यस्य प्रसूतौ व्यतिपातयोगः ।"
इति कोष्ठीप्रदीपः ।
पारिभाषिकयोगविशेषः । यथा, ब्रह्माण्डः ।
"श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके ।
यद्यमा रविवारेण व्यतीपातः स उच्यते ।"
तत्र गङ्गास्नानफलं यथा । ब्रह्माण्डे ।

"संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः ।
पुष्ये स्नात्वा तु जाह्नव्यां कुलकोटीः समुद्धरेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा च भागवते । ४ । १२ । ४८ ।
"दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ।
श्रावयेत् श्रद्दधानानां तीर्थपादपदाश्रयः ॥")

व्यतीहारः, पुं, (वि + अति + हृ + घञ् । "उपसर्गस्य घञीति ।" ६ । ३ । १२२ । इति दीर्घः ।) परीवर्त्तः । इति जटाधरः ॥ परस्परमेकजातीयक्रियाकरणम् । यथा, केशाकेशि । दण्डादण्डि । इत्यादि । इति व्याकरणम् ॥

व्यत्ययः, पुं, (व्यत्ययनमिति । वि + अति + इ + "एरच् ।" ३।३।५६। इत्यच् ।) व्यतिक्रमः । तत्पर्य्यायः । व्यत्यासः २ विपर्य्यासः ३ विपर्य्ययः ४ । इत्यमरः ॥ (यथा, भागवते । ७ । १० । ४४ ।
"परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥")

व्यत्यासः, पुं, (व्यत्यसनमिति । वि + अति + अस् + घञ् ।) विपर्य्ययः । इत्यमरः ॥ (यथा, हरिवंशे । २७ । २६ ।
"मा चासि वञ्चिता भद्रे ! पत्यव्यत्यासहेतुना ।
भविष्यति हि पुत्रस्ते क्रूरकर्म्मातिदारुणः ॥")

व्यथ, ष म ङ दुःखे । चाले । भये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) दुःखं दुःखानुभवः । चालः कम्पनम् । ष, व्यथा । म, व्यथयति । ङ, व्यथते लोकः दुःखमनुभवति । कम्पते बिभेति वेत्यर्थः । केचित्तु दुःखभयचलनयोरिति पठित्वा भये चलनं भयचलनमित्याहुः । दुःखभयचलने इति पठित्वा दुःखभययोश्चलनमुत्पादनमिति गोविन्दभट्टः । इति दुर्गादासः ॥

व्यथकः, त्रि, (व्यथयति पीडयतीति । व्यथ + णिच् + ण्वुल् ।) व्यथाकारी । यथा,—
"अब्रात्यानं व्यथकस्तु स्यान्मर्म्मस्पृगरुन्तुदः ॥"
इति हेमचन्द्रः ॥
(यथा, किराते । २ । ४ ।
"परिणामसुखे गरीयसि
व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।
अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥")

व्यथा, स्त्री, (व्यथ + अङ् । टाप् ।) दुःखम् । इत्यमरः ॥ (यथा, उत्तरचरिते । १ ।
"स्नेहं दयां तथा सौख्यं यदि वा जानकीमपि ।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ॥")

व्यथितः, त्रि, (व्यथ + क्तः ।) पीडितः । (यथा, ऋतुसंहारे । ६ । १९ ।
"कान्ताननद्युतिमुषामचिरोद्गतानां
शोभां परां कुरुवकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये हि पथिकस्य भवेन्न कस्य
कन्दर्पबाणनिकरैर्व्यथितं हि चेतः ॥")
दुःखितः । यथा,—
"ततः प्रव्यथितो बाणो दुहितुः श्रुतदूषणः ।
त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीत् यदूद्वहम् ॥"
इति श्रीभागवते बाणयुद्धे ६२ अध्यायः ॥

व्यध, ञौ य ताडे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-अनिट् ।) य, विध्यति शत्रुं शूरः । ञौ, अव्यात्सीत् । कश्चित्तु द्विर्भूतस्थानिकारीभूतयकारस्य व्यधेर्वकारो वर्ग्यः अन्यत्र तु दन्त्य इति मन्वानः सनि विव्यत्सतीत्याह । इति दुर्गादासः ॥

व्यधः, पुं, (व्यधनमिति । व्यध ताडे + "व्यधजपोरनुपसर्गे ।" ३ । ३ । ६१ । इत्यप् ।) वेधः । इत्यमरः ॥ (यथा, सुश्रुते । १ । ३ ।
"शिराव्यधो धमनीनां गर्भिण्या व्याकृतिस्तथा ॥")

व्यध्यः, पुं, (व्यधाय हितः । व्यध + यत् ।) धनुर्गुणः । यथा,—
"व्यध्यस्तु प्रतिकायः स्याज्जीवाज्या भारवं गुणः ॥")
इति त्रिकाण्डशेषः ॥

व्यध्वः, पुं, (विरुद्धो अध्वा । प्रादिसमासः । उपसर्गादध्वनः । इत्यच् ।) कुत्सितपथः । तत्पर्य्यायः । दुरध्वः २ विपथः ३ कदध्वा ४ कापथः ५ । इत्यमरः ॥ कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८ । इति शब्दरत्नावली ॥ (यथा, महाभारते । २ । ७० । २३ ।
"तूर्णं प्रत्यायनस्तेतान् कामं व्यध्वगतानपि ॥")

व्यप, क क्षये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) अन्तःस्थादियुक्तः ॥ क, व्यापयति । इति दुर्गादासः ॥

व्यपदेशः, पुं, (वि + अप + दिश + घञ् ।) कपटः । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ३ । १५५ ।
"कापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥")
नाम । इति त्रिकाण्डशेषः ॥ वाक्यविशेषः । यथा,—
"व्याजेनात्माभिलाषोक्तिर्व्यपदेश इतीर्य्यते ॥"
इत्युज्ज्वलनीलमणिः ॥

व्यपाकृतिः, स्त्री, अपह्नवः । अस्वीकारः । वि-अप-आङ् पूर्व्वकृधातोः क्तिप्रत्ययेन निष्पन्नम् ॥

व्यभिचारः, पुं, (वि + अभि + चर + घञ् ।) कदाचारः । भ्रष्टाचारः । यथा,—
"व्यभिचारात्तु भर्त्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥"
इति मानवे ५ अध्यायः ॥
दोषविशेषः । तस्य लक्षणम् । साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः । इति व्यधिकरणधर्म्मावच्छिन्नाभावचिन्तामणिः ॥ स त्रिविधः ; साधारणः १ असाधारणः २ अनुपसंहारी ३ । तत्र विपक्षवृत्तित्वं साधारणत्वम् । सर्व्वसपक्षव्यावृत्तत्वमसाधारणत्वम् । व्याप्तिग्रहानुकूलैकधर्म्मोपसंहाराभावो यत्र सह्वेत्वभिमतोऽनुपसंहार्य्यः । इति सव्यभिचारचिन्तामणिः ॥

व्यभिचारिणी, स्त्री, (व्यभिचरति या । वि + अभि + चर + णिनिः । ङीप् ।) परपुरुषगामिनी । यथा,—
"हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥
सोमः शौचं ददौ तासां गन्धर्व्वश्च शुभां गिरम् ।
पावकः सर्व्वभक्षित्वं मेध्या वै योषितो ह्यतः ॥"
इति याज्ञवल्क्ये । १ । ७०-७१ ॥
इति तु स्त्रीसामान्यविषयम् ।
"व्यभिचाराद्दतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्त्तृवधे तासां तथा महति पातके ॥"
इति गारुडे ६५ अध्यायः ॥ * ॥
तस्याः परित्यागादि यथा । हारीतः । गर्भिणीमधोवर्णगां शिष्यसुतगामिनीं पापव्यसनासक्तां धनधान्यक्षयकरीं वर्ज्जयेत् । यमः ।
"स्वच्छन्दगा हि या नारी तस्यास्त्यागो विधीयते ।
न चैव स्त्रीवधः कार्य्यो न चैवाङ्गवियोजनम् ॥"
बृहस्पतिः ।
"हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत् ॥"
विशेषयति मिताक्षरायां स्मृतिः ।
"ब्राह्मणक्षत्रियविशां भार्य्याः शूद्रेण सङ्गताः ।
अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः ॥"
एतत् बलात्कारविषयम् । इत्युद्वाहतत्त्वम् ॥*॥
तस्याः पुण्यकर्म्माणि निष्फलानि धनानधिकारित्वञ्च यथा । हरिवंशीयपुण्यकव्रतोपाख्याने ।
"दानोपवासपुण्यानि सुव्रतान्यप्यरुन्धति ! ।
निष्फलान्यसतीनां हि पुण्यकानि तथा शुभे ॥"
बृहस्पतिः ।
"अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत् पिण्डं कृत्स्नमंशं लभेत च ॥"
भर्त्तुः शयनं पालयन्ती नान्यगामिनी । इति दायतत्त्वम् ॥

व्यभिचारी, [न्] पुं, (व्यभिचरतीति । वि + अभि + चर + णिनिः ।) चतुस्त्रिंशत्प्रकारशृङ्गारभावविशेषः । तद्यथा । निर्व्वेदः १ ग्लानिः २ शङ्का ३ असूया ४ मदः ५ श्रमः ६ आलस्यम् ७ दैन्यम् ८ चिन्ता ९ मोहः १० स्मृतिः ११ धृतिः १२ व्रीडा १३ चपलता १४ हर्षः १५ आवेगः १६ जडता १७ गर्व्वः १८ विषादः १९ औत्सुक्यम् २० निद्रा २१ अपस्मारः २२ सुप्तं २३ विबोधः २४ अमर्षः २५ अवहित्था २६ उग्रता २७ मतिः २८ उपालम्भः २९ व्याधिः ३० उन्मादः ३१ मरणम् ३२ त्रासः ३३ वितर्कः ३४ । इति हेमचन्द्रः ॥ (अस्य लक्षणादिकं यथा, साहित्यदर्पणे । ३ । १६८ ।
"विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः ॥"
के ते इत्याह ।

"निर्व्वेदावेगदैन्यश्रममदजड़ता औग्र्यमोहौ
विबोधः
स्वप्नापस्मारगर्व्वा मरणमलसतामर्षनिद्रा-
वहित्थाः ।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता
व्याधिसन्त्रासलज्जा
हर्षासूयाविषादाः सधृतिचपलताग्लानिचिन्ता
वितर्काः ।"
एतेषां लक्षणादिकं तत्तच्छब्दे विशेषतो द्रष्टव्यम् ।)
त्रि, व्यभिचारविशिष्टः । (स्वमार्गच्युतः । यथा,
कथासरित्सागरे । १५ । ५५ ।
"तथापि मन्त्रिताख्यातिरस्माकं मान्यथा
भवेत् ।
स्वामिसंभावनायाश्च भवेम व्यभिचारिणः ।"
अनित्यः । आगमापायी । यथा, भागवते ।
११ । ३ । ३८ ।
"नात्मा जजान न मरिष्यति नैधतेऽसौ
न क्षीयते सवनविद्व्यभिचारिणां हि ।")
व्यय, क क्षुदि । इति कविकल्पद्रुमः । (चुरा०-
पर०-सक०-सेट् ।) अन्तःस्थादियुक्तः । क,
व्याययति । क्षुदि प्रेरणे । इति दुर्गादासः ॥
व्यय, ञ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-
उभ०-सक०-सेट् ।) ञ, व्ययति व्ययते । इति
दुर्गादासः ॥
व्यय, त् क गतौ । त्यागे । इति कविकल्पद्रुमः ॥
(अदन्तचुरा०-पर०-सक०-सेट् ।) व्यययति ।
इति दुर्गादासः ॥
व्ययं, क्ली, (व्यय गतौ + अच् ।) लग्नात् द्वादश-
स्थानम् । यथा,—
"लग्नं धनं भ्रातृबन्धुपुत्त्रशत्रुकलत्त्रकाः ।
मरणं धर्म्मकर्म्मायव्यया द्वादशराशयः ॥"
इति ज्योतिस्तत्त्वम् ॥
(व्ययति गच्छतीति । व्यय गतौ + अच् । नश्वरे,
त्रि । यथा, मनुः । १ । १९ ।
"सूक्ष्माभ्यो मूर्त्तिमात्राभ्यः संभवत्यव्ययाद्-
व्ययम् ॥")
व्ययः, पुं, (वि + इ + अच् ।) अर्थस्यापगमः ।
वित्तसमुत्सर्गः । इति शब्दरत्नावली ॥ खरच्
इति पारस्यभाषा ॥ (यथा, मनुः । ९ । ११ ।
"अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ॥"
नाशः । यथा, भागवते । ४ । १ । ४९ ।
"ताविमौ वै भगवतो हरेरंशाविहागतौ ।
भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥"
परित्यागः । दानम् । यथा, रघुः । १२ । २३ ।
"आत्मानं सुमुचे तस्मात् एकेनैव व्ययेन सः ॥"
बृहस्पतिचारगतवर्षविशेषः । यथा, बृहत्-
संहितायाम् । ८ । ३६ ।
"पञ्चमं व्ययमुशन्ति शोभनं
मन्मथप्रबलमुत्सवाकुलम् ॥"
नागविशेषः । यथा, महाभारते ।१।५७।१६।
"अमाहठः कामठकः सुषेणो मानसो व्ययः ॥")
व्ययितः, त्रि, (व्यय + क्तः ।) कृतव्ययः । व्यय-
शब्दादितप्रत्ययेन व्ययधातोः क्तप्रत्ययेन वा
निष्पन्नम् ॥
व्ययी, [न्] त्रि, (व्ययोऽस्यास्तीति । व्यय +
इनिः ।) व्यययुक्तः । यथा,—
"द्रविणं परिमितमधिकव्ययिनं जनमाकुली-
कुरुते ।
क्षीणाञ्चलमिव पीनस्तनजघनायाः कुली-
नायाः ॥"
इत्युद्भटः ॥
व्यर्थं, त्रि, (विगतोऽर्थो यस्मात् ।) निरर्थकम् ।
तत्पर्य्यायः । मोघम् २ निष्फलम् ३ । इति
जटाधरः ॥ (यथा, कुमारे । ३ । ७५ ।
"शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ॥")
व्यलीकं, क्ली, (विशेषेण अलतीति । वि + अल +
"अलीकादयश्च ।" उणा० ४ । २५ । इति
कीकन्प्रत्ययेन निपातनात् साधुः ।) पीड़ार्थः ।
इत्यमरः ॥ गतिविपर्य्ययः । कामजापराधः ।
इति तट्टीकायां भरतः ॥ यथा,—
"सत्यं नैव विजानाति परेणापहृतं क्वचित् ।
सत्यञ्च संस्मरेदेतदसत्यञ्च न जल्पति ॥
व्यलीकेषु निवृत्तो यः पर्य्येति कृतनिश्चयः ।
नित्यञ्च धृतिमान् किञ्चित् परोक्षेऽपि न च
क्षिपेत् ॥
ऋतुकालेऽभिगच्छेत अपत्यार्थं स्वकां स्त्रियम् ।
ईदृशास्तु नरा भद्रे मम कर्म्मपरायणाः ॥"
इति वाराहे योनिगर्भमोक्षणनामाध्यायः ॥
अप्रियम् । (यथा, महाभारते । ३ । ६ । ९ ।
"न हि तेन मम भ्रात्रा सुसूक्ष्ममपि किञ्चन ।
व्यलीकं कृतपूर्व्वं वै प्राज्ञेनामितबुद्धिना ॥")
अकार्य्यम् । वैलक्ष्यम् । इति मेदिनी ॥ (यथा,
किराते । ३ । १९ ।
"यस्मिन्ननैश्वर्य्यकृतव्यलीकः
पराभवं प्राप्त इवान्तकोऽपि ।
धुन्वन्धनुः कस्य रणे न कुर्य्यात्
मनो भयैकप्रवणं स भीष्मः ॥")
अपराधः । इति हेमचन्द्रः ॥ (यथा, शिशु-
पालवधे । ९ । ८५ ।
"सुदृशः सरसव्यलीकतप्त-
स्तरसा श्लिष्यतः सयौवनोष्मा ॥")
प्रतारणा । इति हलायुधः ॥ (दुःखम् । इति
वैजयन्ती ॥ यथा, कुमारे । ३ । २५ ।
"दिग् दक्षिणा गन्धवहं मुखेन
व्यलीकनिःश्वासमिवोत्ससर्ज्ज ॥")
तद्वति, त्रि ॥ (यथा, भागवते । ८ । २२ । २ ।
"यद्युत्तमःश्लोक भवान् ममेरितं
वचो व्यलीकं सुरवर्य्य मन्यते ।
करोम्यृतं तन्न भवेत् प्रलम्भनं
पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥")
व्यलीकः, पुं, (वि + अल पर्य्याप्तौ + कीकन् ।)
नागरः । इति मेदिनी ॥ तत्पर्य्यायः । विदग्धः २
षट्प्रज्ञः ३ कामकेलिः ४ विदूषकः ५ पीठ-
केलिः ६ पीठमर्द्दः ७ भङ्गिलः ८ छिदुरः ९
विटः १० । इति त्रिकाण्डशेषः ॥
व्यवकलनं, क्ली, (वि + अव + कल + ल्युट् ।)
वियोगः । हीनः । अङ्कस्यान्तरकरणम् ।
बाकिकाटा इति भाषा । यथा,—
"अये बाले लीलावति ! मतिमति ! ब्रूहि
सहितान्
द्विपञ्चद्वात्रिंशत्त्रिनवतिशताष्टादशदश ।
शतोपेतानेतानयुतवियुतांश्चापि वद मे
यदि व्यक्तेर्युक्तिव्यवकलनमार्गेऽसि कुशला ॥"
इति लीलावती ॥
व्यवकलितः, त्रि, (वि + अव + कल + क्तः ।)
कृतव्यवकलनः । वियोगितः । हीनितः । व्यव-
कलने, क्ली । यथा । अथ सङ्कलितव्यवकलि-
तयोः करणसूत्रं वृत्तार्द्धम् ।
"कार्य्यः क्रमादुत्क्रमतोऽथवाङ्क-
योगो यथास्थानकमन्तरं वा ॥"
इति लीलावती ॥
व्यवच्छिन्नं, त्रि, (वि + अव + छिद् + क्तः ।)
भिन्नम् । यथा । भिन्नन्तु व्यवच्छिन्नं विशेषितम् ।
इति त्रिकाण्डशेषः ॥
व्यवच्छेदः, पुं, (वि + अव + छिद् + घञ् ।) बाण-
मुक्तिः । इति हेमचन्द्रः ॥ पृथक्त्वञ्च ॥ (विरामः ।
निवृत्तिः । यथा, भागवते । ४ । २९ । ३२ ।
"जीवस्य न व्यवच्छेदः स्याच्चेत्तत्प्रतिक्रिया ॥")
व्यवधा, स्त्री, (वि + अव + धा + "आतश्चोपसर्गे ।
इत्यङ । टाप् ।) व्यवधानम् । इत्यमरः ॥
व्यवधानं, क्ली, (वि + अव + धा + ल्युट् ।)
आच्छादनम् । तत्पर्य्यायः । तिरोधानम् २
अन्तर्द्धिः ३ अपवारणम् ४ छदनम् ५ व्यवधा ६
अन्तर्द्धा ७ पिधानम् ८ स्थगनम् ९ । इति
हेमचन्द्रः ॥ व्यवधिः १० अपिधानम् ११ ।
इति शब्दरत्नावली ॥ (यथा, रघुः । १३ । ४४ ।
"इदं विमानव्यवधानमुक्तां
पुनः सहस्रार्च्चिषि सन्निधत्ते ॥"
भेदः । यथा, भागवते । ४ । २२ । २७ ।
"परात्मनोर्यद्व्यवधानकं पुरस्तात्
स्वप्ने यथा पुरुषस्तद्विनाशे ॥"
विच्छेदः । यथा, शिशुपालवधे । ९ । ५२ ।
"वपुरम्बुविहारहिमं शुचि वा
व्यवधानभीरुकतया न वधूः ॥"
समाप्तिः । यथा, भागवते । ४ । २९ । ७७ ।
"यावदन्यं न विन्देत व्यवधानेन कर्म्मणाम् ॥")
व्यवधायकः, त्रि, (व्यवदधातीति । वि + अव +
धा + ण्वुल् ।) व्यवधानकर्त्ता । यथा । स्वर्ग-
कामो यजेत सप्तदशावरा ऋत्विक्कामाः सत्र-
मुपासीरन्निति वेदे कामिनां कर्त्तृत्वावगते-
स्तदनुपपत्त्या ऋत्विग्व्यापारान्तर्भावो न व्यव-
धायकः । इति प्रायश्चित्तविवेकः ॥
व्यवधिः, पुं, (वि + अव + धा + "उपसर्गे घोः
किः ।" ३।३।९२। इति किः ।) व्यवधानम् । इति
शब्दरत्नावली ॥ (यथा, नैषधचरिते ।२।१४।

"व्यवधावपि वा विधोः कला
म्डुमूड़ानिलया न वेद कः ॥")

व्यवसायः, पुं, (वि+अव+सो+घञ् ।) उपजीविका । पेशा इति पारस्यभाषा । यथा,—

"करोति नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेव स्याद्यद्विधेर्मनसि स्थितम् ॥"

इति हितोपदेशे २ परिच्छेदः ॥

अपि च ।

"आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥"

इति चाणक्यशतकम् ॥

अनुष्ठानम् । इति व्यवसायिशब्दार्थदर्शनात् ॥ (यथा, रामायणे । २ । ३० । ४१ ।

"सदृशं सदृशं सीते ! मम स्वस्य कुलस्य च ।
व्यवसायमनुक्रान्ता कान्ते ! त्वमतिशोभनम् ॥")

निश्चयः । यथा,—

"व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥"

इति भगवद्गीतायाम् २ अध्यायः ॥

व्यवसायात्मिकेति । इह ईश्वराराधनलक्षणे कर्मयोगे व्यवसायात्मिका परमेश्वरभक्त्यैव ध्रुवं तरिष्यामीति निश्चयात्मिका एकैव एकनिष्ठैव बुद्धिर्भवति । अव्यवसायिनामीश्वराराधनबहिर्मुखानां कामिनां कामनानन्त्यादनन्ताश्चापि कर्मफल-गुणफलत्वादि-प्रकारभेदाद्बहुशाखाश्च बुद्धयो भवन्ति । इति तट्टीकायां स्वामी ॥

विष्णुः । यथा,—

"व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ॥"

इति महाभारते तस्य सहस्रनामस्तोत्रे । १३ । १४९ । ५५ ॥ (महादेवः । यथा, तत्रैव । १३ । १७ । ५० ।

"बहुप्रसूतो विजयो व्यवसायो ह्यतन्द्रितः ॥")

व्यवसायी, [न्] त्रि, (व्यवसायोऽस्यास्तीति । इनिः ।) व्यवसायविशिष्टः । वाणिज्यकारकः । यथा,—

"कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥"

इति चाणक्यशतकम् ॥

अनुष्ठाता । यथा,—

"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥"

इति मानवे १२ अध्यायः ॥

अज्ञेभ्य इति । उभयोः प्रशस्तत्वे सति अन्यतरस्यातिशयविवक्षया श्रेष्ठतेति निर्देशो विधानादौ वदध्ययनं ज्ञानाः तेभ्यः समग्रग्रन्थाध्येतारः श्रेष्ठाः । तेभ्योऽधीतग्रन्थधारणसमर्थाः श्रेष्ठाः । तेन ग्रन्थिनः पठितविस्मृतग्रन्था बोद्धव्याः । धारिभ्योऽधीतग्रन्थार्थज्ञाः प्रकृष्टाः । तेभ्योऽनुष्ठातारः । इति तट्टीकायां कुल्लूकभट्टः ॥

व्यवसितः, त्रि, (वि+अव+सो+क्तः ।) प्रतारितः । इति भूरिप्रयोगः ॥ अनुष्ठितः । निश्चितः । इति व्यवसायिव्यवसायशब्दार्थदर्शनात् ॥ (यथा, रामायणे । २ । २४ । १ ।

"तं समीक्ष्य व्यवसितं पितुर्निर्देशपालने ।
कौशल्या बाष्पसंरुद्धा वचो धर्म्मिष्ठमब्रवीत् ॥")

व्यवस्था, स्त्री, (वि+अव+स्था+"आतश्चोपसर्गे ।" इत्यङ् । ततष्टाप् ।) शास्त्रविकल्पितविधिः । यथा,—

"दीर्घकालं ब्रह्मचर्य्यं धारणञ्च कमण्डलोः ।
देवरेण सुतोत्पत्तिर्दत्तकन्या प्रदीयते ॥"

इत्यादीन्यभिधाय ।

"एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्व्वकं बुधैः ॥"

इत्युद्वाहतत्त्वे हेमाद्रिपराशरभाष्ययोरादिपुराणम् ॥ (नियमः । यथा, कथासरित्सागरे । १०८ । ७१ ।

"एवं कृतगृहाचारो महारण्यानि शङ्करः ।
उत्पाद्य भगवांस्तत्र व्यवस्थामादिदेश सः ॥")

व्यवस्थानः, पुं, विष्णुः । यथा,—

"व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ॥"

इति महाभारते तस्य सहस्रनामस्तोत्रे । १३ । १४९ । ५५ ॥ (वि+अव+स्था+ल्युट् ।) व्यवस्थिती, स्त्री । यथा,—

"चातुर्व्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते ।
तं म्लेच्छदेशं जानीयादार्य्यावर्त्तस्ततः परम् ॥"

इत्यार्य्यावर्त्तशब्दटीकायां भरतः ॥

व्यवस्थितः, त्रि, (वि+अव+स्था+क्तः ।) विधिपूर्व्वकस्थितः । व्यवस्थापितः । यथा,—

"अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥"

इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

व्यवहर्त्ता, [ऋ] पुं, (वि+अव+हृ+तृच् ।) व्यवहारकर्त्ता । प्राड्विवाक इति यावत् । यथा । उत्तराभिधानानन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादिति परामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानात् व्यवहर्तृसम्बन्धाभावाच्च न व्यवहारपादत्वमिति स्थितम् । इति मिताक्षरायां व्यवहारमातृका । कायस्थस्तोयाधिविशेषश्च ॥

व्यवहारः, पुं, (वि+अव+हृ+घञ् ।) विवादः । इत्यमरः ॥ पणभेदः । न्यायः । पणः । स्थितिः । इति मेदिनीशब्दरत्नावल्यौ ॥ ● ॥ (कर्म्म । क्रिया । यथा,—

"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा ॥"

यथा च रघुः । १ । ६२ ।

"तथापि शश्वद्व्यवहारनिष्ठुरे
विपच्यमाने विरमत्स तिष्ठतः ।
तुतोष वीर्य्यातिशयेन वृत्रहा
पदं हि सर्व्वत्र गुणैर्निधीयते ॥")

अथ व्यवहारदर्शनम् । तत्र याज्ञवल्क्यः ।

"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥"

स्मृतिसदाचारबहिर्भूतेन वर्त्मना परैर्यत्र शरीरतो वा पीड़ितश्चेद्राजनि निवेदयति तद्व्यवहारदर्शनस्थानम् । चेदित्यत्र श्रुतिति मैथिलाः । आवेदयति चेदित्यनेन स्वयं विवादोत्थापनं राज्ञा न कर्त्तव्यमिति शूलपाणिमहामहोपाध्यायाः । राज्ञेति व्यवहारप्रदर्शकपरम् । तथा च बृहस्पतिः ।

"राजा कार्य्याणि संपश्येत् प्राड्विवाकोऽथवा द्विजः ॥" ● ॥

प्राड्विवाकलक्षणमाह स एव ।

"विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
प्रियपूर्व्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः ॥"

कात्यायनः ।

"व्यवहाराश्रितं प्रश्नं पृच्छति प्राडिति स्थितिः ।
विवेचयति यस्तस्मिन् प्राड्विवाकस्ततः स्मृतः ॥"

अर्थिनं प्रति भाषा ते कीदृशी प्रत्यर्थिनं प्रति च तवापि कीदृशमुत्तरं इति पृच्छतीति प्राट् श्रुत्वा च युक्तायुक्तत्वेन जयं पराजयं वा विविनक्ति इति विवाकः प्राट् च स विवाकश्चेति प्राड्विवाकः ॥ ● ॥ कात्यायनः ।

"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
स्वयं स राजा विमृशन्नेव जयपराजयौ ॥
यदा कार्य्यवशाद्राजा न पश्येत् कार्य्यनिर्णयम् ।
तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं वेदपारगम् ॥
यदि विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् ॥
वैश्यं वा धर्म्मशास्त्रज्ञं शूद्रं यत्नेन वर्ज्जयेत् ॥"

स विनीतवेशः । मनुः ।

"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥
नाध्यापयति नाधीते स ब्राह्मणब्रुवः स्मृतः ॥"

व्यासः ।

"द्विजान् विहाय यः पश्येत् कार्य्याणि वृषलैः सह ।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोषश्च नश्यति ॥
यः शूद्रो वैदिकं धर्म्मं स्मार्त्तं वा भाषते यदि ।
तस्य दण्डं द्वे वदने स्तनौ चैव भेदयेत् ॥
दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः ।
दुग्धां गां कः परित्यज्याचर्येत् शीलवतीं खरीम् ॥"

व्यवहारमाह कात्यायनः ।

"वि नानार्थेऽव सन्देहे हरणं हार उच्यते ।
नानासन्देहहरणाद्व्यवहार इति स्थितिः ॥"

नानाविवादविषयः संशयो ह्रियतेऽनेन इति व्यवहारः । भाषोत्तरक्रियानिर्णयकत्वं व्यवहारत्वम् । तथा च बृहस्पतिः ।

"अज्ञानतिमिरोपेतान् सन्देहपटलावृतान् ।
निरामयान् यः कुरुते शास्त्राञ्जनशलाकया ॥
इह कीर्त्तिं राजपूज्यां लभते स्वर्गतिञ्च सः ॥
तस्मात् संशयच्छेत्तॄणां कर्त्तव्यश्च विनिर्णयः ॥"

अतएव नारदः ।

"अनियुक्तो नियुक्तो वा शास्त्रज्ञो वक्तुमर्हति ।
दैवीं वाचं स वदति यः शास्त्रमुपजीवति ॥"
दैवीं देवानुमताम् ॥ * ॥ धर्म्मशास्त्रयोस्तु विरोधे लोकव्यवहार एवादरणीयः । इत्याह स एव ।
"धर्म्मशास्त्रविरोधे तु युक्तियुक्तो विधि स्मृतः ।
व्यवहारोऽपि बलवान् धर्म्मस्तेनावहीयते ॥"
अवहीयते अवगम्यते हि गतावित्यस्माद्धातोः । अतएव बृहस्पतिः ।
"केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।
युक्तिहीनविचारे तु धर्म्महानिः प्रजायते ॥"
युक्तिर्न्यायः । स च लोकव्यवहार इति व्यवहारमातृका । अतएव कात्यायनः ।
"कुलशीलवयोवृत्तवित्तवद्भिरधिष्ठितम् ।
वणिग्भिः स्यात् कतिपयैः कुलवृद्धैरधिष्ठितम् ॥"
सद इति शेषः । कात्यायनः ।
"सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः ।
शृणोति यदि नो राजा स्यात्तु सभ्यस्तदानृणः ॥"
सभ्यः सभायां साधुः ॥ * ॥ तथाविधानाह याज्ञवल्क्यः ।
"श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः ।
राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये समाः ॥"
श्रुताध्ययनसम्पन्नाः धर्म्मशास्त्रज्ञाः । कुलीनाः सङ्करादिदोषशून्यमातापितृवंशपरम्पराकाः । एवंभूताः सभासदः सभायां यथा सीदन्ति उपविशन्ति तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः ॥*॥ तथाविधावस्थानेन भूमेः सभात्वमाह मनुः ।
"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः ।
राज्ञः प्रतिकृतो विद्वान् ब्राह्मणस्तां सभां विदुः ॥"
विदुषांत्रितावपि सभापर्य्यायपरिषच्छब्दमाह स एव ।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा ॥"
त्रैविद्यः त्रिवेदपारगः । हैतुकः । सद्युक्तिव्यवहारी । अतएवामरसिंहः । सभा सदसि सभ्ये च । अत्र भा दीप्तिः प्रकाशो ज्ञानमिति यावत् तया सह साक्षात् परम्परया वा वर्त्तते इति सभा ॥ * ॥ कात्यायनः ।
"दिवसस्याष्टमं भागं मुक्ता भागत्रयं तु यत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः ॥"
अष्टमयामार्द्धप्रहरम् । भागत्रयं प्रहरद्वयपर्य्यन्तम् । मनुः ।
"धर्म्मासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत् ॥"
मनुनारदबौधायनहारीताः ।
"पादोऽधर्म्मस्य कर्त्तारं पादः साक्षिणमृच्छति ।
पादः सभासदः सर्व्वान् पादो राजानमृच्छति ॥
राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः ।
एनो गच्छति कर्त्तारं निन्दार्हो यत्र निन्द्यते ॥"
कर्त्तारं वादिनम् । राजपादं विवेचकपरम् ॥ अनेनाः निष्पापः ॥ अर्थित्वमाहतुर्व्यासनारदौ ।
"यस्य चाभ्यधिका पीड़ा कार्य्यं वाप्यधिकं भवेत् ।
तस्यार्थिभावो दातव्यो न यः पूर्व्वं निवेदयेत् ॥"
अत्रैव पूर्व्वपक्षो भवेत्तस्य इति कात्यायनीये तृतीयपादः । न यः पूर्व्वं निवेदयेदिति तस्योत्तरः पक्ष इति शेषः । स यः पूर्व्वमिति पाठे यः प्रथमं निवेदयति स पूर्व्ववादीत्यर्थः । बृहस्पतिः ।
"अहं पूर्व्विकया यातावर्थिप्रत्यर्थिनौ यदा ।
वादो वर्णानुपूर्व्व्येण ग्राह्यः पीड़ामवेक्ष्य वा ॥"
यत्र द्वावेव वदतः प्रभो मदार्थं शृणु इति तत्र ब्राह्मणादिक्रमेणाधिकपीड़ादर्शनेन वा वादो ग्राह्यः ॥*॥ स्वयं विवादाशक्तौ प्रतिनिधिमाह नारदः ।
"अर्थिना सन्नियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा ।
यो यस्यार्थे विवदते तयोर्जयपराजयौ ॥"
तयोर्व्वादिप्रतिवादिनोः । बृहस्पतिरपि ।
"ऋत्विक् वादे नियुक्तश्च समौ सम्परिकीर्त्तितौ ।
यज्ञे स्वाम्याप्नुयात् पुण्यं हानिं वादेऽथवा जयम् ॥"
कात्यायनः ।
"मनुष्यमारणे स्तेये परदाराभिमर्षणे ।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे ॥
पारुष्ये कूटकरणे नृपद्रोहे तथैव च ।
प्रतिवादी न दातव्यः कर्त्ता तु विवदेत् स्वयम् ॥"
कुलस्त्रीप्रभृतीनां प्रतिनिधिमाह व्यासः ।
"कुलस्त्रीबालकोन्मत्तवृद्धार्त्तानाश्च बान्धवाः ।
पूर्व्वपक्षोत्तरे ब्रूयुर्न्नियुक्तो भृतकस्तथा ॥"
भ्रात्रादीतरस्य पक्षस्थितस्य दण्डनीयत्वमाह नारदः ।
"यो न भ्राता पिता वापि न पुत्त्रो न नियोजितः ।
परार्थवादी दण्ड्यः स्यात् व्यवहारेषु विब्रुवन् ॥"
विब्रुवन् विरुद्धं ब्रुवन् ॥ * ॥ नारदः ।
"निर्व्वेष्टुकामो रोगार्त्तो यियक्षुर्व्यसने स्थितः ।
अभियुक्तस्तथान्येन राजकार्य्योद्यतस्तथा ॥
गवां प्रचारे गोपालाः शस्यबन्धे कृषीवलाः ।
शिल्पिनश्चापि तत्काले आयुधीयाश्च विग्रहे ॥
अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।
विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृपः ॥"
निर्व्वेष्टुकामो विवाहप्रवृत्तः । अन्येन वादान्तरेण । अप्राप्तव्यवहारः षोड़शवर्षावरवयस्कः । तत्काले विवाहादिसमाप्तिपर्य्यन्तकाले । एते विषमस्थाश्च उपप्लवदेशस्थाश्च उत्तमर्णादिना नासेध्या नावधारणीयाः एतान् प्रागुक्तान् वादिना निवेदितानिति शेषः ॥*॥ याज्ञवल्क्यः ।
"अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत् ॥"
अभियुक्तः सन्नुत्तरमदत्त्वा भाषावादिनमेतं स्वाभियोगानुपमर्दकेन विवादान्तरेण न योजयेत् । युगपदनेकव्यवहारासम्भवात् । नारदोऽपि ।
"पूर्व्ववादं परित्यज्य योऽन्यमालम्बते पुनः ।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः ॥"
हीनवादीत्यनेन दण्ड्यतोक्ता न तु प्रकृतार्थहानिरुक्ता अन्यथा छलापत्तेः ॥ * ॥ पारुष्ये प्रतिप्रसवमाह स एव ।
"कुर्य्यात् प्रत्यभियोगञ्च कलहे साहसेषु च ।"
वाक्पारुष्ये शस्त्रादिप्रहारेषु च । यथापूर्व्वमक्रमप्यनेनाकृष्टः शस्त्रेण हत इत्यपराधाभावाय प्रत्यभियोगं कुर्य्यात् । तथा च बृहस्पतिः ।
"आकुष्टस्तु यदाक्रोशंस्ताड़ितः प्रतिताड़यन् ।
हत्वाततायिनश्चैव नापराधी भवेन्नरः ॥"
एतेन वाक्पारुष्यदण्डपारुष्ययोः प्रकृताभियोगे स्वकृताभियोगेऽपि न दोषः । यत्तु ।
"पूर्व्वमाक्षारयेद्यस्तु नियतं स्यात् स दोषभाक् ।
पश्चाद्यः सोऽप्यसत्कारी पूर्व्वे तु विनयो गुरुः ॥"
इति नारदवचनं तत् पूर्व्वापेक्षया परस्याधिकवाक्पारुष्योत्पादकस्यापि स्वल्पदण्डविधायकम् ॥ * ॥ युगपत्संप्रवर्त्तने अधिकदण्डाभावमाह स एव ।
"पारुष्ये साहसे चैव युगपत्संप्रवृत्तयोः ।
विशेषश्चेन्न लभ्येत विनयः स्यात् समस्तयोः ॥"
विनयो दण्डः । एवञ्च दण्डोऽयमनपराधे मयि कृतः पीड़ितत्वादिति भाषायां प्रत्यभियोगः कार्य्य एव । प्रत्यवस्कन्दनोत्तरत्वेन युगपदनेकव्यवहारापत्तिदोषस्याभावात् ॥ * ॥ सभापतेःकर्त्तव्यमाह कात्यायनः ।
"अथ चेत् प्रतिभूर्न्नास्ति वादयोग्यस्तु वादिनोः ।
स रक्षितो दिनस्यान्ते दद्यात् भृत्याय वेतनम् ॥"
प्रतिभवति तत्कार्य्ये तद्रूपमवति इति प्रतिभूर्ल्लग्नकः । वादयोग्यः विवादपक्षस्य साधितधनादिदानस्य दण्डदानस्य च क्षमः । वादिनोः भाषावादिन उत्तरवादिनश्च । तथाच याज्ञवल्क्यः ।
"उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्य्यनिर्णये ।
प्रतिभूत्वाभावे च राज्ञा संज्ञपनं तयोः ॥"
राज्ञा संज्ञपनं दण्डतुल्याधिकरणं निर्णयस्य कार्य्ये धनादिदाने राजदन्तादिवत् कार्य्यशब्दस्य पूर्व्वनिपातः । भृत्यः तत्पक्षो राजनियुक्तः ॥ * ॥ प्रत्यर्थी यदि कश्चित् कालं प्रार्थयते स लभते अर्थी तु कालं प्रार्थयन् अर्थित्वमेव जह्यादिति तेन कालो न प्रार्थनीयः । तदाह ।
"प्रत्यर्थी लभते कालं त्र्यहं सप्ताहमेव च ।
अर्थी तु प्रार्थयन् कालं तत्क्षणादेव हीयते ॥"
क्वचित् प्रत्यर्थी कालं न लभते । याज्ञवल्क्यः ।
"साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम् ।
विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः ॥"
साहसं मनुष्यमारणम् । गौरत्र दोग्ध्री ।

अभिशापो महापातकादिना । अत्यये द्रव्यनाशे । स्त्रियां कुलस्त्रियां चारित्र्यविवादविषयप्राप्तायां दास्यां स्वत्वविवादे वा । एषु सद्य एव उत्तरं दापयेदिति मूलपाठः । विशेषयति कात्यायनः ।

"यस्मात् कार्य्यसमारम्भश्चिरात्तेन विनिश्चितः ।
तस्मान्न लभते कालमभियुक्तस्तु कालभाक् ॥"

अपवादमाह बृहस्पतिः ।

"अभियोक्ता प्रगल्भत्वात् वक्तुं नोत्सहते यदि ।
तदा कालः प्रदातव्यः कार्य्यशक्त्यनुरूपतः ॥"

अत्रापि विशेषयति व्यासः ।

"राजदैवकृतो दोषस्तस्मिन् काले यदा भवेत् ।
अवध्ययोगमात्रेण न भवेत् स पराजितः ॥"

स कृतसमयबन्धोऽभियुक्तः ।

"राजदैवकृतं दोषं साक्षिभिः प्रतिपादयेत् ।
जैह्म्येन वर्त्तमानस्तु दण्ड्यो दाप्यस्तु तद्धनम् ॥"

अवध्यतिक्रमहेतो राजदैविकदोषस्य प्रमितौ न तदतिक्रामकोऽपराध्यति जैह्म्याच्च तदतिक्रमेण दण्ड्यो भङ्गी च भवतीत्यर्थः । छद्मकाठिन्यादियुक्तो जिह्मः । तथा च हारीतः । छद्म माया व्याजयुक्ता निकृतिः । कौटिल्यकाठिन्यशाठ्यवैरस्यसङ्गादयुक्तं जैह्म्यमिति युक्तं योगः ॥ * ॥

अथ व्यवहारपादनिर्णयः । तत्र बृहस्पतिः ।

"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ॥
मिथ्योक्तौ च चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा ।
प्राङ्न्याये च स विज्ञेयो द्विपात्तु संप्रतिपत्तिषु ॥"

यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्युत्तरवादिनैव भाषार्थस्याङ्गीकृतत्वेन क्रियासाध्यो न भवति इति द्विपादतोक्ता ॥ * ॥

अथ भाषापादः ।

तत्र भाषास्वरूपमाहतुः कात्यायनबृहस्पती ।

"प्रतिज्ञादोषनिर्म्मुक्तं साध्यं सत्कारणान्वितम् ।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः ।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः ॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात् तत्पक्षसम्बन्धं प्रतिवादी तदुत्तरम् ॥"

प्रतिज्ञा साध्याभिधायिका वाक् । तस्या दोषैः परस्परविरुद्धार्थपदादिभिस्त्यक्तं साध्यं साधनार्हाभिमतं पक्षं विदुः । अन्यथा प्रतिज्ञादोषेण साध्यदोषः स्यात् । अतएवोक्तम् ।

"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता ।
अदुष्टैव वक्तव्या व्यवहारेषु वादिभिः ॥"

वक्तव्या पक्षप्रतिज्ञे पूर्व्वोक्ते । नारदेनापि ।

"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् ॥"

उत्तरो विजयी । यद्यप्यन्यत्र साध्यं न्याय्यं तद्विशिष्टधर्म्मी पक्ष इति भेदः तथाप्यत्र वाक् प्रत्याय्यर्थादिधर्म्मविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधमर्णादेरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम् । उपसंहारे च एवंविधः पक्ष इति । मिताक्षरायान्तु भाषा प्रतिज्ञा पक्ष इति नार्थान्तरमित्युक्तम् । भाषार्थहृत्वा भाषास्वरूपप्रपञ्चमाह स्वल्पाक्षर इति । निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः । तत्र ।

"द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि ।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति ॥"

इति पक्षसंग्रहवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत् । तच्छोधनमाह बृहस्पतिः ।

"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत् ।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ ॥" * ॥

तल्लिखनप्रकारमाह व्यासः ।

"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"

फलकं काष्ठादिपट्टकम् । कात्यायनः ।

"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत् ।
पाण्डुलेखेन फलके ततः पत्रेऽभिलेखयेत् ॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम् ।
उत्तरेणावरुद्धस्य निवृत्तं शोधनं भवेत् ॥
अन्यदुक्तं लिखेद्योऽन्यदर्थिप्रत्यर्थिनोर्व्वचः ।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः ॥"

स्वभावोक्तमकृत्रिमम् । एतच्च स्वरविशेषादिना सुज्ञेयम् ॥ * ॥ अतएव याज्ञवल्क्यः ।

"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥"

भूतं तत्त्वार्थसम्बन्धम् । नारदः ।

"भूतं तत्त्वार्थसम्बन्धं प्रमादाभिहितं छलम् ।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता ॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्वसाधु वा ।
सर्व्वेष्वर्थविवादेषु वाक्छले नावसीदति ॥
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते ॥"

सर्व्वेष्वर्थविवादेषु प्रमादाभिधानेऽपि नावसीदति अत्रोदाहरणं पशुस्त्रीत्यादि । अर्थविवादग्रहणात् मन्युकृतविवादेषु प्रमादाभिधाने प्रकृतार्थादप्यर्थाद्धीयत इति गम्यते । यथाहमनेन शिरसि पादेन ताडित इत्यभिधाय केवलं हस्तेन ताडित इति वदन् न केवलं दण्ड्यः पराजीयते च । तत्र त्वं मह्यमृणं धारयसि मत्तः ऋणत्वेन गृहीततावद्धनकत्वादिति भाषाशरीरं एतच्च संस्कृतदेशभाषान्यतरेण यथाबोधं वक्तव्यं लेख्यं वा । मूर्खाणामपि वादिप्रतिवादितादर्शनात् अतएवाध्यापनेऽपि तथोक्तं विष्णुधर्म्मोत्तरे ।

"संस्कृतैः प्राकृतैर्व्वाक्यैः शिष्यमनुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥" * ॥

अथोत्तरपादः । तत्र कालमाह कात्यायनः ।

"सद्यःकृतेषु कार्य्येषु सद्य एव विवादयेत् ।
कालातीतेषु वा कालं दद्यात् प्रत्यर्थिने प्रभुः ॥"

वादिनोक्तस्य साध्यस्य प्रतीपमर्थयते इति प्रत्यर्थी । नारदः ।

"गहनत्वाद्विवादानामसामर्थ्यात् स्मृतेरपि ।
ऋणादिषु हरेत् कालं कामं तत्त्वबुभुत्सया ॥"

बृहस्पतिः ।

"यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात् तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम् ॥"

सम्बन्धमुपयुक्तम् । अन्यथा अन्यवादित्वेन भङ्गप्रसङ्गात् ।

"अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥
प्रपलायी त्रिपक्षेण मौनकृत् सप्तभिर्द्दिनैः ।
क्रियाद्वेषी तु मासेन साक्षिभिन्नस्तु तत्क्षणात् ॥"

इति नारदोक्तेः ॥

क्रिया लेख्यादिका । साक्षिभिन्नः साक्षिभिः पराजितः । वादिनोक्तस्य साध्यस्य प्रतीपं वदतीति प्रतिवादी । उत्तीर्य्यते निस्तीर्य्यते प्रकृताभियोगोऽनेन इति उत्तरम् । याज्ञवल्क्यः ।

"श्रुतार्थस्योत्तरं लेख्यं पूर्व्वावेदकसन्निधौ ॥"

लेख्यमिति वाच्यस्याप्युपलक्षणम् ॥ * ॥ उत्तरस्वरूपं तद्भेदांश्चाह नारदः ।

"पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अव्याख्यागम्यमित्येवमुत्तरं तद्विदो विदुः ॥
मिथ्यासंप्रतिपत्तित्वं प्रत्यवस्कन्दनन्तथा ।
प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः ॥
अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम् ।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः ॥"

पक्षस्य भाषार्थस्य व्यापकं आच्छादकं अभियोगप्रतिकूलमिति यावत् । अतएव पूर्व्वपक्षार्थसम्बन्धं प्रतिपक्षं निवेदयेदित्युक्तम् । न च विप्रतिपत्त्या न्यायार्थमागतस्य धारयसीत्यभियुक्तस्य धारयामीति संप्रतिपत्तेः कथमुत्तरत्वं अभियोगाप्रतिकूलत्वादिति वाच्यम् । भाषावादिनो मूर्खत्वेनापटुतया वा कदाचिद्भाषाभिवादादेवायं हीयते इति भाषाविमर्षपर्य्यन्तं विप्रतिपन्नस्याप्युत्तरवादिनो भाषार्थं सम्यगवगम्य तन्निषेधार्थं सम्यगुत्तरासम्भवात् विदत्सभायां चासत्यवचनमत्यन्ताधर्म्मकारकं परोक्तिपराजये च दण्ड्यत्वं वादिना च वैरमित्यादि प्रतिसन्दधतः संप्रतिपत्तेरुत्तरत्वं सम्भवत्येव । एवं एतेभ्य एवानिस्तारात् साध्यत्वेनोपदिष्टस्य पक्षस्य सिद्धत्वेनोपन्यासेन साध्यत्वनिवारणात् सिद्धसाधनेनापि वादिनः प्रत्यवस्थानाच्चोत्तरत्वं संप्रतिपत्तेः सिद्धमिति । सारं प्रकृतोपयोगि । अनाकुलं पूर्व्वापरविरोधशून्यम् । अव्याख्यागम्यमध्याहारादिकं विनैव प्रतीतं अभियोगस्य अभियुज्यते इत्यभियोगः सहेतुकं साध्यं तस्यापह्नवमित्यर्थः ॥ * ॥ उत्तराभासमाह कात्यायनः ।

"प्रकृतेन त्वसम्बन्धं अत्यल्पमतिभूरि च ।
पक्षैकदेशव्याप्येव तच्च नैवोत्तरं भवेत् ॥
अव्यक्तपदव्यापि निगूढार्थं तथाकुलम् ।

याख्यागम्यमसारञ्च नोत्तरं शस्यते बुधैः ॥”
अस्वयस्तपदञ्चापि अनन्वितार्थपदञ्चाप्रमिति व्यवहारतिलके भवदेवभट्टः ॥ * ॥ मिथ्योत्तरभेदमाहतुः पुनर्व्यासनारदौ ।

“मिथ्यैतन्नाभिजानामि मम तत्र न सन्निधिः ।
अजातश्चास्मि तत्काले इति मिथ्या चतुर्व्विधम् ॥”

मिथ्यैतदिति शब्दतो नाभिजानामीत्यादिकमर्थतोऽपह्नवः । तथा च कात्यायनः ।

“श्रुत्वा भाषार्थमन्यस्तु यदि तं प्रतिषेधति ।
अर्थतः शब्दतो वापि मिथ्या तज्ज्ञेयमुत्तरम् ।”

त्वं मह्यं धारयसीति प्रतिज्ञायां न गृहीतमिति शब्दतः । कालविशेषगर्भायां तस्यां सत्यां तदा नाहं जात इति अर्थतः । देशकालविशेषगर्भायां तदा तत्र नाहमासं इत्यप्यर्थतः । देशादिमत्यां तच्छून्यायां वा न जानामीत्यर्थत एव योग्यासत्त्वेनार्थतस्तद्ग्रहणप्रतिपादनात् अत्र चरमत्रयं ग्रहणावस्कन्दनमुखेन ग्रहणाभावप्रतिपादकं सापदेशमिथ्योत्तरमात्रं आद्यं मिथ्योत्तरमात्रम् ॥ * ॥ बृहस्पतिः ।

“श्रुत्वाभियोगं प्रत्यर्थी यदि तत् प्रतिपद्यते ।
सा तु संप्रतिपत्तिः स्याच्छास्त्रविद्भिरुदाहृता ॥
अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तं तथा ।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत् ॥
आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितः पूर्व्वं प्राङ्न्यायस्तु स उच्यते ॥”

अभियुज्यते इत्यभियोगः । प्रतिपद्यतेऽङ्गीकरोति । तं साध्यार्थम् । तथा प्रपद्य सत्यत्वेनाङ्गीकृत्य । कारणं तत्प्रतिकूलरूपं कारणं ब्रूयात् तदा तदुत्तरं प्रत्यवस्कन्दनम् । वाद्युक्तस्य प्रतिकूलत्वेन प्रत्यवस्कन्दनमित्यर्थः । प्रतिपद्यावस्कन्दनात् प्रत्यवस्कन्दनमिति जीमूतवाहनः ॥ तच्च कारणोत्तरं त्रिविधम् । बलवत् तुल्यबलं दुर्ब्बलञ्च । तत्र बलवदुत्तरं यथा । त्वत्तः शतं गृहीतमिति सत्यं किन्तु परिशोधितमिति । अत्र उत्तरवादिन एव क्रियानिर्द्देशः । तथा च नारदः ।

“आधर्ष्यं पूर्ब्बपक्षस्य यस्मिन्नर्थवशाद्भवेत् ।
विवादे साक्षिणस्तत्र प्रष्टव्याः प्रतिवादिनः ॥”

आधर्ष्यं दुर्ब्बलत्वं पूर्ब्बपक्षस्य । ततश्च व्यापकसाध्यस्य धार्य्यमाणत्वस्य ध्वंसकारणं निर्यातनादि तद्रूपमुत्तरं कारणोत्तरम् । अतएव मिथ्योत्तरादस्य भेदः । तद्धि धार्य्यमाणत्वस्यात्यन्ताभावप्रयोजकमग्रहणरूपं न तु ध्वंसरूपम् ॥ * ॥ तुल्यबलकारणोत्तरं यथा । मदीयेयं भूमिः क्रमागतत्वादिति वाद्युक्ते मदीयेयं भूमिः क्रमागतत्वादिति प्रतिवादिना तथोत्तरमिति तत्र पूर्ब्बवादिनः साक्ष्युपन्यासः । तदसामर्थ्ये प्रतिवादिनः । तथा च याज्ञवल्क्यः ।

“साक्षिषूभयतः सत्सु साक्षिणः पूर्ब्बवादिनः ।
पूर्ब्बपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥”

दुर्ब्बलकारणोत्तरं यथा । ममेयं भूः क्रमागतत्वादिति वाद्युक्ते ममेयं भूर्द्दशवर्षभुज्यमानत्वादिति प्रत्युत्तरं तत्तु धनमात्रप्रयुक्तम् ।

“पश्यतोऽब्रुवतो हानिर्धनस्य दशवार्षिकी ॥”
इति याज्ञवल्कीयं वीजम् ।

किन्तु नैतद्युक्तम् ।

“परेण भुज्यमानाया भूमेर्व्विंशतिवार्षिकी ॥”

इति भूमिमात्रविषयकं तत्परार्द्धेनापोदितत्वादिति भवदेवभट्टः ॥

“पश्यतोऽब्रुवतो हानिर्भूमेर्व्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥”

इति शूलपाणिधृतपाठोऽपि तत्रार्थे प्रमाणम् । ततश्चात्र क्रमागतत्वे पूर्ब्बवादिनः प्रमाणोपन्यासः । तथा चोक्तम् ।

“गुरावभिहिते हेतौ प्रतिवादिक्रिया भवेत् ।
दुर्ब्बले वादिनः प्रोक्ता क्रिया तुल्येऽपि वादिनः ॥”

आचारेण व्यवहारेण । अवसन्नो भग्नः । लेखयते भाषामिति शेषः स वादी अस्मिन्नर्थे मया पूर्ब्बं पराजितः वाच्यः प्राङ्न्यायो हि धार्य्यमाणत्वसामान्याभावज्ञापकः ॥ * ॥ एतेषां सङ्करे विशेषमाहतुर्व्यासहारीतौ ।

“मिथ्योत्तरं कारणञ्च स्यातामेकत्र चेदुभे ।
सत्यञ्चापि सहानेन तत्र ग्राह्यं किमुत्तरम् ।
मिथ्याकारणयोर्व्वापि ग्राह्यं कारणमुत्तरम् ॥
यत्प्रभूतार्थविषयं यत्र वा स्यात् क्रियाफलम् ।
उत्तरं तत्तु विज्ञेयमसंकीर्णमतोऽन्यथा ॥”

शताभियोगे शतग्रहणं मिथ्या पञ्चाशदेव गृहीतास्ताश्च परिशुद्धा इति मिथ्याकारणांशयोस्तुल्यरूपत्वे कारणोत्तरं ग्राह्यं आदौ विचारणीयं परिशोधनस्यार्व्वाचीनत्वेन स्मरणार्हत्वात् पश्चान्मिथ्योत्तरं तत्र ऋणस्य चिरातीतस्य कष्टप्रतिपाद्यत्वात् । एवञ्च नवत्यभियोगे मिथ्यैतत् षष्टिपुराणा एव मया गृहीतास्तत्रापि त्रिंशत् परिशुद्धास्त्रिंशद्दास्यामि इति मिथ्याकारणसत्यैः सङ्कीर्णोत्तरेऽपि पूर्व्ववत् कारणोत्तरमेव ग्राह्यं मिथ्याकारणयोर्व्वापीति वापिशब्दाभ्यां तथा दर्शितत्वात् सत्योत्तरस्य स्वयंस्वीकृतत्वेन निर्णयानर्हत्वादिति भावः । प्राङ्न्यायेन सह सर्व्वथैव सङ्करानुपपत्तिरिति तन्नोक्तं यदि शतं मिथ्यापञ्चविंशतिपुराणा गृहीतास्ते च परिशुद्धास्तथा मिथ्यांशस्य प्रचुरार्थविषयस्य विचार उपक्रमणीयः । भूयोऽनुरोधस्याभ्यर्हितत्वात् पश्चात् स्वल्पार्थस्य विचार इति । तुल्यार्थविषयत्वे तु यत्र क्रियायाः साक्ष्यादेः फलं निर्णयः शीघ्रं भवति तदंशस्यैव प्रमाणं ग्राह्यं तथा यदि शतग्रहणे पत्रमस्ति शतापह्नवे च पञ्चाशत्परिशोधने साक्षिणस्तदा मिथ्योत्तर एवादौ तत्खण्डनाय ग्रहणपत्रं ग्राह्यं लिखितस्य साक्षिभ्यो बलवत्त्वेन सम्यङ्निर्णयकारित्वात् पश्चात्परिशोधने साक्षिणः प्रष्टव्याः । सङ्करोत्तरमप्यसङ्कीर्णमदुष्टं अतो भिन्नमन्यथा सङ्कीर्णदुष्टमित्यर्थः । अत्र चावच्छेदभेदेन मिथ्योत्तरसङ्करे सदुत्तरत्वमेकावच्छेदेन । सङ्करे तु असदुत्तरत्वमाह कात्यायनः ।

“पक्षैकदेशे यत् सत्यमेकदेशे च कारणम् ।
मिथ्या चैवैकदेशे स्यात् सङ्करात्तदनुत्तरम् ॥”

एकदेशे इत्यत्र एकस्मिन्नेव देशे न भिन्नदेशे यथा शतं कारयाम्येव परिशोधितं न गृहीतं वा इति ॥ * ॥

अथ क्रियापादः ।

उत्तराभिधानानन्तरं याज्ञवल्क्यः ।

“ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधकम् ।”

अर्थी वादी प्रतिवादी च स्वपक्षार्थित्वात् । तयोरधिकारे नियममाह व्यासः ।

“प्राङ्न्याये कारणोक्तौ च प्रत्यर्थी साधयेत् क्रियाम् ।
मिथ्योत्तरे पूर्ब्बवादी प्रतिपत्तौ न सा भवेत् ॥”

मिथ्योत्तरे न गृहीतं मयेत्यादिरूपे पूर्ब्बवादी भाषावादी साक्ष्यादिकं निर्द्दिशेन्नोत्तरवादी तत्र तस्य मानुष्याः क्रियाया असम्भवादिति न्यायो मतं अत्रापि साक्ष्याद्यभावे उत्तरवादिन एव दिव्यम् ।

“न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत् ।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥”
इति कात्यायनोक्तेः ॥

अत्र पूर्ब्बार्द्धेनार्थिनो दिव्यनिषेधेऽर्थात् प्रत्यर्थिनस्तत्प्राप्तौ परार्द्धाभिधानं सिद्धे सत्यारम्भो नियमाय इति न्यायान्नियमार्थं न च याज्ञवल्क्यवचने क्रियापदं कारणोत्तरमानुषीदैवीपरमित्येतावदर्थकं मिथ्योत्तरेऽप्यनुयुज्यते इति तत्रापि अर्थिन एव दिव्यमिति वाच्यं श्रूयमाणपदस्य हि पुनरन्वयार्थमेवानुषङ्गः । नन्वर्द्धवैयर्थ्यसहितस्य गौरवात् पूर्ब्बोक्तन्यायमूलकविषयलब्धौ कात्यायनोक्तदिव्यविषयनियमभङ्गानर्हत्वाच्च यत्र विवादविषये प्रत्यर्थी सन्दिहानः सत्योत्तरानर्हतया अर्थिन एव दृष्टक्रिया तदसम्भवे तस्यैव दिव्यं न तु प्रत्यर्थिनः अधिकारनिश्चयाभावात् अर्थिनस्तत्सत्त्वात् न च न कश्चिदभियोक्तारमित्यादिना विरोधस्तस्योत्तरार्हप्रतियोगिविषयत्वात् एतद्विषय एव धनस्वामिनो दिव्यमिति लोकप्रवादः ॥ * ॥ लिखिताद्यभावेनापि दिव्यमाह याज्ञवल्क्यः ।

“प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥” * ॥

अथ दिव्यम् । दिव्यान्याह स एव ।

“तुलाग्न्यापो विषं कोषो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥
रुच्या वान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ।
विनापि शीर्षकं कुर्य्यात् नृपद्रोहेऽथ पातके ॥”

महाभियोगेषु महापातकादिगुरुतराभियोगेषु । शीर्षकस्थः शीर्षकं प्रधानं व्यवहारस्य चतुर्थपादो जयपराजयलक्षणः तेन दण्डो लक्ष्यते । तत्र तिष्ठति वर्त्तते तदङ्गीकरोतीत्यर्थः । अत्राभि-

योक्तुः प्रियरीवर्त्तित्वोक्तेरभियोज्यस्य दिव्यकर्त्तृत्वं प्रतीयते। प्रत्यर्थीच्छया अर्थिनो दिव्यमाह रुच्येति। इतरोऽभियुक्तः। एतत्त्वं दिव्यतत्त्वे विवृतम्। प्रतिज्ञातार्थसाधकमिति साधकं साक्ष्यादिकम्। तदाह वृहस्पतिः।

"द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा।
साक्षिलेख्यानुमानश्च मानुषी त्रिविधा स्मृता।
धटाद्या धर्म्मजान्ता च दैविकी नवधा स्मृता।"

तत्रानुमानन्तु मुक्त्यादि। *। तत्र साक्ष्यमाह मनुः।

"समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति।"

एतत् प्रमाणमात्रोपलक्षणम्।

"अनुभावी च यः कश्चित् कुर्य्यात् साक्ष्यं विवादिनाम्।"

इति तद्वचनान्तरात्।

अतएवाकृतमपि साक्षिणमाह मनुः।

"यत्रानिबद्धो वीक्षेत शृणुयाद्वापि किञ्चन।
पृष्टस्तत्रापि तद्ब्रूयात् यथादृष्टं यथाश्रुतम्।"

अनिबद्धस्तत्र साक्षित्वेनानियुक्तः। परम्परयापि श्रवणमाह विष्णुः।

"उद्दिष्टसाक्षिणि मृते देशान्तरगतेऽपि वा।
तदभिहितश्रोतारः प्रमाणं नात्र संशयः।"

अस्योत्तरसंज्ञामाह नारदः।

"साक्षिणामपि यत् साक्ष्यं स्वपक्षं परिभाषताम्।
श्रवणात् श्रावणाद्वापि स साक्ष्युत्तरसंज्ञकः।"

स्वपक्षसम्बन्धि साक्ष्यं परिभाषतां साक्षिणां यः स्वयं शृणोति अर्थिना श्रावितः वा स श्रवणात् श्रावणादुत्तरसाक्षीत्यर्थः। एवं योऽर्थिना गूढ़तया प्रत्यर्थिवचनं श्रावितः स गूढ़साक्षीत्याह स एव।

"अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्।
यः श्राव्यते तदा गूढ़ो गूढ़साक्षी स उच्यते।"

तेनान्यतरवाद्यभिहितार्थविषयकद्रष्टकारकार्ण विज्ञापनं साक्ष्यमिति स्थितम्। तत्र नारदः।

"तेषामपि न बालः स्यान्नैको न स्त्री न दुष्कृत्।
न बान्धवो न चारातिर्ब्रूयुस्ते कार्य्यमन्यथा।"

कार्य्यं सदपि अन्यथा तद्विरुद्धत्वेन। एवञ्च यदि परमधार्म्मिकत्वेन बान्धवादीनामपि सत्यवादित्वं निश्चीयते तदा तेऽपि साक्षिणो भवितुमर्हन्तीति। तेषां साक्ष्यविधायकं वक्ष्यमाणमनुवचनमपि तत्तादृशविषयम्। याज्ञवल्क्यः।

"त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियारताः।
यथाजाति यथावर्णं सर्व्वे सर्व्वेषु वा स्मृताः।"

त्रयोऽवरा निकृष्टा येषां ते त्र्यवराः त्रिभ्योऽन्यूना भवन्तीत्यर्थः। यथेति यो यज्जातीयस्तस्य तज्जातीयः साक्षी। स्त्रीणां स्त्रियोऽन्त्यजानामन्त्यजाः। यथावर्णं ब्राह्मणानां ब्राह्मणाः क्षत्रियादीनां क्षत्रियादयः। अभावे तु तत्तद्भेदं विना सर्व्व एव। त्र्यवरा इत्यस्यापवादमाह स एव।

"उभयानुमतः साक्षी भवेदेकोऽपि धर्म्मवित्।"

उभयानुमतत्वं धर्म्मवित्त्वञ्च नियतं तन्त्रम्। तदाह विष्णुः। अभिमतगुणसम्पन्नस्तूभयानुमतस्त्वेकोऽपि इति। अतएव श्रोत्रियमप्येकं निषेधयति वृहस्पतिः।

"नव सप्त पञ्च वा स्युश्चत्वारस्त्रय एव वा।
उभौ तु श्रोत्रियौ ग्राह्यौ नैकं पृच्छेत् कदाचन।"

एको मिलितगुणसम्पन्नः प्रधानकल्पः तदभावे उभयानुमतमात्रोऽपि ग्राह्यस्तदाह नारदः।

"उभयानुमतो यः स्याद्द्वयोर्व्विवदमानयोः।
भवत्येकोऽपि साक्षित्वे प्रष्टव्यः स्यात् स संसदि।"

उभयानुमत एकोऽलुब्धत्वादिना सर्व्वजनप्रसिद्धश्चेत्तदा साक्षित्वे संसदि बहुजनसन्निधौ प्रष्टव्यः तथात्वे स्नेहवैरादिसत्त्वेऽप्यकीर्त्तिभयात् सत्याभिधानसम्भवादित्याशयः। विचारस्य तत्त्वनिर्णयार्थत्वात्तदाह मनुः।

"एकोऽप्यलुब्धः साक्षी स्यात् बह्व्यः शुच्योऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये वृताः।"

एकोऽलुब्धस्तु साक्षी स्यादिति कुल्लूकभट्टधृतपाठः। एको लुब्धस्त्वसाक्षी स्यादिति श्रीमन्वाहनधृतपाठस्तु न युक्तः। लुब्धाश्चेद्बहवोऽप्यसाक्षिणो भवितुमर्हन्तीति एकपदव्यर्थतापत्तेः। भवतु वा तत्पाठः तथाप्येक इत्यनुरोधात् तन्निषेधमुखेनालुब्धस्यैकस्यानुमतिसत्त्वे धर्म्मवित्त्वमन्तरेण साक्षित्वं बोध्यं इत्यर्थतो न विरोधः। अतएव विश्वरूपप्रभृतीनां उभयानुमत एक एव साक्षीति व्याख्याने धर्म्मवदिति नोक्तम्। दोषैस्तेयादिभिः। तथा च नारदः।

"स्तेनाः साहसिका धूर्त्ताः कितवा घोषकाश्च ये।
असाक्षिणस्तु ते दृष्टास्तेषु सत्यं न विद्यते।"

कितवा द्यूतकराः। *। अपवादमाह उशनाः।

"दासोऽन्धो वधिरः कुष्ठी स्त्रीबालस्थविरादयः।
एतेऽप्यनभिसम्बन्धाः साहसे साक्षिणो मताः।"

स्थविरो म्लानेन्द्रियग्रामः। आदिशब्दात् कितवादयः। उभयानुमताभावे शुचिक्रियत्वादिगुणस्त्वेको ग्राह्यः। तथा च व्यासः।

"शुचिक्रियश्च धर्म्मज्ञो योऽन्यत्राप्यनुभूतवाक्।
प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः।"

अनुभूतवाक् स्थानान्तरे सत्यत्वेनेति। भवदेवभट्टोऽप्येवम्। साहसमाह नारदः।

"मनुष्यमारणं स्तेयं परदाराभिमर्षणम्।
पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्।"

कात्यायनः।

"अभ्यन्तरस्तु निःक्षेपे साक्ष्यमेकोऽपि दापयेत्।
अर्थिना प्रहितः साक्षी भवेदेकोऽपि याचिते।
संस्कृतं येन यत् पण्यं तत्तेनैव विभावयेत्।
एक एव प्रमाणं स विवादे परिकीर्त्तितः।"

संस्कृतं गठितं पण्यं कुण्डलादि। विष्णुः। स्तेयसाहसवाग्दण्डपारुष्यसंग्रहणेषु साक्षिणां न परीक्षा इति स्तेयपरदारगमनादिकार्य्याणां निह्नवेनैव क्रियमाणत्वात् दैवादेव परं साक्षिणो भवन्तीति न परीक्षा इत्युक्तम्। तेषां वाक्यन्तु मित्रारिभावादिनिरूपणेनैवोपपत्त्यनुपपत्तिभ्यामालोचनीयम्। न तु वाक्यमात्रादिति व्यवहारमातृका। अतएव कात्यायनः।

"ऋणादिषु परीक्षेत साक्षिणः स्थिरकर्म्मसु।
साहसात्ययिकेनैव परीक्षा क्वचित् स्मृता।"

इति। *।

श्रोत्रियादीनामसाक्ष्यमाह नारदः।

"श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजिता नराः।
वचनात्तेष्वसाक्षित्वं नाम्र हेतुरुदाहृतः।"

दानरत्नाकरे श्रोत्रियमाह देवलः।

"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित्।"

सकल्पां कल्पमात्राङ्गसहिताम्। षड्भिरिति सहार्थे तृतीया। वचनादिति श्रोत्रियत्वादिरूपाभिधानात् न च तत्रान्यो हेतुरित्यर्थः। तथा च स्वीयवैदिककर्म्मकरणव्यापृततया परकीयकार्य्ये विस्मरणसम्भवात् साक्षित्वरूपलघुकार्य्यनियोगे तच्छापभयेन व्यवहारद्रष्टारोऽपि तान् न पृच्छन्तीति तत्साक्ष्यकरणानर्थक्यात् न ते साक्षिणः कर्त्तव्याः किन्त्वकृताः स्वयं साक्षिणो भवन्त्येव। उभौ तु श्रोत्रियौ स्याताभिति स्मृतेः। वृद्धस्यासाक्षित्वं वृद्धत्वादेव म्लानेन्द्रियत्वादित्यर्थः। मनुः।

"स्त्रीणां साक्ष्यं स्त्रियः कुर्य्युर्द्विजानां सदृशा द्विजाः।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः।
अन्तर्वेश्मन्यरण्ये वा शरीरस्यात्ययेऽपि च।
स्त्रियाप्यसम्भवे कार्य्यं बालेन स्थविरेण वा।
शिष्येण बन्धुना वापि दासेन भृतकेन वा।
देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्।
उदङ्मुखान् प्राङ्मुखान् वा पूर्व्वाह्णे वै शुचिः शुचीन्।
ब्रूहीति ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति पार्थिवम्।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः।"

गोबीजकाञ्चनापहारे यत् पापं तत्त्वानृताभिधाने स्यादिति वैश्यम्। एतत्त्वात्स्यानृताभिधाने भवान् सर्व्वैः पातकैः संवध्यत इत्युक्ता शूद्रञ्च पृच्छेत्।

"ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः।
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा।"

इति मनूक्तं दूषणम्। सत्यफलञ्च।

"अश्वमेधसहस्रन्तु सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते।"

इति मनुनारदोक्तं श्रावयेत्।

याज्ञवल्क्यः।

"न ददाति हि यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि।"

कात्यायन: ।
"अशीतिवत्सरे वर्षं वसेयु: कूटसाक्षिण: ।"*।
याज्ञवल्क्य: ।
"सत्यां प्रतिज्ञां यस्योचु: साक्षिण: स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजय: ।
वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ।
तत्पावनाय निर्व्वाप्यश्चरु: सारस्वतो द्विजै: ॥"
गौतम: । नानृतवचने दोषो जीवनञ्चेत्तदधीनं न तु पापीयसो जीवनमिति ।
"द्वैधे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तरा: ॥"
तेषामिति शेष: । यत्तु ।
"साक्षिणां लिखितानाञ्च निर्द्दिष्टानाञ्च वादिनाम् ।
तेषामेकोऽन्यथावादी भेदात् सर्व्वेऽप्यसाक्षिण: ॥"
इति कात्यायनवचनम् ।
तत्त्रयाणां तुल्यरूपाणां मध्ये एकस्याप्यन्यथावादे अपरस्य तत्तुल्यस्य तत्प्रतिपक्षतया तृतीयस्य किञ्चिद्वादित्वे तत्र भेदात् परस्परविरुद्धार्थाभिधाने भेदात् साक्षिभ्यो न निर्णय इति परम् । बृहस्पतिस्तु साक्षिद्वैधे कर्म्मनिष्ठानां ग्रहणमाह गुणिद्वैधे क्रियावतामित्यनेन । तथा ।
"साक्षिणोऽर्थिसमुद्दिष्टान् सत्सु दोषेषु दोषयेत् ।
अदुष्टं दूषयन् वादी तत्समं दण्डमर्हति ॥"
इति ।
तत्कर्म विवादसमम् । सभासदादिविदितसाक्षिदूषणमेव ग्राह्यं न तु नावरादिसाक्षिभि: प्रतिपाद्यम् । * । अनवस्थापातादित्याह नारद: ।
"सभासदां प्रसिद्धं यल्लोकसिद्धमथापि वा ।
साक्षिणां दूषणं ग्राह्यमसाध्यं दोषवर्जनात् ।
अन्यैश्च साक्षिभि: साध्ये दूषणे पूर्व्वसाक्षिणाम् ।
अनवस्था भवेद्दोषस्तेषामप्यन्यसम्भवात् ॥"
असाध्यं साधनानर्हं सिद्धत्वाद्दोषवर्जनात् । अनवस्थाविरहात्तस्मात् प्रसिद्धदूषणमेव ग्राह्यम् ।*।
दूषणमाह कात्यायन: ।
"बालोऽज्ञानादसत्यात् स्त्री पापाभ्यासाच्च कूटकृत् ।
विब्रूयाद्बान्धव: स्नेहाद्वैरनिर्यातनादरि: ॥
य: साक्षी नैव निर्द्दिष्टो नाहूतो नैव दर्शित: ।
ब्रूयान्मिथ्येति तथ्यं वा दण्ड्य: सोऽपि नराधम: ॥"
यदुत्तरे येन क्रिया प्रदश्यते तदाह ।
"मिथ्याक्रिया पूर्व्ववादे कारणे प्रतिवादिन: ।
प्राङ्न्याये विधिसिद्धौ तु जयपत्रं विनिर्द्दिशेत् ॥"
मिथ्योत्तरे सति पूर्व्ववादे पूर्व्ववादिनि क्रिया प्रदेया इति शेष: ॥ * ॥ तदानीं सन्धिमाह बृहस्पति: ।
"पूर्व्वोत्तरेऽभिलिखिते प्रक्रान्ते कार्य्यनिर्णये ।
द्वयोर्विवदमानयो: सन्धि: स्यादय:पिण्डयोरिव ॥"
उपायप्रकारद्वयमाह स एव ।
"साक्षिसभ्यविकल्पस्तु भवेद्यत्रोभयोरपि ।
दोलायमानौ यौ सन्धिं कुर्व्वातां तौ विचक्षणौ ॥"
कात्यायन: ।
"क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु ।
लेख्ये च सति वादेषु न दिव्यं न च साक्षिण: ।
समत्वं साक्षिणां यत्र दिव्यैस्तत्र विशोधयेत् ॥"
एतत् संशयानुच्छेदे बोध्यम् । याज्ञवल्क्य: ।
"निह्नुते लिखितानेकमेकदेशे विभावित: ।
दाप्य: सर्व्वान् नृपेणार्थान् ग्राह्यस्त्वनिवेदित: ॥"
यो लिखितानेकं सुवर्णादिकं अपलपति स एकदेशे साक्ष्यादिभिर्व्विभावित: सन् सर्व्वान् दद्यात् । यद्येकदेशविभावनेन वादिनोऽवसादमवगम्य इदमपरं मया लेखयितुं विस्मृतमिति ब्रूते स तस्मै भाषाकाले अनुपन्यस्तं न दद्यादेतच्च न केवलं वाचनिकं किन्त्वेकदेशविभावनादिज्ञानत एवास्य तदपलापे दु:शीलत्वावधारणादपरांशेऽपि तथात्वमेव सम्भाव्यते सत्यविभावकस्यापि प्रक्रान्तविषये यथा वस्तुवादावधारणादविभावितांशेऽपि सत्यवादित्वसम्भावनमित्थं रूपतर्कपरम्परा सम्भावना प्रत्ययानुगृहीतात्साक्षादेव योगीश्वरवचनात् सर्व्वं दापनीयमिति निर्णय: । एवञ्च तर्कवाक्यानुसारेण निर्णये क्रियमाणे वस्तुनोऽन्यथात्वेऽपि व्यवहारदर्शिनां न दोष: । तथा च गौतमेनापि न्यायाधिगमे तर्कोऽभ्युपाय: तेनापि संरुह्य यथास्थानं गमयेदित्युक्त्वा तस्माद्राजाचार्य्यावनिन्द्यावित्युपसंहृतम् । एवञ्चास्य न्यायस्य वादिद्वयसाधारणत्वादुभयविषयत्वं वचनानाम् । अतएव कात्यायन: ।
"यद्येकदेशप्राप्तापि क्रिया विद्येत मानुषी ।
सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणाम् ॥"
वदतां विवदतामित्यविशेषेण दर्शयति । पूर्णापि दैविकी समग्रविषयिकापि न ग्राह्या तेनैकदेशप्रतिपादिकया मानुष्या क्रियया समस्तसाध्यसिद्धिरिति । न च यद्येषां मध्ये एकमपि मया गृहीतं विभावयसि तदा सर्व्वमेव दातव्यमिति । प्रतिज्ञाविषयकत्वमेकदेशविभावितस्य वचनस्येति श्रीकोकमतानुसारिमैथिलमतं युक्तमिति वाच्यं प्रतिज्ञाविषयत्वे ।
"अनेकार्थाभियुक्तेन सर्व्वार्थव्यपलापिना ।
विभावितैकदेशेन देयं यदभियुज्यते ॥"
इत्यनर्थकं प्रौढ़िवादेनाभियुज्य मानादधिकस्यापि प्रतिज्ञातस्य दानापत्तेश्च तत्त्वात् न ग्राह्यश्चानिवेदित इत्यपि व्यर्थं अनिवेदितस्यापि प्रागज्ञातत्वेनाप्रतिज्ञातस्य सर्व्वथैव देयत्वात् । न च विभावितैकदेशवचनं व्याप्यभूतैकदेशविषयं तस्मिंस्तु प्रतिपादिते व्यापकैकदेशप्रतीतिरनुमानात् सम्भवतीति वाच्यं विभावितैकदेशानुमितव्यापकस्यापि न्यायतोऽग्राह्यत्वे सिद्धे न ग्राह्यश्चानिवेदित इत्यभिधानानुपपत्ते: । एवञ्च ।
"साध्यार्थांशे निगदिते साक्षिभि: सकलं भवेत् ।
स्त्रीसङ्गे साहसे चौर्य्ये यत्साध्यं परिकल्पितम् ॥"
इति कात्यायनवचनम् ।
तद्विषयप्रदर्शकं ज्ञाननिषेधात्पदद्वयेऽपि योज्यमिति । यत्तु ।
"अनेकार्थाभियोगे तु यावत् संसाधयेद्धनी ।
साक्षिभिस्तावदेवासौ लभते साधितं धनम् ॥"
तदृणादानलिप्सुपुत्रादिविषयकम् । यदा हि नानाविधपित्र्यार्थाभियुक्तेनाजानता नाहं जानामीति उत्तरवादिना साक्ष्यादिभिर्यावद्धनं प्रतिपादयति तावदेव पुत्रेण दातव्यम् एवमेव विश्वरूपश्रीभूतवाहनप्रभृतय: ॥ कात्यायन: ।
"अनुमानाद्गुरु: साक्षी साक्षिभ्यो लिखितं गुरु ।
अविरुद्धा त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी ॥"
अनुमानं प्रत्यासन्नलिङ्गं तदाह मनु: ।
"बाह्यैर्व्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् ।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च ॥"
स्वरो गद्गदादि: वर्णोऽस्वाभाविक: । इङ्गितं स्वेदवेपथुरोमाञ्चादि । आकारो विकृत: । चक्षुषा कातरेण । चेष्टितेन स्थानत्यागादिना । एषामन्यथासिद्धेर्दुर्निरूपत्वादेभ्य: साक्षी बलवान् इत्यर्थ: ॥ * ॥ दुष्टनिरूपणं तु याज्ञवल्क्य: ।
"देशाद्देशान्तरं याति सृक्किणी परिलेढ़ि च ।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ॥
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ।
वाक् चक्षु: पूजयति नो तथौष्ठौ निर्भुजत्यपि ॥
स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्म्मभि: ।
अभियोगे च साक्ष्ये च स दुष्ट: परिकीर्त्तित: ॥"
न परोक्तां वाचं प्रतिवचनेन पूजयति तथौष्ठचक्षुश्च परकीयवीक्षणेन निर्भुजति कुटिलीकरोति यदा मनोवाक्कायकर्म्मभि: स्वभावात् पूर्व्वोक्तां यथायोग्यां विकृतिं गच्छेत्तदा स दुष्ट इत्यर्थ: । अतएव श्रीरामायणे ।
"आकारश्छाद्यमानोऽपि न शक्योऽसौ निगूहितुम् ।
बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् ॥"
आकारो देहधर्म्म: मुखाप्रसादवैवर्ण्यरूप: ।
नारद: ।
"सुदीर्घेणापि कालेन लिखितं सिद्धिमाप्नुयात् ।
संज्ञानन्नात्मनो लेख्यमजानंस्तु लेखयेत् ॥"
सुदीर्घेणेति संस्कारोद्बोधकलिखनसत्त्वादयं चिरेणापि साक्ष्यं दातुं शक्नोतीत्यर्थ: ॥ * । लिपिज्ञं स्वहस्तेन लेखयेत् तदज्ञं परहस्तेनेत्याह व्यास: ।
"अलिपिज्ञ ऋणी य: स्यात् लेखयेत् स्वमतन्तु स: ।
साक्षी वा साक्षिणान्येन सर्व्वसाक्षिसमीपत: ॥"
बृहस्पति: ।
"मुषितं घातितं यत्र सीमायाञ्च समन्तत: ।
अज्ञातोऽपि भवेत् साक्षी ग्रामस्तत्र न संशय: ॥"

अकृता अपि साक्षिणो भवन्तीत्याहतुर्मनु-कात्यायनौ ।
"अन्ये पुनरनिर्द्दिष्टाः साक्षिणः समुदाहृताः ।
ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् ॥
कार्य्येष्वभ्यन्तरो यः स्यादर्थिना प्रहितश्च यः ।
कुल्याः कुलविवादेषु भवेयुस्तेऽपि साक्षिणः ॥"
स्मृतिः ।
"दत्तादत्तेऽथ भृत्यानां स्वामिनां निर्गमे सति ।
विक्रयादानसम्बन्धे क्रीत्वा धनमनिच्छति ॥
द्यूते समाह्वये चैव विवादे समुपस्थिते ।
साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकम् ॥
प्रक्रान्ते साहसे वापि पारुष्ये दण्डवाचिके ।
बलोद्भवेषु कार्य्येषु साक्षिणो दिव्यमेव च ॥"
बृहस्पतिः ।
"लेख्यं वा साक्षिणो वापि विवादे यस्य दूषिताः ।
तस्य कार्य्यं न सिध्येत यावत्तन्न विशोधयेत् ॥"
तल्लेख्यसाक्षिरूपप्रमाणम् ॥ * ॥ लेख्यशोधनमाह कात्यायनः ।
"स्वहस्तलेख्यसन्देहे जीवतो वा मृतस्य च ।
तत्स्वहस्तकृतैरन्यैः पत्रैस्तल्लेख्यनिर्णयः ॥"
तथा ।
"समवेतैश्च यद्दृष्टं वक्तव्यं तत्तथैव च ।
विभिन्नैनैव कार्य्ये तु तद्वक्तव्यं पृथक् पृथक् ॥
नापृष्टैरनियुक्तैर्वा समं सत्यं प्रयत्नतः ।
वक्तव्यं साक्षिभिः साक्ष्यं विवादस्थानमागतैः ॥
अनुद्दिष्टेन चित्तेन दृष्टं सम्यग्विदा तु यत् ।
प्रत्यक्षं तत् स्मृतं कार्य्यं साक्ष्यं साक्षी तु तद्वदेत् ॥"
नारदः ।
"यः परार्थेऽपहरति स्वां वाचं पुरुषाधमः ।
आत्मार्थे किं न कुर्य्यात् स पापो नरकनिर्भयः ॥
अर्था वै वाचि नियता वाङ्मूला वाग्विनिः-
स्रुताः ।
यस्तु तांस्तेनयेद्वाचं स सर्व्वस्तेयकृन्नरः ॥"
बौधायनः ।
"पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् ।
सर्व्वं भूम्यनृते हन्ति साक्ष्ये साक्षी मृषा वदन् ॥"
बृहस्पतिः ।
"यस्य दोषं प्रतिज्ञातं साक्षिभिः प्रतिपादितम् ।
स जयी स्यादन्यथा तु साध्यार्थं न समाप्नुयात् ॥"
याज्ञवल्क्यः ।
"उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तराः ।
द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः ॥"
अन्यथा पूर्व्वविपरीतार्थप्रकारेण । कूटा अना-देयवचनाः । तथा ।
"यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तमसावृतः ।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणश्च विवासयेत् ॥"
त्वमन्येभ्यः साक्ष्यं श्रावयेतिवादिना प्रयुक्तो यः श्रावितः कारितशपथात् परस्मिन्निह्नुते एवम्भूतोऽपि सभायां निगदकाले साक्ष्यं निह्नुते यस्तस्याष्ट-गुणो दण्डः ॥ * ॥

अथ लिखितम् ।

तत्र बृहस्पतिः ।
"षाण्मासिकेऽपि समये भ्रान्तिः संजायते यतः ।
धात्राक्षराणि सृष्टानि पत्रारूढ़ान्यतः पुरा ॥"
नारदः ।
"लेख्यं तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा ।
असाक्षिकं साक्षिकञ्च सिद्धिर्देशस्थितेस्तयोः ॥
मृतास्तु साक्षिणो यत्र धनिकर्णिकलेखकाः ।
तदप्यपार्थकं लेख्यमृते त्वाधेः स्थिराश्रयात् ॥
दर्शितं प्रतिकालञ्च पाठितं स्मारितञ्च यत् ।
लेख्यं सिध्यति सर्व्वत्र मृतेष्वपि च साक्षिषु ॥
लेख्ये देशान्तरस्थे च दग्धे दुर्लिखिते हृते ।
सतस्तत्कालहरणमसतो द्रष्टदर्शनम् ॥
छिन्नभिन्नहृतोन्मृष्टनष्टदुर्लिखितेषु च ।
कर्त्तव्यमन्यलिखितं स्यैष लेख्यविधिः स्मृतः ॥
लेख्यं यच्चान्यनामाङ्कं हेत्वन्तरकृतम्भवेत् ।
विप्रतिपत्तौ परीक्ष्यं तत् सम्बन्धागमहेतुभिः ॥"
स्वलेख्यमसाक्षिकमपि प्रमाणं अन्यद्वारा लेख्यं साक्षिमदिति यथासंख्येनान्वयः । देशस्थिते-र्यस्मिन् देशे यादृशलेख्यस्थितिः प्रवर्त्तते तत्र तादृशाः । तयोः स्वहस्तान्यहस्तकृतलेख्ययोः । मृता इति साक्ष्यादौ मृते पुत्रादिसंस्थं लेख्य-पत्रं न सिध्यति । यद्याधिभोगोऽस्ति तदा तदपि प्रमाणमित्यर्थः ॥ * ॥ यत्तमाह कात्यायनः ।
"यत्र पञ्चत्वमापन्नो लेखकः सह साक्षिभिः ।
ऋणिको धनिकश्चैव नैनं पत्रं प्रमापयेत् ॥"
दर्शितमिति तथाविधमपि पूर्व्वमृणिकादि-सन्निधौ स्वयमन्येन वा दर्शितं स्मारितं वा तदपि सिध्यतीत्यर्थः । सतो देशान्तरस्थपत्रस्य तत्कालहरणं पत्रानयनकालप्रतीक्षणम् । असतो दग्धादेः तदवलोककोपन्यासः । लेख्यमिति यत् पत्रं केनापि हेतुना अन्यनामचिह्नितं तत्र विप्रतिपत्तौ यन्नाम्ना पत्रं तेन सहास्य विश्वास-हेतुभूतसम्बन्धावगमरूपकारणैर्निर्णेतव्यमिति ।
बृहस्पतिः ।
"मुमूर्षुशिशुभीतार्त्तैः स्त्रीमत्तव्यसनातुरैः ।
निशापतत्सु बलात्कारैः कृतं लेख्यं न सिध्यति ॥"
व्यासः ।
"दासास्वतन्त्रबालैश्च स्त्रीकृतञ्चैव यद्भवेत् ।
प्रमाणं नैव तल्लेख्यमिति शास्त्रविदो विदुः ॥"
मिताक्षरायां स्मृतिः ।
"पूगश्रेणीगणादीनां या स्थितिः परकीर्त्तिता ।
तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः ॥"
पूगस्तु ।
"समूहो वणिगादीनां पूगः स परिकीर्त्तितः ।"
इति कात्यायनवचनोक्तः ।
आदिशब्दात् विजातीयलाभः । तेन ग्रामनग-रादिः । श्रेणी तु सजातीयसमूहः ताम्बूलिक-कुविन्दकर्म्मकारकादिः । गण एकक्रियार्थो-द्यतः । लेख्यस्य चाप्रामाण्यशङ्कायां लेख्य-ग्राहिणा प्रागुक्तशोधनप्रकारेण तन्निरसनीयं तत्पुत्रेण तु लेख्याधीनो भोग एव उपन्यास्यो न तु लेख्यमुद्धरणीयम् । तदाह कात्यायनः ।
"आहर्त्ता भुक्तियुक्तोऽपि लेख्यदोषान् विशो-
धयेत् ।
तत्सुतो भुक्तिदोषांस्तु लेख्यदोषांस्तु नाप्नुयात् ॥"
बृहस्पतिः ।
उद्धरेल्लेख्यमाहर्त्ता तत्सुतो भुक्तिमेव हि ।
अभियुक्तः प्रमीतश्चेत् तत्सुतोऽपि तदुद्धरेत् ॥"
अभियुक्त इति लेख्यस्य साधुत्वज्ञापनार्थं अभि-युक्ते लेख्यग्रहीतरि तदविज्ञाप्यैव मृते तत्पुत्रेण साधुत्वं साध्यमित्यर्थः तत्साधनञ्च स्वहस्तलिख-नादिनेति प्रागुक्तम् ॥ * ॥

अथ भुक्तिः ।

तत्र याज्ञवल्क्यः ।
"पश्यतोऽब्रुवतो हानिर्भूमेर्व्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥"
विवादमकुर्व्वतः समक्षं भूस्वामिनः परेणासपि-ण्डादिना भुज्यमानाया भूमेर्व्विंशतिवर्षनिर्वृत्ता स्वत्वहानिः । अत्र लोकव्यवहारकर्म्मत्वाद्वर्ष-गणना सावनेन । तथा च विष्णुधर्म्मोत्तरम् ।
"सत्राण्युपास्यान्यथ सावनेन
लौक्यश्च यत् स्यात् व्यवहारकर्म्म ॥"
तत्रैव ।
"सावने च तथा मासि त्रिंशत् सूर्य्योदयाः
स्मृताः ॥"
विशेषयति व्यासः ।
"वर्षाणि विंशतिर्यस्य भूर्भुक्ता तु परैरिह ।
सति राज्ञि समर्थस्य तस्य सेह न सिध्यति ॥"
समर्थस्य बालत्वादिदोषरहितस्य । धनस्य दश-वर्षनिर्वृत्ता स्वत्वहानिः । तथा च मनुनारदौ ।
"यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥"
यत्किञ्चित् धनजातं समक्षमेव प्रीत्यादिव्यति-रेकेण परैर्दश वर्षाणि भुज्यमानं स्वामी तूष्णीं प्रेक्षते मा भुज्यतामिति न प्रतिसिध्यति नासौ तल्लब्धुं योग्यो भवति तत्र तस्य स्वाम्यं नश्यती-त्यर्थः । गोतमः । अजड़ापौगण्डधनं दशवर्ष-भुक्तं परैः सन्निधौ भोक्तुः इति । जड़ो विकले-न्द्रियः पौगण्डः पूतोऽनुत्पन्नश्मश्रुर्गण्डः कपोलो यस्य सः । तदाह नारदः ।
"बाल आषोड़शाद्वर्षात् पौगण्डश्चापि
शब्द्यते ॥"
अत्रापौगण्डः प्रकीर्त्तित इति कुल्लूकभट्टेन लिखितम् । तत्पाठेऽपि अपौगण्डस्तु पौगण्डः इति द्विरूपकोषादविरुद्धः । तस्माद्याज्ञ-वल्क्यादिवचनाद्विंशतिवर्षदशवर्षादिकालभोग एव स्वत्वं जनयति । यथा । कालप्राप्तिवशेन बीजमङ्कुरं जनयति तरवश्च कुसुममिति स्वामिना चापरित्यक्तेऽपि शास्त्रोक्तकालीन-भोगात् स्वाम्यमन्यस्य भवति । यथा जयेन राज्ञः परराष्ट्रधने इति । एवमेव श्रीकरबाल-कजीमूतवाहनदेवभट्टशूलपाणिकुल्लूकभट्टवर्द्ध-मानमन्त्रिगणवर्द्धमानोपाध्यायप्रभृतयः व्यव-

हारोऽपि तादृगेव। एतद्विरुद्धवचनान्यथा व्याख्येयानि ॥*॥ तत्रोपेक्षया स्वत्वहानिं भुक्त्या च स्वत्वमाह नारदः।

"भुज्यमानान् परैरर्थान् यस्तान्मोहादुपेक्षते।
समक्षं तिष्ठतोऽप्यस्य तान् भुक्तिः कुरुते वशे॥"

व्यक्तमाह बृहस्पतिः।

"स्थावरं सिद्धिमाप्नोति भुक्त्या हानिमुपेक्षया।"

उपेक्षया क्षमया तत्कारणञ्च स्वामिनः सुशीलत्वमहेच्छत्वदयालुत्वादि। एवञ्च विंशतिवर्षात् पूर्व्वं स्वकृतिसाध्यकर्षणपालनादेरुत्पन्नद्रव्य एव स्वत्वम्। एवं दशवर्षात् पूर्व्वं स्वकृतिसाध्यदोहनपालनादेरुत्पन्नदुग्धादावेव स्वत्वं तत्तत्कालपरतस्तु भूमौ गवादिधनेऽपि स्वत्वमिति। पूर्व्वं तत्तन्नाशकभोगे तु चौर्य्यदोषो भवत्येव। भोगे तु स्वत्वहानिमाध्यादीनां व्यावर्त्तयति ॥*॥ पश्यतोऽब्रुवत इत्यभिधाय याज्ञवल्क्यः।

"आधिसीमोपनिक्षेपजड़बालधनैर्विना।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरिह॥"

आधिर्बन्धकद्रव्यम्। उपनिक्षेपस्तु वासनस्थमनाख्याय समुद्रं यन्निधीयते इति नारदोक्तः। वासनं निक्षेपाधारभूतं सम्पुटादिकम्। समुद्रं ग्रन्थ्यादियुतम्। जड़ो बुद्धिविकलः। बालः अप्राप्तषोड़शवर्षः। उपनिधिः प्रीत्या भोगार्थमर्पितः। ततश्च आध्यादिभिर्ज्जड़ादिधनैश्च विनान्यानि धनानि उक्तभोगकाले स्वामिनो नश्यन्ति एतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति। मिताक्षरायां स्मृतिः।

"द्वारमार्गक्रियाभोगजलवाहादिषु क्रिया।
भुक्तिरेवं तु गुर्व्वी स्यान्न दिव्यं न च साक्षिणः॥"

याज्ञवल्क्यः।

"आगमो ह्यधिको भोगाद्विना पूर्व्वक्रमागतात्।
आगमः कारणं तत्र भुक्तिः स्तोकापि यत्र न॥
आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत्।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी॥
योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्।
न तत्र कारणं भुक्तिरागमेन विना कृता॥"

भूम्यादावागमः पूर्व्वपुरुषक्रमानागतभोगाद्बलवान् अतः क्रमागतभोग आगमाद्बलवान्। तथा च बृहस्पतिः।

"अनुमानात् गुरुः साक्षी साक्षिभ्यो लिखितं गुरु।
अव्याहता त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी॥"

त्रिपुरुषभोगमाह व्यासः।

"प्रपितामहेन यद्भुक्तं तत्पुत्रेण विना च तम्।
तौ विना यस्य पित्रा च तस्य भोगस्त्रिपूरुषः॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः।
त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः॥"

आगमोऽपि बलवान्न भवति यत्र स्तोकापि भुक्तिर्नास्ति। तथा च नारदः।

"विद्यमानेऽपि लिखिते जीवत्स्वपि च साक्षिषु।
विशेषतः स्थावराणां यन्न भुक्तं न तत् स्थिरम्॥"

इति दीपकलिका।

यत्र वादिनौ स्वस्वागमबलप्रवृत्तौ आगमयोश्च पूर्व्वापरभावो नास्ति तत्र यस्य भुक्तिस्तस्यागमो बलीयान् न त्वन्यस्येत्यर्थः इति मिताक्षरा॥ अर्थाद्यत्रागमपौर्व्वापर्य्यनिश्चयस्तत्र।

"सर्व्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया।
आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा॥"

इति याज्ञवल्क्यवचनान्निर्णयः। आगमस्त्विति आ सम्यक् गम्यते प्राप्यते स्वीक्रियते येन स आगमः क्रयादिरिति व्यवहारमातृका॥ आगमः साक्षिपत्रादिकमिति दीपकलिका॥ आगमो धनोपार्ज्जनोपायः क्रयादिरिति मैथिलाः॥ तत्रान्येनाभियुक्तस्तत्कूटतामुद्धरेत् तत्पुत्रपौत्रौ नागममुद्धरेतां किन्तु भुक्तिरेव। तत्र प्रमाणं विशेषयति बृहस्पतिः।

"आहर्त्ता शोधयेत् भुक्तिमागमञ्चापि संसदि।
तत्सुतो भुक्तिमेवैकां पौत्रादिषु न किञ्चन॥"

इदं मूलपाणिधृतं तत्पुत्रादिर्न किञ्चनेति मैथिलधृतम्। आहर्त्ता अर्ज्जनकर्त्ता अत्र पुत्रस्य भुक्तिशोधनमात्रम् ॥*॥ भुक्तिशोधनमाहतुर्व्यासकात्यायनौ।

"सागमो दीर्घकालश्च निश्छिद्रोऽन्यरवोज्झितः।
प्रत्यर्थिसन्निधानश्च भोगः पञ्चाङ्ग इष्यते॥"

इष्यते प्रमाणत्वेन। सागमः क्रयादियुक्तः। एष च भूमिविषयकविंशतिवर्षधनविषयकदशवर्षान्यूनकालभोगपरः। योऽभियुक्त इत्यादि यो भोगे क्रियमाणे परेणाभियुक्तः सन् परेतो मृतः स्यान्नागममुद्धृतवान् तदा तत्पुत्रादिरागममुद्धरेत्। तथा च नारदः।

"अनारूढ़विवादस्य प्रेतस्याव्यवहारिणः।
पुत्त्रेण सोऽर्थः संशोध्यो न तु भोगो निवर्त्तयेत्॥"

विवादे सति शेषः। भोगः केवलभोगः। तथा च स एव। आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा इति एष सविवादभोगः षष्ट्यब्देतरपरः। तथाविधभोगस्यागमं विनापि प्रामाण्यात्। तथा व्यासः।

"वर्षाणि विंशतिं भुक्ता स्वामिना व्याहता सती।
भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी।
त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगमः॥"

एतद्वचनमसमक्षभोगविषयकमिति समक्षविंशतिवर्षभोगविषयकवचनेनाविरोधः। एतादृक् स्मृत्युक्तकाल एव। कात्यायनः।

"स्मार्त्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते।
अस्मार्त्ते त्वागमाभावात् क्रमात्त्रिपुरुषागता॥"

षष्टिवर्षैकपुरुषभुक्तौ त्रिपुरुषभुक्तिव्यपदेशस्य फलमाह न तत्रेत्यादि। अतएव नारदः।

"अन्यायेन तु यद्भुक्तं पित्रा पूर्व्वतरैस्त्रिभिः।
न तत् शक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतम्॥"

अन्यायेनेत्यत्रानागममिति मूलपाणिधृतपाठः। तुरप्यर्थः। पित्रा सह पितरमादाय त्रिभिरित्यर्थः। यत्तु।

"अनागमन्तु यो भुङ्क्ते बहून्यब्दशतानि च।
चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः॥"

इति तस्य वचनं दण्डविधायकं न तन्मुख्यार्थपरं धर्म्मशास्त्रविरोधात्। तदाह स एव।

"यत्र विप्रतिपत्तिः स्यात् धर्म्मशास्त्रार्थशास्त्रयोः।
अर्थशास्त्रार्थमुत्सृज्य धर्म्मशास्त्रार्थमाचरेत्॥"

एवमेव मूलपाण्युपाध्यायाः। वस्तुतस्तु अनागममिति दण्डविधायकवचनं शोधनरूपधनपरम्।

"शोधनञ्च नृपेन्द्राणां न कदाचन जीर्य्यति।
अनागमं भुज्यमानमपि वर्षशतैरपि॥"

इति स्वत्वनिषेधकवचनान्तरैकवाक्यत्वात्। तत्र विप्रतिपत्तिः स्यादिति वचनस्याप्येतदुदाहरणम्। यत्रैकस्य जयेऽवधार्य्यमाणे मित्रलब्धिरपरस्य जयेऽवधार्य्यमाणे धर्म्मलब्धिस्तत्र।

"हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः।
अतो यतेत तत्प्राप्ताविति वेदविदां मतम्॥"

इति याज्ञवल्क्योक्तार्थशास्त्रार्थमुत्सृज्य क्रोधलोभविवर्ज्जित इति धर्म्मशास्त्रार्थमवलम्ब्य व्यवहारं पश्येत्। अतएव सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः। इति कात्यायनोक्तम्। भवदेवभट्टास्तु व्यासवचनं प्रतिवादिनोऽसन्निधाने पुरुषैकदयभोगाभिप्रायम्। त्रैपुरुषभोगस्य तत्रैव प्रमाणत्वादित्याहुः॥

अथ भुक्तिस्वत्वापवादः।

बृहस्पतिः।

"भुक्तिस्त्रैपुरुषी सिध्येदपरेषां न संशयः।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिध्यति॥
अस्वामिना च तद्भुक्तं गृहक्षेत्रापणादिकम्।
सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते॥
विवाह्यश्रोत्रियैर्भुक्तं राज्ञामात्यैस्तथैव च।
सुदीर्घेणापि कालेन तेषां तत्तु न सिध्यति॥"

आपणो विक्रयस्थानं विवाह्यो जामाता ॥*॥

अथ युक्तिः।

नारदः।

"उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः।
केशाकेशि गृहीतश्च युगपत् पारदारिकः॥
कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः।
तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्त्तितः॥
प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकृन्नरः।
असाक्षिप्रत्यया ह्येते पारुष्ये तु परीक्षणम्॥"

प्रत्यक्षचिह्नैः रुधिराक्तखड्गादिभिः। पारुष्ये वाक्पारुष्ये। ग्रहः। लोप्त्रहस्तश्च चौर इति। नारदः।

"अभीक्ष्णं देयमानोऽपि प्रतिहन्यान्न तद्वचः।
त्रिचतुःपञ्चकृत्वो वा परतोऽर्थं तमावहेत्॥"

यदा धनिकेनाधमर्णिकस्त्रिचतुःपञ्चकृत्वो वा त्वं मे ऋणं धारयसीति पुनः पुनर्द्देश्यमानोऽपि न तद्वाक्यं प्रतिहन्ति तदोत्तरकालमनेनाभ्युपगतोऽयमर्थ इत्यवधार्य्य तमर्थं धनिकाय दापयेदित्यर्थः ॥*॥

अथ शपथः ।

नारदः ।

"युक्तिष्वप्यवसन्नासु शपथैरेनमर्द्दयेत् ।
अर्थकालबलापेक्षमग्न्यम्बुसुकृतादिभिः ॥"

एनं विचार्य्यमाणमर्थं अर्द्दयेत् पीडयेन्निर्णयेदित्यर्थः । अर्थस्य विवादास्पदस्य बलं बहुत्वभावः कालस्य च बलं पुण्यापुण्यत्वं तदपेक्षं यथा स्यादित्यर्थः । भूदूर्व्वाकरत्वस्य पुत्रादिशिरःस्पर्शस्य चाग्रे दर्शनीयत्वात् । अत्र मयैतत् कृतं न वेति प्रतिज्ञासत्यार्थाग्नौ जले वा हस्तं प्रक्षिपेत् । एतन्मिथ्यात्वे मम सुकृतं नश्येदिति वा ब्रूयात् । न त्वग्निपरीक्षां जलपरीक्षां वा कुर्य्यात् इत्यभिप्रायवर्णनं युक्तं तस्या महाभियोगविषयकत्वेन शपथसमभिव्याहारानर्हत्वात् । सुकृतादिभिरित्यादिना दूर्व्वासत्याद्युपग्रहः । तथा च विष्णुः ।

"सर्व्वव्यवार्थजातेषु मूल्यं स्वर्णं प्रकल्पयेत् ।"

तत्र कृष्णलोने शूद्रं दूर्व्वाकरं शापयेत् । द्विकृष्णलोने तिलकरं त्रिकृष्णलोने जलकरं चतुःकृष्णलोने स्वर्णकरं पञ्चकृष्णलोने सीतोद्धृतमहीकरं सुवर्णार्द्धोने कोषो देयः शूद्रस्य यथासमये विहिता क्रिया तथा द्विगुणेऽर्थे राजन्यस्य त्रिगुणेऽर्थे वैश्यस्य चतुर्गुणेऽर्थे ब्राह्मणस्येति । कृष्णलः काञ्चनरत्तिका तन्मूल्यादूने कृष्णलोने । एवमन्यत्र । मनुः ।

"सत्येन शापयेद्विप्रं क्षत्त्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः ।
पुत्त्रदारस्य वाप्येवं शिरांसि स्पर्शयेत् पृथक् ॥"

ब्राह्मणेन मयैतत् कृतं न कृतं वेति प्रतिज्ञासत्यार्थे सत्यमिति वक्तव्यम् । तथैव क्षत्त्रियेण वाहनायुधं स्प्रष्टव्यम् । तथैव वैश्येन गोबीजकाञ्चनानामन्यतमं स्प्रष्टव्यम् । शूद्रेण तु पूर्व्वोक्तं सर्व्वमेव स्प्रष्टव्यं तेषां वृथाकृतस्पर्शानां पातकहेतुत्वात् पातकशब्देन निर्द्देशः । कुल्लूकभट्टोऽप्येवम् ॥ * ॥ दैवक्रियाविषयमाह नारदः ।

"अरण्ये निर्ज्जने रात्रावन्तर्व्वेश्मनि साहसे ।
न्यासापहरणे चैव दिव्या सम्भवति क्रिया ॥"

बृहस्पतिः ।

"देवब्राह्मणपादांश्च पुत्त्रदारशिरांसि च ।
एते तु शपथाः प्रोक्ता मनुना स्वल्पकारणे ।
साहसेष्वभिशापे च दिव्यानि तु विशोधनम् ॥"

अत्र शपथदिव्ययोः पृथक्प्रतीतिः । शपथे न दिव्यधर्म्माः किन्तु वैधे कर्म्मणि तत्र शौचार्थं स्नानाचमनादिमात्रं कार्य्यम् । दिव्यानि तु दिव्यतत्त्वे कथितानि नात्र लिखितानि । अत्राभियुक्तेन शपथः कर्त्तव्य इत्युत्सर्गः ॥ * ॥ उभयेच्छयाभियोक्तापीत्याह नारदः ।

"अभियोक्ता शिरोवर्त्ती सर्व्वत्रैव प्रकीर्त्तितः ।
इच्छयान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ॥"

इतरः शपथकर्तृभिन्नः । तथा कात्यायनः ।

"आचतुर्दशकाद्दह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स ज्ञेयः शपथे शुचिः ॥"

व्यसनमापत् । घोरमतिपीड़ाकरम् । तथा च कोषाधिकारे यस्य पश्येदित्यनुवृत्तौ विष्णुः ।

"रोगोऽग्निर्ज्ञातिमरणं राजातङ्कमथापि वा ।
तमशुद्धं विजानीयात् तथा शुद्धं विपर्य्ययात् ॥"

कात्यायनः ।

"तस्यैकस्य न सर्व्वस्य जनस्य यदि सम्भवेत् ।
रोगोऽग्निर्ज्ञातिमरणमृणं दद्यात् दमञ्च सः ॥
ज्वरातिसारविस्फोटगूढ़ास्थिपरिपीड़नम् ।
नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते ।
शिरोरुग्भुजभङ्गश्च दैविका व्याधयो नृणाम् ॥"

तस्यैकस्येति न तु देशव्यापकमरणादिः । मनुः ।

"न वृथा शपथं कुर्य्यात् स्वल्पेऽप्यर्थे नरो बुधः ।
वृथा हि शपथं कुर्व्वन् प्रेत्य चेह च नश्यति ॥
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥"

कामिनीष्विति रहसि कामिनीसन्तोषार्थं वृथाशपथे एवं विवाहसिद्ध्यर्थं गोग्रासार्थं आवश्यकहोमेन्धनार्थं ब्राह्मणरक्षार्थमङ्गीकृतधनादौ । यमः ।

"वृथा तु शपथं कृत्वा कीटस्य वधसंयुतम् ।
अनृतेन च युज्येत वधेन च तथा नरः ।
तस्मान्न शपथं कुर्य्यान्नरो मिथ्यावधेप्सितम् ॥"

कीटस्येति प्राणिमात्रोपलक्षणं तद्वधपापेन वृथाशपथकर्त्ता युज्यत इत्यर्थः ॥

अथ निर्णयः ।

तत्र नारदः ।

"यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥
स्वयमभ्युपपन्नोऽपि स्वचर्य्यावसितोऽपि सन् ।
क्रियावसन्नोऽप्यर्हति परं सभ्यावधारणम् ।
सभ्यैरवधृतः पश्चात् स शास्यः शास्त्रमार्गतः ॥"

यस्य वादिनः प्रतिवादिनो वा साक्षिण इत्युपलक्षणम् । साक्षिलिखितभुक्तिशपथानां मध्येऽन्यतमप्रमाणं यस्य प्रतिज्ञायाः सत्यत्वप्रतिपादकं स एव जयी अन्यथा पराजित इति प्रत्येतव्यम् । स्वयमभ्युपपन्नः आत्मनैवाङ्गीकृतस्वपराजयः स्वचर्य्यावसितः कम्पस्वेदवैवर्ण्यादिना पराजितत्वेनावधृतः । क्रियावसन्नः साक्ष्यादिना प्राप्तपराजयः । परमनन्तरं सभ्यावधारणमर्हति सभासदां मिलितानामयं पराजित इति निर्णयमर्हति । आकाङ्क्षित स शास्त्रविधिना शास्यः ॥ * ॥ निर्णयस्य फलमाह बृहस्पतिः ।

"प्रतिज्ञाभावनाद्वादी प्राड्विवाकादिपूजनात् ।
जयपत्रस्य चादानात् जयी लोके निगद्यते ॥"

जयपत्रस्य लिखनप्रकारमाह स एव ।

"यद्वृत्तं व्यवहारेषु पूर्व्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ।
पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने पत्रं जयपत्रं तदुच्यते ॥"

कात्यायनः ।

"अर्थिप्रत्यर्थिवाक्यानि प्रतिसाक्षिवचस्तथा ।
निर्णयश्च तथा तस्य यथा चावधृतं स्वयम् ॥
एतद्यथाक्षरं लेख्यं यथापूर्व्वं निवेशयेत् ।
सभासदश्च ये तत्र धर्म्मशास्त्रविदस्तथा ॥"

तत्र भाषोत्तरे क्रिया च पक्षसाक्ष्यादिकं निर्णयो जयपराजयावधारणं निर्णयकालावस्थितसभ्यस्वाक्ष्यादिकं सर्व्वं लेखनीयं निरूपणस्य सम्यक्त्वप्रदर्शनार्थम् । तथाहि भाषोत्तरलिखनं हेत्वन्तरेण पुनर्न्यायप्रत्यवस्थाननिषेधार्थं नहि न गृहीतमिति मिथ्योत्तरेण पराजितस्य पुनः परिशोधितं मयेति प्रत्यवस्थानं सम्भवति । प्रमाणलिखनन्तु पुनः प्रमाणान्तरेण न्यायनिषेधार्थम् । तदाह कात्यायनः ।

"क्रियां बलवतीं त्यक्त्वा दुर्ब्बलां योऽवलम्बते ।
स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात् क्रियाम् ॥
निर्णीते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत् ॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णीतव्यवहाराणां प्रमाणमफलन्तथा ॥"

निर्णयोत्तरकृत्यमाह मनुः ।

"अर्थेऽपव्ययमानन्तु कारणेन विभावितम् ।
दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः ॥"

अपव्ययमानं अपलपन्तं कारणेन साक्ष्यादिप्रमाणेन । याज्ञवल्क्यः ।

"ज्ञात्वापराधं देशञ्च कालं बलमथापि वा ।
वयः कर्म्म च वित्तञ्च दण्डं दण्ड्येषु दापयेत् ॥"

मनुः ।

"तीरितं चानुशिष्टञ्च यत्र क्वचन सम्भवेत् ।
कृतं तद्धर्म्मतो विद्यात् न तत् भूयो निवर्त्तयेत् ॥"

अनुशिष्टं साक्ष्यादिनिर्णीतं अतएव तीरितं प्राड्विवाकादिभिः समापितम् । तद्विवादपदं पुनर्न निवर्त्तयेदित्यर्थः । यत्र तीरितानुशिष्टयोरप्यधर्म्मकृतत्वं प्रत्यवतिष्ठते । तत्र पुनर्न्यायदर्शनमाह नारदः ।

"तीरितं चानुशिष्टञ्च यो मन्येत विधर्म्मतः ।
द्विगुणं दण्डमादाय तत् कार्य्यं पुनरुद्धरेत् ॥"

असद्विचारे तु विचारान्तरमाह स एव ।

"असाक्षिकन्तु यद्दृष्टं विमार्गेण च तीरितम् ।
असम्मतमतैर्दृष्टं पुनर्दर्शनमर्हति ॥"

असाक्षिकमित्यप्रमाणकोपलक्षणम् । याज्ञवल्क्यः ।

"दुर्द्दृष्टांस्तु पुनर्दृष्टा व्यवहारान्नृपेण तु ।
सभ्याः सजयिनो दण्ड्या विवादाद्विगुणं दमम् ॥
साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः ।
स्वचर्य्यावसितानान्तु नास्ति पौनर्भवो विधिः ॥"

साक्षिवचनेन सभ्यावधारणेन च प्राप्तावसादानां पुनर्न्यायदर्शनम् । स्वव्यापारेण विरुद्धभाषादिना प्राप्तावसादानान्तु नास्ति पुनर्न्यायः । बृहस्पतिरपि ।

"पलायनानुत्तरत्वादन्यपक्षाश्रयेण च ।
हीनस्य गृह्यते वादो न स्ववाक्यजितस्य च ॥"
मनुः ।
"बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम् ।
सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ॥"
याज्ञवल्क्यः ।
"बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्त्तयेत् ।
स्त्रीनक्तमन्तरागारबहिर्ग्रामकृतांस्तथा ॥
मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः ।
असम्बन्धकृतश्चैव व्यवहारो न सिध्यति ॥"
उपाधिश्छलमिति शूलपाणिः । उपाधिर्भयादिरिति विज्ञानेश्वरः । तन्मते भीतादियोजित इत्युक्तवचनेन पौनरुक्तम् । बहिर्ग्रामः बहिर्देशः । मत्तो मद्यादिना । उन्मत्तो वातादिना । व्यसनी द्यूताद्यासक्तः । असम्बन्धो वादिनियुक्तव्यतिरिक्त उदासीनः । आदिपदात् स्वतन्त्रदासपुत्रादेर्ग्रहणम् । तथा च नारदः ।
"स्वतन्त्रोऽपि हि यत् कार्य्यं कुर्य्यादप्रकृतिं गतः ।
तदप्यकृतमेवाहुरस्वातन्त्र्यस्य हेतुतः ॥
कामक्रोधाभिभूता वा भयव्यसनपीड़िताः ।
रागद्वेषपरीताश्च ज्ञेयास्त्वप्रकृतिं गताः ॥
तथा दासकृतं कार्य्यमकृतं परिचक्षते ।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः ॥
पुत्त्रेण च कृतं कार्य्यं यत् स्यादस्वच्छन्दतः पितुः ।
तदप्यकृतमेवाहुर्दासपुत्त्रौ च तौ समौ ॥"
एतच्च कुटुम्बभरणातिरिक्तविषयम् ।
"कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत् ।
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥"
इति मनुवचनात् कुटुम्बमवश्यभरणीयम् । अध्यधीनः परतन्त्रः पुत्त्रदासादिः । व्यवहारमृणादिकं ज्यायान् स्वतन्त्रः न विचालयेत् अनुमन्येत । तथा च नारदः ।
"स्वातन्त्र्यन्तु स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ।
अस्वतन्त्राः प्रजाः सर्व्वाः स्वतन्त्रः पृथिवीपतिः ॥
अस्वतन्त्रः स्मृतः शिष्य आचार्य्यस्य स्वतन्त्रता ।
अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्त्रा दासाः परिग्रहाः ॥
स्वतन्त्रस्तत्र तु गृही यस्य तत् स्यात् क्रमागतम् ।
गर्भस्थैः सदृशो ज्ञेय: अष्टमाद्वत्सरात् शिशुः ॥
बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ॥
जीवतोर्न स्वतन्त्रः स्याज्जरयापि समन्वितः ।
तयोरपि पिता श्रेयान् वीजप्राधान्यदर्शनात् ।
अभावे वीजिनो माता तदभावे च पूर्व्वजः ॥"
परिग्रहा अनुजीविप्रभृतयः । तथा च बृहस्पतिः ।
"पितृव्यभ्रातृपुत्त्रस्त्रीदासशिष्यानुजीविभिः ।
यद्गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति ॥"
कात्यायनः ।
"कुटुम्बार्थमशक्तेन गृहीतं व्याधितेन वा ।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु तत् ॥
कन्यावैवाहिकञ्चैव प्रेतकार्य्ये च यत् कृतम् ।
एतत् सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥"
प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुणा दातव्यमिति रत्नाकरः । बृहस्पतिः ।
"यः स्वामिना नियुक्तोऽपि धनाय व्ययपालने ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु स स्मृतः ॥
प्रमाणं तत् कृतं सर्व्वं लाभालाभव्ययोदयम् ।
स्वदेशे वा विदेशे वा स्वामी तन्न विसंवदेत् ॥"
इति श्रीरघुनन्दनभट्टाचार्य्यविरचितं व्यवहारतत्त्वं समाप्तम् ॥ * ॥

व्यवहारज्ञः, पुं, (व्यवहारं जानातीति । ज्ञा + कः ।) प्राप्तव्यवहारः । (साबालक इति भाषा ।) स तु षोड़शवर्षानन्तरं भवति । यथा,—
"बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ॥"
इति व्यवहारतत्त्वधृतनारदवचनम् ॥
व्यवहारज्ञातरि, त्रि ॥

व्यवहारदर्शनं, क्ली, (व्यवहारस्य दर्शनम् ।) न्यायदर्शनम् । विचारकरणम् । इति मिताक्षरा ॥

व्यवहारपदं, क्ली, (व्यवहारस्य पदम् ।) वादिना राज्ञि निवेदनम् । (नालिस इति भाषा ।) यथा, याज्ञवल्क्यः ।
"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥"
स्मृतिसदाचारबहिर्भूतेन वर्त्मना परैर्धर्षितः शरीरतो वा पीड़ितश्चेद्राजनि निवेदयेत् तद्व्यवहारदर्शनस्थानम् । चेदित्यत्र यदिति मैथिलाः । आवेदयति चेदित्यनेन स्वयं विवादोत्थानं राज्ञा न कर्त्तव्यमिति शूलपाणिमहामहोपाध्यायाः । राज्ञीति व्यवहारप्रदर्शकपरं तथा च बृहस्पतिः ।
"राजा कार्य्याणि संपश्येत् प्राड्विवाकोऽथ वा द्विजः ॥"
कात्यायनः ।
"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
स्वयं स राजा विनुयात् तेषां जयपराजयौ ॥
यदा कार्य्यवशाद्राजा न पश्येत् कार्य्यनिर्णयम् ।
तदा नियुञ्ज्यात् विद्वांसं ब्राह्मणं वेदपारगम् ॥
यदि विप्रो न विद्वान् स्यात् क्षत्त्रियं तत्र योजयेत् ।
वैश्यं वा धर्म्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ॥"
स विनीतवेशः । मनुः ।
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥"
व्यासः ।
"द्विजान् विहाय यः पश्येत् कार्य्याणि वृषलैः सह ।
तस्य प्रक्षुभ्यते राज्यं बलं कोषञ्च नश्यति ॥
दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः ।
दुष्टां गां कः परित्यज्यार्च्चयेच्छीलवतीं खरीम् ॥"
इति व्यवहारतत्त्वम् ॥

व्यवहारपादः, पुं, (व्यवहारस्य पादः ।) व्यवहारांशः । यथा । अथ व्यवहारपादनिर्णयः । तत्र बृहस्पतिः ।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ॥"
इति व्यवहारतत्त्वम् ॥
अपि च ।
"परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु ।
वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः ॥
भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः ।
आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते ॥"
इति मिताक्षरा ॥

व्यवहारमातृका, (व्यवहारस्य मातृकेव ।) व्यवहारोपयोगिक्रिया । तद्यथा । व्यवहारदर्शनम् १ व्यवहारलक्षणम् २ सभासदः ३ प्राड्विवाकादिः ४ व्यवहारविषयः ५ राज्ञः कार्य्यानुत्पादकत्वम् ६ कार्य्यार्थिनि प्रश्नः ७ आह्वानानाह्वाने ८ आसेधः ९ प्रत्यर्थ्यागते लेख्यादिकर्त्तव्यता १० पक्षविधौ हीनः ११ कीदृशं लेख्यं १२ पक्षाभासाः १३ अनादेयाः १४ आदेयः १५ नियुक्तजयपराजये वादिजयपराजयौ १६ शोधितलेख्यनिवेशनम् १७ उत्तरावधिशोधनम् १८ शोधिते पक्षारूढ़े उत्तरकर्त्तव्यम् १९ उत्तरलक्षणम् २० सम्योत्तरलक्षणम् २१ मिथ्योत्तरलक्षणम् २२ प्रत्यवस्कन्दनोत्तरम् २३ प्राङ्न्यायोत्तरम् २४ उत्तराभासः २५ सङ्करानुत्तरम् २६ प्रत्यर्थिक्रियानिर्द्देशः २७ उत्तरे पञ्चेऽभिनिवेशिते साधननिर्द्देशः २८ वस्तुसिद्धौ सिद्धिः २९ चतुष्पाद्व्यवहारः ३० । इति मिताक्षरायां व्यवहारमातृका ॥

व्यवहारमार्गः, (व्यवहारस्य मार्गः ।) व्यवहारविषयः । व्यवहारपदम् । इति मिताक्षरा ॥

व्यवहारविधिः, पुं, (व्यवहारस्य विधिः ।) व्यवहारस्य विधानम् । धर्म्मशास्त्रम् । इति मिताक्षरा ॥

व्यवहारविषयः, पुं, (व्यवहारस्य विषयः ।) व्यवहारपदम् । तत्तु अष्टादशविधम् । यथा । ऋणादानम् १ निक्षेपः २ अस्वामिविक्रयः ३ सम्भूयसमुत्थानम् ४ दत्तस्यानपकर्म्म ५ वेतनादानम् ६ संविदो व्यतिक्रमः ७ क्रयविक्रयानुशयः ८ स्वामिपालयोर्विवादः ९ सीमाविवादधर्म्मः १० वाक्पारुष्यम् ११ दण्डपारुष्यम् १२ स्तेयम् १३ साहसम् १४ स्त्रीसंग्रहणम् १५ स्त्रीपुंधर्म्मः १६ विभागः १७ द्यूतम् १८ । इति मानवे ८ अध्यायः ॥

व्यवहारस्थानं, क्ली, (व्यवहारस्य स्थानम् ।) व्यवहारपदम् । व्यवहारविषयः । इति मिताक्षरा ॥

व्यवहारिकः, त्रि, (व्यवहारमर्हतीति । व्यवहार + ठक् ।) व्यवहारयोग्यः । यथा । इयं बुद्धिः ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोषो भवति । अयं कर्त्तृत्वभोक्तृत्वाभिमानित्वेन इहलोकपरलोकगामी व्यवहारिकोजीव उच्यते । इति वेदान्तसारः ॥

व्यवहारिका, स्त्री, (व्यवहारेण चरतीति ठक् । स्त्रियां टाप् ।) लोकयात्रा । सम्मार्ज्जनी । इङ्गुदवृक्षः । इति मेदिनी ॥

व्यवहारी, [न्] त्रि, (व्यवहारोऽस्यास्तीति । इनिः ।) व्यवहारविशिष्टः । व्यवहारशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नमिदम् ॥

व्यवहार्य्यः, त्रि, (वि + अव + हृ + ण्यत् ।) व्यवहरणीयः । व्यवहर्त्तव्यः । वि-अव-पूर्ब्बहृधातोर्ण्यत्प्रत्ययेन निष्पन्नमेतत् ॥ (यथा, याज्ञवल्क्ये । ३ । २२६ ।
"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतो व्यवहार्य्यस्तु वचनादेव जायते ।")

व्यवहितः, त्रि, (वि + अव + धा + क्तः ।) व्यवधानविशिष्टः । यथा,—
"कर्त्तृकर्म्मव्यवहितामसाक्षाद्धारयेत् क्रियाम् ।
उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं मतम् ।"
इति मुग्धबोधटीकायां रामतर्कवागीशः ॥

व्यवायं, क्ली, (वि + अव + अय + अच् ।) तेजः । इति मेदिनी ।

व्यवायः, पुं, (विशेषेण अवायनं अधः संश्लेषणम् । वि + अव + इ + घञ् ।) मैथुनम् । इत्यमरः ॥ (तथा, वैद्यके ।
"व्यायामञ्च व्यवायञ्च स्नानं चंक्रमणं तथा ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ।")
अन्तर्द्धानम् । इति मेदिनी ॥ (यथा, पाणिनौ ।
"अड्‌भ्याङ्‌नुम्‌व्यवायेऽपि ।" ८ । ४ । २ ।)
शुद्धिः । इति धरणिः ॥ (परिणामे । यथा, भागवते । ८ । ६ । ११ ।
"पश्यन्ति युक्ता मनसा मनीषिणो
गुणव्यवायेऽप्यगुणं विपश्चितः ।")

व्यवायी, [न्] पुं स्त्री, (व्यवैतुं शीलमस्य । णिनिः ।) कामुकः । यथा,—
"श्राद्धे नियुक्तो भुक्त्वा वा भोजयित्वा नियुज्य च ।
व्यवायी रेतसो गर्त्ते मज्जयत्यात्मनः पितॄन् ।"
इति श्राद्धतत्त्वम् ॥
(व्यवधानकर्त्ता । यथा, पाणिनौ । "व्यवायिनोऽन्तरम् ।" ६ । २ । १६६ । "व्यवायी व्यवधाता ।" इति काशिका ॥)

व्यसनं, क्ली, (वि + अस + ल्युट् ।) विपत् । (यथा, महाभारते । १२ । २२७ । ७ ।
"पुत्रदारैः सुखैश्चैव वियुक्तस्य धनेन वा ।
मग्नस्य व्यसने कृच्छ्रे धृतिः श्रेयस्करी नृप ! ।")
भ्रंशः । (यथा, मनौ । ७ । ८३ ।
"आयुधव्यसनप्राप्तं नार्त्तं नातिपरीक्षितम् ।")
कामजकोपजदोषः । इत्यमरः ॥ (यथा, कथासरित्सागरे । ११ । २५ ।
"उन्मुञ्च व्यसनानि त्वं सुखेन हि परैर्नृपाः ।
सीदन्तस्तेषु गृह्यन्ते खातेष्विव वनद्विपाः ॥"
यथा च भागवते । ४ । २६ । ४ ।
"विहाय जाया मतदर्हां मृगव्यसनलालसः ।"
"व्यसनं भोगासक्तिः ।" इति श्रीधरः ॥) विपत् विपत्तिः । भ्रंशोऽपायः पतनम् । मृगयाद्यूतस्त्रीमद्यपानस्वरूपे चतुर्व्वर्गे प्रसक्तिः कामजो दोषः । इच्छाप्रभवत्वात् । वाक्पारुष्यं अर्थपारुष्यञ्चेति त्रिवर्गः कोपजो दोषः । कोपप्रभवत्वात् । एषु व्यसनम् । व्यस्यति श्रेयोमार्गात् व्यसनं कर्त्तरि अनट् । भ्रंशे तु भावे । इति भरतः ॥ (अत्यासक्तिः । यथा, कथासरित्सागरे । ११ । ३२ ।
"शिथिलीकृतकैलासनिवासव्यसनो हरः ।")
अशुभम् । दैवानिष्टफलम् । पापम् । निष्फलोद्यमः । इति मेदिनी ॥ * ॥ राज्ञां व्यसनानि यथा,
"मृगयाक्षाः स्त्रियः पानं वाक्पारुष्यार्थदूषणे ।
दण्डपारुष्यमित्येतद्धेयं व्यसनसप्तकम् ।"
इति हेमचन्द्रः ॥ * ॥
व्यसनासक्ते दोषो यथा,—
"एकैकविषयासक्ताः सर्व्वे मृत्युवशं गताः ।
यः पुनः संहतान् सेवेत् विषयान् विषयी नरः ।
स पतेन्महदैश्वर्य्याच्छिन्नमूल इव द्रुमः ॥
स्त्रियः पानं दिवास्वप्नं तथा वादित्रनर्त्तनम् ।
द्यूताटनमृगागेयकामजानि तथा परे ॥
दण्डैर्वाचा ईर्ष्यासूया क्रोधपैशुन्यसाहसम् ।
अर्थदूषणक्रोधोऽर्थे अष्टकोपं विनाशकृत् ॥
देवा विद्याधरा यक्षाः किन्नरोरगमानुषाः ।
पशवः पक्षिणः सर्व्वे विषये निधनं गताः ॥
एवं विवेकमासक्तं दृष्ट्वा घोरं नराधिप ।
व्यवस्थ्याय समास्थाय विषयैः सन्निवेश्यताम् ॥"
इति देवीपुराणे ८ अध्यायः ॥

व्यसनार्त्तः, त्रि, (व्यसनेनार्त्तः ।) दैवीमानुषीपीडार्त्तः । तत्पर्य्यायः । उपरक्तः २ । इत्यमरभरतौ ॥

व्यसनी, [न्] त्रि, (व्यसनमस्यास्तीति । व्यसन + इनिः ।) व्यसन-विशिष्टः । (यथा, शिशुपालवधे । २ ।
"चिरस्य मित्रव्यसनी सुदमो दमघोषजः ।")
तत्पर्य्यायः । पञ्चभद्रः २ विप्लुतः ३ । इति हेमचन्द्रः ॥

व्यस्तः (वि + अस् + क्तः ।) व्याकुलः । व्याप्तः । इति मेदिनी ॥ प्रत्येकम् । पृथक् पृथक् । यथा, विश्वामित्रः ।
"कृच्छ्रचान्द्रायणादीनि शुद्धाभ्युदयकारणम् ।
प्रकाशे च रहस्ये च संशयेऽशुक्तकेऽस्फुटे ।
प्राजापत्यः सान्तपनः शिशुकृच्छ्रः पराककः ।
अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः ॥
महासान्तपनः शुद्धेः तप्तकृच्छ्रस्तु पावनः ।
जलोपवासकृच्छ्रस्तु ब्रह्मकूर्च्चस्तु शोधकः ॥
एते व्यस्ताः समस्ता वा प्रत्येकमेकशोऽपि वा ।
पातकादिषु सर्व्वेषु पातकेषु प्रयत्नतः ।
कार्य्याश्चान्द्रायणैर्युक्ताः केवला वा विशुद्धये ।"
इति प्रायश्चित्ततत्त्वम् ॥
विपरीतः । यथा,—
"प्रतिपदाप्यमावास्या तिथ्योर्युग्मं महाफलम् ।
एतद्व्यस्तं महाघोरं हन्ति पुण्यं पुराकृतम् ।"
इति तिथ्यादितत्त्वम् ॥

व्यस्तपदं, क्ली, (व्यस्तं पदं यस्मिन् ।) ऋणादानाभियोगे पदान्तरेणोत्तरम् । यथा । सुवर्णशताभियोगे अनेनाहन्ताडित इति । इति मिताक्षरा ॥

व्यस्तारं, क्ली, हस्तिमदप्रयोगः । इति त्रिकाण्डशेषः ॥

व्याकरणं, क्ली, (व्याक्रियन्ते अर्था येनेति । वि + आ + कृ + ल्युट् ।) वेदाङ्गविशेषः । इति शब्दरत्नावली ॥ तत्र साध्यसाधनकर्त्तृकर्म्मक्रियासमासादिनिरूपणम् । तस्य व्युत्पत्तिर्यथा । व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दा अस्मिन् अनेनेति वा । इति दुर्गादासः ॥ * ॥
"अथ व्याकरणं वक्ष्ये कात्यायन समासतः ।
सिद्धशब्दविवेकाय बालव्युत्पत्तिहेतवे ॥
सुप्तिङन्तं पदं ख्यातं सुपः सप्तविभक्तयः ।
स्वौजसः प्रथमा प्रोक्ता सा प्रातिपदिकात्मके ॥
संबोधने च लिङ्गादावुक्ते कर्म्मणि कर्त्तरि ।
अर्थवत् प्रातिपदिकं धातुप्रत्ययवर्ज्जितम् ॥
अमौट्शसो द्वितीया स्यात् तत्कर्म्म क्रियते च यत् ।
द्वितीया कर्म्मणि प्रोक्ता उक्तानुक्तविभेदतः ॥
टा भ्यां भिसस्तृतीया स्यात् करणे कर्त्तरीरिता ।
येन क्रियते करणं तत् कर्त्ता यः करोति सः ॥
ङे भ्यां भ्यसश्चतुर्थी स्यात् संप्रदाने च कारके ।
यस्मै दित्सा धारयते रोचते संप्रदानकम् ॥
पञ्चमी स्यात् ङसि भ्यां भ्यो ह्यपादाने च कारके ।
यतोऽपैति समादत्ते अपादानं भयं यतः ॥
ङसोसामश्च षष्ठी स्यात् स्वामिसम्बन्धमुख्यके ।
ङ्योस्सुपश्च सप्तमी स्यात् सा चाधिकरणे भवेत् ॥
आधारश्चाधिकरणं रक्षार्थानां प्रयोगतः ।
ईप्सितं चानीप्सितं यत्तदपादानकं स्मृतम् ॥
पञ्चमी पर्य्युपाङ्योग इतरर्त्तेऽन्यदिङ्मुखे ।
एनयोगे द्वितीया स्यात् कर्म्म प्रवचनीयकैः ॥
लक्षणवीप्सेत्थंभूतेऽभिभागे च परिप्रती ।
अन्तरेषु सहार्थे च हीनेऽनूपश्च कथ्यते ॥
द्वितीया च चतुर्थी स्याच्चेष्टायां गतिकर्म्मणि ।
अप्राणे हि विभक्ती द्वे मन्यकर्म्मण्यनादरे ॥
नमःस्वस्तिस्वधास्वाहालंवषड्योग ईरिता ।
चतुर्थी चैव तादर्थ्ये तुमर्थाद्भाववाचिनः ॥
तृतीया सहयोगे स्यात् कुत्सितेऽङ्गे विशेषणे ।
काले भावे सप्तमी स्यादेतैर्योगे च षष्ठ्यपि ॥
स्वामीश्वराधिपतिभिः साक्षिदायादसूतकैः ।
निर्द्धारणे द्वे विभक्ती षष्ठी हेतुप्रयोगके ॥
स्मृत्यर्थकर्म्मणि तथा करोतेः प्रतियत्नके ।

हिंसार्थानां प्रयोगे च कृति कर्म्मणि कर्त्तरि ।
न कर्त्तृकर्म्मणोः षष्ठी निष्ठादौ प्रतिपादिता ।
द्विविधं प्रातिपदिकं प्रातिपदिकमज्झलम् ॥*॥
भुवादिभ्यस्तिङो लः स्याल्लकारा दश वै स्मृताः ।
तिप्तसन्ति प्रथमो मध्यः सिप्थस्थोत्तमपूरुषः ।
मिप्वसमसः परस्मै तु पदानाञ्चात्मनेपदम् ।
तामातामन्ताः प्रथमो मध्यस्थासाथांध्वमुत्तमः ।
आदेशा इवहिमहान्ता अणिजादपि धातुतः ।
नाम्नि प्रयुज्यमानेऽपि प्रथमः पुरुषो भवेत् ।
मध्यमो युष्मदि प्रोक्त उत्तमः पुरुषोऽस्मदि ।
भुवाद्या धातवः प्रोक्ताः सनाद्यन्तास्तु धातवः ।
लड़ीरितो वर्त्तमाने स्मेनातीते च धातुतः ।
भूतानद्यतने लट् च लोड़ाशिषि च धातुतः ।
विध्यादावेवानुमतौ लिङ्विधिर्मन्त्रणे भवेत् ।
निमन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु तथाशिषि ।
लिड़तीते परोक्षे स्याल्लङ् लुङ् लृट् लृङ् भविष्यति ।
स्यादनद्यतने लुट् च भविष्यति च धातुतः ।
धातोर्लिङ्क्रियाभिपत्तौ लिङर्थे लोट् प्रकीर्त्तितः ।
कृतस्त्रिष्वपि वर्त्तन्ते भावे कर्म्मणि कर्त्तरि ।
शतृशानच्तव्यण्यदनीयक्तक्तवादयः ॥”
इति गारुडे कुमारव्याकरणे २०९ अध्यायः ॥

कुमार उवाच ।

“सिद्धोदाहरणं वक्ष्ये संहितादि परस्परम् ।
विप्रार्थं सागतान् धीदं सूत्तमं स्यात् पितृषभः ।
होतॄकारो विष्णुनेयं लाङ्गलीषा मनीषया ।
गङ्गोदकं तवल्कार ऋणार्णं प्रार्णमित्यपि ।
शीतार्त्तश्च तवल्कारः सैन्द्री सौकार इत्यपि ।
मध्वासनश्च पित्रर्थे मन्वयं नाप्ययोजयेत् ।
नायको लवणं नावस्त एते तेन ईश्वराः ।
देवीगृहमथोऽत्र यजुरेषि पटू इमौ ।
अमी अश्वाः षड़श्वेति तनुरास्तृणानि च ।
तच्चरेत्तन्नु नातीति तन्नलं तद्मशानकम् ।
सुगन्न पचन्न भवांश्छादयतीति दिक् ।
भवांश्चकुरकश्चैव भवांस्तरति संस्थितिम् ।
भवाँल्लिखति ताञ्छेते भवाञ्छरोऽन्यदीदृशम् ।
भवाञ्छीनं त्वन्तरसि त्वङ्करोषि सदार्च्चनम् ।
कश्चरेत् कष्टकारेण कः कुर्य्यात् कः स्वे स्थितः ।
कः शेते चैव कः षण्डः कोऽर्थः को याति गौरवम् ।
क इहार्थस्त एवाहुर्देवा आहुश्च भो व्रज ।
प्रभुर्विष्णुर्जति च गीष्पतिश्चैव धूष्पतिः ।
तस्मान्नैष व्रजेत् स स्यान्न कर्षत्यनुगच्छति ।
कुटीच्छाया तथाच्छाया साधवोऽन्ये तथेदृशाः ।
समासाः षट् पुराणे ये सद्भिः कर्म्मधारयः ।
द्विगुस्त्रिवेदी ग्रामस्था अयं तत्पुरुषः स्मृतः ।
तत्कृतश्च तदर्थं च वृकभीतिश्च यद्धनम् ।
ज्ञानदक्षिणतत्त्वज्ञो बहुव्रीहिरथाव्ययी ।
भावोऽधिस्त्रि यथोक्तित्वं द्वन्द्वो देवर्षिमानवाः ।
तद्धिताः पाण्डवः शैवो ब्राह्मश्च मधुतादयः ।
देवाश्मसखिपत्यं शुक्रोऽस्त्वयं भुवः पिता ।
ना प्रशास्ता च रा गौर्ग्लौ रूढ़ाजन्ताश्च पुंस्यपि ॥*॥
हलन्ताश्चाप्ययुक् प्राङ्सुहृत्कथान्गाविधः ।
आत्मा राजा युवा पन्थाः पूषब्रह्महणौ शशी ।
विड्वेधा उशनानड्वान् मधुलिट् काष्ठतट् तथा ॥*॥
वनवार्य्यस्थिवस्तूनि जगत्सामाहनी तथा ।
कर्म्म सर्पिर्वपुस्तेज अजझलन्ता नपुंसके ॥*॥
जाया जरा नदी लक्ष्मीः श्रीः स्त्री भूमिर्वधूरपि ।
भूः पुनर्भूस्तथा धेनुः स्वसा माता च नौः स्त्रियः ।
वाक् स्रक् धीः स्त्रुत् क्षुधः पामा युवतिः ककुभस्तथा ।
द्यौर्वृतिः प्रावृषश्चैव सुमन उष्णिहौ स्त्रियाम् ।
गुणद्रव्यक्रियायोगात्त्रिलिङ्गाश्च वदामि ते ।
शुक्लः कीलालपाश्चैव शुचिश्च ग्रामणीः सुधीः ।
पटुः कमलभूः कर्त्ता सुमती वहवः सुनौः ।
सत्यो नाम्नस्तथा ध्वंसो मधुभच्चमदीर्घपात् ।
धनार्थी च सुहृत् सोमौ वागङ्गस्वादिकस्तथा ।
सुवर्ण बहुपाच्छेषा चैषा त्वनडुहा तथा ॥*॥
सर्व्वविश्वोभये चोभौ अन्यान्तरेतराणि च ।
इतरडतरे नेमः समोऽथ सिम इत्ययम् ।
पूर्व्वापरावराश्चैव दक्षिणश्चोत्तराधरौ ।
अपरश्चान्तरोऽप्ये तद्यत्तत्किमदसो इयम् ।
युष्मदस्मत् प्रथमश्चरमाल्पे तथार्द्धके ।
एकः कतिपयो द्वौ च त्रयः सर्व्वादयस्तथा ॥*॥
भुविविदिर्दिविक्रन्दिधार्य्यश्च चयतिः खदिः ।
गौहुर्विद्या जुहोतिश्च जहातिश्च दधात्यपि ।
दीव्यति सूयतिर्वेत्ति पुषश्चिरक्षिणोत्यपि ।
तुटिश्चाहयति स्वपि रुधि गुर्व्वौ स्वती तनिः ।
समिः करोति क्रीणाति शृणोतिर्द्युति वर्द्धति ।
कर्णीडक्षपराणीवा धानवश्च युगा तथा ॥*॥
भवत् भवान् भवन्ती च ज्ञेयं कर्त्तव्यमेव च ।
कार्य्यं कृतश्च कृत्वा च प्रत्ययाः स्युस्तथापरे ।
सूर्य्याचरौ सुराः सन्ति देवविप्रवनान्यथ ।
नरेण कार्य्यं वेदैश्च क्रियते देहि भोजनम् ।
द्विजाय च वरिष्ठाभ्यां मा तेभ्योऽस्तु समागतः ।
तीर्थात्तथाश्रमाभ्याश्च सत्येभ्यः श्वशुरस्य च ।
गन्धर्व्वयोः करणानाञ्च ज्ञानं सिद्धमहान्वयोः ।
आगतस्त्विषु चैवमन्ये नेया यथामति ।
सर्व्वे तिष्ठन्ति सर्व्वस्मै सर्व्वस्मात् सर्व्वतो गतः ।
सर्व्वेषाञ्चैव सर्व्वस्मिन्नेवं विश्वादयस्तथा ।
पूर्व्वः पूर्व्वाश्च पूर्व्वस्मात् पूर्व्वस्मिन् पूर्व्व इत्यतम् ।

सूत उवाच :

सुप्तिङन्तं सिद्धरूपं नाममात्रेण दर्शितम् ।
कात्यायनः कुमारात्तु ज्ञात्वा विस्तरमब्रवीत् ॥”
इति गारुडे कुमारव्याकरणे २१० अध्यायः ॥*॥
एतद्भिन्नं अग्निपुराणे कार्त्तिकेयोक्तव्याकरणमस्ति । एवं महेशकृतमाहेशव्याकरणं पाणिनिमुनिकृतपाणिनीयव्याकरणं शर्व्ववर्म्मकृतकलापव्याकरणं क्रमदीश्वरकृतसंक्षिप्तसारव्याकरणं पद्मनाभदत्तकृतसुपद्मव्याकरणं वोपदेवकृतमुग्धबोधव्याकरणं गोस्वामिकृतहरिनामामृतव्याकरणं भट्टोजीदीक्षितकृतसिद्धान्तकौमुदीव्याकरणं अनुभूतस्वरूपाचार्य्यादिकृतसारस्वतादिव्याकरणानि च सन्ति ॥*॥ (विस्तारः । यथा, महाभारते । १२ । २५१ । ११ ।
“व्यवसायात्मिका बुद्धिर्म्मनो व्याकरणात्मकम् ॥”)

व्याकुलः, त्रि, (विशेषेण आकुलः ।) शोकादिभिरितिकर्त्तव्यताशून्यः । तत्पर्य्यायः । विह्वलः २ । इत्यमरः ॥ (यथा, महाभारते । ५।१७७।२५ ।
“रुरोद सा शोकवती बाष्पव्याकुललोचना ॥”
उपद्रुतः । यथा, भागवते । १ । ३ । २८ ॥
“एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृड़यन्ति युगे युगे ॥”)

व्याकुलात्मा, [न्] त्रि, (व्याकुलः आत्मा यस्य ।) शोकाभिहतचित्तः । यथा,—
“भो वृक्षाः पर्व्वतस्था बहुकुसुमयुता वायुना घूर्णमाना
रामोऽहं व्याकुलात्मा दशरथतनयः पृच्छते शोकदग्धः ।
बिम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या
हा सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टा ॥”
इति महानाटकम् ॥

व्याकृतिः, स्त्री, (विशिष्टा आकृतिः ।) भङ्गिः । इति हलायुधः ॥

व्याकोशः, त्रि, (व्याकुशति प्रस्फुटतीति । वि + आ + कुश + कः ।) विकशितः । इत्यमरटीकायां रामाश्रमः ॥ (यथा, माघे । ४ । ४६ ।
“दोषापि नूनमहिमांशुरसौ किलेति
व्याकोशकोकनदतां दधते नलिन्यः ॥”
भावे घञ् । प्रस्फुटनम् । यथा, मृच्छकटिके । १ अङ्के ।
“पद्मव्याकोशं भास्करं बालचन्द्रं
वापीविस्तीर्णं स्वस्तिकं पूर्णकुम्भम् ।
तत्कस्मिन् देशे दर्शयाम्यात्मशिल्पं
दृष्ट्वा श्वो यद्विस्मयं यान्ति पौराः ॥”)

व्याकोचः, त्रि, (व्याकुचति सङ्कुलीभावाद्बहिर्निःसरतीति । वि + आ + कुच + कः ।) प्रफुल्लः । इत्यमरः ॥ (यथा, महाभारते । ७।३०। २२ ।
“तं पद्मनिकराकारं पद्मपत्रनिभेक्षणम् ।
व्याकोचपद्माभिमुखो नलो विव्याध सायकैः ॥”)

व्याख्या, स्त्री, (व्याख्यानमिति । वि + आ + ख्या + “आतश्चोपसर्गे ।” इत्यङ् । ततष्टाप् ।) विवरणम् । इति हलायुधः ॥ (यथा, भागवते । ७ । १३ । ८ ।
“न शिष्याननुबध्नीत ग्रन्थान्नैवाभ्यसेद्बहून् ।
न व्याख्यामुपयुञ्जीत नारम्भानारभेत् क्वचित् ॥”
ग्रन्थः । यथा, तन्त्रसारे वागीश्वरीप्रकरणे ।
“शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखण्डोज्ज्वलां

व्याख्यामचगुणं सुधाढ्यकलशं विद्याञ्च हस्ताम्बुजैः ।
बिभ्राणां कमलासनां कुचनतां वाग्देवतां सस्मितां
वन्दे वाग्विभवप्रदां त्रिनयनां सौभाग्यसम्पत्करीम् ।")

व्याख्यानम्यं, क्ली, (व्याख्यया गम्यम् ।) उत्तराभासभेदः । व्याख्यया विवरणेन गम्यते ज्ञायते यत् । यथा,—
"अन्तर्व्याप्तपदव्यापि निगूढार्थं तथाकुलम् ।
व्याख्यागम्यमसारञ्च गौत्तरं शस्यते बुधैः ॥"
इति व्यवहारतत्त्वम् ।

व्याख्यातः, त्रि, विवृतः कथितः । वि-आङ्पूर्व्वक-ख्याधातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥

व्याघातः, पुं, (व्याहन्यतेऽनेनेति । वि+आ+हन+घञ् ।) विष्कम्भादिषप्तविंशतियोगान्तर्गतत्रयोदशयोगः । यथा,—
"परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ।
त्यजादौ पञ्च विष्कम्भे सप्त शूले च नाडिकाः ॥
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः ।
वैधृतिव्यतिपातौ च समस्तौ परिवर्जयेत् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥

तत्र जातफलम् ।
"व्याघातकर्म्मा च सतां नितान्तं
व्याघातजन्मा मनुजः कठोरः ।
असत्यभाषी क्षमया विहीनो
महेश्वरो दीर्घतनुः कृशाङ्गः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥

अन्तरायः । (यथा, महाभारते ।१।२।२८८।
"तेन व्याघातमन्त्राणां क्रियमाणमवेक्ष्य च ।")
प्रहारः । इति मेदिनी ॥ अलङ्कारविशेषः ।
तस्य लक्षणं यथा,—
"यद्यथा साधितं केनाप्यपरेण तदन्यथा ।
तथैव यद्विधीयेत स व्याघात इति स्मृतः ॥"
येनोपायेन यत् एकेन उपकल्पितं तस्यान्येन जिगीषुतया तदुपायकमेव यदन्यथाकरणं न स्वसाधितवस्तुव्याहतिहेतुत्वात् व्याघातः ।
उदाहरणम् ।
"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ता स्तुमो वामलोचनाः ॥"
इति काव्यप्रकाशे १० उल्लासः ।

व्याघ्रः, पुं, (व्याजिघ्रतीति । वि+आ+घ्रा+कः ।) जन्तुविशेषः । वाघ इति भाषा । (यथा, छान्दोग्ये । ६ । ९ । ३ ।
"त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति ॥") तत्पर्य्यायः । शार्द्दूलः २ द्वीपी ३ । इत्यमरः ॥ पुण्डरीकः ४ व्याघ्रः ५ चित्रकः ६ पुण्डरीकः ७ । इति जटाधरः ॥ हिंस्रपशुः ८ व्याडः ९ हिंसकः १० हिंसारुः ११ श्वापदः १२ । इति शब्दरत्नावली ॥ पञ्चनखः १३ व्यालः १४ गुहाशयः १५ तीक्ष्णदंष्ट्रः १६ भीरुः १७ नखायुधः १८ ।
अस्य मांसगुणाः ।
"शार्द्दूलसिंहशरभर्क्षतरक्षुमुख्या
येऽन्ये प्रसह्य विनिहत्यभिवर्त्तयन्ते ।
ते कीर्त्तिताः प्रसहनाः पललं तदीय-
मर्शःप्रमेहजठरामयनाशहारि ॥"
इति राजनिर्घण्टः ॥

स तु कश्यपभार्य्यादंष्ट्रासन्तानः । यथा,—
"दंष्ट्रा त्वजनयत् पुत्त्रान् व्याघ्रसिंहांश्च भाविनी ।
द्वीपिनश्च सुतास्तस्या व्याल्याद्याश्चामिष-प्रियाः ॥"
इत्यादौ वह्निपुराणे काश्यपीयवंशनामाध्यायः ॥
नरादिशब्दोत्तरस्थः श्रेष्ठार्थवाचकः । (यथा, महाभारते । १ । १५२ । २६ ।
"किन्नु दुःखतरं शक्यं मया द्रष्टुमतःपरम् ।
योऽहमद्य नरव्याघ्रान् सुप्तान् पश्यामि भूतले ॥")
रक्तैरण्डः । करञ्जः । इति मेदिनी ॥

व्याघ्रदलः, पुं, एरण्डवृक्षः । इति शब्दमाला ॥ राजनिर्घण्टे रक्तैरण्डपर्य्याये व्याघ्रतल इति पाठः ॥

व्याघ्रनखं, क्ली, (व्याघ्रस्य नखमिव ।) नखीनामगन्धद्रव्यम् । तत्पर्य्यायः । व्याड़ायुधम् २ करजम् ३ चक्रकारकम् ४ । इत्यमरः ॥ नखाङ्कम् ५ नखी ६ नख्यम् ७ व्याघ्रनखी ८ । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् ।७७।६।
"मञ्जिष्ठया व्याघ्रनखेन शुक्त्या
त्वचा सकुष्ठेन रसेन चूर्णः ।
तैलेन युक्तोऽर्कमयूखतप्तः
करोति तच्चम्पकगन्धितैलम् ॥")
तत्पर्य्यायगुणाः ।
"नखं व्याघ्रनखं व्याघ्रायुधं तच्चक्रकारकम् ।
नखं स्वल्पं नखी प्रोक्ता हनुर्हट्टविलासिनी ॥
नखद्वयं ग्रहश्लेष्मवातासज्वरकुष्ठहृत् ।
लघूष्णं शुक्रलं वर्ण्यं स्वादु व्रणविषापहम् ।
अलक्ष्मीमुखदौर्गन्ध्यहृत् पाकरसयोः कटुः ॥"
इति भावप्रकाशः ॥
कन्दविशेषः । नखक्षतविशेषः । इति मेदिनी ॥

व्याघ्रनखः, पुं (व्याघ्रस्य नखमिव कण्टकं यस्य ।) स्नुहीवृक्षः । व्यालनखः । इति राजनिर्घण्टः । व्याघ्रस्य नखश्च ॥

व्याघ्रनखकं, क्ली, (व्याघ्रनखमेव । स्वार्थे कन् ।) नखक्षतम् । इति शब्दमाला ॥

व्याघ्रनायकः, पुं, (व्याघ्रस्य नायक इव ।) शृगालः । इति राजनिर्घण्टः ॥

व्याघ्रपात्, [द्] पुं, (व्याघ्रस्य पाद इव ग्रन्थियुक्तमूलानि यस्य । "पादस्य लोपोऽहस्त्यादिभ्यः ।" ५ । ४ । १३८ । इत्यलोपः ।) विकङ्कतवृक्षः । इत्यमरः ॥ मुनिविशेषः । इति पुराणम् ॥ व्याघ्रतुल्यचरणे, त्रि । इति मुग्धबोधव्याकरणम् ॥

व्याघ्रपादः, पुं, (व्याघ्रस्य पादा इव मूलानि यस्य ।) विकङ्कतवृक्षः । विकण्टकवृक्षः । इति राजनिर्घण्टः ॥ (मुनिविशेषः । यथा, महाभारते । १३ । १४ । १०६ ।
"पुराकृतयुगे तात ऋषिरासीत् महायशाः ।
व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः ॥")

व्याघ्रपुच्छः, पुं, (व्याघ्रस्य पुच्छमिव सदृशदलमस्य ।) एरण्डवृक्षः । इत्यमरः ॥ व्याघ्रस्य लाङ्गूलञ्च ॥

व्याघ्राटः, पुं, (व्याघ्र इव अटतीति । अट गतौ+पचाद्यच् ।) भरद्वाजपक्षी । इत्यमरः ॥

व्याघ्रादनी, स्त्री निश्टला । इत्यमरः ॥

व्याघ्रास्यः, पुं, (व्याघ्रस्य आस्यमिव आस्यमस्य ।) विड़ालः । इति शब्दचन्द्रिका ॥ व्याघ्रमुखे, क्ली ॥

व्याघ्री, स्त्री, (व्याघ्र+ङीष् ।) कण्टकारी । इत्यमरः ॥ व्याघ्रपत्नी च ॥ (यथा, रघुः । १२ । ३७ ।
"त्वया: परिभवो व्याघ्र्यामित्यवेहि त्वयाहृतम् ॥")

व्याजः, पुं, (अजति यथार्थव्यवहारादपगच्छत्यनेनेति । वि+अज+घञ् । घञि विभावो नास्ति ।) कपटः । स तु अयथार्थव्यवहारः । वञ्चनमात्रफलम् । इति सर्व्वानन्दो मधुश्च ॥ अपदेशः । स कारणान्तरप्रवृत्तिः कारणान्तरोद्भावनम् । व्याजोऽत्र स्वरूपाच्छादनम् । यथा ध्यानव्याजमुपेत्य चिन्तयसि कामिति । व्याजोऽयमभिप्रायगोपनफलः । पूर्व्वोक्तस्तु परापकारफलः । इत्ययथार्थव्याजयोर्भेदः । अन्यमुद्दिश्य अन्यप्रतिपादनमिह व्याज इत्यर्थः । यदाह अन्यमुद्दिश्य अन्यार्थमनुष्ठानं अपदेशः । यथा, जलक्रीड़ामुद्दिश्य जारावलोकनार्थं यातीति । इत्यमरभरतौ ॥

व्याजनिन्दा, स्त्री, (व्याजेन निन्दा ।) कपटकुत्सा । अलङ्कारविशेषः । यथा,—
"निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते ॥"
इति चन्द्रालोकः ॥
(उदाहरणं यथा,—
"विधेस्स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः ॥")

व्याजस्तुतिः, स्त्री, (व्याजेन स्तुतिः । व्याजरूपा स्तुतिश्च ।) कपटप्रशंसा । अलङ्कारभेदः । यथा,
"उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुति-निन्दयोः ॥"
इति चन्द्रालोकः ॥
(उदाहरणं यथा,—
"कः स्वर्धुनि ! विवेकस्ते पापिनो नयसे दिवम् ॥")

व्याजोक्तिः, स्त्री, (व्याजेन उक्तिः ।) छलवाक्यम् । अलङ्कारविशेषः । यथा,—
"व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम् ॥"
इति चन्द्रालोकः ॥
(उदाहरणं यथा,—
"सखि ! पश्य गृहारामपरागैरस्मि धूसरा ॥")

व्याड़ः, पुं, सर्पः । मांसभक्षकपशुः । इत्यमरः ॥ (यथा, मार्कण्डेये । । १५ । १० ।

"श्वा छगलो वृको ऋक्षो व्याड़ः कङ्कस्तथा-
क्रमात् ॥")
इन्द्रः । इति शब्दरत्नावली ॥ वञ्चकः । इति
रायमुकुटः ॥
व्याड़ायुधं, क्ली, (व्याड़स्य व्याघ्रस्यायुधं नख-
मिव ।) व्याघ्रनखाख्यगन्धद्रव्यम् । इत्यमरः ॥
व्याड़िः, पुं, कोषकारमुनिविशेषः । तत्पर्य्यायः ।
विन्ध्यवासी २ नन्दिनीतनयः ३ । इति हेम-
चन्द्रः ॥ विन्ध्यस्थः ४ नन्दिनीसुतः ५ । इति
त्रिकाण्डशेषः ॥
व्यात्तं, त्रि, (वि+आ+दा+क्तः ।) प्रसारितम् ।
विस्तृतम् । यथा,—

"खर्व्वोद्र्धकर्णं गिरिकन्दराद्भुत-
व्यात्तास्यनासं हनुभेदभीषणम् ।
दिवि स्पृशत्कायमदीर्घपीवर-
ग्रीवोरुवक्षःस्थलमल्पमध्यमम् ॥"
इति श्रीभागवते ७ स्कन्धे ८ अध्यायः ॥

गिरिकन्दरवत् अद्भुतं व्यात्तं प्रसृतमास्यं नासे
च यस्मिन् । इति तट्टीकायां श्रीधरस्वामी ॥
व्यात्युक्षी, स्त्री, (व्यतिहारेण उक्षणम् ।
वि+आ+अति+उक्ष+"कर्म्मव्यतीहारे णच्
स्त्रियाम् ।"३।३।४३। इति णच् । ततः "णचः
स्त्रियामञ् ।"५।४।१४। इति अञ् । "टिड्ढाण-
ञिति ।" ४।१।१५। इति ङीप् ।) रसिकानाम-
न्योन्यं जलक्रीड़नम् । इति संक्षिप्तसारोणादि-
वृत्तिः ॥ तत्पर्य्यायः जलक्रीड़ाशब्दे द्रष्टव्यः ॥
व्यादिशः, पुं, (विशेषेणादिशति स्वस्वकर्म्मणि
नियोजयति जगत् । वि+आ+दिश+कः ।)
विष्णुः । यथा,—
"अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥
व्याधः, पुं, (विध्यति मृगादीन् । व्यध+"श्याद्व्य-
धेति ।" ३ । १ । १४१ । इति णः ।) मृग-
हिंसकजातिः । शिकारी इति भाषा । स तु
सर्व्वस्त्रियां क्षत्त्रियाज्जातः । यथा,—
"गोपिताच्छोपकन्यायां सर्व्वस्त्री तस्य योषिति ।
क्षत्राद्बभूव व्याधश्च बलवान् मृगहिंसकः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
तत्पर्य्यायः । मृगवधाजीवः २ मृगयुः ३
लुब्धकः ४ । इत्यमरः ॥ मृगावित् ५ द्रोहाटः ६ ।
इति जटाधरः ॥ मृगजीवनः ७ बलपांशुनः ८ ।
इति शब्दरत्नावली ॥ (यथा,—

"विद्धा मृगी व्याधशिलीमुखेन
मृगोऽपि तत्कातरवीक्षणेन ।
असून् परित्यज्य गतव्यथा सा
मृगस्य जीवावधिराविरासीत् ॥"
इत्युद्भटः ॥)

दुष्टः । इति मेदिनी ॥ (यथा, भागवते । ३ ।
१४ । २४ ।
"व्याधस्याप्यनुकम्प्यानां स्त्रीणां देवः सती-
पतिः ॥")

व्याधभीतः, पुं, (व्याधाद्भीतः ।) मृगः । इति
शब्दचन्द्रिका ॥ (व्याधभीते, त्रि ॥)
व्याधामः, पुं, वज्रम् । इति हेमचन्द्रः ॥
व्याधिः, पुं, (विविधा आधयोऽस्मात् । यद्वा, वि+
आ+धा+"उपसर्गे घोः किः ।"३ । ३ । ९२ ।
इति किः ।) कुष्ठम् । रोगः । इत्यमरः ॥
(यथा, महाभारते । १२ । १६ । ८ ।
"द्विविधो जायते व्याधिः शारीरो मानस-
स्तथा ।
परस्परं तयोर्ज्जन्म निर्द्वन्द्वं नोपलभ्यते ॥")
कामव्याधासन्तापजन्यकृशता । इति रसमञ्जरी ॥
कुष्ठस्य निदानं यथा,—
"व्यालोकनमनस्यौत्यक्रीड़ाविषयचेष्टितैः ।
विरोधरूपभीहर्षविषादाद्यैश्च दूषितः ॥
पुंस्त्वोत्साहबलभ्रंशशोथचित्ताल्पवज्वरान् ।
सर्व्वाकाराङ्गनिस्तोदं रोमहर्षं सुषुप्तताम् ॥
कुष्ठं विषममन्यच्च कुर्य्यात् सर्व्वाङ्गमार्द्दवम् ॥"
इति गारुड़े १७२ अध्यायः ॥
अन्यत् कुष्ठशब्दे द्रष्टव्यम् ॥ * ॥ अथ कुष्ठस्य
चिकित्सा ।
"वातोत्तरेषु सर्पिर्व्वमनं कफोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं श्रेष्ठम् ॥
पथ्याकरञ्जसिद्धार्थनिशावल्गुजसैन्धवैः ।
विड़ङ्गसहितैः पिष्टैर्लेपो मूत्रेण कुष्ठनुत् ॥"
अवल्गुजः वाकुचीति लोके । पथ्यादिभि-
र्लेपः ॥ * ॥
"सोमराजीभवचूर्णं शृङ्गवेरसमन्वितम् ।
उद्वर्त्तनमिदं हन्ति कुष्ठरोगं क्षतास्रदम् ॥"
सोमराजी वाकुचीति लोके । सोमराज्युद्-
वर्त्तनम् ॥ * ॥
"रसायनं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ।
मार्कण्डेयप्रभृतिभिर्यत् प्रयुक्तं महर्षिभिः ॥
पुष्पकाले तु पुष्पाणि फलकाले फलानि च ।
संगृह्य पिचुमर्द्दस्य त्वङ्मूलानि दलानि च ।
द्विरंशानि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिफला त्र्यूषणं ब्राह्मी श्वदंष्ट्रारुष्करामयः ॥
विड़ङ्गसारवाराहीलोहचूर्णाः स्मृताः समाः ।
निशाद्वयावल्गुजकव्याधिघाताः सशर्करा ॥
कुष्ठमिन्द्रयवाः पाठाः चूर्णमेषान्तु संयुतम् ।
खदिरासननिम्बानां घनं क्वाथेन भावयेत् ॥
सप्तधा पञ्चनिम्बन्तु मार्कवस्वरसेन च ।
स्निग्धः शुद्धतनुर्धीमान् योजयेत्तच्छुभे दिने ॥
मधुना तिक्तहविषा खदिरासनवारिणा ।
लेह्यमुष्णाम्भसा वापि कोलवृद्ध्या पलं भवेत् ।
जीर्णे तस्मिन् समश्नीयात् स्निग्धं लघु हितं च
यत् ॥

विचर्च्चिकोडुम्बरपुण्डरीक-
कपालदद्रुकिटिभालसादि ।
शतारुविस्फोटविसर्पमालाः
कफप्रकोपं त्रिविधं किलासम् ॥
भगन्दरश्लीपदवातरक्त-
जड़ान्ध्यनाड़ीव्रणशीर्षरोगान् ।
सर्व्वान् प्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति ॥
स्थूलोदरः सिंहकृशोदरः स्यात्
सुश्लिष्टसन्धिर्मधुनोपयोगात् ।
सदोषरोगादपि ये दशन्ति
सर्पादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
शुभे रतिश्चन्द्रसमानकान्तिः ॥"

अयमर्थः । निम्बस्य फलपुष्पत्वक्पत्रमूलानि
सर्व्वाणि समुदितानि द्विगुणानि चूर्णितानि
भृङ्गराजस्य रसेन सप्तवारान् भावयेत् ।
त्रिफलादीनि पाठान्तानि समुदितान्येक-
भागानि चूर्णितानि खदिरासननिम्बानां
निविड़क्वाथेन भावयेत् । ततः सर्व्वमेकीकृत्य
मध्वादिनावलिह्यात् । पञ्चनिम्बकावलेहः ॥ * ॥
शशिलेखापञ्चपलं तावद्गिरिजस्य गुग्गुलो-
र्दश च ।
ताप्यस्य पलचितयं द्वे लौहाभ्रकावणिकायाः ॥
त्रिफलाकरञ्जफलखदिरगुड़ूचीचित्रदन्त्यः ।
मुस्ताविड़ङ्गरजनीकुटजत्वक्निम्बचव्य-
सम्पाकाः ॥
एते रचितां वटिकां मधुघृतमिश्रां गिलेत्-
प्रातः ।
गोमूत्रेण च कुष्ठं शुद्रन्यदन्त्यवातमचिरेण ॥
श्वित्राणि पाण्डुरोगं विषमासुदरप्रमेह-
गुल्मांश्च ।
नाशयति वलीपलितं योगः स्वायम्भुवो नाम्ना ॥
शशिलेखा सोमराजी । गिरिजस्य शिला-
जतुनः । ताप्यस्य स्वर्णमाक्षिकस्य । बावचिका
सुकौति लोके । स्वायम्भुवो गुग्गुलुः ॥ * ॥
"त्रिवृतं त्रिफला व्योषमजाजी कारवी वचा ।
सैन्धवातिविषे कुष्ठं चव्येलायावशूकजम् ॥
विड़ङ्गान्यजमोदा च मुस्ता चामरदारु च ।
यावन्त्येतानि सर्व्वाणि तावन्मात्रन्तु गुग्गुलुः ॥
संक्षुभ्य सर्पिषा सार्द्धं गुटिकां कारयेद्भिषक् ।
प्रातर्भोजनकाले च खादेदग्निबलं यथा ॥
हन्त्यष्टादश कुष्ठानि क्रिमीन् दुष्टव्रणानि च ।
ग्रहण्यर्शोविकारांश्च मुखामयगलग्रहान् ॥
गृध्रसीमस्थिभग्नञ्च गुल्मञ्चापि नियच्छति ।
व्याधिं कोष्ठगतांश्चापि जयेद्विष्णुरिवासुरान् ॥"
एकविंशतिको गुग्गुलुः ॥ * ॥
"वातरक्ताधिकारोक्तः पुरः कैशोरकाभिधः ।
कुष्ठानां वातरक्तानां नाशयेत् परमौषधम् ॥"
इति कैशोरको गुग्गुलुः ॥ * ॥
"भल्लातकं प्रस्थयुगं छित्त्वा द्रोणजले क्षिपेत् ।
प्रस्थद्वयं गुड़ूच्याश्च खुसं तत्राम्भसि क्षिपेत् ॥
चतुर्थांशावशेषन्तु कषायमवतारयेत् ।
वस्त्रपूते कषाये च वक्ष्यमाणानि निक्षिपेत् ॥
शरावमात्रं गोसर्पिर्गोदुग्धस्याढकं तथा ।
सितां प्रस्थमितां दद्यात् प्रस्थार्द्धमाक्षिकं क्षिपेत्
सर्व्वाण्येकत्र भाण्डे तु पचेत् मृदग्निना शनैः ।
सर्व्वद्रव्ये घनीभूते पावकादवतारयेत् ॥

तत्र चैष्याणि चूर्णानि क्रमो विल्वमिताम्रता ।
काकुची चाथ दद्रुघ्नः पिचुमर्द्दो हरीतकी ॥
धात्री रात्रिश्च मञ्जिष्ठा मरिचं नागरं कणा ।
यवानी सैन्धवं मुस्तं त्वगेला नागकेशरम् ॥
पर्पटः पद्मकं वालमुशीरं चन्दनं तथा ।
गोक्षुरस्य च बीजानि कर्च्चूरो रक्तचन्दनम् ॥
पृथक् पलार्द्धमानानां चूर्णमेषामिह क्षिपेत् ।
पलमात्रमिदं प्रातः समश्नीयाज्जलेन हि ॥
नाशयेदवलेहोऽयं कुष्ठानि निखिलान्यपि ।
वातरक्तानि सर्व्वाणि सर्व्वाण्यर्शांसि सेवितः ॥
व्यायाममातपं वह्निमम्लं मांसं दधि स्त्रियम् ।
तैलाभ्यङ्गं तथा स्नानं नरो भल्लातके त्यजेत् ॥”
इति अमृतभल्लातकावलेहः ॥ * ॥
“निम्बं गोपाख्या कट्वी त्रायन्ती त्रिफला घनम् ।
पर्पटावल्गुजानन्ता वचा खदिरचन्दनम् ॥
पाठा शुण्ठी शटी भार्गी वासा भूनिम्बवत्सकम् ।
श्यामेन्द्रवारुणी मूर्व्वा विडङ्गेन्द्रयवानलम् ॥
हस्तिपर्ण्योऽनन्ता शृङ्गा पटोलरजनीद्वयम् ।
कृतारग्वधसप्ताह्वसप्तवेणीवटाफलम् ॥
मञ्जिष्ठा लाङ्गली रास्ना नक्तमालं पुनर्नवा ।
दन्ती विजयसारश्च भृङ्गराजकुरण्टकम् ॥
अङ्कोठकश्च प्रास्फोटं द्विपलांशं पृथक् पृथक् ।
सर्व्वाण्येतानि सर्व्वाणि जलद्रोणे पचेच्छनैः ॥
अष्टमांशावशेषन्तु कषायमवतारयेत् ।
त्रिधाय वाससा पूतं स्थापयेद्भाजने दृढे ॥
भल्लातकसहस्राणि छित्त्वा द्रोणमितेऽम्भसि ।
पचेदष्टावशेषन्तु कषायमवतारयेत् ॥
तत्र वस्त्रेण संशोध्य द्वौ कषायौ विमिश्रयेत् ।
गुडस्य च तुलां दत्त्वा लेहवत् साधु साधयेत् ॥
भल्लातकसहस्राणि तत्र बीजानि निःक्षिपेत् ।
त्रिकटु त्रिफला मुस्तं विडङ्गं पद्मकं तथा ॥
चन्दनं सैन्धवं कुष्ठं दीप्यकञ्च पलं पलम् ।
सौगन्ध्यार्थं क्षिपेत्तत्र चातुर्जातं पलं पृथक् ॥
महाभल्लातको ह्येष महादेवेन भाषितः ।
प्राणिनां हितकामाय जयेच्छीघ्रं प्रयोजितः ॥
श्वित्रमौडुम्बरं दद्रुमृष्यजिह्वं सकाकणम् ।
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं रक्तमण्डलम् ॥
कण्डूं कपालकं कुष्ठं पामानञ्च विपादिकाम् ।
वातरक्तं चतुर्थांशि पाण्डुरोगं प्रवाहमीन् ॥
रक्तपित्तमुदावर्त्तकासश्वासं भगन्दरम् ॥
सदाभ्यासेन पलितमामवातं सुदुस्तरम् ।
नियेमतस्तु कथितो विहाराहारमैथुनैः ।
कुरुते परमां कान्तिं प्रदीप्तं जठरानलम् ॥
अनुपानं प्रयोक्तव्यं हिमानीयं पयोऽथवा ।
भोजने तु सदा त्याज्यमुष्णमम्लं विशेषतः ॥”
गोपा श्वेत साउ इति लोके । यत आह निघण्टः ।
“सारिवा सारदा स्फोटा गोपकन्या प्रतानिका ।”
तट्टीकायां गोपीशब्दस्य यत आह । गोपी श्यामा सारिवा स्यादनन्तोत्पलसारिवा इत्यमरः । गोपाङ्गना गोपवल्ली लताङ्का काष्ठसारिवेति मदनपालः । चरणा अतीस् । अवल्गुजः सोमराजी । अनन्ता दुरालभा । चन्दनं श्वेतम् । भार्गी अलाभे कण्टकारीमूलम् । श्यामा कृष्णा साउ । हस्तिकर्णः हथिकर्ण । शृङ्गा वक्रा इति । सप्ताह्वः छतिमन् । सप्तवेणः अजवेतसः । उत्कटाफलं आरक्तगुञ्जाफलम् । कुरण्टकः कटसरैया । दीप्यकः इति यवानी । महाभल्लातकः ।
“मञ्जिष्ठा त्रिफला तिक्ता वचा दारु निशामृता ।
निम्बश्चैषां कृतः क्वाथः सर्व्वकुष्ठानि नाशयेत् ॥”
इति लघुमञ्जिष्ठादिक्वाथः ॥ * ॥
“मञ्जिष्ठा वाकुची चक्रमर्द्दश्च पिचुमर्द्दकम् ।
हरीतकी हरिद्रा च धात्री वासा शतावरी ॥
बला नागबला यष्टीमधुकं क्षुरकोऽपि च ।
पटोलस्य शतोशीरं गुडूची रक्तचन्दनम् ॥
मञ्जिष्ठादिरयं क्वाथः कुष्ठानां नाशनः परः ।
वातरक्तस्य संहर्त्ता कण्डूमण्डलखण्डनः ॥”
इति मध्यममञ्जिष्ठादिक्वाथः ॥ * ॥
“मञ्जिष्ठा कुटजामृता घनवचा शुण्ठी हरिद्राद्वयं
क्षुद्रारिष्टपटोलकुष्ठकटुका भार्गी विडङ्गाग्निकम् ।
मूर्व्वा दारु कलिङ्गभृङ्गमगधा त्रायन्ति पाठा वरी
गायत्री त्रिफला किरातकमहानिम्बा सनारग्वधम् ॥
श्यामा वल्गुजचन्दनं वरुणकं दन्ती कणा चोड़कं
वासा पर्पटसारिवा प्रतिविषानन्ता विशाला जलम् ।
मञ्जिष्ठादिरयं कषायविधिना नित्यं पुमान् यः पिबेत्
त्वग्दोषा ह्यचिरेण यान्ति विलयं कुष्ठानि चाष्टादश ॥
नाशं गच्छति वातरक्तमखिलं नश्यन्ति रक्तामया
वीसर्पश्च विनश्यता नयनजा रोगाः प्रशाम्यन्ति च ॥”
अरिष्टः निम्बः । कलिङ्गः इन्द्रयवः । भृङ्गं भृङ्गरा । वरी शतावरी । गायत्री खदिरः । असनः विजयसारः । श्यामा प्रियङ्गुः । चन्दनमत्र रक्तं ग्राह्यम् । सारिवा साउ । अनन्ता दुरालभा । विशाला इन्द्रवारुणी इति । जलं नेत्रवाला । इहन्मञ्जिष्ठादिक्वाथः ॥
“मरिचं त्रिवृता मुस्ता हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ॥
विशाला करवीरश्च चीरमर्कसमुद्भवम् ।
गोमयस्य रसं कुर्य्यात् प्रत्येकं कर्षसम्मितम् ॥
विषस्यार्द्धपलं देयं तैलं प्रस्थमितं कटु ।
पचेच्चतुर्गुणे नीरे गोमूत्रे द्विगुणे तथा ॥
मरिचाद्यमिदं तैलमभ्यङ्गात् कुष्ठनाशनम् ।
एतस्याभ्यञ्जनतः श्वित्रं विवर्णं तनुच्छयाद्भवेत् ॥
तैलमेतज्जयेत् कण्डूं पामां विस्त्रं विचर्च्चिकाम् ।
पुण्डरीकं तथा दद्रुं शून्यतां नित्यसेविनाम् ॥”
इति लघुमरिचाद्यं तैलम् ॥ * ॥
“मरिचं त्रिवृता दन्ती चीरमार्कं शकृद्रसः ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ॥
विशाला करवीरश्च हरितालं मनःशिला ।
चित्रकं लाङ्गली मुस्ता विडङ्गं चक्रमर्द्दकः ॥
शिरीषः कुटजो निम्बः सप्तपर्णोऽमृता स्नुही ।
सम्पाको नक्तमालश्च खदिरो वाकुची वचा ॥
ज्योतिष्मती च पलिका विषं द्विपलिकं भवेत् ।
आढ़कं कटुतैलस्य गोमूत्रञ्च चतुर्गुणम् ॥
मृत्पात्रे लोहपात्रे च शनैर्मृद्वग्निना पचेत् ।
मरिचाद्यमिदं तैलं महन्मुनिभिरीरितम् ॥
भिषगेतेन तैलेन म्रक्षयेत् कौष्ठिकान् व्रणान् ।
पामाविचर्च्चिकादद्रुकण्डूविस्फोटकानि च ॥
वलयः पलितं च्छाया नीलं व्यङ्गं तथैव च ।
अभ्यङ्गेन प्रणश्यन्ति सौकुमार्य्यञ्च जायते ॥
प्रथमे वयसि स्त्रीणां यासां नस्यं प्रदीयते
तासामपि जरां प्राप्य न स्यातां स्खलितौ स्तनौ ॥
वलीवर्द्दस्तुरङ्गो वा गजो वा वायुपीड़ितः ।
त्रिभिरभ्यञ्जनै रम्यं भवेन्मारुतविक्रमः ॥”
ज्योतिष्मती मालकङ्गुणीति लोके । इति महामरिचादितैलम् ॥ * ॥
“तालकस्य तु पत्राणि यस्य सन्ति पृथक् पृथक् ।
अभ्रकस्येव तद्ग्राह्यं हरितालं चिकित्सकैः ॥
पुनर्नवायाः स्वरसे तालकं तद्विमर्द्दयेत् ।
दिनमेकं ततस्तस्मिन् घनत्वं गमिते सति ॥
कुर्व्वीत चक्रिकां तान्तु शोषयेत् सम्यगातपे ।
पुनर्नवासमस्ताङ्गक्षारैः स्थालीं गलावधि ॥
पूरयेच्च ततः क्षारं दृढ़येत् पीड़नेन हि ।
क्षारस्योपरि तां दद्यात् तालकस्य तु चक्रिकाम् ॥
तत आच्छादनं दत्त्वा मुद्रां कृत्वा विशोषयेत् ।
स्थालीं चुल्ल्यां निधायाग्निममन्दं ज्वालयेद्भिषक् ॥
निरन्तरमहोरात्रं पञ्चकं तेन सिध्यति ।
स्वाङ्गशीतं समुत्तार्य्य गृह्णीयाद्रससुत्तमम् ॥
तालकेश्वरनामायमुक्तो गुञ्जामितो रसः ।
गुडूच्यादिकषायेण गदानेतान् विनाशयेत् ॥
अष्टादशापि कुष्ठानि वातरक्तं तथोद्धतम् ।
फिरङ्गदेशजं रोगं दुस्तरं च व्यपोहति ॥
एतद्भेषजसेवी तु लवणान्नं विवर्ज्जयेत् ।
तथा कटुरसं वह्निमातपं दूरतस्त्यजेत् ॥
लवणं यः परित्यक्तुं न शक्नोति कथञ्चन ।
स तु सैन्धवमश्नीयात् मधुरोपरसो हि सः ॥”
इति तालकेश्वरो रसः ॥ * ॥
“तालताप्यशिलासूतं टङ्कणं सिन्धुसंयुतम् ।
गन्धार्कौ द्विगुणौ सूताज्जम्बीराद्भिः प्रमर्द्दयेत् ॥
यद्वत्रं पुटितं षोढ़ा भूधरे सकलं त्विदम् ।
षट्पदं द्विपलं ताम्रं लोहभस्म चतुष्पलम् ॥

जम्बीराद्भिर्दिनं घृष्टं त्रिंशदंशं विषं पिबेत् ।
अस्य माषद्वयं खादेन्माहिषीघृतसंयुतम् ॥
मध्वाज्यैश्चाकुचीबीजैः कर्षं लिह्यात्ततः परम् ।
तालकेश्वरनामायं सर्व्वकुष्ठहरो रसः ॥"
अर्कौ मारितं ताम्रम् । इति द्वितीयतालकेश्वरो रसः ॥ * ॥

"रसो वलिस्ताम्रमयः पुरोऽग्निः
शिलाजतु स्याद्विषतिन्दुकञ्च ।
वरा च तुल्यं गगनं करञ्ज-
बीजं पृथग्भागचतुष्टयञ्च ॥
संमर्द्य सर्व्वं मधुना घृतेन
घृतस्य पात्रे निहितं प्रयत्नात् ।
कर्षं भजेत् प्रत्यहमस्य पथ्यं
शाल्योदनं दुग्धमधुत्रयञ्च ॥
विशीर्णकर्णाङ्गुलिनासिकोऽपि
भवेदनेन स्मरतुल्यमूर्त्तिः ।
दारापरित्याग इह प्रदिष्टो
तिलौदनं तत्र निबद्धमूले ॥"

ताम्रमयञ्च मारितम् । पुरो गुग्गुलुः । अग्निश्चित्रकम् । विषतिन्दुकः कुचिला । वरा त्रिफला । रसादि त्रिफलान्तं सर्व्वं तुल्यम् । गगनमभ्रकम् । करञ्जबीजञ्च पृथक् चतुर्गुणं दद्यात् । तत्र कुष्ठे बद्धमूले सति तिलौदनमेव पथ्यम् । इति गलत्कुष्ठाधिकारः । इति भावप्रकाशः ॥ * ॥ अथ सर्व्वव्याधिहरकवचम् ।

हरिरुवाच ।

"सर्व्वव्याधिहरं वक्ष्ये वैष्णवं कवचं शिवम् ।
येन रक्षा कृता शम्भोः श्वेतं रक्षयतः पुरा ॥
प्रणम्य देवमीशानमजं नित्यमनामयम् ।
देवं सर्व्वेश्वरं विष्णुं सर्व्वव्यापिनमव्ययम् ॥
बध्नाम्यहं प्रतिसरं नमस्कृत्य जनार्द्दनम् ।
अमोघाप्रतिमं सर्व्वं सर्व्वदुःखनिवारणम् ॥
विष्णुर्मामग्रतः पातु कृष्णो रक्षतु पृष्ठतः ।
हरिर्मे रक्षतु शिरो हृदयञ्च जनार्द्दनः ॥
मनो मम हृषीकेशो जिह्वां रक्षतु केशवः ।
पातु नेत्रे वासुदेवः श्रोत्रे सङ्कर्षणोऽवतु ॥
प्रद्युम्नः पातु मे घ्राणमनिरुद्धश्च चर्म्मकम् ।
वनमाली गलस्यान्तं श्रीवत्सो रक्षतादधः ॥
पार्श्वं रक्षतु मे चक्रं वामं दैत्यनिवारणः ।
दक्षिणन्तु गदा देवी सर्व्वासुरनिवारिणी ॥
उदरं मुषलं पातु पृष्ठं मे पातु लाङ्गलम् ।
ऊरू रक्षतु मे शार्ङ्गं जङ्घे रक्षतु नन्दकः ॥
पार्ष्णी रक्षतु शङ्खश्च पद्मं मे चरणावुभौ ।
सर्व्वकार्य्यार्थसिद्ध्यर्थं पातु मां गरुडः सदा ॥
वराहो रक्षतु जले विषमेषु च वामनः ।
अटव्यां नरसिंहश्च सर्व्वतः पातु केशवः ॥
हिरण्यगर्भो भगवान् हिरण्यं मे प्रयच्छतु ।
सांख्याचार्य्यस्तु कपिलो धातुसाम्यं करोतु मे ॥
श्वेतद्वीपनिवासी च श्वेतद्वीपं नयत्वजः ।
सर्व्वान् शत्रून् सूदयतु मधुकैटभसूदनः ॥
विष्णुः सदा विकिरतु किल्बिषं मम विग्रहात् ।
हंसो मत्स्यस्तथा कूर्म्मः पातु मां सर्व्वतो दिशम् ।
त्रिविक्रमस्तु मे देवः सर्व्वान् पापान् निकृन्ततु ।
नरनारायणौ देवौ बुद्धिं पालयतां मम ।
शेषो मे निर्म्मलं ज्ञानं करोत्वज्ञाननाशनम् ।
बलरामो नाशयतु कल्मषं यत् कृतं मया ॥
पद्भ्यां ददातु परमो सुखं मूर्द्ध्ना मम प्रभुः ।
दत्तात्रेयः कलयतु सपुत्त्रपशुबान्धवम् ॥
सर्व्वानरीन्नाशयतु रामः परशुना मम ।
रक्षोघ्नस्तु दाशरथिः पातु नित्यं महाभुजः ॥
शत्रून् मे समरे हन्याद्रामो यादवनन्दनः ।
प्रलम्बकेशिचाणूरपूतनाकंसनाशनः ॥
कृष्णस्य यो बालभावः स मे कामान् प्रयच्छतु ।
अन्धकारं तमो घोरं पुरुषं कृष्णपिङ्गलम् ॥
पश्यामि भयसन्त्रस्तः पाशहस्तमिवान्तकम् ।
ततोऽहं पुण्डरीकाक्षमच्युतं शरणं गतः ॥
धन्योऽहं निर्भयो नित्यं यस्य मे भगवान् हरिः ।
ध्यात्वा नारायणं देवं सर्व्वोपद्रवनाशनम् ॥
वैष्णवं कवचं बद्ध्वा विचरामि महीतले ।
अप्रधृष्योऽस्मि भूतानां सर्व्वदेवमयो ह्यहम् ॥
स्मरणाद्देवदेवस्य विष्णोरमिततेजसः ।
सिद्धिर्भवतु मे नित्यं यथामन्त्रमुदाहृतम् ॥
यो मां पश्यति चक्षुर्भ्यां यञ्च पश्यामि चक्षुषा ।
सर्व्वेषां पापदुष्टानां विष्णुर्बध्नाति चक्षुषा ॥
वासुदेवस्य यच्चक्रं तस्य चक्रस्य ये त्वराः ।
ते छिन्दन्तु च पापं मे मम हिंसन्तु हिंसकान् ॥
राक्षसेषु पिशाचेषु कान्तारेष्वटवीषु च ।
विवादे राजमार्गेषु द्यूतेषु कलहेषु च ॥
नदीसन्तरणे घाते संप्राप्ते प्राणसंशये ।
अग्निचौरनिपाते च सर्व्वग्रहनिवारणे ।
विद्युत्सर्पविषोद्वेगे रोगे च विघ्नसङ्कटे ।
जप्यमेतज्जपेन्नित्यं शरीरे भयमागते ॥
अयं भगवतो मन्त्रो मन्त्राणां परमो महान् ।
विख्यातं कवचं गुह्यं सर्व्वपापप्रणाशनम् ॥
स्वमायाकृतिनिर्म्माणकल्पान्तगहनो महत् ।
अनाद्यन्त जगद्बीज पद्मनाभ नमोऽस्तु ते ॥

ॐ कालाय स्वाहा । ॐ कालपुरुषाय स्वाहा । ॐ कृष्णाय स्वाहा । ॐ कृष्णपुरुषाय स्वाहा । ॐ चण्डाय स्वाहा । ॐ चण्डपुरुषाय स्वाहा । ॐ प्रचण्डाय स्वाहा । ॐ प्रचण्डपुरुषाय स्वाहा । ॐ सर्व्वाय स्वाहा । ॐ सर्व्वपुरुषाय स्वाहा । ॐ नमो भुवनेशाय त्रिलोकधात्रे इरिटि मिरिटि स्वाहा । ॐ नमो ऽम्बे चाभये ये ये सत्त्वा या पापचरा येषा दैत्यदानवयक्षराक्षसभूतपिशाचकूष्माण्डापस्मारकोच्छादनज्वराणामैकाहिकद्वितीयकतृतीयकचातुर्थकमौहूर्त्तिकदिनज्वररात्रिज्वरसन्ध्याज्वरसर्व्वज्वरादीनां लूताकीटकण्टपूतनाभुजङ्गस्थावरजङ्गमविषादीनामिदं शरीरं ममापथ्यं भवतु तुम्बुरुस्फुटप्रकटोत्कटविकटदंष्ट्रपूर्व्वतो रक्ष । ॐ हैहै हैहै दिनकर सहस्रकाल समावृतो जय पश्चिमतो रक्ष । ॐ निवि निवि प्रदीप्तज्वलनज्वालाकारा महाकपिल उत्तरतो रक्ष । ॐ मिलि भिलि विलि विलि गारुडि गौरि गान्धारि विषमोह विषविषमांसं मोहयतु स्वाहा । दक्षिणतो रक्ष मां अमुकस्य सर्व्वभूतभयोपद्रवेभ्यो रक्ष रक्ष जय जय विजयते न हीयते विप्रश्रवोऽहं कृतवाद्यते । भयहरय भयतोभयोऽभयं दिशतु ममास्तात् सादनमच्युतः । तदुदरमखिलं विशन्तु लोका युगपरिवर्त्तसहस्रं चयामनमिव प्रविशन्ति कलयन्तो ॥
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ।
सर्व्वज्वरान्मम घ्नन्तु विष्णुर्नारायणो हरिः ॥"
इत्यादिमहापुराणे गारुडे सर्व्वव्याधिहरविष्णुकवचं नाम २०० अध्यायः ॥

व्याधिघातः, पुं, (व्याधिर्घातो यस्मात् ।) आरग्वधवृक्षः । इत्यमरः ॥

व्याधितः, त्रि, (व्याधिः संजातोऽस्येति । तारकादित्वादितच् ।) व्याधियुक्तः । तत्पर्य्यायः । आमयावी २ विकृतः ३ अपटुः ४ आतुरः ५ अभ्यमितः ६ अभ्यान्तः ७ । इत्यमरः ॥ रोगी ८ । इति जटाधरः ॥ (यथा, हितोपदेशे ।
"दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥")

व्याधिहन्ता, [न्] पुं, (व्याधिं हन्ति ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥ व्याधिघातके, त्रि ॥

व्याधुतः, त्रि, (वि+आ+धु+क्तः ।) कम्पितः । इति शब्दरत्नावली ॥

व्याधूतः, त्रि, (वि+आ+धू+क्तः ।) कम्पितः । इति शब्दरत्नावली ॥ (यथा, गीतगोविन्दे । १ । ३८ ।
"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्ण-
ज्वराः ॥")

व्यानः, पुं, (व्यानिति सर्व्वशरीरं व्याप्नोतीति । वि+आ+अन+अच् ।) शरीरस्थपञ्चवाय्वन्तर्गतसर्व्वशरीरगवायुः । इत्यमरः ॥ इमे प्राणादयः पञ्चवायवः शरीरे तिष्ठन्ति ते च नियतस्थानस्थाः । यदाहुः ।
"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः ॥"
इति ॥
एषां तद्व्यापाराश्च यथा,—
"अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम् ।
भाषणादि निमेषादि तद्व्यापाराः क्रमादमी ॥"
इति भरतः ।
श्रीधरस्वामिमते तत्कर्म्म । व्यायनम् । आकुञ्चनप्रसारणादि । अन्यच्च ।
"व्यानो व्यानशयत्वन्नं सर्व्वव्याधिप्रकोपकः ।
महारजतसुप्रख्यो हानोपादानकारकः ।
स चाक्षिकर्णयोर्मध्ये कट्यां वै गुल्फयोरपि ।
घ्राणे गले स्फिग्देशे तिष्ठत्यत्र निरन्तरम् ।
स्पन्दयत्यधरं वक्त्रं गात्रनेत्रप्रकोपकः ॥"
इति शारदातिलकटीका ॥

व्यापकः, त्रि, (वि+आप्+ण्वुल् ।) विशेषेणाप्नोति यः । तद्भिन्नाद्यन्ताभावाप्रतियोगी ।

यथा,—
"साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥"
इति भाषापरिच्छेदः ॥

आच्छादकः । यथा,—
"वचस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अग्राम्यागम्यमित्येवमुत्तरं तद्विदो विदुः ॥"
पक्षस्य भावार्थस्य व्यापकं आच्छादकं अभियोगाप्रतिकूलमिति यावत् । इति व्यवहारतत्त्वम् ॥ (यथा, कुमारसम्भवे । ६ । ७१ ।
"तिर्य्यगूर्द्ध्वमधस्ताच्च व्यापको महिमा हरेः ॥")

व्यापकन्यासः, पुं, शिरस्तः पादान्तं पादतः शिरोऽन्तं मूलमन्त्रविन्यासः । यथा ।
"आदावृष्यादिको न्यासः करशुद्धिस्ततः परम् ।
अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च ॥
तालत्रयञ्च दिग्बन्धः प्राणायामस्ततः परम् ।
ध्यानं पूजा जपश्चैव सर्व्वतन्त्रेष्वयं विधिः ॥"
इति तन्त्रसारः ॥

प्रपञ्चस्तु न्यासशब्दे द्रष्टव्यः ॥

व्यापद्, स्त्री, विपूर्व्वाङ्पूर्व्वपदधातोः क्विप्प्रत्ययेन निष्पन्नमेतत् ॥ मृत्युः । आपत् । (यथा, कथासरित्सागरे । २६ । १०६ ।
"पश्य च मूढता व्यापदिहापि फलिता मम ॥")

व्यापनं, क्ली, (वि + आप + ल्युट् ।) आच्छादनम् । व्याप्तिः । यथा । अथ मङ्गलमसंक्रमश्च भवेत्तदा भवति यदा तन्मासततपूर्व्वमासान्त्यचययोरेकराश्यवस्थितस्य तन्मासान्तरमेव राश्यन्तरसंयोगः न त्वेकराशिस्थितस्य मासव्यापनमात्रम् । इति मलमासतत्त्वम् ॥

व्यापन्नः, त्रि, (वि + आ + पद + क्तः ।) मृतः । इति हेमचन्द्रः ॥

व्यापादः, पुं, (वि + आ + पद + घञ् ।) द्रोहचिन्तनम् । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ८ । २१११ ।
"इत्युदीर्य नृपः सर्व्वैः सज्जो व्यापादसिद्धये ॥")

व्यापादनं क्ली, (वि + आ + पद + णिच् + ल्युट् ।) मारणम् । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । २१ । ३२ ।
"अतीते च दिने बालामात्मव्यापादनोद्यताम् ।
सुरभिः प्राह नार्थं त्वां प्राप्स्यते दानवाधमः ॥")
पराऽनिष्टचिन्तनम् । इत्यमरटीकायां रामाश्रमः ॥

व्यापादितः त्रि, (वि + आ + पद + णिच् + क्तः ।) मारितः । यथा,—
"एका चेद्बहुभिः कापि दैवाद्व्यापादिता भवेत् ।
पादं पादञ्च हत्यायाश्चरेयुस्ते पृथक् पृथक् ॥"
इति प्रायश्चित्ततत्त्वधृतसम्वर्त्तवचनम् ॥

व्यापिका, स्त्री, (व्यापक + टापि अत इत्वम् ।) व्यापिनी । यथा,—
"अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता ।
यया विना जगत्सर्व्वमुच्छन्नं विधिनिर्म्मितम् ॥
सत्ये चादर्शना या च त्रेतायां सूक्ष्मरूपिणी ।
अर्द्धावयवरूपा च द्वापरे संवृता भिया ॥
कलौ महाप्रगल्भा च सर्व्वत्र व्यापिका भवेत् ।
कपटेन समं भ्रात्रा भ्रमत्येव गृहे गृहे ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ॥

व्यापारः, पुं, (वि + आ + पृ + घञ् ।) कर्म्म । यथा,—
"स्यात् प्राणवियोगफलको व्यापारो हननं स्मृतम् ।
रागाद्द्वेषात् प्रमादाद्वा स्वतः परत एव वा ॥"
इति प्रायश्चित्ततत्त्वधृताग्निपुराणवचनम् ॥
(साहाय्यम् । इति मल्लिनाथः ॥ यथा, कुमारे । ६ । ३२ ।
"आर्य्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति ।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता ॥"
तज्जन्यत्वे सति तज्जन्यजनकः । इति न्यायशास्त्रम् ॥ यथा, भाषापरिच्छेदे ।
"विषयेन्द्रियसंयोगो व्यापारः सोऽपि षड्विधः ॥")

व्यापारी, [न्] त्रि, (व्यापारोऽस्यास्तीति । व्यापार + इनिः ।) व्यापारविशिष्टः । व्यवसायी । यथा,—
"लाक्षालोहादिव्यापारी रसादिविक्रयी च यः ।
स याति नागवेष्टञ्च नागैर्वेष्टित एव च ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥

व्यापी, [न्] पुं, (व्याप्नोति सर्व्वमिति । वि + आप + णिनिः ।) विष्णुः । यथा,—
"स्वपनः स्ववशो व्यापी नैकात्मा नैककर्म्मकृत् ॥"
इति महाभारते ।
तस्य सहस्रनामस्तोत्रे । १३ । १४९ । ६२ ॥ त्रि, व्यापकः । यथा,—
"त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः ।
न तत्र युग्मादरणमन्यत्र हरिवासरात् ॥"
इति तिथ्यादितत्त्वधृतपराशरवचनम् ॥

व्यापृतः, पुं, (वि + आ + पृ + क्तः ।) कर्म्मसचिवः । यथा,—
"नियोगी कर्म्मसचिव आयुक्तो व्यापृतश्च सः ॥"
इति हेमचन्द्रः ॥

व्यापारयुक्ते, त्रि । वि-आङ्-पूर्व्व-पृ-धातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, उत्तरचरिते । १ ।
"अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत् ॥")

व्याप्तं, त्रि, (वि + आप् + क्तः ।) सम्पूर्णम् । तत्पर्य्यायः । पूर्णम् २ आचितम् ३ छन्नम् ४ पूरितम् ५ भरितम् ६ निचितम् ७ । इति हेमचन्द्रः ॥ (यथा, गीतायाम् । ११ । २० ।
"द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्व्वाः ॥")
ख्यातम् । समाक्रान्तम् । इति मेदिनी ॥ स्थापितम् । यथा । प्राप्तं प्रणिहिते समे इत्यत्र व्याप्तमपि पाठः । इत्यमरटीकायां रायमुकुटः ॥

व्याप्तिः, स्त्री, (वि + आप् + क्तिन् ।) व्यापनम् । (यथा, भागवते । ७ । ८ । १७ ।
"सत्यं विधातुं निजभृत्यभाषितं
व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः ॥")
लम्भः । इति मेदिनी ॥ लम्भस्थाने लम्भनमिति हेमचन्द्रे पाठः ॥ शिवस्याष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । यथा,—
"अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमेशिता ।
वशित्वकामावसायित्वे ऐश्वर्य्यमष्टधा स्मृतम् ॥"
इति शब्दमाला ॥ * ॥
न्यायमते साध्यवदन्यावृत्तित्वम् । यथा । वह्न्यभावस्थाने धूमस्यावर्त्तमानत्वम् । इयं अन्वयव्याप्तिः । अस्या ज्ञानं प्रति व्यभिचारज्ञानाभावः सहचारज्ञानञ्च कारणम् । एवं साध्याभावव्यापकीभूताभावप्रतियोगित्वम् । इयं व्यतिरेकव्याप्तिः । अस्या ज्ञानं प्रति साध्याभाव एवं हेत्वभावस्य सहचारज्ञानं व्यभिचारज्ञानाभावश्च कारणं तत्र प्रमाणम् ।
"व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ।
अथवा हेतुमन्निष्ठविरहाप्रतियोगिना ॥
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ।
व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा ॥
हेतुर्व्याप्तिग्रहे तर्कः क्वचित् शङ्कानिवर्त्तकः ।
द्वैविध्यन्तु भवेद्व्याप्तेरन्वयव्यतिरेकतः ॥
अन्वयव्याप्तिरुक्तैव व्यतिरेकादथोच्यते ।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ॥"
इति भाषापरिच्छेदः ॥

व्याप्तिकर्म्मा, [न्] पुं, (व्याप्तिविशिष्टं कर्म्म यस्य ।) व्यापनक्रियाविशिष्टः । सर्व्वत्र व्याप्तक्रियः । तद्वैदिकपर्य्यायः । इन्वति १ नक्षति २ आक्षाणः ३ आनट् ४ आष्ट ५ आपानः ६ अश्नुत् ७ नशत् ८ आनशे ९ अश्नुते १० । इति दश व्याप्तिकर्म्माणः । इति वेदनिघण्टौ २ अध्याये । १८ ॥

व्याप्यं, क्ली, (व्याप्यते इति । वि + आप् + ण्यत् ।) साधनम् । यथा । व्याप्यं लिङ्गञ्च साधनम् । इति सङ्कीर्णवर्गे त्रिकाण्डशेषः ॥ कुष्ठौषधम् । इत्यमरः ॥

व्याप्यः, त्रि, (वि + आप् + ण्यत् ।) व्याप्तिविशिष्टः । व्यापनीयः । यथा,—
"प्रस्थानं ते कुलिशकलनानिश्चितं पक्षितायै-
श्चित्तेऽस्माकं तदपि रमते याहि याहीति वाणी ।
अप्रामाण्यं कथयति सदा मन्दभाग्यो वियोगी
व्याप्यज्ञानाद्व्रजकुलभुवां व्यापकस्यापि सिद्धौ ॥"
इति पदाङ्कदूतः ॥
(यथा, भागवते । ७ । ६ । २२ ।
"ब्रह्मणात्मस्वरूपेण दृश्यरूपेण च स्वयम् ।
व्याप्यव्यापकनिर्द्देश्यो ह्यनिर्द्देश्योऽविकल्पितः ॥")

व्यामः, पुं, (विशेषेण अम्यतेऽनेनेति । अम गतौ + घञ् ।) तिर्य्यक्पार्श्वे ततयोः सहस्तयोर्बाह्वोरन्तरम् । वाँउ इति भाषा । व्यामीयतेऽनेन व्यामः स्त्रीः कभाव इत्युक्तिर्मोक्षे णः । इत्यमरभरतौ ॥ "व्यामव्यायामन्यग्रोधास्तिर्य्यक्बाहु

प्रचारिणी ।” इति हेमचन्द्रः । (यथा, महाभारते । ३ । १९ । ३८ ।
“ततो भीमो महाबाहुरारुह्य तरसा द्रुमम् ।
दृष्ट्वा व्यायाममर्थाढ्यं निष्क्रममकरोत् तदा ।”)
व्यायमनं, क्ली, (वि+आ+यम+ल्युट् ।) व्यामः । इति त्रिकाण्डशेषः ।
व्यामिश्रं, त्रि, (वि+आ+मिश्र+घञ् ।) संमिलितम् । भिन्नविषयाणामेकीभावकरणम् । यथा,—
“व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥”
इति श्रीभगवद्गीतायाम् । ३ । २ ॥
क्वचित् कर्म्मप्रशंसा क्वचित् ज्ञानप्रशंसा इत्येवं व्यामिश्रं सन्देहोत्पादकमिव यद्वाक्यं तेन मे मतिमुभयत्र दोलायितां कुर्व्वन् मोहयसीव । इति तट्टीकायां श्रीधरस्वामी ।
व्यायतं, त्रि, (विशेषेण आयतम् ।) व्याप्तम् । दैर्घ्यम् । (यथा, शाकुन्तले । २ ।
“अपचितमपि गात्रं व्यायतत्वादलक्ष्यं ।
गिरिचर इव नागः प्राणसारं बिभर्त्ति ॥”)
दृढम् । अतिशयः । इति मेदिनी ।
व्यायामः, पुं, (वि+आ+यम+घञ् ।) पौरुषः । (यथा, महाभारते । ४ । ३८ । ७ ।
“व्यायामसहमत्यर्थं तृणराजसमं महत् ।
सर्व्वायुधमहामात्रं शत्रुसंबाधकारकम् ॥”)
श्रमः । (यथा, महाभारते । १ । १७६ । ६ ।
“व्यायामकर्षितः सोऽथ मृगलिप्सुः पिपासितः ।
आजगाम नरश्रेष्ठ वशिष्ठस्याश्रमं प्रति ॥”)
विषमः । दुर्गसञ्चारः । इति मेदिनी । व्यामः । इति हेमचन्द्रः । मल्लक्रीड़ा । कुस्ती इति पारस्य भाषा । (यथा, महाभारते ।१२।२१।७।
“अन्ये साम प्रशंसन्ति व्यायाममपरे जनाः ।”)
अस्य गुणादि यथा,—
“व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम् ।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ॥
सर्व्वेष्वृतुषु सर्व्वैर्हि पुरुषैरात्महितार्थिभिः ।
बलस्यार्द्धेन तु कर्त्तव्यो व्यायामो हन्त्यतो यथा ॥
हृदि स्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते ।
कुक्षौ ललाटे ग्रीवायां यदा घर्म्मः प्रवर्त्तते ।
बलार्द्धं तं विजानीयाद्दायतोच्छ्वासमेव च ।
लाघवं कर्म्मसामर्थ्यं स्थैर्यं क्लेशसहिष्णुता ।
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते ।
व्यायामं कुर्व्वतो नित्यं विरुद्धमपि भोजनम् ।
विदग्धमविदग्धं वा निर्द्दोषं परिपच्यते ।
न च व्यायामसदृशमन्यत् स्थौल्यापकर्षणम् ।
न च व्यायामिनं मर्त्त्यं मर्द्दयन्त्यरयो बलात् ॥
न चैनं सहसाक्रम्य जरा समधिगच्छति ।
व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्त्तितस्य च ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥
रक्तपित्ती कृशो शोषी कासी श्वासी क्षतातुरः ।
भुक्तवान् स्त्रीषु च क्षीणो व्यायामं परिवर्ज्जयेत् ।
वातपित्तामयी बालो वृद्धोऽजीर्णी च संत्यजेत् ।
अतिव्यायामतः कासो रक्तपित्तं प्रजायते ।
श्रमः क्लमः क्षयस्तृष्णा ज्वरश्छर्द्दिश्च जायते ॥”
इति राजवल्लभः ।
व्यायोगः, पुं, (वि+आ+युज+घञ् ।) दृश्यविषयरूपकान्तर्गतरूपकविशेषः । यथा,—
“स्यान्नाटकं प्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगः समवाकारो वीथ्यङ्केहामृगा इति ।
अभिनेयप्रकाराः स्युर्भाषाः षट् संस्कृतादिकाः ॥”
इति हेमचन्द्रः ।
(तल्लक्षणं यथा, साहित्यदर्पणे । ६ । ५१४ ।
“ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः ।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः ॥
एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः ।
कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः ॥
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः ।
हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः ॥”)
व्यालः, पुं, (विशेषेण आसमन्तात् अलतीति । अल पर्य्याप्तौ+अच् ।) सर्पः । श्वापदः । इत्यमरः । (यथा, मनुः । १ । ४३ ।
“पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः ।
रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ॥”)
दुष्टगजः । इति मेदिनी । (यथा, माघे ।१२।२८।
“व्यालद्विपा यन्तृभिरुन्मदिष्णवः
कथञ्चिदारादपथेन निन्यिरे ॥”)
चित्रकः । व्याघ्रः । इति राजनिर्घण्टः । राजा । इत्यमरटीकायां मथुरेशः ।
व्यालः, त्रि, (वि+आ+अल+अच् ।) शठः । धूर्त्तः । इति जटाधरः ।
व्यालकः, पुं, (व्याल एव । स्वार्थे कन् ।) दुष्टगजः । तत्पर्य्यायः । गम्भीरवेदी २ अङ्कुशदुर्द्धरः ३ चालकः ४ । इति त्रिकाण्डशेषः । (श्वापदः । यथा, महाभारते ।१३।११६।८५।
“जायते व्यालकश्चापि मांसं तस्मात्तु मानुषः ॥”)
व्यालखड्गः, पुं, व्यालनखः । इति राजनिर्घण्टः ।
व्यालगन्धा, स्त्री, (व्यालस्येव गन्धो यस्याः ।) नाकुली । इति राजनिर्घण्टः ।
व्यालग्राहः, पुं, (व्यालं गृह्णातीति । व्याल+ग्रह+अण् ।) व्यालग्राही । इत्यमरटीकायां भरतः । (यथा, मनुः । ८ । २६० ।
“व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः ॥”)
व्यालग्राही, [न्] पुं, (व्यालं गृह्णातीति । ग्रह+णिनिः ।) भिक्षार्थं सर्पधारी । सर्पखेलकः । साপুড়িया इति वादिया इति च भाषा । तत्पर्य्यायः । अहितुण्डिकः २ । इत्यमरः । जाङ्गुलिः ३ जाङ्गलिः ४ आहितुण्डिकः ५ व्यालग्राहः ६ गारुड़िकः ७ विषवैद्यः ८ । इति शब्दरत्नावली ।
व्यालजिह्वा, स्त्री, (व्यालस्य जिह्वेव आकृतिर्यस्याः ।) महासमङ्गा । इति राजनिर्घण्टः । (व्यालजिह्वा च ।)
व्यालदंष्ट्रः, पुं, (व्यालस्य दंष्ट्रेव आकृतिर्यस्य ।) गोक्षुरः । इति राजनिर्घण्टः ।
व्यालनखः, पुं, (व्यालस्य नख इव आकृतिर्यस्य ।) गन्धद्रव्यविशेषः । बघनहा इति हिन्दी भाषा । तत्पर्य्यायः । कूटस्थः २ चक्रनायकः ३ चक्री ४ चक्रनखः ५ आम्रफलः ६ व्याघ्रनखः ७ द्वीपिनखः ८ खपुरः ९ व्यालपाणिजः १० व्याघ्रायुधः ११ व्यालबलः १२ व्यालखड्गः १३ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । कफवातकुष्ठकण्डूव्रणनाशित्वम् । वर्ण्यत्वम् । सौगन्ध्यप्रदत्वञ्च । इति राजनिर्घण्टः ॥
व्यालपत्रा, स्त्री (व्यालानि तीक्ष्णानि पत्राणि यस्याः ।) एर्व्वारुः । इति राजनिर्घण्टः ।
व्यालबलः, पुं, व्यालनखः । इति राजनिर्घण्टः ॥
व्यालमृगः, पुं, (व्यालो हिंस्रो मृगः पशुः ।) चित्रव्याघ्रः । चिता बाघ इति भाषा । इति महाभारते राजधर्म्मः । (यथा, महाभारते । ३ । १६६ । ९ ।
“रथनेमिस्वनश्चैव घण्टाशब्दश्च भारत ! ।
पृथक् व्यालमृगाणाञ्च पक्षिणामिव सर्व्वशः ॥”)
व्यालम्बः, पुं, (विशेषेण आलम्बते इति । वि+आ+लम्ब+अच् ।) रक्तैरण्डः । इति वैद्यकम् । (लम्बमाने, त्रि । यथा, महाभारते । ७ । ८८ । १० ।
“व्यालम्बहस्तान् संहृत्य सपक्षानिव पर्व्वतान् ॥”)
व्यालायुधं, क्ली, (व्यालस्यायुधं नख इव आकृतिर्यस्य ।) नखीनामगन्धद्रव्यम् । इत्यमरटीकायां मथुरेशः ।
व्यालायुधः, पुं, (व्यालस्यायुधमिवाकृतिर्यस्य ।) व्यालनखः । इति राजनिर्घण्टः ॥
व्यावक्रोशी, स्त्री, (वि+अव+क्रुश+“कर्म्मव्यतिहारे णच् स्त्रियाम् ।” ३ । ३ । ४३ । इति णच् । ततः “णचः स्त्रियामञ् ।” ५।४।१४। इति स्वार्थे अञ् । “न कर्म्मव्यतिहारे । ७ । ३ । ६ । इति ऐच्-प्रतिषेधः । स्त्रियां ङीप् ।) परस्पराक्रोशनम् । इति सौलिङ्गसंपदटीकायां भरतः ॥
व्यावभाषी, स्त्री, (वि+अव+भाष+णच् । स्वार्थे अञ् । ङीप् ।) व्यावक्रोशी । इत्यमरटीकायां रायमुकुटः ।
व्यावर्त्तः, पुं, (वि+आ+वृत्+घञ् ।) नाभिकण्टकः । इति शब्दरत्नावली । तत्र व्यावर्त्तकोऽपि पाठः ।
व्यावहारी, स्त्री, (वि+अव+हृ+णच् । स्वार्थे अञ् । ङीप् ।) परस्परहरणम् । इत्यमरटीकायां भरतः ।
व्यावहासी, स्त्री, (वि+अव+हस+णच् । स्वार्थे अञ् । ङीप् ।) परस्परहसनम् । इत्यमरटीकायां भरतः ।
व्यावृत्तः, त्रि, (वि+आ+वृत्+क्तः ।) वृतः । यथा । वृते तु वृतव्यावृत्तौ । इति हेमचन्द्रः । व्यावृत्तश्च । (प्रतिनिवृत्तः । यथा, रघुः ।१।२७।
“व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥”

व्यावृत्तिः, स्त्री, (वि+आ+वृत्+क्तिन् ।) खण्डनम् । यथा,—

"अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः ।
पदे त्वर्व्वाचीने पतति न मनः कस्य न वचः ॥"

इति महिम्नस्तोत्रम् ॥

व्यावृत्तिः । यथा । सर्व्वसपक्षव्यावृत्तिरेव दोषो न विपक्षव्यावृत्तिरपि तस्यानुगुणत्वात् । इति चिन्तामणौ सव्यभिचारलक्षणम् ॥

व्यासः, पुं, (वि+अस्+घञ् ।) विस्तारः । इत्यमरः ॥ (यथा, महाभारते । १ । १ । ५१ ।

"विस्तीर्य्यैतत् महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत् ।
इष्टं हि विदुषां लोके समासव्यासधारणम् ॥"

"समासः संक्षेपः व्यासो विस्तारः ।" इति तट्टीका ॥) नामभेदः । इति शब्दरत्नावली ॥ पाठकब्राह्मणः । यथा, नैयतकालिकतत्त्वधृतौ भविष्यपुराणम् ॥

"विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदं तथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥
बुध्यमानः सदर्थं वै ग्रन्थार्थं कृत्स्नशो नृप ।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थं चार्पयेन्नृप ।
य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते ॥"

इति तिथ्यादितत्त्वम् ॥

गोलस्य मध्यरेखा । यथा,—

"व्यासे भनन्दाग्निहते विभक्ते
खवाणसूर्य्यैः परिधिस्तु सूक्ष्मः ।
द्वाविंशतिघ्ने विहृतेऽथ शैलैः
स्थूलोऽथवा स्याद्व्यवहारयोग्यः ॥"

उदाहरणम् ।

"विष्कम्भमानं किल यत्र सप्त
तत्र प्रमाणं परिधेः प्रचक्ष्व ।
द्वाविंशतिर्यत् परिधिप्रमाणं
तद्व्याससंख्यां च सखे विचिन्त्य ॥"

इति लीलावती ॥*॥

(व्यस्यति वेदानिति । वि+आ+अस्+अच् ।) मुनिविशेषः । तस्य पर्य्यायो वेदव्यासशब्दे द्रष्टव्यः ॥ (अस्य निरुक्तिर्यथा महाभारते । १ । १०५ । १४ ।

"यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः ।
लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च ॥")

स च सत्यवत्यां कन्याकाले पराशराज्जातः । श्रीकृष्णस्य पञ्चकलोद्भवः । यथा,—

"व्यासः पुराणसूत्रञ्च पप्रच्छ वाल्मिकिं यदा ।
मौनीभूतः स सस्मार त्वामेव जगदम्बिकाम् ॥
तदा चकार सिद्धान्तं त्वद्वरेण मुनीश्वरः ।
संप्राप निर्म्मलं ज्ञानं भ्रमान्धध्वंसदीपकम् ॥
पुराणसूत्रं श्रुत्वा स व्यासः पञ्चकलोद्भवः ।
त्वां सिषेवे दध्यौ च शतवर्षञ्च पुष्करे ।
तदा त्वत्तो वरं प्राप्य स कवीन्द्रो बभूव ह ।
तदा वेदविभागञ्च पुराणञ्च चकार ह ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४ अध्यायः ॥*॥

तस्य जन्मान्तरं यथा,—

"अथ भूयो जगत्स्रष्टा भोः शब्देनानुनादयन् ।
सरस्वतीमुच्चचार तत्र सारस्वतोऽभवत् ॥
अपान्तरतमा नाम सुतो वाक्सम्भवः प्रभुः ।
भूतभव्यभविष्यज्ञः सत्यवादी दृढव्रतः ॥
तमुवाच नतं मूर्द्ध्ना देवानामादिरव्ययः ।
वेदाख्याने श्रुतिः कार्य्या यथा मतिमतां वर ॥
तस्मात् कुरु यथाज्ञप्तं ममैतद्वचनं मुने ।
तेन भिन्नास्तदा वेदा मनोः स्वायम्भुवेऽन्तरे ॥
ततस्तुतोष भगवान् हरिस्तेनास्य कर्म्मणा ।
तपसा च सुतप्तेन यमेन नियमेन च ॥
मन्वन्तरेषु पुत्त्रत्वमेवमेवं प्रवर्त्तकः ।
भविष्यस्यचलो ब्रह्मन्नप्रधृष्यश्च नित्यशः ॥"

इति महाभारते मोक्षधर्म्मः ॥*॥

अन्यच्च ।

"सुतं त्वजनयच्छक्तेरदृश्यन्ती पराशरम् ।
काली पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम् ॥
द्वैपायनादरण्यां वै शुको जज्ञे गुणान्वितः ।"

इति वह्निपुराणे प्रजापतिसर्गो नामाध्यायः ॥*

युगभेदे व्यासभेदो यथा,—

"यस्मिन्मन्वन्तरे व्यासा ये ये तांस्तान्निबोध मे ।
यथा च भेदः शाखानां व्यासेन क्रियते मुने ॥
अष्टाविंशतिकृत्वो वै वेदो व्यस्तो महर्षिभिः ।
वैवस्वतेऽन्तरे तस्मिन् द्वापरेषु पुनः पुनः ॥
वेदव्यासा व्यतीता ये अष्टाविंशतिसत्तमाः ।
चतुर्धा यैः कृतो वेदो द्वापरेषु पुनः पुनः ॥
द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा ।
द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः ॥
तृतीये चोशना व्यासश्चतुर्थे तु बृहस्पतिः ।
सविता पञ्चमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः ॥
सप्तमे च तथैवेन्द्रो वशिष्ठश्चाष्टमे स्मृतः ।
सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः ॥
एकादशे वै त्रिवृषो भारद्वाजस्ततः परम् ।
त्रयोदशे चान्तरीक्षो धर्म्मी चापि चतुर्दशे ॥
त्रय्यारुणः पञ्चदशे षोडशे तु धनञ्जयः ।
कृतञ्जयः सप्तदशे ऋणज्योऽष्टादशे स्मृतः ॥
ततो व्यासो भरद्वाजो भरद्वाजात्तु गोतमः ।
गोतमादुत्तमो व्यासो हर्य्यात्मा योऽभिधीयते ॥
अथ हर्य्यात्मनो वेणः स्मृतो वाजश्रवास्तु यः ।
सोमो मुख्यायनस्तस्मात् तृणविन्दुरिति स्मृतः ॥
ऋक्षोऽभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते ।
तस्मादस्मत्पिता शक्तिर्व्यासस्तस्मादहं मुने ॥
जातुकर्णोऽभवन्मत्तः कृष्णद्वैपायनस्ततः ।
अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः ॥
एको वेदश्चतुर्धा तु तैः कृतो द्वापरादिषु ।
भविष्ये द्वापरे चापि द्रौणिर्व्यासो भविष्यति ।
व्यतीते मम पुत्त्रेऽस्मिन् कृष्णद्वैपायने मुनौ ॥"

इति विष्णुपुराणे ३ अंशे ३ अध्यायः ॥*॥

कूर्म्मपुराणे त्वियान् विशेषः । द्वादशे द्वापरे शततेजाः । त्रयोदशे धर्म्मः । चतुर्दशे तरक्षुः । पञ्चदशे त्र्यारुणः । अष्टादशे ऋतञ्जयः । एकविंशे वाजश्रवाः । द्वाविंशे शुष्मायणः । त्रयोविंशे तृणविन्दुः । चतुर्व्विंशे वाल्मीकिः । पञ्चविंशे विष्णुः । अन्यत् विष्णुपुराणवत् ॥ (एतद्विवरणञ्च देवीभागवते १ स्कन्धे ३ अध्याये च द्रष्टव्यम् ॥)

व्यासक्तः, त्रि, (वि+आ+सञ्ज+क्तः ।) विशेषेणासक्तः । संलग्नः । यथा,—

"व्याकोषेन्दीवराभा कनकपरिलसत्पीतवासाः सुहासा
बर्हैश्चन्द्रकान्तैर्व्वलयितचिकुरा चारुकर्णावतंसा ।
अंसव्यासक्तवंशध्वनिसुखितजगद्वल्लवीभिर्लसन्ती
मूर्त्तिर्गोपस्य विष्णोरवतु जगति नः स्रग्धरा हारिहारा ॥"

इति छन्दोमञ्जरी ॥

व्यासङ्गः, पुं, विशेषेण आसङ्गः । वि-आङ्-पूर्व्वसन्जधातोर्घञ्प्रत्ययेन निष्पन्नमेतत् ॥

व्यासमाता, [ऋ] स्त्री, (व्यासस्य माता ।) वेदव्यासजननी । इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । सत्यवती १ वासवी २ गन्धकालिका ३ योजनगन्धा ४ दासेयी ५ शालङ्कायनजीवसूः ६ । इति हेमचन्द्रः ॥ ग्रन्थान्तरे शालङ्कायनजा इति च पाठः । काली ७ झषोदरी ८ विचित्रवीर्य्यसूः ९ चित्राङ्गदसूः १० योजनगन्धिका ११ । इति त्रिकाण्डशेषः ॥ गन्धकाली १२ सत्या १३ दासनन्दिनी १४ । इति शब्दरत्नावली ॥

व्यासिद्धः, त्रि, (वि+आ+सिध+क्तः ।) निषिद्धः । इति मिताक्षरा ॥

व्याहतः, त्रि, (वि+आ+हन+क्तः ।) विशेषेणाहतः । व्यर्थः । यथा । सुप्तव्यासक्तमनसामिन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् तेषामपदेशाज्ज्ञानविशेषाणां व्याहतत्वादहेतुः । इति गौतमसूत्रे प्रत्यक्षपरीक्षाप्रकरणम् ॥ अपि च ।

"अव्याहताज्ञः सर्व्वासु यः सदा देवयोनिषु ।
निर्ज्जिताखिलदैत्यारिः स ययाचे प्रसह्य तत् ॥"

इति देवीमाहात्म्यम् ॥

व्याहारः, पुं, (वि+आ+हृ+घञ् ।) वाक्यम् । इत्यमरः ॥ (यथा, बृहत्संहितायाम् । ४६ । ७१ ।

"अभिरक्षिशवायसप्रवेशनं मन्दिरेषु मरकाय ।
पशुशब्दव्याहारे नृपमृत्युर्मुनिवचश्चेदम् ॥")

व्याहृतिः, स्त्री, (वि+आ+हृ+क्तिन् ।) व्याहारः । मन्त्रविशेषः । यथा,—

"ओँकारमादितः कृत्वा व्याहृतिस्तदनन्तरम् ।
ततोऽधीयीत सावित्रीमेकाग्रश्रद्धयान्वितः ॥
पुराकल्पे समुत्पन्ना भूर्भुवःस्वःसनातनाः ।
महाव्याहृतयस्तिस्रः सर्व्वाशुभनिवर्हणाः ॥
प्रधानपुरुषः कालो ब्रह्मविष्णुमहेश्वराः ।
सत्त्वं रजस्तमस्तिस्रः क्रमाद्व्याहृतयः स्मृताः ॥

ओङ्कारस्तत्परं ब्रह्म सावित्री स्यात्तदक्षरम् ।
एष मन्त्रो महाभाग सारात्सार उदाहृतः ॥”
इति कौर्म्मे उपविभागे १३ अध्यायः ॥
(वाक्यम् । यथा, कुमारसम्भवे । ३ । ६३ ।
“न हीश्वरव्याहृतयः कदाचित्
पुष्णन्ति लोके विपरीतमर्थम् ॥”)

व्युतः, त्रि, (वि + वे + क्तः ।) स्यूतम् । इति भरतद्विरूपकोषः ॥

व्युतिः, स्त्री, (वि + वे + क्तिन् ।) ऊतिः । तन्तुसन्ततिः । इति भरतद्विरूपकोषः ॥

व्युत्क्रमः, पुं, (वि + उत् + क्रम + घञ् ।) क्रमविपर्य्ययः । व्यतिक्रमः । तत्पर्य्यायः । उत्क्रमः २ अक्रमः ३ । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । १० ।
“पश्येत् कश्चिच्चल चपल रे का त्वराहं कुमारी हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ॥”)

व्युत्थानं, क्ली, (वि + उत् + स्था + ल्युट् ।) स्वातन्त्र्याचरणम् । विरोधाचरणम् । इति मेदिनी ॥ (यथा, महाभारते । १४ । २९ । १६ ।
“एवं ते द्रविड़ाभीरा पुण्ड्राश्च शवरैः सह । वृषलत्वं परिगता व्युत्थानात् क्षत्रधर्म्मिणः ॥”) प्रतिरोधनम् । समाधिपारणम् । इति हेमचन्द्रः ॥ नृत्यभेदः । इति शब्दरत्नावली ॥ विशेषेणोत्थानञ्च । (चित्तस्यावस्थाविशेषः । इति पातञ्जलदर्शनम् ।)

व्युत्पत्तिः, स्त्री, (वि + उत् + पद् + क्तिन् ।) विशेषेणोत्पत्तिः । संस्कारः । इति व्युत्पन्नशब्दार्थदर्शनात् । यथा । शक्तिज्ञानबोधनीयत्वेन शारदापदव्युत्पत्तेस्तु पदं तालवादि सारं ददातीति व्युत्पत्तिस्तु काल्पनिकी । इति तिथ्यादितत्त्वम् ॥ शक्तिज्ञानम् । यथा । व्यवहारादिबाधकं विना विवरणादपि व्युत्पत्तेः । बाधकं विना स्वसाध्यस्य बाधकं यद्विशेषणं तदभावकत्वविशेषणसहकारेण व्युत्पत्तेः व्युत्पत्तिसम्भवात् शक्तिग्रहसम्भवादिति यावत् । इति आख्यातवादस्य माथुरी टीका ॥

व्युत्पन्नः, त्रि, (वि + उत् + पद + क्तः ।) संस्कृतः । इति हेमचन्द्रशब्दरत्नावल्यौ ॥ व्युत्पत्तियुक्तः । यथा । व्याकरणव्युत्पन्नशब्दज्ञानाधीनं शास्त्रान्तरज्ञानं तदधीना च वैदिकक्रिया तत्फलं स्वर्गादि । इति मुग्धबोधटीकायां दुर्गादासः ॥

व्युत्पादकः, त्रि, (विशेषेणोत्पादयति ज्ञानम् । वि + उत् + पद + णिच् + ण्वुल् ।) व्युत्पत्तिजनकः । यथा । शब्दव्युत्पादकशास्त्रारम्भे शब्देरेव मङ्गलं कर्त्तव्यम् । इति मुग्धबोधटीकायां दुर्गादासः ॥

व्युदासः, पुं, (वि + उत् + अस + घञ् ।) निरासः । परित्यागः । यथा । तदेवैकैकवाक्यमवकाशतिथिद्वैधे स्वकविशेषो नियम्यते अर्थान्तरव्युदासाय । इत्यमावास्याश्राद्धकालनिरूपणे तिथ्यादितत्त्वम् ॥ (यथा च महाभारते । १२ । १६ । १८ ।
“अथैकान्तव्युदासेन शरीरे पाञ्चभौतिके ॥”)

व्युष्टं, क्ली, (वि + वस् + क्तः ।) फलम् । दिनम् । प्रभातम् । (यथा, माघे । १२ । ४ ।
“व्युष्टं प्रयाणञ्च वियोगवेदना
विदूनमारीकमभूत् समन्ततः ॥”)
पर्य्युषितम् । इति हेमचन्द्रः ॥ (प्रभातार्थे क्वचित् पुंलिङ्गोऽपि । स तु दोषायाः पुत्रः । यथा, भागवते । ४ । १३ । १४ ।
“प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः । व्युष्टः सुतं पुष्करिण्यां सर्व्वतेजसमादधे ॥”)

व्युष्टः, त्रि, (वि + वस + क्तः ।) उषितः । (यथा, महाभारते । ३ । ६९ । २८ ।
“सा व्युष्टा रजनीं तत्र पितुर्वेश्म विभाविनी ।”) दग्धः । इति मेदिनी ॥

व्युष्टिः, स्त्री, (वि + वस् + क्तिन् ।) फलम् । (यथा, महाभारते । १२ । २२८ । ४ ।
“महतस्तपसो व्युष्ट्या पश्यन्तौ परावरौ ॥”) समृद्धिः । इति मेदिनी ॥ स्तुतिः । इति हेमचन्द्रः ॥ (प्रकाशः । यथा, ऋग्वेदे ।१।१७१।५।
“व्युष्टिषु शवसा शश्वतीनाम् ॥”
“व्युष्टिषु सतीषु प्रकाशेषु सत्सु ।” इति तद्भाष्ये सायणः ।)

व्यूढः, त्रि, (विशेषेण उह्यतेस्म । वि + वह + क्तः ।) विन्यस्तः । संहतः । इत्यमरः । ३ । ३ । ४४ ॥ (व्यूहरचनयाधिष्ठितः । यथा, गीतायाम् ।१।२।
“दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्य्योधनस्तदा । आचार्य्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥”) पृथुलः । इति मेदिनी ॥ (यथा, रघुः । १।१३।
“व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्म्महाभुजः । आत्मकर्म्मक्षमं देहं क्षात्त्रो धर्म्म इवाश्रितः ॥”)

व्यूढकङ्कटः, त्रि, (व्यूढः कङ्कटः सन्नाहो येन ।) सन्नद्धः । इत्यमरः ॥

व्यूढिः, स्त्री, (वि + वह + क्तिन् ।) विन्यासः । संहतिः । पृथुलता । इति व्यूढशब्दार्थदर्शनात् ॥

व्यूतं, त्रि, ऊतम् । तन्तुसन्ततम् । विपूर्व्ववेञ्धातोः क्तप्रत्ययेन निष्पन्नमेतत् ॥

व्यूतिः, स्त्री, (वि + वे अव वा + क्तिन् । “ऊतियूतिजूतीति ।” ३ । ३ । ९७ । इति निपातितः ।) वस्त्रादिवयनक्रिया । तत्पर्य्यायः । वानिः २ । इत्यमरः ॥ व्युतिः ३ । इति तट्टीका ॥ वायी ४ । इति शब्दरत्नावली ॥

व्यूहः, पुं, (वि + ऊह + घञ् ।) समूहः । निर्म्माणम् । तर्कः । इति मेदिनी ॥ देहः । (यथा, भागवते । ११ । ६ । १० ।
“यः सात्वतैः समविभूतय आत्मवद्भि-
र्व्यूहेऽर्च्चितः सवनशः स्वरतिक्रमाय ॥”)
सैन्यः । इति त्रिकाण्डशेषः ॥ (परिणामः । लिङ्गम् । यथा, भागवते । ४ । २९ । ७० ।
“यावल्लिङ्गमनोऽबाधं गुणव्यूहो ह्यनादिमान् ॥”)
युद्धार्थसैन्यरचना । तत्पर्य्यायः । बलविन्यासः २ । इत्यमरः ॥ “युद्धार्थं सैन्यस्य देशविशेषे विभज्य दुर्लङ्घ्यत्वनिमित्तं स्थापनं व्यूहः । ऊह वितर्के विपूर्व्वात् घञ् । युद्धे दण्डादयो भेदा विशेषा व्यूहस्येत्यर्थात् आदिना भोगमण्डलसंहतानां ग्रहः । यथाह कामन्दकिः ।
तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगोऽन्वावृत्तिरेव च ।
मण्डलं सर्व्वतो वृत्तिः पृथग्वृत्तिरसंहतः ॥ इति ।
एषां चतुर्णाञ्च बहवो भेदाः क्रौञ्चचक्रादयो ग्रन्थगौरवभयान्नोक्ताः ।” इति भरतः ॥ अपि च ।
“समग्रस्य तु सैन्यस्य विन्यासः स्थानभेदतः ।
स व्यूह इति विख्यातो युद्धेषु पृथिवीभुजाम् ॥
व्यूहभेदास्तु चत्वारो दण्डो भोगोऽथमण्डलम् ।
असंहतश्च निर्द्दिष्टा नीतिसारादिशस्त्रतः ॥
अन्येऽपि प्रकृतिव्यूहाः क्रौञ्चचक्रादयः क्वचित् ।
तिर्य्यग्वृत्तिस्तु दण्डः स्याद्भोगोऽन्वावृत्तिरेव च ॥
मण्डलं सर्व्वतो वृत्तिः पृथग्वृत्तिरसंहतः ।
सैन्यानां नीतिसारादौ व्यूहभेदाः समीरिताः ।
क्रौञ्चचक्रादिभेदानां लक्षणं भारतादिषु ॥”
इति शब्दरत्नावली ॥
(यथा च कामन्दकीयनीतौ ।१६।२६—५७।
“सर्व्वव्यूहविधानज्ञा युद्धकर्म्मसु कर्म्मठाः ।
उरः कक्षौ च पक्षौ च मध्यं पृष्ठं प्रतिग्रहः ।
कोटी च व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह इष्यते ।
उरश्च कक्षपक्षौ च व्यूहोऽयं सप्रतिग्रहः ।
गुरोरेष च शुक्रस्य कक्षाभ्यां परिवर्ज्जितः ॥
अभेद्याः कुलजा मेध्या लब्धलक्षाः प्रहारिणः ।
सेनाङ्गपतयः कार्य्या दृढ़युद्धप्रतिक्रियाः ॥
प्रवीरपुरुषैरेतैस्तिष्ठेयुः परिवारिताः ।
अभेदेन च युद्ध्येरन् रक्षेयुश्च परस्परम् ॥
फल्गु सैन्यस्य यत्किञ्चिन्मध्ये व्यूहस्य तद्भवेत् ।
युद्धवस्तु च यत्किञ्चित्प्रायस्तज्जघने भवेत् ॥
युद्धार्थं युद्धकुशलं बलानीकं प्रयोजयेत् ।
युद्धं हि नायकप्राणं हन्यते तदनायकम् ॥
व्यूहोऽश्वपृष्ठमचलः पत्त्यश्वरथदन्तिभिः ।
तथाप्रतिहतो ज्ञेयो हस्त्यश्वरथपत्तिभिः ॥
मध्ये देशे हयानीकं रथानीकं तु कक्षयोः ।
पक्षयोश्च गजानीकं व्यूहोऽन्तर्भिदयं स्मृतः ॥
रथस्थाने हयान्दद्यात्पदातींश्च हयाश्रये ।
रथाभावे तु मतिमान्नागानेव प्रकल्पयेत् ॥
विभज्य प्रक्षिपेन्मध्ये पत्त्यश्वरथकुञ्जरान् ।
मध्ये कुर्व्वीत नागेन्द्रान् पत्त्यश्वरथवारितान् ॥
धनुः स्थानी च दण्डश्च शकटो मकरध्वजः ।
दण्डादयो महाव्यूहास्तदाकारान् प्रकल्पयेत् ॥
यदि स्याद्दण्डवद्व्यूहस्तदा चापः प्रकीर्त्तितः ।
मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः ॥
कथिताः प्रकृतिव्यूहा भेदास्तेषां प्रकीर्त्तिताः ।
यः स तं व्यूहं मतिमान् काले स्थाने प्रकल्पयेत् ॥
तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगस्त्वावृत्तिरेव च ।
प्रदरो दृढ़कोऽसह्यश्चापो वै तद्विपर्य्ययः ॥
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ ।
विशालविजयः सूची स्थूणाकर्णचमूमुखः ॥

सुखाख्यो वलयश्चैव दण्डभेदाः सुदुर्ज्जयः ।
अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्याञ्चैकपक्षतः ।
अतिक्रान्तश्च पक्षाभ्यां चयोऽन्यस्तु विपर्य्ययः ।
स्थूणापक्षो धनुःपक्षो द्विस्थूणो दण्ड ऊर्द्धगः ।
द्विगुणान्तस्त्वतिक्रान्तपक्षोऽन्योऽस्य विपर्य्ययः ।
द्विचतुर्द्दण्ड इत्येवं ज्ञेया लक्षणतः क्रमात् ।
गोमूत्रिकाहिसञ्चारी शकटो मकरस्तथा ।
भोगभेदाः समाख्यातास्तथा परिपतन्तकः ।
दण्डपक्षो युगोरस्यः शकटस्तद्विपर्य्ययः ।
मकरो व्यत्ययकीर्णश्च शेषः कुञ्जरराजिभिः ।
मण्डलव्यूहभेदौ च सर्व्वतोभद्रदुर्ज्जयौ ।
अष्टानीको द्वितीयस्तु प्रथमः सर्व्वतोमुखः ।
अर्द्धचन्द्रक उद्धारो वज्रो भेदास्तु संहतेः ।
तथा कर्कटशृङ्गी च काकपादी च गोधिका ।
त्रिचतुःपञ्चसैन्यानां ज्ञेया आकारभेदतः ।
इति व्यूहाः समाख्याता व्यूहभेदप्रयोक्तृभिः ।
एते सप्तदश प्रोक्ता दण्डव्यूहाश्च पञ्चधा ।
तथा व्यूहद्वयञ्चैव मण्डलस्य प्रयोक्तृभिः ।
असंहतास्तु षड्व्यूहा भोगव्यूहाश्च पञ्चधा ।
व्यूहैस्तु प्रयोज्याः युद्धकाल उपस्थिते ।
पक्षादीनामनीकेन हत्वा शेषं परिक्षिपेत् ।
उरसा च समाहत्य कोटिभ्यां परिवेष्टयन् ।
परकोटिमुपक्रम्य पक्षाभ्यामप्रतिग्रहः ।
कोटिभ्यां जघने हन्यादुरसा च प्रपीडयेत् ।
एवं व्यूहप्रयत्नेन यत्नवानवनीपतिः ।
विदारयेद्व्यूहजातं वज्रेण द्विषतामलम् ॥")

व्यूहनं, क्ली, (वि + ऊह + ल्युट् ।) सैन्यसंस्थानम् । विपूर्व्वोहधातोरनट्प्रत्ययेन निष्पन्नमिदम् ॥ (मेलनम् । यथा, भागवते । ३ । २६ । २६ ।
"चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ।"
"व्यूहनं मेलनं तृणादेः ।" इति तट्टीकायां स्वामी ॥ क्षोभके, त्रि । यथा, हरिवंशे । १२९ । ३९ ।
"परं गुणेभ्यः पृश्निगर्भरूपं
यशः प्रपन्नं व्यूहनं कालचक्रम् ।"
"व्यूहनं जगत्क्षोभकम् ।" इति तट्टीकायां नीलकण्ठः ।)

व्यूहपार्ष्णिः, पुं, (व्यूहस्य पार्ष्णिः ।) व्यूहपश्चाद्भागः । तत्पर्य्यायः । प्रत्यासारः २ । इत्यमरः ॥ प्रतासरः ३ । इति तट्टीका ॥ व्यूहस्य पश्चाद्व्यूहान्तरम् । इति केचित् । इति भरतः ॥ व्यूहमध्यम् । इति शब्दरत्नावली ॥

व्येञ, ञ ऐ वृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) ञ, व्ययति व्ययते । ऐ, वीयात् । इति दुर्गादासः ॥

व्योकारः पुं, लौहकारः । इत्यमरः ।

व्योम, [न्] क्ली, (व्येञ वृतौ + "नामन् सीमन्निति ।" उणा० ४ । १४६ । इति निपातनात् साधुः । यद्वा, "विपूर्व्वादवतेर्व्याप्त्यर्थत्वात् औणादिके 'सर्व्वधातुभ्यो मनिन् ।' इति सूत्रेण मनिन्प्रत्यये 'ज्वरत्वरश्रिव्यविमवामुपधायाश्च ।' इत्यूठि गुणः । अवति व्याप्नोति सर्व्वं जगत् । यद्वा अवतिर्गत्यर्थः भावे मन् व्योम् । अवनं गमनं विविधमस्मिन् विद्यते । यद्वा रक्षणार्थः विशेषेणावति प्राणिनोऽवकाशप्रदानेन । उणादौ तु नामन् सीमन् व्योमन् इत्यादिना व्येञ् संवरणे इत्यस्मान्मनिनि उत्वं निपात्यते । हीयते तद्वायुना व्योम । तथाच निरुक्तम् व्योमनिरन्तरितं महानवयवः परिवीतो वायुना इति ।" इति निघण्टुटीका । १ । ३ । ३ ।) आकाशः । इत्यमरः ॥ (यथा, रघुः । ४ । २९ ।
"रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसन्निभैः ।
भुवस्तलमिव व्योम कुर्व्वन् व्योमेव भूतलम् ॥")
जलम् । भास्करस्यार्च्चनाश्रयः । इति मेदिनी ॥ अभ्रकम् । इति राजनिर्घण्टः ॥

व्योमकेशः, पुं, (व्योम एव केशा यस्य । विराट्मूर्त्तित्वादस्य तथात्वम् ।) शिवः । इत्यमरः ॥ (यथा, महाभारते । ७ । २०० । १२९ ।
"सूर्य्याचन्द्रमसोर्लोके प्रकाशन्ते रुचश्च याः ।
ते केशसंज्ञितास्त्र्यक्षे व्योमकेश इति स्मृतः ॥")

व्योमकेशी [न्] पुं, महादेवः । गङ्गाधारणकाले व्योमव्यापिनः केशा अस्य सन्तीति व्योमकेशशब्दात् इन्प्रत्ययेन निष्पन्नमेतत् ॥

व्योमचारिपुरं, क्ली, (व्योमचारि आकाशगामि पुरम् ।) शौभपुरम् । इति भूरिप्रयोगः ॥

व्योमचारी, [न्] पुं, (व्योम्नि चरतीति । चर + णिनिः ।) देवता । पक्षी । इति मेदिनी ॥ चिरजीवी । द्विजातः । इति विश्वः ॥ (आकाशचारिणि, त्रि । यथा, कथासरित्सागरे । २२ । ५६ ।
"अस्ति पूर्व्वमहं व्योमचारी विद्याधरोऽभवम् ॥")

व्योमधूमः, पुं, (व्योम्नः धूमः ।) मेघः । इति त्रिकाण्डशेषः ॥

व्योमनासिका, स्त्री, भारतीपक्षी । इति त्रिकाण्डशेषः ॥

व्योममञ्जरं, क्ली, (व्योम्नः मञ्जरमिव ।) पताका । इति त्रिकाण्डशेषः ॥

व्योममण्डलं, क्ली, (व्योम्नः मण्डलम् ।) पताका । इति शब्दरत्नावली ॥ आकाशश्च ॥

व्योममुद्गरः, पुं, (व्योम्नः मुद्गर इव ।) निर्घातः । इति हारावली ॥

व्योमयानं, क्ली, (व्योमगामि यानम् ।) विमानम् । इत्यमरः ॥

व्योमस्थली, स्त्री, भूमिः । इति भूरिप्रयोगः ॥ (व्योम्नः स्थली ।) नभःस्थलञ्च ॥

व्योमाभः, पुं, (व्योम्ना शून्येन आभातीति । आ + भा + कः ।) बुद्धः । इति त्रिकाण्डशेषः ॥

व्योमोदकं, क्ली, (व्योम्नः उदकम् ।) दिव्योदकम् । इति राजनिर्घण्टः ॥

व्योषं, क्ली, (विशेषेण ओषतीति । उष दाहे + पचाद्यच् ।) त्रिकटु । इत्यमरः ॥ (यथा, सुश्रुते । १ । ४४ ।
"व्योषं त्रिजातकं मुस्ता विडङ्गामलके तथा ॥")

व्रज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) व्रजति । इति दुर्गादासः ॥

व्रज, क संस्कृतौ । गतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, व्राजयति । त्रिरेफौ तौ । तौ एतौ विरेफौ रेफरहितौ च स्याताम् । इति दुर्गादासः ॥

व्रजं, क्ली, व्रजनम् । गमनम् । व्रज गतौ इत्यस्मात् घप्रत्ययेन निष्पन्नमिदम् । इति सिद्धान्तकौमुदी ॥

व्रजः, पुं, (व्रज गतौ + "गोचरसंचरेति ।" ३ । ३ । ११९ । इति घप्रत्ययेन निपातनात् साधुः ।) समूहः । इत्यमरः ॥ (यथा, महाभारते । १ । १४९ । १२ ।
"ततः प्रतापः सुमहान् शब्दश्चैव विभावसोः ।
प्रादुरासीत् तदा तेन बुबुधे स जनव्रजः ॥")
गोष्ठम् । (यथा, माघे । २ । ६४ ।
"निरुद्धवीवधासारप्रसारा गा इव व्रजम् ।
उपरुन्धन्तु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥")
पन्थाः । इति मेदिनी ॥ अथ व्रजमथुरयोरनुव्याप्तिनिर्देशः । अस्य विवरणं यथा, माथ्ये ।
"व्रजमण्डलभूगोलं शेषनागफणं वरम् ।
कुमुदाख्यं महाश्रेष्ठं सर्व्वेषां मध्यसंस्थितम् ।
तस्योपरिस्थितं लोकं सर्व्वस्थानं महाफलम् ।
कृष्णलीलाविहारार्थसुखस्थानविराजितम् ।
चतुरष्टकक्रोशेन परिपूर्णविराजितम् ।
अस्य प्रदक्षिणीकुर्व्वन् धनधान्यसुखं लभेत् ।
दानार्थावासतो लोको विष्णुलोकमवाप्नुयात् ।
आवासान्म्रियते चेह पुनर्जन्म न विद्यते ।
पुण्यं लक्षगुणं लब्ध्वा स्नातेऽस्मिन् व्रजमण्डले ।
कृष्णेन निर्म्मितास्तीर्थाः सार्द्धद्वयसहस्रकाः ॥"*
तत्रादौ वनोपवनप्रतिवनाधिवनानि चत्वारिंशत् तानि चतुरष्टक्रोशपरिमाणस्थितानि चतुर्भागशोऽभ्यन्तरस्थितानि क्रमश आह । पाद्मे ।
"वनानि द्वादशान्याहुर्यमुनोत्तरदक्षिणे ।
महावनं महाश्रेष्ठं १ इयं काम्यवनं शुभम् २ ।
कोकिलाख्यं तृतीयञ्च ३ तुर्य्यं तालवनं तथा ४ ।
पञ्चमं कुमुदाख्यञ्च ५ षष्ठं भाण्डीरसंज्ञकम् ६ ।
नाम्ना छत्रवनं श्रेष्ठं सप्तमं परिकीर्त्तितम् ७ ।
अष्टमं खदिरं प्रोक्तं ८ नवमं लोहजं वनम् ९ ।
नाम्ना भद्रवनं श्रेष्ठं दशमं बहुपुण्यदम् १० ।
एकादशं समाख्यातं बहुलावनसंज्ञकम् ११ ।
नाम्ना विल्ववनं श्रेष्ठं द्वादशं कामनाप्रदम् १२ ।
इति द्वादशसंज्ञानि वनानि शुभदानि च ॥"
इति द्वादशवनानि ॥
अथ द्वादशोपवनान्याह वाराहे ।
"आदौ ब्रह्मवनं नाम १ द्वितीयं त्वप्सरावनम् २ ।
तृतीयं विह्वलं नाम ३ कदम्बाख्यं चतुर्थकम् ४ ।
नाम्ना स्वर्णवनं श्रेष्ठं पञ्चमं परिकीर्त्तितम् ५ ।
सुरभीवननामानं षष्ठमाह्लादवर्द्धनम् ६ ।
श्रेष्ठं प्रेमवनं नाम सप्तमं शुभदं नृणाम् ७ ।

मयूरवननामानमष्टमं परिकीर्त्तितम् ८ ।
माणेल्लितवनं श्रेष्ठं नवमं मानवर्द्धनम् ९ ।
शेषशायिवनं श्रेष्ठं दशमं पापनाशनम् १० ॥
एकादशं समाख्यातं नारदाख्यं शुभोदितम् ११ ।
द्वादशं परमानन्दवनं सर्व्वार्थदायकम् १२ ॥
इति द्वादशसंख्यानि वनान्युपवनानि च ।"

इति द्वादशोपवनानि ॥ * ॥

अथ द्वादशप्रतिवनानि । भविष्ये ।
"आदौ रङ्कवनं श्रेष्ठं पुरसंज्ञाविराजितम् १ ।
वार्त्तावनं द्वितीयञ्च २ करहाख्यं तृतीयकम् ३ ।
चतुर्थं काम्यनामानं वनं कामप्रदं नृणाम् ४ ।
वनमञ्जननामानं पञ्चमं कौशुभप्रदम् ५ ॥
नाम्ना कर्णवनं श्रेष्ठं षष्ठं स्वप्नवरप्रदम् ६ ।
कृष्णाक्षिपतकं नाम वनं सप्तममीरितम् ७ ॥
नन्दप्रेक्षणकृष्णाख्यं वनं नन्दनमष्टमम् ८ ।
वनमिन्द्रवनं नाम नवमं कृष्णपूजितम् ९ ॥
शिक्षावनं शुभं प्रोक्तं दशमं नन्दभावितम् १० ।
चन्द्रावलीवनं श्रेष्ठमेकादशमुदाहृतम् ११ ॥
नाम्ना लोहवनं श्रेष्ठं द्वादशं शुभदं नृणाम् १२।
इति प्रतिवनान्याहुर्मार्गे वामे च दक्षिणे ।
इति द्वादशसंख्यास्ते देवावासफलप्रदाः ॥"

इति द्वादश प्रतिवनानि ॥*॥

अथ द्वादशाधिवनानि । विष्णुपुराणे ।
"मथुरा प्रथमं नाम १ राधाकुण्डं द्वितीयकम् २ ।
नन्दग्रामं तृतीयञ्च ३ गूढ़स्थानं चतुर्थकम् ४ ।
पञ्चमं ललिताग्रामं ५ वृषभानुपुरञ्च षट् ६ ।
सप्तमं गोकुलं स्थान-७ मष्टमं बलदेवकम् ८ ।
गोवर्द्धनवनं श्रेष्ठं नवमं कामनाप्रदम् ९ ।
वनं जावटं नाम दशमं परिकीर्त्तितम् १० ॥
सुखवृन्दावनं श्रेष्ठमेकादशं प्रकीर्त्तितम् ११ ।
सङ्केतवटकं स्थानं वनं द्वादशं कीर्त्तितम् १२ ॥
इति द्वादशसंख्यानि वनान्यधिवनानि च ।
वनानामधिपाः प्रोक्ता व्रजमण्डलमध्यगाः ॥
एवां नैव विलोकेन वनयात्रा च निष्फला ।
एतेषां दर्शनेनैव वनयात्रा शुभप्रदा ॥
आदौ लीला यदा पश्चिमनयात्रां ततश्चरेत् ।
सर्व्वान् कामानवाप्नोति विष्णुलोकमवाप्नुयात् ।
सर्व्वत्र विजयी भूयाद्वनयात्राप्रभावतः ॥"

इति व्रजभक्तिविलासे १ अध्यायः ॥

व्रजकः, पुं, तपस्वी । इति शब्दरत्नावली ॥

व्रजकिशोरः, पुं (व्रजस्य किशोरः ।) श्रीकृष्णः । स तु द्वादशाधिवनान्तर्गतललिताग्रामाधिवनाधिपो देवः । "अथ ललिताग्रामाधिपव्रजकिशोरमन्त्रः । यथा श्रीधरोपनिषदि । ॐ श्रीं ललिताग्रामाधिवनाधिपतये व्रजकिशोराय नमः । एकोनविंशाक्षरो व्रजकिशोरमन्त्रः । अनेन मन्त्रेण प्राणायामः । अस्य मन्त्रस्य विभाण्डक ऋषिर्व्रजकिशोरो देवता गायत्री छन्दः मम सकलपापक्षयद्वारा युगलरूपदर्शनार्थे विनियोगः । शिरसि विभाण्डकऋषये नमः मुखे व्रजकिशोराय नमः हृदि गायत्रीछन्दसे नमः । अथ ध्यानम् ।
'ललितासंयुतं कृष्णं सर्व्वैस्तु सखिभिर्युतम् ।
ध्यायेत्त्रिवेणिकूपस्थं महारासकृतोत्सवम् ॥'
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुह्यातीत्यादिना जपं समर्पयेत् । इति ललिताग्रामाधिपव्रजकिशोरमन्त्रः ।" इति व्रजभक्तिविलासे १ अध्यायः ॥

व्रजनाथः, पुं, (व्रजस्य नाथः ।) श्रीकृष्णः । इति पुराणम् ॥

व्रजभूः, पुं, (व्रजे भूरुत्पत्तिर्यस्य ।) कैलिकदम्बः । इति शब्दचन्द्रिका ॥ (व्रजस्य भूर्भूमिः ।) व्रजभूमौ, स्त्री । व्रजजाते, त्रि ॥

व्रजमण्डलं, क्ली, (व्रजस्य मण्डलम् ।) व्रजभूमिः । यथा, मात्स्ये ।
"व्रजमण्डलभूगोलं शेषनागफणं वरम् ।
कुमुदाख्यं महाश्रेष्ठं सर्व्वेषां मध्यसंस्थितम् ॥"
इति व्रजविलासे १ अध्यायः ॥

व्रजमोहनः, पुं, (व्रजान् व्रजवासिनो मोहयतीति । मुह + णिच् + ल्युट् ।) श्रीकृष्णः । इति पुराणम् ॥

व्रजवरः, पुं, (व्रजे वरः श्रेष्ठः ।) श्रीकृष्णः । स तु द्वादशाधिवनान्तर्गतजावटाधिवनाधिपो देवः । "अथ जावटाधिवनाधिपव्रजवरमन्त्रः । शौनकीये ।
'वटादिभिः समन्तात् सघनं वनमाश्रितम् ।
तत्रैवाधिवनं ख्यातं वटौघपापरायणम् ॥
तस्मिन्मध्ये वटं श्रेष्ठं कृष्णक्रीड़ावरप्रदम् ।
वटादिभिर्वनं ख्यातं मध्ये चैव वटं स्मृतम् ॥
वटं दृष्ट्वं स्थितं तत्र वटरूपं विधीयते ।
वटनामानुसारेण वटलिङ्गानि दर्शयेत् ॥'
वटस्थानलिङ्गम् । ॐ ठः क्लीं वटाधिवनाधिपतये व्रजवराय नमः । एकोनविंशाक्षरो जावटाधिवनाधिपव्रजवरमन्त्रः । अनेन मन्त्रेण प्राणायामः । अस्य मन्त्रस्य ऋतीक ऋषिर्जावटाधिपो व्रजवरो देवता पङ्क्तिश्छन्दः मम सकलसौभाग्यसम्पत्फलप्राप्त्यर्थे जपे विनियोगः । न्यासं पूर्व्ववत् । अथ ध्यानम् ।
'नानाशृङ्गारभूषाढ्यं राधाकृष्णं मनोहरम् ।
ध्यायेद्युगलरूपञ्च वनयात्रावरप्रदम् ॥'
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुह्यातीत्यादिना जपं समर्पयेत् । इति जावटाधिवनाधिपव्रजवरमन्त्रः ।" इति व्रजभक्तिविलासे १ अध्यायः ॥

व्रजवल्लभः, पुं, (व्रजानां व्रजवासिनां वल्लभः प्रियः ।) श्रीकृष्णः । इति पुराणम् ॥

व्रजाङ्गना, स्त्री, (व्रजस्य अङ्गना ।) गोपी । यथा, छन्दोमञ्जर्य्याम् ।
"विलासवंशध्वनिलं सुधानिलैः
प्रपूर्य्य यः पञ्चमरागमुद्गिरन् ।
व्रजाङ्गनानामपि गानशालिनां
जहार मानं स हरिः पुनातु वः ॥"

व्रज्या, स्त्री, (व्रजनमिति । व्रज गतौ + "व्रजयजोर्भावे क्यप् ।" ३ । ३ । ९८ । इति क्यप् ।) पर्य्यटनम् । जिगीषोः प्रयाणम् । गमनम् । इत्यमरः ॥ वर्गः । इति मेदिनी ॥ (समानीयानामेकत्र सन्निवेशः । यथा, साहित्यदर्पणे । ६ । ५६५ ।
"कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः ।
व्रज्याक्रमेण रचितः स एवातिमनोहरः ॥")
रङ्गः । इति धरणिः ॥

व्रण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) व्रणति । इति दुर्गादासः ॥

व्रण, त् क अङ्गचूर्णे । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) अङ्गचूर्णः अङ्गभेदः । व्रणयति गात्रं बाणेन भटः । इति दुर्गादासः ॥

व्रणः, पुं क्ली, (व्रणयति गात्रमिति । व्रण अङ्गचूर्णे + पचादित्वात् अच् ।) क्षतम् । तत्पर्य्यायः । ईर्म्मम् २ अरुः ३ । इत्यमरः ॥ ईर्मः ४ । इति तट्टीका ॥ (यथा, रघुः । १२ । ५५ ।
"स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम् ।
आत्मनः सुमहत् कर्म्म व्रणैरावेद्य संस्थितः ॥")
अथ व्रणाधिकारः ।
"व्रणो द्विधा परिज्ञेयो दोषजागन्तुभेदतः ।
दोषजो दुष्टदोषैः स्यादन्यः शस्त्रादिसम्भवः ॥"
तत्र वातिकस्य लक्षणमाह ।
"स्तब्धः कठिनसंस्पर्शो मन्दस्रावो महारुजः ।
तुद्यते स्फुटितश्चापि व्रणो मारुतसम्भवः ॥"
स्तब्धः अचलः ॥ * ॥ पैत्तिकमाह ।
"तृष्णामोहज्वरक्लेददाहदुःखावदारणैः ।
व्रणं पित्तकृतं विद्यात् स्रावैर्गन्धैश्च पूतिकैः ॥"
क्लेद आर्द्रता । दुःखं यथारूपम् । अवदारणं व्रणे विदारणवत् पीड़ा ॥ * ॥ श्लैष्मिकमाह ।
"बहुपिच्छो गुरुः स्निग्धः स्तिमितो मन्दवेदनः ।
पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः ॥"
बहुपिच्छः बहुपिच्छिलः । अल्पसंक्लेद ईषदार्द्रः ॥ * ॥ रौधिरं द्वन्द्वजं सान्निपातिकमाह ।
"रक्तो रक्तस्रुती रक्ताद्विजः स्यात्तद्वयः ।"
तद्वयः द्विदोषलिङ्गसम्बन्धः ॥ * ॥ शुद्धव्रणलिङ्गमाह ।
"जिह्वातलाभोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः ।
सुव्यवस्थो निरस्रावः शुद्धव्रण इति स्मृतः ॥"
जिह्वातलाभः कृतशब्दोऽत्र सदृशार्थे । तेन जिह्वावत्तलः । सुव्यवस्थः उच्चनतारहितः ॥ दुष्टव्रणलिङ्गमाह ।
"पूतिपूयादिदुष्टासृक्स्राव्युत्सङ्गी चिरस्थितिः ।
दुष्टव्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्य्ययः ॥"
उत्सङ्गी कोटरवान् । अतिगन्धादिः आदिशब्देन सावेदनाविवर्णतादयः संग्राह्याः ॥ * ॥ संरोहणवतो लिङ्गमाह ।
"कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः ।
स्थिराश्च पिड़कावन्तो रोहतीति तमादिशेत् ॥"

कपोतवर्णप्रतिमाः पाण्डुधूसराः। स्थिराः विदीर्णतारहिताः। पिडकावन्तः संरोहणार्थाः ये मांसाङ्कुरास्तद्युक्ताः ॥ * ॥ सम्यग्रूढलिङ्गमाह।

"रूढवर्त्मानमग्रन्थिमशूनमरुजं व्रणम्।
त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्द्दिशेत् ॥"

रूढवर्त्मानं संरूढमावमार्गम्। समतलं अनिम्नम् ॥ * ॥ सुखसाध्यत्वादिकमाह।

"त्वङ्मांसजः सुखे देशे तरुणस्यानुपद्रवः।
धीमतोऽभिनवः काले सुखे साध्यः सुखव्रणः ॥"

सुखे देशे मर्म्मरहिते। अनुपद्रवः ज्वरतृष्णाश्वासकासारोचकादिरहितः। धीमतः पथ्यसेविनः। सुखे काले हेमन्ते शिशिरे च।

"गुणैरन्यतरैर्यैर्हीनः कृच्छ्रो व्रणः स्मृतः।
सर्व्वैर्विहीनो विज्ञेयस्त्वसाध्यो निरुपक्रमः ॥"

एभिस्त्वङ्मांसजत्वादिभिः। निरुपमक्रमः अनुपक्रान्तः चिरमुपेक्षित इति यावत्।

"वसामेदोऽथ मज्जानं मस्तुलुङ्गञ्च यः स्रवेत्।
आगन्तुजो व्रणः सिद्ध्येन्न सिद्ध्येद्दोषसम्भवः ॥"

मस्तुलुङ्गं मस्तकाभ्यन्तरस्नेहः।

"कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम्।
व्रणाः कृच्छ्रेण सिध्यन्ति येषां चापि व्रणे व्रणाः ॥"

अरिष्टमाह।

"दह्यन्ते चान्तरत्यर्थं बहिःशीताश्च ये व्रणाः।
दह्यन्ते बहिरत्यर्थं भवन्त्यन्तश्च शीतलाः ॥
प्राणमांसक्षयश्वासकासारोचकपीडिताः।
प्रवृद्धपूयरुधिरं व्रणा ये चापि मर्म्मसु ॥
क्रियाभिः सम्यगारब्धा न सिध्यन्ति च ये व्रणाः।
चिकित्सितेनैव तान् वैद्यः संरक्षन्नात्मनो यशः ॥
मद्यागुर्व्वाज्यसुमनःपद्मचन्दनचम्पकम्।
सगन्धा दिव्यगन्धाश्च मुमूर्षूणां व्रणाः स्मृताः ॥"

मर्म्मसु पायुनाभिहृदयादिषु। सुमनाः जातिः। दिव्यगन्धाः पारिजातादिगन्धाः ॥ * ॥ अथागन्तुव्रणस्य निदानमाह।

"नानाधारामुखैः शस्त्रैर्नानास्थाननिपातितैः।
भवन्ति नानाकृतयो व्रणास्तांस्तान्निबोध मे ॥"

नानाधारामुखानि येषां तैः शस्त्रैः अर्द्धचन्द्रखड्गभल्लकुन्तशूलशरादिभिः। नानाकृतयः बह्वाकृतयः। ता आकृतीराह।

"छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च।
घृष्टमाहुस्तथा षष्ठं तेषां वक्ष्यामि लक्षणम् ॥"

अथ छिन्नस्य लक्षणमाह।

"तिर्य्यक् छिन्न ऋजुर्व्वापि यो व्रणश्चायतो भवेत्।
गात्रस्य पातनं तद्धि छिन्नमित्यभिधीयते ॥"

यो व्रणः तिर्य्यक्छिन्नः खड्गादिहततिर्य्यक्छेदहतः। ऋजुर्व्वापि अथवा खड्गादिहतो रक्तो व्रणः। आयतः दीर्घः। आयत इति तिर्य्यक्छिन्नस्य ऋजोश्च विशेषणम्। गात्रस्य पातनं गात्रस्यैकदेशस्य छेदेन पृथक्करणं वा छिन्नमित्यभिधीयते ॥ * ॥ भिन्नमाह।

"शक्तिकुन्तेषुखड्गाग्रविषाणैराशयो हतः।
यत्किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते ॥"

आशयः कोष्ठः ॥ * ॥ कोष्ठभेदस्य लक्षणमाह।

"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च।
हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥
तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते।
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति ॥
मूर्च्छाश्वासतृषाध्मानमभक्तच्छन्द एव च।
विण्मूत्रवातसङ्गश्च स्वेदस्रावोऽक्षिरक्तता ॥
लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च।
हृदि शूलं पार्श्वयोश्च विशेषश्चाभिधीयते ॥"

तस्मिन् कोष्ठे। भिन्ने शस्त्रादिभिः। रक्तपूर्णे कोष्ठे तस्मादङ्गाङ्गिमात् सुतेन रक्तेन पूर्णे वा ज्वरादयो जायन्ते ॥ * ॥ आमाशये पक्वाशये च रक्तपूर्णे लक्षणभेदमाह।

"आमाशयस्थे रुधिरे रुधिरं छर्द्दयत्यपि।
आध्मानमतिमात्रञ्च शूलञ्च भृशदारुणम् ॥
पक्वाशयगते रक्ते रुजा गौरवमेव च।
अधःकाये विशेषेण शीतता च भवेदिह ॥"

रुजा शूलम्। गौरवं पक्वाशये। अधःकाये नाभेरधोदेशे विशेषेण गौरवमित्यन्वयः। शीतता च भवेदिह। इह नाभेरधोदेशे शीतता च स्यात्। सा च व्याधिस्वभावात् ॥ * ॥ विद्धमाह।

"सूक्ष्मास्यशल्याभिहतं यदङ्गं त्वाशयं विना।
उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्द्दिशेत् ॥"

आशयं विना कोष्ठं विना। उत्तुण्डितं अनिर्गतशल्यम्। निर्गतं वा निर्गतशल्यं वा ॥ * ॥ सशल्यस्य व्रणस्य लक्षणमाह।

"श्यावं सशोथं पिडकाचितञ्च
मुहुर्मुहुः शोणितवाहिनञ्च।
मृदूद्गतं बुद्बुदतुल्यमांसं
व्रणं सशल्यं सरुजं वदन्ति ॥"

मुहुर्मुहुः शोणितवाहनं यदा यदा शल्यं चलति तदा तदा रुधिरं वहति। उद्गतं उत्थितमुखम् ॥ * ॥ कोष्ठस्थितस्य शल्यस्य लक्षणमाह।

"त्वचोऽतीत्य शिरादीनि भित्त्वाङ्गं परिहृत्य वा।
कोष्ठे प्रतिष्ठितं शल्यं कुर्य्यादुक्तानुपद्रवान् ॥"

त्वचः तत्रापि अतिक्रम्य उक्तानुपद्रवान् आटोपानाहौ व्रणमुखेनान्नपुरीषदर्शनञ्च ॥ * ॥ असाध्यस्य कोष्ठस्य रक्तस्य पुरीषस्य लक्षणमाह।

"कोष्ठान्तर्लोहितं पाण्डु शीतपादकराननम्।
शीतोच्छ्वासं रक्तनेत्रमानद्धञ्च विवर्ज्जयेत् ॥"

आनद्धं आनाहवन्तम् ॥ * ॥ क्षतमाह।

"नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितम्।
विषमं व्रणमङ्गे यत्तत् क्षतं परिकीर्त्तितम् ॥"

नातिच्छिन्नं नातिदीर्घघातम्। नातिभिन्नं नातिगम्भीरघातम्। उभयोश्छिन्नभिन्नयोः। विषमं व्रणमङ्गे यत् यदङ्गवमङ्गवैषम्यकरम् ॥ * ॥ पिच्चितमाह।

"प्रहारपीडनाभ्यान्तु यदङ्गं पृथुतां गतम्।
सास्थि तत् पिच्चितं विद्यान्मज्जरक्तपरिप्लुतम् ॥"

प्रहारो मुद्गरादिना। पीडनं कपाटादिना। पृथुतां चिपिटताम् ॥ * ॥ घृष्टमाह।

"घर्षणादपि घाताद्वा यदङ्गं विगतत्वचम्।
उषास्रावान्वितं तत्तु घृष्टमित्यभिधीयते ॥
घर्षणात् कर्कशेष्टिकापाषाणभित्त्यादिभिः ॥" *

मांसशिरास्नायुसन्ध्यस्थिमर्म्मसु क्षतेषु सामान्यलक्षणमाह।

"भ्रमः प्रलापः पतनं प्रमोहो
विचेष्टनं ग्लानिरथोष्णता च।
स्रस्ताङ्गता मूर्च्छनमूर्द्ध्ववात-
स्तीव्रा रुजो वातकृताश्च तास्ताः ॥
मांसोदकाभं रुधिरञ्च गच्छेत्
सर्व्वेन्द्रियार्थोपरमस्तथैव।
दशार्द्धसंख्येष्वपि विक्षतेषु
सामान्यतो मर्म्मसु लिङ्गमुक्तम् ॥"

पतनं भूमौ। विचेष्टनं विरुद्धं चेष्टनं हस्तपादादिप्रक्षेपणादिकम्। मूर्च्छनं इन्द्रियमोहः। प्रमोहो मनोमात्रमोहः। तीव्रा रुजो वातकृताश्च तास्ताः इत्यायतानकादयः। रुधिरञ्च गच्छेत् मेहनभगगुदास्यघ्राणेभ्यः स्रवेत्। सर्व्वेन्द्रियार्थोपरमः इन्द्रियाणां कार्य्यनाशः ॥ * ॥ अथ मर्म्मशिरास्नायुसन्ध्यस्थ्नां विद्धानां पृथग्लक्षणमाह।

"सुरेन्द्रगोपप्रतिमं प्रभूतं
रक्तं स्रवेत्तत्क्षयजश्च वायुः।
करोति रोगान् विविधान् यथोक्तान्
शिरासु विद्धास्वथवा क्षतासु ॥"

सुरेन्द्रगोपो वार्षिकोत्थितकीटविशेषः। बीरबहुटी इति लोके सिद्धम्। प्रभूतं बहु। रोगान् शिरोऽभितापान्यतामयकादीन्। विद्धासु शरादिना। क्षतासु खड्गादिना।

"कौब्ज्यं शरीरावयवावसादः
क्रियास्वशक्तिस्तुमुला रुजाश्च।
चिराद्व्रणो रोहति यस्य चापि
तं स्नायुविद्धं पुरुषं वदन्ति ॥"

कौब्ज्यं विद्धस्याङ्गस्य वक्रता। तुमुला महती।

"शोफातिवृद्धिस्तुमुला रुजश्च
बलक्षयः सर्व्वत एव शोफः।
क्षतेषु सन्धिष्वचलाचलेषु
स्यात् सन्धिकर्म्मोपरमश्च लिङ्गम् ॥"

सर्व्वत एव शोफः सर्व्वसन्धीन् व्याप्य शोफः। उपरमः नाशः।

"घोरा रुजो यस्य निशादिनेषु
सर्व्वास्ववस्थासु न चैति शान्तिम्।
भिषग्विपश्चिद्विदितार्थसूत्र-
स्तमस्थिविद्धं पुरुषं प्रवक्ति ॥"

सर्व्वास्ववस्थासु शयनासनादिकासु। विदितार्थसूत्रः ज्ञानशालसम्पन्नम् ॥ * ॥ अथ मर्म्मशिरादिविद्धलिङ्गानि पृथगभिधाय मर्म्मशिरादीनां विद्धानां पृथग्लिङ्गान्यतिदेशेनाह।

"यथास्वमेतानि विभावयेच्च
लिङ्गानि मर्म्मस्वपि ताडितेषु ।"

यथास्वं शिरादीनां विद्धानां एतानि लिङ्गानि पृथगुक्तानि लिङ्गानि चकारात् भ्रमप्रलापादीनि च मर्म्मस्वपि शिरादिषु ताडितेषु विद्धेषु। विभावयेत् जानीयात् ॥ * ॥ सर्व्वव्रणानामुपद्रवानाह ।

"विसर्पपक्षघातश्च शिरास्तम्भोऽपतानकः ।
मोहोन्मादौ व्रणे पीडा ज्वरस्तृष्णा हनुग्रहः ॥
कासश्छर्द्दिरतीसारो हिक्का श्वासः सवेपथुः ।
षोडशोपद्रवाः प्रोक्ता व्रणानां व्रणचिन्तकैः ॥"

अथाग्निदग्धस्य निदानमाह ।

"तत्राग्निर्द्विविधो ज्ञेयः स्नेहरूक्षः समाश्रितः ।
स्नेहस्तत्र तु तैलादि रूक्षं लौहादि कथ्यते ॥"

अग्निदग्धं चतुर्व्विधमाह ।

"अग्निदग्धं चतुर्द्धा स्यात् प्लुष्टं दुर्दग्धमेव च ।
सम्यग्दग्धं तथा तीव्रदग्धञ्च परिकीर्त्तितम् ॥"

तेषां लक्षणमाह ।

"यद्विवर्णमतिप्लुष्टं तत् प्लुष्टमभिधीयते ।
तीव्रदाहो यथावन्तो यत्र स्फोटा भवन्ति हि ।
चिरेण ते प्रशाम्यन्ति तद्दुर्दग्धमुदाहृतम् ॥
ताम्रवर्णमगम्भीरं दाहपीडासमन्वितम् ।
सुसंस्थितञ्च कथितं सम्यग्दग्धं भिषग्वरैः ॥
लम्बमांसं यत्र दग्धं स्याद्विश्लेषो वपुषस्तथा ।
शिरास्नाय्वस्थिसन्धीनां तं वदन्त्यतिदग्धकम् ॥
अत्यर्थं वेदना दाहो ज्वरस्तृण्मूर्च्छया सह ।
स्याद्व्रणस्तु चिराद्दग्धे रूढो याति विवर्णताम् ॥"* ॥

अथ व्रणस्य चिकित्सा ।

"आदौ शोथहरो लेपस्ततस्तु परिषेचनम् ।
विम्लापनमसृङ्मोक्षस्ततः स्यादुपनाहनम् ॥
पाचनं भेदनं पश्चात् पीडनं शोधनं तथा ।
रोपणं वर्णकरणं व्रणस्यैते क्रमाः स्मृताः ॥"

क्रमाश्चिकित्साः । सुश्रुतेऽष्ट व्रणस्य षष्टिरुपक्रमा लिखिताः सन्ति । ते सर्व्वेऽत्र विस्तरभयान्न लिखिताः ॥ * ॥ तत्रादौ शोथहरं लेपमाह ।

"यथा प्रज्वलिते वेश्मन्यम्भसा परिषेचनम् ।
क्षिप्रं प्रशमयत्यग्निमेवमालेपनं रुजम् ॥
बीजपूरजटाहिंस्रा देवदारु महौषधम् ।
रास्नाग्निमन्थो लेपोऽयं वातशोथविनाशनः ॥*
मधुकं चन्दनं दूर्व्वा नलमूलन्तु पद्मकम् ।
उशीरं वालकं पद्मं लेपोऽयं पित्तशोथहा ॥
न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलैः ।
ससर्पिष्कैः प्रदेहः स्याच्छोथे पित्तसमुद्भवे ॥*॥
आगन्तुजे रक्तजे च लेप एषोऽभिपूजितः ।
अजगन्धाजशृङ्गी च मञ्जिष्ठा सरलस्तथा ।
एकैकिकाश्वगन्धा च लेपोऽयं श्लेष्मशोथहा ॥"

अजशृङ्गी मेढ़ाशृङ्गी । एकैकिका श्यामनिसोतः

"कृष्णा पुराणपिण्याकं शिग्रुत्वक् सिकता शिवा ।
मूत्रपिष्टः सुखोष्णोऽयं प्रलेपः श्लेष्मशोथहा ॥*॥
न रात्रौ लेपनं दद्याद्दत्तं च पतितं तथा ।
न च पर्य्युषितं शुष्यमाणं तत्रैव धारयेत् ॥"

दत्तं दत्तमेव पुनर्न दद्यात् । पतितं दीयमानं यदङ्गात् पतितम् । पर्य्युषितं लेपनद्रव्यकल्कीकृतं यत् पर्य्युषितम् ।

"तमसा पिहितो ह्युष्मा रोमकूपमुखे स्थितः ।
विना लेपेन निर्य्याति रात्रौ नालेपयेदतः ॥
रात्रावपि प्रलेपस्तु विधातव्यो विचक्षणैः ।
अपाकिशोथे गम्भीरे रक्तपित्तसमुद्भवे ॥"* ॥

अथ परिषेचनमाह ।

"यथाम्बुभिः सिच्यमानः शान्तिमग्निर्हि गच्छति।
दोषाग्निरेवं सहसा परिषेकेण शाम्यति ॥"

तद्यथा,—

"वातघ्नौषधनिक्वाथैस्तैलैर्मांसरसैर्घृतैः ।
उष्णैः संसेचयेत् शोथं वातिकं काञ्जिकेन तु ॥
पित्तरक्ताभिघातोत्थं शोथं सिञ्चेत्तु शीतलैः ।
क्षीराज्यमधुखण्डेक्षुरसैः पित्तहरैः शृतैः ॥
कफघ्नौषधनिःक्वाथैरशीतैः परिषेचयेत् ।
तैलक्षारामुत्रैश्च शोथं श्लेष्मसमुद्भवम् ॥"* ॥

अथ विम्लापनमाह ।

"रुजतः कठिनस्यास्य कार्य्यं विम्लापनं शनैः ।"

अथ शोथस्य विम्लापनस्य विधिमाह । सुश्रुतः ।

"अभ्यज्य स्वेदयित्वा तु वेणुनाड्या शनैः शनैः ।
विमर्द्दयेद्भिषङ्मन्दं तलेनाङ्गुष्ठकेन वा ॥"

वेणुनाड्या स्वेदयित्वा उष्णस्वेदं कृत्वा ॥ * ॥
रक्तमोक्षणमाह ।

"वेदनोपशमार्थाय तथा पाकशमाय च ।
अचिरोत्पतिते शोथे शोणितस्रावणञ्चरेत् ॥"

चरेत् कुर्य्यात् ।

"एकतस्तु क्रियाः सर्व्वा रक्तमोक्षणमेकतः ।
रक्तं हि वेदनामूलं तच्चेन्नास्ति न चापि रुक् ॥
विवर्णे कठिने श्यावे व्रणे चात्यन्तवेदने ।
सविषे विशेषेण जलौकोभिः पदैरपि ॥"

शोणितस्रावणञ्चरेदित्यनेनान्वयः ॥ * ॥
अथोपनाहस्वेदमाह । तस्य विधिर्भेषजसाधनप्रकरणे कथित एवास्ति ।

"रुजावतां दारुणानां कठिनानां तथैव च ।
शोथानां स्वेदनं कार्य्यं ये चाप्येवं विचारणात् ॥"

शोथानां सामान्यानां व्रणाः व्रणशोथाः तेषामपि स्वेदनं कार्य्यम् ।

"शोथयोरुपनाहन्तु दद्यादामविदग्धयोः ।
प्रशाम्यत्यविदग्धस्तु विदग्धः पाकमेति च ॥"

अविदग्धः आमः । विदग्धः पाकोन्मुखः । स यथा,—

"दशमूली बला रास्ना वाजिगन्धा प्रसारिणी ।
मूलं फलञ्च वातारिसिन्धुवारपुनर्नवाः ॥
शोभाञ्जनः कणा चापि सैन्धवं विश्वभेषजम् ।
शणकार्पासयोर्बीजमतसी च कुलत्थिका ॥
तिला यवाश्च सिद्धार्थः कुठेरो मूलकं मिसिः ।
यथाप्राप्तैरमीभिस्तु द्रवैरम्लेन संयुतैः ॥
कल्कीकृतैः सुखोष्णैश्च स्वेदयेद्विधिवच्छनैः ।
अनेन प्रशमं याति वातशोथो न संशयः ॥"

दशमूल्यादिरूपमाह ।

"पुनर्नवा दारु शुण्ठी शिग्रुः सिद्धार्थ एव च ।
अम्लपिष्टः सुखोष्णोऽयं प्रलेपः सर्व्वशोथहा ॥"

पुनर्नवादिः ॥ * ॥

अथ पाचनमाह ।

"न प्रशाम्यति यः शोथः प्रलेपादिविधानतः ।
द्रव्याणि पाचनीयानि दद्यात्तत्रोपनाहने ॥"

पाचनद्रव्याण्याह ।

"शणकमूलशिग्रूणां फलानि तिलसर्षपाः ।
अतसीसक्तवः किण्वमुष्णद्रव्याश्च पाचनम् ॥"

शणफलादीनामतस्यन्ताः सक्तवः कर्त्तव्याः । किण्वं सुराबीजम् । यवगोधूमधान्यादिप्रकारः अन्यच्चोष्णद्रव्यं व्रणस्य पाचनं भवति ॥ * ॥

अथ भेदनमाह ।

"अन्तःपूयेषु वक्त्रेषु तथैवोत्सङ्गवत्स्वपि ।
गतिमत्स्वथ रोगेषु भेदनं संप्रयुज्यते ॥"

उत्सङ्गवत्सु कोटरवत्सु । गतिमत्सु नाड़ीव्रणेषु । भेदनं शस्त्रमौषधकर्म्म च ॥ * ॥ तत्र शस्त्रेण भेदनमाह ।

"रोगे व्यधनसाध्ये तु यथादेशं प्रमाणतः ।
शस्त्रं विधाय दोषन्तु स्रावयेत् कथितं यथा ॥"

क्वचिच्छस्त्रनिषेधापवादमाह ।

"बालवृद्धासहक्षीणभीरूणां योषितामपि ।
व्रणेषु मर्म्मजातेषु भेदनं द्रव्यलेपनम् ॥"

तत्र भेदमाह ।

"चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः ।
कपोतकङ्कगृध्राणां मलं लेपेन दारणम् ॥"

चिरविल्वः करञ्जः । अग्निकः भल्लातकः ।

"भल्लातकासहत्वे तु रक्तचन्दनमिष्यते ॥"

हयमारकः करवीरः । दारणं भेदनम् ।

"क्षारद्रव्यं तथा क्षारो दारणः परिकीर्त्तितः ॥"

क्षारद्रव्यं अपामार्गादि । क्षारः स्वर्जिका यवक्षारादिः ।

"हस्तिदन्तो जले पिष्टो बिन्दुमात्रः प्रलेपतः ।
अत्यन्तकठिने शोथे कथितो भेदनः परः ॥"* ॥

अथ पीड़नमाह ।

"पूयगर्भानणुद्वारान् व्रणान् मर्म्मगतानपि ।
यथोक्तैः पीड़नद्रव्यैः समन्तात् परिपीड़येत् ॥"

पीड़नद्रव्याण्याह ।

"द्रव्याणां पिच्छिलानान्तु त्वङ्मूलानि प्रपीड़येत् ।
यवगोधूममाषाणां चूर्णानि च समासतः ॥
शुष्यमाणमुपेक्षेत प्रलेपं पीड़नं प्रति ।
न चापि मुखमालिम्पेत्तथा दोषः प्रसिच्यते ॥"

पीड़नं प्रति पीड़नद्रव्यलेपं प्रति । पीड़नद्रव्यलेपे शुष्यन्तमपि धारयेदित्यर्थः । तथा व्रणस्य मुखे लेपं विना प्रसिच्यते स्रवति ॥ * ॥

अथ शोधनमाह ।

"व्रणस्य त्वविशुद्धस्य क्वाथः शुद्धिकरः परः ।
पटोलनिम्बपत्रस्य सर्व्वथैव प्रयुज्यते ॥
वातिके दशमूलानां क्षीरिणां पैत्तिके व्रणे ।
आरग्वधादेः कफजे कषायः शोधने हितः ॥

अश्वत्थोडुम्बरप्लक्षवटवेतसजं शृतम् ।
व्रणशोथोपदंशानां नाशनं क्षालनात् स्मृतम् ।
तैलसैन्धवयष्ट्याह्वनिम्बपत्रनिशायुगैः ।
त्रिवृद्द्युतैः कार्य्यः प्रलेपो व्रणशोधनः ।
एकैकं सारिवामूलं सर्व्वव्रणविशोधनम् ।
निम्बपत्रतिलादन्तीत्रिवृत्सैन्धवमाक्षिकम् ।
दुष्टव्रणप्रशमनो लेपः शोधनकेशरी ।”
शोधनकेशरी शोधनश्रेष्ठः ।
“लेपान्निम्बदलैः कल्कैर्व्रणशोधनरोपणः ।
भक्षणाच्छर्द्दिमन्दाग्निपित्तश्लेष्मक्रमीन् हरेत् ।
व्रणान् विशोधयेत् वर्त्त्या सूक्ष्मा स्यात् सन्धि-
मर्म्मजान् ।
अभयत्रिवृतादन्तीलाङ्गलीमधुसैन्धवैः ।
निम्बपत्रघृतक्षौद्रदार्व्वीमधुकसंयुता ।
वर्त्तिस्तिलानां कल्को वा शोधयेद्रोपयेद्-
व्रणम् ।”*।
अथ रोपणमाह ।
“अपेतपूतिमांसानां मांसस्थानमरोहताम् ।
कल्कस्तु रोपणे देयस्तिलजो मधुसंयुतः ।
अश्वगन्धा रुहा लोध्रः कट्फलं मधुयष्टिका ।
समङ्गा धातकीपुष्पं परमं व्रणरोपणम् ।
मधुयुक्ता शरपुङ्खा सर्व्वव्रणरोपणी कथिता ।
सुखवीपत्रधत्तूरबला मोचा कुठेरका ।
पृथगेते प्रलेपेन गम्भीरव्रणरोपणाः ।”
सुखवीपत्र कलौञ्जीपत्र । अस्या एतदेव नाम
पुस्तके धृतम् । कुठेरक वरवरी ।
“ककुभोडुम्बराश्वत्थजम्बुकट्फललोध्रजैः ।
त्वक्चूर्णैश्चूर्णिता लेपात् प्ररोहन्ति महाव्रणाः ।
प्रियङ्गुधातकीपुष्पयष्टीमधुजतूनि च ।
सूक्ष्मचूर्णीकृतानि स्यू रोपणान्यवधूननात् ।
यवचूर्णं समधुकं सतैलं सह सर्पिषा ।
दद्यादालेपनं कोष्णं दाहशूलोपशान्तये ।
करञ्जारिष्टनिर्गुण्डीलेपो हन्याद्व्रणं कृमीन् ।
लशुनस्याथवा लेपो हिङ्गुनिम्बकृतोऽथवा ।
निम्बपत्रवचाहिङ्गुसर्पिर्लवणसर्षपैः ।
धूपनं स्याद्व्रणे रक्षःकृमिकण्डूरुजापहम् ।
ये क्लेदपाकस्रुतिगन्धवन्तो
व्रणाश्चिरोत्थाः समताश्च शोथाः ।
प्रयान्ति ते गुग्गुलुमिश्रितेन
पीतेन शान्तिः त्रिफलाघृतेन ।
पटोलनिम्बासनसारधात्री-
पथ्याम्बुनिर्यूहमहर्मुखे तु ।
पिबेत् द्रुतं गुग्गुलुना विसर्प-
विस्फोटदुष्टव्रणशान्तिमिच्छन् ।”*।
अथ सवर्णताकरणम् ।
“मनःशिला समञ्जिष्ठा सलाक्षा रजनीद्वयम् ।
प्रलेपः सघृतक्षौद्रस्त्वचः सावर्ण्यकृत् स्मृतः ।”*
अथ व्रणिनो भोजनम् ।
“जीर्णशाल्योदनं स्निग्धमल्पमुष्णं द्रवोत्तरम् ।
भुञ्जानो जाङ्गलैर्मांसैः शीघ्रं व्रणमपोहति ।
तण्डुलीयकजीवन्तीवास्तूकसुनिषण्णकैः ।
बालं मूलकवार्त्ताकुपटोलैः कारवेल्लकैः ।
सदाडिमैः सामलकैः घृतभृष्टैः ससैन्धवैः ।
अन्यैरेवं गुणैर्व्वापि मुद्गादीनां रसेन च ।”
एभिः सह जीर्णशाल्योदनं भुञ्जानः शीघ्रं व्रण-
मपोहतीत्यन्वयः ।
“अन्नं दधि च शाकञ्च मांसमानूपमौदकम् ।
क्षीरं गुरूणि चान्यानि व्रणितः परिवर्ज्जयेत् ।
व्रणे श्वयथुरायासात् स च रागश्च जागरात् ।
तौ च रुक् च दिवास्वापात् ताश्च मृत्युश्च
मैथुनात् ।”*।
अथाङ्गव्रणचिकित्सा ।
“क्रुद्धे सद्यो व्रणं कुर्य्यादूर्द्ध्वञ्चाधश्च शोधनम् ।
क्रिया शीता प्रयोक्तव्या रक्तपित्तोष्मनाशिनी ।
लङ्घनञ्च बलं ज्ञात्वा भोजनं चासमोचनम् ।
हृष्टे विदलिते चैव सुतरामिष्यते विधिः ।
छिन्ने भिन्ने तथा विद्धे क्षते चासृगतिस्रवेत् ।
रक्तक्षयात्तत्र रुजः करोति पवनो भृशम् ।
स्नेहपानपरीषेकलेपास्त्रोपनाहनम् ।
कुर्व्वीत स्नेहवस्तिञ्च मारुतघ्नौषधैर्भिषक् ।
खड्गादिच्छिन्नगात्रस्य तत्कालं पूरितो व्रणः ।
गाङ्गेरुकीमूलरसैः सद्यः स्यात् गतवेदनः ।”
गाङ्गेरुकी नागबला गुरसकरी इति लोके ।
“कषायमधुराः शीताः क्रियाः सर्व्वाः प्रयो-
जयेत् ।
सद्यो व्रणानां सप्ताहात् पश्चात् पूर्व्वोक्तमाच-
रेत् ।
आमाशयस्थे रुधिरे विदध्याद्वमनं नरः ।
तस्मिन् पक्वाशयस्थे तु दद्यात् स विरे-
चनम् ।
क्वाथो वंशत्वगेरण्डश्वदंष्ट्राश्मभिदा कृतः ।
हिङ्गुसैन्धवसंयुक्तः कोष्ठस्थं स्रावयेदसृक् ।
यवकोलकुलत्थानां निःस्नेहेन रसेन च ।
भुञ्जीतान्नं यवागुं वा पिबेत् सैन्धवसंयुतम् ।
जातीनिम्बपटोलपत्रकटुकादार्व्वीनिशाशारिवा-
मञ्जिष्ठाभयतिक्ततुत्थमधुकैर्नक्ताह्वबीजैः समैः ।
सर्पिःसिद्धमनेन सूक्ष्मवदना मर्म्माश्रिताः स्राविणो
गम्भीराः सरुजो व्रणाः सगतिकाः शुध्यन्ति
रोहन्ति च ।
वृद्धवैद्योपदेशेन पारम्पर्य्योपदेशतः ।
जातीघृतेन संसिद्धे क्षेप्यं सिक्थकं बुधैः ।”
इति जात्यादिघृतम् ।*।
“जातीनिम्बपटोलानां नक्तमालस्य पल्लवाः ।
सिक्थं समधुकं कुष्ठं द्वे निशे कटुरोहिणी ।
मञ्जिष्ठा पद्मकं पथ्या लोध्रमक्नीलमुत्पलम् ।
सारिवा तुत्थकं चापि नक्तमालफलं तथा ।”
सारिवास्थाने सनिम्ब इति च पाठः ।
“एतानि समभागानि कल्कीकृत्य प्रयत्नतः ।
तिलतैलं पचेत् सम्यक् वैद्यः पाकविचक्षणः ।
विषव्रणे समुत्पन्ने स्फोटके कच्छरोगिणि ।
दद्रुवीसर्परोगेषु कीटदष्टेषु सर्व्वथा ।
सद्यः शस्त्रप्रहारेषु दग्धविद्धेषु चैव हि ।
नखदन्तक्षते देहे दुष्टमांसापकर्षणे ।
भक्षणेन हितं तैलमिदं शोधनरोपणम् ।
तैलं जात्यादि नाम्नैतत् प्रसिद्धं भिषगादृतम् ।”
इति जात्यादितैलम् । * ।
“चित्रकरवीरनरामठशरपुङ्खालाङ्गलीकसिन्दूरैः ।
सविषैस्तथा सकुष्ठैः कटुतैलं साधसंयुक्तम् ।
विपरीतमल्लतैलं दुष्टव्रणं तथा नाड़ीम् ।
बहुभेषजैरसाध्यामपथ्यभोक्तुश्च निर्णुदति ।”
इति विपरीतमल्लतैलम् ।*।
“अमृतापटोलमूलत्रिफलात्रिकटुक्रमिघ्नानाम् ।
समभागानां चूर्णं सर्व्वसमो गुग्गुलोर्भागः ।
प्रतिवासरमेकैकां खादेदिहाक्षपरिमाणाम् ।
जेतुं व्रणवातास्रगुल्मोदरशोथवातरोगांश्च ।”
इति अमृतादिगुग्गुलुः । * ।
अथाग्निदग्धस्य चिकित्सा ।
“प्लुष्टस्याग्निप्रतपनं कार्य्यमुष्णं तथौषधम् ।
सम्यक्स्विन्ने शरीरे तु स्विन्नं भवति शोणि-
तम् ।
प्रकृत्या सलिलं शीतं स्कन्दयत्यतिशोणितम् ।
तस्मात् सुखयति प्लुष्टं न तु शीतं कदाचन ।”
स्कन्दयन्ति शोषयन्ति ।
“शीतामुष्णाश्च दुर्दग्धे क्रियां कुर्य्यात्ततः पुनः ।
घृतालेपप्रसेकांस्तु शीतानेवास्य कारयेत् ।
सम्यग्दग्धे तुगाक्षीरीप्लक्षचन्दनगैरिकैः ।
सामृतैः सर्पिषा युक्तैरालेपं कारयेद्भिषक् ।
ग्राम्यानूपौदकैर्मांसैः पिष्टैरेनं प्रलेपयेत् ।
अतिदग्धे विशीर्णानि मांसान्युद्धृत्य शीतलाम् ।
क्रियां कुर्य्यात् ततः पश्चाच्छालितण्डुलकण्डनैः ।
तिन्दुकत्वक्कषायैर्वा घृतमिश्रैः प्रलेपयेत् ।
वदरीत्वक्कषायैर्वा घृतमिश्रैः प्रलेपनम् ।
यवान् दग्ध्वा मसीकृत्य तैलेन युतया तया ।
अयं सर्व्वाग्निदग्धेषु लेपनाद्व्रणरोपणः ।
व्रणं गूढ़विचिचं वा छादयेद्यवोदनैः ।
मधूच्छिष्टं समधुकं लेपं सर्जरसं तथा ।
मञ्जिष्ठाचन्दनं मूर्व्वां पिष्ट्वा सर्पिषि पाच-
येत् ।
सर्व्वेषामग्निदग्धानामेतद्रोपणमुत्तमम् ।”
इति सिक्थकादिघृतम् । * ।
“सिद्धं कषायकल्काभ्यां पटोल्याः कटुतैलकम् ।
व्रणदग्धरुजा स्रावदाहविस्फोटनाशनम् ।”
इति पटोलीतैलम् ।
“वातोष्णमस्तुतं दुष्टं संशोध्य ग्रथितं व्रणम् ।
कुर्य्यात् सदाहं कल्काढ्यं व्रणग्रन्थिस्तु स स्मृतः ।
कम्पिल्लकं विड़ङ्गानि त्वचं दार्व्व्यास्तथैव च ।
पिष्ट्वा तैलं पचेत्तत्तु व्रणग्रन्थिहरं परम् ।”
इति व्रणागन्तुव्रणाग्निदग्धव्रणाधिकारः ।*।
भग्नाधिकारस्तु भग्नशब्दे द्रष्टव्यः । नाड़ीव्रण-
निदानं नाड़ीव्रणशब्दे द्रष्टव्यम् ।*। अथ
नाड़ीव्रणस्य चिकित्सा ।
‘कुष्ठार्कदुग्धदार्व्वीभिर्वर्त्तिं कृत्वा प्रपूरयेत् ।
एष सर्व्वशरीरस्थां नाड़ीं हन्यात् प्रयोगराट् ।
आरग्वधनिशाकालाचूर्णाक्ता क्षौद्रसंयुता ।
सूत्रवर्त्तिर्व्रणे योज्या शोधनी गतिनाशिनी ।”
काला मञ्जिष्ठा ।

"जात्यर्कसम्याककरञ्जदन्ती-
सिन्धूत्थसौवर्च्चलयावशूकैः ।
वर्त्तिः कृता हन्त्यचिरेण नाडीं
स्नुक्क्षीरपिष्टा सह चित्रकेण ॥
नाड्याः शस्त्रेण वदनं हृद्वत् कृत्वा प्रवेशयेत् ।
कुशलो वस्तिविधिना तैलं जात्यादिसाधितम् ॥
एवमन्यच्च यत्तैलं घृतं वा स्वरसं तथा ॥
यत्तैलं यद्घृतं पक्वं स्वरसं वा तथैव च ।"
इति वा पाठः ॥
"नाड्या अभ्यन्तरे वैद्यो लघुहस्तः प्रवेशयेत् ।
कर्पूरकरञ्जैस्तैलं सिद्धार्थकभवं भिषक् ।
पचेत् सिन्दूरकल्केन नाडीदुष्टव्रणापहम् ॥
गुग्गुलुत्रिफलाव्योषैः समांशैराज्ययोजितम् ।
अक्षप्रमाणां गुटिकां खादेच्छीताम्बुना नरः ॥
नाडीदुष्टव्रणं शूलसुदावर्त्तभगन्दरम् ।
गुल्मश्च गुदजान् हन्यात् पक्षिराट् पन्नगानिव ॥"
सप्ताङ्गो गुग्गुलुः । इति नाडीव्रणाधिकारः ॥ * ॥
भगन्दरस्य निदानं चिकित्सा च भगन्दरशब्दे द्रष्टव्यम् । उपदंशस्य निदानादुपदंशशब्दे द्रष्टव्यम् ॥ * ॥ अथोपदंशस्य चिकित्सा ।
"उपदंशेषु सर्व्वेषु स्निग्धस्विन्नस्य देहिनः ।
मेढ्रमध्ये शिरां विध्येत् पातयेद्वा जलौकसः ॥
सद्यो निर्हृतदोषस्य रुक्शोथावुपशाम्यतः ।
पाको निवार्य्यो यत्नेन शिश्नक्षयकरः स यत् ॥
वटप्ररोहार्ज्जुनजम्बुलोध्र-
पथ्याहरिद्रारचितः प्रलेपः ।
यथा तथा शोथमपाकरोति
सर्व्वोपदंशेषु ततो हितोऽयम् ॥
उपदंशेषु पक्वेषु व्रणप्रक्षालनं हितम् ।
त्रिफलायाः कषायेण भृङ्गराजरसेन वा ॥
नीलोत्पलं सकुमुदं पद्मं सौगन्धिकं तथा ।
एष चूर्णं धूलनार्थं प्रलेपश्चात्र शस्यते ॥
बब्बूलदलचूर्णेन रजसा दाडिमत्वचः ।
गुण्ठनान्तद्व्रणे कुर्य्याल्लेपं पूगफलेन वा ॥
दहेत् कटाहे त्रिफलां तन्मसी मधुसंयुता ।
प्रलेपेनोपदंशस्य व्रणः सद्यः प्ररोहयेत् ॥
पटोलनिम्बत्रिफलाकिरात-
क्वाथं पिबेद्वा खदिरासनाभ्याम् ।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्व्वोपदंशोपहरः प्रयोगः ॥
भूनिम्बनिम्बत्रिफलापटोल-
करञ्जधात्रीखदिरासनानाम् ।
कषायकल्कैः घृतमाशु पाच्यं
सर्व्वोपदंशोपहरं प्रदिष्टम् ॥
इति भूनिम्बादिघृतम् ॥
"घृतानि यानि प्रोक्तानि कुष्ठे नाडीव्रणे व्रणे ।
उपदंशे प्रयोज्यानि सेकाभ्यञ्जनभोजने ॥
चारस्त्वेव संछिद्य लिङ्गवर्त्तिमशेषतः ।
दहेच्च तान्ततस्ताभ्यां चिकित्सां व्रणवच्चरेत् ॥"
इत्युपदंशाधिकारः ॥ * ॥
शूकदोषाधिकारः शूकदोषशब्दे द्रष्टव्यः । इति भावप्रकाशः ॥ * ॥ अथ व्रणनाशकतैलम् ।

"उडुम्बरं वटप्लक्षं जम्बुद्वयमथार्ज्जुनम् ।
पिप्पलश्च कदम्बश्च पलाशलोध्रतिन्दुकम् ॥
मधूकमाम्रसर्ज्जञ्च वदरं पद्मकेशरम् ।
शिरीषवीजं कतकमेतत् क्वाथेन साधितम् ।
तैलं हन्ति व्रणाल्लेपाच्चिरकालभवानपि ॥"
इति गारुडे १६८ अध्यायः ॥
व्रणकृत्, पुं, (व्रणं करोतीति । कृ + क्विप् । तुगागमश्च ।) भल्लातकः । इति रत्नमाला ॥ क्षतकारके, त्रि ॥
व्रणकेतुघ्नी, स्त्री, (व्रणकेतुं हन्तीति । हन + टक् । ङीप् ।) दुग्धफेणीक्षुपः । इति राजनिर्घण्टः ॥
व्रणद्विट्, [ष्] पुं, (व्रणस्य द्विट् शत्रुः ।) आश्वगन्धिका । इति शब्दचन्द्रिका ॥ व्रणद्वेषके, त्रि ॥
व्रणहः, पुं, (व्रणं हन्तीति । हन + डः ।) एरण्डवृक्षः । इति शब्दचन्द्रिका ॥ व्रणघातके, त्रि ॥
व्रणहा, स्त्री, (व्रणं हन्तीति । हन + डः । स्त्रियां टाप् ।) गुडूची । इति शब्दचन्द्रिका ॥
व्रणहृत्, पुं, (व्रणं हरतीति । हृ + क्विप् । तुक् च ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥
व्रणारिः, पुं, (व्रणस्य अरिः शत्रुः ।) बोलम् । अगस्त्यवृक्षः । इति राजनिर्घण्टः ॥
व्रतं, क्ली पुं, भक्षणम् । इत्युणादिकोषः ॥ (व्रियते इति । वृञ् वरणे + बाहुलकात् अतच् । सच कित् ।) पुण्यजनकोपवासादि । तत्पर्य्यायः । नियमः २ पुण्यकम् ३ । इत्यमरः ॥ नियामः ४ संयमः ५ । इति शब्दरत्नावली ॥ अथ व्रतविधिः । तदारम्भप्रतिष्ठयोर्व्वर्ज्यकालमाह ज्योतिषे । गुरोर्भृगोरस्तबाल्ये वार्द्धके सिंहगे गुरौ इति । दक्षो बाल्ये दिनत्रयमित्युक्तम् । मठप्रतिष्ठातत्त्वादाववगन्तव्यम् ॥ * ॥ बुधाष्टमीव्रते विशेषो राजमार्त्तण्डोक्तो यथा,—
"द्विजेन्द्रसुतसंयुक्ता पूर्णा या च सिताष्टमी ।
तस्यां नियमकर्त्तारो न स्युः खण्डितसम्पदः ॥
पतङ्गे मकरे याते देवे चाप्रति माधवे ।
बुधाष्टमीं प्रकुर्वीत वर्ज्जयित्वा तु चैत्रिकीम् ॥
प्रसुप्ते च जगन्नाथे सन्ध्याकाले मघौ तथा ।
बुधाष्टमीं न कुर्वीत कृता हन्ति पुराकृतम् ॥"
अथ व्रतानुष्ठानम् । तत्र देवलः ।
"अभुक्ता प्रातराहारं स्नात्वा चैव समाहितः ।
सूर्य्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत् ॥
ब्रह्मचर्य्यं तथा शौचं सत्यमामिषवर्ज्जनम् ।
व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः ॥"
अत्र प्रातरित्यस्याभुक्तेत्यत्र नान्वयः । किन्तु व्रतमित्यनेनान्वयोऽभ्यर्हितत्वात् ।
"प्रातः सङ्कल्पयेद्विद्वानुपवासव्रतादिकम् ।
नापराह्णे न मध्याह्ने पित्र्यकालौ हि तौ स्मृतौ ॥"
इति वराहपुराणैकवाक्यत्वाच्च । ततश्चाभुक्ता प्रातराहारमिति । ..
"मुनिभिर्दिवसं प्रोक्तं विप्राणां मर्त्त्यवासिनां नित्यम् ।
अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः ॥"

इति छन्दोगपरिशिष्टादेकाहारं पूर्व्वदिने कृत्वा परदिने स्नात्वाचम्य सूर्य्यादिदेवेभ्यो निवेद्य । ॐ सूर्य्यः सोमो यम इत्यादिमन्त्रेण सान्निध्यं प्रार्थ्य व्रतमाचरेत् । ततः सङ्कल्पयेत् । यद्वा सूर्य्यादिदेवेभ्यो निवेद्य पूजनीयद्रव्यादि दत्त्वा व्रतमाचरेत् व्रतं कुर्य्यात् । तद्विधानञ्च शान्तिपर्व्वणि ।
"गृहीत्वौडुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासन्तु गृह्णीयात् यद्वा वार्य्येव धारयेत् ॥" * ॥
कर्म्मादौ सूर्य्यपूजामाह भविष्यपुराणम् ।
"यावन्न दीयते चार्घ्यं भास्कराय महात्मने ।
तावन्न पूजयेद्विष्णुं शङ्करं वा महेश्वरीम् ॥"
नवग्रहपूजामाह मत्स्यपुराणम् ।
"नवग्रहमखं कृत्वा ततः कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥"
आदित्यादिपूजामाह पद्मपुराणम् ।
"आदित्यं गणनाथञ्च देवीं रुद्रं यथाक्रमम् ।
नारायणं विशुद्धाख्यं अन्ते च कुलदेवताम् ॥"
यत्तु ।
"देवतादौ यदा मोहात् गणेशश्च न पूज्यते ।
तदा पूजाफलं हन्ति विघ्नराजो गणाधिपः ॥"
इत्यनेन गणेशपूजनस्यादित्वमुक्तं तत् सूर्य्यपूजेतरपरम् । कुलदेवतेत्यत्र कुलाद्युपलक्षणम् ।
"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥"
तत्र विशेषयति मत्स्यपुराणम् ।
"गर्भिणी सूतिका नक्तं कुमारी च रजस्वला
यदाशुद्धा तदान्येन कारयेत् क्रियते सदा ॥
उपवासाशक्तौ तु नक्तं भोजनं कुर्वीत ।
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते ।"
इति वचनान्तरात् अशुद्धा चेत् पूजां कारयेत् । कायिकञ्चोपवासादिकं सदा शुद्धया अशुद्धया वा स्वयं क्रियते । अत्यन्तासामर्थ्ये पुत्रादिप्रतिनिधिद्वारा उपवासः कार्य्यः । तदभावेऽनुकल्पः । गरुडपुराणम् ।
"भार्य्या भर्त्तृव्रतं कुर्य्यात् जायायास्तु पतिस्तथा ।
असामर्थ्यात् द्वयोस्ताभ्यां व्रतभङ्गो न जायते ॥
पुत्त्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ।
एषामभाव एवान्यं ब्राह्मणं विनियोजयेत् ॥"
आरब्धव्रतस्यासमाप्तौ मरणेऽपि तत्फलप्राप्तिमाहाङ्गिराः ।
"यो यदर्थं चरेद्धर्म्मं न समाप्य मृतो भवेत् ।
स तत्पुण्यफलं प्रेत्य प्राप्नुयान्मनुरब्रवीत् ॥"
प्रेत्य परलोके । शाम्बपुराणम् ।
"लोभान्मोहात् प्रमादाद्वा व्रतभङ्गो यदा भवेत् ।
उपवासत्रयं कुर्य्यात् कुर्य्याद्वा केशमुण्डनम् ॥"
मोहो भ्रमः । प्रमादोऽनवधानता । वाशब्दः समुच्चये तेन मुण्डनञ्च कार्य्यं मुण्डनाकरणे द्विगुणं प्रायश्चित्तम् । उपवासत्रयाशक्तौ चतुर्विंशतिपणा देयाः । पद्मपुराणम् ।

"वपनं नैव नारीणां नानुव्रज्याजपादिकम् ।
न गोष्ठे शयनं तासां न च दध्याद्गवाजिनम् ॥
सर्व्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम् ।
एवमेव तु नारीणां मुण्डमुण्डनमादिशेत् ॥"
इति गोवधप्रकरणे विवेचितम् ।
"प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् ।
पूर्व्वं गृहीत्वा सङ्कल्पं प्रमादान्नाचरेद्यदि ।
जीवन् भवति चण्डालो मृत: श्वा चाभि-
जायते ॥"
इति प्रायश्चित्तविवेकधृतवचनम् ।
देवल: ।
"सर्व्वभूतभयं व्याधि: प्रमादो गुरुशासनम् ।
अव्रतघ्नानि कथ्यन्ते सकृदेतानि शास्त्रत: ॥"
भर्त्तुरनुज्ञया स्त्रीणां व्रतकरणे न दोष: । कामं
भर्त्तुरनुज्ञया व्रतोपवासनियमेज्यादीनामभ्यास:
स्त्रीधर्म्म इति संवत्सरप्रदीपधृतशङ्खवचनात् ।
अत्र कथाश्रवणमाह देवीपुराणम् ।
"तद्ध्यानं तज्जप: स्नानं तत्कथाश्रवणादिकम् ।
उपवासकृतो ह्येते गुणा: प्रोक्ता मनीषिभि: ॥"
अथ व्रतप्रतिष्ठाविधि: ।
श्रीभगवानुवाच ।
"गोपथारामसेतूनां मठसंक्रमवेश्मनाम् ।
नियमव्रतलक्षाणां प्रतिष्ठां शृणु सत्तम ॥
ब्राह्मेण विधिना वह्निं समाधाय विचक्षण: ।
शिलां पूर्णघटं कांस्यं सम्भवे स्थापयेद्बुध: ॥
अक्षान् सर्व्वं समासाद्य श्रपयेद्यवमयं चरुम् ।
क्षीरेण कपिलायास्तु तद्विष्णोरिति साधक: ॥
प्रणवेनाभिघार्य्याथ दर्व्वा संघट्टयेत् तत: ।
साधयित्वावतार्य्याथ तद्विष्णोरिति होमयेत् ॥
व्याहृत्या चैव गायत्र्या तद्विप्रासेति होमयेत् ।
विश्वतश्चक्षुरित्युक्ता वेदाद्यैर्होमयेत्तथा ॥
ॐ भूरग्नये स्वाहा । ॐ सूर्य्याय स्वाहा । ॐ
प्रजापतये स्वाहा । ॐ अन्तरीक्षाय स्वाहा ।
ॐ द्यौ: स्वाहा । ॐ ब्रह्मणे स्वाहा । ॐ
पृथिव्यै स्वाहा । ॐ महाराजाय स्वाहा ।
ॐ सोमं राजानमिति जुहुयात् । ॐ लोक-
पालेभ्य: स्वाहा । स्वस्वमन्त्रैर्जुहुयाद्ग्रहेभ्यश्च ।
एवं हुत्वा चरोर्भागं दद्यात् दशदिशां बलिम् ।
तत: पलाशसमिधा हुनेदष्टोत्तरं शतम् ॥
आज्यन्तु जुहुयात् पश्चादेभिर्मन्त्रैर्द्विजोत्तम: ।
तत: पुरुषसूक्तेन मन्त्रैराज्यन्तु होमयेत् ॥
इरावतीति जुहुयात् तिलान् घृतपरिप्लुतान् ।
हुत्वा च ब्रह्मविष्ण्वीशदेवानामनुयायिनम् ॥
ग्रहाणामाहुतीर्हुत्वा लोकेशानामथो पुन: ।
पर्व्वतानां नदीनाञ्च समुद्राणां तथैव च ॥
हुत्वा व्याहृतिभिर्दद्यात् स्रुचा पूर्णाहुतित्रयम् ।
वौषडन्तेन मन्त्रेण वैष्णवेन सुरोत्तम ॥
पञ्चगव्यञ्च संप्राश्य दद्यादाचार्य्यदक्षिणाम् ।
तिलपात्रं हेमयुक्तं सवस्त्रं गामलङ्कृताम् ।
प्रीयतां भगवान् विष्णुरित्युत्सृजेद्व्रतं नर: ॥*॥
आरामं कारयेद्यस्तु नन्दने स चिरं वसेत् ।
मठप्रदानात् स्वर्लोकं प्राप्नोति पुरुष: सदा ।
सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानव: ।
प्रपादानाद्वारुणस्य लोकमाप्नोत्यसंशयम् ॥
संक्रमाणान्तु य: कर्त्ता दुर्गतिं तरते नर: ।
स्वर्गलोके च निवसेत् इष्टकासेतुकृत्तथा ॥
गोमार्गस्य तथा कर्त्ता गोलोके क्रीड़ते चिरम् ।
नियमव्रतकृद्याति विष्णुलोकं नरोत्तम: ॥
लक्षकृत् स्वर्गमाप्नोति सर्व्वपापविवर्ज्जित: ।
अनेन विधिना मर्त्त्य: संपूर्णं फलमाप्नुयात् ॥*॥
इयं प्रतिष्ठा सामान्या सर्व्वसाधारणानघ ।
कर्त्तव्या देशिकेन्द्रैस्तु प्रतिष्ठा यत्र विद्यते ॥
इति संक्षेपत: प्रोक्त: समुदायविधिस्तव ।
सर्व्वेषामेव वर्णानां सर्व्वकामफलप्रद: ॥
सर्व्वसूक्तेषु कर्त्तव्या प्रतिष्ठा विधिना बुधै: ।
फलार्थिभिस्त्वप्रतिष्ठं यस्मान्निष्फलमुच्यते ॥"
इति हयशीर्षे समुदायप्रतिष्ठापटल: ॥ * ॥
ब्राह्मेण वैदिकेन स्वगृह्योक्तविधिनेति यावत् ।
शिलेति उदूखलोपलक्षणम् । कांस्यं अग्निप्रण-
यनार्थम् । कांस्येन अग्निप्रणयनमाह । गृह्या-
संग्रहे ।
"शुभं पात्रन्तु कांस्यं स्यात्तेनाग्निं प्रणयेद्-
बुध: ॥
तस्याभावे शरावेण नवेनाभिमुखञ्च तम् ।
सर्व्वत: पाणिपादान्त: सर्व्वतोऽक्षिशिरोमुख: ।
विश्वरूपो महानग्नि: प्रणीत: सर्व्वकर्म्मसु ॥"
एवञ्चाग्निप्रणयनानन्तरं सर्व्वत इत्यस्य पाठो
युक्त: । प्रणीत इति मन्त्रलिङ्गात् । अन्यथा
स्थापनानन्तरं एतद्विधानं व्यर्थं स्यात् ॥ * ॥
अत्र च पाकाङ्गत्वात् साहसनामानमग्निमाह
गृह्यासंग्रह: ।
"प्रायश्चित्ते विधुश्चैव पाकयज्ञे तु साहस: ।
पूर्णाहुत्यां मृडो नाम शान्तिके वरदस्तथा ।
आहूय चैव होतव्यं यत्र यो विहितोऽनल: ॥"
प्रायश्चित्ते होमकर्म्मवैगुण्यसमाधानार्थं प्राय-
श्चित्तात्मकमहाव्याहृतिहोमादौ । तथा च
छन्दोगपरिशिष्टम् ।
"यत्र व्याहृतिभिर्होम: प्रायश्चित्तात्मको भवेत् ।
चतस्रस्तत्र विज्ञेया: स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुति: ।
होतव्या त्रिविकल्पोऽयं प्रायश्चित्तविधि:
स्मृत: ॥"
अत्र त्रिविकल्प इत्यभिधानात् सामगानां भव-
देवभट्टोक्तशाट्यायनहोमो निष्प्रामाणिक: ।
अत्रासुकाग्ने इहागच्छागच्छ इत्युच्चार्य्य यवा-
भावे व्रीह्यादिभिरपि होम: ।
"हविष्येषु यवा मुख्यास्तदनु व्रीहय: स्मृता: ।
माषकोद्रवगौरादीन् सर्व्वाभावे विवर्ज्जयेत् ॥
यथोक्तवस्तुसम्पत्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालय: ॥"
इति छन्दोगपरिशिष्टात् ।
तत्र गोभिलेन अथ हविर्निर्व्वपति व्रीहीन्
यवान् वा कांस्ये चरुस्थाल्यां वा अमुष्मै त्वा
जुष्टं निर्व्वपामीति देवतानामोद्देश: । सकृद्-
यजुषा द्विस्तूष्णीमित्यनेन निर्व्वापक्रमाभिधानात्
सामगेन तन्मात्रं कर्त्तव्यम् । अत्र च विष्णवे
त्वा जुष्टं निर्व्वपामीत्यनेन यजुषा चरु इत्यभि-
धानात् हवनीयनिर्व्वापणादिचरुनिष्पत्ति:
कर्त्तव्या । तत्र छन्दोगपरिशिष्टम् ।
"देवतासंख्यया ग्राह्या निर्व्वापाश्च पृथक् पृथक् ।
तूष्णीं द्विरेव गृह्णीयाद्धोमश्चापि पृथक् पृथक् ॥"
अत्र देवतासंख्यया पृथक् पृथक् निर्व्वाप: ।
अनुनिर्व्वापस्तूष्णीमेव । होमोऽपि पृथक् पृथ-
गेवेति । आलस्यादिपुरुषदोषेण गृहीतमङ्गु-
लेनापि मन्त्रेण निर्व्वापादिकं समाचरन्ति
याज्ञिका: ।
"घाते न्यूने तथा छिन्ने सान्नाय्ये मान्त्रिके
तथा ।
यज्ञे मन्त्रा: प्रयोक्तव्या मन्त्रा यज्ञार्थसाधका: ॥"
इत्युक्ते: । मान्त्रिके मन्त्रसाध्ये अवघातादौ न्यूने
तत्काले मन्त्रपाठाभावे मन्त्रा: प्रयोक्तव्या: ।
कपिलाया अभावे अन्यधेनोरपि दुग्धेन सप्रणव-
तद्विष्णोरित्यनेनाभिघार्य्य दर्व्या दक्षिणावर्त्तेन
संमिश्रयेत् । दर्व्वी च प्रादेशप्रमाणा द्व्यङ्गुल-
विस्तारा ग्राह्या ।
"इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत् ।
वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम् ॥
एषैव दर्व्वी यस्तत्र विशेषस्तमहं ब्रुवे ।
दर्व्वी द्व्यङ्गुलपृथ्वग्रा तुरीयोनञ्च मेक्षणम् ॥"
इति छन्दोगपरिशिष्टात् ।
इध्मार्द्धप्रमाणं प्रादेशमात्रम् । प्रादेशद्वयमिध्मस्य
प्रमाणं परिकीर्त्तितम् । इति छन्दोगपरि-
शिष्टोक्ते: । अथेत्यनेन स्वगृह्योक्तशेषकर्म्मसमा-
पनानन्तरं प्रकृतहोम: । अत्र बहुदेवताक-
चरुहोमादुपघातहोम: ।
"चरौ तु बहुदैवत्ये होम: स्यादुपघातवत् ।"
इति छन्दोगपरिशिष्टधृतवचनात् ।
उपघातलक्षणमाह गृह्यासंग्रह: ।
"पाणिना मेक्षणेनाथ स्रुवेणैव तु यद्धवि: ।
हूयते चानुपस्तीर्य्य उपघात: स उच्यते ॥
यद्युपघातं जुहुयाच्चरावाज्यं समापयेत् ।
मेक्षणेन तु होतव्यं नाज्यभागो न स्विष्टकृत् ॥"
अनुपस्तीर्य्य इत्यनेन स्रुचि यच्चतुरावत्तं पञ्चा-
वत्तं वा घृतोपस्तरणादिकं तदत्र नास्ति तेन
मेक्षणादिना सकृत् गृहीत्वा होतव्यम् ॥ * ॥
प्रकृतहोमात् प्राक् वह्निपूजनमाह मार्कण्डेय-
पुराणम् ।
"पूजयेच्च ततो वह्निं दद्याच्चाप्याहुती: क्रमात् ।"
तत इति वह्नेर्नामकरणध्यानानन्तरम् ।
होमानुष्ठाने स्मृति: ।
"मन्त्रेणोङ्कारपूर्व्वेण स्वाहान्तेन विचक्षण: ।
स्वाहावसाने जुहुयाद्ध्यायन् वै मन्त्रदेवताम् ॥"
ततस्तद्विष्णोरितिमन्त्रेण चरुणा होमयेत् । एवं
व्याहृत्या प्रत्येकं भूरित्यादिना । गायत्र्या
सावित्र्या । तद्विप्रासेति तद्विप्रासो विपन्यवो
जागृवांस इत्यादिना । विश्वत इति विश्वत-

चक्षुरुत विश्वतोमुख इत्यादिना। वेदाद्यैः अग्निमीळे इत्यादिना। इषेत्वोर्ज्जेत्वा इत्यादिना। अग्न आयाहि इत्यादिना। शन्नो देवीरित्यादिना चतुर्भिः। भूरग्नये इत्यादष्टभिः। ततः सोमं राजानमित्यादिना। ततो लोकपालेभ्य इत्यादिना स्वस्वमन्त्रैस्तत्तद्देवोक्तदशदिक्पालमन्त्रैः। तत्र सामगानां इन्द्रस्य त्रातारमित्यादिना। अग्नेश्च अग्निं दूतं वृणीमहे इत्यादिना। यमस्य नाके सुपर्णमित्यादिना। निर्ऋतेर्वैत्याहि निर्ऋतीनां इत्यादिना। वरुणस्य घृतवती भुवनानामित्यादिना। वायोः वात आवातु भेषजं इत्यादिना। सोमस्य सोमं राजानमित्यादिना। ईशानस्य अभित्वा शूरणो नुम इत्यादिना। ब्रह्मणो ब्रह्मयज्ञानं प्रथममित्यादिना। अनन्तस्य चर्षणीधृतमित्यादिता। तथा च गोभिलीयकर्म्मप्रदीपे।

"त्रातारमिन्द्रमवितारमिन्द्रस्य परिकीर्त्तितः।
अग्निं दूतं वृणीमहे वह्नेर्मन्त्रो यमस्य वै॥
नाके सुपर्णमुपयत् वेत्याहिर्निर्ऋतेस्तथा।
घृतवतीति वरुणस्य वात आवातु भेषजम्॥
वायोर्मन्त्रः समुद्दिष्टः सोमं राजानमित्यृचा।
सोमस्य मन्त्रः कथितस्त्वभित्वेऽतोग्र उच्यते॥"

ईशे ईशानस्य।

"ब्रह्मयज्ञानं प्रथमं ब्रह्मणः परिकीर्त्तितः।
चर्षणीधृतमिति च सर्पस्य समुदाहृतः॥"

ग्रहेभ्यः नवग्रहेभ्यः स्वस्वमन्त्रैः सर्व्ववेदसाधारणैः। सूर्य्यस्याकृष्णेनेत्यादिना। सोमस्याप्यायेत्यादिना। मङ्गलस्याग्निर्मूर्द्धा इत्यादिना। बुधस्याग्ने विवस्वदित्यादिना। बृहस्पतेर्बृहस्पते परिदीयेत्यादिना। शुक्रस्य शुक्रन्तेऽन्यद्यजतन्त इत्यादिना। शनैश्चरस्य शन्नो देवीरित्यादिना। राहोः कयानश्चित्रेत्यादिना। केतोः केतुं कृण्वन्नित्यादिना। तथा च मत्स्यपुराणम्।

"आकृष्णेनेति सूर्य्याय होमः कार्य्यो विजानता।
आप्यायस्वेति सोमाय मन्त्रेण जुहुयात् पुनः॥
अग्निर्मूर्द्धा दिवो मन्त्रमिति भौमाय कीर्त्तयेत्।
अग्ने विवस्वदुषस इति सोमसुताय च।
बृहस्पते परिदीया रथेनेति गुरोर्मतः।
शुक्रन्तेऽन्यदिति च शुक्रस्यापि निगद्यते॥
शनैश्चरायेति पुनः शन्नो देवीति होमयेत्।
कयानश्चित्र आभुव ऊती राहोरुदाहृतः।
केतुं कृण्वन्निति कुर्य्यात् केतूनामुपशान्तये॥"

एवं चरुहोमं समाप्य चरुशेषेण प्राच्यादिदिग्भ्यः पायसबलिं दद्यात्। तद्यथा। एष पायसबलिः ॐ प्राच्यै दिशे नमः इत्यादिना। दक्षिणायै दिशे स्वाहा इति श्रुतिदर्शनात्। हरिहरपद्धतितत्त्वप्रदीपाभ्यां स्वाहान्तेन बलिदानमुक्तम्। वस्तुतस्तु बलिप्रकरण एव प्राच्यूर्द्ध्वाचीभ्योऽवरवर्त्तिन्यं प्रयोग इति गोभिलसूत्रे स्त्रीलिङ्गनिर्द्देशात् दिशां देवतात्वं बलौ प्रतीयते। अत्र अवाचीतिपाठात् श्रुत्युक्तहोमेऽपि दक्षिणायै इत्यनादृत्य ॐ अवाच्यै दिशे नम इति बलौ प्रयुज्यते। एभिर्मन्त्रैस्तद्विष्णोः परमं पदं इत्यादियावन्मन्त्रैः। आज्यन्त्विति सुखब्देन समिद्धोमे तेषां यावर्त्तनात् मन्त्राकाङ्क्षायां प्राथमिकत्वेन तद्विष्णोरित्यस्य परिग्रहः। ततस्तद्विष्णोरिति मन्त्रेण स्वाहान्तेन घृताक्तपलाशसमिद्भिरष्टोत्तरशतं जुहुयात्। पूर्व्वोक्तमन्त्रैः पूर्व्वोक्तदेवताभ्यः सुवेणाज्याहुतीर्जुहुयात्। पुरुषसूक्तस्तत्तद्देवोक्तः। तत्र सामगानाम्। ॐ इदं विष्णुरिति। प्रेचकस्य विष्णोरिति। प्राकायसुसवेव ब्रुवाण इति। सहस्रशीर्षेति। त्रिपादूर्द्ध्व इति। पुरुष एवेदमिति। एतावानस्य इति। ततो विराड़िति। कयान इत्यादि पुरुषसूक्तम्। तथा च सामिधेनी श्रुतिः। इदं विष्णुः प्रेचकस्य विष्णोः प्राकायसुसवेव ब्रुवाणः इति वाराहमन्त्यं पुरुषव्रते चैषा वैष्णवीनामसहितेषां प्रयुञ्जन् विष्णुः प्रीणाति इति प्राकायसुसवेव ब्रुवाण इति वाराहमन्त्यमित्यनेन एको मन्त्रः प्रकाशितः। पुरुष इत्यनेन पुरुषपदयुक्तपञ्चमन्त्राः। व्रते इत्यनेन कयानश्चित्र इत्येको मन्त्रः। सामगो जुहुयात्। यजुर्व्वेदी तु तत्र प्रसिद्धाभिः सहस्रशीर्षेत्यादि ऋग्भिः षोड़शाहुतीर्जुहुयात्। इरावतीति तिलान् घृताक्तान् सकृज्जुहुयात्। एवं ब्रह्मानुयायिभ्यः स्वाहा विष्ण्वनुयायिभ्यः स्वाहा ईशानानुयायिभ्यः स्वाहा। एवं पूर्व्वोक्तनवग्रहमन्त्रैः पूर्व्वोक्तदिक्पालमन्त्रैश्च जुहुयात्। एवं पर्व्वतेभ्यः स्वाहा नदीभ्यः स्वाहा नदेभ्यः स्वाहा समुद्रेभ्यः स्वाहा भूः स्वाहा भुवः स्वाहा इति जुहुयात्। ततः परिभाषासिद्धं स्वशाखोक्तमहाव्याहृतिहोमं प्रायश्चित्तहोमञ्च कृत्वा स्रुचा तद्विष्णोरिति मन्त्रेण वौषड़न्तेन पूर्णाहुतित्रयमुत्थाय जुहुयादिति विशेषोपादानात् नात्र स्वशाखोक्तपूर्णहोमः। ततः पञ्चगव्यं चरुशेषं प्राश्य स्नात्वा वा हेमयुक्तं सवत्सं तिलपात्रं अलङ्कृतां गाञ्च दक्षिणामाचार्य्याय दद्यात्। आचार्य्यपदञ्च।

"उदाहरति वेदार्थान् यज्ञविद्याः स्मृतीरपि।
श्रुतिस्मृतिसमापन्नमाचार्य्यं तं विदुर्बुधाः॥"

इति छन्दोगपरिशिष्टात्।

कर्म्मोपदेष्टुराचार्य्यत्वेन आचार्य्यपदं स्वयं होतृपक्षे ब्रह्मपरं अन्यहोतृपक्षे ब्रह्महोतृद्वयपरम्। स्वयं ब्रह्महोतृकर्म्मकरणपक्षे पुस्तकधारकपरम्।

"ब्रह्मणे दक्षिणा देया यत्र या परिकीर्त्तिता।
कर्म्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत्॥
विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्द्धहरो भवेत्।
स्वयञ्चेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत्॥"

इति छन्दोगपरिशिष्टैकवाक्यत्वात्।

एवं ब्रह्मविधिना अग्निस्थापनादि प्रीयतां भगवान् विष्णुरित्यन्तकर्म्मसंस्कृतगोपथादिदाननियमव्रतहलक्षादिकरणान्यतररूपा समुदायप्रतिष्ठा कर्त्तव्या। समुदायस्य प्रकृतगोपथादेः प्रतिष्ठा समुदायप्रतिष्ठा। तथा च कपिलपञ्चरात्रम्।

"प्रतिष्ठाशब्दसंसिद्धिः प्रतिपूर्व्वाच्च तिष्ठतेः।
बह्वर्थत्वान्निपातानां संस्कारादौ प्रतिःस्थितिः॥"

तथा च गोपथादेरुक्तकर्म्मसंस्कृतस्य फलजनकत्वम्। अप्रतिष्ठन्तु निष्फलमित्युक्तिः। एतद्व्रतकर्म्मणा प्रीयतां भगवान् विष्णुरिति समाप्नुयात्॥ *॥ अथ व्रतप्रतिष्ठाप्रयोगः। तत्र कृतनित्यक्रियः कथान्तं व्रतं समाप्य तत्तद्देवताप्रीतिकामो यथाशक्ति दानादि दद्यात्।

"व्रते देवगृहोत्सर्गे कूपादीनां प्रतिष्ठने।
दद्यात् षोड़शदानानि द्विषड़्दानानि चैव वा॥"

इति दानसागरधृतवचनात्।

ॐ तत् सदित्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा तत्तद्व्रतफलप्राप्तिकामः कृतैतत् अमुकव्रतप्रतिष्ठामहं करिष्ये। स्त्री चेद्व्रतकारिणी तदा अमुकगोत्रामुकी देवीत्याद्यूह्यं इति सङ्कल्पं कुर्य्यात्। ततो घटं संस्थाप्य पञ्च देवान् संपूज्य गौर्य्यादिषोड़शमातृकाः संपूज्याः। पुरुषश्चेत्तदा नान्दीश्राद्धं कुर्य्यात्। तत उत्तराभिमुखं ब्राह्मणमुपवेश्य तत्समीपे आसनमानीय प्राङ्मुखो यजमानः ॐ साधु भवानास्तां इति कृताञ्जलिर्वदेत्। ॐ साध्वहमासे इति प्रतिवचनम्। ॐ अर्च्चयिष्यामो भवन्तं इति पुनरुक्ते ॐ अर्च्चयेति प्रतिवचनम्। ततो वस्त्रालङ्कारगन्धपुष्पादिभिरभ्यर्च्य दक्षिणं जानु धृत्वा ॐ अद्येत्यादि अमुकगोत्रममुकदेवशर्म्माणमर्च्चितं कृतैतदमुकव्रतप्रतिष्ठाकर्म्मणि होमादिकर्म्मकरणाय भवन्तमहं वृणे। ॐ वृतोऽस्मीति प्रतिवचनम्। ॐ यथाविहितं कृतकर्म्म कुरु। ॐ यथाज्ञानं करवाणि इति प्रतिवचनम्। ततो वेदीं पञ्चगव्येनाभ्युक्ष्य पूर्व्वं पञ्च घटान् घटमेकं वा संस्थाप्य प्रथमलिखितक्रमेण भूतशुद्ध्यादिगणेशादिपूजां विधाय तत्तद्देवतां क्रमेण पूजयेत्। ततो होता स्वगृह्योक्तविधिनाग्निं संस्थाप्य ब्रह्मस्थापनानन्तरं चरुश्रपणं कुर्य्यात्। अन्यत् सर्व्वं प्रतिष्ठापद्धतौ ज्ञेयम्॥ *॥ अथ व्रतप्रयोगः। स्वस्तिवाचनं कृत्वा सूर्य्यः सोम इति पठित्वा सङ्कल्पं कुर्य्यात्। अद्येत्यादि अमुककामोऽमुकव्रतमहं करिष्ये। व्रतादृत्तौ आद्यन्तसंख्यामालिखेत् अब्दारम्भेति च उदङ्मुखो भूत्वा एतत् कुर्य्यात्। ॐ पृथः शिवे नम इति स्थण्डिलं मार्ज्जयेत्। ॐ व इत्यभ्युक्षयेत्। वामहस्तेन स्थण्डिलं स्पृष्ट्वा कुशेन प्रणवपूर्व्वकं चतुर्थ्यन्तव्रतदेवतानाम लिखेत्। हस्तप्रमाणं स्थण्डिलं चतुरस्रं सिततण्डुलेनापूर्य्य मध्ये वितस्त्यूर्द्धकर्णिकं हरिद्राचूर्णेन तद्बहिर्वितस्तिप्रमाणान्यन्योन्यसक्तानि अष्टदलानि सिततण्डुलचूर्णेन पञ्चमध्ये केशराणि कुसुम्भचूर्णेन पञ्चसन्धीन् नीलादिपञ्चचूर्णेन पीठगात्राणि दग्धपुलाकचेन कृत्वा घटं संस्थाप्य सामान्यार्घ्यं कृत्वा तदुदकेनात्मानं पूजोपकरण-

चाभ्युत्य गणेशादीन् नवग्रहांश्चैव पूजयेत्। ततो व्रतदेवताः पूजयेत्। इति व्रततत्त्वम्॥*॥ अथ व्रतलक्षणम्। दीर्घकालानुपालनीयसङ्कल्पो व्रतमिति नारायणोपाध्यायानां स्वरसः। स्वकर्त्तव्यविषयो नियतः सङ्कल्पो व्रतमिति श्रीदत्तहरिनाथवर्द्धमानप्रभृतयः। सङ्कल्पश्च भावे मयैतत् कर्त्तव्यमेव निषेधे न कर्त्तव्यमिति ज्ञानविशेषः। अतएव सङ्कल्पः कर्म्ममानसमित्यभिधानिकाः। वस्तुतस्तु पूर्व्वोक्तवराहपुराणवचनेनैकादश्युपवासस्य व्रतत्वाभिधानात्।

"एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन चैकेन पादकृच्छ्र उदाहृतः॥"

इत्यादि याज्ञवल्क्याद्युक्तेषु एकभक्तनक्तायाचितभोजनोपवासादिषु पादकृच्छ्रादित्वाभिधानाच्च न सङ्कल्पो व्रतम्। किन्तु सङ्कल्पविषयतत्तत्कर्म्मैव व्रतमिति। अतएव व्रतानां सङ्कल्पसम्भवत्वमाह मनुः।

"सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः।
व्रता नियमधर्म्माश्च सर्व्वे सङ्कल्पजाः स्मृताः॥"

अनेन कर्म्मणा इदमिष्टं फलं साध्यते इत्येवंविषया बुद्धिः सङ्कल्पस्तदनन्तरमिष्टसाधनतया अवगते तस्मिन् इच्छा जायते ततस्तदर्थं प्रयत्नं कुर्व्वीत इत्येवं यज्ञाः सङ्कल्पसम्भवाः। व्रता नियमरूपा धर्म्माश्चतुर्थाध्याये वक्ष्यमाणाः। सर्व्वे इत्यनेन अन्येऽपि शास्त्रार्थाः सङ्कल्पादेव जायन्ते इति कुल्लूकभट्टः॥*॥ सङ्कल्पमाह वराहपुराणम्।

"प्रातः सङ्कल्पयेद्विद्वानुपवासव्रतादिकम्।
नापराह्णे न मध्याह्ने पित्र्यकालौ हि तौ स्मृतौ॥"

सङ्कल्पं व्रतस्यारम्भ इत्युक्तं राघवधृतो विष्णुः।

"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्॥
आरम्भो वरणं यज्ञे सङ्कल्पो व्रतजापयोः।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिष्क्रिया।
निमन्त्रणन्तु वा श्राद्धे आरम्भः स्यादिति स्मृतिः॥"

पाकपरिष्क्रियेति साग्निदर्शश्राद्धविषयम्। तत्रैव तस्याप्युद्धरणविधानेन तदग्निपाकस्यासाधारणत्वात्॥*॥ सङ्कल्पविधानन्तु संवत्सरप्रदीपे।

"प्रातःसन्ध्यां ततः कृत्वा सङ्कल्पं बुध आचरेत्।"

शान्तिपर्व्वणि।

"गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः।
उपवासन्तु गृह्णीयाद्यद्वा सङ्कल्पयेद्बुधः॥
देवतास्तस्य तुष्यन्ति कामिकं तस्य सिध्यति।
अन्यथा तु वृथा मर्त्त्याः क्लिश्यन्ति स्वल्पबुद्धयः॥"

यद्वेति पक्षान्तरम्। तेन ताम्रपात्राभावे सङ्कल्पमात्रं करणीयम्॥*॥ गृहीतव्रताकरणे दोषमाह छागलेयः।

"पूर्व्वं व्रतं गृहीत्वा यो नाचरेत् काममोहितः।
जीवन् भवति चाण्डालो मृतः श्वा चैव जायते॥
द्वादशीव्रतमादाय व्रतभङ्गं करोति यः।
द्वादशाब्दं व्रतं चीर्णं निष्फलं तस्य जायते॥"

इति नारदीयवचनात् द्वादश्यां विशेषोऽपि॥*॥ प्रायश्चित्तमाह पद्मपुराणम्।

"लोभान्मोहात् प्रमादाद्वा व्रतभङ्गो यदा भवेत्।
उपवासत्रयं कुर्य्यात् कुर्य्याद्वा केशमुण्डनम्।
प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्॥"

वाशब्दः समुच्चये तेन मुण्डनञ्च कर्त्तव्यमिति प्रायश्चित्तविवेकः। प्रमादादस्य सकृत्कृतत्वे प्रतिप्रसूते देवलः।

"सर्व्वभूतभयं व्याधिः प्रमादो गुरुशासनम्।
अव्रतघ्नानि कथ्यन्ते सकृदेतानि शास्त्रतः॥"

इत्येकादशीतत्त्वम्॥*॥

पुण्यजनकव्रतानि यथा। वैशाखस्य शुक्लतृतीयायां अक्षयतृतीयाव्रतम् १ तस्य शुक्ला द्वादशी पिपीतकी २ तच्चतुर्द्दशी नृसिंहचतुर्द्दशी ३ तस्य कृष्णाष्टमी त्रिलोचनाष्टमी ४ तस्य कृष्णचतुर्द्दशी सावित्री ५ ज्यैष्ठशुक्लतृतीया रम्भातृतीया ६ तस्य शुक्ला चतुर्थी उमाचतुर्थी ७ तस्य शुक्ला षष्ठी अरण्यषष्ठी ८ तच्चतुर्द्दशी चम्पकचतुर्द्दशी ९ आषाढ़ी शुक्लैकादशी शयनैकादशी १० श्रावणी कृष्णाष्टमी श्रीकृष्णजन्माष्टमी ११ भाद्रशुक्ला चतुर्थी शिवा चतुर्थी १२ तस्य शुक्ला षष्ठी चपेटा षष्ठी १३ तस्य शुक्ला सप्तमी ललिता सप्तमी तत्र कुक्कुटीव्रतम् १४ तस्य शुक्लाष्टमी दूर्व्वाष्टमी १५ राधाष्टमी च १६ तस्य शुक्ला नवमी तालनवमी १७ तस्य शुक्लैकादश्यां पार्श्वपरिवर्त्तनव्रतम् १८ तस्य शुक्ला द्वादशी श्रवणद्वादशी १९ तस्य शुक्ला चतुर्द्दशी अनन्तचतुर्द्दशी २० तस्य कृष्णा चतुर्थी गणेशचतुर्थी २१ आश्विनशुक्लाष्टमी महाष्टमी २२ कार्त्तिकशुक्ला नवमी दुर्गानवमी २३ तस्य शुक्लैकादशी उत्थानैकादशी २४ तस्य शुक्ला चतुर्द्दशी पाषाणचतुर्द्दशी २५ तन्मासीयैकादश्यादिपञ्चतिथ्यात्मकं वकपञ्चकम् २६ वृश्चिकसंक्रान्त्यां सर्व्वजयाव्रतम् २७ कार्त्तिकेयव्रतञ्च २८ अग्रहायणस्य शुक्ला षष्ठी गुहषष्ठी २९ तस्य शुक्ला सप्तमी मित्रसप्तमी ३० तस्य शुक्ला द्वादशी अखण्डा द्वादशी ३१ माघशुक्ला चतुर्थी वरदा चतुर्थी ३२ तस्य शुक्लपञ्चम्यां श्रीपञ्चमीव्रतं षड्वर्षनिष्पाद्यम् ३३ तस्य शुक्ला षष्ठी शीतला षष्ठी ३४ तस्य शुक्ला सप्तमी आरोग्यसप्तमी ३५ तस्य शुक्लैकादशी भैमैकादशी ३६ तद्द्वादशी वराहद्वादशी ३७ तस्य कृष्णा चतुर्द्दशी शिवरात्रिः ३८ फाल्गुनशुक्ला द्वादशी गोविन्दद्वादशी ३९ चैत्रकृष्णा षष्ठी स्कन्दषष्ठी ४० चैत्रशुक्लाष्टमी अशोकाष्टमी ४१ तस्य शुक्ला नवमी श्रीरामनवमी ४२ तस्य शुक्ला त्रयोदशी मदनत्रयोदशी ४३। इति स्मृतिः॥*॥ अयाचितव्रतं नक्तव्रतं उमामहेश्वरव्रतं शङ्करनारायणव्रतं देवीपुराणे कृष्णाष्टमीव्रतनामाध्याये सम्मार्ज्जनमाहात्म्याध्याये च द्रष्टव्यम्॥*॥ तिथ्यादिव्रतं गारुड़े ११६ अध्याये अगस्त्यार्घ्यव्रतं गारुड़े ११९ अध्याये चातुर्मास्यव्रतानि गारुड़े १२१ अध्याये भीष्मपञ्चकादिव्रतं गारुड़े १२३ अध्याये द्रष्टव्यम्॥*॥ कार्त्तिकस्नानव्रतं कार्त्तिकव्रतं कार्त्तिकप्रदीपदानव्रतञ्च पाद्मोत्तरखण्डे १४० अध्याये द्रष्टव्यम्॥*॥ प्रतिपत्कल्पे धनव्रतम्। द्वितीयाकल्पे पुष्पद्वितीयाव्रतं फलद्वितीयाव्रतञ्च। तृतीयाकल्पे गौरीव्रतम्। चतुर्थीकल्पे गणेशचतुर्थी। पञ्चमीकल्पे भाद्रशुक्ला पञ्चमी नागपञ्चमी। षष्ठीकल्पे भाद्रशुक्ला षष्ठी गुहषष्ठी। सप्तमीकल्पे माघशुक्लसप्तमी रथसप्तमी। शुक्लपक्षे रविवारे सप्तम्यां रोहिणीनक्षत्रयोगे विजयासप्तमी। रविवारे संक्रान्तौ आदित्यहृदयव्रतम्। शुक्लपक्षीयसप्तम्यां पञ्चतारकनक्षत्रयोगे जया सप्तमी। माघशुक्लसप्तमी जयन्ती। भाद्रशुक्लसप्तमी अपराजिता सप्तमी। शुक्लपक्षे सप्तम्यां रविसंक्रमणे महाजया सप्तमी। मार्गशीर्षस्य शुक्ला सप्तमी नन्दा सप्तमी। शुक्लसप्तम्यां हस्तानक्षत्रयोगे भद्रासप्तमीव्रतम्। फाल्गुनस्य शुक्ला सप्तमी कामदा सप्तमी। पापनाशिनी सप्तमीव्रतम्। भानुपदव्रतम्। सर्व्वाप्तिसप्तमीव्रतम्। मार्त्तण्डसप्तमीव्रतम्। भाद्रशुक्लसप्तमी नतसप्तमी। श्रावणशुक्लसप्तमी अव्यङ्गसप्तमी। मार्गशीर्षस्य सितसप्तम्यां हस्तानक्षत्रयोगे त्रितयप्रदाव्रतम्। इति भविष्यपुराणम्॥*॥ उत्तरायणे शुक्लपक्षे बुधवारे अष्टमी बुधाष्टमी। अमावस्याव्रतम्। वैशाखीपूर्णिमा मिष्टपूर्णिमा। मेषसंक्रान्तौ मधुसंक्रान्तिः। जलसंक्रान्तिः। फलसंक्रान्तिः। अन्नसंक्रान्तिः। दधिसंक्रान्तिव्रतञ्च॥*॥ अथ व्रतविधिः। तत्र व्रतधर्म्माः। तत्र विष्णुहारीतौ।

"दिनान्ते नखरोमादीन् प्रवाप्य स्नानमाचरेत्।
भस्मगोमयमृद्वारिपञ्चगव्यादिकल्पितम्॥
मलापकर्षणं कार्य्यं बाह्यशौचात्मसिद्धये।
दन्तधावनपूर्व्वेण पञ्चगव्येन संयुतम्।
व्रतं निशामुखे ग्राह्यं वहिस्तारकदर्शने॥"

तेन प्रायश्चित्तव्रतारम्भे पूर्व्वदिने पञ्चगव्यं प्राश्य दन्तधावनं कृत्वा सायं समये व्रतसङ्कल्पः कर्त्तव्यः। वशिष्ठः। श्मश्रुकेशनखान् वापयेदक्षिलोमशिखावर्ज्जम्। केशधारणेच्छायां द्विगुणव्रतमाह हारीतः।

"राजा वा राजपुत्त्रो वा ब्राह्मणो वा बहुश्रुतः।
केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्॥
केशानां धारणार्थन्तु द्विगुणं व्रतमाचरेत्।
द्विगुणे तु व्रते चीर्णे दक्षिणा द्विगुणा भवेत्॥"*

स्त्रियाः केशवपनं न कार्य्यमित्याह बौधायनः। कृच्छ्रे त्रिषवणस्नानमुदकोपस्पर्शनमधःशयनमेकवाससा केशश्मश्रुनखरोमवापनं एतदेव स्त्रियाः केशवपनवर्ज्जम्। पञ्चगव्यहुतप्राशनयोर्व्विकल्पः।

तथा शङ्खलिखितौ ।
"वाप्य केशनखान् पूर्व्वं हुतं प्राश्य वहिर्निधि ।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ।
प्रायश्चित्तमुपासीनो वाग्यतस्त्रिसवनं स्पृशेत् ।
एकवासार्द्रवासा वा लघ्वाशी स्थण्डिलेशयः ।
स्नानी वीरासनी मौनी मौञ्जी दण्डकमण्डलुम् ।
भैक्षचर्य्याग्निकार्य्यश्च कुश्माण्डैर्जुहुयाद्घृतम् ॥"
प्रत्येकं नियतं कालमिति व्रतसंख्या सङ्कल्पवाक्ये उल्लेखनीया इत्यर्थः । वीरासनी भित्त्याद्यनाश्रितः । दण्डकमण्डलुं आर्षत्वात् मतुपो लोपेन तेनैतद्युक्त इत्यर्थः । कुश्माण्डैर्यद्देवा देवहेलनमित्यादिमन्त्रैः । मनुः ।
"महाव्याहृतिभिर्होमः कर्त्तव्यः स्वयमन्वहम् ।
अहिंसासत्यमक्रोधमार्ज्जवञ्च समाचरेत् ।
त्रिरह्नस्त्रिर्निशायाञ्च सवासा जलमाविशेत् ॥"
त्रिरह्नस्त्रिर्निशायाञ्च इति षट्स्नानविषयमिदम् । पिपीलिकामध्यचान्द्रायणादितप्तकृच्छ्रवर्ज्जं फलातिशयार्थं बहुषु त्रिसवनविधानात् । तथा ।
"स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित् ।
स्थानासनाभ्यां विहरेदशक्तोऽधःशयी भवेत् ॥
ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्च्चकः ।
सावित्रीञ्च जपेन्नित्यं पवित्राणि च शक्तितः ॥
सर्व्वेषु च व्रतेष्वेवं प्रायश्चित्तार्थमादृतः ॥"
ब्रह्मचारी मैथुनवर्ज्जं व्रती छत्रोपानहमाल्यानुलेपनगन्धादिवर्ज्जम् । शूद्रेण सावित्रीजपस्थाने नारायणादिमन्त्रजपः कार्य्यः । अन्यद्वारा वा कारयितव्यः । एवमन्यत्रापि । यथा वराहपुराणम् ।
"अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ।"
जाबालः ।
"आरम्भे सर्व्वकृच्छ्राणां समाप्तौ च विशेषतः ।
आज्येनैव हि शालाग्नौ जुहुयाद्व्याहृतीः पृथक् ॥
श्राद्धं कुर्य्याद्व्रतान्ते च गोहिरण्यादिदक्षिणाम् ।
गृहे गृही वसन् कुर्व्वन् ब्रह्मलोके महीयते ।
स्त्रीणां होमो न कर्त्तव्यः पञ्चगव्यन्तथैव च ।
शूद्राणां पापिनाञ्चैव संवादं न च कारयेत् ।
संवादस्तु न कर्त्तव्यस्त्रिवर्णैश्च कदाचन ।
ब्राह्मणेनैव वक्तव्य उत्पन्ने पापसंशये ॥"
श्राद्धमिति शुद्ध्यर्थं श्राद्धं दर्शितम् । स्त्रीभिर्होमो न कर्त्तव्यः पञ्चगव्यपानञ्च तासां कर्त्तरि चेति षष्ठी । प्रारब्धव्रतपीड़या पापसंशये । अन्ये वर्णा न प्रष्टव्या ब्राह्मण एव प्रष्टव्यः । व्रतं मौनं पूर्व्वोक्तं । तत्र विशेषमाह आपस्तम्बः । तत्र मौनमुक्तं त्रैविद्यवृद्धैर्मुनिभिरन्यैराश्रमिभिर्बहुश्रुतैर्दन्तैर्हन्तान् सन्ध्यायामन्तर्मुख एव यावद्यावदर्थं भाषते न मन्त्रलोपो भवतीति विज्ञायते । मन्त्रलोपो व्रतलोपः । बालवृद्धादिभिरङ्गहीनमपि व्रतं कार्य्यमित्याह लघुविष्णुः ।
"असंस्कृतो निरतृषाह्यो रोगी नवतिजीवकः ।
यथाशक्ति प्रकुर्व्वीत व्रतं स्त्रीषु न लुप्यते ॥"
अशक्तावन्यद्वाराऽपि कार्य्यमिति उक्तञ्च ब्रह्मपुराणे ।
"रोगी वृद्धस्तु पोगण्डः कुर्व्वन्नन्यैर्व्रतं सदा ।
चतुर्थाद्वत्सरादूर्द्धमष्टमं यावदेव हि ॥
शिशोर्व्रतं प्रकुर्व्वीरन् गुरुसम्बन्धिबान्धवाः ।
गुर्व्विणी बालवत्सा च रोगी द्रव्यपरायणः ॥
एते नक्तेषु भुञ्जन्ति बाला मध्याह्न एव च ।
व्रतस्थः प्राणरक्षार्थं कदाचिदुदकं पिबेत् ॥
फलमूले तथा क्षीरं यज्ञशिष्टं तथा हविः ।
व्रतमध्ये तु रोगार्त्तो वैद्यप्रोक्तमथौषधम् ॥
करोति च गुरोर्व्वाक्यं व्रतस्थस्तत्क्षणादपि ।
ब्राह्मणस्याभिलषितं साधयेदविचारयन् ॥
एतान्यष्टौ व्रतस्थानामव्रतघ्नानि कुत्रचित् ।
व्रतेष्वेतेषु देवांस्तान् व्रतस्थस्तु प्रपूजयेत् ॥"
पोगण्डो बालः । द्रव्यपरायणः कुटुम्बी द्रव्यार्ज्जनपालनपरः सन्नित्यर्थः । बौधायनः ।
"अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्व्वचनमौषधम् ॥"
हारीतयमौ ।
"बलयश्चोपहारश्च हवींषि चरवस्तथा ।
निर्व्विशङ्केन भोक्तव्यं व्रतमस्य न लुप्यते ॥"
बलिर्वैश्वदेवादिदेवताभ्यो दत्तः । उपहारो नैवेद्यम् । चरुः पार्व्वणस्थालीपाकादि । अत्र चैषां दत्तावशिष्टं भक्षणीयमिति । देवलः ।
"उपवासो विनश्येत दिवास्वप्नाच्च मैथुनैः ।
अत्यये जलपानेन नोपवासः प्रणश्यति ॥"
वृद्धशातातपः ।
"गन्धालङ्कारवस्त्राणि पुष्पमाल्यानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥"
अलङ्कारवस्त्रसिन्दूरादि उपवासेन हेतुना इत्यर्थः । तथा ।
"स्त्रीणां सम्प्रेक्षणात् स्पर्शात् ताभिः संकथनादपि ।
ब्रह्मचर्य्यं विपद्येत न दारसङ्गमादपि ॥"
संप्रेक्षणात् संकथनात् इति अत्र सरागत्वं संशब्दस्यार्थः । इति प्रायश्चित्तविवेकः ॥ * ॥
प्रायश्चित्तात्मकव्रतानि यथा । विश्वामित्रः ।
"कृच्छ्रचान्द्रायणादीनि शुद्ध्यभ्युदयकारणम् ।
प्रकाशे च रहस्ये च संशयेऽशुक्तकेऽस्फुटे ॥
प्राजापत्यः सान्तपनः शिशुकृच्छ्रः पराककः ।
अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः ॥
महासान्तपनः शुद्धो तप्तकृच्छ्रस्तु पावनः ।
जलोपवासकृच्छ्रस्तु ब्रह्मकूर्च्चस्तु शोधकः ॥
एते व्यस्ताः समस्ता वा प्रत्येकमेकशोऽपि वा ।
पातकादिषु सर्व्वेषु पापकेषु प्रयत्नतः ॥
कार्य्याश्चान्द्रायणैर्युक्ताः केवला वा विशुद्धये ।
शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा ॥
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति ।
उपवासस्त्रिरात्रञ्च मासः पक्षस्तदर्द्धकम् ॥
षड्द्वादशाहादि कार्य्यं शुद्धिकाङ्क्षिणा ।
उपपातकयुक्तानामनादिष्टेषु चैव हि ॥
प्रकाशे च रहस्ये च अभिसन्ध्याद्यपेक्षया ।
जातिशक्तिगुणान् दृष्ट्वा सकृद्बुद्धिकृतं तथा ।
अनुबन्धादिकं दृष्ट्वा सर्व्वं कार्य्यं यथाक्रमम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥ * ॥
द्वादशवार्षिकादिव्रतं प्रायश्चित्तविवेकादौ द्रष्टव्यम् ॥

व्रततिः, स्त्री, (प्र+तन विस्तारे+क्तिच् । पृषोदरादित्वात् पस्य वः ।) विस्तारः । लता । इत्यमरः ॥ (यथा, ऋग्वेदे । ८ । ४० । ६ ।
"अपि वृश्च पुराणवद्व्रततेरिव
गुष्पितमोजो दासस्य दम्भय ॥"
"व्रततेरिव यथा लताया गुष्पितं निर्गतां शाखां वृश्चसि ।" इति तद्भाष्ये सायणः ॥)

व्रतती, स्त्री, (व्रतति+पक्षे ङीष् ।) विस्तारः । लता । इति भरतद्विरूपकोषः ॥ (यथा, रघुः । १४ । १ ।
"अपश्यतां दाशरथी जनन्यौ
छेदादिवोपघ्नतरोर्व्रतत्यौ ॥")

व्रतभिक्षा, स्त्री, (व्रते उपनयनकाले भिक्षा ।) उपनयनकालीनभिक्षा । तस्या विधिर्यथा । अथ भैक्ष्यचरति । अथ शब्दस्तूष्णीमादित्योपस्थानमग्निप्रदक्षिणञ्च शंसति ।
"प्रतिगृह्येप्सितं दण्डमुपस्थाप्य च भास्करम् ।
प्रदक्षिणं परीत्याग्निं चरेत् भैक्ष्यं यथाविधि ॥"
इति मनुवचनात् ।
भिक्षासमूहं भैक्ष्यं तच्चरति याचते इत्यर्थः । मातरमेवाग्रे ये चान्ये सुहृदो याचन्ते वा सन्निहिताः स्युः । याचते इत्यध्याहार्य्यम् । सुहृदे स्निग्धहृदये स्वसादौ । तथा च मनुः ।
"मातरं वा स्वसारं वा मातुर्व्वा भगिनीं
निजाम् ।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥"
सन्निहितास्तद्देशस्थाः न तु प्रतिगृहं गत्वा । भवति भिक्षां देहीति ब्राह्मणभिक्षाप्रयोगः । तथा च मनुः ।
"भवत्पूर्व्वं चरेत् भैक्ष्यमुपनीतद्विजोत्तमः ।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥
आदिमध्यावसानेषु भवच्छब्दोपलक्षिता ।
ब्राह्मणक्षत्रियविशां भैक्ष्यचर्य्या यथाक्रमम् ॥"
इति याज्ञवल्क्यवचनाच्च । इति संस्कारतत्त्वम् ॥

व्रतसंग्रहः, पुं, (व्रतस्य संग्रहः ।) दीक्षा । इति हेमचन्द्रः ॥

व्रतादेशः, पुं, (व्रतस्यादेशः ।) उपनयनम् । यथा,
"आदन्तजननात् सद्य आचूड़ादेकरात्रकम् ।
त्रिरात्रमाव्रतादेशात् दशरात्रमतः परम् ॥"
इति शुद्धितत्त्वम् ॥

व्रती, [न्] पुं, (व्रतमस्यास्तीति । व्रत+इनिः ।) यजमानः । इत्यमरः ॥ (ब्रह्मचारी । यथा, मनुः । २ । १८८ ।
"भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती ।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥")

व्रतविशिष्टे, त्रि । यथा,—
"तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्व्वीत पारणम् ॥"
इति तिथ्यादितत्त्वम् ॥

व्रश्च, ऊ श छेदे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-वेट् ।) दन्त्योपधः चयोगात् तालव्यः। तेन क्विपि शच्छ्रावेति षडि निमित्ताभावे नैमित्तिकस्याप्यभाव इति न्यायात् तालव्यस्य दन्त्यत्वे संयोगादेः सस्य लोपे वृट् इति । तथा च ।
"नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारः स्यात् चाट्टवर्गस्तवर्गजः ॥"
इति वोपदेवः ॥
अस्यार्थः । धातुषु मध्ये झलि झसे परे अनुस्वारपञ्चमौ नकारजौ ज्ञेयौ तालव्यशकारश्च दन्त्यसकारजातः मूर्द्धन्यषकारात् परष्टवर्गोऽपि तवर्गजातो ज्ञेय इति । जिह्वास्थाने इत्यादीनाञ्च यकारादिप्रकृतित्वे तस्थौ इत्यादिबोध्यम् । ऊ, अव्रश्चीत् अव्राक्षीत् । श, वृश्चति । इति दुर्गादासः ॥

व्रश्चनं, क्ली, (व्रश्च + ल्युट् ।) छेदनम् । व्रश्चधातोरनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, शतपथब्राह्मणे । ३ । ६ । ४ । ७ ।
"स रातमना वृश्चनाय भवति ॥")

वृश्चनः, पुं, (व्रश्चति छिनत्ति पतित्सतीरिति । व्रश्च + ल्युः । यद्वा, वृश्चत्यनेनेति करणे ल्युट् ।) स्वर्णादिच्छेदिका । छेनी इति भाषा । तत्पर्य्यायः । पत्रपरशुः २ । इत्यमरः ॥ पत्रपर्शुः ३ । इति शब्दरत्नावली ॥ स्वर्णलोहादिभेदकः ४ । इति जटाधरः ॥ वृक्षच्छेदनजातनिर्यासः । यथा,—
"देवतार्थं हविः शिग्रुं लोहितान् वृश्चनांस्तथा ।
अनुपाकृतमांसानि विड्जानि कवकानि च ॥"
इति याज्ञवल्क्यः ॥
व्रश्चनात् वृक्षच्छेदनजातान् लोहितानपि ।
यथा, मनुः ।
"लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा ।"
इति मिताक्षरायामाचाराध्यायः ॥
(करणे ल्युटि तस्य कुठारादिवाचकता विशेष्यलिङ्गता च । यथा, कातन्त्रे त्वृषु करणाधिकरणयोश्चेत्यत्र कलापचन्द्रः । "युड़न्तश्च शब्दः प्रायो विधेयलिङ्गग्राही यथा वृश्चनः कुठारो गोदोहनी घटी टङ्कः पाषाणदारण इति ।")

व्राजिः, स्त्री, (व्रजति गच्छतीति । व्रज गतौ + "वसिवपियजीति ।" उणा० ४ । १२४ । इति इञ् ।) वायुः । व्रजधातोरौणादिकेञ्प्रत्ययेन निष्पन्नमेतत् ॥

व्रातः, पुं, समूहः । इत्यमरः ॥ (यथा, भागवते । ४ । २५ । १६ ।
"नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः ।
आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः ॥")
चाधादिः । इति व्रात्यशब्दटीकायां भरतः ॥
(मनुष्यः । इति निघण्टुः । २ । ३ । "वृञ् वरणे 'तानव्रातलानसुपित्त' इत्यादिसूत्रेण भोजराजेन क्तप्रत्यये आड़ागमो निपात्यते । वृण्वन्ति स्वमभिमतं देवताभ्यः तपसाराधितेभ्यः प्रविशन्ते वा यज्ञादौ । यद्वा, व्रातो धान्यादिसञ्चयः । तद्वन्तो व्राता मत्वर्थीयोऽकारः । यद्वा, व्रतमिति कर्म्मनाम अन्नं वा । अन्नमपि व्रतायैतस्मादेवेत्युक्तेः तदीयाः 'तस्येदम्' इत्यण् । 'कर्म्मणा जायते जन्तुः कर्म्मणैव प्रलीयते' इत्युक्तेः कर्म्मणामधिकारित्वाच्च मनुष्याणां कर्म्मसम्बन्धित्वम् । 'अथो अन्नाद् भूतानि जायन्ते जातान्यन्नेन वर्द्धन्ते' इति । अन्नात् रेतो रेतसः पुरुषः इति च श्रुतेः मनुष्याणामन्नसम्बन्धित्वम् ।" इति तट्टीकायां देवराजयज्वा । अस्मिन्नर्थे प्रायशो बहुवचनप्रयोगो दृश्यते ॥ * ॥ क्ली, शरीरायासजीविकर्म्म । इति काशिका । ५ । २ । २१ ॥)

व्रातीनः, पुं, (शरीरायासेन ये जीवन्ति तेषां कर्म्म व्रातं तेन जीवतीति । व्रात + "व्रातेन जीवति ।" ५ । २ । २१ । इति खञ् ।) संघजीवी । इति हेमचन्द्रः ॥ (यथा, भट्टिः ।४।१२।
"व्रातीनव्यालदीप्रास्त्रः सुत्वनः परिपूजयन् ॥")

व्रात्यः, पुं, (व्रातो व्यालादिः स इव । "शाखादिभ्यो यत् ।" ५ । ३ । १०३ । इति यत् ।) दशसंस्काररहितः । षोड़शवर्षादूर्द्धं अकृतव्रतबन्धो भ्रष्टगायत्रीको वा । इति भरतः ॥ तत्पर्य्यायः । संस्कारहीनः२ । इत्यमरः ॥ सावित्रीपतितः ३ वाग्दुष्टः ४ पुरुषोक्तिकः ५ । इति जटाधरः ॥ तस्य प्रायश्चित्तादि यथा,—
"अथ व्रात्यविधिं देवि ! प्रायश्चित्तन्तु यद्भवेत् ।
तत् शृणुष्व महेशानि सर्व्ववर्णे विशेषतः ॥
दश वर्षाणि पञ्चैव ब्राह्मणस्योपनीयते ।
एकविंशतिवर्षाणि यावद्वंशुपावशेत् ।
अत ऊर्द्ध्वं पतन्त्येव सर्व्वधर्म्मबहिष्कृताः ॥
गायत्रीपतिता व्रात्या व्रात्यस्तोमेन संस्कृताः ।
अशक्ते चैव यज्ञस्य चरेदौद्दालिकं व्रतम् ॥
द्वौ मासौ यावकाहारो मासमेकं पयः पिवेत् ।
दध्ना च पक्षमेकन्तु सप्तरात्रं घृतेन तु ॥
अयाचितेन षड्रात्रं त्रिरात्रं वर्त्तयेज्जलैः ।
अहोरात्रं न भुञ्जीत ततः संस्कारमर्हति ॥
पतिता यस्य गायत्री दश वर्षाणि पञ्च च ।
प्रायश्चित्तं भवेत्तस्य प्रोवाच भगवान् शिवः ॥
सशिखं वपनं कृत्वा व्रतं कुर्य्यात् समाहितः ।
हविष्यं भोजयेद्दश ब्राह्मणान् सप्त पञ्च वा ॥
एकविंशनिरात्रन्तु पिवेत् प्रसृतियावकम् ।
ततो यावकशुद्धस्य तस्योपनयनं स्मृतम् ॥
व्रतस्याचरणाशक्तौ कुर्य्याच्चान्द्रायणत्रयम् ।
सावित्रीपतिता येषां देशकालादिविभ्रमात् ॥
चान्द्रायणं चरेद्‌द्वयस्तु व्रतान्ते धेनुसुत्सृजेत् ।
क्षीरं वापि पिवेन्मासं दद्यान्नो वत्सशालिनीम् ॥"
इति मत्स्यसूक्ते प्रायश्चित्तप्रकरणे ३८ पटलः ॥

व्रात्यस्तोमः, पुं, यज्ञविशेषः । यथा,—
"सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥"
इति गारुड़े ९४ अध्याये ॥ तथा, याज्ञवल्क्ये । १ । ३८ ॥

व्री, न गि वृत्याम् । इति कविकल्पद्रुमः ॥ (क्र्या०-प्या०-पर०-सक०-अनिट् ।) रेफोपधः । गि, व्रिणाति । व्रीणः व्रीणिः । न, यो व्रीणाति जयश्रियं रणमुखे । व्रीतः व्रीतिः । इति दुर्गादासः ॥

व्री, य ङ ओ गतौ । वृत्याम् । इति कविकल्पद्रुमः ॥ (दिवा० आत्म०-सक०-अनिट् ।) रेफोपधः ॥ य ङ, व्रीयते । ओ, व्रीणः । इति दुर्गादासः ॥

व्रीड़, य ञि चिपि । लज्जे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-लज्जे-अक०-सेट् ।) रेफयुक्तः । य, व्रीड्यति वाणं चापः । व्रीड्यति वधूः । ञि, व्रीड़ितोऽस्ति । इति दुर्गादासः ॥

व्रीड़ः, पुं, (व्रीड़ + भावे घञ् ।) लज्जा । इत्यमरः ॥ (यथा, कुमारे । ७ । ६७ ।
"न नूनमारूढ़रुषा शरीर-
मनेन दग्धं कुसुमायुधस्य ।
व्रीड़ादमुं देवमुदीक्ष्य मन्ये
सन्न्यस्तदेहः स्वयमेव कामः ॥")

व्रीड़नं, क्ली, (व्रीड़ + ल्युट् ।) लज्जा । यथा,—
"अथ मन्दाक्षमन्दास्यं लज्जा लज्या च ह्रीस्त्रपा ।
व्रीड़ो व्रीड़ा व्रीड़नञ्च लज्जापर्य्याय ईरितः ॥"
इति शब्दरत्नावली ॥

व्रीड़ा, स्त्री, (व्रीड़ + "गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यः । टाप् ।) लज्जा । इत्यमरः ॥ (यथा आर्य्यासप्तशत्याम् । ३५७ ।
"प्रातरुपागत्य मृषा वदतः सखि नास्य विद्यते व्रीड़ा ।
सुखलम्भयापि योऽयं न लज्जते दग्धकालिकया ॥")

व्रीस, कि वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-सक०-सेट् ।) कि, व्रीसयति व्रीसति । इति दुर्गादासः ॥

व्रीहिः, पुं, (वर्द्धते वृद्धिं गच्छतीति । वृह वृद्धौ + "इगुपधात् कित् ।" उणा० ४ । ११९ । इति इन् । पृषोदरादित्वात् साधुः ।) धान्यमात्रम् । आशुधान्यम् । इत्यमरः ॥ अस्य सामान्यनामगणना गुणाश्च यथा,—
"धान्यं भोग्यञ्च भोगार्हमन्नाद्यं जीवसाधनम् ।
तच्च तावत्त्रिधा ज्ञेयं शूकशिम्बीतृणाह्वयम् ॥
व्रीह्यादिकं यदि च शूकसमन्वितं स्यात्
यत् शूकधान्यमयमुक्तमकुरकादि ।
शिम्बीनिगूढ़मिति तत्प्रवदन्ति शिम्बीधान्यं तृणोद्भवतया तृणधान्यमन्यत् ।
तत्र त्रिदोषशमनं लघु शूकधान्यं
तेजोबलातिशयवीर्य्यविवृद्धिदायि ।
शिम्बीभवं गुरु हिमञ्च विबन्धदायि
वातावहन्तु शिशिरं तृणधान्यमाहुः ॥

देशे देशे शूकधान्येषु संख्या
ज्ञातुं शक्या नैव तैर्द्दैवतैर्व्वा ।
अस्मादेषां येषु भोगोपभोगा-
स्तान्यस्ताभिर्व्याक्रियन्ते कियन्ति ॥
शालयः कलमा रुच्या व्रीहिश्रेष्ठा नृपप्रियाः ।
धान्योत्तमाश्च विज्ञेयाः कैदाराः सुकुमारकाः ॥
राजान्नषष्टिकसितेतररक्तमुण्ड-
स्थूलाशुगन्धतिरियादिकशालिसंज्ञाः ।
व्रीहिस्तथेति दशधा भुवि शायनाः स्यु-
स्तेषां क्रमेण गुणनामगणं ब्रवीमि ॥
व्रीहिर्गौरो मधुरशिशिरः पित्तहारी कषायः
स्निग्धो वृष्यः कृमिकफहरस्तापरक्तापहश्च ।
पुष्टिं दत्ते श्रमशमनकृद्दीप्यदृष्टिं विधत्ते
रुच्योऽत्यन्तं जनयति सुदं वातकृन्मेचकोऽन्यः ॥”
इति राजनिर्घण्टः ॥

अपि च ।
“वार्षिकाः काण्डिताः शुक्ला व्रीहयश्चिर-
पाकिनः ।
कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि ॥
शालमुखो जतुमुख इत्याद्या व्रीहयः स्मृताः ।
कृष्णव्रीहिः स विज्ञेयो यत्कृष्णतुषतण्डुलाः ॥
पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते ।
कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते ॥
शालमुखः कृष्णशूकः कृष्णतण्डुल उच्यते ।
लाक्षावर्णमुखं तस्य ज्ञेयो जतुमुखस्तु सः ॥
व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिमाः ।
अल्पाभिष्यन्दिनो बद्धवर्चस्काः षष्टिकैः समाः ॥
कृष्णव्रीहिर्व्वरस्तेषां तस्मादल्पगुणाः परे ॥”
इति भावप्रकाशः ॥

तस्य यज्ञीयत्वं यथा,—
‘यज्ञार्थं तत्तु भूतानां भक्ष्यमित्येव वै श्रुतिः ।
दिव्यो भौमस्तथा पैत्रो मानुषो ब्राह्म एव च ॥
एते पञ्च महायज्ञा ब्रह्मणा निर्म्मिताः पुरा ।
ब्राह्मणानां हितार्थाय इतरेषां च तत्सुखाः ॥
इतरेषां तु वर्णानां ब्राह्मणैः कारिताः शुभाः ।
एवं कृत्वा नरो भुक्त्वा स्नाङ्गरिञ्चि ! विशुध्यति ॥
अन्यथा व्रीहयोऽप्येते एकैके मृगपक्षिणः ।
मन्तव्या दात्तभोक्तॄणां महामांसं तु तत्
स्मृतम् ॥”
इति वाराहे आदिकृतवृत्तान्ताध्यायः ॥
तेन पितृप्रियथा । मनुः ।
“तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं प्रीयन्ते विधिवत् पितरो नृणाम् ॥”
व्रीहिः शरत्पक्वधान्यम् । याज्ञवल्क्यः ।
“हविष्यान्नेन वै मासं पायसेन च वत्सरम् ।
मात्स्यहारिणकौरभ्रशाकुनिच्छागपार्षतैः ॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम् ।
मासवृद्ध्याभितृप्यन्ति दत्तेनेह पितामहाः ॥”
हविष्यान्नेन शालिव्रीह्यन्नेन । इति । अमा-
वास्यास्तिस्रोऽष्टका माघी प्रौष्ठपद्यूर्द्ध्वं कृष्णत्रयो-
दशी व्रीहियवपाकौ च ।
“एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजा-
पतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥”
इति विष्णुवचनं नवान्नागमश्राद्धस्यैव व्रीहि-
यवोभयप्राप्तिविषयकत्वेन विधायकं गैश्यादि-
धान्यव्युदासाय । शालिधान्यस्य तु प्राप्तिः ।
“शरद्वसन्तयोः केचित् नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥”
इति छन्दोगपरिशिष्टे व्रीह्यप्राप्त्या नवशस्येष्टौ-
शालिविधानात् यज्ञतुल्यन्यायात् श्राद्धेऽपि तथा
कल्पनात् । इति च श्राद्धतत्त्वम् ॥ * ॥ नवान्न-
श्राद्धकालो यथा । विष्णुः । अमावस्यास्तिस्रो-
ऽष्टकास्तिस्रोऽन्वष्टका माघी प्रौष्टपद्यूर्द्ध्वं कृष्ण-
त्रयोदशी व्रीहियवपाकौ च ।
“एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥
व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव ।
न तावाद्यौ महाराज विना श्राद्धं कथञ्चन ॥”
इति मलमासतत्त्वम् ॥

तेन यागकरणं यथा,—
व्रीहिभिर्यजेत यवैर्यजेत इति श्रूयते । तत्र
“व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः ।
अप्रतीतयवाप्रामाण्यकल्पनम् ।” इत्येकादशी-
तत्त्वम् ॥ * ॥ व्रीह्यप्राप्तौ शालिधान्येन कर्म्म-
करणं यथा,—
“यथोक्तवस्तसम्पत्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥”
इति तिथ्यादितत्त्वम् ॥
व्रीहिकः, त्रि, (व्रीहिरस्यास्तीति । व्रीहि +
“व्रीह्यादिभ्यश्च ।” ५ । २ । ११६ । इति ठन् ।)
धान्यविशिष्टः । इति सिद्धान्तकौमुदी ॥
व्रीहिकाञ्चनः, पुं, (व्रीहिः काञ्चनमिव । अभि-
धानात् पुंस्त्वम् ।) मसूरः । इति त्रिकाण्डशेषः ॥
व्रीहिपर्णी, स्त्री, (व्रीहेः पर्णमिव पर्णमस्याः ।
ङीष् ।) शालपर्णी । इति राजनिर्घण्टः ॥
व्रीहिभेदः, पुं, (व्रीहेर्भेदः ।) धान्यविशेषः ।
चिना इति ख्यातः । तत्पर्य्यायः । अणुः २ ।
इत्यमरः ॥
व्रीहिमयः, पुं, (व्रीहेः पुरोडाशः । व्रीहि + “व्रीहेः
पुरोडाशे ।” ४ । ३ । १४८ । इति मयट् ।)
व्रीहिनिर्म्मितपुरोडाशः । इति सिद्धान्तकौमुदी ॥
(व्रीह्यात्मके, त्रि । यथा, महाभारते । १३ ।
११५ । ५६ ।
“श्रूयते हि पुरा कल्पे नृणां व्रीहिमयः पशुः ।
येनायजन्त यज्वानः पुण्यलोकपरायणाः ॥”)
व्रीहिराजकः, पुं, (व्रीहीनां राजा । टच् समासे ।
ततः कन् ।) कङ्गुधान्यम् । चीनकधान्यम् ।
इति मेदिनी ॥
व्रीहिश्रेष्ठः, पुं, (व्रीहिषु श्रेष्ठः) शालिधान्यम् ।
इति राजनिर्घण्टः ॥
व्रीही, [न्] त्रि, (व्रीहिरस्यास्तीति । व्रीहि +
“व्रीह्यादिभ्यश्च ।” ५ । २ । ११६ इति इनिः ।)
व्रीहियुक्तक्षेत्रादि । इति सिद्धान्तकौमुदी ॥
व्रीह्यगारं, क्ली, (व्रीहीणामगारम् ।) धान्यगृहम् ।
तत्पर्य्यायः । कुसूलः २ । इति त्रिकाण्डशेषः ॥
व्रुड, शि संवृतिसंहत्योः । मज्जे । इति कविकल्प-
द्रुमः ॥ (तुदा०-कुटा०-पर०-सक०-अकष-सेट् ।)
रेफयुक्तः । शि, व्रुडति अव्रुडीत् वुव्रोड ।
मज्जो मज्जनम् । इति दुर्गादासः ॥
व्रूस, कि वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे
भ्वा०-सक०-सेट् ।) रेफयुक्तो दीर्घो । कि,
व्रूसयति व्रूसति । इति दुर्गादासः ॥
व्रैहः, त्रि, (व्रीहेरवयवो विकारो वा । व्रीहि +
“बिल्वादिभ्योऽण् ।” ४ । ३ । १३६ । इत्यण् ।)
व्रीहिनिर्म्मितः । इति सिद्धान्तकौमुदी ॥
व्रैहेयः, त्रि, (व्रीहीणां भवनं क्षेत्रम् । वीहि +
“व्रीहिशाल्योर्ढक् ।” ५ । २ । २ । इति ढक् ।)
आशुधान्योपयुक्तभूम्यादिः । इत्यमरः ॥
व्ली, श गि गतिवृत्योः । इति कविकल्पद्रुमः ॥
(क्र्या०-प्या०-पर०-सक०-अनिट् ।) अन्तःस्थ-
तृतीयोपधः । गि, व्लिनाति । व्लीनः व्लीनिः ।
इति दुर्गादासः ॥

व्रतविशिष्टे, त्रि । यथा,—
"तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्वीत पारणम् ॥"
इति तिथ्यादितत्त्वम् ॥

व्रश्च, ऊ श छेदे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-वेट् ।) दन्त्योपधः चयोगात् तालव्यः । तेन क्विपि शच्छोरिति षडि निमित्ताभावे नैमित्तिकस्याप्यभाव इति न्यायात् तालव्यस्य दन्त्यत्वे संयोगादेः सस्य लोपे वृट् इति । तथा च ।
"नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारः स्यात् षाट्टवर्गस्तवर्गजः ॥"
इति वोपदेवः ॥
अस्यार्थः । धातुषु मध्ये झलि झसे परे अनुस्वारपञ्चमौ नकारजौ ज्ञेयौ तालव्यशकारश्च दन्त्यसकारजातः मूर्द्धन्यषकारात् परष्टवर्गोऽपि तवर्गजातो ज्ञेय इति । जिह्वास्थाने इत्यादीनाञ्च यकारादिप्रकृतित्वे तस्थौ इत्यादिबोध्यम् । ऊ, अव्रश्चीत् अव्राक्षीत् । श, वृश्चति । इति दुर्गादासः ॥

व्रश्चनं, क्ली, (व्रश्च + ल्युट् ।) छेदनम् । व्रश्चधातोरनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, शतपथब्राह्मणे । ३ । ६ । ४ । ७ ।
"स रातमना वृश्चनाय भवति ॥")

वृश्चनः, पुं, (व्रश्चति छिनत्ति पतित्रतोरिति । वृश्च + ल्युः । यद्वा, वृश्चत्यनेनेति करणे ल्युट् ।) स्वर्णादिच्छेदिका । छेनी इति भाषा । तत्पर्य्यायः । पत्रपरशुः २ । इत्यमरः ॥ पत्रपशुः ३ । इति शब्दरत्नावली ॥ स्वर्णलोहादिभेदकः ४ । इति जटाधरः ॥ वृक्षच्छेदनजातनिर्यासः । यथा,—
"देवतार्थं हविः शिग्रुं लोहितान् वृश्चनांस्तथा ।
अनुपाकृतमांसानि विड्जानि कवकानि च ॥"
इति याज्ञवल्क्यः ॥
व्रश्चनात् वृक्षच्छेदनजातान् लोहितानपि । यथा, मनुः ।
"लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा ।"
इति मिताक्षरायामाचाराध्यायः ॥
(करणे ल्युटि तस्य कुठारादिवाचकता विशेष्यलिङ्गता च । यथा, कातन्त्रे ल्युट्कृतुस करणाधिकरणयोश्चेत्यत्र कलापचन्द्रः । "युडन्तश्च शब्दः प्रायो विधेयलिङ्गग्राही यथा वृश्चनः कुठारो मोदोहनो घटी टङ्कः पाषाणदारण इति ।")

व्राजिः, स्त्री, (व्रजति गच्छतीति । व्रज गतौ + "वसिवपियजीति ।" उणा० ४ । १२४ । इति इञ् ।) वायुः । व्रजधातोरौणादिकेन प्रत्ययेन निष्पन्नमेतत् ॥

व्रातः, पुं, समूहः । इत्यमरः ॥ (यथा, भागवते । ४ । २५ । १९ ।
"नानारण्यमृगव्रातैरनावाधे मुनिव्रतैः ।
आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः ॥")
व्राधादिः । इति व्रात्यशब्दटीकायां भरतः ॥
(मनुष्यः । इति निघण्टुः । २ । ३ । "इन् वरणे 'तानव्रातलानसुपित' इत्यादिसूत्रेण भोजराजेन क्तप्रत्यये आडागमो निपात्यते । वृण्वन्ति स्वमभिमतं देवताभ्यः तपसाराधितेभ्यः प्रवियन्ते वा यज्ञादौ । यद्वा, व्रातो धान्यादिसञ्चयः । तद्वन्तो व्राता मत्वर्थीयोऽकारः । यद्वा, व्रतमिति कर्म्मनाम अन्नं वा । अन्नमपि व्रतायेतस्मादेवेत्युक्तेः तदीयाः 'तस्येदम्' इत्यण् । 'कर्म्मणा जायते जन्तुः कर्म्मणैव प्रसूयते' इत्युक्तेः कर्म्मणामधिकारित्वाच्च मनुष्याणां कर्म्मसम्बन्धित्वम् । 'अथो अन्नाद्भूतानि जायन्ते जातान्यन्नेन वर्द्धन्ते' इति । अन्नात् रेतो रेतसः पुरुषः इति च श्रुतेः मनुष्याणामन्नसम्बन्धित्वम् ।" इति तट्टीकायां देवराजयज्वा । अस्मिन्नर्थे प्रायशो बहुवचनप्रयोगो दृश्यते । * । क्ली, शरीरायाससाध्यजीविकर्म्म । इति काशिका । ५ । २ । २१ ।)

व्रातीनः, पुं, (शरीरायासेन ये जीवन्ति तेषां कर्म्म व्रातं तेन जीवतीति । व्रात + "व्रातेन जीवति ।" ५ । २ । २१ । इति खञ् ।) संघजीवी । इति हेमचन्द्रः ॥ (यथा, भट्टिः । ४ । १२ ।
"व्रातीनव्यालदीप्रास्त्रः सुत्वनः परिपूजयन् ॥")

व्रात्यः, पुं, (व्रातो व्रालादिः स इव । "शाखादिभ्यो यत् ।" ५ । ३ । १०३ । इति यत् ।) दशसंस्काररहितः । षोडशवर्षादूर्द्ध्वं असञ्जातव्रतबन्धो भ्रष्टगायत्त्रीको वा । इति भरतः ॥ तत्पर्य्यायः । संस्कारहीनः २ । इत्यमरः ॥ सावित्रीपतितः ३ वागदुष्टः ४ पुरुषोक्तिकः ५ । इति जटाधरः ॥ तस्य प्रायश्चित्तादि यथा,—
"अथ व्रात्यविधिं देवि ! प्रायश्चित्तन्तु यद्भवेत् ।
तत् शृणुष्व महेशानि सर्व्ववर्णे विशेषतः ॥
दश वर्षाणि पञ्चैव ब्राह्मणश्चोपनीयते ।
एकविंशतिवर्षाणि यावद्वैश्यमुपानयेत् ।
अत ऊर्द्ध्वं पतत्येव सर्व्वधर्म्मबहिष्कृतः ॥
गायत्त्रीपतिता व्रात्या व्रात्यस्तोमेन संस्कृताः ।
अशक्तो चैव यज्ञस्य चरेदौद्दालिकं व्रतम् ।
द्वौ मासौ यावकाहारो मासमेकं पयः पिबेत् ।
दध्ना च पक्षमेकन्तु सप्तरात्रं घृतेन तु ॥
अयाचितेन षड्रात्रं त्रिरात्रं वर्त्तयेज्जलैः ।
अहोरात्रं न भुञ्जीत ततः संस्कारमर्हति ॥
पतिता यस्य गायत्त्री दश वर्षाणि पञ्च च ।
प्रायश्चित्तं भवेत्तस्य प्रोवाच भगवान् शिवः ॥
सशिखं वपनं कृत्वा व्रतं कुर्य्यात् समाहितः ।
हविष्यं भोजयेदन्नं ब्राह्मणान् सप्त पञ्च वा ।
एकविंशतिरात्रन्तु पिबेत् प्रसृतियावकम् ।
ततो यावक्शुद्धस्य तस्योपनयनं स्मृतम् ॥
व्रतस्याचरणाशक्तौ कुर्य्याच्चान्द्रायणत्रयम् ।
सावित्रीपतिता येषां देशकालादिविभ्रमात् ॥
चान्द्रायणं चरेद्यस्तु व्रतान्ते धेनुमुत्सृजेत् ।
क्षीरं वापि पिबेन्मासं दद्याद्वा वत्सशालिनीम् ॥"
इति मत्स्यसूक्ते प्रायश्चित्तप्रकरणे १८ पटलः ॥

व्रात्यस्तोमः, पुं, यज्ञविशेषः । यथा,—
"सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ।"
इति गारुडे ९४ अध्याये ॥ तथा, याज्ञवल्क्ये । १ । ३८ ।

व्री, ग गि वृत्याम् । इति कविकल्पद्रुमः ॥ (क्र्या०-प्या०-पर०-सक०-अनिट् ।) रेफोपधः । गि, व्रिणाति । व्रीणः व्रीणिः । ग, यो व्रीणाति जयश्रियं रणमुखे । व्रीतः व्रीतिः । इति दुर्गादासः ॥

व्री, य ङ ओ गतौ । वृत्याम् । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) रेफोपधः ॥ य ङ, व्रीयते । ओ, व्रीणः । इति दुर्गादासः ॥

व्रीड्, य ञि चिपि । लज्जे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-लज्जे-अक०-सेट् ।) रेफयुक्तः । य, व्रीड्यति वाणं चापः । व्रीड्यति वधूः । ञि, व्रीडितोऽस्ति । इति दुर्गादासः ॥

व्रीडः, पुं, (व्रीड् + भावे घञ् ।) लज्जा । इत्यमरः ॥ (यथा, कुमारे । ७ । ६७ ।
"न नूनमारूढ़रुषा शरीरमनेन दग्धं कुसुमायुधस्य ।
व्रीड़ादमुं देवमुदीक्ष्य मन्ये
सन्न्यस्तदेहः स्वयमेव कामः ॥")

व्रीड़नं, क्ली, (व्रीड़ + ल्युट् ।) लज्जा । यथा,—
"अथ मन्दाक्षमन्दास्यं लज्जा लज्या च ह्रीस्त्रपा ।
व्रीड़ो व्रीड़ा व्रीड़नञ्च लज्जापर्य्याय ईरितः ॥"
इति शब्दरत्नावली ॥

व्रीड़ा, स्त्री, (व्रीड़ + "गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यः । टाप् ।) लज्जा । इत्यमरः ॥ (यथा आर्य्यासप्तशत्याम् । ३५७ ।
"प्रातरुपागत्य मृषा वदतः सखि नास्य विद्यते व्रीड़ा ।
सुखलम्पयापि योऽयं न लज्जते दग्धकालिकया ॥")

व्रीस, कि वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-सक०-सेट् ।) कि, व्रीसयति व्रीसति । इति दुर्गादासः ॥

व्रीहिः, पुं, (वर्द्धते वृद्धिं गच्छतीति । वृह वृद्धौ + "इगुपधात् कित् ।" उणा० ४ । ११९ । इति इन् । पृषोदरादित्वात् साधुः ।) धान्यमात्रम् । आशुधान्यम् । इत्यमरः ॥ अस्य सामान्यनामगणना गुणाश्च यथा,—
"धान्यं भोग्यञ्च भोगार्हमन्नाद्यं जीवसाधनम् ।
तत्र तावत्त्रिधा ज्ञेयं शूकशिम्बीतृणाश्रयम् ॥
व्रीह्यादिकं यदि ह शूकसमन्वितं स्यात्
यत् शूकधान्यमयसुद्गमकुष्टकादि ।
शिम्बीनिगूढ़मिति तत्प्रवदन्ति शिम्बीधान्यं तृणोद्भवतया तृणधान्यमन्यत् ।
तत्र त्रिदोषशमनं लघु शूकधान्यं
तेजोबलातिशयवीर्य्यदिवृद्धिदायि ।
शिम्बीभवं गुरु हिमञ्च विबन्धदायि
वातालकन्तु शिशिरं तृणधान्यमाहुः ॥

देशे देशे शूकधान्येषु संख्या
ज्ञातुं शक्या नैव तैर्द्दैवतैर्वा ।
अस्मादेषां येषु भोगोपभोगा-
स्तान्यस्माभिर्व्याक्रियन्ते कियन्ति ॥
शालयः कलमा रुच्या व्रीहिश्रेष्ठा नृपप्रियाः ।
धान्योत्तमाश्च विज्ञेयाः केदाराः सुकुमारकाः ॥
राजान्नषष्टिकसितेतररक्तसुखण्ड-
स्थूलाशुगन्धतिरियादिकशालिसंज्ञाः ।
व्रीहिस्तथेति दशधा भुवि शायनाः स्यु-
स्तेषां क्रमेण गुणनामगणं ब्रवीमि ॥
व्रीहिर्गौरो मधुरशिशिरः पित्तहारी कषायः
स्निग्धो वृष्यः कृमिकफहरस्तापरक्तापहश्च ।
पुष्टिं दत्ते श्रमशमनकृद्दीर्घवृद्धिं विधत्ते
रुच्योऽत्यन्तं जनयति मुदं वातकृन्मेचकोऽन्यः ॥"
इति राजनिर्घण्टः ॥

अपि च ।
"वार्षिकाः काण्डिताः शुक्ला व्रीहयश्चिर-
पाकिनः ।
कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि ॥
शालमुखो जतुमुख इत्याद्या व्रीहयः स्मृताः ।
कृष्णव्रीहिः स विज्ञेयो यत्कृष्णतुषतण्डुलाः ॥
पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते ।
कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते ॥
शालमुखः कृष्णशूकः कृष्णतण्डुल उच्यते ।
लाक्षावर्णमुखं तस्य ज्ञेयो जतुमुखस्तु सः ॥
व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिमाः ।
अल्पाभिष्यन्दिनो बद्धवर्च्चस्काः षष्टिकैः समाः ॥
कृष्णव्रीहिर्व्वरस्तेषां तस्मादल्पगुणाः परे ॥"
इति भावप्रकाशः ॥

तस्य यज्ञीयत्वं यथा,—
'यज्ञार्थं तत्तु भूतानां भक्ष्यमित्येव वै श्रुतिः ।
दिव्यो भौमस्तथा पैत्रो मानुषो ब्राह्म एव च ॥
एते पञ्च महायज्ञा ब्रह्मणा निर्म्मिताः पुरा ।
ब्राह्मणानां हितार्थाय इतरेषां च तत्सुखाः ॥
इतरेषां तु वर्णानां ब्राह्मणैः कारिताः शुभाः ।
एवं कृत्वा नरो भुक्त्वाप्याहरिन्नि ! विशुध्यति ॥
अन्यथा व्रीहयोऽप्येते एकैके स्वगपच्चिणः ।
मन्तव्या दात्रभोक्तॄणां महामांसं तु तत्
स्मृतम् ॥"
इति वाराहे श्राद्धकृतस्त्वन्ताध्यायः ॥
तेन पिष्टकृतिर्यथा । मनुः ।

"तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं प्रीयन्ते विधिवत् पितरो नृणाम् ॥"
व्रीहिः शरत्पक्वधान्यम् । याज्ञवल्क्यः ।
"हविष्यान्नेन वै मासं पायसेन च वत्सरम् ।
मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम् ।
मासवृद्ध्याभितृप्यन्ति दत्तैनेह पितामहाः ॥"
हविष्यान्नेन शालिव्रीह्यन्नेन । इति । अमा-
वास्यास्तिस्रोऽष्टका माघी प्रौष्ठपद्यूर्द्ध्वं कृष्णत्रयो-
दशी व्रीहियवपाकौ च ।
"एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजा-
पतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥"
इति विष्णुवचनं नवान्नागमश्राद्धस्यैव व्रीहि-
यवोभयप्राप्तिविषयकत्वेन विधायकं ग्रैष्मादि-
धान्यव्युदासाय । शालिधान्यस्य तु प्राप्तिः ।
"शरद्वसन्तयोः केचित् नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥"
इति छन्दोगपरिशिष्टे व्रीह्यप्राप्त्या नवशस्येष्टौ-
शालिविधानात् यज्ञतुल्यन्यायात् श्राद्धेऽपि तथा
कल्पनात् । इति च श्राद्धतत्त्वम् ॥ * ॥ नवान्न-
श्राद्धकालो यथा । विष्णुः । अमावस्यास्तिस्रो-
ऽष्टकास्तिस्रोऽन्वष्टका माघी प्रौष्ठपद्यूर्द्ध्वं कृष्ण-
त्रयोदशी व्रीहियवपाकौ च ।
"एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥
व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव ।
न तावाद्यौ महाराज विना श्राद्धं कथञ्चन ॥"
इति मलमासतत्त्वम ॥

तेन यागकरणं यथा,—
व्रीहिभिर्यजेत यवैर्यजेत इति श्रूयते ॥ तत्र
"व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः ।
अप्रतीतयवाप्रामाण्यकल्पनम् ।" इत्येकादशी-
तत्त्वम् ॥ * ॥ व्रीह्यप्राप्तौ शालिधान्येन कर्म्म-
करणं यथा,—
"यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥"
इति तिथ्यादितत्त्वम् ॥

व्रीहिकः, त्रि, (व्रीहिरस्यास्तीति । व्रीहि+
"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ ! इति ठन् ।)
धान्यविशिष्टः । इति सिद्धान्तकौमुदी ॥

व्रीहिकाञ्चनः, पुं, (व्रीहिः काञ्चनमिव । अभि-
धानात् पुंस्त्वम् ।) मसूरः । इति त्रिकाण्डशेषः ॥

व्रीहिपर्णी, स्त्री, (व्रीहेः पर्णमिव पर्णमस्याः ।
ङीष् ।) शालपर्णी । इति राजनिर्घण्टः ॥

व्रीहिभेदः, पुं, (व्रीहेर्भेदः ।) धान्यविशेषः ।
चिना इति ख्यातः । तत्पर्य्यायः । अणुः २ ।
इत्यमरः ॥

व्रीहिमयः, पुं, (व्रीहेः पुरोडाशः । व्रीहि + "व्रीहेः
पुरोडाशे ।" ४ । ३ । १४८ । इति मयट् ।)
व्रीहिनिर्म्मितपुरोडाशः । इति सिद्धान्तकौमुदी ॥
(व्रीह्यात्मके, त्रि । यथा, महाभारते । १३ ।
११५ । ५६ ।
"श्रूयते हि पुरा कल्पे नृणां व्रीहिमयः पशुः ।
येनायजन्त यज्वानः पुण्यलोकपरायणाः ॥")

व्रीहिराजकः, पुं, (व्रीहीनां राजा । टच् समासे ।
ततः कन् ।) कङ्गुधान्यम् । चीनकधान्यम् ।
इति मेदिनी ॥

व्रीहिश्रेष्ठः, पुं, (व्रीहिषु श्रेष्ठः) शालिधान्यम् ।
इति राजनिर्घण्टः ॥

व्रीही, [न्] त्रि, (व्रीहिरस्यास्तीति । व्रीहि +
"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ इति इनिः ।)
व्रीहियुक्तक्षेत्रादि । इति सिद्धान्तकौमुदी ॥

व्रीह्यगारं, क्ली, (व्रीहीनामगारम् ।) धान्यगृहम् ।
तत्पर्य्यायः । कुस्थलः २ । इति त्रिकाण्डशेषः ॥

व्रुड, शि संवृतिसंहत्योः । मज्जे । इति कविकल्प-
द्रुमः ॥ (तुदा०-कुटा०-पर०-सक०-अकर्म्म-सेट् ।)
रेफयुक्तः । शि, व्रुडति अव्रुडीत् वुव्रोड ।
मज्जो मज्जनम् । इति दुर्गादासः ॥

व्रूस, कि वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे
भ्वा०-सक०-सेट् ।) रेफयुक्तो दीर्घी । कि,
व्रूसयति व्रूसति । इति दुर्गादासः ॥

व्रैहः, त्रि, (व्रीहेरवयवो विकारो वा । व्रीहि+
"बिल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् ।)
व्रीहिनिर्म्मितः । इति सिद्धान्तकौमुदी ॥

व्रैहेयः, त्रि, (व्रीहीनां भवनं क्षेत्रम् । व्रीहि+
"व्रीहिशाल्योर्ढक् ।" ५ । २ । २ । इति ढक् ।)
आशुधान्योपयुक्तभूम्यादिः । इत्यमरः ॥

व्ली, ग गि गतिवृत्त्योः । इति कविकल्पद्रुमः ॥
(क्र्या०-प्या०-पर०-सक०-अनिट् ।) अन्तःस्थ-
तृतीयोपधः । गि, व्लिनाति । व्लीनः व्लीनिः ।
इति दुर्गादासः ॥

Reprinted by
Skylark Printers (photo-Offset), Delhi-6 (Phone : 266595)

PK
925
D47
1967
v.4

Deva, (Sir) Radhakanta
Sabdakalpadrumah

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY